॥ प्रकाशिनी-श्रीहेमचन्द्रग्रन्थमाला-अहमदाबादनगरे ॥

ॐ

॥ श्रीहैमबृहत्प्रक्रिया ॥

(महाव्याकरणम्)

॥ वैयाकरणन्यायादर्शालंकृता ॥

प्रकाशनसंयोजकः—

॥ श्रीविजयनीतिसूरीश्वराणां सदुपदेशः ॥

प्रक्रियासंकलयिता—

मयाशंकरजन्मा गिरिजाशंकरः शास्त्री.

प्रकाशयित्री-हेमचन्द्रग्रन्थमाला—अमदाबादनगरे.



॥ श्रीहैमबृहत्प्रक्रिया ॥

(महाव्याकरणम्)

॥ हैमसूत्रपाठ–गणपाठ–धातुपाठ–परिभाषापाठ–लिङ्गानुशासनेति–
लघुन्यासस्थावचूरिसहितपञ्चपाठीसमलङ्कृता, अकारादिवर्ण–
क्रमेण च सूत्रसूचीधातुसूचीभ्यां विभूषिता ॥

अन्ते च

॥ श्रीवैयाकरणन्यायादर्शाख्यग्रन्थरत्नेन समुज्ज्वलिता ॥
॥ तत्तत्क्लिष्टस्थले च टिप्पनकेन विशदीकृता ॥

प्रकाशनसंयोजकः—

श्रीविजयनीतिसूरीश्वराणां सदुपदेशः ॥

प्रक्रियासंकलयिता—

मयाशंकरात्मजगिरिजाशंकरः शास्त्री ॥

आ पुस्तक श्री 'उत्कृष्ट' मुद्रणालयमां पा. पुरसोत्तम शंकरदासे छाप्युं.
गांधीरोड पुल नीचे—अमदावाद.

वि. सं. १९८७. प्रथमावृत्तिप्रतयः ५००. ख्रिस्ताब्दं १९३१.

मूल्यं—सार्धं रूप्यकपञ्चकम्.

— सर्व हक्क स्वाधीन —

॥ किंचित्प्रास्ताविकम् ॥

इह खलु विदितमेवैतत्समस्तशास्त्रपाथोधिपारीणनिपुणतरबुद्धीनां निखिलभैमत्यमलदूरीकरणनिर्मलतमसत्त्वसंप्रकाशप्रख्यातपरमपवित्रयशसां समत्वसंस्थितिसंतुलितमहाभूतपञ्चकसाम्यगुणप्रकर्षाधरीकृतानेकगुणनिवहालंकृतनररत्नानां प्रतिभाप्रकाशसंलोकितत्रिभुवनवस्तुनिकरपरमरहस्यानां विद्वद्रत्नवरमौलिसंलालितचरणनखानां विबुधशेखराणां यत्किल जगदैतिह्यसमालोचनयोरीकृतमेतत्सर्वैः प्राचीनार्वाचीनपण्डितप्रकाण्डैर्गैर्वाण्या वाचो निखिलविश्वस्थविख्याततमवाङ्मातृत्वं श्रुतमत्वं च सकलावनीस्थितवस्तुनिचयप्रकाशनप्राग्भारधुरीणत्वात् ।

ईदृक्समस्तसमाकर्षकोद्दामगुणनिधेरिवास्या जगत्समग्रवाणीसमूहजनन्या गीर्वाणभारत्याः सम्यग्ज्ञानपूर्वकं समवगाहनं वर्वर्ति सुतरां स्वाधीनं सर्वांशपूर्णस्य शब्दशासनापरसंज्ञकसन्महाव्याकरणस्य महानृपमहालयस्थमहाराज्ञीरक्षकस्येव कञ्चुकिवरस्येत्येतदपि नाविदितं प्रायो विद्वज्जनपुरस्कृत आबालवृद्धे जनतावर्गे । इत्येवं दिव्यभाषापृथ्वीपृथिवीमहासाम्राज्यभाञ्जि महाव्याकरणान्यनेकानि पाणिनीयप्रभृतीनि यानि सर्वविद्वज्जनसमादृतानि विद्यन्तेतमामिह भारतभूमौ तद्गणनायां चेक्रियमाणायां प्राधान्यं निरादीनवत्वपुरस्कारं वा तौल्यमप्याहवतितरां हैमशब्दानुशासनाभिधं सुप्रसिद्धं महाव्याकरणरत्नम् ।

अस्येदृगतीवचमत्कृतिजनककृत्यतिशयेन विराजमानस्य महाव्याकरणपंक्तिभुवस्य महाव्याकरणस्य निर्माताऽऽबाल्यसमाराधितब्रह्मवर्चस्कप्रौढप्रतापसंतर्जितार्यमप्रखरातपोऽपि सौम्यगुणातिशयविराजितवर्ष्मा, साङ्गषड्दर्शनीसम्यग्ज्ञानसमुपास्तप्राज्ञप्रतिभाप्रसरोऽपि कृपाधर्मसंस्थापकाग्रिमतया निखिलजीवनिकायाभयदानसंदापनैकरसिकतया च सकलविबुधशिरोवंद्यैरपि वन्दितचरणः सुगृहीतनामधेयमहीपालावलिमौलिवररत्नस्येव महाराजाधिराजकुमारपालभूपालस्य परमसुबोधदातृत्वेन हितावहातिविमलसंबोधिसंप्रापकपरमाराध्यवंद्यतमगुरुत्वेन च निखिलभूवलये प्रसिद्धसाम्यसुधासमास्वादनसमुद्भूतसमत्वयुक्तसद्बुद्धीनां सर्वेषामपि हृदयंगमचारित्रिणां मनसि विरूढाद्भुततमयशस्तोमः कलिकालसर्वज्ञः श्रीहेमचन्द्रसूरिरेवास्तीति विदितप्रायमेव सर्वसचेतस्कानाम् ।

विश्वस्मिन् जगतीह परमाद्भुतपांडित्यप्रथयितृग्रंथनिवहनिर्माणनिपुणस्यास्य भगवतः श्रीहेमचन्द्रसूरेः परमपावनतया सुतरां प्रसिद्धं परमातिपवित्रं सुशोभनं चरितं जन्मादि वृत्तं चातीव प्रसिद्धयत्येव श्रीकुमारपालचरितमहाकाव्यादिग्रन्थेष्विति पिष्टपेषणतामाकलय्य नात्रोल्लिख्यते तत् ।

अस्यैवंगुणगणवैशिष्ट्ययुक्तकर्तृकस्य महाव्याकरणाग्र्यपदसमारूढस्य हैमशब्दमहाव्याकरणस्य किंचिदपि न्यूनत्वादि किंचिदपि वक्तुं न शक्यते स्वबुद्ध्याधरीकृतदेवपतिगुरुबुद्धिभिरपि महाविद्वद्भिस्तथाप्यष्टाध्यायीसंकलनारूपया प्राच्य-

प्रणाल्या ग्रथितस्यास्य महाव्याकरणस्य सुतरां सारल्येन ज्ञानं समयप्रभावान्मन्दातिमन्दमतीनां मादृग्जनविशेषाणां न संभवतीति मादृगर्थमेवास्य व्याकरणशेखरस्य केवलं प्रक्रियास्वरूपापादनमेव मया समर्पादि विज्ञप्त्य श्रीविजयनीतिसूरीश्वरचरणानां परमनिःस्वार्थतयैव परोपकारकरणैकनिष्ठवृत्तीनां सर्वदा सन्मुनिसत्परिवारालंकृतानां पुरस्तात् ।

यद्यपि हैमव्याकरणस्यैव प्रक्रियास्वरूपेणोपनिबद्धा अनेके ग्रन्था उपलभ्यन्ते तथापि तेषां संक्षेपवृत्तिरूपत्वेन सारल्यस्थले प्रत्युत क्लेष्टथमेवानुभूयतेऽभ्यासकैरिति तद्दूरीकरणार्थमेवायमायासः। श्रीहैमव्याकरणस्यैव बृहद्वृत्तियुतस्य प्रक्रियास्वरूपेण ग्रथितत्वादस्य महाग्रन्थस्य 'हैमबृहत्प्रक्रिया' इत्येव नामाभिधानमावहति योग्यतामितः प्राक्कालीनस्य 'हैमलघुप्रक्रिया' इत्याख्यग्रन्थस्य विद्यमानत्वाच्च । एवं प्रक्रियारूपतामापन्नेऽस्मिन् महाव्याकरणे मूलस्थोदाहरणप्रत्युदाहरणानि संक्षेपत एवोद्धृतानि समवलोक्यन्ते, समग्रोदाहरणप्रत्युदाहरणोद्धरणस्यात्र प्रक्रियायामसुकरत्वादनावश्यकत्वाद्वा ग्रन्थस्य चातिविस्तृततयाऽध्येतृणामनादरणीयत्वसंभवाच्च । मूलग्रन्थस्थान्यसर्वविभागस्य तु प्रायोक्षरश एवात्र प्रक्रियासंकलनायां समावेशो दरीदृश्यत इति विलोकयन्तु सहृदया विचक्षणाः। पुनश्च सविनयमभ्यर्थये सतः साञ्जलिरहमेतत्प्रक्रियाकर्ता मुहुर्यत्-पांडित्यप्रकटनविरोधित्वेन पांडित्याभाववत्त्वेन वा ममायं यत्नः केवलं मादृशामल्पमेधस्काभ्यासिनामेव किंचिदुपयोगितामापत्स्यमानः किंचिदपि फलेग्रहिः संपत्स्यत इत्याशयैव चेक्रियमाण इह तत्रभवतां भवतां दृग्गोचरीभवतीति । किं च सद्भिस्तु केवलममृतदेश्यकृपावलोकनमेवैतद्ग्रन्थोपरि संविधेयमथ च यद्दर्शनपथमायायादत्र कुत्रचित्संकलनासंशोध्यं तन्निवेदनीयमित्याशास्तेऽयं जनः। दुर्जनानां तु विद्ययालंकृतत्वेऽपि परिहरणीयत्वमेवाहुः प्राञ्च इत्यस्माभिरपि तत्परिहार एव कर्तुं युज्यते मणिनाऽपि भूषितस्य सर्पस्य भयंकरत्वदर्शनेन तत्परिहारकरणौचितीवत्। वस्तुतस्तु—

"सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता ।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः" ॥ —

इति न्यायेन यस्य कस्यापि विषयस्य सर्वथा वचनीयत्वाभाववत्त्वेऽपि व्यवहारनिरोधस्य दुष्करत्वमेवेत्यालोचयंतु सुधियो विपश्चितः ।

हैमबृहत्प्रक्रियाभिधानेऽस्मिन् ग्रन्थे ये ये विषयाः समुद्द्योतन्ते तन्निरीक्षणार्थं विषयानुक्रमणिका पुरस्तादेव प्रदर्श्यते ग्रन्थान्ते च 'वैयाकरणन्यायादर्श' इत्याख्यकग्रन्थान्तरमपि परिभाषाबोधकं समुद्धृतं प्रकटीक्रियते, सा चेदृक्स्वरूपेयं 'श्रीहैमबृहत्प्रक्रिया' प्राकट्यदशां प्रपन्ना दृष्टिपथमायाति यज्जनतायास्तत्र श्रीविजयनीतिसूरीश्वराणां सदुपदेशविलसितत्वमेव परमनिदानीभूतं परमोपकारिधौरेयतामाबिभर्तीत्यलमतिविस्तरेणेति निवेदयते प्रक्रियासंकलयिता—

मयाशंकरजनुर्गिरिजाशंकरः शास्त्री.

॥ श्रीसिद्धहैमबृहत्प्रक्रियास्थविषयक्रमः ॥

॥ पूर्वार्द्धम् ॥

विषयः		पृष्ठम् ।
	परिशिष्टानि पूर्वार्द्धे आदावेव	६–७
१	संज्ञाप्रकरणम्	१–५
२	परिभाषाप्रकरणम्	५–६
३	स्वरसन्धिप्रकरणम्	६–१४
४	असन्धिप्रकरणम्	१४–२१
५	व्यञ्जनसन्धिप्रकरणम्	२१–२६
६	रेफसन्धिप्रकरणम्	२६–३०
७	स्यादिसन्धिप्रकरणम्	३०–३२
८	स्वरान्तपुंलिङ्गप्रकरणम्	३३–४८
९	स्वरान्तस्त्रीलिङ्गप्रकरणम्	४९–५३
१०	स्वरान्तनपुंसकलिङ्गप्रकरणम्	५३–५६
११	व्यञ्जनान्तपुंलिङ्गप्रकरणम्	५६–८०
१२	व्यञ्जनान्तस्त्रीलिंगप्रकरणम्	८०–८१
१३	व्यञ्जनान्तनपुंसकलिङ्गप्रकरणम्	८२–८४
१४	अव्ययप्रकरणम्	८४–८७
१५	स्त्रीप्रत्ययप्रकरणम्	८७–१०६
१६	कारकप्रकरणम्	१०७–१४०
१७	बहुव्रीहिसमासप्रकरणम्	१४०–१५९
१८	अव्ययीभावसमासप्रकरणम्	१५९–१६६

विषयः		पृष्ठम् ।
१९	तत्पुरुषसमासप्रकरणम्	१६६–१९६
२०	द्वन्द्वसमासप्रकरणम्	१९६–२०४
२१	एकशेषप्रकरणम्	२०५–२०७
२२	समासान्तप्रकरणम्	२०७–२०९
२३	अलुक्समासप्रकरणम्	२१८–२१५
२४	समासाश्रयविधिप्रकरणम्	२१६–२३६
२५	तद्धितेष्वपत्यादिसाधारणप्रत्ययाः	२३७–२३९
२६	तद्धितेष्वपत्याधिकारः	२३९–२६६
२७	तद्धितेषु रक्ताद्यर्थकाः	२६७–२९२
२८	तद्धितेषु शैषिकाः	२९२–३३५
२९	तद्धितेष्विकणधिकारः	३३५–३७०
३०	तद्धितेषु याधिकारः	३७०–३७५
३१	तद्धितेष्वीयाधिकारः	३७५–३८०
३२	तद्धितेषु भावकर्मार्थाः	३८८–३८९
३३	तद्धितेषु क्षेत्राद्यर्थकाः	३९०–४१२
३४	तद्धितेषु मत्वर्थीयाः	४१२–४२७
३५	तद्धितेषु स्वार्थिकाः	४२७–४६६
३६	द्विरुक्तप्रक्रिया	४६६–४७२

॥ उत्तरार्द्धम् ॥

विषयः		पृष्ठम् ·
३७	आख्यातप्रकरणे भ्वादयः	४७३–५३३
३८	आख्यातप्रकरणे अदादयः	५३३–५४७
३९	आख्यातप्रकरणे ह्वादयः	५५७–५५१
४०	आख्यातप्रकरणे दिवादयः	५५१–५५७
४१	आख्यातप्रकरणे स्वादयः	५५७–५६०
४२	आख्यातप्रकरणे तुदादयः	५६०–५६७
४३	आख्यातप्रकरणे रुधादयः	५६७–५६९
४४	आख्यातप्रकरणे तनादयः	५६९–५७०
४५	आख्यातप्रकरणे क्र्यादयः	५७०–५७४
४६	आख्यातप्रकरणे चुरादयः	५७४–५८६
४७	आख्यातप्रकरणे ण्यन्तप्रक्रिया	५८६–५९२
४८	आख्यातप्रकरणे सन्नन्तप्रक्रिया	५९२–५९८
४९	आख्यातप्रकरणे यङन्तप्रक्रिया	५९८–६०२
५०	आख्यातप्रकरणे यङ्लुबन्तप्रक्रिया	६०३–६०५
५१	आख्यातप्रकरणे नामधातुप्रक्रिया	६०५–६१४
५२	आख्यातप्रकरणे कण्ड्वादयः	६१४–६१५
५३	आख्यातप्रकरणे प्रत्ययमाला	६१५–६१५
५४	आख्यातप्रकरणे आत्मनेपदप्रक्रिया	६१६–६३३
५५	आख्यातप्रकरणे परस्मैपदप्रक्रिया	६३३–६३४
५६	आख्यातप्रकरणे भावकर्मप्रक्रिया	६३५–६३८
५७	आख्यातप्रकरणे कर्मकर्तृप्रक्रिया	६३८–६४२
५८	आख्यातप्रकरणे विभक्त्यर्थप्रक्रिया	६४२–६६०
५९	कृदन्ते कृत्यप्रत्ययप्रकरणम्	६६०–६७३
६०	,, पूर्वकृदन्तप्रकरणम्	६७३–७३०
६१	,, उणादयः	७३१–८६४
६२	,, उत्तरकृदन्तप्रकरणम्	८६४–९०१
६३	हैमपञ्चपाठ्याम् अष्टाध्यायीसूत्रपाठः	९०३–९५७
६४	हैमपञ्चपाठ्यां गणपाठः	९५७–९९१
६५	,, धातुपाठः	९९१–१००४
६६	,, परिभाषापाठः	१००४–१००६
६७	,, लिङ्गानुशासनम्	१००७–१०५५
६८	हैमसूत्राणाम् अकारादिक्रमसूची	१०५६–११३५
६९	अकारादिक्रमेण हैमधातुसूची	११३६–११६६
७०	वैयाकरणन्यायादर्शः	११६७–१२२९
७१	शुद्धिपत्रम्	१२३०–१२३८
७२	परिशिष्टानि उत्तरार्द्धे	१२३९–१२४०

॥ परिशिष्टानि ॥

॥ प्रक्रियायां तत्तत्स्थले प्रमादान्न निर्दिष्टानि सूत्राणि ॥

पूर्वार्द्धे-

२१२-२ **पुंस्त्रियोः स्यमौजस्** ॥१।१।२९॥ औरिति प्रथमाद्वितीयाद्विवचनयोरविशेषेण ग्रहणम्। सि अम् औ२ जस् इत्येते प्रत्ययाः पुंलिङ्गे स्त्रीलिङ्गे च घुट्संज्ञाः स्युः। पृष्ठम्-४०-पंक्ति १३।

२७१-२ **शिर्घुट्** ॥ १ । १ । २८ ॥ जस्शसादेशः शिर्घुट्संज्ञः स्यात्। पृष्ठम्-५३-पंक्ति १९।

२७२-२ **घुटि** ॥१।४।६८॥ अधिकारोऽयम्। निमित्तविशेषोपादानमन्तरेणापादपरिसमाप्तेर्यत्कार्यं वक्ष्यते तद् घुटि वेदितव्यम्। पृष्ठम्-५३-पंक्ति २१।

३२१-२ **सविशेषणमाख्यातं वाक्यम्** ॥ १ । १ । २६ ॥ त्याद्यन्तं पदमाख्यातम्। साक्षात् पारंपर्येण वा यान्याख्यातविशेषणानि तैः प्रयुज्यमानैर्वा सहितं प्रयुज्यमानमप्रयुज्यमानं वाख्यातं वाक्यसंज्ञं स्यात्। लोकादेव वाक्यसिद्धौ साकाङ्क्षत्वेऽप्याख्यातभेदे वाक्यभेदार्थं वचनम्। आख्यातमित्येकत्वस्य विवक्षितत्वात् ओदनं पच तव भविष्यति मम भविष्यतीत्यादौ श्रूयमाणे गम्यमाने वाख्यातान्तरे भिन्नवाक्यत्वाद् वस्नसादयो न भवन्ति। लौकिके हि वाक्येऽङ्गीक्रियमाणे आख्यातभेदेऽप्येकवाक्यत्वाद् वस्नसादयः प्रसज्येरन्। कुरु कुरु नः कटमित्यादौ तु कृते द्विर्वचनेऽर्थाभेदादेकमेवाख्यातमित्येकवाक्यत्वाद् वस्नसादयो भवन्ति यथा- पृष्ठम्-६५-पंक्ति १४।

४०९-२ **दाम्नः** ॥ २।४।१० ॥ संख्यादेर्दामन्शब्दान्ताद् नाम्नो बहुव्रीहेः स्त्रियां ङीः स्यात्। द्विदाम्नी। त्रिदाम्नी। संख्यादेरित्येव। उद्दामानम् उद्दामाम् उद्दाम्नीं वडवां पश्य। 'अनो वे'ति विकल्पस्यापवादो योगः। पृष्ठम्-८९-पंक्ति-१५।

५३५-२ **प्रसितोत्सुकाबबद्धैः** ॥ २।२।४९ ॥ एतैर्युक्तादाधारे वर्तमानाद् गौणान्नाम्नस्तृतीया वा स्यात्। केशैः केशेषु वा प्रसितः। प्रकर्षेण सितो बद्धः प्रसितः। नित्यप्रसक्त इत्यर्थः। गृहेण गृहे वा उत्सुकः। केशैः केशेषु वा अवबद्धः। आधार

इत्येव । मनसा प्रसितः उत्सुकः अवबद्धः। करणतृतीयाया विकल्पो मा भूत् । अवबद्धोत्सुकशब्दसाहचर्यात् तदर्थ एव प्रसितशब्दोऽत्र गृह्यते । पूर्ववत् षष्ठीबाधनार्थं वचनम् । बहुवचनमेकद्विवहाविति यथासंख्यनिवृत्त्यर्थम् । पृष्ठम्-१२१-पंक्ति-२१ ।

प्रासादात् पतितः। भोजनादपत्रस्तः। ८०० सूत्रे,१७५ पृष्ठे पंक्तावन्त्यायामन्ते ।

१२६६-२ अनपत्ये ॥ ७।४।५९ ॥ इञन्तस्यापत्यादन्यत्रार्थे योऽण् तस्मिन् परेऽन्त्यस्वरादेर्लुग् न स्यात् ।

५६९ पृष्ठे द्वितीयपंक्तौ भिक्षाणां समूहो भैक्षमित्यनन्तरम् ।

१३८६-२ इकण्यथर्वणः॥७।४।४९॥ अथर्वन्शब्दस्येकणि प्रत्यये परेऽन्त्यस्वरादेर्लुग् न स्यात्। अथर्वाणं वेत्त्यधीते वा आथर्वणिकः। न्यायादिस्त्रादिकण् । पृष्ठम्-२८७-पंक्ति-२२ ।

१५६२-२ जङ्गलधेनुवलजस्योत्तरपदस्य तु वा ॥ ७।४।२४ ॥ आदेरित्यनुवर्तते । वेति तु निवृत्तम् । उत्तरपदस्य चेत्यकरणात् । जङ्गल धेनु वलज इत्येतदुत्तरपदानां शब्दानामादेः पूर्वपदस्य ञिणिति तद्धिते परे स्वरेष्वादेः स्वरस्य नित्यं वृद्धिः स्यात् उत्तरपदस्य पुनर्वा । कुरुजङ्गलेषु भवः कौरुजङ्गलः । कौरुजाङ्गलः। वैश्वधेनवः। वैश्वधैनवः । सौवर्णवलजः । सौवर्णवालजः।

१५६२-३ प्राचां नगरस्य ॥ ७ । ४ । २६ ॥ प्राचां देशे वर्तमानस्य नगरान्तस्य शब्दस्य ञिणिति तद्धिते परे आदेः पूर्वपदस्योत्तरपदस्य च स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् । सुह्मनगरे भवः सौह्मनागरः। पौण्डनागरः। वाजु (वांज) नागरः । वैराटनागरः । गैरिनागरः । प्राचामिति किम् । उदीचां माडनागरः ।

१५६२-४ बिल्वकादेरीयस्य ॥ २ । ४ । ९३॥ नडादिषु बिल्वादयः पठ्यन्ते तेषां कीयप्रत्ययान्तानामिह निर्देशः । बिल्वकीयादीनां दशानां शब्दानामवयवस्येयस्य तद्धितयस्वरे परे लुक् स्यात् । अनाति इति नानुवर्तते । आतोऽसंभवात् । बिल्वाः सन्त्यस्यामिति बिल्वकीया नाम नदी । तस्यां भवा बैल्वकाः । एवं वैणुकाः । वैत्रकाः । वैतसकाः । त्रैकाः । ताक्षकाः। ऐक्षुकाः । काष्ठकाः । कापोतकाः । क्रौञ्चकाः । बिल्वकीयादेरिति किम् । नाडकीयः। प्लाक्षकीयः । तद्धितयस्वर इत्येव । बिल्वकीयाः । बिल्वकीयरूप्यम् ।

इमानि त्रीण्यपि सूत्राणि ३१८ पृष्ठे २१ पंक्तेरनन्तरं गृहीतव्यानि ।

२१७९-२ च्वौ क्वचित् ॥३।२।६०॥ परतः स्त्री अनूङ् च्वौ पुंवत् स्यात्

कचिल्लक्ष्यानुरोधेन। अमहती महती भूता महद्भूता कन्या। एवं बृहत्कृता। कचिद्-ग्रहणादगोमती गोमतीभूता गोमतीभूतेत्यादौ न स्यादेव। पट्वीभूता पटूभूता मृद्वी-कृता मृदूकृतेत्यादौ विकल्पः। महतीभूतेत्यपि केचित्। ४३८ पृष्ठे १४ पंक्तेःपश्चात्।

२२३५–२ अन्त्यस्वरादेः ॥ ७ । ४ । ४३ ॥ तृप्रत्ययस्यान्त्यस्वरादेश्चाव-यवस्येमनि णीष्ठेयसुषु च परेषु लुक् स्यात्।

५५१ पृष्ठे द्वितीयपंक्तौ 'तमबर्थे इष्ठः' इत्येतदनन्तरम्।

२२९२–२ न अस्वङ्गादेः ॥ ७ । ४ । ९ ॥ अप्रत्ययान्तस्य स्वङ्गादेश्च ञिणिति तद्धिते परे ख्वः प्रागौकारौकारौ वा स्याताम्।

४६४ पृष्ठे २ पंक्तौ 'नित्यग्रहणान्महाविभाषा निवृत्ता' इत्यनन्तरम्।



सूचना—उत्तरार्द्धपरिशिष्टानि सूत्राण्युत्तरार्द्धस्यान्ते-संपूर्णग्रन्थान्ते द्रष्टव्यानि ॥

सकलशास्त्रपाथोधिचन्द्रः,
स्वमनीषाधरीकृतानेकविद्वद्वृन्दः,

निखिलावनीपालमौलिवररत्नरञ्जितचरणः,
शुद्धराजत्वालंकृतवर्ष्मा,

जन्म वि. सं.
११४५
दीक्षा वि. सं.
११५४
सूरिपदं वि. सं.
११६६
निर्वाणं वि. सं.
१२२९



जन्म वि. सं.
११४९
राज्याभिषेकः-
वि. सं. ११९९
स्वर्गारोहणम्-
वि सं. १२३७

श्रीसिद्धहैमशब्दानुशासनविधाता, कलिकालसर्वज्ञः
श्रीहेमचन्द्रसूरिः ॥


सकलार्हतानुकार्यचरित्रो राजाधिराजः
श्रीकुमारपालभूपालः ॥

फीनीक्ष प्री. वर्क्स,अमदावाद.

बालब्रह्मचारी

प्रातःस्मरणीय–जगत्पूज्य–विशुद्धचारित्र चूडामणि–तीर्थोद्धारक

तपोगच्छालङ्कार पूज्यपाद–विद्वद्वर्य–श्री–श्री–श्री



जन्म सं. १९३० पोष शुक्ल ११.

दीक्षा सं. १९४९ अषाढ शुक्ल ११.

गणिपद सं. १९६१ मार्गशीर्ष शुक्ल ५.

पन्यासपद सं. १९६२ कारतक वद ११.

श्रीमान् आचार्यमहाराज श्री विजयनीतिसूरीश्वरजी ॥

सूरिपद सं. १९७६ मार्गशीर्ष शुक्ल ५.

फीनीक्ष प्री. वर्क्स,अमदावाद.



॥ श्रीसिद्धहैमबृहत्प्रक्रिया ॥

(महाव्याकरणम्)

नत्वा ब्रह्म भारतीं च हेमचन्द्रं च सद्गुरुम् ॥
प्रक्रियां वितनोमीमां हैमशब्दानुशासनीम् ॥ १ ॥

तत्रादौ स्वयमाचार्यः शिष्टाचारमनुसृत्य प्रारिप्सितग्रंथस्य निर्विघ्नपरिसमाप्ति-कामः शिष्यशिक्षार्थं च सूत्रमुखेनैव मङ्गलमाचष्टेः—

१ अर्हम् ॥१।१।१॥ अर्हमित्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं सिद्धचक्रस्याऽऽदिबीजं सकलागमोपनिषद्भूतमशेषविघ्नविघातनिघ्नमखिलदृष्टादृष्ट-फलसंकल्पकल्पद्रुमोपममाशास्त्राध्ययनाध्यापनावधि प्रणिधेयम् । प्रणिधानं च 'अने-नात्मनः सर्वतः संभेदस्तदभिधेयेन चाभेदः' । वयमपि चैतच्छास्त्रारंभे प्रणिदध्महे । अयमेव हि तात्त्विको नमस्कार इति ।

२ सिद्धिः स्याद्वादात् ॥१।१।२॥ स्यादित्यव्ययमनेकान्तद्योतकम् । ततः स्याद्वादोऽनेकांतवादः नित्याऽनित्याद्यनेकधर्मशबलैकवस्त्वभ्युपगम इति यावत् । ततः सिद्धिर्निष्पत्तिर्ज्ञप्तिर्वा प्रकृतानां शब्दानां वेदितव्या.

॥ अथ संज्ञाप्रकरणम् ॥

३ औदन्ताः स्वराः ॥१।१।४॥ औकारान्ता वर्णाः स्वरसंज्ञकाः स्युः । तकार उच्चारणार्थः । 'औदन्ता' इति बहुवचनं वर्णेष्वपठितानां दीर्घपाठोपलक्षितानां प्लुतानां संग्रहार्थं, तेन तेषामपि स्वरसंज्ञा ।

४ एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः ॥१।१।५॥ मात्रा कालविशेषः । एकद्वित्र्युच्चारणमात्रा औदन्ता वर्णा यथासंख्यं ह्रस्वदीर्घप्लुतसंज्ञाः स्युः । एकमात्रो ह्रस्वः । द्विमात्रो दीर्घः । त्रिमात्रः प्लुतः ।

५ **अनवर्णौ नामी** ॥१।१।६॥ अवर्णरहिता औदन्ता वर्णा नामिसंज्ञकाः स्युः। अत्रापि बहुवचनं प्लुतस्य संग्रहार्थम्। एवमुत्तरत्रापि।

६ **ऌदन्ताः समानाः** ॥१।१।७॥ ऌकारान्ता वर्णाः समानसंज्ञकाः स्युः।

७ **ए ऐ ओ औ संध्यक्षरम्** ॥१।१।८॥ ए ऐ ओ औ इत्येते वर्णाः संध्यक्षरसंज्ञकाः स्युः। त इमे स्वरा औदन्ताः प्रत्येकमुदात्तादिभेदेन त्रिधा। उच्चैरुदात्तः। नीचैरनुदात्तः। समाहारः स्वरितः। पुनश्च सानुनासिकनिरनुनासिकत्वाभ्यामपीमे द्विधा। मुखसहितनासिकयोच्चार्यमाणो वर्णः सानुनासिकः। मुखेनैवोच्चार्यमाणो निरनुनासिकः। तदेवम् अ इ उ ऋ ऌवर्णानां प्रत्येकमष्टादश भेदाः। संध्यक्षराणां तु द्वादशैव, तेषां ह्रस्वाभावात्। अत्र केचित् ऌवर्णस्यापि दीर्घाभाववत्त्वमाश्रित्य द्वादशैव भेदान् मन्वते।

८ **कादिर्व्यञ्जनम्** ॥१।१।१०॥ कादिर्वर्णो हकारपर्यन्तो व्यंजनसंज्ञः स्यात्।

९ **अपञ्चमान्तस्थो धुट्** ॥१।१।११॥ वर्गपञ्चमान्तस्थावर्जितः कादिर्वर्णो धुट्संज्ञः स्यात्।

१० **पञ्चको वर्गः** ॥१।१।१२॥ कादिषु वर्णेषु यो यः पञ्चसंख्यापरिमाणो वर्णः स स वर्गसंज्ञः स्यात्।

११ **आद्यद्वितीयशषसा अघोषाः** ॥१।१।१३॥ वर्गाणामाद्यद्वितीया वर्णाः शषसाश्चाघोषाः स्युः।

१२ **अन्यो घोषवान्** ॥१।१।१४॥ अघोषेभ्योऽन्यः कादिर्वर्णो घोषसंज्ञः स्यात्।

१३ **यरलवा अन्तस्थाः** ॥१।१।१५॥ यरलव इत्येते वर्णा अंतस्थासंज्ञाः स्युः। अत्रेमे यवलाः सानुनासिकनिरनुनासिकत्वाभ्यां द्विधा। अतएव तेषां भेदपरिग्रहार्थः सूत्रे बहुवचननिर्देशः।

१४ **अं अः ×क ><पशषसाः शिट्** ॥१।१।१६॥ अनुस्वारो विसर्गो वज्राकृतिर्गजकुंभाकृतिश्च वर्णः शषसाश्च शिट्संज्ञकाः स्युः। अकारककारपकारा उच्चारणार्थाः। बहुवचनं वर्णेष्वपठितयोरपि ×क><पयोर्वर्णत्वार्थम्। अनयोरेव ×क><पयोर्जिह्वामूलीयोपध्मानीयत्वेन व्यवहारः।

१५ **अं अः अनुस्वारविसर्गौ** ॥१।१।९॥ अकारावुच्चारणार्थौ । अं इति नासिक्यो वर्णः, अः इति कण्ठ्यः । तौ यथासंख्यमनुस्वारविसर्गसंज्ञौ स्तः ।

१६ **अप्रयोगीत्** ॥१।१।३७॥ इह शास्त्रे उपदिश्यमानो वर्णस्तत्समुदायो वा यो लौकिके शब्दप्रयोगे न दृश्यते स इत्संज्ञकः स्यात् । अप्रयोगित्वानुवादेनेत्संज्ञाविधानाच्चास्य प्रयोगाभावः सिद्धः ।

१७ **तुल्यस्थानास्यप्रयत्नः स्वः** ॥१।१।१७॥ यत्र पुद्गलस्कंधस्य वर्णभावापत्तिस्तत्स्थानं कंठादि । यदाहुः–

अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा ॥
जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥१॥

अस्यत्यनेन वर्णानित्यास्यम्, ओष्ठात्प्रभृति प्राक् काकलकसंज्ञकात् कंठमणेः। आस्ये प्रयत्नः आस्यप्रयत्नः, आन्तरः संरभः । स चतुर्धा, स्पृष्टता १ ईषत्स्पृष्टता २ विवृतता ३ ईषद्विवृतता ४ । तुल्यौ वर्णान्तरेण सदृशौ स्थानास्यप्रयत्नौ यस्य स वर्णस्तं प्रति स्वसंज्ञकः स्यात् । करणं तु जिह्वामूलमध्याग्रोपाग्ररूपं स्थानास्यप्रयत्नतुल्यत्वे सति नातुल्यं भवतीति पृथग्नोक्तम् । तत्र स्थानम्:–अवर्णहविसर्गकवर्गाः कंठ्याः । इवर्णचवर्गयशास्तालव्याः । उवर्णपवर्गोपध्मानीया ओष्ठ्याः । ऋवर्णटवर्गरषा मूर्धन्याः । ऌवर्णतवर्गलसा दन्त्याः । ए ऐ तालव्यौ । कंठतालव्यौ इत्यन्ये । ओ औ ओष्ठ्यौ । कंठोष्ठ्यौ इत्यन्ये । वो दन्त्योष्ठ्यः। जिह्वामूलीयो जिह्व्यः । नासिक्योऽनुस्वारः । ङञणनमाः स्वस्थाननासिकास्थानाः । अथास्यप्रयत्नः । तत्र स्पृष्टं प्रयतनं स्पर्शानाम् । स्पर्शा वर्ग्याः। ईषत्स्पृष्टमन्तस्थानाम् । ईषद्विवृतमूष्मणाम् । शषसहा ऊष्माणः । विवृतं स्वराणाम् । स्वरेषु एओ विवृततरौ । ताभ्यामपि ऐ औ । ताभ्यामप्यवर्णः । अकारः संवृतः इत्यन्ये । अत्र सूत्रे आस्यग्रहणं बाह्यप्रयत्ननिवृत्त्यर्थम् । बाह्यप्रयत्नाश्चैकादश, यथा–विवारः संवारः श्वासः नादः घोषः अघोषः अल्पप्राणः महाप्राणः उदात्तः अनुदात्तः स्वरितश्चेति । तत्र वर्गाणां प्रथमद्वितीयाः शषसविसर्गजिह्वामूलीयोपध्मानीया विवाराः श्वासा अघोषाश्च । वर्गाणां तृतीयचतुर्थपञ्चमा अन्तस्था हकारानुस्वारौ च संवारा नादा घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमा अन्तस्थाश्चाल्पप्राणाः । इतरे सर्वे महाप्राणाः । सर्वे स्वराश्च उदात्ता अनुदात्ताः स्वरिताः । इमे विवारादयो वर्णनिष्पत्तिकालादूर्ध्वं वायुवशेनोत्पद्यन्ते, स्पृष्टतादयस्तु स्थानास्यप्रयत्नव्यपारेण वर्णोत्पत्तिकाल एवेति वर्णनिष्पत्तिकालभावाभावाभ्यां

त्रिवारादीनां बाह्यत्वं स्पृष्टतादीनां चाभ्यन्तरत्वम्। बाह्यप्रयत्नाश्च यद्यपि स्वसंज्ञाया-मनुपयुक्तास्तथाप्यान्तरतम्यपरीक्षायामुपयुज्यन्त एवेति.

* तपरस्तत्कालस्य। तः परो यस्मात् स च तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्। तेन अत् इत् उत् इत्यादयः षण्णां षण्णां संज्ञा।

१८ वृद्धिरारैदौत् ॥१।१।१॥ आकार आर् ऐकार औकारश्च प्रत्येकं वृद्धिसंज्ञाः स्युः।

१९ गुणोऽरेदोत् ॥१।१।२॥ अर् एत् ओत् इत्येते प्रत्येकं गुणसंज्ञाः स्युः।

२० क्रियार्थो धातुः ॥१।१।३॥ कृतिः क्रिया प्रवृत्तिर्व्यापार इति यावत्। पूर्वापरीभूता साध्यमानरूपा साऽर्थोऽभिधेयं यस्य स शब्दो धातुसंज्ञः स्यात्।

२१ चादयोऽसत्त्वे ॥१।१।३१॥ सीदतोऽस्मिँल्लिङ्गसंख्ये इति सत्त्वं, लिङ्ग-संख्यावद् द्रव्यमिति यावत्। ततोऽन्यत्र वर्तमानाश्चादयः शब्दा अव्ययसंज्ञकाः स्युः। निपाता इत्यपि पूर्वेषाम्।

* प्रादयः। एतेऽपि तथा। प्र परा अप सम् अनु अव निस् निर् दुर् दुस् वि आङ् नि अधि अपि अति सु उत् अभि, इति प्रादयः।

२२ धातोः पूजार्थस्वतिगतार्थाधिपर्यतिक्रमार्थातिवर्जः प्रादिरुपसर्गः प्राक्च ॥१।१।१॥ धातोः संबंधी तदर्थद्योती चाद्यन्तर्गतः प्रादिशब्दगण-उपसर्गसंज्ञो भवति, तस्माच्च धातोः प्राक् प्रयुज्यते न परो न व्यवहितः, पूजार्थौ स्वती गतार्थावधिपरी अतिक्रमार्थमतिं च वर्जयित्वा।

२३ ऊर्यादयनुकरणक्विडाचश्च गतिः ॥१।१।२॥ ऊर्यादय अनुकरणानि क्व्यन्ता डाजन्ताश्च शब्दा उपसर्गाश्च धातोः संबंधिनो गतिसंज्ञकाः स्युः। तस्माच्च धातोः प्रागेव प्रयुज्यन्ते।

* स्वं रूपं शब्दस्याऽशब्दसंज्ञा। शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना।

२४ विशेषणमन्तः ॥७।४।११३॥ विशिष्यते अनेनेति विशेषणम्। विशेषणं विशेष्यस्य समुदायस्यान्तोऽवयवो भवति। इह शास्त्रे धात्वादिः समुदायोऽ भेदेनावयवविशेषणक उपादीयते। तत्र सोऽवयवस्तत्समुदायस्यान्तत्वेन नियम्यते।

* समासप्रत्ययविधौ प्रतिषेधः।

* उञ्छलदिद्गुणग्रहणवर्जम्।

२५ सप्तम्या आदिः ॥७।४।११४॥ सप्तम्यन्तस्य विशेष्यस्य यद् विशेषणं तत् तस्यादिरवयवो भवति।

* वर्णानामभावोऽयसानम्।

अविरामः संहिता ।

२६ **तदन्तं पदम्** ॥१।१।२०॥ स्याद्यन्तं त्याद्यन्तं च शब्दरूपं पदसंज्ञं स्यात् ।

* स्वराव्यवहितानि व्यंजनानि संयोगः । * ह्रस्वं लघु ।

* विसर्गाऽनुस्वारयुक् संयोगपरं च गुरु । * दीर्घमपि गुरु ।

* आदेशः शत्रुवत् । * आगमो मित्रवत् । * लुक्लुप्लोपास्त्रयो वर्णादर्शनवाचकाः । * उक्ते वर्णे स्वसंज्ञकस्याऽपि ग्रहणम् । कारे तु केवलस्यैव ।

२७ **लोकात्** ॥१।१।३॥ उक्तातिरिक्तानां क्रियागुणद्रव्यजातिकाललिङ्गस्वाङ्गसंख्यापरिमाणापत्यवीप्सालुगवर्णादीनां संज्ञानां परान्नित्यं नित्यादन्तरङ्गमन्तरङ्गाच्चानवकाशं बलीय इत्यादीनां न्यायानां च लोकाद् वैयाकरणसमयविदः प्रामाणिकादेश्च शास्त्रप्रवृत्तये सिद्धिः स्यादिति ज्ञेयम्, वर्णसमाम्नायस्य च ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां संज्ञाप्रकरणम्
समाप्तम् ॥

॥ अथ परिभाषाप्रकरणम् ॥

* स्वरस्य ह्रस्वदीर्घप्लुताः । ह्रस्वदीर्घप्लुतशब्दैर्यत्र विधानं तत्र 'स्वरस्य' इति षष्ठ्यन्तं पदमुपतिष्ठते ।

* यस्याः संबंधविशेष अनिश्चितः सा षष्ठी स्थानेयोगा ज्ञेया । स्थानं च प्रसङ्गः ।

२८ **आसन्नः** ॥७।४।११०॥ इह आसन्नानासन्नप्रसङ्गे यथास्वं स्थानार्थप्रमाणादिभिरासन्न एव विधिर्भवति ।

* यत्रानेकविधमासन्नत्वं तत्र स्थानत आसन्नत्वं बलीयः ।

२९ **पञ्चम्या निर्दिष्टे परस्य** ॥७।४।१०४॥ पञ्चम्या निर्दिष्टे यत्कार्यमुच्यते तत्परस्य स्थाने भवति । निर्दिष्टग्रहणमिहाऽऽनन्तर्यार्थम् । 'अतो भिस ऐस्' इत्यादौ दिग्योगलक्षणा पञ्चमी, तत्र पूर्वस्य परस्य च कार्यं स्यादिति नियमार्थं वचनम् ।

३० **सप्तम्या पूर्वस्य** ॥७।४।१०५॥ सप्तम्या निर्दिष्टे यत्कार्यमुच्यते तत् पूर्वस्यानन्तरस्य स्थाने भवति । 'इवर्णादेरस्वे स्वरे' इत्यादौ औपश्लेषिकमधिकरणं पूर्वं परं च संभवति, तत्र परमेव ग्राह्यमिति नियमार्थं वचनम् ।

३१ **षष्ठ्यान्त्यस्य** ॥७।४।१०६॥ षष्ठ्या निर्दिष्टे यत्कार्यमुच्यते तदन्त्यस्य षष्ठीनिर्दिष्टस्यैव योऽन्त्यो वर्णस्तस्य स्थाने भवति नतु समस्तस्य ।

३२ **अनेकवर्णः सर्वस्य** ॥७।४।१०७॥ अनेकवर्ण आदेशः षष्ठ्या निर्दिष्टस्य सर्वस्यैव स्थाने स्यात् ।

३३ **प्रत्ययस्य** ॥७।४।१०८॥ प्रत्ययस्थाने विधीयमान आदेशः सर्वस्य स्यात् ।

* अपेक्षातोऽधिकारः । * स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम् ।
* परनित्यान्तरङ्गानामुत्तरोत्तरं बलीयः ।
* असिद्धं बहिरङ्गमन्तरङ्गे ।
* न स्वरानन्तर्ये ।
* निमित्ताभावे नैमित्तिकस्याप्यभावः ।
* नानिष्टार्था शास्त्रप्रवृत्तिः ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां परिभाषाप्रकरणम्
समाप्तम्. ॥

॥ अथ स्वरसन्धिप्रकरणम् ॥

३४ **समानानां तेन दीर्घः** ॥१।२।१॥ समानसंज्ञकानां वर्णानां तेन परेण समानेन सहितानां दीर्घः स्यात् आसन्नः । दण्डाग्रम् । दधीदम् । मधूदकम् । पितॄषभः । समानानामिति किम् । वागत्र । तेनेति किम् । दधि शीतम् । बहुवचनं व्याप्त्यर्थम् । तेनोत्तरसूत्रेण ऌकृतोरपि ॠॡति ह्रस्वो भवति । क्लृ ऋषभः । होतृ ऌकारः । अन्यथा 'ऋस्तयोः' इत्यनेन परत्वाद् ऋरेव स्यात् ।

३५ **ऋॡति ह्रस्वो वा** ॥१।२।२॥ समानानामृकारे ऌकारे च परे ह्रस्वो वा स्यात् । बाल ऋश्यः, बालऋश्यः । खट्वे ऋश्यः, खट्वेऋश्यः । मह ऋषिः, महर्षिः । धूलि ऋतुः, धूल्यृतुः । नदि ऋच्छति नद्यृच्छति, । तनु ऋजुता, तन्वृजुता । वधु ऋणम्, वध्वृणम् । कर्तृ ऋषभः, कर्तृषभः । बाल ऌकारः, बालऌकारः । कन्य ऌकारः, कन्यऌकारः । इत्यादि । ह्रस्वकरणसामर्थ्यादेव कार्यान्तरं न भवति । अत एव ह्रस्वस्यापि ह्रस्वः क्रियते । समानानामित्येव । वृक्षाद्गच्छति । ॠॡतीति किम् । दण्डाग्रम् । कन्याया ऋकारः कन्यर्कारः । तकार उच्चारणार्थः । कश्चित्तु ह्रस्वत्वाभावपक्षे प्रकृतिभावमपीच्छति । तन्मते खट्वे ऋश्यः, नदी ऋश्य इत्याद्यपि भवति । मार्च्छतीत्यादौ तु परत्वादारेव । 'ह्रस्वोऽपदे वा' इत्येव सिद्धाववर्णार्थं पदार्थं च वचनम् ।

३६ **ऌत ऋ ॡ ऋॡभ्यां वा** ॥१।२।३॥ ऌतः स्थाने ऋता ऌता च परेण सहितस्य यथासंख्यं ऋ ॡ इत्यादेशौ वा स्याताम् । ऋ इति स्वरसमुदायो स्वरव्यञ्जनसमुदायो वा वर्णान्तरम् । तदपीषत्करणं द्विरेफतुरीयमध्यर्धस्वरमात्रमित्येके । संवृततरं सकलरेफकारमर्धमात्रस्वरभक्तिकमित्यन्ये । द्विरेफश्रुतिकमध्यर्धस्वरमात्रमि-

त्यपरे। एवं ॡ इत्यपि ॡकारः। पक्षे ऋलृतीति ह्रस्व उत्तरेणऋकारश्च । क्लृ ऋकारः। कॄकारः। क्लॄकारः। क्लृ लृकारः । क्लॡकारः। ऌवर्णस्य स्थानित्वमिच्छन्त्येके ।

३७ **ऋतो वा तौ च** ॥१।२।४॥ ऋकारस्य स्थाने ऋता लृता च परेण सहितस्य यथासंख्यं ऋ ॡ इत्यादेशौ वा स्याताम्, तौ च–ऋकारलृकारौ ऋता लृता च सह ऋकारस्य वा स्याताम् । पितॄषभः, पितृऋषभः । होत्लृकारः, होतृकारः, होतृलृकारः । तौ च–पितॄषभः, होत्लृकारः । पक्षे यथाप्राप्तम् ।

३८ **ऋस्तयोः** ॥१।२।५॥ तयोः–पूर्वस्थानिनोर्लृकारऋकारयोः स्थाने यथासंख्यमृता लृता च परेण सहितयोर्ऋकारो द्विमात्र आदेशः स्यात्। कॄषभः। होतॄकारः।

३९ **अवर्णस्येवर्णादिनैदोदरल्** ॥१।२।६॥ अवर्णस्य स्थाने इवर्णोवर्णऋवर्णलृवर्णैः परैः सहितस्य यथासंख्यमेत् ओत् अर् अल् इत्येते आदेशाः स्युः * देवेन्द्रः । नवोदकम् । महा ऋद्धिः × महर्द्धिः । अत्र र्हादर्हेत्यादिना पक्षे द्वित्वे महद्र्द्धिः । धुटोधुटीत्येनन लुकि द्वित्वाभावे वा एकदमेकधम् । द्वित्वे लोपे च तथैव । द्वित्वे द्विदमेकधम् । एकदेऽपि लुकि केवलैकधमिति त्रैरूप्यं ज्ञेयम्–महर्द्धिः, महद्र्द्धिः, महर्धिः । तवल्कारः । अत्र 'अञ्वर्गस्यान्तस्थातः' इत्यनेन पक्षे ककारस्य द्वित्वम् । लस्य तु 'अदीर्घाद्–' इत्यनेनेति रूपचतुष्टयं भवति । उक्तं हि–

" द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि ॥
तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम् " ॥

४० **ऋणे प्रदशार्णवसनकंबलवत्सरवत्सतरस्यार्** ॥१।२।७॥ प्रादीनामवर्णस्य ऋणशब्दे परे परेण ऋकारेण सहितस्याऽऽर् इत्ययमादेशः स्यात् । अरोऽपवादः । प्रगतमृणं प्रार्णम् । दशानामृणं दशार्णम् । दश ऋणान्यस्य दशार्णः क्षत्रियः दश ऋणानि जलदुर्गाण्यस्यां दशार्णा नदी । ऋणस्यावयवतया संबंधि ऋणमृणार्णम्। वसनानामृणं वसनार्णम् । एवं कम्बलार्णम् । वत्सरार्णम् । वत्सतरार्णम् । इह सर्वत्र पक्षे ह्रस्वोऽपि भवति। प्र ऋणम्, दश ऋणमित्यादि। वत्सरशब्दस्यारं नेच्छन्त्येके ।

४१ **ऋते तृतीयासमासे** ॥१।२।८॥ ऋतशब्दे परे योऽवर्णस्तस्य स्थाने परेण ऋकारेण सहितस्यार् इत्ययमादेशः स्यात्, तौ चेन्निमित्तनिमित्तिनावेकत्र

---

* यथासंख्यमनुदेशः समसंख्यानाम् ।

× जलतुम्बिकान्यायेन रेफस्योर्ध्वगमनम् ।

तृतीयासमासे भवतः । शीतेन ऋतः शीतार्तः । ऋलृतीति ह्रस्वोऽपि भवति । शीत ऋतः । ऋत इति किम् । सुखेतः । तृतीयेति किम् । परमर्तः । समास इति किम् । सुखेनर्तः । ऋतेन कृतः ऋतकृतः, परमश्चासौ ऋतकृतश्च परमर्तकृत इत्यत्र तु निमित्त-निमित्तिनौ नैकत्र तृतीयासमासे इति न भवति । अवर्णस्येत्येव । पितृतः । अथ कथं 'क्षुधार्तः सन् शालीन् कवलयति मांसपाकवलितान्' । क्षुध्शब्दस्य व्यञ्जनान्तत्वात् क्षुदृत इति प्राप्नोति । नैवम् । आङ्पूर्व ऋते तृतीयान्तस्यासमस्तस्यायं प्रयोगः । आ ऋत इति उत्तरेणार् । आर्तः । ततः क्षुधेत्यनेन संबंधः । यस्य तु व्यञ्जनान्तादप्याप् तन्मते क्षुधया ऋत इति समस्तप्रयोग एव स्यात् ।

४२ **ऋत्यारुपसर्गस्य** ॥१।२।९॥ उपसर्गस्य संबन्धिनोऽवर्णस्य स्थाने ऋकारादौ धातौ परे परेण ऋकारेण सहितस्याऽऽरादेशः स्यात् सर्वापवादः । प्रार्च्छति । परार्च्छति । ऋतीति किम् । उपेतः । उपसर्गस्येति किम् । इहर्च्छति । इह ऋच्छति । येन धातुना युक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञाः, तेनेह न, प्रगता ऋच्छका अस्मात् प्रर्च्छको देशः । आरिति वर्तमाने पुनरार्ग्रहणमारेव यथा स्यादित्येवमर्थम् । तेनेहोत्तरयोश्च ह्रस्वत्वं बाध्यते ।

४३ **नाम्नि वा** ॥१।२।१०॥ उपसर्गस्य संबन्धिनोऽवर्णस्य स्थाने ऋकारादौ नामावयवे धातौ (नामधातौ) परे परेण ऋकारेण सहितस्यारादेशो वा स्यात् । प्रार्षभीयति । केचित्तु पक्षे ह्रस्वत्वमपि मन्यन्ते, प्र ऋषभीयति । उपसर्गस्येत्येव । इहर्षभीयति । ऋतीत्येव । उपोष्ट्रीयति । ऋकारमिच्छति, उपर्कारीयति ।

४४ **लृत्याल्वा** ॥१।२।११॥ उपसर्गस्य सबन्धिनोऽवर्णस्य लृति—लृकारादौ नामावयवे धातौ परे परेण लृकारेण सहितस्याऽऽल् वा स्यात् । अलोऽपवादः । उपाल्कारीयति । उपल्कारीयति । उपसर्गस्येत्येव । इहल्कारीयति । लृतीत्येव । लृकारमिच्छति उपल्कारीयति ।

४५ **ऐदौत्संध्यक्षरैः** ॥१।२।१२॥ अवर्णस्य स्थाने सन्ध्यक्षरैः परैः सहितस्यैत् औत् इत्यादेशावासन्नौ स्याताम् । तवैषा । तवैन्द्री । तवौदनः । तवौपगवः । अवर्णस्येव । दध्येतत् । दध्यैच्छत् । मध्वोदनः । साध्वौषधम् । संध्यक्षरैरित्यैत्व-निर्देशादुपसर्गस्येति निवृत्तम् ।

४६ **ऊटा** ॥१।२।१३॥ अवर्णस्य परेणोटा सहितस्य स्थाने औकारादेशः स्यात् आसन्नः । ओकारापवादो योगः । धौतः । धौतवान् । लावयति, पावयतीति किपि णिलोपे ' अनुनासिके च च्छ्वः शूट् ' इत्यूटि लौः, पौः ।

४७ **प्रस्यैषैष्योढोढ्यूहे स्वरेण** ॥१।२।१४॥ प्रशब्दसंबंधिनोऽवर्णस्य एष एष्य ऊढ ऊढि ऊह इत्येतेषु परेषु परेण स्वरेण सहितस्य स्थाने ऐदौतावादेशौ स्यताम् आसन्नौ। प्रैषः। प्रैष्यः। प्रौढः। प्रौढिः। प्रौहः। ऊहे नेच्छन्त्येके। प्रस्येति किम्। अपोढः। एषादिष्विति किम्। प्रेतः। कथं प्रेषः, प्रेष्यः। ईषे इष्ये च भविष्यति। यदापि आ ईष्य एष्य इति तदापि 'ओमाङी'त्यवर्णलोपे प्रेष्य इत्येव भवति। 'यस्मिन् प्राप्ते यो विधिरारभ्यते स तस्य बाधको भवती'ति न्यायात् 'उपसर्गस्यानिणेधेदोति' इत्यस्यैवायं बाधको न त्वोमाङीत्यस्य। अथेह कस्मान्न भवति? प्रेषते प्रेष्यते प्रोढवानिति। अर्थवद्ग्रहणेऽनर्थकस्याग्रहणात्। कथं तर्हि ऊढिशब्दस्य ण्यन्तस्य सार्थकस्य प्रोढयतीति प्रयोगः। ऊढशब्देन सार्थकेन स्याद्यन्तेन साहचर्यात् सहचरितासहचरितयोः सहचरितस्यैव ग्रहणात् ण्यन्ते औत्वाभावः। प्रौढादिशब्दात्तु णौ प्रौढयतीत्यादि भवेदेव।

४८ **स्वैरस्वैर्यक्षौहिण्याम्** ॥ १।२।१५ ॥ स्वैर स्वैरिन् अक्षौहिणीत्येतेषु अवर्णस्य परेण स्वरेण सहितस्य ऐत् औत् इत्येतावादेशौ स्याताम्। स्वस्य ईरः स्वैरः, स्वयम् ईरति ईर्ते वा स्वैरः, स्वयमीरितुं शीलमस्येति स्वैरी। 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहण' मिति स्वैरिणी। अक्षाणामूहोऽस्यामस्तीति अक्षौहिणी। स्वैरशब्दान्मत्वर्थीयेनैव इना सिद्धे पृथक् स्वैरिन्ग्रहणं ताच्छीलिकादिणिच्यन्तेऽपीरिनशब्दे ऐत्वार्थम्।

४९ **अनियोगे लुगेवे** ॥ १।२।१६ ॥ नियोगो नियमोऽवधारणम्। तदभावोऽनियोगोऽनवकृप्तिः। तद्विषये एवशब्दे परेऽवर्णस्य लुक् स्यात्। इहेव तिष्ठ। अद्येव गच्छ। स्वेच्छावृत्तिरत्र गम्यते नावधारणम्। नियोगे तु इहैव तिष्ठ मा गाः। ये त्वनियोगेऽव्यापारणे इच्छन्ति तन्मते शास्त्रलोकप्रतीतप्रयोगविरोधः। अथ कथं शकानामन्धुः शकन्धुः, अटतीत्यटा कुलात् कुलस्य वाऽटा कुलटा, पततीति पतः पतः अञ्जलेः पतञ्जलिः, सीम्नोऽन्तः सीमन्तः केशविन्यास एव, प्रार्थनायाऽध्ययनं प्रध्ययनम्, हलस्य ईषा हलीषा, लाङ्गलीषा, मनस् ईषा मनीषा, इत्यादि? पृषोदरादित्वाद् भविष्यति। कथं तु वै त्वै, नु वै न्वै? निपातान्तरमेतत्।

५० **वौष्ठौतौ समासे** ॥ १।२।१७ ॥ ओष्ठशब्दे ओतुशब्दे च परेऽवर्णस्य लुग्वा स्यात्, तौ चेन्निमित्तनिमित्तनावेकत्र समासे भवतः। बिम्बोष्ठी, बिम्बौष्ठी। स्थूलोतुः, स्थूलौतुः। समास इति किम्। हे राजपुत्रौष्ठं पश्य। अवर्णस्येत्येव। शुच्योष्ठी।

५१ **ओमाङि** ॥ १।२।१८ ॥ अवर्णस्य ओमि आङादेशे च परे लुक् स्यात् । आङि दीर्घत्वेनैव सिद्धे लुग्विधानमनर्थकं स्यादिति आङिति आङादेशो गृह्यते । अधोङ्कारः । आ ऊढा ओढा अध ओढा अधोढा । ओमाङिति किम् । तवौदनः । अवर्णस्येत्येव । आ ऋतोः अर्तोः, दधि अर्तोः दध्यर्तोः ।

५२ **उपसर्गस्यानिणेधेदोति** ॥१।२।१९॥ उपसर्गसंबन्धिनोऽवर्णस्येणेधतिवर्जिते एकारादावोकारादौ च धातौ परे लुक् स्यात् । प्रेलयति । परोखति । उपसर्गस्येति किम् । प्रगता एलका अस्मादिति प्रैलको देशः । अनिणेधिति किम् । उपैति । उपैधते । एदोदिति किम् । उपायते । प्लायते ।

५३ **वा नाम्नि** ॥ १।२।२० ॥ नामावयव एकारादावोकारादौ च धातौ परे उपसर्गसंबन्धिनोऽवर्णस्य लुग्वा स्यात् । उपेकीयति । उपैकीयति । प्रोषधीयति । प्रौषधीयति ।

दधि अत्र इति स्थिते ।

५४ **इवर्णादेरस्वे स्वरे यवरलम्** ॥ १।२।२१ ॥ इवर्णोवर्णऋवर्णलृवर्णानामस्वे स्वरे परे यथासंख्यं य् व् र् ल् इत्येते आदेशाः स्युः । दध् य् अत्र इति जाते ।

५५ **अदीर्घाद् विरामैकव्यञ्जने** ॥ १।३।३२ ॥ अदीर्घात् स्वरात् परस्य ह्रस्वरवर्जस्य वर्णस्य स्थाने विरामेऽसंयुक्तव्यञ्जने च परेऽनु द्वित्वं वा स्यात् । इति धकारस्य वा द्वित्वम् ।

५६ **स्थानीवावर्णविधौ** ॥७।४।१०९॥ स्थानं प्रसङ्गः । सोऽस्यास्तीति स्थानी आदेशी । आदेशस्थानिनोः पृथक्त्वात् स्थानिकार्यमादेशे न प्राप्नोतीत्यतिदिश्यते । आदेशः स्थानिवत् स्यात्–स्थान्याश्रयाणि कार्याणि प्रतिपद्यते, न चेत् तानि स्थानिवर्णाश्रयाणि स्युः । अनेनेह यकारस्य स्थानिवत्त्वात् स्वरत्वमाश्रित्यादीर्घाद् विरामैकेति द्वित्वनिषेधः स्यादिति नाशंकनीयम् । सूत्रे 'अवर्णविधौ' इति तन्निषेधात् । अत्र तु स्थानिवर्णाश्रयं कार्यमिति स्थानिवत्त्वस्य प्रसक्तिरेव नास्ति ।

५७ **स्वरस्य परे प्राग्विधौ** ॥७।४।११०॥ वर्णविध्यर्थमिदम् । स्वरस्यादेशः परे-परनिमित्तके व्यवहितेऽव्यवहिते वा पूर्वस्य विधौ कर्तव्ये स्थानीव स्यात् । अनेन यकारस्य स्थानिवद्भावे प्राप्ते ।

५८ **न संधिङीयङिद्विदीर्घासद्धिधावस्क्लुकि** ॥७।४।१११॥ पूर्वेणातिप्रसक्तः स्थानिवद्भावः प्रतिषिध्यते । संधिविधौ ङीविधौ यविधौ किविधौ द्वयो-

द्वित्वस्य विधौ दीर्घविधौ 'संयोगस्यादौ स्कोलुर्क्' इति स्क्लुक्वर्जितेऽसद्विधौ च स्वरस्यादेशः स्थानीव न स्यात् । इति स्थानिवद्भावनिषेधः ।

५९ तृतीयस्तृतीयचतुर्थे ॥ १।३।४९ ॥ धुटां स्थाने तृतीये चतुर्थे च परे स्थानिप्रत्यासन्नस्तृतीयः स्यात् । एकवर्गीया मिथः स्वा इति पूर्वधकारस्य दकारः ।

६० पदस्य ॥२।१।८९॥ पदान्ते वर्तमानस्य संयोगस्य लुगन्तादेशः स्यात्, स च परे स्यादिविधौ च पूर्वस्मिन्नसन् द्रष्टव्यः । इति यलोपे प्राप्ते । 'असिद्धं बहिरङ्गमन्तरङ्गे' इति न्यायेन अन्तरङ्गे लोपे कर्तव्ये बहिरङ्गस्य यकारस्यासिद्धत्वान्न भवति ।

६१ ततोऽस्याः ॥१।३।३४॥ ततोऽञ्वर्गात् परस्या अन्तस्थायाः स्थाने द्वे वा स्तः । इति यकारस्यापि द्वित्वम् । तदिह धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि । एकधमेकयम् । द्विधं द्वियम् । द्विधमेकयम् । एकधं द्वियम् । दध्यत्र । दद्ध्यत्र । दद्ध्यत्र । दध्यत्र । मद्ध्वत्र । पिन्नंशः । लित् । इवर्णादेरित्यत्र पञ्चमीव्याख्याने दधियत्र, मधुवत्रेत्यादि ।

६२ पुत्रस्यादिन्पुत्रादिन्याक्रोशे ॥१।३।३८॥ आदिन्शब्दे पुत्रादिन्शब्दे च परे पुत्रशब्दसंबन्धिनस्तकारस्याक्रोशविषये द्वे न स्तः । पुत्रादिनी त्वमसि पापे । पुत्रपुत्रादिनी भव । अदीर्घादिति विकल्पे प्राप्ते प्रतिषेधः । आदिन्पुत्रादिनीति किम् । पुत्रहती । पुत्रहती । पुत्रजग्धी । पुत्रजग्धी । आक्रोश इति किम् । तत्त्वकथने द्वित्वं भवत्येव । पुत्रादिनी शिशुमारी । पुत्रादिनीति वा । पुत्रपुत्रादिनी नागी । पुत्रपुत्रादिनीति वा ।

६३ हादर्हस्वरस्यानु न वा ॥१।३।३१॥ स्वरेभ्यः परौ यौ रेफहकारौ ताभ्यां परस्यार्हस्वरस्य—रेफहकारस्वरवर्जितस्य वर्णस्य स्थाने द्वेरूपे वा स्तः अनुयदन्यत् कार्यं प्राप्नोति तस्मिन् कृते पश्चात् इत्यर्थः। अर्क्कः । अर्क्कः। ब्रह्म्मा । ब्रह्मा। अर्हस्वरस्येति किम् । पद्महृदः । अर्हः । करः । स्वरेभ्य इत्येव । अभ्रयते । न्हुते । अन्विति किम् । प्रोर्ण्णुनाव । अत्र द्विर्वचने कृते यथा स्यात् ।

६४ अञ्वर्गस्यान्तस्थातः ॥१।३।३३॥ अन्तस्थातः परस्य अकारवर्जितस्य वर्गस्य स्थानेऽनु द्वे वा स्तः । उल्क्का । उल्का । वल्म्मीकः । वल्मीकः । वृक्षव् करोति । वृक्षक् करोति । वर्गस्येति किम् । सव्यतः । अञ्चिति किम् । हल्अकारौ । अन्तस्थात इति किम् । भवान्मधुरः ।

६५ शिटः प्रथमद्वितीयस्य ॥१।३।३५॥ शिटः परयोः प्रथमद्वितीययोः स्थाने द्वे वा स्तः । त्वं करोषि । त्वं करोषि । त्वं क्खनसि । त्वं खनसि । शिट इति किम् । भवान् करोति । प्रथमद्वितीयस्येति किम् । आस्यम् । अनुनासिकादप्यादेशरूपात् केचिदिच्छन्ति । *त्वञ्छात्रः त्वञ्छात्रः ।

६६ ततः शिटः ॥१।३।३६॥ ततः प्रथमद्वितीयाभ्यां परस्य शिटः स्थाने द्वे वा स्तः । तच्छ्शेते । तच् शेते । तत इति किम् । भवान् साधुः । शिट इति किम् । मश्नाति ।

६७ न रात् स्वरे ॥१।२।३७॥ रात् परस्य शिटः स्वरे परे द्वे न स्तः । दर्शनम् । हार्दहेति विकल्पे प्राप्ते प्रतिषेधः । रादिति किम् । तच्छ्शेते । स्वर इति किम् । कश्छ्यते । शिट इत्येव । अर्कः ।

६८ एदैतोऽयाय् ॥१।२।२३॥ एकारैकारयोः स्थाने स्वरे परे यथासंख्यम् अय् आय् इत्येतावादेशौ स्याताम् । नयनम् । नायकः । अस्व इति इवर्णादिसंबद्धं तन्निवृत्तौ निवृत्तम् । तेन स्वेऽपि भवति । वृक्षयेव । रायैन्द्री । स्वर इत्येव । जले पद्मम् । रैधृतिः ।

६९ ओदौतोऽवाव् ॥१।२।२४॥ ओकारौकारयोः स्थाने स्वरे परे यथासंख्यम् अव् आव् इत्येतावादेशौ स्याताम् । लवनम् । लावकः । स्वर इत्येव । गोशृङ्गम् । नौकाष्ठम् ।

७० व्यञ्जये ॥१।२।२५॥ ओकारौकारयोः स्थाने व्यञ्जिते यकारादौ प्रत्यये परे यथासंख्यमव् आव् इत्येतावादेशौ स्याताम् । गव्यति । नाव्यति । यीति किम् गोभ्याम् । नौभ्याम् । अक्ष्म इति किम् । उपोयते । औयत । व्यञ्जनाद् यकारादिः प्रत्ययो गृह्यते, तेनेह न । गोयूतिः । नौयानम् । कथं गव्यूतिः क्रोशद्वयम् । क्रोशयोजनादिवदव्युत्पन्नः संज्ञाशब्दोऽयम् । गवां यूतिर्गव्यूतिरिति व्युत्पत्तिपक्षे तु पृषोदरादित्वाद् भविष्यति । शरव्यमिति तु शरसमानार्थात् शरुशब्दादुवर्णान्तलक्षणे ये, शरान् व्ययतीति वा डे भविष्यति ।

७१ क्षय्यजय्यौ शक्यौ ॥४।३।९०॥ क्षि जि इत्येतयोः शक्यौ गम्यायां यमत्यसेऽयन्तादेशो निपात्यते । निपातनफलं ह्येतत्—

---

* त्वम् छात्र इति स्थिते तौ मुम् इत्यनुनासिको मकारः । ततः छस्य द्वित्वे अघोषे प्रथम इति छस्य चः ।

' अकृतस्य क्रिया चैव प्राप्तेर्बाधनमेव च ।
अधिकार्थविवक्षा च त्रयमेतन्निपातनात् '॥

क्षेतुं शक्यः क्षय्यो व्याधिः । जेतुं शक्यो जय्यः शत्रुः । शक्ताविति किम् । अर्हे–क्षेयम् । जेयम् ।

७२ क्रय्यः क्रयार्थे ॥ ४।३।९१ ॥ क्रीणातेर्यप्रत्ययेऽयन्तादेशो निपात्यते क्रयार्थे–क्रयाय चेत् प्रसारितोऽभिधेयो भवति । क्रय्यो गौः । क्रयार्थ इति किम् । क्रेयं नो धान्यम्, न चास्ति प्रसारितम् ।

७३ स्वरे वा ॥१।३।२४॥ अवर्णभोभगोऽघोभ्यः परयोः पदान्ते वर्तमानयोर्वकारयकारयोः स्वरे परे लुग्वा स्यात् स चासन्धिः। पट इह। पटविह। त आहुः। तयाहुः । तस्मा इदम् । तस्मायिदम् । वृक्षा इह । वृक्षाविह ।

७४ इतावतो लुक् ॥ ७।२।१४६ ॥ अव्यक्तानुकरणस्यानेकस्वरस्य योऽत् इत्ययं शब्दस्तस्य इतिशब्दे परे लुक् स्यात् । पटत् इति पटिति । अव्यक्तानुकरणस्येत्येव । जगदिति । अनेकस्वरस्येत्येव । छत् इति छदिति । अत इति किम् । मरुत् इति मरुदिति । इताविति किम् । पटदत्र । कथं घटदिति गंभीरमंबुदैर्नदितम्, चकदिति तडितापि च कृतमिति च । दकारान्तावेतौ द्रष्टव्यौ ।

७५ न द्वित्वे ॥ ७।२।१४७ ॥ अव्यक्तानुकरणस्यानेकस्वरस्य द्वित्वे कृते इतिशब्दे परे योऽत् शब्दस्तस्य लुग् न स्यात् ।

७६ धुटस्तृतीयः ॥२।१।७६॥ पदान्ते वर्तमानानां धुटां तृतीयः स्यात् । पटत्पटदिति । वीप्सायां द्वित्वम् । द्वित्वे इति किम् । पटिति । कथं चटच्चटिति । नात्र द्वित्वमपि तु समुदायानुकरणमिति भवति।

७७ तो वा ॥ ७।२।१४८ ॥ द्वित्वे सति अव्यक्तानुकरणस्यानेकस्वरस्य योऽच्छब्दस्तस्य संबन्धिनस्तकारस्येतौ परे लुग् वा स्यात् । पटत्पटेति ।

७८ एदोतः पदान्तेऽस्य लुक् ॥१।२।२७॥ एदोद्भ्यां पदान्ते वर्तमानाभ्यां परस्याकारस्य लुक् स्यात् । तेऽत्र । पटोऽत्र । एदोत इति किम् । दध्यत्र । पदान्त इति किम् । नयनम् । अस्येति किम् । तयिह । पटविह ।

७९ गोर्नाम्न्यक्षेऽक्षे ॥१।२।२८॥ गोरोकारस्य पदान्ते वर्तमानस्य अक्षशब्दे परे संज्ञायां गम्यमानायामव इत्ययमादेशः स्यात् । गोरक्षीव–अप्राप्यत्वात्

समासान्तेऽति गवाक्षो वातायनः । नाम्नीति किम् । गवामक्षाणि गोऽक्षाणि । गो अक्षाणि । कश्चित्त्वसंज्ञायां गवाक्षाणीत्यपि इच्छति ।

८० स्वरे वाऽनक्षे ॥१।२।२९॥ गोरोकारस्य पदान्ते वर्तमानस्य स्वरे परेऽव इत्ययमादेशो वा स्यात् अनक्षे–स चेत् स्वरोऽक्षशब्दस्थो न भवति । गवाग्रम् । पक्षे यथाप्राप्तम् । गोऽग्रम् । गो अग्रम् । स्वर इति किम् । गोकुलम् । अनक्ष इति किम् । गोऽक्षम् । गो अक्षम् । पदान्त इत्येव । गवि । ओत इत्येव । चित्रग्वर्थः गोरित्येव । द्योऽग्रम् । हे चित्रगवुदकमित्यत्र तु गोशदस्य लाक्षणिकत्वात् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न भवति ।

८१ इन्द्रे ॥ १।२।३० ॥ गोरोकारस्य पदान्ते वर्तमानस्येन्द्रस्थे स्वरे परेऽव इत्ययमादेशः स्यात् । गवेन्द्रः ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां स्वरसन्धिप्रकरणं समाप्तम् ॥

॥ अथाऽसंधिप्रकरणम् ॥

८२ वाऽत्यसंधिः ॥१।२।३१॥ गोरोकास्य पदान्ते वर्तमानस्यात्यकारे स्वरे परेऽसंधिः–प्रकृतिभावो वा स्यात् । गो अग्रम् । पक्षे यथाप्राप्तम् । गोऽग्रम् । गवाग्रम् । अतीति किम् । गवेङ्गितम् । गोरित्येव । द्योऽग्रम् । ओत इत्येव । चित्रग्वग्रम् । हे चित्रगोऽग्रमित्यत्र तु लाक्षणिकत्वान्न भवति । पदान्त इत्येव । गौरिवाचरति गवति ।

८३ ह्रस्वोऽपदे वा ॥१।२।३२॥ इउऋऌवर्णानामस्वे स्वरे परे ह्रस्वो वा स्यात् अपदे–न चेत्तौ निमित्तनिमित्तिनावेकत्र पदे भवतः । नदि एषा । नद्येषा । मधु अत्र । मध्वत्र । पर्जन्यवल्लक्षणप्रवृत्तिरिति न्यायाद् ह्रस्वस्यापि ह्रस्वः । ह्रस्वविधान सामर्थ्यादसंधिः । इवर्णादेरित्येव । मुनयाचर । स्वर इत्येव । नदी वहति । अस्व इत्येव । दधीदम् ।

८४ प्लुतोऽनितौ । १।२।३३ ॥ इतिशब्दवर्जिते स्वरे परे प्लुतः संधिभाग् न स्यात् । देवदत्त ३ अत्र न्वसि । दूरादामन्त्र्यस्येत्यनेनात्र प्लुतः । अनितावितिकिम् । सुश्लोकेति । केचित्तु इतिशब्दे विकल्पमिच्छन्ति । सुश्लोक ३ इति । सुश्लोकेति ।

८५ **संमत्यसूयाकोपकुत्सनेष्वाद्यामन्त्र्यमादौ स्वरेष्वन्त्यश्च प्लुतः** ॥७।४।८९॥ कार्येष्वाभिमत्यं संमतिः, पूजनं वा। परगुणासहनमसूया। कोपः क्रोधः। निन्दा कुत्सनम्। एते प्रयोक्तृधर्मा नाभिधेयधर्माः। एतेष्वर्थेषु वर्तमानस्य वाक्यस्यादिभूतमामन्त्र्यमामन्त्रणीयार्थं पदं द्विरुच्यते। तत्र द्विर्वचने आदौ-पूर्वोक्तौ स्वराणां मध्ये योऽन्त्यस्वरः स प्लुतो वा स्यात्। संमत्यसूयाकोपकुत्सनेष्विति बहुवचनात् द्विर्वचने विकल्पो न संबध्यते। संमतौ-माणवक ३ माणवक माणवक माणवक उदारः खल्वसि। असूयायाम्-माणवक ३ माणवक माणवक माणवक रिक्तं ते आभिरूप्यम्। कोपे-माणवक ३ माणवक माणवक माणवक इदानीं ज्ञास्यसि जाल्म। कुत्सने-शक्तिके ३ शक्तिके शक्तिके शक्तिके रिक्ता ते शक्तिः। संमत्यसूयाकोपकुत्सनेष्विति किम्। देवदत्त गामभ्याज शुक्लां दण्डेन। आदीति किम्। शोभनः खल्वसि माणवक। आमन्त्र्यमिति किम्। उदारो देवदत्तः। आदाविति किम्। उत्तरोक्तौ मा भूत्। स्वरेष्विति किम्। व्यंजनान्तस्यापि यथा स्यात्। अन्त्य इति किम्। आदिर्मध्यो वा मा भूत्। चकारो द्वित्वस्यानुकर्षणार्थः। तथा च चानुकृष्टत्वादुत्तरत्र नानुवर्तते।

८६ **भर्त्सने पर्यायेण** ॥७।४।९०॥ भर्त्सनं कोपेन दण्डाविष्करणम्। तत्र द्विर्वचनं सिद्धमेव, प्लुतार्थ आरंभः। भर्त्सने वर्तमानस्य वाक्यस्य यदामन्त्र्यं पदं तद् द्विरुच्यते। तत्र पर्यायेण-पूर्वस्यामुत्तरस्यां वोक्तौ स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात्। चौर ३ चौर, चौर चौर ३, चौर चौर बंधयिष्यामि त्वाम्।

८७ **त्यादेः साकांक्षस्याङ्गेन** ॥ ७।४।९१ ॥ वाक्यस्य स्वरेष्वन्त्यः प्लुतो वेत्यनुवर्तते भर्त्सन इति च। भर्त्सने वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरस्त्याद्यन्तस्य पदस्य वाक्यान्तराकांक्षस्य अङ्ग इत्यनेन निपातेन युक्तस्य संबंधी प्लुतो वा स्यात्। अङ्ग कूज ३ अङ्ग कूज इदानीं ज्ञास्यसि जाल्म। त्यादेरिति किम्। अङ्ग देवदत्त मिथ्या वदसि। साकांक्षस्येति किम्। अङ्ग पच। नैतदपरमाकाङ्क्षति। अङ्गेनेति किम्। देवदत्त कूजेदानीं ज्ञास्यसि जाल्म। भर्त्सन इत्येव। अङ्गाधीष्व मोदकं ते दास्यामि।

८८ **क्षियाशीः प्रैषे** ॥७।४।९२॥ क्षिया आचारभ्रेषः। आशीः प्रार्थनाविशेषः। प्रैषोऽसत्कारपूर्विका व्यापारणा। एतेषु वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरस्त्याद्यन्तस्य पदस्य वाक्यान्तराकांक्षस्य संबंधी प्लुतो वा स्यात्। क्षियायाम्-

स्वयं ह रथेन याति ३ उपाध्यायं पदातिं गमयति । स्वयं ह रथेन याति उपाध्यायं पदातिं गमयति । आशिषि–सिद्धान्तमध्येषीष्टाः ३ व्याकरणं च तात । सिद्धान्तमध्येषीष्टा व्याकरणं च तात । प्रैषे–त्वं ह पूर्वं ग्रामं गच्छ ३ चैत्रो दक्षिणम् । त्वं ह पूर्वं ग्रामं गच्छ चैत्रो दक्षिणम् । त्यादेरित्येव । भवता खलु कटः कर्तव्यः ग्रामश्च गन्तव्यः । साकांक्षस्येत्येव । दीर्घं ते आयुरस्तु ।

८९ **चितीवार्थे** ॥७।४।९३॥ इवार्थे–उपमायां वर्तमाने चित् इत्यस्मिन्निपाते प्रयुज्यमाने वाक्यस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । अग्निश्चिद् भा३यात् । अग्निश्चिद् भायात् । चितीति किम् । अग्निरिव भायात् । चितीतिरूपसत्ताश्रयणादप्रयोगे न भवति । अग्निर्माणवको भायात् । इवार्थ इति किम् । कर्णवेष्टकांश्चित्कारय । कर्णवेष्टकानेवेत्यर्थः ।

९० **प्रतिश्रवणनिगृह्यानुयोगे** ॥ ७।४।९४ ॥ प्रतिश्रवणं परोक्तस्याभ्युपगमः, स्वयं प्रतिज्ञानं श्रवणाभिमुख्यं च । निगृह्य स्वमतात् प्रच्याव्यानुयोगो निग्रहपदस्याविष्करणं निगृह्यानुयोगः । उपालंभ इति यावत् । एतयोर्वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । अभ्युपगमे–गां मे देहि भोः, हन्त ते ददामि३। हन्त ते ददामि । स्वयं प्रतिज्ञाने–नित्यः शब्दो भवितुमर्हति ३ । नित्यः शब्दो भवितुमर्हति । श्रवणाभिमुख्ये–भो देवदत्त किं मार्ष ३। किं मार्ष । मार्षेति श्रवणाभिमुख्यद्योतको निपातः । निगृह्यानुयोगे–अद्य श्राद्धमित्यात्थ ३ । अद्य श्राद्धमित्यात्थ । अद्य श्राद्धमितिवादी युक्त्या स्वमतात् प्रच्याव्यैवमुपालभ्यते ।

९१ **विचारे पूर्वस्य** ॥ ७।४।९५ ॥ किमिदं स्यात् किमिदमिति निरूपणं विचारः । संशय इति यावत् । तस्मिन् विषये संशय्यमानस्य यत्पूर्वं तस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । अहिर्नु ३ रज्जुर्नु । अहिर्नु रज्जुर्नु ।

९२ **ओमः प्रारंभे** ॥७।४।९६॥ प्रारंभे–प्रणामादेरभ्यादाने वर्तमानस्य ओम्शब्दस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । ओ३म् ऋषभं पवित्रम् । ओमृषभं पवित्रम् । प्रारंभ इति किम् । ओंददामि । ओमित्याभ्युपगमे ।

९३ **हेः प्रश्नाख्याने** ॥ ७।४।९७ ॥ प्रश्नस्याख्याने पृष्टप्रतिवचने वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरो हिशब्दसंबंधी प्लुतो वा स्यात् । अकार्षीः कटं देवदत्त, अकार्षं हि३ । अकार्षं हि । हेरिति किम् । अकार्षीः कटं देवदत्त, करोमि ननु । प्रश्नग्रहणं किम् । कटं देवदत्ताकार्षं हि । अप्रश्नपूर्वकाख्याने न भवति ।

आख्यानग्रहणं किम् । देवदत्त कटमकार्षीर्हि । उत्तरेण सिद्धे नियमार्थं वचनम् । हेः प्रश्नाख्यान एव, हेः प्रश्नाख्याने वाक्यस्य स्वरेष्वन्त्य एव प्लुत इति च ।

९४ प्रश्ने च प्रतिपदम् ॥ ७।४।९८ ॥ प्रश्ने प्रश्नाख्याने च वर्तमानस्य वाक्यस्य संबंधिनः पदस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । प्रश्ने—अगमः ३ पूर्वा३न् ग्रामा३न् देवदत्त ३ ?। अगमः पूर्वान् ग्रामान् देवदत्त ?। प्रश्नाख्याने—अगम ३म् पूर्वा३न् ग्रामा३न् जिनदत्त ३ । अगमम् पूर्वान् ग्रामान् जिनदत्त । प्रश्ने चेति किम् । देवदत्त ग्रामं गच्छ । प्रतिपदमिति किम् । वाक्यस्यैवान्त्यः स्वरः प्लुतो मा भूत् ।

९५ दूरादामंत्र्यस्य गुरुर्वैकोऽनन्त्योऽपि लॢत् ॥ ७।४।९९ ॥ यत्र प्राकृतात् प्रयत्नात् प्रयत्नविशेषे आश्रीयमाणे संदेहो भवति किमयं श्रोष्यति नवेति तददूरम् । वाक्यस्य यः स्वरेष्वन्त्यः स्वरो दूरादामन्त्र्यपदस्य संबंधी गुरुर्वानन्त्योऽपि ऋकारवर्जितः स्वर ऌकारश्चैको दूरादामन्त्र्यस्यैव संबंधी स प्लुतो वा स्यात् । आगच्छ भो इ३न्द्रभूते, इन्द्रभू३ते, इन्द्रभूते २ । महाविभाषयैव प्लुतविकल्पे सिद्धे वाग्रहणं न विकल्पार्थम्, किंत्वन्त्यप्लुतेन सह गुरोः असमावेशार्थम् । तेन क्लृ३प्तशिख ३ इति न भवति । दूरादिति किम् । शृणु देवदत्त । आमंत्र्यस्येति किम् । आगच्छतु देवदत्तः । प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययादिह न स्यात्—आगच्छ भोः कपिलक माणव । अत्र माणवेति कपिलक इत्यस्य विशेषणमिति अप्रधानता । गुरुरिति किम् । अनन्त्यस्य लघोर्मा भूत् । एक इति किम् । अनेकस्य गुरोर्यौगपद्येन मा भूत् । अनन्त्योऽपीति किम् । अन्त्यस्यैव मा भूत् । ऌकारग्रहणमॄदिति प्रतिषेधनिवृत्त्यर्थम् । अथ ऋतः प्रतिषेधे ऌकारस्य कः प्रसङ्गः ?। उच्यते । इदमेव ज्ञापकमृवर्णग्रहणे ऌवर्णस्यापि ग्रहणं भवतीति । तेनाचीक्लृपदित्यादौ ऋवर्णकार्यं ऌवर्णस्यापि सिद्धं भवति । अॄतः किम् । कृष्णमि३त्र, कृष्णमित्र ३ । अॄदिति गुरुर्विशिष्यते, न स्वरेष्वन्त्यस्तेनेहापि भवति । आगच्छ भोः कर्तृ ३ । आगच्छ भोः कर्तृ । वाक्यस्य स्वरेष्वन्त्यः प्लुत इत्यनुवृत्तेरिह न भवति । देवदत्त अहो आगच्छ । अभिपूजितेऽपि दूरादामन्त्र्यस्यैव प्लुत इष्यत इति अभिपूजिते चेति नारंभणीयम् । शोभनः खल्वसि माणवक ३ । शोभनः खल्वसि माणवक ।

९६ हेहैष्वेषामेव ॥ ७।४।१००॥ दूरादामन्त्र्यस्य संबंधिनौ यौ हेहैशब्दौ तौ च तौ यौ तदामंत्रणे वर्तेते तयोः प्रयुज्यमानयोः तयोरेव वाक्ये यत्रतत्रस्थयो-

रन्त्यः स्वरः प्लुतो वा स्यात् । हे ३ देवदत्त आगच्छ । आगच्छ हे ३ देवदत्त । आगच्छ देवदत्त हे ३ । है ३ देवदत्त आगच्छ । आगच्छ है ३ देवदत्त। आगच्छ देवदत्त है ३ । हेहैष्वित्यवधारणस्य विषयार्थम् । एषामिति स्थानिनिर्देशार्थम् । बहुवचनं हइहे हएहै इति लाक्षणिकयोरपि परिग्रहार्थम् । एवकारोऽन्त्यस्य प्लुतस्य व्युदासार्थः । अत एव चैवकारात् यत्रतत्रस्थयोः प्लुतो विज्ञायते ।

९७ **अस्त्रीशूद्रे प्रत्यभिवादे भोगोत्रनाम्नो वा** ॥ ७।४।१०१ ॥ यदभिवाद्यमानो गुरुः कुशलानुयोगेनाशिषा वा युक्तं वाक्यं प्रयुङ्क्ते स प्रत्यभिवादः । तस्मिन्नस्त्रीशूद्रविषये वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरो भोः शब्दस्य गोत्रस्य नाम्नो वामन्त्र्यस्य संबंधी प्लुतो वा स्यात् । अभिवादये देवदत्तोऽहं भोः । आयुष्मानेधि भोः ३ । आयुष्मानेधि भोः । गोत्रे–अभिवादये गार्ग्योऽहं भोः । आयुष्मानेधि गार्ग्य ३ । आयुष्मानेधि गार्ग्य । राजन्यविशोरपि गोत्रत्वमेव । अभिवादयेऽहमिन्द्रवर्मा भोः । आयुष्मानेधीन्द्रवर्म ३ न् । इन्द्रवर्मन् । आभिवादये इन्द्रपालितोऽहं भोः । आयुष्मानेधीन्द्रपालित ३ । इन्द्रपालित । नाम–अभिवादये देवदत्तोऽहं भोः । आयुष्मानेधि देवदत्त३। देवदत्त । स्त्रीशूद्रवर्जनं किम् । अभिवादये गार्ग्यहं भोः, आयुष्मती भव गार्गि । अभिवादये तुषजकोऽहं भोः, आयुष्मानेधि तुषजक। प्रत्यभिवादे इति किम् । अभिवादये स्थाल्यहं भोः । आयुष्मानेधि स्थालि ३ । अभिवादयिताह–खरकुटीवन्न ममेकारान्ता संज्ञा, का तर्हि दण्डिवन्नकारांता संज्ञा । पुनर्गुरुराह–आयुष्मानेधि स्थालि३न् । स पुनराह–ईकारान्तैव मम संज्ञा, स प्रत्युच्यते–असूयकस्त्वमसि जाल्म, न त्वं प्रत्यभिवादमर्हसि, भिद्यस्व दृषल स्थालि। भोगोत्रनाम्न इति किम् । देवदत्त कुशल्यसि, देवदत्तायुष्मानेधि । पुनर्वाग्रहणमुत्तरत्र वाधिकारनिवृत्त्यर्थम् ।

९८ **प्रश्नार्चाविचारे च संधेयसंध्यक्षरस्यादिदुत्परः** ॥ ७।४।१०२ ॥ संधेयः संधियोग्यः, यः कचित् स्वरे परे विकारमापद्यते । प्रश्नेऽर्चायां विचारे प्रत्यभिवादे च वर्तमानस्य वाक्यस्य संबंधिनः स्वरेष्वन्त्यस्वरस्य संधेयसंध्यक्षरस्य प्लुतो भवन् आकार इदुत्परः प्लुतः स्यात् । स च प्रत्यासत्या एकारैकारयोरिकारपर ओकारौकारयोरुकारपरो भवति । प्रश्ने–अगमः ३ पूर्वां ३ न् ग्रामा ३ नग्निभूता-३ इ ?। पटा ३ उ ?। प्रश्ने च प्रतिपदमिति प्लुतः । अर्चा पूजा तस्याम्–दूरादामंत्र्यस्येति प्लुतः । शोभनः खल्वसि अग्निभूता ३ इ । पटा ३ उ । विचारे–वस्तव्यं

किं निर्ग्रन्थस्य सागारिका ३ इ उतानागारिके । प्रत्यभिवादे–आयुष्मानेधि अग्निभूता ३ इ । पटा ३ उ । प्रश्नार्थविचारे चेति किम् । आगच्छ भो अग्निभूते ३ । संध्येयग्रहणं किम् । कच्चि३त् कुशल३म् भवत्योः ३ कन्ये ३ ? । संध्यक्षरस्येति किम् । भद्रिकाऽसि कुमारि ३ । वाक्यस्य स्वरेष्वन्त्यस्वर इति विज्ञानादिह न भवति, अगमः ३ पूर्वौ ३ ग्रामौ ३ देवदत्त ३ ।

९९ **तयोर्य्वौ स्वरे संहितायाम् ॥७।४।१०३॥** तयोः प्लुताकारात् परयोरिदुतोः स्थाने स्वरे परे संहितायां विषये यथासंख्यं यकारवकारादेशौ स्तः । अगमः ३ अग्निभूता ३ यत्रागच्छ । अगमः ३ पटा ३ वत्रागच्छ । स्वे दीर्घत्वस्याऽस्वे स्वरे ह्रस्वत्वस्य बाधनार्थं वचनम् । स्वर इति किम् । अग्ना ३ इ । पटा ३ उ । संहितायामिति किम् । अग्ना३इ इन्द्रम् । पटा ३ उ उदकम् । केचिदैदौतोश्चतुर्मात्रं प्लुतमिच्छन्ति । ऐ ४ तिकायन । औ४पगव ।

१०० **इ ३ वा ॥१।२।३३॥** इ ३ इति प्लुतः स्वरे परे वाऽसंधिः स्यात् । इतावप्राप्तेऽन्यत्र प्राप्ते उभयत्र विकल्पोऽयम् । लुनीहि ३ इति । लुनीहीति । कथं वशा३इयम् वशेयम् । छांदसावेतौ ।

१०१ **ईदूदेद् द्विवचनम् ॥१।२।३४॥** ईत् ऊत् एत् इत्येवमन्तं द्विवचनं स्वरे परेऽसंधिः स्यात् । त्रपुणी अत्र । साधू एतौ । कुण्डे अत्र । ईदूदेदिति किम् । वृक्षावत्र । द्विवचनमिति किम् । कुमार्यत्र । एषां प्लुतानामितावपि संधिर्न स्यात् । अग्नी ३ इति । स्वर इत्येव । तवेकामौ तवे । प्रत्यासत्तेः स्वरनिमित्तककार्यप्रतिषेधादिह भवत्येव । तव ईतवे आसाते । केचितु ' मणीवोष्ट्रस्य लंबेते भियौ वत्सतरौ मम ' इति प्रयोगदर्शनात् मणी इव मणीवेत्यादावसंधिप्रतिषेधं वर्णयन्ति, तदयुक्तम् । वाशब्देनोपमार्थेन सिद्धत्वात् । ' मणी इवोद्भिन्नमनोहरत्विषौ ' इत्यादावसंधिदर्शनाच्च । अन्ये तु यथादर्शनं संधिमसंधिं वेच्छन्ति । मणीव । दंपतीव । रोदसीव । मणी इव ।

१०२ **अदो मुमी ॥ १।२।३५ ॥** अदस्शब्दसंबंधिनौ मुमी इत्येतावसंधी स्तः स्वरे परे । अमुमुईचा । अमी आसते । अदसिति किम् । *अम्यत्र ।

१०३ **चादिः स्वरोऽनाङ् ॥ १।२।३६ ॥** आङ्वर्जितश्चादिरव्ययसंज्ञकः स्वरः स्वरे परेऽसंधिः स्यात् । अ अपेहि । आ एवं किल मन्यसे । आ एवं नु तत् । विस्मये, इ इन्द्रं पश्य । उ उत्तिष्ठ । चादिरिति किम् । अ (विष्णो) आगच्छ आ-

* अम् गतौ, इत्यतो भावे घञि अमः, सोऽस्यातीति इन् ।

गच्छ। कथं तितउः परिवपनम्। 'तनेर्डउः' इति डउविधानबलाद् असंधिर्भविष्यति। उत्तरत्रान्तग्रहणादिह केवलो गृह्यतेतेनेहन। चेति। स्वर इत्येव। जानु उ जानू। स्वर इति प्रत्यासत्तेस्तन्निमित्तकसंधिप्रतिषेधादिह दीर्घत्वलक्षणः संधिर्भवत्येव। जानु उ अस्य रुजति, जानू अस्य रुजति। केचित्तु चाद्यचादिस्थानस्याचादिरूपत्वात् स्वरनिमित्तकमपि संधिमिच्छन्ति। जानु उ अस्य रुजति, जान्वस्य रुजति। अनाङिति किम्। आ–ईषदुष्णमोष्णम्।

'ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्'॥

१०४ ओदन्तः ॥१।२।३७॥ ओकारान्तश्चादिः स्वरे परेऽसंधिः स्यात्। अहो अत्र। चादिरित्येव। गवीश्वरः।

१०५ सौ नवेतौ ॥१।२।३८॥ सिनिमित्तो य ओदन्तः स इतौ परेऽसंधिर्वा स्यात्। पटो इति। पटविति। साविति किम्। अहो इति। गवित्ययमाह। गौरिति वक्तव्येऽशक्त्या गो इत्युक्तमनुक्रियते। स्याद्वादाश्रयणाच्चानुकार्यानुकारणयोरभेदविवक्षायामसत्यर्थवत्त्वे विभक्तिर्न भवति। इताविति किम्। पटोऽत्र।

१०६ ऊँ चोञ् ॥१।२।३९॥ उञ्शब्दश्चादिरितिशब्दे परेऽसंधिर्वा स्यात्, असंधिपक्षे च उञ ऊँ इत्येवंरूपो दीर्घोऽनुनासिको वा स्यात्। तथा च सति त्रैरूप्यं सिद्धं भवति। उ इति, ऊँ इति, विति। इताविति। उ उत्तिष्ठ। ञित्करणं स्वरूपपरिग्रहार्थम्, तेन विकृतस्य न भवति। अह उ–अहो, अहो इति। अथ ऊँ इत्येव चादिषु पठ्यतां, किमादेशेन। नैवम्। तस्याऽनितावपि प्रयोगः प्रसज्येत, तन्निषेधार्थमादेशवचनम्।

१०७ अञवर्गात् स्वरे वोऽसन् ॥१।२।४०॥ ञकाररहितेभ्यो वर्गेभ्यः पर उञ् स्वरे परे वकारो वा स्यात्, स चासन्–अभूतवत्। क्रुङ्ङ्वास्ते। क्रुङ्ङु आस्ते। असत्त्वाद् द्वित्वम्। वर्गादिति किम्। स्वरु उपैति। अञिति किम्। यञु एति। स्वर इति किम्। किञु गच्छति।

* सप्तम्यर्थे पर्यवसन्नमीदूदन्तं संधिं न भजते, इति केषांचिन्मते, सोमो गौरी[1] अधिश्रितः, मामकी तनू[2] इति, एवमादिषु संधिर्न स्यात्। सप्तम्यर्थ इति अर्थग्रहणाद् वृत्तावर्थान्तरोपसंक्रान्ते तु संधिर्भवत्येव। वाप्यामश्वो वाप्यश्वः।

---

[1] अत्र सप्तम्या लोपश्छान्दसः।

१०८ **अइउवर्णस्यान्तेऽनुनासिकोऽनीदादेः** ॥१।२।४१॥ अवर्णस्येवर्णस्योवर्णस्य चान्ते–विरामे वर्तमानस्यानुनासिक आदेशो वा स्यात्, अनीदादेः–न चेदयमीदूदेद्द्विवचनमित्यादिसूत्रसंबंधी स्यात् । पदान्ताधिकारेऽन्तग्रहणं विरामप्रतिपत्त्यर्थम् । स च विरामे भवन् पदस्यान्ते भवति, केवलमुपसर्गस्य समासान्तर्वर्तिनश्च न भवति, । सामँ, साम । दधिँ, दधि । मधुँ, मधु । अइउवर्णस्येति किम् । कर्तृ । हर्तृ । अन्त इति किम् । दधि करोति । अनीदादेरिति किम् । अग्नी । चादिसूत्रे चादेः स्वरस्य केवलस्याङ्वर्जितस्य च ग्रहणादिह भवत्येव । अँ इति विष्णोः संबोधनम् । प्लक्षश्चँ न्यग्रोधश्चँ । पाटलिपुत्रादाँ ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायामसंधिप्रकरणं
समाप्तम् ॥

॥ अथ व्यंजनसंधिप्रकरणम् ॥

१०९ **तवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ** ॥१।३।६०॥ तवर्गस्य स्थाने शकारचवर्गाभ्यां च योगे यथासंख्यं चवर्गटवर्गावादेशौ स्तः स्थान्यासन्नौ । समुदायद्वयापेक्षया यथासंख्यार्थं तृतीयाद्विवचनम् । योगग्रहणं स्थानित्वाऽऽशंसानिरासार्थं पूर्वापरभावानियमार्थं च । तच् शेते । तच्चरति । पेष्टा । तट्टीकते । अत्र (तच् शेते, तच्चरति, इत्यादौ) तवर्गस्य चवर्गे कृते 'चजः कगम्' (२–७–८६) इति न भवति, 'असिद्धं बहिरङ्गमन्तरङ्गे' इति न्यायात् । तत्र च प्रत्ययाधिकारान्मज्जतीत्यादावपि न भवति । एवमुत्तरत्रापि (वृश्चतीत्यादौ 'सस्य शषौ' इत्यनेन कृतस्य) शकारस्य (यजसृजेति) षत्वमपि (प्रत्ययाभावादेव) न भवति ।

११० **सस्य शषौ** ॥१।३।६१॥ सकारस्य स्थाने श्चवर्गष्टवर्गाभ्यां योगे यथासंख्यं शकारषकारावादेशौ स्तः । वृश्चति । मज्जति । सर्पिष्षु । पापट्षि । * पदान्ताऽपदान्तयोरयं विधिः ।

१११ **न शात्** ॥१।३।६२॥ शकारात् परस्य तवर्गस्य स्थाने यदुक्तं तन्न स्यात् । अश्नाति ।

११२ **पदान्तात्टवर्गादनाम्नगरीनवतेः** ॥१।३।६३॥ पदान्ते वर्तमानात्टवर्गात्परस्य नाम्नगरीनवतिसंबंधिवर्जितस्य तवर्गस्य सकारस्य च यदुक्तं तन्न स्यात् । षट् तयम् । मधुलिट्सु । टवर्गादिति किम् । चतुष्टयम् । पदान्तादिति किम् ।

ईट्टे। अनाम्नगरीनवतेरिति किम्। षण्णाम्। षण्णगरी। षण्णवतिः। नामित्यादेशस्य ग्रहणादिह प्रतिषेधो भवत्येव। षड् नाम।

११३ **षि तवर्गस्य** ॥१।३।६४॥ पदान्ते वर्तमानस्य तवर्गस्य स्थाने षकारे परे यदुक्तं तन्न स्यात्। तीर्थकृत् षोडशः शांतिः। षीति किम्। तट्टीकते। तवर्गस्येति किम्। सर्पिष्षु। वाक् ङ्वते, इत्यत्र धुटस्तृतीय इत्यनेन गत्वे–

११४ **तृतीयस्य पञ्चमे** ॥१।३।१॥ वेति पदान्त इति अनुनासिक इति चानुवर्तते। पदान्ते वर्तमानस्य वर्गतृतीयस्य वर्गपञ्चमे परेऽनुनासिको वा स्यात्, स्थान्यासन्नः। वाङ् ङ्वते। वाग् ङ्वते। तृतीयस्येति किम्। स्वर्नयति। पदान्त इत्येव। विद्मः। पञ्चम इति किम्। वागत्र। केचितु व्यंजनस्य स्थानेऽनुनासिके परे वाऽनुनासिकमिच्छन्ति, तस्य तु 'ह्रस्वान्डण्णनो द्वे' (१–३–२७) इति द्वित्वं च नेच्छन्ति, तन्मते लङ्ँ इति। लगूँ इति। ननु षण्नया इत्यादौ 'अदीर्घाद् विरामैकव्यंजने' इत्यनेन तृतीयस्य द्वित्वे कृतेऽन्तस्यानुनासिके च तृतीयस्यापि श्रुतिः प्राप्नोति। नैवम्। अनुनासिके कृते पश्चाद् द्वित्वस्य भावात्। तेन षण्ँ नयाः, षड्ड्नयाः इत्यादि सिद्धम्।

११५ **प्रत्यये च** ॥१।३।२॥ पदान्ते वर्तमानस्य तृतीयस्य स्थाने पञ्चमादौ प्रत्यये परेऽनुनासिकः स्यात्। नित्यार्थं वचनम्। वाङ् मयम्। चकार उत्तरत्र (ततो ह्रश्चतुर्थ इत्यादौ) विकल्पानुवृत्त्यर्थः।

११६ **लि लौ** ॥१।३।६५॥ पदांते वर्तमानस्य तवर्गस्य स्थाने लकारे परे स्थान्यासन्नावनुनासिकाऽननुनासिकौ लकारौ स्तः। तल्लुनाति। भवाँल् लुनाति। 'आसन्न' इत्येव सिद्धे द्विवचनमन्यत्राऽनुनासिकस्याऽपि स्थानेऽननुनासिकार्थम्।

११७ **उदः स्थास्तंभः सः** ॥१।३।४४॥ उदः परयोः स्थास्तम्भ इत्येतयोः सकारस्य लुक् स्यात्। अनेन 'उद् स्थाता, उद् स्तम्भिता' इत्यत्र सकारस्य लुकि।

११८ **अघोषे प्रथमोऽशिटः** ॥१।३।५०॥ शिड्वर्जितस्य धुटः स्थानेऽघोषे परे प्रथमः स्यात्। इति दकारस्य तकारः। उत्थाता। उत्तम्भिता। उद इति किम्। उत्स्नोता। उत्स्कन्नः। स इति किम्। उत्तिष्ठति। उदस्थात्। प्रत्यासत्तेः स्थास्तम्भविशेषणस्यैवोदो ग्रहणादिह न भवति। ऊर्ध्वं स्थानमस्योत्स्थानः। कथमुत्स्कन्दतीति उत्स्कदको रोग इति? पृषोदरादित्वाद् भविष्यति।

११९ **ततो हश्चतुर्थः** ॥ १।३।३ ॥ पदान्ते वर्तमानात् तृतीयात् परस्य हकारस्य स्थाने प्रत्यासत्या पूर्वसवर्गश्चतुर्थो वा स्यात् । वाग्घीनः, वाग्हीनः । तत इति किम् । माङ् हसति ।

१२० **प्रथमादधुटि शश्छः** ॥१।३।४॥ पदान्ते वर्तमानात् प्रथमात् परस्य शकारस्य स्थानेऽधुटि परे छकारादेशो वा स्यात् । वाक्छूरः । वाक्शूरः । प्रथमादिति किम् । माङ् शूरः । अधुटीति किम् । वाक्श्रयोतति ।

१२१ **तौ मुमो व्यंजने स्वौ** ॥१।३।१४॥ मु इत्यागमस्य पदान्तस्थस्य च मस्य व्यंजने परे तस्यैव स्वावनुस्वाराऽनुनासिकौ पर्यायेण स्याताम् । मग्रहणेनैव सिद्धे मुग्रहणमपदान्तार्थम् । स्वेत्यनुनासिकस्य विशेषणम्, नानुस्वारस्यासंभवात् । चंक्रम्यते । चङ्क्रम्यते । वहंलिहः । वहँल्लिहः । पदान्त इत्येव । गम्यते । व्यंजन इति किम् । किमत्र । स्वाविति किम् । रंरम्यते ।

१२२ **मनयवलपरे हे** ॥१।३।१५॥ मनयवलपरे हकारे परे पदांते वर्तमानस्य मकारस्य स्थानेऽनुस्वाराऽनुनासिकौ स्वौ पर्यायेण स्याताम् । किं ह्रलयति । किम्ह्रलयति । किं न्हुते । किन् न्हुते । किम् ह्यः । किँय् ह्यः । किं ह्वलयति । किंव्ँह्वलयति । किं ह्लादते । किँल् ह्लादते । मादिपर इति किम् । किं हंसति । हं इति किम् । किं ज्वलति ।

१२३ **सम्राट्** ॥१।३।१६॥ समो मकारस्य किबंते राजतौ परेऽनुस्वाराभावो निपात्यते । सम्राड् भरतः ।

१२४ **ङ्णोः कटावन्तौ शिटि न वा** ॥१।३।१७॥ पदान्ते वर्तमानयोर्ङकारणकारयोः शिटि परे यथासंख्यं क् ट् इत्येतावन्तौ स्याताम् ।

१२५ **शिट्याद्यस्य द्वितीयो वा** ॥१।३।५९॥ आद्यस्य–प्रथमस्य स्थाने शिटि परे द्वितीयो वा स्यात् ॥ प्राङ्क् षण्डे, प्राङ्ख् षण्डे । प्राङ् षण्डे । सुगण्ट्सु । सुगण्ट्सु । सुगण्सु । ङ्णोरिति किम् । भवाञ् शेते । शिटीति किम् । प्राङ् करोषि । पदान्त इत्येव नभण्षि ।

१२६ **ङ्नः सः त्सोऽश्चः** ॥१।३।१८॥ पदान्ते वर्तमानाड् ङकारान् नकाराच्च परस्य सकास्य स्थाने त्स इत्ययं तकारादिः सकारादेशो वा स्यात् , अश्चः-श्संयोगावयवश्चेत् सकारो न स्यात् । षट्त्सीदन्ति । ङकारनिर्देशाट्टत्वं न भवति ।

केचित्तु टत्वमपीच्छन्ति। षट्सीदन्ति। पक्षे–षट्सीदन्ति। भवान्त्साधुः। भवान्साधुः। स इति किम्। षड्भवन्ति। अश्व इति किम्। षट्श्वयोतन्ति।

१२७ **नः शिश्** ॥१।३।१९॥ पदान्ते वर्तमानस्य नकारस्य स्थाने शकारे श् इत्ययमादेशो वा स्यात्, अश्वः–श्वावयवश्चेन्न स्यात्। अनेन सूत्रेण 'भवान् शूरः' इत्यत्र वैकल्पिके श्रादेशे कृते 'प्रथमादधुटि शश्छः' इत्यनेन छत्व-विकल्पे च पक्षे–

१२८ **धुटो धुटि स्वे वा** ॥१।३।४८॥ व्यंजनात् परस्य धुटो धुटि स्वे परे लुग्वा स्यात्। अनेन चकारलोपः। तदेवं श्रादेशछत्वचलोपानां विकल्पनात् चातुरूप्यं भवति। भवाञ्छूरः। भवाञ्च्छूरः। भवाञ्श् शूरः। भवाञ् शूरः। आदेशबलात् कत्वं न भवति। शीति किम्। भवान् करोति। अश्व इत्येव। भवाञ्श् योतति।

१२९ **ह्रस्वान् ङ्ण्नो द्वे** ॥१।३।२७॥ ह्रस्वात् परेषां पदान्ते वर्तमानानां ङ् ण् न् इत्येषां वर्णानां स्थाने स्वरे परे द्वे रूपे स्याताम्। क्रुङ्ङास्ते। सुगण्णिह। पचन्नास्ते। कुर्वन्नास्ते, कृषन्नास्ते इत्यत्र तु बहिरङ्गस्य द्वित्वस्यासिद्धत्वाण्णत्वं न। ह्रस्वादिति किम्। प्राङास्ते। ङ्ण्न इति किम्। त्वमत्र। स्वर इत्येव। प्रत्यङ्-शेते। पदान्त इत्येव। वृत्रहणौ, दण्डिनौ, उणादयः इत्यादौ स्वरूपनिर्देशात्, 'अनतः' इत्यादौ त्वन्विधानबलान्न भवति।

१३० **नोऽप्रशानोऽनुस्वारानुनासिकौ च पूर्वस्याधुट्परे** ॥१।३।८॥ पदांते वर्तमानस्य प्रशान्वर्जितशब्दसंबंधिनो नकारस्य स्थाने चटतेषु सद्वितीयेष्वधुट्परेषु परेषु यथासंख्यं शषस इत्येते आदेशाः स्युः, अनुस्वारानुनासिकौ च पूर्वस्य–अनुस्वार आगमोऽनुनासिकश्रादेशः पूर्वस्य क्रमेण भवत इत्यर्थः। भवाँश्चरति। भवांश्चरति। भवाँश्छादयति। भवाँश्छादयति। भवाँष्टीकते। भवांष्टीकते। भवाँष्ठकारः। भवांष्ठकारः। भवाँस्तरति। भवांस्तरति। भवाँस्थुडति। भवांस्थुडति। अप्रशान इति किम्। प्रशान्तरति। अधुट्पर इति किम्। भवान्त्सरुकः। पदान्त इत्येव। भवन्तः। विरामे प्रतिषेधस्य वक्ष्यमाणत्वादिह न भवति। भवान् चरति।

१३१ **पुमोऽशिट्यघोषेऽख्यागि रः** ॥१।३।९॥ पुमिति पुम्सः कृतसंयोगान्तलोपस्यानुकरणम्। अधुट्परेऽघोषे शिट्रख्यागवर्जिते परे पुमित्येतस्य रोऽन्तादेशः स्यादनुस्वारानुनासिकौ च पूर्वस्य।

१३२ पुंसः ॥२।३।३॥ पुंस्शब्दसंबंधिनो रेफस्य कखपफेषु परेषु सः स्यात्। पुंस्काभा । पुँस्कामा । पुंस्पुत्रः । पुँस्पुत्रः । अशिटीति किम् । पुंशरः । अघोष इति किम् । पुंदासः । अधुट्परे इत्येव । पुंक्षुरः । अख्यागिति किम् । पुंख्यातः ।

१३३ नॄनः पेषु वा ॥१।३।१०॥ नॄनिति शसन्तस्य नृशब्दस्यानुकरणम्। नॄनः पकारे परे रोऽन्तादेशो वा स्यात्, अनुस्वारानुनासिकौ च पूर्वस्य ।

१३४ रः कखपफयोः ×क>पौ ॥१।३।५॥ पदान्ते वर्तमानस्य रेफस्य कखे फ्फे च परे यथासंख्यं ×क>पौ—जिह्वामूलीयोपध्मानीयावादेशौ वा स्याताम्। ककारपकाराकारा उच्चारणार्थाः ।

१३५ रः पदान्ते विसर्गस्तयोः ॥ १।३।५३ ॥ विरामेऽघोषे च परे पदांतस्थस्य रेफस्य विसर्गः स्यात् । अनेन पक्षे विसर्गोऽपि । नॄ> पाहि । नॄः पाहि । नॄँ> पाहि । नॄँः पाहि । नॄन् पाहि । पेष्विति किम् । नॄन् योजयति । बहुवचनस्य व्याप्त्यर्थत्वादधुट्पर इति निवृत्तम् ।

१३६ द्विः कानः कानि सः ॥१।३।११॥ कानिति किमः शसन्तस्यानुकरणम् । द्विरुक्तस्य कानः कानि परे सकारान्तादेशः स्यात्, अनुस्वारानुनासिकौ च पूर्वस्य । कांस्कान् । काँस्कान् । द्विरिति किम् । कान् कान् पश्यति । अत्रैकः किं प्रश्नेऽन्यस्तु क्षेपे । कानीति किम् । कांस्कान् पश्यति । रस्याधिकारेणैव सिद्धे सविधानं (सो रुः इति) रुत्वबाधनार्थम् ।

१३७ स्सटि समः ॥ १।३।१२ ॥ समित्येतस्य स्सटि परे सकारान्तादेशः स्यात् , अनुस्वारानुनासिकौ च पूर्वस्य । संस्स्कर्ता । सँस्स्कर्ता । स्सटीति किम् । संकृतिः । संचस्कारेत्यत्र तु व्यवधानान्न भवति, सम इति किम् । उपस्कर्ता।

१३८ लुक् ॥१।३।१३॥ समित्येतस्य स्सटि परे लुगन्तादेशः स्यात् । पृथग्योगादनुस्वारानुनासिकौ च पूर्वस्येति निवृत्तम्। सस्कर्ता । केचित्त्वत्राऽप्यनुनासिकमिच्छन्ति । सँस्कर्ता ।

१३९ स्वरेभ्यः ॥१।३।३०॥ बहुवचनं व्याप्त्यर्थम् । तेन पदान्त इति नानुवर्तते । स्वरात् परस्य छस्य पदान्तेऽपदान्ते च द्वे स्तः । इच्छति । वृक्षच्छाया । स्वरेभ्य इति किम् । वाक् छत्रम् ।

१४० अनाङ्माङो दीर्घाद्वा छः ॥१।३।२८॥ आङ्माङ्वर्जितपदसंबंधिनो दीर्घात् पदान्ते वर्तमानात् परस्य छस्य द्वे वा स्तः । कन्याच्छत्रम् । कन्या-

छत्रम् । अनाङ्माङ इति किम् । आच्छाया। माच्छिदत् । अत्र ' स्वरेभ्यः ' इति नित्यमेव । ङित्करणादेषु विकल्प एव-आच्छायां मन्यसे, आ छायां मन्यसे। वाक्य-स्मरणयोरयमाकारः । माच्छिन्धि । माछिन्धि । आङ्साहचर्येणाव्ययस्य माङो ग्रहणादिहापि विकल्प एव । ममिमीते इति ममाः, विच् । ममाच्छात्रः।ममाछात्रः। दीर्घादिति किम् । श्वेतच्छत्रम् । पदान्त इत्येव । ह्रीच्छति ।

१४१ प्लुताद्वा ॥ १।३।२९॥ पदान्ते वर्तमानात् दीर्घस्थानात् प्लुतात् परस्य छस्य द्वे वा स्तः । आगच्छ भो इन्द्रभूते ३ च्छत्रमानय । आगच्छ भो इन्द्र-भूते ३ छत्रमानय । दीर्घादित्येव । आगच्छ भो देवदत्त ३ छत्रमानय ।

१४२ न संधिः ॥१।३।५२॥ उक्तो वक्ष्यमाणश्च विरामे संधिर्न स्यात् । दधि अत्र । ते आहुः । तत् लुनाति । भवान् लुनाति । कुर्वन् शेते । वृक्षस्य छाया । ब्राह्मणस्य छत्रम् । भवान् छादयति । नून् पाहि । कुण्डम् हसति । वृक्षद् याति । कुर्वन् आस्ते । विरामादन्यत्र संहितायां संधिरेव । सा च–

' संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते' ॥

इति श्रीसिद्धहैमबृहत्प्रक्रियायां व्यंजनसंधिप्रकरणम्
समाप्तम्. ॥

॥ अथ रेफसंधिप्रकरणम् ॥

कस् शेते इति स्थिते

१४३ सो रुः ॥ २।१।७२ ॥ पदांते वर्तमानस्य सस्य रुरादेशः स्यात् । इत्यनेन रुत्वे—

१४४ शषसे शषसं वा ॥१।३।६॥ पदांते वर्तमानस्य रेफस्य शषसेषु परेषु यथासंख्यं शषस इत्येते आदेशा वा स्युः । कश्शेते । पक्षे 'रः पदान्ते' इत्य-नेन विसर्गः । कः शेते । एवम्–कष्षण्डः । कः षण्डः । कस्साधुः । कः साधुः । कथं गीर्षु, धूर्षु । अरो रेफस्य सुपि रेफो वक्ष्यते । कःश्शकार इत्यादिषु त्वघोषे शिट्परे विसर्जनीयस्य विधानाद् रेफ एव नास्तीति न भवति । एवं पूर्वोत्तरयो-रपि योगयोर्द्रष्टव्यम् । वासः क्षौमम् । अग्निः प्सातम् । असेः त्सरुः । नवाधिकारे वाग्रहणं उत्तरत्र विकल्पनिवृत्त्यर्थम् ।

१४५ **चटते सद्वितीये** ॥१।३।७॥ पदांते वर्तमानस्य रेफस्य चटतेषु सद्वितीयेषु परेषु यथासंख्यं शषस इत्येते आदेशाः स्युः । कश्चरति। कश्छादयति। कष्टीकते । कष्टकारः । कस्तरति । कस्थुडति ।

१४६ **ख्यागि** ॥१।३।५४॥ पदान्ते वर्तमानस्य रेफस्य ख्यागि परे विसर्ग एव स्यात् । कःख्यातः । रः पदान्त इत्यनेनैव सिद्धे नियमार्थमिदम् । तेन जिह्वामूलीयो न ।

१४७ **शिट्यघोषात्** ॥१।३।५५॥ अघोषात् परे शिटि परतः पदान्ते वर्तमानस्य रेफस्य विसर्ग एव स्यात् । परुषः त्सरुकः । वासः क्षौमम् । इदमपि नियमार्थम् । तेन सत्वषत्वx क्ष्पा न भवन्ति ।

१४८ **व्यत्यये लुग्वा** ॥१।३।५६॥ शिटः परोऽघोष इति व्यत्ययः। तस्मिन् सति पदान्ते वर्तमानस्य रेफस्य लुग्वा स्यात् । चक्षुश्श्योतति। पक्षे चक्षुश् श्योतति । चक्षुः श्योतति ।

१४९ **नमस्पुरसो गतेः कखपफि रः सः** ॥२।३।५॥ गतिसंज्ञयोर्नमस्-पुरस् इत्येतयोः संबंधिनो रेफस्य कखपफेषु परेषु सकारादेशः स्यात् । नमस्कृत्य। पुरस्कृत्य । गतेरिति किम् । नमःकृत्वा । नमः करोति, नमःशब्दमुच्चारयतीत्यर्थः । नमःशब्दस्य कृग्योगे विकल्पेन गतिसंज्ञाविधानाद् वा ।

१५० **तिरसो वा** ॥२।३।२॥ गतिसंज्ञकस्य तिरःशब्दसंबंधिनो रेफस्य कखपफेषु परेषु सकारादेशो वा स्यात् । तिरस्कृत्य । तिरःकृत्य । गतेरित्येव । तिरःकृत्वा काष्ठं गतः । अन्तर्धावपि 'कृगो नवा' इति विकल्पेन गतिसंज्ञाविधानात् तिरः कृत्वा । अगतेरप्यन्तर्धाविच्छत्यन्यः । तिरस्कृत्वा ।

१५१ **शिरोऽधसः पदे समासैक्ये** ॥२।३।४॥ शिरस् अधस् इत्येतयोः संबंधिनो रेफस्य पदशब्दे परे सः स्यात् समासैक्ये—तौ चेन्निमित्तनिमित्तिनावेकत्र समासे भवतः । शिरस्पदम् । अधस्पदम् । 'अव्ययं भवद्धादिभिः' इति समासः । पद इति किम् । शिरः खण्डम् । समासेतिकिम् । शिरःपदम् । अधः पदम् । ऐक्य इति किम् । परमशिरःपदम् । परमाधःपदम् ।

१५२ **अतः कृकमिकंसकुंभकुशाकर्णीपात्रेऽनव्ययस्य** ॥ २।३।५॥ अकारात् परस्याऽनव्ययसंबंधिनो रेफस्य कृकम्यादिस्थेषु कखपफेषु परेषु सः स्यात्, तौ चेन्निमित्तनिमित्तिनावेकत्र समासे भवतः। अयस्कृत् । यशस्कामः । अय-

स्कंसः । पयस्कुंभः । अयस्कुशा । अयस्कर्णी । अयस्पात्रम् । नामग्रहणे लिङ्गविशिष्टस्याऽपि ग्रहणात् अयस्कुंभी, अयस्पात्री । शुनस्कर्ण इति तु कस्कादिः । अत इति किम् । गीः कारः । भास्कर इति तु कस्कादिः । कृकम्यादिष्विति किम् । अयःकीलः । अनव्ययस्येति किम् । स्वःकामः । समास इत्येव । यशः करोति । ऐक्य इत्येव । उपपयः कारः । अयः कुंभकपालम् । अत्र हि निमित्तनिमित्तिनौ नैकसमासस्थौ । यदा त्वेवं समासोऽयसः कुंभोऽयस्कुंभस्तस्य कपालं तदा भवत्येवायस्कुंभकपालम् इत्यादि । इह कृकम्योः केवलयोः समासो न भवतीति प्रत्ययान्तयोर्ग्रहणम् । अथ किवन्ता धातुत्वं न जहतीति किबन्तयोरेव कस्मान्न भवति । 'गतिकारकस्य' (३. २–८४) इत्यादिसूत्रे किब्ग्रहणात् । न ह्यन्यप्रत्ययान्तानां धातूत्तरपदानामग्रहणात् किब्ग्रहणमर्थवद् भवति । कमिग्रहणात् कामयतेर्न भवति । पयः कामयते पयःकामा । 'शीलिकामिभक्ष्याचरी'ति कृदन्तसूत्रेण णप्रत्ययः । कमेस्त्वणि पयस्कामीति भवति । कथं पयस्कामा । कमनं कामः, पयसि कामोऽस्या इति बहुव्रीहिणा भविष्यति । कमिग्रहणेनैव कंसे लब्धे पृथक्कंसग्रहणं ज्ञापकमस्तीदमपि दर्शनमुणादयोऽव्युत्पन्नानि नामानीति ।

१५३ **प्रत्यये** ॥२।३।६॥ अनव्ययस्य यो रेफस्तस्य प्रत्ययविषयेषु कखपफेषु सः स्यात् । पाशकल्पकाः प्रयोजयन्ति, काम्ये विशेषविधानादन्यस्य चाभावात् । पयस्पाशम् । पयस्कल्पम् । पयस्कम् । अनव्ययस्येत्येव । स्वःपाशम् । प्रत्यय इति किम् । पाशो बंधः, कल्पो विधिः, कं शिरः । (इत्येतैः समासे) पयःपाशः । पयःकल्पः । (पयसि कम्) पयःकम् ।

१५४ **रोः काम्ये** ॥२।३।७॥ अनव्ययसंबंधिनो रोरेव रेफस्य काम्यप्रत्यये परे सः स्यात् । पयस्काम्यति । रोरिति किम् । द्वाः काम्यति । प्रत्यय इत्येव । पुरुषैः काम्यम् । अनव्ययस्येत्येव । अधः काम्यति । पूर्वेणैव सिद्धे रोरेवेति नियमार्थं वचनम् ।

१५५ **नामिनस्तयोः षः** ॥ २।३।८ ॥ तयोरिति ' प्रत्यये' इति सूत्रसंगृहीतानां पाशकल्पकानां ' रोः काम्ये ' इति यथानिर्दिष्टस्य काम्यस्य च ग्रहणम् । तयोः परयोर्नामिन उत्तरस्य रेफस्य षकार आदेशः स्यात् । सर्पिष्पाशम् । सर्पिष्कल्पम् । सर्पिष्कम् । सर्पिष्काम्यति । नामिन इति किम् । अयस्कल्पम् । तयोरिति किम् । मुनिः करोति । रोः काम्य इत्येव । गीः काम्यति ।

१५६ **निर्दुरबहिराविष्प्रादुश्चतुराम्** ॥२।३।९॥ निरादीनां संबंधिनो रेफस्य कखपफेषु परेषु षः स्यात् । बहुवचननिर्देशो निस्दुसोनिर्दुरोश्च परिग्रहार्थः ।

निष्कृतम् । दुष्कृतम् । बहिष्पीतम् । आविष्पीतम् । प्रादुष्कृतम् । चतुष्कण्टकम् । कथं नि३ष्कुल, दु३ष्पुरुष, नैष्कुल्यम् , दौष्कुल्यम् । एकदेशविकृतस्याऽनन्यत्वात् ।

१५७ **सुचो वा** ॥२॥३।५०॥ सुजन्तानां संबंधिनो रेफस्य कखपफेषु परेषु षो वा स्यात् । द्विष्करोति । त्रिष्करोति । चतुष्पचति । पक्षे जिह्वामूलीयोपध्मानीयौ विसर्जनीयश्च भवति । द्वि × करोति । द्विः करोतीत्यादि । सुजन्तस्य चतुरः पूर्वेण नित्यषत्वे प्राप्ते–

१५८ **स्पर्धे** ॥७।४।११९॥ द्वयोर्विध्योरन्यत्र सावकाशयोस्तुल्यबलयोरेकत्रानेकत्र चोपनिपातः स्पर्धः, तत्र यः सूत्रपाठे परः स विधिर्भवति । इत्येवं परत्वादनेन विकल्पो न तु पूर्वेण नित्यो विधिः । कखपफीत्येव । द्विश्चरति ।

१५९ **वेसुसोऽपेक्षायाम्** ॥२।३।११॥ इस् उस्प्रत्ययान्तस्य यो रेफस्तस्य कखपफेषु परेषु षो वा स्यात् अपेक्षायाम्–स्थानिनिमित्तपदे चेत् परस्परापेक्षे भवतः । सर्पिष्करोति । सर्पिः करोति । धनुष्करोति । धनुः करोति । इसुस इति किम् । पय × करोति । इसुसोः प्रत्यययोर्ग्रहणादिह न भवति । मुनिः करोति । इसा साहचर्यादुस औणादिकस्य ग्रहणम् ; तेनेह न भवति । चक्रुः कुलानि । अपेक्षायामिति किम् । तिष्ठतु सर्पिः पिब त्वमुदकम् । एकार्थीभावे च न भवति। परमसर्पिःकुण्डम् ।

१६० **नैकार्थेऽक्रिये** ॥२।३।१२॥ न विद्यते क्रिया प्रवृत्तिनिमित्तं यस्य तस्मिन्नेकार्थे समानाधिकरणे पदे यत्कखपफं तस्मिन् परे इसुस्प्रत्ययान्तस्य संबंधिनो रेफस्य षो न स्यात् । वेसुसोऽपेक्षायामित्यस्यायं प्रतिषेधो नान्यस्य, तद्विषय एवारंभात् । सर्पि × कालकम् । यजु × पीतकम् । एकार्थ इति किम् । सर्पिष्कुंभे । सर्पि × कुंभे । धनुष्पुरुषस्य । धनु × पुरुषस्य । अक्रिय इति किम् । सर्पिष्क्रियते । सर्पिः क्रियते ।

१६१ **समासेऽसमस्तस्य** ॥ २।३।१२ ॥ पूर्वेणासमस्तस्येसुस्प्रत्ययान्तस्य संबंधिनो रेफस्य कखपफे परे षः स्यात् , समासे–तौ चेन्निमित्तनिमित्तिनावेकत्र समासे भवतः । सर्पिष्कुंभः । धनुष्कृत्य । समास इति किम् । तिष्ठतु सर्पिः पिब त्वमुदकम् । असमस्तस्येति किम् । परमसर्पिःकुण्डम् । पूर्वेणापि न भवति, समासे सत्यपेक्षाया अभावात् । इदमेवासमस्तस्येति वचनं ज्ञापकम् इसुसोः 'प्रत्ययः प्रकृत्यादेः' (७–४–११५) इत्ययं नियमो न भवति । तेन परमसर्पिष्करोति, परमसर्पिः

करोतीत्यत्र 'वेसुसोऽपेक्षायाम्' इत्यनेनाधिकस्यापि विकल्पो भवति । बहुसर्पिष्कुण्डम् , बहुसर्पिष्पात्रमित्यत्र तु बहुप्रत्ययादेरपि असमस्तत्वादनेन नित्यं भवति।

१६२ **भ्रातुष्पुत्रकस्कादयः** ॥ २।३।१४ ॥ भ्रातुष्पुत्रादयः कस्कादयश्च कखपफेषु परेषु रेफस्य स्थाने यथासंख्यं कृतषत्वसत्वाः साधवः स्युः। भ्रातुष्पुत्रः। 'ऋतां विद्यायोनिसंबंधे' (३-२-१७) इति षष्ठ्या अलुप् । कस्कः । वीप्सायां द्विर्वचनम्। सर्वत्र नामिनः परस्य रेफस्य षत्वमन्यत्र सत्वं द्रष्टव्यम् ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां रेफसंधिप्रकरणम्

समाप्तम् ॥

॥ अथ स्यादिसंधिप्रकरणम् ॥

कस् अत्र इत्यत्र 'सो रुः' इत्यनेन रुत्वे कृते–

१६३ **अतोऽति रोरुः** ॥१।३।२०॥ अतोऽकारात् परस्य पदान्ते वर्तमानस्य रोः स्थानेऽति–अकारे परे उकारादेशः स्यात् । अवर्णस्येति ओत्वे एदोत इत्यकारलोपे च । कोऽत्र । अत इति किम्। अग्निरत्र । देवा अत्र । अतीति किम् । क इह । सर्वज्ञ आस्ते । रोरिति किम् । पुनरत्र ।

१६४ **घोषवति** ॥१।३।२१॥ अतः परस्य पदान्ते वर्तमानस्य रोःस्थाने घोषवति परे उकारः स्यात् । को गच्छति । घोषवतीति किम् । कः करोति । अत इत्येव । मुनिर्गच्छति । सुश्रोत ३ देहि । रोरित्येव । स्वर्याति । उत्तरेण लुकि प्राप्तेऽपवादोऽयम् ।

१६५ **अवर्णभोभगोऽघोर्लुगसंधिः** ॥१।३।२२॥ अवर्णाद् भोभगोऽघोभ्यश्च परस्य पदान्तस्थस्य रोर्घोषवति परे लुक् स्यात् , स चासंधिः–संधेर्निमित्तं न भवति । श्रमणा गच्छन्ति । अकारात्तु परस्य रोः पूर्वेणापवादत्वादुत्वमेव । भो गच्छसि। भगो हससि । अघो यासि । भो भगो अघो इत्येते आमंत्रणार्थाः सकारान्ता अव्ययाः । केचित्तु भवद् भगवद् अघवतां संबोधने सौ परे वशब्दस्योत्वे तकारस्य च रुत्वं कृत्वा एतानि रूपाणीच्छन्ति, तेषां द्विवचनबहुवचनयोः स्त्रियां च न सिद्ध्यति । घोषवतीत्येव । कुमाराः क्रीडन्ति । असंधिरित्युत्तरार्थम् ।

१६६ **व्योः** ॥१।३।२३॥ अवर्णात् परयोः पदान्ते वर्तमानयोर्वकारयकारयोर्घोषवति परे लुक् स्यात्, स चासंधिः । वृक्षं वृश्चति किप् । वृक्षवृश्चमाचष्टे इति णावन्त्यस्वरादिलोपे वृक्षवयतीति विचि सिद्धं वृक्षव् । वृक्ष गच्छति । एवं माला

हसति । घोषवतीत्येव । वृक्षव् करोति । अवर्णादित्येव । तरुव् गच्छति । पदान्त इत्येव । भव्यम् । कश्चितु स्वरजयोरनादिस्थयोर्यकारवकारयोर्घोषवत्यवर्णादन्यतोऽपि लोपमिच्छति । अध्यारूढ उम्–ईशम् अध्युः । स चासाविन्दुश्च अध्विन्दुः । साधोरीः–श्रीः साध्वी । तस्या उदयः साध्युदयः इत्यादि ।

१६७ **अस्पष्टावव्वर्णात्त्वनुञि वा** ॥१।३।२५॥ अवर्णभोभगोऽघोभ्यः परयोः पदान्ते वर्तमानयोर्वकारयकारयोः स्थानेऽस्पष्टावीषत्स्पृष्टतरौ प्रत्यासत्तेर्वकारयकारावादेशौ स्वरे परे भवतः, अवर्णात्तु परयोर्य्वोरुञ्वर्जिते स्वरे परेऽस्पष्टौ वा भवतः पटवुँ । कयुँ । भोयँत्र । भगोयँत्र । अघोयँत्र । अवर्णात्त्वनुञि वा । पटविह । पटविह । अनुञीति किम् । उञि अस्पष्टावेव यथा स्याताम् । तथा चोदाहृतम् । केचित्तु रुस्थानस्य यकारस्योञिपरे लोपमिच्छन्ति । क उ आगतः । भो उ एहि । भगो उ एहि । अघो उ याहि । अपरे तु भोभगोऽघोभ्यः स्वरे परे नित्यं लोपमेवेच्छन्ति । भो अत्र । भगो अत्र ।

१६८ **रोर्यः** ॥१।३।२६॥ अवर्णभोभगोऽघोभ्यः परस्य पदान्ते वर्तमानस्य रोः स्थाने स्वरे परे यकार आदेशः स्यात् । कयास्ते । देवायासते । भोयत्र । भगोयत्र। अघोयत्र । स्वरे वेति पक्षे लोपोऽपि । क आस्ते, इत्यादि । रोरिति किम् । पुनरिह । अवर्णादिभ्य इत्येव । मुनिरत्र । स्वर इत्येव । कः करोति ।

१६९ **अह्नः** ॥२।१।७४॥ अहन्शब्दस्य पदान्ते रुरित्ययमादेशः स्यात् स चासन्, परे स्यादिविधौ च । दीर्घाण्यहान्यस्मिन्हे दीर्घाहो निदाघ । दीर्घाहा निदाघः । अत्र रुत्वस्यासत्त्वान्नान्तलक्षणो दीर्घो भवति । कश्चित्तु दीर्घत्वं नेच्छति । तन्मते दीर्घाहो निदाघः । अहोभ्याम् । अहस्सु । अहन् शत्रुमित्यत्राहन्शब्दस्य लाक्षणिकत्वान्न भवति ।

१७० **रो लुप्यरि** ॥२।१।७५॥ अहन्शब्दस्य लुपि सत्यामरेफे परे पदान्ते रोऽन्तादेशः स्यात् । रोरपवादः । अहरधीते । लुपीति किम् । हे दीर्घाहोऽत्र । अरीति किम् । अहोरूपम् । अहोरात्रः । गतमहो रात्रिरागता । कृत्स्नमहो रथन्तरं गायति । अन्ये तु रात्रिरूपरथन्तरेष्वेव रेफादिषु परेषु रेफप्रतिषेधमिच्छन्ति ।

१७१ **वाहर्पत्यादयः** ॥१।३।२८॥ अहर्पत्यादयः शब्दा यथायोगमकृतविसर्गाः कृतोत्वाभावाश्च वा निपात्यन्ते । अहर्पतिः । अहः पतिः । अह ः पतिः । गीर्पतिः । गीः पतिः । गी ः पतिः । धूर्पतिः । धूःपतिः । धू ः पतिः । एषु पक्षे

विसर्गाभावो निपात्यते । हे प्रचेता राजन्, हे प्रचेतो राजन् । अत्र पक्षे उत्वाभावो निपात्यते । बहुवचनमाकृतिगणार्थम् ।

१७२ **रो रे लुग्दीर्घश्चादिदुतः** ॥१।३।४१॥ रेफस्य रेफे परे लुक् स्यात्, अकारेकारोकाराणां चानन्तराणां दीर्घः स्यात् । पुना रमते । अग्रीरथेन । पटूराजा । अन्वित्येव । अहोरूपम् । अत्र पूर्वमेव रोरुत्वे रेफाभावाल् लुग्दीर्घाभावः सिद्धः ।

१७३ **ढस्तड्ढे** ॥१।३।४२॥ तन्निमित्तो ढस्तड्ढः । ढकारस्य तड्ढे परेऽनु लुक् स्यात्, अकारेकारोकाराणां च दीर्घः स्यात् । माढिः । लीढम् । तड्ढ इति किम् । मधुलिड् ढौकते । नायं लुप्यमानढकारनिमित्तो ढः । एवं चक्रुड्ढे, लुलुविड्ढे इत्यादावपि ढकारस्य द्वित्वे सति ढकारयोर्निमित्तनिमित्तिभावो नास्तीति लुग्न स्यात् । अदिदुत इत्येव । आतृढम् । आतृढम् । अन्वित्येव । लेढा । मोढा । अत्र गुणे कृते पश्चात् ढलोपः । अन्यथा हि पूर्वमेव ढलोपे दीर्घे च लीढा मूढेत्यनिष्टं रूपं स्यात् ।

१७४ **तदः सेः स्वरे पादार्था** ॥१।३।४५॥ तदः परस्य सेः स्वरे परे लुक् स्यात्, सा चेत् पादार्था–पादपूरणी भवति ।

'सैष दाशरथी रामः सैष राजा युधिष्ठिरः ॥

सौषधीरनुरुध्यति । पादार्थेति किम् । स एष भरतो राजा ।

१७५ **एतदश्च व्यंजनेऽनग्नञ्समासे** ॥१।३।४६॥ एतदस्तदश्च परस्य सेर्व्यंजने परे लुक् स्यात्, अकि नञ्समासे च सति न स्यात् । एष ददाति । स ददाति । एतदश्चेति किम् । को दाता । सेरित्येव । एतौ गच्छतः । तौ तिष्ठतः । अनुबंधग्रहणादिह न भवति । एतेषु चरति । तेषु चरति । अनग्नञ्समास इति किम् । एषकः करोति । सको याति । 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति साकोऽपि प्राप्तिरिति प्रतिषेधः । अनेषो गच्छति । असो याति । व्यंजन इति किम् । एषोऽत्र । सोऽत्र ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां स्यादिसंधिप्रकरणं समाप्तम् ॥



॥ अथ स्वरान्तपुँल्लिङ्गप्रकरणम् ॥

१७६ **अधातुविभक्तिवाक्यमर्थवन्नाम** ॥ १।१।२७ ॥ अर्थोऽभिधेयः स्वार्थो द्रव्यं लिङ्गं संख्या शक्तिरिति, द्योत्यश्च समुच्चयादिः । तद्वच्छब्दरूपं धातु-विभक्त्यन्तवाक्यवर्जितं नामसंज्ञं स्यात् । विभक्त्यन्तवर्जनाच्चाबादिप्रत्ययान्तानां नामसंज्ञा भवत्येव । अर्थवत्समुदायस्य वाक्यस्य नामसंज्ञाप्रतिषेधात् समासादेरपि भवत्येव । यदानुकार्यानुकरणयोः स्याद्वादाश्रयणेनाभेदविवक्षा तदार्थवत्त्वाभावान्न भवति नामसंज्ञा, यथा गवित्ययमाहेति । यदा तु भेदविवक्षा तदानुकार्येणार्थेनार्थ-वत्त्वाद् भवत्येव, पचतिमाह।

१७७ **अनन्तः पञ्चम्याः प्रत्ययः** ॥१।१।३८॥ पञ्चम्यर्थाद् विधीयमानः शब्दः प्रत्ययसंज्ञः स्यात् , अनन्तः--न चेदन्तशब्दोच्चारणेन विहितः स्यात् ।

१७८ **परः** ॥७।४।११८॥ यः प्रत्ययः स प्रकृतेः पर एव स्यात् ।

१७९ **स्यौजसमौशस्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसो-सांङ्योस्सुपां त्रयी त्रयी प्रथमादिः** ॥१।१।१७॥ स्यादीनां प्रत्ययानां त्रयी त्रयी यथासंख्यं प्रथमाद्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तमीसंज्ञा स्यात् । इजशट-ङ्पा अनुबंधाः ' सौ नवेतौ ' इत्यादौ विशेषणार्थाः । बहुवचनं स्याद्यादेशानामपि प्रथमादिसंज्ञाप्रतिपत्त्यर्थम् । *स्यादिप्रत्ययानामियं त्रयी नाम्नः परा योज्यते ।

१८० **स्त्यादिर्विभक्तिः** ॥७।४।११९॥ स् इति उत्सृष्टानुबंधस्य सेर्ग्रहणम्। ति इति उत्सृष्टानुबंधस्य तिवः । आदिशब्दो व्यवस्थावाची । स्यादयस्तिवादयश्च प्रत्ययाः सुप्स्यामहिपर्यन्ता विभक्तिसंज्ञाः स्युः । ततश्चात्राप्यर्थैकत्वविवक्षायां प्रथमै-कवचनं सिः। देवस् इति स्थिते। 'सोरुः', 'रः पदान्ते विसर्गस्तयोः–' देवः। द्वित्वे–

१८१ **स्यादावसंख्येयः** ॥३।१।११९॥ सर्वस्मिन् स्यादौ विभक्तौ समा-नानां तुल्यरूपाणां सहोक्तौ गम्यमानायामेकः शिष्यते, असंख्येयः–संख्येयवाचि-शब्दरूपं वर्जयित्वा । देव औ इति जाते । ऐदौत्संध्यक्षरैरिति–देवौ । बहुत्वे–देव जस् । तत्र–

१८२ **अत आः स्यादौ जस्भ्यां ये** ॥१।४।१॥ स्यादौ जसि भ्यामि य कारे परेऽतोऽकारस्याकारः स्यात् । देवा अस् । ततः समानानां तेनेति दीर्घे देवाः। नन्वत्र दीर्घस्यापि दीर्घत्वं कथमिति चेत् ' पर्जन्यवल्लक्षणप्रवृत्तिः ' इति न्यायात् । अथवा—

' अदीर्घो दीर्घतां याति नास्ति दीर्घस्य दीर्घता ।
पूर्वदीर्घस्थरं दृष्ट्वा परलोपो विधीयते ' ॥

द्वितीयैकवचने देव अम् इत्यत्र—

१८३ **समानादमोऽतः** ॥ १।४।४६ ॥ समानात् परस्यामोऽकारस्य लुक् स्यात् । देवम् । देवौ । द्वितीयाबहुवचने देव शस् । शकारो विशेषणार्थः ।

१८४ **शसोऽता सश्च नः पुंसि** ॥ १।४।४९॥ शसः संबंधिनोऽकारेण सह समानस्य प्रधानस्थान्यासन्नो दीर्घः स्यात्, तत्संनियोगे च पुंल्लिङ्गविषये शसः सकारस्य नकारः स्यात् । देवान् । तृतीयैकवचने देव टा । टकारः प्राग्वत् ।

१८५ **टाङसोरिनस्यौ** ॥१।४।५॥ अकारात्परयोष्टाङसोः स्थाने यथासंख्यमिन स्य इत्येतावादेशौ स्याताम् । अवर्णस्येत्वे—देवेन । अत आ इत्यात्वे देवाभ्याम् । देव भिस् ।

१८६ **भिस ऐस्** ॥ १।४।२ ॥ अकारात् परस्य स्यादेर्भिसः स्थाने ऐस् इत्ययमादेशः स्यात् । अनेकवर्णः सर्वत्र । देवैः । एसादेशेनैव सिद्धे ऐस्करणं ' संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ' इति न्यायस्यानित्यत्वज्ञापनार्थम्, तेनातिजरसैरित्यपि सिद्धम् । चतुर्थ्येकवचने देव ङे । ङकारो ङित्कार्यार्थः ।

१८७ **ङेङस्योर्यातौ** ॥१।४।६॥ अकारात् परयोर्ङेङसि इत्येतयोर्यथासंख्यं य आत् इत्येतावादेशौ स्तः । ततश्च ' अत आ ' इत्यात्वे देवाय । देवाभ्याम् । बहुवचने देव भ्यस् ।

१८८ **एद् बहुस्भोसि** ॥१।४।४॥ बहुवर्थविषये सकारादौ भकारादावोसि च परेऽकारस्यैकारादेशः स्यात् । देवेभ्यः । पञ्चम्येकवचने—देव ङसि । इकारो ङसो विशेषार्थः । ङेङस्योरित्यात् । धुटस्तृतीय इति दत्वे ।

१८९ **विरामे वा** ॥ १।३।५१ ॥ विरामे वर्तमानस्याशिटो धुटःस्थाने प्रथमो वा स्यात् । देवात् । देवाद् । देवाभ्याम् । देवेभ्यः । टाङसोरिति ङसः स्यादेशे देवस्य । ओस्येत्वेऽयादेशे च देवयोः । देव आम् इति स्थिते ।

१९० **ह्रस्वापश्च** ॥ १।४।३२ ॥ ह्रस्वान्तादाबन्तात् स्त्रीदूदन्ताच्च शब्दात् परस्यामः स्थाने नाम् इत्ययमादेशः स्यात् ।

१९१ **दीर्घो नाम्यतिसृचतसृषूः** ॥ १।४।४७ ॥ तिसृचतसृषकाररेफान्तवर्जितशब्दसंबंधिनः पूर्वस्य समानस्यामादेशे नामि परे दीर्घः स्यात् । देवानाम् ।

अप् इति प्रतिषेधेन नकारेण व्यवहितेऽपि नामि दीर्घो ज्ञाप्यते । सप्तम्येकवचने देवे । द्वित्वे देवयोः । बहुवचने, एद्बहुस्भोसीत्येत्वे देवे सु इति स्थिते ।

१९२ नाम्यन्तस्थाकवर्गात् पदान्तः कृतस्य सः शिड्नान्तरेऽपि ॥ २।३।१५ ॥ नामिनोऽन्तस्थायाः कवर्गाच्च परस्य पदमध्ये वर्तमानस्य केनचित् सूत्रेण विहितस्य वा सस्य षः स्यात्, शिटा नकारेण च व्यवधानेऽपि स्यात् । देवेषु । नकारस्यावश्यम् अनुस्वारभवनात् शिड्ग्रहणेनैव सिद्धे नकारोपादानं नकारस्थानेनैवानुस्वारेण यथा स्यादित्येवमर्थम् । तेन मकारानुस्वारेण न भवति । पुंसु । शिटा नकारेण चांतरे, इति प्रत्येकं वाक्यपरिसमाप्तेरुभयव्यवधाने न भवति- निंस्से । नाम्यन्तस्थाकवर्गादिति किम् । असौ । दास्यति । पदान्तरिति किम् । पदादौ पदान्ते च मा भूत् । दधिसेक् । अत्रान्तर्वर्तिन्या विभक्त्या सेक्शब्दस्य पदत्वात् सकारस्य पदादित्वम् । अग्निस्तत्र । कृतस्येति किम् । बिसम् । अथ बिसं- बिसमित्यादौ द्वित्वे कृते सकारस्य षत्वं कस्मान्न भवति । उच्यते । नात्र कृतः सकारः, किंतु तत्संपृक्तः समुदायो द्विरुच्चार्यते । तिसृभिरित्यत्र तु विधानबलान्न भवति । संबोधनेऽपि प्रथमाया एव प्रत्ययास्तत्र—

१९३ अदेतः स्यमोर्लुक् ॥ १।४।४४ ॥ अकारान्तादेकारान्ताच्चामंत्र्येऽर्थे वर्तमानात् परस्य सेस्तदादेशस्यामश्च लुक् स्यात्। संबोधनाभिव्यक्तये हेशब्दस्य प्राक् प्रयोगः । हे देव । हे देवौ । हे देवाः । अदेत इति किम् । हे गौः । स्यादे- शत्वेनैवामोऽपि लुकि सिद्धायां पृथग्वचनमन्यस्यादेशस्य लुगभावार्थम् , तेन हे कतरदित्यादौ लुप्त भवति। एवं देवशब्दवत् घटपटादयोऽप्यकारांताः पुल्लिङ्गा ज्ञेयाः।

सर्वादीनां तु विशेषः । सर्व, विश्व, उभ, उभयट्, अन्य, अन्यतर, इतर, डतर, डतम, त्व, त्वत् , नेम, सम, सिम, पूर्वपरावरदक्षिणोत्तरापराधराणि व्यव- स्थायाम् , स्वमज्ञातिधनाख्यायाम् , अन्तरं बहिर्योगोपसंव्यानयोरपुरि, त्यद्, तद् , यद्, अदस्, इदम् , एतद्, एक, द्वि, युष्मद् , भवतु, अस्मद् , किम्, इत्यसं- ज्ञायां सर्वादिः । तत्र उभशब्दस्य द्विवचनस्वार्थिकप्रत्ययविषयत्वात् स्मैप्रभृति- कार्यं न भवति। तस्येह गणपाठस्तु हेत्वर्थप्रयोगे सर्वविभक्त्यर्थः । उभयट् इति टकारो ङ्यर्थः अस्य च द्विवचनाभावः । एवं च द्वित्वे उभशब्द एकत्वबहुत्वयोश्चोभयशब्दः प्रयोज्यः । डतरग्रहणेनैव सिद्धेऽन्यतरशब्दग्रहणं डतमप्रत्ययान्तस्यान्यशब्दस्य सर्वा- दित्वनिवृत्त्यर्थम् । एके त्वाहुः—'नायं डतरप्रत्ययान्तोऽन्यतरशब्दः किंतु अव्युत्पन्न-

स्तरोत्तरपदस्तरबन्तो वा ' तन्मते डतमान्तस्याप्यन्यशब्दस्य सर्वादित्वम् । डतरडतमौ प्रत्ययौ । (प्रत्ययग्रहणे तदन्तग्रहणम्) तयोः स्वार्थिकत्वात् प्रकृतिद्वारेणैव सिद्धे पृथगुपादानमत्र प्रकरणेऽन्यस्वार्थिकप्रत्ययान्तानामग्रहणार्थमन्यादिलक्षणदार्थं च । त्वशब्दोऽन्यार्थः । त्वच्छब्दः समुच्चयपर्यायार्थः । तस्य स्मायादयो न संभवन्तीति हेत्वर्थयोगे सर्वविभक्तित्वमक्प्रत्ययश्च प्रयोजनम् । नेमशब्दोऽर्धार्थः । समसिमौ सर्वार्थौ । सर्वार्थत्वाभावे नानयोः सर्वादित्वम् । पूर्वादिसप्तानां च व्यवस्थायामेव सर्वादित्वम् , स्वशब्दश्चात्मात्मीयज्ञातिधनार्थवृत्तिः । तत्र ज्ञातिधनयोरयं न सर्वादिः । अन्तरशब्दो बहिर्भावेन बाह्येन वा योगे उपसंव्याने उपसंवीयमाने चार्थे वर्तमानः सर्वादिः स्यात् , न चेद् बहिर्योगेऽपि पुरि वर्तते । द्वियुष्मद्भवत्वस्मदां स्मायादयो न संभवन्तीति सर्वविभक्त्यादयः[1] प्रयोजनम् । सर्वेऽपि चामी संज्ञायां सर्वादयो न भवन्ति, तेनेह न सर्वादिकार्यम्–सर्वो नाम कश्चित् । एते सर्वादयस्त्रिलिङ्गाः । तत्राथो पुंलिङ्गे रूपाण्युच्यन्ते । सर्वः । सर्वौ ।

१९४ **जस इः** ॥१।४।९॥ सर्वादेरकारान्तस्य संबंधिनो जसः स्थाने इकार आदेशः स्यात् । एकवर्णोऽपि 'प्रत्ययस्य' इति सर्वस्य भवति । सर्वे । तत्संबंधिविज्ञानादिह न भवति । प्रियसर्वाः । सर्वम् । सर्वौ । सर्वान् । सर्वेन इति जाते ।

१९५ **रषृवर्णान्नो ण एकपदेऽनन्त्यस्यालचटतवर्गशसान्तरे** ॥२।३।६३॥ रेफषकारऋवर्णेभ्यः परस्यानन्त्यस्य नकारस्य रषृवर्णैरेवैकपदे वर्तमानस्य णः स्यान्न चेन्निमित्तनिमित्तिनोरन्तरे लकारचवर्गटवर्गतवर्गशकारसकाराः स्युः। शेषवर्णव्यवधानेऽपीत्यर्थः । सर्वेण । रषृवर्णादिति किम् । तेन । एकपद इति किम् । अग्निर्नयति । पद इत्येतावतैवैकपदे लब्धे एकग्रहणं नियमार्थम् , एकमेवयन्नित्यं तत्र यथा स्यात्, यदेकं चानेकं च तत्र मा भूत् , चर्मनासिकः । अनन्त्यस्येति किम् । सर्वान् । लादिवर्जनं किम् । विरलेन । मूर्च्छनम् । दृढेन । तीर्थेन । रशना । रसना । सर्वाभ्याम् । सर्वैः ।

१९६ **सर्वादेः स्मैस्मातौ** ॥१।४।७॥ सर्वादेरकारान्तस्य संबंधिनोर्ङेङस्योर्यथासंख्यं स्मैस्मादित्येतावादेशौ स्याताम् । सर्वस्मै । सर्वस्मात् । सर्वादेरिति षष्ठीनिर्देशेन तत्संबंधिविज्ञानादिह न भवति । प्रियाः सर्वे यस्य तस्मै प्रियसर्वाय । प्रियसर्वात् ।

---

१ आदिशब्दाद् यथायोगमेकशेषपूर्वनिपातपुंवद्भावडद्रिआत्आयनिञ्मयट्अकः प्रयोजनानि ज्ञायन्ते ।

१९७ **अवर्णस्यामः साम्** ॥१।४।१५॥ अवर्णान्तस्य सर्वादेः संबंधिनः षष्ठीबहुवचनस्यामः स्थाने सामित्ययमादेशः स्यात् । 'संनिपातलक्षण'—न्यायस्यानित्यत्वादेत्वम् । सर्वेषाम् । सर्वादेरित्येव । नेह, द्वयानाम् । कथं 'व्यथां द्वयेषामपि मेदिनीभृताम् ' इति ? अपपाठ एषः । तत्संबंधिविज्ञानादिह न भवति—प्रियसर्वाणाम् । अवर्णस्येति किम् । भवताम् ।

१९८ **ङेः स्मिन्** ।१।४।८॥ सर्वादेरकारान्तस्य संबंधिनः सप्तम्येकवचनस्य ङेः स्थाने स्मिन्नित्ययमादेशः स्यात् । सर्वस्मिन् । शेषं देववत् । अत इत्येव । भवति । सर्वादेरित्येव । सर्वो नाम कश्चित्—सर्वे । तत्संबंधिविज्ञानादिह न भवति । प्रियसर्वे । एवं विश्वादयोऽप्यदन्ताः ।

१९९ **नवभ्यः पूर्वेभ्य इस्मात्स्मिन् वा** ॥१।४।१६॥ पूर्वादिभ्यो नवभ्यो यथास्थानं ये इ स्मात् स्मिन् आदेशा उक्तास्ते वा स्युः । पूर्वे । पूर्वाः । पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । शेषं सर्ववत् । एवं परादीनामपि । नवभ्य इति किम् । त्ये । त्यस्मात् । त्यस्मिन् । पूर्वेभ्य इति किम् । सर्वे । सर्वस्मात् । सर्वस्मिन् । पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व, अन्तर इति पूर्वादयो नव ।

२०० **द्वन्द्वे वा** ॥१।४।११॥ द्वन्द्वे समासे वर्तमानस्याकारान्तस्य सर्वादेः संबंधिनो जसः स्थाने इर्वा स्यात् । पूर्वोत्तरे । पूर्वोत्तराः । तत्संबंधिविज्ञानादिह न भवति । प्रियकतरकतमाः । उत्तरेण निषेधे प्राप्ते प्रतिप्रसवार्थो योगः ।

२०१ **न सर्वादिः** ॥१।४।१२॥ द्वन्द्वसमासे सर्वादिः सर्वादिर्न स्यात् । सर्वे सर्वादिकार्यं न भवति । पूर्वापराय । पूर्वापरात् । पूर्वापरे । शेषं देववत् । दक्षिणोत्तरपूर्वाणाम् । अत्र 'सर्वादयोऽस्यादौ' इति पुंवद्भावो भवत्येव । तत्र भूतपूर्वस्यापि सर्वादेर्ग्रहणात् । कतरकतमकाः, अत्र सर्वादित्वनिषेधादकच्प्रत्ययाभावे कप्प्रत्यये सति स्वार्थिकप्रत्ययान्ताग्रहणात् द्वन्द्वे वेति जस इर्न भवति ।

२०२ **तृतीयान्तात् पूर्वावरं योगे** ॥ १।४।१३ ॥ पूर्व अवर इत्येतौ सर्वादी तृतीयान्तात् पदात् परौ योगे संबंधे सति सर्वादी न स्याताम् । मासेन पूर्वाय । मासपूर्वाय । संवत्सरेणावराय । संवत्सरावराय । तृतीयान्तादिति किम् । ग्रामात् पूर्वस्मै । पूर्वस्मै मासेन । अवरस्मै पक्षेण । पूर्वापरमिति किम् । मासपरस्मै । योगे इति किम् । यास्यति चैत्रो मासेन पूर्वस्मै दीयतां कम्बलः ।

२०३ **तीयं ङित्कार्ये वा** ॥१।४।१४॥ तीयप्रत्ययान्तं शब्दरूपं ङितां-ङेङसिङीनां कार्ये कर्तव्ये सर्वादिर्वा स्यात् । द्वितीयस्मै । द्वितीयाय । द्वितीयस्मात् । द्वितीयात् । द्वितीयस्मिन् । द्वितीये । शेषं देववत् । एवं तृतीयः । ङित्कार्ये इति किम् । तत्रैव सर्वादित्वं यथा स्यात् , नान्यत्र, तेनाक् न भवति । तथा च कप्रत्यये सति स्वार्थिकप्रत्ययान्ताग्रहणात् स्मैभृतयो न भवन्ति । द्वितीयकाय । तृतीयकाय । द्वितीयिकायै । तृतीयिकायै इत्यादि । अर्थवतः प्रतिपदोक्तस्य च ग्रहणादिह न भवति । पटुजातीयाय ।

२०४ **नेमार्धप्रथमचरमतयायाल्पकतिपयस्य वा** ॥ १।४।१० ॥ नेमादीनि नामानि । तयायौ प्रत्ययौ । तेषामकारान्तानां संबंधिनो जसः स्थाने इर्वा स्यात् । नेमस्य प्राप्ते इतरेषामप्राप्ते विभाषा । नेमे । नेमाः । शेषं सर्ववत् । अर्धे । अर्धाः । प्रथमे । प्रथमाः । चरमे । चरमाः । द्वितये । द्वितयाः । अल्पे । अल्पाः । कतिपये । कतिपयाः । शेषं देववत् । उभयट्शब्दस्य त्वयट्प्रत्ययरहितस्याखण्डस्य सर्वादौ पाठात् पूर्वेण नित्यमेवेत्वं भवति । तत्संबंधिविज्ञानादिह न भवति । प्रियनेमाः । अतिनेमाः । स्वार्थिकप्रत्ययान्ताग्रहणादिह न भवति । अर्धकाः । सर्वादेरित्येव । नेमा नाम केचित् । व्यवस्थितविभाषाविज्ञानादर्धादीनामपि संज्ञायां न भवति । अर्धा नाम केचित् । अत इत्येव । नेमाः स्त्रियः । निर्जरः ।

२०५ **जराया जरस्वा** ॥२।१।३॥ जराशब्दस्य स्वसंबंधिन्यन्यसंबंधिनि वा स्वरादौ स्यादौ परतो जरस् इत्ययमादेशो वा स्यात् । अनेकवर्णत्वात् सर्वादेशे प्राप्ते ' निर्दिश्यमानस्यादेशा भवन्ति ' । एकदेशविकृतस्यानन्यत्वात् जरशब्दस्यापि जरस् । निर्जरसौ । निर्जरसः । निर्जरसम् । परत्वान्नित्यत्वाच्च प्रागेव जरसादेशे कृते अकारान्तत्वाभावादिनादयो न स्युः । निर्जरसा । निर्जरसैः । निर्जरसः । निर्जरसः । अन्ये तु प्रागेवेनादेशं ' संनिपातलक्षण'-न्यायस्यानित्यत्वाश्रयणाज्जरसादेशं चेच्छन्तो निर्जरसिन, निर्जरसादित्यपि मन्यन्ते । निर्जरसोः २ । निर्जरसाम् । निर्जरसि । पक्षे व्यंजनादौ च देववत् । मासः । मासौ । मासाः । मासं । मासौ ।

२०६ **मासनिशासनस्य शसादौ लुग्वा** ॥२।१।१००॥ एषां शसादौ स्यादौ परे लुगन्तादेशो वा स्यात् । मासः । मासान् । मासा । मासेन । भ्यामि मास्भ्यामित्यत्र—

२०७ **नाम सिदय्व्यंजने** ॥१।१।२१॥ सिति प्रत्यये यवर्जव्यंजनादौ च परे पूर्वं नाम पदसंज्ञं स्यात्। इति पदत्वात् सस्य रुत्वे लुकि च [1]भाभ्याम् माद्भ्याम्। मासाभ्यामित्यादि। नामेति किम्। धातोर्माभूत्। वच्मि। सिदय्व्यंजन इति किम्। भवन्तौ। राजानौ। यवर्जव्यंजनं किम्। वाचमिच्छति वाच्यति। अन्तर्वर्तिन्यैव विभक्त्या तदन्तस्य पदत्वे सिद्धे सिद्ग्रहणं नियमार्थम्, तेन प्रत्ययान्तरे न भवति। सौश्रुतम्। दन्तः। दन्तौ। दन्ताः। दन्तम्। दन्तौ।

२०८ **दन्तपादनासिकाहृदयास्रग्यूषोदकदोर्यकृच्छकृतो दत्पन्नस्हृदस्नन्यूषन्नुदन्दोषन्यकन्शकन्वा** ॥२।१।१०१॥ दन्तादीनां यथासंख्यं शसादौ स्यादौ परे दत् इत्येवमादय आदेशा वा स्युः। दतः। दन्तान्। दता। दन्तेन। दद्भ्याम्। दन्ताभ्यामित्यादि। पादः। पादौ। पादाः। पादम्। पादौ। पदः। पादानित्यादि। यूषः। यूषौ। यूषाः। यूषम्। यूषौ। शसादौ स्वरे यूषन्नादेशे कृते—

२०९ **अनोऽस्य** ॥२।१।१०८॥ अनोऽकारस्य ङीस्याद्यघुट्स्वरे परे लुक् स्यात्। णत्वम्। यूष्णः। यूषान्। यूष्णा। यूषेण।

२१० **नाम्नो नोऽनहः** ॥२।१।९१॥ पदान्ते वर्तमानस्य नाम्नो नकारस्य लुक् स्यात्, अनहः—स चेदहन्शब्दसंबंधी न भवति, स चासन् स्यादिविधौ। यूषभ्याम्। यूषाभ्याम्। अस्य नलोपस्य स्यादिविधावसत्वाद्[2] राजभ्याम्, राजभिः, राजसु इत्यादौ दीर्घत्वैस्त्वैत्वान्यकारान्तत्वाभावान्न भवंति। अनह इति किम्। अहरधीते। अहोरूपम्। अत्र परविधौ रेफरुत्वयोरसत्त्वान्नलोपः स्यात्, सावकाशं च तदुभयं संबोधने। हे अहः। हे दीर्घाहः। पदस्येत्येव। राजानौ। स्यादिविधावित्येव। राजायते। अत्र क्यविधौ (नलोपस्य) सत्त्वाद् 'दीर्घश्चियङ्क्यक्येषु चे'त्यनेन क्येऽन्त्याकारस्य दीर्घः सिद्धः। नाम्न इति किम्। कुर्वीरन्। वृत्रहभ्याम्,

---

१ अत्रानेनान्तलोपेऽसिद्धं बहिरङ्गमिति अकारस्थानित्वेन सो रुरितिरुत्वाभावे धुटस्तृतीय इति दत्वे तु माद्भ्यामिति मन्यते भाष्यकृत्॥ स्वमते तु द्वयमपि भवतीति रूपद्वयनिर्देशः।

२ नन्वत्र विशेषविधानात् रोलुप्यरीति, अन्ह इति च रेफरुत्वे एव भविष्यतः किमहन्प्रतिषेधेनेत्याह—असत्त्वादिति। न चैवं तयोरनवकाशतेति वाच्यम्। तदुभयस्य संबोधने 'नामन्त्र्ये' इति नलोपप्रतिषेधात् सावकाशत्वमेव।

वृत्रहभिरित्यत्र तु असिद्धं बहिरङ्गमन्तरङ्गे इति नलोपस्यासिद्धत्वात् 'ह्रस्वस्य तः पित्कृति' इति तोऽन्तो न भवति ।

२११ **ईङौ वा** ॥२।१।१०९॥ अनोऽकारस्येकारे ङौ च परे लुग्वा स्यात् । यूष्णि, यूषणि, यूषे, इत्यादि । द्वयोरह्नोर्भवो व्यह्नः ।

२१२ **संख्यासायवेरह्नस्याहन् ङौ वा** ॥१।४।५०॥ संख्यावाचिभ्यः सायशब्दाच्च परस्याऽह्नस्य शब्दस्य ङौ परेऽहन्नित्ययमादेशो वा स्यात् । व्यह्नि । व्यहनि । व्यह्ने । एवं सायमह्नः सायाह्नः । सायाह्नि । सायाहनि । सायाह्ने । अतएव सूत्रनिर्देशात् सायंशब्दस्य मकारलोपः । सायेत्यकारान्तो वा । विगतमहो व्यह्नः । व्यह्नि । व्यहनि । व्यह्ने । संख्यासायवेरिति किम् । मध्याह्नि । अह्नस्येति किम् । द्वयोरह्नोः समाहारो व्यहस्तस्मिन् व्यहे । ङाविति किम् । व्यह्नः । इत्यकारान्ताः ।

आकारान्तः कीलालपाशब्दः । कीलालपाः । कीलालपौ । कीलालपाः । समानादमोऽतः । कीलालपाम् ।

२१३ **लुगातोऽनापः** ॥२।१।१०७॥ आबवर्जितस्याकारस्य ङीस्याद्यघुट्स्वरे परे लुक् स्यात् । कीलालपः । कीलालपा । कीलालपाभ्यामित्यादि । एवं शुभंयाः । विश्वपाः । हाहाः । आत इति किम् । नदीः । अनाप इति किम् । खट्वाः । ङीस्याद्यघुट्स्वर इत्येव । कीलालपास्तिष्ठन्ति । इत्याकारान्ताः । इकारान्तो मुनिशब्दः । मुनिः ।

२१४ **इदुतोऽस्त्रेरीदूत्** ॥१।४।२१॥ स्त्रिशब्दवर्जितस्येदन्तस्योदन्तस्य च औता सह यथासंख्यं ईत् ऊत् इत्येतावन्तादेशौ स्याताम् । मुनी । इदुत इति किम् । देवौ । नद्यौ । वध्वौ । औता इत्येव । मुनिः । सख्यौ, पत्यौ इत्यत्र तु विधानसामर्थ्यान्न भवति । अस्त्रेरिति किम् । अतिस्त्रियौ पुरुषौ । कथं शस्त्रीमतिक्रान्तौ अतिशस्त्री पुरुषौ । ' अर्थवद्ग्रहणे नानर्थकस्ये'ति प्रतिषेधाभावात् । इदमेव चास्त्रिग्रहणं ज्ञापकं ' परेणापीयादेशेनेदुत्कार्यं न बाध्यते ' इति । तेनातिस्त्रयः, अतिस्त्रये इत्यादि सिद्धम् ।

२१५ **जस्येदोत्** ॥१।४।२२॥ इदन्तस्योदन्तस्य च जसि परे यथासंख्यमेत् ओत् इत्येतावन्तादेशौ स्याताम् । मुनयः । जसीति किम् मुनिः । मुनिम् । मुनी । मुनीन् ।

२१६ टः पुंसि ना ॥१।४।२४॥ इदुदन्तात् परस्य पुंविषयस्य तृतीयैकवचनस्य स्थाने ना इत्ययमादेशः स्यात् । मुनिना । पुंसीति किम् । बुद्ध्या ।

२१७ ङित्यदिति ॥ १।४।२३ ॥ अदिति ङिति स्यादौ परे इदन्तस्योदन्तस्य च यथासंख्यमेत् ओत् इत्येतावन्तादेशौ स्याताम् । मुनये । ङितीति किम् । मुनिः । अदितीति किम् । बुद्धये । स्यादाविति किम् । शुची । पटी ।

२१८ एदोद्भ्यां ङसिङसो रः ॥१।४।२५॥ एदोद्भ्यां परयोर्ङसिङसोः स्थाने रेफः स्यात् । अकार उच्चारणार्थः । 'प्रत्ययस्ये'ति सर्वादेशः । वचनभेदो यथासंख्यनिवृत्त्यर्थः । मुनेः । मुनिभ्याम् । मुनेः । मुन्योः २ । मुनीनाम् ।

२१९ ङिर्ङौ ॥१।४।२६॥ इदुदन्तात् परो ङिः—सप्तम्येकवचनं ङौः स्यात् । अभेदनिर्देशश्चतुर्थ्येकवचनशंकानिरासार्थः । ङकारो डित्कार्यार्थः ।

२२० ङित्यन्त्यस्वरादेः ॥२।१।११४॥ स्वराणां संनिविष्टानां योऽन्त्यः स्वरस्तदादेः शब्दरूपस्य ङिति परे लुक् स्यात् । मुनौ । व्यपदेशिवदेकस्मिन्नित्यन्त्यस्वरादित्वम् । मुन्योः । मुनिषु ।

२२१ ह्रस्वस्य गुणः ॥१।४।४१॥ आमन्त्र्येऽर्थे वर्तमानस्य ह्रस्वान्तस्य सिना सह [1]श्रुतत्वाद् ह्रस्वस्यैव गुणः स्यात्, आसन्नः । हे मुने । हे मुनी । हे मुनयः । सिनेत्येव । हे वारि । अत्र परत्वात् पूर्वं सेर्लुपि सेरभावान्न भवति । 'नामिनो लुग्वे'ति लुकि तु स्थानिवद्भावाद् भवत्येव, हे वारे । आमंत्र्य इत्येव । मुनिः । ह्रस्वस्येति किम् । हे श्रीः । हे नदि इत्यत्र तु ह्रस्वविधानसामर्थ्यात् सेरभावाच्च न भवति । एवं रविकविप्रभृतयः । अतिक्रान्तः स्त्रियमतिस्त्रिः ।

२२२ स्त्रियाः ॥२।१।५४॥ स्त्रीशब्दसंबंधिन इवर्णस्य स्वरादौ प्रत्यये परे इयादेशः स्यात् । अतिस्त्रियौ । अतिस्त्रियः । शस्त्रीशब्दसंबंधिनस्त्वनर्थकत्वान्न भवति । स्वर इत्येव । पृथग्योग उत्तरार्थः ।

२२३ वामशसि ॥२।१।७५॥ स्त्रीशब्दसंबंधिन इवर्णस्यामि शसि च परे इयादेशो वा स्यात् । अतिस्त्रियम् । अतिस्त्रिम् । अतिस्त्रियः । अतिस्त्रीन् । अतिस्त्रिणा । अतिस्त्रये । अतिस्त्रेः २ । आमि च प्रागेव नाम् । अतिस्त्रीणाम् । अतिस्त्रौ । तथोक्तम्—

---

१ श्रुतानुमितयोः श्रुतसंबंधो बलीयानिति.

" ओस्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया ।
इयादेशोऽचि नान्यत्र स्त्रियाः पुंस्युपसर्जने " ॥

२२४ **ऋदुशनस्पुरुदंसोऽनेहसश्च सेर्डा** ॥१।४।८४॥ ऋकारान्तादुशनस्पुरुदंशसनेहस् इत्येतेभ्यः सख्युरितश्च परस्य शेषस्य सेः स्थाने डा इत्ययमादेशः स्यात् । सखा । सख्युरित इत्येव । इयं सखी । शेषस्येत्येव, हे सखे ।

२२५ **सख्युरितो शावैत्** ॥ १।४।८३॥ सखिशब्दस्येकारान्तस्य तत्संबंधिन्यन्यसंबंधिनि वा शिवर्जिते शेषे घुटि परे ऐकारान्तादेशः स्यात् । सखायौ । सखायः । सखायम् । सखायौ । सखीन् । शेष इत्येव । हे सखे । इत इति किम् । इमे सख्यौ । इदमेवेदग्रहणं ज्ञापयति ' नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ' ' एकदेशविकृतमनन्यवद् ' इति च ।

२२६ **न ना ङिदेत्** ॥ १।४।२७ ॥ केवलसखिपतेः परस्य टावचनस्य नादेशो ङिति परे एकारश्च य उक्तः स न स्यात् । सख्या । सख्ये । केवलादित्येव । प्रियसखिना । प्रियसखये । पञ्चमीषष्ठ्येकवचनयोरेत्वनिषेधादिवर्णादेरिति यत्वे–

२२७ **खितिखीतीय उर्** ॥ १।४।३६ ॥ खितिखीतीसंबंधिन इवर्णस्थानाद्यकारात् परयोर्ङसिङसोः स्थाने उर् आदेशः स्यात् । सख्युः २। य इति किम् । यत्र यत्वादेशस्तत्र यथा स्यात्, इह मा भूत्, अतिसखेः । खितिखीतीति किम् । मुख्यमपत्यं चाचष्टे णिच् , विच् । मुख्यः, अपत्यः । अदिति इत्येव । सख्याः ।

२२८ **केवलसखिपतेरौ** ॥१।४।२६॥ केवलसखिपतिभ्यामिदन्ताभ्यां परो ङिरौः स्यात् । सख्यौ । शेषं मुनिवत् । इत इत्येव । सखायमिच्छति क्यनि दीर्घत्वे, सखीयतीति किपि, यलोपे सखीः–सख्यि । केवलग्रहणं किम् । प्रियसखौ । पतिशब्दः केवलः प्रथमाद्वितीययोर्मुनिवत् । तृतीयादौ च सखिवत् । पत्या । पत्ये । पत्युः २ । पत्यौ । समस्तश्च सर्वत्र मुनिवत् । मुनिपतिना । कतिशब्दो नित्यं बहुवचनान्तः

२२९ **डत्यतु संख्यावत्** ॥१।१।३९॥ डतिप्रत्ययान्तमतुप्रत्ययान्तं च नाम संख्यावद् भवति । एकद्यादिका लोकप्रसिद्धा संख्या, तत्कार्यं भजत इत्यर्थः ।

२३० **डतिष्णः संख्याया लुप्** ॥ १।४।५४ ॥ डतिषकारनकारान्तायाः

संख्यायाः संबंधिनोर्जस्शसोर्लुप् स्यात् । कति । कति। डतिष्ण इति किम् ।त्रयः। शतानि, सहस्राणीत्यत्र सन्निपातलक्षणत्वान्नान्तस्य न भवति । संख्याया इति किम् । विप्रुषः । राजानः । तत्संबंधिविज्ञानादिह न भवति । प्रियकतयः । प्रियकतीन् । ननु कतीति प्रथमाबहुवचने लुप्तजसः स्थानिवद्भावाज्जस्येदोदित्यनेनैत्वं कुतो न स्यादिति चेत्–

२३१ लुप्यय्वृल्लेनत् ॥७।४।११२॥ परस्य प्रत्ययस्य लुपि सत्यां लुबूभूतपरनिमित्तकं पूर्वकार्यं न स्यात्, अय्वृल्लेनत्–य्वृल्लुत्वमेनच्च वर्जयित्वा । अत एत्वं न ।कतिभिः। कतिभ्यः २ । कतीनाम्, कतिषु । अस्य त्रिष्वपि लिङ्गेषु सरूपत्वम्, अलिङ्गत्वात् । तथाहुः–'नान्ता संख्या डतिर्युष्मदस्मच्च स्युरलिङ्गकाः ' एवं यतिततिशब्दौ । अत्र सूत्रे लुपीतिवचनाल्लुकि भवत्येव ।। गोमान् । अत्र सिलुकि तन्निमित्तं दीर्घत्वं भवति । लुपीति सप्तमीनिर्देशात् पूर्वस्य यत्कार्यं प्राप्तं तन्निषिध्यते। समुदायस्य तु भवत्येव । पयः। साम । पञ्च । सप्त । अत्र पदसंज्ञा तथा च तन्निबन्धनानि रुत्वनलोपादीनि भवन्ति । कथं पापक्ति, पापचीति इत्यत्र द्वित्वम् । नेदं यङि निमित्ते किन्तु यङन्तस्य । अय्वृल्लेनदिति किम् । य्वृत्–व्यध्, वेविद्धि, श्वि-शोशवीति । ग्रह्–जरीगृहीति । ल्–गृ–निजागलीति। एनत्–एनत्पश्य।स्थानीवावर्णविधाविति लुपः स्थानिवद्भावेन प्राप्तानां कार्याणां प्रतिषेधार्थमिदं सूत्रम् । त्रिशब्दो नित्यं बहुवचनान्तः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः २ ।

२३२ त्रेस्त्रयः ॥१।४।३४॥ आमः संबंधिनस्त्रिशब्दस्य त्रयादेशः स्यात् । त्रयाणाम् । परमत्रयाणाम् । आम्संबंधिविज्ञानादिह न भवति । अतित्रीणाम् । अतत्संबंधिनोऽपिभवतीत्येके । प्रियत्रयाणाम् । त्रिषु। द्विशब्दो नित्यं द्विवचनान्तः।

२३३ आ द्वेरः ॥२।१।४१॥ द्विशब्दमभिव्याप्य त्यदादीनामन्तस्य तत्संबंधिनि स्यादौ तसादौ च परेऽकार आदेशः स्यात्। द्वौ २। द्वाभ्याम् ३ ।द्वयोः २। त्यदादिसंबंधिविज्ञानादिह न भवति । अतिद्विः । मुनिवत् । आ द्वेरिति किम् । किम् । औडुलोमिः । औडुलोमी । बहुवचने तु–

२३४ लोम्नोऽपत्येषु ॥६।१।२३॥ लोमन्शब्दात् प्राग्जितीयेऽपत्यलक्षणेऽर्थे अः प्रत्ययः स्यात् । उडुलोमाः । अपत्येष्विति बहुवचनात् एकस्मिन्नपत्ये द्वयोश्च बाह्वादित्वादिञेव । औडुलोमिम् । औडुलोमी । उडुलोमान् इत्यादि । इतीकारान्ताः ।

वातं प्रमिमीते वातप्रमीः । ' वातात् प्रमः कित् ' इत्युणादिसूत्रेण ईप्रत्ययः । वातप्रम्यौ । वातप्रम्यः । समानादमोऽतः । वातप्रमीम् । वातप्रम्यौ । वातप्रमीन् । वातप्रम्या । वातप्रमीभ्याम् ३ । वातप्रम्ये । वातप्रम्यः २ । वातप्रम्योः २ । दीर्घत्वान्न नाम् । वातप्रम्याम् । ङौ तु समानानां तेन दीर्घः । वातप्रमी । एवं यपीपप्यादयः । यान्त्यनेनेति ययीर्मार्गः । पाति लोकमिति पपीः सूर्यः । किंवन्तवातप्रमीशब्दस्य अमि शसि ङौ च विशेषः । वातप्रम्यम् । वातप्रम्यः । वातप्रम्यि । किब्वृत्तेरिति वक्ष्यमाणं यत्वम् । बहुव्यः श्रेयस्यो यस्य सः ।

२३५ दीर्घङ्याब्व्यंजनात् सेः ॥१।४।४५॥ दीर्घाभ्यां ङ्याब्भ्यां व्यंजनाच्च परस्य सेर्लुक् स्यात् । इति सिलुकि बहुश्रेयसी । एभ्य इति किम् । देवः । ङ्याब्ग्रहणं किम् । लक्ष्मीः । दीर्घग्रहणं किम् । निष्कौशाम्बिः । अतिखट्वः । पदस्येति सिद्धे व्यंजनग्रहणं राजेत्यादौ सिलोपार्थम् । अन्यथा सावपि पदत्वात् पदस्येति च परेऽसत्त्वात् पूर्वं नलोपे सेर्लुप् स्यात्, उखास्रदित्यादौ च संयोगस्यादौ स्कोर्लुकि दत्वं न स्यात् । बहुश्रेयस्यौ । बहुश्रेयसीम् । बहुश्रेयसीन् । बहुश्रेयस्या ।

२३६ स्त्रीदूतः ॥१।४।२९॥ नित्यस्त्रीलिङ्गादीकारान्तादूकारान्ताच्च शब्दात् परेषां तत्संबंधिनामन्यसंबंधिनां वा स्यादेर्ङित्तां स्थाने यथासंख्यं दै दास् दास् दाम् इत्येते आदेशाः स्युः । दकारो विशेषार्थः । बहुश्रेयस्यै । बहुश्रेयस्याः २ । बहुश्रेयसीनाम् । बहुश्रेयस्याम् । स्त्रिया इत्यनुवर्तमाने पुनः स्त्रीग्रहणं नित्यस्त्रीत्वार्थम् । तेनेह न भवति । ग्रामण्ये खलप्वे स्त्रियै । ईदूत इति किम् । मात्रे । ङितामित्येव । बहुश्रेयस्यः । संबोधने तु—

२३७ नित्यदिदुद्विस्वराम्बार्थस्य ह्रस्वः ॥१।४।४३॥ नित्यं दित्—दैदास्दास्दामलक्षण आदेशो येभ्यस्तेषां द्विस्वराम्बार्थानां चावन्तानामामन्त्येऽर्थे वर्तमानानां सिना सह ह्रस्वः स्यात् । हे बहुश्रेयसि । नित्यदिदिति किम् । हे वातप्रमीः । नित्यग्रहणादिह न भवति । हे श्रीः । हे बहुश्रेयस्यौ । हे बहुश्रेयस्यः । अतिलक्ष्मीः । अङ्यन्तत्वान्न सिलोपः । शेषं बहुश्रेयसीवत् । कुमारीमिच्छतीति क्यनन्तात् कुमारीवाचरतीति किवन्ताद्वा कर्तरि किपि, कुमारी । दीर्घङ्याबिति सिलोपः ।

२३८ धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये ॥२।१।५०॥ धातुसंबंधिन इवर्णोवर्णस्य स्थाने स्वरादौ प्रत्यये परे यथासंख्यमिय् उव् इत्येतावादेशौ स्याताम् । इतीयादेशे प्राप्ते—

२३९ **योऽनेकस्वरस्य** ॥२।१।५६॥ अनेकस्वरस्य धातोः संबंधिनः प्रत्यासत्तेरिवर्णस्य स्थाने स्वरादौ प्रत्यये परे यकारादेशः स्यात् । इति यत्वम् । कुमार्यौ । कुमार्यः । कुमार्यम् । शसि कुमार्यः । कुमार्यै । कुमार्याः २। कुमारीणाम् । कुमार्याम् । हे कुमारि । अनेकस्वरस्येति किम् । नयतीति नीः । नियौ । नियः । अमि शसि च परत्वादियँ । नियम् । नियः । निया । नीभ्याम् ।

२४० **निय आम्** ॥१।४।५१॥ नियः परस्य ङेः स्थाने आम् इत्ययमादेशः स्यात् । नियाम् । हेनीः । प्रधीः

२४१ **किब्वृत्तेरसुधियस्तौ** ॥२।१।५८॥किबन्तेनैव या वृत्तिः समासस्तस्याः सुधीशब्दवर्जितायाः संबंधिनो धातोरिवर्णोवर्णयोःस्थाने स्वरादौ स्यादौ परे यकारवकारादेशौ स्याताम् । प्रध्यौ । प्रध्यः । प्रध्यम् । प्रध्यः । उन्नयतीत्युन्नीः । उन्न्यौ । उन्न्यः । ङेराम् । उन्न्याम् । सेनां नेता—सोनानीः । यद्वा नयतीति नीः, पश्चात् साधनेन योगः । सेनान्यौ । ङौ तु सेनान्याम् । एवं ग्रामणीप्रभृतयः । अत्र सूत्रे किब्ग्रहणादिह न भवति । परमश्चासौ नीश्च परमनीः । परमनियौ । परमनियः । स्याद्यन्तेनात्र विशेषणसमासो न तु किबन्तेन । वृत्तिग्रहणादिह न भवति। ब्राह्मणस्य नियौ । असुधिय इति किम् । सुष्ठु ध्यायति दधाति वा सुधीः । सुधियौ। सुधियः । कथं शुद्धधियौ, परमधियौ । ' गतिकारकङस्युक्तानां प्राक् प्रत्ययोत्पत्तेः समास ' इति सुस्थमेव । अथ कथं दुर्धियो, वृश्चिकभियेत्यादि । उच्यते । दुःस्थिता धीर्येषामिति विग्रहे दुरित्यस्य धीशब्दं प्रति गतित्वमेव नास्ति, यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः । वृश्चिकशब्दस्य बुद्धिकृतमपादानत्वं नेह विवक्षितम् । वृश्चिकसंबंधिनी भीर्वृश्चिकभीरित्युत्तरपदलोपो वा । यवान् क्रीणाति इति यवक्रीः ।

२४२ **संयोगात्** ॥२।१।५२॥ धातुसंबंधिन इवर्णस्योवर्णस्य च धातुसंबंधिन एव संयोगात् परस्य स्वरादौ प्रत्यये परे इयुवावादेशौ य्वोरपवादौ स्याताम् । यवक्रियौ । यवक्रियः । धातुना संयोगस्य विशेषणादिह न भवति। उन्न्यौ। उन्न्यः । यवक्रिया। सुश्रीशब्दस्य ङित्सु विशेषः ।

२४३ **वेयुवोऽस्त्रियाः** ॥१।४।३०॥ इयुवोः संबंधिनौ यौ स्त्रीदूतौ तदन्ताच्छब्दात् परेषां तत्संबंधिनामन्यसंबंधिनां वा स्यादेर्ङित्तां यथासंख्यं दै दास् दास् दाम् इत्येते आदेशा वा स्युः, स्त्रीशब्दं वर्जयित्वा । सुश्रियै । सुश्रिये । सुश्रियाः २। सुश्रियः ।२

स्त्रीदूत इत्येव, यवक्रिये । अस्त्रिया इति निर्देशात् परादपि इयुवयत्वादिकार्यात् प्रागेव स्त्रीदूदाश्रितं कार्यं भवति, तेन कुमार्यै, मध्यै इत्यादि सिद्धम् ।

२४४ **आमो नाम् वा** ॥१।४।३१॥ इयुवोः संबंधिनौ यौ स्त्रीदूतौ तदन्ताच्छब्दात् परस्य तत्संबंधिनोऽन्यसंबंधिनो वा आमो नाम् वा स्यात्, स्त्रीशब्दं वर्जयित्वा । सुश्रीणाम् । सुश्रियाम् । सुश्रियाम् । सुश्रियि । सखायमिच्छति—क्यन्—क्विप्—सखीः । सख्यौ—योऽनेकस्वरस्येति यत्वम् । ङसिङसोस्तु खितिखीतीत्युर्—सख्युः २ । ङौ सख्यि । एवं पतिमिच्छति—क्यन्, क्विप्—पतीः । सह खेन वर्तत इति सखीः । सुखमिच्छति सुखीः । सुतमिच्छति सुतीः । पत्युः २ । सख्युः २ । सुख्युः २ । सुत्युः २ । लूनमिच्छति लूनीः । क्षाममिच्छति क्षामीः । प्रस्तीममिच्छति प्रस्तीमीः । एषां ङसिङसोर्थत्वे कृते—

२४५ **क्तादेशोऽषि** ॥२।१।६१॥ ककारेण उपलक्षितस्य तकारस्य स्थाने य आदेशः स षकारादन्यस्मिन् परे कार्ये स्वादिविधौ च कर्तव्येऽसन् द्रष्टव्यः । इत्येवं नत्वमत्वयोरसत्त्वात् खितिखीतीत्युर् भवत्येव । लून्युः २ । क्षाम्युः २ प्रस्तीम्युः २ । शुष्कीयतेः क्विपि शुष्कीः । संयोगादितीयादेशः । शुष्किर्यौ । शुष्कियः । ङसिङसोरपि शुष्कियः २ । अत्र यद्यपि क्तादेशस्यासत्त्वेन तीत्वे लब्धेऽपि कृतयत्वस्याभावान्नोर् । इतीकारान्ताः ।

साधुर्मुनिवत् । एवं वायुभानुगुर्वादयः । क्रुशधातोस्तुन्प्रत्यये क्रोष्टुशब्दः ।

२४६ **क्रुशस्तुनस्तृच् पुंसि** ॥१।४।९१॥ क्रुशःपरो यस्तुन् तस्य शेषे घुटि परे तृजादेशः स्यात् पुंसि । 'क्रोष्टोः क्रोष्टृ' इत्यकृत्वा तृज्वचनं स्वस्रादिसूत्रेणारर्थम् ।

२४७ **अर्डौ च** ॥१।४।३९॥ ऋकारस्य स्थाने ङौ घुटि च परेऽर् इत्ययमादेशः स्यात् । इति भाषे ।

२४८ **तृस्वस्रनप्तृनेष्टृक्षत्तृहोतृपोतृप्रशास्त्रो घुट्यार्** ॥१।४।३८॥ तृच्तृन्प्रत्ययान्तस्य स्वस्रादिशब्दानां च संबंधिन ऋकारस्य स्थाने तत्संबंधिनि वा घुटि परे आर् इत्ययमादेशः स्यात् । तृशब्दस्यार्थवतो ग्रहणेन प्रत्ययग्रहणान्नप्त्रादीनामव्युत्पन्नानां संज्ञाशब्दानां तृशब्देन ग्रहणं न भवतीति तेषां पृथगुपादानम् । इदमेव च ज्ञापकम्, 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणं भवती' ति । व्युत्पत्तिपक्षे तु तृग्रहणेनैव सिद्धे नप्त्रादिग्रहणं नियमार्थम्, तेनान्येषामौणादिकानां न भवति ।

केचित्तु प्रस्तोतृन्नेतृद्गातृप्रतिहर्तृप्रतिस्थातृशब्दानामौणादिकानामपि आरं मन्यन्ते। अस्य विशेषविहितत्वेनार्। क्रोष्टा।क्रोष्टारौ। क्रोष्टारः। क्रोष्टारम्। क्रोष्टारौ। प्रियक्रोष्टा। बहिरङ्गपरिभाषया ऋदिल्लक्षणो न कच्। घुटीति किम्। क्रोष्टून्।

२४९ टादौ स्वरे वा ॥१।४।९२॥ टादौ स्वरादौ परे क्रुशः परस्य तुनस्तृजादेशो वा स्यात् पुंसि। क्रोष्ट्रा। क्रोष्टुना। क्रोष्ट्रे। क्रोष्टवे।

२५० ऋतो डुर् ॥१।४।३७॥ ऋकारात् परयोर्ङसिङसोः स्थाने डुर् इत्ययमादेशःस्यात्। क्रोष्टुः २। आमि तु[1] नित्यत्वात् पूर्वं नामि कृते स्वराभावान्न तृजादेशः। क्रोष्टूनाम्। क्रोष्टरि। क्रोष्ट्रोः २। पक्षे व्यंजनादौ च साधुवत्। इत्युकारान्ताः पुँल्लिङ्गाः।

हूहूः। हूहुवौ। हूहवः। हूहूम्। हूहुवौ। हूहूनित्यादि। अतिचमूशब्दे तु स्त्रीदूत्कार्यं विशेषः। अतिचम्वै। अतिचम्वाः २ इत्यादि बहुश्रेयसीवत्। खलपूः। खलप्वौ। खलप्वः। किब्वृत्तेरिति वत्वम्। एवं सुल्वादयः। लूः। लुवौ। लुवः। स्वभूः। स्वभुवौ। स्वभुवः। इत्यादि सुधीशब्दवत्। कटप्रूः। कटप्रुवौ। संयोगादित्युव्। हन् (हिंसन्) भवतीति हन्भूः।

२५१ हन्पुनर्वर्षाकारैर्भुवः ॥२।१।५९॥ हन् पुनर् वर्षा कार इत्येतैः सह या किब्वृत्तिस्तत्संबंधिनो भुवो धातोरुवर्णस्य स्वरादौ स्यादौ प्रत्यये परे वकारादेशः स्यात्। हन्भ्वौ। हन्भ्वः। वर्षाभूरोषधीविशेषो दर्दुरश्च। वर्षाभ्वौ। वर्षाभ्वः। कारे कारेण वा भवति कारभूः। कारभ्वौ। कारभ्वः। इत्यादि खलपूवत्। हनादिभिरिति किम्। स्वयंभुवौ। स्वयंभुवः। पूर्वेणैव सिद्धे नियमार्थमिदम्। एतैरेव भुवो नान्यैरिति। वसुमिच्छति क्यन्, किप् वसूः।

२५२ स्यादौ वः ॥२।१।५७॥ अनेकस्वरस्य धातोः संबंधिनः प्रत्यासत्तेरुवर्णस्य स्थाने स्वरादौ स्यादौ परे वकारादेशः स्यात्। वस्वौ। वस्वः। किबन्ता धातुत्वं नोज्झन्ति शब्दत्वं च प्रतिपद्यन्ते इत्येषां धातुत्वं ज्ञेयम्। स्यादाविति किम् लुलुवुः।

कर्ता। अतिकर्ता। कर्तारौ। अतिकर्तारौ। कर्तॄणाम्। हे कर्तः। एवं नप्त्रादयः। व्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य नियमार्थत्वात् पितरौ। पितरः। पितरम्। पितरौ। शेषं कर्तृवत्। एवं भ्रात्रादयः। ना। नरौ। नरः।

---

१ कृताकृतप्रसंगेनेत्यर्थः।

२५३ **नुर्वा** ॥१।४।४८॥ नृशब्दसंबंधिनः समानस्य नामि परे दीर्घो वा स्यात् । नॄणाम् । नृणाम् । अतिनॄणाम् । अतिनृणाम् । इति ऋकारान्ताः ।

कॄ तॄ अनयोरनुकरणे ' प्रकृतिवदनुकरणम् ' इति वैकल्पिकातिदेशाद् ' ऋतां क्ङिद्गतीर् ' इत्यनेनेर्त्वे 'पदान्त' इत्यनेन दीर्घे च कीः । किरौ । किरः । तीः । तिरौ । तिरः इत्यादि गीर्वत् । इरभावपक्षे तु ऋदुशन इत्यत्र अर्डौ चेत्यत्र च तपरकरणान्न डारौ । कॄः । क्रौ । क्रः । कॄम् । क्रौ । कॄन् । इत्यादि । इति ऋकारान्ताः ।

गम्लॄ शक्लॄ अनयोरनुकरणे ऋकारकार्यं लृकारेऽपि भवतीति सेर्डा । गमा । शका । अर्विषये च लत्वम् । गमलौ । शकलौ । ङसिङसोर्गमुल् शकुल् । इति लृकारान्ताः । दीर्घलृकारान्ता अप्रसिद्धाः । एकारान्त अतिहेशब्दः । अतिहेः । स्वरादावयादेशः । अतिहयौ । संबोधनेऽदेतः स्यमोरिति सिलुपि हे अतिहे । ऐकारान्तो रैशब्दः ।

२५४ **आ रायो व्यंजने** ॥२।१।५॥ स्वसंबंधिन्यन्यसंबंधिनि वा व्यंजनादौ स्यादौ परे रैशब्दस्याकारान्तादेशः स्यात् । राः । स्वरादावायादेशः । रायौ । रायः । राभ्याम् । राभिः । रासु । हे राः । एवं अतिराः । अतिराभ्याम् । अतिरासु । व्यंजन इति किम् । रायौ । स्यादावित्येव । रैस्रुत्रम् । स्मीत्येव सिद्धे व्यंजनग्रहणमुत्तरार्थम् । ओकारान्तो गोशब्दः ।

२५५ **ओत औः** ॥१।४।७४॥ ओकारस्य ओत एव विहिते घुटि परे औकार आदेशः स्यात् । गौः । गावौ । गावः । ओत इति किम् । चित्रा गौर्यस्य सः चित्रगुः । चित्रगू । विहितविशेषणादिह न भवति । हे चित्रगवः । घुटीत्येव । गवा ।

२५६ **आ अम्शसोऽता** ॥ १।४।७५ ॥ ओकारस्यामशसोरकारेण सह आकारः स्यात् । गाम् । गावौ । गाः । स्यादावित्येव । अचिनवम् । गवा । गोभ्याम् । एदोद्भ्यां ङसिङसोर इति रत्वे गोः २ । गवाम् । गोषु । एवं सुद्यौः । सुद्यावौ । सुद्याव इत्यादि । इत्योकारान्ताः । औकारान्तो ग्लौशब्दः । ग्लौः । ग्लावौ । ग्लावः । ग्लावम् । ग्लावः इत्यादि । एवं सुनौप्रभृतयः । इत्यौकारान्ताः ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां स्वरान्तपुँल्लिङ्गप्रकरणम्
समाप्तम् ॥

॥ अथ स्वरान्तस्त्रीलिङ्गप्रकरणम् ॥

आकारान्तः स्त्रीलिङ्गो गङ्गाशब्दः । दीर्घङ्याविति सिलुकि गङ्गा ।

२५७ **औता** ॥१।४।२०॥ आबन्तस्य संबंधिना औता—प्रथमाद्वितीयाद्विवचनेनौकारेण सहाबन्तस्यैवैकारान्तादेशः स्यात् । गङ्गे । गङ्गाः । गङ्गाम् । गङ्गे । शसि स्त्रीत्वान्नत्वाभावे गङ्गाः । आप इत्येव । कीलालपौ पुरुषौ । तत्संबंधिविज्ञानादिह न भवति । बहुखट्वौ पुरुषौ । इह तु भवति । ईषदपरिसमाप्ते खट्वे बहुखट्वे मञ्चकौ ।

२५८ **टौस्येत्** ॥१।४।१९॥ आबन्तस्य संबंधिनोष्टौसोः परयोरेकारान्तादेशः स्यात् । गङ्गया । गङ्गाभ्याम् । गङ्गाभिः ।

२५९ **आपो ङितां यै यास् यास् याम्** ॥१।४।१७॥ आबन्तसंबंधिनां स्यादेर्ङितां यथासंख्यं यै यास् यास् याम् इत्येते आदेशाः स्युः । गङ्गायै । गङ्गायाः २ । ह्रस्वापश्चेति आमो नामादेशे गङ्गानाम् । गङ्गायाम् । गङ्गयोः । गङ्गासु ।

२६० **एदापः** ॥१।४।४२॥ आमन्त्र्येऽर्थे वर्तमानस्याबन्तस्य सिना सह एकारान्तादेशः स्यात् । हे गङ्गे । आ आप इति आकारमश्लेषादिह न भवति । हे प्रियखट्व । आमन्त्र्य इत्येव । गङ्गा । एवं शालामालादयः । सर्वादीनामयं विशेषः—

२६१ **सर्वादेर्डस्पूर्वाः** ॥१।४।१८॥ सर्वादेराबन्तस्य संबंधिनां ङितां यै यास् यास् यामो डस्पूर्वाः स्युः । सर्वस्यै । सर्वस्याः २ । सर्वासाम् । सर्वस्याम् । शेषं गङ्गावत् । एवं विश्वादय आबन्ताः । तीयस्य विकल्पेन ङित्कार्ये सर्वादित्वात् द्वितीयस्यै । द्वितीयायै । एवं तृतीया । सर्वादेरिति किम् । सर्वा नाम काचित् सर्वायै । तत्संबंधिविज्ञानादिह न भवति । प्रियसर्वायै । दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा । दक्षिणपूर्वायै । दक्षिणपूर्वायाः २ । दक्षिणपूर्वायाम् इत्यादि गङ्गावत् । अत्र बहुव्रीहिसमासस्यान्यपदार्थप्राधान्यात् सर्वादित्वाभावः । यद्येवं कथं दक्षिणपूर्वस्यै, दक्षिणपूर्वस्याः २, दक्षिणपूर्वस्याम् इति । दक्षिणा चासौ पूर्वा चेति कर्मधारये भविष्यति । अथ च बहुव्रीह्यादेः सर्वादित्वाभावे कथं त्वकत्पितृकः मकत्पितृक इत्यादावक्प्रत्ययः । उच्यते । अन्तरङ्गत्वात् पूर्वमेवाक् भविष्यति । अन्ये तु बहुव्रीहावन्तरङ्गस्याप्यकः प्रतिषेधमिच्छन्ति तन्मते कप्प्रत्यय एव । त्वत्कपितृको मत्कपितृक इत्यादि । अम्बा । अक्का । अल्ला ।

संबोधने नित्यदिदिति ह्रस्वः । हे अम्ब । हे अक्क । हे अल्ल । एवं हे अत्त । हे अनम्ब । हे परमाम्ब । हे प्रियाम्ब । नित्यदिदित्यत्र अम्बार्थानां द्विस्वरेति विशेषणान्नेह । हे अम्बाडे । हे अम्बाले । हे अम्बिके । जरा । जरसौ । जरे इत्यादि स्वरादौ वा जरस् । पक्षे व्यंजनादौ च गङ्गावत् । नासिका । नासिके । नासिकाः। नासिकाम् । नासिके। शसादौ दन्तपादेति नासिकाया वा नस् । नसः। नासिकाः नसा । नोभ्याम् । इत्यादि । पक्षे गङ्गावत् । निशाया मासनिशेत्यन्तलुकि निशः । निशा । यजसृजेति षत्वविधायके सूत्रे यजादिधातुसाहचर्यात् शकारस्यापि धातोः संबंधिन एव ग्रहणादिह (भ्यामि) न षत्वमिति धुटस्तृतीय इत्यनेन जकारे । निज्भ्याम् । सुपि तु जकारस्य प्रथमत्वे सस्य शषाविति सुपः सकारस्य शत्वे प्रथमादघुटीति छत्वे च निच्छु इत्यादि । पक्षे गङ्गावत् । [1]पृतनाशब्दस्य गङ्गावद्रूपाणि । गोपाः कीलालपावत् । बुद्धिः प्रायो मुनिवत् । शसि स्त्रीत्वान्नत्वाभावः । बुद्धीः । नात्वमपि न । बुद्ध्या ।

२६२ **स्त्रियां ङितां वा दै दास् दास् दाम्** ॥१।४।२८॥ स्त्रीलिङ्गादिदुदन्ताच्छब्दात् परेषां तत्संबंधिनामन्यसंबंधिनां वा स्यादेर्ङितां यथासंख्यं दै दास् दास् दाम् इत्येते आदेशा वा स्युः । दकारोऽन्यत्र विशेषणार्थः । बुद्ध्यै । बुद्धये। बुद्ध्याः २ । बुद्धेः २ । बुद्ध्याम् । बुद्धौ । एवं प्रियबुद्ध्यै, प्रियबुद्धये । अत्र समासार्थस्य पुरुषत्वेऽपि बुद्धिशब्दस्य स्त्रीत्वमस्तीति भवत्येव । अन्ये तु पुरुषस्य समासार्थत्वे सति नेच्छन्ति, तन्मते प्रियबुद्धये । अन्यस्तु पुरुषस्यैव समासार्थत्वे सति इच्छति न स्त्रियाः, तन्मते प्रियबुद्ध्यै पुरुषायेत्यत्रैव भवति, नतु प्रियबुद्धये स्त्रियै इत्यत्र । एवं मत्यादयः ।

२६३ **त्रिचतुरास्तिसृचतसृ स्यादौ** ॥२।१।१॥ त्रि चतुर् इत्येतयोः स्त्रीलिङ्गे वर्तमानयोस्तत्संबंधिन्यन्यसंबंधिनि वा स्यादौ विभक्तौ तिसृ चतसृ इत्येतावादेशौ स्याताम् ।

२६४ **ऋतो रः स्वरेऽनि** ॥ २।१।२ ॥ तिसृचतसृसंबंधिन ऋकारस्य स्थाने तत्संबंधिन्यन्यसंबंधिनि वा स्वरादौ परतो रादेशः स्यात्, अनि—नकारविषयादन्यत्र । समानदीर्घत्वार्डुरामपवादः। तिस्रः २। तिसृभिः। तिसृभ्यः २ । आमि नाम्। तिसृणाम्।

---

१ पृतनाशब्दस्य शसादौ वा पृत् आदेश इत्येवंमते पृतः, पृता, पृद्भ्यामित्याद्यपि भवति ।

दीर्घो नाम्यतिस्र इत्यत्र अतिस्रित्यादिनिषेधान्न दीर्घः । तिसृषु । प्रियास्तिस्रोऽस्येति प्रियतिसा । प्रियतिस्रौ । प्रियतिस्रः । प्रियतिस्रमित्यादि । प्रियास्रयः त्रीणि वा यस्याः सा प्रियत्रिरिति विग्रहे तु प्रियत्रिबुद्धिवत् । आमि प्रियत्रयाणामित्येके । अत्र त्रिशब्दोऽस्त्रियां, समास एव तु स्त्रियामित्यादेशो न स्यात् । प्रियास्तिस्रोऽस्य कुलस्य प्रियत्रि । स्यमोर्लुपा लुप्तत्वेन स्थानिवद्भावाभावान्न तिस्रादेशः । प्रियतिसृणी । प्रियतिसृणी । अत्र तिस्रादेशस्तु भवत्येव । किंच विभक्त्याश्रयत्वेन बहिरङ्गलक्षणस्य तिस्रादेशस्यासिद्धत्वात् समासान्तः कच् न भवति । परत्वाच तिस्रादेशे कृते पश्चान्नागमः । कथं प्रियतिसृ कुलम् । नामिनो लुग्वेति लुकि सति स्थानिवद्भावाद् भविष्यति तिस्रादेशः । अथ कथं तिसृका नाम ग्रामः । संज्ञाशब्दोऽयम् । द्वेरत्वे सत्याप् । द्वे २ । द्वाभ्याम् ३ । द्वयोः २ । नदी । नद्यौ । नद्यः । नदीम् । नद्यौ । नदीः । नद्या । ङित्सु स्त्रीदूत्कार्यम् । नद्यै । नद्याः २ । नद्याम् । हे नदि । एवं गौर्यादयः । सखीशब्दोऽपि तद्वत् । अङ्न्यन्तत्वान्न सिलोपः—लक्ष्मीः । शेषं नदीवत् । एवं [1]तरीतन्त्र्यादयः । स्त्री । स्त्रिया इतीयादेशः । स्त्रियौ । स्त्रियः । वाम्शसि । स्त्रियम् । स्त्रीम् । स्त्रियः । स्त्रीः । आमि तु अस्त्रिया इति निर्देशेन स्त्रीदूत्कार्येणेयुवादीनां बाधात् नामेव । स्त्रीणाम् । हे स्त्रि । स्त्रियमतिक्रान्त इत्यादि तूक्तमेव । स्त्रियमतिक्रान्तं कुलमतिस्त्रि । अतिस्त्रिणी । अतिस्त्रीणि । अतिस्त्रिणा । अतिस्त्रिणे । ङेप्रभृतिस्वरादौ वक्ष्यमाणपुंवद्भावात् पक्षे प्राग्वद्रूपम् । अतिस्त्रये । अतिस्त्रिणः २ । अतिस्त्रेः २ । अतिस्त्रिणोः २ । अतिस्त्रियोः २ । इत्यादि । स्त्रियमतिक्रान्ता अतिस्त्रीति स्त्रियां तु प्रायेण पुंवत् । शसि अतिस्त्रीः । अतिस्त्रिया । ङित्सु च स्त्रियां ङितां वेति दैदासादयः । अतिस्त्रियै । अतिस्त्रये । अतिस्त्रियाः २ । अतिस्त्रेः २ । अतिस्त्रीणाम् । अतिस्त्रियाम् । अतिस्त्रौ । स्त्रीमिच्छति स्त्रीवाचरति ब्राह्मणः स्त्री । अस्य क्यन्नाद्यन्तस्य तु धातुत्वात् धातोरिवर्णेत्यादिना नित्यमियादेशः । स्त्रियम् । स्त्रियः । श्रीः । श्रियौ । श्रियः । श्रिया । वेयुवोऽस्त्रियाः, श्रियै । श्रिये । श्रियाः २ । श्रियः २ । आमि वा नाम् । श्रीणाम् । श्रियाम् । श्रियि । श्रियाम् । हे श्रीः । एवं श्रियमतिक्रान्ता ब्राह्मणी अतिश्रीः । पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति स्त्रीकुर्वतां केषांचिन्मते प्रधीशब्दस्य

---

१ उक्तं हि—' अवीतन्त्रीतरीलक्ष्मीधीह्रीश्रीणामुणादिषु ।
सखस्त्रीलिङ्गशब्दानां सिलोपो न कदाचन ॥

लक्ष्मीवद् रूपम्। लिङ्गान्तरानभिधायकं तदिति मतान्तरे तु पुंवद् रूपम्। प्रकृष्टा धीरिति विग्रहे तु लक्ष्मीवदेव। अमि शसि च प्रध्यं प्रध्य इति विशेषः। सुष्ठु धीर्यस्याः, सुष्ठु ध्यायति येति विग्रहे तु पूर्वमते सुधीः श्रीवत्। मतान्तरे पुंवत्। सुष्ठु धीरिति विग्रहे तु श्रीवदेव। ग्रामणीः सेनानीवत्। ग्रामनयनस्योत्सर्गतः पुंधर्मतया पदान्तरं विना स्त्रियामप्रवृत्तेः। एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यम्। धेनुर्बुद्धिवत्। एवं तन्वादयः।

२६५ **स्त्रियाम्** ॥१।४।९३॥ घुटीति न संबंध्यते। क्रुशस्तुनस्तृच् पुंसि स्त्रियां चेत्येकयोगाकरणात्। स्त्रियां वर्तमानस्य क्रुशः परस्य तुनस्तृजादेशः स्यान्निर्निमित्त एव।

२६६ **स्त्रियां नृतोऽस्वस्रादेर्ङीः** ॥२।४।१॥ स्त्रियां वर्तमानान्नकारान्ताद्दकारान्ताच्च स्वस्रादिवर्जिताच्चान्नो ङीः स्यात्॥ क्रोष्ट्री। इत्यादि नदीवत्। पञ्चभिः क्रोष्ट्रीभिः क्रीतैरिति विगृह्य 'मूल्यैः क्रीते इति इकणि तस्य च' अनाम्यद्विरिति लुपि ङ्यादेरिति ङीनिवृत्तौ च पञ्चक्रोष्ट्भी रथैः। अत्र निर्निमित्तत्वादादेशस्य ङीनिवृत्तावपि निवृत्तिर्न भवति। अत एव च क्यङ्मानीति पुंवद्भावो न भवति। पुंवद्भावेनापि हि आदेश एव निवर्तनीयः, स च निमित्तत्वाश्रयणेन ङीनिवृत्तावपि निवर्तत एव। स्त्रियां नृत इत्यत्र स्त्रियामिति किम्। पञ्च। नान्तायाः संख्याया युष्मदस्मदोरिवालिङ्गत्वात्। अत एव नकारलोपेऽपि आदित्यावपि न भवति। अस्वस्रादेरिति किम्। स्वसा। अतिस्वसा। दुहिता। ननान्दा। याता। माता। तिस्रः चतस्रः। तिसृचतसृादेशस्य विभक्त्यनन्तरनिमित्तत्वात् संनिपातलक्षणत्वेन तद्विघातकत्वाभावादेव ङीनिवृत्तौ सिद्धायां स्वस्रादिषु तयोः पाठः संनिपातलक्षणन्यायस्यानित्यत्वज्ञापनार्थः, तेनातिदध्न्या कन्ययेत्यादौ विभक्तिनिमित्तोऽनादेशे सति ङीः सिद्धो भवति। एवं या सेत्यादिषु अकारादेशे आबपि। वधूर्नदीवत्। एवंजम्ब्वादयः। भ्रूः।

२६७ **भ्रूक्ष्णोः** ॥२।१।५२॥ भ्रू क्षु इत्येतयोरुवर्णस्य संयोगात् परस्य स्वरादौ प्रत्यये परे उवादेशः स्यात्। भ्रुवौ। भ्रुव इत्यादि श्रीवत्। सुभ्रूः। हे सुभ्रूः। कथं तर्हि हे सुभ्रु, हे भीरु। स्त्रीपर्यायत्वाद्ङि कृते भविष्यति। खलपूः पूवत्। पूनर्भूः पुनरूढा स्त्री। पुनर्भ्वौ। पुनर्भ्वः। दान्नित्यादिना वत्वम्।

२६८ कवर्गैकस्वरवति ॥२।३।७६॥ पूर्वपदस्थाद्रषृवर्णात् परस्य कवर्गवति एकस्वरवति चार्थादुत्तरपदान्तस्य तथा नागमस्य स्यादेश्च नकारस्य णः स्यात् , न चेत्स नकारः पक्षशब्दसंबंधी भवति । वोत्तरपदान्तेत्यादिना विकल्पे प्राप्ते नित्यार्थं वचनम् । पुनर्भूणाम् । वर्षाभूः । भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान् ' इति कोशात् पुनर्नवायां नित्यस्त्रीत्वात् हे वर्षाभु । दर्दुरजातौ नित्यस्त्रीत्वाभावात् हे वर्षाभूः । स्वयंभूः पुंवत् । स्वसा । स्त्रियां ऋत इत्यत्र अस्वस्रादेरिति निषेधान्न ङीः । स्वस्रादयः सप्त तत्रैवोक्ताः । स्वसारौ । स्वसारः । माता पितृवत् । शसि मातॄः । राः पुंवत् । द्यौर्गोवत् । नौर्ग्लौवत् ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां स्वरान्तस्त्रीलिङ्गप्रकरणम्
समाप्तम् ॥

॥ अथ स्वरान्तनपुंसकलिङ्गप्रकरणम् ॥

२६९ अतः स्यमोऽम् ॥१।४।५७॥ अकारान्तस्य नपुंसकस्य संबंधिनोः स्यमोरमित्ययमादेशः स्यात् । समानादमोऽतः । कुण्डम् । नपुंसकस्येत्येव । वृक्षः । अत इति किम् । दधि । तत्संबंधिविज्ञानादिह न भवति । प्रियकुण्डः । अमोऽकारोच्चारणं जरसादेशार्थम् , तेनातिजरसं कुलमित्यादि सिद्धम् ।

२७० औरी ॥१।४।५६॥ नपुंसकस्य संबंधी औकार ईकारः स्यात् । कुण्डे । तत्संबंधिविज्ञानादिह न भवति । प्रियकुण्डौ । इह तु स्यादेव । परमकुण्डे ।

२७१ नपुंसकस्य शिः ॥ १।४।५५॥ नपुंसकस्य संबंधिनोर्जसशसोः स्थाने शिः स्यात् । स च घुट्संज्ञकः शेषघुट्संज्ञकश्च । शकारो विशेषार्थः ।

२७२ स्वराच्छौ ॥१।४।६५॥ जस्शसादेशे शौ परे स्वरान्तान्नपुंसकात् परो नोऽन्तः स्यात् ।

२७३ नि दीर्घः ॥१।४।८५॥ शेषे घुटि परे यो नकारस्तस्मिन् परे पूर्वस्य स्वरस्य दीर्घः स्यात् । कुण्डानि । द्वितीयायामप्येवम् । अदेतः स्यमोरित्यमो लुकि हे कुण्ड । शेषं देववत् । एवं कुलादयः । सर्वादिष्वन्यादीनां विशेषः ।

२७४ पञ्चतोऽन्यादेरनेकतरस्य दः ॥१।४।५८॥ नपुंसकानामन्यादीनां सर्वाद्यन्तर्वर्तिनां पञ्चपरिमाणानां संबंधिनोः स्यमोः स्थाने द इत्ययमादेशः स्यात् ,

एकतरशब्दं वर्जयित्वा। अकार उच्चारणार्थः। विरामे वा। अन्यत्। अन्यद्। अन्ये। अन्यानि। पुनस्तद्वत्। एवमन्यतरत्। इतरत्। कतरत्। कतमत्। शेषं पुंवत्। अनेकतरस्येति किम्। एकतरम्। पश्चत इति किम्। नेमम्। नपुंसकस्येत्येव। अन्यः। अन्या। अन्यादिसंबंधिनोः स्यमोर्ग्रहणादिह न भवति। प्रियान्यम्। इह तु भवति–परमान्यत्। अतिजरम्। जरसादेशपक्षे—

२७५ **जरसो वा** ॥१।४।६०॥ जरसन्तस्य नपुंसकस्य संबंधिनोः स्यमोर्वा लुप् स्यात्। अतिजरः, अतिजरसम्। अतिजरसी, अतिजरे। अन्ये तु द्वितीयैकवचनस्यैवामो योऽमादेशस्तस्यैव लुबविकल्पमिच्छन्ति न स्यादेशस्य, तन्मते प्रथमैकवचने अतिजरसम्, अतिजरमित्येव रूपद्वयम्। केचिज्जरसः स्यमोर्लोपं नेच्छन्ति, तन्मते प्रथमाद्वितीययोरपि प्रत्येकं रूपद्वयमेव। प्रथमाबहुवचने विकल्पेन जरसादेशे कृते—

२७६ **धुटां प्राक्** ॥१।४।६६॥ स्वरात् परा या धुड्जातिस्तदन्तस्य नपुंसकस्य धुड्भ्य एव प्राक् शौ परे नोऽन्तः स्यात्। धुटामिति बहुवचनं जातिपरिग्रहार्थम्। तेन काष्ठतङ्क्षि, गोरङ्क्षि, कुलानीति सिद्धम्।

२७७ **न्समहतोः** ॥१।४।८६॥ न्सन्तस्य महच्छब्दस्य च संबंधिनः स्वरस्य शेषे धुटि दीर्घः स्यात्। अतिजरांसि। अतिजराणि। पुनस्तद्वत्। शेषं पुंवत्। हृदयम्। हृदये। हृदयानि। हृदयम्। हृदये। दन्तपादेति वा हृदादेशे धुटां प्रागिति नागमे च–

२७८ **म्नां धुड्वर्गेऽन्त्योऽपदान्ते** ॥ १।३।३९॥ अपदान्ते वर्तमानानां मकारनकाराणां धुट्संज्ञके वर्गे परे प्रत्यासत्तेर्निमित्तवर्गस्यैवान्त्योऽनु भवति। हृन्दि, हृदयानि। हृदा, हृदयेनेत्यादि। उदकम्। उदके उदकानि। उदकम्। उदके। उदानि। उदकानि। उद्ना। उदकेनेत्यादि। आसनशब्दस्यान्तलुकि–आसनानि–आसानि। आस्ना–आसनेनेत्यादि। (आस्यशब्दस्यासन्नादेश इति पाणिनीयाः)

२७९ **क्लीबे** ॥२।४।९७॥ नपुंसके वर्तमानस्य स्वरान्तस्य नाम्नो ह्रस्वः स्यात्। कीलालपं कुण्डवत्। काण्डे, कुड्ये इत्यादावेत्वदीर्घत्वादेर्निमित्तान्तरापेक्षत्वेन बहिरङ्गस्यासिद्धत्वात् ह्रस्वत्वं न भवति। काण्डीभूतं शुक्लीभूतमित्यादावव्ययानामलिङ्गत्वाच्च।

२८० **अनतो लुप्** ॥ १।४।५९ ॥ अनकारान्तस्य नपुंसकस्य संबंधिनोः स्यमोर्लुप् स्यात् । वारि २ । लुकमकृत्वा लुप्करणं स्यमोः स्थानिवद्भावेन यत्कार्यं तस्य प्रतिषेधार्थम् , तेन यत् तत् इत्यादौ त्यदाद्यत्वं न भवति । वारिऔ इति स्थिते । औरीतीकारे कृते–

२८१ **अनाम्स्वरे नोऽन्तः** ॥१।४।६४॥ नाम्यन्तस्य नपुंसकस्य संबंधिन्याम्वर्जिते स्यादौ स्वरे परे नोऽन्तः स्यात् । वारिणी २ । वारीणि २ । वारिणा । वारिणे । वारिणः २ । वारिणोः २ । अनामिति निषेधान्नामि कृते वारीणाम् । अत्र नागमाभावे नामि सति दीर्घो नाम्यतिस्नित्यादिना दीर्घः सिद्धः । वारिणि । संबोधने–

२८२ **नामिनो लुग्वा** ॥ १।४।६१ ॥ नाम्यन्तस्य नपुंसकस्य संबंधिनोः स्यमोर्लुग्वा स्यात् । लुपैव सिद्धे लुग्वचनं स्थानिवद्भावार्थम् , तेन लुप्तप्रत्ययनिमित्तकं कार्यं स्यादिति सिना सह गुणे हे वारे । पक्षे अनतो लुबिति सेर्लुप् । लुपि न तन्निमित्तमिति गुणाभावे हे वारि । व्यंजनादौ मुनिवत् । तत्संबंधिविज्ञानात् प्रियवारये ।

२८३ **वान्यतः पुमांष्टादौ स्वरे** ॥१।४।६२॥ यो नाम्यन्तः शब्दोऽन्यतो विशेष्यवशान्नपुंसकः स टादौ स्वरे पुंवद्वा स्यात् । शुचये । शुचिने । इत्यादि वारिवत् । अन्यत इति किम् त्रपुणे । जतुने । पीलुने फलाय । टादाविति किम् । शुचिनी । स्वर इति किम् । शुचिभ्याम् । नामिन इत्येव । कीलालपेन कुलेन । नपुंसक इत्येव । कल्याण्यै ब्राह्मण्यै । दध्यादीनां टादौ विशेषः ।

२८४ **दध्यस्थिसक्थ्यक्ष्णोऽन्तस्यान्** ॥१।४।६३॥ दधि अस्थि सक्थि अक्षि इत्येतेषां नपुंसकानां नाम्यन्तानामन्तस्य तत्संबंधिन्यन्यसंबंधिनि वा टादौ स्वरे अन् इत्ययमादेशः स्यात् । अनोऽस्य, दध्ना । दध्ने । दध्नः २ । दध्नाम् । ईङौ वा । दध्नि । दधनि । शेषं वारिवत् । एवमस्थिसक्थ्यक्ष्णीति । प्रियदध्ना । समासान्तविधेरनित्यत्वात् (दध्नुरःसर्पिरित्यनेन प्राप्तः) कच् न भवति । टादावित्येव । दधिनी । स्वर इत्येव । दधिभ्याम् । नपुंसकस्येत्येव । दधातीत्येवंशीलो दधिः, दधिनामा वा । दधिना । दध्ये । दध्ना, अतिदध्ना कुलेनेत्यादौ विशेषविधानात् परमपि नागममनादेशो बाधते । सुधि २ । सुधिनी २ । सुधीनि २ । सुधिया । सुधिना ।

हे सुधे । हे सुधि । प्रधा । प्रधिना । नीग्रामण्यादीनां ह्रस्वत्वे नि, ग्रामणि कुलं । निनी । ग्रामणिनी । निया । निना । ग्रामण्येत्यादि । मधु । मधुनी । मधूनि । हे मधो मधु । एवमम्बादयः । प्रियक्रोष्टु २ । प्रियक्रोष्टुनी २ । प्रियक्रोष्टूनि २ । टादौ पुंवत्पक्षे प्रियक्रोष्ट्रा । प्रियक्रोष्टुना । प्रियक्रोष्ट्रे । प्रियक्रोष्टवे । प्रियक्रोष्टुने । आमि प्रियक्रोष्टूनाम् । सुलु २ । सुलुनी २ सुलूनि २ । सुल्वा । सुलुनेत्यादि । कर्तृ २ । कर्तृणी २ । कर्तृणी २ । कर्त्रा । कर्तृणा । हे कर्तः । हे कर्तृ । एवं धातृज्ञात्रादयः । एदैतोर्ह्रस्वत्वे इकार ओदौत उकारश्च वाच्यौ । अतिहि २ । अतिहिनी २ । अतिहिनी २ । अतिहिनेत्यादि । अत्र न पुंवत् । एवमग्रेऽपि । अतिरि २ । अतिरिणी २ । अतिरीणि २ । अतिरिणा । एकदेशविकृतस्यानन्यत्वादात्वम् । अतिराभ्याम् । अतिरीणाम् इत्यादि । अतिगु २ । अतिगुनी २ । अतिगूनि २ । अतिगुनेत्यादि । एवमतिनु कुलमित्यादि ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां स्वरान्तनपुंसकलिङ्गप्रकरणं समाप्तम् ।

॥ अथ व्यंजनान्तपुँल्लिङ्गप्रकरणम् ॥

तत्र चकारान्तः पयोमुच् शब्दः ।

२८५ **चजः कगम् ॥२।१।८६॥** चकारजकारयोर्धुटि प्रत्यये परे पदान्ते च ककारगकारौ स्याताम् । धुटस्तृतीयः । विरामे वा । पयोमुक् । पयोमुग् । पयोमुचौ पयोमुचः । पयोमुग्भ्याम् । पयोमुक् सु इति जाते नाम्यन्तस्येति षत्वे । कषसंयोगे क्षः , पयोमुक्षु ।

२८६ **यजभ्रजमृजराजभ्राजभ्रस्जभ्रस्चपरिव्राजः शः षः २।१।८७॥** यजादीनां धातूनां चजः शकारस्य च धुटि प्रत्यये परे पदान्ते च षकार आदेशः स्यात् । इत्यनेन षत्वे ।

२८७ **संयोगस्यादौ स्कोर्लुक् ॥२।१।८८॥** धुटि प्रत्यये पदान्ते च यः संयोगस्तस्यादौ वर्तमानयोः सकारककारयोर्लुक् स्यात् । इति सलोपे । धुटस्तृतीय इति डत्वे, विरामे वेत्यनेन च टत्वे मूलवृट् । मूलवृड् । मूलवृश्चौ । मूलवृश्चः । मूलवृश्चा । मूलवृड्भ्याम् । मूलवृट्त्सु । मूलवृट्सु । प्रपूर्वादञ्चतेः किपि ।

२८८ **अञ्चेरनर्चायाम् ॥४।२।४६॥** अञ्चेरनर्चायामेव वर्तमानस्योपान्त्यनकारस्य लुक् स्यात् । इत्यनेन नकारस्य च लुकि प्राच् स् इति स्थिते ।

२८९ अचः ॥१।४।६९॥ अञ्चतेर्धातोर्धुडन्तस्य तत्संबंधिन्यन्यसंबंधिनि वा घुटि परे धुटः प्राग्नोऽन्तः स्यात् । दीर्घङ्याबिति सिलुकि पदस्येति चलुक् ।

२९० युजञ्चक्रुञ्भ्यो नो ङः ॥२।१।७१॥ एषां नस्य पदान्ते वर्तमानस्य ङकार आदेशः स्यात् । प्राङ् । म्नामिति पञ्चमे, प्राञ्चौ । प्राञ्चः । संबोधनेऽप्येवम् । प्राञ्चम् । प्राञ्चौ ।

२९१ अच्च् प्रागदीर्घश्च ॥२।१।१०४॥ अचिति अनकारस्याञ्चेर्निर्देशः । अचिति नाम णिक्यघुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये परे चकारमात्रं स्यात्, पूर्वोऽनन्तरस्वरश्च दीर्घः स्यात् । प्राचः । प्राचा । प्राग्भ्यामित्यादि । प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः । प्रत्यञ्चम् । प्रत्यञ्चौ । प्रतीचः । प्रतीचा । प्रत्यग्भ्याम् इत्यादि । अन्वाचयशिष्टत्वाद् दीर्घत्वस्य तदभावेऽपि चादेशो भवति । दृषदमञ्चतीति किपि स्वरादौ घुट्वर्जिते दृषच्चः । दृषच्चा । दृषच्चे । अत्र 'स्वरस्य ह्रस्वदीर्घप्लुताः' इति न्यायाद् दृषदो दीर्घो न भवति । यस्वर इत्येव । प्रत्यग्भ्याम् । अणिक्यघुटीत्येव । दध्यचति । दध्यच्यति । दध्यच्यते । दध्यञ्चौ । दध्यञ्चः । दध्यञ्चि कुलानि । अच् इति लुप्तनकारस्याञ्चेर्ग्रहणादिह न भवति—साध्वञ्चः, साध्वञ्चा । अमुमञ्चतीति विग्रहे अदस् अञ्च् इति स्थिते ।

२९२ सर्वादिविष्वग्देवाड्डद्रिः क्व्यञ्चौ ॥३।२।१२२॥ सर्वादेर्विष्वग्देवशब्दाभ्यां च परः किबन्तेऽञ्चतावुत्तरपदे डद्रिरन्तः स्यात् । 'धातुग्रहणे तदादेः समुदायस्य ग्रहणं भाभोति' इति कीत्युक्तम् । डकारोऽन्त्यस्वरादिलोपार्थः । अदद्रि अञ्च् इति जाते । यत्वम् ।

२९३ वाऽद्रौ ॥२।१।४६॥ अदसोऽद्रावन्ते सति दकारस्य मकारः स्यात् ।

२९४ मादुवर्णोऽनु ॥२।१।४७॥ अदसः संबंधिनो मकारात् परस्य वर्णमात्रस्योवर्ण आदेशः स्यात्, अनु—पश्चात्कार्यान्तरेभ्यः । आसन्नत्वान्मात्रिकस्य स्थाने मात्रिकः, द्विमात्रस्य द्विमात्रः, त्रिमात्रस्य त्रिमात्रः । अत्र च द्वौ दकारौ तत्र विकल्पेन मत्वे सति चातुरूप्यं भवति । अदमुयङ् । अमुद्यङ् । अमुमुयङ् । अदद्यङ् । तदाह—

" परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः ।
उभयोः केचिदिच्छन्ति केचिदिच्छन्ति नोभयोः " ॥

अदमुयञ्चौ । अमुद्यञ्चौ । अमुमुयञ्चौ । अदद्यञ्चौ । शसादौ स्वरे—अदमुईचः ।

अमुमुईचः । अदोमुमीति संधिप्रतिषेधः । अमुद्रीचः । अदद्रीचः । अदमुयग्भ्यामित्यादि । एवं सर्वत्रयङ् । विषू अवतीति विषूः—विष्वमञ्चति विष्वगञ्चतीति वा विष्वत्रयङ् । देवान् अञ्चतीति देवत्रयङ् । उत्पूर्वादञ्चतेः किपि उदङ् । उदञ्चौ । शसादौ स्वरे ।

२९५ उदश्च उदीच् ॥२।१।१०३॥ उदश्चिति उत्पूर्वस्याञ्चतेः कृतनलोपस्य निर्देशः । उदचो नाम्नोऽणिक्यघुटि यकारादौ स्वरादौ च प्रत्यये परे उदीच् इत्ययमादेशः स्यात् । उदीचः । उदीचा । उदग्भ्यामित्यादि । सह अञ्चतीति विग्रहे किपि कृते ।

२९६ सहसमः सध्रिसमि ॥३।२।१२३॥ सह सम् इत्येतयोः स्थानेऽञ्चतौ किबन्ते उत्तरपदे यथासंख्यं सध्रि समि इत्येतावादेशौ स्याताम् । सध्र्यङ् । सध्र्यञ्चौ । सध्र्यञ्चः । सध्र्यञ्चम् । सध्र्यञ्चौ । सध्रीचः । सध्रीचा । सध्र्यग्भ्यामित्यादि । एवं सममञ्चतीति सम्यङ् । सम्यञ्चौ । समीचः । सम्यग्भ्यामित्यादि ।

२९७ तिरसस्तिर्यति ॥३।२।१२४॥ तिरस्शब्दस्यति अकारादावञ्चतौ किबन्ते उत्तरपदे परे तिरि इत्ययमादेशः स्यात् । तिरस्तिरको वा अञ्चतीति तिर्यङ् । तिर्यञ्चौ । तिर्यञ्चः । तिर्यञ्चम् । तिर्यञ्चौ । अतीति किम् । तिरश्चः । तिरश्चा । तिर्यग्भ्यामित्यादि । किप्यर्चायां निषेधान्नलोपाभावे अच इति नोऽन्तो न भवति । प्राङ् । प्राञ्चौ । प्राञ्चः । प्राञ्चम् । प्राञ्चौ । शसादौ स्वरे च 'अञ्च् प्रागि' त्यत्र लुप्तनकारस्याञ्चतेर्ग्रहणान्न चादेशदीर्घत्वे । प्राञ्चः । प्राञ्चा । प्राङ्भ्यामित्यादि । एवमर्चार्थे प्रत्यङ्ङादयः । क्रुञ्च च कौटिल्याल्पीभावयोः । अस्य किपि नलोपाभावस्य निपातनात् क्रुङ् । क्रुञ्चौ । क्रुञ्चः । क्रुञ्चा । क्रुङ्भ्यामित्यादि । निरुपपदाद्युजेः किपि ।

२९८ युजेरोऽसमासे ॥१।४।७१॥ युजृंपी योगे इत्यस्यासमासे धुडन्तस्य धुटः प्राग् घुटि परे नोऽन्तः स्यात् । युङ् । युञ्जौ । युञ्जः । युञ्जम् । युञ्जौ । युजः । युजा । युग्भ्याम् । ईषदपरिसमाप्तो युङ् बहुयुङ् । बहुयुञ्जौ । बहुयुञ्जः । असमास इति किम् । अश्वयुक् । अश्वयुजौ । अश्वयुजः । ऋदिन्निर्देशः किम् । युजिञ् समाधावित्यस्य मा भूत् । युजमापन्ना मुनयः । समाधिं प्राप्ता इत्यर्थः । घुटीत्येव । युजः । खञ्जतीति खन् । खञ्जौ । खञ्जः । खञ्जा । खन्भ्यामित्यादि । यजसृजेति षत्वे, धुटस्तृतीय इति डत्वे च विराम वा । देवेट्–ड् । देवेजौ । देवेजः । देवेजा । देवेट्सु–त्सु । तीर्थसृट्–ड् । तीर्थसृजौ । तीर्थसृजः । तीर्थसृजा ।

तीर्थसृड्भ्याम् । कंसपरिमृट्–ड् । कंसपरिमृड्भ्याम् । सम्राट्–ड् । सम्राड्भ्याम् । विभ्राट्–ड् । विभ्राड्भ्याम् । राजिसहचरितस्य भ्राजेर्ग्रहणात् एजृङ् भ्रेजृङ् भ्राजि दीप्ताविति अस्य गत्वमेव । विभ्राक्–ग् । विभ्राग्भ्यामित्यादि । अतएव भ्राजेरात्मनेपदिनोऽपि राजृग् टुभ्राजृग् दीप्ताविति उभयपदिषु पुनः पाठः साहचर्यार्थम् । संयोगस्यादाविति सकारलुकि, यजसृजेति षत्वे च धानाभृट्–ड् । सस्य शषाविति सस्य शत्वे, ' तृतीयस्तृतीयचतुर्थे ' इति शस्य जत्वे धानाभृज्जौ । धानाभृज्जः । धानाभृड्भ्यामित्यादि । परिव्राट्–ड् । परिव्राड्भ्यामित्यादि ।

२९९ **वसुराटोः** ॥३।२।८१॥ विश्वशब्दस्य वसौ राटि चोत्तरपदे दीर्घोऽन्तादेशः स्यात् । विश्वं वसु अस्य विश्वावसुः । विश्वस्मिन् राजते विश्वाराट्–ड् । राडिति विकृतनिर्देशादिह न भवति । विश्वराजौ । विश्वराजः । विश्वाराड्भ्यामित्यादि ।

३०० **ऋत्विग्दिशदृक्स्पृक्स्रजदधृष्णिहो गः** ॥ २।१।६९॥ एषां पदान्ते वर्तमानानां गोऽन्तादेशः स्यात् । ऋतुम् ऋतौ ऋतवे ऋतुप्रयोजनो वा यजते ऋत्विक्–ग् । ऋत्विजौ । ऋत्विजः । ऋत्विजा । ऋत्विग्भ्यामित्यादि । 'रात्स' इत्यनेन रात्परस्य संयोगान्तस्य सस्यैव लोपो नान्यस्येति नियमनात् नेह पदस्येति संयोगान्तलोपः–ऊर्क्–ग् । ऊर्जौ । ऊर्ग्भ्यामित्यादि । गणयतेर्विच् । सुगण् । सुगणौ । सुगणः । सुगण्ट्सु । सुगण्ठ्सु । सुगण्सु । किपि तु दीर्घत्वे । सुगाण् । सुगाणौ । सुगाणः । तकारान्तो मरुत् शब्दः । मरुत्–द् । मरुतौ । मरुतः । मरुद्भ्यामित्यादि । ऋकारानुबंधो महत् शब्दः ।

३०१ **ऋदुदितः** ॥१।४।७०॥ ऋदित उदितश्च धुडन्तस्य तत्संबंधिन्यन्यसंबंधिनि वा घुटि परे धुटःप्राक् स्वरात्परो नोऽन्तः स्यात् । पदस्येति तलोपे, न्समहतोरिति च दीर्घे–महान् । संयोगान्तलोपस्यासिद्धत्वान्नलोपो न । महान्तौ । महान्तः । महतः । महता । शेषघुटयेव दीर्घः । हे महन् । हे महान्तौ । शतृप्रत्ययान्तानां घुटि दीर्घाभावो विशेषः । पचन् । पचन्तौ । पचन्तः हे पचन् । हे पचन्तौ । शेषं महद्वत् । भातेर्डवतुरिति उकारानुबंधो भवत् शब्दः ।

३०२ **अभ्वादेरत्वसः सौ** ॥१।४।९०॥ अत्वन्तस्यासन्तस्य च भ्वादिवर्जितस्य संबंधिनः स्वरस्य शेषे घुटि परे दीर्घः स्यात् । भवान् । भवन्तौ । भवन्तः । हे भवन् । मतुप्प्रत्ययान्ता अप्येवम् । 'अर्थवद्ग्रहणे नानर्थकस्ये'त्येव सिद्धे भ्वादे-

रिति वचनम् ' अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' इति न्यायज्ञापनार्थम् । तेनात्रापि भवति–खरणाः । खुरणाः । अधातोरित्यकृत्वा भ्वादेरिति करणं भ्वादीनामेव वर्जनार्थम्, तेनेह भवति–गोमन्तमिच्छति क्यन्, क्विप् गोमान् । गोमन्तौ । गोमन्तः । हे गोमन् । अतु इति उदित्करणादुदितो न भवति । भवतीति भवन् ।

३०३ अन्तो नो लुक् ॥४।२।९६॥ व्युक्तजक्षपञ्चतः परस्य शितोऽवितोऽन्तः संबंधिनो नकारस्य लुक् स्यात् । ददत्–द् । ददतौ । ददतः । जक्षत्–द् । जक्षतौ । जक्षतः । दरिद्रत्–द् । दरिद्रतौ । दरिद्रतः । जाग्रत्–द् । जाग्रतौ । जाग्रतः । चकासत्–द् । चकासतौ । चकासतः । शासत्–द् । शासतौ शासतः । थकारान्तो दधिमथ् शब्दः । धुटस्तृतीय इति दत्वे विरामे वा । दधिमत्–द् । दधिमथौ । दधिमथः । दधिमथा । दधिमद्भ्याम् । दधिमत्सु । दकारान्तास्त्यदादयस्तेषामाद्धेर इत्यत्वे ।

३०४ लुगस्यादेत्यपदे ॥२।१।११३॥ अपदादावकारे एकारे च परेऽकारस्य लुक् स्यात् । त्यस् इति जाते ।

३०५ तः सौ सः ॥२।१।४२॥ आद्धेस्त्यदादीनां संबंधिनि सौ परे तकारस्य सकारादेशः स्यात् । स्यः । त्यौ । त्ये । इत्यादि सर्ववत् । परमस्यः । स्यकः । त्यदादिसंबंधिविज्ञानादिह न भवति । प्रियत्यद् । सः । तौ । ते । सकः । परमसः । यः । यौ । ये । एषः । एतौ । एते ।

३०६ त्यदामेनदेतदो द्वितीयाटौस्यवृत्त्यन्ते ॥२।१।३३॥ त्यदादानां संबंधिन एतदित्यस्य द्वितीयायां टायामोसि च परेऽन्वादेशे एनद् इत्ययमादेशः स्यात्, अवृत्त्यन्ते–न चेदयमेतच्छब्दो वृत्तेरन्ते भवति । किञ्चिद् विधातुं कथितस्य पुनरन्यद् विधातुं कथनमन्वादेशः । आगतो एष अथो एनं भोजय । एतकं साधुमावश्यकमध्यापयाथो एनमेव सूत्राणि । अत्र साकोऽप्यादेशः । सुशीलावेतौ तदेनौ गुरवो मानयन्ति । सुस्थिता एते तदेनान् देवा अपि नमस्यन्ति । टा, एतेन रात्रिरधीता अथो एनेनाहरप्यधीतम् । ओस्, एतयोः शोभनं शीलमथो एनयोर्महती कीर्तिः । सर्वाणि शास्त्राणि ज्ञातवन्तावेतौ अथो एनयोस्तिष्ठतोर्नान्यः पूजार्हः । त्यदामिति किम् । एतदं संगृहाण अथो एतदध्यापय । संज्ञायामसर्वादित्वादत्यदादिः । अवृत्त्यन्त इति किम् । अथो परमैतं पश्य । अन्तग्रहणं किम् । एनच्छ्रुतकः । अत्रा-

र्थात् प्रकरणाद्वापेक्ष्ये निर्ज्ञाते सति समासोऽन्वादेशश्च । द्वितीयाटौसिति किम् । एते मेधाविनो विनीता अथो एते शास्त्रस्य पात्रम् । एताभ्यां रात्रिरधीता अथो एताभ्यामहरप्यधीतम् । एतस्मै सूत्रं देहि अथो एतस्मै अनुयोगमपि देहि । अभ्युदयनिःश्रेयसपदमेतच्छासनमथो एतस्मै नमो भगवते । अन्वादेशाभावे एतम् । एतौ । एतान् । एतेन । एतयोः २ । यत्रापि वस्तुमात्रनिर्देशं कृत्वा विधानं क्रियते तत्रापि न भवति–' ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्यात् ' ॥

युष्मदस्मदोस्त्रिष्वपि लिङ्गेषु समानं रूपमलिङ्गत्वात् ।

३०७ **त्वमहं सिना प्राग्चाऽकः** ॥२।१।१२॥ युष्मदस्मदोः स्वसंबंधिनाऽन्यसंबंधिना वा सिना सह यथासंख्यं त्वम् अहम् इत्येतावादेशौ स्याताम् , तौ चाक्प्रत्ययप्रसङ्गेऽकः प्रागेव । त्वम् । अहम् । प्रियस्त्वं प्रियौ युवां प्रिया यूयं वा यस्य स प्रियत्वम् । प्रियाहम् । एषु परत्वात्त्वमौ युवावौ च बाधित्वा त्वमहमावेव भवतः । सिनेति किम् । युष्माभिः । अस्माभिः । सिलुपि ' लुप्यग्बृल्लेनत् ' इति निषेधान्न भवति । त्वं पुत्रोऽस्य त्वत्पुत्रः । मत्पुत्रः । एवमुत्तरेष्वपि । प्राक् चाक इति किम् । त्वकमहकमित्यत्राकः श्रुतिर्यथा स्यात् । अन्यथा 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ' इति न्यायात् साकोरप्यादेशः स्यात् । केचित्तु त्वां मां चाचष्टे इति णौ त्वमादेशे वृद्धौ किपि मन्तयोरेव त्वाहादेशविधानात् सौ त्वाम् , माम् इति, धातोरेव वृद्धिरिति मते त्वं मम् इत्येव च भवतीति मन्यन्ते । ते हि प्रकृतिमात्रस्यादेशान् ङेजस्सीनाममादेशं ङसस्त्वकारं चेच्छन्ति ।

३०८ **मन्तस्य युवावौ द्वयोः** ॥२।१।१०॥ द्वित्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदस्मदोर्मन्तस्य–मकारावसानस्यावयवस्य तत्संबंधिन्यन्यसंबंधिनि वा स्यादौ परे यथासंख्यं युव आव इत्येतावादेशौ स्याताम् । युवद् । आवद् । इति तावद् भवति ।

३०९ **अमौ मः** ॥२।१।९॥ युष्मदस्मद्भ्यां परयोस्तत्संबंधिनोर्वा अम् औ इत्येतयोर्म इत्ययमादेशः स्यात् । अकार उच्चारणार्थः ।

३१० **युष्मदस्मदोः** ॥२।१।६॥ युष्मदस्मदित्येतयोः शब्दयोः स्वसंबंधिन्यन्यसंबंधिनि वा व्यंजनादौ स्यादौ परे आकारोऽन्तादेशः स्यात् । युवाम् । आवाम् ।

३११ **यूयं वयं जसा** ॥२।१।१३॥ युष्मदस्मदोः स्वसंबंधिनाऽन्यसंबंधिना वा जसा सह यथासंख्यं यूयं वयमित्यादेशौ स्याताम् , प्राग्चाकः । यूयम् । वयम् । परमयूयम् । परमवयम् । प्रियस्त्वम् प्रियौ युवां प्रिया यूयं च येषां ते प्रिययूयम् । प्रियवयम् । जसेति किम् । यूयं पुत्रा अस्य युष्मत्पुत्रः । अस्मत्पुत्रः । प्राग्चाक इत्येव । यूयकम् । वयकम् ।

३१२ **त्वमौ प्रत्ययोत्तरपदे चैकस्मिन्** ॥ २।१।११ ॥ एकत्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदस्मदोर्मन्तावयवस्य स्वसंबंधिन्यन्यसंबंधिनि वा स्यादौ परे प्रत्ययोत्तरपदयोश्च परयोर्यथासंख्यं त्व म इत्येतावादेशौ स्याताम् । ' लुगस्यादेत्यपदे ' इत्यकारलोपे अमो मत्वे दस्यात्वे च त्वाम् । माम् । प्रत्ययोत्तरपदयोः खल्वपि । तव अयं त्वदीयः मदीयः । त्वया कृतम् त्वत्कृतम् । मत्कृतम् । त्वामाचष्टे त्वदयति मदयतीत्यत्र नित्यत्वादन्त्यस्वरादिलोपात् प्रागेव त्वमादेशौ । कश्चित्तु पूर्वमन्त्यस्वरादिलोपे त्वमादेशे अकारस्य वृद्धौ ष्वागमे च त्वापयति मापयति, किपि तु त्वाप् माप् इत्याह । एकस्मिन्निति किम् । युष्माकम् । एकत्वेन युष्मदस्मदोर्विशेषणादिह न भवति । अतिक्रान्तं युष्मान् अतियुष्माम् । अत्यस्माम् । प्रत्ययोत्तरपदे चेति किम् । त्वय्यधि अधियुष्मद् । अध्यस्मद् । अन्तरङ्गत्वात् स्यादिद्वारेणैव त्वमादेशे सिद्धे प्रत्ययोत्तरपदग्रहणं ' बहिरङ्गापि लुप् अन्तरङ्गान् विधीन् बाधते ' इति न्यायज्ञापनार्थम् । तेन यद् तद् इत्यादावन्तरङ्गमपि त्यदाद्यत्वादि न भवति । एके तु निमित्तनिरपेक्षमेकत्वविशिष्टेऽर्थे वर्तमानयोस्त्वमादेशावित्यिच्छन्ति । तन्मते अधित्वत् । अधिमत् । मन्तस्येत्येव । त्वकं पिताऽस्य त्वकत्पितृकः । अत्राक्सहितस्य मा भूत् । प्रत्ययग्रहणेनैव सिद्धे स्यादावित्युत्तरार्थमनुवर्तते । युवाम् । आवाम् ।

३१३ **शसो न** ॥२।१।१७॥ युष्मदस्मद्भ्यां परस्य तत्संबंधिनोऽन्यसंबंधिनो वा शसःस्थाने न इत्ययमादेशः स्यात् । अकार उच्चारणार्थः । युष्मान् । अस्मान् । प्रियायुष्मान् । प्रियास्मान् । प्रियस्त्वं येषां तान् प्रियत्वान् । प्रियमान् । प्रियौ युवां येषां तान् प्रिययुवान् । प्रियावान् । टायां त्वमादेशे ।

३१४ **टाङ्योसि यः** ॥२।१।७॥ युष्मदस्मदोः स्वसंबंधिष्वन्यसंबंधिषु वा टाङिओस् इत्येतेषु स्यादिषु परेषु यकारोऽन्तादेशः स्यात् । त्वया । मया । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः ।

३१५ **तुभ्यं मह्यं ङया** ॥२।१।१४॥ युष्मदस्मदोः स्वसंबंधिनाऽन्यसंबंधिना

वा ङेप्रत्ययेन सह यथासंख्यं तुभ्यं मह्यम् इत्येतावादेशौ स्याताम्, प्राग्चाकः । तुभ्यम् मह्यम् । परमतुभ्यम् । परममह्यम् । प्रियस्त्वं प्रियौ युवां प्रिया यूयं वा यस्य तस्मै प्रियतुभ्यम् । प्रियमह्यम् । ङ्येति किम् । तुभ्यं हितं त्वद्धितम् । मद्धितम् । प्राग्चाक इत्येव । तुभ्यकम् । मह्यकम् । युवाभ्याम् । आवाभ्याम् ।

३१६ अभ्यं भ्यसः ॥२।१।१८॥ युष्मदस्मद्भ्यां परस्य तत्संबंधिनोऽन्यसंबंधिनो वा चतुर्थीभ्यसः स्थानेऽभ्यमादेशः स्यात् । अकारादिकरणमात्वबाधनार्थम् ।

३१७ शेषे लुक् ॥२।१।१९॥ यस्मिन् प्रत्यये आत्वयकारौ विहितौ ततोऽन्यः शेषस्तस्मिन् स्यादौ परे युष्मदस्मदोरन्तस्य लुक् स्यात् । युष्मभ्यम् । अस्मभ्यम् । अलिङ्गे युष्मदस्मदी इति अन्तलोपे स्त्रियामाप् न भवति । शेष इति किम् । त्वया । मया ।

३१८ सोर्वा ॥२।१।२०॥ युष्मदस्मदोर्मकारान्तयोः स्वसंबंधिन्यन्यसंबंधिनि वा शेषे स्यादौ परे मकारस्य लुग्वा स्यात् । युवां युष्मान् वा आवामस्मान् वा आचष्टे णिचि किपि तल्लुकि च युष्म् अस्म् इति मान्तत्वम् । युषभ्यम् । असभ्यम् । युष्मभ्यम् । अस्मभ्यम् । युषद् । असद् । युष्मद् । अस्मद् युषाकम् । असाकम् । युष्माकम् । अस्माकम् । शेष इत्येव । युषान् । असान् । युषाभिः । असाभिः । युषासु । असासु । एषु पूर्वेण मकारस्यात्वम् । टाङ्योसि नित्यत्वात् त्वमादिकार्येभ्यः प्रथममेव पूर्वेण मकारस्य यत्वे युष्या । अस्या । युष्यि । अस्यि । युष्योः । अस्योः । अथ शब्दान्तरमाष्भा यत्वमप्यनित्यमित्याश्रीयते तदा परत्वात् पूर्वं त्वमाद्यादेशे अकारस्य यत्वे त्व्या । म्या । त्व्यि । म्यि । युव्योः । आव्योः । अथ 'सकृद्गते स्पर्द्धे यद् बाधितं तद् बाधितमेव' इत्याश्रीयते तदा यत्वाभावे त्वेन । मेन । युवयोः । आवयोः । त्वे । मे । अत्रासर्वादिसंबंधित्वात् ङेः स्मिन्नादेशो न भवति । अथ 'किमर्थं प्रकृतिरेवाह' इति सर्वादिसंबंधित्वं तदा भवत्येव स्मिन्नादेशः । सिजसेर्ङेङस्प्रत्यये तु परत्वात् त्वमहमादय एवादेशा भवन्ति । त्वम् । अहम् । यूयम् । वयम् । तुभ्यम् । मह्यम् । तव । मम । एके तु सन्ध्योर्युष्मदस्मदोरादेशान्नेच्छन्ति ।

३१९ ङसेश्चाद् ॥२।१।२१॥ युष्मदस्मद्भ्यां परस्य स्वसंबंधिनोऽन्य-

संबंधिनो वा ङसेश्चकारात् तत्सहचरितस्य भ्यसः स्थानेऽद् इत्ययमादेशः स्यात् । त्वद् । मद् । युवाभ्याम् । आवाभ्याम् । युष्मद् । अस्मद् ।

३२० तव मम ङसा ॥२।१।१९॥ युष्मदस्मदोः स्वसंबंधिनाऽन्यसंबंधिना वा ङस्प्रत्ययेन यथासंख्यं तव मम इत्येतावादेशौ स्याताम्, प्राग्चाकः । तव । मम । प्रियतव । प्रियमम । ङसेति किम् । तव प्रियस्त्वत्प्रियः । मत्प्रियः । प्राग्चाक इत्येव । तवक । ममक । ओसि युवावादेशे ' टाङ्योसि ' इति ये । युवयोः आवयोः ।

३२१ आम आकम् ॥२।१।२०॥ युष्मदस्मद्भ्यां परस्य स्वसंबंधिनोऽन्यसंबंधिनो वाऽऽमः स्थाने आकमित्यादेशः स्यात् । युष्माकम् । अस्माकम् । प्रिययुष्माकम् । प्रियास्माकम् । आकमित्याकारो ण्यन्तार्थम् । युष्मानाचक्षाणानां, णौ, किपि, युष्माकम् । अस्माकम् । केचित्तु तत्संबंधिन एवाम आकमादेशमिच्छन्ति, तथाम्प्रत्यये दकारस्य यत्वमपीच्छन्ति, तन्मते प्रिया यूयं येषां तेषां प्रियय्युष्मयाम् । प्रियास्मयाम् । एवमतियुष्मयाम् । अत्यस्मयाम् । त्वयि । मयि । युवयोः । आवयोः । युष्मासु । अस्मासु ।

अथ त्वा मां वा अतिक्रान्तः इति विग्रहे ' त्वमौ प्रत्ययोत्तरपदे चैकस्मिन् ' इत्यत्र एकत्वेन युष्मदस्मदोर्विशेषणात् सर्वत्र त्वमादेशयोः प्राप्तौ, सिजस्ङेङस्सु पुनः परत्वात् त्वमहमादयो भवन्ति । अतित्वम् । अत्यहम् । अतित्वाम् । अतिमाम् । अतियूयम् । अतिवयम् । अतित्वाम् २ । अतिमाम् २ । अतित्वान् । अतिमान् । अतित्वया । अतिमया । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वाभिः । अतिमाभिः । अतित्वभ्यम् । अतिमभ्यम् । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वभ्यम् । अतिमभ्यम् । अतित्वत् । अतिमत् । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वत् । अतिमत् । अतितव । अतिमम । अतित्वयोः । अतिमयोः । अतित्वाकम् । अतिमाकम् । अतित्वयि । अतिमयि । अतित्वयोः । अतिमयोः । अतित्वासु । अतिमासु ।

अथ च युवां आवां वा अतिक्रान्त इति विग्रहे तु ' मन्तस्य युवावौ द्वयोः ' इत्यत्र द्वित्वेन युष्मदस्मदोर्विशेषणात् सर्वत्र युवावादेशयोः प्राप्तौ, सिजस्ङेङस् इत्येतेषु पुनः परत्वात् त्वमहमादयो भवन्ति । अतित्वम् । अत्यहम् । अतियुवाम् । अत्यावाम् । अतियूयम् । अतिवयम् । अतियुवाम् २ । अत्यावाम् २ । अतियुवान् ।

अत्यावान् । अतियुवया । अत्यावया । अतियुवाभ्याम् ३ । अत्यावाभ्याम् ३ । अतियुवाभिः । अत्यावाभिः । अतितुभ्यम् । अतिमह्यम् । अतियुवभ्यम् । अत्यावभ्यम् । ङसिभ्यसोः । अतियुवत् २ । अत्यावत् २ । अतितव । अतिमम । ओसि । अतियुवयोः २ । अत्यावयोः २ । अतियुवाकम् । अत्यावाकम् । अतियुवयि । अत्यावयि । अतियुवासु । अत्यावासु ।

अथ च युष्मान् अस्मान् वा अतिक्रान्त इति विग्रहे तु समासार्थस्य द्व्येकसंख्यत्वेऽपि समस्यमानयुष्मदस्मदोर्बहुत्वार्थत्वेन न त्वमौ न च युवावादेशौ । सिजसङेङस्सु तु त्वमहमादयो भवन्त्येव । अतित्वम् । अत्यहम् । अतियुष्माम् ३ । अत्यस्माम् ३ । अतियूयम् । अतिवयम् । अतियुष्मान् । अत्यस्मान् । अतियुष्मया । अत्यस्मया । अतियुष्माभ्याम् ३ । अत्यस्माभ्याम् ३ । अतियुष्माभिः । अत्यस्माभिः । अतितुभ्यम् । अतिमह्यम् । अतियुष्मभ्यम् । अत्यस्मभ्यम् । ङसिभ्यसोः । अतियुष्मत् २ । अत्यस्मत् २ । अतितव । अतिमम । ओसि । अतियुष्मयोः २ । अत्यस्मयोः २ । अतियुष्माकम् । अत्यस्माकम् । अतियुष्मयि । अत्यस्मयि । अतियुष्मासु । अत्यस्मासु । अथो युष्मदस्मदोरादेशविशेषा उच्यन्ते ।

३२२ **पदाद्युग्विभक्त्यैकवाक्ये वस्नसौ बहुत्वे** ॥२।१।२१॥ द्वितीया चतुर्थी षष्ठी च युग्विभक्तिः । तया बहुत्वविषयया सह पदात् परयोर्युष्मदस्मदोर्यथासंख्यं वस्नस् इत्येतावादेशौ स्याताम्, तच्चेत् पदं युष्मदस्मदी चैकवाक्ये स्याताम् । अन्वादेशे नित्यं विधास्यमानत्वादिह विकल्पो लभ्यते । एवमुत्तरसूत्रत्रयेऽपि । धर्मो वो रक्षतु । धर्मो नो रक्षतु । धर्मो युष्मान् रक्षतु । धर्मोऽस्मान् रक्षतु । तपो वो दीयते । तपो नो दीयते । तपो युष्मभ्यं दीयते । तपोऽस्मभ्यं दीयते । शीलं वः स्वम् । शीलं नः स्वम् । शीलं युष्माकं स्वम् । शीलमस्माकं स्वम् । पदादिति किम् । युष्मान् धर्मो रक्षतु । अस्मान् धर्मो रक्षतु । युग्विभक्त्येति किम् । ज्ञाने यूयं तिष्ठत । शीले वयं स्थास्यामः । एकवाक्य इति किम् । एकस्मिन् पदे निमित्तनिमित्तिनोर्भावे मा भूत् । अतियुष्मान् पश्यति । अत्यस्मान् पश्यति । वाक्यान्तरे च मा भूत् । ओदनं पचत युष्माकं भविष्यति । पटं वयत अस्माकं भविष्यति । ननु च वाक्यान्तरस्थात् परयोर्युष्मदस्मदोः सामर्थ्याभावादेव वस्नसादयो न भविष्यन्ति, किमेकवाक्यग्रहणेन । नैवं शंक्यम् । [1]युक्तयुक्तादपि पदादसमर्थत्वान्न

१ युक्तेन युष्मदस्मत्संबद्धेन पित्रादिना यद् युक्तमितिस्मेत्यादि तस्मादित्यर्थः।

प्राप्नुवन्ति । इति स्म नः पिता कथयति । इति वः श्रेयसी ब्रवीमि । इति मे माताऽवोचत् । शालीनां ते ओदनं दास्यामि। अत्र हि युष्मदस्मदी पित्रादिभिर्युक्ते न पित्रादियुक्तैरितिस्मादिभिरिति वस्नसादयो न स्युः । अतः पारंपर्येणापि युक्तादेकवाक्यस्थात् पदात् परयोर्युष्मदस्मदोर्वस्नसादयो भवन्त्वित्येकवाक्यग्रहणमर्थवत् । बहुत्व इति किम् । धर्मो युवां रक्षतु । धर्मस्त्वां रक्षतु । स्याद्यधिकारे विभक्तिग्रहणं युक्स्यादिवचननिवृत्त्यर्थम् , तेन ज्ञाने युवां तिष्ठतः, शीले आवां तिष्ठाव इत्यत्रोत्तरेण वाम्नावादेशौ न भवतः ।

३२३ **द्वित्वे वाम्नौ** ॥२।१।२२॥ पदात् परयोर्युष्मदस्मदोर्द्वित्वविषयया युग्विभक्त्या सह यथासंख्यं वाम्नावित्यादेशौ वा स्याताम् , तच्चेत् पदं युष्मदस्मदी चैकवाक्ये स्याताम् । धर्मो वां रक्षतु । धर्मो नौ रक्षतु । धर्मो युवां रक्षतु । धर्म आवां रक्षतु । शीलं वां दीयते । शीलं नौ दीयते । शीलं युवाभ्यां दीयते । शीलमावाभ्यां दीयते। ज्ञानं वां स्वम् । ज्ञानं नौ स्वम् । ज्ञानं युवयोः स्वम् । ज्ञानमावयोः स्वम् । युग्विभक्त्येत्येव । ग्रामे युष्मत्पुत्रः । नगरेऽस्मत्पुत्रः । पदादित्येव । युवां धर्मो रक्षतु । आवां धर्मो रक्षतु । एकवाक्य इत्येव । ओदनं पचत युवयोर्भविष्यति आवयोर्भविष्यति ।

३२४ **ङेङसा ते मे** ॥२।१।२३। ते मे इति लुप्तद्विवचनान्तं पदम् । पदात् परयोर्युष्मदस्मदोर्ङेङस् इत्येताभ्यां सह ते मे इत्येतावादेशौ वा स्तः, एकवाक्ये । ङेङसेत्येकवचनं स्थानिभ्यामादेशाभ्यां च यथासंख्यनिवृत्त्यर्थम् । धर्मस्ते दीयते । धर्मस्तुभ्यं दीयते । धर्मो मे दीयते । धर्मो मह्यं दीयते । शीलं ते स्वम् । शीलं तव स्वम् । शीलं मे स्वम् ॥ शीलं मम स्वम् । एकवाक्य इत्येव । ओदनं पच तव भविष्यति मम भविष्यति । त्वां युवां युष्मान्वाऽतिक्रान्ताय अतितुभ्यम् । ङेङसेति किम् । पटस्त्वया क्रियते । धर्मो मया क्रियते । कथं ' न मे श्रुता नापि च दृष्टपूर्वा ' । न मे—न मयेति ह्यत्रार्थः । असाधुरेवायम् । स्यादिप्रतिरूपकमव्ययं वा ।

३२५ **अमा त्वा मा** ॥२।१।२४॥ पदात् परयोर्युष्मदस्मदोर्द्वितीयैकवचनेन सह त्वा मा इत्येतावादेशौ वा स्याताम् , एकवाक्ये । धर्मस्त्वा रक्षतु । धर्मो मा रक्षतु । धर्मस्त्वां रक्षतु । धर्मो मां रक्षतु । पदादित्येव । त्वामीक्षते । मामीक्षते । एकवाक्य इत्येव । अतित्वां पश्यतु । अतिमां पश्यतु ।

३२६ असदिवामन्त्र्यं पूर्वम् ॥ २।१।२५ ॥ आमंत्र्यते यत्तदामंत्र्यम् । तद्वाचि पदं युष्मदस्मद्भ्यां पूर्वमसदिवाविद्यमानमिव स्यात् । सति तस्मिन् यत्कार्यं तन्न भवति, असति यत्तद् भवतीत्यर्थः । श्रमणा युष्मान् रक्षतु धर्मः । श्रमणा अस्मान् रक्षतु धर्मः । श्रमणा युष्मभ्यं दीयते । श्रमणा अस्मभ्यं दीयते । श्रमणा युष्माकं शीलम् । श्रमणा अस्माकं शीलम् । श्रमणौ युवां रक्षतु धर्मः । श्रमणौ आवां रक्षतु धर्मः । श्रमणौ युवाभ्यां दीयते आवाभ्यां दीयते । श्रमणौ युवयोः स्वमावयोः स्वम् । श्रमण त्वां रक्षतु तपः मां रक्षतु तपः । श्रमण तुभ्यं दीयते मह्यं दीयते । श्रमण तव शीलम् मम शीलम् । एष्वामन्त्र्यस्यासत्त्वाद् वस्नसादयो न भवन्ति । ग्रामाश्चैत्र ते स्वमथो इत्यादौ चैत्रपदस्यामन्त्र्यस्यासत्वाद् ग्रामपदापेक्षयाऽन्वादेशे नित्यं तेमयादिविधिः न तु 'सपूर्वात् प्रथमान्ताद्वा ' इति विकल्पः । इवकरणं किम् । श्रवणं यथा स्यात् । आमन्त्र्यमिति किम् । धर्मो वो रक्षतु । धर्मो नो रक्षतु । पूर्वमिति किम् । ' मयैतत्सर्वमाख्यातं युष्माकं मुनिपुंगवाः' । परस्य ह्यसद्वत्त्वे पादादिलक्षणः प्रतिषेधो न स्यात् । व्यवहितेऽपि पूर्वशब्दो वर्तते, तेन 'चैत्र धर्मो वोऽथो रक्षतु, चैत्र धर्मो नोऽथो रक्षतु ' अत्र सपूर्वात् प्रथमान्ताद्वेति विकल्पो न भवति ।

३२७ जस्विशेष्यं वाऽऽमन्त्र्ये ॥ २।१।२६ ॥ तदतद्विषयं विशेष्यम् । तस्य व्यवच्छेदकं विशेषणम् । युष्मदस्मद्भ्यां पूर्वम् असन्तमामन्त्र्यं पदं विशेष्यमामन्त्र्ये पदे सामर्थ्यात्तद्विशेषणीभूते परेऽविद्यमानवद् वा स्यात् । पूर्वेण नित्यं प्राप्ते विकल्पः । जिनाः शरण्या युष्मान् शरणं प्रपद्ये । जिनाः शरण्या वः शरणं प्रपद्ये । जिनाः शरण्या अस्मान् रक्षत । जिनाः शरण्या । नो रक्षत । सिद्धाः शरण्या युष्मानथो शरणं प्रपद्ये । सिद्धाः शरण्या वोऽथो शरणं प्रपद्ये । सिद्धाः शरण्या अस्मानथो रक्षत । सिद्धाः शरण्या वोऽथो रक्षत । जसिति किम् । साधो सुविहित वोऽथो शरणं प्रपद्ये । साधो सुविहित नोऽथो रक्ष । विशेष्यमिति किम् । शरण्याः साधवो युष्मान् शरणं प्रपद्ये । शरण्याः साधवोऽस्मान् रक्षत । आमंत्र्य इति किम् । आचार्या युष्मान् शरण्याः शरणं प्रपद्ये । आमन्त्र्यं विशेषणं व्यवहितत्वान्न परमिति न भवति । सामर्थ्यात् तद्विशेषणभूत इति किम् । आचार्या उपाध्याया युष्मान् शरणं प्रपद्ये ।

३२८ नान्यत् ॥२।१।२७॥ युष्मदस्मद्भ्यां पूर्वं जसन्तादन्यदामन्त्र्यं पदं

विशेष्यमामन्त्र्ये पदे तद्विशेषणभूते परेऽसदिव न स्यात्। साधो सुविहित त्वा शरणं प्रपद्ये। साधू सुविहितौ वां शरणं प्रपद्ये। साधो सुविहित मा रक्ष। साधू सुविहितौ नौ रक्षतम्। साधो सुविहित मा रक्ष। साधू सुविहितौ नौ रक्षतम्। साधो सुविहित ते ज्ञानं दीयते, मे ज्ञानं दीयताम्। साधू सुविहितौ वां ज्ञानं दीयते, नौ ज्ञानं दीयताम्। साधो सुविहित ते शीलं स्वं मे शीलं स्वम्। साधू सुविहितौ वां शीलं स्वम्, नौ शीलं स्वम्। अत्र परस्य 'असदिवामन्त्र्यं पूर्वम्' इत्यसत्त्वेऽपि पूर्वविशेष्यपदाश्रया युष्मदस्मदादेशा भवन्ति। विशेष्यमित्येव। सुविहित साधो तव शीलम्, मम शीलम्।

३२९ पादाद्योः ॥२।१।२८॥ नियतपरिमाणमात्राक्षरपिण्डः पादः। पदात् परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तत् पादस्यादिभूतयोर्न स्यात्।

"वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता॥
स एव नाथो भगवानस्माकं पापनाशनः"॥

पादाद्योरिति द्विवचनं युष्मदस्मदोरभिसंबंधार्थम्। पादादाविति ह्युच्यमाने आमन्त्र्यमभिसंबंध्येत। पादाद्योरिति किम्।

"पान्तु वो देशनाकाले जैनेन्द्रा दशनांशवः।
भवकूपपतज्जन्तुजातोद्धरणरज्जवः"॥

३३० चाहहवैवयोगे ॥२।१।२९॥ च अह ह वा एव इत्येतैर्योगे संबंधे पदात् परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न स्यात्। ज्ञानं युष्माँश्च रक्षतु, अस्माँश्च रक्षतु। ज्ञानं युष्मानह रक्षतु, अस्मानह रक्षतु। ज्ञानं युष्मान् ह रक्षतु, अस्मान् ह रक्षतु। ज्ञानं युष्मान् वा रक्षतु, अस्मान् वा रक्षतु। ज्ञानं युष्मानेव रक्षतु, अस्मानेव रक्षतु। ज्ञानं युष्मभ्यं च दीयते, अस्मभ्यं च दीयते। ज्ञानं युष्माकं च स्वम्, अस्माकं च स्वम्। ज्ञानं युवां च रक्षतु, ज्ञानमावां च रक्षतु। ज्ञानं युवाभ्यां च दीयते, आवाभ्यां च दीयते। ज्ञानं युवयोश्च स्वम्, आवयोश्च स्वम्। ज्ञानं त्वां च रक्षतु, मां च रक्षतु। ज्ञानं तुभ्यं च दीयते, मह्यं च दीयते। ज्ञानं तव च स्वम्, मम च स्वम्। योगग्रहणं किम्। ज्ञानं च शीलं च वो रक्षतु, नो रक्षतु। ज्ञानं च शीलं च वां दीयते, नौ दीयते। ज्ञानं च शीलं च ते स्वम्, मे स्वम्। नैतेषु चशब्देन युष्मदस्मदोर्योगोऽपि तु ज्ञानशीलयोः। 'चाहहवैवैः' इत्येव सिद्धे योगग्रहणं साक्षाद् योगप्रतिपत्त्यर्थम्।

३३१ **दृश्यर्थैश्चिन्तायाम्** ॥२।१।३०॥ दृशिना समानार्था दृश्यर्थाः । तैर्धातुभिश्चिन्तायां वर्तमानैर्योगे युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न स्यात् । जनो युष्मान् संदृश्यागतः । जनोऽस्मान् संदृश्यागतः । जनो युवां समीक्ष्यागतः । जन आवां समीक्ष्यागतः । जनस्त्वामपेक्षते । जनो मामपेक्षते । गुरुस्तव कार्यमालोचयति । गुरुर्मम कार्यमालोचयति इत्यादिषु सर्वत्र मनसा चिन्तितं दृश्यर्थानामर्थः । दृश्यर्थैरिति किम्, । जनो वो मन्यते । जनो नो मन्यते । चिन्तायामिति किम् । जनो वः पश्यति । जनो नः पश्यति—चक्षुषा पश्यतीत्यर्थः ।

३३२ **नित्यमन्वादेशे** ॥ २।१।३१ ॥ अन्वादेशविषये पदात् परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्नित्यं स्यात् । यूयं विनीतास्तद् वो गुरवो मानयन्ति । वयं विनीतास्तद् नो गुरवो मानयन्तीत्यादि ।

३३३ **सपूर्वात् प्रथमान्ताद् वा** ॥२।१।३२॥ विद्यमानपूर्वात् प्रथमान्तात् पदात् परयोर्युष्मदस्मदोरन्वादेशे वस्नसादयो वा स्युः । यूयं विनीतास्तद्-गुरवो वो मानयन्ति, तद्गुरवो युष्मान् मानयन्ति । वयं विनीतास्तद् गुरवो नो मानयन्ति, तद् गुरवोऽस्मान् मानयन्ति इत्यादि । गम्येऽप्यन्वादेशे भवति । ग्रामे कम्बलो वः स्वमथो ग्रामे कम्बलो युष्माकं स्वमथो । सपूर्वादिति किम् । पटो युष्माकं स्वम् । अथो वः कम्बलः स्वम् । प्रथमान्तादिति किम् । पटो नगरे युष्माकं स्वम् । अथो कम्बलो ग्रामे वः स्वम् । माणवक जटिलक ते स्वमथो ' इत्यादौ तु विशेषणपदस्य ' असदिवामन्त्र्यं पूर्वम् ' इत्यसद्वद्भावान्नास्ति सपूर्वप्रथमान्तमिति न भवत्येव विकल्पः । पूर्वेण नित्ये प्राप्ते वचनम् । व्याघ्रस्य इव पादौ अस्य व्याघ्रपात्—द् । व्याघ्रपादौ । व्याघ्रपादः । व्याघ्रपादम् । व्याघ्रपादौ ।

३३४ **यस्वरे पादः पदणिक्यघुटि** ॥२।१।१०२॥ पादिति पादशब्दस्य लुप्ताकारस्य पादयतेर्वा कृतणिलोपस्य निर्देशः । पादन्तस्य नाम्नो णिक्यघुड्-वर्जिते यकारादौ स्वरादौ च प्रत्यये परे पदित्ययमादेशः स्यात् । स च निर्दिश्यमानस्यैव भवतीति पच्छब्दस्यैव भवति न तदन्तस्य सर्वस्य । व्याघ्रपदः । व्याघ्रपदा । व्याघ्रपाद्भ्यामित्यादि । पादमाचष्टे पद्यमानं प्रयुङ्क्ते वेति पादयतेः किपि, पाद् । पादौ । पादः । पादम् । पादौ । पदः । अत्र व्यपदेशिवद्भावेन पादन्तत्वम् । पदा । पाद्भ्यामित्यादि । यस्वर इति किम् । द्विपाद्भ्याम् । द्विपात्काम्यति । अणिक्यघुटीति किम् । पादमाचष्टे पादयति । क्येति क्यनक्यङोरविशेषेण

ग्रहणम् । व्याघ्रपादमिच्छति स इवाचरतीति च व्याघ्रपाद्यति । व्याघ्रपाद्यते । द्विपादौ । नाम्न इत्येव । उपपद्यते एवंशीलः उपपादुकः । पादयतेः क्विबन्तस्य प्रयोगो नास्तीति कश्चित् । धकारान्तो धर्मबुध् शब्दः ।

३३५ **गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्धोश्च प्रत्यये** ॥२।१।७७॥ गडदबादेश्चतुर्थान्तस्यैकस्वरस्य धातुरूपावयवस्यादेश्चतुर्थ आसन्नः स्यात् पदान्ते सकारादौ ध्वशब्दादौ च प्रत्यये परे । धर्मभुत्–द् । धर्मबुधौ । धर्मबुधः । धर्मबुधम् । धर्मबुधौ। धर्मबुधः । धर्मबुधा । धर्मभुद्भ्याम् । धर्मभुत्सु । हे धर्मभुत्–द् । नकारान्तो राजन् शब्दः । ' निदीर्घ ' इति दीर्घे । राजा । राजानौ । राजानः । राजानम् । राजानौ । अघुट्स्वरेऽनोऽस्येत्यल्लोपे असद्विधौ स्वरादेशस्य लोपस्य स्थानिवद्भावप्रतिषेधाच्च नस्य ञत्वे जञोर्ञः । राज्ञः । राज्ञा । राजभ्याम् । असदधिकारविहितस्य नलोपस्यासत्वादीर्घाद्यभावः । राज्ञे । राज्ञः राज्ञोः । राज्ञाम् । राज्ञि । राजनि । राजसु ।

३३६ **नामन्त्र्ये** ॥२।१।९२॥ आमन्त्र्येऽर्थे वर्तमानस्य नाम्नः संबंधिनो नकारस्य लुग् न स्यात् । हे राजन् । [1]एतदेव प्रतिषेधवचनं ज्ञापकं सिलुकः स्थानिवद्भावेन 'अधातुविभक्ति' इति नामसंज्ञाप्रतिषेधो न भवतीति । हे राजवृन्दारक इत्यत्र समुदायार्थ आमन्त्र्यो नावयवार्थ इति नलोपप्रतिषेधो न भवति । अवयवार्थस्य त्वामन्त्र्यत्वे असामर्थ्यात् समास एव न स्यात् । प्रतिदीव्यतीति प्रतिदिवा । प्रतिदिवानौ । प्रतिदिवानः । प्रतिदिवानम् । प्रतिदिवानौ । शसादौ स्वरे अनोऽस्येत्यल्लोपे कृते ।

३३७ **भ्वादेर्नामिनो दीर्घो वोर्व्यञ्जने** ॥ २।१।६३ ॥ भ्वादेर्धातोरवयवभूतौ यौ रेफवकारौ तयोः परयोस्तस्यैव भ्वादेर्नामिनो दीर्घः स्यात् ताभ्यां परं चेद् व्यंजनं न भवति । अत्राप्यनेन दीर्घे कर्तव्ये स्वरादेशस्य लोपस्य न स्थानिवत्त्वम्, असद्विधौ तन्निषेधात् । प्रतिदीव्नः । प्रतिदीव्नेत्यादि । यज्वा । यज्वानौ । यज्वानः । यज्वानम् । यज्वानौ । भ्वादेरिति किम् । चतुर्भिः । दिव्यति । नामिन इति किम् । स्मर्यते । भव्यम् । वोरिति किम् । बुध्यते । व्यंजन इति किम् । विकिरति । वोर्भ्वादिसंबंधिविशेषणं किम् । दीव्यतेः क्निपि

---

१ ननु हे राजन् इत्यादौ सिलुकः स्थानिवद्भावेन 'अधातुविभक्ति' इत्यनेन नामत्वाभावे नलोपस्य प्राप्तिरेव नेति किं प्रतिषेधेनेत्याह–एतदेवेति ।

वकारलोपे दिवन्। दीव्ना। दीव्ने। नामिनो भ्वादिसंबंधिशेषणं किम्। दधिव्रज्या। प्रत्यासत्या तस्यैवेति विशेषणं किम्। ग्रामणिव्रज्या।

३३८ न वमन्तसंयोगात् ॥ २।१।१११ ॥ वकारान्तान्मकारान्ताच्च संयोगात् परस्यानोऽकारस्य लुग् न स्यात्। यज्वनः। यज्वभ्यामित्यादि। आत्मा। आत्मानौ। आत्मानः। आत्मनः। आत्मनेत्यादि। संयोगादिति किम्। प्रतिदीव्ना। साम्ना। वमन्तेति किम्। तक्ष्णा। मूर्ध्ना।

३३९ इन्हन्पूषार्यम्णः शिस्योः ॥१।४।८७॥ इनन्तस्य हनादीनां च संबंधिनः स्वरस्य शौ शेषे सौ च परे दीर्घः स्यात्। नि दीर्घ इत्येव सिद्धे नियमार्थं वचनम्। एषां शिस्योरेव यथा स्यान्नान्यत्रेति। दण्डी। दण्डिनौ। दण्डिनः। दण्डिना। दण्डिभ्याम्। शेष इत्येव। हे दण्डिन्। 'अर्थवद्ग्रहणे नानर्थकस्ये'ति प्लीहानौ, प्लीहानः, प्लीहानमित्यत्र नियमो न भवति। वाग्मिनौ, वाग्मिन इत्यादौ तु 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति' न्यायाद् भवत्येव। एवमेव विन्प्रत्ययान्तानामपि। वचस्वी। वचस्विनौ। वचस्विन इत्यादि। वृत्रहा। कवर्गैकस्वरवतीति णत्वम्। वृत्रहणौ। वृत्रहणः। वृत्रहणम्। वृत्रहणौ। शसादौ स्वरेऽस्यलोपे कृते—

३४० हनो ह्नो घ्नः ॥२।३।२१२॥ हन्तेर्ह्न इत्येवंरूपस्य घ्न इत्ययमादेशः स्यात्। कवर्गैकस्वरवतीति णत्वे प्राप्ते।

३४१ हनो घि ॥ २।३।९४ ॥ हन्तेर्नकारस्य घकारे निमित्तनिमित्तिनोरन्तरे सति णो न स्यात्। वृत्रघ्नः। वृत्रघ्ना। वृत्रहभ्याम्। वृत्रहभिरित्यादौ 'असिद्धं बहिरङ्गमन्तरङ्गे' इति नलोपस्यासिद्धत्वात् 'ह्रस्वस्य तः पित्कृती'ति तोऽन्तो न भवति। वृत्रघ्नि। वृत्रहणि। हे वृत्रहन्। पूषा। पूषणौ। पूष्णः। पूष्णा। पूषभ्याम्। पूष्णि। पूषणि। हे पूषन्। एवमर्यमनशब्दः। श्वा। श्वानौ। श्वानः। श्वानम्।

३४२ श्वनयुवनमघोनो ङीस्याद्यघुट्स्वरे च उः ॥२।१।१०६॥ श्वन् युवन् मघवन्नित्येतेषां सस्वरो वकारो ङीस्याद्यघुट्स्वरे परे उः स्यात्। शुनः। शुना। श्वभ्याम्। युवा। युवानौ। युवानः। युवानम्। यूनः। यूना। युवभ्याम्। मघवा। मघवानौ। मघवानः। मघोनः। मघोनेत्यादि। ङीस्याद्यघुट्स्वर इति किम्। शौवनम्। यौवनम्। माघवनम्। अघुटिति किम्। श्वानौ। युवानौ।

मघवानौ । स्वर इति किम् । श्वभ्याम् । नकारान्तनिर्देशादिह न भवति । गोष्टश्वेन । अर्थवद्ग्रहणादिह न भवति । तत्त्वदश्वना । मघवच्छब्दस्तु मत्वन्तः । मघवान् । मघवन्तौ । मघवन्तः । मघवन्तम् । मघवन्तौ । मघवतः । मघवता । मघवद्भ्यामित्यादि । अर्वा । अर्वाणौ । अर्वाणः । अर्वाणम् । अर्वणः । अर्वणा । अर्वभ्यामित्यादि ।

३४३ **पथिन्मथिनृभुक्षः सौ** ॥ १।४।७६ ॥ पथिन् मथिन् ऋभुक्षिन् इत्येतेषां नकारान्तानामन्तस्य सौ परे आकारः स्यात् । इति नस्यात्वे ।

३४४ **एः** ॥१।४।७७। पथ्यादीनां नान्तानामिकारस्य घुटि परे आः स्यात् । पथा इति जाते ।

३४५ **थोन्थ्** ॥ १।४।७८ ॥ मथिन् मथिन् इत्येतयोर्नान्तयोस्थस्य घुटि परे न्थ् इत्यादेशः स्यात् । पन्थाः । पन्थानौ । पन्थानः । हे पन्थाः ।

३४६ **इन्ङीस्वरे लुक्** ॥ १।४।७९ ॥ पथ्यादीनां नान्तानां ङीप्रत्यये अघुट्स्वरादौ च स्यादौ परे इन् अवयवो लुक् स्यात् । अभेदनिर्देशः सर्वादेशार्थः । पथः । पथा । पथिभ्याम् । एवं मन्थाः । ऋभुक्षाः । कथं हे सुपथिन् हे सुपथि कुल, हे सुमथिन् हे सुमथि कुल । अत्र नित्यत्वान्नपुंसकलक्षणायाः सेर्लुपि सेरभावान्नात्वम् । नकारान्तनिर्देशादिहापि नाकारः—पन्थानमिच्छति क्यनि नलोपे क्विपि च पथीः, मथीः, ऋभुक्षीः । सुपन्थानि, बहुमन्थानीत्यादौ च ' पूजास्वतेः प्राक् टात् ' इति समासान्तप्रतिषेधः । पञ्चन्प्रभृतयो बहुवचनान्ता नान्ताः संख्याशब्दास्त्रिष्वपि लिङ्गेषु सरूपाः । डतिण् इति जश्शसोर्लुपि पञ्च २ । पञ्चभिः पञ्चभ्यः २ ।

३४७ **संख्यानां र्ण्णाम्** ॥१।४।३३॥ रेफषकारनकारान्तानां संख्यावाचिनां संबंधिन आमः स्थाने नाम् स्यात् । दीर्घो नाम्यतिस्निति दीर्घे, नाम्नो नोऽनह्न इति नलोपे पञ्चानाम् । पञ्चसु । तत्संबंधविज्ञानादिह न लुब् न च नाम् । प्रियपञ्चा । प्रियपञ्चानौ । प्रियपञ्चानः । प्रियपञ्चभ्यामित्यादि राजवत् । संख्यानामिति किम् । यतिनाम् । र्ण्णामिति किम् । त्रिंशताम् । पञ्चाशताम् । एवं सप्तन्प्रभृतयः ।

३४८ **वाष्टन आः स्यादौ** ॥ १।४।८२ ॥ अष्टन्शब्दस्य तत्संबंधिन्यन्यसंबंधिनि वा स्यादौ परे आकारान्तादेशो वा स्यात् ।

३४९ **अष्ट और्जस्शसोः** ॥१।४।५३॥ अष्ट इति कृतात्वस्याष्टन्शब्दस्य निर्देशः । अष्टाशब्दसंबंधिनोर्जस्शसोः स्थाने औकारादेशः स्यात् । अष्टौ २। अष्ट २ । अष्टाभिः । अष्टभिः । अष्टाभ्यः २ । अष्टभ्यः २। संख्यानां र्णामित्यत्र बहुवचनस्य व्याप्त्यर्थत्वाद् भूतपूर्वनान्तायां अपि नाम् । अष्टानाम् । अष्टासु । अष्टसु । प्रियाष्टन् शब्दस्य वाष्टन इत्यनेन वैकल्पिकमात्वं भवत्येव, जस्शसोः औत्वं तु तत्संबंधिविज्ञानान्न भवति । प्रियाष्टाः । प्रियाष्टा । प्रियाष्टौ । प्रियाष्टानौ । प्रियाष्टाः । प्रियाष्टानः । प्रियाष्टाम् । प्रियाष्टानम् । प्रियाष्टौ । प्रियाष्टानौ । प्रियाष्टः । प्रियाष्टनः । प्रियाष्टाभिः । प्रियाष्टभिः । हे प्रियाष्टन् । हे प्रियाष्टाः । अन्यसंबंधिनोर्जस्शसोरात्वं नेच्छन्त्येके । तन्मते प्रियाष्टानस्तिष्ठन्ति, प्रियाष्टनः पश्येत्येव भवति । केचित्तु सकारभकारादावेव स्यादावात्वमिच्छन्ति । अतत्संबंधिनोरपि जस्शसोरौत्वमिच्छन्त्येके–प्रियाष्टौ तिष्ठन्ति, प्रियाष्टौ पश्य । केचित्तु अष्टावाचक्षत इति णिचि किपि अष्टौ तिष्ठन्ति, अष्टौ पश्येतीच्छन्ति । तदप्यष्ट इति तन्त्रेण संगृहीतम् । पकारान्तः स्वप्शब्दः ।

३५० **अपः** ॥ १।४।८८ ॥ अपः स्वरस्य शेषे घुटि दीर्घः स्यात् । शोभना आपो यत्र स्वाप्–ब् । स्वापौ । स्वापः । स्वापम् । स्वापौ । स्वपः । स्वपा ।

३५१ **अपोऽद्भे** ॥२।१।४॥ अप् इत्येतस्य स्वसंबंधिन्यन्यसंबंधिनि वा भकारादौ स्यादौ परतोऽद् इत्ययमादेशः स्यात् । स्वद्भ्याम् । स्वद्भिः । स्वद्भ्यः २ । स्वपाम् । स्वप्सु । हे स्वप् । भकारान्तस्तुण्डिभ् शब्दः । तुण्डिभमाचष्टे णौ किपि तुण्डिप्–ब् । तुण्डिभौ । तुण्डिभः । तुण्डिभम् । तुण्डिभः । तुण्डिभा । तुण्डिब्भ्यामित्यादि । एवं गर्दभमाचष्टे णौ किपि गर्धप्–ब् । गर्धब्भ्यामित्यादि । मकारान्तः प्रशाम् शब्दः ।

३५२ **मो नो म्वोश्च** ॥२।१।६७॥ मकारान्तस्य भ्वादेरन्तस्य पदान्ते वर्तमानस्य मकारवकारयोश्च परयोर्नकारादेशः स्यात् स चासन् परे । प्रशाम्यतीति प्रशान् । प्रशामौ । प्रशामः । प्रशामा । प्रशान्भ्याम् । नत्वस्यासच्चान्नलोपाभावः । प्रशान्सु । हे प्रशान् । एवं प्रतान् । प्रदान् । परिक्लान् ।

३५३ **किमः कस्तसादौ च** ॥२।१।४०॥ त्यदादिसंबंधिनि स्यादौ तसादौ च प्रत्यये किम्शब्दस्य क इत्यकारान्त आदेशः स्यात् । कः । कौ । के इत्यादि सर्ववत् । अक्सहितस्याप्ययमादेशः । त्यदादिसंबंधिविज्ञानादिह न भवति–अति-

किम् । अतिकिमौ । अतिकिमः । आदिशब्दस्य व्यवस्थावाचित्वात् तसादयस्थमवसाना ग्राह्याः ।

३५४ **अयमियं पुंस्त्रियोः सौ** ॥२।१।३८॥ त्यदां संबंधिनि सौ परे पुंलिङ्गस्त्रीलिङ्गयोरिदमः स्थाने यथासंख्यमयम् इयम् इत्येतावादेशौ स्याताम् । अयम् । त्यदादिसंबंधिविज्ञानादिह न भवति । अतीदम् पुमान् स्त्री वा । एवं प्रियेदम् । पुंस्त्रियोरिति किम् । पुंसि इयम्, स्त्रियामयम् मा भूत् । नपुंसके तु नित्यत्वात् प्रथममेव सेर्लुपि इदं कुण्डमित्यत्र प्रसङ्ग एव नास्ति । साकोऽप्ययमियमादेशौ भवतः । अयम् । अन्ये त्वादेशे कृते पश्चादकमिच्छन्ति । अयकम् । द्विवचने आद्वेर इति मस्य अत्वे लुगस्यादेत्यपद इति लुकि च ।

३५५ **दो मः स्यादौ** ॥२।१।३९॥ त्यदां संबंधिनि स्यादौ परत इदमो दकारस्य मकारादेशः स्यात् । इमौ । इमे । इमकौ । इमके । त्यदादिसंबंधिविज्ञानादिह न भवति । अतीदमौ । इमम् । इमकम् । इमौ । इमकौ । इमान् । इमकान् । अन्वादेशे तु ।

३५६ **इदमः** ॥२।१।३४॥ त्यदादीनां संबंधिन इदमित्यस्य द्वितीयायां टायामोसि च परेऽन्वादेशे एनद् इत्ययमादेशः स्यात् । इमं साधुमावकश्यकमध्यापय अथो एनमेव सूत्राणि । सुशीलाविमौ तदेनौ गुरवो मानयन्ति । सुस्थिता इमे तदेनान् देवा अपि नमस्यन्ति । अक्सहितस्याप्ययमादेशः ।

३५७ **अद् व्यंजने** ॥२।१।३५॥ इदम इति षष्ठ्यन्तमपि सर्वादेशार्थं प्रथमान्ततयेह विपरिणम्यते । त्यदादिसंबंधीदमशब्दो व्यंजनादौ स्यादौ परेऽन्वादेशे गम्यमानेऽद् भवति, अङ्क्त्यन्ते । तकार उच्चारणार्थः । उत्तरत्र 'अनक्' इति वचनात् इह साक एव विधिः । इमकाभ्यां शैक्षकाभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतम् इत्यादि । सौ तु परत्वादयमादेशः । अथो अयं शीलवान् । अन्वादेश इत्येव । इमकस्मै देहि । अङ्क्त्यन्त इत्येव । अथो परमेमकाभ्यां रात्रिरधीता । व्यंजन इति किम् । अथो इमके तिष्ठन्ति ।

३५८ **टौस्यनः** ॥२।१।३७॥ त्यदादिसंबंधिनि टायामोसि च परेऽन्वर्जितस्येदमः स्थाने अन इत्ययमादेशः स्यात् । अनेन । त्यदादिसंबंधिविज्ञानादिह न भवति । अतीदमा । अनक् इत्येव । इमकेन । अन्वादेशे एनेन ।

३५९ अनक् ॥ २।१।३६॥ त्यदादिसंबंधिनि व्यंजनादौ स्यादौ परेऽग्वर्जित इदम अत् स्यात्। अभेदनिर्देशः सर्वादेशार्थः तकार उच्चारणार्थः। आभ्याम्। अनगिति किम्। इमकाभ्याम्। तत्संबंधिविज्ञानादिह न। अतीदंभ्याम्। इह तु भवत्येव। परमाभ्याम्।[1] अत्र पूर्वोत्तरयोः पदयोः पूर्वं कार्ये कृते पश्चात् संधिकार्यम्। एतच्च 'आतो नेन्द्रवरुणस्य' इत्यत्र ज्ञापयिष्यते।

३६० इदमदसोऽक्येव ॥१।४।३॥ इदम् अदस् इत्येतयोरक्येव सत्यकारात्परस्य भिस ऐस् स्यात्। इति नियमात् 'एद्बहुस्भोसी'त्येत्वे एभिः। अकि तु इमकैः। सर्वादित्वाद् अस्मै। आभ्याम्। एभ्यः। अस्मात्। अस्य। अनयोः २। एनयोः २। एषाम्। अस्मिन्। एषु। चतुरशब्दो बहुवचनान्तः।

३६१ वाः शेषे ॥१।४।८२॥ आमंत्र्यार्थविहितात् सेरन्यो घुट् इह शेषः। तस्मिन् परेऽनडुह् चतुरित्येतयोरुकारस्य वा इत्याकारान्तो वकार आदेशः स्यात्। चत्वारः। प्रियचत्वाः। प्रियचत्वारौ। प्रियचत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः २। संख्यानां र्णाम्। णत्वम्। द्वित्वम्। चतुर्ण्णाम्। चतुर्णाम्। प्रियचतुराम्। सुपि रस्य विसर्गषकारौ प्राप्तौ।

३६२ अरोः सुपि रः ॥१।३।५७॥ रुवर्जितस्य रेफस्य स्थाने सुपि परे रेफ एव स्यात्, कार्यान्तरबाधनार्थः। चतुर्षु।

३६३ उतोऽनडुच्चतुरो वः ॥ १।४।८१ ॥ अनुडुह् चतुर् इत्येतयोरामन्त्र्येऽर्थे वर्तमानयोरुकारस्य सौ परे व इति सस्वरवकारादेशः स्यात्। हे प्रियचत्वः।

लकारान्तः कमल्शब्दः। कमलं कमलां वा आचक्षाणः कमल्। कमलौ। कमलः। कमलम्। कमलौ। षत्वम्। कमल्षु। वकारान्तः प्रियदिव् शब्दः।

३६४ दिव औः सौ ॥२।१।११७॥ दिवोऽन्तस्य सौ परे औः स्यात्। प्रियद्यौः। प्रियदिवौ। प्रियदिवः। प्रियदिवम्। प्रियदिवौ। 'निरनुबंधग्रहणे न सानुबंधस्य' इति धातोर्न भवति। अक्षैर्दीव्यति, किप्, ऊट् अक्षद्यूः। द्यामिति तु द्यौशब्दस्य 'आ अमूशसोऽता' इत्याकारे रूपम् गतम्।

---

१ ननु परमाभ्यामित्यादौ परादप्यदादेशात् समासे सति स्याद्युत्पत्तिसापेक्षत्वेन बहिरङ्गादन्तरङ्गे अवर्णस्यैत्वे कृते इदमरूपाभावाददादेशो न स्यादित्यत आह-अत्रेति।

३६५ उः पदान्तेऽनूत् ॥२।१।११८॥ पदान्ते वर्तमानस्य दिवोऽन्तस्योकारादेशः स्यात्, स च अनूत्–तस्य उकारस्य दीर्घत्वं न भवतीत्यर्थः। प्रियद्युभ्याम्। प्रियद्युभिः। पदान्त इति किम्। दिवन्ति। अनूदिति किम्। अद्यौर्द्यौर्भवतीत्यत्र 'दीर्घश्च्वियङ्' इत्यादिना च्वौ दीर्घत्वं न भवति। ऊकारस्य प्रतिषेधाद् वृद्धिर्भवत्येव। द्युकामस्यापत्यं द्यौकामः। दिवाश्रयः, दिवौकस इति तु पृषोदरादित्वादकारागमे भविष्यति। वृत्तिविषये वाऽकारान्तो दिवशब्दोऽस्ति। शकारान्तो विश्शब्दः। यजसृजेति षत्वे विट्–ड्। विशौ। विशः। विशम्। विशौ। विट्त्सु। विट्सु। एवं तत्वमाट्–ड्। तत्वमाशौ। तत्वमाशः इत्यादि। ऋत्विजित्यादिना पदान्ते गत्वे। तादृक्–ग्। तादृशौ। तादृग्भ्यामित्यादि। एवं सुदिश् सदृश् घृतस्पृशादयः।

३६६ नशो वा ॥२।१।७०॥ नशेः पदान्ते गोऽन्तादेशो वा स्यात्। जीवस्य नशनम् जीवनक्–ग्। पक्षे जीवनट्–ड्। जीवनशौ। जीवनशः। जीवनग्भ्याम्। जीवनड्भ्यामित्यादि। पदान्त इत्येव। जीवनशौ। षकारान्तो दधृष् शब्दः। धृष्णोतीति दधृक्–ग्। दधृषौ। दधृग्भ्याम्। रत्नानि मुष्णातीति रत्नमुट्–ड्। रत्नमुषौ। रत्नमुषः। रत्नमुषा। रत्नमुड्भ्यामित्यादि। षष्शब्दो नित्यं बहुवचनान्तः। डतिष्ण इति जस्शसोर्लुक्। षट्–ड् २। षड्भिः। षड्भ्यः २। षण्णाम्। षट्सु। प्रियषट्–ड्। प्रियषषौ। प्रियषषः। प्रियषषाम्। प्रियषट्सु।

३६७ सजुषः ॥२।१।७२॥ सजुष् इत्येतस्य पदान्ते वर्तमानस्य रुरन्तादेशः स्यात्।

३६८ पदान्ते ॥२।१।६४॥ पदान्ते वर्तमानयोर्भ्वादिसंबंधिनो रेफवकारयोः परयोस्तस्यैव भ्वादेर्नामिनो दीर्घः स्यात्। सह जुषते इति सजूर्देवैः। सहपूर्वस्य जुषेः क्विपि सहस्य सभावे रूपमेतत्। सजुषौ। सजुषः। सजुषम्। सजूर्भ्याम्। इत्यादि। सकारान्तः सुवचस् शब्दः। अभ्वादेरिति दीर्घे। सुवचाः। सुवचसौ। सुवचसः। सुवचोभ्याम्। हे सुवचः।

३६९ णषमसत्परे स्यादिविधौ च ॥२।१।६०॥ इतः सूत्रादारभ्य यत्परं कार्यं विधास्यते तस्मिन् पूर्वस्मिँश्च स्याद्यधिकारविहिते विधौ कर्तव्ये णत्वं वाऽसदसिद्धं द्रष्टव्यम्। एतत्सूत्रनिर्दिष्टयोश्च णत्वषत्वयोः परे षत्वे णत्वमसद् द्रष्टव्यम्। णषशास्त्रं वा परे स्यादिविधौ च शास्त्रे प्रवर्तमानेऽसद् द्रष्टव्यम्। असत्पर इत्यधि-

कारो ' रात्सः–२–१–९० ' इति यावत् । स्यादिविधौ चेति तु ' नाम्न्यादिभ्यः–२–१–९८ ' इति यावत् । पिपठीः । अत्र षत्वस्यासत्त्वात् सकारस्य रुर्भवति । पिपठिषौ । पिपठिषः । पिपठिषम् । पिपठिषः । पिपठिषा । पिपठीर्भ्याम् । पिपठीष्षु । पिपठीःषु ।

३७० रात्सः ॥२।१।९०॥ पदान्ते वर्तमानस्य संयोगस्य संबंधिनो रेफात् परस्य सकारस्यैव लुक् स्यात् । चिकीर्षति इति क्विपि ' अत ' इत्यकारलोपे षत्वस्य परेऽसत्त्वात् सकारस्यैवानेन लोपः–चिकीः । चिकीर्षौ । चिकीर्भ्याम् । अरोः सुपीति नियमान्न विसर्गषत्वे–चिकीर्षु । पदस्येत्यनेनैव संयोगान्तलोपे सिद्धे नियमार्थमिदं सूत्रम्, रात्परस्य संयोगान्तस्य सस्यैव लोपो नान्यस्येति । तेन गूधेः स्पर्धेश्च यङ्लुपि द्वित्वे 'रिरौ च लुपि' इति पूर्वस्य रागमे 'आगुणावन्यादेः' इति दीर्घत्वे चाडागमे च सिद्धम् अजघाः अपास्पा इति, ऊर्क् इत्यादि च । रादेव सस्येति तु विपरीतनियमो न । ' पुंवत्कर्मधारय ' इत्यत्र पुंवदिति निर्देशात् । षत्वस्यासिद्धत्वाद् रुत्वे विसर्गे च दोः । दोषौ । दोषः । दोषम् । दोषौ । शसादौ दन्तपादेति वा दोषन्नादेशे दोष्णः । दोषः । दोष्णा । दोषा । दोषभ्याम् । दोर्भ्यामित्यादि । विशेः सन्नन्तात् क्विपि षत्वस्यासिद्धत्वात् संयोगान्तलोपे यजसृजेति षत्वे धुटस्तृतीय इति डत्वे विरामे वा–विविट्–ड् । विविक्षौ । विविक्षः । विविड्भ्यामित्यादि । काष्ठं तक्ष्णोतीति क्विपि संयोगस्यादाविति कलोपे डत्वे टत्वे च काष्ठतट्–ड् । काष्ठतक्षौ । काष्ठतड्भ्यामित्यादि । कथं मांसं पिपक्षति क्विप् मांसपिपक्, वचो विवक्षते वचोविवक् । कत्वस्य परस्मिँल्लोपेऽसिद्धत्वात् संयोगस्यादाविति न प्रवर्तते । तस्मात् संयोगान्तलोप एव । एवं विवक् । दिधक् । सुष्ठु पेसतीति सुपीः । सुपिसौ । सुपिसः । सुपिसा । सुपीर्भ्यामित्यादि । एवं सुतूः । उकारानुबंधः श्रेयस् शब्दः । ऋदुदित इति नत्वे, न्समहतोरिति दीर्घे च श्रेयान् ।

३७१ शिड्हेऽनुस्वारः ॥१।३।४०॥ अपदान्ते वर्तमानानां न्नां स्थाने शिटि हकारे च परे अनुस्वार आदेशोऽनु स्यात् । श्रेयांसौ । श्रेयांसः । श्रेयसा । श्रेयोभ्याम् । हे श्रेयन् । न्नामिति बहुवचननिर्देशात् बृंहणमित्यत्र णत्वं दंश इत्यादौ अत्वं च बाधित्वाऽनेनानुस्वार एव भवति । शिट इति किम् । गम्यते । अपदान्त इत्येव । भवान् साधुः । अन्वित्येव । पिण्ढि, शिण्ढि । अत्र पिष्शिषोर्हौ तस्य

धित्वे षस्य डत्वे च शिडभावान्नकारस्यानुस्वारो न भवति । क्वसुप्रत्ययान्तो विद्वस् शब्दः । विद्वान् । विद्वांसौ । विद्वांसः । विद्वांसम् । विद्वांसौ ।

३७२ क्वसुष्मतौ च ॥२।१।१०८॥ णिक्यघुड्वर्जिते यकारादौ स्वरादौ मतौ च प्रत्यये परे क्वस [1]उष् स्यात् । विदुषः । विदुषा ।

३७३ स्रन्स्ध्वन्स्क्वस्सनडुहो दः ॥२।१।६८॥ स्रन्स्ध्वन्सोः क्वसप्रत्ययान्तस्य सकारान्तस्यानडुहशब्दस्य च योऽन्त्यस्तस्य पदान्ते वर्तमानस्य दकारः स्यात् । विद्वद्भ्याम् । विद्वत्सु । हे विद्वन् । ' क्वस्स् ' इति द्विसकारपाठः सान्तस्यैव यथा स्यात्, इह मा भूत्–विद्वान् । उपसेदिवान् । सकारस्य पदस्येति लोपेन निवर्तितत्वात्। एतच्च दत्वं ' येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधको भवति ' इति न्यायात् रुत्वढत्वयोरेव बाधकम्, संयोगान्तलोपे पुनः प्राप्ते चाप्राप्ते चारभ्यते इति तस्य बाधकं न भवति । उपसेदिवांसः। उपसेदिवांसम् । शसादिस्वरादौ ' आगमा यद्गुणीभूता ' इति इट्सहितस्य क्वस उष् । उपसेदुषः । उपसेदिवद्भ्यामित्यादि । न्समहतोरित्यत्र महच्छब्दसाहचर्याच्छुद्धधातोः क्विबन्तस्य न न दीर्घः , तेन सुष्ठु हिनस्तीति सुहिन् । सुहिंसौः । सुहिंसः । सुहिन्भ्याम् । सुहिन्सु । उखया युतेन स्थाल्या वा स्रंसते उखास्रत्–द् । उखास्रसौ । उखास्रसः । उखास्रद्भ्यामित्यादि । एवं पर्णध्वत् । उदित् पुंस् शब्दः ।

३७४ पुंसोः पुमन्स् ॥१।४।७३॥ पुंसु इत्येतस्योदितस्तत्संबंधिन्यन्यसंबंधिनि वा घुटि परे पुमन्स् इत्ययमादेशः स्यात् । पुमान् । पुमांसौ । पुमांसः । पुमांसम् । पुंसः पदस्येति सलोपे पुंभ्याम् । पुंसु । हे पुमन् । एवमीषदूनः पुमान् बहुपुमान् । प्रियपुमान् । [2]पुंसोरुदित्त्वात् प्रियपुंसितरा, प्रियपुंस्तरा, प्रियपुंसीतरेत्यादौ ङीह्स्वपुंवद्विकल्पश्च सिद्धः । उशनस्शब्दस्य ऋदुशनसिति सेर्डा । उशना । उशनसौ । उशनसः । उशनसा । उशनोभ्याम् ।

---

१ उष् इति षकारस्य ' नाम्यन्तस्था ' इति सिद्धत्वे प्रक्रियालाघवार्थं षकारकरणम् ॥

२ ननु पातेर्डुम्सुरिति उदनुबंधः कृतोऽस्ति, तेनापि प्रियपुंसीतरेत्यादि रूपत्रयं सेत्स्यति, किमत्रोदनुबंधेन ? । उच्यते । अव्युत्पत्त्याश्रयणं तदाऽत्रसूत्रे कृतस्योकारस्य फलम् । व्युत्पत्तौ तु फलमौणादिकस्य । यथा भवतु शब्दो भातेर्डवतुरिति व्युत्पादितोऽपि सर्वादौ उदनुबंधः पठितोऽव्युत्पत्तिपक्षार्थम् ।

३७५ **वोशनसो नश्चामंत्र्ये सौ** ॥१।४।८०॥ आमंत्र्येऽर्थे वर्तमानस्योशनस्शब्दस्य सौ परे नकारो लुक् चान्तादेशौ वा स्याताम्। हे उशनन्। हे उशन। हे उशनः। अनेहा। अनेहसौ। अनेहोभ्याम्। हे अनेहः। पुरुदंशा। पुरुदंशसौ। पुरुदंशोभ्यामित्यादि। वेधाः। वेधसौ। वेधोभ्यामित्यादि। अभ्वादेरित्यत्र भ्वादिवर्जनात् न दीर्घः। पिण्डं ग्रसते पिण्डग्रः। पिण्डग्रसौ। पिण्डग्रसः। एवं पिण्डग्लः। चर्म वस्ते चर्मवः।

३७६ **अदसो दः सेस्तु डौ** ॥२।१।४३॥ त्यदादिसंबंधिनि सौ परेऽदसो दकारस्य सकारादेशः स्यात्, सेस्तुडौ। असौ। त्यदादिसंबंधिविज्ञानादिह न भवति। अत्यदाः। डित्करणमन्त्यस्वरादिलोपार्थम्। तेन 'औता' 'एदापः' 'दीर्घङ्याब्' 'अस्यायत्तत्क्षिपकादीनाम्' इति कार्याणि न भवन्ति। अन्यथा 'दः सौ' इत्येतत् क्रियेत।

३७७ **असुको वाऽकि** ॥२।१।४४॥ त्यदादिसंबंधिनि सौ परेऽदसोऽकि सत्यसुक इति दस्य सः सकारात्परस्याकारस्योकारः सेश्च डौत्वाभावो वा निपात्यते। असकौ। केचित्तु असुकस् इति सान्तं सिना सह निपातयन्ति। द्विवचने त्यदाद्यत्वे, लुगस्यादेत्यपद इति लुकि ऐदौत्संध्यक्षरैरित्यौत्वे च।

३७८ **मोऽवर्णस्य** ॥ २।१।४५॥ अवर्णान्तस्य त्यदादिसंबंधिनोऽदसो दकारस्य मकार आदेशः स्यात्। अमौ इति जाते 'मादुवर्णेनु–' अमू। सर्वादित्वाज्जस इः। अमे इति जाते।

३७९ **बहुष्वेरीः** ॥ २।१।४९॥ बहुष्वर्थेषु वर्तमानस्यादसो मकारात् परस्यैकारस्य स्थाने ईकार आदेशः स्यात्। अमी। अमूम्। अमू। अमून्।

३८० **प्रागिनात्** ॥ २।१।४८॥ अदसो मात्परस्य वर्णमात्रस्येनादेशात् प्रागुवर्णः स्यात्। अन्विस्यापवादोऽयम्। अमुना। अमूभ्याम् ३। इदमदसोऽक्येवेति नियमाद् मिस ऐस्त्वाभावे, एद्बहुस्भोसीत्येत्वे, बहुष्वेरीः—अमीभिः। अमुष्मै। अमीभ्यः २। अमुष्मात्। अमुष्य। अमुयोः २। अमीषाम्। अमुष्मिन् अमीषु। हे असौ। हे असुक। हे असकौ। अनडुह् शब्दस्य 'वाःशेषे' इत्यनेनोतो वादेशे कृते अवड्वाह् सि इति जाते।

३८१ **अनडुहः सौ** ॥१।४।७२॥ अनडुह्शब्दस्य धुडन्तस्य तत्संबंधिन्य-

न्यसंबंधिनि वा सौ परे धुटः भाग् नोऽन्तः स्यात् ' इति नत्वे पदस्येति हलोपे अनड्वान् । भियानड्वान् । अत्र स्रन्स्यध्वन्सित्यादिना दत्वं प्राप्तम् , नकारविधान-सामर्थ्यान्न भवति । अनड्वाहौ । अनड्वाहः । शसि अनडुहः । पदान्ते सर्वत्र दत्वे अनडुद्भ्यामित्यादि । संबोधने ' उतोनडुच्चतुरो वः ' हे अनड्वन् ।

३८२ हो धुट्पदान्ते ॥२।१।८२॥ हकारस्य धुटि प्रत्यये पदान्ते च ढकारादेशः स्यात् । मधुलिट्–ड् । मधुलिहौ ।मधुलिहः । मधुलिहा । मधुलिड्भ्याम् । मधुलिट्त्सु । मधुलिट्सु । हे मधुलिट्–ड् ।

३८३ भ्वादेर्दादेर्घः ॥२।१।८३॥ भ्वादेर्धातोर्यो दकारादिरवयवस्तदवयवस्य हकारस्य धुटि प्रत्यये पदान्ते च घकारादेशः स्यात् । दस्यापवादः । गडदबादेरिति धत्वे गोधुक्–ग् । गोदुहौ । गोदुहः । गोदुहा । गोधुग्भ्याम् । गोधुक्षु । हे गोधुक् । एवं काष्ठधक् । भ्वादेरिति किम् । दामलिहमिच्छति क्यन् , किप् , दाम-लिट्–ड् । एवं दषद्धुट् । दादेरिति किम् । मधुलिट् । ह इत्येव । अदात् । धुट्-पदान्त इत्येव । गोदुहौ ।

३८४ मुहद्रुहस्नुहस्निहो वा ॥२।१।८४॥ एषां संबंधिनो हकारस्य धुटि प्रत्यये पदान्ते च घकारादेशो वा स्यात् । द्रुहः प्राप्तेऽन्येषामप्राप्ते विकल्पः । उन्मुक्–ग् । उन्मुट्–ड् । उन्मुहौ । उन्मुहः । उन्मुहा । उन्मुग्भ्याम् । उन्मुड्भ्याम् । उन्मुक्षु । उन्मुट्सु–ट्त्सु । एवं मित्रध्रुक्–ग् । मित्रध्रुट्–ड् । उत्स्नुक्–ग् । उत्स्नुट्–ड् । चेलस्निक्–ग् । चेलस्निट्–ड् । मुहादेरिति गणनिर्देशमकृत्वा धातुपरिगणनं यङ्लुप्यपि विध्यर्थम् । मोमोग्धि । मोमोढि । दोद्रोग्धि । दोद्रोढि ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां व्यंजनान्तपुँल्लिङ्गप्रकरणम्
समाप्तम् ॥

॥ अथ व्यंजनान्तस्त्रीलिङ्गप्रकरणम् ॥

चकारान्तो वाच् शब्दः । वाक्–ग् । वाचौ । वाचः । वाचा । वाग्भ्यामि-त्यादि । सृज्यत इति क्रुध्संपदादित्वात् किप् । ऋत्विगित्यादिसूत्रे 'स्रज्' इति निर्दे-शाद् ऋतो रत्वं, तेनैव सूत्रेण च गत्वम् । सृ गताविति्यस्य वा वाऽकञ् । स्रक्–ग् स्रजौ । स्रजः । स्रजा । स्रग्भ्याम् । स्रक्षु । त्यदादीनामाद्वेर इत्यकारान्तत्वे आप् ।

तः सौ सः । स्या । त्ये त्याः । सा । ते । ताः । या । ये । याः इत्यादि सर्ववत् । एषा । एते । एताः । एताम् । एते । एताः । एतया । एताभ्याम् ३ । एतयोः । एतयोः । अन्वादेशे एनाम् । एने । एनाः । एनया । एनयोः २ । क्षुत्–द् । क्षुधौ । क्षुधः । क्षुधा । क्षुद्भ्यामित्यादि । पकारान्तो बहुवचनान्तोऽप्शब्दः । 'अप' इति घुटि दीर्घे आपः । अपः । भकारादौ 'अपोऽद्भे' इत्यदादेशे अद्भिः । अद्भ्यः २ । अपाम् । अप्सु । ककुभ्शब्दस्तुण्डिभ्शब्दवत् । किमः कादेशे आप् । का । के । काः इत्यादि सर्ववत् । इदम्शब्दस्य 'अयमियं पुंस्त्रियोः सौ' इयम् । 'आद्वेर' इत्यत्वे आपि 'दो म' इति मत्वे च इमे । इमाः । इमाम् । इमे । इमाः । 'टौस्यनः' अनया । 'अनक्' आभ्याम् ३ । आभिः । अस्यै । अस्याः २ । अनयोः २ । आसाम् । अस्याम् । आसु । अन्वादेशे एनाम् । एने । एनाः । एनया । एनयोः २ । चतुरश्चतस्रादेशे स्वरादौ रत्वे च चतस्रः २ । चतसृभिः । चतसृभ्यः २ । दीर्घो नामीत्यत्र तिसृचतसृवर्जनात् चतसृणाम् । चतसृषु । गिर्शब्दस्य 'पदान्त' इति दीर्घे गीः । गिरौ । गिरा । गीर्भ्यामित्यादि । एवं धूः । पूः । दिव्शब्दस्य दिव औरित्यौत्वे द्यौः । दिवौ । 'उः पदान्ते' इत्युत्वे द्युभ्याम् । द्युषु । हे द्यौः । ऋत्विगित्यादिना गत्वे दिक्–ग् । दिशौ । दिशः । दिग्भ्याम् । दिक्षु । दृक्–ग् । दृशौ । दृशः । दृग्भ्याम् । दृक्षु । त्विट्–ड् । त्विषौ, त्विषः । त्विषा । त्विड्भ्याम् । त्विट्त्सु–ट्सु । आशिस् शब्दस्य षत्वं 'णषमसत्पर' इत्यनेनासदिति रुत्वे दीर्घे च आशीः । आशिषौ । आशिषः । आशीर्भ्याम् इत्यादि । 'अदसो दः सेस्तु डौ' असौ । द्विवचने अत्वे, आपि, 'औता' इत्येत्वे, मत्वे उत्वे च अमू । अमूः । अमूम् । अमू । अमूः । अमुया । अमूभ्याम् ३ । अमूभिः । अमुष्यै । अमूभ्यः २ । अमुष्याः २ । अमुयोः २ । अमूषाम् । अमुष्याम् । अमूषु ।

३८५ नहाहोर्धतौ ॥२।१।८५॥ नहेर्ब्रूस्थानाहश्च धातोः संबंधिनो हकारस्य धुटि प्रत्यये पदान्ते च धकारतकारावादेशौ स्याताम् । उपानत्–द् । उपानहौ । उपानहः । उपानहा । उपानद्भ्याम् । उपानत्सु । ऊर्ध्वं स्निह्यति नह्यति वा उष्णिक्–ग् । ऋत्विगित्यादिना गत्वम् । अथ च तत्रैव सूत्रे 'उष्णिह्' इति निर्देशात् उदो दकारस्य लोपे सस्य षत्वं, नहेर्नकारस्य च ष्णिरादेशः । उष्णिहौ । उष्णिहः । उष्णिहा । उष्णिग्भ्यामित्यादि ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां व्यंजनान्तस्त्रीलिङ्गप्रकरणम्
समाप्तम्

॥ अथ व्यंजनान्तनपुंसकलिङ्गप्रकरणम् ॥

चकारान्तो गवाञ्च् शब्दः[1] । गामञ्चतीति विग्रहः। गतौ नलोपः । ' स्वरे वाऽनक्षे ' इत्यनेनावादेशः । गवाक्–ग् । वात्यसंधिः । गो अक्–ग् । एदोत इति अस्य लुक्, गोऽक्–ग् । पूजायां ' युजञ्चक्रुञ्चो नो ङः, गवाङ् । गो अङ् । गोऽङ् । अम्यप्येतान्येव नव । घुड्वर्जिते स्वरादौ ' अच प्राग् दीर्घश्च ' गोची । पूजायां तु गवाञ्ची । गोअञ्ची । गोऽञ्ची । नपुंसकस्य जस्शसोः शिः , तस्य च घुट्संज्ञकत्वेन ' अच ' इति नत्वे गवाञ्चि । गतिपूजनयोस्त्रीण्येव । गोचा । गवाञ्चा । गोअञ्चा । गोऽञ्चा । गवाग्भ्याम् । गोअग्भ्याम् गोऽग्भ्याम् । गवाङ्भ्याम् । गोअङ्भ्याम् । गोऽङ्भ्याम् इत्यादि । सुपि तु ङान्तानां पक्षे ' ङ्णोः कटावन्तौ शिटि न वा ' इति कत्वे गवाङ्क्षु । गोअङ्क्षु । गोऽङ्क्षु । गवाङ्षु । गोअङ्षु । गोऽङ्षु । गवाक्षु । गोअक्षु । गोऽक्षु । प्राक्–ग् । प्राची । प्राञ्चि । प्रत्यक्–ग् । प्रतीची । प्रत्यञ्चि । समीची । सम्यञ्चि । शेषं पुंवत् । जकारान्तोऽसृज् शब्दः । असृक्–ग् । असृजी । असृञ्जि । शसादौ वाऽसन्नादेशे, असानि–असृञ्जि । असृजा । असृजा । असभ्याम् । असृग्भ्यामित्यादि । बहूर्क्–ग् । बहूर्जी ।

३८६ लों वा ॥१।४।६७॥ रेफलकाराभ्यां परा या धुड्जातिस्तदन्तस्य नपुंसकस्य धुटः प्राग् नोऽन्तो वा स्यात् शौ परे । बहूर्ञ्जि । बहूर्जि । जगत्–द् । जगती । जगन्ति । पुनस्तद्वत्, शेषं मरुद्वत् । महत्–द् महती । न्समहतोरिति दीर्घे महान्ति । पुनस्तद्वत्, शेषं पुंवत् । यकृत्–द् । यकृती । यकृन्ति । शकृत्–द् । शकृती । शकृन्ति । अनयोः शसादौ वा यकन् शकन्नादेशे यकानि । यकृन्ति । शकानि । शकृन्ति । यक्ना । यकृता । शक्ना । शकृता । यकभ्याम् यकृद्भ्याम् । शकभ्याम् । शकृद्भ्यामित्यादि । तुदत्–द् ।

३८७ अवर्णादश्नोऽन्तो वाऽतुरीङ्योः ॥२।१।११८॥ श्नावर्जितादव-

---

१ गवाक्शब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।
असंख्यवाकारलोपैर्नवाधिकशतं मतम् ॥ १ ॥
स्यमसुप्सु नव षड् भादौ षट्के स्युस्त्रीणि जस्शसोः ।
चत्वारि शेषे दशके रूपाणीति विभावय ॥ २ ॥
ऊह्यमेषां द्विर्वचनानुनासिकविकल्पनात् ।
रूपाण्यश्वाक्षिभूतानि ५२७ भवन्तीति मनीषिभिः ॥३॥

र्णात् परस्यातुः स्थानेऽन्त इत्यादेशो वा स्यात्, ईप्रत्यये ङीप्रत्यये च परे ॥ तुदन्ती। तुदती। तुदन्ति। भात्–द्। भान्ती। भाती। भान्ति। पचत्–द्।

३८८ इयशवः २।१।११६॥ इयात् शवश्च परस्यातुरीङ्योः परतोऽन्त इत्यादेशः स्यात्। पचन्ती। पचन्ति। दीव्यत्। दीव्यन्ती। दीव्यन्ति। ददत्–द्। द्विवचने ईपरतः ' अवर्णादश्च ' इत्यनेन कृतेऽप्यन्तादेशे–

३८९ अन्तो नो लुक् ॥४।२।९४॥व्युक्तजक्षपञ्चतः परस्य शितोऽवितोऽन्तः संबंधिनो नस्य लुक् स्यात्। इति नलोपे ददती। बहुवचने जस्शसोः शौ परतः–

३९० शौ वा ॥४।२।९५॥ व्युक्तजक्षपञ्चतः परस्यान्तो नस्य शिप्रत्यये लुग्वा स्यात्। ददति। ददन्ति। एवं जक्षत्। दरिद्रत्। जाग्रत्। चकासत्। शासत्। त्यदादीनामनतो लुबिति सेर्लुपि त्यद्। द्विवचनादौ अत्वे त्ये। त्यानि। तद्। ते। तानि। यत्। ये। यानि। एतद्। एते। एतानि। अन्वादेशे तु एनत्। शेषं पुंवत्। अहन्शब्दस्य ' अह्न ' इति रुत्वे अहः २। ईङौ वा। अह्नी। अहनी २ अह्ना। अहोभ्यामित्यादि। ब्रह्मन्शब्दस्य ' नाम्नो नोऽनह्न ' इति नलुपि ब्रह्म। ब्रह्मणी। ब्रह्माणि। ब्रह्मणा। ब्रह्मभ्याम्।

३९१ क्लीबे वा ॥२।१।९३॥ आमन्त्र्यविषयस्य नाम्नः क्लीबे नपुंसकलिङ्गे वर्तमानस्य नस्य लुग् वा स्यात्। हे ब्रह्मन्। हे ब्रह्म। एवं चर्मदामप्रभृतयः। दण्डि। दण्डिनी। दण्डीनि। स्रग्वि। स्रग्विणी। स्रग्वीणि। वाग्मि। वाग्मिनी। वाग्मीनि। बहुवृत्रह। बहुवृत्रघ्नी। बहुवृत्रहणी। बहुवृत्रहाणि। बहुपूष। बहुपूष्णी। बहुपूषणी। बहुपूषाणि। बहुवर्यम। बहुवर्यम्णी। बहुवर्यमणी। बहुवर्यमाणि। स्वप्–ब्। स्वपी।

३९२ नि वा ॥१।४।८९॥ अपःस्वरस्य नागमे सति घुटि परे वा दीर्घः। स्वाप्नि। स्वप्नि। स्वपा। स्वद्भ्यामित्यादि। एवमत्यप्। समासान्तविधेरनित्यत्वाद् बहुवप्। सेर्लुप्तत्वात् किमः कादेशो न। किम्। के कानि। शेषं पुंवत्। इदम्। इमे। इमानि। पुनस्तद्वत्। अन्वादेशे एनत्। शेषं पुंवत्। वाः। वारी। धुडन्तत्वाभावान्न नत्वम्। वारि। चत्वारि। विमला द्यौः यस्मिन् तत् विमलद्यु दिनम्। विमलदिवी। अत्र अन्तर्वर्तिनीं विभक्तिमाश्रित्य स्थानिवद्भावेन पदत्वे प्राप्ते रुत्वं प्राप्तम्।

३९३ वृत्त्यन्तोऽसषे ॥१।१।२५॥ परार्थाभिधानं वृत्तिः । तद्वाँश्च पदसमुदायः समासादिः । तस्या अन्तोऽवसानं पदसंज्ञो न स्यात्, असषे—सस्य षत्वे तु पदसंज्ञा भवत्येव । इति पदत्वाभावान्नोत्वम् । न च सित्येवेति नियमेनैव पदत्वस्य निवर्तनं शक्यमिति किमनेन सूत्रेणेति वाच्यम् !

३९४ प्रत्ययः प्रकृत्यादेः ७।४।११८॥ यस्माद्यः प्रत्ययो विधीयते सा तस्य प्रकृतिः । प्रत्ययः प्रकृत्यादेः समुदायस्य विशेषणं वेदितव्यम्, नोनाधिकस्य । इति हि यस्मात् समुदायात् प्रत्ययविधानं तस्यैव पदत्वं नियमेन निवर्त्यते न तु तदवयवस्य । विमलदिवि । पुनस्तद्वत्, शेषं प्राग्वत् काष्ठतट्–ड् । काष्ठतक्षी । काष्ठतङ्क्षि । पुनस्तद्वत्, शेषं पुंवत् । धनुः । धनुषी । न्समहतोरिति दीर्घे । धनूंषि । धनुषा । धनुर्भ्यामित्यादि । एवं चक्षुर्हविरादयः । पदान्त इति दीर्घे, पिपठीः । पिपठिषी । शावल्लोपस्य स्थानिवत्वाद् धुडन्तत्वाभावान्न नत्वम् । स्वविधौ स्थानिवत्वाभावात् स्वराच्छावित्यनेनापि न । पिपठिषि । पिपठिषा । पिपठीर्भ्यामित्यादि पुंवत् । पयः । पयसी । पयांसि । पयसा । पयोभ्यामित्यादि । एवं वचःप्रभृतयः । सुपुम् । सुपुंसी । सुपुमांसि । अदः । द्विवचने अमे इति जाते । ' मादुवर्णो ऽनु ' अमू । अमूनि । पुनस्तद्वत् । अनतो लुबिति सेर्लुपि, स्नन्स्भ्वन्सिति दत्वम् । स्वनडुत्–द् । स्वनडुही । ' वाः शेषे ' स्वनड्वांहि । पुनस्तद्वत्, शेषं पुंवत् ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां व्यंजनान्तनपुंसकलिङ्गप्रकरणं समाप्तम् ॥

॥ अथाऽव्ययप्रकरणम् ॥

३९५ स्वरादयोऽव्ययम् ॥ १।१।३०॥ स्वरादयः शब्दा अव्ययसंज्ञाः स्युः । स्वः सुखयति । एहि जाये स्वा रोहाव । स्वः संजानीते । स्वः स्पृहयति । स्वरागच्छति । छायेव या स्वर्जलधेर्जलेषु । स्वर्वसति । अन्तर्वसति । अन्तर्यामि । अत्युच्चैसौ, अत्युच्चैस इत्यत्रोच्चैरतिक्रान्तो यस्तदभिधायकस्य पूर्वपदार्थप्रधानस्य समासस्य संबंधी स्यादिर्नोच्चैःशब्दस्य, तेन 'अव्ययस्य' इति लुप् न भवति । परमोच्चैः, परमनीचैरित्यत्र तु उत्तरपदार्थप्रधानत्वात् समासस्याव्ययसंबंध्येव स्यादिरिति भवत्येव । अन्वर्थसंज्ञा चेयमव्ययमिति, लिङ्गकारकविभक्तिनानात्वेऽपि न नानारूपतां प्रतिपद्यत इति । यदुक्तम्—

' सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ॥
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ' ॥१॥

अन्वर्थाश्रयणे च स्वराद्यव्ययमव्ययं भवतीति स्वरादेर्विशेषणत्वेन तदन्तविज्ञानात् परमोच्चैः परमनीचैरित्यादावप्यव्ययसंज्ञा भवति। स्वर्, अन्तर्, सनुतर्, पुनर्, मातर्, सायम्, नक्तम्, अस्तम्, दिवा, दोषा, ह्यस्, श्वस्, कम्, शम्, योस्, मयस्, विहायसा, रोदसी, ओम्, भूस्, भुवस्, स्वस्ति, समया, निकषा, अन्तरा, पुरा, बहिस्, अवस्, अधस्, असांप्रतम्, अद्धा, ऋतम्, सत्यम्, इद्धा, मुधा, मृषा, वृथा, मिथ्या, मिथो, मिथु, मिथस्, मिथुस्, मिथुनम्, अनिशम्, मुहुस्, अभीक्ष्णम्, मङ्क्षु, झटिति, उच्चैस्, शनैस्, अवश्यम्, सामि, साचि, विष्वक्, अन्वक्, ताजक्, द्राक्, स्राक्, ऋधक्, पृथक्, धिक्, हिरुक्, ज्योक्, मनाक्, ईषत्, ज्योषम्, जोषम्, तूष्णीम्, काम्, निकामम्, प्रकामम्, अरम्, वरम्, परम्, आरात्, तिरस्, नमस्, भूयस् मायस्, प्रवाहु, प्रवाहुक्, प्रवाहुकम्, आर्थ, हलम्, आर्यहलम्, स्वयम्, अलम्, कु, बलवत्, अतीव, सुष्ठु, दुष्ठु, ऋते, सपदि, साक्षात्, सन्, प्रशान्, सनात्, सनत्, सना, नाना, विना, क्षमा, आशु, सहसा, युगपत्, उपांशु, पुरतस्, इति स्वरादयः। सूत्रे बहुवचनमाकृतिगणार्थम्। तेनान्येषामपि चादिषूपात्तानामनुपात्तानां स्वरादिसधर्मणामव्ययसंज्ञा भवति। स्वरादयो हि स्वार्थस्य वाचका न तु चादिवद् द्योतका इति। अव्ययप्रदेशा अव्ययस्येत्यादयः।

चादयोऽसत्वे। अव्ययसंज्ञाः स्युः। असत्वे इति किम्। यत्रैषां सत्वरूपेऽनुकार्यादावर्थे वृत्तिस्तत्र मा भूत्। चः समुच्चये। इव उपमायाम्। एवोऽवधारणे। च, अह, ह, वा, एव, एवम्, नूनम्, शश्वत्, सूपत्, कूपत्, कुवित्, नेत्, चेत्, नचेत्, चण्, कच्चित्, यत्र, नह, नहि, हन्त, माकिस्, नकिस्, मा, माङ्, न, नञ्, वाव, त्वाव, न्वाव, वावत्, त्वावत्, न्वावत्, त्वै, तुवै, न्वै, नुवै, रै, वै, श्रौषट्, वौषट्, वषट्, वट्, वाट्, वेट्, पाट्, प्याट्, फट्, हुंफट्, छंवट्, अध, आत्, स्वधा, स्वाहा, अलम्, चन, हि, अथ, ओम्, अथो, नो, नोहि, भोस्, भगोस्, अघोस्, अंघो, हंहो, हो, अहो, आहो, उताहो, हा, ही, हे, है, हये, अयि, अये, अररे, अङ्ग, रे, अरे, अवे, ननु, शुकम्, सुकम्, नुकम्, हिकम्, नहिकम्, ऊम्, हुम्, कुम्, उञ्, सुञ्, कम्, हम्, किम्, हिम्,

अद्, कद्, यद्, तद्, इद्, चिद्, किद्, स्विद्, उत, बत, इव, नु, नुं, यच्च, कच्चन, किमुत, किल, किंकिल, किंस्वित्, उदस्वित्, आहोस्वित्, अहह, नहवै, नवै, नवा, अन्यत्, अन्यत्र, शश्वत्, शश्, अथकिम्, विषु, पट्, पशु, खलु, यदिनाम, यदुत, प्रत्युत, यदा, जातु, यदि, यथाकथाच, यथा, तथा, पुद्, अथ, पुरा, यावत्, तावत्, दिष्ट्या, मर्या, आम, नाम, स्म, इतिह, सह, अमा, समम्, सत्रा, साकम्, सार्धम्, ईम्, सीम्, कीम्, आम्, आस्, इति, अव, अड, अट, बाह्या, अनुषक्, खोस्, अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, ए, ऐ, आ, औ, प्रादयः, इति चादयः । सूत्रे बहुवचनमाकृतिगणार्थम् ।

३९६ अधणन्तःस्वाद्याशसः ॥१।१।३२॥ धणवर्जितास्तस्वादयः शस्पर्यन्ता ये प्रत्ययास्तदन्तं शब्दस्वरूपमव्ययं स्यात् । देवा अर्जुनतोऽभवन् । ततः, तत्र, इह, क, कदा एतर्हि, अधुना, इदानीम्, सद्यः, परेद्यवि, पूर्वेद्युः, उभयेद्युः, परुत्, परारि, ऐषमः, कर्हि, यथा, कथम्, पञ्चधा, एकधा, ऐकध्यम्, द्वैधम्, द्वेधा, पञ्चकृत्वः, द्विः, सकृत्, बहुधा, प्राक्, दक्षिणतः, पश्चात्, पुरः, पुरस्तात्, उपरि, उपरिष्टात्, दक्षिणा, दक्षिणाहि, दक्षिणेन, द्वितीयाकरोति क्षेत्रम्, शुक्लीकरोति, अग्निसात् संपद्यते, देवत्राकरोति, बहुशः । अधणिति किम् । पथि द्वैधानि । संशयत्रैधानि । आ शस इति किम् । पचतिरूपम् ।

३९७ विभक्तिथमन्ततसाद्याभाः ॥१।१।३३॥ विभक्त्यन्तप्रतिरूपकास्थमवसाना ये तसादयः प्रत्ययास्तदन्तप्रतिरूपकाश्च शब्दा अव्ययसंज्ञाः स्युः। अहंयुः। शुभंयुः । अस्तिक्षीरा ब्राह्मणी । कुतः । यथा । तथा । कथमिति । अहं, शुभं, कृतं, पर्याप्तं, येन, तेन, चिरेण, अन्तरेण, ते, मे, चिराय, अह्नाय, चिरात्, अकस्मात्, चिरस्य, अन्योऽन्यस्य, मम, एकपदे, अग्रे, प्रगे, प्राह्णे, हेतौ, रात्रौ, वेलायां, मात्रायाम्–एते प्रथमादिविभक्त्यन्तप्रतिरूपकाः । अस्ति, नास्ति, असि, अस्मि, विद्यते, भवति, एहि, ब्रूहि, मन्ये, शंक्ये, अस्तु, भवतु, पूर्यते, स्यात्, आस, आह, वर्तते, न वर्तते, याति, न याति, पश्य, पश्यत, आदह, आदङ्ग, आतङ्ग–इति तिवादिविभक्त्यन्तप्रतिरूपकाः ।

३९८ वत्तस्याम् ॥ १।१।३४ ॥ वत्तस्याम्प्रत्ययान्तः शब्दोऽव्ययसंज्ञः स्यात् । वत्तसिसाहचर्यादामिति तद्धितस्य ' किंत्याद्येऽव्यये'त्यादिना विहितस्यामो ग्रहणम् । मुनेरर्हं मुनिवद्. वृत्तम्। 'तस्यार्हे क्रियायां वत् ' इति वत् । क्षत्रिया इव

क्षत्रियवद्युध्यन्ते । 'स्यादेरिवे' इति वत् । पीलुमूलेनैकदिक् पीलुमूलतो विद्योतते विद्युत् । ' तसि ' रिति तसिः । उरसैकदिक् उरस्तः । ' यश्चोरस'–इति तसिः । आम्–उच्चैस्तराम् । उच्चैस्तमाम् ।

३९९ क्त्वातुमम् १।१।३८॥ क्त्वा तुम् अम् इत्येतत्प्रत्ययान्तं शब्दरूपमव्ययसंज्ञं स्यात् । कृत्वा । प्रकृत्य । कर्तुम् । अमिति णमुख्णमोरुत्सृष्टानुबंधयोर्ग्रहणं न द्वितीयैकवचनस्य क्त्वातुम्साहचर्यात् । यावज्जीवमदात् । स्वादुंकारं भुङ्क्ते ।

४०० गतिः ॥१।१।३६॥ गतिसंज्ञाः शब्दा अव्ययसंज्ञाः स्युः । अदःकृत्य । अत्राव्ययत्वे ' अतः क्रकमिकंस–इत्यादिना सकारो न भवति ।

४०१ अव्ययस्य ॥३।१।७॥ अव्ययसंबंधिनः स्यादेर्लुप् स्यात् । स्वः , प्रातः इत्यादि । तत्संबंधिविज्ञानादिह न भवति । अतिस्वरः , अत्युच्चैसः । अतएव लुब्विधानादव्ययेभ्यः स्यादयोऽनुमीयन्ते । ततश्चाथो स्वस्ते गृहम्, अथोच्चैर्मे गृहमित्यादौ ' सपूर्वात्प्रथमान्ताद्वे ' ति विकल्पेन ते गे आदेशौ पदसंज्ञा च सिद्धा भवति । इत्यव्ययानि त्वलिङ्गान्यसंख्यानि च । तथाहुः—

' नन्ता संख्या डतिर्युष्मदस्मच्च स्युरलिङ्गकाः ॥
पदं वाक्यमव्ययं चेत्यसंख्यं च तद्बहुलम् ' ॥१॥

इति श्रीसिद्धहैमबृहत्प्रक्रियायामव्ययप्रकरणं
समाप्तम् ॥

॥ अथ स्त्रीप्रत्ययप्रकरणम् ॥

४०२ अजादेः ॥२।४।१८॥ अजादिभ्य आदृस्याजादीनामेव स्त्रियां वर्तमानेभ्य आप् प्रत्ययः स्यात् । बाधकबाधनार्थमनकारार्थं च वचनम् । अजा । एडका । अश्वा । चटका । मूषिका । कोकिला । एभ्यो जातिलक्षणस्य ङीप्रत्ययस्यापवाद आप् । बाला । होडा । पाका । वत्सा । मन्दा । विलाता । कन्या । प्रध्या । मुग्धा । विलातेत्यन्ये न पठन्ति, तेन विलातीत्यपि । एभ्यो वयोलक्षणस्य । ज्येष्ठा । मध्यमा । एभ्यो षवयोगलक्षणस्य । पूर्वापहाणा । अपरापहाणा । निपातनाण्णत्वम् । संप्रहाणा । परप्रहाणेत्यप्यन्ये । एषु टिलक्षणस्य । त्रीणि फलानि समाहृतानि त्रिफला ।

अत्र द्विगुलक्षणस्य । क्रुञ्चा । उष्णिहा । देवविशा । एषु व्यंजनान्तत्वात् ' आत् ' इत्यनेनाप्राप्तेरजादिपाठः । कश्चिदेतेभ्यो विकल्पेनेच्छति, तन्मते क्रुङ् , देवविट्, उष्णिक् । अन्ये तु ' क्रुञ्चानालभेत, उष्णिहककुभौ, देवविशश्च मनुष्य, ' इति प्रयोगदर्शनात् अकारान्ता एवैत इति मन्यन्ते । अजादेरित्यावृत्त्या षष्ठीसंबंधः किम् । अजादिसंबंधिन्यामेव स्त्रियामभिधेयायां यथा स्यात्, तेनेह न भवति । पञ्चानां अजानां समाहारः पञ्चाजी, दशाजी । अत्र समाहारः समासार्थः स्त्री, नासावजशब्दसंबंधिनी । अत एव च ज्ञापकात् स्त्रीप्रकरणे तदन्तादपि भवति, तेन महाँश्चासावजश्चेति सामान्येन विग्रहे स्त्रीविवक्षायां महाजा, परमाजेति सिद्धम् । एवमतिभवती, अतिमहती, अतिधीवरी, अतिपीवरी, परमशूद्रेत्यादि ।

४०३ **आत्** ॥ २।४।१८ ॥ अकारान्तान्नाम्नः स्त्रियां वर्तमानादाप् प्रत्ययः स्यात् । खट्वा । सर्वा । या । सा । खट्वादीनामकारान्तत्वम् अतिखट्वः, प्रियखट्वः, पञ्चभिः खट्वाभिः क्रीतः पञ्चखट्व इत्यादिप्रयोगदर्शनात्, उपदेशाच्च निश्चीयते । आदिति किम् । सोमपाः । स्त्री । दृषद् । आदित्यधिकृतं उत्तरत्र यथासंभवं योजनीयम् ।

स्त्रियां नृतोऽस्वस्रादेर्ङीः । राज्ञी । कर्त्री ।

४०४ **अधात्वृदादितः** ॥२।४।२॥ धातुवर्जितो य उदित् ऋदिच्च प्रत्ययोऽप्रत्ययो वा तदन्तान्नाम्नः स्त्रियां वर्तमानात् ङीः प्रत्ययः स्यात् । भवती । पचन्ती । अत्र प्रत्यय उदृदित्, तदन्तं नाम । अतिभवतीत्यादिषु नामाव्युत्पत्तिपक्षे उदृदित्, तदन्तं समासनाम । भवतीत्यादिषु तु व्यपदेशिवद्भावेन तदन्तम् । निर्गोमती, बहुपुंसीत्यत्र प्रत्ययस्योदित्त्वात् गोमदादिशब्दोऽपि उदित्तेन तदन्तं समासनाम । अधात्विति किम् । सुकन् , सुहिन् ।

४०५ **अञ्चः** ॥ २।४।३ ॥ अञ्चन्तान्नाम्नः स्त्रियां ङीः स्यात् । प्राची । प्रतीची ।

४०६ **णस्वराघोषाद्वनो रश्च** ॥२।४।४॥ वन इति वन्कनिप्ड्वनिपामविशेषेण ग्रहणम् । णकारान्तात् स्वरान्तादघोषान्ताच्च यो विहितो वन्प्रत्ययस्तदन्तान्नाम्नः स्त्रियां ङीः स्यात् । वनोऽन्तस्य च तत्संनियोगे रः स्यात् ।

ओणृ–अवावरी । धा–धीवरी । कॄ–सहकॄवरी । दृश्–मेरुदृश्वरी । णस्वराद्योषादिति किम् । युध्–सहयुध्वा । विहितविशेषणं किम् । शृणातीति शर्वरी । स्वरादिहिताद् गुणे कृते घोषवतो यथा स्यात् । वन इति किम् । श्वयतेः ' श्वनमातरिश्वन्'–इत्यादिनाऽनि प्रत्ययेऽन्तलोपे च सति शुनी, अतिशुनी । नान्तत्वादेव ङीः सिद्धस्तन्नियमार्थं रविधानार्थं च वचनम् ।

४०७ **वा बहुव्रीहेः** ॥२।४।७॥ णस्वराद्योषात् यो विहितो वन् प्रत्ययस्तदन्ताद् बहुव्रीहेः स्त्रियां ङीप्रत्ययो वा स्याद् रश्चान्तादेशः । प्रियावावरी । प्रियावावा स्त्री । बहुधीवरी । बहुधीवा । बहुमेरुदृश्वरी । बहुमेरुदृश्वा स्त्री । णस्वराद्योषादित्येव ।

४०८ **वा पादः** ॥ २।४।६ ॥ बहुव्रीहेस्तन्निमित्तकपादशब्दान्तात् स्त्रियां ङीर्वा स्यात् । द्विपदी । द्विपात् । बहुव्रीहिनिमित्तो यः पादिति बहुव्रीहेः पाच्छब्दस्य विशेषणत्वात् इह न भवति–पादमाचष्टे पाद् , त्रयः पादोऽस्याः त्रिपाद् ।

४०९ **ऋचि पादः पात्पदे** ॥२।४।१७॥ पादिति कृतपादभावः पादशब्दो गृह्यते । तस्याबन्तस्य ऋच्यभिधेयायां पात्पदेति निपात्यते । त्रिपात् । चतुष्पात् । ऋक् । त्रिपदा गायत्री । चतुष्पदा पङ्क्तिः ।

४१० **अनो वा** ॥२।४।११॥ अन्नन्ताद् बहुव्रीहेः स्त्रियां ङीर्वा स्यात् । उत्तरत्रोपान्त्यवतः प्रतिषेधात् उपान्त्यलोपिन एवायं विधिः । पक्षे डाबूङीनिषेधौ । बहुराज्ञ्यौ । बहुराजे । बहुराजानौ । बहुव्रीहेरित्येव ।

४११ **नाम्नि** ॥२।४।१२॥ अन्नन्ताद् बहुव्रीहेः स्त्रियां नाम्नि संज्ञायां ङीर्भवत्येव । अधिराज्ञी, सुराज्ञी नाम ग्रामः । अयमुपान्त्यलोपवत एव विधिः । नित्यार्थं वचनम् , तेन पक्षे डाप् विकल्पेन न भवति ।

४१२ **नोपान्त्यवतः** ॥२।४।१३॥ यस्य उपान्त्यलोपो नास्ति स उपान्त्यवान् । तस्मादन्नन्ताद् बहुव्रीहेः स्त्रियां ङीर्न स्यात् । नायं अनो वेति सूत्रविहितस्यैव प्रतिषेधः, किंतु स्त्रियां नृत इत्यस्यापि । सुपर्वा । सुपर्वाणौ । उपान्त्यवत इति किम् । बहुराज्ञी । बहुव्रीहेरित्येव । अतिपर्वणी यष्टिः । अन इत्येव ।

४१३ **मनः** ॥२।४।१४॥ मनन्तान्नान्नः स्त्रियां ङीर्न स्यात् । सीमा । सीमानौ । 'अनिनस्मन्ग्रहणान्यर्थवते'–त्युक्तमेव, तेन महिमानमतिक्रान्ता अतिमहिमेत्यादावपि ङीप्रतिषेधो भवत्येव । बहुव्रीहेरिति निवृत्तम् , योगविभागात् ।

४१४ **ताभ्यां वाप् ङित्** ॥२।४।१०६॥ मनन्तान्नामोऽनन्ताच्च बहुव्रीहेः स्त्रियामाप् प्रत्ययो वा स्यात् स च ङित्। पक्षे यथाप्राप्तम्। सीमे। सीमाः। सुपर्वे। सुपर्वाः। पक्षे पूर्वाभ्यां प्रतिषेधाद् ङीर्न भवति। सीमानौ। सीमानः। सुपर्वाणौ। सुपर्वाणः। उपान्त्यलोपिनस्तु बहुव्रीहेर्ङीरपि भवति। 'दातुं प्रदानोचित भूरिधान्नीमुपागतः सिद्धिमिवास्मि विद्याम्'। एवमुपान्त्यलोपिनोऽन्नन्तस्य बहुव्रीहेः स्त्रियां ङीङाब्विकल्पाभ्यां त्रैरूप्यम्, उपान्त्यवतस्तु डाप्प्रतिषेधाभ्यां द्वैरूप्यं भवति। ङित्करणमन्त्यस्वरादिलोपार्थम्।

४१५ **इचापुंसोऽनित्क्याप्परे** ॥ २।४।१०७॥ आबेव परो यस्मान्न विभक्तिः स आप्परः। अपुंलिङ्गार्थाच्छब्दाद्विहितस्यापः स्थाने इकारो ह्रस्वश्च वा स्याताम्, अनितोऽनकारानुबंधस्य प्रत्ययस्यावयभूते कि–ककारे आप्परे परतः। अल्पा खट्वा खट्विका। खट्वका। खट्वाका। प्रिया खट्वा यस्याः सा प्रियखट्विका। प्रियखट्वका। प्रियखट्वाका। चकारो ह्रस्वानुकर्षणार्थः। तेनोभयविकल्पे त्रैरूप्यं सिद्धम्। अपुंस इति किम्। सर्विका। न विद्यते खट्वा अस्या इति 'गोश्चान्ते–' इत्यादिना ह्रस्वत्वे स्त्रीपुंससाधारणात् पुनरापि अखट्वा, सैवाल्पा अखट्विका। तथा' खट्वामतिक्रान्ता अतिखट्वा, सैवाल्पा अतिखट्विका। अत्रापुंस्काद्विहित आप् न भवतीति त्रैरूप्यं न भवति। 'ङ्यादीदूतः के' इत्यनेन तु ह्रस्वे कृते 'अस्ये'–इत्यादिनेत्वमेव भवति। कश्चित्त्वपुंस्काद्विहित आवस्तीति भवत्येव रूपत्रयम्। न विद्यते खट्वा यस्याः सा अखट्विका, अखट्वका, अखट्वाका। अनिदिति किम्। अनुकंपिता दुर्गा देवीति कम्प्रि दुर्गका। 'ङ्यादीदूतः के' इत्यनेन ह्रस्व एव भवति। कीति किम्। खट्वाता। मालाता। आप्पर इति किम्। प्रियखट्वाकः पुरुषः। आबेव परो यस्मादिति बहुव्रीहिः किम्। प्रियखट्वाकमतिक्रान्तातिप्रियखट्वाका। अत्र प्रथमं द्वितीया परा पश्चादाविति। आप इत्येव। मातृका।

४१६ **स्वज्ञाजभस्त्राधातुत्ययकात्** ॥ २।४।१०८॥ स्वज्ञाजभस्त्रेभ्यः अधातोरप्रत्ययस्य च यावयवौ यकारककारौ ताभ्यां च परस्यापः स्थानेऽनित्प्रत्ययावयवे ककारे आप्परे परत इकारो वा स्यात्। कुत्सिता स्वा ज्ञातिः स्विका, स्वका। अस्विका, अस्वका। निःस्विका, निःस्वका। बहुस्विका। ज्ञातिधनाख्यायामसर्वादित्वादकाभावे कप्रत्ययान्तः स्वकशब्दः। ज्ञिका। ज्ञका। अज्ञिका,

अङ्का । निर्ङ्किका, निर्ङ्का, बहुङ्किका, बहुङ्का । अजिका, अजका । अनजिका, अनजका । निरजिका, निरजका । बह्वजिका, बह्वजका । भस्त्रग्रहणं स्त्रीपुंससाधारणवृत्तेर्ग्रहणार्थम् । अविद्यमाना भस्त्रा यस्याः सा अभस्त्रा, सैवाल्पा अभस्त्रिका, अभस्त्रका । एवं निर्भस्त्रिका, निर्भस्त्रकेत्यादि । अत्र हि गौणस्य ह्रस्वत्वे कृते समासात् स्त्रीपुंससाधारणादाविति पूर्वेण न सिद्ध्यति । यदा त्वपुंस्कादाव् विधीयते तदा पूर्वेण त्रैरूप्यमेव । भस्त्रिका, भस्त्रका, भस्त्राका । न भस्त्रा अभस्त्रा, साल्पा चेत् अभस्त्रिका, अभस्त्रका, अभस्त्राका । एवं परमभस्त्रिका, परमभस्त्रका, परमभस्त्राका । यकार–इभ्यिका, इभ्यका । ककार–चटकिका, चटकका । धातुत्यवर्जनं किम् । सुनयिका, सुपाकिका, दाक्षिणात्यिका, इहत्यिका । आप इत्येव । कुत्सिता स्वा आत्मा आत्मीया वा सर्वादित्वादकि, स्विका । अत्रोत्तरेण नित्यमिकारः । कथं बह्वपत्यिका ? । नात्र त्यः प्रत्ययः । प्रत्ययाप्रत्ययययोश्च प्रत्ययस्यैव ग्रहणम् । अथ शुष्किकेत्यत्र कथं न विकल्पः ? । क्तादेशस्य कस्यासिद्धत्वात् ।

४१७ **द्वेषसूतपुत्रवृन्दारकस्य** ॥२।४।१०९॥ आप इति निवृत्तम्, पृथग्योगात् । एषामन्तस्यानित्यप्रत्ययावयवे ककारे आप्परे परत इकारादेशो वा स्यात् । द्विके, द्वके । एषिका, एषका । केवलयोरेवानयोर्विकल्पेनेकारः । यदा तु न द्वे न एषा न द्वके न एषका इत्यादि विग्रहे कृते विभक्तेर्लुपि सत्यां पुनः समासाद्विभक्तौ तामाश्रित्य त्यदाद्यत्वं तत आप् स च स्थानिवद्भावेन विग्रहकालभाविन्या विभक्तेः परो न तु कात् तदा अनेषका, अद्वके इत्यत्रेकारो न भवति । अस्विकेत्यादौ तु न विभक्तेः पर आप्, किंतु कादेव । सूतिका, सूतका । पुत्रिका, पुत्रका । वृन्दारिका । वृन्दारका । द्विशब्दसाहचर्यादेषेति कृतविकारस्यैतदो निर्देशः । तेनेषेर्णकादिप्रत्ययान्तस्याविकृतस्यैतच्छब्दस्य च न भवति । इच्छतीति एषिका, एता एव एतिकाः ।

४१८ **वौ वर्तिका** ॥२।४।११०॥ वौ शकुनावभिधेये वर्तिकेतीत्वं वा निपात्यते । वर्तत इति णके । वर्तिका, वर्तका शकुनिः । वाविति किम् । वर्तिका–भागुरिर्लोकायतस्य व्याख्यात्रीत्यर्थः ।

४१९ **अस्यायत्तात्क्षिपकादीनाम्** २।४।१११॥ यत्तत्क्षिपकादिवर्जितस्य नाम्नो योऽकारस्तस्यानित्यप्रत्ययावयवे ककार आप्परे परत इकारः स्यात् । वेति निवृत्तं पृथग्योगात् । कारिका, पाचिका । अस्येति किम् । नौका । अनि-

त्कीत्येव । जीवका–' आशिष्यकन् ' । अनित इति पर्युदासेन प्रत्ययग्रहणादिह न भवति–शक्नोतीति शका । आप्पर इत्येव । कारकः । आबेव परो यस्मादिति नियमः किम् । बहुपरिव्राजका मथुरा । विभक्त्यन्तादयमाबिति प्रतिषेधः । यत्तत्क्षिपकादिवर्जनं किम् । यका, सका, क्षिपका। बहुवचनमाकृतिगणार्थम् ।

४२० **नरिका मामिका** ॥२।४।११२॥ नरकशब्दस्य मामक शब्दस्य चा–प्रत्ययावयवे ककारे आप्परे परतोऽकारस्येत्वं निपात्यते । नरान् कायति नरिका । ' आतो डोऽद्वावामः ' इति ड । ममेयं मामिका । अत्र ममकादेशः । ' केवल-मामके ' —त्यादिना संज्ञायां ङीप्रत्ययस्य नियमादाप् । ककारस्याप्रत्ययसंबंधि-त्वात् पूर्वेणाप्राप्ते वचनम् ।

४२१ **तारका वर्णकाष्टका ज्योतिस्तान्तवपितृदेवत्ये** ॥२।४।११३॥ तारकादयः शब्दा यथासंख्यं ज्योतिरादिष्वर्थेषु इकारादेशरहिता निपात्यन्ते । तरतेर्णके, तारका ज्योतिः—तच्च नक्षत्रं कनीनिका च । नक्षत्रमेवेत्यन्ये । अन्यत्र तारिका । वर्णयतीति णके वर्णका, तान्तवः प्रावरणविशेषः । अन्यत्र वर्णिका, भागुरी लोकायतस्य । अश्नोतेरौणादिके तकप्रि अष्टका–पितृदेवत्यं कर्म । अन्य-त्राष्टौ द्रोणाः परिमाणमस्या इति के अष्टिका खारी । पितृदेवतार्थं कर्मेति ' देवता-न्तात्तदर्थे ' इति ये पितृदेवत्यमिति सिद्धम् ।

४२२ **ऊध्नः** ॥ २।४।७ ॥ ऊधस्निति कृतनकारादेशस्योधसो ग्रहणम् । तदन्तान्नान्नो स्त्रियां ङीः स्यात् । कुण्डोध्नी । अनो वेति विकल्पे प्राप्ते वचनम् । समासान्तविधौ नान्तत्वादेव ङीः सिद्ध्यति, किंतु पञ्चभिः कुण्डोध्नीभिः क्रीतः इतीकणि तल्लुपि च पञ्चकुण्डोध्न इति प्रकृतेः सौ पञ्चकुण्डोद् इति स्यात्, इष्यते च पञ्चकुण्डोधेति ।

४२३ **अशिशोः** ॥२।४।८॥ अशिशु इत्येतस्माद् बहुव्रीहेः स्त्रियां ङीः स्यात् । अविद्यमानः शिशुरस्या अशिश्वी । बहुव्रीहेरित्येव । न शिशुः अशिशुः ।

४२४ **संख्यादेर्हायनाद्वयसि** ॥२।४।९॥ संख्यादेर्हायनशब्दान्तान्नान्नो बहुव्रीहेः स्त्रियां वयसि गम्यमाने ङीःस्यात् ।

४२५ **अस्य ङ्यां लुक्** ॥२।४।८६॥ ङीप्रत्यये परे पूर्वस्याकारस्य लुक् स्यात् । द्विहायनी ।

४२६ **चतुस्त्रेर्हायनस्य वयसि** ॥२।३।७४॥ चतुर् त्रि इत्येताभ्यां पूर्वपदाभ्यां परस्य हायनशब्दसंबंधिनो नस्य वयसि गम्ये णः स्यात् । त्रिहायणी । चतुर्हायणी । संख्यादेरिति किम् । अतीतहायना । हायनादिति किम् । द्विवर्षा कन्या । वयसीति किम् । द्विहायना, त्रिहायना, चतुर्हायना शाला । कालकृता प्राणिनां शरीरावस्था वय इति णत्वमपि न भवति । बहुव्रीहेरित्येव । शते हायनेषु संभूता जाता वेति इकणि तल्लुपि च शतहायना स्त्री ।

४२७ **गौरादिभ्यो मुख्यान्ङीः** ॥२।४।१९॥ गौरादेर्गणान् मुख्यात् स्त्रियां ङीः स्यात् । गौरी । अनड्वाही, अनडुही । गौरादिषु रूपद्वयपाठादेव अनडुह्शब्दस्य ङ्यामुकारस्य पक्षे वाशब्दादेशः, सौ नित्यं नागमाभावश्च । मुख्यादित्यधिकारोऽयम् । बहुवचनमाकृतिगणार्थम् । मुख्यादिति किम् । बहुनदा भूमिः ।

४२८ **मत्स्यस्य यः** ॥ २।४।८७ ॥ मत्स्यशब्दसंबंधिनो यकारस्य ङ्यां लुक् स्यात् । मत्सी । गौरादित्वाद् ङीः । कथं मत्स्यो नाम कश्चित्, तस्यापत्यं स्त्रीति इञ्,–ङी–मात्सी ? । ङीनिमित्तादेशस्यापि ङीग्रहणेन ग्रहणात् ।

मनुष्यशब्दस्य गौरादित्वाद् ङीप्रत्यये

४२९ **व्यंजनात्तद्धितस्य** ॥२।४।८८॥ व्यंजनात्परस्य तद्धितस्य यकारस्य ङ्यां लुक् स्यात् । मनुषी । व्यंजनादिति किम् । कारिकाया अपत्यं कारिकेयी । तद्धितस्येति किम् । वैश्यस्य भार्या वैश्यी । ङ्यामित्येव । आवट्या ।

४३० **अणजेयेकण्नञ्स्नञ्ट्टिताम्** ॥२।४।२०॥ अणादिप्रत्ययानां योऽकारस्तदन्तान्नाम्नः प्रत्यासत्तेस्तेषामेवाणादीनां वाच्यायां स्त्रियां वर्तमानात् ङीः स्यात् । उपगोरपत्यमौपगवी । उत्सस्यापत्यमौत्सी । सुपर्ण्या अपत्यं सौपर्णेयी । शिलायास्तुल्या शिलेयी । शैलेयी । अक्षैर्दीव्यति आक्षिकी । स्त्रिया अपत्यमियं वा स्त्रैणी । पौंस्नी । जानु ऊर्ध्वं प्रमाणमस्या जानुदघ्नी, जानुद्वयसी, जानुमात्री । पञ्चतयी । शाक्तिकी । कुरुचरी । प्रत्ययसाहचर्यादागमटितो न भवति । पठिता विद्या । शुनिंधयी, स्तनंधयीत्यादौ तु धातोष्टित्करणस्यानन्यार्थत्वादटितोऽपि भवति । अणादीनां षष्ठीनिर्देशेनाकारस्य विशेषणं पाणिनिना प्रोक्तं पाणिनीयम्, 'तदधीते' इत्यण्, तस्य 'प्रोक्तात्' इति लोपे पाणिनीया कन्येति ङीर्यथा मा भूत् । प्रत्यासत्त्या तैरेवाणादिभिः स्त्रिया विशेषणं किम् । गौतमेन प्रोक्ता नीतिर्गौतमीति । ताम् अधीते इत्यण् । तस्य प्रोक्तादिति लोपे 'ङ्यादे'–रित्यादिना ङीलोपे

ङीर्यथा न स्यात् गौतमा कन्या । अस्त्यत्राणोऽकारो न तु तदभिधेया नीतिलक्षणा स्त्री प्रत्ययार्हा । यदभिधेया तु कन्यालक्षणा स्त्री प्रत्ययार्हा न तस्याकारोऽस्ति इति । तथा बहुकुंभकारा नगरी, बहुकुरुचरीत्यादि ।

४३१ **वयस्यनन्त्ये** ॥२।४।३१॥ प्राणिनां कालकृता शरीरावस्था बाल्ययौवनादि वयः । तस्मिन्नन्त्येऽचरमे वर्तमानादकारान्तान्नाम्नः स्त्रियां ङीः स्यात् । कुमारी । किशोरी । तरुणी । तलुनी । वधूटी । चिरण्टी । धवयोगाभावविशिष्टं वयः कुमारीशब्दस्य प्रवृत्तिनिमित्तम्, न तु धवयोगाभावमात्रम् । वृद्धकुमारीति तु उपमानात् । अनन्त्य इति किम् । वृद्धा । आदित्येव-शिशुः । कथं द्विवर्षा, त्रिवर्षा, उत्तानशया, लोहितपादिकेत्यादि नैता वयःश्रुतयोऽर्थात्तु वयो गम्यते । बाला, वत्सेत्यादयस्त्वजादौ ।

४३२ **द्विगोः समाहारात्** ॥२।४।३२॥ समाहारद्विगुसंज्ञकान्नाम्नोऽकारान्तात् स्त्रियां ङीः स्यात् । पञ्चपूली । पञ्चाजी । दशराजी । द्विवडवी । कथं त्रिफला ? । अजादिपाठात् ।

४३३ **परिमाणात्तद्धितलुक्यबिस्ताचितकम्बल्यात्** ॥ २।४।३३ ॥ परितः सर्वतो मानं परिमाणम् । तच्च रूढिवशात्प्रस्थादि ।

यदाहुः—'ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः' ॥

विस्तादिभ्यो यदन्यत् परिमाणं तदन्ताद् द्विगोरकारान्तात् तद्धितलुकि स्त्रियां ङीः स्यात् । द्वाभ्यां कुडवाभ्यां क्रीता द्विकुडवी । द्व्याढकी । परिमाणादिति किम् । पञ्चभिरश्वैः क्रीता पञ्चाश्वा । तद्धितलुकीति किम् । द्विपण्या । आबिस्ताचितकम्बल्यादिति किम् । द्वाभ्यां बिस्ताभ्यां क्रीता द्विबिस्ता । द्व्याचिता । द्विकम्बल्या ।

४३४ **काण्डात् प्रमाणादक्षेत्रे** ॥ २।४।३४ ॥ प्रमाणवाचि काण्डशब्दान्तादक्षेत्रविषयाद् द्विगोस्तद्धितलुकि सति स्त्रियां ङीः स्यात् । आयामः प्रमाणम् । द्वे काण्डे प्रमाणमस्या द्विकाण्डी रज्जुः । त्रिकाण्डी । प्रमाणादिति किम् । द्वाभ्यां काण्डाभ्यां क्रीता द्विकाण्डा शाटी । अप्रमाणादपीच्छन्त्येके । तन्मते द्विकाण्डी शाटीत्येव भवति । अक्षेत्र इति किम् । द्वे काण्डे प्रमाणमस्या द्विकाण्डा क्षेत्र-

भक्तिः । अक्षेत्र इति द्विगोर्विशेषणं किम् । काण्डस्य क्षेत्रविषयत्वेऽपि यथा स्यात् । द्वाभ्यां काण्डाभ्यां क्षेत्रसंज्ञिताभ्यां क्रीता द्विकाण्डी वडवा । नात्र द्विगुः क्षेत्रविषयः किंतर्हि काण्डशब्द इति ।

४३५ **पुरुषाद्वा** ॥२।४।२५॥ प्रमाणवाचिपुरुषशब्दान्तात् द्विगोस्तद्धितलुकि स्त्रियां ङीर्वा स्यात् । द्वौ पुरुषौ प्रमाणमस्या द्विपुरुषी, द्विपुरुषा वा परिखा । प्रमाणादित्येव । द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा वडवा । तद्धितलुकीत्येव । पञ्चपुरुषा रज्जुः । प्रमाणभूताः पञ्च पुरुषाः समाहृताः पञ्चपुरुषी । द्विगोः समाहारादिति नित्यमेव ।

४३६ **रेवतरोहिणाद् भे** ॥२।४।२६॥ भं नक्षत्रम् । रेवतरोहिणाभ्यां नक्षत्रशब्दाभ्यां स्त्रियां ङीः स्यात् । रेवती । रोहिणी । यदापि 'चित्रारेवतीरोहिण्याः स्त्रियाम्' इति जातार्थीयस्याणो लुकि ङीप्रत्ययस्यापि लुग् भवति तदापि नक्षत्रशब्दात् पुनरनेन ङीर्भवति । रेवत्यां जाता रेवती, रोहिण्यां जाता रोहिणीति । भ इति किम् । रेवता । रोहिणा । कथं रेवतीरमणो बलः, रेवती शुष्करेवती । रेवच्छब्दो मत्वर्थीयान्तोऽस्ति । तत उदिल्लक्षणो ङीः । कथं रोहिणी कटुरोहिणी । रोहिणशब्दः प्रकृत्यन्तरमस्ति ततो जातिलक्षणो ङीर्भविष्यति ।

४३७ **नीलात् प्राण्योषध्योः** ॥२।४।२७॥ नीलशब्दात् प्राणिनि ओषधौ च स्त्रियां ङीः स्यात् । नीली वडवा । नीली ओषधिः । प्राण्योषध्योरिति किम् । नीला शाटी ।

४३८ **क्तात्च नाम्नि वा** ॥२।४।२८॥ नीलशब्दात् क्तान्ताच्च शब्दरूपात् स्त्रियां ङीर्वा स्यात् संज्ञायाम् । नीली । नीला । प्रवृद्धा चासौ विलूना च प्रवृद्धविलूनी, प्रवृद्धविलूना ।

४३९ **केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजात्** ॥२।४।२९॥ एभ्यः स्त्रियां ङीः स्यात् संज्ञायाम् । केवली नामज्योतिः । मामकी । भागधेयी । पापी । अपरी । समानी । आर्यकृती । सुमङ्गली । भेषजी । नान्नीति किम् । मामका । मामकशब्दादजन्तत्वेनैव ङीः सिद्धो नाम्नि नियम्यते, तेन मामिका बुद्धिरिति असंज्ञायाम् अजलक्षणोऽपि ङीर्न भवति ।

४४० **भाजगोणनागस्थलकुण्डकालकुशकामुककटकबरात् पक्वापनस्थूलाकृत्रिमामत्रकृष्णायसीरिरंसुश्रोणिकेशपाशे** ॥ २।४।३० ॥

भाजादिभ्यो दशभ्यो यथासंख्यं पक्वादिष्वर्थेषु स्त्रियां ङीः स्यात् संज्ञायाम्। भाज्यते इति भाजी पक्वा चेत्। भाजान्या। गोणी आवपनं चेत्। गोणान्या। नागी स्थूला चेत्। नागान्या। जातौ तु नाग्येव। तस्याः स्थौल्याभावात्। स्थली अकृत्रिमा चेत्। स्थलाऽन्या। कुण्डी अमत्रं चेत्। कुण्डान्या। काली कृष्णा चेत्। कालाऽन्या। कुशी आयसी चेत्। कुशान्या। कामुकी रिरंसुश्चेत्। कामुकाऽन्या। कटी श्रोणी चेत्। कटाऽन्या। कबरी केशपाशश्चेत्। कबराऽन्या। जानपदशब्दादपि वृत्ताविच्छत्यन्यः। जानपदी वृत्तिः। वृत्तेरन्यत्र जानपदा मदिरा।

४४१ नद्वा शोणादेः ॥२।४।३१॥ शोणादेर्गणात् स्त्रियां ङीर्वा स्यात्। शोणी। शोणा। एवंनामा काचित्। गुणवचनात्तूत्तरेणैव भविष्यति। चन्द्रभागान्नद्याम्। चन्द्रभागा नाम नदी। नद्या अन्यत्र चन्द्रभागा नाम देवता। अनद्यामिति केचित्। चन्द्रभागी, चन्द्रभागा काचित्। अनद्यामित्येके। चन्द्रभागा नाम नदी। अण्णन्तान्नित्यं प्राप्ते विकल्पः। अनद्यां तु नित्यं ङीः। चान्द्रभागी छाया। अन्ये तु अण्णन्तादेवार्थभेदेन विकल्पमिच्छन्ति। नद्यामाप् प्रत्ययोऽन्यत्र ङीप्रत्ययः। चान्द्रभागा नदी। चान्द्रभागी वनराजिः।

४४२ इतोऽत्यर्थात् ॥ २।४।३२ ॥ इकारान्तान्नाम्नः स्त्रियां ङीर्वा स्यात्, न चेत्तत् त्यर्थप्रत्ययान्तं स्यात्। भूमी, भूमिः। रात्री, रात्रिः। अत्यर्थादिति किम्ः कृतिः, अजननिः। कथं साती, सातिः। तिगन्ताद् भविष्यति। अन्ये तु अञ्चतिअङ्कतिअंहतिशकटिशस्त्रिशारितारिअहिकपिमुनिरात्रियष्टिभ्यः कटिश्रोणिप्रभृतिप्राण्यङ्गवाचिभ्यः क्तिवर्जितकृदन्तेभ्य इकारान्तेभ्य इच्छन्ति नान्येभ्यः। तन्मते शोभनो गंधो यस्याः सुगंधिः, सुरभिगंधिः, निर्गता कौशांब्या निष्कौशांबिः, अणिः, शाणिः इत्यादिषु न भवति। क्तिमात्रवर्जनाच्चाकरणिअजननिज्यानिग्लानिप्रभृतिषु न प्रतिषेधः।

४४३ पद्धतेः ॥२।४।३३॥ पद्धतिशब्दात् स्त्रियां ङीर्वा स्यात्। पद्धती, पद्धतिः। त्यर्थं आरंभः।

४४४ शक्तेः शस्त्रे ॥२।४।३४॥ शक्तिशब्दाच्छस्त्रे स्त्रियां ङीर्वा स्यात्। शक्ती, शक्तिः। शस्त्र इति किम्। शक्तिः सामर्थ्यम्।

४४५ स्वरादुतो गुणादक्षरोः ॥२।४।३५॥ स्वरात् परो य उकारः सामर्थ्यादेकवर्णव्यवहितस्तदन्ताद् गुणवचनात् स्वरुवर्जिताच्चाम्नः स्त्रियां ङीर्वा स्यात्।

गुणादिति सामान्योक्तावपि केवलगुणवृत्तेः स्त्रीत्वायोगात् ततो द्रव्यवृत्तेः प्रत्ययः। पट्वी । पटुः । स्वरादिति किम् । पाण्डुर्भूमिः। उत इति किम्। श्वेता पटी। गुणादिति किम् । आखुः। अखरोरिति किम्। खरुरियम् । गुणमिह परिभाषन्ते यथा—

'सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुणः' ॥

सत्वं द्रव्यं तत्रैव निविशते—तदेवाश्रयति यः स गुण इति संबंधः । द्रव्यादपैत्यपगच्छति—यथाम्रान्नीलता पीततामुपजातायाम् । पृथग्जातिषु भिन्नजातीयेषु दृश्यते । एतेन सर्वेण जातिर्गुणो न भवतीत्युक्तं भवति । आधेय उत्पाद्यो यथा कुसुमयोगाद् गंधो वस्त्रे । यथा वाग्निसंयोगाद् घटे रक्तता । अक्रियाजो नित्यस्तद् यथाकाशादिषु महत्त्वादिः । तदेवं गुणस्योत्पाद्यत्वानुत्पाद्यत्वप्रकारद्वयप्रदर्शनेनोत्पाद्यत्वैकप्रकारस्य कर्मणो व्यवच्छेदः । असत्वप्रकृतिः—द्रव्यस्वभावरहितः । अनेन द्रव्यस्य व्यवच्छेदः ।

४४६ **ङ्येतैतहरितभरतरोहिताद्वर्णान्तो नश्च** ॥२।४।३६॥ एभ्यो वर्णवाचिभ्यः स्त्रियां ङीर्वा स्यात्, तत्संनियोगे तकारस्य नकारश्च। श्येनी, श्येता। एनी, एता। हरिणी, हरिता। भरणी, भरता । रोहिणी, रोहिता। लत्वे लोहिनी, लोहिता। वर्णादिति किम्। श्येता । चकारो नकारस्य ङीसंनियोगशिष्टतार्थः ।

४४७ **क्नः पलितासितात्** ॥२।४।३७॥ त इति चेति चानुवर्तते । पलितासिताभ्यां स्त्रियां ङीर्वा स्यात्, तत्संनियोगे तकारस्य क्नादेशश्च। पलिक्नी। पलिता। असिक्नी। असिता।

४४८ **असहनञ्विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः**॥२।४।३८॥ सहनञ्विद्यमानवर्जपूर्वपदं यत्स्वाङ्गं तदन्तात् क्रोडादिगणवर्जितात् नान्नोऽकारान्तात् स्त्रियां ङीर्वा स्यात् । पीनस्तनी, पीनस्तना । अतिक्रान्ता केशानतिकेशी, अतिकेशा माला । निष्क्रान्ता केशेभ्यो निष्केशी, निष्केशा यूका । स्वडी, स्वडा वृश्चिका। अडो नाम वृश्चिकाद्यवयवः। असहनञ्विद्यमानपूर्वपदादिति किम्। सहकेशा। अकेशा। विद्यमानकेशा। स्वाङ्गादिति किम्। बहुयवा। अक्रोडादिभ्य

इति किम् । कल्याणी क्रोडा अस्याः कल्याणक्रोडा । बहुवचनमाकृतिगणार्थम् । तेन किसलयकरा, मृणालभुजेत्यादि । आदित्येव । परमशिखा ।

' अविकारोऽद्रवं मूर्तं प्राणिस्थं स्वाङ्गमुच्यते ।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु' ॥ इति ।

अविकार इति किम् । बहुशोफा । अद्रवमिति किम् । बहुकफा । मूर्तमिति किम् । बहुज्ञाना । प्राणिस्थमिति किम् । दीर्घमुखा शाला । च्युतं च प्राणिनस्तदिति किमर्थम् । अप्राणिस्थादपि पूर्वोक्ताद् यथा स्यात् । बहुकेशी, बहुकेशा रथ्या । तन्निभं च प्रतिमादिष्विति किमर्थम् । प्राणिस्थसदृशादपि पूर्वोक्ताद्यथा स्यात् । पृथुमुखी, पृथुमुखा प्रतिमा । कथं कल्याणं पाणिपादमस्याः कल्याणपाणिपादेत्यत्र न भवति ? स्वाङ्गसमुदायो हि न स्वाङ्गम् । बहुस्वरत्वेन वक्ष्यमाणनियमबलाद्वा न भवति । द्विपादी, त्रिपादीत्यत्र तु 'द्विगोः समाहारादि'ति विशेषविधानान्नित्यमेव ङीर्भवति । अस्वाङ्गपूर्वपदादेवेच्छन्त्यन्ये । पाणी एव पादौ यस्याः सा पाणिपादेत्यादि ।

४४९ **नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात्** ॥ २ । ४।३९॥ असहनञ्विद्यमानपूर्वपदेभ्य एभ्यः स्वाङ्गेभ्यः स्त्रियां ङीर्वा स्यात् । पूर्वेण सिद्धे नियमार्थमिदम् । तेन नासिकोदराभ्यामेव बहुस्वराभ्यां, ओष्ठादिभ्य एव च संयोगोपान्त्येभ्यो भवति नान्येभ्यः । तुङ्गनासिकी, तुङ्गनासिका । कृशोदरी, कृशोदरा । बिम्बोष्ठी, बिम्बोष्ठा । दीर्घजङ्घी, दीर्घजङ्घा । समदन्ती, समदन्ता । चारुकर्णी, चारुकर्णा । तीक्ष्णशृंगी, तीक्ष्णशृंगा । मृदङ्गी, मृदङ्गा । सुगात्री, सुगात्रा । स्निग्धकण्ठी, स्निग्धकण्ठा । असहनञ्विद्यमानपूर्वपदादित्येव । सहनासिका । अनासिका । विद्यमाननासिका । नियमःकिम् । पृथुजघना, सुललाटेत्यादौ बहुस्वरान्न भवति । कल्याणशुल्फेत्यादौ संयोगोपान्त्यान्न भवति । अङ्गगात्रकंठेभ्यो ङीप्रत्ययं नेच्छन्त्येके । केचित्तु दीर्घजिह्वशब्दादपीच्छन्ति, दीर्घजिह्वी, दीर्घजिह्वा कन्येति ।

४५० **नखमुखादनाम्नि** ॥ २।४।४० ॥ असहनञ्पूर्वपदाभ्यां स्वाङ्गाभ्यां नखमुखशब्दाभ्यां स्त्रियां ङीर्वा स्यात्, असंज्ञायामेव । शूर्पनखी, शूर्पनखा । चन्द्रमुखी, चन्द्रमुखा । अनाम्नीति किम् । शूर्पणखा । संज्ञाशब्दोऽयम् ।

४५१ पुच्छात् ॥२।४।४१॥ असहनत्रविद्यमानपूर्वपदात् स्वाङ्गात् पुच्छात् स्त्रियां ङीर्वा स्यात्। दीर्घपुच्छी, दीर्घपुच्छा। असहनत्रविद्यमानपूर्वपदादेव। सपुच्छा, अपुच्छा, विद्यमानपुच्छा।

४५२ कबरमणिविषशरादेः ॥२।४।४२॥ कबरादिपूर्वात् पुच्छात् स्त्रियां नित्यं ङीः स्यात्। पुनर्विधानं नित्यार्थम्। कबरं—कर्बुरं—कुटिलं वा पुच्छमस्याः कबरपुच्छी। मणिःपुच्छे अस्या मणिपुच्छी। विषं पुच्छेऽस्या विषपुच्छी। शरं पुच्छेऽस्याः शरपुच्छी।

४५३ पक्षाच्चोपमादेः ॥ २।४।४३ ॥ उपमानपूर्वात् पक्षशब्दात् पुच्छाच्च स्त्रियां ङीः स्यात्। उलूकस्येव पक्षावस्या उलूकपक्षी शाला। उलूकस्येव पुच्छमस्या उलूकपुच्छी सेना।

४५४ क्रीतात् करणादेः ॥२।४।४४॥ करणमादिरवयवो यस्य तस्मात् क्रीतान्ताच्चाङ्गोऽकारान्तात् स्त्रियां ङीः स्यात्। अश्वेन क्रीयते स्म अश्वक्रीती। धनक्रीती। वस्त्रक्रीती। विभक्त्युत्पत्तेः पूर्वमेव कृदन्तेन समासः। मनसाक्रीती। अलुप्। करणग्रहणं किम्। सुक्रीता। आदिग्रहणं किम्। अश्वेन क्रीता। नह्यत्र करणं क्रीतान्तस्य नाङ्ग आदिरवयवो भवति, ऐकपद्याभावात्। कथं 'सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी' इति। धनं च सा क्रीता चेति कर्मधारयोऽयम्। करणविवक्षायामप्ययोग एव। केचित्तु धनेन क्रीतेत्यत्रावन्तत्वेनापि समासमिच्छन्ति, बहुलाधिकारात्। तदाकारान्तत्वाभावाद् ङीर्न भवति।

४५५ क्तादल्पे ॥२।४।४५॥ क्तप्रत्ययान्ताच्चाङ्गः करणादेरल्पेऽर्थे स्त्रियां ङीः स्यात्। अभ्रविलिप्ती द्यौः। अल्पाभ्रेत्यर्थः। अल्प इति किम्। चन्दनानुलिप्ता स्त्री। अनल्पेन चन्दनेन लिप्तेत्यर्थः।

४५६ स्वाङ्गादेरकृतमितजातप्रतिपन्नाद् बहुव्रीहेः ॥ २।४।४६ ॥ स्वाङ्गादेः कृतादिवर्जितात् क्तान्ताद् बहुव्रीहेः स्त्रियां ङीः स्यात्। शङ्खौ भिन्नावस्याः शंखभिन्नी। कृतादिवर्जनं किम्। दन्तकृता। दन्तमिता। दन्तजाता। दन्तप्रतिपन्ना बहुव्रीहेरिति किम्। हस्ताभ्यां पतिता हस्तपतिता।

४५७ अनाच्छादजात्यादेर्नवा ॥२।४।४७॥ आच्छादवर्जिता या जातिस्तदादेः कृतादिवर्जितक्तान्ताद् बहुव्रीहेः स्त्रियां ङीर्वा स्यात्। शाङ्गरो जग्धोऽनया

शाङ्गरजग्धी, शाङ्गरजग्धा । आच्छादग्रहणं किम् । वस्त्रच्छन्ना । अत्र पूर्वेणापि न भवति, अस्वाङ्गादित्वात् । अकृताद्यन्तादित्येव । कुण्डकृता । कुण्डमिता । पलाण्डुजाता । वृक्षप्रतिपन्ना । क्तादित्येव । शाङ्गरप्रिया ।

४५८ **पत्युर्नः** ॥२।४।४८॥ पत्यन्ताद् बहुव्रीहेः स्त्रियां ङीर्वा स्यात्, तत्संनियोगे चान्तस्य नकारादेशः । दृढःपतिरस्या दृढपत्नी, दृढपतिः । मुख्यादित्येव । बहुस्थूलपतिः पुरी । अत्र हि पत्यन्तो बहुव्रीहिर्मुख्यो न भवति, यस्तु मुख्यः स पत्यन्तो न भवति । यदापि स्थूलश्चासौ पतिश्चेति कर्मधारये सति बहवः स्थूलपतयो यस्यामिति बहुव्रीहिस्तदापि स्थूलपत्यन्तो बहुव्रीहिर्न पत्यन्त इति न भवति ।

४५९ **सादेः** ॥२।४।४९॥ सपूर्वात् पतिशब्दात् स्त्रियां ङीर्वा स्यात्, अस्य च नकारोऽन्तादेशः । पूर्वेणैव सिद्धे पुनर्वचनं बहुव्रीहिनिवृत्त्यर्थम् । ग्रामस्य पतिः ग्रामपत्नी, ग्रामपतिः । सादेरिति किम् । पतिरियम् । मुख्यादित्येव । अतिक्रान्ता पतिमतिपतिः । गौणादपीच्छन्त्येव । अतिपत्नी, अतिपतिः । यदा तु पत्नीशब्दस्य षष्ठ्यन्तेन समासस्तदा राजपत्नी, शूद्रपत्नीत्याद्येव भवति ।

४६० **सपत्न्यादौ** ॥२।४।५०॥ सपत्न्यादौ यः पतिशब्दस्तस्मात् स्त्रियां ङीः स्यात्, नकारश्चान्तादेशः । पुनर्विधानं नित्यार्थम् । समानःपतिरस्याः, समानस्य पतिरिति सपत्नी । एवमेकपत्नी, वीरपत्नी, पिण्डपत्नी, भ्रातृपत्नी, पुत्रपत्नी—षडेते सपत्न्यादयः । समुदायनिपातनं समानस्य सभावार्थम्, पुंवद्भावप्रतिषेधार्थं च । सपत्नीभार्यः । सपत्न्या अयं सापत्नः ।

४६१ **ऊढायाम्** ॥२।४।५१॥ पत्युः केवलादूढायां—परिणीतायां स्त्रियां ङीः स्यात्, नकारश्चान्तादेशः । पत्नी । ऊढायामिति किम् । पतिरियं संगृहीता, अभार्या चेत्यर्थः ।

४६२ **पाणिगृहीतीति** ॥२।४।५२॥ इतिशब्दः प्रकारार्थः । पाणिगृहीतीप्रकाराः शब्दा ऊढायां स्त्रियां ङ्यन्ता निपात्यन्ते । पाणिर्गृहीतोऽस्याः पाणौ वा गृहीता पाणिगृहीती । एवं करगृहीतीत्यादयः । ऊढायामिति किम् । यस्या यथाकथंचित् पाणिर्गृह्यते सा पाणिगृहीता । बहुव्रीहावेवेच्छन्त्यन्ये ।

४६३ **पतिवत्न्यन्तर्वत्न्यौ भार्यागर्भिण्योः** ॥२।४।५३॥ भार्याऽविधवा स्त्री । तस्यामभिधेयायां पतिमच्छब्दाद् ङीरस्य च पतिवत्नादेशस्तथा गर्भिण्यां स्त्रिया-

मभिधेयायामन्तर्वच्छब्दाद् ङीरस्य चान्तर्वत्नादेशो निपात्यते। निपातनादेव च अधिकरणप्रधानादप्यन्तःशब्दान्मत्वर्थीयो मतुर्भवति। पतिवत्नी। अन्तर्वत्नी। भार्येति किम्। पतिमती पृथिवी। गर्भिणीति किम्। अन्तरस्यां शालायामस्ति।

४६४ **जातेरयान्तनित्यस्त्रीशूद्रात्** ॥२।४।६४॥ जातिवाचिनोऽकारान्तान्नाम्नः स्त्रियां ङीः स्यात्, न चेत् तद् यान्तं नित्यस्त्रीजातिवाची शूद्रशब्दो वा स्यात्। तत्र जातिः काचित् संस्थानव्यङ्ग्या, यथा गोत्वादिः। सकृदुपदेशव्यङ्ग्यत्वे सत्यत्रिलिङ्गान्या। यथा ब्राह्मणत्वादिः। अत्रिलिङ्गत्वं देवदत्तादेरप्यस्तीति सकृदुपदेशव्यङ्ग्यत्वे सतीत्युक्तम्। गोत्रचरणलक्षणा च तृतीया। यदाहुः—

> ' आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्।
> सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ' ॥ इति

कुक्कुटी। ब्राह्मणी। नाडायनी। कठी। जातेरिति किम्। मुण्डा। अयान्तेति किम्। इभ्या, क्षत्रिया। गवयी, हयी, मुकयी, मनुषी, मत्सी, ऋश्यी—इति तु गौरादिपाठात्। अन्तग्रहणं साक्षात्पतिपत्त्यर्थम्। तेन वतण्डस्यापत्यं पौत्रादि स्त्रीति यञ्, तस्य लोपे स्थानिवद्भावेऽपि वतण्डीत्यत्र यान्तलक्षणः प्रतिषेधो न। नित्यस्त्रीजातिवर्जनं किम्। मक्षिका, यूका, खट्वा। कथं तर्हि द्रोणी, कुटी। अत्र हि शब्दयोर्नित्यस्त्रीत्वाभावेऽपि द्रोणीकुटीजातेर्नित्यस्त्रीत्वात् प्रतिषेधः प्राप्नोति, नैवम्। गौरादिपाठाद् भविष्यति। शूद्रवर्जनं किम्। शूद्रा। कथं महाशूद्री आभीरजातिः? नात्र शूद्रशब्दो जातिवाची, किंतर्हि महाशूद्रशब्दः। यत्र तु शूद्र एव जातिवाची तत्र भवत्येव ङीनिषेधः। महती चासौ शूद्रा च महाशूद्रेति। जातिलक्षणस्यायं प्रतिषेधः, तेन धवयोगे भवत्येव। शूद्रस्य भार्या शूद्री। आदित्येव। आखुः। मुख्यादित्येव। बहुशूकरा भूमिः। कथं सुपर्णी?। सुपर्णशब्दस्यापि जातिवाचित्वात्, तस्य च मुख्यत्वात्।

४६५ **पाककर्णपर्णवालान्तात्** ॥२।४।६५॥ जातिवाचिनो नाम्नः स्त्रियां ङीः स्यात्। ओदनस्येव पाकोऽस्या ओदनपाकी। आखुकर्णी। मुद्गपर्णी। गौरिव वाला अस्या गोवाली। संज्ञा एता ओषधिजातीनाम्। आसां जातीनां नित्यस्त्रीरूपत्वाद् वचनम्। एवमुत्तरमूत्रत्रयेऽपि। जातेरित्येव। बहुपाका यवागूः।

४६६ **असत्काण्डप्रान्तशतैकाश्वः पुष्पात्** ॥२।४।६६॥ सदादिरहित-

शब्दपूर्वो यः पुष्पशब्दस्तदन्ताज्जातिवाचिनो नाम्नः स्त्रियां ङीः स्यात्। शंखपुष्पी। सदादिप्रतिषेधः किम्। सत्पुष्पा। काण्डपुष्पा। प्रान्तपुष्पा। शतपुष्पा। एकपुष्पा। प्राक्पुष्पा। प्रत्यक्पुष्पा।

४६७ **असभस्त्राजिनैकशणपिण्डात् फलात्** ॥२।४।६७॥ समादिवर्जितशब्दपूर्वो यः फलशब्दस्तदन्ताज्जातिवाचिनो नाम्नः स्त्रियां ङीः स्यात्। दासीफली। समादिप्रतिषेधः किम्। संफला। भस्त्राफला। अजिनफला। एकफला। एकान्नेच्छन्त्यन्ये। शणफला। पिण्डफला। ओषधिजातिविशेषाणां संज्ञा एताः।

४६८ **अनञो मूकात्** ॥२।४।६८॥ नञ्वर्जितशब्दपूर्वो यः फलशब्दस्तदन्ताज्जातिवाचिनो स्त्रियां ङीः स्यात्। दर्भमूली। अनञ इति किम्। अमूला।

४६९ **धवाद्योगादपालकान्तात्** ॥२।४।६९॥ धवो भर्ता, तद्वाचिनोऽकारान्ताद् योगात्–संबंधात् स्त्रियां वर्तमानात् पालकान्तशब्दवर्जान्नाम्नो ङीः स्यात्। प्रष्ठस्य भार्या प्रष्ठी। कुमार्यां भवो भर्ता कौमारः। तस्य भार्या कौमारी। प्रष्ठादयः शब्दा धववाचिनोऽपि योगात् सोऽयमित्यभेदोपचारेण भार्यायां वर्तन्ते। यदा तु 'तस्येदम्' इति व्यतिरेकविवक्षा तदा तद्धितो भवति। प्राष्ठी। धवादिति किम्। परिसृष्टा। प्रजाता। प्रसूता। सर्वत्र विनिर्लुठितगर्भेत्यर्थः। अस्त्यत्र योगस्तेन विना प्रसवाभावात्, न तु धववाचि नाम। योगादिति किम्। देवदत्तो धवो, देवदत्ता भार्या स्वत एव, न तद्योगात्। अपालकान्तादिति किम्। गोपालकस्य भार्या गोपालिका। आदित्येव। सहिष्णोर्भार्या सहिष्णुः। कथं ज्येष्ठस्य भार्या ज्येष्ठा, एवं कनिष्ठा मध्यमा ?। अजादिपाठात्।

४७० **पूतक्रतुवृषाकप्यग्निकुसितकुसिदादै च** ॥ २।४।७० ॥ एभ्यो धवनामभ्यस्तद्योगे स्त्रियां वर्तमानेभ्यो ङीः स्यात्, तत्संनियोगे ऐकारश्चान्तादेशः। पूतक्रतोर्भार्या पूतक्रतायी। एवं वृषाकपायी, अग्नायी, कुसितायी, कुसिदायी। योगादित्येव। पूताः क्रतवो यया सा पूतक्रतुः। एवं वृषाकपिर्नाम काचित्।

४७१ **मनोरौ च वा** ॥२।४।७१॥ मनोर्धवनाम्नस्तद्योगात् स्त्रियां वर्तमानान्ङीर्वा स्यात्, तत्संनियोगे औकार ऐकारश्चान्तादेशः। मनोर्भार्या मनावी, मनायी, मनुः।

४७२ वरुणेन्द्ररुद्रभवशर्वमृडादान् चान्तः ॥२।४।६२॥ एभ्यो धवनामभ्यस्तद्योगात् स्त्रियां वर्तमानेभ्यो ङीःस्यात्, तत्संनियोगे च आनन्त्य—आगमः। वरुणस्य भार्या वरुणानी। एवमिन्द्राणी, रुद्राणी, भवानी, शर्वाणी, मृडानी। कश्चित्त्वाहिताग्नेर्भार्या आहिताग्न्यानी। एवं प्रजापत्यानी, वणिजानी, इत्यादावपीच्छति। इन्द्रमाचष्टे इन्द्र्, तद्भार्या इन्द्राणी, एवं मातुलानीत्यपरः।

४७३ मातुलाचार्योपाध्यायाद्वा ॥२।४।६३॥ एभ्यो धवनामभ्यस्तद्योगात् स्त्रियां वर्तमानेभ्यो ङीः स्यात्, तत्संनियोगे च वा आनन्त्यः—आगमः। मातुलस्य भार्या मातुलानी। मातुली। एवमाचार्यानी, अत्र क्षुभ्नादित्वान्न णत्वम्। आचार्यी। आचार्यीति नेच्छन्त्यन्ये। उपाध्यायानी, उपाध्यायी। अन्ये तु मातुला, आचार्या, उपाध्यायेत्यपीच्छन्ति। तदर्थं ङीरिति विकल्पनीयः।

४७४ सूर्याद्देवतायां वा ॥ २।४।६४॥ सूर्यशब्दाद्धवनान्नस्तद्योगाद्देवतायां स्त्रियां वर्तमानाद् ङीर्वा स्यात्, तत्संनियोगे आन् चान्तः। सूर्यस्य भार्या सूर्याणी। पक्षे आबेव—सूर्या। देवतायामिति किम्। सूर्यस्यादित्यस्य मनुष्यस्य वा भार्या मानुषी इत्यत्र धवाद्योगादित्यनेन ङ्याम्—

४७५ सूर्यागस्त्ययोरीये च ॥ २।४।८९॥ अनयोर्यकारस्य ङीप्रत्यये ईयप्रत्यये च लुक् स्यात्। सूरी। सूर्याणीति नेच्छन्त्यन्ये।

४७६ यवयवनारण्यहिमाद्दोषलिप्युरुमहत्त्वे ॥ २।४।६५॥ धवाद्योगादिति च निवृत्तम्। यवादिभ्यः शब्देभ्यो यथासंख्यं दोषादौ गम्यमाने स्त्रियां ङीः स्यात्, तत्संनियोगे आन् चान्तः। दुष्टो यवो यवानी। यवानां दोषकारि सहचरितं द्रव्यान्तरम्। अप्रसवधर्माणो यवा एवेत्यन्ये। यवनानां लिपिर्यवनानी। उक्तार्थत्वात् तस्येदमित्यण् न भवति। उरु अरण्यं अरण्यानी। महत् हिमं हिमानी। लिपीति किम्। यावनी वृत्तिः। यवनस्य भार्या यवनी। यवारण्यहिमानां तु दोषाद्यभावे स्त्रीत्वमेव नास्तीति न प्रत्युदाहियते। संज्ञायां तु भवत्येव। यथा यवा, अरण्या, हिमा नाम काचित्।

४७७ अर्यक्षत्रियाद्वा ॥ २।४।६६॥ आभ्यां स्त्रियां ङीर्वा स्यात्, तत्संनियोगे आन् चान्तः। अर्याणी, अर्या। क्षत्रियाणी, क्षत्रिया। अधवयोगेऽयं विधिः। धवयोगे तु विशेषविधानात् पूर्वेण नित्यं ङीरेव। अर्यस्य भार्या अर्यी।

एवं क्षत्रियी । धवयोग एवायं विधिरिति कश्चित् । तन्मते अर्यस्य भार्या अर्याणी, अर्या । क्षत्रियाणी, क्षत्रिया । धवयोगादन्यत्र अर्या, क्षत्रियेत्येव भवति ।

४७८ **यञो डायन् च वा** ॥ २।४।६७ ॥ यञ्प्रत्ययान्तात् स्त्रियां ङीः स्यात्, तत्संनियोगे डायन् चान्तो वा । गार्ग्यायणी । डायनागमाभावपक्षे ङ्यामकारस्य लुकि, व्यंजनात्तद्धितस्येति तद्धितयकारस्यच ङ्यां लुक् । गार्गी ।

४७९ **लोहितादिशकलान्तात्** ॥२।४।६८॥ लोहितादिभ्यः शकलान्तेभ्यो यञन्तेभ्यः स्त्रियां ङीः स्यात्, तत्संनियोगे डायन् चान्तः । लौहित्यायनी । सांशित्यायनी । कात्यायनी । शाकल्यायनी ।

४८० **षावटाद्वा** ॥ २।४।६९ ॥ षकारान्तान्नाम्नोऽवटशब्दाच्च यञन्तात् स्त्रियां वा ङीः स्यात्, तत्संनियोगे डायन् चान्तः । पौतिमाष्यायणी । पोतिमाष्या । आवट्यायनी । आवट्या ।

४८१ **कौरव्यमाण्डूकासुरेः** ॥ २।४।७०॥ एभ्यः स्त्रियां ङीः स्यात्, तत्संनियोगे डायन् चान्तः । कौरव्यायणी । माण्डूकायनी । आसुरायणी ।

४८२ **इञ इतः** २।४।७१॥ इञ्प्रत्ययान्तान्नाम्न इकारान्तात् स्त्रियां ङीः स्यात् । सुतंगमेन निर्वृत्तेति इञि सौतंगमी । इत इत किम् । इञादेशात् ष्यान्मा भूत् । वराहस्यापत्यं वाराह्या ।

४८३ **नुर्जातेः** ॥२।४।७२॥ नुर्मनुष्यस्य या जातिस्तद्वाचिन इकारान्तान्नाम्नः स्त्रियां ङीः स्यात् । अवन्तेः कुन्तेश्चापत्यमिति ञ्यः । तस्य लोपे अवन्ती । कुन्ती । इत इत्येव । विशोऽपत्यमित्यञ्, तस्य च लोपे विट् । नुरिति किम् । तित्तिरिः । जातेरिति किम् । निष्कौशांबिः कन्या ।

४८४ **उतोऽप्राणिनश्चायुरज्ज्वादिभ्य ऊङ्** ॥ २।४।७३ ॥ उकारान्तान्नुजातिवाचिनोऽप्राणिजातिवाचिनश्च नाम्नः स्त्रियामूङ् प्रत्ययः स्यात्, युशब्दान्तं रज्ज्वादिंश्च वर्जयित्वा । कुरूः । ब्रह्मबन्धूः । अलाबूः । ब्रह्मा बन्धुरस्या इत्यत्रोङः पूर्वं 'शेषाद्वे' ति समासान्तः कच् परोऽपि न भवति । तत्र बहुलाधिकारात् । उत इति किम् । विट् । वधूः । ऊङि सति वधूमतिक्रान्ताऽतिवधूरित्यत्र ह्रस्वः स्यात् यथा अतिब्रह्मबंधुरित्यत्र । अप्राणिनश्चेति किम् । आखुः । जातेरित्येव । पटुः । अयुरज्ज्वादिभ्य इति किम् । अध्वर्युः स्त्री । चरणत्वाज्जातिः। रज्जुः। हनुः ।

बहुवचनमाकृतिगणार्थम् । कथं तर्हि 'भीरु गतं निवर्तत' इति । भीरुशब्दस्य हि जातिवाचित्वाज्जातिलक्षणस्योङोऽभावे संबोधने ओत्वं प्राप्नोति । नैवम् । ताच्छीलिकानां संज्ञाप्रकारत्वात् मनुष्यजातिवचनत्वम् । तथा चोङि सति ह्रस्वत्वं सिद्धम् । अन्ये तु ' अमूर्यपश्यरूपा त्वं कथं भीरुरार्यसे ' इति प्रयोगदर्शनाज्जातिवचनत्वमनिच्छन्त ऊङं न मन्यन्ते ।

४८५ **बाह्वन्तकद्रुकमण्डलोर्नाम्नि** ॥ २।४।७४ ॥ बाहुशब्दान्तान्नाम्नः कद्रुकमण्डलुभ्यां च नाम्नि विषये स्त्रियामूङ् स्यात् । भद्रबाहूः । कद्रूः । कमण्डलूः । संज्ञा एताः । नाम्नीति किम् । वृत्तौ बाहू अस्याः वृत्तबाहुः ।

४८६ **उपमानसहितसंहितसहशफवामलक्ष्मणादूरोः** ॥२।४।७५॥ उपमानादिपूर्वपदादूरुशब्दात् स्त्रियामूङ् स्यात् । करभ इव ऊरू यस्याः सा करभोरूः । सहितोरूः । संहितोरूः । सहोरूः । शफोरूः । वामोरूः । लक्ष्मणोरूः । उपमानाद्यादेरिति किम् । वृत्तोरूः । पीनोरूः । कथं स्वामिन ऊरू स्वाम्यूरू, हस्तिन इव स्वाम्यूरू यस्याः सा हस्तिस्वाम्यूरुः वडवा, एवं करभमात्रूरुः ?। नात्रोरुशब्द उपमानादिपूर्वः, अपितु स्वाम्यूरुमात्रूरुशब्दौ ।

४८७ **नारी सखी पङ्गू श्वश्रूः**॥२।४।७६॥ एते शब्दाः स्त्रियां ङ्यन्ताश्च ऊङन्ताश्च निपात्यन्ते । नृनरयोर्ङ्यौ नारादेशः । नारी । सखिशब्दात् सखशब्दाच्च बहुव्रीहेर्ङीः । सखी । सह खेन वर्तते या साऽपि सखी । निपातनसामर्थ्याद् धवयोगेऽपि भवति । सख्युः स्त्री सखी । पङ्गुशब्दात् अजातावूङ् । पङ्गूः । श्वशुरशब्दाच्च जातिलक्षणे धवयोगलक्षणे च ङीप्रत्यये प्राप्ते, उकाराकारयोर्लोपश्च । श्वश्रूः ।

४८८ **यूनस्तिः** ॥२।४।७७॥ युवनशब्दात् स्त्रियां तिः स्यात् । नकारान्तत्वात् ङीप्रत्यये प्राप्ते तदपवादो योगः । युवतिः । यूनीत्यपि कश्चित् । न तच्छिष्टसंमतम् । कथं युवती । यौतेरौणादिककिदतिप्रत्ययान्तात् 'इतोऽक्त्यर्थात्, इत्यनेन ङीर्भविष्यति । गुरुत्यादित्येव । अतियूनी । निर्यूनी ।

४८९ **अनार्षे वृद्धेऽणिञो बहुस्वरगुरूपान्त्यस्यान्त्यस्य ष्यः**॥२।४।७८॥ अनार्षे वृद्धे विहितौ यावणिञौ प्रत्ययौ तदन्तस्य सतो बहुस्वरस्य गुरूपान्त्यस्य नाम्नोऽन्त्यस्य स्त्रियां ष्य इत्यादेशः स्यात् । गुरुग्रहणादनेकव्यंजनव्यवधानेऽपि भवति । गुरुग्रहणं दीर्घपरिग्रहणार्थं, सयोगपरिग्रहार्थं च । अन्यथा दीर्घोपान्त्यस्येत्युच्येत । करीषस्येव गंधोऽस्य करीषगंधिः, तस्यापत्यं स्त्री, अण् । तस्य

ष्यादेशे–कारीषगन्ध्या । देवदत्तस्यापत्यं पौत्रादि स्त्री, इञ् । तस्य ष्यादेशे–दैवदत्त्या । अनार्ष इति किम् । वासिष्ठी । वृद्ध इति किम् । वराहस्य प्रथमापत्यं स्त्री वाराही । अणिञ इति किम् । ऋतभागस्यापत्यमिति बिदादित्वादञि आर्तभागी । बहुस्वरे इति किम् । दाक्षी । गुरूपान्त्यस्येति किम् । औपगवी । अणिञन्तस्य सतो बहुस्वरादिविशेषणं किम् । द्वारस्यापत्यं पौत्रादि स्त्री इतीञि दौवार्या । अत्रेञः पूर्वमबहुस्वरत्वेऽगुरूपान्त्यत्वे च सत्यपीञि सति बहुस्वरत्वाद् गुरूपान्त्यत्वाच्च यथा स्यात् । स्त्रियामित्येव । कारीषगंधः पुमान् । मुख्यस्येत्येव । बहवः कारीषगंधा यस्यां सा कारीषगंधा । कथं सौधर्मी? । गौरादिपाठात् । षित्करणं 'ष्या पुत्रपत्योः'–इत्यत्र विशेषणार्थम् ।

४९० **कुलाख्यानाम् ॥२।४।७९॥** पुणिकभुणिकमुखरप्रभृतयः कुलाख्याः, कुलमाख्यायते आभिरिति कृत्वा । तासामनार्षे वृद्धेऽणिञन्तानामन्तस्य स्त्रियां ष्यः स्यात् । अबहुस्वरागुरूपान्त्यार्थं वचनम् । पुणिकस्यापत्यं पौत्रादि स्त्री पौणिक्या, भौणिक्येत्यादि । वृद्ध इत्येव । पौणिकी । अत्र प्रथमापत्ये इञ् । अनार्ष इत्येव । गौतमी । गौरादित्वात्तु भौरिकी, भौलिकी ।

४९१ **क्रौड्यादीनाम् ॥२।४।८०॥** अबहुस्वरागुरूपान्त्यार्थोऽनन्तरापत्यार्थ आरंभः । क्रौडि इत्येवमादीनामणिञन्तानामन्तस्य स्त्रियां ष्यादेशः स्यात् । क्रोडस्यापत्यं क्रौडिः, स्त्री–क्रौड्या । ष्यस्यादेशत्वात् क्रौडेय इत्यादिषु आपत्ययस्य लोपः सिद्धः । अन्ये त्वत्र ष्यस्य प्रत्ययत्वमिच्छन्तो यलोपं नेच्छन्ति । क्रौडचेयः । बहुवचनमाकृतिगणार्थम् ।

४९२ **भोजसूतयोः क्षत्रियायुवत्योः ॥२।४।८१॥** भोजसूतशब्दयोरन्तस्य क्षत्रियायुवत्योरभिधेययोः स्त्रियां ष्यादेशः स्यात् । भोज्या–भोजवंशजा क्षत्रिया । सूत्या–प्राप्तयौवना मानुषीत्यर्थः । अन्ये त्वाहुः– सूतसंबंधिनी युवतिः सूत्या, न सर्वा । क्षत्रियायुवत्योरिति किम् । भोजा, सूता ।

४९३ **दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धेर्वा ॥२।४।८२॥** एषामिञन्तानां स्त्रियामन्तस्य ष्यादेशो वा स्यात् । इञन्तमात्रनिर्देशात् पौत्रादौ प्राप्ते प्रथमापत्ये त्वप्राप्ते विभाषा , दैवयज्ञ्या, दैवयज्ञी । शौचिवृक्ष्या, शौचिवृक्षी । सात्यमुग्र्या, सात्यमुग्री । काण्ठेविद्ध्या, काण्ठेविद्धी ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां स्त्रीप्रत्ययप्रकरणं समाप्तम् ॥

॥ अथ कारकप्रकरणम् ॥

४२४ **नाम्नः प्रथमैकद्विबहौ** ॥ २।२।३१ ॥ एकत्वद्वित्वबहुत्वविशिष्टेऽर्थे वर्तमानान्नाम्नः परा यथासंख्यं सिऔजस्लक्षणा प्रथमा विभक्तिः स्यात् । कर्मादिशक्तिषु द्वितीयादिविभक्तीनां विधास्यमानत्वादिह विशेषानभिधानाच्च परिशिष्टेऽर्थमात्रे प्रथमेति विज्ञायते । तत्र द्वितीयादिविनिर्मुक्तः स्वार्थद्रव्यलिङ्गसंख्याशक्तिलक्षणोऽसमग्रः समग्रो वा पञ्चको नामार्थोऽर्थमात्रम् । तेषु शब्दस्यार्थे प्रवृत्तिनिमित्तं स्वरूपजातिगुणक्रियाद्रव्यसंबंधादिरूपं त्वतलादिप्रत्ययाभिधेयं स्वार्थः । स च भावो विशेषणं गुण इति चाख्यायते । डित्थः । गौः । शुक्लः । कारकः । दण्डी । राजपुरुषः । गर्गाः । यत् पुनरिदंतदित्यादिना वस्तूपलक्षणेन सर्वनाम्ना व्यपदिश्यते स्वार्थस्य व्यवच्छेद्यं लिङ्गसंख्याशक्त्याद्याश्रयः सत्वभूतं तद् द्रव्यं विशेष्यमिति चाख्यायते । इयं जातिः । अयं गुणः । इदं कर्मेति । यदर्थे सदसद् वा शब्दत एवावसीयते तत् ङ्याबादिसंस्कारहेतुः स्त्री पुमान् नपुंसकमिति लिङ्गम् । स्त्री । पुमान् । नपुंसकम् । यस्यामेकवचनद्विवचनबहुवचनानि भवन्ति सा भेदप्रतिपत्तिहेतुरेकत्वादिका संख्या । एकः । द्वौ । बहवः ।

‘ निमित्तमेक इत्यत्र विभक्त्या नाभिधीयते ।
तद्वतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते’ ॥

यस्यां त्यादिभिरनभिहितायां द्वितीयाद्या व्यतिरेकविभक्तयः षष्ठी च भवति सा स्वपराश्रयाश्रितक्रियोत्पत्तिहेतुः कारकरूपा तत्पूर्वकसंबंधरूपा च शक्तिः , सा चाभिहितार्थमात्रम् । क्रियते कटः। अर्थमात्रं चोपचरितम् । यथा साहचर्यात्–कुन्ताः प्रविशन्ति । स्थानात्–मञ्चाः क्रोशन्ति । तादर्थ्यात्–इन्द्रःस्थूणा । वृत्तात्–यमोऽयं राजा । मानात्–प्रस्थो व्रीहिः । धरणात्–तुला चन्दनम् । सामीप्यात्–गङ्गातटं गङ्गा । योगात्–रक्तः कम्बलः । साधनात्–अन्नं प्राणाः । आधिपत्यात्–ग्रामाधिपतिर्ग्रामः । अलिङ्गमपि । त्वम् । अलिङ्गसंख्यमपि । उच्चैः । शक्तिप्रधानमपि । यतः । द्योत्यमपि । प्रपचति । स्वरूपमात्रमपि । अध्यागच्छति । तदयं वस्तुसंक्षेपः–त्याद्यन्तपदसामानाधिकरण्ये प्रथमेति । यत्रापि त्याद्यन्तं पदं न श्रूयते, वृक्षः , प्लक्ष इत्यादौ तत्रापि गम्यते । यदाह–यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते ’ इति । नाम्न इति किम् । निरर्थकाद् वर्णाद् धातुवाक्याभ्यां च मा भूत् । ‘ एकद्विबहौ ’ इति संकरनिवृत्त्यर्थम् । ननु चाव्ययेभ्य एकत्वाद्यभावेन

प्रथमा न प्राप्नोति । सत्यम् । लुब्विधानात्तु विभक्तीनां विधिर्विज्ञायते, तदन्तर्गतत्वाच्च प्रथमाया अपि । तस्य च फलम्–अथो स्वस्ते गृहम्, अथो स्वस्तव गृहमित्यादि । अत्र च ' सपूर्वात् प्रथमान्ताद्वे ' ति विभाषया ते मे आदेशौ । पदसंज्ञा च ' अव्ययस्य ' इत्यत्र सूत्रे उक्तैव–एकद्विबहावित्यादिविभक्तिविधानादिति ।

४९५ आमन्त्र्ये ॥२।२।३२॥ प्रसिद्धतत्संबंधस्य किमप्याख्यातुमभिमुखीकरणं आमंत्रणम्, तद्विषय आमन्त्र्यः । तस्मिन्नर्थे वर्तमानान्नाम्न एकद्विबहौ यथासंख्यं प्रथमा स्यात् । हे देवदत्त । आमंत्र्य इति किम् । राजा भव । अत्र राजा नामंत्र्यः , किंतु स एव विधीयत इति पूर्वेणैव प्रथमा । षष्ठीप्राप्तौ वचनम् ।

४९६ क्रियाहेतुः कारकम् ॥२।२।१॥ क्रियाया हेतुः कारणं कर्त्रादि कारकसंज्ञं स्यात् । तच्च द्रव्याणां स्वपराश्रयसमवेतक्रियानिर्वर्तकं सामर्थ्यं शक्तिरित्याचक्षते । शक्तिश्च सहभूर्यावद्द्रव्यभाविनी च क्रियाकाल एवाभिव्यज्यते । करोतीति कारकमित्यन्वर्थसंज्ञासमाश्रयणाच्चानाश्रितव्यापारस्य निमित्तत्वमात्रेण हेत्वादेः कारकसंज्ञा न भवति । कारकप्रदेशाः ' कारकं कृते'त्यादयो वक्ष्यन्ते ।

४९७ स्वतंत्रः कर्ता ॥२।२।२॥ क्रियाहेतुभूतो यः क्रियासिद्धावपरायत्ततया प्राधान्येन विवक्ष्यते स कारकविशेषः कर्तृसंज्ञःस्यात्। देवदत्तःपचति। जिनदत्तेन कृतम्। स्थाली पचति। प्रेषितः करोति। अस्य च कर्तुरधिश्रयणादयः पचिक्रियायामवान्तरव्यापारा भवन्ति, एतान् कुर्वन् देवदत्तः पचतीत्युच्यते। प्रयोजकोऽपि कर्तैव-पचन्तं देवदत्तं प्रयुङ्क्ते देवदत्तेन पाचयति चैत्रः। अत्र स्वशब्द आत्मवचनः। तन्त्रशब्दः प्रधानार्थः। स्वं तन्त्रं अस्य स्वतंत्र आत्मप्रधानः । किं पुनः कारकान्तरेभ्यः कर्तुः प्राधान्यम् । यत् करणादीनि प्रयुङ्क्ते न तैः प्रयुज्यते । तानि न्यत्करोति न तैर्न्यत्क्रियते । तानि निवर्तयति न तैर्निवर्त्यते । तानि प्रतिनिधत्ते न तैः प्रतिनिधीयते । तेभ्यः स प्रथममात्मलाभं लभते न तानि तस्मात् । स तैर्विनाऽपि दृश्यते न तानि तेनेति।

४९८ कर्तुर्व्याप्यं कर्म ॥२।२।३॥ कर्त्रा क्रियया यद् विशेषेणाप्तुमिष्यते तद् व्याप्यं कर्मसंज्ञं स्यात् । प्रसिद्धस्यानुवादेनाप्रसिद्धस्य विधानं लक्षणार्थः । तेन यत् कर्म यत्कर्त्रा क्रियते तद् व्याप्यसंज्ञं स्यादिति सूत्रार्थः। तत्रेधा–निर्वर्त्यम् १ विकार्यम् २ प्राप्यं ३ च । तत्र यदसज्जायते जन्मना वा प्रकाश्यते तन्निर्वर्त्यम् । प्रकृत्युच्छेदेन गुणान्तराधानेन वा यद् विकृतिमापद्यते तद्विकार्यम् । यत्र तु क्रियाकृतो विशेषो नास्ति तत्प्राप्यम् । अस्य तु त्रिविधस्यापि यथाक्रममवान्तरव्या-

पाराः–निवर्तते, विकुरुते, आभासमुपगच्छतीत्यादयः । त्रिविधमप्येतत् पुनस्त्रिविधम्। इष्टम् १ अनिष्टम् २ अनुभयम् ३ च । यदवाप्तुं क्रियारभ्यते तदिष्टम्। यद् द्विष्टं प्राप्यते तदनिष्टम् । यत्र नेच्छा न च द्वेषस्तदनुभयम् ।

४९९ कर्मणि ॥२।२।४७॥ गौणान्तान्नाम्नः कर्मणि कारके द्वितीया स्यात् । कटं करोति । ओदनं पचति । आदित्यं पश्यति । अहिं लङ्घयति । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति । पुनस्तत्कर्म द्विविधम् । प्रधानेतरभेदात् । तच्च द्विकर्मकेषु धातुषु दुहिभिक्षिरुधिप्रच्छिचिब्रूगशास्वर्थे याचिजयतिप्रभृतिषु च भवति । गां दोग्धि पयः । गां स्रावयति पयः । पौरवं गां भिक्षते । पौरवं गां याचते । गामवरुणद्धि व्रजम् । छात्रं पन्थानं पृच्छति । छात्रं वाक्यं चोदयति । वृक्षमवचिनोति फलानि । शिष्यं धर्मं ब्रूते । शिष्यं धर्ममनुशास्ति । क्रुद्धं याचते शमावस्थाम् । अविनीतं याचते विनयम् । याचिरिहानुनयार्थः, तेन भिक्षार्थाद् भेदः । गर्गान् शतं जयति । गर्गान् शतं दण्डयति । अमृतमम्बुनिधिं मथ्नाति । अजां ग्रामं नयति । ग्रामं भारं हरति । उपसरजमश्वं मुष्णाति । ग्रामं शाखां कर्षति । ग्रामं भारं वहति । तण्डुलानोदनं पचति । अत्र यदर्थं क्रियारभ्यते तत्पयःप्रभृति प्रधानं कर्म । तत्सिद्धये तु यदन्यत् क्रियया व्याप्यते गवादि तदप्रधानम् । यदा तु पयोऽर्थी प्रवृत्तिरविवक्षिता तदा प्रधानस्यासंनिधानात् गवादेरेव प्राधान्यम् । यथाश्वर्यो गवां दोह इति । तत्र दुहादीनामप्रधाने कर्मणि कर्मजः प्रत्ययो भवति–गौर्दुह्यते दुग्धा दोह्या वा पयो मैत्रेणेत्यादि । नीवहिहरतिप्रभृतीनां तु प्रधाने कर्मणि प्रत्ययः, यथा–नीयते नीता नेतव्या वा ग्राममजेत्यादि । गत्यर्थानामकर्मणां च णिगन्तानां प्रधान एव कर्मणि–गमयति मैत्रं ग्रामम् , गम्यते गमितो गम्यो वा मैत्रो ग्रामं चैत्रेण । आसयति मासं मैत्रम् । आस्यते मासं मैत्रश्चैत्रेण । अन्यस्त्वप्रधानेऽपीच्छति । गम्यते मैत्रं ग्रामश्चैत्रेण । आस्यते मासो मैत्रं चैत्रेण । बोधाहारार्थशब्दकर्मकाणां तु णिगन्तानामुभयत्र । बोधयति शिष्यं धर्मम् । बोध्यते धर्मः शिष्यम् इति वा । भोजयत्यतिथिमोदनम् , भोज्यतेऽतिथिमोदन इति वा । पाठयति शिष्यं ग्रन्थम् । पाठयते शिष्यो ग्रन्थम् । पाठयते शिष्यं ग्रन्थ इति वा । अथेह कस्मान्न भवति द्वितीया क्रियते कटः, कृतः कटः, शतेन क्रीतः शत्यः पटः, आरूढो वानरो यं स आरूढवानरो वृक्ष इति । त्यादिकृत्तद्धितसमासैरभिहितत्वाल्लोकशास्त्रयोश्चाभिहितेऽर्थे शब्दप्रयोगायोगात् । यद्येवं कटं करोति भीष्ममुदारं

दर्शनीयमिति भीष्मादिविशेषणविशिष्टस्य कटस्य करोतिक्रियया व्याप्यत्वात् कर्मत्वम्, तच्च कटशब्दादेवोत्पन्नया द्वितीययाभिहितमिति भीष्मादिभ्यो द्वितीया न प्राप्नोति, यथा कृतः कटो भीष्म उदारो दर्शनीय इति करोतेः क्तप्रत्ययेनेति। नैवम्। भीष्मत्वादियुक्तस्य कटस्य संबंधि कर्मत्वं प्रतिपाद्यम्। न च जातिशब्दाः संभविनोऽपि गुणान् प्रतिपादयितुं समर्था इति तत्प्रतिपादनाय यथा भीष्मादिशब्दप्रयोगो भवति तथा द्वितीयापि तेभ्यो भविष्यति। नहि सामान्यवाचिनः कटशब्दादुत्पद्यमाना द्वितीया भीष्मादीनामनियताधाराणां गुणानां कर्मत्वमभिधातुं शक्नोति। यदि वा कटोऽपि कर्म भीष्मादयोऽपि, यथैव ह्ययं कटं करोत्येवं तद्गतान् भीष्मादीनपि। तत्र यद् यत् करोतिना व्याप्तुमिष्टं तत्सर्वं द्रव्यं गुणश्च कर्मेति सर्वेषां पृथक्कर्मत्वे प्रत्येकं द्वितीया पश्चात् त्वेकवाक्यतया विशेषणविशेष्यभाव इति। यदि वा द्रव्यस्य क्रियासु साक्षादुपयोगादस्तु कटस्यैव कर्मत्वम्, भीष्मादीनां तु न केवला प्रकृतिः प्रयोक्तव्येति नियमात् अविभक्तीनामप्रयोगार्हत्वादेकविभक्तिमन्तरेण च सामानाधिकरण्यविशेषणत्वायोगाद्यथेश्वरसुहृदां स्वयं निर्धनत्वेऽपि तदेकयोगक्षेमत्वात् तद्धनेनैव फलभाक्त्वं भवत्येवमकर्मणामपि कटकटकर्मत्वेनैव द्वितीया भविष्यति। कृतः कटो भीष्म उदारो दर्शनीय इत्यादौ तु करोतेरुत्पद्यमानः क्तो यस्य यस्य तया क्रियया संबंधस्तस्य तस्य साकल्येन कर्मत्वमभिदधाति इति क्वचिदपि द्वितीया न भवति। कथं तर्हि कृतं पश्य, आहृतमाहर, कर्त्रा क्रियते, दात्रेण लुनाति, दानीयाय ददाति, भीमाद् बिभेति, प्रासादे प्रसीदति, शयने शेते—इत्यादिषु क्तादिभिरभिहितेषु कर्मादिषु कर्मादयो भवन्ति?। उच्यते। कर्मादिसामान्यं कृद्भिरभिहितम्, तत्राप्यभिहितः सोऽर्थोऽन्तर्भूतो नामार्थः संपन्न इति कर्मादिशक्तियुक्तं द्रव्यमेतदन्तैः शब्दैरभिधीयते यथेदं कर्म इदं करणमिति। तत्र यासौ स्वरूपकालभिन्नायां क्रियायां सव्यापारतया कर्मादिरूपता तदभिधानाय यथायथं द्वितीयादयो भवन्ति। यत्र पुनरेकद्रव्याधारा प्रधानाप्रधानक्रियाविषयानेका शक्तिर्भवति तत्र प्रधानक्रियाविषयायां शक्तौ प्रत्ययैरभिहितायामप्रधानक्रियाविषया शक्तिः प्रधानशक्त्यनुरोधादभिहितवत् प्रकाशमाना विभक्त्युत्पत्तौ निमित्तं न भवति। यथौदनः पक्त्वा भुज्यते देवदत्तेनेति भावाभिधायिना क्त्वाप्रत्ययेनौदनाधिकरणाप्रधानपचिक्रियाविषया कर्मशक्तिरनभिहितापि प्रधानभुजिक्रियाविषयात्मनेपदेनाभिहितेति

तद्वत्प्रकाशमाना द्वितीयोत्पत्तौ निमित्तं न भवति। यथा च ग्रामो गन्तुमिष्यते देवदत्तेनेति ग्रामस्य प्रधानेषिक्रियाविषयां कर्मशक्तिमात्मनेपदेनाभिदधताऽप्रधानगमिक्रियाविषयाऽपि कर्मशक्तिरुपभुक्तेति तदभिधानाय द्वितीयाचतुर्थ्यौ न भवत इति। इह च गौणत्वं क्रियापेक्षं तेनाजां नयति ग्राममित्यादौ ग्रामाद्यपेक्षयाजादेः प्रधानत्वेऽपि गौणत्वं न विहन्यत इति। इह तु कृतपूर्वी कटं, भुक्तपूर्वी ओदनम्, व्याकरणं सूत्रयतीत्यादौ यः कृतादिभिः कटादेरभिसंबंधः स प्रत्ययेऽर्थान्तराभिधायिन्युत्पन्ने कृतादीनामुपसर्जनत्वात् निवर्तते, क्रियया तु सह संबंधोऽस्तीति व्याप्यत्वाद् द्वितीया भवति। कर्तुर्व्याप्यं कर्मेति सूत्रे कर्तुरिति किम्। माषेष्वश्वं बध्नाति। अश्वेन कर्मणा भक्षणक्रियया स्पर्शनक्रियया वा माषाणां व्याप्यानां कर्मणां कर्मसंज्ञा मा भूत्। वीति किम्। पयसा ओदनं भुङ्क्ते। अत्र करणस्य मा भूत्।

६०० **वाऽकर्मणामणिकर्ता णौ** ॥ २।२।४ ॥ अविवक्षितकर्माणोऽकर्मण उत्तरत्र नित्यग्रहणात्। तेषामणिगवस्थायां यः कर्ता स णौ णिगि सति कर्मसंज्ञो वा स्यात्। पचति चैत्रः, पाचयति चैत्रं चैत्रेण वा। गत्यर्थादीनां तु परत्वान्नित्य एव विधिः। किं करोतीति व्यापारमात्रविवक्षायां चाविवक्षितकर्माणो भवन्ति।

६०१ **गतिबोधाहारार्थशब्दकर्मनित्याकर्मणामनीखाद्यदिहृवाशब्दायक्रन्दाम्** ॥२।२।५॥ गतिर्देशान्तरप्राप्तिः। बोधो ज्ञानमात्रम् तद्विशेषश्च। शब्दः कर्म क्रिया व्याप्यं च येषां ते शब्दकर्माणः। नित्याकर्मणः सर्वदाऽविद्यमानव्याप्याः। गत्यर्थबोधार्थाहारार्थानां शब्दकर्मणां नित्याकर्मणां च धातूनां नीखाद्यदिहृयतिशब्दायतिक्रन्दवर्जितानामणिगवस्थायां यः कर्ता स णौ सति कर्मसंज्ञो वा स्यात्। गच्छति मैत्रो ग्रामम्, गमयति मैत्रं ग्रामम्। देशान्तरप्राप्तेरन्यत्र न भवति। स्त्रियं गमयति मैत्रेण चैत्रः। भजनार्थोऽत्र गमिः। बुध्यते शिष्यो धर्मम्, बोधयति गुरुः शिष्यं धर्मम्। अत्र सामान्यबोधार्थः। विशेषबोधार्थे यथा—पश्यति रूपतर्कः कार्षापणम्, दर्शयति रूपतर्कं कार्षापणं वणिक्। एवं घ्रापयति मैत्रमुत्पलमित्यादि। अन्ये तु बोधविशेषार्थस्य दृशेरेवेच्छन्ति नान्येषाम्। तन्मते जिघ्रत्युत्पलं चैत्रः, घ्रापयत्युत्पलं चैत्रेण मैत्रः। एवं स्पर्शयति मैत्रेण वस्त्रम्, श्रावयति धर्मं शिष्येणेत्यादौ प्रयोज्यकर्तरि तृतीयैव भवति। आहारार्थे—भुङ्क्ते बटुरोदनम्, भोजयति बटुमोदनम्। शब्दक्रियाणाम्—जल्पति मैत्रो द्रव्यम्, जल्पयति मैत्रं द्रव्यम्।

एवमालापयति मित्रं मैत्रमित्यादि । शब्दव्याप्यानाम्–शृणोति शब्दं मैत्रः, श्रावयति शब्दं मैत्रम् । अधीते बटुर्वेदम्, अध्यापयति बटुं वेदमित्यादि । नित्याकर्मकाणाम्–आस्ते मैत्रः, आसयति मैत्रं चैत्रः । शेते मैत्रः, शाययति मैत्रं चैत्रः । नित्यग्रहणं पूर्वत्राविवक्षितकर्मकपरिग्रहार्थम् । अन्यथा विभागो न ज्ञायेत । कालाध्वभावदेशैश्च सर्वेऽपि धातवः सकर्मका एवेत्यन्यकर्मापेक्षया नित्याकर्मका वेदितव्याः । गत्यर्थादीनामिति किम् । पचत्योदनं चैत्रः, पाचयत्योदनं चैत्रेण मैत्रः । अणिकर्तेत्येव । गमयति चैत्रो मैत्रम् । तमपरः प्रयुङ्क्ते गमयति चैत्रेण मैत्रं जिनदत्तः । नयत्यादिवर्जनं किम् । नयतेः प्रापणोपसर्जनप्राप्त्यर्थत्वेन गत्यर्थत्वात्, खाद्यद्योराहारार्थत्वात्, ह्राशब्दायक्रन्दां च शब्दकर्मकत्वात् कर्मत्वे प्राप्ते प्रतिषेधार्थम् । नयति भारं चैत्रः, नाययति भारं चैत्रेण । खादयत्यपूपं मैत्रेण । आदयति ओदनं मैत्रेण । ह्रापयति चैत्रं मैत्रेण । क्रन्दयति मित्रं मैत्रेण । कर्मसंज्ञाप्रतिषेधात् स्वव्यापाराश्रयं कर्तृत्वमेव । प्रेषणाऽध्येषणादिना प्रयोजकव्यापारेण णिगन्तवाच्येनाऽणिकर्तुर्व्याप्यत्वात् कर्मसंज्ञा सिद्धैव नियमार्थं तु वचनम् । प्रयोजकव्यापारेण व्याप्यमानस्य गत्यर्थादिसंबंधिन एव प्रयोज्यस्य कर्तुः कर्मसंज्ञा भवति तेनान्यधातुसंबंधिनः कर्तृत्वमेव भवति ।

५०२ **भक्षेर्हिंसायाम् ॥२।२।६॥** भक्षेः स्वार्थिकण्यन्तस्य हिंसार्थस्याणिकर्ता णौ कर्मसंज्ञः स्यात् । भक्षयन्ति सस्यं बलीवर्दाः । तान् प्रयुङ्क्ते भक्षयति सस्यं बलीवर्दान् मैत्रः । उक्ते च कर्मणि–भक्ष्यन्ते यवं बलीवर्दाः, भक्ष्यते यवो बलीवर्दान् मैत्रेणेति वा । वनस्पतीनां प्रसवप्ररोहवृद्ध्यादिमत्त्वेन चेतनत्वात् तद्विशेषस्य सस्यस्य प्राणवियोगस्तद्भक्षणात् स्वाम्युपघातो वाऽत्र हिंसेति भक्षेर्हिंसार्थता । हिंसायामिति किम् । भक्षयति पिण्डीं शिशुः, तं प्रयुङ्क्ते भक्षयति पिण्डीं शिशुना । आहारार्थत्वात् प्राप्ते नियमार्थं वचनम् ।

५०३ **वहेः प्रवेयः ॥२।२।७॥** प्रवीयते प्राजतिक्रियया व्याप्यते यः प्रवेयः । वहेरणिकर्ता प्रवेयो णौ कर्मसंज्ञः स्यात् । वहन्ति बलीवर्दा भारम्, तान् प्रयुङ्क्ते वियोक्ता वाहयति भारं बलीवर्दान् । वाहयिता बलीवर्दानां भारम् । वाह्यन्ते भारं बलीवर्दाः । प्रवेय इति किम् । वाहयति भारं मैत्रेण । नात्र मैत्रो बलीवर्दादिवत् प्रवेयः । प्राप्त्यर्थस्य प्रापणार्थस्य च वहेर्गत्यर्थत्वात् अकर्मकस्य च नित्याकर्मकत्वात् पूर्वेण सिद्धे नियमार्थमविवक्षितकर्मकस्य तु पक्षे विध्यर्थं चेदम् ।

५०४ हृक्रोर्नवा ॥ २।२।८ ॥ हरतेः करोतेश्चाणिकर्ता णौ कर्मसंज्ञो वा स्यात् । प्राप्ते चाप्राप्ते चायं विकल्पः । प्राप्ते–विहरति देशमाचार्यः । विहारयति देशमाचार्यमाचार्येण वा। विकुर्वते सैन्धवाः, विकारयति सैन्धवान् सैन्धवैरिति वा। अत्र गत्यर्थनित्याकर्मकत्वेन यथासंख्यं प्राप्तिः । अप्राप्ते–हरति द्रव्यं मैत्रः, हारयति द्रव्यं मैत्रेण मैत्रं वा । करोति कटं चैत्रः, कारयति कटं चैत्रं चैत्रेण वा । अत्र हरतिश्चौर्यार्थो न प्रापणार्थः, करोतिश्च सकर्मक इत्यप्राप्तिः ।

५०५ दृश्यभिवदोरात्मने ॥२।२।९॥ दृशेरभिपूर्वस्य वदतेश्चात्मनेपदविषयेऽणिकर्त्ता णौ कर्मसंज्ञो वा स्यात् । पश्यन्ति भृत्या राजानम्, तान् राजैवानुकूलाचरणेन प्रयुङ्क्ते दर्शयते राजा भृत्यान् भृत्यैर्वा । अभिवदति गुरुं शिष्यः, अभिवादयते गुरुः शिष्यं शिष्येण वा । अथवा अभिवदति गुरुं शिष्यः, तं मैत्रः प्रयुङ्क्ते, अभिवादयते गुरुं शिष्यं शिष्येण वा मैत्रः । आत्मन इति किम् । पश्यति रूपतर्कः कार्षापणम्, दर्शयति रूपतर्कं कार्षापणम् । अभिवदति गुरुं शिष्यः, अभिवादयति गुरुं शिष्येण । दृशेर्बोधार्थत्वेन नित्यं कर्मत्वे प्राप्ते अभिवदेस्तु नित्यमप्राप्ते विकल्पः । यदा तु अभिवादिर्न प्रणामार्थः किंतु शब्दक्रियस्तदा अभिवादयते गुरुं शिष्यं मैत्र इति नित्यं प्राप्ते विभाषा । णिगन्तस्यापि वदेर्णिगीच्छन्त्येके । अभिवादयति गुरुर्देवदत्तं–तस्मिन्नाशिषं प्रतुङ्क्तइत्यर्थः । अभिवादयते गुरुं देवदत्तो गुरुणेति वा–आत्मन्याशिषं प्रयोजयतीत्यर्थः । णिगन्तस्यापीति कश्चित् । अभिवदति गुरुः स्वयमाशिषम्, तं शिष्यः प्रयुङ्क्ते अभिवादयति गुरुमाशिषं शिष्यः, तं मैत्रः प्रयुङ्क्ते अभिवादयते गुरुमाशिषं शिष्यं शिष्येण वा मैत्रः । नामधातोरपीच्छत्यन्यः ।

५०६ नाथः ॥ २।२।१० ॥ अणिकर्ता णाविति निवृत्तम्, पृथग्योगात् । आत्मनेपदविषयस्य नाथतेर्व्याप्यं कर्म वा स्यात् । आत्मनेपदविषयत्वं चास्याशिष्येवेति तत्रैवायं विधिः । सर्पिषो नाथते, सर्पिर्नाथते । सर्पिर्मे भूयादित्याशास्त इत्यर्थः । आत्मन इत्येव । पुत्रमुपनाथति पाठाय । उपयाचते इत्यर्थः ।

५०७ स्मृत्यर्थदयेशः ॥२।२।११॥ स्मरणार्थानां दयतेरीशश्च व्याप्यं कर्म वा स्यात् । मातुः स्मरति, मातरं स्मरति । मातुः स्मर्यते, माता स्मर्यते । मातुर्ध्यायति, मातरं ध्यायति इत्यादि । सर्पिषो दयते, सर्पिर्दयते । लोकानामीष्टे, लोकानीष्टे ।

ननु कर्माविवक्षायां पक्षे माषाणामश्नीयादित्यादिवत् शेषषष्ठी सिद्धैव तत् किमनेन?। सत्यम्। किंतु 'षष्ठ्यप्रयत्नाच्छेषे' इति अप्रयत्नजे शेषे षष्ठ्याः समासो वक्ष्यते ततो मातुःस्मृतमित्यादौ समासो मा भूदित्यनेन प्रकारेण यत्नाच्छेषो विधीयते नियमार्थं च। तेनैषां धातूनां कर्मैव शेषत्वेन विवक्ष्यते न कारकान्तरं, तेन मात्रा स्मृतम् मनसा स्मृतमित्यादौ कर्तृकरणयोः शेषविवक्षाभावात् षष्ठी न भवति। व्याप्यमित्येव। कथामु स्मरति। गुणैः स्मरति।

५०८ **कृगः प्रतियत्ने** ॥२।२।१२॥ पुनर्यत्नः प्रतियत्नः। सतो गुणाधानायापायपरिहाराय वा समीहा। तस्मिन् वर्तमानस्य करोतेर्व्याप्यं कर्म वा स्यात्। एधोदकस्योपस्कुरुते। एधो दकमुपस्कुरुते। प्रतियत्न इति किम्। कटं करोति। व्याप्यमित्येव। एधो दकस्योपस्कुरुते बुद्ध्या। करणस्य मा भूत्।

५०९ **रुजार्थस्याज्वरिसंतापेर्भावे कर्तरि** ॥ २।२।१३ ॥ रुजा पीडा। तदर्थस्य धातोर्ज्वरिसंतापिवर्जितस्य व्याप्यं कर्मसंज्ञं वा स्यात् भावे कर्तरि–भावश्चेत् रुजार्थस्य कर्ता भवति। चौरस्य रुजति, चौरं वा रुजति रोगः। चौरस्य चौरं वा आमयति रोगः। रुजार्थस्येति किम्। एति जीवन्तमानन्दः। ज्वरिसंतापिवर्जनं किम्। आद्यूनं ज्वरयति। अत्याशिनं संतापयति। कर्तरीति किम्। चैत्रं रुजत्यत्यशने वातः। भाव इति किम्। मैत्रं रुजति श्लेष्मा। अत्र श्लेष्मा द्रव्यं न भावः। रोगो व्याधिरामयः शिरोऽर्तिरित्यादयो भावरूपाः कर्तारः।

५१० **जासनाटक्राथपिषो हिंसायाम्** ॥२।२।१४॥ एषां हिंसायां वर्तमानानां व्याप्यं वा कर्म स्यात्। ड्वुग्पिसजसबर्हण् हिंसायाम्, जसण् ताडने इति चुरादी गृह्येते, न जसूच् मोक्षणे इति दैवादिकस्तस्याहिंसार्थत्वात्। चौरस्योज्जासयति, चौरमुज्जासयति। चौरस्योज्जास्यते, चौर उज्जास्यते चैत्रेण। तथा नटण् अवस्यन्दने इति, अयमपि चुरादिर्नतु णट नृत्ताविति भ्वादिः। चौरस्योन्नाटयति, चौरमुन्नाटयति। एवं क्राथिर्घटादिः। चौरस्योत्क्राथयति, चौरमुत्क्रथयति। चौरस्य पिनष्टि, चौरं पिनष्टि। जासनाटक्राथानामाकारोपान्त्यनिर्देशो यत्राकारश्रुतिस्तत्र यथा स्यादित्येवमर्थः। तेनेह न भवति–दस्युमुदजीजसत्, चौरमनीनटत्, दस्युमुदचिक्रथत्। अत एव च क्राथेः कर्मसंज्ञाप्रतिषेधपक्षे ह्रस्वत्वाभावः। कर्मणि तु ह्रस्वत्वमेव। हिंसायामिति किम्। चौरं बन्धनाज्जासयति–मोचयतीत्यर्थः। नटं नाटयति–नर्तयतीत्यर्थः। अभावकर्तृकार्थं वचनम्।

५११ **निप्रेभ्यो घ्नः** ॥२।२।१५॥ निपाभ्यां परस्य हिंसायां वर्तमानस्य हन्तेर्व्याप्यं वा कर्म स्यात् । बहुवचनं समस्तव्यस्तविपर्यस्तसंग्रहार्थम् । चौरस्य चौरं वा निप्रहन्ति, निहन्ति, प्रहन्ति, प्रणिहन्ति । निप्रेभ्य इति किम् । चौरं हन्ति। हिंसायामित्येव । रागादीन् निहन्ति ।

५१२ **विनिमेयद्यूतपणं पण्यवहोः** ॥२।२।१६॥ विनिमयः क्रेयविक्रेयोऽर्थः । द्यूतपणो द्यूतजेयम् । पणतेर्व्यवपूर्वस्य च हरतेर्व्याप्यौ विनिमेयद्यूतपणौ वा कर्मसंज्ञौ स्याताम् । शतस्य पणायति शतं पणायति। सहस्रस्य सहस्रं वा पणायति। क्रयविक्रये द्यूतपणत्वे वा तद्विनियुङ्क्ते इत्यर्थः । एवं दशानां दश वा व्यवहरति। विनिमेयद्यूतपणमिति किम् । साधून् पणायति–स्तौतीत्यर्थः । शलाकां व्यवहरति–विगणयन् गोपायतीत्यर्थः । वचनभेदो यथासंख्यनिवृत्त्यर्थः ।

५१३ **उपसर्गादिवः** ॥२।२।१७॥ उपसर्गात् परस्य दिवो व्याप्यौ विनिमेयद्यूतपणौ कर्मसंज्ञौ वा स्याताम् । शतस्य शतं वा प्रदीव्यति । विनिमेयद्यूतपणमित्येव । शलाकां प्रतिदीव्यते, विगणयन्नपहरतीत्यर्थः । उपसर्गादिति किम् । शतस्य दीव्यति ।

५१४ **न** ॥२।२।१८॥ विनिमेयद्यूतपणौ दिवो व्याप्यौ कर्मसंज्ञौ न स्याताम्। उपसर्गपूर्वस्य विकल्पविधानादनुपसर्गस्यायं निषेधः । शतस्य दीव्यते । निषिद्धे च कर्मणि षष्ठ्येव भवति । शतस्य दीव्यते, शतस्य द्यूतम् , शतस्य देवितव्यम् । शतस्य सुदेवमित्यादौ भावे आत्मनेपदक्तकृत्यखलः सिद्धाः । शतस्य द्यूतो मैत्र इत्यत्र च कर्तरि क्तः । विनिमेयद्यूतपणमित्येव । जिनं दीव्यति स्तौतीत्यर्थः । भूमिं दीव्यति–संधिना विजिगीषते इत्यर्थः । संधिपणोऽत्र न द्यूतपणः । द्यूतं दीव्यति, अक्षान् दीव्यति, अत्र क्रिया तत्साधनं च व्याप्यं न तु पणः ।

५१५ **करणं च** ॥२।२।१९॥ दीव्यतेः करणं कर्मसंज्ञं चकारात् करणसंज्ञं च स्यात् कर्मकरणसंज्ञे युगपद् भजतीत्यर्थः। अक्षान् दीव्यति । अक्षाणां देवनम् । अक्षा दीव्यन्ते । अक्षा देवितव्याः। अक्षाः सुदेवाः। अक्षदेवः। अक्षा द्यूताश्चैत्रेण। एषु कर्मत्वे द्वितीयाषष्ठ्यात्मनेपदतव्यखलण्क्तप्रत्ययास्तन्निमित्ताः सिद्धाः। अक्षैर्दीव्यति। अक्षैर्देवनम् । अक्षैर्दीव्यते । अक्षैर्देवितव्यम् । अक्षैः सुदेवं मैत्रेण । अक्षैर्द्यूतं चैत्रेण । अक्षा देवनाः । एषु करणत्वे तृतीयानटौ भावे आत्मनेपदादयश्च सिद्धाः ।

आत्मनेपदादिभिश्चोक्तयोः कर्मकरणयोः द्वितीया षष्ठीतृतीया यथायोगं न भवन्ति। करणं वेत्येव सिद्धे चकारः संज्ञाद्वयसमावेशार्थः। तेनाक्षैर्देवयते मैत्रश्चैत्रेणेत्यत्र करणत्वात् तृतीया भवति। कर्मत्वाच्च गत्यादिसूत्रेण नित्याकर्मकलक्षणमणिकर्तुः कर्मत्वम्, देवयतेश्चाणिगि प्राणीत्यादिना अकर्मकलक्षणं परस्मैपदं न भवति। अथाक्षान् दीव्यतीत्यत्र सत्यपि संज्ञाद्वयसमावेशे परत्वात् करणत्वनिमित्तया तृतीययैव भवितव्यम्। नैवम्। स्पर्धे हि परः समानविषययोश्च स्पर्धः। न च द्वितीयातृतीययोः प्रतिनियतकर्मकरणशक्त्यभिधायिन्योः समानविषयत्वमस्तीति द्वितीयाऽपि भवत्येव। प्रतिकार्यं संज्ञा भिद्यन्ते इति वा दर्शनेऽनवकाशत्वात् संज्ञाद्वयस्य विभक्त्योः पर्यायेण प्रवृत्तिरविरुद्धा। दिव इत्येव। दात्रेण लुनाति। करणमिति किम्। गृहे दीव्यति।

५१६ अधेः शीङ्स्थास आधारः ॥२।२।२०॥ अधेः संबद्धानां शीङ्स्था आस् इत्येतेषां य आधारस्तत्कारकं कर्मसंज्ञं स्यात्। ग्राममधिशेते। ग्राममधितिष्ठति। ग्राममध्यास्ते। अधेरिति किम्। शयने शेते। गृहे तिष्ठति। कटे आस्ते। आधार इति किम्। ग्रामोऽधिशयितो मैत्रेण। पौरुषेणाधितिष्ठति। कर्तृकरणे न भवतः। अकर्मका अपि हि धातवः सोपसर्गाः सकर्मका भवन्तीति सिद्धं सकर्मकत्वम्। आधारबाधनार्थं तु वचनम्।

५१७ उपान्वध्याङ्वसः ॥२।२।२१॥ उप अनु अधि आङ्भिर्विशिष्टस्य वसतेर्य आधारः स कर्मसंज्ञः स्यात्। ग्राममुपवसति। पर्वतमनुवसति। पुरमधिवसति। आवसथमावसति। अन्वादिसाहचर्याद्उपस्य स्थानार्थकस्यैव ग्रहणं, नाशननिवृत्त्यर्थस्य। तेन ग्रामे उपवसति—भोजननिवृत्तिं करोतीत्यत्र न भवति। 'अदाद्यनदाद्योरनदादेरेव ग्रहणमिति' वस्तेर्न भवति।

५१८ वाभिनिविशः ॥२।२।२२॥ अभिनिनोपसर्गसमुदायेन विशिष्टस्य विशेराधारः कर्मसंज्ञो वा स्यात्। ग्राममभिनिविशते। व्यवस्थितविभाषेयं, तेन क्वचित् कर्मसंज्ञैव, क्वचिदाधारसंज्ञैव भवति। कल्याणेऽभिनिविशते।

५१९ कालाध्वभावं देशं वाऽकर्म चाकर्मणाम् ॥२।२।२३॥ कालो मुहूर्तादिः। अध्वा गन्तव्यं क्षेत्रं क्रोशादि। भावः क्रिया गोदोहादिः। देशो जनपदग्रामनदीपर्वतादिः। अकर्मकाणां धातूनां प्रयोगे कालादिराधारः कर्मसंज्ञो वा स्यात्

अकर्म च—यत्रापि पक्षे कर्मसंज्ञा तत्राकर्मसंज्ञापि वा भवतीत्यर्थः। मासमास्ते। मास आस्यते। योजनमास्ते। योजन आस्यते। गोदोहमास्ते। गोदोह आस्यते। कुरून् आस्ते। कुरव आस्यन्ते। अविवक्षितकर्माणः सकर्मका अपि अकर्मकाः। मासं पचति। मासः पच्यते। क्रोशमधीते। क्रोशोऽधीयते। ओदनपाकं पठति। ओदनपाकः पठ्यते। कुरून् पठति, कुरवः पठ्यन्ते। पक्षे रात्रौ सुप्यते। रात्रौ नृत्तं च द्रक्ष्यसि। क्रोशे सुप्यते। गोदोहे आस्ते। ओदनपाके स्वपिति। पञ्चालेषु वसति। ग्रामे वासः। कालाध्वभावदेशमिति किम्। प्रासादे आस्ते। शय्यायां शेते। अकर्म चेति किम्। मासमास्यते। क्रोशं सुप्यते। गोदोहमासितः। इदं गोदोहमासितम्। गोदोहमास्यते। कुरून् सुप्यते। एषु तत्साप्यानाप्यादिति गत्यर्थाकर्मकपिबभुजेः अद्यर्थाच्चाधारे इति भावे कर्तर्याधारे च यथायथमात्मनेपदक्तौ सिद्धौ। अकर्मणामिति किम्। रात्रावुदेशोऽधीतः। अहन्यध्ययनमधीतम्। कथं पचत्योदनं मासम्, भक्षयति धानाः क्रोशम्, पिबति पयो गोदोहम्, भजति सुखं कुरून्?। द्विकर्मकत्वात् कर्तुर्व्याप्यं कर्मेत्येव भविष्यति। अन्ये तु सकर्मकाणामकर्मकाणां च प्रयोगे कालाध्वभावानामत्यन्तसंयोगे सति नित्यं कर्मत्वमिच्छन्ति। मासमास्ते। दिवसं पचत्योदनम्। क्रोशं स्वपिति। क्रोशं पठति वेदम्। गोदोहमास्ते। गोदोहं पचत्योदनम्। अनेन कर्मसंज्ञायां कर्मणि त्यादयोऽपि। आस्यते मास इत्यादि। कालाध्वनोर्व्याप्तावितिं च गुणद्रव्ययोगे एवेच्छन्ति न तु क्रियायोगे। अत्यन्तसंयोगादन्यत्र तु रात्रौ शेते, अध्वनि स्थित इत्यादावाधारत्वमेव।

६२० **गौणात् समयानिकषाहाधिगन्तरान्तरेणातियेनतेनैर्द्वितीया** ॥२।३।३३॥ आख्यातपदेनासमानाधिकरणं गौणम्। गौणान्नाम्नः समयादिभिर्निपातैर्युक्तादेकद्विबहौ यथासंख्यं अमौशस्रूपा द्वितीया स्यात्। षष्ठ्यपवादः। समया पर्वतं नदी। निकषा पर्वतं वनम्। हा देवदत्तं वर्धते व्याधिः। धिग् जाल्मम्। अन्तरा निषधं नीलं च विदेहाः। अन्तरेण गंधमादनं माल्यवन्तं चोत्तराः कुरवः। अतिवृद्धं कुरून् महद् बलम्। कुर्वतिक्रमेण वृद्धमित्यर्थः। येन पश्चिमां गतः तेन पश्चिमां नीतः। अन्तरान्तरेण शब्दौ साहचर्यान्निपातौ गृह्येते। तथान्तराशब्दो मध्यमाधेयप्रदानमाचष्टे, अन्तरेणशब्दस्तच्च विनार्थं च। तेनेह न भवति। राजधान्या अन्तरायां पुरि वसति। किंते केशवार्जुनयोरन्तरेण गतेनेति। हा तात, धिग् जाल्म, हा सुभ्रु इत्यादावामन्त्र्यतया विवक्षा न हादियुक्तत्वेनेति न भवति। हा

कृतं चैत्रस्य, धिक् कृतं मैत्रस्येत्यत्र च हाधिक्शब्दाभ्यां कृतशब्दे न्यग्भूतत्वात् न चैत्रादेः साक्षाद्योगः, किंतर्हि तद्विशिष्टेन कृतशब्देन। बहुवचनादन्येनापि युक्ताद् भवति। न देवदत्तं प्रतिभाति किंचित्। बुभुक्षितं न प्रतिभाति किंचित्। तृणीष्व भद्रे प्रतिभाति यत्त्वाम्। योक्षपादमृषिं न्यायः प्रत्यभाद् वदतां वरम्। धातुसंबद्धोऽत्र प्रतिस्तेन ' भागिनि च प्रतिपर्यनुभिः ' इति न सिद्ध्यति। गौणादिति किम्। अन्तरा गार्हपत्यमावहनीयं च वेदिः। अत्र प्रधानाद्वेदिशब्दान्न भवति।

६२१ **द्वित्वेऽधोऽध्युपरिभिः** ॥२।२।३४॥ एभिर्युक्ताद् गौणान्नाम्न एषामेव द्वित्वे सति द्वितीया स्यात्। षष्ठ्यपवादः। बहुवचनमेकद्विबहाविति यथासंख्यनिवृत्त्यर्थम्। अधोऽधो ग्रामं ग्रामाः। अध्यधि ग्रामं क्षेत्राणि। उपर्युपरि ग्रामं ग्रामाः। द्वित्व इति किम्। अधः प्रासादस्य। हर्म्यस्योपरि प्रासादः। असामीप्याच्च द्वित्वं न भवति।

६२२ **सर्वोभयाभिपरिणा तसा** ॥२।२।३५॥ सर्वादिभिस्तसन्तैर्युक्ताद् गौणान्नाम्नो द्वितीया स्यात्। षष्ठ्यपवादः। सर्वतो ग्रामं वनानि। उभयतो ग्रामं वनानि। अभितो ग्रामं क्षेत्राणि। परितो ग्रामं क्षेत्राणि।

६२३ **लक्षणवीप्स्येत्थंभूतेष्वभिना** ॥२।२।३६॥ लक्ष्यते दर्श्यते येन तल्लक्षणं–चिह्नम्। अवयवशः समुदायस्य क्रियादिना साकल्येन प्राप्तीच्छा वीप्सा, तत्कर्म वीप्स्यम्। केनचित् विवक्षितेन विशेषेण भाव इत्थंभावस्तद्विषय इत्थंभूतः। एष्वर्थेषु वर्तमानादभिना युक्ताद् गौणान्नाम्नो द्वितीया स्यात्। वृक्षमभि विद्योतते विद्युत्। अत्र वृक्षो लक्षणम्। विद्योतमाना विद्युल्लक्ष्यम्। अनयोश्च लक्ष्यलक्षणभावः संबंधोऽभिना द्योत्यते। वृक्षं वृक्षमभि सेकः। एकैकस्य वृक्षस्य सेक इत्यर्थः। साधुर्देवदत्तो मातरमभि। मातृविषये साधुत्वे प्रकारं प्राप्त इत्यर्थः। लक्षणादिष्विति किम्। यदत्रममाभि स्यात् तदीयताम्। अत्राभिना भागसंबंधो द्योत्यते। योऽत्र मम भागः स्यादित्यर्थः। अत्रापि बहुवचनं यथासंख्याभावार्थम्। एवमुत्तरत्र।

६२४ **भागिनि च प्रतिपर्यनुभिः** ॥२।२।३७॥ स्वीक्रियमाणोंऽशो भागः तत्स्वामी भागी, तत्र लक्षणादिषु चार्थेषु वर्तमानात् प्रतिपर्यनुभिर्युक्तात् गौणान्नाम्नो द्वितीया स्यात्। यदत्र मां प्रति मां परि मामनु स्यात्। योऽत्र मम भाग

आभवति स दीयतामित्यर्थः। लक्षणे–वृक्षं प्रतिपर्यनु वा विद्योतते विद्युत्। वीप्स्ये वृक्षं वृक्षं प्रतिपर्यनु वा सेचनम्। इत्थंभूते–साधुर्देवदत्तो मातरं प्रतिपर्यनु वा। एतेष्विति किम्। अनुवनस्याश्रमनिर्गता। समीप इत्यर्थः।

५२५ हेतुसहार्थेऽनुना ॥२।२।३८॥ हेतुर्जनकः सहार्थस्तुल्ययोगो विद्यमानता च तद्विषयोऽपि सहार्थ उपचारात्। तयोर्वर्तमानादनुना युक्ताद् गौणान्नाम्नो द्वितीया स्यात्। जिनजन्मोत्सवमन्वागच्छन् सुराः। देवेन्द्रोपपाताध्ययनमन्वागच्छद्देवेन्द्रः। तेन हेतुनेत्यर्थः। पर्वतमन्ववसिता सेना। नदीमन्ववसिता सेना। पर्वतनदीभ्यां सह संबद्धेत्यर्थः। अन्ये तु तृतीयार्थमात्र इच्छन्ति। पर्वतमन्ववसिता सेना। पर्वतेन कर्त्रा करणेन वा कृतान्तेत्यर्थः। तृतीयापवादो योगः।

५२६ उत्कृष्टेऽनूपेन ॥२।२।३९॥ उत्कृष्टेऽर्थे वर्तमानात् अनूपाभ्यां युक्ताद् गौणान्नाम्नो द्वितीया स्यात्। अनु सिद्धसेनं कवयः। उपोमास्वातिं संग्रहीतारः। ताभ्यामन्ये हीना इत्यर्थः।

५२७ क्रियाविशेषणात् ॥२।२।४१॥ क्रियाया यद्विशेषणं तद्वाचिनो गौणान्नाम्नो द्वितीया स्यात्। मृदु पचति। अथो पचति शोभनं ते भार्या। अत्र 'सपूर्वात् प्रथमान्ताद्वे'ति विकल्पो न भवति। द्वितीयार्थं च वचनं न कर्मसंज्ञार्थम्, तेन कृद्योगे कर्मनिमित्ता षष्ठी न भवति। ओदनस्य शोभनं पक्तेत्यादौ चतुर्थी न भवति।

५२८ कालाध्वनोर्व्याप्तौ ॥२।२।४२॥ स्वेन संबंधिना द्रव्यगुणक्रियारूपेण कार्त्स्न्येन संबंधो व्याप्तिः। अत्यन्तसंयोग इति यावत्। तस्यां द्योत्यायां कालेऽध्वनि च वर्तमानाद् गौणान्नाम्नो द्वितीया स्यात्। मासं गुडधानाः। मासमधीते। क्रोशं पर्वतः। क्रोशं कुटिला नदी। कालाध्वनोरिति किम्। स्थाल्यां पचति। व्याप्ताविति किम्। मासस्य मासे वा द्व्यहं गुडधानाः। क्रोशस्य क्रोशे वा एकदेशे पर्वतः। षष्ठ्याः सप्तम्या वा अयमपवादः। तेन मासमधीते, क्रोशमधीते इत्यकर्मकत्व इदमुदाहरणम्। कर्मत्वे कर्मणीत्येव द्वितीया सिद्धा। भावादपीच्छन्त्यन्ये। गोदोहं वक्रः। गोदोहं बुद्बुदाः।

५२९ सिद्धौ तृतीया ॥२।२।४३॥ सिद्धौ-क्रियाफलसिद्धौ द्योत्यायां कालाध्ववाचिनो गौणान्नाम्नः ताभ्याम्भिस्लक्षणा यथासंख्यमेकद्विबहौ तृतीया स्यात्

व्याप्तौ गम्यायाम् । मासेन, मासाभ्यां मासैर्वावश्यकमधीतम् । सिद्धाविति किम्। मासमधीत आचारो नानेन गृहीतः । अत्र व्याप्तिमात्रं गम्यते न सिद्धिः । भावादपीच्छन्त्यन्ये । गोदोहेन कृतः कटः । द्वितीयापवादो योगः ।

५३० हेतुकर्तृकरणेत्थंभूतलक्षणे ॥२।२।४४॥ फलसाधनयोग्यः पदार्थो हेतुः । कर्तृलक्षणं तूक्तमेव । करणलक्षणमनुपदमेव वक्ष्यते । इमं कंचित्प्रकारं भूत आपन्न इत्थंभूतः, स लक्ष्यते येन स इत्थंभूतलक्षणः । हेत्वादिष्वर्थेषु वर्तमानाद् गौणान्नाम्नस्तृतीया स्यात्। तत्र हेतौ—धनेन कुलम्। कर्तरि—चैत्रेण कृतम् ।

५३१ साधकतमं करणम् ॥२।२।२४॥ क्रियासिद्धौ यत् प्रकृष्टोपकारकत्वेनाव्यवधानेन विवक्षितं तत् साधकतमं कारकं करणसंज्ञं स्यात् । काष्ठैः स्थाल्यां पचति । अस्य पाकादिक्रियासु ज्वलनादयोऽवान्तरव्यापाराः । विवक्षया च प्रकृष्टोपकारकत्वात् साधकतमत्वम् । तमग्रहणमपादानादिसंज्ञाविधौ तरतमयोगो नास्तीति ज्ञापनार्थम् । तेन कुसूलात् पचति, गङ्गायां घोषः प्रतिवसतीति व्यवहितयोरपि अपादानत्वमधिकरणत्वं च भवति । अस्य च कारकान्तरापेक्षया प्रकर्षो न स्वकक्षायाम् । तेनैकस्यां क्रियायामनेकमपि करणं भवति । नावा नदीस्रोतसा व्रजति, रथेन पथा दीपिकया यातीत्यादि । इत्थंभूतलक्षणे—अपि भवान् कमण्डलुना छात्रमद्राक्षीत् । छात्रत्वादिकं प्रकारमापन्नस्य मनुष्यस्य कमण्डल्वादिलक्षणम् । इत्थंभूतग्रहणं किम् । दृक्षं प्रति विद्योतनम्। अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षीदित्यत्र तु लक्ष्यप्रधानो निर्देशो न लक्षणप्रधान इति न भवति । ' सहार्थे ' इत्येव तृतीया सिद्ध्यति लक्ष्यलक्षणभावे तु षष्ठी मा भूदितीत्थंभूतलक्षणग्रहणम् । तथा धान्येनार्थः, धान्येनार्थी, मासेन पूर्वः, मासेनावर इत्यादौ कृतभवत्यादिगम्यमानक्रियापेक्षया कर्तरि करणे वा तृतीयेति ।

५३२ सहार्थे ॥२।२।४५॥ सहार्थस्तुल्ययोगो विद्यमानता च । तस्मिन् शब्दादर्थाद्वा गम्यमाने गौणान्नाम्नस्तृतीया स्यात् । पुत्रेण सहागतः ।

' एकेनापि सुपुत्रेण सिंही स्वपिति निर्भरम् ।
सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ' ॥

अर्थग्रहणात् पुत्रेण साकम् इत्यादावपि भवति । अर्थाद् गम्यमाने—पुत्रेणागतः, वृद्धो यूनेत्यादावपि सहार्थोऽस्ति। सुखेनास्ते, दुःखेन जीवती-

त्यादावास्यादिक्रियाभिः सह सुखादेः सहार्थोऽस्ति। क्रियाविशेषणत्वविवक्षायां तु द्वितीयैव। सुखमास्ते इत्यादि। गौणादित्येव। सहोभौ चरतो धर्मम्। चैत्रमैत्राभ्यां सह कृतमिति तु कर्तर्येव तृतीया।

५३३ **यद्भेदैस्तद्वदाख्या** ॥२।२।४६॥ यस्य भेदिनः प्रकारवतोऽर्थस्य भेदैः प्रकारैर्विशेषैस्तद्वतः—तत्प्रकारवदर्थयुक्तस्याख्या निर्देशो भवति तद्वाचिनो गौणान्नान्नस्तृतीया स्यात्। अक्ष्णा काणः। पादेन खञ्जः, इत्यादिषु सर्वत्र पुरुषस्तद्वान् संबध्यते। यद् ग्रहणं प्रकृतिनिर्देशार्थम् तत इत्याक्षेपात्। भेदग्रहणं किम्। यष्टीः प्रवेशय। तद्ग्रहणं किम्। अक्षि काणं पश्य। आख्याग्रहणं प्रसिद्धिपरिग्रहार्थम्। तेनाक्ष्णा दीर्घ इति न भवति। कृतभवत्यादिक्रियाध्याहारेण कर्तृकरणयोस्तृतीया सिद्धैव संबंधषष्ठीनिवृत्त्यर्थं तु वचनम्।

५३४ **कृताद्यैः** ॥२।२।४७॥ कृत इत्येवंप्रकारैर्निषेधार्थैर्युक्ताद् गौणान्नान्नस्तृतीया स्यात्। कृतं तेन। भवतु तेन। अलमतिप्रसङ्गेन। किं गतेन। कृत, कृतम्, भवतु, अलम्, किम्—एवंप्रकाराः कृतादयः।

५३५ **काले भान्नवाधारे** ॥ २।२।४८ ॥ काले वर्तमानान्नक्षत्रवाचिनो गौणान्नान्न आधारे तृतीया वा स्यात्। पुष्येण पायसमश्नीयात्। पुष्ये पायसमश्नीयात्। काल इति किम्। पुष्येऽर्कः, मघासु ग्रहः। अध्वनि मा भूत्। चित्रासु जाता चित्रा माणविका तस्यां चित्रायामास्ते। अत्र माणविकायां मा भूत्। भादिति किम्। 'तिलपुष्पेषु यत्क्षीरं तिलच्छेदेषु यद्दधि'। अत्र तिलपुष्पतिलच्छेदशब्दौ स्वावच्छिन्ने काले वर्तेते इति प्राप्नोति। आधार इति किम्। अद्य पुष्यं विद्धि। स्थाल्या पच्यते इत्यादिवत् आधारस्य करणविवक्षायां तृतीया सिद्धयति संबंधविवक्षायां तु षष्ठी मा भूदिति वचनम्।

५३६ **व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम्** ॥२।२।५०॥ व्याप्ये वर्तमानेभ्यो द्विद्रोणादिभ्यो गौणनामभ्यो वीप्सायां तृतीया वा स्यात्। द्विद्रोणेन धान्यं क्रीणाति। द्विद्रोणं द्विद्रोणं क्रीणाति। तृतीया वीप्सायां विहितेति तृतीयान्तस्य पदस्य द्विर्वचनं न भवति। द्वितीया तु कर्मणि विहिता न वीप्सायामतस्तदन्तस्य द्विर्वचनं भवति। एवं पञ्चकेन पशून् क्रीणाति। पञ्चकं२क्रीणाति। द्विद्रोणादयः प्रयोगगम्याः।

५३७ **समो ज्ञोऽस्मृतौ वा** ॥२।२।५१॥ अस्मृतौ वर्तमानस्य संपूर्वस्य जानातेर्यद् व्याप्यं तत्र वर्तमानाद् गौणान्नान्नस्तृतीया वा स्यात्। मात्रा मातरं वा संजानीते। सम इति किम्। मातरं जानाति। ज्ञ इति किम्। मातरं संवेत्ति। अस्मृताविति किम्। मातरं मातुर्वा संजानाति। स्मरतीत्यर्थः। व्याप्य इत्येव। मातरं स्वरेण संजानीते–अत्र करणे विकल्पो न भवति। मातुः संज्ञातेति कृति परत्वात् षष्ठी। नवाधिकारे वाग्रहणमुत्तरत्र तन्निवृत्त्यर्थम्।

५३८ **दामः संप्रदानेऽधर्म्य आत्मने च** ॥ २।२।५२॥ संपूर्वस्य दामः संप्रदानेऽधर्म्यरूपे वर्तमानान्नान्नस्तृतीया स्यात्, तत्संनियोगे च दाम आत्मनेपदं स्यात्। दास्या संप्रयच्छते। कामुकः सन् द्रव्यं दास्यै ददातीत्यर्थः। दाम इति किम्। दास्यै संददाति। संप्रदान इति किम्। द्रव्यं वृषल्या संप्रयच्छते–कर्मणि मा भूत्। अधर्म्य इति किम्। पत्न्यै संप्रयच्छति। सम इत्येव। दास्यै प्रयच्छति। इह संपूर्वस्य दामः प्रशब्दव्यवधानमन्तरेण प्रयोगाभावात् तद्व्यवधानेऽपि भवति।

५३९ **कर्माभिप्रेयः संप्रदानम्** ॥२।२।२५॥ कर्मणा व्याप्येन क्रियया वा करणभूतेन यमभिप्रेयते श्रद्धानुग्रहादिकाम्यया यमभिसंबध्नाति स कर्माभिप्रेयः कारकं संप्रदानसंज्ञं स्यात्।

५४० **चतुर्थी** ॥२।२।५३॥ संप्रदाने वर्तमानाद् गौणान्नान्नश्चतुर्थी स्यात्। द्विजाय गां ददाति। कर्माभिप्रेयः खल्वपि संप्रदानम्। पत्ये शेते।

५४१ **स्पृहेर्व्याप्यं वा** ॥२।२।२६॥ स्पृहयतेर्धातोर्व्याप्यं वा संप्रदानं स्यात्। पुष्पेभ्यः पुष्पाणि वा स्पृहयति। व्याप्यमिति किम्। पुष्पेभ्यः स्पृहयति वने। आधारस्य मा भूत्। संप्रदानसंज्ञापक्षे धातोरकर्मकत्वम्। तेन पुष्पेभ्यः स्पृह्यते मैत्रेण, पुष्पेभ्यः स्पृहयितव्यम्, पुष्पेभ्यः सुस्पृहम्, पुष्पेभ्यः स्पृहितो मैत्रः-एषु भावे आत्मनेपदतव्यखलः कर्तरि च क्तः सिद्धाः।

५४२ **क्रुद्रुहेर्ष्यासूयार्थैर्यं प्रति कोपः** ॥२।२।२७॥ अमर्षः क्रोधः। अपचिकीर्षा द्रोहः। ईर्ष्या परसंपत्तौ चेतसो व्यारोषः। गुणेषु दोषाविष्करणमसूया। एतदर्थैर्धातुभिर्योगे यं प्रति कोपस्तत्कारकं संप्रदानं स्यात्। मैत्राय क्रुध्यति, रुष्यति, द्रुह्यति, अपचिकीर्षति, अपकरोति, ईर्ष्यति, ईर्ष्यति, असूयति। यं प्रतीति किम्। मनसा क्रुध्यति। करणस्य मा भूत्। प्रतिग्रहणं किम्। यस्मिन्नित्युच्यमाने कर्तुरपि स्यात्। मैत्रेण क्रुध्यते। कोप इति किम्। शिष्यस्य

कुप्यति विनयार्थम् । संप्रदानसंज्ञया कर्मसंज्ञाया बाधितत्वात् भावे आत्मनेपदादयः कर्तरि च क्तः सिद्धः । मैत्रायेर्ष्यते इत्यादि । कथं चौरस्य द्विषन्, योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति । द्विषेरप्रीत्यर्थत्वान्न भविष्यति ।

५४३ **नोपसर्गात् क्रुद्रुहा** ॥२।२।२८॥ उपसर्गात् पराभ्यां क्रुधिद्रुहिभ्यां योगे यं प्रति कोपस्तत् कारकं संप्रदानसंज्ञं न स्यात् । मैत्रमभिक्रुध्यति । मैत्रमभिद्रुह्यति । क्रुधिद्रुही सोपसर्गौ सकर्मकाविति द्वितीया । उपसर्गादिति किम् । मैत्राय क्रुध्यति, द्रुह्यति ।

५४४ **तादर्थ्ये** ॥२।२।५४॥ किञ्चिद् वस्तु संपादयितुं यत्प्रवृत्तं तत्तदर्थम् । तस्य भावे तादर्थ्ये संबंधविशेषे द्योत्ये गौणान्नाम्नः षष्ठ्यवादश्चतुर्थी स्यात् । यूपाय दारु ।

५४५ **रुच्यर्थैर्धारिभिः प्रेयविकारोत्तमर्णेषु** ॥२।२।५५॥ रुच्यर्थैः कृप्यर्थैर्धारिणा च धातुना योगे यथाक्रमं प्रेये विकारे उत्तमर्णे च वर्तमानाद् गौणान्नाम्नश्चतुर्थी स्यात् । वचनसाम्यं यथासंख्यार्थम् । बहुवचनं तु एकद्विबहाविति यथासंख्याभावार्थम् । रुच्यर्थैः प्रेये—प्रीयमाणे—जिनदत्ताय रोचते धर्मः । गुरुदत्ताय स्वदते दधि । तस्याभिलाषमुत्पादयतीत्यर्थः । प्रेय इति किम् । चैत्राय रोचते मोदको माधुर्येण । माधुर्यशब्दान्न भवति । प्रेयसंबंधादभिलाषकरणार्थस्य रुचेर्ग्रहणम्, तेनेह न भवति । सर्वेषामेतद्रोचते कथं वा तवेति । प्रतिभातीत्यर्थः । कथं—

> 'रोचते मम घृतं सह मुद्गैः शालयो दधिशरं कुकुराश्च ।
> घृतमेव ममापि रोचते घृतशीतं च सशर्करं पयः' ॥

संबंधमात्रविवक्षायामत्र षष्ठ्येव भविष्यति । कृप्यर्थैर्विकारे—मूत्राय कल्पते यवागूः । उच्चाराय संपद्यते यवान्नम् । तद्विकाररूपमापद्यत इत्यर्थः । विकार इति किम् । चैत्रस्य कल्पन्ते धनानि, संपद्यन्ते शालयः । गौणादित्येव । मूत्रमिदं संपद्यते यवागूः । धारिणोत्तमर्णे—चैत्राय शतं धारयति । उत्तमर्ण इति किम् । शतशब्दान्न भवति । उत्तमर्णो धनिकः ।

५४६ **प्रत्याङ्भ्यश्रुवार्थिनि** ॥ २।२।५६ ॥ प्रत्याङ्भ्यां परेण शृणोतिना

युक्तादर्थिन्यभिलाषुके वर्तमानाद् गौणान्नाम्नश्चतुर्थी स्यात्। द्विजाय गां प्रतिशृणोति, आशृणोति। याचितोऽयाचितो वा प्रतिजानीते इत्यर्थः। प्रत्याङ इति किम्। चैत्रस्य शृणोति। अर्थिनीति किम्। द्विजाय गां प्रतिशृणोतीत्यत्र गवि मा भूत्।

६४७ प्रत्यनोर्गृणाख्यातरि ॥ २।२।६७ ॥ प्रत्यनुभ्यां परेण गृणातिना योगे आख्यातरि वर्तमानाद् गौणान्नाम्नश्चतुर्थी स्यात्। आचार्याय प्रतिगृणात्यनुगृणाति। आचार्योक्तमनुवदति, प्रशंसन्तं वा प्रोत्साहयति इत्यर्थः। प्रत्यनोरिति किम्। आचार्यो गृणाति। आख्यातरीति किम्। आचार्याय मनसा प्रतिगृणातीत्यत्र मनसि मा भूत्।

६४८ यद्वीक्ष्ये राधीक्षी ॥२।२।६८॥ वीक्ष्यं विमतिपूर्वकं निरूपणीयम्। विमर्शविषय इति यावत्। तद्विषया क्रियापि वीक्ष्यम्। यत्संबंधिनि वीक्ष्ये राध्यतिरीक्षतिश्च वर्तते तस्मिन् वर्तमानाद् गौणान्नाम्नः सामर्थ्याद् राधीक्षिभ्यामेव युक्ताच्चतुर्थी स्यात्। मैत्राय राध्यतीक्षते वा। तस्य दैवं पर्यालोचयतीत्यर्थः। स्त्रीभ्य ईक्षते। स्त्रीणामभिप्रायः कीदृश इति विमतिपूर्वकं निरूपयतीत्यर्थः। 'ईक्षितव्यं परस्त्रीभ्यः स्वधर्मो रक्षसामयम्'—परस्त्रीणामभिप्राये यत् संदेहादीक्षितव्यं निरूपितव्यं किमेवं करोषि नवेति तद्रक्षसां कुलधर्मो न दोषः। दैवे एवेक्ष्ये इच्छन्त्येके। राधीक्ष्यर्थधातुयोगेऽपि इच्छन्त्येके। मैत्राय राधयति साधयति पश्यति जानीत इति चोदाहरन्ति। यद्ग्रहणं किम्। मैत्रस्य शुभाशुभमीक्षते। शुभाशुभान्मा भूत्। मैत्रात्तु राधीक्षिभ्यां योगाभावादेव न भवति। वीक्ष्यग्रहणं किम्। मैत्रमीक्षते। राधीक्ष्यर्थविषयात् विमृष्टव्यादिच्छत्यन्यः। लाभाय राध्यति, राधयति, साधयति, ईक्षते, पश्यति वा।

६४९ उत्पातेन ज्ञाप्ये ॥२।२।६९॥ उत्पात आकस्मिकं निमित्तम्। तेन ज्ञाप्ये—ज्ञाप्यमानेऽर्थे वर्तमानाद् गौणान्नाम्नश्चतुर्थी स्यात्।

'वाताय कपिला विद्युत् आतपायातिलोहिनी।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्'॥

वातादयः स्वकारणेभ्य एवोत्पद्यन्ते, विद्युता तु ज्ञाप्यन्ते, इति तादर्थ्यं नास्ति। उत्पातेनेति किम्। राज्ञ इदं छत्रमायातं विद्धि राजानम्। षष्ठ्यपवादो योगः।

६६० **श्लाघह्नुङ्स्थाशपां प्रयोज्ये** ॥ २।२।६० ॥ ज्ञाप्य इत्यनुवर्तते। श्लाघादिभिर्युक्ताद् ज्ञाप्ये प्रयोज्येऽर्थे वर्तमानाद् गौणान्नाम्नश्चतुर्थी स्यात्। मैत्राय श्लाघते, न्हुते, तिष्ठते, शपते। श्लाघान्हवस्थानशपथान् कुर्वाण आत्मानं परं वा ज्ञाप्यं जानन्तं मैत्रं प्रयोजयतीत्यर्थः। प्रयोज्य इति किम्। मैत्रायात्मानं श्लाघते। मैत्राय शतं न्हुते। आत्मादौ मा भूत्। केचित्त्वप्रयोज्यो यो ज्ञाप्यो य आख्यायते तत्रैवेच्छन्ति।

६६१ **तुमोऽर्थे भाववचनात्** ॥२।२।६१॥ क्रियायां क्रियार्थायामुपपदे तुम् वक्ष्यते तस्यार्थे ये भाववाचिनो घञादयः प्रत्यया विधास्यन्ते तदन्ताद् गौणान्नाम्नः स्वार्थे चतुर्थी स्यात्। पाकाय याति। पक्तुं व्रजतीत्यर्थः। तादर्थ्यस्य प्रत्ययेनैवोक्तत्वात् चतुर्थी न प्राप्नोति इति शेषषष्ठी हेतुहेतुमद्भावविवक्षायां वा हेतुतृतीया स्यादिति चतुर्थ्यर्थं वचनम्। तुमोर्थ इति किम्। अध्ययनेन वसति। नात्र क्रियायां क्रियार्थायामुपपदे प्रत्ययो विहितः किं तर्हि भावमात्रे पश्चात्तु क्रियायाभिसंबंध इति हेतौ तृतीयैव भवति। भाववचनादिति किम्। पक्ष्यतीति गां दास्यतीति च पाचकस्य व्रज्या, गोदायस्य परिसर्या। तुम इति व्यस्तनिर्देश उत्तरार्थः।

६६२ **गम्यस्याप्ये** ॥२।२।६२॥ यस्यार्थो गम्यते न च शब्दः प्रयुज्यते स गम्यः, तस्य तुमो यदाप्यं—व्याप्यं तत्र वर्तमानाद् गौणान्नाम्नश्चतुर्थी स्यात्। द्वितीयापवादः। एधेभ्यो, फलेभ्यो वा व्रजति। एधान् फलानि वाहर्तुं व्रजतीत्यर्थः। गम्यस्येति किम्। एधानाहर्तुं व्रजति। आप्य इति किम्। एधेभ्यो व्रजति शकटेन। करणान्मा भूत्। तुम इत्येव। प्रविश पिण्डीं द्वारम्। अत्र भक्षयेति पिधेहीति च गम्यम्।

६६३ **गतेर्नवाऽनाप्ते** ॥२।२।६३॥ गतिः पादविहरणं तस्या गतेराप्येऽनाप्तेऽसंप्राप्ते वर्तमानाद् गौणान्नाम्नश्चतुर्थी वा स्यात्। ग्रामं ग्रामाय वा गच्छति। नगरं नगराय वा व्रजति। गतेरिति किम्। आदित्यं पश्यति। मनसा मेरुं गच्छतीत्यत्र ज्ञानार्थो गमिः। आप्य इत्येव। ग्रामादागच्छति। अनाप्त इति किम्। पन्थानं गच्छति। क्रियोगे तु परत्वात् षष्ठ्येव भवति। ग्रामस्य गन्ता, द्वितीयैवेत्यन्ये। ग्रामं गन्ता। चतुर्थी चेत्यन्ये। ग्रामं ग्रामाय वा गन्तेति।

६६४ **मन्यस्यानावादिभ्योऽतिकुत्सने** ॥२।२।६४॥ अतीव कुत्स्यतेऽ

नेनेत्यतिकुत्सनम्। तस्मिन् मन्यतेराप्ये वर्तमानान्नावादिगणवर्जितात् गौणान्नाम्नश्चतुर्थी वा स्यात्। न त्वा तृणाय तृणं वा मन्ये। न त्वा शुने श्वानं वा मन्ये। तृणाद्यपि न मन्ये, तृणादेरपि निकृष्टं मन्य इति कुत्सयते। मन्यस्येति किम्। न त्वां तृणं चिन्तयामि। श्यनिर्देशः किम्। न त्वा तृणं मन्वे। अनावादिभ्य इति किम्। न त्वा नावम्, अन्नं, शुकं, शृगालं, काकं वा मन्ये। नावन्नयोरपि परप्रणेयतानायासोच्छेद्यतादिभिरतिकुत्सनत्वं भवति। कुत्सन इति किम्। न त्वा रत्नं मन्ये। रत्नादिभ्योऽपि त्वदादीन् अधिकान् मन्य इति प्रशंसा। कुत्स्यत अनेनेति करणाश्रयणं किम्। न त्वा तृणाय मन्य इति युष्मदो न भवति। अतिग्रहणं किम्। त्वां तृणं मन्ये। अत्र नञ्प्रयोगाभावे साम्यमात्रं प्रतीयते न त्वतिकुत्सा। कुत्सामात्रेऽपीच्छन्त्येके। तृणाय त्वां मन्ये। न त्वा तृणस्य मन्तेति कृद्योगे परत्वात् षष्ठी। चतुर्थ्यपीति कश्चित्। न तव बुसाय मन्ता। उक्तकर्मणि तु न त्वं बुसो मन्यसे मया, न चैत्रः श्वा मन्यते मया, नाहं बुसो मन्ये वृषलेनेत्यतिकुत्सनात् प्रथमेति। बहुवचनमाकृतिगणार्थम्।

५५५ **हितसुखाभ्याम्** ॥२।२।६५॥ हितसुखाभ्यां युक्ताद् गौणान्नाम्नश्चतुर्थी वा स्यात्। आतुराय आतुरस्य वा हितम्। चैत्राय चैत्रस्य वा सुखम्।

५५६ **तद्व्द्रायुष्यक्षेमार्थार्थेनाशिषि** ॥२।२।६६॥ तदिति हितसुखयोः परामर्शः। अर्थशब्दः प्रत्येकमभिसंबध्यते। हिताद्यर्थैर्युक्ताद् गौणान्नाम्न आशिषि गम्यमानायां चतुर्थी वा स्यात्। हितं पथ्यं जीवेभ्यो जीवानां वा भूयात्। शं शर्म प्रजाभ्यो प्रजानां वा भूयात्। भद्रं मद्रं कल्याणं जिनशासनाय जिनशासनस्य वास्तु। आयुष्यं दीर्घमायुरस्तु चैत्राय चैत्रस्य वा। क्षेमं कुशलं संघाय संघस्य वा भूयात्। अर्थः प्रयोजनं मैत्राय मैत्रस्य वा भूयात्। आशिषीति किम्। आयुष्यं प्राणिनां घृतम्। तत्त्वाख्याने न भवति। हितसुखशब्दाभ्यां पूर्वेण विकल्पः सिद्ध एव, तदर्थार्थं तु तद्ग्रहणम्।

५५७ **परिक्रयणे** ॥२।२।६७॥ परिक्रीयते नियतकालं स्वीक्रियते येन तत् परिक्रयणं वेतनादि। तस्मिन् वर्तमानाद् गौणान्नाम्नश्चतुर्थी वा स्यात्। शताय शतेन वा परिक्रीतः। शतादिना नियतकालं स्वीकृत इत्यर्थः। परीति किम्। शतेन क्रीणाति। क्रयस्यात्र करणं न परिक्रयस्य। करणाश्रयणं किम्। शताय परिक्रीतो मासम्।

५६८ **शक्तार्थवषट्नमःस्वस्तिस्वाहास्वधाभिः** ॥२।२।६८॥ शक्तार्थैर्वषडादिभिश्च शब्दैर्युक्ताद् गौणान्नाम्नश्चतुर्थी स्यात्। पृथग्योगाद्वेति निवृत्तम्। शक्नोति प्रभवति मैत्रश्चैत्राय। अलं, समर्थः, प्रभुर्मल्लो मल्लाय। वषडग्नये। नमोऽर्हद्भ्यः। स्वस्ति प्रजाभ्यः। इन्द्राय स्वाहा। पितृभ्यः स्वधा। स्वस्तिशब्दः क्षेमार्थः। तद्योगे आशिष्यपि परत्वान्नित्यमेव। स्वस्ति संघाय भूयात्। तृतीयया योगाभिधानादिह न भवति। नमो जिनायतनेभ्यः। नात्र जिनानां नमसा योगः। नमस्यति जिनानित्यत्रापि नमस्यधातुना योगो न नमसा। यद्येवं कथं स्वयंभुवे नमस्कृत्येति?। नानेनात्र चतुर्थी किंतु नमस्कृतिलक्षणक्रिययाभिप्रेयमाणत्वात् संप्रदानत्वे 'चतुर्थी'त्यनेनैव। स्वयंभुवं नमस्कृत्येत्यत्र तु क्रियाभिप्रेयत्वाविवक्षायां द्वितीयैव।

५६९ **अपायेऽवधिरपादानम्** ॥२।२।२९॥ सावधिकं गमनमपायः। तत्र यदवधिभूतमपायेनानधिष्ठितं तत्कारकमपादानसंज्ञं स्यात्।

५६० **पञ्चम्यपादाने** ॥२।२।६९॥ अपादाने कारके गौणान्नाम्नः पंचमी स्यात्। अपादानं त्रिविधम्। निर्दिष्टविषयं, उपात्तविषयं अपेक्षितक्रियं च। यत्र धातुनाऽपायलक्षणो विषयो निर्दिष्टस्तन्निर्दिष्टविषयम्। यथा ग्रामादागच्छति। यत्र तु धातुर्धात्वन्तरार्थाङ्गं स्वार्थमाह तदुपात्तविषयम्। यथा बलाहकाद् विद्योतते विद्युत्। अत्र हि निःसरणाङ्गे विद्योतने विद्युतिर्वर्तते। यथा वा कुमूलात् पचति। अत्राप्यादानाङ्गे पाके पचिर्वर्तते। यत्र तु क्रियावाचि पदं न श्रूयते केवलं क्रिया प्रतीयते तदपेक्षितक्रियम्। यथा सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतराः। अपायश्च कायसंसर्गपूर्वको बुद्धिसंसर्गपूर्वको वा विभाग उच्यते, तेन बुद्ध्या समीहितैकत्वान् पञ्चालान् कुरुभिर्यदा बुद्ध्या विभजते वक्ता तदापायः प्रतीयत इति अत्रापादानत्वं भवति। एवम्—अधर्माज्जुगुप्सते, अधर्माद् विरमति, धर्मात् प्रमाद्यति। अत्र यः प्रेक्षापूर्वकारी भवति स दुःखहेतुमधर्मं बुद्ध्या नानेन कृत्यमस्तीति ततो निवर्तते। नास्तिकस्तु बुद्ध्या धर्मं प्राप्य नैनं करिष्यामीति ततो निवर्तत इति निवृत्त्यङ्गेषु जुगुप्साविरामप्रमादेष्वेते धातवो वर्तन्त इति बुद्धिसंसर्गपूर्वकोऽपायः। तथा चौरेभ्यो बिभेति, चौरेभ्य उद्विजते, चौरेभ्यस्त्रायते, चौरेभ्यो रक्षति—अत्र बुद्धिमान् वधबंधपरिक्लेशकारिणश्चौरान् बुद्ध्या प्राप्य तेभ्यो निवर्तते। चौरेभ्यस्त्रायते इत्यत्रापि कश्चित् सुहृद् यदीमं चौराः पश्येयुर्नूनमस्य धनमपहरेयुरिति बुद्ध्या तं चौरैः संयोज्य तेभ्यो निवर्तयतीत्यपाय एव। अध्ययनात् पराजयते, भोजनात्

पराजयते—अत्रापि अध्ययनं भोजनं वा सहमानस्ततो निवर्तत इत्यपाय एव। यवेभ्यो गां रक्षति। इहापि गवादेर्यवादिसंपर्कं बुद्ध्या समीक्ष्यान्यतरस्य विनाशं पश्यन् गवादीन् यवादिभ्यो निवर्तयतीत्यपाय एव। उपाध्यायादन्तर्धत्ते, उपाध्यायान्निलीयते—मा मामुपाध्यायोऽद्राक्षीदिति तिरोभवतीत्यत्राप्यपायः। शृङ्गाच्छरो जायत इत्यादिषु शृङ्गादिभ्यः शरादयो निष्क्रामन्तीति स्फुट एवापायः। यदि निष्क्रामन्ति किं नात्यन्ताय निष्क्रामन्ति। संततत्वादन्यान्यप्रादुर्भावाद्वा। हिमवतो गङ्गा प्रभवतीत्यत्राप्यापः संक्रामन्तीत्यपायोऽस्ति। यद्यपक्रामन्ति किं नात्यन्तमपक्रामन्ति, संततत्वादन्यान्यप्रादुर्भावाद्वा। बलभ्याः शत्रुंजयः षड् योजनानि षट्सु वा योजनेषु भवति। अत्र बलभ्या निःसृत्य गतानि योजनानि गतेषु वा तेषु भवतीत्यर्थः। कार्तिक्या आग्रहायणी मासे। ततः प्रभृति मासे गते भवतीत्यर्थः। उभयत्रापायः प्रतीयते। चैत्रान्मैत्रः पटुरित्यादौ मैत्रादयः पुंस्त्वादिना संसृष्टाः पटुत्वादिधर्मेण ततो विभक्ताः प्रतीयन्ते इति सर्वत्राप्यपायविवक्षा। विवक्षान्तरे त्वपादानलाभावे यथायोगं विभक्तयो भवन्ति। बलाहके विद्योतते। बलाहकं विद्योतते। इत्यादि।

५६१ **आङावधौ** ॥२।२।७०॥ अवधिर्मर्यादा। अभिविधिरपि तद्विशेष एवेति तस्यापि ग्रहणम्। अवधौ वर्तमाद् आङा युक्ताद् गौणान्नाम्नः पञ्चमी स्यात्। आ पाटलिपुत्राद् वृष्टो मेघः। पाटलिपुत्रमवधीकृत्य तद्व्याप्याव्याप्य वा वृष्ट इत्यर्थः।

५६२ **पर्यपाभ्यां वर्ज्ये** ॥२।२।७१॥ वर्ज्ये वर्जनीयेऽर्थे वर्तमानात् पर्यपाभ्यां युक्ताद् गौणान्नाम्नः पञ्चमी स्यात्। परि पाटलिपुत्राद् वृष्टो मेघः। अप पाटलिपुत्राद् वृष्टो मेघः। पाटलिपुत्रं वर्जयित्वा। वर्ज्य इति किम्। अपशब्दो मैत्रस्य।

५६३ **यतः प्रतिनिधिप्रतिदाने** ॥२।२।७२॥ प्रतिनिधीयते इति प्रतिनिधिर्मुख्यसदृशोऽर्थः। प्रतिदानं गृहीतस्य प्रत्यर्पणम् विशोधनमिति यावत्। प्रतिना योगे यतः प्रतिनिधिर्यतश्च प्रतिदानम् तद्वाचिनो गौणान्नाम्नः पञ्चमी स्यात्। प्रद्युम्नो वासुदेवात् प्रति। सदृश इत्यर्थः। तिलेभ्यः प्रति माषानस्मै प्रयच्छति। तिलान् गृहीत्वा माषान् ददाति इत्यर्थः। यत इति किम्। तिलेभ्यः प्रति माषान् प्रयच्छति इत्यत्र माषशब्दान्मा भूत्। प्रतिनिधिप्रतिदान इति किम्। वृक्षं प्रति विद्योतते विद्युत्।

५६४ **आख्यातर्युपयोगे** ॥॥२।२।७३॥ आख्याता प्रतिवादयिता तत्र वर्तमानाद् गौणान्नाम्नः पञ्चमी स्यात् उपयोगे–नियमपूर्वकविद्याग्रहणविषये। उपाध्यायादधीते। आख्यातरीति किम्। उपाध्यायात् शास्त्रमागमयति। अत्र शास्त्रान्मा भूत्। उपयोग इति किम्। नटस्य शृणोति। उपयोगविविक्षायां त्वत्रापि भवति। नटाद् भारतं शृणोति। अपादानत्वेनैव सिद्धे उपयोग एव यथा स्यादित्येवमर्थं वचनम्।

५६५ **गम्ययपः कर्माधारे** ॥२।२।७४॥ गम्यस्याप्रयुज्यमानस्य यपो यवन्तस्य यत्कर्माधारश्च तत्र वर्तमानाद् गौणान्नाम्नः पञ्चमी स्यात्। द्वितीयासप्तम्योरपवादः। प्रासादात् आसनात् प्रेक्षते। प्रासादमारुह्यासने उपविश्य प्रेक्षते इत्यर्थः। गम्यग्रहणं किम्। प्रासादमारुह्य शेते। न ह्यत्र यवन्तस्याप्रयोगे तदर्थः प्रतीयते। यबग्रहणं किम्। प्रविश पिण्डीम्। ननु यथा कुसूलादादाय पचति कुसूलात् पचतीत्यत्रादानाङ्गे पाके पचेर्वर्तमानादुपात्तविषयमेतदपादानमिति पञ्चमी भवति एवमिहापि अपक्रमणाङ्गे दर्शने दृशेर्वर्तमानाद् भविष्यति। तथाहि–तत्ततोऽपक्रामति अनपक्रामद्धि न विषयं गृह्णीयात्। सत्यम्। किंतु आरुह्य उपविश्येति यबन्तार्थोऽपि गम्यते। ततो यथा यबन्ते प्रयुज्यमाने कर्माधिकरणयोर्द्वितीयासप्तम्यौ भवतस्तद्वदप्रयुज्यमानेऽपि तदर्थप्रतीतेस्ते प्रसज्जेयातामिति सूत्रमारभ्यते।

५६६ **प्रभृत्यन्यार्थदिक्शब्दबहिरारादितरैः**॥२।२।७५॥ प्रभृत्यर्थैरन्यार्थैर्दिक्शब्दैर्बहिस् आरात् इतर इत्येतैश्च शब्दैर्युक्ताद् गौणान्नाम्नः पञ्चमी स्यात्। कार्तिक्याः प्रभृति। आरभ्य ग्रीष्मात्। अन्यो मैत्रात्। भिन्नश्चैत्रात्। ग्रामात् पूर्वस्यां दिशि वसति। ग्रामादुत्तरस्यां दिशि वसति। दिशि दृष्टाः शब्दा दिक्शब्दा इति देशकालादिवृत्तिनापि भवति। पूर्वं उज्जयिन्या गोनर्दः। पश्चिमो रामात् कृष्णः। एतदर्थमेव शब्दशब्दोपादानम्। गम्यमानेनापि दिक्शब्देन भवति। क्रोशाल्लक्ष्यं विध्यति। परेणेति गम्यते। न्यग् मैत्रस्यावस्थित इति उपसर्जनत्वान्न दिक्शब्दता। बहिर्ग्रामात्। आरादित्यव्ययं दूरसमीपयोर्वाचकम्, तेन तद्योगे वक्ष्यमाणस्य 'आरादर्थैः' इति विकल्पस्यापवादोऽयम्। आराद् ग्रामात् क्षेत्रम्। इतरशब्दो द्वयोरुपलक्षितयोरन्यतरवचनस्तेनान्यार्थाद् भिद्यते। इतरश्चैत्रात्। तस्य द्वितीयो मैत्रादिरित्यर्थः। अथ जिनदत्तादन्योऽयं मैत्रस्य, जिनदत्तादितरोऽयं चैत्रस्य, छात्राणां पूर्वमामंत्रयस्व, कायस्य पूर्वमित्यादौ मैत्रचैत्रच्छात्रकायशब्दे-

भ्यः कथं न भवति?। उच्यते। प्रत्यासत्तेर्यस्यैवान्यत्वादिधर्मनिमित्तोऽन्यशब्दादिना योगस्तत एव जिनदत्तादेः पञ्चमी भवति न मैत्रादेरिति।

५६७ **ऋणाद्धेतोः** ॥२।२।७६॥ फलसाधनयोग्यः पदार्थो हेतुः। हेतुभूतं यदृणं तद्वाचिनो गौणान्नाम्नः पञ्चमी स्यात्। तृतीयापवादः। शताद् बद्धः। हेतोरिति किम्। शतेन बद्धः। कर्तृलक्षणा तृतीया भवति। हेतुर्हि फलसाधनयोग्यः पदार्थः कर्त्रादिभ्योऽन्य उच्यते इति कथं कर्तुर्हेतुत्वम्।

५६८ **गुणादस्त्रियां नवा** ॥२।२।७७॥ अस्त्रियां वर्तमानाद् हेतुभूतगुणवाचिनो गौणान्नाम्नः पञ्चमी वा स्यात्। जाड्याद् जाड्येन वा बद्धः। गुणादिति किम्। धनेन कुलम्। हेतोरित्येव। जाडयस्यैतद् रूपम्। अस्त्रियामिति किम्। बुद्ध्या मुक्तः। अस्त्यत्राग्निर्धूमात्, नास्तीह घटोऽनुपलब्धेः, सर्वमनेकान्तात्मकं सत्वान्यथानुपपत्तेरित्यादौ नाग्न्यादेर्धूमादिर्हेतुः। कस्य तर्हि तज्ज्ञानस्य। कथं तर्हि पञ्चमी?। गम्ययपः कर्मधारे इति भविष्यति। धूमादिकमुपलभ्याग्न्यादिः प्रतिपत्तव्य इति ह्यत्रार्थः। ज्ञानहेतुत्वविवक्षायां हेतुत्वलक्षणा तृतीया भवति। धूमेनाग्निः, अनुपलब्ध्या घटाभावः, सत्वान्यथानुपपत्त्या सर्वमनेकान्तात्मकं प्रतिपत्तव्यमिति।

५६९ **आरादर्थैः** ॥२।२।७८॥ आराद् दूरान्तिकयोः। तन्त्रेणोभयग्रहणम्। दूरार्थैरन्तिकार्थैश्च शब्दैर्युक्ताद् गौणान्नाम्नः पञ्चमी वा स्यात्। दूरं ग्रामाद् ग्रामस्य वा। विप्रकृष्टं ग्रामाद् ग्रामस्य वा। अन्तिकमभ्याशम् ग्रामाद् ग्रामस्य वा। आराच्छब्दयोगे तु प्रभृत्यादिसूत्रेण नित्यमेव पञ्चमी। अथ दूरं हितं ग्रामात्, दूरं हितं ग्रामस्य भूयादित्यादौ हितादियोगे पञ्चम्यभावपक्षे 'हितसुखाभ्यामि'ति चतुर्थी कस्मान्न भवति?। उच्यते। हितसुखादियोगे सा चतुर्थी। इह तु दूरान्तिकादिनैव योगो न तद्विशेषणेन हितादिनेति न भवति। यदा तु हितादिना विशेष्यतया योगस्तदा चतुर्थी भवत्येव। अन्ये त्वसत्त्ववचनैरेवारादर्थैरिच्छन्ति।

५७० **स्तोकाल्पकृच्छ्रकतिपयादसत्वे करणे** ॥२।२।७९॥ यतो द्रव्ये शब्दप्रवृत्तिः स पर्यायो गुणोऽसत्त्वम्। तेनैव वा रूपेणाभिधीयमानं द्रव्यादि। तस्मिन् करणे वर्तमानेभ्यः स्तोकादिभ्यः पञ्चमी वा स्यात्। स्तोकेन स्तोकाद्वा मुक्तः। अल्पेन अल्पाद्वा मुक्तः। कृच्छ्रेण कृच्छ्राद्वा मुक्तः। कतिपयेन कतिपयाद्वा मुक्तः। असत्त्व इति किम्। स्तोकेन विषेण हतः। विषादिद्रव्यसामानाधिकरण्यात्

अत्र सत्त्ववृत्तिता। करण इति किम्। क्रियाविशेषणे मा भूत्। स्तोकं चलति। इह च स्तोकादीनामसत्त्ववाचित्वात् द्वित्वबहुत्वासंभव एकवचनमेव।

'स्तोकस्य चाभिनिर्वृत्तेरनिर्वृत्तेश्च तस्य वा।
प्रसिद्धिं करणत्वस्य स्तोकादीनां प्रचक्षते'॥

५७१ अज्ञाने ज्ञः षष्ठी ॥२।२।८०॥ अज्ञानेऽर्थे वर्तमानस्य जानातेः संबंधिनि करणे वर्तमानाद् गौणान्नाम्नः षष्ठी स्यात्। वेति निवृत्तम्। सर्पिषो जानीते। सर्पिषा करणभूतेन प्रवर्तत इत्यर्थः। प्रवृत्तिरत्र जानातेरर्थः। अथवा सर्पिषि रक्तो विरक्तो वा चित्तभ्रान्त्या सर्वमेवोदकादि सर्पीरूपेण प्रतिपद्यत इति मिथ्याज्ञानवचनोऽत्र जानातिः। मिथ्याज्ञानं चाज्ञानमेव भवति। अज्ञान इति किम्। स्वरेण पुत्रं जानाति। करण इत्येव। तैलं सर्पिषो जानाति। तैलं सर्पीरूपेण प्रतिपद्यत इत्यर्थः। अत्र तैलात् कर्मणो मा भूत्। सर्पिषस्तु करणत्वाद् भवत्येव। तृतीयापवादो योगः।

५७२ शेषे ॥२।२।८१॥ कर्मादिभ्योऽन्यः क्रियाकारकपूर्वकः कर्माद्यविवक्षालक्षणोऽश्रूयमाणक्रियः श्रूयमाणक्रियो वास्येदंभावरूपः स्वस्वामिभावादिः संबंधविशेषः शेषः। तत्र गौणान्नाम्नः षष्ठी स्यात्। प्रथमापवादो योगः। राज्ञः पुरुषः। माषाणामश्नीयात्। कथं पुनः कर्मादीनां सतामप्यविवक्षा?। यथा अनुदरा कन्या, अलोमिका एडकेति। गौणादित्येव। राज्ञः पुरुषः। अत्र संबंधस्य द्विष्ठत्वेऽपि प्रधानात् पुरुषान्न भवति। प्राधान्यं चास्याख्यातपदसामानाधिकरण्यम्। तेन ततः प्रथमैव भवति। यदा तु पुरुषो राजानं प्रति गुणत्वं प्रतिपद्यते तदा पुरुषस्य राजेति भवत्येव। कथं राज्ञः पुरुषस्य कंबल इति?। राजापेक्षया पुरुषस्य प्राधान्येऽपि कंबलापेक्षया गौणत्वाद् भवति।

५७३ रिरिष्टात्स्तादस्तादसतसाता ॥२।२।८२॥ रिष्टात् स्तात् अस्तात् अस् अतस् आत् प्रत्ययान्तैर्युक्ताद् गौणान्नाम्नः षष्ठी स्यात्। उपरि ग्रामस्य। उपरिष्टात् ग्रामस्य। परस्ताद् ग्रामस्य। अवरस्ताद् ग्रामस्य। पुरस्ताद् ग्रामस्य। पुरो ग्रामस्य। दक्षिणतो ग्रामस्य। अधराद् ग्रामस्य। पञ्चम्यपवादो योगः।

५७४ कर्मणि कृतः ॥२।२।८३॥ कृदन्तस्य संबंधिनि कर्मणि गौणान्नाम्नः षष्ठी स्यात्। द्वितीयापवादः। अपां स्रष्टा। ओदनस्य भोजकः। कर्मणीति किम्।

शस्त्रेण भेत्ता । क्रियाविशेषणस्यापि कर्मत्वाभावान्न भवति । साधु पक्ता । कृत इति किम् । कटं करोति । त्यादितद्धितयोः कर्मणि मा भूत् । कथं अर्थस्य त्यागी, सुखस्य भोगीत्यादि ? । अत्र ताच्छीलिकयोर्घिनुणिनोः कर्मेति भवति ।

५७५ द्विषा वातृशः ॥२।२।८४॥ अतृश् प्रत्ययान्तस्य द्विषः कर्मणि गौणान्नाम्नः षष्ठी वा स्यात् । तृन्नादिसूत्रेण प्रतिषेधे प्राप्ते विकल्पोऽयम् । चौरस्य चौरं वा द्विषन् ।

५७६ वैकस्य द्वयोः ॥२।२।८५॥ द्विकर्मकेषु धातुषु द्वयोः कर्मणोरेकस्यैकतरस्मिन् वा षष्ठी स्यात् । अन्यत्र पूर्वेण नित्यमेव । अजाया नेता सुघ्नं सुघ्नस्य वा । अथवा—अजां अजाया वा नेता सुघ्नस्य । अन्ये तु नीवह्यादीनां द्विकर्मकाणां गौणे कर्मणि, दुहादीनां तु प्रधाने विकल्पमिच्छन्ति । उभयत्रापि नित्यमेवेत्यन्ये ।

५७७ कर्तरि ॥२।२।८६॥ कृदन्तस्य कर्तरि गौणान्नाम्नः षष्ठी स्यात् । तृतीयापवादः । भवत आसिका । कर्तरीति किम् । गृहे शायिका । कृत इत्येव । त्वया शय्यते ।

५७८ द्विहेतोरस्त्र्यणकस्य वा ॥२।२।८७॥ स्त्र्यधिकारविहिताभ्यामकारणकाराभ्यामन्यस्य द्वयोः कर्तृकर्मषष्ठ्योः प्राप्तिहेतोः कृतः कर्तरि षष्ठी वा स्यात् । नित्यं प्राप्ते विभाषेयम् । विचित्रा सूत्रस्य कृतिराचार्यस्याचार्येण वा । आश्चर्यो गवां दोहोऽगोपालकस्य अगोपालकेन वा । गम्यमानेऽपि कर्मणि भवति । अन्तर्धौ येनादर्शनमिच्छति यस्यादर्शनमिच्छतीति वा । अत्रात्मन इति कर्म गम्यते । द्विहेतोरित्येकवचननिर्देशः किम् । आश्चर्यमोदनस्य नाम पाकोऽतिथीनां प्रादुर्भाव इति । भिन्नकृतोः कर्तृकर्मषष्ठीहेतुत्वमिति अत्र न भवति । अस्त्र्यणकस्येति किम् । चिकीर्षा मैत्रस्य काव्यानाम् । भावे णकः । कर्तरीत्येव । साधु खल्विदं शब्दानामनुशासनमाचार्यस्याचार्येण वेत्यत्र शब्दशब्दात् कर्मणि विकल्पो न भवति । अन्ये तु घञ्लप्रत्ययोर्द्वित्वहेत्वोः कर्मण्येव षष्ठीमिच्छन्ति न कर्तरि । आश्चर्यो गवां दोहोऽगोपालकेन ।

५७९ कृत्यस्य वा ॥२।२।८८॥ कृत्यस्य कर्तरि गौणान्नाम्नः षष्ठी वा स्यात् । भवतो भवता वा कार्यः, कर्तव्यः, करणीयः, देयः, कृत्यो वा कटः । कर्तरीत्येव । गेयो माणवको गाथानाम् ।

५८० **नोभयोर्हेतोः** ॥२।२।८९॥ उभयोः कर्तृकर्मणोः षष्ठीहेतोः कृत्यस्य संबंधिनोरुभयोरेव षष्ठी न स्यात् । नेतव्या ग्राममजा मैत्रेण । उभयोर्हेतोरिति किम् । एकैकहेतोर्भा भूत् । उपस्थानीयः पुत्रः पितुः ।

५८१ **तृन्नुदन्ताव्ययकस्वानातृशशतृङिणकच्खलर्थस्य** ॥२।२।९०॥ तृन उदन्तस्य कसोरानस्य अतृशः शतुर्ङेः णकचः खलर्थस्य च कृतः संबंधिनोः कर्मकर्त्रोः षष्ठी न स्यात् । वदिता जनापवादान् । कन्यामलंकरिष्णुः । कटं कृत्वा । ओदनं पेचिवान् । आनेति उत्सृष्टानुबंधनिर्देशात् कानशानानशां ग्रहणम् । कटं चक्राणः, वचनमनूचानः । शान–मलयं पवमानः। आनश्–ओदनं पचमानः। अतृश्–अधीयँस्तत्वार्थम् । शतृ–कटं कुर्वन् । परीषहान् सासहिः । एधानाहारको व्रजति। चिन्निर्देशात् णकस्य न भवति । वर्षशतस्य पूरकः । खलर्थः–ईषत्करः कटो भवता, सुज्ञानं तत्त्वं भवता ।

५८२ **क्तयोरसदाधारे** ॥२।२।९१॥ सनो वर्तमानादाधाराच्चान्यस्मिन्नर्थे विहितौ यौ क्तौ–क्तक्तवतू तत्संबंधिनोः कर्मकर्त्रोः षष्ठी न स्यात् । कटःकृतो मैत्रेण। कटं कृतवान् । असदाधार इति किम् । राज्ञां ज्ञातः, बुद्धः, मतः, इष्टः, पूजितो वा। कान्तो हरिश्चन्द्र इव प्रजानाम् । ज्ञानेच्छेत्यादिना सत्यत्र क्तः । कथं शीलितो मैत्रेण, रक्षितश्चैत्रेण ? । भूतेऽयं क्तः । वर्तमानताप्रतीतिस्तु प्रकरणादिनेति । अन्ये तु ज्ञानेच्छार्चार्थताच्छील्यादिभ्योऽतीते क्तं नेच्छन्ति । तन्मतेऽपशब्दावेतौ । आधारे–इदमोदनस्य भुक्तम् । इदमेषामासितम् । 'अद्यर्थाच्चाधारे' इति क्तः ।

५८३ **वा क्लीबे** ॥२।२।९२॥ क्लीबे यो विहितःक्तस्तस्य कर्तरि षष्ठी वा न स्यात् । छात्रस्य छात्रेण वा हसितम् । क्लीब इति किम् । चैत्रेण कृतम् । क्तक्तवतू इति भावे क्तः । पूर्वेण प्रतिषेधे प्राप्ते विकल्पोऽयम् ।

५८४ **अकमेरुकस्य** ॥२।२।९३॥ कमेरन्यस्योकप्रत्ययान्तस्य कर्मणि षष्ठी न स्यात् । भोगानभिलाषुकः । अकमेरिति किम् । दास्याः कामुकः ।

५८५ **एष्यदृणेनः** ॥२।२।९४॥ एष्यत्यर्थे ऋणे च विहितस्येनः कर्मणि षष्ठी न स्यात् । इन इति इनणिनोर्ग्रहणम् । ग्रामं गमी । औणादिक इन् । ग्राममागामी। औणादिको णिन् । शतं दायी । अत्राधमर्ण्ये णिन् । एष्यदृणेति किम् । अवश्यंकारी कटस्य । साधुदायी वित्तस्य ।

५८६ क्रियाश्रयस्याधारोऽधिकरणम् ॥२।२।३०॥ क्रियाश्रयस्य कर्तुः कर्मणो वा य आधारस्तत् कारकमधिकरणसंज्ञं स्यात् ।

५८७ सप्तम्यधिकरणे ॥२।२।९५॥ गौणान्नाम्न अधिकरणे कारके सप्तमी स्यात् । अधिकरणं च षोढा । वैषयिकम्, औपश्लेषिकम्, अभिव्यापकम्, सामीप्यकम्, नैमित्तिकम् औपचारिकं च । तत्र अनन्यत्र भावो विषयः तस्मै प्रभवति वैषयिकम् । दिवि देवाः । एकदेशमात्रसंयोग उपश्लेषस्तत्र भवमौपश्लेषिकम् । कटे आस्ते । यस्याधेयेन समस्तावयवसंयोगस्तदभिव्यापकम्, तद्धि आधेयेनाभिव्याप्यते, आधेयं वाभिव्याप्नोतीति । तिलेषु तैलम् । यदाधेयसंनिधिमात्रेण क्रियाहेतुस्तत्सामीप्यकम् । गङ्गायां घोषः । निमित्तमेव नैमित्तिकम् । युद्धे संनह्यते । उपचारे भवमौपचारिकम् । अङ्गुल्यग्रे करिशतमास्ते ।

५८८ न वा सुजर्थैः काले ॥२।२।९६॥ सुचोऽर्थो वारलक्षणो येषां प्रत्ययानां तदन्तैर्युक्तात् कालेऽधिकरणे वर्तमानाद् गौणान्नाम्नः सप्तमी वा स्यात् । द्विरह्नि अह्नो वा भुङ्क्ते । सुजर्थैरिति किम् । अह्नि भुङ्क्ते । बहुव्रीह्याश्रयणं किम् । सुजर्थप्रत्ययस्याप्रयोगे तदर्थे मा भूत् । काल इति किम् । द्विः कांस्यपात्र्यां भुङ्क्ते । अधिकरणे इत्येव । द्विरह्ना भुङ्क्ते । आधारस्याधारत्वाविवक्षायां पक्षे शैषिकी षष्ठी सिद्धैव । नियमार्थं तु वचनम् । तेन प्रत्युदाहरणेषु शेषे षष्ठी न भवत्येव ।

५८९ कुशलायुक्तेनासेवायाम् ॥२।२।९७॥ कुशलो निपुणः । आयुक्तो व्यापृतः । आभ्यां युक्तादाधारे वर्तमानाद् गौणान्नाम्नः सप्तमी वा स्यात् आसेवायां—तात्पर्ये गम्यमाने । कुशलो विद्याग्रहणे । आयुक्तस्तपश्चरणे । पक्षे अधिकरणाविवक्षायां शेषषष्ठी । कुशलो विद्याग्रहणस्य । आयुक्तस्तपश्चरणस्य । आ सेवायामिति किम् । कुशलश्चित्रकर्मणि न च करोति । आयुक्तो गौः शकटे—आकृष्य युक्त इत्यर्थः । अधिकरणे इत्येव नित्यं सप्तमी । पक्षे आधारस्याविवक्षायां विकल्पे सिद्धेऽनासेवायामाधाराविवक्षानिवृत्त्यर्थं वचनम् ।

५९० स्वाभीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः ॥२।२।९८॥ एभिर्युक्ताद् गौणान्नाम्नः सप्तमी वा स्यात् । पक्षे शेषषष्ठी । गोषु गवां वा स्वामी । गोषु गवां वेश्वरः । गोषु गवां वाधिपतिः । गोषु गवां वा दायादः । गोषु गवां वा साक्षी । गोषु गवां वा प्रतिभूः । गोषु गवां वा प्रसूतः । स्वामीश्वराधिपतीति पर्यायोपादानात्

पर्यायान्तरयोगे न भवति । ग्रामस्य राजा । अत्र षष्ठ्येव भवति । सप्तम्यर्थमिदं वचनम् ।

५९१ व्याप्ये क्तेनः ॥२।२।९९॥ इष्टादिभ्यः क्तान्तेभ्य इष्टमनेनेत्याद्यर्थे तद्धित इन् वक्ष्यते । क्तप्रत्ययान्ताद्य इन् तदन्तस्य व्याप्ये वर्तमानाद् गौणान्नाम्नः सप्तमी स्यात् । वेति निवृत्तम् । अधीतं व्याकरणमनेनेति वाक्यावस्थायामभिधायाधीतीति वृत्त्योक्तेनानभिहिते कर्मणि प्रत्ययार्थकर्तृकेण च धात्वर्थेन व्याप्यमाने कृतपूर्वी कटमित्यादाविव द्वितीयायां प्राप्तायां तदपवादोऽयम् । अधीतं व्याकरणमनेनाधीती व्याकरणे । क्तेनेति किम् । कृतपूर्वी कटम् । व्याप्य इति किम् मासमधीती व्याकरणे । अत्र मासात् मा भूत् । मासस्य हि न कर्मत्वम् । द्वितीया तु कालाध्वनोर्व्याप्तावित्यनेन ।

५९२ तद्युक्ते हेतौ ॥२।२।१००॥ हेतुर्निमित्तं कारणम् । तेन व्याप्येन युक्ते संयुक्ते हेतौ वर्तमानाद् गौणान्नाम्नः सप्तमी स्यात् । हेतुतृतीयापवादः ।

'चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः' ॥

तद्युक्त इति किम् । वेतनेन धान्यं लुनाति । नात्र वेतनं धान्येन संयुक्तम् । हेताविति किम् । देवस्य पादौ स्पृशति ।

५९३ अप्रत्यादावसाधुना ॥२।२।१०१॥ असाधुशब्देन युक्ताद् गौणान्नाम्नोऽप्रत्यादौ—प्रत्यादिप्रयोगाभावे सप्तमी स्यात् । असाधुर्मैत्रो मातरि । अप्रत्यादाविति किम् । असाधुर्मैत्रो मातरं प्रति पर्यनु अभि वा ।

५९४ साधुना ॥२।२।१०२॥ साधुशब्दयुक्ताद् गौणान्नाम्नोऽप्रत्यादौ सप्तमी स्यात् । साधुर्मैत्रो राजनि । अप्रत्यादावित्येव । साधुर्मैत्रो राजानं प्रति पर्यन्वभि वा । उत्तरत्रार्चायां विधानात् अनर्चायां तु व्यावृत्तेस्तत्त्वाख्याने विधिरयम् । कथं साधुर्भृत्यो राज्ञ इति । भृत्यापेक्षाऽत्र षष्ठी न साध्वपेक्षा । साध्वपेक्षायां तु सप्तम्येव ।

५९५ निपुणेन चार्चायाम् ॥१।२।१०३॥ निपुणशब्देन साधुशब्देन च युक्ताद् गौणान्नाम्नोऽप्रत्यादौ सप्तमी स्यात् अर्चायाम् गम्यायाम् । षष्ठ्यपवादः । मातरि निपुणः । पितरि साधुः । अर्चायामिति किम् । निपुणो मैत्रो मातुः । साधु-

मैत्रः पितुः । मातैवैनं निपुणं मन्यते पितैव साधुमित्यनर्चायां न भवति । अमत्या-दावित्येव । निपुणो मैत्रो मातरं प्रतिपर्यन्वभि वा ।

५९६ **स्वेशोऽधिना** ॥२।२।१०४॥ स्वे ईशितव्ये ईशे च स्वामिनि वर्तमानादधिना युक्ताद् गौणान्नाम्नः सप्तमी स्यात् । अधिः स्वस्वामिसंबन्धंद्योतयति । तत्र स्वस्वामिवाचिनोर्यद्गौणत्वेन विवक्ष्यते ततो भवति । अधि मगधेषु श्रेणिकः। अधि श्रेणिके मगधाः । षष्ठीबाधनार्थो योगः ।

५९७ **उपेनाधिकिनि** ॥२।२।१०५॥ उपेन युक्तादधिकिनि वर्तमानाद् गौणान्नाम्नः सप्तमी स्यात् । उपेत्यधिकाधिकिसंबंधं द्योतयति । उप खार्यां द्रोणः । द्रोणोऽधिकः खार्या इत्यर्थः । उपेनेति किम् । खार्यां उपरि द्रोणः । अधिकिनीति किम् । अधिके मा भूत् । तेनोप द्रोणे खारीति न भवति ।

५९८ **यद्भावो भावलक्षणम्** ॥२।२।१०६॥ भावः क्रिया । प्रसिद्धं लक्षणमप्रसिद्धं लक्ष्यम् । यस्य संबंधिना भावेन क्रियया भावोऽपरक्रिया लक्ष्यते तस्मिन् वर्तमानाद् गौणान्नाम्नः सप्तमी स्यात् । गोषु दुह्यमानासु गतः । अत्र कालतः प्रसिद्धेन गवां दोहेन भावेनान्यस्य गमनमप्रसिद्धं लक्ष्यते । एवं देवार्चनायां क्रियमाणायां गतः। गम्यमानेनापि भावेन भावलक्षणे भवति। आम्रेषु कलायमात्रेषु गतः। अत्र जातेष्विति गम्यते । गम्यमानमपि हि विभक्तेर्निमित्तं भवति । यथा वृक्षे शाखा, ग्रामे चैत्रः । अत्र भवति, वसति चेत्याधारनिमित्तं गम्यते । यत्र क्रियार्हाणां कारकत्वं तद्विपर्ययो वा, यथा ऋद्धेषु भुंजानेषु दरिद्रा आसते । ऋद्धेष्वासीनेषु दरिद्रा भुंजते । यत्र क्रियानर्हाणामकारकत्वं तद्विपर्ययो वा, यथा, दरिद्रेष्वासीनेषु ऋद्धा भुंजते । दरिद्रेषु भुंजानेषु ऋद्धा आसते । अत्रापि भावो भावस्य लक्षणं भवतीत्यनेनैव सप्तमी । यद्ग्रहणं प्रकृत्यर्थम् । भाव इति किम् । यो जटाभिस्तस्य भोजनम् । भावलक्षणमिति किम् । यस्य भोजनं स मैत्रः । तृतीयापवादो योगः ।

५९९ **गते गम्येऽध्वनोऽन्तेनैकार्थ्यं वा** ॥२।२।१०७॥ कुतश्चिदवधेर्विवक्षितस्याध्वनोऽवसानमन्तः । यद्भावो भावलक्षणं तस्याध्वनोऽध्ववाचिशब्दस्याध्वन एवान्तेनान्तवाचिना सहैकार्थ्यं सामानाधिकरण्यं वा स्यात्, तद्विभक्तिस्तस्माद् भवतीत्यर्थः, गते गम्ये, गतशब्देऽप्रयुज्यमाने इत्यर्थः। गवीधुमतः सांकाश्यं चत्वारि योजनानि । चतुर्षु योजनेषु गतेषु भवतीत्यर्थः । पक्षे पूर्वेण सप्तमी । गवीधुमतः सांकाश्यं चतुर्षु योजनेषु । गतेष्विति गम्यते । गत इति किम्। दग्धेषु लुप्तेष्विति

वा प्रतीतौ मा भूत् । गम्य इति किम् । गतशब्दप्रयोगे मा भूत् । गवीधुमतः सांकाश्यं चतुर्षु योजनेषु गतेषु भवति । अत्रैकार्थ्यं न भवति । सप्तमी तु पूर्वेण नित्यं भवति । अध्वन इति किम् । कार्तिक्या आग्रहायणी मासे । अत्राप्येकार्थ्याभावे पूर्वेण नित्यं सप्तमी । अन्तेनेति किम् । अद्य नश्चतुर्षु गव्यूतेषु भोजनम् । भोजनं हि भोक्तृधर्मो नाध्वनोऽन्त इति पूर्ववत् सप्तम्येव । नन्वन्तेन सहाध्वनोऽभेदोपचारात् सिद्धमेवैकार्थ्यं किमनेन ? । सत्यम् । कालेऽप्येवं मा भूदिति वचनम् ।

६०० **षष्ठी वानादरे** ॥२।२।१०८॥ यद्भावो भावलक्षणं तस्मिन् भाववति वर्तमानाद् गौणान्नाम्नोऽनादरे गम्यमाने षष्ठी वा स्यात् । पक्षे पूर्वेण सप्तमी । रुदतो लोकस्य रुदति वा लोके प्राव्राजीत् । रुदन्तमनादृत्य प्राव्राजीदित्यर्थः ।

६०१ **सप्तमी चाविभागे निर्धारणे** ॥२।२।१०९॥ जातिगुणक्रियादिभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम् तस्मिन् गम्यमाने गौणान्नाम्नः षष्ठी सप्तमी च स्यात्, अविभागे—निर्धार्यमाणस्यैकदेशस्य समुदायेन सह कथंचिदैक्ये शब्दाद् गम्यमाने । क्षत्रियः पुरुषाणां पुरुषेषु वा शूरतमः । कृष्णा गवां गोषु वा संपन्नक्षीरतमा । धावन्तो गच्छतां गच्छत्सु वा शीघ्रतमाः । युधिष्ठिरः श्रेष्ठतमः कुरूणां कुरुषु वा । अविभाग इति किम् । माथुराः पाटलिपुत्रकेभ्य आढ्यतराः । अत्र हि शब्दाद् भेद एव प्रतीयते न तु कथंचिदैक्यमिति न भवति । पञ्चमीबाधनार्थं वचनम् । अन्ये तु पञ्चमीमपीच्छन्ति । गोभ्यः कृष्णा संपन्नक्षीरतमा ।

६०२ **क्रियामध्येऽध्वकाले पञ्चमी च** ॥२।२।११०॥ क्रिययोर्मध्ये योऽध्वा कालश्च तस्मिन् वर्तमानाद् गौणान्नाम्नः पञ्चमी चकारात् सप्तमी च भवति। इहस्थोऽयमिष्वासः क्रोशाल्लक्ष्यं विध्यति । इह धानुष्कावस्थानमिषुमोक्षो वैका क्रिया लक्ष्यव्यधश्च द्वितीया तन्मध्ये क्रोशोऽध्वा । अद्य भुक्त्वा मुनिर्व्यहाद् भोक्ता । अत्र द्वयोर्भुक्तिक्रिययोर्मध्ये व्यहः कालः । ननु च क्रोशे स्थितं लक्ष्यं विध्यति व्यहे पूर्णे भुङ्क्ते इत्यधिकरण एव सप्तमी; क्रोशान्निःसृत्य स्थितं लक्ष्यं विध्यति, व्यहमतिक्रम्यानुभुङ्क्ते इत्यपादाने 'गम्ययपः कर्माधारे' इति पञ्चमी च सिद्धैव । सत्यम् । यदा त्वस्यैव क्रियाकारकसंबंधस्य फलभूता शेषसंबंधलक्षणोत्तरावस्था विवक्ष्यते यथा द्विरह्नो भुङ्क्ते, योजनस्य शृणोतीति तदापि क्रियामध्ये षष्ठी मा भूदिति वचनम् ।

६०३ **अधिकेन भूयसस्ते** ॥२।२।१११॥ अधिरूढ इत्यर्थेऽधिकशब्दो

निपात्यते । अधिरूढ इति कर्तरि कर्मणि च क्तो भवति । तत्र यदा कर्तरि तदाऽधिक इत्यनेनाल्पीयानुच्यते । यदा तु कर्मणि तदा भूयान् । तत्र सामर्थ्यादल्पीयोवाचिनाऽधिकशब्देन युक्ताद् भूयसो–भूयोवाचिनो गौणान्नाम्नस्ते सप्तमीपञ्चम्यौ स्याताम् । अधिको द्रोणः खार्यां, खार्याः ।

६०४ **तृतीयाल्पीयसः** ॥२।२।११२॥ अधिकशब्देन सामर्थ्याद् भूयोवाचिना युक्तादल्पीयोवाचकाद् गौणान्नाम्नस्तृतीया स्यात् । अधिका खारी द्रोणेन ।

६०५ **पृथग्नाना पञ्चमी च** ॥२।२।११३॥ पृथग्नानाशब्दाभ्यां युक्ताद् गौणान्नाम्नः पञ्चमी तृतीया च स्यात् । पृथग्मैत्रान्मैत्रेण । नाना चैत्राच्चैत्रेण । यदा तु पृथग्नानाशब्दावन्यार्थौ तदा प्रभृत्यादि सूत्रेण पञ्चमी सिद्धैव, तृतीयैवानेन विधीयते । यदा त्वसहायार्थौ तदा पञ्चमीविधानार्थमपीदम् । अन्ये तु द्वितीयामपीच्छन्ति ।

६०६ **ऋते द्वितीया च** ॥२।२।११४॥ ऋते इत्येतदव्ययं वर्जनार्थम् । तेन युक्ताद् गौणान्नाम्नो द्वितीया पञ्चमी च स्यात् । चित्रं यथाश्रयमृते । न ह्यङ्गं विक्रियते रोगमृते । ऋते धर्मात् कुतः सुखम् । द्वितीयां नेच्छन्त्येके ।

६०७ **विना ते तृतीया च** ॥२।२।११५॥ विनाशब्देन युक्ताद् गौणान्नाम्नो द्वितीयापञ्चम्यौ स्याताम् तृतीया च । विना वातम्, वातात्, वातेन । द्वितीयां नेच्छन्त्यन्ये ।

६०८ **तुल्यार्थैस्तृतीयाषष्ठ्यौ** ॥२।२।११६॥ तुल्यार्थैर्युक्ताद् गौणान्नाम्नस्तृतीयाषष्ठ्यौ स्याताम् । मात्रा मातुस्तुल्यः । पित्रा पितुः समानः । अर्थग्रहणं पर्यायार्थम् । उपमा नास्ति कृष्णस्य, तुला नास्ति सनत्कुमारस्येत्यादौ उपमादयो न तुल्यार्था इति न भवति । गौणाधिकाराच्च गौरिव गवयः, यथा गौस्तथा गवय इत्यादौ न भवति । तृतीयामविकल्प्य षष्ठीविधानं सप्तमीबाधनार्थम् । तेन गवां तुल्यः स्वामी, गोभिस्तुल्यः स्वामीत्यत्र स्वामीश्वरेत्यादिना सप्तमी न भवति ।

६०९ **द्वितीयाषष्ठ्यावेनेनानञ्चेः** ॥२।२।११७॥ एन प्रत्ययान्तेन युक्ताद् गौणान्नाम्नो द्वितीयाषष्ठ्यौ स्याताम् न चेत्सोऽञ्चेः परो विहितो भवति । पूर्वेण ग्रामं, ग्रामस्य । अनञ्चेरिति किम् । प्राग्ग्रामात् ।

६१० **हेत्वर्थैस्तृतीयाद्याः** ॥२।२।११८॥ हेतुर्निमित्तं कारणमिति पर्यायाः । **एतदर्थैः शब्दैर्युक्तात् प्रत्यासत्तेस्तैरेव समानाधिकरणाद् गौणान्नाम्नस्तृतीयाषष्ठ्य-**

र्थीपञ्चमीषष्ठीसप्तम्यः स्युः। धनेन धनाय धनात् धनस्य धने हेतुना हेतवे हेतोः२ हेतौ वसति। एवं धनेन निमित्तेन, धनेन कारणेनेत्यादि। तत्सामानाधिकरण्याच्च हेत्वर्थेभ्योऽपि ता एव भवन्ति। प्रत्यासत्तेस्तैरेव समानाधिकरणादिति किम्। अन्नस्य हेतुः। अन्ये तु हेत्वर्थशब्दयोगे नेच्छन्ति। हेतुशब्दप्रयोगे तु षष्ठीमेवेच्छन्ति। असर्वाद्यर्थमिदम्।

६११ **सर्वादेः सर्वाः** ॥२।२।११९॥ हेत्वर्थैर्युक्तात् प्रत्यासत्तेस्तत्समानाधिकरणात् सर्वादेर्गौणान्नाम्नः सर्वा विभक्तयः स्युः। को हेतुः, कं हेतुं, केन हेतुना, कस्मै हेतवे, कस्मात् हेतोः, कस्य हेतोः, कस्मिन् हेतौ वसति चैत्रः। एवं यो हेतुः, यं हेतुमित्यादि।

६१२ **असत्वारादर्थाट्टाङसिङ्यम्** ॥२।२।१२०॥ सत्वं द्रव्यं ततोऽन्यदसत्त्वम्। आराद् दूरान्तिकयोः। तंत्रेणोभयोर्ग्रहणम्। असत्ववाचिनो दूरार्थादन्तिकार्थाच्च टा ङसि ङि अम् इत्येते प्रत्ययाः स्युः। गौणादिति निवृत्तम्। दूरेण, दूरात्, दूरे दूरं ग्रामस्य ग्रामाद्वा वसति। अन्तिकेन, अन्तिकात्, अन्तिके, अन्तिकं ग्रामस्य ग्रामाद्वा वसति। केचिदारादर्थैर्युक्तात् पञ्चमीं नेच्छन्ति। तेन दूराद् ग्रामस्य, अन्तिकाद् ग्रामस्येत्येव भवति। न तत्सर्वसंमतम्। पञ्चम्या अपि दर्शनात्।

'दूरादावसथान्मूत्रं दूरात् पादावसेचनम्।
दूराच्च भाव्यं दस्युभ्यो दूराच्च कुपिताद् गुरोः'॥

असत्वेति किम्। दूरः पन्थाः। कथं चिरं चिरेण चिराय चिरात् चिरस्येति। विभक्तिप्रतिरूपका निपाता एते। यथा परस्परं परस्परेण परस्परस्येत्यादयः।

६१३ **जात्याख्यायां नवैकोऽसंख्यो बहुवत्** ॥२।२।१२१॥ जातेरेकत्वादेकवचन एव प्राप्ते पक्षे बहुवचनार्थं बहुवद्भाव उच्यते। जातेराख्याभिधानं जात्याख्या, तस्यामेकोऽर्थो जातिलक्षणोऽसंख्यः—संख्यावाचिविशेषणरहितो बहुवद्वा स्यात्। संपन्नो यवः। संपन्ना यवाः। जात्यर्थस्य बहुवद्भावात् तद्विशेषणानामपि बहुवद्भावः। तथा चोभयवाचिभ्यो बहुवचनम्। जातिग्रहणं किम्। चैत्रः। आख्याग्रहणं किम्। काश्यपप्रतिकृतिः काश्यपः। भवत्यर्थं जातिशब्दो नत्वनेन जातिराख्यायते, किंतर्हि प्रतिकृतिः। एक इति किम्। संपन्नौ व्रीहियवौ। 'मगधेषु स्तनौ पीनौ कलिङ्गेष्वक्षिणी शुभे' इत्यादावपि सव्येतरत्वलक्षणावान्तरजातिद्व-

योपाधियोगादेकत्वं नास्तीति बहुवद्भावो न भवति। जातिमात्रविवक्षायां तु भवत्येव। मगध्रेषु स्तनाः पीनाः, स्तनः पीनः। कलिङ्गेष्वक्षीणि शुभानि, अक्षि शुभमिति। असंख्य इति किम्। एको व्रीहिः संपन्नः सुभिक्षं करोति। अत्र विशेषणभूतसंख्याप्रयोगोऽस्तीति एके व्रीहयः संपन्नाः सुभिक्षं कुर्वन्ति, इति न भवति।

६१४ **अविशेषणे द्वौ चास्मदः** ॥२।२।१२२॥ अस्मदो द्वावेकश्चार्थो वा बहुवत्स्यात् अविशेषणे—न चेत्तस्य विशेषणं प्रयुज्यते। आवां ब्रूवः। वयं ब्रूमः। अहं ब्रवीमि। वयं ब्रूमः। अविशेषण इति किम्। आवां गार्ग्यौ ब्रूवः। कथं 'नाट्ये च दक्षा वयम्' इत्यादि ?। दक्षत्वादीनां विधेयत्वेनाविशेषणत्वाद् भविष्यति। यदनूद्यमानमवच्छेदकं तद्विशेषणम् इति एकानेकस्वभावस्यात्मनोऽनेकस्वभावविवक्षायां बहुवचनं सिद्धमेव सविशेषणप्रतिषेधार्थं तु वचनम्।

६१५ **फल्गुनीप्रोष्ठपदस्य भे** ॥२।२।१२३॥ फल्गुनीशब्दस्य प्रोष्ठपदाशब्दस्य च भे—नक्षत्रे वर्तमानस्य द्वावर्थौ बहुवद्वा स्याताम्। कदा पूर्वे फल्गुन्यौ, पूर्वाः फल्गुन्यः। कदा पूर्वे प्रोष्ठपदे, पूर्वाः प्रोष्ठपदाः। भ इति किम्। फल्गुनीषु जाते फल्गुन्यौ माणविके। द्वावित्येव। तेनैकस्मिन् ज्योतिषि न भवति। दृश्यते फल्गुनी। एकवचनान्तः प्रयोग एव नास्तीत्यन्ये। फल्गुनीप्रोष्ठपदस्येति शब्दपरो निर्देशः किम्। तत्पर्यायस्य मा भूत्। अद्य पूर्वे भद्रपदे।

६१६ **गुरावेकश्च** ॥२।२।१२४॥ गुरौ—गौरवार्हेऽर्थे वर्तमानस्य शब्दस्य द्वावेकश्चार्थो बहुवद्वा स्यात्। त्वं गुरुः। यूयं गुरवः। युवां गुरू। यूयं गुरवः। एष मे पिता। एते मे पितरः। आपः, दाराः गृहाः, वर्षाः, पञ्चालाः जनपदः गौदौ, खलतिकं वनानि, हरीतक्यः फलानि, पञ्चालमथुरे, चञ्चाभिरूपो मनुष्य इति सर्वलिङ्गसंख्ये वस्तुनि स्याद्वादमनुपतति मुख्योपचरितार्थानुपातिनि च शब्दात्मनि रूढितस्तल्लिङ्गसंख्योपादानव्यवस्थाऽनुसर्तव्या।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां कारक-
प्रकरणं समाप्तम्॥

॥ अथ **समासप्रकरणम्** ॥

तत्रादौ बहुव्रीहिः।

६१७ **समर्थः पदविधिः** ॥७।४।१२२॥ समर्थपदाश्रितत्वात् समर्थः। पदसंबंधी विधिः पदविधिः। तेन यः पदाद्विधिः यश्च पदे यश्च पदस्य पदयोः

पदानां वा स सर्वः पदविधिरेव। सर्वः पदविधिः समर्थो वेदितव्यः। समर्थानां पदानां विधिर्वेदितव्य इत्यर्थः। तच्च सामर्थ्यं व्यपेक्षा एकार्थीभावश्च। अत्र व्यपेक्षायां संबद्धार्थः संप्रेक्षितार्थो वा पदविधिः साधुर्भवति। एकार्थीभावे तु विग्रहवाक्यार्थाभिधाने यः शक्तः संगतार्थः संसृष्टार्थो वा पदविधिः स साधुर्भवति। अत्र च पदानि उपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा प्रधानार्थोपादानात् व्यर्थानि अर्थान्तराभिधायीनि वा भवन्ति। पदविधिश्च समासनामधातुकृत्तद्धितोपपदविभक्तियुष्मदस्मदादेशप्लुतरूपो भवति। तत्र समासः—धर्मं श्रितः धर्मश्रितः इत्यादिः। अत्र पूर्वोत्तरपदयोर्वाक्यावस्थायां परस्पराकांक्षालक्षणा व्यपेक्षा। वृत्त्यवस्थायां तु पृथगर्थानां सतामेकार्थीभाव इति। तदेतत्सामर्थ्यं अविशेषोक्तमपि लोकव्यपेक्षया वृत्यवृत्त्योः स्वभावेन विभक्तमवतिष्ठते। यत्र त्वसामर्थ्यं तत्र समासो न भवति। यथा पश्य धर्मम् श्रितो मैत्रो गुरुकुलमित्यादौ। नामधातुः—पुत्रमिच्छति पुत्रीयति। समर्थ इति किम्। पश्यति पुत्रमिच्छति सुखम्। कृत्—कुंभं करोति कुंभकारः। समर्थ इति किम्। पश्य कुंभम् करोति कटम्। तद्धितः—उपगोरपत्यमौपगवः। समर्थ इति किम्। गृहमुपगोरपत्यं तव। उपपदविभक्तिः—नमो देवेभ्यः। समर्थ इति किम्। इदं नमो देवाः शृणुत। युष्मदस्मदादेशः—धर्मस्ते मे स्वम्। समर्थ इति किम्। ओदनं पच तव मम भविष्यति। प्लुतः—अङ्ग कूज ३ इदानीं ज्ञास्यसि जाल्म। समर्थ इति किम्। अङ्ग कूजत्ययमिदानीं ज्ञास्यति जाल्मः। पदग्रहणाद् वर्णविधिरसामर्थ्येऽपि भवति। तिष्ठतु दध्यशान त्वं शाकेन। एवं समासनामधातुकृत्तद्धितेषु वाक्ये व्यपेक्षा वृत्तावेकार्थीभावः। शेषेषु पुनर्व्यपेक्षैव सामर्थ्यं भवति। ननु च राज्ञः पुरुषमानयेत्युक्ते योऽर्थ आनीयते राजपुरुषमानयेत्यप्युक्ते स एव तत् कोऽत्र व्यपेक्षैकार्थीभावयोर्विशेषः ?। उच्यते। संख्याविशेषो व्यक्ताभिधानमुपसर्जनविशेषणं चयोगश्चेति। तत्र राज्ञः पुरुषः, राज्ञोः पुरुषः, राज्ञां पुरुषः इति वाक्ये संख्याविशेषो भवति, समासे न भवति। राजपुरुषः। वाक्ये ह्युपसर्जनानि विभक्तार्थाभिधायित्वात् संख्याविशेषयुक्तं स्वार्थं प्रतिपादयन्ति। समासेऽन्तर्भूतस्वार्थं प्रधानार्थमभिदधतीत्यभेदैकत्वसंख्यां गमयन्ति। संख्याविशेषाणामविभागेनावस्थानमभेदैकत्वसंख्या।

'यथौषधरसाः सर्वे मधुन्याहितशक्तयः।
अविभागेन वर्तन्ते तां संख्यां तादृशीं विदुः' ॥

विभक्तिवाच्यैव तु संख्या वृत्तौ निवर्तते नामादिगम्या तु न निवर्तते। यथा द्विपुत्रः पञ्चपुत्र इत्यादौ नामार्थ एव संख्याविशेषः। तावकीनो मामकीन इत्यादेशाभिव्यङ्ग्यप्रेकत्वम्। शौर्पिकः मासजात इति परिमाणस्वाभाव्यादेकत्वसंख्यावगमः। कारकमध्यं व्यंजनमध्यमित्यादौ मध्यान्यथानुपपत्त्या द्वित्वागवमः। यत्रापि वृत्तौ विभक्तेर्लुब् नास्ति दास्याः पुत्र इत्यादौ तत्रापि संख्याविशेषो नास्ति सामान्येन विशेषणमात्रप्रतीतेः। अत एव वृत्तौ संख्याभेदाभावात् स्वभावतो निवृत्ता विभक्तिर्लुपा अन्वाख्यायते। अलुप्समासे तु शब्दान्तरं विभक्त्यन्तप्रतिरूपावयवमनेनोपायेन प्रतिपाद्यते। तथा वाक्ये व्यक्ताभिधानं भवति—ब्राह्मणस्य कंबलस्तिष्ठति। समासे पुनरव्यक्तं ब्राह्मणकंबलस्तिष्ठतीति। संदिह्यतेऽत्र षष्ठीसमासो वा संबोधनं वेति। किंचित् पुनरव्यक्तवाक्ये। यथार्धं पशोर्देवदत्तस्येति। पशुगुणस्य वा देवदत्तस्य यदर्धं यो वा संज्ञीभूतो पशुस्तस्य यदर्धमिति। तच्च समासे व्यक्तम् अर्धपशु देवदत्तस्येति। तथा वाक्ये उपसर्जने विशेषणं भवति। ऋद्धस्य राज्ञः पुरुषः। समासे न भवति राजपुरुषः। यथाहुः-सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यते इति। विशेषणयोगे हि सापेक्षत्वेनागमकत्वात् सामर्थ्यं न भवति। यत्र च क्वचिद् विशेषणयोगेऽपि गमकत्वं तत्र भवत्येव समासः, यथा देवदत्तस्य गुरुकुलम्। यदाह-

'संबंधिशब्दः सापेक्षो नित्यं सर्वः प्रवर्तते।
स्वार्थवत् सा व्यपेक्षाऽस्य वृत्तावपि न हीयते॥'

तथा वाक्ये चयोगो भवति स्वचयोगः स्वामिचयोगश्च। राज्ञो गौश्चाश्वश्च पुरुषश्च। समासे न भवति। राज्ञो गोश्वपुरुषाः। यदि समर्थः पदविधिः कथमसामर्थ्ये सूर्यं न पश्यन्त्यसूर्यंपश्या राजदारा इत्याद्या वृत्तयो भवन्ति ?। [1]किं हि वचनान्न भवति।

६१८ नाम नाम्नैकार्थ्यं समासो बहुलम् ॥३।१।१८॥ नाम नाम्ना सहैकार्थ्ये—एकार्थीभावे सति समाससंज्ञं स्यात् बहुलम्। ऐकार्थ्यं च सामर्थ्यविशेषः। स च पृथगर्थानां पदानां क्वचित्परस्परव्यपेक्षालक्षणं सामर्थ्यमनुभूय भवति। लक्षणमिदमधिकारश्च। तेन बहुव्रीह्यादिविशेषसंज्ञाभावे यत्रैकार्थता दृश्यते तत्रानेनैव समाससंज्ञा भवति। ऐकपद्यं च समासफलम्।

---

१ गमकत्वात् 'नञ्' इत्यनेनासामर्थ्येऽपि बाहुलकाद् भवतीत्यर्थः।

६१९ ऐकार्थ्ये ॥३।२।८॥ ऐकार्थ्ये—ऐकपद्यं तन्निमित्तस्य स्यादेर्लुप् स्यात्। अत एव च लुबविधानात् नाम नाम्नेत्युक्तावपि विभक्त्यन्तानामेव समासो विज्ञायते। विस्पष्टं पटुः, विस्पष्टपटुः। अत्र गुणविशेषणस्य गुणवचनेन समासः। भूतः पूर्वं भूतपूर्वः, इत्यादिषु विशेषसंज्ञाप्राप्तौ नाम नाम्नेत्यनेनैव समासः। सूत्रे बहुलमिति शिष्टप्रयोगानुसरणार्थम्। नामेति किम्। चरन्ति गावो धनमस्य। नाम्नेति किम्। चैत्रः पचति। बहुलवचनादेव क्वचिदनामापि समस्यते। भात्यर्को-ऽत्रेति भात्यर्कं नभः। नभसा सामानाधिकरण्यं समासफलम्। क्वचिदनाम्नापि। अनुव्यचलत्। अत्र नित्यसंख्यादिः समासफलम्। समासस्य च नामत्वेऽपि संख्या-यास्त्यादिभिरेवोक्तत्वात् स्यादयो न भवन्ति। पदत्वार्थमुत्पन्नस्य वा प्रथमैकवचनस्य त्याद्यन्तार्थप्राधान्यात् नपुंसकत्वे लोपो भवति। 'ऐकार्थ्ये' इति निमित्तसप्तमीव-ज्ञानादैकार्थ्योत्तरकालस्य न भवति।

६२० सुज्वार्थे संख्या संख्येये संख्यया बहुव्रीहिः ॥ ३।१।१९ ॥ सुचोऽर्थो वारः। वार्थो विकल्पः संशयो वा। सुज्वार्थे वर्तमानं संख्यावाचि नाम च संख्येये वर्तमानेन संख्यावाचिना नाम्ना सहैकार्थ्ये समाससंज्ञं बहुव्रीहिसंज्ञं च स्यात्। सुजर्थस्य समासेनैवाभिहितत्वात् सुचोऽप्रयोगः। द्विः दश इति विग्र-हेऽनेन समासे कृते।

६२१ संख्या समासे ॥३।१।१६३॥ सर्वा संख्या प्रथमोक्तेत्यनियमे प्राप्ते आनुपूर्व्याः संख्यायाः पूर्वनिपातार्थं वचनम्। समासमात्रे संख्यावाचि-नामनुपूर्वं पूर्वनिपतति। ततश्च।

६२२ समासान्तः ॥७।३।६९॥ अधिकारोऽयमापादपरिसमाप्तेः। अतः परं ये प्रत्ययास्ते समासस्यान्ता अवयवाः स्युः, तदग्रहणेन गृह्यन्ते। प्रयोजनं बहुव्रीह्यव्ययीभावद्विगुद्वन्द्वसंज्ञाः।

६२३ प्रमाणीसंख्याड्डः ॥७।३।१२८॥ प्रमाणीशब्दान्तात् संख्यावाचि-शब्दान्ताच्च बहुव्रीहेर्डः समासान्तः स्यात्। इति डे—द्विदशाः। द्वौ वा त्रयो वा द्वित्राः। सुज्वार्थ इति किम्। द्वावेव न त्रयः। संख्येति किम्। गावो वा दश वा। संख्ययेति किम्। दश वा गावो वा। संख्येये इति किम्। द्वित्रिंशतिर्गवाम्।

६२४ आसन्नादूराधिकाध्यर्धार्धादिपूरणं द्वितीयाद्यन्यार्थे ॥३।१।२०॥ आसन्न अदूर अधिक अध्यर्ध इत्येतानि अर्धशब्दपूर्वपदं च पूरणप्रत्ययान्तं नाम

संख्यावाचिना नाम्नैकार्थ्ये समस्यते द्वितीयाद्यन्तस्यान्यस्य पदस्यार्थे संख्येयरूपेऽभिधेये स च समासो बहुव्रीहिसंज्ञः स्यात्। आसन्ना दश येषां येभ्यो वेति विग्रहेऽनेन समासे, स्यादिलुपि ' उक्तार्थानामप्रयोगः' इति यच्छब्दाप्रयोगे।

६२५ **प्रथमोक्तं प्राक्** ॥३।१।१४८॥ अत्र समासप्रकरणे प्रथमान्तेन पदेन यन्निर्दिष्टं तत्पूर्वं निपतेत्। इत्यासन्नशब्दस्य पूर्वनिपाते, समासान्ते च डे–आसन्नदशाः। नव एकादश वेत्यर्थः। एवमदूरदशाः। अधिकदशाः। अध्यर्धा विंशतिर्येषां ते इति विग्रहेऽनेन समासे समासान्ते डे च कृते।

६२६ **विंशतेस्तेर्डिति** ॥७।४।६७॥ विंशतिशब्दस्यापदसंज्ञकस्य यस्तिशब्दस्तस्य डिति तद्धिते परे लुक् स्यात्। अध्यर्धविंशाः। त्रिंशदित्यर्थः। अर्धपञ्चमा विंशतयो येषां ते अर्धपञ्चमविंशाः नवतिरित्यर्थः।

६२७ **अव्ययम्** ॥ ३।१।२१ ॥ अव्ययं नाम संख्यावाचिना नाम्नैकार्थ्ये समस्यते द्वितीयाद्यन्यार्थे संख्येयेऽभिधेये, स च समासो बहुव्रीहिः। योगविभाग उत्तरार्थः। उप–समीपे दश येषां ते उपदशाः, नवैकादश वा। एवमुपविंशाः, उपत्रिंशाः, उपचत्वारिंशाः।

३२८ **एकार्थं चानेकं च** ॥३।१।२२॥ एकः समानोऽर्थोऽधिकरणं यस्य तदेकार्थम्–समानाधिकरणम्। एकमनेकं चैकार्थं नामाव्ययं च नाम्ना द्वितीयाद्यन्तस्यान्यस्य पदस्यार्थे समस्यते स च समासो बहुव्रीहिः। आरूढो वानरो यं स आरूढवानरो वृक्षः। आरूढा बहवो वानरा यं स आरूढबहुवानरो वृक्षः। उच्चैर्मुखमस्य उच्चैर्मुखः। व्यधिकरणत्वादव्ययस्य न प्राप्नोतीत्यव्ययानुकर्षणार्थश्चकारः। सामानाधिकरण्ये तु एकार्थमित्यनेनापि सिद्ध्यति। अस्ति क्षीरमस्या अस्तिक्षीरा गौः। क्रियावचने त्वस्त्यादीनां नाम नाम्नेत्यादिनैव बहुलवचनात् सिद्धम्। एकार्थग्रहणं किम्। पञ्चभिर्भुक्तमस्य। द्वितीयाद्यन्यार्थ इत्येव। वृष्टे मेघे गतः। इह कस्मान्न भवति–वृष्टे मेघे गतं पश्य ?। बहिरङ्गात्र द्वितीयान्ततेति। शब्दे कार्यासंभवादर्थे लब्धे यदर्थग्रहणं तदन्यपदार्थस्य या लिङ्गसंख्याविभक्तयस्ता यथा स्युरित्येवमर्थम्। बहुलाधिकारात् राजन्वती भूरनेनेत्यादौ न भवति।

६२९ **उष्ट्रमुखादयः** ॥३।१।२३॥ उष्ट्रमुखादयो बहुलं बहुव्रीहिसमासा निपात्यन्ते। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। वृषस्कंधः। इत्यादिषूपमानमुपमेयेन सामान्यवाचिना च सह समस्यते। उपमेयसरूपस्य चोपमानस्य यथासंभवं लोपः।

कंठे स्थितः कालो यस्य सः कंठेकाल इत्यादिषु सप्तमीपूर्वपदं समानाधिकरणं समस्यते उत्तरपदस्य च लोपः । केशसंघातश्चूडा यस्य सः केशचूड इत्यादिषु संघातविकारापेक्षया षष्ठ्या समस्तं समस्यते उत्तरपदलोपश्च । तथा प्रपतितानि पर्णानि अस्य प्रपर्ण इत्यादिषु प्रादिपूर्वं धातुजं पदं समस्यते तस्य च विकल्पेन लोपः । तथा अविद्यमानः पुत्रोऽस्य अपुत्रः, अविद्यमानपुत्र इत्यादिषु नञ्पूर्वमस्त्यर्थं पदं समस्यते तस्य च वा लोपः । बहुवचनमाकृतिगणार्थम् ।

६३० **सहस्तेन** ॥ ३।१।२४ ॥ सह इत्येतन्नाम तुल्ययोगे विद्यमानार्थे च वर्तमानं तेनेति तृतीयान्तेन नाम्नाऽन्यपदस्यार्थे समस्यते स च समासो बहुव्रीहिः । प्रथमान्तान्यपदार्थार्थं आरंभः ।

६३१ **सहस्य सोऽन्यार्थे** ॥ ३।२।१४३ ॥ अन्यार्थे–अन्यपदार्थे बहुव्रीहौ समासे उत्तरपदे परे सहशब्दस्य स इत्ययमादेशो वा स्यात् । सह पुत्रेण सपुत्रः, सहपुत्र आगतः । आगमनमुभयोस्तुल्यम् । सह धनेन वर्तते सधनः, सहधनः। विद्यमानताऽत्र सहार्थो न तुल्ययोगः । बहुलाधिकारात् विद्यमानार्थे क्वचिन्न समासः । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ।

६३२ **नाम्नि** ॥३।२।१४४॥ योगारंभाद्वेति नानुवर्तते । अन्यार्थे समासे उत्तरपदे सहशब्दस्य सादेशः स्यात् नाम्नि संज्ञायां विषये । सह अश्वत्थेन वर्तते साश्वत्थं नाम वनम् । सह रसेन सरसा दूर्वा । अन्यार्थ इत्येव । सह चरतीति सहचरः कुरण्टकः ।

६३३ **अदृश्याधिके** ॥३।२।१४५॥ अदृश्यं परोक्षम् । अधिकमधिरूढम् । तद्धाचिनोरुत्तरपदयोरन्यार्थे समासे सहशब्दस्य सादेशः स्यात् । साग्निः कपोतः । सद्रोणा खारी । ' सहस्य सोऽन्यार्थे ' इत्यनेनैव सिद्धे नित्यार्थं वचनम् ।

६३४ **नाशिष्यगोवत्सहले** ॥३।२।१४८॥ आशिषि गम्यमानायां गवादिवर्जित उत्तरपदे परे सहशब्दस्य सादेशो न स्यात् । स्वस्ति राज्ञे सहराष्ट्राय । आशिषीति किम् । सपुत्रः, सहपुत्रः । अगोवत्सहल इति किम् । स्वस्ति भवते सगवे, सहगवे, सवत्साय, सहवत्साय, सहलाय, सहहलाय ।

६३५ **दिशो रूढ्यान्तराले** ॥६।१।२७॥ रूढ्या दिशः संबंधि नाम रूढ्यैव दिशः संबंधिना नाम्नाऽन्तरालेऽन्यपदार्थेऽभिधेये समस्यते स च समासो

बहुव्रीहिः । दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा इति विग्रहेऽनेन समासे कृते ।

६३६ **सर्वादयोऽस्यादौ** ॥३।२।६१॥ सर्वादिगणः परतः स्त्री पुंवत् स्यात् 'अस्यादौ'–स्यादिश्चेत्ततः परो न भवेत् । इत्यनेन पुंवद्भावे–दक्षिणपूर्वा दिक् । कथं पश्चिमदक्षिणा, पश्चिमोत्तरा ? । कर्मधारयोऽयम् । बहुव्रीहौ हि सर्वनाम्नः पूर्वनिपातः स्यात् । रूढिग्रहणं यौगिकनिवृत्त्यर्थम् , तेन ऐन्द्र्याः कौबेर्याश्च दिशोर्यदन्तरालमिति वाक्यमेव । इत्यादयो बहुव्रीहिसमासा ज्ञेयाः । यत्र प्रधानस्यैकदेशो विशेषणतया ज्ञायते स तद्गुणसंविज्ञानो बहुव्रीहिः । यथा लंबौ कर्णौ यस्य सः लंबकर्णः । चित्राः गावः यस्येत्यत्र ।

६३७ **विशेषणं सर्वादिसंख्यं च बहुव्रीहौ** ॥ ३।१।१६० ॥ विशेषणवाचि, सर्वादि, संख्यावाचि च नाम बहुव्रीहौ पूर्वं स्यात् । अनेन विशेषणस्य पूर्वनिपाते ।

६३८ **गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ** ॥२।४।९६॥ गौणस्याकिपो गोशब्दस्य ङ्याद्यन्तस्य च नाम्नोऽन्ते वर्तमानस्य ह्रस्वः स्यान्न चेदसावंशिसमासान्त ईयस्वन्त बहुव्रीह्यन्तो वा स्यात् । अनेन च ह्रस्वे–चित्रगुः। सर्वादौ-सर्वं शुक्लमस्य सर्वशुक्लः । संख्यायाम्–द्वौ कृष्णावस्य द्विकृष्णः । षड्ढतः । सप्तरक्तः । उन्नतरक्तशब्दौ न क्तान्तावपि तु गुणशब्दौ । तेन स्पर्धे क्तलक्षणः पूर्वनिपातो न भवति । शब्दस्पर्धे परत्वात् सर्वादिसंख्ययोः संख्याया एव पूर्वनिपातः। ज्यन्यः । उभयोस्तु सर्वादित्वे स्पर्धे परस्य पूर्वनिपातः । ज्यन्यः । बहुव्रीहाविति किम् । उपसर्वम् । 'प्रथमोक्तं प्राग्वत् ' इत्यनियमे प्राप्ते नियमार्थं वचनम् । सर्वादिसंख्ययोर्विशेषणत्वेऽपि पृथग्वचनं शब्दपरस्पर्धार्थम् ।

६३९ **क्ताः** ॥३।१।१५१॥ क्तप्रत्ययान्तं सर्वं बहुव्रीहौ पूर्वं स्यात् । कृतः कटोऽनेन कृतकटः । क्तान्तस्य विशेषणत्वात् पूर्वेण सिद्धे विशेष्यार्थं तु वचनम् । कटे कृतमनेन कृतकटः । स्पर्धे परत्वार्थं च । कृतभव्यकटः । केचित्तु सर्वादिभ्यः क्तान्तस्य पूर्वनिपातं नेच्छन्ति । बहुवचनं व्याप्त्यर्थम् , तेन कृतमित्य इत्यत्र परेणापि स्पर्धे क्तान्तस्यैव पूर्वनिपातः ।

६४० **जातिकालसुखादेर्नवा** ॥ ३।१।१५२ ॥ जातिवाचिभ्यः कालवाचिभ्यः सुखादिभ्यश्च शब्दरूपेभ्यो बहुव्रीहौ क्तान्तं पूर्वं वा स्यात् । जाति–शङ्कर-जग्धी, जग्धशङ्करा । कटकृतः, कृतकटः । व्यक्तिविवक्षायां तु ' क्ताः ' इत्यनेन कृतकट इत्याद्येव भवति । अन्ये तु आकृतिव्यङ्ग्यजातिवाचिन एव क्तान्तपूर्वनिपातमिच्छन्ति । तेनेह न भवति । आहूतब्राह्मणः । काल–मासयाता, यातमासा । सुखादयो दश क्यनविधौ निर्दिष्टाः । सुखयाता, यातसुखा ।

६४१ **वाहिताग्न्यादिषु** ॥ ३।१।१५३ ॥ आहिताग्न्यादिषु बहुव्रीहिषु क्तान्तं पूर्वं वा स्यात् । आहितोऽग्निर्येन स आहिताग्निः । अग्न्याहितः । बहुवचनमाकृतिगणार्थम् ।

६४२ **प्रहरणात्** ॥ ३।१।१५४ ॥ प्रहरणवाचिनः शब्दात् क्तान्तं बहुव्रीहौ पूर्वं वा स्यात् । उद्यतोऽसिरनेन उद्यतासिः । अस्युद्यतः ।

६४३ **न सप्तम्यिन्द्रादिभ्यश्च** ॥ ३।१।१५५ ॥ इन्द्रादेः प्रहरणवाचिनश्च शब्दात् पूर्वं सप्तम्यन्तं न स्याद् बहुव्रीहौ । इन्दुर्मौलौ यस्य स इन्दुमौलिः । असिः पाणावस्य असिपाणिः । बहुलाधिकारात् पाणिवज्र इत्यत्र पूर्वनिपातोऽपि । सर्वत्र उष्ट्रमुखादित्वात्समासः । बहुवचनं प्रयोगानुसरणार्थम् । एवमुत्तरत्रापि ।

६४४ **गड्वादिभ्यः** ॥३।१।१५६॥ वेत्यनुवर्तते । गड्वादिभ्यः शब्देभ्यो बहुव्रीहौ सप्तम्यन्तं पूर्वं वा स्यात् । गडुकंठः, कंठेगडुः । एवं शिरसिगडुः, गडुशिराः । व्यवस्थितविभाषया बहेगडुरित्येव । भवति ।

६४५ **प्रियः** ॥३।१।१५७॥ प्रियशब्दो बहुव्रीहौ पूर्वं वा स्यात् । प्रियगडुः, गडुप्रियः ।

६४६ **परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ्** ॥ ३।२।४९ ॥ परतो विशेष्यवशाद्यः स्त्रीलिङ्गः स स्त्रियां वर्तमाने एकार्थे तुल्याधिकरणे उत्तरपदे परे पुंवत् स्यात् 'अनूङ्'–न चेदूङन्तो भवति । दर्शनीया भार्या यस्य स दर्शनीयभार्यः । एवं पटुभार्यः । पट्वी च मृद्वी च पट्वीमृद्व्यौ, ते भार्ये अस्य पट्वीमृदुभार्यः । अत्र द्वंद्वपदानां परस्परार्थसंक्रमात् ह्यर्थस्य मृदुशब्दस्य ह्यर्थेन भार्याशब्देन सामानाधिकरण्यमिति पुंवद्भावः । पूर्वस्य तु व्यवधानान्न भवति । परत इति किम् । द्रुणीभार्यः । अत्र पुंवद्भावे अर्थतः प्रत्यासन्नः कूर्मशब्दः प्राप्नुयात् । द्रोणीभार्यः ।

अत्र पुंवद्भावे शब्दतः प्रत्यासन्नो द्रोणशब्दः प्राप्नुयात् । स्त्रीति किम् । ग्रामणि कुलं दृष्टिरस्य ग्रामणिदृष्टिः । स्त्र्येकार्थ इति किम् । कल्याण्या वस्त्रं कल्याणीवस्त्रम् । स्त्रीग्रहणं किम् । कल्याणी प्रधानमेषां कल्याणीप्रधानाः । एकार्थ इति किम् । कल्याण्या माता कल्याणीमाता । अनूङिति किम् । ब्रह्मबंधूभार्यः । अनूङिति प्रसज्ज्यप्रतिषेधात् इडविडोऽपत्यं स्त्री अञ् तस्य लुप् । इडविड् । सा चासौ भार्या च ऐडविडभार्येत्यादिषु उत्तरेण पुंवद्भावः । पर्युदासे हि ऊङ्सदृशप्रत्ययान्तस्यैव पुंवद्भावः स्यात् । उक्तं हि–

'द्वौ नञौ प्रकृतौ लोके पर्युदासप्रसज्ज्यकौ ।
पर्युदासः सदृग्ग्राही प्रसज्ज्यस्तु निषेधकृत्' ॥

६४७ **नाप्प्रियादौ** ॥ ३।२।५३ ॥ पूरण्यप्प्रत्ययान्ते स्त्र्येकार्थे उत्तरपदे प्रियादौ च परे परतः स्त्री पुंवन्न स्यात् । कल्याणी पञ्चमी यासां ताः कल्याणीपञ्चमा रात्रयः । पूरण्यबन्तस्य ग्रहणात् इह पुंवद्भावो भवत्येव । बहव्य ऋचो यस्य स बह्वृचश्चरणः । प्रियादौ–कल्याणी प्रिया यस्य स कल्याणीप्रियः । एवं कल्याणीभक्तिः । कथं दृढभक्तिः? । दृढं भक्तिरस्येत्येवं अस्त्रीपूर्वपदस्य विवक्षितत्वात् । अप्प्रियादाविति किम् । कल्याणी पञ्चमी अस्मिन् कल्याणपञ्चमीकः पक्षः ।

६४८ **तद्धिताककोपान्त्यपूरण्याख्याः** ॥३।२।५४॥ तद्धितप्रत्ययस्याकप्रत्ययस्य च यः कः स उपान्त्यो यासां तास्तद्धिताककोपान्त्याः पूरणीप्रत्ययान्ता आख्याः संज्ञास्तद्रूपाश्च परतः स्त्रियः पुंवन्न स्युः । तद्धित–मद्रिकाभार्यः । अक–कारिकाभार्यः । पूरणी–द्वितीयाभार्यः । कस्य तद्धिताकविशेषणं किम् । पाकभार्यः।

६४९ **तद्धितः स्वरवृद्धिहेतुररक्तविकारे** ॥ ३।२।५५ ॥ स्वरस्थानाया वृद्धेर्यो हेतुस्तद्धितो रक्ताद्विकाराच्चान्यत्रार्थे विहितस्तदन्तः परतः स्त्रीलिङ्गः पुंवन्न स्यात् । [1]वैदिशीभार्यः। तद्धित इति किम् । कुंभकारी भार्या यस्य स कुंभकारभार्यः। वृद्धिहेतुरिति किम् । अर्धमस्थे भवा अर्धप्रस्था, अर्धप्रस्था भार्या यस्य सः अर्धप्रस्थभार्यः । अन्ये तु वृद्धिमात्रहेतोर्ङिर्णितस्तद्धितस्य पुंवत्प्रतिषेधमिच्छन्ति । तन्मते वैयाकरणीभार्यः । अरक्तविकार इति किम् । कषायेण रक्ता काषायी, सा बृहतिका यस्य स काषायबृहतिकः । लोहस्य विकारो लौही, सा ईषास्य लौहेषः ।

१ विदिशायां भवा जाता वा ।

६५० **स्वाङ्गान्ङीर्जातिश्चामानिनि** ॥ ३।२।५६ ॥ स्वाङ्गाद्यो विहितो ङीस्तदन्तो जातिवाची च यः शब्दः परतः स्त्री स पुंवन्न स्यात् अमानिनि–मानिन्शब्दश्चेत्परो न भवेत् । दीर्घकेशीभार्यः । कठीभार्यः ।

' आकृतिग्रहणा जातिरत्रिलिङ्गा च यान्विता ।
आजन्मनाशमर्थानां सामान्यमपरे विदुः ' ॥

अत्र प्रथमजातिलक्षणानुसारेण कुमारीभार्य इति भवति, द्वितीयजातिलक्षणानुसारेण कुमारभार्य इति भवति । नहि कुमारत्वादि उत्पत्तेः प्रभृत्याविनाशमनुवर्तते । स्वाङ्गादिति किम् । पटुभार्यः । ङीरिति किम् । सकेशभार्यः । अमानिनीति किम् । दीर्घकेशमानिनी । कठमानिनी ।

६५१ **बहुव्रीहेः काष्ठे टः** ॥ ७।३।१२५ ॥ अङ्गुल्यन्ताद् बहुव्रीहेः काष्ठे वर्तमानात् टः समासान्तः स्यात् ।

६५२ **अवर्णेवर्णस्य** ॥७।४।६८॥ अवर्णान्तस्येवर्णान्तस्य चापदस्य तद्धिते परे लुक् स्यात् । द्वे अङ्गुली यस्य द्व्यङ्गुलम् । अङ्गुलिसदृशावयवं धान्यकण्टकादीनां विक्षेपणकाष्ठमेवमुच्यते । बहुव्रीहेरिति किम् । उपाङ्गुलि । काष्ठ इति किम् । पञ्चाङ्गुलिर्हस्तः । अङ्गुलेरिति निर्देशादङ्गुलीशब्दान्तान्न भवति । द्वावङ्गुलीसदृशावयवौ यस्य तत् द्व्यङ्गुलीकं दारु । 'न कचि' इति ह्रस्वाभावः । टकारो ङ्यर्थः । दीर्घाङ्गुली यष्टिः ।

६५३ **सक्थ्यक्ष्णः स्वाङ्गे** ॥७।३।१२६॥ स्वाङ्गवाची यः सक्थिशब्दोऽक्षिशब्दश्च तदन्ताद् बहुव्रीहेष्टः स्यात् । दीर्घे सक्थि यस्य दीर्घसक्थः । विशालाक्षः । सक्थ्यक्ष्ण इति किम् । सुबाहुः । स्वाङ्ग इति किम् । दीर्घसक्थि शकटम् । बहुव्रीहेरित्येव परमसक्थि ।

६५४ **द्वित्रेर्मूर्ध्नो वा** ॥७।३।१२७॥ द्वि त्रि इत्येताभ्यां परो यो मूर्धनशब्दस्तदन्ताद् बहुव्रीहेष्टो वा स्यात् ।

६५५ **नोऽपदस्य तद्धिते** ॥७।४।६१॥ नकारान्तानामपदसंज्ञकानां तद्धिते परेऽन्त्यस्वरादेर्लुक् स्यात् । द्विमूर्धः, द्विमूर्धा । त्रिमूर्धः, त्रिमूर्धा । द्विमूर्धी स्त्री । बहुव्रीहेरित्येव । द्वयोर्मूर्धा द्विमूर्धा ।

६८६ सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणिपदाजपदप्रोष्ठपदभद्रपदम् ॥७।३।१२९॥ सुप्रातादयो बहुव्रीहयो डप्रत्ययान्ता निपात्यन्ते । शोभनं कर्म प्रातरस्य सुप्रातः । शोभनं कर्म श्वोऽस्य सुश्वः । शोभनं कर्म दिवाऽस्य सुदिवः शारेरिव कुक्षिरस्य शारिकुक्षः । चतस्रोऽश्रयो यस्य चतुरश्रः । एण्या इव पादावस्य एणीपदः । एवमजपदः । प्रोष्ठो गौस्तस्येव पादावस्य प्रोष्ठपदः । भद्रौ पादावस्य भद्रपदः । निपातनात् पद्भावो विषयव्यवस्था च भवति ।

६८७ पूरणीभ्यस्तत्प्राधान्येऽप् ॥७।३।१३०॥ पूरणप्रत्ययान्तः स्त्रीलिङ्गशब्दः पूरणी तदन्ताद् बहुव्रीहेरप् समासान्तः स्यात् , तत्प्राधान्ये—तस्याः पूरण्याः प्राधान्ये । समासेनाभिधीयमानो ह्यर्थः प्रधानं भवति । कल्याणी पञ्चमी रात्रिर्यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । अत्र रात्रयः समासार्थः । तासु पञ्चम्यपि रात्रित्वेनानुप्रविष्टेति प्रधानम् । पूरणीभ्य इति किम् । द्वितीया भार्या कल्याणी यासां भार्याणां ता द्वितीयाकल्याणीकाः । स्त्रीत्वनिर्देशः किम् । कल्याणपञ्चमका दिवसाः। बहुवचनं व्याप्त्यर्थम् । पकारो 'नाप्प्रियादौ' इति पर्युदासार्थः।

६८८ नञ्सुव्युपत्रेश्चतुरः ॥ ७।३।१३१ ॥ एतेभ्यः परो यश्चतुःशब्दस्तदन्ताद् बहुव्रीहेरप् स्यात् । अविद्यमानानि अदृश्यानि वा चत्वारि यस्य सोऽचतुरः । सुदृश्यानि शोभनानि वा चत्वारि यस्य सुचतुरः । विसदृशानि विगतानि वा चत्वारि यस्य विचतुरः । चत्वारः समीपे येषां संख्येयानां ते उपचतुराः । त्रयो वा चत्वारो वा त्रिचतुराः । समासान्तविधेरनित्यत्वादिह न भवति । त्रयश्चत्वारो यस्य स त्रिचत्वा उन्मुग्धः ।

६८९ अन्तर्बहिर्भ्यां च लोम्नः ॥ ७।३।१३२॥ एताभ्यां परो यो लोमन्शब्दस्तदन्ताद् बहुव्रीहेरप् स्यात् । अन्तर्लोमान्यस्य अन्तर्लोमः । बहिर्लोमः प्रावारः ।

६९० भान्नेतुः ॥७।३।१३३॥ भान्नक्षत्रवाचिनः परो यो नेतृशब्दस्तदन्ताद् बहुव्रीहेरप् स्यात् । मृगो नेता यासां ता मृगनेत्रा रात्रयः । भादिति किम् । देवदत्तनेतृकः । नेत्रशब्देनैव सिद्धे नेतृशब्दात् कच् मा भूत् इति वचनम् ।

६९१ नाभेर्नाम्नि ॥७।३।१३४॥ नाभ्यन्ताद् बहुव्रीहेरप् स्यान्नाम्नि—अवन्तेन चेत्संज्ञा गम्यते । पद्मनाभः । नाम्नीति किम् । विकसितवारिजनाभिः । अधोनाभं प्रहतवानिति अव्ययीभावेऽपि तिष्ठद्गवादिषु तथापाठात् सिद्धम् ।

६६२ **नञ्बहोर्ऋचो माणवचरणे** ॥ ७।३।१३५ ॥ एताभ्यां परो य ऋचशब्दस्तदन्ताद् बहुव्रीहेरप् स्यात् यथासंख्यं माणवे चरणे च वाच्ये।

६६३ **अन् स्वरे** ॥३।२।१२९॥ नञः स्वरादावुत्तरपदेऽन् इत्ययमादेशः स्यात्। न विद्यन्ते ऋचोऽस्य अनृचो माणवः। बह्वृचश्चरणः। माणवचरण इति किम्। अनृकं साम। बह्वृकं सूक्तम्। 'ऋक्पूः पथ्यपोऽत्' इत्येव सिद्धे नियमार्थं वचनम्।

६६४ **नञ्सुदुर्भ्यः सक्तिसक्थिहलेर्वा** ॥७।३।१३६॥ नञ्सुदुर् इत्येतेभ्यः परे ये सक्तिसक्थिहलिशब्दास्तदन्ताद् बहुव्रीहेरब्वा स्यात्। सञ्जनं सक्तिः।

६६५ **नञत्** ॥३।२।१२८॥ नञ्शब्द उत्तरपदे परे अकारः स्यात्। न विद्यमाना सक्तिरस्य असक्तः, असक्तिः। सुसक्तः, सुसक्तिः। दुःसक्तः। दुःसक्तिः। असक्थः, असक्थिः। सुसक्थः, सुसक्थिः। दुःसक्थः, दुःसक्थिः। अहलः, अहलिः। सुहलः, सुहलिः। दुर्हलः, दुर्हलिः। नञ्सुदुर्भ्य इति किम्। गौरसक्थी स्त्री। दीर्घसक्थि शकटम्। बहुहलिः पुरुषः। हलसक्तशब्दाभ्यां सिद्धे कजभावार्थं वचनम्। तेन न विद्यते हलमस्य अहलक इत्यादि न भवति। सक्तिशब्दान्नेच्छन्त्यन्ये। वचनभेदो यथासंख्यनिवृत्त्यर्थः।

६६६ **प्रजाया अस्** ॥७।३।१३७॥ नञादिभ्यः परो यः प्रजाशब्दस्तदन्ताद् बहुव्रीहेरस् समासान्तः स्यात्। न विद्यमानाः प्रजा यस्य अप्रजाः। सुप्रजाः। दुष्प्रजाः।

६६७ **मन्दाल्पाच्च मेधायाः** ॥७।३।१३८॥ एताभ्यां नञादिभ्यश्च परो यो मेधाशब्दस्तदन्ताद् बहुव्रीहेरस् स्यात्। मन्दा मेधा यस्य स मन्दमेधाः। एवमल्पमेधाः। अमेधाः। सुमेधाः। दुर्मेधाः।

६६८ **जातेरीयः सामान्यवति** ॥७।३।१३९॥ जातिशब्दान्ताद् बहुव्रीहेरीयः समासान्तः स्यात् सामान्यवति—सामान्याश्रयेऽन्यपदार्थे वाच्ये। ब्राह्मणो जातिरस्य ब्राह्मणजातीयः, अत्र ब्राह्मणशब्देन ब्राह्मणस्था जातिरुच्यते। सामान्यवतीति किम्। बहुजातिर्ग्रामः। अत्र ग्रामो न सामान्यवान् किन्तु तत्स्थाः पुरुषाः। अजातीय इत्यत्र तु सामान्यवानेवान्यपदार्थः। प्रतिषेधस्तु नञर्थः। सामान्यग्रहणं किम्। दुर्जातेः सुतपुत्रस्य। अत्र जातिशब्दो जन्मपर्याय इति न

सामान्यवानन्यपदार्थः। कथं पितृस्थानीयः ?। स्थानीयं दुर्गमितिवत् स्थीयतेऽस्मिन्निति स्थानीय इत्यधिकरणप्रधानेन स्थानीयशब्देन भविष्यति। पितेव स्थानीयः पितृस्थानीयः।

६६९. **भृतिप्रत्ययान्मासादिकः** ॥७।३।१४०॥ भृतौ वर्तमानाद्यः प्रत्ययो विहितस्तदन्तात्परो यो मासशब्दस्तदन्ताद् बहुव्रीहेरिकः समासान्तः स्यात्। पञ्च भृतिरस्य पञ्चकः, पञ्चको मासोऽस्य पञ्चकमासिकः। भृतिप्रत्ययादिति किम्। सुमासः। भृतिग्रहणं किम्। वर्षासु भवो वार्षिकः, वार्षिको मासोऽस्य वार्षिकमासकः। प्रत्ययग्रहणं किम्। भृतिर्मासोऽस्य भृतिमासकः। मासादिति किम्। पञ्चको दिवसोऽस्य पञ्चकदिवसकः।

६७० **द्विपदाद्धर्मादन्** ॥७।३।१४१॥ धर्मशब्दान्ताद् द्विपदाद् बहुव्रीहेरन् स्यात्। साधूनामिव धर्मोऽस्य साधुधर्मा। विकल्पमिच्छन्त्येके। कल्याणधर्मा। कल्याणधर्मकः। द्विपदादिति किम्। परमः स्वो धर्मोऽस्य परमस्वधर्मः। इह कस्मान्न भवति–परमः स्वधर्मोऽस्य परमस्वधर्मः ?। प्रत्यासत्तेर्द्विपदस्य बहुव्रीहेर्यदि धर्म एवोत्तरपदं तदा स्यादितीह न भवति।

६७१ **सुहरिततृणसोमाज्जम्भात्** ॥ ७।३।१४२॥ एतेभ्यः परो यो जंभशब्दस्तदन्ताद् बहुव्रीहेरन् स्यात्। जंभशब्दोऽभ्यवहार्यवचनो दंष्ट्रावचनो वा। शोभनो जंभो जंभा वा अस्य सुजंभा। हरितजंभा। तृणजंभा। सोमजंभा। दंष्ट्रापक्षे तृणमिव जंभोऽस्य तृणजंभा। स्वादिभ्य इति किम्। चारुजंभः।

६७२ **दक्षिणेर्मा व्याधयोगे** ॥७।३।१४३॥ दक्षिणेर्मेति बहुव्रीहिरन्तो निपात्यते व्याधेन योगे सति। ईर्म बहु व्रणं वा। दक्षिणमङ्गमीर्ममस्य दक्षिणेऽङ्गे ईर्मस्येति वा दक्षिणेर्मा मृगः। व्यधुकामस्य व्याधस्य दक्षिणं भागं बहूकृत्य व्यधनानुकूलं स्थितो व्याधेन वा दक्षिणभागे कृतव्रण एवमुच्यते। व्याधयोग इति किम्। दक्षिणेर्मं शकटम्।

६७३ **सुपूत्युत्सुरभेर्गन्धाद्गुणे** ॥ ७।३।१४४॥ एतेभ्यः परो यो गंधशब्दो गुणे वर्तते तदन्ताद् बहुव्रीहेरित् समासान्तः स्यात्। शोभनो गंधो गुणोऽस्य सुगंधि चन्दनम्। पूतिगंधि करञ्जम्। उद्गंधि कमलम्। सुरभिगंधि केसरम्। उत्तरत्रागन्तोर्वचनादिह स्वाभाविकाद् भवति। स्वादिभ्य इति किम्।

तीव्रगंधं हिङ्गु । गंधादिति किम् । सुरसः । गुण इति किम् । शोभना गंधाः कुष्ठादयोऽस्य सुगंध आपणिकः । इदिति तकार उच्चारणार्थः ।

६७४ **वागन्तौ** ॥ ७।३।१४५ ॥ स्वादिभ्यः पर आगन्तौ–आहार्ये गुणे वर्तते यो गंधशब्दस्तदन्ताद् बहुव्रीहेरित् वा स्यात् । सुगंधि, सुगंधं वा शरीरम् ।

६७५ **वाल्पे** ॥७।३।१४६॥ अल्पेऽर्थे यो गंधशब्दस्तदन्ताद् बहुव्रीहेरित् वा स्यात् । सूपस्य गंधो मात्रास्मिन् सूपगंधि, सूपगंधं भोजनम् । अल्पसूपमित्यर्थः । असामानाधिकरण्येऽपि उष्ट्रमुखादित्वाद् बहुव्रीहिः ।

६७६ **वोपमानात्** ॥७।३।१४७॥ उपमानात् परो यो गंधशब्दस्तदन्ताद् बहुव्रीहेरिद् वा स्यात् । उत्पलस्येव गंधोऽस्य उत्पलगंधि, उत्पलगंधं वा मुखम् ।

६७७ **पात्पादस्याहस्त्यादेः** ॥ ७।३।१४८ ॥ हस्त्यादिवर्जितादुपमानात् परस्य पादशब्दस्य बहुव्रीहौ पादित्ययमादेशः समासान्तः स्यात् । व्याघ्रस्येव पादावस्य व्याघ्रपात् । अहस्त्यादेरिति किम् । हस्तिन इव पादावस्य हस्तिपादः ।

६७८ **कुंभपद्यादिः** ॥७।३।१४९॥ कुंभपद्यादयः शब्दाः कृतपात्समासान्ता ङ्यन्ता एव बहुव्रीहयो निपात्यन्ते । कुंभाविव पादावस्याः कुंभपदी । अत्र कुंभपद्यादिषु ये उपमानपूर्वास्तेषां पूर्वेण संख्यादीनां चोत्तरेण सिद्धे यदिह वचनं तेन 'वा पादः' इति ङीविकल्पो न भवति। कथमेकपादिति ?। केचिदिहैकपदीशब्दं न पठन्ति ।

६७९ **सुसंख्यात्** ॥७।३।१५०॥ सुपूर्वस्य संख्यापूर्वस्य पादशब्दस्य बहुव्रीहौ पादित्ययमादेशः समासान्तः स्यात् । शोभनौ पादावस्य सुपात् । द्विपात् । स्त्रियां तु वा पाद इति पक्षे ङीः । सुपदी, सुपात् । द्विपदी, द्विपात् ।

६८० **वयसि दन्तस्य दत्** ॥७।३।१५१॥ सुपूर्वस्य संख्यापूर्वस्य च दन्तशब्दस्य बहुव्रीहौ वयसि गम्यमाने दत् इत्ययमादेशः समासान्तः स्यात् । शोभनाः सुजाताः समस्ता वा दन्ता अस्य सुदन् कुमारः । द्वौ दन्तावस्य द्विदन् बालः । ऋकारो ङ्यार्थः ।

६८१ **स्त्रियां नाम्नि** ॥७।३।१५२॥ बहुव्रीहौ स्त्रियां नाम्नि विषये दन्तशब्दस्य दत्रादेशः समासान्तः स्यात् । अय इव दन्ता अस्या अयोदती। फालदती।

एवंनामा काचित्। स्त्रियामिति किम्। वज्रदन्तः। नाम्नीति किम्। समदन्ती। असमास उत्तरत्र नाम्नीत्येतावतोऽनुवृत्त्यर्थः।

६८२ **श्यावारोकाद्वा** ॥७।३।१५३॥ एताभ्यां परो यो दन्तशब्दस्तस्य बहुव्रीहौ दत्रादेशो वा स्यान्नाम्नि। श्यावाःकपिशा दन्ता अस्य श्यावदन्, श्यावदन्तः। अरोका निर्दीप्तयो निश्छिद्रा वा दन्ता अस्य अरोकदन्, अरोकदन्तः। नाम्नीत्येव। श्यावदन्तः। अरोकदन्तः।

६८३ **वाग्रान्तशुद्धशुभ्रवृषवराहाहिमूषिकशिखरात्** ॥७।३।१५४॥ अग्रान्तेभ्यः शुद्ध शुभ्र वृष वराह अहि मूषिक शिखर इत्येतेभ्यश्च परो यो दन्तशब्दस्तस्य बहुव्रीहौ दत्रादेशो वा स्यात्। कुड्मलाग्रमिव दन्ता अस्य कुड्मलाग्रदन्, कुड्मलाग्रदन्तः। शुद्धा दन्ता अस्य शुद्धदन्, शुद्धदन्तः। शुभ्रदन्, शुभ्रदन्तः। वृषस्येव दन्ता अस्य वृषदन्, वृषदन्तः। एवं वराहदन्, वराहदन्तः। अहिदन्, अहिदन्तः। मूषिकदन्, मूषिकदन्तः। शिखरदन्, शिखरदन्तः। योगविभागान्नाम्नीति निवृत्तम्।

६८४ **संप्राज्ञानोर्जुज्ञौ** ॥७।३।१५५॥ संप्र इत्येताभ्यां परस्य जानुशब्दस्य बहुव्रीहौ जु ज्ञ इत्येतावादेशौ समासान्तौ स्याताम्। संगते जानुनी अस्य संजुः, संज्ञः। प्रगते प्रवृद्धे प्रणते प्रकृष्टे वा जानुनी अस्य प्रजुः, प्रज्ञः। संप्रादिति किम्। विजानुः। वचनभेदाद्यथासंख्याभावः।

६८५ **वोर्ध्वात्** ॥७।३।१५६॥ ऊर्ध्वशब्दात् परो यो जानुशब्दस्तस्य बहुव्रीहौ जु ज्ञ इत्येतौ वा स्याताम्। ऊर्ध्वे जानुनी अस्य ऊर्ध्वजुः, ऊर्ध्वज्ञः, ऊर्ध्वजानुः।

६८६ **सुहृद्दुर्हृन्मित्रामित्रे** ॥ ७।३।१५७॥ सुहृत् दुर्हृदिति सुपूर्वस्य दुष्पूर्वस्य च हृदयशब्दस्य बहुव्रीहौ यथासंख्यं मित्रे सख्यौ अमित्रे शत्रौ चाभिधेये हृदित्ययमादेशः समासान्तः स्यात्। शोभनं हृदयं यस्य सुहृन्मित्रम्। दुर्हृदमित्रः। मित्रामित्र इति किम्। सुहृदयो मुनिः। दुर्हृदयो व्याधः।

६८७ **धनुषो धन्वन्** ॥ ७।३।१५८॥ धनुः शब्दस्य बहुव्रीहौ धन्वन् इत्ययमादेशः समासान्तः स्यात्। शार्ङ्गं धनुरस्य शार्ङ्गधन्वा। कथं 'गाण्डीवध-

नृषः खेभ्यो निश्चचार हुताशनः ' इति ? । संज्ञात्वविवक्षायामुत्तरेण विकल्पो भविष्यति ।

६८८ **वा नाम्नि** ॥७।३।१५९॥ धनुस्शब्दस्य बहुव्रीहौ धन्वन्नित्ययमादेशः समासान्तः स्यात् नाम्नि–संज्ञायां विषये । पुष्पधन्वा, पुष्पधनुः ।

६८९ **खरखुरान्नासिकाया नस्** ॥ ७।३।१६० ॥ खरखुर इत्येताभ्यां परस्य नासिकाशब्दस्य बहुव्रीहौ नस् इत्ययमादेशः समासान्तः स्यात् ।

६९० **पूर्वपदस्थान्नाम्न्यगः** ॥२।३।६४॥ पूर्वपदस्थाद्रषृवर्णादगकारान्तात् परस्य सामर्थ्यादुत्तरपदस्थस्य नकारस्य णकार आदेशः स्यात् संज्ञायाम् । इत्यनेन च णत्वम् । खरा खरस्येव वा नासिका अस्य खरणाः । खुर इव नासिकाऽस्य खुरणाः ।

६९१ **अस्थूलाच्च नसः** ॥ ७।३।१६१ ॥ स्थूलशब्दवर्जितात् पूर्वपदात् खरखुरशब्दाभ्यां च परस्य नासिकाशब्दस्य बहुव्रीहौ नसादेशः समासान्तः स्यात् संज्ञायाम् । द्रुरिव नासिकाऽस्य द्रुणसः । खरणसः । खुरणसः । अस्थूलादिति किम् । स्थूलनासिकः । नाम्नीत्येव । तुङ्गा नासिकाऽस्य तुङ्गनासिकः । कथं गोनासः ? । यद्यस्ति नासाशब्देन भविष्यति । चकारः पूर्वेणास्य बाधानिवृत्त्यर्थः ।

६९२ **उपसर्गात्** ॥७।३।१६२॥ उपसर्गात् परस्य नासिकाशब्दस्य बहुव्रीहौ नसादेशः समासान्तः स्यात् । असंज्ञार्थं वचनम् ।

६९३ **नसस्य** ॥२।३।६५॥ पूर्वपदस्थाद्रषृवर्णात् परस्य नसशब्दसंबंधिनो नकारस्य णः स्यात् । इति णत्वे । प्रगता प्रवृद्धा वा नासिका अस्य प्रणसं मुखम् । उन्नता उद्गता वा नासिकाऽस्य उन्नसं मुखम् ।

६९४ **वेः खुस्रग्रम्** ॥ ७।३।१६३ ॥ वेरुपसर्गात्परस्य नासिकाशब्दस्य बहुव्रीहौ खु स्र ग्र इत्येते आदेशाः समासान्ताः स्युः । विगता नासिकाऽस्य विखुः, विस्रः, विग्रः । उपसर्गादित्येव । वेः पक्षिण इव नासिकाऽस्य विनासिकः ।

६९५ **जायाया जानिः** ॥७।३।१६४॥ जायाशब्दस्य बहुव्रीहौ जानिरित्ययमादेशः समासान्तः स्यात् । युवतिर्जायाऽस्य युवजानिः ।

६९६ व्युदः काकुदस्य लुक् ॥ ७।३।१६५ ॥ वि उद् इत्येताभ्यां परस्य काकुदशब्दस्य बहुव्रीहौ लुक् समासान्तः स्यात् । विगतं काकुदं तालुस्य विकाकुत् । उत्काकुत् ।

६९७ पूर्णाद्वा ॥ ७।३।१६६ ॥ पूर्णशब्दात् परस्य काकुदशब्दस्य बहुव्रीहौ लुक् समासान्तो वा स्यात् । पूर्णं काकुदमस्य पूर्णकाकुत्, पूर्णकाकुदः । पूर्णादिति किम् । रक्तकाकुदः।

६९८ ककुदस्यावस्थायाम् ॥७।३।१६७॥ अवस्था वयः । ककुदशब्दस्य बहुव्रीहाववस्थायां गम्यमानायां लुक् समासान्तः स्यात् । न संजातं ककुदमस्य असंजातककुद् बालः । पूर्णककुद् युवा । अवस्थायामिति किम् । श्वेतककुदः । ककुच्छब्देनैव सिद्धे ककुदशब्दस्यास्मिन् विषये प्रयोगनिवृत्त्यर्थम् वचनम् ।

६९९ त्रिककुद्गिरौ ॥ ७।३।१६८ ॥ गिरावभिधेये ककुदशब्दस्य त्रिशब्दात् परस्य बहुव्रीहौ ककुदादेशः समासान्तो निपात्यते । त्रीणि ककुदाकाराणि शिखराण्यस्य त्रिककुत् पर्वतः। त्रेर्गिरावितिसिद्धे निपातनं गिरिविशेषप्रतिपत्त्यर्थम् । तेनान्यस्मिन् त्रिककुद इत्येव भवति ।

७०० स्त्रियामूधसोऽन् ॥ ७।३।१६९ ॥ स्त्रियां वर्तमानस्य ऊधस्शब्दस्य बहुव्रीहौ नकारादेशः समासान्तः स्यात्। कुण्डमिवोधोऽस्याः कुण्डोध्नी। स्त्रियामिति किम्। महोधाः पर्जन्यः। बहुव्रीहेरित्येव। ऊधः प्राप्ता प्राप्तोधा गौः ।

७०१ इनः कच् ॥ ७।३।१७० ॥ इन्नन्ताद् बहुव्रीहेः स्त्रियां वर्तमानात् कच् प्रत्ययः समासान्तः स्यात् । बहवो दण्डिनोऽस्यां बहुदण्डिका सेना । अनिनस्मनग्रहणान्यर्थवता चानर्थकेनेत्युक्तमेवेति बहुस्वामिका पुरी । स्त्रियामित्येव । बहुदण्डी, बहुदण्डिको राजा । चकारो न कचीति विशेषणार्थः ।

७०२ ऋन्नित्यादितः ॥ ७।३।१७१ ॥ ऋकारान्तान्नित्यं दिदादेशो यस्मात्तदन्ताच्च बहुव्रीहेः कच् स्यात् । बहुकर्तृकः । बहुकुमारीकः । अत्र ।

७०३ ङ्यादीदूतः के ॥ २।४।१०४ ॥ ङीप्रत्ययस्याकारेकारोकाराणां च के प्रत्यये ह्रस्वः स्यात् । इत्यनेन ह्रस्वे प्राप्ते—

७०४ न कचि ॥ २।४।१०५ ॥ ङ्यादीदूतः कचि प्रत्यये ह्रस्वो न स्यात् । इति निषेधान्न भवति । अयं प्रतिषेधः पूर्वसूत्रे ' निरबंधग्रहणे न सानुबंधस्य '

इति न्यायस्याभावज्ञापनार्थः', तेन निषादकर्ष्वी जातो नैषादकर्षुक इत्यादाविकणि ह्रस्वः सिद्धः । अथ ऋन्नित्यदित इत्यत्र नित्यग्रहणं किम् । पृथुश्रीः, पृथुश्रीकः। पूर्वत्र स्त्रियां विधिरिति योगविभागः । केचिन्नित्यदितां ङ्यूङन्तानामेव कचमिच्छन्ति, तन्मते बहुतन्त्रीः, बहुतन्त्रीक इति शेषाद्वेति विकल्पः ।

७०५ **दध्युरःसर्पिर्मधूपानच्छालेः** ॥ ७।३।१७२ ॥ दधि उरस् सर्पिस् मधु उपानह् शालि इत्येतदन्ताद् बहुव्रीहेः कच् स्यात् । प्रियदधिकः । प्रियोरस्कः । प्रियसर्पिष्कः । प्रियमधुकः । प्रियोपानत्कः । प्रियशालिकः ।

७०६ **पुमनड्नौपयोलक्ष्म्या एकत्वे** ॥७।३।१७३॥ एकत्वविषये पुम्स् अनड्वह् नौ पयस् लक्ष्मीशब्दास्तदन्ताद् बहुव्रीहेः कच् स्यात् । प्रियः पुमानस्य प्रियपुंस्कः । प्रियानड्वत्कः । प्रियनौकः। प्रियपयस्कः । प्रियलक्ष्मीकः। एकत्व इति किम् । द्विपुमान्, द्विपुंस्कः । बह्वनड्वान्, बह्वनड्वत्कः इत्यादि । केचिल्लक्ष्मीशब्दात् द्वित्वबहुत्वयोरपि नित्यं कचमिच्छन्ति। अपरे तु तुल्ययोगेऽपि। सलक्ष्मीको विनाशितः ।

७०७ **नञोऽर्थात्** ॥ ७।३।१७४ ॥ नञः परो योऽर्थशब्दस्तदन्ताद् बहुव्रीहेः कच् स्यात् । न विद्यतेऽर्थो यस्यानर्थकं वचः । नञ इति किम् । अपार्थम्, अपार्थकम् ।

७०८ **शेषाद्वा** ॥ ७।३।१७५ ॥ यस्माद् बहुव्रीहेः समासान्तः प्रत्यय आदेशो वा न विहितस्तस्माच्छेषात् कज्वा स्यात् ।

७०९ **नवापः** ॥ २।४।१०६ आपः कचि परे ह्रस्वो वा स्यात् । न कचीति निषेधे प्राप्ते पक्षे ह्रस्वार्थमिदम् । प्रिया खट्वा यस्य स प्रियखट्वकः, प्रियखट्वाकः। पक्षे प्रियखट्वः । एवं बहुमालकः, बहुमालाकः। बहुमालः। शेषादिति किम् । व्याघ्रपात् । असति शेषग्रहणे पक्षे परत्वात् कच् स्यात् ।

७१० **न नाम्नि** ॥ ७।३।१७६ ॥ संज्ञायां विषये कच् समासान्तो न स्यात्, बहुदेवदत्तः । एवंनामा ग्रामः ।

७११ **ईयसोः** ॥ ७।३।१७७ ॥ ईयस्वन्तात् समासात् कच् न स्यात् । बहुश्रेयान् । लिङ्गविशिष्टस्यापि ग्रहणाद् बहुश्रेयसी ।

७१२ **सहात्तुल्ययोगे** ॥ ७।३।१७८ ॥ तुल्ययोगे यः सहशब्दः सामर्थ्यात्तदादेर्बहुव्रीहेः कज् न स्यात्। तुल्ययोगो [1]वर्तिपदार्थस्य पुत्रादेर्वृत्त्यर्थेन पित्रादिना सह क्रियागुणजातिद्रव्यैः साधारणः संबंधः। सपुत्र आगतः। सहादिति किम्। सह विद्यमानानि लोमान्यस्य सलोमकः।

७१३ **भ्रातुः स्तुतौ** ॥ ७।३।१७९ ॥ भ्रात्रन्तात् समासात् कज् न स्यात् स्तुतौ–भ्रातुः समासार्थस्य वा प्रशंसायां गम्यायाम्। शोभनो भ्राताऽस्य सुभ्राता। भ्रातुरिति किम्। सुमातृकः। स्तुताविति किम्। मूर्खभातृकः।

७१४ **नाडीतन्त्रीभ्यां स्वाङ्गे** ॥ ७।३।१८० ॥ स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात् समासात् कज् न स्यात्। बह्व्यो नाड्यो यस्मिन् बहुनाडिः कायः। बहुतन्त्रीग्रीवा। तन्त्रीर्धमनी। ङ्याद्यन्ताभावान्न ह्रस्वः। स्वाङ्ग इति किम्। बहुनाडीकः स्तम्बः। बहुतन्त्रीका वीणा। अन्ये त्वाहुर्न पारिभाषिकं स्वाङ्गमिह गृह्यते किंतु स्वमात्मीयमङ्गं स्वाङ्गम्। आत्मा चेह अन्यपदार्थः तस्याङ्गमवयवस्तस्मिन्निति। तेषां बहुनाडिः स्तंबः। बहुतंत्रीवीणा। प्रत्युदाहरणं तु बहुनाडीकः कुविन्दः, बहुतन्त्रीको नटः।

७१५ **निष्प्रवाणिः** ॥७।३।१८१॥ निष्प्रवाणिरिति कजभावो निपात्यते। प्रोयतेऽस्यामिति प्रवाणी, तन्तुवायशलाका, सा निर्गतास्मादिति निष्प्रवाणिः पटः, तन्त्रादचिरोद्धृत इत्यर्थः। गोश्चान्ते ह्रस्वः इत्यादिना ह्रस्वः। ऊयते अस्यामिति वानिः। प्रभृता वानिः प्रवाणिः। सा निर्गता तंतुभ्योऽस्येति निष्प्रवाणिः सदश इत्येके। निर्गतः प्रवाण्या निष्प्रवाणिरिति तत्पुरुषेण सिद्धे बहुव्रीहौ कज् मा भूदिति वचनम्।

७१६ **सुभ्रूवादिभ्यः** ॥ ७।३।१८२ ॥ सुभ्रू इत्येवमादिभ्यः कच् समासातो न स्यात्। सुभ्रूः। जातिवचनत्वाद्ङन्तोऽयम्। एवं हि आमंत्र्ये सौ ह्रस्वो भवति। हे सुभ्रु। बहुवचनमाकृतिगणार्थम्। तेन करभोरूः, संहितोरूः इत्यादयोऽपि भवन्ति।

७१७ **मातुर्मातः पुत्रेऽर्हे सिनामंत्र्ये** ॥१।४।४०॥ मातृशब्दस्यामंत्र्ये

---

१ वर्तन्ते पूर्वोत्तरपदान्यस्मिन् 'विदिवृत्तेर्वा इः' वर्तिः–समासस्तस्य पदानि, तेषामर्थः।

पुत्रे वर्तमानस्य सामर्थ्याद् बहुव्रीहौ समासे मात इत्यकारान्त आदेशः स्यात् अर्हे–मातृद्वारेण पुत्रप्रशंसायां गम्यमानायाम् । कचोऽपवादः। गार्गी माता यस्य तस्या-मंत्रणं हे गार्गीमात । अत्र पुत्रः संभावितोत्कर्षया श्लाघया मात्रा तत्पुत्रयोग्यतया प्रशस्यते । अर्हे इति किम् । अरे गार्गीमातृक । आमंत्र्य इति किम् गार्गीमातृकः सिनेति किम् । हे गार्गीमातृकौ ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां समासप्रकरणे

बहुव्रीहिसमासः समाप्तः ॥

॥ अथाव्ययीभावः ॥

७१८ **तत्रादाय मिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः** ॥३।१।२६॥ तत्रेति सप्तम्यन्तं नाम मिथ आदायेति क्रियाव्यतिहारे, तेनेति तृतीयान्तं मिथः प्रहृत्येति क्रियाव्यतिहारे सरूपेण समानरूपेण नाम्ना युद्धे विषयेऽन्यपदार्थे समस्यते, स च समासोऽव्ययीभावसंज्ञः स्यात् । केशेषु केशेषु गृहीत्वा कृतं युद्धमिति विग्रहेऽनेन समासे विभक्तेर्लुपि ।

७१९ **इज् युद्धे** ॥७।३।७४॥ युद्धे यः समासो विहितस्तस्मादिच् समासान्तः स्यात् । इतीचि कृते ।

७२० **इच्यस्वरे दीर्घ आच** ॥३।२।७२॥ इच्प्रत्ययान्तेऽस्वरादावुत्तरपदे परे पूर्वपदस्य दीर्घ आकारश्चान्तादेशः स्यात् । केशाकेशि इति भवति । ततश्च 'द्वन्द्वैकत्वाव्ययीभावौ' इति लिङ्गानुशासनोक्तेरव्ययीभावस्य क्लीबत्वम्। नामसंज्ञायां च स्यादिः ।

७२१ **अनतो लुप्** ॥३।२।६॥ अकारान्तं वर्जयित्वान्यस्याव्ययीभावस्य संबंधिनः स्यादेर्लुप् स्यात् । केशाकेशि । दण्डैर्दण्डैश्च मिथः प्रहृत्य कृतं युद्धं दण्डादण्डि । एवं यष्टीयष्टि, यष्टायष्टि । मुष्टीमुष्टि, मुष्टामुष्टि। तत्रेति तेनेति किम् । केशाँश्च केशाँश्च गृहीत्वा कृतं युद्धं, मुखं च मुखं च प्रहृत्य कृतं युद्धम् । आदायेति प्रहृत्येति किम् । केशेषु च केशेषु स्थित्वा कृतं युद्धं गृहकोकिलाभ्याम् । दण्डैश्च दण्डैश्चागत्य कृतं युद्धमेताभ्याम्। मिथ इति क्रियाव्यतिहारः किम्। केशेषु च केशेषु

च गृहीत्वा युद्धमनेन। सरूपेणेति किम्। हस्ते च पादे च गृहीत्वा कृतं युद्धम्। युद्ध इति विषयनिर्देशात् युद्धोपाधिकायामन्यस्यामपि क्रियायां भवति। बाहूबाहवि व्यासजेताम्।

७२२ **नदीभिर्नाम्नि** ॥३।१।२७॥ नदीवाचिभिर्नामभिर्नाम समस्यते नाम्नि–संज्ञायामन्यपदार्थे स च समासोऽव्ययीभावसंज्ञः स्यात्। उन्मत्ता गङ्गा यत्र स इति विग्रहेऽनेन समासे विभक्तिलुपि, अव्ययीभावस्य क्लीबत्वाद्ध्रस्वत्वम्। नामसंज्ञायां स्यादिः। ततश्च।

७२३ **अमव्ययीभावस्याऽतो पञ्चम्याः** ॥३।२।२॥ अव्ययीभावसमास-स्याकारान्तस्य संबंधिनः स्यादेरमित्ययमादेशः स्यात् अपञ्चम्याः–पञ्चमीं च वर्ज-यित्वा। उन्मत्तगङ्गं देशः।

७२४ **वा तृतीयायाः** ॥३।२।३॥ अकारान्तस्याव्ययीभावस्य संबंधिन्यास्तृ-तीयायाः स्थाने वा अम् स्यात्। उन्मत्तगङ्गम्, उन्मत्तगङ्गेन।

७२५ **सप्तम्या वा** ॥३।१।४॥ अकारान्तस्याव्ययीभावस्य संबंधिन्याः सप्तम्या अमादेशो वा स्यात्। योगविभाग उत्तरार्थः। इत्यनेन सप्तम्यां विकल्पेना-मादेशे प्राप्ते।

७२६ **ऋद्धनदीवंश्यस्य** ॥३।२।५॥ ऋद्धं समृद्धम्। यस्य समृद्धिः सुशब्दादिना द्योत्यते तदन्तस्य नद्यन्तस्य वंश्यान्तस्य चाकारान्तस्याव्ययीभावस्य संबंधिन्याः सप्तम्याः स्थानेऽमादेशः स्यात्। नित्यार्थं वचनम्। उन्मत्तगङ्गं देशे वसति। एवं लोहितगङ्गम्। शनैर्गङ्गम्। तूष्णींगङ्गम्।प्रतिपदोक्तस्यैव ग्रहणादिह न भवति। उपगङ्गे। पूर्वेण तु विकल्पो भवत्येव।

७२७ **संख्या समाहारे** ॥३।१।२८॥ अन्यपदार्थ इति निवृत्तम्। संख्या-वाचि नाम नदीवाचिभिर्नामभिः सह समस्यते समाहारे गम्यमाने स च समासोऽ-व्ययीभावसंज्ञः स्यात्। द्वयोर्यमुनयोः समाहारो द्वियमुनम्। एवं त्रियमुनम्। समाहार इति किम्। एका नदी एकनदी। द्विगुबाधनार्थं वचनम्। अन्ये तु पूर्वपदार्थ-प्राधान्येऽव्ययीभावः, समाहारे तु द्विगुरेवेत्याहुः।

७२८ **वंश्येन पूर्वार्थे** ॥३।१।२९॥ विद्यया जन्मना वा प्राणिनामेक-

लक्षणसंतानो वंशः, तत्र भवो वंश्यः। स इहाद्यः कारणपुरुषो गृह्यते। तद्वाचिना नाम्ना संख्यावाचि नाम समस्यते, पूर्वपदस्यार्थेऽभिधेये स च समासोऽव्ययीभावः। एको मुनिर्वंश्यो व्याकरणस्य एकमुनि व्याकरणस्य। एवं द्विमुनि, त्रिमुनि व्याकरणस्य। यदा तु विद्यया तद्वतामभेदविवक्षा तदैकमुनि व्याकरणं, द्विमुनि व्याकरणमित्यादि सामानाधिकरण्यं भवति। पूर्वार्थ इति किम्। द्वौ मुनी वंश्यावस्य द्विमुनि, द्विमुनिकं व्याकरणम्। अत्रान्यपदार्थे बहुव्रीहिरेव। अन्ये तु पूर्वार्थ इति विशेषं नेच्छन्ति, तन्मते एकश्चासौ मुनिश्चेति कर्मधारयप्रसङ्गे, द्वौ मुनी समाहृताविति द्विगुप्रसङ्गे, एको मुनिर्वंश्योऽस्येति बहुव्रीहिप्रसङ्गे चाव्ययीभाव एव समासो भवति।

७२९ **पारे मध्येऽग्रेऽन्तः षष्ठ्या वा** ॥३।१।३०॥ पारेमभृतीनि नामानि षष्ठ्यन्तेन नाम्ना सह पूर्वपदार्थे वा समस्यन्तेऽव्ययीभावश्च समासः, तत्संनियोगे चाद्यानां त्रयाणामेकारान्तता निपात्यते। पारं गङ्गायाः पारेगङ्गम्। अन्तर्गिरेः अन्तर्गिरम्, अन्तर्गिरि। (वक्ष्यमाणेन वा समासान्तोऽत्) वा वचनात् पक्षे षष्ठीसमासोऽपि भवति। गंगायाः पारं गंगापारम्। गंगामध्यम्। वनाग्रम्। गिर्यन्तः। षष्ठ्येति किम्। पारं शोभनम्।

७३० **यावदियत्त्वे** ॥३।१।३१॥ इयत्त्वमवधारणम्। तस्मिन् गम्यमाने यावदिति नाम नाम्ना समस्यते, पूर्वपदार्थेऽव्ययीभावश्च समासः स्यात्। यावन्त्यमत्राणि यावदमत्रमतिथीन् भोजय। यावन्त्यमत्राणीति निर्ज्ञातपरिमाणेनामत्रादिना तावन्त इति अतिथिपरिमाणमिहावधार्यते। इयत्त्व इति किम्। यावद्दत्तं तावद्भुक्तम्। कियद्भुक्तमिति नावधार्यति। यावदित्यव्ययमनव्ययं चेह गृह्यते। अव्ययमेवेत्यन्ये।

७३१ **पर्यपाङ्बहिरञ्च् पञ्चम्या** ॥३।१।३२॥ पर्यादीनि नामानि पञ्चम्यन्तेन नाम्ना सहैकार्थे पूर्वपदार्थेऽभिधेये समस्यन्ते स च समासोऽव्ययीभावसंज्ञः। परि त्रिगर्तेभ्यः परित्रिगर्तम्। आ ग्रामात् आग्रामम्। बहिर्ग्रामात् बहिर्ग्रामम्। प्राग्ग्रामात् प्राग्ग्रामम्। पर्यादिसाहचर्यादञ्चतिर्धैनलुबन्तोऽव्ययं गृह्यते, तेनेह न भवति—प्राङ् ग्रामात् चैत्रः। प्रतिपदविहितायाश्च पञ्चम्या ग्रहणादिह न, अपशाखः। पञ्चम्येति किम्। परि वृक्षं विद्योतते विद्युत्।

७३२ **लक्षणेनाभिप्रत्याभिमुख्ये** ॥३।१।३३॥ लक्षणं चिन्हम्। तद्वाचिना नाम्ना आभिमुख्ये वर्तमानाभिप्रत्यैकार्थ्ये सति पूर्वपदार्थेऽभिधेये समस्येते,

अव्ययीभावश्च समासः। अभि अग्निम् अभ्यग्नि। प्रत्यग्निं प्रत्यग्नि शलभाः पतन्ति। अग्निं लक्षीकृत्याभिमुखं पतन्तीत्यर्थः। लक्षणेनेति किम्। सुघ्नं प्रति गतः। प्रतिनिवृत्य पुनः सुघ्नमेवाभिमुखं गतः इत्यर्थः। अभिप्रतीति किम्। येनाग्निस्तेन गतः। आभिमुख्य इति किम्। वृक्षमभि विद्योतते विद्युत्। पूर्वपदार्थ इत्येव। अभिमुखोऽङ्को यासां ता अभ्यङ्का गावः।

७३३ **दैर्घ्येऽनुः** ॥३।१।३४॥ अनु इत्येतन्नाम दैर्घ्ये आयामविषये यल्लक्षणं तद्वाचिना नाम्नैकार्थ्ये सति पूर्वपदार्थेऽभिधेये समस्यते स च समासोऽव्ययीभावसंज्ञः। अनु गङ्गां दीर्घा अनुगङ्गं वाराणसी। गङ्गाया लक्षणभूताया आयामेन वाराणस्या आयामो लक्ष्यते। एवमनुयमुनं मथुरा। दैर्घ्ये इति किम्। वृक्षमनु विद्योतते विद्युत्। लक्षणेनेत्येव। लक्ष्येण वाराणस्यादिना मा भूत्।

७३४ **समीपे** ॥३।१।३५॥ अनु इत्येतन्नाम समीपेऽर्थे वर्तमानमर्थात् समीपवाचिनैकार्थ्ये सति पूर्वपदार्थेऽभिधेये समस्यते, स च समासोऽव्ययीभावसंज्ञः। अनु वनस्य अनुवनमशनिर्गता। अनोरव्ययत्वात् 'विभक्तिसमीप' इत्यादिनैव सिद्धे विकल्पार्थम्। तेन वाक्यमपि भवति। पृथग्वचनं लक्षणेनेत्यस्य निवृत्त्यर्थम्।

७३५ **तिष्ठद्गुप्रभृतयः** ॥३।१।३६॥ तिष्ठद्गुप्रभृतयः समासशब्दा अव्ययीभावसंज्ञाः स्युः, यथायोगमन्यपदार्थे पूर्वपदार्थे चाभिधेये। तिष्ठन्ति गावो यस्मिन् काले गर्भग्रहणाय दोहाय वाहाय वत्सेभ्यो निवासाय जलपानार्थं वा स कालस्तिष्ठद्गु। अत्र पूर्वपदस्य पुंवद्भावाभावः समासान्तश्च निपातनात्। तिष्ठद्ग्वादिराकृतिगणः। सूत्रे इतिशब्दः स्वरूपपरिग्रहार्थः। तेनेह समासान्तरं न। परमं तिष्ठद्गु इत्यादि वाक्यमेव। अत एव प्रदक्षिणसंप्रतिभ्यां सह नञ्समासेन सिद्धावप्रदक्षिणासंप्रत्योः पाठः। इजन्तस्य च तिष्ठद्ग्वादिपाठः 'इज् युद्धे' इत्यनेनेजन्तस्य समासान्तरप्रतिषेधार्थः, द्विदण्ड्यादेरव्ययीभावार्थश्च। अन्ये तु परपदेनैव समासं प्रतिषेधन्ति, तन्मते परमतिष्ठद्गु इत्यादयोऽपि साधवः।

७३६ **नित्यं प्रतिनाल्पे** ॥३।१।३७॥ अल्पेऽर्थे वर्तमानेन प्रतिना नाम्ना नित्यं समस्यतेऽव्ययीभावश्च समासः स्यात्। शाकस्याल्पत्वं शाकप्रति। सूपस्य मात्रा सूपप्रति। अल्प इति किम्। वृक्षं प्रति विद्योतते विद्युत्। नित्यग्रहणं वाक्यनिवृत्त्यर्थम्। तेनान्यत्र समासो वाक्यं च भवति।

७३७ संख्याक्षशलाकं परिणा द्यूतेऽन्यथावृत्तौ ॥ ३।१।३८ ॥ संख्यावाचि नामाक्षशलाके च द्यूतविषयेऽन्यथावर्तने वर्तमानेन परिणा नाम्ना सहैकार्थ्ये नित्यं समस्यन्तेऽव्ययीभावश्च समासः । वर्तने चैषां कर्तृत्वात् तृतीयान्तत्वम् । अक्षशलाकयोस्त्वेकवचनान्तयोरेवेष्यते । पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा भवति । तत्र यदा सर्वे उत्ताना अवाञ्चो वा पतन्ति तदा पातयितुर्जयः । अन्यथापाते पराजयः । एकेनाक्षेण शलाकया वा न तथावृत्तं यथा पूर्वं जये एकपरि । द्विपरि । त्रिपरि । परमेण चतुष्परि । पञ्चसु त्वेकरूपेषु जय एव भवति । अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये अक्षपरि । शलाकापरि । संख्यादीति किम् । पाशकेन न तथा वृत्तम् । परिणेति किम् । अक्षेण परिवृत्तम् । द्यूत इति किम् । रथस्याक्षेण न तथा वृत्तम् । अन्यथावृत्ताविति किम् । पञ्चपरीति मा भूत् । केचित् समविषमद्यूते सममित्युक्ते यदा विषमं भवति तदा अक्षपरि, शलाकापरीति प्रयुञ्जत इत्याहुः । अन्ये पूर्वं पदमाहूतं तच्च पतितमिष्टं सिद्धं पुनस्तदाहूतं यदा न पतति तदायं प्रयोगोऽक्षपरिं शलाकापरीत्याहुः ।

७३८ विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिपश्चात्क्रमख्यातियुगपत्सदृक्सांपत्साकल्यान्तेऽव्ययम् ॥३।१।३९॥ विभक्त्यादिष्वर्थेषु वर्तमानमव्ययं नाम नाम्ना सहैकार्थ्ये सति पूर्वपदार्थेऽभिधेये नित्यं समस्यते स च समासोऽव्ययीभावसंज्ञः । विभक्तिर्विभक्त्यर्थः कारकम् । अधिस्त्रि निधेहि । स्त्रीषु निधेहीत्यर्थः । समीपे—उपकुंभम् । कुंभस्य समीप इत्यर्थः । ऋद्धेराधिक्यं समृद्धिः। सुमद्रम् । मद्राणां समृद्धिरित्यर्थः। विगता ऋद्धिर्व्यृद्धिः—ऋद्ध्यभावः । दुर्यवनं—यवनानामृद्ध्यभाव इत्यर्थः । अर्थाभावो धर्मिणोऽसत्त्वम् । निर्मक्षिकम् । मक्षिकाणामभाव इत्यर्थः । अत्ययोऽतीतत्वम्, सत एवातिक्रान्तत्वम् । अतिवर्षम् । वर्षाणामतीतत्वमित्यर्थः । असंप्रतीति वर्तमानकाले उपभोगादेः प्रतिषेधः । अतिकंबलम् । कंबलस्योपभोगं प्रति नायं काल इत्यर्थः । पश्चादर्थे—अनुरथं याति । रथस्य पश्चादित्यर्थः । क्रम आनुपूर्व्यम् । अनुज्येष्ठं प्रविशन्तु । ज्येष्ठानुक्रमेणेत्यर्थः । ख्यातिः शब्दप्रथा । इतिभद्रबाहु । भद्रबाहुशब्दो लोके प्रकाशते इत्यर्थः । युगपदेककालार्थः । चक्रेण युगपदिति विग्रहे युगपदर्थस्य सहेत्यव्ययस्य चक्रेणेति नाम्ना समासे कृते ।

७३९ अकालेऽव्ययीभावे ॥३।२।१४६॥ सहशब्दस्याकालवाचिन्युत्तर-

पदेऽव्ययीभावसमासे सादेशः स्यात्। इति सः। सचक्रं धेहि। चक्रेण सहैककालं युगपद्धेहीत्यर्थः। सदृगर्थे–सव्रतम्। व्रतस्य सदृशमित्यर्थः। संपत् सिद्धिः। सब्रह्म साधूनाम्। संपन्नं ब्रह्मेत्यर्थः। साकल्यमशेषता। सतृणमभ्यवहरति। न किंचित्त्यजतीत्यर्थः। अन्तः समाप्तिः। सपिण्डैषणमधीते। पिण्डैषणापर्यन्तमधीत इत्यर्थः। अत्र समाप्तिरसकलेऽप्यध्ययने प्रतीयत इति साकल्ये अनन्तर्भावः। पूर्वपदार्थ इत्येव। समृद्धा मद्राः सुमद्राः। अव्ययमिति किम्। समीपं कुंभस्य।

७४० **योग्यतावीप्सार्थानतिवृत्तिसादृश्ये** ॥ ३।१।४० ॥ एष्वर्थेष्वव्ययं नाम नाम्नैकार्थं पूर्वपदार्थं समस्यतेऽव्ययीभावश्च समासः। योग्यतायाम्–अनुरूपं चेष्टते। रूपस्य योग्यां चेष्टां कुरुते। वीप्सायाम्–प्रत्यर्थं शब्दा अभिनिविशन्ते। अर्थमर्थं प्रतीत्यर्थः। वीप्सायां द्वितीयाया विधानात् वाक्यमपि भवति। अर्थमर्थं प्रतीति। अर्थानतिवृत्तिः पदार्थानतिक्रमः। यथाशक्ति पठ–शक्तेरनतिक्रमेणेत्यर्थः। एवं यथाबलम्। नात्र विन्यासविशेष इति क्रमाद् भेदः। सादृश्ये–सशीलमनयोः। शीलस्य सादृश्यमित्यर्थः। सदृगित्यनेनैव सिद्धे सादृश्यग्रहणं मुख्यसादृश्यपरिग्रहार्थम्।

७४१ **यथाऽथा** ॥ ३।१।४१ ॥ थाप्रत्ययरहितं यथेत्यव्युत्पन्नमव्ययं नाम नाम्ना सहैकार्थं नित्यं समस्यते पूर्वपदार्थेऽभिधेये स च समासोऽव्ययीभावः। यथारूपं चेष्टते। रूपानुरूपमित्यर्थः। यथावृद्धमभ्यर्चय। ये ये वृद्धास्तानित्यर्थः। यथासूत्रमनुतिष्ठति। सूत्रानतिवृत्त्येत्यर्थः। अथा इति किम्। यथा चैत्रः तथा मैत्रः। पूर्वेणैव सिद्धे सादृश्ये प्रतिषेधार्थं वचनम्।

७४२ **द्विदण्ड्यादिः** ॥७।३।७५॥ द्विदण्डि इत्येवमादयः समासा इजन्ताः साधवः। द्वौ दण्डावस्मिन् प्रहरणे द्विदण्डि प्रहरति। तिष्ठद्गवादित्वादव्ययीभावः। एवं द्विमुसलि इत्यादि। क्रियाविशेषणाच्चान्यत्र न भवति। द्वौ दण्डावस्यां शालायां द्विदण्डा। द्विमुसला।

७४३ **प्रतिपरोऽनोरव्ययीभावात्** ॥७।३।८७॥ प्रति परस् अनु इत्येतत्पूर्वो योऽक्षिशब्दस्तदन्तादव्ययीभावसमासादत् समासान्तः स्यात्। अक्षिणी प्रति प्रत्यक्षम्। परसमानार्थः परस्शब्दोऽव्ययम्। अक्ष्णोः परं परोक्षम्। अत्ययेऽव्ययीभावः। अक्ष्णः समीपमन्वक्षम्। कथं प्रत्यक्षोऽर्थः परोक्षः काल इत्यादेरव्ययीभावस्य

सत्ववचनता?। अभ्रादेराकृतिगणत्वादप्रत्ययेन भविष्यति। अक्षशब्देनेन्द्रियपर्यायेण सिद्धे प्रत्यादिभ्यः परस्याक्षिशब्दस्याव्ययीभावे प्रयोगो मा भूदिति वचनम्।

७४४ **अनः** ॥७।३।८८॥ अन्नन्तादव्ययीभावादत् समासान्तः स्यात्।

७४५ **नोऽपदस्य तद्धिते** ॥ ७।४।६१ ॥ नकारान्तानामपदसंज्ञकानां तद्धिते परेऽन्त्यस्वरादेर्लुक् स्यात्। उपराजम्। उपतक्षम्। अध्यात्मम्। प्रत्यात्मम्।

७४६ **नपुंसकाद्वा** ॥७।३।८९॥ अन्नन्तं यन्नपुंसकं तदन्तादव्ययीभावादत् समासान्तो वा स्यात्। उपचर्मम्। उपचर्म। पूर्वेण नित्ये प्राप्ते विकल्पः।

७४७ **गिरिनदीपौर्णमास्याग्रहायण्यपञ्चमवर्ग्याद्वा** ॥ ७।३।९० ॥ गिरि नदी पौर्णमासी आग्रहायणी इत्येतच्छब्दान्तात् पञ्चमरहिता ये वर्ग्यास्तदन्ताच्चाव्ययीभावात् अत् समासान्तो वा स्यात्। गिरेरन्तः अन्तर्गिरम्, अन्तर्गिरि। गिरेः समीपमुपगिरम्, उपगिरि। एवमुपनदम्, उपनदि। उपपौर्णमासम्, उपपौर्णमासि। उपाग्रहायणम्, उपाग्रहायणि। अपञ्चमवर्ग्य–उपस्रुचम्, उपस्रुक्, उपसमिधम्, उपसमित्।

७४८ **संख्याया नदीगोदावरीभ्याम्** ॥ ७।३।९१ ॥ संख्यावाचिनः परौ यौ नदीगोदावरीशब्दौ तदन्तादव्ययीभावादत् स्यात्। पञ्च नद्यः पञ्चनदम्। द्विगोदावरम्। संख्याया इति किम्। उपनदि। अव्ययीभावादित्येव। एकनदी। इह नदीग्रहणं नित्यार्थम्।

७४९ **शरदादेः** ॥७।३।९२॥ शरदाद्यन्तादव्ययीभावदत् समासान्तः स्यात्। शरदः समीपमुपशरदम्। प्रतिशरदम्। उपत्यदम्। प्रतित्यदम्। शरदादिगणेऽपञ्चमवर्ग्यान्तपाठो नित्यार्थः। अव्ययीभावादित्येव। परमशरद्।

७५० **जरायाः जरस् च** ॥७।३।९३॥ जराशब्दान्तादव्ययीभावसमासादत् समासान्तः स्याद् तत्संनियोगे च जराशब्दस्य जरसादेशः। उपजरसम्। प्रतिजरसम्।

७५१ **सरजसोपशुनानुगवम्** ॥७।३।९४॥ सरजस उपशुन अनुगव इत्येतेऽव्ययीभावा अदन्ता निपात्यन्ते। सह रजसा सरजसमभ्यवहरति। साकल्ये-

ऽव्ययीभावः । शुनः समीपे उपशुनं तिष्ठति । अत्र निपातनाद् वस्योत्वम् । गामन्वायतमनुगवम् । दैर्घ्येऽनुरित्यव्ययीभावः । दैर्घ्यादन्यत्र न भवति । गवां पश्चादनुगु यानम् ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां समासप्रकरणे
अव्ययीभावः समाप्तः ॥

॥ अथ तत्पुरुषः ॥

७५२ **गतिकन्यस्तत्पुरुषः** ॥३।१।४२॥ कु इत्यव्ययं पापाल्पयोर्वर्तते । गतिसंज्ञकाः कुश्च नाम नाम्ना सह नित्यं समस्यन्ते स च समासोऽन्यो बहुव्रीह्यादिलक्षणरहितस्तत्पुरुषसंज्ञः स्यात् । तत्र प्रथमं गतिसंज्ञका उच्यन्ते । 'ऊर्यादिच्व्यनुकरणच्विडाचश्च गतिः ' इत्युक्तमेव । ऊर्यादिः–ऊरीकृत्य । अनुकरण–खाट्कृत्य । च्वि–शुक्लीकृत्य । डाजन्त–पटपटाकृत्य । उपसर्गः–प्रकृत्य ।

७५३ **कारिका स्थित्यादौ** ॥३।१।३॥ कारिकाशब्दः स्थित्यादावर्थे धातोः संबंधी गतिसंज्ञः स्यात् । स्थितिर्मर्यादा वृत्तिर्वा । आदिशब्दाद्यत्नधात्वर्थनिर्देशौ गृह्येते । कारिकाकृत्य । स्थितिं यत्नं क्रियां वा कृत्वेत्यर्थः । स्थित्यादाविति किम् । कारिकां कृत्वा कर्त्रीं कृत्वेत्यर्थः ।

७५४ **भूषादरक्षेपेऽलंसदत्** ॥३।१।४॥ एते यथासंख्यं भूषादरक्षेपेष्वर्थेषु वर्तमानाद्धातोः संबंधिनो गतिसंज्ञाः स्युः। भूषा मण्डनम् । अलंकृत्य । प्रीत्या संभ्रम आदरः। सत्कृत्य । भूषादिष्विति किम् । अलं कृत्वा मा कारीत्यर्थः । सत् कृत्वा, विद्यमानं कृत्वेत्यर्थः । असत् कृत्वा । अविद्यमानं कृत्वेत्यर्थः ।

७५५ **अग्रहानुपदेशेऽन्तरदः** ॥३।१।५॥ अन्तर् अदस् इत्येतौ शब्दौ यथासंख्यमग्रहेऽनुपदेशे चार्थे गम्यमाने धातोः संबंधिनौ गतिसंज्ञौ स्तः। अग्रहोऽस्वीकारः । अन्तर्हृत्य, मध्ये हिंसित्वा शत्रून् गत इत्यर्थः। स्वयं परामर्शोऽनुपदेशो विशेषानाख्यानं वा । अदःकृत्यैतत् करिष्यतीति चिन्तयति । अग्रहानुपदेशे इति किम् । अन्तर्हृत्वा मूषिकां श्येनो गतः । परिगृह्य गत इत्यर्थः । अदःकृत्वा गत इति परस्य कथयति । अदस्शब्दस्त्यदादौ । अव्ययमिति केचित् ।

७५६ **कर्णेमनस्तृप्तौ** ॥३।१।६॥ कर्णे मनस् इत्येते अव्यये तृप्तौ गम्यमानायां धातोः संबंधिनी गतिसंज्ञे स्तः। तृप्तिःश्रद्धोच्छेदः। कर्णेहत्य पयः पिबति। मनोहत्य पयः पिबति। तावत् पिबति यावत्तृप्त इत्यर्थः। तृप्ताविति किम्। तंदुलावधवे कर्णे हत्वा गतः। मनोहत्वा गतः। चेतो हत्वेत्यर्थः।

७५७ **पुरोऽस्तमव्ययम्** ॥३।१।७॥ पुरस् अस्तम् इत्येते अव्यये धातोः संबंधिनी गतिसंज्ञे स्तः। पूर्वपर्यायः पुरः शब्दः। अनुपलब्ध्यर्थोऽस्तंशब्दः। पुरस्कृत्य गतः। अस्तंगत्य पुनरुदेति सविता। अव्ययमिति किम्। पुरः कृत्वा। नगरीरित्यर्थः। अस्तं कृत्वा काण्डं गतः। क्षिप्तमित्यर्थः। सकारोऽप्यत्र न भवति।

७५८ **गत्यर्थवदोऽच्छः** ॥३।१।८॥ अच्छेत्यव्ययमभिशब्दार्थे दृढार्थे च वर्तते। तत् गत्यर्थानां वदश्च धातोः संबंधि गतिसंज्ञं स्यात्। अच्छगत्य। अच्छव्रज्य। अच्छोद्य। गत्यर्थवद इति किम्। अच्छ कृत्वा गतः। अव्ययमित्येव। उदकमच्छं गत्वा।

७५९ **तिरोऽन्तर्धौ** ॥३।१।९॥ तिरः शब्दोऽन्तर्धौ व्यवधाने वर्तमानो धातोः संबंधी गतिसंज्ञः स्यात्। तिरोभूय। अन्तर्धाविति किम्। तिरो भूत्वा स्थितः। तिर्यग्भूत्वेत्यर्थः।

७६० **कृगो न वा** ॥३।१। १०॥ तिरस् इत्यव्ययमन्तर्धौ वर्तमानं कृगो धातोः संबंधि गतिसंज्ञं वा स्यात्। तिरस्कृत्य। तिरःकृत्य। पक्षे तिरः कृत्वा। अन्तर्धाविव्येव। तिरःकृत्वा काष्ठं गतः। तिर्यगित्यर्थः।

७६१ **मध्येपदेनिवचनेमनस्युरस्यनत्याधाने** ॥३।१।११॥ एतानि सप्तमीप्रतिरूपकाण्यव्ययानि अनत्याधानेऽर्थे वर्तमानानि कृगो धातोः संबंधीनि गतिसंज्ञानि वा स्युः। अत्याधानम् उपश्लेष आश्चर्यं च। ततोऽन्यदनत्याधानम्। मध्येकृत्य, मध्ये कृत्वा। पदेकृत्य, पदे कृत्वा, निवचनेकृत्य, निवचने कृत्वा। निवचने वचनाभावः। वाचं नियम्येत्यर्थः। मनसि कृत्य, मनसि कृत्वा। उरसिकृत्य, उरसि कृत्वा। उभयत्र निश्चित्येत्यर्थः। अनत्याधान इति किम्। मध्ये कृत्वा धान्यराशिं स्थिता हस्तिनः। अव्ययमित्येव। मध्ये कृत्वा वाचं तिष्ठतीत्यादि।

७६२ **उपाजेऽन्वाजे** ॥३।१।१२॥ एते अव्यये सप्तम्येकवचनान्तप्रतिरूपके स्वभावाद्दुर्बलस्य भग्नस्य वा बलाधाने वर्तमाने कृगो धातोः संबंधिनी

गतिसंज्ञे वा स्तः । उपाजेकृत्य, उपाजे कृत्वा । अन्वाजेकृत्य, अन्वाजे कृत्वा । दुर्बलस्य भग्नस्य वा बलाधानं कृत्वेत्यर्थः ।

७६३ **स्वाम्येऽधिः** ॥३।१।१३॥ अधीत्येतदव्ययं स्वामित्वे गम्यमाने कृगो धातोः संबंधि गतिसंज्ञं वा स्यात् । चैत्रं ग्रामेऽधिकृत्याधि कृत्वा वा गतः। स्वामिनं कृत्वेत्यर्थः । स्वाम्य इति किम् । चिन्तया ग्राममधिकृत्य । उद्दिश्येत्यर्थः । सार्थकत्वे उपसर्गसंज्ञत्वान्नित्यं प्राप्ते पक्षे प्रतिषेधार्थं वचनम् । अनर्थकत्वे तु विधानार्थम् । प्रादिरुपसर्ग इति वर्तते, तेनोपसर्गसंज्ञाऽपि विकल्प्यत इति कृत्वाधीति प्राक्त्वेऽप्यनियमः ।

७६४ **साक्षादादिश्च्व्यर्थे** ॥३।१।१४॥ साक्षादादयः शब्दाश्च्व्यर्थे वर्तमानाः कृगो धातोः संबंधिनो गतिसंज्ञा वा स्युः। साक्षात्कृत्य, साक्षात् कृत्वा । असाक्षाद्भूतं साक्षाद्भूतं कृत्वेत्यर्थः। एवं मिथ्याकृत्य, मिथ्या कृत्वा । च्व्यर्थ इति किम् । यदा साक्षाद्भूतमेव किंचित्करोति तदा साक्षात्कृत्वेत्येव भवति । च्व्यन्तानां तु ' ऊरी ' आदिसूत्रेण नित्यमेव गतिसंज्ञा ।

७६५ **नित्यं हस्तेपाणावुद्वाहे** ॥३।१।१५॥ हस्ते पाणावित्येतौ सप्तम्येकवचनान्तप्रतिरूपकावव्ययौ । सप्तम्यन्तावनव्ययावित्येके । तावुद्वाहे दारकर्मण्यर्थे वर्तमानौ कृगो धातोः संबंधिनौ गतिसंज्ञौ नित्यं स्तः । हस्तेकृत्य । पाणौकृत्य । भार्यां कृत्वेत्यर्थः । उद्वाह इति किम् । हस्ते कृत्वा कार्षापणं गतः । नित्यग्रहणाद्वानिवृत्तिः ।

७६६ **प्राध्वं बन्धे** ॥ ३।१।१६ ॥ प्राध्वमित्येतन्मकारान्तमव्ययमानुकूल्ये वर्तते । तच्चानुकूल्यं यदा बन्धहेतुकं भवति तदा बन्ध इत्युच्यते । अनेकार्थत्वाद्वा निपातानां मुख्य एवास्य बन्धोऽर्थः। तत्र वर्तमानः प्राध्वंशब्दः कृगो धातोः संबंधी गतिसंज्ञः स्यात् । प्राध्वंकृत्य । बंधनेनानुकूलं कृत्वेत्यर्थः । बंध इति किम् । प्राध्वं कृत्वा शकटं गतः ।

७६७ **जीविकोपनिषदौपम्ये** ॥३।१।१७॥ जीविकोपनिषच्छब्दौ औपम्ये गम्यमाने कृगो धातोः संबंधिनौ गतिसंज्ञौ स्याताम् । जीविकाकृत्य । उपनिषत्कृत्य । जीविकामिवोपनिषदमिव कृत्वेत्यर्थः। औपम्य इति किम् । जीविकां कृत्वा, उपनिषदं कृत्वा गतः । इत्युक्ता गतिसंज्ञकास्तेषां च नाम्ना सह नित्यं तत्पुरुषः समासः । अथ कु इत्यव्ययस्योदाहरणम्—कुत्सितो ब्राह्मणः कुब्राह्मणः।

७६८ कोः कत्तत्पुरुषे ॥३।२।१३०॥ तत्पुरुषे समासे स्वरादावुत्तरपदे कुशब्दस्य कदित्ययमादेशः स्यात् । कुत्सितः अश्वः कदश्वः । तत्पुरुष इति किम् । कुत्सिता उष्ट्रा अस्मिन् कूष्ट्रो देशः ।

७६९ दुर्निन्दाकृच्छ्रे ॥३।१।४३॥ दुरित्यव्ययं नाम निन्दायां कृच्छ्रे चार्थे वर्तमानं नाम्ना नित्यं समस्यते, स च समासस्तत्पुरुषः। निन्दितः पुरुषः दुष्पुरुषः । कुच्छ्रेण कृतं दुष्कृतम् ।

७७० सु पूजायाम् ॥३।१।४४॥ सु इत्यव्ययं पूजायां वर्तमानं नाम्ना नित्यं समस्यते स च समासस्तत्पुरुषः । शोभनो राजा सुराजा । अन्य इत्येव । मद्राणां समृद्धिः सुमद्रम् । अत्राव्ययीभावत्वादम् ।

७७१ अतिरतिक्रमे च ॥ ३।१।४५ ॥ अतीत्यव्ययमतिक्रमे पूजायां च वर्तमानं नाम्ना नित्यं समस्यते, स च समासस्तत्पुरुषः। अतिस्तुतं भवता। अतिसिक्तं भवता । अतिक्रमेण स्तुतिसैकौ कृतावित्यर्थः । पूजायाम्–शोभनो राजा अतिराजा । बहुलाधिकारादतिक्रमे क्वचिन्न भवति । अति श्रुत्वा ।

७७२ आङल्पे ॥३।१।४६॥ आङित्यव्ययमल्पेऽर्थे वर्तमानं नाम्ना नित्यं समस्यते, स च समासस्तत्पुरुषः । ईषत्कडारः आकडारः । आबद्धमायुक्तमित्यादौ तु क्रियायोगे गतिलक्षण एव समासः ।

७७३ प्रात्यवपरिनिरादयो गतक्रान्तकुष्टग्लानक्रान्ताद्यर्थाः प्रथमाद्यन्तैः ॥३।१।४७॥ प्रादयः शब्दा गताद्यर्थेषु वर्तमानाः प्रथमान्तेन, अत्यादयः क्रान्ताद्यर्थेषु द्वितीयान्तेन, अवादयः कुष्टाद्यर्थेषु तृतीयान्तेन, पर्यादयो ग्लानाद्यर्थेषु चतुर्थ्यन्तेन, निरादयः क्रान्ताद्यर्थेषु पञ्चम्यन्तेन नाम्ना सह समस्यन्ते स च समासस्तत्पुरुषः । प्रादयः–प्रगत आचार्यः प्राचार्यः । एवं प्रान्तेवासी । अत्यादयः–अतिक्रान्तः खट्वामतिखट्वः । एवमुद्गतो वेलामुद्वेलः । अवादयः–अवकृष्टः कोकिलया अवकोकिलः । एवं परिणद्धो वीरुद्भिः परिवीरुत् इत्यादि । पर्यादयः–परिग्लानोऽध्ययनाय पर्यध्ययनः। एवमुद्युक्तः संग्रामाय उत्संग्रामः इत्यादि । निरादयः–निष्क्रान्तः कौशांब्या निष्कौशांबिः। एवमपगतः शाखाया अपशाखः इत्यादि । बहुलाधिकारात् षष्ठ्यन्तेनापि–अन्तर्गतो गार्ग्यस्य अन्तर्गार्ग्यः। सप्तम्यन्तेनापि–प्रतिष्ठितमुरसि प्रत्युरसम् । अत्र ।

७७४ **प्रतेरुरसः सप्तम्याः** ॥७।३।८४॥ प्रतिशब्दाद् परो य उरस्शब्दः सप्तम्यन्तस्तदन्तात् समासादत् समासान्तः स्यात् । इत्यनेन समासान्तोऽत् । गतार्थाविति किम् । वृक्षं प्रति विद्योतते विद्युत् । साधुर्देवदत्तो मातरं प्रति । अन्य इत्येव । प्राचार्यको देशः । बहुवचनमाकृतिगणार्थम् ।

७७५ **अव्ययं प्रवृद्धादिभिः** ॥३।१।४८॥ अव्ययं नाम प्रवृद्धादिभिर्नामभिर्नित्यं समस्यते, स च समासोऽन्यस्तत्पुरुषसंज्ञः। पुनःप्रवृद्धं बहिः। बहुवचनमाकृतिगणार्थम् ।

७७६ **ङस्युक्तं कृता** ॥३।१।४९॥ कृत्प्रत्ययविधायके सूत्रे ङसिना पञ्चम्यन्तेन नाम्नोक्तं ङस्युक्तम् । तत् कृदन्तेन नाम्ना नित्यं समस्यते स च समासस्तत्पुरुषः। कुंभं करोतीति कुंभकारः । ' कर्मणोऽण् ' इत्यण् । इह च गतिकारकङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समास इष्यते। तेन प्रस् स्थ इत्यादौ, चर्मन् टा क्रीत, कच्छ अम् प इत्यादौ च समासे च सति अकारान्तत्वाद् ङीः सिद्धः। प्रष्ठी, चर्मक्रीती, कच्छपी इत्यादि । यदि पुनर्विभक्त्यन्तैः कृदन्तैः समासः स्यात् तदान्तरङ्गत्वाद्विभक्तेः प्रागेव आपः प्राप्तावकारान्तत्वाभावात् ङीर्न स्यात् । तथा माषान् वापिन् व्रीहीन् वापिन् इत्यादौ समासे नकारस्यानन्त्यत्वाण्णत्वं सिद्धम् । माषवापिणी । व्रीहिवापिणी । विभक्त्यन्तेन तु समासेऽन्तरङ्गत्वाद्विभक्तेः प्रागेव ङीप्राप्तौ नकारस्यान्त्यत्वाण्णत्वं न स्यात् । पूर्वपदस्य च विभक्त्यन्तत्वनियमात् चर्मक्रीतीत्यादिषु पदकार्यं नकारलोपादि सिद्धं भवति । ङस्युक्तमिति किम् । कारकस्य व्रज्या । कृतेति किम् । धर्मो वो रक्षतु ।

७७७ **तृतीयोक्तं वा** ॥३।१।५०॥ 'दंशेस्तृतीयया' ५-४-६३ इत्यारभ्य यत्तृतीयोक्तं नाम तत् कृता नाम्ना वा समस्यते स च समासस्तत्पुरुषः। मूलकेनोपदंशं, मूलकोपदंशं भुङ्क्ते । दण्डेनोपघातं, दण्डोपघातं गाः कलयति। पार्श्वयोः पार्श्वाभ्यां वोपपीडं, पार्श्वोपपीडं शेते । वा शब्दो नित्यसमासनिवृत्त्यर्थः। तेनोत्तरेषु वाक्यमपि भवति।

७७८ **नञ्** ॥३।१।५१॥ नञित्येतन्नाम नाम्ना समस्यते, स च समासस्तत्पुरुषः। न गौः अगौः । अनुचैः । असः । निवर्त्यमानतद्भावश्चोत्तरपदार्थः पर्युदासे नञ्समासार्थः । स चायं चतुर्धा । तत्सदृशः, तद्विरुद्धः, तदन्यः, तदभाव इति ।

अब्राह्मणः अशुक्ल इति तत्सदृशः क्षत्रियादिः पीतादिश्च प्रतीयते । अधर्मः, असित इति तद्विरोधी पाप्मा कृष्णश्च प्रतीयते । अनग्निः, अवायुरित्यग्निवायुभ्यामन्यः प्रतीयते । अवचनम्, अवीक्षणमिति वचनवीक्षणाभावः प्रतीयते । नन्वस्योत्तरपदार्थप्राधान्येन तल्लिङ्गसंख्यत्वे सति कथं 'भवन्त्यनेके जलधेरिवोर्मयः' इत्यादौ अनेके इति बहुवचनम्?। असाधव एवेदृशाः शब्दाः । प्रसज्यप्रतिषेधे तु नञ् पदान्तरेण संबध्यते इति उत्तरपदं वाक्यवत् स्वार्थ एव वर्तते। तत्रासामर्थ्येऽपि यथाभिधानं बाहुलकात् समासः । सूर्यमपि न पश्यन्ति असूर्यंपश्या राजदाराः । अन्य इत्येव । न विद्यंते मक्षिका यत्र सोऽमक्षिकाकः। मक्षिकाणामभावोऽमक्षिकम् ।

७७९ **पूर्वापराधरोत्तरमभिन्नेनांशिना** ॥३।१।५२॥ अंश एकदेशस्तद्वानंशी । पूर्वादयः शब्दाः सामर्थ्यादंशवाचिनोंऽशिना समस्यन्ते अभिन्नेन–न चेत्सोंऽशी भिन्नःप्रतीयते तत्पुरुषश्च समासः । पूर्वः कायस्य पूर्वकायः । एवम् अपरकायः । अधरकायः । उत्तरकायः । पूर्वादिग्रहणं किम् । दक्षिणं कायस्य । अभिन्नेनेति किम् । पूर्वे छात्राणामामंत्रयस्व । प्रसज्यप्रतिषेधः किम् । पूर्वं पाणिपादस्य । अत्र हि समाहारस्यैकत्वेऽपि पाणिः पादः इति भेदप्रतीतेर्न भवति। पूर्वग्राम इत्यादौ तु न ग्रामशब्दात् प्रासादादिभेदप्रतीतिः । अंशिनेति किम् । पूर्वो नाभेः कायस्य ।

७८० **सायाह्नादयः** ॥३।१।५३॥ सायाह्नादयः शब्दा अंशिना तत्पुरुषेण साधवः । सायमह्नः सायाह्नः । एवं मध्यंदिनम् । मध्यरात्रः। उपारता :पश्चिममात्रगोचरादित्यादयः ।बहुवचनमाकृतिगणार्थम् । पूर्वे पञ्चालाः इतिवत् समुदायवाचिनामंशेऽपि प्रवृत्तिदर्शनात् सामानाधिकरण्ये सति कर्मधारयेणैव सिद्धम् । पूर्वश्चासौ कायश्च पूर्वकायः। सायं च तदह्नश्च सायाह्नः इति । तत्पुरुषविधानं त्विह पूर्वत्र चाह्नः सायं कायस्य पूर्वमिति [1]षष्ठीसमासबाधनार्थम् ।

७८१ **समेंऽशेऽर्धं न वा** ॥३।१।५४॥ अर्धमित्येतत् समेंऽशे वर्तमानमंशिना अभिन्नेन वा समस्यते, तत्पुरुषश्च समासः । अर्धं पिप्पल्याः अर्धपिप्पली । पक्षे पिप्पल्यर्धम् । समेंऽश इति किम् । ग्रामार्धः । अर्धं च सा पिप्पली चेति

---

[1] ननु सायमोऽव्ययत्वात् 'तृज्' इत्यादिना षष्ठीसमासस्य निषेधेन प्राप्तिरेव नास्ति किमुच्यते षष्ठीसमासबाधनार्थमिति ? । उच्यते । यदाऽकारान्तः सायशब्दोऽनव्ययं नपुंसकलिङ्गस्तदा प्राप्नोति ।

कर्मधारयेणैव सिद्धे भेदविवक्षायां पक्षे षष्ठीसमासबाधनार्थमसमांशे चार्द्धश्चासौ ग्रामश्चेति कर्मधारयनिषेधार्थं वचनम् । अंशिनेत्येव । पिप्पल्या अर्धं चैत्रस्य । अत्र चैत्रेण समासो न भवति । अभिन्नेनेत्येव । अर्धं पिप्पलीनाम् । कथमर्धपिप्पल्यः ?। अर्धं पिप्पल्या इत्यभिन्नेन समासे सत्येकशेषात् । अर्धराशिरित्यत्र राशेरभेदप्रतिभासाद् भविष्यति । अत्र समेऽंशे वर्तमानोऽर्धशब्द आविष्टलिङ्गी नपुंसकः । असमांऽशे तु पुंलिङ्गः । अन्ये त्वसमासे वाच्यलिङ्गमेनमाहुः । असमांश एव च षष्ठीसमासं समांशे तु नित्यमंशितत्पुरुषमिच्छन्ति ।

७८२ जरत्यादिभिः ॥३।१।५५॥ असमांशार्थ आरंभः । अर्धशब्दो जरत्यादिभिरभिन्नैः सह वा समस्यते तत्पुरुषश्च समासः । अर्धो जरत्या अर्धजरती । अर्धवैशसम् । अर्धोक्तम् । अर्धविलोकितम् । पक्षे जरत्यर्ध इत्याद्यपि भवति । बहुवचनमाकृतिगणार्थम् । इदमपि षष्ठीसमासबाधनार्थम् ।

७८३ द्वित्रिचतुष्पूरणाग्रादयः ॥३।१।५६॥ द्वि त्रि चतुर् इत्येते पूरणप्रत्ययान्ता अग्र इत्यादयश्च शब्दा अंशवाचिनोंऽशिनाऽभिन्नेन वा समस्यन्ते तत्पुरुषश्च समासः। द्वितीयं भिक्षाया द्वितीयभिक्षा । एवं तृतीयभिक्षा। चतुर्थभिक्षा। तुर्यभिक्षा। तुरीयभिक्षा । अग्रं हस्तस्य अग्रहस्तः । एवं तलपादः । ऊर्ध्वकाय इत्यादि । पक्षे भिक्षाद्वितीयम्, भिक्षातृतीयम्, भिक्षाचतुर्थम् , भिक्षातुर्यम्, भिक्षातुरीयम्, हस्ताग्रम्, पादतलम्, कायोर्ध्वमित्यादि । नित्याधिकाराभावादेव पक्षे वाक्यस्य सिद्धत्वाद् वानुवृत्तिः पक्षे षष्ठीसमासार्थम् । तेन पूरणेन निषिद्धोऽपि षष्ठीसमासो भवति । द्व्यादिग्रहणं किम् । पञ्चमं भिक्षायाः। पूरणेति किम् । द्वौ भिक्षायाः । अंशिनेत्येव । भिक्षाया द्वितीयं भिक्षुकस्य । अत्र भिक्षुकेण समासो न भवति । अभिन्नेनेत्येव । द्वितीयं भिक्षाणाम् । अग्रादिराकृतिगणः ।

७८४ कालो द्विगौ च मेयैः ॥३।१।५७॥ अंशांशिनिवृत्तौ तत्संबद्धे वेति निवृत्तम् । कालवाचि नामैकवचनान्तं द्विगौ च विषये वर्तमानं मेयवाचिना नाम्ना समस्यते तत्पुरुषश्च समासः। मासो जातस्य मासजातः । एको मासो जातस्य एकमासजातः । कथं द्व्यहजातः ?। समाहारद्विगोर्जातेन काल इत्यंशेन समासेन भविष्यति । इह च यद्यपि विग्रहे जातादि कालस्य विशेषणं तथापि शब्दशक्तिस्वाभाव्यात् समासो जातादिप्रधानस्तेन समासे लिङ्गं संख्या च तदीयतदीयमेव भवति।

काल इति किम्। द्रोणो धान्यस्य। काल इति चैकवचनं द्विगोः अन्यत्र प्रयोजकम्। तेन मासौ मासा वा जातस्येत्यत्र न भवति। द्विगौ तु द्वौ त्रयो वा मासा जातस्य द्विमासजातः, त्रिमासजात इत्यपि भवति। द्विगुग्रहणं त्रिपदसमासार्थम्। अन्यथा नाम नाम्नेत्यनुवृत्तेर्द्वयोरेव स्यात्। चकारो द्विगुरहितकालपरिग्रहार्थः। मेयैरिति किम्। मासश्चैत्रस्य। जातादेरेव हि मेयत्वम्। जन्मादेः प्रभृति जातादिसंबंधित्वेनैवादित्यगतेः परिच्छेदात्, न द्रव्यमात्रस्य। क्तान्तेनैव च मेयेन प्रायेणायं समास इष्यते। तेन मासो गच्छतः इत्यादौ न भवति। अयमपि षष्ठीसमासापवादो योगः।

७८५ **स्वयं सामी क्तेन** ॥३।१।५८॥ स्वयं सामि इत्येते अव्यये क्तान्तेन नाम्ना सह समस्येते तत्पुरुषश्च समासः। स्वयंधौतौ पादौ। आत्मनेत्यर्थः। समासे सत्यैकपद्यादेकविभक्तिस्तद्धिताद्युत्पत्तिश्च भवति। कृतेनेति किम्। स्वयं कृत्वा। सामिभुक्त्वा।

७८६ **द्वितीया खट्वा क्षेपे** ॥३।१।५९॥ खट्वेत्येतन्नाम द्वितीयान्तं क्षेपे गम्यमाने क्तान्तेन नाम्ना सह समस्यते तत्पुरुषश्च समासः। क्षेपः समासार्थो न वाक्येन गम्यते इति नित्य एवायं समासः। खट्वारूढो जाल्मः। उत्पथप्रस्थित एवमुच्यते। खट्वा पल्यङ्क आचार्यासनं वा। अधीत्य गुरुभिरनुज्ञातेन हि खट्वारोढव्या। यत् त्वन्यदा खट्वारोहणं तदुत्पथप्रस्थानम्। उपलक्षणं चेह खट्वारोहणमुत्पथप्रस्थानस्य, तेन सर्वोऽपि विमार्गप्रस्थितः खट्वारूढ उच्यते। क्षेप इति किम्। खट्वामारूढ उपाध्यायोऽध्यापयति।

७८७ **कालः** ॥३।१।६०॥ कालवाचि नाम द्वितीयान्तं नाम्ना सह समस्यते तत्पुरुषश्च समासः। रात्रिमतिसृताः रात्र्यतिसृताः। मासं प्रमितो मासप्रमितः प्रतिपच्चन्द्रमाः। मासं प्रमातुमारब्ध इत्यर्थः। अव्याप्त्यर्थ आरंभः।

७८८ **व्याप्तौ** ॥३।१।६१॥ व्याप्तिर्गुणक्रियाद्रव्यैरत्यन्तसंयोगः। व्याप्तौ या द्वितीया तदन्तं कालवाचि नाम व्यापकवाचिनाम्ना सह समस्यते तत्पुरुषश्च समासः। क्तेनेति निवृत्तम्। मुहूर्तं सुखं मुहूर्तसुखम्। व्याप्ताविति किम्। मासपूरको व्रजति। काल इत्येव। क्रोशं कुटिला नदी।

७८९ **श्रितादिभिः** ॥३।१।६२॥ द्वितीयान्तं नाम श्रितादिभिर्नामभिः समस्यते तत्पुरुषश्च समासः। धर्मं श्रितः धर्मश्रितः। संसारातीतः। नरकपतितः।

निर्वाणगतः। बहुवचनमाकृतिगणार्थम्। तेन ओदनबुभुक्षुः इत्यादि सिद्धम्।

७९० प्राप्तापन्नौ तयाच ॥३।१।६३॥ प्राप्तापन्नौ सामर्थ्यात् प्रथमान्तौ तया द्वितीयान्तेन नाम्ना सह समस्येते समासश्च तत्पुरुषः, तत्संनियोगे चानयोरन्तस्याकारः। प्राप्ता जीविकां प्राप्तजीविका। आपन्नजीविका। अत्वचनं स्त्रीलिङ्गार्थम्। प्राप्तापन्नयोः प्रथमोक्तत्वात् पूर्वनिपातार्थं वचनम्। श्रितादित्वाच्चानयोर्द्वितीयाया अपि प्रथमोक्तत्वेन प्राग्निपातः। जीविकाप्राप्तः, जीविकापन्न इत्यपि भवति।

७९१ ईषदूनगुणवचनैः ॥३।१।६४॥ ईषदित्येतदव्ययं गुणवचनैर्नामभिः सह समस्यते तत्पुरुषश्च समासः। ये गुणे वर्तित्वाद्योगे गुणिनि वर्तन्ते गुणमुक्तवन्तो गुणवचनाः। ईषदल्पं पिङ्गलः ईषत्पिङ्गलः। गुणवचनैरिति किम्। ईषत्कारकः।

७९२ तृतीया तत्कृतैः ॥३।१।६५॥ तृतीयान्तं नाम तत्कृतैः-तृतीयान्तार्थकृतगुणवचनैर्नामभिः सह समस्यते, समासश्च तत्पुरुषः। शंकुलया कृतः खण्डः शंकुलाखंडः। कृतार्थो वृत्तावन्तर्भूत इति कृतशब्दो न प्रयुज्यते। तत्कृतैरिति किम्। अक्ष्णा काणः। काणत्वादि ह्यत्र काण्डादिना कृतम् नाक्ष्यादिना। अक्ष्यादिना परं संबंधमात्रम्। यदा तु तत्कृतत्वविवक्षायां कर्तरि करणे वा तृतीया तदा भवत्येव समासः। अक्षिकाण इत्यादि। गुणवचनैरित्येव। गोभिर्वपावान्। दध्ना पटुः। पाटवमित्यर्थः। न ह्येतौ पूर्वं गुणमुक्त्वा सांप्रतं द्रव्ये वर्तेते इति गुणवचनौ न भवतः। अत एव शुद्धगुणवाचिनापि समासो न भवति। घृतेन पाटवम्, विद्यया धार्ष्ट्यम्–अत्रापि समासो भवतीति कश्चित्। अन्ये तु गुणवचनैर्गुणमात्रवृत्तिभिरपि समासमिच्छन्ति। शंकुलाखण्डश्चैत्रस्य।

७९३ चतस्रार्द्धम् ॥३।१।६६॥ अर्धशब्दस्तृतीयान्तस्तत्कृतार्थेन चतस्रशब्देन सह समस्यते तत्पुरुषश्च समासः। अर्धेन कृताश्चतस्रोऽर्धचतस्रो मात्राः। चतस्रेति किम्। अर्धे कृताश्चत्वारो द्रोणाः।

७९४ ऊनार्थपूर्वादैः ॥३।१।६७॥ तृतीयान्तं नाम ऊनार्थैः पूर्वादिभिश्च नामभिः समस्यते तत्पुरुषश्च समासः। माषेणोनं माषोनम्। माषविकलम्। मासेन पूर्वः मासपूर्वः। एवं मासावरः। आकृतिगणोऽयम्। तेन धान्येनार्थो धान्यार्थः इत्यादि सिद्धम्। पूर्वादियोगे यथायोगं हेत्वादौ तृतीया।

७९५ कारकं कृता ॥३।१।६८॥ कारकवाचि नाम तृतीयान्तं सामर्थ्यात्

कर्तृकरणरूपं कृदन्तेन नाम्ना सह समस्यते तत्पुरुषश्च समासः । आत्मना कृतम् आत्मकृतम् । कृत्सगतिकारकस्यापि । चैत्रेण नखनिर्भिन्नः चैत्रनखनिर्भिन्नः । परशुना छिन्नः परशुच्छिन्नः । बहुलाधिकारात् स्तुतिनिन्दार्थतायां प्रायेण कृत्यैः समासः । काकपेया नदी । एवं नाम पूर्णेत्यर्थः । कण्टकसंचेय ओदनः । एवं नाम विशद इत्यर्थः । कारकमिति किम् । विद्ययोषितः । तेन हेतुनेत्यर्थः । कृतेति किम् । गोमिर्वपावान् । बहुलाधिकारादेव क्तवतुना क्त्वया तव्यानीयाभ्यां च न भवति । दात्रेण लूनवान् । दात्रेण कृत्वा । काकैः पातव्यः । श्वभिर्लेहनीयः ।

७९६ **नविंशत्यादिनैकोऽचान्तः** ॥ ३।१।६९ ॥ एकशब्दस्तृतीयान्तो नविंशत्यादिनाम्ना सह समस्यते तत्पुरुषश्च समासः, एकशब्दस्य चादन्तो भवति । एकेन न विंशतिः एकान्नविंशतिः । पक्षे एकादूनविंशतिः । एवमेकान्नत्रिंशत् । एकादूनत्रिंशत् । नविंशत्यादिनेति निर्देशात् नञत् न भवति ।

७९७ **चतुर्थी प्रकृत्या** ॥३।१।७०॥ प्रकृतिः परिणामि कारणम् । चतुर्थ्यन्तमर्थाद् विकृतिवाचि नाम प्रकृतिवाचिना नाम्ना सह समस्यते तत्पुरुषश्च समासः । यूपाय दारु यूपदारु । प्रकृत्येति किम् । रंधनाय स्थाली । मूत्राय संपद्यते यवागूरित्यादौ तु विकारस्याप्रधानस्य संपद्यते इत्यादि क्रियासापेक्षत्वात् न भवति ।

७९८ **हितादिभिः** ॥३।१।७१॥ चतुर्थ्यन्तं नाम हितादिभिः समस्यते तत्पुरुषश्च समासः । गोभ्यो हितं गोहितम् । एवं गोसुखम् । गोरक्षितः । गोबलिः । आकृतिगणोऽयम् । तेन अश्वघास इत्यादि सिद्धम् ।

७९९ **तदर्थार्थेन** ॥३।१।७२॥ तस्याश्चतुर्थ्या अर्थो यस्य स तदर्थः । चतुर्थ्यन्तं नाम तदर्थेनार्थशब्देन नाम्ना सह समस्यते तत्पुरुषश्च समासः । पित्रे इदं पित्रर्थं पयः । ' ङेऽर्थो वाच्यवत् ' इति वाच्यलिङ्गता । नित्यसमासश्चायम् । तदर्थेत्यर्थविशेषणं किम् । पित्रेऽर्थः ।

८०० **पञ्चमी भयाद्यैः** ॥३।१।७३॥ पञ्चम्यन्तं नाम भयाद्यैर्नामभिः सह समस्यते तत्पुरुषश्च समासः । वृकाद् भयम् । एवं वृकभीः । आकृतिगणश्चायम् । तेन द्वीपान्तरानीतः इत्यादि सिद्धम् । बहुलाधिकारादिह न भवति ।

८०१ क्तेनासत्त्वे ॥३।१।७४॥ असत्त्वे वर्तमाना या पञ्चमी तदन्तं नाम क्तप्रत्ययान्तेन नाम्ना सह समस्यते तत्पुरुषश्च समासः। स्तोकान्मुक्तः। 'असत्त्वे ङसेः' इति वक्ष्यमाणेन विभक्तेरलुप्। क्तेनेति किम्। स्तोकान्मोक्षः। असत्त्व इति किम्। स्तोकाद् वर्द्धितः। स्तोकाद्व्यादित्यर्थः। समासे तद्धिताद्युत्पत्तिः फलम्—स्तौकान्मुक्तिः इत्यादि।

८०२ परःशतादिः ॥३।१।७५॥ परःशतादिः पञ्चमीतत्पुरुषः साधुर्भवति। शतात् परे परःशताः। सहस्रात् परे परःसहस्राः। लक्षाल्लक्षाया वा परे परोलक्षाः। परशब्दस्य पूर्वनिपातः सकारागमश्च निपातनात्। परशब्देन समानार्थः परस्शब्दः सकारान्तोऽप्यस्तीत्यन्ये।

८०३ षष्ठ्ययत्नाच्छेषे ॥३।१।७६॥ शेषे या षष्ठी तदन्तं नाम नाम्ना सह समस्यते तत्पुरुषश्च समासः, अयत्नात्—न चेत् स शेषो 'नाथः' इत्यादेर्यत्नाद् भवति। राज्ञः पुरुषः राजपुरुषः। ऋद्धस्य राज्ञः पुरुष इत्यादौ सापेक्षत्वान्न भवति। कथं देवदत्तस्य गुरुकुलमिति?। सापेक्षत्वेऽपि गमकत्वाद् भवति। अयत्नादिति किम्। सर्पिषो नाथितम्। शेष इति किम्। सर्पिषो ज्ञानम्। गोस्वामीत्यादिषु स्वयत्नजा शेष एव षष्ठी। 'स्वामीश्वरा' इति सूत्रस्य नित्यं षष्ठीप्राप्तौ पक्षे सप्तमीविधानार्थत्वात्। संघस्य भद्रं भूयादित्यादौ त्वाशिषि षष्ठ्याः समासो न भवति असामर्थ्यात् अनभिधानाद्वा। नहि संघभद्रं भूयादित्युक्ते संघस्य भद्रं भूयादित्यर्थः प्रतीयते अपि तु संघभद्रं नाम संघसंबंधितया प्रसिद्धं किंचिद् भद्रं कस्यचिद्भूयादिति।

८०४ कृति ॥३।१।७७॥ 'कर्मणि कृतः' 'कर्तरी'ति च या कृति कृत्प्रत्ययनिमित्ता षष्ठी विहिता तदन्तं नाम नाम्ना समस्यते तत्पुरुषश्च समासः। सिद्धसेनकृतिः। गणधरोक्तिः।

८०५ याजकादिभिः ॥३।१।७८॥ षष्ठ्यन्तं नाम याजक इत्येवमादिभिर्नामभिः सह समस्यते तत्पुरुषश्च समासः। ब्राह्मणानां याजकः ब्राह्मणयाजकः। एवं गुरुपूजकः। आकृतिगणोऽयम्। तेन तुल्यार्था अपि। गुरुसदृशः इत्यादयः, तथा अन्यत्कारकः इत्यादयः सिद्धाः। 'कर्मजा तृचा चे'ति प्रतिषेधापवादो योगः तुल्यार्थैर्विध्यर्थश्च।

८०६ **पत्तिरथौ गणकेन** ॥३।१।७९॥ पत्तिरथशब्दौ षष्ठ्यन्तौ गणकेन नाम्ना समस्येते तत्पुरुषश्च समासः । पत्तीनां गणकः पत्तिगणकः। एवं रथगणकः। पत्तिरथाविति किम्। कार्षापणानां गणकः। गणेकेनेति किम्। रथस्य दर्शकः। कथं ज्योतिर्गणकः ? 'अकेन क्रीडाजीवे' इति भविष्यति। 'कर्मजा तृचा च' इत्यस्यापवादोऽयम्।

८०७ **सर्वपश्चादादयः** ॥३।१।८०॥ सर्वपश्चादित्यादयः षष्ठीतत्पुरुषाः साधवः। सर्वेषां पश्चात् सर्वपश्चात् पदं वर्तते। सर्वचिरं जीवति। तदुपरिष्टात् रुक्मं निदधाति। इत्यादि। अव्ययेन प्रतिषेधं वक्ष्यति तस्यापवादोऽयम्। बहुवचनं शिष्टप्रयोगानुसरणार्थम्।

८०८ **अकेन क्रीडाजीवे** ॥३।१।८१॥ आजीवो जीविका। षष्ठ्यन्तं नामाकप्रत्ययान्तेन नाम्ना समस्यते क्रीडायामाजीवे च गम्यमाने तत्पुरुषश्च समासः। उद्दालकपुष्पभञ्जिका। क्रीडाविशेषस्य संज्ञा। आजीवे—दन्तलेखकः। दन्तलेखनादिरस्याजीवो गम्यते। क्रीडाजीवौ वाक्येन न गम्येते इति नित्यसमासा एते। क्रीडाजीव इति किम्। ओदनस्य भोजकः। कर्मजा तृचा इति प्रतिषेधे प्राप्ते वचनम्।

८०९ **न कर्तरि** ॥३।१।८२॥ कर्तरि विहिता या षष्ठी तदन्तं नामाकान्तेन नाम्ना न समस्यते। भवतः शायिका। भवत आसिका। कर्तरीति किम्। इक्षुभक्षिकां मे धारयसि।

८१० **कर्मजा तृचा च** ॥३।१।८३॥ कर्तरीत्यनुवर्तते। तच्चाकस्य विशेषणम्। कर्मणि विहिता षष्ठी कर्मजा। तदन्तं नाम कर्तरि विहितो योऽकप्रत्ययस्तदन्तेन तृजन्तेन च नाम्ना सह न समस्यते। ओदनस्य भोजकः। अपां स्रष्टा। कर्मजेति किम्। संबंधषष्ठ्याः प्रतिषेधो मा भूत्। गुणो गुणिविशेषकः। गुणिनः संबंधी विशेषक इत्यर्थः। कर्तरीत्येव। इक्षुभक्षिकां मे धारयसि। कथं भूभर्ता, वज्रभर्तेति ?। भर्तृशब्दो यः पतिपर्यायस्तेन संबंधषष्ठ्या याजकादिपाठात् कर्मषष्ठ्या वाऽयं समासः। क्रियाशब्दस्य तु तत्राग्रहणादनेन प्रतिषेधः। भुवो भर्ता। वज्रस्य भर्ता।

८११ **तृतीयायाम्** ॥३।१।८४॥ कर्तरि या तृतीया तस्यां सत्यां कर्मजा षष्ठी न समस्यते। आश्चर्यो गवां दोहोऽगोपालकेन। साध्विदं शब्दानामनुशासनमाचार्येण। तृतीयायामिति किम्। साध्विदं शब्दानुशासनमाचार्यस्य। कर्तरि

षष्ठ्यामपि न समास इति कश्चित् । विचित्रा सूत्रस्य कृतिराचार्यस्य । कर्तरीत्येव । साध्विदं शब्दानुशासनमाचार्यस्य नः पुण्येन । कर्मजेत्येव । मैत्रस्य संबंधी कृतो मैत्रकृतश्चैत्रेण । कथं गोदोहो गोपालकेन ?। संबंधषष्ठ्या भविष्यति ।

८१२ तृप्तार्थपूरणाव्ययातृशशत्रानशा ॥३।१।८५॥ तृप्तार्थैः पूरणप्रत्ययान्तैरव्ययैरतृशन्तैः शत्रन्तैरानशन्तैश्च नामभिः षष्ठ्यन्तं नाम न समस्यते । फलानां तृप्तः । तीर्थकराणां षोडशः । राज्ञः साक्षात् । अव्ययीभावस्याप्यन्वर्थाश्रयणात् क्वचिदव्ययत्वम् । तेन चैत्रस्योपकुंभमित्यत्र समासो न भवतीति केचित् । अतृश-रामस्य द्विषन् । शतृ-चैत्रस्य पचन् । चैत्रस्य पचमानः । सर्वत्र संबंधे षष्ठी । एतैरिति किम् । ब्राह्मणस्य कर्तव्यं ब्राह्मणकर्तव्यम् । राज्ञः पाटलिपुत्रकस्य धनमित्यादौ सामानाधिकरण्ये धनादिपदापेक्षया षष्ठीत्यसामर्थ्यात् समासो न भवति । विशेषणसमासस्तु निरपेक्षत्वेन सामर्थ्याद् भवत्येव । पाटलिपुत्रकश्चासौ राजा च तस्य पाटलिपुत्रकराजस्येत्यादि । षष्ठीसमासे तु अनियमेन पूर्वनिपातः स्यात् ।

८१३ ज्ञानेच्छार्थार्थाधारक्तेन ॥३।१।८६॥ ज्ञानार्थादिच्छार्थादर्थार्थाच्च वर्तमानो यः क्तो यश्च 'अधर्थाच्चाधारे (५-१-१२) इत्याधारे विहितस्तदन्तेन नाम्ना षष्ठ्यन्तं नाम न समस्यते । राज्ञां ज्ञातः, बुद्धः, इष्टः, मतः, अर्चितः, पूजितो वा । इदमेषां यातम् । कथं राजपूजितः इत्यादि ? बहुलाधिकारात् इष्टेन भूतकालक्तेन तृतीयासमास एवेति केचित् । अन्ये तु कृद्योगजाया एव षष्ठ्या इह समासप्रतिषेध इति संबंधे षष्ठीसमास इत्याहुः ।

८१४ अस्वस्थगुणैः ॥३।१।८७॥ ये गुणाः स्वात्मन्येवावतिष्ठन्ते न द्रव्ये ते स्वस्थाः । तत्प्रतिषेधेनास्वस्थगुणवाचिभिर्नामभिः सह षष्ठ्यन्तं नाम न समस्यते । पटस्य शुक्लः । कालस्य कृष्णः । अत्र अर्थात्प्रकरणाद्वापेक्ष्यस्य वर्णादेर्निर्ज्ञाने य इमे शुक्लादयस्ते पटादेरिति सामर्थ्योपपत्तेः समासः प्राप्नोतीति प्रतिषिध्यते । तथा पटस्य शौक्ल्यम्, काकस्य कार्ष्ण्यम्-अत्र पूर्वत्र च शुक्लादेर्गुणस्य शुक्लः पट इत्यादौ द्रव्येऽपि वृत्तिप्रदर्शनात् अस्वास्थ्यमस्त्येव । गुणशब्देन चेह लोकप्रसिद्धा रूपरसगंधस्पर्शगुणा अभिप्रेतास्ततः तद्विशेषैरेवार्थं प्रतिषेधः, तेन यत्नस्य गौरवम् यत्नगौरवम् इत्यादिषु निषेधो न भवति । अस्वस्थगुणैरिति किम् । घटवर्णः । बहुलाधिकारात् कंटकस्य तैक्ष्ण्यमित्यादिषु समासो न भवति, कुसुमसौरभ्यमित्यादिषु भवतीति ।

८१६ **सप्तमी शौण्डाद्यैः** ॥३।१।८८॥ सप्तम्यन्तं नाम शौण्डाद्यैर्नामभिः सह समस्यते तत्पुरुषश्च समासः । पाने प्रसक्तः शौण्डः पानशौण्डः मद्यपः । अक्षेषु प्रसक्तः शौण्ड इव अक्षशौण्डः । शौण्डशब्द इह गौणो व्यसनिनि वर्तते । वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादप्रयोगः । बहुवचनमाकृतिगणार्थम्, तेन शिरःशेखरः, ऋणे अधमः अधमर्णः, ऋणे उत्तमः उत्तमर्णः राजदन्तादित्वात् परनिपात इत्यादि सिद्धं भवति ।

८१७ **सिंहाद्यैः पूजायाम्** ॥३।१।८९॥ सप्तम्यन्तं नाम सिंहाद्यैर्नामभिः सह समस्यते पूजायां गम्यमानायाम्, तत्पुरुषश्च समासः। समरे सिंह इव समरसिंहः। एवं रणव्याघ्रः । उपमयात्र पूजावगम्यते बहुवचनमाकृतिगणार्थम् ।

८१७ **काकाद्यैः क्षेपे** ॥३।१।९०॥ सप्तम्यन्तं नाम काकाद्यैर्नामभिः सह समस्यते क्षेपे गम्यमाने, तत्पुरुषश्च समासः । तीर्थे काक इव तीर्थकाकः । एवं तीर्थध्वांक्षः । अनवस्थित एवमुच्यते । उपमया चात्र क्षेपो गम्यते । क्षेप इति किम् । तीर्थे काकस्तिष्ठति । बहुवचनमाकृतिगणार्थम् ।

८१८ **पात्रेसमितेत्यादयः** ॥३।१।९१॥ पात्रेसमितादयः सप्तमीतत्पुरुषा निपात्यन्ते क्षेपे गम्यमाने । पात्र एव समिताः पात्रेसमिताः, भोजनसमये एव संगता न तु कार्ये । एवं पात्रेबहुलाः, गेहेशूरः, गेहेनर्दीत्यादयः। इतिशब्दः समासान्तरनिवृत्त्यर्थः । तेन परमाः पात्रेसमिताः इत्यादिषु समासो न भवति । निपातनात् सप्तम्या अलुप् । बहुवचनमाकृतिगणार्थम् । तेन व्रणकृमिरित्यादयो गृह्यन्ते ।

८१९ **क्तेन** ॥३।१।९२॥ सप्तम्यन्तं नाम क्तान्तेन नाम्ना सह समस्यते क्षेपे गम्यमाने तत्पुरुषश्च समासः ।

८२० **कृत्सगतिकारकस्यापि** ॥७।४।११७॥ कृत्प्रत्ययः प्रकृत्यादेः समुदायस्य गतिकारकपूर्वस्य अपिशब्दात् केवलस्यापि विशेषणं स्यात् । भस्म-निहुतम् । प्रवाहेमूत्रितम् । कार्येष्वनवस्थितत्वमुच्यते । सर्वत्रोपमानेन क्षेपो गम्यते । नित्यसमासाश्चैते पात्रेसमितादयश्च ।

८२१ **तत्राहोरात्रांशम्** ॥३।१।९३॥ पृथग्योगात् क्षेप इति निवृत्तम् । तत्रेत्येतत्सप्तम्यन्तं नामाहरवयवा रात्र्यवयवाश्च सप्तम्यन्ताः क्तान्तेन नाम्ना सह समस्यन्ते तत्पुरुषश्च समासः । तत्रकृतम् । पूर्वाह्णे कृतं पूर्वाह्णकृतम् । पूर्वरात्र-

कृतम् । तद्धिताद्युत्पत्तिः समासफलम् । तात्रकृतिः । तत्राहोरात्रांशमिति किम् । घटे कृतम् । कथमन्यजन्मकृतं कर्मेति ? कारकं कृतेति तृतीयासमासोऽयम् । अहोरात्रग्रहणं किम् । शुक्लपक्षे कृतम् । पक्षो मासांशः । अंशग्रहणं किम् । अहनि भुक्तम् । कथं रात्रिवृत्तमिति ? । बहुलाधिकारात् । कृतेनेत्येव । तत्र भोक्ता ।

८२२ **नाम्नि** ॥३।१।९४॥ सप्तम्यन्तं नाम नाम्ना समस्यते नाम्नि–संज्ञाविषये समुदायश्चेत्संज्ञा भवति, समासश्च तत्पुरुषः । अरण्येतिलकाः । वनेकशेरुकाः । मुकुटे कार्षापणः । अद्यंजनादित्यनेन माकारस्येत्यनेन च वक्ष्यमाणसूत्रेण सप्तम्या अलुप् । नित्यसमासोऽयं, नहि वाक्येन संज्ञा गम्यते ।

८२३ **कृत्येनावश्यके** ॥३।१।९६॥ सप्तम्यन्तं नाम 'य एचातः' (५–१–२८) इति कृत्यप्रत्ययान्तेन नाम्ना समस्यते आवश्यके–अवश्यंभावे गम्यमाने तत्पुरुषश्च समासः । मासेऽवश्यं देयं मासदेयम् । एवं संवत्सरदेयम् । कृदिति किम् । मासे पित्र्यम् । य इति किम् । मासे स्तुत्यः । संवत्सरकर्तव्यमिति तु बहुलाधिकारात् । आवश्यक इति किम् । मासे देया भिक्षा ।

८२४ **विशेषणं विशेष्येणैकार्थे कर्मधारयश्च** ॥३।१।९६॥ विशिष्यतेऽनेकप्रकारं वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यतेऽनेनेति विशेषणं, व्यवच्छेद्यं विशेष्यम् । भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिरैकार्थ्यं सामानाधिकरण्यमिति यावत् । तद्वदेकार्थम् । विशेषणवाचि नामैकार्थं विशेष्यवाचिना नाम्ना सह समस्यते स च समासस्तत्पुरुषसंज्ञः कर्मधारयसंज्ञश्च स्यात् । नीलं च तदुत्पलं च नीलोत्पलम् । विशेषणविशेष्ययोः संबंधिशब्दत्वादेकतरोपादानेनैव द्वये लब्धे द्वयोरुपादानं परस्परमुभयोर्व्यवच्छेद्यव्यवच्छेदकत्वे समासो यथा स्यादित्येवमर्थम् । तेनेह न भवति । तक्षकः सर्पः । लोहितस्तक्षक इति । न ह्यसर्पेऽन्यवर्णो वा तक्षकोऽस्ति । कथं तर्हि आम्रवृक्ष इत्यादौ समासः ? । न ह्यवृक्ष आम्रो भवति । नात्राम्रादयः वृक्षविशेषाणामेव वाचकाः, किं तर्हि फलादेरपि तत्सहचरितमाधुर्यस्थैर्यादेर्गुणविशेषस्य च । एवं च तक्षकाहिरित्यादयोऽपि भवन्ति । यदि वा आम्राणां फलानां संबंधी वृक्षः आम्रवृक्ष इत्यादयः षष्ठीसमासा द्रष्टव्याः । यद्येवमुभयोर्विशेषणत्वे उभयोश्चविशेष्यत्वे सति विशेष्यस्यापि विशेषणत्वमित्युत्पलशब्दस्यापि नीलादिना समासप्रसङ्गः, तथा च 'प्रथमोक्तं प्राक्' इति वचनादुत्पलनीलमित्यपि स्यात् । नैवम् । *अविशेषेऽपि विशेषणविशेष्यभावस्य 'प्रधानानुयाय्यप्रधानम्'*

इति न्यायात् अप्रधानस्यैव प्रधानेन समासः। प्राधान्यं च द्रव्यशब्दानां द्रव्यस्यैव साक्षात् क्रियाभिसंबंधात्। यद्यपि चोत्पलादिशब्दा जातिशब्दास्तथापि उत्पत्तेः प्रभृत्याविनाशाद्द्रव्येण जातेरभिसंबंधाद्द्रव्यशब्दा उच्यन्ते। गुणक्रिययोस्तु तथा द्रव्येण संबंधाभावान्न तन्निमित्ताः शब्दा द्रव्यशब्दा इति नीलोत्पलमित्याद्येव भवति न तूत्पलनीलादीति। यस्तु गुणादिशब्दानामेव समासस्तत्रोभयोरपि पदयोरप्रधानत्वात् कामचारेण पूर्वापरनिपातः। खञ्जश्चासौ कुण्टश्च खञ्जकुण्टः, कुण्टखञ्ज इत्यादि। कृष्णसारङ्ग इत्यादौ तु गुणशब्दत्वेऽपि सारङ्गादिशब्दानां समुदायवाचित्वात् प्राधान्यम् कृष्णादिशब्दानां त्ववयववाचित्वेनाप्राधान्यमिति कृष्णादीनामेव पूर्वनिपातः। एकार्थमिति किम्। वृद्धस्योक्षा वृद्धोक्षा। कर्मधारये समासान्तः स्यात्। बहुलाधिकारात् क्वचित्समासो न भवति। रामो जामदग्न्यः। क्वचिन्नित्यः। कृष्णसर्पः। लोहितशालिः। पुरुषमृगः। जातिविशेषवाचित्वान्नित्यसमासा एते। नहि वाक्येन जातिर्गम्यते। जातिशब्दानां चावयवद्वारेण समुदायेऽपि वृत्तेः सामानाधिकरण्यम्। भूयोऽवयवाभिधायिनश्च प्राधान्याद् विशेष्यत्वमितरस्य तु विशेषणत्वम्। चकारस्तत्पुरुषकर्मधारयसंज्ञासमावेशार्थः।

८२५ पूर्वकालैकसर्वजरत्पुराणनवकेवलम् ॥३।१।९७॥ पूर्वकाल इत्यर्थनिर्देशः। पूर्वःकालो यस्यार्थस्य स पूर्वकालः। तद्वाचि नामैकार्थानि चैकार्थानि परेण नाम्ना सह समस्यन्ते तत्पुरुषः कर्मधारयश्च समासः। पूर्वकालः संबंधिशब्दत्वादपरकालेन। पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। एवं लिप्तवासितः। एकशब्दः संख्यान्यसहायाद्वितीयेषु वर्तते। एका शाटी एकशाटी। शाटशब्देन वस्त्रमित्यानाम्न भवति। एकः शाटः। सर्वशब्दो द्रव्यावयवप्रकारगुणानां कात्स्न्र्ये वर्तते। सर्वशैलाः। जरद्बलिनः। पुराणवैयाकरणः। नवोदकम्। केवलमसहायं ज्ञानं केवलज्ञानम्। एकार्थमित्येव। स्नात्वानुलिप्तः। स्नात्वेत्यसत्त्ववाचिनो नानुलिप्तपदेनकार्थ्यम्। पूर्वेणैव सिद्धे पुनर्वचनं स्पर्द्धे परमिति पूर्वनिपातस्य विषयप्रदर्शनार्थम्, पूर्वापरकालवाचिनोरद्रव्यशब्दत्वादनियमे प्राप्ते पूर्वकालवाचिन एव पूर्वनिपातनार्थं च।

८२६ दिगधिकं संज्ञातद्धितोत्तरपदे ॥३।१।९८॥ दिग्वाचि अधिकमित्येतच्च नामैकार्थं परेण नाम्ना सह समस्यते संज्ञायां तद्धिते च प्रत्यये विषयभूते उत्तरपदे च परतः, स च समासस्तत्पुरुषः कर्मधारयश्च। दक्षिणाः कोशलाः

दक्षिणकोशलाः । एवं नामानो जनपदाः । संज्ञायां नित्यसमासः । नहि वाक्येन संज्ञा गम्यते । पूर्वोत्तरविभागप्रदर्शनार्थं तु विग्रहवाक्यम् । तद्धिते–दक्षिणस्यां शालायां भवः दाक्षिणशालः । अधिकं खल्वपि–अधिकया षष्ट्या क्रीतः अधिकां षष्टिं भूतो भावी वा अधिकषाष्टिकः । अयमपि नित्यसमासः । नहि तद्धिते वाक्यमस्ति । उत्तरपदे–दक्षिणो गौर्धनमस्य दक्षिणगवधनः । अधिकगवप्रियः । अत्र तत्पुरुषलक्षणः समासान्तो वक्ष्यते । उत्तरपदेऽपि नित्यसमासः । त्रयाणामेकार्थीभाव एवोत्तरपदसंभवात् । तत्र च द्वयोर्व्यपेक्षाभावात् । संज्ञादिग्रहणं किम् । उत्तरा वृक्षाः । विशेषणं विशेष्येणेत्येव सिद्धे नियमार्थं वचनम् । दिगधिकं संज्ञातद्धितोत्तरपद एव समस्यते नान्यत्रेति । दक्षिणा गावोऽस्य सन्ति दक्षिणगुरित्यादौ सन्तीत्येतदनपेक्षयान्तरङ्गत्वेन बहुव्रीहिभावादुक्तार्थत्वेन मत्वर्थीयतद्धितविषयभाव एव नास्तीत्यनेन समासो न भवति ।

८२७ **संख्या समाहारे च द्विगुश्चानाम्न्ययम्** ॥३।१।९९॥ अनेकस्य कथंचिदेकत्वं समाहारः । संख्यावाचि नाम परेण नाम्ना सह समस्यते संज्ञातद्धितयोर्विषयभूतयोरुत्तरपदे परे समाहारे चाभिधेये स च समासस्तत्पुरुषसंज्ञः कर्मधारयसंज्ञश्च । अयमेव चानाम्नि-असंज्ञायां द्विगुसंज्ञश्च स्यात् । संज्ञायाम्-पञ्चाम्राः । तद्धिते–द्वयोर्मात्रोरपत्यं द्वैमातुरः । उत्तरपदे–पञ्च गावो धनमस्य पञ्चगवधनः । समाहारे–पञ्चानां पूलानां समाहारः पञ्चपूली । समाहारे चेति किम् । अष्टौ प्रवचनमातरः । विशेषणं विशेष्येणेत्यनेनापि न भवति । नियमार्थत्वादस्य । एकस्य समाहारायोगादपूपेन समासे कथमेकापूपी ? । एकस्याप्यनेकपर्यायोपनिपातिनोऽप्यनेकत्वसंभवे समाहारोपपत्तेः । द्विगुश्चेति चकारः कर्मधारयतत्पुरुषसंज्ञासमावेशार्थः । अनाम्नीति किम् । पञ्चर्षीणामिदं पाञ्चर्षम् । अत्र द्विगुत्वेऽनपत्यप्रत्ययस्य लुप् स्यात् । अयंग्रहणमुत्तरत्र द्विगुश्चेत्यस्याननुवृत्त्यर्थम् ।

८२८ **निन्द्यं कुत्सनैरपापाद्यैः** ॥३।१।१००॥ निन्द्यवाचि नामैकार्थं पापादिवर्जितैः कुत्सनैर्निन्दाहेतुभिः सह समस्यते स च समासस्तत्पुरुषसंज्ञः कर्मधारयसंज्ञश्च । वैयाकरणश्चासौ खसूची च वैयाकरणखसूची । यः शब्दं पृष्टः सन्निष्प्रतिभत्वात् खं सूचयति स एवमुच्यते । वैयाकरणखसूचिरित्यन्ये । मीमांसकदुर्दुरूढः । दुर्दुरूढो नास्तिकः । निन्द्यमिति किम् । वैयाकरणशौरः । प्रत्यासत्तेर्निन्द्यशब्दप्रवृत्तिनिमित्तकुत्सायामयं समास इष्यते । न चात्र चौर्येण वैयाकरणत्वं

कुत्स्यते किंतर्हि तदाश्रयो द्रव्यम् । वैयाकरणत्वं तदुपलक्षणमात्रम् । तेनात्र विशेषणसमासो भवति । चौरवैयाकरणः । कुत्सनैरिति किम् । कुत्सितो ब्राह्मणः । बहुलाधिकारात् विशेषणसमासोऽप्यत्र न भवति । भवतीत्यन्ये । कुत्सितब्राह्मणः । अपापाद्यैरिति किम् । पापवैयाकरणः । प्रवृत्तिनिमित्तमेव कुत्स्यते । विशेष्यस्य पूर्वनिपातार्थं सूत्रम् । बहुवचनं प्रयोगानुसरणार्थम् ।

८२९ उपमानं सामान्यैः ॥ ३।१।१०१ ॥ उपमीयतेऽनेनेत्युपमानम् । उपमानोपमेययोः साधारणो धर्मः सामान्यम् । उपमानवाचि नामैकार्थं सामान्यवाचिभिर्नामभिः सह समस्यते स च समासस्तत्पुरुषः कर्मधारयश्च । शस्त्रीव शस्त्री । शस्त्री चासौ श्यामा च शस्त्रीश्यामा । शस्त्रीव श्यामेत्यर्थः । एवं न्यग्रोधपरिमण्डलेत्यादि । अत्र शरुच्यादयः शब्दाः श्यामादयश्च श्यामादिकं गुणमुपादाय यदोपमेये वर्तन्ते तदैकार्था भवन्ति । एवं च पुंवद्भावोऽपि सिद्धो भवति । उपमानमिति किम् । देवदत्ता श्यामा । सामान्यैरिति किम् । अग्निर्माणवकः । गौर्वाहीकः । विशेषणं विशेष्येणेत्येव सिद्धे उपमानोपमेययोः साधारणधर्ममतीत्यन्यथानुपपत्त्यैव पूर्वनिपाते च सिद्धे उपमानं सामान्यैरेवेति नियमार्थं वचनम् । तेनाग्निर्माणवक इत्यादौ विशेषणसमासोऽपि न भवति ।

८३० उपमेयं व्याघ्राद्यैः साम्यानुक्तौ ॥ ३।१।१०२ ॥ उपमेयवाचि नामैकार्थं सामर्थ्यादुपमानवाचिभिर्व्याघ्राद्यैः नामभिः सह समस्यते, साम्यानुक्तौ—न चेदुपमानोपमेययोः साधारणधर्मवाची शब्दः प्रयुज्यते, स च समासस्तत्पुरुषसंज्ञः कर्मधारयश्च । व्याघ्र इव व्याघ्रः पुरुषः स चासौ व्याघ्रश्च पुरुषव्याघ्रः । एवं पुरुषसिंहः । राज्ञी चासौ व्याघ्री च राजव्याघ्री । अत्रापि कर्मधारयात् पुंवद्भावः । साम्यानुक्ताविति किम् । पुरुषव्याघ्रः शूरः इति मा भूत् । इदमेव च प्रतिषेधवचनं ज्ञापकं प्रधानस्य सापेक्षत्वेऽपि समासो भवति । तेन राजपुरुषो दर्शनीय इत्यादि सिद्धम् । बहुवचनमाकृतिगणार्थम् । तेन वाग्वज्र इत्यादयोऽपि भवन्ति । उपमानं सामान्यैरेवेत्यवधारणेन विशेषणसमासे प्रतिषिद्धे समासविधानार्थं वचनम् ।

८३१ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम् ॥ ३।१।१०३ ॥ पूर्वादीनि नामान्येकार्थानि परेण नाम्ना सह समस्यन्ते स च समासस्तत्पुरुषः

कर्मधारयश्च । पूर्वश्चासौ पुरुषश्च पूर्वपुरुषः। एवमपरपुरुषः। प्रथमपुरुषः। चरमपुरुषः। जघन्यपुरुषः? समानपुरुषः। मध्यपुरुषः। मध्यमपुरुषः। वीरपुरुषः। विशेषणं विशेष्येणेत्यादिनैव सिद्धे स्पर्द्धे परमिति पूर्वनिपातस्य विषयप्रदर्शनार्थमद्रव्यवाचिनोरनियमेन पूर्वापरभावप्रसक्तौ पूर्वनिपातनियमार्थं वचनम्। तेन पूर्वजरन् वीरपूर्वः पूर्वपटुः। कथमेकवीर इत्यादौ वीरादेः परस्य स्पर्धे पूर्वनिपातो न भवति? बहुलाधिकारात्। अथ अपरं च तत् अर्धं चेत्यत्रानेन समासे।

८३२ वोत्तरपदेऽर्धे ॥७।२।१२७॥ अपरशब्दस्य केवलस्य दिक्पूर्वपदस्य च अर्धशब्दे उत्तरपदे पश्चादेशो वा स्यात्। पश्चार्धम्। अपरार्धम्। दक्षिणापरस्याः अर्धः दक्षिणपश्चार्धः। दक्षिणापरार्धः।

८३३ श्रेण्यादिकृत्याद्यैश्च्व्यर्थे ॥ ३।१।१०४ ॥ श्रेण्यादि नामैकार्थं कृताद्यैर्नामभिः समस्यते च्व्यर्थे गम्यमाने स च समासस्तत्पुरुषः कर्मधारयश्च। अश्रेणयः श्रेणयः कृताः श्रेणिकृताः पुरुषाः। अनूका ऊकाः कृताः ऊककृताः। राशिस्थानीकृता इत्यर्थः। च्व्यर्थ इति किम्। श्रेणयः कृताः। किंचित् निगृहीता अनुगृहीता वेत्यर्थः। च्व्यन्तानां च्व्यर्थस्य च्विनैवोक्तत्वान्नानेन समासः। च्व्यर्थे हि समासेनाभिधेयेऽयं समासो भवति। गत्यादिसूत्रेण तु नित्यसमासो भवत्येव। बहुवचनमाकृतिगणार्थम्। यत्र सामर्थ्यं नास्ति तत्रेतिशब्दाध्याहारो द्रष्टव्यः। अनिर्धना निर्धना इत्युपकृताः। श्रेणिकृता इत्यादौ क्रियाकारकसंबंधमात्रं न विशेषणविशेष्यभाव इति वचनम्।

८३४ क्तं नञादिभिन्नैः ॥ ३।१।१०५ ॥ नञादयो नञ्प्रकाराः तैरेव भिन्नैर्नामभिः सह क्तान्तं नामैकार्थं सामर्थ्यादनञ् समस्यते स च समासस्तत्पुरुषः कर्मधारयश्च। कृतं च तदकृतं च कृताकृतम्। इटः क्तावयवत्वाद्विकारस्य त्वेकदेशविकृतानन्यत्वान्न भेदकत्वम्। तेन क्लिष्टाक्लिशितमित्यादि। आदिग्रहणात् कृतापकृतम्। क्तमिति किम्। कर्तव्यमकर्तव्यम्। नञादिभिरेव भिन्नैरित्यवधारणं किम्। कृतं चाविहितं चेति प्रकृतिभेदे कृतं चाकर्तव्यं चेति प्रत्ययभेदे गतश्च प्राप्तोऽगतश्चाज्ञात इत्यर्थभेदे सिद्धं चाभुक्तं चेति प्रकृत्यर्थयोर्भेदे च मा भूत्। अवयवधर्मेण समुदायव्यपदेशात् कृताकृतादिष्वैकार्थ्यम्। विशेषणं विशेष्येणेत्येव समासः सिद्धः किंतु क्रियाशब्दत्वादनियमेन पूर्वापरनिपाते प्राप्ते पूर्वनिपातनियमार्थं वचनम्। तेनाकृतकृतम्, अनशिताशितमित्यादि न भवति।

८३५ **सेड्नानिटा** ॥३।१।१०६॥ सेट् क्तान्तं नाम नञादिभिन्नेनानिटा नाम्ना न समस्यते । पूर्वस्यापवादः। क्लिशितमक्लिष्टम् । पवितमपूतम् । इड्ग्रहणमर्थभेदाहेतोर्विकारस्य उपलक्षणम् । तेन शिताशितं, छिताछितमित्यादि न भवति । कथं वित्ताविन्तं त्राणात्रातम् ? । 'क्तादेशोऽपि' इति परे समासे नत्वस्यासत्त्वाद् भविष्यति । सेडिति किम् । कृताकृतम् । अनिटेति किम् । अशितानशितेन जीवति ।

८३६ **सन्महत्परमोत्तमोत्कृष्टं पूजायाम्** ॥३।१।१०७॥ सदादीनि नामान्येकार्थानि पूजायां गम्यमानायां सामर्थ्यात् पूज्यमानवचनैर्नामभिः सह समस्यन्ते स च समासस्तत्पुरुषः कर्मधारयश्च । सँश्चासौ पुरुषश्च सत्पुरुषः। महाँश्चासौ पुरुषश्चेति विग्रहेऽनेन समासे ।

८३७ **जातीयैकार्थेऽच्वेः** ॥३।२।७०॥ महतोऽच्व्यन्तस्य जातीयप्रत्यये एकार्थे चोत्तरपदे डान्तादेशः स्यात् । महापुरुषः । परमपुरुषः । उत्तमपुरुषः । उत्कृष्टपुरुषः । पूजायामिति किम् । सन् घटः विद्यमान इत्यर्थः । कथं महाजनः, महोदधिः ? विपुलं ह्यत्र गम्यते न पूजा । बहुलाधिकारात् भविष्यति । पूजायामेवेति नियमार्थं वचनम् । पूर्वनिपातव्यवस्थार्थं च । तेन सच्छुक्ल इत्यादौ खञ्जकुण्ठादिवदनियमेन पूर्वनिपातो न भवति । परमजरन् महावीरः परममहान् इत्यादौ च स्पर्धे परमिति यथापरं पूर्वनिपातश्च सिद्धो भवति ।

८३८ **वृन्दारकनागकुञ्जरैः** ॥३।१।१०८॥ पूजायां गम्यमानायामेभिर्नामभिः सामर्थ्यात् पूज्यमानवचनं नामैकार्थं समस्यते स च समासस्तत्पुरुषः कर्मधारयश्च । वृन्दारक इव वृन्दारकः। गौश्चासौ वृन्दारकश्च गोवृन्दारकः। एवं गोनागः। गोकुञ्जरः । वृन्दारकादीनां जातिशब्दत्वेऽपि उपमानात्पूजावगतिः। पूजायामित्येव । शोभना सीमा स्फटा यस्य सः सुसीमो नागः । नात्र नागशब्दः पूजां गमयति । व्याघ्रादेराकृतिगणत्वात् 'उपमेयं व्याघ्राद्यैः साम्यानुक्तौ' इत्येव सिद्धे पूजायामेवेति नियमार्थं साम्योक्तावपि विधानार्थं वचनम् । तेन गोनागो बलवानित्यादि सिद्धम् ।

८३९ **कतरकतमौ जातिप्रश्ने** ॥३।१।१०९॥ कतरकतमावित्येतावेकार्थौ जातिप्रश्ने गम्यमाने सामर्थ्याज्जातिवाचिना नाम्ना सह समस्येते स च समासस्तत्पुरुषः कर्मधारयश्च । कतरश्चासौ कठश्च कतरकठः । कतमकालापः। जातिप्रश्न इति

किम्। गुणक्रियाद्रव्यप्रश्ने न भवति। कतरः शुक्लः। कतरो गन्ता। कतमो गन्ता। कतरः कुण्डली। कतमः कुण्डली। विशेषणं विशेष्येणेत्येव सिद्धे जातिप्रश्न एवेति नियमार्थं वचनम्।

८४० **किं क्षेपे** ॥३।१।११०॥ क्षेपो निन्दा। तस्मिन् गम्यमाने किमित्येतन्नामैकार्थमर्थात् क्षिप्यमाणवाचिनाम्ना सह समस्यते स च समासस्तत्पुरुषः कर्मधारयश्च। को राजा किंराजा यो न रक्षति। अत्र।

८४१ **राजन्सखेः** ॥७।३।१०६॥ राजन् सखि इत्येतदन्तात् तत्पुरुषादट् समासान्तः स्यात्। इत्यनेन समासान्तो न भवति। कस्मादिति चेत्।

८४२ **नः किमः क्षेपे** ॥ ७।३।७०॥ निन्दायां यः किंशब्दस्तदन्तात् समासान्तो न स्यात्। इति प्रतिषेधात्। क्षेप इति किम्। को राजा मथुरायाम्। विशेषणं विशेष्येणेत्येव सिद्धे क्षेपे एवेति नियमार्थं वचनम्।

८४३ **पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यायकधूर्तप्रशंसारूढैर्जातिः** ॥३।१।१११॥ जातिवाचि नामैकार्थं पोटादिभिर्नामभिः प्रशंसारूढैश्च सह समस्यते स च समासस्तत्पुरुषः कर्मधारयश्च। इभ्या च सा पोटा च इभ्यपोटा। पुरुषवेषधारिणी स्त्री पोटा गर्भ एव दास्यं प्राप्ता वा उभयव्यंजना वा भुजिष्यदासी वा। इभ्या चासौ युवतिश्च इभ्ययुवतिः। अग्निश्चासौ स्तोकं च अग्निस्तोकम्। दधि च तत् कतिपयं च दधिकतिपयम्। गौश्चासौ गृष्टिश्च गोगृष्टिः। गृष्टिः सकृत्प्रसूता। गौश्चासौ धेनुश्च गोधेनुः। धेनुर्नवप्रसूता। गोवशा। वशा वन्ध्या। गोवेहत्। वेहद् गर्भघातिनी। गोबष्कयणी। बष्कयेण वृद्धवत्सेन या दुह्यते सा बष्कयणी। कठप्रवक्ता। प्रवक्ता उपाध्यायः। कठश्रोत्रियः। श्रोत्रियश्छन्दोध्यायी। कठाध्यायकः। अध्यायकोऽध्येता। मृगधूर्तः। निन्द्यं कुत्सनैरित्यत्र शब्दप्रवृत्तिनिमित्तकुत्सायां' समास उक्त इह तु तदाश्रयकुत्सायां समासो यथा स्यादिति धूर्तग्रहणम्। प्रशंसायां रूढा मतल्लिकादय आविष्टलिङ्गास्तैः समासः। गौश्चासौ मतल्लिका च गोमतल्लिका। गोमचर्चिका। गोभकाण्डम्। पुरुषोद्घः। गोतल्लजकः। रूढग्रहणादिह न भवति। गौः रमणीया। जातिरिति किम्। देवदत्ता पोटा। विशेष्यस्य जातेः पूर्वनिपातार्थं वचनम्।

८४४ चतुष्पाद्गर्भिण्या ॥३।१।११२॥ चत्वारः पादा यस्याः सा चतुष्पाद् गवादिजातिः। तद्वाचिनामैकार्थं गर्भिण्या गर्भिणीति नाम्ना सह समस्यते स च समासस्तत्पुरुषः कर्मधारयश्च। गौश्चासौ गर्भिणी च गोगर्भिणी। चतुष्पादिति किम्। ब्राह्मणी गर्भिणी। चतुष्पादिति किम्। ब्राह्मणी गर्भिणी। जातिरित्येव। कालाक्षी गर्भिणी। संज्ञाशब्दोऽयम्। जातेर्विशेष्यस्य पूर्वनिपातार्थं वचनम्।

८४५ युवा खलतिवलितजरद्भलिनैः ॥ ३।१।११३ ॥ युवन्नित्येतन्नामैकार्थं खलत्यादिभिर्नामभिः सह समस्यते स च समासस्तत्पुरुषः कर्मधारयश्च। युवा चासौ खलतिश्च युवखलतिः। एवं युवपलितः। युवजरन्। युववलिनः। वलयोऽस्य सन्ति वलिनः। अङ्गादित्वान्नः। नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति युवतिश्चासौ खलतिश्च युवखलतिः। एवं युवपलिता। युवजरती। युववलिना। युवशब्दस्य विशेष्यत्वात् परनिपाते प्राप्ते द्वयोर्वा गुणवचनत्वात् खञ्जकुण्टादिवदनियमे पूर्वनिपातार्थं वचनम्।

८४६ कृत्यतुल्याख्यमजात्या ॥३।१।११४॥ कृत्यप्रत्ययान्तं तुल्याख्यं च तुल्यपर्यायं नामैकार्थमजात्याजातिवाचिनाम्ना सह समस्यते स च समासस्तत्पुरुषः कर्मधारयश्च। भोज्यं च तदुष्णं च भोज्योष्णम्। एवं भोज्यलवणम्। तुल्याख्य–तुल्यश्वेतः। एवं सदृशश्वेतः। अजात्येति किम्। भोज्य ओदनः। कथं शीतपानीयम्?। पानीयशब्दोऽयमौणादिको जलवाची तस्यायं विशेषणसमासः। जात्या समासस्याजातेः पूर्वत्वस्य च प्रतिषेधार्थं वचनम्।

८४७ कुमारः श्रमणादिभिः ॥३।१।११५॥ कुमार इत्येतन्नामैकार्थं श्रमणादिना नाम्ना सह समस्यते स च समासस्तत्पुरुषः कर्मधारयश्च। कुमारी चासौ श्रमणा च कुमारश्रमणा। एवं कुमारप्रव्रजिता। श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी बंधकी दासी एते सप्त स्त्रीलिङ्गा एव। अध्यायक अभिरूपक पटु मृदु पण्डित कुशल चपल निपुण। येऽत्र स्त्रीलिङ्गास्तैः सह स्त्रीलिङ्ग एव कुमारशब्दः समस्यते शेषैस्तूभयलिङ्गः। नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति हि न्यायः श्रमणादीनां स्त्रीलिङ्गानां पाठादेव लभ्यते। पुंलिङ्गैःपूर्वनिपाते कामचारः। कुमारश्रमणः। तापसकुमारः। कुमारशब्दस्य पूर्वनिपातनियमार्थं वचनम्। इह केचित् 'पूर्वकालैकसर्वजरत्पुराणनवकेवलपूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यम-

वीरपूजार्थसन्महत्परमोत्तमोत्कृष्टा' इति,वृन्दारकनागकुञ्जरैरिति,युवाखलतिपलितजरद्वलिनैरिति,कृत्यतुल्याख्यमजात्येति,कुमारःश्रमणादिनेतिपञ्चसूत्रीं विरचय्य तस्यामेव प्रथमान्तानां समावेशे परसूत्रनिर्दिष्टमेव प्रथमान्तं पूर्वं निपतति तृतीयान्तानां समावेशे परसूत्रनिर्दिष्टमेव तृतीयान्तं परं निपतति एकसूत्रोक्तानां तु प्रथमान्तानां तृतीयान्तानां च समावेशे पूर्वापरनिपाते कामचार इतीच्छन्ति। प्रथमान्तसमावेशे-तुल्ययुवा, सदृशयुवा। कुमारपरमः,कुमारपरमा। कुमारसन्, कुमारसती। एवं महज्जघन्यप्रथमचरममध्यमध्यमादयोऽपि। कुमारयुवा, कुमारतुल्यः, कुमारतुल्या। तृतीयान्तसमावेशे-वृन्दारकपलितः वृन्दारकवलिनः नागजरन् वृन्दारकश्रमणा खलतिश्रमणा वृन्दारकप्रव्रजिता खलतिप्रव्रजिता जरत्कुलटा जरत्तापसी इत्यादि । श्रमणादीनां पुंलिङ्गत्वे त्वनियमः । तेन वृन्दारकश्रमणः श्रमणवृन्दारकः । नागतापसः तापसनागः । कुञ्जरदासः दासकुञ्जरः । तथा श्रमणखलतिः खलतिश्रमणः । पलिततापसः तापसपलितः इत्यादि । अध्यायकादयस्तु लिङ्गान्तरेऽपि परनिपातना एव । वृन्दारकाध्यायकः वृन्दारिकाध्यायिका । खलत्यध्यायकः खलत्यध्यायिका । पलिताभिरूपकः पलिताभिरूपिका । एकसूत्रोक्तानां प्रथमान्तानां समावेशे प्रथमवीरः वीरप्रथमः । चरमजघन्यः जघन्यचरमः । इत्यादि । तुल्यभोज्यः भोज्यतुल्य इत्यादि । एकसूत्रे तृतीयान्तानां समावेशे खलतिपलितः पलितखलतिः । जरद्वलिनः वलिनजरन् इत्यादि ।

८४८ **मयूरव्यंसकेत्यादयः** ॥३।१।११७॥ मयूरव्यंसकादयः तत्पुरुषसमासा निपात्यन्ते ॥ विगतावंसावस्य व्यंसस्तत्तुल्यो व्यंसकः । व्यंसयति वा छलयति व्यंसकः । व्यंसकश्चासौ मयूरश्च मयूरव्यंसकः । मुण्डश्चासौ कंबोजश्च कंबोजमुण्डः । यत्नं यत्नमुण्डः। व्यंसका चासौ मयूरी च मयूरव्यंसका । कर्मधारयलक्षणः पुंवद्भावः। एतेषु विशेष्यस्य पूर्वनिपातनम् । एहीडादयोऽन्यपदार्थे । एहि इडे स्त्रि इति जल्पो यस्मिन् कर्मणि काले वा तत् एहीडं वर्तते । एवं एहियवमित्यादि । आख्यातमाख्यातेन सातत्ये । अश्नीत पिबतेति सातत्येनोच्यते यस्यां साश्नीतपिबता । एवमश्नीतपचतेत्यादिषु क्रियैवान्यपदार्थः । घ्नन्तं स्वकर्मणा बहुलमाभीक्ष्ण्ये कर्तरि समासाभिधेये । जहि जोडमित्यभीक्ष्णं य आह स उच्यते जहिजोडः । बहुलवचनान्न च भवति । पचौदनमित्यभीक्ष्णमाह । गतप्रत्यागतादयः । गतं च तत्प्रत्यागतं च गतप्रत्यागतम् । एवं यातानुयातम् पुटापुटिकेत्यादिषु व्यवस्थितपूर्वोत्तरपदसमासः।

शाकपार्थिवादयः । शाकप्रियः शाकभोजी शाकप्रधानो वा पार्थिवः पृथोरपत्यं शाकपार्थिवः। पृथिव्या ईश्वरः पार्थिवः इति वा तेन शाकपार्थिवः। अत्र शाकपार्थिवादिषु प्रियादेरुत्तरपदस्य लोपः। एवमविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः। यच्चेह लक्षणेनानुपपन्नं तत् सर्वं निपातनात् सिद्धम् । सूत्रे इतिशब्दः स्वरूपावधारणार्थः । तेन परमो मयूरव्यंसक इति समासान्तरं न भवति । उत्तरपदेन भवत्येवेत्यन्ये । मयूरव्यंसकप्रिय इत्यादि । बहुवचनमाकृतिगणार्थम् । तेन विस्पष्टपटुरित्यादयो द्रष्टव्याः ।

८४९. राजदन्तादिषु ॥३।१।१४९॥ राजदन्त इत्यादिषु समासेषु अप्राप्तपूर्वनिपातं माग् निपतति । दन्तानां राजा राजदन्तः। षष्ठीति प्रथमोक्तत्वेन दन्तशब्दस्य पूर्वनिपाते प्राप्ते राजशब्दस्यानेन पूर्वनिपातः। पूर्वं वासितं पश्चाल्लिप्तं लिप्तवासितम् । अत्र 'पूर्वकाल' इति प्रथमोक्तत्वेन वासितस्य पूर्वनिपाते प्राप्ते लिप्तस्य पूर्वनिपातः । बहुवचनमाकृतिगणार्थम् । तेन क्वचिद्विकल्पः । पुरुषोत्तमः, उत्तमपुरुष इत्यादि ।

८५० कडाराः कर्मधारये ॥३।१।१५८॥ कडारादयः शब्दाः कर्मधारये समासे वा पूर्वं निपतन्ति । कडारजैमिनिः, जैमिनिकडारः । कडारादीनां गुणवचनत्वात् द्रव्यशब्दान्नित्यं पूर्वनिपाते प्राप्ते पक्षे परनिपातार्थं वचनम् । यदा तु द्वावपि गुणशब्दौ तत्र निर्ज्ञातानिर्ज्ञाताभ्यां विशेषणविशेष्यत्वे पर्यायेण पूर्वनिपात इत्युक्तमेव। गडुलकाणः, काणगडुलः । बहुवचनमाकृतिगणार्थम् । तेन नटबधिरादयोऽपि द्रष्टव्याः ।

८५१ जातमहद्वृद्धाद्दुक्षणः कर्मधारयात् ॥७।३।९५॥ जात महत् वृद्ध इत्येतेभ्यः परो य उक्षन् शब्दस्तदन्तादत् समासान्तः स्यात् । जातश्चासावुक्षा च जातोक्षः । महोक्षः । वृद्धोक्षः । जातादिभ्य इति किम् । परमोक्षा । उक्षण इति किम् । महाश्मश्रु । कर्मधारयादिति किम् । जातस्योक्षा जातोक्षा ।

८५२ स्त्रियाः पुंसो द्वन्द्वाच्च ॥७।३।९६॥ स्त्रीशब्दात् परो यः पुम्स्शब्दस्तदन्ताद् द्वन्द्वात् कर्मधारयाच्चात् समासान्तः स्यात् । स्त्री च पुमाँश्च स्त्रीपुंसं स्त्रीपुंसौ स्त्रीपुंसाः । कर्मधारयात्–स्त्री चासौ पुमाँश्च स्त्रीपुंसः शिखण्डी । द्वन्द्वाच्चेति किम् । स्त्रियाःपुमान् स्त्रीपुमान् ।

८५३ द्विगोरेनहनोऽट् ॥ ७।३।९९ ॥ अन्नन्तादहन्शब्दान्ताच्च द्विगोः समाहारे वर्तमानादट् समासान्तः स्यात् । पञ्च तक्षाणः समाहृताः पञ्चतक्षी । पञ्चतक्षम् । द्विगोरिति किम् । समाहृतास्तक्षाणः संतक्षाणः । समाहार इत्येव । द्वाभ्यामुक्षाभ्यां क्रीतः द्व्युक्षा । अन्नन्तत्वेनैव सिद्धेऽह्न इदमट्विधानं समाहारे 'सर्वांशसंख्याव्ययात्' इति परस्याप्यटो बाधनार्थम् । तस्मिन् हि सत्यह्नादेशः स्यात् ।

८५४ द्वित्रेरायुषः ॥७।३।१००॥ द्वि त्रि इत्येताभ्यां परो य आयुष्शब्दस्तदन्ताद् द्विगोः समाहारे वर्तमानादट् समासान्तः स्यात् । द्वयोरायुषोः समाहारो द्व्यायुषम् । द्व्यायुषम् । द्वित्रेरिति किम् । चतुरायुः । समाहारे इत्येव । द्व्यायुःप्रियः । द्व्यायुःप्रियः ।

८५५ वाञ्जलेरलुकः ॥७।३।१०१॥ द्वित्रिभ्यां परो योऽञ्जलिशब्दस्तदन्ताद् द्विगोरट् समासान्तो वा स्यात् न चेत् स द्विगुस्तद्धितलुगन्तः । द्वयोरञ्जल्योः समाहारः द्व्यञ्जलम् । द्व्यञ्जलि । त्र्यञ्जलम् । त्र्यञ्जलि । द्वाभ्यामञ्जलिभ्यामागतं द्व्यञ्जलमयम् । द्व्यञ्जलिमयम् । अलुक इति किम् । द्वाभ्यामञ्जलिभ्यां क्रीतः द्व्यञ्जलिर्घटः । द्विगोरित्येव । द्वयोरञ्जलिः द्व्यञ्जलिः । नित्योऽयं विधिरित्येके ।

८५६ खार्या वा ॥७।३।१०२॥ पृथग्योगाद् द्वित्रेरिति निवृत्तम् । खारीशब्दान्ताद् द्विगोरलुकोऽट् समासान्तो वा स्यात् । द्विखारम् । पक्षे 'क्लीबे' इत्यनेन ह्रस्वत्वे द्विखारि । केचिदत्र पुंस्त्वमपीच्छन्ति, तन्मते 'गोश्चान्ते'-इत्यादिना ह्रस्वत्वे द्विखारिः । स्त्रीत्वमप्यन्ये । तन्मते पूर्ववद्ध्रस्वत्वे 'इतोऽक्त्यर्थात्' इति ङ्यां च द्विखारी । एवं पञ्चखारम् । पञ्चखारी । द्विखारमयम् । द्विखारीमयम् । पञ्चखारधनः । पञ्चखारीधनः । द्विगोरित्येव । उपखारि । अलुक इत्यस्य प्रत्युदाहरणं नास्ति विशेषाभावात् । यतस्तद्धितलुक्यडभावेऽपि 'ङ्यादेः' इत्यादिना ङीलुकि पुन्नपुंसकयोः द्विखारः द्विखारम् । स्त्रियां तु 'परिमाणात्तद्धितलुकि' इत्यादिना ङीप्रत्यये द्विखारीति भवति । एतच्च त्रैरूप्यमटयपि भवति । इदन्तात् ङ्यां खारीत्येके । तदा तु अस्त्येव विशेषः ।

८५७ वार्धाच्च ॥७।३।१०३॥ अर्धशब्दात् परो यः खारीशब्दस्तदन्ताच्च समासादलुकोऽट् समासान्तो वा स्यात् । 'समेऽशेऽर्धे नवा' इत्यर्धशब्दे यः प्रतिपदं स-

यास उक्तस्तत्रार्थं विधिः। अर्धं खार्याः अर्धखारम् अर्धखारी। विधानसामर्थ्यादङन्तस्य न स्त्रियां वृत्तिः। चकारो द्विगोरनुकर्षणार्थः। तेनोत्तरत्र द्वयमप्यनुवर्तते।

८५८ **नावः** ॥ ७।३।१०४ ॥ अर्धशब्दात् परो यो नौशब्दस्तदन्तात् समासाद् द्विगोश्च नौशब्दान्तान्तादलुकोऽट् समासान्तः स्यात्। अर्धं नावः अर्धनावम् अर्धनावी। द्विगोः–द्विनावम्। द्विनावमयम्। द्विनावियः। अलुक इत्येव। द्वाभ्यां नौभ्यां क्रीतः द्विनौः। द्विगोरित्येव। द्वयोर्नौः द्विनौः। अर्धादित्येव। राजनौः। टकारो ङ्यर्थः। अर्धनावम् अर्धनावीति हि स्त्रीनपुंसकयोर्दृश्यते।

८५९ **गोस्तत्पुरुषात्** ॥७।३।१०५॥ गोशब्दान्तात् तत्पुरुषादलुकोऽट् समासान्तः स्यात्। राज्ञो गौः राजगवः, राजगवी। पञ्चगवम्। पञ्चगवमयम्। पञ्चगवधनः। तत्पुरुषादिति किम्। चित्रगुः। अलुक इत्येव। पञ्चभिर्गोभिः क्रीतः पञ्चगुः।

८६० **राष्ट्राख्याद् ब्रह्मणः** ॥७।३।१०७॥ राष्ट्रवाचिनः परो यो ब्रह्मन्शब्दस्तदन्तात् तत्पुरुषादट् समासान्तः स्यात्। सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः। यः सुराष्ट्रेषु वसति स सौराष्ट्रको ब्राह्मण इत्यर्थः। राष्ट्राख्यादिति किम्। देवब्रह्मा नारदः। आख्य ग्रहणं राष्ट्रवाच्यर्थम्।

८६१ **कुमहद्भ्यां वा** ॥७।३।१०८॥ कु महदित्येताभ्यां परो यो ब्रह्मन्शब्दस्तदन्तात्तत्पुरुषाद्वाट् समासान्तः स्यात्। पापब्रह्मा कुब्रह्मा, कुब्रह्मः। महान्–ब्रह्मा महाब्रह्मः महाब्रह्मा। पापो महाँश्च ब्राह्मण एवमुच्यते।

८६२ **ग्रामकौटात्तक्षणः** ॥७।३।१०९॥ ग्राम कौट इत्येताभ्यां परो यस्तक्षन् शब्दस्तदन्तात् तत्पुरुषादट् समासान्तः स्यात्। ग्रामस्य तक्षा ग्रामतक्षः। ग्रामसाधारण इत्यर्थः। कुटी शाला तस्यां भवः कौटः, कौटस्तक्षा कौटतक्षः। स्वापणशालायां यः कर्म करोति स्वतंत्रो न कस्यचित् प्रतिबद्ध इत्यर्थः। ग्रामकौटादिति किम्। राजतक्षा। तत्पुरुषादित्येव। ग्रामश्च तक्षा च ग्रामतक्षाणौ।

८६३ **गोष्ठातेः शुनः** ॥७।३।११०॥ गोष्ठ अति इत्येताभ्यां परो यः श्वन् शब्दस्तदन्तात्तत्पुरुषादट् समासान्तःस्यात्। गोष्ठे श्वा गोष्ठश्वः। अतिक्रान्तः श्वानम् अतिश्वो वराहः। अतिजवन इत्यर्थः।

८६४ **प्राणिन उपमानात्** ॥७।३।१११॥ प्राणिवाचिन उपमानात् परो यः श्वन्शब्दस्तदन्तात्तत्पुरुषादट् समासान्तः स्यात्। व्याघ्र इव व्याघ्रः स चासौ श्वा च व्याघ्रश्वः। 'उपमेयं व्याघ्राद्यैः साम्यानुक्तौ' इति समासः। अतएव वचनात् श्वन्शब्दस्य परनिपातः। मयूरव्यंसकादित्वाद्वा समासः। प्राणिन उपमानादिति पूर्वपदविज्ञानादिह न भवति। वानरःश्वेव वानरश्वा। प्राणिन इति किम्। फलकमिव श्वा फलकश्वा। उपमानग्रहणं किम्। देवदत्तश्वा। प्राणी उपमानभूतो यः श्वाशब्दः तदन्तात् तत्पुरुषादिच्छन्त्येके। व्याघ्रः श्वेव व्याघ्रश्वः। तन्मते वानरश्वेत्यत्र समासान्तविधेरनित्यत्वान्न भवति।

८६५ **अप्राणिनि** ॥ ७।३।११२॥ पूर्वसूत्रे उपमानादिति पूर्वपदस्य विशेषणम्। इह तु पुनः। अप्राणिनि वर्तते य उपमानवाची श्वन्शब्दस्तदन्तात् तत्पुरुषादट् समासान्तः स्यात्। श्वेव वा,आकर्षश्चासौ श्वा च आकर्षश्वः। अप्राणिनीति किम्। वानरः श्वेव वानरश्वा। उपमानादित्येव। आकर्षे श्वा आकर्षश्वा। कुक्कुरवच्छारेऽपि श्वन्शब्दो रूढो नोपमानम्। तत्राप्युपमानादेव वर्तत इत्येके। तन्मते आकर्षश्व इत्येव भवति। केचित्तूपमानादिति नापेक्षन्ते, तन्मते आकर्षे श्वा आकर्षश्व इत्येव भवति। अन्ये तूपमानादप्राणिनीति एकमेव योगमारभन्ते। तन्मते व्याघ्रश्व इत्यादि न भवति।

८६६ **पूर्वोत्तरमृगाच्च सक्थ्नः** ॥७।३।११३॥ पूर्वोत्तरमृग इत्येतेभ्य उपमानवाचिनश्च शब्दात् परो यः सक्थिशब्दस्तदन्तात्तत्पुरुषादट् समासान्तः स्यात्। पूर्वं सक्थि सक्थ्नः पूर्वं वा पूर्वसक्थम्। मृगस्य सक्थि मृगसक्थम्। उपमानात् फलकमिव फलकम्, फलकं च तत् सक्थि च फलकसक्थम्। व्याघ्रश्वादिवत्समासः। पूर्वशब्दान्नेच्छन्त्येके। कुक्कुटादपीच्छन्त्यन्ये। कुक्कुटसक्थम्।

८६७ **उरसोऽग्रे** ॥७।३।११४॥ अग्रं मुखं प्रधानं वा तत्र वर्तमानो य उरस्शब्दस्तदन्तात् तत्पुरुषादट् समासान्तः स्यात्। अश्वाश्च ते उरश्च अश्वोरसं दृश्यते। सेनाया अश्वा मुखमित्यर्थः। अग्र इति अश्वोरस्यावर्तः।

८६८ **सरोऽनोऽश्मायसो जातिनाम्नोः** ॥७।३।११५॥ सरस् अनस् अश्मन् अयस् इत्येतदन्तात् तत्पुरुषादट् समासान्तः स्यात् जातावभिधेयायां नाम्नि च विषये। इदं च यथासंभवं विशेषणम्। जातसरसम्। मण्डूकसरसम्। एवंनाम्नी सरसी।

मण्डूकसरसमिति जातिरित्येके । उपानसमिति अन्नविशेषस्य संज्ञा जातिर्वा । महानसं पाकस्थानस्य संज्ञा । राज्ञ उपस्थितमित्येके । स्थूलाश्मः, अमूलाश्मः । कनकाश्मः । अश्मजातिविशेषा एते । पिण्डाश्मः संज्ञा जातिर्वा । कालायसम् , लोहितायसम् । तीक्ष्णायसम् । अयोजातिविशेषा एते । लोहितायसमिति नायेत्येके । जातिनाम्नोरिति किम् । परमसरः । सदनः । सदश्मा । कथं बिन्दुसर इति ? । नैषा संज्ञा । रूढ्या ह्यत्र संज्ञाविज्ञानं शूर्पनखीवत् ।

८६९ **अह्नः** ॥७।३।११६॥ अहन्शब्दात् तत्पुरुषादट् समासान्तः स्यात् । परमाहः । उत्तमाहः । एकाहम् । पुण्याहम् । सुदिनाहम् ।

८७० **संख्यातादह्नश्च वा** ॥७।३।११७॥ संख्यातशब्दात् परो योऽहन् शब्दस्तदन्तात् तत्पुरुषादट् समासान्तः स्यात् , तस्याहन्शब्दस्याह्नादेशश्च वा । संख्यातमहः संख्याताह्नः संख्याताहः । अह्नादेशार्थं वचनम् । अट् तु पूर्वेणैव सिद्धः । चकार उत्तरत्राह्नादेशस्याट्संनियोगशिष्टत्वार्थः । अन्यथा ह्यटोऽपवादोऽह्नादेशो विज्ञायेत । तथा च स्त्रियां ङीर्न स्यात् ।

८७१ **सर्वांशसंख्याव्ययात्** ॥७।३।११८॥ सर्वशब्दादंश एकदेशस्तद्वाचिभ्यः संख्यावाचिभ्योऽव्ययेभ्यश्च परो योऽहन्शब्दस्तदन्तात् तत्पुरुषादट् समासान्तः स्यात् , तस्याहन्शब्दस्य नित्यमह्नादेशश्च ।

८७२ **अतोऽह्नस्य** ॥ २।३।७३ ॥ रेफादिमतोऽकारान्तात् पूर्वपदात् परस्याह्नशब्दसंबंधिनो नस्य णः स्यात् । सर्वमहः सर्वाह्णः । पूर्वाह्णः । द्वयोरह्नोर्भवो द्व्यह्णः पटः । अत्यह्णः । अत्यह्नी कथा ।

८७३ **संख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत्** ॥ ७।३।११९ ॥ संख्यात एक पुण्य वर्षा दीर्घ इत्येतेभ्यश्चकारात् सर्वांशादिभ्यश्च परो यो रात्रिशब्दस्तदन्तात् तत्पुरुषादत् समासान्तः स्यात् । संख्याता रात्रिः संख्यातरात्र । एकरात्रः । पुण्यरात्रः । वर्षाणां रात्रिः वर्षारात्रः । दीर्घरात्रः । सर्वरात्रः । पूर्वरात्रः । द्वयो रात्र्योः समाहारः द्विरात्रः । अतिरात्रः । एकग्रहणं संख्याग्रहणेनानेनैकस्याग्रहणार्थम् । तेन पूर्वसूत्रे संख्याशब्देनैकस्याग्रहणम् । एकमहः एकाहम् । अटि मकृतेऽत्विधानं स्त्रियां ङ्यभावार्थम् ।

८७४ **पुरुषायुषद्विस्तावत्रिस्तावम्** ॥७।३।१२०॥ एतेऽत्प्रत्ययान्तास्तत्पुरुषा निपात्यन्ते । पुरुषायुषम् । द्विस्तावती द्विस्तावा । त्रिस्तावा वेदिः । वेद्यामनयोः प्रयोगः । अतीशब्दस्य लोपो निपातनात् । प्रकृतौ यावती वेदिस्तावती द्विगुणा त्रिगुणा वा कस्यांचिद्विकृतौ भवति । प्रकृतिविकृती यागविशेषौ । अन्यत्रापि दृश्यते । द्विस्तावोऽग्निः । त्रिस्तावोऽग्निः ।

८७५ **श्वसो वसीयसः** ॥७।३।१२१॥ श्वसः परो यो वसीयस् शब्दस्तदन्तात् तत्पुरुषादत् समासान्तः स्यात् । वसुमच्छब्दादीयसौ मतोरन्त्यस्वरादेश्च लोपे वसीयः । शोभनं वसीयः श्वोवसीयसं कल्याणम् ।

८७६ **निसश्च श्रेयसः** ॥७।३।१२२॥ निस्शब्दात् श्वस्शब्दाच्च परो यः श्रेयस्शब्दस्तदन्तात् तत्पुरुषादत् समासान्तः स्यात् । निश्चितं श्रेयः निःश्रेयसम्–निर्वाणम् । शोभनं श्रेयः श्वःश्रेयसम् ।

८७७ **नञव्ययात् संख्याया डः** ॥७।३।१२३॥ नञोऽव्ययाच्च परो यः संख्याशब्दस्तदन्तात् तत्पुरुषात् डः समासान्तः स्यात् । न दश अदशाः । अनवाः । न्यूना दश न्यूना नव इत्यर्थः । नञ्पूर्वोऽयं वैकल्ये दृश्यते । निर्गतत्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः । नञव्ययादिति किम् । गोत्रिंशत् । नञ्ग्रहणं ' नञ्तत्पुरुषात् ' इति प्रतिषेधे प्राप्ते प्रतिप्रसवार्थम् । संख्याया इति किम् । निःशकृत् । तत्पुरुषादित्येव । न विद्यंते त्रयो यस्य सोऽत्रिः । डित्वमन्त्यस्वरादिलोपार्थम् ।

८७८ **संख्याव्ययादङ्गुलेः** ॥ ७।३।१२४ ॥ संख्याया अव्ययाच्च परो योऽङ्गुलिशब्दस्तदन्तात् तत्पुरुषाड्डः समासान्तः स्यात् । द्वयोरङ्गुल्योः समाहारः द्व्यङ्गुलम् । द्वे अङ्गुली प्रमाणमस्य मात्रट् तस्य लुप् ततः समासान्तः । द्व्यङ्गुलम् । निरङ्गुलम् । तत्पुरुषादित्येव । उपाङ्गुलि । कथमात्माङ्गुलं, प्रमाणाङ्गुलम्, उत्सेधाङ्गुलमिति ? अङ्गुलशब्दः प्रमाणवाची प्रकृत्यन्तरम् । यथा स्वेनाङ्गुलप्रमाणेनाङ्गुलानां शतं पुमान् ।

८७९ **नञ्तत्पुरुषात्** ॥७।३।१२१॥ नञ्तत्पुरुषात् समासान्तो न स्यात् । अराजा । असखा ।

८८० **महतः करधासविशिष्टे डाः** ॥ ३।२।६८ ॥ करादिषूत्तरपदेषु महतो डा इत्ययमन्तादेशो वा स्यात् । वैयधिकरण्ये इयं विभाषा । सामानाधिकरण्ये

तु नित्य एव विधिर्जातीयैकार्थ इत्युक्त एव । महतां करः महाकरः, महत्करः । कर एव कारः, महाकारः, महत्कारः । महाघासः, महद्घासः । महाविशिष्टः, महद्विशिष्टः । महत इति किम् । राजकरः । करादिष्विति किम् । महतः पुत्रः महत्पुत्रः । डकारोऽन्त्यस्वरादिलोपार्थः स च उत्तरार्थः।

८८१ स्त्रियाम् ॥३।२।६९॥ स्त्रियां वर्तमानस्य महतः करादिषूत्तरपदेषु नित्यं ङाः स्यात् । महत्याः करः महाकरः । एवं महाघासः। महाविशिष्टः। नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति पूर्वेणैव सिद्धे नित्यार्थमिदम् ।

८८२ न पुंवन्निषेधे ॥३।२।७१॥ महतः पुंवन्निषेधविषये उत्तरपदे ङा न स्यात् । महती प्रिया अस्य महतीप्रियः । महतीमनोज्ञः ।

८८३ हविष्यष्टनः कपाले ॥ ३।२।७२ ॥ हविष्यभिधेयेऽष्टन्शब्दस्य कपाले उत्तरपदे दीर्घः स्यात् । अष्टसु कपालेषु संस्कृतं अष्टाकपालं हविः । हविषीति किम् । अष्टानां कपालानां समाहारः अष्टकपालम् । पात्रादित्वात् स्त्रीत्वाभावः । कपाल इति किम् । अष्टपात्रं हविः ।

८८४ गवि युक्ते ॥३।२।७४॥ अष्टन्शब्दस्य गव्युत्तरपदे युक्तेऽभिधेये दीर्घोऽन्तादेशः स्यात् । अष्टागवं शकटम् । अष्टौ गावो युक्ता अस्मिन्निति त्रिपदे बहुव्रीहौ कृते उत्तरपदे परे द्वयोर्द्विगुः ' गोस्तत्पुरुषात् ' इत्यट् समासान्तः । तत्र दीर्घत्वेन युक्तार्थसंप्रत्ययाद्गतार्थत्वाद्युक्तशब्दस्य निवृत्तिः। अथवा समाहारद्विगुः। तत्र साहचर्यादुपचारादष्टगवेन युक्तं शकटमष्टागवमुच्यते । गवीति किम् । अष्टतुरगो रथः । युक्त इति किम् । अष्टगवं ब्राह्मणधनम् । अष्टगुश्चैत्रः ।

८८५ पुंवत्कर्मधारये ॥३।२।५७॥ परतः स्त्र्यूङ् कर्मधारये समासे स्त्र्यर्थेकार्थे उत्तरपदे परे पुंवत् स्यात् । प्रतिषेधनिवृत्त्यर्थ आरंभः । ' नाप्प्रियादौ ' इत्युक्तं तत्रापि भवति । कल्याणी चासौ प्रिया च कल्याणप्रिया । एवं कल्याणमनोज्ञा । ' तद्धितार्थकोपान्त्यपूरण्याख्याः ' इत्युक्तं तत्रापि भवति । मद्रिका चासौ भार्या च मद्रकभार्या । लाक्षिकबृहतिका । पाचकवृन्दारिका । कारकवृन्दारिका । पञ्चमवृन्दारिका । षष्ठवृन्दारिका । दत्तवृन्दारिका । गुप्तवृन्दारिका । स्वाङ्गान्नीजातिश्चामानिनि इत्युक्तं तत्रापि भवति । चन्द्रमुखी चासौ वृन्दारिका च चन्द्रमुख-

वृन्दारिका । दीर्घकेशवृन्दारिका । कठवृन्दारिका । बहवृचवृन्दारिका । वतण्डस्यापत्यं वातण्ड्यः स्त्री चेत् वतण्डी । सा चा सौ वृन्दारिका च वातण्ड्यवृन्दारिका । गर्गस्यापत्यं गार्ग्यः स्त्री चेत् गार्गी । सा चासौ वृन्दारिका च गार्ग्यवृन्दारिका । कपोतपाक एव कापोतपाक्यः स्त्री चेत् कापोतपाका सा चासौ वृन्दारिका च कापोतपाक्यवृन्दारिका । कुञ्जस्यापत्यं कौञ्जायन्यः स्त्री चेत् कौञ्जायनी । सा चासौ वृन्दारिका च कौञ्जायन्यवृन्दारिका । अङ्गस्यापत्यानि अङ्गाः, स्त्रियश्चेदङ्ग्यः । ताश्च ता वृन्दारिकाश्च अङ्गवृन्दारिकाः । एवं गर्गवृन्दारिकाः। इडविड् पृथ् दरद् उशिज् एते जनपदशब्दाः क्षत्रियवाचिनः एभ्योऽपत्यमत्ययस्य स्त्रियां लुपि इडविट् चासौ वृन्दारिका चेत्यादिविग्रहे ऐडविडवृन्दारिका, दारदवृन्दारिका औशिजवृन्दारिका इति भवति । परतः स्त्रीत्येव । खट्वावृन्दारिका । अनूङित्येव, ब्रह्मबन्धूवृन्दारिका ।

८८६ मृगक्षीरादिषु वा ॥ ३।२।६२ ॥ मृगक्षीरादिसमासशब्देषु परतः स्त्रीलिङ्गमनेकार्थेऽस्त्यर्थे चोत्तरपदे पुंवद्वा स्यात् । मृग्याः क्षीरं मृगक्षीरम् । मृगीक्षीरम् । एवं मृगपदम्, मृगीपदमित्यादि । पुंस्त्रीलिङ्गपूर्वपदभेदेन समासविवक्षायां मृगक्षीरादयो न सिद्ध्यन्ति । मृगक्षीरादयः प्रयोगतोऽनुसर्तव्याः ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां समासप्रकरणे

तत्पुरुषः समाप्तः ॥

॥ अथ द्वन्द्वः ॥

८८७ चार्थे द्वन्द्वः सहोक्तौ ॥३।१।११७॥ नाम नाम्ना सह सहोक्तिविषये चार्थे वर्तमानं समस्यते स च समासो द्वन्द्वसंज्ञः स्यात् । समुच्चयान्वाचयेतरेतरयोगसमाहारभेदाच्चत्वारश्चार्थाः । तत्रैकमर्थं प्रति द्व्यादीनां क्रियाकारकद्रव्यगुणानां तुल्यबलानां अविरोधिनामनियतक्रमयौगपद्यानाम् आत्मरूपभेदेन चीयमानता समुच्चयः । यथा चैत्रः पचति पठति च। चैत्रो मैत्रश्च पठति। चशब्दमन्तरेणापि चायं संभवति । यथाहरहर्नयमानो गामश्वं पुरुषं पशुं वैवस्वतो न तृप्यति सुराया इव दुर्मदी । गुणप्रधानभावमात्रविशिष्टः समुच्चय एवान्वाचयः । यथा वटो भिक्षामट

गां चानय। स हि भिक्षां तावदटति यदि च गां पश्यति तामप्यानयति। द्रव्याणामेव परस्परसव्यपेक्षाणामुद्भूतावयवभेदः समूह इतरेतरयोगः। यथा चैत्रश्च मैत्रश्च चैत्रमैत्रौ घटं कुर्वाते। चैत्रश्च मैत्रश्च दत्तश्च चैत्रमैत्रदत्ताः पटं कुर्वन्ति। अत्रावयवानामुद्भूतत्वात् तत्संख्यानिबंधनं द्विवचनं बहुवचनं च भवति। स एव तिरोहितावयवभेदः संहतिप्रधानः समाहारः। धवश्च खदिरश्च पलाशश्च धवखदिरपलाशं तिष्ठति। अत्र तु समूहस्य प्राधान्यात् तस्य चैकत्वादेकवचनमेव भवति। एषु चाद्ययोः सहोक्त्यभावात् समासो न भवति। उत्तरयोस्तु चार्थयोः सहोक्तेर्विद्यमानत्वात् समासो भवति। का पुनरियं सहोक्तिः?। यद्वर्तिपदैः प्रत्येकं पदार्थानां युगपदभिधानं सहोक्तिः। प्लक्षन्यग्रोधावित्यत्र हि प्लक्षोऽपि ह्यर्थः न्यग्रोधोऽपि ह्यर्थः। प्लक्षश्च न्यग्रोधश्चेति वाक्येऽपि चकारेणायमेवार्थः कथ्यते। उत्तरपदेन समुदायेन वा यद्वर्तिपदानां युगपदभिधानं सा सहोक्तिरित्यन्ये। वर्तिपदार्थानामेव सह क्रियादिसंबंधस्य यत् वाक्येनाभिधानं सा सहोक्तिरित्यपरे। एकविंशतिः द्वाविंशतिरित्यादिसंख्याद्वन्द्वः समुदायसंख्यैकत्वानुरोधेन विंशत्यादिवत् संख्येयमाचष्टे इतीतरेतरयोगेऽप्येकवचनान्तो भवति। समाहारेऽपि चाशताद् द्वन्द्व इति लक्षणात् स्त्रीलिङ्गो भवति। संख्याद्वन्द्वादन्यत्र एको देवदत्ताय दीयतां विंशतिश्चैत्रायेति एकविंशती अनयोर्देहि। एवं त्रिंशच्चत्वारिंशतौ षष्टिसप्तत्यशीतय इत्यादौ द्विवचनबहुवचनान्तता। द्वन्द्वप्रदेशाः 'द्वन्द्वे वा' इत्यादयः।

८८८ धर्मार्थादिषु द्वन्द्वे ॥१।३।१५९॥ धर्मार्थादौ द्वन्द्वे समासे प्राप्तपूर्वनिपातं वा पूर्वं निपतति। धर्मार्थौ। अर्थधर्मौ। अत्र स्वराद्यदन्तत्वान्नित्यं पूर्वनिपाते प्राप्तेऽनेन विकल्पः। बहुवचनमाकृतिगणार्थम्। तेन वसन्तग्रीष्मौ। ग्रीष्मवसन्तावित्यादयोऽपि द्रष्टव्याः।

८८९ लघ्वक्षरासखीदुत्स्वराद्यदल्पस्वरार्च्यमेकम् ॥३।१।१६०॥ पृथग्योगाद्वेति निवृत्तम्। लघ्वक्षरं सखिवर्जेकारोकारान्तं स्वराद्यकारान्तमल्पस्वरमर्च्यवाचि च शब्दरूपं द्वंद्वे प्राक् स्यात् यत्र चानेकसंभवस्तत्रैकमेव। तिलमाषम्। अग्निधूमम्। सखिवर्जनं किम्। सुतसखायौ। 'ग्रहणवता नाम्ना न तदन्तविधिः' इति तदन्तस्य प्रतिषेधो न भवति। बहुसखिबहुधनौ। स्पर्धे परमेव। व्रीहियवौ। असखीदुदित्येकपद्यादिदुतोः स्पर्धे कामचारः। पतिवसू। वसुपती। स्वराद्यत्–अस्त्रशस्त्रम्। स्पर्धे परमेव। उष्ट्रखरम्। अल्पस्वर–प्लक्षन्यग्रोधौ। स्पर्धे परमेव। धवखदिरौ। अर्च्य–श्रद्धामेधे।

स्पर्धे परम् । दीक्षातपसी । लघ्वादिग्रहणं किम् । कुक्कुटमयूरौ । मयूरकुक्कुटौ । एकमिति किम् । युगपदनेकस्य पूर्वनिपाते प्राप्ते एकस्यैव यथाप्राप्तं पूर्वं निपातः शेषाणां तु कामचार इति प्रदर्शनार्थम् । शंखदुन्दुभिवीणाः, वीणादुन्दुभिशंखाः, शंखवीणादुन्दुभयः । कथं धनपतिरामकेशवाः, मृदङ्गशंखपणवाः ? रामशंखशब्दयोरुत्तराभ्यां समासे सति पूर्वेण समासः। द्वन्द्व इत्येव । विस्पष्टं पटुः विस्पष्टपटुः।

८९० **मासवर्णभ्रात्रनुपूर्वम्** ॥३।१।१६१॥ मासवाचि वर्णवाचि भ्रातृवाचि च शब्दरूपं द्वन्द्वे समासे अनुपूर्वं—यद्यत्पूर्वं तत्पूर्वं निपतति । अनुग्रहणादेकमिति निवृत्तम् । फाल्गुनचैत्रौ । ब्राह्मणक्षत्रियौ । बलदेववासुदेवौ ।

८९१ **भर्तुतुल्यस्वरम्** ॥३।१।१६२॥ भं नक्षत्रम् । तद्वाचि ऋतुवाचि च तुल्यसंख्यस्वरं द्वन्द्वे समासेऽनुपूर्वं निपतति । कृत्तिकारोहिण्यौ । हेमन्तशिशिरौ । तुल्यस्वरमिति किम् । आर्द्रामृगशिरसी । ग्रीष्मवसन्तौ ।

८९२ **पुष्यार्थाद् भे पुनर्वसुः** ॥३।१।१६३॥ एकशेषो निवृत्तः। एकमित्यनुवर्तते । पुष्यार्थाद् भे नक्षत्रे वर्तमानात् परो भ एव वर्तमानः पुनर्वसुशब्दः सहोक्तौ गम्यमानायां सामर्थ्यात् द्व्यर्थः सन्नेक एकार्थः स्यात् । उदितौ पुष्यपुनर्वसू । अर्थग्रहणं पर्यायार्थम् । तिष्यपुनर्वसू । समाहारे तु पुष्यपुनर्वसु । पुष्यार्थादिति किम् । आर्द्रापुनर्वसवः । पुनर्वसुरिति किम् । पुष्यमघाः । भ इति किम् । पुष्यपुनर्वसवो माणवकाः । सहोक्तावित्येव । पुष्यः पुनर्वसू येषां ते पुष्यपुनर्वसवो मुग्धाः ।

८९३ **विरोधिनामद्रव्याणां न वा द्वन्द्वः स्वैः** ॥ ३।१।१३० ॥ द्रव्यं गुणाद्याश्रयः । विरोधिवाचिनां शब्दानां द्रव्यमप्रतिपादयतां द्वंद्वो वा एक-एकार्थः स्यात् स चेद् द्वन्द्वः स्वैः सजातीयैरेवारभ्यते । सुखदुःखम् । सुखदुःखे । शीतोष्णम् । शीतोष्णे । विरोधिनामिति किम् । रूपरसगंधस्पर्शाः । अद्रव्याणामिति किम् । सुखदुःखाविमौ ग्रामौ । स्वैरिति किम् । बुद्धिसुखदुःखानि । समाहारे चार्थे एकत्वस्येतरेतरयोगे चानेकत्वस्य सिद्धत्वाद् विकल्पे सिद्धे सर्वमिदं विकल्पानुक्रमणं नियमार्थम् । विरोधिनामेवाद्रव्याणामेव स्वैरेवेति । तथा च प्रत्युदाहरणे इतरेतरयोग एव भवति।

८९४ **अश्ववडवपूर्वापराधरोत्तराः** ॥ ३।१।१३१ ॥ अश्ववडवेति, पूर्वापरेति अधरोत्तरेति त्रयो द्वंद्वा एकार्था वा स्युः स्वैः । अश्वश्च वडवा च अश्ववडवम्, अश्ववडवौ । अश्ववडवेति निर्देशादेवेतरेतरयोगे ह्रस्वत्वं निपात्यते । पूर्वापरम्,

पूर्वापरे । अधरोत्तरम्, अधरोत्तरे । पशुविकल्पेनैव सिद्धेऽश्ववडवग्रहणं तत्पर्याय-निवृत्त्यर्थम् । हयवडवे । स्वैरित्येव । अजाश्ववडवाः । [1]न्यायादेव विकल्पे सिद्धे पूर्वापरादिग्रहणं पदान्तरनिवृत्त्यर्थम्, तेन पूर्वपश्चिमौ इत्यादौ विकल्पो न भवति।

८९५ पशुव्यंजनानाम् ॥३।१।१३२॥ पशूनां व्यंजनानां च स्वैर्द्वन्द्व एक-एकार्थो वा स्यात्। गौश्च महिषश्च गोमहिषम्, गोमहिषौ। दधिघृतम्, दधिघृते। अश्वमहिषमित्यत्र तु परत्वात् 'नित्यवैरस्य, इत्यादिना वक्ष्यमाणेन नित्यमेकत्वविधिः। स्वैरित्येव । गोनरौ।

८९६ तरुतृणधान्यमृगपक्षिणां बहुत्वे ॥३।१।१३३॥ एतेषां बहुत्वे वर्तमानानां प्रत्येकं स्वैर्द्वन्द्व एकार्थो वा स्यात् । प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः । कुशकाशम्, कुशकाशाः। तिलमाषम्, तिलमाषाः । ऋश्यैणम्, ऋश्यैणाः । हंसचक्रवाकम्, हंसचक्रवाकाः । एकस्यापि पदस्य बहुत्वे भवति । प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधाः । प्लक्षौ च न्यग्रोधाश्च प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः इत्यादि । बहुत्व इति किम् । प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ । स्वैरित्येव । प्लक्षयवाः । आरण्याः पशवो मृगा इति मृगाणामपि पशुत्वात् पशुविकल्पेनैव सिद्धे मृगाणामिहोपादानं अमृगैरबहुत्वे चैकत्वाभावार्थम् ।

८९७ सेनाङ्गक्षुद्रजन्तूनाम् ॥३।१।१३४॥ सेनाङ्गानां क्षुद्रजन्तूनां च बहुत्वे वर्तमानानां स्वैर्द्वन्द्वो नित्यमेक-एकार्थः स्यात्। पृथग्योगाद्वेति निवृत्तम्। सेनाङ्गम्-अश्वाश्च रथाश्च अश्वरथम्। रथिकाश्वारोहम्। हस्त्यश्वम्। केचित्तु सेनाङ्गानां पशूनां पशुलक्षणं विकल्पमिच्छन्ति। हस्त्यश्वम्, हस्त्यश्वाः। क्षुद्रजन्तवो ऽल्पकायाः प्राणिन आनकुलमिह स्मर्यन्ते । यूकालिक्षम् । बहुत्व इत्येव । सादिनिषादिनौ । स्वैरित्येव । हस्तिमशकाः ।

८९८ फलस्य जातौ ॥३।१।१३५॥ फलवाचिनां शब्दानां बहुत्वे वर्तमानां च जातौ विवक्षायां स्वैर्द्वन्द्व एक-एकार्थः स्यात्। बदराणि चामलकानि च बदरामलकम्। फलस्येति किम् । ब्राह्मणक्षत्रियाः । जाताविति किम् । व्यक्तिपरचोदनायां मा भूत् । एतानि बदरामलकानि तिष्ठन्ति । बहुत्वे इत्येव । बदरामलके, बदरामलकम्। स्वैरित्येव । बदरशृगालाः ।

---

१ समाहारेतरेतरलक्षणात् ।

८९९ अप्राणिपश्वादेः ॥३।१।१३६॥ बहुत्व इति निवृत्तम्। पूर्वयोगारंभात्। प्राणिभ्यः पश्वादिसूत्रोक्तेभ्यश्च येऽन्ये द्रव्यभूताः पदार्थास्तेषां जातौ वर्तमानानां शब्दानां स्वैर्द्वन्द्व एक-एकार्थः स्यात्। आरा च शस्त्री च आराशस्त्रि। धाना च शष्कुली च धानाशष्कुलि। जातावित्येव। विन्ध्यहिमालयौ। जातिविवक्षायामयं विधिः। व्यक्तिविवक्षायां तु यथाप्राप्तम्। आराशस्त्रि, आराशस्त्र्या विमे। प्राणिपश्वादिजातिवर्जनं किम्। ब्राह्मणक्षत्रियविट्शूद्राः। ब्राह्मणक्षत्रियविट्शूद्रम्। अप्राणीति प्राणिनो द्रव्यस्य पर्युदासेनाप्राणिनो द्रव्यस्य ग्रहणादिह न भवति। रूपरसगंधस्पर्शाः। स्वैरित्येव। बदरशृगालौ।

९०० प्राणितूर्याङ्गाणाम् ॥३।१।१३७॥ प्राण्यङ्गानां तूर्याङ्गाणां च स्वैर्द्वन्द्व एक-एकार्थः स्यात्। प्राण्यङ्ग-दन्ताश्च ओष्ठौ च दन्तोष्ठम्। पाणिपादम्। तूर्याङ्ग-शंखपटहम्। मार्दङ्गिकपाणविकम्। स्वैरित्येव। पाणिग्रीवौ। प्राण्यङ्गानां तूर्याङ्गेषु शंखपटहादीनामप्राणिजातित्वात् पूर्वेण सिद्धे व्यक्तिविवक्षायां विधानार्थं जातिविवक्षायां प्राण्यङ्गाप्राण्यङ्गादिसंभेद एकत्वनिराकरणार्थं च वचनम्। एतज्ज्ञापनार्थमेव च बहुवचनम्।

९०१ चरणस्य स्थेणोऽद्यतन्यामनुवादे ॥३।१।१३८॥ शाखाध्ययननिमित्तकव्यपदेशभाजो द्विजन्मानश्चरणाः कठादयः। प्रमाणान्तरप्रतिपन्नस्यार्थस्य शब्देन संकीर्तनमनुवादः। यज्ञकर्मणि शंसितानुशंसनमित्येके। अनुकरणमित्यपरे। अद्यतन्यां परभूतायां यौ स्थेणौ तयोः अनुकथने कर्तृत्वेन संबंधिनो ये चरणास्तद्वाचिनां शब्दानां स्वैर्द्वन्द्वोऽनुवादविषय एक-एकार्थः स्यात्। प्रत्यष्ठात् कठकालापम्। उदगात् कठकौथुमम्। एषामुदयप्रतिष्ठे कश्चिदनुवदति। चरणस्येति किम्। उदगुस्तार्किकवैयाकरणाः। स्थेण इति किम्। अगमन् कठकालापाः। अद्यतन्यामिति किम्। अतिष्ठन् कठकालापाः। अनुवाद इति किम्। उदगुः कठकालापाः। अप्रसिद्धं कथयति। अन्ये तु स्थेणोद्यतनीप्रयोगादनु पश्चाद्वादश्चरणद्वन्द्वस्येत्यनुवादस्तत्रेच्छन्ति। तन्मते इह न भवति। कठकालापाः प्रत्यष्ठुः। कठकौथुमा उदगुः।

९०२ अक्लीबेऽध्वर्युक्रतोः ॥३।१।१३९॥ अध्वर्यवो यजुर्वेदविदः। तेषां वेदोऽप्यध्वर्युः। तत्र विहिताः क्रतवोऽश्वमेधादयोऽध्वर्युक्रतवः। ससोमको यागः क्रतुः। अध्वर्युक्रतुवाचिनां शब्दानां स्वैर्द्वन्द्व एक-एकार्थः स्यात् अक्लीबे-क्लीबे चेदध्वर्यु-

क्रतुवाची शब्दो न भवेत् । अर्कश्चाश्वमेधश्चार्काश्वमेधम् । अर्कादयः पुंलिङ्गाः। अक्लीबग्रहणं किम् । गवामयनादित्यानामयने । प्रसज्यप्रतिषेधः किम् । राजसूयं च वाजपेयं च राजसूयवाजपेये । इमौ क्रतू पुंलिङ्गावपि स्त इति पर्युदासाश्रयणेऽत्रापि स्यात् । अध्वर्युग्रहणं किम् । इष्टुवज्रौ । इष्वादयः सामवेदे विहिताः। क्रतुग्रहणं किम् । दर्शपौर्णमासौ ।

९०३ **निकटपाठस्य** ॥ ३।१।१४० ॥ निकटः पाठो येषामध्येतॄणां ते निकटपाठाः, तद्वाचिनां स्वैर्द्वन्द्व एकार्थः स्यात् । पदमधीते पदकः। एवं क्रमकः। पदकश्च क्रमकश्च पदकक्रमकम् । पदानन्तरं क्रमस्य पाठात् पाठ्योर्निकटत्वम् । निकटेति किम् । याज्ञिकवैयाकरणौ । पाठेति किम् । पितापुत्रौ ।

९०४ **नित्यवैरस्य** ॥३।१।१४१॥ नित्यमनिमित्तं जातिनिबद्धं वैरं येषां तद्वाचिनां शब्दानां स्वैर्द्वन्द्व एकार्थः स्यात् । अहिनकुलम् । मार्जारमूषिकम् । पशुविकल्पः पक्षिविकल्पश्च परत्वादनेन बाध्यते । अश्वमहिषम् । काकोलूकम् । नित्यवैरस्येति किम् । कौरवपाण्डवाः। कौरवपाण्डवम् । देवासुराः। देवासुरम् । नैषां निर्निमित्तं वैरमपि तु राज्यापहारादिकृतम् । अन्ये तु वैर एवाभिधेये इच्छन्ति । श्वावराहं वैरम् । वैरिषु तु यथाप्राप्तम् । दक्षिणाद् वामगमनं प्रशस्तं श्वशृगालयोर्विधते लोक औत्पत्तिको विरोधो यथा मार्जारमूषिकयोः।

९०५ **नदीदेशपुरां विलिङ्गानाम्** ॥३।१।१४२॥ विविधं लिङ्गं येषां तेषां नदीदेशपुराभिधायिनां शब्दानां स्वैर्द्वन्द्व एक-एकार्थः स्यात् । गंगा च शोणश्च गंगाशोणम् । देश-कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम् । पुरम्-मथुरापाटलिपुत्रम् । पुरां देशत्वात् तद्ग्रहणेनैव सिद्धे पूर्ग्रहणं ग्रामनिषेधार्थम् । जाम्बवश्च शालूकिनी च जाम्बवशालूकिन्यौ ग्रामौ। स्वैरित्येव । शौर्यं च नगरं केतवता च ग्रामः शौर्यकेतवते । पूर्ग्रामसंभेदेऽपीच्छत्यन्यः । शौर्यकेतवतम् । पूर्देशसंभेदेऽपीत्यपरे । श्रावस्तीभध्यदेशम् । नदीदेशपुरामिति किम् । कुक्कुटमयूर्यौ । देशग्रहणेन चेह जनपदानां ग्रहणं पृथग्दीपूर्ग्रहणात् । तेनेह न भवति । गौरी च कैलासश्च गौरीकैलासौ पर्वतौ । विलिङ्गानामिति किम् । गंगायमुने ।

९०६ **पात्र्यशूद्रस्य** ॥ ३।१।१४३ ॥ यैर्भुक्ते पात्रं संस्कारेण शुध्यति ते पात्रमर्हन्ति पात्र्याः । पात्र्यशूद्रवाचिनां स्वैर्द्वन्द्व एकार्थः स्यात् । तक्षायस्का-

रम्। रजकतन्तुवायम्। पात्र्येति किम्। जनंगमबुकसाः। शूद्रग्रहणं किम्। ब्राह्मणक्षत्रियविशः।

९०७ **गवाश्वादिः**॥३।१।१४४॥ गवाश्वादिर्द्वन्द्व एक-एकार्थः स्यात्। गौश्च अश्वश्च गवाश्वम्। गवाश्वादिषु यथोच्चारितरूपग्रहणादन्यत्र नायं विधिः। गोऽश्वौ, गोऽश्वम्। पशुविभाषैव भवति।

९०८ **न दधिपयआदिः** ॥३।१।१४५॥ दधिपयःप्रभृति द्वन्द्व एक-एकार्थो न स्यात्। दधि च पयश्च दधिपयसी। सर्पिर्मधुनी।

९०९ **संख्याने** ॥३।१।१४६॥ इयत्तापरिच्छेदः संख्यानम्। वर्तिपदार्थानां संख्याने गम्यमाने द्वन्द्व एकार्थो न स्यात्। दश गोमहिषाः। एतावन्ति दधिघृतानि।

९१० **वान्तिके** ॥३।१।१४७॥ वर्तिपदार्थानां संख्यानस्यान्तिके–समीपे गम्यमाने द्वन्द्व एकार्थो वा स्यात्। उपगता दश यस्य येषां वा उपदशम् गोमहिषम्। उपदशा गोमहिषाः। उपदशाय गोमहिषाय। उपदशेभ्यो गोमहिषेभ्यः। द्वन्द्वार्थस्यैकत्वादनुमयोगस्यापि बहुव्रीहेरेकवचनान्तत्वम्। यदा तु दशानां समीपमुपदशमित्यव्ययीभावस्तदोपदशं गोमहिषायेति भवति।

९११ **आ द्वन्द्वे** ॥३।२।३९॥ विद्यायोनिसंबंधनिमित्ते सति प्रवर्तमानानामृतां यो द्वन्द्वस्तस्मिन् सत्युत्तरपदे परे पूर्वपदस्याकारोऽन्तादेशः स्यात्। होता च पोता च हौतापोतारौ। मातापितरौ। अथेह प्रथमयोः कस्मान्न भवति होतृपोतृनेष्टोद्गातारः इति?। अन्त्यस्यैवोत्तरपदत्वात्। कथं तर्हि होतापोतानेष्टोद्गातार इति?। द्वयोर्द्वयोर्द्वन्द्वे भविष्यति। यदा च होता च पोता च नेष्टोद्गातारौ चेति विग्रहस्तदा होतृपोतानेष्टोद्गातार इति। ऋतामित्येव। गुरुशिष्यौ। ऋतां द्वन्द्व इति किम्। पितृपितामहौ। विद्यायोनिसंबंध इत्येव। कर्तृकारयितारौ। विद्यायोनिसंबंधश्चेह प्रत्यासत्तेः समस्यमानानामृदन्तानामेव परस्परं द्रष्टव्यो न येन केनचित्। तेनेह न भवति। चैत्रस्य स्वसृदुहितरौ। नात्र स्वसृदुहित्रोः परस्परं संबंधः। न हि स्वसा चैत्रस्य स्वसा भवन्ती दुहितरमपेक्षते दुहिता स्वसारमिति। यद्येवं कथं चैत्रस्य पितृभ्रातराविति? अस्ति ह्यत्र परस्परसंबंधः। उच्यते। यद्यपि चैत्रस्य भ्राता भ्राता भवन् पितरमपेक्षते चैत्रपितृजनितस्यैव चैत्रभ्रातृत्वात्। तथापि पिता पिता भवन्न भ्रातरमपेक्षते। यद्येवं कथं मातापितरौ होतापोतारौ?। न ह्यत्र परस्परापेक्षस्त-

थाभावोऽपि तु पुत्रयजमानापेक्षः । नैवम् । अत्रापि मात्रादीनां परस्परसंबंधात् । ते हि स्वकर्मणि प्रजने यागे च सहिता एव प्रवर्तन्ते, तत्कर्मनिमित्तश्चायं तेषां व्यपदेश इत्यदोषः । केचित्तु स्वसादुहितरावित्यत्रापीच्छन्ति ।

९१२ पुत्रे ॥३।२।४०॥ पुत्रशब्दे उत्तरपदे द्वन्द्वसमासे विद्यायोनिसंबंधे निमित्ते सति प्रवर्तमानानामृकारान्तानामाकारोऽन्तादेशः स्यात् । मातापुत्रौ । पितापुत्रौ ।होतापुत्रौ ।

९१३ **वेदसहश्रुतावयुदेवतानाम्** ॥३।२।४१॥ वेदे सह श्रुतानां वायुवर्जितदेवतानां द्वन्द्वे पूर्वपदस्योत्तरपदे परे आकारान्तादेशः स्यात्। इन्द्रासोमौ। इन्द्रावरुणौ। अश्वामरुतौ। वेदेति किम्। शिववैश्रवणौ। सहेति किम्। विष्णुशक्रौ। श्रुतेति किम्। चन्द्रसूर्यौ। वायुवर्जनं किम्। अग्निवायू। वाय्वग्नी। देवतानामिति किम्। यूपचषालौ।

९१४ **ईः षोमवरुणेऽग्नेः** ॥३।२।४२॥ वेदसहश्रुतावयुदेवतानां द्वन्द्वे षोमवरुणयोरुत्तरपदयोरग्निशब्दस्य ईकारान्तादेशः स्यात्। षोमेति निर्देशादीकारसंनियोगे षत्वं च निपात्यते। अग्नीषोमौ। अग्नीवरुणौ। षोमवरुणेति किम्। अग्नेन्द्रौ। देवताद्वन्द्व इत्येव। अग्निसोमौ माणवकौ। ईकारसंनियोगे विधानादिह षत्वमपि न भवति।

९१५ **इर्वृद्धिमत्यविष्णौ** ॥३।२।४३॥ विष्णुवर्जिते वृद्धिमत्युत्तरपदे परे देवताद्वन्द्वेऽग्नेरिकारोऽन्तादेशः स्यात्। ईकाराकारयोरपवादः। अग्नीवरुणौ देवते अस्या आग्निवारुणीमनड्वाहीमालभेत। अग्नीषोमौ देवते अस्य आग्निसौमं कर्म। एवमाग्निमारुतम्। वृद्धिमतीति किम्। अग्नीवरुणौ। अविष्णाविति किम्। अग्नाविष्णू देवते अस्य आग्नावैष्णवं चरुं निर्वपेत्।

९१६ **दिवो द्यावा** ॥३।२।४४॥ देवताद्वन्द्वे दिव्शब्दस्योत्तरपदे परे द्यावा इत्ययमादेशः स्यात्। द्यौश्च भूमिश्च द्यावाभूमी। द्यावानक्ते। नक्तशब्दोऽकारान्तोऽप्यस्त्यनव्ययम्।

९१७ **दिवस्पृथिव्यां वा** ॥३।२।४५॥ दिव्शब्दस्य पृथिव्यामुत्तरपदे परे देवताद्वन्द्वे दिवस् इति दिव इत्येतावादेशौ वा स्याताम्। दिवस्पृथिव्यौ, दिवःपृथिव्यौ। द्यावापृथिव्यौ। दिवः इति विसर्गान्तस्य निर्देशात् दिवस् इति सकारस्य रुत्वं न भवति।

९१८ **उषासोषसः** ॥३।२।४६॥ देवताद्वन्द्वे उत्तरपदे परे उषस्शब्दस्योषासा इत्ययमादेशः स्यात्। उषश्च सूर्यश्च उषासासूर्यम्। केचित्तु सूर्यशब्दस्यापीच्छन्ति। सूर्यश्च सोमश्च उषासासोमौ।

९१९ **मातरपितरं वा** ॥३।२।४७॥ मातृपितृशब्दयोः पूर्वोत्तरपदयोर्द्वन्द्वे मातरपितरेति ऋकारस्य अर इति निपात्यते वा। माता च पिता च मातरपितरौ पक्षे मातापितरौ। एकशेषे तु पितरौ। शद्वरूपापेक्षो नपुंसकैकवचननिर्देश उत्तरपदस्य अरभावाभिव्यक्त्यर्थः। उत्तरपदस्यारं नेच्छन्त्यन्ये।

स्त्रियाः पुंसो द्वन्द्वाच्च। इत्युक्तमेव। स्त्रीपुंसम्। स्त्रीपुंसौ।

९२० **ऋक्सामर्ग्यजुषधेन्वनड्वाड्मनसाहोरात्ररात्रिंदिवनक्तंदिवाहर्दिवोर्वष्ठीवपद्ष्ठीवाक्ष्रुवदारगवम्** ॥ ७।३।९७ ॥ ऋक्सामादयो द्वन्द्वा अत्मत्ययान्ता निपात्यन्ते। ऋक् च साम च ऋक्साम। ऋक्च यजुश्च ऋग्यजुषमधीयानान्। धेनुश्च अनड्वाँश्च धेन्वनडुहौ। असमाहारार्थं धेन्वनडुहग्रहणम्। समाहारे तूत्तरेणैव सिद्धम्। वाक् च मनश्च वाङ्मनसे। अहश्च रात्रिश्च अहोरात्रः। रात्रिश्च दिवा च रात्रिंदिवम्। निपातनात् पूर्वपदस्य मोऽन्तः। नक्तं च दिवा च नक्तंदिवम्। अत्रापि मोऽन्तः। अहश्च दिवा च अहर्दिवम्। पर्याययोरपि वीप्सायां द्वन्द्वो निपातनात्। अहरहरित्यर्थः। रात्रिपर्यायोऽत्रान्यतर इत्येके। अहर्निशमित्यर्थः। उरू च अष्ठीवन्तौ च उर्वष्ठीवम्। निपातनादन्त्यस्वरादिलोपः। पादौ चाष्ठीवन्तौ च पदष्ठीवम्। अत्र पद्भावश्च। अक्षिणी च भ्रुवौ च अक्षिभ्रुवम्। दाराश्च गावश्च दारगवम्। अत्र भ्रूशब्दस्य निपातनादुवादेशोऽक्षिदारशब्दयोश्च पूर्वनिपातः। द्वन्द्वादित्येव। ऋक् साम यस्य ऋक्सामा मुग्धः।

९२१ **चवर्गदषहः समाहारे** ॥७।३।९८॥ चवर्गदकारषकारहकारान्ताद् द्वन्द्वात्समाहारेऽर्थे वर्तमानादत् स्यात्। वाक् च त्वक् च वाक्त्वचम्। श्रीस्रजम्। द्-समिद्दृषदम्। ष्-वाक्त्विषम्। ह्-छत्रोपानहम्। समासान्तत्वेन मत्ययस्य द्वन्द्वावयवत्वात् छत्रोपानहिनीति द्वन्द्वलक्षणो मत्वर्थीय इन् भवति। चवर्गदषह इति किम्। दृषत्समित्। यकृन्मेदः। समाहारे इति किम्। प्रावृट्शरद्भ्याम्। द्वन्द्वादित्येव। पञ्च वाचः समाहताः पञ्चवाक्।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां समास-
प्रकरणे द्वन्द्वः समाप्तः ॥

॥ अथैकशेषः ॥

९२२ **समानामर्थेनैकः शेषः** ॥३।१।११८॥ अर्थेन समानां समानार्थानां शब्दानां सहोक्तौ गम्यमानायामेकः शिष्यते अर्थादन्ये निवर्तन्ते । तत्र विशेषानुपादानात् पर्यायेण शेषो भवति । बहुवचनमतन्त्रम् । तेन द्वयोरप्येकः शिष्यते । वक्रश्च कुटिलश्च वक्रौ, कुटिलौ वा । वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ, कुटिलदण्डाविति वा । एवं लोहिताक्षौ रक्ताक्षाविति वा । सितश्च शुक्लश्च श्वेतश्च सिताः शुक्लाः श्वेता वा। अर्थेन समानामिति किम् । प्लक्षन्यग्रोधौ । सहोक्तावित्येव । वक्रश्च कुटिलश्च । द्वन्द्वापवादो योगः ।

स्यादावसंख्येयः । उक्तमेव। अयमपि द्वन्द्वापवादो विधिः । तेनाकृतद्वन्द्वानामेवैकशेषे वाक् च वाक् च वाचावित्यादि सिद्धम् । अन्यथा द्वन्द्वे कृते परत्वात् समासान्ते कृते वैरूप्यादेकशेषो न स्यात् ।

९२३ **त्यदादिः**॥३।१।१२०॥त्यदादिनान्येन च सहोक्तौ त्यदादिरेवैकः शिष्यते। स च चैत्रश्च तौ । स्पर्धे परमिति त्यदादीनां मिथः सहोक्तौ यद्यत् पाठे परं तत्तदेवैकं शिष्यते । स च यश्च यौ । बहुलाधिकारात् पूर्वमपि । स च यश्च तौ । त्यदादेः कृतैकशेषस्य स्त्रीपुंनपुंसकलिङ्गानां युगपत्प्रयोगात् पर्यायप्राप्तौ शिष्यमाणलिङ्गप्राप्तौ वा स्त्रीपुंनपुंसकानां सह वचने स्यात् परमिति यथापरमेव लिङ्गं भवति। सा च चैत्रश्च तौ । स च देवदत्ता च तौ । अत्र स्त्रीपुंसलिङ्गयोः परं पुंलिङ्गमेव भवति। सा च कुण्डे च तानि । अत्र स्त्रीनपुंसकयोः परं नपुंसकमेव भवति । स च कुण्डं च ते । तच्च चैत्रश्च ते । अत्र पुंनपुंसकयोः परं नपुंसकमेव भवति। कथं स च कुक्कुटः सा च मयूरी ते कुक्कुटमयूर्यौ ? । उच्यते । परलिङ्गो द्वन्द्वोऽशीति समासार्थस्य लिङ्गातिदेशात् तद्विशेषणस्य त्यदादेरपि तल्लिङ्गतैव न्याय्येति ।

९२४ **भ्रातृपुत्राः स्वसृदुहितृभिः** ॥३।१।१२१॥ बहुवचनं पर्यायार्थम् । स्वस्रर्थेन सहोक्तौ भ्रात्रर्थः शब्दो दुहित्रर्थेन सहोक्तौ पुत्रार्थ एकः शिष्यते । भ्राता च स्वसा च भ्रातरौ । सोदर्यश्च स्वसा च सोदर्यौ । भ्राता च भगिनी च भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ । सुतश्च दुहिता च सुतौ । पुत्रश्च सुता च पुत्रौ ।

९२५ **पिता मात्रा वा** ॥३।१।१२२॥ मातृशब्देन सहोक्तौ पितृशब्द एकः

शिष्यते वा । पिता च माता च पितरौ । पक्षे मातापितरौ । मातुरर्च्यत्वात् पूर्वनिपातः ।

९२६ श्वशुरः श्वश्रूभ्यां वा ॥३।१।१२३॥ श्वश्रूशब्देन सहोक्तौ श्वशुरशब्द एको वा शिष्यते । श्वशुरश्च श्वश्रूश्च श्वशुरौ । श्वश्रूश्वशुरौ । द्विवचनं जातौ धवयोगे च वर्तमानयोः श्वशुरयोः परिग्रहार्थम् । तेन जातौ तन्मात्रभेदे ' पुरुषः स्त्रिया ' इति वक्ष्यमाणो नित्यविधिर्न भवति ।

९२७ वृद्धो यूना तन्मात्रभेदे ॥३।१।१२४॥ वृद्धः पौत्रादिर्युवा जीवद्वंश्यादिः । वृद्धस्य यूना सहोक्तौ वृद्धवाच्येकः शिष्यते, तन्मात्र एव चेद् भेदो-विशेषः स्यात् न चेत् प्रकृतिभेदोऽर्थभेदो वाऽन्यो भवतीत्यर्थः । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्ध इति किम् । गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ । यूनेति किम् । गार्ग्यश्च गर्गश्च गार्ग्यगर्गौ । तन्मात्रभेद इति किम् । गार्ग्यवात्स्यायनौ । अत्र प्रकृतिरन्या । भागवित्तिभागवित्तिकौ । अत्र कुत्सा सौवीरदेशत्वं चान्योऽर्थः ।

९२८ स्त्री पुंवच्च ॥३।१।१२५॥ वृद्धस्त्रीवाची शब्दो युववाचिना सहोक्तावेकः शिष्यते पुंवच्च-स्त्र्यर्थः पुमर्थो भवतीत्यर्थः , तन्मात्रभेदे । गार्गी च गार्ग्यायणश्च गार्ग्यौ । गार्गी च गार्ग्यायणौ च गर्गाः । अत्र पुंवद्भावाद् ङीनिवृत्तौ यञो लुप् गर्गानिति 'शसोऽता सश्च नः पुंसि' इति नत्वं च । इमौ गार्ग्यावित्यनुप्रयोगस्यापि पुंस्त्वम् ।

९२९ पुरुषः स्त्रिया ॥३।१।१२६॥ पुरुषशब्दोऽयं प्राणिनि पुंसि रूढः । स्त्रीवाचिना शब्देन सहोक्तौ पुरुषवाची शब्द एकः शिष्यते तन्मात्रभेदे-स्त्रीपुरुषमात्रभेदश्चेद् भवति । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ । कुक्कुटश्च कुक्कुटी च कुक्कुटौ । पुरुष इति किम् । तीरं नदनदीपतेः। तन्मात्रभेद इत्येव । हंसश्च वरटा च हंसवरटे । तत्र प्रकृतिभेदः । गणकगणक्यौ । अत्र धवयोगलक्षणोऽर्थभेदः । कुक्कुटमयूर्यौ । अत्र प्रकृत्यर्थयोर्भेदः । कथं ब्राह्मणवत्सा च ब्राह्मणीवत्सश्च ब्राह्मणवत्साब्राह्मणीवत्सौ ? । न ह्यत्र स्त्रीपुरुषमात्रभेदादन्यो भेदोऽस्ति । सत्यम् । तदित्यनेन प्रधानस्त्रीपुरुषौ परामृश्येते तेन प्रधानस्त्रीपुरुषमात्रकृत एव भेदे भवति। अत्र तु विशेषणीभूताप्रधानस्त्रीपुरुषकृतोऽपि भेदोऽस्तीति न भवति । अन्ये तु तन्मात्रभेदादधिके प्रकृतिभेदे एवैकशेषं नेच्छन्ति अर्थभेदे त्विच्छन्त्येव । इन्द्रश्च

इन्द्राणी च इन्द्रौ । एवं पूर्वसूत्रेऽपि । भागवित्तिश्च भागवित्तिकश्च भागवित्ती ।

९३० **ग्राम्याशिशुद्विशफसंघे स्त्री प्रायः** ॥ ३।१।१२७ ॥ ग्राम्या अशिशवो ये द्विशफा द्विखुरा अर्थात् पशवः । तेषां संघे स्त्रीपुरुषाणां सहोक्तौ प्रायः स्त्रीवाच्येकः शिष्यते स्त्रीपुरुषमात्रभेदश्चेद् भवति । पूर्वेण पुरुषशेषे प्राप्ते स्त्रीशेषार्थं वचनम् । गावश्च स्त्रियः गावश्च पुरुषाः इमा गावः । ग्राम्येति किम् । आरण्यानां मा भूत् । रुरवश्चेमे रुरवश्चेमा इमे रुरवः । अशिशुग्रहणं किम् । वत्साश्चेमा वत्साश्चेमे इमे वत्साः । द्विशफेति किम् । गर्दभाश्च गर्दभ्यश्च गर्दभाः । संघग्रहणं किम् । गौश्चायं गोश्चेयं इमौ गावौ । एवमेतावजौ । प्राय इति किम् । छाग्यश्च छागाश्च छागाः । व्यावृत्तौ सर्वत्र पूर्वेण पुरुषशेष एव भवति । तन्मात्रभेदे इत्येव । गोबलीवर्दम् ।

९३१ **क्लीबमन्येनैकं च वा** ॥३।१।१२८॥क्लीबं नपुंसकं नाम अन्येनाक्लीबेन सहोक्तावेकं शिष्यते तन्मात्रभेदे—क्लीबाक्लीबमात्र एव चेद् भेदो भवति । तच्च शिष्यमाणमेकमेकार्थं वा स्यात् । अर्थस्यैकत्वे तद्विशेषणानामपि तथाभावः । शुक्लं च वस्त्रं शुक्लश्च कम्बलः तदिदं शुक्लम् ते इमे शुक्ले वा । शुक्लं च वस्त्रं शुक्लश्च कंबलः शुक्ला च शाटी तदिदं शुक्लम् तानीमानि शुक्लानि वा । क्लीबग्रहणं किम् । स्त्रीपुंसरयोरपि शेषः स्यात् । अन्येनेति किम् । शुक्लं च शुक्लं च शुक्ले । स्यादावसंख्येय इत्येकशेषः । अनेन त्वेकशेषे विकल्पेनैकार्थत्वं प्रसज्ज्येत । तन्मात्रभेद इत्येव । महद्धिमं हिमानी । हिमं च हिमानी च हिमहिमान्यौ । अत्र प्रवृत्तिनिमित्तलक्षणार्थभेदोऽप्यस्तीति नैकशेषः ।

॥ इति श्रीसिद्धहैमबृहत्प्रक्रियायां समास-
प्रकरणे एकशेषः समाप्तः ॥

॥ अथ समासान्ताः ॥

९३२ **ऋक्पूःपथ्यपोऽत्** ॥७।३।७६॥ ऋच् पुर पथिन् अप् इत्येतदन्तात् समासादत्—अकारः समासान्तः स्यात् । ऋचोऽर्धम् अर्धर्चः । श्रियाः पूः श्रीश्चासौ पूश्चेति वा श्रीपुरम् । जलपथः । द्विर्गता आपोऽस्मिन् द्वीपम् । पुरपथशब्दाभ्यां सिद्धे पुर् पथिन् इत्येतयोरुपादानमेतद्विषये प्रयोगनिवृत्त्यर्थम् ।

९३३ **धुरोऽनक्षस्य** ॥७।३।७७॥ धुरन्तात् समासादत् स्यात् सा चेद्धूः अक्षसंबंधिनी न भवेत् । राज्यधुरा । रणधुरा । द्विधुरी । महाधुरं शकटम् । अनक्षस्येति किम् । अक्षधूः।

९३४ **संख्यापाण्डूदक्कृष्णाद्भूमेः** ॥७।३।७८॥ संख्यावाचिभ्यः पाण्डु उदच् कृष्ण इत्येतेभ्यश्च नामभ्यः परो यो भूमिशब्दस्तदन्तात् समासादत् स्यात् । द्वयोर्भूम्योः समाहारः द्विभूमम् । द्वे भूमी अस्य द्विभूमः प्रासादः । पाण्डुर्भूमिः पाण्डुभूमम् । उदीची भूमिः उदग्भूमम् । कृष्णा भूमिः कृष्णभूमम् । 'भूमोऽसंख्यात एकार्थ ' इति (लिङ्गानुशासनोक्तेः) पाण्डुभूमादेर्नपुंसकत्वम् । संख्यादिभ्य इति किम् । सर्वभूमिः ।

९३५ **उपसर्गादध्वनः** ॥७।३।७९॥ उपसर्गात् धातुयोगे यः प्रादिरुपसर्गसंज्ञां लभते तस्मात् परादध्वनोऽत् समासान्तः स्यात् । प्रगतमध्वानं प्राध्वं शकटम् ।

९३६ **समवान्धात्तमसः** ॥७।३।८०॥ सम् अव अंध इत्येतेभ्यः परो यस्तमसशब्दस्तदन्तात् समासादत् समासान्तः स्यात् । संततं तमः संततं तमसा संततं तमोऽस्मिन्निति वा संतमसम् । अवहीनं तमोऽवहीनं तमसा अवहीनं तमोऽस्मिन्निति वा अवतमसम् । अन्धं करोतीत्यन्धम् । अंधं च तत्तमश्च अंधं तमोऽस्मिन्निति वा अंधतमसम् ।

९३७ **तप्तान्ववाद्रहसः** ॥७।३।८१॥ रह इति अपकाश्यं विजनं वा । तप्त अनु अव इत्येतत्पूर्वो यो रहःशब्दस्तदन्तादत् समासान्तः स्यात् । तप्तं तप्ताय इवानधिगम्यं रहः तप्तरहसम् । अनुगतं रहोऽनुगतं रहसा वा अनुरहसम् । अवहीनं रहोऽवहीनं रहसा वा अवरहसम् ।

९३८ **प्रत्यन्ववात् सामलोम्नः** ॥७।३।८२॥ प्रति अनु अव इत्येतेभ्यः परौ यौ सामन्लोमन्शब्दौ तदन्तात् समासादत् समासान्तः स्यात् । प्रतिगतं साम प्रतिसामम् । प्रतिगतं सामास्य प्रतिसामः। एवमनुसामम् अनुसामः । अवसामम् अवसामः । प्रतिलोमम् प्रतिलोमः । अनुलोमम् अनुलोमः । अवलोमम् अवलोमः । अव्ययीभावे तु परत्वाद् विकल्पः। साम साम प्रति सान्नोऽभिमुखं वा प्रतिसाम प्रतिसाममित्यादि । प्रत्यन्ववादिति किम् । निःषाम वचनम् । निर्लोमा पुरुषः । सामलोम्न इति किम् । प्रतिकर्म ।

९३९. ब्रह्महस्तिराजपल्यार्चसः ॥७।३।८३॥ ब्रह्मन् हस्तिन् राजन् पल्य इत्येतेभ्यः परो यो वर्चस्शब्दस्तदन्तात् समासादत् समासान्तः स्यात्। वर्चस्तेजो बलं वा। ब्रह्मणो वर्चः ब्रह्मवर्चसम्। एवं हस्तिवर्चसम्। पल्यवर्चसम्। पल्यं कटकृतं पलालवर्तिकृतं वा धान्यभाजनम्। हस्तिविधा वा। ब्रह्मादिभ्य इति किम्। नृपाः सोमार्कवर्चसः। कथं त्विषिमान् राजवर्चस्वीति?। समासान्तविधेरनित्यत्वात्। एतच्च 'ऋक्पूःपथ्यपोऽत्' इति निर्देशात् सिद्धम्।

९४० अक्ष्णोऽप्राण्यङ्गे ॥७।३।८५॥ अक्षिशब्दान्तात् समासादत् समासान्तः स्यात् अप्राण्यङ्गे—न चेत्सोऽक्षिशब्दः प्राण्यङ्गे वर्तते। लवणस्याक्षि लवणमक्षीवेति वा लवणाक्षम्। अप्राण्यङ्ग इति किम्। अजाक्षि।

९४१ संकटाभ्याम् ॥ ७।३।८६ ॥ सम् कट इत्येतत्पूर्वादक्षिशब्दादत् समासान्तः स्यात्। संगतमक्ष्णा समीपमक्ष्णो वा समक्षम्। कटस्याक्षि कटाक्षः। प्राण्यङ्गार्थं वचनम्।

९४२ पूजास्वतेः प्राक् टात् ॥७।३।७२॥ पूजायां यौ स्वती ताभ्यां परे ये ऋगादयस्तदन्तात् समासात् 'बहुव्रीहेः काष्टे टः' इति टप्रत्ययात् प्राक् यः समासान्तः स न स्यात्। शोभना धूः सुधूः। अतिधूः। सुराजा। अतिराजा। पूजाग्रहणं किम्। अतिक्रान्तो राजानमतिराजः। स्वतेरिति किम्। परमधुरा। प्राक्टादिति किम्। स्वङ्गुलं, अत्यङ्गुलं काष्ठम्।

९४३ बहोर्ङ ॥७।३।७३॥ ङे—ङविषये ङमसङ्गो यत्र ततो बहुवन्तात् समासान्तो ङः कच् च न स्यात्। आसन्ना बहवो येषां ते आसन्नबहवः। उपबहवः। बहोरिति किम्। द्विग्राः। उपदशाः। ङ इति किम्। प्रिया बहवोऽस्य प्रियबहुकः।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां समासप्रकरणे
समासान्ताः समाप्ताः ॥

॥ अथालुक्समासः ॥

९४४ **न नाम्येकस्वरात् खित्युत्तरपदेऽमः** ॥ ३।२।९ ॥ समासारंभकमन्त्यं पदमुत्तरपदम्। नाम्यन्तादेकस्वरात् पूर्वपदस्यामः खित्प्रत्ययान्ते उत्तरपदे परे लुप् न स्यात्। स्त्रीं स्त्रियं वात्मानं मन्यते स्त्रीमन्यः, स्त्रियंमन्यः। अथ श्रियमात्मानं मन्यते श्रियंमन्यं कुलमित्यत्र नपुंसकलक्षणोऽमो लोपः कस्मान्न भवति ?। उच्यते। श्रीशब्दस्यात्मसमानाधिकरणस्य नपुंसके वृत्त्यभावादाविष्टलिङ्गत्वाच्च न भवति। अन्ये त्वाहुः—यथा षष्ठादयः शब्दा धवयोगात् स्त्रियां वर्तमानाः स्वलिङ्गं विहाय स्त्रीलिङ्गमुपाददते तथा श्रीशब्दः कुले वर्तमानः स्वलिङ्गपरित्यागेन वर्तते ततो नपुंसकलक्षणं ह्रस्वत्वममो लुप् च न भवति। श्रिमन्यं कुलमिति। न चायं नपुंसकलक्षणस्य लोपस्यापवादः किंतु ऐकार्थ्यलक्षणस्योत्तरपदग्रहणात्। नामिग्रहणं किम्। ङमन्यः। एकस्वरादिति किम्। हरणिमन्या। खितीति किम्। स्त्रीमानी। मन्याण्णिन्।

९४५ **असत्त्वे ङसेः** ॥३।२।१०॥ असत्वे विहितो यो ङसिः तस्योत्तरपदे लुप् न स्यात्। स्तोकान्मुक्तः। अल्पान्मुक्तः। अन्तिकादागतः। दूरादागतः। कृतेनासत्वे इति समासः। असत्वे इति किम्। स्तोकभयम्। उत्तरपद इत्येव। निष्क्रान्तः स्तोकान्निस्तोकः।

९४६ **ब्राह्मणाच्छंसी** ॥ ३।२।११ ॥ ब्राह्मणाच्छंसीत्यत्र ङसेर्लुबभावो निपात्यते। ब्राह्मणाद् ग्रंथादादाय शंसति ब्राह्मणाच्छंसी। रूढिवशादृत्विग्विशेष उच्यते। उपात्तविषयमेव तदपादानं यथा कुमूलात् पचति। निपातनस्येष्टविषयत्वात् ऋत्विग्विशेषादन्यत्र लुप् स्यात्। ब्राह्मणशंसिनी स्त्री।

९४७ **ओजोऽक्ष्णसहोम्भस्तमस्तपसष्टः** ॥ ३।२।१२ ॥ एभ्यः परस्य टस्तृतीयैकवचनस्योत्तरपदे परे लुप् न स्यात्। ओजसाकृतम्। अक्ष्णसाकृतम्। सहसाकृतम्। अम्भसाकृतम्। तमसाकृतम्। तपसाकृतम्। कथं 'सततनैशतमोवृतमन्यत' इति? उत्तरपदस्य संबंधिशब्दत्वाद्यत्र पूर्वपदीभूतस्तमःशब्दस्तत्रायं निषेधः। यत्र तु पदान्तरेण समस्तस्तत्र न प्रतिषेधः। ट इति किम्। ओजसो भावः ओजोभावः। तमसो नेच्छन्त्येके। तपसोऽन्ये।

९४८ **पुंजनुषोऽनुजान्धे** ॥ ३।२।१३ ॥ पुम्शब्दाज्जनुःशब्दाच्च परस्य टावचनस्य यथासंख्यमनुजशब्देऽन्धशब्दे चोत्तरपदे लुब् न स्यात् । पुंसा करणेनानुजः पुंसानुजः । जनुषा जन्मनान्धः जनुषान्धः। अविकृताक्षो जात्यन्ध उच्यते। अन्ये तु जतुशब्दात्तकारश्रुतेरिच्छन्ति । ट इत्येव । पुमांसमनुजाता पुमनुजा ।

९४९ **आत्मनः पूरणे** ॥३।२।१४॥ आत्मनः परस्य टावचनस्य पूरणप्रत्ययान्ते उत्तरपदे परे लुब् न स्यात् । आत्मनाद्वितीयः । आत्मनातृतीयः । पूर्वादित्वात् समासः । कथं 'जनार्दनस्त्वात्मचतुर्थ एवे'ति ?। आत्मा चतुर्थोऽस्येति बहुव्रीहिः ।

९५० **मनसश्चाज्ञायिनि** ॥३।२।१५॥ मनःशब्दादात्मशब्दाश्च परस्य टावचनस्याज्ञायिन्युत्तरपदे परे लुब् न स्यात् । मनसा ज्ञातुं शीलमस्य मनसाज्ञायी । एवमात्मनाज्ञायी । आत्मनो नेच्छन्त्येके ।

९५१ **नाम्नि** ॥३।२।१६॥ मनसः परस्य टावचनस्योत्तरपदे परे संज्ञायां विषये लुप् न स्यात् । मनसादेवी । मनसागुप्ता । एवंनामा काचित् । नाम्नीति किम् । मनोदत्ता कन्या ।

९५२ **परात्मभ्यां ङेः** ॥३।२।१७॥ परात्मशब्दाभ्यां परस्य ङेश्चतुर्थ्येकवचनस्योत्तरपदे परे नाम्नि विषये लुप् न स्यात् । परस्मैपदम् । आत्मनेपदम् । तादर्थ्ये चतुर्थी। हितादित्वात् समासः । नाम्नीत्येव । परहितम् । कथं परहितो नाम कश्चित् ? नेयमनादिसंज्ञा ।

९५३ **अद्व्यंजनात् सप्तम्या बहुलम्** ॥३।२।१८॥ अकारान्ताद् व्यंजनाच्च परस्याः सप्तम्या बहुलं लुब् न स्यात् संज्ञायाम्। अदन्त-अरण्येतिलकाः। वनेकशेरुकाः। व्यंजन-युधिष्ठिरः। बहुलवचनात् क्वचिद्विकल्पः। त्वचिसारः। त्वक्सारः।क्वचिद् भवति । जलकुक्कुटः। अद्व्यञ्जनादिति किम् । भूमिपाशः। नाम्नीत्येव । तीर्थकाकः। सप्तम्या इति किम् । गौरखरः । कथं गविष्ठिरः ? विदादिपाठात् ' गवियुधेः स्थिरस्ये ' ति निर्देशाद्वा भविष्यति । नन्वन्तरङ्गत्वादवादेशे कृते व्यंजनान्तत्वादेव सिद्धं किं विदादिपाठाश्रयणेन? नैवम्। 'अन्तरङ्गानपि विधीन् बहिरङ्गा लुब् बाधते' इत्युक्तत्वात् । अन्यथा नदीकुक्कुटिकादिष्वप्यन्तरङ्गत्वाद्यत्वे सत्यलुप् प्रसज्ज्येतेति।

९५४ प्राक्कारस्य व्यंजने ॥३।२।१९॥ राजलभ्यो रक्षानिर्वेशः कारः। प्राचां देशे यः कारस्तस्य नाम्नि-संज्ञायां गम्यमानायामद्व्यञ्जनात् परस्याः सप्तम्या व्यंजनादावुत्तरपदे परे लुब् न स्यात्। मुकुटे मुकुटे कार्षापणः दातव्यः मुकुटेकार्षापणः। व्यंजन-दृषदिमाषकः। वृत्तौ वीप्सायां दानस्य चान्तर्भावः। प्रागिति किम्। यूथे यूथे देयः पशुः यूथपशुः। उदीचां देशे कारोऽर्घ न प्राचाम्। कार इति किम्। अभ्यर्हितेऽभ्यर्हिते देयः पशुः अभ्यर्हितपशुः। प्राचां देशे कारादन्यस्य देयस्यैतन्नाम। व्यञ्जन इति किम्। अविकटेऽविकटे उरणो दातव्यः अविकटोरणः। अविकटोऽविसमूहः। अद्व्यञ्जनादित्येव। नभ्यां नभ्यां दोहो दातव्यः नभ्रीदोहः। पूर्वेणैव सिद्धे नियमार्थोऽयं योगः। त्रिविधश्चात्र नियमः। प्राचामेव, कारस्यैव नाम्नि, व्यंजनादावेवेति। तथा च प्रत्युदाहृतम्।

९५५ तत्पुरुषे कृति ॥३।२।२०॥ अद्व्यञ्जनात् परस्याःसप्तम्याः कृदन्ते उत्तरपदे परे तत्पुरुषे समासे लुब् न स्यात्। नाम्नीति निवृत्तम्। स्तम्बे रमते स्तम्बेरमः। एवं कर्णेजपः। व्यंजन-भस्मनिहुतम्। भस्मनिमीढम्। बहुलाधिकारात् क्वचिदन्यतोऽपि। गोषुचरः। क्वचिन्निषेधो न भवति। मद्रचरः। क्वचिद्विकल्पः। खचरः। खेचरः। क्वचिदन्यदेव। हृदयं स्पृशति हृदिस्पृक्। द्वितीयार्थेऽत्र सप्तमी। तत्पुरुष इति किम्। धन्वनि कारका यस्य स धन्वकारकः। कृतीति किम्। अक्षशौण्डः। अद्व्यञ्जनादित्येव। कुरुषु चरति कुरुचरः। कथं परमे कारके उत्तमे कारके इति विग्रहे परमकारके उत्तमकारके तिष्ठतीत्यत्र सप्तम्या लुब् भवति? उच्यते। अन्तरङ्गत्वात् प्रथमान्तयोरेव परमोत्तमशब्दयोः कारकशब्देन समास इति ताभ्यां सप्तम्येव नास्ति। यद्वा कृतीति कृन्निमित्ताया एव सप्तम्या लुप्प्रतिषेधः। इह तु तिष्ठत्यादिक्रियापेक्षेति लुब् भवत्येव।

९५६ मध्यान्ताद् गुरौ ॥३।२।२१॥ मध्यान्तशब्दाभ्यां परस्याः सप्तम्या गुरुशब्दे उत्तरपदे परे लुब् न स्यात्। मध्येगुरुः। अन्तेगुरुः। मध्यगुरुः, अन्तगुरुरित्यप्यन्ये।

९५७ अमूर्धमस्तकात् स्वाङ्गादकामे ॥३।२।२२॥ मूर्धमस्तकशब्दवर्जितात् स्वाङ्गवाचिनोऽद्व्यञ्जनान्ताच्छब्दात् परस्याः सप्तम्याः कामशब्दादन्यस्मिन्नुत्तरपदे परे लुब् न स्यात्। कण्ठे कालोऽस्य कण्ठेकालः। वहेगडुः। उरसिलोमा। अमूर्धमस्तकादिति किम्। मूर्धशिखः। मस्तकशिखः। स्वाङ्गादिति

किम् । अक्षशौण्डः। अकाम इति किम् । सुखकामः। अव्यञ्जनादित्येव। अङ्गुलित्रणः। बहुलाधिकारात् करकमलम्, गलरोगः , गलव्रणः इत्यादि सिद्धम् ।

९५८ बन्धे घञि न वा ॥३।२।२३॥ बन्धशब्दे घञन्ते उत्तरपदे परे अव्यञ्जनात् परस्याः सप्तम्या वा लुप् न स्यात् । स्वाङ्गादस्वाङ्गाच्चायं विकल्पः । हस्ते बन्धः हस्ते बन्धोऽस्येति वा हस्तेबन्धः, हस्तबन्धः । चक्रेबन्धः , चक्रबन्धः। बन्ध इति किम् । पुटपाकः । घञीति किम् । अजन्ते मा भूत् । बध्नातीति बन्धः, चक्रबन्धः । अदूर्ध्वजनादित्येव । गुप्तिबन्धः ।

९५९ कालात्तनतरतमकाले ॥३।२।२४॥ अव्यञ्जनान्तात् कालवाचिनः शब्दात् परस्याः सप्तम्यास्तनतरतमप्रत्ययेषु कालशब्दे चोत्तरपदे परे वा लुप् न स्यात् । तने-पूर्वाह्णेतनः, पूर्वाह्णतनः। तर-पूर्वाह्णेतराम्। पूर्वाह्णतरे। तम--पूर्वाह्णेतमाम्, पूर्वाह्णतमे । काल-पूर्वाह्णेकाले । पूर्वाह्णकाले । कालादिति किम् । शुक्लतरे । अव्यञ्जनादित्येव । रात्रितरायाम् । 'उत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्य ग्रहणम् न तदन्तस्य' ' न वा खित्कृदन्ते ' इत्यत्रान्तग्रहणात् । तेनात्र तनतरतमप्रत्ययानां स्वरूपेणैव ग्रहणं भवति ।

९६० शयवासिवासेष्वकालात् ॥३।२।२५॥ अकालवाचिनोऽद्व्यञ्जनान्ताच्छब्दात् परस्याः सप्तम्याः शयादिषूत्तरपदेषु लुप् न स्यात् । बिलेशयः, बिलशयः । वनेवासी, वनवासी । ग्रामेवासः, ग्रामवासः । बहुलाधिकारान्मनसिशय इत्यादौ नित्यं लुबभावः । हृच्छय इत्यादौ तु नित्यं लुप् । अकालादिति किम् । पूर्वाह्णशयः । अव्यञ्जनादित्येव । भूमिशयः ।

९६१ वर्षक्षरवराप्सरःशरोरोमनसो जे ॥ ३।२।२६ ॥ वर्ष क्षर वर अप् सरस् शर उरस् मनस् इत्येतेभ्यः परस्याः सप्तम्या जे उत्तरपदे परे वा लुप् स्यात् । वर्षेजः, वर्षजः । क्षरेजः, क्षरजः । वरेजः, वरजः । अप्सुजम् , अब्जम् । सरसिजम् , सरोजम् । शरेजः , शरजः । उरसिजः , उरोजः । मनसिजः, मनोजः ।

९६२ वृप्रावृड्वर्षाशरत्कालात् ॥३।२।२७॥ योगविभागाद्वेति निवृत्तम् । दिवप्रभृतिभ्यः परस्याः सप्तम्या जे उत्तरपदे परे लुप् न स्यात् । दिविजः । प्रावृषिजः । वर्षासुजः । शरदिजः । कालेजः ।

९६३ **अपो यथोनिमतिचरे** ॥३।२।२८॥अप्शब्दात् परस्या सप्तम्या यत्प्रत्यये योनिमतिचरेषु चोत्तरेषदेषु लुब् न स्यात्। अप्सु भवः अप्सव्यः। दिगादित्वाद्यः। अप्सुयोनिः। अप्सुमतिः। अप्सुचरः।

९६४ **नेन्सिद्धस्थे** ॥३।२।२९॥ इन्प्रत्ययान्ते सिद्धस्थ इत्येतयोश्चोत्तरपदयोः सप्तम्या अलुप् न स्यात्। भवत्येवेत्यर्थः। स्थण्डिलशायी। सांकाश्यसिद्धः। समस्थः। शयवासीत्यादियोगद्वयविकल्पो द्युप्राट्टडित्यादियोगद्वयविधिरनेन प्रतिषेधश्च तत्पुरुषे कृतीत्यस्यैव प्रपञ्चः। ते चै विधयः सुसंगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्चेति।

९६५ **षष्ठ्याः क्षेपे** ॥३।२।३०॥ क्षेपे गम्यमाने उत्तरपदे परे षष्ठ्या लुब् न स्यात्। चौरस्यकुलम्। क्षेप इति किम्। ब्राह्मणकुलम्। कथं चौरकुलमिति? तत्त्वाख्यानमेतन्न क्षेपः।

९६६ **पुत्रे वा** ॥३।२।३१॥ पुत्रशब्दे उत्तरपदे क्षेपे गम्यमाने षष्ठ्या लुब् वा न स्यात्। दास्याः पुत्रः, दासीपुत्रः। क्षेप इत्येव। ब्राह्मणपुत्रः। दासीपुत्र इति तु तत्त्वाख्याने। पूर्वेण नित्यं निषेधे प्राप्ते विकल्पः।

९६७ **पश्यद्वाग्दिशो हरयुक्तिदण्डे** ॥३।२।३२॥ पश्यद्वाग्दिक्शब्देभ्यः परस्याः षष्ठ्याः यथासंख्यं हरयुक्तिदंडेषूत्तरपदेषु लुब् न स्यात्। पश्यतोहरः। अनादरे षष्ठीयम्। जनं पश्यन्तमनादृत्य हर्तेत्यर्थः। वाचोयुक्तिः। दिशोदण्डः। संबंधषष्ठ्यौ।

९६८ **अदसोऽकञायनणोः** ॥३।२।३३॥ अदसः परस्याः षष्ठ्या अकञ्प्रत्ययविषये उत्तरपदे आयनण् प्रत्यये च परे लुब् न स्यात्। अमुष्य पुत्रस्य भावः आमुष्यपुत्रिका। चौरादित्वादकञ्। अमुष्यापत्यमामुष्यायणः। नडादित्वादायनण्। अदसोऽनन्तरमायनणो विधानान्न तत्रोत्तरपदसंभवः।

९६९ **देवानांप्रियः** ॥३।२।३४॥ देवानांप्रिय इति षष्ठ्या लुबभावो निपात्यते। देवानांप्रियः। मूर्ख इत्यर्थः।

९७० **शेषपुच्छलाङ्गूलेषु नाम्नि शुनः** ॥ ३।२।३५॥ श्वनशब्दात् परस्याः षष्ठ्याः शेषादिषूत्तरपदेषु संज्ञायां लुब् न स्यात्। शुनः शेपमिव शेपमस्य शुनः शेपः। एवं शुनःपुच्छः। शुनोलाङ्गूलः। शेपःशब्दः सकारान्तोऽप्यस्ति इह त्वकारान्तस्य ग्रहणम्। नाम्नीति किम्। श्वशेपम्। श्वपुच्छम्। अन्ये तु सिंहस्यशेपं

सिंहस्यपुच्छं सिंहस्यलाङ्गूलमित्यत्रापि इच्छन्ति तन्मतसंग्रहार्थं बहुवचनम् अनाम्न्यपि विध्यर्थम् ।

९७१ **वाचस्पतिवास्तोष्पतिदिवस्पतिदिवोदासम्** ॥३।२।३६॥ वाचस्पत्यादयः शब्दाः षष्ठीलुबभावे निपात्यन्ते नाम्नि । वाचस्पतिः। वास्तोष्पतिः। दिवस्पतिः। दिवोदासः । नाम्नीत्येव । वाक्पतिः । वास्तुपतिः। द्युपतिः। द्युदासः।

९७२ **कृतां विद्यायोनिसंबंधे** ॥ ३।२।३७ ॥ ऋकारान्तानां शब्दानां विद्याकृते योनिकृते च संबंधे निमित्ते सति वर्तमानानां संबंधिन्याः षष्ठ्या विद्यायोनिसंबंध एव निमित्ते सति वर्तमाने उत्तरपदे लुब् न स्यात् । होतुःपुत्रः । होतुरन्तेवासी । पितुःपुत्रः । पितुरन्तेवासी । कृतामिति किम् । आचार्यपुत्रः । मातुलान्तेवासी । बहुवचनं विद्यासंबंधनिमित्ते योनिसंबंधनिमित्ते यथासंख्यप्रतिपत्तिव्युदासार्थम् । ऋदुभ्य इति निर्देशे प्राप्ते षष्ठीनिर्देश उत्तरार्थः । विद्यायोनिसंबंध इति किम् । भर्तृगृहम् । पूर्वपदविशेषणं किम् । भर्तृशिष्यः । उत्तरपदविशेषणं किम् । होतृधनम् ।

९७३ **स्वसृपत्योर्वा** ॥३।२।३८॥ विद्यायोनिसंबंधे निमित्ते सति प्रवर्तमानानामृकारान्तानां शब्दानां संबंधिन्याः षष्ठ्याः स्वसृपत्योरुत्तरपदयोर्योनिसंबंधनिमित्तयोः परयोर्लुब् वा न स्यात् । पूर्वेण नित्यं प्रतिषेधे प्राप्ते विकल्पोऽयम् । होतुःस्वसा, होतृस्वसा ।

९७४ **मातृपितुः स्वसुः** ॥३।३।१८॥ मातृपितृभ्यां परस्य स्वसृशब्दसंबंधिनः सकारस्य समासे षः स्यात् । मातृष्वसा । पितृष्वसा । समास इत्येव । मातुः स्वसा । पितुः स्वसा ।

९७५ **संबंधिनां संबंधे** ॥ ७।४।१२१ ॥ संबंधिशब्दानां यत्कार्यमुक्तं तत्संबंधे एव सति भवति नान्यथा । इति वचनात् धान्यमातुः स्वसुर्न षत्वम् । मातृस्वसा ।

९७६ **अलुपि वा** ॥ २।३।१९ ॥ मातृपितृभ्यां परस्य स्वसृशब्दसंबंधिनः सकारस्यालुपि समासे षो वा स्यात् । मातुःष्वसा, मातुःस्वसा । पितुःष्वसा, पितुःस्वसा ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां समास-
प्रकरणेऽलुक्समासः समाप्तः ॥

॥ अथ समासाश्रयविधयः ॥

९७७ **समासेऽग्नेः स्तुतः** ॥२।३।१६॥ अग्निशब्दात् परस्य स्तुत्शब्दसंबंधिनः सकारस्य समासे षः स्यात् । अग्निष्टुत् । अग्निष्टुतौ । अग्निष्टुतः।

९७८ **ज्योतिरायुर्भ्यां च स्तोमस्य** ॥२।३।१७॥ ज्योतिरायुःशब्दाभ्यामग्नेश्च परस्य स्तोमशब्दसंबंधिनः सकारस्य समासे षः स्यात् । ज्योतिःष्टोमः । आयुःष्टोमः । अग्निष्टोमः । समास इत्येव । ज्योतिः स्तोमं दर्शयति ।

९७९ **निनद्याः स्नातेः कौशले** ॥ २।३।२० ॥ निनदीशब्दाभ्यां परस्य स्नातेः संबंधिनः सकारस्य समासे षः स्यात् कौशले–नैपुण्ये गम्यमाने । निष्णः, निष्णातः कटकरणे । नदीष्णः, नदीष्णातः प्रतरणे । कुशल इत्यर्थः। नद्याःस्नातस्य नेच्छन्त्येके । कौशल इति किम् । निस्नातः । नदीस्नः । यः स्रोतसा ह्रियते ।

९८० **प्रतेः स्नातस्य सूत्रे** ॥ २।३।२१ ॥ प्रतेः परस्य स्नातसंबंधिनः सकारस्य समासे षः स्यात् सूत्रेऽभिधेये । विशेषानुपादानाच्चोर्णादिसूत्रं व्याकरणादिसूत्रं च गृह्यते । प्रतिष्णातं सूत्रम् । ऊर्णादिसूत्रं क्षालनेन शुद्धम् व्याकरणादिसूत्रं त्वतिव्याप्त्यादिदोषाभावेन शुद्धमित्यर्थः । सूत्र इति किम् । प्रतिस्नातमन्यत् । प्रत्ययान्तोपादानं प्रत्ययान्तरनिवृत्त्यर्थम् । प्रतिस्नायकं सूत्रम् ।

९८१ **स्नानस्य नाम्नि** ॥२।३।२२॥ प्रतेः परस्य स्नानसंबंधिनः सकारस्य समासे षः स्यात् सूत्रविषये नाम्नि, समुदायश्चेत्सूत्रविषयं नाम भवतीत्यर्थः । प्रतिष्णानं सूत्रमित्यर्थः । नाम्नीति किम् । प्रतिस्नानमन्यत् ।

९८२ **वेः स्त्रः** ॥२।३।२३॥ वेः परस्य स्तृणातेः सकारस्य समासे षः स्यान्नाम्नि–समुदायश्चेत् संज्ञाविषयो भवति । विष्टरो वृक्षः । विष्टरमासनम् । विष्टारपंक्तिश्छन्दः । नाम्नीत्येव । विस्तरो वचसाम् ।

९८३ **अभिनिष्ठानः** ॥२।३।२४॥ अभि निस् इत्येतस्मात् परः ष्ठानशब्दः समासे कृतषत्वो निपात्यते नाम्नि । अभिनिष्ठानो वर्णः । विसर्गस्यैषा संज्ञा । वर्णमात्रस्येत्यन्ये । नाम्नीत्येव । अभिनिःस्तन्यते अभिनिस्तानो मृदङ्गः ।

९८४ **गवियुधेः स्थिरस्य** ॥२।३।२५॥ गवि युधि इत्येताभ्यां परस्य

स्थिरशब्दसंबंधिनः सस्य समासे षः स्यान्नाम्नि । गविष्ठिरः। अस्मादेव निर्देशात् सप्तम्या अलुप् । युधिष्ठिरः ।

९८५ एत्यकः ॥२।३।२६॥ ककारवर्जितान्नाम्यन्तस्थाकवर्गात् परस्य सस्य एकारे परे समासे षः स्यान्नाम्नि । हरिषेणः। श्रीषेणः। एतीति किम् । हरिसिंहः। अक इति किम् । विष्वक्सेनः। नाम्नीत्येव । पृथ्वी सेनाऽस्य पृथुसेनः। नाम्यन्तस्थाकवर्गादित्येव । सर्वसेनः ।

९८६ भादितो वा ॥२।३।२७॥ नक्षत्रवाचिन इकारान्तात् परस्य सकारस्येकारे परे समासे षो वा स्यान्नाम्नि ।

९८७ ङ्यापो बहुलं नाम्नि ॥२।४।९९॥ ङ्यन्तस्य आबन्तस्य च नाम्न उत्तरपदे परतः संज्ञायां ह्रस्वः स्याद् बहुलम् । इति ह्रस्वे–रोहिणिषेणः, रोहिणिसेनः। इत इति किम् । पुनर्वसुषेणः। अत्र पूर्वेण नित्यमेव ।

९८८ विकुशमिपरेः स्थलस्य ॥२।३।२८॥ वि कु शमि परि इत्येतेभ्यः परस्य स्थलशब्दसंबंधिनः सकारस्य समासे षः स्यात् । नाम्नीति निवृत्तम् । विगतं वीनां पक्षिणां वा स्थलं विष्टलम् । कुत्सितं कोः पृथिव्या वा स्थलं कुष्टलम् । शमीनां स्थलं शमिष्टलम् । ङ्यापो बहुलं नाम्नीति ह्रस्वः। सूत्रे ह्रस्वस्य शमिशब्दस्योच्चारणाद् दीर्घान्न भवति । शमीस्थलम् । दीर्घादप्येके । परिगतं स्थलं परिष्टलम् । एभ्य इति किम् । भूमिस्थलम् ।

९८९ कपेर्गोत्रे ॥ २।३।२९ ॥ कपिशब्दात् परस्य स्थलशब्दसंबंधिनः सकारस्य समासे षः स्यात् गोत्रेऽभिधेये । कपिष्टलो नाम गोत्रस्य प्रवर्तयिता । यस्य कापिष्टलिः पुत्रः । गोत्रमिह लौकिकं गृह्यते । लोके चाद्यपुरुषा येऽपत्यसंततेः प्रवर्तयितारो यन्नाम्नोऽपत्यसंततिर्व्यपदिश्यते तेऽभिधीयन्ते । गोत्र इति किम् । कपीनां स्थलं कपिस्थलम् ।

९९० गोम्बाम्बसव्यापद्विस्त्रिभूम्यग्निशेकुशंकुकङ्गुमञ्जिपुञ्जिबर्हिः–परमेदिवेः स्थस्य ॥२।३।३०॥ गो अम्बा आम्ब सव्य अप द्वि त्रि भूमि अग्नि शेकु शङ्कु कु अङ्गु मञ्जि पुञ्जि बर्हिस् परमे दिवि इत्येतेभ्यः परस्य स्थशब्दसंबंधिनः सकारस्य समासे षः स्यात् । गोष्ठम् । अम्बाष्ठः। श्लिष्टनिर्देशाद्भाभ्यामपि भवति।

आम्बष्ठः । सव्यष्ठः । अपष्ठः । द्विष्ठः । त्रिष्ठः । भूमिष्ठः । अग्निष्ठः । शेकुष्ठः । शंकुष्ठः । कुष्ठः । अङ्गुष्ठः । मञ्जिष्ठः । पुञ्जिष्ठः । बर्हिष्ठः । परमेष्ठः । दिविष्ठः । अत एव निपातनात् सप्तम्या अलुप् । तत्पुरुषे कृतीति तु नेन्सिद्धेति प्रतिषेधान्नोपतिष्ठते ।

९९१ **निर्दुस्सोः सेधसंधिसान्नाम्** ॥ २।३।३१ ॥ निरादिभ्यः परेषां सेधादीनां सस्य समासे षः स्यात् । वचनभेदाद्यथासंख्याभावः । निःषेधः । दुःषेधः । सुषेधः । निःषन्धिः । दुःषन्धिः । सुषन्धिः । निःषाम । दुःषाम । सुषाम ।

९९२ **प्रष्ठोग्रगे** ॥२।३।३२॥ प्रात् परस्य स्थसकारस्य षो निपात्यते अग्रगे-अग्रगामिन्यभिधेये । प्रष्ठः अग्रगामी । प्रस्थोऽन्यः ।

९९३ **भीरुष्ठानादयः** ॥२।३।३३॥ भीरुष्ठानादयः शब्दाः समासे कृतषत्वाः साधवो भवन्ति । भीरूणां स्थानं भीरुष्ठानम् । अङ्गुलिपङ्क्ता यवागूः । समास इत्येव । भीरोः स्थानमित्यादि । बहुवचनमाकृतिगणार्थम् ।

९९४ **ह्रस्वान्नाम्नस्ति** ॥२।३।३४॥ नाम्नो विहिते तकारादौ प्रत्यये परे ह्रस्वान्नामिन उत्तरस्य सस्य षः स्यात् । तल्त्वतस्त्यतयतरप्तमपः प्रयोजयन्ति । सर्पिष्टा । सर्पिष्ट्वम् । सर्पिष्टः । निष्टचः । चतुष्टयः । सर्पिष्टरम् । सर्पिष्टमम् ' असिद्धं बहिरङ्गम् अन्तरङ्गे ' इति प्लुतत्वस्यासिद्धत्वादिहापि भवति । सर्पि३ष्ट्व । ह्रस्वादिति किम् । गीस्त्वम् । नामिन इत्येव । तेजस्ता । नाम्न इति किम् । भिन्धुस्तराम् । विहितविशेषणं किम् । सर्पिस्तत्र । तीति किम् । सर्पिस्साद्भवति ।

९९५ **निष्प्राग्रेऽन्तःखदिरकाश्र्याम्रशरेक्षुप्लक्षपीयुक्षाभ्यो वनस्य** ॥२।३।६६॥ निरादिभ्यः परस्य वनशब्दनकारस्य णः स्यात् । बहुवचनं व्याप्त्यर्थम् । तेन संज्ञायामसंज्ञायां च भवति । अन्यथा हि कोटरमिश्रकसिध्रक–इत्यादिवक्ष्यमाणनियमबलेन संज्ञायां न स्यात् । निर्वणम् । प्रवणम् । अग्रेवणम् । पारेमध्येऽग्रेऽन्तः षष्ठ्या वेत्यव्ययीभावः । तत्संनियोगे च पूर्वपदस्यैत्वम् । अन्तर्वणम् । खदिरवणम् । काश्र्यवणम् । वचनसामर्थ्याच्छकारव्यवधानेऽपि भवति । आम्रवणम् । शरवणम् । इक्षुवणम् । प्लक्षवणम् । पीयुक्षावणम् । पीयुक्षाशब्दोऽव्युत्पन्न आबन्तः । (द्राक्षापर्यायो द्राक्षाविशेषो वा)

९९६ **त्रित्रिस्वरौषधिवृक्षेभ्यो नवाऽनिरिकादिभ्यः** ॥ २।३।६७ ॥

द्विस्वरेभ्यस्त्रिस्वरेभ्यश्च इरिकादिवर्जितेभ्य ओषधिवाचिभ्यो वृक्षवाचिभ्यश्च परस्य वनशब्दसंबंधिनो नस्य णो वा स्यात् । ओषधि–दूर्वावणम्, दूर्वावनम्। मूर्वावणम्, मूर्वावनम् । वृक्ष–शिग्रुवणम्, शिग्रुवनम् । बदरीवणम् , बदरीवनम् ।

'ओषध्यः फलपाकान्ता लतागुल्माश्च वीरुधः ।
फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः'॥

इति यद्यपि भेदोऽस्ति तथाप्यतिबहुत्वार्थबहुवचनबलाद् वृक्षग्रहणे वनस्पतीनामपि ग्रहणं भवति । अत एव च यथासंख्यमपि न भवति । तथा संज्ञायामसंज्ञायां च भवति। द्वित्रिस्वरेति किम्। देवदारुवनम्। ओषधिवृक्षेभ्य इति किम्। विदारीवनम् (विदारी लताविशेषः) शिरीषाणामदूरभवो ग्रामोऽपि शिरीषास्तेषां वनं शिरीषवनम् । अनिरिकादिभ्य इति किम् । इरिकावनम् । इरिकादिराकृतिगणः । इरिकादिविशेषवर्जनात् विशेषाणामेवेह विधिः । तेनेह न भवति । वृक्षवनम् ।

९९७ **गिरिनद्यादीनाम्** ॥२।३।६८॥ गिरिनदीत्यादीनां नकारस्य णो वा स्यात् । गिरिणदी, गिरिनदी । बहुवचनाद्यथादर्शनमन्येऽपि भवन्ति ।

९९८ **पानस्य भावकरणे** ॥२।३।६९॥ पूर्वपदस्थेभ्यो रषृवर्णेभ्यः परस्य भावे करणे च यः पानशब्दस्तत्संबंधिनो नस्य णो वा स्यात् । भावे–क्षीरपाणं क्षीरपानं वर्तते । करणे–क्षीरपाणं क्षीरपानं भोजनम्। भावकरण इति किम् । पीयतेऽस्मिन्निति पानः । क्षीरपानो घोषः ।

९९९ **देशे** ॥२।३।७०॥ पूर्वपदस्थाद्रषृवर्णात् परस्य पानशब्दनकारस्य णो नित्यं स्यात् देशे–समुदायेन चेद्देशो गम्यते । योगविभागान्नवेति निवृत्तम् । पीयत इति पानम् । क्षीरं पानं येषां क्षीरपाणा उशीनराः। सुरापाणाः प्राच्याः। तात्स्थ्यान्मनुष्याभिधानेऽपि देशो गम्यते । देशे इति किम् । दाक्षीणां पानं दाक्षिपानम् ।

१००० **ग्रामाग्राच्चियः** ॥२।३।७१॥ ग्रामाग्राभ्यां परस्य नियो नकारस्य णः स्यात् । ग्रामणीः । अग्रणीः। ग्रामाग्रादिति किम् । खरनीः। मेषनीः।

१००१ **वाह्याद्वाहनस्य** ॥२।३।७२॥ वोढव्यं वाह्यम् । तद्वाचिनो रेफादिमतः पूर्वपदात् परस्य वाहनशब्दसंबंधिनो नकारस्य णः स्यात् । उह्यतेऽनेनेति वहनम् । प्रज्ञादित्वात् स्वार्थिकोऽण् । अतो वा निपातनादुपान्त्यदीर्घत्वम् ।

इक्षुवाहणम् । शरवाहणम् । वाह्यादिति किम् । सुरवाहनम् । संबंधमात्रमत्र विवक्षितम् । नरवाहनः । नात्र वाह्यात्परं वाहनं किं तर्हि वाहनात् ।

१००२ वोत्तरपदान्तनस्यादेरयुवपकाहः ॥२।३।७५॥ पूर्वपदस्थाद्रषृवर्णात् परस्योत्तरपदान्तभूतस्य तथा नामस्य स्यादेश्च नकारस्य णो वा स्यात्, न चेत् स नकारो युवन्पकाहनशब्दसंबंधी भवति । उत्तरपदान्त–व्रीहिवापिणौ, व्रीहिवापिनौ । न–व्रीहिवापाणि, व्रीहिवापानि कुलानि । इवु व्याप्तावित्यस्यानटि प्रेण्वनं प्रेन्वनं, हिवु प्रीणने पिवु सेचने इत्यनयोः शतरि प्रहिण्वन् प्रहिन्वन् । प्रपिण्वन् प्रपिन्वन् । हिवोरेव ह्यस्तन्यां प्राहिण्वन् । प्राहिन्वन् । बहुलवचनादनाम्नापि समासः । समासे हि पूर्वोत्तरपदव्यवहारः । पुरुषश्च वारि चेति पुरुषवारिणी इत्यत्र तु परमपि विकल्पं बाधित्वान्तरङ्गत्वादेकपदाश्रितं ' रषृवर्णात् ' इत्यादिना नित्यमेव णत्वम् । स्यादि–व्रीहिवापेण, व्रीहिवापेन । व्रीहिवापान् माषवापानित्यत्र तु अनन्त्यस्येत्यधिकाराद्न भवति । उत्तरपदेति किम् । गर्गाणां भगः गर्गभगः । सोऽस्या अस्तीति समासादिन् । गर्गभगिणी । अत्रोत्तरपदस्यान्तो नकारो न भवतीति विकल्पो न भवति । एकपदस्थत्वात्तु मातृभोगीण इत्यादिवत् नित्यमेव णत्वं भवति । अन्तादिग्रहणं किम् । गर्गाणां भगिनी गर्गभगिनी । अत्र न नकारोऽन्तः किंतु ङीप्रत्ययः । यद्येवं माषवापिणी, माषवापिनीत्यत्र नकारस्योत्तरपदान्तत्वाभावात् विकल्पो न स्यात् । उच्यते । ' गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् प्रत्ययोत्पत्तेः ' इति न्यायात् प्रागेव स्त्रीप्रत्ययात् अन्तरङ्गत्वादश्वक्रीतीत्यादावकारान्तेनेव क्रीतशब्देन नकारान्तेन वापिनशब्देनोपपदसमासः पश्चात् स्त्रीप्रत्ययः । विभक्त्यन्तत्वाभावेऽपि च रूढत्वादुत्तरपदत्वम् । ततश्चोत्तरपदस्यान्तो नकार इति णत्वविकल्पो भवति । अयुवपकाह इति किम् । आर्ययूना । प्रपकानि । दीर्घाह्नी शरत् । अलचटतवर्गशसान्तर इत्येव । गर्दभवाहिनौ ।

१००३ ष्या पुत्रपत्योः केवलयोरीच् तत्पुरुषे ॥ २।४।८३ ॥ मुख्य आबन्तः ष्यः पुत्रपतिशब्दयोः परयोस्तत्पुरुषे समासे ईच् स्यात् । चकारो ' वेदृतः ' इत्यादौ विशेषणार्थः । कारीषगन्ध्यायाः पुत्रः कारीषगन्धीपुत्रः । एवं कारीषगन्धीपतिः । ष्येति किम् । गौकक्ष्यापुत्रः । पुत्रपत्योरिति किम् । कारीषगन्ध्याकुलम् । केवलयोरिति किम् । कारीषगन्ध्यापुत्रकुलम् । कारीषगन्धीपुत्रस्य कुलमिति विग्रहे तु कारीषगन्धीपुत्रकुलमित्यपि भवति । तत्पुरुष इति किम् ।

कारीषगन्ध्यापतिरयं ग्रामः । मुख्य इत्येव । अतिक्रान्ता कारीषगन्ध्यामतिकारीषगन्ध्या, तस्याः पुत्रोऽतिकारीषगन्ध्यापुत्रः ।

१००४ **बन्धौ बहुव्रीहौ** ॥२।४।८४॥ मुख्य आबन्तः ष्यो बन्धुशब्दे केवले परतो बहुव्रीहौ समासे ईच् स्यात् । कारीषगन्ध्या बन्धुरस्य कारीषगन्धीबन्धुः। बन्धाविति किम् । कारीषगन्ध्यापतिर्ग्रामः। केवल इत्येव । कारीषगन्ध्याबन्धुकुलः । कारीषगन्धीबन्धुकुल इत्यत्र कारीषगन्धीबन्धुः कुलमस्येति विग्रहः । बहुव्रीहाविति किम् । कारीषगन्ध्याया बन्धुः कारीषगन्ध्याबन्धुः । मुख्य इत्येव । अतिकारीषगन्ध्या बन्धुरस्य अतिकारीषगन्ध्याबन्धुः। कारीषगन्ध्यामतिक्रान्तः स बंधुरस्य अतिकारीषगन्ध्यबंधुः । अत्रापि न भवति । कथमिति चेत् ।

१००५ **गौणो ङ्यादिः** ॥७।४।११६॥ ङीमारभ्य ष्यं यावत् ङ्यादिः प्रत्ययः स गौणः सन् प्रकृत्यादेः समुदायस्य विशेषणं भवति नोनाधिकस्य । इति वचनादत्र ष्येणाधिकस्याग्रहणात् ।

१००६ **मातमातृमातृके वा** ॥२।४।८५॥ मुख्य आबन्तः ष्यो मातादिषु केवलेषु परेषु बहुव्रीहौ समासे ईज्वा स्यात् । कारीषगन्ध्या माता यस्य स कारीषगन्धीमातः, कारीषगन्ध्यामातः । कारीषगन्ध्या माता यस्य स कारीषगन्धीमाता, कारीषगन्ध्यामाता । कारीषगन्धीमातृकः, कारीषगन्ध्यामातृकः । मातेति निर्देशान्मातृशब्दस्य पुत्रप्रशंसामन्त्र्यमन्तरेणापि पक्षे मातादेशः । अन्यथा मातृशब्देनैव गतत्वान्मातशब्दोपादानमनर्थकं स्यात् । मातृमातृकशब्दयोश्च भेदेनोपादानादृदन्तलक्षणः कप्रत्ययोऽपि विकल्प्यते ।

१००७ **वेदृतोऽनव्ययष्वृदीच्ङीयुवः पदे** ॥२।४।९८॥ ईकारोकारयोरुत्तरपदे परतो ह्रस्वो वा स्यात् न चेत्तावव्ययौ ष्वृत् इज्रूपौ ङीरूपौ इयुवस्थानौ च स्याताम् । लक्ष्मिपुत्रः , लक्ष्मीपुत्रः । ब्रह्मबन्धुपुत्रः , ब्रह्मबन्धूपुत्रः । इदृत इति किम् । खट्वापादः । अव्ययादिवर्जनं किम् । अव्यय–काण्डीभूतम् । ष्वृत्–इन्द्रहूपुत्रः । ईच्–कारीषगन्धीपुत्रः । ङी–गार्गीपुत्रः । इयुव्–श्रीकुलम् । भ्रूकुलम् । उत्तरपद इति किम् । अग्नी पश्य ।

१००८ **त्वे** ॥२।४।१००॥ ङ्यावन्तस्य त्वे प्रत्यये बहुलं ह्रस्वः स्यात् । रोहिण्या भावः रोहिणित्वम् , रोहिणीत्वम् । अजत्वम् । अजात्वम् वा ।

१००९ भ्रुवोऽच्च कुंसकुटयोः ॥२।४।१०१॥ भ्रूशब्दस्य कुंसकुटयोरुत्तरपदयोः परयोर्ह्रस्वोऽकारश्च स्यात्। भ्रुकुंसः, भ्रकुंसः। भ्रुकुटिः, भ्रकुटिः। भ्रूकुंसभ्रूकुटिशब्दावपीच्छन्त्यन्ये।

१०१० मालेषीकेष्टकस्यान्तेऽपि भारितूलचिते ॥२।४।१०२॥ मालाइषीकाइष्टकाशब्दानां केवलानामन्ते वर्तमानानां च भारिनतूलचितशब्देषूत्तरपदेषु परेषु ह्रस्वः स्याद्यथासंख्यम्। मालं बिभर्त्येवंशीलः मालभारी। उत्पलमालभारी। मालभारिणी। उत्पलमालभारिणी। इषीकतूलम्। मुञ्जेषीकतूलम्। इष्टकचितम्। पक्वेष्टकचितम्। इदमेवान्तग्रहणं ज्ञापकम् ग्रहणवता नाम्ना न तदन्तविधिरिति। तेन दिग्धपादोपहतः सौत्रनाडिरित्यादौ पदादेशायनण्प्रत्ययादयो न भवन्ति।

१०११ गोण्या मेये ॥२।४।१०३॥ गोणीशब्दस्य मानवाचिन उपचारान्मेये वर्तमानस्य ह्रस्वः स्यात्। गोण्या मितो गोणिः। मेय इति किम्। गोणी।

१०१२ वर्चस्कादिष्ववस्करादयः ॥३।२।४८॥ कुत्सितं वर्चो वर्चस्कम् तदादिष्वर्थेष्ववस्करादयः शब्दाः कृतशषसाद्युत्तरपदाः साधवः स्युः। वर्चस्केऽवस्करः। अवकीर्यतेऽवस्करः अन्नमलम्। तत्संबन्धात्तद्देशोऽप्यवस्करः। अवकरोऽन्यः। अपस्करो रथाङ्गे। अपकरोऽन्यः। बहुवचनमाकृतिगणार्थम्। [1]तेनावोवचपरोवरादयोऽपि द्रष्टव्याः।

१०१३ ऋदुदित्तरतमरूपकल्पब्रुवचेलड्गोत्रमतहते वा ह्रस्वश्च ॥३।२।६३॥ ऋदिदुदिच्च परतः स्त्रीलिङ्गशब्दस्तरादिषु प्रत्ययेषु ब्रुवादिषु च रूपेकार्थेषूत्तरपदेषु ह्रस्वान्तः पुंवच्च वा स्यात्। तर–पचन्तितरा, पचत्तरा, पचन्तीतरा। तम–पचन्तितमा, पचत्तमा। पचन्तीतमा। रूप–पचन्तिरूपा, पचद्रूपा, पचन्तीरूपा। कल्प–पचन्तिकल्पा, पचत्कल्पा, पचन्तीकल्पा। ब्रुव–पचन्ती चासौ ब्रुवा च पचन्तिब्रुवा, पचद्ब्रुवा, पचन्तीब्रुवा। चेलट् टिद्वचनं ङ्यर्थम्। पचन्ती चासौ चेली च पचन्तिचेली, पचच्चेली, पचन्तीचेली। गोत्र–पचन्ती चासौ गोत्रा च पचन्तिगोत्रा, पचद्गोत्रा, पचन्तीगोत्रा। मत–पचन्ती चासौ मता च पचन्ति-

---

१ आञ्चतीति अवाञ्चतीति आङ् च अवाङ् च 'चवर्गदशहः'-अत् आचोवचमिति निपात्यम्। परश्चावरश्च पराङ् च अवराङ् च इति वा परोवरम्।

मता, पचन्मता पचन्तीमता। हत–पचन्ती चासौ हता च पचन्तिहता, पचद्धता, पचन्तीहता। ब्रुवादयः कुत्साशब्दाः, 'निन्द्यं कुत्सनैरिति च समासः। ऋदुदिदिति किम्। कुमारितरा। (अत्रोत्तरसूत्रेण ह्रस्वः) एकार्थ इत्येव। पचन्त्या हता पचन्तीहता। तरादिष्विति किम्। पचत्पाशा।

१०१४ ङ्यः ॥३।२।६४॥ ङ्यन्तस्य परतः स्त्रीलिङ्गस्य तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदेषु एकार्थेषु ह्रस्वोऽन्तादेशः स्यात्। गौरितरा। गौरितमा। नर्तकिरूपा। कुमारिकल्पा। ब्राह्मणिब्रुवा। गार्गिचेली। ब्राह्मणिगोत्रा। गार्गिमता। गौरिहता। परत्वाद्यथाप्राप्तं पुंवद्भावं बाधते। ङ्य इति किम्। मद्रिकातरा। परतःस्त्रिया इत्येव। बदरीतरा। एकार्थ इत्येव। ब्राह्मण्या हता ब्राह्मणीहता। 'नवैकस्वराणाम्' इत्युत्तरत्र वचनादनेकस्वरस्यैवायं विधिः।

१०१५ भोगवद्गौरिमतोर्नाञ्नि ॥३।२।६५॥ भोगवद्गोरिमतोः संज्ञायां वर्तमानयोर्ङीप्रत्ययस्य तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदेषु एकार्थेषु ह्रस्वः स्यात्। भोगवतितरा। गौरिमतितमा। भोगवतिरूपा। गौरिमतिकल्पा। भोगवतिब्रुवा। गौरिमतिचेली। भोगवतिगोत्रा। गौरिमतिमता। भोगवतिहता। नाञ्नीति किम्। भोगवतितरा, भोगवत्तरा, भोगवतीतरेत्यादि। उदित्वात् पूर्वेण त्रैरूप्यम्।

१०१६ नवैकस्वराणाम् ॥३।२।६६॥ बहुवचनात् परतः स्त्रीति निवृत्तम्। सामान्येन तु विधानम्। स्त्र्येकार्थ इत्यनुवर्तते। एकस्वरस्य ङ्यन्तस्य तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदेषु स्त्र्येकार्थेषु ह्रस्वोऽन्तादेशः स्यात्। स्त्रितरा स्त्रीतरा। श्वस्य भार्या श्वी, श्वितमा, श्वीतमा। अस्यापत्यं स्त्री ई, इरूपा, ईरूपा। कस्य भार्या की, किकल्पा, कीकल्पा। श्विब्रुवा, श्वीब्रुवा। इचेली, ईचेली। किगोत्रा कीगोत्रा। स्त्रिमता, स्त्रीमता। स्त्रिहता, स्त्रीहता। एकस्वराणामिति किम्। कुटीतरा। ङ्य इत्येव। श्रीतरा। एकार्थ इत्येव। स्त्रिया हता स्त्रीहता। नित्यदितामनेकस्वराणामपीच्छन्त्येके। तन्मते आमलकितरेत्याद्यपि भवति।

१०१७ ऊङः ॥३।२।६७॥ ऊङन्तस्य तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदेषु स्त्र्येकार्थे ह्रस्वो वा स्यात्। ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरेत्यादि। एकार्थ इत्येव। भीर्वा हता भीरूहता।

१०१८ **नाम्नि** ॥३।२।७५॥ अष्टनशब्दस्योत्तरपदे परे संज्ञायां दीर्घः स्यात् । अष्टौ पदान्यत्र अष्टापदः कैलासः । अष्टापदं सुवर्णम् । अष्टावक्रो मुनिः। नाम्नीति किम् । अष्टगुणमैश्वर्यम् ।

१०१९ **कोटरमिश्रकसिध्रकपुरगसारिकस्य वणे** ॥३।२।७६॥ कोटरादीनां कृतणत्वे वनशब्दे उत्तरपदे दीर्घः स्यात् संज्ञायाम् । कोटरावणम् । मिश्रकावणम् । सिध्रकावणम् । पुरगावणम् । सारिकावणम् । पूर्वपदस्यान्नाम्न्यग इति णत्वे सिद्धे कृतणत्वस्य वनशब्दस्य निर्देशो नियमार्थः, तेन पूर्वपदस्थादिति सूत्रेण वनशब्दस्य णत्वमाकारसंनियोग एव भवति । ततश्च कुबेरवनमित्यादौ संज्ञायामपि णत्वं न भवति ।

१०२० **अञ्जनादीनां गिरौ** ॥ ३।२।७७ ॥ अञ्जनादीनां गिरावुत्तरपदे दीर्घः स्यान्नाम्नि । अञ्जनागिरिः । बहुवचनमाकृतिगणार्थम् ।

१०२१ **अनजिरादिबहुस्वरशरादीनां मतौ** ॥३।२।७८॥ अजिरादिवर्जबहुस्वराणां शरादीनां च मतौ प्रत्यये दीर्घः स्यान्नाम्नि । बहुस्वर–उदुंबरावती। शरादि–शरावती । अजिरादिराकृतिगणः । नाम्नीत्येव । वलयवती कन्या ।

१०२२ **ऋषौ विश्वस्य मित्रे** ॥३।२।७९॥ विश्वशब्दस्य मित्रे उत्तरपदे ऋषावभिधेये संज्ञायां दीर्घः स्यात् । विश्वामित्रो नामर्षिः । ऋषाविति किम् । विश्वमित्रो माणवकः । नाम्नीत्येव । विश्वं मित्रमस्य विश्वमित्रो मुनिः ।

१०२३ **नरे** ॥ ३।२।८० ॥ विश्वशब्दस्य नरशब्दे उत्तरपदे संज्ञायां दीर्घः स्यात् । विश्वे नरा अस्य विश्वानरो नाम कश्चित् । नर इति किम् । विश्वसेनः । नाम्नीत्येव । विश्वनरो राजा ।

१०२४ **वलच्यपित्रादेः** ॥३।२।८२॥ वलच्प्रत्यये परे पित्रादिवर्जितानां स्वरान्तानां शब्दानां दीर्घोऽन्तादेशः स्यात् । आसुतिः सुरा साऽस्यास्तीति आसुतीवलः। एवं कृषीवलः । अपित्रादेरिति किम् । पितृवलः । चकारः किम् । उत्तरपदे मा भूत् । कायवलम् ।

१०२५ **चितेः कचि** ॥३।२।८३॥ चितिशब्दस्य कचि प्रत्यये परे दीर्घः स्यात् । एका चितिरस्मिन् एकचितीकः ।

१०२६ **स्वामिचिन्हस्याविष्टाष्टपञ्चभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य कर्णे** ॥३।२।८४॥ स्वामी चिन्ह्यते येन तत् स्वामिचिन्हम्। तद्वाचिनो विष्टादिवर्जितस्य कर्णशब्दे उत्तरपदे परे दीर्घोऽन्तादेशः स्यात्। दात्रमिव दात्रम्। दात्रं चिन्हं कर्णे यस्य स दात्रमिव वा कर्णौ यस्य स दात्राकर्णः पशुः। एवं शंकूकर्णः। द्विगुणाकर्णः। ह्यङ्गुलाकर्णः। स्वामिचिन्हस्येति किम्। शोभनकर्णः। स्वामिग्रहणं किम्। लम्बकर्णः। चिन्हग्रहणं किम्। वाहनस्य कर्णः वाहनकर्णः। विष्टादिवर्जनं किम्। विष्टकर्णः। कर्ण इति किम्। [1]चक्रसक्थः।

१०२७ **गतिकारकस्य नहिवृतिवृषिव्यधिरुचिसहितनौ कौ** ॥ ३।२।८५॥गतिसंज्ञस्य कारकवाचिनश्च नह्यादिषु क्विबन्तेषूत्तरपदेषु परेषु दीर्घोऽन्तादेशः स्यात्। उपनह्यति उपनह्यते वा उपानत्। परीणत्। नीवृत्। प्रावृट्। श्वावित्। नीरुक्। [2]तुरासट्। परीतत्। गमां कावितीति नलोपः। गतिकारकस्येति किम्। पटुरुक्। केचित्तु रुजाविच्छन्ति न रुचौ। तेन रुजरुच्योर्मतभेदेन विकल्पः सिद्धः। निरुक्। नीरुक्। कावितीति किम्। उपनद्धम्। इह किग्रहणादन्यत्र धातुग्रहणे तदादिविधिर्लभ्यते। तेनायस्कृतम् अयस्कार इत्यादौ सकारः सिद्धो भवति। अन्यथा ह्ययस्कृदित्यत्रैव स्यात्।

१०२८ **घञ्युपसर्गस्य बहुलम्** ॥३।२।८६॥ घञन्ते उत्तरपदे परे उपसर्गस्य बहुलं दीर्घोऽतादेशः स्यात्। नीक्लेदः। नीवारः। प्रावारः। क्वचिन्न भवति। विषदनं विषादः। निषादः। क्वचिद्विकल्पः। प्रतीवेशः। प्रतिवेशः। क्वचिद्विषयभेदेन। प्रासादो गृहम्। उपसर्गस्येति किम्। चन्दनसारः। घञीति किम्। अवसायः। बहुलवचनादनुपसर्गस्यापि अघञ्यपि च भवति। दक्षिणापथः। क्वचिद्विकल्पः। अन्धतमः, अन्धातमः। क्वचिद्विषयभेदेन। अधीदन्तः। अधीकर्णः। अधीकण्ठः। अधीप्रादः। एते आधिक्ये। अन्यत्र अधिदन्त इत्यादि भवति। क्वचिदनुत्तरपदेऽपि विकल्पः। पूरुषः पुरुषः। काशशब्दे च घञन्ते विकल्पः। नीकाशः, निकाशः। अजन्ते तूत्तरो विधिः।

१०२९ **नाम्निनः काशे** ॥३।२।८७॥ नाम्यन्तस्योपसर्गस्य 'अच्' ७-१-४९

---

१ चक्रं सक्थनि अस्य 'सक्थ्यक्ष्णः स्वाङ्गे टः'।

२ तुरेर्जुहोत्यादिपाठात् तुतोर्ति 'नाम्युपान्त्य' इति कः। तुर सहति तुरासट्। तुरासाडिति तु छान्दसः॥

इत्यजन्ते काशशब्दे उत्तरपदे परे दीर्घोऽन्तादेशः स्यात् । निकाशते नीकाशः। बहुलाधिकारान्निकाश इत्यपि । नामिन इति किम् । प्रकाशते इति प्रकाशः ।

१०३० दस्ति ॥३।२।८८॥ दा इत्येतस्य यस्तकारादिरादेशस्तस्मिन् परे नाम्यन्तस्योपसर्गस्य दीर्घोन्तादेशः स्यात् । नीत्तम् । वीत्तम् । द इति किम् । वितीर्णम् । तीति किम् । सुदत्तम् । नामिन इत्येव । प्रत्तम् ।

१०३१ अपील्वादेर्वहे ॥३।२।८९॥ पील्वादिवर्जितस्य नाम्यन्तस्य वहे उत्तरपदे दीर्घोऽन्तादेशः स्यात् । वहतीति वहम् । अच् प्रत्ययः । ऋषीणां वहम् ऋषीवहम् । मुनीवहम् । कपीवहम् । एवंनामानि नगराणि । घान्ते तु वहशब्दे ऋषीवहः । अपील्वादेरिति किम् । पीलुवहम् ।

१०३२ शुनः ॥३।२।९०॥ श्वन् इत्येतस्योत्तरपदे दीर्घोऽन्तादेशः स्यात्। शुनोदन्तः श्वादन्तः । एवं श्वादंष्ट्रा । बहुलाधिकारात् क्वचिद्विकल्पः । श्वापुच्छम् , श्वपुच्छम् । क्वचिद्विषयान्तरे । शुनः पदमिव पदमस्य श्वापदम् व्याघ्रादिः । क्वचिन्न भवति । श्वकल्पः ।

१०३३ एकादश षोडश षोडन् षोढा षड्ढा ॥ ३।२।९१ ॥ एकादयः शब्दा दशादिषु उत्तरपदादिषु कृतदीर्घत्वादयो निपात्यन्ते । एकोत्तरा दश, एकं च दश च वा एकादश । अत्रैकस्य दशशब्दे उत्तरपदे दीर्घः। षडुत्तरा दश षट् च दश च वा षोडश । अत्र षषोऽन्तस्योत्वम्। उत्तरपददकारस्य च डकारः। षड् दन्ता अस्य षोडन् । अत्र दन्तशब्दस्य दत्रादेशे कृते दस्य डत्वं षषोऽन्तस्योत्वम् । एवं षोडन्तौ षोडन्तः । स्त्रियां तु तु षोडती । अन्ये तु दत्रादेशे कृते षोडन्निति शब्दान्तरं नकारान्तं राजन्शब्दवन्निपातयन्ति । ततश्च षोडानमिच्छतीति क्यनि नकारलोपे ईत्वे च षोडीयतीति सिध्यतीति मन्यन्ते । षड्भिः प्रकारैः षोढा, षड्ढा। अत्र धाप्रत्यये षषोऽन्तस्य वोत्वं धकारस्य तु नित्यं ढत्वम् । यतु षड्ढेति रूपं न तत् धाप्रत्यये किंतु षड् दधाति धयति वेति ' आतो डोऽहावामः' इति डे कृते स्त्रियामापि च भवति । निपातनस्य चेष्टविषयत्वादत्रोत्वढत्वे न भवतः ।

१०३४ द्वित्र्यष्टानां द्वात्रयोऽष्टाः प्राक्शतादनशीतिबहुव्रीहौ ॥३।२।९२॥ द्वि त्रि अष्टन् इत्येतेषां यथासंख्यं द्वा त्रय अष्टा इत्येते आदेशाः प्राक्

शतात् संख्यायामुत्तरपदे स्युः अनशीति बहुव्रीहौ–अशीतिबहुव्रीहिसमासविषयं चोत्तरपदं वर्जयित्वा । द्वाभ्यामधिका दश द्वौ चेति दश च वा द्वादश । त्रयोदश । अष्टादश । द्वित्र्यष्टानामिति किम् । पञ्चदश । प्राक्शतादिति किम् । द्विशतम् । अनशीतिबहुव्रीहाविति किम् । अशीतिः । द्वौ वा त्रयो वा द्वित्राः । प्राक्शतादित्यधेः संख्यापरिग्रहादिह न भवति । द्वैमातुरः ।

१०३५ चत्वारिंशदादौ वा ॥३।२।९३॥ द्वित्र्यष्टानां माक् शताच्चत्वारिंशदादौ संख्यायामुत्तरपदे यथासंख्यं द्वा त्रयस् अष्टा इत्येते आदेशा वा स्युः अनशीतिबहुव्रीहौ । द्वाभ्यामधिका द्वौ च चत्वारिंशच्चेति वा द्वाचत्वारिंशत्, द्विचत्वारिंशत् । त्रयश्चत्वारिंशत्, त्रिचत्वारिंशत् । अष्टाचत्वारिंशत्, अष्टचत्वारिंशत् । पूर्वेण नित्यं प्राप्ते विकल्पार्थमिदम् ।

१०३६ हृदयस्य हृल्लासलेखाण्ये ॥ ३।२।९४ ॥ हृदयशब्दस्य लासलेखयोरुत्तरपदयोरणि ये च प्रत्यये हृदित्ययमादेशः स्यात् । हृदयस्य लासः हृल्लासः । हृदयं लिखतीति हृल्लेखः । अण्संनिधानाल्लेखशब्दोऽणन्तो गृह्यते । तेन घञन्ते न भवति । हृदयस्य लेखः हृदयलेखः । अण्–हृदयस्येदं हार्दम् । य–हृदयस्य प्रियः हृद्यः । अणीत्येव सिद्धे लेखग्रहणं ज्ञापकम् 'उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं न भवतीति । खित्यनव्ययस्येत्यादौ तु असंभवात् तदन्तग्रहणम् । हृदयशब्दपर्यायेण हृच्छब्देनैव सिद्धे हृदादेशविधानं लासादिषु हृदयशब्दप्रयोगनिवृत्त्यर्थम् । अन्यत्र तूभयं प्रयुज्यते । सौहार्द्यम् । सौहृदय्यम् । इत्यादि ।

१०३७ पदः पादस्याज्यातिगोपहते ॥३।२।९५॥ पादशब्दस्याज्यादिषूत्तरपदेषु पद इत्ययमादेशः स्यात् । पादाभ्यामजति अतति चेति औणादिके इणि पदाजिः, पदातिः । अत एव निर्देशादजेर्वी न भवति । पादाभ्यां गच्छति पदगः । 'नाम्नो गम' इत्यादिना डः । पादाभ्यामुपहतः पदोपहतः । पादशब्दसमानार्थः पदशब्दोऽस्ति, आज्यादिषु तु पादशब्दप्रयोगनिवृत्त्यर्थं वचनम् । कथं दिग्धश्चासौ पादश्च दिग्धपादः तेनोपहतः दिग्धपादोपहतः । उत्तरपदसंनिधापितेन पूर्वपदेन पादशब्दो विशेष्यते । न चात्र पादशब्दः पूर्वपदमपि तु दिग्धपादः । तेनात्र न भवति ।

१०३८ हिमहतिकाषिये पद् ॥३।२।९६॥ हिमादिषूत्तरपदेषु पाद्सं-

बंधिनि ये च प्रत्यये पादशब्दस्य पदित्ययमादेशः स्यात् । पादयोर्हिमं पद्धिमम् । पादाभ्यां हतिः पद्धतिः । पादौ कषतीत्येवंशीलः, पुनः पुनः पादौ कषति, पादाभ्यां साधु कषतीति वा पत्काषी । परमश्चासौ पत्काषी च परमपत्काषी । यदा च परमौ च तौ पादौ च परमपादौ तत्कषणशीलादिर्विवक्ष्यते तदा पादशब्दस्य पूर्वपदत्वाभावात् परमपादकाषीत्येव भवति । पादौ विध्यन्ति पद्याः शर्कराः । पादशब्दसंबंधिनि य इति किम् । द्विगुसमाससंबंधिनि मा भूत् । द्वाभ्यां पादाभ्यां क्रीतं द्विपाद्यम् । ' पणपादमाषाद्य ' इति यः । यद्वा आज्यादिषु करणभावः प्राण्यङ्गस्यैवेति पूर्वत्र पादशब्दः प्राण्यङ्गवचनः स एव चेहानुवर्तत इति परिमाणार्थस्य न भवति । अन्ये तु गोपहतयोरपीच्छन्ति । पादाभ्यां गच्छतीति पद्गः । पादाभ्यामुपहतः पदुपहतः । कथं हस्तिपादस्यापत्यं हास्तिपाद इत्यत्र अपत्याणि पद्भावः ? । ' कौपिञ्जलहास्तिपदादण् ' इति निर्देशाद् भविष्यति । पादाभ्यां चरति पदिक इति तु ' पादकः ' इति निपातनात् ।

१०३९ ऋचःशसि ॥३।२।९७॥ ऋचः संबंधिनः पादस्य शकारादौ शस्प्रत्यये पदित्ययमादेशः स्यात् । पादं पादं गायत्र्याः शंसति पच्छो गायत्रीं शंसति । वाक्यगम्यस्य गायत्र्याः पादसंबंधस्य वृत्तौ निवृत्तत्त्वात् स्वाभाविकं शंसनक्रियापेक्षं कर्मत्वं भवति । ऋच इति किम् । पादं पादं कार्षापणस्य ददाति पादशः कार्षापणं ददाति । शसो द्विःशकारपाठात् विभक्तिशसि न भवति । ऋचः पादान् पश्य ।

१०४० शब्दनिष्कघोषमिश्रे वा॥३।२।९८॥ शब्दादिषूत्तरपदेषु पादस्य पदित्ययमादेशो वा स्यात् । पादयोः शब्दः पच्छब्दः । पादशब्दः, पादनिष्कः । पद्घोषः । पन्मिश्रः, पादमिश्रः ।

१०४१ नस् नासिकायास्तःक्षुद्रे ॥ ३।२।९९ ॥ नासिकाशब्दस्य नस् प्रत्यये क्षुद्रशब्दे चोत्तरपदे नसित्ययमादेशः स्यात् । नासिकाया नासिकायां वा नस्तः । नासिकायां नासिकाया वा क्षुद्रः नःक्षुद्रः ।

१०४२ येऽवर्णे ॥३।२।१००॥ नासिकाशब्दस्य यप्रत्यये वर्णादन्यस्मिन्नभिधेये नसित्ययमादेशः स्यात् । नासिकायै हितं तत्र भवं वा नस्यम् । य इति किम् । नासिक्यं नगरम् । चातुरर्थिकोऽयं ञ्यः । निरनुबंधग्रहणे न च सानुबंधस्य ग्रहणं भवति । अवर्ण इति किम् । नासिक्यो वर्णः ।

१०४३ शिरसः शीर्षन् ॥३।२।१०१॥ शिरस् शब्दस्य शीर्षन्नादेशो भवति ये परे। शिरसि भवः शीर्षण्यः स्वरः। य इत्येव। शिरस्तः। निरनुबंधग्रहणे न सानुबंधस्येति न्यायान्नेह–शिर इच्छति शिरस्यति। तथा हस्तिनः शिर इव शिरो यस्य स हस्तिशिराः, तस्यापत्यं स्त्री बाह्वादित्वादिञि ' शीर्षः स्वरे तद्धिते ' इति शिरसः शीर्षादेशे ' अनार्षे वृद्धे ' इत्यादिना चेञः ष्यादेशे हास्तिशीर्ष्या। अत्र ष्यशीर्षादेशयोः स्थानिवद्भावात् शीर्षन्नादेशः स्यात्। शिरस इति चादेशेन संबध्यते न प्रत्ययेन, तेन हास्तिशीर्षिरित्यादौ समाससंबंधिन्यपि तद्धिते उत्तरसूत्रेण शीर्षादेशः स्यात्।

१०४४ केशे वा ॥३।२।१०२॥शिरसः केशविषये य प्रत्यये परे शीर्षन्नादेशो वा स्यात्। शिरसि भवाः शीर्षण्याः, शिरस्याः केशाः। केचित्तु ' इल्वला मृगशीर्षस्य शिरस्यास्तारकाः स्मृताः ' इति प्रयोगदर्शनात् केशादन्यत्रापि विकल्पमिच्छन्ति, शाखादियमत्यये च शीर्षन्निति नेच्छन्त्येव। शिरसस्तुल्यः शिरस्यः। शाखादित्वाद्यः।

१०४५ शीर्षः स्वरे तद्धिते ॥३।२।१०३॥ शिरस्शब्दस्य स्वरादौ तद्धिते शीर्ष इत्यादेशः स्यात्। हस्तिशिरसोऽपत्यं हास्तिशीर्षिः। स्वर इति किम्। शिरस्कल्पः। तद्धित इति किम्। शिरसा। कथमिल्वला मृगशीर्षस्येति? शीर्षशब्दः प्रकृत्यन्तरमस्ति। शीर्षच्छेद्यं परिच्छिद्येति। अनेनैव च सिद्धे उक्तविषये शिरसः प्रयोगनिवृत्त्यर्थं वचनम्।

१०४६ उदकस्योदः पेषंधिवासवाहने ॥३।२।१०४॥ उदकशब्दस्य पेषमादिषूत्तरपदेषु उद इत्ययमादेशः स्यात्। उदकेन पिनष्टि उदपेषं पिनष्टि तगरम्। उदकं धीयतेऽस्मिन्निति उदधिर्घटः। उदकस्य वासः उदवासः। उदकं वाहनमस्येति उदवाहनः। अनार्थं वचनम्। नाम्न्युत्तरेणैव सिद्धम्।

१०४७ वैकव्यंजने पूर्ये ॥३।२।१०५॥ उदकशब्दस्य पूरयितव्यवाचिन्येकव्यंजनेऽसंयुक्तव्यंजनादावुत्तरपदे उदादेशो वा स्यात्। उदकुम्भः, उदककुम्भः। व्यञ्जन इति किम्। उदकामत्रम्। एकेति किम्। उदकस्थालम्। पूर्य इति किम्। उदकपर्वतः।

१०४८ मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहे वा ॥ ३।२। १०६॥ मन्थादिषूत्तरपदेषूदकशब्दस्योदादेशो वा स्यात् । उदमन्थः, उदकमन्थः। उदौदनः , उदकौदनः । उदसक्तुः , उदकसक्तुः । उदबिन्दुः , उदकबिन्दुः । उदवज्रः, उदकवज्रः। उदभारः, उदकभारः। उदहारः, उदकहारः। उदवीवधः, उदकवीवधः । उदगाहः , उदकगाहः । अपूर्यार्थो यत्नः ।

१०४९ नाम्न्युत्तरपदस्य ॥३।२।१०७॥ उदकशब्दस्य पूर्वपदस्योत्तरपदस्य च संज्ञायां विषये उद इत्ययमादेशः स्यात् । उदमेघो नाम यस्यौदमेघिः पुत्रः । उदपानं निपानम् । उत्तरपदस्य–लवणोदः, कालोदः समुद्रः ।

१०५० ते लुग्वा ॥ ३।२।१०८ ॥ नामविषये ये पूर्वोत्तरपदे ते लुग्वा स्याताम् । देवदत्तः–देवः, दत्तः । सत्यभामा–सत्या, भामा । शब्दसाम्येऽपि मकरणादेरर्थविशेषनिश्चयः ।

१०५१ ह्यन्तरनवर्णोपसर्गादप ईप् ॥ ३।२।१०९ ॥ द्वि अन्तर् इत्येताभ्यामनवर्णान्तेभ्यश्चोपसर्गेभ्यः परस्याप् इत्येतस्योत्तरपदस्य ईप् इत्ययमादेशः स्यात् । द्विधा गता आपोऽस्मिन्निति द्वीपम् । एवमन्तरीपम् । प्रतीपम् । समीपम् । उपसर्गादिति किम् । शोभना आपः स्वापः। पूजिता आपः अत्यापः । स्वती पूजायां नोपसर्गौ । अत एव समासान्तो न भवति । अनवर्णेति किम् । प्रापम् । परापम् । संश्लिष्टा आगता आपोऽस्मिन् समापो देवयजनम् ।

१०५२ अनोर्देश उप् ॥३।२।११०॥ अनोः परस्यापो देशेऽभिधेये उप् इत्ययमादेशः स्यात् । अनुगता आपोऽस्मिन्ननूपो देशः । देश इति किम् । अन्वीपं वनम् । कथं कूपः सूपः यूपः ? । पृषोदरादित्वात् ।

१०५३ खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च ॥३।२।१११॥ अनव्ययस्य अर्थात् स्वरान्तस्यारुषश्च खित्प्रत्ययान्ते उत्तरपदे मोऽन्तः स्यात्, यथासंभवं ह्रस्वश्चान्तादेशः । इमात्मानं मन्यते इंमन्यः । खट्वंमन्यः । रात्रिंमन्यमहः। परत्वात् पुंवद्भावो ह्रस्वत्वेन बाध्यते । कालिंमन्या । अरुस्–अरुंतुदः । खितीति किम् । पण्डितमानी । अनव्ययेति किम् । दोषामन्यमहः । अव्ययप्रतिषेधात् खिति तदन्तग्रहणम् । न ह्यव्ययात् परः खित्संभवति । अरुःशब्दोपादानादनव्ययस्य व्यंजना-

न्तस्य मो न भवति । गीर्मन्यः । ' स्वरस्य ह्रस्वदीर्घप्लुताः' इति ह्रस्वः स्वरस्यैव । कृद्ग्रहणे सति गतिकारकस्यापि ग्रहणात् कूलमुद्वुजः, कूलमुद्वह इत्यत्रापि भवति ।

१०५४ **सत्यागदास्तोः कारे** ॥ ३।२।११२ ॥ सत्यादिभ्यः कारशब्दे उत्तरपदे मोऽन्तः स्यात् । सत्यं करोति सत्यस्य कार इति वा सत्यंकारः । एवमगदंकारः । अस्तुंकारः । अस्त्विति निपातः क्रियाप्रतिरूपकोऽभ्युपगमे वर्तते ।

१०५५ **लोकंपृणमध्यंदिनानभ्याशमित्यम्** ॥३।२।११३॥ एते शब्दाः कृतपूर्वपदमान्ता निपात्यन्ते । लोकं पृणति लोकस्य वा पृणः लोकंपृणः । मध्यं दिनस्य मध्यं च तत् दिनं चेति वा मध्यंदिनम् । अश्नोतेर्घञ्यभ्याश इति रूपम् । अनभ्याशं दूरमित्यं गन्तव्यमस्यानभ्याशमित्यः । दूरतः परिहर्तव्य इत्यर्थः । अनभ्याशेनेत्योऽनभ्याशमित्यं इति वा दूरेण प्राप्यो न त्वन्तिकेनेत्यर्थः । अन्ये तु प्रीणातेर्णिगन्तस्याचि ह्रस्वत्वं निपात्य लोकंप्रिणः लोकप्रीणक इत्यर्थ इत्युदाहरन्ति । कश्चित्त्वकृतह्रस्वत्वमेव मन्यते लोकंप्रीणः ।

१०५६ **भ्राष्ट्राग्नेरिन्धे** ॥३।२।११४॥ भ्राष्ट्राग्निभ्यामिन्धशब्दे उत्तरपदे मोऽन्तः स्यात् । भ्राष्ट्रस्येन्धः भ्राष्ट्रमिन्धः । एवमग्निमिन्धः ।

१०५७ **अगिलाद्गिलगिलगिलयोः**॥३।२।११५॥ गिलान्तशब्दवर्जितात् पूर्वपदात् परे गिले गिलगिले चोत्तरपदे मोऽन्तः स्यात् । तिमिं गिलतीति तिमिंगिलः । तिमीनां गिलगिलः तिमिंगिलगिलः । गिलगिलशब्दे गिलशब्दो नोत्तरपदमिति गिलगिलोपादानम् । गिलशब्दस्य स्वरान्तस्य पर्युदासेन स्वरान्ताद्विधिस्तेन व्यंजनान्तान्न भवति । भूर्गिलः । अगिलादिति किम् । तिमिंगिलं गिलति तिमिंगिलगिलः । गिलं गिलति गिलगिल इत्यत्र गिलगिलेति निर्देशादेव मोऽन्तो न संभवति । अगिलादिति तु निषेधो गिलान्तस्यापि निवृत्त्यर्थः ।

१०५८ **भद्रोष्णात्करणे** ॥३।२।११६॥ भद्रशब्दादुष्णशब्दाच्च करणशब्दे उत्तरपदे मोऽन्तः स्यात् । भद्रस्य करणं भद्रंकरणम् । एवमुष्णंकरणम् ।

१०५९ **नवाऽखित्कृदन्ते रात्रेः** ॥३।२।११७॥ रात्रिशब्दस्य खिद्वर्जिते कृदन्ते उत्तरपदे मोऽन्तो वा स्यात् । रात्रौ चरति रात्रिंचरः । रात्रिचरः । रात्रेः करणं रात्रिंकरणम् । रात्रिकरणम् । खिद्वर्जने किम् । रात्रिंमन्यमहः । खित्यनव्ययस्येत्यादिना

नित्यमेव भवति । कृदन्त इति किम् । रात्रिसुखम् । अन्तग्रहणं किम् । रात्रिरिवाचरति क्विप् लुक् तृच् । रात्रयिता । इदमेवान्तग्रहणं ज्ञापकम् 'इहोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययस्यैव ग्रहणं न तदन्तस्य' तेन 'कालात्तनतरतम' इत्यादौ प्रत्ययमात्रस्यैव ग्रहणं सिद्धम् । 'न नाम्येकस्वरात् खिति' इत्यादौ त्वसंभवात्तदन्तग्रहणम् । केचित्तीर्थकरः, तीर्थकर इत्यत्रापि विकल्पमिच्छन्ति । तदर्थं नवाऽखित्कृदन्ते इति रात्रेरिति च योगो विभजनीयः ।

१०६० **धेनोर्भव्यायाम्** ॥३।२।११८॥ धेनुशब्दाद् भव्याशब्दे उत्तरपदे नोऽन्तो वा स्यात् । धेनुश्चासौ भव्या च धेनुंभव्या, धेनुभव्या । केचित्तु नित्यमिच्छन्ति ।

१०६१ **अषष्ठीतृतीयादन्यादृदोऽर्थे** ॥३।२।११९॥ अषष्ठ्यन्तादतृतीयान्ताच्चान्यशब्दादर्थशब्द उत्तरपदे दोऽन्तो वा स्यात् । अन्यश्चासौ अर्थश्च, अन्योऽर्थोऽस्येति वा अन्यदर्थः । अन्यार्थः । अषष्ठीतृतीयादिति किम् । अन्यस्य अन्येन वार्थः अन्यार्थः ।

१०६२ **आशीराशास्थितास्थोत्सुकोतिरागे** ॥३।२।१२०॥ वेति निवृत्तं पृथग्योगात् । अषष्ठीतृतीयान्तादन्यशब्दादाशिस् आशा आस्थित आस्था उत्सुक ऊति राग इत्येतेषु उत्तरपदेषु दोऽन्तः स्यात् । अन्या आशीः अन्यदाशीः । अन्या आशा अन्यदाशा । अन्यमास्थितः अन्यदास्थितः । अन्या आस्था अन्यदास्था । अन्यस्मिन् उत्सुकः अन्यदुत्सुकः । अन्या ऊतिः अन्यदूतिः । अन्यत्र रागः अन्यद्रागः । अषष्ठीतृतीयादित्येव । अन्यस्याशीः अन्याशीः । अन्येनास्थितः अन्यास्थितः ।

१०६३ **ईयकारके** ॥३।२।१२१॥ पृथग्योगादषष्ठीतृतीयादिति निवृत्तम् । अन्यशब्दादीये प्रत्यये कारकशब्दे चोत्तरपदे दोऽन्तः स्यात् । अन्यस्यायमन्यदीयः । गहादित्वादीयः । अन्यस्यान्येन वा कारकः अन्यत्कारकः । अन्यत्कारिका ।

१०६४ **त्यादौ क्षेपे** ॥३।२।१२६॥ त्याद्यन्ते पदे परतः क्षेपे गम्यमाने नञ् अकारः स्यात् । अपचसि त्वं जाल्म । त्यादाविति किम् । न पाचको जाल्मः । क्षेप इति किम् । न पचति मैत्रः । 'अ मा नो ना प्रतिषेधे' इत्यकारेण प्रतिषेधार्थेनैव सिद्धौ क्षेपे नञः श्रवणनिवारणार्थम् अनुत्तरपदार्थं वचनम् ।

१०६५ नगोऽप्राणिनि वा ॥३।२।१२७॥ अप्राणिन्यभिधेये नग इति वा निपात्यते । न गच्छतीति नगः अगः पर्वतः । नगा अगा वृक्षाः । अप्राणिनीति किम् । अगो वृषलः शीतेन । पूर्वेण नित्यमादेशे प्राप्ते विकल्पोऽयम् ।

१०६६ नखादयः ॥३।२।१२८॥ नखादयः शब्दा अकृताकाराद्यादेशा निपात्यन्ते । नास्य खमस्तीति नखः । न भ्राजते इति नभ्राट् क्विबन्तः । न पातीति नपात् शत्रन्तः । त्रिलिङ्गोऽयम् । निपातनात्तु नाभावः । न वेत्तीति नवेदाः। औणादिकोऽस् । सत्सु साधुः सत्यः । साधौ यः । न सत्यः । असत्यः । नासत्यौ नासत्याः । न मुञ्चतीति नमुचिः । औणादिकः किः । नास्य कुलमस्तीति नकुलः । कथं न न भ्राजते किंतु भ्राजत एवेति नभ्राट् ? पृषोदरादित्वादेकस्य नञो लोपे भविष्यति । एवं न न पातीति नपात् इत्यादयः । न पुमान् न स्त्रीति नपुंसकम् । अत एव निपातनात् स्त्रीपुंसयोः पुंसकादेशः। बहुवचनमाकृतिगणार्थम् । तेन नास्तिकः, नभः, नारङ्गमित्यादयो द्रष्टव्याः ।

१०६७ रथवदे ॥३।२।१३१॥ रथवदयोरुत्तरपरयोः कुशब्दस्य कदादेशः स्यात् । कुत्सितो रथः कद्रथः । कुत्सितो रथोऽस्य कद्रथः । कुत्सितो वदोऽस्य कद्वदः । तत्पुरुष एवेच्छन्त्येके । अन्यत्र कुरथो राजा । कुवदो मूर्खः ।

१०६८ तृणे जातौ ॥३।२।१३२॥ कुशब्दस्य तृणे उत्तरपदे जातावभिधेयायां कदादेशः स्यात् । कुत्सितं तृणमस्याः कत्तृणा नाम रौहिषाख्या तृणजातिः। जाताविति किम् । कुत्सितानि तृणानि कुतृणानि ।

१०६९ कत्रिः ॥३।२।१३३॥ कुशब्दस्य किंशब्दस्य वा त्रिशब्दे उत्तरपदे कदादेशो निपात्यते । कुत्सिताः के वा त्रयः कत्रयः । कुत्सिताः के वा त्रयोऽस्य कत्रिः । किमो नेच्छन्त्यन्ये । किंत्रयः ।

१०७० काक्षपथोः ॥३।२।१३४॥ अक्ष पथिन् इत्येतयोरुत्तरपदयोः कोः का इत्ययमादेशः स्यात् । अक्षशब्दस्याकारान्तस्य कृतसमासान्तस्य चाविशेषेण ग्रहणम् । कुत्सितोऽक्षः पाशकादिः काक्षः। कुत्सितमक्षमिन्द्रियं काक्षम् । कुत्सितोऽक्षो यस्य काक्षो रथः । कुत्सितमक्षि अक्षं वाऽस्य काक्षः । कुत्सितः पन्थाः कापथम् । कुत्सितः पन्था अस्मिन् कापथो देशः । साकोऽपि भवति । ककुः—

कुत्सितः अक्षः काक्षः । पथिशब्दनिर्देशात्तत्पर्यायेऽव्युत्पन्ने पथशब्दे न भवति। कुत्सितः पथः कुपथः, कुपथं वनम् । अनीषदर्थार्थं वचनम् ।

१०७१ **पुरुषे वा** ॥३।२।१३५॥ कुशब्दस्य पुरुषशब्दे उत्तरपदे कादेशो वा स्यात् । कुत्सितः पुरुषः कापुरुषः, कुपुरुषः । कुत्सिताः पुरुषा अस्मिन् कापुरुषः , कुपुरुषो ग्रामः । अनीषदर्थे विकल्पोऽयम् । ईषदर्थे तु परत्वादुत्तरेण नित्यमेव । तत्रापि विकल्प एवेति कश्चित् । ईषत्पुरुषः कापुरुषः, कुपुरुषः ।

१०७२ **अल्पे** ॥३।२।१३६॥ ईषदर्थे वर्तमानस्य कुशब्दस्योत्तरपदे कादेशः स्यात्। ईषन्मधुरं कामधुरम् । स्वरादावपि परत्वादीषदर्थे कादेश एव भवति। ईषदम्लं काम्लम् । एवं काच्छम् ।

१०७३ **काकवौ वोष्णे** ॥३।२।१३७॥ कुशब्दस्योष्णशब्दे उत्तरपदे का कव इत्येतावादेशौ वा स्याताम् । ईषत् कुत्सितं वा उष्णं कोष्णं कवोष्णम् । ईषत् कुत्सितं वा उष्णमत्र कोष्णः कवोष्णो देशः। पक्षे यथाप्राप्तमिति तत्पुरुषे कदुष्णम्। बहुव्रीहौ तु न कदादेशः । कूष्णो देशः । अन्यस्त्वग्नावपीच्छति । काग्निः कवाग्निः कदग्निः ।

१०७४ **कृत्येऽवश्यमो लुक्** ॥३।२।१३८॥ अवश्यम्शब्दस्य कृत्यप्रत्यान्ते उत्तरपदे लुक् अन्तादेशः स्यात् । अवश्यकार्यम् । कृत्य इति किम् । अवश्यंलावकः ।

१०७५ **समस्ततहिते वा** ॥३।२।१३९॥ सम्शब्दस्य तते हिते चोत्तरपदे लुगन्तादेशो वा स्यात् । सततम् , संततम् । सहितम्, संहितम् ।

१०७६ **तुमश्च मनःकामे** ॥३।२।१४०॥ तुम्प्रत्ययान्तस्य सम्शब्दस्य च प्रत्येकं मनसि कामे चोत्तरपदे लुगन्तादेशः स्यात्। भोक्तुं मनोऽस्य भोक्तुमनाः। गन्तुं कामोऽस्य गन्तुकामः । सम्यग्मनोऽस्य समनाः । एवं सकामः। सहशब्देनापि सिद्धौ समः श्रुतिनिवृत्त्यर्थं वचनम् ।

१०७७ **मांसस्यानङ्घञि पचि नवा**॥३।२।१४१॥ मांसशब्दस्यानङन्ते घञन्ते च पचावुत्तरपदे लुगन्तादेशो वा स्यात् । मांसस्य पचनं मांस्पचनम् ,

मांसपचनम्। मांसस्य पाकः मांसपाकः, मांसपाकः। अनङ्घञीति किम्। मांसपक्तिः। पचाविति किम्। मांसदाहः।मांसदहनी।

१०७८ दिक्शब्दात्तीरस्य तारः ॥३।२।१४२॥ दिक्शब्दात् परस्य तीरशब्दस्योत्तरपदस्य तार इत्ययमादेशो वा स्यात्। दक्षिणस्याः दिशः दक्षिणस्य वा देशस्य तीरं दक्षिणतारम्, दक्षिणतीरम्। दिक्शब्दादिति किम्। गङ्गातीरम्।

१०७९ ग्रन्थान्ते ॥३।२।१४७॥ ग्रन्थस्यान्तो ग्रन्थान्तः। तद्वाचिन्युत्तरपदेऽव्ययीभावे सहशब्दस्य सादेशः स्यात्। कलामन्तं कृत्वा सकलं ज्योतिषमधीते। एवं सकाष्ठम्। समुहूर्तम्। कलादिशब्दाः कालविशेषवाचिनोऽपि तत्सहचारिषु ग्रन्थेषु वर्तन्त इति ग्रन्थान्तवाचित्वमुत्तरपदस्य। अन्त इत्यव्ययीभावः। कालार्थ आरंभः।

१०८० समानस्य धर्मादिषु ॥३।२।१४९॥ समानशब्दस्य धर्मादिषूत्तरपदेषु सादेशः स्यात्। समानो धर्मोऽस्य सधर्मा। समानो वा धर्मः सधर्मः। बहुवचनमाकृतिगणार्थम्। अन्ये तु (धर्मादिगणे) धर्मादिषु वचनान्तेषु नवसु विकल्पमिच्छन्ति। सधर्मा, समानधर्मेत्यादि। अपरे तु नामादिषु बन्धुपर्यन्तेषु द्वादशस्वेव समानस्य सभावं नित्यमिच्छन्ति अन्येषु तु नेच्छन्त्येव। सधर्मसपक्षादिशब्दाँस्तु सहशब्देन समानपर्यायेण कृतसादेशेन साधयन्ति। समानशब्दप्रयोगे तु समानधर्मा, समानपक्ष इत्याद्येव मन्यन्ते। कथं समानोदरे जातः सोदर्यः, समाने तीर्थे वसति सतीर्थ्य इति ? ' सोदर्यसमानोदर्यौ ' इति ' सतीर्थ्य ' इति च निपातनाद् भविष्यतः।

१०८१ सब्रह्मचारी ॥३।२।१५०॥ सब्रह्मचारीति निपात्यते। समानो ब्रह्मचारी समाने ब्रह्मण्यागमे गुरुकुले वा व्रतं चरतीति सब्रह्मचारी। निपातनादेव व्रतशब्दस्यापि लोपः।

१०८२ दृक्दृशदक्षे ॥३।२।१५१॥ दृक् दृश दक्ष इत्येतेषूत्तरपदेषु समानस्य सादेशः स्यात्। समान इव दृश्यते सदृक्, सदृशः, सदक्षः। दृशदक्षसाहचर्यात् टक्सक्मत्ययसहचरितकिबन्तस्यैव दृशो ग्रहणात् इह न भवति। समाना दृक् समानदृक्।

१०८३ अन्यत्यदादेरा ॥३।२।१५३॥ अन्यशब्दस्य त्यदादेश्च दृक्दृश-दृक्षेषूत्तरपदेषु आकारोऽन्तादेशः स्यात् । अन्य इव दृश्यते अन्यादृक् । अन्यादृशः। अन्यादृक्षः। एवं त्यादृक् । त्यादृशः। त्यादृक्षः। तादृक् । तादृशः। तादृक्षः। इत्यादि । कथं यत्परिमाणमस्य यावान् एवं तावान् , एतावान् ? ' यत्तदेतदो डावादिः ' इति डावतौ भविष्यति ।

१०८४ इदं किमीत्की ॥३।२।१५३॥ इदंशब्दः किंशब्दश्च दृक्दृशदृक्षेषूत्तरपदेषु परेषु यथासंख्यमीकाररूपः कीकाररूपश्च स्यात् । अयमिव दृश्यते ईदृक् । ईदृशः । ईदृक्षः । क इव दृश्यते कीदृक् । कीदृशः । कीदृक्षः । कथं इदं किं वा परिमाणमस्य इयान् कियान् ? ' इदंकिमोऽतुरिय् किय् चास्य ' इत्यादिना भविष्यति ।

१०८५ पृषोदरादयः ॥३।२।१५५॥ पृषोदर इत्येवंप्रकाराः शब्दा विहितलोपागमवर्णविकाराः शिष्टैः प्रयुज्यमानाः साधवः स्युः । पृषदुदरमुदरे वास्य पृषोदरः । पृषत उदरं पृषोदरम् । पृषत उद्धानं पृषोद्धानम् । एवं पृषोद्धारम् । अत्र तकारलोपो निपात्यते । जीवनस्य जलस्य मूतः पुटबन्धः जीमूतः । अत्र वनस्य लोपः । वारिणो वाहको बलाहकः । अत्र पूर्वपदस्य वः उत्तरपदादेश्च लः । इत्यादि । बहुवचनमाकृतिगणार्थम् । तेन मुहूर्तमारग्वधोऽश्वत्थामनिर्लयनीत्यादयोऽपि द्रष्टव्याः।

' वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् '

१०८६ वावाप्योस्तनिक्रोधाग्रहोर्वपी ॥३।२।१५६॥ अवशब्दस्योपसर्गस्य तनिक्रीणात्योः परयोरपिशब्दस्य च धाग्नहोः परयोर्यथासंख्यं व पि इत्येतावादेशौ वा स्याताम् । वतंसः, अवतंसः । वक्रयः, अवक्रयः । पिहितम् , अपिहितम् । पिधानम् , अपिधानम् । पिदधाति, अपिदधाति । पिनद्धम् , अपिनद्धम् । धातुनियमं नेच्छन्त्येके । पृषोदरादिप्रपञ्च एषः, तेन शिष्टप्रयोगोऽनुसरणीयः ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां समासप्रकरणे
समासाश्रयविधयः समाप्ताः ॥
समाप्तं समासप्रकरणम् ॥

अथ तद्धिताः ॥

॥ तत्रादावपत्याधिकारः ॥

१०८७ तद्धितोऽणादिः ॥६।१।१॥ अणादिः प्रत्ययो य इत ऊर्ध्वं वक्ष्यते स तद्धितसंज्ञः स्यात् ।

१०८८ वाद्यात् ॥६।१।११॥ वा इति च आद्यादिति च द्वितयमधिकृतं वेदितव्यम् । तत्र वाधिकारात् इत ऊर्ध्वं वक्ष्यमाणाः प्रत्यया विकल्प्यन्ते । तेन पक्षे यथाप्राप्तं वाक्यं समासश्च भवति । आद्यादित्यधिकारात् सूत्रे यदादौ निर्दिष्टं तस्मात् प्रत्ययो भवति नान्यस्मात् ।

१०८९ प्राग्जितादण् ॥ ६।१।१३ ॥ प्राग्जितशब्दसंकीर्तनात् पादत्रयं यावत् येऽर्था अपत्यादयस्तेष्वपवादविषयं परित्यज्याण् प्रत्ययो वा स्यात् । अधिकारः परिभाषा विधिर्वाऽयम् । अधिकारपक्षे प्राग्जितादित्युत्तरार्थम् । अन्यथेकणित्यादिवदणित्येव सिद्धम् । धनपतेरपत्यं तत्र भवस्तत आगतो वेति वाक्ये ।

१०९० धनादेः पत्युः ॥६।१।१४॥ धनादेर्गणात् परो यः पतिशब्दस्तदन्ताद्धनपतीत्येवमादेः प्राग्जितीयेऽर्थेऽण् प्रत्ययो वा स्यात् । ऐकार्थ्य इति विभक्तिलुपि धनपति अण् इति स्थिते । णकारो वृद्ध्यर्थः ।

१०९१ वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते ॥७।४।१॥ ञिति णिति च तद्धिते प्रत्यये परे पूर्वो यः प्रकृतिभागस्तस्य स्वरेषु स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिरादेशः स्यात् । अवर्णेवर्णस्य । धानपतः । आश्वपतः । केचित्तु (धनादिषु) गृहसेनाशब्दौ न पठन्ति । तन्मते गार्हपत्यम् । सैनापत्यम् इत्युत्तरार्थम् । पत्युत्तरपदलक्षणस्य ञ्यस्य राष्ट्रादिषु त्रिषु ' दोरीय ' इतीयस्य चापवादोऽयम् ।

१०९२ अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्यः ॥६।१।१५॥ दिति–अदिति–आदित्य–यमशब्देभ्यः पत्युत्तरपदाच्च प्राग्जितीयेऽर्थे इदमर्थवर्जितेऽपत्यादावर्थे योऽणोऽपवादः प्रत्ययस्तद्विषये च ञ्यः प्रत्ययः स्यात् । दितेरपत्यं दैत्यः । अदितेरपत्यमादित्यः ।

१०९३ व्यञ्जनात् पञ्चमान्तस्थायाः सरूपे वा ॥१।३।४७॥ व्यञ्जनात्

परस्य पञ्चमस्यान्तस्थायाश्च सरूपे वर्णे परे लुग्वा स्यात् । आदित्यः देवता अस्य आदित्यः, आदित्यो वा स्थालीपाकः। पत्युत्तरपद-बृहस्पतेरपत्यं बार्हस्पत्यः। अण-पवादे च आदित्यस्यापत्यमादित्यः। यमस्यापत्यं याम्यः। अत्र परत्वात् 'अत इञ्' इतीञ् स्यात् । वनस्पतीनां समूहो वानस्पत्यम् । अत्राचित्तलक्षण इकण् स्यात् । ञ्यो हि प्राग्जितीयमणं बाधित्वा सावकाश इति अणपवादग्रहणम् । अण्ग्रहणं किम् । वास्तोष्पत्यभार्यः। असत्यण्ग्रहणे स्वापवादविषयेऽप्यस्य समावेशे सति–

१०९४ तद्धितः स्वरवृद्धिर्हेतुररक्तविकारे ॥ ३।२।५५ ॥ स्वरस्थानाया वृद्धेर्यो हेतुस्तद्धितो रक्ताद्विकाराच्चान्यत्रार्थे विहितस्तदन्तः परतः स्त्रीलिङ्गः पुंवन्न स्यात् । इत्यादिना पुंवद्भावनिषेधात् वास्तोष्पत्याभार्य इति स्यात् । अनिदमीति किम् । आदित्यस्येदमादितीयम् ।

१०९५ बहिषष्टीकण् च ॥६।१।१६॥ बहिस् इत्येतस्मात् प्राग्जितीयेऽर्थे टीकण् प्रत्ययः स्यात्, चकाराद् ञ्यश्च ।

१०९६ प्रायोऽव्ययस्य ॥ ७।४।६५ ॥ अव्ययस्यापदसंज्ञकस्य तद्धिते परेऽन्त्यस्वरादेः प्रायो लुक् स्यात् । बहिर्जातो बाहीकः, बाह्यः । बाह्या । टकारो ङ्यर्थः । बाहिकी । णकारो णित्कार्यार्थः ।

१०९७ कल्यग्नेरेयण् ॥६।१।१७॥ कलि अग्नि इत्येताभ्यां प्राग्जितीयेऽर्थेऽ-निदम्यणपवादे च एयण् प्रत्ययः स्यात् । कलिर्देवताऽस्य कालेयम् । आग्नेयम् । अणपवादे च कलेरागतं कालेयम्। आग्नेयम् । अत्र ' नृहेतुभ्यः ' इत्यादिना रूप्यमयटौ स्याताम्। अन्ये तु जितार्थात् परेष्वपि प्राग्वतीयेष्वर्थेषु एयणमिच्छन्ति। कलये हितं कालेयम्। आग्नेयम्। कलेर्निमित्तम् उत्पातः संयोगो वा कालेयः। आग्नेयः।

१०९८ पृथिव्या ञ्ञ ॥ ६।१।१८ ॥ पृथिवीशब्दात् प्राग्जितीयेऽर्थेऽनि-दम्यणपवादे च ञ्ञ इत्येतौ प्रत्ययौ स्याताम् । पृथिव्यां भवः पार्थिवः । ञ्ञोः स्त्रियां विशेषः । पार्थिवा । पार्थिवी । अणपवादे च पृथिव्या अपत्यं पार्थिवः । पार्थिवा । पार्थिवी । अत्र एयण् स्यात् । ङी बहुषुलुप् संयादिष्वणिति प्रयोजन-मञ्ञविधानस्य ।

१०९९ उत्सादेरञ् ॥६।१।१९॥ उत्स इत्येवमादिभ्यः शब्देभ्यः प्राग्जि-तीयेऽर्थेऽनिदम्यणपवादे चाञ् प्रत्ययः स्यात् । उत्सस्येदमौत्सम् । औदपानम्।

अणपवादे च, उत्सस्यापत्यम् औत्सः । औदपानः । अत्र इञ् प्राप्नोति । कुरोरपत्यं कौरव्य इति ञ्यविधौ कुरुशब्दोपादानस्यानवकाशत्वात् भवति । कौरव इति त्वपत्यस्यापीदमर्थविवक्षायां भविष्यति । उत्तरत्र वष्कयशब्दस्य समासे प्रतिषेधादुत्साद्यन्तस्यापीह प्रत्ययः। तेन गोधेनुभ्य आगतं गौधेनवमिति सिद्धम् । अन्यथा रूप्यमयटौ स्याताम् ।

११०० **वष्कयादसमासे** ॥६।१।२०॥ वष्कयशब्दादसमासे वर्तमानात् प्राग्जितीयेऽर्थेऽनिदम्यणपवादे चाञ् स्यात् । वष्कयस्यापत्यं वाष्कयः। असमास इति किम् । सुवष्कयस्यापत्यं सौवष्कयिः। इञेव ।

११०१ **देवाद्यञ् च** ॥६।१।२१॥ देवशब्दात् प्राग्जितीयेऽर्थेऽनिदम्यणपवादे च यञ् षादञ् च प्रत्ययः स्यात् । देवस्येदं देवादागतं वा दैव्यम्, दैवम् । यञन्तादञन्ताच्च ङ्यां [1]दैवी वाक् । केचित्तु ञ्यप्रत्ययमपीच्छन्ति । तन्मते दैव्या ।

११०२ **अः स्थान्नः** ॥६।१।२२॥ स्थामन्शब्दात् प्राग्जितीयेऽर्थे अः प्रत्ययः स्यात् । अश्वत्थान्नोऽपत्यमश्वत्थामः ।

११०३ **द्विगोरनपत्ये यस्वरादेर्लुबद्विः**॥६।१।२४॥ अपत्यार्थादन्यस्मिन् प्राग्जितीयेऽर्थे उत्पन्नस्य द्विगोः परस्य यकारादेः स्वरादेश्च प्रत्ययस्य सकृल्लुप् स्यात् न तु द्विः । द्वयो रथयोर्द्विरथ्या वायं वोढा द्विरथः। 'रथात्सादेश्च वोढरि' इत्यर्थे 'यः' इति यः । पञ्चसु कपालेषु पञ्चकपाल्यां वा संस्कृतः पञ्चकपालः । द्विगोरिति किम् । पूर्वशालायां भवः पौर्वशालः । अनपत्य इति किम् । द्वैमातुरः । यस्वरादेरिति किम् । पञ्चभ्यो गर्गेभ्य आगतं पञ्चगर्गमयम् । अद्विरिति किम् । पञ्चसु कपालेषु संस्कृतं पञ्चकपालम् तस्येदं पाञ्चकपालम् । एवं त्रैवेदम् । प्राग्जितादित्येव । द्वौ रथौ वहति द्विरथ्यः । 'वहति' इत्यादिना यः ।

इत्यपत्यादिसाधारणाः प्रत्ययाः ।

११०४ **प्राग्वतः स्त्रीपुंसाद् नञ् स्नञ्** ॥६।१।२५॥ प्राग्वतो येऽर्थास्तेष्वनिदम्यणपवादे च स्त्रीशब्दात् पुंसशब्दाच्च यथासंख्यं नञ् स्नञ् प्रत्ययौ स्याताम्। स्त्रिया अपत्यं स्त्रैणः । पौंस्नः । अकारो ञित्कार्यार्थः ।

११०५ **त्वे वा** ॥६।१।२६॥ स्त्रीशब्दात् पुंसशब्दाच्च त्वे त्वप्रत्ययविषये

---

१ यञो डायन् च वा इति वा डायनि दैव्यायनीत्यपि ।

भावे यथासंख्यं नञ्स्नञ्प्रत्ययौ वा स्याताम्। स्त्रिया भावः स्त्रैणं। स्त्रीत्वं। स्त्रीता। पौंस्नम्। पुंस्त्वम्। पुंस्ता। पुनर्वाग्रहणं प्रत्ययविकल्पार्थम्।

११०६ **गोः स्वरे यः** ॥ ६।१।२७ ॥ गोशब्दात् स्वरादितद्धितप्रसङ्गे यः प्रत्ययः स्यात्। गोरपत्यं गव्यः। स्वर इति किम्। गोभ्यो हेतुभ्य आगतं गोरूप्यम्।

११०७ **ङसोऽपत्ये** ॥६।१।२८॥ अणादयोऽनुवर्तन्ते। ङसः षष्ठ्यन्तान्नाम्नोऽपत्येऽर्थे यथाभिहितमणादयः प्रत्ययाः स्युः।

११०८ **अस्वयंभुवोऽव्** ॥७।४।७०॥ स्वयंभूशब्दवर्जितस्यापदसंज्ञकस्योवर्णान्तस्य तद्धिते परे अव् इत्यादेशः स्यात्। उपगोरपत्यमौपगवः। अपत्य इति अपत्यमात्रं विवक्षितं न लिङ्गसंख्यादि। तेन द्वयोर्बहुषु स्त्रीलिङ्गादौ च भवति। औपगवौ। औपगवाः। औपगवी। इत्यादि। ङस इति किम्। देवदत्तेऽपत्यम्। अपत्य इति किम्। भानोरयं भानवीयः। 'तस्येदम्' इत्येवाणादिसिद्धौ अपत्यविवक्षायां [1]तदपवादबाधनार्थं वचनम्। तेन भानोरपत्यं भानवः। अत्र 'दोरीय' इतीयो न भवति। कम्बल उपगोरपत्यं देवदत्तस्येत्यत्र तु असामर्थ्यान्न भवति।

११०९ **पौत्रादि वृद्धम्** ॥६।१।२॥ परमप्रकृतेरपत्यवतो यत्पौत्राद्यपत्यं तद् वृद्धसंज्ञं स्यात्।

१११० **वंश्यज्यायोभ्रात्रोर्जीवति प्रपौत्राद्यस्त्री युवा** ॥ ६।१।३ ॥ वंशे भवो वंश्यः पित्रादिरात्मनः कारणम्। ज्यायान् भ्राता वयोऽधिक एकपितृक एकमातृको वा। प्रपौत्रः पौत्रापत्यम् परमप्रकृतेश्चतुर्थः। स्त्रीवर्जितं प्रपौत्राद्यपत्यं जीवति वंश्ये ज्यायोभ्रातरि वा युवसंज्ञं स्यात्।

१११११ **सपिण्डे वयःस्थानाधिके जीवद्वा** ॥६।१।४॥ ययोरेकः पूर्वः सप्तमः पुरुषस्तावन्योन्यस्य सपिण्डौ। वयो यौवनादि। स्थानं पिता पुत्र इत्यादि। परमप्रकृतेः स्त्रीवर्जितं प्रपौत्राद्यपत्यं वयःस्थानाभ्यां द्वाभ्यामप्यधिके सपिण्डे जीवति जीवदेव युवसंज्ञं वा स्यात्।

---

१ तस्य—तस्येदमित्यणोऽपवादो 'दोरीय' इत्यादिस्तस्य बाधनार्थमन्यथा दुसंज्ञकादपत्यविवक्षायामपि ईय एव स्यात्।

१११२ युववृद्धं कुत्सार्चे वा ॥६।१।५॥ युवा च वृद्धं चापत्यं यथासंख्यं कुत्सायामर्चायां च विषये युवसंज्ञं वा स्यात् ।

१११३ आद्यात् ॥६।१।२९॥ अपत्ये येऽणादयः प्रत्ययास्ते आद्यात्-परमप्रकृतेरेव स्युः । पौत्राद्यपत्यं सर्वपूर्वजानामापरमप्रकृतेः पारंपर्येण संबंधादपत्यं भवति, तत्र तैस्तैः संबंधविवक्षायामनन्तरवृद्धयुवभ्योऽपि प्रत्ययः प्राप्नोतीति नियमार्थ आरंभः । उपगोरपत्यमनन्तरं वृद्धं वा औपगवः। तस्याप्यौपगविः। औपगवेरप्यौपगवः ।

१११४ वृद्धाद्यूनि ॥६।१।३०॥ यून्यपत्ये विवक्षिते यः प्रत्ययः स आद्यात् वृद्धात् परमप्रकृतेर्यो वृद्धप्रत्ययस्तदन्तात् स्यात्। 'आद्यात्' इत्यस्यापवादः। वृद्धादिति [1]यूनि प्रकृतिर्विधीयते । गर्गस्यापत्यं वृद्धं गार्ग्यः । तस्यापत्यं युवा गार्ग्यायणः । यूनीति किम् । गार्ग्यः । आद्यात् इत्येव । उपगोरपत्यं वृद्धमौपगवः , तस्यापत्यं युवा औपगविः । गार्ग्यायणस्य अपत्यं युवा गार्ग्यायणः । अत्रायनण् इञ् च न भवति ।

१११५ अत इञ् ॥६।१।३१॥ ङसोऽपत्य इति वर्तते । अकारान्ताद् ङसन्तान्नाम्नोऽपत्येऽर्थे इञ् प्रत्ययः स्यात् । अणोऽपवादः । दक्षस्यापत्यं दाक्षिः । अत इति किम् । शौभेयः । कैलालपः । केचित्तु शुभंयाकीलालपाशद्धाभ्यामणमपि नेच्छन्ति । कथं-

'त्यजस्व कोपं कुलकीर्तिनाशनं भजस्व धर्मं कुलकीर्तिवर्धनम् ॥
प्रसीद जीवेम सबान्धवा वयं प्रदीयतां दाशरथाय मैथिली' ॥ [2]

तस्येदमिति विवक्षायामण् भविष्यति । अपत्यविवक्षायां तु दाशरथिरित्येव स्यात् । अथ काकवकशुकादेः कस्मान्न भवति? [2]जात्यैवापत्यार्थस्य पौत्रादेरनन्तरस्य चाभिहितत्वात् । यत्र त्वर्थप्रकरणादेर्विशेषप्रतीतिरस्ति तत्र भवत्येव । यथा 'कुतश्चरतिः मायूरिः केन कौपिञ्जलिः कृशः' एतेन काक्यादिभ्य एयणादयोऽपि व्याख्याताः । कथं तर्हि क्रौञ्चः कौकिलः गौधेरः चाटकैर इति ? जातिशब्दा एवैते

---

१ यूनि प्रत्यये विधातव्ये वृद्धप्रत्ययान्त एव आद्य इत्यर्थः ।

२ यतः सर्वोऽपि लोकः काकं दृष्ट्वा काकोऽसावित्येव व्यवहरति न तु काकापत्यमिति ॥

यथाकथंचिद् व्युत्पाद्यन्ते। यथा क्षत्रं क्षत्रियः राजा राजन्यः मनुः मनुष्यो मानुष इति। अनभिधानाच्च शतसर्ववृद्धकारकराजपुरुषमाथुरकुरुरादिभ्यो न भवति। अकारो ञित्कार्यार्थः।

१११६ **वहीनरस्यैत्** ॥७।४।४॥ वहीनरशब्दस्य ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य ऐकार आदेशः स्यात्। वहीनरस्यापत्यं वैहीनरिः। विहीनरस्य वृद्धया सिध्यति, वहीनरस्य वाहीनरिर्मा भूदिति वचनम्।

१११७ **बाह्वादिभ्यो गोत्रे** ॥६।१।३२॥ स्वापत्यसंतानस्य स्वव्यपदेशकारणमृषिरनृषिर्वा यः प्रथमः पुरुषः तदपत्यं गोत्रम्। बाह्वादिभ्यो ऽसन्तेभ्यो गोत्रेऽपत्येऽर्थे इञ् प्रत्ययः स्यात्। अनकारान्तार्थो बाधकबाधनार्थश्चारंभः। बाहोरपत्यं बाहविः। इह बाह्वादिषु उदश्चिति पैलादिषु चोदश्चीति सनकारस्य पाठादनर्चायामपि नलोपाभावः। गोत्र इति किम्। योऽद्यत्वे बाहुर्नाम तस्यापत्यं बाहवः। संभवापेक्षं च गोत्रग्रहणम्। तेन पञ्चानामपत्यं पाञ्चिरित्यादि सिद्धम्। बहुवचनमाकृतिगणार्थम्। तेन सख्युरपत्यं साखिः इत्यादि सिद्ध्यति। ञिवादेश्च प्राग्येऽकारान्ता बिदादयस्तेभ्य ऋष्यणं बाधित्वा उक्तादर्थादन्यत्रानेनैवेञ् वक्ष्यते। बिदस्यापत्यमनन्तरं बैदिः। और्विः। गर्गादेर्यञ्। गार्गिः। वात्सिः। कुञ्जादेर्ढ्यण्यः। कौञ्जिः। ब्राध्निः। अश्वादेरायनञ्। आश्विः। आर्किः। नडादिभ्य आयनण्। नाडिः। मौञ्जिः। अनकारान्तेभ्यस्त्वणेव। औपमन्यवः। जामदग्नः। सौमनसः। भास्मः। लैगवः। शारद्वतः। इतः प्रभृति गोत्रे इत्यधिकारात् गोत्रे संभवति, ततोऽन्यत्र प्रतिषेधः।

१११८ **वर्मणोऽचक्रात्** ॥६।१।३३॥ चक्रशब्दवर्जितात् परो यो वर्मनशब्दस्तदन्तादपत्येऽर्थे इञ् स्यात्। इन्द्रवर्मणोऽपत्यमैन्द्रवर्मिः। अचक्रादिति किम्। चाक्रवर्मणः। अत्र–

१११९ **अणि** ॥७।४।५२॥ अन् इत्येतदन्तस्याणि तद्धिते परेन्त्यस्वरादेर्लुग् न स्यात्। इति निषेधात् नोपदस्येत्यन्त्यस्वरादेर्न लुक्।

११२० **अजादिभ्यो धेनोः** ॥६।१।३४॥ अजादिभ्यः परो यो धेनुशब्दस्तदन्तादपत्येऽर्थे इञ् स्यात्। आजधेनविः। अजादयः प्रयोगतोऽनुसर्तव्याः।

११२१ ब्राह्मणाद्वा ॥६।१।३५॥ ब्राह्मणशब्दात् परो यो धेनुशब्दस्तदन्तादपत्येऽर्थे इञ् वा स्यात् । ब्राह्मणधेनविः, ब्राह्मणधेनवः ।

११२२ भूयःसंभूयोऽम्भोमितौजसः स्लुक् च ॥ ६।१।३६ ॥ भूयस् संभूयस् अम्भस् अमितौजस् इत्येतेभ्योऽपत्येऽर्थे इञ् स्यात् सकारलोपश्चैषाम् । भूयसोऽपत्यं भौयिः । एवं सांभूयिः। आम्भिः। आमितौजिः। भूयसो नेच्छन्त्यन्ये। अकतसोऽपीच्छन्त्येके । आकतिः ।

११२३ शालङ्क्यौदिषाडिवाड्वलि ॥६।१।३७॥ शालङ्कि औदि षाडि वाड्वलि इत्येते शब्दा अपत्येऽर्थे इञ्प्रत्ययान्ता निपात्यन्ते ॥ शलङ्कोरपत्यं शालङ्किः। अत्रेञ् प्रत्यय उकारलोपश्च निपात्यते । उदकस्यौदिः । अत्रेञ् कलोपश्च । षण्णां षाडिः । अत्रेञ् अन्त्यस्य च डत्वम् । वाचं वदति वाग्वादस्तस्यापत्यं वाड्वलिः । अत्रेञि वाचोऽन्तस्य डत्वं वलभावश्चोत्तरपदस्य ।

११२४ व्यासवरुटसुधातृनिषादबिम्बचण्डालादन्त्यस्य चाक् ॥६।१।३८॥ व्यासादिभ्योऽपत्येऽर्थे इञ् स्यात् तत्संनियोगे चैषामक् इत्ययमन्तादेशः।

११२५ स्वः पदान्तात् प्रागैदौत् ॥७।४।५॥ ञ्णिति तद्धिते इवर्णोवर्णयोस्तत्प्राप्तौ वृद्धिप्रसङ्गे तयोरेव स्थाने यौ यकारवकारौ पदान्तौ ताभ्यां प्राक् यथासंख्यम् एत् ऐत् इत्येतावागमौ स्याताम्। यकारात् प्रागैकारः वकारात् प्रागौकार इत्यर्थः। व्यासस्यापत्यं वैयासकिः। वरुटस्य वारुटकिः। सुधातुः सौधातकिः। निषादस्य नैषादकिः । वृद्धे तु परत्वाद् बिदादिलक्षणोऽञ् । नैषादः । बिम्बस्य बैम्बकिः । चण्डालस्य चाण्डालकिः ।सुधातृव्यासाभ्यामणोऽपवादः । वरुटात् कारुण्यस्यापवादः। शेषेभ्योऽस्त्येव। कर्मारव्याघ्राग्निशर्मभ्योऽपीच्छन्त्येके। कार्मारकिः। वैयाघ्रकिः । आग्निशर्मकिः ।

११२६ पुनर्भूपुत्रदुहितृननान्दुरनन्तरेऽञ् ॥ ६।१।३९ ॥ पुनर्भू पुत्र दुहितृ ननान्दृ इत्येतेभ्यो ङसन्तेभ्योऽनन्तरेऽपत्येऽर्थे अञ् प्रत्ययः स्यात् । पुनर्भ्वा अनन्तरमपत्यं पौनर्भवः । पौत्रः । दौहित्रः। नानान्द्रः । अनन्तर इति किम् । वृद्धेऽञ् न भवति । अञो ञित्करणमुत्तरार्थम् । इह तु सूत्रेऽञि अणि वा नास्ति विशेषः । नन्वस्त्येव विशेषः । अञि हि ' यञञोऽश्यापर्ण ' इत्यादिनाञो बहुषु लुप् स्यात् यथा वैदः वैदौ बिदा इति । तथा संघादिष्वर्थेषु ' संघघोषाङ्क '

इत्यादिनाञः परोऽण् स्यात् यथा बैदमिति। अणि तु तदुभयमपि न भवति यथौपगवाः औपगवकमिति। तथा पुत्रशब्दादञन्तात् ततोऽपत्यविवक्षायाम् 'अत इञ्' इतीञि 'ञिदार्षादणिञोः' इति तस्य लुपि पौत्र इति स्यात् यथा बैदः पिता बैदः पुत्रः। अणि तु 'द्विस्वरादणः' इत्यायनिञ् स्यात् यथा कार्त्तायणिरिति। उच्यते। पुनर्भ्वाद्यपत्यस्यागोत्रत्वाद् गोत्राधिकार-विहिता लुप् संघाद्यण् च न भविष्यति। पौत्रशब्दाच्चावृद्धप्रत्ययान्तत्वादञ्यणि च इञ् आयनिञ् च न भविष्यतीति विशेषाभाव एव। केचित्तु पुनर्भ्व इति लुपम-प्युदाहरन्ति। तेषां पुनर्भूरिति गोत्रं तत्रेहाप्यस्ति विशेषः।

११२७ **परस्त्रियाः परशुश्चासावपर्ये** ॥६।१।४०॥ परस्त्रीशब्दादनन्तरेऽ-पत्येऽञ् प्रत्ययः स्यात् तत्संनियोगे परस्त्रीशब्दस्य परशुभावश्चासावपर्ये-न चेत् पुरुषेण सह समानो वर्णो ब्राह्मणत्वादिस्तस्या भवति। परा पुरुषाद् भिन्नवर्णा स्त्री परस्त्री। तस्या अनन्तरापत्यं पारशवः। असावपर्य इति किम्। परस्य स्त्री परस्त्री, तस्या अनन्तरापत्यं पारस्त्रैणेयः। कल्याण्यादिपाठादेयण् अन्तस्य चेनादेशः। अनुशतिका-दिपाठादुभयपदवृद्धिश्च।

११२८ **बिदादेर्वृद्धे** ॥६।१।४१॥ बिदादिभ्यो वृद्धेपत्येऽर्थे अञ् प्रत्ययः स्यात्। बिदस्यापत्यं वृद्धं बैदः। बैदौ। बहुवचने तु।

११२९ **यञञोऽश्यापर्णान्तगोपवनादेः** ॥६।१।१२६॥ यञन्तस्याञ-न्तस्य च बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानः यः स प्रत्ययस्तस्यास्त्रियां लुप् स्यात्, गोपवनादिभ्यः श्यापर्णान्तेभ्यो विहितं वर्जयित्वा। गोपवनादिर्बिदाद्यन्तर्गणः। बिदाः। और्वः और्वौ उर्वाः। काश्यपः काश्यपौ कश्यपाः। भारद्वाजः भारद्वाजौ भरद्वाजाः। अथेन्द्रद्रुः सप्तमः काश्यपानां भारद्वाजानां कत-मोऽसीत्यत्र बहुषु लुप् कस्मान्न भवति? नायमञ् किंतु तस्येदमिति विवक्षायामण्। सर्वेषामपि हि पितरोऽभेदोपचारेण कश्यपाः। यथा बभ्रुः मण्डुः लमक इति। वृद्ध इति किम्। बिदस्यापत्यमनन्तरं बैदिः।

११३० **गर्गादेर्यञ्** ॥ ६।१।४२ ॥ गर्गादिभ्यो ञ्सन्तेभ्यो वृद्धेऽपत्येऽर्थे यञ् प्रत्ययः स्यात्। गर्गस्यापत्यं वृद्धं गार्ग्यः। वात्स्यः। बहुवचने गर्गाः। वत्साः। वृद्ध इत्येव। गर्गस्यापत्यमनन्तरं गार्गिः। गोत्र इत्येव। गर्गो नाम कश्चित् तस्यापत्यं वृद्धं गार्गिः। ननु मनोरत्र पाठाल्लोहितादित्वात् स्त्रियां नित्यं ङायनि

ङ्यां च मानव्यायनीति स्यात् तत्कथं मानवी प्रजेति? उच्यते। अपत्यसामान्यविवक्षायां ' ङ्सोऽपत्ये ' इत्यणि भविष्यति। कथमनन्तरो रामो जामदग्न्यः व्यासः पाराशर्यः? पुत्रेऽपि पौत्रादिकार्यकरणात् तथोच्यते। अनन्तरापत्यविवक्षायां जामदग्नः। पाराशरिः। कथं पाराशरः? तस्येदमिति विवक्षायां भविष्यति।

११३१ **मधुबभ्रोर्ब्राह्मणकौशिके** ॥६।१।४३॥ मधुशब्दाद् बभ्रुशब्दाच्च यथासंख्यं ब्राह्मणे कौशिके वृद्धेऽपत्येऽर्थे यञ् प्रत्ययः स्यात्। माधव्यो ब्राह्मणः। माधवोऽन्यः। बाभ्रव्यः कौशिकः। बाभ्रवोऽन्यः। बभ्रोर्गर्गादिपाठाद् यञि सिद्धे कौशिके नियमार्थं वचनम्। गर्गादिपाठस्तु लोहितादिकार्यार्थः तेन बाभ्रव्यायणीति नित्यं डायन्। केचित्तु अकौशिकेऽपि लोहितादिपाठाद्यञमिच्छन्ति, तन्मतेनेदं यञ्विधानं बभ्रोर्लोहितादेर्बहिष्करणार्थम्। तेन कौशिके यञि सति लोहितादिकार्यं न भवति। तथा च स्त्रियां डायन् वा भवति। बाभ्रवी बाभ्रव्यायणी च कौशिकी।

११३२ **कपिबोधादाङ्गिरसे** ॥६।१।४४॥ कपिबोधशब्दाभ्यामाङ्गिरसेऽपत्यविशेषे वृद्धे यञ् प्रत्ययः स्यात्। कपेरपत्यं वृद्धमाङ्गिरसः काप्यः। एवं बौध्यः। अन्यः कापेयः। बौधिः। कपिशब्दो गर्गादिषु पठ्यते तस्येहोपादानं नियमार्थम्। आङ्गिरस एव यञ् नान्यत्रेति। लोहितादिकार्यार्थश्च गणपाठः। काप्यायनी। मधुबोधयोस्तु यञन्तयोरुभयम्। माधवी। माधव्यायनी। बौधी। बौध्यायनी।

११३३ **वतण्डात्** ॥६।१।४५॥ वतण्डशब्दादाङ्गिरसेऽपत्यविशेषे यञेव स्यात्। वतण्डस्यापत्यं वृद्धमाङ्गिरसः वातण्ड्यः। आङ्गिरसादन्यत्र गर्गादिशिवादिपाठाद्यञ् अण् च भवतः। वातण्ड्यः। वातण्डः। गर्गादिपाठादेव यञि सिद्धे वचनमाङ्गिरसे शिवाद्यण्बाधनार्थम्। शिवादिपाठोऽप्यस्य वृद्ध एवाण्विधानार्थः। अन्यत्र हि ऋषित्वादेवाण् सिद्धः।

११३४ **स्त्रियां लुप्** ॥६।१।४६॥ वतण्डशब्दादाङ्गिरसेऽपत्यविशेषे वृद्धे स्त्रियां यञो लुप् स्यात्। वतण्डस्यापत्यं वृद्धं स्त्री आङ्गिरसी वतण्डी। जातिलक्षणो ङीः। अनाङ्गिरसे तु शिवादिपाठात् वातण्डी। लोहितादिपाठाद् वातण्ड्यायनी।

११३५ **कुञ्जादेर्ढायन्यः** ॥१।१।४७॥ कुञ्जादिभ्यो ङ्सन्तेभ्यो वृद्धेऽपत्येऽर्थे ढायन्यः प्रत्ययः स्यात्। कुञ्जस्यापत्यं वृद्धं कौञ्जायन्यः। वृद्ध इत्येव।

कुञ्जस्यापत्यमनन्तरं कौञ्जिः। ञकारो ञित्कार्यार्थः।

११३६ **स्त्रीबहुष्वायनञ्** ॥६।१।४८॥ कुञ्जादिभ्यो ङसन्तेभ्यो बहुत्वविशिष्टे वृद्धे स्त्रियां वा बहुत्वेऽपि आयनञ् प्रत्ययः स्यात्। कुञ्जस्यापत्यं स्त्री कौञ्जायनी। कुञ्जस्यापत्यानि कौञ्जायनाः। ञकारो ञित्कार्यार्थः।

११३७ **अश्वादेः** ॥६।१।४९॥ अश्वादिभ्यो वृद्धेऽपत्ये आयनञ् प्रत्ययः स्यात्। अश्वस्यापत्यं वृद्धमाश्वायनः। वृद्ध इत्येव। आश्विः। गोत्र इत्येव। अश्वो नाम कश्चित् तस्यापत्यं वृद्धमाश्विः।

११३८ **शपभरद्वाजादात्रेये** ॥६।१।५०॥ शप भरद्वाज इत्येताभ्यामात्रेयापत्ये वृद्धे आयनञ् प्रत्ययः स्यात्। शापायनः, भारद्वाजायनः आत्रेयश्चेत्। आत्रेय इति किम्। भारद्वाजः विदादित्वात्।

११३९ **भर्गात्त्रैगर्ते** ॥६।१।५१॥ भर्गशब्दात् त्रैगर्ते वृद्धेऽपत्ये आयनञ् प्रत्ययः स्यात्। भार्गायणस्त्रैगर्तश्चेत्। भार्गिरन्यः।

११४० **आत्रेयाद् भारद्वाजे** ॥६।१।५२॥ आत्रेयशब्दाद् वृद्धप्रत्ययान्ताद् भारद्वाजे युन्यपत्ये आयनञ् प्रत्ययः स्यात्। आत्रेयायणो भारद्वाजो युवा। आत्रेयोऽन्यः। अत्र–

११४१ **ञिदार्षादणिञोः** ॥६।१।१४०॥ ञित् आर्षश्च योऽपत्यप्रत्ययस्तदन्तात् परस्य युवप्रत्ययस्य अण इञश्च लुप् स्यात्। इत्यनेनेञो लुप्।

११४२ **नडादिभ्य आयनण्** ॥६।१।५३॥ नडादिभ्यो ङसन्तेभ्यो वृद्धेऽपत्ये आयनण् प्रत्ययः स्यात्। नडस्यापत्यं वृद्धं नाडायनः। चारायणः। वृद्ध इत्येव। नडस्यापत्यमनन्तरं नाडिः। णकारो वृद्ध्यर्थः। बहुवचनमाकृतिगणार्थम्।

११४३ **यञिञः** ॥६।१।५४॥ वृद्ध इति यञिञोर्विशेषणम्। वृद्धे विहितौ यौ यञिञौ तदन्ताद् युन्यपत्ये आयनण् प्रत्ययः स्यात्। वृद्धाद्यूनीतिवचनाद्यूनीति लभ्यते। गार्ग्यस्यापत्यं युवा गार्ग्यायणः। वात्स्यायनः। दाक्षेर्युवापत्यं दाक्षायणः। वृद्धविहितस्येञो ग्रहणादिह न भवति। उदुम्बराणां राजा औदुम्बरिस्तस्यापत्यमौदुम्बरः औदुम्बरायणिर्वा। 'अवृद्धादोर्न वा' इति पक्षे आयनिञ्। गार्ग्यो अपत्यं गार्गेयः, दाक्षेयः इत्यत्र परत्वात् ङ्याप्प्रातिपदिकात् इत्येयण् भवति।

११४४ हरितादेरञः ॥६।१।५५॥ विदाद्यन्तर्गणो हरितादिः । वृद्धे विहितो योऽञ् तदन्तेभ्यो हरितादिभ्यो यून्यपत्ये आयनण् प्रत्ययः स्यात् । हरितस्यापत्यं युवा हारितायनः । कैन्दासायनः । हरितादेरिति किम् । बैदस्यापत्यं युवा बैदः । अत्रेञो लुप् । अञ इति किम् । हरितस्यापत्यं वृद्धं हारितः ।

११४५ क्रोष्टुशालङ्कोर्लुक् च ॥६।१।५६॥ क्रोष्टु शालङ्कु इत्येताभ्यां वृद्धेऽपत्ये आयनण् प्रत्ययः स्यात् । क्रोष्टुरपत्यं वृद्धं क्रौष्टायनः। शालङ्कायनः ।

११४६ दर्भकृष्णाग्निशर्मरणशरद्वच्छुनकादाग्रायणब्राह्मणवार्षगण्यवासिष्ठभार्गववात्स्ये ॥६।१।५७॥ दर्भादिभ्य आग्रायणादिषु यथासंख्यं वृद्धेष्वपत्येषु आयनण् प्रत्ययः स्यात् । दर्भादाग्रायणे–दर्भस्यापत्यं वृद्धमाग्रायणश्चेत् दार्भायणः। दार्भिरन्यः। कृष्णाद् ब्राह्मणे–काष्णायनो ब्राह्मणः । कार्ष्णिरन्यः। अग्निशर्मणो वार्षगण्ये–आग्निशर्मायणो वार्षगण्यः । आग्निशर्मिरन्यः। रणाद्वासिष्ठे–राणायनो वासिष्ठः । राणिरन्यः । शरद्वतो भार्गवे–शारद्वतायनो भार्गवः । शारद्वतोऽन्यः । शुनकाद् वात्स्ये–शौनकायनो वात्स्यः । शौनकोऽन्यः । शरद्वच्छुनकौ बिदादी ।

११४७ जीवन्तपर्वताद्वा ॥६।१।५८॥ जीवन्तपर्वताभ्यां वृद्धेऽपत्ये आयनण् प्रत्ययो वा स्यात् । जैवन्तायनः । जैवन्तिः । पार्वतायनः । पार्वतिः । वृद्धे इत्येव । जैवन्तिः ।

११४८ द्रोणाद्वा ॥६।१।५९॥ योगविभागाद् वृद्ध इति निवृत्तम् । द्रोणशब्दादपत्यमात्रे आयनण् प्रत्ययो वा स्यात् । द्रौणायनः। द्रौणिः।

११४९ शिवादेरण् ॥६।१।६०॥ शिवादिभ्यो ञ्स्नन्तेभ्योऽपत्यमात्रेऽण् प्रत्ययः स्यात् । अत इञादेरपवादः । शिवस्यापत्यं शैवः। मौष्टः।

११५० ऋषिवृष्ण्यन्धककुरुभ्यः ॥६।१।६१॥ ऋषयो लौकिका वसिष्ठादयः अपत्ययोगात् । वृष्णयः अन्धकाः। कुरवश्च प्रसिद्धा वंशाख्याः क्षत्रियाः । ऋष्यादिवचनेभ्यः शब्देभ्योऽपत्येऽण् प्रत्ययः स्यात् । इञोऽपवादः । ऋषि–वासिष्ठः । वैश्वामित्रः । वृष्णि–वासुदेवः । आनिरुद्धः । अन्धक–श्वाफल्कः । रान्ध्रसः । कुरु–नाकुलः । साहदेवः । अञ्यादिभ्यस्तु परत्वात् एयण् ञ्येञौ च

भवतः । आत्रेयः, जातसेनिः इत्यादि । कथं दौर्योधनिः ? क्रियाशब्दत्वात् दुःखेन युध्यत इति । यौधिष्ठिरिरार्जुनिरित्यत्र तु बाह्वादित्वादिञेव ।

११५१ **कन्यात्रिवेण्याः कनीनत्रिवणं च** ॥६।१।६२॥ कन्याशब्दात् त्रिवेणीशब्दाच्चापत्येऽण् प्रत्ययः स्यात् तत्संनियोगे कनीन त्रिवण इत्येतावादेशौ च यथासंख्यं स्याताम् । कन्याया अपत्यं कानीनो व्यासः कर्णश्च । त्रिवेण्या अपत्यं त्रैवणः । एयणोऽपवादः ।

११५२ **शुङ्गाभ्यां भारद्वाजे** ॥६।१।६३॥ शुङ्गशब्दात् पुंलिङ्गात् स्त्रीलिङ्गाच्च भारद्वाजेऽपत्येऽण् प्रत्ययः स्यात् । शुङ्गस्य शुङ्गाया वा अपत्यं शौङ्गो भारद्वाजः । शौङ्गिः शौङ्गेयश्चान्यः । ' नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ' इति सिद्धे परत्वात् ' द्विस्वरादनद्याः ' इत्येयण् प्राप्नोति तद्बाधनार्थं द्विवचनेन स्त्रीलिङ्गः शुङ्गाशब्द उपादीयते ।

११५३ **विकर्णच्छगलाद्वात्स्यात्रेये** ॥६।१।६४॥ विकर्ण छगल इत्येताभ्यां यथासंख्यं वात्स्ये आत्रेये चापत्येऽण् प्रत्ययः स्यात् । वैकर्णो वात्स्यः । वैकर्णिरन्यः। छागल आत्रेयः । छागलिरन्यः ।

११५४ **णश्च विश्रवसो विश्लुक् च वा** ॥६।१।६५॥ विश्रवसोऽपत्येऽण्प्रत्ययस्तत्संनियोगे णकारश्चान्तादेशो भवति णसंनियोगे विश्शब्दलोपश्चास्य वा । विश्रवसोऽपत्यं वैश्रवणः । विश्लुकि तु रावणः । अण् सिद्ध एवादेशार्थं वचनम् । एवमुत्तरत्र ।

११५५ **संख्यासंभद्रान्मातुर्मातुर् च** ॥६।१।६६॥ संख्यावाचिनः सम् भद्र इत्येताभ्यां च परो यो मातृशब्दस्तदन्तादपत्येऽण् प्रत्ययः स्यात् मातुश्च मातुरादेशः। द्वयोर्मात्रोरपत्यं द्वैमातुरः। षण्मातुरः। संगता माता संमाता तस्या अपत्यं सांमातुरः। भद्राया भद्रस्य वा माता भद्रमाता तस्या अपत्यं भाद्रमातुरः । ' संबंधिनां संबंधे' इति वचनात् धान्यमातुर्न भवति । तेन द्वयोर्मात्रोरपत्यं द्वैमात्रः । अत्रादेशो न भवति । संख्यासंभद्रादिति किम् ।। सौमात्रः । शुभ्रादिपाठाद्वैमात्रेयः ।

११५६ **संज्ञा दुर्वा** ॥ ६।१।६ ॥ या संज्ञा संव्यवहाराय हठान्नियुज्यते सा दुसंज्ञा वा स्यात् ।

११५७ **त्यदादिः** ॥६।१।७॥ सर्वाद्यन्तर्गतास्त्यदादयो दुसंज्ञाः स्युः।

११५८ वृद्धिर्यस्य स्वरेष्वादिः ॥६।१।८॥ यस्य शब्दस्य स्वरेषु मध्ये आदिः स्वरो वृद्धिसंज्ञो भवति स दुसंज्ञः स्यात् ।

११५९ अदोर्नदीमानुषीनाम्नः ॥६।१।६७॥ अदुसंज्ञकान्नदीनाम्नो मानुषीनाम्नश्चापत्येऽण्प्रत्ययः स्यात् । एयणोऽपवादः । यामुनः प्रणेतः । [1]दैवदत्तः । अदोरिति किम् । चान्द्रभागेयः । नदीमानुषीग्रहणं किम् । सुपर्ण्याः [2]सुपर्णाया वा अपत्यं सौपर्णेयः ।देवीत्येके । पक्षिणीत्यन्ये । नामग्रहणं किम् । शौभनेयः । शोभनाशब्दो नद्यां मानुष्यां च वर्तते न तु नामधेयत्वेन ।

११६० पीलासाल्वामण्डूकाद्वा ॥ ६।१।६८ ॥ पीलासाल्वामण्डूकशब्देभ्योऽपत्येऽण्प्रत्ययो वा स्यात् । पैलः, पैलेयः । साल्वः, साल्वेयः । माण्डूकः, माण्डूकिः । पीलासाल्वाभ्यां द्विस्वरैयणि मण्डूकादिञि प्राप्ते वचनम् । वाग्रहणं मण्डूकस्य इञर्थम् ।

११६१ दितेश्चैयण् वा ॥६।१।६९॥ दितिशब्दान्मण्डूकशब्दाच्च ङसन्तादपत्ये एयण् वा स्यात् । दैतेयः, दैत्यः। माण्डूकेयः, माण्डूकिः। चकारो मण्डूकार्थः। पीलासाल्वाभ्यां ह्यण्विकल्पादेव एयण् सिद्धः । मण्डूके त्रैरूप्यं सिद्धमेव । वाग्रहणं दितेर्ञ्यर्थम् । 'इतोऽनित्र' इति वक्ष्यमाणेनैव दितेरेयणि सिद्धे ' अनिदम्यणपवादे च ' इत्यनेन तस्य बाधायां प्रतिप्रसवार्थं वचनम् ।

११६२ ङ्याप्त्यूङः ॥६।१।७०॥ ङ्यन्तादाबन्तात्स्यन्तादूङन्ताच्चापत्ये एयण् प्रत्ययः स्यात् । सौपर्णेयः । वैनतेयः । यौवतेयः । कामण्डलेयः। अत्र–

११६३ अकद्रूपाण्ड्वोरुवर्णस्यैये ॥७।४।६९॥ कद्रूपाण्डुवर्जोवर्णान्तस्य एये तद्धिते लुक् स्यात् । इत्यनेनोवर्णस्य लुक् ।

११६४ द्विस्वरादनद्याः ॥६।१।७१॥ द्विस्वरात् ङ्याप्त्यूङन्तादनदीवाचिनोऽपत्ये एयण् प्रत्ययः स्यात् । दात्तेयः। अनद्या इति किम् । सिप्रायाः सैप्रः। अदोर्नदीमानुषीनाम्नोऽपवादो योगः ।

---

१ अदोरेवेति सावधारणव्याख्यानात् या नित्यं दुसंज्ञा सैवात्र गृह्यते न तु संज्ञा दुर्वेति वैकल्पिकी । तेन दैवदत्त इत्यादि सिद्धम्। अन्यथाऽत्र संदेहः स्यात् । अत एव व्यावृत्त्युदाहरणे नित्या दुसंज्ञा उदाहृता ।

२ गरुडमातुर्जातित्वमन्ये न मन्यन्त इत्याप् ।

११६५ इतोऽनिञः ॥६।१।७२॥ इञन्तवर्जितात् द्विस्वरादिकारान्तादपत्ये एयण्प्रत्ययः स्यात्। नाभेरपत्यं नाभेयः। अत्रेरात्रेयः। इत इति किम्। दाक्षिः। अनिञ इति किम्। दाक्षायणः। द्विस्वरादित्येव। मरीचेरपत्यं मारीचः। कथमजवस्तेरपत्यमाजवस्तेय इत्यादि ? शुभ्रादित्वाद् भविष्यति।

११६६ शुभ्रादिभ्यः ॥ ६।१।७३ ॥ शुभ्रादिभ्योऽपत्ये एयण्प्रत्ययः स्यात्। यथायोगमित्रादीनामपवादः। शौभ्रेयः। गाङ्गेयः। बहुवचनमाकृतिगणार्थम्।

११६७ प्राद्वाहणस्यैये ॥७।४।२१॥ प्रशब्दात् परस्य वाहणशब्दस्य एये ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् पूर्वस्य तु प्रशब्दस्य वा। प्रवाहयतीति प्रवाहणः प्रवाहणस्यापत्यं प्रवाहणेयः, प्रावाहणेयः। अत्रोत्तरपदवृद्धेः प्रयोजनं प्रवाहणेयी भार्या यस्य प्रवाहणेयीभार्यः इत्यत्र पुंवद्भावप्रतिषेधः।

११६८ एयस्य ॥७।४।२२॥ एयप्रत्ययान्तावयवात् प्रशब्दात् परस्य वाहणशब्दस्य ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् आदेस्तु प्रशब्दस्य वा। प्रवाहणेयस्यापत्यं युवा प्रवाहणेयिः, प्रावाहणेयिः। बाह्यतद्धितनिमित्ता वृद्धिरेयाश्रयेण विकल्पेनाशक्या बाधितुमिति सूत्रारंभः।

११६९ श्यामलक्षणाद्वासिष्ठे ॥६।१।७४॥ श्यामलक्षण इत्येताभ्यां वासिष्ठेऽपत्यविशेषे एयण्प्रत्ययः स्यात्। श्यामेयो वासिष्ठः। श्यामायनोऽन्यः। अश्वादित्वात् वृद्धे आयनञ् अवृद्धे तु श्यामिः। लाक्षणेयो वासिष्ठः। लाक्षणिरन्यः।

११७० विकर्णकुषीतकात् काश्यपे ॥६।१।७५॥ विकर्णकुषीतक इत्येताभ्यां काश्यपेऽपत्यविशेषे एयण्प्रत्ययः स्यात्। वैकर्णेयः, कौषीतकेयः काश्यपः। वैकर्णिः, कौषीतकिरन्यः।

११७१ भ्रुवो भुवच्च ॥६।१।७६॥ भ्रूशब्दादपत्ये एयण्प्रत्ययः स्यात् भ्रुव् चास्यादेशः। भौवेयः।

११७२ कल्याण्यादेरिन् चान्तस्य ॥ ६।१।७७॥ कल्याण्यादिभ्योऽपत्ये एयण्प्रत्ययः स्यात् इन् इत्ययं चान्तादेशः। कल्याण्या अपत्यं काल्याणिनेयः। सुभगाया अपत्यमित्यत्रानेन एयणि इन्नन्तादेशे च कृते।

११७३ हृद्भगसिन्ध्वोः ॥ ७।४।२५॥ हृद्भगसिन्धु इत्येवमन्तानां ञ्णिति तद्धिते पूर्वपदस्योत्तरपदस्य च स्वरेष्वादेः स्वरस्य वृद्धिः स्यात्। सौभागिनेयः।

सुहृदोऽपत्यं सौहार्दः । परस्त्रिया अपत्यमित्यत्रापि कल्याण्यादित्वादेयणि इन्नन्तादेशे च कृते।

११७४ **अनुशतिकादीनाम्** ॥ ७।४।२७ ॥ अनुशतिक इत्येवमादीनां शब्दानां ञ्णिति तद्धिते परे पूर्वपदस्योत्तरपदस्य च स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् । इत्युभयपदवृद्धिः । पारस्त्रैणेयः ।

११७५ **कुलटाया वा** ॥६।१।७८॥ कुलान्यटति कुलटा । कुलटाशब्दादपत्ये एयण् प्रत्ययः स्यात् तत्संनियोगे इन् च वान्तादेशः। आबन्तत्वादेयण् सिद्ध आदेशार्थं वचनम् । अत एवादेशस्यैव विकल्पो न त्वेयणः । कौलटिनेयः, कौलटेयः । या तु कुलान्यटन्ती शीलं भिनत्ति ततः परत्वात् क्षुद्रालक्षण एरणेव । कौलटेरः ।

११७६ **चटकाण्णैरः स्त्रियां तु लुप्** ॥६।१।७९॥ चटकशब्दाद् ङ्सन्तादपत्ये णैरः स्यात् स्त्रियां त्वपत्ये विहितस्य णैरस्य लुप् । चटकस्यापत्यं चाटकैरः । लिङ्गविशिष्टस्य ग्रहणात् चटकाया अपि चाटकैरः । स्त्रियां तु लुप्–चटकस्य चटकाया वा अपत्यं स्त्री चटका । चटकेति जातिशब्दोऽस्त्येव स्त्रियामपत्ये प्रत्ययाश्रवणार्थं लुब्वचनम् । अस्त्रियामित्येव सिद्धे प्रत्ययान्तरबाधनार्थं णैरविधानम् ।

११७७ **क्षुद्राभ्य एरण् वा** ॥६।१।८०॥ क्षुद्रा अङ्गहीना अनियतपुंस्का वा स्त्रियः । बहुवचनं क्षुद्रार्थपरिग्रहार्थम् । क्षुद्रावाचिभ्यः शब्देभ्यो ङ्सन्तेभ्यः स्त्रीलिङ्गेभ्योऽपत्ये एरण् प्रत्ययो वा स्यात् । अणेयणोरपवादः। काणाया अपत्यं काणेरः, काणेयः । दास्या अपत्यं दासेरः दासेयः । नट्या नाटेरः, नाटेयः।

११७८ **गोधाया दुष्टे णारश्च** ॥ ६।१।८१ ॥ गोधाशब्दाद् ङ्सन्ताद् दुष्टेऽपत्ये णारश्चकारादेरण् च प्रत्ययः स्यात्। गोधाया अपत्यं दुष्टं गौधारः,गौधेरः। योऽहिना गोधायां जन्यते । गौधेयोऽन्यः। शुभ्रादित्वादेयण् ।

११७९ **जण्टपण्टात्** ॥६।१।८२॥ जण्टपण्ट इत्येताभ्यामपत्ये णारः प्रत्ययः स्यात्। जाण्टारः। पाण्टारः। केचित्तु पक्षस्यापत्यं पाक्षार इत्यपीच्छन्ति ।

११८० **चतुष्पाद्भ्य एयञ्** ॥६।१।८३॥ चतुष्पाद्वाचिभ्यो ङ्सन्तेभ्योऽपत्ये एयञ् प्रत्ययः स्यात् । अणादीनामपवादः । कमण्डलवा अपत्यं कामण्डलेयः । सुरभेः सौरभेयः ।

११८१ गृष्ट्यादेः ॥६।१।८४॥ गृष्ट्यादिभ्योऽपत्ये एयञ् प्रत्ययः स्यात्। अणादीनामपवादः। गृष्टेरपत्यं गार्ष्टेयः। गृष्टिशब्दो यश्चतुष्पाद्वचनस्ततः पूर्वेणैव सिद्धे अचतुष्पादर्थमुपादानम्। मित्रयोरपत्यमित्यत्रानेन एयञ्। ततश्च।

११८२ केकयमित्रयुप्रलयस्य यादेरिय् च ॥७।४।२॥ एतेषां ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् यादेश्च शब्दरूपस्य इयादेशः। इति इयादेशे प्राप्ते।

११८३ **सारवैक्ष्वाकमैत्रेयभ्रौणहत्यधैवत्याहिरण्मयम्** ॥ ७।४।३० ॥ एते निपात्यन्ते। इति युलोपः। मैत्रेयः। मैत्रेयौ।

११८४ यस्कादेर्गोत्रे ॥६।१।१२५॥ यस्कादिभ्यो यः प्रत्ययो विहितस्तदन्तस्य बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानस्य यस्कादेर्यः स प्रत्ययस्तस्यास्त्रियां लुप् स्यात्। मित्रयवः। अथ मित्रयुशब्दो बिदादिषु किं न पठ्यते। तथा च 'केकयमित्रयु'—इत्यादिनेयादेशेनैव सिद्ध्यतीति नेदं निपातनमारब्धव्यं भवति। यस्कादिषु च मित्रयुशब्दो बहुषु लुबर्थं न पठितव्यो भवति 'यञञः' इत्यादिनैव सिद्धत्वात्। उच्यते। अञि सति मित्रयूणां संघो मैत्रेयकमित्यत्राकञं बाधित्वाण् स्यादिति बिदादिषु न पठ्यते।

११८५ वाडवेयो वृषे ॥६।१।८५॥ वाडवेय इति वडवाशब्दात् वृषे एयञ् एयण् वा प्रत्ययो निपात्यते। वृषो यो गर्भे बीजं निषिञ्चति। वडवाया वृषः वाडवेयः। अपत्ये अणेव भवति। वाडवः। निपातनमेयणेयञोरुभयोरपि वृषे व्यवस्थापनार्थम्। अन्यथाऽन्यतरोऽपत्ये प्रसज्येत।

११८६ रेवत्यादेरिकण् ॥६।१।८६॥ रेवतीत्येवमादिभ्योऽपत्ये इकण् प्रत्ययः स्यात्। एयणादीनामपवादः। रैवतिकः।

११८७ वृद्धस्त्रियाः क्षेपे णश्च ॥६।१।८७॥ वृद्धप्रत्ययान्तात् स्त्रीवाचिनः शब्दादपत्ये णः प्रत्ययः स्यात् चकारादिकण् क्षेपे गम्यमाने। पितुरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य क्षेपः।

११८८ तद्धितयस्वरेऽनाति ॥२।४।९२॥ व्यञ्जनात् परस्यापत्ययकारस्य यकारादावाकारादिवर्जिते स्वरादौ तद्धिते लुक् स्यात्। गार्ग्यो अपत्यं युवा गार्गः गार्गिको वा जाल्मः। वृद्धाद्यूनीति यूनि प्रत्ययः। वृद्धग्रहणं किम्। कारिकेयो

जाल्मः । स्त्रिया इति किम् । औपगविर्जाल्मः । क्षेप इति किम् । गार्गेयो माणवकः । मातुःसंविज्ञानार्थमिदमुच्यते ।

११८९ **भ्रातुर्व्यः** ॥६।१।८८॥ भ्रातृशब्दादपत्ये व्यः प्रत्ययः स्यात् । भ्रातुरपत्यं भ्रातृव्यः । शत्रुरपि भ्रातृव्य उच्यते स उपचारात् । एकद्रव्याभिलाषश्चोपचारनिमित्तम् ।

११९० **ईयः स्वसुश्च** ॥६।१।८९॥ भ्रातृशब्दात् स्वसृशब्दाच्चापत्ये ईयः स्यात् । भ्रात्रीयः । स्वस्रीयः ।

११९१ **मातृपित्रादेर्डेयणीयणौ** ॥६।१।९०॥ मातृपितृशब्दावादी अवयवौ यस्य स्वसुः स्वस्रन्तस्य तस्मात् मातृष्वसृशब्दात् पितृष्वसृशब्दाच्चापत्ये डेयण् ईयण् इत्येतौ प्रत्ययौ स्याताम् । वचनभेदान्न यथासंख्यम् । मातृष्वसेयः । मातृष्वस्रीयः । पैतृष्वसेयः । पैतृष्वस्रीयः । डित्वात् डेयणि अन्त्यस्वरादिलोपः । मातृपित्रादेः स्वस्रन्तस्य ग्रहणादिह न भवति । परममातृष्वसुरपत्यम् । परमपितृष्वसुरपत्यम् । मातृपितृशब्दयोर्ऋकारान्तयोर्निर्देशात् इह न भवति । मातुःस्वस्रः । मातुःष्वस्रः । पैतुःस्वस्रः । पैतुःष्वस्रः । अत्र अलुपि वेति विकल्पेन षत्वम् ।

११९२ **श्वशुराद्यः** ॥६।१।९१॥ श्वशुरशब्दादपत्ये यः प्रत्ययः स्यात् । श्वशुरस्यापत्यं श्वशुर्यः । ' संबंधिनां संबंधे ' इतीह न भवति । श्वशुरो नाम कश्चित् तस्यापत्यं श्वाशुरिः ।

११९३ **जातौ राज्ञः** ॥६।१।९२॥ राजन्शब्दादपत्ये जातौ गम्यमानायां यः स्यात् ।

११९४ **अनोऽट्ये ये** ॥७।४।७१॥ अन् इत्येतदन्तस्य व्यवर्जिते ये प्रत्यये परेऽन्त्यस्वरादेर्लुग्न स्यात् । राज्ञोऽपत्यं राजन्यः क्षत्रियजातिश्चेत् । जाताविति किम् । राजनोऽन्यः ।

११९५ **क्षत्रादियः** ॥६।१।९३॥ क्षत्रशब्दादपत्ये इयः प्रत्ययः स्यात् जातौ गम्यमानायाम् । क्षत्रस्यापत्यं क्षत्रियः जातिश्चेत् । क्षात्रिरन्यः ।

११९६ **मनोर्याणौ षश्चान्तः** ॥६।१।९४॥ मनुशब्दादपत्ये य अण् इत्येतौ प्रत्ययौ स्याताम् तत्संनियोगे च मनुशब्दस्य षकारोऽन्तो जातौ गम्यमानायाम् । मनोरपत्यानि मनुष्याः, मानुषाः । मानुषी । जाताविति एव । मानवः । मानवाः ।

मानवीः प्रजाः पश्य । अत्र हि मनोरपत्यमित्येतावानेवार्थो विवक्षितो न जातिस्तेन षोऽन्तो न भवति । वृद्धापत्यविवक्षायां तु लोहितादिपाठाद्यञेव । मानव्यः । मानव्यौ । मनवः । मानव्यायनी । मनुष्यमानुषशब्दाभ्यां सत्यसति चापत्येऽर्थे अनभिधानादपत्ये पुनरन्यः प्रत्ययो न भवति ।

११९७ **माणवः कुत्सायाम्** ॥६।१।९५॥ माणव इति मनुशब्दस्यौत्सर्गिकेऽण्प्रत्यये कुत्सायां गम्यमानायां नकारस्य णकारादेशो निपात्यते । मनोरपत्यं । कुत्सितं मूढं माणवः ।

११९८ **कुलादीनः** ॥६।१।९६॥ कुलशब्दान्तात् केवलाच्च कुलशब्दादपत्ये ईनः प्रत्ययः स्यात् । कुलस्यापत्यं कुलीनः। ईषपरिदसमाप्तं कुलं बहुकुलम् तस्यापत्यं बहुकुलीनः । क्षत्रियकुलीनः । एषु अत इञः अदोरायनेश्चापवादः। आढ्यकुलीनः। राजकुलीनः । अत्र ' अवृद्धादोर्न वा ' इत्यायनिञोऽत इञश्च । उत्तरसूत्रे समासे प्रतिषेधादिह कुलान्तः केवलश्च गृह्यते ।

११९९ **यैयकञावसमासे वा** ॥६।१।९७॥ कुलशब्दान्तात् केवलाच्च कुलशब्दादपत्ये य एयकञ् इत्येतौ प्रत्ययौ वा स्याताम् ताभ्यां मुक्ते ईनश्च न चेत् कुलशब्दः समासे वर्तते । कुल्यः, कौलेयकः, कुलीनः । बहुकुल्यः, बाहुकुलेयकः, बहुकुलीनः । असमास इति किम् । आढ्यकुलीनः ।

१२०० **दुष्कुलाद्देयण् वा** ॥ ६।१।९८ ॥ दुष्कुलशब्दादपत्ये एयण् प्रत्ययो वा स्यात् । दौष्कुलेयः । दुष्कुलीनः ।

१२०१ **महाकुलाद्ढाञीनञौ** ॥ ६।१।९९ ॥ महाकुलशब्दादपत्ये अञ् ईनञ् इत्येतौ प्रत्ययौ वा स्याताम् ताभ्यां मुक्ते ईनश्च । माहाकुलः, माहाकुलीनः महाकुलीनः । महेत्याकारनिर्देशात् महतां कुलं महत्कुलं तस्यापत्यं महत्कुलीन इति ईन एव भवति ।

१२०२ **कुर्वादेर्ण्यः** ॥६।१।१००॥ कुरु इत्येवमादिभ्योऽपत्ये ण्यः प्रत्ययः स्यात् । कौरव्यः । अक्षत्रियवचनस्येह कुरोर्ग्रहणम्, क्षत्रियवचनात्तु ' दुनादिकुर्विल्कोशलाजादाञ्ञ्यः' इत्यनेन ञ्यः। अयं चानयोर्विशेषः। तस्य द्विसंज्ञकत्वात् बहुषु लुप् कुरवः । अस्य तु द्विसंज्ञाया अभावात् कौरव्याः ततो यूनि तिकादिपाठादायनिञ् । कौरव्यायणिः । अस्माच्चात इञ् । तस्य ' ञिदार्षादणिञोः ' इति लुप् ।

कौरव्यः । कुरुशब्दश्च तिकादिष्वपि पठ्यते । कौरवायणिः । उत्साद्यञ् तु ञ्यायनिञ्भ्यां बाधितः कुरुशब्दादपत्ये न भवति । शङ्कु–शाङ्कव्यः। बहुषु शाङ्कव्याः। स्त्री शाङ्कव्या । लोहितादौ पाठात् पौत्रादौ यञि शाङ्कव्यः । बहुषु लुप् शङ्कवः । स्त्री शाङ्कव्यायनी ।

१२०३ **सम्राजः क्षत्रिये** ॥६।१।१०१॥ सम्राज् इत्येतस्मात् क्षत्रियेऽपत्ये ञ्यः प्रत्ययः स्यात् । सम्राजोऽपत्यं साम्राज्यः क्षत्रियश्चेत् । अन्यत्राणेव साम्राजः। अन्ये साम्राजिरित्याहुः । तत्र सम्राट् बाह्वादिषु द्रष्टव्यः।

१२०४ **सेनान्तकारुलक्ष्मणादिञ् च** ॥६।१।१०२॥ सेनशब्दान्तेभ्यः कारवः कारिणस्तन्तुवायादयस्तद्वाचिभ्यो लक्ष्मणशब्दाच्चापत्ये इञ् प्रत्ययः स्यात् ञ्यश्च । सेनान्त–[1]हारिषेणिः हारिषेण्यः। कारु–तान्तुवायिः, तान्तुवाय्यः। रथकारनापिततक्षभ्यो ञ्य एव नेञ् कुर्वादिपाठात् । कुर्वादौ जातिवाचिन एव पाठात् रथकारादिञपीत्येके । लक्ष्मण–लाक्ष्मणिः, लाक्ष्मण्यः । ऋषिवृष्ण्यन्धककुरुभ्योऽण् ञ्याप्यूङन्तेभ्यस्त्वेयण् परत्वादाभ्यां बाध्यते ।

१२०५ **सुयामनः सौवीरेष्वायनिञ्** ॥ ६।१।१०३ ॥ सुयामनशब्दात् सौवीरेषु जनपदे योऽर्थस्तस्मिन् वर्तमानादपत्ये आयनिञ् प्रत्ययः स्यात् । सौयामायनिः। सौवीरेभ्योऽन्यत्र सौयामः ।

१२०६ **पाण्टाहृतिमिमताण्णश्च** ॥६।१।१०४॥ पाण्टाहृतिशब्दादिञन्तान्मिमतशब्दाच्च सौवीरेषु जनपदे योऽर्थस्तस्मिन् वर्तमानाभ्यामपत्येऽण् आयनिञ् च प्रत्ययौ स्याताम् । पाण्टाहृतेरपत्यं युवा सौवीरगोत्रः पाण्टाहृतः पाण्टाहृतायनिर्वा । मिमतस्य मैमतः मैमतायनिर्वा । सौवीरेष्वित्येव । पाण्टाहृतायनः । ' यञिञः ' इत्यायनण् । मैमतायनः । अत्र नडादित्वात् । अनन्तरो मैमतिः ।

१२०७ **भागवित्तितार्णाबिन्दवाकशापेयान्निन्दवायामिकण्वा** ॥६।१।१०५॥ भागवित्ति तार्णबिन्दव आकशापेय इत्येतेभ्यः सौवीरेषु वृद्धे वर्तमानेभ्यो यून्यपत्ये इकण्प्रत्ययो वा स्यात् निन्दायाम् गम्यमानायाम् । भागवित्तेरपत्यं युवा निन्दितः भागवित्तिकः, भागवित्तायनो वा जाल्मः । तार्णबिन्दविकः,

---

[1] 'पत्यकः' इति पत्वम् ।

तार्णबिन्दविर्वा। आकशापेयिकः, आकशापेयिर्वा। निन्दायामिति किम्। अन्यत्र भागवित्तायनः, तार्णबिन्दविः, आकशापेयिः इत्येव भवति।

१२०८ **सौयामायनियामुन्दायनिबार्ष्यायणेरीयश्च वा** ॥६।१।१०६॥ एभ्य आयनिञन्तेभ्यः सौवीरेषु वृद्धे वर्तमानेभ्यो यून्यपत्ये ईयश्चकारादिकण् च प्रत्ययो वा स्यात् ताभ्यां मुक्तेऽण् प्रत्ययो निन्दायाम् गम्यमानायाम्। सुयामन्नोऽपत्यं सौयामायनिस्तस्यापत्यं युवा निन्दितः सौयामायनीयः, सौयामायनिकः, सौयामायनिर्वा। अणो लुप्। यमुन्दस्यापत्यं यामुन्दायनिः। तिकादित्वादायनिञ्। तस्यापत्यं युवा निन्दितः यामुन्दायनीयः, यामुन्दायनिकः, यामुन्दायनिर्वा। वृषस्यापत्यं वार्ष्यायणिः। दगुकोसलादिमूत्रेण यकारादिरायनिञ्। तस्य वार्ष्यायणीयः, वार्ष्यायणिकः, वार्ष्यायणिर्वा। कश्चित्त्वन्येभ्योऽपीच्छति। तैकायनेरपत्यं युवा तैकायनीयः। निन्दायामित्येव। अन्यत्र सौयामायनिः, यामुन्दायनिः, वार्ष्यायणिर्युवा। अणेव। 'त्रिदार्षादणिञोः' इति तस्य लुप्।

१२०९ **तिकादेरायनिञ्** ॥ ६।१।१०७॥ तिक एवमादिभ्योऽपत्ये आयनिञ् प्रत्ययः स्यात्। इञादेरपवादः। तैकायनिः। कैतवायनिः।

१२१० **दगुकोशलकर्मारच्छागवृषाद्यादिः** ॥६।१।१०८॥ दगु कोशल कर्मार छाग वृष इत्येतेभ्योऽपत्ये यकारादिरायनिञ् प्रत्ययः स्यात्। दागव्यायनिः। कौशल्यायनिः। जनपदसमानशब्दात् क्षत्रियात् 'दुनादि' इत्यादिना ञ्य एव। कौशल्य इति। कार्मार्यायणिः। छाग्यायनिः। वार्ष्यायणिः।

१२११ **द्विस्वरादणः** ॥ ६।१।१०९॥ द्विस्वरादणन्तादपत्ये आयनिञ् प्रत्ययः स्यात्। कर्तुरपत्यं कार्त्रः, तस्य कार्त्रायणिः। पौत्रः, पौत्रायणिः। औत्सर्गिकोऽण्। यास्कायनिः। शिवाद्यण्। द्विस्वरादिति किम्। औपगविः। अण इति किम्। दाक्षेः दाक्षायणः। वृद्धादेवायं विधिः। अवृद्धात्तूत्तरेण विकल्प एव। अङ्गानां राजा आङ्गः तस्यापत्यं आङ्गिः आङ्गायनिर्वा।

१११२ **अवृद्धादोर्नवा** ॥६।१।११०॥ अवृद्धवाचिनो दुसंज्ञकादपत्ये आयनिञ् प्रत्ययो वा स्यात्। आम्रगुप्तायनिः, आम्रगुप्तिः। नापितस्यापत्यं नापितायनिः, नापित्यः, । अस्य पक्षे इञ् नास्ति, तद्बाधनार्थं हि कुर्वादिषु तस्य पाठः। अवृद्धादिति किम्। दाक्षेः दाक्षायणः। दोरिति किम्। अकम्पनस्यापत्यमाकम्पनिः।

१२१३ पुत्रान्तात् ॥६।१।१११॥ पुत्रशब्दान्तात् दुसंज्ञकादपत्ये आयनिञ् मत्ययो वा स्यात् । गार्गीपुत्रायणिः, गार्गीपुत्रिः। पूर्वेणायनिञि सिद्धे वचनमिदमुत्तरसूत्रप्राप्तकागमाभावार्थम् । पक्षे उत्तरेण च कागमोऽपि । एवं च गार्गीपुत्रकायणिरिति तार्तीयिकमपि रूपं भवति ।

१२१४ चर्मिवार्मिगारेटकार्कट्यकाकलंकावाकिनाच्च कश्चान्तोऽन्त्यस्वरात् ॥६।१।११२॥ चर्मिन् वर्मिन् गारेट कार्कट्य काक लंका वाकिन इत्येतेभ्यः पुत्रान्ताच्च दुसंज्ञकादपत्ये आयनिञ् प्रत्ययो वा स्यात् तत्संनियोगे चैषामन्त्यस्वरात् परः ककारोऽन्तः । चार्मिकायणिः, चार्मिणः । वार्मिकायणिः, वार्मिणः । अत्र अणि नोऽपदस्येत्यनेनान्त्यस्वरादेर्लुकि प्राप्ते ।

१२१५ संयोगादिनः ॥७।४।५३॥ संयोगात् परो य इन् तदन्तस्याणि परेऽन्त्यस्वरादेर्लुग् न स्यात् । इति प्रतिषेधान्न भवति । गारेटकायनिः, गारेटिः । कर्कटस्यापत्यं कार्कट्यः, तस्यापत्यं कार्कट्यकायनिः, कार्कट्यायनः । यदा त्वव्युत्पन्नः कार्कट्यशब्दस्तदा पक्षे इञ्येव । कार्कट्यिः । काककायनिः, काकिः। लाङ्ककायनिः, लाङ्क्यः । लङ्कशब्दं केचिदकारान्तमिच्छन्ति, तन्मते लाङ्ककायनिः, लाङ्किः । वाकिनकायनिः, वाकिनिः । पुत्रान्तादोः—गार्गीपुत्रकायणिः, गार्गीपुत्रिः। ककारस्यान्त्यस्वरात् परतो विधानं चर्मिवर्मिणोः नकारस्य लोपार्थम् । यद्येवं परादिरेव क्रियेत । नैवम् । तथा सति प्रत्ययस्य व्यंजनादित्वात्—

१२१६ जातिश्च णितद्धितयस्वरे ॥३।२।५१॥ अन्या परतः स्त्री जातिश्च णिप्रत्यये यकारौ स्वरादौ च तद्धिते विषयभूते उत्पत्स्यमाने तद्विवक्षायामेव पुवंत् स्यात् अनूङ् ।—इत्यनेन पुंवद्भावो न सिद्धयेत्—चर्मिण्या अपत्यं चार्मिकायणिः । ' कोण्डिन्यागस्त्ययोः ' इति सूत्रे 'कौण्डिन्य' इति निर्देशादनित्योऽयं पुंवद्भावः । ततश्च मनाय्या अपत्यं गर्गादित्वात् यञि मानाय्य इत्यत्र न भवति । सपत्न्या अपत्यं शिवादित्वादणि सापत्नः इत्यत्रापि न भवति । ' सपत्न्यादौ ' इति सूत्रे सपत्नीतिसमुदायनिपातनात् । अतएव सपत्नीभार्य इत्यत्रापि न भवति । सपत्नस्यायं सापत्न इति वा भविष्यति ।

१२१७ एयेऽग्नाय्यी ॥ ३।२।५२ ॥ तद्धिते एयप्रत्यये परे आग्नाय्येव परतः स्त्री पुंवत् स्यात् । अग्नाय्या अपत्यं आग्नेयः । कल्यग्नेरेयण् । पूर्वेण सिद्धे

नियमार्थं वचनम् । श्यैनेयः, रौहिणेयः, अत्र पूर्वेणापि युंवद्भावो न भवति ।

१२१८ **अदोरायनिः प्रायः** ॥ ६।१।११३ ॥ अदुसंज्ञकादपत्ये आयनिः प्रत्ययो वा स्यात् प्रायः । ग्लुचुकायनिः, ग्लौचुकिः । अदोरिति किम् । औपगविः । प्रायोग्रहणात् क्वचिन्न भवति । दाक्षिः ।

१२१९ **श्वादेरिति** ॥७।४।१०॥ श्वन्शब्द आदिरवयवो यस्य तस्य श्वादेर्नाम्न इति-इकारादौ ञ्णिति तद्धिते वःप्रागौकारो न स्यात् । श्वभस्त्रस्यापत्यं श्वाभस्त्रिः ।

१२२० **इञः** ॥७।४।११॥ श्वादेरित्प्रत्ययान्तस्य ञ्णिति तद्धिते वकारात् प्रागौकारो न स्यात् । श्वाभस्त्रम् । इकारादौ निमित्त उच्यमानः पूर्वेण प्रतिषेधः इञन्तस्य प्रत्ययान्तरे न प्राप्नोतीति वचनम् ।

१२२१ **षादिहन्धृतराज्ञोऽणि** ॥२।१।११०॥ षकारादेरनो हन्धृतराज्ञित्येतयोश्चाकारस्याणि प्रत्यये लुक् स्यात् । औक्ष्णः । ताक्ष्णः । भ्रौणह्नः । वार्त्रघ्नः । धार्तराज्ञः । षादीनामिति किम् । सामनः । वैमनः । अणीति किम् । ताक्षण्यः ।

१२२२ **अवर्मणो मनोऽपत्ये** ॥७।४।५९॥ वर्मन्शब्दवर्जितस्य मन्नन्तस्यापत्यार्थविहितेऽणि अन्त्यस्वरादेर्लुक् स्यात् । सुषाम्नोऽपत्यं सौषामः । माद्रसामः । भाद्रसामः । अवर्मण इति किम् । चक्रवर्मणोऽपत्यं चाक्रवर्मणः । मन इति किम् । सुत्वनोऽपत्यं सौत्वनः । अपत्य इति किम् । चर्मणा छन्नश्चार्मणो रथः ।

१२२३ **हितनाम्नो वा** ॥७।४।६०॥ हितनामन् शब्दस्यापत्येऽणि परेऽन्त्यस्वरादेर्लुग्वा स्यात् । हितनाम्नोऽपत्यं हैतनामनः, हैतनामः । अपत्य इति किम् । हैतनामनः ।

१२२४ **दण्डिहस्तिनोरायने** ॥७।४।४५॥ दण्डिन् हस्तिन् इत्येतयोरायने प्रत्यये परेऽन्त्यस्वरादेर्लुग्न स्यात् । नोऽपदस्येति प्राप्तौ प्रतिषेधः । दण्डिनोऽपत्यं दाण्डिनायनः । हास्तिनायनः । नडाद्यायनण् । आयन इति किम् । दण्डिनां समूहो दाण्डम्, हास्तिनम् ।

१२२५ **वाशिन आयनौ** ॥७।४।४६॥ वाशिन्शब्दस्यायनि प्रत्यये परेऽन्त्यस्वरादेर्लुग्नः स्यात् । वाशिनोऽपत्यं वाशिनायनिः । अवृद्धाद्दोर्नवेत्यायनिञ् ।

१२२६ **एये जिह्माशिनः** ॥७।४।४७॥ जिह्माशिनशब्दस्य एये प्रत्ययेपरेऽन्त्यस्वरादेर्लुग्न स्यात् । जिह्माशिनोऽपत्यं जैह्माशिनेयः । शुभ्रादित्वादेयण् ।

१२२७ **गाथिविदथिकेशिपणिगणिनः** ॥७।४।५४॥ गाथिन् विदथिन् केशिन् पणिन् गणिन् इत्येतेषामिन्नन्तानामपि परेऽन्त्यस्वरादेर्लुग्न स्यात् । गाथिनोऽपत्यं गाथिनः । वैदथिनः । केशिनः । पाणिनः । गाणिनः ।

१२२८ **राष्ट्रक्षत्रियात्सरूपाद्राजापत्ये ञिरञ्** ॥६।१।११४॥ क्षत्रियवाचिसरूपाद्राष्ट्रवाचिनो राष्ट्रवाचिसरूपाच्च क्षत्रियवाचिनो यथासंख्यं राजनि क्षत्रियेऽपत्ये चाञ् प्रत्ययः स्यात् स च ञिसंज्ञः ।[1] वेति निवृत्तम् । विदेहानां राष्ट्रस्य राजा विदेहस्य राज्ञोऽपत्यं वा वैदेहः । वैदेहौ । विदेहाः । बहुत्वे बहुष्वस्त्रियाम् इति लुप् । राष्ट्रक्षत्रियादिति किम् । पञ्चालस्य ब्राह्मणस्य राजा पाञ्चालः । तस्येदमित्यण् । पञ्चालस्य ब्राह्मणस्यापत्यं पाञ्चालिः । सरूपादिति किम् । सुराष्ट्राणां राजा सौराष्ट्रकः । दशरथस्य क्षत्रियस्यापत्यं दाशरथिः ।

१२२९ **गान्धारिसाल्वेयाभ्याम्** ॥६।१।११५॥ गान्धारिसाल्वेयशब्दौ इञेयणन्तौ सरूपौ राष्ट्रक्षत्रियवचनौ । ताभ्यां राष्ट्राद्राजनि क्षत्रियादपत्ये अञ् स्यात् स च ञिसंज्ञः। दुलक्षणस्य ञ्यस्यापवादः। वचनभेदो यथासंख्यनिवृत्त्यर्थः । गान्धारीणां राजा गान्धारे राज्ञोऽपत्यं च गान्धारः। गान्धारौ। गान्धारयः। बहुष्वञोलुप् । एवं साल्वेयः। साल्वेयौ। साल्वेयाः। एकत्वद्वित्वयोस्त्वपत्यार्थविवक्षायामब्राह्मणादिति लुप् न भवति विधानसामर्थ्यात् । अन्यथा ञ्यविधावेवानयोः प्रतिषेधः क्रियेत । तथा पूर्वेणैवाञ् सिध्यति ।

१२३० **पुरुमगधकलिङ्गशूरमसाद्विस्वरादण्** ॥६।१।११६॥ पुरुमगधकलिङ्गशूरमस् इत्येतेभ्यो द्विस्वरेभ्यश्च शब्देभ्यो राष्ट्रवाचिभ्यः क्षत्रियवाचिभ्यश्च सरूपेभ्यो यथासंख्यं राजन्यपत्ये चार्थे ञिरण् स्यात् । अञोऽपवादः । पुरोरपत्यं पौरवः । मगधानां राजा मगधस्यापत्यं वा मागधः । एवं कालिङ्गः । शौरमसः । द्विस्वर–अङ्गानां राजा अङ्गस्यापत्यं वा आङ्गः । सर्वत्र बहुषु लुप् । पुरुग्रहणमराष्ट्रसरूपार्थम् । अस्ति राजा पुरुर्नाम न तु राष्ट्रम् । तस्यौत्सर्गिकेणैवाणा सिद्धे बहुषु

---

१ अपत्येऽनुवर्तमाने राजनीत्यधिकारस्य भणनात् ।

लुबर्थमिदमण्विधानम्। अत्रैव सिद्धेऽण्विधानं संघाद्यण्बाधनार्थम्। तेनाकञ् भवति। पौरवकम्। मागधकमित्यादि। अञन्ताद्धि गोत्रात् ' अञ्यञिञ ' इति वक्ष्यमाणोऽण् बाधकः स्यात्।

१२३१ साल्वांशप्रत्यग्रथकलकूटाश्मकादिञ् ॥६।१।११७॥ साल्वा नाम जनपदस्तदंशास्तदवयवा उदुम्बरादयस्तेभ्यः प्रत्यग्रथकलकूटाश्मक इत्येतेभ्यश्च राष्ट्रवाचिभ्यः क्षत्रियवाचिभ्यश्च सरूपेभ्यो यथासंख्यं राजन्यपत्ये च इञ् प्रत्ययः स्यात् स च द्रिसंज्ञः। उदुम्बराणां राजा अपत्यं वा औदुम्बरिः। उदुम्बराः। एवं तैलखलिः। तिलखलाः इत्यादयः साल्वांशाः। प्रात्यग्रथिः, प्रत्यग्रथाः। कालकूटिः, कलकूटाः। आश्मकिः अश्मकाः। सर्वत्र बहुषु लुप्।

' उदुम्बरास्तिलखला मद्रकारा युगंधराः।
भुलिङ्गाः शरदण्डाश्च साल्वांशा इति कीर्तिताः' ॥

अजमोढाजकुन्दबुधास्तूदुम्बरादिविशेषाः। तेऽपि साल्वांशा एव। प्रत्यग्रथादिग्रहणमसाल्वांशार्थम्।

१२३२ दुनादिकुवित्कोशलाजादाञ् ञ्यः ॥ ६।१।११८॥ दुसंज्ञकेभ्यो नकारादिभ्यः कुरुशब्दादिकारान्तेभ्यः कोशल अजाद इत्येताभ्यां च राष्ट्रवाचिभ्यः क्षत्रियवाचिभ्यश्च सरूपेभ्यो यथासंख्यं राजन्यपत्ये च ञ्यः प्रत्ययःस्यात् स च द्रिसंज्ञः। दु-आम्बष्ठानां राजा अपत्यं वा आम्बष्ठ्यः। नादि-निषधानां निषधस्य वा नैषध्यः। कुरु-कुरूणां कुरोर्वा कौरव्यः। इत्-अवन्तीनामवन्तेर्वा आवन्त्यः। कोशलानां कोशलस्य वा कौशल्यः। अजादानामजादस्य वा आजाद्यः। सर्वत्र बहुषु लुप्। एभ्य 'इति किम्। कुमारी नाम जनपदः क्षत्रिया च ततो राजन्यपत्ये वाञ्चेव भवति। कौमारः।

१२३३ पाण्डोर्ढ्यण् ॥६।१।११९॥ पाण्डुशब्दाद्राष्ट्रक्षत्रियवाचिनः सरूपाद्यथासंख्यं राजन्यपत्ये चार्थे ढ्यण् प्रत्ययः स्यात् स च द्रिसंज्ञः। पाण्डूनां राजा पाण्डोरपत्यं वा पाण्ड्यः। पाण्ड्यौ। पाण्डवः। कथं 'पाण्डवा यस्य दासाः'?। तस्य क्षत्रियस्य राष्ट्रसरूपस्य य ईश्यो जनपदो यश्च तस्य क्षत्रियसरूपस्य राष्ट्रस्येशिता क्षत्रियः स एव गृह्यते प्रत्यासत्तेः। अत्र तु कुरवो जनपदस्तस्य राजा पाण्डुरिति

शिवाद्यण् भवति । ङकारोऽन्त्यस्वरादिलोपार्थः णकारो वृद्धिनिमित्तपुंवद्भावनिषेधार्थः ।

१२३४ शकादिभ्यो द्रेर्लुप् ॥६।१।१२०॥ शक इत्येवमादिभ्यः परस्य द्रेः प्रत्ययस्य लुप् स्यात् । शकानां राजाऽपत्यं वा शकः। यवनः। शकादयः प्रयोगगम्याः।

१२३५ कुन्त्यवन्तेः स्त्रियाम् ॥ ६।१।१२१ ॥ कुन्ति अवन्ति इत्येताभ्यां परस्य द्रेर्यस्य लुप् स्यात् स्त्रियामभिधेयायाम् । कुन्तेरपत्यं स्त्री कुन्ती । एवमवन्ती । स्त्रियामिति किम् । कौन्त्यः । आवन्त्यः । प्रकृतस्य द्रेर्लुप्विज्ञानात् स्वार्थिकस्य ञ्यटोऽद्रिसंज्ञकस्य न भवति। कौन्ती ।

१२३६ कुरोर्वा ॥ ६।१।१२२ ॥ कुरुशब्दात् परस्य द्रेर्यस्य स्त्रियां वा लुप् स्यात्। कुरोरपत्यं स्त्री कुरूः। कौरव्यायणी। 'कौरव्यमाण्डूकासुरेः' इति डायन्।

१२३७ द्रेरञणोऽप्राच्यभर्गादेः ॥६।१।१२३॥ प्राच्यान् भर्गादींश्च वर्जयित्वान्यस्मात् परस्माञोऽणश्च द्रेः स्त्रियां लुप् स्यात्। शूरसेनस्यापत्यं स्त्री शूरसेनी। मद्री। द्रेरिति किम्। औत्सी। औपगवी। द्रावनुवर्तमाने पुनर्द्रिग्रहणं भिन्नप्रकरणस्यापि द्रेर्लुबर्थम् । पर्शूः। रक्षाः । असुरी । पर्शु रक्षस् असुर इति राष्ट्रसरूपक्षत्रियवाचिनः । एषामपत्यं संघः स्त्रीत्वविशिष्टो विवक्षित इति अणञोः 'शकादिभ्यो द्रेर्लुप् ' इति लुपि पुनः पर्श्वादिलक्षणः स्वार्थिकोऽण् । तस्यापि स्त्रियामनेन लुप्। अञण इति किम्। औदुम्बरी । साल्वांशत्वादिञ् । अप्राच्यभर्गादेरिति किम्। पाञ्चाली । भार्गी ।

१२३८ बहुष्वास्त्रियाम् ॥६।१।१२४॥ यन्तस्य शब्दस्य बहुषु वर्तमानस्य यो द्रिः प्रत्ययस्तस्यास्त्रियां लुप् स्यात् । पञ्चालानां राजानोऽपत्यानि वा पञ्चालाः। एवं पुरवः । अङ्गाः । बहुष्विति यन्तस्य विशेषणं न निमित्तम् । तत्र हि पञ्चालानां निवासः पञ्चालनिवासः,प्रिया वङ्गा यस्य स प्रियवङ्गः इत्यादौ पञ्चाल अञ् आम् निवास इत्यादिस्थिते ' अन्तरङ्गानपि विधीन् बहिरङ्गा लुप् बाधते' इति बहुवचनस्य लुपि द्रेर्लुप् न स्यात् । द्रेरिति पूर्ववदेव भिन्नप्रकरणस्यापि परिग्रहः। बहुष्विति किम् पाञ्चालः । प्रियो वाङ्गो येषां ते प्रियवाङ्गाः इत्यत्र न यन्तं

बहुषु किंतर्हि समास इति लुप् न भवति । प्रत्ययः प्रकृत्यादेरिति नियमाद्धि न समासो य्यन्तो भवति । पञ्चालस्यापत्यं पाञ्चालस्तस्य तयोर्वापत्यानि पञ्चाला इत्यत्र तु इञि लुप्तेऽञन्तमेव बहुषु वर्तत इति अञोऽपि लुप् । द्रेः प्रत्ययस्य बहुषु वर्तमानस्य इति तु विज्ञायमाने न स्यात् । अस्त्रियामिति किम् । पञ्चालस्यापत्यानि स्त्रियः पाञ्चाल्यः । पञ्चभिः पाञ्चालीभिः क्रीतः पञ्चपञ्चाल इत्यत्र तु इकणो लुपः पित्त्वात् पुंवद्भावेन स्त्रीत्वनिवृत्तेर्लुप् स्यादेव ।

१२३९ **कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च** ॥६।१।१२७॥ कौण्डिन्य आगस्त्य इत्येतयोर्बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानयोर्योऽणश्चास्त्रियां लुप् स्यात् तयोश्च कुण्डिनीअगस्त्यशब्दयोः कुण्डिन अगस्ति इत्येतावादेशौ स्याताम् । आगस्त्यशब्दस्य ऋष्यणन्तत्वात् यञञौ न संभवतः । कुण्डिन्या अपत्यं गर्गादित्वाद् यञ् । अतएव निर्देशात् पुंवद्भावाभावः, कौण्डिन्यः। कौण्डिन्यौ । कुण्डिनाः। आगस्त्यः । आगस्त्यौ । अगस्तयः । प्रत्ययलुपं कृत्वादेशकरणमगस्तीनामिमे आगस्तीया इत्येवमर्थम् । प्रत्ययान्तादेशे हि कृते अगस्तिशब्दस्यादेराकारस्याभावात् 'द्वृद्धिर्यस्य स्वरेष्वादिः ' इति दुसंज्ञा न स्यात् । तदभावे च तन्निमित्तो 'दोरीयः ' इति ईयः प्रत्ययोऽपि न स्यात् । यदा तु प्रत्ययस्य लुब् विधीयते तदा स्वरादावीयप्रत्यये भाविनि ' न प्राग्जितीये स्वरे ' इति प्रतिषेधात् प्रत्ययस्य लुब् न स्यात् । तथा च सति दुसंज्ञत्वात् ईयःसिद्धो भवति । कुण्डिन्यामविशेषः । प्रत्ययान्तादेशे हि कुण्डिनशब्दाददुसंज्ञकात् तस्येदमित्यणा भवितव्यम् । प्रत्ययस्य तु लुपि ' न प्राग्जितीये स्वरे ' इति लुप्प्रतिषेधे सत्यामपि दुसंज्ञायामीयप्रत्ययापवादः शकलादित्वादञेव स्यात् अतो न विशेषः । अस्त्रियामित्येव । कौण्डिन्यः आगस्त्यः स्त्रियः ।

१२४० **भृग्वङ्गिरस्कुत्सवसिष्ठगोतमात्रेः** ॥ ६।१।१२८ ॥ भृगु अङ्गिरस् कुत्स वसिष्ठ गोतम अत्रि इत्येतेभ्यो यः प्रत्ययस्तदन्तस्य बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानस्य यः स प्रत्ययस्तस्यास्त्रियां लुप् स्यात् । भार्गवः भार्गवौ भृगवः । एवमङ्गिरसः । कुत्साः । वसिष्ठाः । गोतमाः। एभ्योऽणो लुप् । अत्रयः । एयणो लुप् । अस्त्रियामित्येव । भार्गव्यः आङ्गिरस्यः; आत्रेय्यः स्त्रियः । बहुष्वित्येव । भार्गवः । आत्रेयः । गोत्र इत्येव ।

भार्गवाश्छात्राः। भृग्वादीन् यस्कादिष्वपठित्वेदं वचनं ' द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा ' इत्येवमर्थम्। अन्यथा भृगुकुलं भार्गवकुलमिति न सिद्ध्येत्।

१२४१ **प्राग्भरते बहुस्वरादिञः** ॥६।१।१२९॥ बहुस्वरान्नान्नो य इञ् प्रत्ययस्तदन्तस्य बहुत्वविशिष्टेऽर्थे प्राग्गोत्रे भरतगोत्रे च वर्तमानस्य यः स प्रत्ययस्तस्यास्त्रियां लुप् स्यात्। क्षैरकलम्भिः। क्षैरकलम्भी। बहुत्वे क्षीरकलम्भाः। अत इञो लुप्। प्राग्भरत इति किम्। बालाकयः। हास्तिदासयः। कथं तौल्वलयः इत्यादिषु लुब् न भवति? उच्यते। यस्कादिषु पुष्करसच्छब्दपाठात्। अस्य हि बहुस्वरत्वादनेनैवेञ्लोपे सिद्धे तदर्थो यस्कादिषु पाठो ज्ञापयति तौल्वल्यादीनामिञो लुब् न भवतीति। भरताः प्राच्या एव तेषां पृथगुपादानं प्राग्ग्रहणेनाग्रहणार्थम्। तेन यौधिष्ठिरिः पिता यौधिष्ठिरायणः पुत्र इत्यत्र 'प्राच्येञोऽतौल्वल्यादेः' इति लुब् न भवति। अपरे त्वाहुः। प्राग्ग्रहणं भरतविशेषणम्। क्षीरकलम्भादयो वैश्याः प्राग्भरताः। युधिष्ठिरादयो राजान उदग्भरताः। तत्र प्राग्ग्रहणादुदीच्यभरतेषु राजसु लुब् न भवति। यौधिष्ठिरयः। आर्जुनयः। भरतग्रहणात्तु प्राच्येषु राजसु न भवति। मारसंबन्धयः। भागवित्तयः। बहुस्वरादिति किम्। चैङ्कन्यः। इञ इति किम्। शान्तनवाः।

१२४२ **वोपकादेः** ॥६।१।१३०॥ उपकादिभ्यो यः प्रत्ययस्तदन्तस्य बहुत्वविशिष्टे गोत्रे वर्तमानस्य यः स प्रत्ययस्तस्यास्त्रियां लुब् न स्याद्वा। उपकाः, औपकायनाः। लमकाः, लामकायनाः। अस्त्रियामित्येव। औपकायिन्यः स्त्रियः। उपक, लमक–आभ्यां नडाद्यायनणो लुप्।

१२४३ **तिककितवादौ द्वन्द्वे** ॥६।१।१३१॥ तिककितवादिषु द्वन्द्वघटितेषु बहुषु गोत्रापत्येषु वर्तमानेषु तैकायनिकैतवायनीत्यादीनां यः स प्रत्ययस्तस्यास्त्रियां लुप् स्यात्। तैकायनयश्च कैतवायनयश्च तिककितवाः। तिकाद्यायनिञो लुप्।

१२४४ **ञ्यादेस्तथा** ॥ ६।१।१३२ ॥ ञ्यादिप्रत्ययान्तानां द्वन्द्वेऽबहुत्वार्थेषु वर्तमाने यः स ञ्यादिप्रत्ययस्तस्य लुप् स्यात् तथा–यथापूर्वम्। आङ्गश्च वाङ्गश्च सौह्मश्च अङ्गवङ्गसौह्माः। अत्र द्विस्वरलक्षणस्याणो लुप्। एवं गर्गवत्सवाजाः। अत्र यञः। तथेति किम्। यास्कलाह्याश्छात्राः। अत्र तस्येदमित्यणो

लुब् न भवति, यस्कादेर्गोत्रे इत्यत्र गोत्रे उत्पन्नस्येति प्रत्ययस्य विशेषणात्। गार्गीवत्सवाजाः। अत्र वत्सवाजयोरेव यञो लुप् न गार्गी इत्यस्य, तत्राख्रिया-मिति प्रतिषेधात्। *ञ्यादिग्रहणमगोत्रेऽपि यथा स्यादित्येवमर्थम्। अबह्वर्थं वचनम्।*

१२४५ **वान्येन** ॥६।१।१३३॥ ञ्यादेरन्येन सह ञ्यादीनां द्वन्द्वे बहुष्व-र्थेषु वर्तमाने यः स ञ्यादिप्रत्ययस्तस्य तथा वा लुक् स्यात् यथापूर्वम्। अङ्गवङ्गदाक्षयः। आङ्गवाङ्गदाक्षयः। पूर्वेण नित्ये प्राप्ते विकल्पार्थं वचनम्।

१२४६ **द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा** ॥६।१।१३४॥ षष्ठीतत्पुरुषे यत्पदं तस्याः षष्ठ्या विषये द्वयोरेकस्मिन् वर्तते तस्य यः स यञादिः प्रत्ययस्तस्य तथा वा लुक् स्यात् यथा पूर्वम्। गार्ग्यस्य गार्ग्ययोर्वा कुलम् गर्गकुलम्, गार्ग्यकु-लम्। एवं विदकुलम्, वैदकुलमित्यादि। द्व्येकेष्विति किम्। गर्गाणां कुलम् गर्गकुलम्। षष्ठ्या इति किम्। गार्ग्यहितम्। षष्ठ्या इति तत्पुरुषस्य विशेषणेन प्रतिपदोक्तस्यैव षष्ठीतत्पुरुषस्य परिग्रहादिह न भवति। गार्ग्यस्य गार्ग्ययोर्वान्त-र्गतः अन्तर्गार्ग्यः। 'प्रात्यव'–इत्यादिना समासः। द्व्येकेष्वित्यस्य षष्ठ्या इति विशेषणं किम्। देवदत्तस्य गार्ग्यः देवदत्तगार्ग्यः। तत्पुरुष इति किम्। गार्ग्यस्य समीपमुपगार्ग्यम्। यञादेरिति किम्। आङ्गकुलम्।

१२४७ **न प्राग्जितीये स्वरे** ॥६।१।१३५॥ गोत्र इति वर्तते। गोत्रे उत्पन्नस्य बहुषु या लुबुक्ता सा प्राग्जितीयेऽर्थे यो विधीयते स्वरादिस्तद्धित-स्तस्मिन् विषयभूते न भवति। गर्गाणां छात्राः गार्गीयाः वात्सीयाः। प्राग्जितीय इति किम्। अत्रिभ्यो हितः अत्रीयः। स्वर इति किम्। गर्गेभ्य आगतं गर्गमयम्। विदानामपत्यं युवा वैदः वैदावित्यत्र तु इञि विषयभूतेऽनेन प्रतिषेधः। इञस्तु लुपि सत्यामञन्तं न बहुषु वर्तते इति लुपः प्राप्तिरेव नास्ति। यत्र त्वस्ति तत्र भवत्येव। विदानामपत्यानि विदाः। अथेह कस्मान्न भवति अत्रीणां भरद्वाजानां च विवाहः अत्रिभरद्वाजिका इति ?। उच्यते। प्रत्यासत्तेर्यस्य प्रत्ययस्य लुप् प्रतिषिध्यते तल्लो-पिप्रत्ययान्तादेव विधीयमाने स्वरादौ प्रतिषेधः। अत्र द्वन्द्वाद्विधीयते न तल्लो-पिप्रत्ययान्तादिति प्रतिषेधो न भवति। 'गर्गभार्गविका' इत्युत्तरसूत्रं वा नियमार्थं व्याख्यायते–गर्गभार्गविकाया अन्यत्र द्वन्द्वे वृद्धे यूनि वा प्रतिषेधो न भवति। गोत्र इत्येव। कुवल्याः फलं कुवलम् तस्येदं कौवलम्।

१२४८ **गर्गभार्गविका** ॥ ६।१।१३६॥ गर्गभार्गविकेति द्वन्द्वात् प्राग्जितीये विवाहे यो विधीयतेऽकल् प्रत्ययस्तस्मिन् अणो लुप्प्रतिषेधो निपात्यते। गर्गाणां वृद्धानां भृगूणां वृद्धानां यूनां च विवाहो गर्गभार्गविका। अत्रिभरद्वाजिकादिवदप्राप्तः प्रतिषेधो निपात्यते।

१२४९ **यूनि लुप्** ॥६।१।१३७॥ यून्यपत्ये विहितस्य प्रत्ययस्य प्राग्जितीये स्वरादौ प्रत्यये विषयभूतेऽनुत्पन्न एव लुप् स्यात्। लुपि सत्यां यो यतः प्राप्नोति स तत उत्पद्यते। पाण्टाहृतस्यापत्यं पाण्टाहृतिः। तस्यापत्यं युवा पाण्टाहृतः। 'पाण्टाहृतिमिमताण्णश्चे'ति णः। तस्य छात्रा इति प्राग्जितीये स्वरादौ चिकीर्षिते णस्य लुप्। तत इञन्तं प्रकृतिरूपं संपन्नम् इति 'वृद्धेञः' इत्यञ् भवति। पाण्टाहृताः। प्राग्जितीय इत्येव। भागवित्तिकाय हितं भागवित्तिकीयम्।

१२५० **वायनणायनिञोः** ॥६।१।१३८॥ आयनण आयनिञश्च यून्यपत्ये विहितस्य प्राग्जितीये स्वरादौ प्रत्यये विषयभूते लुब् वा स्यात्। गर्गस्यापत्यं गार्ग्यः तस्यापत्यं युवा गार्ग्यायणः। यञिञ इत्यायनण्। तस्य छात्रा गार्गीयाः गार्ग्यायणीया वा। दोरीय इतीयः। आयनणो णित उपादानात् ञितः पूर्वेण नित्यमेव लुप्। अत्रेरपत्यमात्रेयः तस्यापत्यं भारद्वाजो युवा आत्रेयायणः। 'आत्रेयाद् भारद्वाजे' इत्यायनञ्। तस्य छात्राः आत्रेयीयाः।

१२५१ **द्रीञो वा** ॥ ६।१।१३९॥ प्राग्जितीये स्वर इति निवृत्तम्। द्रिसंज्ञो य इञ् तदन्तात् परस्य युवप्रत्ययस्य लुब् वा स्यात्। उदुम्बरस्यापत्यमौदुम्बरिः। साल्वांशेत्यादिनेञ्। तस्यापत्यं युवा औदुम्बरिः, औदुम्बरायणो वा। यञिञ इत्यायनण्। द्रिग्रहणं किम्। दाक्षेरपत्यं दाक्षायणः। इञ इति किम्। अङ्गस्यापत्यमाङ्गः। पुरुमगध इत्यादिना अण्। तस्यापत्यमिति द्विस्वरादण इत्यायनिञ्। तस्य अब्राह्मणादिति नित्यं लुप्। आङ्गः पिता। आङ्गः पुत्रः। अब्राह्मणात् इति नित्यं लुपि प्राप्तायां विकल्पार्थं वचनम्।

१२५२ **अब्राह्मणात्** ॥६।१।१४१॥ अब्राह्मणवाचिनो वृद्धप्रत्ययान्ताद्यूनि विहितस्य प्रत्ययस्य लुप् स्यात्। अङ्गस्यापत्यमाङ्गः। पुरुमगधेत्यादिनाण्। तस्यापत्यं द्विस्वरादण इत्यायनिञ्। तस्य लुप्। आङ्गः पिता। आङ्गः पुत्रः।

एवं सौह्मः पिता। सौह्मः पुत्रः। अब्राह्मणादिति किम्। गार्ग्यः पिता। गार्ग्यायणः पुत्रः।

१२५३ पैलादेः ॥ ६।१।१४२ ॥ पैलादिभ्यो यूनि विहितस्य प्रत्ययस्य लुप् स्यात्। अब्राह्मणार्थमप्राच्यार्थं वचनम्। पीलाया अपत्यं पैलः। 'पीलासाल्वा-मण्डूकाद्वा' इत्यण्। तस्यापत्यं द्विस्वरादण इत्यायनिञ्। तस्य लुप् पैलः पिता। पैलः पुत्रः।

१२५४ प्राच्येभ्योऽतौल्वल्यादेः ॥ ६।१।१४३ ॥ प्राच्यगोत्रे य इञ् तद-न्तात् तौल्वल्यादिवर्जितात् यून्यपत्ये विहितस्य प्रत्ययस्य लुप् स्यात्। ब्राह्मणार्थं वचनम्। पान्नागारिः पिता। पान्नागारिः पुत्रः। अत इञ् ततो 'यञिञ' इत्यायनण्। तस्य लुप्। प्राच्यग्रहणं किम्। दाक्षिः पिता। दाक्षायणः पुत्रः। इञ इति किम्। राघवः पिता। राघविः पुत्रः। तौल्वल्यादिवर्जनं किम्। तौल्वलिः पिता। तौल्वलायनिः पुत्रः। दालीपिः पिता। दालीपायनिः पुत्रः। अत्र दिलीपशब्दस्यात एव निपातनादिञि वृद्धिराकारः। अपरे दिलीप इति प्रकृत्यन्तरमाहुः।

१२५५ गोत्रोत्तरपदाद् गोत्रादिवाजिह्मवाकात्यहरितकात्यात् ॥ ॥६।१।१२॥ गोत्रमपत्यम्। जिह्माकात्यहरितकात्यवर्जिताद् गोत्रप्रत्ययान्तो-त्तरपदात् यद् गोत्रप्रत्ययान्तमुत्तरपदं तस्मादिव प्रत्ययः स्यात्। यथेह ईयो भवति चारायणीयाः पाणिनीयाः तथा कम्बलचारायणीयाः ओदनपाणिनीया इत्यादावपि भवति। यथा चेहाञ् भवति शाकलाः काण्वाः तथा व्रैहिशाकलाः पैङ्गलकाण्वा इत्यत्रापि भवति। अजिह्माकात्यहरितकात्यादिति किम्। यथेहेयो भवति कात्यस्य छात्राः कातीयास्तद्वदिह न भवति जिह्माचपलः कात्यो जिह्माकात्यः। हरितभक्षः कात्यो हरितकात्यः तस्येमे छात्राः जैह्माकाताः हारितकाताः।

॥ इति श्रीसिद्धहैमबृहत्प्रक्रियायां तद्धितप्रकरणे
अपत्याधिकारः समाप्तः ॥



॥ अथ रक्ताद्यर्थकाः ॥

१२५६ **रागाट् टो रक्ते** ॥६।२।१॥ शुक्लस्य वर्णान्तरापादनमिह रञ्जेरर्थः। रज्यतेऽनेनेति रागः कुसुम्भादिः। रागविशेषवाचिनो नाम्नष्ट इति तृतीयान्ताद् रक्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्। कुसुम्भेन रक्तं वस्त्रं कौसुम्भम्। एवं काषायम्। वाधिकारात् पक्षे वाक्यं समासश्च भवति। कुसुम्भेन रक्तं कुसुम्भरक्तम् इत्यादि। रागादिति किम्। चैत्रेण रक्तम्। रागशब्देन प्रसिद्धा एव कुसुम्भादयो रागा गृह्यन्ते। तेनेह न भवति। कृष्णेन रक्तम्। एते हि वर्णा द्रव्यवृत्तयो न तु रागाख्याः। कथं काषायौ गर्दभस्य कर्णौ इत्यादि ?। काषायाविव काषायौ इत्युपमानोपमेयभावेन तद्गुणाध्यारोपाद् भविष्यति।

१२५७ **लाक्षारोचनादिकण्** ॥ ६।२।२ ॥ लाक्षारोचना इत्येताभ्यां तृतीयान्ताभ्यां रक्तमित्यर्थे इकण् प्रत्ययः स्यात्। अणोऽपवादः। लाक्षया रक्तं लाक्षिकम्। रोचनया रक्तं रौचनिकम्।

१२५८ **शकलकर्दमाद् वा** ॥६।२।३॥ शकलकर्दम इत्येताभ्यां तृतीयान्ताभ्यां रागविशेषवाचिभ्यां रक्तमित्यर्थे इकण् प्रत्ययो वा स्यात्। शकलेन रक्तं शाकलिकम्। शाकलम्। कार्दमिकम्, कार्दमम्।

१२५९ **नीलपीतादकम्** ॥६।२।४॥ नीलपीतशब्दाभ्यां रागविशेषवाचिभ्यां तृतीयान्ताभ्यां रक्तेऽर्थे यथासंख्यम् अ क इत्येतौ प्रत्ययौ स्याताम्। नीलेन लिङ्गविशिष्टग्रहणान्नील्या वा रक्तं नीलम्। पीतेन रक्तं पीतकम्। केचित्तु पीतकशब्दादप्यप्रत्ययमिच्छन्ति। पीतकेन कुसुम्भप्रथमनिर्यासेन रक्तं पीतकम्। गुणवचनत्वात्केन च सिद्धे अणपवादार्थं वचनम्।

१२६० **उदितगुरोर्भाद्युक्तेऽब्दे** ॥६।२।५॥ उदितो गुरुर्बृहस्पतिर्यस्मिन् भे नक्षत्रे तद्वाचिनस्तृतीयान्तात् युक्तेऽर्थे यथाविहितं प्रत्ययः स्यात् स चेद्युक्तोऽर्थोऽब्दः संवत्सरः स्यात्।

१२६१ **तिष्यपुष्ययोर्भाणि** ॥२।४।९०॥ भस्य नक्षत्रस्य संबन्धिन् भाण् यो भात् इत्युल्लेखेन विधीयते। तिष्यपुष्ययोर्यकारस्य भाणि परतो लुक् स्यात्। पुष्येणोदितगुरुणा युक्तं वर्षं पौषं वर्षम्। उदितगुरोरिति किम्। उदितशनैश्चरेण

पुष्येण युक्तं वर्षमित्यत्र न भवति। भादिति किम्। उदितगुरुणा पूर्वरात्रेण युक्तं वर्षम्। अब्द इति किम्। मासे दिवसे वा न भवति।

१२६२ चन्द्रयुक्तात् काले लुप्त्वप्रयुक्ते ॥६।२।६॥ चन्द्रेण युक्तं यन्नक्षत्रं तद्वाचिनस्तृतीयान्ताद् युक्तेऽर्थे यथाविहितं प्रत्ययः स्यात् स चेद्युक्तोऽर्थः कालो भवति, अप्रयुक्ते तु कालवाचके शब्दे लुप् स्यात्। पुष्येण चन्द्रयुक्तेन युक्तमहः पौषमहः। एवं पौषी रात्रिः। चन्द्रयुक्तादिति किम्। शुक्रयुक्तेन पुष्येण युक्तः कालः। भादित्येव। चन्द्रयुक्तेन शुक्रेण युक्तः कालः। काल इति किम्। चन्द्रयुक्तेन पुष्येण युक्तो ग्रहः। लुप्त्वप्रयुक्ते, अद्य पुष्यः। अप्रयुक्त इति किम्। पौषमहः।

१२६३ द्वन्द्वादीयः ॥६।२।७॥ चन्द्रयुक्तं यन्नक्षत्रं तद्द्वन्द्वात्तृतीयान्तात् युक्ते कालेऽर्थे ईयः प्रत्ययः स्यात्। राधानुराधाभिश्चन्द्रयुक्ताभिर्युक्तमहः राधानुराधीयमहः।

१२६४ श्रवणाश्वत्थान्नाम्न्यः ॥ ६।२।८॥ चन्द्रयुक्तनक्षत्रवाचिनः श्रवणशब्दादश्वत्थशब्दाच्च तृतीयान्ताद्युक्ते काले अकारः प्रत्ययः स्यान्नाम्नि—प्रत्ययान्तं चेत् कस्यचित् कालविशेषस्य नाम। श्रवणेन चन्द्रयुक्तेन युक्ता श्रवणा रात्रिः। अश्वत्थेन चन्द्रयुक्तेन युक्ता अश्वत्था रात्रिः पौर्णमासी वा। सत्यपि अन्वर्थयोगे न कालमात्रमेव उच्यते अपि तु कालविशेष एवेति नामत्वम्। नाम्नीति किम्। श्रावणमहः। आश्वत्थी रात्रिः।

१२६५ षष्ठ्याः समूहे ॥६।२।९॥ षष्ठ्यन्तान्नाम्नः समूहेऽर्थे यथाविहितं प्रत्ययाः स्युः। गोत्रादकञ् वक्ष्यते अचित्तादिकण्प्रतिपदं केदाराण्यत्येवमादयः। ततोऽन्यदिहोदाहरणं द्रष्टव्यम्। चाषाणां समूहश्चाषम्। एवं काकं वाकं वानस्पत्यं स्त्रैणं पौंस्नम्। पञ्चानां कुमारीणां समूहः पञ्चकुमारीत्यत्र तु समूहः समाहार एव। स च समासार्थः समासेनैव च गत इति तद्धितो नोत्पद्यते। यद्युत्पद्यते को दोषः स्यात् उत्पन्नस्यापि ह्यस्य द्विगोरनपत्ये यस्वरादेर्लुबद्विरिति लुपा भवितव्यम् तथा चाविशेषः। नैवम्। ङ्यादेर्गौणस्येत्यादिना ङीनिवृत्तिः स्यात्। तस्येदमित्येवाणादिसिद्धौ समूहविवक्षायां तदपवादबाधनार्थो योगः।

१२६६ **भिक्षादेः** ॥६।२।१०॥ भिक्षादिभ्यः षष्ठ्यन्तेभ्यः समूहेऽर्थे यथाविहितं प्रत्ययः स्यात् । भिक्षाणां समूहो भैक्षम् । गार्भिणम् । यौवतम् । अचित्तेकणो बाधनार्थं वचनम् । युवतेरण् सिद्ध एव । पुंवद्भावबाधनार्थस्तु पाठः । अन्ये तु युवतिशब्दं न पठन्ति । तन्मते पुंवद्भावे सति युवतीनां समूहो यौवनमित्येव भवति । तथा च प्रयोगः--

' सुरूपमतिनेपथ्यं कलाकुशलयौवनम् ।
यस्य पुण्यकृतः प्रेष्यं सफलं तस्य यौवनम् ' ॥

भिक्षशब्दाऽकारान्तोऽपीत्येके ।

१२६७ **क्षुद्रकमालवात् सेनानाम्नि** ॥ ६।२।११ ॥ क्षुद्रकमालवशब्दात् षष्ठ्यन्तात् समूहेऽर्थे यथाविहितमण्प्रत्ययः स्यात् सेनाया नाम्नि । क्षुद्रकाश्च मालवाश्च क्षुद्रकमालवास्तेषां समूहः क्षौद्रकमालवी एवंनामा काचित् सेना । सेनानाम्नीति किम् । क्षौद्रकमालवकमन्यत् । गोत्राकञ्बाधनार्थं वचनम् । समूहाधिकारे हि तदन्तस्यापि ग्रहणम् ' धेनोरनञः ' इति प्रतिषेधात् ।

१२६८ **गोत्रोक्षवत्सोष्ट्रवृद्धाजोरभ्रमनुष्यराजराजन्यराजपुत्रादकञ्** ॥ ६।२।१२ ॥ स्वापत्यसंतानस्य स्वव्यपदेशकारिणः प्रथमपुरुषस्यापत्यं गोत्रम् । गोत्रप्रत्ययान्तेभ्य उक्षादिभ्यश्च समूहेऽकञ् प्रत्ययः स्यात् । अणोऽपवादः । औपगवानां समूह औपगवकम् । औक्षकम् । वात्सकम् । औष्ट्रकम् । वार्द्धकम् । आजकम् । औरभ्रकम् ।

१२६९ **न राजन्यमनुष्ययोरके** ॥२।४।१४॥ राजन्यमनुष्ययोर्यकारस्याकप्रत्यये लुग् न स्यात् । मानुष्यकम् । राजकम् । राजन्यकम् । राजपुत्रकम् ।

१२७० **केदाराण्ण्यश्च** ॥६।२।१३॥ केदारशब्दात् समूहे ण्योऽकञ् च प्रत्ययौ स्याताम् । अचित्तेकणोऽपवादः । कैदार्यम् । कैदारकम् ।

१२७१ **कवचिहस्त्यचित्ताच्चेकण्** ॥ ६।२।१४ ॥ कवचिन् हस्तिन् इत्येताभ्यामचित्तवाचिभ्यः केदाराच्च समूहे इकण् प्रत्ययः स्यात् । कवचान्येषां सन्तीति

कवचिनः । तेषां समूहः कावचिकम् । हस्तिनां लिङ्गविशिष्टस्यापि ग्रहणात् हस्तिनीनां वा समूहो हास्तिकम् । अचित्तात्–आपूपिकम् । कैदारिकम् । एवं केदारस्य त्रैरूप्यं भवति । ण्याकञ्भ्यां बाधा मा भूदिति केदारात् इकण्विधानम् ।

१२७२ धेनोरनञः ॥६।२।१६॥ धेनुशब्दात् समूहे इकण् प्रत्ययः स्यात् न चेत् स धेनुशब्दो नञः परो भवेत् ।

१२७३ ऋवर्णोवर्णदोसिसुसश्वदकस्मात्त इकस्येतो लुक् ॥७।४।७१॥ ऋवर्णान्तादुवर्णान्तादोस्शब्दादिसन्तादुसन्ताच्छ्वदकस्माद्र्जितात्तकारान्ताच्च परस्येकप्रत्ययस्य संबंधिन इकारस्य लुक् स्यात् । धेनूनां समूहो धैनुकम् । अनञ इति किम् । अधेनूनां समूह आधेनवम् । उत्सादित्वादञ् । धेनोरनञ इति प्रतिषेधो लिङ्गं समूहे तदन्तस्यापि भवतीति । तेन क्षौद्रकमालवकं ब्राह्मणराजन्यकं वानरहस्तिकं गौधेनुकम् ।

१२७४ ब्राह्मणमाणववाडवाद्यः ॥ ६।२।१६ ॥ ब्राह्मणमाणववाडव इत्येतेभ्यः समूहे यः प्रत्ययः स्यात् । ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ।

१२७५ गणिकाया ण्यः ॥ ६।२।१७ ॥ गणिकाशब्दात् समूहे ण्यः प्रत्ययः स्यात् । गाणिक्यम् । ब्राह्मणादीनां यविधानं पुंवद्भावार्थम् । ब्राह्मणाः प्रकृता अस्यां यात्रायां ' तयोः समूहवच्च बहुषु ' इति यः प्रत्ययः । ब्राह्मण्या यात्रा यस्य स ब्राह्मण्ययात्रः । माणव्ययात्रः । वाडव्ययात्रः । ण्ये हि पुंवद्भावो न[1] स्यात् यथा गाणिक्यायात्रः ।

१२७६ केशाद्वा ॥६।२।१८॥ केशशब्दात् समूहे ण्यः प्रत्ययो वा स्यात् । केशानां समूहः कैश्यम्, कैशिकम् । अचित्तलक्षण इकण् ।

१२७७ वाश्वादीयः ॥ ६।२।१९ ॥ अश्वशब्दात् समूहे ईयः प्रत्ययो वा स्यात् । अश्वीयम्, आश्वम् ।

१२७८ पर्शो ड्वण् ॥ ६।२।२० ॥ पर्शुशब्दात् समूहे ड्वण् प्रत्ययः स्यात् । पर्शूनां समूहः पार्श्वम् । डित्करणमन्त्यस्वरादिलोपार्थम् ।

---

१ ' तद्धितः स्वरवृद्धि ' इति निषेधात् ।

१२७९ ईनोऽह्नः क्रतौ ॥६।२।२१॥ अहन्शब्दात् समूहे क्रतौ वाच्ये ईनः प्रत्ययः स्यात् । अह्नां समूहोऽहीनः क्रतुः। क्रताविति किम् । आह्नमन्यत् । श्वादिपाठादत्र अत्र—

१२८० अनीनादट्यह्नोऽतः ॥७।४।६६॥ इन–अत्–अड्वर्जिते तद्धिते परेऽपदस्याह्नो योऽकारस्तस्य लुक् स्यात् ।

१२८१ पृष्ठाद्यः ॥६।२।२२॥ पृष्ठशब्दात् समूहे क्रतौ वाच्ये यः प्रत्ययः स्यात् । पृष्ठानां समूहः पृष्ठ्यः क्रतुः । पृष्ठशब्दोऽहःपर्यायः । रथन्तरादिसामपर्याय इत्यन्ये । क्रतावित्येव । पार्ष्ठिकम्।

१२८२ चरणाद्धर्मवत् ॥६।२।२३॥ चरणं कठकालापादि । तस्माद्यथा धर्मे प्रत्यया भवन्ति तथा समूहेऽपि । वत् सर्वसादृश्यार्थः । तेन यकाभ्यः प्रकृतिभ्यो यः प्रत्ययो यथा धर्मे भवति ताभ्य एव प्रकृतिभ्यः स एव प्रत्ययस्तथैवेह भवति । यथा कठानां धर्मः काठकं तथा समूहेऽपि काठकमित्यादि ।

१२८३ गोरथवातात् त्रलकट्यलूलम् ॥६।२।२४॥ गोरथवात इत्येतेभ्यः समूहे यथासंख्यं त्रल् कट्यल् ऊल इत्येते प्रत्ययाः स्युः । गवां समूहो गोत्रा । रथानां समूहो रथकट्या । लकारौ [1]स्त्रीत्वार्थौ ॥ वातानां समूहो वातूलः ॥

१२८४ पाशादेश्च ल्यः ॥६।२।२५॥ पाशादिभ्यो गोरथवातशब्देभ्यश्च समूहे ल्यः प्रत्ययः स्यात् । इकणादेरपवादः । पाशानां समूहः पाश्या । तृण्या । खल्या । गव्या । रथ्या । वात्या । भिक्षादिपाठादञ्गारहलाभ्यामपि । आङ्गारम् । हालम् । लकारः स्त्रीत्वार्थः।

१२८५ श्वादिभ्योऽञ् ॥६।२।२६॥ श्वन्प्रकारेभ्यः समूहेऽञ् प्रत्ययः स्यात्। शुनां समूहः शौवम् । अह्नामाह्नम् । अणैव सिद्धे नोपदस्येत्यन्त्यस्वरादिलोपार्थमञ्वचनम्अणपवादबाधनार्थं च । श्वादयः प्रयोगगम्याः ।

---

१ 'लिङ्मिन्यनिण्यणि स्त्र्युक्ताः' इति लिङ्गानुशासने । अस्यायमर्थः–लित्प्रत्ययान्तं मि–नि–अनि–अणिप्रत्ययान्तं स्त्रियामुक्ताः स्त्र्युक्ताः–क्तिः क्यप् शः यः अः अङ् अनः क्विप् ञः अनिः ईअणकश्च इत्येतदन्तं च नाम स्त्रीलिङ्गं स्यात् ।

१२८६ **खलादिभ्यो लिन्** ॥ ६।२।२७ ॥ खलप्रकारेभ्यः समूहे लिन् प्रत्ययः स्यात् । लकारः स्त्रीत्वार्थः । खलानां समूहः खलिनी । पाशादित्वाल्ल्योऽपि । खल्या । ऊकानाम् ऊकिनी । कुटुम्बानां कुटुम्बिनी । खलादयः प्रयोगगम्याः ।

१२८७ **ग्रामजनबन्धुगजसहायात्तल्** ॥ ६।२।२८ ॥ एभ्यः समूहे तल् स्यात् । ग्रामाणां समूहो ग्रामता । जनता । बन्धुता । गजता । सहायता ।

१२८८ **पुरुषात्कृतहितवधविकारे चैयञ्** ॥६।२।२९॥ पुरुषशब्दात् कृते हिते वधे विकारे चकारात्समूहे च एयञ् स्यात् । कृतादौ यथाभिधानं विभक्तियोगः । पुरुषेण कृतः पौरुषेयो ग्रन्थः । पुरुषाय हितं पौरुषेयमार्हतं शासनम् । पुरुषस्य वधः पौरुषेयः । पुरुषस्य विकारः पौरुषेयो विकारः । पुरुषाणां समूहः पौरुषेयम् ।

१२८९ **विकारे** ॥६।२।३०॥ षष्ठ्यन्ताद्विकारे यथाविहितं प्रत्ययाः स्युः । द्रव्यस्यावस्थान्तरं विकारः । अश्मनो विकारः आश्मनः, आश्मः । अत्र--

१२९० **वाश्मनो विकारे** ॥७।४।६३॥ अश्मन्शब्दस्यापदस्य विकारे विहिते तद्धिते परेऽन्त्यस्वरादेर्लुग्वा स्यात् । इत्यनेनान्त्यस्वरादिलोपः ।

१२९१ **चर्मशुनः कोशसंकोचे** ॥७।४।६४॥ चर्मन् श्वन् इत्येतयोरपदभूतयोर्यथासंख्यं कोशे संकोचे चार्थे तद्धिते परेऽन्त्यस्वदादेर्लुक् स्यात् । चर्मणो विकारः कोशश्चार्मः । कोशादन्यत्र चार्मणः । शुनोऽयं शौवः संकोचः । संकोचादन्यत्र शौवनः। कथं शुनो विकारोऽवयवो वा शौवं मांसम् पुच्छमिति? । हेमादित्वादञि नोऽपदस्येत्येव भविष्यति । तस्येदमित्येवाणादिसिद्धावर्धादिषु विकारे अणपवादबाधनार्थं ' विकारे ' इति सूत्रम् ।

१२९२ **प्राण्यौषधिवृक्षेभ्योऽवयवे च** ॥६।२।३१॥ प्राणिन्-औषधि-वृक्षवाचिभ्यः षष्ठ्यन्तेभ्योऽवयवे विकारे च यथाविहितं प्रत्ययाः स्युः । प्राणिभ्यः-कापोतं सक्थि मांसं वा । औषधिभ्यः-दौर्वं काण्डं भस्म वा । वृक्षेभ्यः-कारीरं काण्डं भस्म वा । प्राण्यौषधिवृक्षेभ्य इति किम् । पाटलिपुत्रस्यावयवः पाटलिपुत्रकः प्राकारः । तस्येदमिति विवक्षायामकञ् । इतः परं विकारे

प्राण्यौषधिवृक्षेभ्योऽवयवे चेति द्वयमप्यधिक्रियते । तेनोत्तरे प्रत्ययाः प्राण्यौषधिवृक्षेभ्योऽवयवविकारयोरन्येभ्यस्तु विकारमात्रे भवन्तीति वेदितव्यम् । प्राणिनश्चेतनावन्तः । औषधयः फलपाकान्ताः । वृक्षाः पुष्पवन्तः फलवन्तश्च । वृक्षविशेषत्वात् वनस्पतिवीरुधामपि वृक्षग्रहणेन ग्रहणम् । प्राणिग्रहणेनैव चेतनावत्त्वेन वृक्षौषधिग्रहणे सिद्धे तदुपादानमिह शास्त्रे प्राणिग्रहणेन त्रसा एव गृह्यन्ते न स्थावरा इति ज्ञापनार्थम् ।

१२९३ **तालाद्धनुषि** ॥६।२।३२॥ तालशब्दाद्धनुषि विकारे यथाविहितमण् प्रत्ययः स्यात् । दुलक्षणस्य मयटोऽपवादः । तालस्य विकारस्तालं धनुः । धनुषीति किम् । तालमयं काण्डम् ।

१२९४ **त्रपुजतोः षोऽन्तश्च** ॥६।२।३३॥ त्रपु जतु इत्येताभ्यां विकारे यथाविहितमण् प्रत्ययः स्यात् तयोश्च षोऽन्तः। त्रपुणो विकारः त्रापुषम् । जतुनो विकारः जातुषम् । अण् सिद्ध एव षागमार्थं वचनम् । चकारः संनियोगार्थः ।

१२९५ **शम्याश्च लः** ॥ ६।२।३४ ॥ शमीशब्दाद्विकारेऽवयवे च यथाविहितमञ् प्रत्ययः स्यात् तत्संनियोगे चास्य लोऽन्तः । शम्या विकारोऽवयवो वा शामीलं भस्म । शामिली शाखा ।

१२९६ **पयोद्रोर्यः** ॥६।२।३५॥ पयस् द्रु इत्येताभ्यां विकारे यः प्रत्ययः स्यात् । पयसोऽणोऽपवादः। द्रोरेकस्वरमयटः। पयसो विकारः पयस्यम् । द्रोर्दारुणो विकारो द्रव्यम् ।

१२९७ **उष्ट्रादकञ्** ॥ ६।२।३६ ॥ उष्ट्रशब्दाद्विकारेऽवयवे च अकञ् प्रत्ययः स्यात् । उष्ट्रस्य उष्ट्र्या वा विकारोऽवयवो वा औष्ट्रकं मांसम् । औष्ट्रिकी जङ्घा ।

१२९८ **उमोर्णाद्वा** ॥ ६।२।३७ ॥ उमा ऊर्णा इत्येताभ्यां यथासंभवं विकारे अवयवे च अकञ् वा स्यात् । उमा अतसी तस्या विकारोऽवयवो वा औमकम्, औमम् । ऊर्णायाः विकारोऽवयवो वा और्णकम्, और्णम् ।

१२९९ **एण्या एयञ्** ॥ ६।२।३८ ॥ एणीशब्दाद्विकारेऽवयवे च एयञ्

प्रत्ययः स्यात् । अणोऽपवादः । एण्या विकारो ऽवयवो वा ऐणेयं मांसम् । ऐणेयी जंघा । स्त्रीलिङ्गनिर्देशात् पुंलिङ्गादणेव । ऐणं मांसम् । ऐणी जंघा ।

१३०० **कौशेयम्** ॥६।२।३९॥ कोशशब्दाद्विकारे एयञ् प्रत्ययो निपात्यते । कोशस्य विकारः कौशेयं वस्त्रं सूत्रं वा । निपातनं रूढ्यर्थम् । तेन वस्त्रसूत्राभ्यामन्यत्र भस्मादौ न भवति ।

१३०१ **परशव्याद्यलुक् च** ॥ ६।२।४० ॥ परशवे इदं परशव्यम् । तस्माद्विकारे यथाविहितमण्प्रत्ययः स्यात् यकारस्य च लुक् । परशव्यस्यायसो विकारः पारशवम् । अण् सिद्ध एव यलुगर्थं वचनम् । अथेह यग्रहणं किमर्थम् ? तदभावेऽप्यवर्णेवर्णस्येत्यन्तलुक्सिद्धौ लुग्ग्रहणात् अन्त्याभावेऽन्त्यसदेशस्यापि यकारस्य लुग् भविष्यति । सत्यम् । यग्रहणं यशब्दस्य समुदायस्यैव लोपार्थम् । तेनोत्तरसूत्रे 'स्वरस्य परे प्राग्विधौ' इत्यस्यानुपस्थानाद्यकारलोपे अवर्णेवर्णस्येतीकारलोपो भवति ।

१३०२ **कंसीयाञ् ञ्यः** ॥६।२।४१॥ कंसाय इदं कंसीयम् । ' परिणामिनि तदर्थे ' इतीयः । कंसीयशब्दाद्विकारे ञ्यः स्यात् तत्संनियोगे च यशब्दस्य लुक् । कंसीयस्य विकारः कांस्यम् ।

१३०३ **हेमार्थान्माने** ॥ ६।२।४२ ॥ हेमवाचिनः शब्दान्माने विकारे वाच्ये यथाविहितमण् प्रत्ययः स्यात् । दुमयटोऽपवादः । हाटकस्य विकारः हाटको निष्कः। हैमं कार्षापणमित्यत्र परत्वाद्धेमादिलक्षणोऽञेव । अर्थग्रहणं स्वरूपविधिव्युदासार्थम् । मान इति किम् । हाटकमयी यष्टिः।

१३०४ **द्रोर्वयः** ॥६।२।४३॥ द्रुशब्दान्माने विकारे वयः प्रत्ययः स्यात् । यस्यापवादः । द्रोर्विकारो द्रुवयं मानम् ।

१३०५ **मानात् क्रीतवत्** ॥६।२।४४॥ मीयते परिच्छिद्यते येन तन्मानम् इयत्तापरिच्छित्तिहेतुः संख्यादिरुच्यते । मानवाचिनः शब्दाद्विकारे क्रीतवत् प्रत्ययविधिः । शतेन क्रीतं शत्यं, शतिकं । तथैव शतस्य विकारः शत्यः, शतिकः । वत् सर्वविधिसादृश्यार्थः । तेन लुवादिकस्याप्यतिदेशो भवति । द्विशतः ।

१३०६ हेमादिभ्योऽञ् ॥ ६।२।४५ ॥ हेमन् इत्येवमादिभ्यो यथायोगं विकारेऽवयवे चार्थे नित्यमञ् प्रत्ययः स्यात् । हेम्नो विकारो हैमं शरासनम् । हैमी यष्टिः । रजतस्य राजतः । बहुवचनमाकृतिगणार्थम् । हेम्नोऽण्बाधनार्थमञ्वचनम् । अणि हि सति 'अणि' इत्यन्त्यस्वरादेर्लुग् न स्यात् । (हेमादिषु) पाटलीश्यामाकबार्हिणानां दुलक्षणस्य शेषाणां तु वैकल्पिकस्य मयटो बाधनार्थम् ।

१३०७ अभक्ष्याच्छादने वा मयट् ॥ ६।२।४६ ॥ षष्ठ्यन्ताद् भक्ष्याच्छादनवर्जिते यथायोगं विकारेऽवयवे च मयट् प्रत्ययो वा स्यात् । भस्मनो विकारः भस्ममयं, भास्मनम् । अभक्ष्याच्छादन इति किम् । मौद्गः सूपः । कार्पासः पटः । भक्ष्याच्छादनयोर्मयडभावपक्षे च तालाद्धनुषीत्यादिको विधिः सावकाशः । अयं च भस्ममयमित्यादौ । तत्रोभयप्राप्तौ परत्वादनेन मयट् भवति । तालमयं धनुः इत्यादि । एके तु तालाद्धनुषि द्रोः प्राणिवाचिभ्यश्च मयटं नेच्छन्ति ।

१३०८ शरदर्भकूदीतृणसोमबल्वजात् ॥ ६।२।४७ ॥ शरादिभ्यो यथायोगं भक्ष्याच्छादनवर्जिते विकारेऽवयवे च नित्यं मयट् प्रत्ययः स्यात् । अणोऽपवादः । शरमयम् । दर्भमयम् । कूदीमयम् । तृणमयम् । सोममयम् । बल्वजमयम् ।

१३०९ एकस्वरात् ॥६।२।४८॥ एकस्वरान्नाम्नो यथासंभवं भक्ष्याच्छादनवर्जिते विकारेऽवयवे च नित्यं मयट् स्यात् । वाङ्मयम् । त्वङ्मयम् ।

१३१० दोरप्राणिनः॥६।२।४९॥ दुसंज्ञकादप्राणिवाचिनो यथायोगं भक्ष्याच्छादनवर्जिते विकारेऽवयवे च मयट् प्रत्ययः स्यात् । अणोऽपवादः। आम्रमयम् । यन्मयम् । अप्राणिन इति किम् । श्वाविधो विकारोऽवयवो वा शौवाविधम् , श्वाविन्मयम् ।

१३११ गोः पुरीषे ॥६।२।५०॥ गोशब्दात् पुरीषेऽर्थे मयट् प्रत्ययः स्यात् । गोः पुरीषं गोमयम् । पुरीष इति किम् । गव्यं पयः । 'गोः स्वरे यः' इति यः।

यद्यपि पुरीषं विकारत्वेन न प्रसिद्धं तथापि दोषधातुमलमूलं शरीरमिति विवक्षायां तात्स्थ्यात्तद्व्दुपचार इति गोः पुरीषं पयश्च विकारो भवति। एकस्वरात् इत्येव सिद्धे पुरीषे नियमार्थं वचनम्।

१३१२ व्रीहेः पुरोडाशे ॥ ६।२।५१ ॥ व्रीहिशब्दात् पुरोडाशे विकारे नित्यं मयट् प्रत्ययः स्यात्। अणोऽपवादः। व्रीहिमयः पुरोडाशः। पुरोडाश इति किम्। व्रैह ओदनः।

१३१३ तिलयवाद्नाभ्नि ॥६।२।५२॥ तिल यव इत्येताभ्यां विकारेऽवयवे च मयट् प्रत्ययः स्यात् अनाभ्नि। अणोऽपवादः। यवानां विकारो यावः स एव यावकः।

१३१४ पिष्टात् ॥६।२।५३॥ पिष्टशब्दाद्विकारे मयट् प्रत्ययः स्यात् अनाभ्नि। अणोऽपवादः। पिष्टमयम्।

१३१५ नाभ्नि कः॥६।२।५४॥ पिष्टशब्दान्नाभ्नि विकारे कः प्रत्ययः स्यात्। पिष्टस्य विकारः पिष्टिका।

१३१६ ह्योगोदोहादीनञ् हियङ्ङश्चास्य ॥ ६।२।५५ ॥ ह्योगोदोहशब्दाद्विकारे नाभ्नि ईनञ् प्रत्ययः स्यात् तत्संनियोगे च प्रकृतेर्हियङ्ङ इत्यादेशः। ह्योगोदोहस्य विकारः हैयङ्गवीनं नवनीतं घृतं वा। नाभ्नीत्येव। ह्योगोदोहस्य विकार इदमुदश्वित् ह्यौगोदोहमित्यणेव भवति।

१३१७ अपो यञ् वा ॥६।२।५६॥ अप्शब्दाद्विकारे यञ् प्रत्ययो वा स्यात्। एकस्वरमयटोऽपवादः। अपां विकारः आप्यम्, अम्मयम्। अथ शुन इव पदमस्य श्वापदम्, तस्य विकार इत्यत्र अणि कृते श्वन्शब्दस्य द्वारादिषु पाठात् तत्र तदादिविधेर्ज्ञापितत्वाच्च—

१३१८ द्वारादेः ॥ ७।४।६ ॥ द्वारादीनां यौ यकारवकारौ तयोः समीपस्य स्वरेष्वादेः स्वरस्य तत्माप्तौ वृद्धिप्रसङ्गे ताभ्यामेव प्राक् ऐत् औत् इत्यागमौ स्याताम् ञ्णिति तद्धिते परे। इत्यनेन नित्यमौकारे प्राप्ते—

१३१९ पदस्यानिति वा ॥ ७।४।१२ ॥ पदशब्दान्तस्य श्वादेः शब्दस्य

इकारादिवर्जिते ञ्णिति तद्धिते परे वकारात् प्रागौकारो वा स्यात् । इति विकल्पः। श्वापदं, शौवापदम् । अनितीति किम् । श्वपदेन चरति श्वापदिकः ।

१३२० लुब्बहुलं पुष्पमूले ॥ ६।२।५७ ॥ विकारावयवयोर्विहितस्य प्रत्ययस्य पुष्पे मूले वा विकारतयावयवतया वा विवक्षिते बहुलं लुप् स्यात् । मल्लिकाया विकारोऽवयवो वा पुष्पं मल्लिका । यूथिका । नवमालिका । मालती । एषु अणो मयटो वा लुपि–

१३२१ ङ्यादेर्गौणस्याकिपस्तद्धितलुक्यगोणीसूच्योः ॥ २।४।९५ ॥ ङ्यादेः प्रत्ययस्य गौणस्याकिबन्तस्य तद्धितलुकि सति लुक् गोणीसूचीसंबंधिनस्तु न । इत्यनेन स्त्रीप्रत्ययनिवृत्तौ लुबन्तस्य स्त्रीत्वात् पुनः स्त्रीप्रत्ययः । विदार्या मूलं विदारी । क्वचिन्न भवति । वरणस्य पुष्पाणि वारणानि । एरण्डस्य मूलानि ऐरण्डानि । क्वचिद्विकल्पः । शिरीषस्य पुष्पाणि शिरीषाणि, शैरीषाणि । ह्रीबेरस्य मूलानि ह्रीबेराणि, ह्रैबेराणि । क्वचित्पुष्पमूलाभ्यामन्यत्रापि भवति । आमलकस्य विकारो वृक्षः आमलकी । बदरी । व्रीहेर्विकारः स्तम्बः व्रीहिः ।

१३२२ फले ॥६।२।५८॥ विकारेऽवयवे वा फले विवक्षिते प्रत्ययस्य लुप् स्यात् । आमलक्या विकारोऽवयवो वा फलमामलकम् । बदर्या बदरम् । हरीतक्याः फलं हरीतकी । पिप्पली । हरीतक्यादिभ्यो लुपि प्रकृतिलिङ्गमेव । तत्र पूर्वस्य स्त्रीप्रत्ययस्य लुपि पुनः स एव स्त्रीप्रत्ययः । यद्यप्यामलकादीनि प्रकृत्यन्तराणि सन्ति तथाप्यामलक्यादिभ्यः प्रत्ययश्रुतिनिवृत्त्यर्थं लुग्वचनम् ।

१३२३ प्लक्षादेरण् ॥ ६।२।५९ ॥ प्लक्षादिभ्यो विकारेऽवयवे वा फले विवक्षिते अण् स्यात् । मयटोऽपवादः । विधानसामर्थ्याच्चास्य लुब् न भवति । प्लक्षस्य विकारोऽवयवो वा फलं प्लाक्षम् । एवं न्यग्रोधस्य विकार इत्यत्रानेन अणि कृते—

१३२४ न्यग्रोधस्य केवलस्य ॥७।४।७॥ न्यग्रोधशब्दस्य केवलस्य यो यकारस्तस्य स्थानी अव्युत्पत्तिपक्षे तु समीपो यः स्वरेष्वादिः स्वरस्तस्य

तत्प्राप्तौ–वृद्धिप्राप्तौ तस्मादेव यकारात् प्राक् ऐकार आगमः स्यात् ञ्णिति तद्धिते। नैयग्रोधम् । इदमपि द्वारादीनां तदादिविधेर्ज्ञापकम् । न्यग्रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे नियमार्थम् । केवलस्यैवेति । अव्युत्पत्तिपक्षे तु विध्यर्थं वचनम् ।

१३२५ **जम्ब्वा वा** ॥ ६।२।६० ॥ जम्बूशब्दाद्विकारेऽवयवे वा फले विवक्षिते वाण् प्रत्ययःस्यात् पक्षे यथाप्राप्तम् प्रत्ययस्तस्य च लुप् । जम्ब्वा विकारोऽवयवो वा फलं जाम्बवम् । पक्षे जम्बु जम्बूः । लुपि स्त्रीनपुंसकते ।

१३२६ **न द्विरद्रुवयगोमयफलात्** ॥६।२।६१॥ द्रुवयं गोमयं फलवाचि च वर्जयित्वाऽन्यस्मान्नाम्नो विकारावयवयोर्द्विः प्रत्ययो न स्यात् । कपोतस्य विकारोऽवयवो वा कापोतः । कापोतस्य विकारोऽवयवो वेति दोरप्राणिन इति मयट् न भवति। अद्रुवयगोमयफलादिति किम् । द्रौवयं खण्डम् । गौमयं भस्म । कापित्थो रसः । कथं कपोतस्य मांसं कापोतम् तस्य विकारः कापोतो रसः पलाशस्यावयवः पालाशी शाखा तस्या अवयवः पालाशी समित् । विकारेऽपि प्रकृतिशब्दो वर्तते । यथा मुद्गैः शालीन् भुङ्क्ते । मुद्गविकारैः शालिविकारानिति गम्यते । गोभिः सन्नद्धो वहति । गोविकारैश्चर्ममिरिति गम्यते। अवयवेऽप्यवयविशब्दो वर्तते । पूर्वे पञ्चालाः ग्रामो दग्ध इति । तत्र विकारवृत्तेः प्रकृतिशब्दादवयववृत्तेरवयविशब्दाच्च प्रत्ययो भविष्यति । विकारविकारोऽपि वा विकार एव अवयवावयवोऽप्यवयव इति ।

१३२७ **पितृमातुर्व्यङुलं भ्रातरि** ॥ ६।२।६२ ॥ पितृमातृशब्दाभ्यां षष्ठ्यन्ताभ्यां भ्रातरि वाच्ये यथासंख्यं व्य डुल इत्येतौ प्रत्ययौ स्याताम् । पितुर्भ्राता पित्र्यः । मातुर्भ्राता मातुलः । डकारोऽन्त्यस्वरादिलोपार्थः ।

१३२८ **पित्रोर्डामहट्** ॥ ६।२।६३ ॥ पितृमातृशब्दाभ्यां षष्ठ्यन्ताभ्यां मातापित्रोर्वाच्ययोर्डामहट् प्रत्ययः स्यात् । पितुः पिता पितामहः । पितुर्माता पितामही । मातुः पिता मातामहः । मातुर्माता मातामही । द्विवचनटित्त्वाभ्यां मातापित्रोरिति विज्ञायते । डकारोऽन्त्यस्वरादिलोपार्थः । टकारो ङ्यर्थः ।

१३२९ **अवेर्दुग्धे सोढदुसमरीसम्** ॥ ६।२।६४॥ अविशब्दात् षष्ठ्य-

न्तात् दुग्धेऽर्थे सोढ दूस मरीस इत्येते प्रत्ययाः स्युः । अवेर्दुग्धम् अविसोढम् । अविदूसम् । अविमरीसम् ।

१३३० राष्ट्रेऽनङ्गादिभ्यः ॥६।२।६५॥ राष्ट्रं जनपदः । षष्ठ्यन्तादङ्गादिवर्जितान्नाम्नो राष्ट्रेऽभिधेये यथाविहितम् प्रत्ययः स्यात् । शिबीनां राष्ट्रं शैबम् । अनङ्गादिभ्य इति किम् । अङ्गानां वङ्गानां वा राष्ट्रमिति वाक्यमेव । अङ्गादयः प्रयोगगम्याः । केचित्तु अङ्गादिप्रतिषेधं नेच्छन्ति । अङ्गानां राष्ट्रमाङ्गम् । वाङ्गमित्यादि । उत्तरत्र निवास इत्यभिधानात् ईशितव्ये राष्ट्रेऽयं विधिः । उभयथा हि राष्ट्रसंबंधो भवति ।

१३३१ राजन्यादिभ्योऽकञ् ॥६।२।६६॥ राजन्य इत्येवमादिभ्यो राष्ट्रे वाच्येऽकञ् प्रत्ययः स्यात् । अणोऽपवादः । राजन्यानां राष्ट्रं राजन्यकम् । दैवयावतकम् । बहुवचनमाकृतिगणार्थम् ।

१३३२ वसातेर्वा ॥६।२।६७॥ वसातिशब्दाद्राष्ट्रे वाच्येऽकञ् प्रत्ययो वा स्यात् । वसातीनां राष्ट्रं वासातकं वासातम् ।

१३३३ भौरिक्यैषुकार्यादेर्विधभक्तम् ॥६।२।६८॥ भौरिक्यादिभ्य ऐषुकार्यादिभ्यश्च राष्ट्रे यथासख्यं विध भक्त इत्येतौ प्रत्ययौ स्याताम् । अणोऽपवादः । भौरिकीणां राष्ट्रं भौरिकिविधम् । भौलिकिविधम् । स्वभावान्नपुंसकता । ऐषुकारीणां राष्ट्रं ऐषुकारिभक्तम् । सारञ्जायनभक्तम् ।

१३३४ निवासादूरभवे इति देशे नाम्नि ॥६।२।६९॥ षष्ठ्यन्तान्नाम्नो निवास अदूरभव इत्येतयोरर्थयोर्यथाविहितं प्रत्ययः स्यात् देशे नाम्नि—प्रत्ययान्तं चेद्देशस्य नाम । इतिकरणो विवक्षार्थः । तेनानुवृत्ते व्यवहारमनुपतिते नाम्नि विज्ञेयम् न संगीते । निवसन्त्यस्मिन्निति निवासः । शिबीनां निवासो देशः शैबः, विदिशाया अदूरभवं नगरं वैदिशम् । वैदिशो जनपदः। इह केचिदङ्गानां निवासः अङ्गाः, वरणानामदूरभवं वरणा नगरम्, खलतिकस्य अदूरभवानि खलतिकं वनानीत्यादिषु प्रत्ययमुत्पाद्य लुपमारभन्ते, सत्यां च लुपि प्रकृतिवल्लिङ्गवचने न मन्यन्ते तदयुक्तम् । अत्र हि प्रकृतिमात्रमेव देशनाम न प्रत्ययान्तम् प्रत्ययान्तस्य च देशनामत्वे प्रत्ययो विधीयते इति न भवति। तस्य निवास इत्यादिविवक्षायां

तु वाक्यमेव । प्रत्ययाभावाच्च लुबपि न वक्तव्या । अङ्गवरणादीनां च क्षत्रिय-वृक्षादिवज्जनपदनगरादौ स्वत एव वृत्तिर्न प्रत्ययप्रयोगात् लिङ्गसंख्योपादानं च स्वगतमेवेति ।

१३३५ तदत्रास्ति ॥६।२।७०॥ तदिति प्रथमान्तादत्रेति सप्तम्यर्थे यथाविहितं प्रत्ययः स्यात् यत्तत्प्रथमान्तं तच्चेदस्तीति भवति देशे–नाम्नि प्रत्ययान्तं चेत् देशस्य नाम भवति । अत्रापीतिकरणो विवक्षार्थोऽनुवर्तते एव । तेन प्रसिद्धे नाम्नि भूमादौ चार्थे भवति । अत एव चोभयप्राप्तौ परोऽपि मत्वर्थीयोऽनेन बाध्यते । उदुम्बरा अस्मिन् देशे सन्ति औदुम्बरं नगरम् । औदुम्बरो जनपदः। औदुम्बरः पर्वतः।

१३३६ तेन निर्वृत्ते च ॥६।२।७१॥ तेनेति तृतीयान्तात् निर्वृत्तमित्यर्थे यथा-विहितं प्रत्ययः स्यात् देशे नाम्नि प्रत्ययान्तं चेद्देशस्य नाम भवति। यदा अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति इति कर्मणि निर्वृत्तशब्दो व्युत्पाद्यते तदा तेनेति कर्तरि करणे वा तृतीया । यदा त्वकर्मकविवक्षया कर्तरि निर्वृत्तशब्दस्तदा हेतौ तृतीया । कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी । चकारश्चतुर्णां योगानामुत्तरत्रा-नुवृत्त्यर्थः । तेनोत्तरे प्रत्यया यथायोगं चतुर्ष्वर्थेषु भवन्ति ।

१३३७ नद्यां मतुः ॥६।२।७२॥ तस्य निवासः, तस्यादूरभवः, तदत्रास्ति, तेन निर्वृत्तं चेत्येष्वर्थेषु मतुः प्रत्ययः स्यात् नद्यां देशे नाम्नि–प्रत्ययान्तं चेन्नदी-विषयं नाम भवति । नदीनामेत्यर्थः । अणोऽपवादः ।

१३३८ नाम्नि ॥२।१।९५॥ मतोर्मकारस्य वकारादेशः स्यात् संज्ञायाम् । अनजिरादिबहुस्वरेत्यादिना च मतौ दीर्घः । उदुम्बरा अस्यां सन्ति उदुम्बरावती नदी । मशकावती । वीरणावती । शरावती । इरावती । भगीरथेन निर्वृत्ता भागी-रथीत्यादीनि नदीनामान्यमत्वन्तान्येवेति मतुर्न भवति

१३३९ मध्वादेः ॥६।२।७३॥ मध्वादिभ्यो मतुः प्रत्ययः स्यात् चातुरर्थिकः देशे नाम्नि । अणोऽपवादः । अनद्यर्थश्चारंभः । मधुमान् । बिसवान् ।

१३४० नडकुमुदवेतसमाहिषाड्डित् ॥६।२।७४॥ नडादिभ्यो डित् मतुः प्रत्ययो भवति चातुरर्थिकः देशे नाम्नि । अणाद्यपवादः । नड्वान् । कुमुद्वान् । वेतस्वान् । महिष्मान् देशः । तत्र भवा माहिष्मती नगरी । डित्त्वमन्त्यस्वरा-दिलोपार्थम् ।

१३४१ **नडशादाद् वलः** ॥६।२।७५॥ नड शाद इत्येताभ्यां ङित् वलः प्रत्ययः चातुरर्थिकः स्यादेशे नाम्नि । मत्वर्णाद्यपवादः ।। नड्वलम् । शाद्वलम् ।

१३४२ **शिखायाः** ॥ ६।२।७६ ॥ शिखाशब्दाद्वलः प्रत्ययो भवति चातुरर्थिकः देशे नाम्नि । अणोऽपवादः । पृथग्योगाङ्ङिदिति निवृत्तम् । शिखावलं नाम नगरम् । मतुप्रकरणे शिखाया वलचं वक्ष्यति तत् अदेशार्थं वचनम् ।

१३४३ **शिरीषादिककणौ** ॥६।२।७७॥ शिरीषशब्दादिक कण् इत्येतौ प्रत्ययौ चातुरर्थिकौ स्याताम् देशे नाम्नि । शिरीषाणामदूरभवो ग्रामः शिरीषिकः, शैरीषिकः ।

१३४४ **शर्कराया इकणीयाण् च** ॥६।२।७८॥ शर्कराशब्दादिकण् ईय अण् चकारात् इक कण् इत्येते प्रत्ययाश्चातुरर्थिकाः स्युर्देशे नाम्नि । शर्करा अस्मिन् देशे सन्ति शार्करिकः, शर्करीयः, शार्करः, शर्करिकः, शार्करकः । शिरीषाः शर्करा इति प्रत्ययप्रयोगमन्तरेणापि देशे वृत्तिरिति पूर्ववत् प्रत्ययो न भवति ।

१३४५ **रोऽश्मादेः** ॥६।२।७९॥ अश्मादिभ्यो रः प्रत्ययो भवति चातुरर्थिको देशे नाम्नि । अश्मरः । यूषरः ।

१३४६ **प्रेक्षादेरिन्** ॥६।२।८०॥ प्रेक्षादिभ्य इन् प्रत्ययो भवति चातुरर्थिको देशे नाम्नि । प्रेक्षी । फलकी ।

१३४७ **तृणादेः सल्** ॥६।२।८१॥ तृणादिभ्यश्चातुरर्थिकः सल् प्रत्ययः स्यादेशे नाम्नि । तृणसा । नदसा ।

१३४८ **काशादेरिलः** ॥६।२।८२॥ काशादिभ्यश्चातुरर्थिक इलः प्रत्ययः स्यादेशे नाम्नि । काशिलम् । वाशिलम् ।

१३४९ **अरीहणादेरकण्** ॥६।२।८३॥ अरीहणादिभ्यश्चातुरर्थिकोऽकण् प्रत्ययः स्यादेशे नाम्नि । आरीहणकम् । खाण्डवकम् ।

१३५० **सुपन्थ्यादेर्ण्यः** ॥६।२।८४॥ सुपन्थिन् इत्यादिभ्यश्चातुरर्थिको ण्यः

प्रत्ययः स्यादेशे नाम्नि । सौपन्थ्यम् । सुपथिन्शब्दस्यात एव निपातनात् पकारात्परो नागमः पस्य च वा वकारः ।

१३५१ **सुतंगमादेरिञ्** ॥६।२।८५॥ सुतंगमादिभ्यश्चातुरर्थिक इञ् प्रत्ययः स्यादेशे नाम्नि । सौतंगमिः। मौनिविन्दिः ।

१३५२ **बलादेर्यः** ॥६।२।८६॥ बलादिभ्यश्चातुरर्थिको यः प्रत्ययः स्यात् देशे नाम्नि । बल्यम् । पुल्यम् ।

१३५३ **अहरादिभ्योऽञ्** ॥६।२।८७॥ अहन् इत्येवमादिभ्यश्चातुरर्थिकोऽञ् प्रत्ययः स्यात् देशे नाम्नि । आह्नम् । लौमम् । तेन निर्वृत्तमित्यर्थेऽहःशब्दादेशे नाम्नि विहितोऽयमञ् विशेषविहितत्वात् निर्वृत्त इति सामान्यविहितस्य कालेकणोऽपवादः । अहरादिराकृतिगणः ।

१३५४ **सख्यादेरयण्** ॥६।२।८८॥ सखि इत्येवमादिभ्यश्चातुरर्थिक एयण् प्रत्ययः स्यादेशे नाम्नि । साखेयः। साखिदत्तेयः।

१३५५ **पन्थ्यादेरायनण्** ॥६।२।८९॥ पन्थ्यादिभ्यश्चातुरर्थिक आयनण् प्रत्ययः स्यादेशे नाम्नि । पान्थायनः । पथिन्शब्दस्य प्रत्ययथयोगे पकारात्परो नागमोऽत एव निपातनात् । पाक्षायणः ।

१३५६ **कर्णादेरायनिञ्** ॥६।२।९०॥ कर्णादिभ्यश्चातुरर्थिक आयनिञ् प्रत्ययः स्यात् देशे नाम्नि । कार्णायनिः । वासिष्ठायनिः ।

१३५७ **उत्करादेरीयः** ॥६।२।९१॥ उत्करादिभ्यश्चातुरर्थिक ईयः प्रत्ययः स्यादेशे नाम्नि । उत्करीयः । संकरीयः ।

१३५८ **नडादेः कीयः** ॥६।२।९२॥ नड इत्येवमादिभ्यश्चातुरर्थिकः कीयः प्रत्ययः स्यादेशे नाम्नि । नडकीयः । प्लक्षकीयः ।

१३५९ **कृशाश्वादेरीयण्** ॥६।२।९३॥ कृशाश्वादिभ्यश्चातुरर्थिक ईयण् प्रत्ययः स्यादेशे नाम्नि । कार्शाश्वीयः । आरिष्टीयः ।

१३६० **ऋश्यादेः कः** ॥६।२।९४॥ ऋश्य इत्यादिभ्यश्चातुरर्थिकः कः प्रत्ययः स्यादेशे नाम्नि । ऋश्यकः । न्यग्रोधकः ।

१३६१ **वराहादेः कण्** ॥६।२।९५॥ वराहादिभ्यश्चातुरर्थिकः कण् प्रत्ययः स्यात् देशे नाम्नि । वाराहकः । पालाशकः ।

१३६२ **कुमुदादेरिकः** ॥६।२।९६॥ कुमुद इत्येवमादिभ्यश्चातुरर्थिकः इकः प्रत्ययः स्यादेशे नाम्नि । कुमुदिकम् । इकटिकम् ।

१३६३ **अश्वत्थादेरिकण्** ॥६।२।९७॥ अश्वत्थ इत्यादिभ्यश्चातुरर्थिक इकण् प्रत्ययः स्यादेशे नाम्नि । आश्वत्थिकम् । कौमुदिकम् ।

१३६४ **सास्य पौर्णमासी** ॥६।२।९८॥ इतिशब्दो नाम्नीति चानुवर्तते । देश इति निवृत्तम् । सेति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययः स्यात् यत्तत्प्रथमान्तं तच्चेत्पौर्णमासी भवति नाम्नि–प्रत्ययान्तं चेन्नाम स्यात् । इतिकरणो विवक्षार्थः। तेन मासार्धमासयोरेव संवत्सरपर्वणोः प्रत्ययः। संवत्सरेऽप्यन्ये। अस्येत्यवयवावयविसंबंधे षष्ठी। पौषी पौर्णमासी अस्य पौषो मासः। पौषोऽर्धमासः। एवं माघः, वैशाखः, आषाढ इति। नाम्नीत्येव । पौषी पौर्णमासी अस्य पञ्चरात्रस्येति वाक्यमेव । पौर्णमासीति पूर्णो मास्चन्द्रोऽस्यामस्तीति 'पूर्णमासोऽण्' इत्यण् । पूर्णमास इयमिति वा तस्येदमित्यण् । पूर्णो मा मासो वास्यां पूर्णमासा वा युक्तेति अत एव निपातनादण् ।

१३६५ **आग्रहायण्यश्वत्थादिकण्** ॥६।२।९९॥ आग्रहायणी अश्वत्था इत्येताभ्यां सेति प्रथमान्ताभ्यामस्येति षष्ठ्यर्थे इकण् प्रत्ययः स्यात् यत्तत्प्रथमान्तं तच्चेत्पौर्णमासी भवति नाम्नि–प्रत्ययान्तं चेन्नाम स्यात् । आग्रहायणी पौर्णमासी अस्येति आग्रहायणिको मासोऽर्धमासो वा । अश्वत्था पौर्णमासी अस्येति आश्वत्थिको मासोऽर्धमासो वा । आग्रहायणी मार्गशीर्षी । अश्वत्था आश्वयुजी । अन्ये तु अश्वत्थशब्दमप्रत्ययान्तं पौर्णमास्यामपि पुलिङ्गमिच्छन्ति। अश्वत्थः पौर्णमासी।

१३६६ **चैत्रीकार्तिकीफाल्गुनीश्रवणाद्वा** ॥६।२।१००॥ एभ्य इकण् प्रत्ययो वा स्यात् सास्य पौर्णमासीति अस्मिन् विषये नाम्नि । चैत्री पौर्णमासी

अस्य चैत्रिकः, चैत्रो वा मासोऽर्धमासो वा। एवं कार्तिक्याः कार्तिकिकः, कार्तिकः। फाल्गुन्याः फाल्गुनिकः, फाल्गुनः। श्रवणायाः श्रावणिकः, श्रावणः।

१३६७ देवता ॥ ६।२।१०१ ॥ सास्येत्यनुवर्तते। सेति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययः स्याद्यत्तत्प्रथमान्तं देवता चेत्सा भवति। अर्हन् देवता अस्य आर्हतः। जैनः। आग्नेयः। आदित्यः। बार्हस्पत्यः। गव्यम्।

१३६८ देवतानामात्वादौ ॥ ७।४।२८ ॥ देवतार्थानां शब्दानामात्वादौ विषये ञिणति तद्धिते परे आदेः पूर्वपदस्योत्तरपदस्य च स्वरेष्वादेः स्वरस्य वृद्धिः स्यात्। अग्निश्च विष्णुश्च देवता अस्य आग्नावैष्णवं सूक्तम्। वेदसहश्रुतावायुदेवतानामित्यत आरभ्य उषासोषस इति यावदात्वादयः। आत्वादाविति किम्। स्कन्दविशाखयोरिदं स्कान्दविशाखम्।

१३६९ आतो नेन्द्रवरुणस्य ॥७।४।२९॥ आकारान्तात् पूर्वपदात्परस्य इन्द्रशब्दस्य वरुणशब्दस्य चोत्तरपदस्य स्वरेष्वादेः स्वरस्य वृद्धिर्न स्यात्। अग्निश्च इन्द्रश्च अग्नेन्द्रौ। तौ देवता अस्य आग्नेन्द्रं सूक्तम्। सौमेन्द्रं हविः। ऐन्द्रावरुणम्। मैत्रावरुणम्। आत इति किम्। आग्निवारुणम्। उत्तरपदस्येत्येव। ऐन्द्राग्नं एकादशकपालं पुरोडाशं निर्वपेत्। ननु चेन्द्रशब्दस्य द्वौ स्वरौ तत्राद्यः संधिकार्येण ह्रियतेऽपरोऽवर्णेवर्णस्येत्यतोऽस्वर एवेन्द्रशब्दस्तस्य किं वृद्धिप्रतिषेधेन ? सत्यम्। किन्त्वनेनैतज्ज्ञाप्यते बहिरङ्गमपि पूर्वं पूर्वोत्तरपदयोः कार्यं भवति पश्चात् सन्धिकार्यम्। [1]तेन पूर्वैषुकामशम इत्यादि सिद्धम्।

१३७० पैङ्गाक्षीपुत्रादेरीयः ॥६।२।१०२॥ पैङ्गाक्षीपुत्र इत्येवमादिभ्य ईयः प्रत्ययः स्यात्साऽस्य देवतेत्यस्मिन्विषये। अणोऽपवादः। पैङ्गाक्षीपुत्रो देवता अस्य पैङ्गाक्षीपुत्रीयं हविः। तार्णबिन्दवो देवता अस्य तार्णबिन्दवीयं हविः। एवं पैङ्गीपुत्रीयम्। पैङ्गाक्षीपुत्रादयः प्रयोगगम्याः।

१३७१ शुक्रादियः ॥ ६।२।१०३ ॥ शुक्रशब्दादियः प्रत्ययः स्यात्साऽस्य देवतेत्यस्मिन् विषये। शुक्रियं हविः। शुक्रियोऽध्यायः

---

१ अत्र भवेऽण् प्राग्ग्रामाणामित्युत्तरपदवृद्धिः। अत्र यदि पूर्वं संधिः स्यात्तदा इकारस्य पूर्वपदत्वात् षुसंबंधिन उकारस्य वृद्धिः स्यात्।

१३७२ **शतरुद्रात्तौ** ॥ ६।२।१०४ ॥ शतरुद्रशब्दात्तौ-ईय इय इत्येतौ प्रत्ययौ स्याताम् साऽस्य देवतेत्यस्मिन् विषये। शतसंख्या रुद्राः शतरुद्राः। ते देवता अस्य शतरुद्रीयं, शतरुद्रियम्। शतं रुद्रा देवता अस्येति द्विगावपि विधानसामर्थ्यात् लुब् न भवति।

१३७३ **अपोनपादपान्नपातस्तृ चातः** ॥६।२।१०५॥ अपोनपादपान्नपात् इत्येताभ्यां तौ प्रत्ययौ स्याताम् साऽस्य देवतेत्यस्मिन् विषये तत्संनियोगे चानयोराच्छद्धस्य तृ इत्ययमादेशः स्यात्। अपोनपात् देवता अस्य अपोनप्त्रीयम्, अपोनप्त्रियम्। अपान्नप्त्रीयम्, अपान्नप्त्रियम्।

१३७४ **महेन्द्राद्वा** ॥६।२।१०६॥ महेन्द्रशब्दात् साऽस्य देवतेत्यस्मिन् विषये तौ प्रत्ययौ वा स्याताम्। महेन्द्रीयम्, महेन्द्रियम्। पक्षे अण्। माहेन्द्रं हविः।

१३७५ **कसोमात् ष्यण्** ॥६।२।१०७॥ कशब्दात् सोमशब्दाच्च साऽस्य देवतेत्यस्मिन् विषये ष्यण् प्रत्ययः स्यात्। अणोऽपवादः। टकारो ङ्यर्थः। कः प्रजापतिर्देवता अस्य कायं हविः। कायी इष्टिः। [1]कशब्दं प्रति णित्त्वस्य वैयर्थ्यादालोपो न भवति। सोमो देवताऽस्य सौम्यं हविः।

१३७६ **द्यावापृथिवीशुनासीराग्नीषोममरुत्वद्वास्तोष्पतिगृहमेधादीयौ** ॥६।२।१०८॥ एभ्यः साऽस्य देवतेत्यस्मिन् विषये ईय य इत्येतौ प्रत्ययौ स्याताम्। अणो ङ्यस्य चापवादः। द्यौश्च पृथिवी च द्यावापृथिव्यौ ते देवते अस्य द्यावापृथिवीयम्, द्यावापृथिव्यम् हविः। शुनश्च वायुः सीरश्चादित्यः शुनासीरौ तौ देवता अस्य शुनासीरीयम्, शुनासीर्यम्। अग्निश्च सोमश्च अग्नीषोमौ तौ देवता अस्य अग्नीषोमीयम्, अग्नीषोम्यम्। मरुत्वान् देवता अस्य मरुत्वतीयम्। मरुत्वत्यम्। वास्तोष्पतिर्देवताऽस्येति वास्तोष्पतीयम्, वास्तोष्पत्यम्। गृहमेधौ देवताऽस्य गृहमेधीयम्, गृहमेध्यम्।

१३७७ **वाय्वृतुपित्रुषसो यः** ॥६।२।१०९॥ वायु ऋतु पितृ उषस्-

---

१ ननु कायमित्यत्र लोपात्स्वरादेश इति न्यायेन लोपात् पूर्वं वृद्धौ कृतायां पश्चादाकारलोपः कस्मान्न भवतीत्याह-कशब्दं प्रतीति। अकारस्याकारस्य वा लोपे विशेषाभावात्। यद्वा सकृद्गते स्पर्द्धे यद् बाधितं तद् बाधितमेवेत्युपतिष्ठते।

इत्येतेभ्यः साऽस्य देवतेत्यस्मिन् विषये यः प्रत्ययः स्यात्। अणोऽपवादः। वायुर्देवताऽस्य वायव्यम्। एवम् ऋतव्यम्, पित्र्यम्, उषस्यम्।

१३७८ **महाराजप्रोष्ठपदाट्टिकण्** ॥६।२।११०॥ महाराज प्रोष्ठपद इत्येताभ्यां साऽस्य देवतेत्यस्मिन् विषये इकण् स्यात्। अणोऽपवादः। महाराजो देवताऽस्य माहाराजिकः। माहाराजिकी। प्रौष्ठपदिकः। प्रौष्ठपदिकी।

१३७९ **कालाट्ठञवत्** ॥६।२।१११॥ कालविशेषवाचिभ्यो नामभ्यो यथा भवेऽर्थे प्रत्यया वक्ष्यन्ते तथा साऽस्य देवतेत्यस्मिन् विषये स्युः। वत् सर्वसादृश्यार्थः। तेन यकाभ्यः प्रकृतिभ्यो येन विशेषणेन ये प्रत्यया भवेऽर्थे भवन्ति ताभ्य एव प्रकृतिभ्यस्तेनैव विशेषणेन त एव प्रत्यया इह भवन्ति। यथा मासे भवं मासिकं तथैव मासो देवताऽस्येति मासिकमित्यादि।

१३८० **आदेश्छन्दसः प्रगाथे** ॥६।२।११२॥ सेति प्रकृतिरस्येति प्रत्ययार्थश्चानुवर्तते। तयोर्यथाक्रमं विशेषणे आदेश्छन्दस इति प्रगाथे इति च। सेति प्रथमान्तादादिभूतात् छन्दसोऽस्येति षष्ठ्यर्थे प्रगाथेऽभिधेये यथाविहितं प्रत्ययः स्यात्। यत्र द्वे ऋचौ प्रग्रन्थनेन प्रकर्षगानेन वा तिस्रः क्रियन्ते स मन्त्रविशेषः प्रगाथः। पङ्क्तिरादिर्यस्य प्रगाथस्य पाङ्क्तः प्रगाथः। आदेरिति किम्। अनुष्टुब् मध्यमस्य प्रगाथस्य। छन्दस इति किम्। उदित्यर्थं शब्द आदिरस्य प्रगाथस्य। प्रगाथ इति किम्। पङ्क्तिरादिरस्य अनुवाकस्य।

१३८१ **योद्धृप्रयोजनाद्युद्धे** ॥६।२।११३॥ सेति प्रथमान्तात् योद्धृवाचिनः प्रयोजनवाचिनश्चास्येति षष्ठ्यर्थे युद्धेऽभिधेये यथाविहितं प्रत्ययः स्यात्। विद्याधरा योद्धारः अस्य युद्धस्य वैद्याधरं युद्धम्। भारतं युद्धम्। प्रयोजनं प्रवृत्तिसाध्यं फलम्। सुभद्रा प्रयोजनमस्य युद्धस्य सौभद्रं युद्धम्। सौतारं युद्धम्। अत्र सुभद्रादिशब्दस्तत्प्राप्तौ वर्तत इति प्रयोजनम्। योद्धृप्रयोजनादिति किम्। मासोऽस्य युद्धस्य। युद्ध इति किम्। सुभद्रा प्रयोजनमस्य वैरस्य।

१३८२ **भावघञोऽस्यां णः** ॥६।२।११४॥ सेति प्रकृतिविशेषणमनुवर्तते। भावे यो घञ् तदन्तात् प्रथमान्तादस्यामिति स्त्रीलिङ्गे सप्तम्यर्थे णः प्रत्ययः स्यात्। प्रपातोऽस्यां वर्तते तिथौ प्रपाता। भावग्रहणं किम्। प्राकारोऽस्याम्। घञ इति

किम्। श्येनपतनमस्याम्। स्त्रीलिङ्गग्रहणादिह न। दण्डपातोऽस्मिन् दिवसे। इति-करणानुवृतेः क्वचिन्न भवति। द्रोणपाकोऽस्यां स्थाल्याम्। केवलाच्च भावे घञन्तान्न भवति।

१३८३ **श्यैनंपाता तैलंपाता** ॥६।२।११५॥ श्येनशब्दस्य तिलशब्दस्य च भावघञन्ते पातशब्दे परे मान्तो निपात्यते। प्रत्ययस्तु पूर्वेणैव सिद्धः। श्येन-पातोऽस्यां वर्तते श्यैनंपाता। तिलपातोऽस्यां वर्तते तैलंपाता तिथिः क्रिया-भूमिः क्रीडा वा।

१३८४ **प्रहरणात् क्रीडायां णः** ॥६।२।११६॥ प्रहरणवाचिनः प्रथमा-न्तादस्यामिति सप्तम्यर्थे क्रीडायां णः प्रत्ययः स्यात्। दण्डः प्रहरणमस्यां क्रीडायां दाण्डा क्रीडा। एवं मौष्टा पादा क्रीडा। प्रहरणादिति किम्। माला भूषणमस्यां क्रीडायाम्। क्रीडायामिति किम्। खड्गः प्रहरणमस्यां सेनायाम्। यत्राद्रोहेण घातप्रतिघातौ स्यातां सा क्रीडा। भावघञोऽस्यां ण इत्यनन्तरो णो नानुवर्तते क्रीडाया अर्थान्तरत्वात् यथा पूर्वसूत्रोपात्तः समूहाद्यर्थेषु ततो यथाविहितमेव प्रत्ययो भवेदितीह पुनर्णग्रहणम्।

१३८५ **तद्वेत्त्यधीते** ॥६।२।११७॥ तदिति द्वितीयान्तात् वेत्ति अधीते वेत्येतयोरर्थयोर्यथाविहितं प्रत्ययः स्यात्। मुहूर्तं वेत्ति मौहूर्तः। एवमौत्पातः,नैमित्तः। केचित्तु मुहूर्तनिमित्तशब्दौ न्यायादौ पठन्ति तन्मते मौहूर्तिकः। नैमित्तिकः। छन्दोऽधीते छान्दसः। व्याकरणं वेत्त्यधीते वा वैयाकरणः, नैरुक्तः। घटं वेत्ति पटं वेत्तीत्यादा-वनभिधानान्न भवति। केचित्तु वेदनाध्ययनयोरेकविषयतायामेवेच्छन्ति। तन्मते अग्निष्टोमं यज्ञं वेत्तीत्यादावपि प्रत्ययो न भवति

१३८६ **न्यायादेरिकण्** ॥६।२।११८॥ न्यायादिभ्यो वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययः स्यात्। न्यायं वेत्त्यधीते वा नैयायिकः। नैयासिकः।

१३८७ **पदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकात्** ॥ ६।२।११९ ॥ पदकल्पलक्षणशब्दान्तेभ्यः क्रत्वाख्यानाख्यायिकावाचिभ्यश्च वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययः स्यात्। पदान्त–पौर्वपदिकः। बहुप्रत्ययपूर्वात् पदशब्दान्न भवति अनभिधानात्। कल्पान्त–मातृकल्पिकः। लक्षणान्त–गौलक्षणिकः। लाक्षणिक इति

न्यायादित्वात् सिद्धम् । क्रतु–आग्निष्टोमकः। आख्यान–यावक्रीतिकः। आख्यायिका–वासवदत्तिकः।

१३८८ **अकल्पात् सूत्रात्** ॥६।२।१२०॥ कल्पशब्दवर्जितात् परो यः सूत्रशब्दस्तदन्ताद्वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययः स्यात्। वार्तिसूत्रिकः। सांग्रहसूत्रिकः। अकल्पादिति किम् । सौत्रः । कालपसौत्रः ।

१३८९ **अधर्मक्षत्रत्रिसंसर्गाङ्गाद्विद्यायाः** ॥१।२।१२१॥ धर्म क्षत्र त्रि संसर्ग अङ्ग इत्येतच्छब्दवर्जितात् परो यो विद्याशब्दस्तदन्ताद् वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययः स्यात्। वायसविद्यिकः। सार्पविद्यिकः । अधर्मादेरिति किम् । वैद्यः। धार्मविद्यः । क्षात्रवैद्यः । त्रयवया विद्या त्रिविद्या तां वेत्त्यधीते वा त्रैविद्यः । अत्र त्रिविद्याशब्दस्य कर्मधारयस्यैव ग्रहणं न द्विगोः । तत्र लुपि सत्यामणिकणोर्विशेषाभावात् । त्रिविद्यः । सांसर्गविद्यः । आङ्गविद्यः ।

१३९० **याज्ञिकौक्थिकलौकायितिकम्** ॥६। २।१२२॥ याज्ञिकादयः शब्दा वेत्त्यधीते वेत्यर्थे इकण्प्रत्ययान्ता निपात्यन्ते । याज्ञिकेति यज्ञशब्दाद् याज्ञिक्यशब्दाच्चेकण् इक्यलोपश्च निपात्यते। यज्ञं याज्ञिक्यं वा वेत्त्यधीते वा याज्ञिकः। औक्थिकेति उक्थशब्दः केषुचिदेव सामसु रूढः । यज्ञायज्ञीयात् परेण यानि गीयन्ते न च तेषु वर्तमानात् प्रत्यय इष्यते किं तर्हि तद्व्याख्याने औक्थिक्ये उपचारेण वर्तमानात् । उक्थमधीते औक्थिकः । औक्थिक्यमधीते इत्यर्थः । औक्थिक्यशब्दात्तु प्रत्ययो न भवत्यनभिधानात् । तस्मादपीच्छन्त्येके । औक्थिक्यमधीते औक्थिकः । लौकायितिकेति लोकायतशब्दादिकण् यकाराकारस्य चेकारो निपात्यते । लोकायतं वेत्त्यधीते वा लौकायितिकः । लौकायतिका इति तु न्यायादिपाठात् सिद्धम् ।

१३९१ **अनुब्राह्मणादिन्** ॥६।२।१२३॥ अनुब्राह्मणशब्दाद् वेत्त्यधीते वेत्यर्थे इन् प्रत्ययः स्यात्। ब्रह्मणा प्रोक्तो ग्रन्थो ब्राह्मणम् । ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणम् । सदृशार्थेऽव्ययीभावः। तद्वेत्त्यधीते वानुब्राह्मणी । मत्वर्थीयेनैवेना सिद्धे अनभिधानाच्च इकस्याप्रवृत्तावण्बाधनार्थमिनो विधानम् ।

१३९२ **शतषष्टेः पथ इकट्** ॥६।२।१२४॥ शत षष्टि इत्येताभ्यां परो

यः पथिन्शब्दस्तदन्ताद्वेत्त्यधीते वेत्यर्थे इकट् प्रत्ययःस्यात्। शतपथिकः, शतपथिकी। षष्टिपथिकः, षष्टिपथिकी।

१३९३ पदोत्तरपदेभ्य इकः ॥६।२।१२५॥ पदशब्द उत्तरपदं यस्य तस्मात् पदशब्दात् पदोत्तरपदशब्दाच्च वेत्त्यधीते वेत्यर्थे इकः प्रत्ययः स्यात्। पूर्वपदिकः। पूर्वपदिका। उत्तरपदिकः। उत्तरपदिका। पदिकः। पदिका। पदोत्तरपदिकः। पदोत्तरपदिका। बहुवचनं सर्वभङ्गपरिग्रहार्थम्।

१३९४ पदक्रमशिक्षामीमांसासामन्नोऽकः ॥६।२।१२६॥ पद क्रम शिक्षा मीमांसा सामन् इत्येतेभ्यो तद्वेत्त्यधीते वेत्यर्थेऽकः प्रत्ययः स्यात्। पदकः। क्रमकः। शिक्षकः। मीमांसकः। सामकः। उपनिषच्छब्दादपीच्छति कश्चित्। उपनिषदकः। के सति शिक्षाका, शिक्षिका, शिक्षका। मीमांसाका, मीमांसिका, मीमांसकेति रूपत्रयं स्यात्। शिक्षिका, मीमांसिकेति चेष्यते। तदर्थमेकवचनम्।

१३९५ ससर्वपूर्वाल्लुप् ॥६।२।१२७॥ सपूर्वात् सर्वपूर्वाच्च वेत्त्यधीते वेत्यर्थे विहितस्य प्रत्ययस्य लुप् स्यात्। सवार्तिकमधीते सवार्तिकः। ससंग्रहः। अणो लुप्। सकल्पः। अत्रेकणः। सर्ववेदः। सर्वतन्त्रः। अत्राणः। सर्वविद्यः। अत्रेकणः। कथं द्विवेदः पञ्चव्याकरण इति? द्विगोरनपत्ये यस्वरादेरिति लुपि भविष्यति।

१३९६ संख्याकात् सूत्रे ॥६।२।१२८॥ संख्यायाः परो यः कः प्रत्ययो विहितस्तदन्तात् सूत्रे वर्तमानात् नाम्नो वेत्त्यधीते वेत्यर्थे उत्पन्नस्य प्रत्ययस्य लुप् स्यात्। अप्रोक्तार्थ आरंभः। अष्टावध्यायाः परिमाणमस्य अष्टकं सूत्रम्। तद्विदन्ति अधीयते वा अष्टकाः पाणिनीयाः। संख्याग्रहणं किम्। माहावार्तिकाः। कादिति किम्। चतुष्टयं सूत्रमधीयते चातुष्टयाः।

१३९७ प्रोक्तात् ॥६।२।१२९॥ प्रोक्तार्थविहितः प्रत्यय उपचारात् प्रोक्त इत्युच्यते। तदन्तान्नाम्नो वेत्त्यधीते वेत्यर्थे उत्पन्नस्य प्रत्ययस्य लुप् स्यात्। गोतमेन प्रोक्तं गौतमम्। तद्वेत्त्यधीते वा गौतमः। सुधर्मेण सुधर्मणा वा प्रोक्तं सौधर्मं सौधर्मणं वा। तद्वेत्त्यधीते वा सौधर्मः, सौधर्मणः। स्त्रियां विशेषः। गोतमा सौधर्मा सौधर्मणा स्त्री इत्यादि। अणो लुप्यणन्तत्वाभावात् ङीर्न भवति।

१३९८ **वेदेनब्राह्मणमत्रैव** ॥ ६।२।१३० ॥ प्रोक्तग्रहणमिहानुवर्तते । तच्च प्रथमान्तं विपरिणम्यते । प्रोक्तप्रत्ययान्तं वेदवाचि इनन्तं च ब्राह्मणवाची अत्रैव–वेत्त्यधीते वेत्येतद्विषये एव प्रयुज्यते । तेन स्वातन्त्र्यं उपाध्यन्तरयोगो वाक्यं च निवर्तते । वेद–कठेन प्रोक्तं वेदमधीयते विदन्ति वा कठाः । एवं कलापिना कालापाः । इत्यादि । इनन्तं ब्राह्मणवाची–ताण्डचेन प्रोक्तं ब्राह्मणं विदन्त्यधीयते वा ताण्डिनः । इनग्रहणं किम् । याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्क्यानि । ' शकलादेर्यत्रः ' इत्यत्र । ब्राह्मणमिति किम् । पिङ्गेन प्रोक्तः पैङ्गी कल्पः । ब्राह्मणं वेद एव तत्र वेद इत्येव सिद्धे अनिनन्तस्य नियमनिवृत्त्यर्थमिन्ब्राह्मणग्रहणम् । प्रोक्तानुवर्तनं किमर्थम् । ऋचः यजूंषि सामानि मंत्राः वेदः । आरंभसामर्थ्यादवधारणे सिद्धे उभयावधारणार्थमेवकारः । प्रोक्तप्रत्ययान्तस्यात्रैव वृत्तिर्नान्यत्र तथात्र वृत्तिरेव न केवलस्य प्रोक्तप्रत्ययान्तस्यावस्थानम् । अन्यत्र त्वनियमात् क्वचित्स्वातंत्र्यं भवति । अर्हता प्रोक्तमार्हतं शास्त्रम् । क्वचिदुपाध्यन्तरयोगः । आर्हतं महत्सुविहितमिति । क्वचिद् वाक्यम् । आर्हतमधीते । क्वचिद् वृत्तिः आर्हत इति । इह पुनर्नियमाद्युगपदेव विग्रहः । कठेन प्रोक्तमधीयते कठा इति ।

१३९९ **तेन छन्ने रथे** ॥६।२।१३१॥ छन्न इति प्रत्ययार्थो रथ इति तस्य विशेषणम् । तेनेति तृतीयान्तात् छन्ने रथेऽभिधेये यथाभिहितं प्रत्ययः स्यात् । वस्त्रेण छन्नो वास्त्रो रथः । एवं काम्बलः । चार्मणः । द्वैपेन चर्मणा द्वैपः । वैयाघ्रेण वैयाघ्रः । रथ इति किम् । वस्त्रेण छन्नः कायः । छन्नशब्देन समन्ताद्वेष्टितं व्याप्तमुच्यते । तेनेह न भवति । पुत्रैः परिवृतो रथः । इह कथमण् भवति— न विद्यते पूर्वः पतिर्यस्याः अपूर्वा कुमारी तादृशीं कुमारीमुपपन्नः कौमारः पतिरिति? तत्र ' भवे ' इत्यण् भविष्यति । कुमार्यां भवः कौमारः पतिः , धवयोगे तु कौमारी भार्येत्यपि सिद्धम् ।

१४०० **पाण्डुकम्बलादिन्** ॥६।२।१३२॥ पाण्डुकम्बलशब्दात्तृतीयान्तात्छन्ने रथे वाच्ये इन् प्रत्ययः स्यात् । अणोऽपवादः । पाण्डुकम्बलेन छन्नः पाण्डुकम्बली रथः ।

१४०१ **दृष्टे साम्नि नाम्नि** ॥६।२।१३३॥ दृष्ट इति प्रत्ययार्थस्तस्य साम्नीति विशेषणम् । तेनेति तृतीयान्ताद् दृष्टं सामेत्यस्मिन् अर्थे यथाविहितं

प्रत्ययः स्यात् नाम्नि–प्रत्ययान्तं चेत् साम्नो नाम भवति। क्रुञ्चेन दृष्टं साम क्रौञ्चम्। मृगीयुणा मार्गीयवम्। वासिष्ठम्। वैश्वामित्रम्। एवंनामानि सामानि।

१४०२ **गोत्रादङ्कवत्** ॥ ६।२।१३४॥ गोत्रवाचिनस्तृतीयान्ताद् दृष्टं सामेत्यस्मिन्नर्थे अङ्कवत् प्रत्ययः स्यात्। यथा तस्यायमङ्क इत्यत्रेदमर्थे प्रत्ययो भवति तथा दृष्टं सामेत्येतस्मिन्नर्थेऽपि। औपगवेन दृष्टं साम औपगवकम्। अङ्क इति विशेषोपादानेऽपि तस्येदमित्यर्थमात्रं परिगृह्यते।

१४०३ **वामदेवाद्यः** ॥६।२।१३५॥ वामदेवशब्दात्तृतीयान्ताद् दृष्टे सामनि यः प्रत्ययः स्यात्। वामदेवेन दृष्टं साम वामदेव्यम्।

१४०४ **डिद्वाण्** ॥६।२।१३६॥ दृष्टं सामेत्यस्मिन्नर्थे योऽण् प्रत्ययो विहितः स डिद्वा स्यात्। उशनसा दृष्टं साम औशनम्, औशनसम्।

१४०५ **तत्रोद्धृते पात्रेभ्यः** ॥६।२।१३८॥तत्रेति सप्तम्यन्तात् पात्रवाचिनः उद्धृत इत्यस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्। शरावेषु उद्धृत ओदनः शारावः। पात्रेभ्य इति किम्। पाणावुद्धृत ओदनः। बहुवचनं पात्रविशेषपरिग्रहार्थम्।

१४०६ **स्थण्डिलाच्छेते व्रती** ॥६।२।१३९॥ स्थण्डिलशब्दात् सप्तम्यन्तात् शेते इत्यस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात् योऽसौ शेते स चेद् व्रती। तत्र शयनव्रतोऽन्यत्र शयनान्निवृत्त इत्यर्थः। स्थण्डिल एव शेते स्थाण्डिलो भिक्षुः। व्रती इति किम्। स्थण्डिले शेते बालः।

१४०७ **संस्कृते भक्ष्ये** ॥६।२।१४०॥ संस्कृत इति प्रत्ययार्थः। तस्य विशेषणं भक्ष्य इति। तत्रेति सप्तम्यन्तात् संस्कृते भक्ष्ये यथाविहितं प्रत्ययः स्यात्। सत उत्कर्षाधानं संस्कारः। भ्राष्ट्रे संस्कृता भ्राष्ट्रा अपूपाः। भक्ष्य इति किम्। फलके संस्कृता माला।

१४०८ **शूलोखाद्यः** ॥ ६।२।१४१ ॥ शूलोखाशब्दाभ्यां सप्तम्यन्ताभ्यां संस्कृते भक्ष्ये यः प्रत्ययः स्यात्। शूले संस्कृतं शूल्यं मांसम्। उखायाम् उख्यम्।

१४०९ **क्षीरोदेयण्** ॥६।२।१४२॥ क्षीरशब्दात् सप्तम्यन्तात् संस्कृते भक्ष्ये एयण् प्रत्ययःस्यात्। क्षीरे संस्कृतं भक्ष्यं क्षैरेयम्। क्षैरेयी यवागूः।

१४१० दध्न इकण् ॥६।२।१४३॥ दधिशब्दात् सप्तम्यन्तात् संस्कृते भक्ष्ये इकण् प्रत्ययः स्यात्। दध्नि संस्कृतं भक्ष्यं दाधिकम्। ननु च संस्कृतार्थे इकण् वक्ष्यते तेनैव सिद्धम्। न सिद्ध्यति। दध्ना हि तत्संस्कृतं यस्य दधिकृतमेवोत्कर्षाधानम्। इह तु दधि केवलमाधारभूतं द्रव्यान्तरेण तु लवणादिना संस्कारः क्रियते।

१४११ वोदश्वितः ॥६।२।१४४॥ उदश्चिच्छब्दात् सप्तम्यन्तात् संस्कृते भक्ष्ये इकण् प्रत्ययो वा स्यात्। उदकेन श्चयति उदश्वित्। अत एव निर्देशाद् श्चुदभावः। तत्र संस्कृतं भक्ष्यम् औदश्वित्कम्। औदश्वितम्।

१४१२ क्वचित् ॥६।२।१४५॥ अपत्यादिभ्योऽन्यत्राप्यर्थे क्वचिद्यथाविहितं प्रत्ययः स्यात्। चक्षुषा गृह्यते चाक्षुषं रूपम्। दृषदि पिष्टा दार्षदाः सक्तवः। उदूखले क्षुण्ण औदूखलो यावकः। चतुर्दश्यां दृश्यते चातुर्दशं रक्षः। चतुर्भिरुह्यते चातुरं शकटम्। अश्वैरुह्यते आश्वो रथः। संप्रति युज्यते सांप्रतम्। सांप्रतः।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां तद्धित—
प्रकरणे रक्ताद्यर्थकाः
समाप्ताः

अथ शैषिकाः

१४१३ शेषे ॥६।३।१॥ अधिकारोऽयम्। यदित ऊर्ध्वमनुक्रमिष्यामः शेषेऽर्थे तद्वेदितव्यम्। उपयुक्तादन्यः शेषः। अपत्यादिभ्यः संस्कृतभक्ष्यपर्यन्तेभ्यो योऽन्योऽर्थः स शेषः। तस्येदंविशेषा ह्यपत्यसमूहादयः तेषु वक्ष्यमाणा एयणादयो मा भूवन्निति शेषाधिकारः क्रियते। किं च सर्वेषु प्राग् जितात् कृतादिषु वक्ष्यमाणाः प्रत्यया यथा स्युः अनन्तरेणैवार्थनिर्देशेन कृतार्थता मा विज्ञायि इति साकल्यार्थं शेषवचनम्।

१४१४ नद्यादेरेयण् ॥६।३।२॥ नद्यादिभ्यो यथासंभवं प्राग्जितीये शेषेऽर्थे एयण् प्रत्ययः स्यात्। नद्यां जातो भवो वा नादेयः। माहेयः। वानेयः। वन्य इति तु साधौ यः। शेष इति किम्। नदीनां समूहो नादिकम्। इतः प्रभृति

प्रकृतिविशेषोपादानमात्रेण प्रत्यया विधास्यन्ते तेषां कृतादयोऽर्था विभक्तयश्च परस्ताद् वक्ष्यन्ते ।

१४१५ **राष्ट्रादियः** ॥६।३।३॥ राष्ट्रशब्दात् प्राग्जितीये शेषेऽर्थे इयः प्रत्ययः स्यात् । राष्ट्रे क्रीतः कुशलो जातो भवो वा राष्ट्रियः । शेष इत्येव । राष्ट्रस्यापत्यं राष्ट्रिः ।

१४१६ **दूरादेत्यः** ॥६।३।४॥ दूरशब्दात् शेषेऽर्थे एत्यः प्रत्ययः स्यात् । दूरे भवो दूरेत्यः ।

१४१७ **उत्तराद्दाहञ्** ॥६।३।५॥ उत्तरशब्दाच्छेषेऽर्थे आहञ् प्रत्ययः स्यात् । औत्तराहः। औत्तराही स्त्री । औत्तराहीति उत्तराहिशब्दाद् भवार्थेऽणि ।

१४१८ **पारावारादीनः** ॥६।३।६॥ पारावारशब्दाच्छेषेऽर्थे ईनः प्रत्ययः स्यात् । अवारस्समुद्रस्तस्य पारं राजदन्तादित्वात् पारावारस्तत्र भवो जातो वा पारावारीणः

१४१९ **व्यस्तव्यत्यस्तात्** ॥६।३।७। पारावारशब्दाद् व्यस्ताद् विपर्यस्ताच्च ईनः प्रत्ययः स्यात् । पारीणः । अवारीणः । अवारपारीणः ।

१४२० **द्युप्रागपागुदक्प्रतीच्यो यः** ॥६।३।८॥ दिव्शब्दात् प्राच् अपाच् उदच् प्रत्यच् इत्येतेभ्यश्चाव्ययानव्ययेभ्यः शेषेऽर्थे यः प्रत्ययः स्यात्। दिवि भवं दिव्यम् । प्राचि प्राग्वा भवं प्राच्यम् । उदीच्यम् । प्रतीच्यम् । दिग्देशवृत्तेः प्रागादेरयं यः कालवृत्तेस्त्वव्ययात् परत्वात् सायमित्यादिना तनट् ।
अनव्ययात्तु वर्षाकालेभ्य इतीकण् । प्राक्तनं प्राचिकमित्यादि ।

१४२१ **ग्रामादीनञ् च** ॥६।३।९॥ ग्रामशब्दाच्छेषेऽर्थे ईनञ् चकाराद्यश्च प्रत्ययः स्यात् । ग्रामीणः , ग्राम्यः । ञकारः पुंवद्भावप्रतिषेधार्थः । ग्रामीणा भार्याऽस्य ग्रामीणाभार्यः ।

१४२२ **कत्र्यादेश्चैयकञ्** ॥६।३।१०॥ कत्रि इत्येवमादिभ्यो ग्रामशब्दाच्च शेषेऽर्थे एयकञ् प्रत्ययः स्यात् । कात्रेयकः । पौष्करेयकः । ग्रामेयकः। एवं च

ग्रामशब्दस्य त्रैरूप्यं भवति । कत्र्यादिषु पठितो नगरशब्दो महिष्मत्यादिसाहचर्यात् संज्ञायामेयकञमुत्पादयति अन्यत्राणमेव ।

१४२३ **कुण्डच्यादिभ्यो यलुक् च** ॥६।३।११॥ कुण्डच्यादिभ्यः शेषेऽर्थे एयकञ् प्रत्ययः स्यात् तत्संनियोगे यलुक् चैषाम् । कौण्डेयकः । बहुवचनं प्रयोगानुसरणार्थम् ।

१४२४ **कुलकुक्षिग्रीवाच्छ्वास्यलङ्कारे** ॥६।३।१२॥ कुलकुक्षिग्रीवा इत्येतेभ्यो यथासंख्यं श्वास्यलंकारविशिष्टे प्राग्जितीये शेषेऽर्थे एयकञ् प्रत्ययः स्यात् । अणोऽपवादः। कुले शुद्धान्वये भवो जातो वा कौलेयकः श्वा। कौलोऽन्यः। कौक्षेयकोऽसिः। यः कङ्ककुक्षिनिर्जीर्णेनायसा कृतः। कौक्षोऽन्यः। ग्रैवेयकोऽलंकारः। ग्रैवोऽन्यः।

१४२५ **दक्षिणापश्चात्पुरसस्त्यण्** ॥६।३।१३॥ एभ्यः शेषेऽर्थे त्यण् प्रत्ययः स्यात्। अणोऽपवादः। दक्षिणा दिक् तस्यां भवो दाक्षिणात्यः। अथवा दक्षिणस्यां दिशि वसति ' वा दक्षिणा प्रथमा सप्तम्या आ ' इत्याप्रत्यये दक्षिणा । तत्र भवो दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः । पश्चात्पुरःशब्दसाहचर्यादक्षिणा इति दिक्शब्दोऽव्ययं वा गृह्यते । तेनेह न भवति—दक्षिणायां भवानि दाक्षिणानि जुहोति । अत्र दक्षिणाशब्दो गवादिवचनः । अव्ययादेवेच्छन्त्येके ।

१४२६ **बह्वल्यूर्दिपर्दिकापिश्यायनण्** ॥ ६।३।१४ ॥ बह्वि ऊर्दि पर्दि कापिशी इत्येतेभ्यः शेषेऽर्थे टायनण् प्रत्ययः स्यात् । बाह्वायनः । बाह्वायनी । और्दायनः । और्दायनी । पार्दायनः । पार्दायनी । कापिशायनं मधु । कापिशायनी द्राक्षा । बल्हीति ऊष्मोपान्त्यः । केचिदत्र वकारं दीर्घान्तं पठन्ति ।

१४२७ **रङ्कोः प्राणिनि वा** ॥ ६।३।१५ ॥ रङ्कुशब्दात् प्राणिविशिष्टे शेषेऽर्थे टायनण् वा स्यात् । राङ्कवायणः। पक्षेऽण् राङ्कवो गौः। प्राणिनीति किम् । राङ्कवः कम्बलः । मनुष्ये तु प्राणिन्यपि कच्छादिपाठात् ' कच्छादेर्नृनृस्थे ' इति परत्वादकञ्येव भवति । राङ्कवको मनुष्यः ।

१४२८ **केहामात्रतस्त्यच्** ॥६।३।१६॥ क इह अमा इत्येतेभ्यस्त्रतस्प्रत्यान्तेभ्यश्च शेषेऽर्थे त्यच् प्रत्ययः स्यात् । कत्यः । इहत्यः । अमात्यः। तत्रत्यः ।

ततस्त्यः । आविश्शब्दादपि कश्चित् । आविष्ट्यः। चकारस्त्यण्त्यचोः सामान्यग्रहणाविघातार्थः।

१४२९ **नेर्ध्रुवे** ॥६।३।१७॥ निशब्दात् ध्रुवेऽर्थे त्यच् प्रत्ययः स्यात् । नित्यं ध्रुवम् ।

१४३० **निसो गते** ॥६।३।१८॥ निस्शब्दाद् गतेऽर्थे त्यच् प्रत्ययः स्यात् । निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चण्डालः । ह्रस्वान्नास्तीति षत्वम् ।

१४३१ **ऐषमोह्यःश्वसो वा** ॥६।३।१९॥ ऐषमस् ह्यस् श्वस् इत्येतेभ्यः शेषेऽर्थे त्यञ्वा स्यात् । ऐषमस्त्यम् । ऐषमस्तनम् । ह्यस्त्यम् । ह्यस्तनम् । श्वस्त्यम् । श्वस्त्यनम् । ' श्वसस्तादिः' इतीकणपि भवति । शोवस्तिकम् ।

१४३२ **कन्थाया इकण्** ॥६।३।२०॥ कन्था ग्रामविशेषः । कन्थाशब्दात् शेषेऽर्थे इकण् प्रत्ययः स्यात् । कान्थिकः ।

१४३३ **वर्णावकञ्** ॥६।३।२१॥ वर्णुर्नाम ह्रदः । तस्य समीपो देशोऽपि वर्णुः, तत्र या कन्था ततः शेषेऽर्थे अकञ् प्रत्ययः स्यात् । इकणोऽपवादः। कान्थकः।

१४३४ **रूप्योत्तरपदारण्याण्णः** ॥६।३।२२॥ रूप्योत्तरपदादरण्यशब्दाच्च शेषेऽर्थे णः प्रत्ययः स्यात् । वार्करूप्यः। वार्करूप्या। आरण्याः सुमनसः। माणिरूप्ये जातो माणिरूप्यक इत्यत्र तु दुसंज्ञकत्वेन परत्वात् प्रस्थपुरेत्यादिना ञ्योपान्त्यलक्षणोऽकञ्येव भवति । अन्तग्रहणेनैव सिद्धे उत्तरपदग्रहणं बहुप्रत्ययपूर्वनिवृत्त्यर्थम् । बाहुरूप्यी ।

१४३५ **दिक्पूर्वपदादनात्रः** ॥ ६।३।२३ ॥ दिक्पूर्वपदादनात्रोऽसंज्ञाविषयाच्छेषेऽर्थे णः स्यात् । अणोऽपवादः । पौर्वशालः। पौर्वशाला । अनात्र इति किम् । पूर्वेषुकाशमी नाम ग्रामः । तस्यां भवः पूर्वेषुकामशमः ।

१४३६ **मद्रादञ्** ॥६।३।२४॥ मद्रान्तादिक्पूर्वपदाच्छेषेऽर्थे अञ् स्यात् । पूर्वेषु मद्रेषु भवः पौर्वमद्रः। पौर्वमद्री। ' बहुविषयेभ्य ' इत्यकञ् प्राप्तस्तदपवादे ' वृजिमद्राददेशात्कः ' इति के प्राप्तेऽञ्वचनम् । केवलादेव मद्रादकञ्कविधि-

रिति चेत् तर्हीदमेव ज्ञापकं सुसर्वार्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधेः। तेन सुपाञ्चालक इत्यादि सिद्धम्।

१४३७ **उदग्ग्रामाद्यकृल्लोम्नः** ॥६।३।२५॥ उदग्ग्रामवाचिनो यकृल्लोमन्-शब्दाच्छेषेऽर्थेऽञ् प्रत्ययः स्यात्। याकृल्लोमः। उदग्ग्रामादिति किम्। अन्यस्मादणेव। याकृल्लोमनः। यकृल्लोम्न इति किम्। प्रेक्षिणि भवः प्रैक्षिणः।

१४३८ **गौष्ठीतैकीनैकेतीगोमतीशूरसेनवाहीकरोमकपटच्चरात्** ॥६।३।२६॥ गोष्ठ्यादिभ्यः शेषेऽर्थेऽञ् स्यात्। गौष्ठः। तैकः। नैकेतः। एभ्यो वाहीकग्रामलक्षणयोर्णिकेकणोस्तैक्याः कोपान्त्यलक्षणस्येयस्य चापवादः। गौमतः। अस्मिन्नीलक्षणस्याकञः। शौरसेनः। अत्र राष्ट्राकञः। वाहीकः। रौमकः। अत्र दुलक्षणस्येयस्य। पाटच्चरः। अत्र रोपान्त्यलक्षणस्याकञः। एके तु गौष्ठीस्थाने गोष्ठीं तैकीस्थाने तेकीं नैवीं च पठन्ति।

१४३९ **शकलादेर्यञः** ॥६।३।२७॥ शकलादिभ्यो यञन्तेभ्यः शेषेऽर्थेऽञ् स्यात्। ईयस्यापवादः। गर्गाद्यन्तर्गणः शकलादिः। शकलस्यापत्यं वृद्धं शाकल्यः। तस्य छात्राः शाकलाः। एवं काण्ठाः। यञ इति किम्। शकलो देवताऽस्य शाकलः तस्येदं शाकलीयम्।

१४४० **वृद्धेञः** ॥६।३।२८॥ वृद्धे य इञ् विहितस्तदन्ताच्छेषेऽर्थेऽञ् स्यात्। ईयस्यापवादः। दक्षस्यापत्यं वृद्धं दाक्षिस्तस्य छात्राः दाक्षाः। वृद्धेति किम्। सुतंगमेन निर्वृत्ता सौतंगमी नगरी तस्यां भवः सौतंगमीयः।

१४४१ **न द्विस्वरात् प्राग्भरतात्** ॥६।३।२९॥ प्राच्यगोत्रवाचिनो भरतगोत्रवाचिनश्च नाम्नो वृद्धेञन्ताद् द्विस्वरादञ् न स्यात्। पूर्वेण प्राप्तस्य प्रतिषेधः। प्राचः—चैङ्कीयाः। पौष्पीयाः। चिङ्कपुष्पशब्दावाबन्तावपि तत्र बाह्वादित्वादिञ्। भरतात्—काशीयाः। वाशीयाः। द्विस्वरादिति किम्। पान्नागारेञ्छात्राः पान्नागाराः। प्राग्भरतादिति किम्। दाक्षाः। प्राग्ग्रहणे भरतानां ग्रहणं न भवतीति स्वशब्देन ग्रहणम्।

१४४२ **भवतोरिकणीयसौ** ॥ ६।३।३० ॥ भवतुशब्दाच्छेषेऽर्थे इकण् ईयस् स्याताम्। ईयापवादौ। भवतः भवत्या वा इदं भावत्कम्। भावत्की। भव-

दीयः । भवदीया । सकारो 'नाम सिदव्यंजने' इति पदत्वार्थः । उकारान्तग्रहणाच्छत्रन्तान्न भवति । भवत इदं भावतम् ।

१४४३ **परजनराज्ञोऽकीयः** ॥६।३।३१॥ एभ्यः शेषेऽर्थे अकीयः प्रत्ययः स्यात् । परकीयः। जनकीयः। राजकीयः। अकारः पुंवद्भावार्थः। राज्ञ इदं राजकीयम् । स्वकीयं देवकीयमिति तु स्वकदेवकयोर्गहादित्वात्सिद्धम् । ये तु स्वदेवशब्दाभ्यामकीयमिच्छन्ति तेषां स्वस्येदं सौवं दैवमायुः दैवी वाक् इत्यादि न सिद्ध्यति।

१४४४ **दोरीयः** ॥६।३।३२॥ दुसंज्ञकाच्छेषेऽर्थे ईयः प्रत्ययः स्यात् । देवदत्तीयः । तदीयः । शालीयः । अणपवादो योगः ।

१४४५ **प्राग्देशे** ॥६।१।१०॥ प्राग्देशे वर्तमानस्य यस्य शब्दस्य स्वरेष्वादिस्वर एकार ओकारो वा भवति स ईयादौ प्रत्यये विधातव्ये दुसंज्ञः स्यात् । इत्यनेन दुसंज्ञायामीये च प्रत्यये एणीपचनीयः । गोनर्दीयः ।

१४४६ **उष्णादिभ्यः कालात्** ॥६।३।३३॥ उष्णादिपूर्वपदात् कालान्ताच्छेषेऽर्थे ईयः प्रत्ययः स्यात् । उष्णकालीयः । बहुवचनं प्रयोगानुसरणार्थम् ।

१४४७ **व्यादिभ्यो णिकेकणौ** ॥६।३।३४॥ वि इत्येवमादिभ्यः परो यः कालशब्दस्तदन्ताच्छेषेऽर्थे णिक इकण् इत्येतौ प्रत्ययौ स्याताम् । उभयोः स्त्रियां विशेषः। वैकालिकः । वैकालिका । वैकालिकी । व्यादयः प्रयोगगम्याः ।

१४४८ **काश्यादेः** ॥६।३।३५॥ दोरिति वर्तते । पूर्वयोगयोस्तु न संबध्यते व्यापारासंभवात् । काशी इत्येवमादिभ्यो दुसंज्ञकेभ्यः शेषेऽर्थे णिक इकण् इत्येतौ प्रत्ययौ स्याताम् । काशिकः । काशिका । काशिकी । चैदिकः । चैदिका । चैदिकी । दोरित्येव । देवदत्तं नाम वाहीकग्रामः । तत्र जातो दैवदत्तः । देवदत्तशब्दस्य प्राग्देशे एव दुसंज्ञा न वाहीकेष्विति न भवति । नाप्युत्तरेण । तत्रापि दोरित्यनुवर्तनात् । प्राग्ग्रामेषु तु दुसंज्ञकत्वेन काश्यादित्वाद् भवत्येव । दैवदत्तिका, दैवदत्तिकी । येषां तु काश्यादीनां दुसंज्ञा न संभवति तेषां पाठसामर्थ्याद् भवति । चेदिशब्दसाहचर्याच्च काशिशब्दो जनपद एव वर्तमान इमौ प्रत्ययावुत्पादयति नान्यत्र । काशीयाश्छात्राः ।

१४४९ **वाहीकेषु ग्रामात्** ॥६।३।३६॥ वाहीकदेशे ग्रामवाचिभ्यो दुसंज्ञकेभ्यः शेषेऽर्थे णिक इकण् इत्येतौ प्रत्ययौ स्याताम्। कारन्तपिकः। कारन्तपिका कारन्तपिकी। नापितवास्तुकः इत्यत्र तु परत्वात् 'उवर्णादिकण् इतीकण्। वातानुप्रस्थकः नान्दीपुरकः कौक्कुटीवहकः दासरूप्यकः इत्येतेषु 'प्रस्थपुरवहान्तयोपान्त्यधन्वार्थात्' इति परत्वादकञ्। सौमुकीय इत्यत्र कोपान्त्यलक्षण ईयोऽपवादत्वाच्च भवति। कथं मौञ्जीयम्? मौञ्जं नाम वाहीकावधिरन्यदीयो ग्रामो न वाहीकग्राम इत्येके। अन्ये तु दश द्वादश वा ग्रामा विशिष्टसंनिवेशावस्थाना मौञ्जं नामेति ग्रामसमूह एवायं न ग्रामः, नापि राष्ट्रं येन राष्ट्रलक्षणोऽकञ् स्यात् इति मन्यन्ते। दोरित्येव। देवदत्तं नाम वाहीकग्रामः तत्र जातो दैवदत्तः।

१४५० **एदोदेश एवेयादौ** ॥६।१।९॥ देश एव वर्तमानस्य यस्य शब्दस्य स्वरेष्वादिः स्वर एकार ओकारो वा भवति स ईयादौ प्रत्यये विधातव्ये दुसंज्ञः स्यात्। इत्यनेन दुसंज्ञायां वाहीकग्रामत्वाच्च पूर्वेण प्रत्ययोः कृतयोः सैपुरिकः। सैपुरिका। सैपुरिकी। स्कौनगरिकः। स्कौनगरिका। स्कौनगरिकी। सेपुरं स्कोनगरं च वाहीकग्रामौ। देश इति दैववाचकं नन्व्यध्ययनम्। एवकारोऽन्यत्र वृत्तिव्यवच्छेदार्थः। तेन देशेऽन्यत्र च वर्तमानस्य न भवति। क्रोडं नामोदग्ग्रामस्तत्र भवः क्रौडः। देवदत्तं नाम वाहीकग्रामस्तत्र भवो दैवदत्तः। क्रोडशब्दः स्वाङ्गेऽपि वर्तते। देवदत्तशब्दः पुंस्यपि क्रियाशब्दश्च। ईयादाविति किम्। आयनिञादौ न भवति।

१४५१ **वोशीनरेषु** ॥६।३।३७॥ उशीनरेषु जनपदे यो ग्रामस्तद्वाचिनो दुसंज्ञकाच्छेषेऽर्थे णिकेकणौ प्रत्ययौ वा स्याताम्। आह्वजालिकः। आह्वजालिका। आह्वजालिकी। पक्षे आह्वजालीयः।

१४५२ **वृजिमद्रादेशात्कः** ॥६।३।३८॥ वृजिमद्रशब्दाभ्यां देशवाचिभ्यां शेषेऽर्थे कः प्रत्ययः स्यात्। राष्ट्राकञोऽपवादः। दोरिति निवृत्तम्। वृजिकः। मद्रकः। सुसर्वार्धदिक्शब्देभ्यो जनपदवाचिनः प्रत्ययो भवति। तत्र मद्रात् दिक्पूर्वपदात् 'मद्रादञ्' इत्यञ् विहितः शेषपूर्वपदात्त्वयं भवति। सुमद्रकः इत्यादि। देशादिति किम्। मनुष्यवृत्तेर्वार्जमाद्रः।

१४५३ उवर्णादिकण् ॥६।३।३९॥ उवर्णान्ताद्देशवाचिनः शेषेऽर्थे इकण् प्रत्ययः स्यात्। अणोऽपवादः। परत्वादीयणिकेकणोऽपि बाधते। शबरजम्ब्वां भवः शाबरजम्बुकः। निषादकर्ष्वां भवः नैषादकर्षुकः। यस्तु प्राग्ग्रामस्तस्मादुत्तरेण भवति। आव्रीतमायौ भवः आव्रीतमायकः जिह्नुषु जैह्नवक इति परत्वाद् योपान्त्यलक्षणो राष्ट्रलक्षणश्चाकञ्। ऐक्ष्वाक इत्यत्र तु कोपान्त्यलक्षणोऽण्। उवर्णादिति किम्। दैवदत्तः। देशादित्येव। पटोश्छात्राः पाटवाः।

१४५४ दोरेव प्राचः ॥६।३।४०॥ शरावत्या नद्याः प्राच्यां दिशि देशः प्राग्देशः तद्वाचिन उवर्णान्ताद् दुसंज्ञकादेव इकण् प्रत्ययः स्यात्। आषाढजम्ब्वां भव आषाढजम्बुकः। नापितवास्तौ जातः नापितवास्तुकः। पूर्वेण सिद्धे नियमार्थं वचनम्। इह न भवति। मल्लवास्तुः प्राग्ग्रामः माल्लवास्तवः। एवकार इष्टावधारणार्थः। दोः प्राच एवेति नियमो मा भूत्।

१४५५ ईतोऽकञ् ॥६।३।४१॥ दोर्देशात् प्राच इति च वर्तते। ईकारान्तात् प्राग्देशवाचिनो दुसंज्ञकाच्छेषेऽर्थेऽकञ् प्रत्ययः स्यात्। ईयस्यापवादः। काकन्द्यां भवः काकन्दकः। माकन्द्यां भवः माकन्दकः। प्राच इत्येव। दात्तामित्र्यां भवः दात्तामित्रीयः।

१४५६ रोपान्त्यात् ॥६।३।४२॥ रेफोपान्त्यात् प्राग्देशवाचिनो दुसंज्ञकाच्छेषेऽर्थेऽकञ् प्रत्ययः स्यात्। ईयस्यापवादः। पाटलिपुत्रकः। ऐकचक्रकः।

१४५७ प्रस्थपुरवहान्तेयोपान्त्यधन्वार्थात् ॥६।३।४३॥ दोर्देशादिति च वर्तते। प्रस्थ पुर वह इत्येतदन्तात् यकारोपान्त्याद्धन्ववाचिनश्च देशवाचिनो दुसंज्ञकाच्छेषेऽर्थेऽकञ् प्रत्ययः स्यात्। धन्वन्शब्दो मरुदेशवाची। मालाप्रस्थकः। नान्दीपुरकः। पैलुवहकः। सांकाश्यकः। पारेधन्वनि भवः पारेधन्वकः, अपारेधन्वकः। सुप्रचष्टे डे सुप्रख्येन निर्वृत्त इत्यणि सौप्रख्ये भवः सौप्रख्यीय इति तु गहादित्वात्। एवं कामप्रस्थीयः। पुरग्रहणमप्राच्यार्थम्। प्राच्याद्धि रोपान्त्यत्वेनैव सिद्धम्। अत एव प्राच इति नानुवर्तते। ईयबाधनार्थं वचनम्।

१४५८ राष्ट्रेभ्यः ॥६।३।४४॥ दोर्देशादिति च वर्तते। राष्ट्रेभ्यो देशेभ्यो दुसंज्ञकेभ्यः शेषेऽर्थेऽकञ् प्रत्ययः स्यात्। ईयस्यापवादः। आभिसारे भव

आभिसारकः। आदर्शे आदर्शकः। औषुष्टश्यामायने राष्ट्रावधी अपि राष्ट्रे। औषुष्टे औषुष्टकः। श्यामायने श्यामायनकः। बहुवचनमकञः प्रकृतिबहुत्वं द्योतयदपवादविषयेऽपि प्रापणार्थम्। तेनेहापि भवति। आभिसारगर्त्तकः। अत्र गर्तोत्तरपदलक्षण ईयो न भवति। राष्ट्रसमुदायो न राष्ट्रग्रहणेन गृह्यते इतीह न भवति काशिकोशलीयः।

१४५९ **बहुविषयेभ्यः** ॥६।३।४५॥ दोरिति निवृत्तम् योगविभागात्। अतःपरं दोरदोश्च विधानम्। देशादिति तु वर्तते। राष्ट्रेभ्यो-देशेभ्यो बहुत्व विषयेभ्यः शेषेऽर्थेऽकञ् प्रत्ययः स्यात्। अणाद्यपवादः। अङ्गेषु जात आङ्गकः। वङ्गेषु ।तो वाङ्गकः। विषयग्रहणमनन्यत्र भावार्थम्। तेन य एकत्वद्वित्वयोरपि वर्तते ततो मा भूत्। वर्तनी च वर्तनी च वर्तनी च वर्तन्यः, तासु भवो वार्तनः। बहुवचनमपवादविषयेऽपि प्रापणार्थम्। त्रिगर्त्तेषु त्रैगर्त्तकः। अत्र गर्तोत्तरपदलक्षण ईयो बाध्यते। सुपश्चालेषु भव इत्यत्र चानेनाकञि कृते।

१४६० **सुसर्वार्धाद्राष्ट्रस्य** ॥७।४।१५॥ सु सर्व अर्ध इत्येतेभ्यः परस्य राष्ट्रवाचिन उत्तरपदस्य ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य वृद्धिः स्यात्। सुपाञ्चालकः। सर्वपाञ्चालकः। अर्धपाञ्चालकः। राष्ट्रस्येति किम्। सुगन्धाः पण्यमस्य सौगन्धिकः।

१४६१ **अमद्रस्य दिशः** ॥७।४।१६॥ दिग्वाचिनः परस्य राष्ट्रवाचिनो मद्रशब्दवर्जितस्य ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य वृद्धिः स्यात्। पूर्वपाञ्चालकः। अपरपाञ्चालकः। दक्षिणपाञ्चालकः। उत्तरपाञ्चालकः। अमद्रस्येति किम्। पौर्वमद्रः। दिश इति किम्। पूर्वे पञ्चालानां पूर्वपञ्चालाः। अंशिसमासः। तेषु भवः पौर्वपञ्चालकः। अवयववृत्तेरपि पूर्वशब्दस्य दिशि दृष्टत्वेन दिक्शब्दत्वात् तदन्तविधौ सति बहुविषयेभ्य इत्यकञ्। एके त्वस्य दिक्शब्दत्वं नेच्छन्ति। तन्मते तदन्तविध्यभावेऽणेव। पौर्वपञ्चालः।

१४६२ **धूमादेः** ॥६।३।४६॥ देशादिति वर्तते। धूमादिभ्यो देशवाचिभ्यः शेषेऽर्थेऽकञ् प्रत्ययः स्यात्। अणाद्यपवादः। धौमकः। पाडण्डकः।

१४६३ **सौवीरेषु कूलात्** ॥६।३।४७॥ सौवीरदेशवाचिनः कूलशब्दाच्छेषेऽर्थेऽकञ् प्रत्ययः स्यात्। कौलकः सौवीरेषु। कौलोऽन्यः।

१४६४ **समुद्रान्नृनावोः** ॥७।३।४८॥ समुद्रशब्दादेशवाचिनः शेषेऽर्थेऽकञ् प्रत्ययः स्यात् प्रत्ययान्तो चेन्ना मनुष्यो नौर्वा भवति। सामुद्रको मनुष्यः। सामुद्रिका नौः। नृनावोरिति किम्। सामुद्रं लवणम्।

१४६५ *नगरात् कुत्सादाक्ष्ये* ॥६।३।४९॥ *नगरशब्दादेशवाचिनः शेषेऽर्थेऽकञ् प्रत्ययः स्यात्, प्रत्ययार्थस्य कुत्सायां दाक्ष्ये च गम्यमाने।* कुत्सा निन्दा। दाक्ष्यं नैपुण्यम्। केनायं मुषित इह नगरे मनुष्येण संभाव्यते एतन्नागरके। चौरा हि नागरा भवन्ति। केनेदं चित्रं लिखितमिह नगरे मनुष्येण संभाव्यते एतन्नागरके। दक्षा हि नागरका भवन्ति। कुत्सादाक्ष्य इति किम्। नागरः पुरुषः। संज्ञाशब्दात्तु कतृच्यादिपाठादेयकञ्। नागरेयकः।

१४६६ **कच्छाग्निवक्त्रवर्तोत्तरपदात्** ॥६।३।५०॥ कच्छ अग्नि वक्त्र वर्त इत्येतदुत्तरपदादेशवाचिनः शेषेऽर्थेऽकञ् प्रत्ययः स्यात्। ईयाणोरपवादः। भारुकच्छे भवो भारुकच्छकः। काण्डाग्नौ काण्डाग्नकः। ऐन्दुवक्त्रे भवः ऐन्दुवक्त्रकः। बाहुवर्ते बाहुवर्तकः। उत्तरपदग्रहणमबहुप्रत्ययपूर्वार्थम्। ईषदसमाप्तः कच्छो बहुकच्छो देशः ततोऽकञ् न भवति।

१४६७ **अरण्यात् पथिन्यायाध्यायेभनरविहारे** ॥ ६।३।५१ ॥ अरण्यशब्दादेशवाचिनः पथ्यादिषु वाच्येषु शेषेऽर्थेऽकञ् प्रत्ययः स्यात्। आरण्यकः पन्थाः न्यायोऽध्याय इभो नरो विहारो वा। पथ्यादाविति किम्। आरण्याः सुमनसः।

१४६८ **गोमये वा** ॥६।३।५२॥ अरण्यशब्दादेशवाचिनः शेषेऽर्थे गोमये वाच्येऽकञ् प्रत्ययो वा स्यात्। आरण्यका गोमयाः। आरण्यानि गोमयानि। केचित्तु हस्तिन्यामपि विकल्पमिच्छन्ति। आरण्या आरण्यका हस्तिनी। एके तु नरवर्जे पूर्वसूत्रेऽपि विकल्पमाहुः। आरण्यः आरण्यकः पन्था इत्यादि।

१४६९ **कुरुयुगन्धराद्वा** ॥६।३।५३॥ कुरुयुगन्धरशब्दाभ्यां देशवाचिभ्यां शेषेऽर्थेऽकञ् वा स्यात्। कुरुषु भवः कौरवकः कौरवः। युगन्धरेषु भवः यौगन्धरकः यौगन्धरः। राष्ट्रशब्दावेतौ बहुविषयौ च तत्र युगन्धरात् बहुविषयेभ्य इति नित्यमकञि प्राप्ते विकल्पः। कुरोस्त्वकञः कच्छाद्यणा बाधितस्य प्रतिप्र-

सवार्थं वचनम् । तथा च विकल्पः सिद्ध एव । युगन्धरार्थात्तु विभाषा । नृनृस्थयोस्तु कुरोः परत्वादकञेव । कौरवको मनुष्यः कौरवकमस्य हसितम् ।

१४७० **साल्वाद्गोयवाग्वपत्तौ** ॥६।३।५४॥ साल्वशब्दादेशवाचिनो गवि यवाग्वां पत्तिवर्जिते च मनुष्ये शेषेऽर्थेऽकञ् प्रत्ययः स्यात् । साल्वको गौः। साल्विका यवागूः । साल्वको मनुष्यः । गोयवाग्वपत्ताविति किम् । साल्वा व्रीहयः । साल्वः पत्तिः । राष्ट्रेभ्योऽकञि कच्छाद्यणा बाधिते गोयवागूग्रहणं प्रतिप्रसवार्थम् । अपत्तीति पत्तिप्रतिषेधात् तत्सदृशे मनुष्ये विधिः । तत्र चोत्तरेण सिद्ध एवाकञि नरि नियमार्थमपत्तिग्रहणम् । एवं च गोयवाग्वोः पत्तिवर्जिते च मनुष्ये मनुष्यस्थे च हसितादौ साल्वकः साल्व इति च स्थितम्। अयं च विभागः सल्वशब्दस्यादोरपि विज्ञेयः ।

१४७१ **कच्छादेर्नृनृस्थे** ॥७।३।५५॥ कच्छादिभ्यो देशवाचिभ्यो नरि मनुष्ये नृस्थे मनुष्यस्थे च शेषेऽर्थेऽकञ् प्रत्ययः स्यात् । अणोऽपवादः। काच्छको मनुष्यः । काच्छकमस्य हसितम् । सैन्धवको मनुष्यः । सैन्धवकमस्य हसितम् । नृनृस्थ इति किम् । काच्छो गोः। सैन्धवं लवणम् ।

१४७२ **कोपान्त्याच्चाण्** ॥६।३।५६॥ देशादित्येव वर्तते न नृनृस्थ इति । कोपान्त्यात् कच्छादेश्च देशवाचिनः शेषेऽर्थेऽण् प्रत्ययः स्यात् । इकणकञोरपवादः। कोपान्त्य—ऋषिका जनपदः तेषु जातः आर्षिकः । कच्छादि–काच्छः । सैन्धवः । अथाण्ग्रहणं किमर्थम् । यो हि अन्येन बाधितो न प्राप्नोति तदर्थमिदं स्यात् स चाणेव । न चानन्तरोऽकञेव स्यादित्याशंकनीयम् । एवं हि पूर्वमकञ्विधानम् अनर्थकं स्यात् । नैवम् । असत्यण्ग्रहणे इक्ष्वाकोरुवर्णलक्षण इकण् स्यात् । स हि ततो राष्ट्राकञा बाधितः।

१४७३ **गर्त्तोत्तरपदादीयः** ॥६।३।५७॥ गर्तोत्तरपदादेशवाचिनः शेषेऽर्थे ईयः प्रत्ययः स्यात् । अणोऽपवादः। श्वाविद्गर्ताच्चु वाहीकग्रामलक्षणौ णिकेकणौ परत्वाद् बाधते । श्वाविद्गर्ते भवः श्वाविद्गर्तीयः । वृकगर्तीयः। आभिसारगर्त्तकः त्रैगर्तकः इत्यत्राकञ् ' राष्ट्रेभ्यः ' इति ' बहुविषयेभ्य ' इति बहुवचनसामर्थ्यात् भवतीत्युक्तम् । उत्तरपदग्रहणं बहुप्रत्ययपूर्वनिरासार्थम् । बाहुगर्तः ।

१४७४ कटपूर्वात्प्राचः ॥६।३।५८॥ कटपूर्वपदात् प्राग्देशवाचिनो नाम्नः शेषेऽर्थे ईयः प्रत्ययः स्यात् । अणोऽपवादः । कटनगरीयः । प्राच इति किम् । काटनगरः ।

१४७५ कखोपान्त्यकन्थापलदनगरग्रामह्रदोत्तरपदाद्दोः ॥६।३।५९॥ ककारखकारोपान्त्यात् कन्थापलदनगरग्रामह्रद इत्येतदुत्तरपदाच्च देशवाचिनो दुसंज्ञकात् शेषेऽर्थे ईयः प्रत्ययः स्यात् । बाधकबाधनार्थ आरंभः। कोपान्त्याकोपान्त्यलक्षणेऽणि प्राप्ते आरोहणकीयः। खोपान्त्यात् वाहीकग्रामलक्षणयोर्णिकेकणोः, कौटशिखीयः । कन्थापलदोत्तरपदात्तयोरेव । दाक्षिकन्थीयः । दाक्षिपलदीयः । नगरोत्तरपदाद्रोपान्त्यलक्षणेऽकञि, दाक्षिनगरीयः । ग्रामह्रदोत्तरपदात् णिकेकणोरेव । दाक्षिग्रामीयः । दाक्षिह्रदीयः । दोरिति किम् आर्षिकः ।

१४७६ पर्वतात् ॥६।३।६०॥ पर्वतशब्दादेशवाचिनः शेषेऽर्थे ईयः प्रत्ययः स्यात् । पर्वतीयो राजा ।

१४७७ अनरे वा ॥६।३।६१॥ पर्वतादेशवाचिनः शेषेऽर्थे ईयः प्रत्ययो वा स्यात् । पर्वतीयानि पार्वतानि फलानि । अनर इति किम् । पर्वतीयो मनुष्यः ।

१४७८ पर्णकुकणाद्भारद्वाजात् ॥६।३।६२॥ पर्ण कुकण इत्येताभ्यां भारद्वाजदेशवाचिभ्यां शेषेऽर्थे ईयः प्रत्ययः स्यात् । अणोऽपवादः । पर्णीयः । कुकणीयः । भारद्वाजादिति किम् । पार्णः । कार्कणः ।

१४७९ गहादिभ्यः ॥६।३।६३॥ देशादिति वर्तते । तद् गहादीनां यथासंभवं विशेषणम् । गहादिभ्यो यथासंभवं देशवाचिभ्यः शेषेऽर्थे ईयः प्रत्ययः स्यात् । अणाद्यपवादः । गहीयः । अन्तस्थीयः । बहुवचनमाकृतिगणार्थम् ।

१४८० पृथिवीमध्यान्मध्यमश्चास्य ॥६।३।६४॥ पृथिवीमध्यशब्दादेशवाचिनः शेषेऽर्थे ईयः प्रत्ययः स्यात् मध्यमादेशश्चास्य पृथिवीमध्यशब्दस्य । पृथिवीमध्ये जातो भवो वा मध्यमीयः

१४८१ निवासाच्चरणेऽण् ॥६।३।६५॥ पृथिवीमध्यान्निवासभूतादेशवाचिनश्चरणे निवस्तरि शेषेऽर्थेऽण् प्रत्ययः स्यात् मध्यमादेशश्चास्य। पृथिवीमध्यं निवास

एषां चरणानां माध्यमाश्चरणाः । निवासादिति किम्। पृथिवीमध्यादागतो मध्यमीयः कठः । चरण इति किम् । पृथिवीमध्यं निवासोऽस्य मध्यमीयः शूद्रः ।

१४८२ **वेणुकादिभ्य ईयण्** ॥६।३।६६॥वेणुक इत्येवमादिभ्यो यथायोगं देशवाचिभ्यः शेषेऽर्थे ईयण् प्रत्ययः स्यात् । वैणुकीयः । वैत्रकीयः । बहुवचनं प्रयोगानुसरणार्थम् ।

१४८३ **वा युष्मदस्मदोऽञीनञौ युष्माकास्माकौ चास्यैकत्वे तु तवकममकम्** ॥६।३।६७॥ देशादिति निवृत्तम् । युष्मद् अस्मद् इत्येताभ्यां शेषेऽर्थे अञ् ईनञ् इत्येतौ प्रत्ययौ वा स्याताम् तत्संनियोगे चानयोर्यथासंख्यं युष्माकास्माकौ, एकत्वविशिष्टे त्वर्थे वर्तमानयोस्तवकममकावादेशौ स्याताम् । प्रत्ययौ प्रति यथासंख्यं नास्ति वचनभेदात् । युष्माकमयं युवयोर्वा यौष्माकः । यौष्माकीणः । अस्माकमयमावयोर्वा आस्माकः । आस्माकीनः । पक्षे त्वदादित्वेन दुसंज्ञत्वादीयः । युष्मदीयः । अस्मदीयः । एकत्वे तु तवकममकम् । तवायं तावकः । ममायं मामकः । तावकीनः । मामकीनः । पक्षे त्वदीयः । मदीयः ।

१४८४ **द्वीपादनुसमुद्रं ण्यः** ॥६।३।६८ समुद्रसमीपे यो द्वीपस्तद्वाचिनः शेषेऽर्थे ण्यः प्रत्ययः स्यात् । कच्छाद्यकञोरपवादः । द्वैप्यो मनुष्यः । द्वैप्यमस्य हसितम् । द्वैप्यम् । अनुसमुद्रमिति किम् । अनुनदि यो द्वीपस्तस्मात् द्वैपको व्यासः । द्वैपकमस्य हसितम् । द्वैपम् ।

१४८५ **अर्धाच्चः** ॥६।३।६९॥ अर्धशब्दाच्छेषेऽर्थे यः प्रत्ययःस्यात्। अर्ध्यम्।

१४८६ **सपूर्वादिकण्** ॥६।३।७०॥ सपूर्वपदादर्धशब्दात् शेषेऽर्थे इकण् प्रत्ययः स्यात् । पौष्करार्धिकः । वैजयार्धिकः।

१४८७ **दिक्पूर्वपदात्तौ** ॥६।३।७१॥ दिक्पूर्वपदादर्धशब्दाच्छेषेऽर्थे तौ—य इकण् इत्येतौ प्रत्ययौ स्याताम् । पूर्वार्ध्यम् । पौर्वार्धिकम् ।

१४८८ **ग्रामराष्ट्रांशादणिकणौ** ॥६।३।७२॥ ग्रामराष्ट्रैकदेशवाचिनोऽर्धशब्दादिक्पूर्वात् शेषेऽर्थेऽण् इकण् इत्येतौ प्रत्ययौ स्याताम् । यापवादौ । ग्रामस्य राष्ट्रस्य वा पूर्वार्धे भवः पौर्वार्धः । पौर्वार्धिकः । दाक्षिणार्धः। दाक्षिणार्धिकः।

१४८९ **परावराधमोत्तमादेर्यः** ॥६।३।७३॥ पर अवर अधम उत्तम इत्येतत्पूर्वादर्धशब्दाच्छेषेऽर्थे यः प्रत्ययः स्यात् । इकणोऽपवादः । परार्ध्यम् । अवरार्ध्यम् । अधमार्ध्यम् । उत्तमार्ध्यम् । परावरयोः दिक्शब्दत्वेऽपि परत्वादयमेव यः।

१४९० **अमोऽन्तावोधसः** ॥६।३।७४॥ अन्त अवस् अधस् इत्येतेभ्यः शेषेऽर्थेऽमः प्रत्ययः स्यात् । अन्तमः। अवमः। अधमः। अकारादित्वमवोधसोऽन्त्यस्वरादिलोपार्थम् ।

१४९१ **पश्चादाद्यन्ताग्रादिमः** ॥६॥३।७५॥ पश्चात् आदि अन्त अग्र इत्येतेभ्यः शेषेऽर्थे इमः प्रत्ययः स्यात् । पश्चिमः। अत्राव्ययत्वादन्त्यस्वरादिलोपः। आदिमः। अन्तिमः अग्रिमः । आद्यन्ताभ्यां भवादन्यत्रायं विधिः। भवे तु परत्वादिगादिय एव ।

१४९२ **मध्यान्मः** ॥ ६।३।७६ ॥ मध्यशब्दाच्छेषेऽर्थे मः प्रत्ययः स्यात् । मध्यमः । भवे दिनणादिर्वक्ष्यते । ततोऽन्यत्रायं विधिः ।

१४९३ **मध्य उत्कर्षापकर्षयोरः**॥६।३।७७॥ उत्कर्षापकर्षयोर्मध्ये वर्तमानान्मध्यशब्दाच्छेषेऽर्थे अ इत्ययं प्रत्ययः स्यात् । मापवादः। नात्युत्कृष्टो नात्यपकृष्टो मध्यपरिमाणो मध्यो वैयाकरणः । मध्या स्त्री । यद्यपि मध्यशब्दो मध्यपरिमाणवाचिन्यपि वर्तते तथाप्यवस्थावस्थावतोः स्याद्वादाद् भेदविवक्षायामवस्थावाचिप्रकृतेरवस्थावति प्रत्ययार्थे पूर्वेण मो मा भूदिति वचनम् ।

१४९४ **अध्यात्मादिभ्य इकण्** ॥६।३।७८॥ अध्यात्म इत्यादिभ्यः शेषेऽर्थे इकण् प्रत्ययः स्यात् । अध्यात्मं भवमाध्यात्मिकम् । एवमाधिदैविकम् । आधिभौतिकम् । अनुशतिकादित्वादनयोरुभयपदवृद्धिः। और्ध्वदमिकः। और्ध्वदमिकः। और्ध्वदेहिकः । और्ध्वदेहिकः। अत एव पाठादूर्ध्वशब्दस्य दमदेहयोर्वा मोऽन्तः। केचिदूर्ध्वदमोर्ध्वदेहावनुशतिकादिषु पठन्त उभयपदवृद्धिमिच्छन्ति। और्ध्वदामिकः। और्ध्वदैहिकः। ऊर्ध्वमौहूर्तिकः। अत्र 'सप्तमी चोर्ध्वमौहूर्तिके' इति ज्ञापकादुत्तरपदस्यैव वृद्धिः। अकस्मात् हेतुशून्यः कालः तत्र भवमाकस्मिकम् । अमुष्मिन् परलोके भवम् आमुष्मिकम् । एवमामुत्रिकम् । पारत्रिकम् । इह भवमैहिकम् । शैषिकम् । पाठसामर्थ्यात् सप्तम्या अलुप् । अध्यात्मादयः प्रयोगगम्याः।

१४९५ **समानपूर्वलोकोत्तरपदात्** ॥ ६।३।७९ ॥ समानपूर्वपदेभ्यो लोकशब्दोत्तरपदेभ्यश्च शेषेऽर्थे इकण् प्रत्ययः स्यात् । समानग्रामे कृतो भवो वा सामानग्रामिकः। इहलोके कृतो भवो वा ऐहलौकिकः। पारलौकिकः। सार्वलौकिकः। योगद्वयेऽपि भवार्थ एव प्रत्यय इत्यन्ये ।

१४९६ **वर्षाकालेभ्यः** ॥६।३।८०॥ वर्षाशब्दात् कालविशेषवाचिभ्यश्च शेषेऽर्थे इकण् प्रत्ययः स्यात् । अणपवादः । दोरीयमपि परत्वाद् बाधते । वर्षासु भवो वार्षिकः । ऋतोऽर्णित् प्रत्ययस्तदवयवादेर्ऋत्वन्तादपि भवत्यभिधानात् । तेन पूर्वासु वर्षासु भव इत्यत्रेकणि कृते ।

१४९७ **अंशादृतोः** ॥ ७।४।१४ ॥ अंशवाचिनः शब्दात् परस्य ऋतुवाचिन उत्तरपदस्य स्वरेष्वादेः स्वरस्य स्थाने ञिणिति तद्धिते परे वृद्धिः स्यात् । इत्युत्तरपदवृद्धिः। पूर्ववार्षिकः। अपरवार्षिकः। कालवाचिभ्यः-मासिकः। आर्धमासिकः। वर्षाग्रहणमृत्वण्बाधनार्थम् । कालशब्दः कालविशेषवाची । ' भर्तुसंध्यादेरण् ' इत्यत्र संध्यादिग्रहणात् । स्वरूपग्रहणे हि काललक्षणेकण्बाधकं संध्यादिग्रहणमनर्थकं स्यात् । बहुवचनं तु यथाकथंचित् कालवृत्तिभ्यः प्रत्ययप्रापणार्थम् , निशासहचरितमध्ययनं निशा प्रदोषसहचरितं प्रदोषः तत्र जयी नैशिकः प्रादोषिकः। कदम्बपुष्पसहचरितः कालः कदम्बपुष्पं, व्रीहिपलालसहचरितः कालो व्रीहिपलालम्, तत्र देयमृणं कादम्बपुष्पिकं व्रैहिपलालिकम् ।

१४९८ **शरदः श्राद्धे कर्मणि** ॥६।३।८१॥ शरच्छब्दात् कालवाचिनः श्राद्धे कर्मणि—पितृकार्ये शेषेऽर्थे इकण् स्यात् । ऋत्वणोऽपवादः । शारदिकं श्राद्धम् । कर्मणीति किम् । शारदः श्राद्धः। श्रद्धावानित्यर्थः। श्राद्ध इति किम् । शारदं विरेचनम् ।

१४९९ **नवा रोगातपे** ॥६।३।८२॥ शरच्छब्दात् कालवाचिनो रोगे आतपे च शेषेऽर्थे इकण् प्रत्ययो वा स्यात्। ऋत्वणोऽपवादः। शारदिकः शारदो वा रोगः। शारदिकः शारद आतपः । रोगातप इति किम् । शारदं दधि ।

१५०० **निशाप्रदोषात्** ॥६।३।८३॥ निशाप्रदोषशब्दाभ्यां कालवाचिभ्यां शेषेऽर्थे वर्षाकालेभ्य इति नित्यं प्राप्त इकण् वा स्यात् । नैशिकः नैशः । प्रादोषिकः प्रादोषः ।

१५०१ श्वसस्तादिः ॥६।३।८४॥ श्वस् इत्येतस्मात् कालवाचिनः शेषेऽर्थे इकण् प्रत्ययो वा स्यात् स च तादिः। शौवस्तिकः। पक्षे 'ऐषमोह्यः श्वसो वा' इति त्यच्। श्वस्त्यम्। तत्रापि वाग्रहणात् पक्षे सायमित्यादिना तनट्। श्वस्तनम्।

१५०२ चिरपरुत्पराराेरेत्नः ॥६।३।८५॥ चिरपरुत्परारि इत्येतेभ्यः कालवाचिभ्यः शेषेऽर्थे त्नः प्रत्ययो वा स्यात्। चिरत्नम्। परुत्नम्। पराराित्नम्। पराराितनम्। पक्षे 'सायम्' इत्यादिना तनट्। चिरंतनम्। परुत्तनम्। परुत्पराराभ्यां विकल्पं नेच्छन्त्यन्ये। पराराेस्तु रिलोप इत्येके। परात्नः। केचित्तु परुत्परार्योस्तनटचन्त्यस्वरात् परं म्वागममिच्छन्ति परुंतनम्। पराराितनम्।

१५०३ पुरो नः ॥६।३।८६॥ पुराशब्दात् कालवाचिनोऽव्ययाच्छेषेऽर्थे नः प्रत्ययो वा स्यात्। पुरा भवं पुराणम्। पुरातनम्।

१५०४ पूर्वाह्णापराह्णात्तनट् ॥६।३।८७॥ एताभ्यां कालवाचिभ्यां शेषेऽर्थे तनट् प्रत्ययो वा स्यात्। 'वर्षाकालेभ्यः' इति नित्यमिकणि प्राप्ते विकल्पः। तेन पक्षे सोऽपि भवति। पूर्वाह्णे जातो भवो वा पूर्वाह्णेतनः, पूर्वाह्णतनः। अपराह्णेतनः, अपराह्णतनः। कालात्तनेत्यादिना वा सप्तम्या अलुप्। पूर्वाह्णे जयी पूर्वाह्णतनः। अपराह्णतनः। अत्र जयिनि वाच्ये तत्र व्यवस्थितविभाषाविज्ञानात् नित्यं सप्तम्या लुप्। पक्षे पौर्वाह्णिकः। आपराह्णिकः। टंकारो ङ्यर्थः। पूर्वाह्णेतनी। अपराह्णेतनी।

१५०५ सायंचिरंप्राह्णेप्रगेऽव्ययात् ॥६।३।८८॥ योगविभागाद्वेति निवृत्तम्। सायं चिरं प्राह्णे प्रगे इत्येतेभ्योऽव्ययेभ्यश्च कालवाचिभ्यः शेषेऽर्थे तनट् प्रत्ययो नित्यं स्यात्। साये भवं सायन्तनम्। चिरे भवं चिरन्तनम्। अत एव निर्देशान्मान्तत्वं निपात्यते। प्राह्णेतनम्। प्रगेतनम्। अनयोरेकारान्तत्वम्। अव्यय—दिवातनम्। दोषातनम्। कालेभ्य इत्येव। स्वर्भवं सौवम्। सायंचिरंप्राह्णेप्रगे इत्यव्ययेभ्योऽव्ययादित्येव सिद्धे सायचिरप्राह्णप्रगशब्देभ्यस्तनड्विधानं कालेकण्बाधनार्थम्।

१५०६ **भर्तुसंध्यादेरण्** ॥६।३।८९॥ भं नक्षत्रं तद्वाचिभ्य ऋतुवाचिभ्यः। संध्यादिभ्यश्च कालवाचिभ्यः शेषेऽर्थेऽण् प्रत्ययःस्यात्। इकणोऽपवादः। पुष्येण चन्द्रयुक्तेन युक्तः कालः पुष्यः। चन्द्रयुक्तेत्यादिनाण्। तस्य लुप्। पुष्ये भवः पौषः। ऋतु–ग्रैष्मः। ऋतोर्ञ्णित् प्रत्ययस्तदवयवादेरपि भवति पूर्वग्रैष्मः। अपरशैशिरः। अंशादृतोः इत्युत्तरपदवृद्धिः। सन्ध्यादि–सान्ध्यः। आमावास्यः। एकदेशविकृतस्यानन्यत्वादमावास्याशब्दादपि भवति। आमावस्यः। अण्ग्रहणं स्वातिराधार्द्रापौर्णमासीभ्य ईयबाधनार्थम्। यथाविहितमित्युच्यमाने दोरीय इतीयः प्राप्नोति। कालेभ्य इत्येव। स्वातेरिदमुदयस्थानं स्वातीयम्। शश्वच्छब्दस्य संध्यादित्वेऽपि ऋवर्णावर्णादिति सूत्रेऽशश्वदिति प्रतिषेधात् तस्मादिकणपि। शाश्वतम्। शाश्वतिकम्।

१५०७ **संवत्सरात् फलपर्वणोः** ॥६।३।९०॥ संवत्सरशब्दात् फले पर्वणि च शेषेऽर्थेऽण् प्रत्ययः स्यात्। सांवत्सरं फलं पर्व वा। फलपर्वणोरिति किम्। सांवत्सरिकं श्राद्धम्।

१५०८ **हेमन्ताद्वा तल्लुक् च** ॥६।३।९१॥ हेमन्तशब्दादृतुविशेषवाचिनः शेषेऽर्थेऽण् वा स्यात्, तत्संनियोगे च तकारस्य लुग्वा। नित्यमणि प्राप्ते विभाषा। तथा च त्रैरूप्यम्। हैमनम्। हैमन्तम्। हैमन्तिकम्। तदन्तविधिना पूर्वहैमनम्। अंशादृतोरित्युत्तरपदवृद्धिः।

१५०९ **प्रावृष एण्यः** ॥ ६।३।९२॥ प्रावृष् इत्येतस्मात् ऋतुवाचिनः शेषेऽर्थे एण्यः प्रत्ययः स्यात्। अणोऽपवादः। प्रावृषि भवः प्रावृषेण्यः। जाते तु परत्वादिक एव। प्रावृषि जातः प्रावृषिकः। एण्य इति प्रत्यये मूर्धन्यो णकारो निर्निमित्तकः प्रावृषेण्ययतीति ण्यन्तात् किपि प्रावृषेण् इति मूर्धन्यार्थः।

१५१० **स्थामाजिनान्तात्लुप्** ॥ ६।३।९३॥ स्थामनशब्दान्ताद्-जिनान्ताच्च परस्य शैषिकस्य प्रत्ययस्य लुप् स्यात्। अश्वत्थामनि भवो जातो वा अश्वत्थामा। अः स्थाम्न इत्यः। तस्य लुप्। सिंहाजिने भवो जातो वा सिंहाजिनः। उलाजिनः। वृकाजिनः। भवार्थस्यैव लुपमिच्छन्त्यन्ये तन्मते अश्वत्थाम्नोऽयं तत आगतो वा अश्वत्थामः। एवं सैंहाजिनः। वार्काजिनः इत्यादौ न भवति।

१५११ तत्र कृतलब्धक्रीतसंभूते ॥६।३।९४॥ अणादय एयणादयश्च सविशेषणा अनुवर्तन्ते । तत्रेति सप्तम्यन्तात् कृते लब्धे क्रीते संभूते चार्थे यथायोगमणादय एयणादयश्च प्रत्ययाः स्युः । यदन्येनोत्पादितं तत्कृतम् । यत्प्रतिग्रहादिना प्राप्तं तल्लब्धम् । यन्मूल्येन स्वीकृतं तत्क्रीतम् । यत्संभाव्यते संमाति वा तत्संभूतम् । घ्नुघ्ने कृतो लब्धः क्रीतः संभूतो वा घ्नौघ्नः । एवं माथुरः । अत्राण् । औत्सः । उत्साद्यञ् । बाह्यः । बाहीकः । बहिषष्टीकण् च । नादेयः । नद्यादित्वादेयण् । राष्ट्र्यः । राष्ट्रादियः । पारावारीणः । पारावारादीनः । तत्रेति किम् । देवदत्तेन क्रीतः । कृतलब्धक्रीतसंभूत इति किम् । शयने शेते । आसन आस्ते ।

१५१२ कुशले ६।३।९५॥ तत्रेति सप्तम्यन्तात् कुशलेऽर्थे यथाविहितमणादय एयणादयश्च प्रत्ययाः स्युः । घ्नुघ्ने कुशलः घ्नौघ्नः । माथुरः । नादेयः । राष्ट्र्यः । योगविभाग उत्तरार्थः ।

१५१३ पथोऽकः ॥६।३।९६॥ तत्रेति सप्तम्यन्तात् पथिन्शब्दात् कुशलेऽर्थेऽकः प्रत्ययः स्यात् । अणोऽपवादः । पथि कुशलः पथकः ।

१५१४ क्नेऽश्मादेः ६।३।९७॥ तत्रेति सप्तम्यन्तेभ्योऽश्मन् इत्यादिभ्यः कुशलेऽर्थे कः प्रत्ययः स्यात् । अणादेरपवादः । अश्मनि कुशलः अश्मकः । अशनिकः । आकर्षकः । अश्मादय उपचारात्तद्विषयायां क्रियायां वर्तमानाः प्रत्ययमुत्पादयन्ति । तत्रैव कुशलार्थयोगात् । प्रत्ययान्तरकरणमिकारोकारान्तशब्दार्थम् । अन्यथा तेषु अनिष्टं रूपमापद्येत ।

१५१५ जाते ॥६।३।९८॥ तत्रेति सप्तम्यन्ताज्जातेऽर्थे यथाविहितमणादय एयणादयश्च प्रत्ययाः स्युः । घ्नुघ्ने जातः घ्नौघ्नः । एवं माथुरः । अण् । औदपानः । अञ् । औत्सः । बाह्यः । बाहीकः । ञ्यटीकणौ । कालेयः । आग्नेयः । कल्यग्नेरेयण् । स्त्रैणः । पौंस्नः । प्राग्वतः स्त्रीपुंसान्नञ् स्नञ् । नादेयः । एयण् । राष्ट्र्यः । इयः । पारावारीणः । ईनः । ग्राम्यः । ग्रामीणः । येनञौ । कात्त्रेयकः । कञ्यादेश्चैयकञ् । तत्रेत्येव । चैत्राज्जातः । जात इति किम् । शयने शेते । आसने शेते । स्वयमुत्पत्तिर्जातस्यार्थ इति कृतादिभ्यो भेदः ।

१५१६ **प्रावृष इकः** ॥६।३।९९॥ तत्रेति सप्तम्यन्तात् प्रावृष्शब्दाज्जातेऽर्थे इकः प्रत्ययः स्यात् । एण्यस्यापवादः । प्रावृषि जातः प्रावृषिकः ।

१५१७ **नाम्नि शारदोऽकञ्** ॥६।३।१००॥ शरदित्येतस्मात्सप्तम्यन्ताज्जातेऽर्थेऽकञ् प्रत्ययः स्यान्नाम्नि—प्रकृतिप्रत्ययसमुदायश्चेत्कस्यचिन्नाम । ऋत्वणोऽपवादः । शारदका दर्भा मुद्गा वा । दर्भविशेषाणां मुद्गविशेषाणां चेयं संज्ञा । नाम्नीति किम् । शारदं सस्यम् ।

१५१८ **सिन्ध्वपकरात् काणौ** ॥६।३।१०१॥ सिन्धु अपकर इत्येताभ्यां सप्तम्यन्ताभ्यां जातेऽर्थे क अण् इत्येतौ प्रत्ययौ स्याताम् नाम्नि । सिन्धोः कच्छाद्यकञणोः अपकराच्चौत्सर्गिकाणोऽपवादः । वचनभेदाद्यथासंख्याभावः । सिन्धौ जातः सिन्धुकः सैन्धवः । अपकरे कचवरे जातः अपकरकः आपकरः । नाम्नीत्येव । सैन्धवको मनुष्यः । नाम्नीत्यधिकारः ' कालाद्येय ऋणे ' इति सूत्रं यावत् । अन्ये तु नाम्नीत्यधिकारं नेच्छन्ति ।

१५१९ **पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्करादकः** ॥६।३।१०२॥ तत्रेति सप्तम्यन्तेभ्यः पूर्वाह्णादिभ्यो जातेऽर्थेऽकः प्रत्ययः स्यान्नाम्नि । इकणादेरपवादः । पूर्वाह्णे जातः पूर्वाह्णकः अपराह्णकः । अत्रेकण्तनटोरपादः । आर्द्रकः । मूलकः । अत्र भाणः । प्रदोषकः । अत्रेकणणोः । अवस्करकः । अत्रौत्सर्गिकाणः । नाम्नि इत्येव । पौर्वाह्णिकम् । पूर्वाह्णेतनम् । आपराह्णिकम् । अपराह्णेतनम् । आर्द्रम् । मौलम् । प्रादोषिकम् । प्रादोषम् । आवस्करम् । केनैव सिद्धेऽकविधानमार्द्रिकेत्येवमर्थम् । अन्यथा खट्वाका खट्वका खट्विकेतिवत् के रूपत्रयं स्यात् ।

१५२० **पथः पन्थ च** ॥६।३।१०३॥ पथिन्शब्दात् सप्तम्यन्ताज्जातेऽर्थेऽकः प्रत्ययः स्यात् पथिन्शब्दस्य च पन्थादेशो नाम्नि । अणोऽपवादः । पथि जातः पन्थकः ।

१५२१ **अश्व वाऽमावास्यायाः** ॥६।३।१०४॥ अमावास्याशब्दात् सप्तम्यन्ताज्जातेऽर्थेऽकारोऽकश्च प्रत्ययौ वा स्यातां नाम्नि । सन्ध्याद्यणोऽपवादः । अमा-

वास्यायां जातः अमावास्यः । अमावास्यकः । पक्षे सन्ध्याद्यण् । आमावास्यः । एकदेशविकृतस्यानन्यत्वात् अमावस्याशब्दादपि भवति । अमावस्यः अमावस्यकः । आमावस्यः । नास्तीत्येव । आमावास्यः ।

१५२२ **श्राविष्ठाषाढादीयण् च** ॥६।३।१०५॥ श्रविष्ठा अषाढा इत्येताभ्यां जातेऽर्थे ईयण् चकारादश्च प्रत्ययौ स्यातां नाम्नि । भाऽणोऽपवादः । श्रविष्ठाः धनिष्ठाः । ताभिश्चन्द्रयुक्ताभिः युक्तः कालः श्रविष्ठाः । तासु जातः श्राविष्ठीयः । श्रविष्ठः । एवमषाढायामषाढयोरषाढासु वा जातः आषाढीयः । अषाढः । अणमपीच्छन्त्येके । श्राविष्ठः । आषाढः ।

१५२३ **फल्गुन्याष्टः** ॥६।३।१०६॥ फल्गुनीशब्दात् सप्तम्यन्ताज्जातेऽर्थे टः प्रत्ययः स्यान्नाम्नि । भाऽणोऽपवादः । फल्गुन्योर्जातः फल्गुनः । फल्गुनी स्त्री । अणमपीच्छन्त्येके । फाल्गुनः । टकारो ङ्यर्थः ।

१५२४ **बहुलानुराधापुष्यार्थपुनर्वसुहस्तविशाखास्वातेर्लुप्** ॥ ६ । ।३।१०७॥ बहुलादिभ्यः सप्तम्यन्तेभ्यः परस्य भाणो जातेऽर्थे लुप् स्यान्नाम्नि । बहुलाः कृत्तिकाः ताभिश्चन्द्रयुक्ताभिर्युक्तः कालो बहुलाः तासु जातो बहुलः । अत्राणो लुपि ङ्यादेर्गौणस्येत्यादिनाऽऽपोऽपि लुप् । एवमनुराधासु अनुराधः । घञ्युपसर्गस्य बहुलमिति दीर्घत्वे अनूराधाः । तासु अनूराधः । पुष्यार्थपुष्ये पुष्यः । तिष्यः । सिध्यः । पुनर्वसौ पुनर्वसुः । हस्ते हस्तः । विशाखायां विशाखः । स्वातौ स्वातिः ।

१५२५ **चित्रारेवतीरोहिण्याः स्त्रियाम्** ॥६।३।१०८॥ चित्रादिभ्यः सप्तम्यन्तेभ्यः परस्य भाणो जातेऽर्थे स्त्रियां लुप् स्यात् नाम्नि । चित्रायां जाता चित्रा माणविका । रेवत्यां रेवती । रोहिण्यां रोहिणी । स्त्रियामिति किम् । चैत्रः । रैवतः । रौहिणः । पुंस्येषां विकल्प इत्येके । तन्मते चित्रः रेवतः रोहिणः इत्यपि भवति ।

१५२६ **बहुलमन्येभ्यः** ॥६।३।१०९॥ श्रविष्ठादिभ्यो येऽन्ये नक्षत्रशब्दास्तेभ्यः सप्तम्यन्तेभ्यः परस्य भाणो जातेऽर्थे बहुलं लुप् स्यान्नाम्नि । अभिजिति

जातोऽभिजित्। आभिजितः। अश्वयुजि जातः अश्वयुक्। आश्वयुजः। शतभिषजि शतभिषक्। [1]शातभिषजः। शातभिषः। अत्र।

१५२७ **वा जाते ञिः** ॥६।२।१३७॥ जात इत्यस्मिन्नर्थे योऽण् प्रत्ययो ञिर्विहित उत्सर्गेण प्राप्तोऽपवादेन बाधितः सन् पुनर्विहितः स ञिद्वा स्यात्। इति विकल्पेनाणो ञित्त्वादन्त्यस्वरादिलोपः। कृत्तिकासु कृतिकः, कार्तिकः। मृगशिरसि मृगशिराः, मार्गशीर्षः। एषु वा लोपः। क्वचिन्नित्यम्। अश्विनीषु जातः अश्विनः। अश्विनी। राधः, राधा। श्रवणः, श्रवणा। उत्तरः, उत्तरा। क्वचिन्न भवति। प्रोष्ठपदासु जातः प्रोष्ठपादः। अत्र।

१५२८ **प्रोष्ठभद्राज्ज्ञाते** ॥ ७।४।१३ ॥ प्रोष्ठशब्दाद् भद्रशब्दाच्च परस्य पदशब्दस्योत्तरपदस्य स्वरेष्वादेः स्वरस्य स्थाने जातेऽर्थे विहिते ञ्णिति तद्धिते परे वृद्धिः स्यात्। इत्युत्तरपदवृद्धिः। एवं भद्रपादः।

१५२९ **स्थानान्तगोशालखरशालात्** ॥ ६।३।११० ॥ स्थानशब्दान्तान्नान्नो गोशालखरशाल इत्येताभ्यां च सप्तम्यन्ताभ्यां परस्य जातेऽर्थे प्रत्ययस्य लुप् स्यान्नास्ति। गोस्थाने जातो गोस्थानः। [2]गोशाले गोशालः खरशाले खरशालः। लिङ्गविशिष्टस्यापि ग्रहणाद् गोस्थान्यां गोस्थानः। गोशालायां गोशालः। खरशालायां खरशालः। ङ्यादेर्गौणस्येत्यादिना स्त्रीप्रत्ययस्यापि लुक्।

१५३० **वत्सशालाद्वा** ॥ ६।३।१११ ॥ वत्सशालशब्दात् सप्तम्यन्तात् परस्य जातेऽर्थे प्रत्ययस्य वा लुप् स्यान्नास्ति। वत्सशालः। वात्सशालः।

१५३१ **सोदर्यसमानोदर्यौ** ॥ ६।३।११२ ॥ सोदर्यसमानोदर्यशब्दौ जातेऽर्थे यप्रत्ययान्तौ निपात्येते। समानोदरे जातः सोदर्यः। समानोदर्यः। निपातनात् पक्षे समानस्य सभावः। तत एव च जातार्थमात्रत्वेऽपि भ्रातृत्वेवाभिधानं न कृमिमलादिषु। नास्तीत्यधिकाराद्वा।

---

१ शतं भिषजोऽस्याः शतभिषजा चन्द्रयुक्तया युक्तः कालः कालोऽण्। जाते इत्यणो बाधको वर्षाकालेभ्य इकण् पुनस्तद्बाधको भर्तुसंध्यादेरण्।

२ अत्र तत्पुरुषे कृते परवल्लिङ्गतायां प्राप्तायां 'सेनाशाला' इति पक्षे नपुंसकत्वात् ह्रस्वत्वे गोशाले जात इत्यादिविग्रहः।

१८३२ कालाद्देये ऋणे ॥६।३।११३॥ तत्रेति वर्तते। तत्रेति सप्तम्यन्तात् कालविशेषवाचिनो देयेऽर्थे यथाविहितं प्रत्ययः स्यात्, यत्तद्देयमृणं चेत्तद्भवति। नात्रीति निवृत्तम्। मासे देयं मासिकमृणम्। आर्धमासिकम्। सांवत्सरिकम् ऋणम्। मासादिके गते देयमित्यर्थः। ऋण इति किम्। मासे देया भिक्षा। स्वातौ देयं स्वस्तिवाचनम्।

१८३३ कलाप्यश्वत्थयववबुसोमाव्यासैषमसोऽकः ॥६।३।११४॥ कलापिन् अश्वत्थ यववबुस उमाव्यास ऐषमस् इत्येतेभ्यः कालवाचिभ्यः सप्तम्यन्तेभ्यो देय ऋणेऽकः प्रत्ययः स्यात्। इकणा[1]देरपवादः। यस्मिन् काले मयूराः केदाराः कलापिनो भवन्ति स कालस्तत्साहचर्यात् कलापी तत्र देयमृणं कलापकम्। यस्मिन् कालेऽश्वत्थाः फलन्ति स कालोऽश्वत्थफलसहचरितोऽश्वत्थः। तत्र देयमृणमश्वत्थकम्। यस्मिन् काले यवानां वुसं भवति स कालो यववुसम् तत्र देयमृणं यववुसकम्। उमा व्यस्यन्ते विक्षिप्यन्ते यत्र स काल उमाव्यासस्तत्र देयमृणमुमाव्यासकम्। ऐषमोऽस्मिन् संवत्सरे देयमृणमैषमकम्।

१८३४ ग्रीष्मावरसमादकञ् ॥६।३।११५॥ ग्रीष्म अवरसमा इत्येताभ्यां कालवाचिभ्यां सप्तम्यन्ताभ्यां देये ऋणेऽकञ् प्रत्ययः स्यात्। अणिकणोरपवादः। ञकारो वृद्ध्यर्थः। ग्रीष्मे देयमृणं ग्रैष्मकम्। अवरा समा असरसमा समाया अवरत्वमित्यवरसमं वा। तत्रावरसमकम्। अपरसमादपीच्छन्त्येके। आपरसमकम्।

१८३५ संवत्सराग्रहायण्या इकण् च ॥६।३।११६॥ संवत्सर आग्रहायणी इत्येताभ्यां सप्तम्यन्ताभ्यां देये ऋणे इकण् चकारादकञ्च प्रत्ययौ स्याताम्। अणिकणोरपवादः। संवत्सराद्धि फले पर्वणि च ऋणेऽण् प्राप्नोति। संवत्सरे देयमृणं फलं पर्व वा सांवत्सरिकम्। सांवत्सरकम्। आग्रहायणिकम्। आग्रहायणकम्। वेत्यकृत्वा इकण्वेति विधानं संवत्सरफलपर्वणोरित्यणबाधनार्थम्।

---

१ आदिशब्दात् 'ऐषमोह्यः श्वसो वा' इति त्यचूतनटौ।

१५३६ **साधुपुष्यत्पच्यमाने** ॥६।३।११७॥ कालादिति वर्तते । तत्रेति सप्तम्यन्तात् कालविशेषवाचिनः साधौ पुष्यति पच्यमाने चार्थे यथाविहितं प्रत्ययाः स्युः । हेमन्ते साधु हैमनमनुलेपनम् । हैमन्तं हैमन्तिकम् । वसन्ते पुष्यन्ति वासन्त्यः कुन्दलताः । शरदि पच्यन्ते शारदाः शालयः ।

१५३७ **उप्ते** ॥६।३।११८॥ तत्रेति सप्तम्यन्तात् कालवाचिनः उप्तेऽर्थे यथाविहितं प्रत्ययः स्यात् । शरद्युप्ताः शारदा यवाः । हेमन्ते हैमनाः । ग्रैष्माः । नैदाघाः । योगविभाग उत्तरार्थः ।

१५३८ **आश्वयुज्या अकञ्** ॥ ६।३।११९ ॥ आश्वयुजीशब्दात् सप्तम्यन्तादुप्तेऽर्थेऽकञ् प्रत्ययः स्यात् । इकणोऽपवादः । अश्विनीभिश्चन्द्रयुक्ताभिर्युक्ता या पौर्णमासी सा आश्वयुजी । अश्विनीपर्यायोऽश्वयुक्शब्दः । आश्वयुज्यां कौमुद्यामुप्ता आश्वयुजका माषाः ।

१५३९ **ग्रीष्मवसन्ताद्वा** ॥६।३।१२०॥ आभ्यां सप्तम्यन्ताभ्यामुप्तेऽर्थेऽकञ् प्रत्ययो वा स्यात् । ऋत्वणोऽपादः । ग्रैष्मकं ग्रैष्मं सस्यम् । वासन्तकं वासन्तम् सस्यम् ।

१५४० **व्याहरति मृगे** ॥६।३।१२१॥ तत्रेति वर्तते कालादिति च । तत्रेति सप्तम्यन्तात् कालवाचिनो व्याहरत्यर्थे यथाविहितं प्रत्ययः स्यात् व्याहरँश्चेन्मृगः । निशायां व्याहरति नैशिको नैशो वा शृगालः । प्रादोषिकः प्रादोषो वा शृगालः । मृग इति किम् । वसन्ते व्याहरति कोकिलः ।

१५४१ **जयिनि च** ॥ ६।३।१२२ ॥ जयः प्रसहनमभ्यासः । सोऽस्यास्तीति जयी । तत्रेति सप्तम्यन्तात् कालवा चिनो जयिनि वाच्ये यथाविहितं प्रत्ययः स्यात् । निशासहचरितमध्ययनं निशा तत्र जयी साभ्यासः नैशिकः नैशः । प्रादोषिकः प्रादोषः । वासन्तः । वार्षिकः । केवलकालविषयस्य जयस्यायोगान्निशादिसहचरिताध्ययनादिवृत्तयो निशादयः शब्दाः प्रत्ययमुत्पादयन्ति । चकारः कालादित्यनुकर्षणार्थः । तेन चानुकृष्टत्वान्नोत्तरत्रानुवर्तते ।

१५४२ भवे ॥६।३।१२३॥ तत्रेत्यनुवर्तते । तत्रेति सप्तम्यन्ताद् भवेऽर्थे यथाविहितमणादय एयणादश्च प्रत्ययाः स्युः । सत्ता भवत्यर्थो गृह्यते न जन्म जात इत्यनेन गतार्थत्वात् सुघ्ने भवः सौघ्नः। औत्सः। नादेयः। राष्ट्रियः । पारावारीणः । ग्राम्यः । ग्रामीणः ।

१५४३ दिगादिदेहांशाद्यः ॥६।३।१२४॥ दिगादिभ्यो देहावयववाचिनश्च सप्तम्यन्ताद् भवेऽर्थे यः प्रत्ययः स्यात् । अणीयादेरपवादः । दिशि भवो दिश्यः । वर्ग्यः । अप्सु भवोऽप्सव्यः । 'अपो भयोनिमतिचरे' इति सप्तम्यलुप् । देहांश-मूर्धन्यः । 'अनोऽटचे ये' इत्यनो लोपाभावः । दन्त्यः । कर्ण्यः । ओष्ठ्यः । पाण्यः । पद्यः । तालव्यः । मुख्यः । जघन्यः । देहांशात्तदन्तादपीच्छन्त्येके । कण्ठतालव्यः । दन्तोष्ठ्यः ।

१५४४ नाम्न्युदकात् ॥६।३।१२५॥ उदकशब्दात् सप्तम्यन्ताद् भवेऽर्थे यः स्यान्नाम्नि । उदक्या रजस्वला । नाम्नीति किम् । औदको मत्स्यः ।

१५४५ मध्याद्दिनण्णेया मोऽन्तश्च ॥६।३।१२६॥ मध्यशब्दात् सप्तम्यन्ताद् भवेऽर्थे दिनण् ण ईय इत्येते प्रत्ययाः स्युः तत्संनियोगे च मागमः । मध्ये भवा माध्यंदिना उद्गायन्ति। माध्यमः । मध्यमीयः । अन्ये तु दिनं णितं नेच्छन्ति । मध्यंदिनः ।

१५४६ जिह्वामूलाङ्गुलेश्चेयः ॥६।३।१२७॥ जिह्वामूल अङ्गुलि इत्येताभ्यां मध्यशब्दाच्च भवेऽर्थे ईयः प्रत्ययः स्यात् । यापवादः। जिह्वामूले भवो जिह्वामूलीयः । अङ्गुलीयः । मध्यीयः । चकारेण मध्यशब्दानुकर्षणं मागमाभावार्थम् ।

१५४७ वर्गान्तात् ॥६।३।१२८॥ वर्गशब्दान्तात् सप्तम्यन्ताद् भवेऽर्थे ईयः प्रत्ययः स्यात् । अणोऽपवादः । कवर्गीयो वर्णः ।

१५४८ ईनयौ चाऽशब्दे ॥६।३।१२९॥ वर्गशब्दान्तात् सप्तम्यन्ताद् भवेऽर्थे ईन य इत्येतौ प्रत्ययौ चकारादीयश्च प्रत्ययाः स्युः अशब्दे—न चेत् स भवार्थः शब्दो भवति । भरतवर्गीणः, भरतवर्ग्यः, भरतवर्गीयः । अशब्द इति किम् । कवर्गीयः ।

१६४९ **दृतिकुक्षिकलशिवस्त्यहेरेयण्** ॥६।३।१३०॥ एभ्यः सप्तम्यन्तेभ्यो भवेऽर्थे एयण् प्रत्ययः स्यात् । अणादीनामपवादः । दृतौ चर्मखल्लायां भवं दार्तेयं जलम् । कुक्षौ देहांशे भवः कौक्षेयो व्याधिः । देशार्थादपि भवे परत्वात् अयमेव न धूमाद्यकञ् । असावप्ययमेव न कुलकुक्ष्याद्येयकञ् । असिं कौक्षेयमुद्यम्य । कलश्यां मन्थन्यां भवं कालशेयं तक्रम् । वस्तौ पुरीषनिर्गमरन्ध्रे भवं वास्तेयं पुरीषम् । अहौ भवमाहेयं विषम् ।

१६६० **आस्तेयम्** ॥६।३।१३१॥ अस्तिशब्दात्तिवन्तप्रतिरूपकादव्ययाद्धनविद्यमानपर्यायात्तत्र भवे एयण् प्रत्ययो निपात्यते असृज्शब्दस्य वास्त्यादेशश्च । धने वा विद्यमाने वा असृजि वा भवमास्तेयम् ।

१६६१ **ग्रीवातोऽण् च** ॥६।३।१३२॥ ग्रीवाशब्दाद्भवेऽर्थेऽण् चकारादेयण् च प्रत्ययौ स्याताम् । देहांशयापवादः । ग्रीवायां ग्रीवासु वा भवं ग्रैवं ग्रैवेयम् । ग्रीवाशब्दो यदा शिरोधमनीवचनस्तदा तासां बहुत्वाद् बहुवचनम् ।

१६६२ **चतुर्मासान्नाम्नि** ॥६।३।१३३॥ चतुर्मासशब्दात्तत्र भवेऽण् प्रत्ययः स्यान्नाम्नि समुदायश्चेन्नाम । चतुर्षु मासेषु भवा चातुर्मासी आषाढी कार्तिकी फाल्गुनी च पौर्णमासी भण्यते । अत्र विधानसामर्थ्याद् 'द्विगोरनपत्ये' इत्यादिना प्रत्ययस्य लुब् न भवति । नाम्नीति किम् । चतुर्षु मासेषु भवश्चतुर्मासः । अत्र वर्षाकालेभ्य इतीकण् । तस्य लुप् ।

१६६३ **यज्ञे ञ्यः** ॥६।३।१३४॥ चतुर्मासशब्दात्तत्र भवे यज्ञे ञ्यः प्रत्ययः स्यात् । चतुर्षु मासेषु भवानि चातुर्मास्यानि यज्ञकर्माणि ।

१६६४ **गंभीरपञ्चजनबहिर्देवात्** ॥६।३।१३५॥ गम्भीरपञ्चजनबहिर्देव इत्येतेभ्यस्तत्र भवे ञ्यः प्रत्ययः स्यात् । अणाद्यपवादः । गंभीरे भवो गांभीर्यः । पाञ्चजन्यः । बाह्यः । दैव्यः । भवादन्यत्र गांभीरः । पाञ्चजनः । द्विगौ त्वणो लुपि पञ्चजनः । बाहीकः । दैवः । भवेऽपि बाहीक इत्येके ।

१६६५ **परिमुखादेरव्ययीभावात्** ॥६।३।१३६॥ परिमुख इत्येवमादि-

भ्योऽव्ययीभावेभ्यस्तत्र भवे ञ्यः प्रत्ययः स्यात् । अणोऽपवादः । परितः सर्वतो मुखं परिमुखम् । अतएव वचनादव्ययीभावः । वर्जनार्थो वा परिः । मुखात् परि परिमुखम् । पर्यपाङित्यादिनाऽव्ययीभावः । परिमुखे भवः पारिमुख्यः । पारिहनव्यः। परिमुखादेरिति किम् । औपकूलम् । औपमूलम् । औपशाखम् । औपकुम्भम् । औपखलम् । आनुकुम्भम् । आनुकूलम् । आनुखलम् । अव्ययीभावादिति किम् । परिग्लानो मुखाय परिमुखः, तत्र भवः पारिमुखः ।

१५९६ **अन्तःपूर्वादिकण्** ॥६।३।१३७॥ अन्तःशब्दपूर्वपदादव्ययीभावात्तत्र भवे इकण् प्रत्ययः स्यात् । अणोऽपवादः । अगारस्यान्तः अन्तरगारम् । तत्र भव आन्तरगारिकः । आन्तर्गेहिकः । आन्तर्वेश्मिकः । आन्तःपुरिकः । अव्ययीभावादित्येव । अन्तर्गतमगारस्य अन्तःस्थं वागारमन्तरगारम् । तत्र भवमान्तरगारम् । आन्तःपुरम् । आन्तःकरणम् ।

१५९७ **पर्यनोर्ग्रामात्** ॥६।३।१३८॥ परि अनु इत्येताभ्यां परो यो ग्रामशब्दस्तदन्तादव्ययीभावात्तत्र भवे इकण् प्रत्ययः स्यात् । अणोऽपवादः । ग्रामात् परि परिग्रामम् । ग्रामस्य समीपमनुग्रामम् । तत्र भवः पारिग्रामिकः । आनुग्रामिकः। अव्ययीभावादित्येव । परिगतो ग्रामः परिग्रामस्तत्र भवः पारिग्रामः । आनुग्रामः ।

१५९८ **उपाज्जानुनीविकर्णात् प्रायेण** ॥६।३।१३९॥ उप इत्येतस्मात् परे ये जानुनीविकर्णशब्दास्तदन्तादव्ययीभावादिकण् प्रत्ययः स्यात् प्रायेण तत्र भवे यस्तत्र बाहुल्येन भवति अन्यत्र च कदाचिद् भवति तस्मिन्नित्यर्थः । जानुनः समीपमुपजानु । प्रायेणोपजानु भवति औपजानुकः सेवकः । औपजानुकं शाटकम् । औपनीविकं ग्रीवादाम । औपनीविकं कार्षापणम् । औपकर्णिकः सूचकः । प्रायेणेति किम् । नित्यं भवे मा भूत् । औपजानवं मांसम् । औपजानवं गडु । जानुशब्दो देहावयवो नोपजानुशब्द इति यो न भवति ।

१५९९ **रूढावन्तःपुरादिकः** ॥६।३।१४०॥ अन्तःपुरशब्दात् तत्र भवे इकः प्रत्ययः स्यात् रूढौ–स चेदन्तःपुरशब्दः क्वचिद्रूढः । क्व चायं रूढः एकपुरुषपरिग्रहे स्त्रीसमुदाये । उपचारात्तन्निवासेऽपि । अन्तःपुरे भवा अन्तःपुरिका स्त्री । रूढाविति किम् । पुरस्यान्तर्गतम् अन्तःपुरम् । तत्र भवः आन्तःपुरः । पुरस्यान्तरन्तःपुरमिति अव्ययीभावात्त्विकण् भवति । आन्तःपुरिक इति ।

१६६० कर्णललाटात्कल् ॥६।३।१४१॥ रूढाविति वर्तते । सेह रूढिः प्रकृतिप्रत्ययसमुदायस्य विशेषणम् । कर्णललाटशब्दाभ्यां तत्र भवे कल् स्यात् रूढौ–प्रकृतिप्रत्ययसमुदायश्चेत् क्वचिद्रूढो भवति। कर्णिका कर्णाभरणविशेषः पद्माद्यवयवश्च । ललाटिका ललाटमण्डनम् । रूढावित्येव । कर्णे भवं कर्ण्यम् । ललाट्यम् । लकारः स्त्रीत्वार्थः ।

१६६१ देविकाशिंशपादीर्घसत्रश्रेयसस्तत्प्राप्तौ वाः ॥७।४।३॥ देविका शिंशपादीर्घसत्रश्रेयस् इत्येतेषां ञ्णिति तद्धिते निमित्ते तत्प्राप्तौ वृद्धिप्रसङ्गे आकार आदेशः स्यात् । देविकायां भवं दाविकमुदकम् । देविकाकूले भवा दाविकाकूलाः शालयः । पूर्वदेविका नाम प्राच्यग्रामस्तत्र भवः पूर्वदाविकः । अत्र प्राग्ग्रामाणामित्युत्तरपदवृद्धिप्राप्तिः । शिंशपाया विकारः शांशपः स्तम्भः । शिंशपास्थले भवाः शांशपास्थलाः शालयः । पूर्वशिंशपा नाम प्राच्यग्रामस्तत्र भवः पूर्वशांशपः । दीर्घसत्रे भवं दार्घसत्रम् । श्रेयोऽधिकृत्य कृतं श्रायसं द्वादशाङ्गम् । तत्प्राप्ताविति किमर्थम् । सुदेविकायां भवः सौदेविक इत्यत्र निषेधार्थं पूर्वोत्तरपदानामपि यथा स्यादित्येवमर्थं च । अन्यथा हि केवलानामेव स्यात् ।

१६६२ प्राग्ग्रामाणाम् ॥ ७।४।१७ ॥ प्राग्देशग्रामवाचिनां योऽवयवो दिग्वाची ततः परस्यावयवस्य दिशः परेषां च प्राग्ग्रामवाचिनां ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् । पूर्वकृष्णमृत्तिका नाम प्राक्षु ग्रामः तत्र भवः पूर्वकार्ष्णमृत्तिकः । एवमपरकार्ष्णमृत्तिकः । पूर्वेषुकामशमी नाम प्राग्ग्रामस्तत्र भवः पूर्वैषुकामशमः । एवमपरैषुकामशमः । बहुवचनाद् ग्रामग्रहणेन नगरमपि गृह्यते । पूर्वस्मिन् कन्यकुब्जे भवः पूर्वकान्यकुब्जः । अपरकान्यकुब्जः । प्राग्ग्रहणं किम् । देवदत्तं नाम वाहीकग्रामः पूर्वस्मिन् देवदत्ते भवः पौर्वदेवदत्तः ।

१६६३ तस्य व्याख्याने च ग्रन्थात् ॥६।३।१४२॥ ग्रन्थः शब्दसंदर्भः । स व्याख्यायते अवयवशः कथ्यते येन तद् व्याख्यानम् । तस्येति षष्ठ्यन्ताद् व्याख्यानेऽर्थे तत्रेति सप्तम्यन्ताच्च भवेऽर्थे ग्रन्थवाचिनो यथाविहितं प्रत्ययः स्यात् । चकारस्तत्र भव इत्यस्यानुकर्षणार्थः । वाक्यार्थसमीपे चकारः श्रूयमाणः पूर्ववाक्यार्थमेव समुच्चिनोति । कृतां व्याख्यानं कृत्सु भवं वा कार्तम् । प्रातिपदिकीयम् । ननु च तस्य व्याख्यानेऽर्थे तस्येदमित्यनेनैव प्रत्ययविधिः सिद्धः चकारानु-

कृष्टेऽपि तत्र भवेऽर्थे पूर्वमेव प्रत्ययविधिरुक्तस्तत् किमनयोर्युगपदुपादानम् ? उच्यते । वक्ष्यमाणः सकलोऽप्यपवादविधिरनयोरर्थयोर्यथा स्यादित्येवमर्थम् । उत्तरेणैकयोगत्वे चानुकृष्टत्वात्तत्र भव इत्यस्य ततः परं नानुवृत्तिः स्यात् । योगविभागे त्विहानुवृत्तिरनर्थिकेति द्वयोरुत्तरत्रानुवृत्तिर्भवति । उदाहरणोपन्यासस्तु अनुवादमात्रम् । ग्रन्थादिति किम् । पाटलिपुत्रस्य व्याख्यानी सुकोसलापाटलिपुत्रमेवं संनिवेशमिति सुकोसलया मतिच्छन्दकभूतया व्याख्यायते न तु पाटलिपुत्रं ग्रन्थ इत्युत्तरेणापवादिक इकण् न भवति ।

१५६४ **प्रायो बहुस्वरादिकण्** ॥ ६।३।१४३ ॥ बहुस्वराद् ग्रंथवाचिनस्तस्य व्याख्याने तत्र भवे चार्थे प्राय इकण् प्रत्ययः स्यात् । अणादेरपवादः । षत्वणत्वयोर्व्याख्यानं तत्र भवं वा षात्वणत्विकम् । कथं नातानतिकम् । उदात्तानुदात्तयोः स्वरयोरेते नतानतसंज्ञे । प्रायोवचनात् क्वचिन्न भवति । सांहितम् । प्रातिपदिकीयम् ।

१५६५ **ऋगृद्द्विस्वरयागेभ्यः** ॥६।३।१४४॥ ऋच् इत्येतस्मात् ऋकारान्ताद् द्विस्वरात् यागशब्देभ्यश्च ग्रन्थवाचिभ्यस्तस्य व्याख्याने तत्र भवे चार्थे इकण् प्रत्ययः स्यात् । अणादेरपवादः । ऋचां व्याख्यानं ऋक्षु भवं वा आर्चिकम् । ऋकारान्त–चतुर्षु होतृषु भव इत्यणो लुपि चतुर्होता ग्रन्थः । तस्य व्याख्यानं तत्र भवं वा चातुर्होतृकम् । एवं पाञ्चहोतृकम् । द्विस्वर–आङ्गिकम् । पौर्विकम् । सौत्रिकम् । तार्किकम् । नामिकम् । याग–आग्निष्टोमिकम् । राजसूयिकम् । वाजपेयिकम् । पाकयज्ञिकम् । नावयाज्ञिकम् । पाञ्चौदनिकम् । दाशौदनिकम् । ऋग्यागग्रहणं पूर्वस्यैव प्रपञ्चः । यागेभ्य इति बहुवचनं ससोमकानामग्निष्टोमादीनाम् असोमकानां पञ्चौदनादीनां च परिग्रहार्थम् ।

१५६६ **ऋषेरध्याये** ॥ ६।३।१४५ ॥ ऋषिशब्देभ्यो ग्रन्थवाचिभ्यस्तस्य व्याख्याने तत्र भवे चाध्याये इकण् प्रत्ययः स्यात् । वसिष्ठस्य ग्रन्थस्य व्याख्यानस्तत्र भवो वा वासिष्ठिकोऽध्यायः । अध्याय इति किम् । वसिष्ठस्य व्याख्यानी तत्र भवा वा वासिष्ठी ऋक् । ' प्रायो बहुस्वरादि ' ति प्रायोग्रहणादप्राप्तिकल्पनायां विध्यर्थम्, प्राप्तिकल्पनायामध्याय एवेति नियमार्थं वचनम् ।

१५६७ पुरोडाशपौरोडाशादिकेकटौ ॥६।३।१४६॥ आभ्यां ग्रन्थवाचिभ्यां तस्य व्याख्याने तत्र भवे चार्थे इक इकट् इत्येतौ प्रत्ययौ स्याताम् । अणीयणोरिकणोऽपवादः । वचनभेदाद्यथासंख्याभावः । इकेकटोः स्त्रियां विशेषः । पुरोडाशाः पिष्टपिण्डाः । तैः सहचरितो मंत्रः पुरोडाशः तस्य व्याख्यानस्तत्र भवो वा पौरोडाशिकः । पौरोडाशिका । पौरोडाशिकी ।

१५६८ छन्दसो यः ॥ ६।३।१४७ ॥ छन्दःशब्दाद् ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे च यः प्रत्ययः स्यात् । द्विस्वरेकणोऽपवादः । छन्दसो व्याख्यानस्तत्र भवो वा छन्दस्यः ।

१५६९ शिक्षादेश्चाण् ॥६।३।१४८॥ शिक्षा इत्येवमादिभ्यश्छन्दःशब्दाच्च ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे चार्थेऽण् प्रत्ययः स्यात् । इकणोऽपवादः । शिक्षाया व्याख्यानस्तत्र भवो वा शैक्षः । आर्गयनः । छन्दस्–छान्दसः । एवं छन्दसशब्दस्य द्वैरूप्यं भवति । अण्ग्रहणमीयवाधनार्थम् । नैयायः । वास्तुविद्यः ।

१५७० तत आगते ॥६।३।१४९॥ तत इति पञ्चम्यन्तादागतेऽर्थे यथाविहितमणादय एयणादयश्च प्रत्ययाः स्युः । स्रुघ्नादागतः स्रौघ्नः । माथुरः । औत्सः । गव्यः । दैत्यः । बाह्यः । कालेयः । आग्नेयः । स्त्रैणः । पौंस्नः । राष्ट्रियः । ग्रामीणः । ग्राम्यः । मुख्यापादानपरिग्रहात् स्रुघ्नादागच्छन् वृक्षमूलादागत इत्यत्र वृक्षमूलान्नान्तरीयकापादान्न भवति ।

१५७१ विद्यायोनिसंबंधादकञ् ॥ ६।३।१५० ॥ विद्याकृतो योनिकृतश्च संबंधो येषां तद्वाचिभ्यः पञ्चम्यन्तेभ्य आगतेऽर्थेऽकञ् प्रत्ययः स्यात् । अणोऽपवादः । ईयं तु परत्वाद् बाधते । विद्यासंबंन्धः–आचार्यादागतमाचार्यकम् । औपाध्यायकम् । शैष्यकम् । आर्त्विजकम् । आन्तेवासकम् । योनिसंबन्ध–पैतामहकम् । मातामहकम् । पैतृव्यकम् । मातुलकम् ।

१५७२ पितुर्यो वा ॥६।३।१५१॥ पितृशब्दाद्योनिसंबंधवाचिनः पञ्चम्यन्तादागतेऽर्थे यः प्रत्ययो वा स्यात् । इकणोऽपवादः ।

१५७३ ऋतो रस्तद्धिते ॥१।२।२६॥ ऋकारस्य यकारादौ तद्धिते परे रादेशः स्यात् । इति रत्वम् । पितुरागतं पित्र्यम् । पक्षे पैतृकम् ।

१५७४ ऋत इकण् ॥ ६।३।१५२ ॥ ऋकारान्ताद् विद्यायोनिसंबंधवाचिनः पञ्चम्यन्तादागतेऽर्थे इकण् प्रत्ययः स्यात् । अकञोऽपवादः । होतुरागतं हौतृकम् । पैतृकम् । प्राशास्तृकम् । प्रातिहर्तृकम् । शास्तृकम् । योनिसंबन्ध–मातृकम् । भ्रातृकम् । स्वासृकम् । दौहितृकम् । जामातृकम् । नानान्दृकम् । मातृकी विद्या । इकणन्तत्वाद् ङीप्रत्ययः ।

१५७५ आयस्थानात् ॥६।३।१५३॥ स्वामिग्राह्यो भाग आयः स यस्मिन्नुत्पद्यते तदायस्थानम् । तद्वाचिनः पञ्चम्यन्तादागतेऽर्थे इकण् प्रत्ययः स्यात् । अणोऽपवादः । ईयं तु परत्वाद् बाधते । एत्य तरन्त्यस्मिन्नित्यातरो नदीतीर्थम् । तत आगतम् आतरिकम् । शौल्कशालिकम् । आपणिकम् । दौवारिकम् । आयस्थानत्वेनाप्रसिद्धादपि तादूप्येण विवक्षिताद् भवतीति कश्चित् । सौध्निकः ।

१५७६ शुण्डिकादेरण् ॥ ६।३।१५४ ॥ शुण्डिक इत्येवमादिभ्यः पञ्चम्यन्तेभ्य आगतेऽर्थेऽण् प्रत्ययः स्यात् । इकणादेरपवादः । शुण्डः शुण्डा वा सुरा ततो मत्वर्थीये शुण्डिकः शुण्डिका वा सुरापणः सुराविक्रयी चोच्यते । तत आगतं शौण्डिकम् । औदपानम् । कार्कणम् । अण्ग्रहणं विस्पष्टार्थम् । यदि ह्यनेनाप्यायस्थानादिकण् तीर्थाद् धूमाद्यकञ् पर्णकृकणाभ्यां चैयः स्याद्वचनमिदमनर्थकं स्यात् । न चोदपानादिहाऽन्यणि वा विशेषोऽस्तीति । यदा तु शुण्डिकादीनि सर्वाण्यायस्थानान्येव तदा अकञीयबाधनार्थम् ।

१५७७ गोत्रादङ्कवत् ॥६।३।१५५॥ गोत्रवाचिनः शब्दात् पञ्चम्यन्तादागतेऽर्थे अङ्क इव प्रत्ययविधिः स्यात् । यथा भवति विदानामङ्कः वैदः गार्गः दाक्ष इति 'संघघोषाङ्क' इत्यादिनाण् तथेहापि विदेभ्य आगतं वैदं गार्गं दाक्षम् । अङ्कग्रहणेन तस्येदमित्यर्थसामान्यं लक्ष्यते । तेनाकञोऽप्यतिदेशः । अन्यथा संघाद्यण् एव स्यात् । तेन यथा भवति औपगवकः कापटवकः नाडायनकः गार्ग्यायणक इति 'गोत्राददण्ड' इत्यादिनाकञ् तथेहापि औपगवेभ्य आगत औपगवकः कापटवकः नाडायनकः गार्ग्यायणकः । एवं रैवतिकेभ्य आगतं रैवतिकीयम्–'रैवतिकादेरीयः' गौरग्रीवीयम् । कौपिञ्जलादागतं कौपिञ्जलं–'कौपिञ्जलहास्तिपदादण्' । हास्तिपदम् ।

१५७८ नृहेतुभ्यो रूप्यमयटौ वा ॥६।३।१५६॥ नृवाचिभ्यो हेतुवा-

चिभ्यश्च पञ्चम्यन्तेभ्य आगतेऽर्थे रूप्य मयट् इत्येतौ प्रत्ययौ वा स्याताम् । ताभ्यां मुक्ते यथाप्राप्तम् । वचनभेदाद् यथासंख्याभावः । हेतुः कारणम् । नृग्रहणमहेत्वर्थम् । देवदत्तादागतं देवदत्तरूप्यम् । देवदत्तमयम् । दैवदत्तम् । अत्रापादाने पञ्चमी । हेतुः—समादागतं समरूप्यम् । सममयम् । विषमरूप्यं विषममयम् । पक्षे गहादिपाठादीयः । समीयम् । विषमीयम् । पापरूप्यम् । पापमयम् । पक्षे दोरीयः । पापीयम् । अत्र हेतौ पञ्चमी । बहुवचनं स्वरूपव्युदासार्थम् ।

१५७९ **प्रभवति** ॥६।३।१५७॥ तत इति वर्तते । तत इति पञ्चम्यन्तात् प्रभवति—प्रथमं प्रकाशमानेऽर्थे यथाविहितं प्रत्ययाः स्युः । प्रथममुपलभ्यमानता प्रभवः । अन्ये प्रभवति—जायमाने इत्याहुः । ' जाते ' इति भूते सप्तम्यन्ताद् प्रत्ययः अयं तु पञ्चम्यन्ताद् वर्तमाने इति विशेषः । हिमवतः प्रभवति हैमवती गङ्गा । दारदी सिन्धुः । काश्मीरी वितस्ता । कश्मीरशब्दात् ' बहुविषयेभ्यः ' इति अकञोऽपवादः कच्छाद्यण् ।

१५८० **वैडूर्यः** ॥६।३।१५८॥ विडूरशब्दात् पञ्चम्यन्तात् प्रभवत्यर्थे ञ्यः प्रत्ययो निपात्यते । विडूरात् प्रभवति वैडूर्यो मणिः । विडूरग्रामे ह्ययं संस्क्रियमाणो मणितया ततः प्रथमं प्रभवति । वालवायात्तु पर्वतादसौ प्रभवन्न मणिः किंतु पाषाणः । यदा तु जायमानतार्थः प्रभवशब्दस्तदा वालवायशब्दस्य ञ्यस्तत्संनियोगे विडूरादेशश्च निपात्यते । वालवायपर्याय एव वा विडूरशब्दः । प्रतिनियतविषयाश्च रूढ्या इति वैयाकरणानामेव प्रसिद्धिः । यथा जित्वरीशब्दस्य वाराणस्यां वणिजामेव । वालवायशब्दात्तु ईयप्रत्ययोऽनभिधानान्न भवति ।

१५८१ **त्यदादेर्मयट्** ॥६।३।१५९॥ त्यदादिभ्यः पञ्चम्यन्तेभ्यः प्रभवत्यर्थे मयट् प्रत्ययः स्यात् । तन्मयम् । तन्मयी । भवन्मयम् । भवन्मयी ।

१५८२ **तस्येदम्** ॥६।३।१६०॥ तस्येति षष्ठ्यन्तादिदमित्यर्थे यथाविहितमणादय एयणादयश्च स्युः । उपगोरिदमौपगवम् । दैत्यम् । कालेयम् । औत्सम् । स्त्रैणम् । गव्यम् । नादेयम् । राष्ट्रियम् । पारीणः । भानवीयः । पाटलिपुत्रकः प्राकारः । इह त्वनभिधानान्न भवति । देवदत्तस्यानन्तरः । तस्येति षष्ठ्यर्थमात्रमिदमिति षष्ठ्यर्थसंबंधिमात्रं च विवक्षितम् । यदन्यल्लिङ्गसंख्याभत्यक्षपरोक्षत्वादिकं तदविवक्षितम् ।

१५८३ न्यङ्कोर्वा ॥७।४।८॥ न्यङ्कुशब्दस्य तद्धिते ञ्णिति परे यकारात् प्रागैकारो वा स्यात्। न्यङ्कोरिदं नैयङ्कवम्। न्याङ्कवम्।

१५८४ नञः क्षेत्रज्ञेश्वरकुशलचपलनिपुणशुचेः ॥७।४।२३॥ नञः परेषां क्षेत्रज्ञ ईश्वर कुशल चपल निपुण शुचि इत्येतेषां प्रकृत्यवयवानां ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् आदेस्तु नञो वा। अक्षेत्रज्ञस्येदं अक्षैत्रज्ञम्, आक्षैत्रज्ञम्, एवमनैश्वरम्, आनैश्वरम्। अकौशलम्, आकौशलम्। अचापलम्, आचापलम्। अनैपुणम्। आनैपुणम्। न शुचिः अशुचिः तस्येदम् अशौचम् आशौचम्।

१५८५ उक्षणो लुक् ॥७।४।५६॥ उक्षन्शब्दस्यानपत्येऽणि अन्त्यस्वरादेर्लुक् स्यात्। उक्षण इदमौक्षं पदम्। अनपत्य इत्येव। उक्षणोऽपत्यमौक्षणः।

१५८६ ब्रह्मणः ॥७।४।५७॥ ब्रह्मन्शब्दस्यानपत्येऽणि अन्त्यस्वरादेर्लुक् स्यात्। ब्रह्मण इदं ब्राह्ममस्त्रम्।

१५८७ जातौ ॥७।४।५८॥ ब्रह्मन्शब्दस्य जातावभिधेयायामनपत्येऽणि अन्त्यस्वरादेर्लुक् स्यात्। ब्रह्मण इयं ब्राह्मी औषधिः। पूर्वेण सिद्धे जातावनपत्यएवेति नियमार्थं वचनम्।

१५८८ हलसीरादिकण् ॥६।३।१६१॥ आभ्यां षष्ठ्यन्ताभ्यामिदमित्यर्थे इकण् प्रत्ययः स्यात्। अणोऽपवादः। हालिकम्। सैरिकम्।

१५८९ समिध आधाने टेन्यण् ॥६।३।१६२॥ आधीयते येन समित्तदाधानम्। समिध् इत्येतस्मात्तस्येदमित्यर्थे टेन्यण् प्रत्ययः स्यात् तच्चेदिदमाधानं भवति। अणोऽपवादः। टकारो ङ्यर्थः। समिधामाधानो मन्त्रः सामिधेन्यो मन्त्रः। सामिधेनी ऋक्। सामिधेनीरन्वाह। पञ्चदश सामिधेन्यः।

१५९० विवाहे द्वन्द्वादकल् ॥ ६।३।१६३ ॥ द्वन्द्वात्तस्येदमित्यर्थे विवाहेऽभिधेयेऽकल् प्रत्ययः स्यात्। अणोऽपवादः। अत्रिभरद्वाजानां विवाहोऽत्रिभरद्वाजिका। वसिष्ठकश्यपिका। भृग्वङ्गिरसिका। कुत्सकुशिकिका। गर्गभार्गविका। कुरुवृष्णिका। कुरुकाशिका। ककारः स्त्रीत्वार्थः।

१५९१ **अदेवासुरादिभ्यो वैरे** ॥६।३।१६४॥ द्वन्द्वात् षष्ठ्यन्ताद्देवासुरादिवर्जितादिदमर्थे वैरेऽकल् प्रत्ययः स्यात् । अणोऽपवादः । ईयं तु परत्वाद् बाधते । बाभ्रवशालङ्कायनानामिदं वैरं बाभ्रवशालङ्कायनिका । काकोलूकस्येदं वैरं काकोलूकिका । श्वावराहिका । श्वशृगालिका । अहिनकुलिका । अदेवासुरादिभ्य इति किम् । दैवासुरम् । राक्षोऽसुरम् । देवासुरादयः प्रयोगगम्याः ।

१५९२ **नटान्नृत्ते ञ्यः** ॥६।३।१६५॥ नटशब्दात्तस्येदमित्यर्थे नृत्ते ञ्यः प्रत्ययः स्यात् । नटानामिदं नृत्तं नाट्यम् । नृत्त इति किम् । नटानामिदं गृहम् ।

१५९३ **छन्दोगौक्थिकयाज्ञिकबह्वृचाच्च धर्माम्नायसंघे** ॥६।३।१६६॥ छन्दोगादिभ्यश्चरणेभ्यो नटशब्दाच्च तस्येदमित्यर्थे धर्मादौ ञ्यः प्रत्ययः स्यात् । छन्दोगादिभ्यश्चरणाकञो नटादणोऽपवादः । छन्दोगानां धर्म आम्नायः संघो वा छान्दोग्यम् । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम् । नाट्यम् । धर्मादिष्विति किम् । छन्दोगानां गृहं छान्दोगम् ।

१५९४ **आथर्वणिकादणिकलुक् च** ॥ ६।३।१६७ ॥ आथर्वणिकशब्दात्तस्येदमित्यर्थे धर्मादावण् स्यादिकलोपश्चास्य भवति । अथर्वणा प्रोक्तं वेदं वेत्त्यधीते वा आथर्वणिकः । न्यायादित्वादिकण् । अत एव निपातनाद् गणपाठसामर्थ्याद्वा प्रोक्ताल्लुप् न भवति । आथर्वणिकानां धर्म आम्नायः संघो वा आथर्वणः । चरणादकञि प्राप्ते वचनम् ।

१५९५ **चरणादकञ्** ॥६।३।१६८॥ चरणशब्दो वेदशाखावचनस्तद्योगात्तदध्यायिषु वर्तते । चरणवाचिनस्तस्येदमित्यर्थे धर्मादावकञ् प्रत्ययः स्यात् । अणोऽपवादः । ईयं तु परत्वाद् बाधते । कठानां धर्म आम्नायः संघो वा काठकः चरकाणां चारकः । कलापानां कालापकः । पैप्पलादानां पैप्पलादकः । मौदानां मौदकः । आर्चाभिनामार्चाभकः । वाजसनेयिनां वाजसनेयकः ।

१५९६ **गोत्राददण्डमाणवाशिष्ये** ॥६।३।१६९॥ गोत्रवाचिनस्तस्येदमित्यर्थे दण्डमाणवशिष्यवर्जितेऽकञ् प्रत्ययः स्यात् । अणोऽपवादः । औपगवस्येदमौपगवकम् । कापटवकं दाक्षकम् । प्लाक्षकम् । गार्गकम् । गार्ग्यायणकम् ।

ग्लौचुकायनकम् । अदण्डमाणवशिष्ये इति किम् । काण्व्यस्येमे काण्वा दण्डमाणवाः शिष्या वा । एवं गौकक्षाः । शकलादेर्यञ इत्यञ् । दाक्षेरिमे दाक्षाः । प्लाक्षाः । माहकाः । वृद्धेञ इत्यञ् । दण्डप्रधाना माणवा दण्डमाणवाः आश्रमिणां रक्षापरिचरणार्थाः । शिष्या अध्ययनार्था अन्तेवासिनः ।

१५९७ **रैवतिकादेरीयः** ॥ ६।३।१७०॥ रैवतिकादेर्गोत्रवाचिनस्तस्येदमित्यर्थे ईयः प्रत्ययः स्यात् । अकञादेरपवादः । रैवतिकस्येदं रैवतिकीयम् शकटम् । रैवतिकीयः संघादिः । रैवतिकीया दण्डमाणवशिष्याः । गौरग्रीवीयं शकटम् । गौरग्रीवीयः संघादिः । गौरग्रीवीया दण्डमाणवशिष्याः ।

१५९८ **कौपिञ्जलहास्तिपदादण्** ॥ ६।३।१७१ ॥ आभ्यां गोत्रवाचिभ्यां तस्येदमित्यर्थेऽण् प्रत्ययः स्यात् । अकञादेरपवादः । कुपिञ्जलस्यापत्यं कौपिञ्जलः । हस्तिपादस्यापत्यं हास्तिपदः । अतो निपातनादेवाण् पादस्य च पद्भावः । तयोरिदं कौपिञ्जलम् , हास्तिपदं शकटम् । कौपिञ्जलाः हास्तिपदाः दण्डमाणवशिष्याः । अथाण्ग्रहणं किमर्थम् । यथाविहितमित्येव ह्यण् सिद्धः । न चेयः प्राप्नोति । तदभीष्टौ हि रैवतिकादावेवैतौ पठ्येयाताम् । असत्यण्ग्रहणे दण्डमाणवकशिष्येष्वकञर्थमेतत् स्यात् । तत्र ह्यकञ् प्रतिषिद्ध इति । णित्वं ङ्यर्थं पुंवद्भावार्थं च । कौपिञ्जलीस्थूणः । हास्तिपदीस्थूणः ।

१५९९ **संघघोषाङ्कलक्षणेऽञ्यञिञः** ॥६।३।१७२॥ अञन्तात् यञन्तात् इञन्ताच्च गोत्रवाचिनस्तस्येदमित्यर्थे संघादावण् प्रत्ययः स्यात् । अकञोऽपवादः । अञ्–विदानामयं वैदः संघो घोषोऽङ्को वा । वैदं लक्षणम् । यञ्—दाक्षीणामयं दाक्षः संघो घोषोऽङ्को वा । दाक्षं लक्षणम् । संघादिष्विति किम् । विदानां गृहम् । अञ्यञिञ इति किम् । औपगवकः संघादिः । गोत्रादित्येव । सौतंगमीयः संघादिः । अथाङ्कलक्षणयोः को विशेषः । लक्षणं लक्ष्यस्यैव स्वम् । यथा शिखादि । अङ्कस्तु स्वामिविशेषविज्ञापकः । स्वस्तिकादिर्गवादिस्थो न गवादीनामेव स्वं भवति ।

१६०० शाकलादकञ् च ॥ ६।३।१७३ ॥ शाकलशब्दात् तस्येदमित्यर्थे संघादावण् अकञ् च प्रत्ययः स्यात् । शाकल्येन प्रोक्तं वेदं विदन्त्यधीयते वा शाकलाः । तेषां संघो घोषोऽङ्को वा शाकलः । शाकलकः । शाकलं शाकलकं लक्षणम् ।

१६०१ गृहेऽग्नीधो रण् घश्च ॥ ६।३।१७४ ॥ अग्नीध् ऋत्विग्विशेषः । तस्मात् तस्येदमित्यर्थे गृहे रण् प्रत्ययः स्यात् अन्तस्य च तृतीयबाधनार्थं धादेशः । अग्नीध इदं गृहमाग्नीध्रम् ।

१६०२ रथात् सादेश्च वोढृङ्गे ॥ ६।३।१७५ ॥ नियममूत्रमेतत् । रथात् केवलात् सपूर्वाच्च षष्ठ्यन्तादिदमर्थे यः प्रत्ययः स्यात् रथस्य वोढरि अङ्गे एव च । रथस्यायं वोढा रथ्योऽश्वः । रथस्येदमङ्गं रथ्यं चक्रम् । रथ्यं-युगम् । सादि–द्वयो रथयोर्वोढा द्विरथः । त्रिरथः । द्विगोरनपत्ये यस्वरे इत्यादिना यलुप् । अन्ये तु स्वरादेव लुपमिच्छन्ति, तन्मते द्विरथ्यः । परमरथस्येदं परमरथ्यम् । उत्तमरथ्यम् । आश्वरथं चक्रम् । वोढृङ्ग एवेति नियमात् अन्यत्र वाक्यमेव न प्रत्ययः । रथस्येदं स्थानम् । अश्वरथस्य स्वामी ।

१६०३ यः ॥६।३।१७६॥ रथात् केवलात् सादेश्च षष्ठ्यन्तादिदमर्थे यः प्रत्ययः स्यात् । अणाद्यपवादः । रथस्यायं वोढा रथ्यः । द्वयो रथयोर्वोढा द्विरथः । रथ्यम् । परमरथ्यम् । काष्ठरथ्यं चक्रम् ।

१६०४ पत्रपूर्वादञ् ॥६।३।१७७॥ पत्रं वाहनम् । तत्पूर्वात् रथशब्दात् षष्ठ्यन्तादिदमर्थेऽञ् प्रत्ययः स्यात् । यापवादः । अश्वरथस्येदमाश्वरथं चक्रम् । आश्वरथं युगम् । औष्ट्ररथम् । रासभरथम् ।

१६०५ वाहनात् ॥६।३।१७८॥ वाहनवाचिनस्तस्येदमित्यर्थेऽञ् प्रत्ययः स्यात् । अणादेरपवादः । उष्ट्रस्यायमौष्ट्रः । रासभः । हास्तो रथः ।

१६०६ वाह्यपथ्युपकरणे ॥६।३।१७९॥ नियममूत्रमिदम् । वाहनाद्योऽयं प्रत्यय उक्तः स वाह्ये पथि उपकरणे एव चेदमर्थे स्यान्नान्यत्र । अश्वस्यायमाश्वो रथः पन्था वा । आश्वं पल्ययनम् । आश्वी कशा । वाह्यपथ्युपकरण एवेति नियमादन्यत्र वाक्यमेव न प्रत्ययः । अश्वानां घासः ।

१६०७ वहेस्तुरिश्चादिः ॥६।३।१८०॥ वहेः परो यस्तृचस्तुनो वा तृशब्दस्तदन्तान्नान्नस्तस्येदमित्यर्थेऽञ् प्रत्ययस्तृशब्दस्य चादिरिकारो भवति । संवोढुः सारथेरिदं सांवहित्रम् ।

१६०८ तेन प्रोक्ते ॥ ६।३।१८१ ॥ प्रकर्षेण व्याख्यातमध्यापितं वा प्रोक्तम् न तु कृतम् । तत्र कृत इत्येव गतत्वात् । तस्मिन्नर्थे तेनेति तृतीयान्तान्नाम्नो यथाविहितं प्रत्ययाः स्युः । भद्रबाहुना प्रोक्तानि भाद्रबाहवानि उत्तराध्ययनानि । गणधरप्रत्येकबुद्धादिभिः कृतानि तेन व्याख्यातानीत्यर्थः । याज्ञवल्क्येन याज्ञवल्क्यानि ब्राह्मणानि । पाणिनेन पाणिनीयम् । आपिशलिना आपिशलम् । काशकृत्स्निना काशकृत्स्नम् । उशनसा औशनसम् । बृहस्पतिना बार्हस्पत्यम् ।

१६०९ कलापिकुथुमितैतलिजाजलिलाङ्गलिशिखण्डिशिलालिसब्रह्मचारिपीठसर्पिसूकरसद्मसुपर्वणः ॥ ७।४।१२ ॥ कलाप्यादीनां नकारान्तानामपदसंज्ञकानां तद्धिते परेऽन्त्यस्वरादेर्लुक् स्यात् । अत्र ये इञन्तास्तेषामनपत्य इति शिखण्डिपीठसर्पिणोरपत्येऽपि संयोगादिन इति सूकरसद्मसुपर्वणोस्त्वणि इति निषेधे प्राप्ते लुग्वचनम् । कलापिना प्रोक्तं वेदमधीयते कालापाः । कौथुमाः । तैतलि जाजलि लाङ्गलि चाचार्याः । तत्कृतो ग्रन्थोऽप्युपचारात् तच्छब्देनोच्यते । तदधीयते तैतलाः । जाजलाः । लाङ्गलाः । शिखंडिन इमेऽपत्यानि वा शैखंडाः । शिलालिनः शैलालाः । सब्रह्मचारिणः साब्रह्मचाराः । पीठसर्पिणः पैठसर्पाः । सूकरसद्मनः सौकरसद्माः । सुपर्वणः सौपर्वाः ।

१६१० मौदादिभ्यः ॥ ६।३।१८२ ॥ मौद इत्येवमादिभ्यस्तेन प्रोक्ते यथाविहितं प्रत्ययः स्यात् । स चापवादैर्बाधितोऽणेव । अपवादस्यैव भावे वचनानर्थक्यात् । मौदेन प्रोक्तं वेदं विदन्त्यधीयते वा मौदाः । वेदेन्ब्राह्मणमत्रैवेति नियमादत्र वेदित्रध्येतृविषय एवाण् । एवं पैप्पलादाः । जाजलाः । माथुरेण प्रोक्ता माथुरी वृत्तिः । सौलभानि ब्राह्मणानि । मौदादयः प्रयोगगम्याः ।

१६११ कठादिभ्यो वेदे लुप् ॥ ६।३।१८३ ॥ कठ इत्येवमादिभ्यः

प्रोक्ते यः प्रत्ययस्तस्य लुप् स्यात् स चेत्प्रोक्तो वेदः भवति । कठेन प्रोक्तं वेदं विदन्त्यधीयते वा कठाः । चरकाः । वेदेन्ब्राह्मणमिति नियमात् वेदित्रध्येत्रोरेव विषये प्रत्ययस्य लुप् । वेद इति किम् । चरकेण प्रोक्ताश्चारकाः श्लोकाः । चरको वैशम्पायनः । कठादयः प्रयोगगम्याः ।

१६१२ **तित्तिरिवरतन्तुखण्डिकोखादीयण्** ॥६।३।१८४॥ तित्तिरि वरतन्तु खण्डिक उख इत्येतेभ्यस्तेन प्रोक्तेऽर्थे ईयण् प्रत्ययः स्यात् स चेत्प्रोक्तो वेदो भवति । अणोऽपवादः। तित्तिरिणा प्रोक्तं वेदं विदन्त्यधीयते वा तैत्तिरीयाः। वारतन्तवीयाः । खाण्डिकीयाः। औखीयाः । वेदे इत्येव । तित्तिरिणा प्रोक्तास्तैत्तिराः श्लोकाः । अत्रापि वेदेन्ब्राह्मणमत्रैवेत्युपतिष्ठते ।

१६१३ **छगलिनो णेयिन्** ॥६।३।१८५॥ छगलिन्शब्दात् तेन प्रोक्ते वेदे णेयिन् प्रत्ययः स्यात् । अणोऽपवादः। छगलिना प्रोक्तं वेदं विदन्त्यधीयते वा छागलेयिनः ।

१६१४ **शौनकादिभ्यो णिन्** ॥६।३।१८६॥ शौनक इत्येवमादिभ्यस्तेन प्रोक्ते वेदे णिन् प्रत्ययः स्यात् । अणाद्यपवादः । शौनकेन प्रोक्तं वेदं विदन्त्यधीयते वा शौनकिनः । शाङ्गरविणः । वाजसनेयिनः । वेद इत्येव । शौनकीया शिक्षा । शौनकादिराकृतिगणः । तेन भालुविना प्रोक्तं ब्राह्मणं विदन्त्यधीयते वा भालुविनः, शाट्यायनिनः ऐतरेयिणः इत्यादि सिद्धं भवति । ब्राह्मणमपि वेदएव । मन्त्रब्राह्मणं हि वेदः ।

१६१५ **पुराणे कल्पे** ॥ ६।३।१८७ ॥ तेनेति तृतीयान्तात् प्रोक्तेऽर्थे णिन् प्रत्ययः स्यात् स चेत्प्रोक्तः पुराणः कल्पो भवति । अणाद्यपवादः । पिङ्गेन प्रोक्तः कल्पः पुराणः पैङ्गी कल्पः । तृणपिङ्गेन तार्णपिङ्गी कल्पः । अरुणपराजेन आरुणपराजी कल्पः । येऽपि पैङ्गिनं कल्पं विदन्त्यधीयते वा तेऽपि पैङ्गिनः । आरुणपराजिनः । प्रोक्ताद्धि लुबुक्तैव । पुराण इति किम् । आश्मरथः कल्पः । आश्मरथ्येन प्रोक्तः कल्प उत्तरकल्पेभ्य आरातीयः श्रूयते ।

१६१६ **काश्यपकौशिकाढ्येदवच्च** ॥ ६।३।१८८ ॥ आभ्यां तेन प्रोक्ते पुराणे कल्पे णिन् प्रत्ययः स्यात् वेदवच्चास्मिन् कार्यम् । ईयापवादः । काश्यपेन

प्रोक्तं पुराणं कल्पं विदन्त्यधीयते वा काश्यपिनः । कौशिकेन कौशिकिनः । काश्यपिनां धर्म आम्नायः संघो वा काश्यपकः। कौशिकिनां कौशिकिकः। वेदवच्चेत्यतिदेशात् वेदेब्राह्मणमत्रैवेति नियमाद् वेदित्रध्येतृविषयता चरणादकञ् इत्यकञ् च भवति । कल्प इत्येव । काश्यपीया संहिता । पुराण इत्येव । इदानींतनेन गोत्रकाश्यपेन प्रोक्तः कल्पः काश्यपीयः । वेदवच्चेति अतिदेशार्थं वचनम् ।

१६१८ **शिलालिपाराशर्यान्नटभिक्षुसूत्रे** ॥ ६।३।१८९ ॥ शिलालिन् पाराशर्य इत्येताभ्यां तेन प्रोक्तते यथासंख्यं नटसूत्रे भिक्षुसूत्रे च णिन् प्रत्ययः स्यात् वेदवच्चास्मिन् कार्यं भवति । अणञपवादः । नटानामध्ययनं नटसूत्रम् । भिक्षूणामध्ययनं भिक्षुसूत्रम् । शिलालिना प्रोक्तं नटसूत्रं विदन्त्यधीयते वा शैलालिनो नटाः । पाराशर्येण प्रोक्तं भिक्षुसूत्रं विदन्त्यधीयते वा पाराशरिणो भिक्षवः । शैलालिनां धर्म आम्नायः संघो वा शैलालकम् । पाराशरकम् । अतिदेशाद् वेदित्रध्येतृविषयता चरणादकञ् च भवति । नटभिक्षुसूत्र इति किम् । शैलालम् । पाराशरम् ।

१६१९ **कृशाश्वकर्मन्दादिन्** ॥६।३।१९०॥ आभ्यां तेन प्रोक्ते यथासंख्यं नटसूत्रे भिक्षुसूत्रे च इन् प्रत्ययः स्यात् वेदवच्चास्मिन् कार्यम् । अणोऽपवादः । कृशाश्वेन प्रोक्तं नटसूत्रं विदन्त्यधीयते वा कृशाश्विनो नटाः । कर्मन्देन प्रोक्तं भिक्षुसूत्रं विदन्त्यधीयते वा कर्मन्दिनो भिक्षवः । अतिदेशादकञ् च । कार्शाश्वकम् । कार्मन्दकम् । नटसूत्रे कापिलेयशब्दादपीच्छन्त्येके । कापिलेयिनो नटाः । कापिलेयक आम्नायः ।

१६२० **उपज्ञाते** ॥६।३।१९१॥ तेनेति वर्तते । प्रथमत उपदेशेन विना ज्ञातमुपज्ञातं प्रथमतः कृतं वोपज्ञातम् । तस्मिन्नर्थे तृतीयान्ताद्यथाविहितं प्रत्ययः स्यात् । पाणिनेन पाणिनिना वोपज्ञातं पाणिनीयम् [1]अकालकं व्याकरणम् । काशकृत्स्नं गुरुलाघवम् ।

---

१ न विद्यते कालः कालाधिकारो यत्र । पाणिनेः पूर्वं अचार्याः कालपरिभाषां कुर्वन्तिस्म आन्याय्यादुत्थानादान्याय्याच्च संवेशनादेषोऽद्यतनः कालः। अन्ये पुनराहुः उभयतोऽर्द्धरात्रं वेति । तत्पाणिनिः प्रत्याचष्टे । तदशिष्यं-

१६२१ कृते ॥ ६।३।१९२ ॥ तेनेति तृतीयान्तात् कृते उत्पादितेऽर्थे यथाविहितमणादयः स्युः । शिवेन कृतो ग्रन्थः शैवः । वाररुचानि वाक्यानि । जलूकेन जलूकया वा कृता जालूकाः श्लोकाः । जालुकिना जालुकाः । अत्र 'वृद्धेञ्' इत्यञ् । सिद्धसेनीयः स्तवः । इष्टकाभिः कृतः प्रासादः ऐष्टकः । नारदेन कृतं गीतं नारदीयम् । मनसा कृता मानसी कन्या । तृष्णा कृतः प्रासादः इत्यादावनभिधानान्न भवति । कृते ग्रन्थे एवेच्छन्त्यन्ये ।

१६२२ **नाम्नि माक्षिकादिभ्यः** ॥६।३।१९३॥ मक्षिकादिभ्यस्तृतीयान्तेभ्यः कृतेऽर्थे यथाविहितं प्रत्ययः स्यान्नाम्नि । मक्षिकाभिः कृतं माक्षिकं मधु । सरयाभिः सारयम् । गर्मुद्भिर्गार्मुतम् । नर्मुकाभिर्नार्मुकम् । नाम्नीति किम् । मक्षिकाभिः कृतं शकृत् । वातपैः कृतं वातपमित्यत्राणन्तं नाम नेयान्तमितीयो न भवति । मक्षिकादयः प्रयोगगम्याः ।

१६२३ **कुलालादेरकञ्** ॥६।३।१९४॥ कुलालादिभ्यस्तेन कृतेऽर्थेऽकञ् प्रत्ययः स्यान्नाम्नि । कुलालेन कृतं कौलालकम् । वारुटकम् । नाम्नीत्यभिधेयनियमार्थम् । तेन घटघटीशरावोदञ्चनाद्येव भाण्डं कौलालकं न यत्किञ्चित् कुलालकृतम् । शूर्पपिटकपटलिकापिच्छिकाद्येव भाण्डं वारुटकं नान्यत् । एवमन्यत्राप्यभिधेयनियमः ।

१६२४ **सर्वचर्मण ईनेनञौ** ॥ ६।३।१९५ ॥ सर्वचर्मन्शब्दात् तेन कृते ईन ईनञ् इत्येतौ प्रत्ययौ स्याताम् । नाम्नीत्यधिकारादभिधेयनियमः । सर्वश्चर्मणा कृतः सर्वचर्मीणः, सार्वचर्मीणः। अत्र सर्वशब्दस्य कृतापेक्षस्य चर्मशब्देनायोगिनापि नाम नाम्नेत्यादिना समासः ।

१६२५ **उरसो याणौ** ॥ ६।३।१९६ ॥ उरस्शब्दात् तेन कृते य अण् इत्येतौ प्रत्ययौ स्याताम् नाम्नि । उरसा कृतः उरस्यः, औरस्यः ।

१६२६ **छन्दस्यः** ॥६।३।१९७॥ छन्दस्शब्दात् तेन कृते यः प्रत्ययो

लोकतोऽर्थगतेस्तदेवं कालपरिभाषारहितमकालकं व्याकरणं पाणिनिना प्रथमं ज्ञातं स्वयमेव वोपदेशेन विना ज्ञातं प्रथमतः कृतं वेत्यर्थः ।

निपात्यते नाम्नि । छन्दसा इच्छया कृतः छन्दस्यः । न तु प्रवचनेन गायत्र्यादिना वा । नाम्नीत्यधिकारादभिधेयव्यवस्था । निपातनात् क्वचिदन्यत्रापि भवति । ॐ श्रावयेति चतुरक्षरम् अस्तु श्रौषट् इति चतुरक्षरम् ये यजामहे इति पञ्चाक्षरम् यजेति त्र्यक्षरं त्र्यक्षरो वषट्कारः एष वै सप्तदशाक्षरश्छन्दस्यो यज्ञमनुविहितः । अत्र स्वार्थे यः । यथानुष्टुबादिरक्षरसमूहश्छन्दस्तथैषां सप्तदशानामक्षराणां समूहश्छन्दस्य उच्यते ।

१६२७ **अमोऽधिकृत्य ग्रन्थे** ॥६।३।१९८॥ कृत इति वर्तते अम इति द्वितीयान्तादधिकृत्य कृते ग्रन्थेऽर्थे यथाविहितं प्रत्ययः स्यात् । अधिकृत्य प्रस्तुत्य उद्दिश्येत्यर्थः । तदपेक्षा द्वितीया । सुभद्रामधिकृत्य कृतो ग्रन्थः सौभद्रः । भद्रां भाद्रः । सुतारां सौतारः । भीमरथामधिकृत्य कृताख्यायिका भैमरथी । ग्रन्थ इति किम् । सुभद्रामधिकृत्य कृतः प्रासादः । कथं वासवदत्तामधिकृत्य कृताख्यायिका वासवदत्ता उर्वशी सुमनोहरा बलिबन्धनं सीताहरणमिति? उपचाराद् ग्रन्थे तात्स्थ्यं भविष्यति ।

१६२८ **ज्योतिषम्** ॥६।३।१९९॥ ज्योतिःशब्दादमोऽधिकृत्य कृते ग्रन्थेऽण् प्रत्ययो वृद्धत्वाभावश्च निपात्यते । ज्योतींष्यधिकृत्य कृतो ग्रन्थो ज्योतिषम् ।

१६२९ **शिशुक्रन्दादिभ्य ईयः** ॥६।३।२००॥ शिशुक्रन्दादिभ्यो द्वितीयान्तेभ्योऽधिकृत्य कृते ग्रन्थे ईयः प्रत्ययः स्यात् । शिशुक्रन्दमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः । यमसभीयः । इन्द्रजननीयः । प्रद्युम्नप्रत्यागमनीयः । प्रद्युम्नोदयनीयः । सीताहरणीयः । सीतान्वेषणीयः । शिशुक्रन्दादयः प्रयोगतोऽनुसर्तव्याः । शिशुक्रन्दशब्दात् केचिन्नेच्छन्ति । शैशुक्रन्दम् ।

१६३० **द्वन्द्वात् प्रायः** ॥ ६।३।२०१॥ द्वन्द्वात् समासादमोऽधिकृत्य कृते ग्रन्थे प्राय ईयः स्यात् । अणोऽपवादः । वाक्यपदीयम् । द्रव्यपर्यायीयम् । शब्दार्थसंबन्धीयम् । श्येनकपोतीयम् । प्राय इति किम् । दैवासुरम् । राक्षोसुरम् ।

१६३१ **अभिनिष्क्रामति द्वारे** ॥६।३।२०२॥ द्वितीयान्तादभिनिष्क्रामति–अभिनिर्गच्छत्यर्थे यथाविहितं प्रत्ययः स्यात् तदभिनिष्क्रामद् द्वारं चेत् ।

सुघ्नमभिनिष्क्रामति सौघ्नं कन्यकुब्जद्वारम् । माथुरम् । नादेयम् । राष्ट्रियं द्वारम् । करणभूतस्यापि द्वारस्याभिनिष्क्रमणक्रियायां स्वातंत्र्यविवक्षा । यथा साध्वसिश्छिनत्तीति । रचनाविहिर्भावे वा निष्क्रमिः । यथा गृहकोणो निष्क्रान्तः द्वार इति किम् । सुघ्नमभिनिष्क्रामति चैत्रः ।

१६३२ **गच्छति पथि दूते** ॥ ६।३।२०३ ॥ द्वितीयान्ताद् गच्छत्यर्थे यथाविहितं प्रत्ययः स्यात् योऽसौ गच्छति स चेत् पन्था दूतो वा भवति । सुघ्नं गच्छति सौघ्नः पन्था दूतो वा । माथुरः । नादेयः । राष्ट्रियः । पथिस्थेषु गच्छत्सु तद्धेतुः पन्था अभिगच्छतीत्युच्यते । सुघ्नादिप्राप्तिर्वा पथो गमनम् । पथि दूत इति किम् । सुघ्नं गच्छति साधुः । पाटलिपुत्रं गच्छति नौः पण्यं वणिग्वा ।

१६३३ **भजति** ॥ ६।३।२०४ ॥ द्वितीयान्ताद् भजत्यर्थे यथाविहितं प्रत्ययः स्यात् । सुघ्नं भजति सौघ्नः । माथुरः । नादेयः । राष्ट्रियः ।

१६३४ **महाराजादिकण्** ॥६।३।२०५॥ महाराजशब्दाद् द्वितीयान्ताद् भजत्यर्थे इकण् प्रत्ययः स्यात् । महाराजं भजति माहाराजिकः ।

१६३५ **अचित्ताददेशकालात्** ॥ ६।३।२०६॥ देशकालवर्जितं यदचित्तमचेतनं तद्वाचिनो द्वितीयान्तात् भजत्यर्थे इकण् प्रत्ययः स्यात् । अणादेर्बाधकः । अपूपान् भजति आपूपिकः । शाष्कुलिकः । मौदकिकः । पायसिकः । अचित्तादिति किम् । दैवदत्तः । अदेशकालादिति किम् । सौघ्नः । हैमनः ।

१६३६ **वासुदेवार्जुनादकः** ॥ ६।३।२०७ ॥ आभ्यां द्वितीयान्ताभ्यां भजत्यर्थेऽकः प्रत्ययः स्यात् । ईयाकञोरपवादः । वासुदेवं भजति वासुदेवकः । यदा वासुदेवशब्दः संज्ञाशब्दोऽक्षत्रियवचनस्तदोत्तरेणाकञ् न प्राप्नोति किंतु दोरीय इति ईयः स्यादिति तद्ग्रहणम् । अर्जुनं भजति अर्जुनकः । अर्जुनशब्दः क्षत्रियवाचीत्युत्तरेणाकञ् स्यादिति केनैव सिद्धेऽकविधानं वासुदेवीं भजति वासुदेवकः अर्जुनीमर्जुनक इत्येवमर्थम् ।

१६३७ **गोत्रक्षत्रियेभ्योऽकञ् प्रायः** ॥ ६।३।२०८॥ गोत्रवाचिभ्यः

क्षत्रियवाचिभ्यश्च द्वितीयान्तेभ्यो भजत्यर्थेऽकञ् प्रत्ययः स्यात् प्रायः । अणाद्यपवादः । ग्लुचुकायनिं भजति ग्लौचुकायनकः । औपमवकः । दाक्षकः । गार्गकः गाग्र्यायणकः । क्षत्रिय–नाकुलकः । साहदेवकः । दौर्योधनकः । दौःशासनकः । बहुवचनं क्षत्रियविशेषपरिग्रहार्थम् । प्राय इति किम् । पणिनोऽपत्यं पाणिनः तं भजति पाणिनीयः । पौरवीयः ।

१६३७ **सरूपाद् द्रेः सर्वं राष्ट्रवत्** ॥६।३।२०९॥ 'राष्ट्रक्षत्रियात् सरूपाद् राजापत्ये द्रिरञ्' इति प्रस्तुत्य सरूपाद्यो द्रिः प्रत्यय उक्तस्तदन्तस्य द्वितीयान्तस्य भजतीत्यर्थे सर्वं प्रत्ययः प्रकृतिश्च राष्ट्रवत् भवति । राष्ट्रवाचिनी या प्रकृतिर्वृजि इत्यादिस्ततश्च यः प्रत्ययो 'वृजिमद्रादेशात् कः' इत्यादिना विहितस्तदुभयं वार्ज्य इत्येवमादेः सरूपस्य द्रिप्रत्ययान्तस्य भजतीत्यस्मिन् विषये स्यादित्यर्थः । वार्ज्यं वार्ज्यौ वृजीन् वा भजति वृजिकः । माद्रं माद्रौ मद्रान् वा भजति मद्रकः । अत्र कप्रत्ययः । पाण्ड्यं पाण्ड्यौ पाण्ड्न् वा भजति पाण्डवकः। आङ्गकः। वाङ्गकः । पाञ्चालकः । वैदेहकः। औदुम्बरकः। तैलखलकः । अत्र बहुविषयेभ्य इत्यकञ् । कौरवकः । कौरवः । यौगन्धरकः । यौगन्धरः । 'कुरुयुगन्धराद्वा' इति वाकञ् । ऐक्ष्वाकः । अत्र 'कोपान्त्याच्चाण्' इत्यण् । सरूपादिति किम् । पौरवीयम् । अत्र पुरुः राजा अनुखण्डो जनपद इति सारूप्यं नास्ति । अत एव पुरुमगध इत्यादौ द्विस्वरत्वेनैव सिद्धे पुरुग्रहणमसरूपार्थं कृतम् । द्रेरिति किम् । पञ्चालान् ब्राह्मणान् भजति पाञ्चालः । अत्र बहुविषयेभ्य इत्यकञ् न भवति । सर्वग्रहणं प्रकृत्यतिदेशार्थम् । ततश्च वार्ज्यमाद्रपाण्ड्यकौरव्याः प्रयोजयन्ति । अन्यत्र हि नास्ति विशेषः ।

१६३८ **टस्तुल्यदिशि** ॥६।३।२१०॥ ट इति सहार्थतृतीयान्तात् तुल्यदिश्यर्थे यथाविहितं प्रत्ययः स्यात् । तुल्या समाना साधारणा दिक् यस्य स तुल्यदिक् । एकदिगित्यर्थः । सुदाम्ना एकदिक् सौदामनी विद्युत् । सुदामा नाम पर्वतो यस्यां दिशि तस्यां विद्युत् । तेन सा सुदाम्ना सहैकदिगुच्यते । सूर्येण सहैकदिक् सौरी बलाका । हिमवता एकदिक् हैमवती गङ्गा । त्रिककुदा एकदिक् त्रैककुदी लंका ।

१६३९ **तसिः** ॥६।३।२११॥ ट इति तृतीयान्तात् तुल्यदिश्यर्थे तसिरित्ययं

प्रत्ययः स्यात् । पूर्वेण यथास्वमणादय एयणादयश्च विहिताः प्रत्ययान्तरमिदं सर्वप्रकृतिविषयं विधीयते । सुदाम्ना एकदिक् सुदामतः । सूर्यतः । हिमवत्तः । त्रिककुत्तः । पीलुमूलतः । पार्श्वतः । पृष्ठतः । इकारो वत्तस्यामित्यत्र विशेषणार्थः ।

१६४० यश्चोरसः ॥ ६।३।२१२ ॥ उरस् इत्येतस्मात् तृतीयान्तात् तुल्यदिश्यर्थे यः प्रत्ययश्चकारात्तसिश्च स्याताम् । अणोऽपवादः । उरसा एकदिक् उरस्यः, उरस्तः ।

१६४१ सेर्निवासादस्य ॥६।३।२१३॥ सेरिति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययः स्यात् यत्तत् प्रथमान्तं स चेन्निवासः । निवसन्त्यस्मिन्निति निवासो देश उच्यते । सुघ्नो निवासोऽस्य सौघ्नः । माथुरः । नादेयः । राष्ट्रियः ।

१६४२ आभिजनात् ॥६।३।२१४॥ सेर्निवासादस्येति वर्तते । अभिजनाः पूर्वबान्धवाः तेषामयमाभिजनः । सेः प्रथमान्तादाभिजनान्निवासादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययः स्यात् । सुघ्नोऽस्याभिजनो निवासः सौघ्नः । माथुरः । नादेयः । राष्ट्रियः ।

१६४३ शण्डिकादेर्ण्यः ॥६।३।२१५॥ शण्डिक इत्येवमादिभ्यः प्रथमान्तेभ्य आभिजननिवासवाचिभ्योऽस्येत्यस्मिन्नर्थे ण्यः प्रत्ययः स्यात् । अणाद्यपवादः । शण्डिक आभिजनो निवासोऽस्य शाण्डिक्यः । कौचवार्यः ।

१६४४ सिन्ध्वादेरञ् ॥६।३।२१६॥ सिन्ध्वादिभ्यः प्रथमान्तेभ्य आभिजननिवासवाचिभ्योऽस्येत्यस्मिन्नर्थेऽञ् प्रत्ययः स्यात् । सिन्धुराभिजनो निवासोऽस्य सैन्धवः । वार्णवः ।

१६४५ सलातुरादीयण् ॥६।३।२१७॥ सलातुरशब्दात् प्रथमान्तादाभिजननिवासवाचिनोऽस्येत्यस्मिन्नर्थे ईयण् प्रत्ययः स्यात् । सलातुर आभिजनो निवासोऽस्य सालातुरीयः पाणिनिः ।

१६४६ तूदीवर्मत्या एयण् ॥६।३।२१८॥ तूदीवर्मतीशब्दाभ्यां प्रथमान्ताभ्यामाभिजननिवासवाचिभ्यामस्येत्यर्थे एयण् प्रत्ययः स्यात् । तूदी आभिजनो निवासोऽस्य तौदेयः । वार्मतेयः ।

१६४७ **गिरेरीयोऽस्त्राजीवे** ॥६।३।२१९॥ गिरिर्य आभिजनो निवासस्तदभिधायिनः प्रथमान्तादस्येति षष्ठ्यर्थे ईयः प्रत्ययः स्यात् अस्त्राजीवे—अस्त्रमाजीवो जीविका यस्य तस्मिन्नायुधजीविन्यभिधेय इत्यर्थः। हृद्गोलः पर्वत आभिजनो निवासोऽस्यास्त्राजीवस्य हृद्गोलीयः। एवं भोजकटीयः। रोहितगिरीयः। अन्धश्मीयः। गिरेरिति किम्। सांकाश्यकोऽस्त्राजीवः प्रस्थपुरेत्यादिनाकञ्। अस्त्राजीव इति किम्। ऋक्षोदः पर्वत आभिजनो निवासोऽस्य आर्क्षोदो ब्राह्मणः। पृथुः पर्वत आभिजनो निवासोऽस्य पार्थवः।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां तद्धित-
प्रकरणे शैषिकाः समाप्ताः।

॥ अथेकणधिकारः ॥

१६४८ **इकण्** ॥६।४।१॥ अणः पूर्णोऽवधिः। अधिकारोऽयमापादपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रापवादविषयं परिहृत्येकणित्यधिकृतं वेदितव्यम्।

१६४९ **तेन जितजयद्दीव्यत्खनत्सु** ॥६।४।२॥ तेनेति तृतीयान्ताज्जिते जयति दीव्यति खनति चार्थे इकण् प्रत्ययः स्यात्। अक्षैर्जितमाक्षिकम्। अक्षैर्जयति दीव्यति वा आक्षिकः। शालाकिकः। अभ्र्या खनति आभ्रिकः। अभ्री काष्ठमयी तीक्ष्णाग्रा। इह तेनेति करणे तृतीया वेदितव्या नान्यत्रानभिधानात्। तेन देवदत्तेन जितमित्यत्र न भवति। अभ्र्या खनन्नङ्गुल्या खनतीत्यत्र तु सत्यप्यङ्गुलेः करणत्वे मुख्यकरणभावोऽभ्र्या एव नाङ्गुलेरित्यङ्गुलिशब्दान्न भवति। यथा स्रुघ्नादागच्छन्वृक्षमूलादागत इति। जयदादिषु त्रिषु कालो न विवक्षितः। जिते तु विवक्षितः। बहुवचनं पृथगर्थताभिव्यक्त्यर्थम्।

१६५० **संस्कृते** ॥ ६।४।३ ॥ तेनेति तृतीयान्तात् संस्कृतेऽर्थे इकण् प्रत्ययः स्यात्। सत उत्कर्षाधानं संस्कारः। दध्ना संस्कृतं दाधिकम्। मारिचिकम्। शार्ङ्गवेरीकम्। उपाध्यायेन संस्कृतः औपाध्यायिकः शिष्यः। विद्यया संस्कृतो वैद्यिकः। योगविभाग उत्तरार्थः।

१६५१ **कुलत्थकोपान्त्यादण्** ॥६।४।४॥ कुलत्थशब्दात् ककारोपान्त्याच्च

शब्दरूपात्तेन संस्कृतेऽर्थे अण् प्रत्ययः स्यात् । इकणोऽपवादः । कुलत्थैः संस्कृतं कौलत्थम् । अन्ये तु कुलत्थशब्दात् सकाराक्रान्तथकारात् प्रत्ययं मन्यन्ते । कौलस्थः । कोपान्त्य-तित्तिडीकेन तित्तिडीकाभिर्वा संस्कृतं तैत्तिडीकम् । दर्दुरूकेण दार्दुरूकम् । मरण्डूकेन मारण्डूकम् । अन्ये तु कवर्गोपान्त्यादपीच्छन्ति । मौद्गम् । सारवम् ।

१६७२ **संसृष्टे** ॥६।४।५॥ तेनेति तृतीयान्तात् संसृष्टेऽर्थे इकण् प्रत्ययः स्यात् । मिश्रणमात्रं संसर्ग इति पूर्वोक्तात् संस्कृताद् भेदः । दध्ना संसृष्टं दाधिकम् । शार्ङ्गवेरिकम् । पैप्पलिकम् । वैपिका भिक्षा । आशुचिकमन्नम् ।

१६७३ **लवणादः** ॥६।४।६॥ लवणशब्दात् तेन संसृष्टे अकारः प्रत्ययः स्यात् । लवणेन संसृष्टो लवणः सूपः । लवणः शाकः । लवणा यवागूः । लवणशब्दो द्रव्यशब्दो गुणशब्दश्च । तत्र द्रव्यवाची लवणशब्दः प्रत्ययं प्रयोजयति न गुणवाची । गुणेन विश्लेषपूर्वकस्य संसर्गस्याभावात् ।

१६७४ **चूर्णमुद्गाभ्यामिनणौ** ॥६।४।७॥ आभ्यां तेन संसृष्टे यथासंख्यमिन् अण् इत्येतौ प्रत्ययौ स्याताम् । चूर्णैः संसृष्टाश्चूर्णिनोऽपूपाः । चूर्णिन्यो धानाः । मुद्गैः संसृष्टो मौद्ग ओदनः । दाधिक ओदनः ।

१६७५ **व्यंजनेभ्य उपसिक्ते** ॥ ६।४।८ ॥ व्यंजनवाचिनस्तृतीयान्तादुपसिक्तेऽर्थे इकण् प्रत्ययः स्यात् । सूपेन उपसिक्तः सौपिक ओदनः । दाधिक ओदनः । घार्तिकः सूपः । तैलिकं शाकम् । व्यंजनेभ्य इति किम् । उदकेन उपसिक्त ओदनः । व्यंजनशब्दो रूढ्या सूपादौ वर्तते । उपसिक्त इति किम् । सूपेन संसृष्टा स्थाली । उपसिक्तमिति यद्भोजनार्थमुपादीयते भोज्यादि तदुच्यते न स्थाल्यादि । उपसिक्तं संसृष्टमेव तत्र 'संसृष्टे' इत्येव सिद्धे नियमार्थं वचनम् । व्यंजनैः संसृष्टे उपसिक्तं एव उपसिक्ते च व्यंजनैरेव । बहुवचनं स्वरूपविधेर्निरासार्थम् ।

१६७६ **तरति** ॥६।४।९॥ तेनेति तृतीयान्तात् तरत्यर्थे इकण् प्रत्ययः स्यात् । उडुपेन तरति औडुपिकः । काण्डप्लविकः । विशारप्लकः । गौपुच्छिकः ।

१६७७ **नौद्विस्वरादिकः** ॥६।४।१०॥ नौशब्दाद् द्विस्वराच्च नान्नस्तृती-

यान्तात् तरत्यर्थे इकः प्रत्ययः स्यात् । नावा तरति नाविकः। नाविका । द्विस्वरघटिकः । प्लविकः । दृतिकः । वाहकः । वाहुका ।

१६५८ चरति ॥६।४।११॥ तेनेति तृतीयान्तात् चरत्यर्थे इकण् प्रत्ययः स्यात् । चरतिरिह गत्यर्थो भक्ष्यार्थश्च गृह्यते । हस्तिना चरति हास्तिकः । शाकटिकः । घाण्टिकः । आकषिकः । आकषः सुवर्णनिकषोपलः औषधपेषणपाषाणश्च । भक्ष्यर्थ–दध्ना चरति दाधिकः । शार्ङ्गवेरिकः ।

१६५९ पर्पादेरिकट् ॥ ६।४।१२ ॥ पर्प इत्येवमादिभ्यस्तृतीयान्तेभ्यश्चरत्यर्थे इकट् प्रत्ययः स्यात् । पर्पेण चरति पर्पिकः । पर्पिकी । अश्विकः । अश्विकी ।

१६६० पदिकः ॥६।४।१३॥ पादशब्दात्तेन चरत्यर्थे इकट् प्रत्ययः स्यादस्य पद्भावश्च निपात्यते । पादाभ्यां चरति पदिकः ।

१६६१ श्वगणाद्वा ॥ ६।४।१४ ॥ श्वगणशब्दात् तेन चरत्यर्थ इकट् प्रत्ययो वा स्यात् । श्वगणेन चरति श्वगणिकः । श्वगणिकी । पक्षे इकण् । श्वागणिकः । श्वागणिकी । श्वादेरितीति वात् प्रागौर्न भवति ।

१६६२ वेतनादेर्जीवति ॥६।४।१५॥ तेनेति वर्तते । वेतन इत्येवमादिभ्यस्तृतीयान्तेभ्यो जीवत्यर्थे इकण् प्रत्ययः स्यात् । वेतनेन जीवति वैतनिकः । वाहिकः ।

१६६३ व्यस्ताच्च क्रयविक्रयादिकः ॥६।४।१६॥ क्रयविक्रयशब्दात्समस्ताद् व्यस्ताच्च तेन जीवत्यर्थे इकः प्रत्ययः स्यात् । क्रयविक्रयेण जीवति क्रयविक्रयिकः । क्रयिकः । विक्रयिकः ।

१६६४ वस्नात् ॥६।४।१७॥ वस्नात् तेन जीवत्यर्थे इकः प्रत्ययः स्यात् । वस्नं मूल्यं तेन जीवति वस्निकः ।

१६६५ आयुधादीयश्च ॥६।४।१८॥ आयुधशब्दात् तेन जीवत्यर्थे ईयश्चकारादिकश्च प्रत्ययौ स्याताम् । आयुधीयः । आयुधिकः । आयुधिका । आयुधादिकेकणोः स्त्रियां विशेषः ।

१६६६ **व्रातादीनञ्** ॥६।४।१९॥ व्रातशब्दात् तेन जीवत्यर्थे ईनञ् प्रत्ययः स्यात् । नानाजातीया अनियतवृत्तयः शरीरायासजीविनः संघा व्राताः । तत्साहचर्यात् तत्कर्मापि व्रातम् । तेन जीवति व्रातीनः । अकारो वृद्ध्यर्थः । तेन 'तद्धितः स्वरवृद्धि' –इत्यादिना पुंवद्भावो न भवति । व्रातीनाभार्यः।

१६६७ **निर्वृत्तेऽक्षद्यूतादेः** ॥ ६।४।२० ॥ अक्षद्यूत इत्येवमादिभ्यस्तृतीयान्तेभ्यो निर्वृत्तेऽर्थे इकण् प्रत्ययः स्यात् । अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरम् । जाङ्घाप्रहतिकं वैरम् ।

१६६८ **भावादिमः** ॥६।४।२१॥ भाववाचिनस्तेन निर्वृत्तेऽर्थे इमः प्रत्ययः स्यात् । पाकेन निर्वृत्तं पाकिमम् । सेकिमम् । त्यागिमम् । रोगिमम् । कुट्टिमम् । संमूर्छिमम् ।

१६६९ **याचितापमित्यात् कण्** ॥६।४।२२॥ याचितापमित्य इत्येताभ्यां तेन निर्वृत्ते कण् प्रत्ययः स्यात् । याचितेन याच्ञया निर्वृत्तं याचितकम् । अपमित्येति यबन्तम् । अपमित्य प्रतिदानेन निर्वृत्तमापमित्यकम् ।

१६७० **हरत्युत्सङ्गादेः** ॥६।४।२३॥ उत्सङ्गादिभ्यस्तृतीयान्तेभ्यो हरत्यर्थे इकण् प्रत्ययः स्यात् । उत्सङ्गेन हरत्यौत्सङ्गिकः । उत्रुपेन औत्रुपिकः । उडुपेन औडुपिकः ।

१६७१ **भस्त्रादेरिकट्** ॥ ६।४।२४ ॥ भस्त्रादिभ्यस्तृतीयान्तेभ्यो हरत्यर्थे इकट् प्रत्ययः स्यात् । भस्त्रया हरति भस्त्रिकः । भस्त्रिकी । भरटिकः । भरटिकी ।

१६७२ **विवधवीवधाद्वा** ॥ ६।४।२५॥ विवध वीवध इत्येताभ्यां तेन हरतीत्यर्थे इकट् प्रत्ययो वा स्यात् । विवधेन हरति विवधिकः । विवधिकी । वीवधिकः। वीवधिकी । पक्षे इकण् । वैवधिकः । वैवधिकी । विवधवीवधशब्दौ समानार्थौ पथि पर्याहारे च वर्तते ।

१६७३ **कुटिलिकाया अण्** ॥ ६।४।२६ ॥ कुटिलिकाशब्दात् तृतीयान्ताद् हरत्यर्थेऽण् प्रत्ययः स्यात् । कुटिलिकाशब्देनाग्रेवक्रा लोहादिमयी अङ्गारा-

कर्षणी यष्टिर्वा कुटिला गतिर्वा पलालोत्क्षेपणोऽग्रेवक्रो दण्डो वा परिव्राजकोपकरण-विशेषो वा चौराणां नौगृहाद्यारोहणार्थं दामाग्रप्रतिबद्ध आयसोऽङ्कुशो वोच्यते। कुटिलिकया हरति अङ्गारान् कौटिलिकः कर्मारः। कुटिलिकया हरति व्याधं कौटिलिको मृगः। कुटिलिकया हरति पलालं कौटिलिकः कर्षकः। कुटिलिकया हरति पुष्पाणि कौटिलिकः परिव्राजकः। कुटिलिकया हरति नावं कौटिलिकश्चौरः।

१६७४ **ओजःसहोऽम्भसो वर्तते** ॥६।४।२७॥ ओजस् सहस् अम्भस् इत्येतेभ्यस्तृतीयान्तेभ्यो वर्तत इत्यर्थे इकण् प्रत्ययः स्यात्। वृत्तिरात्मनिर्यापना चेष्टा वा। ओजसा बलेन वर्तते औजसिकः। सहसा प्रसहनेन पराभिभवेन वा साहसिकः। अम्भसा जलेन आम्भसिकः।

१६७५ **तं प्रत्यनोर्लोमेपकूलात्** ॥६।४।२८॥ तेनेनि निवृत्तम्। तमिति द्वितीयान्तात् प्रति अनु इत्येताभ्यां परो यो लोमशब्द ईपशब्दः कूलशब्दश्च तदन्तात् वर्तत इत्यर्थे इकण् प्रत्ययः स्यात्। प्रतिलोमं वर्तते प्रातिलोमिकः। आनुलोमिकः। प्रातीपिकः। आन्वीपिकः। प्रातिकूलिकः। आनुकूलिकः। अकर्मकस्यापि वृत्तेर्योगे प्रतिलोमादेः क्रियाविशेषणत्वात् द्वितीया। तमिति पुंलिङ्गनिर्देशोऽसंदेहार्थः।

१६७६ **परेर्मुखपार्श्वात्** ॥६।४।२९॥ परिशब्दाद्यो मुखशब्दः पार्श्वशब्दश्च तदन्ताद् द्वितीयान्ताद् वर्तत इत्यर्थे इकण् प्रत्ययः स्यात्। परिमुखं वर्तते पारिमुखिकः। परिपार्श्वं वर्तते पारिपार्श्विकः। परिर्वर्जने सर्वतोभावे वा। स्वामिनो मुखं वर्जयित्वा वर्तमानोऽथवा यतो यतः स्वामिमुखं ततस्ततो वर्तमानः पारिमुखिकः सेवकः। एवं पारिपार्श्विकः।

१६७७ **रक्षदुञ्छतोः** ॥६।४।३०॥ तमिति द्वितीयान्ताद् रक्षति उञ्छति चार्थे इकण् प्रत्ययः स्यात्। समाजं रक्षति सामाजिकः। बदराण्युञ्छति उच्चिनोति वादरिकः।

१६७८ **पक्षिमत्स्यमृगार्थाद् घ्नति** ॥६।४।३१॥ तमिति द्वितीयान्तेभ्यः पक्ष्यर्थेभ्यो मत्स्यार्थेभ्यो मृगार्थेभ्यश्च घ्नत्यर्थे इकण् प्रत्ययः स्यात्। पक्षिणो हन्ति पाक्षिकः। मात्सिकः। मार्गिकः। अर्थग्रहणात् तत्पर्यायेभ्यो विशेषेभ्यश्च भवति। शाकुलिकः। मायूरिकः। तैत्तिरिकः। मैनिकः। शाफरिकः। शाकुलिकः।

सौकरिकः । नैयङ्कुकः । अथाजिह्मान् हन्ति अनिमिषान् हन्तीत्यत्र कस्मान्न भवति । नैतन्मत्स्येत्यस्य स्वरूपं न विशेषो न पर्यायः अपि त्वसाधारणं विशेषणं यथा जिह्मगा भुजगाः अनिमिषा देवा इति ।

१६७९ परिपन्थात्तिष्ठति च ॥६।४।३२॥ परिपन्थशब्दाद् द्वितीयान्तात्तिष्ठति घ्नति चार्थे इकण् प्रत्ययः स्यात् । परिपन्थं तिष्ठति हन्ति वा पारिपन्थिकश्चौरः । अत एव निर्देशात् परिपथशब्दस्येकणोऽन्यत्रापि वा परिपन्थादेशः । तेन परिपन्थं गच्छति पश्यति इत्याद्यपि भवति ।

१६८० परिपथात् ॥६।४।३३॥ तिष्ठतीति वर्तते । परिपथशब्दाद् द्वितीयान्तात् तिष्ठत्यर्थे इकण् प्रत्ययः स्यात् । परिर्वर्जने सर्वतो भावे वा । पथः परि सर्वतः पन्थानं वा परिपथम् । परिपथं तिष्ठति पारिपथिकः । पन्थानं वर्जयित्वा व्याप्य वा तिष्ठतीत्यर्थः ।

१६८१ अवृद्धेर्गृह्णाति गर्ह्ये ॥ ६।४।३४ ॥ तमिति द्वितीयान्ताद् वृद्धिशब्दवर्जिताद् गृह्णत्यर्थे इकण् प्रत्ययः स्यात् योऽसौ गृह्णाति स चेदन्यायेन ग्रहणाद् गर्ह्यो निंद्यो भवति । द्विगुणं गृह्णाति द्वैगुणिकः । त्रैगुणिकः । वृधुषीं वृद्धिं गृह्णाति वार्धुषिकः । अल्पं दत्त्वा प्रभूतं गृह्णन्नन्यायकारी निन्द्यते । अवृद्धेरिति किम् । वृद्धिं गृह्णातीति वाक्यमेव । गर्ह्ये इति किम् । दत्तं गृह्णाति ।

१६८२ कुसीदादिकट् ॥६।४।३५॥ तमिति द्वितीयान्तात् कुसीदशब्दाद् गर्ह्ये गृह्णत्यर्थे इकट् प्रत्ययः स्यात् । कुसीदं वृद्धिस्तदर्थं द्रव्यमपि कुसीदम् । तद् गृह्णाति कुसीदिकः । कुसीदिकी । टकारो ङ्यर्थः ।

१६८३ दशैकादशादिकश्च ॥६।४।३६॥ द्वितीयान्ताद् दशैकादशशब्दाद् गर्ह्ये गृह्णत्यर्थे इकश्चादिकट् च प्रत्ययः स्यात् । दशभिरेकादश दशैकादशाः । तान् गृह्णाति दशैकादशिकः दशैकादशिका । दशैकादशिकी । दशैकादशादित्यत एव निपातनादकारान्तत्वम् । तच्च वाक्ये प्रयोगार्थम् । दशैकादशान् गृह्णाति । अन्ये दशैकादश गृह्णातीति विगृह्णन्ति । तदपि अबाधकान्यपि निपातनानि भवन्तीति न्यायादुपपद्यते ।

१६८४ अर्थपदपदोत्तरपदललामप्रतिकण्ठात् ॥६।४।३७॥ गर्ह्ये इति निवृत्तम् । अर्थात् पदात् पदशब्द उत्तरपदं यस्य तस्मात् ललामात् प्रतिकण्ठाच्च

द्वितीयान्ताद् गृह्णत्यर्थे इकण् प्रत्ययः स्यात्। अर्थं गृह्णाति आर्थिकः। पदं पादिकः। पदोत्तरपद–पूर्वपदं पौर्वपदिकः। औत्तरपदिकः। आदिपदिकः। आन्तपदिकः। ललाम-लालामिकः। प्रतिकण्ठं प्रातिकण्ठिकः। अव्ययीभावसमासाश्रयणादिह न भवति। प्रतिगतः कण्ठं प्रतिकण्ठः तं गृह्णाति। उत्तरपदग्रहणाद् बहुप्रत्ययपूर्वान्न भवति। बहुपदं गृह्णाति।

१६८५ **परदारादिभ्यो गच्छति** ॥६।४।३८॥ परदारादिभ्यो द्वितीयान्तेभ्यो गच्छत्यर्थे इकण् प्रत्ययः स्यात्। परदारान् गच्छति पारदारिकः। गौरुदारिकः। गौरुतल्पिकः। सभर्तृकां गच्छति सांभर्तृकिकः। भ्रातृजायिकः। परदारादयः प्रयोगगम्याः।

१६८६ **प्रतिपथादिकश्च** ॥ ६।४।३९ ॥ प्रतिपथशब्दाद् द्वितीयान्ताद् गच्छत्यर्थे इकः प्रत्ययः स्यात् चकाराद्यथाप्राप्त इकण्। पन्थानं २ प्रति पथोऽभिमुखमिति वा प्रतिपथम्। तद् गच्छति प्रतिपथिकः प्रातिपथिकी वा।

१६८७ **माथोत्तरपदपदव्याक्रन्दाद्धावति** ॥६।४।४०॥ तमिति वर्तते। माथोत्तरपदं यस्य तस्मान्नाम्नः पदवीशब्दादाक्रन्दशब्दाच्च द्वितीयान्ताद्धावत्यर्थे इकण् प्रत्ययः स्यात्। दण्डमाथं धावति दाण्डमाथिकः। शौक्लमाथिकः। माथशब्दः पथिपर्यायः। दण्ड इव माथो दण्डमाथः ऋजुमार्ग उच्यते। पदवीं धावति पादविकः। आक्रन्दति यत्र स देश आक्रन्दः। आक्रन्द्यते इति वा आक्रन्दः आर्तायनं शरणमुच्यते। आक्रन्दं धावति आक्रन्दिकः। उत्तरपदग्रहणाद् बहुप्रत्ययपूर्वान्न भवति। बहुमाथं धावति।

१६८८ **पश्चात्यनुपदात्** ॥ ६।४।४१ ॥ पश्चातीति प्रकृतिविशेषणम्। पश्चादर्थः पश्चात्। पश्चादर्थे वर्तमानादनुपदशब्दाद् धावत्यर्थे इकण् प्रत्ययः स्यात्। पदस्य पश्चादनुपदम्। अनुपदं धावति आनुपदिकः। प्रत्यासत्त्या धावतीत्यर्थः। पश्चातीति किम्। अनुपदं धावति। अत्र 'दैर्घ्येऽनुः' समीपे 'प्रात्यवे' त्यादिना वा समासः।

१६८९ **सुस्नातादिभ्यः पृच्छति** ॥६।४।४२॥ तमिति वर्तते। सुस्नातादिभ्यो द्वितीयान्तेभ्यः पृच्छत्यर्थे इकण् प्रत्ययः स्यात्। सुस्नातं पृच्छति सौस्ना-

तिकः । सौखरात्रिकः । सौखशयनिकः । सौखशाय्यिकः । सुस्नातादयः प्रयोगगम्याः ।

१६९० **प्रभूतादिभ्यो ब्रुवति** ॥६।४।४३॥ प्रभूतादिभ्यो द्वितीयान्तेभ्यो ब्रुवत्यर्थे इकण् प्रत्ययः स्यात् । प्रभूतं ब्रूते प्राभूतिकः । पर्याप्तं ब्रूते पार्याप्तिकः वैपुलिकः । वैचित्रिकः । नैपुणिकः । क्रियाविशेषणादयमिष्यते । तेनेह न भवति । प्रभूतमर्थं ब्रूते । पर्याप्तमर्थं ब्रूते । कचिदक्रियाविशेषणादपि । स्वर्गमनं ब्रूते सौवर्गमनिकः । प्रभूतादयः प्रयोगगम्याः ।

१६९१ **माशब्द इत्यादिभ्यः** ॥६।४।४४॥ माशब्द इत्यादिभ्यो ब्रुवत्यर्थे इकण् प्रत्ययः स्यात् । इतिशब्दो वाक्यपरामर्शार्थः । मा शब्द इति ब्रूते माशब्दिकः । मा शब्दः क्रियतामिति ब्रूत इत्यर्थः । कार्यः शब्द इति ब्रूते कार्यशब्दिकः । नित्यः शब्द इति ब्रूते नैत्यशब्दिकः । माशब्द इत्यादयः प्रयोगगम्याः । वाक्यात् प्रत्ययविधानार्थं वचनम् ।

१६९२ **शाब्दिकदार्दरिकललाटिककौक्कुटिकम्** ॥६।४।४५॥ शाब्दिकादयः शब्दा यथास्वं प्रसिद्धेऽर्थविशेषे इकणप्रत्ययान्ता निपात्यन्ते । शब्दं करोति शाब्दिकः । यः कश्चित् शब्दं करोति न स सर्वः शाब्दिकः किं तर्हि यः शब्दं जानाति वैयाकरणः स एवाविनष्टं शब्दमुच्चारयन् शाब्दिक उच्यते । एवं दार्दरिकः । दर्दरो घटो वादित्रं च तत्र वादित्रं कुर्वन्नेवमुच्यते । ललाटं पश्यति लालाटिकः । ललाटदर्शनेन दूरावस्थानं लक्ष्यते तेन च कार्येष्वनुपस्थानम् । यः सेवको द्रष्टुं स्वामिनो ललाटमिति दूरतो याति न स्वामिकार्येषूपतिष्ठते स एवमुच्यते । ललाटमेव वा कोपप्रसादलक्षणाय यः पश्यति स लालाटिकः । कुक्कुटीं पश्यति कौक्कुटिकः । कुक्कुटीशब्देन कुक्कुटीपातो लक्ष्यते । तेन च देशस्याल्पता । यो हि भिक्षुरविक्षिप्तदृष्टिः पादविक्षेपे देशे चक्षुः संयम्य पुरो युगमात्रदेशप्रेक्षी गच्छति स एवमुच्यते । यो वा तथाविधमात्मानमतथाविधोऽपि संदर्शयति सोऽपि कौक्कुटिकः । दांभिकचेष्टा वा मिथ्याशौचादिः कुक्कुटी तामाचरन् कौक्कुटिकः । हृदयावयवो वा कुक्कुटी तां पश्यति कौक्कुटिको भिक्षुः । निभृत इत्यर्थः । तदेतत्सर्वं निपातनाल्लभ्यते ।

१६९३ **समूहार्थात् समवेते** ॥ ६।४।४६ ॥ समूहवाचिभ्यो द्वितीया-

न्तेभ्यः समवेते तादात्म्यात् तदेकदेशीभूतेऽर्थे इकण् प्रत्ययः स्यात् । समूहं समवैति सामूहिकः । सामाजिकः । सांसदिकः । सामवायिकः । गौष्ठिकः । तदेकदेशीभावमनुभवन्नेवमुच्यते । समवेत्यापगते तु समवेतशब्दो न वर्तते यथा सुप्तोत्थिते सुप्तशब्द इति तत्र न भवति ।

१६९४ **पर्षदो ण्यः** ॥ ६।४।४७ ॥ पर्षच्छब्दाद् द्वितीयान्तात् समवेतेऽर्थे ण्यः प्रत्ययो वा स्यात् । पर्षदं समवैति पार्षद्यः । परिषच्छब्दादपीच्छन्त्यन्ये । पारिषद्यः ।

१६९५ **सेनाया वा** ॥६।४।४८॥ सेनाशब्दाद् द्वितीयान्तात् समवेतेऽर्थे ण्यः प्रत्ययो वा स्यात् । सेनां समवैति सैन्यः । पक्षे समूहार्थात् समवेते इतीकण् । सैनिकः । सेनैव सैन्यमिति तु भेषजादित्वात् स्वार्थे ष्यण् ।

१६९६ **धर्माधर्माच्चरति** ॥६।४।४९॥ धर्म अधर्म इत्येताभ्यां द्वितीयान्ताभ्यां चरत्यर्थे इकण् प्रत्ययः स्यात् । चरतिस्तात्पर्येणानुष्ठाने । धर्मं चरति धार्मिकः । आधर्मिकः ।

१६९७ **षष्ठ्या धर्म्ये** ॥६।४।५०॥ षष्ठ्यन्ताद् धर्म्येऽर्थे इकण् प्रत्ययः स्यात् । धर्मो न्यायोऽनुवृत्त आचारस्तस्मादनपेतं धर्म्यम् । शुल्कशालाया धर्म्ये शौल्कशालिकम् । आपणिकम् । गौल्मिकम् । आतरिकम् ।

१६९८ **ऋनरादेरण्** ॥६।४।५१॥ ऋकारान्तेभ्यो नरादिभ्यश्च षष्ठ्यन्तेभ्यो धर्म्येऽर्थेऽण् प्रत्ययः स्यात् । नुर्धर्म्यं नारम् । स्त्रियां नारी । मातुर्मात्रम् । पितुः पैत्रम् । शास्तुः शास्त्रम् । विकर्तुः वैकर्त्रम् । होतुर्हौत्रम् । पोतुः पौत्रम् । उद्गातुः औद्गात्रम् । नरादि—नरस्य धर्म्यं नारम् । नृशब्देनैव रूपद्वये सिद्धे नरशब्दादिकण् मा भूदिति तद्ग्रहणम् । महिष्या माहिषम् ।

१६९९ **विभाजयितृविशासितुर्णिलुक् च** ॥ ६।४।५२ ॥ आभ्यां षष्ठ्यन्तां धर्म्येऽर्थेऽण् प्रत्ययः स्यात्, तत्संनियोगे च विभाजयितुर्णिलुक् । विभाजयितुर्धर्म्यं वैभाजित्रम् । विशासितुर्वैशस्त्रम् ।

१७०० **अवक्रये** ॥ ६।४।५३ ॥ अवक्रियते येनेच्छानियमितेन द्रव्येण कियन्तमपि कालमापणादि सोऽवक्रयः । भौगनिर्वेशो भाटकमिति यावत् । षष्ठ्य-

न्तान्नाम्नोऽवक्रयेऽर्थे इकण् प्रत्ययः स्यात् । आपणस्यावक्रय आपणिकः । शौल्क-शालिकः । आतरिकः । गौल्मिकः । लोकपीडया धर्मातिक्रमेणापि अवक्रयो भवतीत्ययं धर्म्याद् भिद्यते ।

१७०१ तदस्य पण्यम् ॥ ६।४।५४॥ तदिति प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययः स्यात् तच्चेत् प्रथमान्तं पण्यं विक्रेयं भवति । अपूपाः पण्यमस्य आपूपिकः । पण्यार्थो वृत्तावन्तर्भूत इति पण्यशब्दस्याप्रयोगः । एवं शाष्कुलिकः । मौदकिकः । लावणिकः ।

१७०२ किशरादेरिकट् ॥ ६।४।५५॥ किशर इत्येवमादिभ्यस्तदस्य पण्यमित्यस्मिन् विषये इकट् प्रत्ययः स्यात् । किशरादयो गन्धद्रव्यविशेषवचनाः। किशरं किशरो वा पण्यमस्य किशरिकः । किशरिकी स्त्री । तगरिकः । तगरिकी स्त्री । टकारो ङ्यर्थः ।

१७०३ शलालुनो वा ॥६।४।५६॥ शलालुशब्दाद् गन्धविशेषवाचिनस्तदस्य पण्यमित्यस्मिन् विषये इकट् प्रत्ययो वा स्यात् । शलालु पण्यमस्य शलालुकः । शलालुकी । पक्षे इकण् । शालालुकी ।

१७०४ शिल्पम् ॥६।४।५७॥ तदस्येति वर्तते । तदिति प्रथमान्तादस्येत्यर्थे इकण् प्रत्ययः स्यात् यत्तत् प्रथमान्तं तच्चेत् शिल्पं भवति । शिल्पं कौशलं विज्ञानप्रकर्षः । अनेन तन्निवर्त्यः क्रियाविशेषो लक्ष्यते । नृत्तं शिल्पमस्य नार्तिकः । गीतं गैतिकः । वादनं वादनिकः । मृदङ्गो मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः । पाणविकः। मौरजिकः। वैणविकः। मृदङ्गादिशब्दा वादनार्थवृत्तयः प्रत्ययमुत्पादयन्ति न द्रव्यवृत्तयः । उत्पादनार्थवृत्तिभ्यस्त्वनभिधानान्न भवति । शिल्पार्थो वृत्तावन्तर्भूत इति शिल्पशब्दस्याप्रयोगः।

१७०५ मडुकझर्झराद्वाण् ॥ ६।४।५८ ॥ मडुक झर्झर इत्येताभ्यां तदस्य शिल्पमित्यर्थे अण् प्रत्ययो वा स्यात् । मडुकवादनं शिल्पमस्य माडुकः । झार्झरः पक्षे इकण् । माडुकिकः । झार्झरिकः ।

१७०६ शीलम् ॥ ६।४।५९ ॥ तदिति प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययः स्यात् यत्तत् प्रथमान्तं तच्चेत् शीलम् । शीलं प्राणिनां स्वभावः । फलनि-

रपेक्षा प्रवृत्तिरिति यावत् । अपूपा–अपूपभक्षणं शीलमस्य आपूपिकः। शाष्कुलिकः। मौदकिकः। ताम्बूलिकः। परुषवचनं शीलमस्य पारुषिकः । एवमाक्रोशिकः। मृदङ्गादिवदपूपादयः शब्दाः क्रियावृत्तयः प्रत्ययमुत्पादयन्ति। शीलार्थो वृत्तावन्तर्भूत इति शीलशब्दस्याप्रयोगः।

१७०७ अङ्स्थाच्छत्रादेरञ् ॥ ६।४।६० ॥ अङ्प्रत्ययान्तात्तिष्ठतेश्छत्रादिभ्यश्च तदस्य शीलमित्यस्मिन् विषये अञ् प्रत्ययः स्यात्। आस्था। शीलमस्य आस्थः । सांस्थः । आवस्थः । सामास्थः । वैयवस्थः। नैष्ठः। वैष्ठः। 'उपसर्गादातः इत्यङ्। आन्तस्थः । भिदादित्वादङ्। छत्रादि–छत्रं शीलमस्य छात्रः। छत्रशब्देन गुरुकार्येष्वनवहितस्य शिष्यस्य छत्रक्रियातुल्या गुरुच्छिद्राच्छादनाऽपायरक्षणादिका क्रियोच्यते उपचारात् । शिष्यो हि छत्रवद् गुरुच्छिद्रावरणादिप्रवृत्तश्छात्र इत्युच्यते । अभ्यासापेक्षाऽपि क्रिया शीलमित्युच्यते । यथा शीलिता विद्येति । चुराशीलः चौरः। तपःशीलः तापसः। स्त्रियां छात्री। चौरी । तापसी।

१७०८ तूष्णीकः ॥६।४।६१ ॥ तूष्णींशब्दात् तदस्य शीलमित्यस्मिन् विषये कः प्रत्ययो मकारलोपश्च निपात्यते। तूष्णींभावः शीलमस्य तूष्णीकः।

१७०९ प्रहरणम् ॥६।४।६२॥ तदिति प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययः स्यात् यत्तत्प्रथमान्तं तच्चेत् प्रहरणं भवति। असिः प्रहरणमस्य आसिकः। प्रासिकः। चाक्रिकः। मौष्टिकः। धानुष्कः । चरतीत्यत्र व्यापारसाधनात् प्रत्ययो यथा अश्वेन चरतीति। शिल्पमित्यत्र तु विज्ञानातिशये यथा नृत्तं शीलमस्येति। अनेन तु व्यापाराभावेऽपि परिज्ञानमात्रे प्रत्ययः।

१७१० परश्वधाढ्ञाण् ॥ ६।४।६३ ॥ परश्वधशब्दात् तदस्य प्रहरणमित्यर्थे अण् प्रत्ययो वा स्यात्। परश्वधः प्रहरणमस्य पारश्वधः । पक्षे इकण्। पारश्वधिकः।

१७११ शक्तियष्टेष्टीकण् ॥६।४।६४॥ शक्ति यष्टि इत्येताभ्यां तदस्य प्रहरणमित्यस्मिन् विषये टीकण् प्रत्ययः स्यात्। शक्तिः प्रहरणमस्य शाक्तीकः। शाक्तीकी। याष्टीकः। याष्टीकी। कथं शाक्तीकः शक्त्या जीवतीति। वेतनादीकणा भविष्यति।

१७१२ **वेष्ट्यादिभ्यः** ॥ ६।४।६५ ॥ इष्टि इत्येवमादिभ्यस्तदस्य प्रहरणमित्यस्मिन् विषये टीकण् वा स्यात् । इष्टिः प्रहरणमस्य ऐष्टीकः । ऐष्टीकी । ऐष्टिकः । ईषा प्रहरणमस्य ऐषीकः । ऐषीकी । ऐषिकः । कम्पनं प्रहरणमस्य काम्पनीकः । काम्पनीकी । काम्पनिकः । अम्भःप्रहरणः आम्भसीकः । आम्भसीकी । आम्भसिकः । दण्डप्रहरणः दाण्डीकः, दाण्डीकी, दाण्डिकः। इष्ट्यादयः प्रयोगगम्याः ।

१७१३ **नास्तिकास्तिकदैष्टिकम्** ॥६।४।६६॥ एते शब्दास्तदस्येत्यस्मिन् विषये इकण्प्रत्ययान्ता निपात्यन्ते । निपातनं रूढ्यर्थम् । नास्ति परलोकः पुण्यं पापमिति वा मतिरस्य नास्तिकः । अस्ति परलोकः पुण्यं पापमिति वा मतिरस्य आस्तिकः । नास्त्यस्तिशब्दौ तिवादिप्रतिरूपके अव्यये । निपातनादेव वा तदिति प्रथमाधिकारेऽपि आख्याताच्चास्तीति पदसमुदायाच्च प्रत्ययः। दिष्टं दैवं तत्प्रमाणमिति मतिरस्य दिष्टा वा प्रमाणानुपातिनी मतिरस्य दैष्टिकः ।

१७१४ **वृत्तोऽपपाठोऽनुयोगे** ॥ ६।४।६७ ॥ तदस्येति वर्तते । तदिति प्रथमान्तादस्यति षष्ठ्यर्थे इकण् प्रत्ययः स्यात् यत्तत् प्रथमान्तं तच्चेदनुयोगविषये वृत्तोऽपपाठः । अनुयोगः परीक्षा । एकमन्यदपपाठोऽनुयोगे वृत्तमस्य ऐकान्यिकः । द्वैयन्यिकः । त्रैयन्यिकः । संख्यान्यशब्दयोस्तद्धिते विषयभूते समासः । ततस्तद्धितः । वृत्तोऽपपाठोऽनुयोग इत्यस्य तु वृत्तावन्तर्भावादप्रयोगः । अन्यत्वं चापपाठस्य सम्यक्पाठापेक्षम् । वृत्त इति किम् । वर्तमाने वर्त्स्यति च न भवति । अपपाठ इति किम् । एकमन्यदस्य दुःखमनुयोगे वृत्तम् । जयोऽनुयोगे वृत्तः । अनुयोग इति किम् । स्वैराध्ययने मा भूत् । अन्ये त्वपपाठादन्यत्राप्यध्ययनमात्रे प्रत्ययमिच्छन्ति । एकं रूपमध्ययने वृत्तमस्य ऐकरूपिकः । ऐकग्रन्थिकः ।

१७१५ **बहुस्वरपूर्वादिकः** ॥६।४।६८॥ बहुस्वरपूर्वपदं यस्य तस्मान्नाम्नः प्रथमान्तादस्येति षष्ठ्यर्थे इकः प्रत्ययः स्यात् यत्तत् प्रथमान्तं तच्चेद् वृत्तोऽपपाठोऽनुयोगे भवति । एकादशान्यान्यपपाठरूपाण्यनुयोगेऽस्य वृत्तानि एकादशान्यिकः । एकादशान्यिका स्त्री । द्वादशान्यिकः । द्वादशान्यिका स्त्री । त्रयोदशान्यिकः । त्रयोदशान्यिका । चतुर्दशान्यिकः । चतुर्दशान्यिका । अत्राप्यन्ये पूर्ववदन्यत्रापीच्छन्ति । द्वादश रूपाण्यध्ययने वृत्तान्यस्य द्वादशरूपिकः ।

१७१६ **भक्ष्यं हितमस्मै** ॥६।४।६९॥ तदिति वर्तते। तदिति प्रथमान्तादस्मै इति चतुर्थ्यर्थे इकण् प्रत्ययः स्यात् यत् तत् प्रथमान्तं तच्चेद् भक्ष्यं हितं भवति। अपूपा भक्ष्यं हितमस्मै आपूपिकः। शाष्कुलिकः। मौदकिकः। गौडधानिकः। भक्ष्यमिति किम्। देवदत्तो हितोऽस्मै। हितमिति किम्। अपूपा भक्ष्यमहितमस्मै। हितार्थो भक्षणक्रिया च तद्धितवृत्तावेवान्तर्भवति।

१७१७ **नियुक्तं दीयते** ॥६।४।७०॥ तदिति अस्मै इति च वर्तते। तदिति प्रथमान्तादस्मै इति चतुर्थ्यर्थे इकण् प्रत्ययः स्यात्। यत्तत्प्रथमान्तं तच्चेन्नियुक्तमव्यभिचारेण नित्यं वा दीयते। अग्रभोजनमस्मै नियुक्तं दीयते आग्रभोजनिकः। आग्रकलिकः। मांसिकः। आपूपिकः। शाष्कुलिकः। ग्रामिकः। आग्रहारिकः। अस्मै इत्येव। रजकस्य वस्त्रं नित्यं दीयते। अर्प्यते इत्यर्थः।

१७१८ **श्राणामांसौदनादिको वा** ॥६।४।७१॥ श्राणा मांसौदन इत्येताभ्यां तदस्मै नियुक्तं दीयत इत्यस्मिन् विषये इकः प्रत्ययो वा स्यात्। श्राणा नियुक्तमस्मै दीयते श्राणिकः पथ्याशी। श्राणिका। मांसौदनिकः। मांसौदनिका। पक्षे इकण्। श्राणिकी। मांसौदनिकी। इकेकणोः स्त्रियां विशेषः। अन्ये त्विकं नेच्छन्ति।

१७१९ **भक्तौदनाद्राणिकट्** ॥ ६।४।७२ ॥ भक्त ओदन इत्येताभ्यां यथासंख्यमणिकट् प्रत्ययौ वा स्याताम् तदस्मै नियुक्तं दीयत इत्यस्मिन् विषये। भक्तमस्मै नियुक्तं दीयते भाक्तः। औदनिकः। औदनिकी। पक्षे इकण्। भाक्तिकः। औदनिकः। ओदनशब्दादिकणं नेच्छन्त्यन्ये।

१७२० **नवयज्ञादयोऽस्मिन् वर्तन्ते** ॥६।४।७३॥ नवयज्ञादिभ्यः प्रथमान्तेभ्यो वर्तन्त इत्येवमुपाधिभ्योऽस्मिन्निति सप्तम्यर्थे इकण् प्रत्ययः स्यात्। नवा यज्ञा अस्मिन् वर्तन्ते नावयज्ञिकः। पाकयज्ञिकः। नवयज्ञादयः प्रयोगगम्याः।

१७२१ **तत्र नियुक्ते** ॥६।४।७४॥ तत्रेति सप्तम्यन्तान्नियुक्तेऽर्थे इकण् प्रत्ययः स्यात्। नियुक्तोऽधिकृतो व्यापारित इत्यर्थः। पूर्वकस्य नियुक्तमित्यस्य क्रियाविशेषणरूपस्याव्यभिचारो नित्यमिति चार्थः। प्रत्ययार्थश्चायम्। स तु प्रकृत्यर्थोपाधिः। शुल्कशालायां नियुक्तः शौल्कशालिकः। आपणिकः। आन्तरिकः। दौवारिकः। आक्षपटलिकः।

१७२२ **अगारान्तादिकः** ॥६।४।७६॥ अगारान्तात् तत्र नियुक्तेऽर्थे इकः प्रत्ययः स्यात् । देवागारिकः। देवागारिका । भाण्डागारिकः। भाण्डागारिका। आयुधागारिकः । आयुधागारिका । कोष्ठागारिकः । कोष्ठागारिका ।

१७२३ **अदेशकालादध्यायिनि** ॥६।४।७६॥ तत्रेति वर्तते । अध्ययनस्य यौ प्रतिषिद्धौ देशकालौ तावदेशकालौ । तद्वाचिनः सप्तम्यन्तादध्यायिन्यर्थे इकण् प्रत्ययः स्यात् । अशुचावध्यायी आशुचिकः। श्मशानेऽध्यायी श्माशानिकः श्मशानाभ्यासिकः। अकाल–सान्ध्यिकः। अदेशकालादिति किम् । स्वाध्यायभूमाबध्यायी । पूर्वाह्णेऽध्यायी ।

१७२४ **निकटादिषु वसति** ॥६।४।७७॥ निकटादिभ्यः सप्तम्यन्तेभ्यो वसत्यर्थे इकण् प्रत्ययः स्यात् । निकटे वसति नैकटिकः । आरण्यकेन भिक्षुणा ग्रामात् क्रोशे वस्तव्यमिति यस्य शास्त्रितो वासः स एवोच्यते । एतदर्थ एव च तत्रेत्यधिकारे सप्तमीनिर्देशः । वृक्षमूले वसति वार्क्षमूलिकः। श्माशानिकः। आभ्रवकाशिकः । आवसथिकः । निकटादयः प्रयोगगम्याः ।

१७२५ **सतीर्थ्यः** ॥६।४।७८॥ सतीर्थ्य इति समानतीर्थशब्दात् तत्र वसत्यर्थे यः प्रत्ययो निपात्यते समानस्य च सभावः । समानतीर्थे वसति सतीर्थ्यः। तीर्थमिह गुरुरुच्यते ।

१७२६ **प्रस्तारसंस्थानतदन्तकठिनान्तेभ्यो व्यवहरति** ॥६।४।७९॥ प्रस्तार संस्थान इत्येताभ्यां प्रस्तारान्तात् संस्थानान्तात् कठिनान्ताच्च व्यवहरत्यर्थे इकण् प्रत्ययः स्यात् । व्यवहरतिरिह क्रियातत्त्वे क्रियाया अविपरीतस्वभावे । यथा लौकिको व्यवहार इत्यत्र । प्रस्तारे व्यवहरति प्रास्तारिकः । सांस्थानिकः । तदन्त—कांस्यप्रस्तारिकः । लौहप्रस्तारिकः । गौसंस्थानिकः आश्वसंस्थानिकः । कठिनान्त–वांशकठिनिकः । वार्ध्रकठिनिकः । कठिनं तापसभाजनं पीठं वा । बहुवचनं कठिनान्तेति स्वरूपग्रहणव्युदासार्थम् रूढ्यर्थं च । प्रस्तारसंस्थानाभ्यां तदन्ताभ्यां केचिन्नेच्छन्ति ।

१७२७ **संख्यादेश्चार्हदल्लुचः** ॥६।४।८०॥ आ अर्हदर्थादित ऊर्ध्वं या प्रकृतिरुपादास्यते तस्याः केवलायास्तदन्तायाश्च संख्यापूर्वाया वक्ष्यमाणः प्रत्ययः

स्यादिति वेदितव्यम् न चेत्सा लुगन्ता भवति । चन्द्रायणं चरति चान्द्रायणिकः । द्वे चन्द्रायणे चरति द्वैचन्द्रायणिकः । पारायणमधीते पारायणिकः । द्वे पारायणे अधीते द्वैपारायणिकः । संख्यादेरिति किम् । परमपारायणमधीते । महापारायणमधीते । चकारः केवलार्थः । आर्हत इत्यत्राकारोऽभिविधौ । तेनार्हदर्थेऽपि भवति । द्वे सहस्रे द्विसहस्रं वार्हति द्विसाहस्रः । अलुच इति किम् । द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । अत्र 'शूर्पाद्वाञ्' इत्यञ् । ' अनाम्न्यद्विः प्लुप् ' इति लुप् । द्विशूर्पेण क्रीतं द्विशौर्पिकम् । पुनरपि ' शूर्पाद्वाञ् ' इत्यञ् न भवति ।

१७२८ **गोदानादीनां ब्रह्मचर्ये** ॥६।४।८१॥ गोदानादिभ्यो निर्देशाद् षष्ठ्यन्तेभ्यो ब्रह्मचर्येऽभिधेये इकण् प्रत्ययः स्यात् । गोदानस्य ब्रह्मचर्यं गौदानिकम् । आदित्यव्रतानामादित्यव्रतिकम् । महानाम्नीनां माहानाम्निकम् । गोदानादयः प्रयोगगम्याः । येभ्योऽस्मिन्नर्थे इकण् दृश्यते ते गोदानादयः ।

१७२९ **चन्द्रायणं च चरति** ॥ ६।४।८२ ॥ चन्द्रायणशब्दान्निर्देशादेव द्वितीयान्ताद् गोदानादिभ्यश्चार्थाद् द्वितीयान्तेभ्यश्चरत्यर्थे इकण् प्रत्ययः स्यात् । चन्द्रायणं चरति चान्द्रायणिकः । गोदानं चरति गौदानिकः । आदित्यव्रतिकः । महानाम्न्यो नाम ऋचः । तत्साहचर्यात् तासां व्रतमपि महानाम्न्यः । महानाम्नीव्रतं चरति माहानामिकः ।

१७३० **देवव्रतादीन् डिन्** ॥६।४।८३॥ देवव्रतादिभ्यो निर्देशादेव द्वितीयान्तेभ्यश्चरत्यर्थे डिन् प्रत्ययः स्यात् । देवव्रतं चरति देवव्रती । तिलव्रती । महाव्रती । देवव्रतादयः प्रयोगगम्याः । डित्करणमुत्तरत्रान्त्यस्वरादिलोपार्थम् ।

१७३१ **डकश्चाष्टाचत्वारिंशतं वर्षाणाम्** ॥६।४।८४॥ वर्षाणां संबंधिनोऽष्टाचत्वारिंशच्छब्दाद् व्रतवृत्तेर्निर्देशादेव द्वितीयान्ताच्चरत्यर्थे डकश्चकाराड्डिन् च प्रत्ययः स्यात् । अष्टाचत्वारिंशद्वर्षसहितं व्रतमष्टाचत्वारिंशत् तच्चरति अष्टाचत्वारिंशकः । अष्टाचत्वारिंशी ।

१७३२ **चातुर्मास्यं तौ यलुक् च** ॥६।४।८५॥ चातुर्मास्यशब्दाद् व्रतवृत्तेर्द्वितीयान्ताच्चरत्यर्थे तौ डकडिनौ प्रत्ययौ यलोपश्च भवति । चतुर्षु मासेषु भवानि 'यज्ञेऽयः' इति ञ्यः चातुर्मास्यानि नाम यज्ञाः । तत्सहचरितानि व्रतानि चातुर्मास्यानि तानि चरति चातुर्मासकः । चातुर्मासी ।

१७३३ क्रोशयोजनपूर्वाच्छताद्योजनाच्चाभिगमार्हे ॥ ६।४।८६ ॥ क्रोशशब्दपूर्वाद्योजनशब्दपूर्वाच्च शताद् योजनशब्दाच्च निर्देशादेव पञ्चम्यन्ताद-भिगमार्हेऽर्थे इकण् प्रत्ययः स्यात् । क्रोशशताभिगमनमर्हति क्रौशशतिको मुनिः । यौजनशतिको मुनिः। यौजनिकः साधुः ।

१७३४ तद्यात्येभ्यः ॥६।४।८७॥ तदिति द्वितीयान्तेभ्य एभ्यः–क्रोशशत-योजनशत योजन इत्येतेभ्यो याति—गच्छत्यर्थे इकण् प्रत्ययः स्यात् । क्रोशशतं याति क्रौशशतिकः । यौजनशतिकः । यौजनिको दूतः । एभ्य इति किम् । नगरं याति चैत्रः ।

१७३५ पथ इकट् ॥६।४।८८॥ पथिन्शब्दाद् द्वितीयान्ताद्यात्यर्थे इकट् प्रत्ययः स्यात् । पन्थानं याति पथिकः । पथिकी स्त्री । टकारो ङ्यर्थः । द्वौ पन्थानौ याति द्विपथिकः द्विपथिकी स्त्री । कटमकृत्वा इकड्वचनं परत्वात् समा-सान्ते कृतेऽपि यथा स्यादित्येवमर्थम् ।

१७३६ नित्यं णः पन्थश्च ॥६।४।८९॥ नित्यमिति प्रत्ययार्थविशेषणम् । पथिन्शब्दाद् द्वितीयान्तान्नित्यं यात्यर्थे णः प्रत्ययः स्यात् पथिन्शब्दस्य च पन्था-देशः । पन्थानं नित्यं याति पान्थः। पान्था स्त्री। द्वौ पन्थानौ नित्यं याति द्वैपन्थः। द्वैपन्था । नित्यमिति किम् । पथिकः ।

१७३७ शङ्कूत्तरकान्तराजवारिस्थलजङ्गलादेस्तेनाहृते च ॥६।४।९०॥ शङ्कु उत्तर कान्तार अज वारिस्थल जङ्गल इत्येतत्पूर्वात् पथिन्नन्तात्तेनेति तृतीयान्तादाहृते याति चार्थे इकण् प्रत्ययः स्यात् । शङ्कुपथेनाहृतो याति वा शाङ्कुपथिकः । औत्तरपथिकः । कान्तारपथिकः । आजपथिकः । वारिपथिकः । स्थालपथिकः । जाङ्गलपथिकः ।

१७३८ स्थलादेर्मधुकमरिचेऽण् ॥६।४।९१॥ स्थलपूर्वपदात् पथिन्नन्तात् तृतीयान्तादाहृतेऽर्थेऽण् प्रत्ययः स्यात् तच्चेदाहृतं मधुकं मरिचं वा भवति । स्थलपथेनाहृतं मधुकं मरिचं वा स्थालपथम् । मधुकमरिच इति किम् । स्थाल-पथिकमन्यत् ।

१७३९ तुरायणपारायणं यजमानाधीयाने ॥६।४।९२॥ आभ्यां

निर्देशादेव द्वितीयान्ताभ्यां यथासंख्यं यजमानेऽधीयाने चार्थे इकण् प्रत्ययः स्यात् । तुरायणं नाम यज्ञस्तं यजते तौरायणिकः । पारायणमधीते पारायणिकः ।

१७४० **संशयं प्राप्ते ज्ञेये** ॥६।४।९३॥ संशयमिति द्वितीयान्तात् प्राप्तेऽर्थे इकण् प्रत्ययः स्यात् स चेत् प्राप्तोऽर्थो ज्ञेयो भवति । संशयं प्राप्तः सांशयिकः । सांशयिकोऽयमूर्ध्वो न जाने स्थाणुरुत पुरुष इति । सांशयिकश्चैत्रो न जाने जीवति उत मृत इति। ज्ञेय इति किम्। संशयितरि मा भूत्। सोऽपि हि संशयं प्राप्तो भवति तस्य तत्र भावात् ।

१७४१ **तस्मै योगादेः शक्ते** ॥६।४।९४॥ योगादिभ्यस्तस्मै इति चतुर्थ्यन्तेभ्यः शक्तेऽर्थे इकण् प्रत्ययः स्यात् । योगाय शक्तः यौगिकः । सांतापिकः ।

१७४२ **योगकर्मभ्यां योक्त्रौ** ॥६।४।९५॥ आभ्यां चतुर्थ्यन्ताभ्यां शक्तेऽर्थे यथाक्रमं य उकञ् इत्येतौ प्रत्ययौ स्याताम् । योगाय शक्तः योग्यः । कर्मणे शक्तं कार्मुकम् । एवं योगशब्दस्य द्वैरूप्यम् ।

१७४३ **यज्ञानां दक्षिणायाम्** ॥६।४।९६॥ यज्ञवाचिभ्यो निर्देशादेव षष्ठ्यन्तेभ्यो दक्षिणायामर्थे इकण् प्रत्ययः स्यात् । यज्ञकर्मकृतां वेतनादानं दक्षिणा । अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी । वाजपेयिकी । राजसूयिकी । नावयज्ञिकी । पाञ्चौदनिकी । ऐकादशाहिकी । द्वादशाहिकी । द्वैवाजपेयिकी । बहुवचनं स्वरूपविधेर्व्युदासार्थम् ।

१७४४ **तेषु देये** ॥६।४।९७॥ यज्ञवाचिभ्यस्तेष्विति निर्देशादेव सप्तम्यन्तेभ्यो देयेऽर्थे इकण् प्रत्ययः स्यात् । अग्निष्टोमे देयं आग्निष्टोमिकम् । वाजपेयिकं भक्तम् ।

१७४५ **काले कार्ये च भववत्** ॥६।४।९८॥ कालवाचिनो निर्देशादेव सप्तम्यन्तादेये कार्ये चार्थे भववत् प्रत्ययाः स्युः। यकाभ्यः प्रकृतिभ्यो येन विशेषेण ये प्रत्यया भवेऽर्थे भवन्ति ताभ्यः प्रकृतिभ्यस्तेन विशेषेण कार्ये देये चार्थे ते प्रत्ययाः स्युः । वद्धि सर्वसादृश्यार्थः । यथा वर्षासु भवं वार्षिकं मासिकमित्यादि

तथा वर्षासु देयं कार्यं वा वार्षिकं मासिकमित्यादि भवति। प्रत्ययस्य भावोऽत्रातिदिश्यते नाभाव इति द्विगोः परस्य लुप् न भवति। द्वयोर्मासयोर्देयं कार्यं वा द्वैमासिकं त्रैमासिकम्।

१७४६ **व्युष्टादिष्वण्** ॥६।४।९९॥ व्युष्टादिभ्यो निर्देशादेव सप्तम्यन्तेभ्यो देये कार्ये चार्थेऽण् प्रत्ययः स्यात्। व्युष्टे देयं कार्यं वा वैयुष्टम्। नैत्यम्। बहुवचनादाकृतिगणोऽयम्। व्युष्टसाहचर्यान्नित्यशब्दः कालवाची गृह्यते ततः सप्तम्यपवादेन कालाध्वनोर्व्याप्ताविति द्वितीयाविधानात् नित्यं देयं कार्यं वेति द्वितीयान्तादेव प्रत्ययः। अन्ये तु सप्तम्यन्तादपीच्छन्ति। नित्ये विष्णुवति षड्भिश्चराचरैर्मुहूर्तैरनाक्रम्यमाणे देयं कार्यं वा नैत्यम्।

१७४७ **यथाकथाचाणः** ॥६।४।१००॥ यथाकथाचशब्दोऽव्ययसमुदायोऽनादरेणेत्यर्थे वर्तते तस्माद्देये कार्ये चार्थे णः प्रत्ययः स्यात्। यथाकथाच दीयते क्रियते वा याथाकथाचम्। याथाकथाचा दक्षिणा।

१७४८ **तेन हस्ताद्यः** ॥६।४।१०१॥ तेनेति तृतीयान्ताद् हस्तशब्दाद् देये कार्ये चार्थे यः प्रत्ययः स्यात्। हस्तेन देयं कार्यं वा हस्त्यम्।

१७४९ **शोभमाने** ॥६।४।१०२॥ तेनेति तृतीयान्ताच्छोभमानेऽर्थे इकण् प्रत्ययः स्यात्। कर्णवेष्टकाभ्यां शोभते कार्णवेष्टकिकं मुखम्। एवं वाल्ययुगिकं शरीरम्। औपानहिकौ पादौ। असमर्थनञ्समासोऽप्यस्मिन् विषये भवति। कर्णवेष्टकाभ्यां न शोभते अकार्णवेष्टकिकम्। अवाल्ययुगिकम्।

१७५० **कर्मवेषाद्यः** ॥६।४।१०३॥ कर्मन् वेष इत्येताभ्यां तृतीयान्ताभ्यां शोभमानेऽर्थे यः प्रत्ययः स्यात्। कर्मणा शोभते कर्मण्यं शौर्यम्। वेषेण शोभते वेष्यो नटः। पूर्ववन्नञ्समासो भवति। अकर्मण्यः। अवेष्यः। केचिद्वेषस्थाने वेशं पठन्ति। वेश्या नर्तकी।

१७५१ **कालात्परिजय्यलभ्यकार्यसुकरे** ॥ ६।४।१०४॥ कालविशेषवाचिनस्तृतीयान्तात् परिजय्ये लभ्ये कार्ये सुकरे चार्थे इकण् प्रत्ययः स्यात्। परितो जेतुं शक्यं परिजय्यम्। शक्ते कृत्यः। लभ्यकार्ययोः शक्तेऽर्हे वा। अकृच्छ्रेण क्रियते यत्तत्सुकरम्। मासेन परिजय्यो मासिको व्याधिः। मासेन लभ्यो

मासिकः पटः । मासेन कार्यं मासिकं चान्द्रायणम् । मासेन सुकरः प्रासादः । कालादिति किम् । चैत्रेण परिजय्यम् ।

१७५२ **निर्वृत्ते** ॥६।४।१०५॥ तेनेति कालादिति च वर्तते । कालवाचिनस्तृतीयान्तान्निर्वृत्तेऽर्थे इकण् प्रत्ययः स्यात् । अह्ना निर्वृत्तमाह्निकम् । मासिकम् । आर्धमासिकम् । सांवत्सरिकम् । योगविभाग उत्तरत्रास्यानुवृत्त्यर्थः ।

१७५३ **तं भाविभूते** ॥६।४।१०६ ॥ कालादिति वर्तते । द्वितीयान्तात् कालवाचिनो भाविनि भूते चार्थे इकण् प्रत्ययः स्यात् । स्वसत्तया व्याप्स्यमानकालो भावी । व्याप्तकालो भूतः । मासं भावी भूतो वा मासिक उत्सवो व्याधिर्वा ।

१७५४ **तस्मै भृताधीष्टे च** ॥ ६।४।१०७॥ कालादिति वर्तते । तस्मै इति तादर्थ्यचतुर्थ्यन्तात् कालवाचिनो भृतेऽधीष्टे चार्थे इकण् प्रत्ययः स्यात् । भृतो वेतनेन क्रीतः । अधीष्टः सत्कृत्य व्यापारितः । मासाय भृतो मासिकः कर्मकरः । मासं कर्मणे भृत इत्यर्थः । मासायाधीष्टो मासिक उपाध्यायः । मासमध्यापनायाधीष्ट इत्यर्थः । एवं वार्षिकः । सांवत्सरिकः। चकारस्तेन निर्वृत्ते तं भाविभूते तस्मै भृताधीष्टे चेति सूत्रत्रयस्याप्युत्तरत्रानुवृत्त्यर्थः ।

१७५५ **षण्मासाद्वयसि ण्येकौ** ॥६।४।१०८॥ षण्मासशब्दात् कालवाचिनस्तेन निर्वृत्ते तं भाविभूते तस्मै भृताधीष्टे चेत्यस्मिन् विषयेऽवयसि गम्यमाने ण्य इक इत्येतौ प्रत्ययौ स्याताम् । षड्भिर्मासैर्निर्वृत्तः षण्मासान् भावी भूतो वा षण्मासेभ्यो भृतोऽधीष्टो वा षाण्मास्यः । षण्मासिकः । अवयसीति किम् । षण्मासान् भूतः षण्मास्यः । 'षण्मासाद्ययणिकण्' इति यः ।

१७५६ **समाया ईनः** ॥६।४।१०९॥ समाशब्दात्तेन निर्वृत्त इत्यादिपञ्चकविषये ईनः प्रत्ययः स्यात् । समया निर्वृत्तः समां भूतो भावी वा समायै भृतोऽधीष्टो वा समीनः ।

१७५७ **रात्र्यहःसंवत्सराच्च द्विगोर्वा** ॥६।४।११०॥ रात्रि अहन् संवत्सर इत्येतदन्तात् समाशब्दान्ताच्च द्विगोस्तेन निर्वृत्त इत्यादिपञ्चकविषये ईनः

प्रत्ययो वा स्यात् । द्वाभ्यां रात्रिभ्यां निर्वृत्तो द्वे रात्री भूतो भावी वा द्वाभ्यां रात्रिभ्यां भृतोऽधीष्टो वा द्विरात्रीणः । एवं त्र्यहीनः । द्विसंवत्सरीणः। द्विसमीनः। पक्षे इकण् । द्वैरात्रिकः । द्वैयन्हिकः । द्वैयहिक इति तु अहशब्दात् समाहारद्विगोर्गोरिकणि भवति । द्विसांवत्सरिकः । अत्र ।

१७५८ **मानसंवत्सरस्याशाणकुलिजस्यानाम्नि** ॥७।४।२९॥ मीयते परिच्छिद्यते येन तन्मानम् परिमाणादि । संख्याया अधिकशब्दाच्च परस्य शाणकुलिजशब्दवर्जितस्य मानवाचिनः संवत्सरशब्दस्य च ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् । इत्यादिना उत्तरपदवृद्धिः । द्वैसमिकः । रात्र्यन्तादहरन्ताच्च परमपि समासान्तं बाधित्वा अनवकाशत्वादीन एव भवति । तथा च समासान्तसंनियोगे उच्यमानः ' सर्वांशसंख्याव्ययात् ' इत्यट्टादेशो न भवति । समान्तात् पूर्वेण नित्ये प्राप्ते शेषेभ्योऽप्राप्ते विकल्पः ।

१७५९ **वर्षादश्च वा** ॥ ६।४।१११ ॥ वर्षशब्दो यः कालवाची तदन्ताद् द्विगोस्तेन निर्वृत्त इत्यादिपञ्चकविषयेऽकारश्चकारादीनश्च वा स्यात् । पक्षे इकण् । एवं त्रैरूप्यं भवति । द्वाभ्यां वर्षाभ्यां निर्वृत्तो द्वौ वर्षौ द्वे वर्षे वा भूतो भावी द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा द्विवर्षः । द्विवर्षीणः । द्विवार्षिकः । अत्र ।

१७६० **संख्याधिकाभ्यां वर्षस्याभाविनि** ॥७।४।१८॥ संख्यावाचिनोऽधिकशब्दाच्च परस्य वर्षशब्दस्य ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् अभाविनि—न चेत् स तद्धितो भावीत्यस्मिन्नर्थे विहितः। इत्युत्तरपदवृद्धिः । एवं अधिकवार्षिकः। भाविनि तु प्रतिषेधात् द्वैवर्षिकः। त्रैवर्षिकः ।

१७६१ **प्राणिनि भूते** ॥६।४।११२॥ कालवाचिवर्षान्ताद् द्विगोर्भूतेऽर्थे अः प्रत्ययः स्यात् स चेद् भूतः प्राणी भवति । द्वे वर्षे भूतो द्विवर्षो दारकः। त्रिवर्षो वत्सः । प्राणिनीति इति किम् । द्विवर्षः, द्विवर्षीणः द्विवार्षिकः सरकः। भूत इति किम् । शेषेष्वर्थेषु पूर्वेण विकल्प एव । द्विवर्ष, द्विवर्षीणः, द्विवार्षिको मनुष्यः। भाविन्यपि केचिदिच्छन्ति । एवमुत्तरेष्वपि त्रिषु पूर्वेण विकल्पे प्राप्ते नित्यार्थो विधिः।

१७६२ **मासाद्वयसि यः** ॥६।४।११३॥ मासान्ताद् द्विगोर्भूतेऽर्थे यः

प्रत्ययः स्याद्वयसि गम्यमाने । द्वौ मासौ भूतो द्विमास्यः दारकः। त्रिमास्यो दारकः। वयसीति किम् । द्वैमासिको व्याधिः। त्रैमासिको व्याधिः। द्वैमासिको नायकः। भूत इत्येव । द्वौ मासौ भावी द्वैमासिको युवा ।

१७६३ ईनञ् च ॥६।४।११४॥ द्विगोरिति निवृत्तं योगविभागात् । मास-शब्दाद् भूतेऽर्थे ईनञ् चकाराद्यश्च प्रत्ययः स्याद्वयसि गम्यमाने । मासं मासीनः मास्यो दारकः । अकारो वृद्धिहेतुत्वेन पुंवद्भावाभावार्थः । मासीना स्वसाऽस्य मासीनास्वसृकः । वयसीत्येव । मासिको नायकः।

१७६४ षण्मासाद्ययणिकण् ॥६।४।११५॥ षण्मासशब्दात् कालवाचिनो भूतेऽर्थे ययण् इकण् इत्येते प्रत्ययाः स्युः वयसि गम्यमाने । षण्मासान् भूतः षण्मास्यः । षाण्मास्यः । षाण्मासिकः । भूत इत्येव । षण्मासान् भावी । वयसी-त्येव । षाण्मास्यः । षण्मासिको नायकः ।

१७६५ सोऽस्य ब्रह्मचर्यतद्वतोः ॥ ६।४।११६ ॥ स इति प्रथमान्तात् कालवाचिनः षष्ठ्यर्थे इकण् प्रत्ययः स्यात् ब्रह्मचर्ये तद्वति चाभिधेये । यत्तदस्येति निर्दिष्टं तच्चेद् ब्रह्मचर्यं ब्रह्मचारी वा भवतीत्यर्थः । मासोऽस्य ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यम् । आर्धमासिकम् । सांवत्सरिकम् । मासोऽस्य ब्रह्मचारिणो मासिको ब्रह्मचारी । मासं ब्रह्मचर्यमस्येत्यर्थः । एवमार्धमासिकः । सांवत्सरिकः ।

१७६६ प्रयोजनम् ॥६।४।११७॥ सोऽस्येति वर्तते । स इति प्रथमान्ता-दस्येति षष्ठ्यर्थे इकण् प्रत्ययः स्यात् यत्तत्प्रथमान्तं तच्चेत् प्रयोजनं स्यात् । प्रयो-जनं प्रयोजकं प्रवर्तनं जनकमुत्पादकम् । जिनमहः प्रयोजनमस्य जैनमहि-कम् । ऐन्द्रमहिकम् । आभिषेचनिकम् । दैपोत्सविकम् ।

१७६७ एकागाराच्चौरे ॥६।४।११८॥ एकागारशब्दात् तदस्य प्रयोजन-मित्यस्मिन् विषये इकण् प्रत्ययः स्यात् चौरे—यत्तदस्येति निर्दिष्टं स चेत् चौरो भवति । एकमसहायमगारं प्रयोजनमस्य ऐकागारिकश्चौरः । ऐकागारिकी । चौरे नियमार्थं वचनम् । तेनान्यत्र न भवति । एकागारं प्रयोजनमस्य भिक्षो-रिति वाक्यमेव ।

१७६८ चूडादिभ्योऽण् ॥६।४।११९॥ चूडादिभ्यस्तदस्य प्रयोजनमित्य-

स्मिन् विषयेऽण् प्रत्ययः स्यात् । चूडा प्रयोजनमस्य चौडम् । चूला चौलम् । उपनयनमौपनयनम् । श्रद्धा श्राद्धम् । चूडादयः प्रयोगगम्याः।

१७६९ **विशाखाषाढान्मन्थदण्डे** ॥ ६।४।१२० ॥ विशाखा आषाढा इत्येताभ्यां तदस्य प्रयोजनमित्यस्मिन् विषयेऽण् प्रत्ययः स्यात् यथासंख्यं मन्थे दण्डे चाभिधेये । मन्थो विलोडनं दण्डो वा । विशाखा प्रयोजनमस्य वैशाखो मन्थः । आषाढा आषाढे आषाढाः प्रयोजनमस्य आषाढो दण्डः ।

१७७० **उत्थापनादेरीयः** ॥६।४।१२१॥ उत्थापन इत्येवमादिभ्यस्तदस्य प्रयोजनमित्यस्मिन् विषये ईयः प्रत्ययः स्यात् । उत्थापनं प्रयोजनमस्योत्थापनीयः। उपस्थापनीयः ।

१७७१ **विशिरुहिपादिपरिसमापेरनात् सपूर्वपदात्** ॥ ६।४।१२२ ॥ विशिरुहिपदिपूरिसमापि इत्येतेभ्योऽनप्रत्ययान्तेभ्यः सपूर्वपदेभ्यस्तदस्य प्रयोजनमित्यर्थे ईयः प्रत्ययः स्यात् । गृहप्रवेशनं प्रयोजनमस्य गृहप्रवेशनीयम् । संवेशनीयम् । अनुवेशनीयम् । अनुप्रवेशनीयम् । समावेशनीयम् । रुहि–प्रासादारोहणीयम् । आरोहणीयम् । प्ररोहणीयम् । अनुरोहणीयम् । अन्वारोहणीयम् । पदि–अश्वप्रपदनीयम् । गोप्रपदनीयम् । पूरि-प्रपापूरणीयम् । महापूरणीयम् । समापि–समापनीयम् । अङ्गसमापनीयम् । श्रुतस्कन्धसमापनीयम् । व्याकरणसमापनीयम् ।

१७७२ **स्वर्गस्वस्तिवाचनादिभ्यो यलुपौ** ॥६।४।१२३॥ स्वर्गादिभ्यः स्वस्तिवाचनादिभ्यश्च यथासंख्यं तदस्य प्रयोजनमित्यस्मिन् विषये यः प्रत्ययो लुप् च स्याताम् । स्वर्गादिभ्यो यः–स्वर्गः प्रयोजनमस्य स्वर्ग्यम् । यश-स्यम् । आयुष्यम् । काम्यम् । धन्यम् । स्वस्तिवाचनादिभ्य इकणो लुप् । स्वस्तिवाचनं प्रयोजनमस्य स्वस्तिवाचनम् । शान्तिवाचनम् । पुण्याहवाचनम् । स्वर्गादयः स्वस्तिवाचनादयश्च प्रयोगगम्याः । गणद्वयोपादानाद्वचनभेदेऽपि यथासंख्यम् ।

१७७३ **समयात् प्राप्तः** ॥६।४।१२४॥ सोऽस्येत्यनुवर्तते । समयशब्दात् प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययः स्यात् योऽसौ प्रथमान्तः प्राप्तश्चेत् स भवति । समयः प्राप्तोऽस्य सामयिकं कार्यम् । उपनतकालमित्यर्थः ।

१७७४ ऋत्वादिभ्योऽण् ॥ ६।४।१२५ ॥ ऋतु इत्येवमादिभ्यः सोऽस्य प्राप्त इत्यर्थे अण् प्रत्ययः स्यात् । ऋतुः प्राप्तोऽस्य आर्तवं पुष्पफलम् । उपवस्ता प्राप्तोऽस्य औपवस्त्रम् । प्राशिता प्राप्तोऽस्य प्राशित्रम् । ऋत्वादयः प्रयोगगम्याः ।

१७७५ कालाद्यः ॥ ६।४।१२६ ॥ कालशब्दात् सोऽस्य प्राप्त इत्यर्थे यः प्रत्ययः स्यात् । कालः प्राप्तोऽस्य काल्यस्तापसः। काल्या मेघाः ।

१७७६ दीर्घः ॥ ६।४।१२७ ॥ कालशब्दात् प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययः स्यात् योऽसौ प्रथमान्तः स चेद्दीर्घो भवति। दीर्घः कालोऽस्य कालिकमृणम् । कालिकं वैरम् । कालिकी संपत् । योगविभागादिकण् । यविधाने हि कालाद्यो दीर्घश्चेत्येकमेव सूत्रं क्रियेत ।

१७७७ आकालिकामिकश्चाद्यन्ते ॥६।४।१२८॥ आकालिकमिति शब्दरूपमिकान्तमिकणन्तं च निपात्यते। आकालशब्दादिक इकण् च भवत्यर्थे भवतीत्यर्थः। आद्यन्ते—आदिरेव यद्यन्तो गम्यते । कथं चादिरेवान्तो भवति । यस्मिन् काले यत् प्रवृत्तमनध्यायादि तस्मिन्नेव काले प्रत्यावृत्ते यदि तदुपरमेत । यदि वा यस्मिन्नेव काले क्षणादौ विद्युदादेर्जन्म यदि तस्मिन्नेव काले विनश्येन्नात्मलाभकालादूर्ध्वं तिष्ठेदित्यर्थः । आकालं भवति आकालिकोऽनध्यायः । पूर्वेद्युर्यस्मिन् काले तृतीये चतुर्थे वा यामे प्रवृत्तः पुनरपरेद्युरपि आतस्मात् कालाद् भवन् आकालिकोऽनध्याय उच्यते । आकालिका आकालिकी वा दृष्टिः । स्त्रियामिकेकणोर्विशेषः । अकालिका आकालिकी वा विद्युत् । आ जन्मकालमेव भवन्ती जन्मानन्तरविनाशिनी ऊर्ध्वमननुवर्तमाना एवमुच्यते । एवं च द्वेधाप्यादिरेवान्तो भवति । आद्यन्त इति किम् । सर्वकालभाविनि मा भूत् । निपातनमादावन्ते चेति द्वन्द्वनिवृत्त्यर्थम् । अथवा निपातनस्येष्टविषयत्वाद् समानकालशब्दस्याकालादेशः । आद्यन्त इति च द्वन्द्वः प्रकृतिविशेषणम् । आद्यन्तयोर्वर्तमानाद् समानकालशब्दाद् प्रथमान्तादस्येति षष्ठ्यर्थे इकेकणौ निपात्येते समानकालशब्दस्याकालादेशः । समानकालावाद्यन्ता—वस्याकालिकोऽनध्यायः । आकालिका आकालिकी वा विद्युत् । समानकालताद्यन्तयोः पूर्ववद्भेदितव्या ।

१७७८ त्रिंशद्विंशतेर्डकोऽसंज्ञायामार्हदर्थे ॥६।४।१२९॥ त्रिंशद्विंशति इत्येताभ्यामा अर्हदर्थाद्योऽर्थो वक्ष्यते तस्मिन् डकः प्रत्ययः स्यात् कापवादः

असंज्ञायां विषये न चेत् प्रत्ययान्तं कस्यचित् संज्ञा भवति। त्रिंशता क्रीतं त्रिंशकम्। विंशत्या क्रीतं विंशकम्। त्रिंशतमर्हति त्रिंशकः। विंशकः। आर्हदर्थ इत्यभिविधावाकारः। असंज्ञायामिति किम्। त्रिंशत्कम्। विंशतिकम्।

१७७९ **संख्याऽतेश्चाशत्तिष्टेः कः** ॥६।४।१३०॥ शदन्तत्यन्तष्ट्यन्तवर्जितायाः संख्याया डतिप्रत्ययान्ताच्च शब्दाच्चकारात्त्रिंशद्विंशतिभ्यां च आर्हदर्थे कः प्रत्ययः स्यात्। इकणोऽपवादः। द्वाभ्यां क्रीतं द्विकम्। त्रिकम्। पञ्चकम्।

१७८० **बहुगणं भेदे** ॥१।१।४०॥ बहुगण इत्येतौ शब्दौ भेदे वर्तमानौ संख्यावत् स्याताम्। भेदो नानात्वमेकत्वप्रतियोगि। बहुकः। गणकः। भेद इति किम्। वैपुल्ये संघे च संख्याकार्यं मा भूत्। बहुगणौ न नियतावधिभेदाभिधायकाविति संख्याप्रसिद्धेरभावात् वचनम्। अत एव भूर्यादिनिवृत्तिः। यावत्कम्। तावत्कम्।

१७८१ **कसमासेऽध्यर्धः** ॥१।१।४१॥ अध्यर्धशब्दः कप्रत्यये समासे च विधातव्ये संख्यावत् स्यात्। अध्यर्द्धेन क्रीतम् अध्यर्धकम्। अध्यर्धेन शूर्पेण क्रीतम् अध्यर्धशूर्पम्। अत्र संख्यापूर्वत्वेन द्विगुत्वे क्रीतार्थस्येकणः 'अनाम्न्यद्विः प्लुप्' इति लुप्। कसमास इति किम्। धादिप्रत्ययविधौ न भवति।

१७८२ **अर्धपूर्वपदः पूरणः** ॥१।१।४२॥ अर्धपूर्वपदः पूरणप्रत्ययान्तः शब्दः कप्रत्यये समासे च विधातव्ये संख्यावत् स्यात्। अर्धपञ्चमकम्। अर्धपञ्चमशूर्पम्। डति–कतिभिः क्रीतं कतिकम्। त्रिंशत्–त्रिंशत्कम्। विंशति–विंशतिकम्। अषष्टितेरिति प्रतिषेधे प्राप्ते डतित्रिंशद्विंशतीनामुपादानम्। अशत्तिष्टेरिति किम्। चात्वारिंशत्कम्। पाञ्चाशत्कम्। साप्ततिकम्। षाष्टिकम्। आशीतिकम्। नावतिकम्।

१७८३ **शतात् केवलादतस्मिन् येकौ** ॥६।४।१३१॥ आ अर्हदर्थाद् योऽर्थो वक्ष्यते तस्मिन् केवलाच्छतशब्दाद् य इक इत्येतौ प्रत्ययौ स्यातां कापवादौ अतस्मिन्—स चेदर्थो वस्तुतः प्रकृत्यर्थादभिन्नो न भवेत्। शतेन क्रीतं शत्यम्। शतिकम्। शतमर्हति शत्यः शतिकः। शतं वर्षाणि मानमस्य शत्यः शतिकः पुरुषः। केवलादिति किम्। द्युत्तरं शतं द्विशतम्। तेन क्रीतं द्विशतकम्।

संख्यादेश्चार्हदलुचः इति प्राप्नोति। अतस्मिन्निति किम्। शतं मानमस्य शतकं स्तोत्रम्। शतकनिदानम्। अत्र हि प्रकृत्यर्थ एव श्लोकाध्यायशतं प्रत्ययान्तेनाभिधीयते। अन्यस्मिँस्तु शते भवत्येव। शतेन क्रीतं शाटकशतं शत्यम्, शतिकम्।

१७८४ **वातोरिकः** ॥६।४।१३२॥ अत्वन्तायाः संख्याया आ अर्हदर्थाद्योऽर्थो वक्ष्यते तस्मिन्निकः प्रत्ययो वा स्यात्। यावतिकम्। यावत्कम्। तावतिकम्। तावत्कम्। विधानसामर्थ्यादिकारलोपो न भवति।

१७८५ **कार्षापणादिकट् प्रतिश्चास्य वा** ॥६।४।१३३॥ कार्षापणशब्दादार्हदर्थे इकट् प्रत्ययः स्यात् अस्य च कार्षापणशब्दस्य प्रतीत्यादेशो वा भवति। कार्षापणिकम्। कार्षापणिकी। प्रतिकम्। प्रतिकी। चकार आदेशस्य प्रत्ययसंनियोगशिष्टत्वार्थः। अत एव द्विगोर्लुपि प्रत्यादेशो न भवति। द्विकार्षापणम्। अध्यर्धकार्षापणम्। अस्येति स्थानिप्रतिपत्त्यर्थम्। अन्यथा प्रतिः प्रत्ययान्तरं विज्ञायेत। टकारो ङ्यर्थः।

१७८६ **अर्धात् पलकंसकर्षात्** ॥६।४।१३४॥ अर्धशब्दपूर्वात् पलकंसकर्ष इत्येवमन्तान्नान्न आर्हदर्थे इकट् प्रत्ययः स्यात्। अर्धपलिकम्। अर्धपलिकी। अर्धकंसिकम्। अर्धकंसिकी। अर्धकर्षिकम्। अर्धकर्षिकी।

१७८७ **कंसार्धात्** ॥६।४।१३५॥ कंस अर्ध इत्येताभ्यामार्हदर्थे इकट् प्रत्ययः स्यात्। कंसिकम्। कंसिकी। अर्धिकम्। अर्धिकी।

१७८८ **सहस्रशतमानादण्** ॥६।४॥१३६॥ सहस्र शतमान इत्येताभ्यामार्हदर्थेऽण् प्रत्ययः स्यात्। केकणोरपवादः। सहस्रेण क्रीतः साहस्रः। शतमानेन शातमानः। वसनादित्यत्र सहस्रशतमानग्रहणमकृत्वाऽण्वचनं 'नवाणः' इत्येवमर्थम्।

१७८९ **शूर्पाद्ढाञ्** ॥६।४।१३७॥ शूर्पशब्दादार्हदर्थेऽञ् प्रत्ययो वा स्यात्। इकणोऽपवादः। शौर्पम्। शौर्पिकम्।

१७९० **वसनात्** ॥६।४।१३८॥ वसनशब्दादार्हदर्थेऽञ् प्रत्ययः स्यात्। वसनेन क्रीतं वासनम्।

१७९१ **विंशतिकात्** ॥६।४।१३९॥ विंशतिकशब्दादार्हदर्थेऽञ् प्रत्ययः स्यात् । विंशतिर्मानमस्य विंशतिकम् । तेन क्रीतं वैंशतिकम् । योगविभाग उत्तरार्थः ।

१७९२ **द्विगोरीनः** ॥६।४।१४०॥ विंशतिकशब्दान्ताद् द्विगोरार्हदर्थे ईनः प्रत्ययः स्यात् । अणोऽपवादः । विधानसामर्थ्याल्लुब् न भवति । द्विविंशतिकीनम् । त्रिविंशतिकीनम् । अध्यर्धविंशतिकीनम् । अर्धपञ्चमविंशतिकीनम् ।

१७९३ **अनाम्न्यद्विः प्लुप्** ॥६।४। १४१॥ द्विगोः समासादार्हदर्थे उत्पन्नस्य प्रत्ययस्य पिल्लुप् सकृत् स्यान्न तु द्विः अनाम्नि—न चेत् प्रत्ययान्तं कस्यचिन्नाम भवति । द्वाभ्यां कंसाभ्यां द्विकंस्या वा क्रीतं द्विकंसम् । त्रिकंसम् । अध्यर्धकंसम् । अर्धपञ्चमकंसम् । द्विशूर्पम् । त्रिशूर्पम् । अध्यर्धशूर्पम् । अर्धपञ्चमशूर्पम् । अद्विरिति किम् । द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । अञ् लुप् । द्विशूर्पेण क्रीतं द्विशौर्पिकम् । अनाम्नीति किम् । पञ्च लोहिन्यः परिमाणमस्य पाञ्चलोहितिकम् । जातिश्च णीत्यादिना पुंवद्भावः । पञ्च कलायाः परिमाणमस्य पाञ्चकलायिकम् । परिमाणविशेषनाम्नी एते । अतएव मानसंवत्सरेत्यादिना नोत्तरपदवृद्धिः । लुपः पित्त्वात् पञ्चभिः गार्गीभिः क्रीतः पञ्चगर्गं इत्यत्रेकणो लुपि ।

१७९४ **क्यङ्मानिपित्तद्धिते** ॥३।२।५०॥ क्यङि प्रत्यये मानिनि शब्दे चोत्तरपदे पिति तद्धिते च प्रत्यये परे परतः स्त्रीलिङ्गशब्दोऽनूङ् पुंवत् स्यात् । इत्यनेन पुंवद्भावो भवति । संख्यान्ताद् द्विगोर्लुपं नेच्छन्त्येके । द्वाभ्यां षष्टिभ्यां क्रीतं द्विषाष्टिकम् । त्रिषाष्टिकम् ।

१७९५ **नवाणः** ६।४।१४२॥ द्विगोः परस्यार्हदर्थे विहितस्याणः पिल्लुप् वा स्यान्न तु द्विः । द्विसहस्रम् । द्विसाहस्रम् । अध्यर्धसहस्रम् । अध्यर्धसाहस्रम् । अर्धषष्ठसहस्रम् । अर्धषष्ठसाहस्रम् । द्विशतमानम् । द्विशातमानम् । अध्यर्धशतमानम् । अध्यर्धशातमानम् । अर्धषष्ठशतमानम् । अर्धषष्ठशातमानम् । अण इति किम् । द्वौ द्रोणौ पचति द्विद्रोणः । अध्यर्धद्रोणः । पूर्वेण नित्यमेव लुप् ।

१७९६ **सुवर्णकार्षापणात्** ॥६।४।१४३॥ सुवर्णान्तात् कार्षापणान्ताच्च द्विगोः परस्यार्हदर्थे विहितस्य प्रत्ययस्य वा लुप् स्यात् न तु द्विः । द्वाभ्यां सुवर्णा-

भ्यां क्रीतं द्विसुवर्णम् । द्विसौवर्णिकम् । अध्यर्धसुवर्णम् । अध्यर्धसौवर्णिकम् । द्विकार्षापणम् । द्विकार्षापणिकम् । द्विमति । द्विमतिकम् । अध्यर्धकार्षापणम् । अध्यर्धकार्षापणिकम् । अध्यर्धप्रतिकम् ।

१७९७ **द्वित्रिबहोर्निष्कबिस्तात्** ॥६।४।१४४॥ द्वि त्रि बहु इत्येतेभ्यः परौ यौ निष्कबिस्तशब्दौ तदन्ताद् द्विगोरार्हदर्थे उत्पन्नस्य प्रत्ययस्य लुप् वा स्यान्नतु द्विः। द्विनिष्कम् । द्वैनिष्किम् । त्रिनिष्कम् । त्रैनिष्किकम् । बहुनिष्कम् । बहुनैष्किकम् । द्विबिस्तम् । द्विबैस्तिकम् । त्रिबिस्तम् । त्रिबैस्तिकम् । बहुबिस्तम् । बहुबैस्तिकम् ।

१७९८ **शताद्यः** ॥६।४।१४५॥ शतान्ताद् द्विगोरार्हदर्थे यः प्रत्ययो वा स्यात् । पक्षे संख्यालक्षणः कः। तस्य लुप् भवति । अस्य तु विधानसामर्थ्यान्न भवति । द्वाभ्यां शताभ्यां क्रीतं द्विशत्यम् । द्विशतम् । अध्यर्धशत्यम् । अध्यर्धशतम् । अर्धषष्ठशत्यम् । अर्धषष्ठशतम् ।

१७९९ **शाणात्** ॥६।४।१४६॥ शाणान्ताद् द्विगोरार्हदर्थे यः प्रत्ययो वा स्यात् । पक्षे इकण् । तस्य लुप् । अस्य तु न भवति विधानसामर्थ्यात् । पञ्चशाण्यम् । पञ्चशाणम् । अध्यर्धशाण्यम् । अध्यर्धशाणम् । अर्धपञ्चमशाण्यम् । अर्धपञ्चमशाणम् । योगविभाग उत्तरार्थः ।

१८०० **द्वित्र्यादेर्याण् वा** ॥६।४।१४७॥ द्वित्रि इत्येतत्पूर्वो यः शाणशब्दस्तदन्ताद् द्विगोरार्हदर्थे य अण् इत्येतौ प्रत्ययौ वा स्याताम् । वाग्रहणमुत्तरत्र वानिवृत्त्यर्थम् । द्वाभ्यां शाणाभ्यां क्रीतं द्विशाण्यम् । द्वैशाणम् । पक्षे इकण् तस्य लुप् । द्विशाणम् । एवं त्रिशाण्यम् । त्रैशाणम् । त्रिशाणम् । एवं च त्रैरूप्यं भवति ।

१८०१ **पणपादमाषाद्यः** ॥ ६।४।१४८ ॥ पण पाद माष इत्येवमन्ताद् द्विगोरार्हदर्थे यः प्रत्ययः स्यात् । विधानसामर्थ्यान्न लुप् । द्वाभ्यां पणाभ्यां क्रीतं द्विपण्यम् । द्विपाद्यम् । त्रिपण्यम् । त्रिपाद्यम् । अध्यर्धपण्यम् । अध्यर्धपाद्यम् । अर्धषष्ठपण्यम् । माषपणसाहचर्यात् पादः परिमाणं गृह्यते न प्राण्यङ्गम् । तेन हिमहतिकापीति पद्भावो न भवति, तत्र प्राण्यङ्गस्यैव ग्रहणात् । यद्वा पादसंबंधी यका-

रस्तत्र गृह्यते अयं तु द्विगुसंबंधीति न भवति । द्विमाष्यम् । त्रिमाष्यम् । अध्यर्धमाष्यम् ।

१८०२ **खारीकाकणीभ्यः कच्** ॥६।४।१४९॥ खारी काकणी इत्येवमन्ताद् द्विगोर्बहुवचनात् केवलाभ्यां च खारीकाकणीभ्यामार्हदर्थे कच् प्रत्ययः स्यात् । विधानसामर्थ्याच्च न लुप् । द्वाभ्यां खारीभ्यां क्रीतं द्विखारीकम् । द्विकाकणीकम् । त्रिखारीकम् । त्रिकाकणीकम् । अध्यर्धखारीकम् । अध्यर्धकाकणीकम् । अर्धतृतीयखारीकम् । अर्धतृतीयकाकणीकम् । केवलाभ्यां–खारीकम् । काकणीकम् । चकारो न कचीति प्रतिषेधार्थः ।

१८०३ **मूल्यैः क्रीते** ॥६।४।१५०॥ मूल्यवाचिनो निर्देशादेव तृतीयान्तात् क्रीतेऽर्थे यथाविहितमिकणादयः प्रत्यया: स्युः। प्रस्थेन क्रीतं प्रास्थिकम् । सप्तत्या साप्ततिकम् । आशीतिकम् । नैष्किकम् । पाणिकम् । पादिकम् । त्रिंशकम् । विंशकम् । द्विकम् । त्रिकम् । शत्यम् । शतिकम् । मूल्यैरिति किम् । देवदत्तेन क्रीतम् । पाणिना क्रीतम् । वृत्तौ संख्याविशेषानवगमात् द्विवचनबहुवचनान्तान्न भवति । प्रस्थाभ्यां प्रस्थैर्वा क्रीतमिति । यत्र तु संख्याविशेषावगमे प्रमाणमस्ति तत्र भवत्येव । द्वाभ्यां क्रीतं द्विकम् । त्रिकम् । द्वाभ्यां प्रस्थाभ्यां क्रीतं द्विप्रस्थम् । त्रिप्रस्थम् । यथा मुद्गैः क्रीतं मौद्गिकम् । माषिकम् । न ह्येकेन मुद्गेन माषेण वा क्रयः संभवति ।

१८०४ **अर्धात् परिमाणस्यानतौ वा त्वादेः** ॥७।४।२०॥ अर्धशब्दात् परस्य परिमाणवाचिनः कुडवादेः शब्दरूपस्य ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्यानतोऽकाररहितस्य वृद्धिः स्याद्वा त्वादेः–परिमाणात् पूर्वस्य त्वर्धशब्दस्य वा । अर्धकुडवेन क्रीतम् अर्धकौडविकम् । आर्धकौडविकम् । परिमाणस्येति किम् । अर्धक्रोशः प्रयोजनमस्य आर्धक्रोशिकम् । अनत इति किम् । अर्धप्रस्थिकम् । आर्धप्रस्थिकम् । आदिविकल्प उत्तरवृद्धचनपेक्ष इति भवत्येव । अतः प्रतिषेधादाकारस्य वृद्धिर्भवत्येव । अर्धखार्यां भवः अर्धखारीकः। पुनरत्र को विशेषः सत्यामसत्यां वा वृद्धौ ? उच्यते । अर्धखारी भार्यास्य अर्धखारीभार्य इति । यत्र वृद्धिप्रतिषेधः स्यात् अयं तद्धितो न वृद्धिहेतुरिति पुंवद्भावप्रतिषेधो न स्यात् । यथार्धप्रस्थे भवार्धप्रस्थी सा भार्याऽस्य अर्धप्रस्थभार्य इति ।

१८०७ तस्य वापे ॥६।४।१७१॥ तस्येति षष्ठ्यन्ताद् वापेऽर्थे यथाविधि इकणादयः प्रत्ययाः स्युः । उप्यते अस्मिन्निति वापः क्षेत्रम् । प्रस्थस्य वापः प्रास्थिकम् । द्रौणिकम् । मौद्गिकम् । शत्यम् । शतिकम् । खारीकम् ।

१८०६ वातपित्तश्लेष्मसंनिपाताच्छमनकोपने ॥ ६।४।१७२ ॥ वातादिभ्यस्तस्येति षष्ठ्यन्तेभ्यः शमने कोपने चार्थे यथाविहितमिकण् प्रत्ययः स्यात् । शाम्यति येन तच्छमनम् । कुप्यति येन तत्कोपनम् । वातस्य शमनं कोपनं वा वातिकम् । पैत्तिकम् । श्लैष्मिकम् । सांनिपातिकम् । पथ्यमपथ्यं च द्रव्याद्येवमभिधीयते प्रकरणात्तु विशेषगतिः ।

१८०७ हेतौ संयोगोत्पाते ॥ ६।४।१७३ ॥ तस्येति षष्ठ्यन्ताद्धेतावर्थे यथाविहितं प्रत्ययः स्यात् योऽसौ हेतुः स चेत् संयोग उत्पातो वा । हेतुर्निमित्तं संयोगः संबंधः । प्राणिनां शुभाशुभसूचको महाभूतपरिणाम उत्पातः । शतस्य हेतुरीश्वरसंयोगः शत्यः । शतिकः । साहस्रः । उत्पात–सोमग्रहणस्य हेतुरुत्पातः सोमग्रहणिको भूमिकम्पः । सांग्रामिकमिन्द्रधनुः । सौभिक्षिकः परिवेषः। शतस्य हेतुर्दक्षिणाक्षिस्पन्दनम् शत्यं शतिकं साहस्रम् । संयोगोत्पात इति किम् । शतस्य हेतुश्चैत्रः ।

१८०८ पुत्राद्येयौ ॥६।४।१७४॥ पुत्रशब्दात् तस्येति षष्ठ्यन्ताद्धेतावर्थे य ईय इत्येतौ प्रत्ययौ स्याताम् स चेद्धेतुः संयोग उत्पातो वा भवति । पुत्रस्य हेतुः संयोग उत्पातो वा पुत्र्यः । पुत्रीयः ।

१८०९ द्विस्वरब्रह्मवर्चसाद्योऽसंख्यापरिमाणाश्वादेः ॥६।४।१७५॥ संख्यापरिमाणाश्वादिवर्जिताद् द्विस्वराच्चान्नो ब्रह्मवर्चसशब्दाच्च तस्येति षष्ठ्यन्ताद्धेतावर्थे यः प्रत्ययः स्यात् स चेद्धेतुः संयोग उत्पातो वा भवति । इकणादीनामपवादः । धनस्य हेतुः संयोग उत्पातो वा धन्यः । यशस्यः । आयुष्यः । वात्या विद्युत् । ब्रह्मवर्चसस्य हेतुः संयोग उत्पातो वा ब्रह्मवर्चस्यः । कथं गोर्हेतुः संयोग उत्पातो वा गव्यः ? द्विस्वराभावात् 'गोः स्वरे यः' इति भविष्यति । द्विस्वरेति किम् । विजयस्य हेतुः संयोग उत्पातो वा वैजयिकः । ब्रह्मवर्चसग्रहणमद्विस्वरार्थम् । असंख्यापरिमाणाश्वादेरिति किम् । संख्या–पञ्चानां हेतुः संयोग उत्पातो वा पञ्चकः । सप्तकः । परिमाण–प्रास्थिकः । खारीकः ।

'ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः' ॥

इति संख्यापरिमाणयोर्विशेषः। अश्वादि–आश्विकः। गाणिकः। वासुकः।

१८१० पृथिवीसर्वभूमेरीशज्ञातयोश्च ॥ ६।४।१५६ ॥ पृथिवीसर्वभूमिशब्दाभ्यां षष्ठ्यन्ताभ्यामीशज्ञातयोस्तस्य हेतुः संयोग उत्पात इत्यस्मिन् विषये चात्र प्रत्ययः स्यात्। पृथिव्या ईश पार्थिवः। सर्वभूमेः सार्वभौमः। सर्वभूमेरनुशतिकादित्वादुभयपदवृद्धिः। पृथिव्या ज्ञातः पार्थिवः। कर्तरि षष्ठी संबन्धविवक्षायां वा। एवं सार्वभौमः। पृथिव्या हेतुः संयोग उत्पातो वा पार्थिवः। सार्वभौमः। ईशज्ञातयोरिति द्विवचनं हेतुविशेषणत्वशंकाव्यवच्छेदार्थम्।

१८११ लोकसर्वलोकाज्ज्ञाते ॥ ६।४।१५७ ॥ लोकसर्वलोकशब्दाभ्यां तस्येति षष्ठ्यन्ताभ्यां ज्ञातेऽर्थे यथाविहितमिकण् प्रत्ययः स्यात्। लोकस्य ज्ञातः लौकिकः। सार्वलौकिकः। सर्वलोकशब्दस्यानुशतिकादित्वादुभयपदवृद्धिः।

१८१२ तदस्मै वा वृद्ध्यायलाभोपदाशुल्कं देयम् ॥६।४।१५८॥ तदिति प्रथमान्तादस्मै इति चतुर्थ्यर्थे वा यथाविहितं प्रत्ययः स्यात् यत्तत्प्रथमान्तं तच्चेद् वृद्धिरायो लाभ उपदा शुल्कं वा देयम् भवति। अधमर्णेनोत्तमर्णाय गृहीतधनातिरिक्तं देयं वृद्धिः। ग्रामादिषु स्वामिग्राह्यो भाग आयः। पटादीनामुपादानं मूल्यातिरिक्तं प्राप्तं द्रव्यं लाभः। उपदा उत्कोचः। लञ्च उत्कोट इति यावत्। वणिजां रक्षानिर्वेशो राजभागः शुल्कम्। पञ्चास्मिन् शते वृद्धिः पञ्चकं शतम्। पञ्चास्मिन् ग्रामे आयः पञ्चको ग्रामः। पञ्चास्मिन् पटे लाभः पञ्चकः पटः। पञ्चास्मिन् व्यवहारे उपदा पञ्चको व्यवहारः। पञ्चास्मिन् शते शुल्कं पञ्चकं शतम्। एवं शतमस्मिन् वृद्धिरायो लाभ उपदा शुल्कं वा शत्यम् शतिकम्। साहस्रम्। प्रास्थिकम्। द्रौणिकम्। अस्मै–पञ्चास्मै देवदत्ताय वृद्धिरायो लाभ उपदा शुल्कं वा देयं पञ्चको देवदत्तः। शत्यः। शतिकः। साहस्रः प्रास्थिकः। द्रौणिकः। वृद्ध्यादिग्रहणं किम्। पञ्च मूल्यमस्मिन्नस्मै वा दीयते।

१८१३ पूरणार्द्धादिकः ॥६।४।१५९॥ पूरणप्रत्ययान्तादर्द्धशब्दाच्च तदिति प्रथमान्तादस्मिन्नस्मै वा दीयत इत्यर्थयोरिकः प्रत्ययः स्यात् यत्तत्प्रथमान्तं वृद्ध्यादि

चेत्तद् भवति । इकणिकटोरपवादः । द्वितीयमस्मिन्नस्मै वा वृद्धिरायो लाभ उपदा शुल्कं वा देयं द्वितीयिकः । तृतीयिकः । पञ्चमिकः । षष्ठिकः । अर्ध–अर्धिकः। अर्धिका स्त्री । अर्धशब्दो रूपकार्धे रूढः ।

१८१४ **भागाद्येकौ** ॥ ६।४।१६० ॥ भागशब्दात् तदस्मिन्नस्मै वा वृद्ध्यादीनामन्यतमं देयमिति विषये य इक इत्येतौ प्रत्ययौ स्याताम् इकणोऽपवादौ । भागोऽस्मिन्नस्मै वा वृद्ध्यादीनामन्यतमं देयं भाग्यः भागिकः । भागिका स्त्री । भागशब्दोऽपि रूपकार्धस्य वाचकः ।

१८१५ **तं पचति द्रोणाढाञ्** ॥ ६।४।१६१ ॥ तमिति द्वितीयान्ताद् द्रोणशब्दात् पचत्यर्थे अञ् प्रत्ययो वा स्यात् । पक्षे इकण् । द्रोणं पचति द्रौणः । द्रौणिकः । द्रौणिकी स्थाली गृहिणी वा । द्वौ द्रोणौ पचति द्विद्रोणी । 'अनाम्न्यद्विः प्लुप् ' इति अञ्इकणोर्लुप् ।

१८१६ **संभवदवहरतोश्च** ॥ ६।४।१६२ ॥ तमिति द्वितीयान्तान्नाम्नः पचति संभवदवहरतोश्चार्थयोर्यथाविहितमिकणादयः स्युः । तत्राधेयस्य प्रमाणानतिरेकेण धारणं संभवः । अतिरेकेणावहारः । प्रस्थं पचति संभवत्यवहरति वा प्रास्थिकः कटाहः । प्रास्थिकी स्थाली । संभवतिः अकर्मकः सकर्मकश्च संभवति । तत्र सकर्मक इह ग्राह्यः । संभवत्यवगृह्णातीत्यर्थः। चकारः पचता संभवदवहरतोः समुच्चयार्थः । तेनोत्तरत्रार्थत्रयस्याप्यनुवृत्तिः ।

१८१७ **पात्राचितादकादीनो वा** ॥ ६।४।१६३ ॥ पात्र आचित आढक इत्येतेभ्यो द्वितीयान्तेभ्यः पचत्संभवदवहरत्स्वर्थेषु ईनः प्रत्ययो वा स्यात् । पक्षे इकण् । पात्रं पचति संभवत्यवहरति वा पात्रीणः । पात्रीणा । पात्रिकः । पात्रिकी स्थाली । आचितीना । आचितिकी । आढकीना । आढकिकी । पात्रादयः परिमाणशब्दाः।

१८१८ **द्विगोरीनेकटौ** वा ॥६।४।१६४॥ पात्राचितादकान्ताद् द्विगोर्द्वितीयान्तात् पचदादिषु त्रिष्वर्थेषु ईन इकट् इत्येतौ प्रत्ययौ वा स्याताम् । पक्षे इकण् । तस्य च ' अनाम्न्यद्विः प्लुप् ' इति लुप् नानयोर्विधानसामर्थ्यात् ।

द्वे पात्रे पचति संभवत्यवहरति वा द्विपात्रीणः। द्विपात्रिकः। द्विपात्रः। द्विपात्रीणा। द्विपात्रिकी। द्विपात्री। आचितीना। आचितिका। आचिता। आचितान्ताद् ङीर्न भवति। अबिस्ताचितकम्बल्यादिति प्रतिषेधात्। आढकीना। आढकिकी। आढकी। टकारो ङ्यर्थः।

१८१९ **कुलिजाद्वा लुप् च** ॥ ६।४।१६७॥ कुलिजान्ताद् द्विगोर्द्वितीयान्तात् पचदादिषु त्रिष्वर्थेषु ईन इकट् इत्येतौ प्रत्ययौ वा स्याताम्। पक्षे इकण्। तस्य च लुप् वा भवति। तेन चातुरूप्यं संपद्यते। द्वे कुलिजे पचति संभवत्यवहरति वा द्विकुलिजीना। द्विकुलिजिकी। पक्षे द्विकुलिजी। द्वैकुलिजिकी। लुपि 'परिमाण' इत्यादिना ङीः। अन्ये तु लुब्विकल्पं न मन्यन्ते। तन्मते त्रैरूप्यमेव।

१८२० **वंशादेर्भाराद्धरद्वहदावहत्सु** ॥६।४।१६६॥ वंशादिभ्यः परो यो भारशब्दस्तदन्ताद् द्वितीयान्तान्नाम्नो हरति वहति आवहति चार्थे यथाविहितं प्रत्ययः स्यात्। वंशभारं हरति वहति आवहति वा वांशभारिकः। कौटभारिकः। वंशादेरिति किम्। भारं वहति। भारादिति किम्। वंशं हरति। अपरोऽर्थः— भारभूतेभ्यो वंशादिभ्यो द्वितीयान्तेभ्यो हरदादिष्वर्थेषु यथाविहितं प्रत्ययः स्यात्। भारभूतान् वंशान् हरति वहति आवहति वा वांशिकः। कौटिकः। वाल्वजिकः। भारादिति किम्। एकं वंशं हरति। हरतिर्देशान्तरप्रापणे चौर्ये वा। वहतिरुत्क्षिप्य धारणे। आवहतिरुपादाने। बहुवचनमर्थत्रयसूचनार्थम्।

१८२१ **द्रव्यवस्नात् केकम्** ॥६।४।१६७॥ द्रव्य वस्न इत्येताभ्यां द्वितीयान्ताभ्यां हरदादिष्वर्थेषु यथासंख्यं क इक इत्येतौ प्रत्ययौ स्याताम्। द्रव्यं हरति वहति आवहति वा द्रव्यकः। एवं वस्निकः।

१८२२ **सोऽस्य भृतिवस्नांशम्** ॥ ६।४।१६८ ॥ स इति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितमिकणादयः स्युः, यत्तत्प्रथमान्तं तच्चेद् भृतिर्वस्नमंशो वा भवति। भृतिर्वेतनम्। वस्नो नियतकालक्रयमूल्यम्। अंशो भागः। पञ्चास्य भृतिः पञ्चकः कर्मकरः। पञ्चास्य वस्नं पञ्चकः पटः। पञ्चास्यांशाः पञ्चकं नगरम्। एवं सप्तकः। अष्टकः। शत्यः। शतिकः। साहस्रः। प्रास्थिकः।

१८२३ **मानम्** ॥६।४।१६९॥ सोऽस्येति वर्तते। स इति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययः स्याद्यत् तत्प्रथमान्तं तच्चेन्मानं भवति। मीयते येन तन्मानम्। प्रस्थो मानमस्य प्रास्थिको राशिः। द्रौणिकः। खारीकः। खारीशतिकः। खारीसहस्रिकः। वर्षशतं मानमस्य वार्षशतिको देवदत्तः। वार्षसहस्रिकः। पञ्च लोहितानि पञ्च लोहिन्यो वा मानमस्य पाञ्चलोहितिकम्। पाञ्चकलायिकम्। अनयोः संज्ञाशब्दत्वाद् अनाम्न्यद्विरिति लुप् न भवति। अथ मासो मानमस्य वर्षं मानमस्येत्यादौ कस्मात् प्रत्ययो न भवति? न कालो मानग्रहणेन गृह्यते 'मानसंवत्सरस्य' इत्यादौ मानग्रहणे सत्यपि संवत्सरग्रहणात्।

१८२४ **जीवितस्य सन्** ॥६।४।१७०॥ जीवितस्य यन्मानं ततः प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययः स्यात् स च सन्—तस्य 'अनाम्न्यद्विः प्लुप्' इति लुप् प्राप्ता न भवतीत्यर्थः। षष्टिर्जीवितमानमस्य षाष्टिकः। सप्ततिकः। वार्षशतिकः। वार्षसहस्रिकः। द्वे षष्टी जीवितमानमस्य द्विषाष्टिकः। त्रिषाष्टिकः। द्विसप्ततिकः। त्रिसप्ततिकः। द्विवार्षशतिकः। त्रिवार्षशतिकः। द्विवार्षसहस्रिकः। त्रिवार्षसहस्रिकः। कथं पुनः षष्ट्यादयो जीवितमानं भवन्ति? वृत्तौ वर्षशब्दलोपात्। यथा शतायुर्वै पुरुष इति। एवं तर्हि मानमित्यनेनैव सिद्धे किमर्थमिदम्? नैवम्। प्रास्थिक इत्यादौ व्रीह्यादय एव ये याः त एव च प्रत्ययार्थः। अत्र तु जीवितं येयं पुरुषस्तु प्रत्ययार्थ इत्येतदर्थं लुबभावार्थं च।

१८२५ **संख्यायाः संघसूत्रपाठे** ॥ ६।४।१७१ ॥ संख्यावाचिनः प्रथमान्तादस्य मानमित्यर्थे यथाविहितं प्रत्ययः स्याद्यत्तदस्येति निर्दिष्टं तच्चेत्संघः सूत्रं पाठो वा भवति। संघः प्राणिनां समूहः। सूत्रं शास्त्रग्रन्थः। पाठोऽधीतिरध्ययनम्। पञ्च गावो मानमस्य पञ्चकः संघः। सप्तकः। अष्टावध्याया मानमस्याष्टकं पाणिनीयं सूत्रम्। दशकं वैयाघ्रपदीयम्। शतकं निदानम्। अष्टौ रूपाणि वारा मानमस्याष्टकः पाठोऽधीतः। संघसूत्रपाठ इति किम्। पञ्च वर्णा मानमस्य पञ्चतयं पदम्। पदं न संघो न सूत्रं न पाठ इति को न भवति। अपि तु तयडेव। एवं चतुष्टयी शब्दानां प्रवृत्तिः। पञ्चादीनां संख्येयानामवयवतया संघादेर्मानत्वान्मानमित्यनेनैव सिद्ध्यति परत्वात्तु तयट् प्राप्नोति तद्बाधनार्थं वचनम्। न चातिप्रसङ्गः। अभेदरूपापन्ने संघादौ तयायटोर्बाधकमिदम्। भेदरूपापन्ने तु तयडेव। चतुष्टये ब्राह्मणक्षत्रियविट्शूद्राः। स्याद्वादाश्रयणाच्चात्र भेदाभेदयोः संभव इति।

१८२६ नाम्नि ॥६।४।१७२॥ संख्यावाचिनस्तदस्य मानमित्यर्थे यथाविहितं प्रत्ययः स्यान्नाम्नि–समुदायश्चेन्नाम भवति। पञ्चेति संख्या मानमेषां पञ्चकाः शकुनयः। त्रिकाः शालङ्कायनाः। सप्तका ब्रह्मबृक्षाः। अष्टका राजर्षयः। योगविभागकरणात् संज्ञायां पञ्चैव पञ्चकाः त्रय एव त्रिका इति स्वार्थे एव वा प्रत्ययो भवति।

१८२७ विंशत्यादयः ॥६।४।१७३॥ विंशत्यादयः शब्दा नाम्नि विषये तदस्य मानमित्यर्थे साधवो भवन्ति। द्वेर्दशदर्थे विंभावः शतिश्च प्रत्ययः। द्वौ दशतौ मानमेषां संख्येयानामस्य वा संख्यानस्य विंशतिः। त्रेस्त्रिंभावः। शच्च प्रत्ययः। त्रयो दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य त्रिंशत्। चतुरश्चत्वारिंभावः शच्च प्रत्ययः। चत्वारो दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य चत्वारिंशत्। पञ्चन आत्वं च। पञ्च दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य पञ्चाशत्। षषस्तिः षष् च। षट् दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य षष्टिः। सप्तनस्तिः। सप्त दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य सप्ततिः। अष्टनोऽशी च। अष्टौ दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य अशीतिः। नवनस्तिः। नव दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य नवतिः। दशनः शभावस्तश्च प्रत्ययः। दश दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य शतम्। दश शतानि मानमेषां संख्येयानामस्य वा संख्यानस्य सहस्रम्। एवं दश सहस्राण्ययुतम्। दशायुतानि नियुतम्। दश नियुतानि प्रयुतम्। दश प्रयुतान्यर्बुदम्। दशार्बुदानि न्यर्बुदम्। बहुवचनाल्लक्षकोटिखर्वनिखर्वादयो भवन्ति। पञ्च पादा मानमस्याः पङ्क्तिश्छन्दः। पिपीलिकापङ्क्तिरित्यादौ तु पचुण् विस्तारे इत्यस्मात् क्त्यन्ताद् भवति। यदत्र लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम्। लिङ्गसंख्यानियमश्च विंशत्याद्या शतादिति सिद्धः।

१८२८ त्रैंशं चात्वारिंशम् ॥६।४।१७४॥ त्रिंशच्चत्वारिंशदित्येताभ्यां तदस्य मानमित्यर्थे डण् निपात्यते प्रत्ययान्तं चेत्कस्यचिन्नाम भवति। त्रिंशदध्याया मानमेषां त्रैंशानि चात्वारिंशानि कानिचिद् ब्राह्मणान्येवमुच्यन्ते।

१८२९ पञ्चद्दशद्वर्गे वा ॥६।४।१७५॥ पञ्चद्दशदित्येतौ शब्दौ तदस्य मानमित्येतस्मिन् विषये वर्गेऽभिधेये डत्प्रत्ययान्तौ वा निपात्येते। पक्षे को भवति। पञ्च मानमस्य वर्गस्य पञ्चद्वर्गः। पञ्चको वर्गः। दशद्वर्गः। दशको वर्गः।

१८३० **स्तोमे डट्** ॥६।४।१७६॥ संख्यावाचिनः प्रथमान्तात् तदस्य मानमित्यस्मिन् विषये स्तोमेऽभिधेये डट् प्रत्ययः स्यात् । ऋगादीनां समूहः स्तोमः। पञ्चदश ऋचो मानमस्य पञ्चदशः स्तोमः । विंशः। पञ्चविंशः। त्रिंशः। पञ्चदशी पङ्क्तिः। डकारोऽन्त्यस्वरादिलोपार्थः। टकारो ङ्यर्थः।

१८३१ **तमर्हति** ॥६।४।१७७॥ तमिति द्वितीयान्तादर्हदर्थे यथाविधि प्रत्ययः स्यात् । श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः। वैषिकः। वास्त्रिकः। वास्त्रयुगिकः। आभिषेचनिकः। वालिवर्दिकः। चामारिकः। शत्यः। शतिकः। साहस्रः। भोजनमर्हतीत्यादावनभिधान्न भवति।

१८३२ **दण्डादेर्यः** ॥६।४।१७८॥ दण्डादिभ्यो द्वितीयान्तेभ्योऽर्हत्यर्थे यः प्रत्ययः स्यात् । इकणोऽपवादः। दण्डमर्हति दण्ड्यः। मुसल्यः।

१८३३ **यज्ञादियः** ॥६।४।१७९॥ यज्ञशब्दाद् द्वितीयान्तादर्हत्यर्थे इयः प्रत्ययः स्यात् । यज्ञमर्हति यज्ञियो देशो यजमानो वा। यज्ञो नाम क्रियासमुदायः कश्चित् तदभिव्यङ्ग्यं वापूर्वम् इत्याहुः।

१८३४ **पात्रात्तौ** ॥६।४।१८०॥ पात्रशब्दाद् द्वितीयान्तादर्हत्यर्थे तौ—य इय इत्येतौ प्रत्ययौ स्याताम् । पात्रमर्हति पात्र्यः। पात्रियः।

१८३५ **दक्षिणाकडङ्गरस्थालीबिलादीययौ** ॥६।४।१८१॥ दक्षिणा कडङ्गर स्थालीबिल इत्येतेभ्यो द्वितीयान्तेभ्योऽर्हत्यर्थे ईय य इत्येतौ प्रत्ययौ स्याताम्। दक्षिणामर्हति दक्षिणीयो दक्षिण्यो गुरुः। कडङ्गरीयो कडङ्गर्यो गौः। कडङ्गरं माषादिकाष्ठम्। स्थालीबिलीयाः स्थालीबिल्यास्तण्डुलाः पाकार्हाः इत्यर्थः।

१८३६ **छेदादेर्नित्यम्** ॥६।४।१८२॥ नित्यमित्यर्हतीत्यस्य विशेषणम्। छेदादिभ्यो द्वितीयान्तेभ्यो नित्यमर्हत्यर्थे यथाविहितं प्रत्ययः स्यात्। छेदं नित्यमर्हति छैदिकः। भैदिकः।

१८३७ **विरागाद्विरङ्गश्च** ॥६।४।१८३॥ विरागशब्दाद् द्वितीयान्तान्नित्यमर्हत्यर्थे यथाविधि प्रत्ययः तत्संनियोगे च विरागशब्दस्य विरङ्गादेशो भवति। नित्यं विरागमर्हति वैरङ्गिकः।

१८३८ शीर्षच्छेदाद्यो वा ६।४।१८४॥ शीर्षच्छेदाद् द्वितीयान्तान्नित्यमर्हत्यर्थे यः प्रत्ययो वा स्यात् । शीर्षच्छेदं नित्यमर्हति शीर्षच्छेद्यः, शैर्षच्छेदिकश्चौरः ।

१८३९ शालीनकौपीनात्वौजीनम् ॥ ६।४।१८५ ॥ शालीन कौपीन आर्त्विजीन इत्येते शब्दास्तमर्हत्यर्थे ईनञ्प्रत्ययान्ता निपात्यन्ते । नित्यमिति निवृत्तम् । निपातनस्येष्टविषयत्वात् । शालीन इति शालाप्रवेशनशब्दादीनञ् उत्तरपदस्य च लुक् । शालाप्रवेशनमर्हति शालीनः । अकारस्य वृद्धिनिमित्तत्वात् पुंवद्भावो न भवति । शालीनाभार्यः । शालीनशब्दोऽधृष्टपर्यायः। कूपप्रवेशनमर्हति कौपीनः । कौपीनशब्दः पापकर्मणि लोमनीयपायूस्थे तदावरणे च चीवरखण्डे वर्तते । आर्त्विजीन इति ऋत्विज्शब्दात् ऋत्विक्कर्मशब्दाद्वा ईनञ् प्रत्ययः कर्मशब्दलोपश्च निपात्यते । ऋत्विजमर्हति आर्त्विजीनो यजमानः । ऋत्विक्कर्मार्हति आर्त्वीजीनः ऋत्विगेव वा ।

॥ इति श्रीसिद्धहैमबृहत्प्रक्रियायां तद्धित–
प्रकरणे इकणधिकारः
समाप्तः ॥

॥ अथ यधिकारः ॥

१८४० यः ॥७।१।१॥ अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामो यावत्प्रकृतिसामान्यविषयमनुपात्तप्रकृतिविशेषं प्रत्ययान्तरमीयोऽधिकरिष्यते तावत् तत्र य इत्येतदपवादविषयं परिहृत्याधिकृतं वेदितव्यम् ।

१८४१ वहति रथयुगप्रासङ्गात् ॥७।१।२। तमित्यनुवर्तते । तमिति द्वितीयान्तेभ्यो रथ युग प्रासङ्ग इत्येतेभ्यो वहत्यर्थे यः प्रत्ययः स्यात् । रथं वहति रथ्यः । द्वौ रथौ वहति द्विरथ्यः । युगं वहति युग्यः । इहानभिधानान्न भवति । कालसंज्ञकं युगं वहति राजा, युगं वहति मनुष्यः। कुप्यभिद्येति निपातनादेव युग्य इति सिद्धे इदमर्थविवक्षायामण्बाधनार्थं युगग्रहणम् । यो हि युगं वहति स युगस्य संबंधी भवति । प्रसज्यत इति प्रासङ्गः । यत्काष्ठं वत्सानां दमनकाले स्कन्ध आसज्यते तद् वहति यः स प्रासङ्ग्यः । यच्चान्यत् यत्प्रसङ्गादागतं प्रासङ्गमिति

तद्वहति न भवत्यनभिधानात् । ननु यो रथं वहति स रथस्य वोढा भवति । तत्र रथात्सादेश्च वोढुरङ इत्येव सिद्धं तत् किं रथग्रहणेन ? सत्यम् । अलुबर्थं तु तद्ग्रहणम् । तेन हि ये विधीयमाने ' द्विगोरनपत्ये यस्वरादेर्लुबद्विः ' इति लुपा भवितव्यम् । द्वयो रथयोर्वोढा द्विरथः । अनेन तु विधीयमाने न भवति अप्राग्जितीयत्वात् । एवं च द्विगौ रूपद्वयं संपन्नं भवति ।

१८४२ धुरो यैयण् ॥ ७।१।३ ॥ धुर् इत्येतस्माद् द्वितीयान्ताद् वहत्यर्थे य एयण् इत्येतौ प्रत्ययौ स्याताम् ।

१८४३ न यि तद्धिते ॥२।१।६५॥ यकारादौ तद्धिते परे यौ वौं तयोः परयोर्नामिनो दीर्घो न स्यात् । धुरं वहति धुर्यः धौरेयः । एयण्वेत्यकृत्वा यग्रहणमिदमर्थविवक्षायां वहत्यर्थेऽण्बाधनार्थम् ।यो हि यद्वहति स तस्य संबंधी । कश्चित्तु यडेयकणावपीच्छति तन्मते धुर्यः । स्त्रियां टित्वाद् ङी धुरी । धौरेयकः ।

१८४४ वामाद्यादेरीनः ॥७।१।४॥ वाम आदिर्येषां ते वामादयः । तत्पूर्वात् धुर् इत्येतदन्ताद् द्वितीयान्ताद्वहत्यर्थे ईनः प्रत्ययः स्यात् । वामा धूर्वामधुरा । समासान्तादाप् । वामधुरां वहति वामधुरीणः । एवं सर्वधुरीणः । उत्तरधुरीणः । दक्षिणधुरीणः । वामादयः प्रयोगगम्याः । सर्वधुर्य इत्यत्र यमत्ययोऽपीति कश्चित् । धुरीण इति केवलादपीन इत्यन्यः ।

१८४५ अश्वैकादेः ॥७।१।६॥ एकशब्दादेर्धुर् इत्येतदन्ताद् द्वितीयान्ताद् वहत्यर्थे अः प्रत्ययश्चकारादीनश्च । एका एकस्य वा धूरेकधुरा । एका धूरस्मिन्नेकधुरम् । तां तद्वा वहति एकधुरः । एकधुरीणः ।

१८४६ हलसीरादिकण् ॥७।१।५॥ हल सीर इत्येताभ्यां द्वितीयान्ताभ्यां वहत्यर्थे इकण् प्रत्ययः स्यात् । हलं वहति हालिकः । सैरिकः ।

१८४७ शकटादण् ॥७।१।७॥ शकटशब्दाद् द्वितीयान्ताद् वहत्यर्थेऽण् प्रत्ययः स्यात् । शकटं वहति शाकटो गौः। ननु च तस्येदमिति शकटादण्, हलसीरादिकणिति हलसीराभ्यामिकण् च सिद्ध एव । यो हि यद्वहति स तस्य संबंधी भवति । सत्यम् । रथवदेव तदन्तार्थमुपादानम् । तेनात्रापि द्विगौ द्वैरूप्यं भवति।

द्वयोः शकटयोर्हलयोः सीरयोर्वा वोढा द्विशकटः। द्विहलः। द्विसीरः। द्वे शकटे हले सीरे वा वहति द्वैशकटः। द्वैहलिकः। द्वैसीरिकः। अन्ये तु शकटहलसीरेभ्य इदमर्थविवक्षायां प्रत्ययमिच्छन्ति न वहत्यर्थे तन्मते द्विशकट इत्येव भवति। हलसीराभ्यां तु तदन्तविधिं नेच्छन्त्येव।

१८४८ विध्यत्यनन्येन ॥७।१।८॥ तमिति वर्तते। तमिति द्वितीयान्ताद् विध्यत्यर्थे यः प्रत्ययः स्यात्, स चेद्विध्यन्नात्मनोऽन्येन करणेन न विध्यति। पादौ विध्यन्ति पद्याः शर्कराः। ऊरू विध्यन्ति ऊरव्याः कण्टकाः। उरो विध्यन्ति उरस्या वाताः। अनन्येनेति किम्। चौरं विध्यति चैत्रः। अत्र हि चैत्रश्चौरं विध्यन् पाषाणेन धनुषा वा विध्यति। शर्करादयस्तु न करणेन विध्यन्ति। यच्च मुखनैर्क्ष्ण्यादिकरणं तत्तेषामात्मनो नान्यत्। यद्येवं पादौ विध्यन्ति शर्कराः मुखेनेति करणप्रयोगे कस्मान्न भवति। अस्ति हि अत्रानन्यत् करणमिति? उच्यते। अत्राप्रधानस्य सापेक्षत्वात्। साधनप्रधाने हि तद्धिते क्रियाऽप्रधानमेव। अनभिधानाद्वा। मुखेन पद्या इत्युक्ते हि मुखस्योपलक्षणत्वं सहयोगो वा प्रतीयते न व्यधनं प्रति करणत्वमिति।

१८४९ धनगणाल्लब्धरि ॥७।१।९॥ द्वितीयान्ताद् धनशब्दाद् गणशब्दाच्च लब्ध्यर्थे यः प्रत्ययः स्यात्। धनं लब्धा धन्यः। गणं लब्धा गण्यः। लब्धेति तृन्नन्तम्।

१८५० णोऽन्नात् ॥७।१।१०॥ अन्नशब्दाद् द्वितीयान्ताल्लब्धरि णः प्रत्ययः स्यात्। अन्नं लब्धा आन्नः।

१८५१ हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्यधेनुष्यागार्हपत्यजन्यधर्म्यम् ॥७।१।११॥ हृद्यादयः शब्दा यथास्वमर्थविशेषेषु यप्रत्ययान्ता निपात्यन्ते। हृद्य इति हृदयशब्दात् षष्ठ्यन्तात् प्रियेऽर्थे बन्धने च वशीकरणमन्त्रे यः प्रत्ययो निपात्यते। हृदयस्य प्रियं हृद्यमौषधम्। हृद्यो देशः। हृदयस्य बंधनो हृद्यो देशः। हृदयस्य बंधनो हृद्यो वशीकरणमंत्रः। हृदयस्य हृल्लासलेखाण्ये इति हृदादेशः। निपातनं रूढ्यर्थं तेनेह न भवति। हृदयस्य प्रियः पुत्रः। पद्य इति पदशब्दात् प्रथमान्तात् दृश्यत्वोपाधिकादस्मिन्निति सप्तम्यर्थे यः। पदमस्मिन् दृश्यं पद्यः कर्दमः। नातिद्रवो नातिशुष्को यत्र प्रतिमुद्रोत्पादनेन पदं द्रष्टुं शक्यते। तुल्य इति

तुलाशब्दात् संमितेऽर्थे यः । तुलया संमितं तुल्यं भाण्डम् । निपातनं रूढ्यर्थम् । तेन न तुलासंमित एवोच्यते किंतु सदृशार्थोऽपि तुल्यशब्दः। गिरिणा तुल्यो हस्ती। मूल्यमिति मूलशब्दात् प्रथमान्तादस्येति षष्ठ्यर्थे यः तच्च यद्युत्पाटनयोग्यं भवति। मूलमेषामुत्पाट्यं मूल्या मुद्गाः । तृतीयान्ताच्चानाम्ये समे च । मूलेनानाम्यं मूल्यम् । मूलं पटाद्युत्पत्तिकारणम् । तेनानाम्यं यत्पटादेर्विक्रयात् प्राप्यते सुवर्णादि तन्मूल्यम् । मूलेन समो मूल्यः पटः । उपादानेन समानफल इत्यर्थः। वश्य इति वशशब्दाद् द्वितीयान्ताद् गतेऽर्थे यः। वशं गतो वश्यो गौर्विधेयः। इच्छानुवर्तीति यावत् । निपातनं रूढ्यर्थम् । तेनेह न भवति । वशं गतः इच्छां प्राप्तः । अभिप्रेतं गत इत्यर्थः । पथ्य इति पथिन्शब्दादनपेते यः । पथोऽनपेतं पथ्यमोदनादि। निपातनादिह न भवति । पथोऽनपेतं शकटादि । वयस्य इति वयःशब्दात् तृतीयान्तात् तुल्येऽर्थे यः । वयसा तुल्यो वयस्यः सखा । निपातनादिह न भवति। वयसा तुल्यः शत्रुः । धेनुष्येति धेनुशब्दाद् विशिष्टायां यः षोऽन्तश्च । धेनुष्या या गोमता गोपालायाधमर्णेन चोत्तमर्णाय आ ऋणप्रदानादोहार्थं धेनुर्दीयते सा धेनुरेव धेनुष्या। पीतदुग्धेति यस्याः प्रसिद्धिः । गार्हपत्य इति गृहपतिशब्दात् तृतीयान्तात् संयुक्तेऽर्थे ञ्यः प्रत्ययः। गृहपतिना संयुक्तो गार्हपत्य एवंनामा कश्चिदग्निः। निपातनादन्यत्र न भवति। जन्य इति जनीशब्दाद् वधूवाचिनो द्वितीयान्ताद् वहत्सु अभिधेयेषु जनशब्दाच्च षष्ठ्यन्ताञ्जल्पेऽर्थे यः। जनीं वहन्ति जन्या जामातुर्वयस्या उच्यन्ते । जनस्य जल्पः जन्यः । निपातनादन्यत्र न भवति । धर्म्य इति धर्मशब्दात् तृतीयान्तात् प्राप्येऽर्थे पञ्चम्यन्ताच्चानपेतेऽर्थे यः। धर्मेण प्राप्यं धर्म्यम् सुखम् । धर्मादनपेतं च धर्म्यम् । यद्धर्ममनुवर्तते ।

१८५२ **नौविषेण तार्यवध्ये** ॥७।१।१२॥ नौ विष इत्येताभ्यां निर्देशादेव तृतीयान्ताभ्यां यथासंख्यं तार्ये वध्ये चार्थे यः प्रत्ययः स्यात् । नावा तार्यं नाव्यमुदकम् । नाव्या नदी । विषेण वध्यो विष्यः।

१८५३ **न्यायार्थादनपेते** ॥७।१।१३॥ न्याय अर्थ इत्येताभ्यां निर्देशादेव पञ्चम्यन्ताभ्यामनपेतेऽर्थे यः प्रत्ययः स्यात् । न्यायादनपेतं न्याय्यम् । अर्थादनपेतमर्थ्यम् ।

१८५४ **मतमदस्य करणे** ॥ ७।१।१४ ॥ मतमदशब्दाभ्यां निर्देशादेव

षष्ठ्यन्ताभ्यां करणेऽर्थे यः प्रत्ययः स्यात् । इष्टं साम्यं ज्ञानं मतिर्वा मतशब्देनोच्यते । करणं साधकतमं कृतिर्वा । मतस्य करणं मत्यम् । मदस्य करणं मद्यम् ।

१८५५ **तत्र साधौ** ॥ ७।१।१५ ॥ तत्रेति सप्तम्यन्तात् साधावर्थे यः प्रत्ययः स्यात् । साधुः प्रवीणो योग्य उपकारको वा । सामनि साधुः सामन्यः । कर्मणि कर्मण्यः । सभायां सभ्यः । शरणे शरण्यः ।

१८५६ **पथ्यतिथिवसातिस्वपतेरेयण्** ॥ ७।१।१६ ॥ पथिन् अतिथि वसति स्वपति इत्येतेभ्यस्तत्र साधावेयण् प्रत्ययः स्यात् । पथि साधु पाथेयम् । वासतेयम् । स्वापतेयम् ।

१८५७ **भक्ताण्णः** ॥७।१।१७॥ भक्तशब्दात् तत्र साधौ णः प्रत्ययः स्यात् । भक्ते साधुर्भाक्तः शालिः। भाक्तास्तण्डुलाः।

१८५८ **पर्षदो ण्यण्यौ** ॥ ७।१।१८ ॥ पर्षच्छब्दात् तत्र साधौ[1] ण्यणेत्येतौ प्रत्ययौ स्याताम् । पर्षदि साधुः पार्षद्यः। पार्षदः। परिषदोऽपीच्छन्त्यन्ये । पारिषद्यः । पारिषदः ।

१८५९ **सर्वजनाण्ण्येनञौ** ॥ ७।१।१९ ॥ सर्वजनशब्दात् तत्र साधौ ण्य ईनञ् इत्येतौ प्रत्ययौ स्याताम् । सार्वजन्यः। सार्वजनीनः ।

१८६० **प्रतिजनादेरीनञ्** ॥७।१।२०॥ प्रतिजनादिभ्यस्तत्र साधावीनञ् प्रत्ययः स्यात् । प्रतिजने साधुः प्रातिजनीनः । अनुजने साधुः आनुजनीनः । इदंयुगे साधुः ऐदंयुगीनः।

१८६१ **कथादेरिकण्** ॥७।१।२१॥ कथादिभ्यः सप्तम्यन्तेभ्यः साधावर्थे इकण् प्रत्ययः स्यात् । कथायां साधुः काथिकः। वैकथिकः।

१८६२ **देवतान्तात् तदर्थे** ॥ ७।१।२२ ॥ देवतान्तात् शब्दरूपात् तदर्थे यः प्रत्ययः स्यात् । अग्निदेवतायै इदमग्निदेवत्यम् । पितृदेवत्यम् । देवदेवत्यम् । देवताशब्देन देयस्य हविरादेः प्रतिग्रहीता स्वामी संप्रदानमुच्यते ।

१८६३ **पाद्यार्घ्ये** ॥ ७।१।२३ ॥ पाद्य अर्घ्य इत्येतौ तदर्थे यप्रत्ययान्तौ

निपात्येते । पादार्थमुदकं पाद्यम् । निपातनादेव ये पदादेशो न भवति । अर्घो मूल्यं पूजनं वा । अर्घार्थं रत्नमर्घ्यम् ।

१८६४ **ण्योऽतिथेः** ॥ ७।१।२४ ॥ अतिथिशब्दात् तदर्थे ण्यः प्रत्ययः स्यात् । अतिथ्यर्थमातिथ्यम् ।

१८६५ **सादेश्चातदः** ॥ ७।१।२५ ॥ अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र आ तदः--तदिति सूत्रं यावत् केवलस्य सादेश्च विधिर्वेदितव्यः।

१८६६ **हलस्य कर्षे** ॥ ७।१।२६ ॥ हलशब्दात् केवलात् सादेश्च निर्देशादेव षष्ठ्यन्तात् कर्षेऽर्थे यः प्रत्ययः स्यात् । हलस्य कर्षो हल्या हल्यो वा । द्वयोर्द्विहल्या । त्रिहल्या । परमहल्या । उत्तमहल्या । बहुहल्यः। यत्र हलं कृष्टं स मार्गः कर्षः। कृष्यते इति कर्षः क्षेत्रमित्यन्ये ।

१८६७ **सीतया संगते** ॥ ७।१।२७ ॥ सीताशब्दात् केवलात् सादेश्च निर्देशादेव तृतीयान्तात् संगतेऽर्थे यः प्रत्ययः स्यात् । सीतया संगतं सीत्यम् । द्वाभ्यां सीताभ्यां संगतं द्विसीत्यम् । त्रिसीत्यम् । परमसीत्यम् । यस्य पूर्णोऽवधिः।

॥ इति श्रीसिद्धहैमबृहत्प्रक्रियायां
तद्धितप्रकरणे याधिकारः
समाप्तः ॥

॥ **अथेयाधिकारः** ॥

१८६८ **ईयः** ॥७।१।२८॥ आ तद इत्यनुवर्तते। यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रातदोऽर्थेषु ईय इत्यधिकृतं वेदितव्यम् ।

१८६९ **हविरन्नभेदापूपादेर्यो वा** ॥ ७।१।२९ ॥ हविर्भेदवाचिभ्योऽन्नभेदवाचिभ्योऽपूपादिभ्यश्च आतदोऽर्थेषु वा यः प्रत्ययोऽधिक्रियते । ईयापवादः । हविर्भेदः--आमिक्षायै इदं आमिक्ष्यम् । आमिक्षीयम् दधि । पुरोडाशाय इमे पुरोडाश्यः पुरोडाशीयास्तण्डुलाः । हविस्शब्दात्तु परत्वाद्युगादिपाठान्नित्यमेव यः । अन्नभेद--ओदनाय इमे ओदन्या ओदनीयास्तण्डुलाः। कृशरायै कृशर्याः कृशरीया-

स्तण्डुलाः। सुरायै सुर्यः सुरीयास्तण्डुलाः। अपूपादि–अपूपायेदमपूप्यम् अपूपीयम्। तण्डुलाय तण्डुल्यम् तण्डुलीयम्। सादेश्चेत्यधिकारात् तदन्तादपि भवति। यवापूप्यम्। यवापूपीयम्। व्रीहितण्डुल्यम्। व्रीहितण्डुलीयम्। उवर्णान्तात्तु हविरन्नभेदात् परत्वान्नित्यो यो भवति। चरव्यास्तण्डुलाः। सक्तव्या धानाः। अपूपादिषु येऽन्नभेदशब्दा अपूपादयस्तेषां केनचिदाकारसादृश्येन अर्थान्तरवृत्तौ प्रत्ययार्थमुपादानम्। केचित्तु अपूपादिपठितान्नभेदव्यतिरिक्तानामन्नभेदानां तदन्तविधिं नेच्छन्ति। यवसुरीयम्। पिष्टसुरीयम्। यो न भवति।

१८७० उवर्णयुगादेर्यः ॥७।१।३०॥ उवर्णान्ताद् युगादिभ्यश्च तदोऽर्थेषु यः स्यात्। ईयापवादः। उवर्ण–शंकवे इदं शंकव्यं दारु। पिचव्यः कर्पासः। पारशव्यमयः। कमण्डलव्या मृत्तिका। चरव्यास्तण्डुलाः। सक्तव्या धानाः। युगादि–युगाय हितं युगार्थं युगोऽस्य वा स्यादिति युग्यम्। हविष्यम्। सादेश्चेत्यधिकारात् सुयुग्यम्। अतियुग्यम्। 'गोः स्वरे यः' इत्यनेनैव सिद्धे (युगादिषु) गोग्रहणं तदन्तार्थम्। तेन सुगव्यम् अतिगव्यमित्यपि सिद्धम्। इह यग्रहणं बाधकबाधनार्थम्। सनङ्गवे इदं सनङ्गव्यं चर्म। अत्र हि परत्वात् 'चर्मण्यञ्' इति प्राप्नोति।

१८७१ नाभेर्नभ् चादेहांशात् ॥७।१।३१॥ नाभिशब्दाददेहांशवाचिन आ तदोऽर्थेषु यः स्यान्नाभिशब्दस्य च नभ् इत्यादेशः। नाभ्यै नाभये वा हितं नभ्यमञ्जनम्। अरकमध्यवर्ती अक्षधारणश्चक्रावयवो नाभिस्तदर्थं नभ्यम्। यत्तु अरकगण्डरहितं चक्रम् एककाष्ठं तत्र न नाभिरिति तदर्थे नभ्यमित्युपचारात्। नभ्यो वृक्षः नभ्या शिंशपेति नभ्यार्थे वृक्षादौ ताच्छब्द्यान्नभ्यत्वम् इन्द्रार्थायां स्थूणायामिन्द्रवत्। अदेहांशादिति किम्। नाभये हितं नाभ्यं तैलम्। अत्र नभादेशो न भवति। यस्तु प्राण्यङ्गेत्यादिना भवति।

१८७२ न् चोधसः ॥ ७।१।३२॥ ऊधस्शब्दादा तदोऽर्थेषु यः प्रत्ययः स्यान्नकारश्चान्तादेशो भवति। ईयापवादः। ऊधसे हितं ऊधन्यम्।

१८७३ शुनो वश्चोदूत् ॥७।१।३३॥ श्वन्शब्दादा तदोऽर्थेषु यः प्रत्ययः स्याद्वकारश्च उकारऊकाररूपो भवति। अभेदनिर्देशः सर्वादेशार्थः। शुने हितं शुन्यम्। शून्यम्। नाभि–ऊधस्–श्वन्शब्दान् युगादिषु पठित्वाऽपि शक्यः प्रत्यय आदेशार्थास्तु योगाः।

१८७४ **कम्बलान्नाम्नि** ॥ ७।१।३४ ॥ कम्बलशब्दादा तदोऽर्थेषु यः प्रत्ययः स्यान्नाम्नि संज्ञायां विषये । ईयापवादः । कम्बलोऽस्य स्यात् कम्बल्यं परिमाणम् ऊर्णापलशतमुच्यते । अशीतिशतमित्यन्ये । षट्षष्टिशतमित्यपरे । नाम्नीति किम् । कम्बलीया ऊर्णा ।

१८७५ **तस्मै हिते** ॥७।१।३५॥ हित उपकारकः। तस्मै इति चतुर्थ्यन्तान्नाम्नो हितेऽर्थे यथाधिकृतं प्रत्ययः स्यात् । वत्सेभ्यो हितो वत्सीयः । करभीयः। पित्रीयः । मात्रीयः । आमिक्ष्यः । आमिक्षीयः। ओदन्यः। ओदनीयः। अपूप्यः। अपूपीयः। हविष्यः। युग्यः। शुन्यः। शून्यः। ऊधन्यः। वत्सेभ्यो न हितः अवत्सीयः। एवमकरभीयः।

१८७६ **न राजाचार्यब्राह्मणवृष्णः** ॥ ७।१।३६ ॥ राजन् आचार्य ब्राह्मण वृषन् इत्येतेभ्यश्चतुर्थ्यन्तेभ्यो हितेऽर्थेऽधिकृतः प्रत्ययो न स्यात् । राज्ञे आचार्याय ब्राह्मणाय वृष्णे वा हित इति वाक्यमेव ।

१८७७ **प्राण्यङ्गरथखलतिलयववृषब्रह्ममाषाद्यः**॥७।१।३७॥ प्राण्यङ्गवाचिभ्यो रथादिभ्यश्च चतुर्थ्यन्तेभ्यो हितेऽर्थे यः प्रत्ययः स्यात् । दन्तेभ्यो हितं दन्त्यम् । कर्ण्यम् । चक्षुष्यम् । कण्ठ्यम् । ओष्ठ्यम् । नाभ्यम् । रथाय हिता रथ्या भूमिः। खलाय हितं खल्यम् अग्निरक्षणम् । तिलेभ्यो हितो तिल्यो वायुः। यवेभ्यो हितो यव्यस्तुषारः। वृषाय हितं वृष्यं क्षीरपाणम् । ब्रह्मणे हितो ब्रह्मण्यो देशः । माषेभ्यो हितो माष्यो वायुः । सादेश्चेत्यधिकारात् राजदन्त्यम् । अश्वरथ्या भूमिः। कृष्णतिल्यः। राजमाष्यः ।

१८७८ **अव्यजात् ष्यप्** ॥७।१।३८॥ अवि अज इत्येताभ्यां तस्मै हिते ष्यप् प्रत्ययः स्यात् । अविभ्यो हितम् अविष्यम् । अजेभ्यो अजष्यम् । पकारः पुंवद्भावार्थः । अजाभ्यो हिता अजष्या यूतिः ।

१८७९ **चरकमाणवादीनञ्** ॥७।१।३९॥ आभ्यां तस्मै हितेऽर्थे ईनञ् प्रत्ययः स्यात् । चरकेभ्यो हितश्चारकीणः । माणवीनः ।

१८८० **भोगोत्तरपदात्मभ्यामीनः** ॥७।१।४०॥ भोगोत्तरपदादात्मन्शब्दाच्च तस्मै हितेऽर्थे ईनः प्रत्ययः स्यात् । मातृभोगाय हितो मातृभोगीणः । पितृभोगीणः। आचार्यभोगीनः। अत्र रषृवर्णादित्यादिना णत्वे प्राप्ते ।

१८८१ **क्षुभ्नादीनाम्** ॥२।३।९६॥ क्षुभ्ना इत्येवमादीनां नकारस्य णो न स्यात्। इति निषेधान्न भवति। आत्मने हितः आत्मनीनः। अत्र नोऽपदस्येत्यन्त्यस्वरादिलोपे प्राप्ते।

१८८२ **ईनेऽध्वात्मनोः** ॥७।४।४८॥ अध्वन् आत्मन् इत्येतयोरीनप्रत्यये परेऽन्त्यस्वरादेर्लुग्न स्यात्। इति निषेधान्न भवति। एवमनात्मनीनः।

१८८३ **पञ्चसर्वविश्वाज्जनात् कर्मधारये** ॥७।१।४१॥ पञ्च सर्व विश्व इत्येतेभ्यः पराज्जनशब्दात् कर्मधारये वर्तमानात् तस्मै हिते ईनः प्रत्ययः स्यात्। ईयापवादः। पञ्चजनेभ्यः पञ्चाजनाय वा हितः पञ्चजनीनः। रथकारपञ्चमस्य चातुर्वर्ण्यस्य पञ्चजन इति संज्ञा। एवं सर्वजनीनः। विश्वजनीनः। कर्मधारय इति किम्। पञ्चानां जनः पञ्चजनः तस्मै हितः पञ्चजनीयः। सर्वो जनोऽस्य सर्वेषां वा जनः सर्वजनः तस्मै हितः सर्वजनीयः। एवं विश्वजनीयः।

१८८४ **महत्सर्वादिकण्** ॥७।१।४२॥ महतः सर्वाच्च यो जनशब्दस्तदन्तात् कर्मधारये वर्तमानात् तस्मै हिते इकण् प्रत्ययः स्यात्। महते जनाय हितः माहाजनिकः। सर्वस्मै जनाय हितः सार्वजनिकः। एवं च सर्वजनात् पूर्वेण ईनः अनेनेकणिति द्वैरूप्यम्। कर्मधारय इत्येव। महान् जनोऽस्य महाजनः तस्मै हितः महाजनीयः। सर्वेषां जनाय हितं सर्वजनीयम्।

१८८५ **सर्वाण्णो वा** ॥७।१।४३॥ जनात् कर्मधारय इति च निवृत्तम्। सर्वशब्दात् तस्मै हिते णः प्रत्ययो वा स्यात्। सर्वस्मै हितः सार्वः पक्षे ईयः। सर्वीयः।

१८८६ **परिणामिनि तदर्थे** ॥७।१।४४॥ हित इति निवृत्तम्। तद्भावः परिणामः सोऽस्यास्तीति परिणामि द्रव्यमुच्यते। तस्मै इति चतुर्थ्यन्तात् तदर्थे चतुर्थ्यन्तार्थार्थे परिणामिनि कारणद्रव्येऽभिधेये यथाधिकृतं प्रत्ययः स्यात्। अङ्गारेभ्य इमानि अङ्गारीयाणि काष्ठानि। अङ्गारार्थानीत्यर्थः। एवं प्राकारीया इष्टकाः। शङ्कव्यं दारु। पिचव्यः कर्पासः। आमिक्ष्यं आमिक्षीयं दधि। ओदन्या ओदनीयास्तण्डुलाः। अपूप्यं अपूपीयम् पिष्टम्। परिणामिनीति किम्। उदकाय कूपः। असये कोशी। न कूपः कोशी वा उदकभावेन परिणमते। तदर्थे इति किम्।

मूत्राय यवागूः। उच्चाराय यवागूः। उच्चाराय यवान्नम्। पादरोगाय नड्वलोदकम्। यवाग्वादि मूत्रादितया परिणमति न तु तदर्थम्। अथवा तदर्थे इति चतुर्थीविशेषणम्। तदर्थे या चतुर्थी तदन्तात् प्रत्ययः इह तु संपद्यतौ चतुर्थीति न भवति। तस्मै इत्येव। सक्तूनां धानाः। धानानां यवाः। अत्र सत्यपि तादर्थ्ये संबंधमात्रविवक्षायां षष्ठी। यथा गुरोरिदं गुर्वर्थमिति। भवति च सतोऽप्यविवक्षा यथाऽनुदरा कन्येति।

१८८७ **चर्मण्यञ्** ॥७।१।४५॥ चतुर्थ्यन्तात् परिणामिनि तदर्थे चर्मण्यभिधेये अञ् प्रत्ययः स्यात्। वर्ध्रायेदं वार्ध्रम् चर्म। वरत्रायै इदं वारत्रं चर्म। रथोपस्थायेदं राथोपस्थं चर्म। हलाबन्धायेदं हालाबन्धं चर्म। सनङ्वे इदं सनङ्व्यं चर्मेति 'उवर्णयुगादेर्य' इति यग्रहणाद्य एव। सनङ्वर्थमविकारः।

१८८८ **ऋषभोपानहाञ्ञः** ॥७।१।४६॥ ऋषभ उपानह् इत्येताभ्यां चतुर्थ्यन्ताभ्यां परिणामिनि तदर्थे ञ्यः प्रत्ययः स्यात्। ऋषभाय अयं आर्षभ्यो वत्सः। औपानह्यो मुञ्जः। औपानह्यं काष्ठम्। औपानह्यं चर्मेति चर्मण्यपि परिणामिनि परत्वादयमेव भवति।

१८८९ **छदिर्बलेरेयण्** ॥७।१।४७॥ छदिस् बलि इत्येताभ्यां चतुर्थ्यन्ताभ्यां परिणामिनि तदर्थे एयण् प्रत्ययः स्यात्। छदिषे इमानि छादिषेयाणि तृणानि। वलये इमे वालेयास्तण्डुलाः। चर्मण्यपि परत्वादयमेव भवति। छादिषेयं चर्म। कथमौपधेयः? उपधीयत इत्युपधेयः। स एव प्रज्ञाद्यणि स्वार्थिके औपधेयः। उपधिः रथाङ्गमिति यावत्। अत उपधेः स्वार्थे एयणिति नारंभणीयम्।

१८९० **परिखाऽस्य स्यात्** ॥ ७।१।४८ ॥ परिखाशब्दान्निर्देशादेव प्रथमान्तादस्येति षष्ठ्यर्थे परिणामिनि एयण् प्रत्ययः स्यात् या सा परिखा सा चेत्स्यादिति योग्यतया संभाव्यते। तदित्यनेन यश्चाधिकृतस्य प्रत्ययस्य विधास्यमानत्वादिहोत्तरत्र च एयणेवानुवर्तते। परिखा आसामिष्टकानां स्यादिति पारिखेय्य इष्टकाः। स्यादिति संभावने सप्तमी। इष्टकानां बहुत्वेन संभाव्यत एतत्परिखासां स्यादिति। स्यादिति किम्॥ परिखा इष्टकानाम्। परिणामिनीत्येव। परिखास्य नगरस्य स्यात्।

१८९१ अत्र च ॥७।१।४९॥ परिखाशब्दान्निर्देशादेव प्रथमान्तादत्रेति सप्तम्यर्थे एयण् प्रत्ययः स्यात् सा चेत् परिखा स्यादिति संभाव्यते। परिखाऽस्यां स्यात् पारिखेयी भूमिः। योगविभागः परिणामिनीत्यस्येह असंबंधार्थः। चकार उत्तरत्राऽस्य स्यादिति परिणामिन्यत्र स्यादिति चोभयस्याप्यनुवृत्त्यर्थः।

१८९२ तद् ॥७।१।५०॥ तदिति प्रथमान्तादस्येति षष्ठ्यर्थे परिणामिनि अत्रेति सप्तम्यर्थे च यथाधिकृतं प्रत्ययः स्यात् यत्तत् प्रथमान्तं तच्चेत्स्यादिति संभाव्यते। प्राकार आसामिष्टकानां स्यात् प्राकारीया इष्टकाः। परशव्यमयः। स्यादित्येव। प्राकार इष्टकानाम्। परिणामिनीत्येव। प्रासादोऽस्य चैत्रस्य स्यात्।

॥ इति श्रीसिद्धहैमबृहत्प्रक्रियायां तद्धित-
प्रकरणे ईयाधिकारः
समाप्तः ॥

॥ अथ भावकर्मार्थाः ॥

१८९३ तस्यार्हे क्रियायां वत् ॥ ७।१।५१ ॥ ईयस्य पूर्णोऽवधिः। अर्हतीत्यर्हम्। 'अच्' इत्यच्। तस्येति षष्ठ्यन्तादर्हेऽर्थे वत् प्रत्ययः स्यात् यत्तदर्हं तच्चेत् क्रिया भवति। राज्ञोऽर्हं राजवत् वृत्तमस्य राज्ञः। राजत्वस्य युक्तमस्य राज्ञो वृत्तमित्यर्थः। राजवदवर्तत भरतः। राजार्हं वर्तते स्मेत्यर्थः। एवं कुलीनवत्। साधुवत्। स शिरांसि द्विषामाजौ चिच्छेद कृतहस्तवत्। राज्ञि एकस्मिन्नुपमानोपमेयभावासंभवादुत्तरेण न सिद्ध्यतीति वचनम्। यदा तु राज्ञः सगरादेर्वृत्तस्यार्हं इदानींतनः कश्चिद्राजेति भेदो विवक्ष्यते तदोत्तरेणैव सिद्धम्। क्रियायामिति किम्। शतस्यार्हो देवदत्तः। राज्ञोऽर्हो मणिः।

१८९४ स्यादेरिवे ॥७।१।५२॥ स्याद्यन्तादिवार्थे वत् प्रत्ययः स्यात्। इवशब्दः सादृश्यं द्योतयति। तच्चेत् सादृश्यं क्रियायां क्रियाविषयं क्रियागतं भवति। क्षत्रिया इव क्षत्रियवद्युध्यन्ते ब्राह्मणाः। अश्ववद्धावति चैत्रः। देवमिव देववत् पश्यति मुनिम्। साधुनेव साधुवदाचरितं मैत्रेण। ब्राह्मणायेव ब्राह्मणवद्दत्तं क्षत्रियाय। पर्वतादिव पर्वतवदवरोहति आसनात्। स्यादेरिति किम्। गच्छन्नास्त इव मन्दत्वादीप्सितदेशस्य असंप्राप्तेः। अधीयानो नृत्यतीव अङ्गविकारप्रायत्वात्।

क्रियायामित्येव । गौरिव गवयः । देवदत्त इव गोमान् । हस्तीव स्थूलः । अत्र द्रव्यगुणविषये सादृश्ये न भवति । कथं देवदत्तवत्स्थूलः यज्ञदत्तवद् गोमानिति ? अत्र तुल्यायामस्तौ भवतौ चाह्रियमाणायां प्रत्ययो भविष्यति । अथोपमानोपमेयक्रिययोः साधनभेदापेक्षायामिह कस्मान्न भवति–ऋचं ब्राह्मणवदयं गाथामधीत इति ? सापेक्षत्वात् ।

१८९५ मनुर्नभोऽङ्गिरो वति ॥ १।१।२४ ॥ मनुस् नभस् अङ्गिरस् इत्येतानि नामानि वति प्रत्यये परे पदसंज्ञानि न स्युः। मनुरिव मनुष्वत् । एवं नभस्वत् । अङ्गिरस्वत् । पदत्वाभावाद्रुर्न भवति षत्वं तु भवति ।

१८९६ तत्र ॥७।१।७३॥ तत्रेति सप्तम्यन्तादिवार्थे वत् प्रत्ययः स्यात् । मथुरायामिव मथुरावत् पाटलिपुत्रे प्रासादाः। स्रुघ्न इव साकेते परिखा स्रुघ्नवत् । गुरुवद् गुरुपुत्रे वर्तितव्यमित्यादिषु क्रियासादृश्ये पूर्वेणैव सिद्धम् । अक्रियार्थस्त्वारंभः ।

१८९७ तस्य ॥७।१।७४॥ तस्येति षष्ठ्यन्तादिवार्थे वत् प्रत्ययः स्यात् । चैत्रस्येव मैत्रस्य गावश्चैत्रवत्। ब्राह्मणस्येव क्षत्रियस्य दन्ताः ब्राह्मणवत् । अक्रियाविषयसादृश्यार्थ आरंभः । योगविभाग उत्तरार्थः।

१८९८ भावे त्वतल् ॥७।१।७५॥ तस्येति षष्ठ्यन्ताद् भावेऽभिधेये त्व तल् इत्येतौ प्रत्ययौ स्याताम् । भवतोऽस्मात् अभिधानप्रत्ययौ इति भावः शब्दस्य प्रवृत्तिनिमित्तं द्रव्यसंसर्गी भेदको गुणः । यदाह–यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति । तत्र—

> ' जातिगुणाज्जातिगुणे समासकृत्तद्धितासु संबंधे ।
> ङित्यादेः स्वे रूपे त्वतलादीनां विधिर्भवति ' ॥

तत्र जातिवचनेभ्यो जातौ, गोः शब्दस्य भावो गोत्वं गोता । अत्र गोशब्दजातिर्भावः। गोरर्थस्य भावो गोत्वम् गोता । अत्र गवार्थजातिर्भावः। एवमश्वत्वमश्वता । शुक्लस्य गुणस्य भावः शुक्लत्वं शुक्लतेत्यत्र शुक्लगुणजातिः । रूपस्य भावो रूपत्वं रूपता । रसस्य रसत्वं रसता । अत्र रूपादिगुणजातिः । कत्वं खत्वमिति भिन्नवर्णव्यक्तिसमवेता जातिः । कवर्गत्वं चवर्गत्वमिति ककारादिवर्गव्यक्तिसमवेता जातिः

संहतिः । गुणशब्देभ्यो गुणे, शुक्लस्य पटस्य भावः शुक्लत्वं शुक्लता । अत्र शुक्लो गुणो भावः । एवं शुक्लतरत्वं शुक्लतमत्वमिति स एव प्रकृष्टः । अणुत्वं महत्वमिति परिमाणलक्षणो गुणः। एकत्वं द्वित्वमिति संख्यालक्षणः । पृथक्त्वं नानात्वमिति भेदलक्षणः । उच्चैस्त्वं नीचैस्त्वमिति उच्छ्र्यादिलक्षणः । वृत्तौ पृथगादिशब्दाः पृथग्भूताद्यर्थे सत्वे वर्तन्ते इति प्रत्ययः विग्रहस्तु पृथग्भूतस्य भाव इति । पट्वादयोऽपि गुणा एवेति पटुत्वं मृदुत्वं तीक्ष्णत्वमित्यादिष्वपि गुणो भावः । समासात् संबंधे, राजपुरुषत्वम् । कृतः संबन्धे–पाचकत्वं पक्तृत्वं कार्यत्वं साधनत्वम् । अत्र क्रियाकारकसंबन्धः । तद्धितात् संबन्धे–औपगवत्वम् । दण्डित्वम् । विषाणित्वम् । अत्रोपगुदण्डादिसंबन्धः । डित्थादेः स्वरूपे, डित्थादेस्तु यदृच्छाशब्दादन्यस्य प्रवृत्तिनिमित्तस्यासंभवात् तस्मिन्नेव स्वरूपे डित्थशब्दवाच्यतया अध्यवसितभेदेऽव्यतिरिक्तेऽपि व्यतिरिक्त इव शब्दप्रत्ययबलात् बुद्ध्यावगृहीते धर्मे प्रत्ययः । डित्थस्य भावः स्वरूपं डित्थत्वम् । एवं गोजातेर्भावो गोत्वं गोतेति गोशब्दस्य स्वरूपम् । शुक्लजातेर्भावः शुक्लत्वं शुक्लतेति शुक्लशब्दस्य स्वरूपम् । गवादयो हि यदा जातिमात्रवाचिनस्तदा तेषां शब्दस्वरूपमेव प्रवृत्तिनिमित्तम् । तथा ह्यर्थजातौ शब्दार्थयोरभेदेन शब्दस्वरूपमध्यवस्यते यो गोशब्दः स एवार्थ इति । एवं देवदत्तत्वं चन्द्रत्वं सूर्यत्वं दिक्त्वं आकाशत्वम् अभावत्वमिति स्वरूपमेवोच्यते । एके तु यदृच्छाशब्देषु शब्दस्वरूपं संज्ञासंज्ञिसंबंधो वा प्रवृत्तिनिमित्तमिति मन्यन्ते । अन्ये तु डित्थत्वं देवदत्तत्वमिति वयोऽवस्थाभेदभिन्नव्यक्तिसमवेतं सामान्यम् . चन्द्रत्वं सूर्यत्वमिति कालावस्थाभेदभिन्नव्यक्तिसमवेतं सामान्यं, दिक्त्वं आकाशत्वं अभावत्वमित्युपचरितभेदव्यक्तिसमवेतं सामान्यं प्रत्ययार्थ इति वदन्तोऽत्रापि जातिमेव त्वतलादिप्रत्ययप्रवृत्तिनिमित्तमभिदधति । ननु च समासकृत्तद्धितेभ्योऽपि भावप्रत्ययेन जातिरेवाभिधीयते गौरखरत्वं लोहितशालित्वं सप्तपर्णत्वं धवखदिरत्वमिति, कुम्भकारत्वं तन्तुवायत्वं स्तम्बेरमत्वं, पङ्कजत्वमिति, हस्तित्वं मानुषत्वं क्षत्रियत्वं राजन्यत्वमिति ? उच्यते । समासकृत्तद्धितेषु संबन्धाभिधानमन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसंबन्धेभ्यः। तत्र रूढयो गौरखरादय उदाहृता एव । अभिन्नरूपास्तु तद्धिता एव लुबादिभिः संभवन्ति गर्गत्वं पञ्चालत्वमिति । अत्र गर्गादयः शब्दा यद्यप्युर्लुपि यद्यपि तद्धितान्तास्तथापि मूलप्रकृत्या सह सहविवक्षायामभिन्नरूपत्वात् प्रत्ययोत्पत्तिसंबंधो न्यग्भूत इति अभिन्नशब्दाभिधेयतैव भावप्रत्ययात् प्रतीयते न संबंधः । अथ पञ्चालशब्दात् युगपदपत्यजन-

पदाभिधायिनो भावप्रत्ययेन किमभिधीयते? प्रवृत्तिनिमित्तसंघातः यथा धवखदिरत्वमिति जातिसंहतिः। एतेन अक्षत्वं पादत्वं माषत्वमित्यादीन्यपि व्याख्यातानि। अव्यभिचरितसंबंधास्तु प्रायः कृत्स्वेव भवन्ति। सतो भावः सत्त्वं सत्ता विद्यमानत्वं विद्यमानता। अत्र हि जातावेव भावप्रत्ययः। नहि सद्वस्तु सत्तासंबन्धस्य व्यभिचरतीति सत्तासंबंधानपेक्षणान्न संबंधे। पाचक इत्यादौ तु संबंधस्य कादाचित्कत्वात् तदपेक्षः पाचकादिशब्दः स्वार्थमभिधत्त इति ततः संबंधे प्रत्ययो युक्तः। तस्मात् सत्सु विद्यमानेषु च पदार्थेषु नित्यसमवायिनी शब्दप्रवृत्तिहेतुः सत्तैव भावप्रत्ययवाच्या न तु सत्सत्तयोः संबंधः कश्चित् इति। ततः स्थितमेतत् रूढ्यादिभ्योऽन्यत्रैव कृत्तद्धितसमासेषु संबंधाभिधानमिति। ' त्वे वा ' इति वचनात् स्त्रीपुंसाभ्यां पक्षे नञ्स्नञावपि भवतः। स्त्रीत्वं स्त्रीता स्त्रैणम्। पुंस्त्वं पुंस्ता पौंस्नमिति। लकारः स्त्रीत्वार्थः। त्वान्तम् ' [1]आ त्वात्त्वादिः ' इति नपुंसकम्।

१८९९ त्वतले गुणः ॥३।२।५९॥ परतः स्यनूङ् गुणवचनः शब्दस्त्वत इत्येतयोः प्रत्ययोः परयोः पुंवत् स्यात्। पटव्या भावः पटुत्वं पटुता। त्वत इति किम्। पट्वीरूप्यम्। गुण इति किम्। कठीत्वम्। केचित्तु जातिसंज्ञावर्जितस्य विशेषणमात्रस्य पुंवद्भावमिच्छन्ति। पाचिकाया भावः पाचकत्वं पाचकतेत्यादौ।

१९०० प्राक्त्वादगडुलादेः ॥७।१।५६॥ त्वतलित्यनुवर्तते। ब्रह्मणस्त्व इत्यत्र यत्त्वशब्दसंकीर्तनं तस्मात् प्राक् त्वतलौ प्रत्ययावधिकृतौ वेदितव्यौ गडुलादीन् वर्जयित्वा। ते उत्तरत्रैवोदाहरिष्यन्ते। अपवादैः समावेशार्थः कर्मणि विधानार्थश्चारंभः। अगडुलादेरिति किम्। गाडुल्यम्। कामण्डलवम्। गडुलादिषु कमण्डलोः 'ग्वृवर्णालुग्वादेः' इत्यण्। शेषेभ्यस्तु राजादेराकृतिगणत्वात् ष्यण्। गडुलादेरपि केचिदिच्छन्ति–गडुलत्वं गडुलता।

१९०१ नञ् तत्पुरुषाद्बुधादेः ॥७।१।५७॥ प्राक्त्वान्नञ्पूर्वाद् तत्पुरुषाद् बुधाद्यन्तवर्जिताच्चतलौ स्यातामित्ययमधिकारो वेदितव्यः ष्यणादिबाधनार्थम्।

---

१ लिङ्गानुशासनमेतत्। अस्यार्थश्चायम्–' भावे त्वतल् ' इति त्वप्रत्ययादारभ्य ब्रह्मणस्त्वमिति त्वमभिव्याप्य ये प्रत्ययाः त्व–य–ष्यण्–अञ्–अण्–अकञ्–ईय–त्वस्वरूपास्तदन्तं नाम क्लीवम्।

न शुक्लोऽशुक्लस्तस्य भावोऽशुक्लत्वमशुक्लता । वर्णलक्षणष्यण्बाधया त्वतलावेव । अशौक्ल्यमकार्ष्ण्यमिति च ष्यणन्तेन समासः । समासात्तु ष्यणि नञो वृद्धिः प्रसज्ज्येत । एवमपतेर्भावः कर्म वा अपतित्वम् अपतिता । अत्र पत्यन्तलक्षणष्यण्बाधया । अनाधिपत्यम् अगाणपत्यमिति ष्यणन्तेन समासः । अराजत्वमराजता । अत्र राजान्तलक्षणष्यण्बाधया । अनाधिराज्यमयौवराज्यमिति ष्यणन्तेन समासः। अमूर्खत्वममूर्खता। अत्र गुणाङ्गलक्षणष्यण्बाधया। अमौर्ख्यमजाड्यमिति ष्यणन्तेन समासः । अस्थविरत्वमस्थविरता । अत्र वयोलक्षणाञ्बाधया । अस्थाविरमकैशोरमित्यणञन्तेन समासः । अहायनत्वमहायनता अत्र हायनान्तलक्षणाण्बाधया । अद्वैहायनम् । अत्रैहायनमित्यणन्तेन समासः । अपटुत्वमपटुता । अत्र ष्टुवर्णलक्षणाण्बाधया । अपाटवमलाघवमित्यणन्तेन समासः । अरमणीयत्वमरमणीयता । अत्र योपान्त्यलक्षणाकञ्बाधया । अरामणीयकम् अकामनीयकमित्यकञन्तेन समासः । नञ्ग्रहणं किम् । प्राजापत्यम् । सैनापत्यम् । तत्पुरुषादिति किम् । न विद्यते पतिरस्य अपतिर्ग्रामः । तस्य भावः कर्म वा आपत्यम् । एवमाराज्यम् आहायनम् आरमणीयकम् । अबुधादेरिति किम् । न बुधः अबुधः तस्य भावः कर्म वा आबुध्यम् । आचतुर्थम् । अत्र राजादित्वात् ष्यण् । अथ ष्यणन्तानामेषां नञ्समासो भवति वा नवा बुधस्य भावः कर्म वा बौध्यम् न बौध्यमबौध्यमिति ? भवतीत्येके । न भवतीत्यत्ये ।

१९०२ पृथ्वादेरिमन् ॥७।१।५८॥ पृथ्वादिभ्यस्तस्य भावे इमन् प्रत्ययो वा स्यात् । वावचनाच्चाणादिः प्राप्नोति सोऽपि भवति ।

१९०३ पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः ॥ ७।४।३९ ॥ पृथ्वादीनामृकारस्येमनि णीष्ठेयसुषु च परेषु रादेशः स्यात् । पृथोर्भावः प्रथिमा पृथुत्वं पृथुता पार्थवम् । म्रदिमा मृदुत्वं मृदुता मार्दवम् । बहुलस्य भाव इत्यत्र इमनि बहुलस्य—

१९०४ प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घवृद्धवृन्दारकस्येमनि च प्रास्थास्फावरगरबंहत्रपद्राघवर्षवृन्दम् ॥ ७।४।३८ ॥ प्रियादीनां यथासंभवमिमनि णीष्ठेयसुषु च यथासंख्यं प्रादय आदेशाः स्युः । इत्यादिना बंहादेशः ।

बंहिमा बहुलत्वं बहुलता। बाहुल्यम् ष्यण् । वत्सिमा । वत्सत्वं वत्सता । वात्सम् । वयोलक्षणोऽञ् । एवं प्रियस्य भावः प्रेमा प्रियत्वं प्रियतेत्यादि ।

१९०५ भूर्लुक् चेवर्णस्य ॥७।४।४१॥ बहुशब्दस्य ईयसाविमनि च परे भू इत्ययमादेशः स्यादनयोश्चेवर्णस्य लुक् । बहोर्भावः भूमा ।

१९०६ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः ॥७।४।४२॥ स्थूलादीनां यथासंभवमिमनि णीष्ठेयसुषु च परेष्वन्तस्थादेरवयवस्य लुक् स्यान्नामिनश्च गुणः । ह्रस्वस्य भावो ह्रसिमा । क्षिप्रस्य क्षेपिमा । क्षुद्रस्य क्षोदिमा ।

१९०७ वर्णदृढादिभ्यष्ट्यण् च वा ॥७।१।५९॥ वर्णविशेषवाचिभ्यो दृढादिभ्यश्च तस्य भावे ष्यण् इमन् चेत्येतौ प्रत्ययौ वा स्याताम् । प्राक्त्वादित्यधिकारात् त्वतलौ च। वावचनाद्यश्चाण् प्राप्नोति सोऽपि भवति। शुक्लस्य भावः शौक्ल्यं शुक्लिमा शुक्लत्वं शुक्लता । शितेर्भावः शैत्यं शितिमा शितित्वं शितिता शैतम्। वावचनाद् ऋवर्णान्तस्य पाञ्चरूप्यम्। दृढादि–दार्ढ्यं द्रढिमा दृढत्वं दृढता। वार्ढ्यम्। [1]द्रढिमा। दृढत्वं दृढता । पारिदृढ्यं परिद्रढिमा परिदृढत्वं परिद्रढता । वैमत्यं विमतिमा विमतित्वं विमतिता वैमतम् । सांमत्यं संमतिमा संमतित्वं संमतिता सांमतम् । ऋवर्णान्तलक्षणोऽण् । टकारो ङ्यर्थः । अर्हतो भावः कर्म वा आर्हन्त्यम् ङौ चेत् आर्हन्ती । एवमौचिती यथाकामी सामग्री शैली पारिख्याती आनुपूर्वी । बहुवचनादाकृतिगणोऽयम् । तेन स्थैर्यं स्थेमेत्यादयपि सिद्धम् ।

१९०८ पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च ॥७।१।६०॥ पत्यन्तेभ्यो राजान्तेभ्यो गुणाङ्गेभ्यो राजादिभ्यश्च षष्ठ्यन्तेभ्यो भावे कर्मणि च क्रियायां ष्यण् प्रत्ययः स्यात् । प्राक्त्वादित्यधिकारात् त्वतलौ च । पत्यन्त–अधिपतेर्भावः कर्म वा आधिपत्यम् अधिपतित्वम् अधिपतिता । एवं नारपत्यम् । बार्हस्पत्यम् । प्राजापत्यम् । सैनापत्यम् । राजान्त–आधिराज्यम् अधिराजत्वम् अधिराजता । एवं सौराज्यम् । यौवराज्यम् । गुणाङ्ग–द्रव्याश्रयी गुणः, गुणोऽङ्गं

---

१ केचित्तु बृढशब्दस्यापि ऋकारस्य रादेशमिच्छन्ति इति मतान्तरेणात्र रत्वम् ॥

निमित्तं येषां प्रवृत्तौ ते गुणाङ्गाः, गुणद्वारेण ये गुणिनि वर्तन्ते न तु गुणवचना एव। मौढ्यं मूढत्वं मूढता। मौखर्यम्। वैदुष्यम्। राजादि--राज्यम् राजत्वं राजता। काव्यं कवित्वं कविता। ब्राह्मण्यं ब्राह्मणत्वं ब्राह्मणता। चकारो भावे कर्मणि चेत्युभयसमुच्चयार्थः।

१९०९ **अर्हतस्तोन्त् च** ॥७।१।६१॥ अर्हत्शब्दात् षष्ठ्यन्ताद् भावे कर्मणि चार्थे ष्यण् प्रत्ययः स्यात् तत्संनियोगे च तकारस्य न्त् इत्यादेशो भवति। अरिहननात् रजोहननात् रहस्याभावाच्च अर्हन् पृषोदरादित्वात्। यद्वा चतुस्त्रिंशत-मतिशयान् सुरेन्द्रादिकृतां पूजां वार्हति इति अर्हन्। तस्य भावः कर्म वा आर्हन्त्यम्। आर्हन्ती। प्राक्त्वादिति त्वतलौ च। अर्हत्त्वम्। अर्हत्ता।

१९१० **सहायाद्वा** ॥७।१।६२॥ सहायशब्दात् तस्य भावे कर्मणि च ष्यण् प्रत्ययो वा स्यात्। वावचनात् पक्षे योपान्त्यलक्षणोऽकञ्। प्राक्त्वादिति त्वतलौ च। सहायस्य भावः कर्म च साहाय्यम्। साहायकम्। सहायत्वम्। सहायता।

१९११ **सखिवणिग्दूताद्यः** ॥७।१।६३॥ सखिवणिग्दूत इत्येतेभ्यस्तस्य भावे कर्मणि च यः प्रत्ययः स्यात्। प्राक्त्वादिति त्वतलौ च। सख्युर्भावः कर्म वा सख्यम्। सखित्वं सखिता। वणिज्यम्। वणिज्या। वणित्वम्। वणिक्ता। दूत्यम्। दूतत्वं दूतता। राजादेराकृतिगणत्वात् ष्यणपि। वाणिज्यम्। दौत्यम्।

१९१२ **स्तेनान्न लुक् च** ॥७।१।६४॥ स्तेनशब्दात् तस्य भावे कर्मणि च यः प्रत्ययः स्यात्तत्संनियोगे च न इत्येतस्य लुक् स्यात्। प्राक्त्वादिति त्वतलौ च। स्तेनस्य भावः कर्म वा स्तेयम्। स्तेनत्वम् स्तेनता। राजादिदर्शनात् स्तैन्यमि-त्यपि भवति।

१९१३ **कपिज्ञातेरेयण्** ॥७।१।६५॥ कपि ज्ञाति इत्येताभ्यां तस्य भावे कर्मणि च एयण् प्रत्ययः स्यात्। त्वतलौ च। कपेर्भावः कर्म वा कापेयम्। कपित्वं कपिता। ज्ञातेयम्। ज्ञातित्वं ज्ञातिता। कपेः इकारान्तत्वात् अणि प्राप्ते ज्ञातेश्च प्राणिजातित्वादञि प्राप्ते वचनम्।

१९१४ प्राणिजातिवयोऽर्थादञ् ॥ ७।१।६६ ॥ प्राणिजातिवाचिनो वयोवचनाच्च तस्य भावे कर्मणि वाञ् प्रत्ययः स्यात् । त्वतलौ च । अश्वस्य भावः कर्म वा आश्वम् । अश्वत्वम् । अश्वता । कुमारस्य भावः कर्म वा कौमारं कुमारत्वं कुमारता । प्राणिग्रहणं किम् । तृणत्वं तृणता । जातिग्रहणं किम् । देवदत्तत्वम् । देवदत्तता ।

१९१५ युवादेरण् ॥७।१।६७॥ युवादिभ्यः शब्देभ्यस्तस्य भावे कर्मणि चाण् प्रत्ययः स्यात् त्वतलौ च । यूनो लिङ्गविशिष्टस्यापि ग्रहणात् युवतेर्भावः कर्म वा यौवनम् युवत्वं युवता । चौरादिपाठाद्यौवनिकेत्यपि भवति । स्थाविरम् । स्थविरत्वम् । स्थविरता ।

१९१६ हायनान्तात् ॥७।१।६८॥ हायनान्तेभ्यः शब्देभ्यस्तस्य भावे कर्मणि चाण् प्रत्ययः स्यात् त्वतलौ च । द्वैहायनम् । द्विहायनत्वम् । द्विहायनता । त्रैहायनम् । चातुर्हायनम् । अत्रावयोवाचित्वात् ' चतुस्त्रैर्हायनस्य वयसि ' हति णत्वं न भवति । वयसि तु पूर्वेणाञ् त्रैहायणम् । चातुर्हायणम् ।

१९१७ ऋवर्णाल्लघ्वादेः ॥ ७।१।६९ ॥ लघुरादिर्यस्येवर्णोवर्णस्य तदन्तान्नाम्नस्तस्य भावे कर्मणि चाण् प्रत्ययः स्यात् । त्वतलौ च । शुचेर्भावः कर्म वा शौचम् शुचित्वं शुचिता । शकुनेः शाकुनम् । मुनेर्भावः कर्म वा मौनम् । संमतेः सांमतम् । कवेर्भावः कर्म वा काव्यमिति तु राजादिपाठात् । नखरजन्या नाखरजनम् । हरीतक्या हारीतकम् । तितउनस्तैतवम् । पृथोः पार्थवम् । पटोः पाटवम् । लघोर्लाघवम् । वध्वा वाध्वम् । पितुः पैत्रम् । आदिग्रहणं समीपमात्रार्थम् । तेन तितउ इत्यत्राव्यवहिते शुच्यादौ चैकवर्णव्यवहिते लघुनि भवति । ऋवर्णादिति किम् । घटत्वम् । पटत्वम् । लघ्वादेरिति किम् । पाण्डुत्वम् । कण्डूत्वम् । केचित्तु कृशानोर्भावः कर्म वा कार्शानवम् । अरत्नेरारत्नम् अरातेरारातम् इत्यादिष्वपि इच्छन्ति । तन्मतसंग्रहार्थं लघ्वादेरिति प्रकृतेर्विशेषणं न ऋवर्णस्येति व्याख्येयम् । तन्मते संमतेः सांमतमिति न भवति ।

१९१८ पुरुषहृदयादसमासे ॥७।१।७०॥ पुरुषहृदय इत्येताभ्यां तस्य भावे कर्मणि चाण् स्यात् त्वतलौ च असमासे न चेदनयोः समासो विषयभूतो

भवति । पुरुषस्य भावः कर्म वा पौरुषम् पुरुषत्वं पुरुषता । हृदयस्य भावः कर्म वा हार्दम् । हृदयस्य हृल्लासेति हृद्भावः । हृदयत्वं हृदयता । असमास इति किम् । परमपुरुषत्वम् । परमहृदयत्वम् । सत्पुरुषत्वम् । सौहृदव्यम् । परमपौरुषं परमहार्दमित्यादि मा भूत् । अत एव निषेधात् सापेक्षादपि भावप्रत्ययो विज्ञायते । तेन काकस्य काण्र्यं बलाकायाः शौक्ल्यमित्यादि सिद्धम् । पौरुषमिति प्राणिजात्यत्रापि सिद्धम् । समासविषये प्रतिषेधार्थं पुरुषोपादानम् ।

१९१९ श्रोत्रियाद्यल्लुक् च ॥७।१।७१॥ श्रोत्रियशब्दात् तस्य भावे कर्मणि चाण् प्रत्ययः स्यात् तत्संनियोगे च य इत्यस्य लोपः भवति त्वतलौ च । श्रोत्रियस्य भावः कर्म वा श्रौत्रम् । श्रोत्रियत्वं श्रोत्रियता । चौरादिपाठादकञपि । श्रौत्रियकम् ।

१९२० योपान्त्यादगुरूपोत्तमादसुप्रख्यादकञ् ॥७।१।७२॥ त्रिप्रभृतीनामन्त्यमुत्तमम् तत्समीपमुपोत्तमम् उपोत्तमं गुरुर्यस्य तस्मात् यकारोपान्त्यात् सुप्रख्यवर्जितात् तस्य भावे कर्मणि चाकञ् प्रत्ययः स्यात् त्वतलौ च । रमणीयस्य भावः कर्म वा रामणीयकम् रमणीयत्वम् रमणीयता । दार्शनीयकम् । कामनीयकम् । औपाध्यायकम् । पानीयकम् । गुरुग्रहणादनेकव्यञ्जनव्यवधानेऽपि भवति । आचार्यकम् । गुरुग्रहणं दीर्घपरिग्रहार्थं संयोगपरिग्रहार्थं च । अन्यथा दीर्घोत्तमादित्युच्येत । योपान्त्यादिति किम् । कापोतम् । विमानत्वम् । गुरूपोत्तमादिति किम् । क्षत्रियत्वम् कायत्वम् । असुप्रख्यादिति किम् । सुप्रख्यत्वम् । गुणाङ्गत्वात् ष्यणपि । सौप्रख्यम् ।

१९२१ चौरादेः ॥७।१।७३॥ चौरादिभ्यस्तस्य भावे कर्मणि चाकञ् प्रत्ययः स्यात् । त्वतलौ च । चौरस्य भावः कर्म वा चौरकम् । चौरिका । धौर्तकम् । धौर्तिका । मानोज्ञकम् । प्रैयरूपकम् । चौरत्वम् । चौरता । यूनो भावः यौवनकम्, यौवनिका । अत्र नोऽपदस्येत्यन्त्यस्वरादेर्लुकि प्राप्ते ।

१९२२ यूनोऽके ॥७।४।५०॥ युवन्शब्दस्याके परेऽन्त्यस्वरादेर्लुग् स्यात् । इति निषेधान्न भवति ।

१९२३ द्वन्द्वाल्लित् ॥७।१।७४॥ द्वन्द्वसमासात्तस्य भावे कर्मणि चाकञ्

प्रत्ययः स्यात् स च लित् त्वतलौ च । लित्करणं स्त्रीत्वार्थम् । गोपालपशुपालानां भावः कर्म वा गौपालपशुपालिका । गोपशुपालत्वम् गोपशुपालता । शैष्योपाध्यायिका । कौत्सकुशिकिका । विश्व पक्षी ना च नरः वित्रोर्भावः कर्म वा वैत्रिका । अत्र 'स्त्रवर्णाल्लुब्वादेः' इत्यणि प्राप्ते परत्वादकञ् । एवं भारतबाहुबलिका ।

१९२४ **गोत्रचरणाच्छ्लाघात्याकारप्राप्त्यवगमे** ॥७।१।७५॥ गोत्रवाचिनश्चरणवाचिनश्च शब्दात्तस्य भावे कर्मणि च लिदकञ् प्रत्ययो भवति त्वतलौ च श्लाघादिषु विषयभूतेषु । श्लाघा विकत्थनम् । अत्याकारः पराधिक्षेपः । विषयभावः पुनः श्लाघादीनां क्रियारूपाणां भावकर्मणी प्रति साध्यत्वात् । गोत्रमपत्यं प्रवराध्यायपठितं च । चरणं शाखानिमित्तं कठादि । गार्ग्यस्य भावः कर्म वा गार्गिका तया श्लाघते । काठिकया विकत्थते । गार्गिकया अत्याकुरुते । काठिकयाधिक्षिपति । गार्गिकां प्राप्तवानवगतवान् वा । काठिकामधिगतवान् विज्ञातवान् वा । गार्ग्यत्वेन गार्ग्यतया कठत्वेन कठतया श्लाघते । श्लाघादिष्विति किम् । गार्गम् । काठम् । प्राणिजातिलक्षणोऽञ् ।

१९२५ **होत्राभ्य ईयः** ॥ ७।१।७६ ॥ होत्राशब्द ऋत्विग्विशेषवचनः । ऋत्विग्विशेषवाचिभ्यस्तस्य भावे कर्मणि ईयः प्रत्ययः स्यात् त्वतलौ च । मैत्रावरुणस्य भावः कर्म वा मैत्रावरुणीयम् । मैत्रावरुणत्वम् । मैत्रावरुणता । एवमग्नीधः अग्निधीयम् । नेष्टुः नेष्ट्रीयम् । पोतुः पोत्रीयम् । ब्राह्मणाच्छंसिनो ब्राह्मणाच्छंसीयम् । हूयते आभिरिति होत्रा ऋच इत्येके । तान्येवोदाहरणानि । मैत्रावरुणादयस्तु ऋग्वचनाः । बहुवचनं स्वरूपविधिनिरासार्थम् ।

१९२६ **ब्रह्मणस्त्वः** ॥७।१।७७॥ होत्राभ्य इति वर्तते । ब्रह्मन् इत्येतस्माद्ऋत्विग्वाचिनस्तस्य भावे कर्मणि च त्वः प्रत्ययः स्यात् । ईयापवादः । ब्रह्मणो भावः कर्म वा ब्रह्मत्वम् । होत्राधिकारात् ब्राह्मणपर्यायाज्जातिवाचिनो ब्रह्मन्शब्दात् [1]तलपि भवति । ब्रह्मत्वम् । ब्रह्मता ।

इति श्रीसिद्धहैमबृहत्प्रक्रियायां तद्धितप्रकरणे
भावकर्मार्थाः समाप्ताः ॥

---

१ तलपीति-न केवलं 'भावे त्वतल्' इत्यनेन त्वः किंतु तलपि । अयमर्थः-

॥ अथ क्षेत्राद्यर्थकाः ॥

१९२७ शाकटशाकिनौ क्षेत्रे ॥७।१।७८॥ तस्येति वर्तते। क्षेत्रं धान्यादीनामुत्पत्त्याधारभूमिः। तस्येति षष्ठ्यन्ताद् क्षेत्रेऽर्थे शाकटशाकिन इत्येतौ प्रत्ययौ स्याताम्। इक्षूणां क्षेत्रम् इक्षुशाकटम्। इक्षुशाकिनम्। मूलकशाकटं मूलकशाकिनम्। शाकशाकटम्। शाकशाकिनम्।

१९२८ धान्येभ्य ईनञ् ॥७।१।७९॥ धान्यवाचिभ्यः षष्ठ्यन्तेभ्यः क्षेत्रेऽर्थे ईनञ् प्रत्ययः स्यात्। कुलत्थानां क्षेत्रं कौलत्थीनम्। मौद्गीनम्। मैयङ्गवीणम्। नैवारीणम्। कौद्रवीणम्।

१९२९ व्रीहिशालेरेयण् ॥७।१।८०॥ व्रीहि शालि इत्येताभ्यां तस्य क्षेत्रे एयण् प्रत्ययः स्यात्। ईनञोऽपवादः। व्रीहेःक्षेत्रं व्रैहेयम्। शालेयम्।

१९३० यवयवकषष्टिकाद्यः ॥७।१।८१॥ यवयवकषष्टि इत्येतेभ्यस्तस्य क्षेत्रे यः प्रत्ययः स्यात्। ईनञोऽपवादः। यवानां क्षेत्रं यव्यम्। यवक्यम्। षष्टिक्यम्। षष्टिरात्रेण पच्यमाना व्रीहयः षष्टिकाः। अत एव निपातनात् सिद्धिः।

१९३१ वाणुमाषात् ॥ ७।१।८२ ॥ अणु माष इत्येताभ्यां षष्ठ्यन्ताभ्यां क्षेत्रेऽर्थे यः प्रत्ययो वा स्यात्। पक्षे ईनञ्। अणूनां क्षेत्रमणव्यम्। आणवीनम्। माष्यम्। माषीणम्।

१९३२ वोमाभङ्गातिलात् ॥७।१।८३॥ उमा भङ्गा तिल इत्येतेभ्यः षष्ठ्यन्तेभ्यः क्षेत्रेऽर्थे यः प्रत्ययो वा स्यात्। पक्षे ईनञ्। उमाभङ्गे अपि धान्ये एवेष्येते। उमानां क्षेत्रम् उम्यम् औमीनम्। भङ्ग्यम्। भाङ्गीनम्। तिल्यम्। तैलीनम्। योगविभाग उत्तरार्थः।

१९३३ अलाब्वाश्च कटो रजसि ॥७।१।८४॥ अलाबूशब्दाच्चकारादुमा-

ऋत्विग्वचनस्य ब्राह्मणवचनस्य च त्वप्रत्ययः समानः तेन जातिवचनस्य तलपि भवतीत्यर्थः। उपलक्षणं चेदं तेन ब्रह्मणो भावः कर्म वा प्राणिजात्यत्रि ब्राह्ममित्यपि।

भङ्गातिलेभ्यश्च षष्ठ्यन्तेभ्यो रजस्यर्थे कटः प्रत्ययः स्यात् । अलाबूनां रजः अलाबूकटम् । उमाकटम् । भङ्गाकटम् । तिलकटम् ।

१९३४ अह्ना गम्येऽश्वादीनञ् ॥ ७।१।८५ ॥ तस्येति षष्ठ्यन्तादश्वशब्दादेकेनाह्ना गम्येऽर्थे ईनञ् प्रत्ययः स्यात् । अश्वस्यैकेनाह्ना गम्य आश्वीनोऽध्वा । अह्नेति किम् । अश्वस्य मासेन गम्यः।

१९३५ कुलाज्जल्पे ॥ ७।१।८६ ॥ षष्ठ्यन्तात् कुलशब्दाज्जल्पेऽर्थे ईनञ् प्रत्ययः स्यात् । कुलस्य जल्पः कौलीनम् ।

१९३६ पीलवादेः कुणः पाके ॥७।१।८७॥ पीलवादिभ्यः षष्ठ्यन्तेभ्यः पाकेऽर्थे कुणः प्रत्ययः स्यात् । पीलूनां पाकः पीलुकुणः। कर्कन्धुकुणः।

१९३७ कर्णादेर्मूले जाहः ॥७।१।८८॥ कर्णादिभ्यः षष्ठ्यन्तेभ्यो मूलेऽर्थे जाहः प्रत्ययः स्यात् । कर्णस्य मूलं कर्णजाहम् । अक्षिजाहम् ।

१९३८ पक्षात्तिः ॥ ७।१।८९ ॥ पक्षशब्दात् षष्ठ्यन्तान्मूलेऽर्थे तिः प्रत्ययः स्यात् । पक्षस्य मूलं पक्षतिः।

१९३९ हिमादेलुः सहे ॥ ७।१।९० ॥ हिमशब्दात् षष्ठ्यन्तात् सहे–सहमानेऽर्थे एलुः प्रत्ययः स्यात् । हिमस्य सहः–हिमं सहमानः हिमेलुः।

१९४० बलवातादूलः ॥ ७।१।९१ ॥ बल वात इत्येताभ्यां षष्ठ्यन्ताभ्यां सहेऽर्थे ऊलः प्रत्ययः स्यात् । बलस्य सहः–बलं सहमानः बलूलः। वातूलः।

१९४१ शीतोष्णतृप्रादालुरसहे ॥७।१।९२॥ शीत उष्ण तृप्र इत्येतेभ्यः षष्ठ्यन्तेभ्योऽसहेऽसहमानेऽर्थे आलुः प्रत्ययः स्यात् । शीतस्यासहः–शीतमसहमानः शीतालुः। उष्णालुः। तृप्रालुः। तृप्रं दुःखम् ।

१९४२ यथामुखसंमुखादीनस्तद् दृश्यतेऽस्मिन् ॥ ७।१।९३ ॥ यथामुख संमुख इत्येताभ्यां तदिति प्रथमान्ताभ्यामस्मिन्निति सप्तम्यर्थे ईनः प्रत्ययः स्यात् यत्तत् प्रथमान्तं दृश्यते चेत् तद्भवति । यथामुखं दृश्यतेऽस्मिन् यथामुखीन आदर्शादिः। मुखस्य सदृशोऽर्थो यथामुखं प्रतिबिम्ब उच्यते । अत एव निपातनाद्

'यथाथे'ति प्रतिषेधेऽप्यव्ययीभावः। समं मुखं संमुखं समं मुखमस्यानेनेति वा संमुखं प्रतिबिंबमेव। अत एव निपातनात् समशब्दस्य अन्तलोपः। संमुखं दृश्यतेऽस्मिन्निति संमुखीनः। यथामुखीनः सीताया इति। संमुखीनो हि जयो रन्ध्रप्रहारिणामिति च उपमानात्।

१९४३ **सर्वादेः पथ्यङ्गकर्मपत्रपात्रशरावं व्याप्नोति** ॥ ७।१।९४ ॥ सर्वशब्दपूर्वेभ्यः पथिन् अङ्ग कर्मन् पत्र पात्र शराव इत्येतदन्तेभ्यो निर्देशादेव द्वितीयान्तेभ्यो व्याप्नोतीत्यर्थे ईनः प्रत्ययः स्यात्। सर्वपथं व्याप्नोति सर्वपथीनो रथः। सर्वाङ्गीणस्तापः। सर्वकर्मीणः पुरुषः। सर्वपत्रीणः सारथिः। सर्वपात्रीणः सर्वशरावीण ओदनः। सर्वादेरिति किम्। पन्थानं व्याप्नोति।

१९४४ **आप्रपदम्** ॥७।१।९५॥ प्रगतं पदं प्रपदम्। पदाग्रमित्यर्थः। अथवा प्रवृद्धं पदं प्रपदम् पदस्योपरिष्टात् संस्था खलुको गुल्फ इति यावत्। आङ् मर्यादायामभिविधौ वा। आ प्रपदात् आप्रपदम्। 'पर्यपाङ्' इत्यव्ययीभावः। आप्रपदशब्दान्निर्देशादेव द्वितीयान्ताद् व्याप्नोतीत्यर्थे ईनः प्रत्ययः स्यात्। आप्रपदं व्याप्नोति न तदतिवर्तते यः स आप्रपदीनः पटः। अनेन पटस्य प्रमाणमाख्यायते।

१९४५ **अनुपदं वद्धा** ॥७।१।९६॥ अनुपदशब्दान्निर्देशादेव द्वितीयान्ताद् बद्धा इत्येतस्मिन्नर्थे ईनः प्रत्ययः स्यात्। अनुपदं बद्धा अनुपदीना उपानत्। पदप्रमाणेत्यर्थः। अनुपदमिति दैर्घ्येऽनुरित्यव्ययीभावः।

१९४६ **अयानयं नेयः** ॥७।१।९७॥ अयानयशब्दान्निर्देशादेव द्वितीयान्तान्नेय इत्यस्मिन्नर्थे ईनः प्रत्ययः स्यात्। अयानयं नेयोऽयानयीनः शारः। फलकशिरसि स्थित उच्यते। अयः प्रदक्षिणं गमनम्। अनयः प्रसव्यं वामम्। शारिद्यूते हि केचिच्छाराः प्रदक्षिणं गच्छन्ति केचित् प्रसव्यम्। तेषां गतिरयसहितोऽनयोऽयानय इत्युच्यते। यस्मिन् परशारैः पदानामप्रवेशः तदुभयं नेयः अयानयीन इति रूढिः। अथवा अयः शुभं दैवम्। अनयोऽशुभम्। शुभादैवादपवर्ततेऽशुभं दैवं यस्मिन् कर्मणि तदयानयं शान्तिकर्म चतुःशरणप्रतिपत्तिरनाघातघोषणं देवगुरुपूजा तपो दानं ब्रह्मचर्यादिनियमः तद्यो नेयः कारयितव्यः सोऽयानयीन ईश्वर इति।

१९४७ **सर्वान्नमत्ति** ॥७।१।९८॥ सर्वान्नशब्दाद् द्वितीयान्ताद् अत्तीत्य-

स्मिन्नर्थे ईनः प्रत्ययः स्यात् । सर्वशब्दः प्रकारकात्स्न्र्ये । सर्वप्रकारमन्नं सर्वान्नं तदत्ति सर्वान्नीनो भिक्षुर्नियमरहितः।

१९४८ **परोवरीणपरंपरीणपुत्रपौत्रीणम्** ॥७।१।९९॥ परोवरीणादयः शब्दा अनुभवत्यर्थे ईनप्रत्ययान्ता निपात्यन्ते । परावरशब्दाद् द्वितीयान्तादनुभवत्यर्थे ईनः प्रत्ययोऽवरशब्दाकारस्य चोत्वं प्रत्ययसंनियोगे निपात्यते । परांश्चावरांश्चानुभवति परोवरीणः। पारोवर्यमित्यत्रातीतक्रमवाचि परोवरमिति शब्दान्तरम् । परंपरीणेति परपरतरशब्दाद् द्वितीयान्तादनुभवत्यर्थे ईनः परंपरभावश्च । परान् परतरांश्चानुभवति परंपरीणः। मन्त्रिपरंपरामन्त्रं भिनत्तीत्यत्र परम्पराशब्द आवन्तो बाहुल्यार्थः प्रकृत्यन्तरम् । पुत्रपौत्रीणेति पुत्रपौत्रशब्दाद् द्वितीयान्तादनुभवत्यर्थे ईनः । पुत्रांश्च पौत्रांश्चानुभवति पुत्रपौत्रीणः।

१९४९ **यथाकामानुकामात्यन्तं गामिनि** ॥७।१।१००॥ यथाकामानुकाम अत्यन्त इत्येतेभ्यो द्वितीयान्तेभ्यो गामिन्यर्थे ईनः प्रत्ययः स्यात् । यथाकामं गामी यथाकामीनः । अनुकामीनः । यथेच्छं गामीत्यर्थः ।

१९५० **पारावारं व्यस्तव्यत्यस्तं च** ॥७।१।१०१॥ पारावारशब्दात्समस्ताद् व्यस्ताद् व्यत्यस्ताच्च निर्देशादेव द्वितीयान्ताद् गामिन्यर्थे ईनः प्रत्ययः स्यात्। पारावारं गामी पारावारीणः । पारीणः । अवारीणः। पारावारीणः ।

१९५१ **अनुगवलम्** ॥७।१।१०२॥ अनुगुशब्दाद् द्वितीयान्तादलंगामिनि ईनः प्रत्ययः स्यात् । अलं पर्याप्तमित्यर्थः। गवां पश्चादनुगु तदलं गामी अलंगवीनो गोपालकः ।

१९५२ **अध्वानं खनौ** ॥७।१।१०३॥ अलंगामिनीति वर्तते। अध्वन्शब्दाद् द्वितीयान्तादलंगामिनि य ईन इत्येतौ प्रत्ययौ स्याताम् । अध्वानमलंगामी अध्वन्यः । अध्वनीनः ।

१९५३ **अभ्यमित्रमीयश्च** ॥ ७।१।१०४ ॥ अभ्यमित्रशब्दाद् द्वितीयातादलंगामिनि ईयः प्रत्ययः स्यात् चकाराद्येनौ च। अभ्यमित्रमलंगामी अभ्यमित्रीयः। अभ्यमित्र्यः। अभ्यमित्रीणः। अमित्राभिमुखं भृशं गन्तेत्यर्थः ।

१९७४ **समांसमीनाद्यश्वीनाद्यप्रातीनागवीनसाप्तपदीनम्** ॥७।१।१०५॥ समांसमीनादयः शब्दा ईनप्रत्ययान्ता निपात्यन्ते । साप्तपदीनस्त्वीनञ्प्रत्ययान्तः । समांसमीनेति समांसमामिति वीप्साद्वितीयान्तात् समुदायाद् गर्भं धारयत्यर्थे ईनः पूर्वपदविभक्तेश्चालुप् । समां समां गर्भं धारयति समांसमीना गौः । समामिति कालाध्वनोर्व्याप्तावितिं द्वितीया । अन्ये समायां समायां विजायते गर्भं विमुञ्चति समांसमीनेति पूर्वपदस्य यलोपमाहुः । व्याप्त्यभावाच्चाधिकरणे सप्तमी । अद्यश्वीनेति अद्यश्वःशब्दयोर्वार्थे समासः विजनिष्यमाणेऽर्थे विजननस्य प्रत्यासत्तौ गम्यमानायामीनः । अद्य श्वो वा विजनिष्यमाणा अद्यश्वीना गौः । एवं नाम प्रत्यासन्नप्रसवेत्यर्थः। अन्ये तु प्रत्यासत्तौ गम्यमानायां भविष्यत्यर्थे प्रत्ययमाहुः । अद्य श्वो वा भविष्यति अद्यश्वीनो लाभः । अद्यश्वीनं मरणम् । एव मद्यप्रातः-शब्दादीनः । अद्यप्रातीना गौः । अद्यप्रातीनो लाभः । अद्यप्रातीनं मरणम् । आगवीनेति आगोप्रतिदानशब्दात् कारिण्यर्थे ईनः प्रतिदानशब्दस्य च लुक् । आगोप्रतिदानं कारी आगवीनः कर्मकरः । गवा भृतो य आ तस्याः गोः प्रत्यर्पणात् कर्म करोति स आगवीनः। रूढिशब्दोऽयम् । यत्किञ्चिदादाया तस्य प्रतिदानात् कर्मकर एवमुच्यत इत्येके । अन्ये तु आ गोः प्राप्तेः कर्मकारी आगवीन इत्याहुः । साप्तपदीनेति सप्तपदशब्दात् तृतीयान्तात् तदवाप्येऽर्थे ईनञ् यत्तदवाप्यं तच्चेत् सख्यं सखा वा भवति। सप्तभिः पदैरवाप्यं साप्तपदीनं सख्यम्। साप्तपदीनः सखा। साप्तपदीनं मित्रम् ।

१९७५ **अषडक्षाशितंग्वलंकर्मालंपुरुषादीनः** ॥७।१।१०६॥ अषडक्ष आशितंगु अलंकर्मन् अलंपुरुष इत्येतेभ्यः स्वार्थे ईनः प्रत्ययः स्यात् । अविद्यमानानि षडक्षीणि अस्मिन् अषडक्षीणो मंत्रः । सक्थ्यक्ष्णः स्वाङ्ग इति टान्तादीनः । अषडक्षीणा क्रीडा द्वाभ्यां साध्यत इत्यर्थः । अषडक्षीणः कन्दुकः । येन द्वौ क्रीडतः । अदृश्यानि षडक्षीणि अस्य अषडक्षीणश्चैत्रः । पितुः पितामहस्य पुत्रस्य वा द्रष्टोच्यते । इन्द्रियपर्यायो वाक्षशब्दः । अविद्यमानानि षडक्षाण्यस्याषडक्षीणोऽमनस्कः । विचारेण विना प्रवर्तत इत्यर्थः । आशिता गावोऽस्मिन्निति आशितंगु । अस्मादेव निपातनात् पूर्वपदस्य मोऽन्तः । तत ईनः । आशितंगवीनमरण्यम् । अलं कर्मणे अलं पुरुषाय 'प्राप्त्यवपरि' इत्यादिना समासः तत ईनः अलंकर्मीणः अलंपुरुषीणः । राजाधीनमिति त्वधीनेन शौण्डादित्वात् सप्तमीसमासः । अस्ति

चाधीनशब्दः । 'अस्मास्वधीनं किमु निःस्पृहाणाम्' इति । 'वाक्यं हि वक्तुर्यधीनं भवति' इति । 'तदेतत् प्रयोक्तुर्यधीनं भवती'ति ।

१९८६ अदिक् स्त्रियां वाञ्चः ॥७।१।१०७॥ अञ्चत्यन्तान्नान्न ईनः प्रत्ययो वा स्यात् स्वार्थे न चेत् स दिशि स्त्रियां वर्तते । प्राचीनम् । प्राक् । प्रतीचीनं प्रत्यक् । उदीचीनम् उदक् । अवाचीनम् अवाक् । समीचीनः सम्यङ् । अदिक्स्त्रियामिति किम् । प्राची उदीची दिक् । दिग्ग्रहणं किम्। प्राचीना शाखा । स्त्रीग्रहणं किम् । प्राचीनं प्राक् रमणीयम् । दिश्यपि लुबन्तं स्वभावान्नपुंसकम् । 'वाग्वात्' इति विकल्पे लब्धे वाग्रहणं पूर्वत्र नित्यार्थम् ।

१९८७ तस्य तुल्ये कः संज्ञाप्रतिकृत्योः ॥ ७।१।१०८ ॥ तस्येति षष्ठ्यन्तात्तुल्ये सदृशेऽर्थे कः प्रत्ययः स्यात् संज्ञायां प्रतिकृतौ च विषये । प्रतिकृतिः काष्ठादिमयं प्रतिच्छन्दकम्। अश्वस्य तुल्यः अश्वकः । उष्ट्रकः । गर्दभकः । अश्वादिसदृशस्य संज्ञा एताः। प्रतिकृति–अश्वकं रूपम् । अश्विका प्रतिमा । अश्वकानि रूपाणि । तुल्य इति किम् । इन्द्रदेवः । एवंनामा कश्चित् । नात्र सादृश्यम् । संज्ञाप्रतिकृत्योरिति किम् । गोस्तुल्यो गवयः । संज्ञाग्रहणमप्रतिकृत्यर्थम् । एकेत्वाहुः। तुल्यमात्रे प्रत्ययः। शिव इव शिवकः।

१९८८ न नृपूजार्थध्वजचित्रे ॥७।१।१०९॥ नरि मनुष्ये पूजार्थे ध्वजे चित्रे च चित्रकर्मणि अभिधेये कः प्रत्ययो न स्यात् । तत्र सोऽयमित्येवाभिसंबंधः । संज्ञाप्रतिकृत्योरिति यथासंभवं प्राप्ते प्रतिषेधोऽयम् । नृ–चञ्चा तृणमयः पुरुषो यः क्षेत्ररक्षणाय क्रियते । चञ्चातुल्यः पुरुषश्चञ्चा । एवं वर्धिका । खरकुटी। पूजार्थ–अर्हन्, शिवः, स्कन्दः । पूजनार्थाः प्रतिकृतय उच्यन्ते । ध्वज–गरुडः सिंहः तालो ध्वजः । चित्र–दुर्योधनः भीमसेनः ।

१९८९ अपण्ये जीवने ॥७।१।११०॥ जीवन्त्यनेनेति जीवनम् । पण्यं विक्रेतव्यम् । पण्यवर्जितं यज्जीवनं तस्मिन् कः प्रत्ययो न स्यात् । वासुदेवसदृशो वासुदेवः । एवं शिवः स्कन्दः विष्णुः । देवलकानां जीविकार्थाः प्रतिकृतय उच्यन्ते । अपण्य इति किम् । हस्तिकान् विक्रीणीते । जीवन इति किम् । क्रीडने निषेधो मा भूत् । हस्तिकः ।

१९६० देवपथादिभ्यः ॥ ७।१।१११ ॥ देवपथ इत्येवमादिभ्यस्तुल्ये संज्ञाप्रतिकृत्योः कः प्रत्ययो न स्यात् । देवपथस्य तुल्यो देवपथः । एवं हंसपथः । बहुवचनमाकृतिगणार्थम् । पूर्वयोगावस्यैव प्रपञ्चः ।

१९६१ वस्तेरेयञ् ॥७।१।११२॥ तस्य तुल्य इति वर्तते न संज्ञाप्रतिकृत्योरिति । वस्तिशब्दात् षष्ठ्यन्तात् तुल्येऽर्थे एयञ् प्रत्ययः स्यात् । वस्तेस्तुल्यं वास्तेयम् । वास्तेयी प्रणालिका ।

१९६२ शिलाया एयच्च ॥ ७।१।११३ ॥ शिलाशब्दात् षष्ठ्यन्तात् एयञ् प्रत्ययः स्यात् चकारादेयञ् च । शिलायास्तुल्यं शिलेयं शैलेयं दधि । शिलेयी शैलेयी इष्टका । चकारः ' अणञेयेकण् ' इति एयस्य सामान्यग्रहणाविघातार्थः । अन्यथा ह्यस्यैव स्यात् । अन्ये तु द्रव्यशब्दवदेयजन्तं स्त्रियां नास्तीत्याहुः ।

१९६३ शाखादेर्यः ॥७।१।११४॥ शाखा इत्येवमादिभ्यस्तस्य तुल्ये यः प्रत्ययः स्यात् । पुरुषस्कन्धस्य वृक्षस्कन्धस्य वा तिर्यक् प्रसृतमङ्गं शाखेत्युच्यते । तद्यथा शाखा पार्श्वायता तथा कुलस्य यः पार्श्वायतोऽङ्गभूतः स शाखायास्तुल्यः शाख्यः । मुख्यः । जघन्यः ।

१९६४ द्रोर्भव्ये ॥७।१।११५॥ द्रुशब्दात् तस्य तुल्ये भव्येऽभिधेये यः प्रत्ययः स्यात् । विशिष्टेष्टपरिणामेन भवतीति भव्यम् अभिप्रेतानामर्थानां पात्रम् । द्रुतुल्यो द्रव्यमयं माणवकः। द्रव्यं कार्षापणम् । यथा द्रु अग्रन्थि अजिह्मं दारु उपकल्प्यमानविशिष्टेष्टरूपं भवति तथा माणवकोऽपि विनीयमानो विद्यालक्ष्म्यादिभाजनं भवतीति द्रव्यमुच्यते । कार्षापणमपि विनियुज्यमानं विशिष्टेष्टमाल्याद्युपभोगफलं भवति इति द्रव्यमुच्यते । द्रुरिव द्रव्यं राजपुत्रः। यथा द्रुमः पुष्पफलादिभिरर्थिनः कृतार्थयति एवमन्योऽपि यः सोऽपि द्रव्यमुच्यते । भव्य इति किम् । द्रुतुल्योऽयं न चेतयते ।

१९६५ कुशाग्रादीयः ॥७।१।११६॥ कुशाग्रशब्दात् तस्य तुल्ये ईयः प्रत्ययः स्यात् । कुशाग्रस्य तुल्यं कुशाग्रीयं शस्त्रम् तदाकारत्वात् । कुशाग्रीया बुद्धिः तीक्ष्णत्वात् ।

१९६६ काकतालीयादयः ॥७।१।११७॥ काकतालीयादयः शब्दा ईय-

प्रत्ययान्ताः साधवो भवन्ति तस्य तुल्येऽभिधेये। काकश्च तालश्च काकतालम्। यथा कथंचिद् व्रजतः काकस्य निपतता तालेनातर्कितोपनतश्चित्रीयमाणः संयोगो लक्षणयोच्यते तत्तुल्यं काकतालीयम्। एवं खलतिबिल्वीयम्। अन्धकश्च वर्तिका च अन्धकवर्तिकम्। अत्रान्धकस्य वर्तिकाया उपरि अतर्कितः पादन्यास उच्यते। अन्धकस्य बाहूत्क्षेपे वर्तिकायाः करे निलयनं वा तत्तुल्यमन्धकवर्तिकीयम्। अजया पादेनावकिरत्यात्मवधाय कृपाणस्य दर्शनमजाकृपाणम् तत्तुल्यमजाकृपाणीयम्। एवंविधचित्रीकरणविषयाः काकतालीयादयः। निपातनं रूढ्यर्थम्। बहुवचनादन्येऽपि। अर्धजरतीयम्। घुणाक्षरीयमित्यादि।

१९६७ शर्करादेरण् ॥७।१।११८॥ शर्करादिभ्यस्तस्य तुल्येऽण् प्रत्ययः स्यात्। शर्करायास्तुल्यं शार्करं दधि मधुरत्वात्। शार्करी मृत्तिका कठिनत्वात्।

१९६८ अः सपत्न्याः ।७।१।११९॥ सपत्नीशब्दात् तस्य तुल्ये अः प्रत्ययः स्यात्। सपत्न्यास्तुल्यः सपत्नः।

१९६९ एकशालाया इकः ॥७।१।१२०॥ एकशालाशब्दात् तस्य तुल्ये इकः प्रत्ययः स्यात्। एकशालायास्तुल्यमेकशालिकम्।

१९७० गोण्यादेश्चैकण् ॥ ७।१।१२१ ॥ गोण्यादिभ्य एकशालाशब्दाच्च तस्य तुल्ये इकण् प्रत्ययः स्यात्। गोण्यास्तुल्यं गौणिकम्। अङ्गुलेरङ्गुल्या वा आङ्गुलिकम्। एकशालाया ऐकशालिकम्।

१९७१ कर्कलोहिताट् टीकण् च ॥७।१।१२२॥ कर्कलोहितशब्दाभ्यां तस्य तुल्ये टीकण् प्रत्ययः स्याच्चादिकण्। शुक्लोऽश्वः कर्कः। तस्य तुल्यः कार्कीकः। कार्किकः। लौहितीकः। लौहितिकः। स्फटिकादिः अलोहितवर्णोऽप्युपाश्रयवशाद्यस्तथावभासते स एवमुच्यते। ककारो ङ्यर्थः। कार्कीकी। लौहितीकी।

१९७२ वेर्विस्तृते शालशङ्कटौ ॥७।१।१२३॥ विशब्दाद् विस्तृतेऽर्थे शाल शङ्कट इत्येतौ प्रत्ययौ स्याताम्। विशालः। विशङ्कटः। विस्तृत इत्यर्थः। विनानानेत्यव्यये पृथग्भावे वर्तते इति विनञ्भ्यां नानाञौ प्रत्ययौ न वक्तव्यौ।

१९७३ कटः ॥७।१।१२४॥ विशब्दाद् विस्तृतेऽर्थे कटः प्रत्ययः स्यात्। विकटः।

१९७४ **संप्रोन्नेः संकीर्णप्रकाशाधिकसमीपे** ॥७।१।१२५॥ सम् प्र उद् नि इत्येतेभ्यो यथासंख्यं संकीर्णादिष्वर्थेषु कटः प्रत्ययः स्यात्। समः संकीर्णे संकटः। प्रात् प्रकाशे प्रकटः। उदोऽधिके उत्कटः। नेः समीपे निकटम्।

१९७५ **अवात्कुटारश्चावनते** ॥७।१।१२६॥ अवशब्दादवनतेऽर्थे कुटारश्चकारात् कटश्च प्रत्ययः स्यात्। अवकुटारः। अवकटः।

१९७६ **नासानतितद्वतोष्टीटनाटभ्रटम्** ॥७।१।१२७॥ अवशब्दान्नासानतौ तद्वति च वाच्ये टीट नाट भ्रट इत्येते प्रत्ययाः स्युः। नासानतौ—नासाया नमनम् अवटीटम् अवनाटम् अवभ्रटम्। सा नासानतिर्विद्यते यस्मिन् स तद्वान् नासा पुरुषः। अपकृष्टो वार्थः। तत्र अवटीटा अवनाटा अवभ्रटा नासिका। अवटीटः। अवनाटः। अवभ्रटः पुरुषः। अवटीटम् अवनाटम् अवभ्रटं वा ब्रह्मदेयम्। अपकृष्टमपि हि वस्तु दृष्ट्वा लोको नासिकां नामयति।

१९७७ **नेरिनपिटकाश्चिक्चिचिकश्चास्य** ॥७।१।१२८॥ निशब्दान्नासानतौ तद्वति चाभिधेये इन पिट क इत्येते प्रत्ययाः स्युः तत्संनियोगे चास्य नेर्यथासंख्यं चिक् चि चिक् इत्येते आदेशाः स्युः। चिकिनम् चिपिटम् चिकम् नासिकानमनम्। चिकिना चिपिटा चिका नासिका। चिकिनः चिपिटः चिकः पुरुषः। बहुवचनं [1] रूढ्यर्थम्।

१९७८ **बिडबिरीसौ नीरन्ध्रे च** ॥७।१।१२९॥ निशब्दान्नीरन्ध्रेऽर्थे नासानतितद्वतोश्च बिडबिरीस इत्येतौ प्रत्ययौ स्याताम्। निबिडाः निबिरीसाः केशाः। निबिडम् निबिरीसम् नासिकानमनम्। निबिडा निबिरीसा नासिका। निबिडो निबिरीसो मैत्रः। विधानसामर्थ्यात् षत्वं न भवति।

१९७९ **क्लिन्नाल्लश्चक्षुषि चिल् पिल् चुल् चास्य** ॥७।१।१३०॥ क्लिन्नशब्दाच्चक्षुषि वाच्ये लः प्रत्ययः स्यात् तत्संनियोगे चास्य चिल् पिल् चुल इत्येते आदेशाः। चिलम्। पिलम्। चुलम् चक्षुः। तद्योगात् पुरुषोऽपि चिलः पिलः। चुलः।

१९८० **उपत्यकाधित्यके** ॥७।१।१३१॥ उपत्यका अधित्यका इत्येतौ

---

१ तेनापकृष्टे ब्रह्मदेयलक्षणे अर्थे चिकिनमित्यादयो न भवन्ति ॥

शब्दौ निपात्येते। उपाधिशब्दाभ्यां यथासंख्यं पर्वतस्यासन्नायामधिरूढायां च भुवि त्यकः प्रत्ययो निपात्यते। उपत्यका। अधित्यका। क्षिपकादित्वादित्वाभावः। स्वभावतः स्त्रीलिङ्गावेतौ। पुंलिङ्गावपीति कश्चित्। उपत्यको देशः। अधित्यकः पन्थाः। निपातनं रूढ्यर्थम्।

१९८१ **अवेः संघातविस्तारे कटपटम्** ॥७।१।१३२॥ अविशब्दात् संघाते विस्तारे चार्थे यथासंख्यं कट पट इत्येतौ प्रत्ययौ स्याताम्। अवीनां संघातः अविकटः। अवीनां विस्तारः अविपटः। संघाते सामूहिकानां विस्तारे ऐदमर्थिकानां चापवादो योगः।

१९८२ **पशुभ्यः स्थाने गोष्ठः** ॥७।१।१३३॥ पशुनामभ्यः षष्ठ्यन्तेभ्यः स्थानेऽर्थे गोष्ठः प्रत्ययः स्यात्। इदमर्थानामपवादः। गवां स्थानं गोगोष्ठम्। महिषीगोष्ठम्। अश्वगोष्ठम्।

१९८३ **द्वित्वे गोयुगः** ॥७।१।१३४॥ पशुनामभ्यः षष्ठ्यन्तेभ्यो द्वित्वेऽर्थे गोयुगः प्रत्ययः स्यात्। इदमर्थानामपवादः। गवोर्द्वित्वं गोगोयुगम्। अश्वगोयुगम्। उष्ट्रगोयुगम्।

१९८४ **षट्त्वे षड्गवः** ॥७।१।१३५॥ पशुनामभ्यः षष्ठ्यन्तेभ्यः षट्त्वे गम्यमाने षड्गवः प्रत्ययः स्यात्। उष्ट्राणां षट्त्वमुष्ट्रषड्गवम्। हस्तिषड्गवम्। अश्वषड्गवम्। इदमर्थानामपवादः।

१९८५ **तिलादिभ्यः स्नेहे तैलः** ॥७।१।१६६॥ तिलादिभ्यः सामर्थ्यात् षष्ठ्यन्तेभ्यः स्नेहेऽर्थे तैल इति प्रत्ययः स्यात्। विकारप्रत्ययापवादः। तिलानां स्नेहो विकारस्तिलतैलम्। सर्षपतैलम्। इङ्गुदतैलम्। एरण्डतैलम्।

१९८६ **तत्र घटते कर्मणष्ठः** ॥ ७।१।१३७॥ कर्मन्शब्दाद् तत्रेति सप्तम्यन्तात् घटते इत्यर्थे ठः प्रत्ययः स्यात्। कर्मणि घटते कर्मठः।

१९८७ **तदस्य संजातं तारकादिभ्य इतः** ॥७।१।१३८॥ तदिति प्रथमान्तेभ्यस्तारकादिभ्योऽस्येति षष्ठ्यर्थे इतः प्रत्ययः स्यात् यत्तत्प्रथमान्तं संजातं चेत्तद् भवति। तारकाः संजाता अस्य तारकितं नभः। पुष्पाणि संजातान्यस्य पुष्पितस्तरुः। बहुवचनमाकृतिगणार्थम्।

१९८८ **गर्भादप्राणिनि** ॥७।१।१३९॥ गर्भशब्दात्तदस्य संजातमित्यर्थे इतः प्रत्ययः स्यात् अप्राणिनि–स चेत् षष्ठ्यर्थः प्राणी न भवति। गर्भः संजातोऽस्य गर्भितो व्रीहिः। अप्राणिनीति किम्। गर्भः संजातोऽस्या दास्या इति वाक्यमेव।

१९८९ **प्रमाणान्मात्रट्** ॥७।१।१४०॥ तदस्येति वर्तते। तदिति प्रथमान्तात् प्रमाणवाचिनोऽस्येति षष्ठ्यर्थे मात्रट् प्रत्ययः स्यात्। आयाममानं प्रमाणं, तद्द्विविधम् ऊर्ध्वमानं तिर्यग्मानं चेति। तत्रोर्ध्वमानात्–जानुनी प्रमाणमस्य जानुमात्रमुदकम्। जानुमात्री खाता। तिर्यग्मानात्–रज्जुमात्री भूमिः। तन्मात्री। तावन्मात्री। टकारो ङ्यर्थः।

१९९० **हस्तिपुरुषाड्डाण्** ॥७।१।१४१॥ तदिति प्रथमान्तात् प्रमाणवाचिनो हस्तिशब्दात् पुरुषशब्दाच्चास्येति षष्ठ्यर्थेऽण् प्रत्ययो वा स्यात्। पक्षे यथाप्राप्तम्। हस्ती प्रमाणमस्य हास्तिनं हस्तिमात्रम् हस्तिदघ्नं हस्तिद्वयसमुदकम्। हास्तिनी हस्तिमात्री हस्तिदघ्नी हस्तिद्वयसी खाता। पौरुषं पुरुषमात्रं पुरुषदघ्नं पुरुषद्वयसमुदकम्। पौरुषी पुरुषमात्री पुरुषदघ्नी पुरुषद्वयसी खाता। पौरुषी पुरुषमात्री छाया।

१९९१ **वोर्ध्वे दघ्नट् द्वयसट्** ॥७।१।१४२॥ ऊर्ध्वे यत्प्रमाणं तद्वाचिनो नाम्नः प्रथमान्तादस्येति षष्ठ्यर्थे दघ्नट् द्वयसट् इत्येतौ प्रत्ययौ वा स्याताम्। पक्षे मात्रट्। ऊरुः प्रमाणमस्य ऊरुदघ्नम् ऊरुद्वयसम् ऊरुमात्रमुदकम्। ऊरुदघ्नी ऊरुद्वयसी ऊरुमात्री खाता। तदघ्नी तद्द्वयसी तन्मात्री। तावदघ्नी तावद्द्वयसी तावन्मात्री। वाग्रहणमण्मात्रटोरबाधनार्थम्। तेन पुरुषदघ्नम् पुरुषद्वयसम् पुरुषमात्रम्। पौरुषमिति पुरुषहस्तिनोश्चातुरूप्यं भवति। ऊर्ध्वमिति किम्। रज्जुमात्री भूमिः।

१९९२ **मानादसंशये लुप्** ॥७।१।१४३॥ प्रमाणमिति वर्तते। मानवाच्येव साक्षाद्यः प्रमाणशब्दो हस्तवितस्त्यादिः प्रसिद्धो न तु रज्ज्वादिर्यो लक्षणया प्रमाणे वर्तते तस्मात् प्रस्तुतस्य मात्रडादेः प्रत्ययस्यासंशये गम्यमाने लुप् स्यात्। हस्तः प्रमाणमस्य हस्तः। वितस्तिः। दिष्टिः। शमः चतुर्विंशतिरङ्गुलानि। मानादिति किम्। ऊरुमात्रमुदकम्। रज्जुमात्री भूमिः। असंशय इति किम्। शमः प्रमाणमस्य स्यादिति शममात्रम्। दिष्टिमात्रम्। वितस्तिमात्रम्। केचित्तु मानमात्रान्मात्रटं

तस्यासंशये लुब्विकल्पं चेच्छन्ति । प्रस्थः प्रस्थमात्रो वा व्रीहिः । हस्तः हस्तमात्रं वा काष्ठम् । पलं पलमात्रं वा सुवर्णम् । शतं शतमात्रा वा गावः ।

१९९३ द्विगोः संशये च ॥७।१।१४४॥ मानादिति वर्तते । प्रमाणादिति निवृत्तम् । पुरुषाद्वेत्यत्र उपचरितप्रमाणात् पुरुषाल्लुपि ङीविधानात् । तदनुवृत्तौ तु तस्य मानेन विशेषणात् प्रसिद्धादेव हस्तादेः लुप् स्यात् । मानान्ताद् द्विगोः संशये चकारादसंशये च प्रस्तुतस्य मात्रडादेः प्रत्ययस्य लुप् भवति । द्वौ शमौ प्रमाणमस्य द्वौ शमौ प्रमाणमस्य स्यादिति वा द्विशमः द्विदिष्टिः द्विवितस्तिः। द्विकाण्डा क्षेत्रभक्तिः । द्विकाण्डी रज्जुः । द्विपुरुषी द्विपुरुषा खाता । द्विहस्तिनी । त्रिहस्तिनी । द्वौ प्रस्थौ मानमस्य स्यात् द्विप्रस्थः । द्विपलम् । द्विशतः । मीयतेऽनेन मानं प्रमाणं परिमाणम् उन्मानं संख्या चेह गृह्यते ।

ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः ।

अन्ये तु रूढप्रमाणान्तादेव द्विगोरिच्छन्ति तन्मते द्विप्रस्थमित्यादौ लुब् न भवति ।

१९९४ मात्रट् ॥७।१।१४५॥ मानात् संशये चेति वर्तते । तदिति प्रथमान्तान्मानवाचिनो नाम्नः षष्ठ्यर्थे मात्रट् प्रत्ययः स्यात् संशये । प्रस्थो मानमस्य स्यात् प्रस्थमात्रं धान्यम् । प्रस्थमात्रा व्रीहयः । कुडवमात्रम् । पलमात्रम् । कर्षमात्रम् । पञ्चमात्राः । शतमात्राः । शतमात्रम् । दिष्टिमात्रम् । मात्रदघ्नद्वयसानि नामान्यपि सन्ति । अनुबन्धासञ्जनार्थं तु प्रत्ययविधानम् । तेन च स्त्रियां विशेषः । [1]वैश्वदेवमात्रा भिक्षा ।

१९९५ शन्नशद्विंशतेः ॥७।१।१४६॥ शन्नन्ताच्छदन्ताच्च संख्याशब्दाद्विंशतिशब्दाच्च मानवृत्तेस्तदिति प्रथमान्तादस्येति षष्ठ्यर्थे संशये गम्यमाने मात्रट् प्रत्ययः स्यात् । डिनोऽपवादः। दश मानमेषां स्यादिति दशमात्राः । पञ्चदशमात्राः । त्रिंशन्मात्राः । त्रयस्त्रिंशन्मात्राः । विंशतिमात्राः ।

१९९६ डिन् ॥७।१।१४७॥ संशये इति निवृत्तम् । योगविभागात् । शन्नन्ताच्छदन्ताच्च संख्याशब्दाद् विंशतिशब्दाच्च मानवृत्तेस्तदिति प्रथमान्तादस्येति

---

१ विश्वे देवा देवता अस्याण् वैश्वदेवो मात्रं मात्रा वाऽस्याः।

षष्ठ्यर्थे डिन् प्रत्ययः स्यात् । पञ्चदशाहोरात्राः परिमाणमस्य पञ्चदशी अर्धमासः। पञ्चदशिनौ पञ्चदशिनः। एवं त्रिंशी त्रिंशिनौ त्रिंशिनो मासाः। त्रयस्त्रिंशिनो देवविशेषाः। विंशिनो भवनेन्द्राः।

१९९७ इदं किमोऽतुरिय् किय् चास्य ॥७।१।१४८॥ तदस्य मानादिति वर्तते । तदिति प्रथमान्तादिदंशब्दात् किंशब्दाच्च मानवृत्तेरस्येति षष्ठ्यर्थे मेयेऽतुः प्रत्ययस्तत्संनियोगे च इदंकिंशब्दयोरिय् किय् इत्येतावादेशौ स्याताम् । चतुर्विधं मानम्, तत्र प्रामाणात्–इदं मानमस्य इयान् कियान् पटः । परिमाणात्–इयत् कियद्धान्यम् । उन्मानात्–इयत् कियत्सुवर्णम् । संख्यायाः–इयन्तः कियन्तो गुणिनः । इयती । कियती । उदित्करणं दीर्घत्वाद्यर्थम् ।

१९९८ यत्तदेतदो डावादिः ॥७।१।१४९॥ यत्तदेतदित्येतेभ्यः प्रथमान्तेभ्यो मानवृत्तिभ्योऽस्येति षष्ठ्यर्थे मेयेऽतुः प्रत्ययः स्यात् स च डावादिः । यत्तदेतद्वा प्रमाणमस्य यावान् तावान् एतावान् पटः । यावत् तावत् एतावत् धान्यम् । यावत् तावत् एतावत् सुवर्णम् । यावन्ति तावन्ति एतावन्ति अधिकरणानि । यावती तावती एतावती । ननु मात्रडादयोऽपि दृश्यन्ते इदं प्रमाणमस्य इदंमात्रं किंमात्रं यन्मात्रं तन्मात्रं एतन्मात्रं यद्दघ्नं यद्द्रुयसमित्यादि । सत्यम् । स्वविषये मानविशेषे प्रमाणे मात्रडादयो भवन्त्येव मानसामान्येऽतुरेवेति विभागः।

१९९९ यत्ततत्किमः संख्याया डतिर्वा ॥ ७।१।१५० ॥ संख्यारूपं यन्मानं तद्वृत्तिभ्यो यत्तत्किम् इत्येतेभ्यः प्रथमान्तेभ्योऽस्येति षष्ठ्यर्थे संख्येये मेये डतिः प्रत्ययो वा स्यात् । पक्षे यथाविहितोऽतुश्च । या संख्या मानमेषां यति यावन्तः । सा संख्या मानमेषां तति तावन्तः। का संख्या मानमेषां कति कियन्तः। [1]एतौ चातुडतिप्रत्ययौ स्वभावाद् बहुवचनविषयावेव भवतः। संख्याया इति किम्। कियान् यावान् तावान पटः । मानादिति संख्याया विशेषणं किम् । क्षेपे मा भूत् । का संख्या येषां दशानाम् ।

२००० अवयवात्तयट् ॥७।१।१५१॥ तदस्येति संख्याया इति च वर्तते । मानादिति निवृत्तम् । अवयवादिति विशेषणान्तरोपादानात् । अवयवे वर्तमानात्

---

१ अनेन संख्यावृत्तिभ्यो विहितौ मानवृत्तेस्तु 'इदं किमोऽतु'रित्यादिना एकत्वादावपि ।

संख्यावाचिनो नान्नस्तदिति प्रथमान्तात् अस्येति षष्ठ्यर्थे अवयविनि तयट् प्रत्ययः स्यात् । चत्वारोऽवयवा अस्याः चतुष्टयी शङ्कानां प्रवृत्तिः। चतुष्टयी रज्जुः। पञ्चतयो यमः। सप्ततयी नयप्रवृत्तिः। दशतयो धर्मः। द्वादशतयः सिद्धान्तः।

२००१ द्वित्रिभ्यामयट् वा ॥ ७।१।१५२ ॥ द्वि त्रि इत्येताभ्यामवयववृत्तिभ्यां प्रथमान्ताभ्यामस्येति षष्ठ्यर्थे अवयविनि अयट् प्रत्ययो वा स्यात् । द्वाववयवावस्य द्वयं द्वितयं तपः। त्रयं त्रितयं जगत्। त्रयः त्रितयो मोक्षमार्गः। टकारो ङ्यर्थः । द्वयी द्वितयी । त्रयी त्रितयी रज्जुः । अवयवा अवयविनि संबद्धा इति सामर्थ्यादवयवी प्रत्ययार्थ इति विज्ञायते । त्रयाणि पानानि यथा तथा पिबेदित्यत्र तु देशकालादिभेदेन समुदायाभिधानात् बहुवचनम् । द्वये पदार्था जीवा अजीवाश्चेत्यत्र तु जीवाजीवतया द्वैराश्योपादानात् बहूनामपि द्वाववयवौ भवतः। कथमुभयो मणिः, उभये देवमनुष्याः, उभयी दृष्टिरिति ? उभयशब्दः सर्वादिषु उभयद् इति पठ्यमानः शब्दान्तरमेव । तथा चास्य 'नेमार्ध' इत्यादिना जस इकारविकल्पो न ।

२००२ द्यादेर्गुणान्मूल्यक्रेये मयट् ॥७।१।१५३॥ संख्याया इति वर्तते । द्यादेः संख्याशब्दाद् गुणवृत्तेस्तदिति प्रथमान्तादस्येति षष्ठ्यर्थे मयट् प्रत्ययः स्यात् । स चेत् संख्याशब्दो मूल्ये क्रेये वा वर्तते । यवानां द्वौ गुणौ मूल्यमस्योदश्वितः क्रेयस्य द्विमयमुदश्विद्यवानाम् । एवं त्रिमयम् । चतुर्मयम् । उदश्वितो द्वौ गुणौ क्रेयावेषां यवानां द्विमया यवा उदश्वितः । एवं त्रिमयाः । चतुर्मयाः । द्यादिपदस्य सापेक्षस्यापि नित्यसापेक्षत्वेन गमकत्वाद् वृत्तिः । द्यादेरिति किम् । यवानामेको गुणो मूल्यमस्योदश्वित उदश्वित एको गुणः क्रेय एषां यवानाम् । गुणादिति किम् । द्वौ व्रीहियवौ मूल्यमस्योदश्वितः । द्वे घृतोदश्विती क्रेये एषां यवानाम् । मूल्यक्रय इति किम् । क्षीरस्य द्वौ गुणौ तैलस्य पाक्यस्य । अपरः प्रकारः। मूल्यक्रेय इति प्रत्ययार्थविशेषणम् । द्यादेः संख्याशब्दाद् गुणवृत्तेस्तदिति प्रथमान्तादस्येति षष्ठ्यर्थे मयट् प्रत्ययः स्यात् स चेत् षष्ठ्यर्थो मूल्यं क्रेयं वा भवति । द्वौ गुणावेषां मूल्यभूतानां यवानामुदश्वितः द्विमया यवा उदश्वितो मूल्यम् । एवं त्रिमयाः। चतुर्मयाः । द्वौ गुणावस्योदश्वितः क्रेयभूतस्य द्विमयमुदश्विद्यवानां क्रेयम् । त्रिमयम् । चतुर्मयम् । द्यादेरिति किम् । एकगुणा यवा उदश्वितो मूल्यम् एकगुणमुदश्विद्यवानां क्रेयम् । गुणादिति किम् । उदश्वितस्त्रयाणां भागानां द्वौ भागौ

यवानां मूल्यभूतानाम् । यवानां त्रयाणां भागानां द्वौ भागौ उदश्वितः क्रेयस्य । द्वौ गुणाविति क्रयं मूल्यं चैकगुणं कृत्वा तदपेक्षया मूल्यक्रेययोर्द्विस्तावत्त्वोच्यते । मूल्यक्रेय इति किम् । द्विगुणं क्षीरं तैलस्य पाक्यस्य ।

२००३ अधिकं तत्संख्यमस्मिन् शतसहस्रे शतिशद्दशान्ताया डः ॥७।१।१५४॥ संख्याया इति तदिति च वर्तते । तदिति प्रथमान्तात् शतिशद्दशन् इत्येवमन्तात् संख्याशब्दादस्मिन्निति सप्तम्यर्थे शते सहस्रे च डः प्रत्ययः स्यात् यत्तत् प्रथमान्तं तच्चेदधिकं तत्संख्यं च भवति । सा शतसहस्रलक्षणा संख्या यस्य योजनादेस्तत्तत्संख्यं शतं सहस्रमिति च यत्संख्यायते तदेव यद्यधिकमपि भवतीत्यर्थः । योजनानां विंशतिर्योजनानि वा विंशतिरधिकास्मिन् योजनशते शते वा योजनेषु विंशं योजनशतं विंशं शतं योजनानि । एवं विंशं योजनसहस्रं विंशं सहस्रं योजनानि । विंशं कार्षापणशतम् विंशं शतं कार्षापणानि । विंशं कार्षापणसहस्रम् विंशं सहस्रं कार्षापणानि । संख्यासमुदायोऽपि संख्यैव संख्यायतेऽनयेति कृत्वेत्यत्रापि भवति । एकविंशम् द्वाविंशं शतम् । शत्–त्रिंशं शतं त्रिंशं सहस्रम् । एकत्रिंशं चत्वारिंशं पञ्चाशम् । दशन्–एकादशं शतम् एकादशं सहस्रम् । द्वादशं त्रयोदशं शतं सहस्रं वा । योजनादीनामिव शतानामपि सहस्रे भवति । विंशतिः शतान्यधिकान्यस्मिन् सहस्राणां शते विंशं शतसहस्रम् । त्रिंशम् । एकादशम् । राजदन्तादिषु पाठाच्छतशब्दस्य पूर्वनिपातः। अधिकमिति किम् । विंशतिः त्रिंशत् एकादश वा ऊना अस्मिन् शते । तत्संख्यमिति किम् । विंशतिर्दण्डा अधिका अस्मिन् योजनशते, त्रिंशत्पणा अधिका अस्मिन् कार्षापणसहस्रे, एकादश माषा अधिका अस्मिन कार्षापणशते । अस्मिन्निति किम् । विंशतिरधिकास्माच्छतात् । शतसहस्र इति किम् । एकादशाधिका अस्यां त्रिंशति । शतिशद्दशान्ताया इति किम् । षडधिका अस्मिन् शते । दशाधिका अस्मिन् सहस्रे । व्यपदेशिवद्भावाद्दशान्तत्वे शन्नित्येव क्रियेत न तु दशन्निति । संख्याया इत्येव । गोविंशतिः अधिका अस्मिन् गोशते । न गोविंशतिशब्द एकविंशत्यादिवत् संख्याशब्दः ।

२००४ संख्यापूरणे डट् ॥७।१।१५५॥ संख्या पूर्यते येन तत्संख्यापूरणम् । संख्याया इति वर्तते । संख्याशब्दात् संख्यापूरणेऽभिधेये डट् प्रत्ययः

स्यात् । अत्र सामर्थ्यात् षष्ठ्यन्तात् प्रत्ययो विज्ञायते । अतएव तदिति निवृत्तम् । एकादशानां पूरणः एकादशः । एकादशसंख्यापूरण इत्यर्थः। एकादशी । एवं द्वादशः । त्रयोदशः । चतुर्दशः । संख्याग्रहणं किम् । एकादशानामुष्ट्रिकाणां पूरणो घटः । एकस्य तु पूरणाभावान्न ग्रहणम् । द्यादेरित्यनुवृत्तेर्वा ।

२००५ **विंशत्यादेर्वा तमट्** ॥७।१।१५६॥ विंशत्येवमादिकायाः संख्यायाः संख्यापूरणे तमट् प्रत्ययो वा स्यात् । पक्षे डट्। विंशतेः पूरणः विंशतितमः। विंशः। *विंशतितमी विंशी स्त्री । एकविंशतितमः । एकविंशः । द्वाविंशतितमः। द्वाविंशः।* एकान्नत्रिंशत्तमः एकान्नत्रिंशः। त्रिंशत्तमः । त्रिंशः । चत्वारिंशत्तमः । चत्वारिंशः। द्वाचत्वारिंशत्तमः । द्वाचत्वारिंशः । पञ्चाशत्तमः। पञ्चाशः । अष्टपञ्चाशत्तमः । अष्टपञ्चाशः ।

२००६ **शतादिमासार्धमाससंवत्सरात्** ॥७।१।१५७॥ शतादिभ्यः संख्याशब्देभ्यो मास अर्धमास संवत्सर इत्येतेभ्यश्च संख्यापूरणे तमट् प्रत्ययः स्यात् । शतस्य पूरणः शततमः । शततमी । एकशततमः । सहस्रतमः। लक्षतमः। मासस्य पूरणो मासतमो दिवसः । अर्धमासतमः। संवत्सरतमः । षष्ठ्यादेरित्येव सिद्धे शतादिग्रहणं संख्याद्यर्थम् ।

२००७ **षष्ठ्यदेरसंख्यादेः** ॥७।१।१५८॥ संख्या आदिरवयवो यस्य स संख्यादिः । ततोऽन्यस्मात् षष्ठ्यादेः षष्टिप्रभृतिभ्यः संख्याशब्देभ्यः संख्यापूरणे तमट् प्रत्ययः स्यात् । विकल्पापवादः । षष्टेः पूरणः षष्टितमः । सप्ततितमः । अशीतितमः । नवतितमः । असंख्यादेरिति किम् । एकषष्टितमः। एकषष्टः। एकसप्ततितमः। एकसप्ततः। विंशत्यादेरिति विकल्प एव ।

२००८ **नो मट्** ॥७।१।१५९॥ असंख्यादेः संख्याशब्दान्नकारान्तात् संख्यापूरणे मट् प्रत्ययः स्यात् । डटोऽपवादः । पञ्चानां पूरणः पञ्चमः । पञ्चमी । सप्तमः। अष्टमः। नवमः। दशमः। न इति किम् विंशः। असंख्यादेरित्येव । एकादशः । द्वादशः ।

२००९ **पित्तिथट् बहुगणपूगसंघात्** ॥७।१।१६०॥ बहु गण पूग संघ इत्येतेभ्यः संख्यापूरणे तिथट् प्रत्ययः स्यात् स च पित् । बहूनां पूरणः बहुतिथः।

बह्वीनां पूरणी बहुतिथी । गणतिथः गणतिथी । पूगतिथः । पूगतिथी । संघतिथः । संघतिथी । संख्याविशेषणं संभवापेक्षम् । पित्करणं पुंवद्भावार्थम् । टकारो ङ्यर्थः ।

२०१० अतोरिथट् ॥७।१।१६१॥ अत्वन्तात् संख्याशब्दात् संख्यापूरणे इथट् प्रत्ययः स्यात् स च पित् । डटोऽपवादः । इयतां पूरणः इयतिथः । इयतीनां पूरणी इयतिथी । कियतिथः । कियतिथी । यावतिथः । यावतिथी । तावतिथः । तावतिथी । एतावतिथः । एतावतिथी ।

२०११ षट्कतिकतिपयात् थट् ॥७।१।१६२॥ षट् कति कतिपय इत्येतेभ्यः संख्यापूरणे थट् प्रत्ययः स्यात् स च पित् । षण्णां पूरणः षष्ठः । षष्ठी । कतीनां पूरणः कतिथः । कतिथी । कतिपयथः । कतिपयानां स्त्रीणां पूरणी कतिपयथी । 'षष्ठी वानादरे' 'चतुर्थी' इति च निर्देशात् थटि 'नाम सिदय्व्यंजने' इति पदत्वं न भवति ।

२०१२ चतुरः ॥७।१।१६३॥ चतुर् इत्येतस्मात् संख्यापूरणे थट् प्रत्ययः स्यात् । चतुर्णां पूरणः चतुर्थः । चतसृणां पूरणी चतुर्थी । योगविभाग उत्तरार्थः ।

२०१३ येयौ चलुक् च ॥७।१।१६४॥ चतुर् इत्येतस्मात् संख्यापूरणे य ईय इत्येतौ प्रत्ययौ स्याताम् च इत्येतस्य लुक् च भवति । चतुर्णां पूरणः तुर्यः । तुरीयः । तुर्या । तुरीया । एवं च त्रैरूप्यं भवति ।

२०१४ द्वेस्तीयः ॥७।१।१६५॥ द्विशब्दात् संख्यापूरणे तीयः प्रत्ययः स्यात् । द्वयोः पूरणः द्वितीयः । द्वितीया ।

२०१५ त्रेस्तृ च ॥७।१।१६६॥ त्रि इत्येतस्मात् संख्यापूरणे तीयः प्रत्ययः स्यात् तत्संनियोगे च त्रेस्तृ इत्यादेशः । त्रयाणां पूरणः तृतीयः । तिसृणां पूरणी तृतीया ।

२०१६ पूर्वमनेन सादेश्चेन् ॥७।१।१६७॥ पूर्वमिति क्रियाविशेषणान्निर्देशादेव केवलात् सादेः सपूर्वाच्चानेनेति तृतीयार्थे कर्तरि इन् प्रत्ययः स्यात् । केवलात्—पूर्वमनेन पूर्वी पूर्विणौ पूर्विणः । अनेनेति कर्तृपदम्, कर्ता च क्रियामन्तरेण न भवतीति कृतं भुक्तं पीतं चेति कांचित् क्रियामपेक्षते । विशेषावगमस्तु अर्थात् प्रकरणात् शब्दान्तरसंनिधेर्वा भवति । पूर्वी कटम् । पूर्वी ओदनम् । पूर्वी पयः ।

सादेः-कृतं पूर्वमनेन कृतपूर्वी कटम् । भुक्तं पूर्वमनेन भुक्तपूर्वी ओदनम् । पीतं पूर्वमनेन पीतपूर्वी पयः। कृतपूर्वादिसमासात् प्रत्ययः क्तान्तं येनैव समानाधिकरणं तस्यैव कर्मतां वक्ति । न च वृत्तौ क्तान्तं कटादिना समानाधिकरणमिति कटादिगतं कर्मानुक्तमिति अतो द्वितीया ।

२०१७ इष्टादेः ॥७।१।१६८ इष्ट इत्येवमादिभ्यः सामर्थ्यात् प्रथमान्तेभ्योऽनेनेति तृतीयार्थे कर्तरि इन् प्रत्ययः स्यात् । इष्टमनेन इष्टी यज्ञे । पूर्ती श्राद्धे । 'व्याप्ये क्तेनः' इति कर्मणि सप्तमी ।

२०१८ श्राद्धमद्य भुक्तामिकेनौ ॥७।१।१६९॥ श्राद्धशब्दात् प्रथमान्तादद्य भुक्तमित्येवमुपाधिकादनेनेति तृतीयार्थे कर्तरि इक इन् इत्येतौ प्रत्ययौ स्याताम् । श्राद्धशब्दः कर्मनामधेयं तत्साधने द्रव्ये वर्तित्वा प्रत्ययमुत्पादयति । श्राद्धमनेनाद्य भुक्तं श्राद्धिकः श्राद्धी । अद्यग्रहणादद्य भुक्ते श्राद्धे श्वः श्राद्धिकः श्राद्धी इति न भवति । भुक्तमिति किम् । श्राद्धमनेनाद्य कृतम् ।

२०१९ अनुपद्यन्वेष्टा ॥७।१।१७०॥ अनुपदीति इनन्तं निपात्यते अन्वेष्टा चेत् प्रत्ययार्थो भवति । अनुपदमन्वेष्टा अनुपदी उष्ट्राणां गवां वा ।

२०२० दाण्डाजिनिकायःशूलिकपार्श्वकम् ॥७।१।१७१॥ दाण्डाजिनिकायःशूलिकशब्दौ इकण्प्रत्ययान्तौ पार्श्वकशब्दश्च कप्रत्ययान्तो निपात्यते अन्वेष्टा चेत् प्रत्ययार्थः । दण्डाजिनं दम्भः तेन अन्वेष्टा दाण्डाजिनिकः । यो मिथ्याव्रती परप्रसादार्थं दण्डाजिनमुपादायार्थानन्विच्छति स दाम्भिक उच्यते । निपातनं रूढ्यर्थम् , तेन शैवभागवतादौ न भवति । आयःशूलिक इति । तीक्ष्ण उपायोऽयःशूलसाम्यादयःशूलं तेनान्वेष्टा आयःशूलिकः। यो मृदुनोपायेनान्वेष्टव्यानर्थान् तीक्ष्णोपायेनान्विच्छति राभसिकः स एवमुच्यते । केचिद्दण्डाजिनायःशूलाभ्यामिकमेवाहुः तन्मते दण्डाजिनिकः दण्डाजिनिका । अयःशूलिकः अयःशूलिका । पार्श्वक इति पार्श्वमनृजुरुपायः लञ्चादिः तेनान्वेष्टा पार्श्वकः। ऋजुनोपायेनान्वेष्टव्यानर्थाननृजुनोपायेन योऽन्विच्छति स पार्श्वक उच्यते । यस्तु राज्ञः पार्श्वेनार्थानन्विच्छति स राजपुरुषस्तत्र न भवति ।

२०२१ क्षेत्रेऽन्यस्मिन्नाश्य इयः ॥ ७।१।१७२ ॥ क्षेत्रशब्दाच्चिर्देशादेव

सप्तम्यन्तादन्योपाधिकान्नाश्येऽर्थे इयः प्रत्ययः स्यात् । अन्यस्मिन् क्षेत्रे नाश्यः क्षेत्रियो व्याधिः। क्षेत्रं शरीरम् । अन्यदिति जन्मान्तरशरीरमुच्यते । तत्र नाश्यो नेहेत्यसाध्यो व्याधिरुच्यते । क्षेत्रियं विषम् । तद्धि स्वशरीरादन्यस्मिन् परशरीरे संक्रमय्य किंचिन्नाश्यं चिकित्स्यं भवति । क्षेत्रियाणि तृणानि । तानि हि सस्यक्षेत्रेऽन्यस्मिन्नुत्पन्नानि नाश्यान्युत्पाट्यानि भवन्ति । क्षेत्रियः पारदारिकः। स हि स्वक्षेत्रादन्यस्मिन् क्षेत्रे परदारेषु प्रवर्तमानस्तत्र नाश्यो निग्राह्यो भवति। दाराः क्षेत्रम् ।

२०२२ छन्दोऽधीते श्रोत्रश्च वा ॥७।१।१७३॥ छन्दस्शब्दान्निर्देशादेव द्वितीयान्तादधीत इत्यस्मिन्नर्थे इयः प्रत्ययो वा स्यात् तत्संनियोगे च छन्दस्शब्दस्य श्रोत्रभावः । छन्दोऽधीते श्रोत्रियः॥ पक्षेऽण् । छान्दसः॥

२०२३ इन्द्रियम् ॥७।१।१७४॥ इन्द्रियमितीन्द्रशब्दादियप्रत्ययो निपात्यते । निपातनं रूढ्यर्थं तेन यथायोगमर्थकल्पना । इन्द्र आत्मा तस्य लिङ्गमिन्द्रियं चक्षुराद्युच्यते । तेन हि करणेनात्मानुमीयते नाकर्तृकं करणमिति । इन्द्रेण दृष्टमिन्द्रियम् । आत्मा हि चक्षुरादीनि दृष्ट्वा स्वविषये नियुङ्क्ते । इन्द्रेण सृष्टमिन्द्रियम् । आत्मकृतेन हि शुभाशुभेन कर्मणा तथाविधविषयोपभोगायास्य चक्षुरादीनि भवन्ति । इन्द्रेण जुष्टमिन्द्रियम् । तद्द्वारेणास्य विज्ञानोत्पादात् । इन्द्रेण दत्तमिन्द्रियम् । विषयग्रहणाय विषयेभ्यः समर्पणात् । इन्द्रस्यावरणक्षयोपशमसाधनमिन्द्रियम् । एवं सति संभवेऽन्यापि व्युत्पत्तिः कर्तव्या ।

२०२४ तेन वित्ते चञ्चुचणौ ॥ ७।१।१७५ ॥ तेनेति तृतीयान्ताद् वित्तेऽर्थे चञ्चु चण इत्येतौ प्रत्ययौ स्याताम् । वित्तो ज्ञातः प्रकाश इत्यर्थः। विद्यया वित्तः विद्याचञ्चुः । विद्याचणः। केशचञ्चुः। केशचणः।

२०२५ पूरणाद् ग्रन्थस्य ग्राहके को लुक् चास्य ॥ ७।१।१७६ ॥ तेनेति तृतीयान्तात् पूरणप्रत्ययान्ताद् ग्रन्थस्य ग्राहकेऽर्थे कः प्रत्ययः स्यात् तत्संनियोगे च पूरणप्रत्ययस्य लुक् । द्वितीयेन रूपेण ग्रन्थस्य ग्राहकः द्विकः त्रिकः चतुष्कः पञ्चकः षट्कः वैयाकरणः। ग्रन्थस्येति किम् । पञ्चमेन दिनेन शत्रूणां ग्राहकः ।

२०२६ ग्रहणाद्वा ॥७।१।१७७॥ ग्रन्थस्येति वर्तते पूरणादिति च । गृह्यते-

ऽनेनेति ग्रहणं रूपादि । ग्रन्थस्य ग्रहणाद्–ग्रहणे वर्तमानात् पूरणप्रत्ययान्तात् नाम्नः कः प्रत्ययः स्यात् स्वार्थे–प्रकृत्यर्थ एव अर्थान्तरानिर्देशात् तत्संनियोगे च पूरणप्रत्ययस्य वा लुक् । वेति लुकैव संबध्यते न प्रत्ययेन । पक्षे प्रत्ययानुत्पत्तेर्मङ्हाविभाषयैव सिद्धत्वात् द्वितीयमेव द्विकं द्वितीयकं ग्रन्थग्रहणमस्य । एवं त्रिकं तृतीयकं चतुष्कं चतुर्थकं पञ्चकं पञ्चमकं व्याकरणस्य ग्रहणम् । ग्रन्थस्येत्येव । द्वितीयं ग्रहणं धान्यस्य ।

२०२७ **सस्याद् गुणात् परिजाते** ॥ ७।१।१७८ ॥ सस्यशब्दाद् गुणवाचिनस्तेनेति तृतीयान्तात् परिजातेऽर्थे कः प्रत्ययः स्यात् । परिः सर्वतो भावे । जनिः संपत्तौ । सस्येन परिजातः सस्यकः शालिः यः सर्वतो गुणैः संपन्नो न यस्य किंचिदपि वैगुण्यमस्ति स एवमुच्यते । एवं सस्यको देशः। सस्यको वत्सः। सस्यकं सीधु । सस्यको मणिः। रूढिशब्दश्चायं मणिविषये । सस्यकः खड्गः सर्वतः सारेण संबद्धः । गुणादिति किम् । धान्यवचनान्मा भूत् । परिजातं क्षेत्रम् ।

२०२८ **धनहिरण्ये कामे** ॥७।१।१७९॥ धन हिरण्य इत्येताभ्यां निर्देशादेव सप्तम्यन्ताभ्यां कामेऽभिलाषेऽर्थे कः प्रत्ययः स्यात् । धने कामः धनकः चैत्रस्य । हिरण्यका मैत्रस्य ।

२०२९ **स्वाङ्गेषु सक्ते** ॥७।१।१८०॥ स्वाङ्गवाचिभ्यो नामभ्यो निर्देशादेव सप्तम्यन्तेभ्यः सक्ते तत्परेऽर्थे कः प्रत्ययः स्यात् । केशेषु सक्तः केशकः। नखकः। दन्तकः। केशादिरचनायां प्रसक्त उच्यते । बहुवचनात् स्वाङ्गसमुदायादपि भवति । दन्तौष्ठकः। केशनखकः ।

२०३० **उदरे त्विकणाद्यूने** ॥७।१।१८१॥ उदरशब्दान्निर्देशादेव सप्तम्यन्तात् सक्तेऽर्थे इकण् प्रत्ययः स्यात् । सक्तश्चेदाद्यूनो भवति । उदरे सक्तः औदरिकः आद्यूनः। अविजिगीषुर्यो बुभुक्षयात्यन्तं पीड्यते । औदरिकी । आद्यून इति किम् । उदरकोऽन्यः । तुशब्दः पूर्वयोगशेषतामस्य कथयति तेन काधिकारो न बाध्यते ।

२०३१ **अंशं हारिणि** ॥७।१।१८२॥ अंशशब्दान्निर्देशादेव द्वितीयान्ताद्धारिण्यर्थे कः प्रत्ययः स्यात् । अंशं हारी अंशको दायादः। हारीत्यावश्यके णिन् ।

२०३२ तन्त्रादचिरोद्धृते ॥७।१।१८३॥ तंत्रशब्दान्निर्देशादेव पञ्चम्यन्तादचिरोद्धृते–अचिरादुत्तीर्णेऽर्थे कः प्रत्ययः स्यात् । तन्त्रात्–पटवानोपकरणादचिरोत्तीर्णः तन्त्रकः पटः। प्रत्यग्र इत्यर्थः ।

२०३३ ब्राह्मणान्नाञ्नि ॥७।१।१८४॥ ब्राह्मणशब्दान्निर्देशादेव पञ्चम्यन्तादचिरोद्धृतेऽर्थे नाञ्नि–संज्ञायां कः प्रत्ययः स्यात् । सदाचारब्राह्मणेभ्यस्तदानीमेवोद्धृत्य पृथक्कृतः ब्राह्मणको नाम देशः । यत्रायुधजीविनः काण्डस्पृष्टा नाम ब्राह्मणा भवन्ति । आयुधजीवी ब्राह्मण एव ब्राह्मणक इत्यन्ये ।

२०३४ उष्णात् ॥७।१।१८५॥ उष्णशब्दात् पञ्चम्यन्तादचिरोद्धृतेऽर्थे कः प्रत्ययः स्यात् नाञ्नि । उष्णादग्नेरचिरोद्धृता उष्णिका यवागूः । अल्पान्ना पेया विलेपिकेति यावत् । उष्णकुण्डान्निसृता नदीति केचित् ।

२०३५ शीताच्च कारिणि ॥७।१।१८६॥ शीतादुष्णाच्च सामर्थ्याद् द्वितीयान्तात् कारिण्यर्थे कः प्रत्ययः स्यात् नाञ्नि । शीतं मन्दं करोति शीतकोऽलसः। उष्णं क्षिप्रं करोति उष्णको दक्षः। नाञ्नीत्यनुवृत्तेः शीतोष्णशब्दाविह मान्द्यशैघ्र्यवचनौ गृह्येते न स्पर्शवचनौ । क्रियाविशेषणत्वाद् द्वितीया । शारीत्यावश्यके णिन् ।

२०३६ अधेरारूढे ॥७।१।१८७॥ अधिशब्दादारूढेऽर्थे वर्तमानात् स्वार्थे कः प्रत्ययः स्यात् । आरूढशब्दः कर्तरि कर्मणि च क्तप्रत्यये सिद्धः । तत्र यदा कर्तरि तदा अधिको द्रोणः खार्याः खार्यामिति च भवति । यदा तु कर्मणि तदा अधिका खारी द्रोणेनेति भवति ।

२०३७ अनोः कमितरि ॥७।१।१८८॥ अनुशब्दात् कः प्रत्ययः स्यात् समुदायेन चेत् कमिता गम्यते । अनुकामयतेऽनुकः ।

२०३८ अभेरीश्च वा ॥७।१।१८९॥ अभिशब्दात् कः प्रत्ययः स्यात् ईकारश्चास्य वा भवति समुदायेन चेत् कमिता गम्यते । अभिकामयते अभिकः, अभीकः ।

२०३९ सोऽस्य मुख्यः ॥७।१।१९०॥ स इति प्रथमान्तादस्येति षष्ठ्यर्थे कः प्रत्ययः स्यात् यत्तत्प्रथमान्तं स चेन्मुख्यः प्रधानं ग्रामणीर्भवति । देवदत्तो

मुख्योऽस्य देवदत्तकः संघः। जिनदत्तकः। देवदत्तो मुख्य एषां देवदत्तकाः। जिनदत्तकाः। मुख्य इति किम्। देवदत्तः शत्रुरेषाम्।

२०४० शृङ्खलकः करभे ॥७।१।१९१॥ शृङ्खलकशब्दः कप्रत्ययान्तो निपात्यते करभे उष्ट्रशिशौ वाच्ये। शृङ्खलं बन्धनमस्य शृङ्खलकः करभः। करभाणां काष्ठमयं पादबन्धनं शृङ्खलम्। वयःशब्दश्चायम्। शृङ्खलं बन्धनं भवतु वा मा भूत्।

२०४१ उदुत्सोरुन्मनसि ॥७।१।१९२॥ उत् उत्सु इत्येताभ्यामस्येत्युन्मनस्यभिधेये कः प्रत्ययः स्यात्। उद्गतं मनोऽस्य उत्कः। उत्सुगतं मनोऽस्य उत्सुकः। उन्मनाः इत्यर्थः।

२०४२ कालहेतुफलाद्रोगे ॥७।१।१९३॥ स इति वर्तते। स इति प्रथमान्तेभ्यः कालविशेषवाचिभ्यो हेतुवाचिभ्यः फलवाचिभ्यश्चास्येति षष्ठ्यर्थे कः प्रत्ययः स्यात् यत्तदस्येति निर्दिष्टं रोगश्चेत्तद्भवति। द्वितीयो दिवसोऽस्याविर्भावाय द्वितीयकः। तृतीयकः। चतुर्थको ज्वरः। सततः कालोऽस्य सततको ज्वरः। हेतुर्विषपुष्पं हेतुरस्य विषपुष्पकः रोगः। काशपुष्पकः पर्वतको रोगः। फल–शीतं फलं कार्यमस्य शीतको ज्वरः। रोग इति किम्। द्वितीयो दिवसोऽस्य जातस्य बालस्य।

२०४३ प्रायोऽन्नमस्मिन्नान्नि ॥७।१।१९४॥ स इति वर्तते। स इति प्रथमान्तादस्मिन्निति सप्तम्यर्थे नान्नि–संज्ञायां विषये कः प्रत्ययः स्यात् यत्तत्प्रथमान्तं तच्चेदन्नं प्रायः। प्रायशब्दोऽत्रान्नसमानाधिकरणो नियतलिङ्गसंख्यः। प्रायः अकृत्स्नबहुत्वम्। गुडापूपाः प्रायेण प्रायो वाऽन्नमस्यां गुडापूपिका पौर्णमासी। तिलापूपिका। कृशरिका। त्रिपुटिका। नान्नीति किम्। अपूपाः प्रायेण प्रायो वान्नमवन्तिषु।

२०४४ कुल्मासादण् ॥७।१।१९५॥ कुल्मासशब्दात् प्रथमान्तात् प्रायोऽन्नमस्मिन्नित्यर्थेऽण् प्रत्ययः स्यात् नान्नि। कुल्मासाः प्रायेण प्रायो वान्नमस्यां पौर्णमास्यां कौल्मासी। कुल्मास इति मूर्धन्योपान्त्योऽप्यस्ति।

२०४५ वटकादिन् ॥७।१।१९६॥ वटकशब्दात् प्रथमान्तात् प्रायोऽन्नमस्मिन्नित्यर्थे इन् प्रत्ययः स्यात् संज्ञायाम्। वटकानि प्रायेण प्रायो वान्नमस्यां वटकिनी।

२०४६ साक्षाद् द्रष्टा ॥७।१।१९७॥ साक्षाच्छब्दाद् द्रष्टेत्यस्मिन्नर्थे इन् प्रत्ययः स्यात् । साक्षाद् द्रष्टा साक्षी साक्षिणौ साक्षिणः। प्रायोऽव्ययस्येत्यन्त्यस्वरादिलोपः । नान्नीत्येव । साक्षाद् द्रष्टा ।

॥ इति श्रीसिद्धहैमबृहत्प्रक्रियायां तद्धित-
प्रकरणे क्षेत्राद्यर्थकाः
समाप्ताः ॥

॥ अथ मत्वर्थीयाः ॥

२०४७ तदस्यास्त्यस्मिन्निति मतुः ॥७।२।१॥ तदिति प्रथमान्तादस्येति षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे वा मतुः प्रत्ययः स्यात् यत्तत् प्रथमान्तमस्तीति चेत्तद्भवति–अस्तिसमानाधिकरणं भवतीत्यर्थः । गावोऽस्य सन्ति गोमान् । यवमान् । वृक्षा अस्मिन् सन्ति वृक्षवान् प्लक्षवान् पर्वतः। अस्ति धनमस्य अस्तिमान् । स्वस्ति आरोग्यमस्यास्ति स्वस्तिमान् । अत्रास्तिस्वस्ती अव्ययौ धनारोग्यवचनौ । अस्तीति च सामान्याभिधायी । विशेषास्तेश्च सामान्यास्तिना सामानाधिकरण्यमुपपद्यत एव । अस्तीति वर्तमानकालोपादानात् वर्तमानसत्तायां प्रत्ययो भवति न भूतभविष्यत्सत्तायाम् गावोऽस्यासन् गावोऽस्य भवितार इति । न तर्हि इदानीमिदं भवति गोमानासीत् गोमान् भवितेति । भवति, नत्वेतस्मिन् वाक्ये भवति। तथा हि सति यथा गोमान् यवमानित्यत्रास्तेः प्रयोगो न भवति एवं गोमानासीत् गोमान् भवितेत्यत्रापि न स्यात् । भवतु वा प्रयोगः तथापि गावोऽस्यासन् गावोऽस्य भवितार इतिवत् गोमानासीदित्यादिष्वपि बहुवचनं श्रूयेत । का तर्हीयं वाचो युक्तिः गोमानासीत् गोमान् भवितेति । एषैषा वाचोयुक्तिः । नैषा गवां सत्ता कथ्यते गोमत्सत्तैषा कथ्यते । तर्हि कथं मतुः । अस्त्यत्र वर्तमानकालोक्तिः। कथं तर्हि भूतभविष्यत्कालता गम्यते । 'धातोः संबंधे प्रत्ययाः' इति। अथेह कस्मान्न भवति–चित्रा गावोऽस्य सन्ति स चित्रगुः शबलगुरिति । बहुव्रीहिणैव मत्वर्थस्योक्तत्वात् । एवं पूर्वशालः अपरशालः पञ्चगुः दशगुरित्यत्राप्यस्तीतिपदसापेक्षं तद्धितद्विगुं द्वैमातुर इत्यादौ सावकाशं बाधित्वा अस्तिपदनिरपेक्षत्वादन्तरङ्गेण बहुव्रीहिणा भवता उक्तार्थत्वान्मतुर्न भवति । अस्तीति किम् । गावोऽस्यानन्तरा गावोऽस्य समीपाः । अनन्तरादिष्वपि स्यात् । इतिकरणो विवक्षार्थः । तेन—

' भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां प्रायो मत्वादयो मताः' ॥१॥

भूम्नि–गोमान् । यवमान् । निन्दायां शङ्कोदकी । ककुदावर्ती । शंसायां–रूपवती शीलवती कन्या । नित्ययोगे–क्षीरिणो वृक्षाः कण्टकिनः। अतिशायने–उदरिणी कन्या । संसर्गे-दण्डी । छत्री । प्रायिकमेतद् भूमादिदर्शनं सत्तामात्रेऽपि प्रत्ययो दृश्यते। व्याघ्रवान् पर्वतः । स्पर्शरसगन्धवर्णवन्तः पुद्गलाः । रूपरसगन्धस्पर्शवती पृथिवी । रूपरसस्पर्शवत्य आपः । रूपस्पर्शवत् तेजः । स्पर्शवान् वायुः । यवमतीभिरद्भिर्यूपं प्रोक्षन्ति । तथा मत्वर्थीयान्मत्वर्थीयः सरूपो न भवति । गाव एषां सन्तीति गोमन्तः, गोमन्तः अत्र सन्तीति मतुर्न भवति । दण्ड एषामस्तीति दण्डिकाः, दण्डिका अत्र सन्तीति इको न भवति । विरूपस्तु भवत्येव । दण्डिमती शाला । विरूपोऽपि मत्वर्थीयः समानायां वृत्तौ न भवति । दण्ड एषामस्तीति दण्डिकाः, दण्डिनः । दण्डिका अस्य सन्ति दण्डिनोऽस्य सन्तीति इन्मतू न भवतः ।

' शैषिकाच्छैषिको नेष्टः सरूपः प्रत्ययः क्वचित् ।
समानवृत्तौ मत्वर्थान्मत्वर्थीयोऽपि नेष्यते ' ॥१॥

क्वचिदिति समानायामसमानायां च वृत्तौ। शालायां भवः शालीयः। दोरीय इतीये सति पुनः शालीये भवः शालीयस्यायं वेतीयो न भवति । विरूपस्तु भवत्येव । अहिच्छत्रे भव आहिच्छत्रः । तत्र भव आहिच्छत्रीयः। तथा असंज्ञाभूतात् कर्मधारन्मत्वर्थीयो न भवति । वीरपुरुषा अस्मिन् ग्रामे सन्ति । अत्र बहुव्रीहिरेव भवति । वीरपुरुषको ग्रामः। संज्ञायास्तु भवत्येव । गौरखरवदरण्यम् । कृष्णसर्पवान् वल्मीकः। लोहितशालिमान् ग्रामः। कथमेकगविकः सर्वधनीति । ' एकादेः कर्मधारयात् ' इत्याद्यारंभसामर्थ्याद् भविष्यति । तथा गुणे गुणिनि च ये गुणशब्दा वर्तन्ते तेभ्यो मत्वर्थीयो न भवति । शुक्लो वर्णोऽस्यास्तीति, तिक्तो रसोऽस्यातीति प्रत्ययमन्तरेणाप्येषां तदभिधाने सामर्थ्यात् । ये तु गुणमात्रे तेभ्यो भवत्येव । रूपवान्, रसवान् शौक्ल्यवान् काष्ण्यवानिति ।

२०४८ आ यात् ॥७।२।२॥ ' गुणादिभ्यो यः ' ' रूपात् प्रशस्ताहतात् ' इत्येतस्माद्यप्रत्ययात् याः प्रकृतयो निर्देक्ष्यन्ते ताभ्यो मतुः प्रत्ययः स्यात् तदस्यास्ति तदस्मिन्नस्तीत्यस्मिन् विषये । कुमारीमान् । व्रीहिमान् । आयादित्यभिवि-

धावाङ्। अपवादैर्बाधा मा भूदिति वचनम्। तेन यथाविधानमुत्तरत्र मतुरपि भवति।

२०४९ **न स्तं मत्वर्थे** ॥१।१।२३॥ सकारान्तं तकारान्तं च नाम मत्वर्थे प्रत्यये परे पदसंज्ञं न स्यात्। मतोरपि मत्वर्थाव्यभिचारात् मत्वर्थशब्देन ग्रहणम्। पेचुष्मान्। विदुष्मान्। यशस्वान्। तडित्वान्। विद्युत्वान्। मरुत्वान्। स्तमिति किम्। तक्षवान्। राजवान्।अय्व्यंजन इति प्राप्ते प्रतिषेधोऽयम्।

२०५० **मावर्णान्तोपान्त्यापञ्चमवर्गान्मतोर्मो वः**॥२।१।९४॥ मश्चावर्णश्च मावर्णौ तौ प्रत्येकमन्तोपान्तौ यस्य तस्मान्मकारान्तान्मकारोपान्ताच्चावर्णान्तादवर्णोपान्ताच्च पञ्चमरहितवर्गान्ताच्च नाम्नः परस्य मतोर्मकारस्य वकार आदेशः स्यात्। मकारान्तात्–किंवान्। इदंवान्। शंवान्। मकारोपान्तात्–शमीवान्। लक्ष्मीवान्। दाडिमीवान्। अवर्णान्तात्–वृक्षवान्। प्लक्षवान्। खट्वावान्। मालावान्। अवर्णोपान्तात्–अहर्वान्। सुगण्वान्। पयस्वान्। दधद्वान्। वार्वान्। भास्वान्। अपञ्चमवर्गात्–मरुत्वान्। विद्युत्वान्। उदश्वित्वान् तडित्वान्। समिद्वान्। मावर्णान्तोपान्त्यापञ्चमवर्गादिति किम्। अग्निमान्। वायुमान्। पितृमान्। नृमान्। नृमतोरपत्यं नार्मत इत्यत्र तु वृद्धेर्बहिरङ्गलक्षणत्वान्न भवति।

२०५१ **चर्मण्वत्यष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वत्** ॥२।१।९६॥ एते शब्दा मत्वन्ता नाम्नि विषये निपात्यन्ते। चर्मन्शब्दस्य नलोपाभावो णत्वं च निपात्यते। चर्मण्वती नाम नदी। अस्थिशब्दस्याष्ठीभावः। अष्ठीवान् जंघोरुसंधिः। चक्रशब्दस्य चक्रीभावः। चक्रीवान् नाम गर्दभः। चक्रीवान्नाम राजा। कक्ष्याशब्दस्य कक्षीभावः। कक्षीवान् नाम ऋषिः। लवणस्य रुमण्भावः। रुमण्वान् नाम पर्वतः। अन्ये त्वाहुः–रुमन्निति प्रकृत्यन्तरमस्ति तस्यैतन्निपातनं नकारलोपाभावार्थं णत्वार्थं च। वत्वं तु यथायोगमस्त्येव। नाम्नीत्येव। चर्मवती। अस्थिमान्। चक्रवान्। कक्ष्यावान्। लवणवान्।

२०५२ **उदन्वानब्धौ च** ॥२।१।९७॥ आपो धीयन्तेऽस्मिन्नित्यब्धिः। अब्धौ नाम्नि चोदन्वानिति उदकशब्दस्य मतावुदन्भावो निपात्यते। उदन्वान् घटो मेघो वा। यस्मिन्नुदकं धीयते स एवमुच्यते। नाम्नि–उदन्वान् नाम समुद्रः

ऋषिर्वा। यस्यौदन्वतः पुत्रः। उदन्वान्नाम आश्रमः। अब्धौ चेति किम्। उदकवान् घटः। अत्र घटस्योदकसंबंधमात्रं विवक्षितं न दधातीत्यर्थः।

२०६३ **राजन्वान् सुराज्ञि** ॥२।१।९८॥ शोभनो राजा यस्य तस्मिन्नभिधेये राजन्वानिति मतौ नलोपाभावो निपात्यते। राजन्वान् देशः। राजन्वती पृथ्वी। राजन्वत्यः प्रजाः। सुराज्ञीति किम्। राजवान् देशः।

२०६४ **नोर्म्यादिभ्यः** ॥२।१।९९॥ ऊर्मि इत्येवमादिभ्यो नामभ्यः परस्य मतोर्मकारस्य वकारादेशो न स्यात्। उर्मिमान्। दल्भिमान्। भूमिमान्। तिमिमान्। क्रिमिमान्। एभ्यो मोपान्त्यत्वात् प्राप्ते, यवमान् कुञ्चामान् द्राक्षामान् ध्राङ्क्षामान् वासामान् एभ्योऽवर्णान्तत्वात् प्राप्ते, हरित्मान् गरुत्मान् ध्वजिन्मान् ककुद्मान् एभ्योऽपञ्चमवर्गादिति प्राप्ते, ज्योतिष्मती महिष्मान् गोमती कान्तिमती शिम्बीमती हरिमती वासमती इक्षुमती बन्धुमती मधुमती विन्दुमती इन्दुमती द्रुमती वसुमती अंशुमती श्रुमती हनूमान् सानुमती एभ्यो 'नाम्नि' इति प्राप्ते प्रतिषेधोऽयम्। बहुवचनमाकृतिगणार्थम्। तेन यस्य सति निमित्ते मतोर्वत्वं न दृश्यते स ऊर्म्यादिषु द्रष्टव्यः।

२०६५ **नावादेरिकः** ॥७।२।३॥ नौ इत्येवमादिभ्यो मत्वर्थे इकः प्रत्ययः स्यान्मतुश्च। नौरस्यास्मिन् वास्तीति नाविकः। नौमान्। कुमारीमान्। यवखदिकः। यवखदावान्। नौकुमारीभ्याम् इनं केचिदाहुः। नावी। कुमारी।

२०६६ **शिखादिभ्य इन्** ॥७।२।४॥ शिखा इत्येवमादिभ्यो मत्वर्थे इन् प्रत्ययः स्यान्मतुश्च। शिखी। शिखावान्। माली। मालावान्।

२०६७ **व्रीह्यादिभ्यस्तौ** ॥७।२।५॥ व्रीह्यादिभ्यो मत्वर्थे तौ—इक इन् इत्येतौ प्रत्ययौ स्याताम् मतुश्च। व्रीहयोऽस्यास्मिन् वा सन्ति व्रीहिकः। व्रीही। व्रीहिमान्। मायिकः। मायी। मायावान्। मायावीति विन्। व्रीह्यादयः प्रयोगगम्याः।

२०६८ **अतोऽनेकस्वरात्** ॥७।२।६॥ अकारान्तादनेकस्वरान्मत्वर्थे इक इन् इत्येतौ प्रत्ययौ स्याताम् मतुश्च। दण्डिकः। दण्डी। दण्डवान्। छत्रिकः। छत्री। छत्रवान्। अत इति किम्। खट्वावान्। मालावान्। अनेकस्वरादिति किम्।

खवान् । स्खवान् । अभिधानार्थस्येतिकरणस्यानुवृत्तेः कृदन्तान्न भवतः। राप्यवान् लाप्यवान् लव्यवान् हव्यवान् कृत्यवान् भृत्यवान् कारकवान् हारकवान् कुंभकारवान् धान्यमायवान् हिंस्रवान् ईश्वरवान् पाकवान् स्नेहवान् । क्वचिद् भवतः- कार्यिकः कार्यी हार्यिकः हार्यी गृहिकः गृही दात्रिकः दात्री पात्रिकः पात्री भोगिकः भोगी तरिकः तरी विजयिकः विजयी संयमिकः संयमी स्थानिकः स्थानी इति। जातिशब्देभ्यो न भवतः । व्याघ्रवान् सिंहवान् वृक्षवान् प्लक्षवान् । तथा द्रव्यवान् क्रव्यवान् सस्यवान् धान्यवान् माल्यवान् पुण्यवान् सत्यवान् अपत्यवान् । क्वचिद् भवतः । तण्डुलिकः । तण्डुली । कर्पटिकः कर्पटी । धनादुत्तमर्णे भवतः । धनिकः । धनी । सप्तम्यर्थे च न भवतः। दण्डोऽस्मिन्नस्ति दण्डवद् गृहम् । क्वचिद् भवतः । खलिनी भूमिः । शाद्वलिनी भूमिः । रसरूपवर्णगन्धस्पर्शशब्दस्नेहेभ्यो गुणवाचिभ्यो न भवतः। क्वचिद् भवतः। रसिको नटः। रसी इक्षुः। रूपिको दारकः। रूपिणी कन्या । रूपिष्ववधिः । रूपिसमवायाच्चाक्षुषाणि । स्पर्शिको वायुः । गन्धिकः । गन्धी । तदेवं व्यभिचारे सूत्रणादभिधानमेव श्रेयः ।

२०५९ **अशिरसोऽशीर्षश्च** ॥७।२।७॥ अशिरःशब्दान्मत्वर्थे इक इन् इत्येतौ प्रत्ययौ स्याताम् मतुश्च तत्संनियोगे चाशिरःशब्दस्याशीर्ष इत्यादेशो भवति अशीर्षिकः । अशीर्षी । अशीर्षवान् । इकेनोः ' शीर्षः स्वरे तद्धिते ' इति शीर्षादेशो विद्यत एव, मतौ त्वशिरसोऽशीर्षभावोऽनेन विधीयते ।

२०६० **अर्थार्थान्ताद् भावात्** ॥७।२।८॥ अर्थशब्दादर्थान्ताच्च भाववाचिनो मत्वर्थे इक इन् इत्येतौ प्रत्ययौ स्याताम् । नियमार्थमिदम् । उभयथा चायं नियमो वाक्यभेदेन क्रियते । भाववाचिन एवैतौ प्रत्ययौ भाववाचिनश्चैतावेव । अर्थणि उपयाचने । अर्थनमर्थः । सोऽस्यास्तीत्यर्थिकः अर्थी । प्रतीपमर्थनं प्रत्यर्थः । सोऽस्यास्तीति प्रत्यर्थिकः प्रत्यर्थी । इकेनावेवेति नियमादतो मतुर्न भवति । भावादेवेति नियमादतो द्रव्यवाचिन इकेनौ न भवतः। अर्थो हिरण्यादिरस्यास्तीति अर्थवान् इति मतुरेव भवति ।

२०६१ **व्रीह्यर्थतुन्दादेरिलश्च** ॥७।२।९॥ व्रीहिवाचिभ्यस्तुन्दादिभ्यश्च मत्वर्थे इलः प्रत्ययः स्यात् चकारात्तौ चेकेनौ आ यादिति मतुश्च । व्रीह्यर्थ-कलमा अस्यास्मिन् वा सन्ति कलमिलः। कलमिकः। कलमी। कलमवान्। शालिलः। शालिकः।

शाली । शालिमान् । व्रीहिशब्दोऽपि व्रीह्यर्थो भवति किंतु तस्य पूर्वत्रोपादानादिलो न भवति । भावे हि तत्रोपादानमनर्थकं स्यात् । भवतीत्येके । व्रीहिलः । तुन्दादि–तुन्दिलः । तुन्दिकः । तुन्दी । तुन्दवान् । उदरिलः । उदरिकः । उदरी । उदरवान् ।

२०६२ **स्वाङ्गाद्विवृद्धात्ते** ॥७।२।१०॥ स्वाङ्गाद्विवृद्धोपाधिकान्मत्वर्थे ते–इल इक इन् इत्येते प्रत्ययाः स्युर्मतुश्च । विवृद्धौ महान्तौ कर्णावस्य स्तः कर्णिलः। कर्णिकः । कर्णी । कर्णवान् । ओष्ठिलः । ओष्ठिकः । ओष्ठी । ओष्ठवान् । विवृद्धादिति किम् । अन्यत्रेलो न भवति । अतोऽनेकस्वरादितीकेन्मतव एव भवन्ति ।

२०६३ **वृन्दादारकः** ॥ ७।२।११ ॥ वृन्दशब्दान्मत्वर्थे आरकः प्रत्ययः स्यान्मतुश्च । वृन्दारकः । वृन्दवान् । शिखादित्वाद् वृन्दी ।

२०६४ **शृङ्गात्** ॥७।२।१२॥ शृङ्गान्मत्वर्थे आरकः प्रत्ययः स्यान्मतुश्च । शृङ्गारकः । शृङ्गवान् । शिखादित्वात् शृङ्गी ।

२०६५ **फलबर्हाच्चेनः** ॥७।२।१३॥ फल बर्ह इत्येताभ्यां शृङ्गाच्च मत्वर्थे इनः प्रत्ययः स्यान्मतुश्च । फलिनः । फलवान् । बर्हिणः । बर्हवान् । शृङ्गिणः । शृङ्गवान् । शिखादित्वात् फली । बर्ही ।

२०६६ **मलादीमसश्च** ॥७।२।१४॥ मलशब्दान्मत्वर्थे ईमस इनश्च प्रत्ययौ स्यातां मतुश्च । मलीमसः । मलिनः । मलवान् ।

२०६७ **मरुत्पर्वणस्तः** ॥७।२।१५॥ मरुत् पर्वन् इत्येताभ्यां मत्वर्थे तः प्रत्ययः स्यान्मतुश्च । मरुत्तः। मरुत्वान् । पर्वतः। पर्ववान् ।

२०६८ **वलिवटितुण्डेर्भः** ॥७।२।१६॥ वलि वटि तुण्डि इत्येतेभ्यो मत्वर्थे भः प्रत्ययः स्यान् मतुश्च । वलिभः । वलिवान् । वलिन इत्यंगादित्वान्नः। वटिभः । तुण्डिभः। सिध्मादिपाठाल्ले तुण्डिलः। प्रवृद्धा नाभिस्तुण्डिः ।

२०६९ **ऊर्णाहंशुभमो युस्** ॥७।२।१७॥ ऊर्णा अहम् शुभम् इत्येतेभ्यो मत्वर्थे युस् प्रत्ययः स्यात् । ऊर्णायुः उरभ्रः । अहंयुः अहंकारी । शुभंयुः कल्याणबुद्धिः ।

२०७० **कंशंभ्यां युस्तियस्तुतवभम्** ॥७।२।१८॥ कंशं इत्येताभ्यां मत्वर्थे युस् ति यस् तु त व भ इत्येते प्रत्ययाः स्युः। कंयुः। शंयुः। कन्तिः। शन्तिः। कंयः। शंयः। कन्तुः। शन्तुः। कन्तः। शन्तः। कंवः। शंवः। कंभः। शंभः। युस्यसोः सकारो 'नाम सिदय्व्यंजने' इति पदत्वार्थः। तेन 'तौ मुमो व्यंजने स्वौ' इत्यनुस्वारानुनासिकौ सिद्धौ। कंयुः। कँय्युः। शंयः। शँय्यः।

२०७१ **बलवातदन्तललाटादूलः** ॥ ७।२।१९ ॥ एभ्यो मत्वर्थे ऊलः प्रत्ययः स्यात् मतुश्च। बलूलः। बलवान्। वातूलः। वातवान्। दन्तूलः। दन्तवान्। ललाटूलः। ललाटवान्।

२०७२ **प्राण्यङ्गादातो लः** ॥७।२।२०॥ प्राण्यङ्गवाचिन आकारान्तान्मत्वर्थे लः प्रत्ययः स्यान्मतुश्च। चूडालः। चूडावान्। जङ्घालः। जङ्घावान्। शिखालः। शिखावान्। प्राण्यङ्गादिति किम्। जङ्घावान् प्रासादः। शिखावान् प्रदीपः। अङ्गग्रहणं किम्। इच्छावान्। वासनावान्। कर्णिकाल इत्यत्र कर्णिकाशब्दः प्राण्यङ्गस्यैव वाचक इत्याहुः। आत इति किम्। हस्तवान्। पादवान्।

२०७३ **सिध्मादिक्षुद्रजन्तुरुग्भ्यः** ॥७।२।२१॥ सिध्मादेर्गणात् क्षुद्रजन्तुवाचिभ्यो रुग्वाचिभ्यश्च मत्वर्थे लः प्रत्ययः स्यान्मतुश्च। सिध्मान्यस्य सन्ति सिध्मलः। सिध्मवान्। वर्ध्मलः। वर्ध्मवान्। अङ्गादित्वान्ने वर्ध्मनः। गडुलः। गडुमान्। पाण्यिधमनीशब्दौ दीर्घान्तावेव गणे पठ्येते तेन दीर्घान्ताभ्यामेव लः। पाण्यिलः। धमनीलः। ह्रस्वान्ताभ्यां तु मतुरेव। पाणिमान्। धमनिमान्। क्षुद्रजन्तु। यूकालः यूकावान्। मक्षिकालः मक्षिकावान्। आ नकुलात् क्षुद्रजन्तवः। रुक्-मूर्च्छालः। मूर्च्छावान्। विचर्चिकालः। विचर्चिकावान्। रुग्भ्य इति बहुवचनं स्वरूपविधिनिषेधार्थम्। कथं वत्सलः स्नेहवान् असलो बलवान्? नात्र कश्चिद् वत्साद्यर्थोऽस्तीति पेशलकुशलादिवदेतौ यथाकथंचिद् व्युत्पादनीयौ सिध्मादिषु वा पठनीयौ।

२०७४ **प्रज्ञापर्णोदकफेनाल्लेलौ** ॥ ७।२।२२ ॥ प्रज्ञा पर्ण उदक फेन इत्येतेभ्यो मत्वर्थे ल इल इत्येतौ प्रत्ययौ स्यातां मतुश्च। प्रज्ञालः। प्रज्ञिलः। प्रज्ञावान्। पर्णलः। पर्णिलः। पर्णवान्। उदकलः। उदकिलः। उदकवान्। फेनलः। फेनिलः। फेनवान्।

२०७५ **कालाजटाघाटात् क्षेपे** ॥७।२।२३॥ काला जटा घाटा इत्येतेभ्यो ल इल इत्येतौ प्रत्ययौ स्यातां क्षेपे--प्रत्ययार्थस्य निन्दायां गम्यमानायाम्। कालालः। कालिलः। कालेति डोपान्त्यं केचित् पठन्ति। काडालः काडिलः। जटालः। जटिलः। घाटालः। घाटिलः। मतुना क्षेपो न गम्यत इति क्षेपे मतुर्न भवति। क्षेप इति किम्। कालावान्। जटावान्। घाटावान्।

२०७६ **वाच आलाटौ** ॥७।२।२४॥ वाच् इत्येतस्मान्मत्वर्थे आल आट इत्येतौ प्रत्ययौ स्यातां क्षेपे गम्यमाने। ग्मिनोऽपवादः। वाचालः। वाचाटः। यो बहु निःसारं भाषते स एवं शिष्यते। मतुना क्षेपो न गम्यत इति क्षेपे मतुर्न भवति। क्षेपे इत्येव। वाग्मी। वाग्वान्।

२०७७ **ग्मिन्** ॥७।२।२५॥ क्षेपे इति निवृत्तम्। वाचो मत्वर्थे ग्मिन् प्रत्ययः स्यान्मतुश्च। वाग्मी। वाग्वान्। गकारः प्रत्यये चेत्यनुनासिकनिवृत्त्यर्थः। क्षेप इति निवृत्तम्।

२०७८ **मध्वादिभ्यो रः** ॥७।२।२६॥ मध्वादिभ्यो मत्वर्थे रः प्रत्ययः स्यात्। अत्र मधुशब्दः स्वादुत्वे गुणत्वे गुणसामान्ये वर्तते। मधुरं मधु। मधुरं क्षीरम्। क्षौद्रादिद्रव्यवृत्तेस्तु मतुरेव इतिकरणानुवृत्तेः। मधुमान् घटः एवं खं महत् कण्ठविवरमस्यातीति खरो गर्दभः। खवानन्यः। मध्वादयः प्रयोगगम्याः।

२०७९ **कृष्यादिभ्यो वलच्** ॥ ७।२।२७ ॥ कृष्यादिभ्यो मत्वर्थे वलच् प्रत्ययः स्यात्। कृषीवलः कुटुम्बी। कृषिमत् क्षेत्रम्। आसुतीवलः कल्यपालः। आसुतिमान्। परिषद्वलः। परिषद्वान्। पर्षद्वलः। पर्षद्वान्। परिषद्वलं तीर्थं पङ्किलमित्यर्थः। परिषद्वत्। रजस्वला स्त्री। रजस्वान् ग्रामः। केचित्तु रजस्वलो देशः। रजस्वला भूमिः रजस्वान् रजस्वतीति सर्वत्राविशेषेण वृत्तिमिच्छन्ति। दन्तावलो नाम राजा हस्ती च। शिखावलं नगरम्। शिखावलो मयूरः। शिखावला स्थूणा। दन्तवान्। शिखावानन्यः। मातृवलः मातृमान्। एवं पितृवलः। भ्रातृवलः। उत्साहवलः। पुत्रवलः। उत्सङ्गवलः। विशेष इतिकरणात् सिद्धः। कृष्यादयः प्रयोगगम्याः।

२०८० **लोमपिच्छादेः शेलम्** ॥७।२।२८॥ लोमादिभ्यः पिच्छादिभ्यश्च

मत्वर्थे यथासंख्यं श इल इत्येतौ प्रत्ययौ स्यातां मतुश्च । लोमशः । लोमवान् । रोमशः । रोमवान् । पिच्छिलः । पिच्छवान् । उरसिलः । उरस्वान् ।

२०८१ नोऽङ्गादेः ॥ ७।२।२९ ॥ अङ्ग इत्येवमादिभ्यो मत्वर्थे नः प्रत्ययः स्यान्मतुश्च । अङ्गान्यस्याः सन्ति अङ्गना । रूढिशब्दोऽयम् । कल्याणाङ्गी स्त्री उच्यते । इतिकरणात् अन्यत्राङ्गवती । पामनः । पामवान् । वामनः । वामवान् । योगविभाग उत्तरार्थः ।

२०८२ शाकीपलालीदर्द्रूवा ह्रस्वश्च ॥७।२।३०॥ शाकी पलाली दर्द्रू इत्येतेभ्यो मत्वर्थे नः प्रत्ययः स्यान्मतुश्च नसंनियोगे चैषां ह्रस्वोऽन्तादेशः । महच्छाकं शाकसमूहो वा शाकी । महत्पलालं पलालक्षोदो वा पलाली । दर्द्रूर्नाम व्याधिः । शाकिनः । शाकीमान् । पलालिनः । पलालीमान् । दर्द्रुणः । दर्द्रूमान् । केचित्तु शाकीपलाल्योर्ह्रस्वत्वं नेच्छन्ति, तन्मते शाकीनः । पलालीनः ।

२०८३ विष्वचो विषुश्च ॥ ७।२।३१ ॥ विष्वच् इत्येतस्मान्मत्वर्थे नः प्रत्ययः स्याद् विषु इत्ययं चादेशो भवति । विषु अञ्चतीति विष्वक् । विश्वञ्चो रश्मयो विष्वग्गतानि वा अस्य सन्ति इति विषुणः आदित्यः । विषुणः वायुः । विषुशब्दो निपातो नानात्वे वर्तते । विष्वगिति अखण्डमव्ययं वा । नकारसंनियोगे आदेशस्य विधानात् मतौ विष्वग्वान् । कथं विषुमानहोरात्रप्रविभाग इति । विषुर्नाम मुहूर्तस्तस्माद् भविष्यति ।

२०८४ लक्ष्म्या अनः ॥ ७।२।३२ ॥ लक्ष्मीशब्दान्मत्वर्थेऽनः प्रत्ययः स्यात् । लक्ष्मीरस्यास्तीति लक्ष्मणः । मतौ लक्ष्मीवान् ।

२०८५ प्रज्ञाश्रद्धार्चावृत्तेर्णः ॥७।२।३३॥ प्रज्ञाश्रद्धार्चावृत्ति इत्येतेभ्यो मत्वर्थे णः प्रत्ययः स्यान्मतुश्च । प्राज्ञः प्रज्ञावान् । श्राद्धः । श्रद्धावान् । आर्चः । अर्चावान् । वार्तः । वृत्तिमान् । स्त्री तु प्राज्ञा । श्राद्धा । आर्चा । वार्ता । प्राज्ञीति स्वार्थिकाणन्तात् ।

२०८६ ज्योत्स्नादिभ्योऽण् ॥७।२।३४॥ ज्योत्स्ना इत्येवमादिभ्यो मत्वर्थेऽण् प्रत्ययः स्यात् । ज्योत्स्ना अस्मिन्नस्ति ज्यौत्स्नः पक्षः । ज्यौत्स्नी रात्रिः । तामिस्रः पक्षः । तामिस्री रात्रिः । तामिस्राणि गुहामुखानि । वैसर्पो व्याधिः ।

वैपादिकं कुष्ठम् । कौतुपं गृहम् । कौण्डलो युवा । तापसः पाखण्डी । साहस्रो देवदत्तः । मतौ ज्योत्स्नावान् तमिस्रावानित्यादि । तापस इति रूढिविषये च मतुर्न भवति । कुण्डली सहस्री चेति शिखादित्वात् । ज्योत्स्नादयः प्रयोगगम्याः।

२०८७ **सिकताशर्कराट्** ॥७।२।३५॥ सिकता शर्करा इत्येताभ्यां मत्वर्थेऽण् प्रत्ययः स्यात् मतुश्च । सैकतः। सिकतावान् देशः। शार्करः। शर्करावानोदनः।

२०८८ **इलश्च देशे** ॥ ७।२।३६ ॥ सिकताशर्कराभ्यां देशे मत्वर्थे इलश्चकारादण् च प्रत्ययौ स्यातां मतुश्च । सिकतिलः सैकतः सिकतावान् देशः । शर्करिलः शार्करः शर्करावान् देशः । सिकताः देशः शर्कराः देशः इत्यभेदोपचारात् ।

२०८९ **द्युद्रोर्मः** ॥ ७।२।३७ ॥ द्यु इति दिवः कृतोकारस्य निर्देशः द्युशब्द उकारान्तोऽहःपर्यायः प्रकृत्यन्तरं वा । द्युद्रुशब्दाभ्यां मत्वर्थे मः प्रत्ययः स्यात् । द्यौर्द्युर्वास्यास्मिन् वास्तीति द्युमः । द्रूणि दारुणि अस्यास्मिन् वा सन्तीति द्रुमः। रूढिशब्दाविमौ रूढिविषये च मतुर्न भवति । अन्यत्र तु मतुरेव । द्युमान् । द्रुमान् ।

२०९० **काण्डाण्डभाण्डादीरः** ॥७।२।३८॥काण्ड आण्ड भाण्ड इत्येतेभ्यो मत्वर्थे ईरः प्रत्ययः स्यान्मतुश्च । काण्डीरः । काण्डवान् । आण्डीरः। आण्डवान् । भाण्डीरः । भाण्डवान् । आण्डौ मुष्कौ ।

२०९१ **कच्छ्वा डुरः** ॥७।२।३९॥ कच्छूशब्दान्मत्वर्थे डुरः प्रत्ययः स्यात्। कच्छुरः । कच्छूमान् ।

२०९२ **दन्तादुन्नतात्** ॥ ७।२।४० ॥ उन्नतत्वोपाधिकादन्तशब्दान्मत्वर्थे डुरः प्रत्ययः स्यात् । उन्नता दन्ता अस्य सन्ति दन्तुरः । उन्नतादिति किम् । दन्तवान् ।

२०९३ **मेधारथाभ्रवेरः** ॥ ७।२।४१ ॥ मेधा रथ इत्येताभ्यां मत्वर्थे इरः प्रत्ययो वा स्यात् । वावचनाद्यथाप्राप्तमिकेनौ आ यादिति मतुश्च । मेधिरः । मेधावान् । उत्तरसूत्रेण विन्नपि । मेधावी । रथिरः । रथिकः रथी । रथवान् ।

२०९४ **कृपाहृदयादालुः** ॥७।२।४२॥ कृपा–हृदय–शब्दाभ्यां मत्वर्थे आलुः

प्रत्ययो वा स्यान्मतुश्च । कृपालुः । कृपावान् । हृदयालुः । हृदयिकः । हृदयी । हृदयवान् ।

२०९५ केशाद्वः ॥७।२।४३॥ केशशब्दान्मत्वर्थे वः प्रत्ययो वा स्यान्मतुश्च । केशवः । केशिकः । केशी । केशवान् । केशव इति रूढिशब्दोऽपि विष्णुवाची ।

२०९६ मण्यादिभ्यः ॥ ७।२।४४ ॥ मण्यादिभ्यो मत्वर्थे वः प्रत्ययो वा स्यान्मतुश्च । योगविभागाद्वेति नित्यम् । मणिवः । मणिमान् । सिध्मादिपाठात् मणिलः । हिरण्यवः । हिरण्यवान् । बिम्बावम् । कुरुरावम् । कुरुवावम् । ' घञ्युपधस्य बहुलम् ' इति बाहुलकादीर्घः । राजीवम् । इष्टकावम् । गाण्डीवम् । गाण्डिवम् । अजकावम् । बिम्बावम् । इत्यादयो रूढिशब्दाः । रूढिशब्दविषये च मतुर्न भवति । विषयान्तरे तु भवत्येव । बिम्बवानित्यादि ।

२०९७ हीनात् स्वाङ्गादः ॥ ७।२।४५॥ हीनोपाधिकात् स्वाङ्गान्मत्वर्थे अः प्रत्ययः स्यात् । खण्डः कर्णोऽस्यास्ति कर्णः । छिन्ना नासिकाऽस्यास्ति नासिकः । हीनादिति किम् । कर्णवान् । नासिकावानित्येव भवति ।

२०९८ अभ्रादिभ्यः ॥ ७।२।४६ ॥ अभ्रादिभ्यो मत्वर्थे अः प्रत्ययः स्याद् यथादर्शनं मतुश्च । अभ्राण्यस्मिन्सन्ति अभ्रं नभः । अर्शांस्यस्य सन्ति अर्शसो देवदत्तः । उरसः । उरस्वान् । अभ्रादिराकृतिगणः ।

२०९९ अस्तपोमायामेधास्रजो विन् ॥ ७।२।४७ ॥ अस्तेभ्यस्तपसमायामेधास्रज् इत्येतेभ्यश्च मत्वर्थे विन् प्रत्ययः स्यान्मतुश्च । यशस्वी । यशस्वान् । सरस्वी । सरस्वान् । सरस्वती । एवं तेजस्वी । वर्चस्वी । तपस्वी । तपस्वान् । असन्तत्वेनैव सिद्धे तपसो ग्रहणं ज्योत्स्नाद्यणा बाधा माभूदित्येवमर्थम् । मायावी । मायावान् । मायी मायिक इति व्रीह्यादिपाठात् । मेधावी । मेधावान् । स्रग्वी । स्रग्वान् ।

२१०० आमयाद्दीर्घश्च ॥७।२।४८॥ आमयशब्दान्मत्वर्थे विन् प्रत्ययः स्याद्दीर्घश्चामयशब्दस्य भवति मतुश्च । आमयावी । आमयवान् ।

२१०१ स्वान्मिन्नीशे ॥७।२।४९॥ स्वशब्दान्मत्वर्थे ईशे वाच्ये मिन् प्रत्ययः स्याद्दीर्घश्चास्य । स्वमस्यास्तीति स्वामी । ईश इति किम् । स्ववान् ।

२१०२ **गोः** ॥७।२।८०॥ गोशब्दान्मत्वर्थे मिन् प्रत्ययः स्यात् । गावोऽस्य सन्ति गोमी । मतुश्च । गोमान् । पूज्य एव मिनमिच्छन्त्यन्ये ।

२१०३ **ऊर्जो विन्बलावश्चान्तः** ॥७।२।८१॥ ऊर्जशब्दान्मत्वर्थे विन् बल इत्येतौ प्रत्ययौ स्याताम्, तत्संनियोगे चास्यास् चान्तो भवति । ऊर्जस्वी । ऊर्जस्वलः। मतुश्च । ऊर्ज्वान् । कथमूर्जस्वान् । ऊर्जयतेः असूप्रत्ययान्तस्य मतौ ।

२१०४ **तमिस्राार्णवज्योत्स्नाः** ॥७।२।८२॥ तमिस्राार्णवज्योत्स्ना इत्येते शब्दा निपात्यन्ते । तमिस्रेति तमःशब्दाद्रः उपान्त्यस्य चेत्वम् । तमोऽत्रास्तीति तमिस्रा रात्रिः । तमिस्रं तमःसमूहः। तमिस्राणि गुहामुखानि । मतुश्च । तमस्वान् । अर्णवेति अर्णसो वः प्रत्ययः अन्त्यस्य च लोपः । अर्णवः समुद्रः । ज्योत्स्नेति ज्योतिःशब्दान्नः प्रत्ययः उपान्त्यलोपश्च निपात्यते । ज्योत्स्ना चन्द्रप्रभा । अन्यत्र ज्योतिष्मती रात्रिः । निपातनस्येष्टविषयत्वात् ।

२१०५ **गुणादिभ्यो यः** ॥७।२।८३॥ गुणादिभ्यो मत्वर्थे यः प्रत्ययः स्यात् मतुश्च । गुण्यः गुणवान् पुरुषः हिम्यः हिमवान् पर्वतः । कथं को गुणिनो नार्चयेत् इति इन् ? शिखात्वादित्वेन भविष्यति । गुणादयः प्रयोगगम्याः ।

२१०६ **रूपात् प्रशस्ताहतात्** ॥७।२।८४॥ प्रशस्तोपाधिकादाहतोपाधिकाच्च रूपान्मत्वर्थे यः प्रत्ययः स्यात् । प्रशस्तं रूपमस्यास्ति रूप्यो गौः रूप्यः पुरुषः । आहतं रूपमस्यास्ति रूप्यः कार्षापणः । निघातिकाताडनादीनारादिषु यद्रूपमुत्पद्यते तदाहतं रूपम् । प्रशस्ताहतादिति किम् । रूपवान् । प्रशंसायां मतुरपि भवति । रूपवती कन्या । आहते न भवति इति करणात् । कथं रूपिणी कन्या रूपिको दारक इति ? व्रीह्यादित्वाद् भविष्यति । *आयादित्यस्य पूर्णोऽवधिः, अतः परं मतुर्नास्ति ।*

२१०७ **पूर्णमासोऽण्** ॥७।२।८५॥ पूर्णमासशब्दान्मत्वर्थेऽण् प्रत्ययः स्यात् । पूर्णो मासश्चन्द्रमा अस्यामस्ति पौर्णमासी ।

२१०८ **गोपूर्वादत इकण्** ॥ ७।२।८६ ॥ गोशब्दपूर्वादकारान्तान्मत्वर्थे इकण् प्रत्ययः स्यात् । मत्वादीनामपवादः । गौशतिकः गौसहस्रिकः अत इति किम् । गोविंशतिमान् । कथं गौशकटिकः। शकटीशब्देन समानार्थः शकटशब्दोऽस्ति ।

शकटीशब्दात्तु मतुः अनभिधानान्न भवति । केचित्तु गवादेरनकारान्तादपीच्छन्ति । गवां समूहो गोत्रा सा विद्यते यस्य गौत्रिकः गावो वयांसि वास्य सन्ति गौवयसिकः ।

२१०९ **निष्कादेः शतसहस्रात्** ॥७।२।५७॥ निष्को य आदिस्ततः परं यच्छतं सहस्रं च तदन्तान्मत्वर्थे इकण् प्रत्ययः स्यात् । नैष्कशतिकः । नैष्कसहस्रिकः। निष्कादेरिति किम् । शती । सहस्री । आदिग्रहणात् सुवर्णनिष्कशतमस्यास्तीत्यत्र न भवति ।

२११० **एकादेः कर्मधारयात्** ॥७।२।५८॥ एकादेः कर्मधारयादकारान्तान्मत्वर्थे इकण् प्रत्ययः स्यात् । एको गौरेकगवः सोऽस्यास्त्येकगविकः । ऐकशतिकः । ऐकसहस्रिकः। कर्मधारयादिति किम् । एकस्य गौरेकगवः सोऽस्यास्तीति न भवति । अत इत्येव । एकविंशतिरस्यास्तीति न भवति । कथमेकद्रव्यवत्त्वादिति? एकेन द्रव्यवत्त्वमिति समासे भविष्यति ।

२१११ **सर्वादेरिन्** ॥७।२।५९॥ सर्वादेरकारान्तात् कर्मधारयान्मत्वर्थे इन् प्रत्ययः स्यात् । सर्वं धनं सर्वधनम् । तदस्यास्ति सर्वधनी । सर्ववीजी । सर्वकेशी नटः।

२११२ **प्राणिस्थादस्वाङ्गाद् द्वन्द्वरुग्निन्द्यात्** ॥७।२।६०॥ प्राणिस्थोऽस्वाङ्गवाची अकारान्तो यो द्वन्द्वः समासो यश्च रुग्वाची निन्द्यवाची च शब्दस्तदन्तान्मत्वर्थे इन् प्रत्ययः स्यात् । द्वन्द्व-कटकवलयिनी । शंखनूपुरिणी । रुक्-किलासी । निन्द्य-ककुदावर्ती । कालतालुमती । प्राणिस्थादिति किम् । पुष्पफलवान् वृक्षः । अस्वाङ्गादिति किम् । स्तनकेशवती । अत इत्येव । चित्रकललाटिकावती । अतोऽनेकस्वरादित्येव सिद्धे इकादिबाधनार्थं वचनम् ।

२११३ **वातातीसारपिशाचात् कश्चान्तः** ॥७।२।६१॥ वात अतीसार पिशाच इत्येतेभ्यो मत्वर्थे इन् स्यात् ककारश्चान्तः । वातातीसारयो रुक्त्वात् पूर्वेणेन् सिद्धः कार्थमुपादानम् । पिशाचस्य तूभयार्थम् । वातकी । अतीसारकी । पिशाचकी ।

२११४ **पूरणाद्वयसि** ॥७।२।६२॥ पूरणप्रत्ययान्ताद् वयसि गम्यमाने मत्वर्थे इन्नेव स्यात् । पञ्चमो मासः संवत्सरो वास्यास्ति पञ्चमी बालकः ।

२११५ **सुखादेः** ॥ ७।२।६३ ॥ सुखादिभ्यो मत्वर्थे इन्नेव स्यात् । सुखी । दुःखी ।

२११६ **मालायाः क्षेपे** ॥७।२।६४॥ मालाशब्दात् क्षेपे गम्यमाने मत्वर्थे इन्नेव स्यात् । माली । क्षेप इति किम् । मालावान् । मालाशब्दः शिखादिः, ततः क्षेपे मतुनिवृत्त्यर्थं वचनम् ।

२११७ **धर्मशीलवर्णान्तात्** ॥७।२।६५॥ धर्म शील वर्ण इत्येतदन्तान्मत्वर्थे इन्नेव स्यात् । मुनिधर्मी । यतिशीली । ब्राह्मणवर्णी ।

२११८ **बाहूर्वादेर्बलात्** ॥७।२।६६॥ बाहु–ऊरुपूर्वाद् बलान्तान्नाम्नो मत्वर्थे इन्नेव स्यात् । बाहुबली । ऊरुबली ।

२११९ **मन्माज्जादेर्नाम्नि** ॥७।२।६७॥ मन्नन्तेभ्यो मान्तेभ्योऽज्जादिभ्यश्च मत्वर्थे इन्नेव स्यात् नाम्नि । दामिनी । भामिनी । अब्जिनी । कमलिनी । नाम्नीति किम् । सामवान् ।

२१२० **हस्तदन्तकराज्जातौ** ॥७।२।६८॥ हस्त दन्त कर इत्येतेभ्यो मत्वर्थे इन्नेव स्यात् समुदायेन चेज्जातिरभिधीयते । हस्तोऽस्यास्तीति हस्ती । दन्ती । करी । जाताविति किम् । हस्तवान् । दन्तवान् । करवान् नरः ।

२१२१ **वर्णाद् ब्रह्मचारिणि** ॥७।२।६९॥ वर्णशब्दान्मत्वर्थ इन् स्यात् ब्रह्मचारी चेदभिधेयः । वर्णशब्दो ब्रह्मचर्यपर्यायः । वर्णो ब्रह्मचर्यमस्यास्ति वर्णी ब्रह्मचारीत्यर्थः । अन्ये तु वर्णशब्दो ब्राह्मणादिवर्णवचनः । तत्र ब्रह्मचारीत्यनेन शूद्रव्यवच्छेदः क्रियते इति मन्यन्ते तेन त्रैवर्णिको वर्णीत्युच्यते । सहि विद्याग्रहणार्थमुपनीतो ब्रह्म चरति न शूद्र इति । ब्रह्मचारिणीति किम् । वर्णवान् ।

२१२२ **पुष्करादेर्देशे** ॥७।२।७०॥ पुष्करादिभ्यो मत्वर्थे इन्नेव स्यात् देशेऽभिधेये । पुष्करिणी । पद्मिनी । देश इति किम् । पुष्करवान् हस्ती । कथं कुमुद्वती सरसी कुमुद्वान् ह्रदः नड्वान् नड्वलमिति । नडकुमुदेत्यादिना चातुरर्थिकेन मतुना भविष्यति ।

२१२३ **सूक्तसाम्नोरीयः** ॥७।२।७१॥ सूक्ते सामनि चाभिधेये मत्वर्थे ईयः

प्रत्ययः स्यात् । मत्वादीनामपवादः । अच्छावाक् शब्दोऽत्र सूक्तेऽस्ति अच्छावाकीयम् । मैत्रावरुणीयम् । साम्नि–यज्ञायज्ञीयं साम । अशनापिपासीयम् । वारतन्तवीयम् साम । अथास्यवामीयं सूक्तं कयानश्चित्रीयं सामेत्यत्र ' ऐकार्थ्ये इति विभक्तिलोपः कथं न भवति ? उच्यते । अस्यवामादयः सूक्तसामस्थानामनुकार्याणामखण्डा एवानुकरणशब्दाः नात्र विभक्तिरिति लुप् न भवति । अतएव प्रथमान्तताऽपि न विरुध्यते । सूक्तसाम्नी ग्रन्थविशेषौ ।

२१२४ **लुब् वाध्यायानुवाके** ॥७।२।७२॥ अध्यायेऽनुवाके चाभिधेये मत्वर्थे य ईयस्तस्य लुब् वा स्यात् । अत एव लुब्वचनादध्यायानुवाकयोरीयोऽनुमीयते । एतावपि ग्रन्थविशेषौ । गर्दभाण्डशब्दोऽस्मिन्नध्यायेऽनुवाके वास्तीति गर्दभाण्डः गर्दभाण्डीयोऽध्यायोऽनुवाको वा । एवं दीर्घजीवितिः। दीर्घजीवितीयः । पलितस्तम्भः। पलितस्तम्भीयः। पलितः। पलितीयः। स्तम्भः। स्तम्भीयः। उच्छिष्टः उच्छिष्टीयः । द्रुमपुष्पः द्रुमपुष्पीयः ।

२१२५ **विमुक्तादेरण्** ॥७।२।७३॥ विमुक्तादिभ्यो मत्वर्थेऽध्यायानुवाकयोरभिधेययोरण् प्रत्ययः स्यात् । विमुक्तशब्दोऽस्मिन्नध्यायेऽनुवाकेऽस्ति वैमुक्तः । दैवासुरः ।

२१२६ **घोषदादेरकः** ॥७।२।७४॥ घोषदादिभ्यो मत्वर्थेऽध्यायानुवाकयोरभिधेययोरकः प्रत्ययः स्यात् । घोषच्छब्दोऽस्मिन्नस्ति घोषदकः । गोषदकः। ईषदकः अध्यायोऽनुवाको वा ।

२१२७ **प्रकारे जातीयर्** ॥७।२।७५॥ तदस्येति वर्तते । तदिति प्रथमान्तादस्येति षष्ठ्यर्थे जातीयर् प्रत्ययः स्यात् यत्तत् प्रथमान्तं तच्चेत् प्रकारो भवति । सामान्यस्य भिद्यमानस्य यो विशेषो विशेषान्तरानुप्रवृत्तः स प्रकारः । पटुः प्रकारोऽस्य पटुजातीयः । रित्करणात् पट्वी प्रकारोऽस्या ' पटुजातीया ' इत्यत्र ।

२१२८ **रिति** ॥६।२।७८॥ परतः स्वयनूङ् रिति प्रत्यये जातीये देशीये च पुंवत् स्यात् । इत्यनेन पुंवद्भावः । मृदुजातीयः । यज्जातीयः । तज्जातीयः । नानाभूतः प्रकारोऽस्य नानाजातीयः । एवंप्रकारोऽस्य एवंजातीयः । अस्येति षष्ठ्यर्थे विधानात् प्रकारवति जातीयर् विज्ञायते । ततः प्रकारमात्रभाविथाथ-

मन्तादपि जातीयर् प्रत्ययो भवति । यथाजातीयः । तथाजातीयः । कथंजातीयः । इत्थंजातीयः ।

२१२९ कोऽण्वादेः ॥ ७।२।७६ ॥ अणु इत्येवमादिभ्यस्तदस्य प्रकारे इत्यस्मिन् विषये कः प्रत्ययः स्यात् । जातीयरोऽपवादः । अणुः प्रकारोऽस्य अणुकः पटः । एवं स्थूलकः पटः । अणुकाः स्थूलका वा माषाः । माषकं हिरण्यम् । इषुका । गोलिका ।

२१३० जीर्णगोमूत्रावदातसुरायवकृष्णाच्छाल्याच्छादनसुराहिव्रीहितिले ॥७।२।७७॥ जीर्ण गोमूत्र अवदात सुरा यव कृष्ण इत्येतेभ्यो यथासंख्यं शालिआच्छादनसुराहिव्रीहितिलेषु वाच्येषु तदस्य प्रकार इत्यस्मिन् विषये कःप्रत्ययः स्यात्। जीर्णाच्छालिषु–जीर्णः प्रकार एषां जीर्णकाः शालयः। गोमूत्रादाच्छादने–गोमूत्रप्रकारं गोमूत्रकम् गोमूत्रवर्णमाच्छादनम् । अवदातात्सुरायाम्–अवदातप्रकारा अवदातिका सुरा । सुराया अहौ–सुराप्रकारः सुरावर्णः सुरकोऽहिः। यवाद्व्रीहिषु–यवप्रकारा यवका व्रीहयः। कृष्णात् तिलेषु–कृष्णप्रकाराः कृष्णकास्तिलाः । शाल्यादिष्विति किम् । जीर्णजातीयोऽन्य इत्यादि ।

॥ इति श्रीसिद्धहैमबृहत्प्रक्रियायां
तद्धितप्रकरणे मत्वर्थीयाः
समाप्ताः ॥

॥ अथ स्वार्थिकाः ॥

२१३१ भूतपूर्वे प्चरट् ॥७।२।७८॥ अतः परं प्रायः स्वार्थिकाः प्रत्ययाः। तत्रोपाधिः प्रकृतेर्विज्ञायते स प्रत्ययस्य द्योत्यो भवति । पूर्वं भूतो भूतपूर्वः । भूतपूर्वेऽर्थे वर्तमानान्नाम्नः प्चरट् प्रत्ययः स्यात् स्वार्थे । भूतपूर्व आढ्यः आढ्यचरः । दर्शनीयचरः। टकारो ङ्यर्थः। पकारः पुंवद्भावार्थः। भूतपूर्वा आढ्या आढ्यचरी। दर्शनीयचरी। भूतशब्दो वर्तमानेऽप्यस्ति पूर्वशब्दो दिगादावपीति अतिक्रान्तकालप्रतिपत्त्यर्थमुभयोरुपादानम् । प्रत्यासत्तेः शब्दमद्भवति । निमित्तस्य भूतपूर्वत्वेऽयं प्रत्ययः इतीह न भवति । अर्जुनो महिष्मत्यां भूतपूर्व इति ।

२१३२ **गोष्ठादीनञ्** ॥७।२।७९॥ गोष्ठशब्दाद् भूतपूर्वत्वे ईनञ् प्रत्ययः स्यात्। गोष्ठो भूतपूर्वो गौष्ठीनो देशः।

२१३३ **षष्ठ्या रूप्यप्चरट्** ॥७।२।८०॥ षष्ठ्यन्ताद् भूतपूर्वेऽर्थे रूप्यप्चरट् प्रत्ययौ स्याताम्। भूतपूर्वम् इतीह प्रत्ययार्थः। देवदत्तस्य भूतपूर्वो देवदत्तरूप्यो गौः। देवदत्तचरः। प्चरडित्यत्र पकारटकारौ पुंवद्भावङीप्रत्ययार्थौ। देवदत्तचरी।

२१३४ **व्याश्रये तसुः** ॥७।२।८१॥ नानापक्षाश्रयो व्याश्रयः। षष्ठ्यन्ताद् व्याश्रये गम्यमाने तसुः प्रत्ययः स्यात्। उकारो विशेषणार्थः। देवा अर्जुनतोऽभवन्। आदित्यः कर्णतोऽभवत्। अर्जुनकर्णयोर्विवदमानयोरर्जुनस्य पक्षे देवाः कर्णस्य पक्षे आदित्योऽभवदित्यर्थः। यत्तोऽभवत् यस्य पक्षे इत्यर्थः। तत्तोऽभवत् तस्य पक्षे इत्यर्थः। एवं त्वत्तोऽभवत्। मत्तोऽभवत्। व्याश्रय इति किम्। वृक्षस्य शाखा।

२१३५ **रोगात्प्रतीकारे** ॥७।२।८२॥ रोगवाचिनः षष्ठ्यन्तात् प्रतीकारेऽपनयने गम्यमाने तसुः प्रत्ययः स्यात्। प्रवाहिकातः प्रच्छर्दिकातः कुरु। अस्य रोगस्य चिकित्सां कुर्वित्यर्थः।

२१३६ **पर्यभेः सर्वोभये** ॥७।२।८३॥ परि अभि इत्येताभ्यां यथाक्रमं सर्वोभयार्थे वर्तमानाभ्यां तसुः प्रत्ययः स्यात्। परितः सर्वत इत्यर्थः। अभितः उभयत इत्यर्थः। सर्वोभय इति किम्। वृक्षं परि। वृक्षमभि।

२१३७ **आद्यादिभ्यः** ॥७।२।८४॥ आद्यादिभ्यः संभवद्विभक्त्यन्तेभ्यस्तसुः प्रत्ययः स्यात्। आदौ आदेर्वा आदितः। एवं अन्ततः। मध्यतः। अग्रतः। वक्षस्तः। पार्श्वतः। पृष्ठतः। मुखतः। सर्वतः। विश्वतः। उभयतः। अन्यतः। पूर्वतः। एकतः। इतः। प्रमाणेन प्रमाणाद्वा प्रमाणतः। पृष्ठेन पृष्ठतोऽर्कं सेवेत। एवं पार्श्वतः। इतः। दुष्टः शब्दः स्वरतो वर्णतो वा। शब्दतः अर्थतः अभिधानतः। येन यस्मिन् वा यतः। ततः। पृषोदरादित्वाद् दलोपः। आद्यादयः प्रयोगगम्याः।

२१३८ **क्षेपातिग्रहाव्यथेष्वकर्तुस्तृतीयायाः** ॥७।२।८५॥ तृतीयान्ताद्-कर्तृवाचिनः क्षेपातिग्रहाव्यथाविषये तसुः प्रत्ययः स्यात्। क्षेपो निन्दा। वृत्तेन क्षिप्तः वृत्ततः क्षिप्तः निन्दित इत्यर्थः। अतिक्रम्य ग्रहणमतिग्रहः। वृत्तेनातिगृह्यते वृत्ततोऽतिगृह्यते

साधुवृत्तोऽन्यानतिक्रम्य वृत्तेन गृह्यते । साध्वाचार इति संभाव्यत इत्यर्थः । अतिशयेन वा ग्रहणमतिग्रहः । तत्रातिशयेन गृह्यत इत्यर्थः । अचलनमक्षोभणमव्यथा अभीतिर्वा । वृत्तेन न व्यथते वृत्ततो न व्यथते । वृत्तेन न चलति न बिभेति चेत्यर्थः। क्षेपातिग्रहाव्यथेष्विति किम् । वृत्तेन भिन्नः । अकर्तुरिति किम् । देवदत्तेन क्षिप्तः। तृतीयाया इति किम् । देवदत्तं क्षिपति ।

२१३९ **पापहीयमानेन** ॥७।२।८६॥ अकर्तृवाचिनस्तृतीयान्तात् पापहीयमानाभ्यां योगे तसुः प्रत्ययः स्यात् । वृत्तेन पापः वृत्ततः पापः । वृत्तेन हीयते वृत्ततः हीयते । पापहीयमानेनेति किम् । चारित्रेण शुद्धः । अकर्तुरित्येव । चैत्रेण हीयते । तृतीयाया इत्येव । ग्रामे हीयते । क्षेपस्याविवक्षायां तत्त्वाख्याने यथा स्यादिति वचनम् ।

२१४० **प्रतिना पञ्चम्या** ॥७।२।८७॥ प्रतिना योगे या पञ्चमी विहिता तदन्तात् तसुः प्रत्ययो वा स्यात् । अभिमन्युरर्जुनात् प्रति अर्जुनतः प्रति वा । अर्जुनस्य प्रतिनिधिरित्यर्थः । माषानस्मै तिलेभ्यः प्रतियच्छन्ति तिलतः प्रतियच्छंति । पञ्चम्या इति किम् । वृक्षं प्रति विद्योतते विद्युत् ।

२१४१ **अहीयरुहोऽपादाने** ॥७।२।८८॥ अपादाने या पञ्चमी विहिता तदन्तात्तसुः प्रत्ययो वा स्यात्तच्चेदपादानं हीयरुहोः संबंधि न भवति । ग्रामाद् ग्रामतो वा आगच्छति । चौरात् चौरतो वा बिभेति । अहीयरुह इति किम् । सार्थात् हीयते सार्थाद्धीनः । पर्वतादवरोहति । सार्थादिति कर्तुरपायेऽवधिविवक्षा। सार्थेन हीयते । देवदत्त इत्यर्थः । हीयते इति कर्मकर्तरीत्यन्ये । सार्थात् स्वयमेव हीयते देवदत्त इत्यर्थः। हीयेति क्यान्तस्य जहातेर्निर्देशो जिहीते इत्यस्य व्युदासार्थः। तेन तत्र प्रतिषेधो न भवति । भूमित उज्जिहीते। हागिति निर्देशेनैव हाङो निवृत्तिसिद्धौ हीयेति निर्देशो यत्रैव भावे कर्मणि कर्मकर्तरि च जहातेः प्रयोगस्तत्रैवापायविवक्षा नान्यत्रेत्येवमर्थम् । तेन सार्थाज्जहातीति न भवति । अपादान इति किम् । ऋते धर्मात् कुतः सुखम् । आपाटलिपुत्राद् वृष्टो मेघः ।

२१४२ **किमद्यादिसर्वाद्यवैपुल्यबहोः पित्तस्** ॥७।२।८९॥ पञ्चम्या इत्यनुवर्तते । किंशब्दाद् द्यादिवर्जितेभ्यः सर्वादिभ्योऽवैपुल्यवाचिनो बहुशब्दाच्च

पञ्चम्यन्तात् तस् प्रत्ययः स्यात् स च पित्। किम्–कस्मात् कुतः। सर्वादि–सर्वतः। विश्वतः। यतः। ततः। बहु–बहुभ्यः बहुतः। किमः सर्वादित्वेऽपि ह्यादिवर्जनान्न प्राप्नोतीति पृथगुपादानम्। ह्यादिवर्जनं किम्। द्वाभ्याम्। त्वत्। मत्। युष्मत्। अस्मत्। भवतः। कथं द्वितः। त्वत्तः। मत्तः। युष्मत्तः। अस्मत्तः इति? अहीयरुहोऽपादान इति भविष्यति। अनेन हि तस्विधाने 'आद्वेर' इत्यत्वं स्यात्। तसावप्यत्वमिच्छन्त्येके। बहोर्वैपुल्यप्रतिषेधः किम्। बहोः सूपात्। किमह्यादिसर्वाद्यवैपुल्यबहोरिति किम्। वृक्षाद्विना। किंसर्वादिबहोश्च तसुविषयेऽपि परत्वादयमेव तस्। यतः प्रति। ततः प्रति। यत आगच्छति। तत आगच्छति। निरनुबन्धप्रत्ययान्तरकरणमत्वार्थम्। पित्करणं पुंवद्भावार्थम्। बह्वीभ्यो बहुतः। पञ्चम्यन्तमात्रादयं विधिः। सर्वतो हीयते। सर्वतो रोहति। सर्वतो हेतोः। सर्वतः पूर्वः।

२१४३ इतोऽतः कुतः ॥७।२।९०॥ इतस् अतस् कुतस् इत्येते शब्दा निपात्यन्ते। इत इति इदमस्तसि इः सर्वादेशो निपात्यते। अस्मादितः। इमकस्मादितः। अत इति एतदः अः सर्वादेशः। एतस्मादतः। एतकस्मादतः। कुत इति किमः कुरित्यादेशः। कस्मात् कुतः। इह पञ्चम्या इति नानुवर्तते। लक्षणान्तरेण तसि तसौ वा सिद्धे आदेशमात्रं विधीयते। तेनोत्तरसूत्रेण तसि इतो भवान् अतोभवान् आद्यादितसौ इत आस्यतामिति भवति।

२१४४ भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैकार्थात् ॥ ७।२।९१ ॥ भवतु आयुष्मत् दीर्घायुस् देवानां प्रिय इत्येतैः समानाधिकरणात् किमह्यादिसर्वाद्यवैपुल्यबहोः सर्वविभक्त्यन्तात् पित्तस् प्रत्ययो वा स्यात्। स भवान्। ततो भवान्। तौ भवन्तौ ततो भवन्तौ। ते भवन्तः ततो भवन्तः। तं भवन्तम्। ततो भवन्तम्। तेन भवता। ततो भवता। तस्मै भवते। ततो भवते। तस्मात् भवतः। ततो भवतः। तस्य भवतः। ततो भवतः। एवमयं भवान् इतो भवान्। को भवान्। कुतो भवान् इत्याद्युदाहार्यम्। तथा स आयुष्मान् ततो आयुष्मान्। स दीर्घायुः ततो दीर्घायुः। स देवानां प्रियः ततो देवानां प्रियः। अयमायुष्मान्। इत आयुष्मान्। क आयुष्मान्। कुत आयुष्मान्। एवं दीर्घायुर्देवानाप्रियाभ्यामपि। भवत्वित्युकारः सर्वादिपरिग्रहार्थः, तेन मतुशत्रन्तव्युदासः।

२१४५ त्रप् च ॥७।२।९२॥ भवत्तायुष्मद्दीर्घायुर्देवानांप्रियैः समानाधिकरणात् किमाद्यादिसर्वाद्यवैपुल्यबहोः सर्वविभक्त्यन्तात् त्रप् प्रत्ययो वा स्यात्। स भवान् तत्र भवान्। तौ भवन्तौ तत्र भवन्तौ। ते भवन्तः। तत्र भवन्तः। तं भवन्तं तत्र भवन्तम्। तेन भवता तत्र भवता। तस्मै भवते तत्र भवते। तस्माद् भवतः तत्र भवतः। तस्य भवतः तत्र भवतः। तस्मिन् भवति तत्र भवति। एवमायुष्मद्दीर्घायुर्देवानांप्रियैरप्युदाहार्यम्। योगविभागश्चकारेण पुनस्तस्विधानार्थः। तेन सप्तम्यन्तादपि तस् भवति। ततो भवति तत्र भवति। अन्यथा हि ततः 'सप्तम्या' इति परत्वात् त्रबेव स्यात्। रूढिशब्दाश्चैते ततोभवदादयः समुदायाः पूजावचना यथाकथंचित् व्युत्पाद्यन्ते। अत एव पुनस्त्यदादिरनुमयुज्यते। स तत्रभवान्। तं तत्रभवन्तम्। केचित्तु भवच्छब्दस्यामन्त्रणे सौ भो इत्यादेशं कुर्वन्ति तन्मते ततो भोः तत्र भोः इत्यत्रापि भवति। केचिनु भवदाद्ययोगेऽपि त्रप्तसाविच्छन्ति। क गमिष्यसि कं देशं गमिष्यसि इत्यादि।

२१४६ क कुत्रात्रेह ॥७।२।९३॥ क कुत्र अत्र इह इत्येते शब्दास्त्रबन्ता निपात्यन्ते। केति किमः कादेशः त्रपश्चाकारः। कस्मिन् क। कुत्रेति किमः कु इत्यादेशः। कस्मिन् कुत्र। अत्रेति एतदोऽकारादेशः। एतस्मिन् अत्र। एतकस्मिन् अत्र। इहेति इदम इकारादेशः त्रपश्च हादेशः। अस्मिन् इह। इमकस्मिन् इह। एषु 'सप्तम्या' इति त्रप्। त्रप्मात्रे चैते आदेशा विधीयन्ते तेन भवदादियोगेऽपि भवन्ति। क भवान् कुत्र भवान्। अत्र भवान्। इह भवान्। कायुष्मान्। कुत्रायुष्मान्। अत्रायुष्मान्। इहायुष्मान्। क दीर्घायुः। कुत्र दीर्घायुः। अत्र दीर्घायुः। इह दीर्घायुः इत्यादि।

२१४७ सप्तम्याः ॥७।२।९४॥ सप्तम्यन्तात् किमादिसर्वाद्यवैपुल्यबहोस्त्रप् स्यात्। कस्मिन् कुत्र। सर्वत्र। तत्र। बहुषु बहुत्र। पकारस्य पुंवद्भावार्थत्वात् बह्वीषु बहुत्र।

२१४८ किंयत्तत्सर्वैकान्यात् काले दा ॥७।२।९५॥ किंयत्तत्सर्व एक अन्य इत्येतेभ्यः सप्तम्यन्तेभ्यः काले वाच्ये दा प्रत्ययः स्यात्। कस्मिन् काले कदा। यदा। तदा। सर्वदा। एकदा। अन्यदा। काल इति किम्। क देशे।

२१४९ सदाऽधुनेदानींतदानीमेतर्हि ॥७।२।९६॥ सदा अधुना इदानीं

तदानीम् एतर्हि इत्येते शब्दाः काले वाच्ये निपात्यन्ते । सदेति सर्वशब्दाद्दा प्रत्ययः सभावश्चास्य । सर्वस्मिन् काले सदा । सर्वदेत्यपि पूर्वेण । अधुनेति इदमो धुना प्रत्ययोऽकारादेशश्च । अस्मिन् काले अधुना । इदानीमिति इदमो दानीं प्रत्यय इकारादेशश्च । अस्मिन् काले इदानीम् । तदानीमिति तदो दानीं प्रत्ययः। तस्मिन् काले तदानीम् । एतर्हीति इदमो र्हिः प्रत्ययः। एतादेशश्च । अस्मिन् काले एतर्हि ।

२१५० **सद्योऽद्यपरेद्यव्यह्नि** ॥७।२।९७॥ सद्यस् अद्य परेद्यवि इत्येतेऽह्नि काले निपात्यन्ते । सद्य इति समानशब्दात् सप्तम्यन्तादह्नि काले वर्तमानात् द्यस् प्रत्ययः समानस्य च सभावो निपात्यते । समानेऽह्नि सद्यः । अद्येति इदंशब्दाद् द्यः प्रत्यय अकारादेशश्चास्य । अस्मिन्नहनि अद्य । परेद्यवीति परशब्दात् एद्यवि प्रत्ययः । परस्मिन्नहनि परेद्यवि । सद्य इति केचित् कालमात्रे निपातयन्ति ।

२१५१ **पूर्वापराधरोत्तरान्यान्यतरेतरादेद्युस्** ॥ ७।२।९८ ॥ पूर्व अपर अधर उत्तर अन्य अन्यतर इतर इत्येतेभ्यः सप्तम्यन्तेभ्योऽह्नि काले वर्तमानेभ्य एद्युस् प्रत्ययः स्यात् । पूर्वस्मिन्नहनि पूर्वेद्युः । अपरेद्युः । अधरेद्युः । उत्तरेद्युः। अन्येद्युः । अन्यतरेद्युः । इतरेद्युः ।

२१५२ **उभयाद् द्युश्च** ॥७।२।९९॥ उभयशब्दादह्नि काले द्युस् चकारादेद्युस् च प्रत्ययः स्यात् । उभयस्मिन्नहनि उभयद्युः। उभयेद्युः ।

२१५३ **ऐषमः परुत्परारि वर्षे** । ७।२।१००॥ संवत्सरे काले निपात्यन्ते । ऐषमसिति इदंशब्दात् सप्तम्यन्ताद् वर्षे वर्तमानात् समसिण् प्रत्यय इदमश्चैकारादेशः । अस्मिन् संवत्सरे इमकस्मिन् संवत्सरे वा ऐषमः । परुदिति पूर्वशब्दात्परशब्दाद्वा उत् प्रत्ययस्तस्य च पर इत्यादेशः । पूर्वस्मिन् परस्मिन् वा संवत्सरे परुत् । परारीति पूर्वतरशब्दात् परतरशब्दाद्वा आरिप्रत्ययः तस्य च परादेशः। पूर्वतरे परतरे वा संवत्सरे परारि ।

२१५४ **अनद्यतने र्हिः** ॥७।२।१०१॥ सप्तम्यन्तादनद्यतने काले वर्तमानात् यथासंभवं किमद्यादिसर्वाद्यवैपुल्यबहोः र्हिः प्रत्ययः स्यात् । कस्मिन्नद्यतने काले कर्हि । यर्हि । तर्हि । अन्यर्हि । एतस्मिन् काले एतर्हि । एतदः साको नेष्यते । अमुष्मिन् काले अमुर्हि । [1]इदमस्तु अनेन नेष्यते । बहुषु कालेषु बहुर्हि ।

१ किंतु सदाधुनेदानीं तदानीमिति सामान्यकाले वर्तिभा

किंयत्तदेतदन्येभ्य एवेच्छन्त्यन्ये । काल इत्येव । यस्मिन्ननद्यतने भोजने यत्र । अनद्यतन इति किम् । यस्मिन् काले यदा । अनद्यननेऽपि काले काममात्रविवक्षायां दादिः प्रत्ययो भवति । कदा । यदा । तदा । तदानीम् । अन्यदा । सप्तम्यर्थमात्रविवक्षायां त्रबपि भवति । अमुत्र काले ।

२१८५ प्रकारे था ॥७।२।१०२॥ सप्तम्या इति निवृत्तम् । यथासंभवं विभक्तिः । सामान्यस्य भिद्यमानस्य भेदान्तरानुप्रवृत्तो भेदः प्रकारः तस्मिन् वर्तमानात् किमद्यादिसर्वाद्यवैपुल्यबहोः था प्रत्ययः स्यात् । सर्वेण प्रकारेण सर्वथा । यथा । तथा । उभयथा । अन्यथा । अपरथा । इतरथा । बहोस्तु परत्वाद्धा भवति ।

२१८६ कथमित्थम् ॥ ७।२।१०३ ॥ कथमित्थमिति प्रकारे निपात्यते । कथमिति किमस्थापवादस्थम् निपात्यते । केन प्रकारेण कथम् । इत्थमिति इदम एतदो वा थमुप्रत्यय इदादेशश्च । अनेन एतेन वा प्रकारेण इत्थम् ।

२१८७ संख्याया धा ॥ ७।२।१०४ ॥ संख्यावाचिनो नाम्नः प्रकारे वर्तमानाद् धा प्रत्ययः स्यात् । एकेन प्रकारेण एकधा । द्विधा । त्रिधा । चतुर्धा । पञ्चधा । शतधा । बहुधा । गणधा । कतिधा । तावद्धा ।

२२८८ विचाले च ॥ ७।२।१०५ ॥ विचलनं विचालः । द्रव्यस्य पूर्वसंख्यायाः प्रच्युतिः संख्यान्तरापत्तिः एकस्यानेकीभावः अनेकस्य चैकीभावः । तस्मिन् गम्यमाने संख्यावाचिनो नाम्नो धा प्रत्ययो वा स्यात् । एको राशिर्द्वौ क्रियते द्विधा क्रियते । एको राशिर्द्वौ भवति द्विधा भवति । त्रिधा भवति । एकं राशिं द्वौ करोति द्विधा कोति । त्रिधा करोति । शतेन शतधा ।

'यदि मे यतमानाय वचनं न करिष्यसि ।
उन्मत्त शतधा मूर्धा तवैषोऽद्य फलिष्यति' ॥

अनेक एकः क्रियते एकधा क्रियते । अनेक एको भवति एकधा भवति । अनेकमेकं करोति एकधा करोति । पञ्च राजयस्त्रयो द्वौ एको वा क्रियन्ते त्रिधा द्विधा एकधा क्रियन्ते । एवं त्रिधा द्विधा एकधा वा भवन्ति । त्रिधा द्विधा एकधा वा करोति । एवं बहुधा गणधा कतिधा तावद्धा । चकार उत्तरत्र प्रकारे विचाले चेत्युभयोः समुच्चयार्थः ।

२१५९ **वैकाद् ध्यमञ्** ॥ ७।२।१०६ ॥ एक इत्येतस्मात् संख्यावाचिनः प्रकारे वर्तमानाद् विचाले च गम्यमाने ध्यमञ् प्रत्ययो वा स्यात् । एकेन प्रकारेण एकध्यम् एकधा भुङ्क्ते । अनेकमेकं करोति एकध्यम् एकधा करोति । वाग्रहणं धार्थम् ।

२१६० **द्वित्रेर्धमञेधौ वा** ॥७।२।१०७॥ द्वि त्रि इत्येताभ्यां संख्यावाचिभ्यां प्रकारे वर्तमानाभ्यां विचाले च गम्यमाने धमञ् एधा इत्येतौ प्रत्ययौ वा स्याताम् । वचनभेदाद्यथासंख्यं नास्ति । द्वाभ्यां प्रकाराभ्यां द्वैधम् द्वेधा त्रैधम् त्रेधा भुङ्क्ते । वावचनाद् द्विधा त्रिधा । एकं राशिं द्वौ करोति द्वैधम् द्वेधा द्विधा, त्रैधम् त्रेधा त्रिधा करोति ।

२१६१ **तद्वति धण्** ॥ ७।२।१०८ ॥ द्वित्रिभ्यां संख्यावाचिभ्यां तद्वति–प्रकारवति विचालवति चाभिधेये धण् प्रत्ययः स्यात् । द्वौ प्रकारौ विभागौ वा एषां द्वैधानि त्रैधानि । राजद्वैधानि । राजत्रैधानि । द्वैधीभावः । त्रैधीभावः ।

२१६२ **वारे कृत्वस्** ॥७।२।१०९॥ संख्याया इति वर्तते । वारो धात्वर्थस्यायौगपद्येन वृत्तिः तत्काले वा । तस्मिन् वर्तमानात् संख्याशब्दात् तद्वति–वारवति धात्वर्थे क्रियायामर्थे कृत्वस् प्रत्ययः स्यात् । पञ्च वारा अस्य पञ्चकृत्वो भुङ्क्ते । षट्कृत्वः । शतकृत्वः सहस्रकृत्वोऽधीते । बहुकृत्वः । गणकृत्वः । कतिकृत्वः । तावत्कृत्वः । भुज्यर्थो वारवानिति भुज्यर्थस्य इदं विशेषणम् । तद्वतीत्येव । भोजनस्य पञ्च वाराः । संख्याया इत्येव । भूरयो वारा अस्य भोजनस्य ।

२१६३ **द्वित्रिचतुरः सुच्** ॥७।२।११०॥ द्वित्रिचतुर् इत्येतेभ्यः संख्याशब्देभ्यो वारे वर्तमानेभ्यस्तद्वति सुच् प्रत्ययः स्यात् । कृत्वसोऽपवादः । द्वौ वारावस्य द्विर्भुङ्क्ते । त्रिः चतुर् भुङ्क्ते । इह तु द्विस्तावान् प्रासादः द्विर्दशेति गम्यमानेऽपि वारे भवति । चकारः ' सुचो वा ' इत्यत्र विशेषणार्थः ।

२१६४ **एकात् सकृच्चास्य** ॥७।२।१११॥ एकशब्दाद् वारे वर्तमानात् तद्वत्यभिधेये सुच् प्रत्ययः सकृदिति चास्यादेशो भवति । कृत्वसोऽपवादः । एकवारं भुङ्क्ते सकृद् भुङ्क्ते ।

२१६५ **बहोर्धासन्ने** ॥ ७।२।११२ ॥ बहुशब्दात् संख्यावाचिन आसन्ने

अविदूरेऽविप्रकृष्टकाले वारे क्रियाप्रवृत्तौ तत्काले वाविप्रकृष्टे वर्तमानात् तद्वति धा प्रत्ययः स्यात्। बहव आसन्ना वारा अस्य बहुधा भुङ्क्ते। आसन्नवारेऽपि वारमात्रे द्योत्ये कृत्वस् प्रत्ययो भवत्येव। बहुकृत्वोऽह्नो भुङ्क्ते। आसन्नता तु प्रकरणादिना गम्यते। एके तु गणधा भुङ्क्ते तावद्धा भुङ्क्ते इत्यत्रापीच्छन्ति।

२१६६ दिक्शब्दादिग्देशकालेषु प्रथमापञ्चमीसप्तम्याः ॥७।२।११३॥ दिक्शब्दादिशि प्रसिद्धाच्छब्दाद् दिशि देशे काले च वर्तमानात् प्रथमापञ्चमीसप्तम्यन्तात् स्वार्थे धा प्रत्ययः स्यात्।

२१६७ लुबञ्चेः ॥ ७।२।११३ ॥ अञ्चत्यन्तादिक्शब्दादिग्देशकालेषु वर्तमानात् प्रथमापञ्चमीसप्तम्यन्ताद्यः प्रत्ययो विहितो धा एनो वा तस्य लुप् स्यात्। इत्यनेन धाप्रत्ययस्य लुपि ङ्ग्यादेरित्यादिना ङीलुक्। प्राची दिग् रमणीया प्राग्रमणीयम्। प्राङ्देशः कालो वा रमणीयः प्राग्रमणीयम्। प्राच्या दिशः प्राचो देशात् कालाद्वागतः प्रागागतः प्राच्यां दिशि प्राचि देशे काले वा वसति प्राग्वसति। दिक्शब्दादिति किम्। ऐन्द्री दिक्। दिग्देशकालेष्विति किम्। प्राङ्वृक्षः। प्रथमापञ्चमीसप्तम्या इति किम्। प्राचीं दिशं पश्यति। प्राच्या दिशा प्रज्वलितम्। प्राच्यै दिशे देहि। प्राच्या दिशः स्वम्। दिग्देशकालेष्विति बहुवचनं प्रथमादिभिर्यथासंख्यनिवृत्त्यर्थम्।

२१६८ ऊर्ध्वादिरिष्टातावुपश्चास्य ॥ ७।२।११४ ॥ ऊर्ध्वशब्दादिग्देशकालेषु वर्तमानात् प्रथमापञ्चमीसप्तम्यन्तात् रि रिष्टात् इत्येतौ प्रत्ययौ धापवादौ स्याताम् अस्य चोर्ध्वशब्दस्योपादेशो भवति। ऊर्ध्वा दिग्देशः कालो वा रमणीयः उपरि उपरिष्टात् रमणीयम्। एवम् उपरि उपरिष्टादागतो वसति वा।

२१६९ पूर्वावराधरेभ्योऽसस्तातौ पुरवधश्चैषाम् ॥ ७।२।११५ ॥ पूर्व अवर अधर इत्येतेभ्यः प्रत्येकं दिग्देशकालवृत्तिभ्यः प्रथमापञ्चमीसप्तम्यन्तेभ्योऽस् अस्तात् इत्येतौ प्रत्ययौ स्यातामेषां च पूर्वावराधरशब्दानां यथासंख्यं पुर् अव् अध् इत्येते आदेशाः स्युः। पूर्वा दिग्देशः कालो वा रमणीयः पुरः पुरस्ताद् रमणीयम्। पुरः पुरस्तादागतो वसति वा। अवरो दिग्देशः कालो वा रमणीयः अवः अवस्ताद् रमणीयम्। अवः अवस्तादागतो वसति वा। अधरा दिग्देशः कालो वा रमणीयः अधः अधस्ताद् रमणीयम्। अधः अधस्तादागतो वसति वा।

२१७० परावरात् स्तात् ॥७।२।११६॥ पर अवर इत्येताभ्यां दिग्देशकालेषु वर्तमानाभ्यां पथमापञ्चमीसप्तम्यन्ताभ्यां स्वार्थे स्तात् प्रत्ययः स्यात्। परा दिग्देशः कालो वा रमणीयः परस्ताद् रमणीयम्। परस्तादागतो वसति वा। एवमवरस्ताद्रमणीयमागतो वसति वा।

२१७१ दक्षिणोत्तराच्चातस् ॥७।२।११७॥ दक्षिण उत्तर इत्येताभ्यां चकारात् परावराभ्यां च दिग्देशकालेषु वर्तमानाभ्यां प्रथमापञ्चमीसप्तम्यन्ताभ्यां स्वार्थेऽतस् प्रत्ययः स्यात्। दक्षिणशब्दः काले न संभवतीति दिग्देशवृत्तिर्गृह्यते। दक्षिणा दिग्देशो वा रमणीयः दक्षिणतो रमणीयम्। दक्षिणत आगतो वसति वा। उत्तरा दिग्देशः कालो वा रमणीयः उत्तरतो रमणीयम्। उत्तरत आगतो वसति वा। एवं परतो रमणीयमागतो वसति वा। अवरतो रमणीयमागतो वसति वा। एवं चावरशब्दस्य चातुरूप्यं भवति। अकारस्तसोऽस्य भेदार्थः। तेनातः 'केहामात्रतसस्त्यच्' इति त्यच् न भवति। परतो भवं पारतमित्यणेव।

२१७२ अधरापराच्चात् ॥७।२।११८॥ अधर अपर इत्येताभ्यां दिग्देशकालवृत्तिभ्यां प्रथमापञ्चमीसप्तम्यन्ताभ्यामात् प्रत्ययः स्यात्। चादक्षिणोत्तराभ्यां च। अधरा दिग्देशः कालो वा रमणीयः अधराद् रमणीयम्। अधरादागतो वसति वा। एवं चाधरशब्दस्य त्रैरूप्यम्।

२१७३ पश्चोऽपरस्य दिक्पूर्वस्य चाति ॥७।२।१२४॥ अपरशब्दस्य केवलस्य दिक्पूर्वपदस्य च अति प्रत्यये परे पश्चादेशः स्यात्। अपरा दिग्देशः कालो वा रमणीयः पश्चाद् रमणीयम्। पश्चादागतो वसति वा। एवं दक्षिणपश्चाद् रमणीयमागतो वसति वा। दक्षिणाद् रमणीयमागतो वसति वा। उत्तराद् रमणीयमागतो वसति वा।

२१७४ वा दक्षिणात् प्रथमासप्तम्या आः ॥७।२।११९॥ दक्षिणशब्दाद्दिग्देशवृत्तेः प्रथमान्तात् सप्तम्यन्ताच्च आः प्रत्ययो वा स्यात्। दक्षिणा रमणीयम्। दक्षिणा वसति, पक्षे अतसातौ। दक्षिणतो दक्षिणाद् रमणीयम्। दक्षिणतो दक्षिणाद् वसति। पञ्चम्यां सावकाशावतसावाकारो बाधेतेति वाग्रहणम्। प्रथमासप्तम्या इति किम्। दक्षिणत आगतः।

२१७५ आहि दूरे ॥७।२।१२०॥ दिक्शब्दा अवध्यपेक्षाः। तत्रावधेर्दूरे

दिशि देशे वा वर्तमानात् प्रथमासप्तम्यन्तात् दक्षिणशब्दादा आहि इत्येतौ प्रत्ययौ स्याताम् । ग्रामाद् दूरा दक्षिणा दिग्देशो वा रमणीयः ग्रामादक्षिणा दक्षिणाहि रमणीयम् । दक्षिणा दक्षिणाहि वसति । दूर इति किम् । दक्षिणतः दक्षिणात् दक्षिणा रमणीयम् । आहिर्न भवति । आकारस्तु पूर्वेण सामान्येन विधानाद् भवत्येव । यद्येवमिहाकारग्रहणं किमर्थम् । विशेषविहितेनाहिना बाधो मा भूदित्येवमर्थम् उत्तरार्थं च । प्रथमासप्तम्या इत्येव । दक्षिणत आगतः।

२१७६ **बोत्तरात्** ॥७।२।१२१॥ उत्तरशब्दात् प्रथमासप्तम्यन्तात् आ आहि इत्येतौ प्रत्ययौ वा स्याताम् । योगविभागाद् दूर इति नानुवर्तते । उत्तरा उत्तराहि रमणीयम् । उत्तरा उत्तराहि वसति । पक्षे अतसातौ । उत्तरतः उत्तरात् । प्रथमासप्तम्या इत्येव । उत्तरतः उत्तरादागतः ।

२१७७ **अदूरे एनः** ॥७।२।१२२॥ बोत्तरादिति नानुवर्तते । दिक्शब्दादिग्देशकालवृत्तेः प्रथमासप्तम्यन्तादवधेरदूरे वर्तमानादेनः प्रत्ययः स्यात् । अस्मात् पूर्वा अदूरा दिक् रमणीया देशः कालो वा पूर्वेणास्य रमणीयम् । पूर्वेणास्य वसति । अपरेणास्य रमणीयम् । अपरेणास्य वसति । एवं दक्षिणेन उत्तरेण अधरेण । अदूर इति किम् । पुरो रमणीयम् । प्रथमासप्तम्या इत्येव । पुर आगतः । दिग्देशकालमात्रे द्योत्ये ये सामान्यप्रत्यया उक्ता अदूरे अपि सामान्यविवक्षायां ते भवन्त्येव । प्रकरणादेश्चादूरता गम्यत इति नार्थो वाग्रहणेन । अन्ये तु दक्षिणोत्तराधरशब्देभ्य एव एनप्रत्ययमिच्छन्ति ।

२१७८ **कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्वे च्विः** ॥७।२।१२६॥ भूश्च अस्तिश्च भ्वस्ति, का च भ्वस्ति च कृभ्वस्तिनी, ताभ्यां कृभ्वस्तिभ्याम् । द्विवचनं कर्मकर्तृभ्यामिति यथासंख्यार्थम् । करोतिकर्मणो भ्वस्तिकर्तुश्च प्राक् पूर्वमतस्य तत्त्वेऽभूततद्भावे गम्यमाने कृभ्वस्तिभ्यां च योगे च्विः स्यात् । द्रव्यस्य गुणक्रियासंबंधसमूहविकारयोगे प्रागतत्तत्वमुदाहार्यम् ।

२१७९ **ईश्चावावर्णस्यानव्ययस्य** ॥४।३।१११॥ अव्ययवर्जितस्यावर्णान्तस्य च्वौ प्रत्यये ईकारोऽन्तादेशः स्यात् । शुक्लीकरोति पटम् । प्रागशुक्लं शुक्लं करोतीत्यर्थः। शुक्लीक्रियते पटः। प्रागशुक्लः शुक्लः क्रियत इत्यर्थः। शुक्लीकरणम् । शुक्लीभवति पटः।

प्रागशुक्लः पटः इदानीं शुक्लो भवतीत्यर्थः। शुक्लीभवनम्। शुक्लीस्यात् पटः। प्राग-शुक्लः पट इदानीं शुक्लः स्यादित्यर्थः। एवं कारकीकरोति चैत्रम्। कारकीभवति कार-कीस्याच्चैत्रः। दण्डीकरोति चैत्रम्। दण्डीभवति दण्डीस्यात् चैत्रः। राजपुरुषीकरोति चैत्रम्। राजपुरुषीभवति राजपुरुषीस्याच्चैत्रः। संघीकरोति गाः। संघीभवन्ति संघीस्युर्गावः। घटीकरोति मृदम्। घटीभवति घटीस्यान्मृत्। पटीकरोति तन्तून्। पटीभवन्ति पटीस्युस्तन्तवः। भस्मीकरोति काष्ठम्। भस्मीभवति भस्मीस्यात् काष्ठम्। कृभ्वस्तिभ्यामिति किम्। अशुक्लं शुक्लं संपादयति। अशुक्लः शुक्लः संपद्यते। कर्म-कर्तृभ्यामिति किम्। प्रागदेवकुले इदानीं देवकुले करोति। प्रागदेवकुले इदानीं देवकुले भवति। कथं समीपीभवति दूरीभवति। अत्रापि उत्तरात् तत्स्थे द्रव्ये वर्तमानानां समीपादीनां कर्तृत्वम्। प्रागतत्तत्व इति किम्। शुक्लं करोति। शुक्लो भवति। शुक्लः स्यात्। प्राग्ग्रहणं किम्। अशुक्लं शुक्लं करोति। एककालमत-त्तत्त्वे न भवति। भवति हि एको भावः कश्चिदेककालं शुक्लोऽशुक्लश्च देशभेदेन चित्रपटीवत्। अभद्रं भद्रं करोति भद्राकरोति शिरः, अनिष्कुलं निष्कुलं करोति निष्कुलाकरोति दाडिममित्यत्र परत्वात् डाजेव।

२१८० अरुर्मनश्चक्षुश्चेतोरहोरजसां लुक् च्वौ ॥७।२।१२७॥ एतेषां च्वौ परेऽन्तस्य लुक् स्यात्।

२१८१ दीर्घश्चिवयङ्यक्क्येषु च ॥४।३।१०८॥ च्वौ यङि यकि क्येषु यकारादावाशिषि च परतोऽन्त्यस्वरस्य दीर्घःस्यात्। अनरुः अरुः करोति अरू-करोति। अरूभवति अरूस्यात्। महारूकरोति। महारूभवति। महारूस्यात्। मनीकरोति। मनीभवति। मनीस्यात्। उन्मनीकरोति। उन्मनीभवति। उन्मनीस्यात्। चक्षूकरोति। चक्षूभवति। चक्षूस्यात्। उच्चक्षूकरोति। उच्चक्षू-भवति। उच्चक्षूस्यात्। चेतीकरोति। चेतीभवति। चेतीस्यात्। विचेतीकरोति। विचेतीभवति। विचेतीस्यात्। रहीकरोति। रहीभवति। रहीस्यात्। विरही-करोति। विरहीभवति। विरहीस्यात्। रजीकरोति। रजीभवति। रजीस्यात्। विरजीकरोति। विरजीभवति। विरजीस्यात्। च्वाविति किम्। अरुः करोति। बहु-वचनं तदन्तानामपि परिग्रहार्थम्। अन्यथा ग्रहणवता न तदन्तविधिरित्युपतिष्ठेत।

२१८२ इसुसोर्बहुलम् ॥७।२।१२८॥ इस् उस् इत्येवमन्तस्य च्वौ परे

बहुलमन्तस्य लुक् स्यात् । असर्पिः सर्पिः करोति सर्पीकरोति नवनीतम् । धनूभवति वंशः। न च भवति सर्पिर्भवति । धनुर्भवति । बहुलग्रहणं प्रयोगानुसरणार्थम् ।

२१८३ व्यञ्जनस्यान्त ईः ॥७।२।१२९॥ व्यञ्जनान्तस्य च्वौ परे बहुलमीकारोऽन्तः स्यात् । दृषदीभवति शिला । समिधीभवति काष्ठम् । न च भवति दृषद्भवति । समिद्भवति ।

२१८४ आपत्यस्य क्यच्च्व्योः ॥२।४।९१॥ व्यञ्जनात् परस्यापत्ययकारस्य क्ये च्वौ च परतो लुक् स्यात् । अगार्ग्यो गार्ग्यो भवति गार्गीभवति । आपत्यस्येति किम् । असाङ्काश्यः साङ्काश्यः देशो भवति साङ्काश्यीभवति । व्यञ्जनादित्येव । कारिकेयीभवति ।

२१८५ ऋतो री ॥४।३।१०९॥ धातोरधातोर्वा ऋदन्तस्य श्रुतत्वादतः स्थाने रीरित्ययमादेशः स्यात् च्वि–यङ्–यक्–क्येषु । पित्रीकरोति । पित्रीभवति । पित्रीस्यात् ।

२१८६ व्याप्तौ स्सात् ॥७।२।१३०॥ कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्वे इति वर्तते । एतस्मिन् विषये सकारादिः सात् प्रत्ययः स्यात् व्याप्तौ–प्रागतत्तत्त्वस्य सर्वात्मना द्रव्येणाभिसंबंधो चेद् गम्यते । द्विसकारपाठः षत्वनिषेधार्थः । सर्वं काष्ठं प्रागनग्निमग्निं करोति अग्निसात्करोति काष्ठम् । अग्निसाद्भवति । अग्निसात् स्यात् । उदकसात्करोति लवणम् । उदकसाद् भवति । उदकसात् स्यात् । व्याप्ताविति किम् । अग्नीकरोति काष्ठम् । अग्नीभवति अग्नीस्यात् काष्ठम् । सत्यामपि वस्तुनि व्याप्तौ प्रागतत्तत्वमात्रे च्विर्भवत्येवेति नार्थो वावचनेन । अग्नीभवति काष्ठम् । व्याप्तिस्तु प्रकरणादेर्गम्यते ।

२१८७ जातेः संपदा च ॥७।२।१३१॥ कृभ्वस्तिभिः संपदा च योगे करोतिकर्मणो भ्वस्तिकर्तुः संपदिकर्तुश्च प्रागतत्तत्वेन जातेः सामान्यस्य व्याप्तौ स्सात् प्रत्ययः स्यात् । अस्यां सेनायां शस्त्रमग्निसात् करोति दैवम् । अस्यां सेनायां सर्वं शस्त्रम् अग्निसाद्भवति अग्निसात्स्यात् । अस्यां सेनायां सर्वं शस्त्रअग्निसात्संपद्यते । वर्षासु सर्वं लवणमुदकसात्करोति मेघः । उदकसाद् भवति । उदकसात् स्यात् । उदकसात् संपद्यते । यथैव ह्येकस्य द्रव्यस्य सर्वावयवाभिसंबंधे प्रागतत्तत्वेन व्याप्ति-

र्भवति तथा जातेः सामान्यस्य सर्वव्यक्तिसंबन्धे भवति । एवं च व्याप्ताविति सामान्योपादानात् कृभ्वस्तियोगे पूर्वेणैव स्सात्सिद्धः संपद्यर्थं तु वचनम् । चकार उत्तरत्रोभयोः समुच्चयार्थः ।

२१८८ तत्राधीने ॥७।२।१३२॥ कृभ्वस्तिभ्यां संपदा चेत्यनुवर्तते । कर्मकर्तृभ्यां प्रागतत्तत्वे इति च निवृत्तम् । तत्रेति सप्तम्यन्तादधीने आयत्तेऽर्थे कृभ्वस्तिसंपद्भिर्योगे स्सात् प्रत्ययः स्यात् । राजन्यधीनं करोति राजसात्करोति । राजस्वामिकं करोतीत्यर्थः। राजसाद्भवति । राजसात्स्यात् । राजसात्संपद्यते । आचार्यसात्करोति । आचार्यसाद्भवति । आचार्यसात्स्यात् । आचार्यसात्संपद्यते ।

२१८९ देये त्रा च ॥७।२।१३३॥ तत्रेति सप्तम्यन्तादेयोपाधिकेऽधीनेऽर्थे कृभ्वस्तिसंपद्भिर्योगे त्रा प्रत्ययः स्यात् । चकारो न स्सातोऽनुकर्षणार्थः तस्याधीनतामात्रविवक्षायां पूर्वेणैव सिद्धत्वात्, किंतु कृभ्वस्तिभ्यां संपदा चेत्यस्यानुकर्षणार्थः । तेनोत्तरत्र नानुवर्तते । देवेऽधीनं देयं करोति देवत्राकरोति द्रव्यम् । देवाय दातव्यमिति यत्स्थापितं तदिदानीं देवाय ददातीत्यर्थः। देवेऽधीनं देयं भवति देवत्राभवति । देवत्रास्यात् । देवत्रासंपद्यते । गुरुत्रा करोति । गुरुत्रा भवति । गुरुत्रा स्यात् । गुरुत्रा संपद्यते । देय इति किम् । राजसाद्भवति राष्ट्रम् ।

२१९० सप्तमीद्वितीयादेवादिभ्यः ॥७।२।१३४॥ सप्तम्यन्तेभ्यो द्वितीयान्तेभ्यश्च देवादिभ्यस्त्रा प्रत्ययो वा स्यात् स्वार्थे । देवेषु वसति देवत्रा वसति । देवेषु भवति देवत्रा भवति । देवेषु स्यात् देवत्रा स्यात् । देवान् करोति देवत्रा करोति । देवान् गच्छति देवत्रा गच्छति । एवं मनुष्यत्रा वसति । मनुष्यत्रा गच्छति । मर्त्यत्रा वसति । मर्त्यत्रा गच्छति । पुरुषत्रा वसति । पुरुषत्रा गच्छति । पुरुत्रा वसति । पुरुत्रा गच्छति । बहुत्रा वसति । बहुत्रा गच्छति । देवादयः शिष्टप्रयोगगम्याः।

२१९१ तीयशम्बबीजात् कृगा कृषौ डाच् ॥ ७।२।१३५ ॥ तीयप्रत्ययान्तात् शम्बबीजात् इत्येताभ्यां च करोतिना योगे कृषिविषये डाच् प्रत्ययः स्यात् । द्वितीयं वारं करोति क्षेत्रं द्वितीयाकरोति क्षेत्रम् । द्वितीयं वारं कृषतीत्यर्थः। तृतीयाकरोति क्षेत्रम् । तृतीयं वारं कृषतीत्यर्थः । शम्बाकरोति क्षेत्रम् । अनुलोमकृष्टं पुनस्तिर्यक् कृषतीत्यर्थः। अन्ये त्वाहुः—शम्बसाधनः कृषिरिति शम्बेन कृषतीत्यर्थः। एके तु शम्बाकरोति कुलिवमित्युदाहरन्ति । लोहकं वर्धकुण्डलिका वा

शम्बं तत् कुलिवस्य करोतीत्यर्थः । बीजाकरोति क्षेत्रम् । उप्ते पश्चाद् बीजैः सह कृषतीत्यर्थः । यदाप्येवं विग्रहः क्षेत्रस्य द्वितीयां कृषिं कर्षं कर्षणं करोति शम्बं करोति क्षेत्रस्य कुलिवस्य वा बीजं करोति क्षेत्रस्येति तदापि द्वितीयाकरोति क्षेत्रमित्यादौ क्षेत्राद् द्वितीया भवति। द्वितीयाकरोतीत्यादयो हि मुण्डयतीत्यादिवत् क्रियाशब्दास्तेषां च क्षेत्रादि कर्म भवति । कृगेति किम् । द्वितीयं वारं कृषति । कृषाविति किम् । द्वितीयं पटं करोति । चकारो 'डाच्यादौ' इत्यत्र विशेषणार्थः।

२१९२ **संख्यादेर्गुणात्** ॥७।२।१३६॥ संख्याया आद्यवयवात् परो यो गुणशब्दस्तदन्तात् कृगो योगे कृषिविषये डाच् प्रत्ययः स्यात्। द्विगुणं कर्षणं करोति क्षेत्रस्य द्विगुणाकरोति क्षेत्रम् । त्रिगुणाकरोति क्षेत्रम् । क्षेत्रस्य द्विगुणं त्रिगुणं च विलेखनं करोतीत्यर्थः । कृषावित्येव । द्विगुणां रज्जुं करोति ।

२१९३ **समयाद्यापनायाम्** ॥७।२।१३७॥ समयशब्दाद् यापनायां कालहरणे गम्यमाने कृगा योगे डाच् प्रत्ययः स्यात्। समयाकरोति तन्तुवायः। अद्यश्वस्ते पटं दास्यामीति कालक्षेपं करोतीत्यर्थः । यापनायामिति किम् । समयं करोति ।

२१९४ **सपत्रनिष्पत्रादतिव्यथने** ॥७।२।१३८॥ सपत्र निष्पत्र इत्येताभ्यां कृगा योगेऽतिव्यथनेऽतिपीडने गम्यमाने डाच् प्रत्ययः स्यात्। सपत्राकरोति मृगम् । पत्रं शरः, सह पत्रमनेनेति सपत्रः तं करोति–शरमस्य शरीरे प्रवेशयतीत्यर्थः । निष्पत्राकरोति । निर्गतं पत्रमस्मादिति निष्पत्रः तं करोति–शरमस्यापरपार्श्वेन निष्क्रमयतीत्यर्थः । सपत्राकरोति निष्पत्राकरोति वृक्षं वायुः । अत्र पत्रशातनमेवातिव्यथनम् । सपत्राकरोतीत्यपि मङ्गलाभिप्रायेण वृक्षस्य निष्पत्राकरणमेवोच्यते । यथा दीपो नन्दतीति विध्वंसः । अतिव्यथन इति किम् । सपत्रं करोति वृक्षं जलसेकः । निष्पत्रं करोति वृक्षतलं भूमिशोधकः ।

२१९५ **निष्कुलान्निष्कोषणे** ॥७।२।१३९॥ निष्कुलशब्दात् कृगो योगे निष्कोषणेऽर्थे डाच् प्रत्ययः स्यात् । निष्कृष्टंकुलमवयवसंघातोऽस्मादिति निष्कुलम्। अन्तरवयवानां बहिर्निष्कासनं निष्कोषणम् । निष्कुलंकरोति निष्कुलाकरोति दाडिमम् निष्कृष्णातीत्यर्थः । एवं निष्कुलाकरोति पशुं चण्डालः । निष्कोषण इति किम् । निष्कुलं करोति शत्रुम् ।

२१९६ प्रियसुखादानुकूल्ये ॥७।२।१४०॥ प्रिय सुख इत्येताभ्यां कृगा योगे आनुकूल्ये गम्यमाने डाच् प्रत्ययः स्यात् प्रियाकरोति सुखाकरोति गुरुम्। गुरोरानुकूल्यं करोति तमाराधयतीत्यर्थः। आनुकूल्य इति किम्। प्रियं करोति सामवचनम्। सुखं करोत्यौषधपानम्।

२१९७ दुःखात् प्रातिकूल्ये ॥ ७।२।१४१ ॥ दुःखशब्दात् प्रातिकूल्ये गम्यमाने कृगा योगे डाच् प्रत्ययः स्यात्। दुःखाकरोति शत्रुम्। शत्रोः प्रातिकूल्यं करोति प्रतिकूलमाचरति–अनभिमतानुष्ठानेन तं पीडयतीत्यर्थः। प्रातिकूल्य इति किम्। दुखं करोति रोगः।

२१९८ शूलात् पाके ॥७।२।१४२॥ शूलशब्दात् पाके गम्यमाने कृगा योगे डाच् प्रत्ययः स्यात्। शूलाकरोति मांसम्। शूले पचतीत्यर्थः। पाक इति किम्। शूलं करोति कदन्नम्।

२१९९ सत्यादशपथे ॥७।२।१४३॥ सत्यशब्दाच्छपथादन्यत्र वर्तमानात् कृगा योगे डाच् प्रत्ययः स्यात्। सत्याकरोति वणिग् भाण्डम्। कार्षापणादिदानेन मयावश्यमेवैतत् क्रेतव्यमिति विक्रेतारं प्रत्याययति। अशपथ इति किम्। सत्यं करोति। यदीदमेवं न स्यात् इदं मे इष्टं मा भूत् अनिष्टं वा भवत्विति शपथं करोतीत्यर्थः।

२२०० भद्रभद्रात् वपने ॥७।२।१४४॥ भद्रभद्रशब्दाभ्यां वपने मुण्डने गम्यमाने कृगा योगे डाच् प्रत्ययः स्यात्। भद्रं भद्रं वपनं करोति भद्राकरोति भद्राकरोति नापितः। शिशोर्मङ्गल्यं केशच्छेदनं करोतीत्यर्थः। भद्रभद्रशब्दौ मङ्गल्यवचनौ। वपन इति किम्। भद्रं भद्रं करोति साधुः।

२२०१ अव्यक्तानुकरणादनेकस्वरात् कृभ्वस्तिनानितौ द्विश्च ॥७।२।१४५॥ यस्मिन् ध्वनावकारादयो वर्णा विशेषरूपेण नाभिव्यज्यन्ते सोऽव्यक्तः तस्यानुकरणमव्यक्तानुकरणम्। तस्मादनेकस्वरादनितिपरात् कृभ्वस्तिभिर्योगे डाच्वा स्यात् द्विश्चास्य प्रकृतिरुच्यते। प्रत्ययस्य द्विर्वचनानर्थक्यात्।

२२०२ डाच्यादौ ॥७।२।१४६॥ अव्यक्तानुकरणस्यानेकस्वरस्याच्छब्दान्तस्य द्वित्वे सति आदौ पूर्वपदे योऽतस्तकारस्तस्य डाचि परे लुक् स्यात्। पटत् करोति

पटापटा करोति । पटापटा भवति । पटापटा स्यात् । दमत् करोति । दमदमा करोति । दमदमा भवति । दमदमा स्यात् । एवं मसत् करोति । मसमसा करोति । खरटत् करोति । खरटखरटा करोति । अव्यक्तवर्णस्यापि[1] कथंचिद् ध्वनिमात्रसादृश्यात् व्यक्तवर्णमनुकरणं भवति । अव्यक्तानुकरणादिति किम् । दृषत्करोति । अत्र व्यक्तवर्णमनुकार्यम् । अनेकस्वरादिति किम् । श्रत्करोति । कुभ्वस्तिनेति किम् । पटज्जायते । अनितावितिं किम् । पटिति करोति ।

२२०३ **बह्वल्पार्थात् कारकादिष्टानिष्टे प्शस्** ॥७।२।१६०॥ बह्वर्थादल्पार्थाच्च कारकाभिधायिनो नाम्नः प्शस् प्रत्ययो वा स्यात् यथासंख्यमिष्टेऽनिष्टे च विषये । इष्टं प्राशित्रादि । अनिष्टं श्राद्धादि । ग्रामे बहवो बहुशो वा ददति । एवं भूरिशः। प्रभूतशः । गणशः । अल्पार्थ–अल्प आगच्छति। अल्पश आगच्छति। अल्पं धनं ददाति । अल्पशो धनं ददाति । श्राद्धे अल्पैर्भुक्तम् । अल्पशो भुक्तम् । अल्पेभ्यो ददाति। अल्पशो ददाति। अल्पेभ्य आगतम्। अल्पश आगतम् । अल्पेषु वसति । अल्पशो वसति । एवं स्तोकशः । कतिपयशः। बह्वल्पार्थादिति किम् । गां ददाति । अश्वं ददाति। कारकादिति किम्। बहूनां स्वामी। इष्टानिष्ट इति किम्। बहु ददाति श्राद्धे । अल्पं ददाति प्राशित्रादौ । पकारः पित्कार्यार्थः ।

२२०४ **संख्यैकार्थाद्वीप्सायां शस्** ॥७।२।१६१॥ संख्यावाचिन एकत्वविशिष्टार्थवाचिनश्च कारकाभिधायिनो नाम्नो वीप्सायां द्योत्यायां शस् प्रत्ययः स्यात् । वीप्सायां द्विर्वचनस्य प्राप्तौ तदपवादोऽयम् । वाधिकारात् पक्षे द्विर्वचनमपि भवति । एकैकम् एकशो वा ददाति । द्वौ द्वौ वा द्विशः । एवं त्रिशः । तावच्छः । कतिशः । गणशः। एकैकेन दीयते एकशो दीयते । द्वाभ्यां द्वाभ्यां द्विशः । त्रिशः। तावच्छः । एवं कतिशः । गणशः । एकार्थ–माषं माषं माषशो वा देहि । कार्षापणशः । पणशः । पादशः । पलशः । प्रस्थशः । अर्धशः । पर्वशः । तिलशः । संघशः । पूगशः । वृन्दशः । पङ्क्तिशः । वनशः प्रविशति । कूपीशः खनति । कुम्भीशः कलशीशो ददाति । क्रमश इति क्रमवतामभेदात् क्रमेण क्रमेणेति वीप्सा भवति । संख्यैकार्थादिति किम् । माषौ माषौ ददाति । वीप्सायामिति किम् । द्वौ

---

१ अथ पटदिति व्यक्तवर्णमव्यक्तवर्णस्य कथमनुकरणमनुकरणस्यानुकार्यसदृशत्वादन्यथातिप्रसङ्गः स्यादित्याह–कथंचिदिति ।

ददाति। माषं ददाति। तानेकैकशः पृच्छेत्। एकैकशोऽपि निघ्नन्ति एकैकशो ददातीति वीप्सायां द्विरुक्तात् पूर्वेणाल्पार्थादिति प्रशस्। वीप्सितवीप्सायां वानेनैव शस्। एकैकमेकैकं पृच्छेदित्यर्थः। कारकादित्येव। द्वयोर्द्वयोः स्वामी। माषस्य माषस्येष्टे।

२२०५ संख्यादेः पादादिभ्यो दानदण्डे चाकल् लुक् च ॥७।२।१५२॥ संख्यायाः प्रकृत्याद्यवयवात् परे ये पादादयस्तदन्तानाम्नो दानदण्डे चकाराद् वीप्सायां च विषयेऽकल् प्रत्ययः स्यात् तत्संनियोगे च प्रकृतेरन्तस्य लुक्। द्वौ द्वौ पादौ ददाति द्विपदिकां ददाति। त्रिपदिकां ददाति। द्वे शते व्यवसृजति द्विशतिकां व्यवसृजति। द्विमोदकिकाम्। त्रिमोदकिकां त्यजति। दण्डे-द्वौ पादौ दण्डितः द्विपदिकां दण्डितः। एवं त्रिपदिकां द्विशतिकां त्रिशतिकाम्। द्विमोदकिकां त्रिमोदकिकाम्। वीप्सायाम्-द्वौ द्वौ पादौ भुङ्क्ते द्विपदिकां भुङ्क्ते। त्रिपदिकाम् द्विशतिकाम् त्रिशतिकाम्। द्विमोदकिकाम् त्रिमोदकिकाम्। संख्यादेरिति किम्। पादंददाति। पादंदण्डितः। पादं पादं भुङ्क्ते। पादादिभ्य इति किम्। द्वौ द्वौ माषौ ददाति। दानदण्डे चेति किम्। द्वौ पादौ भुङ्क्ते। चकारो वीप्साया अनुकर्षणार्थः। लकारः स्त्रीत्वार्थः। लुग्वचनम् अनिमित्तलुगर्थम्। तेन पादः पद्भावो भवति। परनिमित्तायां तु लुचि स्थानिवद्भावो न स्यात्। पादादयः प्रयोगतोऽनुसर्तव्याः।

२२०६ तीयाट्टीकण् न चेद् विद्या चेत् ॥७।२।१५३॥ तीयप्रत्ययान्तात् स्वार्थे टीकण् प्रत्ययो वा स्यात् न चेत् तीयान्तस्य विद्या विषयो भवति। द्वितीयम्। द्वैतीयीकम्। तृतीयम्। तार्तीयीकम्। टकारो ङ्यर्थः। द्वैतीयीकी शाटी। न विद्या चेदिति किम्। द्वितीया विद्या। मुखतीयः पार्श्वतीय इति तीयस्यानर्थकत्वान्न भवति।

२२०७ निष्फले तिलात् पिञ्जपेजौ ॥७।२।१५४॥ तिलशब्दान्निष्फलेऽर्थे वर्तमानात् पिञ्ज पेज इत्येतौ प्रत्ययौ स्याताम्। निष्फलस्तिलः तिलपिञ्जः। तिलपेजः।

२२०८ प्रायोऽतोर्द्वयसट् मात्रट् ॥७।२।१५५॥ अतुप्रत्ययान्तात् स्वार्थे द्वयसट् मात्रट् इत्येतौ प्रत्ययौ स्यातां प्रायः। यावदेव यावद्वयसम्। यावन्मात्रम्। तावदेव तावद्वयसम्। तावन्मात्रम्। प्रायोग्रहणं प्रयोगानुसरणार्थम्।

२२०९ वर्णाव्ययात् स्वरूपे कारः ॥७।२।१५६॥ वर्णेभ्योऽव्ययेभ्यश्च

स्वरूपार्थवृत्तिभ्यः स्वार्थे कारः प्रत्ययः स्यात् । अकारः । इकारः । ककारः । खकारः । ककारादिष्वकार उच्चारणार्थः । ओंकारः । स्वाहाकारः । स्वधाकारः । वषट्कारः । हन्तकारः । नमस्कारः । चकारः । इतिकारः । एवकारः । हुंकारः । पूत्कारः । सीत्कारः । सूत्कारः । ननु यथा हुंकृतिः पूत्कृतिः सूत्कृतं सीत्कृतमिति भवन्ति तथा कारशब्देन घञन्तेन समासे ओंकारादयो भविष्यन्ति । सत्यम् । किंतु ओंकारमुच्चारयति वषट्कारमभिधत्ते हुंकारं करोतीत्यादि न सिद्ध्यति । स्वरूप इति किम् । अः विष्णुः इः कामः कः ब्रह्मा खम् आकाशम् ओंब्रह्म वषडिन्द्राय स्वाहाग्नये स्वधा पितृभ्य इत्याद्यर्थपरतायां न भवति । प्रायोऽनुवृत्तेरन्यत्रापि भवति । मन एव मनस्कारः । अहमेवाहंकारः ।

२२१० **रादेफः** ॥७।२।१५७॥ रशब्दादेफः प्रत्ययो वा स्यात् । रेफः । प्रायोवचनाद्रकार इत्यपि ।

२२११ **नामरूपभागाद्धेयः** ॥७।२।१५८॥ नामन् रूप भाग इत्येतेभ्यः स्वार्थे धेयः प्रत्ययो वा स्यात् । नामैव नामधेयम् । रूपमेव रूपधेयम् । भाग एव भागधेयम् ।

२२१२ **मर्तादिभ्यो यः** ॥७।२।१५९॥ मर्त इत्येवमादिभ्यः स्वार्थे यः प्रत्ययो वा स्यात् । मर्त एव मर्त्यः । सूर एव सूर्यः । एवं क्षेम्यः । यविष्यः । भाग्यम् । अपराध्यम् । रव्यम् । लव्यम् । मर्तादयः प्रयोगगम्याः ।

२२१३ **नवादीनतनत्नं च नू चास्य** ॥७।२।१६०॥ नवशब्दात् स्वार्थे ईन तन त्न चकाराद्यश्च प्रत्यया वा स्युः तत्संनियोगे च नवशब्दस्य नू इत्ययमादेशः। नवमेव नवीनम् । नूतनम् । नूत्नम् । नव्यम् ।

२२१४ **प्रात् पुराणे नश्च** ॥ ७।२।१६१ ॥ प्रशब्दात् पुराणेऽर्थे वर्तमानात् स्वार्थे नः प्रत्ययः स्यात् चकारादीनतनत्नाश्च । प्रगतं कालेनेति प्रशब्देन पुराणमुच्यते । प्रणं प्रीणं प्रतनं प्रत्नम् ।

२२१५ **देवात्तल्** ॥७।२।१६२॥ देवशब्दात् स्वार्थे तल् प्रत्ययो वा स्यात् । देव एव देवता । लित्करणं स्त्र्यर्थम् ।

२२१६ होत्राया ईयः ॥७।२।१६३॥ होत्राशब्दात् स्वार्थे ईयः प्रत्ययो वा स्यात् । होत्रैव होत्रीयम् ।

२२१७ भेषजादिभ्यष्ट्यण् ॥७।२।१६४॥ भेषज इत्येवमादिभ्यः स्वार्थे ट्यण् प्रत्ययः स्याद्वा । भेषजमेव भैषज्यम् । अनन्त एव आनन्त्यम् । आवसथ एव आवसथ्यम् । इतिह एव ऐतिह्यम् । इतिहेति निपातसमुदाय उपदेशपारंपर्ये वर्तते । चत्वार एव वर्णाश्चातुर्वर्ण्यम् । चातुराश्रम्यम् । चत्वारो वेदाश्चतस्रो विद्या वा चातुर्वैद्यम् । एवं त्रैविद्यम् । अनुशतिकादित्वादुभयपदवृद्धिः । त्रैलोक्यम् । ऐकभाव्यम् । द्वैभाव्यम् । त्रैभाव्यम् । आन्यभाव्यम् । सार्ववैद्यम् । सार्वलौक्यम् । षाड्गुण्यम् । शीलमेव शैलीयम् आचार्यस्य । भैषज्यानन्त्यावसथ्यैतिह्यश्रद्धा यदि स्त्रियां स्युस्तदा अजादिषु द्रष्टव्याः । भेषजादयः शिष्टप्रयोगगम्याः ।

२२१८ प्रज्ञादिभ्योऽण् ॥७।२।१६५॥ प्रज्ञादिभ्यः स्वार्थे अण् स्याद्वा । प्रजानातीति प्रज्ञः, प्रज्ञ एव प्राज्ञः । प्राज्ञी कन्या । प्रज्ञा अस्या अस्तीति णे प्राज्ञा कन्या । वणिगेव वाणिजः । प्रज्ञादिराकृतिगणः । तेन आग्नीध्री आग्नीध्रा वा शाला साधारणी साधारणा वा भूमिरित्यादि सिद्धम् ।

२२१९ ओत्रौषधिकृष्णाच्छरीरभेषजमृगे ॥७।२।१६६॥ ओत्र ओषधि कृष्ण इत्येतेभ्यो यथासंख्यं शरीरे भेषजे मृगे च वर्तमानेभ्यः स्वार्थेऽण् प्रत्ययो वा स्यात् । ओत्राच्छरीरे—ओत्रमेव औत्रं शरीरम् । ओत्रमेवान्यत् । ओषधेर्भेषजे—ओषधिरेव औषधं भेषजम् । ओषधिरेवान्यत् । कृष्णान्मृगे—कृष्ण एव कार्ष्णो मृगः । कृष्ण एवान्यः ।

२२२० कर्मणः सन्दिष्टे ॥ ७।२।१६७ ॥ सन्दिष्टेऽर्थे वर्तमानात् कर्मणः स्वार्थेऽण् प्रत्ययः स्यात् । अन्येनान्योन्यस्मै यदाह त्वयेदं कर्तव्यमिति तत्सन्दिष्टं कर्म । कर्मैव कार्मणं करोति । सन्दिष्टं कर्म करोतीत्यर्थः । वशीकरणमपि वृद्धपरंपरोपदेशात् क्रियते इति कार्मणमुच्यते । सन्दिष्ट इति किम् । सत्यपि महावाधिकारे विशिष्टोऽर्थः प्रत्ययमन्तरेण न प्रतीयत इति अस्मिन् विषये नित्य एव प्रत्ययः ।

२२२१ वाच इकण् ॥७।२।१६८॥ सन्दिष्टेऽर्थे वर्तमानात् वाच्शब्दात्स्वार्थे

इकण् प्रत्ययः स्यात् । अन्येनान्योऽन्यस्मै यामाह सा सन्दिष्टा वाक् । वागेव वाचिकं कथयति । सन्दिष्टां वाचं कथयतीत्यर्थः । सन्दिष्ट इत्येव । चित्रा वाक् चैत्रस्य । अत्रापि पूर्ववन्नित्यो विधिः ।

२२२२ **विनयादिभ्यः** ॥ ७।२।१६९ ॥ विनयादिभ्यः स्वार्थे इकण् प्रत्ययो वा स्यात् । विनय एव वैनयिकम् । समय एव सामयिकम् । विनयादिराकृतिगणः ।

२२२३ **उपायाद्ध्रस्वश्च** ॥७।२।१७०॥ उपायशब्दात् स्वार्थे इकण् प्रत्ययो वा स्यात् तत्संनियोगे च ह्रस्वः । उपाय एव औपयिकम् ।

२२२४ **मृदस्तिकः** ॥७।२।१७१॥ मृच्छब्दात् स्वार्थे तिकः प्रत्ययो वा स्यात् । मृदेव मृत्तिका ।

२२२५ **सस्नौ प्रशस्ते** ॥७।२।१७२॥ मृद् इत्येतस्मात् प्रशस्तेऽर्थे वर्तमानात् स स्न इत्येतौ प्रत्ययौ वा स्याताम् । रूपप्रत्ययापवादः । प्रशस्ता मृत् मृत्सा मृत्स्ना । केचित्तु रूपमपीच्छन्ति प्रशस्ता मृत् मृद्रूपा ।

२२२६ **प्रकृते मयट्** ॥७।३।१॥ प्राचुर्येण प्राधान्येन वा कृतं प्रकृतम् । प्रकृतेऽर्थे वर्तमानान्नात्रः स्वार्थे मयट् प्रत्ययः स्यात् । अन्नं प्रकृतम् अन्नमयम् । घृतमयम् । दधिमयम् । टकारो ङ्यर्थः । यवागूमयी । अतिवर्तन्तेऽपि स्वार्थिकाः प्रकृतिलिङ्गवचनानीति यवागूः प्रकृता यवागूमयम् । एवमुत्तरत्रापि । अपूपाः प्रकृताः आपूपिकम् । अपूपमयम् । शष्कुल्यः प्रकृताः शाष्कुलिकम् । शष्कुलीमयम् । प्रकृत इति किम् । अन्नम् घृतम् ।

२२२७ **अस्मिन्** ॥७।३।२॥ प्रकृतेऽर्थे वर्तमानान्नात्रोऽस्मिन्निति सप्तम्यर्थे मयट् प्रत्ययः स्यात् । अन्नं प्रकृतमस्मिन्नन्नमयं भोजनम् । अपूपमयं पर्व । वटकमयी यात्रा । यवागूमयी इष्टिः ।

२२२८ **तयोः समूहवच्च बहुषु** ॥७।३।३॥ तयोः 'प्रकृते' 'अस्मिन्' इत्येतयोर्विषययोर्बहुषु वर्तमानान्नात्रः समूहवत् प्रत्ययः स्यात् चकारान्मयट् च । अपूपाः प्रकृता अस्मिन् आपूपिकम् । अपूपमयम् । मौदकिकम् । मोदकमयम् । शाष्कुलिकम् । शष्कुलीमयम् । कवचिद्दृश्यचित्ताच्चेकण् । धैनुकम् । धैनुमयम् ।

'धेनोरनञः'। अपूपाः प्रकृताः अस्मिन् आपूपिकम् अपूपमयं पर्व। मौदकिकी मोदकमयी पूजा। गणिकाः प्रकृता यस्यां यात्रायां गाणिक्या गणिकामयी यात्रा। 'गणिकाया ण्यः' अश्वीया अश्वमयी मात्रा। 'वाश्वादीयः।'

२२२९ **निन्द्ये पाशप्** ॥७।३।४॥ निन्द्येऽर्थे वर्तमानान्नाम्नः स्वार्थे पाशप् प्रत्ययः स्यात्। निन्द्यो वैयाकरणः वैयाकरणपाशः। छान्दसपाशः। निन्द्य इति किम्। साधुर्वैयाकरणः। प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तकुत्सायामयमिष्यते। तेनेह न भवति। वैयाकरणश्चौरः। न ह्यत्र चौर्येण वैयाकरणत्वं कुत्स्यते किं तर्हि शीलमिति। पकारः पुंवद्भावार्थः। कुत्सिता कुमारी कुमारपाशा। किशोरपाशा। अथेह वयोवचनत्वात् पुनर्ङीः कस्मान्न भवति? कुमारादयो वयोवचना न कुमारपाशादयः। निन्दावचना हि ते इति न भवति।

२२३० **प्रकृष्टे तमप्** ॥७।३।५॥ प्रकृष्टे प्रकर्षवत्यर्थे वर्तमानान्नाम्नस्तमप् प्रत्ययः स्यात्। प्रकर्षोऽतिशयः। स च गुणक्रिययोरेव न जातिद्रव्ययोः। सर्वे इमे शुक्लाः अयमेषां प्रकृष्टः शुक्लः शुक्लतमः शुक्लतमौ शुक्लतमाः। एवमाढ्यतमः। सुकुमारतमः। कारकतमः। साधकतमः। प्रकृष्टतमः। जातिद्रव्यवचनेभ्योऽपि गुणक्रियाप्रकर्षविवक्षायां भवति। गौरयं सुसंनहनः शकटं वहति। गोतमोऽयं यः सुलक्षणः शकटं सीरं च वहति। गोतमेयं या समांसमां विजायते स्त्रीवत्सा च। [1]द्रव्यान्तरसमवायिना च प्रकृष्टेन गुणेन कृत्वा प्रकृष्टे द्रव्ये [2]तद्वतः प्रत्ययो भवति। अतिशयेन सूक्ष्माणि वस्त्राण्यस्य सूक्ष्मवस्त्रतमः। प्रकर्षप्रत्ययान्ताच्च प्रकर्षस्यापि प्रकर्षविवक्षायां प्रत्ययो भवति। यथा—युधिष्ठिरः श्रेष्ठतमः कुरूणाम्। तरबन्तात् तु तरप् न भवति अनभिधानात्। तथा यथा पूर्वपदातिशये पूर्वपदाद् बहुव्रीहेर्वा आतिशायिकः प्रत्ययो भवति सूक्ष्मतमवस्त्रः सूक्ष्मवस्त्रतमो वा न तथोत्तरपदातिशये बहुव्रीहेः बह्वाढ्यकतम इति किं तूत्तरपदादेव। बहव आढ्यतमा यत्र बह्वाढ्यतमकः। केचित्तु पूर्वपदातिशये बहुव्रीहेरेवातिशायिकमिच्छन्ति। द्वयोः प्रकर्षे तरपो विधानात् बहूनां प्रकर्षेऽयं विधिः। कथं तर्हि प्रधानमयं ग्रामः प्रधानतमोऽयं ग्रामे, आढ्यं नगरम् आढ्यतमोऽयं नगरे? एकस्मिन्नपि निर्दिष्टे समुदाये तदन्तर्गतावयवान्तरा-

---

१ देवदत्तरूपाद् द्रव्यादन्यद् द्रव्यं वस्त्रादि तत्र समवायी यो गुणः सूक्ष्मत्वादिः तेन।

२ प्रकृष्टगुणवद्द्रव्यवतश्चैत्रादेः। परमार्थवृत्त्याऽस्यैव प्रकर्ष इत्यर्थः।

पेक्षया प्रकर्षे भविष्यन्ति । प्रकृष्ट इति किम् । महत्सर्षपं महान् हिमवानिति । शुक्लापेक्षया च कृष्णे मा भूद् । अदूरविप्रकर्षे समानगुणक्रिययोश्च स्पर्धा भवति । नहि निष्कधनः शतनिष्कधनेन स्पर्धते । आढ्याभिरूपौ वा गन्तृपाचकौ वा । तथा च तन्निमित्तः प्रकर्षोऽपि नास्ति। कथं तर्हि शुक्लकृष्णयोः कृष्णो भास्वरतर इति ? भास्वरत्वमेकजातीयम् तदपेक्षो भविष्यति । कथमन्धानां काणतमः ? अन्धशब्दस्य काणपर्यायत्वात् काणशब्दस्य चान्यपर्यायत्वाददोषः। कथमहिंसकः श्रेयान् पापीयान् प्राणिनां हन्तेत्यत्र तरबर्थे ईयस् ? नैतयोः परस्परं स्पर्धा किं तर्हि अन्यापेक्षा । पकारः पुंवद्भावार्थः । शुक्लतमा शाटी ।

२२३१ **वान्तमान्तितमान्तितोऽन्तियान्तिषद्** ॥ ७।४।३१ ॥ अन्तमादयः शब्दास्तमबादिप्रत्ययान्ताः कृततिकादिलोपादयो वा निपात्यन्ते । अयमेषामतिशयेनान्तिकः अन्तमः पक्षे अन्तिकतमः । अत्रान्तिकशब्दस्य तमप्प्रत्यये तिकशब्दलोपो ' नोऽप्रशानोऽनुस्वारानुनासिकौ च पूर्वस्याधुट्परे ' इति सकाराभावश्च निपात्यते । अयमेषामतिशयेनान्तिकः अन्तितमः । अत्र कशब्दस्य लोपः । पक्षे अन्तिकतमः । अन्तिकादागच्छति । अन्तित आगच्छति । अत्राषादानलक्षणे तसौ कशब्दस्य लोपः । पक्षेऽन्तिकत आगच्छति । अन्तिके साधुः अन्तियः। अत्र यप्रत्यये कशब्दस्य लोपः इकारस्य च लोपाभावः । पक्षे अन्तिक्यः । अन्तिके सीदति अन्तिषद् । अत्र सदिति किबन्ते कलोपः सस्य षत्वं च । पक्षे अन्तिकसत् ।

२२३२ **द्वयोर्विभज्ये च तरप्** ॥ ७।३।६ ॥ द्वयोस्तद्गुणयोरर्थयोर्मध्ये यः प्रकृष्टस्तस्मिन् विभज्ये च विभक्तव्ये च प्रकृष्टेऽर्थे वर्तमानान्नाम्नस्तरप् प्रत्ययः स्यात् । तमपोऽपवादः । द्वाविमौ पटू अयमनयोः प्रकृष्टः पटुः पटुतरः । एवं सुकुमारतरः । पाचकतरः । गोतरो यः शकटं वहति सीरं च । गोतरा या समांसमां विजायते स्त्रीवत्सा च। दन्ताश्च ओष्ठौ च दन्तौष्ठम् । दन्तौष्ठस्य दन्ताः स्निग्धतराः। अत्र यद्यपि विग्रहे बहुत्वसंख्या प्रतीयते तथापि समाहारेऽवयवौ स्वार्थमात्रं दन्तत्वादिलक्षणम् अभेदैकत्वसंख्यायोग्युपाददाते न संख्याभेदमिति द्वयोरेव प्रकर्षः । यदा पुनरितरेतरयोगस्तदा बह्वर्थप्रकर्ष इति तमबेव भवति। अस्माकं च देवदत्तस्य देवदत्तोऽभिमुख्यतरः । अत्रास्माकमित्येकस्यैव ' अविशेषणे द्वौ चास्मदः ' इति बहुवद्भावः । परुद्भावाद् पटुरासीत् पटुतर ऐषमः । अत्रैकस्यापि पर्यायार्थार्पणया द्वित्वमिति द्वयोरेव प्रकर्षः।विभज्ये–सांकाश्यकेभ्यः पाटलिपुत्रका आढ्यतराः।

अभिरूपतराः। सुकुमारतराः। सांकाश्यकादिषु पाटलिपुत्रकादीनामप्रवेशात् विभागः। विभज्यस्य च विशेषणमप्याढ्याद्यर्थः प्रकृष्टं विभज्यं भवति ततः प्रत्ययः। द्वयोर्विभज्ये चेति किम्। गवां कृष्णा संपन्नक्षीरतमा। सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका आढ्यतमा इत्यत्र राश्यपेक्षया द्वित्वेऽपि शब्देन बहुत्वोपादानात् तरप् न भवति। विभज्यग्रहणमद्वित्वार्थम्। प्रकृष्ट इत्येव। अयमनयोः पटुः। सांकाश्यकेभ्यः पाटलिपुत्रका आढ्याः। पकारः पुंवद्भावार्थः। शुक्लतरा शाटी।

२२३३ **क्वचित्** ॥ ७।३।७ ॥ स्वार्थेऽपि तरप् प्रत्ययः स्यात्। प्रकृष्टे सिद्ध एव। अभिन्नमेवाभिन्नतरकम्। उपपन्नमेवोपपन्नतरकम्। उच्चैरेवोच्चैस्तराम्। क्वचिद्ग्रहणं शिष्टप्रयोगानुसरणार्थम्।

२२३४ **किंत्याद्येऽव्ययादसत्त्वे तयोरन्तस्याम्** ॥ ७।३।८ ॥ किंशब्दात् त्याद्यन्तात् एकारान्तादव्ययेभ्यश्च परयोस्तमप्तरपोरन्तस्यामित्ययमादेशः स्यात् असत्त्वे–न चेत् तौ सत्त्वे द्रव्ये इदं तदिति परामर्शयोग्ये प्रकृष्टे वर्तेते। इदमनयोरतिशयेन किं पचति किंतरां पचति इदमेषामतिशयेन किं पचति किंतमां पचति। त्यादि–द्वाविमौ पचतः अयमनयोरतिशयेन पचति पचतितराम्। सर्वे इमे पचन्ति अयमेषां प्रकृष्टं पचति पचतितमाम्। अस्मादेव वचनात् त्याद्यन्तादपि व्यर्थप्रकर्षे तरप् बह्वर्थप्रकर्षे तमप् भवति। पूर्वाह्णेतराम् पूर्वाह्णेतमाम् भुङ्क्ते। अपराह्णेतराम्। अपराह्णेतमाम्। प्राह्णेतराम्। प्राह्णेतमाम्। प्रगेतराम्। प्रगेतमाम्। अग्रेतराम्। अग्रेतमाम्। एग्रहणसामर्थ्यात् काले सत्वेऽप्याम् भवति नान्यस्मिन्नेदन्ताभावात्। अग्रेशब्दोऽपि कालवाची। अथवा विभक्त्यर्थो न द्रव्यम्। तत्प्रकर्षेऽत्र तरप्तमपौ। शोभनो हेशब्दो यस्य सुहेतर इत्यत्रानभिधानान्न भवति। क्रियाशब्देभ्यश्च–जयतीति विचि जेः जेतर इत्यादि। अव्यय–नितराम्। नितमाम्। अतितराम्। अतितमाम्। अतीवतराम्। नतराम्। उच्चैस्तराम्। उच्चैस्तमाम्। किंत्याद्येऽव्ययादिति किम्। शीघ्रतरं गच्छति। असत्त्व इति किम्। किंतरं दारु। उच्चैस्तरः उच्चैस्तमो वृक्षः। उत्तरः। उत्तमः।

२२३५ **गुणाङ्गाद्वेष्ठेयसू** ॥७।३।९॥ तयोरिति सप्तम्या विपरिणम्यते। गुणोऽङ्गं प्रवृत्तिनिमित्तं यस्य स गुणाङ्गः। यः शब्दो गुणमभिधाय द्रव्ये वर्तते।

तस्मात्तयोस्तमप्ततरपोर्विषये यथासंख्यमिष्ठ ईयसु इत्येतौ प्रत्ययौ वा स्याताम् । पक्षे यथाप्राप्तं तमप्ततरपौ च । तमबर्थे इष्ठः । अयमेषामतिशयेन पटुः पटिष्ठः पटुतमः । पटिष्ठौ पटुतमौ । पटिष्ठाः । पटुतमाः । एवं लघिष्ठः । लघुतमः । गरिष्ठः । गुरुतमः । म्रदिष्ठः । मृदुतमः । तरबर्थे ईयसुः । अयमनयोरतिशयेन पटुः पटीयान् तटुतरः । गरीयान् । गुरुतरः । लघीयान् । लघुतरः । म्रदीयान् । मृदुतरः । परुद्धवान् पटुरासीत् पटीयानेषमः । पटुतरः । माथुरेभ्यः पाटलिपुत्रकाः पटीयांसः पटुतराः । गुणग्रहणं किम् । गोतरः । गोतमः । पाचकतरः । पाचकतमः । दन्तौष्ठस्य दन्ताः स्निग्धतराः । परुद्धवान् विद्वानासीत् ऐषमो विद्वत्तर इति । अत्र जातिक्रियाङ्गवान्न भवति । अङ्गग्रहणं किम् । शुक्लतरं शुक्लतमं रूपम् । अत्र हि गुण एव वृत्तिर्न तदुपसर्जने द्रव्ये इति न भवति । ईयसोरुकार उदित्कार्यार्थः । पटीयसी ।

२२३६ **विन्मतोर्णीष्ठेयसौ लुप्** ।७।४।३२॥ विन्मतु इत्येतयोः प्रत्यययोर्णि इष्ठ ईयसु इत्येतेषु प्रत्ययेषु परेषु लुप् स्यात् ।

२२३७ **नैकस्वरस्य** ॥७।४।४४॥ एकस्वरस्य शब्दरूपस्य योऽन्त्यस्वरादिरवयवस्तस्येमनि णीष्ठेयसुषु च परेषु लुग्न स्यात् । अयमेषां स्रग्विणामतिशयेन स्रग्वी स्रजिष्ठः । अयमनयोः स्रग्विणोरतिशयेन स्रग्वी स्रजीयान् ।

२२३८ **अल्पयूनोः कन्वा** ॥७।४।३३॥ अल्प युवन् इत्येतयोर्णि इष्ठ ईयसु इत्येतेषु परेषु कन् इत्ययमादेशो वा स्यात् । कनिष्ठः । कनीयान् । पक्षे अल्पिष्ठः । अल्पीयान् । यविष्ठः । यवीयान् ।

२२३९ **प्रशस्यस्य श्रः** ॥७।४।३४॥ प्रशस्यशब्दस्य णीष्ठेयसुषु परतः श्र इत्ययमादेशः स्यात् । श्रेष्ठः । श्रेयान् ।

२२४० **वृद्धस्य च ज्यः** ॥७।४।३५॥ वृद्धशब्दस्य प्रशस्यशब्दस्य च णीष्ठेयसुषु परतो ज्य इत्यादेशः स्यात् । ज्येष्ठः ।

२२४१ **ज्यायान्** ॥७।४।३६॥ ज्यायानिति पूर्वसूत्रेण विहिताज्ज्यादेशात् परस्येयसोरीकारस्य आकारादेशो निपात्यते । अयमनयोरतिशयेन प्रशस्यो वृद्धो वा ज्यायान् । ज्यायसी ।

२२४२ **बाढान्तिकयोः साधनेदौ** ॥७।४।३७॥ बाढ–अन्तिकयोर्णीष्ठेयसुषु परतो यथासंख्यं साध नेद इत्येतावादेशौ स्याताम्। साधिष्ठः। साधीयान्। नेदिष्ठः। नेदीयान्। प्रियस्थिरेत्यादिना णीष्ठेयसुषु यथासंख्यं प्रा इत्यादय आदेशाः। प्रियस्य प्रा, प्रेष्ठः प्रेयान्। स्थिरस्य स्था, स्थेष्ठः स्थेयान्। स्फिरस्य स्फा, स्फेष्ठः स्फेयान्। ऊरोर्वर, वरिष्ठः वरीयान्। गुरोर्गर्, गरिष्ठः गरीयान्। बहुलस्य बंह्, बंहिष्ठः बंहीयान्। तृप्रस्य त्रप्, त्रपिष्ठः त्रपीयान्। दीर्घस्य द्राघ्, द्राघिष्ठः द्राघीयान्। वृद्धस्य वर्ष्, वर्षिष्ठः वर्षीयान्। वृन्दारकस्य वृन्द्, वृन्दिष्ठः वृन्दीयान्। पृथुमृदुभृशेत्यादिना पृथ्वादीनां ऋकारस्य णीष्ठेयसुषु रः। प्रथिष्ठः। प्रथीयान्। म्रदिष्ठः। म्रदीयान्। भ्रशिष्ठः। भ्रशीयान्। क्रशिष्ठः। क्रशीयान्। द्रढिष्ठः। द्रढीयान्। परिव्रढिष्ठः। परिव्रढीयान्। केचित्तु वृढशब्दस्यापीच्छन्ति। व्रढिष्ठः। व्रढीयान्।

२२४३ **बहोर्णीष्ठे भूय्** ॥७।४।४०॥ बहुशब्दस्य णीष्ठयोः परयोर्भूय् इत्ययमादेशः स्यात्। भूमापवादः। भूयिष्ठः। भूर्लुक् चेवर्णस्य। भूयान्। स्थूलदूरेत्यादिना स्थूलादीनां अन्तस्थादेरवयवस्य लुकि नामिनश्च गुणे स्थविष्ठः स्थवीयान्। दूर–दविष्ठः। दवीयान्। युवन्–यविष्ठः यवीयान्। ह्रसिष्ठः ह्रसीयान्। क्षेपिष्ठः क्षेपीयान्। क्षोदिष्ठः। क्षोदीयान्। 'अन्त्यस्वरादेः' करिष्ठः करीयान्।

२२४४ **त्यादेश्च प्रशस्ते रूपप्** ॥७।३।१०॥ त्याद्यन्तान्नाम्नश्च प्रशस्तेऽर्थे वर्तमानाद्रूपप् प्रत्ययः स्यात्। प्रशस्तं पचति पचतिरूपम्। पचतोरूपम्। पचन्तिरूपम्। त्याद्यन्तानां क्रियाप्रधानत्वात् तस्याश्च साध्यत्वेन लिङ्गसंख्याभ्यामयोगात् रूपबन्तस्यौत्सर्गिकमेकवचनं नपुंसकलिङ्गं च भवति। प्रशस्तो वैयाकरणो वैयाकरणरूपः। पण्डितरूपः। प्रकृते प्रवृत्तिनिमित्तस्य वैस्पष्ट्यं परिपूर्णता प्रशस्तत्वम्। तेनात्रापि भवति। वृषलरूपोऽयमपि पलाण्डुना सुरां पिबेत्। दस्युरूपोऽयमप्यक्ष्णोरञ्जनं हरेत्। पटुतमरूपः पटुतररूपः। पकारः पुंवद्भावार्थः। शोभनरूपा। दर्शनीयरूपा।

२२४५ **अतमबादेरीषदसमाप्ते कल्पप् देश्यप् देशीर्** ॥७।३।११॥ त्यादेश्चेति वर्तते। संपूर्णता पदार्थानां समाप्तिः। सा किंचिदूना ईषदसमाप्तिः। तद्विशिष्टेऽर्थे वर्तमानात् त्याद्यन्तान्नाम्नश्च तमबाद्यन्तवर्जितात् कल्पप् देश्यप् देशीयर् इत्येते प्रत्ययाः स्युः। ईषदसमाप्तं पचति पचतिकल्पम्। पचतिदेश्यम्। पचतिदेशी-

यम् । पचतःकल्पम् । पचतोदेश्यम् । पचतोदेशीयम् । पचन्तिकल्पम् । पचन्तिदेश्यम् । पचन्तिदेशीयम् । पक्ष्यतिकल्पम् । अपाक्षीत्कल्पमित्यादि । पूर्ववन्नपुंसकत्वमेकवचनं च । इदमेव त्यादिग्रहणं ज्ञापकं शेषस्तद्धितो नाम्न एव भवति । ईषदसमाप्तः पटुः पटुकल्पः पटुदेश्यः पटुदेशीयः । कारककल्पः । कारकदेश्यः कारकदेशीयः । कृतकल्पम् । भुक्तदेश्यम् । पीतदेशीयम् । ईषदसमाप्तो गुडो गुडकल्पा गुडदेश्या, गुडदेशीया द्राक्षा । पयस्कल्पा यवागूः । चन्द्रकल्पं मुखम् । तैलकल्पा प्रसन्ना । गुडादिधर्माणां माधुर्यादीनां द्राक्षादिष्वीषदसमाप्तत्वात् गुडादित्वेनेषदसमाप्ता द्राक्षादय एवमुच्यन्ते कल्पबाद्यन्तमुपमेये वर्तमानमुपमेयलिङ्गसंख्यम् । बहुप्रत्ययपूर्वे तु प्रकृतिलिङ्गसंख्यम् । स्वभावाच्छब्दशक्तिरेषा यदुत स्वार्थिकाः केचित् प्रकृतिलिङ्गान्यतिवर्तन्ते यथा कुटीरः शुण्डारः शमीरुः शमीरः दैवतम् औपयिकम् औषधम् वाचिकमिति । केचित्तु नातिवर्तन्ते यथा यावकः मणिकः बृहतिका मृत्तिकाकासूतरी गोणीतरी व्यावक्रोशी व्यावहासीति । अतमबादेरिति किम् । यदा प्रकर्षादिविशिष्टस्येषदसमाप्तिविवक्षा तदा तमबादिभ्यः कल्पबादयः प्राप्नुवन्त्यतस्ते मा भूवन् । यदा त्वीषदसमाप्तस्य प्रकर्षादयो विवक्ष्यन्ते तदा कल्पबाद्यन्तेभ्यस्तमबादयो भवन्त्येव । पटुकल्पतमः । पटुकल्पतरः । पटुदेश्यतमः । पटुदेश्यतरः । पटुकल्परूपः । पटुदेश्यरूपः । पकारौ पुंवद्भावार्थौ । दर्शनीयकल्पा । दर्शनीयदेश्या । केचिद् देश्यं पितं नेच्छन्ति तन्मते दर्शनीयादेश्या इत्येव भवति । देशीयर् इति रेफो रितीत्यत्र विशेषणार्थः । स्रौघ्रदेशीया । पञ्चमदेशीया ।

२२४६ **नाम्नः प्राग्बहुर्वा** ॥७।३।१२॥ ईषदसमाप्तेऽर्थे वर्तमानान्नाम्नो बहुप्रत्ययो वा स्यात् स च प्राक्–पुरस्तादेव न परस्तात् । ईषदसमाप्तः पटुः बहुपटुः । बहुमृदुः । बहुभुक्तम् । बहुपीतम् । बहुगुडो द्राक्षा । बहुतैलं प्रसन्ना । बहुपयो यवागूः । बहुचन्द्रो मुखम् । नामग्रहणं त्याद्यन्तनिवृत्त्यर्थम् । त्याद्यन्तेषु सावकाशाः कल्पबादयो बहुना मा बाधिषतेति वावचनम् । तेन पक्षे तेऽपि भवन्ति ।

२२४७ **न तमबादिः कपोऽच्छिन्नादिभ्यः** ॥७।३।१३॥ छिन्नादीन् वर्जयित्वान्यस्माद्यः कप् प्रत्ययस्तदन्तात् तमबादिः प्रत्ययो न स्यात् । अयमेषामनयोर्वा प्रकृष्टः पटुकः । प्रकर्षादिमतः कुत्सितत्वादिविवक्षायां तमबाद्यन्तेभ्यः कप् भवत्येव । अयमेषामनयोर्वा अतिशयेन पटुः कुत्सितः पटुतमकः पटुतरकः । पटुरूपकः । पटुक-

ल्पकः । पटुदेश्यकः । पटुदेशीयकः । कप इति किम् । कुटीरतमः । पकारः किम् । लोहितकतमो मणिः। लोहितकतममक्षि कोपेन। अच्छिन्नादिभ्य इति किम्। कुत्सितोऽल्पोऽज्ञातो वा छिन्नः छिन्नकः। अयमेषामनयोर्वा अतिशयेन छिन्नकः छिन्नकतमः, छिन्नकतरः । छिन्नकरूपः। छिन्नककल्पः। छिन्नादयः प्रयोगगम्याः।

२२४८ **अनत्यन्ते** ॥७।३।१४॥ अनत्यन्तेऽर्थे यः कप् तदन्तात् तमबादिर्न स्यात् । छिन्नाद्यर्थं वचनम् । अनत्यन्तं छिन्नं छिन्नकम् । अनत्यन्तं भिन्नं भिन्नकम्। इदमेषामनयोर्वा प्रकृष्टं छिन्नकं भिन्नकम् । यदा तु प्रकर्षवतोऽनत्यन्तविशिष्टविवक्षा तदा तमबाद्यन्तात् 'क्तात्तमबादेश्चानत्यन्ते' इति कब् भवत्येव । छिन्नतमकम् । छिन्नतरकम् । भिन्नतमकम् । भिन्नतरकम् ।

२२४९ **यावादिभ्यः कः** ॥७।३।१५॥ याव इत्येवमादिभ्यः स्वार्थे कः प्रत्ययः स्यात् । याव एव यावकः । मणिरेव मणिकः । अविरेव अविकः । यावादिराकृतिगणः । तेनाभिन्नतरकम् बहुतरकमित्यादि सिद्धम् ।

२२५० **कुमारीक्रीडनेयसोः** ॥७।३।१६॥ कुमारीणां यानि क्रीडनानि तद्वाचिभ्य ईयसुप्रत्ययान्तेभ्यश्च स्वार्थे कः प्रत्ययः स्यात् । कन्दुरेव कन्दुकः । उत्कण्टकः। गिरिकः। समुद्गकः। दोलिका । भ्रमरकः। शृङ्गकम् । ईयसु–श्रेयानेव श्रेयस्कः । ज्यायस्कः। भूयस्कः ।

२२५१ **लोहितान् मणौ** ॥७।३।१६॥ लोहितशब्दान्मणौ वर्तमानात् स्वार्थे कः प्रत्ययो वा स्यात् । लोहित एव लोहितको मणिः । लिङ्गविशिष्टस्यापि ग्रहणाल्लोहिन्येव लोहिनिका मणिः । लोहितैव लोहितिका मणिः । मणेर्विशेषणमेतदित्येके । नामधेयमित्यन्ये । वाधिकारान्न भवत्यपि । लोहितो मणिः मणाविति किम् । लोहिता गौः ।

२२५२ **रक्तानित्यवर्णयोः** ॥७।३।१८॥ रक्ते द्रव्यान्तरेण लाक्षादिना वर्णान्तरमापादितेऽनित्ये च वर्णे वर्तमानाल्लोहितशब्दात् कः प्रत्ययो वा स्यात् । रक्ते–लोहित एव लोहितकः पटः । लिङ्गविशिष्टस्यापि ग्रहणात् लोहिनिका लोहितिका शाटी। अनित्यवर्णे–लोहितकमक्ष्णो रूपं कोपेन। लोहतकमक्षि कोपेन। लोहिनिका लोहितिका कन्या कोपेन । वाधिकारान्न भवत्यपि । लोहिता लोहिनी

वा कोपेन । नित्योऽपि रक्तो वर्णोऽस्ति यथा कृमिरागादिरक्ते पट इति रक्तग्रहणम् । अनित्यग्रहणं किम् । लोहित इन्द्रगोपकः । सत्येवाश्रयद्रव्येऽपयन्निहानित्य उच्यते । अन्यथा रक्तग्रहणस्यानर्थक्यात् । वर्णग्रहणं द्रव्यनिवृत्त्यर्थम् । असति वर्णग्रहणे स्त्रीणामार्तवे द्रव्ये स्यात् । तद्धि सत्येवाश्रये स्त्रियां कदाचिन्न भवति लोहितशब्दवाच्यं च ।

२२५३ **कालात्** ॥७।३।१९॥ कालशब्दात् कज्जलादिना रक्ते अनित्यवर्णे चार्थे वर्तमानात् कः प्रत्ययो वा स्यात् । रक्ते—काल एव कालकः पटः। अनित्यवर्णे-कालकं मुखं वैलक्ष्येण । वाधिकाराच्च भवत्यपि । कालः पटः । कालं मुखम् ।

२२५४ **शीतोष्णादृतौ** ॥७।३।२०॥ शीतोष्णशब्दाभ्यामृतौ वर्तमानाभ्यां कः प्रत्ययो वा स्यात् । शीत एव शीतकः, उष्णकः ऋतुः । ऋताविति किम् । शीतो वायुः । उष्णः स्पर्शः ।

२२५५ **लूनवियातात् पशौ** ॥७।३।२१॥ लूनवियातशब्दाभ्यां पशौ वर्तमानाभ्यां स्वार्थे कः प्रत्ययो वा स्यात् । लून एव लूनकः । वियातकः पशुः । पशाविति किम् । लूनो यवः। वियातो बटुः। विहानशब्दादपीच्छन्त्येके । विहानकः पशुः । विहान एवान्यत्र ।

२२५६ **स्नातात् वेदसमाप्तौ** ॥७।३।२२॥ स्नातशब्दाद् वेदसमाप्तौ गम्यमानायां कः प्रत्ययः स्यात् । वेदं समाप्य स्नातः स्नातकः। वेदसमाप्ताविति किम् । तीर्थे स्नातः

२२५७ **तनुपुत्राणुबृहतीशून्यात् सूत्रकृत्रिमनिपुणाच्छादनरिक्ते** ॥७।३।२३॥ तनुपुत्राणुबृहतीशून्य इत्येतेभ्यो यथासंख्यं सूत्रकृत्रिमनिपुणाच्छादनरिक्त इत्येतेष्वर्थेषु वर्तमानेभ्यः स्वार्थे कः प्रत्ययः स्यात् । तनोः सूत्रे, तनु सूत्रं तनुकं भङ्गादिमयं कल्पादि च । सूत्र इति किम् । तनुर्वंशः । पुत्रात् कृत्रिमे, कृत्रिमस्तक्षादिव्यापारनिष्पादितः । कृत्रिमः पुत्रः पुत्रकः । कृत्रिम इति किम् । औरसः पुत्रः । अणोर्निपुणे, निपुणो निष्णातोऽणुः अणुकः । निपुण इति किम् । अणुर्व्रीहिः । बृहत्या आच्छादने, बृहतिका आच्छादनविशेषः । प्रत्ययमन्तरेणार्थानवगमात् नित्य एवायं विधिः। आच्छादन इति किम् । बृहती छन्दः। बृहती ओषधिः। शून्यादिक्ते,

रिक्तो धनप्रज्ञादिना, शून्य एव शून्यकः रिक्तश्चेत् । रिक्त इति किम् । शुने हितं शून्यम् । अन्ये तु सूत्रादयोऽर्थाः प्रत्ययमन्तरेण न प्रतीयन्ते इति तद्विषये तन्वादिभ्यो नित्य एव प्रत्ययविधिरिति मन्यन्ते । एवं पूर्वसूत्रेऽपि ।

२२५८ **भागेऽष्टमाञ्ञः** ॥ ७।३।२४ ॥ अष्टमशब्दाद् भागेऽंशे वर्तमानात् स्वार्थे ञः प्रत्ययो वा स्यात् । अष्टम एव अष्टमो भागः । भाग इति किम् । अष्टमो जिनः चन्द्रप्रभः।

२२५९ **षष्ठात्** ॥७।३।२५॥ षष्ठशब्दाद्भागे वर्तमानात् स्वार्थे ञः प्रत्ययो वा स्यात् । षष्ठ एव षाष्ठो भागः । भाग इति किम् । षष्ठो जिनः पद्मप्रभः । योगविभाग उत्तरार्थः ।

२२६० **माने कञ्च** ॥७।३।२६॥ मीयते येन तन्मानम् । तस्मिन् माने भागे वर्तमानात् षष्ठशब्दात् कश्चकाराञ्ञश्च प्रत्ययौ वा स्याताम् । षष्ठ एव षष्ठकः षाष्ठो भागः मानं चेत् । मान इति किम् । षष्ठ एव षाष्ठो भागोऽन्यः ।

२२६१ **एकादाकिन् चासहाये** ॥७।३।२७॥ एकशब्दादसहायार्थवाचिन आकिन् स्यात् चात्कश्च । एक एव एकाकी, एककः । असहाय इति किम् । एके आचार्याः। एको द्वौ बहवः।

२२६२ **प्राग् नित्यात् कप्** ॥७।३।२८॥ नित्यशब्दसंकीर्तनात् प्राग्येऽर्थास्तेषु द्योत्येषु कप् प्रत्ययोऽधिकृतो वेदितव्यः । कुत्सितोऽल्पोऽज्ञातो वा अश्वः अश्वकः । पकारः पुंवद्भावार्थः । कुत्सिता दरद् दारदिका । प्राग्नित्यादित्यवध्यर्थम् । अन्यथापवादबाधितो नोत्तरत्रानुवर्तेत । परतोऽपि चानुवर्तते ।

२२६३ **त्यादिसर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्** ॥७।३।२९॥ त्याद्यन्तस्य सर्वादीनां च स्वरेषु स्वराणां मध्ये योऽन्त्यस्वरस्तस्मात् पूर्वोऽक् प्रत्ययः स्यात् । प्राग्नित्यात् कपोऽपवादः । कुत्सितमल्पमज्ञातं वा पचति पचतकि । सर्वके । विश्वके । सर्वकस्मै । यकत्पिता । तकत्पिता । त्वकत्पिता । मकत्पिता । परमसर्वके । तदन्तस्यापि सर्वावित्वस्तीति अत्राप्यक् । स्वरेष्वन्त्यादिति किम् । आद्यन्तात् सर्वादेश्च पूर्वं मा भूत् । पूर्व इति किम् । परो मा भूत् ।

२२६४ युष्मदस्मदोऽसोभादिस्यादेः ॥७।३।३०॥ युष्मदस्मदित्येतयोः सकाराद्योकारादिभकारादिवर्जितस्याद्यन्तयोः स्वरेष्वन्त्यात् पूर्वोऽक् प्रत्ययः स्यात् । युष्मस्मदोः स्वरेष्वन्त्यात् पूर्वस्यापवादः । त्वयका । मयका । त्वयकि । मयकि । युष्माककम् । अस्माककम् । परमत्वयका । परममयका । युष्मदस्मद इति किम् । तकया । यकया । सर्वकेण । विश्वकेन । इमकेन । अमुकेन । इमकैः । अमुकैः । भवकन्तौ । भवकन्तः । केचिद् भवच्छब्दस्यापि स्याद्यन्तस्यास्वरात् पूर्वमकमिच्छन्ति । तन्मते भवतका, भवतके, भवतकः, भवतकीत्यपि भवति । असोभादिस्यादेरिति किम् । युष्मकासु, अस्मकासु, युवकयोः, आवकयोः, युवकाभ्याम्, आवकाभ्याम् । युष्मकाभिः । अस्मकाभिः ।

२२६५ अव्ययस्य को द् च ॥७।३।३१॥ प्राङ्नित्याद्येऽर्थास्तेषु द्योत्येषु अव्ययस्य स्वरेष्वन्त्यात् पूर्वमक् प्रत्ययः स्यात् , तत्संनियोगे च यत्ककारान्तमव्ययं तस्य दकारोऽन्तादेशः स्यात् । कपोऽपवादः । कुत्सितमल्पमज्ञातं वा उच्चैः उच्चकैः, नीचैस् नीचकैः । धिक् धकित् । हिरुक् हिरकुद् । पृथक् पृथकद् । चकारोऽन्वाचये, तेन सर्वस्याव्ययस्याक् स्यात् । ककारान्तस्य त्वक् दान्तादेशश्च । योगविभागस्त्यादेर्दादेशाभावार्थः । शक्लृंट् शक्तौ । यङ्लुप् दिव् । अशाशक् । अकि अशाशकक् ।

२२६६ तूष्णीकाम् ॥७।३।३२॥ तूष्णीकामिति तूष्णीमो मकारात् पूर्वं का इत्यागमो निपात्यते प्राङ् नित्यात् । अकोऽपवादः । कुत्सितमल्पमज्ञातं वा तूष्णीं तूष्णीकामास्ते । तूष्णीकां तिष्ठति ।

२२६७ कुत्सिताल्पाज्ञाते ॥७।३।३३॥ कुत्सितं निन्दितम् । अल्पं महत्मतियोगि । अज्ञातं प्रकृत्युपात्तधर्मव्यतिरेकेण केनचित् स्वत्वादिना धर्मेणानिश्चितम् । सर्वथा त्वज्ञाते प्रयोगाभावात् । कुत्सिताल्पाज्ञातोपाधिकेऽर्थे वर्तमानाद्यथायोगं कवादयः प्रत्ययाः स्युः । कुत्सितोऽल्पोऽज्ञातो वाश्वः अश्वकः । गर्दभकः । घृतकम् । तैलकम् । पचतकि । भिन्धकि । सर्वके । विश्वके । उचकैः । नीचकैः । तूष्णीकाम् । कथं कुत्सितकः, अल्पकः, अज्ञातकः ? कुत्सादीनां भेदोपपत्तेः कुत्सितादिभ्योऽपि कुत्सितादौ प्रत्ययो भवति, प्रकृष्टतर इत्यादौ प्रकर्षभेदे तरबादिवत् । राधकः, पूर्णकः, शूद्रक इत्यादौ सत्यामपि संज्ञायां कुत्सायोगात् कुत्सित इत्येव कप् ।

व्याकरणेन नाम त्वं गर्वितः, याज्ञिक्यकेन नाम त्वं विकत्थसे इत्यादौ अवक्षेपणमपि कुत्सितमेव। न ह्यकुत्सितेनावक्षिप्यते।

२२६८ अनुकम्पातद्युक्तनीत्योः ॥७।३।३४॥ अनुकम्पा कारुण्येन परस्यानुग्रहः। तया अनुकम्पया युक्ता नीतिस्तद्युक्तनीतिः। नीतिः सामादिप्रयोगः। तत्रानुकम्पायां सामोपप्रदाने एव न भेददण्डौ तयोः अनुकम्पाया अयोगात्। अनुकम्पायां तद्युक्तायां नीतौ च गम्यमानायां यथायोगं कबादयः स्युः। अनुकम्पा तन्नीतिश्च प्रयोक्तृधर्मौ वेदितव्यौ। पुत्रकः। वत्सकः। बालकः बुभुक्षितः। ज्वरितकः। शनकैः। तूष्णीकाम् स्वपितकि। स्वपिषकि। जल्पतकि। एहकि। अनुकम्पमान एवं प्रयुङ्क्ते पुत्रक एहकि उत्सङ्गके उपविश कर्दमकेनासि दिग्धकः कण्टकस्ते लग्नकः। वत्सक तूष्णीकां तिष्ठ ओदनं भोक्ष्यसे हन्त ते गुडका हन्त ते धानकाः अद्धकि। अत्रोपविश असि तिष्ठ ओदनं भोक्ष्यसे हन्त ते इत्येतेषु अनभिधानान्न भवति। यत्र त्वभिधानं तत्र भवति। नक त्वकं पुत्रक पश्यसकि। असकौ काकको वृक्षके उच्चैः प्रणिलीयते। अनुकम्पायां प्रत्यासत्तेरनुकम्प्यमानादेव स्यात् नान्यस्मात् उत्सङ्गादेस्ततोऽपि यथा स्यादिति तद्युक्तनीतिग्रहणम्।

२२६९ अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा ॥७।३।३५॥ तद्युक्तनीताविति न वर्तते अनुकम्प्यादेव प्रत्ययविधानात्। नृनाम्नो—मनुष्यनामधेयाद् बहुस्वरादनुकम्पायां गम्यमानायां इय इक इल इत्येते प्रत्यया वा स्युः अजातेः—न चेन्मनुष्यनाम जातिशब्दो भवति अनुकम्पितो देवदत्तः देवियः देविकः, देविलः। वा वचनात् कबपि। देवदत्तकः। जिनियः। जिनिकः। जिनिलः। जिनदत्तकः। अजातेरिति किम्। महिषकः। वराहकः। शरभकः। सूकरकः। गर्दभकः। एते जातिशब्दा मनुष्यनामानि च। अजातेरिति प्रायिको निषेधः इत्यन्ये। व्याघ्रिलः सिंहिल इति हि दृश्यते। तन्मते बहुस्वरादित्यपि प्रायिकम्। नृनाम्न इति किम्। सुसीमकः। नृग्रहणं किम्। अनुकम्पितो देवदत्तो हस्ती देवदत्तकः। नामग्रहणं किम्। मद्रबाहुकः। विशेषणमेतन्न नाम। बहुस्वरादिति किम्। रामकः। गुप्तकः।

२२७० वोपादेरडाकौ च ॥७।३।३६॥ उपपूर्वादजातिरूपान्मनुष्यनामधेयाद् बहुस्वरादनुकम्पायां गम्यमानायां अड अक चकारात् इय इक इल इत्येते प्रत्यया वा भवन्ति। अनुकम्पित उपेन्द्रदत्तः उपडः। उपकः। उपियः। उपिकः। उपिलः। वावचनात् पक्षे कबपि। उपेन्द्रदत्तकः।

२२७१ ऋवर्णोवर्णान्तस्वरादेरादेर्लुक् प्रकृत्या च ॥७।३।३७॥ ऋवर्णान्तादुवर्णान्ताच्च परस्यानुकम्पायां विहितस्य स्वरादेः प्रत्ययस्यादेर्लुक् स्यात् तच्च ऋवर्णोवर्णान्तं लुकि सति प्रकृत्या तिष्ठति । न विकारमापद्यत इत्यर्थः । अनुकम्पितो मातृदत्तः मातृयः, मातृकः, मातृलः । अनुकम्पितो वायुदत्तः । वायुयः, वायुकः, वायुलः । अनुकम्पितो भानुदत्तः भानुयः । भानुकः भानुलः । प्रकृतिवद्भावात् रेफावादेशौ न भवतः । ऋवर्णोवर्णादिति किम् । अनुकम्पितो देवदत्तो देवियः, देविकः, देविलः । अनुकम्पितो वागाशीः वाचियः वाचिकः वाचिलः । स्वरादेरिति किम् । मद्बाहुकः । आदेरिति किम् । सर्वस्य मा भूत् ।

२२७२ लुक्युत्तरपदस्य कप्न् ॥७।३।३८॥ नृनाम्नो यदुत्तरपदं तस्य ते लुग्वेति लुकि सति ततः कप्न् प्रत्ययः स्यात् अनुकम्पायां गम्यमानायाम् । कबादीनामपवादः । देवदत्तो देवः । अत्र ' ते लुग्वा ' इत्युत्तरपदलोपः । अनुकम्पितो देवः देवकः । एवमनुकम्पितो यज्ञः यज्ञकः । पकारः पुंवद्भावार्थः । नकारः ' इचापुंसोऽनित्क्याप्परे ' इत्यत्र पर्युदासार्थः । अनुकम्पिता देवी देवका । अत्र कप्रि सति पित्त्वात् पुंवद्भावे नित्त्वादाप्परेऽपि ककारे इत्वं न भवति । उत्तरपदस्येति किम् । देवदत्ता दत्ता । अत्र ' ते लुग्वा ' इति पूर्वपदस्य लुक् । अनुकम्पिता दत्ता दत्तिका । पूर्वेण कप् ।

२२७३ लुक् चाजिनान्तात् ॥७।३।३९॥ अजितशब्दान्तान्मनुष्यनाम्नोऽनुकम्पायां गम्यमानायां कप्न् प्रत्ययः स्यात् तत्संनियोगे लुक् चोत्तरपदस्य । व्याघ्राजिनो व्याघ्रमहाजिनो वा नाम मनुष्यः सोऽनुकम्पितो व्याघ्रकः । एवं सिंहकः । शरभकः । दृकः । उलकः । अनुकम्पिता व्याघ्राजिना व्याघ्रमहाजिना वा व्याघ्रकाः । सिंहकाः । आतो नेन्द्रवरुणस्येत्यत्र ज्ञापनादकृतसंधेरेवोत्तरपदस्य लुक् ।

२२७४ षड्वर्जैकस्वरपूर्वपदस्य स्वरे ॥७।३।४०॥ षट्शब्दवर्जितमेकस्वरं पूर्वपदं तस्य तत्संबन्धिन उत्तरपदस्यानुकम्पायां विहिते स्वरादौ प्रत्यये लुक् स्यात् । उत्तरसूत्रस्यापवादः । अनुकम्पितो वागाशीः वाग्दत्तः वागाशीर्दत्तो वा वाचियः, वाचिकः, वाचिलः । एवं त्वचियः । त्वचिकः । त्वचिलः । सुचियः । सुचिकः । सुचिलः । षड्वर्जैकस्वरपूर्वपदस्येति किम् । उपेन्द्रेण दत्तः उपेन्द्रदत्तः, सोऽनुकंपितः उपडः उपकः उपियः उपिकः उपिलः । उत्तरेण लुक् । षड्वर्जेति किम् । अनुक-

म्पितः षडङ्गुलिः षडियः, षडिकः, षडिलः। अत्रोत्तरेण द्वितीयस्वरादूर्ध्वं लोपः। तथा चावर्णेवर्णस्येत्यल्लुचः स्थानिवद्भावात् पदत्वस्यानिवृत्तेस्तृतीयत्वं न निवर्तते। षड्वर्जनादेव च पदत्वे संधिविधावपि अल्लुकः स्थानित्वनिषेधो न भवति। स्वर इति किम्। वागाशीकः वागाशीर्दत्तकः।

२२७५ द्वितीयात् स्वरादूर्ध्वम् ॥७।३।४१॥ अनुकम्पायां विहिते स्वरादौ प्रत्यये परतः प्रकृतेर्द्वितीयात् स्वरादूर्ध्वं शब्दस्वरूपस्य लुक् स्यात्। अनुकम्पितो देवदत्तो देवियः, देविकः, देविलः। अनुकम्पित उपेन्द्रदत्त उपडः उपकः उपियः उपिलः। अनुकम्पितः पितृदत्तः पितृयः पितृकः पितृलः। एवं वायुयः। वायुकः। वायुलः। ऊर्ध्वग्रहणं सर्वलोपार्थम्।

२२७६ संध्यक्षरात्तेन ॥७।३।४२॥ अनुकम्पायां विहिते स्वरादौ प्रत्यये परतः प्रकृतेर्द्वितीयात् संध्यक्षररूपात् स्वरादूर्ध्वं शब्दरूपस्य तेन द्वितीयेन संध्यक्षरेण सह लुक् स्यात्। अनुकम्पितः कुबेरदत्तः कुबियः, कुबिकः, कुबिलः। अनुकम्पितो लहोडः। लहियः। लहिकः। लहिलः। अनुकम्पितः कपोतरोमा कपियः कपिकः कपिलः। अनुकम्पितोऽमोघः अमोघदत्तः। अमोघजिह्वो वा अमियः। अमिकः। अमिलः। संध्यक्षरादिति किम्। अनुकम्पितो गुरुदत्तः गुरुयः, गुरुकः, गुरुलः।

२२७७ शेवलाद्यादेस्तृतीयात् ॥ ७।३।४३ ॥ शेवलादिपूर्वपदस्य मनुष्यनाम्नोऽनुकम्पायां विहिते स्वरादौ प्रत्यये तृतीयात् स्वरादूर्ध्वं लुक् स्यात्। द्वितीयात्स्वरादूर्ध्वमित्यस्यापवादः। अनुकम्पितः शेवलदत्तः शेवलियः, शेवलिकः शेवलिलः। एवं सुपरिदत्तः सुपरियः सुपरिकः सुपरिलः। विशालदत्तः विशालियः विशालिकः विशालिलः। वरुणदत्तः वरुणियः तरुणिकः वरुणिलः। अर्यमदत्तः अर्यमियः अर्यमिकः अर्यमिलः। अत्रात्राप्यकृतसंधेरेव लोपः शेवलेन्द्रदत्तोऽनुकम्पितः शेवलिकः इति यथा स्यात् शेवलयिक इति मा भूत्। सुपर्याशीर्दत्तोऽनुकम्पितः सुपर्यिक इति मा भूत्। केचित्तु विशाखिलः कुमारिल इत्यत्रापीच्छन्ति।

२२७८ क्वचित्तुर्यात् ॥७।३।४४॥ अनुकम्पायां विहिते स्वरादौ क्वचिल्लक्ष्यानुसारेण तुर्याच्चतुर्यात्स्वरादूर्ध्वं लुक् स्यात्। अनुकम्पितो बृहस्पतिदत्तो

बृहस्पतिशर्मा वा बृहस्पतियः, बृहस्पतिकः, बृहस्पतिलः । एवं प्रजापतियः प्रजापतिकः प्रजापतिलः। अकृतसन्धेरित्येव पूर्ववत् प्रजापत्याशीर्दत्तोऽनुकम्पितः प्रजापतिक इति यथा स्यात् प्रजापत्यिक इति मा भूत्। क्वचिद्ग्रहणादिह न भवति। अनुकम्पितः उपेन्द्रदत्तः उपडः, उपकः, उपियः, उपिलः।

२२७९ पूर्वपदस्य वा ॥७।३।४५॥ अनुकम्पायां विहिते स्वरादौ प्रत्यये पूर्वपदस्य लुग् वा स्यात्। अनुकम्पितो देवदत्तः दत्तियः, दत्तिकः, दत्तिलः। वावचनाद्यथाप्राप्तम्। द्वितीयात्स्वरादूर्ध्वं इति लुक्।

२२८० ह्रस्वे ॥७।३।४६॥ दीर्घप्रतियोगि ह्रस्वम्। ह्रस्वेऽर्थे वर्तमानाच्छब्दरूपाद्यथायोगं कवादयः प्रत्ययाः स्युः। ह्रस्वः पटः पटकः। ह्रस्वं पचति पचतकि। ह्रस्वकालयोगात् क्रिया ह्रस्वेत्युच्यते। ह्रस्वाः सर्वे सर्वके। विश्वके। उच्चकैः। नीचकैः। तूष्णीकाम्। संज्ञायामपि ह्रस्वत्वयोगात् कप्, स ह्रस्व इत्येव सिद्धः। वंशकः। वेणुकः। नडकः (नरकः)। ललकः। वरकः।

२२८१ कुटीशुण्डाद्रः ॥७।३।४७॥ कुटी शुण्डा इत्येताभ्यां ह्रस्वेऽर्थे वर्तमानाभ्यां रः प्रत्ययः स्यात्। कपोऽपवादः। ह्रस्वा कुटी कुटीरः। शुण्डारः। केचित्तु कुटीस्थाने कुर्दीं पठन्ति। कुर्दीरः।

२२८२ शम्या रुरौ ॥७।३।४८॥ शमीशब्दात् ह्रस्वेऽर्थे वर्तमानात् रु र इत्येतौ प्रत्ययौ स्याताम्। ह्रस्वा शमी शमीरुः शमीरः।

२२८३ कुत्वा डुपः ॥७।३।४९॥ कुतूशब्दाद् ह्रस्वेऽर्थे वर्तमानात् स्वार्थे डुपः प्रत्ययः स्यात्। ह्रस्वा कुतूः कुतुपः। कुतूरिति चर्ममयं तैलाद्यावपनमुच्यते।

२२८४ कासूगोणीभ्यां तरट् ॥७।३।५०॥ कासू गोणी इत्येताभ्यां ह्रस्वेऽर्थे वर्तमानाभ्यां तरट् प्रत्ययः स्यात्। ह्रस्वा कासूः कासूतरी। गोणीतरी। पुंलिङ्गमपि दृश्यत इत्येके। कासूतरः। गोणीतरः। कासूः शक्तिर्नामायुधम्। गोणी धान्यावपनम्। टकारो ङ्यर्थः।

२२८५ वत्सोक्षाश्वर्षभाद्धासे पित् ॥७।३।५१ वत्स उक्षन् अश्व ऋषभ इत्येतेभ्यः शब्दप्रवृत्तिनिमित्तस्य स्वार्थस्य हासे गम्यमाने तरट् प्रत्ययः स्यात् स च

पित् । ह्रसितो वत्सः वत्सतरः । वत्सः प्रथमवयस्को गौः तस्य ह्रासो द्वितीयवयःप्राप्तिः । ह्रसित उक्षा उक्षतरः । उक्षा द्वितीयवयास्तरुणस्तस्य ह्रासस्तृतीयवयःप्राप्तिः । ह्रसितोऽश्वोऽश्वतरः । अश्वेनाश्वायां जातोऽश्वस्तस्य ह्रासो गर्दभपितृकता । आशुगमनाद्धाश्वस्तस्य ह्रासो गमने मन्दता । सर्वथाश्वतरशब्दो जातिशब्दः । ह्रसित ऋषभः ऋषभतरः । ऋषभोऽनड्वान् बलीयान् तस्य ह्रासो भारवहने मन्दशक्तिता । प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तस्य ह्रासे भवति । इह मा भूत् । कृशो वत्सो वत्सतर इति । पित्करणं पुंवद्भावार्थम् । ह्रसिता वत्सा वत्सतरी । ह्रसिताश्वा अश्वतरी ।

२२८६ **वैकाद् द्वयोर्निर्धार्ये डतरः** ॥ ७।३।५२ ॥ समुदायादेकदेशो जातिगुणक्रियासंज्ञाद्रव्यैर्निष्कृष्य बुद्ध्या पृथक् क्रियमाणो निर्धार्यः । एकशब्दाद् द्वयोर्मध्ये निर्धार्येऽर्थे वर्तमानात् डतरः प्रत्ययो वा स्यात् । एकतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा । वावचनम् अगर्थम् । एकको भवतोः कठः पटुर्वा । महावाधिकारात्प्रत्ययो न भवत्यपि । एको भवतोः पटुः । द्वयोरिति किम् । एकोऽस्मिन् ग्रामे प्रधानम् । निर्धार्य इति किम् । एकोऽनयोर्ग्रामयोः स्वामी ।

२२८७ **यत्तत्किमन्यात्** ॥७।३।५३॥ यद् तद् किम् अन्य इत्येतेभ्यो द्वयोरेकस्मिन् निर्धार्येऽर्थे वर्तमानेभ्यो डतरः प्रत्ययः स्यात् । यतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा ततर आगच्छतु । कतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा । अन्यतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा । महावाधिकारात् प्रत्ययो न भवत्यपि । यो भवतोः पटुः । स आगच्छतु । को भवतोः पटुः । अन्यो भवतोः पटुः द्वयोरित्येव । योऽस्मिन् ग्रामे प्रधानं स आगच्छतु । निर्धार्य इत्येव । योऽनयोर्ग्रामयोः स्वामी स आगच्छतु ।

२२८८ **बहूनां प्रश्ने डतमश्च वा** ॥ ७।३।५४ ॥ यद् तद् किम् अन्य इत्येतेभ्यो बहूनां निर्धार्येऽर्थे वर्तमानेभ्यः प्रश्नविषये डतमः प्रत्ययो वा स्यात् चकाराड्डतरश्च । यतमो यतरो वा भवतां कठस्ततमस्ततरो वा आगच्छतु । कतरः कतमो वा भवतां कठः । प्रमाणान्तरात् प्रतिपत्तौ बहूनामप्रयोगेऽपि भवति । यथा बहुष्वासीनेषु कंश्चित् पृच्छति कतमः कतरो वा देवदत्तः । अन्यतरो अन्यतमो वा भवतां कठः । शुचिवल्कवीतवपुरन्यतमस्तिमिरच्छिदाम्बिव गिरौ भवतः । वृद्धस्तु व्याधितो वा राजा मातृबन्धुकुलयशुणवत्सामन्तानामन्यतमेन क्षेत्रे बीजमुत्पादयेत् ।

वावचनमगर्थम् । यको भवतां कठः सक आगच्छतु इत्यादि । अन्यक एषां कालापः । किमस्तु साकः कादेश उक्तः । महावाधिकारात् प्रत्ययो न भवत्यपि । यो भवतां कठः स आगच्छतु । बहूनामिति किम् । योऽस्मिन् ग्रामे कंठः स आगच्छतु । प्रश्न इति किम् । क्षेपे मा भूत् । को भवतां कठः कुत्सित इत्यर्थः । प्रश्नग्रहणं किमो विशेषणं नान्यस्यासंभवात् । अन्ये त्वाहुः यत्तत्किभ्यो जातावेव डतमः, डतरस्तु बहूनां निर्धार्ये किम एव न यत्तद्भ्याम्, स च जातावेव । अन्यशब्दादपि बहुविषये डतम एव नतु डतरः । डतरडतमौ च निर्धार्ये अन्यशब्दान्नित्यावेव नाक्, नापि केवलस्य प्रयोगः, एके त्वविशेषेणेत्यत्राभिधानमनुसर्तव्यम् ।

२२८९ **नैकात्** ॥७।३।५५॥ एकशब्दाद् बहूनामेकस्मिन्निर्धार्येऽर्थे वर्तमानात् डतमः प्रत्ययो वा स्यात् । एकतमो भवतां कठः पटुर्गन्ता देवदत्तो दण्डी वा । वावचनादक् । एककः । महावाधिकारान्न भवत्यपि । एको भवतां कठः । पृथग्योगो डतरनिवृत्त्यर्थः ।

२२९० **क्तात्तमबादेश्चानत्यन्ते** ॥७।३।५६॥ क्तान्तात् केवलात्तमबाद्यन्ताच्चानत्यन्तेऽर्थे वर्तमानात् कप् प्रत्ययः स्यात् । क्रियायाः स्वेनाश्रयेण साकल्येनानभिसंन्धोऽनन्यन्तता । अनत्यन्तं भिन्नं भिन्नकम् । अनत्यन्तं छिन्नं छिन्नकम् । अनत्यन्तं भिन्ना भिन्निका घटी । छिन्निका रज्जुः । तमबाद्यन्तात् क्तान्तात्—अनत्यन्तं भिन्नतमं भिन्नतमकम् । एवं भिन्नतरकम् । भिन्नकल्पकम् । छिन्नतमकम् । छिन्नतरकम् । छिन्नकल्पकम् । तमबाद्यन्तेषु क्तान्तता नास्तीति तमबादिग्रहणम् । असमासस्तमबादेरित्यत्रापि क्तादित्यस्य संबन्धार्थः । तेनेह न भवति । अनत्यन्तं शुक्ततमम् ।

२२९१ **न सामिवचने** ॥७।३।५७॥ सामि अर्धः । सामिवचने उपपदे अनत्यन्तेऽर्थे वर्तमानात् क्तान्तात् केवलात्तमबाद्यन्ताच्च कप् प्रत्ययो न स्यात् । सामि अनत्यन्तं भिन्नम् । भिन्नतमम् । भिन्नतरम् । वचनग्रहणं पर्यायार्थम् । एवं कृतं भुक्तम् । पीतम् । अर्धमनत्यन्तं भिन्नम् । नेममनत्यन्तं भिन्नम् । एवं शकलं खण्डमित्यादि । अन्ये तु समास एवोदाहरन्ति । सामिकृतम् अर्धकृतमिति । ननु साम्यादिभिरेवानन्तताया अभिहितत्वादुक्तार्थत्वेन कप् न प्राप्नोतीति व्यर्थः प्रतिषेधः । उच्यते । साम्यादिभिः समुदायविषयक्रियाया एवानत्यन्तता प्रतीयते न स्वविषये । तत्रानत्यन्तविवक्षायां कप् प्राप्नोतीति प्रतिषेधवचनम् ।

२२९२ **नित्यं अत्रिनोऽण्** ॥७।३।५८॥ अत्रिन् इत्येतत्प्रत्ययान्तात् स्वार्थे नित्यमण् प्रत्ययः स्यात् । नित्यग्रहणान्महाविभषा निवृत्ता । व्यावक्रोशी । व्यावलेखी । व्यावहासी वर्तते । त्रिन्–सांकूटिनम् । सांराविणम् । सांमार्जिनम् ।

२२९३ **विसारिणो मत्स्ये** ॥७।३।५९॥ विसारिनशब्दान्मत्स्ये वर्तमानात्स्वार्थेऽण् प्रत्ययः स्यात् । विसरतीति विसारी । ग्रहादित्वाण्णिन् । मत्स्यश्चेद्विसारिणः । मत्स्य इति किम् । विसारी देवदत्तः ।

२२९४ **पूगादमुख्यकाञ्ञो द्रिः** ॥७।३।६०॥ नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः संघाः पूगाः । पूगवाचिनो नाम्नः स्वार्थे ञ्यः प्रत्ययः स्यात् स च द्रिसंज्ञः न चेत्पूगवाचि नाम 'सोऽस्य मुख्यः' इति विहितकप्प्रत्ययान्तं भवति । लौहध्वज्यः लौहध्वज्यौ लोहध्वजाः पूगाः। शैब्यः शैब्यौ शिबयः। वातक्यः वातक्यौ वातकाः । द्रित्वात् बहुष्वस्त्रियां लुप् । अमुख्यकादिति किम् । देवदत्तो मुख्योऽस्य देवदत्तकः, इन्द्राग्निलुप्तकः पूगः।

२२९५ **व्रातादस्त्रियाम्** ॥७।३।६१॥ नानाजातीया अनियतवृत्तयः शरीरायासजीविनः संघा व्राताः । व्रातवाचिनोऽस्त्रियां वर्तमानात् स्वार्थे ञ्यः प्रत्ययः स्यात् स च द्रिसंज्ञः । कापोतपाक्यः कापोतपाक्यौ कपोतपाकाः। व्रैहिमत्यः व्रैहिमत्यौ व्रीहिमताः। अस्त्रियामिति किम् । कपोतपाका । व्रीहिमता स्त्री ।

२२९६ **शस्त्रजीविसंघाञ्ञ्यङ् वा** ॥७।३।६२॥ शस्त्रजीविनां यः संघस्तद्वाचिनः स्वार्थे ञ्यट् प्रत्ययो वा स्यात् स च द्रिसंज्ञः। शावर्यः शावर्यौ शवराः । पौलिन्द्यः पौलिन्द्यौ पुलिन्दाः । कुन्तेरपत्यं बहवो माणवकाः कुन्तयः । ते शस्त्रजीविसंघः कौन्त्यः कौन्त्यौ कुन्तयः । पक्षे शवरः, पुलिन्दः । शस्त्रजीविग्रहणं किम् । मल्लाः संघः । मल्लः मल्लौ मल्लाः । शयण्डः शयण्डौ शयण्डाः। संघादिति किम् । सम्राट् । वागुरः वागुरौ वागुराः । नैते श्रेणिबद्धा इति न संघः। टकारो ङ्यर्थः। शाबरी । पौलिन्दी । कौन्ती ।

२२९७ **वाहीकेष्वब्राह्मणराजन्येभ्यः** ॥ ७।३।६३ ॥ वाहीकेषु यः शस्त्रजीविसंघो ब्राह्मणराजन्यवर्जितस्तद्वाचिनः स्वार्थे ञ्यट प्रत्ययो नित्यं स्यात् स च द्रिसंज्ञः। कुण्डीविशाः शस्त्रजीविसंघः। कौण्डीविश्यः कौण्डीविश्यौ कुण्डीविशाः।

क्षौद्रक्यः क्षौद्रक्यौ क्षुद्रकाः। मालव्यः मालव्यौ मालवाः। वाहीकेष्विति किम्। शबराः शस्त्रजीविसंघः। शबरः शबरौ। पुलिन्दः पुलिन्दौ। अब्राह्मणराजन्येभ्य इति किम्। गौपालिः। गौपाली। शालङ्कायनः। शालङ्कायनौ। राजन्यः। राजन्यौ। काम्बव्यः। काम्बव्यौ। स्त्रियां राजन्या। काम्बव्या। ञ्यटि तु ङीः स्यात्। ब्राह्मणप्रतिषेधे ब्राह्मणविशेषप्रतिषेधः। न हि ब्राह्मणशब्दवाच्यो वाहीकेषु शस्त्रजीविसंघोस्ति। राजन्ये तु स्वरूपस्य विशेषस्य च प्रतिषेधः। तदर्थमेव बहुवचनम्। शस्त्रजीविसंघादित्येव। मल्लः। शयण्डः। सम्राट्। वाग्गुरः।

२२९८ **वृकाट्टेण्यण्** ॥ ७।३।६४ ॥ वृकशब्दाच्छस्त्रजीविसंघवाचिनः स्वार्थे टेण्यण् प्रत्ययः स्यात् स च द्रिः। वार्केण्यः वार्केण्यौ वृकाः। टकारो ङ्यर्थः। वार्केणी स्त्री। शस्त्रजीविसंघादित्येव। कामक्रोधौ मनुष्याणां खादितारौ वृकाविव। वाहीकत्वे नित्यमवाहीकत्वे तु विकल्पेन ञ्यटि प्राप्ते वचनम्। एवमुत्तरसूत्रत्रयमपि।

२२९९ **यौधेयादेरञ्** ॥ ७।३।६५ ॥ यौधेयादिभ्यः शस्त्रजीविसंघवाचिभ्योऽञ् प्रत्ययः स्यात् स च द्रिः। युधाया अपत्यं बहवः कुमारास्ते शस्त्रजीविसंघः यौधेयः यौधेयौ यौधेयाः। एवं शौभ्रेयः। शौक्रेयः। धार्तेयः। धार्तेयः। ज्यावनेयः। अञ्वचनं 'संघघोषाङ्कलक्षणेञ्यञ्त्रिञः' इत्यणर्थम्। तेन यौधेयस्य संघादिर्यौधेय इति भवति। ननु यौधेयादयः संघवचनाः कथं गोत्रं भवन्ति उच्यते। भर्गाद्यन्तर्गणो यौधेयादिस्तत्र येऽपत्यप्रत्ययान्तास्ते गोत्रं भवन्ति औपगवादिवत्। अपत्यं हि गोत्रम्। अपत्यप्रत्ययान्ताच्च स्वार्थिकोऽप्यपत्यग्रहणेन गृह्यते। अत्र चेदमेव अञ्वचनं लिङ्गम्।

२३०० **पर्श्वादेरण्** ॥७।३।६६॥ पर्शु इत्येवमादिभ्यः शस्त्रजीविसंघवाचिभ्यः स्वार्थेऽण् प्रत्ययः स्यात् स च द्रिः। पर्शोरपत्यं बहवो माणवकाः पर्शवः। द्विस्वत्वादण् लुप्। शस्त्रजीविसंघः पार्शवः पार्शवौ पर्शवः। राक्षसः राक्षसौ रक्षांसि। स्त्रियां तु 'द्रेरञणोऽप्राच्यभर्गादेः' इति लुप्। पर्शूः। अणो लुपि उतोऽप्राणिनश्चेत्यादिनोङ्।

२३०१ **दामन्यादेरीयः** ॥ ७।३।६७ ॥ दामन्यादिभ्यः शस्त्रजीविसंघेभ्यः स्वार्थे ईयः प्रत्ययः स्यात् स च द्रिः। दमनस्यापत्यं बहवः कुमारास्ते शस्त्रजीविसंघः दामनीयः दामनीयौ दामनयः। औलपीयः औलपीयौ औलपयः।

२३०२ श्रुमच्छमीवच्छिखावच्छालावदूर्णावद्विदभृदाभिजितो गोत्रेऽणो यञ् ॥ ७।२।६८ ॥ शस्त्रजीविसंघादिति निवृत्तम् । श्रुमच्छमीवच्छिखावच्छालावदूर्णावद्विदभृदभिजिदित्येतेभ्यो गोत्रे योऽण् तदन्तेभ्यः स्वार्थे यञ् प्रत्ययः स्यात् स च द्विः । श्रुमतोऽपत्यमण् तदन्ताद्यञ् । श्रौमत्यः श्रौमत्यौ श्रौमताः । श्रीमच्छब्दादपि केचिदिच्छन्ति । श्रैमत्यः श्रैमत्यौ श्रैमताः । शामीवत्यः शामीवत्यौ शामीवताः । शैखावत्यः शैखावत्यौ शैखावताः । शालावत्यः शालावत्यौ शालावताः। और्णावत्यः और्णावत्यौ और्णावताः । वैदभृत्यः वैदभृत्यौ वैदभृताः । आभिजित्यः आभिजित्यौ आभिजिताः। गोत्रग्रहणं किम् । श्रुमत इदं श्रौमतम्। आभिजितो मुहूर्तः । आभिजितः स्थालीपाकः । अपत्यप्रत्ययान्तात् स्वार्थिकोऽपत्य एव वर्तत इति तदाश्रयः प्रत्ययो भवति । श्रौमत्यस्यापत्यं युवा श्रौमत्यायनः । आभिजित्यायनः । अत्र यञिञ इत्यायनण् । श्रौमत्यस्यायं श्रौमतकः। आभिजितकः । अत्र गोत्राददण्डेत्यादिनाऽकञ् । श्रौमतानां समूहः श्रौमतकम् । आभिजितकम् । अत्र गोत्रोक्षेत्यादिनाऽकञ् । श्रौमत्यस्य संघादि श्रौमतम् । आभिजितम् । अत्र संघघोषेत्यादिनाण् ।

॥ इति श्रीसिद्धहैमबृहत्प्रक्रियायां तद्धित-
प्रकरणे स्वार्थिकाः
समाप्ताः ॥

॥ अथ द्विरुक्तप्राक्रिया ॥

२३०३ असकृत्संभ्रमे ॥ ७।४।७२ ॥ भयादिभिश्चित्तव्याक्षेपात् प्रयोक्तुस्त्वरणं संभ्रमः । तस्मिन् द्योत्ये यत् प्रवर्तते पदं वाक्यं वा तदसकृदनेकवारं प्रयुज्यते । अहिरहिः । बुध्यस्व बुध्यस्व । अहिरहिरहिः । बुध्यस्व बुध्यस्व बुध्यस्व । हस्त्यागच्छति हस्त्यागच्छति । लघु पलायध्वम् लघु पलायध्वम् । संभ्रमादौ पदं वाक्यं वा वर्तते न पदावयव इति नासौ असकृद् द्विर्वा भवति । तच्च पदं वाक्यं वा परिनिष्पन्नं सत्तत्र वर्तते नापरिनिष्पन्नमिति कृतेषु यत्वादिकार्येषु तदसकृद् द्विर्वा भवति नाकृतेषु । तेन द्रोग्धा द्रोग्धा, द्रोढा द्रोढेत्येव भवति न तु द्रोग्धा द्रोढा द्रोढा द्रोग्धा । एवं माषवापाणि माषवापाणि ।

मातुःष्वसा मातुःष्वसा । हीणो हीणः । कृतद्विर्वचनानामपि रूपार्थयोरभेदेन स्थानिवद्भावेन चैकपदत्वात् कौतस्कुतः पौनःपुन्यमित्यादिषु तद्धितः सिद्धो भवति ।

२३०४ **भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक्तमबादेः** ॥७।४।७३॥ क्रियायाः साकल्यमवयवक्रियाणां कात्स्न्र्यं भृशार्थः । पौनःपुन्यमाभीक्ष्ण्यम् । सातत्यं क्रियान्तरैरव्यवधानमविच्छेदः। एतेषु द्योत्येषु यत्पदं वाक्यं वा वर्तते तत्तमबादिप्रत्ययेभ्यः प्रागेव द्विरुच्यते । भृशे–लुनीहि लुनीहि इत्येवायं लुनाति । अधीष्वाधीष्वेत्येवायमधीते । आभीक्ष्ण्ये–भोजं भोजं व्रजति । भुक्त्वा भुक्त्वा व्रजति । अविच्छेदे–पचति पचति । अधीते अधीते । ब्रह्मचर्यं चरति चरति । प्रपचति प्रपचति । सत्करोति सत्करोति । अलंकरोति अलंकरोति । भृशादयश्च क्रियाधर्मा इति क्रियापदमेवात्र संबध्यते । क्रियाविशेषणस्यापि क्रियात्वेनाध्यवसायात् भृशादियोगे द्विर्वचनं भवति । यथा पुनः पुनः पचति । भूयोभूयः पठति । वारंवारं भुङ्क्ते । मुहुर्मुहुः पिबति । शनैः शनैर्गच्छति । मन्दं मन्दं तुदति । स्तोकं स्तोकं चलति । पृथक् पृथक् अभिधत्ते । यदा तु क्रियारूपता न विवक्ष्यते तदा ' नवा गुणः सदृशे रित् ' इति सादृश्ये द्विर्वचनं भवति । मन्दं मन्दं तुदति । स्तोकं स्तोकम् । अस्तमयति इति । एतेष्विति किम् । लुनीहि, भुक्त्वा व्रजति । पचति । भृशाभीक्ष्ण्ययोर्यङिति यङन्तमुक्तार्थत्वान्न द्विरुच्यते । यदा तु भृशार्थे यङ् तदाभीक्ष्ण्यार्थाभिव्यक्तये द्विर्वचनम् पापच्यते पापच्यते । यदा तु तत्प्रतिपादनाय पञ्चमी विधीयते तदा तस्या द्विर्वचनसहायाया एवाभीक्ष्ण्यप्रतिपादने सामर्थ्यं त्वाणमोरिवेति द्विर्वचनमपि भवति पापच्यस्व पापच्यस्वेति । प्राक्तमबादेरिति किम् । पचतिपचतितमाम् । पचतिपचतितराम् । अत्र तमबादेरातिशायिकात् पूर्वमेव द्विर्वचनं पश्चात्तमबादिः । अन्यथा ह्यनियमः स्यात् ।

२३०५ **नानावधारणे** ॥ ७।४।७४ ॥ नानाभूतानां भेदेनेयत्तापरिच्छेदो नानावधारणम्। तस्मिन् यच्छब्दरूपं वर्तते तद् द्विरुच्यते । योगविभागात् प्राक्तमबादेरिति नानुवर्तते । अस्मात् कार्षापणादिह भवद्भ्यां माषं माषं देहि । प्रत्येकं माषमात्रं देहि नाधिकमित्यर्थः। द्वौ द्वौ देहि । त्रीन् त्रीन् देहि । एषु कार्षापणसंबंधिनो माषा न साकल्येन दित्सिताः किंतर्हि प्रत्येकं माषमात्रमेव द्वावेव त्रय एवेति न वीप्सास्ति । नानाग्रहणं किम् । अस्मात् कार्षापणादिह भवद्भ्यां माषं देहि । एकमेवेत्यर्थः। अवधारण इति किम् । अस्मात् कार्षापणादिहभवद्भ्यां माषं द्वौ त्रीन् वा देहि ।

२३०६ **आधिक्यानुपूर्व्ये** ॥७।४।७५॥ आधिक्यं प्रकर्षः। आनुपूर्व्यं क्रमानुलङ्घनम्। एतयोर्यच्छब्दरूपं वर्तते तद् द्विरुच्यते। आधिक्ये–नमो नमः। अधिकं नम इत्यर्थः। कन्या दर्शनीया कन्या दर्शनीया। अहो दर्शनीया अहो दर्शनीया। मह्यं रोचते मह्यं रोचते। एष तवाञ्जलिरेष तवाञ्जलिः। मह्यं रोचतेतराम् मह्यं रोचतेतराम्। अत्र प्रागातिशायिकः पश्चाद् द्वित्वम्। आनुपूर्व्ये–मूले मूले स्थूलाः। अग्रे अग्रे सूक्ष्माः। ज्येष्ठं ज्येष्ठमनुप्रवेशय। कनिष्ठं कनिष्ठमासय। मूलाद्यानुपूर्व्येणैषां स्थौल्यादय इत्यर्थः। अग्रमूलमध्यानि त्रयो भागाः तत्रैकमेव मुख्यमग्रं मूलं च। अन्येषां तु भागानामपेक्षाकृतोऽग्रमूलव्यपदेशः। अधःसन्निविष्टमपेक्ष्याग्रव्यपदेशः। उपरिसंनिविष्टमपेक्ष्य मूलव्यपदेशः। न चैकरूपं भागानां स्थौल्यं सौक्ष्म्यं वा किं तर्हि यथामूलमुपचीयते स्थौल्यं यथाग्रं च सौक्ष्म्योपचय इति वीप्सा नास्ति। एवं ज्येष्ठत्वकनिष्ठत्वयोरपि आपेक्षिकत्वाद्वीप्सा नास्तीति वचनम्।

२३०७ **डतरडतमौ समानां स्त्रीभावप्रश्ने** ॥७।४।७६॥ समानां केनचिद् गुणेन तुल्यतया संप्रधारितानां स्त्रीलिङ्गस्य भावस्य प्रश्ने यद् वर्तते डतरान्तं डतमान्तं च शब्दरूपं तद् द्विरुच्यते। उभाविमावाढ्यौ कतरा कतरा अनयोराढ्यता किं दैवकृता उत पौरुषकृतेत्यर्थः। कतमा कतमा अनयोराढ्यता किं साधनसंबन्धकृता उतान्यसंबन्धकृता आहोस्विदुभयसंबन्धकृतेत्यर्थः। एवं सर्वे इमे आढ्याः कतरा कतरा एषामाढ्यता। कतमा कतमा एषामाढ्यता। सर्वे इमे आढ्याः यतरा यतरा एषां विभूतिः ततरा ततरा कथ्यताम्। यतमा यतमा एषां संपत् ततमा ततमा कथ्यताम्। डतरडतमाविति किम्। उभाविमावाढ्यौ कानयोराढ्यता। समानामिति किम्। आढ्योऽयं कतरस्य कतमस्याढ्यता। स्त्रीग्रहणं किम्। उभाविमावाढ्यौ कतरदनयोराढ्यत्वम्। कतमोऽनयोर्विभवः। भावग्रहणं किम्। उभाविमौ लक्ष्मीवन्तौ कतरा कतमाऽनयोर्लक्ष्मीः। लक्ष्यतेऽनया पुण्यकर्मेति लक्ष्मीः। इयं स्त्री भवति न भाव इति। प्रश्न इति किम्। उभाविमावाढ्यौ यतराऽनयोराढ्यता ततरा श्रूयताम्। केचिद्डतरडतमाभ्यां स्त्रीलिङ्गाच्चान्यत्रापीच्छन्ति। उभाविमावाढ्यौ कीदृशी कीदृशी अनयोराढ्यता कतरत्कतरदनयोराढ्यत्वम्। कतमः कतमोऽनयोर्विभवः। कतराऽनयोराढ्यतेत्यादौ प्राप्ते स्वार्थिकं द्विर्वचनम्।

२३०८ **पूर्वप्रथमावन्यतोऽतिशये** ॥७।४।७७॥ पूर्वशब्दः प्रथमशब्दश्चान्यतोऽतिशये तदर्थस्य प्रकर्षे द्योत्ये द्विरुच्यते। आतिशायिकाऽपवादः। पूर्वं पूर्वं

पुष्यन्ति । प्रथमं प्रथमं पच्यन्ते । अन्येभ्यः पूर्वतरं पुष्यन्ति, प्रथमतरं पच्यन्त इत्यर्थः । अन्यत इति किम् । पूर्वतरं पुष्यन्ति । प्रथमतरं पच्यन्ते । अत्र स्वव्यापारापेक्षातिशयो गम्यते न तावदिमे किशलयिता यावत्पुष्पिताः, न तावदिमे पुष्पिता यावत्पक्का इति । अतिशय इति किम् । पूर्वं, प्रथमम् । अन्येऽतिशयमात्रेऽपि द्विर्वचनमिच्छन्ति तमप्रत्ययं च विकल्पम् ।

२३०९ प्रोपोत्सं पादपूरणे ॥७।४।७८॥ प्र उप उत् सम् इत्येतान्युपसर्गरूपाणि द्विरुच्यन्ते तेन चेद् पादः पूर्यते ।

‘ प्रप्रशान्तकषायाग्नेरुपोपप्लववर्जितम् ।
उदुज्ज्वलं तपो यस्य संसंश्रयत तं जिनम् ’ ॥१॥

पादपूरण इति किम् । प्रणम्य सच्छासनवर्धमानम् । इदं छन्दसीति कश्चित् ।

२३१० सामीप्येऽधोऽध्युपरि ॥७।४।७९॥ अधस् अधि उपरि इत्येतानि शब्दरूपाणि द्विरुच्यन्ते सामीप्ये विवक्षिते । सामीप्यं देशकृता कालकृता वा प्रत्यासत्तिः । अधोऽधो ग्रामम् । अध्यधि ग्रामम् । उपर्युपरि ग्रामम् । उपर्युपरि दुःखानि । सामीप्य इति किम् । अधः पन्नगाः । अधि ब्रह्मदत्ते पञ्चालाः। उपरि चन्द्रमाः । कथमुपरि शिरसो घट इति । अत्रौत्तराधर्यमात्रं विवक्षितम् , न सदपि सामीप्यमिति न भवति । यथायथमिति मकारान्तमव्ययं यथास्वमित्यर्थे आश्रीयते इति यथास्वे यथायथमिति नारभ्यते ।

२३११ वीप्सायाम् ॥७।४।८०॥ पृथक्संख्यायुक्तानां बहूनां सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियया गुणेन द्रव्येण जात्या वा युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा । तस्यां यद् वर्तते शब्दरूपं तद् द्विरुच्यते । वीप्सा च स्याद्यन्तेष्वेव भवतीति तेषामेव द्विर्वचनम् । वृक्षं वृक्षं सिञ्चति । ग्रामो ग्रामो रमणीयः। गृहे गृहे अश्वाः । योद्धा योद्धा क्षत्रियः। तथा रूपं रूपं पश्यति । शुक्लं शुक्लमानयति । क्रियां क्रियामारभते । उपचरितभेदस्यापि भवति । खिन्नः खिन्नो विश्राम्यति । क्षीणः क्षीणः पयः पिबति । व्यापकधर्मस्यापि व्याप्यताभेदोपचाराद् भेदे सति व्यापकान्तरापेक्षायां वीप्सा भवति । स एवान्योऽन्यः संपद्यते । नवो नवो भवति जायमान इति । आढ्यतरमाढ्यतरमानय । अत्र द्विर्वचनात्प्रागतिशायिकः । वीप्सायामिति किम् । वृक्षं सिञ्चति । जात्येकशेषेतरेतरयोगक्रमाभिधानेषु सत्यामपि व्याप्तौ यथो-

क्तलक्षणवीप्साया अभावान्न भवति। तथाहि संपन्नो यवः संपन्ना यवा इति जातेरेकत्वात् बह्वर्थाभिधानं नास्ति। अस्मिन्वने वृक्षाः शोभना इति एकशेषे साकल्येन व्याप्तिर्नास्ति। तथाहि–कतिपयेष्वपि वृक्षेषु शोभनेष्वयं प्रयोगो भवति। एवमितरेतरयोगेऽपि। अस्मिन्वने धवखदिरपलाशाः शोभना इति न वीप्सा, तथाऽस्मिन्वनेऽयं वृक्षः शोभनोऽयं वृक्षः शोभन इति क्रमाभिधाने साकल्येनापि व्याप्तौ यौगपद्याभावान्न भवति। अस्मिन् वने सर्वे वृक्षाः शोभना इत्यत्र तु सर्वशब्देन वीप्सार्थाभिधानान्न भवति। यथा तद्धितसमासाभ्याम्। तद्धितेन तावत्–द्वौ द्वौ पादौ ददाति द्विपदिकां ददाति। एकैकं ददाति एकशो ददाति। एकैकशो ददातीत्यत्र वीप्सायां द्विर्वचने कृते 'बहुल्पार्थात्' इति शस् भविष्यति। अर्थमर्थं प्रति प्रत्यर्थम्। गेहं गेहमनुप्रवेशमास्ते गेहानुप्रवेशमास्ते। क्वचित्तु वीप्स्यमानमपि समासेनाभिधीयते। पर्वणि पर्वणि सप्त पर्णान्यस्य सप्तपर्णः। पङ्क्तौ पङ्क्तौ अष्टौ पदान्यस्य अष्टापदः। ननु च वृक्षं वृक्षं सिञ्चतीत्यादौ वीप्सायां बहवोऽर्थाः प्रतीयन्ते तत्र बहुषु बहुवचनं प्राप्नोति। उच्यते। पृथक्संख्यायुक्तानामिति वचनात् परिगृहीतैकत्वादिसंख्यानां पदार्थानां वीप्सया योग इति पुनः समुदायाद् बहुवचनं न भवति।

२३१२ प्लुप् चादावेकस्य स्यादेः ॥७।४।८१॥ एकशब्दस्य वीप्सायां द्विरुक्तस्यादौ वर्तते य एकशब्दस्तत्संबन्धिनः स्यादेः प्लुप् स्यात्। पित्करणं पुंवद्भावार्थम्। अत एवातद्धितेऽपि लुपि पुंवद्भावः। एकैकः। एकैका। एकैकस्याः। एक एका। एक एकस्याः। अत्र विरामस्य विवक्षितत्वात् पुंवद्भावे सति संधिकार्यं न भवति। यथा अग्रे अग्रे सूक्ष्माः। यथा वा ऋक् ऋगिति। आदिपदस्य स्यादेः प्लुप्युत्तरेणाभेदाश्रयणे स्याद्यन्तत्वात् 'सर्वादयोऽस्यादौ' इति पुंवद्भावो न प्राप्नोतीति लुपः पित्त्वं विधीयते। चकार उत्तरत्र प्लुपद्विर्वचनयोः समुच्चयार्थः। इह तु द्विर्वचनं पूर्वेणैव सिद्धम् प्लुपमात्रं विधीयते। आदाविति किम्। उत्तरोक्तौ मा भूत्।

२३१३ द्वन्द्वं वा ॥७।४।८२॥ द्वन्द्वमिति वीप्सायां द्विरुक्तस्य द्विशब्दस्यादौ स्यादेः प्लुप् इकारस्याम्भाव उत्तरत्रेकारस्यात्वं स्यादेश्चाम्भावो वा निपात्यते। द्वन्द्वं तिष्ठतः। द्वौ द्वौ तिष्ठतः। नरकपटलान्यधोऽधो द्वन्द्वं हीनानि। द्वाभ्यां द्वाभ्यां हीनानि। द्वन्द्वं युद्धं वर्तते। द्वयोर्द्वयोर्युद्धं वर्तते। द्वन्द्वं कृतम्। द्वाभ्यां द्वाभ्यां कृतम्। द्वन्द्वं स्थितम्। द्वयोर्द्वयोः स्थितम्।

२३१४ रहस्यमर्यादोक्तिव्युत्क्रान्तियज्ञपात्रप्रयोगे ॥ ७।४।८३ ॥ वीप्सायामिति निवृत्तम्। द्वन्द्वमिति द्विशब्दस्य द्विर्वचनं शेषं पूर्ववत् रहस्यादिषु गम्यमानेषु निपात्यते। रहस्ये–द्वन्द्वं मन्त्रयन्ते। रहस्यं मन्त्रयन्त इत्यर्थः। मर्यादोक्तौ-आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते। माता पुत्रेण पौत्रेण प्रपौत्रेण तत्पुत्रेण च मैथुनं यातीत्यर्थः। व्युत्क्रान्तौ–द्वन्द्वं व्युत्क्रान्ताः, द्वैराश्येन भिन्ना इत्यर्थः। व्युत्क्रान्तिर्भेदः। यज्ञपात्रप्रयोगे–द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति। द्वे द्वे प्रयुनक्तीत्यर्थः। रहस्यादिष्विति किम्। द्वौ तिष्ठतः। उक्तिग्रहणं शब्दोपात्तायां मर्यादायां यथा स्यात् प्रकरणादिगम्यायां मा भूदित्येवमर्थम्। द्वन्द्वः समासः, द्वन्द्वः कलहः द्वन्द्वं युद्धं, द्वन्द्वं युग्मं, द्वन्द्वानि सहते दुःखानीत्यर्थः। अत्र द्वन्द्व इति शब्दान्तरम्।

२३१५ लोकज्ञातेऽत्यन्तसाहचर्ये ॥७।४।८४॥ लोकज्ञातेऽत्यन्तसाहचर्ये द्योत्ये द्विशब्दस्य पूर्ववत् द्वन्द्वमिति निपात्यते। द्वन्द्वं नारदपर्वतौ। द्वन्द्वं रामलक्ष्मणौ। द्वन्द्वं बलदेववासुदेवौ। द्वन्द्वं स्कन्दविशाखौ। द्वन्द्वं शिववैश्रवणौ। लोकज्ञात इति किम्। द्वौ चैत्रमैत्रौ। अत्यन्तसाहचर्य इति किम्। द्वौ युधिष्ठिरार्जुनौ। द्वन्द्वमिति च सूत्रत्रयेऽपि नपुंसकं वेदितव्यमनुप्रयोगस्य नपुंसकत्वार्थम्।

२३१६ आबाधे ॥७।४।८५॥ आबाधो मनःपीडा प्रयोक्तृधर्मः। तस्मिन् विषये वर्तमानं शब्दरूपं द्विरुच्यते तत्र चादौ पूर्वपदे स्यादेः प्लुप् स्यात्। ऋक् ऋक्। पूः पूः। गतगतः। नष्टनष्टः। गतगता। नष्टनष्टा। नन करोमि। ऋगादेर्दुरुच्चारणादिना पीड्यमानः प्रयोक्ता एवं प्रयुङ्क्ते। अष्टमी अष्टमी कालिका कालिका इत्यत्र तु पूरणप्रत्ययान्तत्वात् कोपान्त्यत्वाच्च पुंवद्भावो न भवति।

२३१७ नवा गुणः सदृशे रित् ॥७।४।८६॥ गुणशब्दो मुख्यसदृशे गुणे गुणिनि वा वर्तमानो वा द्विरुच्यते तत्र चादौ वर्तमानस्य स्यादेः प्लुप् स्यात् सा च रित्। रित्करणं प्रतिषिद्धस्यापि पुंवद्भावस्य 'रिति' इति विधानार्थम्। शुक्ल-शुक्लं रूपम्। शुक्लशुक्लः पटः। कालककालिका। शुक्लादिसदृशमपरिपूर्णगुणमेवमुच्यते। वाग्रहणात् पक्षे जातीयरपि भवति। शुक्लजातीयः। पटुजातीयः। गुण इति किम्। अग्निर्माणवकः। गौर्वाहीकः। सदा गुणवाची यः स इह गुणशब्दो गृह्यते। अयं तूपमानात् प्राग्द्रव्यवाची पश्चात्तु तैक्ष्ण्यजाड्यादिगुणवाचीति न भवति। सदृश इति किम्। शुक्लः पटः। पटुश्चैत्रः।

२३१८ **प्रियसुखं चाकृच्छ्रे** ॥७।४।८७॥ प्रियसुखशब्दौ अकृच्छ्रे—क्लेशाभावे वा द्विरुच्येते तत्र चादौ शब्दरूपस्य स्यादेः प्लुप् स्यात्। प्रियप्रियेण ददाति। प्रियेण ददाति। सुखसुखेनाधीते। सुखेनाधीते। अक्लेशेनाधीते इत्यर्थः। अकृच्छ्र इति किम्। प्रियः पुत्रः। सुखो रथः। चकारः प्लुप् चादौ स्यादेः इत्यस्यानुकर्षणार्थः।

२३१९ **वाक्यस्य परिर्वर्जने** ॥७।४।८८॥ वाक्यस्यावयवो यः परिशब्दो न पदस्य स वर्जने वर्तमानो वा द्विरुच्यते। परि परि त्रिगर्तेभ्यो वृष्टो मेघः। परि त्रिगर्तेभ्यो वृष्टो मेघः। परि परि सौवीरेभ्यः। परि सौवीरेभ्यः। वाक्यस्येति किम्। परित्रिगर्तं वृष्टो मेघः। वाक्यस्यैवेत्यवधारणविज्ञानात् पदावये न भवति। परिरिति किम्। अप त्रिगर्तेभ्यो वृष्टो मेघः। वर्जन इति किम्। साधुर्देवदत्तो मातरं परि।

२३२० **परस्परान्योन्येतरेतरस्याम् स्यादेर्वा पुंसि** ॥३।२।१॥ परस्परादीनामपुंसि स्त्रियां नपुंसके च प्रयुज्यमानानां संबन्धिनः स्यादेः स्थाने आमादेशो वा स्यात्। इमे सख्यौ परस्परां भोजयतः। परस्परं भोजयतः। आभिः सखीभिः परस्परां भोज्यते। परस्परेण भोज्यते। इमाः सख्यः परस्परां प्रयच्छन्ति। परस्परस्मै प्रयच्छन्ति। इमाः परस्परां परस्परस्माद्वा बिभ्यति। इमाः परस्परां परस्परस्य वा स्मरन्ति। इमाः परस्परां परस्परस्मिन् वा स्निह्यन्ति। इमे कुले परस्परां परस्परं वा भोजयत इति। इमे सख्यौ कुले वा अन्योन्यामन्योन्यं वा भोजयतः। सखीभिः कुलैर्वा अन्योन्यामन्योन्येन वा भोज्यते। इमे सख्यौ कुले वा इतरेतरामितरेतरं वा भोजयतः। सखीभिः कुलैर्वा इतरेतराभितरेतरेण वा भोज्यते। अपुंसीति किम्। इमे नराः परस्परं भोजयन्ति। नरैः परस्परेण भोज्यते। नरैः परस्परस्मै दीयते। अपरोऽर्थः—परस्परादीनामपुंसि प्रयुज्यमानानां संबन्धिनः स्यादेरमादेशो वा स्यात्। आभिः सखीभिः कुलैर्वा परस्परं परस्परेण वा भोज्यते। स्त्रीभिः कुलैर्वा परस्परं परस्परस्मै वा दीयते। अपरोऽर्थः—परस्परादीनां पुंसि प्रयुज्यमानानां संबंधिनः स्यादेरम्वा स्यात्। एभिर्नरैः परस्परं परस्परेण वा भोज्यते। एभिर्नरैः परस्परं परस्परस्मै वा दीयते। एवं च स्त्रीनपुंसकयोरमामौ द्वावादेशौ वा स्यातामिति त्रैरूप्यम्। इमे परस्परादयः शब्दाः स्वभावादेकत्वपुंस्त्ववृत्तयः कर्मव्यतीहारविषयाः। अस्मादेव च निर्देशात् परान्येतरशब्दानां सर्वनाम्नां द्विर्वचनादि निपात्यते।

॥ इति श्रीसिद्धहैमबृहत्प्रक्रियायां द्विरुक्तप्रक्रिया समाप्ता ॥

समाप्तं पूर्वार्द्धम् ॥

॥ अथोत्तरार्द्धम् ॥

प्रणम्य परमेशानं वाग्देवीं विश्वदेवताम् ।
हेमचन्द्रं च चन्द्राभं सर्वशास्त्रपयोनिधेः ॥१॥
पूर्वार्द्धे प्राक्रियाबद्धं हैमशब्दानुशासनम् ॥
कथितं चोत्तरार्द्धे तत्क्रमेणैवाधुनोच्यते ॥२॥

तत्राथ—

॥ आख्यातप्रकरणे निरनुबन्धा भ्वादयः ॥

आख्यातप्रत्यया धातोर्वक्तव्याः ।

क्रियार्थो धातुः। कृतिः क्रियेत्याद्युक्तमेव। भवति। एधते। अत्ति। दीव्यति। सुनोति। रुणद्धि। तनोति। क्रीणाति। सहति। आयादिप्रत्ययान्तानामपि क्रियार्थत्वात् धातुत्वम्। गोपायति। कामयते। ऋतीयते। जुगुप्सते। कण्डूयति। पापच्यते। चोरयति। कारयति। चिकीर्षति। पुत्रकाम्यति। पुत्रीयति। अश्वति। श्येनायते। हस्तयते। मुण्डयति। एवं जुस्तम्भुचुलुम्पादीनामपि। जवनः। स्तभ्नाति। चुलुम्पाञ्चकार। प्रेङ्खोलयति। शिष्टप्रयोगानुसारित्वात् अस्य लक्षणस्याणपयत्यादिनिवृत्तिः। शिष्टज्ञापनाय चेदं लक्षणम्। एतदविसंवादेन च शिष्टा ज्ञायन्त इति। अन्वयव्यतिरेकाभ्यां च धातोः क्रियार्थत्वावगमः। तथाहि—पचतीत्यादौ धातुप्रत्ययसमुदाये संसृष्टक्रियाकालकारकाद्यनेकार्थाभिधायिनि प्रयुज्यमाने धातोरेव क्रियार्थत्वमवगम्यतेऽन्वयव्यतिरेकाभ्यां नेतरेषाम्। पचतीति प्रयोगे द्वयं श्रूयते पच् इति प्रकृतिः अतिरिति च प्रत्ययः। अर्थोऽपि कश्चिद् गम्यते। विक्लित्तिः कर्तृत्वमेकत्वम्। पठतीत्युक्ते कश्चित् शब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी। पच् शब्दो हीयते पठ्-शब्द उपजायते अतिशब्दोऽन्वयी। अर्थोऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी। विक्लित्तिर्हीयते पठिरुपजायते कर्तृत्वमेकत्वं चान्वयी। तेन मन्यामहे यः शब्दो हीयते तस्यासावर्थो योऽर्थो हीयते यश्च शब्द उपजायते तस्यासावर्थो योऽर्थ उपजायते यश्च शब्दोऽन्वयी तस्यासावर्थो योऽन्वयीति। ननु च कृतिः करोत्यर्थः

क्रिया, तत्र युक्तं पचादीनां किं करोति पचति किं करोति पठतीति किं करोत्यर्थगर्भितत्वात् क्रियात्वम्, अस्तिविद्यतिभवतीनां तु न युक्तम्। नहि भवति किं करोति अस्ति भवति विद्यते चेति। तदयुक्तम्। न करोत्यर्थः क्रियाशब्दस्य प्रवृत्तिनिमित्तमपि तर्हि कारकव्यापारविशेषः। व्यापारश्च व्यापारान्तराद् भिद्यते इत्यस्त्याद्यर्थोऽपि क्रियैव। करोत्यर्थस्तु क्रियाशब्दस्य व्युत्पत्तिनिमित्तमेव। एवं सति क्रियासामान्यवचनाः कृभ्वस्तयः क्रियाविशेषवचनास्तु पचादय इति सिद्धम्। तथा भावे घञित्युक्त्वा कारः पाकः इत्यादयोऽप्युदाह्रियन्ते। क्रियोपपदाद्धातोस्तुमित्युक्त्वा योद्धुं धनुर्भवति द्रष्टुं चक्षुर्जातमित्याद्यप्युदाहरणं युक्तम्। यदाहुः—'यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रथमपुरुषे प्रयुज्यते' इति। क्रिया च द्वेधा सिद्धसाध्यत्वभेदात्। तत्र सिद्धस्वभावोपसंहृतक्रमा परितः परिच्छिन्ना सत्वभावमापन्ना घञादिभिरभिधीयते। यदाह—'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति। तुमादिभिस्तु सत्वभावमनापन्नेति विशेषः। साध्यमानावस्था पूर्वापरीभूतावयवा भूतभविष्यद्वर्तमानसदसदाद्यनेकावयवरूपाख्यातपदैरुच्यते। यदाह-पूर्वापरीभूतं भावमाख्यातेनाचष्टे। यथा च पचतीत्यत्र पूर्वापरीभावस्तद्वदेव जायते अस्ति विपरिणमते वर्धते अपक्षीयते विनश्यति भवति श्वेतते संयुज्यते समवैतीत्यादावपि। साध्यत्वाभिधानेन क्रमरूपाश्रयणात् क्रियाव्यपदेशः सिद्धः। तदुक्तम्।

'यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् तत् क्रियेति प्रतीयते'॥

१ **न प्रादिरप्रत्ययः** ॥३।३।४॥ प्रादिश्चाद्यन्तर्गणः स धातुर्धातोरवयवो न स्यात्, तं व्युदस्य ततः पर एव धातुसंज्ञो वेदितव्यः 'अप्रत्ययः'—न चेत्ततः परः प्रत्ययो भवति। अभ्यमनायत। अभिमिमनायिषते। अभिमनाय्य गतः। प्रासादीयत्। प्रासिसादीयिषति। प्रासादीय्य गतः। प्रादिरिति किम्। अमहापुत्रीयत्। अप्रत्यय इति किम्। औत्सुकायत। उत्सुसुकायिषते। उत्सुकायित्वा। अभिमनायादिः प्रत्ययान्तः समादिसमुदायः क्रियार्थ इति तस्मिन् धातुसंज्ञे प्राप्ते प्रादिस्ततः प्रतिषेधेन बहिष्क्रियते। ततश्च तत उत्तर एव धातुरिति तस्याट् द्विर्वचनं च भवति। प्रादेश्चोत्तरेण समास इति क्त्वाया यबादेशः। असंग्रामयत शूर इति। नायं सम् प्रादिः किंतु धात्ववयवः, यथा विच्छाद्यवयवो विः, संग्रामणि युद्धे इत्यखण्डस्य चुरादौ पाठात्।

२ **त्रीणि त्रीण्यन्ययुष्मदस्मदि** ॥३।३।१७॥ सर्वासां विभक्तीनां त्रीणि त्रीणि वचनानि अन्यस्मिन्नर्थे चाभिधेये यथाक्रमं परिभाष्यन्ते । अन्यत्वं युष्मदस्मदपेक्षं संनिधानात् । युष्मच्छब्दोपसृष्टार्थो युष्मदर्थः । तेन भवच्छब्देनोच्यमानो न युष्मदर्थः ।

३ **एकद्विबहुषु** ॥३।३।१८॥ अन्यादिषु यानि त्रीणि त्रीणि वचनान्युक्तानि तानि एकद्विबहुष्वर्थेषु परिभाष्यन्ते । एकस्मिन्नर्थे एकवचनं, द्वयोरर्थयोर्द्विवचनं, बहुष्वर्थेषु बहुवचनम् । वचनभेदान्नान्यादिभिरेकादीनां यथासंख्यम् ।

४ **नवाद्यानि शतृक्वसू च परस्मैपदम्** ॥३।३।१९॥ सर्वासां विभक्तीनामाद्यानि नव नव वचनानि शतृक्वसू च प्रत्ययौ परस्मैपदसंज्ञानि स्युः । परस्मैपदसंज्ञाप्रदेशाः ' शेषात्परस्मै ' इत्यादयः ।

५ **पराणि कानानशौ चात्मनेपदम्** ॥३।३।२०॥ सर्वासां विभक्तीनां पराणि नव नव वचनानि कानानशौ च प्रत्ययावात्मनेपदसंज्ञानि स्युः । आत्मनेपदप्रदेशाः ' सिजाशिषावात्मने ' इत्यादयः ।

६ **तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्च** ॥३।३।२१॥ तदात्मनेपदं कृत्यक्तखलर्थाश्च प्रत्ययाः साप्यात्सकर्मकाद् धातोः कर्मणि, अनाप्यादकर्मकादविवक्षितकर्मकाच्च भावे स्युः । क्रियते कटश्चैत्रेण । क्रियमाणः । करिष्यमाणः । चक्राणः । भावे—भूयते भवता । भूयमानं भवता । सकर्मका अपि अविवक्षितकर्माणः कर्त्रेकनिष्ठव्यापारा अकर्मका भवन्ति । तेनैषां भावेऽपि प्रयोगः । क्रियते भवता । मृदु पच्यते भवता । पञ्च वारान् भुज्यते भवता । कृत्याः—कार्यः कर्तव्यः करणीयः देयः कृत्यः कटो भवता । भवता शयनीयम् । भवता शयितव्यम् । भवता शेयम् । भवता कार्यम् कर्तव्यम् करणीयम् । देयं कृत्यं भवता । क्तः—कृतः कटो भवता । शयितं भवता । कृतं भवता । सकर्मकादपि क्लीबे भावे क्तमिच्छन्ति । ग्रामं गतं भवता । ओदनं भुक्तं भवता । खलर्थाः—सुकरः कटो भवता । सुशयं भवता । सुकरं भवता । सुकटंकराणि वीरणानि । ईषदाढ्यं भवं भवता । सुज्ञानं तत्त्वं मुनिना । सुग्लानं कृपणेन । ' कालाध्वभावदेशं वा ' इत्यादिना कालाध्वभावदेशानां कर्मसंज्ञाया अकर्मकत्वस्य च विधानात् तद्योगे कर्मणि भावे चात्मनेपदादीनि भवन्ति । मास आस्यते । क्रोशो गुडधानाभिर्भूयते । गोदोहः सुप्यते ।

नदी सुप्यते । मास आसितव्यः । मास आसितः । मासो दुरासः । भावे–मास-मास्यते । क्रोशमधीयते । ओदनपाकं स्थीयते । कुरून् सुप्यते । मासमासितव्यम् । मासमासितम् । मासं स्वासम् । भावे च युष्मदस्मत्संबन्धनिमित्तयोः कर्तृकर्मणोरभावात् प्रथममेव त्रयं भवति । साध्यरूपत्वाच्च संख्यायोगो नास्तीति औत्सर्गिकमेकवचनमेव भवति । पाकः पाकौ पाकाः। पाको वर्तते पाकं करोतीत्यादौ चानव्ययकृदभिहितो भावो द्रव्यवत्प्रकाशत इति संख्यया लिङ्गेन कारकैश्च युज्यते । त्यादिनेवाव्ययेनाभिहितस्त्वसत्वरूपत्वान्न युज्यते । उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्ते इति तु बहुवचनं कृदभिहितेन अभेदोपचाराद् भवतीति ।

७ इङ्ङितः कर्तरि ॥३।३।२२॥ इकारेतो ङकारेतश्च धातोः कर्तर्यात्मनेपदं स्यात् । एभ्य एव कर्तरीति नियमार्थं वचनम् ।

८ ईगितः ॥३।३।९७॥ ईकारेतो गकारेतश्च धातोः फलवति कर्तरि आत्मनेपदं स्यात् । यजीं यजते । डुकृंग् कुरुते । फलवतीत्येव । यजन्ति याजकाः । पचन्ति पाचकाः । कुर्वन्ति कर्मकराः । नात्र स्वर्गौदनादि प्रधानं फलं कर्त्रा संबध्यते । यच्च दक्षिणावेतनादि संबध्यते न तत् क्रियायाः फलं प्रधानम् इति । तच्चैतत्स्वार्थलक्षणं फलं सदसद्वा विवक्षानिबन्धनमेव ग्राह्यम् । तथैव लोके व्यवहारात् । तथाहि–क्वचिदसदपि सद्विवक्ष्यते । यथा शोषयते व्रीहीनातपः । शब्दः प्राक् स्वार्थमभिधत्ते ततो द्रव्यम् । परकर्मण्यपि प्रवृत्ताः कदाचिदाहुर्यजामहे इमे पचामहे । यत्नादस्मदीयमेवैतदिति क्वचित्सदप्यसद्विवक्ष्यते । यथा इमे ब्रूमः । अवचनप्रतिषेधपरत्वेन प्रवृत्तेर्विवक्षितत्वात् । एवम् अगमकत्वादिति ब्रूमो न ब्रूमोऽपशब्दः स्यादिति । तदाहुः—

> ' क्रियाप्रवृत्तावाख्याता कैश्चित्स्वार्थपरार्थता ।
> असती वा सती वापि विवक्षितनिबन्धना ' ॥ इति ।

केचित्तु णिग्वर्जितादीगितो धातोर्णिगर्थे एव प्रेरणाध्येषणविशेषे प्रतिविधाननाम्नि वर्तमानादात्मनेपदमिच्छन्ति । पचते–पाचयतीत्यर्थः । केशश्मश्रु वपते । वापयतीत्यर्थः । वेदो वैधर्म्यं विधत्ते–विधापयतीत्यर्थः इत्यादि । यदाहुः—

'क्रीणीष्व वपते धत्ते मिनुते चिनुतेऽपि च ।
आत्मप्रयोगा दृश्यन्ते येषु ण्यर्थोऽभिधीयते' ॥

एतच्च श्रोत्रियमतमित्युपेक्ष्यते ।

९ शेषात्परस्मै ॥३।३।१००॥ पूर्वप्रकरणेनात्मनियमः कृतः परस्मैपदं तु अनियतमिति नियमार्थमिदम् । उपयुक्तादन्यः शेषः। येभ्यो धातुभ्यो येन विशेषेणात्मनेपदमुक्तं ततोऽन्यस्मादेव धातोः कर्तरि परस्मैपदं स्यात् । अनुबन्धोपसर्गार्थोपपदप्रत्ययभेदाच्चानेकधा शेषः ।

१० सति ॥८।२।१९॥ सन् विद्यमानो वर्तमान इत्यर्थः स च प्रारब्धापरिसमाप्तः क्रियाप्रबन्धः । सत्यर्थे वर्तमानाद्धातोर्वर्तमाना विभक्तिः स्यात् । जीवं न मारयति मांसं न भक्षयतीत्यादौ नियमः प्रारब्धोऽसमाप्तश्च प्रतीयते । इहाधीमहे इह कुमाराः क्रीडन्तीत्यादौ क्रियान्तरव्यवधानेऽपि अध्ययनादिक्रियायाः प्रारम्भापरिसमाप्तिरस्त्येव । चैत्रो भुङ्क्ते इत्यादावपि हि क्रियान्तरव्यवधानमशक्यपरिहारम् । सोऽपि ह्यवश्यं भुञ्जानो हसति जल्पति पानीयं वा पिबतीति । तिष्ठन्ति पर्वताः स्यन्दन्ते नद्य इत्यादौ तु स्फुटैव प्रारम्भापरिसमाप्तिः। कथं तर्हि तस्थुः स्थास्यन्ति गिरय इति । भूतभाविनां भरतकल्किप्रभृतीनां राज्ञां याः क्रियाः तदवच्छेदेन पर्वतादिक्रियाणामतीतत्वानागतत्वोपपत्तेर्न भूतभाविप्रत्ययानुपपत्तिदोषः। एवं च विद्यमानकर्तृकेभ्योऽस्त्यर्थेभ्यो धातुभ्यः सर्वा विभक्तयो भवन्ति । कूपोऽस्ति भविष्यति भविताऽभूदासीत् बभूव । (अथेयं का वर्तमाना ?)

११ वर्तमाना तिव् तस् अन्ति सिव् थस् थ मिव् वस् मस् ते आते अन्ते से आथे ध्वे ए वहे महे ॥३।३।६॥ इमानि वचनानि वर्तमानासंज्ञानि स्युः। वित्करणं 'शिदवित्' इत्यत्र विशेषणार्थम् । एवमन्यत्रापि वित्करणस्य प्रयोजनं द्रष्टव्यम् । वर्तमानाप्रदेशाः 'स्मे च वर्तमाना' इत्यादयः ।

१२ एताः शितः ॥३।३।१०॥ एताः—वर्तमानासप्तमीपञ्चमीह्यस्तन्यः शितः—शानुबन्धा वेदितव्याः। शित्वाच्च शित्कार्यम् । भू सत्तायाम् ॥१॥ कर्तृविवक्षायां भू ति इति स्थिते ।

१३ **कर्तर्यनदृभ्यः शप्** ॥३।४।७१॥ धातोरदादिवर्जितात् कर्तरि विहिते शिति शप् प्रत्ययः स्यात् । शकारवकारौ शिद्वित्कार्यार्थौ ।

१४ **नामिनो गुणोऽक्ङिति** ॥४।३।१॥ नाम्यन्तस्य धातोः कित्ङित्त्वर्जिते प्रत्यये परे आसन्नो गुणः स्यात् । इति गुणे अवादेशे भवति । नामिन इति किम् । याति । नीभ्यां लूभ्यामित्यादौ गौणत्वान्न गुणः । अक्ङितीति किम् । चितः। अशिश्रियत् ।

१५ **शिदाचित्** ॥४।३।२०॥ धातोः परो विद्वर्जितः शित्प्रत्ययो ङिद्वत्स्यात् । इत्यनेन तसि ङिद्भावाद् गुणाप्राप्तावपि शवनिमित्तो गुणः। भवतः। अविदिति किम् । एति । शिदिति किम् । वेषीष्ट । कथं च्यवन्ते प्लवन्ते ? अन्तरङ्गत्वाद् गुणे कृते शवो लोपात् स्थानिवद्भावाद्वा । लुगस्यादेत्यपदे इत्यकारलुकि, भवन्ति। भवसि । भवथः । भवथ ।

१६ **मव्यस्याः** ॥४।२।११३॥ धातोर्विहिते मकारादौ वकारादौ च प्रत्ययेऽकारस्याकारो दीर्घः स्यात् । भवामि । भवावः । भवामः । धातोः प्रत्ययेनाभिसंबंधो नाकारेणेति प्रत्ययाकारस्यापि दीर्घो भवति । अस्येति किम्। चिनुवः। चिनुमः । आकारस्य दीर्घत्वेन विशेषणमाकारो दीर्घ एव यथा स्यात् न प्लुतस्तल्लक्षणयोगेऽपीत्येवमर्थम् । स भवति । तौ भवतः । ते भवन्ति । त्वं भवसि । युवां भवथः । यूयं भवथ । अहं भवामि । आवां भवावः वयं भवामः । एवं सर्वासु विभक्तिषु । द्वययोगे त्रययोगे च शब्दस्पर्धात् पराश्रयमेव वचनमतिदिश्यते । स च त्वं च भवथः । स चाहं च भवावः। स च त्वं चाहं च भवामः। कथमत्वं त्वं संपद्यते अनहमहं संपद्यते त्वद्भवति मद्भवति? युष्मदस्मदोर्गौणत्वात् । त्वमादेशौ तु शब्दमात्राश्रयत्वाद् भवत एव । एहि मन्ये रथेन यास्यसि नहि यास्यसि यातस्ते पितेति प्रहासे यथाप्राप्तमेव प्रतिपत्तिर्नात्र प्रसिद्धार्थविपर्यासे किंचिन्निबन्धनमस्ति । रथेन यास्यसीति भाविगमनाभिधानात्प्रहासो गम्यते । नहि यास्यसीति बहिर्गमनं प्रतिषिध्यते । अनेकस्मिन्नपि प्रहसितरि च प्रत्येकमेव परिहास इति अभिधानवशान्मन्ये इत्येकवचनमेव । लौकिकश्च प्रयोगोऽनुसर्तव्य इति न प्रकारान्तरकल्पना न्याय्या ।

१७ **विधिनिमन्त्रणाधीष्टसंप्रश्नप्रार्थने** ॥५।४।२८॥ विधिरप्राप्ते नियोगः। क्रियायां प्रेरणेति यावत्। अज्ञातज्ञापनमित्येके। कटं कुर्यात् करोतु भवान्। प्रेरणायामेव यस्यां प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणम्, इच्छामन्तरेणापि नियोगतः कर्तव्यमिति यावत्। द्विसन्ध्यमावश्यकं कुर्यात् करोतु भवान्। यत्र प्रेरणायामेव प्रत्याख्याने कामचारस्तदामन्त्रणम्। इहासीत आस्तां भवान् यदि रोचते। प्रेरणैव सत्कारपूर्विकाऽधीष्टम् अध्येषणम्। [1]तत्त्वज्ञानं नः प्रसीदेयुः प्रसीदन्तु गुरुपादाः। संप्रश्नः संप्रधारणा। किन्नु खलु भो व्याकरणमधीयीय अध्यये उत सिद्धान्तम्। प्रार्थनं याच्ञा। प्रार्थना मे व्याकरणमधीयीय अध्यये। एतेषु विध्यादिविशिष्टेषु कर्तृकर्मभावेषु प्रत्ययार्थेषु धातोः सप्तमीपञ्चम्यौ स्याताम्। सर्वप्रत्ययापवादौ।

१८ **सप्तमी यात् याताम् युस् यास् यातम् यात याम् याव याम ईत ईयाताम् ईरन् ईथास् ईयाथाम् ईध्वम् ईय ईवहि ईमहि** ॥३।३।७॥ इमानि वचनानि सप्तमीसंज्ञानि स्युः। सप्तमीप्रदेशाः 'इच्छार्थे कर्मणः सप्तमी' इत्यादयः।

१९ **यः सप्तम्याः** ॥४।२।११७॥ अकारात्परस्य सप्तम्याः संबंधिनो याशब्दस्येकारादेशः स्यात्। भवेत्। भवेताम्। आदित्येव। अद्यात्।

२० **याम्युसोरियामियुसौ** ॥४।२।१२३॥ अकारात् परयोर्याम्युस् इत्येतयोर्यथासंख्यमियमियुसावादेशौ स्याताम्। भवेयुः। भवेः। भवेतम्। भवेत। भवेयम्। भवेव। भवेम।

२१ **प्रैषानुज्ञावसरे कृत्यपञ्चम्यौ** ॥५।४।२९॥ त्वत्कारपूर्विका प्रेरणा प्रैषः। अनुज्ञा कामचारानुमतिः। अतिसर्ग इति यावत्। अवसरः प्राप्तकालता–निमित्तभूतकालोपनतिः। प्रैषादिविशिष्टे कर्त्रादावर्थे धातोः कृत्यप्रत्ययाः पञ्चमी च विभक्तिः स्यात्। यद्यपि कृत्याः सामान्येन भावकर्मणोर्विहितास्तथापि सर्वप्रत्ययापवादभूतया पञ्चम्या बाध्येरन् इति पुनर्विधीयन्ते। भवता खलु कटः कार्यः कर्तव्यः करणीयः कृत्यः। अनुज्ञायां केचित्सप्तम्येवेत्याहुः।

---

१ तत्त्वज्ञानं कर्मतापन्नं नोऽस्मभ्यं प्रसादपूर्वकं दद्युः–प्रसीदेयुः गुरुपादाः। यद्वा तत्त्वज्ञानरूपक्रियाविशेषणादम् नोऽस्माकं प्रसीदेयुः।

२२ **आशीष्याशीःपञ्चम्यौ** ॥५।४।३८॥ आशासनमाशीः। आशीर्विशिष्टेऽर्थे वर्तमानाद्धातोराशीःपञ्चम्यौ विभक्ती स्याताम्। कश्चित्तु समर्थनायां पञ्चमीमिच्छति। परैरशक्यस्य वस्तुनोऽध्यवसायः समर्थना। कश्चिदाह समुद्रः शोषयितुमशक्यः। स आह समुद्रमपि शोषयाणि।

२३ **पञ्चमी तुव् ताम् अन्तु हि तम् त आनिव् आवव् आमव् ताम् आताम् अन्ताम् स्व आथाम् ध्वम् ऐव् आवहैव् आमहैव्** ॥३।३।८॥ इमानि वचनानि पञ्चमीसंज्ञानि स्युः। पञ्चमीप्रदेशाः 'स्मे पञ्चमी' इत्यादयः।

२४ **आशिषि तुह्योस्तातङ्** ॥४।२।११९॥ आशिषि विहितयोस्तुह्योः स्थाने तातङ् आदेशो वा स्यात्। आयुष्मान् भवतु भवतात् भवान्। ङित्करणं गुणनिषेधार्थम्।

२५ **अतः प्रत्ययाल्लुक्** ॥४।२।८५॥ धातोः परो योऽकारान्तः प्रत्ययस्तस्मात्परस्य हेर्लुक् स्यात्। भव। आशिषि श्रेयस्वी भवतात् सौम्य। भवतम्। भवत। भवानि। भवाव। भवाम।

२६ **अनद्यतने ह्यस्तनी** ॥६।२।७॥ आन्याय्यादुत्थानादान्याय्याच्च संवेशनादहरुभयतः सार्धरात्रं वा अद्यतनः कालः। तस्मिन्नसति भूतेऽर्थे वर्तमानाद्धातोर्ह्यस्तनी विभक्तिः स्यात्।

२७ **ह्यस्तनी दिव् ताम् अन् सिव् तम् त अम्व् व म त आताम् अन्त थास् आथाम् ध्वम् इ वहि महि** ॥३।३।१॥ इमानि वचनानि ह्यस्तनीसंज्ञानि स्युः। ह्यस्तनीप्रदेशाः 'अनद्यतने ह्यस्तनी' इत्यादयः। दिस्योरिकार उच्चारणार्थः।

२८ **अड्धातोरादिर्ह्यस्तन्यां चामाङा** ॥४।४।२९॥ ह्यस्तन्यामद्यतनीक्रियातिपत्त्योश्च विषये धातोरादिरवयवोऽट् स्यात् 'अमाङा'–माङा योगे तु न। अभवद् ह्यो जिनार्चा। विरामे वा। अभवत्। अभवताम्। अभवन्। अभवः अभवतम्। अभवत। अभवम्। अभवाव। अभवाम। विषयविज्ञानात् प्रत्ययव्य-

धानेऽपि भवति। परविज्ञाने हि अहन्नित्यादावेव स्यात्। अमाङेति किम्। मा भवान् भूत्। मास्म भवत्। अस्मद्विना मा भूशमुन्मनी भूः। धातोरादिरिति किम्। प्राभवत्।

२९ अद्यतनी ॥५।२।४॥ भूतेऽर्थे वर्तमानाद्धातोरद्यतनी विभक्तिः स्यात्।

३० सिजद्यतन्याम् ॥ ३।४।५३ ॥ धातोरद्यतन्यां परभूतायां सिच् प्रत्ययः स्यात्। वेति निवृत्तम्। इकारचकारौ विशेषणार्थौ।

३१ पिबैतिदाभूस्थः सिचो लुप्परस्मै न चेट् ॥४।३।६६॥ एभ्यः परस्य सिचः परस्मैपदे परे लुप् स्यात् 'न चेट्' लुप्संनियोगे चैतेभ्य इट् न भवति। एतीति इणिकोर्ग्रहणम्। देति दासंज्ञा धातवः। भू इति भवतेरस्त्यादेशस्य च ग्रहणम्। पिबेति किम्। पातिपायत्योः अपासीत् वनं वा वस्त्रं वा। दासंज्ञ इति किम्। अदासीत् केदारं भोजनं वा। परस्मै इति किम्। अपासत पयांसि चैत्रेण। लुकमकृत्वा लुब्विधानं स्थानिवद्भावाभावार्थम्। तेनाबोभोदित्यत्र न वृद्धिः।

३२ भवतेः सिज्लुपि ॥४।३।१२॥ सिचो लुपि भवतेर्गुणो न स्यात्। अड्धातोरित्यडागमे। अभूत्। अभूताम्। अभूस् अन् इति स्थिते सिज्लोपे धातोरिवर्णस्येत्युवादेशे।

३३ भुवो वः परोक्षाद्यतन्योः ॥४।२।४३॥ भुवो वकारान्तस्य परोक्षाद्यतन्योः परतः उपान्त्यस्योद्भवति। अभूवन्। अभूः। अभूतम्। अभूत। अभूवम्। अभूव। अभूम। व इति किम्। अभूत्। अत्र भस्य मा भूत्।

३४ परोक्षे ॥५।२।१२॥ अक्षाणां परः परोक्षः। अतएव निर्देशात् साधुः अव्युत्पन्नो वा असाक्षात्कारार्थः। भूतानद्यतने परोक्षेऽर्थे वर्तमानाद्धातोः परोक्षा विभक्तिः स्यात्। यद्यपि साध्यत्वेनानिष्पन्नत्वात् सर्वोऽपि धात्वर्थः परोक्षस्तथापि प्रत्यक्षसाधनत्वेन तत्र लोकस्य प्रत्यक्षत्वाभिमानोऽस्ति। यत्र स नास्ति स परोक्षः।

३५ परोक्षा णव् अतुस् उस् थव् अथुस् अ णव् व म ए आते इरे से आथे ध्वे ए वहे महे ॥ ३।३।१२ ॥ इमानि वचनानि परोक्षासंज्ञानि

स्युः । परोक्षाप्रदेशाः ' श्रुसदवस्भ्यः परोक्षा वा ' इत्यादयः । भू णव् इति स्थिते णकारो वृद्ध्यर्थः ।

.३६ **द्विर्धातुः परोक्षाङे प्राक्तु स्वरे स्वरविधेः** ॥४।१।१॥ परोक्षायां ङे च प्रत्यये परे धातुर्द्विः स्यात् । धातोरवस्थितस्य द्वितीयमुच्चारणं क्रियत इत्यर्थः । स्वरादौ तु द्विर्वचननिमित्ते प्रत्यये स्वरस्य कार्यात् प्रागेव द्वित्वं भवति । धातुरिति किम् । प्राशिश्रियत् । ' वेत्तेः कित् ' इति वचनादामि परोक्षाकार्यं न भवति । दयांचक्रे । परोक्षाङ इति किम् । अदात् । प्रागिति किम् । निनायेत्यादिषु वृद्ध्यादेः स्वरविधेः पूर्वमेव द्वित्वं सिद्धं भवति । स्वर इति किम् । दिदीर्वान् । स्वरविधेरिति किम् । श्वि–[1]शुशाव । [2]तितवनीयिषतीत्यत्र तु [3]स्वरविधेर्द्विर्वचननिमित्तप्रत्ययाजन्यत्वान्न ततः प्राग् द्वित्वम् । जग्ले मम्ले इति अनिमित्तकमात्वम् । अधिजगे इति विषये आदेशः । प्राक्तु स्वरे स्वरविधेरिति आद्विर्वचनमधिकारः । अन्यथा हि आटिटत् इत्यादि न सिद्ध्येत् । [प्रागेव णेर्लोपे सति]

३७ **भूस्वपोरदुतौ** ॥ ४।१।७० ॥ भूस्वप् इत्येतयोः परोक्षायां द्वित्वे सति पूर्वस्य यथासंख्यमकारोकारौ स्याताम् । केचित्तु कर्तर्येव धुवोऽकारमिच्छन्ति न भावकर्मणोः । तेन बुभूवे चैत्रेण, अनुबुभूवे कम्बलः साधुनेत्येव भवति ।

३८ **द्वितीयतुर्ययोः पूर्वौ** ॥४।१।४२॥ धातोर्द्वित्वे सति पूर्वस्य द्वितीयतुर्ययोः स्थाने यथासंख्यं पूर्वावाद्यतृतीयावासन्नौ स्याताम् ।

३९ **नाम्निनोऽकलिहलेः** ॥४।३।५१॥ नाम्यन्तस्य धातोर्नाम्नो वा कलिहलिवर्जितस्य ञिणिति प्रत्यये परे वृद्धिः स्यात् । इति वृद्धावावादेशे ' धुवोव ' इत्यूत्वे च बभूव श्वीवीरः । बभूवतुः । कलिहलिवर्जनान्नाम्नोऽपि । तेन पटुमाख्यातवान् अपीपटत् । अलीलघत् इत्यत्र वृद्धावन्त्यस्वरादिलोपे चासमानलोपित्वात् सन्वद्भावः सिद्धो भवति । कलिहलिवर्जनं किम् । कलिं हलिं वाग्रहीत् अचकलत् अजहलत् । अन्ये तु नाम्नो वृद्धिमनिच्छन्तोऽन्त्यस्वरस्योकारस्यैव णिचि लोपमिच्छन्तः समानलोपित्वात्सन्वद्भावप्रतिषेधेऽपपटत् अललघदित्येवाहुः।

---

१ अत्र स्वरव्यञ्जनकार्यं 'वा परोक्षायङि' इति व्यृत् ' दीर्घमवोऽन्त्यम् '।
२ तुंक् वृत्तीत्यतोऽनडन्तात् क्यनि सनि ' अन्यस्य ' इति द्वित्वम् ।
३ गुणरूपस्येत्यर्थः ।

४० स्कसृवृभृस्तुद्रुस्रुस्रोर्व्यञ्जनादेः परोक्षायाः ॥४।४।८३॥ सस्सटः करोतेः सृवृभृस्तुद्रुस्रुवर्जितेभ्यश्च सर्वधातुभ्यः परस्य व्यञ्जनादेः परोक्षाया आदिरिट् स्यात् । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ।

आशिष्याशीःपञ्चम्यावित्युक्तमेव ।

४१ आशीः क्यात् क्यास्ताम् क्यासुस् क्यास् क्यास्तम् क्यास्त क्यासम् क्यास्व क्यास्म सीष्ट सीयास्ताम् सीरन् सीष्ठास् सीयास्थाम् सीध्वम् सीय सीवहि सीमहि ॥ ३।३।१३ ॥ इमानि वचनानि आशीःसंज्ञानि स्युः । कित्करणं ' नामिनो गुणोऽकिङति ' इत्यादिषु विशेषणार्थम् । भूयात् भद्रं सद्भ्यः । भूयास्ताम् । भूयासुः । भूयाः भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ।

४२ अनद्यतने श्वस्तनी ॥५।३।५॥ न विद्यतेऽद्यतनो यत्र तस्मिन् वर्त्स्यति धात्वर्थे वर्तमानाद्धातोः श्वस्तनी विभक्तिः स्यात् । अनद्यतन इति बहुव्रीहिः किम् । व्यामिश्रे मा भूत् । अद्य श्वो वा गमिष्यति । कथं श्वो भविष्यति मासेन गमिष्यति ? [1]पदार्थे भविष्यन्ती पश्चात् श्वःशब्देन योगः ।

४३ श्वस्तनी ता तारौ तारस् तासि तास्थस् तास्थ तास्मि तास्वस् तास्मस् ता तारौ तारस् तासे तासाथे ताध्वे ताहे तास्वहे तास्महे ॥३।३।१४॥ इमानि वचनानि श्वस्तनीसंज्ञानि स्युः । श्वस्तनीप्रदेशाः ' अनद्यतने श्वस्तनी ' इत्यादयः ।

४४ स्तास्यशितोऽत्रोणादेरिट् ॥४।४।३२॥ धातोः परस्य सकारादेस्तकारादेश्चाशितः प्रत्ययस्यादिरिट् स्यात् ' अत्रोणादेः ' त्रस्य उणादेश्च न । भविता श्वः पूजोत्सवः । भवितारौ । भवितारः । भवितासि । भवितास्थः । भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः । स्तादीति किम् । त्रस्नुः । स्योमा । भूयात् । दीप्यः । ईश्वरः । विद्वान् । अशित इति किम् । आस्से । आस्ते । अत्रोणादेरिति किम् । शस्त्रम् । योत्रम् । पत्रम् । पोत्रम् । उणादिः—वत्सः । अंसः । दन्तः । हस्तः ।

---

१ पदं गमिष्यति क्रिया सार्थो यस्य धात्वर्थस्य तस्मिन् ।

४५ **भविष्यन्ती** ॥६।३।४॥ वर्त्स्यत्यर्थे वर्तमानाद्धातोः परा भविष्यन्ती विभक्तिः स्यात् ।

४६ **भविष्यन्ती स्यति स्यतस् स्यन्ति स्यसि स्यथस् स्यथ स्यामि स्यावस् स्यामस् स्यते स्येते स्यन्ते स्यसे स्येथे स्यध्वे स्ये स्यावहे स्यामहे** ॥३।३।१५॥ इमानि वचनानि भविष्यन्तीसंज्ञानि स्युः । भविष्यन्तीप्रदेशाः ' भविष्यन्ती ' इत्यादयः । सादित्वादिडागमे । भविष्यति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथ । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः ।

४७ **सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः** ॥६।४।९॥ सप्तम्या अर्थो निमित्तं हेतुफलकथनादिका सामग्री । कुतश्चिद्धेतुगुण्यात् क्रियाया अतिपतनमनभिनिर्वृत्तिः क्रियातिपत्तिः । तस्यां सत्यामेष्यत्यर्थे वर्तमानाद्धातोः सप्तम्यर्थे क्रियातिपत्तिः स्यात् ।

४८ **क्रियातिपत्तिः स्यत् स्यताम् स्यन् स्यस् स्यतम् स्यत स्यम् स्याव स्याम स्यत स्येताम् स्येन्त स्यथास् स्येथाम् स्यध्वम् स्ये स्यावहि स्यामहि** ॥ ३।३।१६ ॥ सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम ।

४९ **अदुरुपसर्गान्तरो णहिनुमीनानेः** ॥२।३।७७॥ दुर्वर्जोपसर्गस्थादन्तःशब्दाच्च रषृवर्णात् परस्य णकारहिनुमीना आनिसंबन्धिनो नकारस्य णः स्यात् । णेति णोपदेशा धातवो गृह्यन्ते । उपसर्गाण्णत्वविधानात् । सर्वे च नादयो णोपदेशा नृतिनन्दिनर्दिनश्चिनाटिनक्किनाधृनाधृनूवर्जम् । नाटीति ' नटण् अवस्यन्दने ' इति चौरादिकस्यैव वर्जनं नतु ' णट नृत्तौ ' इति भौवादिकस्य । प्रणमति । परिणमति । प्रणयति । परिणयति । प्रणामकः । परिणामकः । प्रणायकः । परिणायकः । अन्तर्–अन्तर्णयति । अन्तर्णायकः । हिनु–प्रहिणोति । प्रहिणुतः । मीना–प्रमीणाति । प्रमीणीतः । हिनुमीनाग्रहणे विकृतस्यापि भवति । एकदेशविकृतस्यानन्यत्वात् आनि–प्रभवाणि । आनीत्यर्थवत एव ग्रहणादनर्थकस्य न भवति । प्रवृद्धा वपा येषां तानि प्रवपानि मांसानि । अदुरिति किम् । दुर्भवानि । उपसर्गान्तरिति किम् । प्रातर्नयति । पुनर्नयति । येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा

भवन्तीतीह न भवति । प्रगता नायका यस्मात्प्रनायको देशः । णहिनुमीनानेरिति किम् । प्रनृत्यति । अणोपदेशस्त्वाण्णत्वं न भवति । अलचटतवर्गशसान्तर इत्येव । प्रतिनमति । प्रददाति । परिनदनमित्यत्र तु क्षुभ्नादित्वान्न भवति ।

५० अकखाद्यषान्ते पाठे वा ॥२।३।८०॥ पाठे धातूपदेशे ककारखकारादिः षकारान्तश्च यो धातुस्ताभ्यामन्यस्मिन् धातौ परेऽदुरुपसर्गान्तःशब्दस्थात् रषृवर्णात् परस्य नेर्नकारस्य णो वा स्यात् । प्रणिभवति । प्रनिभवति । प्रणिष्टभ्नाति । प्रनिष्टभ्नाति । स्तम्भेः सौत्रेषु पाठात् पाठविषयत्वम् । अकखादीति किम् । प्रनिकरोति । प्रनिखनति । अषान्त इति किम् । प्रनिद्वेष्टि । पाठ इति किम् । इह च प्रतिषेधो यथा स्यात् । प्रतिचकार । प्रनिचखाद । प्रनिषेक्ष्यति । इह च मा भूत् प्रनिवेष्टा । प्रणिवेष्टा । प्रणिदेष्टा । प्रनिदेष्टा । यङ्लुपि नेच्छन्त्येके । प्रनिपापचीति । प्रनिसासक्ति इत्यादि । भू सत्तायामिति सत्ताद्यर्थनिर्देशोऽत्रोपलक्षणम् । मृदो घटो भवतीत्यादावुत्पद्यत इत्याद्यर्थात् । उपसर्गा अर्थविशेषस्य द्योतकाः । प्रभवति पराभवति सम्भवति अनुभवति अभिभवतीत्यादौ विधिधार्थावगतेः ।

तदुक्तम्:–' उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
विहाराहारसंहारमहारप्रतिहारवत् ' ॥

अपरं च–' धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।
तमेव विशिनष्ट्यन्योऽनर्थकोऽन्यः प्रयुज्यते ' ॥

बाधते यथा-प्रतिष्ठते । प्रस्मरति । प्रवसति । प्रलीयते । प्रतीक्षते । प्रतिपालयति । तमनुवर्तते यथा–अधीते । अध्येति । आचामति । आचष्टे । अनुरुध्यते । प्रलोकयति । तमेव विशिनष्टि यथा–प्रपचति । प्रकरोति । प्राणिति । प्राश्नाति । निरीक्षते । निष्पति । अनर्थको यथा–प्रलम्बते । प्रार्थयते । विजयते । विजानाति । निमीलति । निखञ्जति । निरजति । एषां चापश्चभ्यः प्रायेण प्रयोगो भवति । आहरति । व्याहरति । अभिव्याहरति । समभिव्याहरति । प्रसमभिव्याहरतीति । अथ किं धातुः पूर्वं क्रियाविशेषकेणोपसर्गेण युज्यते उत साधनाभिधायिना प्रत्ययेनेति ? साधनेनेति केचित् । साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि । अभिनिर्वृत्तस्य चोपसर्गेण विशेषः शक्यो वक्तुं नानाभिनिर्वृत्तस्य । तदयुक्तम् । यो हि धातूपसर्गयोरभिसंबन्धस्तमभ्यन्तरीकृत्य धातुः साधनेन प्रयुज्यते यस्माद्विशिष्टैव क्रिया साधनेन साध्यते

न तु साधनालब्धस्वरूपान्यतो विशेषं लभते। तस्मात्पूर्वमुपसर्गेणेति युक्तम्। तथा च समस्करोत् संचस्कारेत्यत्रान्तरङ्गत्वात् स्सटि कृते प्रत्ययनिमित्ते अडागमद्विर्वचने भवतः अतश्चैवम्। पूर्वं हि धातोः साधनेन संबंधे आस्यते गुरुणेत्यकर्मकः उपास्यते गुरुरिति सकर्मको धातुः केन स्यात्। न चैतद्वाच्यं प्रत्ययसंबन्धमन्तरेण क्रियाविशेषस्यानभिव्यक्तेर्न धातोः पूर्वमुपसर्गेण संबन्धो युज्यते। यतः बीजकालेषु संबद्धा यथा लाक्षारसादयः वर्णादिपरिणामेन फलानामुपकुर्वते बुद्धिस्थादभिसंबन्धात्तथा धातूपसर्गयोरभ्यन्तरीकृतो भेदः पदकाले प्रकाश्यते। पद्येवमुपेत्यादावन्तरङ्गत्वादेत्वदीर्घत्वयोः कृतयोर्ह्स्वाभावात्तोऽन्तो न प्राप्नोति। सत्यम्। असिद्धं बहिरङ्गमन्तरङ्गे भविष्यति। प्रेजुः प्रोपुः इत्यत्र तु यज्वपोर्व्हृति द्वित्वे च सति अन्तरङ्गत्वात् समानदीर्घत्वे पश्चादेदोतौ। यदा पूर्वमेदोतौ ततोऽयवादेशे 'व्यञ्जनस्यानादेर्लुक्' इति लुकि पुनरेदोतौ। ननु कर्तुं प्रकर्षेणेच्छति प्रचिकीर्षति इत्यादौ धात्वन्तरसंबद्धस्योपसर्गस्य तदर्थप्रतिपादकप्रत्ययादेव प्राक्प्रयोगः प्राप्नोति। नैवम्। तस्याधातुत्वात्। समुदायस्यैव धातुत्वात्। एवं मनःशब्दात् सुभवतौ दुर्भवतौ अभिभवतौ क्यङ्प्रत्यये सुमनायते दुर्मनायते अभिमनायते हस्तिनाऽतिक्रामति अतिहस्तयति सेनयाभियाति अभिषेणयतीत्यादावपि द्रष्टव्यम्॥ पां पाने ॥२॥ अनुस्वार 'एकस्वरादनुस्वारेत' इतीण्निषेधार्थः।

५१ श्नौतिकृवुधिवुपाघ्राध्मास्थाम्नादाम्दृश्अर्तिशदसदः शृकृधिपिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौयसीदम् ॥४।२।१०८॥ श्नौत्यादीनां शिति परे यथासंख्यं शृ इत्यादय आदेशाः स्युः अत्यादौ। 'पिब' इति स्वरान्तत्वादुपान्त्यलक्षणो गुणो न भवति। पिबति। पिबतः। पिबन्ति। घ्रादिभिः साहचर्यात् पात्योर्भौवादिकयोरेव ग्रहणम्। लाक्षणिकत्वाच्च पैं इत्येतस्य न ग्रहणम्। तेन पान् इव्रत् पायति। श्नौत्यर्त्योस्तिवूनिर्देशः कृवुधिवुदृशूदामामनुबन्धश्च यङ्लुप्यादेशनिवृत्त्यर्थः। शोश्नुवत्। अर्तेर्यङ्लुपि द्वित्वे पूर्वस्यात्वे रागमे धातोश्च रत्वे तन्निमित्ते रागमलोपे पूर्वाकारदीर्घत्वे च आरत्। चरीकृण्वत्। देधिन्वत्। दर्दृशत्। दादत्। केचित्तु श्नौतेर्यङ्लुप्यण्यादेशं श्नुप्रत्ययं चेच्छन्त्यगुणाभावं मन्यन्ते। दामो मकारस्य निर्देशो दासंज्ञशङ्कानिवृत्त्यर्थश्च। पिबेत्। पिबतु। पिबतात्। अपिबत्। पिबैतिदाभ्विति सिज्लोपे अपात्। अपाताम्।

५२ **सिज्विदोऽभुवः** ॥४।२।९२॥ सिचः प्रत्ययाद्विदश्च धातोः परस्यानः स्थाने पुसादेशः स्यात् 'अभुवः' न चेद् भुवः परः सिज् भवति । प् इत् ।

५३ **इडेत्पुसि चातो लुक्** ॥४।३।९४॥ क्ङित्यशिति स्वरे इटि एकारे पुसि च परे आकारान्तस्य धातोरन्तस्य लुक् स्यात् । अपुः । अक्ङिदर्थं शिदर्थं चेडादिग्रहणम् । अपाः । अपातम् । अपात । अपाम् । अपाव । अपाम ।

५४ **ह्रस्वः** ॥४।१।३९॥ धातोर्द्वित्वे सति पूर्वस्य स्वरान्तस्य ह्रस्वः स्यात् ।

५५ **आतो णव औः** ॥४।२।१२०॥ वेति निवृत्तम् । आकारात्परस्य णवः स्थाने औरित्ययमादेशः स्यात् । पपौ । आत इति किम् । स जगाम । सुप्तोऽहं किल विललाप ।

५६ **इन्ध्यसंयोगात्परोक्षा किद्वत्** ॥४।३।२१॥ इन्धेरसंयोगान्ताच्च धातोः परा अवित्परोक्षा किद्वत् स्यात् । इति किच्चात् इडेत्पुसीत्यातो लुक् । पपतुः । पपुः । इन्ध्यसंयोगादिति किम् । सस्रंसे । दध्वंसे । परोक्षेति किम् । इन्धिता । नेता । अविदित्येव । निनय । निनयिथ । इयाज । इयजिथ । ङिद्वदिति प्रकृते किद्वचनं यजादिवचिस्वपीनां ग्वृदर्थम् । जागर्तेश्च गुणार्थम् । ङित्वे हि ते न स्याताम् ।

५७ **सृजिदृशिस्कृस्वराऽत्वतस्तृज्नित्यानिटस्थवः** ॥ ४।४।७९ ॥ सृजिदृशिभ्यां सस्सटः कृगः स्वरान्तादकारवतश्च तृचि नित्यानिटो धातोर्विहितस्य थव आदिरिड् वा न स्यात् । पपिथ । पपाथ । पपथुः । पप । पपौ । सृजिदृशिस्कृस्वरात्वत इति किम् । रराधिथ । विभेदिथ । चकर्थ । तृजिति किम् । किति नित्यानिटो मा भूत् । लुलविथ । नित्येति किम् । तृचि विकल्पेटो मा भूत् । विदुधविथ । ररन्धिथ । अनिट इति किम् । शिश्रयिथ । थव इति किम् । पपिव । पपिम । विहितविशेषणं किम् । चकर्षिथ । अदादेशस्य घसेः वेगादेशस्य च वयेः तृज्यभावान्नित्यमेवेड् भवति । जघसिथ । उवयिथ । प्रकृत्यन्तरस्य तु घसेः परोक्षायामपि प्रायिक एव प्रयोगः । स्क्रादिसूत्रेण प्राप्ते विभाषा । स्वरान्तत्वेनैव सिद्धे स्कृग्रहणं 'ऋतः' इति प्रतिषेधबाधनार्थम् ।

५८ **गापास्थासादामाहाकः** ॥४।३।९६॥ एषामन्तस्य क्ङित्याशिष्येकारः

स्यात् । पेयात् । पेयास्ताम् । पेयासुः । गास्थोर्मध्ये पाठाद् भौवादिकयोः पै पा इत्येतयोः पाशब्देन ग्रहणम् नत्वादादिकस्य। हाकःयङ्लुप्निवृत्त्यर्थः । शेषाणां यङ्लुप्यपि भवति ।

८९ एकस्वरादनुस्वारेतः ॥४।४।८७॥ एकस्वरादनुस्वारेता धातोर्विहितस्य स्त्याद्यशित आदिरिड् न स्यात् । पाता । पास्यति । अपास्यत् । अत्र संग्रहश्लोकाः--

" श्विश्रिडीशीयुरुक्षुरुष्णुणुस्नुभ्यश्च वृगो वृङः ॥
ऊदृदन्ता युजादिभ्यः[1] स्वरान्ता धातवोऽपरे ॥१॥

पाठ एकस्वराः स्युर्येऽनुस्वारेत इमे मताः ॥
द्विविधोऽपि शकिश्चैवं वचिर्विचिरिची पचिः ॥२॥

सिञ्चतिर्मुचिरितोऽपि पृच्छति- ।
भ्रस्जिमस्जिभुजयो युजिर्यजिः ॥
ष्वञ्जिरञ्जिरुजयो णिजिविजृ- ।
सञ्जिभञ्जिभजयः सृजित्यजी ॥३॥

स्कन्दिविद्याविदॄविन्तयो नुदिः ।
स्विद्यतिः शदिसदी भिदिच्छिदी ॥
तुद्यदी पदिहदी खिदिक्षुदी ।
राधिसाधिशुधयो युधिव्यधी ॥४॥

बन्धबुध्यरुधयः क्रुधिक्षुधी ।
सिध्यतिस्तदनु हन्तिमन्यती ॥
आपिना तपिशपिक्षपिच्छुपो ।
लुम्पतिः सृपिलिपी वपिस्वपी ॥५॥

---

१ स्वरान्ताः किंचिद्विशिष्टाः ये पाठे एकस्वरास्ते अनुस्वारेत इत्यर्थ ।

यमिरमिलभियमिरमिनमिगमयः ।
क्रुशिलिशिरुशिरिशिदिशतिदशतयः ॥
स्पृशिमृशतिविशतिदृशिशिशिष्लृशुषय- ।
स्त्विषिपिषिविषिल्लृकृषितुषिदुषिपुषयः ॥६॥

श्लिष्यतिर्द्विषिरतो घसिवसती ।
रोहतिर्लुहिरिही अनिगदितौ ॥
देग्धिदोग्धिलिहयो मिहिवहती ।
नह्यतिर्दहिरिति स्फुटमनिटः ॥७॥

घ्रां गन्धोपादाने ॥३॥ जिघ्रति । जिघ्रेत् । जिघ्रतु । जिघ्रतात् । अजिघ्रत् ।

६० ट्वेर्घाशाच्छासो वा ॥४।३।७७॥ एभ्यः परस्य सिचः परस्मैपदे वा लुप् स्यात् लुप्संनियोगे चैतेभ्य इट् न स्यात् । ट्वेर्पिबैतीत्यनेन नित्यं प्राप्ते शेषेभ्योऽप्राप्ते विकल्पः । अघ्रात् । पक्षे ।

६१ सः सिजस्तेर्दिस्योः ॥४।३।६५॥ सिच्प्रत्ययान्ताद्धातोरस्तेश्च सः-सकारान्तात्परः परादिरीत् स्यात् दिस्योः परयोः।

६२ यमिरमिनम्यातः सोऽन्तश्च ॥४।४।८७॥ यमिरमिनमिभ्य आदन्तेभ्यश्च धातुभ्यः परस्य परस्मैपदविषयस्य सिच आदिरिट् स्यात् एषां च सोऽन्तः ।

६३ इट ईति ॥ ४।३।७१ ॥ इटः परस्य सिच ईति परे लुक् स्यात् । अघ्रासीत् । अघ्रासाताम् । अघ्रासिषुः । अघ्रुः । अघ्रासिषुः इत्यादि । परोक्षायां घ्रा घ्रेति द्वित्वे ।

६४ व्यञ्जनस्यानादेर्लुक् ॥४।१।४४॥ धातोर्द्वित्वे सति पूर्वस्य व्यञ्जनस्यानादेर्लुक् स्यात् । व्यञ्जनस्येति किम् । स्वरस्य मा भूत् । अनादेरिति किम् । आदेर्मा भूत् । इति लुकि द्वितीयतुर्ययोरिति घस्य गत्वे ।

६५ गहोर्जः ॥४।१।४०॥ धातोर्द्वित्वे सति पूर्वयोर्गकारहकारयोर्जकारः स्यात् । जघ्नौ । जघ्नतुः । जघ्नुः ।

६६ **संयोगादेर्वाशिष्यः** ॥४।३।९५॥ धातोः संयोगादेराकारान्तस्य क्ङिति आशिषि परेऽन्तस्यैकारादेशो वा स्यात् । ग्रेयात् । ग्रायात् । ग्रेयास्ताम् । ग्रायास्ताम् । ग्रेयासुः । ग्रायासुः । अपच्छायादित्यत्र तु छकारस्य द्वित्वे सति संयोगादित्वस्य लाक्षणिकत्वान्न भवति । संयोगादेरिति किम् । यायात् । धातोरित्येव । निर्यायात् । क्ङितीत्येव । ग्लासीष्ट । आशिषीति किम् । ग्लानः । घ्राता । घ्रास्यति । अघ्रास्यत् । ध्मां शब्दाग्निसंयोगयोः ॥४॥ धमति । अध्मासीत् । दध्मौ । ध्मायात् । ध्मेयात् । ध्माता । ध्मास्यति । अध्मास्यत् । ष्ठां गतिनिवृत्तौ ॥५॥

६७ **षः सोऽष्ट्यैष्ठिवष्वष्कः** ॥२।३।९८॥ पाठे धात्वादेः षकारस्य सकार आदेशः स्यान्न चेत् षकारः ष्ट्यैष्ठिवष्वष्कसंबन्धी । स्वरदन्त्यपरसकारादयः स्मिस्विदिस्वदिस्वञ्जिस्वपयश्च षोपदेशाः सृपि, सृजि, स्त्या, स्तृ, स्तृ, सृ, सेकृ-वर्जम् । षोपदेशश्चैषां षत्वविषयव्यवस्थार्थः । निमित्ताभावे नैमित्तिकस्याप्यभाव इति ठस्य थत्वे स्थाधातुः । तिष्ठति । तस्थौ । अस्थात् ।

६८ **अघोषे शिटः** ॥४।१।४५॥ धातोर्द्वित्वे सति पूर्वस्य शिटस्तत्संबन्धि-न्येवाघोषे परे लुक् स्यात् । अनादिलुगपवादोऽयम् । तस्थौ । तस्थतुः । तस्थुः । तस्थिथ । तस्थाथ । अघोष इति किम् । सस्नौ । शिट इति किम् । पप्सौ । स्थेयात् । स्थाता । स्थास्यति । अस्थास्यत् ।

६९ **स्थासेनिसेधसिचसञ्जां द्वित्वेऽपि** ॥२।३।४०॥ उपसर्गस्थान्नाम्य-न्तस्थाकवर्गात्परेषां स्थादीनां सकारस्य षः स्यात् द्वित्वेऽपि अट्यपि–द्विवचनेनाटा द्वाभ्यां व्यवधानेऽपीत्यर्थः । अध्यष्ठात् । अधितष्ठौ । अधिष्ठाता । अधिष्ठास्यति । अध्यष्ठास्यत् । उपसर्गादित्येव । अधिस्थास्यति । गतार्थत्वान्नात्राधिरुपसर्गः सेनेः[1] अषोपदेशार्थं स्थासञ्जोरवर्णान्तव्यवधानेऽपि विध्यर्थं सिच्सञ्जसेधां षणि[1] नियमबाधनार्थं सर्वेषामड्व्यवधाने पदादौ च षत्वार्थं वचनम् । म्नां अभ्यासे ॥६॥ मनति । अम्नासीत् । मम्नौ । म्नेयात् । म्नायात् । म्नाता । म्नास्यति । अम्नास्यत् । दां दाने ॥७॥ यच्छति ।

---

१ अषोपदेशत्वं च सह इनेन वर्तते इति व्युत्पत्तौ । सर्वेऽपि साधित-स्यापि वा व्युत्पत्तिपक्षे ।

१ सेनेस्तु 'णिस्तोरेधा–' इति सिद्धं, तिष्ठतेस्तु सन् षत्वरूपो नास्तीति ।

७० अर्वौ दाधौ दा ॥३।३।५॥ दाधा इत्येवंरूपौ धातू अवानुबन्धौ दासंज्ञौ स्याताम्। दारूपाश्चत्वारः—दाम्, देङ्, डुदांग्क्, दोंच्। धारूपौ द्वौ—ट्धें, डुधांग्क्। दाधारूपोपलक्षितस्य दासंज्ञावचनात् दोंदेंट्धें इत्येतेषां शिति दाधारूपाभावेऽपि दासंज्ञा सिद्धा। दीङो दारूपस्य बहिरङ्गत्वान्न भवति। अनेन दासंज्ञत्वात् पिबैतीत्यादिना सिज्लुप्। अदात्। अदाताम्। अदुः। अवाविति किम्। दांवृ—दातं बर्हिः। दैंक्—अवदातं मुखम्। अविति वकारो न पकारः। दातिर्दायतिश्च वकारानुबन्धौ। तेन प्रणिदापयति प्रणिधापयतीत्यत्र दासंज्ञायां सत्यां नेर्णत्वं सिद्धम्। ददौ। गापास्थेत्येकारे देयात्। दाता। दास्यति। अदास्यत्।

७१ नेर्ङ्मादापतपदनदगदवपीवहीशम्चिग्यातिवातिद्रातिप्साति-ष्यतिहन्तिदेग्धौ ॥२।३।७९॥ अदुरुपसर्गान्तःशब्दाद्रपूवर्णात्परस्योपसर्गस्य माङादिषु धातुषु परेषु णः स्यात्। ङकारोपलक्षिता माङ्मा, तेन माङ्मेङोर्ग्रहणेन मातिमीनातिमिनोतीनाम्। ङकारनिर्देशश्च नानुबन्धार्थः किं तु मात्यादिनिवृत्त्यर्थः। तेन यङ्लुप्यप्युदाहरिष्यते। दा इति संज्ञापरिग्रहात् ददातिदयतियच्छतिदातिदधातिधयतीनां ग्रहणम्। प्रणियच्छति। अडागमस्य धात्ववयत्वेन व्यवधायकत्वाभावात् प्रण्ययच्छत्। प्रण्यास्यति इत्यादौ तु आङा व्यवधानेऽपि प्रतिषेधाभावात् भवति। अदुरित्येव। दुर्नियच्छति। उपसर्गान्तर इत्येव। प्रातर्नियच्छति। वप्यादीनामनुबन्धेन तिवा च निर्देशो यङ्लुप्निवृत्त्यर्थः। जिं ञ्जि अभिभवे ॥९॥ जयति। जयेत्। जयतु। जयतात्। अजयत्।

७२ सिचि परस्मै समानस्याङिति ॥४।३।४४॥ समानान्तस्य धातोः परस्मैपदविषये सिच्यङिति परे आसन्ना वृद्धिः स्यात्। अजैषीत्। अजैष्टाम्। अजैषुः।

७३ जेर्गिः सन्परोक्षयोः ॥४।१।३५॥ जयतेः सन्परोक्षयोर्द्वित्वे सति पूर्वस्मात् परस्य गिरादेशः स्यात्। जिगाय। सन्परोक्षयोरिति किम्। जेजीयते। जिनातेर्जिरूपस्य लाक्षणिकत्वात् जिज्यतुः। जिग्यतुः। जिज्युः। जिग्युः। जिगयिथ। जिगेथ। जिग्यथुः। जिग्य।

७४ णिद्वान्त्यो णव् ॥४।३।५८॥ परोक्षातृतीयत्रिकैकवचनमन्त्यो णव्

वा णिन्न स्यात्। णिच्त्वाश्रयं कार्यं पक्षे प्रतिषिध्यते। जिगय। जिगाय। जिग्यिव। जिग्यिम। वा णिच्त्वप्रतिबन्धात् कुटादीनां गुणविभाषा। चुकुट। चुकोट। अन्त्य इति किम्। जिगाय। णिच्त्वाश्रयस्य विकल्पनात् णत्वाश्रयं नित्यमेव। अहं पणौ। दीर्घश्चीति दीर्घे जीयात्। जेता। जेष्यति। अजेष्यत्। क्षिं क्षये ॥१०॥ अकर्मकः। अन्तर्भावितण्यर्थस्तु सकर्मकः। क्षयति। अक्षैषीत्।

७५ कङश्चञ् ॥४।१।४६॥ धातोर्द्वित्वे सति पूर्वयोः ककारङकारयोर्यथासंख्यं चकारञकारौ स्याताम्। चिक्षाय। चिक्षियतुः। चिक्षियुः चिक्षयिथ। चिक्षेथ। क्षीयात्। इं दुं द्रुं श्रुं सुं गतौ ॥१५॥ अयति। अयेत्। अयतु। अयतात्।

७६ स्वरादेस्तासु ॥४।४।३१॥ स्वरादेर्धातोरादेः स्वरस्य तास्वद्यतनीक्रियातिपत्तिह्यस्तनीषु विषये आसन्ना वृद्धिः स्यात् अमाङ। आयत्। आयताम्। आयन्। ऐषीत्। ऐष्टाम्। ऐषुः।

७७ पूर्वस्यास्वे स्वरे योरियुव् ॥४।१।३७॥ धातोर्द्वित्वे सति यः पूर्वस्तस्य संबन्धिनो योरिकारस्योकारस्य चास्वे स्वरे परे आसन्नौ इय् उव् इत्येतावादेशौ स्याताम्। इयाय। अर्तेर्यङ्लुपि द्वित्वे पूर्वस्याकारे 'रिरौ च लुपि' इत्यनेन रिरी इत्यागमे तदिवर्णस्य चेयभावे सति अरियर्ति। अरियरीति। एके त्वत्रेयं नेच्छन्ति। अर्यर्ति। अर्यरीतीति। तन्मतसंग्रहार्थं पूर्वस्येति योः समानाधिकरणं विशेषणं तेन इकारोकारमात्रस्यैव पूर्वस्येयुवौ भवतः। द्वित्वे सति योऽनेकस्वरस्येति यत्वे इयतुः। इयुः। दवति। अदौषीत्। दुदाव। दुदविथ। दुदोथ। द्रवति। अद्यतन्याम्।

७८ णिश्रिद्रुस्रुकमः कर्तरि ङः ॥३।४।७७॥ ण्यन्तात् श्र्यादिभ्यश्च कर्तरि अद्यतन्यां ङः प्रत्ययः स्यात्। ङकारो ङित्कार्यार्थः। द्विर्धातुरिति द्वित्वे अदुद्रुवत्। कमिग्रहणं 'अशवि ते वा' इति यदा णिङ् नास्ति तदार्थवत्। दुद्राव। थवि द्रुवर्जनान्नेट् दुद्रोथ। द्रूयात्। द्रोता। श्रवति। अश्रौषीत्। शुश्राव। शुश्रोथ। श्रूयात्। श्रोता। स्रुधातोः स्रवति। अद्यतन्याम् असुस्रुवत्। ध्रुं स्थैर्ये च ॥१६॥ ध्रवति। अध्रौषीत्। दुध्राव। दुध्रविथ। दुध्रोथ। अयं कुटादौ गत्यर्थ इत्येके। सुं प्रसवैश्वर्ययोः ॥१७॥ प्रसवोऽभ्यनुज्ञानम्। सवति।

७९ धूङ्सुस्तोः परस्मै ॥४।४।८६॥ एभ्यः परस्य सिच आदिरिट् स्यात् परस्मैपदे परतः ॥ सु इति सुमात्रस्य ग्रहणम् । असावीत् । असाविष्टाम् । असाविषुः । धूगो विकल्पे सुस्तुभ्यां च प्रतिषेधे प्राप्ते वचनम् । अषोपदेशत्वान्न षत्वं सुसाव । सुसविथ । सुसोथ । षोपदेशोऽयमिति केचित् । सूयात् । सोता । सोष्यति । असोष्यत् । स्मृं चिन्तायाम् । १८॥ स्मरति । अस्मार्षीत् । अस्मार्ष्टाम् । स्मृ स्मृ इति द्वित्वे ।

८० ऋतोऽत् ॥४।१।३८॥ धातोर्द्वित्वे सति पूर्वस्य ऋतोऽत् स्यात् । सस्मार ।

८१ संयोगादृदर्तेः ॥४।३।९॥ संयोगात्परो य ऋकारस्तदन्तस्य धातोर्तेश्च परोक्षायां परतो गुणः स्यात् अकि । गुणप्रतिषेधविषये पुनःप्रसवार्थं वचनम् । ऋतः संयोगेन विशेषणादर्तिग्रहणम् । सस्मरतुः । सस्मरुः ।

८२ ऋतः ॥४।४।८७॥ ऋकारान्ताद्धातोस्तृचि नित्यानिटो विहितस्य थव आदिरिण्न स्यात् । सृजिदृशीत्यस्यापवादोऽयम् । पृथग्योगाद् वेति निवृत्तम् । सस्मर्थ । थव इत्येव । सस्मरिव । सस्मरिम ।

८३ क्ययङाशीर्ये ॥४।३।१०॥ संयोगात्परो य ऋकारस्तदन्तस्य धातोर्तेश्च क्ये यङि आशीःसंबन्धिनि ये च प्रत्यये गुणः स्यात् । स्मर्यात् । औपदेशिकसंयोगग्रहणादिह न । संस्क्रियात् । ऋत इत्येव । आस्तीर्यात् । आशीर्य इति किम् । स्मृपीष्ट । अर्तेरिति तिव्निर्देशाद्यङ्लुपि न भवति । आरियात् । अर्दियात् । स्मर्ता ।

८४ हन्तः स्यस्य ॥४।४।४९॥ हन्तेर्ऋकारान्ताच्च धातोः परस्य स्यस्यादिरिट् स्यात् । तकारनिर्देशादर्तेरेव ग्रहणं न भवति । स्मरिष्यति । अस्मरिष्यत् । गृं घृं सेचने ॥२०॥ गरति । अगार्षीत् । जगार ।

८५ रिः शक्याशीर्ये ॥४।३।११०॥ ऋकारान्तस्य धातोर्ऋतः स्थाने शे क्ये आशीर्ये च परे रिरादेशः स्यात् । ग्रियात् । घ्रियात् । ह्रस्वविधानात् दीर्घश्च्वीति दीर्घत्वं न । औस्त्रं शब्दोपतापयोः। स्वरति ।

८६ धूगौदितः ॥४।४।३८॥ धूग औदिद्भ्यश्च धातुभ्यः परस्य स्ताद्यशित आदिरिड्वा स्यात्। पृथग्योगात् ' सिजाशिषोरात्मने ' इति नित्तम्। अस्वारीत्। अस्वारिष्टाम्। पक्षे अस्वार्षीत्। अस्वार्ष्टाम्। सस्वार। अस्वरिथ। तृचि नित्यानिट्त्वाभावान्न विकल्पः। सस्वर्थेत्यपि कश्चित्। वमयोस्तु ' स्कसृभृ ' इत्यनिट्। स्वर्ता। स्वरिता। स्वरिष्यति। अस्वरिष्यत्। हनृतः स्यस्येति परत्वान्नित्यमिट्। दूङ् वरणे ॥२१॥ द्वरति। अद्वार्षीत्। ध्वङ् ध्वङ् कौटिल्ये ॥२३॥ सृं गतौ ॥२४॥ सरति।

८७ वेगे सर्तेर्धाव् ॥४।२।१०७॥ सरतेर्वेगे शिति धावादेशोऽत्यादौ। धावति। वेगे इति किम्। प्रियामनुसरति। धाविना सिद्धे सरतेर्वेगे सरतीति प्रयोगनिवृत्त्यर्थं वचनम्। तिव्निर्देशाद्यङ्लुपि न।

८८ सर्त्यशेर्वा ॥३।४।६१॥ सृ ऋ आभ्यां धातुभ्यां कर्तर्यद्यतन्यामङ्प्रत्ययो वा स्यात्। ऋ अदादिभ्वादिर्वा।

८९ ऋवर्णद्दशोऽङि ॥४।३।७॥ ऋवर्णान्तानां धातूनां दृशश्चाङि प्रत्यये परे गुणः स्यात्। असरत्। पक्षे असार्षीत्। ससार। ससर्थ। सस्रव। स्क्रादित्वान्नेट्। स्रियात्। सर्ता। सरिष्यति। असरिष्यत्। ऋं प्रापणे च ॥२५॥ ऋच्छति। आर्षीत्। सर्त्यर्तेर्वेत्यत्र 'ऋ' भौवादिकश्चेद् गृह्यते तर्हि पक्षे आरत्।

९० अस्यादेः परोक्षायाम् ॥४।१।६८॥ धातोर्द्वित्वे सति पूर्वस्यादेरकारस्याकारः स्यात्। आर। आरतुः। आरुः।

९१ ऋवृव्येऽद् इट् ॥४।४।८१॥ अर्तेर्वृगो व्येगोऽदश्च धातोः परस्य थव आदिरिट् स्यात्। पुनरिड्ग्रहणान्नेति नित्तम्। अर्तेः पूर्वेण ('ऋत' इत्येनेन) वृग उत्तरेण ('स्कसृवृ' इत्यनेन) प्रतिषेधे व्येऽदोस्तु सृजिदृशीत्यादिना विकल्पे प्राप्ते वचनम्। आरिथ। अर्यात्। अर्ता। अरिष्यति। आरिष्यत्। तॄ प्लवनतरणयोः ॥२६॥ तरति। अतारीत्। अतारिष्टाम्। ततार।

९२ स्कृच्छृतोऽकि परोक्षायाम् ॥४।३।८॥ स्कृ ऋच्छ् इत्येतयोर्ऋकारान्तानां च धातूनां नामिनः परोक्षायां परतो गुणः स्यात् अकि—ककारोपलक्षितायां

तु न । ' संयोगाद्यन्तेः ' इत्येनेनैव सिद्धे स्कुग्रहणं तत्रौपदेशिकसंयोगपरिग्रहार्थम् । तर् इति जाते ।

९३ तृन्नपफलभजाम् ॥४।१।२५॥ एषामवित्परोक्षासेट्थवोः स्वरस्यात एत्वं स्यान्न चैते द्विः स्युः। तरतेरतो गुणरूपत्वात् फलभजोरादेशादित्वात् न प्राप्नोतीति वचनम् । बहुवचनं तु फलन्निफला इत्युभयोरपि ग्रहणार्थम् । तेरतुः । तेरुः । तेरिथ ।

९४ ऋतां क्ङिन्तीर् ॥४।४।११७॥ ऋकारान्तस्य धातोः किति ङिति प्रत्यये परे निर्देशात् ऋकारस्यैव स्थाने (नतु अनेकवर्णः सर्वस्येति) इरित्ययमादेशः स्यात् । बहुवचनं लाक्षणिकस्यापि परिग्रहार्थम् यथा चिकीर्षतीति । तीर्यात् ।

९५ वृतो नवानाशीःसिच्परस्मै च ॥४।४।३५॥ वृगृवृभ्यामकारान्तेभ्यश्च परस्य वा दीर्घः स्यात् परोक्षायामाशिषि परस्मैपदविषये सिचि च न । तकारो वर्णनिर्देशार्थः । अन्यथा समरीता समरितेति ऋणातेरेव विज्ञायेत । तरीता। तरिता। तरीष्यति । तरिष्यति । अतरीष्यत् । अतरिष्यत् । सिचः परस्मैपदविशेषणादात्मनेपदे दीर्घो भवत्येव । टूधें पाने ॥२७॥

९६ आत्सन्ध्यक्षरस्य ॥४।२।१॥ धातोः सन्ध्यक्षरान्तस्याकारः स्यान्निर्निमित्तः । अनैमित्तिकत्वादात्वस्य प्रागेव कृतत्वात् सुग्लः सुम्ल इत्यादौ आकारान्तलक्षणः प्रत्ययो भवति । अनेन सर्वत्राकारे प्राप्ते ।

९७ न शिति ॥४।२।२॥ सन्ध्यक्षरान्तस्य शिति प्रत्यये विषयभूते आकारो न स्यात् । धयति । इह तु लाक्षणिकत्वान्न भवति–चेता । स्तोता । अद्यतन्याम् अत्वे कृते–

९८ टूधेश्वेर्वा ॥३।४।५९॥ टूधेभ्यां कर्तर्यद्यतन्यां ङः प्रत्ययो वा स्यात् । द्विर्धातुरिति द्वित्वे पूर्वस्य ह्रस्वत्वे दत्वे च अदधत् । अदधताम् । अदधन् । पक्षे टूधेग्रेति वा सिज्लोपे अधात् । अधाताम् । अधुः । विकल्पद्वये त्रैरूप्यमिति यमिरमिनम्यातः सोऽन्तश्च । अधासीत् । अधासिष्टाम् । अधासिषुः । दधौ । धेयात् । धाता । धास्यति । दैव् शोधने ॥२८॥ दायति । अदासीत् । ददौ । दासंज्ञा-

भावात् दायात् । ध्यै चिन्तायाम् ॥२९॥ ध्यायति । अध्यासीत् । दध्यौ । ध्येयात् । ध्यायात् । ग्लै हर्षक्षये । ॥३०॥ हर्षक्षयो धातुक्षयः । ग्लायति । अग्लासीत् । जग्लौ । ग्लेयात् । ग्लायात् । म्लै गात्रविनामे ॥३१॥ गात्रविनामः कान्तिक्षयः । ग्लैवत् । ब्यै न्यक्करणे । ॥३२॥ द्यायति । अद्यासीत् । दद्यौ । द्रै स्वप्ने ॥३३॥ प्रै तृप्तौ ॥३४॥ कै गै रै शब्दे ॥३७॥ कायति । अकासीत् । गायति । अगासीत् । गेयात् । रायति । अरासीत् । ष्ठ्यै स्त्यै संघाते ॥३९॥ षोपदेस्यापि षत्वे कृते रूपं तुल्यम् । षोपदेशफलं तु तिष्ठ्यासति अतिष्ठ्यपदित्यत्र षत्वम् । खै खदने ॥४०॥ क्षै जै षै क्षये ॥४३॥ क्षायति । जायति । सायति । अक्षासीत् । अजासीत् । ट्धेग्रेत्यत्र 'सों, सैं' इत्युभयोरपि ग्रहणाद्विकल्पेन सिज्लुपि असात् । पक्षे असासीत् । गापास्थेत्यत्रापि 'सों, सैं' इत्युभयोरपि ग्रहणात् सेयात् । अन्ये 'सैं क्षये' सायादित्येवेच्छन्ति । स्रैं श्रैं पाके ॥४५॥ पैं ओवैं शोषणे ॥४७॥ पायति । अपासीत् । गास्थोर्मध्ये पाठादित्याद्युक्तत्वात् पेयात् । पै इत्यस्य नेच्छन्त्यन्य इति पायात् । ष्वैं वेष्टने ॥४८॥ स्नायति । इति स्वरान्ताः । फक्क नीचैर्गतौ ॥४९॥ फक्कति । अफक्कीत् । पफक्क । तक्क हसने ॥५०॥ तक्कति ।

९९ व्यञ्जनादेर्वोपान्त्यस्यातः ॥४।३।४७॥ व्यञ्जनादेर्धातोरुपान्त्यस्यातः सेटि सिचि परस्मैपदविषये परे वृद्धिर्वा स्यात् । अताकीत् । अतकीत् ।

१०० ञ्णिति ॥४।३।५०॥ ञिति णिति च प्रत्यये परे धातोरुपान्त्यस्यातो वृद्धिः स्यात् । ततात्क ।

१०१ अनादेशादेरेकव्यञ्जनमध्येऽतः ॥४।१।२४॥ अवित्परोक्षासेट्थवोः परयोर्योऽनादेशादिर्धातुस्तत्संबंधिनः स्वरस्यातोऽकाररूपस्यासहायव्यञ्जनयोर्मध्ये वर्तमानस्य स्थाने एकारादेशः स्यान्न च धातुर्द्विः । तेकतुः । तेकुः । तेकिथ । अविदित्येव । अहं ततक्क । परोक्षायामित्येव तक्यते । सेट् थवीत्येव । पपक्थ । अनादेशादेरिति किम् । बभणतुः । बभणिथ । एकव्यञ्जनमध्य इति किम् । ततक्षतुः । ततक्षिथ । अत इति किम् । दिदिवतुः । अवित्परोक्षासेट्थव्भ्यामादेशादित्यस्य विशेषणं किम् । इहापि यथा स्यात् नेमतुः । सेहे । अत्र हि अनिमित्ते नत्वसत्वे स्तु परोक्षाथव्निमित्ते इति । तक्क कृच्छ्रजीवने ॥५१॥

१०२ उदितः स्वरान्नोऽन्तः ॥ ४।४।९१ ॥ उदितो धातोः स्वरात्परो नोऽन्तोऽवयवः स्यात् । अयं चोपदेशावस्थायामेव भवत्यनैमित्तिकत्वात् । तेन कुण्डा हुण्डेत्यादौ ' क्तेटो गुरोर्व्यञ्जनात् ' इत्यप्रत्ययः सिद्धो भवति । तङ्कति । अतङ्कीत् । ततङ्क । ततङ्कतुः । शुक गतौ ।५२॥

१०३ लघोरुपान्त्यस्य ॥४।३।४॥ धातोरुपान्त्यस्य नामिनो लघोरक्ङिति प्रत्यये परे गुणः स्यात् । शोकति । अशोकीत् । शुशोक । बुक्क भाषणे ॥५३॥ बुकति । अबुकीत् । बुबुक्क । ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः ॥५८॥ ओखति । औखीत् ।

१०४ गुरुनाम्यादेरनृच्छूर्णोः ॥ ३।३।४८ ॥ गुरुर्नामी आदिर्यस्य तस्माद्धातोर्ऋच्छूर्णुवर्जितात्परस्याः परोक्षायाः स्थाने आमादेशः स्यात् आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते । अत एव ऋच्छप्रतिषेधात् संयोगे परे पूर्वो गुरुरिति विज्ञायते । विधानबलादस्तेर्न भूः ।

१०५ आमः कृगः ॥ ३।३।७५ ॥ आमः परादनुप्रयुज्यमानात्करोतेराम एव प्राग्यो धातुस्तस्मादेव कर्तर्यात्मनेपदं स्यात् । भवति न भवति चेति विधिप्रतिषेधावतिदिश्येते । यथोशीरवन्मद्रेषु यवाः सन्ति न सन्तीति । तेन ईहाञ्चक्रे ईक्षाञ्चक्रे इत्यफलवत्यपि भवति । बिभयाञ्चकार जागराञ्चकारेति फलवत्यपि न भवति । यत्र तु पूर्वस्मादुभयं तत्र फलवत्यफलवति चोभयं भवति । बिभराञ्चक्रे बिभराञ्चकारेति । ओखाञ्चकार । कृग इति किम् । करोतेरेव यथा स्यादिह मा भूत् । ईक्षामास । ईक्षाम्बभूव । शाखृ श्लाखृ व्याप्तौ ॥६०॥ कक्ख हसने ॥६१॥ उख नख णख वख मख रख लख मखु रखु लखु रिखु इख इखु ईखु वल्ग रगु लगु तगु श्रगु श्लगु अगु वगु मगु खगु इगु उगु रिगु लिगु गतौ ॥८८॥ ओखति। औखीत् । णवि उख् उख् इति द्वित्वे लघोरुपान्त्यस्येति गुणे पूर्वस्यास्वे स्वर इत्युवादेशे च उवोख । ऊखतुः ऊखुः । अत्र ' संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येत्याम्न । तथा च समानां तेनेति दीर्घस्य पूर्वग्रहणेन ग्रहणाद् ह्रस्वः प्राप्तोऽपि न भवति सकृत्प्रवृत्तत्वात् । पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वे कृते ततो दीर्घः परत्वात् । उख्यात् । ओखिता । ओखिष्यति । औखिष्यत् । वखति । अवाखीत् । अवखीत् । ववाख ।

१०६ न शासददवादिगुणिनः ॥४।१।३०॥ शासिदद्योर्वकारादीनां गुणिनां च धातुनां स्वरस्यैत्वं न स्यात् । ववखतुः । ववखुः । ववखिथ । मङ्क्ति । अमङ्क्षीत् । ममङ्क्ष । अङ्क्ति । आङ्क्षीत् ।

१०७ अनातो नश्चान्त ऋदादयशौसंयोगस्य ॥४।१।६९॥ ऋदादेरक्षोतेः संयोगान्तस्य च धातोः परोक्षायां द्वित्वे पूर्वस्यादेरकारस्यानात आकारस्थानेऽनिष्पन्नस्याकारः स्यात् कृताकारात्त्वस्मान्नोऽन्तश्च । आनङ्ग । आनङ्गतुः । आनङ्गुः । ऋदादेरिति किम् । आर । आरतुः । अशावित्यौकारः किम् । अश्नातेर्मा भूत् । आश । आशतुः । संयोगस्येति किम् । आट । अनात इति किम् । आलु आयामे–आऽन्छ । कश्चिदत्रापीच्छति–आनाऽन्छ । अङ्क्ष्यात् । अङ्क्षिता । अङ्क्ष्यति । आङ्क्ष्यत् । त्वगु कम्पने च । चाद्गतौ ॥८९॥ त्वङ्क्ति । अत्वङ्क्षीत् । युगु जुगु वुगु वर्जने ॥ ९२ ॥ गग्घ हसने ॥९३॥ दघु पालने ॥९४॥ वर्जनेऽपीत्येके । शिघु आघ्राणे ॥९५॥ लघु शोषणे ॥९६॥ इति कवर्गीयान्ताः । शुच शोके ॥९७॥ शोचति । अशोचीत् । शुशोच । कुच शब्दे तारे ॥९८॥ कोचति । कुञ्च गतौ ॥९९॥ कुञ्च च कौटिल्याल्पीभावयोः ॥१००॥ लुञ्च अपनयने ॥१०१॥

१०८ नो व्यञ्जनस्यानुदितः ॥४।२।४५॥ व्यञ्जनान्तस्यानुदितो धातोरुपान्त्यस्य नकारस्य क्ङिति प्रत्यये परे लुक्स्यात् । कुच्यात् । कुच्यात् । लुच्यात् । व्यञ्जनस्येति किम् । नीयते । अनुदित इति किम् । दुनदु–नन्द्यते । क्ङितीत्येव । उपान्त्यस्येत्येव । नह्यते । अर्च पूजायाम् ॥१०२॥ अर्चति । आर्चीत् । आनर्च । आनर्चतुः । आनर्चुः । अर्च्यात् । अर्चिता । अर्चिष्यति । आर्चिष्यत् । अञ्चू गतौ च ॥ १०३ ॥ चात्पूजायाम् । गतौ 'अञ्चेरनर्चायाम्' इति नकारलुकि अच्यात् । पूजायाम् अञ्च्यात् । वञ्चू चञ्चू तञ्चू त्वञ्चू मञ्चू म्रुञ्चू म्रुचू म्रुञ्चू म्लुचू म्लुञ्चू पश्च गतौ ॥११४॥ ग्रुचु ग्लुचू स्तेये । गतावपीति केचित् ।

१०९ ऋदिच्छिस्तम्भूम्रुचूम्लुचूग्रुचूग्लुचूग्लुंचूभ्यो वा ॥ ३।४।६५॥ ऋदितो धातोः श्विमभृतिभ्यश्च कर्तर्यद्यतन्यां परस्मैपदे वाङ्प्रत्ययः स्यात् । अम्रुचत् । अम्रोचीत् । अम्लुचत् । अम्लोचीत् । अग्रुचत् । अग्रोचीत् । ग्रुचो नेच्छन्त्यन्ये । अग्लुचत् । अग्लोचीत् । अग्लुञ्चीत् । ग्लुचूग्लुञ्चोरेकतरोपादानेऽपि रूपत्रयं सिद्ध्यति अर्थभेदात्तु द्वयोरुपादानम् । अन्ये त्वङ्विधानसामर्थ्यात् ग्लुञ्चेर्नलोपं

नेच्छन्ति । तेनाग्लुश्चत् । सश्चर्ति । म्लेच्छ अव्यक्तायां वाचि । ॥११५॥ लछ लाछु लक्षणे ॥ ११७ ॥ वाछु इच्छायाम् । वाञ्छति । आछु आयामे ॥ ११८ ॥ अनात इति सूत्रेऽनाकारस्थानकथनात् आञ्छ । आञ्छतुः । आञ्छुः । कश्चिदत्रापि आनाञ्छ आनाञ्छतुरित्याह । ह्रीच्छ लज्जायाम् ॥ ११९ ॥ ह्रीच्छति । जिह्रीच्छ । हूर्च्छा कौटिल्ये ॥१२०॥ हूर्च्छति । मूर्च्छा मोहसमुच्छ्राययोः ॥१२१॥ मूर्च्छति । स्फूर्च्छा स्मूर्च्छा विस्मृतौ ॥१२३॥ युच्छ प्रमादे ॥१२४॥ उछु उञ्छे ॥१२५॥ उञ्छति । गुरुनाम्यादेरनृच्छूर्णोः—उञ्छाञ्चकार । धृज धृजु ध्वज ध्वजु ध्रज ध्रजु वज व्रज षस्ज गतौ ॥१३४॥ धर्जति । धृञ्जतीत्यादि । व्रजति ।

११० वदव्रजलृः ॥ ४।३।४८ ॥ वदव्रजोर्लकारान्तानां रेफान्तानां च धातूनामुपान्त्यस्याकारस्य परस्मैपदविषये सिचि परे वृद्धिः स्यात् । व्यञ्जनादेर्वोपान्त्यस्येत्यस्यापवादोऽयम् । अव्राजीत् । वव्राज । षस्ज गतौ । अस्य सस्य शषाविति सस्य शः । सज्जति । अज क्षेपणे च । चाद् गतौ ॥१३५॥ अजति ।

१११ अघञ्क्यबलञ्यजेर्वी ॥ ४।४।२ ॥ घञ् क्यप् अल् अच्—वर्जितेऽशिति प्रत्यये विषयभूतेऽजेर्वी इत्यादेशः स्यात् । अवैषीत् । पक्षे आजीत् । विवाय । विव्यतुः । अत्र वकारस्य व्यञ्जनपरत्वात् 'भ्वादेर्नामिन' इति दीर्घे प्राप्ते स्वरस्य परे प्राग्विधाविति स्थानिवद्भावेन स्वरपरत्वम् । न च न सन्धीति निषेध इति वाच्यम् । स्वरदीर्घयलोपेषु लोपस्वरादेश एव न स्थानिवदित्युक्तेः । थवि सृजिदृशीत्यादिना वेट् । विवयिथ । विवेथ । तदुक्तम्:—

स्वरान्तोऽकारवान्वा यस्तृच्यनिड् थवि वेडयम् ।
ऋदन्त ईदूङनित्यानिट्, स्याद्यन्यः सेट् परोक्षके ॥

पक्षे आजिथ । विव्यथुः । विव्य । विवाय । विवय । विव्यिव । आजिव । विव्यिम । आजिम । वीयात् । अज्यात् । वेता । अजिता । वेष्यति । अजिष्यति । अवेष्यत् । आजिष्यत् । कुजू खुजू स्तेये ॥ १३७ ॥ अर्ज सर्ज अर्जने ॥१३९॥ अर्जति । आनर्ज । सर्जति । कर्ज व्यथने ॥१४०॥ चकर्ज । खर्ज मार्जने च ॥१४१॥ खज मन्थे ॥१४२॥ चखाज । खजु गतिवैकल्ये ॥१४३॥ खञ्जति । एजृ कम्पने ॥१४४॥ एजति । एजाञ्चकार । द्वोस्फूर्जा वज्रनिर्घोषे ॥१४५॥ स्फूर्जति । क्षीज कूज गुज गुजु अव्यक्ते शब्दे ॥१४९॥ क्षीजति । कूजति । गोजति । गुञ्जति । लज लजु

तर्ज भर्त्सने ॥१५२॥ लजति । अलाजीत् । अलजीत् । ललाज । लेजतुः । लज्जति । तर्जति । लाज लाजु भर्जने च ॥१५४॥ लाजति । लाज्जति । जज जजु युद्धे ॥१५६॥ जजाज । जेजतुः । जजञ्ज । जजञ्जतुः । तुज हिंसायाम् ॥ १५७ ॥ तोजति । अतोजीत् । तुजु चलने च ॥१५८॥ तुञ्जति । गर्ज गजु गृज गृजु मुज मुजु मृज मृजु मज शब्दे ॥१६७॥ जगर्ज । जगर्जतुः । जगृजतुः । गज मदने च ॥१६८॥ अगाजीत् । अगजीत् । त्यजं हानौ ॥१६९॥ त्यजति ।

११२ **व्यञ्जनानामनिटि** ॥ ४।३।४५ ॥ व्यञ्जनान्तस्य धातोः परस्मैपदविषयेऽनिटि सिचि परे वृद्धिः स्यात् । बहुवचनं जात्यर्थम् । तेनानेकव्यञ्जनव्यवधानेऽपि भवति । अत्याक्षीत् ।

११३ **धुड्हस्वाल्लुगनिटस्तथोः** ॥ ४।३।७० ॥ धुडन्ताद् ह्रस्वान्ताच्च धातोः परस्यानिटस्सिचस्तकारादौ थकारादौ च प्रत्यये लुक् स्यात् । अत्यक्ताम् । अत्याक्षुः । धुड्हस्वादिति किम् । अमंस्त । अच्योष्ट । लुकः परत्वेऽपि नित्यत्वात्प्रागेव गुणः । तथोरिति किम् । अभित्साताम् । अनिट इति किम् । व्यद्योतिष्ट । ह्रस्वान्ताद्धातोरिति किम् । प्रास्ताविष्ट गौः स्वयमेव । अलाविष्टाम् । ञेरिटश्च परस्य लोपो मा भूत् । लुबधिकारे लुग्ग्रहणं सिज्लुक्यपि स्थानित्वेन तत्कार्यप्रतिपत्त्यर्थम् । तेनावात्तामित्यादिषु सिचि विधीयमाना वृद्धिस्तदभावेऽपि सिद्धा भवति । तथा सि इत्यनुवर्तमाने तथग्रहणं व्याप्तिप्रतिपत्त्यर्थम्, तेन साहचर्यं नास्ति । तथोरिति द्विवचनं यथासंख्यपरिहारार्थम् । तत्याज । त्यक्ता । त्यक्ष्यति । अत्यक्ष्यत् । षञ्जं सङ्गे ॥१७०॥

११४ **दंशसञ्जः शवि** ॥४।२।४९॥ अनयोरुपान्त्यनकारस्य शवि परे लुक् स्यात् । सजति । तुदादावपठित्वाऽनयोर्भ्वादौ पाठः शवर्थः । तेन 'श्यशवः' इति नित्यमन्तादेशः सिद्धो भवति । दशन्ती । सजन्ती । इति च वर्गीयान्ताः । कटे वर्षावरणयोः ॥१७१॥ कटति ।

११५ **न श्विजाग्रृशस्क्षणक्ष्येदितः** ४।३।४९॥ श्विजाग्रृशस्क्षणां हकारमकारयकारान्तानामेदितां च धातूनां परस्मैपदविषये सेटि सिचि परे वृद्धिर्न स्यात् । श्विजाग्रोः 'सिचि परस्मै समानस्ये'ति वृद्धावन्येषां च 'व्यञ्जनादेर्वोपा-

न्त्यस्ये'ति विकल्पे प्राप्ते वचनम् । शसः स्थाने श्वसं पठन्त्यन्ये । वकारान्तस्यापि प्रतिषेधमिच्छत्यन्यः। श्व्यादीनां यङ्लुबन्तानामपि प्रतिषेधः। एदितां तु यङ्लुपि न प्रतिषेधः । अत एव श्व्यादयो नेदितः क्रियन्ते । अन्यथा ह्येदितः कृत्वा इह श्व्यादिग्रहणं न क्रियेत। अकटीत्। चकाट। शट रुजाविशरणगत्यवसादनेषु ॥१७२॥ वट वेष्टने ॥१७३॥ वटति । ववाट । ववटतुः । किट खिट उत्त्रासे ॥१७५॥ शिट षिट अनादरे ॥१७७॥ जट झट संघाते ॥१७९॥ पिट शब्दे च ॥१८०॥ भट भृतौ ॥१८१॥ तट उच्छ्राये ॥१८२॥ खट काङ्क्षे ॥१८३॥ णट नृत्तौ ॥१८४॥

११६ पाठे धात्वादेर्णो नः २।३।९७॥ पाठविषये धात्वादेर्णकारस्य नकार आदेशः स्यात् । नटति । अदुरुपसर्गेति णत्वे प्रणटति । नोपदेशोऽयमित्येके । हट दीप्तौ ॥१८५॥ पट अवयवे ॥१८६॥ लुठ विलोठने ॥१८७॥ चिट परप्रेष्ये ॥१८८॥ विट शब्दे ॥१८९॥ हेट विबाधायाम् । डान्तोऽयमित्येके ॥१९०॥ अट पट इट किट कट कटे गतौ ॥१९७॥ अस्यादेरा इत्यात्वे आट । आटतुः । आटुः । कुटु वैकल्ये ॥१९८॥ कुण्टति । मुट प्रमर्दने ॥१९९॥ चुट चुटु अल्पीभावे ॥२०१॥ वटु विभाजने ॥२०२॥ रुटु लुटु स्तेये ॥२०४॥ स्फुट स्फुटृ विशरणे ॥२०६॥ लट बाल्ये ॥२०७॥ रट रठ च परिभाषणे ॥२०८॥ पठ व्यक्तायां वाचि ॥२०९॥ वठ स्थौल्ये ॥२१०॥ मठ मदनिवासयोः ॥२११॥ कठ कृच्छ्रजीवने ॥२१२॥ हठ बलात्कारे। उठ रुठ लुठ उपघाते ॥२१५॥ ओठति। औठीत् । उवोठ । ऊठतुः । पिठ हिंसासंक्लेशनयोः ॥२१६॥ शठ कैतवे च ॥२१७॥ शुठ गतिप्रतिघाते ॥२१८॥ कुठ लुठ आलस्ये च ॥२२०॥ शुठु शोषणे ॥२२१॥ अठ रुठु गतौ ॥२२३॥ पुडृ प्रमर्दने ॥२२४॥ मुडु खण्डने च ॥२२५॥ मडु भूषायाम् ॥२२६॥ गडु वदनैकदेशे ॥२२७॥ शौडृ गर्वे ॥२२८॥ यौडृ सम्बन्धे ॥२२९॥ मेडृ म्रेडृ म्लेडृ लोडृ लौडृ उन्मादे ॥२३४॥॥ शौडादयो लौड्वर्जाष्टान्ता इत्येके । रोडृ रौडृ तौडृ अनादरे ॥२३७॥ क्रीडृ विहारे ॥२३८॥ तुडृ तूडृ जौडृ तोडने ॥२३९॥ तोडति । तूडति । प्रथमः संयुक्तडान्त इत्यन्ये । हुडृ हूडृ हूडृ हौडृ गतौ ॥२४३॥ खोडृ प्रतिघाते ॥२४४॥ विड आक्रोशे ॥२४५॥ अड उद्यमे ॥२४३॥ आड । आडतुः । लड विलासे ॥२४७॥ लत्वे ललति । कडु मदे ॥२४८॥ अयमात्मनेपदेऽपि । कडृ कार्कश्ये ॥२४९॥ अडृ अभियोगे ॥२५०॥ अडृति । आनडृ। चुडृ हावकरणे ॥२५१॥ हावकरणमभिप्रायसूचनम् । त्रयोऽप्येते दोपान्त्याः ।

एषां क्विपि कत् अत् चुत् इति। अण रण वण व्रण वण भण भ्रण मण धण ध्वण ध्रण क्वण चण शब्दे ॥२६५॥ ओणृ अपनयने ॥२६६॥ ओणति। औणीत्। ओणाञ्चकार ॥ शोणृ वर्णगत्योः ॥२६७॥ श्रोणृ श्लोणृ संघाते ॥२६९॥ पैणृ गतिप्रेरण[x]लेषणेषु ॥ २७० ॥ इति टवर्गीयान्ताः ॥ चितै संज्ञाने ॥२७१॥ चेतति। अचेतीत्। चिचेत। अत सातत्यगमने ॥२७२॥ अतति आतीत्। आत। आततुः। च्युतृ आसेचने। आसेचनमार्द्रीकरणम् ॥२७३॥ च्योतति। ऋदित्वाद्वाङ्। अच्युतत्। अच्योतीत्। चुतृ [x]चुतृ [x]च्युतृ क्षरणे ॥२७६॥ अचुतत्। अ[x]चुतत्। अ[x]चोतीत्। अ[x]च्युतत्। अ[x]च्योतीत्। जुतृ भासने ॥२७७॥ अतु बन्धने ॥२७८॥

अन्तति। कित निवासे रोगापनयने संशये च ॥२७९॥

११७ **कितः संशयप्रतीकारे** ॥३।४।६॥ कितो धातोः संशये प्रतीकारे च वर्तमानात् स्वार्थे सन् प्रत्ययः स्यात्।

११८ **सन्यङश्च** ॥४।१।३॥ सन्नन्तस्य यङन्तस्य च धातोः राद्य एकस्वरोऽवयवो द्विः स्यात्। षष्ठीनिर्देश उत्तरार्थः। चकारः पूर्वोक्तनिमित्तसमुच्चयार्थ उत्तरार्थ एव। तेनोत्तरत्र परोक्षाङेस्सन्नन्तयङन्तानां च यथासंभवं द्वित्वम्।

११९ **उपान्त्ये** ॥४।३।३४॥ नामिन्युपान्त्ये सति धातोरनिट् सन् किद्वत्स्यात्।

१२० **स्वार्थे** ॥४।४।६१॥ स्वार्थे विहितस्य सन आदिरिड् न स्यात्। विचिकित्सति। संशेते इत्यर्थः। व्याधिं विचिकित्सति। प्रतिकरोत्यर्थः। निग्रहविनाशौ प्रतीकारस्यैव भेदौ तेनात्रापि भवति–क्षेत्रे चिकित्स्यः पारदारिकः। निग्राह्य इत्यर्थः। चिकित्स्यानि क्षेत्रे तृणानि–विनाशयितव्यानीत्यर्थः। संशयप्रतीकार इति किम्। केतनम्। केतयति।

१२१ **अतः** ॥४।३।८२॥ अकारान्ताद्धातोर्विहितेऽशिति प्रत्यये तस्यैव धातोर्लुगन्तादेशः स्यात्। अचिकित्सीत्। अत इति विहितविशेषणादिह न। गतः।

१२२ **धातोरनेकस्वरादाम् परोक्षायाः कृञ्वस्ति चानु तदन्तम्** ॥३।४।४६॥ अनेकस्वराद्धातोः परस्याः परोक्षायाः स्थाने आमादेशः स्यात्।

आमन्ताश्च परे कृभ्वस्तथो धातवः परोक्षान्ता अनु—पश्चादनन्तरं प्रयुज्यन्ते। चिकित्साञ्चकार । चिकित्साम्बभूव । चिकित्सामास। विधानबलादस्तेर्न भूः। अनेकस्वरादिति किम्। पपाच। कश्चित्तु प्रत्ययान्तादेकस्वरादपीच्छति। गौरिवाचचार गवाञ्चकार। अनुग्रहणं विपर्यासव्यवहितनिवृत्त्यर्थम्। तेन चकारचकासाम् इत्यादि न भवति। उपसर्गस्य तु क्रियाविशेषकत्वात् व्यवधायकत्वं नास्ति। तेन 'उक्षांश्चक्रुर्नगरस्य मार्गान्' इत्यादि भवत्येव। ऋत घृणागतिस्पर्द्धेषु ॥२८०॥

१२३ ऋतेर्ङीयः ॥३।४।७॥ ऋत घृणागतिस्पर्धेषु इत्यस्माद्धातोः स्वार्थे ङीयः प्रत्ययः स्याम्। ङकार आत्मनेपदार्थः। ऋतीयते।

१२४ **आतामाते आथामाथे आदिः** ॥४।२।१२१॥ अकारात्परेषामातामाते आथामाथे इत्येतेषाम् आत इः स्यात्। ऋतीयेते। ऋतीयन्ते। ऋतीयसे। ऋतीयेथे। ऋतीयध्वे। ऋतीये। ऋतीयावहे। ऋतीयामहे। ऋतीयेत। ऋतीयेयाताम्। ऋतीयेरन्। ऋतीयेथाः। ऋतीयेयाथाम्। ऋतीयेध्वम्। ऋतीयेय। ऋतीयेवहि। ऋतीयेमहि। ऋतीयताम्। ऋतीयेताम्। ऋतीयन्ताम्। ऋतीयस्व। ऋतीयेथाम्। ऋतीयध्वम्। ऋतीयै ऋतीयावहै। ऋतीयामहै। आर्तीयत। आर्तीयेताम्। आर्तीयन्त। आर्तीयथाः। आर्तीयेथाम्। आर्तीयध्वम्। आर्तीये। आर्तीयावहि। आर्तीयामहि।

१२५ **अशवि ते वा** ॥३।४।६॥ गुपादिभ्योऽशवि विषये ते आयादयो वा स्युः। आर्तीयिष्ट। आर्तीयिषाताम्।

१२६ **अनतोऽन्तोऽदात्मने** ॥४।२।११४॥ अनकारात्परस्यात्मनेपदसंबंधिनोऽन्तरूपस्यावयवस्यात् इत्ययमादेशः स्यात्। आर्तीयिषत। आर्तीयिष्ठाः। आर्तीयिषाथाम्।

१२७ **सो धि वा** ॥४।३।७२॥ धातोर्धकारादौ प्रत्यये परे सकारस्य लुग्वा स्यात्। सिच्यनुवर्तमाने सग्रहणं सामान्यसकारपरिग्रहार्थम्। तेन प्रकृतिसकारस्यापि लुग् भवति। विकल्पं नेच्छन्त्येके। अन्ये तु सिच एव नित्यं लोपमिच्छन्ति। आर्तीयिध्वम्। आर्तीयिषि। आर्तीयिष्वहि। आर्तीयिष्महि। पक्षे—ङीयप्रत्ययाभावे आर्तीत्। आर्तिष्टाम्। आर्तिषुः। ऋतीयाञ्चक्रे। आनर्त। ऋतीयिषीष्ट। ऋती-

यिषीयास्ताम्। ऋतीयिषीरन्। ऋत्यात्। ऋत्यास्ताम्। ऋत्यासुः। ऋतीयिता। ऋतीयितासे। अर्तिता। अर्तितासि। ऋतीयिष्यते। अर्तिष्यते। आर्तीयिष्यत। कुथु पुथु लुथु मथु मन्थ मान्थ हिंसासंक्लेशनयोः ॥२८६॥ उदित्वान्नलोपाभावः। कुन्थ्यात्। मन्थ्यात्। मथ्यात्। माथ्यात्। खाद भक्षणे ॥२८७॥ वद स्थैर्ये ॥२८८॥ खद हिंसायां च ॥२८९ चात्स्थैर्ये। तत्राकर्मकः। गद व्यक्तायां वाचि ॥२९०॥ गदति। अगादीत्। अगदीत्। जगाद। प्रणिगदति। नेर्ङ्मादेति णत्वम्। रद विलेखने ॥२९१॥ भेदने इत्यर्थः। णद ञिष्विदा अव्यक्ते शब्दे ॥२९३॥ नदति। प्रणदति। प्रणिनदति। अर्द गतियाचनयोः॥ ॥२९४॥ अर्दति। आर्दीत्। आनर्द। नर्द णर्द गर्द शब्दे ॥२९७॥ णोपदेशाभावान्न णत्वम्। प्रनर्दति। णोपदेशे तु प्रणर्दति। तर्द हिंसायाम् ॥२९८॥ कर्द कुत्सिते शब्दे। कुत्सिते कौक्षे इत्यर्थः ॥२९९॥ खर्द दशने ॥३००॥ अदु बन्धने ॥३०१॥ इदु परमैश्वर्ये ॥३०२॥ इन्दति। इन्दाञ्चकार। विदु अवयवे ॥३०३॥ पवर्गतृतीयादिः। विन्दति। अवयवं करोतीत्यर्थः। णिदु कुत्सायाम् ॥३०४॥ टुनदु समृद्धौ ॥३०५॥ नन्दति। नन्द्यात्। उदित्वान्नलोपो न। चदु दीप्त्याह्लादनयोः ॥३०६॥चचन्द। त्रदु चेष्टायाम् ॥३०७॥ कदु क्रदु क्लदु रोदनाह्वानयोः ॥३१०॥ क्लिदु परिदेवने ॥३१२॥ स्कन्दृं गतिशोषणयोः ॥३१२॥ स्कन्दति। ऋदित्त्वादङ् वा। अस्कदत्। अस्कान्त्सीत्। अस्कान्ताम्। अस्कान्त्सुः। चस्कन्द। चस्कन्दिथ। चस्कन्थ। नलोपः स्कद्यात्। स्कन्ता।

१२८ वेः स्कदोऽक्तयोः ॥ २।३।५१ ॥ विपूर्वस्य स्कन्देः संबन्धिनः सकारस्य षो वा स्यात् न चेत् क्तक्तवतू प्रत्ययौ भवतः। द्विवचनादर्थवद्ग्रहणानपेक्षमुभयपरिग्रहः। विष्कन्ता। विस्कन्ता। विष्कन्तुम्। विस्कन्तुम्। क्तयोरिति किम्। विस्कन्नः। विस्कन्नवान्।

१२७ परेः ॥२।३।५२॥ परिपूर्वस्य स्कन्देः सकारस्य षो वा स्यात्। परिष्कन्ता। परिस्कन्ता। परिष्कन्तुम्। परिस्कन्तुम्। योगविभागादक्तयोरिति नानुवर्तते। तेन क्तयोरपि विकल्पो भवति। परिष्कण्णः। परिस्कन्नः। परिष्कण्णवान्। परिस्कन्नवान्। केचिनु परिपूर्वस्य स्कन्देरजन्तस्य घञन्तस्य वा प्राच्यभरतविषये प्रयोगे नित्यं षत्वमन्यत्र विकल्पमिच्छन्ति। अन्ये तु प्राच्यभरतविषये प्रयोगे षत्वाभावमन्यत्र तु विकल्पमिच्छन्ति। तदुभयं नारम्भणीयम्। अनेनैव सिद्ध-

त्वात् । षिधू गत्याम् ॥३१३॥ सेधति । प्रतिषेधति । प्रत्यषेधत् । असेधीत् । प्रतिषिषेध ।

१३० गतौ सेधः ॥२।३।६१॥ गतौ वर्तमानस्य सेधतेर्धातोः सकारस्य षो न स्यात् । अभिसेधति अनुसेधति गा अनुगच्छतीत्यर्थः । अभिसेधयति अनुसेधयति । गमयतीत्यर्थः । अभिसिसेधिषति । अनुसिसेधिषति । अभिजिगमिषति अनुजिगमिषतीत्यर्थः । गताविति किम् । प्रतिषेधति । निषेधति । पापान्निवारयतीत्यर्थः । षिधौ शास्त्रमाङ्ख्ययोः ॥३१४॥ शास्त्रं शासनम् । सेधति । औदित्वादिड्वा—असेधीत् । पक्षे असैत्सीत् ।

१३१ अधश्चतुर्थात्तथोर्धः ॥२।१।७९॥ चतुर्थात्परयोस्तकारथकारयोर्धारूपवर्जिताद्धातोर्विहितयोः स्थाने धकार आदेशः स्यात् । असैद्धाम् । असैत्सुरित्यादि । अध इति किम् । दधातेर्यङ्लुबन्तधयतेश्च मा भूत् । केचित्तु यङ्लुबन्तधयतेरपीच्छन्ति । विहितविशेषणं किम् । ज्ञानभुक्त्वम् । अत्र नामविहिते त्वे मा भूत् । शुन्ध शुद्धौ ॥३१५॥ स्तन धन ध्वन चन स्वन वन शब्दे ॥३२१॥ स्तनति । स्वनति ।

१३२ जृभ्रमवमत्रसफणस्यमस्वनराजभ्राजभ्रासभ्लासो वा ॥४।१।२६॥ एषामवित्परोक्षासेट्थवोः स्वरस्यात एत्वं वा स्यात् न चैते द्विर्भवन्ति । यमेर्नेच्छन्त्यन्ये । स्वेनतुः । सस्वनतुः । स्वेनिथ । सस्वनिथ । अविदित्येव । अहं सस्वन ।

१३३ व्यवात्स्वनोऽशने ॥२।३।४३॥ वेरवाच्चोपसर्गात्परस्य स्वनो धातोः सकारस्याशने भोजनेऽर्थे द्वित्वेऽपि अट्यपि षः स्यात् । विष्वणति । अवष्वणति । भुङ्क्ते इत्यर्थः । सशब्दं भुङ्क्ते इत्यर्थ इत्यन्ये । भुञ्जानः कंचिच्छब्दं करोतीत्यर्थ इत्यपरे । विषष्वाण । अवषष्वाण । विषंष्वण्यते । अवषंष्वण्यते । विषिष्वणिषति । अवषिष्वणिषति । व्यष्वणत् । अवाष्वणत् । व्यषिष्वणत् । अवाषिष्वणत् । व्यवादिति किम् । अतिस्वनति । अत्यसिस्वनत् । अशन इति किम् । विस्वनति अवस्वनति मृदङ्गः । विविधं शब्दं करोतीत्यर्थः । वन षण संभक्तौ ॥३२३॥ सनति । असानीत् । असनीत् । ससान । सेनतुः ।

१३४ ये न वा ॥४।२।६२॥ स्वनादीनां ये क्ङिति प्रत्ययेऽन्तस्याकारो वा

स्यात् । सायते । सन्यते । 'ये' इत्यकारान्तनिर्देशादिह न–सन्यात् । अन्यथा यीति क्रियेत । केचिदत्रापीच्छन्ति सायात् । सन्यात् । कनै दीप्तिकान्तिगतिषु ॥३२४॥ इति तवर्गीयान्ताः। गुपौ रक्षणे ॥३२५॥

१३५ गुपौधूपविच्छिपाणिपनेरायः ॥३।४।१॥ गुपादिभ्यो धातुभ्यः परः आयप्रत्ययः स्यात् स चानिर्दिष्टत्वात् स्वार्थे । गुपावित्यौकारो 'गुपि गोपने' इत्यस्य निवृत्त्यर्थः यङ्लुब्निवृत्त्यर्थश्च । आयप्रत्ययान्तानामपि स्वार्थादेव क्रियार्थत्वाद्धातुसंज्ञा । गोपायति । अशवि ते वा । औदित्त्वादिट् च वा । अगोपायीत् । अगोपीत् । अगौप्सीत् । गोपायाञ्चकार । गोपायाम्बभूव । गोपायामास । पक्षे जुगोप । जुगुपतुः । जुगुपुः । जुगोपिथ । गोपाय्यात् । गुप्यात् । गोपायिता । गोपिता । गोप्ता । तपं, धूप संतापे ॥३२७॥ तपति । अताप्सीत् । तताप । तेपतुः । तप्ता । तप्स्यति ।

१३६ निसस्तपेऽनासेवायाम् ॥२।३।३५॥ निसः संबन्धिनः सकारस्य तकारादौ तपतौ परे षः स्यात् अनासेवायामर्थे । पुनः पुनः करणमासेवा । शव्-निर्देशो भौवादिकपरिग्रहार्थः, यङ्लुब्निवृत्त्यर्थश्च । उक्तं हि–

" तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च ।
एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि " ॥

निष्टपति सुवर्णम् । सकृदग्निं स्पर्शयतीत्यर्थः। अनासेवायामिति किम् ? निस्तपति सुवर्णं सुवर्णकारः । पुनः पुनस्तपतीत्यर्थः । निष्टप्तं रक्षो निष्टप्ता अरातयः इत्यत्र तु सदप्यासेवनं न विवक्ष्यते । तीत्येव । निरतपत् । धूपायति । अधूपायीत् । अधूपीत् । धूपायाञ्चकार । दुधूप । धूपाय्यात् । धूप्यात् । धूपायिता । धूपिता । धूपायिष्यति । धूपिष्यति । अधूपायिष्यत् । अधूपिष्यत् । रप लप जल्प व्यक्तायां वाचि ॥३३०॥ जप मानसे च ॥३३१॥ चप सान्त्वने ॥३३२॥ षप समवाये ॥३३३॥ स्रप्लृं गतौ ॥३३४॥ सर्पति ।

१३७ लृदिद्द्युतादिपुष्यादेः परस्मै ॥३।४।६४॥ लृदितो धातोर्द्युतादिभ्यः पुष्यत्यादिभ्यश्च कर्तर्यद्यतन्यां परस्मैपदे अङ् स्यात् । द्युतादयो 'द्युद्भ्योऽद्यतन्याम्' इत्यत्र परिगणिताः। पुष्यादयो दिवाद्यन्तर्गताः 'दिवादेः श्यः' इत्यत्र

परिगणिष्यन्ते । पुष्येति श्यनिर्देशः पोषतिपुष्णात्यादिभ्यो मा भूत् इत्यर्थः असृपत् । ससर्प ।

१३८ **स्पृशादिसृपो वा** ॥ ४।४।११३ ॥ स्पृशमृशकृषतृपदृपां सृपश्च स्वरात्परो धुडादौ प्रत्यये परेऽकारोऽन्तो वा स्यात् अकिति । स्पृशा सर्प्ता । स्पर्प्स्यति । सर्प्स्यति । असस्पर्प्स्यत् । असर्प्स्यत् । तुप तुम्प तुप तुम्प तुफ तुम्फ तुफ तुम्फ हिंसायाम् ॥३४२॥ तोपति । अतोपीत् । तुतोप । तुम्पति । अतुम्पीत् । तुतुम्प । तुतुम्पतुः । संयोगात्परस्याः परोक्षायाः कित्त्वाभावान्नलोपो न । आशिषि कित्त्वान्नलोपो भवत्येव । तुप्यात् ।

१३९ **प्रात्तुम्पतेर्गवि** ॥४।४।११४ प्रात्परस्य तुम्प इत्येतस्य धातोर्गवि कर्तरि सडादिः स्यात् । प्रस्तुम्पति गौः । प्रस्तुम्पति वत्सो मातरम् । प्रस्तुम्पको वत्सः । गवीति किम् । प्रतुम्पति वनस्पतिः । अन्ये तु प्रात्परस्य तुम्पतिशब्दस्य गवि अभिधेये सडादिः स्यात् । प्रस्तुम्पतिर्गौः । प्रस्तुम्पतिरन्यः । तुम्पतिधातोस्तु सट् न भवतीति मन्यन्ते । एके तु प्रात्तुम्पतेः कपीत्यारभन्ते । कपि हिंसायां कुत्सायां वा कपि समासान्त इति च व्याचक्षते । प्रस्तुम्पति वत्सो मातरं हिनस्तीत्यर्थः । प्रगतस्तुम्पोऽस्मात् प्रस्तुम्पको देशः । इहाद्यौ द्वौ पञ्चमषष्ठौ च नीरेफौ अन्ये सरेफाः । वर्फ रफ रफु अर्ब कर्ब खर्ब गर्ब चर्ब तर्ब नर्ब पर्ब बर्ब शर्ब षर्ब सर्ब रिबु रबु गतौ ॥३५९॥ कुबु आच्छादने ॥३६०॥ लुबु तुबु अर्दने ॥३६२॥ चुबु वक्त्रसंयोगे ॥३६३॥ सृभु सृम्भू स्रिभू षिम्भू भर्म हिंसायाम् ॥३६८॥ शुम्भ भाषणे च ॥ ६६९ ॥ यभं जभ मैथुने ॥ ३७१ ॥ यभति । अयाप्सीत् । अधश्चतुर्थादिति धत्वे अयाब्धाम् । अयाप्सुः । ययाभ । येभतुः । येभिथ । ययब्ध । यब्धा । यप्स्यति । अयप्स्यत् ।

१४० **जभः स्वरे** ॥४।४।१००॥ जम्भतेः स्वरादौ प्रत्यये परे नोऽन्तः स्यात् । जम्भति । चमू छमू झमू जिमु अदने ॥३७५॥

१४१ **ष्ठिवुक्लम्वाचमः** ॥४।२।११०॥ ष्ठिवेः क्लमेराङ्पूर्वस्य च चमेः शिति परे दीर्घः स्यात् अत्यादौ ॥ आचामति । चमेराङ्पूर्वस्य ग्रहणादिह न चमति । विचमति । ष्ठिवुक्लमोरूकारनिर्देशाद्यङ्लुपि न । अचमीत् । चचाम । चेमतुः । क्रमू पादविक्षेपे ॥३७६॥

१४२ **भ्राशम्लाशभ्रमक्रमक्लमत्रसित्रुटिलषियसिसंयसेर्वा** ॥३।४।७३॥ एभ्यः कर्तरि विहिते शिति श्यः प्रत्ययो वा स्यात् । प्राप्तप्राप्तविभाषेयम् । यसिग्रहणेनैव सिद्धे संयसिग्रहणमुपसर्गान्तरपूर्वकस्य यसेर्निवृत्त्यर्थम् ।

१४३ **क्रमो दीर्घः परस्मै** ॥४।२।१०९॥ क्रमेः परस्मैपदे शिति परे दीर्घः स्यात् अत्यादौ । क्राम्यति । क्रामति । परस्मैपदनिमित्तविज्ञानाद्धेर्लुक्यपि भवति । क्राम्य । क्राम । परस्मै इति किम् । आक्रमते सूर्यः ॥

१४४ **क्रमः** ॥४।४।७३॥ क्रमः परस्य स्ताद्यशित आदिरिट् स्यात् आत्मनेपदं चेन्न भवति । मान्तत्वान्न वृद्धिः । अक्रमीत् । चक्राम । क्रमिता । क्रमिष्यति । अक्रमिष्यत् । क्रमितेवाचरति क्रमित्रीयते इत्यत्रापि पूर्ववदिट् । कथं ' चिक्रंसया कृत्रिमपत्रिपङ्क्तेः' इत्यत्रेडभावः ? गतानुगतिक एष पाठः । ' जिघृक्षया कृत्रिमपत्रिपङ्क्तेः ' इति तु अविगानः पाठः । यमूं उपरमे ॥३७७॥

१४५ **गमिषद्यमइछः** ॥४।२।१०६॥ गम् इषत् यम् इत्येतेषां शिति प्रत्यये छकारादेशः स्यात् अत्यादौ । इषदिति तकारनिर्देश इष्यतीष्णात्योर्निवृत्त्यर्थः । यच्छति । अयंसीत् । स्यमू शब्दे ॥३७८॥ स्यमति । अस्यमीत् । सस्याम । स्येमतुः । सस्यमतुः । जृभ्रमेति वा एत्वम् । णमं प्रह्वत्वे ॥३७९॥ नमति । अनंसीत् । ननाम । नेमतुः । नन्ता । नंस्यति । षम ष्टम वैक्लव्ये ॥३८१॥ ससाम । तस्ताम । अम शब्दभर्त्सयोः ॥६८२॥ अमति । आमीत् । आम । अम द्रम हम्म मिमृ गस्लृं गतौ ॥३८७॥ अमोऽर्थभेदार्थं पुनः पाठः। गच्छति । लृदित्त्वादङ् अगमत् । जगाम ।

१४६ **गमहनजनखनघसस्वरेऽनङि क्ङिति लुक्** ॥ ४।२।४४ ॥ एषामुपान्त्यस्याङ्वर्जिते स्वरादौ क्ङिति प्रत्यये परे लुक् स्यात् । जग्मतुः। जग्मुः। जगमिथ । जगन्थ । गम्यात् । गन्ता ।

१४७ **गमोऽनात्मने** ॥४।४।७१॥ गमः परस्य सकारादेस्ताद्यशित आदिरिट् स्यात् आत्मनेपदं चेन्न भवति । गम इति आदेशस्यानादेशस्य च ग्रहणमविशेषात् । गमिष्यति। अगमिष्यत् । इण्धातोरादेशो गम्–जिगमिषति ग्रामम् । इक्धातोरादेशो गम्–अधिजिगमिषति मातुः । इङ्धातोरादेशो गम्–अधिजिगमिषिता

शास्त्रस्य । इङो नेच्छन्त्येके । तन्मते अधिजिगंसिता अधिजिगांसुः इत्याद्येव भवति। अनात्मने इति किम् । गंस्यते ग्रामः । इणिकोर्जिगांस्यते। अधिजिगांस्यते माता । कथं जिगमिषितेवाचरति जिगमिषित्रीयते इति ? आत्मनेपदस्य क्यङाश्रितत्वेन बहिरङ्गत्वात् । केचित्तु आत्मनेपदविषयस्य गमेरात्मनेपदाभावे सति इटो विकल्पमिच्छन्ति । गम्–संजिगंसिता संजिगमिषिता । इङ् अधिजिगंसिता अधिजिगमिषिता । अनात्मनेपदनिमित्तात्तु गमेर्नित्यमिटमिच्छन्ति–गमिष्यति जिगमिषतीति। जिगमिषितुम् अधिजिगमिषितुम् अधिजिगमिषितव्यमित्यत्रापि गमेरनात्मनेपदविषयत्वान्नित्यमिड् भवति । तन्मतसंग्रहार्थमाद्वृत्या सूत्रद्वयं व्याख्येयम् । ' गमोऽनात्मने ' ' गमोऽनात्मने ' इति । तत्र पूर्वस्यायमर्थः । गमेः सकारस्यादिरिड् वा स्यात् आत्मनेपदं चेन्न भवति । वेत्यनुवर्तनीयम् । द्वितीयसूत्रे तु अनात्मन इति प्रकृतिविशेषणं व्याख्येयम् । ततश्च गमेरात्मनेपदविषयात् सकारस्यादिर्नित्यमिट् स्यात् । इहानात्मने इति प्रकृतिविशेषणात् पूर्वसूत्रे आत्मनेपदविषयादिति सामर्थ्यालभ्यते । एवं च तन्मतसंग्रहः सिद्धो भवति। एके तु परस्मैपदविषयस्यैव गमेरिटमिच्छन्ति नात्मनेपदविषयस्य । तन्मतसंग्रहार्थं तु नात्मने इत्यसमस्तं व्याख्येयम् । आत्मन इति च प्रकृतिविशेषणम् । एवं च गमेरात्मनेपदविषयात् सकारस्यादिरिड् न भवतीत्ययमर्थो भवति । तेन संजिगंसिता संजिगंसितव्यम् अधिजिगांसिता व्याकरणस्य। अधिजिगांसितव्यम् । इति पवर्गीयान्ताः।

हय हर्य क्लान्तौ च ॥ ३८९ ॥ चाद् गत्याम् । यान्तत्वान्न वृद्धिः अहर्यीत् । मव्य बन्धने ॥ ३९० ॥ सूर्ख्य ईर्ख्य इर्ष्य ईष्यार्थाः ॥ ३९३ ॥ शुच्यै चुच्यै अभिषवे ॥३९५॥ द्रवेणाद्रवाणां परिवासनमभिषवः । स्नानमित्यन्ये ॥ इति यान्ताः ॥ छद्म गतौ ॥ ३९६ ॥ क्मर हूर्छने ॥ ३९७ ॥ अभ्र वभ्र मभ्र गतौ ॥४००॥ आनभ्र । चर भक्षणे च ॥४०१॥ धोर्क्ङ गतिचातुर्ये ॥४०२॥ ऋदित् धोरति । खोर्क्ङ प्रतिघाते ॥४०३॥ गतेरित्यनुवर्तते । चुखोर । ॥ इति रान्ताः ॥ दल त्रिफला विशरणे ॥४०५॥ अफालीत् । पफाल । फेलतुः। मील श्मील स्मील ष्मील निमेषणे ॥४०९॥ निमेषणं संकोचः । पील प्रतिष्टम्भे ॥४१०॥ प्रतिष्टम्भो रोपणम् । णील वर्णे ॥४११॥ वर्णोपलक्षितायां क्रियायामित्यर्थः । शील समाधौ ॥४१२॥ कील बन्धे ॥४१३॥ कूल आवरणे ॥४१४॥ शूल रुजायाम् ॥४१५॥ तूल निष्कर्षे ॥४१६॥ निष्कर्षोऽन्तःस्थस्य बहिर्निस्सा-

रणम् । पूल संघाते ॥४१७॥ मूल प्रतिष्ठायाम् ॥४१८॥ फल निष्पत्तौ ॥४१९॥ फुल्ल विकसने ॥४२०॥ चुल्ल हावकरणे ॥४२१॥ फुल्ल विकसने ॥४२२॥ चिल्ल शैथिल्ये च ॥४२३॥ पेल्ल फेल्ल शेल्ल षेल्ल सेल्ल वेहल्ल सल तिल तिल्ल पल्ल वेल्ल गतौ ॥४३४॥ वेल्ल चेल्ल केल्ल क्वेल्ल खेल्ल स्खल गतौ ॥४४०॥ खल संचये च। ॥४४१॥ श्वल श्वल्ल आशुगतौ ॥४४३॥ गल (इति लान्ताः) चर्व अदने ॥४४५॥ अगालीत् । अचर्वीत् । पूर्व पर्व मर्व पूरणे ॥४४८॥ गर्व धिवु शव गतौ ॥४५१॥ कर्व खर्व गर्व दर्पे ॥४५४॥ ष्ठिवू क्ष्विवू निरसने ॥४५६॥ ष्ठिवूक्लम्वाचम इति दीर्घे ष्ठीवति ।

१४८ निर्वा ष्ठिवः ॥४।१।४३॥ ष्ठिवेर्द्वित्वे सति पूर्वस्य द्वितीयस्य तिरादेशो वा स्यात् । तिष्ठेव टिष्ठेव । तेरिकारोच्चारणार्थः । तेन 'इवृध' इत्यादिना वेटि तुष्टचूषति दुष्टचूषति । पूर्वस्येत्यादेशविधानमेव ज्ञापयति ष्ठिवेः षकारः ठकारपरः ष्टाष्टचैमभृतीनां तु तवर्गपरः । तेन तस्थौ तष्टयौ इत्यादि भवति । चिक्षेव । जीव प्राणधारणे ॥४५७॥ पीव मीव तीव नीव स्थौल्ये ॥४६१॥ उर्वै तुर्वै थुर्वै दुर्वै धुर्वै जुर्वै अर्व भर्व शर्व हिंसायाम् ॥४७०॥ मुर्वै मव बन्धने ॥४७२॥ गुर्वै उद्यमे ॥४७३॥ पिवु मिवु निवु सेचने ॥४७६॥ हिवु दिवु जिवु प्रीणने ॥४७९॥ इवु व्याप्तौ ॥४८०॥ इन्वति । इन्वाञ्चकार । अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादहनभाववृद्धिषु॥ ॥४८१॥ अवति । आवीत् । मा भवानवीत् । इति वान्ताः। कश शब्दे ॥४८२॥ सौत्रोऽयमित्येके। मिश मश रोषे च ॥४८४॥ शश प्लुतगतौ ॥४८५॥ उत्पत्य गमन इत्यर्थः। णिश समाधौ ॥४८६॥ दृश्रं प्रेक्षणे ॥४८७॥ पश्यति। ऋदिल्ङीत्यङि ऋदृशोऽङीति गुणे अदर्शत् । पक्षे ।

१४९ अः सृजिदृशोऽकिति ॥४।४।११६॥ सृजिदृशोः स्वरात्परो धुडादौ प्रत्यये अकारोऽन्तः स्यात् अकिति । परत्वादकारागमे सति वृद्धिः। ततो यजसृजेति शस्य षत्वे ।

१७० षढोः कः सि ॥२।१।६२॥ षकारढकारयोः स्थाने सकारे ककार आदेशः स्यात् । नाम्यन्तस्येति सस्य षत्वे अद्राक्षीत् । अद्राष्टाम् । अद्राक्षुः । ददर्श । ददृशतुः। सृजिदृशीति वेटि। ददर्शिथ । दद्रष्ठ । दृश्यात् । द्रष्टा । द्रक्ष्यति। ॥इति शान्ताः॥ घुषृ शब्दे । ॥४८८॥ अघुषत् । अघोषीत् । चूष पाने ॥४८९॥ तूष

तुष्टौ ॥४९०॥ पूष वृद्धौ ॥४९१॥ लूष मूष स्तेये ॥४९३॥ षूष प्रसवे ॥४९४॥ सूषति । ऊष रुजायाम् ॥४९५॥ ऊषाञ्चकार । ईष उञ्छे ॥४९६॥ उञ्छ उञ्छनम् । कृषं विलेखने ॥४९७॥ कर्षति ।

१६१ स्पृशमृशकृषतृपदृपो वा ॥३।४।५४॥ स्पृशादिभ्यो धातुभ्योऽद्यतन्यां सिज्वा स्यात् । स्पृशादिसृपो वा । अक्राक्षीत् । अकार्क्षीत् । पक्षे ।

१६२ हशिटो नाम्युपान्त्यादृदृशोऽनिटः सक् ॥३।४।५५॥ हशिडन्तान्नाम्युपान्त्याद् दृशिवर्जितात् अनिटो धातोरद्यतन्यां परतः सक् प्रत्ययः स्यात् । सिचोऽपवादः । अकृक्षत् । अकृक्षताम् । कष शिष जष झष वष मष मुष रुष रिष यूष जूष शष चष हिंसायाम् ॥६१०॥

१६३ सहलुभेच्छरुषरिषस्तादेः ॥४।४।४६॥ एभ्यः परस्य तकारादेस्ताद्यशित आदिरिड् वा स्यात् । रोषिता । रोष्टा । रेषिता । रेष्टा । वृष संघाते च ॥६११॥ भष भर्त्सने ॥६१२॥ भषति । पैशुन्येन वक्तीत्यर्थः । जिषू विषू मिषू निषू पृषू वृषू सेचने ॥६१८॥ मृषू सहने च ॥६१९॥ उषू श्रिषू श्लिषू प्रुषू प्लुषू दाहे ॥६२४॥ ओषति । औषीत् ।

१६४ जाग्युषसमिन्धेर्नवा ॥३।४।४९॥ जागृ उष सम्पूर्व इन्धं इत्येतेभ्यो धातुभ्यः परस्याः परोक्षायाः स्थाने आमादेशो वा स्यात् आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते । ओषाञ्चकार । पक्षे उवोष । ऊषतुः । ऊषुः । उवोषिथ । घृषू संघर्षे ॥६२७॥ हृषु अलीके ॥६२६॥ पुष पुष्टौ ॥५२७॥ भूष (इति षान्ताः) तसु अलंकारे ॥५२९॥ तुस हृस हृस रस शब्दे ॥६३३॥ लस [1]श्लेषणक्रीडनयोः ॥६३४॥ ललास । लेसतुः । घस्लृं अदने ॥६३५॥ घसति । अघसत् । जघास । गमहनेत्युपान्त्यलोपे ।

१६५ घस्वसः ॥२।३।३६॥ नाम्यन्तस्थाकवर्गात्परस्य घसेर्वसेश्च धातोः संबन्धिनः सकारस्य षः स्यात् । घसिरिहायमेव । आदेशस्य कृतत्वेनैव सिद्धत्वात् । अकृतसकारार्थं वचनम् । जक्षतुः । जक्षुः । जघसिथ । जघस्थ । घस्ता ।

१६६ स्स्तास्सि ॥४।३।९२॥ अशितीत्यनुवर्तते । धातोः सकारान्तस्याशिति सकारादौ प्रत्यये विषयभूते तकारोऽन्तादेशः स्यात् । घत्स्यति । अघत्स्यत् ।

विषयसप्तमीविज्ञानात् अवात्ताम् अवात्तेत्यत्र प्रागेव सस्य तकारः। हसे हसने ॥६३६॥ पिस्ट पेस्ट वेस्ट गतौ ॥६३९॥ शसु हिंसायाम् ॥६४०॥ शशास। शशसतुः। न शसददेत्येत्वं न। शंसु स्तुतौ च ॥६४१॥ शंसति। शशंस। आशिषि नलोपः शस्यात् ॥इति सान्ताः॥ मिह सेचने ॥६४२॥ मेढा। मेक्ष्यति। दहं भस्मीकरणे ॥६४३॥ दहति। भ्वादेर्दार्देर्घ इति हस्य धत्वे गडदबादेरिति दस्य धत्वे वृद्धौ च अधाक्षीत्। धुड्हस्वादिति सिज्लोपे अधश्चतुर्थेति तस्य धत्वे च अदाग्धाम्। अधाक्षुः। ददाह। देहतुः। देहिथ। ददग्ध। दग्धात्। दग्धा। धक्ष्यति। चह कल्कने ॥६४४॥ कल्कनं दंभः शाठ्यं च। अचहीत्। रह त्यागे ॥६४५॥ रहु गतौ ॥६४६॥ रंहति। दह दहु बृह बृद्धौ ॥६४९॥ दर्हति। दंहति। बर्हति। बृहू बृहु शब्दे च ॥६५१॥ अबृहत्। अबर्हीत्। अबृंहीत्। उहू तुहू दुहू अर्दने ॥६५४॥ औहत्। औहीत्। उवोह। अतुहत्। अतोहीत्। अदुहत्। अदोहीत्। अर्ह मर्ह पूजायाम् ॥६५६॥ अर्हति। आर्हीत्। आनर्ह। इति हान्ताः। उक्ष सेचने ॥६५७॥ उक्षति। उक्षाञ्चकार। रक्ष पालने ॥६५८॥ मक्ष म्रक्ष संघाते ॥६६०॥ अक्षौ व्याप्तौ च ॥६६१॥

१५७ वाक्षः ॥३।४।७६॥ अक्षौ इत्येतस्मात् कर्तरि विहिते शिति [*]नुः प्रत्ययो वा स्यात्।

१५८ उश्नोः ॥४।३।२॥ धातोः परयोरु[*]नु इत्येतयोः प्रत्ययोरक्ङिति प्रत्यये गुणः स्यात्। अक्ष्णोति। अक्षति। आक्षीत्। आष्टाम्। आक्षिष्टाम्। आनक्ष। अक्षिता। अष्टा। तक्षौ त्वक्षौ तनूकरणे ॥६६३॥

१५९ तक्षः स्वार्थे वा ॥३।४।७७॥ स्वार्थस्तनूकरणं तस्मिन् वर्तमानात् तक्षौ इत्येतस्मात् कर्तरि विहिते शिति [*]नुः प्रत्ययो वा स्यात्। तक्ष्णोति तक्षति काष्ठम्। स्वार्थे किम्। संतक्षति वाग्भिः शिष्यं निर्भर्त्सयतीत्यर्थः। अतक्षीत्। अताक्षीत्। अतक्षिष्टाम्। अताष्टाम्। तक्षिता। तष्टा। णिक्ष चुम्बने ॥६६४॥ प्रणिक्षति। निक्षिता। तृक्ष स्तृक्ष णक्ष गतौ ॥६६७॥ वक्ष रोषे ॥ संघात इत्येके ॥६६८॥ त्वक्ष त्वचने ॥६६९॥ त्वचनं त्वग्ग्रहणम्, संवरणं वा। सूक्ष्म अनादरे ॥६७०॥ काक्षु वाक्षु माक्षु कांक्षायाम् ॥६७३॥ द्राक्षु ध्राक्षु ध्वाक्षु घोरवासिते च ॥६७६॥ इति सान्ताः। एषां षान्तेषु पाठो युक्तो वैचित्र्यार्थं त्विह कृतः ॥

॥ इति परस्मैपदिनः ॥

॥ अथात्मनेपदिनः ॥

गाङ् गतौ ॥१॥ गाते । गाते । गाते । गासे । गाथे । गाध्वे। गै । गावहे। गामहे । गेत । गेयाताम् । गेरन् । गेथाः । गेयाथाम् । गेध्वम् । गेय । गेवहि । गेमहि । गाताम् । गाताम् । गाताम् । गास्व । गाथाम् । गाध्वम् । गै । गावहै । गामहै । अगात । अगाताम् । अगात । अगाथाः । अगाथाम् । अगाध्वम् । अगे । अगावहि । अगामहि । अगास्त । अगासाताम् । अगासत । अगास्थाः । अगासाथाम् । अगाध्वम् । अगाद्ध्वम् । अगासि । अगास्वहि । अगास्महि । जगे । जगाते । जगिरे । जगिषे । जगाथे । जगिध्वे । जगे । जगिवहे । जगिमहे । गासीष्ट । गासीयास्ताम् । गासीरन् । गासीष्ठाः । गासीयास्थाम् । गासीध्वम् । गासीय । गासीवहि । गासीमहि । गाता । गातारौ । गातारः । गातासे । गातासाथे । गाताध्वे । गाताहे । गातास्वहे । गातास्महे । गास्यते । गास्येते । गास्यन्ते । गास्यसे । गास्येथे । गास्यध्वे । गास्ये । गास्यावहे । गास्यामहे । अगास्यत । अगास्येताम् । अगास्यन्त । अगास्यथाः । अगास्येथाम् । अगास्यध्वम् । अगास्ये । अगास्यावहि । अगास्यामहि । ष्मिङ् ईषद्धसने ॥२॥ स्मयते । स्मयेते । स्मयन्ते । स्मयेत । स्मयताम् । अस्मेष्ट । अस्मेषाताम् । अस्मेषत । अस्मेष्ठाः। अस्मेषाथाम् ।

१६० **र्नाम्यन्तात्परोक्षाद्यतन्याशिषो धो ढः** ॥२।१।८०॥ रेफान्तान्नाम्यन्ताच्च धातोः परासां परोक्षाद्यतन्याशिषां विभक्तीनां यो धकारस्तस्य ढकार आदेशः स्यात् । अस्मेड्ढ्वम् । र्नाम्यन्तादिति धातोर्विशेषणं किम् । ववसिध्वे । र्नाम्यन्तादिति किम् । अपग्ध्वम् । परोक्षाद्यतन्याशिष इति किम् । स्तुध्वे । सिष्मिये । सिष्मियाते ।

१६१ **हान्तस्थाञ्ञीङ्भ्यां वा** ॥२।१।८१॥ हकारान्तादन्तस्थायाश्च पराञ् ञेरिटश्च परासां परोक्षाद्यतन्याशिषां संबन्धिनो धकारस्य ढकारो वा स्यात् । वचनभेदो यथासंख्यनिवृत्त्यर्थः । सिष्मियिढ्वे । सिष्मियिध्वे । स्मेषीष्ट । स्मेता । स्मेष्यते । अस्मेष्यत । डीङ् विहायसागतौ ॥३॥ डयते । अडयिष्ट । डिड्ये । डयिषीष्ट । डयिता । डयिष्यते । अडयिष्ट । उंङ् कुंङ् गुंङ् घुंङ् डुंङ् शब्दे ॥८॥ अवते । आवत । औष्ट । ऊवे । अत्र वार्णात् प्राकृतं बलीय इत्युव् ततश्च समानदीर्घः। ओषीष्ट। ओता। कवते। अकोष्ट। चुकुवे। च्युंङ् ज्युंङ् जुंङ् प्रुंङ् प्लुंङ् गतौ

॥१३॥ रुंङ् रेषणे च ॥१४॥ रेषणं हिंसा । चादगतौ । पूङ् पवने ॥१५॥ पवनं नीरजीकरणम् । पवते । पविता । मूङ् बन्धने ॥१६॥ मवते । मविता । धूंङ् अवध्वंसने ॥१७॥ धरते ।

१६२ ऋवर्णात् ॥४।३।३६॥ ऋवर्णान्ताद्धातोः परे अनिटावात्मनेपदविषये सिजाशिषौ किद्वत्स्याताम् ।

१६३ न वृद्धिश्चाविति क्ङिल्लोपे ॥४।३।११॥ अविति प्रत्यये यः कितो ङितश्च लोपस्तस्मिन् सति गुणो वृद्धिश्च न स्यात् । लोपोऽदर्शनमात्रमिह गृह्यते । अधृत । अधृषाताम् । क्ङिदिति किम् । रागी । रागः । अत्र नलोपे प्रतिषेधो मा भूत् । केचित्तु दधीत्राचरति इति किपि लोपे अप्रत्यये णिगि च दध्या दध्यतीत्यत्रापि गुणवृद्धयोः प्रतिषेधमिच्छन्ति । तन्मतसंग्रहार्थं क्ङिल्लोपे सति अविति प्रत्यये परे गुणवृद्धी न भवत इति व्याख्येयम् । विति तु दधयति । रोरवीति । बोभवीति । केचित्तु दीधीवेव्योरिवर्णे यकारे चान्तस्य लुकमन्यत्र तु गुणवृद्धिनिषेधमारभन्ते । तदसत् छान्दसत्वादनयोः। दध्रे । धृषीष्ट । धर्ता । धरिष्यते । मेङ् प्रतिदाने ॥१८॥ प्रतिदानं प्रत्यर्पणम्। प्रणिमयते। दैङ् त्रैङ् पालने ॥२०॥ दयते।

१६४ इश्च स्थादः ॥४।३।४१॥ तिष्ठतेर्दासंज्ञाच्च धातोः पर आत्मनेपदविषयः सिच् किद्वत्स्यात् तत्संनियोगे च स्थादोरन्तस्येकारादेशः । अदित । अदिषाताम् ।

१६५ देर्दिगिः परोक्षायाम् ॥४।१।३२। देङः परोक्षायां दिगिरित्ययमादेशः स्यान्नचायं द्विः। दिग्ये । दिग्याते । दिग्यिरे । त्रायते । अत्रास्त । अत्रासाताम् । तत्रे । त्रासीष्ट । त्राता । त्रास्यते । श्यैङ् गतौ ॥२१॥ प्यैङ् वृद्धौ ॥२२॥ ॥ इति स्वरान्ताः॥ वकुङ् कौटिल्ये ॥२३॥ वङ्कते । गतावपीत्येके। मकुङ् मण्डने ॥२४॥ मण्डनं शोभनम् । अकुङ् लक्षणे ॥२५॥ आनङ्के । शीकृङ् सेचने । २६॥ लोकृङ् दर्शने ॥२७॥ लोकते । आलोकिष्ट। लुलोके। श्लोकृङ् संघाते ॥२८॥ ग्रन्थे इत्यर्थः। स च ग्रन्थो व्यापारो ग्रथ्यमानस्य ग्रन्थितुर्वा । आद्येऽकर्मको द्वितीये सकर्मकः । श्लोकते । ष्रेकृङ् ष्रेकृङ् शब्दोत्साहे ॥३०॥ शब्दस्योत्साह औद्धत्यं वृद्धिश्च । रेकृङ् शकृङ् शङ्कायाम् ॥३२॥ ककि लौल्ये ॥३३॥ लौल्यं गर्वश्चापल्यं च । ककते।

चकके । कुकि वृकि आदाने ॥३५॥ कोकते । वर्कते । इन्ध्यसंयोगादिति कित्वे । चुकुके । वृकके । चकि तृप्तिप्रतिघातयोः ॥३६॥ चकते । चेके । ककुङ् श्वकुङ् त्रकुङ् श्रकुङ् श्लकुङ् ढौकृङ् त्रौकृङ् ष्वष्कि रस्कि मस्कि तिकि टिकि टीकृङ् सेकृङ् सेकृङ् रघुङ् लघुङ् गतौ ॥५३॥ कङ्कते । ढुढौके । तुत्रौके । ष्वष्कते । रङ्कते । लङ्कते । लघुङ् भोजननिवृत्तावपि । अघुङ् वघुङ् गत्याक्षेपे ॥५५॥ आक्षेपो वेग आरम्भ उपालम्भो वा । मघुङ् कैतवे च ॥५६॥ चाद् गत्याक्षेपे । राघृङ् लाघृङ् सामर्थ्ये ॥५७॥ द्राघृङ् आयासे च ॥५८॥ आयास इत्यन्ये । श्लाघृङ् कत्थने ॥९॥ ॥ इति कवर्गीयान्ताः ॥ लोचृङ् दर्शने ॥६०॥ लोचते । लुलोचे । षचि सेचने ॥६१॥ सचते । शचि व्यक्तायां वाचि ॥६२॥ कचि बन्धने ॥६३॥ कचुङ् दीप्तौ च ॥६४॥ श्वचि श्वचुङ् गतौ । ॥६६॥ वर्चिं दीप्तौ ॥६७॥ मचि मुचुङ् कल्कने ॥६९॥ मचुङ् धारणोच्छ्रायपूजनेषु ॥७०॥ पचुङ् व्यक्तीकरणे ॥७१॥ ष्टुचिं प्रसादे ॥७२॥ स्तोचते । तुष्टुचे । एजृङ् भ्रेजृङ् भ्राजि दीप्तौ ॥७५॥ एजाञ्चक्रे । बिभ्रेजे । बभ्राजे । इजुङ् गतौ ॥७६॥ इञ्जते । इञ्जाञ्चक्रे । ईंजि कुत्सने च । ईंजते । ईंजाञ्चक्रे । ऋजि गतिस्थानार्जनोपार्जनेषु ॥७८॥ अर्जते । आनृजे । ऋजुङ् भृजैङ् भर्जने ॥८०॥ तिजि क्षमानिशानयोः ॥८२॥ निशानं तीक्ष्णीकरणम् ।

१६६ **गुप्तिज्कद्भ्यः सन्** ॥३।४।५॥ गुप्तिज् इत्येताभ्यां यथासंख्यं गर्हायां क्षान्तौ च वर्तमानाभ्यां स्वार्थे सन् प्रत्ययः स्यात् । अकारः सन्ग्रहणेषु सामान्यग्रहणार्थः । नकारः सन्यङश्चेत्यत्र विशेषणार्थः । तितिक्षते । सहते इत्यर्थः । तेजने तु तेजयति । एवं गुप्धातोर्गर्हायां जुगुप्सत इति । अन्यत्र गोपयति । इति चवर्गीयान्ताः । घट्टि चलने ॥८२॥ स्फुटि विकसने ॥८३॥ स्फोटते । चेष्टि चेष्टायाम् ॥८४॥ गोष्टि लोष्टि संघाते ॥८६॥ वेष्टि वेष्टने ॥८७॥ अट्टि हिंसातिक्रमयोः ॥८८॥ दोपान्त्यस्तोपान्त्यो वा । अट्टते । आनट्टे । एठि हेठि विबाधायाम् ॥९० एठाञ्चक्रे । जिहेठे । मठुङ् कठुङ् शोके ॥९२॥ शोकोऽत्राध्यानम् । मण्ठते । कण्ठते । मुठुङ् पलायने ॥९२॥ वठुङ् एकचर्यायाम् ॥९४॥ अठुङ् पठुङ् गतौ ॥९६॥ हुडुङ् पिडुङ् संघाते ॥९८॥ शडुङ् रुजायां च ॥९९॥ चात्संघाते । तडुङ् ताडने ॥१००॥ कडुङ् मदे ॥१०१॥ खडुङ् मन्थे च ॥१०२॥ खुडुङ् गतिवैकल्ये ॥१०३॥ कुडुङ् दाहे ॥१०४॥ वडुङ् मडुङ् वेष्टने ॥१०६॥ विभाजनं इत्येके । विभाजनं विभागीकरणम् । चरमाभावश्च । भडुङ् परिभाषणे ॥१०७॥

मुडुङ् मार्जने ॥१०८॥ मार्जनं शोधनम्। मुण्डते। तुडुङ् तोडने ॥१०९॥ भुडुङ् वरणे ॥११०॥ वरणं स्वीकारः। चडुङ् कोपे ॥१११॥ द्राढृङ् ध्राढृङ् विशरणे ॥११३॥ दद्राडे। दध्राडे। शाढृङ् श्लाघायाम् ॥११४॥ ऋफिडादित्वाड्डस्य लत्वे शालते। वाढृङ् आप्लाव्ये ॥११६॥ हेढृङ् होढृङ् अनादरे ॥११७॥ हिडुङ् गतौ च ॥१२८॥ घिणुङ् घुणुङ् घृणुङ् ग्रहणे ॥१२१॥ घुणि घूर्णि भ्रमणे ॥१२३॥ पणि व्यवहारस्तुत्योः ॥१२४॥ गुपौधूपेत्यायप्रत्यये पणायति। व्यवहरति स्तौति चेत्यर्थः। व्यवहारार्थात् पणेर्नेच्छन्त्यन्ये। शतस्य पणते। अनुबन्धस्याशवि आयप्रत्ययाभावपक्षे चरितार्थत्वादायप्रत्ययान्ताभ्यां पणिपनिभ्यामात्मनेपदं न भवति। पणायाञ्चक्रार। पेणे। इति टवर्गीयान्ताः। यतैङ् प्रयत्ने ॥१२५॥ येते। युतृङ् जुतृङ् भासने ॥१२७॥ योतते। जोतते। विथृङ् वेथृङ् याचने ॥१२९॥ नाथृङ् उपतापैश्वर्याशीःषु च ॥१३०॥ चाद् याचने।

१६७ **आशिषि नाथः** ॥३।३।३६॥ आशिष्येवार्थे वर्तमानान्नाथतेः कर्तर्यात्मनेपदं स्यात्। सर्पिषो नाथते। सर्पिर्मे भूयादित्याशास्ते इत्यर्थः। आशिष्येवेति नियमः किम्। याच्ञायां मा भूत्। मधु नाथति। ङित्करणं तस्यानप्रत्ययार्थम्। श्रथुङ् शैथिल्ये ॥१३१॥ ग्रथुङ् कौटिल्ये ॥१३२॥ कत्थि श्लाघायाम् ॥१३३॥ स्विदुङ् खैत्ये ॥१३४॥ वदुङ् स्तुत्यभिवादनयोः ॥१३५॥ भदुङ् सुखकल्याणयोः ॥१३६॥ मदुङ् स्तुतिमोदमदस्वप्नगतिषु ॥१३७॥ स्पदुङ् किंचिच्चलने ॥१३८॥ क्लिदुङ् परिदेवने ॥१३०॥ मुदि हर्षे ॥१४०॥ मोदते। ददि दाने ॥१४१॥ न शसददेत्येत्वं न। ददे। हदिं पुरीषोत्सर्गे ॥१४२॥ हदते। अहत्त। अहत्साताम्। हत्ता। ष्वदि स्वदि स्वादि आस्वादने ॥१४५॥ ष्वदिरनुभवे सकर्मको रुचावकर्मकः। उर्दि मानक्रीडयोश्च ॥१४६॥ भ्वादेरिति दीर्घे ऊर्दते। ऊर्दाञ्चक्रे। कुर्दि गुर्दि गुदि क्रीडायाम् ॥१४९॥ षूदि क्षरणे ॥१५०॥ ह्रादि शब्दे ॥१५१॥ अव्यक्ते शब्दे इत्यन्ये। ह्रादैङ् सुखे च। पर्दि कुत्सिते शब्दे ॥१५२॥ स्कुदुङ् आप्रवणे। ॥१५३॥ आप्रवणमुत्प्लव उद्धरणं च। स्कुन्दते। एधि वृद्धौ ॥१५४॥ एधते। एधांचक्रे। स्पर्द्धि संघर्षे ॥१५५॥ संघर्षः पराभिभवेच्छा। धात्वर्थेनोपसंग्रहादकर्मकः। स्पर्द्धते। पस्पर्द्धे। गाधृङ् प्रतिष्ठालिप्साग्रंथेषु ॥१५६ प्रतिष्ठायामकर्मकः। बाधृङ् रोटने ॥१५७॥ रोटनं प्रतिघातः। दधि धारणे ॥१५८॥ देधे। बधि बन्धने ॥१५९॥

१६८ शान्दान्मान्बधान्निशानार्जवविचारवैरूप्ये दीर्घश्चेतः॥३।४।७॥ शान् दान् मान् बध् इत्येतेभ्यो यथासंख्यं निशाने आर्जवे विचारे वैरूप्ये च वर्तमानेभ्यः स्वार्थे सन् प्रत्ययः स्याद् दीर्घश्चैषां द्विर्वचने सति पूर्वस्येकारस्य।

१६९ सन्यस्य ॥४।१।५९॥ धातोर्द्वित्वे सति पूर्वस्याकारस्य सनि परे इकारः स्यात्। बीभत्सते चित्तम्। विकुरुते इत्यर्थः। अर्थनिर्देशः किम्। अर्थान्तरे मा भूत्। बाधयति। नाथृङ् नाथृङ्वत् ॥१६०॥ पनि स्तुतौ ॥१६१॥ आयप्रत्यये पनायति। पनायाञ्चकार। पेने। पणिवत्। मानि पूजायाम् ॥१६२॥ विचारे मीमांसते। तिपृङ् ष्टिपृङ् ष्टेपृङ् क्षरणे ॥१४५॥ तेपृङ् कम्पने च ॥१६६॥ टुवेपृङ् केपृङ् गेपृङ् कपुङ् चलने ॥१७०॥ ग्लेपृङ् दैन्ये च। चाचलने। गतावप्यन्ये ॥१७१॥ जिग्लेपे। ग्रेपृङ् रेपृङ् लेपृङ् गतौ ॥१७४॥ त्रपौषि लज्जायाम् ॥१७५॥ त्रपते। तृफलेत्येत्वे त्रेपे। औदित्त्वादिड्वा। त्रपिता। त्रप्ता। गुपि गोपने ॥१७६॥ गोपते। गर्हायां सनि जुगुप्सते। अबुङ् रबुङ् शब्दे ॥१७८॥ अम्बते। आनम्बे। रम्बते। लबुङ् अवस्रंसने च ॥१७९॥ कबृङ् वर्णे ॥१८०॥ कबते। वर्णो वर्णनं शुक्लादिश्च। क्रीबृङ् अधार्ष्ट्ये ॥१८१॥ क्षीबृङ् मदे ॥१८२॥ शीभृङ् चीभृङ् शलिभ कत्थने ॥१८६॥ वलिभ भोजने ॥१८६॥ गलिभ धार्ष्ट्ये ॥१८७॥ रेभृङ् अभुङ् रभुङ् वभुङ् शब्दे ॥१९३॥ ष्टभुङ् स्कभुङ् स्तम्भे ॥१९६॥ स्तम्भः क्रियानिरोधः। स्तम्भते। स्कम्भते। जभुङ् जभैङ् जृभुङ् गात्रविनामे ॥१९९॥ जम्भते। जभते। जृम्भते। रभिङ् राभस्ये ॥२००॥ आरभते। डुलभिष् प्राप्तौ ॥२०१॥ लभते। अलब्ध। लेभे। भाभि क्रोधे ॥२०२॥ क्षमौषि सहने ॥२०३॥ क्षमते। अक्षमिष्ट। अक्षंस्त। चक्षमे। चक्षमिषे। चक्षंसे। चक्षमिध्वे। चक्षन्ध्वे। चक्षमिवहे। मोनो म्वोश्चेति नकारादेशे चक्षण्वहे। चक्षमिमहे। चक्षण्महे। क्षमिषीष्ट। क्षंसीष्ट। क्षमिता। क्षन्ता। क्षमिष्यते। क्षंस्यते। कमुङ् कान्तौ ॥२०४॥ कान्तिरिच्छा।

१७० कमेर्णिङ् ॥३।४।२॥ कमेर्धातोः स्वार्थे णिङ् प्रत्ययः स्यात्। णकारो वृद्ध्यर्थः। ङकार आत्मनेपदार्थः। कामयते। अद्यतन्यां णिश्रीति ङप्रत्यये अकाम् इ अ त इति स्थिते।

१७१ णेरनिटि ॥४।३।८३॥ अनिज्यशिति प्रत्यये णेर्लुक् स्यात्। इयङ्-

गुणवृद्धिदीर्घतागमानां बाधकोऽयम् । इय्–अतक्षत्। य् आटिटत्। गुणः–कारणा। वृद्धिः–कारकः । दीर्घः–कार्यते । तागमः–प्रकार्य । अनिटीति विषयसप्तमी । तेन चेतन इत्यत्र प्रागेव णेर्लोपे 'इङितो व्यञ्जनाद्यन्तात्' इति अनः सिद्धः। अनिटीति किम् । कारयिता । अशितीत्येव । कारयति ।

१७२ उपान्त्यस्यासमानलोपिशास्वृदितो ङे ॥ ४।२।३५ ॥ समानलोपिशासृकृदनुबन्धवर्जितस्य धातोरुपान्त्यस्य ङपरे णौ ह्रस्वः स्यात् । नित्यमपि द्विर्वचनं बाधित्वा प्रागेव ह्रस्वो भवति ओर्णेर्ऋदित्करणज्ञापकात् । तद्धि मा भवानोर्णिणत् इत्यत्र ऋदित्त्वादुपान्त्यह्रस्वत्वप्रतिषेधो यथा स्यादित्येवमर्थं क्रियते । यदि चात्र नित्यत्वात् पूर्वमेव द्वितीयद्वित्वं स्यात्तदानुपान्त्यत्वादेव ह्रस्वत्वस्याप्राप्तिरिति किं तन्निवृत्त्यर्थेन ऋदित्करणेन। एवं मा भवानटिटत् इत्यादि सिद्धं भवति। ङपरे णौ इति च न धातुर्विशिष्यते किं तर्हि नदुपान्त्य इति णेः पूर्वस्याधातुत्वेऽपि ह्रस्वो भवति । तेन गोनावमाख्यत् अजूगुनत् । केचिदौतः स्थानिवद्भावेनोपान्त्यत्वाभावाद्ध्रस्वं नेच्छन्ति । तेनाजुगोनत् । णाविति किम् । ङे उपान्त्यस्यैतावत्युच्यमाने अलीलवदित्यादावन्तरङ्गावपि वृद्ध्यावादेशावदीदपदित्यादौ प्वागमं च बाधित्वा वचनसामर्थ्यात् ण्युपान्त्यस्य ह्रस्वः प्रसज्ज्येत। अपीपचदित्यादौ ण्युपान्त्यस्वराभावान्न स्यात् । णिग्रहणानुवृत्तौ तु ङपरे णावुपान्त्यस्य ह्रस्व इति सर्वत्र ह्रस्वः सिद्धो भवति । ङ इति किम् । कारयति । उपान्त्यस्येति किम् । अचकाङ्क्षत् । येन नाव्यवधानमिति न्यायेनैव सिद्धे उपान्त्यग्रहणमुत्तरार्थम् । असमानलोपिशास्वृदित इति किम् । राजानमतिक्रान्तवानत्यरराजत् । यत्रान्त्यस्वरादिलोपस्तत्र स्थानिवद्भावेन न सिद्ध्यतीति वचनम् । यत्र तु स्वरस्यैव लोपस्तत्र स्वरादेशत्वात् स्थानिवद्भावेनैव सिद्ध्यति । मालामाख्यत् अममालत् । ननु यत्रापि स्वरव्यञ्जनलोपस्तत्रापि अवयवावयविनोरभेदनयेन स्वरादेश एवेति स्थानिवद्भावेनैव सिद्ध्यति किमसमानलोपिवचनेन ? सत्यम् । स्थानिवद्भावस्य अनित्यत्वख्यापनार्थं वचनम् । तेन स्वादु कृतवान् असिस्वददित्यादि सिद्धम् । अत्र 'नामिनोऽकलिहलेः' इति वृद्धौ कृतायामन्त्यस्वरादिलोपादसमानलोपित्वम् । ननु च परत्वात् प्रथमं लोपेनैव भवितव्यम्। नैवम्। कलिहलिवर्जनात् परमपि लोपं वृद्धिर्बाधते। अतएव तत्र कलिहलिवर्जनमर्थवत् । शासेरूदित्करणं यङ्लुप्निवृत्त्यर्थम् । वदति स्म वीणा तां

मायुंक्त परिवादकः तमप्यन्यः मायुंक्त अवीवदत् वीणां परिवादकेनेति तु णिजात्याश्रयणात् सिद्धम् ।

१७३ **स्वरादेर्द्वितीयः** ॥४।१।२॥ अनेकस्वरस्य धातोराद्य एकस्वरोऽवयवः परोक्षाङेप्रत्यये द्विः स्यात् । द्विर्धातुरित्यनेन सर्वस्य द्वित्वे प्राप्ते वचनम् । इति द्वित्वे ।

१७४ **असमानलोपे सन्वल्लघुनि ङे** ॥४।१।६३॥ न विद्यते समानस्य लोपो यस्मिन् ङपरे णौ द्वित्वे सति पूर्वस्य लघुनि धात्वक्षरे परे सनीव कार्यं स्यात् । सन्यस्येत्वमुक्तमिहापि तथा । अचिकणत् इत्यादौ अनेकव्यञ्जनव्यवधानेऽपि स्थादीनामित्त्वबाधकस्यात्वस्य शासनात् सन्वद्भावो भवति नतु स्वरव्यञ्जनव्यवायेऽपि । तेन अजजागरत् । पटुमाख्यत् अपीपटदित्यादौ तु वृद्धौ कृतायां सन्व्यक्षरलोप इति असमानलोपत्वात् सन्वद्भावः। णाविति जात्याश्रयणात् वादितवन्तं प्रयोजितवान् अवीवद्वीणां परिवादकेन । अत्र णेः समानस्य लोपेऽपि भवति ।

१७५ **लघोर्दीर्घोऽस्वरादेः** ॥४।१।६४॥ अस्वरादेर्धातोर्ङपरेऽसमानलोपे णौ द्वित्वे सति पूर्वस्य लघोर्लघुनि धात्वक्षरे परे दीर्घः स्यात् । अचीकमत । णाविति एव । तेनात्र णिङ्भावपक्षे अचकमत ।

१७६ **आमन्ताल्वाय्येत्नवय्** ॥४।३।८८॥ आम् अन्त आलु आय्य इत्नु प्रत्ययेषु परेषु णेरयादेशः स्यात् । लुकोऽपवादः । कामयाञ्चक्रे । अन्ताय्येत्नव औणादिकाः । णिङ्भावे चकमे । कामयिता । कमिता । कामयिष्यते । कमिष्यते । इति पवर्गीयान्ताः । अयि वयि पयि मयि नयि चयि रयि गतौ ॥ २११ ॥ अयते । आयिष्ट ।

१७७ **दयायास्कासः** ॥३।४।४७॥ दय् अय् आस् कास् इत्येतेभ्यो धातुभ्यः परस्याः परोक्षायाः स्थाने आमादेशः स्यात् आमन्ताच्च परे क्रञ्स्तयः परोक्षान्ता अनुप्रयुज्यन्ते । अयाञ्चक्रे । अयिषीष्ट । अयिषीध्वम् । अयिषीढ्वम् ।

१७८ **उपसर्गस्यायौ** ॥२।३।१००॥ उपसर्गसंबन्धिनो रेफस्य अयि गतावित्यस्मिन् धातौ परे लकारादेशः स्यात् । प्लायते । पलायते । पल्ययते । प्लत्ययते । अत्रानेकवर्णव्यवधानान्नेच्छन्त्येके । प्रतिपूर्वस्य प्रयोग एव नास्तीत्यन्ये ।

निलयनम् । दुलयनम् । कथं निरयते दुरयते ? रत्वस्यासिद्धत्वात् निसो दुसश्च न भवति । उपसर्गस्येति किम् । परस्यायनं परायनम् । अयाविति किम् । इंण्क् गतौ । अल् । प्रायः । परायः । अयीति इकारनिर्देशोऽयि गताविति यस्य परिग्रहार्थः । तयि णयि रक्षणे च ॥२१३॥ चाद् गतौ । दयि दानगतिहिंसादहनेषु च ॥२१४॥ दयाञ्चक्रे । ऊयैङ् तन्तुसंताने ॥२१५॥ ऊयाञ्चक्रे । पूयैङ् दुर्गन्धविशरणयोः ॥२१६॥ क्नूयैङ् शब्दोन्दनयोः ॥ उन्दनं क्लेदनम् ॥२१७॥ दुर्गन्धेऽपीत्येके । क्ष्मायैङ् विधूनने ॥२१८॥ स्फायैङ् ओप्यायैङ् वृद्धौ ॥२००॥ प्यायते ।

१७९ दीपजनबुधपूरितायप्यायो वा ॥३।४।६७॥ एभ्यः कर्तर्यद्यतन्यास्ते परे अिच् प्रत्ययो वा स्यात् निमित्तभूततलुक् च । अप्यायि । अप्यायिष्ट ।

१८० प्यायः पी ॥४।१।९१॥ प्यायतेः परोक्षायां यङि च पीरादेशः स्यात् । पिप्ये । पिप्याते । पिप्यिरे । दीर्घनिर्देशो यङ्लुबर्थः । तायृङ् सन्तानपालनयोः ॥२२१॥ तायते । अतायि । अतायिष्ट ॥ इति यान्ताः॥ वलि वल्लि संवरणे ॥२२३॥ शलि चलने च ॥२२४॥ मलि मल्लि धारणे ॥२२६॥ भलि भल्लि परिभाषणहिंसादानेषु ॥२२८ कलि शब्दसंख्यानयोः ॥२२९॥ कल्लि अशब्दे ॥२३०॥ ॥ इति लान्ताः॥ तेवृङ् देवृङ् देवने ॥२३२॥ षेवृङ् सेवृङ् केवृङ् खेवृङ् गेवृङ् ग्लेवृङ् पेवृङ् प्लेवृङ् मेवृङ् म्लेवृङ् सेचने ॥२४२॥

१८१ परिनिवेः सेवः ॥२।३।४६॥ परिनिव्युपसर्गस्थान्नाम्यन्तस्थाकवर्गात्परस्य सेवतेर्धातोः सकारस्य द्वित्वेऽपि षः स्यात् । परिषेवते । पर्यषेवत । परिषिषेवे । निषेवते । न्यषेवत । निषिषेवे । विषेवते । व्यषेवत । विषिषेवे । परिनिवेरिति किम् । अनुसेवते । द्वितीयस्य तु परिसेवते । पर्यसेवत । परिसिसेवे । रेवृङ् पवि गतौ ॥२४४॥ रेवते । पवते । पेवे । ॥ इति वान्ताः॥ काशृङ् दीप्तौ ॥२४५॥ क्लेशि बाधने ॥ इति शान्ताः ॥ २४६॥ भाषि च व्यक्तायां वाचि ॥२४७॥ ईषि गतिहिंसादर्शनेषु ॥२४८॥ ईषते । ईषाञ्चक्रे । गेषृङ् अन्विच्छायाम् ॥ अन्वेषणमन्विच्छा ॥२४९॥ येषृङ् प्रयत्ने ॥२५०॥ जेषृङ् णेषृङ् एषृङ् ह्रेषृङ् गतौ ॥२५४॥ जेषते । नेषते । एषते । एषाञ्चक्रे । ह्रेषते । रेषृङ् ह्रेषृङ् अव्यक्ते शब्दे ॥२५६॥ पर्षि स्नेहने ॥२५७॥ घुषृङ् कान्तिकरणे ॥ इति षान्ताः॥ २५८ ॥ स्वन्सृङ् प्रमादे ॥२५९॥ कासृङ् शब्दकुत्सायाम् । ॥२६०॥ शब्दस्य कुत्सा रोगः।

भासि दुभ्रासि दुभ्लासृङ् दीप्तौ ॥२७३॥ भासते । बभासे । भ्रासभ्लासेति वा श्ये । भ्रास्यते । भ्रासते । भ्रू भ्रमेति वा एत्वे । भ्रेसे । बभ्रासे । भ्लास्यते । भ्लासते । भ्लेसे । बभ्लासे । रासृङ् णासृङ् शब्दे ॥२७५॥ णसि कौटिल्ये ॥२७६॥ भ्यसि भये ॥२७७॥ आङ्शसुङ् इच्छायाम् ॥२७८॥ आशंसते । ग्रसुङ् ग्लसुङ् अदने ॥२७०॥ घसुङ् करणे ॥२७१॥ मूर्धन्यान्तोऽयमिति चन्द्रः । ॥ इति सान्ताः ॥ ईहि चेष्टायाम् ॥२७२॥ ईहते । ईहाञ्चक्रे । अहुङ् प्लिहि गतौ ॥२७४॥ अंहते । आनंहे । प्लेहते । पिप्लिहे । गर्हिं गल्हि कुत्सने ॥२७६॥ बर्हिं बल्हि माधान्ये ॥२२८॥ वर्हिं वल्हि परिभाषणहिंसाच्छादनेषु ॥२८०॥ दानेऽप्यन्ये । दन्त्योष्ठ्यादी । अवल्हिध्वम् । अवल्हिढ्वम् । वेहङ् जेहङ् वाहङ् प्रयत्ने ॥२८३॥ विवेहे । जिजेहे । ववाहे । द्राहङ् निक्षेपे ॥२८४॥ निद्राक्षेपे इत्येके । ऊहि तर्के ॥२८५॥ ऊहते । ऊहाञ्चक्रे ॥ गाहौङ् विलोडने ॥२८६॥ अगाहिष्ट । अगाढ । जगाहे । गाहिषीष्ट । घाक्षीष्ट । गाहिता । गाढा । गाहिष्यते । घाक्ष्यते । ग्लाहौङ् ग्रहणे ॥२८७॥ गाहिवत् । गृहौङ् इत्येके । गर्हिषीष्ट । अघृक्षत ।

१८२ **स्वरेऽतः** ॥४।३।७५॥ सकोऽकारस्य स्वरादौ प्रत्यये परे लुक् स्यात् । अघृक्षताम् । अघृक्षन्त । अत्राकारलोपेऽपि स्थानिवद्भावादन्तोऽदादेशो न भवति । जगृहे । जगृहिषे । जघृक्षे । अगर्हिष्ट ।

१८३ **सिजाशिषावात्मने** ॥४।३।३५॥ नामिन्युपान्त्ये सति धातोः परे आत्मनेपदविषये अनिटौ सिजाशिषौ किद्वत्स्याताम् । घृक्षीष्ट । बहुङ् महुङ् वृद्धौ ॥२८९॥ वंहते । मंहते । इति हान्ताः । दक्षि शैघ्र्ये च ॥२९०॥ धुक्षि धिक्षि सन्दीपनक्लेशनजीवनेषु ॥ धुक्षते । ॥२९२॥ वृक्षि वरणे ॥२९३॥ शिक्षि विद्योपादाने ॥२९४॥ भिक्षि याच्ञायाम् ॥२९५॥ दीक्षि मौण्ड्येज्योपनयननियमव्रतादेशेषु ॥२९६॥ ईक्षि दर्शने ॥२९७॥ ईक्षते । ऐक्षत । ऐक्षिष्ट । ईक्षाञ्चक्रे ।

॥ इत्यात्मनेपदिनः ॥

॥ अथोभयपदिनः ॥

श्रिञ् सेवायाम् ॥१॥ श्रयति । श्रयते । णिश्रीति ङे अशिश्रियत् । अशिश्रियत । शिश्राय । शिश्रियतुः । शिश्रिये । श्रीयात् । श्रयिषीष्ट । श्रयिता । श्रयिष्यति । श्रयिष्यते । अश्रयिष्यत् । अश्रयिष्यत । णींञ् प्रापणे ॥२॥ निनाय । निनयिथ । निनेथ । निन्ये । निन्यिषे । हृंञ् हरणे ॥३॥ हरति । हरते । अहार्षीत् । अहृत । जहार । जहर्थ । जह्रिव । जह्रे । जह्रिषे । ह्रियात् । हृषीष्ट । हर्ता । हरिष्यति । हरिष्यते । भृंञ् भरणे ॥४॥ भरति । भरते । अभार्षीत् । अभार्ष्टाम् । अभृत । अभृषाताम् । बभार । बभ्रतुः । बभर्थ । बभृव । बभृम । बभ्रे । बभृषे । भ्रियात् । भृषीष्ट । भर्ता । भरिष्यति । भरिष्यते । धृंञ् धारणे ॥५॥ धरति । धरते । अधार्षीत् । अधृत । डुकृंञ् करणे ॥६॥

१८४ *कृञ्तनादेरुः ॥३।४।८३॥ कृञस्तनादेश्च गणात् कर्तरि विहिते शिति उः प्रत्ययः स्यात् । उश्नोरिति गुणे करोति ।

१८५ अतः शित्युत् ॥४।२।८९॥ शित्यविति प्रत्यये य उकारस्तन्निमित्तो यः कृगोऽकारस्तस्योकारः स्यात् । उविधानबलाद् गुणो न भवति । ओकार एवान्यथा विधीयेत । कुरुतः । कुर्वन्ति । उकारनिमित्तत्वेनाकारविज्ञानात् कुर्यादित्यादावुकारलोपेऽपि भवति अडागमस्य च न भवति । शितीत्युकारस्य विशेषणं कुरुत इत्यादौ शिति व्यवहितेऽपि यथा स्यादित्येवमर्थम् । अवितीत्येव । करोति ।

१८६ कृगो यि च ॥४।२।८८॥ कृगः परस्योकारस्य यकारादौ वमि चाविति प्रत्यये लुक् स्यात् । अवितीत्येव । करोमि । कुर्मीत्यपि कश्चित्तदसंमतम् । कुं गृं हिंसायामित्यस्मात्तु नकारव्यवधानात् उः परो न संभवतीति न भवति ।

१८७ कुरुच्छुरः ॥२।१।६६॥ कुरुच्छुरोः संबधिनो नामिनो रेफे परे दीर्घो न स्यात् । कुर्वः । कुर्मः । कुर्वित्युकारः किम् । कुरत् शब्दे । कूर्यते । कूर्यात् ।

* तनादावपठित्वा भ्वादिपाठोऽस्य करतीत्यत्र शवर्थः । येषां मते तनादौ पाठस्तन्मते 'तन्भ्यो वा तथासि' इति रूपद्वयं प्राप्येत शप् च न सिद्धयेत् । स्वमते तु अकृथ अकृथा इति नित्यमेव 'धुड्हस्वादिति लुक् । अन्यैः कृग् तनादौ पठितस्तत्साहचर्यात् कृग् गृह्यते नतु कृगट् ।

केचिदस्यापि प्रतिषेधमिच्छन्ति । अथ द्विर्वचने पूर्वस्य कस्माद् दीर्घो न भवति। रीः रिर्वा-रिर्यतुः। रिर्युः । बहिरङ्गलक्षणस्य यत्वस्यासिद्धत्वेन व्यञ्जनस्याभावात् । संविव्यायेत्यादौ तु नामिनोऽसिद्धत्वात् । कुरुते । कुर्वाते । कुर्वते । कुर्वहे । कुर्महे। कुर्यात् । कुर्वीत । करोतु । कुरुतात् । कुरुताम् । कुर्वन्तु ।

१८८ असंयोगादोः ॥४।२।८६॥ असंयोगात्परो य उकारस्तदन्तात् प्रत्ययात्परस्य हेर्लुक् स्यात् । कुरु । कुरुतात् । कुरुतम्। कुरुत । करवाणि । करवाव । करवाम । असंयोगादिति किम् । अश्नुहि । असंयोगादित्योर्विशेषणादिहापि न । आप्नुहि। ओरिति किम् । क्रीणीहि । प्रत्ययादित्येव । युहि । कुरुताम् । कुर्वाताम् । कुर्वताम् । अकरोत् । अकुरुताम् । अकुर्वन् । अकुरुत । अकुर्वाताम् । अकुर्वत । अकार्षीत् । अकार्ष्टाम् । अकार्षुः । अकृत । अकृषाताम् । अकृषत । चकार । चक्रे । क्रियात् । कृषीष्ट । कर्ता । करिष्यति । करिष्यते ।

१८९ संपरेः कृगः स्सट् ॥४।४।९२॥ संपरिभ्यां परस्य कृग आदिः स्सट् स्यात् । संस्करोति कन्याम् । भूषयतीत्यर्थः । संस्कृतं वचनम् । संस्कारो वासना । तत्र नः संस्कृतं समुदितमित्यर्थः । परिष्करोति कन्याम् । परिष्कृतम् । परिष्कारः । तत्र नः परिष्कृतम् । भूषासमवाययोरेवेच्छन्त्येके । तन्मतेऽन्यत्र परिकृतम् । पूर्वं धातुरुपसर्गेण संबध्यते पश्चात्साधनेनेति द्विर्वचनादडागमाच्च पूर्वं स्सडेव भवति । संचस्कार । परिचस्कार । समस्करोत् । पर्यस्करोत् । समस्कार्षीत् । पर्यस्कार्षीत् । समचिस्करत् । पर्यचिस्करत् । कथं संकृतिः? गर्गादिपाठात् । संकरः परिकर इति किरतेरला भविष्यति । संकार इत्यत्र किरतिरेव । बहुलाधिकाराद् घञ् । स्सडिति द्विसकारनिर्देशात् समचिस्करदित्यादौ षो न । परिष्करोतीत्यादौ तु अधस्तनसूत्रेण भवति ।

१९० असोऽसिवूसहस्सटाम् ॥२।३।४८॥ परिनिविभ्यः परस्य सिवूसहोर्धात्वोस्सडागमस्य च संबंधिनः सकारस्य षः स्यात् । बहुवचनं परिनिविभिः सह यथासंख्यनिवृत्त्यर्थम् । परिष्करोति ।

१९१ स्तुस्वञ्जश्चाटि नवा ॥२।३।४९॥ परिनिविभ्यः परस्य स्तुस्वञ्जोर्धात्वोरसोऽसिवूसहस्सटां च सकारस्याटि सति षो वा स्यात् । स्तुस्वञ्जोर्नित्यं प्राप्ते सिवूसहस्सटां चाप्राप्ते विभाषा । पर्यष्करोत् । पर्यस्करोत् ।

१९२ उपात् भूषासमवायप्रतियत्नविकारवाक्याध्याहारे॥४।४।९१॥ उपात्परस्य कृगो भूषादिष्वर्थेष्वादिः सट् स्यात्। भूषालंकारः। कन्यामुपस्करोति भूषयतीत्यर्थः। समवायः समुदायः। तत्र न उपस्कृतं समुदितमित्यर्थः। पुनर्यत्नः प्रतियत्नः। सतोऽर्थस्य संवंधाय वृद्धये तादवस्थाय वा समीहा प्रतियत्नः। एधो दकस्योपस्कुरुते। काण्डगुणस्योपस्कुरुते। तत्र प्रतियतत इत्यर्थः। प्रकृतेरन्यथाभावो विकारः। उपस्कृतं भुङ्क्ते वा गच्छति। विकृतमित्यर्थः। गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारः। उपस्कृतं जल्पति अधीते वा। सोपस्कराणि सूत्राणि। सवाक्याध्याहाराणीत्यर्थः। एष्विति किम्। उपकरोति। हिक्की अव्यक्ते शब्दे ॥७॥ हिक्कति। हिक्कते। अञ्चूग् गतौ ॥८॥ गतिपूजनयोरयम्। अञ्चति। अञ्चते। डुयाचृग् याच्ञायाम् ॥९॥ याचति। याचते। द्वित्वमित्येके। डुपचींष् पाके ॥१०॥ पचति। पचते। अपाक्षीत्। अपक्त। राजृग् दुभ्राजृग् दीप्तौ ॥१२॥ राजति। राजते। भ्राजति। भ्राजते। जृभ्रमेति वा एत्वे। रेजतुः। रराजतुः। भ्रेजतुः। वभ्राजतुः। रेजे। रराजे। भ्रेजे। बभ्राजे। भ्राजेरिह पाठो राजृसाहचर्यार्थस्तेन यजसृजेत्यत्रास्यैव ग्रहणम्। नन्वेवं षत्वं विकल्प्यतामिति चेत् पुनः पाठः आत्मनेपदानित्यत्वज्ञापनार्थः। तेन लभति लभते सेवति सेवते इत्यादि सिद्धम्। भजीं सेवायाम् ॥१३॥ भजति। भजते। अभाक्षीत्। अभक्त। बभाज। भेजे। भज्यात्। भक्षीष्ट। भक्ता। भक्ष्यति। भक्ष्यते। रञ्जीं रागे ॥ १४ ॥

१९३ अकट्घिनोश्च रञ्जेः ॥४।२।९०॥ रञ्जेरकटि घिनणि शवि च प्रत्यये उपान्त्यनकारस्य लुक् स्यात्। रजति। रजते। व्यञ्जनानामनिटीत्यत्र बहुवचनस्य जात्यर्थत्वात् अराङ्क्षीत्। अरङ्क्त। रेटृग् परिभाषणयाचनयोः ॥१५॥ वेण्टृग् गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु ॥१६॥ चतेग् याचने ॥१७॥ अचतीत्। अचतिष्ट। मेथृग् संगमे च ॥१८॥ मिमेथ। मिमेथे। चदेग् याचने ॥१९॥ ऊबुन्दृग् निशामने ॥ १९ ॥ बुन्दति। ऋदित्त्वाद्वाङि अबुदत्। अबुन्दीत्। अबुन्दिष्ट। धान्तोऽयमिति नन्दी। णिटृग् णेटृग् कुत्सासन्निकर्षयोः ॥२१॥ मिटृग् मेटृग् मेधाहिंसयोः ॥ २३ ॥ मेधृग् संगमे च ॥ २४ ॥ चान्मेधाहिंसयोः। गृधृग् मृधृग् उन्दे ॥ २६ ॥ उन्दः क्लेदनम्। शर्धति। शर्धते। मर्धति। मर्धते। बुधृग् बोधने ॥ २७ ॥ बोधति। बोधते। अबुधत्। अबोधीत्।

अवोधिष्ट । खनूग् अवदारणे ॥२८॥ गमहनेत्यल्लुकि चख्नतुः। चख्ने । दानी अवखण्डने । ॥२९॥ आर्जवे दीदांसति । दीदांसते । शानी तेजने ॥३०॥ निशाने शीशांसति । शीशांसते । अर्थान्तरे तु सनोऽभावे प्रत्ययान्तराण्यपि । शपीं आक्रोशे ॥३१॥ शपति । शपते । अशाप्सीत् । अशप्त । शशाप । शेपे । चायृग् पूजानिशामनयोः ॥३२॥ व्ययी गतौ ॥३३॥ अव्ययीत् । अव्ययिष्ट । अली भूषणपर्याप्तिवारणेषु ॥४४॥ धावृग् गतिशुद्धयोः ॥३५॥ चीव्रग् ऋषीवत् ॥३६॥ अनृदिदयमित्येके ॥ दाशृग् दाने ॥३७॥ ऋषी आदानसंवरणयोः ॥३८॥ भेषृग् भये ॥३९॥ श्रेषृग् चलने च ॥४०॥ पषी बाधनस्पर्शनशोः ॥४१॥ शान्तोऽयमित्येके । लषी कान्तौ ॥४२॥ कान्तिरिच्छा । भ्राशम्लाशेति वा श्ये । अभिलष्यति । अभिलषति । अभिलष्यते । अभिलषते । चषी भक्षणे ॥४३॥ छषी हिंसायाम् ॥४४॥ चच्छाष । चच्छषे । त्विषीं दीप्तौ ॥४५॥ त्वेषति । त्वेषते । अत्विक्षत् । अत्विक्षत । अत्विक्षाताम् । अषी असी गत्यादानयोश्च ॥४७॥ दासृग् दाने ॥४८॥ माहृग् माने ॥४९॥ मानं वर्तनम् । माहति । माहते । गुहौग् संवरणे ॥५०॥

१९४ गोहः स्वरे ॥४।२।४२॥ कृतगुणस्य गुहेः स्वरादौ प्रत्यये परे उपान्त्यस्योत् स्यात् ॥ गूहति । गूहते । अगूहीत् । इडभावे सक् । अघुक्षत् । अगूहिष्ट । इडभावपक्षे ।

१९५ दुहदिहलिहगुहो दन्त्यात्मने वा सकः ॥४।३।७४॥ एभ्यः परस्य सक्प्रत्ययस्य दन्त्यादावात्मनेपदे परे लुग् वा स्यात् । इत्यनेन वा सको लुकि अगूढ । अघुक्षत । अघुक्षाताम् । अगूढाः । अघुक्षथाः । जुगूह । जुगुहतुः । । । जुगूहे । गुह्यात् । गूहिषीष्ट । घुक्षीष्ट । गूहिता । गोढा । गूहिष्यति । घोक्ष्यति । गूहिष्यते । घोक्ष्यते । भ्लक्षी भक्षणे ॥५१॥ भ्लक्षते । भक्षीत्यन्ये ।

॥ इत्युभयपदिनः ॥

॥ अथ भ्वादिषु द्युतादयः ॥

द्युति दीप्तौ ॥१॥ द्योतते ।

१९६ द्युद्भ्योऽद्यतन्याम् ॥३।३।४४॥बहुवचनं गणार्थम् । द्युतादिभ्योऽद्य-

तनीविषये कर्तर्यात्मनेपदं वा स्यात्। लृदिद्द्युतादीत्यङ्। अद्युतत्। अद्योतिष्ट। प्राप्तविभाषेयम्।

१९७ द्युतेरिः ॥४।१।४१॥ द्युतेर्द्वित्वे सति पूर्वस्योत इः स्यात्। दिद्युते। रुचि अभिप्रीत्यां च ॥२॥ रोचते। अरुचत्। अरोचिष्ट। घुटि परिवर्तने ॥३॥ घोटते। अघुटत्। अघोटिष्ट। रुटि लुटि लुठि प्रतीघाते ॥६॥ श्वितङ् वर्णे ॥७॥ अश्वितत्। अश्वेतिष्ट। ञिमिदाङ् स्नेहने ॥८॥ मेदते। अमिदत्। अमेदिष्ट। ञिष्विदाङ् ञिष्विदाङ् मोचने च ॥१०॥ चात्स्नेहने। अश्विदत्। अश्वेदिष्ट। स्वेदते। अस्विदत्। अस्वेदिष्ट। शुभि दीप्तौ ॥११॥ अशुभत्। अशोभिष्ट। क्षुभि संचलने ॥१२॥ अक्षुभत्। अक्षोभिष्ट। णभि तुभि हिंसायाम् ॥१४॥ अनभत्। अनभिष्ट। अतुभत्। अतोभिष्ट। स्रम्भुङ् विश्वासे ॥१५॥ स्रंभते। अस्रभत्। अस्रम्भिष्ट। भ्रंशूङ् स्रंसूङ् अवस्रंसने ॥१७॥ अभ्रशत्। अभ्रंशिष्ट। अस्रसत्। अस्रंसिष्ट। ध्वंसूङ् गतौ च ॥१८॥ चादवस्रंसने। ध्वंसते। अध्वसत्। अध्वंसिष्ट। अथ द्युताद्यन्तर्गणो वृतादिः। वृतूङ् वर्तने ॥१९॥ वर्तते। अवृतत्। अवर्तिष्ट। वव्रृते। वर्तिषीष्ट। वर्तिता।

१९८ वृद्भ्यः स्यसनोः ॥३।३।४५॥ बहुवचनं पूर्ववत्। वृतादयो द्युताद्यन्तर्गताः पञ्च। तेभ्यः स्यकारादिप्रत्यये विषये सन्प्रत्यये विषये च कर्तर्यात्मनेपदं वा स्यात्। इयमपि प्राप्तविभाषा। वर्तिष्यते। पक्षे।

१९९ न वृद्भ्यः ॥४।४।५६॥ वृतूङ् स्यन्दौङ् वृधूङ् शृधूङ् कृपौङ् एभ्यः परस्य स्ताद्यशित आदिरिड् न स्यात् 'अनात्मनाम्' अनात्मनेपदनिमित्तं चेद् वृतादयो न भवन्ति। अनात्मनेपदनिमित्तं च वृतादयः स्यसनि श्वस्तन्यां च कृपिर्विकल्पेन भवन्ति स्यन्दिकृपोरादिछक्षणो विकल्पः परत्वादनेन बाध्यते। वर्त्स्यति। अवर्तिष्यत। अवर्त्स्यत्। स्यन्दौङ् प्रस्रवणे ॥२०॥ अस्यदत्। अस्यन्दिष्ट। औदित्त्वादिड्विकल्पे अस्यन्त। अस्यन्तसाताम्। सस्यन्दे। सस्यन्दिषे। सस्यन्त्से। स्यन्दिष्यते। स्यन्त्स्यते। स्यन्त्स्यति। अस्यन्दिष्यत। अस्यन्त्स्यत। अस्यन्त्स्यत्।

२०० निरभ्यनोश्च स्यन्दस्याप्राणिनि ॥२।३।८०॥ निरभ्यनुभ्यश्चकारात् परिनिविभ्यश्च परस्याप्राणिकर्तृकेऽर्थे वर्तमानस्य स्यन्देः सकारस्य षो वा स्यात्।

निःष्यन्दते निःस्यन्दते वा तैलम्। अभिष्यन्दते। अभिस्यन्दते। अनुष्यन्दते। अनुस्यन्दते। परिष्यन्दते। परिस्यन्दते। निष्यन्दते। निस्यन्दते। विष्यन्दते। विस्यन्दते। शव्निर्देशाद् यङ्लुपि न भवति। निरभ्यनोश्चेति किम्। अतिस्यन्दते तैलम्। अप्राणिनीति किम्। परिस्यन्दते मत्स्य उदके। पर्युदासोऽयं न प्रसज्यप्रतिषेधः। तेन यत्र प्राणी चाप्राणी कर्ता भवति तत्राप्राण्याश्रयो विकल्पो भवति न तु प्राण्याश्रयः प्रतिषेधः। अनुष्यन्देते अनुस्यन्देते वा मत्स्योदके। निर्निभ्यां नेच्छन्त्येके। वृधूङ् वृद्धौ ॥२१॥ वर्धते। अवृधत्। अवर्धिष्ट। वव्रधे। वर्धिष्यते। वर्त्स्यति। शृधूङ् शब्दकुत्सायाम् ॥२२॥ वृधूङ्वत्। कृपौङ् सामर्थ्ये ॥२३॥

२०१ ऋर लृलं कृपोऽकृपीटादिषु ॥२।३।९९॥ कृपेर्धातोर्ऋकारस्य लृकारो रेफस्य च लकार आदेशः स्यात् स चेत् कृपिः कृपीटादिविषयो न भवति। कल्पते। अकॢपत्। अकल्पिष्ट। अकॢप्त। चक्लृपे। चक्लृपिषे। चक्लृप्से। क्लृपिषीष्ट। क्लृप्सीष्ट।

२०२ कृपः श्वस्तन्याम् ॥३।३।४६॥ कृपेः श्वस्तन्यां विषये कर्तर्यात्मनेपदं वा स्यात्। कल्पिता। कल्प्ता। कल्पितासे। कल्प्तासे। परस्मैपदविषये न वृद्भ्य इतीण्निषेधात्। कल्प्ता। कल्प्तासि। कल्पिष्यते। कल्प्स्यते। कल्प्स्यति। अकल्पिष्यत। अकल्प्स्यत। अकल्प्स्यत्।

॥ इति द्युतादिः ॥

॥ अथ भ्वादिषु ज्वलादयः ॥

ज्वल दीप्तौ ॥१॥ शेषादिति परस्मैपदे ज्वलति। कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु ॥२॥ संपर्चनं मिश्रता। विलेखनं कषणम्। पल्ल पथे गतौ ॥४॥ पतति।

२०३ श्वयत्यसूवक्षपतः श्वास्थवोचपप्तम् ॥४।३।१०३॥ श्वयति असु वक्ष पत इत्येतेषामङि परे श्व अस्थ वोच पप्त इत्येते आदेशाः स्युः। लृदित्वादङ् अपप्तत्। पथति। अपथीत्। कथे निष्पाके ॥५॥ मथे विलोडने ॥६॥ षदॢङ्

विशरणगत्यवसादनेषु ॥७॥ श्नौतीत्यादिना सीदादेशे सीदति । असदत् । ससाद । सेदतुः । सेदिथ । ससत्थ ।

२०४ सदोऽप्रतेः परोक्षायां त्वादेः ॥२।३।४४॥ प्रतिवर्जितोपसर्गस्थात् नाम्यन्तस्थाकवर्गात् परस्य सदो धातोः सकारस्य द्वित्वेऽप्यव्यपि षः स्यात् परोक्षायां तु द्वित्वे सति आदेः पूर्वस्यैव भवति । निषीदति । न्यषीदत् । व्यषीदत् । परोक्षायां त्वादेरेव । निषसाद । विषसाद । अमतेरिति किम् । प्रतिसीदति । शदॢ शातने ॥८॥ शातनं तनूकरणम् ।

२०५ शदेः शितिं ॥३।३।४१॥ शदेः शिद्विषयात् कर्तर्यात्मनेपदं स्यात् । श्नौतीत्यादिना शीयादेशे । शीयते । अशदत् । शशाद । शत्ता । शत्स्यति । बुध अवगमने ॥९॥ बोधति । अबोधीत् । अनुस्वारेदयमित्येके । अभौत्सीत् । टुवमू उद्गिरणे ॥१०॥ वमति । अवमीत् । जूभ्रमेति वा एत्वे वेमतुः। ववमतुः । भ्रमू चलने॥११॥ भ्रासभ्लाशेति वा श्ये भ्रम्यति । भ्रमति । भ्रेमतुः। बभ्रमतुः। क्षर संचलने ॥१२॥ अक्षारीत् । चल कम्पने ॥१३॥ चलति । अचालीत् । जल घात्ये ॥१४॥ घात्यं जडत्वम् । टल ट्वुल वैक्लव्ये ॥१६॥ ष्ठुल स्थाने ॥१७॥ अषोपदेशोऽयमित्यन्ये । हल विलेखने ॥१८॥ णल गन्धे ॥१९॥ नलति। बल प्राणनधान्यावरोधयोः ॥२०॥ बबाल । बेलतुः । पुल महत्त्वे ॥२१॥ कुल बन्धुसंस्त्यानयोः ॥२२॥ पल फल शल गतौ ॥२५॥ फलिशल्योः पुनः पाठो ज्वलादिकार्यार्थः । शलेः परस्मैपदार्थश्च । हुल हिंसासंवरणयोश्च ॥२६॥ चाद् गतौ । क्रुशं आह्वानरोदनयोः ॥२७॥ हशिट इति सकि अक्रुक्षत् । कोष्टा । कस गतौ ॥२८॥ रुहं जन्मनि ॥२९॥ बीजजन्मनीत्यन्ये । रोहति । अरुक्षत् । रोढा । रमिं क्रीडायाम् ॥३०॥ षहि मर्षणे ॥३१॥ असोढेति षत्वे परिषहते । निषहते । विषहते । असोढेति प्रतिषेधात् परिसोढः । परिसोढव्यः। निसोढः । निसोढव्यः । विसोढः । विसोढव्यः । ङे–मा परिसीषहत् । मूलधातोस्तु षत्वं भवत्येव । सोप्रतिषेधस्तु सहेरेव न सिवस्तस्य सोरूपासंभवात् । अटि सति स्तुस्वञ्झश्चाटीति वा षत्वम् । पर्यषहत । पर्यसहत । न्यषहत । न्यसहत । व्यषहत । व्यसहत । असोढसिवूसहेत्येव । पर्यसोढयत् । पर्यसीषिवत् । पर्यसीषहत् । सहलुभेच्छेति वेटि सहिता । पक्षे हस्य ढत्वे, तस्य धत्वे, धस्यापि ढत्वे ।

२०६ **सहिवहेरोद्वावर्णस्य** ॥१।३।४३॥ सहिवहि इत्येतयोर्ढस्य तद्ढे परेऽनु लुक् स्यात् अवर्णस्य चौकारः । सोढा ।

॥ इति ज्वलादिः ॥

॥ अथ भ्वादिषु यजादयः ॥

यजीं देवपूजासंगतिकरणदानेषु ॥१॥ यजति । यजते । अयाक्षीत् । अयष्ट ।

२०७ **यजादिवश्वचः सस्वरान्तस्था य्वृत्** ॥४।१।७२॥ यजादीनां वश्-वचोश्च परोक्षायां द्वित्वे सति पूर्वस्य सस्वरान्तस्था य्वृत्—इकारउकारऋकाररूपा प्रत्यासत्त्या स्यात् । वचिति वश्साहचर्यात् वचंक् ब्रूगादेशो वा आदादिको गृह्यते न यौजादिकः । इयाज ।

२०८ **यजादिवचेः किति** ॥४।१।७९॥ यजादीनां धातूनां वचेश्च किति प्रत्यये परे सस्वरान्तस्था य्वृत् स्यात् । ईजतुः । ईजुः । इयजिथ । इयष्ठ । ईजिव । ईजिम । ईजे । इज्यात् । यक्षीष्ट । यष्टा । यक्ष्यति । यक्ष्यते । वेंग् तन्तुसंताने ॥२॥ वयति । अवासीत् ।

२०९ **वेर्वय्** ॥४।४।१९॥ वेगो धातोः परोक्षायां वयित्ययमादेशो वा स्यात् । उवाय । यजादिवचेः किताविति य्वृति ।

२१० **न वयो य्** ॥४।१।७३॥ वेगादेशस्य वयेर्यकारः परोक्षायां य्वृन्न स्यात् । ऊयतुः । ऊयुः । उवयिथ । ऊयथुः । ऊय । उवाय । उवय । ऊयिव । ऊयिम । वयादेशाभावे ।

२११ **वेरयः** ॥४।१।७४॥ वेगोऽयकारान्तस्याविति परोक्षायां परतो य्वृद्वा न स्यात् । आत्संध्यक्षरस्येत्यात्वे । ववौ ।

२१२ **अविति वा** ॥४।१।७५॥ वेगोऽयकारान्तस्याविति परोक्षायां परतो य्वृद्वा न स्यात् । ववतुः । ऊवतुः । अत्र पूर्वं य्वृत् ततो द्वित्वं ततश्च पुनर्वकारस्य य्वृत् प्राप्नोति परम् ।

२१३ य्वृत्सकृत् ॥४।१।१०२॥ धातोर्य्वृत् सकृदेकवारमेव स्यात्। यावत्संभवस्तावद्विधिरिति न्यायात् पुनःप्राप्तं प्रतिषिध्यते। इति न भवति। वव्वुः। ऊव्वुः। द्वित्वे कृते परत्वाद्धातोरुवादेशे सति पश्चात् पूर्वस्य समानस्य दीर्घः। अय इति किम्। ऊयतुः। ववित्थ। ववाथ। ऊये। ऊवे। ऊयात्। वासीष्ट। वाता। वास्यति। वास्यते। व्येंग् संवरणे ॥३॥ व्ययति। अव्यासीत्। व्ययते। अव्यास्त।

२१४ व्यस्थव्णवि ॥४।२।३॥ व्ययतेस्थवि णवि च विषयभूते आकारो न स्यात्। द्वित्वे।

२१५ ज्याव्येव्यधिव्यचिव्यथेरिः ॥४।१।७१॥ एषां परोक्षायां द्वित्वे सति पूर्वस्येकारः स्यात्। नामिनोऽकलिहलीति वृद्धौ विव्याय। विव्यतुः। विव्युः। केचित्तु परोक्षामात्रे आत्वप्रतिषेधमिच्छन्तो व्येगो य्वृद्विधिं विकल्पयन्ति—त्वक्त्रैः संविव्ययुर्देहान् इति सिद्धम्। तदपरे पाठभ्रम एवायमिति मन्यन्ते। त्वक्त्रैः संविन्युरङ्गानि इति तु सम्यक्पाठः। एवं 'संविव्ययुर्वसनचारु चमूसमुत्थं पृथ्वीरजः करभकण्ठकडारमाशाः' इत्यत्राऽपि 'संविव्युरम्बरविकासि चमूसमुत्थम्' इति सत्पाठः। थवि 'ऋवृव्येऽद' इत्यनेन नित्यमिट्। विव्ययिथ। विव्ये। यजादिवेरिति वीयात्। व्यासीष्ट। व्याता। व्यास्यति। व्यास्यते। ह्वेंग् स्पर्द्धाशब्दयोः ॥४॥ आह्वयति। आह्वयते।

२१६ ह्वालिप्सिचः ॥३।४।६२॥ एभ्यः कर्तर्यद्यतन्यामङ् प्रत्ययः स्यात्। आह्वत्। आह्वताम्। आह्वन्।

२१७ वात्मने ॥३।४।६३॥ ह्वादिभ्यः कर्तर्यद्यतन्यामात्मनेपदे परे वाङ् स्यात्। आह्वत। आह्वेताम्। आह्वन्त। आह्वास्त। आह्वासाताम्।

२१८ द्वित्वे ह्वः ॥४।१।८७॥ ह्वयतेर्द्वित्वविषये सस्वरान्तस्था य्वृत् स्यात्। हु हु इति द्वित्वे आजुहाव। धातोरिवर्णोवर्णेत्युवादेशे आजुहुवतुः। आजुहविथ। आजुहोथ। जुहुवे। अनेनैव सिद्धे 'णौऽसनी'ति सूत्रकरणं णेरन्यस्मिन् द्वित्वनिमित्तप्रत्ययव्यवधायके य्वृन्मा भूदित्येवमर्थम्। तेनेह न भवति। ह्वायकमिच्छति ह्वायकीयति। ततः सन्। जिह्वायकीयिषति। डुवपीं बीजसन्ताने ॥५॥ वपति। वपते। अवाप्सीत्। अवप्त। ऊवाप। ऊपतुः। ऊपे। उप्यात्। वप्सीष्ट। वप्ता।

वप्स्यति । वप्स्यते । वहीं प्रापणे ॥६॥ वहति । वहते । अवाक्षीत् । अवोढाम् । अवाक्षुः । अवोढ । अवक्षाताम् । अवक्षत । उवाह । ऊहतुः । उवहिथ । उवोढ । ऊहे । उह्यात् । वक्षीष्ट । वोढा । वक्ष्यति । वक्ष्यते । इति यजादावुभयपदिनः । अथ त्रयः परस्मैपदिनः । टुओश्वि गतिवृद्धयोः ॥७॥ श्वयति । ट्वेश्वेर्वेति वैकल्पिके ङे द्विर्धातुरिति द्वित्वे संयोगादितीयादेशे अशिश्वियत् । पक्षे 'ऋदिच्छ्वी'त्यादिनाऽङि 'श्वयत्यस्' इत्यादिना श्वादेशे च अश्वत् । अश्वताम् । अश्वन् । पक्षे सिचि 'नश्वी'ति वृद्धिनिषेधे अश्वयीत् ।

२१९ वा परोक्षायाङि ॥४।१।९०॥ श्वयतेः सस्वरान्तस्था परोक्षायां यङि च परे वा द्वित् स्यात् । अवित्परोक्षायां किच्वाद् यजादित्वेन प्राप्ते विति परोक्षायां यङि चाप्राप्ते विभाषा । शुशाव । शुशुवतुः । शुशुवुः । शुशविथ । द्वित्वाभावे शिश्वाय । शिश्वियतुः । शिश्वियुः । शिश्वयिथ । शूयात् । श्वयिता । श्वयिष्यति । वद व्यक्तायां वाचि ॥८॥ वदति । वदव्रजेति वृद्धौ अवादीत् । उवाद । ऊदतुः । उवदिथ । उद्यात् । वदिता । वदिष्यति । वस निवासे ॥९॥ वसति । 'सस्तः सि' इति तकारे अवात्सीत् । अवात्ताम् । अवात्सुः । उवास । घस्वस इति षत्वे ऊषतुः । ऊषुः । उवसिथ । उवस्थ । उष्यात् । वत्स्यति ।

॥ इति यजादयः ॥

॥ अथ भ्वादिषु घटादिः ॥

घटिष् चेष्टायाम् ॥१॥ घटते । 'घटादेर्ह्रस्वो दीर्घस्तु वा ञिणम्परे' इति घटादिसंज्ञाफलं वक्ष्यते । घटादीनामनेकार्थत्वेऽपि पठितार्थेष्वेष घटादिकार्यविज्ञानम्, तेन 'उद्घाटयति कमलवनम्,' प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिवेत्यादि सिद्धम् । विघटयतीत्यादि तु अच्प्रत्ययान्तस्य 'णिज्बहुलं नाम्नः कृगादिषु' इति करोत्यर्थे णिचि रूपम् । अघटिष्ट । जघटे । घटिता । घटिष्यते । घटादित्वात् घटयति । अघाटि । अघटि । घाटं घाटम् । घटं घटम् । क्षजुङ् गतिदानयोः । अक्षाञ्जि । अक्षञ्जि । क्षाञ्जं क्षाञ्जं क्षञ्जं क्षञ्जम् । क्षञ्जिदक्ष्यादीनां घटादिपाठबलादनुपान्त्यस्यापि वा दीर्घः । व्यथिष् भयचलनयोः ॥३॥ व्यथते । अव्यथिष्ट । 'ज्याव्ये' इत्यादिना विव्यधे । घटादिपाठात् व्यथयति । अव्याथि ।

अव्यथि। व्याथं व्याथम्। व्यथं व्यथम्। प्रथिष् प्रख्याने ॥४॥ प्रथते। अप्रथिष्ट। पप्रथे। म्रदिष् मर्दने ॥५॥ स्वदिष् स्वदने ॥६॥ स्वदनं विदारणम्। कदुङ् क्रदुङ् क्रदुङ् वैक्लव्ये ॥९॥ वैकल्य इति चन्द्रः। कन्दते। क्रन्दते। क्रन्दते। क्रपि कृपायाम् ॥१०॥ त्रिलरिष् संभ्रमे ॥११॥ प्रसिष् विस्तारे ॥१२॥ प्रसव इत्यन्ये। दक्षि हिंसागत्योः ॥१३॥ श्रां पाके ॥१४॥ श्रैं पाके श्रांक् पाके इत्यस्य घटादिकार्यार्थः पाठः। श्रपयति। अन्यत्र श्रापयति। स्मृं आध्याने ॥१५॥ स्मारयति। दृ भये ॥१६॥ दरयति। भयादन्यत्र दारयति। दृश् विदारणे इति क्र्यादिषु पठिष्यमाणस्यापि घटादिकार्यार्थमिह पाठः। एवमुत्तरत्रापि। नृ नये ॥९७॥ घटादित्वात् नृणन्तं प्रयुंक्ते नरयति। नयादन्यत्र नारयति। ष्टक स्तक प्रतीघाते ॥१९॥ स्तकति। चक तृप्तौ ॥२०॥ चकति। चकयति। अयमात्मनेपद्यपि। चकते। अक कुटिलायां गतौ ॥२१॥ अकति। अकयति। कखे हसने ॥२२॥ कखति। अकखीत्। अग अकवत् ॥२३॥ रगे शंकायाम् ॥२४॥ लगे सङ्गे ॥२५॥ ह्रगे ह्लगे षगे सगे ष्टगे स्थगे संवरणे ॥३१॥ संवरणमाच्छादनम्। वट भट परिभाषणे ॥३३॥ वेष्टने वाटयति। भृतौ भाटयति। णट नृत्तौ ॥३४॥ नटयति शाखाम्। अन्यत्र नाटयति। गड सेचने ॥३५॥ गडति। ऋफिडादीनामिति लत्वे गलति। हेड वेष्टने ॥३६॥ ह्रस्वत्वे। हिडयति। ह्रस्वविधानान्न गुणः। अहिडि। अहीडी। लड जिह्वोन्मथने ॥३७॥ लडयति जिह्वां कुक्कुरः। अन्यत्र लाडयति। लत्वे। ललयति। लड विलासे इत्यस्यैवार्थविशेषे घटादिकार्यार्थमिह पाठः। फण कण रण गतौ ॥४०॥ फणति। पफाण। जृभ्रमेति वा एत्वे फेणतुः। पफणतुः। गतेरन्यत्र फाणयति घटम्। निःस्नेहयतीत्यर्थः। चण हिंसादानयोश्च ॥४१॥ चाद् गतौ ॥ चणति। चणयति। शब्दे तु चाणयति। शण श्रण दाने ॥४२॥ स्नथ क्रथ क्रथ क्रथ हिंसार्थाः॥४६॥ क्रथयति। चौरस्योत्क्राथयतीति तु यौजादिकस्य घञन्ताद्वा णिच्। जासनाटक्राथेतिनिर्देशाद्वा ह्रस्वाभावः। छद ऊर्जने ॥४७॥ ऊर्जनं प्राणनं बलं च। छदण् ऊर्जने इति पठिष्यमाणोऽप्यूर्जने घटादिकार्यार्थमिह पाठः। छदयत्यग्निः। स्वार्थे णिच् ॥ छादयन्तं प्रयुङ्क्ते इति णिग्वा। ऊर्जनादन्यत्र छादयति गृहं तृणैः। मदै हर्षग्लेपनयोः ॥४८॥ मदैच् हर्ष इत्यस्यार्थविशेषे ह्रस्वार्थं पाठः। मदयति। अन्यत्र मादयति। ष्टन स्तन ध्वन शब्दे ॥५१॥ स्वन अवतंसने ॥५२॥ स्वनयति। शब्दे तु स्वानयति। चन हिंसायाम् ॥५३॥ ज्वर रोगे ॥७४॥ चल कम्पने ॥७७॥ ह्वल ह्मल चलने

॥५७॥ ज्वल दीप्तौ ॥४८॥ ज्वलति । ज्वलयति । इति घटादयः। भ्वादिराकृतिगणः । तेन चुलुम्पतीत्यादिसंग्रहः ॥

॥ इति निरनुबन्धा भ्वादयः ॥

॥ अथादादयः ॥

अदं प्साङ् भक्षणे ॥२॥ कर्तर्यनद्यद इत्यदादिवर्जनान्न शप् । अत्ति । अत्तः । अदन्ति । अत्सि । अत्थः । अत्थ । अद्मि । अद्वः । अद्मः । अद्यात् । अद्याताम् । अद्युः । अत्तु । अत्तात् ।

२२० हुधुटो हेर्धिः ॥४।२।८३॥ जुहोतेर्धुडन्ताच्च धातोः परस्य हेर्धिरादेशः स्यात् । अद्धि । हुधुड्भ्यां परत्वेन हेर्विशेषणादिह न भवति । रुदिहि । हेरिति किम् । अत्तु । जुहुतात्त्वमित्यादौ नित्यत्वात् प्रकृत्यनपेक्षणेनान्तरङ्गत्वाच्च तातङ् । तस्य च न पुनर्धिभावो हेरिति शब्दाश्रयणात् । केचित्तु ' हिंसेर्हेरत् ' हिंस, ' भुजिभञ्जिभ्यां तु वा ' भुञ्ज–भुङ्ग्धि, भञ्ज–भङ्ग्धि इतीच्छन्ति । नैतद् वैयाकरणरूपसंमतम् । हिन्धि इत्याद्येव तु भवति । अदानि । अदाव । अदाम ।

२२१ अदश्चाट् ॥४।४।९०॥ अत्ते रुत्पञ्चकात् च परयोर्दिस्योः शितोरादिरट् स्यात् । आदत् । आदः । दिस्योरित्येव । अत्ति । अत्सि ।

२२२ घस्लृ सनद्यतनीघञ्चलि ॥४।४।१७॥ एषु प्रत्ययेष्वदेर्घस्लृ इत्ययमादेशः स्यात् । घस्लृ अदने इत्यनेनैव सिद्धेऽदेः सन्नादिषु रूपान्तरनिवृत्त्यर्थं वचनम् । लृदङर्थः । अघसत् ।

२२३ परोक्षायां न वा ॥४।४।१८॥ परोक्षायां परतोऽदेर्घस्लादेशो वा स्यात् ॥ घस्यदिभ्यामेव सिद्धे विकल्पवचनं घसेरसर्वविषयत्वज्ञापनार्थम् । तेन घस्ता घस्मर इत्यादावेव घसेः प्रयोगो भवति । जघास । द्वित्वे गमहनेत्युपान्त्यलुकि, अघोषे प्रथम इति घस्य कत्वे घस्वस इति सस्य पत्वे जक्षतुः। जक्षुः। क्ङ्ग्येऽद इति नित्यमिट् । जघसिथ । जघास । जघस । जक्षिव । जक्षिम । पक्षे

आद । आदतुः । आदुः । आदिथ । अद्यात् । अत्ता । अत्स्यति । प्साति । प्सायात् । प्सातु । अप्सात् । अप्साताम् ।

२२४ **वा द्विषातोऽनः पुस्** ॥४।२।९१॥ द्विष आकारान्ताच्च धातोः परस्य शितोऽवितोऽनः स्थाने वा पुसादेशः स्यात् । अप्सुः । अप्सान् । अप्सासीत् । अप्सासिष्टाम् । अप्सासिषुः । पप्सौ ॥ पप्सतुः । प्साता । प्सास्यति । भांक् दीप्तौ ॥३॥ भाति । अभासीत् । बभौ । बभिथ । बभाथ । यांक् प्रापणे ॥४॥ गतौ इत्यर्थः। याति । यायात् । अयात् । अयुः। अयान् । अयासीत् । ययौ । वांक् गतिगन्धनयोः॥५॥ ष्णांक् शौचे ॥६॥ स्नाति । सस्नौ । श्रांक् पाके ॥७॥ द्रांक् कुत्सितगतौ ॥८॥ पांक् रक्षणे ॥९॥ पायात् । लांक् आदाने ॥१०॥ रांक् दाने ॥११॥ दांक् लवने । वित्वान्न दासंज्ञा । अदासीत् । दायात् । ख्यांक् प्रकथने ॥१३॥ आख्याति ।

२२५ **शास्त्यसूवक्तिख्यातेरङ्** ॥३।४।६०॥ एभ्यो धातुभ्यः कर्तर्यद्यतन्यामङ् स्यात् । तिव्निर्देशो यङ्लुबन्तनिवृत्त्यर्थः॥ अस्यतेः पुष्यादित्वादङि सिद्धे वचनम् आत्मनेपदार्थम् । शास्तेरात्मनेपदे नेच्छन्त्येके । आख्यत् । आख्यताम् । आख्यन् । आचख्यौ । प्रांक् पूरणे ॥१४॥ मांक् माने ॥१५॥ अस्याशिषि गापास्थेत्येत्वे मेयात् । इंक् स्मरणे ॥१६॥ अधिपूर्व एवायम् । अध्येति। अधीतः।

२२६ **इको वा** ॥४।३।१६॥ इंक् स्मरणे इत्यस्य स्वरादाविति शिति परे वा यकारः स्यात् । अधियन्ति । अधीयन्ति । अधीयात् । अध्येतु । अधीतात् । अधीताम् । अधियन्तु । अधीयन्तु । अधीहि । अध्ययानि । अध्ययाव । अध्ययाम ।

२२७ **एत्यस्तेर्वृद्धिः** ॥४।४।३०॥ इणिकोरस्तेश्चादेः स्वरस्य ह्यस्तन्यां विषये वृद्धिः स्यात् अमाङा । ['अङ्धातोरादिः' इत्यत्र 'आदिः' इति प्रथमान्तमप्यत्र] आदेरिति विभक्तिविपरिणामात् । यत्वे लुकि च स्वरादित्वाभावात् उत्तरेण ('स्वरादेस्तासु' इत्यनेन) वृद्धिर्न प्राप्नोतीति वचनम् । विषयत्वविज्ञानात् परत्वाद्वा प्रागेव वृद्धौ कृतो यत्वाल्लुकोः प्राप्तिरिति चेत् सत्यम्। इदमेव वचनं ज्ञापकं कृतेऽस्मिन् धातुप्रत्ययकार्ये पश्चाद्वृद्धिस्तद्बाध्योऽट् च भवति । तेन ऐयरुः अध्यैयतेत्यादावियादेशे सति वृद्धिः सिद्धा । अचीकरदित्यादौ च दीर्घत्वम् । पूर्वमटि तु स्वरादित्वात् तन्न स्यात् । यत्वाल्लुगपवादश्चायम् । तेनेकः पक्षे यत्वाभावेऽध्यैय-

न्नित्यत्रेयि सत्युत्तरेणैव (स्वरादेरित्यनेनैव) वृद्धिर्भवति। अध्यैत्। अध्यैताम्। अध्यायन्। अध्यैयन्। अध्यैः। अध्यैतम्। अध्यैत। अध्यायम्। अध्यैव। अध्यैम। पिबैतिदेति सिज्लुपि–

२२८ इणिकोर्गाः ॥४।४।२३॥ अद्यतन्यां विषये इण इकश्च धातोर्गा इत्ययमादेशः स्यात्। अध्यगात्। अध्यगाताम्। अध्यगुः। अधीयाय। अधीयतुः। अधीयुः। अधीयियिथ। अधीयेथ। अधीयथुः। अधीय। अधीयाय। अधीयय। अधीयिव। अधीयिम। अधीयात्। अध्येता। अध्येष्यति। इंक् गतौ ॥१७॥ एति। इतः।

२२९ ह्विणोरप्विति व्यौ ॥४।३।१५॥ हु इण् इत्येतयोर्नामिनः स्वरादावपित्यविति त्र शिति परे यथासंख्यं वकारयकारादेशावियुवोरपवादौ स्याताम्। यन्ति। स्वरादावित्येव। इथः। अप्वितीति किम्। अजुह्वुः। अयानि। ऐत्। ऐताम्। आयन्नित्यत्र तु एत्यस्तेर्वृद्धिरिति वृद्धिरेवापवादत्वात्। अगात्। अगाताम्। अगुः। इयाय।

२३० इणः ॥२।१।५१॥ इणो धातोः स्वरादौ प्रत्यये परे इय् इत्ययमादेशः स्यात्। *यत्वापवादः। ईयतुः। ईयुः। कथं यन्ति यन्तु? परत्वेन 'ह्विणोरप्विति' इति यत्वस्यैव भावात्। अयनम् आयक इत्यत्रापि परत्वाद् गुणवृद्धी एव। आशिषि ईयात्।

२३१ आशिषीणः ॥४।३।१०७॥ उपसर्गात्परस्येण ईकारस्य क्ङिति यकारादाशिषि परतो ह्रस्वः स्यात्। उदियात्। समियात्। आशिषीति किम्। उदीयते। उपसर्गादित्येव। ई इण इति ईकारम्[ऽ]लेषात् आ इयात् एयात् समेयादित्यत्र न भवति। ननु प्रतीयादित्यत्र समानलक्षणे दीर्घे सति कथं न ह्रस्वः? न। दीर्घे सति उपसर्गात् परस्य इणोऽभावात्। केचित् अत्रापीच्छन्ति। प्रतियात्। इकोऽपि समानदीर्घत्वे इच्छन्त्येके। अधियात्। वींक् प्रजनकान्त्यसनखादनेषु ॥१८॥ वेति। वीतः। वियन्ति। वीयात्। वेतु। अवेत्। अवैषीत्। अवैष्टाम्। विवाय। विव्यतुः। वीयात्। वेता। वेष्यति। अत्र ईंक् इति धात्वन्तरम्[ऽ]लेषः। एति। ईतः। इयन्ति। ऐषीत्। ईंक् अभिगमने ॥१९॥

* योऽनेकस्वरस्येति ग्रासस्य।

२३२ उत और्विति व्यञ्जनेऽद्धेः ॥४।३।५९॥ अद्विरुक्तस्योकारान्तस्य धातोर्व्यञ्जनादौ विति वकारानुबन्धे परे औः स्यात्। द्यौति। द्युतः। द्युवन्ति। द्यौतु। तोः स्थाने तातङो ङित्त्वात् स्थानिवत्वं बाध्यते तेन द्युतादित्यादौ नौकारः। षुंक् प्रसवैश्वर्ययोः ॥२०॥ प्रसवोऽभ्यनुज्ञानम्। सौति। सुतः। सुवन्ति। सुयात्। सौतु। सुतात्। असौत्। असौषीत्। सुषाव। सूयात्। सोता। सोष्यति। तुंक् वृत्तिर्हिंसापूरणेषु ॥२२॥

२३३ यङ्तुरुस्तोर्बहुलम् ॥४।३।६४॥ यङ्लुबन्तात् तुरुस्तु इत्येतेभ्यश्च धातुभ्यः परो व्यञ्जनादौ विति प्रत्यये परे ईत् स्यात् 'बहुलम्' शिष्टप्रयोगानुसारेण स च परादिः। क्वचिद्विकल्पः। तवीति। तौति। तुतः। तुवन्ति। अतौषीत्। तुताव। 'यङ्तुरु' इत्यत्र अद्धेरित्यनुवृत्तेः तुतोथेत्यत्र न भवति। यङिति सामान्याभिधानेऽपि यङ्लुबन्तस्य ग्रहणम्। यङन्तस्यात्मनेपदित्वाद् वितो व्यञ्जनादेरसंभवात्। तुरुस्तुभ्य ईतं छान्दसमाहुरेके। युक् मिश्रणे ॥२२॥ यौति। अयावीत्। णुक् स्तुतौ ॥२३॥ बहुलग्रहणादत्रापि और्भवति। नवीति। नौति। नुतः। नुवन्ति। अनावीत्। नुनाव। नविता। ष्णुक् ष्णुक् प्रस्रवणे ॥२५॥ स्नौति। अस्नावीत्। ष्ठुक् ष्टुक् कुंक् शब्दे ॥२८॥ क्ष्वौति। क्ष्वीति। क्ष्वौति। अक्ष्वावीत्। अक्ष्वावीत्। अक्ष्वौषीत्। रुदृक् अश्रुविमोचने ॥२९॥

२३४ रुत्पञ्चकाच्छिदयः ॥४।४।८९॥ रुदिस्वपिअनिश्वसिजक्षिलक्षणाद्रुत्पञ्चकात्परस्य व्यञ्जनादेः शितोऽयादेरादिरिट् स्यात्। रोदिति। रुदितः। व्यञ्जनादित्येव। रुदन्ति। अयिति किम्। रुद्यात्। रोदितु। रुदितात्। रुदिताम्। रुदन्तु। रुदिहि। रोदानि।

२३५ दिस्योरिट् ॥ ४।४।९० ॥ रुत्पञ्चकात्परयोर्दिस्योः शितोरादिरीट् स्यात्। अरोदीत्। 'अदश्राट्' इत्यडागमे च अरोदत्। अरुदिताम्। अरुदन्। अरोदीः। अरोदः। अरुदितम्। अरुदित। अरोदम्। अरुदिव। अरुदिम। अरोदीत्। ऋदित्वात् पक्षेऽङि अरुदत्। रुद्यात्। रोदिता। रोदिष्यति। ञिष्वपंक् शये ॥३०॥ स्वपिति। स्वप्यात्। स्वपितु। अस्वपीत्। अस्वपत्। अस्वाप्सीत्। अस्वाप्ताम्। अस्वाप्सुः। द्वित्वे भूस्यपोरित्युत्वे सुष्वाप।

२३६ स्वपेर्यङ्ङे च ॥४।१।८०॥ स्वपेर्यङि ङे किति च प्रत्यये सस्वरान्तस्था य्वृत् स्यात् । ङे परे स्वपितिर्य्यन्तो लभ्यते । सुषुपतुः । सुषुपुः । सुष्वपिथ । सुष्वप्थ । सुप्यात् । स्वप्ता । स्वप्स्यति । अस्वप्स्यत् ।

२३७ अवः स्वपः ॥२।३।८६॥ निर्दुःसुविपूर्वस्य वकाररहितस्य स्वपेर्धातोः सकारस्य षः स्यात् । नि षुषुपतुः । दुःषुषुपतुः । सुषुषुपतुः । विषुषुपतुः । अव इति किम् । निःस्वप्नः । दुःस्वप्नः । सुस्वप्नः । विसुष्वाप । अन श्वसक् प्राणने ॥ ३२ ॥

२३८ द्वित्वेऽप्यन्तेऽप्यनितेः परेस्तु वा ॥२।३।८१॥ अदुरुपसर्गान्तःशब्दस्थाद्वर्णात्परस्यानितेर्नकारस्य द्वित्वे चाद्वित्वे चान्ते चानन्ते वर्तमानस्य णः स्यात् परिपूर्वकस्य तु वा । प्राणिति । प्राण्यात् । प्राणितु । प्राणीत् । प्राणत् । प्राणीत् । प्राणिष्टाम् । प्राण । प्राणतुः । प्राण्यात् । प्राणिता । प्राणिष्यति । पर्याणिति । पर्यनिति । परिपूर्वकस्य द्वित्वे अन्ते च नित्यं णत्वमिच्छन्त्येके । अन्ये तु अन्तेऽनन्ते च नेच्छन्त्येव । ये तु द्वित्वे कृतेऽपि पुनर्द्वित्वमिच्छन्ति तन्मतेऽपि द्वित्वे इति वचनात् द्वयोरेवाद्ययोर्णत्वं भवति न तृतीयस्य । प्राणिणिषयतेर्ङे प्राणिणिनिषत् । अनन्त्यस्येत्यकारात् अन्ते न प्राप्नोतीति अन्तवचनम् । अनितीति तिवा निर्देशो दैवादिकनिवृत्त्यर्थः न यङ्लुप्निवृत्त्यर्थः, यङोऽसंभवात् । श्वसिति । अद्यतन्यां व्यञ्जनादेर्वोपान्त्यस्येति वा वृद्धौ अश्वासीत् । अश्वसीत् । 'न श्विजागृ' इति सूत्रे शसः स्थाने श्वसं पठन्त्यन्ये तन्मते अश्वसीत् । शश्वास । शश्वसतुः । जक्षक् भक्षहसनयोः ॥३३॥ जक्षिति । जक्षितः । अन्तो नो लुगिति नकारलुकि जक्षति । अजक्षीत् । अजक्षत् । अजक्षिताम् ।

२३९ व्युक्तजक्षपञ्चतः ॥४।२।९३॥ द्वे उक्ते यस्य स व्युक्तः । पञ्चानां वर्गः पञ्चत् । जक्षाणां पञ्चत् जक्षपञ्चत् । व्युक्ताद्धातोर्जक्षपञ्चतश्च परस्य शितोऽवितोऽनः स्थाने पुसादेशः स्यात् । अजक्षुः । अजक्षीत् । अजक्षिष्टाम् । जजक्ष । दरिद्राक् दुर्गतौ ॥३४॥ दरिद्राति ।

२४० इर्दरिद्रः ॥४।२।९८॥ दरिद्रातेर्व्यञ्जनादौ शित्यविति प्रत्यये परे आकारस्येकारः स्यात् । दरिद्रितः ।

२४१ **भ्रश्चातः** ॥४।२।९६॥ व्युक्तजक्षपञ्चतः श्नाप्रत्ययस्य च संबंधिनः शित्यविति प्रत्यये परे आकारस्य लुक् स्यात्। दरिद्रति। दरिद्रियात्। अदरिद्रात्। अदरिद्रुः।

२४२ **दरिद्रोऽद्यतन्यां वा** ॥४।३।७६॥ दरिद्रातेरद्यतन्यां विषयेऽन्तस्य वा लुक् स्यात्। अदरिद्रीत्। अदरिद्रिष्टाम्। पक्षे अदरिद्रासीत्। अदरिद्रासिष्टाम्। अदरिद्रासिषुः। दरिद्राञ्चकार।

२४३ **अशित्यस्सनणकञ्णकानटि** ॥४।३।७७॥ सकारादिसनणकञ्णकानडवर्जितेऽशिति प्रत्यये विषयभूते दरिद्रातेरन्तस्य लुक् स्यात्। [1]ददरिद्रौ। ददरिद्रतुः। दरिद्रयात्। दरिद्रिता। दरिद्रिष्यति। विषयसप्तमीविज्ञानात् पूर्वमेवाकारलोपे दरिद्रातीति दरिद्रः। अजेव भवति नञाकारान्तलक्षणो णः। तथा दुर्दरिद्रिमित्याकारान्तलक्षणोऽनो न भवति। दरिद्राणम्। दरिद्र इति च यञि 'आत' इति ऐर्न भवति। अशितीति किम्। दरिद्राति। सन्नादिवर्जनं किम्। दिदरिद्रासति। क्रियायां क्रियार्थायां णकञि दरिद्रायको व्रजति। 'पर्यायार्हण' इत्यादीना णके दरिद्रायको वर्तते। णकतृचौ इति च णके दरिद्रायकः। अनटि दरिद्राणम्। सनः सादिविशेषणं किम्। दिदरिद्रिषति। अक इत्येव वक्तव्ये णकञ्णकयोरुपादानं किम्। आशिष्यकनि मा भूत्। दरिद्रकः। केचिदरिद्रातेरनिटि कसावालोपं नेच्छन्ति। तन्मते इट् आम् चाभिधानान्न भवतः। दिदरिद्रावान्। जागृक् निद्राक्षये ॥३५॥ जागर्ति। जागृयात्। जागर्तु। नामिनो गुण इति गुणे।

२४४ **व्यञ्जनादेः सश्च दः** ॥ ४।३।७८ ॥ धातोर्व्यञ्जनान्तात्परस्य देर्लुक् यथासंभवं धातुसकारस्य च दकारः। अजागः। व्यञ्जनादिति किम्। अयात्। धातोरित्येव। अभैत्सीत्। ईतः परादित्वात् सेतोऽपि प्राप्नोति। अजागृताम्।

३४५ **पुस्पौ** ॥४।३।३॥ नाम्यन्तस्य धातोः पुसि पौ च परे गुणः स्यात्। अजागरुः।

---

१ 'आतो णव औः' इत्यत्र ओकारेणैव सिद्धे औकारकरणं एतदर्थमेव। अन्यथा 'अशित्यस्सन्' इत्यालोपे इदं न सिद्धयेत्। नन्वत्रामादेशेन भाव्यम्, *तत्कथमेतदर्थम्। सत्यम्। अतएव औकारकरणादामादेशस्यानित्यत्वम्।*

२४६ सेः स्द्धां च रुर्वा ॥४।३।७९॥ धातोर्व्यञ्जनान्तात् परस्य सेर्लुक् सकारदकारधकाराणां च यथासंभवं वा रुः। अजागः। सकारस्य रुत्वे सिद्धे पक्षे रुत्वबाधनार्थं वचनम्। ततश्च पक्षे धुटस्तृतीय इति सकारस्य दकारः स्यात्। दिभ-त्यासत्तेः सिरपि ह्यस्तन्या एव। तेनेह न, भिनत्सि। सेरुदित्करणं किम्। उत्वा-दिकार्थं यथा स्यात्। अभिनोऽत्र। 'नश्वी'ति वृद्धिनिषेधे अजागरीत्। अजागरि-ष्टाम्। अजागरिषुः। जागृषेति वा आमि जागराञ्चकार। पक्षे 'आद्योंऽश एकस्वर' इति द्वित्वे।

२४७ जागुर्ञ्णिण्वि ॥४।३।८२॥ जागर्तेर्ञौ णव्येव ञ्णिति प्रत्यये परे वृद्धिः स्यात्। नामिनोऽकलिहलीत्यनेनैव सिद्धे नियमार्थो योगः। जजागार। ञ्णिवीति किम्। जागरयति।

२४८ जागुः किति ॥४।३।६॥ जागर्तेः किति प्रत्यये परे गुणः स्यात्। क्ङिति प्रतिषेधे प्राप्ते वचनम्। जजागरतुः। जजागरुः। अथ इह कस्मान्न भवति जजागृवानिति? जागर्तेः क्सुरनभिधानाद् भाषायां नास्तीत्येके। गुणमेवेच्छन्त्यन्ये। जजागर्वान्। अपरे तु क्सुकानयोर्गुणप्रतिषेधमेवाहुः। जजागृवान्। व्यतिजजाग्राणः। जागर्यात्। जागरिता। जागरिष्यति। चकास्रक् दीप्तौ ॥३६॥ चकास्ति। चकास्तः। चकासति। चकास्यात्। चकास्तु। हुधुटो हेर्धिरिति धौ 'सो धि वा' लुक्। चकाधि। चकाद्धि। अचकात्। अचकास्ताम्। अचकासुः। अचकाः। अचकात्। अचकासीत्। चकासाञ्चकार। चकास्यात्। चकासिता। चकासिष्यति। शासूक् अनुशिष्टौ ॥३७॥ शास्ति।

२४९ इसासः शासोऽङ्व्यञ्जने ॥४।४।११९॥ शास्तेरवयवस्यासः स्थाने-ऽङि व्यञ्जनादौ च क्ङिति प्रत्यये परे इसित्ययमादेशः स्यात्। शिष्टः। शासति। शिष्यात्। शास्तु। शिष्टात्। शासःशिसित्यकृत्वा आस इस्विधानं यङ्लुपि शाशिष्ट इत्यादिप्रयोगार्थम्। अन्यथा शिष्ट इत्यादि स्यात्।

२५० शासस्हनः शाध्येधिजहि ॥४।२।८४॥ शास् अस् हन् इत्येतेषां हिप्रत्ययान्तानां शाध्येधिजहि इत्येते आदेशा यथासंख्यं स्युः। शाधि। शास्हनोः यङ्लुप्यपि शाधि। जहि। हनेस्तु यङ्लुपि नेच्छन्त्यन्ये। जङ्हहि। शिष्टात्।

शिष्टम् । शिष्ट । अशात् । अशिष्टाम् । अशाः । अशात् । ' शास्त्यसूवक्ती ' त्यङ् । अशिषत् । शशास । शशासतुः । शिष्यात् । शासिता । शासिष्यति । वचंक् भाषणे ॥३८॥ वक्ति । वक्तः । वचन्ति । वच्यात् । वक्तु । वग्धि । अवक् । शास्त्यसूवक्तीत्यङ् । 'श्वयत्यसू' इति वोचादेशे । अवोचत् । द्वित्वे ग्रहति उवाच । यजादिवचेरिति ग्रहति ऊचतुः । ऊचुः । ऊचिथ । उवक्थ । उच्यात् । वक्ता । वक्ष्यति । मृजौक् शुद्धौ ॥३९॥ लघूपान्त्यस्येति गुणे सति ।

२५१ मृजोऽस्य वृद्धिः ॥४।३।४२॥ मृजेर्गुणे सति अकारस्य वृद्धिः स्यात् । यजसृजेति षत्वे । मार्ष्टि । मृष्टः ।

२५२ ऋतः स्वरे वा ॥४।३।४३॥ मृजेर्ऋकारस्य स्वरादौ प्रत्यये परे वा वृद्धिः स्यात् । मार्जन्ति । मृजन्ति । मार्क्षि । मृष्टः । मृज्यात् । मार्ष्टु । मृष्टात् । मृष्टाम् । मार्जन्तु । मृजन्तु । मृड्ढि । मृष्टात् । अमार्ट्-ड् । अमृष्टाम् । अमार्जन् । अमृजन् । अमार्ट्-ड् । औदित्वादिड्विकल्पे । अमार्जीत् । अमार्क्षीत् । ममार्ज । ममार्जतुः । ममृजतुः । ममार्जुः । ममृजुः । मृज्यात् । मार्जिता । मार्ष्टा । मार्जिष्यति । मार्क्ष्यति । सस्तुक् स्वप्ने ॥४०॥ उदित्वान्ने 'धुटो धुटी' ति तकारलुकि संस्ति । असंस्तीत् । विदक् ज्ञाने ॥४१॥ वेत्ति । वित्तः । विदन्ति ।

२५३ तिवां णवः परस्मै ॥४।२।११७॥ वेत्तेः परेषां परस्मैपदसंबंधिनां तिवादीनां नवानां प्रत्ययानां स्थाने परस्मैपदसंबन्धिन एव णवादयो नवादेशा यथासंख्यं वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । विद्यात् ।

२५४ पञ्चम्याः कृग् ॥३।४।५२॥ वेत्तेः परस्याः पञ्चम्याः स्थाने किदामादेशो वा स्यात् आमन्ताच्च परः पञ्चम्यन्तः कृगनुप्रयुज्यते । कृग्ग्रहणं भ्वस्तिव्युदासार्थम् । विदाङ्करोतु । विदाङ्कुरुतात् । विदाङ्कुर्वन्तु । विदाङ्कुरु । विदाङ्करवाणि । पक्षे वेत्तु । वित्तात् । वित्ताम् । विदन्तु । विद्धि । वेदानि । अवेत्-द् । अवित्ताम् । अविदुः । अवेः । अवेत्-द् । अवेदीत् । अवेदिष्टाम् । अवेदिषुः ।

२५५ वेत्तेः कित् ॥३।४।५१॥ विदक् ज्ञाने इत्यतो धातोः परस्याः परोक्षायाः स्थाने आमादेशो वा स्यात् स च कित् आमन्ताच्च कृभ्वस्तयोऽनुप्रयुज्यन्ते ।

कित्वाद् गुणो न । विदाञ्चकार । विदांबभूव । विदामास । पक्षे विवेद । वेत्तेरविदिति कृते इन्ध्यसंयोगात् परोक्षाकिद्वदित्यामः स्थानिवद्भावेन कित्त्वे सिद्धेऽपि कित्त्वविधानमामः परोक्षावद्भावनिवृत्तिज्ञापनार्थम् । तेन परोक्षावद्भावेन हि कित्त्वद्विर्वचनादिकं न भवति । तिङ्निर्देश आदादिकपरिग्रहार्थः । विद्यात् । विद्यास्ताम् । वेदिता । वेदिष्यति । अवेदिष्यत् । हनंक् हिंसागत्योः ॥४२॥ हन्ति । प्रणिहन्ति ।

२५६ यमिरमिनमिगमिहनिमनिवनतितनादेर्घुटि किङति ॥१।२।५५॥ यमिरमिनमिगमिहनिमनीनां वनतेस्तनादीनां च धुडादौ किङति प्रत्यये परेऽन्तस्य लुक् स्यात् । हतः । एषामिति किम् । शान्तः । दान्तः । तिङ्गणनिर्देशाद् यङ्लुपि न । गमहनेत्युपान्त्यलुकि, हनो ह्तो घ्न इति घ्नादेशे च घ्नन्ति । हंसि । हथः । हथ । हन्मि । हन्वः । हन्मः ।

२५७ वमि वा ॥ २।३।८३ ॥ अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात्परस्य हन्तेर्नकारस्य वकारे मकारे च परे णो वा स्यात् । प्रहण्वः । प्रहन्वः । प्रहण्मः । प्रहन्मः । प्रहण्मि । प्रहन्मि । अन्तर्हण्वः । अन्तर्हन्वः । अन्तर्हण्मः । अन्तर्हन्मः ।

२५८ हनः ॥२।३।८२॥ अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात् परस्य हन्तेर्नकारस्य णः स्यात् । प्रहण्यात् । प्रघ्नन्तीत्यादौ हनो घीति प्रतिषेधान्न भवति । हन्तु । हतात् । जहि । हतात् । अहन् । अहताम् । अघ्नन् ।

२५९ अद्यतन्यां वा त्वात्मने ॥४।४।२२॥ अद्यतन्यां विषये हनो वध इत्ययमादेशः स्यात् आत्मनेपदे त्वस्या वा भवति । इट ईतीति सिज्लोपे 'अतः' इत्यकारलुकि च अवधीत् । अलोपस्य स्थानिवद्भावेन 'व्यञ्जनादेर्वोपान्त्यस्यातः' इति वृद्धिर्न ।

२६० त्रिणवि घन् ॥४।३।१०१॥ त्रौ णवि च प्रत्यये परे हन्तेर्घन् इत्ययमादेशः स्यात् । घातोऽपवादः । जघान । द्वित्वे गमहनेत्युपान्त्यलुकि—

२६१ अङे हिहनो हो घः पूर्वात् ॥४।१।३४॥ हि हन् इत्येतयोर्धात्वोर्ङेवर्जिते प्रत्यये परे द्वित्वे सति पूर्वस्मात् परस्य हस्य घः स्यात् । अङे द्विर्वचननिमित्तप्रत्ययेऽनन्तरस्य विज्ञानादिह न भवति । हननीयितुमिच्छति जिहननीयिषति ।

ङपर्युदासात्तु णिव्यवधाने भवति। प्रजिघायियिषति। पूर्वादिति वचनान्न च द्विरिति निवृत्तम्। जघ्नतुः। जघ्नुः। जघनिथ। जघन्थ।

२६२ हनो वध आशीष्यञौ ॥४।४।२१॥ परोक्षानिवृत्तौ वेति निवृत्तम्। आशीर्विषये हन्तेर्वध इत्यकारान्त आदेशः स्यात् 'अञौ' त्विषये तु न। वध्यात्। वध्यास्ताम्। वध्यासुः। अञाविति किम्। घानिषीष्ट। हन्ता। हनृतः स्यस्येतीटि हनिष्यति। वशक् कान्तौ ॥४३॥ यजसृजेति षत्वे। वष्टि।

२६३ वशेरयङि ॥४।१।८३॥ वशेः सस्वरान्तस्था अयङि क्ङिति प्रत्यये ग्वृत् स्यात्। उष्टः। उशन्ति। उश्यात्। वष्टु। उष्टात्। उड्ढि। वशानि। अवट्-ड्। ग्वृति स्वरादेस्तास्खिति वृद्धौ। औष्टाम्। औशन्। अवाशीत्। अवशीत्। द्वित्वे यजादिवशृवचेति ग्वृति वृद्धौ च उवाश। वशेरयङीति ग्वृति। ऊशतुः। ऊशुः। उवशिथ। ववाश। ववश। ऊशिव। ऊशिम। उश्यात्। वशिता। वक्ष्यति। असक् भुवि ॥४४॥ अस्ति।

२६४ श्नास्त्योर्लुक् ॥४।२।९०॥ श्नस्य प्रत्ययस्यास्तेश्च धातोः संबंधिनोऽकारस्य शित्यविति प्रत्यये लुक् स्यात्। स्तः। सन्ति। अवितीत्येव। अस्ति। तिङ्निर्देशः किम्। अस्यतेर्मा भूत्।

२६५ अस्तेः सि हस्त्वेति ॥४।३।७३॥ अस्तेः सकारस्य सकारादौ प्रत्यये परे लुक् स्यात् एकारे तु प्रत्यये सकारस्य हकारः। असि। स्थः। स्थ। अस्मि। स्वः। स्मः। स्यात्। स्याताम्। स्युः।

२६६ प्रादुरुपसर्गाद्यस्वरेऽस्तेः ॥ २।३।१५८॥ प्रादुःशब्दादुपसर्गस्थाच्च नाम्यन्तस्थाकवर्गात् परस्यास्तेः सकारस्य यकारादौ स्वरादौ च प्रत्यये षः स्यात्। प्रादुःष्यात्। निष्यात्। विष्यात्। अभिष्यात्। प्रादुःषन्ति। निषन्ति। विषन्ति। अभिषन्ति। शिड्नान्तरेऽपि। निःष्यात्। निःषन्ति। प्रादुरुपसर्गादिति किम्। दधि स्यात्। मधूनि सन्ति। यदत्र मां प्रति स्यात्तदीयताम्। सर्पिषोऽपि स्यात्। यस्वर इति किम्। प्रादुःस्तः। निस्तः। अनुस्तः। अनुस्मः। अस्तेरिति किम्। विस्तृतम्। अनुस्तृतम्। अनुस्तृतेः किपि अनुस्तृस्तस्यापत्यं शुभ्रादित्वादेयण् ऊलोपः—आनुसेयः। प्रादुःशब्दस्य तु कृभ्वस्तिष्वेव प्रयोगात् प्रत्युदाहरणं नास्ति।

२६७ **अस्तिब्रुवोर्भूवच्वाशिति** ॥ ४।४।१ ॥ अस्तिब्रुवोर्यथासंख्यं भू बच् इत्येतावादेशौ स्याताम् आशिति प्रत्यये विषयभूते। अभूत्। बभूव। भूयात्। भविता। भविष्यति। अभविष्यत्। अस्तीति निर्देशादस्यतेरसतेश्च न भवति। धात्वन्तरेणैव सिद्धेऽस्तिब्रुवोराशिति प्रयोगनिवृत्त्यर्थं वचनम् ब्रूगादेशस्य फलवत्यात्मनेपदार्थं च। षसक् स्वप्ने ॥४५॥ सस्ति। सस्तः। असासीत्। असंसीत्। यङ्लुप् च ॥४६॥ यङ्लुबन्ता अपि धातवोऽदादौ ज्ञेयाः।

॥ इति परस्मैपदिनः ॥

इंङ्क् अध्ययने ॥१॥ नित्यमधिपूर्वोऽयं प्रयुज्यते। अधीते। अधीयाते। अधीयते। अधीयीत। अधीयीयाताम्। अधीताम्। अधीयाताम्। अध्यैय। अध्यैयावहै। अध्यैत। अध्यैयाताम्। अध्यैयि।

२६८ **वाऽद्यतनीक्रियातिपत्त्योर्गीङ्** ॥४।४।२८॥ अद्यतनीक्रियातिपत्त्योः परत इङो गीङादेशो वा स्यात्। ङकारो गुणनिषेधार्थः। अध्यगीष्ट। अध्यगीषाताम्। अध्यगीषत। अध्यैष्ट। अध्यैषाताम्। अध्यैषत।

२६९ **गाः परोक्षायाम्** ॥ ४।४।२६ ॥ इङः परोक्षायां विषये गादेशः स्यात्। अधिजगे। अधिजगाते। अधिजगिरे। अधिजगिषे। विषयनिर्देशः किम्। आदेशे सति द्विर्वचनं यथा स्यात्। तेन प्राक्तु स्वरे स्वरविधेरिति नोपतिष्ठते। अध्येषीष्ट। अध्येता। अध्येष्यते। अध्यगीष्यत। अध्यैष्यत। शीङ्क् स्वप्ने ॥२॥

२७० **शीङ एः शिति** ॥४।३।१०४॥ शीङः शिति परे एकारोऽन्तादेशः स्यात्। शेते। शयाते। ङित्त्वनिर्देशाद् यङ्लुपि न।

२७१ **शीङो रत्** ॥ ४।३।११५ ॥ शीङः परस्यात्मनेपदसंबन्धिनोऽन्तो रत् इत्ययमादेशः स्यात्। शेरते। शयीत। शेताम्। शयाताम्। शेरताम्। शेष्व। अशेत। अशयिष्ट। शिश्ये। शयिषीष्ट। शयिता। शयिष्यते। अशयिष्यत। हनुंङ्क् अपनयने ॥३॥ हनुते। अह्नोष्ट। ह्नोता। ह्नोष्यते। घूङौक् प्राणिगर्भविमोचने ॥४॥ सूते। सुवीत।

२७२ **सूतेः पञ्चम्याम्** ॥४।३।१३॥ सूतेः पञ्चम्यां गुणो न स्यात्। सुवै। सुवावहै। सुवामहै। तिव्निर्देशाद् यङ्लुपि गुणो भवत्येव। असूत। ऊदित्त्वादिड्विकल्पे असविष्ट। असोष्ट। सुषुवे।

२७३ **उवर्णात्** ॥ ४।४।८९ ॥ उवर्णान्तादेकस्वराद्धातोर्विहितस्य कित आदिरिण्न स्यात्। अनेन औदित्वलक्षणमिड्विकल्पं बाधित्वा निषेधे प्राप्ते परत्वात् स्कुसुवितिं नित्यमिट्। सुषुविषे। सुषुविढ्वे। सुषुविध्वे। सोता। सविता। सोष्यते। सविष्यते। असोष्यत। असविष्यत। पृचैङ् पृजुङ् पिजुकि संपर्चने। ॥७॥ मिश्रणे इत्यर्थः। पृक्ते। पृङ्क्ते। पिङ्क्ते। वृजैकिं वर्जने ॥८॥ वृक्ते। ईडिक् स्तुतौ ॥९॥ ईट्टे। ईडाते। ईडते।

२७४ **ईशीडः सेध्वेस्वध्वमोः** ॥४।४।८८॥ आभ्यां परयोर्वर्तमानासेध्वयोः पञ्चमीस्वध्वमोश्चादिरिट् स्यात्। ईडिषे। ईडिध्वे। ईडिष्व। ईडिध्वम्। समुदायद्वयापेक्षं द्विवचनम्। तेन स्वसहचरितस्य ध्वमो ग्रहणात् ह्यस्तनीध्वमि न भवति। ऐड्ढ्वम्। परोक्षासेध्वयोरामा भाव्यमिति वर्तमानासेध्वयोर्ग्रहणम्। वचनभेदो यथासंख्यनिवृत्त्यर्थः। ईरिक् गतिकम्पनयोः ॥१०॥ ईर्ते। ईरीत। ईर्ताम्। ऐर्त। ऐरिष्ट। ईराञ्चक्रे। ईरिषीष्ट। ईरिता। ईरिष्यते। ऐरिष्यत। ईशिक् ऐश्वर्ये ॥११॥ ईष्टे। ईशिषे। ईशिध्वे। ईशीत। ईष्टाम्। ऐष्ट। ऐड्ध्वम्। ऐशिष्ट। ईशाञ्चक्रे। ईशिषीष्ट। ईशिता। ईशिष्यते। ऐशिष्यत। वसिक् आच्छादने ॥१२॥ वस्ते। वस्से। वध्वे। आङः शासुकि इच्छायाम् ॥१३॥

२७५ **आङः** ॥ ४।४।१२१ ॥ आङः परस्य शासोऽवयवस्यासः स्थाने कावेवेसादेशः स्यात्। नियमार्थोऽयं योगः। तेनेह न आशास्ते। आशास्वहे। आशास्महे। आसिक् उपवेशने ॥१४॥ आस्ते। आसीत। आस्ताम्। आस्स्व। आध्वम्। आसै। आस्त। आसिष्ट। दयायासश्रास इत्यामि आसाञ्चक्रे। आसिषीष्ट। आसिता। आसिष्यते। आसिष्यत। कसुकि गतिसातनयोः ॥१५॥ कंस्ते। अयमनुदिदपि। कस्ते। तालव्यान्तोऽप्ययम्। कष्टे। कशाते। कक्षे। कड्ढ्वे। णिसुकि चुम्बने ॥१६॥ निंस्ते। चक्षिक् व्यक्तायां वाचि ॥१७॥ दर्शनेऽप्यन्ये। चष्टे। चक्षाते। चक्षते। चक्षे। चड्ढ्वे। चक्षीत। चष्टाम्। अचष्ट। अचक्षाताम्। अचक्षत।

२७६ **चक्षो वाचि क्शांग् ख्यांग्** ॥४।४।४॥ चक्षिको वाचि वर्तमानस्याशिति प्रत्यये विषयभूते क्शांग् ख्यांग् इत्यादेशौ स्याताम् । अनुस्वार इडभावार्थः । गकारः फलवद्विवक्षायामात्मनेपदार्थस्तेन स्थानिवद्भावेन नित्यमात्मनेपदं न भवति । अक्शासीत् । शिट्यादेस्य द्वितीयो वेति ककारस्य खकारः। अख्शासीत् । अक्शास्त । अख्शास्त । 'शास्त्यसू' इत्यङ् । आख्यत् । आख्यत । विषयसप्तमीविज्ञानात् आक्शेयम् । आख्येयम् ।

२७७ **न वा परोक्षायाम्** ॥४।४।५॥ चक्षिको वाचि परोक्षायां क्शांग्ख्यांगौ वा स्याताम् । आचक्शौ । आचख्शौ । आचख्यौ । आचक्शे । आचख्शे । आचख्ये । पक्षे आचचक्षे । आक्शेयात् । आक्शायात् । आख्शेयात् । आख्शायात् । आख्येयात् । आख्यायात् । आक्शासीष्ट । आख्शासीष्ट । आख्यासीष्ट । आक्शाता । आख्शाता । आख्याता । आक्शास्यति । आख्शास्यति । आख्यास्यति । आक्शास्यते । आख्शास्यते । आख्यास्यते ।

॥ इत्यात्मनेपदिनः ॥

ऊर्णुञ्क् आच्छादने ॥१॥

२७८ **वोर्णोः** ॥४।३।६०॥ ऊर्णोतेरद्विरुक्तस्य व्यञ्जनादौ विति प्रत्यये और्वा स्यात् । उत औरिति नित्यं प्राप्ते विकल्पः। ऊर्णौति । ऊर्णोति । ऊर्णुयात् । ऊर्णौतु । ऊर्णोतु । ऊर्णुते ।

२७९ **न दिस्योः** ॥४।३।६१॥ ऊर्णोतेर्दिस्योः परयोरौर्न स्यात् । पृथग्योगात् पूर्वेणापि प्राप्तः प्रतिषिध्यते । और्णोत् । और्णुताम् । और्णुवन् । और्णोः । और्णुत ।

२८० **वोर्णुगःसेटि** ॥४।३।४६॥ ऊर्णोतेः सेटि सिचि परस्मैपदविषये वृद्धिर्वा स्यात् । सानुबन्धोपादानं यङ्लुप्यनिवृत्त्यर्थम् ।

२८१ **वोर्णोः** ॥४।३।१९॥ ऊर्णोतेरिङ्वा ङिद्वत् स्यात् । और्णावीत् । और्णवीत् । और्णुवीत् । और्णाविष्टाम् । और्णविष्टाम् । और्णुविष्टाम् । और्णुविष्ट । और्णविष्ट ।

२८२ स्वरादेर्द्वितीयः ॥४।१।४॥ स्वरादेर्धातोर्द्वित्वे वचनभाजो द्वितीयांश एकस्वरो द्विः स्यान्न त्वाद्यः। प्राक्तु स्वरे स्वरविधेरित्येव।

२८३ अयि रः ॥४।१।६॥ स्वरादेर्धातोर्द्वितीयस्यावयवस्यैकस्वरस्य रेफः संयोगादिर्द्वित्वे स्यात् 'अयि' रेफात्पर आनन्तर्येण यकारश्चेन्न भवति। णत्वस्यासिद्धत्वान्नुशब्दस्य द्वित्वम्। ऊर्णुनाव। ऊर्णुनुवतुः। ऊर्णुनुवुः। ऊर्णुनुविथ। ऊर्णुनविथ। ऊर्णूयात्। ऊर्णुविषीष्ट। ऊर्णविषीष्ट। ऊर्णुविता। ऊर्णविता। ऊर्णुविष्यति। ऊर्णविष्यति। और्णुविष्यत्। और्णविष्यत्। ष्टुञ्क् स्तुतौ ॥२॥ स्तौति। स्तवीति। स्तुतः। स्तुवन्ति।

२८४ उपसर्गात् सुग्सुवसोस्तुस्तुभोऽट्यप्यद्वित्वे ॥२।३।३९॥ अद्वित्वे द्विर्वचनाभावे सति सुनोतिसुवतिस्यतिस्तौतिस्तोभतीनां सकारस्योपसर्गस्थान्नाम्यन्तस्थाकवर्गात्परस्य षः स्यात् अट्यपि—अडागमेऽपि सति। अड्व्यवधानेऽपीत्यर्थः। अभिष्टौति। परिष्टौति। पूजायां सोः पूजातिक्रमयोश्चातेरुपसर्गत्वाभावादिह न भवति। सुस्तुतम्। येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा इति धात्वन्तरयोगे न भवति। 'स्तुस्वञ्जश्चाटि नवा' इति वैकल्पिके षत्वे पर्यस्तौत्। पर्यष्टौत्। अस्तवीत्। 'धूग्सुस्तोः परस्मै' इतीडागमे अस्तावीत्। अस्ताविष्टाम्। अस्तोष्ट। तुष्टाव। तुष्टुवतुः। तुष्टुवुः। तुष्टोथ। तुष्टुव। तुष्टुम। स्तोता। स्तोष्यति। ब्रूंग्क् व्यक्तायां वाचि ॥३॥

२८५ ब्रूगः पञ्चानां पञ्चाहश्च ॥४।२।११८॥ ब्रूगः परेषां तिवादीनां पञ्चानां स्थाने यथासंख्यं पञ्च णवादय आदेशा वा स्युः, तत्संनियोगे ब्रूग आह इत्यादेशश्च। आह। आहतुः। आहुः। 'नहाहोर्धतावि' ति हकारस्य तकारः। आत्थ। आहथुः। पक्षे।

२८६ ब्रूतः परादिः ॥४।३।६३॥ ब्रुव ऊत् ब्रूत्, ब्रूतेरूकारात्परो व्यञ्जनादौ विति प्रत्यये परे ईत् स्यात् स च परादिः—परावयवः। ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रवीषि। ब्रूथः। ब्रूथ। ब्रवीमि। ब्रूवः। ब्रूमः। ऊत इति किम्। आत्थ। ब्रूते। ब्रूयात्। ब्रुवीत। ब्रवीतु। ब्रूहि। ब्रवाणि। ब्रूताम्। अब्रवीत्। अब्रवम्। अब्रूत। अस्तिब्रुवोरिति वचादेशे अवोचत्। अवोचत। उवाच। ऊचे। उच्यात्। वक्षीष्ट। वक्ता।

वक्ष्यति । वक्ष्यते । अवक्ष्यत् । अवक्ष्यत । द्विषींक् अप्रीतौ ॥४॥ द्वेष्टि । द्विष्टे । द्विष्यात् । द्वेष्टु । द्विष्टात् । द्विड्ढि । द्वेषाणि । अद्वेट् । अद्वेड् । 'वा द्विषातोऽनः पुस्' इति पुसि अद्विषुः । अद्विषन् । हशिट इति सकि अद्विक्षत् । अद्विक्षत । दिद्वेष । दिद्विषे । द्विष्यात् । द्विक्षीष्ट । द्वेक्ष्यति । द्वेक्ष्यते । दुहींक् क्षरणे ॥५॥ 'भ्वादेर्दादेर्घः' इति हस्य घत्वे 'अघश्चतुर्थात्' इति धत्वे दोग्धि । दुग्धः । 'गडदबादे'रिति धत्वे धोक्षि । दुग्धे । धुक्षे । दुह्यात् । दुहीत । दोग्धु । दुग्धि । दुग्धाम् । धुक्ष्व । अधोक्–ग् । अदुग्ध । अधुक्षत् । दुहदिहलिहेति वा सको लुकि अदुग्ध । पक्षे अधुक्षत । अदुह्वहि । अधुक्षावहि । दुदोह । दुदुहे । दुह्यात् । धुक्षीष्ट । दोग्धा । धोक्ष्यति । धोक्ष्यते । एवं दिहींक् लेपे ॥६॥ लिहींक् आस्वादने ॥७॥ लेढि । लीढः । लीढे । लिह्राते । लिह्यात् । लिहीत । लेढु । लीढाम् । अलेट्–ड् । अलीढ । अलिक्षत् । सको वा लोपे अलीढ । अलिक्षत । अलिह्वहि । अलिक्षावहि । लेढा । लेक्ष्यति । लेक्ष्यते ।

॥ इत्युभयपदिनः ॥

॥ अथादादावन्तर्गणो ह्वादिः ॥

हुंक् दानादनयोः ॥१॥

२८७ ह्वः शिति ॥४।१।१२॥ जुहोत्यादयः शिति द्विः स्युः । प्राक्तु स्वरे स्वरविधेरित्येव । जुहोति । जुहुतः । अन्तो नो लुक् इति नलुकि । ह्विणोरप्विति व्यौ । जुह्वति । जुहोषि । जुहुयात् । जुहोतु । जुहुतात् । जुहुताम् । जुह्वतु । हुधुटो हेर्धिः । जुहुधि । जुहवानि । अजुहोत् । व्युक्तजक्षपञ्चत इति पुसि गुणे अजुहवुः । अजुहोः । अजुहवम् । अहौषीत् ।

२८८ भीह्रीभृहोस्तिव्वत् ॥३।४।५०॥ भी ह्री भृ हु इत्येतेभ्यो धातुभ्यः परोक्षायाः स्थाने आमादेशो वा स्यात् स च तिव्वत् आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते । तिव्वद्भावाद् द्वित्वमित्वं च । जुहवाञ्चकार । जुहविथ । जुहोथ । हूयात् । होता । होष्यति । ओहांक् त्यागे ॥२॥ जहाति ।

२८९ हाकः ॥४।२।१००॥ जहातेर्व्युक्तस्य व्यञ्जनादौ शित्यविति प्रत्यये परेऽन्तस्येकारो वा स्यात् । अनुबन्धनिर्देश ओहाङ्यङ्लुपोर्निवृत्त्यर्थः । जहितः । पक्षे ।

२९० एषामीर्व्यञ्जनेऽदः ॥४।२।९७॥ एषां व्युक्तजक्षपञ्चतृश्नाप्रत्ययानामाकारस्य शित्यविति व्यञ्जनादौ परत ईकारः स्याद् दासंज्ञं वर्जयित्वा । जहीतः । श्नश्नात इत्यालुकि जहति । जहासि । जहिथः । जहीथः । जहिथ । जहीथ ।

२९१ यि लुक् ॥४।२।१०२॥ यकारादौ शिति प्रत्यये जहातेरन्तस्य लुक् स्यात् । वेति नानुवर्तते । जह्यात् । जह्याताम् । जह्युः । जहातु । जहितात् । जहीतात् । जहिताम् । जहीताम् । जहतु ।

२९२ आ च हौ ॥४।२।१०१॥ अवितीति निवृत्तम् । वितोऽसंभवात् । शितीतिवानुवर्तते । व्युक्तस्य जहातेर्हौ परे आकार इकारश्च वा स्यात् । जहाहि । जहिहि । जहीहि । जहितात् । जहीतात् । अजहात् । अजहिताम् । अजहीताम् । अजहुः । अहासीत् । जहौ । जहिथ । जहाथ । गापास्थासेत्येकारे हेयात् । हाता । हास्यति । अहास्यत् । ञिभींक् भये ॥३॥ बिभेति ।

२९३ भियो नवा ॥४।२।९९॥ बिभेतेर्व्यञ्जनादौ शित्यविति प्रत्यये परेऽन्तस्येकारो वा स्यात् । बिभितः । बिभीतः । बिभ्यति । बिभियात् । बिभीयात् । बिभेतु । बिभितात् । बिभीतात् । बिभिताम् । बिभीताम् । बिभ्यतु । अबिभेत् । अबिभिताम् । अबिभीताम् । अबिभयुः । अभैषीत् । भीह्रीत्यामि बिभयाञ्चकार । बिभाय । बिभ्यतुः । बिभयिथ । बिभेथ । भीयात् । भेता । भेष्यति । ह्रींक् लज्जायाम् ॥४॥ जिह्रेति । जिह्रीतः । संयोगादितीय् । जिह्रियति । जिह्रियात् । जिह्रेतु । अजिह्रेत् । अह्रैषीत् । जिह्रयाञ्चकार । जिह्राय । ह्रीयात् । ह्रेता । ह्रेष्यति । पॄंक् पालनपूरणयोः ॥५५॥

२९४ पॄभ्रूमाहाङामिः ॥४।१।५८॥ पॄभ्रूमाहाङ् इत्येतेषां शिति द्वित्वे सति पूर्वस्येकारः स्यात् । पिपर्ति । पिपृतः । पिप्रति । पिपृयात् । पिपर्तु । अपिपः । अपार्षीत् । पपार । पप्रतुः । पपर्थ । प्रियात् । पर्ता । परिष्यति । केचित्तु पॄ पालनपूरणयोरिति दीर्घान्तं पठन्ति । तन्मतसंग्रहार्थं पॄश्च ऋश्चेति विग्रहः । अतएव च बहुवचनम् । तथा च ।

२९५ ओष्ठ्यादुर ॥४।४।११८॥ धातोरोष्ठ्याद् वर्णात्परस्य ऋकारस्य किङिति प्रत्यये परे उरादेशः स्यात् । इरोऽपवादः । भ्वादेर्नामिन इति दीर्घे पिपूर्तः । पिपुरति । पिपूर्यात् । पिपर्तु । पिपूर्तात् । पिपूर्हि । अपिपः । अपिपूर्ताम् । धातो-

रिति विशेषणादिह न । समीर्णम् । क्ङितीत्येव । निपरणम् । केचित्तु उपान्त्यस्यापि ऋत उरमिच्छन्ति । पृण्मृणोर्यङ्लुप् तस् 'अहन्पञ्चम' इत्यादिना दीर्घत्वम् । परिपूर्णः । मरिमूर्णः । अधिशेषनिर्देशात्तदपि संगृहीतम् । अपारीत् । अपारिष्टाम् । पपार ।

२९६ ऋः शॄदॄपॄः ॥४।४।२०॥ शॄदॄपॄ इत्येतेषां धातूनां परोक्षायां परत ऋकारोऽन्तादेशो वा स्यात् । पप्रतुः । पक्षे स्कॄच्छृतोऽकि परोक्षायामिति गुणे पपरतुः । पप्रुः। पपरुः । पूर्यात् । परिता । परीता । परिष्यति । परीष्यति । ऋंक् गतौ । ॥६॥ ऋ ऋ इति द्वित्वे पूर्वस्येत्वे द्वितीयस्य गुणे पूर्वस्येयादेशे च इर्यर्ति । इर्यृतः । इर्य्यति । इर्यृयात् । इर्यर्तु । इर्यृतात् । इर्यृहि । इयराणि । ऐयः । ऐयृताम् । ऐयरुः । सर्त्यर्तेर्वेर्त्यङि आरत् । पक्षे आर्षीत् । आर । आरतुः । आरुः । ऋदृन्येऽद इतीटि आरिथ । अर्यात् । अर्ता । अरिष्यति ।

॥ इति परस्मैपदिनः ॥

ओहाङ्क् गतौ ॥१॥ एषामीर्ज्यञ्जनेऽद इतीत्वे जिहीते । श्नश्चेत्यालुकि जिहाते । जिहते । जिहीत । जिहीताम् । अजिहीत । अहास्त । जहे । हासीष्ट । हाता । हास्यते । अहास्यत । मांङ्क् मानशब्दयोः ॥ २ ॥ मिमीते । मिमाते । मिमते । मिमीत । मिमीताम् । अमिमीत । अमास्त । ममे । मासीष्ट । माता । मास्यते ।

॥ इत्यात्मनेपदिनौ ॥

डुदांक् दाने ॥१॥ ददाति । प्रणिददाति । दत्तः । ददति । दत्ते । दद्यात् । ददीत । ददातु । दत्तात ।

२९७ हौ दः ॥४।१।३१॥ दासंज्ञकस्य धातोर्हौ परेऽन्तस्यैकारादेशः स्यात् न चायं द्विः। देहि । न च द्विरिति वचनात् कृतमपि द्वित्वं निवर्तते । तेन कल्लुपि अपि देहीति भवति । हाविति व्यक्तिनिर्देशादिह न । दत्तात् । दत्ताम् । अददात् ।

अदत्त । ददौ । ददिथ । ददाथ । ददे । अदात् । अदित । देयात् । दासीष्ट । दाता । दास्यति । दास्यते । डुधांक् धारणे च ॥२४ चाद्दाने । दधाति । प्रणिदधाति ।

२९८ धागस्तथोश्च ॥२।१।७८॥ दधातेश्चतुर्थान्तस्य दकारादेरादेर्दकारस्य तथयोश्च परयोश्चतुर्थः स्यात् । धत्तः । अत्रासद्विधित्वाद् वचनसामर्थ्याद्धातो लोपस्य स्वरादेशत्वेऽपि स्थानिवद्भावो न। गकारः किम्। धयतेर्मा भूत्। दधातेरपि यङ्लुबन्तस्य मा भूत्—

'तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च ॥
एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि' ॥

केचित्तु यङ्लुप्यपीच्छन्ति । चतुर्थान्तस्येत्येव । दधासि । धत्ते । दध्यात् । दधीत॥ दधातु । धत्तात् । धेहि । अदधात् । अधत्त । अधात् । अधित । धेयात् । धासीष्ट। धाता । धास्यति । धास्यते । डुडुभृंक् पोषणे च ॥३॥ द्वित्वे पूर्वभृमाहाङामिरितीत्वे बिभर्ति । बिभृतः । बिभ्रति । बिभृते । बिभृयात् । बिभ्रीत । अबिभः। अबिभृताम् । अबिभरुः । अबिभृत । अभार्षीत् । अभृत । 'भीह्रीभृ' इत्यामि बिभराञ्चकार । बभार । बभ्रे । भ्रियात् । भृषीष्ट । भर्ता । भरिष्यति । भरिष्यते । णिजृंकी शौचे च ॥ चात्पोषणे ॥४॥

२९९ निजां शित्येत् ॥४।१।५७॥ निजिविजिविषां त्रयाणां शिति द्वित्वे सति पूर्वस्यैकारादेशः स्यात् । निजामिति बहुवचनेन निजिविजिविषस्त्रय एवादादिपर्यन्तपठिता गृह्यन्ते। नेनेक्ति । नेनिक्तः । नेनिज्रति । नेनिक्ते । नेनिज्यात् । नेनिजीत । नेनेक्तु । नेनिक्ताम् । नेनिग्धि ।

३०० व्यञ्जनोपान्त्यस्य शिति स्वरे ॥४।३।१४॥ कृतद्वित्वस्य धातोरुपान्त्यस्य नामिनः स्वरादौ शिति प्रत्यये परे गुणो न स्यात् । नेनिजानि । नेनिक्ताम् । नेनिजै । अनेनेक्-ग्। अनेनिक्त। ऋदित्वाद्वाङि अनिजत्। पक्षे अनैक्षीत्। अनिक्त। अनिक्षाताम्। निनेज । निनिजे । निज्यात् । निक्षीष्ट । नेक्ता । नेक्ष्यति । नेक्ष्यते। एवं विजृंकी पृथग्भावे ॥५॥ विष्लृंकी व्याप्तौ ॥६॥ वेवेष्टि । वेविष्टे । वेविष्यात्। वेविषीत । वेवेष्टु । वेविष्टाम् । अवेवेट्-ड् । अवेविष्ट । लृदित्त्वादङ्।

अविषत् । 'हशिट' इति सकि अविक्षत । विवेष । विविषे । विष्यात् । विक्षीष्ट । वेष्टा । वेक्ष्यति । वेक्ष्यते ।

॥ इत्युभयपदिनः ॥

॥ इत्यदादयः कितो धातवः ॥

॥ अथ दिवादयः ॥

दिवूच् क्रीडाजयेच्छापणिद्युतिस्तुतिगतिषु ॥१॥

३०१ दिवादेः श्यः॥३।४।७२॥ दिवादेर्गणात् कर्तृविहिते शिति श्यः प्रत्ययः स्यात् । शकारः शित्कार्यार्थः । श्यादयः शवोऽपवादाः॥ भ्वादेरिति दीर्घे दीव्यति । दीव्येत् । दीव्यतु । अदीव्यत् । अदेवीत् । दिदेव । दिदिवतुः । दीव्यात् । देविता । देविष्यति । अदेविष्यत् । जूष् झूषच् जरसि ॥३॥ ऋतां क्ङितीर् । जीर्यति । 'ऋदिच्छि' इत्यङि, ऋवर्णदृशोऽङीति गुणे अजरत् । पक्षे अजारीत् । जजार । ऋच्छृतोऽकीति, जॄभ्रमेति वा एत्वे च जेरतुः । जजरतुः । जीर्यात् । जरिता । जरीता । जरिष्यति । जरीष्यति । शोंच् तक्षणे ॥४॥

३०२ ओतः श्ये ॥४।२।१०३॥ धातोरोकारस्य श्ये परे लुक् स्यात् । श्यति । श्येत् । श्यतु । अश्यत् । अशात् । अशासीत् । शशौ । शायात् । शाता । शास्यति । अशास्यत् । दोंच् छोंच् छेदने ॥६॥ षोंच् अन्तकर्मणि ॥७॥ द्यति । छ्यति । स्यति । व्रीडच् लज्जायाम् ॥८॥ व्रीड्यति । नृतैच् नर्तने ॥९॥ नृत्यति । अनर्तीत् । ननर्त । नृत्यात् । नर्तिता ।

३०३ कृतचृतनृतछृदतृदोऽसिचः सादेर्वा ॥४।४।५०॥ एभ्यः परस्य सिज्वर्जितस्य सकारादेः स्ताद्यशितः प्रत्ययस्यादिरिड्वा स्यात् । प्राप्ते विभाषा । नर्तिष्यति । नर्त्स्यति । अनर्तिष्यत् । अनर्त्स्यत् । कुथच् पूतीभावे ॥१०॥ कुथ्यति । अकोथीत् । चुकोथ । कुथ्यात् । कोथिता । पुथच् हिंसायाम् ॥११॥ गुधच् परिवेष्टने ॥१२॥ राधंच् वृद्धौ ॥१३॥ राध्यति । वृद्धेरन्यत्र राध्नोति । व्यधंच् ताडने ॥१४॥

३०४ ज्याव्यधः क्ङिति ॥४।१।८१॥ जिनातेर्विध्यतेश्च सस्वरान्तस्था किति ङिति च प्रत्यये परे य्वृत् स्यात्। विध्यति। अव्यात्सीत्। ज्याव्यधीति पूर्वस्येत्वे विव्याध। य्वृति द्वित्वे विविधतुः। विव्यधिथ। विव्यद्ध। विध्यात्। व्यद्धा। व्यत्स्यति। क्षिपंच् प्रेरणे ॥१५॥ क्षिप्यति। चिक्षेप। क्षेप्ता। पुष्पच् विकसने ॥१६॥ पुष्प्यति। अपुष्पीत्। तिम तीमच् ष्टिम ष्टीमच् आर्द्रीभावे ॥२०॥ षिवूच् गतौ ॥२१॥ सीव्यति। असेवीत्। सिषेव। असोऽसिवूसहस्सटाम्। परिषीव्यति। अट्यपि। पर्यषीव्यत्। द्वित्वेऽपि परिषिषेव। श्रिवूच् गतिशोषणयोः ॥२२॥ श्रीव्यति। शिश्रेव। ष्ठिवू ष्लिवूच् निरसने ॥२४॥ ष्ठीव्यति। तिर्वा ष्ठिव इति तौ तिष्ठेव। क्षीव्यति। इषच् गतौ ॥२५॥ इष्यति। इयेष। सहलुभेच्छेत्यत्र इच्छेति निर्देशादिषत् इच्छायामित्यस्य ग्रहणम्। तेनास्य नित्यमेवेट्। एषिता। ऊदिदयमित्येके। तन्मते क्त्वायां क्तक्तवत्वोश्च इट्वा। एषित्वा। इष्टः। इष्टवान्। ष्णासूच् निरसने ॥२६॥ स्नस्यति। क्रमूच् ह्वृतिदीप्त्योः॥२७॥ क्रस्यति। अक्रासीत्। अक्रसीत्। त्रसैच् भये ॥२८॥ भ्रासभ्लासेति वा इये त्रस्यति त्रसति। जू भ्रमेति वा एत्वे त्रेसतुः। तत्रसतुः। व्युसच् दाहे ॥२८॥ व्युस्यति। अव्योसीत्। वुव्योस। षान्तोऽयमित्येके। षह षुहच् शक्तौ ॥३०॥ सह्यति। सुह्यति। ससाह। सेहतुः। सुषोह। सुषुहतुः। पुषंच् पुष्टौ ॥३१॥ पुष्यति। लृदिद्द्युतादिपुष्यादेरित्यङ्। अपुषत्। पुपोष। पुष्यात्। पोष्टा। पोक्ष्यति। उचच् समवाये ॥३२॥ उच्यति। औचत्। लुटच् विलोटने ॥ ३३ ॥ लुट्यति। अलुटत्। ष्विदांच् गात्रप्रक्षरणे ॥३४॥ स्विद्यति। अस्विदत्। क्लिदौच् आर्द्रीभावे ॥ ३५ ॥ क्लिद्यति। ञिमिदाच् स्नेहने ॥ ३६ ॥

३०५ मिदः इये ॥४।३।५॥ मिदेरुपान्त्यस्य इये परे गुणः स्यात्। मेद्यति। अमिदत्। ञिक्ष्विदाच् मोचने च ॥३७॥ चात्स्नेहने। क्ष्विद्यति। अक्ष्विदत्। क्षुधंच् बुभुक्षायाम् ॥३८॥ क्षुध्यति। अक्षुधत्। क्षोद्धा। शुधंच् शौचे ॥३९॥ क्रुधंच् कोपे ॥ ४० ॥ क्रुध्यति। अक्रुध्यत्। षिधूंच् संराद्धौ ॥ ४१ ॥ सिध्यति। असिधत्। सिषेध। ऋधूच् वृद्धौ ॥ ४२ ॥ ऋध्यति। आर्धत्। आनर्ध। अर्धिता। गृधूच् अभिकांक्षायाम् ॥४३॥ गृध्यति। अगृधत्। जगर्ध। रधौच् हिंसासंराद्धयोः ॥४४॥ रध्यति। अरधत्।

३०६ रध इटि तु परोक्षायामेव ॥४।४।१०२॥ रध्यतेः स्वरात् परः

स्वरादौ प्रत्यये परेऽन्तो नः स्यात् इटि तु-इडादौ तु प्रत्यये परोक्षायामेव। ररन्ध। ररन्धतुः। ररन्धिथ। ररन्धिव। ररन्धिम। परोक्षायामेवेति किम्। रधिता औदित्त्वादिड्वा। रद्धा। रधिष्यति। रत्स्यति। एवकारो विपरीतनियमनिरासार्थः। तेनेह नियमो न भवति। ररन्ध। तृपौच् प्रीतौ ॥४५॥ तृप्यति। 'स्पृशमृशकृशतृपदृपो वा', सिचि, स्पृशादिसृपो वा इति वा अकारे वृद्धौ च अत्राप्सीत् अताप्सीत्। पक्षे औदित्त्वादिटि अतर्पीत्। पक्षेऽङि अतृपत्। ततर्प। दृपौच् हर्षमोहनयोः॥४६॥ कुपच् क्रोधे ॥४७॥ गुपच् व्याकुलत्वे ॥४८॥ गुप रुप लुपच् विमोहने ॥५१॥ डिपच् क्षेपे ॥५२॥ ष्टुपच् समुच्छ्राये ॥५३॥ लुभच् गार्द्ध्ये ॥५४॥ क्षुभच् सञ्चलने ॥५५॥ णभ तुभच् हिंसायाम् ॥५७॥ नशौच् अदर्शने ॥५८॥ नश्यति।

३०७ **नशः शः** ॥ २।३।७८ ॥ अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात् परस्य नशेः शकारान्तस्य संबंधिनो नकारस्य णः स्यात्। प्रणश्यति। परिणश्यति। अन्तर्णश्यति। श इति किम्। प्रनष्टः। नशेरणोपदेशात् अदुरुपसर्गान्तेत्यनेनासिद्धे विध्यर्थमिदम्।

३०८ **नशोर्नेश् वाङि** ॥४।३।१०२॥ नशेरङि परे नेश् इत्ययमादेशो वा स्यात्। अनेशत्। अनशत्। अनेशताम्। अनशताम्। अनेशन्। अनशन्। अनेशम्। अनशम्। अङीति किम्। नश्यति। ननाश। नेशतुः। नश्यात्।

३०९ **नशो धुटि** ॥४।४।११०॥ नश्यतेः स्वरात् परो धुडादौ प्रत्यये परे नोऽन्तः स्यात्। नंष्टा। नशिता। नङ्क्ष्यति। नशिष्यति। अनङ्क्ष्यत्। अनशिष्यत्। कुशच् श्लेषणे ॥५९॥ कुश्यति। अकुशत्। भृशू भ्रंशूच् अधःपतने ॥६१॥ भृश्यति। भ्रश्यति। वृशच् वरणे ॥६२॥ कृशच् तनुत्वे ॥६३॥ शुषंच् शोषणे ॥६४॥ दुषंच् वैकृत्ये ॥६५॥ श्लिषंच् आलिङ्गने ॥६६॥ श्लिष्यति।

३१० **श्लिषः** ॥३।४।५६॥ श्लिषो धातोरनिटोऽद्यतन्यां सक् प्रत्ययः स्यात्। आश्लिक्षत् कन्यां देवदत्तः। पुष्यादित्वादङि प्राप्ते वचनम्। 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इत्यङ एव बाधो न च्विचः। आश्लेषि कन्या देवदत्तेन। अनिट इत्येव। श्लिषू दाहे इत्यस्मात् सेटो मा भूत्। अश्लेषीत्। अधाक्षीदित्यर्थः।

३११ **नासत्त्वाश्लेषे** ॥३।४।८७॥ श्लिषो धातोरप्राण्याश्लेषे वर्तमानात् सक् प्रत्ययो न स्यात्। उपाश्लिषज्जतु च काष्ठं च। समाश्लिषद् गुरुकुलम्। पृथग्योगात् पूर्वेणापि प्राप्तः प्रतिषिध्यते। व्यत्यश्लिक्षन्त काष्ठानि। असत्त्वाश्लेष इति किम्। व्यत्यश्लिक्षन्त मिथुनानि। प्लुष्यति। अप्लुषत्। अनूदिदयमित्येके। त्रितृषच् पिपासायाम् ॥६८॥ तृष्यति। अतृषत्। तुषं हृषच् तुष्टौ ॥७०॥ रुषंच् रोषे ॥७१॥ प्युष् प्युस् पुसच् विभागे ॥७४॥ बिसच् प्रेरणे ॥७५॥ कुसच् श्लेषणे ॥७६॥ अमूच् क्षेपणे ॥७७॥ अस्यति। पुष्यादित्वादङि 'श्वयत्यस्' इत्यस्यादेशे च आस्थत्। आस। असिता। यमूच् प्रयत्ने ॥७८॥ यस्यति। यसति। संयस्यति। संयसति। अयसत्। जमूच् मोक्षणे ॥७९॥ हिंसार्थोऽप्ययमित्येके। तमू दमूच् उपक्षये ॥८१॥ वमूच् स्तम्भे ॥८२॥ वुसच् उत्सर्गे ॥८२॥ मुसच् खण्डने ॥८४॥ मसैच् परिणामे ॥८५॥ शमू दमूच् उपशमे ॥८७॥

३१२ **शमूसप्तकस्य श्ये** ॥४।२।१११॥ अत्यादाविति निवृत्तम्। शमादीनां मदैच्पर्यन्तानां सप्तानां श्ये परे दीर्घः स्यात्। शाम्यति। दाम्यति। प्रणिशाम्यति। शमूसप्तकस्येति किम्। अस्यति। श्य इति किम्। भ्रमति। अशमत्। अदमत्। तमूच् कांक्षायाम् ॥८८॥ श्रमूच् खेदतपसोः ॥८९॥ भ्रमूच् अनवस्थाने ॥९०॥ भ्राम्यति। भ्रामति। भ्रेमतुः। बभ्रमतुः। क्षमौच् सहने ॥९१॥ क्षाम्यति। औदित्त्वादिड्वा। चक्षमिथ। चक्षन्थ। चक्षमिव। चक्षण्व। चक्षमिम। चक्षण्म। क्षमिता। क्षन्ता। क्षमिष्यति। क्षंस्यति। मदैच् हर्षे ॥९२॥ क्लमूच् ग्लानौ ॥९३॥ भ्रासम्लासेति वा श्ये ष्ठिवुक्लम्विति दीर्घे च क्लाम्यति। क्लामति। अक्लमीत्। क्लमिता। इति शम्सप्तकम्। मुहौच् वैचित्ये ॥९४॥ मुह्यति। अमुहत्। इङ्किल्पे मुहदुहस्नुहेति वैकल्पिके घत्वे ढत्वे च मुमोहिथ। मुमोग्ध। मुमोढ। मोहिता। मोग्धा। मोढा। मोहिष्यति। मोक्ष्यति। द्रुहौच् जिघांसायाम् ॥९५॥ द्रुह्यति। अद्रुहत्। दुद्रोहिथ। दुद्रोग्ध। दुद्रोढ। द्रोहिता। द्रोग्धा। द्रोढा। द्रोहिष्यति। ध्रोक्ष्यति। ष्णुहौच् उद्गिरणे ॥९६॥ स्नुह्यति। अस्नुहत्। स्नोहिता। स्नोग्धा। स्नोढा। स्नोक्ष्यति। स्नोहिष्यति। एवं ष्णिहौच् प्रीतौ ॥९७॥ वृत् पुषादिः॥

॥ इति परस्मैपदिनः ॥

षूङ्ङैच् प्राणिप्रसवे ॥१॥ सूयते । असविष्ट । असोष्ट । सुषुवे । औदित्त्वादिड्विकल्पं बाधित्वा उवर्णादितीण्निषेधे प्राप्ते परत्वात् स्कृसृत्रित्यादिना नित्यमिट् । सुषुविषे । सुषुविवहे । सविता । सोता । सविष्यते । सोष्यते । दूङ्च् परितापे ॥२॥ दीङ्च् क्षये ॥३॥ दीयते ।

३१३ यबङ्क्ङिति ॥४।२।७॥ दीङो यपि अक्ङिति च प्रत्यये विषयभूते आकारोऽन्तादेशः स्यात् । अदास्त । विषयसप्तमीनिर्देशात् पूर्वमेवात्वे सति ईयदुपादानः उपादायो वर्तते इत्यत्र आकारान्तलक्षणोऽनः घञ् च भवति । यबक्ङितीति किम् । दीनः । उपदीयते । सानुबन्यनिर्देशाद् यङ्लुपि न ।

३१४ दीय् दीङः क्ङिति स्वरे ॥ ४।३।९३ ॥ दीङः क्ङित्यशिति स्वरे परे दीयादेशः स्यात् । परोक्षायामिति सिद्धे क्ङिति स्वरे इत्युत्तरार्थम् । दिदीये । दिदीयाते । दिदीयिरे । दिदीयिध्वे । दिदीयिढ्वे । दीङो ङित्करणं यङ्लुबनिट्त्यर्थम् । दाता । दास्यते । धीङ्च् अनादरे ॥५४॥ धीयते । अधेष्ट । दिध्ये । धेता । मींङ्च् हिंसायाम् ॥५॥ मीयते । रींङ्च् श्रवणे ॥५॥ लींङ्च् श्लेषणे ॥७॥

३१५ लीङ्लिनोर्वा ॥ ४।२।९ ॥ लीयतेर्लिनातेश्च यपि खलचल्वर्जिते क्ङिति प्रत्यये च विषयभूते आकारोऽन्तादेशो वा स्यात् । अलास्त । अलेष्ट । लिल्ये । लाता । लेता । लास्यते । लेष्यते । अखलचलीत्येव । ईषद्विलयः विलयः विलयो वर्तते । यबक्ङितीत्येव । लीनः । लीयते । ङिल्लुप्तिनिर्देशाद् यङ्लुपि न । ली द्रवीकरण इति यौजादिकस्य च न । डीङ्च् गतौ ॥८॥ डीयते । डिड्ये । व्रींङ्च् वरणे ॥९॥ व्रीयते । अव्रेष्ट । विव्रिये । वृत्स्वादिः । तत्फलं तु क्त्योस्तस्य नत्वम् । पींङ्च् पाने ॥१०॥ पीयते । ईङ्च् गतौ ॥११॥ ईयते । अयाश्चक्रे । प्रींङ्च् प्रीतौ ॥१२॥ प्रीयते । युजिंच् समाधौ ॥१४॥ युज्यते । अयुक्त । सृजिंच् विसर्गे ॥१४॥ सृज्यते । असृष्ट । असृक्षाताम् । सृक्षीष्ट । ससृजे । ससृजिषे । स्रष्टा । स्रक्ष्यते । वृतूचि वरणे ॥१५॥ वृत्यते । अवर्तिष्ट । पदिंच् गतौ ॥१६॥ पद्यते । प्रणिपद्यते ।

३१६ ञिच् ते पदस्तलुक् च ॥ ३।४।६६ ॥ पदिंच् गताविति स्मादातोः कर्तर्यद्यतन्यास्ते परे ञिच् प्रत्ययः स्यात् निमित्तभूतस्य तकारस्य च लुक् । पदेरात्मनेपदित्वात् त इति आत्मनेपदप्रथमत्रिकैकवचनं तकारो गृह्यते न परस्मैपदम-

ध्यमत्रिकबहुवचनम् । एवमुत्तरत्र । अकारो 'ञ्णिती'ति विशेषणार्थः । चकारो 'न कर्मणा ञिच्' इत्यत्र विशेषणार्थः । अपादि । अपत्साताम् । अपत्सत । पेदे । पत्सीष्ट । पत्ता । पत्स्यते । अपत्स्यत । विदिंच् सत्तायाम् ॥२७॥ विद्यते । अवित्त । विविदे । खिदिंच् दैन्ये ॥२८॥ युधिंच् संप्रहारे ॥२९॥ युध्यते । अयुद्ध । अयुत्साताम् । युयुधे । युत्सीष्ट । योद्धा । योत्स्यते । अनो रुधिंच् कामे ॥३०॥ अनुरुध्यते । बुधिं मनिंच् ज्ञाने ॥३२॥ बुध्यते । दीपजनेति वा ञिच् । अबोधि । अबुद्ध । अभुत्साताम् । बुबुधे । भुत्सीष्ट । बोद्धा । भोत्स्यते । मन्यते । अमंस्त । अमंसाताम् । मेने । मंसीष्ट । मन्ता । मंस्यते । अनिच् माणने ॥३३॥ अन्यते । आनिष्ट । आने । अनिता । जनैचि प्रादुर्भावे ॥३४॥


३१७ **जा ज्ञाजनोऽत्यादौ** ॥४।२।१०४॥ ज्ञा जन् इत्येतयोः शिति प्रत्यये परे जा इत्ययमादेशः स्यात् अत्यादौ–तिवादिश्चेदनन्तरो न भवति । जायते । शितीत्येव । जन्यते । अत्यादाविति किम् । यङ्लुपि जञ्जन्ति । दीपजनेति ञिचि ।

३१८ **न जनवधः** ॥ ४।३।५४ ॥ जनवध्योः कृति ञ्णिति औ परे वृद्धिर्न स्यात् । अजनि । अजनिष्ट । वधिरत्र वध बन्धने इत्ययं गृह्यते यस्य वीभत्सत इति वैरूप्य एव सन्निध्यते अन्यत्र वधते । भक्षकश्चेन्नास्ति वधकोऽपि न विद्यते । हन्यादेशस्य तु वधेरदन्तत्वाद् वृद्धेरप्रसङ्ग एव । अन्ये त्वगणपठितं वधिं हिंसार्थं 'यत्र शालमतीकाशः कर्णोऽवध्यत संयुगे' इत्यादिदर्शनान्मन्यन्ते । प्रत्युदाहरन्ति च ववाध । गमहनेत्युपान्त्यलुकि जज्ञे । जज्ञाते । जज्ञिरे । जज्ञिषे । जनिषीष्ट । जनिता । जनिष्यते । अजनिष्यत । दीपैचि दीप्तौ ॥३५॥ दीप्यते । अदीपि । अदीपिष्ट । दिदीपे । तपिंच् ऐश्वर्ये वा ॥३७॥ तप्यते । अतप्त । तेपे । तप्सीष्ट तप्ता । तप्स्यते । पुरैचि आप्यायने ॥३६॥ पूर्यते । अपूरि । अपूरिष्ट । पुपूरे । पूरिषीष्ट । पूरिता । पूरिष्यते । घूरैङ् ज्वरैचि जरायाम् ॥३९॥ धूरैङ् गूरैचि गतौ ॥४१॥ शूरैचि स्तम्भे ॥४२॥ तूरैचि त्वरायाम् ॥४३२ घूरादयो हिंसायां च । चूरैचि दाहे ॥४४॥ क्लिशिच् उपतापे ॥४५॥ क्लिश्यते । अक्लेशिष्ट । चिक्लिशे । क्लेशिता । क्लेशिष्यते । लिशिच् अल्पत्वे ॥४६॥ काशिच् दीप्तौ ॥४७॥ काश्यते । चकाशे । वाशिच् शब्दे ॥४८॥

॥ इत्यात्मनेपदिनः ॥

शकींच् शर्षणे ॥१॥ शक्यति । शक्यते । अशाक्षीत् । अशक्त । शशाक । शेके । शुचृगैच् पूतीभावे ॥२॥ शुच्यति । शुच्यते । अशोचीत् । अशुचत् । अशोचिष्ट । शुशोच । शुशुचे । रञ्जींच् रागे ॥३॥ रज्यति । रज्यते । शपींच् आक्रोशे ॥४॥ मृषीच् तितिक्षायाम् ॥५॥ मृष्यति । मृष्यते । अमर्षीत् । अमर्षिष्ट । ममर्ष । ममृषे । णहींच् बन्धने ॥६॥ अनात्सीत् । अनद्ध । ननाह । नेहे । नह्यात् । नत्सीष्ट । नद्धा । नत्स्यति । नत्स्यते । इत्युभयपदिनः ।

॥ इति दिवादयः ॥



॥ अथ स्वादयः ॥

षुंग्ट् अभिषवे ॥१॥ अभिषवः स्नपनं पीडनं स्नानं सुरासंधानं च ।

३१९ **स्वादेः [1]नुः** ॥ ३।४।७५ ॥ स्वादेर्गणात् कर्तरि विहिते शिति [1]नुः प्रत्ययः स्यात् । शकारः शित्कार्यार्थः । उश्नोरिति गुणे सुनोति । सुनुतः । सुन्वन्ति । सुनुते ।

३२० **वम्यविति वा** ॥४।२।८७॥ प्रत्ययादिति ओरिति च (अनुवर्त्तमानम्) पञ्चम्यन्तमपि व्यधिकरणषष्ठ्यन्ततया विपरिणम्यते । असंयोगात् परो य उकारस्तस्य प्रत्ययसंबंधिनो लुग् वा स्यात् वकारादौ मकारादौ चाविति प्रत्यये । सुन्वः । सुनुवः । सुन्मः । सुनुमः । सुन्वहे । सुनुवहे । सुन्महे । सुनुमहे । अवितीति किम् । सुनोमि । ओरित्येव । क्रीणीवः । प्रत्ययस्येत्येव । युवः । युमः । असंयोगादित्येव । तक्ष्णुवः । तक्ष्णुमः । असंयोगादित्योर्विशेषणादिहापि न । आप्नुवः । आप्नुमः । सुनुयात् । सुन्वीत । सुनोतु । सुनुतात् । असंयोगादिति हेर्लुक् । सुनु । सुनुतात् । सुनवानि । सुनुताम् । सुनवै । असुनोत् । असुनुत । धृग्सुस्तोरितीटि असावीत् । सुषाव । सुषुवे । सोता । सोष्यति । सोष्यते । उपसर्गात्सुगिति षत्वे अभिषुणोति । अभ्यषुणोत् ।

३२१ **सुगः स्यसनि** ॥२।३।६२॥ सुनोतेः संबंधिनः सकारस्य स्ये सनि च प्रत्यये परे षो न स्यात् । अभिसोष्यति । परिसोष्यति । अभ्यसोष्यत् । पर्यसोष्यत् । सनि सुसूषतेः किपि सुसूः । सुसूषतीति तु नोदाह्रियते । णिस्तोरेव

षणीति नियमेनैव व्यावर्तितत्वात् । अभिसुसूषतीत्यपि नोदाह्रियते । अद्वित्वे इति व्यावृत्त्यैव निवर्तितत्वात् । स्यसनीति किम् । सुषाव । अभिषुणोति । षिंग्ट् बन्धने ॥२॥ सिनोति । सिनुते । शिंग्ट् निशातने ॥३॥ शिनोति । शिनुते । शिशाय । शिश्ये । शेता । डुमिंग्ट् प्रक्षेपणे ॥४॥ मिनोति । मिनुते ।

३२२ **मिग्मीगोऽखलचलि** ॥ ४।२।८ ॥ मिनोतिमीनात्योर्यपि खलचल्वर्जितेऽक्ङिति च प्रत्यये विषयभूत आकारान्तादेशः स्यात् । अमासीत् । अमास्त । ममौ । मिम्ये । मीयात् । मासीष्ट । माता । मास्यति । मास्यते । अखलचलीति किम् । ईषन्निमयः । मयः । निमयः । सानुबन्धनिर्देशो यङ्लुप्निवृत्त्यर्थः । मिग्मीग इति किम् । मीङ्च् हिंसायामिति दैवादिकस्य मा भूत् । अस्याप्यात्वमिच्छन्त्यन्ये । चिंग्ट् चयने ॥५॥ चिनोति । चिनुते । अचैषीत् । अचेष्ट ।


३२३ **चेः किर्वा** ॥४।१।३६॥ चिनोतेः सन्परोक्षयोर्द्वित्वे सति पूर्वस्मात् परस्य किरादेशो वा स्यात् । चिकाय । चिचाय । चिक्ये । चिच्ये । चीयात् । चेषीष्ट । चेता । चेष्यति । चेष्यते । धूग्क् कंपने ॥६॥ धूनोति । धूनुते । अधावीत् । अधविष्ट । अधोष्ट । दुधाव । दुधुवे । धूयात् । धविषीष्ट । धोषीष्ट । धोता । धविता । स्तृंग्ट् आच्छादने ॥७॥ स्तृणोति । स्तृणुते । अस्तार्षीत् ।

३२४ **संयोगादतः** ॥४।४।३७॥ धातोः संयोगात् परो य ऋकारस्तदन्ताद्धातोः परयोरात्मनेपदविषययोः सिजाशिषोरादिरिड्वा स्यात् । अस्तरिष्ट । अस्तृत । संयोगादिति किम् । अकृत । धातोरिति विशेषणादिह न भवति । मा निष्कृत । 'स्कृच्छृतोऽकि परोक्षायामित्यत्र स्कृगो ग्रहणात् स्सट्संयोगो न गृह्यते' तेनेह न समस्कृत । तस्तार । तस्तरतुः । तस्तरे । क्यङाशीर्ये–इति गुणे स्तर्यात् । स्तरिषीष्ट । स्तृषीष्ट । कृंग्ट् हिंसायाम् ॥८॥ कृणोति । कृणुते । अकार्षीत् । अकृत । चकार । चकर्थ । चक्रे । चकृढ्वे । क्रियात् । कृषीष्ट । वृग्ट् वरणे ॥९॥ वृणोति । वृणुते । अवारीत् ।

३२५ **इट् सिजाशिषोरात्मने** ॥४।४।३६॥ वृतः परयोरात्मनेपदविषययोः सिजाशिषोरादिरिड् वा स्यात् । अवरिष्ट । अवरीष्ट । अवृत । ववार । ऋवृत्व्येऽद इति नित्यमिट् । ववरिथ । वव्रे ।

३२६ ऋवर्णश्रयूर्णुगः कितः ॥४।४।५७॥ ऋवर्णान्ताद्धातोः श्रयतेरूर्णुगश्चैकस्वराद् विहितस्य कितः प्रत्ययस्यादिरिट् न स्यात् । उवर्णादित्यनेनैव सिद्धे ऊर्णुग्रहणमनेकस्वरार्थम्। गिच्चाद् यङ्लुपि न । वव्रृषे । कित इति किम् । वरिता । वरीता । विहितविशेषणात् तीर्णः पूर्त इत्यत्र कृतेऽपीरुरादेशे निषेधो भवति । त्रियात् । वृषीष्ट । वरिषीष्ट । वरीषीष्ट । वरिष्यति । वरीष्यति । वरिष्यते । वरीष्यते ।

॥ इत्युभयपदिनः ॥



हिंट् गतिवृद्धयोः ॥१॥ हिनोति । अदुरुपसर्गेति णत्वे प्रहिणोति । अहैषीत् । अङे हिहनो हो घ इति घत्वे जिघाय। हीयात्। हेता। हेष्यति। श्रुंट् श्रवणे ॥२॥ श्रौतीत्यादिना श्रृ आदेशः । शृणोति । अश्रौषीत् । शुश्राव । शुश्रुवतुः । शुश्रोथ । टुदुंट् उपतापे ॥३॥ दुनोति । पृंट् प्रीतौ ॥३॥ पृणोति । स्मृंट् पालने च । चात् प्रीतौ । स्मृणोति । सस्मार । स्मृंट् इत्येके । शक्लृंट् शक्तौ ॥४॥ शक्नोति । शक्नुतः। शक्नुवन्ति । असंयोगादिति हेर्न लुक् । शक्नुहि । लृदित्त्वादङ् । अशकत् । शशाक । तिक तिग पघट् हिंसायाम् ॥७॥ आद्यावास्कन्दनेऽपीत्येके । तिक्नोति । तिग्नोति । सन्नोति । ससाघ । सेघतुः । राधं साधंट् संसिद्धौ ॥९॥

३२७ अवित्परोक्षासेट्थवोरेः ॥४।१।२३॥ राधेर्हिंसायां वर्तमानस्य अविति परोक्षायां थवि च सेटि स्वरस्यैकारः स्यात् न चास्य द्विः। रेधतुः। रेधुः। रेधिथ । अविति किम् । ररास्ध । परोक्षासेट्थवोरिति किम्। राध्यते। वध इत्येव। आरराधतुः । आरराधिथ । राध्यात् । राद्धा । रात्स्यति । एवं साध्नोति । असात्सीत् । असाद्धाम् । अषोपदेशोऽयम् । षोपदेश इत्येके । ऋधूट् वृद्धौ ॥१०॥ ऋध्नोति । आर्धनोत् । आनर्ध । अर्धिता । आप्लृंट् व्याप्तौ ॥११॥ आप्नोति । आपत् । आप । आपतुः । तृपट् प्रीणने ॥१२॥ क्षुभ्नादित्वान्न णः । तृम्पोति । अतर्पीत् । तर्पिता । दम्भूट् दम्भे ॥१३॥ दभ्नोति । ददम्भ ।

३२८ दम्भः ॥ ४।१।२८ ॥ दम्भेरवित्परोक्षायां स्वरस्य एकारादेशः स्यात् तत्संनियोगे च नकारस्य लुग् न चायं द्विः । देभतुः । देभुः ।

३२९ थे वा ॥ ४।१।२९ ॥ दम्भेः स्वरस्य थे परे एकारादेशो वा स्यात्

तत्संनियोगे च नकारस्य लुग् न चायं द्विः। देभिथ। ददम्भिथ। अन्ये तु श्रन्थिग्रन्थिदम्भीनां नलोपे सति नित्यमेत्वमिच्छन्ति नलोपं त्वविति परोक्षायां नित्यमेव। तेन श्रेथतुः ग्रेथतुः देभतुः, नलोपाभावे तु शश्रन्थिथ ददम्भिथेत्येव भवति। अन्यस्त्वविति परोक्षासेट्थवोर्नित्यमेत्वमिच्छति नलोपं त्वविति परोक्षायामेव। तेन श्रेथतुः ग्रेथतुः देभतुः, नलोपाभावेऽपि श्रेन्थिथ ग्रेन्थिथ देम्भिथेत्येवेच्छति। दभ्यात्। दम्भिता। कुवुट् हिंसाकरणयोः ॥१४॥ श्नातीत्यादिना क्रादेशे कृणोति। अकृण्वीत्। चकृण्व। कृण्विता। धिवुट् गतौ ॥१५॥ श्नातीत्यादिना ध्यादेशे धिनोति। अधिन्वीत्। दिधिन्व। त्रिधृषाट् प्रागल्भ्ये ॥१६॥ धृष्णोति।

॥ इति परस्मैपदिनः ॥

ष्टिघिट् आस्कन्दने ॥१॥ स्तिघ्नुते। अशौटि व्याप्तौ ॥२॥ अश्नुते। औदित्त्वादिड्वा। आशिष्ट। आष्ट। आनशे। अशिषीष्ट। अक्षीष्ट। अशिता। अष्टा। अशिष्यते। अक्ष्यते।

॥ इत्यात्मनेपदिनौ ॥

॥ इति स्वादयः ॥

॥ अथ तुदादयः ॥

तुदींत् व्यथने ॥१॥

३३० तुदादेः शः ॥३।४।८१॥ तुदादेर्गणात् कर्तरि विहिते शिति शः प्रत्ययः स्यात्। शकारः शित्कार्यार्थः। तुदति। तुदते। अतौत्सीत्। अतुत्त। तुतोद। तुतुदे। तुद्यात्। तुत्सीष्ट। तोत्ता। तोत्स्यति। तोत्स्यते। भ्रस्जींत् पाके ॥ २ ॥

३३१ ग्रहब्रस्चभ्रस्जप्रच्छः ॥४।१।८४॥ ग्रहादीनां सस्वरान्तस्था क्ङिति प्रत्यये परे ग्वृत् स्यात्। भृज्जति। भृज्जते। व्यचिवशिव्रश्चिभ्रस्जिमृच्छीनां

पञ्चानां यङ्लुबन्तानां नेच्छन्त्यन्ये । अन्ये तु ' प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम् ' इति यङ्लुप्यपि मन्यन्ते । अपरे तु विचतिवृश्चतिभृज्जतिपृच्छतीनां नित्यं ग्वृत् ज्यादीनां त्वनित्यमिति मन्यन्ते तेनेदं सिद्धम् ' तस्यास्त्रयस्त्रीनपि विव्यधुः शरैः ' इति । अन्ये तु विविधुरित्येवाहुः॥

३३२ भृज्जो भर्ज् ॥४।४।६॥ भृज्जतेरशिति प्रत्यये भर्ज् इत्ययमादेशो वा स्यात् । लुप्तविङ्निर्देशो यङ्लुप्निवृत्त्यर्थः । अभार्क्षीत् । पक्षे संयोगस्यादाविति सलुकि अभ्राक्षीत् । अभर्ष्ट । अभ्रष्ट । बभर्ज । बभर्जतुः । बभर्जुः । बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जुः । बभर्जिथ । बभर्ष्ठ । बभ्रज्जिथ । बभ्रष्ठ । भृज्यात् । अत्र परत्वाद् भर्जादेशेऽपि स्थानिवद्भावेन पूर्वेण स्वरेण सह ग्वृत् । भर्क्षीष्ट । भ्रक्षीष्ट । भर्ष्टा । भ्रष्टा । भर्क्ष्यति । भ्रक्ष्यति । भर्क्ष्यते । भ्रक्ष्यते । क्षिपींत् प्रेरणे ॥३॥ क्षिपति । क्षिपते । अक्षैप्सीत् । अक्षिप्त । चिक्षेप । चिक्षिपे । क्षेप्ता । क्षेप्स्यति । क्षेप्स्यते । दिशींत् अतिसर्जने ॥४॥ दाने इत्यर्थः । दिशति । दिशते । अदिक्षत् । अदिक्षत । दिश्यात् । दिक्षीष्ट । कृषींत् विलेखने ॥५॥ कृषति । कृषते । स्पृशमृशेति वा सिचि स्पृशादिसृपो वेत्यदागमे अक्राक्षीत् । अकार्क्षीत् । अकृक्षत् । अकृष्ट । अकृक्षत । चकर्ष । चकृषे । कृष्यात् । कृक्षीष्ट । क्रष्टा । कर्ष्टा । क्रक्ष्यति । कर्क्ष्यति । क्रक्ष्यते । कर्क्ष्यते । मृच्लृंती मोक्षणे ॥६॥

३३३ मुचादितृफद्दफगुफशुभोभः शे ॥४।४।१००॥ एषां स्वरान्नोऽन्तः स्यात् शे परे । तृफादयः सनकारा अनकाराश्च तुदादिषु पठ्यन्ते । तत्र तृम्फादीनां शे नस्य लुक् इति तृफादीनां नविधानम् । विधानसामर्थ्यात्त्वस्य लोपो न भवतीति तृफति तृम्फतीत्यादि द्वैरूप्यं सिद्धम् । मुञ्चति । मुञ्चते । लृदित्त्वादमुचत् । अमुक्त । मोक्ता । मोक्ष्यति । मोक्ष्यते । षिचींत् क्षरणे ॥ ७ ॥ सिञ्चति । सिञ्चते । ह्वालिप्सिजित्यङि असिचत् । वात्मने । असिचत । असिक्त । अभ्यषिचत् । अभिषिषेच । विद्लृंती लाभे ॥८॥ विन्दति । विन्दते । अविदत् । अवित्त । लुप्लृंती छेदने ॥९॥ लुम्पति । लुम्पते । अलुपत् । अलुप्त । लिपींत् उपदेहे ॥१०॥ लिम्पति । लिम्पते । अलिपत् । अलिपत । अलिप्त ।

॥ इत्युभयपदिनः ॥

कृतैत् छेदने ॥१॥ कृन्तति । अकर्तीत् । कर्तिष्यति । कर्त्स्यति । खिदंत् परिघाते ॥२॥ खिन्दति । अखैत्सीत् । पिशत् अवयवे ॥३॥ पिंशति । अपेशीत् ।

॥ वृत् भुचादिः ॥

रिं पिंत् गतौ ॥२॥ रियति । पियति । धिंत् धारणे ॥३॥ धियति । क्षिंत् निवासगत्योः ॥४॥ क्षियति । अक्षैषीत् । षूत् प्रेरणे ॥५॥ सुवति । उपसर्गात्सुगिति षत्वे अभिषुवति । अभ्यषुवत् । अभिसुषाव । सविता । मृंत् प्राणत्यागे ॥६॥

३३४ म्रियतेरद्यतन्याशिषि च ॥३।३।४२॥ म्रियतेरद्यतन्याशीर्विषयाच्छिद्विषयाच्च कर्तर्यात्मनेपदं स्यात् । रिः शक्याशीर्ये इति रित्वे इयादेशे च । म्रियते । अमृत । ममार । मृषीष्ट । मर्ता । मरिष्यति । अमरिष्यत् । तिव्निर्देशाद् यङ्लुपि न । कॄत् विक्षेपे ॥७॥ किरति ।

३३५ किरो लवने ॥ ४।४।९४ ॥ उपात् परस्य किरतेः सडादिः स्यात् लवने—लवनविषयश्चेत्तदर्थः । उपस्किरति । लुनातीत्यर्थः । लवन इति किम् । उपकिरति पुष्पम् ।

३३६ प्रतेश्च वधे ॥४।४।९५॥ प्रतेरुपाच्च परस्य किरतेर्वधे हिंसायां विषयेऽभिधेये वा सडादिः स्यात् । प्रतिस्किरति । उपस्किरति । अभिधेये—'उरोविदारं प्रतिचस्करे नखैः' । हत इत्यर्थः । वध इति किम् । प्रतिकिरति बीजम् । विक्षिपतीत्यर्थः । गॄत् निगरणे ॥८॥

३३७ नवा स्वरे ॥२।३।१०२॥ गिरते रेफस्य स्वरादौ प्रत्यये विहितस्य लकारो वा स्यात् । गिरति । गिलति । अगारीत् । अगालीत् । गीर्यात् । गरिता । गरीता । विहितविशेषणं किम् । इह च यथा स्यात् निगार्यते । निगाल्यते । इह च मा भूत् । गिरौ । गिरः । लिखत् अक्षरविन्यासे ॥९॥ लिलेख । लेखिता । कुटादिरयमित्येके । तन्मते लिखिता । जर्च झर्चत् परिभाषणे ॥११॥ जर्चति । झर्चति । चादिरयमित्येके । चर्चति । लचत् संवरणे ॥१२॥ लचति । तलाच । ऋचत् स्तुतौ ॥१३॥ ऋचति । आनर्च । आनृचतुः । ओव्रश्चौत् छेदने ॥१४॥ व्रश्चति । औदित्वाद्वेट् । अव्रश्चीत् । अव्राक्षीत् । वव्रश्च । वव्रश्चिथ । वव्रष्ठ । व्रश्च्यात् । व्रश्चिता । व्रष्टा ।

ऋच्छत् इन्द्रियप्रलयमूर्त्तिभावयोः ॥१५॥ इन्द्रियप्रलय इन्द्रियमोहः । गतावपीत्येके । छस्य द्वित्वे । ऋच्छति । आर्च्छीत् । ऋच्छवर्जनान्नाम् । स्कृच्छृतोऽकीति गुणे आनर्छ । आनर्छतुः । ऋच्छिता । विछत् गतौ ॥१६॥ गुपौधूपविच्छीति आयप्रत्ययः। १विच्छायति । अशवि ते वा । अविच्छायीत् । अविच्छीत् । विच्छायाञ्चकार । विविच्छ । विच्छाय्यात् । विच्छ्यात् । विच्छायिता । विच्छिता । उछैत् विवासे ॥१७॥ विवासः समाप्तिः । उच्छति । उच्छाञ्चकार । मिच्छत् उत्क्लेशे ॥१८॥ मिच्छति । उछुत् उञ्छे ॥१९॥ उञ्छति । प्रच्छंत् ज्ञीप्सायाम् ॥२०॥ पृच्छति ।

३३८ अनुनासिके च च्छ्वः शूट् ॥ ४।१।१०८ ॥ अनुनासिकादौ क्ङौ धुडादौ प्रत्यये च धातोर्[१]च्छकारवकारयोर्यथासंख्यं श ऊट् इत्येतावादेशौ स्याताम्। छस्य द्विः पाठात् द्वयोरपि शकारः । अप्राक्षीत् । स्योमा, स्योन इत्यत्र सिवेर्मनि प्रत्यये औणादिके च ने लघूपान्त्यगुणात् पूर्वमूट् क्रियते नित्यत्वात् । तत्र कृतेऽल्पाश्रितत्वेनान्तरङ्गत्वाद्यत्वं न तु गुणः। अक्षद्यूरित्यत्र ' असिद्धं बहिरङ्गमन्तरङ्गे इति स्वरानन्तर्ये नेष्यते तेन यत्वं भवति। वकारस्य विकल्पेनानुनासिकत्वाद् वनक्कनिपोः सुस्योवा, सुस्यूवा, पक्षे सुसेवा सुसित्वेत्यपि सिद्धम् । धातोरित्येव । दिवेरौणादिकडिव्प्रत्ययान्तस्य द्युभ्याम् द्युभिः । यदा तु दिवेः किप् तदा धातुत्वाद् द्यूभ्यां द्युभिरिति । यङ्लुपि तु देद्योति । अन्ये तु देदेतीत्येवेच्छन्ति । तन्मतपरिग्रहार्थं क्ङितीत्यनुवर्तनीयम् । यजादिसूत्रे च च्छग्रहणं विधेयम् । ऊटष्टकार ' ऊटा ' इत्यत्र विशेषणार्थः । पप्रच्छ । पृच्छ्यात् । प्रष्टा । प्रक्ष्यति । उञ्जत् आर्जवे ॥२१॥ उञ्जति । उञ्जाञ्चकार । सृजंत् विसर्गे ॥२२॥ सृजति ' अः सृजिदृशोऽकिति ' असाक्षीत् । ससर्ज । सृजिदृशीति वेट् । ससर्जिथ । सस्रष्टु । सृज्यात् । स्रष्टा । रुजोंत् भङ्गे ॥२३॥ रुजति । अरौक्षीत् । रुरोज । भुजोंत् कौटिल्ये ॥२४॥ भुजति । भोक्ता । टुमस्जोंत् शुद्धौ ॥२५॥ मज्जति ।

३३९ मस्जेः सः ॥४।४।१११॥ मस्जतेः स्वरात् परस्य सकारस्य स्थाने धुडादौ प्रत्यये नोऽन्तः स्यात् । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः । ममज्ज ।

---

१ ननु विच्छेस्तौदादिकत्वेन शविषयत्वात् शव्विषयाभावाद्विकल्पः प्राप्नोति । नैवम् । शवोऽपवादत्वाद् शप्रत्ययस्यापि शव्शब्देनाभिधानाददोषः । एवं चाशधीत्यनेनाशितीत्यर्थः सिद्धो भवति । अशितीत्येव वा पठनीयम् । धातुपारायणकृता तु मेने विच्छायति, विच्छतीति ।

ममज्जिथ । ममङ्क्थ । मज्ज्यात् । मङ्क्ता । मङ्क्ष्यति । आदेशकरणं मग्न इत्यादौ नलोपार्थम् । जर्ज झर्झत् परिभाषणे ॥२७॥ जर्जति । झर्झति । उज्झत् उत्सर्गे ॥२८॥ दोपान्त्योऽयम् । उज्झाञ्चकार । जुडत् गतौ ॥२९॥ जुडति । अजोडीत् । पृड मृडत् सुखने ॥३१॥ पृडति । अपर्डीत् । मृडति । मर्डिता । कडत् मदे ॥३२॥ भक्षणेऽयमित्येके । कुटादिरयमित्यन्ये । अकाडीत् । अकडीत् । पृणत् प्रीणने ॥३३॥ तुणत् कौटिल्ये ॥३४॥ मृणत् हिंसायाम् ॥३५॥ द्रुणत् गतिकौटिल्ययोश्च ॥३६॥ पुणत् शुभे ॥३७॥ मुणत् प्रतिज्ञाने ॥३८॥ कुणत् शब्दोपकरणयोः ॥३९॥ घुण घूर्णत् भ्रमणे ॥४१॥ घुणति । घूर्णति । चृतैत् हिंसाग्रन्थयोः ॥४२॥ चृतति । चर्तिष्यति । चर्त्स्यति । णुदंत् प्रेरणे ॥४२॥ नुदति । षद्लृंत् अवसादने ॥४४॥ श्नौतीत्यादिना सीदादेशे सीदति । असदत् । ससाद । सेदतुः । ज्वलादौ पठितस्यापीह पाठोऽवर्णादश्च इति वान्तादेशार्थः । सीदती । सीदन्ती । ज्वलादिपाठस्तु णविकल्पार्थः । सादः सदः । विधत् विधाने ॥४५॥ अवेधीत् । जुन शुनत् गतौ ॥४७॥ जुनति । जुजोन । शुनति । रिफत् कथनयुद्धहिंसादानेषु ॥४८॥ रिफति । स्वरादिरयमित्यन्ये । ऋफति । तृफ तुम्फत् तृप्तौ ॥५०॥ मुचादितृफेति ने तुम्फति । विधानबलान्नस्य लुग्न । अन्यस्य तु लुग्भवत्येव । तृफति । ततर्फ । ततृम्फ । पान्तावेतावित्यन्ये । शे नलुकं च नेच्छन्ति । तृपति । तृभ्पति । ऋफ ऋम्फत् हिंसायाम् ॥५२॥ ऋफति । आनर्फ । नलुकं नेच्छन्त्येके । ऋम्फति । इकारोपान्त्यो रादिश्चायमित्येके । दृफ दृम्फत् उत्क्लेशे ॥५४॥ शे मुचादीति ने दृम्फति । ददर्फ । दृफति । ददृम्फ । दृफ्यात् । उभ उम्भत् पूरणे ॥५६॥ उम्भति । उवोभ । उभति । उम्भाञ्चकार । उभ्यात् । शुभ शुम्भत् शोभार्थे ॥५८॥ शुम्भति । शुशोभ । शुभति । शुशुम्भ । दभैत् ग्रन्थे ॥५९॥ दभति । ददर्भ । लुभत् विमोहने ॥६०॥ विमोहनं व्याकुलीकरणम् । लुभति । लुलोभ । लोभिता । लोभ्या । कुरत् शब्दे ॥६१॥ कुरति । क्षुरत् विलेखने ॥६२॥ क्षुरति । चुक्षोर । खुरत् छेदने च ॥६३॥ चाद् विलेखने । घुरत् भीमार्थशब्दयोः ॥६४॥ पुरत् अग्रगमने ॥६५॥ मुरत् संवेष्टने ॥६६॥ सुरत् ऐश्वर्यदीप्त्योः ॥६७॥ सुरति । अषोपदेशत्वात् षत्वाभावे सुसोर । षोपदेशोऽयमित्येके । स्फर स्फलत् स्फुरणे ॥६८॥ स्फरति । पस्फार । किलत् श्वैत्यक्रीडनयोः ॥६९॥ इलत् गतिस्वप्नक्षेपणेषु ॥७०॥ इलति । इयेल । हिलत् हावकरणे ॥७१॥ शिल सिलत् उञ्छे ॥७३॥ सिलति । अषोपदेशत्वान्न षः ।

सिसेल । षोपदेशोऽयमित्येके । सिषेल । तिलत् स्नेहने ॥७४॥ चलत् विलसने ॥७५॥ चिलत् वसने ॥७६॥ विलत् वरणे ॥७७॥ बिलत् भेदने ॥७८॥ णिलत् गहने ॥७९॥ निलति । प्रणिलति । मिलत् [श]लेषणे ॥८०॥ मिलति । अमेलीत् । मिमेल । स्पृशंत् संस्पर्शे ॥८१॥ स्पृशति । अस्पाक्षीत् । अस्पार्क्षीत् । अस्पृक्षत् । पस्पर्श । स्पृश्यात् । स्पष्टा । स्पष्टुं । स्पक्ष्यति । स्पर्क्ष्यति । रुशं रिशंत् हिंसायाम् ॥८३॥ अरुक्षत् । अरिक्षत् । विशंत् प्रवेशने ॥८४॥ विशति । अविक्षत् । मृशंत् आमर्शने ॥८५॥ आमर्शनं स्पर्शः। अम्राक्षीत् । अमार्क्षीत् । अमृक्षत् । लिशं ऋषैत् गतौ ॥८७॥ अलिक्षत् । आनर्ष । इषत् इच्छायाम् ॥८८॥ इच्छति । एषिता । एष्टा । मिषत् स्पर्द्धायाम् ॥८९॥ वृहौत् उद्यमे ॥९०॥ उद्यम उद्धरणम् । वृहति । वर्हिता । वर्द्धा । तृहौ तृंहौ स्तृंहौत् हिंसायाम् ॥९४॥ तृहति । अतर्हीत् । अतृक्षत् । तर्हिता । तर्द्धा । अतृंहीत् । अताङ्क्षीत् । तृंहिता । तृण्ढा । स्तृहति । अस्तर्हीत् । अस्तृक्षत् । अस्तृंहीत् । अस्ताङ्क्षीत् । स्तृह्यात् । अथ कुटादिः। कुटत् कौटिल्ये ॥९५॥

३४० कुटादेर्ङिद्वदञ्णित् ॥४।३।१७॥ तुदाद्यन्तर्गणो वृत्पर्यन्तः कुटादिः। कुटादेर्गणात् परो ञित्णिद्वर्जितः प्रत्ययो [1]ङिद्वत् स्यात् । अकुटीत् । कुटिता । केचिल्लिखिमपि कुटादौ पठन्ति । अपरे तु कडस्फरस्फलान् कुटादौ पठित्वा पाठसामर्थ्यात् ञिणति वृद्धिनिषेधमिच्छन्ति । अञिणति किम् । चुकोट । गुंत् पुरीषोत्सर्गे ॥९६॥ गुवति । अगुषीम् । गुता । धुंत् गतिस्थैर्ययोः ॥९७॥ धुवति । अधुषीत् । दुधाव । णूत् स्तवने ॥९८॥ नुवति । अनुवीत् । नुनाव । नुविता । धूत् विधूनने ॥९९॥ धुवति । दुधाव । धुविता । कुञ्त् संकोचने ॥१००॥ व्यचत् व्याजीकरणे ॥१०१॥

३४१ व्यचोऽनसि ॥४।१।८२॥ व्यचेः सस्वरान्तस्थाऽस्वर्जिते क्ङिति प्रत्यये ग्रहत् स्यात् । विचति । विव्याच । विविचतुः। विचिता । विच्यात् । अनसीति किम् । उरुव्यचाः । गुजत् शब्दे ॥१०२॥ गुजति । अगुजीत् । जुगोज । गुजिता । घुटत् प्रतीघाते ॥१०३॥ घुटति । अघुटीत् । घुटिता । गादिर्दान्तश्चायमित्येके। चुट छुट त्रुटत् छेदने ॥१०६॥ भ्रासभ्लासेति वा श्ये त्रुट्यति। त्रुटति । त्रुटिता । तुटत् कलहकर्मणि ॥१०७॥ तुटति । अतुटीत् । मुटत् आक्षेपमर्दनयोः।

---

१ प्रत्यासत्त्या यत् कार्यं कुटादेर्ङिद्द्वारा प्राप्नोति तस्मिन्नेव कार्ये ङित्त्वं नात्मनेपदादौ । तेन चुकुटिषतीत्यादौ सन्नन्तस्य ङित्त्वादात्मनेपदं न ।

॥१०८॥ मुटति । स्फुटत् विकसने । स्फुटति । स्फुटिता । पुट लुठत् संश्लेषणे । ॥११०॥ डान्तोऽयमित्येके । कुडत् घसने ॥१११॥ घसनं भक्षणम् । घनत्वे इत्यन्ये । घनत्वं सान्द्रता । कुडत् बाल्ये च ॥११२॥ कुडति । गुडत् रक्षायाम् । ॥११३॥ जुडत् बन्धने ॥११४॥ तुडत् तोडने ॥११५॥ तुड थुड स्थुडत् संवरणे ॥११८॥ बुडत् उत्सर्गे च ॥११९॥ ब्रुड भ्रुडत् संघाते ॥१२१॥ संवरणेऽप्यन्ये । टुड हुड त्रुडत् निमज्जने ॥१२४॥ चुणत् छेदने ॥१२५॥ डिपत् क्षेपे ॥१२६॥ छुरत् छेदने ॥१२७॥ छुरति । चुच्छोर । छुर्यात् । कुरुच्छुर इति दीर्घनिषेधः । स्फुरत् स्फुरणे ॥१२८॥ चलन इत्यन्ये । स्फुरति । स्फुलत् संचये च ॥१२९॥

३४२ **निर्नेः स्फुरस्फुलोः** ॥२।३।५३॥ निर्निभ्यां परयोः स्फुरतिस्फुलत्योः सकारस्य षो वा स्यात्। निःष्फुरति। निःस्फुरति। निःष्फुलति। निःस्फुलति। निष्फुरति। निस्फुरति। निष्फुलति। निस्फुलति। वचनभेदो यथासंख्यनिवृत्त्यर्थः।

३४३ **वेः** ॥२।३।५४॥ वेः परयोः स्फुरतिस्फुलत्योः सकारस्य षो वा स्यात्। विष्फुरति। विस्फुरति। विष्फुलति। विस्फुलति। योगविभाग उत्तरार्थः।

॥ इति परस्मैपदिनः ॥

कुंङ् कूङ्त् शब्दे ॥२॥ कुवते। अकुत। अकुविष्ट। कुविता। गुरौति उद्यमे। ॥३॥ गुरते। अगुरिष्ट। वृत् कुटादिः। पूंङ्त् व्यायामे ॥४॥ प्रायेणायं व्याङ्पूर्वः॥ रिः शक्याशीर्ये इतीयादेशे व्यामियते। व्यापप्ते। हंङ्त् आदरे ॥५॥ आद्रियते। आदद्रे। आदर्ता। धुंङ्त् स्थाने ॥६॥ ध्रियते। दध्रे। धर्ता। ओविजैति भयचलनयोः ॥७॥ अयं प्राय उत्पूर्वः। उद्विजते।


३४४ **विजेरिट्** ॥४।३।१८॥ विजेरिड् ङिद्वत् स्यात्। उदविजिष्ट। उद्विजिता। उद्विजिष्यते। ओलजैङ् ओलस्जैति व्रीडायाम् ॥९॥ लजते। लज्जते। ललज्जे। भ्वादौ पठनाद्धावप्येतौ प्रसिद्ध्यनुरोधादिह पठितौ। ष्वञ्जित् सङ्गे ॥१०॥ स्वजते। अस्वङ्क्त। नञा निर्दिष्टस्यानित्यत्वादिटि अस्वञ्जिष्ट।

३४५ **स्वञ्जश्च** ॥२।३।४५॥ उपसर्गस्थान्नाम्यन्तस्थाकवर्गात् परस्य वञ्जेः सकारस्य द्वित्वेऽप्यत्र्यपि षः स्यात् परोक्षायां तु द्वित्वे सत्यादेरेव। परिष्वजते।

पर्यष्वङ्क्षिष्ट । पर्यष्वङ्क्त । योगविभागादप्रतेरिति नानुवर्तते । चकारः परोक्षायां त्वादेरित्यस्यानुकर्षणार्थः। ततश्चोत्तरत्रानुवृत्तिः। स्तुस्वञ्जश्चाटि नवेति वैकल्पिके षत्वे पर्यष्वजत । पर्यस्वजत ।

३४६ स्वञ्जेर्न वा ॥ ४।३।२२ ॥ स्वञ्जेः परा परोक्षा वा किद्वत् स्यात् । परिषस्वजे । परिषस्वञ्जे । स्वङ्क्ता । जुषैति प्रीतिसेवनयोः ॥११॥ जुषते । इत्यात्मनेपदिनः ।

॥ इति तुदादयः ॥



॥ अथ रुधादयः ॥

रुधृंपी आवरणे ॥१॥

३४७ रुधां स्वराच्छ्नो नलुक् च ॥ ३।४।८२ ॥ रुधादेर्गणस्य स्वरात् परः कर्तरि विहिते शितिं श्नः प्रत्ययः स्यात् तत्संनियोगे च प्रकृतिनकारस्य लुगन्वाचीयते । प्रत्ययनकारस्य तु विधानसामर्थ्यान्न भवति । शकारः 'श्नास्त्योर्लुक्' इत्यत्र विशेषणार्थः । रुणद्धि । श्नास्त्योर्लुगित्यकारलोपे रुन्धः । रुन्धन्ति । रुन्धे । रुन्धाते । रुन्धते । ऋदित्वादङ्वा अरुधत् । अरौत्सीत् । अरुद्ध । रुरोध । रुरुधे । रोद्धा । रोत्स्यति । रोत्स्यते । रिचृंपी विरेचने ॥२॥ विरेचनं निःसारणम् । रिणक्ति । रिङ्क्ते । अरिचत् । अरैक्षीत् । अरिक्त । विचृंपी पृथग्भावे ॥३॥ विनक्ति । विङ्क्ते । अविचत् । अवैक्षीत् । अविक्त । युजृंपी योगे ॥४॥ युनक्ति । युङ्क्ते । अयुनक् । अयुङ्क्त । अयुजत् । अयौक्षीत् । अयुक्त । युयोज । युयुजे । युज्यात् । युक्षीष्ट । योक्ता । योक्ष्यति । योक्ष्यते । क्षुदृंपी संपेषे ॥५॥ क्षुणत्ति । क्षुन्ते । भिदृंपी विदारणे ॥६॥ भिनत्ति । भिन्ते । अभिनत् । अभिदत् । अभैत्सीत् । अभित्त । छिदृंपी द्वैधीकरणे ॥७॥ छिनत्ति । छिन्ते । अच्छिदत् । अच्छैत्सीत् । अच्छित्त । उच्छृदृंपी दीप्तिदेवनयोः ॥८॥ वमनेऽपीत्येके । छृणत्ति । छृन्ते । अच्छृदत् । अच्छर्दीत् । अच्छर्दिष्ट । छर्दिष्यति । छर्त्स्यति । उतृदृंपी दीप्तिदेवनयोः॥९॥ तृणत्ति । तृन्ते । अतृदत् । अतर्दीत् । अतर्दिष्ट । तर्दिष्यति । तर्त्स्यति । इत्युभयपदिनः ।

पृचैप् संपर्के ॥१॥ पृणक्ति । अपर्चीत् । पपर्च । पर्चिता । वृचैप् वरणे ॥२॥ वृणक्ति । जान्तोऽयमित्यन्ये । जान्तोऽपि वर्जनार्थ इत्येके । तन्चु तन्जौप् संकोचने ॥४॥ श्ने तत्संनियोगे च प्रकृतिनकारस्य लुकि तनक्ति । अतनक् । अतञ्चीत् । अतञ्जीत् । अताङ्क्षीत् । ततञ्च । ततञ्ज । ततञ्जिथ । ततङ्क्थ । तञ्जिता । तङ्क्ता । भञ्जोप् आमर्दने ॥५॥ भनक्ति । भङ्क्तः । अभनक् । अभाङ्क्षीत् । बभञ्ज । भङ्क्ता । भङ्क्ष्यति । भुजंप् पालनाभ्यवहारयोः ॥६॥ भुनक्ति । अभौक्षीत् । बुभोज ।

३४८ भुनजोऽत्राणे ॥ ३।३।३७ ॥ त्राणात्—पालनादन्यत्रार्थे वर्तमानाद् भुनक्तेः कर्तर्यात्मनेपदं स्यात् । ओदनं भुङ्क्ते । परिभुङ्क्ते । उपभुङ्क्ते । अत्राण इति किम् । महीं भुनक्ति । पालयतीत्यर्थः। 'अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्' इत्यत्र तु न पालनं भुजेरर्थः किंतु पालननिमित्तक उपकारः । धातूनामनेकार्थत्वात् । पालनेन महीमुपकृतवन्तौ मह्याश्रयं फलं स्वीकृतवन्ताविति वेत्यर्थः । उभयपदिनमेनमन्ये मन्यन्ते । भुनजिति श्निर्देशो भुजौंत् इत्यस्य निवृत्त्यर्थः । ओष्ठौ निर्भुनजति । कुटिलयतीत्यर्थः । अञ्जौप् व्यक्तिम्रक्षणगतिषु ॥७॥ अनक्ति । अङ्क्तः । अञ्जन्ति । अञ्ज्यात् । अनक्तु । । अङ्ग्धि । आनक्—ग् ।

३४९ सिचोऽञ्जेः ॥४।४।८५॥ अञ्जेः परस्य सिच आदिरिट् स्यात् । आञ्जीत् । आञ्जिष्टाम् । आञ्जिषुः । औदित्त्वाद् विकल्पे प्राप्ते नित्यार्थं वचनम् । आनञ्ज । आनञ्जिथ । आनङ्क्थ । अञ्ज्यात् । अञ्जिता । अङ्क्ता । ओविजैप् भयचलनयोः ॥८॥ विनक्ति । अविजीत् । विजिता । कृतैप् वेष्टने ॥९॥ कृणत्ति । कर्तिता । कर्तिष्यति । कर्त्स्यति । उन्दैप् क्लेदने ॥१०॥ उनत्ति । औन्दीत् । उन्दाञ्चकार । शिष्लृंप् विशेषणे ॥११॥ शिनष्टि । शिष्यात् । शिनष्टु । शिन् ष् हि इत्यत्र 'हेर्धिः' । तृतीयस्तृतीयेति षस्य डः । तवर्गस्येति धेर्दिः। झां धुड्ढ्रगे इति टवर्गपरत्वान्नस्य णः । धुटो धुटि स्वे वा इति डलोपे शिण्ढि । शिण्ड्ढि । शिनषाणि । अशिनट्—ड् । अशिषत् । शिष्यात् । शेष्टा । शेक्ष्यति । पिष्लृंप् संचूर्णने ॥१२॥ पिनष्टि । अपिषत् । हिसु तृहप् हिंसायाम् ॥१४॥ हिनस्ति । हिंस्तः । हिंसन्ति । हिनस्तु । हिंस्यात् । हिन्धि । व्यञ्जनादेः सश्च दः । अहिनत्—द् । अहिंसीत् । जिहिंस । हिंसिता ।

३५० तृहः श्नादीत् ॥४।३।६२॥ तृहः श्नात् परो व्यञ्जनादौ विति प्रत्यये परे ईत्—ईकारः स्यात् । तृणेढि । तृण्ढः । तृणेक्षि । तृणेह्मि । तृणेद्धु । अतृणेढि-

त्यत्र व्यञ्जनादौ प्रत्ययेऽस्य विधानात् प्रत्ययाश्रयत्वमेव न वर्णाश्रयत्वम्, वर्णस्य प्रत्ययविशेषणत्वादिति प्रत्ययलोपे प्रत्ययलक्षणं भवत्येव । आद्यन्तवद्भावाच्च व्यञ्जनादित्वम् । व्यञ्जनादाविति एव । तृणहानि । अतृणहम् । वितीत्येव । दीर्घनिर्देश उत्तरार्थः । अतर्हीत् । ततर्ह । तृह्यात् । तर्हिता ।

॥ इति परस्मैपदिनः ॥

खिदिंप् दैन्ये ॥१॥ खिन्ते । अखित्त । चिखिदे । खेत्ता । विदिंप् विचारणे ॥२॥ विन्ते । विविदे । वेत्ता । त्रिइन्धैपि दीप्तौ ॥३॥ इन्धे । इन्त्से । ऐन्ध । ऐन्धिष्ट । इन्धाञ्चक्रे । सम्पूर्वकस्य तु समिन्धाञ्चक्रे । समीधे । इन्धिता । इन्धिष्यते । इत्यात्मनेपदिनः ।

॥ इति रुधादयः ॥

॥ अथ तनादयः ॥

तनूयी विस्तारे ॥१॥ कृग्तनादेरुः। उश्नोरिति गुणे तनोति । तनुतः। तनुवः। तन्वः । तनुमः । तन्मः । तनुते । तनुवहे । तन्वहे । तनुमहे । तन्महे । अतानीत् । अतनीत् ।

३५१ तन्भ्यो वा तथासि ण्णोश्च ॥ ४।३।६८ ॥ तनादेर्गणात् परस्य सिचस्ते थासि च प्रत्यये परे लुब्वा स्यात् तत्संनियोगे च नकारस्य णकारस्य च लुप् स्यान्न चेट् । अतत । अतनिष्ट । अतनिषाताम् । अतनिषत । अतथाः । अतनिष्ठाः । इह परस्मै इति नानुवर्तते थास्ग्रहणात् । थास्साहचर्यात् तप्रत्ययोऽप्यात्मनेपदसंबंध्येव गृह्यते । तेनेह न भवति । अतनिष्ट यूयम् । ततान । तेने । तन्यात् । तनिषीष्ट । तनिता । षणूयी दाने ॥२॥ सनोति । सनुते । असानीत् । असनीत् ।

३५२ सनस्तत्रा वा ॥४।३।६९॥ सनोतेस्तत्र लुपि सत्यामन्तस्य वा आकारः स्यात् । असात । असत । तत्रेति किम् । असनिष्ट । असाथाः । असथाः । असनिष्ठाः। केचिदात्वं न मन्यन्ते । नित्यमेवान्ये । ससान । सेने । सन्यात् । सनिषीष्ट । क्षणू क्षिणूयी हिंसायाम् ॥४॥ क्षणोति । क्षणुते । न श्विजाग्रिति वृद्धिनिषेधः ।

अक्षणीत् । अक्षत । अक्षणिष्ट । अक्षथाः । अक्षणिष्ठाः । चक्षाण । चक्षणे । क्षण्यात् । क्षणिषीष्ट । एवं क्षेणोति । क्षेणुते । केचिदुप्रत्ययनिमित्तमुपान्त्यगुणं न मन्यन्ते । तन्मते क्षिणोति । क्षिणुते । अमुं न पठन्त्येके । ऋणूयी गतौ ॥५॥ अर्णोति । अर्णुते । अर्णुवः । अर्णुवहे । आर्णीत् । आर्त । आर्णिष्ट । तृणूयी अदने ॥६॥ तर्णोति । तर्णुते । घृणूयी दीप्तौ ॥७॥ घर्णोति । घर्णुते । जघर्ण । जघृणे । इत्युभयपदिनः ।

वनूयी याचने ॥१॥ वनुते । ववने । मनूयी बोधने ॥२॥ मनुते । मेने । इत्यात्मनेपदिनौ ॥

॥ इति तनादयः ॥

॥ अथ क्र्यादयः ॥

डुक्रींग्श् द्रव्यविनिमये ॥१॥

३८३ क्र्यादेः ॥३।४।७९॥ क्र्यादेर्गणात् कर्तरि विहिते शिति श्नाः प्रत्ययः स्यात् । क्रीणाति । एषामीर्व्यञ्जनेऽदः ॥ क्रीणीतः । श्नश्नात इत्यालोपे क्रीणन्ति । क्रीणीते । क्रीणीयात् । क्रीणीत । क्रीणातु । क्रीणीतात् । क्रीणीताम् । अक्रीणात् । अक्रीणीत । अक्रैषीत् । अक्रेष्ट । चिक्राय । चिक्रिये । क्रीयात् । क्रेषीष्ट । क्रेता । क्रेष्यति । क्रेष्यते । षिंग्श् बन्धने ॥२॥ सिनाति । सिनीते । असैषीत् । असेष्ट । सिषाय । मींग्श् तृप्तिकान्त्योः ॥३॥ मीणाति । मीणीते । श्रींग्श् पाके ॥४॥ श्रीणाति । श्रीणीते । मींग्श् हिंसायाम् ॥५॥ मीनाति । मीनीते । अदुरुपसर्गेति णत्वे ममीणाति । ममीणीते । मिग्मीनोऽखलचलेत्यात्वे अमासीत् । अमास्त । ममौ । मम्ये । मीयात् । मासीष्ट । युंग्श् बन्धने ॥६॥ युनाति । युनीते । स्कुंग्श् आप्रवणे ॥७॥

३८४ स्तम्भूस्तुम्भूस्कम्भूस्कुम्भूस्कोः श्ना च ॥३।४।७८॥ स्तम्भ्वादिभ्यः सौत्रेभ्यो धातुभ्यः स्कुगश्च कर्तरि विहिते शिति श्नाः [*]नुश्च प्रत्ययः स्यात् । शकारः श्नित्कार्यार्थः । स्कुनाति । स्कुनीते । स्कुनोति । स्कुनुते । अस्कौषीत् । अस्कोष्ट । चुस्काव । चुस्कुवे । स्कोता । स्तम्भ्वादयश्चत्वारः सौत्राः, सर्वे रोधनार्थाः । सर्वे परस्मैपदिनः । प्रथमतृतीयौ स्तम्भ्यर्थौ द्वितीयो निष्कोषणार्थः ।

तुरीयो धारणार्थ इत्येके । एतेषामूदित्करणं क्त्वाक्तयोरिड्विकल्पनित्यप्रतिषेधौ यथा स्याताम् ।

३५५ अङ्प्रतिस्तब्धनिस्तब्धे स्तम्भः ॥२।३।४१॥ उपसर्गस्थान्नाम्यन्तस्थाकवर्गात् परस्य स्तम्भसकारस्य द्वित्वेऽपि अव्यपि षः स्यात् न चेदसौ स्तम्भिर्ङे प्रतिस्तब्धे निस्तब्धे च विषये स्यात् । विष्टभ्नाति । प्रतिष्टभ्नाति । वितष्टम्भ । प्रतितष्टम्भ । व्यष्टभ्नात् । प्रत्यष्टभ्नात् । व्यष्टम्भीत् । अङ्प्रतिस्तब्धनिस्तब्ध इति किम् । व्यतस्तम्भत् । प्रत्यतस्तम्भत् । प्रतिस्तब्धः । निस्तब्धः

३५६ अवाच्चाश्रयोर्जाविदूरे ॥२।३।४२॥ अवादुपसर्गात् परस्य स्तम्भः सकारस्याश्रयादिष्वर्थेषु गम्यमानेषु द्वित्वेऽपि अव्यपि षः स्यात् अङे–ङविषयश्चेत् स्तम्भिर्न भवेत् । आश्रय आलम्बनम् । दुर्गमवष्टभ्यास्ते । अवतष्टम्भ दुर्गम् । दुर्गमवाष्टभ्नात् । ऊर्ज ऊर्जितम् । अहो वृषलस्यावष्टम्भः । अवष्टब्धो रिपुः शूरेण । अविदूरमनतिविप्रकृष्टम् आसन्नमदूरासन्नं च गृह्यते । अवष्टब्धा शरत् । अवष्टब्धे सेने । अवादिति किम् । प्रस्तब्धः । चकारोऽङ इत्यस्यानुवृत्त्यर्थः अनुक्तसमुच्चयार्थश्च । तेनोपष्टम्भ उपष्टम्भक उपष्टब्ध इत्यादावुपादपि भवति । उपावादित्यकृत्वा चकारेण सूचनम् अनित्यार्थं तेनोपस्तब्ध इत्यपि भवति। आश्रयादिष्विति किम्। अवस्तब्धो वृषलः शीतेन । अङ इत्येव । अवातस्तम्भत् । स्कभ्नाति ।

३५७ स्कभ्नः ॥२।३।५५॥ वेः परस्य स्कभ्नातेः सकारस्य नित्यं षः स्यात्। योगविभागाद्वेति निवृत्तम्। अन्यथा हि वेः स्कभ्नश्चेति क्रियेत। विष्कभ्नाति। विष्कम्भिता । विष्कम्भकः । विष्कम्भयति । श्नानिर्देशः किम् । सञ्स्तोर्मा भूत् । विस्कभ्नोति । स्कम्भुः सौत्रो धातुः अषोपदेशः ।

३५८ व्यञ्जनाच्छ्नाहेरानः ॥३।४।८०॥ व्यञ्जनान्ताद्धातोः परस्य श्नायुक्तस्य हेः स्थाने आन आदेशः स्यात् । स्तभान । स्तुभान । विष्कभाण । स्कुभान । उत्तभान। व्यञ्जनादिति किम् । लुनीहि । श्नाहेरिति किम् । अश्नाति । उत्तभ्नुहि । कनूग्श् शब्दे ॥१२॥ कनूनाति । कनूनीते । द्रूग्श् हिंसायाम् ॥१३॥ गतावित्यन्ये । ग्रहीश् उपादाने ॥१४॥ ग्रहवृश्चेति व्यङ् । गृह्णाति । गृह्णीते । गृह्णातु । गृह्णाण । गृह्णीताम् ।

३५९ गृह्णोऽपरोक्षायां दीर्घः ॥४।४।३४॥ गृह्णातेर्यो विहित इट् तस्य दीर्घः

स्यात् अपरोक्षायाम्—न चेत् स इट् परोक्षायां भवति । अग्रहीत् । दीर्घस्य स्थानिवद्भावादिट इतीति सिचो लुग्भवति । न चायं वर्णविधिः । इट इति रूपाश्रयत्वात् । अग्रहीष्टाम् । अग्रहीध्वम् । अग्रहीढ्वम् । विहितविशेषणं किम् । यङन्ताद् विहितस्य मा भूत् । जरीगृहिता । लुप्ततिव्निर्देशात् यङ्लुपि न । जरीगर्हिता । अपरोक्षायामिति किम् । जगृहिव । जगृहिम । इट इत्येव । ग्राहिषीष्ट । त्रिटो मा भूत् । गृह्यात् । ग्रहीषीष्ट । ग्रहीता । ग्रहीष्यति । ग्रहीष्यते । पूगश् पवने ॥१५॥

३६० प्वादेर्ह्रस्वः ॥ ४।२।१०५ ॥ प्वादेर्गणस्य शिति प्रत्यये परे ह्रस्वः स्यात् अत्यादौ । पुनाति । पुनीते । क्र्यादिषु ' पूगश् पवने ' इत्यारभ्य वृत्करणपर्यन्ताः प्वादयः । प्वादेरिति किम् । व्रीणाति । भ्रीणाति । आगणान्तात् प्वादय इत्यन्ये । वृत्करणं ल्वादिपरिसमाप्त्यर्थम् । तन्मते त्रिणाति । भ्रिणाति इत्येव भवति । जानातीत्यत्र तु विधानसामर्थ्यान्न ह्रस्वः । अपावीत् । अपविष्ट । पुपाव । पुपुवे । पूयात् । पविषीष्ट । पविता । पविष्यति । पविष्यते । लूगश् छेदने ॥१६॥ लुनाति । लुनीते । धूगश् कम्पने ॥१७॥ धुनाति । धुनीते । धूगसुस्तोः परस्मै । अधावीत् । अधविष्ट । अधोष्ट । स्तृगश् आच्छादने ॥१८॥ स्तृणाति । स्तृणीते । अस्तारीत् । सिजाशिषोरिति वेटि सिच्यात्मनेपदे वृतो नवेति वा दीर्घः । अस्तरिष्ट । अस्तरीष्ट । अस्तीर्ष्ट । तस्तार । तस्तरतुः । तस्तरे । स्तीर्यात् । स्तरिषीष्ट । स्तीर्षीष्ट । स्तरिता । स्तरीता । स्तरिष्यति । स्तरीष्यति । स्तरिष्यते । स्तरीष्यते । कृगश् हिंसायाम् ॥१९॥ कृणाति । कृणीते । वृगश् वरणे ॥२०॥ वृणाति । वृणीते । अवारीत् । अवारिष्टाम् । अवरिष्ट । अवरीष्ट । अवृर्ष्ट । ववार । वव्रे । वूर्यात् । वरिषीष्ट । वूर्षीष्ट । वरिता । वरीता ।

॥ इत्युभयपदिनः ॥

ज्यांश् वयोहानौ ॥१॥ ज्याव्यध इति य्वृति ।

३६१ दीर्घमवोऽन्त्यम् ॥४।१।१०३। वेगवर्जितस्य धातोर्व्वृदन्त्यं दीर्घं स्यात् इति दीर्घे प्वादित्वाद् ह्रस्वः। जिनाति । अज्यासीत् । जिज्यौ । जिज्यतुः। जीयात् । ज्याता । ज्यास्यति । रींश् गतिरेषणयोः ॥२॥ रेषणं हिंसा । रिणाति । अरैषीत् । रिराय । रिर्यतुः। लींश् श्लेषणे ॥३॥ लिनाति । लीङ्लिनोर्वा इत्यात्वे अलासीत् । अलैषीत् । ललौ । लिलाय । लाता । लेता । लास्यति । लेष्यति ।

व्लीँश् वरणे ॥४॥ गतावित्यत्ये । व्लिनाति । अलैव्नीत् । प्लीँश् गतौ ॥५॥ प्लिनाति । कॄ मॄ शॄ हिंसायाम् ॥८॥ कृणाति । शृणाति । अशारीत् । ऋशूदृमः । शशरतुः । शश्रतुः । शरिता । शरीता । पॄश् पालनपूरणयोः ॥९॥ पृणाति । पपार । पप्रतुः । पपरतुः । वॄश् वरणे ॥१०॥ भरणेऽपि । वृणाति । भॄश् भर्जने च । चाद्धरणे ॥११॥ भृणाति । दॄश् विदारणे ॥ भय इत्यन्ये ॥१२॥ दृणाति । ददार । ददृतुः । ददरतुः । जॄश् वयोहानौ ॥१३॥ जृणाति । जजार । जजरतुः । जरिता । जरीता । नॄश् नये ॥१४॥ गॄश् शब्दे ॥१५॥ गृणाति । जगार । ऋश् गतौ ॥१॥ ऋणाति । आरीत् । आरिष्टाम् । अराञ्चकार । ईर्यात् । अरिता । अरीता । वृत् ल्वादिःप्वादिश्च । ज्ञांश् अवबोधने ॥१७॥ जा ज्ञाजनोऽत्यादौ । जानाति । जानीतः । जानन्ति । अज्ञासीत् । जज्ञौ । ज्ञायात् । ज्ञेयात् । ज्ञाता । ज्ञास्यति । क्षिंष्श् हिंसायाम् ॥१८॥ क्षिणाति । चिक्षाय । क्षेता । व्रींश् वरणे ॥१९॥ व्रीणाति । विव्राय । विव्रियतुः । भ्रींश् भरणे ॥२०॥ भ्रीणाति । हेठश् भूतप्रादुर्भावे ॥२१॥ भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । तवर्गस्येति नस्य णत्वे हेठ्णाति । हेठान । जिहेठ । हेठिता । मृडश् सुखने ॥२२॥ मृड्णाति । ममर्ड । मर्डिता । श्रन्थश् मोचनप्रतिहर्षणयोः ॥२३॥ श्रथ्नाति ।

३६२ **वा श्रन्थग्रन्थो नलुक् च** ॥४।१।२७॥ अनयोः स्वरस्यावित्परोक्षासेट्थवोरेकारादेशो वा स्यात् तत्संनियोगे च नकारस्य लुक् न चैतौ द्विः । श्रेथतुः । शश्रन्थतुः । श्रेथिथ । शश्रन्थिथ । अविदित्येव । शश्रन्थ । श्रथ्यात् । मन्थश् विलोडने ॥२४॥ मथ्नाति । ममन्थ । मथ्यात् । ग्रन्थश् संदर्भे ॥२५॥ ग्रथ्नाति । जग्रन्थ । ग्रेथतुः । जग्रन्थतुः । ग्रथ्यात् । कुन्थश् संक्लेशे ॥२६॥ कुथ्नाति । मृदश् क्षोदे ॥२७॥ मृद्नाति । गुधश् रोषे ॥२८॥ बन्धंश् बन्धने ॥२९॥ बध्नाति । अभान्त्सीत् । बबन्थ । बबन्धिथ । बबन्द्ध । क्षुभश् संचलने ॥३०॥ क्षुभ्नाति । क्षुभाण । णभ तुभश् हिंसायाम् ॥३२॥ नभ्नाति । प्रणभ्नाति । तुभ्नाति । खवश् भूतप्रादुर्भावे ॥३३॥ 'अनुनासिके च च्छ्वः' शूट् इति वकारस्योटि खौनाति । खौनीहि । अखावीत् । अखवीत् । चखाव । खविता । ऊटं नेच्छन्त्येके । खव्नाति । चान्तोऽयमित्यन्ये । खच्त्राति । क्लिशौश् विबाधने ॥३४॥ क्लिश्नाति । क्लिशान । चौदित्त्वादिड्वा । अक्लेशीत् । इडभावे सक् । अक्लिक्षत् । क्लेशिता । क्लेष्टा । अशश् भोजने ॥३५॥ अश्नाति । अशान । आशीत् । आश । अशिता । इषश् आभीक्ष्ण्ये ॥३६॥ इष्णाति । इयेष । ईषतुः । एषिता । विषश् विप्रयोगे ॥३७॥

मुष ष्लुषश् स्नेहसेचनपूरणेषु ॥३९॥ मुष्णाति । ष्लुष्णाति । मुषश् स्तेये ॥४०॥ मुष्णाति । मुषाण । अमोषीत् । पुषष् पुष्टौ ॥४१॥ पुष्णाति । पुषाण । अपोषीत् । पुपोष । पुष्यात् । पोषिता । कुषश् निष्कर्षे ॥४२॥ कुष्णाति ।

३६३ निष्कुषः ॥४।४।३९॥ निर्निस्संबद्धात् कुषः परस्य स्ताद्यशित आदिरिड् वा स्यात् । निरकोषीत् । निरकुक्षत् । निष्कोष्टा । निष्कोषिता । निष्पूर्वनियमात् केवलादन्यपूर्वाच्च नित्य एवेट् । कोषिता । प्रकोषिता । निर्निस्संबद्धात् कुष इति किम् । निर्गताः कोषितारोऽस्मान्निष्कोषितृको देश इति नित्यमिट् । योगविभाग उत्तरार्थः । ध्रसूश् उञ्छे ॥४३॥ ध्रस्नाति । ध्रसान । अध्रसीत् । अध्रासीत् । इति परस्मैपदिनः । वृङ्श् संभक्तौ ॥१॥ वृणीते । अवरिष्ट । अवरीष्ट । अवृत । वरिता । वरीता ।

॥ इति क्र्यादयः ॥



॥ अथ चुरादयः ॥

चुरण् स्तेये ॥१॥

३६४ चुरादिभ्यो णिच् ॥३।४।१७॥ णितश्चुरादयः ॥ तेभ्यो धातुभ्यः स्वार्थे णिच् प्रत्ययः स्यात् । णकारो वृद्ध्यर्थः । णिग्रहणेषु सामान्यग्रहणार्थश्च । चकारः सामान्यग्रहणविधानार्थः । अत्र णिचो गित्त्वाभावात् फलवति कर्तरि आत्मनेपदं नास्ति । केचित्तु चुरादीनामुभयपदित्वमाहुः॥ अनित्यो हि णिच् चुरादीनां ' घुषेरविशब्दे ' इत्यत्र ज्ञापयिष्यते । बहुवचनमाकृतिगणार्थं तेन संवाहयतीति सिद्धम् । चोरयति । णिश्रीति ङे अचूचुरत् । चोरयाञ्चकार । चोर्यात् । चोरयिता । चोरयिष्यति । 'उपान्त्यस्येति सूत्रे 'लघोर्दीर्घ' इति सूत्रे च णिजात्याश्रयणात् णिजन्ताद् णिग्यपि अचूचुरदित्येव न तु अचुचोरदिति । पृण् पूरणे ॥२॥ पारयति । अपीपरत् । घृण् स्तवणे ॥३॥ अजीघरत् । शुल्क वल्कण् भाषणे ॥५॥ नक्क धक्कण् नाशने ॥७॥ चक्क चुक्कण् व्यथने ॥९॥ टक्कण् बन्धने ॥१०॥ टक्कयति । अटटक्कत् । अर्कण् स्तवने ॥११॥ आर्चिकत् । पिच्चण् कुट्टने ॥१२॥ पचुण् विस्तारे ॥१३॥ मपश्चयति । म्लेच्छण् म्लेच्छने ॥१४॥ म्लेच्छनमव्यक्ता वाक् । अमिम्लेच्छत् । ऊर्जण् बलप्राणनयोः ॥१५॥ ऊर्जयति । औजिजत् । तृजु पिजुण् हिंसाबलादान-

निकेतनेषु ॥१७॥ क्षजुण् कुच्छ्रजीवने ॥१८॥ क्षञ्जयति । पूजण् पूजायाम् ॥१९॥ पूजयति । अपूपुजत् । गज मार्जण् शब्दे ॥२१॥ मर्चमर्जावप्येके पठन्ति । तिजण् निशाने ॥ २२ ॥ तेजयति । वज व्रजण् मार्गणसंस्कारगत्योः ॥२३॥ मार्गणो बाणस्तस्य संस्कारे गतौ चेत्यर्थः। वाजयति । व्राजयति । रुजण् हिंसायाम् ॥२४॥ नटण् अवस्यन्दने ॥२५॥ चौरस्योन्नाटयति । नृत्तौ घटादित्वाद् ह्रस्वः । तुट चुट चुडु छुटुण् छेदने ॥२९॥ तोटयति । चोटयति । चुण्टयति । छुण्टयति । कुट्टण् कुत्सने च ॥३०॥ पुट्ट चुट्ट षुट्टण् अल्पीभावे ॥३३॥ पुट ष्फुटण् संचूर्णने ॥३५॥ अट्ट स्फिटण् अनादरे ॥३७॥

३६५ न बदनं संयोगादिः ॥४।१।५॥ स्वरादेर्धातोर्द्वितीयस्यावयवस्यैकस्वरस्य बकारदकारनकाराः संयोगस्यादौ द्वित्रि स्युः। आट्टिटत् । अट्ट अल्पीभाव इत्यन्ये । बदनमिति किम् । ईचिक्षिषते । संयोगादिरिति किम् । प्राणिणिषति । लुण्टण् स्तेये च ॥३८॥ लुण्टयति। अलुलुण्टत्। स्निटण् स्नेहने ॥३९॥ स्नेटयति। घट्टण् चलने ॥४०॥ खट्टण् संवरणे ॥४१॥ षट्ट स्फिटण् हिंसायाम् ॥४३॥ प्रथमो बलदाननिकेतनेष्वपीत्येके । द्वितीयोऽनादर इत्यन्ये ॥ स्फुटण् परिहासे । ॥४४॥ कीटण् वर्णने ॥४५॥ बन्ध इत्यन्ये । वडुण् विभाजने ॥४६॥ वण्टयति । डान्तोऽयमित्येके । रुटण् रोषे ॥४७॥ रोटयति । शठ श्वठ श्वठुण् संस्कारगत्योः। ॥५०॥ शाठयति । श्वाठयति । श्वण्ठयति । शुठण् आलस्ये ॥५१॥ शोठयति । शुठुण् शोषणे ॥५२॥ शुण्टयति । गुठुण् वेष्टने ॥५३॥ गुण्ठयति । अवगुण्ठति । लडण् उपसेवायाम् ॥५४॥ लाडयति । लत्वे लालयति । स्फुडुण् परिहासे ॥५४॥ स्फुण्डयति। ओलडुण् उत्क्षेपे ॥५५॥ ओलण्डयति। ओदिदयमित्येके। लण्डयति। पीडण् गहने ॥५६॥ पीडयति ।

३६६ भ्राजभासभाषदीपपीडजीवमीलक्षणरणषणश्रणव्येहेठ-लुटलुपलपां नचा ॥ ४।२।३६ ॥ एषां ङपरे णौ उपान्त्यस्य ह्रस्वो वा स्यात् । अपीपिडत् । अपिपीडत् । बहुवचनं शिष्टप्रयोगानुसारेण अन्येषामपि परिग्रहार्थम् । तडण् आघाते ॥५७॥ ताडयति । खड खडुण् भेदे ॥५९॥ खाडयति। खण्डयति । कडुण् खण्डने च। खुडुण् इत्येके ॥६०॥ कुडुण् रक्षणे ॥६१॥ कुण्डयति । गुडुण् वेष्टने च ॥६२॥ चुडुण् छेदने ॥६३॥ मडुण् भूषायाम् ॥६४॥ भडुण् कल्याणे ॥६५॥ दान्तोऽयमित्येके । पिडुण् संघाते ॥६६॥ पिण्डयति ।

पडुण् इत्येके । ईडण् स्तुतौ ॥६७॥ ईडयति । चडुण् कोपे ॥६८॥ जुड चूर्ण वर्णण् प्रेरणे ॥७१॥ प्रेरणं दलनम् । जोडयति । चूर्णयति । वर्णयति । चूण तूणण् संकोचने ॥७३॥ श्रणण् दाने ॥७४॥ श्राणयति । अशिश्रणत् । अशश्राणत् । पूणण् संघाते ॥ ७५ ॥ पूणयति । चिंतुण् स्मृत्याम् ॥ ७६ ॥ चिन्तयति । अचिचिन्तत् । पुस्त बुस्तण् ॥७८॥ मुस्तण् संघाते ॥७९॥ कृतण् संशब्दने । ॥८०॥ ऋदुपदेशोऽचीकृतदित्यत्र ऋकारश्रवणार्थः ।

३६७ **कृतः कीर्तिः** ॥४।४।१२३॥ कृतण् इत्येतस्य कीर्त् इत्ययमादेशः स्यात् । कीर्तयति । कोर्तीति इकारान्तनिर्देशश्चतुर्थाध्यायसमाप्तौ मङ्गलार्थः।

३६८ **ऋदृवर्णस्य** ॥ ४।२।३७ ॥ धातोरुपान्त्यस्य ऋवर्णस्य ङपरे णौ वा ऋकारः स्यात् । अचीकृतत् । अचिकीर्तत् । वचनसामर्थ्यादर्कीर्त्यादेशौ बाध्येते । स्वर्त पथुण् गतौ ॥८२॥ आद्यः कृच्छ्रजीवनेऽपीत्येके । स्वर्तयति । पन्थयति । श्रथण् प्रतिहर्षे ॥८३॥ प्रतियत्न इत्यन्ये । श्राथयति । अशिश्रथत् । 'श्रथण् बन्धने' इति युजादौ पठिष्यमाणोप्यर्थभेदात् पुनरिह पाठः । पृथण् प्रक्षेपणे । ॥८४॥ पर्थयति । अपीपृथत् । अपपर्थत् । पर्थण् इत्येके । पार्थण् इत्यन्ये । प्रथण् प्रख्याने ॥८५॥ प्राथयति ।

३६९ **स्मृदृत्वरप्रथम्रदस्तृस्पशेरः** ॥ ४।१।६५ ॥ एषां धातूनामसम्प्रानलोपे ङपरे णौ द्वित्वे सति पूर्वस्य अकारोन्तादेशो वा स्यात् । सन्वद्भावापवादः । अपप्रथत् । छदण् संवरणे ॥८६॥ छादयति । चुदण् संचोदने ॥८७॥ चोदयति । मिदुण् स्नेहने ॥८८॥ मिन्दयति । नायमुदिदिति कौशिकः। मेदयति । गुर्दण् निकेतने ॥८९॥ पूर्वनिकेतन इत्येके । भ्वादेरिति दीर्घे गूर्दयति । छर्दण् वमने ॥९०॥ छर्दयति । अचच्छर्दत् । इह गर्दण् शब्दे इत्येके पठन्ति । गर्दयति । बुधुण् हिंसायाम् ॥९१॥ बुन्धयति । ठान्तोऽयमित्येके । वर्धण् छेदनपूरणयोः । ॥९२॥ गर्धण् अभिकांक्षायाम् ॥९३॥ बन्ध बधण् संयमने ॥९५॥ बन्धयति । बाधयति । छपुण् गतौ ॥९६॥ क्षपुण् क्षान्तौ ॥९७॥ ष्टूपण् समुच्छ्राये ॥९८॥ स्तूपयति । अषोपदेश इत्येके । उकारो ह्रस्व इत्यन्ये । स्तोपयति । डिपण् क्षेपे । ॥९९॥ ह्रपण् व्यक्तायां वाचि ॥१००॥ ह्रापयति । डपु डिपुण् संघाते ॥१०२॥ अभिमर्दन इत्येके । डम्पयति । डिम्पयति । भान्तावेतावित्यन्ये । शूर्पण् माने ।

॥१०३॥ शुल्वण् सर्जने च ॥१०४॥ चान्माने । डबु डिबुण् क्षेपे ॥१०६॥ विडम्बयति । केचित्तु दभदिभुदभूनपीहाहुः । सम्बण् संबन्धे ॥१०७॥ षोपदेशोऽयमित्यन्ये । तालव्यादिरयमिति केचित् । शंबयति । साम्बेत्येके । कुबुण् आच्छादने ॥१०८॥ कुम्बयति । लुबु तुबुण् अर्दने ॥११०॥ तुपुण् इत्यन्ये । पुर्बण् निकेतने ॥१११॥ यमण् परिवेषणे ॥११२॥ यामयति अतिथीन् । अपरिवेषणे तु ।

• ३७० **यमोऽपरिवेषणे णिचि च** ॥ ४।२।२९ ॥ अपरिवेषणे वर्तमानस्य यमेर्णिच्यणिचि च णौ परे ह्रस्वः स्यात् त्रिणम्परे तु णौ वा दीर्घः। यमयति । अयामि । अयमि । यामंयामम् । यमंयमम् । यमः परिवेषण इत्यन्ये । तन्मते उदाहरणप्रत्युदाहरणयोर्व्यत्यासः । णाविति सिद्धे अस्य णिचि चेति वचनात् अन्येषां णिचि न भवति । स्यमिण् वितर्के—स्यामयते । अस्यामि । स्यामंस्यामम् । व्ययण् क्षये ॥११३॥ व्याययति । यत्रुण् संकोचने ॥११४॥ कुद्रुण् अनृतभाषणे ॥११५॥ कुन्द्रयति । गादिरयमित्यन्ये । गुन्द्रयति । श्वभ्रण् गतौ ॥११६॥ तिलण् स्नेहने ॥११७॥ जलण् अपवारणे ॥११८॥ जालयति । क्षलण् शौचे ॥११९॥ क्षालयति । पुलण् समुच्छ्राये ॥१२९॥ बिलण् भेदे ॥१२१॥ भिलेति केचित् । तलण् प्रतिष्ठायाम् ॥१२२॥ तुलण् उन्माने ॥१२३॥ तोलयति । तुलयतीति तुलाशब्दाद् 'णिज्बहुलमि'ति णिचि रूपम् । दुलण् उत्क्षेपे ॥१२४॥ बुलण् निमज्जने ॥१२५॥ मूलण् रोहणे ॥१२६॥ कल किल पिलण् क्षेपे ॥१२७॥ पलण् रक्षणे ॥१२८॥ पालयति । इलण् प्रेरणे ॥१२९॥ चलण् भृतौ ॥१३०॥ सान्त्वण् सामप्रयोगे ॥१३१॥ षोपदेशोऽयमित्येके । साम सान्त्वप्रयोगे इति चन्द्रः । धूशण् कान्तीकरणे ॥१३२॥ धूशयति । अदूधुशत् । मूर्धन्यान्तोऽयमिति केचित् । दन्त्यान्त इत्यन्ये । श्लिषण् श्लेषणे ॥१३३॥ लूषण् हिंसायाम् ॥१३४॥ रुषण् रोषे ॥१३५॥ प्युषण् उत्सर्गे ॥१३६॥ प्योषयति । पसुण् नाशने ॥१३७॥ पंसयति । जसुण् रक्षणे ॥१३८॥ पुंसण् अभिमर्दने ॥१३९॥ ब्रुस पिस जस बर्हण् हिंसायाम् ॥१४३॥ स्निहण् स्नेहने ॥१४४॥ स्नेहयति । म्रक्षण् म्लेच्छने ॥१४५॥ भक्षण् अदने ॥१४६॥ भक्षयति । पक्षण् परिग्रहे ॥१४७॥

लक्षीण् दर्शनाङ्कयोः ॥१४८॥ ईदित्त्वात् फलवति कर्तर्यात्मनेपदम् । अन्यत्र

शेषादिति परस्मैपदम् । लक्षयते । लक्षयति । इतोऽर्थविशेषे आलक्षिणः। इतः परं लक्षिण्पर्यन्ता अर्थविशेषे चुरादयः कथ्यन्ते । ज्ञाण् मारणादिनियोजनेषु ॥२॥

३७१ **मारणतोषणनिशाने ज्ञश्च** ॥ ४।२।३० ॥ एष्वर्थेषु वर्तमानस्य जानातेर्णिचि अणिचि च णौ ह्रस्वः स्यात् ञिणम्परे तु वा दीर्घः। चकारो णिचि चेत्यस्यानुकर्षणार्थः । इह पूर्वत्र च सूत्रे णिचि अणिचि च णौ रूपसाम्येऽप्यर्थभेदः। एकत्र स्वार्थोऽन्यत्र प्रयोक्तृव्यापारः। अन्ये तु निशान इत्यस्य स्थाने निशामन इति पठन्ति । निशामनमालोचनं प्रणिधानमाहुः ।

३७२ **अर्तिरीक्ष्लीह्लीक्नूयिक्ष्माय्यातां पुः** ॥४।२।२१॥ एषामाकारान्तानां च धातूनां णौ परे पुरन्तः स्यात् । अर्तीति ऋं गतौ ऋं प्रापणे चेत्यनयोर्ग्रहणं सामान्यनिर्देशात् । तिङ्निर्देशो यङ्लुप्निवृत्त्यर्थः । रीति रीयतिरिणात्योर्ग्रहणम् । बहुवचनं व्याप्त्यर्थम्, तेन नाम्नोऽपि । मारणे–संज्ञपयति पशून् । तोषणे–ज्ञपयति गुरून् । निशाने–ज्ञपयति शरान् । अन्यत्र आज्ञापयति भृत्यम् । च्युण् सहने ॥१४९॥ च्यावयति । सहत इत्यर्थः । भूण् अवकल्कने ॥१५०॥ अवकल्कनं मिश्रीकरणम् । भावयति दध्नौदनम् । विकल्कन इति नन्दी । अवकल्पन इत्यन्ये ।

३७३ **ओर्जान्तःस्थापवर्गेऽवर्णे** ॥४।१।६०॥ धातोर्द्वित्वे सति पूर्वस्योकारान्तस्यावर्णान्ते जान्तस्थापवर्गे परतः सनि परे इकारोऽन्तादेशः स्यात् । अबीभवत् । ओरिति किम् । पापचिषते । जान्तस्थापवर्ग इति किम् । अवतुतावयिषति । अवर्ण इति किम् । बुभूषति । सनीत्येव । लुलाव । ननु ण्यन्तानां वृद्ध्यवादेशयोः कृतयोर्द्वित्वे सति पूर्वस्योकारान्तता न संभवति, तत्र सन्यस्येत्यनेनैव सिद्धे किं गुरुणा सूत्रेण, एतावत्तु विधेयम् 'ओः पय्येऽवर्णे' इति। पिपविषति, यियविषतीत्यत्र पूर्वस्योकारान्तस्येत्वं यथा स्यात् । सत्यं, णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद् भवतीति न्यायज्ञापनार्थं वचनम् । तेन पुस्फारयिषति चुक्षावयिषति शुशावयिषतीत्यादापि सिद्धम्। एतच्च ज्ञापकं जान्तस्थापवर्गवत् अन्यत्राप्यवर्ण एव द्रष्टव्यम्। तेनाचिकीर्तदित्यत्रेकारवतो द्विर्वचनं सिद्धम् । बुक्कण् भाषणे ॥१५१॥ भषण इत्यन्ये । बुक्कयति श्वा चौरान् । रक लक रग लगण् आस्वादने ॥१५५॥ आद्यावासादन इत्यन्ये । रागयति । लागयति । णिगि घटादित्वाद् ह्रस्वे रगयति । लगयति । लिगुण् चित्रीकरणे ॥१५६ लिङ्गयति । चर्चण् अध्ययने ॥१५७॥ अञ्चण् विशेषणे

॥१५८॥ अञ्चयत्यर्थम् । व्यक्तीकरोत्यर्थः । मुचण् प्रमोचने ॥१५९॥ मोचयति शरान् । प्रयोजन इत्यन्ये । मोचयति कुण्डले । प्रयोजयतीत्यर्थः। अर्जण् प्रतियत्ने ॥१६०॥ प्रतियत्नः संस्कारः । अर्जयति । भजण् विश्राणने ॥१६१॥ विश्राणनं विपचनम् । चट स्फुटण् भेदे ॥१६२॥ घटण् संघाते ॥१६३॥ घाटयति । अन्यत्र णिगि घटयति ।

३७४ घटादेर्ह्रस्वो दीर्घस्तु वा ञिणम्परे ॥४।२।२४॥ घटादीनां धातूनां णौ परे ह्रस्वः स्यात् ञिणम्परे तु णौ वा दीर्घः ॥ घटयति । अघाटि । अघटि । घाटंघाटम् । घटंघटम् । क्षञ्जिदक्ष्यादीनां घटादिपाठबलादनुपान्त्यस्यापि वा दीर्घः। वा ञिणम्पर इत्येव ह्रस्वविकल्पेन सिद्धे दीर्घग्रहणं हेडेरिकारस्य दीर्घत्वार्थम् । ह्रस्वविकल्पे हि पक्षे एकारश्रुतिः स्यात् । णिग्यङ्व्यवहितेऽपि णौ ञिणम्परे दीर्घत्वार्थं च । णिग्व्यवाये–शमयन्तं प्रयुङ्क्ते, णिग् तदन्तात् औ णमि, अशामि । अशमि । शामंशामम् । शमंशमम् । यङ्व्यवाये–शंशमयतेर्औ णमि च अशंशामि । अशंशमि । शंशामंशंशामम् । शंशमंशंशमम् । अत्र योऽसौ णौ णिर्लुप्यते यश्च यङोऽकारस्तस्य स्थानिवद्भावेन घटादीनां व्यवहितत्वात् आनन्तर्यं नास्तीति ञिणम्परे णौ न स्याद् ह्रस्वविकल्पः । दीर्घग्रहणे तु दीर्घविधिं प्रति स्थानिवद्भावप्रतिषेधादानन्तर्यमेवेति सिद्ध्यति । हन्त्यर्थाश्च । सर्वे हन्त्यर्था धातवोऽत्र चुरादौ पठितव्याः।

३७५ ञिणति घात् ॥४।३।१००॥ ञिणति प्रत्यये परे हन्तेर्घात् इत्ययमादेशः स्यात् । घातयति । हिंसयतीत्यादि । अनेनैव सिद्धे चुरादिषु हिंसार्थानां पाठ आत्मनेपदादिगतरूपभेदार्थः । कणण् निमीलने ॥१६४॥ काणयति । अचीकणत् । अचकाणत् । यतण् निकारोपस्कारयोः ॥१६५॥ निकारः खेदनम् । यातयत्यरिम् । उपस्कारे–यातयति च्छिद्रं राजा । प्रच्छादयतीत्यर्थः । शब्दण् उपसर्गाद् भाषाविष्कारयोः॥१६७॥ विशब्दयति। योगविभागोऽत्रेति नन्दी। शब्दण् उपसर्गादित्येकः। भाषाविकारयोरित्यपरः । प्रशब्दयति । द्वितीयोऽनुपसर्गार्थः । शब्दयति । ष्वदण् आश्रयणे ॥१६८॥ क्षरण इति केचित् । स्वदयति । आङः क्रन्दण् सातत्ये ॥१६९॥ आक्रन्दयति । अर्थान्तरे तु आक्रन्दति । ष्वदण् आस्वादने ॥१७०॥ संवरण इत्यन्ये । स्वादयति । आस्वदः सकर्मकात् । आस्वादयति यवागूम् । मुदण् संसर्गे ॥१७१॥ मोदयति सक्तून् सर्पिषा । संसृजतीत्यर्थः । शृधण् प्रसहने ॥१७१॥ प्रसहनमभिभवः । शर्धयत्यरिम् । अशीशृधत् । अशशर्धत् । कृपण् अवकल्कने

॥१७३॥ तच्च मिश्रीकरणं सामर्थ्यं च । अवकल्पनमित्येके । कल्पयति । जभुण् नाशने ॥१७४॥ जम्भयति । अमण् रोगे ॥१७५॥ आमयति । चरण् असंशये ॥१७६॥ विचारयति । निश्चिनोतीत्यर्थः । भक्षणे तु चरति । पूरण् आप्यायने । पूरयति ॥१७७॥ दलण् विदारणे ॥१७८॥ णिगि दलयतीत्येके । दिवण् अर्दने ॥१७९॥ देवयति शत्रून् । पश पषण् बन्धने ॥१८१॥ पाशयत्यश्वम् । पाषयति। दन्त्यान्तोऽयमित्येके । पुषण् धारणे ॥१८२॥ पोषयत्याभरणम् । घुषृण् विशब्दने ॥१८३॥ विशिष्टशब्दकरणेनाशब्दकरणे वेत्यर्थः । अविशब्दन इत्येके। अपघोषयति पापम्--अपहनुते इत्यर्थः। ऋदित्करणं णिचोऽनित्यत्वे लिङ्गम्। तेन अघुषत्, अघोषीत्, जुघुषुः पुष्पमाणवा इत्यादि सिद्धम् । कौशिकस्त्वाह--नायमृदिदिति । आङः क्रन्दे सातत्य इत्यपरे । आघोषयति। भूष तसुण् अलङ्कारे ॥१८५॥ भूषयति । अवतंसयति । जसण् ताडने ॥१८६॥ त्रसण् वारणे ॥१८७॥ धारण इति नन्दी । ग्रहण इत्येके । त्रासयति मृगान्--निराकरोतीत्यर्थः । वसण् स्नेहच्छेदावहरणेषु ॥१८८॥ अवहरणं मारणम् । वासयत्यरीन् । ध्रसण् उत्क्षेपे ॥१८९॥ उञ्छ इत्यन्ये । ध्रासयति । उकारादिरयमित्येके । ग्रसण् ग्रहणे ॥१९०॥ ग्रासयति फलम् । लसण् शिल्पयोगे ॥१९१॥ लासयति दारु । शान्तोऽयमित्येके । षान्तोऽयमित्यपरे । अर्हण् पूजायाम् ॥१९२ अर्हयति । आर्जिहत् । मोक्षण् असने ॥१९३॥ मोक्षयति शरान् । अस्यतीत्यर्थः । लोक् तर्क रघु लघु लोचृ विच्छ अजु तुजु पिजु लजु लुजु भजु पट पुट लुट घट घटु वृत पुथ नद वृध गुप धूप कुप चिव दशु कुशु त्रसु पिसु कुसु दसु बर्ह बृहु बल्ह अहु वहु महुण् भाषार्थाः ॥२३०॥ भासार्था इति पारायणम् ।

॥ इति परस्मैपदिनः ॥

॥ अथात्मनेपदिनः ॥

युणि जुगुप्सायाम् ॥२३१॥ यावयते धर्मं जाल्मः । अन्यत्र यौति । युनाति । युनीते । युजिरयमित्येके । योजयते । गृणि विज्ञाने ॥२३२॥ गारयते । विज्ञापन इत्येके । कृणीति चन्द्रः । कारयते । वञ्चि प्रलम्भने ॥२३३॥ वञ्चयते । कुटिण् प्रतापने ॥२३४॥ मदिण् तृप्तियोगे ॥२३५॥ तृप्तिशोधन इत्यन्ये । मादयते । विदिण् चेतनाख्याननिवासेषु ॥२३६॥ विवादेऽप्यन्ये । वेदयते । मनिण् स्तम्भे ॥२३७॥

स्तम्भो गर्वः । बलि भलिण् आभण्डने ॥२३९॥ आभण्डनं निरूपणम् । दिविण् परिक्रूजने ॥२४०॥ देवयते गन्त्री । वृषिण् शक्तिबन्धे ॥२४१॥ आवर्षयते ग्रामः । शक्तिं बध्नातीत्यर्थः । शक्तिबन्धः एजनसामर्थ्यमित्यन्ये । कुत्सिण् अवक्षेपे ॥२४२॥ लक्षिण् आलोचने ॥२४३॥ लक्षयते । हिष्कि किष्किण् हिंसायाम् ॥२४५॥ निष्किण् परिमाणे ॥२४६॥ तर्जिण् संतर्जने ॥२४७॥ कूटिण् अप्रमादे ॥२४८॥ आप्रदान इत्यन्ये । त्रुटिण् छेदने ॥२४९॥ त्रोटयते । डान्तोऽयमित्येके । शठिण् श्लाघायाम् ॥२५०॥ शाठयते । शटीति नन्दी । शलीति कौशिकः । कूणिण् संकोचने ॥२५१॥ तूणिण् पूरणे ॥२५२॥ तूलेति चन्द्रः । भ्रूणिण् आशंसायाम् ॥२५३॥ आशंकायामित्येके । चितिण् संवेदने ॥२५४॥ चेतयते । वस्ति गन्धिण् अर्दने ॥२५६॥ डप डिपि डम्पि डिम्पि डम्भि डिम्भिण् संघाते ॥२६२॥ स्यमिण् वितर्के ॥२६३॥ शमिण् आलोचने ॥१६४॥ शामयते । कुस्मिण् कुस्मयने ॥२६५॥ कुस्मयते । कुस्मयाञ्चक्रे । गूरिण् उद्यमे ॥२६६॥ गूरयते । तन्त्रिण् कुटुम्बधारणे ॥२६७॥ तन्त्रयते । कुटुम्बेत्यपि धातुरिति चान्द्राः । कुटुम्बयते । मन्त्रिण् गुप्तभाषणे ॥२६८॥ ललिण् ईप्सायाम् ॥२६९॥ लालयते । गलिण् स्रावण इति केचित् । स्पशिण् ग्रहणश्लेषणयोः ॥२६९॥ दंशिण् दशने ॥२७०॥ दशनं दंष्ट्राव्यापारः । दंशयते । दशिण् दान इत्येके । दंसिण् दर्शने च ॥२७१॥ चादशने । भर्त्सिण् संतर्जने ॥२७२॥ यक्षिण् पूजायाम् ॥२७३॥ यक्षयते । अयक्षत ।

॥ इत्यात्मनेपदिनः ॥

इतोऽदन्ताः । अत इत्यल्लुकः स्थानिवत्त्वाद् गुणवृद्धयोः समानलोपित्वाच्च सन्वद्भावदीर्घोपान्त्यह्रस्वानामभावः। अङ्कण् लक्षणे ॥२७४॥ अङ्कयति । आञ्चकत् । अस्यादन्तेषु पाठः पूर्वाचार्यानुरोधेन । णिजभावेऽनेकस्वरत्वाद्यङ्निवृत्त्यर्थः इत्येके । द्रमिलास्त्वेवंप्रकाराणामदन्ततासामर्थ्याल्लोपाभावं मन्यन्ते । तेन अङ्कापयति दुःखापयतीत्यादि । ते हि ङिणति वृद्धिं स्वरमात्रस्येच्छन्ति । अनदन्त एवायमित्येके । श्लेष्कण् दर्शने ॥२७५॥ सुख दुःखण् तत्क्रियायाम् ॥२७७॥ सुखयति । दुःखयति । अङ्कण् पदलक्षणयोः ॥२७८॥ अघण् पापकरणे ॥२७९॥ रचण् प्रतियत्ने ॥२८०॥ अररचत् । सूचण् पैशुन्ये ॥२८१॥ सूचयति । अघोपदेशत्वात् षत्वाभावे असुसूचत् । भाजण् पृथक्कर्मणि ॥२८२॥ सभाजण् प्रीतिसेवनयोः ॥२८३॥ प्रीतिदर्शनयोरित्यन्ये । लज लजुण् प्रकाशने ॥२८५॥ लजयति । लञ्ज-

यति । कूटण् दाहे ॥२८६॥ पट वटुण् ग्रन्थे ॥२८८॥ खेटण् भक्षणे ॥२८९॥ खेड इत्येके । खोटण् क्षेपे ॥२९०॥ डान्तोऽयमिति कश्चित् । दान्तोऽयमित्यन्ये । पुटण् संसर्गे ॥२९१॥ वटुण् विभाजने ॥२९२॥ वण्टयति । वण्टापयतीति कश्चित् । शठ श्वठण् सम्यग्भाषणे ॥२९४॥ दण्डण् दण्डनिपातने ॥२९६॥ व्रणण् गात्रविचूर्णने ॥२९६॥ वर्णण् वर्णक्रियाविस्तारगुणवचनेषु ॥२९७॥ पर्णण् हरितभावे ॥२९८॥ कर्णण् भेदे ॥२९९॥ तूणण् संकोचने ॥३००॥ वितूणयति मुखम् । गणण् संख्याने ॥३०१॥ गणयति ।

३७६ ई च गणः ॥४।१।६७॥ गणेर्ङपरे णौ द्वित्वे पूर्वस्येकारोऽकारश्चान्तादेशः स्यात् । अजीगणत् । अजगणत् । गणेरदन्तत्वेन समानलोपित्वात् सन्वद्भावो दीर्घत्वं च न प्राप्नोतीतीत्वविधिः । ' भूरिदाक्षिण्यसंपन्नं यत्त्वं सान्त्वमचीकथः ' इति प्रयोगदर्शनादन्येषामपि यथादर्शनमीत्वमिच्छन्त्येके । कुण गुण केतण् आमन्त्रणे ॥३०४॥ आमन्त्रणं गूढोक्तिः । कुणयति । अचुकुणत् । केतयति । अयं निश्रावणनिमन्त्रणयोरपीत्येके । पतण् गतौ वा ॥३०५॥ पतयति । अपपतत् । वाशब्दो णिजदन्तत्वयोर्युगपद्विकल्पार्थः । तेन पतति । अपातीत् । वातण् गतिसुखसेवनयोः ॥३०६॥ सुखसेवनयोरित्येके । वातयति । वा इति पृथग्धातुरित्यपरे । वापयति । कथण् वाक्यप्रबन्धे ॥३०७॥ वाक्यप्रतिबन्ध इत्यन्ये । कथयति । अचकथत् । श्रथण् दौर्बल्ये ॥३०८॥ श्रथयति । लत्वे श्लथयति । अशश्लथत् । छेदण् द्वैधीकरणे ॥३०९॥ गदण् वर्जे ॥३१०॥ गदयति । अजगदत् । अन्धण् दृष्ट्युपसंहारे ॥३११॥ अन्धयति । आन्दधत् । न वदनमिति नस्य द्वित्वाभावः । स्तनण् गर्जे ॥३१२॥ स्तनयति । ध्वनण् शब्दे ॥३१३॥ ध्वनयति । अदध्वनत् । स्तेनण् चौर्ये ॥३१४॥ स्तेनयति । अनेकस्वरत्वात् षोपदेशाभावेन न षत्वमिति अतिस्तेनत् । ऊनण् परिहाणे ॥३१५॥ ऊनयति । औननत् । मा भवान्नूनत् । कृपण् दौर्बल्ये ॥३१६॥ कृपयति । अचकृपत् । रूपण् रूपक्रियायाम् ॥३१७॥ रूपक्रिया राजमुद्रादिरूपस्य करणं रूपदर्शनं वा । रूपयति । अरुरूपत् । क्षप लाभण् प्रेरणे ॥३१९॥ क्षपयति । लाभयति । अललाभत् । लभण् इति सभ्याः । लम्भयतीति तु डुलभिष् प्राप्तावित्यस्य णिगि रूपम् । भामण् क्रोधे ॥३२०॥ अबभामत् । गोमण् उपलेपने ॥३२१॥ गोमयति भूमिम् । अजुगोमत् । सामण् सान्त्वने ॥३२२॥ सामयति । प्रीणयतीत्यर्थः । श्रामण् आमन्त्रणे ॥३२३॥

श्रामयति । अशश्रामत् । स्तोमण् श्लाघायाम् ॥३२४॥ स्तोमयति । व्ययण् वित्त-समुत्सर्गे ॥३२५॥ व्ययति । गताविच्छेके । वित्तेति धात्वन्तरमित्येके । वित्त-यति । सूत्रण् विमोचने ॥३२६॥ ग्रथने इत्यर्थः । सूत्रयति । असुसूत्रत् । मूत्रण् प्रस्रवणे ॥३२७॥ मूत्रयति । पार तीरण् कर्मसमाप्तौ ॥३२९॥ पारयति । अपपारत् । कत्र गात्रण् शैथिल्ये ॥३३१॥ अचकत्रत् । अजगात्रत् । चित्रण् चित्रक्रियाकदाचिद्दृष्ट्योः ॥३३२॥ चित्रयति । आलेख्यं करोति कदाचित् पश्यति वेत्यर्थः । वैचित्र्यकरणार्थोऽयं न चित्रक्रियार्थ इत्यपरे । छिद्रण् भेदे । ॥३३३॥ मिश्रण् संपर्चने ॥३३४॥ वरण् ईप्सायाम् ॥३३५॥ वरयति । अववरत् । स्वरण् आक्षेपे ॥३३६॥ शारण् दौर्बल्ये ॥३३७॥ तालव्यादिः। शरेति नन्दी । कुमारण् क्रीडायाम् ॥३३८॥ कुमारयति । अचुकुमारत् । लान्तोऽयमित्येके । कुमालयति । कलण् संख्यानगत्योः ॥३३९॥ कलयति । क्षेपे तु कालयति गाः । शीलण् उपधारणे ॥३४०॥ उपधारणमभ्यासः परिचयो वा । शीलयति । अशि-शीलत् । वेल कालण् उपदेशे ॥३४२॥ अविवेलत् । अचकालत् । वेलण् कालो-पदेश इत्येके । पल्यूलण् लवनपवनयोः ॥३४३॥ पल्यूलयति क्षेत्रं धान्यं वा । अपपल्यूलत् । वल्यूलेत्यन्ये । अंशण् समाघाते ॥३४४॥ समाघातो विभजनम् । अंशयति । चन्द्रो दन्त्यान्त्यमाह । ध्वंसयति । पषण् अनुपसर्गः ॥३४५॥ पषयति । अनुपसर्ग इति किम् । प्रपषति । गवेषण् मार्गणे ॥३४६॥ गवेषयति । अजगवेषत् । मृषण् क्षान्तौ ॥३४७॥ मृषयति । अममृषत् । रसण् आस्वादन-स्नेहनयोः ॥३४८॥ वासण् उपसेवायाम् ॥३४९॥ निवासण् आच्छादने ॥३५०॥ निवासयति । अनिनिवासत् । चहण् कल्कने ॥३५१॥

३७७ चहणः शाठ्ये ॥४।२।३१॥ चहेश्चौरादिकस्य शाठ्येऽर्थे वर्तमा-नस्य णिचि णौ परे ह्रस्वः स्यात् ञिणम्परे तु वा दीर्घः । अदन्तत्वात् सिद्धेऽपि दीर्घार्थं वचनम् । चहयति । णिल्करणाद् भौवादिकस्य न भवति । चाहयति । महण् पूजायाम् ॥३५२॥ अममहत् । रहण् त्यागे ॥३५३॥ रहयति । अररहत् । रहुण् गतौ ॥३५४॥ रंहयति । स्पृहण् ईप्सायाम् ॥३५५॥ पुष्पेभ्यः स्पृहयति । रूक्षण् पारुष्ये ॥३५६॥ रूक्षयति । अरुरूक्षत् ।

॥ इत्यदन्ताः परस्मैपदिनः ॥

मृगणि अन्वेषणे ॥३५७॥ मृगयते । अर्थणि उपयाचने ॥३५८॥ अर्थयते । पदणि गतौ ॥३५९॥ पदयते । अपपदत । संग्रामणि युद्धे ॥३६०॥ संग्रामयते । अयं परस्मैपदीत्येके । शूर वीरणि विक्रान्तौ ॥३६२॥ सत्रणि संदानक्रियायाम् । ॥३६३॥ सत्रयते । असिसत्रत । स्थूलणि परिबृहणे ॥३६४॥ गर्वणि माने । ॥३६५॥ गृहणि ग्रहणे ॥३६६॥ गृहयते । अजगृहत । कुहणि विस्मापने ।३६७। कुहयते । इत्यदन्ता आत्मनेपदिनः । अदन्तत्वं च [1]सुखादीनां णिच्संनियोगे एव द्रष्टव्यम् । तेन णिजभावे जगणतुः जगणिथेत्यत्र [2]अनेकस्वरत्वादाम् न ।

॥ अथ विभाषितणिचः ॥

युजण् संपर्चने ॥३६८॥

३७८ **युजादेर्न वा** ॥३।४।१८॥ चुरादयन्तर्गणो युजादिः । युजादिभ्यो धातुभ्यः स्वार्थे णिच् प्रत्ययो वा स्यात् । योजयति । योजति । अयूयुजत् । अयोजीत् । लीण् द्रवीकरणे ॥३६९॥

३७९ **लियो नोऽन्तः स्नेहद्रवे** ॥४।२।१५॥ ली इति लीङ्लीङोः सामान्येन ग्रहणम् [उपलक्षणत्वाल्लीण् इत्यस्यापि] । लियः—स्नेहद्रवेऽर्थे गम्यमाने णौ परे नोऽन्तोऽवयवो वा स्यात् । घृतं विलीनयति विलाययति । णौ वृद्धावायादेशः । लिय ई ली इति ईकारम[*]लेषात् ईकारान्तस्यैव भवति । कृतात्वस्य तु ।

३८० **लो लः** ॥४।२।२६॥ लातेर्ली इत्यस्य च कृतात्वस्य स्नेहद्रवेऽर्थे णौ परे लोऽन्तो वा स्यात् । घृतं विलालयति विलापयति । स्नेहद्रव इत्येव । जटाभिरालापयते । श्येनो वर्तिकामुल्लापयते । ' लीङ्लिनोऽर्चाभिभवे चाचार्कर्तर्यपि ' इत्यनेनात्मनेपदं च । पूर्वसूत्रेण नकारस्य पूर्वान्तकरणात् व्यलीलिनदित्यत्रोपान्त्यह्रस्वो भवति । एवमुत्तरत्रापि । णिजभावे विलयति । मीण् मतौ ॥३७०॥ गतावित्यन्ये । मायति । मयति । प्रीण् तर्पणे ॥३७१॥

---

१ अङ्कादीनामिति वक्तव्येऽङ्क्लेष्कयोः फलाभावात् सुखादीनामित्युक्तम् । पूर्वाचार्यानुरोधेन त्वदंतमध्ये पाठः ।

२ द्वित्वे सत्यनेकस्वरत्वेऽपि सन्निपातन्यायान्न । सन्निपातनिमित्तं ह्यनेकस्वरत्वम् ।


३८१ धूग्प्रीगोर्नः ॥४।२।१८॥ धूग् प्रीग् इत्येतयोर्णौ परे नोऽन्तः स्यात्। प्रीणयति। अपिप्रीणत्। यौजादिकयोर्नेच्छन्त्येके। प्राययति। गित्त्वस्य णिजभावे फलवत्कर्तर्यात्मनेपदार्थत्वम्। प्रयति। प्रयते। अनुबन्ध्यनिर्देशो यङ्लुबनिवृत्त्यर्थो धुवतिप्रीयतिनिवृत्त्यर्थश्च। दोधावयति। पेप्रायय्यति। धावयति। माययति। धूग्ण् कम्पने ॥३७२॥ धूनयति। धवति। धवते। अधावीत्। अधविष्ट। अधोष्ट। व्रग्ण् आवरणे ॥३७३॥ वारयति। वरति। वरते। जॄण् वयोहानौ ॥३७४॥ जारयति। जरति। अजारीत्। चीक शीकण् आमर्षणे ॥३७६॥ अचीचिकत्। अचीकीत्। अशीशिकत्। अशीकीत्। मार्गण् अन्वेषणे ॥३७७॥ मार्गयति। मार्गति। पृचण् संपर्चने ॥३७६॥ अपीपृचत्। अपपर्चत्। अपर्चीत्। रिचण् वियोजने ॥३७९॥ रेचयति। रेचति। वचण् भाषणे ॥३८०॥ संदेशन इत्येके। वाचयति। वचति। वच्यात्। यजादिवचेरित्यत्र यौजादिकस्य वचेरग्रहणान्न य्वृत्। अर्चिण् पूजायाम् ॥३८१॥ वृजैण् वर्जने ॥३८२॥ मृजौण् शौचालङ्कारयोः ॥३८३॥ मार्जयति। मृजोऽस्येति वृद्धिः। मार्जति। औदित्त्वाद्वेट्। मार्जयिता। मार्जिता। मार्ष्टा। कठुग् शोके ॥३८४॥ उत्कण्ठयति। उत्कण्ठति। श्रन्थ ग्रन्थण् सन्दर्भे ॥३८६॥ क्रथ अर्दिण् हिंसायाम् ॥३८८॥ चौरस्योत्क्राथयति। क्रथति। णिगि घटादित्वाद् ह्रस्वत्वे चौरमुत्क्रथयति। अर्दयति। अर्दते। श्रथण् बन्धने च ॥३८९॥ वदिण् ॥३९०॥ भाषणे। वादयति। संवदते। छदण् अपवारणे॥३९१॥ छादयति। छदति। आङः सदण् गतौ ॥३९२॥ आसादयति। आसीदति। आसदतीत्येके। आसादीत्। असदीत्। अनुस्वारेदयमित्येके। तन्मते आसात्सीत्। छृदण् संदीपने ॥३९३॥ छर्दयति। छर्दति। कृतचृतेत्यत्र तृद्साहचर्याद् रुधादिस्थस्यैव छृदेर्ग्रहणान्नेड्विकल्पः। छर्दिष्यति। एदिदयमित्येके। शुन्धिण् शुद्धौ ॥३९४॥ शुन्धयति। शुन्धते। अनिदिदयमित्येके। तनूण् श्रद्धाघाते ॥३९५॥ श्रद्धोपकरणयोरित्यन्ये। तानयति। तनति। उपसर्गादैर्घ्ये ॥३९६॥ आतानयति। मानण् पूजायाम् ॥३९७॥ मनण् इत्येके। मानयति। मानति। तपिण् दाहे ॥३९८॥ तापयति। तपते। तृपण् प्रीणने ॥३९९॥ सन्दीपन इत्येके। आप्लृण् लम्भने ॥४००॥ आपयति। आपिपत्। आपति। आपत्। दर्भैण् भये ॥४०१॥ दर्भयति। दर्भति। ईरण् क्षये ॥४०२॥ गताविच्छेके। ईरयति। ईरति। मृषिण् तितिक्षायाम् ॥४०३॥ मर्षयति। मर्षते। अर्चि–अर्दि–तपि–वदि–मृषयः परस्मैपदिन इति केचित्। शिषण् असर्वो-

पयोगे ॥४०४॥ असर्वोपयोगोऽनुपयुक्तत्वम् । शेषयति । शेषति । विपूर्वोऽतिशये ॥४०५॥ अतिशय उत्कर्षः । विशेषयति । विशेषति । व्यशेषीत् । जुषण् परितर्कणे ॥४०६॥ परितर्पण इत्येके । जोषयति । जोषति । धृषण् प्रसहने ॥४०७॥ प्रसहनमभिभवः । धर्षयति । धर्षति । अदीधृषत् । अदधर्षत् । अधर्षीत् । आदिदयमित्येके । हिंसुण् हिंसायाम् ॥४०८॥ हिंसयति । हिंसति । गर्हण् विनिन्दने ॥४०९॥ षहण् मर्षणे ॥४१०॥ साहयति । सहति । असीषहत् । असहीत् । बहुलमेतन्निदर्शनम् । यदेतद्भवत्यादिधातुपरिगणनं तद् बाहुल्येन निदर्शनत्वेन ज्ञेयम् । तेनात्रापठिता अपि क्रविप्रभृतयो लौकिकाः स्तम्भ्वादयः सौत्राश्चुलुम्पादयश्च वाक्यकरणीया धातव उदाहार्य्याः । विक्लवन्ते दिवि ग्रहाः । विच्छायीभवन्तीत्यर्थः । उपक्षपयति प्रावृट् । आसन्नीभवतीत्यर्थः । उत्तभ्नाति ।

" निपानं दोलयन्नेष प्रेङ्खोलयति मे मनः ।
पवनो वीजयन्नाशा ममाशामुच्चुलुम्पति " ॥

' तावत्खरः प्रखरमुल्लुलयाञ्चकार ' यद्वा भ्वादिगणाष्टकोक्ताः स्वार्थणिजन्ता अपि बहुलं भवन्ति । चुरादिपाठस्तु निदर्शनार्थः । यदाहुः—" निवृत्तप्रेषणाद्धातोः प्राक्तेऽर्थे णिजिष्यते " । रामो राज्यमचीकरत् । अकार्षीदित्यर्थः । प्रयोज्यव्यापारेऽपि प्रयोक्तृव्यापारानुप्रवेशो णिगं विनापि वृद्ध्यारोपाद् बहुलं भवति । जजान गर्भं मघवा । इन्द्रोऽजीजनदित्यर्थः । अथवा णिज्बहुलमित्येव सिद्धे सूत्रमूत्रच्छिद्रान्यादय उदाहरणार्थाः । तेनादन्तेष्वनुक्ता अपि बहुलं द्रष्टव्याः । वृत् युजादयः परस्मैपदिनः ।

॥ इति णित्चुरादयः ॥



॥ अथ ण्यन्तप्रक्रिया ॥

३८२ भूङः प्राप्तौ णिङ् ॥३।४।१९॥ भुवो धातोः प्राप्तावर्थे वर्तमानात् णिङ् प्रत्ययो वा स्यात् । भावयते । भवते । प्राप्नोतीत्यर्थः । भवतीत्येवान्यत्र । णिङिति ङकारः आत्मनेपदार्थः । भूङ इति ङकारनिर्देशो णिङभावेऽप्यात्मनेपदार्थः । प्राप्त्यभावेऽपि क्वचिदात्मनेपदमिष्यते ।—

" याचितारश्च नः सन्तु दातारश्च भवामहे ।
आक्रोष्टारश्च नः सन्तु क्षन्तारश्च भवामहे " । इति

प्राप्तावपि परस्मैपदमित्यन्ये । सर्वं भवति प्राप्नोतीत्यर्थः। अवकल्कने तु भावयतीत्येव । भूण् अवकल्कने इति चुरादौ पाठात् ।

३८३ **प्रयोक्तृव्यापारे णिग्** ॥३।४।२०॥ कर्तारं यः प्रयुङ्क्ते स प्रयोक्ता तद्व्यापारेऽभिधेये धातोर्णिग् प्रत्ययो वा स्यात्। व्यापारश्च प्रेषणाध्येषणनिमित्तभावाख्यानाभिनयज्ञानप्राप्तिभेदैरनेकधा भवति । तत्र तिरस्कारपूर्वको व्यापारः प्रेषणम् । सत्कारपूर्वकस्त्वध्येषणम् । णकारस्तूभयपदार्थः । भवन्तं प्रयुङ्क्ते भावयति । भावयते । पचन्तं प्रयुङ्क्ते पाचयति । अत्र प्रेषणेनाध्येषणेन वा यथासंभवं प्रयोक्तृत्वम् । वसन्तं प्रयुङ्क्ते वासयति भिक्षा । अत्र निमित्तभावेन । राजानमागच्छन्तं प्रयुङ्क्ते राजानमागमयति, मृगान् रमयति, रात्रिं विवासयति कथकः । अत्राख्यानेन । आख्यानेन हि बुद्ध्यारूढा राजादयः प्रयुक्ताः प्रतीयन्ते । कंसं घ्नन्तं प्रयुङ्क्ते कंसं घातयति, बलिं बन्धयति नटः । अत्राभिनयेन । पुष्येण युञ्जन्तं प्रयुङ्क्ते पुष्येण योजयति चन्द्रम्, मयाभियोजयति गणकः। अत्र कालज्ञानेन । उज्जयिन्याः प्रदोषे प्रस्थितो माहिष्मत्यां सूर्यमुद्गच्छन्तं प्रयुङ्क्ते माहिष्मत्यां सूर्यमुद्गमयति । रैवतकात् प्रस्थितः शत्रुञ्जये सूर्यं पातयति । अत्र प्राप्त्या । ननु कर्तापि करणादीनां प्रयोजक इति तद्व्यापारेऽपि णिग् प्राप्नोति । नैवम् । प्रयोक्तृग्रहणसामर्थ्यात् । तथा क्रियां कुर्वन्नेव कर्ताऽभिधीयते । तेन तूष्णीमासीने प्रयोज्ये मा पृच्छतु भवान् अनुयुङ्क्तां मा भवानित्यत्र णिग् न भवति । पञ्चम्या बाधितत्वाद्वा । वाधिकार आबहुलवचनात् पक्षे वाक्यार्थः। भवन्तं प्रायुङ्क्त इति वाक्ये भावि द् इति स्थिते णिश्रीति ङे उपान्त्यस्येति ह्रस्वे ततो णेर्लुकि असमानलोप इत्यादिना सन्वद्भावे 'ओर्जान्तस्थापवर्गेऽवर्णे' अबीभवत्। अजीजवत्। अयीयवत्। अरीरवत्। अलीलवत् । अपीपवत् । अमीमवत् ।

३८४ **श्रुस्रुद्रुप्लुच्योर्वा** ॥४।१।६१॥ एषां सनि परे द्वित्वे सति पूर्वस्योकारान्तस्यान्तस्थायामवर्णान्तायां परत इकारोऽन्तादेशो वा स्यात् । अशिश्रवत् । अशुश्रवत्। असिस्रवत्। असुस्रवत् । अदिद्रवत्। अदुद्रवत्। अपिप्लवत्। अपुप्लवत् । अपिप्लुवत्। अपुप्लुवत्। अचिच्यवत्। अचुच्यवत्। वचनादेकेनावर्णेनान्तस्थाया व्यवधानमाश्रीयते। अवर्ण इत्येव । शुश्रूषते । ओरित्येव । सोस्रविषति । अशशासत् । अडुढौकत् । अचचकासत् । मतान्तरे अचीचकासत् । ऋदिद्वर्जनाद् ह्रस्वनिषेधे राजयति । अरराजत् । णिजन्ताण्णिग् । णिलोपे चोरयति । अचूचुरत् । 'घटा-

देर्ह्रस्वः' इति ह्रस्वे घटयति । अजीघटत् । स्मरयति । स्मृदृत्वरेति अः। असस्मरत् । अददरत् । अतत्वरत् ।

३८५ **वा वेष्टचेष्टः** ॥४।१।६६॥ वेष्टचेष्टोर्धात्वोरसमानलोपे ङपरे णौ द्वित्वे सति पूर्वस्य आकारान्तादेशो वा स्यात् । अववेष्टत् । अविवेष्टत् । अचचेष्टत् । अचिचेष्टत् । भ्राजभासेति ह्रस्वविकल्पे पूर्वस्य सन्वद्भावेनेत्वे अविभ्रजत् । अबभ्राजत् । अविभ्रसत् । अवभ्रासत् । अदीदिपत् । अदिदीपत् । वर्तयति । ऋदृवर्णस्येति ऋत्वे पक्षे गुणः । अवीवृतत् । अववर्तत् । अर्तीति पुः । अर्पयति । आर्पिपत् । रेपयति । व्लेपयति । ह्रेपयति ।

३८६ **ख्वोः प्वञ्व्यञ्जने लुक्** ॥४।४।११२॥ पौ यकाररहितव्यञ्जनादौ च प्रत्यये यकारवकारयोर्लुक् स्यात् । पुग्रहणमप्रत्ययार्थम् । क्रोपयति । क्ष्मापयति । कथं दृक्षवयतीति दृक्षव् ? णिलुकः थानिवत्त्वाद् भविष्यति । यवर्जनं किम् । क्रूय्यते । व्यञ्जन इति किम् ! क्न्यिता । प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणात् धात्ववयवे न भवति । व्रश्चकः । स्वापयति । स्वपेर्यङ्ङे चेति ण्वृत् । ततो द्वित्वे असूषुपत् ।

३८७ **णौ क्रीजीङः** ॥४।२।१०॥ क्रींङ् जि इङ् इत्येतेषां णौ परे आकारोऽन्तादेशः स्यात् । क्रापयति । जापयति । अध्यापयति ।

३८८ **णौ सन्ङे वा** ॥४।४।२७॥ सन्परे ङपरे च णौ परत इङो गादेशो वा स्यात् । अध्यजीगपत् । अध्यापिपत् । णाविति किम् । अधिजिगांसते । सन्ङ इति किम् । अध्यापयति ।

३८९ **सिध्यतेरज्ञाने** ॥४।२।११॥ षिधूच् संराद्धावित्यस्याज्ञाने वर्तमानस्य णौ परतः स्वरस्याकारः स्यात् । मन्त्रं साधयति । अन्नं साधयति साधर्मिकेभ्यो दातुम् । अज्ञान इति किम् । तपस्तपस्विनं सेधयति । सिध्यति जानीते तपस्वी ज्ञानविशेषमासादयति तं तपः प्रयुङ्क्ते इत्यर्थः। सिध्यतेरिति किम् । षिधू गत्यामिति भौवादिकस्य मा भूत् । अन्नं सेधयतीति प्रयोगनिवृत्त्यर्थं वचनम् ।

३९० **चिस्फुरोर्नवा** ॥ ४।२।१२ ॥ चिनोतेः स्फुरतेश्च णौ परे स्वरस्यात्वं वा स्यात् । चापयति । चाययति । स्फारयति । स्फोरयति ।

३९१ **विगः प्रजने** ॥ ४।२।१३ ॥ प्रजनो जन्मन उपक्रमो गर्भग्रहणम् । तस्मिन् वर्तमानस्य वी इत्येतस्य णौ परे आत्वमन्तादेशो वा स्यात् । पुरो वातो गाः प्रवापयति । प्रवाययति । गर्भं ग्राहयतीत्यर्थः । वातेः प्रजने वृत्तिर्नास्तीति आरंभः ।

३९२ **रुहः पः** ॥ ४।२।१४ ॥ रुहेर्णौ परतः पकारोऽन्तादेशो वा स्यात् । रोपयति रोहयति व्रीहीन् । रोहत्यर्थे रुप्यतिर्न दृश्यते इति योगारंभः । लियो नोऽन्त इति वा ने घृतं विलीनयति, विलाययति । कृतात्वस्य तु लकारपकारौ विलालयति, विलापयति ।

३९३ **पातेः** ॥ ४।२।१७ ॥ पृथग्योगाद्वेति निवृत्तम् । पांक् रक्षणे इत्येतस्य णौ परे लोऽन्तः स्यात् । पालयति । अपीपलत् । ' पलण् रक्षणे ' इति चौरादिकेनैव सिद्धे पातेर्योऽन्तः स्यादिति वचनम् । तिव्निर्देशो धात्वन्तरनिवृत्त्यर्थः। पा पाने, पैं शोषणे वा, पाययति । यङ्लुप्निवृत्त्यर्थश्च । पापाययति ।

३९४ **वो विधूनने जः**॥४।२।१८॥ वा इत्येतस्य विधूननेऽर्थे णौ परे जोऽन्तः स्यात् । पक्षकेण उपवाजयति । अवीवजत् । विधूनन इति किम् । ओवैं–केशानवापयति । शोषयतीत्यर्थः । वजिनैव सिद्धे वाते रूपान्तरनिवृत्त्यर्थं वचनम् ।

३९५ **पाशाछासावेव्याह्वो यः**॥४।२।२०॥ एषां णौ परे योऽन्तः स्यात् । पोरपवादो योगः । पां पाने, पैं शोषणे वा, पाययति । पातेस्तु लकार उक्तः । शोंच् शाययति । छोंच् अवच्छाययति । सों सैं वा अवसाययति । वेंग् वाययति । वे इत्यनात्वेन निर्देशो वांक् गतिगन्धनयोः, ओवैं शोषणे इत्यनयोर्निवृत्त्यर्थः । वापयति । व्येंग् व्याययति । ह्वेंग् ह्वाययति । एषां कृतात्वानां ग्रहणादिह प्रकरणे लाक्षणिकस्यापि ग्रहणं भवति । तेन क्रापयतीत्यादि सिद्धम् । पैं शोषणे इत्यस्य अद्यतन्यां अपीपयत् । पिबतेस्तु ।

३९६ **ङे पिबः पिप्य्** ॥४।१।३३॥ ण्यन्तस्य पिबतेर्ङे परे पीप्य् इत्ययमादेशः स्यात् न चायं द्विः। अपीप्यत् । पिबतिनिर्देशात् पातेर्न । अपीपलत् । लुप्तितिव्निर्देशाद्यङ्लुप्यपि न । अपापयत् । शोंच्–अद्यतनी–अशीशयदित्यादि । ह्वेंग अद्यतन्याम्–

३९७ णौ ङसनि ॥४।१।८८॥ ह्वयतेः सस्वरान्तस्था ङपरे सन्परे च णौ विषये ग्वृत् स्यात्। अजूहवत्। णाविति विषयसप्तमी किम्। णिविषय एवान्तरङ्गमपि मकारागमं बाधित्वा ग्वृद्यथा स्यात्।

३९८ श्वेर्वा ॥४।१।८९॥ श्वयतेः सस्वरान्तस्था ङपरे सन्परे च णौ विषये ग्वृद्वा स्यात्। अशूशवत्। अशिश्वियत्। विषयविज्ञानादन्तरङ्गमपि वृद्ध्यादिकं ग्वृता बाध्यते। कृते च तस्मिन् वृद्धिः, तत आवादेश उपान्त्यह्रस्वत्वम्। ततो णिकृतस्य स्थानित्वात् शोर्द्वित्वं ततः पूर्वदीर्घ इति क्रमः।

३९९ स्फाय् स्फाव् ॥४।२।२२॥ स्फायतिर्णौ परे स्फाव् इत्ययमादेशः स्यात्। स्फावयति। अभेदनिर्देशोऽन्ताधिकारनिवृत्त्यर्थः।

४०० शदेरगतौ शात् ॥४।२।२३॥ शीयतेरगतावर्थे णौ परे शात् इत्ययमादेशः स्यात्। पुष्पाणि शातयति। अगताविति किम्। गोपालको गाः शादयति। गमयतीत्यर्थः।

४०१ कगेवनूजनैजूष्क्रस्रञ्जः ॥ ४।२।२५ ॥ एषां णौ परे ह्रस्वः स्यात् ञिणम्परे तु णौ वा दीर्घः। कगे–इति सौत्रो धातुः। एकारश्चैदित्कार्यार्थः। कगयति। वन्–उपवनयति। जनै–जनयति। जूष्–जरयति। क्रस्–क्रसयति। रञ्जेस्तु।

४०२ णौ मृगरमणे ॥४।२।५१॥ रञ्जेरुपान्त्यनकारस्य णौ परे मृगाणां रमणे–क्रीडायामर्थे लुक् स्यात्। रजयति मृगान् व्याधः। मृगरमण इति किम्। रञ्जयति रजको वस्त्रम्। रञ्जयति सभां नटः। नलोपे वचनस्य चरितार्थत्वात् नलोपाभावे 'अरञ्जि' इत्यादौ दीर्घो न। केचित्तु ष्णासूच् निरसने इत्यस्यापि (ह्रस्वम्) इच्छन्ति। वनू इत्यूकारनिर्देशात् 'वन भक्तौ' इत्यस्य न भवति। वानयति। कगादीनां तु अर्थविशेषो नोपादीयते।

४०३ अमोऽकम्यमिचमः ॥ ४।२।२६ ॥ कम्यमिचमिवर्जितस्यामन्तस्य धातोर्णौ परे ह्रस्वः स्यात् ञिणम्परे तु णौ वा दीर्घः। रमयति। दमयति। गमयति। कथं संक्रामयति? संक्रामन्तं करोतीति शत्रन्ताण्णिजि भविष्यति। अकम्यमिचम इति किम्। कामयते। आमयति। आचामयति।

४०४ पर्यपात्स्खदः ॥४।२।२७॥ पर्यपाभ्यामेव परस्य स्खदेर्णौ परे ह्रस्वः स्यात् ञिणम्परे तु वा दीर्घः। परिस्खदयति। अपस्खदयति। अवादप्यन्ये। अवस्खदयति। स्खदेर्घटादिपाठेन सिद्धे नियमार्थं वचनम्। अन्योपसर्गपूर्वस्य मा भूत्। प्रस्खादयति। अन्ये तु निषेधाधिकारे 'अपपरिस्खदः' इति पठित्वा पर्यपपूर्वस्य स्खदेर्निषेधमिच्छन्ति। तन्मते परिस्खादयति, अपस्खादयतीत्यादि भवति। पर्यपाभ्यामन्यत्र प्रस्खदयतीत्यादि भवति।

४०५ शमोऽदर्शने ॥४।२।२८॥ अदर्शनेऽर्थे वर्तमानस्य शमेर्णौ परे ह्रस्वः स्यात् ञिणम्परे तु वा दीर्घः। शमयति रोगम्। अदर्शन इति किम्। निशामयति रूपम्। दर्शन एव केचिदिच्छन्ति। तेषामुदाहरणप्रत्युदाहरणयोर्विपर्ययः।

४०६ ज्वलहलह्मलग्लास्नावनूवमनमोऽनुपसर्गस्य वा ॥४।२।३२॥ एषामनुपसर्गाणां णौ परे ह्रस्वो वा स्यात्। ज्वलयति। ज्वालयति। ह्लयति। ह्लालयति। ह्मलयति। ह्मालयति। ग्लपयति। ग्लापयति। स्नपयति। स्नापयति। वनयति। वानयति। वमयति। वामयति। नमयति। नामयति। अनुपसर्गस्येति किम्। प्रज्वलयति। प्रह्लयति। प्रह्मलयति। प्रग्लापयति। प्रस्नापयति। प्रवनयति। प्रवमयति। प्रणमयति। ग्लास्नोरप्राप्ते शेषाणां तु प्राप्ते विभाषा। ग्रापयति।

४०७ जिघ्रतेरिः ॥४।२।३८॥ जिघ्रतेरुपान्त्यस्य ङपरे णाविकारो वा स्यात्। अजिघ्रिपत्। अजिघ्रपत्। तिङ्निर्देशो यङ्लुङ्निवृत्त्यर्थः। अजाघ्रपत्।

४०८ तिष्ठतेः ॥ ४।२।३९ ॥ तिष्ठतेरुपान्त्यस्य ङपरे णाविकारः स्यात्। अतिष्ठिपत्। योगविभागो नित्यार्थः।

४०९ ऊदुदुषो णौ ॥ ४।२।४० ॥ दुषेरुपान्त्यस्य णौ परे ऊकारादेशः स्यात्। दुष्यन्तं प्रयुङ्क्ते दूषयति। णाविति किम्। दोषो वर्तते। धातोः स्वरूपग्रहणे तत्प्रत्ययविज्ञानादिह न। दोषणं दुट् क्विप्। दुषमाचष्टे दुषयति। पुनर्णिग्रहणं ङनिवृत्त्यर्थम्। ङे ह्रस्वो न भवतीत्यन्ये। अदुदूषत्।

४१० चित्ते वा ॥४।२।४१॥ चित्तविषयस्य चित्तकर्तृकस्य दुषेरुपान्त्यस्य णौ परे ऊद्वा स्यात्। चित्तं दुष्यति तदन्यः प्रयुङ्क्ते चित्तं दूषयति, दोषयति। मनो दूषयति, दोषयति। चित्तग्रहणेन प्रज्ञाया अपि ग्रहणात् प्रज्ञां दूषयति, दोषयति।

गोहःस्वरे । निगूहयति । ओणेर्ऋदित्करणाल्लिङ्गात् नित्यादपि द्विर्वचनात् प्रागेवोपान्त्यह्रस्व इति मा भवानाटिटत् । मा भवानानिदिधत् । मा भवान् मेदिधत् । आशिशत् । साहयति । न्यसीषहत् । अत्र असोऽसिवूसहस्सटामिति सोविषयस्य ङविषयस्य च वर्जनात् सस्य षत्वं न । एवं पर्यसीषिवत् । व्यतस्तम्यत् । प्राणयति । प्राणिणत् । न वदनं संयोगादिः । औब्जिजत् । आड्डिडत् । औन्दिदत् ।

४११ **णावज्ञाने गमुः** ॥४।४।२४॥ णिकोरज्ञाने वर्तमानयोर्णौ विषये गमु इत्ययमादेशः स्यात् । उकारः 'स्वरहन्गमोः सनि धुटि' इत्यत्र विशेषणार्थः। गमयति ग्रामम् । अधिगमयति प्रियम् । अज्ञान इति किम् । अर्थान् प्रत्याययति । अज्ञान इतीणो विशेषणं नेकोऽसंभवात् । धात्वन्तरेणैव सिद्धे णाविको ज्ञानादन्यत्रेणश्च रूपान्तरनिवृत्त्यर्थं वचनम् । कथमर्थान् गमयन्ति शब्दाः। गमिनैव सिद्धम् । ईर्ष्यायति । ऐर्षिष्यत् ।

४१२ **रभोऽपरोक्षाशत्रि** ॥४।४।१०३॥ रभतेः स्वरात्परःपरोक्षाशत्रवर्जिते स्वरादौ प्रत्यये परे नोऽन्तः स्यात् । आरम्भयति । आरम्भत । अपरोक्षाशत्रीति किम् । आरेभे । आरभते ।

४१३ **लभः** ॥ ४।४।१०४ ॥ लभतेः स्वरात्परः परोक्षाशत्रवर्जिते स्वरादौ प्रत्यये परे नोऽन्तः स्यात् । लम्भयति । अपरोक्षाशत्रीत्येव । लेभे । लभते । लभेः परस्मैपदस्याप्यभिधानात् लभन्ती स्त्रीति केचित् । स्वर इत्येव । लब्धा । योगविभाग उत्तरार्थः ।

॥ इति ण्यन्तप्रक्रिया ॥

॥ अथ सन्नन्तप्रक्रिया ॥

४१४ **तुमर्हादिच्छायां सन्नतत्सनः** ॥३।४।२१॥ यो धातुरिषेः कर्म इषिणैव च समानकर्तृकः स तुमर्हः, तस्मादिच्छायामर्थे सन् प्रत्ययो वा स्यात् न चेत्स इच्छासन्नन्तो भवति । नकारः सन्ग्रहणेषु विशेषणार्थः । सन्यङश्चेति द्वित्वम् । सन्यस्येति पूर्वस्येकारे नाम्यन्तस्थेति षत्वे च पठितुमिच्छति पिपठिषति । तुमर्हादिति किं । अकर्मणोऽसमानकर्तृकाच्च मा भूत् । गमनेनेच्छति । इच्छायामिति

किम् । भोक्तुं व्रजति । अतत्सन इति किम् । चिकीर्षितुमिच्छति। तदग्रहणं किम् । जुगुप्सिषते । सनोऽकारः किम् । अर्थान् मतीषिषति । कथं नदीकूलं पिपतिषति ? पतितुमिच्छतीति वाक्यवदुपमानाद् भविष्यति । अपिपठिषीत् । पिपठिषाञ्चकार । पिपठिष्यात् । पिपठिषिता । पिपठिषिष्यति । स्वरादेर्द्वितीयः । अटिटिषति । घस्लृसनघतनीति घस्लादेशे अत्तुमिच्छति जिघत्सति । अजिघत्सीत् ।

४१५ यिः सन्वेर्ष्यः ॥४।१।११॥ ईर्ष्यतेर्द्विर्वचनभाजो यिः सन् वा द्विः स्यात् । ईर्ष्ययिषति । ईर्ष्यिषति ।

४१६ ग्रहगुहश्च सनः ॥४।४।६०॥ ग्रहिगुहिभ्यामुवर्णान्ताच्च धातोर्विहितस्य सन आदिरिट् न स्यात् ।

४१७ रुदविदमुषग्रहस्वपप्रच्छः सन् च ॥४।४।३२॥ सेडिति निवृत्तम् । एभ्यः परः सन् क्त्वा च किद्वत्स्याताम् । जिघृक्षति । जुघुक्षति । रुरुदिषति । विविदिषति । मुमुषिषति । सुषुप्सति । पिपृच्छिषति । रुदविदमुषो ' वौ व्यञ्जनादेः सन् चाऽस्यवः ' इति विकल्पे ग्रहेस्तु ' क्त्वा ' इति प्रतिषेधे प्राप्ते वचनम् । स्वपिप्रच्छ्योः सन्नर्थमेव । गुहेरिटमपीच्छत्यन्यः। जुगूहिषन् मत्तगजोऽभ्यधावत् । स्वापयितुमिच्छति ।

४१८ स्वपो णावुः ॥४।१।६२॥ स्वपेर्णौ सति द्वित्वे कृते पूर्वस्योकारान्तादेशः स्यात् । स्वपेर्णौ णकेक्यनि णौ ङे च असुष्वापकीयत् । स्वापेः किबन्तात् कर्तुः किपि यङ् सोष्वाप्यते । अन्ये तु णौ सति द्वित्वनिमित्तानन्तर्य एवेच्छन्ति । स्वापकीयतेः सनि सिष्वापकीयिषति । णाविति किम् । णकान्तात् क्यनि सनि च सिष्वापकीयिषति । स्वपो णाविति किम् । स्वापं चिकीर्षति सिष्वापयिषति । अत्र न स्वपेर्णिर्घञा व्यवधानात् । स्वपो णौ सति द्वित्व इति किम् । सोषोपयिषति । अत्र यङ्लुबन्तात् द्वित्वे सति णिर्न तु णौ सति द्वित्वमिति ।

४१९ नामिनोऽनिट् ॥४।३।३३॥ नाम्यन्ताद्धातोरनिट् सन् किद्वत्स्यात् ।

४२० स्वरहनगमोः सनि धुटि ॥४।१।१०४॥ स्वरान्तस्य धातोर्हन्तेर्गमेश्च धुडादौ सनि परे स्वरस्य दीर्घः स्यात् । चिचीषति । चेः किर्वा । चिकीषति । तुतूषति । कृगः सनि चिकीर्षति । हन्तुमिच्छति जिघांसति । गम्विति इणिङ्कादेशस्य गमेर्ग्रहणम् ।

४२१ **सनीङश्च** ॥ ४।४।२५ ॥ इङ इणिकोश्चाज्ञाने वर्तमानयोः सनि परे गमुरादेशः स्यात् । अज्ञान इति इण एव विशेषणं नेङिकोरसंभवात् ।

४२२ **प्राग्वत्** ॥३।३।७४॥ सनः प्राक् पूर्वो यो धातुस्तस्मादिव सन्नन्तात् कर्तर्यात्मनेपदं स्यात् । यत्पूर्वस्य धातोरनुबन्धेनोपपदेनार्थविशेषेण वात्मनेपदं दृष्टं तत्सन्नन्तादतिदिश्यते । इङ्–अधिजिगांसते विद्याम् । इण्–अधिजिगमिषति ग्रामम् । इक्–मातुरधिजिगमिषति । ज्ञाने तु अर्थान् मतीषिषति । णौ सन्ङे चेति वा इङो गाङादेशे अधिजिगापयिषति । अध्यापिपयिषति । यत्पुनः समत्ययधातुनिमित्तं तत् (प्राग्वत् इत्यनेन) नातिदिश्यते । शिशित्सति । मुमूर्षति । अत्र हि न शदिम्रियती एव निमित्ते किं तर्हि शिदाशीरद्यतन्योऽपि । अनुबन्धादिनिमित्तमपि यद् विशेषविधानबाधया प्राग्न दृष्टं तन्नातिदिश्यते । यथा अनुकरोति–अनुचिकीर्षति । पराकरोति–पराचिकीर्षति । तिजादीनां त्वर्थविशेषेषु केवलानामप्रयोगात् सन्नन्तसमुदायार्थमेव अनुबन्धविधानम् । तेन तितिक्षते, जुगुप्सते, मीमांसते, इत्यादौ प्रागदृष्टमपि आत्मनेपदमनुबन्धसामर्थ्याद् भवति । यथा कुस्मिचित्रञ्जहीङ्हृणीङामनुबन्धो णिच्क्यन्यगन्तसमुदायार्थः। विकुस्मयते, चित्रीयते, महीयते, हृणीयते । अवयवे वा कृतं लिङ्गं समुदायस्य विशेषकं भवति यं समुदायं सोऽवयवो न व्यभिचरति । यथा गोः सक्थनि कर्णे वा कृतं लिङ्गं चिन्हं गोरेव विशेषकं भवति न गोमण्डलस्य । सन्नन्तं च समुदायं तिजादयोऽर्थविशेषेषु न व्यभिचरन्ति णिगन्तं पुनर्व्यभिचरन्ति । ननु सन्नन्तमपि व्यभिचरन्ति तेजयति, गोपायति, मानयतीति । नैवम् । अर्थविशेषेषु न व्यभिचार इत्युक्तत्वात् । शीङ् शिशयिषते । निविविक्षते । शास्त्रेऽस्य क्रमते बुद्धिः, चिक्रंसते उभयेन ।

उपान्त्ये । बिभित्सते । बुभुत्सते । विवृत्सति । विवर्तिषति । अनिडित्येव । विवर्धिषते । नामिन इत्येव । यियक्षति । विवत्सति । कृतवृतेतीड्विकल्पे निनृत्सति । निनर्तिषति । चिकृत्सति । चिकर्तिषति ।

४२३ **वौ व्यञ्जनादेः सनूचाय्वः** ॥ ४।३।२५ ॥ वौ उकारे इकारे चोपान्त्ये सति व्यञ्जनादेर्धातोः परः क्त्वा सन् च सेटौ वा किद्वत्स्यातां 'अय्वः' यकारान्ताद् वकारान्ताच्च न भवतः । दिद्युतिषते । दिद्योतिषते । मुमुदिषते । मुमोदिषते । लिलिखिषति । लिलेखिषति । शिश्वितिषते । शिश्वेतिषते । व्यञ्ज-

नादेरिति किम् । ओषिषिषति । सेडित्येव । बुभुक्षते । अय्व इति किम् । दिदेविषति ।

४२४ इवृधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृदृदरिद्रः सनः ॥४।४।४७॥ इवन्तेभ्य ऋधभ्रस्जदम्भश्रियुऊर्णुभरतिज्ञपिसनितनिपतिवृभ्य ऋकारान्तेभ्यो दरिद्रातेश्च परस्य सन आदिरिड् वा स्यात् । दुधूषति । सिस्यूषति । सिसेविषति ।

४२५ ऋध ईर्त् ॥४।१।१७॥ ऋधः सकारादौ सनि परे ईर्त् इत्यादेशो न चास्य द्विः । ईर्त्सति । सीत्येव । अर्दिधिषति । ' भृज्जो भर्ज् ' बिभ्रक्षति । बिभ्रर्क्षति । बिभर्जिषति । बिभ्रज्जिषति ।

४२६ दम्भो धिप् धीप् ॥४।१।१८॥ दम्भेः सकारादौ सनि परे धिप् धीप् इत्येतावादेशौ स्याताम् न चास्य द्विः । धिप्सति । धीप्सति । सीत्येव । दिदम्भिषति । शिश्रीषति । शिश्रयिषति । युयूषति । ओर्जान्तस्थेतीकारः । यियविषति । प्रोर्णुनूषति । प्रोर्णुनुविषति । प्रोर्णुनविषति । बुभूर्षति । बिभरिषति । शन्निर्देशो यङ्लुपो बिभर्तेश्च निवृत्त्यर्थः । बिभर्तेरपीच्छन्त्येके । इडभावपक्षे गुणमपि । बिभर्षति । बिभरिषति । तन्मतसंग्रहार्थं कृतगुणस्य भृगो निर्देशः । तेन इडभावपक्षेऽपि गुणो भवति ।

४२७ ज्ञप्यापो ज्ञीपी न च द्विः सि सनि ॥४।१।१९॥ ज्ञपेरापेश्च सकारादौ सनि परे यथासंख्यं ज्ञी पीप् इत्येतावादेशौ स्याताम् , न चानयोरेकस्वरोऽशो द्विः । आदेशे कृते द्वित्वं प्राप्नोतीति निषिध्यते । आदेशसंनियोगे च निषेधात् अन्यत्र द्वित्वं भवत्येव । ज्ञीप्सति । सीत्येव । जिज्ञपयिषति । ईप्सति । ज्ञपीति कृतह्रस्वस्योपादानात् ज्ञापेर्जिज्ञापयिषतीत्येव । सनीति सनतेः सनोतेश्च ग्रहणम् ।

४२८ सनि ॥४।२।६१॥खनादीनां धुडादौ सनि परतोऽन्तस्यात्वं स्यात् । सिषासति । खनिजनोरिटा भवितव्यमिति धुडादिः सन्न भवति । धुटीत्येव । सिसनिषति ।

४२९ **तनो वा** ॥४।१।१०५॥ तनोतेर्धुडादौ सनि परे स्वरस्य दीर्घो वा स्यात् । तितांसति । तितंसति । धुटीत्येव । तितनिषति ।

४३० **रभलभशकपतपदामिः** ॥४।१।२१॥ एषां स्वरस्य सकारादौ सनि परे इकार आदेशः स्यात् न चैषां द्विः । बहुवचनं शकीच्शक्लृंटोरुभयोरपि परिग्रहार्थम् । पित्सति । पिपतिषति । आरिप्सते । लिप्सते । शिक्षते । पित्सते । वृ इति वृञ्वृङोर्ग्रहणम् । मावुवूर्षति । माविवरीषति । वुवूर्षते । विवरिषते । विवरीषते । ऋदन्त–तितीर्षति । तितरिषति । तितरीषति । चिकीर्षतीत्यत्र तु लाक्षणिकत्वान्न भवति । दरिद्रा–दिदरिद्रासति । दिदरिद्रिषति । योः 'ग्रहगुहश्च सनः' भ्रस्जभृगोस्तुसामान्येन प्रतिषेधेऽन्येषां च नित्यमिटि प्राप्ते [इट्त्वेति] विकल्पोऽयम् ।

४३१ **ऋस्मिपूङभ्रशौकृगृदधृप्रच्छः** ॥४।४।४८॥ पृथग्योगाद्वेति निवृत्तम् । एभ्यः परस्य सन आदिरिट् स्यात् । ऋ–अरिरिषति । स्मि–सिस्मयिषते । पूङ्–पिपविषते । अनुबन्धनिर्देशात् पूगः पुपूषति, पुपूषते । अङ्क्–अङ्किजिषति । अशौ–अशिशिषते । अश्नातेस्त्विडस्त्येव । कृ–चिकरिषति । चिकरीषति । गृ–जिगरिषति । जिगरीषति । वृतो नवेत्यादिना पक्षे दीर्घत्वम् । अन्ये तु व्यवस्थितविभाषयाऽस्येटो दीर्घत्वं नेच्छन्ति । दंङ्–आदिदरिषते । धृंङ्–आदिधरिषते । प्रच्छ्–पिपृच्छिषति । प्रच्छसहचरिताः कृगृधृ इत्येते तौदादिकाः । तेन कृणातेश्चिकीर्षति । चिकरिषति । चिकरीषति । गृणातेः जिगीर्षति । जिगरिषति । जिगरीषति । धरतेर्दिधीर्षतीत्येव भवति । ऋस्मिपूङ्दधृप्रच्छामप्राप्ते शेषाणां विकल्पे प्राप्ते वचनम् ।

४३२ **अव्याप्यस्य मुचेर्मोग्वा** ॥ ४।१।१९ ॥ मुचेरकर्मकस्य सकारादौ सनि परे मोक् इत्ययमादेशो वा स्यात् न चास्य द्विः । मोक्षति, मुमुक्षति चैत्रः । मोक्षते मुमुक्षते वा वत्सः स्वयमेव । अव्याप्यस्येति किम् । मुमुक्षति वत्सं चैत्रः ।

४३३ **मिमीमादामित्स्वरस्य** ॥४।१।२०॥ मिमीमा इत्येतेषां दासंज्ञकानां च स्वरस्य सकारादौ सनि परे इदादेशः स्यान्न चैषां द्विः । मीति मींङ्च्मींङ्शोर्ग्रहणम् । मित्सते । प्रमित्सति । प्रमित्सते शत्रून् । मेति मांमाङ्क्ष्मेंङ्नं

ग्रहणम् । मित्सति । प्रमित्सते भूमिम् । अपमित्सते यवान् । मातेर्नेच्छन्त्येके । मिमासति । दासंज्ञ–दाम्–प्रदित्सति दानम् । देङ्–दित्सते पुत्रम् । डुदांग्क्–दित्सति दित्सते वस्त्रम् । दोंच्–दित्सति दण्डम् । ट्धेंट्–धित्सति स्तनम् । डुधांग्क् धित्सति धित्सते श्रुतम् । बहुवचनं व्याप्त्यर्थम् । तेन 'निरनुबन्धग्रहणे न सानुबन्धस्य' इत्यादि नाश्रीयते । स्वरस्येति किम् । सर्वस्य मा भूत् ।

४३४ राधेर्वधे ॥४।१।२२॥ राधेर्हिंसायां वर्तमानस्य सकारादौ सनि परे स्वरस्येकारादेशः स्यान्न चास्य द्विः । प्रतिरित्सति, अपरित्सति । वध इति किम् । आरिरात्सति गुरून् ।


४३५ दीङः सनि वा ॥ ४।२।६ ॥ दीङः सनि परे आत्वं वा स्यात् । दिदासते । दिदीषते । उपदिदासते । उपदिदीषते । तृहौत्–तितृक्षति । तितर्हिषति हैमम् । जेर्गिः सन्परोक्षयोः। जिगीषति । इष्–एषिषिषति। अनक् प्राणने–प्राणिणिषति । उच्छेः चछाभ्यां सहितस्येटो द्वित्वम् । उचिच्छिषति । निमित्ताभावे नैमित्तिकस्याप्यभाव इति त्वनित्यम् । द्वित्वे ह्वः। जुहूषति । णौ ङसनि । जुहावयिषति । श्वेर्वा । शुशावयिषति । शिश्वाययिषति । स्फुरतेर्ण्यन्तात्सनि पुस्फोरयिषति । लुनन्तं प्रयुङ्क्ते लावयति । लावयितुमिच्छति । ओर्जान्तस्येतीति लिलावयिषति । पिपावयिषति। 'श्रुस्तुद्रु' इत्यादिना विकल्पेनेकारे शिश्रावयिषति। शुश्रावयिषति । उपसर्गात्सुनोतीत्यत्राद्वित्व इत्युक्तत्वादिह न षत्वम् । अभिसुसूषति। अभ्यसुसूषत् । परिसुसूषति । पर्यसुसूषत् । अभिसिषासति । अभ्यसिषासत् । अत्र पूर्वसकारस्य षत्वं न । मूलधातोस्तु यथाप्राप्तं भवत्येव ।

४३६ णिस्तोरेवास्वदस्विदसहः षणि ॥२।३।३७॥ स्वदस्विदसहवर्जितानां ण्यन्तानां स्तौतेरेव च संबन्धिनः सकारस्य नाम्यन्तस्थाकवर्गात् परस्य सनि परे षः स्यान्नान्येषाम् । सिषेवयिषति । सुष्वापयिषति । सिषेधयिषति । तुष्टूषति । स्वदादिपर्युदासः किम् । सिस्वादयिषति । सिस्वेदयिषति । सिसाहयिषति । स्तौतिसाहचर्यात् स्वदादिपर्युदासेन सदृशग्रहणाच्च ण्यन्तानामपि षोपदेशानामेव ग्रहणम् । तथा च कृतत्वात् सकारस्य 'नाम्यन्तस्थाकवर्गा' दादिसूत्रेणैव सिद्धे नियमार्थं वचनम् । णिस्तोरेव षणि षत्वं नान्यस्य । तेनेह न । सुसूषति । सिसिक्षति । सिसेविषति । एवकारः षण्येव णिस्तोरिति विपरीतनियमनिवृत्त्यर्थः। तेनेहापि भवति। असीषिवत्।

तुष्टाव । षणीति किम् । सिषेव । सुष्वाप । षत्वं किम् । सुषुप्सति । तिष्ठासति । नकारः किम् । व्यतिसुषुपिषे । कथं प्रतीषिषति । अधीषिषति ? षणि निमित्ते धातोः षत्वनियम उक्तः । इह तु सन एव द्विरुक्तस्य षत्वं न धातोरिति न प्रतिषेधः। सोषुषिषते, सेषिविषते इत्यादौ तु यङि द्वित्वं पश्चात् सन्निति न प्रतिषेधः। येषां तु दर्शने द्वित्वेऽपि पुनः सनि द्विरुक्तिः तन्मते सुसोषुषिषत इत्यत्र षणि सुशब्दात् परस्य सस्य षत्वं न भवत्येव ।

४३७ स्वञ्जेर्वा ॥२।३।३८॥ इकारान्तनिर्देशात्सञ्ज इह ण्यन्तो गृह्यते । सञ्जयतेर्नाम्यन्तस्थाकवर्गात् परस्य षणि परे सस्य षो वा स्यात् । सिसञ्जयिषति । सिषञ्जयिषति । नित्यं षत्वमित्येके ।

॥ इति सन्नन्तप्रक्रिया ॥



॥ अथ यङन्तप्रक्रिया ॥

४३८ व्यञ्जनादेरेकस्वरादृभृशाभीक्ष्ण्ये यङ् वा ॥३।४।९॥ गुणक्रियाणामधिश्रयणादीनां क्रियान्तराव्यवहितानां साकल्येन संपत्तिः फलातिरेको वा भृशत्वम् । प्रधानक्रियाया विक्लेदादेः क्रियान्तराव्यवधानेनाद्वत्तिराभीक्ष्ण्यम् । तद्विशिष्टेऽर्थे वर्तमानाद्धातोर्व्यञ्जनादेरेकस्वराद्यङ् प्रत्ययो वा स्यात् । ङकार आत्मनेपदार्थः । सन्यङश्चेति द्वित्वे ।

४३९ आगुणावन्यादेः ॥४।१।४८॥ धातोर्यङन्तस्य द्वित्वे सति पूर्वस्यान्यादेर्नीभुरीरिरन्तवर्जितस्याकारो गुणश्चासन्नौ स्याताम् । भृशं पुनःपुनर्वा पचति पापच्यते । अथाभीक्ष्णयङन्तस्याभीक्ष्णे द्वित्वं कस्मान्न भवति । उक्तार्थत्वात् । यदा तु भृशार्थयङन्तादाभीक्ष्ण्यविवक्षा तदा भवत्येव । पापच्यते, पापच्यते । तथा भृशार्थयङन्तादाभीक्ष्ण्ये आभीक्ष्ण्ययङन्ताद्वा भृशार्थे विवक्षिते यदा पञ्चमी तदा सा केवला तदर्थद्योतनेऽसमर्थेति तदर्थद्योतने द्विर्वचनमपेक्षते । पापच्यस्व, पापच्यस्वेति । धातोरित्येव । तेन सोपसर्गान्न भवति । भृशं प्राप्ति । व्यञ्जनादेरिति किम् । भृशमीक्षते । एकस्वरादिति किम् । भृशं चकास्ति । केचिज्जागर्तेरिच्छन्ति । जाजाग्रीयते । सर्वस्माद्धातोरायादिप्रत्ययरहितात् केचिदिच्छन्ति । अटाट्यते । दादरिद्र्यते ।

भृशाभीक्ष्ण्ये इति किम् । पचति । वेति किम् । लुनीहि लुनीहीत्येवायं लुनातीत्यादि यथा स्यात् । ' आ गुणावन्यादेः ' इत्यनेन विधीयमानावाकारगुणौ यङ्निमित्तौ नेति यङ्लुप्यपि भवतः । पापचीति । अन्यादेरिति किम् । वनीवच्यते । यंयम्यते । नरीनृत्यते । नरिननर्ति । नर्नर्ति । ननु चात्र अपवादत्वान्न्यादय एव बाधका भविष्यन्ति किं न्यादिवर्जनेन ? सत्यम्, द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधक इति ज्ञापनार्थम् । तेन अचीकरदित्यत्र ' लघोर्दीर्घोऽस्वरादेः ' इति सन्वत्कार्यं न बाध्यते ।

४४० योऽशिति ॥ ४।३।८० ॥ व्यञ्जनान्ताद्धातोः परस्य यकारस्याशिति प्रत्यये लुक् स्यात् । अपापचिष्ट । पापचाञ्चक्रे । पापचिता । पापचिष्यते । सोसूचिता, शाशयिता कुषुमितेत्यत्र णिज्लोपे शयादेशेऽस्य लोपे च व्यञ्जनान्तता । अन्ये तु लाक्षणिकव्यञ्जनान्तेभ्यो यलोपं नेच्छन्ति । तन्मतसंग्रहार्थं व्यञ्जनान्ताद्धातोर्विहितस्येति विहितविशेषणं कार्यम् । धातोरित्येव । पुत्रकाम्यिता । व्यञ्जनादित्येव । कण्डूयिता । आशितीति किम् । वेमिध्यते ।

४४१ अटयर्तिसूत्रिमूत्रिसूच्यशूर्णोः ॥३।४।१०॥ एभ्यो भृशाभीक्ष्ण्ये वर्तमानेभ्यो यङ् प्रत्ययः स्यात् । भृशं पुनःपुनर्वाटति अटाट्यते । एवमियर्ति ऋच्छति वा अरार्यते । सूत्रण्–सोसूत्र्यते । मूत्रण्–मोमूत्र्यते । सूचण्–सोसूच्यते । अश्नुते अश्नाति वा अशाश्यते । ऊर्णुग्क्–प्रोर्णोनूयते । अट्यर्त्यशामव्यञ्जनादित्वात् सूत्रिमूत्रिसूचीनामनेकस्वरत्वात् ऊर्णोतेरव्यञ्जनाद्यनेकस्वरत्वादप्राप्ते वचनम् । दीर्घश्चीति दीर्घे तोष्टूयते ।

४४२ गत्यर्थात् कुटिले ॥३।४।११॥ व्यञ्जनादेरेकस्वराद् गत्यर्थाद् कुटिल एवार्थे वर्तमानात् धातोर्यङ् स्यान्न भृशाभीक्ष्ण्ये । तक्रकौण्डिन्यन्यायेन भृशाभीक्ष्ण्ययोर्निषेधार्थं वचनम् । भृशाभीक्ष्ण्ये कुटिलयुक्ते एव यङ् न केवल इत्यन्ये । एवमुत्तरत्रापि ।

४४३ मुरन्तोऽनुनासिकस्य ॥४।१।५१॥ अकारात्परो योऽनुनासिकस्तदन्तस्य धातोर्यङन्तस्य द्वित्वे सति पूर्वस्य मुरन्तः स्यात् । कुटिलं क्रामति चङ्क्रम्यते । दन्द्रम्यते । कुटिल इति किम् । भृशमभीक्ष्णं वा क्रामति । धात्वर्थविशेषणं किम् ।

साधने कुटिले मा भूत् । कुटिलं पन्थानं गच्छति। कथं जंगमः? रूढिशब्दोऽयम् । लक्षणया स्थावरप्रतिपक्षमात्रे वर्तते ।

४४४ गृलुपसदचरजपजभदशदहो गर्ह्ये ॥ ३।४।१२ ॥ गर्ह्य एवार्थे वर्तमानेभ्यो गृप्रभृतिभ्यो धातुभ्यो यङ्प्रत्ययः स्यान्न भृशादिषु ।

४४५ ग्रो यङि ॥ २।३।१०१ ॥ यङि प्रत्यये गिरते रेफस्य लकारादेशः स्यात् । गर्हितं निगिरति निजेगिल्यते । गृणातेस्तु यङेव नास्ति । केचित्तु तस्यापीच्छन्ति, लत्वं तु नेच्छन्ति । यङीति किम् । निगीर्यते । लोलुप्यते । सासद्यते ।

४४६ चरफलाम् ॥४।१।५३॥ बहुवचनं ' त्रिफला विशरणे ' इत्यस्यापि परिग्रहार्थम् । चरफलत्रिफला इत्येषां यङन्तानां द्वित्वे सति पूर्वस्य मुरन्तः स्यात् ।

४४७ ति चोपान्त्यातोऽनोदुः ॥४।१।५४॥ यङन्तानां चरफलां तकारादौ च प्रत्यये उपान्त्यस्यात उरादेशः स्यात् ' स चानोत् '–तस्य गुणो न । चञ्चूर्यते । पंफुल्यते । अत इति किम् । चारयतेः फालयतेश्च क्विप् । ततो यङ्–चञ्चार्यते । पंफाल्यते । अत्रैकदेशविकृतानन्यत्वात् प्राप्नोति । अनोदिति किम् । चंचूर्तिं । पंफुलिति । अत्र गुणो न ।

४४८ जपजभदहदशभञ्जपशः ॥४।१।५२॥ एषां यङन्तानां द्वित्वे सति पूर्वस्य मुरन्तः स्यात् । जञ्जप्यते । जञ्जभ्यते । दन्दह्यते । दन्दश्यते । गृलुपेत्यत्र दंशेः कृतनलोपस्य निर्देशो यङ्लुप्यपि नलोपार्थः। दंदशीति। अन्यस्तु नलोपं नेच्छति। बम्भज्यते । पशिति सौत्रो धातुः पंपश्यते । गृलुपेत्यत्र गर्ह्य एवेति नियमः किम् । भृशं पुनःपुनर्वा निगिरति कुटिलं चरतीत्यत्र मा भूत् । धात्वर्थविशेषणं किम् । साधने गर्ह्ये मा भूत् ।

४४९ न गृणाशुभरुचः ॥३।४।१३॥ गृणातिशुभिरुचिभ्यो भृशाभीक्ष्ण्यादौ यङ् न स्यात् । गर्हितं गृणाति । भृशं शोभते । भृशं रोचते ।

४५० ईर्य्यजनेऽयपि ॥४।३।९७॥ मापास्थासादामाहाकामन्तस्य यप्वर्जिते किति अशिति व्यञ्जनादौ प्रत्यये परे ईः स्यात् । गै गाङ् वा–जेगीयते । गाङो-मेच्छन्त्यन्ये । पा–पेपीयते । स्था–तेष्ठीयते । सो–सेषीयते । सैं–सेसीयते ।

अषोपदेशत्वान्न षत्वम् । दासंज्ञ–देदीयते । देधीयते । मा इति माङ्मामेङां त्रयाणां ग्रहणम् । मेमीयते । मातेर्नेच्छन्त्यन्ये । मामायते । हांक् जेहीयते । हाङो न । जाहायते । अयपीति किम् । प्रगाय । प्रपाय । कथमापीय ? पीङो भवति । स्वरादावन्तलोपविधानाद् व्यंजनादौ लब्धे व्यंजनग्रहणं साक्षाद् व्यंजनप्रतिपत्त्यर्थम् । तेन किब्लुपि स्थानिवद्भावेनापि न । शंस्थाः पुमान् ।

४५१ घ्राध्मोर्यङि ॥४।४।९८॥ घ्राध्मोर्यङि परे ईकारान्तादेशः स्यात् । जेघ्रीयते । देध्मीयते । यङीति किम् । घ्रायते । ध्मायते । यङ्लुपि जाघ्रीतः । दाध्मीतः । अन्ये तु यङ्लुप्यपीच्छन्ति । जेघ्रीतः । देध्मीतः ।

४५२ हनो घ्नीर्वधे ॥ ४।३।९९ ॥ हन्तेर्वधे हिंसायां वर्तमानस्य यङि घ्नी इत्यादेशः स्यात् । जेघ्नीयते । द्विषो जेघ्नीयिषीष्टवः । वधे इति किम् । गतौ–जंघन्यते । दीर्घनिर्देशात् यङ्लुप्यपि । जेघ्नीतः । नेच्छन्त्यन्ये । जंघत इति भवति ।

४५३ क्ङिति यि शय् ॥ ४।२।१०५ ॥ शीङः क्ङिति यकारादौ प्रत्यये शयादेशः स्यात् । शाशय्यते । यीति किम् । शिश्यानः । क्ङितीति किम् । यङ्लुपि न । संशेशीय ।

४५४ ऋतो रीः ॥४।३।१०९॥ धातोरधातोर्वा ऋदन्तस्य श्रुतत्वात् ऋतः स्थाने रीरित्ययमादेशः स्यात् क्ङियङ्यक्क्येषु । चेक्रीयते । जेहीयते । ऋत इति किम् । चेकीर्यते । निजेगिल्यते ।

४५५ ऋमतां रीः ॥४।१।७५॥ ऋकारवतां धातूनां यङन्तानां द्वित्वे सति पूर्वस्य रीरन्तः स्यात् ।

४५६ नृतेर्यङि ॥२।३।९७॥ नृतेर्धातोर्नकारस्य यङ्विषये णो न स्यात् । नरीनृत्यते । अत्र ' रषृवर्णात् ' इत्यादिना प्राप्तिः । यङीति किम् । हरिरिव नृत्यतीति हरिणर्ती नाम कश्चित् । ' पूर्वपदस्थान्नाम्न्यगः ' इत्यनेन णत्वम् । दृशूं–दरीदृश्यते । वृतूङ्–वरीवृत्यते । वृधूङ्–वरीवृध्यते । कृपौङ् चलीकृप्यते । धृज्–दरीधृज्यते । प्रच्छंत् परीपृच्छ्यते । ओव्रश्चौत्–वरीवृश्च्यते । ग्रहीश्–जरीगृह्यते । प्रच्छिव्रश्चिग्रहीणामृकारे कृते ऋमत्त्वम् । ऋमतामिति किम् ।

क्रीक्रीयते । जेहीयते । कृगृहमो रीभावे कृते द्वित्वमिति ऋमत्वं नास्ति । बहुवचननिर्देशो लाक्षणिकपरिग्रहार्थः ।

४६७ न कवतेर्यङः ॥४।१।४७॥ यङन्तस्य कवतेर्द्वित्वे सति पूर्वस्य कस्य चो न स्यात् ॥ कोकूयते स्वरः । शब्दनिर्देशः कौतिकुवत्योर्निवृत्त्यर्थः । चोकूयते । कवतिरव्यक्ते शब्दे । कुवतिरार्तस्वरे । कौतिः शब्दमात्रे । एषां पाठे शब्दमात्रार्थत्वेऽपि गत्यर्थत्वाविशेषे धावतिगच्छत्यादीनामिवार्थभेदः । यङ्लुपि च निषेधो न । चोकवीति । अन्ये तु यङ्लुप्यपि प्रतिषेधयन्ति । कोकवीति । यङ इति किम् । चुकुवे ।

४६८ वश्चस्रन्सध्वन्सभ्रंशकसपतपदस्कन्दोऽन्तो नीः ॥ ४।१।५० ॥ एषां यङन्तानां द्वित्वे सति पूर्वस्य नीरन्तोऽवयवः स्यात् । वनीवच्यते । सनीस्रस्यते । दनीध्वस्यते । बनीभ्रश्यते । चनीकस्यते । पनीपत्यते । पनीपद्यते । चनीस्कद्यते । दीर्घविधानाद्ध्रस्वो न ।

४६९ व्येस्यमोर्यङि ॥ ४।१।८५ ॥ व्येस्यमोः सस्वरान्तस्था यङि ग्वृत् स्यात् । वेवीयते । सेसिम्यते । यङ्लुपि नेच्छन्त्यन्ये । वाव्याति । संस्यन्ति । यङीति किम् । व्ययति ।

४६९ चायः की ॥४।१।८६॥ चायृगित्येतस्य यङि की इत्ययमादेशः स्यात् । चेकीयते । दीर्घनिर्देशो यङ्लुबर्थः । चेकीतः ।

४६१ सिचो यङि ॥ २।३।६० ॥ सिञ्चतेर्धातोः सकारस्य यङि प्रत्यये परतः षो न स्यात् । सेसिच्यते । अभिसेसिच्यते । परत्वादुपसर्गलक्षणमपि षत्वं बाधते । यङीति किम् । अभिषिषिक्षति । ङकारः किम् । अभिषिच्यते ।

॥ इति यङन्तप्रक्रिया ॥



॥ अथ यङ्लुबन्तप्रक्रिया ॥

४६२ बहुलं लुप् ॥३।४।१४॥ यङो लुप् बहुलं स्यात् ।

" तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च ॥
एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि " ॥

इत्युक्तत्वात् नेह ' इङ्तिः ' इत्यादीनां प्रवृत्तिः। गणनिर्दिष्टत्वेन श्यादयोऽपि न। यङ्लुबन्तं परस्मैपदं ' यङ्लुप् च ' इत्युक्तत्वेनादादिवच्च । तेन शवपि न। ' यङ्लुगुस्तोः ' इति वा ईदागमे बोभवीति। बोभोति। बोभूतः। बोभुवति। बोभूयात्। बोभोतु। बोभवीतु। बोभूहि। अबोभवीत्। अबोभोत्। अबोभवुः। पिबैतिदेति सिज्लुपि अबोभोत्। अबोभूताम्। अबोभूवुः। अबोभूवन् इति केचित्। बोभवाञ्चकार। बोभूयात्। बोभूयास्ताम्। बोभविता। बोभविष्यति। अबोभविष्यत्। बहुलग्रहणं प्रयोगानुसरणार्थम्। तेन क्वचिन्न। लोलूया। पोपूया। नानाथीति। नानात्ति। नानात्तः। नानाथति। अनानात्। पास्पर्धीति। पास्पर्धि। पास्पर्धः। पास्पर्धति। पास्पर्त्सि। हेर्धिः। पास्पर्धि। अपास्पर्त्। अपास्पर्द्। सिचि अपास्पाः इत्यधिकम्। जागाधीति। जागाद्धि। जाघात्सि। अजाघात्-द्। अजाघाः। दध्-दादधीति। दादद्धि। दादद्धः। दाधत्सि। अदादधीत्। अदाधत्। अद्यतन्यां-अदादधीत्। अदादाधीत्। चोस्कुन्दीति। चोस्कुन्ति। अचोस्कुन्दीत्। अचोस्कुन्। अचोस्कुन्ताम्। अचोस्कुन्दुः। मोमुदीति। मोमोत्ति। अमोमुदीत्। अमोमोत्। अमोमोः। अद्यतन्यां-अमोमोदीत्। मोमोदाञ्चकार। मोमोदिता। चोकूर्दीति। चोकूर्ति। अचोकूर्दीत्। अचोकूर्त्-र्द्। अचोकूः। वनीवश्चीति। वनीवङ्क्ति। वनीवक्तः। वनीवचति। अवनीवश्चीत्। अवनीवन्। जङ्गमीति। जङ्गन्ति। यमिरमीति मस्य लुक्। जङ्गतः। जङ्गमति। मोनो म्वोश्च। जङ्गन्मि। जङ्गन्वः। जङ्गहि। एकस्वरग्रहणोक्तत्वान्नेण्निषेधः। अजङ्गमीत्। जङ्गमिता। हन्तेर्यङ्लुपि ' हनो घ्नीर्वधे ' जेघ्नीयीति। जेघ्नेति। जेघ्नीतः। घ्नीं नेच्छन्त्यन्ये। वधादन्यत्र जङ्घनीति। जङ्घन्ति। जहि। केषांचिन्मते जङ्घहि। अवधीत्। वध्यात्। वधादेशस्य द्वित्वं तु न। स्थानिवत्त्वेन प्राप्तं सकृत्प्रवृत्तौ प्रवृत्तमेवेति एकविषये पुनर्निषेधात्। आङ्पूर्वात्तु आजङ्घते इत्यादि। चङ्घनीति। चङ्घन्ति।

४६३ आः खनिसनिजनः ॥४।२।६०॥ खनादीनां धुडादौ प्रत्यये परेऽन्तस्याकारादेशः स्यात् । चङ्खातः । चङ्खन्ति । चङ्खाहि । चङ्खानि । अचङ्खनीत् । अचङ्खन् । अचङ्खानीत् । 'ये न वा' चङ्खायात् । चङ्खन्यात् । चञ्चुरीति । चञ्चूर्ति । चञ्चूर्तः । चञ्चुरति । अचञ्चुरीत् । अचञ्चूः । योयोति । योयवीति । अयोयवीत् । अयोयोत् । अद्यतन्यां अयोयावीत् । योयूयात् । नोनवीति । नोनोति ।

४६४ न हाको लुपि ॥४।१।४९॥ ओहांक् त्यागे इत्यस्य द्वित्वे सति पूर्वस्य यङो लुप्याकारो न स्यात् । जहाति । जहेति । लुपीति किम् । जेहीयते । जाहातीति केचित् । जहीतः । जहति । जहासि । जहिथः । जहीहि । अजहेत् । अजहात् । अजहीताम् । अजहुः । अद्यतन्यां अजहासीत् । अजहासिष्टाम् । आशिषि जहायात् । अजहिष्यत् । सोषुपीति । सोषोप्ति । सास्वपीति, सास्वप्तीति केचित् । असोषुपीत् । असोषोप्-व् । असास्वपीत् । आशिषि सासुप्यात् ।

४६५ रिरौ च लुपि ॥४।१।५६॥ ऋमतां धातूनां यङो लुपि द्वित्वे सति पूर्वस्य रिरौ री चान्तः स्यात् । चरिकर्ति । चर्कर्ति । चरीकर्ति । जरिहर्ति । जरीहर्ति । नरिनृतीति । नरिनर्ति । नर्नृतीति । नर्नर्ति । नरीनृतीति । नरीनर्ति । वरिवृश्चीति । वरिवृष्टि । वर्वृश्चीति । वर्वृष्टि । वरीवृश्चीति । वरीवृष्टि । चलिक्लृपीति । चलिकल्प्ति । चल्क्लृपीति । चल्कल्प्ति । चलीक्लृपीति । चलिकल्प्ति । लुपीति किम् । नरीनृत्यते । ऋमतामित्येव । कॄ-चाकरीति । चाकर्ति । चाकीर्तः । चाकिरति । गॄ-जागरिति । तॄ-तार्तर्ति । वरिवृतीति । वर्वृतीति । वरीवृतीति । वरिवर्ति । वर्वर्ति । वरीवर्ति । अवरिवृतीत् ३। अवरिवर्त् ३। गणनिर्दिष्टत्वादङ् न । अवरिवर्तीत् ३। एवं जरिगृधीति ३। जरिगर्द्धि ३। जरिगृद्धः ३। जरिगृधति ३। जरिगृधीषि ३। जरिघर्त्सि । अजरिगृधीत् ३। अजरिघर्त्-र्ड् ३। अजघर्ः ३। जरिगृहीति ३। जरिगर्ढि ३। जरिगृढः ३। जरिगृहन्ति ३। जरिगृहीषि ३। जरिघर्क्षि ३। अजरिगृहीत् ३। अजरिघर्ट्-र्ड् ३। अर्तेर्यङ्लुपि द्वित्वे ऋतोऽत् । अरर्त्ति । रियोगे-पूर्वस्यास्वे स्वरे य्वोरियुव्-अरियर्ति । अररीति । अरियरीति । अर्कृतः । अरियृतः । आरति । अरिरिष्यति । अर्कृयात् । अरियृयात् । आशिषि गुणविधौ तिवा निर्देशान्न गुणः । रिः शक्याशीर्ये । रलुग्दीर्घश्च । आरियात् । अरिरिष्यियात् । गृहोङ् ग्रहणे । जरिगृहीति । ३। जरिगर्ढि ३। जरिगृढः ३। जरिगृहति ३। अजरिघर्ट्-र्ड् । जरिगर्हिता ३। अत्रेटो दीर्घस्तु न । दीर्घविधायके लुप्तिवा निर्देशात् । हय गतौ । जाहयीति । जाहति ।

जाहतः । जाहयति । जाहयीषि । जाहसि । मव्यस्याः । जाहामि । जाहावः । जाहामः। हर्य गतिकान्त्योः॥ जाहर्यीति । जाहर्त्ति । जाहर्तः। जाहर्यति । अजाहः। अजाहर्ताम् । यकारवकारान्तानां तूट्भाविनां यङ्लुपोऽभावः। उट्भाविनोः श्रिविमव्योस्तु यङ्लुबस्त्येव । शेश्रिवीति ।

४६६ मव्यविश्रिविज्वारित्वरेरुपान्त्येन॥ ४।१।१९०॥ मव्यादीनामनुनासिकादौ क्ङौ धुडादौ च प्रत्यये वकारस्योपान्त्येन सहोट् स्यात् । ज्वरत्वरोरुपान्त्यो वकारात्परः, श्रिव्यविमवां तु पूर्वः । शेश्रोति । शेश्रूतः । मव्–मामवीति । मामोति । मामूतः । मामवति । ज्वर–जाज्वरीति । जाजूर्ति । जाजूर्तः । तात्वरीति । तातूर्ति । तातूर्तः । ऊटष्टकार ऊटा इत्यत्र विशेषणार्थः।

४६७ रात्लुक् ॥४।१।११०॥ रेफात् परयोर्धातोश्छकारवकारयोरनुनासिकादौ क्ङौ धुडादौ च प्रत्यये लुक् स्यात् । शूटोऽपवादः। मुर्छा–मोमोर्ति । मोमूर्त्तः। मोमूर्छति । हुर्छा–जोहोर्त्ति। जोहूर्त्तः। जोहूर्छति। तुर्वै–तोतोर्ति। तोतूर्तः। तोतूर्वति। थुर्वै–तोथोर्ति । धुर्वै–दोधोर्ति । अजेर्वी । वेवयीति । वेवेति । अस्य यङ्लुब् नास्ति । लुप्तापहारे विषयत्वाभावेन वीभावस्यामद्वृत्तेरिति केचित् । तेषां मते वेवीयते इति यङन्तमेव रूपम् ।

॥ इति यङ्लुबन्तप्रक्रिया ॥

॥ अथ नामधातुप्रक्रिया ॥

४६८ द्वितीयायाः काम्यः ॥३।४।२२॥ द्वितीयान्तान्नाम्न इच्छायामर्थे काम्यप्रत्ययो वा स्यात् । पुत्रमिच्छति पुत्रकाम्यति । इदंकाम्यति । स्वःकाम्यति । काम्येनैव कर्मण उक्तत्वात् भावकर्त्रोरेव प्रयोगः । पुत्रकाम्यतेऽनेन । पुत्रकाम्यत्यसौ । द्वितीयाया इति किम् । इष्टः पुत्रः । इष्यते पुत्रः । इह कस्मान्न भवति, भ्रातुःपुत्रमिच्छति महान्तं पुत्रमिच्छति स्थूलं दर्शनीयं वा। सापेक्षत्वात्। न ह्यन्यमपेक्षमाणोऽन्येन सहैकार्थीभावमनुभवितुं शक्नोति। भ्रातुष्पुत्रकाम्यतीत्यत्र पुत्रस्यात्मीयता गम्यते । अन्यस्याश्रुतेः इच्छायाश्चात्मविषयत्वात् ।

४६९ अमाव्ययात् क्यन् च ॥३।४।२३॥ अमकारान्तादव्ययाच्च द्वितीयान्तान्नाम्नः इच्छायामर्थे क्यन् प्रत्ययो वा स्यात् काम्यश्च । तो

४७० क्यनि ॥४।३।११२॥ क्यनि परेऽवर्णान्तस्येकारोऽन्तादेशः स्यात् । दीर्घश्वीत्यस्यापवादः । पुत्रमिच्छति पुत्रीयति । पुत्रकाम्यति । एवं नाव्यति । चकारः काम्यार्थेऽन्यथा मान्ताव्ययोः सावकाशः स क्यना बाध्येत । अमाव्ययादिति किम् । इदमिच्छति । स्वरिच्छति । गोशब्दसंध्यक्षरवर्जस्वरनान्तेभ्य एव क्यनमिच्छन्त्यन्ये । गव्यति । पुत्रीयति । राजानं इच्छति ।

४७१ नं क्ये ॥१।१।२२॥ क्य इति उत्सृष्टानुबन्धानां क्यन्क्यङ्क्यङ्षां ग्रहणम् । नकारान्तं नाम क्ये प्रत्यये परे पदसंज्ञं स्यात् । पदत्वान्नलोपः । राजीयति । नाम सिदयित्यत्र अयिति प्रतिषेधादप्राप्ते वचनम् । नमिति किम् । वाच्यति ।

४७२ क्यो वा ॥४।३।८१॥ धातोर्व्यञ्जनात्परस्य क्यस्याशिति प्रत्यये परे वा लुक् स्यात् । सामान्यनिर्देशात् क्यन्क्यङोर्ग्रहणम् । क्यङ्षस्तु व्यञ्जनान्तात् प्राप्तिरेव नास्ति । वाचिता । वाच्यिता । समिधिता । समिध्यिता । व्यञ्जनादित्येव । पटीयिता । अशितीत्येव । समिध्यति । केचित्तु यकोऽपि लुग्विकल्पमिच्छन्ति । भिषजिता । भिषज्यिता । तन्मतसंग्रहार्थं ककारेणोपलक्षितो य क्य इति व्याख्येयम् । अन्यस्त्वाह—शिष्य इवाचरिता शिषिता, शिष्यितेति । यद्यस्ति प्रयोगस्तदा कृत्क्यपोऽपि ग्रहणम् । क्य इति व्यञ्जनात् षष्ठी अतो लुकि कृते लुगर्था । अन्यथा हि अतो लुगपवादः क्यलुग् विज्ञायेत ।

४७३ आधाराच्चोपमानादाचारे ॥ ३।४।२४ ॥ अमाव्ययादुपमानभूताद् द्वितीयान्तादाधाराच्चाचारार्थे क्यन् प्रत्ययो वा स्यात् । पुत्रमिवाचरति पुत्रीयति छात्रम् । वस्त्रीयति कम्बलम् । पुत्रीयति स्थूलं दर्शनीयं वा । आधारात्—प्रासाद इवाचरति प्रासादीयति कुड्याम् । पर्यङ्कीयति मञ्चके । उपमानादिति किम् । छात्रादेर्मा भूत् । आधाराच्चेति किम् । परशुना दात्रेणेवाचरति । अमाव्ययादिति किम् । इदमिवाचरति । स्वरिवाचरति । उपमानस्य नित्यमुपमेयापेक्षत्वात् सापेक्षत्वेऽप्यसामर्थ्यं न भवति ।

४७४ क्षुत्तृड्गर्धेऽशनायोदन्यधनायम् ॥४।३।११३॥ क्षुदादिष्वर्थेषु यथासंख्यमशनायादयः क्यन्नन्ता निपात्यन्ते । क्षुधि गम्यमानायामशनशब्दस्यात्वम्, तृषि गम्यमानायामुदकशब्दस्योदन्नित्ययमादेशो, गर्धे गम्यमाने धनशब्दस्यात्वं

क्यनि परे निपात्यते । अशनायति । उदन्यति । धनायति । क्षुत्तृड्भ्यां इति किम् । अशनीयति । उदकीयति । धनीयति दानाय ।

४७५ वृषाश्वान्मैथुने स्सोऽन्तः ॥४।३।११४॥ वृषशब्दादश्वशब्दाच्च मैथुने वर्तमानात् क्यनि परे स्सकारः स्यात् स चान्तोऽवयवः। वृषस्यति गौः। अश्वस्यति वडवा । वृषाश्वशब्दावत्र मैथुने वर्तेते । मनुष्यादावपि प्रयुज्येते । मैथुनेच्छायामर्थायौ वृषस्याश्वस्येति । ' सा क्षीरकण्ठकं वत्सं वृषस्यन्ती न लज्जिता । शुनी गौश्च स्वमश्वस्यति । ' लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवागमत् ' । मैथुन इति किम् । वृषीयति, अश्वीयति ब्राह्मणी । स्स इति द्विसकारनिर्देशः षत्वनिषेधार्थः । तेनोत्तरत्र दधिस्यति, मधुस्यतीत्यत्र षत्वं न ।

४७६ अस् च लौल्ये ॥४।३।११५॥ भोक्तुमभिलाषातिरेको लौल्यम् । तत्र गम्यमाने क्यनि परे नाम्नः स्सोऽस् चान्तः स्यात् । दधि भक्षितुमिच्छति दधिस्यति, दध्यस्यति । मधुस्यति, मध्वस्यति । एवं क्षीरस्यति । लवणस्यति । अस्विधानमनकारार्थम् । अकारान्तेषु हि ' लुगस्यादेत्यपदे ' इति लुकि सति विशेषो नास्ति । अन्यस्तु लुकममृष्यमाणः क्षीरास्यति, लवणास्यतीत्युदाहरति । एतच्च न बहुसंमतम् । लौल्य इति किम् । क्षीरयति दानाय ।

४७७ कर्तुः क्विब् गल्भक्लीबहोडास्तु ङित् ॥३।४।२५॥ कर्तुरुपमानान्नाम्न आचारेऽर्थे क्विप् प्रत्ययो वा स्यात् गल्भक्लीबहोडेभ्यः पुनः स एव ङित् । ङित्त्वादात्मनेपदम् । अश्व इवाचरति अश्वति । एवं गर्दभति । दधयति । गवति । नावति । राजेवाचरति राजनति । मधुलिडिवाचरति मधुलेहति । गोधुगिवाचरति गोदोहति । गल्भते । अवगल्भते । क्लीबते । विक्लीबते । होडते । विहोडते । गल्भाञ्चक्रे । अवगल्भाञ्चक्रे । एके तु कर्तुः संबन्धिन उपमानाद् द्वितीयान्तात् क्विप्क्यङाविच्छन्ति । अश्वमिवात्मानमाचरति गर्दभः अश्वति । श्येनमिवात्मानमाचरति काकः श्येनायते । तन्मतसंग्रहार्थं कर्तुरिति षष्ठी व्याख्येया । द्वितीयाया इति चानुवर्तनीयम् । क्विबिति पूर्वप्रसिद्धचनुवादः ।

४७८ क्यङ् ॥३।४।२६॥ कर्तुरुपमानादाचारेऽर्थे क्यङ् प्रत्ययो वा स्यात् । श्येन इवाचरति श्येनायते । हंसायते । अश्वायते । गर्दभायते । गल्भायते । क्लीबा-

यते । होडायते । क्विप्क्यङोस्तुल्यविषयत्वादसत्युत्सर्गापवादत्वे पर्यायेण प्रयोगः। ककारः सामान्यग्रहणार्थः । ङकार आत्मनेपदार्थः ।

४७९ **सो वा लुक् च** ॥३।४।२७॥ स इति आवृत्त्या पञ्चम्यन्तं षष्ठ्यन्तं चाभिसंबध्यते । सकारान्तात् कर्तुरुपमानादाचारेऽर्थे क्यङ् प्रत्ययो वा स्यात् अन्त्यसकारस्य च लुग्वा। पय इवाचरति पयायते । पयस्यते । सरायते । सरस्यते। अन्ये त्वप्सरस एव सलोपो नान्यस्य अप्सरायते अन्यत्र पयस्यते इत्याद्येवाहुः। क्यङ् सिद्धो लुगर्थं वचनम् । चकारो लुचः क्यङ्संनियोगार्थः।

४८० **ओजोऽप्सरसः** ॥३।४।२८॥ ओजःशब्दो वृत्तिविषये स्वभावात्तद्वति वर्तते । ओजःशब्दादप्सरस्शब्दाच्च कर्तुरुपमानभूतादाचारेऽर्थे क्यङ्-प्रत्ययो वा स्यात् सलोपश्च । ओजस्वीवाचरति ओजायते । अप्सरायते । अन्ये त्वोजःशब्दे सलोपविकल्पमिच्छन्ति । ओजायते । ओजस्यते ।

४८१ **च्व्यर्थे भृशादेः स्तोः** ॥३।४।२९॥ भृशादिभ्यः कर्तृभ्यः च्व्यर्थे क्यङ् प्रत्ययो वा स्यात् सकारतकारयोर्यथासंभवं लुक् च । च्व्यर्थे इत्यनेन लक्षणया भवत्यर्थविशिष्टं प्रागतत्तत्तमुच्यते । करोतिस्तु कर्तुरित्यनेन व्युदस्तः । भवत्यर्थे च विधानात् क्यङन्तस्य क्रियार्थत्वं भवत्यर्थशब्दाप्रयोगश्च । अभृशो भृशो भवति भृशायते । उन्मनायते । वेहायते । अनोजस्वी ओजस्वी भवति ओजायते । अत्र तद्वद्वृत्तेरेव च्व्यर्थ इति धर्ममात्रवृत्तेर्न । अनोज ओजो भवति । कर्तुरित्येव । अभृशं भृशं करोति । च्व्यर्थ इति किम् । भृशो भवति । प्रागतत्तत्त्व-मात्रे च्वेर्विधानात् क्यङा च्विर्न बाध्यते । भृशीभवति ।

४८२ **डाज् लोहितादिभ्यः षित्** ॥ ३।४।३० ॥ डाच्प्रत्ययान्तेभ्यो लोहितादिभ्यश्च कर्तृभ्यश्च्व्यर्थे क्यङ् प्रत्ययः षित् स्यात् ।

४८३ **क्यङ्षो न वा** ॥३।३।४३॥ क्यङ्षन्ताद्धातोः कर्तर्यात्मनेपदं स्यात् । अपटत् पटद् भवति पटपटायति, पटपटायते । दमदमायति, दमदमायते । डाजन्तात् क्यङ्षविधानात् कृभ्वस्तिभिरिव क्यङ्षापि योगे डाज् भवति । अलोहितो लोहितो भवति लोहितायति । लोहितायते । कर्तुरित्येव । अपटपटा पटपटा करोति । अलोहितं लोहितं करोति । च्व्यर्थ इत्येव । लोहितो भवति । बहुवचन-

माकृतिगणार्थम्। लोहितादिषु लोहितशब्दादेवेच्छन्त्यन्ये। षकारः क्यङ्षो नवेति विशेषणार्थः। (लोहितादिषु) धूमादीनां स्वतन्त्रार्थवृत्तीनां प्रकृतिविकारभावाप्रतीतेश्च्व्यर्थो नास्तीति तद्वद्वृत्तिभ्यः प्रत्ययो भवति। अधूमवान् धूमवान् भवति धूमायति, धूमायते।

४८४ **कष्टकक्षकृच्छ्रसत्रगहनाय पापे क्रमणे** ॥३।४।३१॥ कष्टादिभ्यो निर्देशादेव चतुर्थ्यन्तेभ्यः पापे वर्तमानेभ्यः क्रमणेऽर्थे क्यङ् प्रत्ययः स्यात्। कष्टाय कर्मणे क्रामति कष्टायते। एवं कक्षायते। कृच्छ्रायते। सत्रायते। गहनायते। कष्टादिभ्य इति किम्। कुटिलाय कर्मणे क्रामति। चतुर्थीनिर्देशः किम्। रिपुः कष्टं क्रामति। पाप इति किम्। कष्टाय तपसे क्रामति। क्रमणमत्र न पादविक्षेपः किंतु प्रवृत्तिमात्रम्। द्वितीयान्तेभ्यः पापचिकीर्षायामित्यन्ये। कष्टं चिकीर्षति कष्टायते इत्यादि।

४८५ **रोमन्थाद् व्याप्यादुच्चर्वणे** ॥३।४।३२॥ रोमन्थात् कर्मणः पर उच्चर्वणेऽर्थे क्यङ् प्रत्ययो वा स्यात्। अभ्यवहृतं द्रव्यं रोमन्थः। उद्गीर्य चर्वणमुच्चर्वणम्। रोमन्थम् उच्चर्वयति रोमन्थायते गौः। उद्गीर्य चर्वयतीत्यर्थः। उच्चर्वण इति किम्। कीटो रोमन्थं वर्तयति। उद्गीर्य बहिस्त्यक्तं पृष्ठान्तेन निर्गतं वा द्रव्यं गुटिकां करोतीत्यर्थः।

४८६ **फेनोष्मबाष्पधूमादुद्गमने** ॥ ३।४।३३ ॥ फेनादिभ्यः कर्मभ्य उद्गमनेऽर्थे क्यङ् प्रत्ययो वा स्यात्। फेनमुद्गमति फेनायते। एवमूष्मायते। बाष्पायते। धूमायते।

४८७ **सुखादेरनुभवे** ॥३।४।३४॥ साक्षात्कारोऽनुभवस्तस्मिन्नर्थे सुखादिभ्यः कर्मभ्यः क्यङ् प्रत्ययो वा स्यात्। सुखमनुभवति सुखायते। अनुभव इति किम्। सुखं वेदयते प्रसाधको देवदत्तस्य। सुखादिविकारेणानुमानतो निश्चिनोतीत्यर्थः।

४८८ **शब्दादेः कृतौ वा** ॥३।४।३५॥ शब्दादिभ्यः कर्मभ्यः करोत्यर्थे क्यङ् प्रत्ययो वा स्यात्। णिजपवादः। शब्दं करोति शब्दायते। वैरायते। कलहायते। वाशब्दो व्यवस्थितविभाषार्थः। तेन यथादर्शनं णिजपि भवति। शब्दयति। वैरयति। वाधिकारस्तु वाक्यार्थः।

४८९ **तपसः क्यन्** ॥३।४।३६॥ तपःशब्दात् कर्मणः करोत्यर्थे क्यन् प्रत्ययो वा स्यात्। तपः करोति तपस्यति। अत्र यदा व्रतपर्यायः तपःशब्दस्तदा क्यन्कर्मणो वृत्तावन्तर्भूतत्वात् अकर्मकत्वम्। यदा तु संतापक्रियावचनस्तदा क्यन्कर्मणो वृत्तावन्तर्भावेऽपि सकर्मक एव। शत्रूणां तपः करोति तपस्यति शत्रूनिति। यथा व्याकरणस्य सूत्रं करोति व्याकरणं सूत्रयति।

४९० **नमोवरिवश्चित्रङोऽर्चासेवाश्चर्ये** ॥३।४।३७॥ नमस् वरिवस् चित्रङ्–शब्देभ्यः कर्मभ्यो यथासंख्यं पूजासेवाश्चर्येष्वर्थेषु करोत्यर्थे क्यन् प्रत्ययो वा स्यात्। देवेभ्यो नमस्करोति नमस्यति देवान्। गुरूणां वरिवः करोति वरिवस्यति गुरून्। चित्रं करोति चित्रीयते। ङकार आत्मनेपदार्थः। अर्चादिष्विति किम्। नमः करोति। वरिवः करोति। नमोवरिवःशब्दमुच्चारयतीत्यर्थः। चित्रं करोति। नानात्वमालेख्यं वा करोतीत्यर्थः। ननु च नमस्यति देवानित्यत्र नमःशब्दसंयोगनिबन्धना चतुर्थी कस्मान्न भवति? उच्यते। नामधातूनामविवक्षितप्रत्ययभेदानां धातुत्वादनर्थकोऽत्र नमःशब्दः। उपपदविभक्तेर्वा कारकविभक्तिर्बलीयसी। एवं च नमस्करोति देवानिति वाक्येऽपि द्वितीया सिद्धा। यद्येवं नमस्करोति देवेभ्य इति नैव भवितव्यम्। नैवम्। करोतेः नमःशब्दसंबन्धेन देवपदेनासंबन्धात्। कस्मै इति त्वाकाङ्क्षायां देवेभ्य इति संबन्धाच्चतुर्थी संप्रदाने वा इत्यदोषः।

४९१ **अङ्गान्निरसने णिङ्** ॥ ३।४।३८ ॥ अङ्गवाचिनः शब्दात् कर्मणो निरसनेऽर्थे णिङ् प्रत्ययो वा स्यात्। ङकार आत्मनेपदार्थः। हस्तौ निरस्यति हस्तयते। पादयते। ग्रीवयते। निरसने इति किम्। हस्तं करोति हस्तयति। कर्मण इति किम्। हस्तेन निरस्यति।

४९२ **पुच्छादुत्परिव्यसने** ॥३।४।३९॥ पुच्छशब्दात् कर्मण उदसने पर्यसने व्यसने असने चार्थे णिङ् प्रत्ययो वा स्यात्। पुच्छम् उदस्यति उत्पुच्छयते। पर्यस्यते परिपुच्छयते। व्यस्यति विपुच्छयते। अस्यति पुच्छयते।

४९३ **भाण्डात्समाचितौ** ॥३।४।४०॥ भाण्डशब्दात् कर्मणः समाचयनेऽर्थे णिङ् प्रत्ययो वा स्यात्। समाचयनं च समा परिणा च द्योत्यते। भाण्डानि समाचिनोति संभाण्डयते। परिभाण्डयते।

४९४ चीवरात्परिधानार्जने ॥३।४।४१॥ चीवरशब्दात् कर्मणः परिधानेऽर्जने चार्थे णिङ् प्रत्ययो वा स्यात् । चीवरं परिधत्ते परिचीवरयते । समाच्छादनमपि परिधानम् । [illegible] समाच्छादयति संचीवरयते । चीवरमर्जयति चीवरयते । संमार्जनेऽप्यन्ये । चीवरं संमार्जयति संचीवरयते ।

४९५ णिज्बहुलं नाम्नः कृगादिषु ॥३।४।४२॥ कृगादीनां धातूनामर्थे नाम्नो णिच् प्रत्ययः स्याद् बहुलम् । बहुलग्रहणं प्रयोगानुसरणार्थम् । तेन यस्मान्नाम्नो यद्विभक्त्यन्ताद्यस्मिन् धात्वर्थे दृश्यते तस्मात् तद्विभक्त्यन्तात्तद्धात्वर्थे एव भवतीति नियमो लभ्यते । मुण्डं करोति मुण्डयति छात्रम् । एवं मिश्रयत्योदनम् । श्लक्ष्णयति वस्त्रम् । लवणयति सूपम् । एभ्यश्च्व्यर्थे एवेति कश्चित् । अमुण्डं मुण्डं करोति मुण्डयतीत्यादि । लघुं करोति लघयति । एवं छिद्रयति कर्णयति दण्ड्यति अन्धयति अङ्कयति । व्याकरणस्य सूत्रं करोति सूत्रयति । द्वारस्योद्घाटनं करोति द्वारमुद्घाटयति । ननु व्याकरणशब्दात् वाक्ये षष्ठी दृश्यते उत्पन्ने च प्रत्यये कथं द्वितीया? उच्यते । योऽसौ सूत्रव्याकरणयोः संबन्धः स उत्पन्ने प्रत्यये निवर्तते सूत्रयतिक्रियासंबन्धाच्च द्वितीयैव । एवं द्वारमुद्घाटयति । पाप्मिन उल्लाघयति । त्रिलोकीं तिलकयतीत्याद्यपि द्रष्टव्यम् । अथ तपः करोति तपस्यतीत्यादिवत् कर्मणो वृत्तावन्तर्भूतत्वान्मुण्डरकर्मकः प्राप्नोति । नैवम् । सामान्यकर्मान्तर्भूतं विशेषकर्मणा तु सकर्मक एव, मुण्डयति कं छात्रमिति । यद्येवं पुत्रीयतिरपि विशेषकर्मणा सकर्मकः प्राप्नोति पुत्रीयति कं छात्रमिति । सत्यम् । आचारक्यना तु बुद्धेरपहृतत्वात् इच्छाक्यन्नन्तस्य विद्यमानमपि विशेषकर्म न प्रयुज्यते । तथाहि— पुत्रीयति छात्रमित्युक्ते पुत्रमिवाचरति छात्रमिति प्रतीतिर्भवति न तु पुत्रमिच्छतीति । तदुक्तम्—

सदपीच्छाक्यनः कर्म तदाचारक्यना हृतम् ।
कौटिल्येनैव गत्यर्थाभ्यासो वृत्तौ न गम्यते ' ॥

मुण्डं बलीवर्दं करोतीति उभयधर्मविधाने मुण्डं शुक्लं करोतीत्यनुवादे बानभिधानान्न भवति । पटुमाचष्टे पटयति । एवं स्थूलं स्थवयति । दूरं दवयति । युवानं यवयति । क्षिप्रं क्षेपयति । क्षुद्रं क्षोदयति । प्रियं प्रापयति । स्थिरं स्थापयति । स्फिरं स्फापयति । पुच्छं पुच्छयति । वृक्षमाचष्टे रोपयति वा वृक्षयति । कृतं

गृह्णाति कृतयति । एवं वर्णयति । त्वचयति । त्वचशब्दोऽकारान्तस्त्वक्पर्यायः । रूपं दर्शयति । रूपं निध्यायति निरूपयति । लोमान्यनुमार्ष्टि अनुलोमयति । तूस्तानि विहन्ति उद्वहति वा वितूस्तयति । उत्तूस्तयति केशान् विजटीकरोतीत्यर्थः । वस्त्रं वस्त्रेण वा समाच्छादयति संवस्त्रयति । वस्त्रं परिदधाति परिवस्त्रयति । तृणान्युत्प्लुत्य शातयति उत्तृणयति । हस्तिनातिक्रामति अतिहस्तयति । एवमत्यश्वयति । वर्मणा संनह्यति संवर्मयति । वीणया उपगायति उपवीणयति । सेनया अभियाति अभिषेणयति । चूर्णैरवध्वंसयति अवकिरति वा अवचूर्णयति । तूलैरनुकुष्णाति अवकुष्णाति अनुगृह्णाति वा अनुतूलयति अवतूलयति । वास्या छिनत्ति वासयति । एवं परशुना परशयति । असिना असयति । वास्या परिछिनत्ति परिवासयति । वाससा उन्मोचयति उद्वासयति । श्लोकैरुपस्तौति उपश्लोकयति । हस्तेनापक्षिपति अपहस्तयति । अश्वेन संयुनक्ति समश्वयति । गन्धेनार्चयति गन्धयति । एवं पुष्पयति । बलेन सहते बलयति । शीलेनाचरति शीलयति । एवं सामयति । सान्त्वयति । छन्दसोपचरति उपमन्त्रयते वा उपच्छन्दयति । पाशेन संयच्छयति संपाशयति । पाशं पाशाद्वा विमोचयति विपाशयति । शूरो भवति शूरयति । वीर उत्सहते वीरयति । कूलमुल्लंघयति उत्कूलयति । कूलं प्रतीपं गच्छति प्रतिकूलयति । कूलमनुगच्छति अनुकूलयति । लोष्टानवमर्दयति अवलोष्टयति । पुत्रं सूते पुत्रयति । इत्यादि । आख्यानं नलोपाख्यानं कंसवधं सीताहरणं रामप्रव्रजनं राजागमनं मृगरमणम् आरात्रिविवासमाचष्टे इत्यादिषु इन्द्रियाणां जयं क्षीरस्य पानं देवानां यागं धान्यस्य क्रयं धनस्य त्यागं ओदनस्य पाकं करोतीत्यादिषु बहुलवचनान्न भवति । अथ हस्तौ निरस्यति हस्तयते पादयते इत्यादिवदुत्पुच्छयते इत्यादावप्युपसर्गस्याप्रयोगः प्राप्नोति । नैवम् । यत्रानेकविशेषणविशिष्टा क्रिया प्रत्ययार्थस्तत्र क्रियाविशेषाभिव्यक्तये युक्त उपसर्गप्रयोगः । यथा विपाशयति संपाशयतीति । यत्र त्वेकविशेषणविशिष्टा क्रिया प्रत्ययार्थस्तत्र संदेहाभावादुपसर्गो न प्रयुज्यते । यथा श्येन इवाचरति श्येनायते । बाष्पमुद्गमति बाष्पायते । हस्तौ निरस्यति हस्तयते । पुत्रमिवाचरति पुत्रीयति । यद्येवमतिहस्तयति उपवीणयति इत्यादावेकैकविशेषणविशिष्टत्वादुपसर्गप्रयोगो न प्राप्नोति । नैवम् । अत्र णिच्प्रत्ययस्य करोत्याचष्टेऽतिक्रामति इत्याद्यनेकार्थत्वात् संदेहे तदभिव्यक्त्यर्थमुपसर्गप्रयोगः । यत्र पुनरनेकोपसर्गविशिष्टा क्रिया प्रत्ययार्थस्तत्र शब्दशक्तिस्वाभाव्यादेक

एवोपसर्गार्थः प्रत्ययार्थेऽन्तर्भवति, द्वितीयस्तूपसर्गेणैव प्रत्याय्यते । यथा भाण्डं समाचिनोति संभाण्डयते । वस्त्रं वस्त्रेण वा समाच्छादयति संवस्त्रयतीति ।

४९६ **व्रताद् भुजितन्निवृत्त्योः** ॥३।४।४३॥ व्रतं शास्त्रविहितो नियमः। व्रतशब्दाद् भोजने तन्निवृत्तौ च वर्तमानात् कृगादिष्वर्थेषु णिच् प्रत्ययः स्याद् बहुलम्। पय एव मया भोक्तव्यमिति व्रतं करोति गृह्णाति वा पयो व्रतयति। सावद्यान्नं मया न भोक्तव्यमिति व्रतं करोति गृह्णाति वा सावद्यान्नं व्रतयति। अर्थनियमार्थ आरम्भः।

४९७ **सत्यार्थवेदस्याः** ॥३।४।४४॥ सत्यार्थवेद इत्येतेषां णिच्संनियोगे आकारान्तादेशः स्यात्। सत्यमाचष्टे करोति वा सत्यापयति। एवमर्थापयति। वेदापयति। 'त्रन्त्यस्वरादेः' इति आकारस्य लुग्न भवति विधानसामर्थ्यात्।

४९८ **श्वेताश्वाश्वतरगालोडिताहरकस्याश्वतरेतकलुक्** ॥३।४।४५॥ श्वेताश्च अश्वतर गालोडित आहरक इत्येतेषां णिच्संनियोगे यथासंख्यमश्वतरेतक इत्येतेषां लुक् स्यात्। श्वेताश्वमाचष्टे करोति वा श्वेताश्वेनातिक्रामति इति वा श्वेतयति। एवमश्वयति। गालोडितमाचष्टे करोति वा गालोडयति। एवमाहरयति। लुगर्थं वचनम्, णिच् तु पूर्वेण सिद्ध एव। प्रियस्थिरेत्यादिना प्राद्यादेशे प्रियमाचष्टे प्रापयति। स्थूलमाचष्टे स्थवयति। पृथुं प्रथयति। अप्रथत्। मृदुं म्रदयति। अम्रदत्। भृशं कृशं दृढं भ्रशयति। क्रशयति। द्रढयति। पृथुमृदुभृशेत्यादिना ऋतो रः। बहून् भूययति। भावयतीति केचित्। बहयतीत्यन्ये। ऊढिमाचष्टे ऊढयति। औजिढत्। ढत्वादीनामसत्त्वाद्धतिशब्दस्य द्वित्वम्। ढि इत्यस्य द्वित्वमित्यन्ये। औडिढत्। ऊढमाख्यत् ओजढत्। हतशब्दस्य द्वित्वम्। ढस्य द्वित्वे औडढत्। त्वां मां वाऽचष्टे त्वदयति। मदयति। नित्यत्वादन्त्यस्वरादिलोपात्प्रागेव त्वमादेशौ। त्वापयति मापयतीति केचित्। त्वादयति मादयतीत्यन्ये। युवामावामाचष्टे युष्मयति। अस्मयति। विद्वांसमाचष्टे विद्वयति। णिवर्जनान्नोष्। विदावयतीत्येके। विदयतीत्यन्ये। श्वानं श्वानयति। शावयतीति केचित्। शुनयतीत्यन्ये। उदञ्चमाचष्टे उदयति। उदीच् तु न। णिवर्जनात्। उदीचयतीत्येके। प्रत्यञ्चमाचष्टे प्रत्ययति। प्रतीचयतीत्येके। दध्यञ्चं दध्ययति। सम्यञ्चं सम्ययति समीचयतीत्यपरे। तिर्यञ्चं तिर्ययति। अन्त्यस्वरादिलोपस्य बहिरङ्गत्वेनासिद्धत्वात्

तिरसस्तिरिः । तिराययतीत्येके । सध्यञ्चं सध्ययति । सध्राययतीत्यन्ये । विष्वग्यञ्चं विष्वग्ययति । देवग्यञ्चं देवग्ययति । अदग्यञ्चम् अदग्ययति । अदमुयञ्चम् अदमुययति । अमुमुयञ्चम् अमुमुययति । हलिं कलिं गृह्णाति हलयति । कलयति । अजहलत् । अचकलत् । सन्वद्भावो दीर्घश्चात्र न । नामिनोऽकलिहलेरिति वृद्ध्यभावे समानलोपित्वात् । स्वश्वमाचष्टे स्वश्वयति । स्वाशश्वत् । भुवं भावयति । अबीभवत् । श्रियम् अशिश्रयत् । गाम् अजूगवत् । रायम् अरीरयत् । नावम् अनूनवत् । विन्मतोर्णीष्ठेयसौ लुप् । स्रग्विणं स्रजयति । संज्ञापूर्वकत्वान्न वृद्धिः । श्रीमतीं श्रीमन्तं वा श्राययति । अशिश्रयत् । पयस्विनीं पयसयति । त्वग्वन्तं त्वचयति । वसुमन्तं वसयति । अल्पं युवानं वा कनयति । पक्षे अल्पयति । यवयति । दूरं दवयति । कथं दूरयतीति । दूरमतति अयते दूरात् । दूरातं कुर्वतीत्यर्थः । अन्तिकं नेदयति । बाढं साधयति । प्रशस्यं श्रयति । प्रशसयतीत्यन्ये । वृद्धम् ज्यायति । वर्षयति । स्थिरं स्थापयति । स्फिरं स्फापयति । गुरुं गरयति । तृप्तं त्रपयति । उरुं वरयति । बहुलं बंहयति । दीर्घं द्राघयति । वृन्दारकं वृन्दयति ।

॥ इति नामधातुप्रक्रिया ॥

॥ अथ कण्ड्वादयः ॥

कण्डूग् गात्रविघर्षणे ॥१॥ गकारः फलवति 'ईगित' इत्यात्मनेपदार्थः ।

४९९ धातोः कण्ड्वादेर्यक् ॥३।४।८॥ द्विविधाः कण्ड्वादयः, धातवो नामानि च । कण्ड्वादिभ्यो धातुभ्यः स्वार्थे यक् प्रत्ययः स्यात् । कण्डूयति । कण्डूयते । धातोरिति किम् । कण्डूः । कण्ड्वौ । कण्ड्वः । यकः कित्त्वाद्धातोरेवायं विधिः । धातुग्रहणमुत्तरार्थमिह सुखार्थं च । महीङ् वृद्धौ पूजायाम् च ॥२॥ महीयते । हृणीङ् रोषलज्जयोः ॥३॥ हृणीयते । वेङ् लाङ् धौर्त्ये, पूर्वभावे, स्वप्ने च ॥५॥ सर्वत्र ङकार आत्मनेपदार्थः । मन्तु अपराधे ॥६॥ मन्तूयति । वल्गु पूजामाधुर्ययोः ॥७॥ असु उपतापे ॥८॥ असूयति । असू असूग् इत्येके । असूयति । असूयते । वेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने च ॥१०॥ वेट् लाट् इत्यन्ये । लिट् अल्पार्थे कुत्सायां च । ११॥ लोट् दीप्तौ ॥१२॥ लेला दीप्तावित्येके । उरस् ऐश्वर्ये ॥१३॥ उरस्यति । उषस् प्रभातीभावे ॥१४॥ इरस् ईर्ष्यायाम् ॥१५॥ इरज् इरग् इत्यपि केचित् ।

तिरस् अन्तर्धौ ॥१६॥ इयस् इमस् अस् पयस् प्रसूतौ ॥२०॥ संभूयस् प्रभूतभावे ॥२१॥ दुवस् परितापपरिचरणयोः ॥२२॥ दुरज् भिषज् चिकित्सायाम् ॥२४॥ भिष्णुक् उपसेवायाम् ॥२५॥ रेखा श्लाघासादनयोः ॥२६॥ लेखा विलासस्खलनयोः ॥२७॥ एला वेला केला खेला विलासे ॥२१॥ खल इत्यन्ये। गोधा मेधा आशुग्रहणे ॥३३॥ मगध परिवेष्टने ॥३४॥ इरध इषुध शरधारणे ॥३६॥ कुशुभ क्षेपे ॥३७॥ सुख दुःख तत्क्रियायाम् ॥३९॥ अगद नीरोगत्वे ॥४०॥ गद्गद वाक्स्खलने ॥४१॥ गद्गदडित्येके। तरण वरण गतौ ॥४३॥ उरण तुरण त्वरायाम् ॥४५॥ घुरण गतौ ॥४६॥ भरण धारणपोषणयोः ॥४८॥ चुरण् चौर्ये ॥४९॥ तपुस् तम्पस् दुःखे ॥५१॥ अरर आराकर्मणि ॥५२॥ सपर पूजायाम् ॥५३॥ समर युद्धे ॥५४॥ ॥ इति कण्ड्वादयः ॥

॥ अथ प्रत्ययमाला ॥

अश्वीयतेः सन्।

५०० **नाम्नो द्वितीयाद्यथेष्टम्** ॥ ४।१।७ ॥ स्वरादेर्नाम्नो द्विर्वचनभाजो द्वितीयादारभ्यैकस्वरोऽवयवो यथेष्टं द्विरुच्यते। अशिश्वीयिषति। अश्वीयियिषति। अश्वीयिषिषति।

५०१ **अन्यस्य** ॥४।१।८॥ स्वरादेरन्यस्य व्यञ्जनादेर्नाम्नो धातोर्द्विर्वचनभाज एकस्वरोऽवयवो यथेष्टं प्रथमो द्वितीयस्तृतीयादिर्वाऽन्यतमो द्विरुच्यते। पुपुत्रीयिषति। पुतित्रीयिषति। पुत्रीयियिषति। पुत्रीयिषिषति। पुत्रीयन्तं प्रायुंक्त अपुपुत्रीयत्। अपुतित्रीयत्। अपुत्रीयियत्।

५०२ **कण्ड्वादेस्तृतीयः** ॥४।१।९॥ कण्ड्वादेर्धातोर्द्विर्वचनभाज एकस्वरस्तृतीय एवावयवो द्विः स्यात्। कण्डूयियिषति। आमूयियत्।

५०३ **पुनरेकेषाम्** ॥६।१।१०॥ एकेषामाचार्याणां मते द्वित्वे कृते पुनर्द्वित्वं स्यात्। सुसोषुपिषते। अत्र स्वपेर्भृशार्थे यङ्। 'स्वपेर्यङ्ङे च' इति ग्रहृद् द्वित्वं सोषुपितुमिच्छति सन्। अत इत्यनेन विषयेऽस्य लोपात् 'स्वरस्य परे' इति स्थानित्वाऽभावे यो लुक् सिद्धः। प्राणिणिनिषत् 'द्वित्वेऽप्यन्ते' इत्यत्र द्वित्वे इति वचनात् द्वयोरेव णत्वं न तृतीयस्यापि। एकेषामिति किम्। सोसुपिषते। प्राणिणिषत्। बोभूयिषते। ॥ इति प्रत्ययमाला ॥

॥ अथात्मनेपदप्रक्रिया ॥

इङ्तिः कर्तरि । एधते । शेते ।

५०४ क्रियाव्यतिहारेऽगतिर्हिंसाशब्दार्थहसो हृवहश्चानन्योन्यार्थे ॥३।३।२३॥ इतरेण चिकीर्षितायां क्रियायामितरेण हरणं करणं क्रियाव्यतिहारः। तस्मिन्नर्थे वर्तमानाद् गतिर्हिंसाशब्दार्थहसवर्जिताद्धातोर्हृवहिभ्यां च कर्तर्यात्मनेपदं स्यात्र चेदन्योन्यार्थो अन्योन्येतरेतरपरस्परशब्दाः प्रयुज्यन्ते । व्यतिलुनते । व्यतिपुनते । व्यतिहरन्ते भारम् । संप्रहरन्ते राजानः । संविवहन्ते वर्गैः । हृवहोर्गतिर्हिंसार्थत्वात् प्रतिषेधे प्राप्ते प्रतिप्रसवार्थमुपादानम् । व्यतिहार इति किम् । लुनन्ति । पुनन्ति । क्रियेति किम् । द्रव्यव्यतिहारे मा भूत् । चैत्रस्य धान्यं व्यतिलुनन्ति । अत्र लुनातिरुपसंग्रहात्मके लवने वर्तते । चैत्रेण यत् गृहीतं धान्यं पुरस्ताल्लवनेनोपसंगृह्णन्तीत्यर्थः । अगतिर्हिंसाशब्दार्थहस इति किम् । व्यतिगच्छन्ति । व्यतिसर्पन्ति । व्यतिहिंसन्ति । व्यतिघ्नन्ति । व्यतिजल्पन्ति । व्यतिपठन्ति । व्यतिहसन्ति । अनन्योन्यार्थ इति किम् । अन्योन्यस्य व्यतिलुनन्ति । इतरेतरस्य व्यतिलुनन्ति । परस्परस्य व्यतिलुनन्ति । क्रियाव्यतिहारो व्यतिनैव द्योतित इत्यन्योन्यादिभिः तत्कर्माभिसंबध्यते अन्योन्यस्य केदारमिति । कर्तरीत्येव । तेन भावकर्मणोः पूर्वेणैव स्यादनेन मा भूत् । यदि ह्यनेन स्यात्तदा व्यतिगम्यन्ते ग्रामाः, व्यतिहन्यन्ते दस्यवः इत्यत्रागतिर्हिंसाशब्दार्थहस इति प्रतिषेधः स्यात् ।

५०५ निविशः ॥३।३।२४॥ निपूर्वाद्विशः कर्तर्यात्मनेपदं स्यात् । निविशते । न्यविशतेत्यटो धात्ववयवत्वान्न व्यवधायकत्वम् । मधुनि विशन्ति भ्रमरा इत्यादि तु निविशोरसंबन्धादनर्थकत्वाच्च न भवति ।

५०६ उपसर्गादस्योहो वा ॥३।३।२५॥ उपसर्गात् पराभ्यामस्त्यूहिभ्यां कर्तर्यात्मनेपदं वा स्यात् । विपर्यस्यति । विपर्यस्यते । समूहति । समूहते । संततं तिमिरमिन्दुरुदासे । यशः समूहन्निव दिग्विकीर्णम् । अस्येति श्यनिर्देशोऽस्यसति निवृत्त्यर्थः। उपसर्गादिति किम् । अस्यति । ऊहते । अस्यतेरप्राप्ते ऊहतेश्च नित्यं प्राप्ते उभयत्र विभाषेयम् । अन्ये त्वकर्मकाभ्यामेवेच्छन्ति । प्रत्युदाहरन्ति च मूनिरस्यति शत्रून् । सहते पदार्थान् ।

६०७ उपसर्गादूहो ह्रस्वः ॥४।३।१०६॥ उपसर्गात् परस्योहतेरूकारस्य क्ङिति यकारादौ प्रत्यये ह्रस्वः स्यात् । समुह्यते । समुह्यात् । समुह्य । पर्युह्यते । पर्युह्यात् । पर्युह्य । अभ्युह्यते । अभ्युह्यात् । अभ्युह्य । उपसर्गादिति किम् । ऊह्यते । यीत्येव । समूहितम् । क्ङितीत्येव । अभ्यूह्योऽयमर्थः । ऊ ऊह इति ऊकारश्लेषात् आ ऊह्यते ओह्यते, समौह्यतेत्यत्र न भवति ।

६०८ उत्स्वराद्युजेरयज्ञतत्पात्रे ॥ ३।३।२६ ॥ उदः स्वरान्ताच्चोपसर्गात् पराद्युनक्तेः कर्तर्यात्मनेपदं स्यात् ' अयज्ञतत्पात्रे ' न चेद्यज्ञे यत्तत्पात्रं तद्विषयो युज्यर्थः । उद्युङ्क्ते । उपयुङ्क्ते । नियुङ्क्ते । उत्स्वरादिति किम् । संयुनक्ति । निर्युनक्ति । अयज्ञतत्पात्र इति किम् । द्वंद्वं यज्ञपात्राणि प्रयुनक्ति । यत्र तु यज्ञ एव नतु तत्पात्रम्, तत्पात्रमेव वा न यज्ञस्तत्र भवत्येव । यज्ञे मन्त्रं रन्धनपात्राणि वा प्रयुङ्क्ते । यज्ञपात्राणि रन्धने प्रयुङ्क्ते । युजिंच् समाधावित्यस्येदित्त्वादात्मनेपदविधानमनर्थकम् ।

६०९ परिव्यवात् क्रियः ॥३।३।२७॥ परि वि अव इत्येतेभ्य उपसर्गेभ्यः परात् क्रीणातेः कर्तर्यात्मनेपदं स्यात् । परिक्रीणीते । विक्रीणीते । अवक्रीणीते । सर्वत्रेगितः फलवतोऽन्यत्र विधिः । उपसर्गादित्येव । उपरि क्रीणाति । गवि क्रीणाति । वनं बहुवि क्रीणाति । अपचाव क्रीणीवः । क्रीं इत्यनुकरणमनुकार्येणार्थेनार्थवदिति नामत्वे सति ततः स्यादयः । प्रकृतिवदनुकरणमिति न्यायाच्च धातुकार्यमियादेशः । अत एव च ज्ञापकात् ' प्रकृतिवदनुकरणे कार्यं भवति ' तेन मुनी इत्याह, द्विष्पचतीत्याहेत्यादौ प्रकृतिभावषत्वविकल्पादि सिद्धं भवति ।

६१० परावेर्जेः ॥३।३।२८॥ परा वि इत्येताभ्यामुपसर्गाभ्यां पराज्जयतेः कर्तर्यात्मनेपदं स्यात् । पराजयते । विजयते । उपसर्गादित्येव । सेना परा जयति । बहुवि जयति वनम् ।

६११ समः क्ष्णोः ॥३।३।२९॥ समः परात् क्ष्णौतेः कर्तर्यात्मनेपदं स्यात् । संक्ष्णुते शस्त्रम् । सम इति किम् । क्ष्णौति । उपसर्गादित्येव । आयसं क्ष्णौति ।

६१२ अपास्किरः ॥३।३।३०॥ अपपूर्वात् किरतेः सस्सट्कात् कर्तर्यात्म-

नेपदं स्यात्। अपस्किरते वृषभो हृष्टः। अपस्किरते कुक्कुटो भक्ष्यार्थी। अपस्किरते श्वा आश्रयार्थी। अपाच्चतुष्पादित्यादिना स्सट्। सस्सट्कनिर्देशादिह न। अपकिरति वृषभः। अपेति किम्। उपस्किरति।

५१३ उदश्चरः साप्यात् ॥३।३।३१॥ उत्पूर्वाच्चरतेः साप्यात् सकर्मकात् कर्तर्यात्मनेपदं स्याद्। गुरुवचनमुच्चरते। मार्गमुच्चरते। व्युत्क्रम्य गच्छतीत्यर्थः। ग्रासमुच्चरते। सक्तूनुच्चरते। भक्षयतीत्यर्थः। उद इति किम्। चारं चरति। साप्यादिति किम्। धूम उच्चरति। शब्द उच्चरति। ऊर्ध्वं गच्छतीत्यर्थः।

५१४ समस्तृतीयया ॥३।३।३२॥ समः पराच्चरतेः तृतीयान्तेन योगे सति कर्तर्यात्मनेपदं स्यात्। अश्वेन संचरते। रथेन संचरते। तृतीययेति किम्। उभौ लोकौ संचरसि इमं चामुं च देवल किं त्वं करिष्यसि रथ्यया संचरति चैत्रोऽरण्ये इत्यत्र तु तृतीयान्तेन योगाभावान्न भवति।

५१५ क्रीडोऽनूजने ॥ ३।३।३३ ॥ अनूजनमव्यक्तः शब्दस्ततोऽन्यस्मिन्नर्थे वर्तमानात् संपूर्वात् क्रीडेः कर्तर्यात्मनेपदं स्यात्। संक्रीडते। संक्रीडमानः। रमते इत्यर्थः। सम इत्येव। क्रीडति। अनूजन इति किम्। संक्रीडन्ति शकटानि। अव्यक्तं शब्दं कुर्वन्ति इत्यर्थः।

५१६ अन्वाङ्परेः ॥ ३।३।३४ ॥ अनु आङ् परि इत्येतेभ्य उपसर्गेभ्यः परात् क्रीडतेः कर्तर्यात्मनेपदं स्यात्। अनुक्रीडते। अनुक्रीडमानः। आक्रीडते। आक्रीडमानः। परिक्रीडते। परिक्रीडमानः। उपसर्गादित्येव। माणवकमनु[1] क्रीडति। माणवकेन सह क्रीडतीत्यर्थः। धातुना अनोरसंबन्धाद्वा न भवति। एवमुपरि क्रीडति।

५१७ शप उपलम्भने ॥३।३।३५॥ उपलम्भनेऽर्थे वर्तमानाच्छपतेः कर्तर्यात्मनेपदं स्यात्। उपलम्भनं प्रकाशनम् ज्ञापनम्। मैत्राय शपते। मैत्रं कथंचिदर्थं बोधयतीत्यर्थः। मैत्रमेवैवंभूतोऽसावित्यन्यस्मै प्रकाशयतीत्येके। अथवा स्वाभिप्रायस्य परत्राविष्करणमुपलम्भनं शपथ इति यावत्। मैत्राय शपते। वाचा मात्रादिशरीरस्पर्शनेन मैत्रं स्वाभिप्रायं बोधयतीत्यर्थः। प्रोषितस्य भावाभावोपलब्धौ

---

१ अत्रानोर्माणवकेन योगादुपसर्गत्वाभावादुपसर्गानुवृत्तेरत्र नात्मनेपदम्।

कस्यचिदर्थस्यासेवनं चोपलम्भनम् । मैत्राय शपते । प्रोषिते मैत्रे तस्य भावेऽभावे चोपलब्धे सति तदनुरूपं किंचिदनुतिष्ठतीत्यर्थः । उपलम्भन इति किम् । मैत्रं शपति । आक्रोशतीत्यर्थः ।

५१८ आशिषि नाथः ॥३।३।३६॥ आशिष्येवार्थे वर्तमानान्नाथतेः कर्तर्यात्मनेपदं स्यात् । सर्पिषो नाथते । मधुनो नाथते । सर्पिर्मे भूयादित्याशास्ते इत्यर्थः। आशिष्येवेति नियमः किम्। याच्ञायां मा भूत्। मधु नाथति। ङित्करणं त्वस्यानप्रत्ययार्थम्। भुनजोऽत्राणे। ओदनं भुङ्क्ते। त्राणे तु महीं भुनक्ति।

५१९ हृगो गततताच्छील्ये ॥३।३।३८॥ गतं प्रकारः सादृश्यमनुकरणमित्येकोऽर्थः। तच्छीलमस्य तच्छीलस्तस्य भावस्ताच्छील्यम् उत्पत्तेः प्रभृत्याविनाशात्तत्स्वभावता। हरतेः प्रकारताच्छील्येऽर्थे वर्तमानात् कर्तर्यात्मनेपदं स्यात्। शब्दशक्तिस्वाभाव्याच्चानुपूर्व एव हरतिर्गततताच्छील्ये वर्तते। पैतृकमश्वा अनुहरन्ते। मातृकं गावोऽनुहरन्ते। पितुरागतं मातुरागतं गुणविषयं क्रियाविषयं वा सादृश्यमविकलं शीलयन्तीत्यर्थः। एवं पितुरनुहरते। पितरमनुहरते। मातुरनुहरते। मातरमनुहरते। गतग्रहणं किम्। पितुर्हरति मातुर्हरति। ताच्छील्य इति किम्। नटो राममनुहरति। नटो हि कंचिदेव कालं राममनुकरोति इत्यसातत्ये न भवति। यद्वा गमनं गतं तस्य पित्रादेः शीलमस्य तच्छीलस्तस्य भावस्ताच्छील्यम्। गतेन गमनेन ताच्छील्यं गततताच्छील्यम्। तस्मिन्नर्थे वर्तमानाद्धरतेः कर्तर्यात्मनेपदं स्यात्। पैतृकमश्वा अनुहरन्ते। पितुरागतं गमनम् अविच्छेदेन शीलयन्तीत्यर्थः। एवं पितुः पितरं वा अनुहरते। गततताच्छील्य इति किम्। धर्मान्तरेण पितरमनुहरन्ति। अथवा गते गमने ताच्छील्ये च वर्तमानाद्धरतेरात्मनेपदं स्यात्। पैतृकमश्वा अनुहरन्ते—तद्वद् गच्छन्ति तद्वच्छीलन्ति वेत्यर्थः।

५२० पूजाचार्यकभृत्युत्क्षेपज्ञानविगणनव्यये नियः ॥३।३।३९॥ पूजाचार्यकभृतिषु यथासंख्यं कर्मकर्तृधात्वर्थविशेषणेषु गम्यमानेषु उत्क्षेपादिषु च धात्वर्थेषु वर्तमानान्नयतेः कर्तर्यात्मनेपदं स्यात्। पूजा सन्मानः। नयते विद्वान् स्याद्वादे। प्रमाणव्यापारचित् स्याद्वादे जीवादीन् पदार्थान् युक्तिभिः स्थिरीकृत्य शिष्यबुद्धिं प्रापयतीत्यर्थः। ते युक्तिभिः स्थिरीकृताः पूजिता भवन्ति। आचार्यस्य भावः कर्म वाचार्यकम्। माणवकमुपनयते। स्वयमाचार्यो भवन्माणवकमध्ययना-

यात्मसमीपं प्रापयतीत्यर्थः । भृतिर्वेतनम् । कर्मकरानुपनयते । वेतनेनात्मसमीपं प्रापयतीत्यर्थः । उत्क्षेप ऊर्ध्वं नयनम् । शिशुमुदानयते । उत्क्षिपतीत्यर्थः । ज्ञानं प्रमेयनिश्चयः । नयते तत्रार्थे । तत्र प्रमेयं निश्चिनोतीत्यर्थः । विगणनमृणादेः शोधनम् । मद्राः कारं विनयन्ते । राजग्राह्यं भागं दानेन शोधयन्तीत्यर्थः । व्ययो धर्मादिषु विनियोगः। शतं विनयते। सहस्रं विनयते। धर्माद्यर्थं तीर्थादिषु विनियुङ्क्ते इत्यर्थः । एतेष्विति किम् । अजां नयति ग्रामम् । गिरवादफलवदर्थ आरम्भः ।

५२१ कर्तृस्थामूर्ताप्याद् ॥३।३।४०॥ कर्तृस्थममूर्त्तमाप्यं कर्म यस्य तस्मान्नयतेः कर्तर्यात्मनेपदं स्यात् । श्रमं विनयते । क्रोधं विनयते । शमयतीत्यर्थः। कर्तृस्थेति किम् । चैत्रो मैत्रस्य मन्युं विनयति । अमूर्त्तेति किम् । गडुं विनयति । घट्टं विनयति । आप्येति किम् । बुद्ध्या विनयति । श्रमं विनयते इत्यादौ श्रमापगमादेः फलस्य कर्तृसमवायित्वात् सिद्धे आत्मनेपदे नियमार्थं वचनम् । व्यवच्छेद्यं च प्रत्युदाहरणम् । शमयतिक्रियावचनादेव च नयतेरात्मनेपदं दृश्यते न प्रापणार्थात् । यथा—

" शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम् ।
विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः"॥

यथा च कोपं शमं नयति । मन्युं नाशं नयति । प्रज्ञां प्रवृद्धिं नयति । बुद्धिं क्षयं नयति ।

शदेः शिति । शीयते । म्रियतेरद्यतन्याशिषि च । अमृत । मृषीष्ट । म्रियते । म्रियेत । म्रियताम् । अम्रियत । क्यङ्क्षो न वा । पटपटायते । पटपटायति । द्युद्भ्योऽद्यतन्याम् । व्यद्युतत् । व्यद्योतिष्ट । अरुचत् । अरोचिष्ट । वृद्भ्यः स्यसनोः । वर्त्स्यति । वर्तिष्यते । विवृत्सति । विवर्तिषते । कृपः श्वस्तन्याम् । कल्प्तासि । कल्पितासे ।

५२२ क्रमोऽनुपसर्गात् ॥३।३।४७॥ अविद्यमानोपसर्गात् क्रमेः कर्तर्यात्मनेपदं वा स्यात् । क्रमते । क्रामति । अनुपसर्गादिति किम् । संक्रामति । वृत्त्यादेरन्यत्रायमारम्भ इत्यप्राप्तविभाषा ।

५२३ वृत्तिसर्गतायने ॥३।३।४८॥ वेति निवृत्तम् । वृत्त्यादिष्वर्थेषु वर्त-

मानात् क्रमेः कर्तर्यात्मनेपदं स्यात्। वृत्तिरप्रतिबन्ध आत्मयापनं वा। शास्त्रेऽस्य क्रमते बुद्धिः। तत्र न हन्यते। आत्मानं यापयति वेत्यर्थः। सर्ग उत्साहः तात्पर्यं वा। सर्गणातिसर्गस्य लक्षणादनुज्ञा वा। सूत्राय क्रमते। तदर्थमुत्सहते तत्परो वानुज्ञातो वा। तायनं स्फीतता संतानः पालनं वा। क्रमन्तेऽस्मिन् योगाः। स्फीता भवन्ति संतन्यन्ते पाल्यन्ते वेत्यर्थः। वृत्त्यादिष्विति किम्। क्रामति।

५२४ **परोपात्** ॥३।३।४९॥ परोपाभ्यामेव क्रमेर्वृत्त्यादिष्वर्थेषु कर्तर्यात्मनेपदं स्यात्। पराक्रमते। उपक्रमते। परोपादेवेति किम्। अनुक्रामति। वृत्त्यादिष्वित्येव। पराक्रमति। उपक्रमति। अन्ये तु परोपाभ्यां परात् क्रमतेर्वृत्त्याद्यर्थाभावेऽपीच्छन्ति। तेन पराक्रमते उपक्रमते इत्यात्मनेपदमेव। वृत्त्यादिषु त्वन्योपसर्गपूर्वादपि मन्यन्ते। निष्क्रमते। प्रतिक्रमते। न प्रतिहन्यते इत्यर्थः।

५२५ **वेः स्वार्थे** ॥३।३।५०॥ स्वार्थः पादविक्षेपः। तस्मिन् वर्तमानाद् वेः परात् क्रमेः कर्तर्यात्मनेपदं स्यात्। साधु विक्रमते गजः। स्वार्थे इति किम्। अश्वेन विक्रामति। विक्रामत्यजिनसंधिः स्फुटतीत्यर्थः। विक्रामति राजा। उत्सहते इत्यर्थः।

५२६ **प्रोपादारम्भे** ॥३।३।५१॥ आरम्भ आदिकर्म। अङ्गीकरणं चेत्यन्ये। तस्मिन् वर्तमानात् प्रोपाभ्यां परात् क्रमेःकर्तर्यात्मनेपदं स्यात्। प्रक्रमते, उपक्रमते भोक्तुम्। प्रारभते अङ्गीकरोति चेत्यर्थः। आरम्भ इति किम्। पूर्वेद्युः प्रक्रामति गच्छतीत्यर्थः। अपरेद्युरुपक्रामति, समीपमागच्छतीत्यर्थः। परोपादित्यनेनापि न भवति। वृत्त्यादेरर्थस्याविवक्षितत्वात्। अन्ये तु स्वार्थविषय एवारंभे मन्यन्ते। तेनोपक्रमते प्रक्रमते पादाभ्यां गन्तुमारभत इत्यर्थ इत्यत्रैव भवति। स्वार्थविषयारम्भादन्यत्र तु प्रक्रामति, उपक्रामति भोक्तुमित्यत्र न भवति।

५२७ **आङो ज्योतिरुद्गमे** ॥ ३।३।५२ ॥ आङः परात् क्रमेर्ज्योतिषां चन्द्रादीनामुद्गमे ऊर्ध्वगमने प्रधाने उपसर्जने वा वर्तमानात् कर्तर्यात्मनेपदं स्यात्। आक्रमते चन्द्रः सूर्यो वा। उदयते इत्यर्थः। दिवमाक्रममाणेन केतुना। अत्र दिवमिति कर्मणा योगादुद्गमनोपसर्जनव्याप्तिवचनः क्रमिः। ज्योतिरुद्गम इति किम्। आक्रामति माणवकः कुतुपमवष्टभ्नातीत्यर्थः। ज्योतिरिति किम्। धूम

आक्रामति उद्गच्छतीत्यर्थः । आक्रामति धूमो हर्म्यतलम् । उद्गच्छन् व्याप्नोतीत्यर्थः । उद्गम इति किम् ।

" नभः समाक्रामति नष्टवर्त्मना स्थितैकचक्रेण रथेन भास्करः "

अत्र व्याप्तिमात्रं विवक्षितं नतूद्गमोपसर्जनव्याप्तिः । अन्ये तूद्गमोपसर्जनां व्याप्तिं पश्यन्तोऽसाधुमेनं मन्यन्ते ।

६२८ **दागोऽस्वास्यप्रसारविकासे** ॥३।३।५३॥ आङ्पूर्वाद्ददातेः कर्तर्यात्मनेपदं स्यान्न चेत्स्वास्यप्रसारणं विकासश्चार्थो भवति । विद्यामादत्ते । धनमादत्ते । अस्वास्यप्रसारविकास इति किम् । उष्ट्रो मुखं व्याददाति प्रसारयतीत्यर्थः। कूलं व्याददाति । विपादिका व्याददाति विकसतीत्यर्थः । स्वग्रहणं किम् । व्याददते पिपीलिकाः पतङ्गस्य मुखम् । आङ इत्येव । ददाति । फलवतोऽन्यत्रायं विधिः ।

६२९ **नुप्रच्छः** ॥३।३।५४॥ आङ्पूर्वान्नौतेः प्रच्छेश्च कर्तर्यात्मनेपदं स्यात् । आनुते शृगालः । उत्कण्ठितः शब्दं करोति । उत्कण्ठापूर्वके संशब्दे नौतेरयं विधिर्न सर्वत्र । आपृच्छते गुरून् । आपृच्छस्व प्रियसखम् । वियुज्यमानस्य प्रश्नेऽयं विधिः । आङ इत्येव । नौति । प्रणौति । पृच्छति । परिपृच्छति ।

६३० **गमेः क्षान्तौ** ॥ ३।३।५५ ॥ क्षान्तिः कालहरणम् । तत्र वर्तमानाद् गमयतेराङ्पूर्वकात् कर्तर्यात्मनेपदं स्यात् । आगमयते गुरून् । कंचित् कालं प्रतीक्षते । आगमयस्व तावत् । कंचित् कालं सहस्वेत्यर्थः । क्षान्ताविति किम् । आगमयति विद्याम् । गृह्णातीत्यर्थः । क्षान्तौ स्वभावाद् गमिर्ण्यन्त एव ।

६३१ **ह्वः स्पर्द्धे** ॥३।३।५६॥ आङ्पूर्वाद् ह्वयतेः कर्तर्यात्मनेपदं स्यात् स्पर्द्धे गम्यमाने । स्पर्द्धः संघर्षः पराभिभवेच्छा । स धात्वर्थस्य विशेषणम् । धात्वर्थश्च ह्वयतेराङ्पूर्वस्य शब्द एव स्वभावात् । मल्लो मल्लमाह्वयते । स्पर्द्धमान आकारयतीत्यर्थः । स्पर्द्ध इति किम् । गामाह्वयति ।

६३२ **संनिवेः** ॥३।३।५७॥ संनिविभ्यः पराद् ह्वयतेः कर्तर्यात्मनेपदं स्यात् । संह्वयते । निह्वयते । विह्वयते ।

६३३ **उपात्** ॥३।३।५८॥ उपपूर्वाद् ह्वयतेः कर्तर्यात्मनेपदं स्यात् । उपह्वयते । योगविभाग उत्तरार्थः ।

५३४ **यमः स्वीकारे** ॥ ३।३।५९ ॥ उपपूर्वाद्यमः स्वीकारेऽर्थे वर्तमानात् कर्तर्यात्मनेपदं स्यात् । कन्यामुपयच्छते । वेश्यामुपयच्छते । उपायंस्त महास्त्राणि । क्विनिर्देशः किम् । शाटकानुपयच्छति । नात्रास्वं स्वं क्रियते । स्वत्वेन तु निर्ज्ञातस्य ग्रहणमिति न भवति । उद्वाह एवेच्छन्त्यन्ये ।

५३५ **देवाचार्यमैत्रीसंगमपथिकर्तृकमन्त्रकरणे स्थः**॥३।३।६०॥ एष्वर्थेषु वर्तमानात् उपपूर्वात्तिष्ठतेः कर्तर्यात्मनेपदं स्यात् । देवाचार्यम्–जिनेन्द्रमुपतिष्ठते ।

" बहूनामप्यचित्तानामेको भवति चित्तवान् ।
पश्य वानरसंघेऽस्मिन् यदर्कमुपतिष्ठते " ॥

यदा तु नेयं देवपूजाऽपि तु चापलमिति विवक्षितं तदा न भवति ।

" मैवं मंस्थाः सचित्तोऽयमेषोऽपि हि यथा वयम् ।
एतदप्यस्य कापेयं यदर्कमुपतिष्ठति " ॥

मित्रतया मित्रं वा कर्तुमाचरणं मैत्री उपस्थानस्य हेतुः फलं वा । महामात्रानुपतिष्ठते । मैत्र्या हेतुना फलेन वाराधयतीत्यर्थः । संगम उपश्लेषः । यमुना गङ्गामुपतिष्ठते । पन्थाः कर्ता यस्यार्थस्य स पथिकर्तृकः । अयं पन्थाः स्रुघ्नमुपतिष्ठते । मन्त्रः करणं यस्यार्थस्य स मन्त्रकरणः । ऐन्द्र्या गार्हपत्यमुपतिष्ठते । सावित्र्या सूर्यमुपतिष्ठते । आराधयतीत्यर्थः । मन्त्रादन्यत्र–भर्तारमुपतिष्ठति यौवनेन । करणग्रहणं किम् । गायत्रीमुपतिष्ठति । अत्र मैत्री धात्वर्थविशेषणेनोपसर्जनं धात्वर्थः । शेषास्तु प्रधानम् ।

५३६ **वा लिप्सायाम्** ॥३।३।६१॥ उपपूर्वात्तिष्ठतेर्लिप्सायां गम्यमानायां कर्तर्यात्मनेपदं स्यात् । भिक्षुको दातृकुलमुपतिष्ठति उपतिष्ठते वा भिक्षां लभेयेति ।

५३७ **उदोऽनूर्ध्वैहे** ॥ ३।३।६२ ॥ अनूर्ध्वो य ईहश्चेष्टा तत्र वर्तमानादुदः परात् तिष्ठतेः कर्तर्यात्मनेपदं स्यात् । मुक्तावुत्तिष्ठते । मुक्त्यर्थं चेष्टते इत्यर्थः । अनूर्ध्वेति किम् । आसनादुत्तिष्ठति । ईहेति किम् । अस्माद् ग्रामाच्छतमुत्तिष्ठति । सेनोत्तिष्ठति । उत्पद्यत इत्यर्थः ।

५३८ **संविप्रावात्** ॥३।३।६३॥ एभ्यः परात्तिष्ठतेः कर्तर्यात्मनेपदं स्यात् । संतिष्ठते । वितिष्ठते । प्रतिष्ठते । अवतिष्ठते ।

५३९ **ज्ञीप्सास्थेये** ॥३।३।६४॥ परपरितोषार्थमात्मरूपादिप्रकाशनं ज्ञीप्सा । तिष्ठन्त्यस्मिन्निति स्थेयः । रूढिवशाद्विवादपदे निर्णेता प्रमाणभूतः पुरुष उच्यते । ज्ञीप्सायां स्थेयविषयायां च क्रियायां वर्तमानात्तिष्ठतेः कर्तर्यात्मनेपदं स्यात् । तिष्ठते कन्या छात्रेभ्यः । तिष्ठते वृषली ग्राम्येभ्यः । स्वाभिप्रायप्रकाशनेनात्मानं रोचयतीत्यर्थः । त्वयि मयि तिष्ठते । संशय्य कर्णादिषु तिष्ठते यः। कर्णादिस्थेयोपदिष्टं निर्णयतीत्यर्थः ।

५४० **प्रतिज्ञायाम्** ॥३।३।६५॥ प्रतिज्ञा अभ्युपगमः। तत्र वर्तमानात्तिष्ठतेः कर्तर्यात्मनेपदं स्यात् । नित्यं शब्दमातिष्ठते । तदतदात्मकं तत्त्वमातिष्ठते । स्वभावाच्चायमाङ्पूर्व एव प्रतिज्ञायां वर्तते । योगविभाग उत्तरार्थः ।

५४१ **समो गिरः** ॥ ३।३।६६ ॥ सम्पूर्वाद् गिरतेः प्रतिज्ञायां वर्तमानात् कर्तर्यात्मनेपदं स्यात् । स्याद्वादं संगिरते प्रतिजानीते इत्यर्थः । प्रतिज्ञायामित्येव । संगिरति ग्रासम् । गिर इति निर्देशाद् गृणातेर्न भवति ।

५४२ **अवात्** ॥३।३।६७॥ पृथग्योगात् प्रतिज्ञायामिति निवृत्तम् । अवपूर्वाद् गिरतेः कर्तर्यात्मनेपदं स्यात् । अवगिरते । अवादन्यत्र गिरति । गिर इत्येव । अवगृणाति । अवपूर्वस्य गृणातेः प्रयोगो नास्तीत्यन्ये ।

५४३ **निह्नवे ज्ञः** ॥ ३।३।६८ ॥ निह्नवोऽपलापस्तस्मिन् वर्तमानाज्जानातेः कर्तर्यात्मनेपदं स्यात् । शतमपजानीते । अपह्नुते इत्यर्थः । अपेन चास्यायमर्थोऽभिव्यज्यते । निह्नव इति किम् । तत्त्वं जानाति ।

५४४ **संप्रतेरस्मृतौ** ॥३।३।६९॥ संप्रतिभ्यां पराज्जानातेरस्मृतौ वर्तमानात् कर्तर्यात्मनेपदं स्यात् । शतं संजानीते—अवेक्षते इत्यर्थः। शतं प्रतिजानीते +शतेन संजानीते । अभ्युपगच्छतीत्यर्थः । अस्मृताविति किम् । मातुर्मातरं वा संजानाति।

५४५ **अननोः सनः** ॥३।३।७०॥ सन्नन्ताज्जानातेः कर्तर्यात्मनेपदं स्यात् स चेदनोरुपसर्गात् परो न । धर्मं जिज्ञासते । अननोरिति किम् । धर्ममनुजिज्ञासति । कथमौषधस्यानुजिज्ञासते ? अकर्मकात् 'माग्वत्' इत्यनेन भविष्यति ।

+ 'समो ज्ञो स्मृतौ वा' इति तृतीया । तद्विकल्पे च पक्षे द्वितीया ।

५४६ **श्रुवोऽनाङ्प्रतेः** ॥३।३।७१॥ सन्नन्ताच्छृणोतेः कर्तर्यात्मनेपदं स्यात् स चेदाङ्प्रतिभ्यामुपसर्गाभ्यां परो न भवेत् । शुश्रूषते गुरून् । संशुश्रूषते शब्दान् । अनाङ्प्रतेरिति किम् । आशुश्रूषति । प्रतिशुश्रूषति । चैत्रं प्रतिशुश्रूषत इति प्रतिना संबन्धाभावात् प्रतिषेधो न भवति ।

५४७ **स्मृदृशः** ॥३।३।७२॥ स्मृदृशिभ्यां सन्नन्ताभ्यां कर्तर्यात्मनेपदं स्यात् । सुस्मूर्षते पूर्ववृत्तम् । दिदृक्षते देवम् ।

५४८ **शको जिज्ञासायाम्** ॥ ३।३।७३ ॥ शकिः स्वभावादन्यधात्वर्थानुसंहितः प्रवर्तते शक्नोति भोक्तुमन्यद्वेति । ततो ज्ञानानुसंहितार्थात् सन्नन्तात् कर्तर्यात्मनेपदं स्यात् । विद्याः शिक्षते ज्ञातुं शक्नुयामितीच्छतीत्यर्थः । जिज्ञासायामिति किम् । शक्तुमिच्छति शिक्षति । शिक्षि विद्योपादाने इत्यनेनैव सिद्धे आमनुप्रयोगार्थं वचनम् । तेन शिक्षांचक्रे इति भवति न तु शिक्षांचकारेति । केचित्तु शकेः सन्नन्तस्यात्मनेपदमनिच्छन्तः शिक्षतेरेव जिज्ञासायामात्मनेपदमन्यत्र च परस्मैपदमिच्छन्ति ।

'प्राग्वत्' । उक्तमेव सन्नन्तप्रक्रियायाम् । 'आमः कृगः' इदमप्युक्तमेव ।

५४९ **गन्धनावक्षेपसेवासाहसप्रतियत्नप्रकथनोपयोगे** ॥३।३।७६॥ गन्धनादिष्वर्थेषु वर्तमानात् करोतेः कर्तर्यात्मनेपदं स्यात् । गन्धनं द्रोहाभिप्रायेण परदोषोद्घाटनम् । प्रोत्साहनादिकमन्ये । उत्कुरुते । उदाकुरुते माम् । अध्याकुरुते—जिघांसुरपकर्त्रे कथयतीत्यर्थः । अवक्षेपणमवक्षेपः कुत्सनं भर्त्सनं वा । दुर्वृत्तानवकुरुते । कुत्सयतीत्यर्थः । श्येनो वर्तिकामपकुरुते—भर्त्सयतीत्यर्थः । सेवाऽनुवृत्तिः । महामात्रानुपकुरुते—सेवते इत्यर्थः । साहसमविमृश्य प्रवृत्तिः । परदारान् प्रकुरुते—विनिपातमविभाव्य तान् अभिगच्छतीत्यर्थः । प्रतियत्नः सतो गुणान्तराधानम् । एधो दकस्योपस्कुरुते । तत्र गुणान्तरमादधातीत्यर्थः । प्रकथनं कथनमारंभः । प्रकर्षेण कथनं वा । जनवादान् प्रकुरुते—कथयितुमारभते प्रकर्षेण कथयति वेत्यर्थः । उपयोगो धर्मादौ विनियोगः । शतं प्रकुरुते—धर्मादौ विनियुङ्क्ते इत्यर्थः । एष्विति किम् । कटं करोति । अफलवत्कर्त्रर्थ आरम्भः ।

५५० **अधेः प्रसहने** ॥३।३।७७॥ अधेः परात् करोतेः प्रसहने वर्तमानात् कर्तर्यात्मनेपदं स्यात् । प्रसहनं पराभिभवः परेणापराजयो वा । तं हाधिचक्रे । तं

प्रसेहे । तमभिभूतवान् तेन वा न पराजित इत्यर्थः । अथवा सहनं क्षमा तितिक्षोपेक्षेति यावत् । प्रकर्षेण सहनं प्रसहनम् । तच्च द्विधा शक्तस्याशक्तस्य च ।

' भवादृशा[५]श्चेदधिकुर्वते रतिम् [समर्था अपि यद्युपेक्षन्ते तदा]
निराश्रया हन्त हता मनस्विता ' । ' अधिचक्रे न यं हरिः ' ।–

सोढुमशक्तः सन् तेन न्यक्रियते । प्रसहन इति किम् । तमधिकरोति । अधेरिति किम् । शत्रून् प्रकरोति ।

७८१ दीप्तिज्ञानयत्नविमत्युपसंभाषोपमन्त्रणे वदः ॥ ३।३।७८ ॥
दीप्त्यादिष्वर्थेषु गम्यमानेषु वदतेः कर्तर्यात्मनेपदं स्यात् । दीप्तिर्भासनम् । सा च कर्तृविशेषणम् वा वदनक्रियासहचारिणी धात्वर्थो वा केवलैव धात्वर्थः । वदते विद्वान् स्याद्वादे । सम्यग्ज्ञानादनाकुलकथनाच्च विकसितमुखत्वाद्दीप्यमानो वदतीति । वदन् दीप्यते इति वा । दीप्यत एवेत्यर्थः । ज्ञानमवबोधः । तच्च वदिक्रियाया हेतुर्वा विषयि वा फलं वा केवलमेव वा धात्वर्थः । वदते धीमाँस्तत्वार्थे । ज्ञात्वा वदतीति वा, जानाति वदितुमिति वा, वदन् जानातीति वा, जानात्येव वेत्यर्थः । यत्न उत्साहः । स च धात्वर्थस्य विषयो धात्वर्थ एव वा । श्रुते वदते । तपसि वदते । तद्विषयमुत्साहं वाचाविष्करोति, तत्रोत्सहते इति वेत्यर्थः । नानामतिर्विमतिः । सा च धात्वर्थस्य हेतुः धात्वर्थ एव वा । धर्मे विवदन्ते । विमतिपूर्वकं विचित्रं भाषन्त इति वा विविधं मन्यन्त इति वेत्यर्थः । उपसंभाषोपसान्त्वनमुपालम्भो वा । धात्वर्थ एवायम् । कर्मकरानुपवदते । उपसान्त्वयति उपालभते वेत्यर्थः । उपमन्त्रणं रहसि उपच्छन्दनम् । तदपि धात्वर्थ एव । कुलभार्यामुपवदते । परदारानुपवदते । रहस्युपलोभयतीत्यर्थः । दीप्त्यादिष्विति किम् । यत्किञ्चिद् वदति ।

७८२ व्यक्तवाचां समूहोक्तौ ॥३।३।७९॥ व्यक्ता–व्यक्ताक्षरा वाग् येषां ते व्यक्तवाचः, रूढ्या मनुष्यादय एवोच्यन्ते । तेषां समूहोक्तौ संभूयोच्चारणे वर्तमानाद् वदेः कर्तर्यात्मनेपदं स्यात् । संप्रवदन्ते ग्राम्याः । संप्रवदन्ते पिशाचाः । संभूय भाषन्ते इत्यर्थः । व्यक्तवाचामिति किम् । संप्रवदन्ति कुक्कुटाः । संप्रवदन्ति शुकाः । शुकसारिकादीनामपि व्यक्तवाक्त्वात् समूहोक्ताविच्छन्त्यन्ये । संप्रवदन्ते शुकाः सारिका वा । समूहोक्ताविति किम् । चैत्रेणोक्ते मैत्रो वदति ।

६५३ **विवादे वा** ॥ ३।३।८० ॥ विरुद्धार्थो वादो विवादः । व्यक्तवाचां सहोक्तौ विवादरूपायां वर्तमानाद् वदेः कर्तर्यात्मनेपदं वा स्यात् । विप्रवदन्ते विप्रवदन्ति वा मौहूर्ताः। परस्परप्रतिषेधेन युगपद्विरुद्धं वदन्तीत्यर्थः। विवाद इति किम् । संप्रवदन्ते वैयाकरणाः । सह वदन्तीत्यर्थः। व्यक्तवाचामित्येव । संप्रवदन्ति शकुनयः । नानारुतं कुवन्ति जातिशक्तिभेदात् । सहोक्ताविति किम् । मौहूर्तो मौहूर्तेन सह क्रमेण विप्रवदति। विरुद्धाभिधानमात्रमिह विवक्षितं न तु विप्रतिपूर्वकम् । तेन विप्रतिलक्षणमप्यात्मनेपदं न ।

६५४ **अनोः कर्मण्यसति** ॥ ३।३।८१ ॥ व्यक्तवाचामित्येवानुवर्तते । व्यक्तवाचां संबन्धिन्यर्थे वर्तमानादनुपूर्वाद्वदेः कर्मण्यसति कर्तर्यात्मनेपदं स्यात् । अनुः सादृश्ये पश्चादर्थे वा । अनुवदते चैत्रो मैत्रस्य । यथा मैत्रो वदति तथा चैत्रो वदतीत्यर्थः । अनुवदते आचार्यस्य शिष्यः। आचार्येण पूर्वमुक्ते पश्चाद् वदतीत्यर्थः। कर्मण्यसतीति किम्। उक्तमनुवदति वीणा । कथं वाचिकषडिकौ न संवदेते। मिथो विरुध्येते इत्यर्थः ? विप्रतिविवक्षायां भविष्यति। अकर्मकादित्यनुक्त्वा कर्मण्यसतीति निर्देश उत्तरत्र शब्दे स्वेऽङ्गे च कर्मणीति लाघवेन प्रतिपत्त्यर्थः।

६५५ **ज्ञः** ॥३।३।८२॥ जानातेः कर्मण्यसति कर्तर्यात्मनेपदं स्यात् । सर्पिषो जानीते । मधुनो जानीते । कथमत्र जानातिरकर्मकः ? उच्यते । नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितं किं तर्हि प्रवृत्तौ कारणत्वेन । सर्पिषा मधुना वा करणेन भोक्तुं प्रवर्तत इत्यर्थः । अत एव अज्ञाने ज्ञः षष्ठीति षष्ठी । मिथ्याज्ञानार्थो वा जानातिः। सर्पिषि रक्तः प्रतिहतो वोदकादिषु सर्पिष्टया ज्ञानवान् भवतीत्यर्थः । मिथ्याज्ञानं चाज्ञानमित्यज्ञानार्थत्वे पूर्ववदेव षष्ठी । अथवा सर्पिःसंबन्धि ज्ञानं करोतीति विवक्षायां ज्ञानार्थोऽपि जानातिरकर्मकः तदा तु संबन्धे षष्ठी । कर्मण्यसतीत्येव । तैलं सर्पिषो जानाति । तैलं सर्पिष्टया जानातीत्यर्थः । स्वरेण पुत्रं जानाति । केचित्तु ज्ञानोपसर्जनायां प्रवृत्तावेवाकर्मकाज्जानातेरात्मनेपदमाहुः । अत एव ते 'संभविष्याव एकस्यामभिजानासि मातरि', अभिजानासि मैत्र कश्मीरेषु वत्स्याम इत्यादौ प्रवृत्त्यर्थाभावादात्मनेपदभावं मन्यन्ते । ज्ञास्ये रात्राविति प्राज्ञः इत्यत्रापि ज्ञात्वा प्रवर्तिष्ये इति व्याचक्षते । जाने कोपपराङ्मुखीत्यत्र तु 'ज्ञोऽनुपसर्गात्' इत्यात्मनेपदमिच्छन्तीति ।

५५६ **उपात्स्थः** ॥३।३।८३॥ उपपूर्वात् तिष्ठतेः कर्मण्यसति कर्तर्यात्मनेपदं स्यात् । भोजनकाल उपतिष्ठते । योगे योग उपतिष्ठते । ज्ञानमस्य ज्ञेयेषूपतिष्ठते । संनिधीयते इत्यर्थः । कर्मण्यसतीत्येव । राजानमुपतिष्ठति ।

५५७ **समो गम्यृच्छिप्रच्छिश्रुवित्स्वरत्यार्तिदृशः** ॥ ३।३।८४ ॥ समः परेभ्यो गमादिभ्यः कर्मण्यसति कर्तर्यात्मनेपदं स्यात् । संगच्छते ।

५५८ **गमो वा** ॥४।३।३७॥ गमेः परे आत्मनेपदविषये सिजाशिषौ किद्वद्वा स्याताम् । समगत, समगंस्त चैत्रः । सङ्गसीष्ट, संगंसीष्ट चैत्रः । समृच्छते । समृ*-च्छिष्यते । संपृच्छते । संशृणुते । नित्यपरस्मैपदिभिः साहचर्यात् ज्ञानार्थस्यैव विदेर्ग्रहणम् । संवित्ते । संविदाते ।

५५९ **वेत्तेर्नवा** ॥ ४।२।११६ ॥ वेत्तेः परस्यात्मनेपदसंबन्धिनोऽन्तो रत् इत्ययमादेशो वा स्यात् । संविद्रते । पक्षे संविदते । संविद्रताम् । संविदताम् । समविद्रत । समविदत । आत्मन इत्येव । विदन्ति । वेत्तेरिति किम् । रौधादिकस्य मा भूत् । विन्दन्ते । संस्वरते । अर्तीति सामान्यनिर्देशात् भ्वादिरदादिश्च गृह्यते । समृच्छते । समियृते । संपश्यते । स्वरत्यर्त्योस्तिवृनिर्देशो यङ्लुबृनिवृत्यर्थः । कर्मण्यसतीत्येव । संगच्छति सुहृदम् ।

५६० **वेः कृगः शब्दे चानाशे** ॥ ३।३।८५ ॥ विपूर्वात्करोतेरनाशेऽर्थे वर्तमानात् कर्मण्यसति शब्दे च कर्मणि कर्तर्यात्मनेपदं स्यात् । कर्मण्यसति–विकुर्वते सैन्यवाः । साधु दान्ताः शोभनं वल्गन्तीत्यर्थः। ओदनस्य पूर्णा[१]छात्रा विकुर्वते । निष्फलं चेष्टन्त इत्यर्थः । शब्दे कर्मणि–क्रोष्टा विकुरुते स्वरान् । नानोत्पादयतीत्यर्थः । शब्दे चेति किम् । विकरोति मृदम् । अनाश इति किम् । विकरोत्यध्यायं विकरोति शब्दं विनाशयतीत्यर्थः ।

५६१ **आङो यमहनः स्वेऽङ्गे च** ॥३।३।८६॥ आङः पराभ्यां यमिहनिभ्यां कर्मण्यसति कर्तुः स्वेऽङ्गे च कर्मणि कर्तर्यात्मनेपदं स्यात् । आयच्छते । आहते । स्वेऽङ्गे–आयच्छते पादम् । आहते शिरः । स्वेऽङ्गे चेति किम् । आयच्छति

---

* समृच्छेति ऋच्छेरर्तेश्च रूपसाम्यात् ऋच्छेरभिव्यक्त्यर्थं समृच्छिष्यते इति द्वितीयमुदाहरणम् ।

रज्जुम् । आहन्ति वृषलम् । स्व इति किम् । आयच्छति पादौ चैत्रस्य । आहन्ति शिरो मैत्रस्य । अङ्ग इति किम् । स्वामायच्छति रज्जुम् । स्वं पुत्रमाहन्ति । स्वाङ्ग इति समस्तनिर्देशे पारिभाषिकस्वाङ्गप्रतिपत्तिः स्यादित्यसमस्ताभिधानम् ।

५६२ हनः सिच् ॥ ४।३।३८ ॥ हन्तेः पर आत्मनेपदविषयः सिच् कित् स्यात् । आहत । आहसाताम् । आहसत ।

५६३ यमः सूचने ॥४।३।३९॥ सूचनं परदोषाविष्करणम् । तत्र वर्तमानाद्यमेः पर आत्मनेपदविषयः सिच् कित् स्यात् । उदायत । उदायसाताम् । उदायसत । सूचन इति किम् । आयंस्त कूपाद्रज्जुम् । उद्धृतवानित्यर्थः। सकर्मकात् ' समुदाङो यमेरग्रन्थे ' इत्यात्मनेपदम् ।

५६४ व्युदस्तपः ॥ ३।३।८७ ॥ व्युद्भ्यां परात्तपेः कर्मण्यसति स्वेऽङ्गे च कर्मणि कर्तर्यात्मनेपदं स्यात् । वितपते, उत्तपते रविः। दीप्यत इत्यर्थः। स्वेऽङ्गे—वितपते, उत्तपते पाणिम् । तापयतीत्यर्थः । व्युद इति किम् । निष्टपति । स्वेऽङ्गे चेत्येव । वितपति पृथिवीं सविता । संतापयतीत्यर्थः। उत्तपति सुवर्णं सुवर्णकारः । द्रवीकरोतीत्यर्थः । स्व इत्येव । उत्तपति पृष्ठं चैत्रस्य । अङ्ग इत्येव । स्वं सुवर्णमुत्तपति । इह दीप्यते ज्वलति भासते रोचते इत्येष्वर्थेषु तपिमकर्मकं स्मरन्ति । यथा वहति भारमिति प्रापणे वहिं सकर्मकं स्पन्दने त्वकर्मकम् । वहति नदी स्पन्दते इत्यर्थः ।

५६५ अणिक्कर्मणिकर्तृकाण्णिगोऽस्मृतौ ॥३।३।८८॥ अणिगवस्थायां यत्कर्म तदेव णिगवस्थायां कर्ता यस्य सोऽणिक्कर्मणिकर्तृकः । तस्माण्णिगन्ताद्धातोरस्मृतौ वर्तमानात् कर्तर्यात्मनेपदं स्यात् । आरोहन्ति हस्तिनं हस्तिपकाः। आरोहयते हस्ती हस्तिपकान् । आस्कन्दयते इत्यर्थः । पश्यन्ति राजानं भृत्याः । दर्शयते राजा भृत्यान् भृत्यैरिति वा । पिबन्ति मधु पायकाः । पाययते मधु पायकान् । अणिगिति किम् । आरोहन्ति हस्तिनं हस्तिपकाः। आरोहयति हस्तिपकान् महामात्रः । आरोहयन्ति महामात्रेण हस्तिपकाः । प्रथमणिगन्तकर्मणि द्वितीयणिगन्तकर्तर्यपि मा भूत् । गित्करणं किम् । गणयति गणं गोपालकः । गणयते गणो गोपालम् इति णिजन्तकर्मणिकर्तृकादपि णिगन्तात् प्रतिषेधो मा भूत् । कर्मेति किम् । करणादेः कर्तृत्वे मा भूत् । पश्यन्ति भृत्याः प्रदीपेन । दर्शयति प्रदीपो भृत्यान् ।

णिगिति किम्। यस्याणिगन्तस्यैव कर्म कर्ता भवति ततो णिगन्तान्मा भूत्। लुनाति केदारं चैत्रः। लूयते केदारः स्वयमेव। तं प्रयुङ्क्ते लावयति केदारं चैत्रः। कर्तृग्रहणं किम्। आरोहन्ति हस्तिनं हस्तिपकाः। तानेनमारोहयति महामात्रः। णिग इति किम्। आरोहन्ति हस्तिनं हस्तिपकाः तानारोहयते हस्तीत्यणिगवस्थायां मा भूत्। प्रत्यासत्तेश्च यस्यैव धातोरणिगवस्था तस्यैव धातोर्णिगवस्था गृह्यते न धात्वन्तरस्य। तेनेह न। आरुह्यमाणो हस्ती सेचयति पृष्ठं मूत्रेण। हस्तिपकैरारुह्यमाणो हस्ती स्थलमारोहयति मनुष्यान् इत्यत्र तु सदृशधातुप्रयोगेऽपि पूर्वो हस्तिपककर्तृको रुहिः परश्च मनुष्यकर्तृक इति साधनभेदात् क्रियाभेदे धातुभेदः। अस्मृताविति किम्। स्मरति वनगुल्मं कोकिलः। स्मरयति एनं वनगुल्मः। कथं हन्त्यात्मानं घातयत्यात्मेति। अत्र ह्यात्मनोऽणिकर्मणो णिकर्तृत्वमस्तीति। नैवम्। द्वावात्मानौ शरीरात्मान्तरात्मा च। तत्र भेदेनैव लोके नित्यमयं प्रयोगः। हन्त्यात्मानमिति शरीरात्मनोऽन्तरात्मनो वा कर्मत्वम्। घातयत्यानमित्यपि तस्यैव कर्मत्वं न कर्तृत्वमिति। ननु यदि अणिकर्मणो णिकर्तृतायां णिगन्तादात्मनेपदमिष्यते तर्हि शुष्यन्त्यातपे व्रीहयः शोषयते व्रीहीनातप इत्यादावधिकरणादेः कर्तृतायामात्मनेपदं न प्राप्नोति। न। फलवत्कर्तरि भविष्यति। यद्येवमारोहयते हस्ती हस्तिपकानित्यादावपि तथैवास्तु। सत्यम्। किं तु फलवतः कर्मस्थक्रियाच्चान्यत्रायं विधिः। तथाहि–लावयते केदारः, भूषयते कन्या, कारयते कटः, गणयते गणः, आरोहयते हस्ती स्वयमेवेत्यादौ कर्मस्थक्रियत्वात् 'एकधातौ कर्मक्रिययैकाकर्मक्रिये'त्यनेनैवात्मनेपदं भवति। नन्वारोहयते हस्ती स्वयमेवेत्यस्यास्कन्दयते इति किलार्थः। तत्कथं कर्मस्थक्रियता रुहेः? उच्यते। यदा न्यग्भावनार्थोऽयं तदा कर्मस्थक्रियत्वम्। तथाहि–आरोहन्ति हस्तिनं हस्तिपका इति न्यग्भवनोपसर्जने न्यग्भावने रुहिर्वर्तते। स द्वितीयस्यामवस्थायाम् आरुह्यते हस्ती स्वयमेवेत्यस्यां कर्मकर्तृविषयो न्यग्भवनमात्रवृत्तिर्भवति। अथ चतुर्थ्याम् अन्तर्भूततृतीयायाम् आरुह्यमाणं प्रयुञ्जत इति हस्तिपकव्यापारप्रधानायां णिगन्तः सन्नारोहयन्ति हस्तिनं हस्तिपकाः इत्यस्यां शुद्धारोहतिवन्न्यग्भवनोपसर्जने न्यग्भावने वर्तते। पुनर्यदा अस्यैव प्रयोजकव्यापाराविवक्षा तदा आरोहयते हस्ती स्वयमेवेत्यस्यां पञ्चम्यामवस्थायाम् आरुह्यते हस्ती स्वयमेवेति वन्न्यग्भवनलक्षणस्य विशेषस्य हस्तिसमवेतत्वेनोपलम्भाल्लावयते केदार इत्यादाविव कर्मस्थक्रियत्वमस्त्येवेति न किंचिदनुपपन्नम्। यदुक्तम्–

" न्यग्भावना न्यग्भवनं रुहौ शुद्धे प्रतीयते ।
न्यग्भावना न्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते ॥१॥

अवस्थां पञ्चमीमाहुर्ण्यन्ते तां कर्मकर्तरि ।
निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिगुच्यते ॥२॥

५६६ **प्रलम्भे गृधिवञ्चेः** ॥३।३।८९॥ गृधिवञ्चिभ्यां णिगन्ताभ्यां प्रलम्भे वञ्चने वर्तमानाभ्यां कर्तर्यात्मनेपदं स्यात् । बटुं गर्धयते । बटुं वञ्चयते । विप्रतारयतीत्यर्थः । प्रलम्भ इति किम् । श्वानं गर्धयति । प्रलोभयतीत्यर्थः । अहिं वञ्चयति । गमयतीत्यर्थः । णिग आत्मनेपदविधानं सर्वत्राफलवदर्थम् ।

५६७ **लीङ्लिनोऽर्चाभिभवे चाचाकर्तर्यपि** ॥३।३।९०॥ लीयतिलिनातिभ्यां णिगन्ताभ्यामर्चाभिभवयोः प्रलम्भे चार्थे वर्तमानाभ्यां कर्तर्यात्मनेपदं स्यात् अनयोश्चान्तस्याकर्तर्यप्याकारः । जटाभिरालापयते । परैरात्मानं पूजयतीत्यर्थः । श्येनो वर्तिकामपलापयते । अभिभवतीत्यर्थः । कस्त्वामुल्लापयते वञ्चयते इत्यर्थः । एष्विति किम् । बालकमुल्लापयति । उत्क्षिपतीत्यर्थः । कथं तर्ह्यत्रात्मम् । लीङ्लिनोर्वेति भविष्यति । अकर्तर्यपीति किम् । जटाभिरालाप्यते जटिलेन । ङिच्छानिर्देशो यौजादिकनिवृत्त्यर्थः ।

५६८ **स्मिङः प्रयोक्तुः स्वार्थे** ॥४।३।९१॥ प्रयोक्तुः सकाशाद्यः स्वार्थः स्मयस्तत्र वर्तमानाण्णिगन्तात् स्मयतेः कर्तर्यात्मनेपदं स्यात् अस्य चान्तस्याकारोऽकर्तर्यपि । जटिलो विस्मापयते । प्रयोक्तुः स्वार्थे इति किम् । करणात् स्वार्थे मा भूत् । रूपेण विस्मापयति । अकर्तर्यपीत्येव । विस्मापनम् । ङिन्निर्देशाद् यङ्लुपि न । सेष्मापयति ।

५६९ **बिभेतेर्भीष् च** ॥ ३।३।९२ ॥ प्रयोक्तुः सकाशात् स्वार्थे वर्तमानाण्यन्ताद् बिभेतेः कर्तर्यात्मनेपदं स्यादस्य च भीषादेशः । पक्षेऽन्तस्याकारश्चाकर्तर्यपि । मुण्डो भीषयते, भापयते । प्रयोक्तुः स्वार्थे इत्येव । कुञ्चिकया भाययति । अकर्तर्यपीत्येव । भीषा । भापनम् । तिङ्निर्देशाद् यङ्लुपि न । मुण्डो बेभाययति ।

५७० **मिथ्याकृगोऽभ्यासे** ॥ ३।३।९३ ॥ मिथ्याशब्दयुक्तो यः कृग् तस्माण्णिगन्तादभ्यासेऽर्थे वर्तमानात् कर्तर्यात्मनेपदं स्यात् । अभ्यासः पुनः पुनः

क्रियाभ्यावृत्तिः । पदं मिथ्या कारयते । स्वरादिदोषदुष्टमसकृदुच्चारयति पाठयतीत्यर्थः । आत्मनेपदेनैव क्रियाभ्यावृत्तेर्द्योतितत्वात् आभीक्ष्ण्ये द्विर्वचनं न भवतीति केचित् । मिथ्येति किम् । पदं साधु कारयति । कृग इति किम् । पदं मिथ्या वाचयति । अभ्यास इति किम् । सकृत् पदं मिथ्या कारयति ।

५७१ परिमुहायमायसपाट्धेवदवसदमादरुचनृतः फलवति ॥ ॥३।३।९४॥ फलवतीति भूम्न्यतिशायने वा मतुः। तेन यत्क्रियायाः प्रधानं फलमोदनादि यदर्थमियमारभ्यते तद्वति कर्तरि विवक्षिते परिपूर्वान्मुहेराङ्पूर्वाभ्यां यमियसिभ्यां पिवतिट्धेवदवसतिदमादरुचनृतिभ्यश्च णिगन्तेभ्यः कर्तर्यात्मनेपदं स्यात्। परिमोहयते चैत्रम् । आयामयते सर्पम् । आयासयते मैत्रम् । पाययते बटुम् । धापयते शिशुम् । वादयते शिशुम् । वासयते पान्थम् । दमयतेऽश्वम् । आदयते चैत्रेण । अदेर्नेच्छन्त्यन्ये । आदयति चैत्रेण । रोचयते मैत्रम्। नर्तयते नटम्। पिबत्यत्तिट्धेधातूनामाहारार्थत्वादौदासीन्यनिवृत्त्यर्थतायामकर्मकत्वाच्च नृतेश्चलनार्थत्वाच्च शेषाणां स्वरूपतो विवक्षातो वाऽकर्मकत्वात् उत्तराभ्यां परस्मैपदे प्राप्ते वचनम् । पा इति ट्धेसाहचर्यात् पिबतेर्ग्रहणं न पातेः, वदसाहचर्याच्च वस इति वसतेर्न वस्तेरिति पाति चैत्रो नोदास्ते, पालयति चैत्रम्, वस्ते मैत्रो न नग्नः, वासयति मैत्रम् इत्येव भवति ।

ईगितः । यजीं—यजते । डुकृंग्—कुरुते ।

५७२ ज्ञोऽनुपसर्गात् ॥ ३।३।९६ ॥ अविद्यमानोपसर्गाज्जानातेः फलवति कर्तर्यात्मनेपदं स्यात् । गां जानीते । अश्वं जानीते । अनुपसर्गादिति किम् । स्वर्गं प्रजानाति । फलवतीत्येव । परस्य गां जानाति । अकर्मकात् पूर्वेण सिद्धे सकर्मकार्थं वचनम् ।


५७३ वदोऽपात् ॥३।३।९७॥ अपपूर्वाद् वदतेः फलवति कर्तर्यात्मनेपदं स्यात्। एकान्तमपवदते । अपादिति किम्। वदति फलवतीत्येव । अपवदति परं स्वभावतः ।

५७४ समुदाङो यमेरग्रन्थे ॥३।३।९८॥ समुदाङ्भ्यः पराद् यमेरग्रन्थविषये प्रयोगे फलवति कर्तर्यात्मनेपदं स्यात् । संयच्छते व्रीहीन् । उद्यच्छते भारम् । आयच्छते वस्त्रम् । समुदाङ इति किम्। नियच्छति वाचम् । अग्रन्थ इति किम् ।

वैद्यश्चिकित्सामुद्यच्छति । चिकित्साग्रन्थे उद्यमं करोतीत्यर्थः । फलवतीत्येव । संयच्छति उद्यच्छति आयच्छति परस्य वस्त्रम् । आङ्पूर्वादकर्मकात् स्वाङ्गकर्मकाच्च 'आङो यमहनः' इति सिद्धेऽन्यकर्मकार्थं वचनम् ।

५७५ **पदान्तरगम्ये वा** ॥३।३।९९॥ अनन्तरसूत्रपञ्चकेन यदात्मनेपदमुक्तं तत् पदान्तराद् गम्ये फलवति कर्तरि वा स्यात् । स्वं शत्रुं परिमोहयते परिमोहयति वा । स्वं यज्ञं यजते यजति वा । स्वं कटं कुरुते करोति वा । स्वमश्वं गमयते गमयति वा । स्वं शिरः कण्डूयते कण्डूयति वा । स्वां गां जानीते जानाति वा । स्वं शत्रुमपवदते अपवदति वा । स्वान् व्रीहीन् संयच्छते संयच्छति वा ।

॥ इत्यात्मनेपदप्रक्रिया ॥



॥ अथ परस्मैपदप्रक्रिया ॥

॥ शेषात् परस्मै ॥ भवति ।

५७६ **परानोः कृगः** ॥३।३।१०१॥ परानुभ्यां परात् करोतेः कर्तरि परस्मैपदं स्यात् । पराकरोति । अनुकरोति । गङ्गामनु कुरुते तप इति नात्र करोतिरनुना संबध्यते । गन्धनादावर्थे गिच्चात् फलवति च प्राप्तस्यात्मनेपदस्यापवादोऽयम् ।

५७७ **प्रत्यभ्यतेः क्षिपः** ॥३।३।१०२॥ प्रत्यभ्यतिभ्यः परात् क्षिपेः कर्तरि परस्मैपदं स्यात् । प्रतिक्षिपति । अभिक्षिपति । अतिक्षिपति बटुम् । प्रतिक्षिपते भिक्षामिति नायं क्षिपिः प्रतिना संबध्यते । ईदित्वात् फलवति प्राप्तस्यात्मनेपदस्यापवादोऽयम् । एवमुत्तरसूत्रद्वयमपि ।

५७८ **प्राद्वहः** ॥ ३।३।१०३ ॥ प्रपूर्वाद् वहतेः कर्तरि परस्मैपदं स्यात् । प्रवहति ।

५७९ **परेर्मृषश्च** ॥३।३।१०४॥ परिपूर्वान्मृषेर्वहेश्च कर्तरि परस्मैपदं स्यात् । परिमृष्यति । परिवहति । मैत्रं परि मृष्यते धनं परि वहते इत्यत्र न परिर्मृषिवहिभ्यां संबध्यते । वहेर्नेच्छन्त्यन्ये ।


५८० व्याङ्परे रमः ॥३।३।१०५॥ व्याङ्परिभ्यः पराद् रमेः कर्तरि परस्मैपदं स्यात् । विरमति । आरमति । परिरमति । इदित्वात् आत्मनेपदस्यापवादः ।

५८१ वोपात् ॥ ३।३।१०६ ॥ उपपूर्वाद्रमेः कर्तरि परस्मैपदं वा स्यात् । भार्यामुपरमति, उपरमते वा । उपसंपाप्तिपूर्विकायां रतौ वर्तमानोऽन्तर्भूतणिगर्थो वा रमिः सकर्मकः । उपरमति उपरमते वा संतापः । उपरमति उपरमते वाक्यात् । उपाद्रमेः सकर्मकात् परस्मैपदमेवेत्येके । आत्मनेपदमेवेत्यन्ये ।

५८२ अणिगि प्राणिकर्तृकानाप्याण्णिगः॥३।३।१०७॥ अणिगवस्थायां यः प्राणिकर्तृकोऽकर्मकश्च धातुस्तस्माण्णिगन्तात् कर्तरि परस्मैपदं स्यात् । आस्ते चैत्र आसयति चैत्रम् । शेते मैत्रः शाययति मैत्रम् । अणिगीति किम् । स्वयमेवारोहयमाणं हस्तिनं प्रयुङ्क्ते आरोहयते । अणिगिति गकारः किम् । णिजवस्थायां प्राणिकर्तृकानाप्यात् णिगन्ताद्यथा स्यात् । चेतयमानं प्रयुङ्क्ते चेतयतीति । प्राणिकर्तृकेति किम् । शुष्यन्ति व्रीहयः शोषयते व्रीहीनातपः । प्राण्यौषधिवृक्षेभ्य इति पृथग्निर्देशादिह लोके प्रतीता एव प्राणिनो गृह्यन्ते । अनाप्यादिति हि कटं कुर्वाणं प्रयुङ्क्ते कटं कारयते । णिग इति किम् । आस्ते । शेते । गकारः किम् । अणिगवस्थायां प्राणिकर्तृकानाप्याण्णिजन्तान्मा भूत् । चेतयते । ईगित इत्यात्मनेपदस्यापवादोऽयम् ।

५८३ चल्याहारार्थेङ्बुधयुधप्रुद्रुस्रुनशजनः ॥ ३।३।१०८ ॥ चलिरर्थः कम्पनम् । तदर्थेभ्यः आहारार्थेभ्य इङादिभ्यश्च णिगन्तेभ्यः कर्तरि परस्मैपदं स्यात् । चल्यर्थ–चलयति कम्पयति वोपयति शाखाम् । आहारार्थ–निगारयति भोजयति आशयति चैत्रमन्नम् । पय उपयोजयते चैत्रेणेति युजेरनाहारार्थत्वान्न भवति । इङ्–सूत्रमध्यापयति शिष्यम् । बुध्–बोधयति पद्मं रविः । बोधयति धर्मं शिष्यम् । युध्–योधयति काष्ठानि । प्रु–प्रावयति राज्यं प्रापयतीत्यर्थः । द्रु–द्रावयत्यम्बुः । विलाययतीत्यर्थः । स्रु–स्रावयति तैलम् । स्पन्दयतीत्यर्थः । नश्–नाशयति पापम् । जन्–जनयति पुण्यम् । प्रुस्रुद्रूणामचलनार्थार्थं शेषाणां सकर्मकार्थमप्राणिकर्तृकार्थं च वचनम् ।

॥ इति परस्मैपदप्रक्रिया ॥



॥ अथ भावकर्मप्रक्रिया ॥

अथ भावकर्मरूपसाधनम् । तत्र तत्साप्यादित्यादिनाऽऽत्मनेपदम् ।

६८४ क्यः शिति ॥३।४।७०॥ सर्वस्माद्धातोर्भावकर्मविहिते शिति क्यः प्रत्ययः स्यात् । भावो भावना उत्पादना क्रिया । सा च धातुत्वेन सर्वधातुवाच्या भावार्थप्रत्ययेनानूद्यते । युष्मदस्मद्भ्यां सामानाधिकरण्याभावादन्यदर्थ एव । विभक्तिवाच्यायां भावनायां अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि किंतु एकवचनमेव । तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वात् । अनुक्तत्वात् कर्तरि तृतीया । त्वया मया अन्यैश्च भूयते । अभूयत । अद्यतन्याम् ।

६८५ भावकर्मणोः ॥३।४।६८॥ सर्वस्माद् धातोः भावकर्मविहितेऽद्यतन्यास्ते अिच् प्रत्ययः स्यात् तलुक् च । अभावि । बभूवे ।

६८६ स्वरग्रहदृशहन्भ्यः स्यसिजाशीःश्वस्तन्यां अिट् वा ॥३।४।६९॥ स्वरान्ताद् धातोः ग्रहादिभ्यश्च विहितासु भावकर्मविहितासु स्यसिजाशीःश्वस्तनीषु अिट् प्रत्ययो वा स्यात् । भाविषीष्ट । भविषीष्ट । भाविता । भविता । भाविष्यते । भविष्यते । अभाविष्यत । अभविष्यत । अनुपूर्वत्वे सकर्मकस्य भूधातोः—अनुभूयते सुखं स्वामिना । अनुभूयसे त्वं मया । अनुभूयेऽहं जनैः । अन्वभावि भवो भवता । अन्वभाविषाताम् । अन्वभविषाताम् । ण्यन्तत्वे—भाव्यते । णेर्लुकि अभाविषाताम् । अभावयिषाताम् । भावयाञ्चक्रे । भावयाम्बभूवे । भाविषीष्ट । भावयिषीष्ट । भाविता । भावयिता । भाविष्यते । भावयिष्यते । सन्नन्तत्वे तु बुभूष्यते । बुभूषाञ्चक्रे । बुभूषिता । यङन्ते—बोभूय्यते । बोभूयाञ्चक्रे । बोभूयिषीष्ट । बोभूयिष्यते । यङ्लुपि—बोभूयते । अबोभावि । बोभवाञ्चक्रे । बोभाविता । बोभविता । स्तूयतेऽर्हन् । अस्तावि । अस्ताविषाताम् । अस्तोषाताम् । तुष्टुवे । स्ताविता । स्तोता । स्ताविष्यते । स्तोष्यते । क्यङाशीर्ये इति गुणे । अर्यते । स्मर्यते । आरिषाताम् । अस्मारिषाताम् । आरिता । स्मारिता । अर्ता । स्मर्ता । औपदेशिकसंयोगग्रहणात् 'क्यङाशीर्ये' इति न गुणः । संस्क्रियते । ईर्ष्यङ्नेऽयपीति ईत्वे गीयते । पीयते । स्थीयते । सीयते । दीयते । धीयते ।

६८७ आत ऐः कृञ्भौ ॥ ४।३।५३ ॥ आकारान्तस्य धातोर्ञिर्णिति कृति

मत्यये औ च परे ऐकारः स्यात्। अदायि। अधायि। अदायिषाताम्। अदिषाताम्। अधायिषाताम्। अधिषाताम्। ददे। दधे। दायिषीष्ट। दासीष्ट। धायिषीष्ट। धासीष्ट। दायिता। दाता। धायिता। धाता। दायिष्यते। दास्यते। धायिष्यते। धास्यते। शीङ्–शय्यते। अशायि। कृ–क्रियते। अकारि। अकारिषाताम्। अकृषाताम्। चक्रे। कारिषीष्ट। कृषीष्ट। कारिता। कर्ता। कारिष्यते। करिष्यते। अकारिष्यत। अकरिष्यत। गृ–गीर्यते। अद्यतन्यां ध्वमि सिज्लोपपक्षे चतुरधिकं शतम्। तथाहि–ञिटि न दीर्घः अगारिध्वम्। इटि तु वृतो-नवेति वा दीर्घः–अगरीध्वम्, अगरिध्वम्। एषां त्रयाणां लत्वं ढत्वं द्वित्वत्रयं चेति पञ्चैकल्पिकानि इति षण्णवतिः। इट् सिजाशिषोरात्मने इति विकल्पादिडभावे ऋवर्णादिति कित्त्वम्। ऋतां ङ्किति, भ्वादेर्नामिन इति दीर्घे नाम्यन्तात्परोक्षेति ढत्वे अगीर्ढ्वम्। ढत्वमानां द्वित्वविकल्पे अष्टौ। उक्तषण्णवत्या सह संकलने उक्ता संख्या सिद्धा।

" इड् दीर्घश्च ञिट् लत्वं ढत्वं द्वित्वत्रयं तथा ॥
अष्टानामिति वैकल्प्ये शतं वेदाधिकं मतम् " ॥

सिज्लोपाभावे तु ढत्वविकल्पाभावात् षट्पञ्चाशत्।

६८८ तनः क्ये ॥४।२।६३॥ तनोतेरन्तस्य क्ये परे आकारो वा स्यात्। तायते। तन्यते। क्य इति किम्। तन्तन्यते। ये न वा। जायते। जन्यते। सायते। सन्यते। खायते खन्यते।

६८९ तपः कर्त्रनुतापे च ॥३।४।९१॥ तपेर्धातोः कर्मकर्तरि कर्तरि अनुतापे चार्थे ञिच् न स्यात्। अनुतापग्रहणाद् भावे कर्मणि च। अन्वतप्त कितवः स्वयमेव। कर्तरि–अतप्त तपांसि साधुः। अन्वतप्त चैत्रेण। अन्ववातप्त पापः पापेन कर्मणा। कर्त्रनुतापे चेति किम्। अतापि पृथिवी राज्ञा। हन्यते। घन्। अघानि। अघानिषाताम्। अहसाताम्। पक्षे वधादेशे अवधि। अवधिषाताम्। घानिषीष्ट। वधिषीष्ट। घानिष्यते। हनिष्यते। गृह्यते। अग्राहि। अग्राहिषाताम्। अग्रहीषाताम्। अग्राहिध्वम्। अग्राहिढ्वम्। अग्रहीध्वम्। अग्रहीढ्वम्। जगृहे। ग्राहिषीष्ट। ग्राहिषीढ्वम्। ग्रहीषीढ्वम्। ग्राहिता। ग्रहीता। दृश्यते। अदर्शि। अदर्शिषाताम्। अदृक्षाताम्। ददृशे। दर्शिषीष्ट। दृक्षीष्ट। दर्शिता। द्रष्टा। दर्शि-

ष्यते। द्रक्ष्यते। 'नो व्यञ्जने' इति नस्य लुकि–स्रस्यते। उदित्त्वान्नात्र नलुक्–नन्द्यते। ग्वृति इज्यते। घट्यते। घटादेर्ह्रस्वो दीर्घस्तु वा ञिणम्परे। अघाटि। अघटि। अघाटिषाताम्। अघटिषाताम्। अघटयिषाताम्। शमोऽदर्शने। अशामि। अशामिषाताम्। अशमिषाताम्। यङन्तात् णौ अशंशामि। अशंशमि। अशंशामिषाताम्। अशंशमिषाताम्। यङ्लुबन्तादप्येवम्। ण्यन्तत्वाभावे तु शम्यते मुनिना।

५९० **मोऽकमियमिरमिनमिगमिवमाचमः** ॥ ४।३।५५ ॥ मान्तस्य धातोः कम्यादिवर्जितस्य ञ्णिति कृत्प्रत्यये औ च परे वृद्धिर्न स्यात्। अशमि। अतमि। अदमि। म इति किम्। अपाठि। कम्यादिवर्जनं किम्। अकामि। अयामि। अरामि। अनामि। अगामि। अवामि। आचामि। वध हिंसायाम्। व्यञ्जनान्तः। न जनवधेति न वृद्धिः। अवधि।

५९१ **विश्रमेर्वा** ॥४।३।५६॥ विपूर्वस्य श्रमेर्ञ्णिति कृत्प्रत्यये औ च परे वा वृद्धिर्न स्यात्। व्यश्रामि। व्यश्रमि। वीति किम्। अश्रमि। अन्ये तु विश्रमेर्वृद्धिं नेच्छन्त्येव। अपरे तु नित्यमेव वृद्धिमुपयन्ति। एके तु यङ्येव विकल्पमातिष्ठन्ते। जागुर्ञ्णवीति वृद्धौ अजागारि।

५९२ **भञ्जेर्नौ वा** ॥४।३।४८॥ भञ्जेरुपान्त्यनकारस्य औ परे लुग्वा स्यात्। अभाजि। अभञ्जि।

५९३ **ञिरुणमोर्वा** ॥४।४।१०७॥ औ रुणमि च प्रत्यये परे लभतेः स्वरात् परो नोऽन्तो वा स्यात्। अलाभि। अलम्भि।

५९४ **उपसर्गात् खल्घञोश्च** ॥४।४।१०८॥ उपसर्गात् परस्य लभेः स्वरात् परः खल्घञोर्ञिरुणमोश्च परयोर्नोऽन्तः स्यात्। प्रालम्भि। उपसर्गादिति किम्। ईषल्लभः। ञिरुणमोर्नित्यार्थमुपसर्गादेव खल्घञोरिति नियमार्थं वचनम्। द्विकर्मकाणां तु—

> " गौणं कर्म दुहादीनां प्रत्ययो वक्ति कर्मजः।
> न्यादीनां कर्मणो मुख्यस्योक्तत्वे प्रत्यया यथा " ॥

गत्यर्थाकर्मकाणां णिगन्तानां मुख्यकर्मणि। बोधाहारार्थशब्दकर्मकाणां तु ण्यन्तानामुभयत्र।

५९५ न स्सः ॥२।३।५९॥ कृतद्विर्भावसकारसंबन्धिनः सकारस्य षो न स्यात् । सुषिस्यते । सुतुस्यते । अत्र सुपूर्वस्य षिसेस्तुसेश्च सकारस्य क्ये अशीर्घादित्यादिना द्विर्भावः । ननु दधिस्यते, मधुस्यति, समविस्करन्, अग्निसात्करोति इत्यादिषु प्रतिषेधाभावात् षत्वं प्राप्नोति । उच्यते । स्सस्सडागमयोः स्सात्प्रत्ययस्य च द्विः सकारपाठस्य षत्वप्रतिषेधार्थत्वेनोच्यमानत्वात् षत्वं न ।

॥ इति भावकर्मप्रक्रिया ॥

॥ अथ कर्मकर्तृप्रक्रिया ॥

यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते, स्वव्यापारे स्वतन्त्रत्वात् । तेन पूर्वं करणादिसत्त्वेऽपि संप्रति कर्तृत्वात् कर्तरि विभक्तिः । साध्वसिश्छिनत्ति । स्थाली पचति । कर्मणस्तु कर्तृत्वविवक्षायां प्राक् सकर्मका अपि प्रायेणाकर्मका भवन्ति । तेभ्यो भावे कर्तरि च प्रत्ययः । पच्यते ओदनेन । भिद्यते काष्ठेन । कर्तरि तु ।

५९६ एकधातौ कर्माक्रिययैकाकर्माक्रिये ॥३।४।८६॥ एकस्मिन् धातौ कर्मस्थक्रियया पूर्वदृष्टया एका अभिन्ना संप्रत्यकर्मिका क्रिया यस्य तस्मिन् कर्तरि कर्मकर्तृरूपे धातोर्विक्यात्मनेपदानि तथा स्युः । अकारि कटः स्वयमेव । क्रियते कटः स्वयमेव । क्रियमाणः कटः स्वयमेव । चक्रे कटः स्वयमेव । अभेदि कुशूलः स्वयमेव । भिद्यते कुशूलः स्वयमेव । बिभिदे कुशूलः स्वयमेव । अत्र करोति कटम्, भिनत्ति कुशूलमित्यादौ यैव कटादिकर्मणां निर्वृत्तिद्विधाभवनादिका क्रिया सैव सौकर्यादविवक्षिते कर्तृव्यापारे स्वातन्त्र्यविवक्षायां तस्मिन्नेव धातावकर्मिका च। एवं चाकर्मत्वाद् भावेऽप्यात्मनेपदम् । क्रियते कटेन । भिद्यते कुशूलेन । एकधाताविति किम् । पचत्योदनं चैत्रः । सिद्ध्यत्योदनः स्वयमेव । कर्मक्रिययेति किम् । साध्वसिश्छिनत्ति, साधु स्थाली पचति इति करणाधिकरणक्रिययैकक्रिये मा भूत् । एकक्रिययेति किम् । स्रवत्युदकं कुण्डिका । स्रवत्युदकं कुण्डिकायाः। अत्र विसृजति निष्क्रामतीति क्रियाभेदात् । गलन्त्युदकं वलीकानि । गलत्युदकं वलीकेभ्य इति । अत्रापि मुञ्चतीति पततीति क्रियाभेदात् नैकाक्रियत्वम् । अकर्मक्रिय इति किम् । भिद्यमानः कुशूलः पात्राणि भिनत्ति । अन्योन्यमाश्लिष्यतः । हन्त्यात्मानमात्मा ।

एकस्य कर्मत्वं कर्तृत्वं च कथमिति चेत् उच्यते । सर्वमपि कर्म स्वव्यापारे स्वातन्त्र्यमनुभूय कर्तृव्यापारेण न्यक्कृतं सत् कर्मतामनुभवति । कर्तृव्यापाराविवक्षायां तु स्वव्यापारे स्वातन्त्र्यात् कर्तृत्वमस्याव्याहृत्तमेव । यदाहुः--

" निर्वृत्त्यादिषु तत्पूर्वमनुभूय स्वतन्त्रताम् ॥
कर्त्रन्तराणां व्यापारे कर्म संपद्यते ततः ॥१॥

निर्वृत्तभेषणं चैतत् स्वक्रियावयवे स्थितम् ॥
निवर्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते " ॥ इति ॥

५९७ पचिदुहेः ॥ ३।४।८७ ॥ पचिदुहिभ्यामेकधातौ कर्मस्थक्रियया पूर्वदृष्टयाऽकर्मिकया सकर्मिकया वा एकक्रिये कर्तरि कर्मकर्तृरूपे त्रिक्यात्मनेपदानि स्युः अपवादविषयं मुक्त्वा । अपाच्योदनः स्वयमेव । पच्यते ओदनः स्वयमेव । पक्ष्यते ओदनः स्वयमेव । अदोहि गौः स्वयमेव । दुग्धे गौः स्वयमेव । अदुग्ध गौः स्वयमेव । उदुम्बरं फलं पचति वायुः । उदुम्बरः फलं पच्यते स्वयमेव । अपक्तोदुम्बरः फलं स्वयमेव । गां दोग्धि पयो गोपालकः । दुग्धे गौः पयः स्वयमेव । अदुग्ध गौः पयः स्वयमेव । अधुक्षत गौः पयः स्वयमेव । दुहिपच्योः कर्मणि च्विचः प्रतिषेधं वक्ष्यति । तथा अविशेषेण दुहेश्चिचो विकल्पं क्यस्य च प्रतिषेधं वक्ष्यति । अकर्मकस्येह पूर्वेणैव सिद्धे सकर्मकार्थं वचनम् ।

५९८ न कर्मणा च्विच् ॥ ३।४।८८ ॥ पचिदुहेः कर्मणा योगेऽनन्तरोक्ते कर्तरि च्विच् न स्यात् । अपक्तोदुम्बरः फलं स्वयमेव । अदुग्ध गौः पयः स्वयमेव । कर्मणेति किम् । अपाच्योदनः स्वयमेव । अदोहि गौः स्वयमेव । अनन्तरोक्ते कर्तरीत्येव । अपाचि उदुम्बरः फलं वायुना । अदोहि गौः पयो गोपालकेन ।

५९९ रुधः ॥ ३।४।८९ ॥ रुधो धातोरनन्तरोक्ते कर्तरि च्विच् न स्यात् । अरुद्ध गौः स्वयमेव । अनन्तरोक्ते कर्तरीत्येव । अरोधि गौर्गोपालकेन ।

६०० स्वरदुहो वा ॥ ३।४।९० ॥ स्वरान्ताद्धातोर्दुहेश्चानन्तरोक्ते कर्तरि च्विच् वा न स्यात् । अकृत अकारि कटः स्वयमेव । अलविष्ट अलावि केदारः स्वयमेव । अदुग्ध अदोहि गौः स्वयमेव । स्वरदुह इति किम् । अभेदि कुशूलः स्वयमेव । अनन्तरोक्ते कर्तरीत्येव । अकारि कटश्चैत्रेण । अदोहि गौर्बल्लवेन ।

६०१ णिस्नुभ्र्यात्मनेपदाकर्मकात् ॥३।४।९२॥ ण्यन्ताद्धातोः स्नुभ्रिभ्यां चात्मनेपदविषावकर्मकेभ्यश्च कर्मकर्तरि च्लि न स्यात्। येभ्यः कर्मण्यसति आत्मनेपदं विधीयते ते आत्मनेपद्यकर्मकाः। णि–पचति ओदनं चैत्रः तं मैत्रः प्रायुक्त अपीपचत् ओदनं चैत्रेण मैत्रः। पुनरोदनस्य सुकरत्वेन कर्तृत्वे अपीपचतौदनः स्वयमेव। यदि वा स्वयमेव पच्यमानः ओदनः स्वं प्रायुक्त अपीपचतौदनः स्वयमेव। उभयत्र स्वयमेवापाचीत्येवार्थः। अचूचुरत् गां चैत्रः, अचूचुरत गौः स्वयमेव। पुच्छमुत्क्षिपति उत्पुच्छयते गौः। अन्तर्भूतण्यर्थत्वात् सकर्मकत्वे उदपुपुच्छत गां देवदत्तः। उदपुपुच्छत गौः स्वयमेव। यद्वा उत्पुच्छामकार्षीदिति णिच्चि उदपुपुच्छद् गां देवदत्तः। उदपुपुच्छत गौः स्वयमेव। स्नु–प्रास्नावीत् गां देवदत्तः। प्रास्नोष्ट गौः स्वयमेव।

६०२ स्नोः ॥४।४।९३॥ स्नोः परस्य स्ताद्यशित आदिरिट् स्यात् आत्मनेपदं चेन्न। प्रस्नविष्यति। प्रस्नविता। अनात्मन इत्येव। प्रस्नोष्यते। प्रास्नोष्ट। प्रस्नवितेवाचरति प्रस्नवित्रीयत इत्यत्र त्वात्मनेपदस्य बहिरङ्गत्वात् तदाश्रयः प्रतिषेधो न। स्नौतेरिट् सिद्ध एव, प्रतिषेधाभावादात्मनेपद इडनिवृत्त्यर्थं तु वचनम्। श्रि–उदशिश्रियत दण्डं दण्डी। उदशिश्रियत दण्डः स्वयमेव। आत्मनेपदाकर्मक–व्यकार्षीत् सैन्धवं चैत्रः। वल्गयति स्मेत्यर्थः। व्यकृत सैन्धवः स्वयमेव। विकरोतिर्वल्गनेऽन्तर्भूतण्यर्थः कर्मस्थक्रियः। व्यकार्षीत् कटं चैत्रः व्यकृत कटः स्वयमेव। अवधीत् गां गोपः। आहत गौः स्वयमेव। व्यताप्सीत् पृथिवीं रविः। व्यतप्त पृथिवी स्वयमेव। च्लिनिषेधात् च्लिट् भवत्येव। पाचिता पाचिषीष्ट ओदनः स्वयमेव। प्रास्नाविष्ट प्रस्नाविषीष्ट गौः स्वयमेव। उच्छ्रायिता उच्छ्रायिषीष्ट दण्डः स्वयमेव। आघानिष्ट आघानिषीष्ट गौः स्वयमेव। पृथग्योगात् उत्तरेण च्लिटः प्रतिषेधो न।

६०३ भूषार्थसन्किरादिभ्यश्च च्लिक्यौ ॥३।४।९३॥ भूषार्थेभ्यः सन्नन्तेभ्यः किरादिभ्यश्चकाराण्णिस्नुभ्र्यात्मनेपदाकर्मकेभ्यश्च धातुभ्यः कर्मकर्तरि च्लिक्यौ न स्याताम्। च्लिरुत्सृष्टानुबन्धो च्लिच्लिटोर्ग्रहणार्थः। भूषार्थ–अलमकार्षीत् कन्या चैत्रः। अलमकृत कन्या स्वयमेव। एवमलंकरिष्यते अलंकुरुते कन्या स्वयमेव। पर्यस्कार्षीत् कन्यां चैत्रः, पर्यस्कृत, परिष्करिष्यते परिष्कुरुते कन्या स्वयमेव। अबूभुषत् कन्यां छात्रः। अबूभुषत भूषयिष्यते भूषयते कन्या स्वयमेव। अममण्डत्

कन्यां छात्रः, अममण्डत मण्डयिष्यते मण्डयते कन्या स्वयमेव । भूषिमण्डयोर्ण्यन्तत्वेनैव निषेधे सिद्धे ञिट्प्रतिषेधार्थं भूषार्थेषूदाहरणम् । सन्नन्त–अचिकीर्षीत् कटं चैत्रः । अचिकीर्षिष्ट चिकीर्षिष्यते चिकीर्षते कटः स्वयमेव । अविभित्सीत् कुशूलं चैत्रः । अविभित्सिष्ट विभित्सिष्यते बिभित्सते कुशूलः स्वयमेव । किरादि–अकारीत् पांसुं करी, अकीर्ष्ट कीर्षीष्ट किरते पांसुः स्वयमेव । एवमवाकीर्ष्ट । अवकीर्षीष्ट अवकिरते पांसुः स्वयमेव । अगारीत् ग्रासं चैत्रः । अगीर्ष्ट गीर्षीष्ट गिरते ग्रासः स्वयमेव । एवं न्यगीर्ष्ट निगीर्षीष्ट निगिरते ग्रासः स्वयमेव । दोग्धि गां पयो गोपः । दुग्धे गौः स्वयमेव । दुग्धे गौः पयः स्वयमेव । कथमदोहि गौः स्वयमेव ? दुहेर्ञिज्विकल्प उक्तः । अवोचत् कथां चैत्रः । अचोचत ब्रूते कथा स्वयमेव । अश्रन्थीत् मालां मालिकः। अश्रन्थिष्ट श्रथ्नीते श्रन्थते माला स्वयमेव । अग्रन्थीत् ग्रन्थं विद्वान् । अग्रन्थिष्ट ग्रथ्नीते ग्रन्थते ग्रन्थः स्वयमेव । श्रन्थिग्रन्थी क्र्यादौ युजादौ वा। अनंसीत् दण्डं दण्डी। अनंस्त नमते दण्डः स्वयमेव। परिणमति मृदं कुलालः। परिणमते मृत् स्वयमेव। कॄ गॄ दुह ब्रू श्रन्थ् ग्रन्थ् नम् इति किरादयः। बहुवचनं शिष्टप्रयोगानुसरणार्थम् । णिस्नुभ्यात्मनेपदाकर्मकाणां ञिच्प्रतिषेधः पूर्वसूत्रे उदाहृतः। ञिट् त्वेषां पृथग्योगाद् भवत्येवेति चोक्तम्। क्यनिषेध उदाह्रियते। ण्यन्त–कारयते कटः स्वयमेव । चोरयते गौः स्वयमेव । उत्पुच्छयते गौः स्वयमेव । स्नु–प्रस्नुते गौः स्वयमेव । श्रि–उच्छ्रयते दण्डः स्वयमेव । आत्मनेपदाकर्मक–विकुर्वते सैन्धवाः स्वयमेव । आहते गौः स्वयमेव । अन्ये तु णिस्नुभ्यात्मनेपदाकर्मकेभ्यो ञिटोऽपि प्रतिषेधमिच्छन्ति । तन्मते पाचयिता पाचयिष्यते ओदनः, प्रस्नोता प्रस्नोष्यते गौः, उच्छ्रयिता उच्छ्रयिष्यते दण्डः, आहन्ता आहनिष्यते गौः स्वयमेवेत्येव भवति । स्नुनमोः अन्तर्भूतण्यर्थत्वेन सकर्मकत्वाद् गवादेः कर्मकर्तृत्वम् । यत्र तु ण्यर्थो नास्ति तत्र कर्तृतैव । यथा प्रस्नौति गौर्दोग्धुः कौशलेन । नमति पल्लवो वातेन । ननु कर्मस्थया क्रियया एकाकर्मक्रिये कर्तरि ञिक्यात्मनेपदानि भवन्ति अत्र तु ण्यन्तानां प्रयोजकव्यापारः सन्नन्तानां चेच्छाकर्तृस्थैव क्रियेति ञिक्ययोः प्राप्तिरेव नास्ति किं प्रतिषेधेन ? उच्यते–प्रयोजकव्यापारस्येच्छायाश्च तदर्थत्वात् करणादिक्रियारूपस्य प्रकृत्यर्थस्य प्राधान्यम्, तस्य च कर्मस्थत्वात् णिसन्नन्तानामपि कर्मस्थक्रियत्वम् । तथा ब्रूते कथेत्यत्र वचनं शब्दप्रकाशनफलत्वात् उपाध्याये नोक्तः करोतीतिवत् प्रेरणार्थत्वात् वा कर्मस्थक्रियारूपम् । भूषाक्रियाणां च भूषाफलं शोभाख्यं कर्मणि दृश्यत इति कर्मस्थक्रियत्वम् । एवमन्यत्रापि भावनीयम् ।

६०४ करणक्रियया कचित् ॥३।४।९४॥ एकधातौ पूर्वदृष्टया करणस्थया क्रियया एकाकर्मक्रिये कर्तरि क्यिक्यात्मनेपदानि कचित् स्युः । परिवारयन्ति कण्टकैः पुरुषा वृक्षम् । परिवारयन्ते कण्टका वृक्षं स्वयमेव । कचिन्न । साध्वसिश्छिनत्ति ।

६०५ सृजः श्राद्धे क्यिक्यात्मने तथा ॥३।४।८४॥ सृजो धातोः श्रद्धावति कर्तरि क्यिक्यात्मनेपदानि स्युस्तथा यथा विहितानि। असर्जि मालां धार्मिकः। सृज्यते मालां धार्मिकः । स्रक्ष्यते मालां धार्मिकः । श्राद्ध इति किम् । व्यत्यसृष्ट माले मिथुनम् । सृजति स्रक्ष्यति मालां मालिकः। तथेति वचनादद्यतन्यामात्मनेपदे ते क्यिच् तलुक् च शिति च क्य इति सिद्धम् ।

६०६ तपेस्तपःकर्मकात् ॥३।४।८५॥ तपेर्धातोरर्थान्तरवृत्तित्वेन तपःकर्मकात् कर्तरि क्यिक्यात्मनेपदानि स्युस्तथा । तप्यते तपः साधुः । तेपे तपांसि साधुः। तपिरत्र करोत्यर्थः । क्यिच् तु तपःकर्त्रनुतापे चेति प्रतिषेधान्न । अन्वतप्त तपः साधुः। तपेरिति किम् । कुरुते तपांसि साधुः। तप इति किम् । उत्तपति सुवर्णं सुवर्णकारः। कर्मेति किम् । तपांसि साधुं तपन्ति । दुःखयन्तीत्यर्थः ।

६०७ कृषिरञ्जेर्व्याप्ये वा परस्मै च ॥३।४।७४॥ कृषिरञ्जिभ्यां व्याप्ये कर्तरि शिद्विषये परस्मैपदं वा स्यात् तत्संनियोगे श्यश्च । क्यात्मनेपदापवादौ । कृष्णाति पादं देवदत्तः । कृष्यति कृष्यते पादः स्वयमेव । कृष्यन् कृष्यमाणः पादः स्वयमेव । रज्यति रज्यते वस्त्रं स्वयमेव । रज्यद् रज्यमानं वस्त्रं स्वयमेव । व्याप्ये कर्तरीति किम् । कृष्णाति पादं रोगः । रज्यति वस्त्रं शिल्पी । शितीत्येव । अकोषि । चुकुषे । कोषिष्यमाणः । अरञ्जि । ररञ्जे । रङ्क्ष्यमाणं स्वयमेव । परस्मैपदसंनियोगविज्ञानादिह न । कतीह कृष्णानाः पादाः । कतीह रजमानानि वस्त्राणि । ' वयःशक्तिशीले ' इति ज्ञानः। क्यात्परस्मैपदविकल्पविधानेनैव सिद्धे श्यविधानं कृष्यन्ती रज्यन्तीत्यत्र 'श्यशवः' इत्यनेन नित्यमन्तादेशार्थम् ।

॥ इति कर्मकर्तृप्रक्रिया ॥

॥ अथ विभक्त्यर्थप्रक्रिया ॥

६०८ श्रुसदवस्भ्यः परोक्षा वा ॥५।२।१॥ भूत इति अनुवर्तते । शृणोत्यादिभ्यो धातुभ्यो भूतार्थवृत्तिभ्यः परोक्षा विभक्तिर्वा स्यात् । उपशुश्राव । उपससाद ।

अनूवास। वावचनाद्यथास्वकालमद्यतनी ह्यस्तनी च। उपाश्रौषीत्। उपाशृणोत्। उपासदत्। उपासीदत्। अन्ववात्सीत्। अन्ववसत्। एवं शुश्रुवे, अश्रावि अश्रूयतेत्यादि। अन्ये तु श्रवादिभ्यो भूतमात्रे क्सुमेवेच्छन्ति न परोक्षाम्। ह्यस्तनीमपीच्छत्यन्यः। बहुवचनं व्याप्त्यर्थम्। तेन भूतानद्यतनेऽपीयं ह्यस्तन्या न बाध्यते। असरूपत्वादेवाद्यतन्यादिसिद्धौ वावचनं विभक्तिष्वसरूपोत्सर्गविभक्तिसमावेशनिषेधार्थम्[1]।

६०९ **विशेषाविवक्षाव्यामिश्रे** ॥५।२।५॥ अनद्यतनादिविशेषस्याविवक्षायां व्यामिश्रणे च सति भूतेऽर्थे वर्तमानाद् धातोरद्यतनी विभक्तिः स्यात्। अकार्षीत्। अहार्षीत्। अगमाम घोषान्। अपाम पयः। अजैषीत् गर्तो हूणान्। रामो वनमगमत्। सतोऽप्यत्र विशेषस्याविवक्षा यथाऽनुदरा कन्या अलोमिका एडकेति। व्यामिश्रे—अद्य ह्यो वाभुक्ष्महि। विशेषाविवक्षेति किम्। अगच्छाम घोषान्। अपिबाम पयः। अजयद् गर्तो हूणान्। रामो वनं जगाम। ह्यस्तन्यादि विषयेऽप्यद्यतन्यर्थं वचनम्।

६१० **रात्रौ वसोऽन्त्ययामास्वप्नर्यद्य** ॥५।२।६॥ रात्रौ भूतेऽर्थे वर्तमानाद् वसतेर्धातोर्ह्यस्तन्यपवादोऽद्यतनी विभक्तिः स्यात् अन्त्ययामास्वप्नरि—स चेदर्थो यस्यां रात्रौ भूतस्तस्या एवान्त्ययामं व्याप्यास्वप्नरि कर्तरि वर्तते। अद्य तेनैवान्त्ययामेनावच्छिन्नेऽद्यतने चेत्प्रयोगो भवति नाद्यतनान्तरे। न्याय्ये प्रत्युत्थाने प्रत्युत्थितं कंचित् कश्चिदाह—क भवानुषितः। स आह—अमुत्रावात्समिति। रात्र्यन्त्ययामे तु मुहूर्तमपि स्वापे ह्यस्तन्येव। अमुत्रावसमिति।

६११ **ख्याते दृश्ये** ॥५।२।८॥ ख्याते लोकविज्ञाते दृश्ये प्रयोक्तुः शक्यदर्शने भूतेऽनद्यतनेऽर्थे वर्तमानाद्धातोर्ह्यस्तनी स्यात्। परोक्षापवादः। अरुणत् सिद्धराजोऽवन्तीम्। अजयत् सिद्धः सौराष्ट्रान्। ख्यात इति किम्। चकार कटं चैत्रः। दृश्य इति किम्। जघान कंसं किल वासुदेवः। अनद्यतन इत्येव। उदगादद्यादित्यः।

६१२ **अयदि स्मृत्यर्थे भविष्यन्ती** ॥ ५।२।९॥ स्मृत्यर्थे धातावुपपदे सति भूतानद्यतनेऽर्थे वर्तमानाद्धातोर्भविष्यन्ती स्यात् अयदि—न चेद् यच्छब्दः

---

१ तेन 'अयदि' इति सूत्रे वर्त्स्यन्तीविषये ह्यस्तनी न।

प्रयुज्यते । अभिजानासि देवदत्त कश्मीरेषु वत्स्यामः । स्मरसि साधो स्वर्गे स्थास्यामः । एवं बुध्यसे चेतयसे अध्येष्यवगच्छसि चैत्र कलिङ्गेषु गमिष्यामः। अयदीति किम् । अभिजानासि मित्र यत् कलिङ्गेष्ववसाम ।

६१३ **वाऽऽक्रोशायाम्** ॥५।२।१०॥ अयदीति नानुवर्तते । स्मृत्यर्थे धातावुपपदे सति यद्ययदि वा प्रयुज्यमाने प्रयोक्तुः क्रियान्तराङ्क्षायां सत्यां भूतानद्यतनेऽर्थे वर्तमानाद् धातोर्भविष्यन्ती वा स्यात्। स्मरसि मित्र कश्मीरेषु वत्स्यामस् तत्रौदनं भोक्ष्यामहे पास्यामः पयांसि च । स्मरसि मित्र कश्मीरेष्ववसाम तत्रौदनमभुञ्ज्महि । स्मरसि मित्र यत् कश्मीरेषु वत्स्यामो यत्तत्रौदनं भोक्ष्यामहे । स्मरसि मित्र यत् कश्मीरेष्ववसाम यत्तत्रौदनमभुञ्ज्महि । अत्र वासो लक्षणं भोजनं पानं च लक्ष्यमिति लक्ष्यलक्षणयोः संबन्धे प्रयोक्तुराकाङ्क्षा भवति ।

६१४ **कृतास्मरणातिनिह्नवे परोक्षा** ॥५।२।११॥ कृतस्यापि व्यापारस्य चित्तव्याक्षेपादिनाऽस्मरणेऽत्यन्तापह्नवे वा गम्यमाने भूतेऽनद्यतनेऽर्थे वर्तमानाद् धातोः परोक्षा विभक्तिः स्यात् । अपरोक्षकालार्थ आरम्भः। सुप्तोऽहं किल विललाप । मत्तोऽहं किल विचचार । चिन्तयन् किलाहं शिरः कम्पयांबभूव । अङ्गुलिं स्फोटयामास । अतिनिह्नवे—कश्चित् केनचिदुक्तः कलिङ्गेषु त्वया ब्राह्मणो हतः स तदपह्नुवान आह—कः कलिङ्गान् जगाम को ब्राह्मणं ददर्श नाहं कलिङ्गान् जगाम इत्यत्यन्तमपह्नुते । अतिग्रहणादेकदेशापह्नवे ह्यस्तन्येव । न कलिङ्गेषु ब्राह्मणमहमहनम् ।

६१५ **हशश्वद्युगान्तःप्रच्छचे ह्यस्तनी च** ॥५।२।१३॥ पञ्चवर्षं युगं तस्यान्तर्मध्यं तत्र पृच्छचते यः स युगान्तःपृच्छचः । हे शश्वति च प्रयुज्यमाने युगान्तःप्रष्टव्ये च भूतानद्यतने परोक्षेऽर्थे वर्तमानाद् धातोर्ह्यस्तनी परोक्षा च विभक्ती स्याताम् । इति हाकरोत् । इति ह चकार । शश्वदकरोत् । शश्वच्चकार । प्रच्छचे—किमगच्छस्त्वं मथुराम् । किं जगन्थ त्वं मथुराम् । हशश्वद्युगान्तःपृच्छच इति किम् । जघान कंसं किल वासुदेवः । वेत्येव कृते भूतानद्यतनमात्रभाविन्या ह्यस्तन्याः पक्षे सिद्धौ ह्यस्तनीविधानं स्मृत्यर्थयोगेऽपि ह्यस्तन्येव यथा स्याच्च भविष्यन्तीत्येवमर्थम् । तेन स्मरसि मित्र कश्मीरेष्विति हाध्यैमहि अभिजानासि चैत्र शश्वदध्यैमहीत्यादि सिद्धम् । क्रियान्तराकाङ्क्षायां तु हशश्वत्प्रयोग एव न संभवतीति नोदाहियते ।

६१६ **अविवक्षिते** ॥५।२।१४॥ भूतानद्यतने परोक्षे परोक्षत्वेनाविवक्षितेऽर्थे वर्तमानाद् धातोर्ह्यस्तनी स्यात् । अभवत् सगरो राजा । अहन् कंसं वासुदेवः । एवं च परोक्षानद्यतने विवक्षावशादद्यतनीह्यस्तनीपरोक्षास्तिस्रो विभक्तयः सिद्धाः। तथा च अन्वनैषीत् ततो वाली न्यक्षिपच्चाङ्गदं सुग्रीवं मोचे सद्भावमागतः । राक्षसेन्द्रस्ततोऽभैषीत् सैन्यं समस्तं सोऽयुयुत्सयत् स्वयं युयुत्सयाञ्चक्रे । तथा

'अभूवँस्तापसाः केचित् पाण्डुपत्रफलाशिनः ।
पारिव्राज्यं तदादत्त मरीचिश्च तृषार्दितः' ॥ इति ।

६१७ **वाद्यतनी पुरादौ** ॥५।२।१५॥ परोक्षे इति निवृत्तम् । भूतानद्यतने परोक्षे चापरोक्षे चार्थे वर्तमानाद् धातोः पुरा इत्यादावुपपदेऽद्यतनी वा स्यात् । अपरोक्षे ह्यस्तन्याः परोक्षे तु परोक्षाया अपवादः । वावचनात् पक्षे यथाप्राप्ति ते अपि भवतः । अवात्सुरिह पुरा छात्राः । अवसन्निह पुरा छात्राः । ऊषुरिह पुरा छात्राः । तदाभाषिष्ट राघवः । तदाभाषत राघवः । बभाषे राघवस्तदा । भूतानद्यतनपरोक्षेऽद्यतनीं नेच्छन्त्यन्ये । एवमुत्तरसूत्रे पुरादियोगे वर्तमानाम् । हशश्वच्छब्दयोगेऽपि पुरादियोगे परत्वाद् विकल्पेनाद्यतनी । इति ह पुराकार्षीत् । अकरोत् । चकार । शश्वत् पुराकार्षीदकरोच्चकार । भूतमात्रविवक्षया अद्यतन्याः सिद्धौ पुरादियोगे तद्वचनं स्मृत्यर्थहशश्वत्स्मयोगे सामान्यविवक्षया अद्यतनी न भवतीति ज्ञापनार्थम् ।

६१८ **स्मे च वर्तमाना** ॥ ५।२।१६ ॥ भूतानद्यतने परोक्षेऽपरोक्षे चार्थे वर्तमानाद् धातोः स्मशब्दे पुरादौ चोपपदे वर्तमाना स्यात् । इति स्मोपाध्यायः कथयति । पृच्छति स्म पुरोधसम् । वसन्तीह पुरा छात्राः । भाषते राघवस्तदा । अथाह वर्णी विदितो महेश्वरः । यावद् गिरः खे मरुतां चरन्ति । आदिग्रहणमिह पूर्वत्र च प्रयोगानुसरणार्थम् । एवं च पुरादियोगेऽद्यतनीह्यस्तनीपरोक्षावर्तमानाश्चतस्रो विभक्तयः सिद्धाः । स्मपुरायोगे तु परत्वाद् वर्तमानैव । नटेन स्म पुराधीयते । एवं हशश्वत्स्मयोगेऽपि । इति ह स्मोपाध्यायः कथयति । शश्वदधीयते स्म । त्रययोगेऽपि एवम् । न ह स्म वै पुराग्निरपरशु वृक्णं दहतीति ।

६१९ **ननौ पृष्टोक्तौ सद्यत्** ॥ ५।२।१७ ॥ अनद्यतन इति निवृत्तम् । पृष्टस्य धात्वर्थस्योक्तिः प्रतिवचनं पृष्टोक्तिः । ननुशब्दे उपपदे पृष्टोक्तौ भूतेऽर्थे

वर्तमानाद् धातोः सद्वत्–वर्तमान इव वर्तमाना विभक्तिः स्यात् । सद्वद्वचनादत्र विषये शत्रानशावपि भवतः । किमकार्षीः कटं चैत्र । ननु करोमि भोः । ननु कुर्वन्तं कुर्वाणं मां पश्य । किमवोचः किंचिच्चैत्र । ननु ब्रवीमि भोः । ननु ब्रुवन्तं ब्रुवाणं मां पश्य । पृष्टोक्ताविति किम् । नन्वकार्षीच्चैत्रः कटम् ।

६२० **नन्वोर्वा** ॥ ७।२।१८ ॥ न नु इत्येतयोः शब्दयोरुपपदयोः पृष्टोक्तौ भूतेऽर्थे वर्तमानाद् धातोर्वा वर्तमाना विभक्तिः सा च सद्वत् । किमकार्षीः कटं चैत्र । न करोमि भोः । न कुर्वन्तं न कुर्वाणं पश्य माम् । नाकार्षम् । कस्तत्रावोचत् । अहं नु ब्रवीमि । ब्रुवन्तं ब्रुवाणं तु मां पश्य । अहं न्ववोचम् ।

६२१ **परिदेवने** ॥५।३।६॥ परिदेवनमनुशोचनम् । तस्मिन् गम्यमाने वर्त्स्यति धात्वर्थे वर्तमानाद् धातोः श्वस्तनी विभक्तिः स्यात् । अनद्यतनार्थ आरम्भः । इयं तु कदा गन्ता यैवं पादौ निदधाति । अयं तु कदाध्येता य एवमनभियुक्तः । विशेषविधानात् कदाकर्हिलक्षणा विभाषा बाध्यते ।

६२२ **पुरायावतोर्वर्तमाना** ॥५।३।७॥ पुरायावतोर्निपातयोरुपपदयोर्वर्त्स्यति धात्वर्थेवर्तमानाद् धातोर्वर्तमाना विभक्तिः स्यात् । पुरा भुङ्क्ते । यावद् भुङ्क्ते । भविष्यदनद्यतनेऽपि परत्वाद् वर्तमानैव । पुरा श्वो भुङ्क्ते । यावच्छ्वो व्रजति । लाक्षणिकत्वादिह न । महत्या पुरा जेष्यति ग्रामम् । यावदास्यते तावद् भोक्ष्यते । यत्परिमाणमित्यर्थः ।

६२३ **कदाकर्ह्योर्नवा** ॥५।३।८॥ कदाकर्ह्योरुपपदयोर्वर्त्स्यत्यर्थे वर्तमानाद् धातोर्वर्तमाना वा स्यात् । पक्षे भविष्यन्तीश्वस्तन्यावपि । कदा भुङ्क्ते । कदा भोक्ष्यते । कदा भोक्ता । कर्हि भुङ्क्ते । कर्हि भोक्ष्यते इति । कर्हिशब्दस्य अनद्यतनार्थवृत्तित्वान्न प्राप्नोति, श्वो गमिष्यतीत्यादिवत्तु भविष्यति । भूते तु नित्यं परोक्षादयः । कदा बुभुजे । कदा भुक्तवान् । कर्हि बुभुजे । कर्हि भुक्तवान् ।

६२४ **किंवृत्ते लिप्सायाम्** ॥५।३।९॥ विभक्त्यन्तस्य डतरडतमान्तस्य च किमो वृत्तं किंवृत्तमिति वैयाकरणसमयः । तेन किंतरां किंतमामिति न किंवृत्तम् । तस्मिन्नुपपदे प्रष्टुर्लिप्सायां गम्यमानायां वर्त्स्यत्यर्थे वर्तमानाद् धातोर्वर्तमाना वा स्यात् । पक्षे भविष्यन्तीश्वस्तन्यावपि । लब्धुमिच्छा लिप्सा । को भवतां भिक्षां

ददाति दास्यति दाता वा । किंवृत्त इति किम् । भिक्षां दास्यति । लिप्सायामिति किम् । कः सिद्धपुरं यास्यति ।

६२५ **लिप्स्यासिद्धौ** ॥ ७।३।१० ॥ लब्धुमिष्यमाण ओदनादिर्लिप्स्यस्तस्मात् सिद्धौ स्वर्गाद्यवाप्तिलक्षणायां गम्यमानायां वर्त्स्यत्यर्थे वर्तमानाद् धातोर्वा वर्तमाना स्यात् । पक्षे भविष्यन्तीश्वस्तन्यावपि । अकिंवृत्तार्थोऽयमारम्भः । यो भिक्षां ददाति दास्यति दाता वा स स्वर्गलोकं याति यास्यति याता वा । लिप्स्यात् भक्तात् स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयति ।

६२६ **पञ्चम्यर्थहेतौ** ॥७।३।११॥ पञ्चम्यर्थः प्रैषादिस्तस्य हेतुर्निमित्तमुपाध्यायागमनादि तस्मिन्नर्थे वर्त्स्यति वर्तमानाद् धातोर्वर्तमाना वा स्यात् । पक्षे भविष्यन्तीश्वस्तन्यावपि । उपाध्यायश्चेदागच्छति आगमिष्यति आगन्ता वा अथ त्वं सूत्रमधीष्व। अथ त्वमनुयोगमादत्स्व। अत्र भविष्यदुपाध्यायागमनमध्ययनादिविषयस्य प्रैषस्यातिसर्गस्य प्राप्तकालतायाश्च हेतुर्भवति ।

६२७ **सप्तमी चोर्ध्वमौहूर्तिके** ॥ ७।३।१२ ॥ ऊर्ध्वं मुहूर्तात् भव ऊर्ध्वमौहूर्तिकः । नाम नाम्नेति समासः । उत्तरपदवृद्धिस्त्वस्मादेव निर्देशात् । पञ्चम्यर्थहेतौ ऊर्ध्वमौहूर्तिके वर्त्स्यत्यर्थे वर्तमानाद् धातोः सप्तमी चकाराद् वर्तमाना च विभक्तिर्वा स्यात् । पक्षे भविष्यन्तीश्वस्तन्यावपि । ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य परं मुहूर्तादुपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगन्ता वा अथ त्वं तर्कमधीष्व अथ त्वं सिद्धान्तमधीष्व।

६२८ **क्रियायां क्रियार्थायां तुमणकच्भविष्यन्ती** ॥७।२।१३॥ वेति निवृत्तम् । यस्माद् धातोस्तुमादिस्तद्वाच्या या क्रिया सार्थः प्रयोजनं यस्याः सा क्रियार्था । तस्यां क्रियायामुपपदे वर्त्स्यत्यर्थे वर्तमानाद् धातोस्तुमणकच्भविष्यन्तीप्रत्ययाः स्युः । कर्तुं व्रजति । कारको व्रजति । करिष्यामीति व्रजति । भोक्तुं व्रजति । भोजको व्रजति । भोक्ष्ये इति व्रजति । क्रियायामिति किम् । भिक्षिष्ये इत्यस्य जटाः । क्रियार्थायामिति किम् । धावतस्ते पतिष्यति वासः । अत्रास्ति धावनक्रियोपपदम्, न त्वसौ पतनार्थमुपात्तेति न भवति । णकतृचाविति सामान्येन सिद्धे क्रियार्थोपपदभाविन्या भविष्यन्त्या बाधा मा भूदिति णकञ्विधानम् । असरूपविधिना णकोऽपि भविष्यतीति चेदेवं तर्हि असरूपविधिना तृजादयो मा

भूवन्निति पुनर्णकञ्विधानम् । तेनौदनस्य पाचको व्रजति पक्ता व्रजति पचो व्रजति विक्षिपो व्रजतीत्यादि न भवति।

६२९ **सत्सामीप्ये सद्वद्वा** ॥५।४।१॥ समीपमेव सामीप्यम् । सतो वर्तमानस्य सामीप्ये भूते भविष्यति चार्थे वर्तमानाद् धातोः सद्वद्वर्तमानवत् प्रत्यया वा स्युः । सतीति सूत्रादारभ्यापादपरिसमाप्तेर्विहिताः प्रत्यया भूतभविष्यतोर्वा अतिदिश्यन्ते । कदा चैत्रागतोऽसि । अयमागच्छामि । आगच्छन्तमेव मां विद्धि । वावचनाद् यथाप्राप्तं च । अयमागमम् । एषोऽस्म्यागतः । कदा मैत्र गमिष्यसि । एष गच्छामि । गच्छन्तमेव मां विद्धि । पक्षे एष गमिष्यामि गन्तास्मि । गमिष्यन्तमेव मां विद्धि । वत्करणस्य सादृश्यार्थत्वात् येनैव प्रकृत्युपपदोपाध्यादिना विशेषेण वर्तमाने विहितास्तेनैव विशेषेण भूतभविष्यतोरपि भवन्ति । कदा भवान् सोमं पूतवान् पविष्यते वा । एषोऽस्मि पवमानः । कदा भवानिष्टवान् यक्ष्यते वा । एषोऽस्मि यजमानः । कदा भवान् कन्यामलंकृतवान् करिष्यते वा । एषोऽस्म्यलंकरिष्णुरिति । सामीप्य इति किम् । परुदगच्छत् । वर्षेण गमिष्यति ।

६३० **भूतवच्चाशंस्ये वा** ॥ ५।४।२ ॥ अनागतस्य प्रियस्यार्थस्याशंसनं प्राप्तुमिच्छा आशंसा । तद्विषय आशंस्यः । तस्मिन्नर्थे वर्तमानाद् धातोर्भूतवच्चकारात् सद्वच्च प्रत्यया वा स्युः। आशंस्यस्य भविष्यच्चादयमतिदेशः। वाग्रहणाद् यथाप्राप्तं च । उपाध्यायश्चेदागमत् एते तर्कमध्यगीष्महि । उपाध्यायश्चेदागत एतैस्तर्कोऽधीतः। उपाध्यायश्चेदागच्छति एते तर्कमधीमहे। पक्षे उपाध्यायश्चेदागमिष्यति एते तर्कमध्येष्यामहे । उपाध्यायश्चेदागन्ता एते तर्कमध्येतास्महे । सामान्यस्यातिदेशे विशेषस्यानतिदेशात् ह्यस्तनीपरोक्षे न भवतः । आशंस्य इति किम् । उपाध्याय आगमिष्यति तर्कमध्येष्यते मैत्रः ।

६३१ **क्षिप्राशंसार्थयोर्भविष्यन्तीसप्तम्यौ** ॥५।४।३॥ क्षिप्रार्थे आशंसार्थे चोपपदे आशंस्येऽर्थे वर्तमानाद् धातोर्यथासंख्यं भविष्यन्तीसप्तम्यौ विभक्ती स्याताम् । भूतवच्चेत्यस्यापवादः । उपाध्यायश्चेदागच्छति आगमत् आगमिष्यति आगन्ता क्षिप्रमाशु त्वरितमरं शीघ्रमेते सिद्धान्तमध्येष्यामहे । क्षिप्रार्थे नेति वक्तव्ये भविष्यन्तीवचनं श्वस्तनीविषयेऽपि भविष्यन्ती यथा स्यादित्येवमर्थम् । उपाध्यायश्चेच्छ्वः शीघ्रमागमिष्यति एते श्वः क्षिप्रमध्येष्यामहे । आशंसार्थे खल्वपि । उपाध्याय

श्वेदागच्छति आगमत् आगमिष्यति आगन्ता आशंसेऽवकल्पये संभावये युक्तोऽधीय। द्वयोरुपपदयोः सप्तम्येव शब्दतः परत्वात् । आशंसे क्षिप्रमधीयीय ।

६३२ **संभावने सिद्धवत्** ॥७।४।४॥ हेतोः शक्तिश्रद्धानं संभावनम् । तस्मिन् विषयेऽसिद्धेऽपि वस्तुनि सिद्धवत् प्रत्ययाः स्युः ।

" समये चेत्प्रयत्नोऽभूत् उदभूवन् विभूतयः ।
इषे चेन्माधवोऽवर्षीत् समपत्सत शालयः ॥

जातश्चायं मुखेन्दुश्चेत् भृकुटिप्रणयी पुनः ।
गतं च वसुदेवस्य कुलं नामावशेषताम् " ॥

६३३ **नानद्यतनः प्रबन्धासत्त्योः** ॥७।४।५॥ प्रबन्धः सातत्यम् । आसत्तिः सामीप्यम् । तच्च कालतः । सजातीयेन कालेनाव्यवहितकालतेति यावत् । धात्वर्थस्य प्रबन्धे आसत्तौ च गम्यमानायां धातोरनद्यतनविहितः प्रत्ययो न स्यात् । भूतानद्यतने ह्यस्तनी भविष्यदनद्यतने च श्वस्तनी विहिता तयोः प्रतिषेधः । यावज्जीवं भृशमन्नं दास्यति । यावज्जीवं युक्तोऽध्यापिषत् । यावज्जीवं युक्तोऽध्यापयिष्यति । आसत्तौ खल्वपि—येयं पौर्णमास्यतिक्रान्ता एतस्यां जिनमहः प्रावर्तिष्ट, प्रवृत्तः । येयं पौर्णमास्यागामिनी अस्यां जिनमहः प्रवर्तिष्यते । द्वौ प्रतिषेधौ यथाप्राप्तस्याभ्यनुज्ञानाय। केचित्तु अनद्यतनविशेषविहितानामपि परोक्षादीनां प्रतिषेधमिच्छन्ति।

६३४ **एष्यत्यवधौ देशस्यार्वाग्भागे** ॥७।४।६॥ देशस्य योऽवधिस्तद्वाचिन्युपपदे देशस्यैवार्वाग्भागे य एष्यन्नर्थस्तत्र वर्तमानाद् धातोरनद्यतनविहितः प्रत्ययो न स्यात् । अप्रबन्धार्थमनासत्त्यर्थं च वचनम् । यद्यप्यनद्यतन इति प्रकृतं तथापीष्यतीति वचनात् श्वस्तन्या एव निषेधः । योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यदवरं बलभ्यास्तत्र द्विरोदनं भोक्ष्यामहे द्विः सक्तून् पातास्मः । योऽयमध्वा गन्तव्य आ पाटलिपुत्रात् तस्य यदवरमर्धं तत्रौदनं भोक्ष्यामहे । एष्यतीति किम् । योऽयमध्वातिक्रान्त आ शत्रुंजयात् तस्य यदवरं बलभ्यास्तत्र युक्ता द्विरध्यैमहि, द्विः सक्तूनपिबाम । अवधाविति किम् । योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं बलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्विः सक्तून् पातास्मः । अर्वाग्भाग इति किम् । योऽयमध्वा गन्तव्य आ शत्रुंजयात् तस्य यत् परं बलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्विः सक्तून् पातास्मः ।

६३५ कालस्यानहोरात्राणाम् ॥५।४।७॥ कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैवार्वाग्भागे य एष्यन्नर्थस्तत्र वर्तमानाद् धातोरनद्यतनविहितः प्रत्ययो न स्यात् अनहोरात्राणाम् न चेत् सोऽर्वाग्भागोऽहोरात्राणां संबन्धी स्यात्। योऽयमागामी संवत्सरस्तस्य यदवरं आग्रहायण्यास्तत्र जिनपूजां करिष्यामोऽतिथिभ्यो दानं दास्यामहे। एष्यतीत्येव। योऽयं संवत्सरोऽतीतस्तत्र युक्ता द्विरध्यैमहि। अवधावित्येव। योऽयमागामी निरवधिकः कालस्तत्र यदवरमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे। अर्वाग्भाग इत्येव। परस्मिन् विभाषा वक्ष्यते। अनहोरात्राणामिति किम्। योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रः तत्र युक्ता द्विरध्येतास्महे। योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरोऽर्धमासस्तत्र द्विरोदनं भोक्तास्महे। योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र द्विः सक्तून् पातास्म इति त्रिविधेऽप्यहोरात्रसंबन्धे मा भूत्। योगविभाग उत्तरार्थः। बहुवचनं कालस्येति सामानाधिकरण्यभ्रमनिरासार्थम्।

६३६ परे वा ॥ ५।४।८ ॥ कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैव परस्मिन् भागेऽनहोरात्रसंबन्धिनि य एष्यन्नर्थस्तत्र वर्तमानात् धातोरनद्यतनविहितः प्रत्ययो वा न स्यात्। आगामिनः संवत्सरस्याग्रहायण्याः परस्तात् द्विः सूत्रमध्येष्यामहे, अध्येतास्महे वा। प्रबन्धासत्तिविवक्षायामपि परत्वात् अयमेव विकल्पः। आगामिनः संवत्सरस्याग्रहायण्याः परस्तादविच्छिन्नं सूत्रमध्येष्यामहे अध्येतास्महे वा। कालस्येत्येव। आ शत्रुञ्जयाद् गन्तव्येऽस्मिन्नध्वनि वलभ्याः परस्तात् द्विरोदनं भोक्तास्महे। प्रबन्धासत्योस्तु नित्यं भविष्यन्ती। आ शत्रुञ्जयाद् गन्तव्येऽस्मिन्नध्वनि वलभ्याः परस्तादविच्छिन्नं सूत्रमध्येष्यामहे। पर इति किम्। अर्वाग्भागे पूर्वेण नित्यं प्रतिषेधः। एष्यतीत्येव। अतीते वत्सरे परस्तादाग्रहायण्याः सूत्रं युक्ता अध्यैमहि। अवधावित्येव। योऽयमागामी निरवधिकः कालस्तस्य यत्परमाग्रहायण्यास्तत्र द्विरध्येतास्महे। अनहोरात्राणामित्येव। योऽयं त्रिंशद्रात्र आगामी तस्य यः परः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे।

६३७ भूते ॥५।४।१०॥ भूतेऽर्थे वर्तमानाद् धातोः क्रियातिपत्तौ सत्याम् सप्तम्यर्थे क्रियातिपत्तिर्विभक्तिः स्यात्। 'सप्तम्युताप्योर्वाडे' इत्यारभ्य सप्तम्यर्थेऽनेन विधानम्। ततः प्राक् 'वोताद् प्राक्' इति विकल्पो वक्ष्यते। दृष्टो मया भवतः

पुत्रोऽन्नार्थी चंक्रम्यमाणः अपरश्चातिथ्यर्थी यदि स तेन दृष्टोऽभविष्यत् उताभोक्ष्यत अप्यभोक्ष्यत न तु दृष्टोऽन्येन पथा गत इति न भुक्तवान् ।

६३८ **वोतात् प्राक्** ॥५।४।११॥ 'सप्तम्युताप्योर्वाढे' इत्यत्र यदुतशब्दसंकीर्तनं ततः प्राक् सप्तमीनिमित्ते क्रियातिपत्तौ सत्यां भूतेऽर्थे वर्तमानाद् धातोर्वा क्रियातिपत्तिः स्यात् । कथं नाम संयतः सन्ननागाढे तत्रभवान् आधायकृतम् असेविष्यत धिग् गर्हामहे । वावचनाद्यथाप्राप्तं च । कथं सेवेत धिग् गर्हामहे । उतात् प्रागिति किम् । कालो यदभोक्ष्यत भवान् । भूत इत्येव । एष्यति नित्यमेव ।

६३९ **क्षेपेऽपिजात्वोर्वर्तमाना** ॥५।४।१२॥ भूत इति निवृत्तम् । क्षेपो गर्हा तस्मिन् गम्यमानेऽपिजात्वोरुपपदयोर्धातोर्वर्तमाना विभक्तिः स्यात् । कालसामान्ये विधानात् कालविशेषे विहिता अपि प्रत्ययाः परत्वादनेन बाध्यन्ते । अपि तत्रभवान् जन्तून् हिनस्ति । जातु तत्रभवान् भूतानि हिनस्ति । अपि संयतः सन्ननागाढे तत्रभवानाधायकृतं सेवते धिग् गर्हामहे । इह सप्तमीनिमित्ताभावात् क्रियातिपतने क्रियातिपत्तिर्नोदाह्रियते ।

६४० **कथमि सप्तमी च वा** ॥५।४।१३॥ कथंशब्दे उपपदे क्षेपे गम्यमाने धातोः सर्वेषु कालेषु सप्तमी चकाराद् वर्तमाना च विभक्ती वा स्याताम् । वावचनाद्यथाप्राप्तं च । कथं नाम तत्र भवान् मांसं भक्षयेत्, मांसं भक्ष्यति धिग् गर्हामहे, अन्याय्यमेतत् । पक्षे अबभक्षत् । अभक्षयत् । भक्षयाञ्चकार । भक्षयिता । भक्षयिष्यति । अत्र सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिर्भवति । कथं नाम तत्र भवान् मांसमभक्षयिष्यत् । भक्षयेत् । भक्षयति । अबभक्षत् । अभक्षयत् । भक्षयाञ्चकार । भविष्यति तु क्रियातिपतने नित्यमेव क्रियातिपत्तिः । कथं नाम तत्र भवान् मांसमभक्षयिष्यत् । न तु वर्तमानासप्तमीभविष्यन्तीश्चस्तन्यः । क्षेप इत्येव । कथं नाम तत्रभवान् साधूनपूपूजत् । एवं यथाप्राप्ति वर्तमानादयो भवन्ति ।

६४१ **किंवृत्ते सप्तमीभविष्यन्त्यौ** ॥ ५।४।१४ ॥ किंवृत्ते उपपदे क्षेपे गम्यमाने धातोः सप्तमीभविष्यन्त्यौ स्याताम् । सर्वविभक्त्यपवादः । किं तत्रभवाननृतं ब्रूयात् । किं तत्र भवाननृतं वक्ष्यति । को नाम कतरो नाम कतमो नाम यस्मै तत्र भवाननृतं ब्रूयात्, वक्ष्यति । अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः । किं तत्र भवाननृतमवक्ष्यत् । पक्षे ब्रूयात् वक्ष्यति च । भविष्यति

तु नित्यम् । किं तत्र भवाननृतमवक्ष्यत् । क्षेप इत्येव । किं तत्रभवान् देवानपूपुजदित्यादि ।

६४२ **अश्रद्धामर्षेऽन्यत्रापि** ॥ ५।४।१५ ॥ क्षेप इति निवृत्तम् । अश्रद्धा असंभावना । अमर्षोऽक्षमा । अन्यत्राकिंवृत्तेऽपिशब्दाद् किंवृत्ते चोपपदेऽश्रद्धामर्षयोर्गम्यमानयोर्धातोः सप्तमीभविष्यन्त्यौ स्याताम् । सर्वविभक्त्यपवादः । वचनभेदाद् यथासंख्यं नास्ति । अश्रद्धायाम् । न श्रद्दधे न संभावयामि नावकल्पयामि तत्रभवान्नामादत्तं गृह्णीयात् ग्रहीष्यति । किंवृत्तेऽपि–न श्रद्दधे न संभावयामि नावकल्पयामि किं तत्रभवान्नामादत्तमाददीत, अदत्तमादास्यते । अमर्षे–न मर्षयामि न क्षमे धिग् मिथ्या नैतदस्ति तत्रभवान्नामादत्तं गृह्णीयात्, अदत्तं ग्रहीष्यति । किंवृत्तेऽपि–न मर्षयामि न क्षमे धिग् मिथ्या नैतदस्ति किं तत्रभवानदत्तं गृह्णीयात् ग्रहीष्यति । अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः। न श्रद्दधे न मर्षयामि तत्र भवानदत्तमग्रहीष्यत् पक्षे गृह्णीयात् ग्रहीष्यति च । भविष्यति तु नित्यम् । न श्रद्दधे न मर्षयामि तत्रभवानदत्तमग्रहीष्यत् । अन्यत्रापीति किम् । यदार्थात् प्रकरणाद्वा श्रद्धामर्षयोर्गम्यमानत्वात् तद्वाचकेनाप्युपपदेन धातोर्न योगस्तदा मा भूत् ।

६४३ **किंकिलास्त्यर्थयोर्भविष्यन्ती** ॥ ५।४।१६ ॥ किंकिलेति समुदायशब्देऽस्त्यर्थे च शब्दे उपपदेऽश्रद्धामर्षयोर्गम्यमानयोर्धातोर्भविष्यन्ती स्यात् । सप्तम्यपवादः । वचनभेदादश्रद्धामर्ष इति यथासंख्यं नास्ति । न श्रद्दधे न मर्षयामि किंकिल नाम तत्रभवान् परदानुपकरिष्यते । गन्धनादिसूत्रेण साहसे आत्मनेपदम् । अस्त्यर्था अस्तिभवतिविद्यतयः । न श्रद्दधे न मर्षयामि अस्ति नाम भवति नाम विद्यते नाम तत्रभवान् परदारानुपकरिष्यते । अत्र सप्तमीनिमित्तं नास्तीति क्रियातिपतने क्रियातिपत्तिर्न ।

६४४ **जातुयद्यदायदौ सप्तमी** ॥५।४।१७॥ जातु यद् यदा यदि इत्येतेषूपपदेषु अश्रद्धामर्षयोर्गम्यमानयोर्धातोः सप्तमी स्यात् । भविष्यन्त्यपवादः । न श्रद्दधे न क्षमे जातु तत्रभवान् सुरां पिबेत् , यत्तत्रभवान् सुरां पिबेत्, यदा तत्रभवान् सुरां पिबेत्, यदि तत्रभवान् सुरां पिबेत्। अत्र सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः । न श्रद्दधे न क्षमे जातु तत्रभवान् सुरामपास्यत् । पक्षे पिबेत् । भविष्यति तु नित्यम् । जातु तत्रभवान् सुरामपास्यत् ।

६४५ क्षेपे च यच्चयत्रे ॥५।४।१८॥ यच्चयत्रशब्दयोरुपपदयोः क्षेपे श्रद्धामर्षयोश्च गम्यमानयोर्धातोः सप्तमी स्यात्। अश्रद्धामर्षयोर्भविष्यन्त्याः क्षेपे तु सर्वविभक्तीनामपवादः । धिग् गर्हामहे यच्च तत्रभवानस्मानाक्रोशेत् । यत्र तत्रभवानस्मानाक्रोशेत् । न श्रद्दधे न क्षमे यच्च तत्रभवान् परिवादं कथयेत् । अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः। धिग् गर्हामहे न श्रद्दधे न क्षमे यच्च यत्र वा तत्रभवानस्मानाक्रोक्ष्यत्। पक्षे आक्रोशेत्। भविष्यति तु नित्यम्। धिग् गर्हामहे न श्रद्दधे न क्षमे यच्च यत्र वा तत्रभवान् परिवादमकथयिष्यत् ।

६४६ चित्रे ॥५।४।१९॥ चित्रमाश्चर्यम्। तस्मिन् गम्यमाने यच्चयत्रयोरुपपदयोर्धातोः सप्तमी स्यात् । सर्वविभक्त्यपवादः । चित्रमाश्चर्यमद्भुतं विस्मयनीयं यच्च तत्रभवानकल्प्यं सेवेत। यत्र तत्रभवानकल्प्यं सेवेत। अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः । चित्रं यच्च यत्र वा तत्रभवानकल्प्यमसेविष्यत । पक्षे सेवेत। भविष्यति तु नित्यम्। चित्रं यच्च यत्र वा तत्रभवानकल्प्यमसेविष्यत ।

६४७ शेषे भविष्यन्त्ययदौ ॥५।४।२०॥ शेषे—यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रे गम्यमाने धातोर्भविष्यन्ती विभक्तिः स्यात् अयदौ—यदिशब्दश्चेन्न प्रयुज्यते । सर्वविभक्त्यपवादः । चित्रमाश्चर्यमन्धो नाम पर्वतमारोक्ष्यति । बधिरो नाम व्याकरणं श्रोष्यति । मूको नाम धर्मं कथयिष्यति । अत्र सप्तमीनिमित्तं नास्तीति न क्रियातिपत्तिः । शेष इति किम् । यच्चयत्रयोः पूर्वेण सप्तम्येव । अयदाविति किम् । आश्चर्यं यदि स भुञ्जीत । चित्रं यदि सोऽधीयीत । अत्र अश्रद्धाप्यस्तीति ' जातुयद्यदायदौ सप्तमी'इत्यनेन सप्तमी ।

६४८ सप्तम्युताप्योर्बाढे ॥५।४।२१॥ बाढेऽर्थे वर्तमानयोरुताप्योरुपपदयोर्धातोः सप्तमी स्यात् । सर्वविभक्त्यपवादः । उत कुर्यात् । अपि कुर्यात् । बाढं करिष्यतीत्यर्थः। बाढ इति किम्। उत दण्डः पतिष्यति। अपिधास्यति द्वारम्। प्रश्नः पिधानं च यथाक्रमं गम्यते । वोतात्प्रागिति निवृत्तम् । इतःप्रभृति सप्तमीनिमित्ते सति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिः । उताकरिष्यत् । अप्यकरिष्यत् ।

६४९ संभावनेऽलमर्थे तदर्थानुक्तौ ॥ ५।४।२२ ॥ अलमोऽर्थः सामर्थ्यं,

तद्विषये संभावने श्रद्धाने गम्यमाने तदर्थस्यालमर्थार्थस्य शब्दस्यानुक्तावप्रयोगे धातोः सप्तमी स्यात् । सर्वविभक्त्यपवादः । शक्यसंभावने–अपि मासमुपवसेत् । अपि पुण्डरीकाध्ययनमहाधीयीत । अपि स्कन्दकोद्देशं यामेनाधीयीत । अशक्यसंभावने–अपि शिरसा पर्वतं भिन्द्यात् । अपि खारीपाकं भुञ्जीत । अपि समुद्रं दोर्भ्यां तरेत् । अलमर्थ इति किम् । निदेशस्थायी मे जिनदत्तः प्रायेण गमिष्यति । तदर्थानुक्ताविति किम् । वसति चेत् सुराष्ट्रेषु वन्दिष्यतेऽलमुज्जयन्तं, शक्तश्चैत्रो धर्मं करिष्यति । अत्र सप्तमीनिमित्तमस्तीति भूते भविष्यति क्रियातिपतने नित्यं क्रियातिपत्तिः । अपि पर्वतं शिरसाऽभेत्स्यत् । तथा काकिन्या हेतोरपि मातुः स्तनं छिन्द्यात् इत्यत्र ' क्षेपेऽपिजात्वोर्वर्तमाना ' इति वर्तमानां बाधित्वा चित्रमाश्चर्यमपि शिरसा पर्वतं भिन्द्यादित्यत्र तु ' शेषे भविष्यन्त्ययदौ ' इति भविष्यन्तीं च बाधित्वा परत्वादनेन सप्तम्येव ।

६८० **अयदि श्रद्धाधातौ न वा** ॥ ५।४।३३ ॥ श्रद्धा संभावना, तदर्थे धातावुपपदेऽलमर्थविषये संभावने गम्यमाने धातोः सप्तमी वा स्यात् अयदियच्छब्दश्चेन्न प्रयुज्यते । पूर्वेण नित्यं प्राप्ते विकल्पः । श्रद्दधे संभावयामि अवकल्पयामि भुञ्जीत भवान् । पक्षे यथाप्राप्तम् । भोक्ष्यते भवान्, अभुक्त भवान्, अभुङ्क्त भवान् । अयदीति किम् । संभावयामि यद् भुञ्जीत भवान् । श्रद्धाधाताविति किम् । अपि शिरसा पर्वतं भिन्द्यात् । उभयत्र पूर्वेण नित्यं सप्तमी । अत्रापि सप्तमीनिमित्तस्तीति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिः । संभावयामि नाभोक्ष्यत भवान् ।

६८१ **सतीच्छार्थात्** ॥५।४।३४॥ सति वर्तमानेऽर्थे वर्तमानादिच्छार्थाद् धातोः सप्तमी वा स्यात् पक्षे तु वर्तमानैव । इच्छेत् । इच्छति । उश्यात् । वष्टि । कामयेत । कामयते । वाञ्छेत् । वाञ्छति । ' क्षेपेऽपिजात्वोर्वर्तमाना ' इत्यादावपि परत्वादयमेव विकल्पः । अपि संयतः सन्नकल्प्यं सेवितुमिच्छेत् । अपि संयतः सन्नकल्प्यं सेवितुमिच्छति धिग् गर्हामहे । भूतभविष्यतोरभावात् सत्यपि सप्तमीनिमित्ते सत्यपि च क्रियातिपतने क्रियातिपत्तिर्न ।

६८२ **वर्त्स्यति हेतुफले** ॥ ५।४।३५ ॥ हेतुः कारणं, फलं कार्यम् । हेतुभूते फलभूते च वर्त्स्यत्यर्थे वर्तमानाद् धातोः सप्तमी वा स्यात् । यदि गुरूनुपासीत

शास्त्रान्तं गच्छेत्। यदि गुरूनुपासिष्यते शास्त्रान्तं गमिष्यति। अत्र गुरूपासनं हेतुः शास्त्रान्तगमनं फलम्। वर्त्स्यतीति किम्। दक्षिणेन चेद्याति न शकटं पर्याभवति। केचित्तु सर्वेषु कालेषु सर्वविभक्त्यपवादं सप्तमीं मन्यन्ते। दक्षिणेन चेद्यायात् न शकटं पर्याभवेत्। दक्षिणेन चेद्यास्यति न शकटं पर्याभविष्यति। दक्षिणेन चेद्याति न शकटं पर्याभवति। दक्षिणेन चेदयासीन्न शकटं पर्याभूत्। अत्रापि सप्तमीनिमित्तमस्तीति भविष्यति क्रियातिपतने क्रियातिपत्तिः। दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यत्। कथम्—

अमङ्क्ष्यद्वसुधा तोये च्युतशैलेन्द्रबन्धना।
नारायण इव श्रीमान् यदि त्वं नाधरिष्यथाः' इति।

वर्त्स्यत्येवायं प्रयोगः। केचित्तु भूत इच्छन्ति। हनिष्यतीति पलायिष्यते, वर्षिष्यतीति धाविष्यतीत्यत्र तु हेतुफलभावस्य इतिशब्देनैव द्योतितत्वात् सप्तमी न।

६७३ **कामोक्तावकच्चिति** ॥ ७।४।२६ ॥ वेति निवृत्तम्। काम इच्छा तस्योक्तिः प्रवेदनं तस्यां गम्यमानायां धातोः सप्तमी स्यात् अकच्चिति—न चेत् कच्चिच्छब्दः प्रयुज्यते। सर्वविभक्त्यपवादः। कामो मे भुञ्जीत भवान्। इच्छा मे अभिप्रायो मे श्रद्धा मे अभिलाषो मे अधीयीत भवान्। अकच्चितीति किम्। कच्चिज्जीवति मे माता। अत्र सप्तमीनिमित्तमस्तीति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिः। कामो मेऽभोक्ष्यत भवान्।

६७४ **इच्छार्थे सप्तमीपञ्चम्यौ** ॥७।४।२७॥ इच्छार्थे धातावुपपदे कामोक्तौ गम्यमानायां धातोः सप्तमीपञ्चम्यौ स्याताम्। सर्वविभक्त्यपवादौ। इच्छामि भुञ्जीत भवान्। इच्छामि भुङ्क्तां भवान्। कामये प्रार्थये अभिलषामि वश्मि अधीयीत भवान्, अधीतां भवान्। कामोक्तावित्येव। इच्छया इच्छतः कामयमानः कामयमानस्य भुङ्क्ते। नात्र प्रयोक्तुः कामोक्तिः। अत्र सत्यपि सप्तमीनिमित्ते इच्छार्थ उपपदे कामोक्तौ क्रियातिपतनस्य असामर्थ्येनासंभवात् क्रियातिपत्तिर्न। केचित्तु 'सप्तम्युताप्योर्बाढे' इत्यत आरभ्य यत्र सप्तम्या एव केवलाया निमित्तमस्ति न विभक्त्यन्तरसहितायास्तत्रैव क्रियातिपतने क्रियातिपत्तिर्भवतीति मन्यन्ते।

६७५ **प्रैषानुज्ञावसरे कृत्यपञ्चम्यौ** ॥७।४।२९॥ प्रैषादिविशिष्टे कर्त्रादावर्थे धातोः कृत्यप्रत्ययाः पञ्चमी च विभक्तिः स्यात्। न्यत्कारपूर्विका प्रेरणा

प्रैषः । अनुज्ञा कामचारानुमतिः । अतिसर्ग इति यावत् । अवसरः प्राप्तकालता । निमित्तभूतकालोपनतिः । भवता खलु कटः कार्यः कर्तव्यः करणीयः कृत्यः । भवान् कटं करोतु । भवान् हि प्रेषितोऽनुज्ञातः । भवतोऽवसरः कटकरणे । यद्यपि कृत्याः सामान्येन भावकर्मणोर्विहितास्तथापि सर्वप्रत्ययापवादभूतया पञ्चम्या बाध्येरन्निति पुनर्विधीयन्ते । अनुज्ञायां केचित् सप्तम्येवेत्याहुः । अतिसृष्टो भवान् ग्रामं गच्छेत् ।

६८६ **सप्तमी चोर्ध्वमौहूर्तिके** ॥५।४।३०॥ ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य भवोऽर्थ ऊर्ध्वमौहूर्तिकः । तस्मिन् वर्तमानाद् धातोः प्रैषादिषु गम्यमानेषु सप्तमी कृत्याः पञ्चमी च स्युः । ऊर्ध्वं मुहूर्तात् कटं कुर्याद् भवान् । कार्यः कर्तव्यः करणीयः कृत्यः कटो भवता । कटं करोतु भवान् । भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे ।

६८७ **इच्छार्थे कर्मणः सप्तमी** ॥८।३।८९॥ इच्छार्थे धातावुपपदे तुल्यकर्तृकेऽर्थे वर्तमानात्कर्मभूताद्धातोः संबन्धे सप्तमी विभक्तिः स्यात् । कर्मत्वं तुल्यकर्तृकत्वं च धातोः श्रुतत्वादुपपदापेक्षे । भुञ्जीयेतीच्छति । भुञ्जीयेति वाञ्छति । भुञ्जीयेति कामयते । इच्छार्थ इति किम् । भोजको व्रजति । कर्मण इति किम् । इच्छन् करोति । अत्र करोतीच्छत्योर्लक्ष्यलक्षणभावो न तु कर्मक्रियाभावः । तुल्यकर्तृक इति किम् । इच्छामि भुङ्क्तां भवान् ।

६५८ **स्मे पञ्चमी** ॥ ८।४।३१ ॥ स्मशब्दे उपपदे प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद् धातोः पञ्चमी स्यात् । कृत्यानां सप्तम्याश्चापवादः । ऊर्ध्वं मुहूर्ताद् भवान् कटं करोतु स्म । भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे ।

६८९ **अधीष्टौ** ॥५।४।३२॥ ऊर्ध्वमौहूर्तिक इति निवृत्तं पृथग्योगात् । स्मे उपपदेऽधीष्टावध्येषणायां गम्यमानायां धातोः पञ्चमी स्यात् । सप्तम्यपवादः । अङ्ग स्म विद्वन्नणुव्रतानि रक्ष शिक्षाः प्रतिपद्यस्व ।

६६० **कालवेलासमये तुम्वावसरे** ॥८।४।३३॥ कालवेलासमयशब्देषूपपदेष्ववसरे गम्यमाने धातोस्तुम् प्रत्ययो वा स्यात् । कालो वेला समयो वा

भोक्तुम्। वावचनाद्यथाप्राप्तं च। कालो भोक्तव्यस्य। ऊर्ध्वं मुहूर्तात् कालो भोक्तुम्। ऊर्ध्वं मुहूर्ताद् भोक्तुं स्म कालः। अङ्ग स्म राजन् भोक्तुं काल इत्येतेषु परत्वात्तुमेव। अवसर इति किम्। कालः पचति भूतानि। कालोऽत्र द्रव्यं न त्ववसरः।

६६१ **सप्तमी यदि** ॥५।४।३४॥ यदि–यच्छब्दप्रयोगे सति कालादिष्वुपपदेषु धातोः सप्तमी स्यात्। तुमोऽपवादः। कालो यदधीयीत भवान्। वेला यद् भुञ्जीत भवान्। समयो यच्छयीत भवान्। बहुलाधिकारात्कालो यदध्ययनस्य वेला यद्भोजनस्य समयो यच्छयनस्य इत्याद्यपि भवति।

६६२ **शक्तार्हे कृत्याश्च** ॥५।४।३५॥ शक्तेऽर्हे च कर्तरि गम्यमाने धातोः कृत्याः सप्तमी च स्यात्। भवता खलु भारो वाह्यः वोढव्यः वहनीयः उद्वेत। भवान् भारं वहेत्। भवान् हि शक्तः। अर्हे–भवता खलु कन्या वाह्या वोढव्या वहनीया। भवान् खलु कन्यां वहेत्। भवता खलु छेदसूत्रं वाह्यं वोढव्यं वहनीयम्। भवान् खलु छेदसूत्रं वहेत्। भवानेतदर्हति। सप्तम्या बाधो मा भूदिति कृत्यग्रहणम्। बहुवचनमिहोत्तरत्र च यथासंख्यनिवृत्त्यर्थम्।

६६३ **धातोः संबन्धे प्रत्ययाः** ॥५।४।४१॥ धातुशब्देन धात्वर्थ उच्यते। धात्वर्थानां संबन्धे विशेषणविशेष्यभावे सति अयथाकालमपि प्रत्ययाः साधवः स्युः। विश्वदृश्वास्य पुत्रो भविता। कृतः कटः श्वो भविता। भावि कृत्यमासीत्। विश्वदृश्वेति भूतकालः प्रत्ययो भवितेति भूतकालेन प्रत्ययेनाभिसंबध्यमानः साधुर्भवति। एवं कृतः कटः श्वो भवितेति। भावि कृत्यमासीदित्यत्र तु भावीति भविष्यत्कालः प्रत्ययः आसीदिति भूतकालेन प्रत्ययेनाभिसंबध्यमानः साधुर्भवति। विशेषणं गुणत्वाद् विशेष्यकालमनुरुध्यते। तेन विपर्ययो न। तथा त्याद्यन्तमपि यदाऽपरं त्याद्यन्तं प्रति विशेषणत्वेनोपादीयते तदा तस्यापि समुदायवाक्यार्थापेक्षया कालान्यत्वं भवत्येव।

" साटोपमुर्वीमनिशं नदन्तो यैः प्लावयिष्यन्ति समन्ततोऽम्भी।
तान्येकदेशान्निभृतं पयोधेः सोऽम्भांसि मेघान् पिबतो ददर्श " ॥

अत्र प्लावयिष्यन्तीति भविष्यदर्थस्य ददर्शेति भूतानुगमः। बहुवचनात् अधात्वधिकारविहिता अपि प्रत्ययास्तद्धिता धातुसंबन्धे सति कालभेदे साधवः। गोमानासीत्। गोमान् भविता। अस्तिविवक्षायां हि मतुरुक्तः। स कालान्तरे न स्यात् इति।

६६४ भृशाभीक्ष्ण्ये हिस्वौ यथाविधि तध्वमौ च तद्युष्मदि ॥५।४।४२॥ गुणक्रियाणामधिश्रयणादीनां क्रियान्तरैरव्यवहितानां साकल्यं फलाति-रेको वा भृशत्वम्। प्रधानक्रियाया विक्लेदादेः क्रियान्तरैरव्यवहितायाः पौनःपु-न्यमाभीक्ष्ण्यम्। तद्विशिष्टे सर्वकालेऽर्थे वर्तमानाद् धातोः सर्वविभक्तिसर्ववचनविषये हिस्वौ पञ्चमीसंबन्धिनौ स्याताम् यथाविधि धातोः संबन्धे यत एव धातोर्यस्मिन्नेव कारके हिस्वौ विधीयेते तस्यैव धातोस्तत्कारकविशिष्टस्यैव संबन्धेऽनुप्रयोगरूपे सति, यथा तध्वमौ हिस्वसाहचर्यात् पञ्चम्या एव संबन्धिनौ तथोः तध्वमोः संबन्धी बहुत्वविशिष्टो युष्मत् तस्मिँस्तद्युष्मदि अभिधेये भवतः चकाराद्धिस्वौ यथाविधि धातोः संबन्धे। लुनीहि लुनीहीत्येवायं लुनाति। अनुप्रयोगात् कालवचनभेदोऽभि-व्यज्यते। लुनीहि लुनीहीत्येवेमौ लुनीतः। लुनीहि लुनीहीत्येवेमे लुनन्ति। लुनीहि लुनीहीत्येव त्वं लुनासि, युवां लुनीथः यूयं लुनीथ। लुनीहि लुनीहीत्येवाहं लुनामि, आवां लुनीवः वयं लुनीमः। एवं लुनीहि लुनीहीत्येवायमलावीत्। लुनीहि लुनीहीत्येवायमलुनात्। लुनीहि लुनीहीत्येवायं लुलाव। लुनीहि लुनीहीत्येवायं लविता। लुनीहि लुनीहीत्येवायं लविष्यति। लुनीहि लुनीहीत्येवायं लुनीयात्। लुनीहि लुनीहीत्येवायं लुनातु। लुनीहि लुनीहीत्येवायं लूयात्। एवमधीष्वाधीष्वे-त्येवायमधीते, इमावधीयाते इमेऽधीयते। अधीष्वाधीष्वेत्येव त्वमधीषे, युवामधीयाथे यूयमधीध्वे। अधीष्वाधीष्वेत्येवाहमधीये, आवामधीवहे यूयमधीमहे। तथा अधीष्वाधीष्वेत्येवायमध्यगीष्ट। अधीष्वाधीष्वेत्येवायमध्यैत। अधीष्वाधीष्वेत्येवा-यमधिजगे। अधीष्वाधीष्वेत्येवायमध्येष्यते। अधीष्वाधीष्वेत्येवायमध्येता। अधीष्वाधीष्वेत्येवायमधीयीत। अधीष्वाधीष्वेत्येवायमधीताम्। अधीष्वाधीष्वेत्ये-वायमध्येषीष्ट। एवं सर्वविभक्तिवचनान्तरेष्वपि हिस्वावुदाहरणीयौ। एवं भावक-र्मणोरपि। शय्यस्व शय्यस्वेत्येव शय्यते अशायि शायिष्यते भवता। लूयस्व लूय-स्वेत्येव लूयते अलावि लाविष्यते केदारः। तध्वमौ च तद्युष्मदि। लुनीत लुनीतेत्येव यूयं लुनीथ। लुनीहि लुनीहीत्येव यूयं लुनीथ। अधीध्वमधीध्वमित्येव यूयमधीध्वे। अधीष्वाधीष्वेत्येव यूयमधीध्वे। तथा लुनीत लुनीतेत्येव यूयमलाविष्ट। लुनीहि लुनीहीत्येव यूयमलाविष्ट। अधीध्वमधीध्वमित्येव यूयमध्यैढ्वम्। अधीष्वाधीष्वेत्येव यूयमध्यगीढ्वम्। एवं ह्यस्तन्यादिष्वप्युदाहार्यम्। यथाविधीति किम्। लुनीहि लुनी-हीत्येवायं लुनाति। छिनत्ति लूयते वेति धातोः संबन्धे मा भूत्। अधीष्वाधीष्वे-त्येवायमधीते। पठति अधीयते वेति धातोः संबन्धे मा भूत्। लुनीत लुनीतेत्येव


यूयं लुनीथ । छिन्थेति धातोः संबन्धे मा भूत् । अधीध्वमधीध्वमित्येव यूयमधीध्वे । पठथेति धातोः संबन्धे मा भूत् । लुनीहि लुनीहीत्यादौ च भृशाभीक्ष्ण्ये द्विर्वचनम् । ननु च भृशाभीक्ष्ण्ययोर्यङपि विधीयते न तु तत्र द्विर्वचनम् । इह तु द्विर्वचनमित्यत्र को हेतुः ? उच्यते । यङ् स्वार्थिकत्वात् प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये समर्थोऽवद्योतयितुम् इति तदभिव्यक्तये द्विर्वचनं नापेक्षते । हिस्वादयस्तु कर्तृकर्मभावार्थत्वेनास्वार्थिकत्वादसमर्थाः प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये अवद्योतयितुमिति तदवद्योतनाय द्विर्वचनमपेक्षन्ते इति । भृशाभीक्ष्ण्ये द्वित्वं तु अनेन—

६६५ **भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक्तमबादेः** ॥७।४।७३॥ क्रियायाः साकल्यमवयवक्रियाणां कात्स्न्र्यं भृशार्थः । पौनःपुन्यमाभीक्ष्ण्यम् । सातत्यं क्रियान्तरैरव्यवधानमविच्छेदः । एतेषु द्योत्येषु यत् पदं वाक्यं वा वर्तते तत् तमबादिप्रत्ययेभ्यः प्रागेव द्विरुच्यते । भृशे—लुनीहि लुनीहीत्येवायं लुनाति । आभीक्ष्ण्ये—भोजं भोजं व्रजति । अविच्छेदे—पचति पचति । भृशादयश्च क्रियाधर्मा इति क्रियापदमेवात्र संबध्यते । क्रियाविशेषणस्यापि क्रियात्वेनाध्यवसायात् भृशादियोगे द्विर्वचनं भवति । यथा पुनः पुनः पचति । यदा तु क्रियारूपता न विवक्ष्यते तदा 'नवा गुणः सदृशे रित्' इति सादृश्ये द्विर्वचनं भवति । मन्दं मन्दं तुदति । स्तोकं स्तोकं अस्तमयति । एतेष्विति किम् । लुनीहि, भुक्त्वा व्रजति । भृशाभीक्ष्ण्ययोर्यङिति यङन्तमुक्तार्थत्वान्न द्विरुच्यते । यदा तु भृशार्थे यङ् तदाभीक्ष्ण्यार्थोभिव्यक्तये द्विर्वचनं पापच्यते पापच्यते इति । यदा तु तत्प्रतिपादनाय पञ्चमी विधीयते तदा तस्या द्विर्वचनसहायाया एवाभीक्ष्ण्यप्रतिपादने सामर्थ्यं क्त्वाणमोरिवेति द्विर्वचनमपि भवति । पापच्यस्व पापच्यस्वेति । प्राक्तमबादेरिति किम् । पचतिपचतितमाम् । पचतिपचतितराम् । अत्र तमबादेरातिशायिकात्पूर्वमेव द्विर्वचनं पश्चात्तमबादिः । अन्यथा ह्यनियमः स्यात् ।

६६६ **प्रचये नवा सामान्यार्थस्य** ॥५।४।४३॥ भृशाभीक्ष्ण्ये यथाविधीति च नानुवर्तते । प्रचयः समुच्चयः । स्वतः साधनभेदेन वा भिद्यमानस्य एकत्रानेकस्य धात्वर्थस्याध्यवाप इति यावत् । तस्मिन् गम्यमाने सामान्यार्थस्य धातोः संबन्धे सति धातोः परौ हिस्वौ तध्वमौ च तद्युष्मदि वा स्याताम् । व्रीहीन् वप लुनीहि पुनीहि इत्येव यतते चेष्टते समीहते यत्यते चेष्ट्यते समीह्यते । पक्षे व्रीहीन् वपति लुनाति पुनातीत्येव यतते यत्यते । देवदत्तोऽद्धि गुरुदत्तोऽद्धि जिनदत्तोऽद्धि

इत्येव भुञ्जते भुज्यते। पक्षे देवदत्तोऽत्ति गुरुदत्तोऽत्ति जिनदत्तोऽत्ति इत्येव भुञ्जते भुज्यते। ग्राममट वनमट गिरिमटेत्येवाटति घटते अट्यते घट्यते। पक्षे ग्राममटति वनमटति गिरिमटतीत्येवाटति घटते अट्यते घट्यते। सक्तून् पिब धानाः खाद ओदनं भुङ्क्ष्वेत्येवाभ्यवहरति अभ्यवह्रियते। पक्षे सक्तून् पिबति धानाः खादति ओदनं भुङ्क्ते इत्येवाभ्यवहरति अभ्यवह्रियते। सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येवाधीते पठति अधीयते पठ्यते। पक्षे सूत्रमधीते निर्युक्तिमधीते भाष्यमधीते इत्येवाधीते पठति अधीयते पठ्यते। तध्वमौ च तध्वमदि। व्रीहीन् वपत लुनीत पुनीतेत्येव यतध्वे चेष्टध्वे समीहध्वे। व्रीहीन् वप लुनीहि पुनीहि इत्येव यतध्वे चेष्टध्वे समीहध्वे। पक्षे व्रीहीन् वपथ लुनीथ पुनीथेत्येव यतध्वे चेष्टध्वे समीहध्वे। ग्राममटत वनमटत गिरिमटतेत्येवाटथ घटध्वे। ग्राममट वनमट गिरिमटेत्येवाटथ घटध्वे। पक्षे ग्राममटथ वनमटथ गिरिमटथेत्येवाटथ घटध्वे। सूत्रमधीध्वं निर्युक्तिमधीध्वं भाष्यमधीध्वमित्येवाधीध्वे पठथ। सूत्रमधीष्व निर्युक्तिमधीष्वेत्येवाधीध्वे पठथ। पक्षे सूत्रमधीध्वे निर्युक्तिमधीध्वे भाष्यमधीध्वे इत्येवाधीध्वे पठथ। एवं वचनान्तरे त्रिकान्तरे विभक्त्यन्तरेऽप्युदाहार्यम्। सामान्यार्थस्येति किम्। व्रीहीन् वप लुनीहि पुनीहीत्येव वपति लुनाति पुनातीति मा भूत्। ग्राममट वनमट गिरिमटेत्येव ग्राममटति वनमटति गिरिमटतीति च मा भूत्। कारकभेदेनाटतीत्यस्य सामान्यार्थत्वाभावात्।

॥ इति विभक्त्यर्थप्रक्रिया ॥



॥ अथ कृदन्तप्रक्रिया ॥

—तत्र—

॥ प्रथमं कृत्यप्रत्ययाः ॥

६६७ **आ तुमोऽत्यादिः कृत्** ॥५।१।१॥ धातोर्विधीयमानस्त्यादिवर्जितो वक्ष्यमाणः प्रत्ययस्तुममित्याप्य कृत्संज्ञः स्यात्। घनघात्यः। उदकेविशीर्णम्। गोदायो व्रजति। अत्यादिरिति किम्। प्रणिस्ते। कृत्यदेशाः तिक्कृतौ नाम्नीत्येवमादयः।

६६८ **बहुलम्** ॥ ५।१।२ ॥ अधिकारोऽयम् । कृत्प्रत्ययो यथानिर्दिष्टात् अर्थादेरन्यत्रापि बहुलं स्यात् । पादाभ्यां हियते पादहारकः । गले चोप्यत इति गलेचोपकः। मुह्यत्यनेनात्मेति मोहनीयं कर्म । स्नाति तेनेति स्नानीयं चूर्णम् । एवं यानीयोऽश्वः। दीयते तस्मै इति दानीयोऽतिथिः। संप्रदीयतेऽस्मै इति संप्रदानम् । एवं स्पृहणीया विभूतिः। समावर्तते तस्मादिति समावर्तनीयो गुरुः। एवमुदेजनीयः खलः । तिष्ठन्त्यस्मिन्निति स्थानीयं नगरम् । एवं शयनीयः पल्यङ्कः।

६६९ **कर्तरि** ॥५।१।३॥ कृत्प्रत्ययोऽर्थविशेषनिर्देशमन्तरेण कर्तरि स्यात् । कारकः। कर्ता । पचः। नन्दनः।

६७० **व्याप्ये घुरकेलिमकृष्टपच्यम्** ॥ ५।१।४ ॥ घुर केलिम इत्येतौ प्रत्ययौ कृष्टपच्यशब्दश्च व्याप्ये कर्तरि स्यादिति वेदितव्यम् । घुरो वक्ष्यते । केलिमोऽत एव वचनाद् ज्ञायते । कृष्टपच्ये यश्च । भज्यते स्वयमेव भङ्गुरं काष्ठम् । एवं भिदुरः कुशूलः छिदुरा रज्जुः। भासमिदिविदां कर्तर्येव घुरः कर्मकर्तुरसंभवात् । भासते इत्येवंशीलो भासुरः । एवं मेदुरः । विदुरः । केचिच्छिदिभिदोरपि कर्तरि घुरमिच्छन्ति । दोषान्धकारभिदुरो दृष्टारिवक्षश्छिदुर इति । पच्यन्ते स्वयमेव पचेलिमा माषाः । एवं भिदेलिमास्तण्डुलाः । कृष्टे पच्यन्ते स्वयमेव कृष्टपच्याः शालयः ।

६७१ **सङ्गतेऽजर्यम्** ॥ ५।१।५ ॥ संगमनं संगतम् । तस्मिन् कर्तर्यभिधेये नञ्पूर्वाज्जीर्यतेर्यप्रत्ययो निपात्यते । न जीर्यतीति अजर्यमार्यसंगतम् । मृगैरजर्यं जरसोपदिष्टम् । सामान्यविशेषभावेन चोभयोरपि प्रयोगो भवति । तेन संगतमार्येण रामाजर्यं कुरु द्रुतम् । अजर्यं संगतं नोऽस्तु । संगत इति किम् । अजरः पटः । अजरिता कम्बलः । कर्तरीत्येव । अजार्यं संगतेन ।

६७२ **रुच्याव्यथ्यवास्तव्यम्** ॥५।१।६॥ एते कर्तरि निपात्यन्ते । रोचतेर्नञ्पूर्वात् व्यथतेश्च क्यप् प्रत्ययो वसतेस्तु तव्यण् निपात्यते । रोचते इति रुच्यो मोदको मैत्राय । न व्यथते इत्यव्यथ्यो मुनिः। वसतीति वास्तव्यः ।

६७३ **भव्यगेयजन्यचर्याप्लाव्यं न वा** ॥५।१।७॥ एते कर्तरि वा निपात्यन्ते । भावकर्मणोः प्राप्तयोः पक्षे कर्तरि विधानार्थमिदम् । भूगायतिरम-

यतिभ्यो यो यः प्रत्ययो यश्च जनेराङ्पूर्वाभ्यां च पतिप्लुभ्यां घ्यण् स कर्तरि वा निपात्यते । भवत्यसाविति भव्यः । पक्षे भव्यमनेन । गायतीति गेयो माणवकः साम्नाम् । गेयानि माणवकेन सामानि । जायतेऽसाविति जन्यः । जन्यमनेन । रमयत्यसौ रम्यः । रम्यते रम्यः । आपतत्यसावापात्यः । आपात्यमनेन । आप्लवतेऽसावाप्लाव्यः । आप्लाव्यमनेन ।

६७४ प्रवचनीयादयः ॥५।१।८॥ प्रवचनीयादयः कर्तर्यनीयप्रत्ययान्ता वा निपात्यन्ते । प्रवक्ति प्रब्रूते वा प्रवचनीयो गुरुः शासनस्य । प्रवचनीयं गुरुणा शासनम् । उपतिष्ठत इति उपस्थानीयः शिष्यो गुरोः । उपस्थानीयः शिष्येण गुरुः। एवं रमयतीति रमणीयो देशः । मदयतीति मदनीया योषित् । दीपयतीति दीपनीयं चूर्णम् । मोहयतीति मोहनीयं कर्म । ज्ञानमावृणोतीति ज्ञानावरणीयम् । एवं दर्शनावरणीयम् ।

६७५ असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः ॥५।१।१६॥ इतः सूत्रादारभ्य स्त्रियां क्तिरित्यतः प्राक् योऽपवादस्तद्विषयेऽपवादेनासमानरूप उत्सर्ग औत्सर्गिकः प्रत्ययो वा स्यात् । अवश्यलाव्यम् । अवश्यलवितव्यम् । अवश्यलवनीयम् । ज्ञः । ज्ञाता । ज्ञायकः । नन्दनः। नन्दकः । नन्दयिता । असरूप इति किम् । घ्यणि यो न स्यात् । कार्यम् । डविषयेऽण् न स्यात् । गोदः । अनुबन्धोऽप्रयोगी इति सारूप्यमेव । प्राक्क्तेरिति किम् । कृतिः । चितिः । रक्षितम् । रक्षणम् । घञादिर्न । चिकीर्षा । जिहीर्षा । क्तिर्न । ईषत्पानः । सुपानः । दुष्पानः । खल् न । अपवादत्यादिविषये तु असरूपोऽप्युत्सर्गत्यादिर्न प्रवर्तत इति 'श्रुसद' इत्यादिसूत्रे वाग्रहणेन ज्ञापयिष्यते ।

६७६ ते कृत्याः ॥ ५।१।४७ ॥ घ्यण् तव्य अनीय य क्यप् इत्येते प्रत्ययाः कृत्यसंज्ञाः स्युः ।

६७७ ऋवर्णव्यञ्जनाद् घ्यण् ॥ ५।१।१७ ॥ ऋवर्णान्ताद् व्यञ्जनान्ताच्च धातोर्घ्यण् प्रत्ययः स्यात् । कार्यम् । हार्यम् ।

६७८ क्तेऽनिटश्चजोः कगौ घिति ॥४।१।१११॥ क्तेऽनिटो धातोश्चकारजकारयोः स्थाने घिति प्रत्यये यथासंख्यं कगौ स्याताम् । पाक्यम् । वाक्यम् ।

ननु उदाजः समाजः इत्यत्र अजेः क्तेऽनिट्त्वात् गत्वं प्राप्नोति । नैवम् । क्तेऽनिट इति विद्यमानस्य विशेषणम् । अजेस्तु वीभावेन असत्त्वाद् गत्वं न । क्त इति किम् । अर्चः । अर्च्यम् । याच्यम् । रोच्यम् । अर्चादयो हि अर्कः याच्ञा रुक्ममिति प्रयोगेष्वनिटोऽपि क्ते सेट इति कत्वं न । धितीति किम् । पचनम् । त्यजनम् ।

६७९ **न्यङ्क्वादयः** ॥४।१।११२॥ न्यङ्क्वादयः कृतकत्वा उद्वादयः कृतगत्वा मेघादयः कृतघत्वा निपात्यन्ते । न्यञ्चेरुप्रत्यये न्यङ्कुः। तञ्चिवञ्चिशुचीनां रकि तक्रम्, वक्रम्, शुक्रः । शुचिरुच्योर्घञि शोकः, रोगः । क्ते सेट्त्वान्न प्राप्नोति । घञोऽन्यत्र शोच्यम्, रोच्यम् । श्वपाकः । मांसपाकः। पिण्डपाकः । कपोतपाकः । उलूकपाकः। पचेः 'कर्मणोऽण्' इत्यणि सति अणभावे श्वपच इत्यादि। नीचेपाकः । दूरेपाकः । फलेपाकः । क्षणेपाकः। पचेर्नीचे पच्यते स्वयमेवेति कर्मकर्तर्यचि दीर्घत्वं च निपातनात् । तत्पुरुषे कृतीति बहुलाधिकारात् सप्तम्या अलुप् । उकारान्ता अपि गणे पठ्यन्ते । नीचेपाकुः । फलेपाकुः । दूरेपाकुः । क्षणेपाकुः। अत एव निपातनादुकारः। नीचेपाका दूरेपाका फलेपाका इत्याबन्ता अपि । अनुब्रवीतीत्यच् अनुवाकः। सोमं प्रवक्तीत्यण् सोमप्रवाकः। उचेः न्युच्यति समवैतीति लिहाद्यचि न्योको वृक्षः शकुन्तो वा । उब्जेर्घञि उद्गः । समुद्गः । न्युद्गः। अभ्युद्गः। क्ते सेट्त्वाद् गत्वमुपान्त्यस्य च दत्वं निपात्यते । सृजेः कर्तर्यचि सर्गः । अवसर्गः। उपसर्गः। षञ्जेरचि व्यतिषङ्गः। अनुषङ्गः। मस्जेरुः। मद्गुः। भ्रस्जेः कुः सलोपश्च । भृगुः। युजेः 'कर्मणोऽण्' इत्यणि गोयोगः। मिहेरचि संज्ञायां हस्य घत्वम् । मेघः। अन्यत्र मेहः । वहेरनुपसर्गस्य वस्यौकारश्च । वहतीत्योघः प्रवाहः। अनुपसर्गस्येत्येव। प्रवहः । विवहः । परिवहः । संवहः । उद्वहः । अभिवहः । निवहः । संज्ञायामित्येव । अर्हः । एवमविहितलक्षणानि कत्वगत्वघत्वानि द्रष्टव्यानि ।

६८० **न वञ्चेर्गतौ** ॥४।१।११३॥ वञ्चेर्गतौ वर्तमानस्य कत्वं न । वञ्चेर्घञ् । वञ्चं वञ्चति गन्तव्यं गच्छतीत्यर्थः ।

" पश्यैते व्याधवार्केण्यसंकुले वित्तवत्तमाः ॥
रात्रावपि महारण्ये वञ्चं वञ्चन्ति वाणिजाः"॥

गताविति किम् । वङ्कं काष्ठम् । कुटिलमित्यर्थः ।

६८१ **यजेर्यज्ञाङ्गे** ॥ ४।१।११४ ॥ यज्ञाङ्गे वर्तमानस्य यजेर्जस्य गत्वं न ।

पञ्च प्रयाजाः । त्रयोऽनुयाजाः । एकादशोपयाजाः । उपांशुयाजाः । पत्नीसंयाजाः। क्रतुयाजाः । घञ् याज इत्यप्यन्ये । यज्ञाङ्ग इति किम् । प्रयागः। अनुयागः । यागः।

६८२ **घ्यण्यावश्यके** ॥४।१।११५॥ आवश्यकोपाधिके घ्यणि प्रत्यये परतो धातोश्चजोः कगौ न । अवश्यपाच्यम् । अवश्यरेच्यम् । अवश्यरङ्ज्यम् । अवश्यभङ्ज्यम् । आवश्यक इति किम् । पाक्यम् । रेक्यम् । रङ्ग्यम् । भङ्ग्यम् ।

६८३ **निप्राभ्युजः शक्ये** ॥ ४।१।११६॥ निप्राभ्यां परस्य युजः शक्येऽर्थे गम्यमाने घ्यणि परे गो न स्यात् । नियोक्तुं शक्यः नियोज्यः । प्रयोज्यः। शक्य इति किम् । नियोग्यः । प्रयोग्यः ।

६८४ **भुजो भक्ष्ये** ॥४।१।११७॥ भुजो भक्ष्येऽर्थे घ्यणि परे गो न स्यात् । भोज्यमन्नम् । भोज्या यवागूः । भोज्यं पयः । भक्ष्य इति किम् । भोग्यः कम्बलः। प्रावरणीय इत्यर्थः। भोग्या अपूपाः पालनीया इत्यर्थः । भक्ष्यमभ्यवहार्यमात्रम् न खरविशदमेव । यथा अब्भक्ष्यो वायुभक्ष्य इति ।

६८५ **त्यजयजप्रवचः** ॥ ४।१।११८ ॥ एषां घ्यणि कगौ न । त्याज्यम् । याज्यम् । अत एव प्रतिषेधाद्यजेर्घ्यणपि । प्रवचिग्रहणं शब्दसंज्ञार्थम् । प्रवाच्यो नाम पाठविशेषः । तदुपलक्षितो ग्रन्थोऽप्युच्यते । उपसर्गनियमार्थं वा प्रपूर्वस्यैव वचेरशब्दसंज्ञायां प्रतिषेधो भवति नान्योपसर्गपूर्वस्य । अधिवास्यं नाम दशरात्रस्य यज्ञस्य यद्दशममहः। यस्मिन् याज्ञिका अधिब्रुवते तस्मिन्नेवाभिधानम् । अधिवाच्यमन्यत्र ।

६८६ **वचोऽशब्दनाम्नि** ॥४।१।११९॥ अशब्दसंज्ञायां गम्यमानायां वचेर्घ्यणि को न । वाच्यमाह । अवाच्यमाह । अशब्दनाम्नीति किम् । वाक्यं विशिष्टः पदसमुदायः ।

६८७ **भुजन्युब्जं पाणिरोगे** ॥४।१।१२०॥ भुजेर्निपूर्वस्योब्जेश्च घञन्तस्य पाणौ रोगे चार्थे यथासंख्यं भुजन्युब्जौ निपात्येते । भुज्यतेऽनेनेति भुजः पाणिः। न्युब्जिताः शेरतेऽस्मिन् इति न्युब्जो नाम रोगविशेषः । अत्र धञि गत्वाभावो भुजेर्गुणाभावश्च निपात्यते । पाणिरोग इति किम् । भोगः । न्युब्जः ।

६८८ **वीरुन्न्यग्रोधौ** ॥४।१।१२१॥ विपूर्वस्य रुहेः किपि न्यक्पूर्वस्य चाचि

वीरुध्न्यग्रोधशब्दौ धकारान्तौ निपात्येते । विरोहतीति वीरुत् । न्यग्रोहतीति न्यग्रोधः । अवरोध इत्यप्यन्ये ।

६८९ **पाणिसमवाभ्यां सृजः** ॥ ६।१।१८ ॥ पाणिपूर्वात् समवपूर्वाच्च सृजेर्घ्यण् प्रत्ययः स्यात् । ऋदुपान्त्यक्वयपोऽपवादः । पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः । समवसृज्यते समवसर्ग्यः । पाणिसमवाभ्यामिति किम् । सृज्यम् । संसृज्यम् । समवेति समुदायपरिग्रहार्थं द्विवचनम् ।

६९० **उवर्णादावश्यके** ॥६।१।१९॥ अवश्यस्य भावोऽवश्यंभाव इति वा अकञि आवश्यकम् । तस्मिन् द्योत्ये उवर्णान्ताद् धातोर्घ्यण् स्यात् । लाव्यम् । पाव्यम् । यन्नियोगात् कर्तव्यम् अर्थमकरणादिना निश्चितं तत्रायं प्रत्ययः। लाव्यमवश्यम् । पाव्यमवश्यम् । अवश्यलाव्यम् । अवश्यपाव्यम् । अत्रावश्यंशब्देनापि अवश्यंभावो द्योत्यते मयूरव्यंसकादित्वाच्च समासः । अवश्यस्तुत्य इति परत्वात् क्वयप् । आवश्यक इति किम् । लव्यम् । पव्यम् ।

६९१ **आसुयुवपिरपिलपित्रपिडिपिदभिचम्यानमः** ॥ ५।१।२० ॥ आङ्पूर्वाभ्यां सुनोतिनमिभ्यां यौत्यादिभ्यश्च धातुभ्यो घ्यण् स्यात् । यापवादः । याव्यम् । वाप्यम् । राप्यम् । लाप्यम् । अभिलाप्यम् । अपत्राप्यम् । डेप्यम् । दमिः सौत्रो बन्धने वर्तते । दाभ्यम् । अवदाभ्यम् । आचाम्यम् । आनाम्यम् । नमिरन्तर्भूतण्यर्थः सकर्मकः । अकर्मका अपि धातवो ण्यर्थे वर्तमानाः सकर्मका भवन्ति । यथा नेमिं नमन्ति । डिपेः कुटादित्वाद्ये गुणो न लभ्यते इति घ्यण् विधीयते । आनमेर्नेच्छन्त्येके ।

६९२ **वाधारेऽमावस्या** ॥ ५।१।२१ ॥ अमापूर्वाद् वसतेराधारे घ्यण् प्रत्ययो धातोः पक्षे ह्रस्वश्च निपात्यते । अमाशब्दः सहार्थः । अमा–सह वसतोऽस्यां सूर्याचन्द्रमसाविति अमावस्या अमावास्या वा रूढ्या तिथिविशेषः । पक्षे यमकृत्वा ह्रस्वनिपातनम् 'अश्वामावास्यायाः' इत्यत्रैकदेशविकृतस्यानन्यत्वादमावास्याशब्देन अमावस्याशब्दस्यापि ग्रहणार्थम् ।

६९३ **संचाय्यकुण्डपाय्यराजसूयं क्रतौ** ॥५।१।२२॥ एते क्रतावभिधेये घ्यणन्ता निपात्यन्ते आधारे कर्मणि वा ॥ निपातनादेवायादेशदीर्घत्वे अपि

भवतः । संचीयते सोमोऽस्मिन् संचीयते वासाविति संचाय्यः क्रतुः । संचेयोऽन्यः। कुण्डैः पीयते सोमोऽस्मिन् कुण्डैः पीयते इति वा कुण्डपाय्यः क्रतुः । ससोमको हि यागः क्रतुः । कुण्डपानोऽन्यः । राजा सूयतेऽस्मिन् राज्ञा वा सोतव्य इति राजसूयः क्रतुः ।

६९४ प्रणाय्यो निष्कामासंमते ॥ ५।१।२३ ॥ प्रपूर्वान्नयतेर्घ्यण् आयादेशश्च निपात्यते निष्कामेऽसंमते वाभिधेये ॥ प्रणाय्योऽन्तेवासी । विषयेष्वनभिलाष इत्यर्थः । प्रणाय्यश्चौरः । सर्वलोकासंमत इत्यर्थः । प्रणेयोऽन्यः ।

६९५ धाय्यापाय्यसान्नाय्यनिकाय्यमृड्मानहविर्निवासे ॥५।१।२४॥ धाय्यादयः शब्दा ऋगादिष्वर्थेषु यथासंख्यं घ्यणन्ता निपात्यन्ते । निपातनादेव च सर्वत्रायादेशः । दधातेर्ऋचि, धीयते समिदग्नावनयेति धाय्या ऋक् । रूढिशब्दत्वात् काश्चिदेव ऋच उच्यन्ते । अन्यत्र धेया । मीयते येन तन्मानम् । तत्र माङ आदिपत्वं च । मीयते तेनेति पाय्यं मानम् । मेयमन्यत् । संपूर्वान्नयतेर्हविषि समो दीर्घत्वं च । सान्नाय्यं हविः। अयमपि रूढिशब्दत्वाद्धविर्विशेषेऽवतिष्ठते । संनेयमन्यत् । निपूर्वाच्चिनोतेर्निवासे आदिकत्वं च । निकाय्यो निवासः । निचेयमन्यत् ।

६९६ परिचाय्योपचाय्यानाय्यसमूह्यचित्यमग्नौ ॥५।१।२५॥ एतेऽग्नौ निपात्यंते । पर्युपपूर्वाच्चिनोतेर्घ्यण् आयादेशश्च । परिचीयत इति परिचाय्योऽग्निः । एवमुपचाय्यः । परिचेयः, उपचेयोऽन्यः । आङ्पूर्वान्नयतेर्घ्यण् आयादेशश्च । गार्हपत्यादानीयते इत्यानाय्यो दक्षिणाग्निः। स ह्याहवनीयेन सह एकयोनिरेवोच्यते। आनेयोऽन्यः । केचिदग्निविशेषादन्यत्रापि अनित्यविशेष इच्छन्ति । आनाय्यो गोधुक् अनित्य इत्यर्थः । संपूर्वाद् वहेर्घ्यण् ऊत्वं च वशब्दस्य । समुह्यत इति समूह्यः। अन्यः संवाह्यः। अन्ये तु संपूर्वादूहेरग्नावेवेति नियमार्थं घ्यणं निपातयन्ति । अग्नेरन्यत्र समूहितव्य इत्येव । वहेस्तु तन्मतेऽग्नावपि संवाह्य इति भवति । चिनोतेः क्यप् ।

६९७ ह्रस्वस्य तः पित्कृति ॥ ४।४।११४ ॥ धुटीति निवृत्तमसंभवात्, अकितीति च 'सोस्तोङ्निपि'इति सूत्राकरणात् । ह्रस्वान्तस्य धातोः पिति कृत्प्रत्यये परे तोऽन्तः स्यात् । चित्योऽग्निः। चेयोऽन्यः। ह्रस्वस्येति किम्। ग्रामणीः। कृतीति

किम् । अजुहवुः। ग्रामणि कुलं वृत्रह कुलमित्यत्र तु 'असिद्धं बहिरङ्गमन्तरङ्गे' इति न भवति । सुशूः, उपशूयेत्यत्रान्तरङ्गत्वाद् विशेषविहितत्वाच्च ह्रस्वदीर्घत्वं च ।

६९८ **याज्या दानर्च्ये** ॥५।१।२६॥ यजेः करणे ण्यण् निपात्यते दानर्च्यमिधेयायाम् । इज्यतेऽनयेति याज्या । 'त्यज्यजमवचः' इति गत्वाभावः ।

६९९ **तव्यानीयौ** ॥ ५।१।२७ ॥ धातोः परौ तव्य अनीय इत्येतौ प्रत्ययौ स्याताम् । शयितव्यम् । शयनीयम् । वस्तव्यम् । वसनीयम् । कर्तव्यं करणीयं भवता । कर्तव्यः करणीयः कटः ।

७०० **निंसनिक्षनिन्दः कृति वा** ॥२।३।८४॥ अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात् परस्य निंसादीनां धातूनां नकारस्य कृत्प्रत्यये परो णो वा स्यात् । प्रणिंसितव्यम् । प्रनिंसितव्यम् । प्रणिक्षितव्यम् । प्रनिक्षितव्यम् । प्रणिन्दितव्यम् । प्रनिन्दितव्यम् । कृतीति किम् । प्रणिंस्ते । प्रणिक्षति । प्रणिन्दति ।

७०१ **स्वरात्** ॥ २।३।८५ ॥ अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात् परस्य कृद्विषयस्य नकारस्य स्वरादुत्तरस्य णः स्यात् । प्रयाणीयम् । यथासंभवं क्त–क्तवतु–अन–आन–इन्–अनि–अनीय इत्येते प्रत्ययाः प्रयोजयन्ति । स्वरादिति किम् । प्रभुग्नः । प्रभुग्नवान् । अदुरित्येव । दुर्यानः पन्थाः । कृतीत्येव । प्रवापेन । अलचटतवर्गशसान्तर इत्येव । प्रक्लृप्यमानम् ।

७०२ **नाम्यादेरेव ने** ॥ २।३।८६ ॥ अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात् परस्य नागमे सति नाम्यादेरेव धातोः परस्य स्वरादुत्तरस्य कृद्विषयस्य नकारस्य णः स्यात् । प्रेङ्खणीयम् । नाम्यादेरिति किम् । प्रमङ्गनीयम् । एवकार इष्टावधारणार्थः । न एव सति नाम्यादेरिति नियमे इह न स्यात् । प्रेहणम् । पूर्वेण सिद्धे नियमार्थं वचनम् । नग्रहणं नागमादेशोपलक्षणार्थम् । नकारस्य व्यवधाने हि प्राप्तिरेव नास्ति । प्रेन्वनम् । व्यञ्जनान्तादेवायं नियमः । ण्यन्तात्तु 'णेर्वा' इति परत्वाद्विकल्प एव । प्रमङ्गणा । प्रमङ्गना ।

७०३ **व्यञ्जनादेर्नाम्युपान्त्याद्वा** ॥२।३।८७॥ अदुरुपसर्गान्तःशब्दस्थात् रषृवर्णात् परो यो व्यञ्जनादिर्नाम्युपान्त्यो धातुस्ततः परस्य कृद्विषयस्य स्वरादुत्तरनकारस्य णो वा स्यात् । प्रकोपणीयम् । प्रकोपनीयम् । व्यञ्जनादेरिति किम् ।

मेहणम् । मोहणम् । नाम्युपान्त्यादिति किम् । प्रवपणम् । स्वरादित्येव । प्रभुग्रः । अदुरित्येव । दुर्मोहनः । अलचटतवर्गशसान्तर इत्येव । प्रभेदनम् । स्वरादित्यनेन नित्यं प्राप्ते विभाषेयम् ।

७०४ णेर्वा ॥२।३।८८॥ अदुरुपसर्गान्तःशब्दस्थाद्रषृवर्णात् परस्य ण्यन्ताद्धातोर्विहितस्य स्वरादुत्तरस्य कृद्विषयस्य नकारस्य णो वा स्यात् । प्रयापणीयम् । प्रयापनीयम् । विहितविशेषणं किम् । प्रयाप्यमाणः, प्रयाप्यमान इति क्येन व्यवधानेऽपि यथा स्यात् । अलचटतवर्गशसान्तर इत्येव । प्रदापनम् । प्रतियापनम् । अनाम्यादिभ्यो नागमे सति 'नाम्यादेरेव ने' इति नियमेनाप्राप्ते शेषेभ्यस्तु स्वरादित्यनेन नित्यं प्राप्ते उभयत्र विभाषेयम् ।

७०५ निर्विण्णः ॥२।३।८९॥ निर्पूर्वाद् विदेः सत्तालाभविचारार्थात् परस्य क्तनकारस्य णत्वं निपात्यते । निर्विण्णः प्राव्राजीत् । कश्चित्तु वेत्तेरपीच्छति निर्विण्णवानिति च ।

७०६ न ख्याप्रभ्रूभाकमगमप्यायवेपौ णेश्च ॥२।३।९०॥ अदुरुपसर्गान्तःशब्दस्थाद् रषृवर्णात् परे ये ख्यादयो ण्यन्ताश्च धातवस्तेभ्यः परस्य कृद्विषयस्य नकारस्य णो न स्यात् । प्रख्यानीयम् । प्रख्यापनीयम् । प्रपवनीयम् । प्रपावनीयम् । प्रभवनीयम् । प्रभावनीयम् । प्रभानीयम् । प्रभापनीयम् । प्रकमनीयम् । प्रकामनीयम् । प्रगमना । प्रप्यायना । प्रवेपनम् । अण्यन्तेभ्यो नित्यं ण्यन्तेभ्यश्च विकल्पेन प्राप्ते प्रतिषेधः । पूगो गकारः पवतेर्निर्वृत्त्यर्थः । तेन प्रपवणम्, प्रपूयमाणम् इत्यादि । ख्यातेर्णत्वमिति कश्चित् । प्रख्याणम् । प्रख्यायमाणम् ।

७०७ देशेऽन्तरोऽयनहनः ॥२।३।९१॥ अन्तःशब्दात् परस्यायनशब्दस्य हन्तेश्च संबन्धिनो नकारस्य देशेऽभिधेये णो न स्यात् । अन्तरय्यतेऽस्मिन्निति अन्तरयनो देशः । एवमन्तर्हननीयः । देश इति किम् । अन्तरयणं वर्तते । अन्तर्हण्यते । अन्तर्घणो देशे इति तु निपातनात् । अन्तर इति किम् । प्रायणो देशः । अयनहन इति किम् । अन्तर्णमनो देशः ।

७०८ षात्पदे ॥ २।३।९२ ॥ पदे परतो यः षकारस्तस्मान्निमित्तात् परस्य नकारस्य णो न स्यात् । सर्पिष्पानम् । यजुष्पानम् । दुष्पानम् । अत्र 'पानस्य भाव-

करणे' इति, निष्पानमिति स्वरादिति निष्पायनमिति णेर्वेति प्राप्ते प्रतिषेधः। षादिति किम्। निर्णयः। पद इति किम्। पुष्पाति। सर्पिष्केण।

७०९ पदेऽन्तरेऽनाङ्यतद्धिते ॥२।३।९३॥ आङन्तं तद्धितान्तं च वर्जयित्वाऽन्यस्मिन् पदे निमित्तनिमित्तिनोरन्तरे व्यवधायके नकारस्य णो न स्यात्। प्रावनद्धम्। पर्यवनीतम्। माषकुम्भवापेन। व्रीहिकुम्भवापेन। चतुरङ्गयोगेन। भर्तृवाहुयुग्मेन। रोषभीममुखेन। अत्र यदा माषकुम्भस्य वाप इति माषाः कुम्भो वापोऽस्येति वा समासस्तदा 'वोत्तरपदान्ते'ति विकल्पे प्राप्ते प्रतिषेधः। यदा माषस्य कुम्भवाप इति तदा 'कवर्गैकस्वरवती'ति नित्ये प्राप्ते। एवं शेषेष्वपि यथासंभवं वाच्यम्। अन्ये तु माषाणां कुम्भवाप इति व्यवधायकस्योत्तरपदावयवत्वे प्रतिषेधं नेच्छन्ति। तन्मते माषकुम्भवापेणेत्यादौ नित्यमेव णत्वम्। अपरे तु माषकुम्भस्य वाप इति व्यवधायकस्य पूर्वपदावयवत्वे प्रतिषेधं नेच्छन्ति। तन्मते माषकुम्भवापेण माषकुम्भवापेनेत्यादौ विकल्प एव। अनाङीति किम्। माणद्धम्। पर्याणद्धम्। अतद्धित इति किम्। आर्द्रगोमयेण।

७१० य एचातः ॥ ५।१।२८॥ ऋवर्णव्वञ्जनान्तात् ध्यणो विहितत्वात् परिशिष्टात् स्वरान्ताद् धातोर्यः प्रत्ययः स्यात् अन्त्याकारस्य चैकारः। दित्स्यम्। धित्स्यम्। चेयम्। जेयम्। नेयम्। शेयम्। नव्यम्। लव्यम्। भव्यम्। एचातः देयम्। धेयम्।

७११ शकितकिचतियतिशासिसहियजिभजिपवर्गात् ॥५।१।२९॥ शक्यादिभ्यः पवर्गान्तेभ्यश्च धातुभ्यो यः प्रत्ययः स्यात्। ध्यणोऽपवादः। शक्यम्। तक्यम्। चत्यम्॥यत्यम्। शस्यम्। सह्यम्। यज्यम्। भज्यम्। पवर्गान्त–तप्यम्। लभ्यम्।

४-४-१०४

७१२ आङो यि ॥४।४।१०४॥ आङः परस्य लभतेः स्वरात् परो यि यकारादौ प्रत्यये नोऽन्तः स्यात्। आलम्भ्या गौः। आलम्भ्या वडवा। आङ इति किम्। लभ्यः। यीति किम्। आलब्धा।

४-४-१०५

७१३ उपात्स्तुतौ ॥४।४।१०५॥ उपात् परस्य लभतेः स्वरात् परो यकारादौ प्रत्यये परे स्तुतौ प्रशंसायां गम्यमानायां नोऽन्तः स्यात्। उपलम्भ्या विद्या

भवता। उपलम्भ्यं शीलम्। स्तुताविति किम्। उपलभ्या वार्ता। उपलभ्यमस्माद् वृषलात् किञ्चित्। गम्यम्। यजेः 'त्यजयजप्रवचः' इति प्रतिषेधात् भजेश्च बाहुलकाद् ध्यणपि याज्यम्। भाग्यम्। यजिभजिभ्यां नेच्छन्त्येके। कथमसिना वध्योऽसिवध्यः, मुसलवध्यः ? 'न जनवधः' इति वृद्धिप्रतिषेधे ध्यणा भविष्यति।

७१४ यममदगदोऽनुपसर्गात् ॥५।१।३०॥ उपसर्गरहितेभ्य एभ्यो यः स्यात्। यम्यम्। मद्यम्। गद्यम्। अनुपसर्गादिति किम्। आयाम्यम्। प्रमाद्यम्। निगाद्यम्। पवर्गान्तत्वात् सिद्धे यमो नियमार्थं वचनम्—अनुपसर्गादेव यथा स्यात्। बहुलवचनान्माद्यत्यनेनेति मद्यम् करणेऽपि नियम्यमिति च सोपसर्गादिति।

७१५ चरेराङस्त्वगुरौ ॥५।१।३१॥ अनुपसर्गाच्चरेराङ्पूर्वात्त्वगुरावर्थे यः प्रत्ययः स्यात्। चर्यं भवता। चर्यो देशः। आचर्यं भवता। आचर्यो देशः। आङस्त्विति किम्। अभिचार्यम्। अगुराविति किम्। आचार्यो गुरुः।

७१६ वर्योपसर्यावद्यपण्यमुपेयर्तुमतीगर्ह्यविक्रेये ॥५।१।३२॥ वर्यादयः शब्दा उपेयादिष्वर्थेषु यथासंख्यं यान्ता निपात्यते। वृणातेर्ये वर्या उपेया चेद् भवति। शतेन वर्या, सहस्रेण वर्या कन्या संभक्तव्या मैत्रीमापादनीयेति यावत्। वृत्यान्या। वृणोतेः क्यप्। स्त्रीलिङ्गनिर्देशादिह न। वार्यो ऋत्विजः। अन्यस्तु 'सुग्रीवो नाम वर्योऽसौ भवता चारुविक्रमः' इति प्रयोगदर्शनात् पुंलिङ्गेऽपीच्छति। सामान्यनिर्देशात् तदपि संगृहीतम्। शतेन वर्यः। सहस्रेण वर्यः। उपपूर्वात् सर्तेर्ये उपसर्या ऋतुमती चेत्। उपसर्या गौः। गर्भग्रहणे प्राप्तकालेत्यर्थः। अन्यत्र उपसर्या शरदि मथुरा। नञ्पूर्वाद् वदेर्ये अवद्यं गर्ह्यं चेत्। अवद्यं पापम्। अवद्या हिंसा। गर्ह्येत्यर्थः। अनुद्यमन्यत्। कथमवाद्या ? वदेर्निरुपपदात् ध्यण्। पश्चात् नञ्समासः। पणेर्ये पण्यं विक्रेयं चेत्। पण्यः कम्बलः। पण्या गौः। विक्रेयेत्यर्थः। अन्यत्र पाण्यः साधुः।

७१७ स्वामिवैश्येऽर्यः ॥ ५।१।३३ ॥ अर्तेः स्वामिनि वैश्ये चाभिधेये यो निपात्यते। अर्यः स्वामी। अर्यो वैश्यः। स्वामिवैश्य इति किम्। आर्यः।

७१८ वह्यं करणे ॥५।१।३४॥ वहेः करणे यो निपात्यते। वहन्ति तेनेति वह्यं शकटम्। वाह्यमन्यत्।

७१९ **नाम्नो वदः क्यप् च** ॥५।१।३५॥ अनुपसर्गादिति वर्तते। अनुपसर्गान्नाम्नः परात् वदेः क्यप् यश्च प्रत्ययौ स्याताम्। ब्रह्मोद्यम्। ब्रह्मवद्यम्। सत्यवद्यम्। सत्योद्यम्। नाम्न इति किम्। वाद्यम्। अनुपसर्गादित्येव। प्रवाद्यम्। अनुवाद्यम्। ककारः कित्कार्यार्थः। पकार उत्तरत्र तागमार्थः।

७२० **हत्याभूयं भावे** ॥५।१।३६॥ अनुपसर्गान्नाम्नः परौ हत्या भूय इत्येतौ भावे क्यवन्तौ निपात्येते। हन्तेः स्त्रीभावे क्यप् तकारश्चान्तादेशः। ब्रह्मणो वधः ब्रह्महत्या। भ्रूणहत्या। दरिद्रहत्या। श्वहत्या। भवतेर्नपुंसके भावे क्यप्। ब्रह्मभूयं गतः। देवभूयं गतः। ब्रह्मत्वं देवत्वं गत इत्यर्थः। भाव इति किम्। श्वघात्या दृषली। नाम्न इत्येव। हतिः। घातः। भव्यम्। हन्तेर्भावे ण्यण् न भवत्यनभिधानात्। तथा च बहुलाधिकारः। अनुपसर्गादित्येव। उपहतिः। प्रभव्यम्।

७२१ **अग्निचित्या** ॥५।१।३७॥ अग्नेः पराच्चिनोतेः स्त्रीभावे क्यप् निपात्यते। अग्नेश्चयनमग्निचित्या।

७२२ **खेयमृषोद्ये** ॥५।१।३८॥ अनुपसर्गादिति नाम्न इति च निवृत्तम्। खेय मृषोद्य इत्येतौ क्यवन्तौ निपात्येते। खनेर्घ्यणोऽपवादः क्यप् अन्त्यस्वरादेरेकारश्च। खन्यत इति खेयम्। निखेयम्। उत्खेयम्। मृषापूर्वाद् वदतेः पक्षे ये प्राप्ते नित्यं क्यप्। मृषोद्यते मृषोद्यम्। नात्र भाव एवेति योगविभागः।

७२३ **कुप्यभिद्योद्ध्यसिध्यतिष्यपुष्ययुग्याज्यसूर्यं नाम्नि** ॥ ॥५।१।३९॥ एते क्यवन्ता संज्ञायां निपात्यन्ते। गुपेः क्यप् आदिकत्वं च धनेऽर्थे। गोपाय्यते तदिति कुप्यं धनम्। गोपाय्यमन्यत्। भिदेरुज्झेश्च नदेऽभिधेये क्यप् उज्झेर्धत्वं च। भिनत्ति कूलानि इति भिद्यः। उज्झत्युदकम् उद्ध्यः। अन्यत्र भेत्ता। उज्झिता। सिधिवित्रिषिपुषिभ्यो नक्षत्रेऽभिधेये क्यप् त्रिषेर्वलोपश्च। सिध्यन्ति त्वेषन्ति पुष्यन्ति अस्मिन् कार्याणि इति सिध्यः, तिष्यः, पुष्यः। अन्यत्र सेधनः, त्वेषणः, पोषणः। युजेः क्यप् गत्वं च वाहनेऽभिधेये। युञ्जन्ति तदिति युग्यं वाहनं गजाश्वादि। योग्यमन्यत्। आङ्पूर्वादज्झेर्घृतेऽर्थे क्यप्। आज्यत्यनेनेति आज्यं घृतम्। आज्यनमन्यत्। सर्तेः क्यप् ऋकारस्योर्, सुवतेर्वा क्यप् रान्तश्च देवतायाम्। सरति सुवति वा कर्मसु लोकानिति सूर्या देवता। बहुलाधिकारान्निपातनसामर्थ्याद्वानुक्तोऽपि निपातनेषु कारकविशेषो गम्यते।

७२४ **दृवृग्स्तुजुषेतिशासः** ॥ ५।१।४० ॥ एभ्यः क्यप् स्यात् । दृ–आदृत्यः । वृग्–मावृत्यः । वृङस्तु वार्या ऋत्विजः । स्तु–स्तुत्यः । अवश्यस्तुत्यः । जुष्यः । एतीति इणिकोर्ग्रहणम् । इत्यः । अधीत्यः । अयतेरिङश्च न । उपेयम् । अध्येयम् । इकोऽप्यध्येयमित्येके । ईयतेरप्युपेयमिति भवति । शास्–शिष्यः । आशासेस्तु 'आशास्यमन्यत् पुनरुक्तभूतम्' इति । कथं 'मनिवार्यो गजैरन्यैः स्वभाव इव देहिनाम्' इति ? संभक्तेरन्यत्रापि वृङ् ।

७२५ **ऋदुपान्त्यादकृपिचृदचः** ॥ ५।१।४१ ॥ ऋकारोपान्त्याद् धातोः कृपिचृतिऋचिवर्जितात् क्यप् स्यात् । वृत्यम् । वृध्यम् । गृध्यम् । शृध्यम् । अकृपिचृदच इति किम् । कल्प्यम् । चर्त्यम् । अर्च्यम् ।

७२६ **कृवृषिमृजिशांसिगुहिदुहिजपो वा** ॥५।१।४२॥ एभ्यः क्यप् वा स्यात् । कृत्यम् । कार्यम् । वृष्यम् । वर्ष्यम् । मृज्यम् । मार्ज्यम् । शस्यम् । शंस्यम् । गुह्यम् । गोह्यम् । दुह्यम् । दोह्यम् । जप्यम् । जाप्यम् । जपेरपि क्यबभावपक्षे[1] घ्यण् विकल्पसामर्थ्यात् ।

७२७ **जिविपून्यो हलिमुञ्जकल्के** ॥ ५।१।४३ ॥ जयतेर्विपूर्वाभ्यां च पूनीभ्यां यथासंख्यं हलिमुञ्जकल्केषु कर्मसु वाच्येषु क्यप् स्यात् । महद्धलं हलिः । मुञ्जस्तृणविशेषः । कल्कस्त्रिफलादीनाम् । जीयते निपुणेनेति जित्या जित्यो वा हलिः । पूङ् पूग् वा । विपवितव्यो विपूयो मुञ्जः । पूगो नेच्छन्त्येके । विनेतव्यस्तैलादिमध्ये इति विनीयः कल्कः । हलिमुञ्जकल्क इति किम् । जेयम् । विपव्यम् । विनेयम् ।

७२८ **पदास्वैरिबाह्यापक्ष्ये ग्रहः** ॥५।१।४४॥ विभक्त्यन्तं पदम् । अस्वैरी परतन्त्रः । बाह्या बहिर्भवा । पक्ष्यो वर्ग्यः । एष्वर्थेषु ग्रहः क्यप् स्यात् । घ्यणोऽपवादः । प्रगृह्यते विशेषेण ज्ञायते प्रगृह्यं पदम् । यत्स्वरेण न संधीयते 'अग्नी इति' । अवगृह्यते नानावयवसात् क्रियते अवगृह्यं पदम् । अस्वैरिणिगृह्याः कामिनः । रागादिपरतन्त्रा इत्यर्थः । बाह्यायां–ग्रामगृह्या श्रेणिः। नगरगृह्या सेना । बाह्येत्यर्थः । स्त्रीलिङ्गनिर्देशो लिङ्गान्तरेऽनभिधानख्यापनार्थः । पक्ष्ये–स्व-

---

१ शकितकीति यप्रत्यये तु विशेषाभावः ।

दृगृह्यः । मद्गृह्यः । गुणगृह्या वचने विपश्चितः । तत्पक्षाश्रिता इत्यर्थः । एष्विति किम् । ग्राह्यं वचः ।

७२९ **भृगोऽसंज्ञायाम्** ॥५।१।४५॥ भृगो धातोरसंज्ञायां क्यप् स्यात् । भ्रियते भृत्यः । पोष्य इत्यर्थः । असंज्ञायामिति किम् । भार्यो नाम क्षत्रियः । भार्या पत्नी । ननु च संज्ञायामपि स्त्रियां भृगो नान्नीति क्यबस्ति—यथा कुमार-भृत्या । न । तस्य भाव एव विधानात् ।

७३० **समो वा** ॥५।१।४६॥ संपूर्वाद् भृगः क्यब् वा स्यात् । संभृत्यः । संभार्यः ।

॥ इति कृत्यप्रत्ययाः ॥

७३१ **णकतृचौ** ॥५।१।४८॥ धातोः परौ णकतृचौ प्रत्ययौ स्याताम् । कृत्वात् कर्तरि । पाचकः । पक्ता । पाठकः । पठिता । णकारो वृद्ध्यर्थः । चकार-स्त्रन्त्यस्वरादेरित्यत्र सामान्यग्रहणाविघातार्थः ।

७३२ **त्रने वा** ॥ ४।४।३ ॥ तृ अन इत्येतयोः प्रत्यययोर्विषयभूतयोरजेर्वी इत्यादेशो वा स्यात् । प्रवेता । प्राजिता । प्रवयणः प्राजनो दण्डः । अत्रानो वक्ष्यते । अन्ये त्वने प्रत्यये यकाररहिते व्यञ्जनादौ चाविशेषेण विकल्पमिच्छन्ति । प्रवेता । प्राजिता । प्रवेष्यति । प्राजिष्यति । प्रविवीषति । प्राजिजिषति । प्रवेतव्यम् । प्राजितव्यम् । प्रवेतुम् । प्राजितुम् ।

७३३ **तुः** ॥४।४।५५॥ अनात्मनेपदविषयात् क्रमः परस्य तुस्तृचस्तृनश्च स्त्याश्रित आदिरिट् स्यात् । अनात्मन इति प्रकृतिविशेषणमत्रान्यथा व्यवच्छेद्या-भावात् । क्रमिता । निष्क्रमिता । आत्मनेपदविषयश्च क्रमिः कर्मव्यतिहारवृत्त्या-दिषु प्रोपव्याङ्पूर्वश्च आरम्भादिषु भवति । अनात्मन इत्येव । व्यतिक्रन्ता । प्रक्रन्ता । उपक्रन्ता । विक्रन्ता । आक्रन्ता ।

७३४ **अर्हे तृच्** ॥५।४।३७॥ अर्हे कर्तरि वाच्ये धातोस्तृच् प्रत्ययः स्यात् । भवान् कन्याया वोढा । भवान् खलु च्छेदसूत्रस्य वोढा । सप्तम्या बाधा मा भूदि-त्यर्हे तृच्विधानम् ।

७३५ अच् ॥५।१।४९॥ धातोरच् प्रत्ययः स्यात् । कृत्त्वात्कर्तरि । करः। हरः । पचः । पठः । उद्वहः । चकारः ' अचि ' इत्यत्र विशेषणार्थः ।

७३६ अचि ॥३।४।१५॥ अचि प्रत्यये परे यङो लुप् स्यात् । लोलुवः। पोपुवः । सनीस्रंसः । दनीध्वंसः । चेच्यः। नेन्यः । ' बहुलं लुप् ' इति विकल्पे प्राप्ते नित्यार्थं वचनम् ।

७३७ नोतः ॥३।४।१६॥ उकारान्ताद् विहितस्य यङोऽचि परे लुब् न स्यात् । योयूयः । रोरूयः ।

७३८ लिहादिभ्यः ॥५।१।६०॥ लिहादिभ्यो धातुभ्योऽच् प्रत्ययः स्यात् । पृथग्योगो बाधकबाधनार्थः । लेहः । शेषः। सेवः । देवः । मेधः । मेषः। मेघः। देहः । प्ररोहः । न्यग्रोधः । कोपः । गोपः । सर्पः । नर्तः । दर्शः । एषु नाम्युपान्त्यलक्षणं कं दृशेस्तु वा शं बाधते । अनिमिष इति बहुलाधिकारात् कोऽपि भवति । श्वपचः । पारापतः । यद्वदः । अरीन् व्रणयतीत्यरित्रणा शक्तिः । जारभरा । कन्यावरः । रघूद्वहः । रसावहः । एष्वणं बाधते । बहुवचनम् आकृतिगणार्थम् । नदी । भषी । प्लवी । गरी । चरी । तरी । दरी । स्तरी । सूदी । देवी । सेवी । चोरी । गोही । एतेऽजन्ता गौरादौ द्रष्टव्याः ।

७३९ चराचरचलाचलपतापतवदावदघनाघनपाटूपटं वा ॥ ॥४।१।१३॥ एते शब्दा अचि कृतद्विर्वचना वा निपात्यन्ते । चरिचलिपतिवदिहन्तीनामजन्तानां द्वित्वं हन्तेर्हस्य घत्वं पूर्वस्य च दीर्घः । चरतीति चराचरः । चलाचलः । पतापतः । वदावदः । घनाघनः । पाटयतेरजन्तस्य द्वित्वं ह्रस्वत्वं पूर्वस्य च ऊदन्तो निपात्यते । पाटयतीति पाटूपटः । पक्षे चरः । चलः । पतः । वदः । हनः। पाटः । केचित्तु पटूपट इति निपातयन्ति ।

७४० चिक्लिदचक्रसम् ॥४।१।१४॥ चिक्लिदचक्रसशब्दौ निपात्येते । चिक्लिदः । चक्रसः । चक्रुः ययुः ब्रभ्रुः इत्यौणादिकाः ।

७४१ ब्रुवः ॥५।१।५१॥ ब्रुवो धातोरचि ब्रुव इति निपात्यते । ब्राह्मणमात्मानं ब्रूते ब्राह्मणब्रुवः । अण्वचादेशगुणबाधनार्थं निपातनम् ।

७४२ सयसितस्य ॥२।३।४७॥ परिनिविभ्यः परयोः सयसितयोः सका-

रस्य षः स्यात् । परिषयः । निषयः । विषयः । परिषितः । निषितः । विषितः । सय इति सिनोतेरलन्तस्याजन्तस्य घान्तस्य वा । सित इति क्तान्तस्य रूपम् । स्यतेर्वा नियमार्थं परिनिविषरस्यैव क्तान्तस्य स्यतेर्यथा स्यात् इति । तेनोपसर्गान्तरपूर्वस्य उपसर्गात् सुगित्यादिनाऽपि न भवति। तेन प्रतिसितः निःसितः इत्यादि सिद्धम् । योगविभागात् द्वित्वेऽपि अव्यपीति निवृत्तम् । तेन माविषसयदित्यत्र द्वित्वे सति पूर्वेण व्यवधानादुत्तरस्य न । पूर्वस्य त्वव्यवहितत्वात् भवत्येव । व्यसयीयत् । पर्यसितायत । कथं मापरिषिषयत् ? द्वित्वे सति उपसर्गात् परस्य पूर्वस्यानेन षत्वम् उत्तरस्य तु ' नाम्यन्तस्थे'त्यादिनेति न दोषः ।

७४३ वेः स्कन्दोऽक्तयोः ॥२।३।८१॥ विपूर्वस्यः स्कन्देः संबन्धिनः सकारस्य षो वा स्यात् अक्तयोः—न चेत् क्तक्तवतू प्रत्ययौ स्याताम् । द्विवचनादर्थवद्ग्रहणानपेक्षमुभयपरिग्रहः । विष्कन्ता । विस्कन्ता । विष्कन्तुम् । विस्कन्तुम् । अक्तयोरिति किम् । विस्कन्नः । विस्कन्नवान् ।

७४४ परेः ॥ २।३।८२ ॥ परिपूर्वस्य स्कन्देः सकारस्य षो वा स्यात् । परिष्कन्ता । परिस्कन्ता । परिष्कन्तुम् । परिस्कन्तुम् । योगविभागादक्तयोरिति नानुवर्तते । तेन क्तयोरपि विकल्पः । परिष्कण्णः । परिस्कन्नः । परिष्कण्णवान् । परिस्कन्नवान् । केचित्तु परिपूर्वस्य स्कन्देरजन्तस्य घञन्तस्य वा प्राच्यभरतविषये नित्यं षत्वमन्यत्र विकल्पमिच्छन्ति । अन्ये तु प्राच्यभरतविषये प्रयोगे षत्वाभावमन्यत्र तु विकल्पमिच्छन्ति तदुभयं नारम्भणीयम् , अनेनैव सिद्धत्वात् ।

७४५ निर्दुःसुवेः समसूतेः ॥२।३।८६॥ निर्दुःसुविभ्यः परस्य समसूतिसंबन्धिनः सकारस्य षः स्यात् । निःषमः । दुःषमः । सुषमः । विषमः । निःषूतिः। दुःषूतिः । सुषुतिः । विषूतिः । समसुतीति नाम्नोर्ग्रहणाद् धातोर्वैरूप्ये च न । निःसमति । दुःसमति । सुसमति । विसमति । निःसूतम् । दुःसूतम् । सुसूतम् । विसूतम् । अन्ये तु समसूत्योर्धात्वोरेवेच्छन्ति । तन्मते निषमति, दुःषमति, निःषूतं, दुःषूतमित्यादावेव ।

७४६ नन्द्यादिभ्योऽनः ॥ ८।१।८२ ॥ नन्द्यादिभ्यो धातुभ्यो नामगणे दृष्टेभ्योऽनः प्रत्ययः स्यात्। नन्द्यादयो नन्दनरमणेत्यादिनामगणशब्देभ्योऽपोद्धृत्य वेदितव्याः। स च समत्ययपाठो विशिष्टविषयार्थो रूपनिग्रहार्थश्च । नन्दिवाशि-

मदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् । नन्दनः। वाशनः । मूदनः। दूषणः । साधनः । वर्धनः । शोभनः । रोचनः । सहिरमिदमिरुचिकृतितपितृदिदहियुपूलूभ्यः संज्ञायामेवाण्यन्तेभ्यः । सहते सहनः । एवं रमणः । दमनः । विरोचनः । विकर्तनः । तपनः । प्रतर्दनः । दहनः । यवनः । पवनः । लवणः । निपातनाण्णत्वम् । समः क्रन्दिकृषिहृषिभ्यः संज्ञायामेव । संक्रन्दनः । संकर्षणः । संहर्षणः । कर्मणो दमिअर्दिनाशिमूदिभ्यः। सर्वदमनः । जनार्दनः। वित्तविनाशनः। मधुसूदनः । असंज्ञायामपि । रिपुदमनः । कुलदमनः । परार्दनः । रोगनाशनः । अरिसूदनः। नर्दिभीषिभूषिदृपिजल्पिभ्यः नर्दयति नर्दनः। विभीषयते विभीषणः। भूषयति भूषणः । दृप्यति दर्पणः । जल्पति जल्पनः । बहुवचनमाकृतिगणार्थम् ।

७४७ **ग्रहादिभ्यो णिन्** ॥ ५।१।५३ ॥ ग्रहादिभ्यो नामगणदृष्टेभ्यो णिन् प्रत्ययः स्यात् । ग्राही । स्थायी । उपस्थायी । मन्त्री । संमर्दी । उपावाभ्यां रुधः । उपरोधी । अवरोधी । अपाद्राधः । अपराधी । उदः सहिदहि (सि) भासिभ्यः उत्साही । उद्दाही (सी)। उज्जासी । नेः श्रुशीविशवसवपरक्षिभ्यः। निशृणोति निश्रावी । निशायी । निवेशी । निवासी । निवापी । निरक्षी । नञो व्याहृसंव्याहृसंव्यवहृयाचिव्रजवदवसिभ्यः । न व्याहरति अव्याहारी । असंव्याहारी । असंव्यवहारी । अयाची । अव्राजी । अवादी । अवासी । नञ्पूर्वात् स्वरान्तादचित्तवत्कर्तृकात् । अकारी धर्मस्य बालातपः । अहारी शीतस्य शिशिरः । चित्तवत्कर्तृकान्न । अकर्ता कटस्य चैत्रः। केचिदनञ्पूर्वादिच्छन्ति। कारी । हारी । व्यभिभ्यां भुवोऽतीते । विभवति स्म विभावी । अभिभावी । विपरिभ्यां भुवो ह्रस्वश्च वा । विभवति विभावी । विभवी । परिभावी । परिभवी । वेः शीङ्विगोर्देशे ह्रस्वश्च । गुणैश्चित्ते विशेते विसिनोति वा विशयी विषयी प्रदेशः । निपातनात् षत्वम् । ग्रहादिराकृतिगणः ।

७४८ **नाम्युपान्त्यप्रीकृगृज्ञः कः** ॥७।१।७४॥ नाम्युपान्त्येभ्यो धातुभ्यः प्रीकृगृज्ञा इत्येतेभ्यश्च कः प्रत्ययः स्यात् । ककारः कित्कार्यार्थः । विक्षिपः । विलिखः । बुधः । युधः । कृशः । वितृदः । प्रीणातीति प्रियः । किरतीति किरः। उत्किरः। गिलतीति गिलः। निगिलः। जानातीति ज्ञः । काष्ठभेद इति परत्वादण् ।

७४९ **वौ विष्किरो वा** ॥४।४।९७॥ वौ पक्षिण्यभिधेये विष्किर इति वा स्सट्

निपात्यते। विकिरतीति विष्किरः पक्षिविशेषः। विकिरोऽपि स एव। अन्ये तु पक्षिणोऽन्यत्र विकिरशब्दस्यापि प्रयोगो नास्तीत्याहुः।

७५० गेहे ग्रहः ॥५।१।७५॥ गेहेऽभिधेये ग्रहेः कः स्यात्। गृहम्। गृहाणि। गृहाः पुंसि बहुवचनान्त एव। उपचाराद् दारा गृहाः।

७५१ उपसर्गादातो डोऽद्यः ॥५।१।७६॥ उपसर्गात् परात् श्यैङ्वर्जिता-दाकारान्ताद् धातोर्डः प्रत्ययः स्यात्। आह्वयतीति आह्वः। मह्यः। संव्यः। परिव्यः। प्रज्यः। अनुज्यः। प्रस्थः। सुग्लः। सुम्लः। सुत्रः। व्यालः। सुरः। केनैव सिद्धे डविधानं ष्ट्रन्निषेधार्थम्। उपसर्गादिति किम्। णे–दायः, धायः। आत इति किम्। आहर्ता। अश्य इति किम्। णे–अवश्यायः। प्रतिश्यायः। 'पूर्वेऽपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति णो बाध्यते नाण्, तेन गोसंदायो बडवासंदाय इत्यणेव।

७५२ व्याघ्राघ्रे प्राणिनसोः ॥ ५।१।७७ ॥ व्याघ्र आघ्रा इत्येतौ शब्दौ जिघ्रतेर्यथासंख्यं प्राणिनि नासिकायां चार्थे डप्रत्ययान्तौ निपात्येते। विविधमाजिघ्रति व्याघ्रः प्राणी। आजिघ्रति आघ्रा नासिका। शस्यापवादः।

७५३ घ्राध्मापाट्धेदृशः शः ॥ ५।१।७८ ॥ एभ्यः शः प्रत्ययः स्यात्। जिघ्रति इति जिघ्रः। विजिघ्रः। उज्जिघ्रः। धमः। विधमः। उद्धमः। घ्रादिसाहचर्यात् पा इति पिबतेर्ग्रहणं न पातेः। पिबः। निपिबः। उत्पिबः। पायतेस्तु लाक्षणिकत्वान्न। दृधे–धयः। विधयः। उद्धयः। दृश–पश्यः। विपश्यः। उत्पश्यः। दृधेष्टकारो ङ्यर्थः। उद्धयो। विधयी। उपसर्गादेवेच्छन्त्यन्ये। शकारः शित्कार्यार्थः।

७५४ साहिसातिवेद्युदेजिधारिपारिचेतेरनुपसर्गात् ॥ ५।१।७९ ॥ एतेभ्य उपसर्गरहितेभ्यो ण्यन्तेभ्यः शः प्रत्ययः स्यात्। साहयतीति साहयः। सातिः सौत्रो धातुः। सातयः। वेदयः। उदेजयः। धारयः। पारयः। चेतयः। अनुपसर्गादिति किम्। प्रसाहयिता। छत्रधार इति परत्वादणेव।

७५५ लिम्पविन्दः ॥५।१।८०॥ अनुपसर्गाभ्यां लिम्पविन्दिभ्यां शः स्यात्। लिम्पतीति लिम्पः। विन्दतीति विन्दः। अनुपसर्गादित्येव। प्रलिपः।

७५६ निगवादेर्णाञ्नि ॥ ५।१।८१ ॥ यथासंख्यं निपूर्वात् लिम्पेर्गवादि-

पूर्वाच्च विन्देर्नाम्नि–संज्ञायां शः स्यात् । निलिम्पन्तीति निलिम्पा नाम देवाः। गा विन्दतीति गोविन्दः । कुविन्दः । अरविन्दः । कुरुविन्दः । उरविन्दः। नाम्नीति किम् । निलिपः।

७५७ **वा ज्वलादिदुनीभूग्रहास्नोर्णः** ॥ ५।१।६२ ॥ ज्वलादेर्गणात् दुनीभूग्रहिभ्य आङ्पूर्वाच्च स्रवतेरनुपसर्गाण्णो वा स्यात् । ज्वलः । ज्वालः । चलः। चालः । निपातः, उत्क्रोशः, इति बहुलाधिकारात् । दवः । दावः । नयः । नायः । दुनीभ्यां नित्यमेवेत्येके । भवः। भावः। व्यवस्थितविभाषेयम् । तेन ग्राहो मकरादिः। ग्रहः सूर्यादिः । आस्रवः । आस्रावः । अनुपसर्गादित्येव । प्रज्वलः । प्रदवः । प्रणयः । प्रभवः । प्रग्रहः । प्रस्रवः ।

७५८ **अवहसासंस्रो** ॥५।१।६३॥ अवपूर्वाभ्यां हसाभ्यां संपूर्वाच्च स्रवतेर्णः प्रत्ययः स्यात् । अवहारः । अवसायः । संस्रावः । संस्रव इत्यपि कश्चित् ।

७५९ **तन्व्यधीण्श्वसातः** ॥५।१।६४॥ तन् व्यधि इण् श्वस् इत्येतेभ्य आदन्तेभ्यश्च धातुभ्यो णः प्रत्ययः स्यात् । तानः । उत्तानः। अवतानः। व्याधः। प्रत्यायः । अत्यायः । अन्तरायः । अतिपूर्वादेवेण इत्येके । श्वासः । आश्वासः । आदन्त–अवश्यायः । प्रतिश्यायः । ग्लायः । म्लायः । कथं ददः, दधः ? ददिदध्योरचा सिद्धम् ।

७६० **नृत्खन्रञ्जः शिल्पिन्यकट्** ॥५।१।६५॥ नृतिखनिरञ्जिभ्यः शिल्पिनि कर्तर्यकट् प्रत्ययः स्यात् । शिल्पं कर्मकौशलम् । तद्वान् शिल्पी । नर्तकः । नर्तकी । खनकः । खनकी । रजकः । रजकी । शिल्पिनीति किम् । नर्तिका । खानकः । रञ्जकः । टकारो ङ्यर्थः ।

७६१ **गस्थकः** ॥५।१।६६॥ गायतेः शिल्पिनि कर्तरि थकः प्रत्ययः स्यात् । गाथकः । गाङः प्रत्यये शिल्पी न गम्यते इति गायतेर्ग्रहणम् ।

७६२ **टनण्** ॥५।१।६७॥ गायतेः शिल्पिनि कर्तरि टनण् प्रत्ययः स्यात् । गायनः । गायनी । टकारो ङ्यर्थः । णकार ऐकारार्थः । योगविभाग उत्तरार्थः । एतौ प्रत्ययावशिल्पिन्यपीत्येके ।

७६३ **हः कालव्रीह्योः** ॥५।१।६८॥ जहातेर्जिहीतेर्वा कालव्रीह्योः कर्त्रोष्टनण् प्रत्ययः स्यात्। जहाति जिहीते वा भावान् हायनः संवत्सरः। जहत्युदकं दूरोत्थानात् जिहते वा द्रुतं हायना नाम व्रीहयः। कालव्रीह्योरिति किम्। हाता।

७६४ **प्रसुत्वोऽकः साधौ** ॥५।१।६९॥ प्रसुलू इत्येतेभ्यो धातुभ्यः साधुत्वविशिष्टेऽर्थे वर्तमानेभ्योऽकः प्रत्ययः स्यात्। साधु प्रवते इति प्रवकः। एवं सरकः। लवकः। साधाविति किम्। प्रावकः। सारकः। लावकः।

७६५ **आशिष्यकन्** ॥५।१।७०॥ इष्टस्य प्रार्थनमाशीः। तस्यां गम्यमानायां धातोरकन् प्रत्ययः स्यात्। जीवतादित्याशास्यमानो जीवकः। एवं नन्दकः। भवकः। आशिषीति किम्। जीविका। नन्दिका। भाविका। नकार 'इच्चाणुंसोऽनित्क्याण्परे' इत्यत्र व्युदासार्थः। तेन जीवका। नन्दका। भवका।

७६६ **तिक्कृतौ नाम्नि** ॥५।१।७१॥ आशिषि विषये संज्ञायां गम्यमानायां धातोस्तिक् कृतश्च सर्वे प्रत्ययाः स्युः।

७६७ **अहन्पञ्चमस्य क्विक्ङिति** ॥४।१।१०७॥ हन्वर्जितस्य पञ्चमान्तस्य धातोः स्वरस्य कौ धुडादौ च क्ङिति प्रत्यये दीर्घः स्यात्। शम्यात् शान्तिः। पञ्चमस्येति किम्। ओदनपक्। पक्त्वा। अहन्निति किम्। वृत्रहणि। भ्रूणहनि। क्विक्ङितीति किम्। गन्ता। रन्ता। धुटीत्येव। यम्यते। यंयम्यते। कश्चित्त्वाचारक्वावपि दीर्घत्वमिच्छन्ति। कमिवाचरति कामति। एवं शम् शामति। किम् कीमति। इदम् इदामति।

७६८ **न तिकि दीर्घश्च** ॥४।२।५९॥ एषां तिकि प्रत्यये लुग् दीर्घश्च न। यन्तिः। रन्तिः। नन्तिः। गन्तिः। हन्तिः। मन्तिः। वन्तिः। तन्तिः। क्षणिति लाक्षणिकोऽयं णकारः। तेन क्षन्तिरिति भवति। अन्यस्त्वौपदेशिकोऽयमिति मन्यते, तन्मते क्षण्टिः। अन्तलोपे प्रतिषिद्धे 'अहन्पञ्चम' इत्यादिना दीर्घत्वं प्राप्तं तदपि प्रतिषिध्यते। एषामित्येव। शान्तिर्भगवान्। तिकीति किम्। यतिः। रतिः। ततिः।

७६९ **तौ सनस्तिकि** ॥४।२।६४॥ सनित्येतस्य तिकि प्रत्यये परे तौ लुगाकारौ वा स्याताम्। षणू–सति;, सातिः, सन्तिः। षण् भक्तौ–सतिः, सातिः,

सान्तिः । अहन्पञ्चमेति दीर्घः । कृत्–वीरो भूयादिति वीरभूः । मित्रभूः। क्विप् । अग्निरस्य भूयात् अग्निभूतिः । देवभूतिः । अश्वभूतिः । सोमभूतिः । कुमारोऽस्य दुरितानि नयतामित्याशंसितः कुमारनीतिः । मित्रमेनं वर्धिषीष्ट मित्रवृद्धिः । क्तिः । देवा एनं देयासुर्देवदत्तः । विष्णुरेनं श्रूयात् इति विष्णुश्रुतः । क्तः । शर्व एनं वृषीष्ट शर्ववर्मा । मन् । गङ्गा एनं मिद्यात् गङ्गामित्रः । त्रक् । वर्धिषीष्ट वर्धमानः।

७७० **कर्मणोऽण्** ॥५।१।७२॥ निर्वर्त्यविकार्यप्राप्यरूपात् कर्मणः परस्माद् धातोरण् प्रत्ययः स्यात् । अजाद्यपवादः । निर्वर्त्यात्–कुम्भकारः। नगरकारः । विकार्यात्–काण्डलावः । शरलावः। प्राप्यात्–वेदाध्यायः । चर्चापारः । भारहारः । सूत्रधारः । भारवाहः । द्वारपालः । उष्ट्रप्रणायः । कमण्डलुग्राहः । आदित्यं पश्यति हिमवन्तं शृणोति ग्रामं गच्छतीत्यादौ प्राप्यात् कर्मणोऽनभिधानान्न । महान्तं घटं करोतीति सापेक्षत्वात् अनभिधानाच्च । तथा च बहुलाधिकारः । निवर्त्यविकार्याभ्यामपि क्वचिन्न । संयोगं जनयति । स्रजं विरचयति । वृक्षं छिनत्ति । कन्यां मण्डयति । णकारो वृद्ध्यर्थः ।

७७१ **शीलिकामिभक्ष्याचरीक्षिक्षमो णः** ॥५।१।७३॥ कर्मणः परेभ्यः शीलि कामि भक्षि आचरि ईक्षि क्षम् इत्येतेभ्यो धातुभ्यो णः प्रत्ययः स्यात्। धर्मं शीलयति धर्मशीलः, धर्मशीला । धर्मकामः, धर्मकामा । वायुभक्षः, वायुभक्षा । आङ्पूर्वश्चरिः–कल्याणाचारः । कल्याणाचारा । सुखप्रतीक्षः । सुखप्रतीक्षा । बहुक्षमः । बहुक्षमा । अल्घञन्तैः शीलादिभिर्बहुव्रीहौ सति धर्मशीलादयः सिद्ध्यन्ति। अण्बाधनार्थं तु वचनम् । अणि हि स्त्रियां ङी स्यात् तथाच धर्मशीलीत्याद्यनिष्टं रूपं स्यात् । एवंप्रायेषु च बहुव्रीह्याश्रयणे अम्भोऽतिगमेति स्यात् अम्भोऽतिगामी चेष्यते । कामीति ण्यन्तस्योपादानादण्यन्तादणेव पयस्कामीति । ण्यन्तस्य तु णे सति पयःकामेति भवति । अत एव च ण्यन्तनिर्देशादण्यन्तनिर्देशे कृकमिकंसेत्यादौ केवलस्यैव कमेर्ग्रहणम् । तेन णे सति सकारादेशो न ।

७७२ **गायोऽनुपसर्गाट्टक्** ॥५।१।७४॥ कर्मणः परादनुपसर्गाद् गायतेष्टक् प्रत्ययः स्यात्। वक्रं गायति वक्रगः वक्रगी। सामगः। सामगी। अनुपसर्गादिति किम्। वक्रसंगायः। खरुसंगायः । वक्रादयो गीतविशेषाः गायतिनिर्देशो गाङ्निवृत्त्यर्थः॥

७७३ **सुराशीधोः पिबः** ॥५।१।७५॥ सुराशीधुभ्यां कर्मभ्यां परादनुप-

सर्गात् पिबतेष्टक् स्यात् । सुरां पिबति सुरापः, सुरापी । सीधुपः । सीधुपी । सुराशीधोरिति किम् । क्षीरपा बाला । पिब इति किम् । सुरां पाति सुरापा । कथं संज्ञायां सुरापा, सुरापीति ? पातिपिबत्योर्भविष्यति । न च धात्वर्थभेदः । संज्ञासु धात्वर्थस्य व्युत्पत्तिमात्रार्थत्वात् ।

७७४ **आतो डोऽह्वावामः** ॥५।१।७६॥ कर्मणः परादनुपसर्गात् ह्वावामावर्जितादाकारान्ताद् धातोर्डः प्रत्ययः स्यात् । गां ददाति गोदः । कम्बलदः । पार्ष्णित्रम् । अङ्गुलित्रम् । ब्रह्मज्यः । वपुर्वीतवान् वपुर्व्यः । अह्वावाम इति किम् । स्वर्गह्वायः । तन्तुवायः । धान्यमायः । अणेव । कथं मित्रहः ? 'क्वचित्' इत्यनेन डः। अनुपसर्गादित्येव । गोसंदायः। वडवासंदायः। उपसर्गैः अव्यवधानतैवेत्येण् ।

७७५ **समः ख्यः** ॥५।१।७७॥ कर्मणः परात् संपूर्वात् ख्या इत्येतस्मात् डः स्यात् । गां संख्याति संचष्टे वा गोसंख्यः । पशुसंख्यः । उपसर्गार्थं वचनम् ।

७७६ **दश्चाङः** ॥५।१।७८॥ कर्मणः परादाङ्पूर्वाद्दातेः ख्या इत्येतस्माच्च डः स्यात् । दायमादत्ते दायादः । स्त्रियमाचष्टे ख्याख्यः । प्रियाख्यः । इदमुत्तरं चोपसर्गार्थं वचनम् ।

७७७ **प्राज्ञश्च** ॥ ५।१।७९ ॥ कर्मणः परात्प्रपूर्वाज्ज्ञानातेर्दारूपाच्च डः स्यात् । पथिप्रज्ञः । प्रपाप्रदः । इह पूर्वसूत्रे च दारूपं गृह्यते न संज्ञा ज्ञाख्यासाहचर्यात् । पूर्वसूत्रे तु दाग एव ग्रहणम् । तस्यैवाङ योगात् । तेन स्तनौ प्रथयति स्तनप्रथायः ।

७७८ **आशिषि हनः** ॥५।१।८०॥ आशिषि गम्यमानायां कर्मणः पराद् हन्तेर्डः स्यात् । शत्रुं वध्यात् शत्रुहः । पापहः । दुःखहः । गतावपीति कश्चित् । क्रोशं हन्ति क्रोशहः ।

७७९ **क्लेशादिभ्योऽपात्** ॥५।१।८१॥ क्लेशादिभ्यः कर्मभ्यः परादपपूर्वाद् हन्तेर्डः स्यात् । अनाशीरर्थ आरम्भः । क्लेशमपहन्ति क्लेशापहः । तमोऽपहः । दुःखापहः । ज्वरापहः । दर्पापहः। दोषापहः । रोगापहः । वातपित्तकफापहः । विषाग्निदर्पापहः । बहुवचनाद्यथादर्शनमन्येभ्योऽपि भवति । कथं दार्वाघाटः, चार्वाघाटः ? घटतेरणि संज्ञायां भविष्यति । चारु आहन्ति चार्वाघातो हन्तेरेव ।

दार्वाघातोऽपि तर्हि स्यात् । असंज्ञायामिष्यत एव । एवमसंज्ञायां संपूर्वाभ्यां घटि-हनिभ्यां वर्णसंघाटः, वर्णसंघातः, पदसंघाटः पदसंघात इत्यादि सिद्धम् । हन्तेरेव वा पृषोदरादित्वाद् वर्णविकारः ।

७८० **कुमारशीर्षाण्णिन्** ॥ ५।१।८२ ॥ कुमारशीर्षाभ्यां कर्मभ्यां पराद् हन्तेर्णिन् प्रत्ययः स्यात् । कुमारं हन्ति कुमारघाती । शीर्षघाती । अत एव निपातनात् शिरसः शीर्षशब्दोऽकारान्तः प्रकृत्यन्तरं वा। तथा च शीर्षे स्थितं पृष्ठत इति।

७८१ **अचित्ते टक्** ॥५।१।८३॥ कर्मणः पराद् हन्तेरचित्तवति कर्तरि टक् प्रत्ययः स्यात् । वातं हन्ति वातघ्नं तैलम् । पित्तघ्नं घृतम् । श्लेष्मघ्नं मधु । रोगघ्नमौषधम् । जायाघ्नास्तिलकालकाः । पतिघ्नी पाणिरेखा । सर्वकर्मघ्नी शैलेशी। स्रुघ्नो नगरम् । शतघ्नी आयुधविशेषः । हस्तघ्नो ज्याघातत्रो वर्धपट्टः । बहुलाधिकारात् स्रुघ्नादयः संज्ञायाम् । अचित्त इति किम् । पापघातो यतिः । चौरघातो राजा । आखुघातो विडालः । मत्स्यघातो बकः । सस्यघातो वृषभः ।

७८२ **जायापतेश्चिन्हवति** ॥ ५।१।८४ ॥ जायापतिभ्यां कर्मभ्यां पराद् हन्तेश्चिन्हवति कर्तरि टक् स्यात् । चिन्हं शरीरस्थं शुभाशुभसूचकं तिलकालकादि । जायाघ्नो ब्राह्मणः । पतिघ्नी कन्या । अपलक्षणयुगित्यर्थः । चित्तवदर्थ आरम्भः ।

७८३ **ब्रह्मादिभ्यः** ॥५।१।८५॥ ब्रह्मादिभ्यः कर्मभ्यः पराद् हन्तेष्टक् प्रत्ययः स्यात् । ब्रह्म हन्ति ब्रह्मघ्नः। कृतघ्नः। शत्रुघ्नः। वृत्रघ्नः। भ्रूणघ्नः। बालघ्नः। शशघ्नी पक्षिजातिः । गां हन्ति गोघ्नः पातकी । बहुलाधिकारात् संप्रदानेऽपि । गां हन्ति यस्मै आगताय दातुं स गोघ्नोऽतिथिः । बहुवचनाद्यथादर्शनमन्येभ्योऽपि भवति । चित्तवदर्थ आरम्भः ।

७८४ **हस्तिबाहुकपाटाच्छक्तौ** ॥५।१।८६॥ एभ्यः कर्मभ्यः पराद् हन्तेः शक्तौ गम्यमानायां टक् स्यात् । चित्तवदर्थ आरम्भः । हस्तिनं हन्तुं शक्तो हस्तिघ्नो मनुष्यः । बाहुघ्नो मल्लः । कपाटघ्नश्चौरः । शक्ताविति किम् । हस्तिनं हन्ति विषेण हस्तिघातो रसदः ।

७८५ **नगरादगजे** ॥ ५।१।८७ ॥ नगरात् कर्मणः पराद् हन्तेर्गजवर्जिते कर्तरि टक् स्यात् । चित्तवदर्थ आरम्भः । नगरघ्नो व्याघ्रः । अगज इति किम् । नगरघातो हस्ती ।

७८६ **राजघः** ॥५।१।८८॥ राज्ञः कर्मणः पराद् हन्तेष्टक् प्रत्ययो घादेशश्च निपात्यते । राजानं हन्ति राजघः ।

७८७ **पाणिघताडघौ शिल्पिनि** ॥५।१।८९॥ पाणिताडाभ्यां कर्मभ्यां पराद् हन्तेः शिल्पिनि कर्तरि टक् घादेशश्च निपात्यते । पाणिं हन्ति पाणिघः, ताडघः शिल्पी । पाणिना ताडेन च हन्तीति करणादपि केचित् । शिल्पिनीति किम् । पाणिघातः । ताडघातः ।

७८८ **कुक्ष्यात्मोदरादृ भृगः खिः** ॥ ५।१।९० ॥ एभ्यः कर्मभ्यः परात् भृगो धातोः खिः प्रत्ययः स्यात् । खित्यनव्ययारुष इति मागमे कुक्षिमेव बिभर्ति कुक्षिंभरिः । आत्मंभरिः । उदरंभरिः । उदरात् केचिदेवेच्छन्ति । खकारो मागमार्थः ।

७८९ **अर्होऽच्** ॥५।१।९१॥ कर्मणः परादर्हतेरच् प्रत्ययः स्यात् । अणोऽपवादः । पूजामर्हति पूजार्हः साधुः । पूजार्हा प्रतिमा ।

७९० **धनुर्दण्डत्सरुलाङ्गलाङ्कुशर्ष्टियष्टिशक्तितोमरघटाद् ग्रहः** ॥५।१।९२॥ एभ्यः कर्मभ्यः पराद् ग्रहेरच् प्रत्ययः स्यात् । धनुर्गृह्णाति धनुर्ग्रहः । दण्डग्रहः । त्सरुग्रहः । लाङ्गलग्रहः । अङ्कुशग्रहः । ऋष्टिग्रहः । यष्टिग्रहः । शक्तिग्रहः । तोमरग्रहः । घटग्रहः । नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति घटीग्रहः । अणपीत्येके । धनुर्ग्राहः, दण्डग्राह इत्यादि चोदाहरन्ति ।

७९१ **सूत्राद्धारणे** ॥५।१।९३॥ सूत्रं कार्पासादिमयं लक्षणसूत्रं वाविशेषेण गृह्यते । सूत्रात् कर्मणः पराद् ग्रहेर्ग्रहणपूर्वके धारणेऽर्थे वर्तमानादच् प्रत्ययः स्यात् । सूत्रं गृह्णाति सूत्रग्रहः प्राज्ञः सूत्रधारो वा । सूत्रमुपादाय धारयतीत्यर्थः । अन्ये त्ववधारणे एवेच्छन्ति तन्मते सूत्रग्रहः प्राज्ञ एवोच्यते । धारण इति किम् । सूत्रग्राहः । यो हि सूत्रं गृह्णाति न तु धारयति स एवमुच्यते ।

७९२ **आयुधादिभ्यो धृगोऽदण्डादेः** ॥५।१।९४॥ दण्डादीन् वर्जयित्वा आयुधादिभ्यः कर्मभ्यः परात् धृगो धातोरच् स्यात् । धनुर्धरति धनुर्धरः । शक्तिधरः । चक्रधरः । वज्रधरः । शूलधरः । हलधरः । आदिग्रहणाद् भूधरः । जलधरः । विषधरः । शशधरः । विद्याधरः । श्रीधरः । जटाधरः । पयोधरः । बहुवचनाद्

यथादर्शनमन्येभ्योऽपि भवति । अदण्डादेरिति किम् । दण्डधारः । कुण्डधारः । काण्डधारः । कर्णधारः । सूत्रधारः । छत्रधारः ।

७९३ हृगो वयोऽनुद्यमे ॥५।१।९५॥ कर्मणः पराद् हरतेर्वयसि अनुद्यमे च गम्यमाने अच् स्यात् । प्राणिनां कालकृतावस्था वयः। उद्यम उत्क्षेपणम् आकाशस्थस्य वा धारणम् । तदभावोऽनुद्यमः । अस्थिहरः श्वशिशुः । कवचहरः क्षत्रियकुमारः । अंशहरो दायादः । अनुद्यमे—मनोहरः प्रासादः । मनोहरा माला । संज्ञायां टोऽपीति कश्चित् । मनोहरी विषहरी मणिः । वयोऽनुद्यम इति किम् । भारहारः। वयसि क्रियमाणः । संभाव्यमानो वोद्यम उच्यमानो वयो गमयतीति उद्यमार्थं वयोग्रहणम् ।

७९४ आङः शीले ॥५।१।९६॥ कर्मणः परादाङ्पूर्वाद्धरतेः शीले गम्यमानेऽच् प्रत्ययः स्यात् । शीलं स्वाभाविकी प्रवृत्तिः। पुष्पाण्याहरतीत्येवंशीलः पुष्पाहरः । फलाहरः । सुखाहरः । पुष्पाद्याहरणे स्वाभाविकी फलनिरपेक्षा वृत्तिरस्येत्यर्थः । आङ इति किम् । पुष्पाणि हर्ता । तृन् । शील इति किम् । पुष्पाहारः । सुखाहर इति अशीलेऽनुद्यमेऽर्थे पूर्वेणाच् । लिहादिभपञ्चमकरणमिदम् ।

७९५ दृतिनाथात्पशाविः ॥५।१।९७॥ आभ्यां कर्मभ्यां पराद्धरतेः पशौ कर्तरि इः प्रत्ययः स्यात् । दृतिं हरति दृतिहरिःश्वा । नाथहरिः सिंहः । पशाविति किम् । दृतिहारो व्याधः । नाथहारी गन्त्री ।

७९६ रजःफलेमलाद् ग्रहः ॥५।१।९८॥ एभ्यः कर्मभ्यः पराद् ग्रहेरिः स्यात् । रजोग्रहिः कञ्चुकः । फलेग्रहिर्वृक्षः । सूत्रनिर्देशादेत्वम् । मलग्रहिः कम्बलः। रजोमलाभ्यां केचिदेवेच्छन्ति ।

७९७ देववाताद्दापः ॥५।१।९९॥ देववाताभ्यां कर्मभ्यां परादापेर्धातोरिः प्रत्ययः स्यात् । देवानाप्नोति देवापिः। वातापिः ।

७९८ शकृत्स्तम्बाद् वत्सव्रीहौ कृगः ॥ ५।१।१०० ॥ शकृत्स्तम्बाभ्यां कर्मभ्यां परात् कृगो यथासंख्यं वत्से व्रीहौ च कर्तरि इः प्रत्ययः स्यात् । शकृत्करिर्वत्सः। स्तम्बकरिर्व्रीहिः । वत्सव्रीहाविति किम् । शकृत्कारः । स्तम्बकारः।

७९९ किंयत्तद्भहोरः ॥५।१।१०१॥ एभ्यः कर्मभ्यः परात् करोतेरः प्रत्ययः

स्यात् । किं करोति किंकरः, किंकरा । यत्करः । यत्करा । तत्करः । तत्करा । चौर्ये तस्करः । बहुकरः । बहुकरा । बहुकरीति संख्यावचनादुत्तरेण टः । किंकरीति हेत्वादौ टः ।

८०० संख्याहर्दिवाविभानिशाप्रभाभास्त्रिचक्रत्र्यन्तानन्तकारबाहुरुधनुर्नान्दीलिपिलिबिबलिभक्तिक्षेत्रजङ्घाक्षपाक्षणदारजनिदोषादिनदिवसाट्टः ॥५।१।१०२॥ संख्येत्यर्थप्रधानमपि । तेनैकादिपरिग्रहः। एभ्यः कर्मभ्यः परात् करोष्टः प्रत्ययः स्यात् । अहेत्वाद्यर्थ आरम्भः । संख्यां करोति संख्याकरः। एककरः। द्विकरः। त्रिकरः। अहस्करः। दिवाकरः। विभाकरः। निशाकरः। प्रभाकरः । भास्करः। चित्रकरः । कर्तृकरः । आदिकरः । अन्तकरः । अनन्तकरः। कारकरः । बाहुकरः । अरुष्करः । धनुष्करः । नान्दीकरः । लिपिकरः । लिबिकरः। बलिकरः । भक्तिकरः । क्षेत्रकरः । जङ्घाकरः । क्षपाकरः । क्षणदाकरः । रजनिकरः। रजनीकरः । दोषाकरः । दिनकरः । दिवसकरः । टकारो ङ्यर्थः । संख्याकरी ।

८०१ हेतुतच्छीलानुकूलेऽशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात् ॥५।१।१०३॥ हेतुः प्रतीतशक्तिकं कारणम् । तच्छीलं तत्स्वभावः। अनुकूल आराध्यचित्तानुवर्ती । एषु कर्तृषु शब्दादिवर्जितात् कर्मणः परात् करोतेष्टः प्रत्ययः स्यात् । हेतौ—यशस्करोति यशस्करी विद्या । शोककरी कन्या । कुलकरं धनम् । तच्छीले—क्रीडाकरः । श्राद्धकरः । अनुकूले—प्रेषणाकरः। वचनकरः। हेत्वादिष्विति किम् । कुम्भकारः । शब्दादिनिषेधः किम् । शब्दकारः । श्लोककारः । कलहकारः। गाथाकारः । वैरकारः । चाटुकारः । सूत्रकारः । मन्त्रकारः । पदकारः । तच्छीले ताच्छीलिकश्च प्रत्यय उदाहार्यः ।

८०२ भृतौ कर्मणः ॥५।१।१०४॥ कर्मन्शब्दात् कर्मणः परात् करोतेर्भृतौ गम्यमानायां टः स्यात् । भृतिर्वेतनं कर्ममूल्यमिति यावत् । कर्मकरो भृतकः। कर्मकरी दासी । भृताविति किम् । कर्मकारः । पुनः कर्मग्रहणं शब्दरूपकर्मप्रतिपत्त्यर्थम् ।

८०३ क्षेमप्रियमद्रभद्रात् खाण् ॥ ५।१।१०५ ॥ एभ्यः कर्मभ्यः परात् करोतेः ख अण् इत्येतौ प्रत्ययौ स्याताम् । क्षेमं करोति क्षेमंकरः, क्षेमकारः । प्रियंकरः, प्रियकारः । मद्रंकरः, मद्रकारः । भद्रंकरः, भद्रकारः । भद्रात्केचिदेवेच्छन्ति । एभ्य इति किम् । तीर्थकरः । हेत्वादिषु तीर्थकरः । तीर्थकार इत्यपि

कश्चित्। खो वेति सिद्धेऽण्ग्रहणं हेत्वादिषु टबाधनार्थम्। कथं योगक्षेमकरी लोकस्येति? उपपदविधिषु तदन्तविधेरनाश्रयणात्। अत एव 'संख्या'—दिसूत्रेऽन्तग्रहणे सत्यप्यनन्तग्रहणम्। उत्तरत्र च भयग्रहणेऽप्यभयग्रहणम्।

८०४ **मेघर्तिभयाभयात्खः** ॥५।१।१०६॥ एभ्यः कर्मभ्यः परात् करोतेः खप्रत्ययः स्यात्। मेघान् करोति मेघंकरः। ऋतिर्गतिः सत्यता वा। ऋतिंकरः। भयंकरः। अभयंकरः। हेत्वादिविवक्षायां टमपि बाधते परत्वात्। भयंकरं श्मशानम्।

८०५ **प्रियवशाद्वदः** ॥ ५।१।१०७ ॥ आभ्यां कर्मभ्यां पराद् वदेः खः स्यात्। प्रियं वदति प्रियंवदः। वशंवदः।

८०६ **द्विषन्तपपरंतपौ** ॥ ५।१।१०८ ॥ द्विषत्परशब्दाभ्यां कर्मभ्यां परात् ण्यन्तात्तपेः खः प्रत्ययो ह्रस्वत्वं द्विषत्तकारस्य मकारश्च निपात्यन्ते। द्विषतस्तापयति द्विषन्तपः। परन्तपः। निपातनस्येष्टविषयत्वात् स्त्रियामनभिधानम्। द्विषतीतापः। अण्यन्तस्य च तपेर्न। द्विषतः परांश्च तपति द्विषत्तापः। परतापः।

८०७ **परिमाणार्थमितनखात्पचः** ॥५।१।१०९॥ सर्वतो मानं परिमाणम्। तदर्थाः प्रस्थादयः शब्दाः। एभ्यो मितनखाभ्यां च कर्मभ्यां परात् पचेः खः प्रत्ययः स्यात्। प्रस्थंपचा स्थाली। द्रोणंपचा दासी। अल्पंपचा मुनयः। पान्तावल्पंपचान् मुनीन्। मितंपचा ब्राह्मणी। नखंपचा यवागूः।

८०८ **कूलाभ्रकरीषात्कषः** ॥५।१।११०॥ एभ्यः कर्मभ्यः परात् कषेः खः प्रत्ययः स्यात्। कूलंकषा नदी। अभ्रंकषो गिरिः। करीषंकषा वात्या।

८०९ **सर्वात् सहश्च** ॥५।१।१११॥ सर्वशब्दात् कर्मणः परात् सहेः कषेश्च खः प्रत्ययः स्यात्। सर्वं सहते सर्वसहो मुनिः। सर्वंकषः खलः।

८१० **भृवृजितृतपदमेश्च नाम्नि** ॥ ५।१।११२ ॥ कर्मणः परेभ्य एभ्यः सहेश्च खः स्यान्नाम्नि—संज्ञायाम्। विश्वंभरा वसुधा। पतिंवरा कन्या। शत्रुंजयः पर्वतः। धनंजयः पार्थः। रथन्तरं साम। शत्रुन्तपो राजा दमिरन्तर्भूतण्यर्थो ण्यन्तश्च गृह्यते। बलिं दाम्यति दमयति वा बलिन्दमः कृष्णः। अरिन्दमः। शत्रुंसहः। एतौ राजानौ॥ नाम्नीति किम्। कुटुम्बं बिभर्ति कुटुम्बभारः। केचित्तु रथेन तरति रथन्तरं सामेत्यकर्मणोऽपीच्छति।

८११ धारेर्धर् च ॥५।१।११३॥ कर्मणः पराद् धारयतेः संज्ञायां खः प्रत्ययः स्याद् धर् इत्ययमादेशश्च । वसु धारयति वसुन्धरा पृथ्वी । युगन्धरः । सीमन्धरः। तीर्थकरावेतौ । संज्ञायामित्येव । छत्रधारः।

८१२ पुरन्दरभगन्दरौ ॥५।१।११४॥ एतौ संज्ञायां खप्रत्ययान्तौ निपात्येते। पुरो दारयति पुरन्दरः शक्रः । भगं दारयति भगन्दरो व्याधिः । दारयतेर्हेस्वः पुरोऽमन्तता च निपात्यते । पुरशब्दपूर्वस्य तु पुरदार इति भवति ।

८१३ वाचंयमो व्रते ॥ ५।१।११५ ॥ व्रतं शास्त्रितो नियमः । तस्मिन् गम्यमाने वाचः कर्मणः पराद्यमेर्यांतोः खो वाचश्चामन्तता निपात्यते। वाचं यच्छति नियमयति वा वाचंयमो व्रती । व्रत इति किम् । वाग्यामोऽन्यः ।

८१४ मन्याण्णिन् ॥५।१।११६॥ कर्मणः परान्मन्यतेर्णिन् प्रत्ययः स्यात् । पण्डितं मन्यते बन्धुं पण्डितमानी बन्धोः । दर्शनीयां मन्यते भार्यां दर्शनीयमानी भार्यायाः । ख्यनिर्देश उत्तरार्थः ।*

८१५ कर्तुः खश् ॥ ५।१।११७ ॥ प्रत्ययार्थात् कर्तुः कर्मणः परान्मन्यतेः खश् प्रत्ययः स्यात् । यदा प्रत्ययार्थः कर्ता आत्मानमेव दर्शनीयत्वादिना धर्मेण विशिष्टं मन्यते तदायं कर्म तत्रायं विधिः । पण्डितमात्मानं मन्यते पण्डितंमन्यः । पट्वीमात्मानं मन्यते पट्विमन्या । विद्वन्मन्यः । विदुषिमन्या । असरूपत्वाण्णिन्नपि। पण्डितमात्मानं मन्यते पण्डितमानी । पटुमानिनी । विद्वन्मानी । विद्वन्मानिनी । कर्तुरिति किम् । दर्शनीयमानी चैत्रस्य । पूर्वेणात्र णिन्नेव । शकारः शित्कार्यार्थः ।

८१६ एजेः ॥५।१।११८॥ कर्मणः परादेजयतेः खश् स्यात् । अङ्गान्येजयति अङ्गमेजयः । जनमेजयः । अरिमेजयः ।

८१७ शुनीस्तनमुञ्जकूलास्यपुष्पात् टूधेः॥५।१।११९॥ एभ्यः कर्मभ्यः परात् टूधेः खश् स्यात् । शुनीं धयति शुनिंधयः। स्तनंधयः। मुञ्जंधयः। कूलंधयः। आस्यंधयः । पुष्पंधयः । मुञ्जादिभ्यः केचिदेवेच्छन्ति। टूधेष्टकारो ऽन्यर्थः। शुनिंधयी । स्तनंधयी सर्पजातिः ।

---

* मनुतेर्निवृत्त्यर्थश्च ।

८१८ नाडीघटीखरीमुष्टिनासिकावाताद् धमश्च ॥५।१।१२०॥ एभ्यः कर्मभ्यः पराद् धमतेष्ट्वेश्च खश् स्यात् । नाडीं धमति धयति वा नाडिंधमः । नाडिंधयः । घटिंधमः । घटिंधयः । खरिंधमः । खरिंधयः । मुष्टिंधमः। मुष्टिंधयः । नासिकंधमः । नासिकंधयः । वातंधमः । वातन्धयः। ङ्यन्तनिर्देशस्तदभावे खश्-प्रत्ययनिवृत्त्यर्थः । नाडिं धमति धयति वा नाडिध्मः । नाडिधः । घटध्मः । घटधः । खरध्मः । खरधः ।

८१९ पाणिकरात् ॥ ५।१।१२१ ॥ आभ्यां कर्मभ्यां पराद् धमतेः खश् प्रत्ययः स्यात् । पार्णिं धमति पार्णिंधमः । करंधमः। पाणिकरात् ट्वेरपीति कश्चित् पार्णिंधयः । करंधयः । पाणिधमाः, करंधमाः नाडिंधमाः पन्थान इति तद्योगाद्यथा मञ्चाः क्रोशन्तीति ।

८२० कूलादुद्रुजोद्वहः ॥५।१।१२२॥ कूलात् कर्मणः पराभ्यामुद्रुज् उद्वह् इत्येताभ्यां परः खश् स्यात् । कूलमुद्रुजो गजः । कूलमुद्वहा नदी ।

८२१ वहाभ्रालिहः ॥५।१।१२३॥ वहाभ्राभ्यां कर्मभ्यां परालिहेः खश् स्यात् । वहं लेढि वहंलिहो गौः। अभ्रंलिहः प्रासादः।

८२२ बहुविध्वरुस्तिलात्तुदः ॥५।१॥१२४॥ एभ्यः कर्मभ्यः परात् तुदेः खश् स्यात् । बहुं तुदति बहुतुदं युगम् । विधुंतुदो राहुः । [1]अरुंतुदः पीडाकरः। तिलंतुदः काकः । बहोः केचिदेवेच्छन्ति ।

८२३ ललाटवातशर्धात्तपाजहाकः ॥५।१।१२५॥ ललाटादिभ्यः कर्मभ्यः परेभ्यो यथासंख्यं तप् अज् हाक् इत्येतेभ्यः खश् स्यात् । ललाटं तपति ललाटन्तपः सूर्यः । वातमजन्ति वातमजा मृगाः । शर्द्धंजहा माषाः । खशः शित्त्वादजेर्वी आदेशो न । हाकः ककारो हाङो निवृत्त्यर्थः ।

८२४ असूर्योग्राद् दृशः ॥५।१।१२६॥ असूर्योग्राभ्यां कर्मभ्यां पराद् दृशेः खश् स्यात् । सूर्यमपि न पश्यन्ति असूर्यंपश्या राजदाराः। दृशिना संबद्धस्य नञः सूर्येण सहासामर्थ्येऽपि गमकत्वात् समासः । उग्रं पश्यति उग्रंपश्यः ।

---

१ मोऽन्ते 'संयोगस्य' इति सलोपः।

८२५ इरंमदः ॥५।१।१२७॥ कर्मण इति निवृत्तम्। इरापूर्वान्माद्यतेः खश् श्यभावश्च निपात्यते। इरां सुरां तया माद्यति इति इरंमदः।

८२६ नग्नपलितप्रियान्धस्थूलसुभगाढ्यतदन्ताच्च्व्यर्थेऽच्वेर्भुवः खिष्णुखुकञ् ॥५।१।१२८॥ नग्नादिभ्यः केवलेभ्यस्तदन्तेभ्यश्चाच्व्यन्तेभ्यश्च्व्यर्थे वर्तमानेभ्यः पराद् भवतेः खिष्णुखुकञौ प्रत्ययौ स्याताम्। अनग्नो नग्नो भवति नग्नंभविष्णुः। नग्नंभावुकः। पलितंभविष्णुः। पलितंभावुकः। प्रियंभविष्णुः। प्रियंभावुकः। स्थूलंभविष्णुः। स्थूलंभावुकः। सुभगंभविष्णुः। सुभगंभावुकः। आढ्यंभविष्णुः। आढ्यंभावुकः। तदन्तेभ्यः—अननग्नोऽनग्नो भवति अनग्नंभविष्णुः। अनग्नंभावुकः। असुनग्नः सुनग्नो भवति सुनग्नंभविष्णुः। सुनग्नंभावुकः। च्व्यर्थ इति किम्। नग्नो भविता। अच्वेरिति किम्। आढ्यीभविता। तृच्। उपपदविधिषु तदन्तविधिरनाश्रित इति तदन्तग्रहणम्।

८२७ कृगः खनट् करणे ॥५।१।१२९॥ नग्नादिभ्योऽच्व्यन्तेभ्यश्च्व्यर्थवृत्तिभ्यः पराद् करोतेः करणे खनट् प्रत्ययः स्यात्। करण इति कर्तरीत्यस्यापवादः। अनग्नो नग्नः क्रियतेऽनेन नग्नंकरणं द्यूतम्। एवं पलितंकरणं तैलम्। प्रियंकरणं शीलम्। अन्धंकरणः शोकः। स्थूलंकरणं दधि। सुभगंकरणं रूपम्। आढ्यंकरणं वित्तम्। तदन्तेभ्योऽपि—अननग्नोऽनग्नः क्रियतेऽनेनानग्नंकरणः पटः। सुनग्नंकरणः। अपलितंकरणो रसः। च्व्यर्थ इत्येव। नग्नं करोति द्यूतेन। नात्र प्रकृतिविकारभावो विवक्ष्यते। अच्वेरित्येव। नग्नीकुर्वन्त्यनेन। अत्र खनट्प्रतिषेधसामर्थ्यादनडपि न। नहि नग्नीकरणमित्यत्रानट्खनटो रूपे समासे स्त्रियां वा विशेषोऽस्ति। केचित्तु च्व्यन्तपूर्वादपि खनटमिच्छन्ति। नग्नीकरणं द्यूतम्।

८२८ भावे चाशितादू भुवः खः ॥५।१।१३०॥ आशितशब्दात् पराद् भवतेः भावे करणे चाभिधेये खः प्रत्ययः स्यात्। आशितेन तृप्तेन भूयते भवता आशितंभवो वर्तते भवतः। आशितो भवत्यनेन आशितंभव ओदनः। आशितो भवत्यनयाशितंभवा पञ्चपूली। असरूपत्वादनडपि। आशितस्य भवनम्। न घञ् सरूपत्वात्। आशित इति निर्देशादश्नातेः कर्तरि क्तो दीर्घत्वं च। आङ्पूर्वाद्वा अविवक्षितकर्मकात् कर्तरि क्तः।

८२९ नाम्नो गमः खड्डौ च विहायसस्तु विहः ॥५।१।१३१॥ नाम्नः

पराद् गमेः खड् ड इत्येतौ खश्च प्रत्ययाः स्युः, विहायसश्शब्दस्य च विहादेशः। खड्–तुरो गच्छति तुरंगः। भुजेन भुज इव वा गच्छति भुजङ्गः। प्लवेन प्लुवेन गच्छति प्लवङ्गः, प्लुवङ्गः। पतो गच्छति पतङ्गः। विहायसा गच्छति विहङ्गः। ड–तुरगः। भुजगः। प्लुवगः। विहगः। अत्यन्तगः। सर्वगः। सर्वत्रगः। अनन्तगः। परदारगः। ग्रामगः। गुरुतल्पगः। प्रतीपगः। पुरोगः। पीठगः। तीरगः। अग्रादिभ्यस्तदन्तेभ्योऽपि। अग्रगः। सेनाग्रगः। आदिगः। पङ्क्त्यादिगः। मध्यगः। गृहमध्यगः। अन्तगः। शाखान्तगः। अध्वगः। नगराध्वगः। दूरगः। अदूरगः। पारगः। वेदपारगः। अगारगः। क्षयगारगः। इत्यादि। अथ संज्ञायाम्–खे गच्छति खगः पक्षी। न गच्छत्यगो वृक्षः पर्वतश्च। एवं नगः। उरसा गच्छत्युरगः। पृषोदरादित्वात् सलोपः। पतो गच्छति पतगः पक्षी। पद्भ्यां न गच्छति पन्नं वा गच्छति पन्नगः सर्पः। आपमब्धिं गच्छति आपगा नदी। आशु गच्छत्याशुगः शरः। निम्नगा। समुद्रगा। सततगा इत्यादि। अगो वृषलः शीतेनेत्यसंज्ञायामपि। अथ खः–सुतं सुतेन वा गच्छति सुतंगमो नाम हस्ती। यस्य सौतंगमिः पुत्रः। मितं गच्छति मितंगमोऽश्वः। अमितंगमा हस्तिनी। जनंगमश्चण्डालः। पूर्वंगमाः पन्थानः। हृदयंगमा वाचः। तुरंगमोऽश्वः। भुजंगमः सर्पः। प्लवंगमः कपिः। प्लुवंगमो भेकः। विहंगमः, नभसंगमश्च पक्षी। नभसशब्दोऽकारान्तोऽप्यस्ति। उरंगम इत्यपि कश्चित्। बहुलाधिकाराद् यथाप्रयोगदर्शनं व्यवस्था। डकारोऽन्त्यस्वरादिलोपार्थः।

८३० सुगदुर्गमाधारे ॥ ५।१।१३२ ॥ सुदुर्भ्यां गमेराधारे डः प्रत्ययो निपात्यते। सुखेन दुःखेन च गम्यतेऽस्मिन्निति सुगः, दुर्गः पन्थाः। आधार इति किम्। सुगन्ता। दुर्गन्ता। असरूपत्वादनडपि। सुगमनः। दुर्गमनः। सुगमो दुर्गम इति कर्मणि।

८३१ निर्गो देशे ॥५।१।१३३॥ निस्पूर्वाद् गमेराधारे देशे डो निपात्यते। निर्गम्यतेऽस्मिन् देशे इति निर्गो देशः। देश इति किम्। निर्गमनः।

८३२ शमो नाम्न्यः ॥५।१।१३४॥ शमो नाम्नः पराद् धातोर्नाम्नि संज्ञायामः प्रत्ययः स्यात्। शमित्यव्ययं सुखे वर्तते। तत्र भवति शंभवोऽर्हन्। शं करोति शंकरः। शंगरः। शंवरः। शंवदः। स्वः पश्येत्यादिष्वव्ययानां कर्मत्वदर्शनाच्छमि कर्मणि हेत्वादिष्वपि परत्वात् कृगष्टो बाध्यते। शंकरा नाम परिव्राजिका। शंकरा नाम शकुनिका तच्छीला च। नाम्नीति किम्। शंकरी जिनदीक्षा।

८३३ पार्श्वादिभ्यः शीङः ॥५।१।१३५॥ पार्श्वादिभ्यो नामभ्यः परात् शीङः अः प्रत्ययः स्यात् । पार्श्वाभ्यां शेते पार्श्वशयः । एवं पृष्ठशयः । उदरशयः । दिग्धेन सह शेते दिग्धसहशयः । दिग्धसहात् तृतीयासमासात् शीङोऽकारः । पश्चादुपपदसमासः। बहुवचनाद् यथादर्शनमन्येभ्योऽपि । अनाधारार्थ आरम्भः।

८३४ ऊर्ध्वादिभ्यः कर्तुः ॥५।१।१३६॥ ऊर्ध्वादिभ्यो नामभ्यः कर्तृवाचिभ्यः परात् शीङः अः प्रत्ययः स्यात् । ऊर्ध्वः शेते ऊर्ध्वशयः । एवमुत्तानशयः। बहुवचनं प्रयोगानुसरणार्थम् ।

८३५ आधारात् ॥ ५।१।१३७ ॥ आधारवाचिनो नाम्नः परात् शीङः अप्रत्ययः स्यात् । खे शेते खशयः । गर्तशयः । गुहाशयः । हृच्छयः । बिलेशयः । मनसिशयः । कुशेशयः इति सप्तम्या अलुप् । गिरिश इति संज्ञायां लोमादित्वाच्छः । क्रियार्थत्वे तु गिरिशय इति भवितव्यम् ।

८३६ चरेष्टः ॥ ५।१।१३८ ॥ आधारवाचिनो नाम्नः पराच्चरेष्टः प्रत्ययः स्यात् । कुरुषु चरति कुरुचरः । मद्रचरः । वनेचरः । निशाचरः । टकारो ङ्यर्थः। कुरुचरी । मद्रचरी । आधारादित्येव । कुरूँश्चरति । पञ्चालाँश्चरति ।

८३७ भिक्षासेनादायादात् ॥५।१।१३९॥ अनाधारार्थ आरम्भः। एभ्यः पराच्चरेष्टः स्यात् । भिक्षां चरति भिक्षाचरः । भिक्षाचरी । सेनां चरति परीक्षते सेनाचरः तापसव्यञ्जनः । सेनया वा चरति सेनाचरः । आदाय गृहीत्वा चरति आदायचरः । आदानं कृत्वा चरतीत्यर्थः । किमादायेत्यविवक्षैव । एभ्य इति किम् । कुरूँश्चरति ।

८३८ पुरोऽग्रतोऽग्रे सर्तेः ॥ ५।१।१४० ॥ एभ्यो नामभ्यः परात् सर्तेष्टः स्यात् । पुरः सरति पुरःसरः, पुरःसरी । अग्रतः सरति अग्रतःसरः । आद्यादित्वात् तस् । अग्रे सरति अग्रेसरः। सप्तम्यलुप् । एकारान्तमव्ययं वा । सूत्रनिपातनाद्वैकारः । तत्राग्रं सरति अग्रेण वा सरति अग्रेसरः इत्यपि ।

८३९ पूर्वात्कर्तुः ॥ ५।१।१४१ ॥ पूर्वशब्दात् कर्तृवाचिनः परात् सरतेष्टः स्यात् । पूर्वः सरति पूर्वसरः । पूर्वी भूत्वा सरतीत्यर्थः । कस्मात् पूर्व इति अविवक्षैव । पूर्वसरी । कर्तुरिति किम् । पूर्वं देश सरति पूर्वसारः ।

८४० स्थापास्नात्रः कः ॥५।१।१४२॥ नाम्नः परेभ्य एभ्यः कः प्रत्ययः स्यात् । समे तिष्ठति समस्थः । विषमस्थः । कूटस्थः । कपित्थः । दधित्थः । महित्थः । अश्वत्थः । कुलत्थः । द्विपः । पादपः । कच्छपः । अनेकपः । कटाहपः । नदीष्णः । आतपत्रम् । धर्मत्रम् । परत्वादयं 'शमो नाम्न्यः' इत्यमत्ययं बाधते । शंस्थो नाम कश्चित् । संस्था इत्यसरूपत्वात् किप् ।

८४१ शोकापनुदतुन्दपरिमृजस्तम्बरमकर्णेजपं प्रियालसहस्ति-सूचके ॥५।१।१४३॥ शोकापनुदादयः शब्दा यथासंख्यं प्रियादिष्वर्थेषु कप्रत्ययान्ता निपात्यन्ते । शोकमपनुदति शोकापनुदः प्रियः । पुत्रादिरानन्दकर एवमुच्यते । तुन्दं परिमार्ष्टि तुन्दपरिमृजोऽलसः । स्तम्बे रमते स्तम्बेरमो हस्ती । कर्णे जपति कर्णेजपः सूचकः । एष्विति किम् । शोकापनोदो धर्माचार्यः । तुन्दपरिमार्ज आतुरः । स्तम्बे रन्ता पक्षी । कर्णे जपिता मन्त्री ।

८४२ मूलविभुजादयः ॥५।१।१४४॥ मूलविभुजादयः शब्दाः कप्रत्ययान्ता नियतार्थधातूपपदा यथाशिष्टप्रयोगं निपात्यन्ते । मूलानि विभुजति मूलविभुजो रथः । उर्व्यां रोहति उर्वीरुहो वृक्षः । कौ मोदते कुमुदं कैरवम् । महीं धरति महीध्रः शैलः । उषसि बुध्यते उषर्बुधोऽग्निः । अपो बिभर्ति अब्भ्रं मेघः । सरसि रोहति सरसिरुहं पद्मम् । नखानि मुञ्चन्ति नखमुचानि धनूंषि । काकेभ्यो गूहनीयाः काकगूहनीयास्तिलाः । धर्माय प्रददाति धर्मप्रदः । एवं कामप्रदः । शब्दप्रदः । शास्त्रेण प्रजानाति शास्त्रप्रज्ञः । एवमागमप्रज्ञः ।

८४३ दुहेर्डुघः ॥५।१।१४५॥ नाम्नः परादुहेर्डुघः प्रत्ययः स्यात् । कामान् दुग्धे पूरयति कामदुघा । धर्माय दुग्धे धर्मदुघा । असरूपत्वात् किप् । कामधुक् । डकारोऽन्त्यस्वरादिलोपार्थः ।

८४४ भजो विण् ॥५।१।१४६॥ नाम्नः पराद् भजेर्विण् प्रत्ययः स्यात् । अर्धं भजते अर्धभाक् । पादभाक् । दूरभाक् । प्रभाक् । विभाक् । इकार उच्चारणार्थः । वकारो विण्किपोः सारूप्यार्थस्तेनात्र विषये किब् न ।

८४५ मन्वन्क्वनिप्विच् क्वचित् ॥५।१।१४७॥ नाम्नः परात् धातोरेते प्रत्ययाः क्वचिल्लक्ष्यानुसारेण स्युः । मन्–इन्द्रं शृणाति इन्द्रशर्मा । सुशर्मा । सुवर्मा ।

सुदामा । अश्वत्थामा । क्वचिद्ग्रहणात् केवलादपि । शर्म । वर्म । हेम । दामा । पामा । वन्–भूरिदावा । घृतपावा ।

८४६ वन्याङ्पञ्चमस्य ॥ ४।२।६५ ॥ धातोः पञ्चमस्य वनि प्रत्यये परे आकारः स्यात् । आङिति आकारान्तरम्[1]लेषादननुनासिकोऽनुनासिकश्चायमादेशः । 'लि लौ' इति ज्ञापकादननुनासिक एव स्यात् । जन्–विजावा । खन्–विखावा । क्रम्–दधिक्रावा । गम्–अग्रेगावा । घुण्–घ्वावा । घूर्ण्–घूरावा । ओणृ–अवावा । इवु व्याप्तौ च । वनि 'य्वोः प्वव्यञ्जने लुक्' इति वलोपे नकारस्यात्वे यावा । पुनराग्रहणं ताविति नवेति च निवृत्त्यर्थम् । ङित्करणं घ्वावेत्यादौ गुणनिषेधार्थम् । क्वनिप्–प्रातरित्वा । प्रातरित्वानौ । सुधीवा । सुपीवा । केवलादपि । कृत्वा । कृत्वानौ । धीवा । पीवा । विच्–कीलालपाः। शुभंयाः। पाप्मरेट्। केवलादपि। रेट् । रोट् । वेट् । जागः । ककारपकारौ कित्पित्कार्यार्थौ ॥

८४७ क्विप् ॥५।१।१४८॥ नाम्नः पराद् धातोः क्विप् प्रत्ययः स्यात् क्वचित्। उखेन उखया वा स्रंसते उखास्रत्। वहात् भ्रश्यति वहाभ्रट्। 'धञ्युपसर्गस्य बहुल'मिति बहुलग्रहणादुखवहयोर्दीर्घः । पर्णानि ध्वंसते पर्णध्वत् । शकान् ह्वयति शकहूः । परिव्ययति परिवीः । यवलूः । खलपूः । अक्षद्यूः । मित्रभूः । प्रतिभूः । कटचिकीः। केवलादपि । पाः । वाः। कीः गीः। ऊः । लूः। क्रुङ् । पक् ।

८४८ गमां कौ ॥४।२।५८॥ एषां गमादीनां यथादर्शनं कौ क्विङिति प्रत्ययेऽन्तस्य लुक् स्यात्। बहुवचनं प्रयोगानुसरणार्थम्। जनं गच्छति जनंगत्। कलिङ्गत्। यम्–संयत्, वियत् । तन्–परीतत्, उपातत् । सन्–सुसत् । मन्–सुमत् । वन्–सुवत् । क्षण्–सुक्षत्, विक्षत् । अग्रेगूरित्यौणादिको डूः ।

८४९ क्वौ ॥ ४।४।१२० ॥ शासोऽवयवस्यासः स्थाने काविसादेशः स्यात् । आर्यशीः । मित्रशीः । आङ इतीसादेशे आशीः । सदिस्वृद्विषद्रुहदुहयुजविदभिदछिदजिनीराजिभ्यः (क्विप्) । दिवि सीदति दिविषत् । सप्तम्या अलुप् भीरुष्ठानादित्वात् षत्वं च । द्युसत् । अन्तरिक्षसत् । सभासत् । प्रसीदति प्रसत् । उपसत् । अण्डं सूते अण्डसूः। शतमूः। प्रमूः। मित्रं द्वेष्टि मित्रद्विट्। पद्विट्। द्विषो जेघ्रीयिषीष्ट वः। मित्राय द्रुह्यति मित्रध्रुक्। मध्रुक्। विध्रुक्। गां दोग्धि गोधुक्। कामधुक्। प्रधुक्। अश्वं युनक्ति युज्यते वा अश्वयुक्। प्रयुक्। युङ्। युञ्जौ। युञ्जः। तत्त्ववित्। वेदवित्।

भवित्। निर्विविदे विदां वरः। विदेरविशेषेण ग्रहणम्। लाभार्थान्नेच्छन्त्येके। काष्ठं भिनत्ति काष्ठभित्। बलभित्। गोत्रभित्। रज्जुं छिनत्ति रज्जुच्छित्। तमश्छिद्। भवच्छित्। प्रच्छित्। शत्रुं जयति शत्रुजित्। प्रसेनजित्। कर्मजित्। प्रजित्। अभिजित्। सेनां नयति सेनानीः। अग्रणीः। ग्रामणीः। प्रणीः। नीः। विश्वस्मिन् राजते विश्वाराट्। विश्वस्य वसुराटोरिति दीर्घः। राजराट्। सम्राट्। विराट्। राट्। अञ्चेः–दध्यञ्चति दध्यङ्। देवमञ्चति देवय्यङ्। विश्वय्यङ्। तिर्यङ्। प्राङ्। प्रत्यङ्। केवलान्न। तथा ऋतौ ऋतुम् ऋतवे ऋतुप्रयोजनो वा यजते ऋत्विग् याजकः। 'ऋत्विज्' इत्यादिना गत्वम्। धृष्णोति दधृक् प्रगल्भः। दधृगिति निर्देशाद् द्वित्वम्। उत्स्निह्यति उन्नह्यति वा उष्णिग् छन्दः। उष्णिगिति निर्देशाद् दलोपषत्वादि। कथं दिश्यते दिक् सृज्यते स्रक्? क्रुत्संपदादित्वात् क्विप्। ककारः कित्कार्यार्थः। पकारः पित्कार्यार्थः। इकार उच्चारणार्थः।

८६० छदेरिस्मन्त्रट्क्वौ ॥ ४।२।३३ ॥ छदेरिस्मन्त्रट्क्विप्परे णौ ह्रस्वः स्यात्। इसि–छदिः। मनि–छद्म। त्रटि–छत्रम्। छत्री। क्विपि–उपच्छत्, धामच्छत्। त्रडिति किम्। त्रे मा भूत् छात्रः।

८६१ स्पृशोऽनुदकात् ॥ ५।१।१४९ ॥ उदकवर्जितान्नाम्नः परात् स्पृशेः क्विप् प्रत्ययः स्यात्। घृतं स्पृशति घृतस्पृक्। एवं मर्मस्पृक्। व्योमस्पृक्। मन्त्रेण स्पृशति मन्त्रस्पृक्। कर्मोपपदादेवेच्छन्त्यन्ये। अनुदकादिति किम्। उदकस्पर्शः। उदकेन स्पृष्टा। अनुदक इति पर्युदासाश्रयणादुदकसदृशमनुपसर्गं नाम गृह्यते। तेनेह न। उपस्पृशति।

८६२ अदोऽनन्नात् ॥ ५।१।१५० ॥ अन्नवर्जितान्नाम्नः पराददेः क्विप् प्रत्ययः स्यात्। आममत्ति आमात्। सस्यात्। अनन्नादिति किम्। अन्नादः। बहुलाधिकारात् कणादः। पिप्पलादः। क्विप् सिद्धोऽन्नप्रतिषेधार्थं वचनम्।

८६३ क्रव्यात्क्रव्यादावामपक्वादौ ॥ ५।१।१५१ ॥ क्रव्यात् क्रव्याद इत्येतौ शब्दौ यथासंख्यं क्विबण्न्तौ साधू स्याताम्, यद्यामात्पक्वाच्चाभिधेयौ। क्रव्यमत्ति क्रव्यात् आममांसभक्षः। क्रव्यादः पक्वमांसभक्षः। क्रव्याद इति नेच्छन्त्यन्ये। आममांसवाच्यपि क्रव्यशब्दः क्रव्याद इति निपातनसामर्थ्यात् वृत्तौ पक्वमांसे वर्तते।

अथवा कृत्तविकृत्तशब्दस्य पक्वमांसार्थस्य पृषोदरादित्वात् क्रव्यादेशः। सिद्धौ प्रत्ययौ विषयनियमार्थं वचनम्।

८५४ त्यदाद्यन्यसमानादुपमानाद् व्याप्ये दृशष्टक्सकौ च ॥५।१।१५२॥ त्यदादेरन्यशब्दात् समानशब्दाच्चोपमानभूताद् व्याप्ये कर्मणि वर्तमानात् पराद् दृशेर्व्याप्य एव टक्सकौ किप् च प्रत्ययाः स्युः। त्यदादि-स्य इव दृश्यते त्यादृशः, त्यादृशी। त्यादृक्षः। त्यादृक्षा। त्यादृक्। एवं तादृशः। तादृशी। तादृक्षः। तादृक्षा। तादृक्। अन्य-अन्यादृशः। अन्यादृशी। अन्यादृक्षः। अन्यादृक्षा। अन्यादृक्। समान-सदृशः। सदृशी। सदृक्षः। सदृक्षा। सदृक्। केचित्सकमपि टितं मन्यन्ते। तन्मते त्यादृक्षीत्याद्येव। एभ्य इति किम्। वृक्ष इव दृश्यते। उपमानादिति किम्। स दृश्यते। व्याप्ये वर्तमानादिति किम्। तेनेव दृश्यते। तस्मिन्निव दृश्यते। अस्मिन्निव दृश्यते। व्याप्य एवेति किम्। तमिव पश्यन्तीत्यत्र कर्तरि न। वचनभेदान्न यथासंख्यम्।

८५५ कर्तुर्णिन् ॥ ५।१।१५३॥ कर्तृवाचिन उपमानभूतान्नाम्नः पराद् धातोर्णिन् प्रत्ययः स्यात्। कृत्त्वात् कर्तरि। उष्ट्र इव क्रोशति उष्ट्रक्रोशी। ध्वाङ्क्ष-रावी। खरनादी। सिंहनदी। कर्तुरिति किम्। शालीनिव क्रोद्रवान् भुङ्क्ते। उष्ट्र-मिवाश्वमारोहति। उपमानभूतादित्येव। उष्ट्रः क्रोशति। अशीलार्थो जात्यर्थश्च आरम्भः।

८५६ अजातेः शीले ॥५।१।१५४॥ अजातिवाचिनो नाम्नः पराद् धातोः शीलेऽर्थे वर्तमानात् णिन् प्रत्ययः स्यात्। उष्णं भुङ्क्ते इत्येवंशीलः उष्णभोजी। शीतभोजी। अजातेरिति प्रसज्यप्रतिषेधादसत्ववाचिनोऽप्युपसर्गाद् भवति। उदा-सरतीत्येवंशील उदासारी। प्रत्यासारी। प्रस्थायी। प्रतिबोधी। प्रयायी। प्रति-यायी। उदाङ्प्रत्याङ्भ्यां परं सर्तिं वर्जयित्वा अन्यस्माद् धातोरुपसर्गपरान्नेच्छ-न्त्यन्ये। अजातेरिति किम्। ब्राह्मणानामन्त्रयिता। शालीन् भोक्ता। प्रभोक्ता उपभोक्ता संभोक्तेति बहुलाधिकारान्न। शील इति किम्। उष्णभोज्ञ आतुरः।

८५७ साधौ ॥५।१।१५५॥ नाम्नः परात् साधावर्थे वर्तमानाद् धातोर्णिन् प्रत्ययः स्यात्। अशीलार्थ आरम्भः। साधु करोति साधुकारी। साधुदायी। चारुनर्ती। सुष्ठुगामी। बहुलाधिकारात् साधु वादयति वादको वीणाम् साधु गायतीत्यादौ न।

८५७ **ब्रह्मणो वदः** ॥५।१।१५६॥ ब्रह्मन्शब्दात् पराद् वदेर्णिन् प्रत्ययः स्यात्। ब्रह्म ब्रह्माणं वा वदति ब्रह्मवादी। अयमप्यशीलार्थ आरम्भो जात्यर्थोऽसरूपविधिनिवृत्त्यर्थश्च।

७५९ **व्रताभीक्ष्ण्ये** ॥ ५।१।१५७ ॥ व्रतं शास्त्रितो नियमः। आभीक्ष्ण्यं पौनःपुन्यम्। तयोर्गम्यमानयोर्नाम्नः पराद् धातोर्णिन् प्रत्ययः स्यात्। व्रते—अश्राद्धं भुङ्क्ते अश्राद्धभोजी। अलवणभोजी। स्थण्डिलशायी। स्थण्डिलवर्ती। वृक्षमूलवासी। पार्श्वशायी। तदन्यवर्जनमिह व्रतं गम्यते। आभीक्ष्ण्ये—पुनः पुनः क्षीरं पिबन्ति क्षीरपायिण उशीनराः। तक्रपायिणः सौराष्ट्राः। कषायपायिणो गान्धाराः। सौवीरपायिणो बाह्लीकाः। व्रताभीक्ष्ण्य इति किम्। स्थण्डिले शेते स्थण्डिलशयः। बहुलाधिकारादाभीक्ष्ण्येऽपीह न। कुल्माषखादाश्चोलाः। अशीलार्थं जात्यर्थं च वचनम्।

८६० **करणाद्यजो भूते** ॥५।१।१५८॥ करणवाचिनो नाम्नः पराद् भूतेऽर्थे वर्तमानाद् यजेर्णिन् प्रत्ययः स्यात् अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी। भवति हि सामान्यविशेषयोर्भेदविवक्षायां सामान्ययजौ विशेषयजिरग्निष्टोमः करणम्। भूत इति किम्। अग्निष्टोमेन यजते। करणादिति किम्। गुरूनिष्टवान्।

८६१ **निन्द्ये व्याप्यादिन् विक्रियः** ॥५।१।१५९॥ व्याप्यान्नाम्नः परात् विपूर्वात् क्रीणातेर्भूतेऽर्थे वर्तमानात् कुत्सिते कर्तरीन् प्रत्ययः स्यात्। सोमं विक्रीतवान् सोमविक्रयी, घृतविक्रयी, तैलविक्रयी ब्राह्मणः। निन्द्य इति किम्। धान्यविक्रायः, घृतविक्रायः, तैलविक्रायः वणिक्। व्याप्यादिति किम्। ग्रामे विक्रीतवान्। भावेऽलन्तस्य मत्वर्थीयेनेना सिद्धयति कुत्सायाम् साधनार्थं वचनम्।

८६२ **हनो णिन्** ॥५।१।१६०॥ व्याप्यान्नाम्नः पराद् भूतेऽर्थे वर्तमानात् हन्तेर्निन्द्ये कर्तरि णिन् प्रत्ययः स्यात्। पितृव्यं हतवान् पितृव्यघाती। मातुलघाती। असरूपत्वादणपि। पितृव्यघातः। मातुलघातः। केचित्त्वसरूपविधिं नेच्छन्ति। निन्द्य इत्येव। शत्रुं हतवान् शत्रुघातः। चौरघातः। व्याप्यादित्येव। दण्डेन हतवान्। यत्रन्तान्मत्वर्थीयेनेना सिद्धे भूतकुत्साभ्यामन्यत्र शत्रुघातीत्यादौ मत्वर्थीयनिवृत्त्यर्थं वचनम्। अन्यत्रापीच्छत्यन्यः। एवं पूर्वसूत्रेऽपि।

८६३ **ब्रह्मभ्रूणवृत्रात् क्विप्** ॥ ५।१।१६१ ॥ ब्रह्मादिभ्यः कर्मभ्यः पराद्

भूतेऽर्थे वर्तमानाद्धन्तेः किप् प्रत्ययः स्यात् । ब्रह्माणं हतवान् ब्रह्महा । भ्रूणहा । किवित्यनेनैव सिद्धे नियमार्थं वचनम् । चतुर्विधश्चात्र नियमः । ब्रह्मादिभ्य एव हन्तेर्भूते किप् नान्यस्मात् । पुरुषं हतवान् पुरुषघातः । मधुहा । अहिहा । गोघ्नहा । हिमहा । तमोपहा । असुरहा । आखुहा इत्यादिषु वर्तमानभविष्यतोः कालमात्रे वा 'किप्' इत्यनेनैव किप् । तथा ब्रह्मादिभ्यो हन्तेरेव भूते नान्यस्माद् धातोः किप् । ब्रह्माधीतवान् ब्रह्माध्याय इत्यणेव न तु किप् । ब्रह्मविदादयस्तु भूताविवक्षायाम् । तथा ब्रह्मादिभ्यो हन्तेर्भूते किवेव नान्यः प्रत्ययः । ब्रह्माणं हतवान् ब्रह्महा इति किवेव भवति नाण्णिनौ । ब्रह्मघ्नादयस्तु कालसामान्येन 'ब्रह्मादिभ्यः' इति टक्प्रत्यये साधवः । कथं वृत्रस्य हन्तुः कुलिशमिति ? केवलादेव हन्तेस्तुच् पश्चाद् वृत्रेण संबन्धः । 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' इति किपाऽण्णादिरेव बाध्यते न क्तक्तवतू । तथा ब्रह्मादिभ्यो हन्तेर्भूत एव काले किप् नान्यस्मिन् । ब्रह्माणं हन्ति हनिष्यति वा ब्रह्मघात इत्यणेव । तदेतत्सर्वं बहुलाधिकाराल्लभ्यते ।

८६४ कृगः सुपुण्यपापकर्ममन्त्रपदात् ॥५।१।१६२॥ सुशब्दात् पुण्यादिभ्यश्च कर्मभ्यः परात् करोतेर्भूतेऽर्थे वर्तमानात् किप् स्यात् । सुष्ठु कृतवान् सुकृत् । पुण्यं कृतवान् पुण्यकृत् । पापकृत् । कर्मकृत् । मन्त्रकृत् । पदकृत् । इदमपि नियमार्थं वचनम् । त्रिविधश्चात्र नियमः । एभ्यः कृग एव भूते किप् नान्यस्माद् धातोः । मन्त्रमधीतवान् मन्त्राध्याय इत्यण्क्ता एव भवन्ति न किप् । मन्त्रवित्, पापनुत् इत्यादौ तु भूताविवक्षायां किप् । तथा एभ्यः कृगो भूत एव किप् । इह न । कर्म करोति करिष्यति वा कर्मकारः, मन्त्रकारः । पदकारः । तथा एभ्यः परात् कृगो भूते किप् एव नान्यः प्रत्ययः । तेन कर्म कृतवान् कर्मकार इति न । एभ्य एव भूते कृगः किविति धातुनियमो नेष्यते । तेन शास्त्रकृत् तीर्थकृत् वृत्तिकृत् सूत्रकृत् भाष्यकृदित्यादयः सिद्धाः ।

८६५ सोमात्सुगः ॥५।१।१६३॥ कर्मणः परात् सुनोतेर्भूतेऽर्थे वर्तमानात् किप् स्यात् । सोमं सुतवान् सोमसुत् । अयमपि नियमार्थो योगः । चतुर्विधश्चात्रापि नियमः । सोमादेवेति नियमात् सुरां सुतवान् सुरासाव इत्यण् । सुरासुदिति भूताविवक्षायाम् । सुग एवेति नियमात् सोमं पीतवान् सोमपा इति विच् । भूत एवेति नियमात् सोमं सुनोति सोष्यति वा सोमसाव इत्यण् । किवेवेति नियमात् सोमं सुतवान् इत्यण् न ।

८६६ अग्नेश्चेः ॥५।१।१६४॥ अग्नेः कर्मणः पराचिनोतेर्भूतेऽर्थे वर्तमानात् क्विप् स्यात् । अग्निं चितवान् अग्निचित् । अत्रापि चतुर्विधो नियमः। अग्नेरेवेति नियमात् कुड्यं चितवान् कुड्यचाय इत्यण् । चरेरेवेति नियमादग्निं कृतवान् अग्निकारः। भूत एवेति नियमादग्निं चिनोति चेष्यति वाग्निचायः। क्विबेवेति नियमादग्निं चितवानित्यण् न ।

८६७ कर्मण्यन्यर्थे ॥५।१।१६५॥ कर्मणः पराद् भूतेऽर्थे वर्तमानाच्चिनोतेः कर्मणि कारकेऽन्यर्थेऽभिधेये क्विप् स्यात् । श्येन इव चीयते स्म श्येनचित् । एवं कङ्कचित् । रथचक्रचित् । अन्यर्थं इष्टकचय उच्यते । बहुलाधिकारात् रूढिविषय एवायं द्रष्टव्यः । केचित्तु संज्ञाशब्दत्वात् कालत्रयेऽप्ययं भवतीत्याहुः । श्येन इव चीयते चितश्चेष्यते वा श्येनचित् ।

८६८ दृशः क्कनिप् ॥५।१।१६६॥ कर्मणः पराद् दृशो भूतेऽर्थे वर्तमानात् क्कनिप् प्रत्ययः स्यात् । मेरुं दृष्टवान् मेरुदृश्वा । विश्वदृश्वा । बहुदृश्वा । परलोकदृश्वा । सामान्यसूत्रेण क्कनिपि सिद्धे भूतकाले प्रत्ययान्तरबाधनार्थं वचनम् ।

८६९ सहराजभ्यां कृञ्युधेः ॥५।१।१६७॥ सहशब्दात् राजन्शब्दाच्च कर्मणः परात् करोतेर्युधेश्च भूतेऽर्थे वर्तमानात् क्कनिप् प्रत्ययः स्यात् । सह कृतवान् सहकृत्वा । सहकृत्वानौ । सह युद्धवान् सहयुध्वा । सहयुध्वानौ । राजानं कृतवान् राजकृत्वा । राजानं योधितवान् राजयुध्वा । युधिरन्तर्भूतण्यर्थः सकर्मकः। कर्मण इत्येव । राज्ञा युद्धवान् । प्रत्ययान्तरबाधनार्थोऽयमप्यारंभः ।

८७० अनोर्जनेर्डः ॥ ५।१।१६८ ॥ कर्मणः परादनुपूर्वाज्जनेर्भूतेऽर्थे वर्तमानाड्डः प्रत्ययः स्यात् । पुमांसमनुजातः पुमनुजः । स्त्र्यनुजः । आत्मानुजः। अनुपूर्वो जनिः जननोपसर्जनायां प्राप्तौ वर्तमानः सकर्मकः।

८७१ सप्तम्याः ॥५।१।१६९॥ सप्तम्यन्ताद् नाम्नः पराद् भूतेऽर्थे जनेर्डः स्यात् । उपसरे जातः उपसरजः । मन्दुरायां मन्दुरे वा जातः मन्दुरजः । । अप्सु जातम् अप्सुजम्, अब्जम् ।

८७२ अजातेः पञ्चम्याः ॥५।१।१७०॥ पञ्चम्यन्तादजातिवाचिनो नाम्नः पराद् भूतेऽर्थे जनेर्डः स्यात् । बुद्धेर्जातो बुद्धिजः संस्कारः । संस्कारजा स्मृतिः ।

संतोषजं सुखम् । कौशल्याया जातः कौशल्याजः । संज्ञाशब्दोऽत्रोपपदम् । अजातेरिति किम् । हस्तिनो जातः । अश्वाज्जातः ।

८७३ क्वचित् ॥५।१।१७१॥ उक्तादन्यत्रापि क्वचिल्लक्ष्यानुसारेण डः स्यात् । उक्तान्नाम्नोऽन्यतोऽपि । किं जातेन किंजः । केन जातः किंजोऽनिर्ज्ञातपितृकः । अलं जातेनालंजः । द्विर्जातो द्विजः । न जातोऽजः । अधिजातोऽधिजः । उपजः । परिजः । प्रजाताः प्रजाः । अभिजः । अकर्मणोऽपि, अनुजः । जातेरपि, ब्राह्मणजः पशुवधः। क्षत्रियजं युद्धम् । स्त्रीजमनृतम् । उक्तादधातोरन्यतोऽपि । ब्रह्मणि जीनवान् ब्रह्मज्यः । उक्तान्नाम्नो धातोश्चान्यतोऽपि । वरमाहतवान् वराहः। उक्तान्नाम्नो धातोः कारकाच्चान्यतोऽपि । परिखाता परिखा । आखाता आखा । उपखाता उपखा । नामधातुकालान्यत्वे–मित्रं ह्वयति मित्रह्वः । अणोऽपवादो डः । धातुकारकान्यत्वे–पटे हन्यते स्म पटहः । धातुकालान्यत्वे–वाचंयरति वाचंयो हंसः । नामकारकान्यत्वे–पुंसानुजातः पुंसानुजः। नामाभावे–उक्तधातुकालान्यत्वे–अटति अतति वा अः । कायति कामयते वा कः । भातीति भं नक्षत्रम् । नामाभावे उक्तधातुकालकारकान्यत्वे च खन्यत इति खम् ।

८७४ **सुयजोर्ङ्वनिप्** ॥५।१।१७२॥ सुनोतेर्यजतेश्च भूतार्थवृत्तेर्ङ्वनिप् स्यात् । सुतवान् सुत्वा । सुत्वानौ । इष्टवान् यज्वा । यज्वानौ । कनिप्वनभ्यां सिद्धे भूते नियमार्थं वचनम् । मन्त्रादिसूत्रस्थक्वचिद्ग्रहणस्यैव प्रपञ्चः। ङकारो गुणनिषेधार्थः। पकारः पित्कार्यार्थः । इकार उच्चारणार्थः ।

८७५ **जृषोऽतृः** ॥५।१।१७३॥ जीर्यतेर्भूतार्थवृत्तेरतृ प्रत्ययः स्यात् । जीर्यति स्म जरन्। जरती । असरूपत्वात्। जीर्णः। जीर्णवान् । ऋकारो दीर्घत्वप्रतिषेधार्थः।

८७६ **क्तक्तवतू** ॥५।१।१७४॥ धातोर्भूतेऽर्थे वर्तमानात् क्तक्तवतू प्रत्ययौ स्याताम् । क्रियते स्म कृतः। करोति स्म कृतवान् । प्रकृतः कटं देवदत्तः। प्रकृतवान् कटं देवदत्तः । अत्र समुदायस्याभूतत्वेऽपि कटैकदेशे कटत्वोपचारात् तस्य च निर्वृत्तत्वाद् भूत एव धात्वर्थ इत्यादिकर्मण्यनेनैव क्तक्तवतू सिद्धौ ।

८७७ **श्लिषशीङ्स्थासवसजनरुहजृभजेः क्तः** ॥ ५।१।९ ॥ एभ्यः क्तप्रत्ययो यो विहितः स कर्तरि वा स्यात् । श्लिष्टः । आश्लिष्टः कान्तां कामुकः ।

आश्लिष्टा कान्ता कामुकेन । आश्लिष्टं कामुकेन । शीङ्–अतिशयितो गुरुं शिष्यः। अतिशयितो गुरुः शिष्येण । अतिशयितं शिष्येण । स्था–उपस्थितो गुरुं शिष्यः । उपस्थितो गुरुः शिष्येण । उपस्थितं शिष्येण । आस्–उपासितो गुरुं शिष्यः । उपासितो गुरुः शिष्येण । उपासितं शिष्येण । वस्–अनूषितो गुरुं भवान् । अनूषितोगुरुर्भवता। अनूषितं भवता। जन्–अनुजातो माणवको माणविकाम्। अनुजाता माणविका माणवकेन । अनुजातं माणवकेन । विजाता वत्सं गौः। विजातो वत्सो गवा । विजातं गवा । रुह्–आरूढो वृक्षं भवान् । आरूढो वृक्षो भवता । आरूढं भवता । जॄ–अनुजीर्णो वृषलीं चैत्रः । अनुप्राप्य जीर्ण इत्यर्थः । अनुजीर्णा वृषली चैत्रेण । अनुजीर्णं चैत्रेण । भज्–विभक्ता भ्रातरो रिक्थम् । विभक्तं भ्रातृभिः रिक्थम् । विभक्तं भ्रातृभिः । अकर्मका अपि हि धातव उपसर्गसंबन्धात् सकर्मका भवन्तीति शीङादिग्रहणम् । अन्यथाऽकर्मकत्वादुत्तरेणैव सिद्धम् । श्लिषभजी केवलावपि सकर्मकौ ।

८७८ **आरम्भे** ॥५।१।१०॥ आरम्भे आदिकर्मणि भूतादित्वेन विवक्षिते वर्तमानाद् धातोर्यः क्तो विहितः स कर्तरि वा स्यात् । प्रकृतः कटं भवान् । प्रकृतः कटो भवता । प्रभुक्त ओदनं चैत्रः । प्रभुक्त ओदनश्चैत्रेण । प्रभुक्तं चैत्रेण ।

८७९ **गत्यर्थाकर्मकपिबभुजेः** ॥५।१।११॥ भूतादौ यः क्तो विहितः स गत्यर्थेभ्योऽकर्मकेभ्यश्च धातुभ्यः पिबभुजिभ्यां च कर्तरि वा स्यात् । गत्यर्थ–गतो मैत्रो ग्रामम् । गतो मैत्रेण ग्रामः । गतं मैत्रेण । यातास्ते ग्रामम् । यातस्तैर्ग्रामः । यातं तैः । अकर्मक–आसितो भवान् । शयितो भवान् । आसितं भवता । शयितं भवता । सकर्मका अपि अविवक्षितकर्माणोऽकर्मकाः । तेन पठितो भवान् । एवं प्रख्यातः । विदितः । अविवक्षितकर्मभ्यो नेच्छन्त्येके । तन्मते कृतो देवदत्तः, हृतो देवदत्तः इत्यादि कर्तरि न । कालभावाध्वभिश्च कर्मभिः सकर्मका अप्यकर्मका उक्ताः । तेन त्रैरूप्यं भवति । सुप्तो भवान् मासम् । सुप्तो भवता मासः । सुप्तं भवता मासम् । एवमोदनपाकं सुप्तो भवान् इत्यादि । पिब–पयः पीता गावः। इदं गोभिः पीतम् । इह गोभिः पीतम् । भुजि–अन्नं भुक्तास्ते । इदं तैर्भुक्तम् । इह तैर्भुक्तम् ।

८८० **अद्यर्थाच्चाधारे** ॥५।१।१२॥ अद्यर्थात् आहारार्थात् धातोर्गत्यर्थाकर्मकपिबभुजेश्च यः क्तः स आधारे वा स्यात् । इदमेषां जग्धम् । इदं तैर्जग्धम् ।

इह तैर्जग्धम् । इदमेषामभ्यवहृतम् । इदं तैरभ्यवहृतम् । इदं तेषामशितम् । इदं तैराशितम् । आरम्भे तु कर्तर्यपि भवति । इह ते अन्नं प्राशिताः । इह ते मधु प्रलीढाः । गत्यर्थादिभ्यः खल्वपि । इदं तेषां यातम् । इदमहेः सृप्तम् । इदमेषामासितम् । इदमेषां शयितम् । इदं गवां पीतम् । इदं तेषां भुक्तम् । पक्षे कर्तृकर्मभावेषु पूर्वाण्येवोदाहरणानि ।

८८१ ह्लादो ह्लद् क्तयोश्च ॥४।२।६७॥ ह्लादतेः क्तक्तवत्वोः क्तौ च परतो ह्लद् आदेशः स्यात् । ह्लन्नः । ह्लन्नवान् । प्रह्लन्नवान् । अत्र 'रदादमूर्छमद' इत्यधस्तनसूत्रेण दकारस्य नकारः। क्तयोश्चेति किम् । ह्लादित्वा ।

८८२ ऋल्वादेरेषां तो नोऽप्रः ॥४।२।६८॥ पूर्वर्जितादृकारान्ताद् धातोर्ल्वादिभ्यश्च परेषां क्तिक्तक्तवतूनां तकारस्य नकार आदेशः स्यात् । तॄ–तीर्णः, तीर्णवान् । कॄ–कीर्णः, कीर्णवान् । गॄ–गीर्णः, गीर्णवान् । ल्वादि–लूनः। लूनवान्। धूनः । धूनवान् । लीनः । लीनवान् । अप्र इति किम् । पूर्तिः । पूर्णिरित्यपि कश्चित् । पूर्तः । पूर्तवान् । ल्वादिषु ये ऋकारान्ता स्तॄदृप्रभृतयस्तेषामॄग्रहणेनैव सिद्धे तत्र पाठः ष्वादिकार्यार्थः । क्राद्यन्तर्गणो ल्वादिः ।

८८३ रदादमूर्च्छमदः क्तयोर्दस्य च ॥ ४।२।६९ ॥ मूर्छिमदिवर्जितादृरेफदकारान्ताद् धातोः परस्य क्तयोः क्तक्तवत्वोस्तकारस्य तत्संनियोगे धातुदकारस्य च नकारः स्यात् । पॄ–पूर्णः । पूर्णवान् । गॄ–गूर्णः । गूर्णवान् । भिद्–भिन्नः। भिन्नवान् । छिद्–छिन्नः। छिन्नवान् । रदादिति किम् । चितः चितवान् । अमूर्छमद इति किम् । मूर्तः । मूर्तवान् । मत्तः । मत्तवान् । कृतस्यापत्यं कार्तिरित्यत्र ' असिद्धं बहिरङ्गमन्तरङ्गे इति न । क्तयोरिति किम् । पूर्तिः । भित्तिः । कथं चूर्णिः ? चुरेरौणादिको णिः । रदस्येति किम् । चरितम् । उदितम् । इटा व्यवधाने न स्यात् । कृतः कृतवानित्यत्र तु वर्णैकदेशानां वर्णग्रहणेनाग्रहणान्न । रेफात् परेण स्वरभागेन व्यवधानाद्वा । ऋकारस्य हि मध्येऽर्धमात्रो रेफः, अग्रे पश्चाच्च तुरीयः स्वरभागः प्रतिज्ञायते । भिन्नवद्भ्यामित्यत्र प्रत्ययदकारस्य परेऽसत्त्वात् सूत्रे चाश्रुतत्वान्न । कथं चीर्णः, चीर्णवानिति ? चॄ इति धात्वन्तरं चरतिसमानार्थं क्तक्तवतुविषयमामनन्ति ।

८८४ सूयत्याद्योदितः ॥४।२।७०॥ सूयत्यादिभ्यो नवभ्यो धातुभ्य ओकार

इद्येषां तेभ्यश्च परस्य क्तयोस्तकारस्य नकारादेशः स्यात्। षूङ्प्राणि-सूनः, सूनवान्। दूङ्च्-दूनः, दूनवान्। दीङ्च्-दीनः,दीनवान्। धीङ्च्-धीनः,धीनवान्। मीङ्च्-मीनः, मीनवान्। रीङ्च्-रीणः, रीणवान्। लीङ्च्-लीनः, लीनवान्। डीङ्च्-डीनः,डीनवान्। व्रीङ्च्-व्रीणः, व्रीणवान्। इति सूयत्यादयः। ओदित्-ओलजैङ् ओलस्जैति वा लग्नः, लग्नवान्। ओविजैति-उद्विग्नः, उद्विग्नवान्। ओप्यायैङ्-पीनः, पीनवान्। ट्वोश्वि-शूनः, शूनवान्। ओव्रश्चौत्-वृक्णः, वृक्णवान्। एभ्य इति किम्। पीतः। पीतवान्। सूयतीति श्यनिर्देशः सूतिसुवत्योर्निवृत्त्यर्थः।

८८५ व्यञ्जनान्तस्थातोऽख्याध्यः ॥ ४।२।७१ ॥ ख्याध्यावर्जितस्य धातोर्यद् व्यञ्जनं तस्मात् परा याऽन्तस्था तस्याः परो य आकारस्तस्मात् परस्य क्तयोस्तकारस्य नः स्यात्। स्त्यानः। स्त्यानवान्। निद्राणः। निद्राणवान्। ग्लानः। ग्लानवान्। व्यञ्जनेति किम्। यातः। यातवान्। अन्तस्थेति किम्। स्नातः। स्नातवान्। आत इति किम्। च्युतः। च्युतवान्। द्रुतः। द्रुतवान्। प्लुतः। प्लुतवान्। धातुना व्यञ्जनस्य विशेषणादिह न। निर्यातः। निर्यातवान्। द्विर्भावेऽप्यन्तस्थेत्यभेदाश्रयणाद् बहिरङ्गत्वेनासिद्धेश्च न। अख्याध्य इति किम्। ख्यातः। ख्यातवान्। ध्यातः। ध्यातवान्। आतः परस्येति किम्। दरिद्रितः। दरिद्रितवान्।

८८६ पूदिव्यश्वेर्नाशाद्यूतानपादाने ॥४।२।७२॥ पू दिव् अञ्च् इत्येतेभ्यो यथासंख्यं नाशेऽद्यूते अनपादाने चार्थे परस्य क्तयोस्तकारस्य नकारादेशः स्यात्। पूना यवा विनष्टा इत्यर्थः। आद्यूनः। परिद्यूनः।

८८७ वेटोऽपतः ॥४।४।६३॥ पतिवर्जिताद् यत्र क्वचिद्विकल्पितेटो धातोरेकस्वरात् परयोः क्तयोरादिरिट् न स्यात्। समक्नौ शकुनेः पक्षौ। संगतावित्यर्थः। रधो-रद्धः, रद्धवान्। अञ्जौ-अक्तः, अक्तवान्। गुहौ-गूढः, गूढवान्। शमौ-शान्तः, शान्तवान्। असू-अस्तः, अस्तवान्। केचिदस्यतेर्भावे कृते नित्यमिटमिच्छन्ति। असितमनेन। सह-सोढः, सोढवान्। अपत इति किम्। पतितः। पतितवान्। सनि वेट्त्वात् प्राप्ते प्रतिषेधः। एकस्वरादित्येव। दरिद्रितः। दरिद्रितवान्। कथं प्रोर्णुतः, प्रोर्णुतवान्? 'ऋवर्णश्नूर्णुगः कितः' इत्यनेन भविष्यति। नाशाद्यूतानपादान इति किम्। पूतं धान्यम्। द्यूतं वर्तते। उदक्तमुदकं कूपात्। कथं व्यक्तम्? अञ्जेर्भविष्यति।

८८८ **सेर्ग्रासे कर्मकर्तरि** ॥४।२।७३॥ सिनोतेः सिनातेर्वा परस्य क्तयोस्तकारस्य ग्रासे कर्मणि कर्तृत्वेन विवक्षिते नकारः स्यात्। सितो ग्रासः स्वयमेव। ग्रास इति किम्। सितं कर्म स्वयमेव। कर्मकर्तरीति किम्। सितो ग्रासो मैत्रेण। सितो गलो ग्रासेन।

८८९ **क्षेः क्षी चाघ्यार्थे** ॥४।२।७४॥ घ्यणर्थौ भावकर्मणी, ततोऽन्यस्मिन्नर्थे विहितयोः क्तयोस्तकारस्य क्षि इत्येतस्मात् परस्य नकारः स्यात् तत्संनियोगे चास्य क्षी इत्ययमादेशः। कर्तरि–क्षीणः, क्षीणवान् मैत्रः। अधिकरणे–इदमेषां क्षीणम्। अघ्यार्थ इति किम्। क्षितमस्य। भावे क्तः। क्षिप्श् हिंसायामित्यस्य सानुबन्धत्वान्न ग्रहणम्। अन्यस्तु तस्यापि ग्रहणमिच्छति।

८९० **वाऽऽक्रोशदैन्ये** ॥४।२।७५॥ आक्रोशे दैन्ये च गम्यमाने क्षेः परस्याघ्यार्थे क्तयोस्तकारस्य वा नकारादेशः स्यात् तत्संनियोगे च क्षी इत्ययमादेशः। आक्रोशे–क्षीणायुः क्षितायुर्वा जाल्मः। दैन्ये–क्षीणकः, क्षितकः तपस्वी। अघ्यार्थ इत्येव। क्षितं जाल्मस्य। क्षितं तपस्विनः। कश्चित्तु भावेऽपि विकल्पमिच्छति। क्षीणमनेन। क्षितमनेन। क्षेर्भावकर्मणोर्भाषायां क्त एव नास्तीति कश्चित्।

८९१ **ऋहीघ्राघ्रात्रोन्दनुदविन्तेर्वा** ॥४।२।७६॥ एभ्यः परस्य क्तयोस्तकारस्य नकारो वा स्यात्। ऋ–ऋणम्। ऋतम्। ह्री–ह्रीणः, ह्रीणवान्। ह्रीतः, ह्रीतवान्। घ्रा–घ्राणः, घ्राणवान्। घ्रातः, घ्रातवान्। त्रा–त्राणः, त्राणवान्। त्रातः, त्रातवान्। उन्द्–ऐदित्त्वात्–

८९२ **डीयश्व्यैदितः क्तयोः** ॥४।४।६१॥ डीयतेः श्वयतेरैदिद्भ्यश्च धातुभ्यः परयोःक्तयोरादिरिट् न स्यात्। समुन्नः, समुन्नवान्। समुत्तः, समुत्तवान्। नुद्–नुन्नः, नुन्नवान्। नुत्तः, नुत्तवान्। विदिँप्–विन्नः, विन्नवान्। वित्तः, वित्तवान्। विदः श्नर्निर्देशाद् विध्यतेर्विन्दतेश्च नित्यं नकारः। विन्नः, विन्नवान्। प्रथमाभ्यामप्राप्ते घ्रादिभ्यस्तु प्राप्ते विकल्पः। तेन दकारान्तानां दस्यापि पूर्वेण नत्वं भवति। तकारनत्वाभावपक्षे च संनियोगशिष्टत्वाद्दस्यापि नकारो न। व्यवस्थितविभाषेयम्। तेन ऋणमित्युत्तमर्णाधमर्णयोरेव। अन्यत्र ऋतं सत्यम्। त्रायतेस्तु संज्ञायां न। त्रातः, देवत्रातः। अन्यत्र तु नत्वम्। त्राणः। उभयमित्येके। डीयतेः–डीनः, डीनवान्। उड्डीनवान्। शूनः, शूनवान्। अन्ये-

ऽप्यैदितः-ओलजै-लग्नः, लग्नवान्। विजै-उद्विग्नः, उद्विग्नवान्। यतै-यत्तः, यत्तवान्। त्रसै-त्रस्तः, त्रस्तवान्। दीपै-दीप्तः, दीप्तवान्। डीयेतिश्यनिर्देशात् डयतेरिडेव। डयितः, डयितवान्। क्तयोरिति किम्। डयिता। श्वयिता। लज्जिता। उद्विजिता। कृतैनृतैचृतै इत्येतेषां वेट्त्वेन क्तयोरिट्प्रतिषेधे सिद्धे ऐदित्त्वं यङ्लुबर्थम्।

८९३ **दुगोरूच** ॥ ४।२।७७ ॥ दु गु इत्येताभ्यां परस्य क्तयोस्तकारस्य नकारादेशः स्यात् तत्संनियोगे च अनयोरूकारश्चान्तादेशः। दूनः, दूनवान्। गूनः, गूनवान्।

८९४ **क्षैशुषिपचो मकवम्** ॥४।२।७८॥ क्षैशुषिपचिभ्यः परस्य क्तयोस्तकारस्य यथासंख्यं म क व इत्येते आदेशाः स्युः। क्षामः, क्षामवान्। शुष्कः, शुष्कवान्। पक्वः, पक्वान्।

८९५ **निर्वाणमवाते** ॥४।२।७९॥ निर्वाणमिति निर्पूर्वाद् वाधातोः परस्य क्तकारस्य नकारो निपात्यते अवाते कर्तरि-वातश्चेन्निर्वातक्रियायाः कर्ता न। निर्वाणो मुनिः। निर्वाणो दीपः। अवाते इति किम्। निर्वातो वातः। निर्वातं वातेन। भावेऽपि वात एव कर्ता। निर्वाणः प्रदीपो वातेनेत्यत्र तु प्रदीपः कर्ता। वातस्तु हेतुः करणं वेति प्रतिषेधो न। केचित्तु निर्वाणं वातेनेतीच्छन्ति। तेषां वाते कर्तरि प्रत्यये सति प्रतिषेध इति द्रष्टव्यम्।

८९६ **अनुपसर्गाः क्षीबोल्लाघकृशपरिकृशफुल्लोत्फुल्लसंफुल्लाः** ॥ ॥४।२।८०॥ अनुपसर्गाः क्तप्रत्ययान्ता एते शब्दा निपात्यन्ते। क्षीबृङ् मदे। उत्पूर्वो लाघृङ् सामर्थ्ये। कृशच् तनुत्वे केवलः परिपूर्वश्च। एभ्यः परस्य क्तकारस्य लोप इडभावश्च निपात्यते। क्षीबः। उल्लाघः। कृशः। परिकृशः। त्रिफला विशरणे इत्यस्मात् केवलादुत्संपूर्वाच्च परस्य क्तस्य लादेशो भावारम्भविवक्षायामिडभावश्च निपात्यते। फुल्लः, उत्फुल्लः, संफुल्लः। केचित्तु क्षीबवान्, उल्लाघवान्, कृशवान्, परिकृशवान्, फुल्लवान्, उत्फुल्लवान्, संफुल्लवान् इति क्तवतावपि रूपमिच्छन्ति, तदर्थं क्तक्तवत्वोस्तशब्दावधि निपातनं द्रष्टव्यम्। एतदर्थमेव बहुवचनम्। अनुपसर्गा इति किम्। प्रक्षीबितः। प्रोल्लाघितः। प्रकृशितः। संपरिकृशितः।

८९७ **आदितः** ॥४।४।७१॥ आकारानुबन्धाद् धातोः परयोः क्तयोरादिरिट्

न स्यात् । ति चोपान्त्येत्युत्वम् । आदितां धातूनां भावारम्भे वेट्त्वादन्यत्र वेटोऽपत इत्यनेनैव नित्यमिट्प्रतिषेधे सिद्धे[1] योगविभागो यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति न्यायज्ञापनार्थः, तेन विदक् ज्ञाने-विदित इत्यादि सिद्धम् । प्रफुल्तः। निपातनस्येष्टविषयत्वात् फल निष्पत्तौ--फलितः, फलितवान् । क्षीवादयः शब्दाः केनाचापि च सिद्ध्यन्ति क्षीवित इत्यादिरूपनिवृत्त्यर्थं तु वचनम् । कथं प्रक्षीवः? प्रगतः क्षीवः इति प्रादिसमासाद् भविष्यति ।

८९८ **भित्तं शकलम्** ॥४।२।८१॥ भिदेः परस्य क्तस्य नत्वाभावो निपात्यते, शकलम्--शकलपर्यायश्चेद् भित्तशब्दः । भित्तं शकलमित्यर्थः। शकलमिति किम् । भिन्नम् । शकलमिति पर्यायनिर्देशः किम् । भिदिक्रियाविवक्षायां शकले विषये भिन्नमित्येव यथा स्यात् । भिन्नं शकलम् । भिन्नं भित्तम् ।

८९९ **वित्तं धनप्रतीतम्** ॥४।२।८२॥ विन्दतेः परस्य नत्वाभावो निपात्यते धनप्रतीतम्--धनपर्यायः प्रतीतपर्यायश्चेद् वित्तशब्दः। विद्यते लभ्यते इति वित्तं धनम्। विद्यते उपलभ्यतेऽसाविति वित्तः प्रतीतः। धनप्रतीतमिति किम् । विन्नः। वेत्तेर्विदितम् । विन्तेर्विन्नं वित्तं च । विद्यतेर्विन्नम् । वित्तं धने प्रतीते च विन्दतेर्विन्नमन्यत्र ।

९०० **क्तयोरनुपसर्गस्य** ॥४।१।९२॥ अनुपसर्गस्य प्यायः क्तयोः क्तक्तवत्वोः प्रत्ययोः परयोः पीत्ययमादेशः स्यात् । पीनं मुखम् । पीनवन्मुखम् । क्तयोरिति किम् । प्यायते । अनुपसर्गस्येति किम् । प्रप्यानो मेघः ।

९०१ **आङोऽन्धूधसोः** ॥४।१।९३॥ आङ उपसर्गात् परस्य प्यायतेरन्धावूधसि चार्थे क्तयोः परतः पीरादेशः स्यात् । आपीनोऽन्धुः। आपीनमूधः। अन्धुव्रणम् ऊधसो वा पर्यायः । आङ इति किम् । प्रप्यानोऽन्धुः । परिप्यानमूधः । अन्धूधसोरिति किम् । आप्यानश्चन्द्रः । आङ एवेति नियमात् प्राप्यानमूध इत्यत्राङन्तादुपसर्गान्न भवति । अनुपसर्गस्य तु पूर्वेण भवत्येव । पीनोऽन्धुः । पीनवान-

---

१ 'आदितो नवा भावारंभे' इत्येक एव क्रियतां, किं योगविभागेनेति। तदुपाधेरिति । अयमर्थः-'नवा भावारंभे' इत्यनेन भावारंभविवक्षायां विभाषा इति यदा कर्मणि कर्तरि वा विवक्ष्यते क्तस्तदा वेटोऽपत इत्यनेनापि निषेधो न स्यात् इत्यस्य पृथगारंभः ।

न्धुः । पीनमूधः । पीनवदूधः । अन्ये तु प्यायतेः केवलस्याङ्पूर्वस्याङन्तोपसर्गपूर्वस्यैव च प्रयोगमिच्छन्ति नान्यपूर्वस्य । तन्मते प्रप्यानपरिप्यानादयोऽप्रयोगाः॥ क्तयोरित्येव । आप्याय्यः ।

९०२ स्फायः स्फी वा ॥४।१।९४॥ स्फायतेः क्तयोः परतः स्फी इत्ययमादेशो वा स्यात् । स्फीतः, स्फीतवान् । संस्फीतः, संस्फीतवान् । स्फातः, स्फातवान् । क्तयोरिति किम् । स्फातिः । विकल्पं नेच्छन्त्यन्ये ।

९०३ प्रसमः स्त्यः स्ती ॥४।१।९५॥ प्रसम् इत्येवं समुदायपूर्वस्य स्त्यायतेः क्तयोः परतः स्ती इत्ययमादेशः स्यात् । प्रसंस्तीतः, प्रसंस्तीतवान् । प्रसम इति किम् । संप्रस्त्यानः । संप्रस्त्यानवान् । स्त्यानः । संस्त्यानः । प्रसमो नेच्छन्त्यन्ये ।

९०४ प्रात्तश्च मो वा ॥४।१।९६॥ प्रात् केवलात् परस्य स्त्यायतेः क्तयोः परयोः स्ती इत्ययमादेशः स्यात् क्तयोस्तकारस्य च वा मकारः । प्रस्तीमः, प्रस्तीमवान् । प्रस्तीतः, प्रस्तीतवान् ।

९०५ श्यः शीर्द्रवमूर्तिस्पर्शे नश्चास्पर्शे ॥४।१।९७॥ द्रवस्य मूर्तिः—काठिन्यं तस्मिन् स्पर्शे च वर्तमानस्य श्यायतेः क्तयोः परतः शी इत्ययमादेशः स्यात् तत्संनियोगे च क्तयोस्तकारस्यास्पर्शे विषये नकारादेशः । शीनं घृतम् । शीनवद् घृतम् । शीनं मेदः, शीनवन्मेदः । द्रवावस्थायाः काठिन्यं गतमित्यर्थः । स्पर्शे—शीतं वर्तते । शीतो वायुः । गुणमात्रे तद्वति चार्थे स्पर्शविषयो भवति । द्रवमूर्तिस्पर्श इति किम् । संश्यानो वृश्चिकः । शीतेन संकुचित इत्यर्थः । व्यञ्जनान्तस्थात इति नत्वम् ।

९०६ प्रतेः ॥४।१।९८॥ प्रतिपरस्य श्यायतेः क्तयोः परतः शी इत्ययमादेशः स्यात् तत्संनियोगे च क्तयोस्तकारस्य नकारः। प्रतिशीनः, प्रतिशीनवान् । प्रतिपूर्वोऽयं रोगे वर्तत इति पूर्वेणाप्राप्तौ वचनम् ।

९०७ वाऽभ्यवाभ्याम् ॥४।१।९९॥ अभि अव इत्येताभ्यां परस्य स्त्यायतेः क्तयोः परतः शी इत्ययमादेशो वा स्यात् तत्संनियोगे च क्तयोस्तस्यास्पर्शे नः ।

अभिशीनः, अभिशीनवान् । अभिश्यानः, अभिश्यानवान् । अवशीनः, अवशीनवान् । अवश्यानः, अवश्यानवान् । द्रवमूर्तिस्पर्शनयोरप्यनेन परत्वाद् विकल्पः । अभिशीनम्, अभिश्यानं घृतम् । अवशीनम्, अवश्यानं हिमम् । अभिशीतः, अवशीतो वायुः । स्पर्शत्वान्न नत्वम् । अभिश्यानः, अवश्यानो वायुः । व्यञ्जनान्तस्थात इति स्पर्शेऽपि नत्वम् । अभ्यवाभ्यामिति किम् । संश्यानः, संश्यानवान् । केचित्तु समा व्यवधानेऽपीच्छन्ति । अभिसंशीनः, अभिसंशीनवान् । अभिसंश्यानः, अभिसंश्यानवान् । अवसंशीनः, अवसंशीनवान् । अवसंश्यानः, अवसंश्यानवान् । तदाभ्यवाभ्यामिति तृतीया व्याख्येया । समस्ताभ्यामपीत्यन्ये । अभ्यवशीनः, अभ्यवश्यानः । विपर्यासे प्रयोगो नास्ति । वाशब्दस्य च व्यवस्थितविभाषार्थादन्योपसर्गान्ताभ्यां न भवति । समभिश्यानः । समभिश्यानवान् । समवश्यानः, समवश्यानवान् ।

९०८ **श्रः शृतं हविःक्षीरे** ॥ ४।१।१०० ॥ श्रातेः श्रायतेश्च क्तप्रत्यये हविषि क्षीरे चाभिधेये शृभावो निपात्यते । शृतं हविः । शृतं क्षीरं स्वयमेव । श्रातिश्रायती हि अकर्मककर्मकर्तृविषयस्य पचेरर्थे वर्तेते । तयोश्चैतन्निपातनम् । हविःक्षीर इति किम् । श्राणा यवागूः ।

९०९ **अपेः प्रयोक्त्रैक्ये** ॥४।१।१०१॥ श्रायतेः श्रातेर्वा ण्यन्तस्यैकस्मिन् प्रयोक्तरि कर्तरि परतो हविषि क्षीरे चाभिधेये शृभावो निपात्यते । श्राति श्रायति वा हविः स्वयमेव, तच्चैत्रेण प्रायुज्यत शृतं हविश्चैत्रेण । शृतं क्षीरं चैत्रेण । यदा तु द्वितीये प्रयोक्तरि णिगुत्पद्यते तदा न । श्रपितं हविश्चैत्रेण मैत्रेणेति । हविःक्षीर इत्येव । श्रपिता यवागूः । अन्ये तु श्रपिं चुरादौ पठन्ति, तस्यैव श्रपेर्निपातनम् । प्रयोजकव्यन्तस्य त्वेकस्यापि प्रयोगं नेच्छन्ति । तन्मते कर्मकर्तृ हविः श्रातुं चैत्रः प्रयुक्तवान् इति प्रयोजकव्यापारे णिगि श्रपितं हविश्चैत्रेणेत्येव भवति । अपरे तु सकर्मकावपि श्रातिश्रायती इच्छन्ति । तन्मते तयोरप्यण्यन्तयोर्निपातनं भवति । शृतं हविश्चैत्रेण । ण्यन्तयोस्तु न भवत्येव । श्रपितं हविश्चैत्रेण मैत्रेणेति ।

९१० **लङ्किकम्प्योरुपतापाङ्गविकृत्योः** ॥४।२।४७। लङ्किकम्प्योरुपान्त्यनकारस्य यथासंख्यमुपतापेऽङ्गविकारे चार्थे कृङिति प्रत्यये लुक् स्यात् । विलगितः । विकपितः । उपतापाङ्गविकृत्योरिति किम् । विलङ्गितः । विकम्पितः । लङ्किकम्प्योरुदित्त्वात् पूर्वेण प्राप्ते वचनम् । द्विवचनं कृङितीत्यनेन यथासंख्यनिवृत्त्यर्थम् ।

९११ उति शवर्हादुभ्यः क्तौ भावारम्भे ॥४।३।२६॥ उकारे उपान्त्ये सति शवर्हेभ्योऽदादिभ्यश्च धातुभ्यो भावे आरम्भे चादिकर्मणि विहितौ क्तौ-क्तवतू सेटौ वा किद्वत्स्याताम्। कुचितमनेन। कोचितमनेन। प्रकुचितः। प्रकोचितः। प्रकुचितवान्। प्रकोचितवान्। द्युतितमनेन। द्योतितमनेन। प्रद्युतितः। प्रद्योतितः। मुदितमनेन, मोदितमनेन। प्रमुदितः, प्रमोदितः। अद्भ्यः-रुदितम्, रोदितमनेन। प्ररुदितः, प्ररोदितः। प्ररुदितवान्, प्ररोदितवान्। उतीति किम्। श्वितितमनेन। प्रश्वितितः। शवर्हादुभ्य इति किम्। गुधितमनेन। प्रगुधितः। भावारम्भ इति किम्। रुचिता कन्या। क्ताविति किम्। प्रद्योतिषीष्ट। सेटाविति एव। रूढमनेन। प्ररूढः। प्ररूढवान्।

९१२ न डीङ्शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदः ॥४।३।२७॥ भावारम्भ इति न स्मर्यते। एभ्यः परौ सेटौ क्तक्तवतू न किद्वत्। डयतेः-डयितः, डयितवान्। शीङ्-शयितः, शयितवान्। पूङ्-

९१३ पूङ्क्लिशिभ्यो न वा ॥ ४।४।४५ ॥ पूङः क्लिशिभ्यां च परेषां क्तक्तवतुक्त्वामादिरिड् वा स्यात्। पूतः, पवितः। पूतवान्। पवितवान्। क्लिष्टः, क्लिशितः। क्लिष्टवान्, क्लिशितवान्। पूङिति ङकारः पूगो निवृत्त्यर्थः। तस्य हि 'न डीङ्शीङ्' इत्यादिना कित्त्वप्रतिषेधाभावात् पुवित इत्यनिष्टं रूपमासज्जेत। बहुवचनं क्लिश्यतिक्लिश्नात्योर्ग्रहणार्थम्। पूङः 'उवर्णात्' इति नित्यं निषेधे प्राप्ते क्लिश्यतेर्नित्यमिटि प्राप्ते क्लिश्नातेश्चौदित्त्वात् क्त्वायां विकल्पे सिद्धेऽपि क्तयोर्नित्यं निषेधे प्राप्ते विकल्पार्थं वचनम्। डीङ्शीङ्पूङामनुबन्धनिर्देशो यङ्लुबन्निवृत्त्यर्थः। डेड्यितः। डेड्यितवान्। शेश्यितः, शेश्यितवान्। *पोपुवितः, पोपुवितवान्। सेटाविति एव। डीयतेर्डीनः, डीनवान्। पूतः, पूतवान्। धृष्टः। क्ष्विण्णः। क्ष्विण्णवान्। स्विन्नः, स्विन्नवान्। मिन्नः, मिन्नवान्।

९१४ मृषः क्षान्तौ ॥४।३।२८॥ क्षान्तौ वर्तमानान्मृषः परौ सेटौ क्तक्तवतू किद्वत्न। मर्षितः। मर्षितवान्। क्षान्ताविति किम्। अपमृषितं वाक्यमाह। सामर्थ्यमित्यर्थः। सेटाविति एव। मृषू सहने च। मृष्टः, मृष्टवान्।

---

* पूङ्क्लिशीति विकल्पो न, तिवा शवेति न्यायात्।

९१५ **सेट्क्तयोः** ॥ ४।३।८४ ॥ सेट्कयोः क्तयोः परतो णेर्लुक् स्यात्। कारितः। कारितवान्। हारितः। हारितवान्। गणितः। संज्ञपितः पशुः। सेडिति किमर्थम्? इटि कृते लोपो यथा स्यात्। शकितः शकितवान्। अन्यथेह इट् न स्यात्।

९१६ **प्रादागस्त्त आरम्भे क्ते** ॥४।४।७॥ आरम्भे आदिकर्मणि वर्तमानस्य प्रशब्दादुत्तरस्य दागः स्थाने क्ते प्रत्यये परे त्तादेशो वा स्यात्। प्रत्तः। प्रदत्तः। दातुं प्रारब्धवानित्यर्थः। प्रादिति किम्। परीत्तम्। उत्तरेण नित्यं त्तादेशः। दाग इति किम्। दोच्-प्रत्तम्। आरम्भ इति किम्। अन्यत्र नित्यमेव। प्रकर्षेण दीयते स्म प्रत्तम्। क्त इति किम्। प्रत्तवान्। दातुं प्रवृत्त इत्यर्थः। द्विस्तकार आदेशः सर्वादेशार्थः। अकार उच्चारणार्थः।

९१७ **निविस्वन्यवात्** ॥ ४।४।८ ॥ एभ्यः परस्य दागः क्ते परे त्तादेशो वा स्यात्। नीत्तम्, निदत्तम्। वीत्तम्, विदत्तम्। सूत्तम्, सुदत्तम्। अनूत्तम्। अनुदत्तम्। अवत्तम्, अवदत्तम्। सुदत्तमेवेत्वन्ये। उत्तरेण नित्यं त्तादेशे प्राप्ते बिभाषेयम्। केचिदत्राप्यारम्भ एव विकल्पमिच्छन्ति। यदाहुः-

> " अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ॥
> सुदत्तमनुदत्तं च निदत्तमिति चेष्यते " ॥१॥

तन्मतसंग्रहार्थमारम्भ इत्यनुवर्तनीयम्।

९१८ **स्वरादुपसर्गादस्ति क्तित्यधः** ॥ ४।४।९ ॥ पूर्वयोगारम्भाद्वेति निवृत्तम्। स्वरान्तादुपसर्गात् परस्य धावर्जितस्य दासंज्ञकस्य तकारादौ क्तिति प्रत्यये परे त्तादेशः स्यात्। प्रत्तः, प्रत्तवान्। परीत्तः, परीत्तवान्। श्यतेरपीत्वं बाधित्वा विशेषविहितत्वात् त्तत्वमेव भवति। अवत्तवान्। उपसर्गादिति किम्। दधि दत्तम्। स्वरादिति किम्। निर्दत्तम्। दुर्दत्तम्। निर्दितम्। दुर्दितम्। द इति किम्। प्रदाता व्रीहयः। निदातानि भाजनानि। क्तितीति किम्। प्रदाता। तीति किम्। प्रदाय। अध इति किम्। धांग्-निहितः। दृधेः-निधीतः।

९१९ **दत्** ॥४।४।१०॥ धावर्जितस्य दासंज्ञकस्य तादौ क्तिति परे दत् इत्यय-

मादेशः स्यात्। दत्तः, दत्तवान्। द्यतेः परत्वादित्वम्। दितः, दितवान्। द इत्येव। दातं बर्हिः। अवदातं मुखम्। अध इत्येव। धीतः। धीतवान्।

९२० दोसोमास्थ इः ॥ ४।४।११ ॥ एषां तादौ किति प्रत्यये इरन्तादेशः स्यात्। द्यतेर्दद्भावस्य शेषाणामीत्वस्यापवादः। दो–निर्दितः, निर्दितवान्। सो–अवसितः, अवसितवान्। मा–मितः, मितवान्। गामादाग्रहणेष्वविशेष इति माङ्मामेङां ग्रहणम्। अन्यस्तु माङ्मेङोरेवेच्छति। मातेस्तु–मातः, मातवान् प्रस्थः स्थाल्याम्। स्था–स्थितः, स्थितवान्। दोसो इत्योकारनिर्देशो दैवादिकरयोरेव परिग्रहार्थः। तीत्येव। यङ्लुपि इट् दादितः, दादितवान्। इडेत्पुसि चातो लुगित्यातो लुक्। किती त्येव। अवदाता। अवसाता।

९२१ छाशोर्वा ॥ ४।४।१२ ॥ छो शो इत्येतयोस्तादौ किति प्रत्यये परे इरन्तादेशो वा स्यात्। अवच्छितः, अवच्छातः। अवच्छितवान्, अवच्छातवान्। निशितः, निशातः। निशितवान्। निशातवान्। श्यतिशिनोत्योरपि रूपद्वयसिद्धौ श्यतेर्विकल्पवचनं 'क्तं नञादिभिन्नैः' इति समासार्थम्। शिताशितम्।

९२२ शो व्रते ॥४।४।१३॥ श्यतेः क्तप्रत्यये व्रतविषये प्रयोगे नित्यमित्वं स्यात्। संशितं व्रतम्। असिधारातीक्ष्णमित्यर्थः। संशितव्रतः, संशितः साधुः। व्रते यत्नवानित्यर्थः। संशितशब्दः अन्यत्राप्यस्तीति व्रतमिति विशेषणं न दुष्यति। नित्यार्थं वचनम्। तेन व्रतविषये संशात इति न। व्रत इति किम्। निशातः।

९२३ धागः ।४।४।१५॥ दधातेस्तादौ किति प्रत्यये हिरादेशः स्यात्। क्त्वीति न संबध्यते पृथग्योगात्। विहितः। विहितवान्। गकारः ट्धेर्निवृत्त्यर्थः। धीतः। धीतवान्। तीत्येव। प्रधाय। यङ्लुपि इट्। दाधितः, दाधितवान्। केचित्तु दोसोहाक्धागां यङ्लुप्यागमशासनमनित्यमिति न्यायादिदं नेच्छन्ति, इत्वहित्वविधिं च निषेधन्ति। तन्मते दत्तः, दत्तवान्। परमात्रस्यैव दद्भाव इति मते निर्दादत्तः, निर्दादत्तवान्, अवसासीतः, अवसासीतवान्, जाहातः, जाहातवान्, दाधीतः, दाधीतवान इत्येव भवति।

९२४ यपि चादो जग्ध् ॥४।४।१६॥ तादौ किति प्रत्यये यपि चादेर्जग्ध् इत्ययमादेशः स्यात्। जग्धः, जग्धवान्। तीत्येव। अद्यात्। किती त्येव। अत्त-

व्यम् । कथमन्नम् ? अनितेरौणादिको नः । 'अदोऽनन्नात्' इति ज्ञापकाद्बाध्यते तदित्यन्नम् । एकपदाश्रयत्वेनान्तरङ्गत्वाद् यबादेशात् प्रागेव जग्धादेशे सिद्धे यब्ग्रहणमन्तरङ्गानपि विधीन् यबादेशो बाधते इति ज्ञापनार्थम् । तेन प्रशम्य, प्रपृच्छ्य, प्रदीव्य, प्रखन्य, प्रस्थाय, प्रपाय, प्रदाय, प्रधाय, प्रपठ्येत्यादौ दीर्घत्वं शत्वमूत्वमात्वमित्वमीत्वं हिलमिट्त्वं यपा बाध्यते ।

९२५ क्तयोः ॥ ४।४।४० ॥ निष्कुषः परयोः क्तयोरादिरिड् नित्यं स्यात् । पृथग्योगाद्वेति निवृत्तम् । निष्कुषितः, निष्कुषितवान् ।

९२६ क्षुधवसस्तेषाम् ॥४।४।४३॥ क्षुधवसिभ्यां परेषां क्तक्तवतुक्त्वामादिरिट् स्यात् । क्षुधितः, क्षुधितवान् । उषितः, उषितवान् । यङ्लुपि–*वावसितः, वावसितवान् । यङ्लुपि नेच्छन्त्यन्ये । वावस्तः, वावस्तवान् । वसिति वसतेर्ग्रहणम् । वस्तेस्त्विडस्त्येव ।

९२७ लुभ्यश्चेर्विमोहार्चे ॥४।४।४४॥ विमोहो विमोहनमाकुलीकरणम् । अर्चा पूजा । लुभ्यश्चिभ्यां यथासंख्यं विमोहेऽर्चायां चार्थे वर्तमानाभ्यां परेषां क्तक्तवतुक्त्वामादिरिट् स्यात् । विलुभितः सीमन्तः । विलुभिताः केशाः । विलुभितानि पदानि । विलुभितवान् । अश्चिता गुरवः। उच्चैरश्चितलाङ्गूलः। अश्चितवान् गुरुम् । शिरोऽश्चित्वेव संवहन् । विमोहार्चे इति किम् । लुब्धो जाल्मः। लुब्धवान् । उदक्तमुदकं कूपात् । लुभेः क्त्वि 'सहलुभे'त्यादिना अञ्चेश्च 'उदितः' इति विकल्पे उभयोश्च ' वेटोऽपत ' इति नित्यं प्रतिषेधे प्राप्ते वचनम् ।

९२८ संनिवेरर्दः ॥४।४।६४॥ संनिविपूर्वादर्दतेः परयोः क्तयोरादिरिट् न स्यात् । समर्ण्णः, समर्ण्णवान् । न्यर्ण्णः, न्यर्ण्णवान् । व्यर्ण्णः, व्यर्ण्णवान् । संनिवेरिति किम् । अर्दितः । प्रार्दितः । कश्चित् केवलादपीच्छति । अर्ण्णः । अर्ण्णवान् ।

९२९ अविदूरेऽभेः ॥४।४।६५॥ विदूरमतिविप्रकृष्टम् । ततोऽन्यदविदूरम् । अभिपूर्वादर्देः परयोः क्तयोरविदूरेऽर्थे आदिरिट् न स्यात् । अभ्यर्ण्णम्–अविदूरमित्यर्थः । अभ्यर्ण्णा सरित् । अभ्यर्ण्णे शेते । अविदूर इति किम् । अभ्यर्दितो वृषलः शीतेन । बाधित इत्यर्थः ।

* यजादिवचेरित्यत्र गणनिर्देशाद् अत्र न वृत् ।

९३० वर्तेर्वृत्तं ग्रन्थे ॥ ४।४।६६ ॥ वृतेर्ण्यन्तात् क्ते वृत्तमिति ग्रन्थविषये निपात्यते । गुणाभावेऽप्रतिषेधौ णिलुक् च निपातनात् । वृत्तो गुण[1]च्छात्रेण । वृत्तं पारायणं चैत्रेण । वृतेरन्तर्भूतण्यर्थस्यैतत् सिद्ध्यति । वर्तेस्तु ग्रन्थविषये वर्तितमिति प्रयोगनिवृत्त्यर्थं वचनम् । ग्रन्थ इति किम् । वर्तितं कुङ्कुमम् । अन्ये तु ग्रन्थेऽपि वर्तितमिति प्रयोगमाद्रियन्त ।

९३१ धृषशसः प्रगल्भे ॥ ४।४।६७ ॥ प्रगल्भो जितसभः । अविनीत इत्यन्ये । धृषिशसिभ्यां परयोः क्तयोरादिः प्रगल्भ एवार्थे इट् न । धृष्टः । विशस्तः। प्रगल्भ इत्यर्थः । प्रगल्भ इति किम् । धर्षितः, विशसितः । धृषेः 'आदितः' इति शसेरप्युदित्वात् 'वेटोऽपतः' इति प्रतिषेधे सिद्धे नियमार्थं वचनम् । अथ भावारम्भयोर्नित्यार्थं धृषेरुपादानं कस्मान्न भवति ? नैवम् । धृषेर्भावारम्भे स्वभावात् प्रगल्भार्थानभिधानात् ।

९३२ कषः कृच्छ्रगहने ॥ ४।४।६८ ॥ कृच्छ्रं दुःखम् तत्कारणं च, गहनं दुरवगाहम् । तयोरर्थयोः कषेः परयोः क्तयोरादिरिड् न स्यात् । कष्टं वर्तते । कष्टोऽग्निः । कष्टानि वनानि । कृच्छ्रगहन इति किम् । कर्षितं स्वर्णम् ।

९३३ घुषेरविशब्दे ॥४।४।६९॥ विशब्दनं विशब्दः नानाशब्दनं प्रतिज्ञानं च ततोऽन्यत्रार्थे वर्तमानात् घुषेः परयोः क्तयोरादिरिट् न स्यात् । घुष्टा रज्जुः-संबद्धावयवेत्यर्थः । घुष्टवान् । अविशब्दन इति किम् । अवघुषितं वाक्यमाह । नानाशब्दितं प्रतिज्ञातं वा वाक्यं व्रत इत्यर्थः । अत एव विशब्दनप्रतिषेधात् ज्ञाप्यते घुषेर्विशब्दनार्थस्य अनित्य[2]चुरादेर्णिजिति । तेनायमपि प्रयोग उपपन्नो भवति-'महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः'-स्वाभिप्रायं नानाशब्दैराविष्कृतवन्त इत्यर्थः ।

९३४ बलिस्थूले दृढः ॥४।४।७०॥ बलिनि स्थूले चार्थे दृहेर्दृहेर्वा क्तान्तस्य दृढ इति निपात्यते । इडभावः क्तस्य ढत्वं धातुहनयोर्लोपश्च निपातनात् । दृढो बली स्थूलो वा । परिदृढ्य गतः । पारिदृढी कन्या । बलिस्थूल इति किम् । दृंहितम् । दृंहितम् ।

९३५ क्षुब्धविरिब्धस्वान्तलग्नम्लिष्टफाण्टबाढपरिवृढं मन्थस्वरमनस्तमःसक्तास्पष्टानायासभृशप्रभौ ॥ ४।४।७१ ॥ क्षुब्धादयः क्तान्ता

मन्थादिष्वर्थेषु यथासंख्यमनिटो निपात्यन्ते । क्षुभेर्मन्थेऽर्थे क्तान्तस्येडभावो निपात्यते । मथ्यत इति मन्थः । कर्मणि घञ् । क्तोऽपि क्षुभः कर्मण्येव । तत्सामानाधिकरण्यात् । क्षुब्धः समुद्रः। मथित इति मथ्यमानः संक्षोभं गत इति वार्थः। क्षुब्धा गिरिनदी । मन्थनं वा मन्थः । तस्मिन्नभिधेये क्षुब्धं वल्लुवेन । विलोडनं कृतमित्यर्थः । अथवा द्रवद्रव्यसंपृक्ताः सक्तवो रूढ्या मन्थशब्देनोच्यन्ते । तद्द्रव्याभिधाने क्षुब्धशब्दो मन्थपर्यायो भवति । यदा तु क्षोभं प्रवृत्तिनिमित्तीकृत्य मन्थे वर्तते तदा क्षुब्धो मन्थ इति सामानाधिकरण्यम् । संचलितो मन्थ इत्यर्थः। मन्थेऽभिधेय इति किम् । क्षुभितं समुद्रेण । क्षुभितं मन्थेन । क्षुभितः समुद्रो मन्थेन । अन्यस्तु दध्यादिकं येन मथ्यते स मन्थो मन्थानक इत्याह ।

" अमृतं नाम यत्सन्तो मन्त्रजिह्वेषु जुह्वति ॥
शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना " ॥१॥ इति ।

विपूर्वाद् सौत्राद् रिभेर्विरिब्ध इति भवति स्वरो ध्वनिश्चेत् ।

रेभेर्वा इत्वस्यापि निपातनात् । विरिभितं विरेभितमन्यत् । स्वनेः स्वान्तमिति मनश्चेत् । मनःपर्यायः स्वान्तशब्दः। विषयेष्वनाकुलं मनःस्वान्तमित्यन्ये । अन्यत्र स्वनितो मृदङ्गः। स्वनितं मनसा घट्टितं स्पृष्टमिति यावत् । ध्वनेः ध्वान्तमिति तमश्चेत् । तमःपर्यायो ध्वान्तशब्दः। अनालोकं गम्भीरं तमो ध्वान्तमित्यन्ये। अन्यत्र ध्वनितं तमसा। ध्वनितो मृदङ्गः। लगेर्लग्नमिति सक्तं चेत् । लगितमन्यत् । लेच्छेर्म्लिष्टमिति अस्पष्टं चेत् । इत्वमपि निपातनात् । म्लेच्छितमन्यत् । फणेः फाण्टमिति अनायाससाध्यं चेत् । यदभ्रपितमपिष्टमुदकसंपर्कमात्राद् विभक्तरसमौषधं कषायादि तदेवमुच्यते । अग्निना तप्तं यदीषदुष्णं तत् फाण्टमित्यन्ये । अन्ये त्वविद्यमानायासः पुरुषोऽन्यो वा सामान्येन फाण्टशब्देनाभिधीयते, फाण्टाश्चित्रास्त्रपाणय इत्याहुः। वाहेर्वाढमिति भृशं चेत् । क्रियाविशेषणमेवैतत् स्वभावात् । वाढविक्रमा इति तु विस्पष्टपटुवत्समासः । वाहितमन्यत् । परिपूर्वस्य बृहेर्बृहेर्वा परिवृढ इति प्रभुश्चेत् । हकारनलोपे ढत्वे च निपातनात् । परिवृढः प्रभुः । परिवढस्य गतः । पारिवृढी कन्या । अन्यत्र परिवृढहितं परिवृंहितम् । केचित्तु लग्नविरिब्धम्लिष्टफाण्टबाढानि धात्वर्थस्य सत्ताद्यर्थविषयभावमात्रे भवन्तीत्याहुः । तेषां लग्नं सक्तेनेत्याद्यपि भवति । यथा *लोम्नि हृष्टमिति ।

* यथा लोमविषये हृष्टं निपात्यते प्रयोगश्च लोमभिः हृष्टमिति तथाऽत्रापीत्यर्थः ।

९३६ **नवा भावारम्भे** ॥ ४।४।७३ ॥ आरम्भ आदिक्रिया। आदितो धातोर्भावे आरम्भे च विहितयोः क्तयोरादिरिड् वा न स्यात्। मिन्नम्, मेदितमनेन। प्रमिन्नः, प्रमेदितः। प्रमिन्नवान्, प्रमेदितवान्। आदित इत्येव। विदितमनेन। प्रविदितः। प्रविदितवान्। भावारम्भ इति किम्। मिन्नः। मिन्नवान्। पूर्वेण नित्यं निषेधे प्राप्ते विकल्पः।

९३७ **शकः कर्मणि** ॥४।४।७४॥ शकेर्धातोः कर्मणि विहितयोः क्तयोरादिरिड् वा न स्यात्। शक्तः, शकितो वा घटः कर्तुं चैत्रेण। कर्मणि क्तवतुर्नास्तीति नोदाह्रियते। कर्मणीति किम्। शक्तः कटं कर्तुं चैत्रः।

९३८ **णौ दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्तम्** ॥ ४।४।७५ ॥ णौ सति दमादीनां क्तान्तानां दान्तादयो वा निपात्यन्ते। दम्–दान्तः, दमितः। शम्–शान्तः, शमितः। पूरै–पूर्णः, पूरितः। एषु णिलुग् निपात्यते। दासृ–दस्तः, दासितः। स्पश्–स्पष्टः, स्पाशितः। छद्–छन्नः, छादितः। एषु ह्रस्वश्च। ज्ञा–ज्ञप्तः, ज्ञापितः। संज्ञपितः, संज्ञप्तः। अत्र क्वचिद् ह्रस्वश्च। इडभावः सर्वत्र।

९३९ **श्वसजपवमरुषत्वरसंघुषास्वनामः** ॥४।४।७६॥ एभ्यः परयोः क्तयोरादिरिड् वा न स्यात्। श्वस्तः, श्वसितः। प्रश्वस्तः, प्रश्वसितः। आश्वस्तः, आश्वसितः। आश्वस्तवान्, आश्वसितवान्। विश्वस्तः, विश्वसितः। विश्वस्तवान्। विश्वसितवान्। व्याङ्भ्यामेव केचिद् विकल्पमिच्छन्ति। श्वसितः, श्वसितवान्। विश्वसितः, विश्वसितवान्। उच्छ्वसितः। उच्छ्वसितवान्। प्राङ्भ्यो नित्यमिड्निषेध इत्यन्ये। प्रश्वस्तः, आश्वस्तः, विश्वस्तः। श्वसेः कर्तर्ययं निषेधो भावेऽधिकरणे च नित्यमेवेट्। श्वसितं निश्वसितमिति केचित्। जप्–जप्तः, जपितः। जप्तवान्, जपितवान्। वम्–वान्तः, वमितः। वान्तवान्, वमितवान्। जपिवम्योर्नित्यमिड्निषेधः–जप्तः जप्तवान्, वान्तः वान्तवान् इत्यन्ये। रुष्–रुष्टः रुषितः, रुष्टवान्। रुषितवान्। वेट्त्वाद् रुषेर्नित्यं प्रतिषेधे प्राप्ते वचनम्। त्वर्–तूर्णः, त्वरितः। तूर्णवान्, त्वरितवान्। संघुष्–संघुष्टं, संघुषितं वाक्यम्। संघुष्टौ संघुषितौ दम्यौ। संघुष्टवान्, संघुषितवान् वाक्यम्। आस्वन्–आस्वान्तः, आस्वनितश्चैत्रः। संघुषास्वनिभ्यां परत्वात् अयमेव विकल्पः। तेनाऽविशब्दनेऽपि–संघुष्टा, संघुषिता रज्जुः। मनस्यपि आस्वान्तम्, आस्वनितं मन इति भवति। अम्–अभ्यान्तः, अभ्यमितः। अभ्यान्तवान्, अभ्यमितवान्।

९४० हृषेः केशलोमविस्मयप्रतिघाते ॥ ४।४।७७ ॥ केशलोमकर्तृका क्रिया केशलोमशब्देनोच्यते। हृषेः केशादिष्वर्थेषु वर्तमानात् परयोः क्तयोरादिरिड्वा स्यात्। हृष्टाः, हृषिताः केशाः। हृष्टं, हृषितं केशैः। हृष्टानि, हृषितानि लोमानि। हृष्टं, हृषितं लोमभिः। हृष्टः, हृषितश्चैत्रः। विस्मित इत्यर्थः। हृष्टाः हृषिताः दन्ताः, प्रतिहता इत्यर्थः। केशादिष्विति किम्। हृष्टो मैत्र इत्यलीकार्थस्य हृषित[x]चैत्रस्तुष्ट्यर्थस्य ।

९४१ अपचितः ॥४।४।७८॥ अपपूर्वस्य चायतेः क्तान्तस्येडभावश्चिरादेशश्च वा निपात्यते। अपचितः, अपचायितः। चिनोतिः पूजार्थो नास्तीति इदं निपातनम्।

९४२ तत्र कसुकानौ तद्वत् ॥५।२।२॥ तत्र—परोक्षामात्रविषये धातोः परौ कसुकानौ प्रत्ययौ स्यातां तौ च परोक्षावद् व्यपदिश्येते। तत्र कसुः परस्मैपदित्वात् कर्तरि, कानस्त्वात्मनेपदित्वाद् भावकर्मणोरपि। शुश्रुवान् उपशुश्रुवान्। पेचानः। चक्राणः। परोक्षावद्भावाद् द्विर्वचनादि। परोक्षावद्भावादेव किित्त्वे सिद्धे कित्करणं संयोगान्तधात्वर्थम्। तेनाजिवान्, बभज्वान्, सस्वजानः, एषु किित्वात् नलोपः। ऋदन्तानां गुणप्रतिषेधार्थं च। शिशीर्वान्। तितीर्वान्। पुपूर्वान्। कर्मणि—शशिराणः। ततिराणः। पपुराणः। बहुलाधिकारात् श्रुसदवसिभ्यः कानो न। केचित्तु एभ्य एव कसुर्नान्येभ्यः, कानस्तु प्रत्यय एव नेष्यते इत्याहुः। अपरे तु सर्वधातुभ्यः कसुमेवेच्छन्ति न कानम्। भूताधिकारेणैवोक्तपरोक्षाविषयत्वे लब्धे तत्रग्रहणं परोक्षामात्रप्रतिपत्त्यर्थम्। तेन पेचिवान् इत्यादि सिद्धम्।

९४३ घसेकस्वरातः कसोः ॥ ४।४।८३ ॥ घसेरेकस्वरादादन्ताच्च धातोः परस्य परोक्षायाः कसोरादिरिट् स्यात्। घस्—जक्षिवान्। एकस्वर—आदिवान्। आशिवान्। द्वित्वदीर्घत्वयोः कृतयोरेकस्वरत्वम्। ऊचिवान्। अनूचिवान्। ष्ट्रति दीर्घत्वे चैकस्वरत्वम्। शेकिवान्। पेचिवान्। सेदिवान्। ऊषिवान्। इणोऽर्तेश्च द्विर्वचने कृतेऽपि समानदीर्घत्वे अरादेशे च सत्येकस्वरसद्भावेनेटः प्राप्तिसद्भावात् इट् नित्य एवेति पूर्वमेव भवति। तेन ईयिवान्, समीयिवान्। आरिवान्। आत्—पपिवान्। ययिवान्। तस्थिवान्। जग्लिवान्। घसेकस्वरात इति किम्। बिभिद्वान्। चिच्छिद्वान्। बभूवान्। नित्यत्वाद् द्वित्वे कृतेऽनेकस्वरत्वम्। विहितविशेषणं चेह नाश्रीयते। कसोरिति किम्। बिभिदिव। बिभिदिम। वमयोर्नियमो

न । घस्यादग्रहणमनेकस्वरार्थम् । इटि हि सत्याकारलोप उपान्त्यलोपश्च भवति दरिद्रातेस्त्वामा भवितव्यम् । दरीद्रांचकृवान् । पूर्वेणैव सिद्धे नियमार्थं वचनम् । एभ्य एव कसोरादिरिट् भवति नान्येभ्य इति ।

९४४ **गमहनविदलृविशदृशो वा** ॥४।४।८४॥ एभ्यः परस्य कसोरादिरिड् वा स्यात् । गम्–जग्मिवान्, जगन्वान् । हन्–जघ्निवान्, जघन्वान् । विद्लृ–विविदिवान्, विविद्वान् । विश्–विविशिवान्, विविश्वान् । दृश्–ददृशिवान्, ददृश्वान् । लृकारो लाभार्थस्य विदेर्ग्रहणार्थः । तेन ज्ञानार्थस्य विविद्वानित्येव भवति । सत्ताविचारणार्थयोस्त्वात्मनेपदित्वात् कसुर्नास्त्येव ।

९४५ **वेयिवदनाश्वदनूचानम्** ॥ ५।२।३ ॥ एते शब्दा भूतेऽर्थे कसुकानान्ताः कर्तरि वा निपात्यन्ते । इणः कसुर्निपात्यते । ईयिवान्, समीयिवान्, उपेयिवान् । तथा नञ्पूर्वादश्नातेः कसुरिडभावश्च निपात्यते । अनाश्वान् । तथा वचेर्ब्रूगादेशाद्वानुपूर्वात् कानो निपात्यते । अनूचानः । निपातनस्येष्टविषयत्वात् कर्तुरन्यत्र अनूक्तमित्याद्येव । ब्रूग एवेच्छन्त्यन्ये । वावचनात् पक्षेऽद्यतन्यादयोऽपि । अगात् । उपागात् । उपैत् । उपेयाय । नाशीत् । नाश्नात् । नाश । अन्ववोचत् । अन्वब्रवीत् । अन्ववक् । अनूवाच ।

९४६ **दाश्वत् साह्वत् मीढ्वत्** ॥४।१।१५॥ एते शब्दाः कसुप्रत्ययान्ता निपात्यन्ते । दाशृ दाने इत्यस्य कसावद्वित्वमनिट्त्वं च निपात्यते । दाश्वान् । दाश्वांसौ । दाशुषी । षहि मर्षणे इत्यस्य परस्मैपदमद्वित्वमुपान्त्यदीर्घत्वमनिट्त्वं च निपात्यते । साह्वान् । मिह सेचने इत्यस्याद्वित्वमनिट्त्वमुपान्त्यदीर्घत्वं ढत्वं च निपात्यते । मीढ्वान् ।

९४७ **शत्रानशावेष्यति तु सस्यौ** ॥५।२।२०॥ सत्यर्थे वर्तमानाद् धातोः शत्रानशौ प्रत्ययौ स्याताम् एष्यति तु–एष्यन्मात्रे भविष्यन्तीविषयेऽर्थे सस्यौ–स्यप्रत्ययसहितौ शत्रानशौ स्याताम् । स्योऽपि प्रत्ययत्वाद् धातोरेव । यान् । यान्तौ । यान्तः । शयानः । शयानौ । शयानाः । निरस्यन् ।

९४८ **अतो म आने** ॥४।४।११५॥ धातोर्विहिते आने प्रत्यये परेऽकारस्य मोऽन्तः स्यात् । पूर्वान्तकरणं 'मव्यस्याः' इत्याकारनिवृत्त्यर्थम् । निरस्यमानः।

पचन्। पचमानः। एकविषयत्वाद् वर्तमानापि–याति। एवं सर्वत्र। तथा सन् अस्ति, अधीयानः अधीते, विद्यमानः विद्यते, जुह्वत् जुहोति, विदन् वेत्ति, जानन् जानाति ब्राह्मणः। तथा तरादौ प्रत्यये–पचत्तरः, पचत्तमः, पचतितमाम्। पचद्रूपः। पचतिरूपम्। जल्पत्कल्पः, जल्पतिकल्पम्। पश्यद्देश्यः, पश्यतिदेश्यम्, पठद्देश्यः, पठतिदेशीयम्। एवं पचमानतरः, पचमानतमः, पचतेतरां पचतेतमामित्यादि। द्वितीयाद्यन्तपदसामानाधिकरण्यसंबोधनतरादिवर्जिततद्धितप्रत्ययोत्तरपदक्रियालक्षणक्रियाहेतुषु वर्तमानाया अन्वयायोगात् शत्रानशावेव। पचन्तं पचमानं पश्य। पचता पचमानेन कृतम्। पचते पचमानाय देहि। पचतः पचमानाद् भीतः। पचतः पचमानस्य स्वम्। पचति पचमाने गतः। संबोधने–हे पचन्, पचमान। तराद्यन्तद्धिते–कुर्वतोऽपत्यं कौर्वतः। पाचतः। वैक्षमाणिः। कुर्वत्पाशः। पचत्पाशः। कुर्वच्चरः। पचच्चरः। उत्तरपदे–भज्यत इति भक्तिः, कुर्वन्भक्तिरस्य कुर्वद्भक्तिः, कुर्वाणभक्तिः। कुर्वत्प्रियः, कुर्वाणप्रियः। ब्रुवन्माठरः, ब्रुवाणमाठरः। क्रियायां लक्षणं ज्ञापकं चिन्हम्। तत्र तिष्ठन्तोऽनुशासति गणकाः। शयाना भुञ्जते यवनाः। बहुषु मूत्रयत्सु कश्चैत्र इति पृष्टः कश्चिदाह–यस्तिष्ठन् मूत्रयति। एवं यो गच्छन् भक्षयति। यः शयानो भुङ्क्ते। योऽधीयान आस्ते। तथा यः पठन् पचति स मैत्रः। एवं यः पचन् पठति। योऽधीयान आस्ते।

९४९. **आसीनः** ॥४।४।११६॥ आस्तेः परस्यानस्यादेरीकारो निपात्यते। य आसीनोऽधीते। तथा–

> " फलन्ती वर्धते द्राक्षा पुष्प्यन्ती वर्धतेऽञ्जनी।
> शयाना वर्धते दूर्वा आसीनं वर्धते विसम् " ॥१॥

क्रियाया हेतुर्जनकस्तत्र अर्जयन् वसति। अधीयानो वसति। एष्यति तु सस्यौ। यास्यन् यास्यति। शयिष्यमाणः शयिष्यते। पश्यन् पश्यति पश्यमाणः पश्यते। तथा भविष्यन् भविष्यति, अध्येष्यमाणः अध्येष्यते ब्राह्मणः इत्यादि। तथा पश्यत्तरः, पश्यतितराम्, पश्यमाणतमः, पश्यतितमाम् इत्यादि। सर्वेष्वेकविषयत्वाद् भविष्यन्त्यपि। पश्यन् व्रजति, पश्यमाणो व्रजतीति क्रियायां क्रियार्थायामेकविषयत्वाच्च भविष्यन्त्यादयोऽपि। पश्यामीति व्रजति। पाचको व्रजति। पक्तुं व्रजति। पूर्ववदेव च द्वितीयाद्यन्तसामानाधिकरण्यादिषु भविष्यन्त्याः

समन्वयाभावादभावः । पक्ष्यन्तं पक्ष्यमाणं पश्य । हे पक्ष्यन् पक्ष्यमाण ब्राह्मण । पाक्ष्यतः, पाक्ष्यमाणिः, पक्ष्यमाणपाशः। पक्ष्यद्भक्तिः, पक्ष्यमाणप्रियः। जल्पिष्यन्तो ज्ञास्यन्ते पण्डिताः । अध्येष्यमाणा वत्स्यन्तीत्यादि । सदेष्यतोरभावे तु श्वः पक्ता। बहुलाधिकाराद् द्रव्यगुणयोर्लक्षणे हेतुहेतुमद्भावद्योतके त्यादियोगे च न । यः कम्पते सोऽश्वत्थः । यत्तरति तल्लघु । हन्तीति पलायते । वर्षतीति धावति । करिष्यतीति व्रजति । हनिष्यतीति नश्यति । पचत्यतो लभते । विजयतेऽतः पूज्यते । क्रियाया अपि लक्षणे चादियोगे न । यः पचति च पठति च स चैत्रः । योऽधीते चास्ते स मैत्रः । शकारः शित्कार्यार्थः । ऋकारो ङ्याद्यर्थः ।

९५० **तौ माङ्याक्रोशेषु** ॥ ५।२।२१ ॥ माङ्युपपदे आक्रोशे गम्यमाने सति तौ शत्रानशौ प्रत्ययौ स्याताम् । मा पचन् वृषलो ज्ञास्यति । मा पचमानोऽसौ मर्तुकामः ।

" मा जीवन् यः परावज्ञा–दुःखदग्धोऽपि जीवति ॥
तस्याजननिरेवास्तु जननीक्लेशकारिणः " ॥१॥

शत्रानशोरनुवृत्तावपि 'तौ' ग्रहणमवधारणार्थम् । तेनात्र विषये असरूपविधिनाऽप्यद्यतनी न । भवतीत्यपि कश्चित् ।

९५१ **वा वेत्तेः क्वसुः** ॥५।२।२२॥ सत्यर्थे वर्तमानाद् वेत्तेः क्वसुप्रत्ययो वा वा स्यात् । पक्षे यथाप्राप्तम् । विद्वान् । साधुस्तत्त्वं विद्वान् विदन् वेत्ति । विदुषा कृतम् । विदता कृतम् । हे विद्वन्, हे विदन् । वैदुषः। वैदतः। विद्वद्भक्तिः,विदद्भक्तिः। विद्वानास्ते । विदन्नास्ते । विद्वाँल्लभते, विदँल्लभते । द्वितीयाद्यन्तपदसामानाधिकरण्यादिषु पूर्ववदनन्वयादेव न वर्तमाना । ककारःकित्कार्यार्थः। उकारो ङ्याद्यर्थः।

९५२ **पूङ्यजः शानः** ॥ ५।२।२३ ॥ सत्यर्थे वर्तमानाभ्यां पवतियजिभ्यां परः शानः स्यात् । कृत्त्वात् कर्तरि । पवते, पवमानः । मलयं पवमानः । यजति यजते वा यजमानः । आनशा योगे न षष्ठीसमासो न च यजेरफलवति कर्तरि सोऽस्तीति वचनम् । एवमुत्तरत्रापि । शकारः शित्कार्यार्थः ।

९५३ **वयःशक्तिशीले** ॥ ५।२।२४ ॥ सत्यर्थे वर्तमानाद् धातोर्वयः–

शक्तिशीलेषु गम्यमानेषु शानः स्यात् । वयः प्राणिनां कालकृता बाल्याद्यवस्था । कतीह शिखण्डं वहमानाः । स्त्रियं गच्छमानाः। शक्तिःसामर्थ्यम्–कतीह हस्तिनं निघ्नानाः। समश्नानाः। शीलं स्वभावः। कतीहात्मानं वर्णयमानाः। परान्निन्दमानाः। अनभिधानान्न वाऽसरूपः शतृः ।

९८४ धारीङोऽकृच्छ्रेऽतृश् ॥५।२।२५॥ अकृच्छ्रः सुखसाध्यः । अकृच्छ्रे सत्यर्थे वर्तमानाद् धारेरिङश्च परोऽतृश् प्रत्ययः स्यात् । धारयन् आचाराङ्गम् । अधीयन् द्रुमपुष्पीयम् । अकृच्छ्र इति किम् । कृच्छ्रेण धारयति यतिधर्मम् । कृच्छ्रेणाधीते पूर्वगतम् । इङ आनशि प्राप्ते धारेरुभयप्राप्तौ वचनम् । वासरूपोऽपि नेष्यत एव ।

९८५ सुगद्विषार्हः सत्रिशत्रुस्तुत्ये ॥ ५।२।२६ ॥ सत्यर्थे वर्तमानात् सुनोतेर्द्विषोऽर्हश्च धातोर्यथासंख्यं सत्रिणि शत्रौ स्तुत्ये च कर्तरि अतृश् प्रत्ययः स्यात् । सत्री यजमानः । सर्वे सुन्वन्तः यज्ञस्वामिन इत्यर्थः । चौरं चौरस्य वा द्विषन शत्रुरित्यर्थः । पूजामर्हन् प्रशस्य इत्यर्थः । एष्विति किम् । सुरां सुनोति । भार्यां द्वेष्टि परं पश्यन्तीम् । वधर्हति चौरः ।

९८६ तृन् शीलधर्मसाधुषु ॥ ५।२।२७ ॥ शीले धर्मे साधौ च सत्यर्थे वर्तमानाद् धातोस्तृन् प्रत्ययः स्यात् । शीले–कर्ता कटम् । वदिता जनापवादान् । करणं वदनं चास्य शीलमित्यर्थः । धर्मः कुलाद्याचारः, तत्र वधूमूढां मुण्डयितारः श्राविष्ठायनाः श्राद्धे सिद्धमन्नमपहर्तारः आह्वरकाः । मुण्डनादि तेषां कुलधर्म इत्यर्थः। साधौ–गन्ता खेलः । कर्ता विकटः। साधु गच्छति साधु करोतीत्यर्थः। नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृशब्दा औणादिकाः पितृमात्रादिवत् । अत अत एवैषामार्विधौ पृथगुपादानम् । शीलादिष्विति किम् । कर्ता कटस्य । बहुवचनं 'सन्भिक्षाशंसेरुः' इत्यादौ यथासंख्यपरिहारार्थम् । नकारः सामान्यग्रहणाविघातार्थः ।

९८७ भ्राज्यलंकृग्निराकृग्भूसहिरुचिवृतिवृधिचरिप्रजनापत्रप इष्णुः ॥५।२।२८॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य इष्णुः प्रत्ययः स्यात् । भ्राजनशीलो भ्राजनधर्मा साधु भ्राजते वा भ्राजिष्णुः। भ्राजिष्णुना लोहितचन्दनेन । अलंकृग्–अलंकरिष्णुः । निराकृग्–निराकरिष्णुः । भू–भविष्णुः । सर्वेषां भविष्णूनां जन्यानां न तु स योग्यः । सह्–सहिष्णुः । रुच्–रोचिष्णुः । वृत्–वर्तिष्णुः । वृध्–

वर्धिष्णुः । चर्–चरिष्णुः । प्रजन्–प्रजनिष्णुः । अपत्रप्–अपत्रपिष्णुः । भ्राजेर्नेच्छन्त्येके ।

९५८ **उदः पचिपतिपदिमदेः** ॥ ५।२।२९ ॥ उत्पूर्वेभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य इष्णुः स्यात् । उत्पचिष्णुः । उत्पतिष्णुः । उत्पदिष्णुः। उन्मदिष्णुः। पदेर्नेच्छन्त्यन्ये ।

९५९ **भूजेः ष्णुक्** ॥ ५।२।३० ॥ शीलादौ सत्यर्थे वर्तमानाभ्यां भूजिभ्यां ष्णुक् प्रत्ययः स्यात् । भूष्णुः। ककारः कित्कार्यार्थः ।

९६० **स्थाग्लाम्लापाचिपरिमृजिक्षेः स्नुः** ॥ ५।२।३१ ॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यः स्नुप्रत्ययः स्यात् । स्थास्नुः । ग्लास्नुः । म्लास्नुः। पक्ष्णुः । परिमार्क्ष्णुः । क्षेष्णुः । म्लादिभ्यः केचिदेवेच्छन्ति ।

९६१ **त्रसिगृधिधृषिक्षिपः क्नुः** ॥५।२।३२॥ शीलादौ सत्यर्थे वर्तमानेभ्य एभ्यः क्नुः प्रत्ययः स्यात् । त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्णुः ।

९६२ **सन्नभिक्षाशंसेरुः** ॥५।२।३३॥ शीलादौ सत्यर्थे वर्तमानात् सन्नन्तयान्ताद् धातोर्भिक्षाशंसिभ्यां च पर उः प्रत्ययः स्यात् । चिकीर्षुः । जिहीर्षुः। भिक्षुः। आशंसितिं आङः शसुङ् इच्छायामित्यस्य ग्रहणम् , न तु शंसु स्तुतौ चेत्यस्य । तत्राङ्योगस्यानियतत्वात् । आशंसुः । स्तुत्यर्थस्यार्षीच्छत्यन्यः ।

९६३ **विन्दिच्छू** ॥५।२।३४॥ शीलादौ सत्यर्थे वर्तमानाद् वित्तेरिच्छतेश्च उः प्रत्ययो यथासंख्यं नोपान्त्यछकारान्तादेशौ च निपात्यन्ते । वेदनशीलो विन्दुः। एषणशील इच्छुः। कथमपां विन्दुः? विन्देरवयवार्थात् औणादिक उः। अन्ये तस्यैव निपातनं क्रियानिमित्तस्तु विन्दुरनागमिक एवेत्याहुः । सर्वविदीनां सर्वेषीणां च निपातनमिदमित्यन्यः ।

९६४ **शृवन्देरारुः** ॥५।२।३५॥ शीलादौ सत्यर्थे वर्तमानाभ्यां शृशृवन्दिभ्यामारुः प्रत्ययः स्यात् । शृणातीत्येवंशीलः शरारुः । विशीर्यते विशरारुः । वन्दते वन्दारुः ।

९६५ **दाधेसिशदसदो रुः** ॥५।२।३६॥ शीलादौ सत्यर्थे वर्तमानेभ्यो दारूप-

टुधे–सि–शद–सद–इत्येतेभ्यो रुः प्रत्ययः स्यात् । ददाति दयते यच्छति धयति दाति दायति वेत्येवंशीलो दारुः । कथं धयति तदिति दारु काष्ठम् ? औणादिकः कर्मणि रुः । धयति धारुर्वत्सो मातरम् । सिनोति सेरुः । शीयते शद्रुः । सीदति सद्रुः। एभ्य इति किम् । दधातीत्येवंशीलो दधिर्गौः। टुधेग्रहणाद्दारूपमिह गृह्यते न संज्ञा।

९६६ **शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालुः** ॥५।२।३७॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य आलुः प्रत्ययः स्यात् । शेते इत्येवंशीलः शयालुः । श्रःपूर्वो धाग्–श्रद्धत्ते श्रद्धालुः । निद्राति निद्रायति वा निद्रालुः । तन्द्राति द्रायति वा तन्द्रालुः । निपातनात् तदो दस्य नः । तन्द्रेति सौत्रो वा । दयते दयालुः । पतिगृहिस्पृहयोऽदन्ताश्चौरादिकाः। पतिगृही सौत्राविकारान्तौ वा। पतयति पतयालुः। गृहयति गृहयालुः । स्पृहयति स्पृहयालुः । मृगयतेरपि कश्चित् । मृगयालुः। लज्जालुः, ईर्ष्यालुः, शलालुप्रभृतयस्त्वौणादिकाः। कृपालुहृदयालू मत्वर्थीयान्तौ ।

९६७ **ङौ सासहि वावहि चाचलि पापति** ॥५।२।३८॥ शीलादौ सत्यर्थे वर्तमानानां सहिवहिचलिपतीनां यङन्तानां ङौ सति यथासंख्यमेते निपात्यन्ते। अत एव वचनाद् ङिरपि। सासह्यते इत्येवंशीलः सासहिः। वावह्यते वावहिः। चाचल्यते चाचलिः। पनीपत्यते पापतिः। निपातनात् न्यागमाभावः। ङाविति ङकारः 'तृन्नुदन्ताव्ययकस्वान ' इत्यत्र विशेषणार्थः।

९६८ **सस्रिचक्रिदधिजज्ञिनेमि** ॥५।२।३९॥ एते शीलादौ सत्यर्थे कृतद्विर्वचना ङिप्रत्ययान्ता निपात्यन्ते । सरतीत्येवंशीलः सस्रिः । करोति चक्रिः । दधाति दधिः । जायते जानाति वा जज्ञिः। नमति नेमिः । द्विर्वचनाभाव एवं च निपातनात् ।

९६९ **शृकमगमहनवृषभूस्थ उकण्** ॥५।२।४०॥ शीलादौ सत्यर्थे वर्तमानेभ्य एभ्य उकण् प्रत्ययः स्यात् । शृणाति एवंशीलः शारुकः । प्रशारुकः शरः । कामुकः, कामुकी रिरंसुः । कामुका येच्छां विना कामयते । कामुका अन्यस्य स्त्रियो भवन्ति। गामुकः आगामुकः स्वगृहम्। घातुकः, आघातुको व्याधः। वर्षुकः, प्रवर्षुकः पर्जन्यः । भावुकः। प्रभावुकः क्षत्रियः। स्थायुकः प्रमत्तः। उपस्थायुको गुरुम् । गुणानधिष्ठायुकः ।

९७० लषपतपदः ॥५।२।४१॥ शीलादौ सत्यर्थे वर्तमानेभ्य एभ्य उकण् प्रत्ययः स्यात् । अपलषतीत्येवंशीलम् अपलाषुकं नीचसांगत्यम् । अभिलाषुकः । उत्पातुकं ज्योतिः। प्रपातुका गर्भाः । उपपादुका देवाः । योगविभाग उत्तरार्थः।

९७१ भूषाक्रोधार्थजुसृगृधिज्वलशुचश्चानः ॥५।२।४२॥ भूषार्थेभ्यः क्रोधार्थेभ्यो जुसृगृधिज्वलशुचिभ्यः लषपतपदिभ्यश्च शीलादौ सत्यर्थे वर्तमानेभ्योऽनः प्रत्ययः स्यात् । भूषार्थे–भूषयतीत्येवंशीलो भूषणः कुलस्य । मण्डना गगनस्य भाः । प्रसाधनः क्रोधार्थे–क्रोधनः । कोपनः । रोषणः । जवतिः सौत्रो वेगाख्ये संस्कारे वर्तते । तेन चल्यर्थद्वारेण न सिद्ध्यतीतीहोपादानम् । जवनः । सृ–सरणः । गृधू गर्धनः। ज्वल्–ज्वलनः । शुच्–शोचनः। लष्–अभिलषणः । पत्–पतनः । पदेरिदित्त्वादुत्तरेणैव सिद्धे सकर्मकार्थं वचनम् । अर्थस्य ग्रन्थस्य क्षेत्राणां पदनः । उत्तरत्र सकर्मकेभ्योऽपि विधिरित्येकेषां दर्शनम्। तथा चोकणा बाधितोऽपि असरूपत्वात् पदेरनः प्रत्ययो भविष्यतीति चेत् एवं तर्हि शीलादिप्रत्ययेष्वसरूपत्वेन शीलादिप्रत्ययो न भवतीति ज्ञापनार्थं पदिग्रहणम् । तेन चिकीर्षिता कटम् अलंकर्ता कन्यामिति न । कथं तर्हि गन्ता खेलः आगामुकः भविता भावुकः जागरिता जागरूकः विकत्थनः विकत्थी भासनं भासुरं वर्धनः वर्धिष्णुः अपलाषुकः अपलाषी कम्पना कम्मा शाखा कमना कामुका युवतिः ? क्वचित् समावेशोऽपि भवति । एतदर्थमेव च ' न ण्यादि ' इति सूत्रे दीपिग्रहणम् । अन्यथा रेणानो बाध्येत इति तदनर्थकं स्यात् । अनस्यैव विषये समावेश इत्येके ।

९७२ चलशब्दार्थादकर्मकात् ॥५।२।४३॥ चलनार्थाच्छब्दार्थाच्च धातोः शीलादौ सत्यर्थे वर्तमानादकर्मकादविद्यमानकर्मकादविवक्षितकर्मकाद्वा परोऽनः प्रत्ययः स्यात् । चलतीत्येवंशीलश्चलनः । कम्पनः । चोपनः । चेष्टनः । शब्दयतीत्येवंशीलः शब्दनः। रवणः। आक्रोशनः । अकर्मकादिति किम् । पठिता विद्याम् ।

९७३ इङितो व्यञ्जनाद्यन्तात् ॥५।२।४४॥ व्यञ्जनमादिरन्तश्च यस्य स व्यञ्जनाद्यन्तः । इदनुबन्धात् ङानुबन्धाच्च व्यञ्जनाद्यन्ताद् धातोः शीलादौ सत्यर्थे वर्तमानादनः प्रत्ययः स्यात्। इदित्–स्पर्धि–स्पर्धनः। ङित्–वृतूङ्–वर्तनः। वृधूङ्–वर्धनः । णेरतश्च विषय एव लोपे व्यञ्जनान्तत्वात् इहापि भवति । चितिण्–चेतनः। गुपि–जुगुप्सनः । मानि मीमांसनः। इङित इति किम् । स्वप्ना । व्यञ्जनाद्यन्तादिति

किम् । एधिता । शयिता । अकर्मकादित्येव । वसिता वस्त्रम् । सेविता विषयान् । कथमुत्कण्ठावर्धनैरिति ? नात्र कर्मषष्ठीसमासो वृधेरकर्मकत्वात् । किंतु तृतीयासमासः । उत्कण्ठया वर्धनैः–वर्धमानोत्कण्ठाशीलैरिति यावत् । अन्ये त्वकर्मकादेवेति नेच्छन्ति ।

९७४ **न णिङ्यसूददीपदीक्षः** ॥ ५।२।४५ ॥ णिङन्तेभ्यो यान्तेभ्यः सूदादिभ्यश्च धातुभ्यः शीलादौ सत्यर्थेऽनः प्रत्ययो न स्यात् । भावयिता । हस्तयिता । उत्पुच्छयिता । क्ष्मायिता । क्नूयिता । दयिता । सूदिता । दीपिता । दीक्षिता । मधुसूदनारिसूदनबलसूदनादयो नन्द्यादिषु द्रष्टव्याः ।

९७५ **द्रमक्रमो यङः** ॥५।२।४६॥ शीलादौ सत्यर्थे वर्तमानाभ्यां यङन्ताभ्यां द्रमिक्रमिभ्यामनः प्रत्ययः स्यात् । कुटिलं द्रमति क्रामतीत्येवंशीलः–दन्द्रमणः, चङ्क्रमणः । सकर्मकार्थं 'य' इति प्रतिषेधनिवृत्त्यर्थं च वचनम् । 'अतः' इति हि लुक् प्रत्यये विषयभूतेऽपि भवति ।

९७६ **यजिजपिदंशिवदादूकः**॥५।२।४७॥ एभ्यो यङन्तेभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य ऊकः प्रत्ययः स्यात् । भृशं पुनःपुनर्वा यजतीत्येवंशीलो यायजूकः । जञ्जपूकः । दन्दशूकः । वावदूकः । अन्येभ्योऽपीति केचित् । दन्दहूकः । पापयूकः । निजागदूकः । नानशूकः। पंपशूकः ।

९७७ **जागुः** ॥ ५।२।४८ ॥ शीलादौ सत्यर्थे वर्तमानाज्जागर्तेरूकः प्रत्ययः स्यात् । यङ इति निवृत्तम् । जागर्तीत्येवंशीलो जागरूकः ।

९७८ **शमष्टकाद् घिनण्** ॥५।२।४९॥ शीलादौ सत्यर्थे वर्तमानेभ्यः शमादिभ्योऽष्टाभ्यो धातुभ्यो घिनण् प्रत्ययः स्यात् । शाम्यतीत्येवंशीलः शमी । दमी । तमी । श्रमी । भ्रमी । क्षमी । ममादी । उन्मादी । क्रमी । यङन्तान्मत्वर्थीयेनैव सिद्धयति तृन्बाधनार्थं तु वचनम् । अष्टकादिति किम् । असिता । णकारो वृद्धयर्थः । घकार उत्तरत्र कत्वगत्वार्थः । अभिधानात् घिनण् अकर्मकेभ्यस्तेनेह न । अरण्यं भ्रमिता । सकर्मकेभ्यस्तु यथादर्शनं दर्शयिष्यामः।

९७९ **युजभुजभजत्यजरुजविषदुषदुहदुहाभ्याहनः**॥५।२।५०॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो घिनण् स्यात्। युज्यते युनक्ति वा इत्येवंशीलो योगी।

भुङ्क्ते भुनक्ति भुजतीति वा भोगी । भागी । कल्याणभागी । त्यागी । प्राणत्यागी । रागी । 'अकट्घिनोश्च रञ्जेः' इति नलोपः । द्वेषी । दोषी । द्रोही । दोही । अभ्याघाती । अकर्मकादित्येव । गां दोग्धा । शत्रूनभ्याहन्ता ।

९८० **आङः क्रीडमुषः** ॥५।२।५१॥ शीलादौ सत्यर्थे वर्तमानाभ्यामाङः पराभ्यामाभ्यां घिनण् स्यात् । आक्रीडत इत्येवंशील आक्रीडी । आमोषी । शीलादिप्रत्ययान्ताः प्रायेण रूढिप्रकारा यथादर्शनं प्रयुज्यन्त इति उपसर्गान्तराधिक्ये न भवति । एवमुत्तरत्रापि ।

९८१ **प्राच्च यमयसः** ॥ ५।२।५२ ॥ शीलादौ सत्यर्थे वर्तमानाभ्यां प्रादाङश्च पराभ्यामाभ्यां घिनण् स्यात् । प्रयच्छतीत्येवंशीलः प्रयामी । आयामी । प्रयासी । आयासी ।

९८२ **मथलपः** ॥ ५।२।५३ ॥ प्रात्पराभ्यामाभ्यां शीलादौ सत्यर्थे वर्तमानाभ्यां घिनण् स्यात् । प्रमथतीत्येवंशीलः प्रमाथी । प्रलापी ।

९८३ **वेश्च द्रोः** ॥५।२।५४॥ वेः प्राच्च पराच्छीलादौ सत्यर्थे वर्तमानाद् द्रवतेर्घिनण् स्यात् । विद्रवतीत्येवंशीलो विद्रावी । प्रद्रावी ।

९८४ **विपरिप्रात् सर्तेः** ॥५।२।५५॥ विपरिप्रेभ्यः पराच्छीलादौ सत्यर्थे वर्तमानात् सर्तेर्घिनण् स्यात् । विसरतीत्येवंशीलो विसारी । परिसारी । प्रसारी ।

९८५ **समः पृचैप्ज्वरेः** ॥ ५।२।५६ ॥ शीलादौ सत्यर्थे वर्तमानाभ्यां समः पराभ्यां पृणक्तिज्वरिभ्यां घिनण् स्यात् । संपृणक्तीत्येवंशीलः संपर्की । पिन्निर्देशादादादिकस्य न ग्रहणम् । संपर्चिता । संज्वरतीत्येवंशीलः संज्वारी । केचिद् ण्यन्तादपीच्छन्ति । संज्वरी । त्वरयतेरपि कश्चित् । संत्वरी । अकर्मकादित्येव । संपृणक्ति शाकम् ।

९८६ **संवेः सृजः** ॥ ५।२।५७ ॥ शीलादौ सत्यर्थे वर्तमानात् संविभ्यां परात् सृजेर्घिनण् स्यात् । संसृजतीत्येवंशीलः संसृज्यते वा संसर्गी, विसर्गी ।

९८७ **संपरिव्यनुप्राद्वदः** ॥ ५।२।५८ ॥ शीलादौ सत्यर्थे वर्तमानाद्

संपरिव्यनुभ्येभ्यः परात् वदेर्घिनण् स्यात् । संवदतीत्येवंशीलः संवादी । परिवादी विवादी । अनुवादी । प्रवादी । परिपूर्वाण्यन्तादपीति केचित् ।

९८८ **वेर्विचकत्थस्रम्भूकषकसलसहनः** ॥ ५।२।५९ ॥ एभ्यो विपूर्वेभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो घिनण् स्यात् । विविनक्ति इत्येवंशीलो विवेकी । विकत्थी । विस्रम्भी । विकाषी । विकासी । विलासी । विघाती ।

९८९ **व्यपाभेर्लषः** ॥ ५।२।६० ॥ व्यपाभिभ्यः पराच्छीलादौ सत्यर्थे वर्तमानाल्लषेर्घिनण् स्यात् । विलषतीत्येवंशीलो विलाषी । अपलाषी । अभिलाषी ।

९९० **संप्राद्वसात्** ॥५।२।६१॥ संप्राभ्यां पराच्छीलादौ सत्यर्थे वर्तमानाद् वसतेर्घिनण् स्यात् । संवसतीत्येवंशीलः संवासी । प्रवासी । शबादिर्देशाद् वस्तेर्न ।

९९१ **समत्यपाभिव्यभेश्चरः** ॥५।२।६२॥ सम् अति अप अभि व्यभि इत्येतेभ्यः पराच्छीलादौ सत्यर्थे वर्तमानाच्चरतेर्घिनण् स्यात् । संचरतीत्येवंशीलः संचारी । अतिचारी । अपचारी । अभिचारी । व्यभिचारी ।

९९२ **समनुव्यवाद्रुधः** ॥ ५।२।६३ ॥ सम् अनु वि अव इत्येभ्यः पराच्छीलादौ सत्यर्थे वर्तमानाद् रुधेर्घिनण् स्यात् । संरुन्धे इत्येवंशीलः संरोधी । अनुरोधी । विरोधी । अवरोधी ।

९९३ **वेर्दहः** ॥५।२।६४॥ विपूर्वाच्छीलादौ सत्यर्थे वर्तमानाद् दहेर्घिनण् स्यात् । विदहतीत्येवंशीलो विदाही ।

९९४ **परेर्देविमुहश्च** ॥५।२।६५॥ देवीति देवृधातोरण्यन्तस्य ण्यन्तस्य च ग्रहणम् । परिपूर्वाभ्यां शीलादौ सत्यर्थे वर्तमानाभ्यामाभ्यां दहश्च घिनण् स्यात् । परिदेवयते परिदेवयति वा परिदेवी । ण्यन्तान्नेच्छन्त्यन्ये । परिमोही । परिदाही ।

९९५ **क्षिपरटः** ॥५।२।६६॥ परिपूर्वाभ्यां शीलादौ सत्यर्थे वर्तमानाभ्यामाभ्यां घिनण् स्यात् । परिक्षिप्यति परिक्षिपति वा परिक्षेपी । परिक्षेप्यम्भसाम् । परिराटी ।

९९६ **वादेश्च णकः** ॥ ५।२।६७ ॥ परिपूर्वाच्छीलादौ सत्यर्थे वर्तमानाद् वादयतेः क्षिपरटिभ्यां च णकः प्रत्ययः स्यात् । परिवादयतीत्येवंशीलः परिवादकः। वदेरपीति केचित् । परिक्षेपकः । परिराटकः । असरूपत्वात् ' णकतृचौ ' इति सिद्धे पुनर्विधानं शीलादिप्रत्ययेष्वशीलादिकृत्प्रत्ययोऽसरूपविधिना न भवतीति ज्ञापनार्थम् । तेनालंकारकः परिक्षिपः परिरट इत्यादिशीलाद्यर्थे न भवति । बाहुलकात् क्वचिद् भवत्यपि । 'कामक्रोधौ मनुष्याणां खादितारौ वृकाविव ' । अत्र णकविषये तृच् ।

९९७ **निन्दहिंसक्लिशखादविनाशिव्याभाषासूयाऽनेकस्वरात्** ॥५।२।६८॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो णकः स्यात् । निन्दतीत्येवंशीलो निन्दकः । हिंसकः । क्लिश्नाति क्लिश्यते वा क्लेशकः । खादकः । विनाशयति विनाशकः । व्याभाषकः । असूयः कण्ड्वादौ । असूयकः । दरिद्रायकः । चकासकः गणकः । चुलुम्पकः । अनेकस्वरत्वादेव सिद्धेऽसूयग्रहणं कण्ड्वादिनिवृत्त्यर्थम् । तेन कण्डूयिता, मन्तूयिता-तृन्नेव । विनाशिग्रहणं तु अन्यस्य ण्यन्तस्य निवृत्त्यर्थम् । कारयिता । अनेकस्वरान्नेच्छन्त्यन्ये । क्लिशेरविशेषेण ग्रहणाद्दैवादिकादिदित्त्वेऽपि अनो न ।

९९८ **वृङ्भिक्षिलुण्टिजल्पिकुट्टाट्टाकः** ।५।२।७०॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यष्टाकः प्रत्ययः स्यात् । वृणीते इत्येवंशीलो वराकः । वराकी । भिक्षाकः, भिक्षाकी । लुण्टाकः, लुण्टाकी । जल्पाकः, जल्पाकी । कुट्टाकः, कुट्टाकी । टकारो ङ्यर्थः ।

९९९ **प्रात्सूजोरिन्** ॥५।२।७१॥ प्रात् पराभ्यां सुवतिजुभ्यां शीलादौ सत्यर्थे वर्तमानाभ्यामिन् प्रत्ययः स्यात् । सू इति निरनुबन्धग्रहणात् सुवतेर्ग्रहणं न सूतिसूयत्योः । प्रसुवतीत्येवंशीलः प्रसवी । प्रजवी ।

१००० **जीणृदाक्षिविश्रिपरिभूवमाभ्यमाव्यथः** ॥ ५।२।७२ ॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य इन् स्यात् । जि-जयतीत्येवंशीलो जयी । इण्-अत्ययी उदयी । दृ-आदरी । क्षीति क्षिक्षितोर्ग्रहणम् । क्षयी । विश्रि-विश्रयी । परिभू-परिभवी । वम्-वमी । अभ्यम्-अभ्यमी । अव्यथ्-न व्यथते इत्यव्यथी ।

१००१ **सृघस्यदो मरक्** ॥५।२।७३॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो मरक् प्रत्ययः स्यात् । सरतीत्येवंशीलः सृमरः । घस्मरः । अज्मरः ।

१००२ **भञ्जिभासिमिदो घुरः** ॥५।२।७४॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो घुरः प्रत्ययः स्यात् । भज्यते स्वयमेवेत्येवंशीलं भङ्गुरं काष्ठम् । भासते भासुरं वपुः । मेद्यति मेदते वा मेदुरः । धकारो गत्वार्थः ।

१००३ **वेत्तिच्छिदभिदः कित्** ॥५।२।७५॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यः कित् घुरः प्रत्ययः स्यात् । वेत्तीत्येवंशीलो विदुरः। छिद्यते भिद्यते स्वयमेव छिदुरः, भिदुरः । कित्वाद् गुणो न । वेत्तीति तिङ्निर्देश इतरविदित्रयव्युदासार्थः।

१००४ **भियो रुरुकलुकम्** ॥ ५।२।७६ ॥ शीलादौ सत्यर्थे वर्तमानाद् बिभेते रुरुकलुक इति प्रत्ययत्रयं कित् स्यात् । बिभेतीत्येवंशीलो भीरुः । भीलुकः। ऋफिडादित्वात् लत्वं प्रयोगानुसरणाद् गरीय इति लाघवार्थं लुकवचनम्।

१००५ **सृजीणृनशष्टरप्** ॥५।२।७७॥ एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यः कित् ट्वरप् प्रत्ययः स्यात् । सरतीत्येवंशीलः सृत्वरः । सृत्वरी । जित्वरः, जित्वरी । इण्–इत्वरः, इत्वरी । क्रूरकर्मणि पथिके नीचे दुर्विधे । नश्वरः नश्वरी । टकारो ङ्यर्थः । पकारस्तागमार्थः ।

१००६ **गत्वरः** ॥५।२।७८॥ गमेष्टवरप् मकारस्य च तकारो निपात्यते । गत्वरः, गत्वरी ।

१००७ **स्म्यजसाहिंसदीपकम्पकमनमो रः** ॥ ५।२।७९ ॥ स्म्यादिभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो रः प्रत्ययः स्यात् । स्मयत इत्येवंशीलं स्मेरं मुखम् । अजसिति जसूच् मोक्षणे–नञ्पूर्वः । न जस्यति अजस्रं श्रवणम् । अजस्रा प्रवृत्तिः। अजस्रः पाकः । अजस्रं पचति । अजस्रशब्दोऽयं स्वभावात् सातत्यविशिष्टां क्रियामाह । तेन धात्वर्थ एव कर्तरि रः प्रत्ययोऽन्यथा क्रियाभिधानानुपपत्तेः । तेनाजस्रो घट इति न । अजस्रमित्यव्ययं नित्यार्थं क्रियाविशेषणमप्यस्ति । हिंस्–हिंस्रो व्याधः। दीप्–दीप्रो दीपः । कम्प्–कम्प्रः । कम्–कामयते कम्रा युवतिः। बहुलाधिकारात् कर्मण्यपि । कम्यते कम्रः । तत एव कमितेत्यपि । नम्–नमतीति नम्रः । अजसिकमिनमिभ्यः कर्मकर्तर्येवेच्छन्त्येके ।

१००८ तृषिधृषिस्वपो नजिङ् ॥५।२।८०॥ तृषिधृषिस्वपिभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो नजिङ् प्रत्ययः स्यात् । तृष्यतीत्येवंशीलस्तृष्णक् । तृष्णजौ । धृष्णक् । धृष्णजौ । स्वप्नक् । स्वप्नजौ । ङकारो गुणप्रतिषेधार्थः । इकार उच्चारणार्थः । धृषो नेच्छन्त्येके ।

१००९ स्थेशभासपिसकसो वरः ॥ ५।२।८१ ॥ स्थादिभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो वरः प्रत्ययः स्यात् । तिष्ठतीत्येवंशीलः स्थावरः, स्थावरा । ईश्वरः, ईश्वरा । कथमीश्वरी ? 'अक्षोरीचादेः' इत्यौणादिके वरटि भवति । भास्वरः, भास्वरा । पेस्वरः । पेस्वरा । विकस्वरः, विकस्वरा । प्रमदेरपीति कश्चित् । प्रमाद्यति प्रमद्वरः ।

१०१० यायावरः ॥ ५।२।८२ ॥ यातेर्धातोः शीलादौ सत्यर्थे वर्तमानाद् वरः प्रत्ययो निपात्यते । कुटिलं यातीत्येवंशीलो यायावरः।

१०११ दिद्युद्दद्जगज्जुहूवाक्प्राट्धीश्रीद्रूस्रूज्वायतस्तूकटप्रूपरिव्राड्भ्राजादयः क्विपः ॥ ५।२।८३ ॥ एते शब्दाः क्विबन्ताः शीलादौ सत्यर्थे निपात्यन्ते । द्योतते इत्येवंशीलो दिद्युत् । दृणातीति ददृत् । गच्छतीति जगत् । जुहोतीति जुहूः । एषु द्वित्वम् । दृणातिजुहोत्योर्ह्रस्वत्वदीर्घत्वे च । वक्तीति वाक् । पृच्छतीति प्राट् । शब्दप्राट् । तत्वप्राट् । दधाति ध्यायति वा धीः । श्रयतीति श्रीः। शतं द्रवति शतद्रूः। स्रवतीति स्रूः। जवतीति जूः । आयतं स्तौतीति आयतस्तूः । कटं प्रवते कटप्रूः। परिव्रजतीति परिव्राट् । एषु दीर्घत्वम् । दधातेराकारस्य ध्यायतेर्याशब्दस्य चेकारः । बहुलाधिकारादशीलादौ अपि । धीः । सुधीः । प्रधीः। आधीः । भ्राजादि–विभ्राजते इति विभ्राट् । भासते इति भाः । पिपर्तीति पूः। धूर्वतीति धूः । विद्योतते विद्युत् । ऊर्जयतीति ऊर्क् । ग्रावाणं स्तौतीति ग्रावस्तुत् । पचतीति पक् । शक्नोतीति शक् । भिनतीति भित् । वेत्तीति वित् । शोकच्छित् । 'भुवः संज्ञायामेव ।' भूः पृथिवी । शंभूः शिवः। आत्मभूः कामः। मनोभूः स एव। स्वयंभूर्ब्रह्मा । स्वभूर्विष्णुश्च । मित्रभूर्नाम कश्चित् । प्रतिभूः उत्तमर्णाधमर्णयोः अन्तरस्थः । दृन्भूः व्यसनसहायः । कारभूः पण्यमूल्यादिनिर्णेता । वर्षाभूर्दर्दुर औषधिश्च । पुनर्भूः पुनरूढा औषधिश्च संज्ञायाम् । अन्यत्र, भविता । शीलादिषु असरूपविधिर्नास्ति । तेन सामान्यलक्षणः क्विप् न प्राप्नोतीति पुनर्विधीयते । शीला-

दिप्रत्ययानां पूर्णोऽवधिः। केचित्तु संज्ञाशब्दानां शीलाद्यर्थेषु कामचारस्ते यथाकथंचिद् व्युत्पादनीयाः इति मन्यन्ते।

१०१२ शंसंस्वयंविभाद् भुवो डुः ॥५।२।८४॥ एभ्यः पराद् भुवः सत्यर्थे वर्तमानाद् डुः प्रत्ययः स्यात्। शं सुखं तत्र भवति शंभुः शंकरः। संभुर्जनिता। स्वयंभुः। विभुः व्यापकः। प्रभुः स्वामी। बहुलाधिकारात् शंभुः संज्ञायाम्। अन्ये त्वसंज्ञायामपि। मितद्रवादयस्त्वौणादिकाः।

१०१३ पुव इत्रो दैवते ॥ ५।२।८५ ॥ सामान्यनिर्देशात् पवतेः पुनातेश्च दैवते–देवतायां कर्तरि सत्यर्थे इत्रः प्रत्ययः स्यात्। पुनाति पवते वा पवित्रोऽर्हन् स मां पुनातु। करणेऽप्यन्ये।

१०१४ ऋषिनाम्नोः करणे ॥५।२।८६॥ सत्यर्थे वर्तमानात् पुवः करणे इत्रः स्यात् ऋषौ संज्ञायां च। पूयतेऽनेनेति पवित्रोऽयमृषिः। नाम्नि–दर्भः पवित्रः। बर्हिः पवित्रम्। यज्ञोपवीतं पवित्रम्। ओघोपकरणं पवित्रम्। पवित्रा नदी। दर्भादीनां पवित्रमिति संज्ञा। ऋषौ कर्तर्यपि केचित्।

१०१५ लूधूसूखनचरसहार्त्तेः ॥ ५।२।८७ ॥ एभ्यः सत्यर्थे वर्तमानेभ्यः करणे इत्रः स्यात्। लुनात्यनेन लवित्रम्। धुवत्यनेन धुवित्रम्। धूनोतेरपि कश्चित्। धवित्रम्। सुवत्यनेन सवित्रम्। निरनुबन्धनिर्देशात् धूगसूङोर्न। खनित्रम्। चरित्रम्। सहित्रम्। ऋच्छतीयर्तिवानेनारित्रम्। वहेरपि कश्चित्। वहित्रम्।

१०१६ नीदांव्शसुयुयुजस्तुतुदसिसिचमिहपतपानहस्त्रट् ।५।२।८८। एभ्यः सत्यर्थे वर्तमानेभ्यः करणे त्रट् प्रत्ययः स्यात्। नयन्त्यनेन नेत्रम्। दांव्–दान्त्यनेन दात्रम्। शसु–शस्त्रम्। यु–योत्रम्। युज् योक्त्रम्। स्तु–स्तोत्रम्। तुद्–तोत्रम्। सि–सेत्रम्। सिच्–सेक्त्रम्। मिह्–मेढ्रम्। पत्–पत्रम्। पा–पात्रम्। पात्री। नह्–नद्धः, नद्धी। टकारो ङ्यर्थः।

१०१७ हलक्रोडास्ये पुवः ॥ ५।२।८९ ॥ आस्यं मुखम्। पुवो धातोः सत्यर्थे हलास्ये क्रोडास्ये च करणे त्रट् प्रत्ययः स्यात्। पुनाति पवते वाऽनेन पोत्रम्। हलस्य सूकरस्य वा मुखमुच्यते।

१०१८ दंशेष्ट्रः ॥ ५।२।९० ॥ दंशेः सत्यर्थे वर्तमानात् करणे ष्ट्रः प्रत्ययः स्यात् । दशत्यनया दंष्ट्रा । प्रत्ययान्तरकरणमावर्थम् ।

१०१९ धात्री ॥५।२।९१॥ ट्धेर्दधातेर्वा कर्मणि ष्ट्रन् प्रत्ययो निपात्यते । धयन्ति तामिति धात्री स्तनदायिनी । दधति तां भैषज्यार्थमिति धात्री आमलकी ।

१०२० ज्ञानेच्छार्चार्थशीच्छील्यादिभ्यः क्तः ॥ ५।२।९२ ॥ ज्ञानार्थेभ्य इच्छार्थेभ्योऽर्चा–पूजा तदर्थेभ्यो शीदृभ्यः शीलादिभ्यश्च धातुभ्यः सत्यर्थे वर्तमानेभ्यः क्तः प्रत्ययः स्यात् । पूर्ववच्चास्य कर्तृकर्माद्यर्थदेशः । ज्ञानार्थ–राज्ञां ज्ञातः, बुद्धः, विदितः, अवगतो वा । इच्छार्थ–राज्ञामिष्टः, मतः । अर्चार्थ–राज्ञामर्चितः, पूजितः । त्रिट्–त्रिमिदा–मिन्नः । ष्विण्णः । स्विन्नः । घृष्टः । तूर्णः । सुप्तः । भीतः । इद्धः । तृषितः । फुल्लः॥ शीलयादि–

शीलितो, रक्षितः, क्षान्त, आकृष्टो जुष्ट उद्यतः ॥
संयतः शयितस्तुष्टो रुष्टो रुषित आशितः ॥१॥

कान्तोऽभिव्याहृतो हृष्ट–स्तृप्तः सुप्तः स्थितो भृतः ॥
अमृतो मुदितः पूर्तः शक्तोऽक्तः श्रान्तविस्मितौ" ॥२॥

संरब्धारब्धदयिता दिग्धः स्निग्धोऽवतीर्णकः ॥
आरूढो मूढ आयस्तः क्षुधितक्रान्तव्रीडिताः ॥३॥

मत्तश्चैव तथा क्रुद्धः श्लिष्टः सुहित इत्यपि ॥
लिप्तदृप्तौ च विज्ञेयौ सति लग्नादयस्तथा" ॥४॥

बहुलाधिकाराद् यथाभिधानमेभ्यो भूतेऽपि क्तो भवति । तथा च तद्योगे तृतीयासमासोऽपि सिद्धः–'अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः' इति । एवं शीलितो मैत्रेण रक्षितो मैत्रेणाकृष्टश्चैत्रेणेत्यादावपि द्रष्टव्यम् । वर्तमानक्ते तु षष्ठ्येव–'कान्तो हरिश्चन्द्र इव प्रजानाम्' इति । अन्ये तु ज्ञानाद्यर्थेभ्यः तक्रकौण्डिन्यन्यायेन भूते क्तस्य बाधनात् वर्तमानक्तेन च योगे कर्तरि षष्ठीविधानात् त्वया ज्ञातो मया ज्ञात इत्यादिरपशब्द इति मन्यन्ते ।

॥ इति श्रीसिद्धहैमबृहत्प्रक्रियायां कृदन्तप्रकरणे पूर्वकृदन्तप्रक्रिया ॥

॥ अथोणादिविवृतिः ॥

१०२१ उणादयः ॥ ५।२।९३ ॥ बहुलमिति वर्तते । सत्यर्थे वर्तमानाद् धातोरुणादयः प्रत्यया बहुलं स्युः । करोतीति कारुः । वायुः । पायुः । बहुलवचनात् प्रायः संज्ञाशब्दाः केचित्त्वसंज्ञाशब्दा इति अनुक्ता अपि प्रत्यया भवन्ति । ऋफिडः । ऋफिडुः । तथा सति विहिता उणादयः क्वचिद् भूतेऽपि दृश्यन्ते । भसितं तदिति भस्म, कषितोऽसौ कषिः, ततोऽसौ तनिः, वृत्तं तदिति वर्त्म, चरितं तदिति चर्म, अद्भ्यः सरन्ति स्म अप्सरसः । उक्तं च–

" संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्यानुबन्धोपपदं विज्ञातव्यमुणादिषु " ॥१॥

तथा–" बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम् ।
कार्यसशेषविधेश्च तदूह्यं नैगमरूढिभवं हि सुसाधु ॥२॥

" नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् ।
यत् न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् " ॥३॥

कृवापाजिस्वदिसाध्यशौदृस्नासनिजानिरहीण्भ्य उण् ॥१॥ करोत्यादिभ्यो धातुभ्यः सत्यर्थे वर्तमानेभ्यः संप्रदानापादानाभ्यामन्यत्र कारके भावे च संज्ञायां विषये बहुलमुण् प्रत्ययः स्यात् । डुकृंग् करणे, कृंगट् हिंसायां वा निरनुबन्धग्रहणे सामान्यग्रहणात् । करोति करति कृणोति वा कारुः कारी नापितादिः इन्द्रश्च । वांक् गतिगन्धनयोः, पैं ओवैं शोषणे वा । वाति वायति वा द्रव्याणि वायुः नभस्वान् । पां पाने । पिबन्त्यनेन तैलादि द्रव्यं पायुः अपानमुपस्थश्च । पातिपायत्योस्त्वर्थासंगतेर्न ग्रहणम् । जिं अभिभवे । जयत्यनेन रोगान् श्लेष्माणं वा जायुः औषधं पित्तं वा । ष्वदि आस्वादने । स्वद्यते इदमनेन वा स्वादुः रुच्यः । स्वदनं वा स्वादुः । साधंट् संसिद्धौ । उत्तमक्षमादिभिः तपोविशेषैर्भावितात्मा साध्नोति साधुः । सम्यग्दर्शनादिभिः परमपदं साधयति वा साधुः संयतः । उभयलोकफलं वा साधयति साधुः धर्मशीलः । अशौटि व्याप्तौ । अश्नुते तेजसा सर्वं केदारं वा इत्याशुः सूर्यो व्रीहिश्च । अशनं वा आशु क्षिप्रम् । अश्नुते इति वा आशुः शीघ्रगामी शीघ्रकारी च । दृ भये, दृशृ विदारणे वा । दरति दृणाति दीर्यते वा दारु काष्ठं

भव्यं च । ष्णौं वेष्टने । स्नायति स्नायुः अस्थिनहनम् । षण भक्तौ, षणूयी दाने वा। सनति सनोति वा मृगादीनिति सानु पर्वतैकदेशः । जनैचि प्रादुर्भावे। जयतेऽनेनाकुञ्चनादि जानु ऊरुजङ्घासंधिमण्डलम् । जानीत्याकारनिर्देशात् ' न जनवध;' इति प्रतिषिद्धाऽपि वृद्धिर्भवति । रह त्यागे। रहति गृहीत्वा सूर्याचन्द्रमसौ स्वशरीरं वा राहुः सैंहिकेयः । इंण्क् गतौ । एत्यायुः पुरुषः, शकटम्, औषधम्, जीवनम्, पुरूरवःपुत्रो वा। जरायुः गर्भवेष्टनं जलमलं वा। जटायुः पक्षी। धनायुः देशः। रसायुः भ्रमरः। 'संप्रदानाच्चान्यत्रोणादयः' इति यथायोगं प्रत्ययो वेदितव्यः।

अः ॥२॥ सर्वस्माद् धातोर्यथायोगमकारः प्रत्ययः स्यात् । भवः । तरः । वरः । प्लवः । शयः । शरः । परः । करः । स्तवः । चरः । वदः ।

म्लेच्छीडेर्ईस्वश्च वा ॥३॥ आभ्यामः प्रत्ययः स्याद्दीर्घस्य च ह्रस्वो वा । म्लेच्छ अव्यक्तायां वाचि । म्लिच्छः मूकः। म्लेच्छः कुमनुष्यजातिः। ईडिक् स्तुतौ । इडः ईडो देवताविशेषौ मेदिनी च ।

नञः क्रामिगामिशामिखन्याकामिभ्यो डित् ॥४॥ नञः परेभ्यो डित् अः प्रत्ययः स्यात् । क्रमू पादविक्षेपे । न क्रामति नक्रः जलचरो ग्राहः। गम्लृं गतौ । नगः वृक्षः पर्वतश्च । शमूच् उपशमे । नशः यक्षः। खनूग् अवदारणे । नखः करजः। नास्य खमस्तीति वा नख इत्यपि । कमूङ् कान्तौ । नाकः स्वर्गः। नात्राकमस्तीति नाक इत्यपि । नखादित्वात् ' अन् स्वरे ' इत्यन् न भवति । डित्करणमन्त्यस्वरादिलोपार्थम् ।

तुदादिविषिगुहिभ्यः कित् ॥५॥ तुदादिभ्यो विषिगुहिभ्यां च कित् अः प्रत्ययः स्यात् । तुदः । नुदः । क्षिपः । सुरः । बुधः । सुरत् ऐश्वर्यदीप्त्योः । तुदादिर्न धातुगणः किं तर्हि भिन्न इति । तेन बुधादीनामिति लिङ्गपरिणामस्तु ज्ञेयः। शिवः। तुदादीनां यथासंभवं कारकविधिः। विष्लृंकी व्याप्तौ । वेवेष्टि विषं प्राणहरं द्रव्यम् । गुहौग् संवरणे । गूहति गुहः स्कन्दः। गुहा पर्वतैकदेशः।

विन्देर्नलुक् च ॥६॥ विन्देः कित् अः प्रत्ययः स्यात् तत्संनियोगे च नस्य लुक् च । विदु अवयवे । विदः गोत्रकृद् वृक्षजातिश्च ।

कृगो द्वे च ॥७॥ करोतेः कित् अः प्रत्ययः स्यात् अस्य धातोर्द्वे रूपे भवतः । डुकृंग् करणे । चक्रं रथाङ्गमायुधं च ।

कनिगदिमनेः मरूपे ॥८॥ किदिति निवृत्तम् । एभ्योऽकारः प्रत्ययः स्यात् एषां च सरूपे समानरूपे द्वे उक्ती भवतः । कनै दीप्तिकान्तिगतिषु । कनति दीप्यते कनकनः कान्तः। गद व्यक्तायां वाचि। गदति अव्यक्तं वदति गद्यतेऽव्यक्तं कथ्यते वा गद्गदोऽव्यक्तवाक्, गद्गदमव्यक्तं वचनम्। मनिंच् ज्ञाने। मन्मनः अविस्पष्टवाक्। सरूपग्रहणं व्यञ्जनस्यानादेर्लुक् इत्यादिकार्यनिवृत्त्यर्थम् ।

ऋतष्टित् ॥९॥ ऋकारान्ताद् धातोरकारः प्रत्ययः स्यात् स च बहुलं टित् धातोश्च सरूपे द्वे रूपे। दृश् विदारणे–दीर्यते भिद्यतेऽनेन श्रोत्रमिति दर्दरः वाद्यविशेषः पर्वतश्च । दर्दरी सस्यलुण्टिः । कृत् विक्षेपे । कर्करः क्षुद्राश्मा । कर्करी गलन्तिका । वृग्श् वरणे । वर्वरः म्लेच्छजातिः । वर्वरी केशविशेषः । भृश् भर्जने । भर्भरः छद्मवान् । भर्भरी श्रीः । जृष् जृष्च् जरसि । जर्जरः अदृढः । जर्जरी स्त्री । झर्झरः वाद्यविशेषः । झर्झरी झल्लरिका । गॄत् निगरणे । गर्गरः राजर्षिः । गर्गरी महाकुम्भः । मृश् हिंसायाम् । मर्मरः शुष्कपत्रप्रकरः । तद्धर्माऽन्योऽपि क्षोदासहिष्णुर्दानवश्च । मर्मरायां दूर्वायामित्यत्र टित्त्वेऽपि ङीर्न भवति बहुलाधिकारात् । तत एव च ऋकारान्तादपि। घृं सेचने। घर्घरः सदोषाव्यक्तवाक्। घर्घरी किंकणिका।

किच ॥१०॥ ऋकारान्ताद् धातोर्यथादर्शनं किदकारः प्रत्ययः स्यात् धातोश्च सरूपे द्वे रूपे। मृश् हिंसायाम् । मूर्यतेऽनेन मुर्मुरः ज्वलदङ्गारचूर्णम् । पॄ पालनपूरणयोः । पूर्यते जलघातेन पुर्पुरः फेनः । तॄ प्लवनतरणयोः। तीर्यतेऽनेनास्मिन् वा तिर्तिरः संक्रमः । भृश् भर्जने च । भूर्यते संचीयते भुर्भुरः संचयः । शॄश् हिंसायाम् । शीर्यते समंतात् शिर्शिरः पुञ्जः ।

पॄपालिभ्यां टित् पिप् च पूर्वस्य ॥११॥ आभ्यां टित् अः प्रत्ययः स्यात् अनयोश्च सरूपे द्वे रूपे पूर्वस्य च स्थाने पिप् इत्यादेशः । पॄश् पालनपूरणयोः। पृणाति छायया पिप्परी वृक्षजातिः । पल गतौ । पलत्यातुरं पिप्पली औषधजातिः। टित्करणं ङ्यर्थम् ।

क्रमिमथिभ्यां चन्मनौ च ॥१२॥ आभ्यामः प्रत्ययः, सरूपे च द्वे रूपे पूर्वस्य च स्थाने यथासंख्यं चन् मन् इत्यादेशौ स्याताम् । क्रमॄ पादविक्षेपे । क्रामति सुखमनेनास्मिन् वा चङ्क्रमः संक्रमः । मथे विलोडने । मथति चित्तं रागिणां मन्मथः कामः ।

गमेर्जम् च वा ॥१३॥ गमेरः प्रत्ययः स्यात् सरूपे च द्वे रूपे पूर्वस्य च जम् इत्यादेशो वा। गम्लृं गतौ। गच्छति पादविहरणं करोति जङ्गमः चरः। गच्छत्यमाध्यस्थ्यं गङ्गमः चपलः।

अदुपान्त्यऋदृभ्यामश्चान्तः ॥१४॥ अकारोपान्त्यादृकारान्ताच्च धातोरः प्रत्ययः स्यात् सरूपे च द्वे रूपे पूर्वस्य चान्तोऽकारः। पल फल शल गतौ। शलशलः। सल गतौ। सलसलः। हल विलेखने। हलहलः। कलि शब्दसंख्यानयोः। कलकलः। मलि धारणे। मलमलः। घटिष् चेष्टायाम्। घटघटः। वद व्यक्तायां वाचि। वदवदः। पदिंच् गतौ। पदपदः। ऋदन्त--डुकृंग् करणे। करकरः। मृंत् प्राणत्यागे। मरमरः। हृङ्त् आदरे। दरदरः। सृं गतौ। सरसरः। वृगृट् वरणे। वरवरः। अनुकरणशब्दा एते।

मषिमसेर्वा ॥१५॥ आभ्यामः प्रत्ययः स्यात् सरूपे च द्वे रूपे पूर्वस्य चान्तोऽकारो वा। मष हिंसायाम्। मषमषः, मष्मषः। मसैच् परिमाणे। मसमसः। मस्मसः।

हसृफालिकषेरा च ॥१६॥ एभ्योऽः प्रत्ययः स्यात् सरूपे च द्वे रूपे पूर्वस्य चाकारान्तः। हृंग् हरणे। हरति नयति शस्त्राण्यस्खलन् लक्ष्यं हराहरः योग्याचार्यः। सृं गतौ। सरति धावति वायुना नीयमानः समन्तात् सरासरः सारङ्गः। फल निष्पतौ। फलति निष्पादयति नानाविधानि पुष्पफलानि फलाफलमरण्यम्। कष हिंसायाम्। कषति विदारयति कषाकषः कृमिजातिः।

इदुदुपान्त्याभ्यां किदिदुतौ च ॥१७॥ इकारोपान्त्यादुकारोपान्त्याच्च कित् अः प्रत्ययः स्यात् सरूपे च द्वे रूपे पूर्वस्य च यथासंख्यमिकारोकारौ चान्तौ। किलत् श्वैत्यक्रीडनयोः। किलिकिलः। हिलत् हावकरणे। हिलिहिलः। शिलत् उञ्छे। शिलिशिलः। छुरत् छेदने। छुरुच्छुरः। मुरत् संवेष्टने। मुरुमुरः। घुरत् भीमार्थशब्दयोः। घुरुघुरः। पुरत् अग्रगमने। पुरुपुरः। पुरत् ऐश्वर्यदीप्त्योः। सुरुसुरः। कुरत् शब्दे। कुरुकुरः। चुरण् स्तेये। चुरुचुरः। हुल हिंसासंवरणयोश्च। हुलुहुलः। गुजत् शब्दे। गुजुगुजः। गुडत् रक्षायाम्। गुडुगुडः। कुटत् कौटिल्ये। कुटुकुटः। पुटत् संश्लेषणे। पुटुपुटः। कुणत् शब्दोपकरणयोः। कुणुकुणः। मुणत् प्रतिज्ञाने। मुणुमुणः। अनुकरणशब्दा एते।

जजलतितलकाकोलीसरीसृपादयः ॥१८॥ एते अप्रत्ययान्ता निपात्यन्ते । जल घात्ये । अस्य द्वित्वे पूर्वस्य जभावः । जजलः । यस्य जाजलिः पुत्रः। तिलत् स्नेहने । अस्य द्वित्वे पूर्वस्य च तिभावे धातोरिकारस्याकारे तितलः । कुल बन्धुसंस्त्यानयोः । अस्य द्वित्वे पूर्वस्य च काभावे कालोली क्षीरकाकोली च वल्लीजातिः । सृप्लृ गतौ । अस्य द्वित्वे गुणाभावे पूर्वस्य च सरीभावे सरीसृपः उरगजातिः । आदिग्रहणाद् यथादर्शनमन्येऽपि ।

बहुलं गुणवृद्धी चादेः ॥१९॥ धातोः किदः प्रत्ययः स्यात् सरूपे च द्वे रूपे पूर्वस्य चेकारोकारावन्तौ यथादर्शनं च गुणवृद्धी । केलिकिलः कैलिकिलश्च हसनशीलः। हिलत् हावकरणे । हेलिहिलः हैलिहिलश्च विलसनशीलः। शेलिशिलः, शैलिशिलः। शुभि दीप्तौ । शोभते पुनःपुनरिति शोभुशुभः,शौभुशुभः। णुदंत् प्रेरणे। नुदति पुनः पुनरिति नोदुनुदः नौदुनुदः। गुडत् रक्षायाम् । गुडति भ्राम्यति पुनः पुनरिति गोलुगुलः, गौलुगुलः । बुलण् निमज्जने । बोलयति पुनःपुनरिति बोलुबुलः, बौलुबुलः । तत्तद्धात्वर्थास्तच्छीला अनुवादविशेषा वैते ।

णेर्लुप्॥२०॥ धातोरप्रत्ययसन्नियोगे बहुलं णेर्लुप् स्यात् । वज्रं धारयतीति वज्रधर इन्द्रः । एवं चक्रधरो विष्णुः । भूधरः अद्रिः । जलधरो मेघः । बाहुलकात् प्रत्ययान्तरेऽपि । देवयतीति दिव्–द्यौः व्योम स्वर्गश्च । पुण्यं कारयन्तीति पुण्यकृतो देवाः । एवं पर्ण शोषयतीति पर्णशुट् ।

" वान्ति पर्णशुषो वातास्ततः पर्णमुचोऽपरे ।
ततः पर्णरुहः पश्चात् ततो देवः प्रवर्षति " ॥

तथा ' महतः कारयाश्चक्रुराक्रन्दान् ' इति प्राप्ते ' महतश्चक्रुराक्रन्दान् ' इति भवति । ' महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः " घोषयाञ्चक्रुरित्यर्थः ।

भीण्शलिवलिकल्यतिमर्च्यर्चिम्रजिकुतुस्तुदाधारात्राकापानिहानञ्शुभ्यः कः ॥२१॥ एभ्यः कः प्रत्ययः स्यात् । भिभींक् भये । बिभेति । दुन्दुभात् परस्माच्च भेकः मण्डूकः कातरश्च । बिभेति वायोर्भेको मेघः । इंण्क् गतौ । एत्यद्वितीय एकः असहायः संख्याप्रधानमसमानमन्यश्च । पल फल शल गतौ । शलन्त्यात्मरक्षणाय तमिति शल्कः शरणम् । शलति त्यक्तं बहिरिति शल्कं गृहीतरसं

शकलम् । शल्कः काष्ठत्वक् मलिनं च काष्ठं मुद्गरः करणं च । वलि संवरणे । वल्कः दशनः वासः त्वक् च । कलि शब्दसंख्यानयोः । कल्कः कषायः दम्भः पिष्टपिण्डश्च । अत सातत्यगमने । अल्कः आत्माः वायुः व्याधितः चन्द्रः उत्पातश्च । मर्चः सौत्रो धातुः प्राप्तौ । मर्कः देवदारुः वायुः दानवः मनः पन्नगः विघ्नकारी च । ' चजः कगम् ' इति कत्वम् । अर्च पूजायाम् । । अर्कः सूर्यः पुष्पजातिः का(ज्ञा)टजातिश्च । मृजौक् शुद्धौ । मार्कः वायुः। कुंक् शब्दे । कोकश्चक्रवाकः। तुंक् हिंसावृत्तिपूरणेषु तोकमपत्यम् । ष्टुंगक् स्तुतौ । स्तोकमल्पम् । डुदांगक् दाने । दाकः यजमानः यज्ञश्च । डुधांगक् धारणे च । धाकः ओदनः अनड्वान् अम्भः स्तम्भश्च । रांक् दाने । राकः दाता अर्थः सूर्यश्च । राका पौर्णमासी कुमारी रजस्वला च । त्रैङ् पालने । त्राकः धर्मः शरणस्थानीयश्च । कैं शब्दे । काकः वायसः । पां पाने पांक् रक्षणे वा । पाकः बालः असुरः पर्वतश्च । ओहांक् त्यागे । निहाकः निःस्नेहः निर्मोकश्च । निहाका गोधा । शुं गतौ । न शवतीति अशोकः ।

विचिपुषिमुषिशुष्यविसृवृशुसुभूधूमूनीवीभ्यः कित् ॥२२॥ एभ्यः कित् कः प्रत्ययः स्यात् । विचृंपी पृथग्भावे । विकः करिपोतः । पुषंच् पुष्टौ । पुष्कः निशाकरः । मुषश् स्तेये । मुष्कः चौरः मांसलो वा । मुष्कौ वृषणौ । शुषंच् शोषणे । शुष्कमपगतरसम् । अव रक्षणादिषु । ऊकः कुन्दुमः । सृं गतौ । सृकः वायुः बाणः शृगालः बकः निरयश्च । सृका आयुधविशेषः । वृगट् वरणे वृङ्श् संभक्तौ वा । वृकः मृगजातिः आदित्यः धूर्तः जाठरश्चाग्निः । शुं गतौ शुकः कीरः ऋषिश्च । षुंगट् अभिषवे । सुकः निरामयः। भू सत्तायाम् । भूकः कालः छिद्रं च । धूत् विधूनने धूगट् कम्पने धूगश् कम्पने वा । धूकः वायुः व्याधिश्च । धूका पताका । मूङ् बन्धने । मूकः अवाक् । णींग् प्रापणे । नीकः खगः ज्ञाता च । नीका उदकहारिका ज्ञातिश्च । वींक् प्रजनादिषु । वीकः वायुः । व्याधिः नाशः अर्थः मनः वसन्तश्च । वीका पक्षिजातिः नेत्रमलं च ।

कृगो वा ॥२३॥ कृगः कः प्रत्ययः स्यात् स च किद्वा । डुकृंग् करणे । कर्कः अग्निः सारङ्गः दर्भः श्वेताश्वश्च । कृकः शिरोग्रीवम् ।

धुयुहिपितुशोर्दीर्घश्च ॥२४॥ एभ्यः कित् कः प्रत्ययः स्यात् एषां च दीर्घः । धुङ् शब्दे । धूकः कौशिकः । युक् मिश्रणे । का क्षुद्रजन्तुः स्वेदजः।

हिंट् गतिवृद्धयोः। हीकः पक्षी। पिंट् गतौ। पीक उपस्थो जलाश्रयश्च। तृंक् वृत्यादिषु। तूकः उपस्थः पर्वतश्च। शुं गतौ। शूकः किंशारुः अभिषवः शोकश्च। शूका हलेखः।

हियो रश्च लो वा ॥२५॥ हियः कित् कः प्रत्ययः स्यात् रेफस्य च लकारो वा। ह्रीकः, ह्लीकः लज्जापरः नकुलश्च। ह्रीको लिङ्गत्यपि।

निष्कतुरुष्कोदर्कालर्कशुल्कश्वफल्कार्किञ्जल्कोल्कावृक्कच्छेककेकाय-स्कादयः। २६॥ एते कप्रत्ययान्ता निपात्यन्ते। नेः सीदतेर्डिच्च। निष्कः सुवर्णादिः। तुरैचि त्वरायाम्। अस्य ह्रस्व उपश्चान्तः। तुरुष्कः वृक्षः म्लेच्छश्च। उदः परादर्तेः। उदर्कः क्रियाफलम्। अली भूषणादौ। अस्मादर् चान्तः। अलर्कः उन्मत्तो मदालसात्मजश्च। पलफलशलगतौ इत्यस्योपान्त्योत्वं च। शुल्कं रक्षानिर्वेशः। शुनः परात् फालेर्ह्रस्वश्च। श्वफल्कः अन्धकविशेषः। किमः परात् जूर्णो रस्य लश्च। किञ्जल्कः पुष्परेणुः। ज्वलेरुलादेशश्च उले; सौत्रस्य वा। उल्का औत्पातिकं ज्योतिः अग्निज्वाला च। वृजैकि वर्जने। अगुणत्वं च। वृक्कः मुष्कः। छयतिकायत्योरेत्वं च। छेकः मनीषी। केका मयूरवाक्। यमेर्मस्य सः। यस्कः। आदिग्रहणात् ढक्कास्पृक्कादयोऽपि।

दृकृनृसृशृधृवृमृस्तृकुक्षुलङ्किचरिचटिकटिकण्टिचणिचषिफलिवमितम्यविदेविबन्धिकनिजनिमाशिक्षारिकूरिद्रातिवह्लिमल्लिसल्यलिभ्योऽकः ॥२७॥ एभ्योऽकः प्रत्ययः स्यात्। दृश् विदारणे। दरकः भीरुः। कृत् विक्षेपे। करकः जलभाजनं कमण्डलुश्च। करका वर्षपाषाणः। नृश् नये। नरकः निरयः। सृं गतौ। सरको मद्यविशेषः कंसभाजनविशेषश्च। सरका मधुपानवारः। डुडुभृंग्क् पोषणे च। भरकः गोण्यादिः। धृंङ् अवध्वंसने। धरकः सुवर्णोन्माननियुक्तः। वृगट् वरणे। वरकः वधूजातिसहायः वाजसनेयभेदश्च। मृंत् प्राणत्यागे। मरकः जनोपद्रवः। ष्टुंग्क् स्तुतौ। स्तवकः पुष्पगुच्छः। कुंक् शब्दे। कवकमभक्ष्यद्रव्यविशेषः। ढुक्षुक् शब्दे। क्षवकः राजसर्षपः। लघुङ् गतौ। लङ्घकः रंगोपजीवी। चर भक्षणे च। चरकः मुनिः। चटण् भेदे। चटकः पक्षी। कटे वर्षावरणयोः। कटकः वलयः। कटु गतौ। कण्टकः तरुरोम। चण शब्दे। चणकः मुनिः धान्यविशेषश्च। चषी भक्षणे। चषकः पानभाजनम्। फल निष्पत्तौ। फलकः

खेटकम् । टुवमू उद्गिरणे । वमकः कर्मकरः। तमूच् काङ्क्षायाम् । तमकः व्याधिः क्रोधश्च । अव रक्षणादौ । अवका शैवलम् । देवृङ् देवने । देवका अप्सराः । देविका नदी । बन्धंश् बन्धने । बन्धकः चारकपालः । कनै दीप्त्यादिषु । कनकं सुवर्णम् । जनैचि प्रादुर्भावे । जनकः सीतापिता । मश रोषे च। मशकः क्षुद्रजन्तुः। क्षर संचलने ण्यन्तः । क्षारकं बालमुकुलम् । कुरत् शब्दे । कोरकं मौढमुकुलम् । वृतूङ् वर्तने । वर्तका वर्तिका वा शकुनिः । वल्लि संवरणे । वल्लकी वीणा । मल्लि धारणे । मल्लकः शरावः। मल्लिका पुष्पजातिः, दीपाधारश्च । सल्लः सौत्रः । सल्लकी *वृक्षः । सत्कृत्य लक्ष्यते स्वाद्यते गजैरिति वा सल्लकी । अली भूषणादिषु । अलकः केशविन्यासः । अलका पुरी ।*

कोरुरुण्टरण्टिभ्यः ॥२८॥ कुशब्दात् परेभ्य एभ्योऽकः प्रत्ययः स्यात् । रुक् शब्दे । कुरुबकः वृक्षः । रुटु स्तेये । कुरुण्टको वर्णगुच्छः। रण्टिः प्राणहारणे सौत्रः । कुरण्टकः स एव ।

ध्रुधून्दिरुचितिलिपुलिकुलिक्षिपिक्षुपिक्षुभिलिखिभ्यः कित् ॥ २९ ॥ एभ्यः किदकः प्रत्ययः स्यात् । ध्रुं स्थैर्ये च ध्रुवकः स्थिरः। ध्रुवका आवपनविशेषः। धूत् विधूनने । धुवकं धूननम्। धुवकः प्रधानम्। स्त्री धुवका आवपनविशेषः। उन्दैप् क्लेदने। उदकं जलम् । रुचि अभिप्रीत्यां च । रुचकः आभरणविशेषः। तिलत् स्नेहने। तिलकः विशेषकः वृक्षश्च । पुलत् समुच्छ्राये । पुल महत्त्वे वा पुलकः रोमाञ्चः। कुल बन्धुसंस्त्यानयोः । कुलकं संयुक्तम् । क्षिपींत् प्रेरणे । क्षिपकः वायुः। क्षिपका आयुधम् । क्षुपः सौत्रो ह्रस्वीभावे । क्षुपकः गुल्मः । क्षुभच् संचलने । क्षुभकः पाञ्चालकः । लिखत् अक्षरविन्यासे । लिखकः चित्रकरः ।

छिदिभिदिपिटेर्वा ॥३०॥ एभ्योऽकः प्रत्ययः स्यात् स च किद्वा । छिदृंपी द्वैधीकरणे । छिदकः खड्गः क्षुरश्च । छेदकः परशुः । भिदृंपी विदारणे । भिदकं जलं पिशुनश्च। भेदकं वज्रम्। पिट शब्दे च। पिटकः क्षुद्रस्फोटकः। पेटकं संघातः।

कृषेर्गुणवृद्धी च वा ॥३१॥ कृषेरकः प्रत्ययः स्यात् गुणवृद्धी चास्य वा । कृषंत् विलेखने । कर्षकः कृषकः परशुः । कर्षकः कृषकः कुटुम्बी ।

नञः पुंसेः ॥३२॥ नञः परात् पुंसण् अभिमर्दने इत्यस्मात् किदकः प्रत्ययः स्यात् । नपुंसकं तृतीया प्रकृतिः । नखादित्वात् नञत् न भवति ।

कीचकपेचकमेनकार्भकधमकवधकलघकजहकैरकैडकाश्मकलमक-क्षुल्लकवट्वकाढकादयः ॥ ३३ ॥ कीचकादयः शब्दा अकप्रत्ययान्ता निपात्यन्ते । कचि बन्धने । अस्योपान्त्यस्येत्वं च । कीचकः वंशविशेषः । डुपचीष् पाके । मचि कल्कने । मनिंच् ज्ञाने । एषामुपान्त्यस्यैत्वं च । पेचकः करिजघनभागः। मेचकः वर्णः। मेनका अप्सराः। अर्तेर्भश्चान्तः । अर्भकः बालः । ध्मां शब्दाग्निसंयोगयोः । अस्य धमादेशश्च । धमकः कीटः कर्मारश्च । अन्यत्रापि धमादेशो दृश्यते । क्ते धान्तः । हन्तेर्वधश्च । वधकः हन्ता व्याधिश्च । वधकं पद्मबीजम् । अन्यत्रापि दृश्यते । वृत्रं हन्ति अचि वृत्रवधः शक्रः । वधिता निर्मोचकः । वध्यः, वधनम् । लघुङ् गतौ । नलुक् च । लघकः असमीक्ष्यकारी । जहातेर्ड्रे रूपे अन्तलुक् च । जहकः निर्मोचकः कालः क्षुद्रश्च । ईरिक् गतिकम्पनयोः। ईडिक् स्तुतौ । अनयोर्गुणश्च । एरका उदकतृणजातिः । एडका अविजातिः । अशौटि व्याप्तौ । अस्य मोऽन्तः । अश्मका जनपदः । रमिं क्रीडायाम् । अस्य लमादेशः । लमक ऋषिविशेषः । क्षुदूंपी संपेषे । अस्य क्षुल्लादेशश्च । क्षुल्लकं दभ्रम् । क्षुधं लातीति क्षुल्लः, क्षुल्ल एव क्षुल्लक इति वा । वट वेष्टने। अस्य वोऽन्तश्च । वट्वका तृणपुञ्जः। आङ्पूर्वात् ढौकतेर्ढिच्च । आढकं मानम् । आदिग्रहणाद् बृहत्तन्त्रात् कला आपिबन्तीति कलापकाः शास्त्राणि । कथण् वाक्यप्रबन्धे । कथयतीति कथकः तोटकाख्यायिकादीनां वर्णयिता । एवमुपकचम्पकफलहकादयोऽपि ।

शालिबालिपतिवृतिनभिपटितटिडगडिभन्दिवन्दिमन्दिनमिकुदुपूमनिखजिभ्य आकः ॥३४॥ एभ्य आकः प्रत्ययः स्यात् । पल फल शल गतौ । शलि चलने च वा । शलाका एषणी पूरणरेखा द्यूतोपकरणं सूची च । बल प्राणनधान्यावरोधयोः । बलाका जलचरी शकुनिः । पत्लृ गतौ । पताका वैजयन्ती। वृतूङ् वर्तने । वर्तका शकुनिजातिः । णभच् हिंसायाम् । नभाकः चक्रवाकजातिः तमः काकश्च । पट गतौ । पटाका वैजयन्ती पक्षिजातिश्च । तट उच्छ्राये । तटाकं सरः । तडण् आघाते । तडाकं तदेव । गड सेचने । गडाकः शाकजातिः । भदुङ् सुखकल्याणयोः । भन्दाकं शासनम् । वदुङ् स्तुत्यभिवादनयोः । वन्दाकः चीवरभिक्षुः । मदुङ् स्तुत्यादिषु । मन्दाका ओषधी । णमं प्रह्वत्वे । नमाका म्लेच्छजातिः।

कुंङ् शब्दे । कवाकः पक्षी । टुदुंट् उपतापे । दवाकः म्लेच्छः। पूङ् पवने । पवाका वात्या । मनिंच् ज्ञाने । मनाका हस्तिनी । खज मन्थे । खजाकः आकरः मन्थाः दर्विः आकाशं बन्धकी शरीरं पक्षी च ।

शुभिगृहिविदिपुलिगुभ्यः कित् ॥३५॥ एभ्यः किदाकः प्रत्ययः स्यात् । शुभि दीप्तौ । शुभाका पक्षिजातिः । गृहणि ग्रहणे । गृहाकः । विदंक् ज्ञाने । विदाका भूतग्रामः । पुल महत्त्वे । पुलाकः अर्धस्विन्नविधो धान्यविशेषः। गुंङ् शब्दे गुंत् पुरीषोत्सर्गे वा । गुवाकं पूगफलम् ।

पिषेः पिन्पिण्यौ च ॥३६॥ पिष्लृंप् संचूर्णने इत्यस्मात् किदाकः प्रत्ययः स्यात् अस्य च पिन् पिण्य इत्यादेशौ। पिनाकमैशं धनुः शूलं वा। पिनाकः दण्डः। पिण्याकस्तिलादिखलः ।

मवाकश्यामाकवार्ताकवृन्ताकज्योन्ताकगूवाकभद्राकादयः ॥३७॥ एते आकप्रत्ययान्ता निपात्यन्ते। मव्य बन्धने। यलोपः। मवाकः रेणुः। श्यैङ् गतौ मोऽन्तश्च। श्यामाकः जघन्यो व्रीहिः। वृतेर्वृद्धिश्च। वार्ताकी शाकविशेषः। तत्फलं वार्ताकम् । स्वरान्नोऽन्तश्च । वृन्ताकी उच्चबृहती । तत्फलं वृन्ताकम् । ज्युङ् गतौ । न्तश्च प्रत्ययादिः । ज्यवतेऽस्मिन् स्विद्यमान इति ज्योन्ताकं स्वेदसद्मविशेषः। गुंत् पुरीषोत्सर्गे, गुंङ् शब्दे वा । ऊवादेशश्च । गूवाकं पूगफलम् । भदुङ् सुखकल्याणयोः। अस्य भद्रादेशश्च । भद्राकः अकुटिलः। आदिग्रहणात् स्योनाकचार्वाकपराकादयो भवन्ति ।

कीकल्यलिदलिस्फटिदूषिभ्य इकः । ३८॥ एभ्य इकः प्रत्ययः स्यात् । डुक्रींग्श् द्रव्यविनिमये । क्रयिकः क्रेता । कलि शब्दसंख्यानयोः । कलिका कोरकः। उत्कलिका ऊर्मिः। अली भूषणादौ । अलिकं ललाटम् । दल विशरणे । दलिकं दारु । स्फट स्फुट विशरणे । स्फटिकः मणिः । दुषंच् वैकृत्ये । दूषिका नेत्रमलः ।

आङः पणिपनिपदिपतिभ्यः ॥३९॥ आङः परेभ्य एभ्य इकः प्रत्ययः स्यात् । पणि व्यवहारस्तुत्योः। आपणिकः पत्तनवासी व्यवहारज्ञो वा। पनि स्तुतौ। आपनिकः स्तावकः इन्द्रनीलः इन्द्रकीलो वा । पदिंच् गतौ । आपदिकः इन्द्रनीलः

इन्द्रकीलो वा । पत्लृ गतौ । आपतिकः पथि वर्तमानः मयूरः श्येनः कालो वा । आपणिकादयश्चत्वारो वणिजोऽपि ।

नसिवसिकसिभ्यो णित् ॥४०॥ एभ्यो णिदिकः प्रत्ययः स्यात् । णसि कौटिल्ये । नासिका घ्राणम् । वसं निवासे । वासिका माल्यदामविशेषः छेदनद्रव्यं च । कस गतौ । कासिका वनस्पतिः ।

पापुलिकृषिक्रुशिव्रश्चिभ्यः कित् ॥४१॥ एभ्यः किदिकः प्रत्ययः स्यात् । पां पाने । पिकः कोकिलः । पुल महत्त्वे । पुलिकः मणिः । कृषीं विलेखने । कृषिकः पामरः तृणजातिश्च । क्रुशं आह्वानरोदनयोः । क्रुशिकः क्रोष्टुकः उलूकश्च । ओव्रश्चौत् छेदने । वृश्चिकः सविषः कीटः राशिश्च नक्षत्रपादनवकरूपः ।

प्राङः पणिपनिकषिभ्यः ॥ ४२ ॥ प्राङ् इत्येतस्मादुपसर्गसमुदायात् परेभ्य एभ्यः किदिकः प्रत्ययः स्यात् । पणि व्यवहारस्तुत्योः । प्रापणिकः वणिक् । पनि स्तुतौ । प्रापनिकः पथिकः । कष हिंसायाम् । प्राकषिकः वायुः खलः नर्तकः मालाकारश्च । प्रपूर्वात् पणेराङ्पूर्वाच्च कषेरिच्छन्त्यन्ये । प्रपणिकः गन्धविक्रयी । आकषिकः न कर्तव्यः ।

मुषेर्दीर्घश्च ॥४३॥ मुषेरिकः प्रत्ययः स्यात् दीर्घश्च स्वरस्य । मूषिक आखुः ।

स्यमेः सीम् च ॥४४॥ स्यमेरिकः प्रत्ययः स्यात् सीम् इत्यादेशश्चास्य । स्यमू शब्दे । सीमिकः वृक्षः उदककृमिश्च । सीमिका उपजिह्विका । सीमिकं वल्मीकम् । केचित् सिमिति ह्रस्वोपान्त्यमादेशं प्रत्ययस्य च दीर्घत्वमिच्छन्ति । सिमीकः सूक्ष्मकृमिः ।

कुशिकहृदिकमक्षिकैतिकपिपीलिकादयः ॥४५॥ एते किदिकप्रत्ययान्ता निपात्यन्ते । कुषेः श च । कुशिकः मुनिः । हृगो दोऽन्तश्च । हृदिकः यादवः । मषेः सोऽन्तश्च । मक्षिका क्षुद्रजातिः । एतेस्तोऽन्तश्च । एतिकः मुनिः । पीलेर्द्वे च । पिपीलिका मध्यक्षामा कीटजातिः । आदिग्रहणात् गन्दिकमुरिकमुलिकादयो भवन्ति ।

स्यमिकषिदृष्यनिमनिमलिवल्यलिपालिकणिभ्य ईकः ॥४६॥ एभ्य ईकः प्रत्ययः स्यात् । स्यमू शब्दे । स्यमीकः वृक्षः वल्मीकः नृपगोत्रं च । स्यमीकं जलम् ।

स्यमीका कृमिजातिः । कष हिंसायाम् । कषीका कुद्दालिका । दुषंच् वैकृत्ये ण्यन्तः। दूषीका नेत्रमलः वीरणजातिः वर्तिः लता च । अनक् प्राणने । अनीकं सेनासमूहः संग्रामश्च । मनिंच् ज्ञाने । मनीकः सूक्ष्मः। मलि धारणे । मलीकम् अञ्जनम् अरिश्च । वलि संवरणे । वलीकः वलवान् पटलान्तश्च । वलीकं वेश्मदारु । अली भूषणादौ । अलीकम् असत्यम् । अलीका पण्यस्त्री । व्यलीकमपराधः। व्यलीका लज्जा । पलण् रक्षणे च । पालीकं तेजः । कण शब्दे । कणीकः पटवासः । कणीका भिन्नतण्डुलावयवः वनस्पतिबीजं च ।

जॄपूदॄशॄवृमृभ्यो ङेरश्चादौ ॥४७॥ एभ्य ईकः प्रत्ययः स्यात् ङे च रूपे स्त एषां चादौ रः । जॄशृच् जरसि । जर्जरीका शतपत्री । पॄश् पालनपूरणयोः। पर्परीका जलाशयः सूर्पश्च । पर्परीकः अग्निः कुररः भक्ष्यं कुर्कुरश्च । दॄश् विदारणे । दर्दरीकः दाडिमः इन्द्रः वादित्रविशेषः वादित्रभाण्डं च । शॄश् हिंसायाम् । शर्शरीकः कृमिः विकलेन्द्रियः दुष्टाश्वः लावकश्च । शर्शरीका माङ्गल्याभरणम् । वृगट् वरणे । वर्वरीकः संवरणम् उरणः पतत्री केशसंघातश्च । वर्वरीका सरस्वती । मृंत् प्राणत्यागे । मर्मरीकः अग्निः शूरः श्येनश्च ।

ऋच्यृजिहृषीषिदृशिमृडिशिलिनिलीभ्यः कित् ॥४८॥ एभ्यः किदीकः प्रत्ययः स्यात् । ऋचत् स्तुतौ । ऋचीकः । ऋजि गतिस्थानार्जनोपार्जनेषु । ऋजीकं वज्रं बलं स्थानं च । हृषू अलीके, हृषच् तुष्टौ वा । हृषीकमिन्द्रियम् । इषत् इच्छायाम्, ईष उञ्छे, ईष गतिहिंसादर्शनेषु वा । इषीका ईषीका च तृणशलाका । दृशूं प्रेक्षणे । दृशीकं मनोज्ञम् । दृषीका रजस्वला । मृडत् सुखने । मृडीकं सुखकृत् सुखं च । शिलत् उञ्छे । शिलीकः सस्यविशेषः। लीङ्च् श्लेषणे निपूर्वः। निलीकं वृत्तम् । बाहुलकादीलुक् ।

मृदेर्वोऽन्तश्च वा ॥ ४९ ॥ मृदेः किदीकः प्रत्ययः स्यात् वकारश्चान्तः । मृदश् क्षोदे । मृद्विका मृदीका च द्राक्षा ।

सृणीकास्तीकप्रतीकपूतीकसमीकवाहीकवाल्लीकवल्मीककल्मलीकतिन्तिडीककङ्कणीकाकिङ्किणीकपुण्डरीकचञ्चरीकफर्फरीकझर्झरीकर्घघरीकादयः ॥ ५० ॥ एते किदीकप्रत्ययान्ता निपात्यन्ते । सर्तेर्णोऽन्तश्च । सृणीकः वायुः अग्निः अशनिः उन्मत्तश्च । सृणीका लाला । अस्तेस्तोऽन्तश्च ।

अस्तीकः जरत्कारुसुतः । प्रांक् पूरणे । प्रातेस्तोऽन्तो ह्रस्वश्च । प्राति शरीरमिति प्रतीकः वायुः अवयवः मुखं च । सुप्रतीकः दिग्गजः । पुवस्तोऽन्तश्च । पूतीकं तृणजातिः । सम्पूर्वस्य एतेर्लुक् च । संयन्त्यस्मिन्निति समीकं संग्रामः । वहिवह्-ल्योर्दीर्घश्च । वाहीकः वाह्लीकः एतौ देशौ । वलेर्मोऽन्तश्च । वल्मीकः नाकुः । कलेर्मल-श्चान्तः । कल्मलीकं ज्वाला । तिमेस्तिड् चान्तः । तिन्तिडीकः पक्षी वृक्षाम्लश्च । तन्ति-डीक इति पूर्वस्येत्वं नेच्छन्त्येके । चङ्क्ष्यतेः कङ्कण् च । कङ्कणीकः घण्टाजालम् । किमः परात् कणतेः किण् च । किङ्किणीका घण्टिका । पुणेर्डर् चान्तः पुण्डतेर्वा । पुण्डरीकं पद्मं छत्रं व्याघ्रश्च । चञ्चेरर् चान्तः । चञ्चरीकः भ्रमरः । पिपर्तेर्गुणो द्वित्वं पकारयोः फत्वं रश्चान्तः पूर्वस्य । फर्फरीकं पल्लवं पादुका मर्दलिका च । झीर्यतेर्द्वित्वं तृतीयाभावः पूर्वस्य रश्चान्तः । झर्झरीकः देहः । झर्झरीका वादित्रभाण्डम् । एवं घरतेर्घर्घरीका घण्टिका । आदिग्रहणादन्येऽपि ।

मिवमिकटिभल्लिकुहेरुकः ॥५१॥ एभ्य उकः प्रत्ययः स्यात् । डुमिंग्ट् प्रक्षेपणे । मयुकः आतपः । बाहुलकाद् 'मिग्मीगो' इति नात्वम् । डुवमू उद्गिरणे । वमुकः जलदः । कटे वर्षावरणयोः । कटुकः रसविशेषः । भल्लि परिभाषणहिंसादानेषु । भल्लुकः ऋक्षः । कुहणि विस्मापने । कुहकमाश्चर्यम् ।

संविभ्यां कसेः ॥५२॥ संविभ्यां परस्मात् कसेरुकः प्रत्ययः स्यात् । कस गतौ । संकसुकः सुकुमारः परापवादशीलः श्राद्धाग्निश्च । संकसुकं व्यक्ताव्यक्तं संकीर्णं च । विकसुकः गुणवादी परिश्रान्तश्च ।

क्रमेः कृम् च वा ॥५३॥ क्रमेरुकः प्रत्ययः स्यात् अस्य च कृम् इत्यादेशो वा । क्रमू पादविक्षेपे । कृमुकः बन्धनम् । आदेशविधानबलाच्च न गुणः । क्रमुकः पूगतरुः ।

कमिमिमेर्दोऽन्तश्च ॥५४॥ आभ्यामुकः प्रत्ययः स्याद् दश्चान्तः । कमूङ् कान्तौ । कन्दुकः क्रीडनम् । तिमच् आर्द्रभावे । तिन्दुकः वृक्षः ।

मण्डेर्मड्ड् च ॥५५॥ मण्डेरुकः प्रत्ययः स्यान्मड्ड् चादेशः । मडु भूषा-याम् । मड्डुकः वाद्यविशेषः ।

कण्यणेर्णित् ॥५६॥ आभ्यां णिदुकः प्रत्ययः स्यात् । कण अण शब्दे । काणुकः काकः हिंस्रश्च । काणुकम् आणुकं च अक्षिमलम् ।

कञ्चुकांशुकनंशुकपाकुकहिबुकचिबुकजम्बुकचुल्लुकचूचुकोल्मुक-भावुकपृथुकमधुकादयः ॥६७॥ एते किदुकप्रत्ययान्ता निपात्यन्ते। कचि बन्धने। अशौटि व्याप्तौ। नशौच् अदर्शने। एषां स्वराद्योऽन्तश्च। कञ्चुकः कूर्पासः। अंशुकं वस्त्रम्। नंशुको रणरेणुः प्रवासशीलः चन्द्रः प्रावरणं च। पचेः पाक् च। पाकुकः लघुपाची सूपः सूपकारः अध्वर्युश्च। हिनोतिचिनोतिजमतिनां बोऽन्तश्च। हिबुकं ललाटतुर्यस्थानम् रसातलं च। चिबुकं मुखाधोभागः। जम्बुकः शृगालः। चुलुम्पः सौत्रः अन्त्यस्वरादिलोपश्च। चुलुम्पतीति चुल्लुकः करकोशः। चतेश्चूच् च। चूचुकः स्तनाग्रभागः। ज्वलेरुल्म् च। उल्मुकम् अलातम्। भातेर्वोऽन्तश्च। भावुकः भगिनीपतिः। प्रथिप् प्रख्याने। पृथुकः शिशुः व्रीह्याद्यभ्यूषश्च। मचि कल्कने धश्चान्तादेशः। मधुकं यष्टीमधु। आदिग्रहणाद् वालुकीवालुकादयो भवन्ति।

मृमन्यञ्जिजलिवलितालिमलिमाल्लिभालिमण्डबन्धिभ्य ऊकः ॥६८॥ एभ्य ऊकः प्रत्ययः स्यात्। मृंत् प्राणत्यागे। मरूकः मयूरः मृगः निदर्शनेभः तृणं च। मनिंच् ज्ञाने। मनूकः कृमिजातिः। अञ्जौप् व्यक्तिम्रक्षणगतिषु। अञ्जूकः हिंस्रः। जल घात्ये। जलूका जलजन्तुः। वल प्राणनधान्यावरोधयोः। वलूकः उत्पलमूलं मत्स्यश्च। तलण् प्रतिष्ठायाम्। तलूकः लकृमिः। मलि धारणे। मलूकः सरोजशकुनिः। मल्लि धारणे। मल्लूकः कृमिजातिः। भलिण् आभण्डने। भालूकः ऋक्षः। मडु भूषायाम्। मण्डूकः दर्दुरः। बन्धंश् बन्धने। बन्धूकः बन्धुजीवः।

शल्यणेर्णित् ॥६९॥ आभ्यां णिदूकः प्रत्ययः स्यात्। पलफलशल गतौ। शालूकं जलकन्दः वलवाँश्च। अण शब्दे। आणूकम् अक्षिमलम्।

कणिभल्लेर्दीर्घश्च वा ॥७०॥ आभ्यामूकः प्रत्ययो दीर्घश्चानयोर्वा। कण शब्दे। कणूकः धान्यस्तोकः। काणूकः पक्षी। काणूकम् अक्षिमलः तमो वा। भल्लि परिभाषणहिंसादानेषु। भल्लूकः भाल्लूकश्च ऋक्षः।

शम्बूकशाम्बूकवृधूकमधूकोलूकोरुबूकवरूकादयः ॥ ६१ ॥ एते ऊकप्रत्ययान्ता निपात्यन्ते। शमेर्वोऽन्तो दीर्घश्च वा। शम्बूकः शङ्खः। शाम्बूकः स एव। वृश् वरणे। अस्य वृधभावश्च। वृधूकः मातृवाहकः। वृधूकं जलम्। मदेर्धश्च। मदयधूतीति मकः वृक्षः। अलेरुच्चोपान्त्यस्य। उलूकः काकारिः। उरुपूर्वाद्

वातेः किच्च । उरु वाति उल्वूकः एरण्डः । वृधेर्लोपश्च । वर्धते इति वरूकः तृणजातिः। आदिग्रहणादन्यूकवावदूकादयो भवन्ति ।

किरोऽङ्को रो लश्च वा ॥६२॥ किरतेरङ्कः प्रत्ययः स्याद् रेफस्य च लकारादेशो वा । करङ्कः समुद्रः । कलङ्कः लाञ्छनम् ।

रालापाकाभ्यः कित् ॥६३॥ एभ्यः किदङ्कः प्रत्ययः स्यात् । रांक् दाने । रङ्कः अबलीयान् । लांक् दाने । लङ्का पुरी । पांक् रक्षणे । पङ्कः कर्दमः । कैं शब्दे । कङ्कः पक्षी ।

कुलिचिरिभ्यामिङ्कक् ॥६४॥ आभ्यामिङ्कक् प्रत्ययः स्यात् । कुल बन्धुसंस्त्यानयोः। कुलिङ्कः चटकः । चिर हिंसायाम् सौत्रः। चिरिङ्कं जलयन्त्रम् ।

कलेरविङ्कः ॥६५॥ कलेरविङ्कः प्रत्ययः स्यात् । कलि शब्दसंख्यानयोः । कलविङ्कः गृहचटकः ।

क्रमेरेलकः ॥६६॥ क्रमू पादविक्षेपे इत्यस्मादेलकः प्रत्ययः स्यात् । क्रमेलकः करभः ।

जीवेरातृको जैव् च ॥६७॥ जीवमाणधारणे इत्यस्मादातृकः प्रत्ययः स्यात् जैव् इत्यादेशश्च । जैवातृकः आयुष्मान् चन्द्रः आम्रः वैद्यः मेघश्च । जैवातृका जीवद्वत्सा स्त्री ।

हृभूलाभ्य आणकः ॥६८॥ एभ्य आणकः प्रत्ययः स्यात् । हृंग् हरणे । हराणकः चौरः। भू सत्तायाम् । भवाणकः गृहपतिः। लांक् आदाने । लाणकः हस्ती।

प्रियः कित् ॥६९॥ प्रींग्श् तृप्तिकान्त्योरित्यस्मादाणकः प्रत्ययः स्यात् स च कित् । प्रियाणकः ।

धालूशिङ्भ्यः ॥७०॥ योगविभाग उत्तरार्थः । एभ्य आणकः प्रत्ययः स्यात् । डुधांग्क् धारणे च । धाणकः दीनारद्वादशभागः हविषां ग्रहः छिद्रपिधानं च । लूग्श् छेदने । लवाणकः कालः तृणजातिः दात्रं च। शिघु आघ्राणे। शिङ्घाणकः नासिकामलः ।

शीभीराजेश्चानकः ॥७१॥ शीभीराजिभ्यो धातुशिङ्भिभ्यश्चानकः प्रत्ययः स्यात्। शीङ्क् स्वप्ने। शयानकः अजगरः शैलश्च। भिभींक् भये। बिभेत्यस्मादिति भयानकः भीमः व्याघ्रः वराहः राहुश्च। राजृग् दीप्तौ। राजानकः क्षत्रियः। धुधांगुक् धारणे च। धानकः हेमादिपरिमाणम्। लूगश् छेदने। लवानकः देशविशेषः दात्रं च। शिङ्क्त्यनेनेति शिङ्घानकः श्लेष्मायुः पुरीषं च।

अणेर्डित् ॥७२॥ अणेर्डिदानकः प्रत्ययः स्यात्। अण शब्दे। आनकः पटहः।

कनेरीनकः ॥७३॥ कनै दीप्तिकान्तिगतिषु इत्यस्मादीनकः प्रत्ययः स्यात्। कनीनकः कनीनिका वाक्षितारका

गुङ ईधुकैधुकौ ॥७४॥ गुङ् शब्दे इत्यस्मादीधुक एधुक इत्येतौ प्रत्ययौ स्याताम्। गवीधुकं नगरं धान्यजातिश्च। गवेधुका तृणजातिः।

वृतेस्तिकः ॥७५॥ वृतूङ् वर्तने इत्यस्मात् तिकः प्रत्ययः स्यात्। वर्त्तिका चित्रकरोपकरणं शकुनिः द्रव्यगुटिका च।

कृतिपुतिलतिभिदिभ्यः कित् ॥७६॥ एभ्यः कित्तिकः प्रत्ययः स्यात्। कृतैत् छेदने। कृत्तिका नक्षत्रम्। पुतिलती सौत्रौ। पुत्तिका मधुमक्षिका। लत्तिका वाद्यविशेषः गौः गोधा च। गोपूर्वाद् गोलत्तिका गृहगोलिका। अवपूर्वादवलत्तिका गोधा। आलत्तिका गानप्रारम्भः। भिदृंपी विदारणे। भित्तिका कुड्यम् माषादिचूर्णं शरावती च नदी।

इष्यशिमसिभ्यस्तकक् ॥७७॥ एभ्यस्तकक् प्रत्ययः स्यात्। इषत् इच्छायाम्। इष्टका मृद्विकारः। अशौटि व्याप्तौ। अष्टकाः श्राद्धतिथयस्तिस्रः अष्टम्यः पितृदेवत्यं च। मसैच् परिणामे। मस्तकः शिरः।

भियो ढे च ॥७८॥ भिभींक् भये इत्यस्मात् तकक् प्रत्ययः स्यात् ढे च रूपे भवतः। बिभीतकः अक्षः।

हरुहिपिण्डिभ्य ईतकः ॥७९॥ एभ्य ईतकः प्रत्ययः स्यात्। हृंग् हरणे। हरीतकी पथ्या। रुहं जन्मनि। रोहीतकः वृक्षविशेषः। पिडुङ् संघाते। पिण्डीतकः करहाटः।

कुषेः कित् ॥८०॥ कुषश् निष्कर्षे इत्यस्मात् । कित्कीतकः प्रत्ययः स्यात् । कुषीतकः ऋषिः ।

बलिबिलिशलिदमिभ्य आहकः ॥८१॥ एभ्य आहकः प्रत्ययः स्यात् । बल प्राणनधान्यावरोधयोः । बलाहकः मेघः वातश्च । बिलत् भेदने । बिलाहकः वज्रः । बाहुलकान्न गुणः । शल गतौ । शलाहकः वायुः । दमूच् उपशमे । दमाहकः शिष्यः ।

चण्डिभल्लिभ्यामातकः ॥८२॥ आभ्यामातकः प्रत्ययः स्यात् । चडुङ् कोपे । चण्डातकं नर्तक्यादिवासः। भल्लि परिभाषणहिंसादानेषु । भल्लातकः वृक्षः।

[१]लेष्मातकाम्रातकामिलातकपिष्टातकादयः ॥ ८३ ॥ एते आतकप्रत्ययान्ता निपात्यन्ते । श्लिषेर्मश्च परादिः। [१]लेष्मातकः कफेलुः। अमेर्वृद्धी रश्चान्तः। आम्रातकः वृक्षः । नञः परस्य म्लायतेर्मिल् च । अमिलातकम् वर्णपुष्पम् । पिषेस्तोऽन्तश्च । पिष्टातकं वर्णचूर्णम् । आदिग्रहणात् कोशातक्यादयो भवन्ति ।

शमिमनिभ्यां खः ॥८४॥ आभ्यां खः प्रत्ययः स्यात् । शमूच् उपशमे । शङ्खः कम्बुः निधिश्च । मनिंच् ज्ञाने । मङ्खः मागधः कृपणः चित्रपटश्च । मङ्खा मङ्गलम् ।

इयतेरिच्च चा ॥८५॥ शोंच् तक्षणे इत्यस्मात् खः प्रत्यय इश्चास्यान्तादेशो वा । शिखा चूडा ज्वाला च । विशिखा आपणः। विशिखः बाणः। शाखा विटपः । विशाखा नक्षत्रम् । विशाखः स्कन्दः ।

पूमुहोः पुन्मूरौ च ॥८६॥ पूङ् पवने मुहौच् वैचित्ये इत्येताभ्यां खः प्रत्ययोऽनयोश्च यथासंख्यं पुन् मूर् इत्यादेशौ । पुङ्खः बाणवुन्धभागः मङ्गलाचारश्च । मूर्खः अज्ञः ।

अशेर्डित् ॥८७॥ अशौटि व्याप्तावित्यस्मात् डित् खः प्रत्ययः स्यात् । अ[२]नुत इति खमाकाशमिन्द्रियं च । नास्य खमस्ति नखः । शोभनानि खानि अस्मिन् सुखम् । दुष्टानि खान्यस्मिन् दुःखम् ।

उषेः किल्लुक् च ॥८८॥ उषू दाहे इत्यस्मात् कित् खः प्रत्ययः स्यात् लुक् चान्त्यस्य । ओषन्त्यस्यामिति उखा स्थाली ऊर्ध्वक्रिया वा ।

महेरुचास्य वा ॥८९॥ मह पूजायामित्यस्मात् खः प्रत्ययः कित् अन्तलुक् अकारस्य चोकारादेशो वा । मुखमाननम् । मखः यज्ञः अध्वर्युः ईश्वरश्च ।

न्युङ्खादयः ॥९०॥ न्युङ्खादयः शब्दाः खप्रत्ययान्ता निपात्यन्ते । नयतेः ख उन् चान्तः न्युङ्खाः षडोङ्काराः । आदिग्रहणादन्येऽपि ।

मयेधिभ्यामूखेखौ ॥९१॥ मयि गतौ एधि वृद्धौ इत्याभ्यां यथासंख्यमूखेख इत्येतौ प्रत्ययौ स्याताम् । मयूखः रश्मिः । एधिखः वराहः ।

गम्यमिरम्यजिगद्यादिछागडिखाडिगृभृवृस्तृभ्यो गः ॥९२॥ एभ्यो गः प्रत्ययः स्यात् । गम्लृं गतौ । गङ्गा देवनदी । अम गतौ । अङ्गं शरीरावयवः । अङ्गः समुद्रः वह्निः राजा च । अङ्गा जनपदः । रमिं क्रीडायाम् । रङ्गः नाट्यस्थानम् । अज क्षेपणे च । वेगः त्वरा रेतश्च । गद व्यक्तायां वाचि । गद्गदः वाग्विकलः । अदंक् भक्षणे । अद्गः समुद्रः अग्निः पुरोडाशश्च । छोंच् छेदने । छागः बस्तः । गड सेचने । गड्गः मृगजातिः । खडण् भेदे । खड्गः मृगविशेषोऽसिश्च । गृत् निगरणे । गर्गः ऋषिः । दुडुभृंग्क् पोषणे च । भर्गः रुद्रः सूर्यश्च । वृगट् वरणे । वर्गः संघातः । औस्व शब्दोपतापयोः । स्वर्गः नाकः ।

पूसुदिभ्यां कित् ॥९३॥ आभ्यां किद् गः प्रत्ययः स्यात् । पूगश् पवने । पूगः संघः क्रमुकश्च । मुदि हर्षे । मुद्गः धान्यविशेषः ।

भृवृभ्यां नोऽन्तश्च ॥९४॥ आभ्यां किद् गः प्रत्ययो नकारश्चान्तः । दुडुभृंग्क् पोषणे च । भृङ्गः पक्षी भ्रमरः वर्णविशेषः लवङ्गश्च । वृगट् वरणे । वृङ्गः पक्षी उपपतिः ।

द्रुमो णिद्वा ॥९५॥ द्रम गतावित्यस्माद् गः प्रत्ययः स च णिद्वा । द्राङ्गं शीघ्रम् । द्राङ्गः पांशुः । द्रङ्गः नगरम् । द्रङ्गा शुल्कशाला ।

शृङ्गशार्ङ्गादयः ॥९६॥ शृङ्गादयः शब्दा गप्रत्ययान्ता निपात्यन्ते । शृश् हिंसायामित्यस्य ह्रस्वो नोऽन्तश्च । शृङ्गं विषाणं शिखरं च । तस्यैव नोऽन्तो वृद्धिश्च । शार्ङ्गः पक्षी । आदिग्रहणाद् हृंग् हरणे हार्गः परितोषः । मृंत् प्राणत्यागे । मार्गः पन्थाः ।

तडेरागः ॥९७॥ तड ण आघाते इत्यस्मादागः प्रत्ययः स्यात् । तडागं सरः ।

पतितमितॄपॄकॄशॄल्वादेरङ्गः ॥९८॥ एभ्योऽङ्गः प्रत्ययः स्यात्। पत्लृ गतौ। पतङ्गः पक्षी शलभः सूर्यः शालिविशेषश्च। तमूच् काङ्क्षायाम्। तमङ्गः हर्म्यनिर्यूहः। तॄ प्लवनतरणयोः। तरङ्गः ऊर्मिः। पॄश् पालनपूरणयोः। परङ्गः खगः वेगश्च। कॄत् विक्षेपे। करङ्गः कर्मशीलः। शॄश् हिंसायाम्। शरङ्गः पक्षिविशेषः। लूगश् छेदने। लवङ्गः सुगन्धिवृक्षः। आदिग्रहणादन्येभ्योऽपि।

सृवृनृभ्यो णित् ॥९९॥ एभ्यो णिदङ्गः प्रत्ययः स्यात्। सृ गतौ। सारङ्गः हरिणः चातकः शबलवर्णश्च। वृगट् वरणे। वारङ्गः काण्डखड्गयोः शल्यं शकुनिश्च। नृश् नये। नारङ्गः वृक्षजातिः।

मनेर्मनूमातौ च ॥१००॥ मनिंच् इत्यस्मादङ्गः प्रत्ययो मनूमातौ चास्यादेशौ। मतङ्गः ऋषिः हस्ती च। मातङ्गः हस्ती अन्त्यजातिश्च।

विडिविलिकुरिमृदीपिशिभ्यः कित् ॥१०१॥ एभ्यः किदङ्गः प्रत्ययः स्यात्। विड आक्रोशे। विडङ्गः वृक्षजातिः गृहावयवश्च। विलत् वरणे, विलत् भेदने वा। विलङ्गः औषधम्। कुरत् शब्दे। कुरङ्गः हरिणः। कुरङ्गी भोजकन्या। मृदश् क्षोदे। मृदङ्गः मुरजः। पिशत् अवयवे। पिशङ्गः वर्णः।

स्फुलिकालिपल्यादिभ्य इङ्गक् ॥१०२॥ स्फुल्यादिभ्य आदन्तेभ्यश्च इङ्गक् प्रत्ययः स्यात्। स्फुलत् संचये च। स्फुलिङ्गः स्फुलिङ्गा च अग्निकणः। कलि शब्दसंख्यानयोः। कलिङ्गः राजा कलिङ्गा जनपदः। पल गतौ। पलिङ्ग ऋषिः शिला च। पातेः पिङ्गः। भातेः भिङ्गः। द्वावपि वर्णविशेषौ। ददातेः दिङ्गः अध्यक्षः। दधातेः धिङ्गः श्रेष्ठी। लातेः लिङ्गं स्त्रीत्वादि हेतुश्च। आलिङ्गः वाद्यविशेषः। श्यतेः शिङ्गः वनस्पतिः किशोरश्च।

भलेरिदुतौ चातः ॥१०३॥ भलिण् आभण्डने इत्यस्मादिङ्गक् प्रत्ययः स्यात् अकारस्य चेकारोकारौ। भिलिङ्गः कर्मारोपकरणम्। भुलिङ्गः ऋषिः पक्षी। भुलिङ्गाः साल्वावयवाः।

अदेर्णित् ॥१०४॥ अदंक् भक्षणे इत्यस्मात् णिदिङ्गक् प्रत्ययः स्यात्। आदिङ्गः वाद्यजातिः।

उचिलिङ्गादयः ॥१०५॥ उचिलिङ्गादयः शब्दा इङ्गक्मत्ययान्ता निपात्यन्ते। उत्पूर्वाच्चलेरस्येत्वं च । उचिलिङ्गः दाडिमी । आदिग्रहणादन्येऽपि ।

माङस्तुलेरुङ्गक् ॥१०६॥ माङ्पूर्वात् तुलण् उन्माने इत्यस्माद् उङ्गक् इङ्गच् प्रत्ययौ स्याताम् । मातुलुङ्गः बीजपूरः । मातुलिङ्गः स एव ।

कमितमिशमिभ्यो डित् ॥१०७॥ एभ्यो डिदुङः प्रत्ययः स्यात् । कमूङ् कान्तौ । कुङ्गा जनपदः । तमूच् काङ्क्षायाम् । तुङ्गः महावर्ष्मा । शमूच् उपशमे । शुङ्गः मुनिः । शुङ्गा विनता । शुङ्गाः कन्दल्यः ।

सर्तेः सुर्च ॥१०८॥ सृं गतावित्यस्मादुङः प्रत्ययः सुर् चास्यादेशः। सुरुङ्गा गूदमार्गः ।

स्थार्तिज्ञानिभ्यो घः ॥१०९॥ एभ्यो घः प्रत्ययः स्यात् । ष्ठां गतिनिवृत्तौ । स्थाघः गाधः । ऋं प्रापणे च । अर्घः मूल्यं मानप्रमाणं पादोदकादि च । जनैचि प्रादुर्भावे । जङ्घा शरीरावयवः ।

मघाघङ्गाघदीर्घादयः ॥११०॥ एते घप्रत्ययान्ता निपात्यन्ते । मङ्गेर्नघलोपश्च । मघा नक्षत्रम् । हन्तेर्हस्य घश्च । घङ्गः घस्मरः । घङ्गा काङ्क्षा । अमेर्लुक् च । अघं पापम् । हणातेर्दीर् च । दीर्घः आयातः उच्चश्च । आदिशब्दादन्येऽपि ।

सर्तेरघः ॥१११॥ सृं गतावित्यस्मादघः प्रत्ययः स्यात् । सरघा मधुमक्षिका ।

कूपूसामिण्भ्यश्चट् दीर्घश्च ॥११२॥ कूपूभ्यां सम्पूर्वाच्चेण्श्च चट् प्रत्ययः स्यात् दीर्घश्च । टो ङ्यर्थः। कुंङ् शब्दे । कूचः हस्ती । कूची प्रमदा चित्रभाण्डम् उदञ्चिद्विकारश्च । पूगृश् पवने । पूचः पूची मुनिः । इंणक् गतौ । समीचः ऋत्विक् । समीचं मिथुनयोगः। समीची पृथ्वी उदीची च । दीर्घवचनाद् गुणो न ।

कूर्चचूर्चादयः ॥११३॥ कूर्चादयः शब्दाश्चट्प्रत्ययान्ता निपात्यन्ते । कवतेः किरतेः करोतेर्वा ऊरादेशश्चान्तस्य । कूर्चं श्मश्रु आसनं तन्तुवायोपकरणं यतिपवित्रकं च । कूर्चमिव कूर्चकः कूर्चिकेति च भवति । चरतेश्चोरयतेर्वा चूरादेशश्च । चूर्चः बलवान् । आदिशब्दादन्येऽपि ।

कल्यविभ्रादिभ्यिकुकाणिकुटिकृभ्योऽचः ॥११४॥ एभ्योऽचः प्रत्ययः स्यात् । कलि शब्दसंख्यानयोः । कलचः गणकः । अव रक्षणादौ । अवचः उच्चैस्तरः । मदैच् हर्षे । मदचः मत्तः । मण शब्दे । मणचः शकुनिः । कुंङ् शब्दे । कवचं वर्म । कण शब्दे । कणचः कुणपः । कुटत् कौटिल्ये । कुटचः वृक्षजातिः । कृत् विक्षेपे । करचः धान्यावपनम् ।

ककचादयः ॥११५॥ ककच इत्यादयः शब्दा अचप्रत्ययान्ता निपात्यन्ते । क्रमेः कश्च । ककचः करपत्रः । आदिशब्दादन्येऽपि ।

पिशेराचक् ॥११६॥ पिशत् अवयवे इत्यस्मादाचक् प्रत्ययः स्यात् । पिशाचः व्यन्तरजातिः ।

मृत्रपिभ्यामिचः ॥११७॥ आभ्यामिचः प्रत्ययः स्यात् । मृंत् प्राणत्यागे । मरिचमूषणम् । त्रपौषि लज्जायाम् । त्रपिचा कुथा ।

म्रियतेरीचण् ॥११८॥ मृंत् प्राणत्यागे इत्यस्मादीचण् प्रत्ययः स्यात् । मारीचः रावणमातुलः ।

लषेरुचः कश्च ॥११९॥ लषी कान्तावित्यस्मादुचः प्रत्ययोऽन्त्यस्य च कः । लकुचः वृक्षजातिः ।

गुडेरूचट् ॥१२०॥ गुडत् रक्षायामित्यस्मादूचट् प्रत्ययः स्यात् । गुडूची छिन्नरुहा । कुटादित्वाद् ङित्त्वम् ।

सिवेर्डित् ॥१२१॥ षिवूच् ऊतौ इत्यस्मादूचट् प्रत्ययो डित् स्यात् । सूचः पिशुनः स्तिमिश्च । सूची संधानकरणी ।

चिमेर्डोचडश्चौ ॥१२२॥ चिमिभ्यां प्रत्येकं डोच डश्च इति प्रत्ययौ स्याताम् । वचनभेदान्न यथासंख्यम् । चिंग्ट् चयने । चोचः वृक्षविशेषः । चश्चा तृणमयः पुरुषः । डुमिंग्ट् प्रक्षेपणे । मोचा कदली । मञ्चः पर्यङ्कः ।

कुटिकुलिकल्युदिभ्य इञ्चक् ॥१२३॥ एभ्य इञ्चक् प्रत्ययः स्यात् । कुटेः कुटिञ्चः क्षुद्रकर्कटः । कुलेः कुलिञ्चः राशिः । कलेः-कलिञ्चः उपस्कारखण्डवः । उद आघाते सौत्रः । उदिञ्चः कोणः येन तूर्यं वाद्यते, परपुष्टश्च ।

तुदिमदिपद्यदिगुगमिकाचिभ्यश्छक् ॥१२४॥ एभ्यश्छक् प्रत्ययः स्यात्। तुदींत् व्यथने। तुच्छः स्तोकः। मदैच् हर्षे। मच्छःमत्स्यः प्रमत्तपुरुषश्च। मच्छा स्त्री। पदिंच् गतौ। पच्छः शिला। अदंक् भक्षणे। अच्छः निर्मलः। गुंङ् शब्दे। गुच्छः स्तबकः। गस्लृं गतौ। गच्छः क्षुद्रवृक्षः। कचि बन्धने। कच्छः कूर्मपादः कुक्षिः नद्यवकुटारश्च। कच्छा जनपदः। बाहुलकात् कत्वाभावः।

पीपूङो ह्रस्वश्च ॥१२५॥ आभ्यां छक् प्रत्ययः स्यात् ह्रस्वश्च। पीङ्च् पाने। पिच्छम् शकुनिपत्रम्। पिच्छः गुणविशेषः, यद्वान् पिच्छिल उच्यते। पूङ् पवने। पुच्छं वालधिः।

गुलुञ्छ।पिलिपिञ्छैधिच्छादयः ॥१२६॥ एते छप्रत्ययान्ता निपात्यन्ते। गुडेर्ल उम् चान्तः। गुलुञ्छः स्तबकः। पीलेरिपिनोऽन्तो ह्रस्वश्च। पिलिपिञ्छः रक्षोविशेषः। एधेरिट् च। एधिच्छः नगः। आदिग्रहणात् पिञ्छादयोऽपि भवन्ति।

वियो जक् ॥१२७॥ वींक् प्रजनकान्त्यसनखादनेषु च इत्यस्मात् जक् प्रत्ययः स्यात्। बीजम् उत्पत्तिहेतुः।

पुवः पुन् च ॥१२८॥ पूङ् पवने इत्यस्मात् जक् प्रत्ययोऽस्य च पुन् इत्यादेशः। पुञ्जः राशिः।

कुवः कुब्कुनौ च ॥१२९॥ कुंङ् शब्दे इत्यस्माज्जक् प्रत्ययोऽस्य च कुब् कुन् इत्यादेशौ। कुब्जः वक्रानताङ्गः गुच्छश्च। कुञ्जः हनुः पर्वतैकदेशश्च। निकुञ्जः गहनम्।

कुटेरजः ॥१३०॥ कुटत् कौटिल्ये इत्येतस्मादजः प्रत्ययः स्यात्। कुटजः वृक्षविशेषः। कुटादित्वाद् ङित्वम्। कुटजी।

भिषेर्भिषभिष्णौ च वा ॥१३१॥ भिषेरजः प्रत्ययो भिष भिष्ण इत्यादेशौ चास्य वा। भिषिः सौत्रः। भिषजः। आदेशबलान्न गुणः। भिष्णजः वैद्यः। भेषजमौषधम्।

मुर्वेर्मुर् च ॥१३२॥ मुर्वं बन्धने इत्यस्मादजः प्रत्ययोऽस्य च मुरित्यादेशः। मुरजः मृदङ्गः।

बलेर्वोऽन्तश्च वा ॥१३३॥ बल प्राणनधान्यावरोधयोरित्यस्मात् अजः प्रत्ययो वकारश्चान्तो वा । बल्वजः मुञ्जविशेषः । बलजा सबुसो धान्यपुञ्जः ।

उटजादयः ॥१३४॥ उटजादयः शब्दा अजप्रत्ययान्ता निपात्यन्ते । वटेर्वस्योत्वं च । उटजं मुनिकुटीरः । आदिशब्दाद् भूर्जभरुजादयो भवन्ति ।

कुलेरिजक् ॥१३५॥ कुल बन्धुसंस्त्यानयोरित्यस्मात् इजक् प्रत्ययः स्यात् । कुलिजं मानम् ।

कृगोऽञ्जः ॥१३६॥ करोतेरञ्जः प्रत्ययः स्यात् । करञ्जः वृक्षजातिः ।

झमेर्झः ॥१३७॥ झमू अदने इत्यस्मात् झः प्रत्ययः स्यात् । झञ्झा ससीकरो मेघवातः ।

लुषेष्टः ॥१३८॥ लुष स्तेये इत्यस्माट् टः प्रत्ययः स्यात् । लोष्टो मृत्पिण्डः ।

नमितनिजनिवनिसनो लुक् च ॥१३९॥ एभ्यष्टः प्रत्ययः स्यात् लुक् चान्तस्य । णमं प्रह्वत्वे । नटः भरतपुत्रः । तनूयी विस्तारे । तटं कूलम् । जनैचि प्रादुर्भावे । जटा ग्रथितकेशसंघातः । वन षण संभक्तौ । वटः न्यग्रोधः । सटा अग्रथितः केशसंघातः ।

जनिपणिकिजुभ्यो दीर्घश्च ॥१४०॥ एभ्यष्टः प्रत्ययो दीर्घश्चैषां गुणापवादः। जनैचि प्रादुर्भावे । पणि व्यवहारस्तुत्योः। जाण्टः। पाण्टः। पक्षिविशेषावेतौ। किजू सौत्रौ । कीटः क्षुद्रजन्तुः । जूटः मौलिः ।

घटाघाटाघण्टादयः ॥१४१॥ एते टप्रत्ययान्ता निपात्यन्ते । हन्तेर्घाघनश्च। घटा वृन्दम् । घाटा स्थाङ्गम् । घण्टा वाद्यविशेषः । आदिग्रहणाच्चटादयो भवन्ति ।

दिव्याविश्रुकुकर्विशाकिकङ्किकृपिचपिचमिकम्येधिकर्किमर्किकक्खतृकृसृभृवृभ्योऽटः ॥१४२॥ एभ्योऽटः प्रत्ययः स्यात् । दिवूच् क्रीडादौ । देवटः देवकुलविशेषः शिल्पी च । अव रक्षणादौ । अवटः प्रपातः कूपश्च । श्रुंट् श्रवणे । श्रवटः छत्रम् । कुंक् शब्दे । कवटः उच्छिष्टम् । कर्व गतौ । कर्वटं क्षुद्रपत्तनम् । शक्लृंट् शक्तौ । शकटम् अनः। ककुङ् गतौ । कङ्कटः सन्नाहः। कङ्कटं सीमा । कृपौङ् सामर्थ्ये । कर्पटं वासः । चप सान्त्वने । चपटः रसः । चमू अदने । चमटः घस्मरः । कमूङ् कान्तौ । कमटः वामनः । एधि वृद्धौ । एधटः वल्मीकः। कर्किमर्की सौत्रौ । कर्कटः

कपिलः कुलीरश्च । कर्कटी स्त्रपुसी । मर्कटः कपिः क्षुद्रजन्तुश्च । कक्ख हसने । कक्खटः कर्कशः । तॄ तरणप्लवनयोः । तरटः पीनः । डुकृंग् करणे । करटः काकः करिकपोलश्च । सृं गतौ । सरटः कृकलासः। डुडुभृंग्क् पोषणे च । भरटः प्लवविशेषः भृत्यः कुलालश्च । वृग्ट् वरणे । वरटः क्षुद्रधान्यं प्रहारश्च ।

कुलिविलिभ्यां कित् ॥१४३॥ आभ्यां किदटः प्रत्ययः स्यात् । कुल बन्धुसंस्त्यानयोः । कुलटा बन्धकी । विलत् वरणे । विलटा नदी ।

कपटकीकटादयः ॥१४४॥ कपटादयः शब्दा अटप्रत्ययान्ता निपात्यन्ते । कम्पेर्नलोपश्च । कपटं माया । ककेरत ईच्च । कीकटः कृपणः । आदिशब्दाल्लपटपर्पटादयो भवन्ति ।

अनिशृपृवृललिभ्य आटः ॥१४५॥ एभ्य आटः प्रत्ययः स्यात् । अनक् प्राणने । अनाटः शिशुः । शृश् हिंसायाम् । शराटः कुन्तः । पृश् पालनपूरणयोः । पराट आयुक्तकः । वृङ्श् संभक्तौ । वराटः सेवकः । ललिण् ईप्सायाम् । ललाटम् अलिकम् ।

स्रसृपेः कित् ॥१४६॥ आभ्यां किदाटः प्रत्ययः स्यात् । सृं गतौ । स्राटः पुरःसरः । सृप्लृं गतौ । सृपाटः अल्पः कुमुदादिपत्रं च । सृपाटी उपानत् कुप्यम् अल्पपुस्तकश्च ।

किरो लश्च वा ॥१४७॥ किरतेः किदाटः प्रत्ययो लश्चान्तो वा । किलाटो भक्ष्यविशेषः । किराटो वणिक् म्लेच्छश्च ।

कपाटविराटशृङ्गाटप्रपुन्नाटादयः ॥१४८॥ एते आटप्रत्ययान्ता निपात्यन्ते । कम्पेर्नलोपश्च । कपाटः अररिः । जपादीनां पो वेति वत्वे कवाटः । वृङ इत्वं च । विराटः राजा । श्रयतेः शृङ् च । शृङ्गाटं जलजविशेषः विपणिमार्गश्च । प्रपूर्वात् पुणेर्नश्च । प्रपुन्नाटः एडगजः । आदिशब्दात् खल्वाटादयोऽपि ।

चिरेरिटो भ् च ॥१४९॥ चिरेः सौत्रादिटः प्रत्ययः स्याद् भकारश्चान्तादेशः। चिर्भिटी वालुङ्की ।

टिण्टश्चर् च वा ॥१५०॥ चिरेष्टिदिण्टः प्रत्ययश्चर् इति चास्यादेशो वा । चिरिण्टी च प्रथमवयाः स्त्री ।

तॄकृकृपिकम्पिकृषिभ्यः कीटः ॥१५१॥ एभ्यः किदीटः प्रत्ययः स्यात् ।

तॄ प्लवनतरणयोः । तिरीटं कूलवृक्षः मुकुटं वेष्टनं च । कॄत् विक्षेपे । किरीटं मुकुटं हिरण्यं च । कृपौङ् सामर्थ्ये । कृपीटं हिरण्यं जलं च । कपुङ् चलने । कम्पीटं कम्पः कम्पं च । कृषींत् विलेखने । कृषीटं जलम् ।

खञ्जेररीटः ॥१५२॥ खजु गतिवैकल्ये इत्यस्मादरीटः प्रत्ययः स्यात् । खञ्जरीटः खञ्जनः ।

गृजृदृवृभ्भ्य उट उडश्च ॥१५३॥ एभ्य उट उडश्च प्रत्ययौ स्याताम् । भिन्नविभक्तिनिर्देश उटस्योत्तरत्रानुवृत्त्यर्थः । अप्रकृतस्यापि उडस्य विधानमिह लाघवार्थम् । गृश् शब्दे । गरुटः गरुडश्च गरुत्मान् । जॄष्च् जरसि । जरुटः जरुडश्च वनस्पतिः । दॄश् विदारणे । दरुटः दरुडश्च विडालः । वृगृश् वरणे । वरुटः वरुडश्च मेषः । भृश् भर्जने च । भरुटः भरुडश्च मेष एव ।

मङ्कॆर्मकमुकौ च ॥१५४॥ मकुङ् मण्डने इत्यस्मात् उटः प्रत्ययो मक मुक इत्यादेशौ चास्य । मकुटः मुकुटश्च किरीटः ।

नर्कुटकुकुटोत्कुरुटमुरुटपुरुटादयः॥१५५॥एते उटप्रत्ययान्ता निपात्यन्ते । नृतेः कश्च । नर्कुटः बन्दी । कुकेः कोऽन्तश्च । कुक्कुटः कुकवाकुः । उत्पूर्वात् कृगः कुर् च । उत्कुरुटः कचवरपुञ्जः । मुरिपुर्योर्गुणाभावश्च । मुरुटः यत् वेण्वादिमूलमुज्जूर्कर्तुं न शक्यते । पुरुटः जलजन्तुः । आदिशब्दात् स्थपुटादयोऽपि ।

दुरो द्रः कूटश्च दुर् च ॥१५६॥ दुरूपूर्वाद् द्रणातेः किदूट उटश्च प्रत्ययौ दुर् चास्यादेशः । दुर्दुरूटः दुर्मुखः । दुर्दुरुटः अदेशकालवादी ।

बन्धेः ॥१५७॥ बन्धंशृ् बन्धने इत्यस्मात् किदूटः प्रत्ययः स्यात् । बधूटी प्रथमवयाः स्त्री ।

चपेरेटः ॥१५८॥ चप सान्त्वने इत्यस्मादेटः प्रत्ययः स्यात् । चपेटः चपेटा वा हस्ततलाहतिः ।

ग्रो णित् ॥ १५९ ॥ गॄत् निगरणे इत्यस्मात् णिदेटः प्रत्ययः स्यात् । गारेटः ऋषिः ।

कृशकृशाखेरोटः ॥१६०॥ एभ्य ओटः प्रत्ययः स्यात् । डुकृंग् करणे । करोटः भृत्यः शिरः कपालं च । करोटं भाजनविशेषः । शक्लृंट् शक्तौ । शकोटः बाहुः । शाखृ श्लाखृ व्याप्तौ । शाखोटः वृक्षविशेषः ।

कपोटवकोटाक्षोटकर्कोटादयः ॥१६१॥ एते ओटप्रत्ययान्ता निपात्यन्ते। कबृङ् वर्णे पश्च। कपोटः वर्णः कितवश्च। वचेः कश्च। वकोटः बकः। अक्ष्नातेः सश्च परादिः। अक्षोटः फलवृक्षः। कृगः कोऽन्तश्च। कर्कोटः नागः। आदिशब्दादन्येऽपि।

वनिकणिकाशृषिभ्यष्ठः ॥१६२॥ एभ्यष्ठः प्रत्ययः स्यात्। वन भक्तौ। वण्ठः अनिविष्टः। कण शब्दे। कण्ठः कन्धरा। काशृङ् दीप्तौ। काष्ठं दारु। काष्ठा दिक् अवस्था च। उषू दाहे। ओष्ठः दन्तच्छदः।

पीविशिकुणिपृषिभ्यः कित् ॥१६३॥ एभ्यः कित् ठः प्रत्ययः स्यात्। पीङ्व् पाने। पीठमासनम्। विशंत् प्रवेशने। विष्ठा पुरीषम्। कुणत् शब्दोपकरणयोः। कुण्ठः अतीक्ष्णः। पृषू सेचने। पृष्ठः अङ्कुशः शरीरैकदेशश्च।

कुषेर्वा ॥१६४॥ कुषश् निष्कर्षे इत्यस्मात् ठः प्रत्ययः स्यात् स च किद्वा। कुष्ठं व्याधिः गन्धद्रव्यं च। कोष्ठः कुशूलः उदरं च।

शमेर्लुक् च वा ॥१६५॥ शमूच् उपशमे इत्यस्मात् लुक् चान्तस्य वा। शठः धूर्तः। शण्ठः स एव नपुंसकं च।

पष्ठैधिटादयः॥१६६॥ पष्ठादयः शब्दाष्ठप्रत्ययान्ता निपात्यन्ते। पुषेः कित् ठः षपादेशश्च। पष्ठः प्रस्थः पर्वतश्च। एधतेरिट् च। एधिठं वनम्। एधिठः गिरिसरिद्द्रहः। आदिशब्दादन्येऽपि।

मृजृशृकम्पमिरमिरापिभ्योऽठः ॥१६७॥ एभ्योऽठः प्रत्ययः स्यात्। मृंत् प्राणत्यागे। मरठः दध्यतिद्रवीभूतं कृमिजातिः कण्ठः प्राणश्च। जृष्च् जरसि। जरठः कठोरः। शृश् हिंसायाम्। शरठः आयुधं पापं क्रीडनशीलश्च। कमूङ् कान्तौ। कमठः भिक्षाभाजनम् कूर्मास्थि कच्छपः मयूरः वामनश्च। अम गतौ। अमठः प्रकर्षगतिः। रमिं क्रीडायाम्। रमठः देशः कृमिजातिः क्रीडनशीलः म्लेच्छः देवश्च विलातानाम्। रप व्यक्ते वचने। रपठः विद्वान् मण्डूकश्च।

पञ्चमात् डः ॥१६८॥ पञ्चमान्ताद् धातोर्डः प्रत्ययः स्यात्। षण् भक्तौ। षण्डः वनं वृषभश्च। बाहुलकात् सलोपाभावः। भण शब्दे। भण्डः प्रहसनकरः बन्दी च। चण शब्दे। चण्डः क्रूरः। पणि व्यवहारस्तुत्योः। पण्डः शण्ढः। गणण् संख्याने। गण्डः पौरुषयुक्तः पुरुषः। मण शब्दे। मण्डः रश्मिः अग्रम् अन्नविकारश्च। वन

भक्तौ । वण्डः अल्पशेफः निश्चर्मांग्रशिश्नश्च । शमू दमूच् उपशमे । शण्डः उत्सृष्टः पशुः ऋषिश्च । दण्डः वनस्पतिप्रतानः राजशासनं नालं प्रहरणं च । रमिं क्रीडायाम् । रण्डः पुरुषः रण्डा स्त्री रण्डमन्तःकरणम् । त्रयमपि स्वसंबन्धिशून्यमेवमुच्यते । तमेस्तनेर्वा तण्डः ऋषिः । वितण्डा तृतीयकथा । गमेः गण्डः कपोलः । भामि क्रोधे । भाण्डमुपस्करः ।

कण्यणिखनिभ्यो णिद्वा ॥१६९॥ एभ्यो डः प्रत्ययः स्यात् स च णिद्वा । कण अण शब्दे । काण्डः शरः फलसंघातः पर्व च । काण्डं भूषणं पर्व च । आण्डः शुष्कः । अण्डः स एव योनिविशेषश्च । खनूग् अवदारणे । खाण्डः कालाभ्रयो गुडः । खण्डः इक्षुविकारोऽन्यः । खण्डं शकलम् ।

कुगुहुनीकुणितुणिपुणिमुणिशुन्यादिभ्यः कित् ॥१७०॥ एभ्यः कित् डः प्रत्ययः स्यात् । कुङ् शब्दे । कुडः घटः हलं च । गुंङ् शब्दे । गुडः गोलः इक्षुविकारश्च । गुडा सन्नाहः । हुंक् दानादनयोः । हुडः मूर्खः मेषश्च । णींग् प्रापणे । नीडं कुलायः । कुणत् शब्दोपकरणयोः । कुण्डं भाजनं जलाधारविशेषश्च । कुण्डः भर्तरि जीवति जारेण जातः अपट्टिन्द्रियश्च । तुणत् कौटिल्ये । तुण्डं मुखम् । पुणत् शुभे । पुण्डः भिन्नवर्णः । मुणत् मतिज्ञाने । मुण्डः परिवापितकेशः । शुनत् गतौ । शुण्डा सुरा हस्तिहस्तश्च । आदिग्रहणादन्येभ्योऽपि भवति ।

ऋसृतृव्यालिह्यविचमिवमियमिचुरिकुहेरडः ॥ १७१ ॥ एभ्योऽडः प्रत्ययः स्यात् । ऋंक् गतौ । अरडः तरुः । सृं गतौ । सरडः भुजपरिसर्पः तरुश्च । तृ प्लवनतरणयोः । तरडः वृक्षजातिः । व्यैंग् संवरणे । व्याडः दुःशीलः हिंस्रः पशुः भुजगश्च । लिहींक् आस्वादने । लेहडः श्वा चौर्यग्रासी च । अव रक्षणादौ । अवडः क्षेत्रविशेषः । चमू अदने । चमडः पशुजातिः । टुवमू उद्गिरणे । वमडः लूताजातिः । यमू उपरमे । यमडो वनस्पतिः युगलं च । चुरण् स्तेये । चोरडः चोरः । कुहणि विस्मापने । कुहडः उन्मत्तकः ।

विहडकहोडकुरडकेरडक्रोडादयः ॥ १७२ ॥ एतेऽडप्रत्ययान्ता निपात्यन्ते । विपूर्वाद् हन्तेरनो लुक् च । विहडः शकुनिः मूढचित्तश्च । कषेर्हः प्रत्ययाकारस्य चौकारः । कहोडः ऋषिः । कुरेर्गुणाभावश्च । कुरडः मार्जारः । किरतेः केर् च । केरडः त्रैराज्ये राजा । कृगः कित् प्रत्ययाकारस्य चौकारः । क्रोडः किरिः अङ्गश्च । आदिग्रहणाल्लहोडादयः ।

जृकृतृशृसृभृवृभ्योऽण्डः ॥ १७३ ॥ एभ्योऽण्डः प्रत्ययः स्यात् । जृष्च् जरसि । जरण्डः अतीतवयस्कः । कृत् विक्षेपे । करण्डः समुद्रः समुद्रः कृमिजातिश्च । तॄ प्लवनतरणयोः । तरण्डः प्लवः वायुश्च । शृश् हिंसायाम् । शरण्डः हिंस्रः आयुधं च । सृं गतौ । सरण्डः कृमिजातिः इषीका वायुः भूतसंघातः तृणसमवायश्च । टुडुभृंङ् पोषणे च । भरण्डः भण्डजातिः पक्षी च । वृग्ट् वरणे । वरण्डः कुड्यम् तृणकाष्ठादिभारश्च ।

पूगो गादिः ॥१७४॥ पूग्श् पवने इत्यस्मात् गकारादिरण्डः प्रत्ययः स्यात् । पोगण्डः विकलाङ्गः युवा च ।

वनेस्त च ॥ १७५ ॥ वन भक्तावित्यस्मादण्डः प्रत्ययः स्यात् तकारश्चान्तादेशः । वतण्डः ऋषिः ।

पिचण्डैरण्डखरण्डादयः ॥ १७६ ॥ एतेऽण्डप्रत्ययान्ता निपात्यन्ते । पिचेरगुणत्वं च । पिचण्डः लघुलगुडः । ईरेर्गुणश्च । एरण्डः पञ्चाङ्गुलः। स्वादु भक्षणे । अन्त्यस्वरादेररादेशश्च । स्वरण्डः सर्वर्तुकम् । आदिग्रहणात् कूष्माण्डशयण्डशयाण्डादयः ।

लगेरुडः ॥१७७॥ लगे सङ्गे इत्यस्मात् उडः प्रत्ययः स्यात् । लगुडः यष्टिः । गृजृदृवृभ्यस्तु उडो विहित एव ।

कुशेरुण्डक् ॥१७८॥ कुशच् श्लेषे इत्यस्मात् उण्डक् प्रत्ययः स्यात् । कुशुण्डः वपुष्मान् ।

शामिषाणिभ्यां ढः ॥१७९॥ आभ्यां ढः प्रत्ययः स्यात् । शमूच् उपशमे । शण्ढः नपुंसकम् । षण भक्तौ । षण्ढः स एव । बाहुलकात् सत्वाभावः ।

कुणेः कित् ॥१८०॥ कुणत् शब्दोपकरणयोरित्यस्मात् कित् ढः प्रत्ययः स्यात् । कुण्ढः धूर्तः । बाहुलकान्न दीर्घः ।

नञः सहेः षा च ॥१८१॥ नञ्पूर्वात् षहि मर्षणे इत्यस्मात् ढः प्रत्ययः स्यात् षा चास्यादेशः । अषाढा नक्षत्रम् ।

इणुर्विशावेणिपृकृवृतृजृदृसृपिपणिभ्यो णः ॥१८२॥ एभ्यो णः प्रत्ययः स्यात् । इंणक् गतौ । एणः कुरङ्गः । उर्वै हिंसायाम् । उर्णा मेषादिलोम भ्रुवोरन्तरावर्तश्च । शोंच् तक्षणे । शाणः परिमाणं शस्त्रतेजनं च । वेणृग् गतिज्ञान-

चिन्तानिशामनवादित्रग्रहणेषु । वेण्णा कृष्णवेण्णा च नाम नदी । पॄश् पालनपूरणयोः । पर्ण पत्रं शिरश्च । कॄत् विक्षेपे । कर्णः श्रवणं कौन्तेयश्च । वॄञ् वरणे । वर्णः शुक्लादिः ब्राह्मणादिः अकारादिः यशः स्तुतिः प्रकारश्च । तॄ प्लवनतरणयोः । तर्णः वत्सः । जॄष्च् जरसि । जर्णः चन्द्रमाः वृक्षः कर्कः क्षयधर्मा शकुनिश्च । दंङ्त् आदरे । दर्णः पर्णम् । सृप्लॄं गतौ । सर्ण्णः सरीसृपजातिः । पणि व्यवहारस्तुत्योः । पण्णं व्यवहारः ।

घृवीङ्वाशुष्युषितृषिकृष्यर्तिभ्यः कित् ॥ १८३ ॥ एभ्यः कित् णः प्रत्ययः स्यात् । घृं सेचने । घृणा कृपा । वींक् प्रजनादिषु । वीणा वल्लकी । ह्वॅंग् स्पर्धाशब्दयोः । हूणः म्लेच्छजातिः । शुषंच् शोषणे । शुष्णः निदाघः । उषू दाहे । उष्णः स्पर्शविशेषः । त्रितृष्च् पिपासायाम् । तृष्णा पिपासा । कृषींत् विलेखने । कृष्णः वर्णः विष्णुः मृगश्च । ऋंक् गतौ । ऋणं वृद्धिधनम् जलं दुर्गभूमिश्च ।

द्रोर्वा ॥१८४॥ द्रुं गतौ इत्यस्मात् णः प्रत्ययः स्यात् स च किद्वा । द्रुणा ज्या । द्रोणः चतुराढकं पाण्डवाचार्यश्च । द्रोणी नौः । गौरादित्वाद् ङीः ।

स्थाक्षुतोरूच्च ॥१८५॥ एभ्यो णः प्रत्यय ऊकारश्चान्तादेशः । ष्ठां गतिनिवृत्तौ । स्थूणा तन्तुधारिणी गृहधारिणी शरीरधारिणी लोहप्रतिमाव्याधिविशेषौ च । ष्टुक्षुक् शब्दे । क्षूणमपराधः । तुंक् वृत्त्यादिषु । तूणः इषुधिः ।

भूणतृणगुणकार्ष्णतीक्ष्णश्लक्ष्णाभीक्ष्णादयः ॥१८६॥ एते णप्रत्ययान्ता निपात्यन्ते । भृगो भू च । भूणः निहीनः अर्भकः स्त्रैणगर्भश्च । तरतेर्हस्वश्च । तृणं शष्पादि । गायतेर्गमेर्गृणातेर्वा गुभावश्च । गुण उपकारः आश्रितः अप्रधानं ज्या च । कृगो वृद्धिः कान्तश्च । कार्ष्णः शिल्पी । तिजेर्दीर्घः सश्च परादिः । तीक्ष्णं निशितम् । श्लिषेः सोऽन्तोऽचेतः । श्लक्ष्णमकर्कशं सूक्ष्मं च । अभिपूर्वादिषेः किच्च सोऽन्तः । अभीक्ष्णमजस्रम् । आदिग्रहणादन्येऽपि ।

तॄकॄशॄपॄभृवृश्रुरुहिलक्षिविचक्षिचुक्षिवुक्षितडयाडिमाङ्किकाङ्किचारिसमीरेरणः ॥ १८७ ॥ एभ्योऽणः प्रत्ययः स्यात् । तॄ प्लवनतरणयोः । तरणम् । कॄत् विक्षेपे । करणम् । शॄश् हिंसायाम् । शरणं गृहम् । पॄश् पालनपूरणयोः । परणम् । टुडुभृंक् पोषणे च । भरणम् । वृङ् वरणे । वरणः वृक्षः सेतुबन्धश्च । वरणं कन्यासंप्रतिपादनम् । श्रुंट् श्रवणे । श्रवणः कर्णः भिक्षुश्च । रुक् शब्दे

रुंङ् रेषणे वा । रवणः करभः अग्निः द्रुमः वायुः भृङ्गः शकुनिः सूर्यः घण्टा च । रुहं जन्मनि । रोहणः गिरिः । लक्षीण् दर्शनाङ्कनयोः । लक्षणं व्याकरणं शुभाशुभसूचकं रेखातिलकादि अङ्कनं च । चक्षिक् व्यक्तायां वाचि । विचक्षणः विद्वान् । चुक्कण् व्यथने । चुक्कणः व्यायामशीलः । बुक्क भाषणे । बुक्कणः श्वा वावदूकश्च । तगु गतौ । तङ्गणाः जनपदः ।अगु गतौ । अङ्गणम् अजिरम् । मकुङ् मण्डने । मङ्कणः ऋषिः । ककुङ् गतौ । कङ्कणः प्रतिसरः । चर भक्षणे च । चरणः पादः । ईरिक् गतिकम्पनयोः सम्पूर्वः । समीरणः वातः ।

कृगृपृकृपिवृषिभ्यः कित् ॥१८८॥ एभ्यः किदणः प्रत्ययः स्यात् । कृत् विक्षेपे । किरणः रश्मिः । गृत् निगरणे । गिरणः मेघः आचार्यः ग्रामश्च । पृङ् पालनपूरणयोः । पुरणः समग्रयिता समुद्रः पर्वतविशेषश्च । कृपौङ् सामर्थ्ये । कृपणः कीनाशः । वृषू सेचने । वृषणः शुष्कः ।

धृषिवहेरिचोपान्त्यस्य ॥१८९॥ आभ्यां किदणः प्रत्ययः, इचोपान्त्यस्य । त्रिधृषाट् प्रागल्भ्ये । धिषणः बृहस्पतिः । धिषणा बुद्धिः । वहीं प्रापणे । विहणः ऋषिः पाठश्च ।

चिक्कणकुक्कणकृकणकुङ्कणत्रवणोल्वणोरणलवणवङ्कणादयः ॥१९०॥ एते किदणप्रत्ययान्ता निपात्यन्ते । चिनोतेश्चिक् च । चिक्कणः पिच्छिलः । कुकिकृगोः कोऽन्तश्च । कुक्कणः शकुनिः । कृकणः ऋषिः । कुकेः स्वरान्नोऽन्तश्च । कुङ्कणाः जनपदः । त्रपेर्वश्च । त्रवणः देशः । वलेर्वस्योत् वोऽन्तश्च । उल्वणः स्फारः । अर्तेरुर् च । उरणः मेषः । लीयतेः क्लिद्यतेः स्वदतेर्वा लवादेशश्च । लवणं गुणः द्रव्यं च । वञ्चेः सः परादिर्नलोपाभावश्च । वङ्कणः ऊरुमूलसन्धिः । आदिशब्दाज्ज्योतिरिङ्गणतुरणभुरणादयो भवन्ति ।

कृपिविषिवृषिधृषिमृषियुषिद्रुहिग्रहेराणक् ॥ १९१ ॥ एभ्यः आणक् प्रत्ययः स्यात् । कृपौङ् सामर्थ्ये । कृपाणः खड्गः । विषू सेचने । विषाणं शृङ्गं करिदन्तश्च । वृषू सेचने । वृषाणः । त्रिधृषाट् प्रागल्भ्ये । धृषाणः देवः । मृषू सहने च । मृषाणः । युषि सेवने सौत्रः । युषाणः । द्रुहौच् जिघांसायाम् । द्रुहाणः मुखरः । ग्रहीश् उपादाने । गृहाणः । वृषाणादयः स्वप्रकृत्यर्थवाचिनः सर्वेऽपि कर्तरि कारके ज्ञेयाः ।

पषो णित् ॥ १९२ ॥ पषी बाधनस्पर्शनयोरित्यस्मात् आणक् प्रत्ययः स्यात् स च णित् । पाषाणः प्रस्तरः ।

कल्याणपर्याणादयः ॥ १९३ ॥ कल्याणादयः शब्दा आणकप्रत्ययान्ता निपात्यन्ते । कलेर्योऽन्तश्च । कल्याणं श्वोवसीयसम् । परिपूर्वादिणो लुक् च । पर्याणम् अश्वादीनां पृष्ठच्छदः । आदिग्रहणाद् द्रेक्काणवोक्काणकेक्काणादयो भवन्ति ।

द्रुहबृहिदक्षिभ्य इणः ॥१९४॥ एभ्य इणः प्रत्ययः स्यात् । द्रुं गतौ । द्रविणं द्रव्यम् । हृंग् हरणे । हरिणः मृगः। बृह वृद्धौ । बर्हिणः मयूरः। दक्षि शैघ्र्ये च । दक्षिणः कुशलः अनुकूलश्च । दक्षिणा दिक् ब्रह्मदेयं च ।

ऋदृहेः कित् ॥१९५॥ आभ्यां किदिणः प्रत्ययः स्यात्। ऋश् गतौ । इरिणम् ऊषरं कुञ्जः वनदुर्गं च । दृहौच् जिघांसायाम् । दृहिणः ब्रह्मा क्षुद्रजन्तुश्च ।

ऋकृवृधृदारिभ्य उणः ॥१९६॥ एभ्य उणः प्रत्ययः स्यात् । ऋंक् गतौ । अरुणः सूर्यसारथिः उषा वर्णश्च । कृत् विक्षेपे । करुणा दया । करुणः करुणाविषयः । करुणं दैन्यम् । वृश् भरणे । वरुणः प्रचेताः । धृंग् धारणे । धरुणः धर्ता आयुक्तो लोकश्च । दृश् विदारणे । णौ--दारुण उग्रः ।

क्षः कित् ॥१९७॥ क्षै क्षये इत्यस्मात् किदुणः प्रत्ययः स्यात् । क्षुणः व्याधिः क्षामः क्रोधः उन्मत्तश्च ।

भिक्षुणी ॥१९८॥ भिक्षेरुणः प्रत्ययो ङीश्च निपात्यते । भिक्षुणी व्रतिनी ।

गादाभ्यामेष्णक् ॥१९९॥ आभ्यामेष्णक् प्रत्ययः स्यात् । गैं शब्दे । गेष्णः मेषः उद्गाता रङ्गोपजीवी च । गेष्णं साम सुखं च । रात्रिगेष्णः रङ्गोपजीवी । सुगेष्णा किन्नरी । डुदांग्क् दाने । देष्णः बाहुः दानशीलश्च । चारुदेष्णः सात्यभामेयः । सुदेष्णा विराटपत्नी ।

दम्यामितमिमावापूधूगृजूहसिवस्यसिवितसिमसीण्भ्यस्तः ॥२००॥ एभ्यस्तः प्रत्ययः स्यात् । दमूच् उपशमे । दन्तः दशनः हस्तिदंष्ट्रा च । अम गतौ । अन्तः अवसानं धर्मः समीपं च । तमूच् काङ्क्षायाम् । तन्तः खिन्नः । मांक् माने । मातम् अन्तः प्रविष्टम् । वांक् गतिगन्धनयोः । वातः वायुः । पूगश् पवने । पोतः नौः अग्निः बालश्च । धूगश् कम्पने । धोतः धूमः शठः वातश्च । गृत् निगरणे । गर्तः श्वभ्रम् । जूष्च् जरसि । जर्तः भजननं राजा च । हसे हसने । हस्तःकरः नक्षत्रं

च । वसूच् स्तम्भे । वस्तः छागः । असूच् क्षेपणे । अस्तःगिरिः । तसूच् उपक्षये वितस्ता नदी । मसैच् परिणामे । मस्तः मूर्धा । इणंक् गतौ । एतः हरिणः वर्णः वायुः पथिकश्च ।

शीरीभूदूभूघृपाधाग्चित्यर्त्यञ्जिपसिमुसिवुसिबिसिरमिधुर्विपूर्विभ्यः कित् ॥२०१॥ एभ्यः कित् तः प्रत्ययः स्यात् । शीङ्क् स्वप्ने । शीतं स्पर्शविशेषः । रींङ् गतिरेषणयोः । रीतं सुवर्णम् । भू सत्तायाम् । भूतः ग्रहः । भूतं पृथिव्यादि । दूङ् च परितापे । दूतः वचोहरः । मूङ् बन्धने । मूतः दध्यर्थं क्षीरे तक्रसेकः वस्त्रावेष्टनबन्धनम् आचमनी आलानं पाशः बन्धनमात्रं धान्यादिपुटश्च । घृं सेचने । घृतं सर्पिः । पां पाने । पीतं वर्णविशेषः । डुधांग्क् धारणे च । 'धागः' इति हिः । हितम् उपकारि । चितै संज्ञाने । चित्तं मनः । ऋंक् गतौ । ऋतं सत्यम् । अञ्जौप् व्यक्तिम्रक्षणादिषु । अक्तः म्रक्षितः व्यक्तीकृतः परिमितः प्रेतश्च । पुसच् विभागे । पुस्तः लेख्यपत्रसंघातः लेप्यादिकर्म च । मुसच् खण्डने । मुस्ता गन्धद्रव्यम् । वुसच् उत्सर्गे । वुस्तः महसनम् । विसच् प्रेरणे । विस्तं सुवर्णमानम् । रमिं क्रीडायाम् । सुरतं मैथुनम् । धुर्वैं हिंसायाम् । धूर्तः शठः । पूर्व पूरणे । पूर्तः पुण्यम् ।

लूग्रो वा ॥२०२॥ आभ्यां तः प्रत्ययः स च किद्वा । लूगृ छेदने । लूता क्षुद्रजन्तुः । लोतः बाष्पं लवनं वस्तः कीटजातिश्च । मृंत् प्राणत्यागे । मृतः गतप्राणः । मर्तः ऋषिः प्राणी पुरुषश्च ।

सुसितनितुसेर्दीर्घश्च वा ॥२०३॥ एभ्यः कित् तः प्रत्ययो दीर्घश्च वा । षुंगट् अभिषवे । सूतः सारथिः । सुतः पुत्रः । षिंगट् बन्धने । सीता जनकात्मजा सस्यं हलमार्गश्च । तनूयी विस्तारे । तातः पिता पुत्रेष्टनाम च । ततं विस्तीर्णं वाद्यविशेषश्च । तुस शब्दे । तूस्तानि वस्त्रदशाः । तुस्ताः जटाः प्रदीपनं च ।

पुतपित्तनिमित्तोतशुक्रतिक्तक्लिन्नसूरतमुहूर्तादयः ॥२०४॥ एते कित्तप्रत्ययान्ता निपात्यन्ते । पूङो ह्रस्वश्च । पुतः स्फिक् । पीङस्तोऽन्तश्च । पित्तं मायुः । निपूर्वात् मिनोतेर्मित् च । निमित्तं हेतुः दिव्यज्ञानं च । उभेर्लुक् च । उत आशङ्कार्थमव्ययम् । शकेः शुचेर्वा शुक्भावश्च । शुक्तं कल्कजातिः । ताडयतेस्तकतेस्तिजेर्वा तिक् च । तिक्तो रसविशेषः । लीयतेः पोऽन्तो ह्रस्वश्च । लिप्तं [x]लेपः अंसदेशश्च । सुपूर्वाद् रमेः सोर्दीर्घश्च । सूरतः दमितो हस्ती अन्यो वा दान्तः । हुर्च्छेः

मुश्च धात्वादिः । मुहूर्तः कालविशेषः। आदिग्रहणादयुतनियुतादयो भवन्ति ।

कृगो यङः ॥२०५॥ करोतेर्यङन्तात् कित् तः प्रत्ययः स्यात् । चेक्रीयितः पूर्वाचार्याणां यङ्प्रत्ययसंज्ञा ।

इवर्णादिर्लुपि ॥२०६॥ करोतेर्यङो लुपि इवर्णादिस्तः प्रत्ययः स्यात् । चर्करितं चर्करीतं यङ्लुबन्तस्याख्ये ।

दृपृभृमृशीयजिखलिचलिपविपच्यमिनमितमिदाशिहार्यैकाङ्क्ष्यो ऽतः ॥२०७॥ एभ्योऽतः प्रत्ययः स्यात् । दृङ् आदरे । दरतः आदरः । पॄंक् पालनपूरणयोः । परतः कालः । डुडुभृंग्क् पोषणे च । भरतः आदिचक्रवर्ती हिमवत्समुद्रमध्यक्षेत्रं च । मृंत् प्राणत्यागे । मरतः मृत्युः अग्निः प्राणी च । शीङ्क् स्वप्ने । शयतः निद्रालुः चन्द्रः स्वप्नः अजगरश्च । यजीं देवपूजासंगतिकरणदानेषु । यजतः यज्वा अग्निश्च । खल संचये च । खलतः शीर्णकेशशिराः । वलि संवरणे । वलतः कुशूलः। पर्व पूरणे । पर्वतः गिरिः। डुपचींप् पाके । पचतः अग्निः आदित्यः पालकः इन्द्रश्च । अम गतौ । अमतः मृत्युः जीवः आतङ्कश्च । णमं प्रह्वत्वे । नमतः नटः देवः ऊर्णास्तरणं हस्तश्च । तमूच् काङ्क्षायाम् । तमतः निर्वेदी आकाङ्क्षी धूमश्च । दृशूं प्रेक्षणे । दर्शतः द्रष्टा अग्निश्च । हर्य क्रान्तौ । हर्यतः वायुः अश्वः कान्तः रश्मिः यज्ञश्च । ककुङ् गतौ । कङ्कतः केशमार्जनम् ।

पृषिरञ्जिसिकिकालावृभ्यः कित् ॥२०८॥ एभ्यः कितः प्रत्ययः स्यात् । पृषू सेचने । पृषतः हरिणः । रञ्जीं रागे । रजतं रूप्यम् । सिकिः सौत्रः । सिकताः वालुका । कैं शब्दे । कतः गोत्रकृत् । लांक् आदाने । लता वल्ली । वृङ्ट् वरणे । व्रतं शास्त्रविहितो नियमः ।

कृवृकल्यलिचिलिविलीलिलानाथिभ्य आतक् ॥२०९॥ एभ्य आतक् प्रत्ययः स्यात् । कृत् विक्षेपे । किरातः शबरः। वृगट् वरणे । व्रातः समूहः उत्सेधजीविसंघश्च । कलि शब्दसंख्यानयोः । कलातः ब्रह्मा । अली भूषणादौ । अलातम् उल्मुकम् । चिलत् वसने । चिलातो म्लेच्छः । विलत् वरणे । विलातः शवाच्छादनवस्त्रम् । इलत् गत्यादौ । इलातः नगः । लांक् आदाने । लातः मृत्तिकादानभाजनम् । नाथृङ् उपतापैश्वर्याशीःषु । नाथातः आहारः प्रजापतिश्च ।

हृहयारुहिशोणिपलिभ्य इतः ॥२१०॥ एभ्य इतः प्रत्ययः स्यात् । हृंग् हरणे । हरितः वर्णः । श्यैङ् गतौ । श्येतः वर्णः मृगः मत्स्यः श्येनश्च । रुहं

बीजजन्मनि । रोहितः वर्णः मत्स्यः मृगजातिश्च । लत्वे—लोहितः वर्णः । लोहितम् असृक् । शोणृ वर्णगत्योः । शोणितं रुधिरम् । पल गतौ । पलितं श्वेतकेशः ।

नञ आपेः ॥२११॥ नञ् पूर्वादाप्लृंट् व्याप्तावित्यस्मादितः प्रत्ययः स्यात् । नापितः कारुविशेषः ।

क्रुशिपिशिपृषिकृषिकुस्युचिभ्यः कित् ॥२१२॥ एभ्यः किदितः प्रत्ययः स्यात् । क्रुशं आह्वानरोदनयोः । क्रुशितं पापम् । पिशत् अवयवे । पिशितं मांसम् । पृषू सेचने । पृषितं वारिबिन्दुः । कुषृश् निष्कर्षे । कुषितं पापम् । कुसच् श्लेषे । कुसितः ऋषिः । कुसितम् ऋणं श्लिष्टं च । उचच् समवाये । उचितं स्वभावः योग्यं चिरानुयातं श्रेष्ठं च ।

हृग ईतण् ॥२१३॥ हृंग् इत्यस्मादीतण् प्रत्ययः स्यात् । हारीतः पक्षी ऋषिश्च ।

अदो भुवो डुतः ॥२१४॥ अद्पूर्वाद् भुवो डुतः प्रत्ययः स्यात् । अद् विस्मितं भवति तेन तस्मिन् वा मनः अद्भुतमाश्चर्यम् ।

कुलिमयिभ्यामूतक् ॥२१५॥ आभ्यामूतक् प्रत्ययः स्यात् । कुल बन्धुसंस्त्यानयोः । कुलूताः जनपदः । मयि गतौ । मयूता वसतिः।

जीवेर्मश्च ॥२१६॥ जीव प्राणधारणे इत्यस्मादूतक् प्रत्ययः स्यान्मन्तादेशश्च । जीमूतः मेघः गिरिश्च ।

कबेरोतः प च ॥२१७॥॥ कबृङ् वर्णे इत्यस्मादोतः प्रत्ययः पश्चान्तादेशः । कपोतः पक्षी वर्णश्च ।

आस्फायेर्डित् ॥२१८॥ आङ्पूर्वात् स्फायैङ् वृद्धावित्यस्मात् डिदोतः प्रत्ययः स्यात् । आस्फोता नाम ओषधिः ।

जृविशिभ्यामन्तः ॥२१९॥ आभ्यामन्तः प्रत्ययः स्यात् । जृष्च् जरसि । जरन्तः भूतग्रामः वृद्धः महिषश्च । विशंत् प्रवेशने । वेशन्तः पल्वलम् वल्लभः अप्राप्तापवर्गः आकाशं च ।

रुहिनन्दिजीविप्राणिभ्यष्टिदाशिषि ॥२२०॥ एभ्य आशिषि टिदन्तः प्रत्ययः स्यात् । रुहं जन्मनि । रोहतात् रोहन्तः वृक्षः । रोहन्ती ओषधिः । दुनदु समृद्धौ । नन्दतात् नन्दन्तः सखा आनन्दश्च । नन्दन्ती सखी । जीव प्राणधारणे ।

जीवतात् जीवन्तः आयुष्मान् । जीवन्ती शाकः । अनक् प्राणने । प्राण्यात् प्राणन्तः वायुः रसायनं च । प्राणन्ती स्त्री ।

तॄजिभूवदिवहिवासिभास्यादिसाधिमदिगाडिगाण्डिनान्दिरविभ्यः॥ ॥२२१॥ एभ्यष्टिदन्तः प्रत्ययः स्यात् । आशिषीत्येके । तॄ प्लवनतरणयोः । तरन्तः आदित्यः भेकश्च । तरन्ती स्त्री । जि अभिभवे । जयन्तः रथरेणुः ध्वज इन्द्रपुत्रः जम्बूद्वीपपश्चिमद्वारं पश्चिमानुत्तरविमानं च । जयन्ती उदयनपितृष्वसा । भू सत्तायाम् । भवन्तः कालः । भवन्ती । वद व्यक्तायां वाचि । वदन्तः वदन्ती । वहीं प्रापणे । वहन्तः रथः अनड्वान् रथरेणुः वायुश्च । वहन्ती । वसं निवासे । वसन्तः ऋतुः । भासि दीप्तौ । भासन्तः सूर्यः । भासन्ती । ण्यन्तोऽपि । भासयन्तः सूर्यः । अदंक् भक्षणे । अदन्तः । अदन्ती । साधंट् संसिद्धौ । साधन्तः भिक्षुः । ण्यतोऽपि । साधयन्तः भिक्षुः । साधयन्ती । मदैच् हर्षे । णौ–मदयन्तः । मदयन्ती पुष्पगुल्मजातिः । गड सेचने । गडन्तः जलदः । ण्यन्तोऽपि । गडयन्तः । गडयन्ती । गडु वदनैकदेशे । ण्यन्तः–गण्डयन्तः मेषः । मडु भूषायाम् । ण्यन्तः–मण्डयन्तः प्रसाधकः अलंकारः आदर्शश्च । टुनदु समृद्धौ । ण्यन्तः–नन्दयन्तः सुखकृत् राजा हिरण्यं सुखं च । नन्दयन्ती । रेवृङ् पथि गतौ । रेवन्तः सूर्यपुत्रः । अनुक्तार्था धात्वर्थकर्त्रर्थाः ।

सीमन्तहेमन्तभदन्तदुष्यन्तादयः ॥२२२॥ एतेऽन्तप्रत्ययान्ता निपात्यन्ते । सिनोतेः सीम् च । सीमन्तः केशमार्गः ग्रामक्षेत्रान्तश्च । हन्तेर्हिनोतेर्वा हेम् च । हेमन्तः ऋतुः । भन्दतेर्नलुक् च । भदन्तः निर्ग्रन्थेषु शाक्येषु च पूज्यः । दुषेर्योऽन्तश्च । दुष्यन्तः राजा । आदिग्रहणादन्येऽपि ।

शकेरुन्तः ॥२२३॥ शक्लृंट् शक्तावित्यस्मादुन्तः प्रत्ययः स्यात् । शकुन्तः पक्षी ।

कषेर्डित् ॥२२४॥ कष हिंसायामित्येतस्मात् डिदुन्तः प्रत्ययः स्यात् । कुन्तः आयुधम् ।

कामिप्रुगार्तिभ्यस्थः ॥२२५॥ एभ्यस्थः प्रत्ययः स्यात् । कमूङ् कान्तौ । कन्था प्रावरणं नगरं च । प्रुङ् गतौ । प्रोथः प्रियो युवा शूकरमुखं घोणा च । गै शब्दे । गाथा श्लोकः आर्या वा । ऋं गतौ । अर्थः जीवाजीवादिपदार्थः प्रयोजनम् अभिधेयं धनं याच्ञा निवृत्तिश्च ।

अवाद् गोऽच्च वा ॥२२६॥ अवपूर्वाद् गायतेस्थः प्रत्ययोऽच्चान्तादेशो वा ।

अवगथः अवगाथः अक्षसंधातः प्रातःसवनं रथयानं साम पन्थाश्च ।

नीनूरमितृतुदिवाचिरिचिसिचिश्विहनिपागोपावोद्भाभ्यःकित् ॥२२७॥ एभ्यः कित् थः प्रत्ययः स्यात् । णींग् प्रापणे । नीथं जलम् । सुनीथो नाम राजा नीतिमान् धर्मशीलः ब्राह्मणश्च । णूत् स्तवने । नूथं तीर्थम् । रमिं क्रीडायाम् । रथः स्यन्दनः। तॄ प्लवनतरणयोः । तीर्थं जलाशयावगाहनमार्गः पुण्यक्षेत्रमाचार्यश्च । तुदींत् व्यथने । तुत्थं चक्षुष्यो धातुविशेषः । वचंक् भाषणे । उक्थं शास्त्रं सामवेदश्च । उक्थानि सामानि । रिचृंपि विरेचने । रिक्थं धनम् । षिचींत् क्षरणे । सिक्थं मदनं पुलाकश्च । डुओश्वि गतिवृद्ध्योः । शूथः यज्ञप्रदेशः । हनंक् हिंसागत्योः। हथः पन्थाः कालश्च । पां पाने । पीथं बालघृतपानम् अम्भः नवनीतं च । पीथः मकरः रविश्च । गोपूर्वात् गोपीथः तीर्थविशेषः गोनिपानं जलद्रोणी कालविशेषश्च । गैं शब्दे अवगीथम् । यज्ञकर्मणि प्रातःशंसनम् उद्गीथः शुनामूर्ध्वमुखानां विरावः सामगानं प्रथमोच्चारणं च ।

न्युदुभ्यां शीङः ॥२२८॥ निउत्पूर्वात् शीङ्क् स्वप्ने इत्यस्मात् कित् थः प्रत्ययः स्यात् । निशीथः अर्धरात्रः रात्रिः प्रदोषश्च । उच्छीथः स्वप्नः टिट्टिभश्च ।

अवभृनिर्ऋसमिण्भ्यः ॥२२९॥ अवपूर्वाद् बिभर्तेः निस्पूर्वादर्तेः संपूर्वादेतेश्च कित् थः प्रत्ययः स्यात् । अवभृथः यज्ञावसानं यज्ञस्नानं च । निर्ऋथः निकायः । निर्ऋथं स्नानम् । समिथः संगमः गोधूमपिष्टं च । समिथं समूहः।

सर्तेर्णित् ॥२३०॥ सॄं गतावित्यस्मात् णित् थः प्रत्ययः स्यात् । सार्थः समूहः ।

पथयूथगूथकुथतिथनिथसूरथादयः॥२३१॥ एते थप्रत्ययान्ता निपात्यन्ते । पलतेर्लो लुक् च । पथः पन्थाः । यौतेर्गुणवतेश्च दीर्घश्च यूथं समूहः । गूथमभ्यं विष्ठा च । किरतेः करोतेर्वा कुश्च । कुथः कुथा वा आस्तरणम् । । तनोतेस्तिष्ठतेर्वा तिश्च । तिथः कालः । तिम्यतेस्तिथः प्रावृट्कालः । नयतेर्हस्वश्च । निथः पूर्वक्षत्रियः कालश्च । सुपूर्वाद् रमेः सोर्दीर्घश्च कित् च । सूरथः दान्तः । आदिग्रहणाद् निपूर्वाद् रौतेर्दीर्घत्वं च । निरूथः दिक् । निरूथं पुण्यक्रमनियतम् । एवं संगीथप्रगाथादयो भवन्ति ।

भृशीशपिशमिगमिरामिवन्दिवञ्जिजीविप्राणिभ्योऽथः ॥ २३२ ॥ एभ्योऽथः प्रत्ययः स्यात् । डुडुभृंग्क् पोषणे च । भरथः कैकेयीसुतः अग्निः

लोकपालश्च । शीङ्क् स्वप्ने । शयथः अजगरः प्रदोषः मत्स्यः वराहश्च । शपीं आक्रोशे । शपथः प्रत्ययकरणम् आक्रोशश्च । शमूच् उपशमे । शमथः समाधिः आश्रमपदं च । गम्लृं गतौ । गमथः पन्थाः पथिकश्च । रमिं क्रीडायाम् । रमथः प्रहर्षः । वदुङ् स्तुत्यभिवादनयोः । वन्दथः स्तोता स्तुत्यश्च । वञ्चू गतौ । वञ्चथः अध्वा कोकिलः काकः दम्भश्च । जीव प्राणधारणे । जीवथः अर्थवान् जलम् अन्नं वायुः मयूरः कूर्मः धार्मिकश्च । अनक् प्राणने । प्राणथः बलवान् ईश्वरः प्रजापतिश्च ।

उपसर्गाद् वसः ॥२३३॥ उपसर्गात् परस्मात् वसं निवास इत्यस्मादथः प्रत्ययः स्यात् । आवसथः गृहम् । उपवसथः उपवासः । संवसथः संवासः । सुवसथः सुवासः । निवसथः निवासः ।

विदिभिदिरुदिद्रुहिभ्यः कित् ॥२३४॥ एभ्यः किदथः प्रत्ययः स्यात् । विदंक् ज्ञाने । विदथः ज्ञानी यज्ञः अध्वर्युः संग्रामश्च । भिदृंपी विदारणे । भिदथः शरः । रुदृक् अश्रुविमोचने । रुदथः बालः असत्त्वः श्वा च । द्रुहौच् जिघांसायाम् । द्रोहथः शत्रुः ।

रोर्वा ॥२३५॥ रुक् शब्दे इत्यस्मादथः प्रत्ययः स्यात् स च किद्वा । रुवथः शकुनिः शिशुश्च । रवथः आक्रन्दः शब्दकारश्च ।

जृवृभ्यामूथः ॥२३६॥ आभ्यामूथः प्रत्ययः स्यात् । जृष्च् जरसि । जरूथः शरीरम् अग्रमांसम् अग्निः संवत्सरः मार्गः कल्मषं च । वृश् वरणे । वरूथः वर्म सेनाङ्गं बलसंघातश्च ।

शाशपिमनिकनिभ्यो दः ॥२३७॥ एभ्यो दः प्रत्ययः स्यात् । शोंच् तक्षणे । शादः कर्दमः तरुणतृणं मृदुः बन्धः सुवर्णं च । शपीं आक्रोशे । शब्दः श्रोत्रग्राह्योऽर्थः । मनिंच् ज्ञाने । मन्दः अलसः बुद्धिहीनश्च । कनै दीप्त्यादिषु । कन्दः मूलम् ।

आपोऽप् च ॥२३८॥ आप्लृंट् व्याप्तावित्यस्मादः प्रत्ययः स्यात् अस्य चाप् इत्ययमादेशश्च । अब्दं वर्षम् ।

गोः कित् ॥२३९॥ गुंत् पुरीषोत्सर्गे इत्यस्मात् कित् दः प्रत्ययः स्यात् । गुदम् अपानम् ।

वृतुकुसुभ्यो नोऽन्तश्च ॥२४०॥ एभ्यः कित् दः प्रत्ययो नकारश्चान्तादेशः । वृणट् वरणे । वृन्दं समूहः । तुंक् वृत्त्यादिषु । तुन्दं जठरम् । कुंङ् शब्दे । कुन्दः

पुष्पजातिः । घुंगट् अभिषवे । सुन्दः दानवः ।

कुसेरिदेदौ ॥२४१॥ कुस्च् श्लेषे इत्यस्मात् इद ईद इत्येतौ कितौ प्रत्ययौ स्याताम् । कुसिदम् ऋणम् । कुसीदं वृद्धिजीविका ।

इङ्ग्यर्बिभ्यामुदः ॥२४२॥ आभ्यामुदः प्रत्ययः स्यात् । इगु गतौ । इङ्गुदः वृक्षजातिः । अर्व गतौ । अर्बुदः पर्वतः अक्षिव्याधिः संख्याविशेषश्च । निपूर्वात् न्यर्बुदं संख्याविशेषः ।

ककोर्णिद्वा ॥२४३॥ ककि लौल्ये इत्यस्मादुदः प्रत्ययः स च णिद्वा । काकुदं तालु । ककुदं स्कन्धः ।

कुमुदबुदबुदादयः ॥२४४॥ एते उदप्रत्ययान्ता निपात्यन्ते । कमेः कुम् च । कुमुदं कैरवम् । बुन्देः कित् बोऽन्तश्च । बुद्बुदः जलस्फोटः । बुद्बुदं नेत्रजो व्याधिः । आदिग्रहणात् दुहींक् क्षरणे, प्रत्ययादेरत्वे दोहदः अभिलाषविशेषः । एवमन्येऽपि ।

ककिमकिभ्यामन्दः ॥२४५॥ आभ्यामन्दः प्रत्ययः स्यात् । ककि लौल्ये । मकिः सौत्रः । ककन्दः मकन्दश्च राजानौ यकाभ्यां निर्वृत्ता काकन्दी माकन्दी च नगरी ।

कल्यलिपुलिकुरिकुणिमणिभ्य इन्दक् ॥२४६॥ एभ्य इन्दक् प्रत्ययः स्यात् । कलि शब्दसंख्यानयोः । कलिन्दः पर्वतः, यतो यमुना प्रभवति । अली भूषणादौ । अलिन्दः प्रघाणः भाजनं स्थानं च । पुल महत्त्वे । पुलिन्दः शबरः । कुरत् शब्दे । कुरिन्दः धान्यमलहरणोपकरणम्, तेजनोपकरणं च । कुणत् शब्दोपकरणयोः । कुणिन्दः म्लेच्छः शब्द उपकरणं च । मण शब्दे । मणिन्दः अश्वबल्लवः ।

कुपेर्वं च वा ॥२४७॥ कुपच् क्रोधे इत्यस्मादिन्दक् प्रत्ययो वश्चान्तादेशो वा । कुपिन्दः, कुविन्दः तन्तुवायः ।

पृपालिभ्यां णित् ॥२४८॥ आभ्यां णिदिन्दक् प्रत्ययः स्यात् । पृङ् पालनपूरणयोः । पल गतौ । पारिन्दः । पालिन्दः । द्वावपि वृक्षगाथकौ । पारिन्दो मुख्यः पूज्यश्च । पालिन्दो नृपतिः । रक्षकश्चेत्येके ।

यमेरुन्दः ॥ २४९ ॥ यमूं उपरमे इत्यस्मादुन्दः प्रत्ययः स्यात् । यमुन्दः क्षत्रियविशेषः ।

मुचेर्डुकुन्दकुकुन्दौ ॥२५०॥ मुच्लृंती मोक्षणे इत्यस्मात् डित् उकुन्दः किदुकुन्दश्च प्रत्ययौ स्याताम् । मुकुन्दः विष्णुः । मुचुकुन्दः राजा वृक्षविशेषश्च ।

स्कन्द्यमिभ्यां धः ॥२५१॥ आभ्यां धः प्रत्ययः स्यात् । स्कन्दृं गतिशोषणयोः। स्कन्धः बाहुमूर्धा ककुदं विभागश्च । बाहुलकाद् दस्य लुक् । अम गतौ । अन्धः चक्षुर्विकलः ।

नेः स्यतेरधक् ॥२५२॥ निपूर्वात् षोंच् अन्तकर्मणि इत्यस्मादधक् प्रत्ययः स्यात् । निषधः पर्वतः । निषधाः जनपदः ।

मङ्गेर्नलुक् च ॥२५३॥ मगु गताविस्यस्मादधक् प्रत्ययो नकारस्य च लुक् स्यात् । मगधाः जनपदः ।

आरगेर्वधः ॥२५४॥ आङ्पूर्वाद् रगे शङ्कायामित्यस्माद् वधः प्रत्ययः स्यात् । आरग्वधः वृक्षजातिः ।

पराच्छ्रो डित् ॥२५५॥ परपूर्वात् शृश् हिंसायामित्यस्मात् डित् वधः प्रत्ययः स्यात् । परश्वध आयुधजातिः ।

इषेरुधक् ॥ २५६ । इषत् इच्छायामित्यस्मादुधक् प्रत्ययः स्यात् । इषुधः याच्ञा ।

कोरन्धः ॥ २५७ ॥ कुंङ् शब्दे इत्यस्मादन्धः प्रत्ययः स्यात् । कबन्धः छिन्नमूर्धा देहः ।

प्याधापन्यनिस्वादिस्वपिवस्यज्यतिसिविभ्यो नः ॥२५८॥ एभ्यो नः प्रत्ययः स्यात् । प्यैङ् वृद्धौ । प्यानः समुद्रः चन्द्रश्च । डुधांग्क् धारणे च । धाना भृष्टो यवः अङ्कुरश्च । पनि स्तुतौ । पन्नं नीचैःकरणम् , सन्नं जिह्वा च । अनक् प्राणने । अन्नं भक्तम् आचारश्च । ष्वदि आस्वादने । स्वन्नं रुचितम् । ञिष्वपंक् शये । स्वप्नः मनोविकारः निद्रा च । वसं निवासे । वस्नं वासः मूल्यं मेढ्रम् आगमश्च । अज क्षेपणे च । वेनः प्रजापतिः ध्यानी राजा वायुः यज्ञः प्राज्ञः सूर्यश्च । अत सातत्यगमने । अत्नः आत्मा वायुः मेघः प्रजापतिश्च । षिवूच् उतौ । स्योनं सुखं तन्तुवायसूत्रसंतानः समुद्रः सूर्यः रश्मिः आस्तरणं च ।

षसेर्णित् ॥२५९॥ षसक् स्वप्ने इत्यस्मात् णित् नः प्रत्ययः स्यात् । सास्ना गोकण्ठावलम्बि चर्म निद्रा च ।

रसेर्वा ॥२६०॥ रस शब्दे इत्यस्मान्नः प्रत्ययो णिद्वा स्यात् । रास्ना धेनुः

ओषधिजातिश्च । रस्नं द्रव्यजातिः । रस्ना जिह्वा । रस्नः तुरङ्गः दण्डश्च ।

जीण्शीदीवुध्यविमीभ्यः कित् ॥२६१॥ एभ्यः कित् नः प्रत्ययः स्यात् । जिनः अर्हन् बुद्धश्च । इंण्क् गतौ । इनः स्वामी संनिपातः ईश्वरः राजा सूर्यश्च । शीङ्क् स्वप्ने । शीनः पीलुः । दीङ्च् क्षये । दीनः कृपणः खिन्नश्च । बुधिच् ज्ञाने । बुध्नः मूलं पृष्ठान्तः रुद्रश्च । अव रक्षणादौ । ऊनम् अपरिपूर्णम् । मीङ्च् हिंसायाम् । मीनः मत्स्यः राशिश्च ।

सेर्वा ॥२६२॥ पिंगट् बन्धने इत्यस्मात् नः प्रत्ययः स च किद्वा । सिनः कायः वस्त्रं बन्धश्च । सेना चमूः ।

सोरू च ॥२६३॥ षुंगट् अभिषवे इत्यस्मान्नः प्रत्यय ऊकारश्चान्तादेशः । सूना घातस्थानम् दुहितापुत्रः प्रकृतिः आघाटस्थानं च ।

रमेस्त च ॥२६४॥ रमिं क्रीडायामित्यस्मात् नः प्रत्ययस्तश्चान्तादेशः । रत्नं वज्रादि ।

क्रुशेर्वृद्धिश्च ॥२६५॥ क्रुशं आह्वानरोदनयोरित्यस्मात् नः प्रत्ययोऽस्य च वृद्धिः स्यात् । क्रौश्नः श्वापदः ।

ष्वसुनिभ्यो माङो डित् ॥२६६॥ ष्वसुनिपूर्वात् माङ्क् मानशब्दयोरित्यस्मात् डित् नः प्रत्ययः स्यात् । ष्वस्नं द्रविणम् । सुम्नं सुखम् । निम्नं नतम् ।

शीङः सन्वत् ॥२६७॥ शीङ्क् स्वप्ने इत्यस्मात् डित् नः प्रत्ययः स च सन्वत् स्यात् । शिश्नं शेपः ।

दिननभ्रफेनचिन्हब्रध्नधेनस्तेनच्यौक्रादयः ॥२६८॥ एते नप्रत्ययान्ता निपात्यन्ते । दीव्यतेः किल्लुक् च । दिनम् अहः । नञ्पूर्वाद्वसेर्गोऽन्तो धातोर्लुक् च । न वस्ते नग्नः अवसनः । फणेः फलेः स्फायेर्वा फेभावश्च । फेनः बुद्बुदसंघातः । चहेरिचोपान्त्यस्य । चिन्हमभिज्ञानम् । बन्धेर्ब्रध् च । ब्रध्नः रविः प्रजापतिः ब्रह्मा स्वर्गः पृष्ठान्तश्च । धयतेरेत्वं च । धेना सरस्वती माता च । धेन समुद्रः । ईत्वं चेत्येके । धीना । स्त्यायेस्ते च । स्तेनः चौरः । च्यवतेर्वृद्धिः कोऽन्तश्च । च्यौक्रक्षस्थानम् अनुजः क्षीणपुण्यश्च । च्यौक्री कांस्यादिपात्री । आदिशब्दादन्येऽपि ।

वसिरसिरुचिजिमास्जिदेविस्यन्दिचन्दिमन्दिमण्डमदिदाहिवह्यादेरनः ॥२६९॥ एभ्योऽनः प्रत्ययः स्यात् । युक् मिश्रणे । यवनाः जनपदः । यवनं मिश्रणम् । अमूच् क्षेपणे । असनः बीजकः । रसण् आस्वादनस्नेहनयोः । रसना

जिह्वा । रुचि अभिप्रीत्यां च । रोचना गोपित्तम् । रोचनः चन्द्रः । विपूर्वाद् रोचतेः विरोचनः अग्निः सूर्यः इन्दुः दानवश्च । जि अभिभवे । जयनम् ऊर्णापटः । टुमस्जोत् शुद्धौ । मज्जनं स्नानं तोयं च । देवृङ् देवने । देवनः अक्षः कितवश्च । स्यन्दौङ् स्रवणे । स्यन्दनः रथः । चदु दीप्त्याह्लादनयोः । चन्दनं गन्धद्रव्यम् । मदुङ् स्तुत्यादौ । मन्दनं स्तोत्रम् । मडु भूषायाम् । मण्डनमलंकारः । मदैच् हर्षे । मदनः वृक्षः कामः मधूच्छिष्टं च । दहं भस्मीकरणे । दहनः अग्निः । वहीं प्रापणे । वहनं नौः । आदिग्रहणात् पचेः पचनः अग्निः । पुनातेः पवनः वायुः । बिभर्तेः भरणं साधनम् । नयतेर्नयनं नेत्रम् । द्युतेः द्योतनः आदित्यः । रचेः रचना–वैचित्र्यम् । गृञ्जेः गृञ्जनम् अभक्ष्यद्रव्यविशेषः । प्रस्कन्दनः प्रपतनः इत्यादयो भवन्ति ।

अशो रश्चादौ ॥२७०॥ अशौटि व्याप्तावित्यस्मात् अनः प्रत्ययः स्यात् आदौ रेफश्च । रशना मेखला । राशिमेके प्रकृतिमुपदिशन्ति । सा च राशिरशनारश्मि इत्यत्र प्रयुज्यते इत्याहुः ।

उन्देर्नलुक् च ॥२७१॥ उन्दैप् क्लेदने इत्यस्मात् अनः प्रत्ययो नलोपश्च । ओदनः भक्तम् ।

हनेर्घतजघौ च ॥२७२॥ हनंक् हिंसागत्योरित्यस्मादनः प्रत्ययो घतजघावित्यादेशौ चास्य स्याताम् । घतनः रङ्गोपजीवी पापकर्मा निर्लज्जश्च । जघनं श्रोणिः ।

तुदादिवृजिरञ्जिनिधाभ्यः कित् ॥२७३॥ एभ्यः किदनः प्रत्ययः स्यात् । तुदींत् व्यथने । तुदनः । क्षिपींत् प्रेरणे । क्षिपणः । सुरत् ऐश्वर्यदीप्त्योः । सुरणः । बुधिंच् बोधने । बुधनः । षिवूच् उतौ । सिवनः । एषां यथासंभवं कारकमुच्यते । लबुङ् अवस्रंसने । लम्बनः शकुनिः । वृजैकि वर्जने । वृजिनमन्तरिक्षं निवारणं मुण्डनं च । रञ्जीं रागे । रजनं हरिद्रा । महारजनं कुसुम्भम् । रजनः रङ्गविशेषः । डुधांगुक् धारणे च । निधनमवसानम् ।

सूधूभूभ्रस्जिभ्यो वा ॥२७४॥ एभ्योऽनः प्रत्ययः स्यात् स च किद्वा । षूत् प्रेरणे । सुवनः अङ्कुरः आदित्यः प्रादुर्भावश्च । सुवनं चन्द्रप्रभा । सवनं यज्ञः पूर्वाह्णापराह्णमध्याह्नकालश्च । त्रिषवणम् । धूत् विधूनने । धुवनः धूमः वायुः अग्निश्च । धुवनम् एधः । भू सत्तायाम् । भुवनं जगत् । भवनं गृहम् । भ्रस्जींत् पाके । भृज्जनम् अन्तरिक्षम् अम्बरीषः पाकश्च । भ्रज्जनः पावकः ।

विदनगगनगहनादयः ॥२७५॥ एते किदनप्रत्ययान्ता निपात्यन्ते । विदु

अवयवे नलोपश्च । बिदनः गोत्रकृत् । गमेर्ग च । गगनम् आकाशम् । गाहौङ् विलोडने ह्रस्वश्च । गहनं दुर्गमम् । आदिशब्दात्काञ्चनकाननादयो भवन्ति।

संस्तुस्पृशिमन्थेरानः ॥२७६॥ संपूर्वात् स्तोः स्पृशेश्च संपूर्वाभ्यां वा स्तुस्पृशिभ्यां मन्थेश्चानः प्रत्ययः स्यात् । ष्टुंग्क् स्तुतौ । संस्तवानः सोमः होता महर्षिः वाग्मी च । स्पृशंत् स्पर्शे । स्पर्शानः मनः । संस्पर्शानः मनः अग्निश्च । मन्थश् विलोडने । मन्थानः खजकः ।

युयुजिंयुधिबुधिमृशिदृशीशिभ्यः कित् ॥२७७॥ एभ्यः किदानः प्रत्ययः स्यात् । युक् मिश्रणे । युवानः तरुणः। युजृंपी योगे । युजानः सारथिः । युधिच् संप्रहारे । युधानः रिपुः । बुधिच् ज्ञाने । बुधानः आचार्यः पण्डितो वा । मृशंत् आमर्शने । मृशानः विमर्शकः । दृशूं प्रेक्षणे । दृशानः लोकपालः । युजादिप्रसिद्धकर्त्रर्था एते । ईशिक् ऐश्वर्ये । ईशानः ईश्वरः ।

मुमुचानयुयुधानाशिश्विदानजुहुराणाजिह्रियाणाः ॥२७८॥ एते किदानप्रत्ययान्ता निपात्यन्ते । मुचेर्द्वित्वं च मुमुचानः मेघः । एवं युधिच् संप्रहारे । युयुधानः साहसिकः राजा च कश्चित् । श्वितङ् वर्णे । अस्य दश्च । शिश्विदानः दुराचारो द्विजः । हुर्च्छा कौटिल्ये अस्यान्तलुक् च । जुहुराणः कठिनहृदयः कुटिलः अग्निः अध्वर्युः अनड्वाँश्च । ह्रींक् लज्जायाम्। जिह्रियाणः नीतिमान् । सर्वे एवैते मुच्यादिप्रसिद्धक्रियाकर्तृवचना इत्येके । अन्ये तु मुमुक्षादिसन्नन्तप्रकृतीनामेतन्निपातनं, तेन सन्नन्तक्रियाकर्तृवचना इत्याहुः।

ऋञ्जिरञ्जिमन्दिसह्यर्हिभ्योऽसानः ॥२७९॥ एभ्योऽसानः प्रत्ययः स्यात् । ऋजुङ् भर्जने । ऋञ्जसानः महेन्द्रः मेघः श्मशानं च । रञ्जीं रागे । रञ्जसानः मेघः धर्मश्च । मदुङ् स्तुत्यादिषु । मन्दसानः हंसः चन्द्रः सूर्यः जीवः स्वप्नः अग्निश्च । षहि मर्षणे । सहसानः दृढः मयूरः यजमानः क्षमावाँश्च । अर्ह पूजायाम्। अर्हसानः चन्द्रः तुरंगमश्च ।

रुहियजेः कित् ॥२८०॥ आभ्यां किदसानः प्रत्ययः स्यात् । रुहं जन्मनि। रुहसानः विटपः । यजीं देवपूजादौ । इजसानः धर्मः ।

वृधेर्वा ॥२८१॥ वृधेरसानः प्रत्ययः किद्वा स्यात् । वृधूङ् वृद्धौ । वृधसानः गर्भः । वर्धसानः गिरिः मृत्युः गर्भः पुरुषश्च ।

इयाकठिखलिनल्यविकुण्डिभ्य इनः ॥२८२॥ एभ्य इनः प्रत्ययः स्यात् ।

श्यैङ् गतौ। श्येनः पक्षी अभिचारयज्ञश्च। कठ कृच्छ्रजीवने। कठिनममृदु। खल संचये च। खलिनम् अश्वमुखसंयमनम्। णल गन्धे। नलिनं पद्मम्। अव रक्षणादौ। अविनं जलं मृगः नाशः अग्निः राजा अध्वर्युः विधानं गुप्तिश्च। कुडङ् दाहे। कुण्डिनः ऋषिः। कुण्डिनं नगरम्।

वृजितुहिपुलिपुटिभ्यः कित् ॥२८३॥ एभ्यः किदिनः प्रत्ययः स्यात्। वृजैकि वर्जने। वृजिनं पापं कुटिलं च। तुह अर्दने। तुहिनं हिममन्धकारश्च। पुल महत्त्वे। पुटत् संश्लेषणे। पुलिनं पुटिनं च नदीतीरं वालुकासंघातश्च।

विपिनाजिनादयः ॥२८४॥ विपिनादयः शब्दाः किदिनप्रत्ययान्ता निपात्यन्ते। टुवपीं बीजसन्ताने टुवेपृङ् चलने इत्यस्य वा इच्चोपान्त्यस्य। विपिनं गहनम् अब्जं जलदुर्गं च। अज क्षेपणे च। अस्य वीभावाभावश्च। अजिनं चर्म। आदिग्रहणादन्येऽपि।

महेर्णिद्वा ॥२८५॥ मह पूजायामित्यस्मादिनः प्रत्ययः स च णिद्वा स्यात्। माहिनं राज्यं बलं च। महिनं राज्यं शयनं च। महिनः माहात्म्यवान्।

खलिहिंसिभ्यामीनः ॥२८६॥ आभ्यामीनः प्रत्ययः स्यात्। खल संचये च। खलीनं कवियम्। हिंसुप् हिंसायाम्। हिंसीनः श्वापदः।

पठेर्णित् ॥२८७॥ पठ व्यक्तायां वाचीत्यस्मात् णिदीनः प्रत्ययः स्यात्। पाठीनः मत्स्यः।

यम्यजिशक्यर्जिशीयजितृभ्य उनः ॥२८८॥ एभ्यः उनः प्रत्ययः स्यात्। यमूं उपरमे। यमुना नदी। अज क्षेपणे च। वयुनं विज्ञानम् अङ्गं च। वयुनः विद्वान् चन्द्रः यज्ञश्च। शक्लृंट् शक्तौ। शकुनः पक्षी। अर्ज अर्जने। अर्जुनः ककुभः वृक्षविशेषः पार्थः श्वेतवर्णः श्वेताश्वः कार्तवीर्यश्च। अर्जुनी गौः। अर्जुनं तृणं श्वेतसुवर्णं च। शीङ्क् स्वप्ने। शयुनः अजगरः। यजीं देवपूजादौ। यजुना क्रतुद्रव्यम्। तॄ प्लवनतरणयोः। तरुणः समर्थः युवा वायुश्च। ऋफिडादिलाञ्छत्वे तलुनः।

लषेः श च ॥२८९॥ लषी कान्ताविति्यस्मादुनः प्रत्ययः तालव्यः शकारश्चान्तादेशः। लशुनं कन्दजातिः।

पिशिमिथिक्षुधिभ्यः कित् ॥२९०॥ एभ्यः किदुनः प्रत्ययः स्यात्। पिशत् अवयवे। पिशुनः खलः। पिशुनं मैत्रीभेदकं वचनम्। मिथृङ् मेधाहिंसयोः।

मिथुनं स्त्रीपुंसद्वन्द्वं राशिश्च । क्षुधंच् बुभुक्षायाम् । क्षुधनः कीटकः ।

फलेर्गोऽन्तश्च ॥२९१॥ फल निष्पत्तौ इत्यस्मादुनः प्रत्ययो गश्चान्तः । फल्गुनः अर्जुनः । फल्गुनी नक्षत्रम् ।

वीपतिपटिभ्यस्तनः ॥२९२॥ एभ्यस्तनः प्रत्ययः स्यात् । वींक् प्रजनादौ । वेतनं भृतिः । पत्लृ गतौ । पत्तनम् । पट गतौ । पट्टनम् । द्वावपि नगरविशेषौ ।

‘ पट्टनं शकटैर्गम्यं घोटकैर्नौभिरेव च ।
नौभिरेव तु यद् गम्यं पत्तनं तत्प्रचक्षते ” ॥

पृपूभ्यां कित् ॥२९३॥ आभ्यां कित् तनः प्रत्ययः स्यात् । पृंङ्त् व्यायामे । पृतना सेना । पूगश् पवने । पूतना राक्षसी ।

कृत्यशौभ्यां स्नक् ॥२९४॥ आभ्यां स्नक् प्रत्ययः स्यात् । कृतैत् छेदने । कृत्स्नं सर्वम् । अशौटि व्याप्तौ । अक्ष्णं नयनं व्याधिः रज्जुः तेजनम् अखण्डं च ।

अर्तेः शसानः ॥२९५॥ ऋंक् गतावित्यस्मात् तालव्यादिः शसानः प्रत्ययः स्यात् । अर्शसानः पन्थाः इषुः अग्निश्च ।

भापाचणिचमिविषिसृपृतृशीतल्यलिशमिरमिवपिभ्यः पः॥२९६॥ एभ्यः पः प्रत्ययः स्यात् । भांक् दीप्तौ । भाप आदित्यः ज्येष्ठश्च भ्राता । पांक् रक्षणे । पापं कल्मषम् । पापः घोरः । चण हिंसादानयोश्च । चण्पा नगरी । चण्पः वृक्षः । चमू अदने । चम्पा नगरी । विषलृंकी व्याप्तौ । वेष्पः परमात्मा स्वर्गं आकाशश्च । निपूर्वात् निवेष्पः अपां गर्भः कूपः वृक्षजातिः अन्तरिक्षं च । सृं गतौ । सर्पः अहिः । पृश् पालनपूरणयोः । पर्पः प्लवः शंखः समुद्रः शस्त्रं च । तॄ प्लवनतरणयोः । तर्पः उडुपः नौश्च । शीङ्क् स्वप्ने । शेपः पुच्छम् । तलण् प्रतिष्ठायाम् । तल्पं शयनीयम् अङ्गं दाराः युद्धं च । अलीं भूषणादौ । अल्पं स्तोकम् । शमूच् उपशमे । शम्पा विद्युत् काञ्ची च । विपूर्वाद् विशम्पः दानवः । रमिं क्रीडायाम् । रम्पा चर्मकारोपकरणम् । डुवपीं बीजसन्ताने । वप्पः पिता ।

युसुकुरुतुच्युस्त्वादेरूच्च ॥२९७॥ एभ्यः पः ऊकारश्चान्तादेशः । युक् मिश्रणे । यूपः यज्ञपशुबन्धनकाष्ठम् । षुंगट् अभिषवे । सूपः मुद्गादिभिस्कृतः । कुंक् शब्दे । कूपः प्रहिः । रुक् शब्दे । रूपं [१]श्वेतादि लावण्यं स्वभावश्च । तुंक् वृत्त्यादौ । तूप आयतनविशेषः । च्युंङ् गतौ । च्यूपः आदित्यः वायुः संग्रामश्च । ष्टुंगक् स्तुतौ । स्तूपः बोधिसत्त्वभवनम् उपायतनं च । आदिशब्दादन्येऽपि ।

कृशृसृभ्य ऊर् चान्तस्य ॥२९८॥ एभ्यः पः प्रत्ययोऽन्तस्य च ऊः । कृत् विक्षेपे । कूर्पं भ्रूमध्यम् । शृश् हिंसायाम् । शूर्पः धान्यादिनिष्पवनभाण्डं संख्या च । सृं गतौ । सूर्पः भुजंगमः मत्स्यजातिश्च ।

शादिबाधिखनिहनेः ष च ॥२९९॥ एभ्यः पः प्रत्ययः षश्चान्तादेशः । शद्लृं शातने । शष्पं बालतृणम् । शष हिंसायामित्यस्य वा रूपम् । बाधृङ् रोटने । बाष्पः अश्रु धूमाभासं च मुखपानीयादौ । खनूग् अवदारणे । खष्पः बलात्कारः दुर्मेधाः कूपश्च । खष्पं खलीनं जनपदविशेषः अङ्गारश्च । हनंक् हिंसागत्योः । हष्पः प्रावरणजातिः ।

पम्पाशिल्पादयः ॥३००॥ पम्पादयः शब्दाः पप्रत्ययान्ता निपात्यन्ते । पांक् रक्षणे मोऽन्तो ह्रस्वश्च । पम्पा पुष्करिणी । शीलयतेः शलतेः शेतेर्वा शिलादेशश्च । शिल्पं विज्ञानम् । आदिग्रहणादन्येऽपि ।

क्षुचुपिपूभ्यः कित् ॥३०१॥ एभ्यः कित् पः प्रत्ययः स्यात् । टुक्षुक् शब्दे । क्षुपः गुच्छः । चुप मन्दायां गतौ । चुप्पं मन्दगमनम् । पूगश् पवने । पूपः पिष्टमयः ।

नियो वा ॥३०२॥ णींग् प्रापणे इत्यस्मात् पः प्रत्ययः स्यात् स च किद्वा । नीपः वृक्षविशेषः (कदम्बः) । नेपः नयः पुरोहितः वृक्षः भृतकश्च । नेपमुदकं यानं च ।

उभ्यवेर्लुक् च ॥३०३॥ आभ्यां कित् पः प्रत्ययो लुक् चान्तस्य । उभत् पूरणे । अव रक्षणादौ । उप अप च अव्यये ।

दलिवलितलिखजिध्वजिकचिभ्योऽपः ॥ ३०४ ॥ एभ्योऽपः प्रत्ययः स्यात् । दल विशरणे । दलपः प्रहरणं रणमुखम् विदलं दलविशेषश्च । दलपं व्रणमुखत्राणम् । वलि संवरणे । वलपः कर्णिका । तलण् प्रतिष्ठायाम् । तलपः हस्तप्रहारः । खज मन्थे । खजपः मन्थः । खजपं दधि घृतम् उदकं च । ध्वज गतौ । ध्वजपः ध्वजः । कचि बन्धने । कचपः शाकपर्ण बन्धश्च ।

भुजिकुतिकुटिविटिकुणिकुष्युषिभ्यः कित् ।३०५॥ एभ्यः किदपः प्रत्ययः स्यात् । भुजंप् पालनाभ्यवहारयोः । भुजपः राजा यजमानपालनादग्निश्च । कुतिः सौत्रः । कुतपः छागलोम्नां कम्बलः आस्तरणं श्राद्धकालश्च । कुटत् कौटिल्ये । कुटपः प्रस्थचतुर्भागः नीडं च शकुनीनाम् । विट् शब्दे । विटपः शाखा । कुणत् शब्दोपकरणयोः । कुणपः मृतकं कुथितं शब्दार्थसारूप्यं च । कुषश् निष्कर्षे ।

कृषपः विन्ध्यः संदंशश्च । उषू दाहे । उषपः दाहः सूर्यः वन्हिश्च ।

शंसेः श इच्चातः ॥३०६॥ शंसू स्तुतौ चेत्यस्मादपः प्रत्ययस्तालव्यः शकारोऽन्तादेशोऽकारस्य चेकारः । शिंशपाः वृक्षविशेषः ।

विष्टपोलपवातपादयः ॥३०७॥ विष्टपादयः शब्दाः किदपप्रत्ययान्ता निपात्यन्ते । विषेस्तोऽन्तश्च । विष्टपं जगत् सुकृतिनां स्थानं च । वलेरुल् च । उलपं पर्वततृणं पङ्कजं जलं च । उलपः ऋषिः । वातेस्तोऽन्तश्च । वातपः ऋषिः । आदिग्रहणात् खरपादयो भवन्ति ।

कलेरापः ॥३०८॥ कलि शब्दसंख्यानयोरित्यस्मादापः प्रत्ययः स्यात् । कलापः काञ्ची समूहः शिखण्डश्च ।

विशेरिपक् ॥३०९॥ विशंत् प्रवेशने इत्यस्मादिपक् प्रत्ययः स्यात् । विशिपः राशिः । विशिपं तृणं वेश्म आसनं पद्मं च ।

दलेरीपो दिल् च ॥३१०॥ दल विशरणे इत्यस्मादीपः प्रत्ययः स्यात् दिल् चास्यादेशः । दिलीपः राजा ।

उडेरुपक् ॥३११॥ उड् संघाते इत्यस्मात् सौत्रादुपक् प्रत्ययः स्यात् । उडुपः प्लवः। जपादित्वाद् वत्वे उडुवः।

अशू ऊपः पश्च ॥३१२॥ अशौटि व्याप्ताविवस्मादूपः प्रत्ययः पश्चान्तादेशः। अपूपः पक्वान्नविशेषः ।

सर्तेः षपः ॥३१३॥ सृं गताविवस्मात् षपः प्रत्ययः स्यात् । सर्षपः रक्षोघ्नं द्रव्यं शाकं च ।

रीशीभ्यां फः ॥३१४॥ आभ्यां फः प्रत्ययः स्यात् । रींङ्च् श्रवणे । रेफः कुत्सितः । शीङ्क् स्वप्ने । शेफः मेढः ।

कलिगलेरस्योच्च ॥३१५॥ आभ्यां फः प्रत्ययोऽस्य चोकारः । कलि शब्द-संख्यानयोः । गल अदने । कुल्फ गुल्फः जङ्घांघ्रिसन्धिः । गुल्फः पदोपरिग्रन्थिः।

शफकफशिफाशोफादयः ॥ ३१६ ॥ शफादयः शब्दाः फप्रत्ययान्ता निपात्यन्ते । श्यतेः कायतेश्च ह्रस्वश्च । शफः खुरः प्रियंवदश्च । कफः श्लेष्मा । श्यतेरित्वमोत्वं च । शिफा वृक्षजटा । शोफः श्वयथुः खुरश्च । आदिशब्दात् रिफानफा-स्नुनफादयो भवन्ति ।

वलिनितनिभ्यां वः ॥३१७॥ वलि संवरणे निपूर्वाच्च तनूयी विस्तारे

इत्यस्माच्च बः प्रत्ययः स्यात् । वल्बः वृक्षः । नितम्बः श्रोणिः पर्वतैकदेशः नटश्च ।

शम्यमोर्णिद्वा ॥३१८॥ आभ्यां बः प्रत्ययः सचणिद्वा । शमूच् उपशमे । शम्बः वज्रः कर्षणविशेषः वेणुदण्डः तोत्रम् अरित्रं च। शम्बशाम्बौ जाम्बवतेयौ । अम्बा माता । आम्बः अपक्वः ।

शल्यलेरुच्चातः ॥३१९॥ आभ्यां बः प्रत्ययोऽकारस्य चोकारः। पलफलशल्ल गतौ । शुल्बं ताम्रम् । अली भूषणादौ । उल्बं रजतं गर्भवेष्टनम् । शुल्बं वम्भ्रुः तरक्षुश्च ।

तुम्बस्तम्बादयः ॥३२०॥ तुम्बादयः शब्दा बप्रत्ययान्ता निपात्यन्ते । ताम्यतेरत उत्वं च। तुम्बम् अलाबु चक्राङ्गं च। स्तम्भेर्लुक् च। स्तम्बः तृणं विटपः संघातः अङ्कुरसमुदायः स्तवकः पुष्पापीडश्च । आदिग्रहणात् कुम्भाम्बादयो भवन्ति।

कृकडिकाटिवटेरम्बः ॥३२१॥ एभ्योऽम्बः प्रत्ययः स्यात् । डुकृंग् करणे । करम्बः दध्योदनः दधिसक्तवः पुष्पं च । कडत् मदे । कडम्बः जातिविशेषः जनपदविशेषश्च । कटे वर्षावरणयोः । कटम्बः पक्वान्नविशेषः वादित्रं च । कडम्बकटम्बौ वृक्षौ च । वट वेष्टने । वटम्बः शैलः तृणपुञ्जश्च ।

कदेर्णिद्वा ॥३२२॥ कद वैक्लव्ये इत्यस्मात् सौत्रादम्बः प्रत्ययः स च णिद्वा। कादम्बः हंसः । कदम्बः वृक्षजातिः ।

शिलिविलादेः कित् ॥३२३॥ शिलादिभ्यः किदम्बः प्रत्ययः स्यात् । शिलत् उञ्छे । शिलम्बः ऋषिः तन्तुवायश्च । विलत् वरणे । विलम्बः वेषविशेषः रङ्गावसरश्च । आदिग्रहणादन्येऽपि ।

हिण्डिविलेः किम्बो नलुक् च ॥३२४॥ आभ्यां किदिम्बः प्रत्ययो नस्य च लुक् । हिडुङ् गतौ च, विलत् वरणे । हिडिम्बः विलिम्बश्च राक्षसौ ।

डीनीवन्धिशृधिचालिभ्यो डिम्बः ॥३२५॥ एभ्यो डिदिम्बः प्रत्ययः स्यात् । डींङ् विहायसा गतौ । डिम्बः राजोपद्रवः । णींग् प्रापणे । निम्बः वृक्षविशेषः। वन्धंश् वन्धने । विम्बं प्रतिच्छन्दः देहश्च । विम्बी वल्लिजातिः। शृधूङ् शब्दकुत्सायाम् । शिम्बः मृगजातिः । शिम्बी निष्पाववल्ली च । चल कम्पने । चिम्बा यवागूजातिः।

कुटचुन्दिचुरितुरिपुरिमुरिकुरिभ्यः कुम्बः ॥३२६॥ एभ्यः किदुम्बः प्रत्ययः स्यात् । कुटत् कौटिल्ये । कुटुम्बं दारादयः । उन्दैप् क्लेदने । उदुम्बः

समुद्रः । चुरण् स्तेये । तुरण् त्वरणे सौत्रः । चुरुम्बः तुरुम्बश्च गहनम् । पुरत् अग्रगमने । पुरुम्बः आहारः । मुरत् संवेष्टने । मुरुम्बः मृद्यमानपाषाणचूर्णम् । कुरत् शब्दे । कुरुम्बः अङ्कुरः । निपूर्वात् निकुरुम्बः राशिः ।

गृदृरमिहनिजन्यर्तिदलिभ्यो भः ॥३२७॥ एभ्यो भः प्रत्ययः स्यात् । गृत् निगरणे । गर्भः जठरस्थः प्राणी । दृश् विदारणे । दर्भः कुशः । रमिं क्रीडायाम् । रम्भा अप्सराः कदली च । हनंक् हिंसागत्योः । हम्भा गोधेनुनादः । जनैचि प्रादुर्भावे । जम्भः दानवः दन्तश्च । जम्भा मुखविदारणम् । ऋंक् गतौ । अर्भः शिशुः । दल विदारणे । दल्भः ऋषिः वल्कलं विदारणं च ।

इणः कित् ॥३२८॥ इंण्क् गतावित्यस्मात् किद् भः प्रत्ययः स्यात् । इभः हस्ती ।

कृशृगृशलिकलिकाडिगर्दिरासिरमिवडिवल्लिरभः ॥३२९॥ एभ्योऽभः प्रत्ययः स्यात् । कृत् विक्षेपे । करभः त्रिवर्षः उष्ट्रः । शृश् हिंसायाम् । शरभः श्वापदविशेषः । गृत् निगरणे । गरभः उदरस्थो जन्तुः । पलफलशल गतौ । शलभः पतङ्गः । कलि शब्दसंख्यानयोः । कलभः हस्ती यौवनाभिमुखः । कडत् मदे । कडभः हस्तिपोतकः । गर्द शब्दे । गर्दभः खरः । रासृङ् शब्दे । रासभः स एव । रमिं क्रीडायाम् । रमभः प्रहर्षः । वडः सौत्रः । वडभी वेश्माग्रभूमिका । ऋफिडादित्वाल्लत्वे वलभी । वल्लि संवरणे । वल्लभः स्वामी दयितश्च ।

सनोर्डित् ॥३३०॥ पण भक्तावित्यस्माद् डिदभः प्रत्ययः स्यात् । सभा परिषत् शाला च ।

ऋषिवृषिलुसिभ्यः कित् ॥३३१॥ एभ्यः किदभः प्रत्ययः स्यात् । ऋषैत् गतौ । वृषू सेचने । ऋषभः वृषभश्च पुङ्गवः भगवाँश्चादितीर्थकरः । ऋषभः वायुः । लुसिः सौत्रः । लुसभः हिंस्रः मत्तहस्ती वनं च ।

सिटिकिभ्यामिभः सैरटिट्टौ च ॥ ३३२ ॥ आभ्यामिभः प्रत्ययो दन्त्यादिः सैरः टिट्टश्चादेशौ यथासंख्यं स्याताम् । षिंगट् बन्धने । सैरिभः महिषः । टिकि गतौ । टिट्टिभः पक्षी ।

ककेरुभः ॥३३३॥ ककि लौल्ये इत्यस्मादुभः प्रत्ययः स्यात् । ककुभः अर्जुनः ।

कुकेः कोऽन्तश्च ॥३३४॥ कुकि आदाने इत्यस्मादुभः प्रत्ययः कश्चान्तादेशः । ककुभः पक्षिविशेषः ।

दमो दुण्ड् च ॥३३५॥ दमूच् उपशमे इत्यस्मात् उभः प्रत्ययोऽस्य च दन्त्यादिष्टवर्गतृतीयान्तो दुण्ड् इत्यादेशः। दुण्डुभः निर्विषाहिः।

कृकलेरम्भः ॥३३६॥ आभ्यामम्भः प्रत्ययः स्यात्। डुकृंग् करणे। करम्भः दधिसक्तवः। कलि शब्दसंख्यानयोः। कलम्भः। ऋषिः।

काकुसिभ्यां कुम्भः ॥ ३३७ ॥ आभ्यां किदुम्भः प्रत्ययः स्यात्। कैं शब्दे। कुम्भः घटः राशिश्च। कुसच् श्लेषणे। कुसुम्भं महारजनम्।

अर्तीरिस्तुसुहुसृधृधृसृक्षियक्षिभावाव्याधापायावलिपदिनीभ्यो मः ॥३३८॥ एभ्यो मः प्रत्ययः स्यात्। ऋंक् गतौ। अर्मः अक्षिरोगः ग्रामः स्थलं च। ईरिक् गतिकम्पनयोः। ईर्मं व्रणः। ष्टुंग्क् स्तुतौ। स्तोमः समूहः यज्ञः स्तोत्रं च। षुंग्ट् अभिषवे। सोमः चन्द्रः वल्ली च। हुंक् दानादनयोः। होमः आहुतिः। सृं गतौ। सर्मः नदः कालश्च। सर्मं स्थानं सुखं च। धृं सेचने। धर्मः ग्रीष्मः। धृंङ्त् स्थाने। धर्मः उत्तमक्षमादिः न्यायश्च। शृंश् हिंसायाम्। शर्म सुखम्। क्षिंत् निवासगत्योः। क्षेमं कल्याणम्। यक्षिण् पूजायाम्। यक्ष्मः व्याधिः। भांक् दीप्तौ। भामः क्रोधः। भामा स्त्री। वांक् गतिगन्धनयोः। वामः प्रतिकूलः सव्यश्च। व्यंग् संवरणे। व्यामः वक्षोभुजायतिः। डुधांग्क् धारणे च। धामं निलयः तेजश्च। पां पाने। पामा कच्छूः। यांक् प्रापणे। यामः प्रहरः। वलि संवरणे। वल्मः ग्रंथिः। पदिंच् गतौ। पद्मं कमलम्। णींग् प्रापणे। नेमः अर्धः समीपश्च।

ग्रसिहाग्भ्यां ग्राजिहौ च ॥३३९॥ आभ्यां मः प्रत्ययोऽनयोश्च ग्राजिहावित्यादेशौ यथासंख्यं स्याताम्। ग्रामः समूहादिः। जिह्मः कुटिलः।

विलिभिलिसिधीन्धिधूसूशाध्यारुसिविशुषिमुषीषिसुहियुधिदसिभ्यः कित् ॥३४०॥ एभ्यः किन्मः प्रत्ययः स्यात्। विलत् वरणे। विल्मं प्रकाशः। मिलिः सौत्रः। मिल्मं भास्वरम्। षिधू गत्याम्। सिध्मं खगरोगः। त्रिइन्धैषि दीप्तौ। इध्ममिन्धनम्। धूगश् कम्पने। धूमः अग्निकेतुः। षूङ्प्राणिप्रसवे। सूमः कालः श्वयथुः रविश्च। सूममन्तरिक्षम्। इयैङ् गतौ। श्यामः वर्णः। श्यामं नभः। श्यामा रात्रिः ओषधिश्च। ध्यैं चिन्तायाम्। ध्यामः अव्यक्तवर्णः। रुक् शब्दे। रुमा लवणभूमिः। षिवूच् उतौ। स्यूमः रश्मिः दीर्घः सूत्रतन्तुश्च। स्यूमं जलम्। शुषंच् शोषणे। शुष्मं बलं जलं संयोगश्च। मुषश्

स्तेये । मुष्मः मूषिकः । ईष उञ्छे । ईष्मः वसन्तः बाणः वातश्च । घुहच् शक्तौ । सुह्माः जनपदः । सुह्मः राजा । युधिच् संप्रहारे । युध्मः शरत्कालः शूरः शत्रुः संग्रामश्च । दसूच् उपक्षये । दस्मः हीनः वन्हिः यज्ञश्च ।

क्षुहिभ्यां वा ॥३४१॥ आभ्यां मः प्रत्ययः स च कित्वा । टुक्षुक् शब्दे । क्षुमा अतसी । क्षोमं वस्त्रम् । हिंट् गतिवृद्धयोः। हिमं तुषारः । हेमं सुवर्णम् ।

अवेर्ह्रस्वश्च ॥३४२॥ अव रक्षणादावित्यस्मात् कित् मः प्रत्ययः ऊटो ह्रस्वश्च वा । उमा गौरी अतसी कीर्तिश्च । ऊममूनमाकाशं नगरं च ।

सेरी च वा ॥३४३॥ षिंगट् बन्धने इत्यस्मात् कित् मः प्रत्ययः ईकारश्चान्तादेशो वा । सीमो ग्रामगोचरभूमिः क्षेत्रमर्यादा हयश्च । सिमः स एव सर्वार्थश्च ।

भियः षोऽन्तश्च वा ॥३४४॥ ञिभींक् भये इत्यस्मात् कित् मः प्रत्ययः षकारश्चान्तादेशो वा । बिभेत्यस्मादिति भीष्मः भयानकः । भीमः स एव ।

तिजियुजेर्ग् च ॥३४५॥ आभ्यां कित् मः प्रत्ययो गकारश्चान्तादेशः । तिजि क्षमानिशानयोः । तिग्मं तीक्ष्णं दीप्तं तेजश्च । युजृंपी योगे । युग्मं युगलम् ।

रुक्मग्रीष्मकूर्मसूर्मजाल्मगुल्मघ्रोमपरिस्तोमसूक्ष्मादयः ॥ ३४६ ॥ एते किन्मप्रत्ययान्ता निपात्यन्ते । रोचतेः क च । रुक्मं सुवर्णं रूप्यं च । ग्रसेर्ग्रीष् च । ग्रीष्मः ऋतुः । कुरतेर्दीर्घश्च । कूर्मः कच्छपः । षूत् प्रेरणे इत्यस्माद् रोऽन्तश्च । सूर्मी लोहप्रतिमा चुल्लिश्च । जल घात्ये दीर्घश्च । जाल्मः निकृष्टः । गुप्च् व्याकुलत्वे लश्च । गुल्मः व्याधिः तरुसमूहः वनस्पतिः सेनाङ्गं च । गुल्मम् आयस्थानम् । जिघ्रतेरोत्वं च । घ्रोमः यज्ञाङ्गलक्षणः सोमः । परिपूर्वात् स्तौतेः षत्वाभावो गुणश्च । परिस्तोमः यज्ञविशेषः । सूचण् पैशून्ये । कत्वं षोऽन्तश्च । सूक्ष्मः निपुणः । सूक्ष्मम् अणु । आदिग्रहणात् क्ष्मादयो भवन्ति ।

सृपृप्रथिचरिकडिकर्दिरमः ॥३४७॥ एभ्योऽमः प्रत्ययः स्यात् । सृ गतौ । सरमा देवशुनी । पॄश् पालनपूरणयोः । परमः उत्कृष्टः । प्रथिप् प्रख्याने । प्रथमः आद्यः । चर भक्षणे । चरमः पश्चिमः । कडत् मदे । कडमः शालिः । ऋफिडादिलाल्लत्वे कलमः स एव । कर्द कुत्सिते शब्दे । कर्दमः पङ्कः ।

अवेर्धश्च वा ॥३४८॥ अव रक्षणादावित्यस्मादमः प्रत्ययो धश्चान्तादेशो वा । अधमः अवमश्च हीनः ।

कुट्टिवेष्टिपूरिपिषिसिचिगण्यर्पिद्दमहिभ्य इमः ॥३४९॥ एभ्य इमः

प्रत्ययः स्यात् । कुट्टण् कुत्सने च । कुट्टिमः संस्कृतभूतलम् । वेष्टि वेष्टने । वेष्टिमं पुष्पबन्धविशेषः भक्ष्यविशेषश्च । पूरौचि आप्यायने । पूरिमं मालाबन्धविशेषः भक्ष्यविशेषश्च । पिष्लृंप् संचूर्णने । पेषिमं भक्ष्यविशेषः । षिचींत् क्षरणे । सेचिमं मालाविशेषः । गणण् संख्याने । गणिमं गणितम् । ऋंक् गतौ, णौ, पौ अर्पिमं बालवत्साया दुग्धम् । वृगट् वरणे । वरिमं तुलोन्मेयम् । मह पूजायाम् । महिमं पूजनीयम् ।

वयिमखचिमादयः ॥३५०॥ वयिमादयः शब्दा इमप्रत्ययान्ता निपात्यन्ते । वेंग् तन्तुसंताने वयादेशश्च । वयिमं माल्यं कन्दुकः तन्तुवायदण्डश्च । खनूग् अवदारणे चश्च । खचिमं मणिलोहविद्धं घृतविहीनं च दधि । आदिशब्दादन्येऽपि ।

उद्घटिकुल्यलिकुथिकुरिकुटिकुडिकुसिभ्यः कुमः ॥३५१॥ उत्पूर्वाद्घटेः कुल्यादिभ्यश्च किदुमः प्रत्ययः स्यात् । वट वेष्टने । उद्घटुमः परिक्षेपः । कुल बन्धुसंस्त्यानयोः । कुलुमः उत्सवः । अली भूषणादौ । अलुमः प्रसाधनं नापितः अग्निश्च । कुथच् पूतीभावे । कुथुमः ऋषिः । कुथुमं मृगाजिनम् । कुरत् शब्दे । कुरुमः कारुः भाजनं च । कुटत् कौटिल्ये । कुटुमः प्रेष्यः । कुडत् बाल्ये च । कुडुमा भूमिः । कुसच् श्लेषे । कुसुमं पुष्पम् ।

कुन्दुमालिन्दुमकुङ्कुमाविद्रुमपट्टुमादयः ॥३५२॥ एते कुमप्रत्ययान्ता निपात्यन्ते । कुकि आदाने । स्वरान्नो दश्च । कुन्दुमः निचयः गन्धद्रव्यं च । लीङ्च् श्लेषणे लिन्दभावश्च । लिन्दुमो गन्धद्रव्यम् । कुकेः स्वरान्नोऽन्तश्च । कुङ्कुमं घुसृणम् । विद्लृंती लाभे रोऽन्तश्च । विद्रुमः प्रवालः । पटेष्टोऽन्तश्च । पट्टुमं नगरम् । आदिग्रहणादन्येऽपि ।

कुथिगुधेरूमः ॥३५३॥ आभ्यामूमः प्रत्ययः स्यात् । कुथच् पूतीभावे । कोधूमः चरणकुद्दृषिः । गुधच् परिवेष्टने । गोधूमः धान्यविशेषः ।

विहाविशापचिभिद्यादेः केलिमः ॥३५४॥ विपूर्वाभ्याम् ओहांक् त्यागे शोंच् तक्षणे इत्येताभ्यां पच्यादिभ्यश्च किदेलिमः प्रत्ययः स्यात् । विहीयते त्यज्यतेऽशुचि शरीरमस्मिन्निति विहेलिमः स्वर्गः । विश्यति तनूभवति मासि मासि कलाभिर्हीयमान इति विशेलिमः चन्द्रः स्वर्गश्च । डुपचींष् पाके । पचति असावन्नमिति पचेलिमोऽग्निः आदित्यः अश्वश्च । भिदृंपी विदारणे । भिदेलिमः तस्करः । आदिशब्दात् दृशृं प्रेक्षणे–दृशेलिमम् । अदंप्सांक् भक्षणे । अदेलिमम् । हनंक्

हिंसागत्योः । ध्रेलिमम् । डुयाचृङ् याच्ञायाम् । याचेलिमम् । पांक् रक्षणे । पेलिमम् । डुकृंग् करणे । क्रेलिमम् इत्यादयो भवन्ति ।

दो डिमः ॥३५५॥ दां दाने इत्यस्मात् डिमः प्रत्ययः स्यात् । दाडिमः दाडिमी वा वृक्षजातिः ।

डिमेः कित् ॥३५६॥ डिमेः सौत्रात् कित् डिमः प्रत्ययः स्यात् । डिण्डिमः वाद्यविशेषः ।

स्थाछामासास्रमन्यनिकनिषसिपलिकलिशलिशकीर्ष्यसहिबन्धिभ्यो यः ॥३५७॥ एभ्यो यः प्रत्ययः स्यात् । ष्ठां गतिनिवृत्तौ । स्थायः स्थानम् । स्थाया भूमिः । दों छोंच् छेदने । छाया तमः प्रतिरूपं कान्तिश्च । मांक् माने । माया छद्म दिव्यानुभावदर्शनं च । षोंच् अन्तकर्मणि । सायं दिनावसानम् । षूत् प्रेरणे । सव्यः वामः दक्षिणश्च । मनिंच् ज्ञाने । मन्या धमनिः । अनक् प्राणने । अन्यः परः। कनै दीप्त्यादिषु । कन्या कुमारी । षसक् स्वप्ने । सस्यं क्षेत्रस्थं गोधूमादि । पल गतौ । पल्यः कटकुमूलः । कलि शब्दसंख्यानयोः । कल्यः नीरोगः। पलफलशल गतौ । शल्यमन्तर्गतं लोहादि । शक्लृंट् शक्तौ । शक्यमसारम् । ईर्ष्यरीर्ष्यार्थः। ईर्ष्यति ईर्ष्यणं वा ईर्ष्या मात्सर्यम् । षहि मर्षणे । सह्यः पश्चादर्णवपार्श्वशैलः । बन्धश् बन्धने । वन्ध्या अप्रसूतिः ।

नञो हलिपतेः ॥३५८॥ नञ्पूर्वाभ्यामाभ्यां यः प्रत्ययः स्यात् । हल विलेखने । अहल्या गोतमपत्नी । पत्लृ गतौ । अपत्यं पुत्रसंतानः ।

सञ्जेर्ध् च ॥३५९॥ षञ्जं सङ्गे इत्यस्मात् यः प्रत्ययो धकारश्चान्तादेशः। संध्या दिननिशान्तरम् ।

मृशीपसिवस्यनिभ्यस्तादिः ॥३६०॥ एभ्यस्तकारादिर्यः प्रत्ययः स्यात्। मृंत् प्राणत्यागे । मर्त्यः मनुष्यः । शीङ्क् स्वप्ने । शेत्यः शकुनिः संवत्सरः अजगरश्च । पसि निवासे सौत्रो दन्त्यान्तः । पस्त्यं गृहम् । वसं निवासे । वस्त्यः गुरुः । अनक् प्राणने । अन्त्यः निरवसितः चण्डालादिश्च ।

ऋशिजनिपुणिकृतिभ्यः कित् ॥३६१॥ एभ्यः कित्यः प्रत्ययः स्यात् । ऋश् गतौ स्तुतौ वा । स्वरादिस्तालव्यान्तः । ऋश्यः मृगजातिः । जनैचि प्रादुर्भावे । जन्यं संग्रामः । जाया पत्नी । 'ये नवा' इत्यात्वम् । पुणत् शुभे । पुण्यं सत्कर्म । कृतैत् छेदने । कृन्तति कृत्या दुर्गा ।

कुलेर्ड् च वा ॥३६२॥ कुल बन्धुसंस्त्यानयोरित्यस्मात् किद्यः प्रत्ययो डकारश्चान्तादेशो वा । कुड्यं भित्तिः । कुल्या सारणी ।

अगपुलाभ्यां स्तम्भेर्डित् ॥३६३॥ अग पुल इत्येताभ्यां परस्मात् स्तम्भेः सौत्रात् डित्यः प्रत्ययः स्यात् । अगस्त्यः पुलस्त्यश्च ऋषिः ।

शिक्यास्याढ्यमध्यविन्ध्यधिष्ण्याद्यन्यहर्म्यसत्यनित्यादयः ॥३६४॥ एते यप्रत्ययान्ता निपात्यन्ते । शोंच् तक्षणे इकश्चान्तः। शिक्यं लम्बमानः पिठर्याद्याधारः परिव्राड्भिक्षाभाजनस्थानम् असारं च । अस्तृच् क्षेपणे दीर्घत्वं च । आस्यं मुखम् । आङ्पूर्वाद् ढौकतेर्डिच्च । आढ्यः धनवान् । मव बन्धने ध् च । मध्यं गर्भः । विधत् विधाने स्वरान्नोऽन्तश्च । विन्ध्यः पर्वतः । ञिधृषाट् प्रागल्भ्ये णोऽन्तो धिष् च । धिष्ण्यं भवनम् आसनं च । धिष्ण्या उल्का । नञ्पूर्वाद् हन्तेरुपान्त्यलोपश्च । अघ्न्यो धर्मः गोपतिश्च । अघ्न्या गौः। हरतेर्मोऽन्तश्च । हर्म्यं सौधम् । अस्तेः सत् च । सत्यम् अमृषा । निपूर्वाद्यमेस्तोऽन्तो धातुलुक् च । नित्यं ध्रुवम् । आदिग्रहणाल्लुब्धदुह्यादयो भवन्ति ।

कुगुवलिमलिकणितन्यास्यक्षेरयः ॥३६७॥ एभ्योऽयः प्रत्ययः स्यात् । कुंक् शब्दे । कवयः ऋषिः पुरोडाशश्च । गुंङ् शब्दे । गवयः गवाकृतिः पशुविशेषः। वलि संवरणे । वलयः कटकः । मलि धारणे । मलयः पर्वतः । कण शब्दे । कणयः आयुधविशेषः । तनूयी विस्तारे । तनयः पुत्रः । अमण् रागे णिचि च । आमयः व्याधिः । अक्षौ व्याप्तौ । अक्षयः विष्णुः ।

चायेः केक् च ॥३६६॥ चायृग् पूजानिशामनयोः इत्यस्मात् अयः प्रत्ययोऽस्य च केक् इत्यादेशः । केकयः क्षत्रियः ।

लादिभ्यः कित् ॥३६७॥ लादिभ्यः किदयः प्रत्ययः स्यात् । लांक् आदाने । लयः । पां पाने । पयः । ष्णांक् शौचे । स्नयः । दैंङ् पालने । दयः । टुधैं पाने । धयः । मेंङ् प्रतिदाने । मयः । कैं शब्दे । कयः । खैं खदने । खयः । श्रैं पाके । श्रयः । क्षैं जैं सैं क्षये । क्षयः । जयः । सयः । त्रैंङ् पालने । त्रयः । ओवैं शोषणे । वयः । इत्यादि ।

कसेरलादिरिच्चास्य ॥ ३६८ ॥ कस गताविति यस्मादलादिरयः प्रत्ययोऽकारस्य चेकारः । किसलयं प्रवालम् ।

वृङः शषौ चान्तौ ॥३६९॥ वृङ्शृ संभक्ताविति यस्मात् किदयः प्रत्ययः

शकारषकारौ चान्तौ स्याताम् । दृशयं देशनाम आकाशम् आसनं शयनं च । दृषयः आशयः ।

गयहृदयादयः ॥३७०॥ गयहृदयादयः शब्दाः किदयप्रत्ययान्ता निपात्यन्ते। गमेर्डिच्च । गयः प्राणः । गया तीर्थम् । हरतेर्दोऽन्तश्च । हृदयं मनः स्तनमध्यं च। आदिशब्दाद् गणेरेयः । गणेयं गणनीयमित्यादि ।

मुचेर्घयघुयौ ॥३७१॥ मुच्लृंती मोक्षणे इत्यस्माद् घितावय उय इति प्रत्ययौ कितौ स्याताम् । मुकयः, मुकुयश्च अश्वतराद्भ्यायां जातः । चित्करणं कलार्थम् ।

कुलिलुलिकलिकषिभ्यः कायः ॥३७२॥ एभ्यः किदायः प्रत्ययः स्यात् । कुलायः नीडम् । लुलिः सौत्रः । लुलायः महिषः । कलि शब्दसंख्यानयोः । कलायः त्रिपुटः । कष हिंसायाम् । कषायः कल्कादिः ।

श्रुदक्षिगृहिस्पृहिमहेराय्यः । ३७३॥ एभ्य आय्यः प्रत्ययः स्यात् । श्रुंट् श्रवणे । श्रवाय्यः यज्ञपशुः ग्रहणसमर्थश्च श्रोता । दक्षि हिंसागत्योः । दक्षाय्यः अग्निः गृध्रः वैनतेयः दक्षतमश्च । गृहणि ग्रहणे । गृहयाय्यः वैनतेयः गृहकर्मकुशलश्च । स्पृहण् ईप्सायाम् । स्पृहयाय्यः स्पृहयालुः घृतं च । स्पृहयाय्याणि तृणानि अहानि च । महण् पूजायाम् । महयाय्यः अश्वमेधः ।

दधिषाय्यदीधीषाय्यौ ॥३७४॥ एतावाय्यप्रत्ययान्तौ निपात्येते । दधिपूर्वात् स्यतेः षत्वं च । दधिषाय्यं पृषदाज्यं मृषावादी च। दीव्यतेर्दीधीष् च। दीधीषाय्यं तदेव ।

कौतेरियः ॥ ३७५ ॥ कुंक् शब्दे इत्यस्मात् इयः प्रत्ययः स्यात् । कवियं खलीनम् ।

कृगः कित् ॥३७६॥ डुकृंग् करणे इत्यस्मात् किदियः प्रत्ययः स्यात् । क्रियो मेषः ।

मृजेर्णालीयः ॥३७७॥ मृजौक् शुद्धौ इत्यस्माण्णालीयः प्रत्ययः स्यात् । मार्जालीयं पापशोधनम् । मार्जालीयः अग्निः । मृजोऽस्य वृद्धिरिति वृद्धिः । णकार उत्तरार्थः ।

वेतेस्तादिः ॥३७८॥ वींक् प्रजनादावित्यस्मात् तकारादिर्णिदालीयः प्रत्ययः स्यात् । वैतालीयं छन्दोजातिः ।

धाग्राजिशूरमियाज्यर्तेरन्यः ॥ ३७९ ॥ एभ्योऽन्यः प्रत्ययः स्यात् । दुधांग्क् धारणे च । धान्यं सस्यजातिः । राजृग् दीप्तौ । राजन्यः ज्योतिः अग्निः क्षत्रियश्च । शूश् हिंसायाम् । शरण्यः त्राता । रमि क्रीडायाम् । रमण्यं शोभनम् । यजीं देवपूजादौ । याजन्यः क्षत्रियः यज्ञश्च । ऋंक् गतौ । अरण्यं वनम् ।

हिरण्यपर्जन्यादयः ॥३८०॥ हिरण्यादयः शब्दा अन्यप्रत्ययान्ता निपात्यन्ते । हरतेरिच्चातः । हिरण्यं सुवर्णादि द्रव्यम् । परिपूर्वस्य पृषू सेचने इत्यस्योपसर्गान्तलोपो धातोश्च जः समस्तादेशः गर्जतेर्वा गकारस्य पकारः । पर्जन्यः इन्द्रः मेघः शङ्कुः पुण्यं कुशलं च कर्म । आदिग्रहणादन्येऽपि ।

वदिसहिभ्यामान्यः ॥३८१॥ आभ्यामान्यः प्रत्ययः स्यात् । वद व्यक्तायां वाचि । वदान्यः दाता गुणवान् चारुभाषी वा । षहि मर्षणे । सहान्यः शैलः ।

वृङ ण्यः ॥३८२॥ वृङ्श् संभक्तावित्यस्मादेण्यः प्रत्ययः स्यात् । वरेण्यः परं ब्रह्म धाम श्रेष्ठः प्रजापतिः अन्नं च ।

मदेः स्यः ॥३८३॥ मदैच् हर्षे इत्यस्मात् स्यः प्रत्ययः स्यात् । मत्स्यः मीनः धूर्तश्च ।

रुचिभुजिभ्यां किण्यः ॥३८४॥ रुचिभुजिभ्यां किदिण्यः प्रत्ययः स्यात् । रुचि अभिप्रीत्यां च । रुचिण्यः वल्लभः सुवर्णं च । भुजंप् पालनाभ्यवहारयोः । भुजिण्यः आचार्यः भोक्ता अन्नं मृदु ओदनः दासश्च । भुजिण्यं धनम् ।

वचर्थिभ्यामुष्यः ॥३८५॥ आभ्यामुष्यः प्रत्ययः स्यात् । वचंक् भाषणे । वचुष्यः वक्ता । अर्थणि उपयाचने । अर्थुष्यः अर्थी ।

वचोऽध्य उत् च ॥३८६॥ वचंक् भाषणे इत्यस्मादध्यः प्रत्ययोऽस्य चोत् इत्यादेशः । उतथ्यः ऋषिः ।

भीवृधिरुधिवज्यगिरमिवमिवपिजपिशकिस्फायिवन्दीन्दिपदिमदिमन्दिचन्दिदासिघासिनीसिहस्यसिवासिदहिसहिभ्यो रः ॥३८७॥ एभ्यो रः प्रत्ययः स्यात् । त्रिभींक् भये । भेरः भेदः करभः शरः मण्डूकः दुन्दुभिः कातरश्च । ऋफिडादित्वात् लत्वे भेलः चिकित्साग्रन्थकारः शरः मण्डूकः प्रहीणः अप्राज्ञश्च । वृधूङ् वृद्धौ । वर्धः चर्मविकारः चन्द्रः मेघश्च । रुधूंपी आवरणे । रोध्रः वृक्षविशेषः । वज गतौ । वज्रं कुलिशं रत्नविशेषश्च । अग कुटिलायां गतौ । अग्रः प्राग्भागः श्रेष्ठश्च । रमि क्रीडायाम् । रम्रः कामुकः । डुवमू उद्गिरणे । वम्रः

धर्मविशेषः धूमश्च। वम्री उपदेहिका। दुवपीं बीजसन्ताने। वप्रः केदारः प्राकारः वास्तुभूमिश्च। जप मानसे च। जप्रः ब्राह्मणः मण्डूकश्च। शक्लृंट् शक्तौ। शक्रः इन्द्रः। स्फायैङ् वृद्धौ। स्फारम् उल्बणं प्रभूतं च। वदुङ् स्तुत्यभिवादनयोः। वन्द्रः बन्दी केतुः कामश्च। वन्द्रम् समूहः। इदु परमैश्वर्ये। इन्द्रः शक्रः। पदिंच् गतौ। पद्रं ग्रामादिनिवेशः शून्यं च। मदैच् हर्षे। मद्रा जनपदः क्षत्रियश्च। मद्रं सुखम्। मदुङ् स्तुत्यभिवादनयोः। मन्द्रं मधुरः स्वरः। मन्द्रं गभीरम्। चदु दीप्त्याह्लादयोः। चन्द्रः शशी सुवर्णं च। दसूच् उपक्षये। दस्रः शिशिरं चन्द्रमाः अश्विनोर्ज्येष्ठश्च। दस्रौ अश्विनौ। घस्लृं अदने। घस्रः दिवसः। णसि कौटिल्ये। नस्रः नासिकापुटः ऋषिश्च। हसे हसने। हस्रः दिनं घातुकः हर्षुलश्च। हस्रं बलाधानं संनिपातश्च। सहस्रं दश शतानि। अमूच् क्षेपणे। अस्रम् अश्रु। वासिच् शब्दे। वास्रः पुरुषः शब्दः संघातः शरभः रासभः पक्षी च। वास्रा धेनुः। दहं भस्मीकरणे। दह्रः अग्निः शिशुः सूर्यश्च। पहि मर्षणे। सह्रः शैलः।

ऋज्यजितञ्चिवञ्चिरिपिसृपितृपिदृपिचुपिक्षिपिक्षुपिक्षुदिमुदिरुदिछिदिभिदिखिद्युन्दिदम्भिशुभ्युम्भिदंशिचिसिवहिविसिवसिशुचिसिधिगृधिवीन्धिश्वितिवृतिनीशीसुसूभ्यः कित् ॥३८८॥ एभ्यः कित् रः प्रत्ययः स्यात्। ऋजि गतिस्थानार्जनोपार्जनेषु। ऋज्रः नायकः इन्द्रः अर्थश्च। अज क्षेपणे च। वीरः विक्रान्तः। तञ्चू वञ्चू गतौ। तक्रम् उदश्वित्। वक्रः कुटिलः अङ्गारकः विष्णुश्च। उभयत्र न्यङ्क्वादित्वात् कत्वम्। रिपिः सौत्रः। रिप्रं कुत्सितम्। सृप्लृं गतौ। सृप्रः चन्द्रः। सृप्रं मधु। सृप्रा नाम नदी। तृपौच् प्रीतौ। तृप्रं मेघान्तर्घर्मः आज्यं काष्ठं पापं दुःखं वा। दृपौच् हर्षमोहनयोः। दृप्रं बलं दुःखं च। दृप्रा बुद्धिः। चुप मन्दायां गतौ। चुप्रः वायुः। क्षिपींत् प्रेरणे। क्षिप्रं शीघ्रम्। क्षुपि सादने सौत्रः। क्षुप्रं तुहिनं कण्टकिगुल्मकश्च। क्षुद्रृंपी संपेषे। क्षुद्रम् अणु जलगर्तश्च। क्षुद्रा मधुकर्यः। क्षुद्रः हिंस्रः। मुदि हर्षे। मुद्रा चिन्हकरणम्। रुदृक् अश्रुविमोचने। रुद्रः शंभुः। छिदृंपी द्वैधीकरणे। छिद्रं विवरम्। भिदृंपी विदारणे। भिद्रम् अदृढम्। भिद्रः शरः। खिदंत् परिघाते। खिद्रं विघ्नः। खिद्रः विषाणं विषादः चन्द्रः दीनश्च। उन्दैप् क्लेदने। उद्रः ऋषिः मत्स्यश्च। सम्पूर्वात् समुन्दन्ति आर्द्रीभवन्ति वेलाकाले नद्योऽस्मादिति समुद्रः सागरः। भीमादित्वादपादाने। दम्भूट् दम्भने। दभ्रः अल्पः चन्द्रः कुशः कुशलः सूर्यश्च। शुभि दीप्तौ। शुभ्रोऽ-

वदातः । उम्भत् पूरणे । उभ्रो मेघः पेलवश्च । दंशं दशने । दश्रो दन्तः सर्पश्च । चिंग्ट् चयने । चिरम् अशीघ्रम् । षिंग्ट् बन्धने । सिरा रुधिरस्रोतोवाहिनी नाडी । वहीं प्रापणे । उह्रः अनड्वान् । विसच् प्रेरणे । विस्रम् आमगन्धि । वसं निवासे । उस्रः रश्मिः । बाहुलकात् षत्वं न । उस्रा गौः । शुच शोके । शुक्रः ग्रहः मासः शुक्रश्च । शुक्रं रेतः । लत्वे शुल्कः वर्णः । कत्वं न्यङ्कादित्वात् । षिधू गत्याम् । सिध्रः साधुः वृक्षः मांसप्रभेदश्च । गृधूच् अभिकाङ्क्षायाम् । गृध्रः श्येनः लुब्धकः कङ्कश्च । ञिइन्धैपि दीप्तौ । विपूर्वात्–वीध्रः अग्निः वायुः नभः निर्मलः पूर्णचन्द्रमण्डलम् । श्वित्राङ् वर्णे । श्वित्रं श्वेतकुष्ठम् । वृतूङ् वर्तने । वृत्रः दानवः बलवान् रिपुश्च । वृत्रं पापम् । णींग् प्रापणे । नीरं जलम् । शीङ्कृ स्वप्ने । शीरः अजगरः । षुंग्ट् अभिषवे । सुरः देवः । सुरा मद्यम् । षूङौच् प्राणिप्रसवे । सूरः आदित्यः रश्मिश्च ।

इण्धाग्भ्यां वा ॥३८९॥ आभ्यां रः प्रत्ययः स्यात् स च किद्वा । इंण्क् गतौ । इरा मदनीयपानविशेषः मेदिनी च । एरा एडका । डुधांग्क् धारणे च । धीरः सत्ववान् धृतिमाँश्च । धारा जलयष्टिः खड्गावयवः अश्वगतिविशेषश्च ।

चुम्बिकुम्बितुम्बेर्नलुक् च ॥३९०॥ एभ्यः किद्रः प्रत्ययः स्यात् नकारस्य चैषां लुक् । चुबु वक्त्रसंयोगे । चुब्रं वक्त्रम् । चुब्रः रश्मिः । कुबु आच्छादने । कुब्रं संकटं भग्नपृष्ठः फल्गु हस्ती चर्म गृहाच्छादनं च । तुबु अर्दने । तुब्रं कुटिलम् ।

भन्देर्वा ॥ ३९१ ॥ भदुङ् सुखकल्याणयोरित्यस्माद्रः प्रत्ययो नकारस्य च लुग्वा । भद्रं भन्द्रं च कल्याणं सुखं च ।

चिजिशुसिमितम्यम्यर्देर्दीर्घश्च ॥३९२॥ एभ्यो रः प्रत्ययो दीर्घश्चैषां स्यात् । चिंग्ट् चयने । चीरं जीर्णं वस्त्रं वल्कलं च । जिं अभिभवे । जीरः अजाजी अग्निः वायुः अश्वश्च । जीरम् अन्नम् । लत्वे–जीलः चर्मपुटः । शुं गतौ । शूरः विक्रान्तः । षिंग्ट् बन्धने । सीरं हलम् । सीरा हलविलेखिता लेखा । डुमिंग्ट् प्रक्षेपणे । मीरः समुद्रः । मीरं जलम् । मीरा मांस्पचनी देवसीमा च । तमूच् काङ्क्षायाम् । ताम्रः वर्णः शुल्बं च । अम गतौ । आम्रः वृक्षः । अर्द गतियाचनयोः । आर्द्रं सरसम् ।

चकिरामिविकसेरुचास्य ॥३९३॥ चकिरमिभ्यां विपूर्वात् कसेरः प्रत्ययः स्यात् अकारस्य चैषामुकारः । चकि तृप्तिप्रतिघातयोः । चुक्रः अम्लो रसः बीज-

पूरकमीजिका असुरः निमन्त्रणं च। रमिं क्रीडायाम्। रुम्रः सुन्दरः आदित्यसारथिः ब्राह्मणः विनाशश्च। कसे गतौ। विकुस्रः चन्द्रः समुद्रश्च। विकुस्रं पुष्पितम्। बाहुलकात् विकसोवकल्पः। विकस्रः।

शदेरूच ॥३९४॥ शदॢ शातने इत्यस्माद्रः प्रत्ययोऽकारस्य चोकारः। शूद्रः चतुर्थो वर्णः।

कृतेः क्रूकृच्छ्रौ च ॥३९५॥ कृतैत् छेदने इत्यस्माद्रः प्रत्ययोऽस्य च क्रू कृच्छ्र इत्यादेशौ स्याताम्। क्रूरम् अमृदु। क्रूरः पापकर्मा। कृच्छ्रं दुःखम्।

खुरक्षुरदूरगौरविप्रकुम्रस्वभ्राभ्रधूम्रान्ध्ररन्ध्रशिलिन्ध्रौड्रपुण्ड्रतीव्रनीव्रशीव्रोग्रतुग्रभुग्रनिद्रातन्द्रासान्द्रगुन्द्रारिभ्रादयः ॥३९६॥ एते रप्रत्ययान्ता निपात्यन्ते। खुरत् छेदने। क्षुरत् विलेखने। अनयो रलोपो गुणाभावश्च। खुरः शफः। क्षुरः नापितभाण्डम्। ननु च खुरक्षुरशब्दौ 'नाम्युपान्त्यप्रीकृगृज्ञः कः' इति केन सिद्ध्यतः। सत्यम्। तत्र कर्तैवार्थ इह तु संप्रदानाच्चान्यत्रोणादय इत्यर्थभेदः। असर्वविषयत्वं वाऽनयोर्ज्ञाप्यते। यथा अदेः परोक्षायां वा घस्लादेशवचनेन घसेः। एवमन्यत्रापि स्वयमभ्यूह्यम्। दुरूपूर्वादिणो लुक् च। दूरं विप्रकृष्टम्। गवतेर्ट्टद्धिश्च। गौरः अवदातः। विपूर्वात् पातेर्लुक् च। विप्रः ब्राह्मणः। विविधं प्रातीति वा विप्रः। गुप्च् व्याकुलत्वे। आदेः कत्वं च। कुभं गहनम् गृहाच्छादनं च। ट्वोश्चि गतिवृद्ध्योः, अकारः भोऽन्तश्च। श्वभ्रं विलम् आकाशं च। आप्लृंट् व्याप्तौ अभादेशश्च। अभ्रं मेघः। धूञ् कम्पने मोऽन्तश्च। धूम्रः वर्णविशेषः। अहुङ् गतौ धश्च। अन्ध्रः क्षत्रजातिः। रधेः स्वरान्नोऽन्तश्च। रन्ध्रं छिद्रम्। त्रि इन्धैपि दीप्तौ। अस्य च तालव्यादिशिलश्चादिः। शिलिन्ध्रम् उद्भिद्विशेषः। ओणेः डश्च। ओड्रः क्षत्रजातिः। पुणेः स्वरान्नोऽन्तो डश्च। पुण्ड्रः क्षत्रजातिः तिलकश्च। पुण्डेर्वा रूपम्। तिजेर्वा दीर्घश्च। तीवतेर्वा। तीव्रः तीक्ष्णः उत्कृष्टश्च। नियो वोऽन्तश्च। नीवतेर्वा। नीव्रं गृहच्छदिरुपान्तः। श्यैङ ईत्वं यलोपो धश्चान्तः। शीघ्रः त्वरितः। उच्चेरुषेर्वा गः कित् च। उग्रः रुद्रः रौद्रश्च। तुदींत् व्यथने गः किच्च। तुग्रं शृङ्गम्। भुजंप् पालनाभ्यवहारयोः गः किच्च। भुग्रः रश्मिसमूहः। णिदु कुत्सायाम्। कित्नलोपश्च। निद्रा स्वापः। तमूच् काङ्क्षायाम् दोऽन्तश्च। तन्द्रा आलस्यम्। षद्लृं विशरणगत्यवसादनेषु। अस्य स्वरान्नोऽन्तो वृद्धिश्च। सान्द्रं घनम्। गुदेः स्वरा-

त्रोऽन्तश्च । गुन्द्रा जलतृणविशेषः । राजेरञ्जेर्वा किच्चेचोपान्त्यस्य । रिञ्रः नायकः। आदिग्रहणादन्येऽपि ।

ऋच्छिचटिवटिकुटिकठिवठिमव्यडिशीकृशीभृकदिवदिकन्दिमन्दि-सुन्दिमन्थिमञ्जिपञ्जिपिञ्जिकमिसमिचमिवमिभ्रम्यमिदेविवासिकास्य-र्तिजीविर्बार्बिकुशुदोररः ॥ ३९७ ॥ एभ्योऽरः प्रत्ययः स्यात् । ऋच्छत् इन्द्रियप्रलयमूर्तिभावयोः । ऋच्छरः त्वरावान् । ऋच्छरा वेश्या कुलटा त्वरा अङ्गुलिश्च । चटण् भेदे । चटरः तस्करः । वट वेष्टने । वटरः मधुकण्डरा । कुटत् कौटिल्ये । कोटरं छिद्रम् । कठ कृच्छ्रजीवने । कठरः दरिद्रः । वठ स्थौल्ये । वठरः मूर्खः बृहद्देहश्च । मठ मदनिवासयोश्च । मठरः ऋषिः अज्ञानी गोत्रम् अलसश्च । अड उद्यमे । अडरः वृक्षः । शीकृङ् सेचने । शीकरः जललवसेकः । शीभृङ् कत्थने । शीभरः हस्तिहस्तमुक्तो जललवसेकः । कदिः सौत्रः । कदरः वृक्षविशेषः । बद स्थैर्ये । बदरी फलवृक्षः । कदुङ् वैक्लव्ये । कन्दरः गिरिगर्तः । मदुङ् स्तुत्यादौ । मन्दरः शैलः । सुन्दिः सौत्रः शोभायाम् । सुन्दरः मनोज्ञः । मन्थश् विलोडने । मन्थरः मन्दः खर्वश्च । मञ्जिपञ्जी सौत्रौ । मञ्जरी आम्रादिशाखा । गौरादित्वाद् ङीः । पञ्जरः शुकाद्यवरोधसद्म । पिजुण् हिंसाबलदाननिकेतनेषु । पिञ्जरः पिशिङ्गः । कमूङ् कान्तौ । कमरः मूर्खः कार्मुकं कोमलः चौरः कान्तश्च । षम वैक्लव्ये । समरः संग्रामः । चमू अदने । चमरः अरण्यपशुः । डुवमू उद्गिरणे । वमरः दुर्मेधाः । भ्रमूच् अनवस्थाने । भ्रमरः षट्पदः । अम गतौ । अमरः सुरः । देवृङ् देवने । देवरः पत्यनुजः । वस निवासे, णौ वासरः दिवसः कामः अग्निः प्रावृट् च । अन्ये वाशिच् शब्दे इत्यस्मादपि तालव्यान्तादिच्छन्ति । वाशरः अग्निः मेघः दिवसश्च । कासृङ् शब्दकुत्सायाम् । कासरः महिषः । ऋंक् गतौ । अररः कपाटः बुधः भ्रमरः गृहं हरणं शलाका च । जीव प्राणधारणे । जीवरः दीर्घायुः । बर्ब गतौ । बर्बरः म्लेच्छजातिः । बर्बरी कुञ्चिताः केशाः । कुंक् शब्दे । कवरः वर्णः । कवरी वेणिः । शुं गतौ । शबरः म्लेच्छजातिः । शव गतावित्यस्यान्ये । डुदुंत् उपतापे । दवरः गुणः ।

अवेर्धृ च वा ॥३९८॥ अव रक्षणादावित्यस्मादरः प्रत्ययो धकारश्चान्तादेशो वा । अधरः हीनः उपरिभावस्य प्रतियोगी दन्तच्छदश्च । अवरः परप्रतियोगी ।

मृकुन्दिपिठिकुरिकुहिभ्यः कित् ॥३९९॥ एभ्यो रः प्रत्ययः कित् स्यात् ।

मृदश् क्षोदे । मृदरः व्याधिः अतिकायः क्षोदश्च । उन्दैप् क्लेदने । उदरं जठरं व्याधिश्च । पिठ हिंसासंक्लेशयोः । पिठरं भाण्डम् । कुरत् शब्दे । कुररः जलपक्षिजातिः । कुहणि विस्मापने । कुहरं गम्भीरगर्तः ।

शाखेरिदेतौ चातः ॥४००॥ शाखृ व्याप्तावित्यस्मादरः प्रत्यय आकारस्य चेकारेकारौ स्याताम् । शिखरम् अग्रम् । शेखर आपीडः ।

शपेः फ् च ॥४०१॥ शपीं आक्रोशे इत्यस्मादरः प्रत्ययः फकारश्चान्तादेशः। शफरः क्षुद्रमत्स्यः ।

दमेर्णिद्वा दश्च डः ॥४०२॥ दमूच् उपशमे इत्यस्मादरः प्रत्ययः स च णिद् वा दकारस्य च डकारः । डामरः भयानकः । डमरः स एव ।

जठरकक्करमक्करशंकरकर्परकूर्परतोमरपामरग्रामरग्राम्यरसगरनगरतगरोर्दरादरशूदरदद्दरकुकरकुकुन्दरगोर्वराम्बरमुखरखरडहरकुञ्जराजगरादयः ॥४०३॥ एते किदरप्रत्ययान्ता निपात्यन्ते । जनेष्ठ च । जठरं कोष्ठः। क्रमेः क च । ककरः गौरतित्तिरिः। मङ्क्नेर्नलोपश्च । मकरः ग्राहः। शंपूर्वात् किरतेर्डिच्च । शङ्करः रुद्रः। कृपेरुपान्त्यस्य उर् च वा । कर्परं कपालम् । कूर्परं कुफणी । ताम्यतेरत ओच्च । तोमरः आयुधम् । पातेर्मोऽन्तश्च । पामरः ग्रामीणः। ग्रपूर्वादमतेः ग्रामरः ग्राम्यमन्दजातिः। ग्रपूर्वादत्तेर्मोऽन्तश्च । ग्राम्बरः नरपशुः। सहिनश्यृगि च । सगरः द्वितीयश्चक्रवर्ती । नगरं पुरम् । तङ्क्नेर्नलोपश्च । तगरः वृक्षविशेषः। ऊर्जः पराद् दृणातेर्डित् जलुक् च । ऊर्जा बलेन दृणाति विभेति ऊर्दरः दुर्बलः । अदु बन्धने नलुक् च । अदरं वक्षः वृक्षः संग्रामः चञ्चुसमूहः मातृवाहश्च । शृश् हिंसायाम् दृशू विदारणे इत्यनयोर्ह्रस्वत्वं दश्चान्तः । शूदरः सर्पः । ददरं भयं विषं च । डुकृंग् करणे दोऽन्तश्च । कृदरः वृक्षः सर्वकर्मप्रवृत्तो दस्युजनः कुशूलश्च । कुपूर्वात् स्कुदुङ् आप्लवणे सलोपश्च । कुकुन्दरं श्रोणिकूपकः। गोपूर्वात् वृगो डित् रश्चादिः गोर्वरः करीषः । अमेर्वोऽन्तश्च । अम्बरं वस्त्रम् आकाशं च । मुहेः ख च । मुखरः वाचालः । खनेर्डिच्च । खरः रासभः । दहेरादेर्डश्च । डहरं हृत्कमलम् । कूज अव्यक्ते शब्दे ह्रस्वः स्वरान्नोऽन्तश्च । कुञ्जरः हस्ती । अजेरगश्चान्तः वीभावाभावश्च । अजगरः शयुः । आदिग्रहणात् कोठराडङ्गरशाङ्गरपाण्डरवानरादयो भवन्ति ।

मुदिगुरिभ्यां टिद्गजौ चान्तौ ॥४०४॥ आभ्यां टिदरः प्रत्ययो गकारजकारौ च यथासंख्यमन्तौ स्याताम् । मुदि हर्षे । मुद्गरः प्रहरणविशेषः । मुद्गरी

स्त्री । गूरैचि गतौ । गूर्जरः सौराष्ट्रादिः । गूर्जरी स्त्री ।

अग्यङ्गिमदिमन्दिकडिकसिकासिमृजिकञ्जिकलिमलिकचिभ्यआरः ॥ ४०६ ॥ एभ्य आरः प्रत्ययः स्यात् । अग कुटिलायां गतौ । अगारं वेश्म । अगु गतौ । अङ्गारः निर्वातज्वालो निर्वाणश्चोल्मूकावयवः भूमिसुतश्च । मदैच् हर्षे । मदारः पानशौण्डः वराहः हस्ती अलसश्च । मदुङ् स्तुत्यादौ । मन्दारः वृक्षविशेषः । कडत् मदे । कडारः पिङ्गलः विषमदशनश्च । कस गतौ । कसारः हिंस्रः । कासृङ् शब्दकुत्सायाम् । कासारः पल्वलम् । मृजौक् शुद्धौ । मार्जारः विडालः । कञ्जिः सौत्रः । कञ्जारः कुशूलजातिः यूपः व्यञ्जनं च । कलि शब्दसंख्यानयोः। कलारः विषमरूपः । मलि धारणे । मलारः अलसः । मलमिवारा तोदोऽस्येति वा मलारः। कचि बन्धने । कचारः अपनेयः तृणबुसपांसुविकारः।

त्रः कादिः ॥४०७॥ तॄ प्लवनतरणयोरित्यस्मात् ककारादिरारः प्रत्ययः स्यात् । तर्कारः वृक्षः ।

कृगो मादिश्च ॥४०७॥ करोतेर्मकारादिः ककारादिश्चारः प्रत्ययः स्यात् । कर्मारः लोहकारः । कर्कारः वृक्षः ।

तुषिकुठिभ्यां कित् ॥४०८॥ आभ्यां किदारः प्रत्ययः स्यात् । तुषंच् तुष्टौ । तुषारः हिमम् । कुठिः सौत्रः । कुठारः परशुः ।

कमेरत उच्च ॥४०९ कमूङ् कान्तावित्यस्मादारः प्रत्ययोऽकारस्य चोकारः । कुमारः महासेनः अभ्रष्टः बालश्च ।

कनेः कोविदकर्बुदकाञ्चनाश्च ॥४१०॥ कनै दीप्तावित्यस्मादारः प्रत्ययोऽस्य च कोविद कर्बुद काञ्चन इत्यादेशाः स्युः । कोविदारः कर्बुदारः काञ्चनारश्च वृक्षविशेषाः ।

द्वारशृङ्गारभृङ्गारकल्हारकान्तारकेदारखारडादयः ॥ ४११ ॥ एते आरप्रत्ययान्ता निपात्यन्ते । उम्भत् पूरणे द्वादेशश्च । द्वारं द्वाः । श्रयतेस्तालव्यादिः शृङ्गश्च । शृङ्गारः रसविशेषः विदग्धता च । भृगो भृङ् च । भृङ्गारः हस्तिमुखाकारगलन्तिका । कलेर्हश्च स्वरात्परः । कल्हारः उत्पलविशेषः । कमेस्तोऽन्तो दीर्घश्च । कान्तारमरण्यम् । कदेः सौत्रस्यात एच्च । केदारः वप्रः । खनेर्डिच्च । खारी चतुर्द्रोणम् । खारडिति टकारो ङ्यर्थः। आदिग्रहणात् शिशुमारादयो भवन्ति।

मदिमन्दिचन्दिपदिखदिसहिवहिकृसृभ्य इरः ॥ ४१२ ॥ एभ्य इरः

मत्ययः स्यात् । मदैच् हर्षे । मदिरा सुरा । मदुङ् स्तुत्यादौ । मन्दिरं वेश्म नगरं च । चदु दीप्त्याह्लादनयोः । चन्दिरः चन्द्रमाः हस्ती च । चन्दिरं चन्द्रिकावत् जलं च । पदिच् गतौ । पदिरः मार्गः । खद हिंसायाम् । खदिरः वृक्षविशेषः । षहि मर्षणे । सहिरः पर्वतः । वहीं प्रापणे । वहिरः बलीवर्दः । कुंक् शब्दे । कविरः अक्षिकोणः । सृं गतौ । सरिरं जलम् । लत्वे सलिलम् ।

शवशशेरिचातः ॥४१३॥ आभ्यामिरः प्रत्ययोऽकारस्य चेकारः । शव गतौ तालव्यादिः । शिविरं सैन्यसंनिवेशः । शश प्लुतिगतौ । शिशिरं शीतलम् ऋतुश्च ।

श्रन्थेः शिथ् च ॥४१४॥ श्रथुङ् शैथिल्ये इत्यस्मादिरः प्रत्ययोऽस्य च शिथ् इत्यादेशः स्यात् । शिथिरं श्लथम् । लत्वे शिथिलम् ।

अशेर्णित् ॥४१५॥ अश्नातेरश्नोतेर्वा णिदिरः प्रत्ययः स्यात् । आशिरः विष्णुः आदित्यश्च । प्राशिरः बह्वाशी ।

शुषीषिबन्धिरुधिरुचिसुचिमुहिमिहितिमिमुदिखिदिच्छिदिभिदिस्थाभ्यः कित् ॥४१६॥ एभ्यः किदिरः प्रत्ययः स्यात् । शुषंच् शोषणे । शुषिरं छिद्रम् । इषन् इच्छायाम् । इषिरं तृणम् । इषिरः अग्निः आहारः क्षिप्रः सेव्यश्च । बन्धंश् बन्धने । बधिरः श्रुतिविकलः । रुधृंपी आवरणे । रुधिरं द्वितीयो धातुः । रुचि अभिप्रीत्यां च । रुचिरं दयितं दीप्तिमच्च । मुच्लृंती मोक्षणे । मुचिरः धर्मः सूर्यः मेघश्च । मुहौच् वैचित्ये । मुहिरः कन्दर्पः सूर्यश्च । मुहिरं तमः । मिहं सेचने । मिहिरः मेघः सूर्यश्च । मिहिरं तोयम् । तिमच् आर्द्रभावे । तिमिरं तमः तोयं रोगश्च कश्चित् । मुदि हर्षे । मुदिरः मेघः सूर्यश्च । खिदंत् परिघाते । खिदिरः त्रासः तस्करश्च । छिदृंपी द्वैधीकरणे । छिदिरः उन्दुरः अग्निश्च । छिदिरं शस्त्रम् । भिदृंपी विदारणे । भिदिरः अशनिः भेदश्च । ष्ठां गतिनिवृत्तौ । स्थिरः अचलः ।

स्थविरपिठिरस्फिराजिरादयः ॥ ४१७ ॥ एते किदिरप्रत्ययान्ता निपात्यन्ते । तिष्ठतेर्वोऽन्तो ह्रस्वश्च । स्थविरः वृद्धः । पचतेरत इत्वं ठश्च । पिठिरं साधनभाण्डम् । पिठेर्वा रूपम् । स्फायतेर्डिच्च । स्फिरः स्फारः वृद्धिश्च । अजेर्वीभावाभावश्च । अजिरम् अङ्गणं नगरं देवः वेश्म च । आदिग्रहणादन्येऽपि ।

कृशृपृपूगमाञ्जिकुटिकाटिपटिकाण्डिशौण्डिहिंसिभ्य ईरः ॥ ४१८ ॥ *एभ्य ईरः प्रत्ययः स्यात् । कृत् विक्षेपे । करीरः वनस्पतिविशेषः वंशाद्यङ्कुरश्च ।*

शृश् हिंसायाम् । शरीरं वपुः । पृश् पालनपूरणयोः । परीरं बलं लाङ्गलमुखं च । पूगश् पवने । पवीरं रङ्गस्थानं फलं पवित्रं बीजावपनं च । मञ्जिः सौत्रः । मञ्जीरं नूपुरः । कुटत् कौटिल्ये । कुटीरम् आलयः कर्कटकः चन्द्राश्रयराशिश्च । कोटीरं मुकुटः । बाहुलकाद् गुणः । कटे वर्षावरणयोः । कटीरं जनपदः जघनं जलं च । पट गतौ । पटीरः कन्दर्पः । पटीरं कार्मुकं स्फिक् च । कडु मदे । कण्डीरं हरितकम् । शौण्डृ गर्वे । शौण्डीरः गर्वितः सत्त्ववान् तीक्ष्णश्च । हिंसुप् हिंसायाम् । हिंसीरः श्वापदः हिंस्रश्च ।

घसिवशिपुटिकुरिकुलिकाभ्यः कित् ॥४१९॥ एभ्यः किदीरः प्रत्ययः स्यात् । घस्लृं अदने । क्षीरं दुग्धं मेघश्च । वशक् कान्तौ । उशीरं वीरणीमूलम् । पुटत् संश्लेषणे । पुटीरः कूर्मः । कुरत् शब्दे । कुरीरं मैथुनं वेश्म च । कुरीरः मालाविशेषः कम्बलश्च । कुल बन्धुसंस्त्यानयोः । कुलीरः कर्कटः । कै शब्दे । कीरः शुकः काश्मीरकश्च ।

कशेर्मोऽन्तश्च ॥४२०॥ कश शब्दे इत्यस्मात् तालव्यान्तादीरः प्रत्ययो मध्यान्तः स्यात् । कश्मीरा जनपदः ।

वनिवापिभ्यां णित् ॥४२१॥ आभ्यां णिदीरः प्रत्ययः स्यात् । वन भक्तौ । वानीरः वेतसः । डुवपीं बीजसन्ताने । वापीरः मेघः अमोघः निष्पत्तिः क्षेत्रं च ।

जम्बीराभीरगभीरगम्भीरकुम्भीरभडीरभण्डीराडिण्डीरकिर्मीरादयः ॥४२२॥ एते ईरप्रत्ययान्ता निपात्यन्ते । जनेर्बोऽन्तश्च । जम्बीरः वृक्षविशेषः । आप्नोतेर्भश्च । आभीरः शूद्रजातिः । गमेर्भः स्वरान्नस्तु वा । गभीरः अगाधः अचपलश्च । गम्भीरः स एव । स्कुम्भेः सौत्रात् सलोपश्च । कुम्भीरः जलचरः । भडुङ् परिभाषणे । अस्य नलुक् च वा । भडीरः भण्डीरश्च योद्धृवचने । डीङो डित् द्वित्वं पूर्वस्य नोऽन्तश्च । डिण्डीरः फेनः । किरतेर्मोऽन्तश्च । किर्मीरः कर्बुरः । आदिग्रहणात् तूणीरनासीरमन्दीरकरवीरादयो भवन्ति ।

वाशृयसिवासिमसिमथ्युन्दिमन्दिचतिचङ्क्यङ्किकिर्विचकिवन्धिभ्य उरः ॥४२३॥ एभ्य उरः प्रत्ययः स्यात् । वाशिच् शब्दे । वाशुरः शकुनिः गर्दभश्च । वाशुरा रात्रिः । असूच् क्षेपणे । असुरः दानवः । वासण् उपसेवायाम् । वासुरा रात्रिः मसुरा च । मसैच् परिमाणे । मसुरा पण्यस्त्री । मसुरं चर्मासनं धान्य-

विशेषश्च । मथे विलोडने । मथुरा नगरी । उन्दैप् क्लेदने । उन्दुरः मुषिकः । मदुङ् स्तुत्यादौ । मन्दुरा वाजिशाला । चतेग् याचने । चतुरः विदग्धः । चङ्किः सौत्रः । चङ्कति चेष्टते चङ्करः रथः अनवस्थितश्च । अकुङ् लक्षणे । अङ्कुङ् प्ररोहः तरुप्रतानभेदश्च । घञ्युपसर्गस्य बहुलमिति बहुलवचनाद् दीर्घे अङ्कूरः । कर्ब गतौ । कर्बुरः शबलः । चकि तृप्तिप्रतिघातयोः । चकुरः दशनः । बन्धंश् बन्धने । बन्धुरः मनोज्ञः नम्रश्च ।

मङ्कुर्नलुक् वोचास्य ॥४२४॥ मकुङ् मण्डन इत्यस्मादुरः प्रत्ययो नकारस्य लुक् अकारस्य चोकारो वा । मुकुरः आदर्शः मुकुलं च । मकुरः आदर्शः कल्कः बालपुष्पं च ।

विधेः कित् ॥४२५॥ विधत् विधाने इत्यस्मात् किदुरः प्रत्ययः स्यात् । विधुरं वैशसम् ।

श्वशुरकुकुन्दुरदर्दुरानिचुरप्रचुरचिकुरकुकुरकुक्कुरकुर्कुरशर्कुरनूपुर-निष्ठुरविथुरमद्गुरवागुरादयः ॥ ४२६ ॥एते किदुरप्रत्ययान्ता निपात्यन्ते । आशुपूर्वात् शुपूर्वाद्वा अश्नोतेरश्नातेर्वा आकारलोपश्च । श्वशुरः जम्पत्योः पिता । कुपूर्वात् स्कुदुङ् आप्रवणे इत्यस्मात् सलुक् च । कुकुन्दुरौ नितम्बकूपौ । हृणातेर्दीऽन्तश्च । दर्दुरः मण्डूकः मेघश्च । निपूर्वात् प्रपूर्वात् चिनोतेः चरतेर्वा डिच्च । निचुरः तरुविशेषः । लत्वे निचुलः । प्रचुरं प्रायः । चकेरिच्चास्य । चिकुरं युवतीनामीषन्निमीलितमक्षि । चिकुराः केशाः । कुकेः कोऽन्तो वा । कुकुरः यादवः । कुक्कुरः श्वा । किरः कुर् कोऽन्तश्च । कुर्कुरः श्वा । गृश् हिंसायां गुणः कोऽन्तश्च । शर्कुरस्तरुणः । णूत् स्तवने पोऽन्तश्च । नूपुरः तुलाकोटिः । निपूर्वात् तिष्ठतेः निष्ठुरः कर्कशः । निष्ठुरं काहलम् । व्यथेर्विथ् च । व्यथतेऽस्माज्जनः इत्यपादानेऽपि । विथुरः राक्षसः । मदिवात्योर्गोऽन्तश्च । मद्गुरः मत्स्यविशेषः । वागुरा मृगानायः । आदिग्रहणान्मन्यतेर्धश्च । मधुरः रसविशेष इत्यादि ।

मीमासिपाशिखाटिखाडिखार्जिकार्जिसार्जिकृपिवल्लिमण्डिभ्य ऊरः ॥४२७॥ एभ्य ऊरः प्रत्ययः स्यात् । मीङ्च् हिंसायाम् । मयूरः शिखी । मद्यां रौति मयूर इति पृषोदरादिषु संज्ञाशब्दानामनेकधा व्युत्पत्तिं लक्षयति । मसैच् परिमाणे । मसूरः अवरधान्यजातिः चर्मासनं च । पशिः सौत्रः । पश्यते गम्यते इति पशूरः ग्रामः । खट काङ्क्षे । खटूरः मणिविशेषः । खडण् भेदे । खडूरः खुरलीस्थानम् ।

खर्ज मार्जने च । खर्जूरः वृक्षविशेषः । कर्ज व्यथने । कर्जूरः स एव मलिनश्च । सर्ज अर्जने । सर्जूरः अहः । कृपौङ् सामर्थ्ये । कर्पूरः गन्धद्रव्यम् । वल्लि संवरणे । वल्लूरः शुष्कं मांसम् । मडु भूषायाम् । मण्डूरः धातुविशेषः ।

महिकणिचण्यणिपल्यलितलिमलिशलिभ्यो णित् ॥४२८॥ एभ्यो णिदुरः प्रत्ययः स्यात् । मह पूजायाम् । माहूरः शैलः । कण गतौ । काणूरः नागः । चण हिंसादानयोश्च । चाणूरः मल्लो विष्णुहतः । अण शब्दे । आणूरः ग्रामः । पल गतौ । पालूरं नाम नगरमान्ध्रराज्ये । अली भूषणादौ । आलूरः विटः । तलण् प्रतिष्ठायाम् । तालूरः जलावर्तः । मलि धारणे । मालूरः दानवः विल्वश्च । शल गतौ । शालूरः दर्दुरः ।

स्थाविडेः कित् ॥४२९॥ आभ्यां किदुरः प्रत्ययः स्यात् । ष्ठां गतिनिवृत्तौ । स्थूरः बठरः उच्चश्च । स्थूरा जङ्घाप्रदेशः । विड आक्रोशे । विडूरः बालवाये ग्रामः ।

सिन्दूरकर्चूरपत्तूरधुत्तूरादयः ॥४३०॥ एते ऊरप्रत्ययान्ता निपात्यन्ते । स्यन्देः सिन्द् च । सिन्दूरं चीनपिष्टम् । करोतेश्चोऽन्तश्च । कर्चूरः औषधविशेषः । पतेस्तोऽन्तश्च । पत्तूरं गन्धद्रव्यम् । धुवो द्विरुक्तस्तोऽन्तो ह्रस्वश्च । धुत्तूर उन्मत्तकः । दधातेर्धत्तूर इत्यन्ये । आदिग्रहणात् कस्तूरहारहूरादयो भवन्ति ।

कुगुपतिकथिकुथिकाठिकुठिकुटिगडिगुडिमुदिमूलिदंशिभ्यः केरः ॥४३१॥ एभ्यः किदेरः प्रत्ययः स्यात् । कुंङ् शब्दे । कुबेरः धनदः । गुंत् पुरीषोत्सर्गे । गुबेरं युद्धम् । पल्ल गतौ । पतेरः पक्षी पवनश्च । कथण् वाक्यप्रबन्धे । कथेरः कथकः कुहकः शकुन्तश्च । कुथच् पूतिभावे । कुथेरः शिडाकीसंभारः । कठ कृच्छ्रजीवने । कठेरः दरिद्रः । कुठिः सौत्रः । कुठेरः निःसृतसारः अर्जकश्च । कुटत् कौटिल्ये । कुटेरः शठः । गड सेचने । गडेरः मेघः प्रस्रवणशीलश्च । गुडत् रक्षायाम् । गुडेरः राजा पण्यं च बालभक्ष्यम् । मुदि हर्षे । मुदेरः मूर्खः । मूल प्रतिष्ठायाम् । मूलेरः वनस्पतिः । मूलेरं पण्यम् । दंशं दशने । दशेरः सर्पः सारमेयः जनपदश्च ।

शतेरादयः ॥४३२॥ शतेरादयः शब्दाः केरप्रत्ययान्ता निपात्यन्ते । शदॢंशातने तश्च । शतेरः वायुः तुषारश्च । आदिग्रहणात् गुधेरशृङ्गवेरनालिकेरादयो भवन्ति ।

कठिचकिसहिभ्य ओरः ॥४३३॥ एभ्य ओरः प्रत्ययः स्यात् । कठ कृच्छ्रजीवने । कठोरः अमृदुः चिरंतनश्च । चकि तृप्तौ च । चकोरः पक्षिविशेषः पर्वत-

विशेषश्च । षहि मर्षणे । सहोरः विष्णुः पर्वतश्च ।

कोरचोरमोरकिशोरघोरहोरादोरादयः ॥ ४३४ ॥ कोरादयः शब्दा ओरप्रत्ययान्ता निपात्यन्ते । कायतेश्चरतेर्म्रियतेश्च डित् । कोरः बालपुष्पम् । चोरः तस्करः । मोरः मयूरः । कृशेरिच्चोपान्त्यस्य । किशोरः तरुणः बालाश्वश्च । हन्तेर्डित् घश्च । घोरं कष्टम् । हुंग् हरणे । होरा निमित्तवादिनां चक्ररेखा । डुदांग्क् दाने, दोंच् छेदने वा । दोरः कटिसूत्रं तन्तुगुणश्च । आदिग्रहणादन्येऽपि ।

किशृहृभ्यः करः ॥४३५॥ एभ्यः करः प्रत्ययः स्यात् । किः सौत्रः । केकरः वक्रदृष्टिः । शृश् हिंसायाम् । शर्करा मत्स्यण्डिकादिः कर्कशः क्षुद्रपाषाणावयवश्च । वृगट् वरणे । वर्करः छागशिशुः ।

सूपुषिभ्यां कित् ॥४३६॥ आभ्यां कित् करः प्रत्ययः स्यात् । षूत् प्रेरणे । सूकरः वराहः । पुष् पुष्टौ । पुष्करं पद्मं तूर्यमुखं हस्तिहस्ताग्रम् आकाशं मुरजः तीर्थनाम च ।

अनिकाभ्यां तरः ॥४३७॥ आभ्यां तरः प्रत्ययः स्यात् । अनक् प्राणने । अन्तरं बहिर्योगोपसंव्यानयोः छिद्रमध्यविरहविशेषेषु च । कैं शब्दे । कातरः भीरुः।

इण्पूभ्यां कित् ॥४३८॥ आभ्यां कित् तरः प्रत्ययः स्यात् । इंण्क् गतौ । इतरः निर्दिष्टप्रतियोगी । पूगश् पवने । पूतरः जलजन्तुः ।

मीज्यजिमामद्यशौवासिकिभ्यः सरः ॥ ४३९ ॥ एभ्यः सरः प्रत्ययः स्यात् । मीङ्च् हिंसायाम् । मेसरः वर्णविशेषः । जिं अभिभवे । जेसरः शूरः । अज क्षेपणे च । वेसरः अश्वतरः। विसृग् गतावित्यस्य वा जठरेत्यादि निपातनादरे रूपम् । मांक् माने । मासरः आयामः । मदैच् हर्षे । मत्सरः क्रोधविशेषः । अशौटि व्याप्तौ । अक्षरं वर्णः मोक्षपदम् आकाशं च । अक्षेर्वा अरे रूपम् । वसं निवासे । वत्सरः संवत्सरः परिवत्सरः अनुवत्सरः अनुसंवत्सरः विवत्सरः उद्वत्सरः वर्षाभिधानानि । इडा मानेन वसन्त्यत्र कालावयवा इति इड्संवत्सरः, इडया मानेन वसन्त्यत्रेति इडावत्सरः वर्षविशेषाभिधाने । परिवत्सरादीन्यपि वर्णविशेषाभिधानानीत्येके । कि इत्यादौ स्मरन्ति । केसरः सिंहसटः पुष्पावयवः बकुलश्च । बाहुलकान्न षत्वम् ।

कृधूतन्यृषिभ्यः कित् ॥४४०॥ एभ्यः कित् सरः प्रत्ययः स्यात् । डुकृंग् करणे । कृसरः कृसरा वा विलेपिकाविशेषः वर्णविशेषश्च । धूत् विधूनने ।

भूसरः भिन्नवर्णः वायुः धान्यविशेषश्च । तनूयी विस्तारे । तसरः कौशेयसूत्रम् । ऋपैत् गतौ । ऋक्षरः कण्टकः ऋत्विक् च । ऋक्षरा तोयधारा ।

कृगृशदृदृगचतिखटिकटिनिषदिभ्यो वरट् ॥४४१॥ एभ्यष्टिद्वरः प्रत्ययः स्यात् । कृत् विक्षेपे । कर्वरः व्याघ्रः विष्किरः अञ्जलिश्च । कर्वरी भूमिः शिवा च । गृत् निगरणे । गर्वरः अहंकारः महिषश्च । गर्वरी महिषी संध्या च । शृ हिंसायाम् । शर्वरः सायाह्नः रुद्रः हिंस्रश्च । शर्वरं तमः अन्नं च । शर्वरी रात्रिः । दृश् विदारणे । दर्वरं वज्रम् । दर्वरी सेवा । वृगट् वरणे । वर्वरः कामः चन्दनं केशविशेषः लुब्धकश्च । वर्वरी नदी भार्या च । चतेग् याचने । चत्वरं चतुष्पथमरण्यं च । चत्वरी रथ्या देवता वेदिश्च । खट काङ्क्षे । खट्वरं रससंकीर्णशाकपाकः । कटे वर्षावरणयोः । कट्वरः व्यालाश्वः । कटवरी दधिविकारः । षदॢ विशरणादौ निपूर्वः । निषद्वदः कर्दमः वन्हिः कर्मकरः कन्दर्पः इन्द्रश्च । निषद्वरमासनम् । निषद्वरी प्रपा रात्रिः प्रमदा इन्द्राणी च ।

अश्नोतेरीचादेः ॥४४२॥ अशौटि व्याप्तावित्यस्माद्वरट् प्रत्यय ईकारश्चादेः । ईश्वरः विभुः । ईश्वरी स्त्री ।

नीमीकुतुचेर्दीर्घश्च ॥४४३॥ एभ्यो वरट् प्रत्ययः स्यात् दीर्घश्चैषाम् । णींग् प्रापणे । नीवरः पुरुषकारः । मींग्श् हिंसायाम् । मीवरः हिंस्रः समुद्रश्च । कुंङ् शब्दे । कूवरः रथावयवः । तुंक् वृत्यादिषु । तूवरः मन्दश्मश्रुः अजननीकश्च । चिंग्ट् चयने । चीवरं मुनिजनवासः निःसारं कन्था च ।

तीवरधीवरपीवरावछित्वरछत्वरगह्वरोपह्वरसंयद्वरोदुम्बरादयः ॥४४४॥ एते वरट्प्रत्ययान्ता निपात्यन्ते । तिम्यतेस्ती च, तीवतेर्वाऽरे तीवरं जलं व्यञ्जनं च । ध्यायतेर्धी च । धीवरः कैवर्तः । प्यायः प्यैङो वा पी च पीवतेर्वाऽरः । पीवरः मांसलः । छिनत्तेस्तः किच्च । छित्वरः शठः जर्जरः पिटकश्च । छादेर्णिलुकि ह्रस्वश्च । छत्वरः निर्भर्त्सकः निकुञ्जश्च । छत्वरं कुड्यहीनं गृहं शयनप्रच्छदः छदिश्च । गुहेरुच्चोतः । गह्वरं गहनं महाविलं भयानकं प्रत्यन्तदेशश्च । उपपूर्वात् ह्वो वादेर्लुक् च । उपह्वरं संधिः समीपं रहःस्थानं च । सम्पूर्वाद्यमेर्दश्च । संयद्वरः रणः संयमी नृपश्च । उन्देः किदुम्बान्तः । उदुम्बरः वृक्षविशेषः । आदिग्रहणात् उम्बरशम्बरादयो भवन्ति ।

कडेरेवराङ्गरौ ॥४४५॥ कडत् मदे इत्यस्मात् एवर अङ्गर इति प्रत्ययौ

स्याताम् । कडेवरं मृतशरीरम् । लत्वे—कलेवरम् । कडङ्करः वनस्पतिः ।

त्रट् ॥४४६॥ सर्वधातुभ्यस्त्रट् प्रत्ययः स्यात् । छादयतीति छत्रम् छत्री वा घर्मवारणम् । पातीति पात्रमूर्जितगुणाधारः साध्वादिः । पात्री भाजनम् । स्नायतेः स्नात्रम्, स्नानम् । राजते इति राष्ट्रं देशः । शिष्यतेऽनेन शास्त्रं ग्रन्थः । असूच् क्षेपणे । अस्त्रं धनुः ।

जिभृसृभ्रस्जिगमिनमिनश्यसिहनिविषेर्वृद्धिश्च ॥४४७॥ एभ्यस्त्रट् प्रत्ययो वृद्धिश्चैषां स्यात् । जिं अभिभवे । जैत्रः जयनशीलः । जैत्रं द्यूतम् । डुडुभृंग्क् पोषणे च । भार्त्रं पोषः यश्च भृतिं गृहीत्वा वहति । सृं गतौ । सार्त्रः आलयः। भ्रस्जींत् पाके । भ्राष्ट्रम् अम्बरीषम् । गम्लृं गतौ । गान्त्रं मनः शरीरं लोकश्च । णमं प्रह्वत्वे । नान्त्रं शिरः शाखा वैचित्र्यं च । नशौच् अदर्शने । नशो धुटीति नोऽन्तः । नांष्ट्रा यातुधानाः । अश्नोतेरश्नातेर्वा आष्ट्रम् आकाशः रश्मिश्च । हनंक् हिंसागत्योः । हान्त्रं रक्षः युद्धं वधश्च । विष्लृंकी व्याप्तौ । वैष्ट्रः विष्णुः वायुश्च । वैष्ट्रं यकृत् त्रिदिवं वेश्म च ।

दिवेर्द्यौ च ॥४४८॥ दीव्यतेस्त्रट् प्रत्ययो द्यौ चास्यादेशः । द्यौत्रं त्रिदिवं ज्योतिः विमानं प्रमाणं प्रतोदश्च ।

सूमूखन्युषिभ्यः कित् ॥४४९॥ एभ्यः कित् त्रट् प्रत्ययः स्यात् । षूत् प्रेरणे । सूत्रं तन्तुः शास्त्रं च । मूङ् बन्धने । मूत्रं प्रस्रावः । खनूग् अवदारणे । खात्रं कूर्दालः नडाकं ग्रामाधानमृत् चौरकृतं च छिद्रम् । उषू दाहे । उष्ट्रः क्रमेलकः।

स्त्री ॥४५०॥ स्यतेः सूतेः स्त्यायतेस्तृणातेर्वा त्रट् स्यात् ङिच्च । स्त्री योषित् ।

हुयामाश्रुवसिभसिगुवीपचिवचिधूयम्यमिमनितनिसादिछादिक्षिक्षदिलुपिपतिधूभ्यस्त्रः ॥४५१॥ एभ्यस्त्रः प्रत्ययः स्यात् । हुंक् दानादनयोः । होत्रं हवनं होत्रा ऋचः । यांक् प्रापणे । यात्रा प्रस्थानं यापनम् उत्सवश्च । मांक् माने । मात्रा प्रमाणं कालविशेषः स्तोकः गणना च । श्रुंट् श्रवणे । श्रोत्रं कर्णः । वसिक् आच्छादने । वस्त्रं वासः । भसिं जुहोत्यादौ स्मरन्ति । भस्त्रा चर्ममयमावपनम् उदरं च । गुंग् शब्दे । गोत्रः पर्वतः । गोत्रा पृथ्वी । गोत्रम् अन्ववायः । वींक् प्रजनादौ । वेत्रं वीरुद्विशेषः । डुपचींष् पाके । पक्त्रं पिठरं गार्हपत्यं च । वचंक् भाषणे । वक्त्रम् आस्यं छन्दोजातिश्च । धृङ्त् स्थाने च । धर्त्रः धर्मः वृक्षः रविश्च । धर्त्रं नभः गृहसूत्रं च । धर्त्रा द्यौः । यमूं उपरमे । यन्त्रं शरीरसन्धानम् अरघट्टादि

च । अम गतौ । अन्त्रं पुरीतत् । मनिंच् ज्ञाने । मन्त्रः छन्दः । तनूयी विस्तारे । तन्त्रं प्रसारितास्तन्तवः शास्त्रं समूहः कुटुम्बं च । षद्लृ विशरणादौ । सत्रं यज्ञः सदः दानं छत्रं यागविशेषश्च । छदण् संवरणे । छादयतीति छात्रः शिक्षकः । क्षित् निवासगत्योः । क्षेत्रं कर्षणभूमिः भार्या शरीरमाकाशं च । क्षद संवरणे सौत्रः । क्षत्रं राजबीजम् । लृपृलृंती छेदने । लोप्त्रम् अपहृतं द्रव्यम् । पत्लृ गतौ । पत्रं पर्ण यानं च । धूग्श् कम्पने । धोत्रं रज्जुः ।

श्वितेर्वश्च मो वा ॥४५२॥ श्विताङ् वर्णे इत्यस्मात् त्रः प्रत्ययो वकारस्य च मकारो वा । श्मेत्रं श्वेत्रं च रोगौ ।

गमेरा च ॥४५३॥ गम्लृं गतावित्यस्मात् त्रः प्रत्यय आकारश्चान्तादेशः । गात्रं शरीरम् । गात्रा खट्वावयवः ।

चिमिदिशंसिभ्यः कित्॥४५४॥एभ्यः कित् त्रः प्रत्ययः स्यात् । चिंग्ट् चयने । चित्रम् आश्चर्यम् आलेख्यं वर्णश्च । ञिमिदांच् स्नेहने । मित्रं सुहृत् । अमित्रः शत्रुः । मित्रः सूर्यः । शंसु स्तुतौ च । शस्त्रं स्तोत्रमायुधं च ।

पुत्रादयः ॥४५५॥ पुत्रादयः शब्दास्त्रप्रत्ययान्ता निपात्यन्ते । पुनाति पवते वा पितृपूतिमिति पुत्रः सुतः । यदाहुः–'पूतीति नरकस्याख्या दुःखं च नरकं विदुः' पुन्नाम्नो नरकात् त्रायत इति व्युत्पत्तिस्तु संज्ञाशब्दानामनेकधा व्याख्यानं लक्षयति । आदिग्रहणादन्येऽपि ।

वृग्नक्षिपचिवच्यमिनमिवपिवधियजिपतिकडिभ्योऽत्रः ॥ ४५६ ॥ एभ्योऽत्रः प्रत्ययः स्यात् । वृग्ट्वरणे । वरत्रा चर्मरज्जुः । णक्ष गतौ । नक्षत्रम् अश्विन्यादि । डुपचींष् पाके । पचत्रं रन्धनस्थाली । वचंक् भाषणे । वचत्रं वचनम् । अम गतौ । अमत्रं भाजनम् । णमं प्रह्वत्वे । नमत्रं कर्मारोपकरणम् । टूवमू उद्गिरणे । वमत्रं प्रक्षेपः । डुवपीं बीजसन्ताने । वपत्रं क्षेत्रम् । बधि बन्धने । बधत्रम् आयुधः वस्त्रं विषं शूरश्च । यजीं देवपूजादौ । यजत्रः यज्वा । यजत्रमग्निहोत्रम् । पत्लृ गतौ । पतत्रं बर्हं वाहनं व्योम च । कडत् मदे । कडत्रं दाराः । लत्वे–कलत्रं दारा जघनं च ।

सोर्विदः कित् ॥४५७॥ सुपूर्वाद् विदः कित्रः प्रत्ययः स्यात् । सुष्ठु वेत्ति विन्दति विद्यते वा सुविदत्रं कुटुम्बं धनं मङ्गलं च ।

कृतेः कृन्त् च ॥४५८॥ कृतैच् छेदने इत्यस्मात्रः प्रत्ययः स्यात् अस्य च

कृन्तादेशः । कृन्तत्रः मशकः । कृन्तत्रं छेदनं लाङ्गलाग्रं च ।

बन्धिवहिकटयहयादिभ्य इत्रः ॥४५९॥ एभ्य इत्रः प्रत्ययः स्यात् । बन्धंश् बन्धने । बन्धित्रं मन्थः । वहीं प्रापणे । वहित्रं वाहनं वहनं च । कटे वर्षावरणयोः । कटित्रं लेरुयचर्म । अशौटि व्याप्तौ अशश् भोजने वा । अशित्रं रश्मिः हविः अग्निः अन्नपानं च । आदिग्रहणात् लुनातेः लवित्रं कर्मद्रव्यम् । पुनातेः पवित्रं मङ्गल्यम् । भटतेः भटित्रं शूले पक्वमांसम् । कडतेः कडित्रं कटित्रमेव । अमतेः अमित्रःरिपुः इत्यादि ।

भूगृवादिचरिभ्यो णित् ॥४६०॥ एभ्यो णिदित्रः प्रत्ययः स्यात् । भू सत्तायाम् । भावित्रं त्रैलोक्यं निधानं भद्रं च । गृत् निगरणे । गारित्रं नभः अन्नपानम् आश्चर्यं च । वद व्यक्तायां वाचि । वादित्रम् आतोद्यम् । चर भक्षणे च । चारित्रं वृत्तं स्थित्यभेदश्च ।

तनितृलापात्रादिभ्य उत्रः ॥ ४६१ ॥ एभ्य उत्रः प्रत्ययः स्यात् । तनूयी विस्तारे । तनुत्रं कवचम् । तृ प्लवनतरणयोः । तरुत्रं प्लवः घासहारी च । लांक् आदाने । लोत्रम् अपहृतद्रव्यम् । पां पाने । पोत्रं हलमूकरयोर्मुखम् । त्रैङ् पालने । त्रोत्रमभयक्रिया । आदिग्रहणात् वृणोतेः वरुत्रम् अभिप्रेतमित्यादयः ।

शामाहयाशक्यस्यमिभ्यो लः ॥४६२॥ एभ्यो लः प्रत्ययः स्यात् । शोंच् तक्षणे । शाला सभा । मांक् माने । माला स्रक् । श्यैङ् गतौ । श्यालः पत्नीभ्राता । शक्लृंट् शक्तौ । शक्तः मनोज्ञदर्शनः मधुरवाक् शक्तश्च । अबुङ् शब्दे, अम गतौ । अम्लः अम्लश्च रसः ।

शुकशीमूभ्यः कित् ॥४६३॥ एभ्यः कित् लः प्रत्ययः स्यात् । शुक गतौ । शुक्लः सितो वर्णः । शीङ्क् स्वप्ने । शीलं स्वभावः व्रतं धर्मः समाधिश्च । मूङ् बन्धने । मूलम् वृक्षपादावयवः आदिः हेतुश्च ।

भिल्लाच्छभल्लसौविदल्लादयः ॥ ४६४ ॥ भिल्लादयः शब्दाः किल्लप्रत्ययान्ता निपात्यन्ते । भिदेर्लश्च । भिल्लः अन्त्यजातिः । अच्छपूर्वात् भलेः अच्छभल्लः ऋक्षः । सुपूर्वाद् विदेरलोऽन्तः सोश्च वृद्धिः । सौविदल्लः कञ्चुकी । आदिग्रहणादल्लपल्लीरल्लादयोऽपि भवन्ति ।

मृदिकन्दिकुण्डिमण्डिमड्डिपटिपाटिशकिकेवृदेवृकमियमिशलिकलिपलिगुध्वञ्चिचञ्चिचपिवहिदिहिकुहितृसृपिशितुसिकुस्यनिद्रमेरलः ॥

॥४६५॥ एभ्योऽलः प्रत्ययः स्यात्। मृद्शक्षोदे। मर्दलः मुरजः। कदु रोदनाह्वानयोः। कन्दलः प्ररोहः। कुडुङ् दाहे। कुण्डलं कर्णाभरणम्। मडु भूषायाम्। मण्डलं देशः परिवारश्च। मगु गतौ। मङ्गलं शुभम्। पट गतौ। पटलं छदिः समूहः आवपनं नेत्ररोगश्च। ण्यन्तात्–पाटलः वर्णः। शकॢंट् शक्तौ। शकलं मित्तमसारं च। केवृङ् सेचने। केवलं परिपूर्णं ज्ञानम् असहायं च। देवृङ् देवने। देवलः ऋषिः देवव्रातः क्रीडनश्च। कमूङ् कान्तौ। कमलं पद्मम्। णिडि कामलो नेत्ररोगः। यमूं उपरमे। यमलं युग्मम्। शल गतौ। शललं शेषाङ्गरुहशङ्कुः। कलि शब्दसंख्यानयोः। कललं गर्भमथमावस्था। पल गतौ। पललं भृष्टतिलातसीचूर्णम्। गुंङ् शब्दे। गवलः महिषः। धृग्श् कम्पने। धवलः श्वेतः। अञ्चू गतौ च। अञ्चलः वस्त्रान्तः। चञ्चू गतौ। चञ्चलः अस्थिरः। चप सान्त्वने। चपलः स एव। वहीं प्रापणे। वहलं सान्द्रम्। दिहींक् लेपे। देहली द्वाराधःपट्टः। कुहणि विस्मापने। कोहलः भरतपुत्रः। बाहुलकाद् गुणः। तॄप्लवनतरणयोः। तरलः अधीरः हारमध्यमणिश्च। सॄ गतौ–सरलः अकुटिलः वृक्षविशेषश्च। पिशत् अवयवे। पेशलः मनोज्ञः। तुस शब्दे। तोसलाः जनपदः। कुसच् श्लेषे। कोसलाः जनपदः। अनक् प्राणने। अनलः अग्निः। द्रम गतौ। द्रमलं जलम्।

नहिलङ्गेर्दीर्घश्च ॥४६६॥ आभ्यामलः प्रत्ययोऽनयोश्च दीर्घः स्यात्। हणींच् बन्धने। नाहलः म्लेच्छः। लगु गतौ। लाङ्गलं हलम्।

ऋजनेर्गोऽन्तश्च ॥४६७॥ आभ्यामलः प्रत्ययो गकारश्चान्तः स्यात्। ऋंक् गतौ। अर्गला परिघः। जनैचि प्रादुर्भावे। जङ्गलं निर्जलो देशः।

तृपिवपिकुपिकुशिकुटिवृषिमुसिभ्यः कित् ॥४६८॥ एभ्यः किदलः प्रत्ययः स्यात्। तृपौच् प्रीतौ। तृपला लता। तृपलं शुष्कपर्णं शुष्कतृणं च। डुवपीं बीजसन्ताने। उपलः पाषाणः। कुपच् कोपे। कुपलः प्रवालः। कुशच् श्लेषणे। कुशलः मेधावी। कुशलम् आरोग्यम्। कुटत् कौटिल्ये। कुटलः ऋषिः। वृषू सेचने। वृषलः दासजातिः। मुसच् खण्डने। मुसलम् अवहननम्।

कोर्वा ॥४६९॥ कुंङ् शब्दे इत्यस्मादलः प्रत्ययः स च किद्वा। कुवलं बदरम्। कुवली क्षुद्रबदरी। कवलः ग्रासः।

शमेर्बश्च वा ॥४७०॥ शमूच् उपशमे इत्यस्मादलः प्रत्ययो मकारस्य च बकारो वा। शबलः कल्माषः। शमलं पुरीषं दुरितं च।

छोडग्गादिर्वा ॥४७१॥ छोंच् छेदने इत्यस्मात् किदलः प्रत्ययः स च डगादिर्गादिश्च वा। छगलः छागः। छागलः ऋषिः। छलं वचनविघातोऽर्थविकल्पोपपत्या।

मृजिखन्याहनिभ्यो डित् ॥ ४७२ ॥ एभ्यो डिदलः प्रत्ययः स्यात्। मृजौक् शुद्धौ। मलं बाह्यं रजः अन्तर्दोषश्च। खनूग् अवदारणे। खलः दुर्जनः निष्पीडितरसं पिण्याकादि। खलं सस्यग्रहणभूमिः। हनंक् हिंसागत्योः आङ्पूर्वः। आहलः विषाणं नखरश्च।

स्थो वा ॥४७३॥ तिष्ठतेरलः प्रत्ययः स च डिद्वा। स्थलं प्रदेशविशेषः। स्थालं भाजनम्।

मुरलोरलविरलकेरलकपिञ्जलकज्जलेज्जलकोमलभृमलसिंहलकाहलशूकलपाकलयुगलभगलविदलकुन्तलोत्पलादयः॥४७४॥ एतेऽलप्रत्ययान्ता निपात्यन्ते। मुर्व्युर्व्योर्वलोपः किच्च। मुरलाः जनपदः। उरलः उत्कटः। विपूर्वाद् रमेर्डिच्च। विरलः असंहतः। किरः केर् च। केरलाः जनपदः। कम्पेरिञ्जोऽन्तो नलोपश्च। कपिञ्जलः गौरतित्तिरिः। कषीषोर्जोऽन्तो जश्च। कज्जलं मषी। इज्जलः वृक्षविशेषः। कमेरत ओच्च। कोमलं मृदु। भ्रमेर्भृम च। भृमलः वायुः कृमिजातिश्च। भृमलं चक्रम्। हिंसेराद्यन्तविपर्ययश्च। सिंहलाः जनपदः। कणेर्हो दीर्घश्च। काहलः अव्यक्तवाक्। काहला वाद्यविशेषः। शकेरूच्चास्य। शूकलः अश्वाधमः। पचेः पाक् च। पाकलः हस्तिज्वरः। युजेः कित् ग च। युगलं युग्मम्। भातेर्गोऽन्तो ह्रस्वश्च। भगलः मुनिः। विन्देर्नलोपश्च। विदलं वेणुदलम्। कनेरत उत् तोऽन्तश्च। कुन्तलाः जनपदः केशाश्च। उत्पूर्वात् पिबतेर्ह्रस्वश्च। उत्पलं पद्मम्। आदिग्रहणात् सुवर्चलामुद्गलपुद्गलादयो भवन्ति।

ऋकृसृवृतनितमिचषिचपिकपिकीलिपलिबलिपश्चिमङ्गिगण्डिमण्डिचण्डितण्डिपिण्डिनन्दिनदिशकिभ्य आलः ॥ ४७५ ॥ एभ्य आलः प्रत्ययः स्यात्। ऋंक् गतौ। अरालं वक्रम्। डुकृंग् करणे। करालम् उच्चम्। मृंत् प्राणत्यागे। मरालः हंसः महाँश्च। वृगट् वरणे। वरालः वदान्यः। तनूयी विस्तारे। तनालं जलाशयः। तमूच् काङ्क्षायाम्। तमालः वृक्षः व्यालश्च। चषी भक्षणे। चषालं यज्ञद्रव्यम्। कपिः सौत्रः। कपालं घटाद्यवयवः शिरोऽस्थि च। कील बन्धे। कीलालं मद्यं जलमसृक् च। पल गतौ। पलालम् अकणो व्रीह्यादिः। बल प्राणनधा-

न्यावरोधयोः । बलालः वायुः । पचुङ् व्यक्तीकरणे । पञ्चालः ऋषिः राजा च । पञ्चाला जनपदः । मगु गतौ । मङ्गालः देशः । गडु वदनैकदेशे । गण्डालः मत्तहस्ती । मडु भूषायाम् । मण्डालः ऋषिः राजा च । चडुङ् कोपे । चण्डालः श्वपचः ।

‘ अकृतज्ञमकार्यज्ञं दीर्घरोषमनार्जवम् ।
चतुरो विद्धि चण्डालान् जन्मना चेति पञ्चमम् ॥ १ ॥

तडुङ् आघाते । तण्डालः क्षुपः । पिडुङ् संघाते । पिण्डालः कन्दजातिः । डुनदु समृद्धौ । नन्दालः राजा । णद अव्यक्ते शब्दे । नदालः नादवान् । शक्लृंट् शक्तौ । शकालाः जनपदः मूर्धवनी च ।

कूलिपिलिविशिबिडिमृडिकुणिपीप्रीभ्यः कित् ॥ ४७६ ॥ एभ्यः किदालः प्रत्ययः स्यात् । कुल बन्धुसंस्त्यानयोः । कुलालः कुम्भकारः । पिलत् क्षेपे । पिलालं श्लिष्टम् । विशंत् प्रवेशने । विशालं विस्तीर्णम् । विड आक्रोशे । विडालः मार्जारः । लत्वे बिलालः स एव । मृणत् हिंसायाम् । मृणालं बिसम् । कुणत् शब्दोपकरणयोः । कुणालः कृतमालः कटविशेषश्च । कुणालं नगरं कठिनं च । पीङ्च् पाने । पियालः वृक्षः । पियालं शाकं वीरुच्च । प्रीङ्च् प्रीतौ । प्रियालः पियालः ।

भजेः कगौ च ॥ ४७७ ॥ भजीं सेवायामित्यस्मात् किदालः प्रत्ययः कगौ चान्तादेशौ स्याताम् । भकालम् भगालं । उभयं कपालम् ।

सर्तेर्गोऽन्तश्च ॥ ४७८ ॥ सृं गतावित्यस्मात् किदालः प्रत्ययः स्याद् गश्चान्तः । सृगालः क्रोष्टा ।

पतिकृलूभ्यो णित् ॥४७९॥ एभ्यो णिदालः प्रत्ययः स्यात् । पत्लृ गतौ । पातालं रसातलम् । डुकृंग् करणे । कारालं लेपद्रव्यम् । लूग्श् छेदने । लावालः उदन्तः ।

चात्वालकङ्कालहिन्तालवेतालजम्बालशब्दालममाप्तालादयः॥४८०॥ एते आलप्रत्ययान्ता निपात्यन्ते । चतेर्वोऽन्तो दीर्घश्च । चात्वालः यज्ञगर्तः । कचेः स्वराद्योन्तः कश्च । *कङ्कालः कलेवरम् । हिंसेस्त च । हिन्तालः वृक्षविशेषः ।* वियस्तोऽन्तो गुणश्च । वेतालः रजनीचरविशेषः । जनेर्वोऽन्तश्च । जम्बालः कर्दमः शैवलं च । शमेर्कुषेर्वा शब्दभावश्च । शब्दालः शब्दनशीलः । मवेर्वलोपो माप्तश्चान्तः । ममाप्तालः मतिः स्नेहः पुत्रादिषु स्नेहबन्धनं च । आदिशब्दाच्चक्र-

वालकरवालालवालादयो भवन्ति ।

कल्यनिमहिद्रमिजटिभटिकुटिचण्डिशण्डितुण्डिपिण्डिभूकुकिभ्य इलः ॥ ४८१ ॥ एभ्य इलः प्रत्ययः स्यात् । कलि शब्दसंख्यानयोः । कलिलं गहनं पापम् आत्माधिष्ठितं च शुक्रार्तवम् । अनक् प्राणने । अनिलः वायुः । मह पूजायाम् । महिला स्त्री । द्रम गतौ । द्रमिलाः त्रैराज्यवासिनः । जट झट संघाते । जटिलः जटावान् । भट भृतौ । भटिलः श्वा सेवकश्च । कुटत् कौटिल्ये । कुटिलं वक्रम् । चडुङ् कोपे । चण्डिलः श्वा क्रोधनः नापितश्च । शडुङ् रुजायाम् । शण्डिलः ऋषिः । तुडुङ् तोडने । तुण्डिलः वाग्जाली । पिडुङ् संघाते । पिण्डिलः मेघः हिंस्रः हिमः गणकश्च । भू सत्तायाम् । भविलः मुनिः समर्थः गृहं बहुनेता च । कुकि आदाने । कोकिलः परभृतः ।

भण्डेर्नलुक् च वा ॥ ४८२ ॥ भडुङ् परिभाषणे इत्यस्मात् इलः प्रत्ययो नकारस्य च लुग्वा । भडिलः ऋषिः पिशाचः शत्रुश्च । भण्डिलः श्वा दूतः ऋषिश्च ।

गुपिमिथिध्रुभ्यः कित् ॥ ४८३ ॥ एभ्यः किदिलः प्रत्ययः स्यात् । गुपौ रक्षणे । गुपिलं गहनम् । मिथृग् मेधाहिंसयोः । मिथिला नगरी । ध्रुं स्थैर्ये च । ध्रुविलः ऋषिः ।

स्थण्डिलकपिलाविचाकिलादयः ॥४८४॥ स्थण्डिलादयः शब्दा इलप्रत्ययान्ता निपात्यन्ते । स्थलेः स्थण्ड् च । स्थण्डिलं व्रतिशयनवेदिका । कबेः प च । कपिलः वर्णः ऋषिश्च । विचेरकोऽन्तश्च । विचकिलः मल्लिकाविशेषः । आदिग्रहणाद् गोभिलनिकुम्भिलादयो भवन्ति ।

हृषिवृतिचटिपटिशकिशङ्कितण्डिमङ्ग्युत्कण्ठिभ्य उलः ॥४८५॥ एभ्य उलः प्रत्ययः स्यात् । हृषच् तुष्टौ, हृषू अलीके वा । हर्षुलः हर्षवान् कामी मृगश्च । वृतूङ् वर्तने । वर्तुलः वृत्तः । चटण् भेदे । चटुलः चञ्चलः । पट गतौ । पटुलः वाग्मी । शक्लृंट् शक्तौ । शकुलः मत्स्यः । शकुङ् शङ्कायाम् । शङ्कुला क्रीडनशङ्कुः बन्धनभाण्डम् आयुधं च । तडुङ् ताडने । तण्डुलो निस्तुषो व्रीह्यादिः । मगु गतौ । मङ्गुलं न्यायापेतम् । कठुङ् शोके उत्पूर्वः । उत्कण्ठुलः उत्कण्ठावान् ।

स्थावाङ्किबंहिबिन्दिभ्यः किन्नलुक् च ॥४८६॥ एभ्यः किदुलः प्रत्ययो नकारस्य च लुक् स्यात् । ष्ठां गतिनिवृत्तौ । स्थुलं पटकुटीविशेषः । वकुङ् कौटिल्ये । बकुलः केसरः ऋषिश्च । बहुङ् वृद्धौ । बहुलं प्रचुरम् । बहुलः प्रासकः कृष्णपक्षश्च ।

बहुलाः कृत्तिकाः । बहुला गौः । विदु अवयवे । विदुलः वेतसः ।

कुमुलतुमुलनिचुलवञ्जुलमञ्जुलपृथुलविशंस्थुलाङ्गुलमुकुलशष्कुलादयः ॥४८७॥ एते उलप्रत्ययान्ता निपात्यन्ते । कमितम्योरत उच्च । कुमुलं कुसुमं हिरण्यं च । कुमुलः शिशुः कान्तश्च । तुमुलं व्यामिश्रयुद्धं संकुलं च । निजेः किच्चश्च । निचुलः वञ्जुलः । वजेः स्वराद्वोऽन्तश्च । वञ्जुलः निचुलः । मञ्जिः सौत्रः । मञ्जुलं मनोज्ञम् । प्रथेः पृथ् च । पृथुलः विस्तीर्णः । विपूर्वात् शंसेस्थोऽन्तश्च । विशंस्थुलः व्यग्रः । अञ्जेर्ग च । अङ्गुलम् अष्टयवप्रमाणम् । मुचेः कित् कश्च । मुकुलः अविकसितपुष्पम् । शकेः स्वरात् षोऽन्तश्च । शष्कुली भक्ष्यविशेषः कर्णावयवश्च । आदिग्रहणाल्लकुलवल्गुलादयो भवन्ति ।

पिञ्जिमञ्जिकण्डिगण्डिबलिबधिवञ्चिभ्य ऊलः ॥४८८॥ एभ्यः ऊलः प्रत्ययः स्यात् । पिजुण् हिंसाबलदाननिकेतनेषु । पिञ्जूलः हस्तिबन्धनपाशः राशिः कुलपतिश्च । मञ्जिः सौत्रः । मञ्जूला मृदुभाषिणी । कडुङ् मदे । कण्डूलः अशिष्टो जनः । गडु वदनैकदेशे । गण्डूलः कृमिजातिः । बल प्राणनधान्यावरोधयोः । बलूलः ऋषिः मेघः मासश्च । बधि बन्धने । बधूलः हस्ती घातकः रसायनं तन्त्रकारश्च । वञ्चिण् प्रलम्भने । वञ्चूलः हस्ती मत्स्यमारपक्षी च ।

तमेर्वोऽन्तो दीर्घस्तु वा ॥४८९॥ तमूच् काङ्क्षायामित्यस्मादूलः प्रत्ययो वोऽन्तश्च स्याद् दीर्घस्तु वा । ताम्बूलं तम्बूलं उभयं पूगपत्रचूर्णसंयोगः ।

कुलिपुलिकुशिभ्यः कित् ॥४९०॥ एभ्य ऊलः प्रत्ययः स्यात् स च कित् । कुल बन्धुसंस्त्यानयोः । कुलूलः कृमिजातिः । पुल महत्त्वे । पुलूलः वृक्षविशेषः । कुशच् श्लेषे । कुशूलः कोष्ठः ।

दुकूलकुकूलबब्बूललाङ्गूलशार्दूलादयः ॥४९१॥ दूकूलादयः शब्दा ऊलप्रत्ययान्ता निपात्यन्ते । दुक्रोः कोऽन्तश्च । दूकूलं क्षौमं वासः । कुकूलं कारीषोऽग्निः । बधेर्वोऽन्तो वश्च । बब्बूलः वृक्षविशेषः । लङ्गेर्दीर्घश्च । लाङ्गूलं वालधिः । शृणातेर्दीऽन्तो वृद्धिश्च । शार्दूलः व्याघ्रः । आदिग्रहणाद् मार्जूलकञ्चूलादयो भवन्ति ।

महेरेलः ॥४९२॥ मह पूजायामित्यस्मादेलः प्रत्ययः स्यात् । महेला स्त्री ।

कटिपटिकाण्डिगण्डिशकिकपिचाहिभ्य ओलः ॥४९३॥ एभ्य ओलः प्रत्ययः स्यात् । कटे वर्षावरणयोः । कटोलः कटविशेषः वादित्रविशेषश्च । कटोला ओषधिः । पट गतौ । पटोला वल्लीविशेषः । कडु मदे । कण्डोलः विदलभाजन-

विशेषः । गडु वदनैकदेशे । गण्डोलः कृमिविशेषः । शक्लृट् शक्तौ । शकोलः शक्तः । कपिः सौत्रः । कपोलः गण्डः । चह कलकने । चहोलः उपद्रवः ।

ग्रहाद्बुधः कित् ॥४९४॥ ग्रहेराकारान्तेभ्यश्च धातुभ्यः किदोलः प्रत्ययः स्यात् । ग्रहीश् उपादाने । गृहोलः बालिशः । कायतेः कोलः बदरी वराहश्च । गायतेः गोलः वृत्ताकृतिः । गोला गोदावरी बालरमणकाष्ठं च । पातेः पोला तालाख्यं कपाटबन्धनं परिखा च । लातेः लोलः चपलः । ददातेर्दयतेर्द्यतेर्वा दोला प्रेङ्खणम् ।

पिच्छोलकल्लोलकक्कोलमक्कोलादयः ॥ ४९५ ॥ पिच्छोलादयः शब्दा ओलप्रत्ययान्ता निपात्यन्ते । पीडेः पिच्छ् च । पिच्छोलः वादित्रविशेषः । कलेर्लोऽन्तश्च । कल्लोल ऊर्मिः । कचिमच्योः कादिः । कक्कोली लताविशेषः । मक्कोलः सुधाविशेषः । आदिग्रहणादन्येऽपि ।

वलिपुषेः कलक् ॥४९६॥ आभ्यां कित् कलः प्रत्ययः स्यात् । वलि संवरणे । वल्कलं तरुत्वक् । पुष् पुष्टौ । पुष्कलं समग्रं युद्धं शोभनं हिरण्यं धान्यं च ।

मिगः खलश्चैच ॥४९७॥ डुमिंग्ट् प्रेक्षणे इत्यस्मात् खलश्चकारात् कलश्च प्रत्यय एकारश्चान्तादेशः स्यात् । मेखला गिरिनितम्बः रशना च । मेकलः नर्मदाप्रभवोऽद्रिः । मिग एत्ववचनमालबाधनार्थम् ।

शृगो नोऽन्तो ह्रस्वश्च ॥ ४९८ ॥ शृङ् हिंसायामित्यस्मात् खलः प्रत्ययो नकारोऽन्तो ह्रस्वश्च स्यात् । शृङ्खला लोहरज्जुः । शृङ्खलः शृङ्खलं वा ।

शामिकामिपालिभ्यो बलः ॥४९९॥ एभ्यो बलः प्रत्ययः स्यात् । शम्बलं पाथेयम् । कमूङ् कान्तौ । कम्बलः ऊर्णापटः । पल गतौ । पल्वलम् अकृत्रिमोदकस्थानविशेषः ।

तुल्वलेल्वलादयः ॥५००॥ तुल्वलादयः शब्दा वलप्रत्ययान्ता निपात्यन्ते । तुलील्योर्णिलुग्गुणाभावश्च । तुल्वलः ऋषिः, यस्य तौल्वलिः पुत्रः । इल्वलः असुरो योऽगस्त्येन जग्धः मत्स्यः यूपश्च । इल्वलाः तिस्रो मृगशिरःशिरस्ताराः । आदिग्रहणात् शाल्वलादयो भवन्ति ।

शीङस्तलकपालवालण्वलण्वलाः ॥५०१॥ शीङ्क् स्वप्ने इत्यस्मात्तलकपालवालण्वलण्वल इत्येते प्रत्ययाः स्युः । शीतलमनुष्णम् । शेपालम् । जपादिलात् पस्य वत्वे शेवालम्, शैवालम्, शैवलम्, शेवलम्, पञ्चकमपि जलमलवाचि ।

रुचिकुटिकुषिकशिशालिद्रुभ्यो मलक् ॥५०२॥ एभ्यः किन्मलः प्रत्ययः स्यात् । रुचि अभिप्रीत्यां च । रुक्मलं सुवर्णम् । न्यङ्क्वादित्वात् कलम् । कुटत् कौटिल्ये । कुट्मलं मुकुलम् । कुष्श् निष्कर्षे । कुष्मलं तदेव बिलं च । कश शब्दे तालव्यान्तः । कश्मलं मलिनम् । शाडृङ् श्लाघायाम् । लत्वे-शाल्मलः वृक्षविशेषः। द्रुं गतौ द्रुमलं जलं वनं च ।

कुशिकामिभ्यां कुलकुमौ च ॥५०३॥ आभ्या मलक् प्रत्ययः स्यात् अनयोश्च यथासंख्यं कुल कुम इत्यादेशौ च । कुशृच् [१]लेषणे । कुल्मलं छेदनम् । कमूङ् कान्तौ । कुम्मलं पद्मम् ।

पतेः सलः ॥५०४॥ पत्लृ गतावित्यस्मात् सलः प्रत्ययः स्यात् । पत्सलः प्रहारः गोमान् आहारश्च ।

लटिखटिखलिनलिकण्यशौसृशृकृगृदृपृशपिड्याशालापदिहसीण्भ्यो वः ॥५०५॥ एभ्यो वः प्रत्ययः स्यात् । लट बाल्ये । लट्वा क्षुद्रचटका कुसुम्भं च । खट काङ्क्षे । खट्वा शयनयन्त्रम् । खल संचये च । खल्वं निम्नं खलीनं च । खल्वा इतिः । णल गन्धे । नल्वः भूमानविशेषः । कण शब्दे । कण्वः ऋषिः । कण्वं पापम् । अशौटि व्याप्तौ । अश्वः तुरगः । सृ गतौ । सर्वः शम्भुः । सर्वादिश्च कृत्स्नार्थे । शृश् हिंसायाम् । शर्वः शम्भुः । कृत् विक्षेपे । कर्वः आखुः समुद्रः निष्पत्तिक्षेत्रं च । गृत् निगरणे । गर्वः अहंकारः। दृश् विदारणे। दर्वाः जनपदः। दर्वः हिंस्रः । पृश् पालनपूरणयोः । पर्वः रुद्रः काण्डं च । शपीं आक्रोशे । शप्वः आक्रोशः । श्यैङ् गतौ । श्यावः वर्णः । शोंच् तक्षणे । शावः तिर्यग्बालः । लांक् आदाने । लावः पक्षिजातिः । पदिंच् गतौ । पद्वः रथः वायुः भूर्लोकश्च । हस शब्दे । ह्रस्वः लघुः । इंण्क् गतौ । एवः केवलः । एवेत्यवधारणे निपातश्च ।

शीङापो ह्रस्वश्च वा ॥५०६॥ आभ्यां वः प्रत्ययो ह्रस्वश्च वा । शीङ्क् स्वप्ने । शिवं क्षेमं सुखं मोक्षपदं च । शिवा हरीतकी । शेवं धनम् । शेवः अजगरः सुखकृच्च । शेवा प्रचला निद्राविशेषः मेदश्च । आप्लृंट् व्याप्तौ । अप्वा देवायुधम् । आप्वा वायुः ।

उर्दे र्धश्च ॥५०७॥ उर्दि मानकीडयोश्चेत्यस्माद् वः प्रत्ययो धकारश्चान्तादेशः। ऊर्ध्वः उद्गर्भा । ऊर्ध्वमुपरि । ऊर्ध्वं परस्तात् ।

गन्धेरर्चान्तः ॥५०८॥ गन्धिण् अर्दने इत्यस्माद् वः प्रत्ययोऽर् चान्तः

स्यात् । गन्धर्वः गाथकः देवविशेषश्च ।

लषेर्लिष् च वा ॥५०९॥ लषी कान्तौ इत्यस्माद् वः प्रत्ययोऽस्य च लिष् इत्यादेशो वा । लिष्वः लम्पटः कान्तः दयितश्च । लष्वः अपत्यम् ऋषिस्थानं च ।

सलेर्णिद्वा ॥५१०॥ सल गतावित्यस्माद् वः प्रत्ययः स च णिद्वा स्यात् । साल्वाः सल्वाश्च जनपदः क्षत्रियाश्च ।

निघृषीष्यृषिश्रुप्रुषिकिणिविशिविल्यविपृभ्यः कित् ॥५११॥ एभ्यः किद्वः प्रत्ययः स्यात् । घृषू संघर्षे निपूर्वः–निघृष्वः अनुकूलः सुवर्णनिकषोपलः वायुः क्षुरश्च । इषत् इच्छायाम् । इष्वः अभिलषितः आचार्यश्च । इष्वा अपत्यसंततिः। ऋषैत् गतौ । ऋष्वः रिपुः हिंस्रश्च । रिषेर्व्यञ्जनादेः केचिदिच्छन्ति । रिष्वः । स्रुं गतौ । स्रुवः हवनभाण्डम् । प्रुषू दाहे । प्रुष्वा निर्वृत्तिः जललवश्च । किणः सौत्रः । किण्वं सुराबीजम् । विशंत् प्रवेशने । विश्वं जगत् सर्वादि च । विलत् भेदने । विल्वः मालूरः । अव रक्षणादौ । अवेत्यव्ययम् । पॄश् पालनपूरणयोः । पूर्वः दिक्कालनिमित्तः ।

नञो भुवो डित् ॥५१२॥ नञ्पूर्वाद् भवतेर्डिद्वः प्रत्ययः स्यात् । अभ्वम् अद्भुतम् ।

लिहेर्जिह्व च ॥५१३॥ लिहींक् आस्वादने इत्यस्मात् वः प्रत्ययोऽस्य जिह्व इत्यादेशः स्यात् । जिह्वा रसना ।

प्रह्वाह्वायह्वास्वच्छेवाग्रीवामीवाव्वादयः ॥५१४॥ प्रह्वादयः शब्दा वप्रत्ययान्ता निपात्यन्ते । प्रपूर्वस्य ह्वयतेर्वादेर्लोपो यततेर्वा हादेशश्च । प्रह्वः प्रणतः। आह्वयतेराह च । आह्वा कण्ठः । यमेर्यसेर्वा हश्च । यह्वा बुद्धिः । अस्यतेरलोपश्च । स्वः आत्मा आत्मीयं ज्ञातिः धनं च । छ्यतेश्छिदेर्वा छेभावश्च । छेवा उच्छित्तिः । ग्रन्थतेर्गिरतेर्वा ग्रीभावश्च । ग्रीवा । अमेरीच्चान्तो दीर्घश्च वा । अमीवा बुभुक्षा । आमीवा व्याधिः । मिनोतेर्दीर्घश्च । मीवा मनः उदकं च । तदेतत्रयमपि तन्त्रेणावृत्त्या वा निर्दिष्टम् । अवतेर्वलोपाभावश्च । अव्वा माता । आदिशब्दात् प्वादयो भवन्ति ।

वडिवाटिपेलुचाणिपाणिपल्लिवल्लेरवः ॥५१५॥ एभ्योऽवः प्रत्ययः स्यात्। वड आग्रहणे सौत्रः । वडवा अश्वा । वट वेष्टने । वटवा सैव । पेलृ गतौ । पेलवं निःसारम् । चण हिंसादानयोश्च । चणवः अवरधान्यविशेषः । पणि व्यवहा-

रस्तुत्योः । पणवः वाद्यजातिः । पल्ल गतौ । पल्लवः किसलयम् । वल्लि संवरणे । वल्लवः गोपः ।

माणिवसेर्णित् ॥५१६॥ आभ्यां णिदवः प्रत्ययः स्यात् । मण शब्दे । माणवः शिष्यः । वसं निवासे । वासवः शक्रः ।

मलेर्वा ॥५१७॥ मलि धारणे इत्यस्मादवः प्रत्ययः स च णिद्वा । मालवाः जनपदः । मलवः दानवः ।

कितिकुडिकुरिमुरिस्थाभ्यः कित् ॥५१८॥ एभ्यः किदवः प्रत्ययः स्यात् । कित् निवासे । कितवः द्यूतकारः । कुडत् बाल्ये च । कुडवः मानम् । लत्वे—कुलवः स एव नालीद्वयं च । कुरत् शब्दे । कुरवः पुष्पवृक्षजातिः । मुरत् संवेष्टने । मुरवः मानविशेषः वाद्यजातिश्च । ष्ठां गतिनिवृत्तौ । स्थवः अजावृषः ।

कैरवभैरवमुतवकारण्डवादीनवादयः ॥ ५१९ ॥ कैरवादयः शब्दा अवप्रत्ययान्ता निपात्यन्ते । कुम्भृगोः कैरभैरावादेशौ । कैरवं कुमुदम् । भैरवः भर्गः भयानकश्च । मिनोतेर्मुत् च । मुतवः मानविशेषः । कृगोऽण्डोन्तो वृद्धिश्च । कारण्डवः जलपक्षी । आङ्पूर्वादीङो नोऽन्तश्च । आदीनवः दोषः । आदिग्रहणात् कोद्रवकोटवादयोऽपि भवन्ति ।

शृणातेरावः ॥५२०॥ शृश् हिंसायामित्यस्मादावः प्रत्ययः स्यात् । शरावः मल्लकः ।

प्रथेरिवट् पृथ् च ॥५२१॥ प्रथिष् प्रख्याने इत्यस्मादिवट् प्रत्ययोऽस्य च पृथ् इत्यादेशः स्यात् । पृथिवी भूः ।

पलिसचेरिवः ॥५२२॥ पलण् रक्षणे षचि सेवने इत्याभ्यामिवः प्रत्ययः स्यात् । पलिवः गोप्ता । सचिवः सहायः ।

स्पृशेः श्वः पार् च ॥५२३॥ स्पृशंत् संस्पर्शे इत्यस्मात् श्वः प्रत्ययोऽस्य च पारित्यादेशः स्यात् । पार्श्वं स्वाङ्गं समीपं च । पार्श्वः भगवाँस्तीर्थकरः ।

कुडितुड्यडेरुवः ॥५२४॥ एभ्य उवः प्रत्ययः स्यात् । कुडत् बाल्ये च । कुडुवं प्रसृतहस्तमानम् । तुडत् तोडने । तुडुवम् अपनेयद्रव्यम् । अड उद्यमे । अडुवः प्लवः ।

नीहृविणध्यैप्यापादाम्याभ्यस्त्वः ॥५२५॥ एभ्यस्त्वः प्रत्ययः स्यात् । णींग् प्रापणे । नेत्वं द्यावापृथिव्यौ चन्द्रश्च । हुंक् दानादनयोः । होत्वं यजमानः

समुद्रश्च । इंण्क् गतौ । एत्वं गमनपरम् । ध्यैं चिन्तायाम् । ध्यात्वं ब्राह्मणः । प्यैङ् वृद्धौ । प्यात्वं ब्राह्मणः समुद्रः नेत्रं च । पां पाने । पात्वं पात्रम् । डुदांग्क् दाने । दात्तः आयुक्तः यज्वा यज्ञश्च । मांक् माने । मात्रम् प्रमेयद्रव्यम् ।

कृजन्येधिपाभ्य इत्वः ॥५२६॥ एभ्य इत्वः प्रत्ययः स्यात् । डुकृंग् करणे । करित्वः करणशीलः । जनैचि प्रादुर्भावे । जनित्वः लोकः मातापितरौ द्यावापृथिव्यौ च । जनित्वं कुलम् । एधि वृद्धौ । एधित्वः अग्निः समुद्रः शैलश्च । पां पाने । पेत्वं तप्तभूमिप्रदेशः अमृतं नेत्रं सुखं मानं च ।

पादाचम्यमिभ्यः शः ॥५२७॥ एभ्यः शः प्रत्ययः स्यात् । पांक् रक्षणे । पाशः बन्धनम् । डुदांग्क् दाने । दाशः कैवर्तः । डुवमू उद्गिरणे । वंशः वेणुः । अम गतौ । अंशः भागः ।

कृभृवृचनिभ्यः कित् ॥५२८॥ एभ्यः कित् शः प्रत्ययः स्यात् । डुकृंग् करणे । कृशः तनुः । वृग्ट् वरणे । वृशं शृङ्गवेरम् मूलकं लशुनं च । डुडुभृंग्क् पोषणे च । भृशम् अत्यर्थम् । वन भक्तौ । वशः आयत्तः ।

कोर्षा ॥५२९॥ कुंङ् शब्दे इत्यस्मात् शः प्रत्ययः स च किद्वा स्यात् । कुशः दर्भः । कोशः सारं कुड्मलं च ।

क्लिशः के च ॥५३०॥ क्लिशौश् विबाधने इत्यस्मात् शः प्रत्ययोऽस्य च के इत्यादेशः स्यात् । केशाः मूर्धजाः ।

उरेरशक् ॥ ५३१ ॥ उर गताविति्यस्मात् सौत्रादशक् प्रत्ययः स्यात् । उरशः ऋषिः ।

कलेष्टित् ॥५३२॥ कलि शब्दसंख्यानयोरित्यस्मात् टिदशक् प्रत्ययः स्यात् । कलशः कुम्भः । कलशी दधिमन्थनभाजनम् ।

पलेराशः ॥ ५३३ ॥ पल गताविति्यस्मादाशः प्रत्ययः स्यात् । पलाशः ब्रह्मवृक्षः ।

कनेरीश्चातः ॥५३४॥ कनै दीप्त्यादाविति्यस्मादाशः प्रत्यय ईकारश्चाकारस्य । कीनाशः कर्षकः वर्णसंकरः कदर्यश्च ।

तथा—" लुब्धः कीनाशः स्यात् कीनाशोऽप्युच्यते कृतघ्नश्च ।
योऽश्नाति वाऽऽममांसं स च कीनाशो यमश्चैव ॥१॥

कालिकनिकणिपलिवडिभ्यः किशः ॥५३५॥ एभ्यः कित् इशः प्रत्ययः

स्यात् । कुल बन्धुसंस्त्यानयोः । कुलिशं वज्रम् । कनै दीप्त्यादौ, कण शब्दे । कनिशं कणिशं च सस्यमञ्जरी । पल गतौ । पलिशं यत्र स्थित्वा मृगा व्यापाद्यन्ते । वड आग्रहणे, सौत्रः । वडिशं मत्स्यवेधनम् ।

बलेर्णिद्वा ॥५३६॥ बल प्राणनधान्यावरोधयोरित्यस्मात् किशः प्रत्ययः स च णिद्वा स्यात् । बालिशः मूर्खः । बलिशः मूर्खः । बलिशं वडिशम् ।

तिनिशेतिशादयः ॥५३७॥ तिनिशादयः शब्दाः किशप्रत्ययान्ता निपात्यन्ते । तनेरिश्चातः । तिनिशः वृक्षः । इणस्तोऽन्तश्च । इतिशः गोत्रकृद् ऋषिः । आदिग्रहणादन्येऽपि ।

मस्ज्याङ्क्ष्यामुशः ॥ ५३८ ॥ आभ्यामुशः प्रत्ययः स्यात् । टुमस्जोंत् शुद्धौ । ' न्यङ्कूद्रमेघादयः ' इति गः । मद्गुशः नकुलः । अकुङ् लक्षणे । अङ्कुशः सृणिः ।

अर्तीणभ्यां पिशतशौ ॥५३९॥ आभ्यां यथासंख्यं पिश तश इत्येतौ प्रत्ययौ स्याताम् । ऋंक् गतौ । अर्पिशम् आर्द्रमांसम् बालवत्साया दुग्धं च । इंक्ष् गतौ । एतशः अश्वः ऋषिः वायुः अग्निः अर्कश्च ।

वृकृतॄमीङ्माभ्यः षः ॥५४०॥ एभ्यः षः प्रत्ययः स्यात् । वृङ् वरणे । वर्षः भर्ता । वर्ष संवत्सरः । वर्षाः ऋतुः । कृत् विक्षेपे । कर्षः उन्मानविशेषः । तॄ प्लवनतरणयोः । तर्षः प्लवः हर्षश्च । मीङ्च् हिंसायाम् । मेषः उरभ्रः । मांक् माने । माषः धान्यविशेषः हेमपरिमाणं च ।

योरूच्च वा ॥५४१॥ युक् मिश्रण इत्यस्मात् षः प्रत्यय ऊकारश्चान्तादेशो वा । यूषःपेयविशेषः । यूषा छाया । योषा स्त्री ।

स्नुपूसूम्वर्कलूभ्यः कित् ॥५४२॥ स्वादिभ्योऽर्कपूर्वाच्च लुनातेः कित् षः प्रत्ययः स्यात् । स्नुक् प्रस्रवणे । स्नुषा पुत्रवधूः । पूङ्श् पवने । पूषः पवनभाण्डं शूर्पादि । षूत् प्रेरणे । सूषः बलम् । मूङ् बन्धने । मूषा लोहक्षरणभाजनम् । लूङ्श् छेदने अर्कपूर्वः । अर्कलूषः ऋषिः ।

श्लिषेः शो च ॥५४३॥ श्लिषंच् आलिङ्गने इत्यस्मात् षः प्रत्ययोऽस्य च शे इत्यादेशः स्यात् । शेषः नागराजः ।

कोरषः ॥५४४॥ कुंङ् शब्दे इत्यस्मादषः प्रत्ययः स्यात् । कवषः क्रोधी शब्दकारश्च ।

युजलेराषः ॥५४५॥ आभ्यामाषः प्रत्ययः स्यात्। युक् मिश्रणे। यवाषः दुरालभा। जल घात्ये। जलाषं जलम्।

अर्पेरिषः ॥५४६॥ ऋंक् गतावित्यस्माण्ण्यन्तादिषः प्रत्ययः स्यात्। अर्पिषम् आर्द्रमांसम्।

मह्यविभ्यां टित् ॥५४७॥ आभ्यां टिदिषः प्रत्ययः स्यात्। मह पूजायाम्। महिषः सैरिभः राजा च। महिषी राजपत्नी सैरिभी च। अव रक्षणादौ। अविषः समुद्रः राजा पर्वतश्च। अविषी द्यौः भूमिः गङ्गा च।

रुहेर्वृद्धिश्च ॥५४८॥ रुहं जन्मनीत्यस्मात् टिदिषः प्रत्ययः स्यात् वृद्धिश्चास्य। रौहिषं तृणविशेषः अन्तरिक्षं च। रौहिषः मृगः। रौहिषी वात्या मृगी दूर्वा च।

अमिमृभ्यां णित् ॥५४९॥ आभ्यामिषः प्रत्ययः स्यात् स च णित्। अम गतौ। आमिषं भक्ष्यम्। मृश् हिंसायाम्। मारिषः हिंस्रः।

तवेर्वा ॥५५०॥ तव गतावित्यस्मात् सौत्रात् टिदिषः प्रत्ययः स्यात् स च णिद्वा। ताविषः तविषश्च स्वर्गः। ताविषं तविषं च बलं तेजश्च। ताविषी तविषी च वात्या देवकन्या च।

कलेः किल्ब् च ॥५५१॥ कलि शब्दसंख्यानयोरित्यस्मात् टिदिषः प्रत्ययोऽस्य च किल्ब् इत्यादेशः स्यात्। किल्बिषं पापम्। किल्बिषी वेश्या रात्रिः पिशाची च।

नञो व्यथेः ॥५५२॥ नञ्पूर्वाद् व्यथिष् भयचलनयोरित्यस्मात् टिदिषः प्रत्ययः स्यात्। अव्यथिषः क्षेत्रज्ञः सूर्यः अग्निश्च। अव्यथिषी पृथिवी।

कृतृभ्यामीषः ॥५५३॥ आभ्यामीषः प्रत्ययः स्यात्। कृत् विक्षेपे। करीषः शुष्कगोमयरजः। तॄ प्लवनतरणयोः। तरीषः समर्थः स्तम्भः प्लवश्च।

ऋजिशॄपॄभ्यः कित् ॥५५४॥ एभ्यः किदीषः प्रत्ययः स्यात्। ऋजि गत्यादौ। ऋजीषः अवस्करः। ऋजीषं धनम् (उपहतम्)। शॄश् हिंसायाम्। शिरीषः वृक्षः। पॄश् पालनपूरणयोः। पुरीषं शकृत्।

अमेर्वरादिः ॥५५५॥ अम गतावित्यस्माद् वरादिरीषः प्रत्ययः स्यात्। अम्बरीषं भ्राष्ट्रं व्योम च। अम्बरीषः आदित्यः।

उषेर्णोऽन्तश्च ॥ ५५६ ॥ उषू दाहे इत्यस्मादीषः प्रत्ययो णकारश्चान्तः स्यात्। उष्णीषः मुकुटं शिरोवेष्टनं च।

ऋपॄनाहिहनिकलिचलिचपिवपिकृपिहयिभ्य उषः ॥ ५५७ ॥ एभ्य उषः प्रत्ययः स्यात् । ऋश् गतौ । अरुषः व्रणः हयः आदित्यः वर्णः रोषश्च । पृश् पालनपूरणयोः । परुषः कर्कशः । णहींच् बन्धने । नहुषः पूर्वो राजा । हनंक् हिंसागत्योः । हनुषः क्रोधः राक्षसश्च । कलि शब्दसंख्यानयोः । कलुषम् अप्रसन्नं पापं च । चल कम्पने । चलुषः वायुः । चप सान्त्वने । चपुषः शकुनिः । डुवपीं बीजसन्ताने । वपुषः वर्णः । कृपौङ् सामर्थ्ये । कल्पुषः क्रियानुगुणः। हय क्रान्तौ च । हयुषा ओषधिः ।

विदिपॄभ्यां कित् ॥५५८॥ आभ्यां किदुषः प्रत्ययः स्यात् । विदक् ज्ञाने । विदुषः विद्वान् । पृश् पालनपूरणयोः । पुरुषः पुमान् आत्मा च ।

अपुषधनुषादयः ॥५५९॥ अपुषादयः शब्दा उषप्रत्ययान्ता निपात्यन्ते । आप्नोतेर्ह्रस्वश्च । अपुषः अग्निः सरोगश्च । दधातेर्धन् च । धनुषः शैलः। आदिग्रहणाल्लुषादयो भवन्ति ।

खलिफलिवृषकृजूलम्बिमञ्जिपीविहन्यङ्गिमाङ्गिगण्ड्यर्तिभ्य ऊषः ॥५६०॥ एभ्य ऊषः प्रत्ययः स्यात् । खल संचये च । खलूषः म्लेच्छजातिः । फल निष्पत्तौ । फलूषः वीरुत् । वृग्ट् वरणे । वरूषः भाजनम् । पृश् पालनपूरणयोः । परूषः वृक्षविशेषः । कृत् विक्षेपे । करूषाः जनपदः । जूष्च् जरसि । जरूषः आदित्यः । लबुङ् अवस्रंसने च । लम्बूषः नीरकदम्बः निचुलश्च । मञ्जिः पीयिश्च सौत्रौ । मञ्जूषा काष्ठकोष्ठः । पीयूषं मत्स्यप्रसवक्षीरविकारः अमृतं घृतं च । हनंक् हिंसागत्योः । हनूषः राक्षसः । अगु गतौ । अङ्गूषः शकुनिजातिः हस्ती बाणः वेगश्च । मगु गतौ । मङ्गूषः जलचरशकुनिः । गडु वदनैकदेशे । गण्डूषः द्रवकवलः । ऋंक् गतौ । अरूषः रविः ।

कोरदूषाटरूषकारूषशैलूषपिञ्जूषादयः ॥५६१॥ एते ऊषप्रत्ययान्ता निपात्यन्ते । कुरेरदोऽन्तश्च । कोरदूषः कोद्रवः । अटेराङ्पूर्वस्य चारोऽन्तश्च । आटरूषः वासः । अटनं रूषतीति तु अटरूषः पृषोदरादित्वात् । कृगो वृद्धिश्च । कारूषाः जनपदः । शलेरै चातः । शैलूषः नटः । पिजुण् हिंसादौ । पिञ्जूषः कर्णशष्कुल्याभोगः । आदिशब्दात् प्रत्यूषाभ्यूषादयो भवन्ति ।

कलेर्मषः ॥५६२॥ कलि शब्दसंख्यानयोरित्यस्मान्मषः प्रत्ययः स्यात् । कल्मषं पापम् ।

कुलेश्च माषक् ॥५६३॥ कुल बन्धुसंस्त्यानयोरित्यस्मात् कलेश्च किन्माषः प्रत्ययः स्यात् । कुल्माषः अर्धस्विन्नमाषादि । कल्माषः शबलः ।

मावावद्यमिकमिहनिमानिकष्यशिपचिमुचियजिवृतृभ्यः सः॥५६४॥ एभ्यः सः प्रत्ययः स्यात् । मांक् माने । मासः त्रिंशद्रात्रः। वांक् गतिगन्धनयोः । वासः आटरूषकः। वद व्यक्तायां वाचि । वत्सः तर्णकः ऋषिः प्रियस्य च पुत्रस्याख्यानम् । अम गतौ । अंसः भुजशिखरम् । कमूङ् कान्तौ । कंसः लोहजातिः विष्णोररातिः हिरण्यमानं च । हनंक् हिंसागत्योः । हंसः श्वेतच्छदः । मानि पूजायाम् । मांसं तृतीयो धातुः । कष हिंसायाम् । कक्षः तृणं गहनारण्यं शरीरावयवश्च । अशौटि व्याप्तौ । अक्षाः पासकाः । अक्षाणि इन्द्रियाणि रथचक्राणि च । डुपचींष् पाके । पक्षः अर्धमासः वर्गः शकुन्यवयवः सहायः साध्यं च । मुच्लृंती मोक्षणे । मोक्षः मुक्तिः । यजीं देवपूजादौ । यक्षः गुह्यकः । वृञ् वरणे । वर्सः देशः समुद्रश्च । तॄ प्लवनतरणयोः। तर्सः वीतंसः सूर्यश्च। वर्सतर्सयोर्बाहुलकान्न षत्वम्।

व्यवाभ्यां तनेरीच्च वेः ॥५६५॥ वि अव इत्येताभ्यां परात् तनोतेः सः प्रत्ययो वेरीकारश्चान्तादेशः । वीतंसः शकुन्यवरोधः । अवतंसः कर्णपूरः ।

प्लुषेः प्लष् च ॥५६६॥ प्लुषू दाह इत्यस्मात् सः प्रत्ययोऽस्य च प्लष् इत्यादेशः स्यात् । प्लक्षं नक्षत्रं वृक्षश्च ।

ऋजिरिषिकुषिकृतिव्रश्च्युन्दिशृभ्यः कित् ॥५६७॥ एभ्यः कित् सः प्रत्ययः स्यात् । ऋजि गत्यादौ । ऋक्षं नक्षत्रम् । ऋक्षः अच्छभल्लः । रिष हिंसायाम् । रिक्षा यूकाण्डम् । लत्वे लिक्षा सैव । कुष्श् निष्कर्षे । कुक्षः गर्भः । कुक्षं गर्तः । कृतैत् छेदने । कृत्सः गोत्रकृत् ओदनं वक्त्रं दुःखजातं च । ओव्रश्चौत् छेदने । वृक्षः पादपः । उन्दैप् क्लेदने । उत्सः समुद्रः आकाशं जलं जलाशयश्च । उत्सं स्रोतः । शृश् हिंसायाम् । शीर्षं शिरः ।

गुधिगृधेस्त च ॥५६८॥ आभ्यां कित् सः प्रत्ययस्तकारश्चान्तादेशः स्यात् । गुधच् परिवेष्टने । गुत्सः रोषः तृणजातिश्च । गृधूच् अभिकाङ्क्षायाम् । गृत्सः विप्रः श्वा गृध्रः अभिलाषश्च । तकारविधानमादिचतुर्थबाधनार्थम् ।

तप्यणिपन्यल्यविरधिनभिनम्यमिचमितामिचट्यतिपतेरसः ॥५६९॥ एभ्योऽसः प्रत्ययः स्यात् । तपं संतापे । तपसः आदित्यः पशुः घर्मः घर्मश्च । अण शब्दे । अणसः शकुनिः। पनि स्तुतौ । पनसः फलवृक्षः । अली भूषणादौ । अलसः

निरुत्साहः। अव रक्षणादौ। अवसः भानुः राजा च। अवसं चापं पाथेयं च। रधौच् हिंसासंराद्धयोः। 'रध इटि तु परोक्षायामेव' इति नागमे रन्धसः अन्धकजातिः। णभच् हिंसायाम्। नभसः ऋतुः आकाशः समुद्रश्च। णमं प्रह्वत्वे। नमसः वेत्रः प्रणामश्च। अम गतौ। अमसः कालः आहारः संसारः रोगश्च। चमू अदने। चमसः सोमपात्रं मन्त्रपूतं पिष्टं च। चमसी मुद्गादिमिश्रकृता। तमूच् काङ्क्षायाम्। तमसः अन्धकारः। तमसा नाम नदी। चटण् भेदे। चटसः चर्मपुटः। अत सातत्यगमने। अतसः वायुः आत्मा वनस्पतिश्च। अतसी ओषधिः। पत्लृ गतौ। पतसः पतङ्गः।

सृवयिभ्यां णित् ॥५७०॥ आभ्यां णिदसः प्रत्ययः स्यात्। सृ गतौ। सारसः पक्षिविशेषः। वयि गतौ। वायसः काकः।

वहियुभ्यां वा ॥५७१॥ आभ्यामसः प्रत्ययः स च णिद्वा। वहीं प्रापणे। वाहसः अनड्वान् शकटम् अजगरः वहनजीवश्च। वहसः अनड्वान् शकटश्च। युक् मिश्रणे। यावसं भक्तं तृणं मित्रं च। यवसम् अश्वादिग्रासः अन्नं च।

दिवादिरभिलभ्युरिभ्यः कित् ॥५७२॥ दिवादिभ्यो रभिलभ्युरिभ्यश्च किदसः प्रत्ययः स्यात्। दीव्यतेः-दिवसः वासरः। व्रीड्यतेः लत्वे व्रीलसः लज्जावान्। नृत्यतेः नृतसः नर्तकः। क्षिप्यतेः क्षिपसः योद्धा। सीव्यतेः सिवसः श्लोकः वस्त्रं च। श्रीव्यतेः श्रिवसः गतिमान्। इष्यतेः इषसः इष्वाचार्यः। रभिं राभस्ये। रभसः संरम्भः उद्धर्षः अगम्भीरश्च। डुलभिष् प्राप्तौ। लभसः याचकः प्राप्तिश्च। उरिः सौत्रः। उरसः ऋषिः।

फनसतामरसादयः॥५७३॥ फनसादयः शब्दा असप्रत्ययान्ता निपात्यन्ते। फण गतौ नश्च। फनसः पनसः। तमेररोऽन्तो वृद्धिश्च। तामरसं पद्मम्। आदिग्रहणात् कीकसबुक्कसादयो भवन्ति।

युबलिभ्यामासः ॥५७४॥ आभ्यामासः प्रत्ययः स्यात्। युक् मिश्रणे। यवासः दुरालभा। बल प्राणनधान्यावरोधयोः। बलासः श्लेष्मा।

किलेः कित् ॥५७५॥ किलत् श्वैत्यक्रीडनयोरित्यस्मात् किदासः प्रत्ययः स्यात्। किलासं सिध्मम्। किलासी पाककर्परम्।

तलिकसिभ्यामीसण् ॥५७६॥ आभ्यामीसण् प्रत्ययः स्यात्। तलण् प्रतिष्ठायाम्। तालीसं गन्धद्रव्यम्। कस गतौ। कासीसं धातुजमौषधम्।

सोर्डित् ॥५७७॥ षिण्ट् बन्धने इत्यस्मात् डिदीसण् प्रत्ययः स्यात्। सीसं लोहजातिः।

त्रपेरुसः ॥५७८॥ त्रपौषि लज्जायामित्यस्मादुसः प्रत्ययः स्यात्। त्रपुसं कर्कटिका। विधानसामर्थ्यात् षलाभावः।

पटिवीभ्यां टिसडिसौ ॥५७९॥ आभ्यां यथासंख्यं टिसो डित् इसश्च प्रत्ययः स्यात्। पट गतौ। पट्टिसः आयुधविशेषः। वींक् प्रजनादौ। बिसं मृणालम्।

तसः ॥५८०॥ पटिवीभ्यां तसः प्रत्ययः स्यात्। पट्टसः त्रिशूलम्। वेतसः वानीरः।

इणः ॥५८१॥ एतेस्तसः प्रत्ययः स्यात्। एतसः अध्वर्युः।

पीङो नसक् ॥५८२॥ पीङ्च् पाने इत्यस्मात् किन्नसः प्रत्ययः स्यात्। पीनसः श्लेष्मा।

कृकुरिभ्यां पासः ॥५८३॥ आभ्यां पासः प्रत्ययः स्यात्। डुकृंग् करणे। कर्पासः पिचुमकृतिः वीरुच्च। कुरत् शब्दे। कूर्पासः कञ्चुकः।

कालिकुलिभ्यां मासक् ॥५८४॥ आभ्यां कित् मासः प्रत्ययः स्यात्। कलि शब्दसंख्यानयोः। कल्मासं शबलम्। कुल बन्धुसंस्त्यानयोः। कुल्मासः अर्धस्विन्नं माषादि।

अलेरम्बुसः ॥५८५॥ अली भूषणादावित्यस्मादम्बुसः प्रत्ययः स्यात्। अलम्बुसः यातुधानः। अलम्बुसा नाम ओषधिः।

लूगो हः ॥५८६॥ लुनातेर्हः प्रत्ययः स्यात्। लोहं सुवर्णादि।

कितो गे च ॥५८७॥ कित् निवासे इत्यस्मात् हः प्रत्ययोऽस्य च गे इत्यादेशः। गेहं गृहम्।

हिंसेः सिम् च ॥५८८॥ हिंसुप् हिंसायामित्यस्माद्धः प्रत्ययोऽस्य च सिमित्यादेशः। सिंहः मृगराजः।

कृपृकटिपटिमटिलटिललिपालिकल्यनिरगिलगेरहः ॥५८९॥ एभ्योऽहः प्रत्ययः स्यात्। कृत् विक्षेपे। करहः धान्यावपनम्। पृश् पालनपूरणयोः। परहः शंकरः। कटे वर्षावरणयोः। कटहः पर्जन्यः कर्णवच्च कालायसभाजनम्। पट गतौ। पटहः वाद्यविशेषः। मट सादे, सौत्रः। मटहः ह्रस्वः। लट बाल्ये। लटति

विलसति लटहः विलासवान् । ललिण् ईप्सायाम् । ललहः लीलावान् । पल गतौ । पलहः आवापः । कलि शब्दसंख्यानयोः । कलहः युद्धम् । अनक् प्राणने । अनहः नीरोगः । रगे शङ्कायाम् । रगहः नटः । लगे सङ्गे । लगहः मन्दः ।

पुलेः कित् ॥५९०॥ पुल महत्त्व इत्यस्मात् किदहः प्रत्ययः स्यात् । पुलहः प्रजापतिः ।

वृकाटिशायिभ्य आहः ॥५९१॥ एभ्य आहः प्रत्ययः स्यात् । वृग्ट् वरणे । वराहः सूकरः । कटे वर्षावरणयोः । कटाहः कर्णवत् कालायसभाजनम् । शमूच् उपशमे । शमाहः आश्रमः ।

विलेः कित् ॥५९२॥ विलत् वरणे इत्यस्मात् किदाहः प्रत्ययः स्यात् । विलाहः रहः ।

निर इण ऊहश् ॥५९३॥ निरूपूर्वात् इंण्क् गतावित्यस्माच्छिदूहः प्रत्ययः स्यात् । निर्यूहः सौधादिकाष्ठनिर्गमः ।

दस्त्यूहः ॥५९४॥ ददातेस्त्यूहः प्रत्ययः स्यात् । दात्यूहः पक्षिविशेषः ।

अनेरोकहः ॥५९५॥ अनक् प्राणने इत्यस्मादोकहः प्रत्ययः स्यात् । अनोकहः वृक्षः ।

वलेरक्षः ॥५९६॥ वलि संवरणे इत्यस्मादक्षः प्रत्ययः स्यात् । वलक्षः शुक्लः ।

लाक्षाद्राक्षामिक्षादयः ॥५९७॥ लाक्षादयः शब्दा अक्षप्रत्ययान्ता निपात्यन्ते । लसेरा च । लाक्षा जतु । रसेर्द्रा च । द्राक्षा मृद्वीका । आङ्पूर्वान्मृदेरन्त्यस्वरादेर्लुक् प्रत्ययादेरित्वं च । आमिक्षा हविर्विशेषः । आदिग्रहणात् चुप मन्दायां गताविति्यस्य चोक्षः ग्रामरागः शुद्धं च । एवं पीयूक्षादयोऽपि ।

समिणिनिकषिभ्यामाः ॥५९८॥ संपूर्वादिंण्क् गताविति्यस्मात् निपूर्वात् कष हिंसायामित्यस्माच्च आः प्रत्ययः स्यात् । समया निकषा पर्वतम् । समीपाद्व्यावाचिनावेतौ ।

दिविपुरिवृषिमृषिभ्यः कित् ॥५९९॥ एभ्यः किदाः प्रत्ययः स्यात् । दिवूच् क्रीडाजयेच्छापणिद्युतिस्तुतिगतिषु । दिवा अहः । पुरत् अग्रगमने । पुरा भूतकालवाची । वृषू सेचने । वृषा प्रबलमित्यर्थः । मृषीच् तितिक्षायाम् । मृषा अभूतमित्यर्थः ।

वेः साहाभ्याम् ॥६००॥ क्विपूर्वाभ्यां षोंच् अन्तकर्मणि, ओहांक् त्यागे

इत्येताभ्यां आः प्रत्ययः स्यात् । विसाः चन्द्रमाः बुद्धिश्च । तालव्यान्तोऽयमित्येके । विहाः विहगः स्वर्गश्च ।

वृमिथिदिशिभ्यस्थयटचाश्चान्ताः ॥६०१॥ एभ्यः किदाः प्रत्ययः स्यात् यथासंख्यं थकारयकारटकाराश्चान्ताः स्युः । वृग्ट् वरणे । वृथा अनर्थकम् । मिथृग् मेधाहिंसयोः । मिथ्या मृषा निष्फलं च । दिशींत् अतिसर्जने । दिष्ट्या प्रीतिवचनम् ।

मुचिस्वदेर्धश्च ॥६०२॥ आभ्यां किदाः प्रत्ययो धकारश्चान्तस्य स्यात् । मुच्लृंती मोक्षणे । मुधा अनिमित्तम् । ष्वदि आस्वादने । स्वधा पितृबलिः ।

सोर्ह्रग आहश्च ॥६०३॥ सुपूर्वाद् ब्रूतेराः प्रत्ययोऽस्य चाहादेशः स्यात् । स्वाहा देवतातर्पणम् ।

सनिक्षमिदुषेः ॥६०४॥ एभ्यो धातुभ्य आः प्रत्ययः स्यात् । षणूयी दाने । सना नित्यम् । क्षमौषि सहने । क्षमा भूः क्षान्तिश्च । दुषंच् वैकृत्ये । दोषा रात्रिः ।

डित् ॥६०५॥ धातोर्बहुलमाः प्रत्ययः स च डित् स्यात् । मनिंच् ज्ञाने । मा निषेधे । षोंच् अन्तकर्मणि । सा अवसानम् । अनक् प्राणने । आ स्मरणादौ । प्रीङ्च् प्रीतौ । प्रा स्मयने । हनंक् हिंसागत्योः । हा विषादे । वन भक्तौ । वा विकल्पे । रांक् दाने । रा दीप्तिः । भांक् दीप्तौ । भा कान्तिः । सहपूर्वः सभा परिषत् । नाम्नीति सहस्य सः ।

स्वरेभ्य इः ॥६०६॥ स्वरान्तेभ्यो धातुभ्यः इः प्रत्ययः स्यात् । जिं अभिभवे । जयिः राजा । हिंट् गतिवृद्ध्योः । हयिः कामः । रुक् शब्दे । रविः सूर्यः । कुंक् शब्दे । कविः काव्यकर्ता । ष्टुंग्क् स्तुतौ । स्तविः उद्गाता । लूग्श् छेदने । लविः दात्रम् । पूग् पवने । पविः वायुः वज्रं पवित्रं च । भू सत्तायाम् । भविः सत्ता चन्द्रः विधिश्च । ऋंक् गतौ । अरिः शत्रुः । हृंग् हरणे । हरिः इन्द्रः विष्णुः चन्दनम् मर्कटादिश्च । हरयः शक्राश्वाः । डुडुभृंग्क् पोषणे च । भरिः वसुधा । सृं गतौ । सरिः मेघः । पृश् पालनपूरणयोः । परिः भूमिः । तॄ प्लवनतरणयोः । तरिः नौः । दृश् विदारणे । दरिः महाभिदा । मृश् हिंसायाम् ण्यन्तः । मारिः अशिवम् । वृग्श् वरणे । वरिः विष्णुः । ण्यन्ताद् वारिः हस्तिबन्धनम् । वारि जलम् ।

पदिपठिपचिस्थलिहलिकलिबलिवलिवल्लिपल्लिकटिचटिचाटिबाधिगाध्यर्चिवन्दिनन्यविवाशिवाशिकाशिछर्दिंतन्त्रिमन्त्रिखण्डिमण्डिचण्डि-

यत्यञ्जिमस्यसिवनिध्वनिसनिगमितमिग्रन्थिश्रन्थिजनिमण्यादिभ्यः ॥ ॥६०७॥ एभ्य इः प्रत्ययः स्यात् । पदिच् गतौ । पदिः राशिः मोक्षमार्गश्च । पठ व्यक्तायां वाचि । पठिः विद्वान् । डुपचींष् पाके । पचिः अग्निः । ष्ठुल स्थाने । स्थलिः दानशाला । हल विलेखने । हलिः हलः । कलि शब्दसंख्यानयोः । कलिः कलहः युगं च । बल प्राणनधान्यावरोधयोः । बलिः देवतोपहारः दानवश्च । वलि वल्लि संवरणे । वलिः वक्ररङ्गः । वल्लिः हिरण्यशलाका लता च । पल्ल गतौ । पल्लिः मुनीनामाश्रमः व्याधसंस्त्यायश्च । कटे वर्षावरणयोः । कटिः स्वाङ्गम् । चटण् भेदे । चटिः वर्णः । वट वेष्टने । वटिः गुलिका तन्तुः सूना च नाभिः वर्णश्च । बधि बन्धने । बधिः क्रियाशब्दः । गाधृङ् प्रतिष्ठालिप्साग्रन्थेषु । गाधिः विश्वामित्रपिता । अर्च पूजायाम् । अर्चिः अग्निशिखा । वदुङ् स्तुत्यभिवादनयोः । वन्दिः ग्रहणिः । टुनदु समृद्धौ । नन्दिः ईश्वरप्रतीहारः भेरिश्च । अव रक्षणादौ । अविः ऊर्णायुः । वशक् कान्तौ । वशिः वशिता । वाशिच् शब्दे । वाशिः प्रक्रान्तिः रश्मिः गोमायुः अग्निः शब्दः प्रजनपाप्मा चतुष्पात् जलदश्च । काशृङ् दीप्तौ । काशयः जनपदः । छर्दण् वमने । छर्दिः वमनम् । तन्त्रिण् कुटुम्बधारणे । तन्त्रिः वीणासूत्रम् । मन्त्रिण गुप्तभाषणे । मन्त्रिः सचिवः । खडुण् भेदे । खण्डिः प्रद्वारम् । मडु भूषायाम् । मण्डिः मृद्भाजनपिधानम् । चडुङ् कोपे । चण्डिः भामिनी । यतैङ् प्रयत्ने । यतिः भिक्षुः । अञ्जौप् व्यक्तिम्रक्षणगतिषु । अञ्जिः सज्जः पेशनी पेजः गतिश्च । समञ्जिः शिश्नः । मसैच् परिणामे । मसिः शस्त्री । अमूच् क्षेपणे । असिः खड्गः । वनूयी याचने । वनिः साधुः याच्ञा खकुनिः अग्निश्च । ध्वन शब्दे । ध्वनिः नादः । षण भक्तौ । सनिः संभक्ता पन्था दानं म्लेच्छः नदीतटं च । गम्लृ गतौ । गमिः आचार्यः । तमूच् काङ्क्षायाम् । तमिः अलसः । ग्रन्थश् संदर्भे, श्रन्थश् मोचनप्रतिहर्षयोः । ग्रन्थिः श्रन्थिश्च पर्व संध्यादि । जनैचि प्रादुर्भावे । जनिः वधूः कुलाङ्गना भगिनी प्रादुर्भावश्च । मण शब्दे । मणिः रत्नम् । आदिग्रहणात् वहीं प्रापणे । वहिः अश्वः । खाद भक्षणे । खादिः श्वा । दधि धारणे । दधि क्षीरविकारः । खल संचये च । खलिः पिण्याकः । शचि व्यक्तायां वाचि । शची इन्द्राणी । 'इतोऽत्यर्थात्' इति गौरादित्वाद्वा ङीः इत्यादयोऽपि भवन्ति ।

किलिपिलिपिशिचिटिबुटिशुण्ठितुण्डिकुण्डिभण्डिहुण्डिहिण्डिपि-

ण्डचुल्लिबुधिमिथिरुहिदिविकीर्त्यादिभ्यः ॥६०८॥ एभ्य इः प्रत्ययः स्यात्। किलत् श्वैत्यक्रीडनयोः। केलिः क्रीडा। पिलण् क्षेपे। पेलिः क्षुद्रपेला। पिशत् अवयवे। पेशिः मांसखण्डम्। चिट प्रेष्ये। चेटिः दारिका प्रेष्या च। त्रुटत् छेदने ण्यन्तः त्रोटिः चञ्चुः। शुठु शोषणे। शुण्ठिः विश्वभेषजम्। तुडुङ् तोडने। तुण्डिः आस्यं मत्कुणा च नाभिः। कुडुङ् दाहे। कुण्डिः जलभाजनम्। भडुङ् परिभाषणे। भण्डिः शकटम्। हुडुङ् संघाते। हुण्डिः पिण्डित ओदनः। हिडुङ् गतौ च। हिण्डिः रात्रौ रक्षाचारः। पिडुङ् संघाते। पिण्डिः निष्पीडितस्नेहःपिण्डः। चुल्ल भावकरणे। चुल्लिः रन्धनस्थानम्। बुधिच् ज्ञाने। बोधिः सम्यग्ज्ञानम्। मिथृग् मेधाहिंसयोः। मेथिः खलमध्यस्थूणा। रुहं बीजजन्मनि। रोहिः सस्यं जन्म च। दिवूच् क्रीडादौ। देविः भूमिः। कृतण् संशब्दने णिजन्तः। कीर्तिः यशः। आदिग्रहणादन्येऽपि।

नाम्युपान्त्यकृगृशृपॄपूङ्भ्यः कित् ॥६०९॥ नाम्युपान्त्येभ्यः क्रादिभ्यश्च किदिः प्रत्ययः स्यात्। लिखत् अक्षरविन्यासे। लिखिः शिल्पम्। शुच् शोके। शुचिः पूतः विद्वान् धर्मः आषाढश्च। रुचि अभिप्रीत्यां च। रुचिः दीप्तिः अभिलाषश्च। भुजंप् पालनाभ्यवहारयोः। भुजिः अग्निः राजा कुटिलं च। कुणत् शब्दोपकरणयोः। कुणिः विकलो हस्तः हस्तविकलश्च। सृजंत् विसर्गे। सृजिः पन्थाः। द्युति दीप्तौ। द्युतिः दीप्तिः। ऋत् घृणागतिस्पर्धेषु। ऋतिः यतिः। छिदृंपी द्वैधीकरणे। छिदिः छेत्ता पर्शुश्च। मुदि हर्षे। मुदिः बालः। भिदृंपी विदारणे। भिदिः वज्रं सूचकः भेत्ता च। ऊछृदृपी दीप्तिदेवनयोः। छृदिः रथकारः। लिपींत् उपदेहे। लिपिः अक्षरजातिः। तुर त्वरणे, सौत्रः। तुरिः तन्तुवायोपकरणम्। डुलण् उत्क्षेपे। डुलिः कच्छपः। लिषीं दीप्तौ। लिषिः दीप्तिः। लिषिमान् राजवर्चस्वी च। कृषींत् विलेखने। कृषिः कर्षणं कर्षणभूमिश्च। ऋषैत् गतौ। ऋषिः मुनिः वेदश्च। कुषश् निष्कर्षे। कुषिः शुषिरम्। शुषंच् शोषणे। शुषिः छिद्रं शोषणं च। हृषू अलीके। हृषिः अलीकवादी दीप्तिः तुष्टिश्च। ष्णुहौच् उद्गिरणे। स्नुहिः वृक्षः। कृत् विक्षेपे। किरिः सूकरः मूषिकः गन्धर्वः गर्तश्च। गृत् निगरणे। गिरिः नगः कन्दुकश्च। शृश् हिंसायाम्। शिरिः हिंस्रः खड्गः शोकः पाषाणश्च। पॄश् पालनपूरणयोः। पुरिः नगरी राजा पूरयिता च। पूङ् पवने। पुविः वातः।

विदिवृतेर्वा ॥६१०॥ आभ्यामिः प्रत्ययः स्यात् स च किद्वा। विदक् ज्ञाने।

विदिः शिल्पी । वेदिः इज्यादिस्थानम् । वृतूङ् वर्तने । वृतिः कण्टकशाखावरणम् । निर्वृतिः सुखम् । वर्तिः द्रव्यं दीपाङ्गं च ।

तॄभ्रम्यद्यापिदम्भिभ्यस्तित्तिरभ्रमाधापदेभाश्च ॥६११॥ एभ्यः किदिः प्रत्यय एषां च यथासंख्यं तित्तिरभ्रमअधापदेभ इत्यादेशाः स्युः । तॄ प्लवनतरणयोः । तित्तिरिः पक्षिजातिः प्रवक्ता च वेदशाखायाः । भ्रमू चलने । भ्रमिः वायुः हस्ती जलं च । बाहुलकात् भ्रमादेशाभावे भ्रमिः भ्रमः । अदंक् भक्षणे । अधि उपरिभावे । अध्यागच्छति । आप्लृंट् व्याप्तौ । अपि समुच्चयादौ । प्लक्षोऽपि, न्यग्रोधोऽपि । दम्भूट् दम्भे । देभिः शरासनम् ।

मनेरुदेतौ चास्य वा ॥६१२॥ मनिंच् ज्ञाने इत्यस्मादिः प्रत्ययोऽकारस्य च उकारैकारौ वा स्याताम् । मुनिः ज्ञानवान् । मेनिः संकल्पः । मनिः धूमवर्तिः।

क्रमितमिस्तम्भेरिच्च नमेस्तु वा ॥६१३॥ एभ्यः किदिः प्रत्ययोऽकारस्य चेकारः स्यात् नमेः पुनरकारस्येकारो विकल्पेन । क्रमू पादविक्षेपे । क्रिमिः क्षुद्रजन्तुः । तमूच् काङ्क्षायाम् । तिमिः महामत्स्यः । स्तम्भिः सौत्रः । स्तिभिः केतकादिसूची हृदयं समुद्रश्च । णमं प्रह्वत्वे । निमिः राजा । नमिः विद्याधराणामाद्यः तीर्थकरश्च ।

अम्भिकुण्ठिकम्प्यंह्रिभ्यो नलुक् च ॥६१४॥ एभ्य इः प्रत्ययो नकारस्य च लुक् स्यात् । अभुङ् शब्दे । अभि आभिमुख्येऽव्ययम् । अभ्यग्नि शलभाः पतन्ति । कुठु आलस्ये च । कुठिः वृक्षः पापं वृषलः देहः गेहं कुठारश्च । कपुङ् चलने । कपिः अग्निः वानरश्च । अहुङ् गतौ । अहिः सर्पः वृत्रः वप्रश्च ।

उभेर्द्व्यौ च ॥६१५॥ उभत् पूरणे इत्यस्मादिः प्रत्ययोऽस्य च द्व त्र इत्यादेशौ स्याताम् । द्वौ । द्वितीयः । द्विमुनि व्याकरणस्य । त्रयः । तृतीयः । त्रिमुनि व्याकरणस्य ।

नीवीप्रह्वभ्यो डित् ॥६१६॥ एभ्यो डिदिः प्रत्ययः स्यात् । णींग् प्रापणे । निवसति । वींक् प्रजनादौ । विः तन्तुवायः पक्षी उपसर्गश्च । यथा–विभवति । हिंग् हरणे प्रपूर्वः । प्रहिः कूपः उदपानं च ।

वौ रिचेः स्वरान्नोऽन्तश्च ॥६१७॥ वावुपसर्गे सति रिचृंपी विरेचने इत्यस्मादिः प्रत्ययः स्वरात्परो नोऽन्तश्च । विरिञ्चिः ब्रह्मा ।

कमिवमिजमिघसिशलिफलितलिताडिवजिव्रजिध्वजिराजिपणिव-

णिवादिसादिहदिहनिसहिवहिनपिवपिभटिकाञ्चिसंपातिभ्यो णित् ॥६१८॥ एभ्यो णिदिः प्रत्ययः स्यात् । कमूङ् कान्तौ । कामी वसुकः कामी च । डुवमू उद्गिरणे । वामिः स्त्री । जमू अदने । जामिः भगिनी तृणं जनपदश्चैकः । घस्लृं अदने । घासिः संग्रामः गर्तः अग्निः बहुभुक् च । शल गतौ । शालिः व्रीहिराजः । फल निष्पत्तौ । फालिः दलम् । तलण् प्रतिष्ठायाम् । तालिः वृक्षजातिः । तडण् आघाते । ताडिः स एव । वज व्रज ध्वज गतौ । वाजिः अश्वः पुंखावसानं च । व्राजिः पद्धतिः पिटकजातिश्च । ध्वाजिः पताका अश्वश्च । राजृग् दीप्तौ । राजिः पङ्क्तिः लेखा च । पणि व्यवहारस्तुत्योः । पाणिः करः । वण शब्दे । वाणिः वाक् । ङ्याम्—वाणी । वद व्यक्तायां वाचि । वादिः वाग्मी वीणा च । षदॢं विशरणगत्यवसादनेषु । सादिः अश्वारोहः सारथिश्च । हदि पुरीषोत्सर्गे । हादिः लूता । हनंक् हिंसागत्योः । घातिः प्रहरणम् । केचित्तु हानिः अर्थनाश उच्छित्तिश्चेति उदाहरन्ति, तत्र बाहुलकात् ञ्णिति घात् इति घात् न भवति । बाहुलकादेव णित्त्वविकल्पे हनिः आयुधम् । पहि मर्षणे । साहिः शैलः । वहिं प्रापणे । वाहिः अनड्वान् । तपं सन्तापे । तापिः दानवः । डुवपीं बीजसन्ताने । वापिः पुष्करिणी । भट भृतौ । भाटिः सुरतमूल्यम् । कचुङ् दीप्तौ । काञ्चिः मेखला पुरी च । णित्करणादनुपान्त्यस्यापि वृद्धिः । पत्लृ गतौ संपूर्वः । संपातिः पक्षिराजः ।

कृशृकुटिग्रहिखन्यणिकष्यालिपालिचरिवासिगण्डिभ्यो वा ॥६१९॥ एभ्य इः प्रत्ययः स च णिद्वा । डुकृंग् करणे । कारिः शिल्पी । करिः हस्ती विष्णुश्च । शृश हिंसायाम् । शारिः द्यूतोपकरणं हस्तिपर्याणं शारिका च । शरिः हिंसा शूलश्च । कुटत् कौटिल्ये । कोटिः अस्त्रिः अग्रभागः अष्टमं वाऽङ्कस्थानं च । कुटिः गृहं शरीराङ्गं च । ग्रहीश् उपादाने । ग्राहिः पतिः । ग्रहिः वेणुः । खनूग् अवदारणे । खानिः खनिश्च निधिः आकरः तडागं च । अण शब्दे । आणिः अणिश्च द्वारकीलिका । कष हिंसायाम् । काषिः कर्षकः । कषिः निकषोपलः काष्ठम् अश्वकर्णः खनित्रं च । अली भूषणादौ । आलिः पङ्क्तिः सखी च । अलिः भ्रमरः । पल गतौ । पालिः जलसेतुः कर्णपर्यन्तश्च । पलिः संस्त्यायः । चर भक्षणे च । चारिः पशूनां भक्ष्यम् । चरिः प्राकारशिखरम् विषयः वायुः पशुः केशोर्णा च । वसं निवासे । वासिः तक्षोपकरणम् । वसिः शय्या अग्निः गृहं रात्रिश्च । गडु वदनैकदेशे । गण्डिः गण्डिका । णित्त्वपक्षे तु अनुपान्त्यस्यापि वृद्धौ गाण्डिः धनुष्पर्व ।

पादाद्यात्यजिभ्याम् ॥६२०॥ पादशब्दपूर्वाभ्यां केवलाभ्यां चाऽत्यजिभ्यां णिदिः प्रत्ययः स्यात् । अत सातत्यगमने । अज क्षेपणे च । पादाभ्यामतत्यजति वा पदातिः पदाजिः । ' पदः पादस्याज्यातिगोपहते ' इति पदभावः । उभावपि पत्तिवाचिनौ । आतिः पक्षी । सुपूर्वात् स्वातिः वायव्यनक्षत्रम् । आजिः संग्रामः स्पर्धावधिश्च ।

नहेर्भ् च ॥६२१॥ णहींच् बन्धने इत्यस्माण्णिदिः प्रत्ययो भकारश्चान्तादेशः। नाभिः अन्त्यकुलकरः चक्रमध्यं शरीरावयवश्च ।

अशोरश्वादिः ॥६२२॥ अशौटि व्याप्तावित्यस्माण्णिदिः प्रत्ययो रेफश्च धातोरादिः स्यात् । राशिः समूहः नक्षत्रपादनवकरूपश्च मेषादिः ।

कायः किरिच्च वा ॥६२३॥ कैं शब्दे इत्यस्मात् किः प्रत्ययः इकारश्चान्तादेशो वा । किकिः पक्षी विद्वाँश्च । काकिः स्वरदोषः ।

वर्द्धेरकिः ॥६२४॥ वर्धण् छेदनपूरणयोरित्यस्मादकिः प्रत्ययः स्यात् । वर्द्धकिः तक्षा ।

सनेर्डखिः ॥ ६२५ ॥ षणूयी दान इत्यस्मात् डिदखिः प्रत्ययः स्यात् । सखा मित्रम् ।

कोर्डिखिः ॥ ६२६ ॥ कुंक् शब्दे इत्यस्मात् डिदिखिः प्रत्ययः स्यात् । किखिः लोमसिका ।

मृश्विकण्यणिदध्याविभ्य ईचिः ॥६२७॥ एभ्य ईचिः प्रत्ययः स्यात् । मृंत् प्राणत्यागे । मरीचिः मुनिः मयूखश्च । ट्वोश्वि गतिवृद्धचोः। श्वयीचिः चन्द्रः श्वयथुश्च । कण अण शब्दे । कणीचिः प्राणी लता चक्षुः शकटं शङ्खश्च । अणीचिः वेणुः शाकटिकश्च । दधि धारणे । दधीचिः राजर्षिः। अव रक्षणादौ । अवीचिः नरकविशेषः ।

वेगो डित् ॥६२८॥ वेंग् तन्तुसंताने इत्यस्मात् डिदिचिः प्रत्ययः स्यात् । वीचिः ऊर्मिः ।

वणेर्णित् ॥६२९॥ वण शब्दे इत्यस्मात् णिदीचिः प्रत्ययः स्यात् । वाणीचिः छाया व्याधिश्च ।

कृपिशाकिभ्यामटिः ॥६३०॥ आभ्यामटिः प्रत्ययः स्यात् । कृपौङ् सामर्थ्ये । कर्मटिः निस्त्रः । शकुंट् शक्तौ । शकटिः शकटः ।

श्रेदिः ॥ ६३१ ॥ श्रिग् सेवायामित्यस्मात् दिः प्रत्ययः स्यात् । श्रेदिः गणितव्यवहारः ।

चमेरुच्चातः ॥ ६३२ ॥ चमू अदने इत्यस्मात् दिः प्रत्ययोऽस्योकारश्च । चुण्दिः क्षुद्रवापी ।

मुषेरुण् चान्तः ॥६३३॥ मुष् स्तेये इत्यस्मात् दिः प्रत्यय उण् चान्तः स्यात् । मुषुण्दिः प्रहरणम् । उणो न गुणो विधानसामर्थ्यात् ।

कावावीकीश्रिश्रुक्षुज्वरितूरिचूरिपूरिभ्यो णिः ॥६३४॥ एभ्यो णिः प्रत्ययः स्यात् । कैं शब्दे । काणिः वैलक्ष्यानुसर्पणम् । वेंग् तन्तुसंताने । वाणिः व्यूतिः। वींक् प्रजनादौ । वेणिः कवरी । डुक्रींग्श् द्रव्यविनिमये । क्रेणिः क्रयविशेषः । श्रिग् सेवायाम् । श्रेणिः पङ्क्तिः बलविशेषः । श्रेणयः अष्टादश गणविशेषाः । निपूर्वात् निश्रेणिः संक्रमः । श्रुंद् श्रवणे । श्रोणिः जघनम् । टुक्षुक् शब्दे । क्षोणिः पृथ्वी । ज्वर रोगे । जूर्णिः ज्वरः वायुः आदित्यः अग्निः शरीरं ब्रह्मा पुराणश्च । तूरैचि त्वरायाम् । तूर्णिः त्वरा मनः शीघ्रश्च । चूरैचि दाहे । चूर्णिः वृत्तिः । पूरैचि आप्यायने । पूर्णिः पूरः ।

ऋदृघृसृकुवृषिभ्यः कित् ॥६३५॥ ऋकारान्तेभ्यो घृ इत्यादिभ्यश्च कित् णिः प्रत्ययः स्यात् । शृश् हिंसायाम् । शीर्णिः रोगः अवयवश्च । स्तृग्श् आच्छादने । स्तीर्णिः संस्तरः। घृं सेचने । घृणिः रश्मिः ज्वाला निदाघश्च । सृणिः आदित्यः वज्रम् अनिलः अङ्कुशः अग्निश्च । कुंक् शब्दे । कुणिः विकलो हस्तः हस्तविकलश्च । वृषू सेचने । वृष्णिः वस्तः मेषः यदुविशेषश्च । पर्षतेरपीच्छन्त्येके । पृष्णिः रश्मिः ।

पृषिहृषिभ्यां वृद्धिश्च ॥ ६३६ ॥ आभ्यां णिः प्रत्ययोऽनयोश्च वृद्धिः स्यात् । पृषू सेचने । पार्ष्णिः पादपश्चाद्भागः पृष्ठप्रदेशश्च । हर्षंच् तुष्टौ । हार्ष्णिः हरणम् ।

हूर्णिधूर्णिभूर्णिघूर्ण्यादयः ॥ ६३७ ॥ एते णिप्रत्ययान्ता निपात्यन्ते । हूंग् हरणे, धूंग् धारणे, भू सत्तायाम्, घृं सेचने, ऊत्वं रश्चान्तो निपात्यते । हूर्णिः कुल्या । धूर्णिः धृतिः । भूर्णिः वे (चे) तनं भूमिः कालश्च । घूर्णिः भ्रमः। आदिग्रहणादन्येऽपि ।

ऋहसृसृधृभृकृतृग्रहेरणिः ॥ ६३८ ॥ एभ्योऽणिः प्रत्ययः स्यात् । ऋंक्

गतौ । अरणिः अग्निमन्थनकाष्ठम् । हृंग् हरणे । हरणिः कुल्या मृत्युश्च । सृं गतौ । सरणिः ईषद्गतिः पन्थाः आदित्यः शिरा संघातश्च । मृंत् प्राणत्यागे । मरणिः रात्रिः । धृंग् धारणे । धरणिः क्षितिः । डुडुभृंग्क् पोषणे च । भरणिः नक्षत्रम् । डुकृंग् करणे । करणिः सादृश्यम् । तॄ प्लवनतरणयोः । तरणिः संक्रमः आदित्यः यवागूः पतितगोरूपोत्थापनी च यष्टिः । वै दुःखार्थः, दुःखेन तीर्यते इति वैतरणी नदी । ग्रहीश् उपादाने । ग्रहणिः जठराग्निः तदाधारो व्याधिः मेढ्रं मृत्युश्च ।

कङ्केरिच्चास्य वा ॥६३९॥ ककुङ् गतावित्यस्मादणिः प्रत्ययो धातोरस्य चेकारो वा । कङ्कणिः कङ्कणम् । किङ्कणिः घण्टा ।

ककोर्णित् ॥६४०॥ ककि लौल्ये इत्यस्मात् णिदणिः प्रत्ययः स्यात् । काकणिः मानविशेषः ।

कृषेश्च चादेः ॥६४१॥ कृषींत् विलेखने इत्यस्मादणिः प्रत्यय आदेश्च चकारः स्यात् । चर्षणिः चमूः अग्निः बुद्धिः व्यवसायः वेश्या वृषश्च ।

क्षिपेः कित् ॥६४२॥ क्षिपींत् प्रेरणे इत्यस्मात् किदणिः प्रत्ययः स्यात् । क्षिपणिः आयुधं बडिशबन्धकः चर्मकृता पाषाणसर्जनी च ।

आङः कृहशुषेः सनः ॥६४३॥ आङः परेभ्यो डुकृंग् करणे, हृंग् हरणे शुषंच् शोषणे इत्येतेभ्यः सन्नन्तेभ्योऽणिः प्रत्ययः स्यात् । आचिकीर्षणिः व्यवसायः । आजिहीर्षणिः श्रीः । आशुशुक्षणिः अग्निः वायुश्च ।

वारिसत्यादेरिणिक् ॥६४४॥ एभ्यः किदिणिः प्रत्ययः स्यात् । वृग्ट् वरणे ण्यन्तः । वारिणिः पशुः पशुवृत्तिश्च । सृं गतौ । स्रिणिः अग्निः वज्रं च । आदिग्रहणादन्येऽपि ।

अदेस्त्रीणिः ॥६४५॥ अदंक् भक्षणे इत्यस्मात् त्रीणिः प्रत्ययः स्यात् । अत्रीणिः कृमिजातिः ।

प्लुज्ञायजिषपिपदिवसितसिभ्यस्तिः ॥ ६४६ ॥ एभ्यस्तिः प्रत्ययः स्यात् । प्लुंङ् गतौ । प्लोतिः चीरम् । ज्ञांश् अवबोधने । ज्ञायते त्रैलोक्यस्य त्रातेति ज्ञातिः इक्ष्वाकुवृषभः स्वजनश्च । यजीं देवपूजादौ । यष्टिः दण्डः लता च । षप समवाये । सप्तिः अश्वः । पदिंच् गतौ । पत्तिः पदातिः । वसं निवासे । वस्तिः मूत्राधारः चर्मपुटः स्नेहोपकरणं च । तमूच् उपक्षये विपूर्वः । वितस्तिः अर्धहस्तः ।

प्रथेर्लुक् च वा ॥६४७॥ प्रथिष् प्रख्यान इत्यस्मात् तिः प्रत्ययोऽन्तस्य च

लुग्वा स्यात् । वृक्षं प्रति विद्योतते । प्रतिष्ठितः । पक्षे–प्रत्तिः प्रथनं भागश्च ।

कोर्यषादिः ॥६४८॥ कुंक् शब्दे इत्यस्मात् यषादिस्तिः प्रत्ययः स्यात् । कोयष्टिः पक्षिविशेषः ।

ग्रो गृष् च ॥६४९॥ गॄत् निगरणे इत्यस्मात् तिः प्रत्ययोऽस्य च गृष् इत्यादेशः स्यात् । गृष्टिः सकृत्प्रसूता गौः ।

सोरस्तेः शित् ॥६५०॥ सुपूर्वात् असक् भुवीत्यस्मात् शित् तिः प्रत्ययः स्यात् । स्वस्ति कल्याणम् । शित्त्वाद् भूभावाल्लुगभावः ।

दृसुषिकृषिरिषिविषिशोशुच्यसिपूयीण्प्रभृतिभ्यः कित् ॥६५१॥ एभ्यः कित् तिः प्रत्ययः स्यात् । दृंक्त् आदरे । दृतिः छागादित्वङ्मयो जलाधारः । सुषश् स्तेये । सुष्टिः अङ्गुलिसंनिवेशविशेषः । कृषींत् विलेखने । कृष्टिः पण्डितः । रिष् हिंसायाम् । रिष्टिः प्रहरणम् । विष्लृंकी व्याप्तौ । विष्टिः अवेतनकर्मकरः । शोंच् तक्षणे । शितिः कृष्णः कृशश्च । शुच् शोके । शुक्तिः मुक्तादिः । अशौटि व्याप्तौ । अष्टिः छन्दोविशेषः । पूयैङ् दुर्गन्धविशरणयोः । पूतिः दुर्गन्धः दुष्टम् तृणजातिश्च । इंण्क् गतौ । इति हेत्वादौ । डुडुभृंण्क् पोषणे च प्रपूर्वः । प्रभृतिः आदिः ।

कुच्योर्नोऽन्तश्च ॥६५२॥ आभ्यां कित् तिः प्रत्ययो नकारश्चान्तः स्यात् । कुङ् शब्दे । कुन्तिः राजा । कुन्तयः जनपदः । चिंग्ट् चयने । चिन्तिः राजा ।

खल्यमिरमिवहिवस्यर्तेरतिः ॥६५३॥ एभ्योऽतिः प्रत्ययः स्यात् । खल संचये च । खलतिः खल्वाटः । अम् गतौ । अमतिः चातकः छागः प्रावृट् मार्गः व्याधिः गतिश्च । रमिं क्रीडायाम् । रमतिः क्रीडा कामः स्वर्गः स्वभावश्च । वहीं प्रापणे । वहतिः गौः वायुः अमात्यः अपत्यं कुटुम्बं च । वसं निवासे । वसतिः निवासः ग्रामसंनिवेशश्च । ऋंक् गतौ । अरतिः वायुः सरणम् असुखं क्रोधः वर्म च ।

हन्तेरंहट् च ॥६५४॥ हनंक् हिंसागत्योरित्यस्मादतिः प्रत्ययोऽस्य च अंहट् इत्यादेशः । अंहतिः व्याधिः पन्थाः कालः रथश्च ।

वृगो व्रत् च ॥६५५॥ वृग्ट् वरणे इत्यस्मादतिः प्रत्ययोऽस्य च व्रत् इत्यादेशः स्यात् । व्रततिः वल्ली ।

अञ्चेः क च वा ॥६५६॥ अञ्चू गतौ चेत्यस्मादतिः प्रत्ययोऽस्य च क् इत्यन्तादेशो वा स्यात् । अङ्कतिः वायुः अग्निः प्रजापतिश्च । अञ्चतिः अग्निः ।

वातेर्णिद्वा ॥६५७॥ वांक् गतिगन्धनयोरित्यस्मादतिः प्रत्ययः स च णिद्वा स्यात् । वायतिः वातः । वातिः गन्धमिश्रपवनः ।

योः कित् ॥६५८॥ युक् मिश्रणे इत्यस्मादतिः प्रत्ययः कित् स्यात् । युवतिः तरुणी ।

पातेर्वा ॥६५९॥ पांक् रक्षणे इत्यस्मादतिः प्रत्ययः स च किद् वा स्यात् । पतिः भर्ता । पातिः भर्ता रक्षिता प्रभुश्च ।

अगिविलिपुलिक्षिपेरस्तिक् ॥६६०॥ एभ्यः किदस्तिः प्रत्ययः स्यात् । अग कुटिलायां गतौ । अगस्तिः । विलत् वरणे । विलस्तिः । पुल महत्त्वे । पुलस्तिः । क्षिपींत् प्रेरणे । क्षिपस्तिः । एते लौकिका ऋषयः । अगस्तिः वृक्षजातिश्च ।

गृधेर्गभ् च ॥६६१॥ गृधूच् अभिकाङ्क्षायामित्यस्मादस्तिक् प्रत्ययो गभ् चास्यादेशः स्यात् । गभस्तिः रश्मिः ।

वस्यातिभ्यामातिः ॥६६२॥ आभ्यामातिः प्रत्ययः स्यात् । वसं निवासे । वसातयः जनपदः । ऋंक् गतौ । अरातिः रिपुः ।

अभेर्यामाभ्याम् ॥६६३॥ अभिपूर्वाभ्यामाभ्यामातिः प्रत्ययः स्यात् । यांक् प्रापणे । मांक् माने । अभियातिः अभिमातिश्च शत्रुः ।

यजो य च ॥६६४॥ यजीं देवपूजादावित्यस्मादातिः प्रत्ययोऽस्य च यकारोऽन्तादेशः स्यात् । ययातिः राजा ।

वद्यविच्छदिभूभ्योऽन्तिः ॥ ६६५ ॥ एभ्योऽन्तिः प्रत्ययः स्यात् । वद व्यक्तायां वाचि । वदन्तिः कथा । अव रक्षणादिषु । अवन्तिः राजा । अवन्तयः जनपदः । छदण् अपवारणे । युजादिर्विकल्पितणिजन्तत्वादण्यन्तः । छदन्तिः गृहच्छादनद्रव्यम् । भू सत्तायाम् । भवन्तिः कालः लोकस्थितिश्च ।

शकेरुन्तिः ॥ ६६६ ॥ शक्लृंट् शक्तावित्यस्मादुन्तिः प्रत्ययः स्यात् । शकुन्तिः पक्षी ।

नञो दागो डितिः ॥६६७॥ नञ्पूर्वाद् डुदांग्क् दाने इत्यस्मात् डिदितिः प्रत्ययः स्यात् । अदितिः देवमाता ।

देङः॥६६८॥ देङ् रक्षणे इत्यस्मात् डिदितिः प्रत्ययः स्यात् । दितिः असुरमाता ।

वीसञ्ज्यसिभ्यस्थिक् ॥६६९॥ एभ्यस्थिक् प्रत्ययः स्यात् । वींक् प्रजना-

दिषु । वीथिः मार्गः । षञ्जं सङ्गे । सक्थि ऊरुः शकटाङ्गं च । असूच् क्षेपणे । अस्थि पञ्चमो धातुः ।

सारेरथिः ॥ ६७० ॥ सृं गताविति्यस्मात् ण्यन्तादथिः प्रत्ययः स्यात् । सारथिः यन्ता ।

निषञ्जेर्घित् ॥६७१॥ निपूर्वात् षञ्जं सङ्गे इत्यस्मात् घिदथिः प्रत्ययः स्यात् । निषङ्गथिः रुद्रः धनुर्धरश्च । घित्करणं गत्यर्थम् ।

उदर्त्तेर्णिद्वा ॥६७२॥ उत्पूर्वात् ऋंक् गताविति्यस्मात् अथिः प्रत्ययः स च णिद्वा स्यात् । उदारथिः विष्णुः । उदरथिः विप्रः काष्ठं समुद्रः अनड्वाँश्च ।

अतेरिथिः ॥६७३॥ अत् सातत्यगमने इत्यस्मादिथिः प्रत्ययः स्यात् । अतिथिः पात्रतमो भिक्षावृत्तिः ।

तनेर्डित् ॥६७४॥ तनूयी विस्तारे इत्यस्मात् डिदिथिः प्रत्ययः स्यात् । तिथिः प्रतिपदादिः ।

उषेरधिः ॥ ६७५ ॥ उषू दाहे इत्यस्मादधिः प्रत्ययः स्यात् । ओषधिः ब्रह्मद्विशेषः ।

विदोरधिक् ॥६७६॥ विदक् ज्ञाने इत्यस्मात् किद्रधिः प्रत्ययः स्यात् । विद्रधिः व्याधिविशेषः ।

वीयुसुवत्यगिभ्यो निः ॥६७७॥ एभ्यो निः प्रत्ययः स्यात् । वींक् प्रजनादौ । वेनिः व्याधिः नदी च । युक् मिश्रणे । योनिः प्रजननमङ्गम् उत्पत्तिस्थानं च । षुंङ् अभिषवे । सोनिः सवनम् । वहीं प्रापणे । वह्निः पावकः बलीवर्दश्च । अग कुटिलायां गतौ । अग्निः पावकः ।

धूशाशीङो ह्रस्वश्च ॥६७८॥ एभ्यो निः प्रत्ययो ह्रस्वश्चैषां स्यात् । धूञ् कम्पने । धुनिः नदी । शोंच् तक्षणे । शनिः सौरिः । शीङ्क् स्वप्ने । शिनिः यादवः वर्णश्च ।

लूधूप्रच्छिभ्यः कित् ॥६७९॥ एभ्यः किन्निः प्रत्ययः स्यात् । लूञ् छेदने । लूनिः लवनः । धूञ् कम्पने । धूनिः वायुः । प्रच्छंत् ज्ञीप्सायाम् । पृश्निः वर्णः अल्पतनुः किरणः स्वर्गश्च ।

सदिवृत्यमिधम्यश्यटिकत्यवेरनिः ॥६८०॥ एभ्योऽनिः प्रत्ययः स्यात् । षदॢंङ् विशरणादौ । सदनिः जलम् । वृतूङ् वर्तने । वर्तनिः पन्थाः देशनाम च ।

अम गतौ । अमनिः अग्निः। धमः सौत्रः। धमनिः मन्या रसवहा च शिरा। अशौटि व्याप्तौ । अशनिः इन्द्रायुधम् । अट गतौ । अटनिः चापकोटिः। कटे वर्षावरणयोः। कटनिः शैलमेखला । अव रक्षणादौ । अवनिः भूः ।

रञ्जेः कित् ॥ ६८१ ॥ रञ्जीं रागे इत्यस्मात् किदनिः प्रत्ययः स्यात् । रजनिः रात्रिः ।

अर्तेरत्निः ॥६८२॥ ऋंक् गतावित्यस्मादत्निः प्रत्ययः स्यात् । अरत्निः बाहुमध्यं शमः उत्कनिष्ठश्च हस्तः ।

एधेरिनिः ॥६८३॥ एधि वृद्धावित्यस्मादिनिः प्रत्ययः स्यात् । एधिनिः मेदिनी ।

शकेरुनिः ॥६८४॥ शक्लृंट् शक्तावित्यस्मादुनिः प्रत्ययः स्यात् । शकुनिः पक्षी ।

अदेर्मनिः ॥६८५॥ अदंक् भक्षणे इत्यस्मान्मनिः प्रत्ययः स्यात् । अघ्निः पशूनां भक्षणद्रोणी अग्निः जयः हस्ती अश्वः तालु च ।

दमेर्दुभिर्दुम् च ॥६८६॥ दमूच् उपशमे इत्यस्मात् दुभिः प्रत्ययोऽस्य च दुमित्यादेशः स्यात् । दुन्दुभिः देवतूर्यम् ।

नीसावृयुशूवलिदलिभ्यो मिः ॥६८७॥ एभ्यो मिः प्रत्ययः स्यात् । णींग् प्रापणे। नेमिः चक्रधारा। पोंच् अन्तकर्मणि। सामि अर्धवाच्यव्ययम् । वृग्ट् वरणे । वर्मिः वल्मीककृमिः । युक् मिश्रणे । योमिः शकुनिः । शूश् हिंसायाम् । शर्मिः मृगः । वलि संवरणे । वल्मिः इन्द्रः समुद्रश्च । दल विशरणे । दल्मिः आयुधम् इन्द्रः समुद्रः शक्रः विषं च ।

अशोरश्यादिः ॥६८८॥ अशौटि व्याप्तावित्यस्मान्मिः प्रत्ययो रेफश्च धातोरादिः स्यात् । रश्मिः प्रग्रहः मयूखश्च ।

स्वर्तेरूच्चातः ॥६८९॥ आभ्यां मिः प्रत्ययो गुणे च कृतेऽकारस्योकारः स्यात् । सूं गतौ । सूर्मिः स्थूणा । ऋंक् गतौ । ऊर्मिः तरङ्गः ।

कृभूभ्यां कित् ॥ ६९० ॥ आभ्यां किन्मिः प्रत्ययः स्यात् । डुकृंग् करणे । कृमिः क्षुद्रजन्तुजातिः । भू सत्तायाम् । भूमिः वसुधा ।

कणेर्डयिः ॥६९१॥ कण शब्दे इत्यस्मात् डिदयिः प्रत्ययः स्यात् । कयिः पक्षिविशेषः ।

ताङ्किवङ्क्यङ्किमङ्क्यंहिशयदिसद्याशौवपिवशिभ्यो रिः ॥ ६९२ ॥

एभ्यो रिः प्रत्ययः स्यात् । तकु कृच्छ्रजीवने । तङ्किः युवा । वकुङ् कौटिल्ये । वङ्किः शल्यं परशुका रथः अहः कुटिलश्च । अकुङ् लक्षणे । अङ्किः चिन्हं वंशकठिनिकश्च । मकुङ् मण्डने । मङ्किः मण्डनम् शठः मवकश्च । अहुङ् गतौ । अंहिः पादः । अङ्गेरप्येके । अघुङ् गत्याक्षेपे । अङ्घ्रिः । शदॢंऽ शातने । शद्रिः वज्रः भस्म हस्ती गिरिः ऋषिः शोभनश्च । अदंक् भक्षणे । अद्रिः पर्वतः । षदॢंऽ विशरणादौ । सद्रिः हस्ती गिरिः मेघश्च । अशौटि व्याप्तौ । अश्रिः कोटिः । डुवपीं बीजसन्ताने । वप्रिः केदारः । वशक् कान्तौ । वश्रिः समूहः ।

भूसूकृशिविशिशुभिभ्यः कित् ॥६९३॥ एभ्यः कित् रिः प्रत्ययः स्याद्। भू सत्तायाम् । भूरि प्रभूतम्, काञ्चनं च । षूत् प्रेरणे । सूरिः आचार्यः पण्डितश्च । कृशच् श्लेषणे । कृशिः ऋषिः । विशंत् प्रवेशने । विश्रिः मृत्युः ऋषिश्च । शुभि दीप्तौ । शुभ्रिः यतिः विप्रः दर्शनीयं शुभं सत्यं च ।

जृषो रश्च वः ॥६९४॥ जृष्च् जरसीत्यस्मात् किद्रिः प्रत्यय ईरि सति रेफस्य वकारश्च स्यात् । जीव्रिः शरीरम् ।

कुन्द्रिकुद्र्यादयः ॥६९५॥ कुन्द्र्यादयः शब्दाः किद्रिप्रत्ययान्ता निपात्यन्ते । कुषेः कौतेश्च दश्चान्तः । कुन्द्रिः ऋषिः । कुद्रिः पर्वतः ऋषिः समुद्रश्च । आदिग्रहणात् क्षौतेर्दोऽन्तः । क्षुद्रिः समुद्रः । अर्तेर्गोऽन्तः । ऋग्रिः लोकनाथः । शकेः शक्रिः बलवान् इत्यादयोऽपि भवन्ति ।

राशादिशाकिकद्यादिभ्यस्त्रिः ॥६९६॥ एभ्यस्त्रिः प्रत्ययः स्यात् । रांक् दाने । रात्रिः निशा । शदॢंऽ शातने । शत्रिः कुञ्जरः क्रौञ्चश्च । शक्लृंट् शक्तौ । शक्त्रिः क्रौञ्चः ऋषिश्च । कद वैक्लव्ये सौत्रः । कत्रिः ऋषिः । अदंक् भक्षणे । अत्रिः ऋषिः ।

पतेरत्रिः ॥६९७॥ पतॢंऽ गतावित्यस्मादत्रिः प्रत्ययः स्यात् । पतत्रिः पक्षी ।

नदिवल्ल्यर्तिकृतेररिः ॥६९८॥ एभ्योऽरिः प्रत्ययः स्यात् । णद अव्यक्ते शब्दे । नदरिः पटहः । वल्लि संवरणे । वल्लरिः लता वीणा सस्यमञ्जरी च । ऋंक् गतौ । अररिः कपाटम् । कृतैत् छेदने । कर्तरिः केशादिकर्तनयन्त्रम् ।

मस्यसिघसिजस्यङ्गिसाहिभ्य उरिः ॥६९९॥ एभ्य उरिः प्रत्ययः स्यात् । मसैच् परिणामे । मसुरिः मरीचिः । असूच् क्षेपणे । असुरिः संग्रामः । घस्लृंऽ अदने । घसुरिः अग्निः । जसूच् मोक्षणे । जसुरिः समाप्तिः अशनिः अरणिः

क्रोधश्च । अगु गतौ । अङ्गुरिः करशाखा । लत्वे-अङ्गुलिः । षहि मर्षणे । सहरिः पृथ्वी अक्रोधनः अनड्वान् संग्रामः अन्धकारः सूर्यश्च ।

मुहेः कित् ॥७००॥ मुहौच् वैचित्त्ये इत्यस्मात् किदुरिः प्रत्ययः स्यात् । मुहूरिः सूर्यः अनड्वांश्च ।

धूमूभ्यां लिक्लिणौ ॥७०१॥ आभ्यां यथासंख्यं लिक् लिण् एतौ प्रत्ययौ स्याताम् । धूग्श् कम्पने । धूलिः पांसुः । मूङ् बन्धने । मौलिः मुकुटः ।

पाट्यञ्जिभ्यामलिः ॥७०२॥ आभ्यामलिः प्रत्ययः स्यात् । पट गतौ, ण्यन्तः । पाटलिः वृक्षविशेषः । अञ्जौप् व्यक्त्यादौ । अञ्जलिः पाणिपुटः प्रणामहस्तयुग्मं च ।

मासालिभ्यामोकुलिमलौ ॥७०३॥ आभ्यां यथासंख्यमोकुलिमलीत्येतौ प्रत्ययौ स्याताम् । मांङ् माने । मौकुलिः काकः । शल गतौ, ण्यन्तः । शाल्मलिः वृक्षविशेषः ।

दृपृवृभ्यो विः ॥७०४॥ एभ्यो विः प्रत्ययः स्यात् । दृशृ विदारणे । दर्विः तर्दः । पृशृ पालनपूरणयोः । पर्विः कङ्कः हिंस्रश्च । वृग्श् वरणे । वर्विः शकटं धात्री काकः श्येनश्च ।

जृशृस्तृजागृकृनीघृषिभ्यो ङित् ॥७०५॥ एभ्यो ङिद्विः प्रत्ययः स्यात् । जृष्व् जरसि । जीर्विः वायुः पशुः कण्टकः शकटः मद्गुः कायम् गुल्मं शङ्का वृद्धः वृद्धभावश्च । शृशृ हिंसायाम् । शीर्विः हिंस्रः कृमिः न्युङ्कुश्च । स्तृग्श् आच्छादने । स्तीर्विः गर्विष्ठः अध्वर्युः भगः तनुः रुधिरं भयं तृणजातिः नभः अजश्च । जागृक् निद्राक्षये । जागृविः राजा अग्निः प्रबुद्धश्च । ङित्त्वान्न गुणः । डुकृंग् करणे । कृविः रुद्रः तन्तुवायः तन्तुवायद्रव्यम् राजा च । यदुपङ्गं कृवय इति पञ्चालानाचक्षते । णींग् प्रापणे । नीविः परिधानग्रन्थिः मूलधनं च । घृषू संघर्षे । घृष्विः वराहः वायुः अग्निश्च ।

छविछिविस्फाविस्फिविस्थाविस्थिविदाविदीविकिकिविदिदिविदीदिविकिकीदिविकिकिदीविशिव्यटव्यादयः ॥ ७०६ ॥ एते ङिद्विप्रत्ययान्ता निपात्यन्ते । छद्यतेर्ईस्वश्च । छविः स्त्रिक् छाया आवरणं च । छिदेर्लुक् च । छिविः फल्गुद्रव्यम् । स्फायतेः स्फस्फिभावौ च । स्फविः वृक्षजातिः । स्फिविः वृक्षः उदश्विच्च । तिष्ठतेः स्थस्थिभावौ च । स्थविः प्रसेवकः तन्तुवायः सीमा अग्निः अजंगमः स्वर्गः कुष्ठी कुष्ठिमांसं फलं च । स्थिविः सीमा । दमेर्लुक् च । दविः धर्मशीलः

दाता स्थानं फालश्च । दीव्यतेर्दीर्घश्च । दीविः कितवः द्युतिमान् कालः व्याघ्रजातिश्च । कितेर्द्वित्वं पूर्वस्य चत्वाभावो लुक् च । किकिविः पक्षिविशेषः । दिवेर्द्वित्वं पूर्वस्य दीर्घश्च वा । दिदिविः स्वर्गः । दीदिविः अन्नं स्वर्गश्च । कितेः किकीदिभावश्च । किकीदिविः वर्णः पक्षी च । किकिपूर्वाद् दीव्यतेः दीर्घश्च । किकीति कुर्वन् दीव्यतीति किकिदीविः चाषः । शीङो ह्रस्वश्च । शिविः राजा । अटेरत् चान्तः । अटविः अरण्यम् । आदिग्रहणादन्येऽपि ।

मुषिप्लुषिशुषिकुष्यसिभ्यः सिक् ॥७०७॥ एभ्यः कित् सिः प्रत्ययः स्यात् । मुषू प्लुषू दाहे । मुक्षिः अग्निः उदपानश्च । प्लुक्षिः अग्निः जठरं कुशूलश्च । शुषंच् शोषणे । शुक्षिः वायुः निदाघः यवासकः तेजश्च । कुषश् निष्कर्षे । कुक्षिः जठरम् । अशौटि व्याप्तौ । अक्षि नेत्रम् ।

गोपादेरनेरसिः ॥७०८॥ गोप इत्यादिभ्यः परादनक् प्राणने इत्यस्मात् असिः प्रत्ययः स्यात् । गोपानसिः सौधाग्रभागच्छदिः । चित्रानसिः जलचरः । एकानसिः उज्जयनी । वाराणसिः काशी नगरी ।

वृधृपृवृसाभ्यो नसिः ॥७०९॥ एभ्यो नसिः प्रत्ययः स्यात् । वृङ् वरणे । वर्णसिः तरुः । धृंग् धारणे । धर्णसिः शैलः लोकपालः जलं माता च । पृश् पालनपूरणयोः । पर्णसिः जलधरः उलूखलं शाकादिश्च । वृञ् वरणे । वर्णसिः भूमिः । षोंच् अन्तकर्मणि । सानसिः स्नेहः नखः हिरण्यम् ऋणं सखा सनातनश्च ।

व्रियो हिक् ॥७१०॥ व्रीश् वरणे इत्यस्मात् कित् हिः प्रत्ययः स्यात् । व्रीहिः धान्यविशेषः ।

तॄस्तॄतन्द्रितन्त्र्यविभ्य ईः ॥७११॥ एभ्य ईः प्रत्ययः स्यात् । तॄ प्लवनतरणयोः । तरीः नौः अग्निः वायुः प्लवनश्च । स्तृञ् आच्छादने । स्तरीः तृणं धूमः मेघः नदी शय्या च । तन्द्रिः सादमोहनयोः सौत्रः । तन्द्रीः मोहनिद्रा । तन्त्रिण् कुटुम्बधारणे । तन्त्रीः शुष्कस्नायुः वादित्रं वीणा आलस्यं च । अव रक्षणादौ । अवीः प्रकाशः आदित्यः भूमिः पशुः राजा स्त्री च ।

नडेर्णित् ॥७१२॥ नडेः सौत्रादीः प्रत्ययः स च णित् स्यात् । नाडी आयतशुषिरं द्रव्यम् अर्धमुहूर्तश्च ।

वातात् प्रमः कित् ॥७१३॥ वातपूर्वपदात् प्रेणोपसृष्टात् मांक् माने इत्यस्मात् किदीः प्रत्ययः स्यात् । वातप्रमीः वात्या अश्वः वातमृगः पक्षी शमीवृक्षश्च ।

यापाभ्यां ङ्ये च ॥७१४॥ आभ्यां किदीः प्रत्ययोऽनयोश्च ङ्ये रूपे स्याताम्। यांक् प्रापणे। ययीः मोक्षमार्गः दिव्यदृष्टिः आदित्यः अश्वश्च। पां पाने। पपीः रश्मिः सूर्यः हस्ती च।

लक्षेर्मोऽन्तश्च ॥७१५॥ लक्षीण् दर्शनाङ्कनयोरित्यस्मादीः प्रत्ययो मकारश्चान्तः स्यात्। लक्ष्मीः श्रीः।

भृमृतृत्सरितनिधन्यनिमनिमस्जिशीवाटिकटिपटिगडिचञ्चयसिवसिभ्रपिशृस्त्रस्निहिक्लिदिकन्दीन्दिविन्द्यन्धिबन्ध्यणिलोष्टिकुन्थिभ्य उः ॥७१६॥ एभ्य उः प्रत्ययः स्यात्। डुडुभृंक् पोषणे च, भृंग् भरणे वा। भरुः समुद्रः वर्णिः भर्ता च। मृंत् प्राणत्यागे। मरुः निर्जलो देशः गिरिश्च। तॄ प्लवनतरणयोः। तरुः वृक्षः। त्सर छद्मगतौ। त्सरुः आदर्शखड्गादिग्रहणप्रदेशः वज्रकः क्षुरिका च। तनूयी विस्तारे। तनुः देहः सूक्ष्मश्च। धन धान्ये, सौत्रः। धनुः अस्त्रं दानमानं च। अनक् प्राणने। अनुः प्राणः। अनु पश्चादाद्यर्थेऽव्ययम्। मनिंच् ज्ञाने। मनूयी बोधने वा। मनुः प्रजापतिः। टुमस्जोंत् शुद्धौ। मद्गुः जलवायसः। शीङ्क् स्वप्ने। शयुः अजगरः स्वप्नः आदित्यश्च। वट वेष्टने। वटुः माणवकः। कटे वर्षावरणयोः। कटुः रसविशेषः। पट गतौ। पटुः दक्षः। गड सेचने। गडुः घाटामस्तकयोर्मध्ये मांसपिण्डः स्फोटश्च। चञ्चू गतौ। चञ्चुः पक्षिमुखम्। असूच् क्षेपणे। असवः प्राणाः। वसं निवासे। वसु द्रव्यं तेजो देवता च। वसुः कश्चिद्राजा। त्रपौषि लज्जायाम्। त्रपु लोहविशेषः। शृशृ हिंसायाम्। शरुः क्रोधः आयुधः हिंस्रश्च। औस्ट शब्दोपतापयोः। स्वरुः प्रतापः वज्रः वज्रास्फालनं च। ष्णिहौच् प्रीतौ। स्नेहुः चन्द्रमाः सन्निपातजो व्याधिविशेषः पित्तं वनस्पतिश्च। क्लिदौच् आर्द्रभावे। क्लेदुः क्षेत्रं चन्द्रः भगं शरीरभङ्गश्च। क्लेदयतीति क्लेदुः चन्द्रमा इत्यन्ये। कदु रोदनाह्वानयोः। कन्दुः पाकस्थानं मूत्रोतं च क्रीडनम्। इदु परमैश्वर्ये। इन्दुः चन्द्रः। विदु अवयवे। बिन्दुः विप्रुट्। अन्धण् दृष्ट्युपसंहारे। अन्धुः कूपः व्रणश्च। बन्धंश् बन्धने। बन्धुः स्वजनः। वन्धु द्रव्यम्। अण शब्दे। अणुः पुद्गलः सूक्ष्मः रालकादिश्च धान्यविशेषः। लोष्टि संघाते। लोष्टुः मृत्पिण्डः। कुन्थश् संक्लेशे। कुन्थुः सूक्ष्मजन्तुः।

स्यन्दिस्रजिभ्यां सिन्ध्रज्जौ च ॥७१७॥ आभ्यामुः प्रत्ययोऽनयोश्च यथासंख्यं सिन्ध् रज्ज् इत्यादेशौ स्याताम्। स्यन्दौङ् स्रवणे। सिन्धुः नदः नदी

समुद्रश्च । सृजंत् विसर्गे, सृजिच् विसर्गे वा । रज्जुः दवरकः ।

पंसेर्दीर्घश्च ॥७१८॥ पसुण् नाशने इत्यस्मादुः प्रत्ययो दीर्घश्चास्य । पांसुः पार्थिवं रजः ।

अशेरान्नोऽन्तश्च ॥७१९॥ अशौटि व्याप्तावित्यस्मादुः प्रत्ययोऽकाराच्च परो नोऽन्तः स्यात् । अंशुः रश्मिः सूर्यश्च । प्रांशुः दीर्घः ।

नमेर्नाक् च ॥७२०॥ णमं प्रह्वत्वे इत्यस्मादुः प्रत्ययोऽस्य च नाक् इत्यादेशः स्यात् । नाकुः व्यलीकं वनस्पतिः ऋषिः कल्मीकश्च ।

मनिजनिभ्यां धतौ च ॥७२१॥ आभ्यामुः प्रत्ययोऽनयोश्च यथासंख्यं धकारतकारौ स्यातां । मनिंच् ज्ञाने । मधु क्षौद्रं शीधु च । मधुः असुरः मासश्च चैत्रः । जनैचि प्रादुर्भावे । जतु लाक्षा ।

अर्जेर्ऋजु च ॥७२२॥ अर्ज अर्जने इत्यस्मादुः प्रत्ययोऽस्य च ऋजु इत्यादेशः स्यात् । ऋजु अकुटिलम् ।

कृतेस्तर्कु च ॥७२३॥ कृतैत् छेदने कृतैप् वेष्टने इत्यस्माद्वा उः प्रत्ययः स्यात् अस्य च तर्कु इत्यादेशः । तर्कुः चुन्दः सूत्रवेष्टनशलाका च ।

नेरश्चेः ॥७२४॥ निपूर्वादञ्चतेरुः प्रत्ययः । न्यङ्कुः मृगः ऋषिश्च ।

किमः श्रो णित् ॥७२५॥ किम्पूर्वात् शृश् हिंसायामित्यस्मात् णिदुः प्रत्ययः स्यात् । किंशारुः शूकः धान्यशिखा उष्ट्रः हिंस्रः इषुश्च ।

मिवहिचरिचटिभ्यो वा ॥७२६॥ एभ्य उः प्रत्ययः स च णिद्वा । डुमिंग्ट् प्रक्षेपणे । मायुः पित्तं मानं शब्दश्च । गोमायुः शृगालः । मयुः किन्नरः उष्ट्रः प्रक्षेपः आकूतं च । बाहुलकादाल्लाभावः । वहीं प्रापणे । बाहुः भुजः । बहु प्रभूतम् । चर भक्षणे च । चारु शोभनम् । चरन्त्यस्मादेवपितृभूतानि इत्यपादानेऽपि भीमादित्वात्, चरुः देवतोद्देशेन पाकः स्थाली च । चटण् भेदे । चाटु प्रियाचरणम् पटुजनः प्रियवादी स्फुटवादी दर्व्यग्रं शिष्यश्च । चटु प्रियाचरणम् ।

ऋतृशृमृभ्रादिभ्यो रो लश्च ॥७२७॥ एभ्यो णिदुः प्रत्ययो रेफस्य च लकारः । ऋंक् गतौ, ऋंत् प्रापणे च वा । आलुः श्लेष्मा श्लेष्मातकः कन्दविशेषश्च । तॄ प्लवनतरणयोः । तालु काकुदम् । शॄश् हिंसायाम् । शालुः हिंस्रः कषायश्च । मृंत् प्राणत्यागे । मालुः पत्रलता, यस्या मालुधानीति प्रसिद्धिः । टुडुभृंक् पोषणे च । भालुः इन्द्रः । आदिग्रहणादन्येऽपि ।

कृकस्थूराद्वचः क् च ॥७२८॥ आभ्यां परात् वचो णिदुः प्रत्ययः स्यात् ककारश्चान्तादेशः । वचंक् भाषणे, ब्रूग्क् व्यक्तायां वाचि । कृकमव्यक्तं ब्रूते वक्ति वा कृकवाकुः कुक्कुटः कृकलासः खञ्जरीटश्च । एवं स्थूरवाकुः उच्चैर्ध्वनिः ।

पॄकाहृषिधृषीषिकुहिभिदिविदिमृदिव्याधिगृध्यादिभ्यः कित् ॥७२९॥ एभ्यः किदुः प्रत्ययः स्यात् । पॄश् पालनपूरणयोः । पुरुः महान् लोकः समुद्रः यजमानः राजा च कश्चित् । कैं शब्दे । कुः पृथ्वी । हृषच् तुष्टौ, हृषू अलीके वा । हृषुः तुष्टः अलीकः सूर्याग्निशशिनश्च । ञिधृषाट् प्रागल्भ्ये । धृषुः प्रगल्भः संतापः उत्साहः पर्वतश्च । इषत् इच्छायाम् । इषुः शरः । कुहणि विस्मापने । कुहुः नष्टचन्द्रामावस्या । भिदृंपि विदारणे । भिदुः वज्रः कन्दर्पश्च । विदक् ज्ञाने । विदुः हस्तिमस्तैकदेशः । मृदश् क्षोदे । मृदुः अकठिनः । व्यधंच् ताडने । विधुः चन्द्रः वायुः अग्निश्च । गृधूच् अभिकाङ्क्षायाम् । गृधुः कामः । आदिग्रहणात् पूरैचि आप्यायने, पूरण् आप्यायने वा । पूरितमनेन यशसा सर्वमिति पूरुः राजर्षिः । एवमन्येऽपि ।

रभिपृथिभ्यामृच्च रस्य ॥७३०॥ आभ्यां किदुः प्रत्ययो रेफस्य च ऋकारः स्यात् । रभिं राभस्ये । ऋभवः देवाः । प्रथिप् प्रख्याने । पृथुः राजा विस्तीर्णश्च ।

स्पशिभ्रस्जेः स्लुक् च ॥७३१॥ आभ्यां किदुः प्रत्ययः सकारस्य च लुक् स्यात् । स्पशिः सौत्रः, तालव्यान्तः । पशुः तिर्यङ् मन्त्रवध्यश्च जनः। भ्रस्जींत् पाके । भृगुः प्रपातः ब्रह्मणश्च सुतः । किरत्वात् ग्रहत्वश्च भ्रस्जमज्ज इति ग्वत् । न्यङ्कूद्रमेघादय इति गत्वम् ।

दुःस्वपवनिभ्यः स्थः ॥७३२॥ दुस् सु अप वनि इत्येतेभ्यः परात् ष्ठां गतिनिवृत्तावित्यस्मात् किदुः प्रत्ययः स्यात् । दुःष्ठु अशोभनम् । सुष्ठु सातिशयम् । अपष्ठु वामम् । वनिष्ठुः वपासंनिहितोऽवयवः अश्वः संभक्तः अपानं च ।

हनियाकृभृपृतॄभ्यो द्वे च ॥७३३॥ एभ्यः किदुःप्रत्ययो द्वे रूपे चैषां स्याताम् । हनंक् हिंसागत्योः । जन्वुः इन्द्रः वेगवाँश्च । यांक् प्रापणे । ययुः अश्वः यायावरः स्वर्गमार्गश्च । डुकृंग् करणे । चक्रुः कर्मठः वैकुण्ठश्च । डुडुभृंग्क् पोषणे च, भृंग् भरणे वा । बभ्रुः ऋषिः नकुलः राजा वर्णश्च । पॄश् पालनपूरणयोः । पुपुरुः समुद्रः चन्द्रः लोकश्च । तॄ प्लवनतरणयोः । तितिरुः पतङ्गः । त्रैङ् पालने तत्रुः नौका ।

कृञ ऋत उर् च ॥७३४॥ आभ्यां किदुः प्रत्यय ऋकारस्य चोर् स्यात्। कृत् विक्षेपे। कुरुः राजर्षिः। कुरवः जनपदः। गृश् शब्दे। गुरुः आचार्यः लघुप्रतिपक्षः पूज्यश्च जनः।

पचेरिचातः ॥७३५॥ डुपचींष् पाके इत्यस्मादुः प्रत्ययोऽकारस्य चेकारः स्यात्। पिचुः निरस्थीकृतः कर्पासः।

अर्तेरूर्च ॥ ७३६ ॥ ऋंक् गताविति अस्मादुः प्रत्ययोऽस्य च ऊर् इत्यादेशः स्यात्। ऊरुः शरीराङ्गम्।

महत्युर्च ॥७३७॥ अर्तेर्महत्यभिधेये उः प्रत्ययोऽस्य चोर् इत्यादेशः स्यात्। उरु विस्तीर्णम्।

उड् च भे ॥ ७३८ ॥ अर्तेर्भे नक्षत्रेऽभिधेये उः प्रत्ययो धातोश्च उडादेशः स्यात्। उडु नक्षत्रम्।

श्लिषेः क च ॥७३९॥ श्लिषंच् आलिङ्गने इत्यस्मात् किदुः प्रत्ययः ककारश्चान्तादेशः स्यात्। श्लिकुः मृगास्थि सव्यवसायः राज्यं ज्योतिषं सेवकश्च।

रङ्गिलङ्गिलिङ्गेर्नलुक् च ॥ ७४० ॥ एभ्य उः प्रत्ययो नकारस्य च लुक् स्यात्। रघु लघुङ् गतौ। रघुः राजा। लघु तुच्छं शीघ्रं च। लिगुण् चित्रीकरणे। लिगुः ऋषिः सेवकः मूर्खः भूमिविशेषश्च।

पीमृगमित्रदेवकुमारलोकधर्मविश्वसुम्नाश्मावेभ्यो युः ॥ ७४१ ॥ पी मृग मित्र देव कुमार लोक धर्म विश्व सुम्नाश्मन् अव इत्येतेभ्यः परात् यांक् प्रापणे इत्यस्मात् किदुः प्रत्ययः स्यात्। पीयुः उलूकः आदित्यः सुवर्णं कालश्च। मृगयुः व्याधः मृगश्च। मित्रयुः ऋषिः मित्रवत्सलश्च। देवयुः धार्मिकः। कुमारयुः राजपुत्रः। लोकयुः वाक्यकुशलः जनः। धर्मयुः धार्मिकः। विश्वयुः वायुः। सुम्नयुः यजमानः। अश्मयुः मूर्खः। अवयुः काव्यम्।

पराङ्भ्यां शृखनिभ्यां डित् ॥७४२॥ पराङ्पूर्वाभ्यां यथासंख्यं शृखनिभ्यां डिदुः प्रत्ययः स्यात्। शृशृ हिंसायाम्। परान् शृणाति परशुः कुठारः। खनूग् अवदारणे। आखुः मूषिकः।

शुभेः स च वा ॥७४३॥ शुभि दीप्तावित्यस्मात् डिदुः प्रत्ययः स्यात् अस्य च दन्त्यः सो वा। सुः शुश्च पूजायाम्। सुपुरुषः। शुनासीरः।

द्युद्भ्याम् ॥७४४॥ आभ्यां डिदुः प्रत्ययः स्यात्। द्युंक् अभिगमे। द्युः

स्वर्गक्रीडा स्वर्गश्च । द्रुं गतौ । द्रुः वृक्षशाखा वृक्षश्च ।

हरिपीतमितशतविकुकदभ्यो द्रुवः ॥७४५॥ हरि पीत मित शत वि कु कद् इत्येतेभ्यः पराद् द्रुं गतावित्यस्मात् डिदुः प्रत्ययः स्यात् । हरिद्रुः वृक्षः ऋषिः पर्वतश्च । पीतद्रुः देवदारुः । मितद्रुः समुद्रः तुरगः मितंगमश्च । शतद्रुर्नाम नदः नदी च । विद्रुः दारुप्रकारः वृक्षश्च । कुद्रुः विकलपादः । कद्रुर्नागमाता वन्हिजातिः गृहगोधा वर्णश्च ।

केवयुभुरण्यध्वर्वादयः ॥७४६॥ केवय्वादयः शब्दा डिदुप्रत्ययान्ता निपात्यन्ते । केवलपूर्वाद्यातेर्लोपश्च । केवलो याति केवयुः ऋषिः । भूपूर्वाद् यातेर्भुरण् चादौ । भुवं याति भुरण्युः अग्निः । अध्वरं याति, पूर्वपदान्तलोपे अध्वर्युः ऋत्विक् । आदिग्रहणात् चरन् याति चरण्युः वायुः । अभिपूर्वस्य चाश्नातेरभीशुः रश्मिः ।

शः सन्वच्च ॥७४७॥ शोंच् तक्षणे इत्यस्मात् डिदुः प्रत्ययः स च सन्वत् स्यात्–सनि इवास्मिन् द्वित्वं पूर्वस्य चेत्वं भवतीत्यर्थः । शिशुः बालः ।

तनेर्डउः ॥७४८॥ तनूयी विस्तारे इत्यस्मात् डिदउः प्रत्ययः स्यात् स च सन्वत् । तितउः परिपवनम् ।

कैशीशामिरामिभ्यः कुः ॥७४९॥ एभ्यः कुः प्रत्ययः स्यात् । कैं शब्दे । काकुः स्वरविशेषः । शीङ्क् स्वप्ने । शेकुः उद्भिद्विशेषः । शमूच् उपशमे । शङ्कुः कीलकः बाणः शूलम् आयुधं चिन्हं छलकश्च । रमि क्रीडायाम् । रङ्कुः मृगः ।

ह्रियः किद्रो लश्च वा ॥७५०॥ ह्रींक् लज्जायामित्यस्मात् कित् कुः प्रत्ययो रेफस्य च लकारो वा स्यात् । ह्रीकुः ह्रीकुश्च त्रपुजतुनी लज्जावाँश्च । ह्रीकुः वनमार्जारः ।

किरः ष च ॥७५१॥ कॄत् विक्षेपे इत्यस्मात् कित् कुः प्रत्ययः षकारश्चान्तादेशः स्यात् । किष्कुः छायामानद्रव्यम् ।

चटिकाटिपर्दिभ्य आकुः ॥७५२॥ एभ्य आकुः प्रत्ययः स्यात् । चटण् भेदे । चटाकुः ऋषिः शकुनिश्च । कठ कृच्छ्रजीवने । कठाकुः कुटुम्बपोषकः । पर्दि कुत्सिते शब्दे । पर्दाकुः भेकः वृश्चिकः अजगरश्च ।

सिविकुटिकुठि कुकुषिकृषिभ्यः कित् ॥७५३॥ एभ्यः किदाकुः प्रत्ययः स्यात् । षिवूङ् गतौ । सिवाकुः ऋषिः । कुटत् कौटिल्ये । कुटाकुः विटपः । कुठिः

सौत्रः । कुठाकुः श्वभ्रम् । कुंङ् शब्दे । कुवाकुः पक्षी । कुषश् निष्कर्षे । कुषाकुः मूषिकः अग्निः परोपतापी च । कृषींत् विलेखने । कृषाकुः कृषीवलः ।

उपसर्गाच्चेर्डित् ॥७५४॥ उपसर्गपूर्वात् चिंग्ट् चयन इत्यस्मात् डिदाकुः प्रत्ययः स्यात् । उपचाकुः संचाकुश्च ऋषिः । निचाकुः निपुणः ऋषिश्च ।

शलेरङ्कुः ॥ ७५५ ॥ शल गताविंत्यस्मात् अङ्कुः प्रत्ययः स्यात् । शलङ्कुः ऋषिः ।

सृपृभ्यां दाकुक् ॥७५६॥ आभ्यां कित् दाकुः प्रत्ययः स्यात् । सृदाकुः दवाग्निः वायुः आदित्यः व्याघ्रः शकुनिः अस्तः भर्ता गोत्रकृच्च । पृंक् पालनपूरणयोः । पृदाकुः सर्पः गोत्रकृच्च ।

इषेः स्वाकुक् च ॥७५७॥ इषत् इच्छायामित्यस्मात् कित् स्वाकुः प्रत्ययः स्यात् । इक्ष्वाकुः आदिक्षत्रियः ।

फलिवल्यमेर्गुः ॥७५८॥ एभ्यो गुः प्रत्ययः स्यात् । फल निष्पत्तौ । फल्गु असारम् । वलि संवरणे । वल्गु मधुरं शोभनं च । वल्गुः पक्षी । अम गतौ । अङ्गुः शरीरावयवः ।

दमेर्लुक् च ॥७५९॥ दमूच् उपशमे इत्यस्माद् गुः प्रत्ययोऽन्त्यस्य च लुक् स्यात् । दगुः ऋषिः ।

हेर्हिन् च ॥७६०॥ हिंट् गतिवृद्ध्योरित्यस्माद् गुः प्रत्ययो हिन् चास्यादेशः स्यात् । हिङ्गुः रामठः ।

प्रीकैपैनीलेरङ्गुक् ॥७६१॥ एभ्यः किदङ्गुः प्रत्ययः स्यात् । प्रींग्श् तृप्तिकान्त्योः । प्रियङ्गुः फलिनी रालकश्च । कैं शब्दे । कङ्गुः अणुः । पैं शोषणे । पङ्गुः खञ्जः । णील वर्णे । नीलङ्गुः कृमिजातिः शृगालश्च ।

अव्यार्तिगृभ्योऽडुः ॥७६२॥ एभ्योऽडुः प्रत्ययः स्यात् । अव रक्षणादौ । अवडुः कुकाटिका । ऋंक् गतौ । अरडुः वृक्षः । गृत् निगरणे । गरडुः देशविशेषः पक्षी अजगरश्च ।

शलेराडुः ॥ ७६३ ॥ शल गताविंत्यस्मादाडुः प्रत्ययः स्यात् । शलाडुः कोमलं फलम् ।

अञ्जेरिष्ठुः ॥७६४॥ आभ्यामिष्ठुः प्रत्ययः स्यात् । अञ्जौप् व्यक्तयादौ । अञ्जिष्ठुः भानुः अग्निश्च । अव रक्षणादौ । अविष्ठुः अश्वः होता च ।

तनिमनिकणिभ्यो डुः ॥७६५॥ एभ्यो डुः प्रत्ययः स्यात्। तनूयी विस्तारे। तण्डुः प्रथमः। मनिंच् ज्ञाने। मण्डुः ऋषिः। कण शब्दे। कण्डुः वेदनाविशेषः।

पनेर्दीर्घश्च ॥७६६॥ पनि स्तुतावित्यस्मात् डुः प्रत्ययो दीर्घश्च स्यात्। पाण्डुः वर्णः क्षत्रियश्च।

पलिमृभ्यामाण्डुकण्डुकौ ॥७६७॥ आभ्यां यथासंख्यमाण्डुः कण्डुक् च प्रत्ययौ स्याताम्। पल गतौ। पलाण्डुः लशुनभेदः। मृंत् प्राणत्यागे। मृकण्डुः ऋषिः।

अजिस्थाव्टरीभ्यो णुः ॥७६८॥ एभ्यो णुः प्रत्ययः स्यात्। अज क्षेपणे च। वेणुः वंशः। ष्ठां गतिनिवृत्तौ। स्थाणुः शिवः ऊर्ध्वं च दारु। वृग्ट् वरणे। वर्णुः नदः जनपदश्च। रींश् गतिरेषणयोः। रेणुः धूलिः।

विषेः कित् ॥७६९॥ विष्लृंकी व्याप्ताविवयस्मात् कित् णुः प्रत्ययः स्यात्। विष्णुः हरिः।

क्षिपेरणुक् ॥७७०॥ क्षिपींत् प्रेरणे इत्यस्मात् किदणुः प्रत्ययः स्यात्। क्षिपणुः समीरणः विद्युच्च।

अञ्जेरिष्णुः ॥७७१॥ अञ्जौप् व्यक्त्यादाविवयस्मादिष्णुः प्रत्ययः स्यात्। अञ्जिष्णुः घृतम्।

कृहभूजीविगम्यादिभ्य एणुः ॥७७२॥ एभ्य एणुः प्रत्ययः स्यात्। कृंग्ट् हिंसायाम्। डुकृंग् करणे वा। करेणुः हस्ती। हृंग् हरणे। हरेणुः गन्धद्रव्यम्। भू सत्तायाम्। भवेणुः भव्यः। जीव प्राणधारणे। जीवेणुः औषधम्। गम्लृं गतौ। गमेणुः गन्ता। आदिग्रहणात् शमूच् उपशमे, शमेणुः उपशमनम्। यजीं देवपूजादौ। यजेणुः यज्ञादिः। डुपचींष् पाके। पचेणुः पाकस्थानम्। पदेणुः वहेणुरित्यादि।

कृसिकम्यमिगमितनिमनिजन्यसिमासिसच्यविभाधागाग्लाम्लाह-निहायाहिक्रुशिपूभ्यस्तुन् ॥७७३॥ एभ्यस्तुन् प्रत्ययः स्यात्। डुकृग् करणे। कर्तुः कर्मकरः। षिंग्ट् बन्धने। सेतुः नदीसंक्रमः। कमूङ् कान्तौ। कन्तुः कन्दर्पः कामी मनः कुसूलश्च। अम गतौ। अन्तुः रक्षिता लक्षणं च। गम्लृं गतौ। गन्तुः पथिकः आगन्तुः अवास्तव्यो जनः। तनूयी विस्तारे। तन्तुः सूत्रम्। मनिंच् ज्ञाने। मन्तुः वैमनस्यं प्रियंवदः मानश्च। जनैचि प्रादुर्भावे। जन्तुः प्राणी। असूक् भुवि। अस्तुः अस्तिभावः। बाहुलकात् भूभावाभावः। मसैच् परिणामे। मस्तु दधिमूलवारि। षचि सेचने। सक्तुः यवविकारः। अव रक्षणादौ। ओतुः बिडालः।

भांक् दीप्तौ । भातुः दीप्तिमान् शरीरावयवः अग्निः विद्वाँश्च । डुधांग्क् धारणे च । धातुः लोहादिः रसादिः शब्दप्रकृतिश्च । गैं शब्दे । गातुः गायनः उद्गाता च । ग्लैं हर्षक्षये । ग्लातुः सरुजः । म्लैं गात्रविनामे । म्लातुः दीनः । हनंक् हिंसागत्योः । हन्तुः आयुधं हिमश्च । ओहांक् त्यागे । हातुः मृत्युः मार्गश्च । यांक् प्रापणे । यातुः पाप्मा जनः राक्षसश्च । हिंट् गतिवृद्धयोः । हेतुः कारणम् । क्रुशं आह्वानरोदनयोः । क्रोष्टा शृगालः । पूग्ग् पवने । पोतुः पविता । नित्करणं 'क्रुशस्तुनस्तृच् पुंसि' इत्यत्र विशेषणार्थम् ।

वसेर्णिद्वा ॥७७४॥ वसं निवासे इत्यस्मात् तुन् प्रत्ययः स च णिद्वा । वास्तु गृहं गृहभूमिश्च । वस्तु सत् निवेशभूमिश्च ।

पः पीप्यौ च वा ॥७७५॥ पां पान इत्यस्मात् तुन् प्रत्ययः स्यात् अस्य च पी पि इत्यादेशौ वा स्याताम् । पीतुः आदित्यः चन्द्रः हस्ती कालः चक्षुः बालघृतपानभाजनं च । पितुः प्रजापतिः आहारश्च । पातुः रक्षिता ब्रह्मा च ।

आपोऽप् च ॥७७६॥ आप्लृंट् व्याप्तावित्यस्मात् तुन् प्रत्ययोऽस्य चाप् इत्यादेशः स्यात् । अप्तुः देवताविशेषः कालः याजकः यज्ञयोनिश्च ।

अञ्ज्यर्तेः कित् ॥७७७॥ आभ्यां कित्तुन् प्रत्ययः स्यात् । अञ्जौप् व्यक्त्यादिषु । अक्तुः इन्द्रः विष्णुः रात्रिश्च । ऋंक् गतौ । ऋतुः हेमन्तादिः स्त्रीरजः तत्कालश्च ।

चायः के च ॥७७८॥ चायृग् पूजानिशामनयोरित्यस्मात् तुन् प्रत्ययोऽस्य च के इत्यादेशः स्यात् । केतुः ध्वजः ग्रहश्च ।

वहिमहिगुह्येधिभ्योऽतुः ॥७७९॥ एभ्योऽतुः प्रत्ययः स्यात् । वहीं प्रापणे । वहतुः विवाहः अनड्वान् अग्निः कालश्च । मह पूजायाम् । महतुः अग्निः । गुहौंग् संवरणे । गूहतुः भूमिः । एधि वृद्धौ । एधतुः लक्ष्मीः पुरुषः अग्निश्च ।

कृलाभ्यां कित् ॥७८०॥ आभ्यां कितुः प्रत्ययः स्यात् । डुकृंग् करणे । क्रतुः यज्ञः । लांक् आदाने । लतुः पाशः ।

तनेर्यतुः ॥७८१॥ तनूयी विस्तारे इत्यस्माद् यतुः प्रत्ययः स्यात् । तन्यतुः विस्तारः वायुः पर्वतः सूर्यश्च ।

जीवेरातुः ॥७८२॥ जीव प्राणधारणे इत्यस्मादातुः प्रत्ययः स्यात् । जीवातुः जीवनम् औषधम् अन्नम् उदकं द्रव्यं च ।

यमेर्दुक् ॥७८३॥ यमूं उपरमे इत्यस्मात् कित् दुः प्रत्ययः स्यात् । यदुः क्षत्रियः ।

शीङो धुक् ॥७८४॥ शीङ्क् स्वप्ने इत्यस्मात् कित् धुः प्रत्ययः स्यात् । शीधु मद्यविशेषः ।

धूगो धुन् च ॥७८५॥ धूञ् कम्पने इत्यस्मात् धुक् प्रत्ययोऽस्य च धुन् इत्यादेशः स्यात् । धुन्धुः दानवः ।

दाभाभ्यां नुः ॥७८६॥ आभ्यां नुः प्रत्ययः स्यात् । डुदांङ् दाने । दानुः गन्ता यजमानः वायुः आदित्यः दक्षिणार्थं च धनम् । भांङ् दीप्तौ । भानुः सूर्यः रश्मिश्च । चित्रभानुः अग्निः । स्वर्भानुः राहुः । विश्वभानुः आदित्यः ।

धेः शित् ॥७८७॥ टुधेंट् पाने इत्यस्मान्नुः प्रत्ययः स्यात् स च शित् । शित्त्वादात्संध्यक्षरस्येति आकारो न । धेनुः अभिनवप्रसवा गवादिः ।

सूङः कित् ॥७८८॥ षूङौङ् प्राणिगर्भविमोचने इत्यस्मात् कित् नुः प्रत्ययः स्यात् । सूनुः पुत्रः ।

हो जह् च ॥७८९॥ ओहाक् त्यागे इत्यस्मात् कित्नुः प्रत्ययोऽस्य च जह् इत्यादेशः । जह्नुः गङ्गापिता ।

वचेः कगौ च ॥७९०॥ वचंक् भाषणे इत्यस्मान्नुः प्रत्ययः ककारगकारौ चान्तादेशौ स्याताम् । वक्नुः वग्नुश्च वाग्मी ।

कृहनेस्तुक्नुकौ ॥७९१॥ आभ्यां कितौ तु नु इति प्रत्ययौ स्याताम् । डुकृंग् करणे । कृतुः कर्मकारः । कृणुः कोशकारः कारुश्च । हनंक् हिंसागत्योः । हतुः हिमः । हनुः वक्त्रैकदेशः । बाहुलकान्नलोपः ।

गमेः सन्वच्च ॥७९२॥ गम्लृं गतावित्यस्मात् तुक्नुकौ सन्वच्च स्याताम् । जिगन्तुः ब्राह्मणः दिवसः मार्गः प्राणः अग्निश्च । जिगन्नुः प्राणः बाणः मनः मीनः वायुश्च ।

दाभूक्षण्युन्दिनदिवदिपत्यादेरनुङ् ॥७९३॥ एभ्यो ङिदनुः प्रत्ययः स्यात् । डुदांङ् दाने । दनुः दानवमाता । भू सत्तायाम् । भुवनुः मेघः चन्द्रः भवितव्यता हंसश्च । क्षणूयी हिंसायाम् । क्षणनुः यायावरः । उन्दैप् क्लेदने । उदनुः शुकः । णद अव्यक्ते शब्दे । नदनुः मेघः सिंहश्च । वद व्यक्तायां वाचि । वदनुः वक्ता । पत्लृ गतौ । पतनुः श्येनः । आदिग्रहणादन्येऽपि । किच्चमकृत्वा ङित्करणं वदेर्व्रीदभावार्थम् ।

कृशेरानुक् ॥७९४॥ कृशच् तनुत्वे इत्यस्मात् किदानुः प्रत्ययः स्यात् । कृशानुः वन्हिः ।

जीवे रदानुक् ॥७९५॥ जीव प्राणधारणे इत्यस्मात् कित् रदानुः प्रत्ययः स्यात्। जीरदानुः। कित्करणं गुणप्रतिषेधार्थम्। वलोपे हि नाम्यन्तत्वात् गुणः स्यात्।

वचेरक्नुः ॥७९६॥ वचंक् भाषणे इत्यस्मादक्नुः प्रत्ययः स्यात्। वचक्नुः वाग्मी आचार्यः ब्राह्मणः ऋषिश्च।

हृषिपुषिघुषिगदिमदिनन्दिगण्डिमण्डिजनिस्तनिभ्यो णेरित्नुः ॥ ॥७९७॥ एभ्यो ण्यन्तेभ्यो इत्नुः प्रत्ययः स्यात्। हृंषच् तुष्टौ, हृषू अलीके वा। हर्षयित्नुः आनन्दः स्वजनः रङ्गोपजीवी प्रियंवदश्च। पुषंच् पुष्टौ। पोषयित्नुः भर्ता मेघः कोकिलश्च। घुषृण् विशब्दने। घोषयित्नुः कोकिलः शब्दश्च। गदण् गर्जे। गदयित्नुः पर्जन्यः वावदूकः भ्रमरः कामश्च। मदैच् हर्षे। मदयित्नुः मदिरा सुवर्णम् अलंकारश्च। टुनदु समृद्धौ। नन्दयित्नुः पुत्रः आनन्दः प्रमुदितश्च। गड सेचने। गडयित्नुः बलाहकः। मडु भूषायाम्। मण्डयित्नुः मण्डयिता कामुकश्च। जनैचि प्रादुर्भावे। जनयित्नुः पिता। स्तनण् गर्जे। स्तनयित्नुः मेघः मेघगर्जितं च।

कस्यर्तिभ्यामिपुक् ॥७९८॥ आभ्यां किदिपुः प्रत्ययः स्यात्। कस गतौ। कसिपुः असनम्। ऋंक् गतौ। रिपुः शत्रुः।

कम्यमिभ्यां वुः ॥७९९॥ आभ्यां वुः प्रत्ययः स्यात्। कमूङ् कान्तौ। कम्बुः शङ्खः। अम गतौ। अम्बु पानीयम्।

अभ्रेरमुः ॥ ८०० ॥ अभ्र गतावित्यस्मादमुः प्रत्ययः स्यात्। अभ्रमुः देवहस्तिनी।

यजिशुन्धिदहिदसिजनिमनिभ्यो युः ॥८०१॥ एभ्यो युः प्रत्ययः स्यात्। यजीं देवपूजादौ। यज्युः अग्निः अध्वर्युः यज्वा शिष्यश्च। शुन्ध् शुद्धौ। शुन्ध्युः अग्निः आदित्यः पवित्रं च। दहं भस्मीकरणे। दह्युः अग्निः। दसूच् उपक्षये। दस्युः चौरः। जनैचि प्रादुर्भावे। जन्युः अपत्यं पिता वायुः प्रादुर्भावः प्रजापतिः प्राणी च। मनिंच् ज्ञाने च। मन्युः कृपा क्रोधः शोकः क्रतुश्च।

भुजेः कित् ॥८०२॥ भुजंप् पालनाभ्यवहारयोः इत्यस्मात् कित् युः प्रत्ययः स्यात्। भुज्युः अग्निः आदित्यः गरुडः भोगः ऋषिश्च।

सर्तेरय्वन्यू ॥८०३॥ सृं गतावित्यस्मात् अयु अन्यु इति प्रत्ययौ स्याताम्। सरयुः नदी वायुश्च। दीर्घान्तमिममिच्छन्त्येके। सरयूः। श्लिष्टनिर्देशात् तदपि संगृहीतम्। सरण्युः मेघः अश्विनोर्माता समेघो वायुश्च।

भूक्षिपिचरेरन्युक् ॥८०४॥ एभ्यः किदन्युः प्रत्ययः स्यात् । भू सत्तायाम् । भुवन्युः ईश्वरः अग्निश्च । क्षिपींत् प्रेरणे । क्षिपण्युः वायुः वसन्तः विद्युत् अर्थः कालश्च । चर भक्षणे च । चरण्युः वायुः ।

मुस्त्युक् ॥८०५॥ मृंत् प्राणत्यागे इत्यस्मात् कित् त्युः प्रत्ययः स्यात् । मारयतीति मृत्युः कालः मरणं च ।

चिनीपीभ्यशिभ्यो रुः ॥८०६॥ एभ्यो रुः प्रत्ययः स्यात् । चिंग्ट् चयने । चेरुः मुनिः । णींग् प्रापणे । नेरुः जनपदः। पींङ्च् पाने । पेरुः सूर्यः गिरिः कलविङ्कश्च । मींङ्च् हिंसायाम् । मेरुः देवाद्रिः । अशौटि व्याप्तौ । अश्रु नेत्रजलम् ।

रुपूभ्यां कित् ॥८०७॥ आभ्यां किद्रुः प्रत्ययः स्यात् । रुक् शब्दे । रुरुः मृगजातिः । पूग्श् पवने । पूरुः राजा ।

खनो लुक् च ॥८०८॥ खनूग् अवदारणे इत्यस्मात् रुः प्रत्ययः स्यादन्तस्य च लुक् । खरुः दर्पः क्रूरः मूर्खः दक्षः गीतविशेषश्च ।

जनिहनिशद्यर्तेस्त च ॥८०९॥ एभ्यो रुः प्रत्ययस्तकारश्चान्तादेशः स्यात्। जनैचि प्रादुर्भावे । जन्तुः शरीरावयवः मेघः घर्मावसानं च । हनंक् हिंसागत्योः । हन्तुः हिंस्रः । शदॢं शातने । शन्तुः रिपुः । बाहुलकात् तादेशविकल्पे शद्रुः पुरुषः। ऋंक् गतौ । अर्न्तुः क्षुद्रजन्तुः ।

श्मनः शीङो डित् ॥८१०॥ श्मन्पूर्वात् शीङ्क् स्वप्न इत्यस्मात् डिद् रुः प्रत्ययः स्यात् । श्मश्रु मुखलोमानि ।

शिग्रुगेरुनमेर्वादयः ॥ ८११ ॥ शिग्र्वादयः शब्दा रुप्रत्ययान्ता निपात्यन्ते । शिंग्ट् निशाने । कित् गोऽन्तश्च । शिग्रुः सौभाञ्जनकः, हरितकविशेषश्च । गिरतेरेच्च । गेरुः धातुः । नमेर्नऽपूर्वस्य मयतेर्वा एच्चान्तः । नमेरुः देवतरुः । आदिग्रहणादन्येऽपि ।

कटिकुटयर्तेररुः ॥८१२॥ एभ्योऽरुः प्रत्ययः स्यात् । कटे वर्षावरणयोः । कटरुः शकटम् । कुटत् कौटिल्ये । कुटरुः पक्षिविशेषः मर्कटः वृक्षः वर्धकिश्च । कुटादिलान्न गुणः । ऋंक् गतौ । अररुः असुरः आयुधं मण्डलं च ।

कर्केरारुः ॥८१३॥ कर्केः सौत्रादारुः प्रत्ययः स्यात् । कर्कारुः क्षुद्रचिर्भटी ।

उर्वेरादेरूदेतौ च ॥८१४॥ उर्वैं हिंसायामित्यस्मादारुः प्रत्ययः स्यात्

आदेश्चोकारैकारौ स्याताम् । ऊर्वत्यार्तिमिति ऊर्वारुः कटुचिर्भटी । एर्वारुः चारुचिर्भटी ।

कृपिक्षुधिवीकुणिभ्यः कित् ॥८१५॥ एभ्यः किदारुः प्रत्ययः स्यात् । कृपौङ् सामर्थ्ये । कृपारुः दयाशीलः । क्षुधंच् बुभुक्षायाम् । क्षुधारुः क्षुधमसहमानः। लत्वे कृपालुः क्षुधालुः । पीङ्च् पाने । पियारुः वृक्षः । कुणत् शब्दोपकरणयोः । कुणारुः वनस्पतिः ।

श्यः शीत च ॥८१६॥ श्यैङ् गतावित्यस्मादारुः प्रत्ययोऽस्य च शीत इत्यादेशः स्यात् । शीतारुः शीतासहः । लत्वे शीतालुः ।

तुम्बेरुरुः ॥ ८१७ ॥ तुबु अर्दने इत्यस्मादुरुः प्रत्ययः स्यात् । तुम्बुरुः गन्धर्वः गन्धद्रव्यं च ।

कन्देः कुन्दु च ॥८१८॥ कदु रोदनाह्वानयोरित्यस्मादुरुः प्रत्ययोऽस्य च कुन्द् इत्यादेशः स्यात् । कुन्दुरुः सल्लकीनिर्यासः ।

चमेरूरुः ॥८१९॥ चमू अदने इत्यस्मादूरुः प्रत्ययः स्यात् । चमूरुः चित्रकः।

शीङो लुः ॥८२०॥ शीङ्क् स्वप्ने इत्यस्मालुः प्रत्ययः स्यात् । शेलुः श्लेष्मातकः ।

पीङः कित् ॥८२१॥ पीङ्च् पाने इत्यस्मात् कित् लुः प्रत्ययः स्यात् । पीलुः हस्ती वृक्षश्च ।

लस्जीर्ष्यशलेरालुः ॥८२२॥ एभ्य आलुः प्रत्ययः स्यात् । ओलस्जैति व्रीडे । लज्जालुः लज्जनशीलः । ईर्ष्यू ईर्ष्यार्थः । ईर्ष्यालुः ईर्ष्याशीलः । शल गतौ । शलालुः वृक्षावयवः ।

आपोऽप् च ॥ ८२३ ॥ आप्लृंट् व्याप्तावित्यस्मादालुः प्रत्ययोऽस्य चाप् इत्यादेशः स्यात् । अपालुः वायुः ।

गृहलुगुग्गुलुकमण्डलवः ॥ ८२४ ॥ एते आलुप्रत्ययान्ता निपात्यन्ते । गृहतेर्ह्रस्वश्च प्रत्ययादेः । गृहलुः ऋषिः । गुंङ् शब्दे । अस्यादिर्गुग् लोपश्च प्रत्ययादेः । गुग्गुलुः वृक्षविशेषः अश्वश्च । कम्पूर्वादनितेर्दोऽन्तः ह्रस्वश्च प्रत्ययादेः। कमण्डलुः अमत्रम् ।

प्रः शुः ॥८२५॥ पॄश् पालनपूरणयोरित्यस्मात् शुः प्रत्ययः स्यात् । पर्शुः वङ्क्षिसंज्ञं वक्रास्थि ।

मस्जीष्यशिभ्यः सुक् ॥८२६॥ एभ्यः कित् सुः प्रत्ययः स्यात्। डुमस्जोंत् शुद्धौ। 'मस्जेः सः' इति नोऽन्तः। मङ्क्षुः मुनिः। इषश् आभीक्ष्ण्ये। इक्षुः गुडादिप्रकृतिः। अशौटि व्याप्तौ। अक्षुः समुद्रः वमश्च।

तॄपलिमलेरक्षुः ॥८२७॥ एभ्योऽक्षुः प्रत्ययः स्यात्। तॄ प्लवनतरणयोः। तरक्षुः श्वापदविशेषः। पल गतौ, मलि धारणे। पलक्षुः मलक्षुश्च वृक्षः।

उलेः कित् ॥८२८॥ उल दाहे इत्यस्मात् सौत्राद् किदक्षुः प्रत्ययः स्यात्। उलक्षुः तृणजातिः।

कृषिचमितनिधन्यन्दिसर्जिखर्जिभर्जिलस्जीर्ष्यिभ्य ऊः ॥ ८२९ ॥ एभ्य ऊः प्रत्ययः स्यात्। कृषींत् विलेखने। कर्षूः कुल्या अङ्गारः परिखा गर्तश्च। चमू अदने। चमूः सेना। तनूयी विस्तारे। तनूः शरीरम्। धन शब्दे, धन धान्ये सौत्रो वा। धनूः धान्यराशिः ज्या वरारोहा च स्त्री। अदु बन्धने। अन्दूः पादकटकः। सर्ज अर्जने। सर्जूः अर्थः क्षारः वनस्पतिः वणिक् च। खर्ज मार्जने च। खर्जूः कण्डूः विद्युच्च। भृजैङ् भर्जने, भ्रस्जींत् पाके वा। भर्जूः यवविकारः। ओलस्जैति व्रीडे। लज्जूः लज्जालुः। ईर्ष्य् ईर्ष्यार्थः। ईर्ष्यूः ईर्ष्यालुः।

फलेः फेल् च ॥८३०॥ फल निष्पत्तावित्यस्मादूः प्रत्ययोऽस्य च फेल् इत्यादेशः स्यात्। फेलूः होमविशेषः।

कषेर्ण्डच्छौ च षः ॥८३१॥ कष हिंसायामित्यस्मादूः प्रत्ययः स्यात् षकारस्य च ण्ड् च्छश्चादेशः स्यात्। कण्डूः कच्छूश्च पामा।

वहेर्धूः च ॥ ८३२ ॥ वहीं प्रापणे इत्यस्मादूः प्रत्ययो धश्चान्तादेशः स्यात्। वधूः पतिमुपयन्ना कन्या जाया च।

मृजेर्गुणश्च ॥८३३॥ मृजौक् शुद्धावित्यस्मादूः प्रत्ययो गुणश्चास्य। मर्जूः शुद्धिः रजकः नद्यास्तीरं शिला च। गुणे सिद्धे गुणवचनमकारस्य वृद्धिबाधनार्थम्।

अजेर्जोऽन्तश्च ॥८३४॥ अज क्षेपणे चेत्यस्मादूः प्रत्ययो जकारश्चान्तः स्यात्। अज्जूः जननी।

कसिपद्यर्त्यादिभ्यो णित् ॥८३५॥ एभ्यो णिदूः प्रत्ययः स्यात्। कस गतौ। कासूः शक्तिर्नामायुधम् वाग्विकलः बुद्धिः व्याधिः विकला च वाक्। पदिच् गतौ। पादूः पादुका। ऋक् गतौ। आरूः वृक्षविशेषः कच्छूः गतिः पिङ्गलश्च। आदिग्रहणात् कचतेः काचूः, शलतेः शालूः इत्यादयोऽपि।

अणेर्डोऽन्तश्च ॥८३६॥ अणेर्धातोर्णिदूः प्रत्ययः स्याद् डश्चान्तः। अण शब्दे। आण्डूः जलभृङ्गारः।

अडो लः च वा ॥८३७॥ अड उद्यमे इत्यस्माण्णिदूः प्रत्ययः स्यात् लश्चान्तादेशो वा। आलूः भृङ्गारः करकश्च। आडूः दर्वी टिट्टिभः वनस्पतिः जलाधारभूमिः पादभेदनं च।

नञो लम्बेर्नलुक् च ॥८३८॥ नञ्पूर्वात् लबूङ् अवस्रंसने चेत्यस्मात् णिदूः प्रत्ययो नकारस्य च लुक् स्यात्। अलाबूः तुम्बी।

कफादीरेर्ले च ॥८३९॥ कफपूर्वादीरिक् गतिकम्पनयोरित्यस्मादूः प्रत्ययो लकारश्चान्तादेशः स्यात्। कफेलूः श्लेष्मातकः यवलाजाः मधुपर्कः छादिषेयं च तृणम्।

ऋतो रत् च ॥८४०॥ ऋत् घृणागतिस्पर्धेषु इत्यस्मादूः प्रत्ययो रत् चास्यादेशः स्यात्। रतूः नदीविशेषः सत्यवाक् दूतः कृमिविशेषश्च।

दृभिचपेः स्वरान्नोऽन्तश्च ॥८४१॥ आभ्यां पर ऊः प्रत्ययः स्वरात् परो नोऽन्तश्च स्यात्। दृभैत् ग्रन्थे। दृन्भूः सर्पजातिः वनस्पतिः वज्रः ग्रन्थकारः दर्भणं च। बाहुलकात् 'म्रां धुड्वर्गेऽन्त्योऽपदान्ते' इति नकारस्य निमित्तवर्गीयान्त्योन। चप सान्त्वने चम्पूः कथाविशेषः।

धृषेर्दिधिषदिधीषौ च ॥८४२॥ त्रिधृषाट् प्रागल्भ्ये इत्यस्मात् ऊः प्रत्ययो दिधिष् दिधीष् इत्यादेशौ चास्य स्याताम्। दिधिषूः ज्यायस्याः पूर्वपरिणीता पुंश्चली च। दिधीषूः ऊढायाः कनिष्ठाया अनूढा ज्येष्ठा पुनर्भूः आहुतिश्च।

भ्रमिगमितनिभ्यो डित् ॥८४३॥ एभ्यो डिदूः प्रत्ययः स्यात्। भ्रमूच् अनवस्थाने। भ्रूः अक्ष्णोरुपरि रोमराजिः। गम्लृं गतौ। अग्रे गच्छत्यग्रेगूः पुरस्सरः। तनूयी विस्तारे। कुत्सितं तन्यते कुतूः चर्ममयमावपनम्।

नृतिशृधिरुषिकुहिभ्यः कित् ॥८४४॥ एभ्यः किदूः प्रत्ययः स्यात्। नृतैच् नर्तने। नृतूः नर्तकः कृमिजातिः प्लवः प्रतिकृतिश्च। शृधूङ् शब्दकुत्सायाम्। शृधूः शर्धनः कृमिजातिः अपानं बलिश्च दानवः। रुषंच् रोषे। रुषूः भर्त्सकः। कुहणि विस्मापने। कुहूः अमावास्या।

तॄस्वप्डिभ्यां डूः ॥८४५॥ आभ्यां डूः प्रत्ययः स्यात्। तॄ प्लवनतरणयोः। तर्डूः द्रोणी प्लवः परिवेषणभाण्डं च। खडण् भेदे। खड्डूः बालानामुपकरणं स्त्रीणां पादाङ्गुष्ठाभरणं च।

तृदृभ्यां दूः ॥८४६॥ आभ्यां दूः प्रत्ययः स्यात् । तॄ प्लवनतरणयोः । तर्दूः दर्वी । दृश् विदारणे । दर्दूः कुष्ठभेदः ।

कमिजनिभ्यां बूः ॥८४७॥ आभ्यां बूः प्रत्ययः स्यात् । कमूङ् कान्तौ । कम्बूः भूषणम् आदर्शत्सरुः कुरुविन्दश्च । जनैचि प्रादुर्भावे । जम्बूः वृक्षविशेषः।

शकेरन्धूः ॥८४८॥ शक्लृंट् शक्तावित्यस्मादन्धुः प्रत्ययः स्यात् । शकन्धूः वनस्पतिः देवताविशेषश्च ।

कृगः कादिः ॥८४९॥ डुकृंग् करणे इत्यस्मात् ककारादिरन्धूः प्रत्ययः स्यात् । कर्कन्धूः बदरी व्रणं यवलाजाः मधुपर्कः विष्टम्भश्च ।

योरागूः ॥८५०॥ युक् मिश्रणे इत्यस्मादागूः प्रत्ययः स्यात् । यवागूः द्रवौदनः ।

काच्छीङो डेरूः ॥८५१॥ कपूर्वात् शीङ्क् स्वप्ने इत्यस्मात् डिदेरुः प्रत्ययः स्यात् । कशेरुः कन्दविशेषः वीरुच्च ।

दिव ऋः ॥८५२॥ दिवूच् क्रीडादावित्यस्माद् ऋः प्रत्ययः स्यात् । देवा देवरः पितृव्यस्त्री अग्निश्च ।

सोरसेः ॥८५३॥ सुपूर्वादसूच् क्षेपणे इत्यस्माद् ऋः प्रत्ययः स्यात् । स्वसा भगिनी ।

नियो डित् ॥८५४॥ णींग् प्रापणे इत्यस्मात् डिद् ऋः प्रत्ययः स्यात् । ना पुरुषः ।

सव्यात् स्थः ॥८५५॥ सव्यपूर्वात् ष्ठां गतिनिवृत्ताविवित्यस्माद् डिद् ऋः प्रत्ययः स्यात् । सव्येष्ठा सारथिः ।

यतिननान्दिभ्यां दीर्घश्च ॥८५६॥ यतेर्नञ्पूर्वात् नन्देश्च ऋः प्रत्ययः स्यात् दीर्घश्चानयोर्भवति। यतैङ् प्रयत्ने । याता पतिभ्रातृभगिनी देवरभार्या ज्येष्ठभार्या च। टुनदु समृद्धौ । ननान्दा भर्तृभगिनी । नखादिलाञ्छनोऽन्न भवति ।

शासिशंसिनीरुक्षुहृभृधूमन्यादिभ्यस्तृः ॥ ८५७ ॥ एभ्यस्तृः प्रत्ययः स्यात् । शासूक् अनुशिष्टौ । शास्ता गुरुः राजा च । प्रशास्ता राजा ऋत्विक् च । शंसू स्तुतौ च । शंस्ता स्तोता । णींग् प्रापणे । नेता सारथिः । रुक् शब्दे । रोता मेघः । टुक्षुक् शब्दे । क्षोता मुसलम् । हृंग् हरणे । हर्ता चौरः । टुडुभृंग्क् पोषणे च । भर्ता पतिः । धृंङ्त् अवध्वंसने । धर्ता धर्मः । मनिंच् ज्ञाने । मन्ता विद्वान् प्रजापतिश्च । आदिग्रहणादुपद्रष्टा ऋत्विक् विशस्ता घातकः इत्यादयोऽपि ।

पातेरिच्च ॥८५८॥ पांक् इत्यस्मात् तृः प्रत्ययो धातोश्चेकारोऽन्तादेशः स्यात् । पिता जनकः ।

मानिभ्राजेर्लुक् च ॥८५९॥ आभ्यां तृः प्रत्ययो लुक् चान्तस्य स्यात् । मानि पूजायाम् । माता जननी । भ्राजि दीप्तौ । भ्राता सोदर्यः ।

जाया मिगः ॥८६०॥ जाशब्दपूर्वात् मिंग्ट् प्रक्षेपणे इत्यस्मात् तृः प्रत्ययः स्यात् । जायां प्रजायां मिन्वन्ति तमिति जामाता दुहितृपतिः ।

आपोऽप् च ॥८६१॥ आप्लृंट् व्याप्तावित्यस्मात् तृः प्रत्ययः स्यात् अप् चास्यादेशः । अप्ता यज्ञः अग्निश्च ।

नमेः प च ॥८६२॥ णमं प्रह्वत्वे इत्यस्मात्तृः प्रत्ययः पश्चास्यान्तादेशः। नप्ता दुहितुः पुत्रस्य वा पुत्रः ।

हुपूग्गोन्नीप्रस्तुप्रतिहृप्रतिप्रस्थाभ्य ऋत्विजि ॥८६३॥ एभ्य ऋत्विज्यभिधेये तृः प्रत्ययः स्यात् । हुंक् दानादनयोः । होता । पूग्श् पवने । पोता । गैं शब्दे, णींग् प्रापणे, उत्पूर्वः । उद्गाता । उन्नेता । ष्टुंग्क् स्तुतौ, प्रपूर्वः । प्रस्तोता । हृंग् हरणे, प्रतिपूर्वः । प्रतिहर्ता । ष्ठां गतिनिवृत्तौ, प्रतिप्रपूर्वः । प्रतिप्रस्थाता । एते ऋत्विजः ।

नियः षादिः ॥८६४॥ णींग् प्रापणे इत्यस्मात् षकारादिस्तृः प्रत्ययः स्यात् ऋत्विज्यभिधेये । नेष्टा ऋत्विक् ।

त्वष्टृक्षत्तृदुहित्रादयः ॥८६५॥ एते तृप्रत्ययान्ता निपात्यन्ते । त्विषेरितोऽच्च । त्वष्टा देववर्धकिः प्रजापतिः आदित्यश्च । क्षद खदने सौत्रः। क्षत्ता नियुक्तः अविनीतः दौवारिकः मुसलः पारशवः रुद्रः सारथिश्च । दुहेरिट् किच्च । दुहिता तनया । आदिग्रहणादन्येऽपि ।

रातेर्डैः ॥८६६॥ रांक् दाने इत्यस्मात् डिदैः प्रत्ययः स्यात् । राः द्रव्यम् । रायौ । रायः ।

द्युगमिभ्यां डोः ॥८६७॥ आभ्यां डिदोः प्रत्ययः स्यात् । द्युंक् अभिगमे । द्यौः स्वर्गः अन्तरिक्षं च । गम्लृं गतौ । गौः पृथिव्यादिः ।

ग्लानुदिभ्यां डौः ॥८६८॥ आभ्यां डिदौः प्रत्ययः स्यात् । ग्लैं हर्षक्षये । ग्लौः चन्द्रमाः व्याधितः शरीरग्लानिश्च । णुदंत् प्रेरणे । नौः जलतरणम् ।

तोः किक् ॥८६९॥ तुंक् हृत्यादावित्यस्मात् किक् प्रत्ययः स्यात् । ककारः कित्कार्यार्थः । इकार उच्चारणार्थः । तुक् अपत्यम् ।

द्राग्रादयः ॥८७०॥ द्राक् इत्यादयः शब्दाः किक्प्रत्ययान्ता निपात्यन्ते। द्रवतेरा च। द्राक् शीघ्रम्। एवं सरतेः स्राक्। स एवार्थः। इयर्त्तेरर्वादेशश्च। अर्वाक् अचिरन्तम्। आदिग्रहणादन्येऽपि।

स्रोश्चिक् ॥८७१॥ स्रुं गतौ इत्यस्मात् चिक् प्रत्ययः स्यात्। स्रुक् जुहूप्रभृति अग्निहोत्रभाण्डम्। स्रुचौ। स्रुचः। इकार उच्चारणार्थः। ककारः कित्कार्यार्थः।

तनेर्ड्वच् ॥८७२॥ तनूयी विस्तारे इत्यस्मात् डिद्वच् प्रत्ययः स्यात्। त्वक् शरीरादिवेष्टनम्।

पारेरज् ॥८७३॥ पारण् कर्मसमाप्तावित्यस्मादज् प्रत्ययः स्यात्। पारक् शाकविशेषः माकारः सुवर्णं रत्नं च। पारजौ। पारजः।

ऋधिपृथिभिषिभ्यः कित् ॥८७४॥ एभ्यः किदज् प्रत्ययः स्यात्। ऋधौच् वृद्धौ। ऋधक् समीपवाचि अव्ययम्। प्रथिष् प्रख्याने। निर्देशादेव ष्वृत्। पृथक् नानार्थेऽव्ययम्। भिष् सौत्रः। भिषक् वैद्यः। भिषजौ। भिषजः।

भृपणिभ्यामिज् भुरवणौ च ॥८७५॥ भृपणिभ्यामिज् प्रत्ययो यथासंख्यं भुर वण इत्यादेशौ च स्याताम्। भृंग् भरणे। भुरिक् बाहुः शब्दः भूमिः वायुः एकाक्षराधिकपादं च ऋक्छन्दः। पणि व्यवहारस्तुत्योः। वणिक् वैदेहिकः।

वशेः कित् ॥८७६॥ वशक् कान्ताविवस्मात् किदिज् प्रत्ययः स्यात्। उशिक् कान्तः उशीरम् अग्निः गौतमश्च ऋषिः।

लङ्घेरट् नलुक् च ॥८७७॥ लघुङ् गताविवस्मात् अट्प्रत्ययो नलोपश्चास्य स्यात्। लघट् वायुः लघु च शकटम्।

सर्तेरड् ॥८७८॥ सृं गताविवस्मादट् प्रत्ययः स्यात्। सरट् वृक्षविशेषः मेघः उष्ट्जातिश्च।

ईडेरविड् ह्रस्वश्च ॥८७९॥ ईडिक् स्तुताविवस्मादविट् प्रत्ययः स्यात् ह्रस्वश्चास्य। इडविट् विश्ववाः।

किपि म्लेच्छश्च वा ॥८८०॥ म्लेच्छेरीडेश्च किपि प्रत्यये वा ह्रस्वः स्यात्। अत एव वचनात् किप् च। म्लेच्छ अव्यक्ते शब्दे। म्लेट् म्लिट् उभयं म्लेच्छजातिः। ईट् इट् स्वामी मेदिनी च।

तृपेः कत् ॥८८१॥ तृपौच् प्रीताविवस्मात् किदत् प्रत्ययः स्यात्। तृपत् चन्द्रः समुद्रः तृणभूमिश्च।

संश्रद्धेहत्साक्षादादयः ॥८८२॥ एते कत्प्रत्ययान्ता निपात्यन्ते । संपूर्वाच्चिनोतेर्डित् समो मकारस्यानुस्वारपूर्वः शकारश्च । संश्वत् अध्वर्युः कुहकश्च । अनुस्वारं नेच्छन्त्येके । सश्वत् कुहकः । विपूर्वाद् हन्तेर्डिद्वेश्च गुणः । विहन्ति गर्भमिति वेहत् गर्भघातिनी अप्रजाः स्त्री अनङ्वाँश्च । संपूर्वादीक्षतेः साक्षाभावश्च । साक्षात् समक्षमित्यर्थः । आदिग्रहणाद्देहद्वियत्पुरीतदादयोऽपि ।

पटच्छपदादयोऽनुकरणाः ॥८८३॥ पटदित्यादयोऽनुकरणशब्दाः कत्प्रत्ययान्ता निपात्यन्ते । पट गतौ । पटत् । छुपत् संस्पर्शे, उकारस्याकारश्च । छपत् । पतृ गतौ । पतत् । शूश् हिंसायाम् । शरत् । शल गतौ । शलत् । खट काङ्क्षे । खटत् । दहेः प च । दपत् । डिहेः डिपत् । खनते रश्च । खरत् । खादतेः खादत् । सर्व एते कस्यचिद्विशेषस्य श्रुतिप्रत्यासत्त्याऽनुकरणशब्दाः । अनुकरणमपि हि साध्वेव कर्तव्यं न यत् किंचित् यथानक्षरमिति शिष्टाः स्मरन्ति ।

द्रुहिवहिमहिपृषिभ्यः कतृः ॥८८४॥ एभ्यः किदतृः प्रत्ययः स्यात् । द्रुहौच् जिघांसायाम् । द्रुहन् ग्रीष्मः । वृह वृद्धौ । बृहन् प्रवृद्धः । बृहती छन्दः । मह पूजायाम् । महान् पूजितः विस्तीर्णश्च । महान्तौ । महान्तः । महती । पृषू सेचने । पृषत् तन्त्रं जलबिन्दुः चित्रवर्णजातिः दध्युपसिक्तमाज्यं च । पृषती मृगी । स्थूलपृषतीमालभेत । ऋकारो ङ्याद्यर्थः ।

गमेर्डिद् द्वे च ॥८८५॥ गम्लृं गतावित्यस्मात् कतृः प्रत्ययो डित् स्यात् द्वे चास्य रूपे स्याताम् । जगत् स्थावरजङ्गमो लोकः । जगती पृथ्वी ।

भातेर्डवतुः ॥८८६॥ भांक् दीप्तावित्यस्मात् डिदवतुः प्रत्ययः स्यात् । भवान् । भवन्तौ । भवन्तः । उकारो दीर्घत्वादिकार्यार्थः ।

हसृरुहियुषितडिभ्य इत् ॥८८७॥ एभ्य इत् प्रत्ययः स्यात् । हंग् हरणे । हरित् हरितो वर्णः ककुब् वायुः मृगजातिः अश्वः सूर्यश्च । सृ गतौ । सरित् नदी । रुहं बीजजन्मनि । रोहित् वीरुत्प्रकारः मत्स्यः सूर्यः अग्निः मृगः वर्णश्च । युषः सौत्रः । योषति गच्छति पुरुषमिति योषित् स्त्री । तडण् आघाते । तडित् विद्युत् ।

उदकाच्छ्वेर्डित् ॥८८८॥ उदकपूर्वात् द्वोश्वि गतिवृद्ध्योरित्यस्मात् डिदित् प्रत्ययः स्यात् । उदकेन श्वयति उदश्वित् तक्रम् । 'नाम्युत्तरपदस्य च' इति उदकस्य उदभावः ।

अ उत् ॥८८९॥ मृंत् प्राणत्यागे इत्यस्मादुत् प्रत्ययः स्यात् । मरुत् वायुः

देवः गिरिशिखरं च ।

ग्रो मादिर्वा ॥ ८९० ॥ गृत् निगरणे इत्यस्मादुत् प्रत्ययः स्यात् स च मकारादिर्वा । गर्मुत् गरुडः आदित्यः मधुमक्षिका तक्षा तृणं सुवर्णं च । गरुत् बर्हः अजगरः मरकतमणिः वेगः तेजसां वर्तिश्च ।

शकेर्ऋत् ॥८९१॥ शक्लृँट् शक्तावित्यस्माद् ऋत् प्रत्ययः स्यात् । शकृत् पुरीषम् ।

यजेः क च ॥८९२॥ यजीं देवपूजादिष्वित्यस्मात् ऋत् प्रत्ययो कश्चान्तादेशः स्यात् । यकृत् अन्त्रम् ।

पातेः कुथ् ॥८९३॥ पांक् रक्षणे इत्यस्मात् ऋथ् प्रत्ययः कित् स्यात् । पृथो नाम क्षत्रियाः ।

शृदृभसेरद् ॥८९४॥ एभ्योऽद् प्रत्ययः स्यात् । शृशृ हिंसायाम् । शरद् ऋतुः । दृ भये । दरत् जनपदसमानशब्दः क्षत्रियः । दरदो जनपदः । भस भर्त्सनदीप्त्योः, सौत्रः । भसत् जघनम् आस्यम् आमाशयस्थानं च । भषेरपीच्छन्त्येके । भषत् ।

तनित्यजियजिभ्यो डद् ॥८९५॥ एभ्यो डिदद् प्रत्ययः स्यात् । तनूयी विस्तारे । तद्, सः । त्यजं हानौ । त्यद्, स्यः । एतौ निर्देशवाचिनौ । यजीं देवपूजादौ । यद्–यः । अयमुद्देशवाची ।

इणस्तद् ॥८९६॥ इणंक् गतावित्यस्मात् तद् प्रत्ययः स्यात् । एतद्–एषः । समीपवाची शब्दः ।

प्रः सद् ॥८९७॥ पृशृ पालनपूरणयोरित्यस्मात् सद् इत्येवं प्रत्ययः स्यात् । पर्षत् सभा ।

द्रो ह्रस्वश्च ॥८९८॥ दृशृ विदारणे इत्यस्मात् सद् प्रत्ययः स्याद् ह्रस्वश्चास्य । दृषत् पाषाणः ।

युष्यसिभ्यां क्मद् ॥८९९॥ आभ्यां कित् मत् प्रत्ययः स्यात् । युषः सौत्रः, सेवायाम् । युष्मद्–यूयम् । असूच् क्षेपणे, अस्मद्–वयम् ।

उक्षितक्ष्यक्षीशिराजिधन्विपञ्चिपूषिक्लिदिस्निहिनुमस्जेरन् ॥९००॥ एभ्योऽन् प्रत्ययः स्यात् । उक्ष सेचने । उक्षा वृषः । तक्षौ तनूकरणे । तक्षा वर्द्धकिः । अक्षौ व्याप्तौ च । अक्षा दृष्टिनिपातः । ईशिक् ऐश्वर्ये । ईशा परमात्मा । राजृग् दीप्तौ राजा ईश्वरः । धन्विः सौत्रो गतौ, धवु गतौ वा । धन्वा मरुः धनुश्च । पञ्चुक् व्यक्तीकरणे । पञ्च संख्या । पूष वृद्धौ । पूषा आदित्यः । क्लिदौच् आर्द्रभावे ।

क्लेदा मुखमसेकः चन्द्रः इन्द्रश्च । ष्णिहौच् प्रीतौ । स्नेहा स्वाङ्गम् मुहुत् वशा च गौः । णुक् स्तुतौ । नव संख्या । टुमस्जोंत् शुद्धौ । मज्जा षष्ठो धातुः ।

लूपूयुवृषिदंशिश्युदिविप्रतिदिविभ्यः कित् ॥९०१॥ एभ्यः किदन् प्रत्ययः स्यात् । लूञ् छेदने । लुवा दात्रं स्थावरश्च । पूञ् पवने । पुवा वायुः । युक् मिश्रणे । युवा तरुणः । वृषू सेचने । वृषा इन्द्रः वृषभश्च । दंशं दशने । दश संख्या । धुंक् अभिगमे । द्युवा अभिगमनीयः राजा सूर्यश्च । दिवूच् क्रीडादौ । दिवा दिनम् । प्रतिपूर्वात् प्रतिदिवा अहः अपराह्णश्च ।

श्वन्मातरिश्वन्मूर्धन्प्लीहन्अर्यमन्विश्वप्सन्परिज्वन्महन्नहन्मघवन्नथर्वन्निति ॥ ९०२ ॥ एतेऽनप्रत्ययान्ता निपात्यन्ते । श्वयतेर्लुक् च । श्वा कुक्कुरः । मातरि अन्तरिक्षे श्वयति मातरिश्वा वायुः । अत्र ' तत्पुरुषे कृति ' इति सप्तम्या अलुप् इकारलोपश्च पूर्ववत् । मूर्छेर्धं च । मूर्छन्त्यस्मिन्नाहताः प्राणिन इति मूर्धा शिरः । प्लिहेर्दीर्घश्च । प्लीहा जठरान्तरावयवः । अरिपूर्वादमेर्ण्यन्तात् अरीन् आमयतीति अर्यमा सूर्यः । विश्वपूर्वात् प्साते: कित् च । विश्वप्सा कालः वायुः अग्निः इन्द्रश्च । परिपूर्वात् ज्वलतेर्डिच्च । परिज्वा सूर्यः चन्द्रः अग्निः वायुश्च । महीयतेरीयलोपश्च । महा महत्त्वम् । अहेर्नलोपश्च । अंहतेः अहः दिवसः । मङ्घेर्नलोपोऽव् चान्तः । मङ्घते इति मघवा इन्द्रः । नञ्पूर्वात् खर्वेः खस्थश्च । खर्वति अथर्वा वेदः ऋषिश्च । इतिकरणादन्येऽपि भवन्ति ।

षप्यशौभ्यां तन् ॥९०३॥ आभ्यां तन् प्रत्ययः स्यात् । षप समवाये । अशौटि व्याप्तौ । सप्त अष्ट उभे संख्ये ।

स्नाम्यदिपद्यर्तिपृशकिभ्यो वन् ॥९०४॥ एभ्यो वन् प्रत्ययः स्यात् । ष्णांक् शौचे । स्नावा शिरा नदी च । मदैच् हर्षे । मद्वा दक्षः पानं कान्तिः क्रीडा मुनिः शिरश्च । मद्वरी मदिरा । बाहुलकात् ङी वनो रश्च । पदिंच् गतौ । पद्वा पत्तिः वत्सः रथः पादः गतिश्च । ऋंक् गतौ । अर्वा अश्वः अशनिः आसनं मुनिश्च । पॄ पालनपूरणयोः । पर्व सन्धिः पूरणं पुण्यतिथिश्च । शक्लृंट् शक्तौ । शका वर्धकिः समर्थः । शकरी नदी विद्युत् छन्दोजातिः युवतिः सुरभिश्च । शाकरो वृषः ।

ग्रहेरा च ॥९०५॥ ग्रहीश् उपादाने इत्यस्माद् वन् प्रत्ययः स्यादाकारश्चान्तादेशः । ग्रावा पाषाणः पर्वतश्च ।

ऋशीकुशिरुहिजिक्षिहृसृधृदृभ्यः कनिप् ॥९०६॥ एभ्यः कनिप् प्रत्ययः

स्यात् । ऋंक् गतौ । ऋत्वा ऋषिः । शीङ्क् स्वप्ने । शीवा अजगरः । क्रुशं आह्वानरोदनयोः । क्रुश्वा शृगालः । रुहं बीजजन्मनि । रुह्वा वृक्षः । जिं अभिभवे । जित्वा धर्मः इन्द्रः योद्धा च । जित्वरी नदी वणिजश्च । वाराणसीं जित्वरीमाहुः । क्षिं क्षये । क्षित्वा वायुः विष्णुः मृत्युश्च । क्षित्वरी रात्रिः । हंग् हरणे । हृत्वा रुद्रः मत्स्यः वायुश्च । सृं गतौ । सृत्वा कालः अग्निः वायुः सर्पः प्रजापतिः नीचजातिश्च । सृत्वरी वेश्यामाता । धृंङ्त् स्थाने । धृत्वा विष्णुः शैलः समुद्रश्च । धृत्वरी भूमिः । दृंङ्त् आदरे । दृत्वा दक्षः । पकारस्तागमार्थः ।

सृजेः स्रज्सृकौ च ॥९०७॥ सृजंत् विसर्गे इत्यस्मात् क्वनिप् प्रत्ययः स्यात् स्रज् सृक् इत्यादेशौ चास्य स्याताम् । स्रज्वा मालाकारः रज्जुश्च । सृक्वणी आस्योपान्तौ ।

ध्याप्योर्धी पी च ॥९०८॥ ध्यैं चिन्तायाम् प्यैङ् वृद्धौ इत्याभ्यां क्वनिप् प्रत्ययो यथासंख्यं च धी पी इत्येतावादेशौ स्याताम् । ध्यायतीति धीवा पीवा मनीषी निषादः व्याधिः मत्स्यश्च । प्यायतेः, पीवा पीनः ।

अतेर्धश्च ॥९०९॥ अत सातत्यगमने इत्यस्मात् क्वनिप् प्रत्ययो धश्चान्तादेशः स्यात् । अध्वा मार्गः ।

प्रात्सदिरीरिणस्तोऽन्तश्च ॥९१०॥ प्रपूर्वेभ्यः सद्यादिभ्यः क्वनिप् प्रत्ययस्तोऽन्तश्च । षद्लृं विशरणगत्यवसादनेषु । प्रसत्वा मूढः वायुश्च प्रसत्वरी माता प्रतिपत्तिश्च । रींङ् गतिरेषणयोः । प्ररीत्वा वायुः । प्ररीत्वरी स्त्रीविशेषः । ईरिक् गतिकम्पनयोः । प्रेर्त्वा सागरः वायुश्च । प्रेर्त्वरी नगरी । इणंक् गतौ । प्रेत्वरी नगरीत्याहुः ।

मन् ॥९११॥ सर्वधातुभ्यो बहुलं मन् प्रत्ययः स्यात् । डुकृंग् करणे । कर्म व्यापारः । वृग्ट् वरणे । वर्म कवचम् । वृतूङ् वर्तने । वर्त्म पन्थाः । चर भक्षणे च । चर्म अजिनम् । भस भर्त्सनदीप्त्योः सौत्रः । भसितं तदिति भस्म भूतिः । जनैचि प्रादुर्भावे । जन्म उत्पत्तिः । शॄंश् हिंसायाम् । शर्म सुखम् । वसवोऽस्य दुरितं शीर्यासुरिति वसुशर्मा । एवं हरिशर्मा । मृंत् प्राणत्यागे । मर्म जीवप्रदेशप्रचयस्थानम् । यत्र जायमाना वेदना महती जायते । नॄंश् नये । नर्म परिहासकथा । श्लिषंच् आलिङ्गने । श्लेष्मा कफः । ऊष रुजायाम् । ऊष्मा तापः । डुडुभृंक् पोषणे च । भर्म सुवर्णम् । यांक् प्रापणे । यामा रथः । वांक् गतिगन्धनयोः । वामा करचरणह्रस्वः । पांक् रक्षणे । पामा कच्छूः वृषूः सेचने । वर्ष्म शरीरम् ।

षद्लृं विशरणगत्यवसादनेषु । सद्म गृहम् । विशंत् प्रवेशने । वेश्म गृहम् । हिंट् गतिवृद्धयोः । हेम सुवर्णम् । छदण् अपवारणे । छद्म माया । दीङ्च् क्षये, देंङ् पालने वा । दाम रज्जुः माता च । दुधांङ्क् धारणे च । धाम स्थानं तेजश्च । ष्ठांङ् गतिनिवृत्तौ । स्थाम बलम् । षुंङ्ट् अभिषवे । सोमा यज्ञः पयो रसः चन्द्रमाश्च । अशौटि व्याप्तौ । अश्मा पाषाणः । लक्षण् दर्शनाङ्कनयोः । लक्ष्म चिन्हम् । अयि गतौ । अय्म संग्रामः । तक् हसने । तक्मा रतिः आतपः दीपश्च । हुंक् दानादनयोः । होम हव्यद्रव्यम् अग्निहोत्रशाला च । धृंङ् धारणे । धर्म पुण्यम् । विपूर्वात् विधर्मा अहितः वायुः व्यभिचारश्च । ध्यैं चिन्तायाम् । ध्याम ध्यानम् ।

कुष्युषिसृपिभ्यः कित् ॥९१२॥ एभ्यः कित् मन् प्रत्ययः स्यात् । कुषश् निष्कर्षे । कुष्म शल्यम् । उषू दाहे । उष्मा दाहः । सृप्लृं गतौ । सृप्मा सर्पः शिशुः यतिश्च ।

बृंहेर्नोऽच्च ॥९१३॥ बृहु शब्दे इत्यस्मात् मन् प्रत्ययः स्यात् नकारस्य चाकारः। ब्रह्म परं तेजः अध्ययनं मोक्षः । बृहत्त्वादात्मा । ब्रह्मा भगवान् ।

व्येग एदोतौ च वा ॥९१४॥ व्येंङ् संवरणे इत्यस्मात् मन् प्रत्यय एदेतौ चान्तादेशौ वा स्याताम् । व्येम वस्त्रम् । व्येमा संसारः कुविन्दभाण्डं च । व्योम नभः । पक्षे, व्याम न्यग्रोधाख्यं प्रमाणम् ।

स्यतेरी च वा ॥९१५॥ षोंङ् अन्तकर्मणि इत्यस्मात् मन् प्रत्यय ईकारश्चान्तादेशो वा स्यात् । सीमा आघाटः । पक्षे, साम प्रियवचनं वामदेव्यादि च ।

सात्मन्नात्मन्वेमत्रोमन्क्लोमन्ललामन्नामन्पाप्मन्पक्ष्मन्यक्ष्मन्निति ॥ ९१६ ॥ एते मन्प्रत्ययान्ता निपात्यन्ते । स्यतेस्तोऽन्तश्च । सात्म अत्यन्ताभ्यस्तं प्रकृतिभूतम् अन्तकर्म च । अतेः दीर्घश्च । आत्मा जीवः । वेग आत्मभावश्च । वेम तन्तुवायोपकरणम् । रुहेर्लुक् च । रोम तनूरुहम् । लत्वे—लोम तदेव । क्लमेरोच्च । क्लोम शरीरान्तरवयवः । लातेर्द्वित्वं च । ललाम भूषणादि । नमेरा च । नाम संज्ञा कीर्तिश्च । पातयतेस्तः प् च । पाप्मा पापं रक्षश्च । पञ्चेः कः षोऽन्तो नलोपश्च । पक्ष्म अक्ष्यादिलोम । यस्यतेः यक्षिणो वा यक्ष्मा रोगः । इतिकरणात् तोक्मरुक्मादयो भवन्ति ।

हृजनिभ्यामिमन् ॥९१७॥ आभ्यामिमन् प्रत्ययः स्यात् । हृंङ् हरणे । *हरिमा पापविशेषः मृत्युः वायुश्च । जनैचि प्रादुर्भावे । जनिमा धर्मविशेषः संसारश्च ।*

सृहृभृस्तृसूभ्य ईमन् ॥ ९१८ ॥ एभ्य ईमन् प्रत्ययः स्यात् । सृं गतौ । सरीमा कालः। हृंग् हरणे । हरीमा मातरिश्वा । डुडुभृंङ् पोषणे च । भरीमा क्षमी राजा कुटुम्बं च । धृंग् धारणे । धरीमा धर्मः । स्तृञ् आच्छादने । स्तरीमा प्रावारः । षूत् प्रेरणे । सवीमा गर्भः प्रसूतिश्च ।

गमेरिन् ॥ ९१९ ॥ गम्लृं गतावित्यस्मादिन् प्रत्ययः स्यात् । गमिष्यतीति गमी जिगमिषुः ।

आङश्च णित् ॥९२०॥ आङ्पूर्वात् केवलाच्च गमेर्णिदिन् प्रत्ययः स्यात् । आगमिष्यतीति आगामी प्रोषितादिः । गमिष्यतीति गामी प्रस्थितादिः ।

सुवः ॥९२१॥ षूङौच् प्राणिप्रसवे इत्यस्मात् णिदिन् प्रत्ययः स्यात् । आसावी आसविष्यमाणः। जनिष्यमाण इत्यर्थः ।

भुवो वा ॥९२२॥ भू सत्तायामित्यस्मात् इन् प्रत्ययः स्यात् स च णिद्वा । भविष्यतीति भावी कर्मविपाकादिः । भवी भविष्यन् ।

प्रप्रतेर्याबुधिभ्याम् ॥९२३॥ प्रपूर्वात् प्रतिपूर्वाच्च यांङ् प्रापणे बुधिं भनिंच् ज्ञाने इत्यस्मात् च णिदिन् प्रत्ययः स्यात् । प्रयास्यतीति प्रयायी, प्रतियास्यतीति प्रतियायी । प्रभोत्स्यते इति प्रबोधी प्रतिबोधी बालादिः ।

प्रात् स्थः ॥९२४॥प्रपूर्वात् ष्ठां गतिनिवृत्तौ इत्यस्मात् णिदिन् प्रत्ययः स्यात् । प्रस्थास्यते इति प्रस्थायी गन्तुमनाः ।

परमात् कित् ॥९२५॥ परमपूर्वात् तिष्ठतेः किदित् प्रत्ययः स्यात् । परमे पदे तिष्ठतीति परमेष्ठी अर्हदादिः । भीरुष्ठानादित्वात् षत्वं सप्तम्या अलुप् च ।

पथिमन्थिभ्याम् ॥ ९२६ ॥ आभ्यां किदिन प्रत्ययः स्यात् । पथे गतौ । पन्थाः मार्गः। पन्थानौ। पन्थानः । पथिपियः । मन्थश् विलोडने। मन्थाः क्षुब्धः वायुः वज्रश्च । मन्थानौ। मन्थानः । मथिप्रियः।

होर्मिन् ॥ ९२७ ॥ हुंङ् दानादनयोरित्यस्मात् मिन् प्रत्ययः स्यात् । होमी ऋत्विक् घृतं च ।

अर्तेर्भुक्षिनक् ॥ ९२८ ॥ ऋंङ् गतावित्यस्मात् भुक्षिनक् प्रत्ययः स्यात् । ऋभुक्षा इन्द्रः । ऋभुक्षाणौ । ऋभुक्षाणः ।

अदेस्त्रिन् ॥९२९॥ अदंङ् भक्षणे इत्यस्मात् त्रिन् प्रत्ययः स्यात्। अत्री ऋषिः।

पतेरत्रिन् ॥९३०॥ पत्लृ गतावित्यस्मादत्रिन् प्रत्ययः स्यात्। पतत्री पक्षी ।

आपः क्विप् ह्रस्वश्च ॥ ९३१ ॥ आप्लृंट् व्याप्तावित्यस्मात् क्विप् प्रत्ययो ह्रस्वश्चास्य । आपः अम्भः । स्वभावाद् बहुत्वम् ।

ककुप्त्रिष्टुबनुष्टुभः ॥९३२॥ एते क्विप्प्रत्ययान्ता निपात्यन्ते । कपूर्वात् स्कुभ्नातेः सलोपश्च । कं वायुं ब्रह्म च स्कुभ्नन्तीति ककुभो दिशः । ककुप् उष्णिक् छन्दः । त्र्यनुपूर्वात् स्कुभ्नातेः सः षश्च । त्रिष्टुप् छन्दः । अनुष्टुप् छन्दः । बहुवचनान्निजिविजिविषां क्विप् शित् । नेनिक् प्रजापतिः । वेविक् शुचिः । वेविट् चन्द्रमाः ।

अवेर्मः ॥ ९३३ ॥ अव रक्षणादावित्यस्मान्मः प्रत्ययः स्यात् । अवतीति ओम् ब्रह्म प्रणवश्च ।

सोरेतेरम् ॥ ९३४ ॥ सुपूर्वादिणंक् गतावित्यस्मात् अम् प्रत्ययः स्यात् । स्वयम् आत्मना ।

नशिनूभ्यां नक्तनूनौ च ॥ ९३५ ॥ नशौच् अदर्शने णूत् स्तवने आभ्यामम् प्रत्ययो नक्त नून इत्यादेशौ चानयोः । नक्तं रात्रौ । नूनं वितर्के ।

स्यतेर्णित् ॥९३६॥ षोंच् अन्तकर्मणीत्यस्मात् णिदम् प्रत्ययः स्यात् । सायं दिवसावसानम् ।

गमिजमिक्षमिकमिशमिसमिभ्यो डित् ॥९३७॥ एभ्यो डिदम् प्रत्ययः स्यात् । गम्लृं गतौ । गम् । जमू अदने । जम् । क्षमौषि सहने । क्षम् । एतानि भार्यानामानि । कमूङ् कान्तौ । कम् पानीयम् । शमूच् उपशमे । शम् सुखम् । षम वैक्लव्ये । सम् । संभवति ।

इणो दमक् ॥९३८॥ इणंक् गतावित्यस्मात् कित् दम् प्रत्ययः स्यात् । इदम् प्रत्यक्षनिर्देशे ।

कोर्डिम् ॥ ९३९ ॥ कुंङ् शब्दे इत्यस्मात् डिदिम् प्रत्ययः स्यात् । किम् । अनेनाविज्ञातं वस्तु पर्यनुयुज्यते ।

तूषेरीम् णोऽन्तश्च ॥ ९४० ॥ तूष तुष्टाविवस्मादीम् प्रत्ययो णकारश्चास्यान्तः स्यात् । तूष्णीं वाङ्नियमे ।

ईङ्कमिशमिसमिभ्यो डित् ॥ ९४१ ॥ एभ्यो डिदीम् प्रत्ययः स्यात् । ईङ्च् गतौ । ईम् । कमूङ् कान्तौ । कीम् । शमूच् उपशमे । शीम् । षम् वैक्लव्ये । सीम् । अभिनयव्याहरणान्येतानि । ईम् शीम् अव्यक्ते । कीम् संशयप्रश्नादिषु ।

सीम् अमर्षपादपूरणयोः ।

क्रमिगमिक्षमेस्तुमाच्चातः ॥९४२॥ एभ्यस्तुम् प्रत्ययोऽकारस्य चाऽऽकारः स्यात् । क्रमू पादविक्षेपे । क्रान्तुं गमनम् । गम्लृं गतौ । गान्तुम् पान्थः । क्षमौषि सहने । क्षान्तुं भूमिः। तुमर्थश्च सर्वत्र ।

गृपृदुर्विधुर्विभ्यः क्विप् ॥९४३॥ एभ्यः क्विप् प्रत्ययः स्यात् । गृङ् शब्दे । गीः वाक् । पॄङ् पालनपूरणयोः । पूः नगरी । दुर्वैं धुर्वैं हिंसायाम् । दूः देहान्तरवयवः । धूः शकटाङ्गम् आदिश्च ।

वार्द्वारौ ॥ ९४४ ॥ एतौ क्विप्प्रत्ययान्तौ निपात्येते । वृणोतेर्वृद्धिश्च । वाः पानीयम् । कर्मणि दश्च धात्वादिः । वृण्वन्ति तामिति द्वाः द्वारम् । द्वृं वरणे इत्यस्य च णिगन्तस्य रूपम् ।

प्रादतेरर् ॥९४५॥ प्रपूर्वादत सातत्यगमने इत्यस्मादर् प्रत्ययः स्यात् । प्रातः प्रभातम् ।

सोरर्तेर्लुक् च ॥९४६॥ सुपूर्वादृंक् गतावित्यस्मादर् प्रत्ययो धातोश्च लुक् स्यात् । स्वः स्वर्गः ।

पूसन्यनिभ्यः पुनसनुतान्ताश्च ॥९४७॥ पूङ् पवने, षण् भक्तौ अम गतावित्येतेभ्योऽर् प्रत्ययः स्यात् यथासंख्यं च पुन् सनुत् अन्त् इत्यादेशा एषां स्युः । पुनः भूयः । सनुतः कालवाची । अन्तः मध्ये ।

चतेरुर् ९४८॥ चतेग् याचने इत्यस्मादुर् प्रत्ययः स्यात् । चत्वारः संख्या । चत्वारि । चतस्रः ।

दिवेर्डिव् ॥९४९॥ दिवूच् क्रीडादावित्यस्मात् डिदिव् प्रत्ययः स्यात् । द्यौः स्वर्गः अन्तरिक्षं च । दिवौ । दिवः ।

विशिविपाशिभ्यां क्विप् ॥९५०॥ आभ्यां क्विप् प्रत्ययः स्यात् । विशंत् प्रवेशने । विशः प्रजाः । विट् वैश्यः पुरीषं अपत्यं च । पशण् बन्धने, विपूर्वः । विपाशयति स्म वसिष्ठमिति विपाट् नदी ।

सहेः षष् च ९५१॥ षहि मर्षणे इत्यस्मात् क्विप् प्रत्ययः षष् चास्यादेशः स्यात् । षट् संख्या ।

अस् ॥९५२॥ सर्वधातुभ्यो बहुलमस् प्रत्ययः स्यात् । तपं संतापे । तपः संतापः माघमासः निर्जराफलं चानशनादि । सुष्ठु तपतीति सुतपाः । एवं महातपाः।

णमं प्रह्वत्वे । नमः पूजायाम् । तमूच् काङ्क्षायाम् । तमः अन्धकारः तृतीयगुणः अज्ञानं च । इणंक् गतौ । अयः काललोहम् । वींक् प्रजनादौ । वयः पक्षी प्राणिनां कालकृता शरीरावस्था च यौवनादिः । वर्चि दीप्तौ । वर्चः लावण्यम् अन्नमलं तेजश्च । सुष्ठु वर्चते इति सुवर्चाः । रक्ष पालने । रक्षः निशाचरः । ष्विमिदाच् स्नेहने । मेदः चतुर्थो धातुः । रह त्यागे । रहः प्रच्छन्नम् । षहि मर्षणे । सहाः मार्गशीर्षमासः । णभच् हिंसायाम् । नभः आकाशं श्रावणमासश्च । चिते संज्ञाने । चेतः चित्तम् । प्रचेता वरुणः । मनिंच् ज्ञाने । मनः नोइन्द्रियम् । ब्रूग्क् व्यक्तायां वाचि । वचः वचनम् । रुदृक् अश्रुविमोचने । रोदः नभः । रोदसी द्यावापृथिव्यौ । रुधूंपी आवरणे । रोधः तीरम् । अनक् प्राणने । अनः शकटम् अन्नं भोजनं च । सृं गतौ । सरः जलाशयविशेषः । तॄ प्लवनतरणयोः । तरः वेगः बलं च । रहु गतौ । रंहः जवः । तिजि क्षमानिशानयोः । तेजः दीप्तिः । मयि गतौ । मयः सुखम् । मह पूजायाम् । महः तेजः । अर्चिण् पूजायाम् । अर्चः पूजा । पदॢं विशरणादौ । सदः सभा भवनं च । अञ्जौप् व्यक्त्यादौ । अञ्जः स्नेहः ।

पाहाक्भ्यां पयह्यौ च ९५३॥ पां पाने ओहांक् त्यागे इत्याभ्यामस् प्रत्ययः स्यात् यथासंख्यं च पय् ह्य इत्यादेशावनयोः स्याताम् । पयः क्षीरं जलं च । ह्यः अनन्तरातीते दिने ।

छदिवहिभ्यां छन्दोधौ च ॥९५४॥ छदण् संवरणे वहीं प्रापणे इत्याभ्यामस् प्रत्ययो यथासंख्यं चानयोः छन्द् ऊध् इत्यादेशौ स्याताम् । छन्दः वेदः इच्छा वाग्बन्धविशेषश्च । ऊधः धेनोः क्षीराधारः ।

श्वेः शव् च वा ॥९५५॥ ट्वोश्वि गतिवृद्ध्योरित्यस्मात् अस् प्रत्ययः स्यात् अस्य च शव् इत्यादेशो वा । शवः रोगाभिधानं मृतदेहश्च । शवसी । शवांसि । श्वयः शोफः बलं च । श्वयसी । श्वयांसि ।

विश्वाद् विदिभुजिभ्याम् ॥ ९५६ ॥ विश्वपूर्वाभ्यामाभ्यामस् प्रत्ययः स्यात् । विदक् ज्ञाने । विश्ववेदाः अग्निः । भुजंप् पालनाभ्यवहारयोः । विश्वभोजाः अग्निः लोकपालश्च ।

चायेर्नो ह्रस्वश्च वा ॥९५७॥ चायृग् पूजानिशामनयोः इत्यस्मात् अस् प्रत्ययो नकारोऽन्तादेशो ह्रस्वश्चास्य वा । चणः चाणश्चान्नम् । बाहुलकाण्णत्वम् । णत्वं नेच्छन्त्येके ।

अशेर्यश्चादिः ॥९५८॥ अशश् भोजने अशौटि व्याप्तावित्यस्माद्दास् प्रत्ययो यकारश्च धात्वादिः स्यात् । यशः माहात्म्यम् सत्त्वं श्रीः ज्ञानं प्रतापः कीर्तिश्च । एवं शोभनमश्नाति अश्नुते वा सुयशाः । नागमेवाश्नाति नागयशाः । बृहदेनोऽश्नाति बृहद्यशाः । श्रुत एनोऽश्नाति श्रुतयशाः । एवमन्येऽपि द्रष्टव्याः ।

उषेर्ज च ॥९५९॥ उषू दाहे इत्यस्मादस् प्रत्ययो जकारश्चान्तादेशः स्यात् । ओजः बलं प्रभावः दीप्तिः शुक्रं च ।

स्कन्देर्धृ च ॥९६०॥ स्कन्दृं गतिशोषणयोः इत्यस्मात् अस् प्रत्ययो धकारश्चान्तादेशः स्यात् । स्कन्धः स्वाङ्गम् ।

अवेर्वा ॥९६१॥ अव रक्षणादावित्यस्मादस् प्रत्ययो धकारश्चान्तादेशो वा । अधः अवरम् । अवः रक्षा ।

अमेर्भहौ चान्तौ ॥९६२॥ अम गताविस्यस्मादस् प्रत्ययो भकारहकारौ चान्तौ स्याताम् । अम्भः पानीयम् । अंहः पापम् अपराधः दिनश्च ।

अदेरन्ध च वा ॥९६३॥ अदंक् भक्षणे इत्यस्मादस् प्रत्ययोऽन्धादेशश्चास्य वा स्यात् । अद्यते तदिति अन्धः अन्नम् । अद्यते दृशा मनसा च तत् इति अदः। अनेन प्रत्यक्षविप्रकृष्टम् अप्रत्यक्षं च बुद्धिस्थमपदिश्यते ।

आपोऽपाप्सराब्जाश्च ॥९६४॥ आप्लृंट् व्याप्ताविस्यस्मात् अस् प्रत्ययोऽप् अप्त् अप्सर् अब्ज् इत्यादेशाश्चास्य स्युः । अपः सत्कर्म । अप्तः तदेव । अप्सरसः देवगणिकाः। अब्जः जलजम् अजर्यं च रूपम् ।

उच्यञ्चेः क च ॥९६५॥ उचच् समवाये अञ्चू गतौ चेत्याभ्यामस् प्रत्ययोऽनयोश्च कोऽन्तादेशः स्यात् । ओकः आलयः जलौकसश्च । अङ्कः स्वाङ्गं रणश्च ।

अञ्जियजियुजिभृजेर्ग च ॥९६६॥ एभ्योऽस् प्रत्ययो गकारश्चान्तादेशः स्यात् । अञ्जौप् व्यक्त्यादौ । अङ्गः क्षत्रियनाम गिरिपक्षी व्यक्तिश्च । अज क्षेपणे च । अगः क्षेमम् । युजृंपी योगे । योगः मनः युगं च । भृजैङ् भर्जने । भर्गः रुद्रः हविः तेजश्च ।

अर्तेरुराशौ च ॥९६७॥ ऋंक् गताविस्यस्मादस् प्रत्ययोऽस्य चोरिति अर्श् इति च तालव्यशकारान्त आदेशः स्यात् । उरः वक्षः। अर्शांसि गुदादिकीलाः ।

येन्धिभ्यां यादेधौ च ॥९६८॥ यांक् प्रापणे ञिइन्धैपि दीप्तौ इत्याभ्यामस् प्रत्ययो यथासंख्यं च याद् एध इत्यादेशौ स्याताम् । यादः जलदुष्टसत्त्वम् ।

एधः इन्धनम् ।

चक्षः शिद्वा ॥९६९॥ चक्षिङ्क् व्यक्तायां वाचीत्यस्मात् अस् प्रत्ययः स च शिद्वा । चक्षः ख्याः उभे अपि रक्षोनाम्नी । आचक्षाः वाग्मी । आख्याः प्रख्याश्च बृहस्पतिः । संचक्षाः ऋत्विक् । नृचक्षाः राक्षसः ।

वस्त्यगिभ्यां णित् ॥९७०॥ वस्त्यगिभ्यां णिदस् प्रत्ययः स्यात् । वसिक् आच्छादने । वासः वस्त्रम् । अग कुटिलायां गतौ । आगः अपराधः ।

मिथिरज्ज्युषितृपृशृभूवाष्टिभ्यः कित् ॥९७१॥ एभ्यः किदस् प्रत्ययः स्यात् । मिथृग् मेधाहिंसयोः । मिथः परस्परम् रहसि चेत्यर्थः । रञ्जीं रागे । रजः गुणः अशुभं पांसुश्च । उषू दाहे । उषाः संध्या अरुणः रात्रिश्च । तॄ प्लवनतरणयोः । तिरस्करोति, तिरः कृत्वा काण्डं गतः । तिर इति अन्तर्द्धावनृजुत्वे च । पृश् पालनपूरणयोः । पुरः पूजायाम् । तथा च पठन्ति नमः पूजायां पुरश्चेति । शृश् हिंसायाम् । शृणाति तद्विद्युक्तमिति शिरः उत्तमाङ्गम् । भू सत्तायाम् । भुवः लोकः अन्तरिक्षं सूर्यश्च । वशक् कान्तौ । उशा रात्रिः ।

विधेर्वा ॥९७२॥ विधत् विधाने इत्यस्मादस् प्रत्ययः स्यात् स च किद्वा । वेधाः विद्वान् सर्ववित् प्रजापतिश्च । विधाः स एव ।

नुवो धथादिः ॥९७३॥ णूत् स्तवने इत्यस्माद् धकारादिस्थकारादिश्च किदस् प्रत्ययः स्यात् । नूधा नूथाश्च सूतमागधौ । धादौ गुणमिच्छन्त्येके । नोधाः ऋषिः ऋत्विक् ।

वयःपयःपुरोरेतोभ्यो धाग् ॥ ९७४ ॥ एभ्यः परात् डुधांग्क् धारणे चेत्यस्मात् किदस् प्रत्ययः स्यात् । वयोधाः युवा चन्द्रः प्राणी च । पयोधाः पर्जन्यः । पुरोधाः पुरोहितः उपाध्यायश्च । रेतोधा जनकः ।

नञ ईहेरेधौ च ॥९७५॥ नञ्पूर्वादीहि चेष्टायामित्यस्मात् अस् प्रत्ययोऽस्य च एह् एध् इत्यादेशौ स्याताम् । अनेहा कालः इन्द्रः चन्द्रश्च । अनेधा अग्निः वायुश्च ।

विहायस्सुमनस्पुरुदंशस्पुरूरवोऽङ्गिरसः ॥ ९७६ ॥ एतेऽस्प्रत्ययान्ता निपात्यन्ते । विपूर्वाज्जहातेर्जिहीतेर्वा योऽन्तश्च । विजहातीति विहायः आकाशम् । विजिहीत इति विहायाः पक्षी । सुपूर्वान्मानेर्ह्रस्वश्च । सुष्ठु मानयन्ति मान्यन्ते वा सुमनसः पुष्पाणि । पुरुं दशतीति पुरुदंशाः इन्द्रः । पुरुपूर्वाद् रौतेर्दीर्घश्च । पुरु रौतीति पूरूरवाः राजा यमुर्वशी चकमे । अङ्गेरिरोऽन्तश्च । अङ्गतीत्यङ्गिरा ऋषिः ।

पातेर्जस्थसौ ॥९७७॥ पांक् रक्षणे इत्यस्मात् जस् थस् इत्येतौ प्रत्ययौ स्याताम् । पाजः बलम् । पाथ उदकम् अन्नं च ।

स्रुरीभ्यां तस् ॥९७८॥ आभ्यां तस् प्रत्ययः स्यात् । स्रुं गतौ । स्रोतः निर्झरणम् । सुष्ठु स्रवतीति सुस्रोताः। रींङ् गतिरेषणयोः । रेतः शुक्रम् ।

अर्तीणिभ्यां नस् ॥९७९॥ आभ्यां नस् प्रत्ययः स्यात् । ऋंङ् गतौ । एनः पापम् अपराधश्च ।

रिचेः क च ॥९८०॥ रिचृंपी विरेचन इत्यस्मात् नस् प्रत्ययोऽस्य च ककारोऽन्तादेशः स्यात् । रेक्णः पापं धनं च ।

रीवृभ्यां पस् ॥९८१॥ आभ्यां पस् प्रत्ययः स्यात् । रींङ् गतिरेषणयोः । रेपः पापम् । वृग्ट् वरणे । वर्पः रूपम् ।

शीङः फस् च ॥९८२॥ शीङ्क् स्वप्ने इत्यस्मात् फस् चकारात् पस् प्रत्ययः स्यात् । शेफः शेपश्च मेढ्रम् ।

पचिवचिभ्यां सस् ॥९८३॥ आभ्यां सस् प्रत्ययः स्यात् । डुपचींषृ पाके । पक्षः चक्रम् इन्धनं च । वचंक् भाषणे । वक्षः उरः शरीरं च ।

इणस्तशस् ॥९८४॥ इणंक् गतावित्यस्मात् तशस् प्रत्ययः स्यात् । एतशाः सोमः अध्वर्युः वायुः अग्निः अर्कः इन्द्रश्च ।

वष्टेः कनस् ॥९८५॥ वशक् कान्तावित्यस्मात् कित् अनस् प्रत्ययः स्यात् । उशनाः शुक्रः ।

चन्दो रमस् ॥९८६॥ चदु दीप्त्याह्लादयोरित्यस्माद् रमस् प्रत्ययः स्यात् । चन्द्रमाः शशी ।

दमेरुनसूनसौ ॥९८७॥ दमूच् उपशम इत्यस्मात् उनस् ऊनस् इत्येतौ प्रत्ययौ स्याताम् । दमुनाः अग्निः । दमूनाः सूर्यः देवः उपशान्तश्च ।

इण आस् ॥९८८॥ इणंक् गतावित्यस्मादास् प्रत्ययः स्यात् । अयाः कालः आदित्यश्च ।

रुच्यर्चिशुचिहुसृपिछादिछृदिभ्य इस् ॥९८९॥ एभ्य इस् प्रत्ययः स्यात् । रुचि अभिप्रीत्यां च । रोचिः किरणः। वसुपूर्वाद् वसुरोचिः वासवः किरणः ऋतुश्चः। अर्च पूजायाम् । अर्चिः ज्वाला । शुच् शोके । शोचिः रश्मिः शोकः पिङ्गलभावः विविक्तं च । हुंक् दानादनयोः । हविः पुरोडाशादि । सृप्लृं गतौ । सर्पिः घृतम् ।

छदण् संवरणे । छादयतीति छदिः। ' छदेरिस्मन्त्रट्कौ ' इति ह्रस्वः। बाहुलकादीर्घत्वे छादिः । उभयं गृहच्छादनम् । ऊछृदूपी दीप्तिदेवनयोः । छर्दिः वमनम् ।

बंहिहृहेर्नलुक् च ॥९९०॥ आभ्यामिस् प्रत्ययो नकारस्य च लुक् स्यात् । बहुङ् वृद्धौ । बर्हिः अनभ्यन्तरे । हृहु शब्दे च । बर्हिः शिखी दर्भश्च ।

द्युतेरादेश्च जः ॥९९१॥ द्युति दीप्तावित्यस्मादिस् प्रत्ययो धातोरादेश्च वर्णस्य जकारः । ज्योतिः तेजः सूर्यः अग्निः तारका च ।

सहेर्धश्च ॥९९२॥ षहि मर्षणे इत्यस्मादिस् प्रत्ययो धकारश्चान्तादेशः स्यात् । सधिः सत्त्वं भूमिः संयोगः सहिष्णुः अग्निः अनङ्वाँश्च ।

पस्थोऽन्तश्च ॥९९३॥ पां पाने इत्यस्मादिस् प्रत्ययः थकारश्चान्तः स्यात् । पाथिः पानं नदी आदित्यः ज्योतिः स्वर्गलोकश्च ।

नियो डित् ॥९९४॥ णींङ् प्रापणे इत्यस्मात् डिदिस् प्रत्ययः स्यात् । निश्चिनोति । निरुपसर्गोऽयं पृथग्भावे ।

अवेर्णित् ॥९९५॥ अव रक्षणादावित्यस्माण्णिदिस् प्रत्ययः स्यात् । आविः प्राकाश्ये । आविरभूत् । आविष्करोति ।

तुभूस्तुभ्यः कित् ॥९९६॥ एभ्यः किदिस् प्रत्ययः स्यात् । तुंक् वृत्त्यादौ । तुविः समुद्रः सरित् विवस्वान् प्रभुसंयोगश्च । भूङ् सत्तायाम् । भुविः क्रतुः समुद्रः सरित् विवस्वाँश्च । ष्टुंक् स्तुतौ । स्तुविः स्तोता यज्ञश्च ।

रुद्यतिजनितनिधानिमनिग्रन्थिपृतापित्रापिवापियजिप्रादिवेपिभ्य उस् ॥९९७॥ एभ्य उस् प्रत्ययः स्यात् । रुदृक् अश्रुविमोचने । रोदुः अश्रुनिपातः। ऋंक् गतौ । अरुः व्रणः आदित्यः प्राणः समुद्रश्च । जनैचि प्रादुर्भावे । जनुः अपत्यं पिता माता जन्म प्राणी च । तनूयी विस्तारे । तनुः शरीरम् । धन धान्ये, सौत्रः। धनुः चापम् । मनिंच् ज्ञाने । मनुः प्रजापतिः । ग्रन्थश् संदर्भे । ग्रन्थुः ग्रन्थः । पॄश् पालनपूरणयोः। परुः पर्व समुद्रः धर्मश्च । तपं संतापे । तपुः त्रपु शत्रुः भास्करः अग्निः कृच्छ्रादि च । त्रपौषि लज्जायाम् । त्रपुः त्रपु । डुवपीं बीजसन्ताने । वपुः शरीरं लावण्यं तेजश्च । यजीं देवपूजादौ । यजुः अच्छन्दा श्रुतिः यज्ञोत्सवश्च । अदंक् भक्षणे प्रपूर्वः। प्रादुः प्राकाश्ये उत्पत्तौ च । प्रादुर्बभूव । प्रादुरासीत् । टुवेपृङ् चलने । वेपुः वेपथुः ।

इणो णित् ॥९९८॥ इणंक् गतावित्यस्मात् णिदुस् प्रत्ययः स्यात् । आयुः

जीवितम् । जटापूर्वादपि । जटायुः अरुणात्मजः ।

" तं नीलजीमूतनिकाशवर्णं सपाण्डुरोरस्कमुदारधैर्यम् ।
ददर्श लङ्काधिपतिः पृथिव्यां जटायुषं शान्तमिवाग्निदाहम् " ॥

दुषेर्डित् ॥९९९॥ दुषंच् वैकृत्ये इत्यस्मात् डिदुस् प्रत्ययः स्यात् । दुः निन्दायाम् । दुष्पुरुषः ।

मुहिमिथ्यादेः कित् ॥१०००॥ आभ्यां किदुस् प्रत्ययः स्यात् । मुहौच् वैचित्ये । मुहुः कालाद्वृत्तिः । मिथृग् मेधाहिंसयोः । मिथुः संगमः । आदिग्रहणादन्येभ्योऽपि भवति ।

चक्षेः शिद्वा ॥१००१॥ चक्षिक् व्यक्तायां वाचि इत्यस्मात् कित् उस् प्रत्ययः स्यात् स च शिद्वा । चक्षुः परिचक्षुः अवचक्षुः अवसंचक्षुः अचक्षुः अवख्युः । बाहुलकात् द्विर्वचने संचचक्षुः, विचख्युः ।

पातेर्डुम्सुः ॥१००२॥ पांक् रक्षणे इत्यस्मात् डिदुम्सुः प्रत्ययः स्यात् । पुमान् पुरुषः । पुमांसौ । पुमांसः । उकार उदित्कार्यार्थः ।

न्युद्भ्यामक्षेः ककाकैसष्टावच्च ॥१००३॥ न्युद्भ्यां परादञ्चू गतौ चेत्यस्मात् कितः अ आ ऐस् इत्येते प्रत्ययाः स्युः ते च टावत् । टायामिव एषु कार्यं भवतीत्यर्थः। तेन 'अच्च घ्राग्दीर्घश्च' इति भवति । नीचम् उच्चम् । नीचा उच्चा । नीचैः उच्चैः। प्रसिद्धार्था एते। लाघवार्थं सन्ताधिकारेऽपि अकाराकारप्रत्ययविधानम्।

शमो नियो डैस् मलुक् च ॥१००४॥ शम्पूर्वात् णींग् प्रापणे इत्यस्मात् डिदैस् प्रत्ययः स्यात् शमो मकारस्य च लुक् । शनैः मन्दम् ।

यमिदमिभ्यां डोस् ॥१००५॥ आभ्यां डिदोस् प्रत्ययः स्यात् । यमूं उपरमे । योर्विषयसुखम् । दमुच् उपशमे । दोर्बाहुः ।

अनसो वहेः किप् सश्च डः ॥१००६॥ अनसशब्दपूर्वात् वहीं प्रापणे इत्यस्मात् किप् प्रत्ययः सकारस्य च डः स्यात् । अनो वहति अनड्वान् वृषभः ।

१०२२ भीमादयोऽपादाने ॥५।१।१४॥ भीमादयः शब्दा अपादाने साधवः स्युः । बिभ्यत्यस्मादिति भीमः । एवं भीष्मः । भयानकः । वरुः वसुद्रः । सुवः । सुक् । रक्षः । संकसुकः । खलतिः । उणादिप्रत्ययान्ता एते संप्रदानाच्चान्यत्रोणादयः इति निषेधेनाप्राप्ता निपात्यन्ते ।

१०२३ संप्रदानाच्चान्यत्रोणादयः ॥५।१।१५॥ संप्रदानादपादानाच्चान्यत्र

कारके भावे चोणादयः प्रत्ययाः स्युः। कृत्त्वात् कर्तर्येव प्राप्ताः कर्मादिष्वपि कथ्यन्ते। करोतीति कारुः। वातीति वायुः। कषितोऽसाविति कर्मणि कषिः। तन्यतेऽसाविति तनुः। ऋचन्ति तयेति ऋक्। वृत्तं तत्रेति वर्त्म। चरितं तत्रेति चर्म।

॥ इत्युणादिविवृतिः ॥

॥ अथोत्तरकृदन्तप्रकरणम् ॥

१०२४ **वर्त्स्यति गम्यादिः** ॥५।३।१॥ गम्यादयः शब्दा वर्त्स्यति भविष्यति धात्वर्थे इन्नादिप्रत्ययान्ताः साधवः स्युः। अनेन सामान्यतः सिद्धानां प्रत्ययानां भविष्यद्धात्वर्थता विधीयते। गमिष्यतीति गमी ग्रामम्। इन्नौणादिकः सति प्राप्तो वर्त्स्यति भवति। आगामी। भावी। प्रस्थायी। एभ्य औणादिको णिन्। प्रयायी। प्रतियायी। प्रतिबोधी। प्रतिरोधी। एभ्योऽजातेः शीले आवश्यके वा णिन् सिद्धो भविष्यति नियम्यते। कथं श्वो ग्रामं गमी? भविष्यत्सामान्ये पदं निष्पाद्य पश्चाच्छ्वःशब्देन योगः कार्यः।

१०२५ **वा हेतुसिद्धौ क्तः** ॥५।३।२॥ हेतुः कारणं तस्य सिद्धिः निष्पत्तिः, वर्त्स्यर्थे वर्तमानाद् धातोः धात्वर्थे हेतोः सिद्धौ सत्यां क्तः प्रत्ययो वा स्यात्। किं ब्रवीषि वृष्टो देवः संपन्नास्तर्हि शालयः। संपत्स्यन्त इति वा। प्राप्ता नौस्तीर्णा तर्हि नदी। तरिष्यत इति वा।

१०२६ **कषोऽनिटः** ॥५।३।३॥ कषेः कृच्छ्रगहनयोरनिट्त्वमुक्तम्। तस्माद् वर्त्स्यति वर्तमानात् क्तः स्यात्। कषिष्यतीति कष्टम्। कष्टा दिशस्तमसा। सत्यपि कश्चित्। कषति कष्टम्। अनिट इति किम्। कषिताः शत्रवः शूरेण।

१०२७ **क्रियायां क्रियार्थायां तुम्णकच् भविष्यन्ती** ॥५।३।१३॥ वेति निवृत्तम्। यस्माद् धातोस्तुमादिः तद्वाच्या या क्रिया सार्थः प्रयोजनं यस्याः सा क्रियार्था। तस्यां क्रियायामुपपदे वर्त्स्यत्यर्थे वर्तमानाद् धातोस्तुम्णकच्भविष्यन्तीप्रत्ययाः स्युः। कर्तुं व्रजति। कारको व्रजति। करिष्यामीति व्रजति। भोक्तुं व्रजति। भोजको व्रजति। भोक्ष्ये इति व्रजति। क्रियायामिति किम्। भिक्षिष्ये इत्यस्य जटाः। क्रियार्थायामिति किम्। धावतस्ते पतिष्यति वासः। अत्रास्ति धावनक्रियोपपदं न तत्सौ पतनार्थमुपात्तेति न भवति। णकतृचौ इति सामान्येन सिद्धे क्रियार्थोपपदभाविन्या भविष्यन्त्या बाधा मा भूदिति णकञ्विधानम्। अस-

रूपविधिना णकोऽपि भविष्यतीति चेदेवं तर्हि असरूपविधिना तृजादयो मा भूवन्निति पुनर्णकञ्विधानम्। तेनौदनस्य पाचको व्रजति पक्ता व्रजति पचो व्रजति विक्षिपो व्रजतीत्यादि न भवति।

१०२८ क्त्वातुमम् भावे ॥५।२।१३॥ वेति निवृत्तम्। क्त्वा तुम् अम् इत्येते प्रत्यया भावे धात्वर्थमात्रे वेदितव्याः। कृत्वो व्रजति। कर्तुं व्रजति। कारं कारं व्रजति। चौरंकारमाक्रोशति। अतिथिवेदं भोजयति।

१०२९ कालवेलासमये तुम्वाचसरे ॥५।४।३३॥ कालवेलासमयशब्देषूपपदेषु अवसरे गम्यमाने धातोस्तुम् प्रत्ययो वा स्यात्। कालो भोक्तुम्। वेला भोक्तुम्। समयो भोक्तुम्। वावचनाद् यथाप्राप्तं च। कालो भोक्तव्यस्य। ऊर्ध्वं मुहूर्तात् कालो भोक्तुम्। ऊर्ध्वं मुहूर्ताद् भोक्तुं स्म कालः। अङ्ग स्म राजन् भोक्तुं काल इत्येतेषु परत्वात् तुमेव। अवसर इति किम्। कालः पचति भूतानि। कालोऽत्र द्रव्यं न त्ववसरः।

१०३० शकधृषज्ञाघटास्तिसमर्थार्थे च तुम् ॥५।४।९०॥ शक्याद्यर्थेषु धातुषु समर्थार्थेषु नामसु च चकारादिच्छार्थेषु धातुषूपपदेषु कर्मभूताद्धातोस्तुम् प्रत्ययः स्यात्। शक्नोति पारयति वा भोक्तुम्। धृष्णोत्यध्यवस्यति वा भोक्तुम्। जानाति वेत्ति वा भोक्तुम्। आरभते प्रक्रमते वा भोक्तुम्। लभते विदते वा भोक्तुम्। सहते क्षमते वा भोक्तुम्। अर्हति प्राप्नोति वा भोक्तुम्। ग्लायति म्लायति वा भोक्तुम्। घटते युज्यते वा भोक्तुम्। अस्ति विद्यते वा भोक्तुम्। समर्थोऽलं प्रभवति ईष्टे वा भोक्तुम्। समर्थार्थमतीतावपि भवति। द्रष्टुं चक्षुः योद्धुं धनुः। शक्त्या भुज्यते सामर्थ्येन भुज्यते इत्यादौ त्वनभिधानान्न भवति। इच्छार्थेषु—इच्छति भोक्तुम्। वाञ्छति भोक्तुम्। वष्टि भोक्तुम्। अभिलषति भोक्तुम्। समर्थार्थत्वादेव सिद्धे शकग्रहणमसमर्थार्थम्। कर्मण इति च सामर्थ्याच्छकादिष्वर्हपर्यन्तेषु इच्छार्थेषु चोपपदेषु सत्सु संबन्धनीयम्। अन्ये तु शकादिषु घटान्तेषु स्वरूपोपदेष्वेवेच्छन्ति न तदर्थेषु। अतादर्थ्यार्थमक्रियोपपदार्थं चेदं प्रस्तूयते।

१०३१ कर्मणोऽण् ॥५।३।१४॥ क्रियायां क्रियार्थायामुपपदे कर्मणः पराद् वर्त्स्यर्थे वर्तमानाद् धातोरण् प्रत्ययः स्यात्। कुम्भकारो व्रजति। काण्डलावो व्रजति। कर्मणोऽण् इति सामान्येन विहितोऽण्णकचाऽनेन बाध्येतासरूपविधिश्च नास्तीति पुनर्विधीयते। सोऽपवादत्वाण्णकचं बाधते। परत्वात् सामान्यस्याणो बाधकान्

टगादीनपि । तेन वक्रगायो व्रजति सुरापायो व्रजति गोदायो व्रजति । बहुलाधिकाराण्णकचभविष्यन्त्यावपि भवतः । कटं कारको व्रजति । ओदनं भोजको व्रजति । काण्डानि लविष्यामि इति व्रजति । कम्बलं दास्यामीति व्रजति ।

१०३२ **भाववचनाः** ॥५।३।१५॥ भाववचना घञ्क्त्यादयस्ते क्रियायां क्रियार्थायामुपपदे वर्त्स्यत्यर्थे वर्तमानाद् धातोः स्युः । क्रियार्थोपपदेन तुमा मा बाधिषतेति वचनम् । असरूपविध्यभावस्य ज्ञापितत्वात् । पाकाय पक्तये पचनाय पाचनायै वा व्रजति । वचनग्रहणाद् यो यथा विहितः स तथा भवति । ' तुमोऽर्थे भाववचनात् ' इति चतुर्थी ।

१०३३ **पदरुजविशस्पृशो घञ्** ॥५।३।१६॥ एभ्यो धातुभ्यो घञ् प्रत्ययः स्यात् । कृत्त्वात् कर्तरि । वर्त्स्यतीत्यादि निवृत्तम् । पद्यते पत्स्यते अपादि पेदे वा पादः । एवं रोगः । वेशः । स्पर्शो व्याधिविशेषः । स्पर्शो देवदत्तः कम्बलस्य । घकारः कत्वगत्वार्थः । अकारो वृद्ध्यर्थः ।

१०३४ **सर्त्तेः स्थिरव्याधिबलमत्स्ये** ॥५।३।१७॥ सर्तेरेषु कर्तृषु घञ् स्यात् । स्थिरे—सरति कालान्तरमिति सारः स्थिरः पदार्थः । सालसारः । खदिरसारः । कार्यसारः । व्याध्यादौ—अतीसारः व्याधिः, सारो बलम् । विसारो मत्स्यः ।

१०३५ **भावाकर्त्रोः** ॥५।३।१८॥ भावे वाच्ये कर्तृवर्जिते कारके च सर्वधातुभ्यो घञ् स्यात् । पचनं पाकः । एवं रागः । त्यागः । प्रकुर्वन्ति तमिति प्राकारः । एवं प्रासः । प्रसेवः । समाहारः । कारः । करणाधिकरणयोरनट् तदपवादश्च व्यञ्जनान्तेभ्यो घञ् वक्ष्यते । दाशन्तेऽस्मा इति दाशः । तालव्योपान्त्योऽयम् । आहरन्त्यस्मादित्याहारः । असंज्ञायामपि । दायो दत्तः । लाभो लब्धः । कृतः कटो हृतो भार इत्यादौ बहुलाधिकारान्न । अकर्त्रिति पर्युदासेन कारकाश्रयणात् संबन्धे न । देवदत्तस्य पच्यते । भावाकर्त्रोरिति किम् । पचः । भावो भवत्यर्थः साध्यरूपः क्रियासामान्यं धात्वर्थः स धातुनैवोच्यते तत्रैव च त्यादयः क्त्वातुमस्तव्यानीयादयश्च भवन्ति । यस्तु भावो धात्वर्थधर्मः सिद्धता नाम लिङ्गसंख्यायोगी द्रव्यवद् धात्वर्थादन्यः । तत्रायं घञादिविधिः । तेन तद्योगे लिङ्गवचनभेदः सिद्धो भवति । पाकः । पाकौ । पाकाः । पचनं, पचने, पचनानि । पक्तिः, पक्ती, पक्तयः । इति ।

१०३६ **स्फुरस्फुलोर्घञि** ॥४।२।४॥ स्फुरस्फुलोर्घञि सन्ध्यक्षरस्याकारः स्यात् । विस्फारः, विस्फालः । विष्फारः, विष्फालः । 'वेः' इति वा षत्वम् ।

घञीति किम् । विस्फोरकः ।

१०३७ घञि भावकरणे ॥४।२।५२॥ रञ्जेरुपान्त्यनकारस्य भावकरणार्थे घञि परे लुक् स्यात् । रङ्गनं रज्यतेऽनेनेति वा रागः । घञि इति किम् । रञ्जनम् । भावकरणे इति किम् । रजन्त्यस्मिन्निति रङ्गः ।

१०३८ स्यदो जवे ॥४।२।५३॥ स्यद इति स्यन्देर्घञि नलोपो वृद्ध्यभावश्च निपात्यते जवे वेगेऽभिधेये । गोस्यदः । अश्वस्यदः । जव इति किम् । घृतस्यन्दः । तैलस्यन्दः

१०३९ दशनावोदैधौद्मप्रश्रथाहिमश्रथम् ॥४।२।५४॥ एते शब्दाः कृतनलोपादयो निपात्यन्ते । दन्शेरनटि अवपूर्वस्य उन्देः इन्धेश्च घञि उन्देर्मनि नलोपः, प्रहिमपूर्वस्य श्रन्थेर्घञि वृद्ध्यभावश्च निपात्यते । दशनम् । अवोदः । एधः । ओद्म । प्रश्रथः । हिमश्रथः ।

१०४० उद्यमोपरमौ ॥ ४।३।५७ ॥ उदुपपूर्वयोर्यमिरम्योर्घञि वृद्ध्यभावो निपात्यते । उद्यमः। उपरमः। अन्यत्र वृद्धिरेव । यामः। संयामः । सुयामः। रामः। विरामः।

१०४१ इङोऽपादाने तु टिद्वा ॥५।३।१९॥ इङो धातोर्भावाकर्त्रोर्घञ् स्यात् अपादाने तु कारके वा टित् । अध्ययनमध्यायः । अधीयत इति अध्यायः । उपेत्याधीयतेऽस्मादित्युपाध्यायः । टिद्विधानसामर्थ्यात् स्त्रियां क्तिर्बाध्यते । उपाध्यायी । उपाध्याया ।

१०४२ श्रो वायुवर्णनिवृते ॥५।३।२०॥ शृ इत्यस्माद् भावाकर्त्रोर्वाच्यवादिष्वर्थेषु घञ् स्यात् । शीर्यते औषधादिभिरिति शारो वायुः । मालिन्येन शीर्यत इति शारो वर्णः । निवृतं निवरणं प्रावरणमित्यर्थः । निशीर्यते शीताद्युपद्रवो येन तत् निवृतम् । 'गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः' । निवृता द्यूतोपकरणमिति कश्चित् नियमेन वृता इत्यन्वर्थात् । शारैरिव क्रीडितम् । एष्विति किम् । शरः ।

१०४३ निरभेः पूल्वः ॥५।३।२१॥ पू इति पूग्पूङोः सामान्येन ग्रहणम् । निरभिपूर्वाभ्यां यथासंख्यं पूल्वूभ्यां परो भावाकर्त्रोर्घञ् स्यात् । निष्पूयते निष्पावः। अभिलावः ।

१०४४ रोरुपसर्गात् ॥५।३।२२॥ उपसर्गपूर्वाद् रौतेर्भावाकर्त्रोर्घञ् स्यात् । संरवणं संरावः । उपरावः । विरावः । उपसर्गादिति किम् । रवः । सांराविणमित्यत्र ञिन् बाधकः । कथं रावः ? बहुलाधिकारात् ।

१०४५ भूश्यदोऽल् ॥५।३।२३॥ भू श्रि अद् इत्येतेभ्य उपसर्गपूर्वेभ्यो भावाकर्त्रोरल् प्रत्ययः स्यात् । प्रभवः विभवः । संभवः । प्रश्रयः । प्रतिश्रयः । संश्रयः । प्रघसः । विघसः संघसः । उपसर्गादित्येव । भावः । श्रायः । घासः । भूश्योरुपसर्गादेवेति नियमार्थं वचनम् । कथं प्रभावः विभावः अनुभावः ? बहुलाधिकारात् । प्रकृष्टो भाव इत्यादिप्रादिसमासो वा । लकारो 'मिग्मीगोऽखलिचलि' इत्यत्र विशेषणार्थः ।

१०४६ न्यादो नवा ॥ ५।३।२४ ॥ निपूर्वाददेरलि घस्लभावोऽकारस्य दीर्घत्वं च वा निपात्यते । न्यादः । निघसः ।

१०४७ संनिव्युपाद्यमः ॥५।३।२५॥ एभ्य उपसर्गेभ्यः पराद् यमेर्भावाकर्त्रोरल् वा स्यात् । संयमः । संयामः । नियमः । नियामः । वियमः । वियामः । उपयमः । उपयामः ।

१०४८ नेर्नदगदपठस्वनक्वणः ॥५।३।२६॥ नेरुपसर्गात् परेभ्य एभ्यो भावाकर्त्रोरल् प्रत्ययो वा स्यात् । निनदः । निनादः । निगदः । निगादः । निपठः । निपाठः । निस्वनः । निस्वानः । निक्वणः । निक्वाणः ।

१०४९ वैणे क्वणः ॥५।३।२७॥ वीणायां भवो वैणः । वैणेऽर्थे वर्तमानादुपसर्गपूर्वात् क्वणेर्भावाकर्त्रोरल् वा स्यात् । प्रक्वणो वीणायाः । प्रक्वाणो वीणायाः । एवं निक्वणः, निक्वाणः । वैण इति किम् । प्रक्वाणः शृङ्खलस्य । कथं क्वणः, क्वाणो वीणायाः ? 'नवा क्वण' इत्यादिना सामान्येन विधानात् वैणेऽपि भवति ।

१०५० युवर्णाद्वृदवशरणगमृदृग्रहः ॥५।३।२८॥ उपसर्गाद् वेति च निवृत्तम् । इवर्णान्तेभ्य उवर्णान्तेभ्यो वृदवशरणगमिभ्य ऋकारान्तेभ्यो ग्रहेश्च धातोर्भावाकर्त्रोरल् स्यात् । व्यवादः । चयः । निश्चयः । जयः । क्षयः । क्रयः । यवः । रवः । नवः । स्तवः । लवः । पवः । वरः । प्रवरः । दरः । आदरः । वशः । रणः । गमः । अवगमः । कृ–करः । गृ–गरः । तृ–तरः । दृ–दरः । शृ–शरः । ग्रहः । कथं वारः समूहः, वारोऽवसरः, वारः क्रियाभ्याहृत्तिः ? बहुलाधिकाराद् घञ् । परिवार इति तु ण्यन्तादचि सिद्धम् ।

१०५१ वर्षादयः क्लीबे ॥५।३।२९॥ वर्षादयः शब्दा अलन्ताः क्लीबे यथादर्शनं भावाकर्त्रोर्निपात्यन्ते । नपुंसके क्तानङ्निवृत्त्यर्थं वचनम् । वर्ष भयं धनं वनं खलं पदं युगम् । अत्र रथाङ्गकालविशेषयुगमेष्वल् गत्वगुणाभावौ च निपातनात् ।

अनपुंसकक्तस्तु असरूपविधिना भवत्येव । दृष्यते स्म दृष्टं मेघेन । भीतं बटुना।

१०५२ **समुदोऽजः पशौ** ॥५।३।३०॥ समुद्भ्यां परादजतेः पशुविषये धात्वर्थे वर्तमानात् भावाकर्त्रोरल् स्यात् । समजः पशूनां समूह इत्यर्थः । उदजः पशूनां प्रेरणमित्यर्थः । समुद इति किम् । व्याजः पशूनाम् । पशाविति किम् । समाजः साधूनाम् । उदाजः खगानाम् ।

१०५३ **स्तृग्लहः प्रजनाक्षे** । ५।३।३१॥ सांतगृहिभ्यां यथासंख्यं प्रजनाक्षविषये धात्वर्थे वर्तमानाभ्यां भावाकर्त्रोरल् स्यात् । गवामुपसरः । पशूनामुपसरः। वीनामुपसरं दृष्ट्वा । प्रजनो गर्भग्रहणम् । तदर्थं स्त्रीषु पुसां प्रथमं सरणमुपसर उच्यते । अक्षाणां ग्लहः ग्रहणमित्यर्थः। ग्रहेः सूत्रनिपातनाल्लुत्वम् । ग्लहिः प्रकृत्यन्तरं वा । प्रजनाक्ष इति किम् । उपसारो भृत्यै राज्ञाम् । ग्लहः ग्लाहो वा पादस्य । कथं परिसरविषमेषुलीढमुक्तौ ? अधिकरणे पुंनाम्नि घेन सिद्धम् ।

१०५४ **पणेर्मानेः** ॥५।३।३२॥ पणेर्मानेऽर्थे वर्तमानाद् भावाकर्त्रोरल् स्यात् । मूलकपणः । शाकपणः । पण्यत इति पणः, मूलकादीनां संव्यवहारार्थं परिमितो मुष्टिरित्यर्थः । मान इति किम् । पाणः। घञोऽपवादो योगः ।

१०५५ **संमदप्रमदौ हर्षे** ॥५।३।३३॥ संमद प्रमद इत्येतौ भावाकर्त्रोर्हर्षेऽर्थेऽलन्तौ निपात्येते । सम्मदः कोकिलानाम् । प्रमदः कन्यानाम् । हर्ष इति किम् । संमादः । प्रमादः । संप्रान्मद इत्यनुक्त्वा निपातनं रूपनिग्रहार्थम् । तेगोपसर्गान्तरयोगे न । प्रसंमादः । संप्रमादः । अभिसंमादः ।

१०५६ **हनोऽन्तर्घनान्तर्घणौ देशे** ॥५।३।३४॥ अन्तःपूर्वाद् हन्तेरल् प्रत्ययो घनघणौ चादेशौ निपात्येते देशेऽभिधेये भावाकर्त्रोः । अन्तर्हण्यतेऽस्मिन्नित्यन्तर्घनः अन्तर्घणो वा वाहीकेषु देशविशेषः । अन्तर्घातोऽन्यः । एके त्वन्तःसंहतो देशोऽन्तर्घनः । अभ्यन्तरो देश इति केचित् । तस्मिन्नन्तर्घणेऽपश्यत् । घणिः प्रकृत्यन्तरमित्यन्ये ।

१०५७ **प्रघणप्रघाणौ गृहांशे** ॥५।३।३५॥ प्रपूर्वाद् हन्तेर्गृहांशेऽभिधेयेऽल् प्रत्ययो घणघाणौ चादेशौ निपात्येते । प्रघणः प्रघाणो वा द्वारालिन्दकः । प्रघातोऽन्यः ।

१०५८ **निघोदघसंघोदघनापघनोपघ्नं निमितप्रशस्तगणात्याधानाङ्गासङ्गम्** ॥५।३।३६॥ हन्तेर्निघादयः शब्दा यथासंख्यं निमितादिषु वाच्येषु

कृतघत्वादयोऽलन्ता निपात्यन्ते । समन्ततो मितं तुल्यमविशेषेण वा मितं परिच्छिन्नं निमितम् । तुल्यारोहपरिणाहमित्यर्थः । निर्विशेषं निश्चयेन वा हन्यन्ते ज्ञायन्ते निघा वृक्षाः । निघाः शालयः । निघा बृहतिका । निघं वस्त्रम् । निघातोऽन्यः । उत्कर्षेण हन्यते ज्ञायते उद्घः प्रशस्तः । उद्घातोऽन्यः । गणः प्राणिसमूहः । संहतिः संघः । अन्यत्र संघातः । कथं संघातो मनुष्याणाम् ? संघातशब्दः समुदायमात्रे । अत्याधीयन्ते छेदनार्थं कुट्टनार्थं च काष्ठादीनि यत्र तदत्याधानम् । उद्धन्यतेऽस्मिन्निति उद्घनः । काष्ठोद्घनः । ताम्रोद्घनः । लोहोद्घनः । घनः स्कन्धः । उद्घातोऽन्यः । अङ्गं शरीरावयवः । अपहन्यतेऽनेनेत्यपघनोऽङ्गम् । व्रणिभिरपघनैर्घर्घरा व्यक्तघोषान् । पाणिः पादश्चापघनो नापरमङ्गमित्यन्ये । अपघातोऽन्यः । उपहन्यते समीप इति ज्ञायते उपघ्नः आसन्नः । गुरूपघ्नः । ग्रामोपघ्नः । उपघातोऽन्यः । निपातनादेवोपात्तार्थविशेषे वृत्तिरसरूपप्रत्ययबाधनं च विज्ञायते ।

१०५९ मूर्तिनिचिताभ्रे घनः ॥५।३।३७॥ हन्तेर्मूर्त्यादिष्वर्थेषु अल् प्रत्ययो घनादेशश्च निपात्यते । मूर्तिः काठिन्यम् । अभ्रस्य घनः काठिन्यमित्यर्थः । एवं दधिघनः । लोहघनः । निचितं निरन्तरम्, तत्र घनाः केशाः । घनाः व्रीहयः । अभ्रं मेघः, तत्र घनः । कथं घनं दधि ? गुणशब्दोऽयम्, तद्योगाद् गुणिन्यपि वर्तते ।

१०६० व्ययोद्रोः करणे ॥५।३।३८॥ वि अयस् द्रु इत्येतेभ्यः पराद् हन्तेः करणेऽल् प्रत्ययो घनादेशश्च निपात्यते । भावस्य कारकान्तरस्य चानुप्रवेशो मा भूदिति करणग्रहणम् । विहन्यतेऽनेन तिमिरं विघनः । विघनेन्दुसमद्युतिः । वयः पक्षिणो हन्यन्तेऽनेनेति वा विघनः, अयोघनः । द्रुः हन्यतेऽनेनेति द्रुघनः कुठारः । कथं द्रुघणः ? अरीहणादिपाठाण्णत्वे भविष्यति । घणतेर्वाऽजन्तस्य रूपम् । स्त्रियां त्वनडेव परत्वात् । विहननी । अयोहननी । द्रुहननी ।

१०६१ स्तम्बाद् घ्नश्च ॥५।३।३९॥ स्तम्बशब्दात् पराद् हन्तेरल् घ्नघनादेशौ च निपात्येते करणे । स्तम्बो हन्यतेऽनेन स्तम्बघ्नो दण्डः । स्तम्बघनो यष्टिः । स्त्रियां परत्वादनडेव । स्तम्बहननी यष्टिः । केचित्तु कप्रत्यये निपातनं कृत्वा स्त्रियामपि स्तम्बघ्नेति इच्छन्ति । अन्ये तु स्तम्बपूर्वस्यापि हन्तेः 'सातिहेती'ति निपातनात् स्तम्बहेतिरितीच्छन्ति । करण इत्येव । स्तम्बहननं स्तम्बघातः । कथं स्तम्बघ्नीषीका ? करणस्यापि कर्तृविवक्षया 'अचित्ते टक्' इत्यनेन टकि सिद्धम् ।

१०६२ परेर्घः ॥५।३।४०॥ परिपूर्वाद्धन्तेरल् घादेशश्च करणे निपात्यते ।

परिहण्यतेऽनेनेति परिघोऽर्गला । लत्वे पलिघः ।

१०६३ ह्वः **समाह्वयाह्वयौ द्यूतनाम्नोः**॥५।३।४१॥ करण इति निवृत्तम् । द्यूते नाम्नि चाभिधेये यथासंख्यं समाङ्पूर्वादाङ्पूर्वाच्च ह्वयतेरल् ह्वयादेशश्च निपात्यते । समाह्वयः प्राणिद्यूतम् । आह्वयो नाम ।

१०६४ **न्यभ्युपवेर्वाश्चोत्** ॥५।३।४२॥ नि–अभि–उप–विभ्यः पराद् ह्वयतेर्भावाकर्त्रोरल् तत्संनियोगे च वाशब्द उकारः स्यात् । अभेदनिर्देशः सर्वादेशार्थः । निह्वः । अभिह्वः । उपह्वः । विह्वः । न्यभ्युपवेरिति किम् । प्रह्वायः। ह्व इत्येव । निह्वायः । ह्वो ह्व इत्यनिपातनं किम् । यङ्लुपि निपातनं मा भूत् । तेन विजोह्व इति सिद्धम् । अन्यथा विह्व इति स्यात् । जुहोतिनैव सिद्धे ह्वयतेरूपान्तरनिवृत्त्यर्थं वचनम् ।

१०६५ **आङो युद्धे** ॥५।३।४३॥ आङ्पूर्वाद् ह्वयतेर्युद्धेऽर्थे भावाअर्त्रोरल् स्यात् वाशब्दश्चोकारः। आहूयन्ते योद्धारोऽस्मिन्नित्याह्वो युद्धम् । युद्ध इति किम्। आह्वायः, आह्वानम् ।

१०६६ **आह्वाहो निपानम्** ॥५।३।४४॥ निपिबन्त्यस्मिन्निपानम् । पशुशकुनीनां पानार्थं कृतो जलाधारः । आङ्पूर्वाद् ह्वयतेर्भावाकर्त्रोरल् आह्वादेशश्च निपात्यते निपानं चेदभिधेयं स्यात् । आहूयन्ते पशवः पानायास्मिन्नित्याह्वः पशूनाम् । आह्वः शकुनीनाम् । निपानमित्यर्थः । निपानमिति किम् । आह्वायः, आह्वानम् ।

१०६७ **भावेऽनुपसर्गात्** ॥५।३।४५॥ अविद्यमानोपसर्गाद् ह्वयतेर्भावेऽल् वाशब्दश्चोकारः । अकर्तरीत्यस्यानुप्रवेशो मा भूदिति भावग्रहणम् । ह्वानं ह्वः । भाव इति किम् । कर्मणि ह्वायः। अनुपसर्गादिति किम् । आह्वायः ।

१०६८ **हनो वा वध् च** ॥५।३।४६॥ अनुपसर्गाद् हन्तेर्भावेऽल् वा स्यात् तत्संनियोगे चास्य वधादेशः । हननं वधः। घातः । अनुपसर्गादित्येव । संघातः ।

१०६९ **व्यधजपमदभ्यः** ॥५।३।४७॥ एभ्योऽनुपसर्गेभ्यो भावाकर्त्रोरल् स्यात् । बहुवचनाद् भाव इति निवृत्तम् । व्यधः । जपः । मदः । अनुपसर्गादित्येव। आव्याधः । उपजापः । उन्मादः ।

१०७० **नवा कणयमहसस्वनः** ॥५।३।४८॥ अनुपसर्गेभ्य एभ्यो भावाकर्त्रोरल् वा स्यात् । कणः, काणः । यमः, यामः । हसः । हासः । स्वनः, स्वानः

अनुपसर्गादित्येव । प्रकाणः । प्रयामः । प्रहासः । विष्वाणः । अमाप्तविभाषेयम् ।

१०७१ आङो रुप्लोः ॥ ५।३।४९ ॥ आङः पराभ्यां रुप्लुभ्यां भावाकर्त्रोरल् वा स्यात् । आरवः । आरावः । आप्लुवः । आप्लावः । आङ इति किम् । विरावः । विप्लुवः । रौतेर्धवि प्लुवतेरलि नित्यं प्राप्ते विकल्पः ।

१०७२ वर्षविघ्नेऽवाद् ग्रहः ॥५।३।५०॥ अवपूर्वाद् ग्रहेर्वर्षविघ्ने वाच्ये भावाकर्त्रोरल् वा स्यात् । अवग्रहः । अवग्राहः । वृष्टेः प्रतिबन्ध इत्यर्थः । वर्षविघ्न इति किम् । अवग्रहः पदस्य । अवग्रहोऽर्थस्य ।

१०७३ प्राद्ग्रहिमतुलासूत्रे ॥५।३।५१॥ प्रपूर्वाद् ग्रहे रश्मौ तुलासूत्रे चार्थे भावाकर्त्रोरल् वा स्यात् । प्रगृह्णत इति प्रग्रहः प्रग्राहः, अश्वादेः संयमनरज्जुस्तुलासूत्रं चोच्यते । अन्यस्तु प्रग्रहः ।

१०७४ वृगो वस्त्रे ॥५।३।५२॥ प्रपूर्वाद् वृणोतेर्वस्त्रविशेषे वाच्ये भावाकर्त्रोरल् वा स्यात् । प्रवृण्वन्ति तमिति प्रवरः, प्रावारः, 'घञपसर्गस्य बहुलम्' इति दीर्घः । अन्ये तु प्राङ्पूर्व एव वृणोतिः स्वभावाद् वस्त्रविशेषे वर्तते, तेन प्रावारः, प्रावर इति भवति । वस्त्र इति किम् । प्रवरो यतिः ।

१०७५ उदः श्रेः ॥५।३।५३॥ उत्पूर्वाच्छ्रेर्भावाकर्त्रोरल् वा स्यात् । उच्छ्रयः । उच्छ्रायः । नित्यमलि प्राप्ते विकल्पः ।

१०७६ युपूद्रोर्घञ् ॥५।३।५४॥ वेति निवृत्तम् पृथग्योगात् । उत्पूर्वेभ्य एभ्यो भावाकर्त्रोर्घञ् स्यात् । अलोऽपवादः । उद्यावः । उत्पावः । उद्द्रावः ।

१०७७ ग्रहः ॥५।३।५५॥ उत्पूर्वाद् ग्रहेर्भावाकर्त्रोर्घञ् स्यात् । अलोऽपवादः । उद्ग्राहः । उद इत्येव । ग्रहः, विग्रहः ।

१०७८ न्यवाच्छापे ॥५।६।५६॥ न्यवाभ्यां पराद् ग्रहेः शापे आक्रोशे गम्यमाने भावाकर्त्रोर्घञ् स्यात् । निग्राहो ह ते वृषल भूयात् । अवग्राहो ह ते जाल्म भूयात् । शाप इति किम् । निग्रहश्चौरस्य । अवग्रहः पदस्य ।

१०७९ प्राल्लिप्सायाम् ॥५।३।५७॥ प्रपूर्वाद् ग्रहेर्लिप्सायां गम्यमानायां भावाकर्त्रोर्घञ् स्यात् । पात्रप्रग्राहेण चरति पिण्डपातार्थी भिक्षुः । स्रुवस्य प्रग्राहेण चरति दक्षिणार्थी द्विजः । लिप्सायामिति किम् । स्रुवस्य प्रग्रहः ।

१०८० समो मुष्टौ ॥५।३।५८॥ संपूर्वाद् ग्रहेर्मुष्टिविषये धान्यार्थे भावाकर्त्रोर्घञ् स्यात् । मुष्टिरङ्गुलिसंनिवेशो न परिमाणम् । तत्र 'माने' इत्येव सिद्धत्वात् ।

संग्राहो मल्लस्य । अहो मौष्टिकस्य संग्राहः । मुष्टेर्दार्ढ्यमुच्यते । मुष्टाविति किम् । संग्रहः शिष्यस्य ।

१०८१ **युदुद्रोः** ॥५।३।५९॥ संपूर्वेभ्य एभ्यो भावाकर्त्रोर्घञ् स्यात् । संयावः। संदावः । संद्रावः । सम इत्येव । विद्रवः । उपद्रवः ।

१०८२ **नियश्चानुपसर्गाद् वा** ॥५।३।६०॥ अविद्यमानोपसर्गान्नयतेर्युदुद्रोश्च भावाकर्त्रोर्घञ् वा स्यात् । नयः । नायः । यवः । यावः । दवः । दावः । द्रवः । द्रावः । अनुपसर्गादिति किम् । प्रणयः ।

१०८३ **घोदः** ॥५।३।६१॥ उत्पूर्वान्नयतेर्भावाकर्त्रोर्वा घञ् स्यात् । उन्नायः, उन्नयः ।

१०८४ **अवात्** ॥५।३।६२॥ अवपूर्वान्नयतेर्भावाकर्त्रोर्घञ् स्यात् । अवनायः।

१०८५ **परेर्द्यूते** ॥५।३।६३॥ परिपूर्वान्नयतेर्द्यूतविषये धात्वर्थे वर्तमानाद् भावाकर्त्रोर्घञ् स्यात् । परिणायेन शारान् हन्ति । समन्तान्नयनेनेत्यर्थः । द्यूत इति किम् । परिणयः कन्यायाः ।

१०८६ **भुवोऽवज्ञाने वा** ॥५।३।६४॥ परिपूर्वाद् भवतेरवज्ञानेऽर्थे वर्तमानाद् भावाकर्त्रोर्घञ् वा स्यात् । अवज्ञानमसत्कारपूर्वकोऽवक्षेपः । परिभावः । परिभवः । अवज्ञान इति किम् । समन्ताद् भवनं परिभवः ।

१०८७ **यज्ञे ग्रहः** ॥५।३।६५॥ परिपूर्वाद् ग्रहेर्यज्ञविषये प्रयोगे भावाकर्त्रोर्घञ् स्यात् । पूर्वपरिग्राहः । उत्तरपरिग्राहः । वेदेर्यज्ञाङ्गभूताया ग्रहणविशेष एताभ्यामभिधीयते । यज्ञ इति किम् । परिग्रहः कुटुम्बिनः ।

१०८८ **संस्तोः** ॥५।३।६६॥ संपूर्वात् स्तौतेर्भावाकर्त्रोर्यज्ञविषये घञ् स्यात् । संस्तुवन्त्यत्रेति संस्तावश्छन्दोगानाम् । समेत्य स्तुवन्ति छन्दोगा यत्र देशे स देशः संस्ताव उच्यते । यज्ञे इत्येव । संस्तवोऽन्यदृष्टे ।

१०८९ **प्रात्स्रुद्रुस्तोः** ॥५।३।६७॥ प्रात्परेभ्यः स्रवत्यादिभ्यो भावाकर्त्रोर्घञ् स्यात् । प्रस्रावः । प्रद्रावः । प्रस्तावः । प्रादिति किम् । स्रवः । द्रवः । स्तवः । कथं स्रावः ? बहुलाधिकारात् ।

१०९० **अयज्ञे स्त्रः** ॥५।३।६८॥ प्रपूर्वात् स्तृ इत्येतस्मात् धातोर्भावाकर्त्रोर्घञ् स्यात् अयज्ञे—न चेत् यज्ञविषयः प्रयोगः । प्रस्तारः । मणिप्रस्तारः । विमान-

प्रस्तारः । नयप्रस्तारः। अयज्ञ इति किम्। बर्हिष्प्रस्तारः। समासेऽसमस्तस्येति षत्वम्।

१०९१ वेरशब्दे प्रथने ॥५।३।६९॥ प्रथनं विस्तीर्णता । वेः परात् स्तृणातेरशब्दविषये प्रथनेऽभिधेये घञ् स्यात् । विस्तारः पटस्य । प्रथन इति किम् । तृणस्य विस्तरः । छादनमित्यर्थः । अशब्द इति किम् । अहो द्वादशाङ्गस्य विस्तरः।

१०९२ छन्दोनाम्नि ॥५।३।७०॥ छन्दः पद्यो वर्णविन्यासः । विपूर्वात् स्तृणातेश्छन्दोनाम्नि विषये घञ् स्यात् । विष्टारपङ्क्तिः । केचित्तु वेरन्यतोऽपीच्छन्ति । आस्तारपङ्क्तिः । प्रस्तारपङ्क्तिः छन्दोनाम ।

१०९३ क्षुश्रोः ॥५।३।७१॥ क्षौतेः शृणोतेश्च विपूर्वाद् भावाकर्त्रोर्घञ् स्यात्। विक्षावः । विश्रावः। वेरित्येव । क्षवः । श्रवः ।

१०९४ न्युदो ग्रः ॥५।३।७२॥ न्युद्भ्यां पराद् गिरतेर्गृणातेर्वा भावाकर्त्रोर्घञ् स्यात् । निगारः । उद्गारः । न्युद इति किम् । गरः । संगरः ।

१०९५ किरो धान्ये ॥५।३।७३॥ न्युत्पूर्वात् किरतेर्धान्यविषये धात्वर्थे वर्तमानाद् भावाकर्त्रोर्घञ् स्यात्। निकारो धान्यस्य । उत्कारो धान्यस्य । राशिरित्यर्थः । धान्य इति किम्। फलनिकरः । पुष्पोत्करः ।

१०९६ नेर्वुः ॥५।३।७४॥ निपूर्वात् वृणोतेर्वृणातेर्वा धान्यविशेषेऽभिधेये भावाकर्त्रोर्घञ् स्यात् । निव्रियन्त इति नीवारा नाम व्रीहिविशेषाः। 'घञ्युपसर्गस्य बहुलम्' इति दीर्घत्वम् । धान्य इत्येव । निवरा कन्या । स्वभावादलन्तोऽप्ययं स्त्रियां वर्तते । क्तिस्तु बहुलाधिकारान्न ।

१०९७ इणोऽध्रेषे ॥५।३।७५॥ स्थितेरचलनमध्रेषः। निपूर्वादिणोऽध्रेषविषयेऽर्थे वर्तमानाद् भावाकर्त्रोर्घञ् स्यात् । शास्त्रलोकप्रसिद्ध्यादिना नियतमयनं न्यायः । अध्रेष इति किम् । न्ययं गतश्चौरः ।

१०९८ परेः क्रमे ।५।३।७६॥ क्रमः परिपाटी । परिपूर्वादिणः क्रमविषयेऽर्थे वर्तमानाद् भावाकर्त्रोर्घञ् स्यात् । तव पर्यायो भोक्तुम्। मम पर्यायो भोक्तुम्। क्रमेण पदार्थानां क्रियासंबन्धः पर्यायः । क्रम इति किम् । पर्ययः स्वाध्यायस्य । अतिक्रम इत्यर्थः । विपर्ययो मतेः, अन्यथाभवनमित्यर्थः ।

१०९९ व्युपाच्छीङः ॥५।३।७७॥ व्युपाभ्यां पराच्छीङो भावाकर्त्रोर्घञ् स्यात् क्रमे—क्रमविषयश्चेद् धात्वर्थः । तव राजविशायः। मम राजोपशायः। क्रमप्राप्तं पर्यायसाध्यं शयनमुच्यते । अन्ये तु शयितुं पर्याय उच्यते इत्याहुः । क्रम इति

किम् । विशयः । उपशयः ।

११०० **हस्तप्राप्ये चेरस्तेये** ॥५।३।७८॥ हस्तेनोपायान्तरनिरपेक्षेण प्राप्तुं शक्यं हस्तप्राप्यम् । तद्विषयाच्चिनोतेर्भावाकर्त्रोर्घञ् स्यात् अस्तेये—न चेद् धात्वर्थः स्तेये चौर्ये भवति । हस्तप्राप्यशब्देन प्रत्यासत्तिः प्राप्यस्य लक्ष्यते । तेन प्रत्यासत्तिविषये धात्वर्थे विधानम् । पुष्पप्रचायः । फलावचायः । फलोच्चायः । फलोच्चायश्च संहतैः । उदो नेच्छन्त्यन्ये । फलोच्चयः । हस्तप्राप्य इति किम् । पुष्पप्रचयं करोति तरुशिखरे । अस्तेय इति किम् । स्तेयेन पुष्पप्रचयं करोति । हस्तप्राप्यशब्देन प्रमाणमप्युच्यते । यद्धस्ते संभवति न हस्तादतिरिच्यते इति । ततश्च 'माने'—इत्यनेनैव सिद्धे नियमार्थं वचनम् । अस्तेय एवेति, तेन पुष्पाणां हस्तेन प्रचयं करोति चौर इत्यत्र 'माने' इत्यनेनापि घञ् न ।

११०१ **चितिदेहावासोपसमाधाने कश्चादेः** ॥५।३।७९॥ चीयत इति चितिर्यज्ञेऽग्निविशेषः तदाधारो वा । देहः शरीरम् । आवासो निवासः उपसमाधानमुपर्युपरि राशीकरणम् । एष्वर्थेषु चिनोतेर्भावाकर्त्रोर्घञ् तत्संनियोगे चादेः ककारादेशः स्यात् । चितौ—आकायमग्निं चिन्वीत । देहे—कायः शरीरम् । आवासे—ऋषिनिकायः । उपसमाधाने—गोमयनिकायः । गोमयपरिकायः । कथं काष्ठनिचयः ? बहुलमात्रविवक्षया । एष्विति किम् । चयः । चः क इत्येव सिद्धे आदिग्रहणमादेरेव यथा स्यात्, तेन चेर्यङ्लुपि निकेचाय इत्येव भवति ।

११०२ **संघेऽनूर्ध्वे** ॥ ५।३।८० ॥ न विद्यते कुतश्चिदूर्ध्वमुपरि किंचिद् यस्मिन् सोऽनूर्ध्वः । तस्मिन् संघे प्राणिसमुदायेऽभिधेये चिनोतेर्भावाकर्त्रोर्घञ् तत्संनियोगे चादेः कः । वैयाकरणनिकायः । तार्किकनिकायः । संघ इति किम् । सारसमुच्चयः । प्रमाणसमुच्चयः । अनूर्ध्व इति किम् । सूकरनिचयः । सूकरा ह्युपर्युपरि चीयन्ते ।

११०३ **माने** ॥५।३।८१॥ माने गम्यमाने धातोर्भावाकर्त्रोर्घञ् स्यात् । मानमियत्ता । सा च द्वेधा । संख्या परिमाणं च । एको निघासः । द्वौ निघासौ । एकस्तण्डुलावक्षायः । एकस्तण्डुलनिश्चायः । एकः कारः । द्वौ कारौ । त्रयः काराः । द्वौ सूर्पनिष्पावौ । समित्संग्राहः । तण्डुलसंग्राहः । मुष्टिरित्यर्थः । मान इति किम् । निश्चयः । अल एवायमपवादः । क्यादिभिस्तु बाध्यते । एका तिलोच्छ्रितिः । द्वे प्रसृती ।

११०४ **स्यादिभ्यः कः** ॥५।३।८२॥ स्यादिभ्यो धातुभ्यो भावाकर्त्रोः कः

प्रत्ययः स्यात् । आखूनामुत्थानम् आखूत्थो वर्तते । शलभोत्थो वर्तते । प्रतिष्ठन्त्यस्मिन्निति प्रस्थः सानुः । संतिष्ठन्तेऽस्यामिति संस्था । व्यवतिष्ठन्तेऽनयेति व्यवस्था । प्रस्नान्त्यस्मिन्निति प्रस्नः । प्रपिबन्त्यस्यामिति प्रपा । विध्यतेऽनेनेति विधः । आविध्यतेऽनेनेत्याविधः । विहन्यतेऽनेनास्मिन् वा विघ्नः । आयुध्यंतेऽनेनेत्यायुधम् । आध्यायन्ति तमित्याढ्यः । पृषोदरादित्वाद् धस्य ढः । सर्वापवादत्वादनटमपि कप्रत्ययो बाधते । कथमाव्याधः घातः विघातः उपघातः ? बहुलाधिकारात् । बहुवचनं प्रयोगानुसरणार्थम् ।

११०५ ट्वितोऽथुः ॥५।३।८३॥ ट्वितो धातोर्भावाकर्त्रोरथुः प्रत्ययः स्यात् । वेपथुः । वमथुः । श्वयथुः । स्फूर्जथुः । भ्रासथुः । नन्दथुः । क्षवथुः । दवथुः । असरूपत्वाद् घञलावपि । वेपः । क्षवः ।

११०६ ङ्वितस्त्रिमक् तत्कृतम् ॥५।३।८४॥ ङ्वितो धातोर्भावाकर्त्रोस्त्रिमक् प्रत्ययः स्यात् तेन धात्वर्थेन कृतं निर्वृत्तमित्येतस्मिन्नर्थे । पाकेन निर्वृत्तं पक्त्रिमम् । उप्त्रिमम् । कृत्रिमम् । लब्धिमम् । विहित्रिमम् । याचित्रिमम् । ट्विदसाविति कश्चित् । याचथुः । ककारः कित्कार्यार्थः ।

११०७ याजिस्वापिरक्षियतिप्रच्छो नः ॥५।३।८५॥ एभ्यो भावाकर्त्रोर्नः प्रत्ययः स्यात् । यज्ञः । स्वप्नः । रक्ष्णः । यत्नः । प्रश्नः ।

११०८ विच्छो नङ् ॥५।३।८६॥ विच्छेर्भावाकर्त्रोर्नङ् प्रत्ययः स्याद् । विश्नः । ङकारो गुणप्रतिषेधार्थः ।

११०९ उपसर्गादेः किः ॥५।३।८७॥ उपसर्गपूर्वादेः संज्ञकाद् धातोर्भावाकर्त्रोः किः प्रत्ययः स्यात् । आदिः । प्रदिः । प्रधिः । आधिः । निधिः । उपविधिः । सन्धिः । समाधिः । कित्करणमाकारलोपार्थम् ।

१११० व्याप्यादाधारे ॥५।३।८८॥ व्याप्यात् कर्मणः परादेः संज्ञादाधारेऽधिकरणे कारके किः स्यात् । जलं धीयतेऽस्मिन्निति जलधिः । शरधिः । इषुधिः । वालधिः । शेवधिः । आधारग्रहणमर्थान्तरनिषेधार्थम् ।

१११११ अन्तर्द्धेः ॥५।३।८९॥ अन्तःपूर्वाद्धातेर्भावाकर्त्रोः किः प्रत्ययो निपात्यते । अन्तर्धिः ।

१११२ अभिव्याप्तौ भावेऽनञिन् ॥५।३।९०॥ क्रियया स्वसंबन्धिनः साकल्येनाभिसंबन्धोऽभिव्याप्तिः । तस्यां गम्यमानायां भावे धातोरनञिन् इत्येतौ

प्रत्ययौ स्याताम् । समन्ताद् रावः संरवणं, सांराविणं सेनायां वर्तते । संकुटनं सांकौटिनमेषाम् । अभिव्याप्ताविति किम् । संरावः । संकोटः । भावग्रहणं कर्मादिप्रतिषेधार्थम् । असरूपविधिना क्तघञादिनिवृत्त्यर्थमनग्रहणम् ।

१११३ स्त्रियां क्तिः ॥५।३।९१॥ स्त्रियामिति प्रत्ययार्थविशेषणम् । धातोर्भावाकर्त्रोः स्त्रीलिङ्गे क्तिः प्रत्ययः स्यात् । घञादेरपवादः । कृतिः । हृतिः । चितिः । नीतिः । नुतिः । भूतिः । स्त्रियामिति किम् । कारः । चयः ।

१११४ श्वादिभ्यः ॥५।३।९२॥ शृणोत्यादिभ्यो धातुभ्यः स्त्रीलिङ्गे भावाकर्त्रोः क्तिः स्यात् । वक्ष्यमाणैः किबादिभिः सह समावेशार्थं वचनम् । श्रु–श्रुतिः । प्रतिश्रुत् । स्तु–स्तुतिः । प्रतिस्तुत् । पद्–संपत्तिः, संपद् । सद्–आसत्तिः । संसद् । उपनिषद् । निषद्या । विद्–संवित्तिः । संविद् । विद्या । वेदना । लभ्–लब्धिः । लभा । अर्द्–शिरोऽर्तिः । अर्दिका । शंस्–प्रशस्तिः । प्रशंसा । पच्–पक्तिः । पचा । कण्डूय–कण्डूतिः, कण्डूः, कण्डूया । व्यवक्रुश्–व्यवक्रुष्टिः । व्यावक्रोशी । इष्–इष्टिः । इच्छा । यज्–इष्टिः । इज्या । मन्–मतिः । मन्या । आस्–आस्या । उपास्तिः । उपासना । शास्–अनुशिष्टिः, आशीः । भृग्–भृतिः, भृत्या । स्तूयते इज्यते इष्यतेऽनयेति स्तुतिः इष्टिः इष्टिः । इष्टिरिति संज्ञाशब्दत्वात् करणेऽपि क्तिरेव नानट् । एवं स्तुतिः । अन्यत्र तु स्पर्धे ' परत्वात् स्त्रीखलनाः अलो बाधकाः स्त्रियाः खलनौ ' इति न्यायः ।

१११५ समिणासुगः ॥५।३।९३॥ संपूर्वादिण आङ्पूर्वात् सुनोतेश्च भावाकर्त्रोः स्त्रियां क्तिः स्यात् । क्यपोऽपवादः । समितिः । आसुतिः । समाङोऽन्यत्र इत्या सुत्येति क्यबेव ।

१११६ सातिहेतियूतिजूतिज्ञप्तिकीर्ति ॥५।३।९४॥ एते शब्दा भावाकर्त्रोः क्तिप्रत्ययान्ता निपात्यन्ते । सिनोतेः सुनोतेः स्यतेर्वा आत्वमित्वाभावश्च निपात्यते । सातिः । हिनोतेर्गुणे हन्तेर्वाऽन्त्यस्वरादेरेत्वे हेतिः । यौतेर्जवतेश्च दीर्घत्वे यूतिः । जूतिः । ज्ञपयतेर्ज्ञप्तिः । कीर्तयतेः कीर्तिः । आभ्यां ण्यन्तलक्षणोऽनो न । कीर्तनेत्यपि कश्चित् ।

१११७ गापापचो भावे ॥५।३।९५॥ एभ्यो भावेऽर्थे स्त्रियां क्तिः स्यात् । गा इति सामान्येन ग्रहणम् । प्रगीतिः । संगीतिः । पा इति गापचिसाहचर्यात् पिबतेर्ग्रहणम् । प्रपीतिः । संपीतिः । पक्तिः । प्रपक्तिः । भावग्रहणमर्थान्तरनिरासार्थम् । बाधकस्याङोऽपवादः ।

१११८ स्थो वा ॥५।३।९६॥ तिष्ठतेर्भावेऽर्थे स्त्रियां क्तिर्वा स्यात्। प्रस्थितिः। उपस्थितिः। वावचनादङपि । आस्था । व्यवस्था । संस्था । पूर्ववदङोऽपवादः।

१११९ अपाच्चायश्चिः क्तौ ॥४।२।६६॥ अपपूर्वस्य चायतेः क्तिप्रत्यये चिरादेशः स्यात् । अपचितिः । ह्रादो ह्लदिति ह्रादेशे ह्लत्तिः ।

११२० तेर्ग्रहादिभ्यः ॥४।४।३३॥ ग्रहादिभ्य एव परस्य स्ताद्यशितस्तेरादिरिट् स्यात्। तेरिति सामान्येन क्तेस्तिको वा ग्रहणम्। निगृहीतिः। अपस्निहितिः। निकुञ्चितिः । निपठितिः । उदितिः । भणितिः । रणितिः । मथितिः । लिखितिः। कम्पितिः । अन्दोलितिः । बहुवचनमाकृतिगणार्थम् । तेर्ग्रहादिभ्य एवेति नियमादन्यत्र न । शान्तिः । वान्तिः। दीप्तिः। ज्ञप्तिः। स्रस्तिः । ध्वस्तिः । तिक्तः खल्वपि। तन्तिः । सन्तिः । कण्डूतिः । णौ, पाक्तिः । याष्टिः । मज्जयितिः । तेरेव ग्रहादिभ्य इति विपरीतनियमो न । उत्तरत्र ग्रहेः परोक्षायामिटो दीर्घनिषेधात् ।

११२१ आस्यटिव्रज्यजः क्यप् ॥५।३।९७॥ एभ्यः परो भावेऽर्थे स्त्रियां क्यप् प्रत्ययः स्यात् । आस् आस्या । अट् अट्या । वृथाट्या खलु सा तस्याः । व्रज् व्रज्या । यज् इज्या । ककारः कित्कार्यार्थः । पित्करणमुत्तरत्र तागमार्थम् ।

११२२ भृगो नाम्नि ॥५।३।९८॥ भृगः परो भावेऽर्थे स्त्रियां नाम्नि संज्ञायां क्यप् प्रत्ययः स्यात् । भरणं भृत्या । नाम्नीति किम् । भृतिः । भाव इत्येव । भ्रियत इति भार्या वधूः ।

११२३ समजनिषन्निषदशीङ्सुगविदिचरिमनीणः ॥ ५।३।९९ ॥ योगविभागाद् भाव एवेति निवृत्तम् । एभ्यः परो नाम्नि भावाकर्त्रोः स्त्रियां क्यप् स्यात् । समज्–समजन्त्यस्यामिति समज्या । निपन्निषदेति संहितानिर्देशात् पतेः पदेश्च ग्रहणम् । निपतन्त्यस्यामिति निपत्या । निपद्या । निषद्–निषदनं निषीदन्त्यस्यामिति निषद्या । शीङ्–शेरतेऽस्यामिति शय्या । सुग्–सवनं सुन्वन्त्यस्यामिति वा सुत्या । विद्–वेदनं विदन्ति तस्यां तया वा हिताहितमिति विद्या । चर् चरणं चरन्ति अनयेति वा चर्या । मन् मननं मन्यतेऽनयेति वा मन्या । इण्–अयनमेत्यनयेति वा इत्या । नाम्नीत्येव । संवीतिः। निपत्तिः । निषत्तिः ।

११२४ कृगः श च वा ॥५।३।१००॥ करोतेर्भावाकर्त्रोः स्त्रियां शः प्रत्ययो वा स्यात् । चकारात् क्यप् च । क्रिया । कृत्या । पक्षे कृतिः । क्रियेति यदा भावकर्मणोः शस्तदा मध्ये क्यः । यदा त्वपानादौ शस्तदा क्यो नास्तीति रेरिकारस्येयादेशः ।

११२५ मृगयेच्छायाच्ञातृष्णाकृपाभाश्रद्धाऽन्तर्धा ॥५।३।१०१॥ एते शब्दाः स्त्रियां निपात्यन्ते । तत्रेच्छा भाव एव । शेषास्तु भावाकर्त्रोः । अन्ये तु सर्वान् भाव एवानुमन्यन्ते। मृगयतेः शः शव् च क्यापवादो निपात्यते। मृगया। इच्छतेः शः क्याभावश्च । इच्छा । याचितृष्योः ननङौ । याच्ञा । तृष्णा । क्रपेरङ् रेफस्य च ऋकारः । कृपा । भातेरङ् । भा । श्रत्पूर्वादन्तःपूर्वाच्च दधातेरङ् । श्रद्धा । अन्तर्धा ।

११२६ परेः सृचरेर्यः ॥५।३।१०२॥ परिपूर्वाभ्यां सृचरिभ्यां परः स्त्रियां यः प्रत्ययः स्यात् भावाकर्त्रोः । भाव इत्यन्ये । परिसर्या । परेरिति किम् । संसृतिः । चूर्तिः ।

११२७ वाटाट्यात् ॥५।३।१०३॥ अटतेर्यङन्तात् स्त्रियां यप्रत्ययो वा स्यात् भावाकर्त्रोः । भाव इत्यन्ये । अटाट्या । पक्षे अः प्रत्ययः । अटाटा । अन्ये तु क्तिप्रत्ययबाधनार्थमटतेरयङन्तस्य यप्रत्ययं द्विर्वचनं पूर्वदीर्घत्वं च निपातयन्ति । अटनमटाट्या ।

११२८ जागुरश्च ॥५।३।१०४॥ जागर्तेः स्त्रियामः प्रत्ययो यश्च स्याद् भावाकर्त्रोः । भाव इत्यन्ये । जागरा । जागर्या ।

११२९ शंसिप्रत्ययात् ॥५।३।१०५॥ शंसेः प्रत्ययान्तेभ्यश्च धातुभ्यो भावाकर्त्रोः स्त्रियामः प्रत्ययः स्यात् । प्रशंसा । गोपाया । ऋतीया । मीमांसा । कण्डूया । लोलूया । चिकीर्षा । पुत्रकाम्या । पुत्रीया । गवा । गल्भा । श्येनाया । पटपटाया । शंसूः क्तेऽनिट् इति वचनम् ।

११३० क्तेटो गुरोर्व्यञ्जनात् ॥५।३।१०६॥ क्तस्येट् यस्मात् स क्तेट् । क्तेटो गुरुमतो व्यञ्जनान्ताद् धातोर्भावाकर्त्रोः स्त्रियामः प्रत्ययः स्यात् । ईहा । ऊहा । ईक्षा । उक्षा । कुण्डा । हुण्डा । शिक्षा । भिक्षा । व्यतीहा । व्यतीक्षा । क्तेट इति किम् । स्रस्तिः । ध्वस्तिः । आप्तिः । दीप्तिः । अक्तिः । राद्धिः । चायअपचितिः । । स्फुर्छा, स्फूर्तिः । मुर्छा, मूर्तिः । गुरोरिति किम् । स्फुर्–स्फूर्तिः। निपठितिः । व्यञ्जनादिति किम् । संशीतिः ।

११३१ षितोऽङ् ॥५।३।१०७॥ षिद्भ्यो धातुभ्यो भावाकर्त्रोः स्त्रियामङ् प्रत्ययः स्यात् । पचा । क्षमा । क्षान्तिरिति तु क्षाम्यतेः । घटा । त्वरा । प्रथा । व्यथा । जरा । 'ऋवर्णदृशोऽङि' इति गुणः । ङकारो ङित्कार्यार्थः ।

११३२ भिदादयः ॥५।३।१०८॥ भिदादयः शब्दा भावाकर्त्रोः स्त्रियामङ्प्रत्ययान्ता यथादर्शनं निपात्यन्ते । भिदा विदारणम् । छिदा द्वैधीकरणम् । विदा विचारणा । मृजा शरीरसंस्कारः । क्षिपा प्रेरणम् । दया अनुकम्पा । रुजा रोगः । चुरा चौर्यम् । पृच्छा प्रश्नः । एतेऽर्थविशेषे । अन्यत्र भित्तिः कुड्यम्, छित्तिश्चौर्यादिकरणाद् राजापराधः, विच्छित्तिः प्रकार इत्यादि । तथा ऋकृहृधृतृभ्यः संज्ञायां वृद्धिश्च । आरा शस्त्री । ऋतिरन्या । कारा गुप्तिः। कृतिरन्या । हारा मानम् । हृतिरन्या । धारा प्रपातः खड्गादेर्वा । धृतिरन्या । तारा ज्योतिः । तीर्णिरन्या । तथा गुहिकुहिवशिवपितुलिक्षपिक्षिभ्यश्च संज्ञायाम् । गुहा पर्वतकन्दरा ओषधिश्च । गूढिरन्या । कुहा नाम नदी । कुहनान्या । वशा स्नेहनद्रव्यम् धातुविशेषश्च । उष्टिरन्या । वपा मेदोविशेषः । उप्तिरन्या । एवं तुला उन्मानम् । क्षपा रात्रिः । क्षिया आचारभ्रंशः । तथा संज्ञायामेव रिखिलिखिशुभिसिधिमिधिगुधिभ्यो गुणश्च । रिखिः लिखेः समानार्थः सौत्रो धातुः । रेखा राजिः । लेखा सैव । शोभा कान्तिः । सेधा सत्त्वम् । मेधा बुद्धिः । गोधा प्राणिविशेषः दोस्त्राणं च । भिदादिराकृतिगणः, तेन चूडेत्यादिसिद्धम् ।

‘ अकृतस्य क्रिया चैव प्राप्तेर्बाधनमेव च ।
अधिकार्थविवक्षा च त्रयमेतन्निपातनात् ’॥

११३३ भीषिभूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यः ॥५।३।१०९॥ एभ्यो ण्यन्तेभ्यः स्त्रियां भावाकर्त्रोरङ् स्यात् । ण्यन्तलादने प्राप्ते वचनम् । भीषा । भूषा । चिन्ता । पूजा । कथा । कुम्बा । चर्चा । स्पृहा । तोला । दोला । बहुवचनाद् यथादर्शनमन्येभ्योऽपि भवति । पीडा । ऊना ।

११३४ उपसर्गादातः ॥५।३।११०॥ उपसर्गेभ्य आकारोन्तेभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोरङ् स्यात् । उपदा । उपधा । आधा । प्रदा । मधा । विधा । संधा । प्रमा । श्वादिलात् क्तौ प्रमितिः । उपसर्गादिति किम् । दत्तिः ।

११३५ णिवेत्त्यासश्रन्थघट्टवन्देरनः ॥५।३।१११॥ ण्यन्तेभ्यो वेत्त्यासश्रन्थघट्टवन्दिभ्यश्च धातुभ्यः स्त्रियां भावाकर्त्रोरनः प्रत्ययः स्यात् । कारणा । हारणा । कामना । लक्षणा । भावना । वेदना । आसना । उपासना । श्रन्थना । ग्रन्थेरप्यन्ये । ग्रन्थना । घट्टना । वन्दना । वेत्तीति तिङ्निर्देशो ज्ञानार्थपरिग्रहार्थः ।

११३६ इषोऽनिच्छायाम् ॥५।३।११२॥ इषेरनिच्छायां वर्तमानात् स्त्रियां

भावाकर्त्रोरनः स्यात् । अन्वेषणा । एषणा । पिण्डैषणा । अनिच्छायामिति किम् । इष्टिः । कथं प्राणैषणा वित्तैषणा परलोकैषणा ? बहुलाधिकारात् ।

११३७ पर्यधेर्वा ॥५।३।११३॥ पर्यधिपूर्वादिषेरनिच्छायां वर्तमानाद् भावाकर्त्रोः स्त्रियामनो वा स्यात् । पर्येषणा । परीष्टिः । अध्येषणा । अधीष्टिः । अधीष्टिरिति नेच्छन्त्यन्ये ।

११३८ क्रुत्संपदादिभ्यः क्विप् ॥५।३।११४॥ क्रुधादिभ्योऽनुपसर्गपूर्वेभ्यः पदादिभ्यश्च समादिपूर्वेभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोः क्विप् प्रत्ययः स्यात् । क्रुधेः क्रुत् । युधेः युत् । क्षुधेः क्षुत् । तृषेः तृट् । लिषेः लिट् । रुषेः रुट् । रुजेः रुक् । रुचेः रुक् । शुचेः शुक् । मुदेः मुत् । मृदेः मृत् । गृ–गीः । त्रै–त्राः । दिशेः दिक् । सृजेः स्रक् । तथा पदेः संपद् । विपद् । आपद् । व्यापद् । प्रतिपद् । षद्लृ–संसत् । परिषत् । उपसत् । उपनिषत् । विदेः निवित् । शासेः प्रशीः । आशीः । श्रु–प्रतिश्रुत् । उपश्रुत् । स्रु–परिस्रुत् । नहेः–व्यपानत् । दृषेः प्रादृट् । मृषेः विमृट् । वृतेः नीवृत् । उपावृत् । यतेः संयत् । इणः समित् । भृगः उपभृत् । इन्धेः समित् । क्रुधादिः संपदादिश्चाकृतिगणः ।

११३९ भ्यादिभ्यो वा ॥५।३।११५॥ बिभेत्यादिभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोः क्विप् वा स्यात् । भीः । भीतिः । ह्रीः । ह्रीतिः । लूः । लूनिः । भूः । भूतिः । कण्डूः । कण्डूया । कृत् । कृतिः । भित् । भित्तिः । छित् । छित्तिः । तुत् । तुत्तिः । दृक् । दृष्टिः । नशेः नक् । नष्टिः । युजेः युक् । युक्तिः । ज्वरेः जूः । जूर्तिः । स्वरेः तूः । तूर्तिः । अवतेः ऊः । ऊतिः । स्त्रिवेः स्यूः । स्यूतिः । मवतेः मूः । मूतिः । नौतेः नुत् । नुतिः । शकेः शक् । शक्तिः ।

११४० व्यतीहारेऽनीहादिभ्यो अः ॥ ५।३।११६ ॥ व्यतिहरणं व्यतिहारः । परस्परस्य कृतप्रतिकृतिः । व्यतिहारविषयेभ्यो धातुभ्य ईहादिवर्जितेभ्यः स्त्रियां अः प्रत्ययः स्यात् । बाहुलकाद् भावे क्त्यादीनामपवादः । परस्परमाक्रोशनं व्यावक्रोशी । व्याक्रोशी । व्यावमोषी । व्यावहासी । व्यावलेखी । व्यातिचारी । व्यावचर्ची । व्यात्युक्षी । अनीहादिभ्य इति किम् । व्यतीहा । व्यतीक्षा । व्यतिपृच्छा । व्यवहृतिः । व्युत्युक्षेत्यप्येके । नित्यं 'अग्निनोऽण्'–इति स्वार्थेऽण् वक्ष्यते । तेन केवलस्य प्रयोगो न भवति । 'श्वादिभ्यः'–इति समावेशाभिधानात् व्यवकृष्टि–व्याकृष्टिरित्यपि भवति । स्त्रियामित्येव । व्यतिपाको वर्तते ।

११४१ नञ्योऽनिः शापे ॥५।३।११७॥ नञ्: पराद् धातोः शापे गम्यमाने भावाकर्त्रोः स्त्रियामनिः प्रत्ययः स्यात् । अजननिस्ते वृषल भूयात् । एवमजीवनिः। अकरणिः । अप्रयाणिः । अगमनिः । नञ् इति किम् । मृतिस्ते जाल्म भूयात् । शाप इति किम् । अकृतिस्तस्य पटस्य ।

११४२ ग्लाहाज्यः ॥५।३।११८॥ एभ्यः स्त्रियां भावाकर्त्रोरनिः प्रत्ययः स्यात् । ग्लानिः । हानिः । ज्यानिः । म्लानिरित्यपि कश्चित् ।

११४३ प्रश्नाख्याने वेञ् ॥५।३।११९॥ प्रश्ने आख्याने च गम्यमाने स्त्रियां भावाकर्त्रोर्धातोरिञ् प्रत्ययो वा स्यात् । वावचनाद् यथाप्राप्तं च । कां त्वं कारिमकार्षीः। कां कारिकां कां क्रियां कां कृत्यां कां कृतिम्। आख्याने सर्वां कारिमकार्षं सर्वां कारिकां सर्वां क्रियां सर्वां कृत्याम् सर्वां कृतिम् । कां त्वं गणिमजीगणः, कां गणनाम् । सर्वां गणिमजीगणम् सर्वां गणिकां सर्वां गणनाम्। एवं पाचिं पाचिकां पक्तिं पचाम् । पाठिं पाठिकां पठितिम् । प्रश्नाख्यान इति किम् । कृतिः। हृतिः।

११४४ पर्यायार्हणोत्पत्तौ च णकः ॥५।३।१२०॥ एष्वर्थेषु प्रश्नाख्यानयोश्च गम्यमानयोः स्त्रियां भावाकर्त्रोर्धातोर्णकः प्रत्ययः स्यात् । क्त्याद्यपवादः । पर्यायः क्रमः परिपाटिरिति यावत् । भवत आसिका । भवतः शायिका। भवतोऽग्रगामिका । आसितुं शयितुमग्रेगन्तुं च भवतः क्रम इत्यर्थः । अर्हणमर्हः योग्यता । अर्हति भवान् इक्षुभक्षिकाम् । ओदनभोजिकाम् । पयःपायिकाम् । ऋणं यत्परस्मै धार्यते । इक्षुभक्षिकां मे धारयसि । उत्पत्तिर्जन्म । इक्षुभक्षिका मे उदपादि। प्रश्ने—कां त्वं कारिकामकार्षीः । कां त्वं गणिकामजीगणः । आख्याने—सर्वां कारिकामकार्षं, सर्वां गणिकामजीगणम्। बहुलाधिकारात् क्वचिन्न । चिकीर्षा बुभुक्षा मे उदपादि । प्रश्नाख्यानयोगेऽपि पर्यायादिषु परत्वाद् णक एव भवति नेञ् ।

११४५ नाम्नि पुंसि च ॥५।३।१२१॥ धातोः स्त्रियां भावाकर्त्रोर्नाम्नि संज्ञायां णकः प्रत्ययः स्यात्, यथादर्शनं पुंसि च । प्रच्छर्दनं प्रच्छर्द्यतेऽनयेति वा प्रच्छर्दिका । एवं प्रवाहिका । विचर्चिका । प्रस्कन्दिका । विपादिका । एता रोगसंज्ञाः । उद्दालकपुष्पाणि भज्यन्ते यस्यां सा उद्दालकपुष्पभञ्जिका । एवं वारणपुष्पप्रचायिका। अभ्योषाः खाद्यन्तेऽस्यामिति अभ्योषखादिका । एवमवोषखादिका । साला भज्यन्ते यस्यां सा सालभञ्जिका । एवंनामानः क्रीडाः । बहुलाधिकारादिह न । शिरसोऽर्दनं शिरोऽर्तिः । एवं शीर्षार्तिः । शिरोऽभितप्तिः । शीर्षाभितप्तिः । तथा

चन्दनतक्षा क्रीडा । बहुलाधिकारादेव चार्तिरित्यत्रार्दतेः अर्दयतेश्च यथाक्रममप्रत्यय-मनप्रत्ययं च बाधित्वा क्तिरेव । पुंसि च–अरोचनं न रोचतेऽस्मिन्निति वा अरो-चकः । अनाशकः । उत्कन्दकः । उत्कर्णकः ।

११४६ भावे ॥५।३।१२२॥ भावे–धात्वर्थनिर्देशे स्त्रियां धातोर्णकः प्रत्ययः स्यात् । आसिका । शायिका । जीविका । कारिका । बहुलाधिकारात् ईक्षा, ऊहा, ईहा, स्मरणा ।

११४७ क्लीबे क्तः ॥५।३।१२३॥ क्लीबे नपुंसकलिङ्गे भावेऽर्थे धातोः क्तः प्रत्ययः स्यात् । घञाद्यपवादः । स्त्रियां भावाकर्त्रोरिति च निष्टत्तम् । हसितं छात्रस्य । नृत्तं मयूरस्य । व्याहृतं कोकिलस्य । गतं मतंगजस्य । क्लीब इति किम् । हसः । हासः ।

११४८ अनट् ॥५।३।१२४॥ क्लीबे भावेऽर्थे धातोरनट् स्यात् । गमनं भोजनं वचनं हसनं छात्रस्य । टकार उत्तरत्र ङ्यर्थः ।

११४९ ष्ठिवसिवोऽनटि वा ॥४।२।११२॥ ष्ठिवः सीव्यतेश्चानटि वा दीर्घः स्यात् । निष्ठीवनम् । निष्ठेवनम् । सीवनम् । सेवनम् ।

११५० यत्कर्मस्पर्शात् कर्त्रङ्गसुखं ततः ॥५।३।१२५॥ येन कर्मणा संस्पृश्यमानस्य कर्तुरङ्गस्य शरीरस्य सुखमुत्पद्यते ततः कर्मणः पराद् धातोः क्लीबे भावेऽर्थेऽनट् स्यात् । पूर्वेणैव प्रत्यये सिद्धे नित्यसमासार्थं वचनम् । पयःपानं सुखम् । ओदनभोजनं सुखम् । कर्मेति किम् । अपादानादिस्पर्शे मा भूत् । तूलिकाया उत्थानं सुखम् । स्पर्शादिति किम् । अग्निकुण्डस्योपासनं सुखम् । कर्त्रिति किम् । शिष्येण गुरोः स्नापनं सुखम् । स्नापयतेर्न गुरुः कर्ता किं तर्हि कर्म । अङ्गग्रहणं किम् । पुत्रस्य परिष्वङ्गनं सुखम् । पुत्रस्य स्पर्शान्न शरीरस्य सुखं किं तर्हि मानसी प्रीतिः । अन्यथा परपुत्रपरिष्वङ्गेऽपि स्यात् । सुखमिति किम् । कण्टकानां मर्दनम् । सर्वत्रासमासः प्रत्युदाहार्यः । अथवा तत इति सप्तम्य-न्तात् तसुः । येन कर्मणा स्पृश्यमानस्य कर्तुरङ्गसुखमुत्पद्यते तस्मिन् कर्मण्यभिधेये सामर्थ्यात् कर्तुः पराद् धातोरनट् स्यात् इत्यपरोऽर्थः । राज्ञा भुज्यन्ते राजभोजनाः शालयः । राजाच्छादनाः प्रावाराः । राजपरिधानानि वासांसि ।

११५१ रम्यादिभ्यः कर्तरि ॥५।३।१२६॥ रम्यादिभ्यो धातुभ्यः कर्तर्यनट् स्यात् । रम्–रमणी । कम्–कमनी । नन्द् नन्दनी । ह्लाद् ह्लादनी । त्रश्च्–इध्मत्र-श्चनः । शातिः–पलाशशातनः । बहुवचनं प्रयोगानुसरणार्थम् ।

११५२ **कारणम्** ॥५।३।१२७॥ कृगः कर्तर्यनट् वृद्धिश्च निपात्यते। करोतीति कारणम्। कर्तरीति किम्। करणम्।

११५३ **भुजिपत्यादिभ्यः कर्मापादाने** ॥५।३।१२८॥ भुज्यादिभ्यः पत्यादिभ्यश्च धातुभ्यो यथासंख्यं कर्मण्यपादाने चानट् स्यात्। भुज्यत इति भोजनम्। निरदन्ति तदिति निरदनम्। आच्छादि–आच्छादनम्। अवस्रावि–अवस्रावणम्। अवसिच्–अवसेचनम्। अस्–असनम्। वस्–वसनम्। आभृग्–आभरणम्। अपादाने, पत्–प्रपतत्यस्मादिति प्रपतनः। स्कन्दि-प्रस्कन्दनः। श्र्योति–प्रश्र्योतनः। स्रु–प्रस्रवणः। झृष्–निर्झरणः। धृ–शङ्खोद्धरणः। दाग्–अपादानम्। बहुवचनं प्रयोगानुसरणार्थम्।

११५४ **करणाधारे** ॥५।३।१२९॥ करणाधारयोरर्थयोः धातोरनट् स्यात्। घञाद्यपवादः। करणे–एषणी। लेखनी। विचयनी। इध्मव्रश्चनः। पलाशशातनः। अविलवनः। श्मश्रुकर्तनः। आधारे–गोदोहनी। सक्तुधानी। तिलपीडनी। शयनम्। आसनम्। अधिकरणम्। आस्थानम्।

११५५ **पुंनाम्नि घः** ॥५।३।१३०॥ पुंसो नाम संज्ञा पुन्नाम। तत्र गम्यमाने करणाधारयोर्धातोर्घः प्रत्ययः स्यात्। करणे–प्रच्छदः। उरच्छदः। दन्तच्छदः। प्लवः। प्रणवः। करः। प्रत्ययः। शरः। आधारे–एत्य कुर्वन्त्यस्मिन्नित्याकरः। आलवः। आरवः। आपवः। भवः। लयः। विषयः। भरः। प्रहरः। प्रसरः। अवसरः। परिसरः। विसरः। प्रतिसरः। पुंग्रहणं किम्। विचीयतेऽनयेति विचयनी। प्रधीयते विकारोऽस्मिन्निति प्रधानम्। नाम्नीति किम्। प्रहरणो दण्डः। बहुलाधिकारात् क्वचिन्न। प्रसाधनः। दोहनः। घकार 'एकोपसर्गस्य च वे' इत्यत्र विशेषणार्थः।

११५६ **गोचरसंचरवहव्रजव्यजखलापणनिगमबकभगकषाकषनिकषम्** ॥५।३।१३१॥ एते शब्दाः करणाधारयोः पुंनाम्नि व्यञ्जनाद् घञि प्राप्ते घप्रत्ययान्ता निपात्यन्ते। गावश्चरन्ति अस्मिन्निति गोचरो देशः। व्युत्पत्तिमात्रं चेदम्। विषयस्य तु संज्ञा। अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम्। संचरन्तेऽनेन संचरः। वहन्ति तेन वहः वृषस्कन्धदेशः। व्रजन्त्यस्मिन्निति व्रजः। विपूर्वोऽजिः। व्यजत्यनेन व्यजः। निपातनाद् वीभावाभावः। खलन्त्यस्मिन्निति खलः। एत्य पणायन्ति अस्मिन्निति आपणः। निगच्छन्ति तत्रेति निगमः। वक्तीति

बकः । बाहुलकात् कर्तरि । निपचन्त्यनेन निपक इत्यपि कश्चित् । भज्यतेऽनेनास्मिन्निति वा भगः । भगमिति बाहुलकात् क्लीबोऽपि घः । कषत्यस्मिन्निति कषः । एवमाकषः । निकषः ।

११५७ व्यञ्जनाद् घञ् ॥५।३।१३२॥ व्यञ्जनान्ताद् धातोः पुंनाम्नि करणाधारे घञ् प्रत्ययः स्यात् । घस्यापवादः । विदन्त्यनेन विन्दति विन्दते वा वेदः। चेष्टतेऽनेन चेष्टो बलम् । एत्य पचन्त्यस्मिन्नित्यापाकः । आरामः । लेखः । बन्धः। नेगः । वेगः । रागः । रङ्गः । क्रमः । प्रासादः । अपामार्गः । नीमार्गः ।

११५८ अवात् तॄस्तॄभ्याम् ॥५।३।१३३॥ अवपूर्वाभ्यां तॄस्तॄभ्यां करणाधारयोः पुंनाम्नि घञ् स्यात् । अवतरन्त्यनेनास्मिन् वेति अवतारः । अवस्तृणन्त्यनेनास्मिन्निति वा अवस्तारः । बहुलाधिकारादसंज्ञायामपि । अवतारो नद्याः । उत्पूर्वादपि । नद्युत्तारः । करणाधार इत्येव । अवतरः । केचित्तु संज्ञायामसंज्ञायां च भावेऽकर्तरि कारके च स्त्रो नित्यं तरतेस्तु विकल्पेन घञमिच्छन्ति । द्विवचनं करणाधार इति यथासंख्यनिवृत्त्यर्थम् ।

११५९ न्यायावायाध्यायोद्यावसंहारावहाराधारदारजारम् ॥५।३।१३४॥ स्वरान्तार्थ आरम्भः । एते शब्दाः पुंनाम्नि करणाधारयोर्घे प्राप्ते घञन्ता निपात्यन्ते । निपूर्वस्येणो नीयतेऽनेनेति न्यायः । एत्य वयन्ति वायन्ति वा तत्रेति आवायः । अधीयतेऽनेनास्मिन् वाध्यायः । उद्यवन्ति तेन तस्मिन् वोद्यावः । संहरन्ति तेन संहारः । अवहरन्ति तेन तस्मिन् वा अवहारः । आधियते तत्रेत्याधारः। दीर्यन्ते एभिरिति दाराः । जीर्यतेऽनेनेति जारः। दारयन्तीति दाराः । जरयतीति जार इति कर्तरि केचिन्निपातयन्ति ।

११६० उदङ्कोऽतोये ॥५।३।१३५॥ उत्पूर्वादञ्चतेः पुंनाम्नि करणाधारयोर्घञ् निपात्यते अतोये—न चेत् तोयविषयो धात्वर्थः । जलं चेत् तेन नोदच्यत इत्यर्थः । तैलोदङ्कः । घृतोदङ्कः । अतोय इति किम् । उदकोदञ्चनः । 'व्यञ्जनान्ताद् घञ्' इति सिद्धे तोये प्रतिषेधार्थं वचनम् । रूपाविशेषाद् घोऽपि न भवति ।

११६१ आनायो जालम् ॥५।३।१३६॥ आङ्पूर्वान्नयतेः करणे पुंनाम्नि घञ् निपात्यते जालं चेद्वाच्यं स्यात् । आनयन्ति तेन आनायो मत्स्यानाम् । आनायो मृगाणाम् ।

११६२ खनो डडरेकेकवकघं च ॥५।३।१३७॥ खनेः पुंनाम्नि करणाधा-

रयोर्ड दर इक इकवक घ घञ् च प्रत्ययाः स्युः। आखायते आखन्यते वाऽनेनास्मिन् वा आखः। आखरः। आखनिकः। आखनिकवकः। आखनः। आखानः।

११६३ इकिञितव् स्वरूपार्थे ॥५।३।१३८॥ धातोः स्वरूपेऽर्थे नामिधेये इकिञितव् इत्येते प्रत्ययाः स्युः। भञ्जिः। क्रुधिः। वेत्तिः। अर्थे–यजेरज्ञानि। भुजिः क्रियते। पचतिर्वर्तते।

११६४ दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् ॥५।३।१३९॥ कृच्छ्रं दुःखम्। अकृच्छ्रं सुखम्। कृच्छ्रार्थवृत्तेः दुरः सामर्थ्यादकृच्छ्रार्थवृत्तिभ्यां स्वीषद्भ्यां पराद् धातोर्भावाकर्मणोरर्थयोः खल् प्रत्ययः स्यात्। कृत्यादीनामपवादः। दुःखेन शय्यत इति दुःशयम्। सुखेन शय्यत इति सुशयम्, ईषच्छयं भवता। दुःखेन क्रियत इति दुष्करः। सुखेन क्रियत इति सुकरः, ईषत्करः कटो भवता। दुष्करं सुकरम् ईषत्करं भवता। दुःस्वीषत इति किम्। कृच्छ्रसाध्यः। सुखसाध्यः। कृच्छ्राकृच्छ्रार्थादिति किम्। ईषल्लभ्यं धनं कृपणात्। अल्पं लभ्यमित्यर्थः। खकार उत्तरत्र मागमार्थः। लकारः 'खलर्थाश्च' इत्यत्र विशेषणार्थः। इह स्त्रीप्रत्ययात् प्रभृति असरूपविधेरभावात् स्पर्धे अलः स्त्रीखलनाः स्त्रियास्तु खलनौ परत्वात् भवतः। तत्र चयः जयः लवः इत्यादावलोऽवकाशः कृतिः हृतिः इत्यादौ स्त्रीप्रत्ययस्य चितिः स्तुतिरित्यादौ तूभयं प्राप्नोति। अलोऽविशेषेणाभिधानात्। तत्र परत्वात् स्त्रीप्रत्ययो भवति। तथा दुर्भेदः सुभेद इत्यादौ खलोऽवकाशः अलस्तु पूर्व एव दुश्चयं सुचयं दुर्लवं सुलवमित्यादौ तूभयप्राप्तौ परत्वात् खल् भवति। तथा इध्मवश्चनः पलाशच्छेदन इत्यादौ अनस्यावकाशः अलस्तु पूर्वक एव पलाशशातनोऽविलवन इत्यादौ तूभयप्राप्तौ परत्वादनो भवति। एवं हृतिः कृतिरित्यादौ स्त्रीप्रत्ययस्यावकाशः दुर्भेदः सुभेदः इत्यादौ खलः दुर्भेदा सुभेदा इत्यादौ तूभयप्राप्तौ परत्वात् खल् भवति। तथा इध्मवश्चनः पलाशच्छेदन इत्यादावनस्यावकाशः कृतिरित्यादौ स्त्रीप्रत्ययस्य सक्तुधानी तिलपीडनीत्यादौ तूभयप्राप्तौ परत्वादनडेव। लभेः खलि 'उपसर्गात् खल्घञोश्च' इति नोऽन्तः। ईषत्प्रलम्भम्। ईषदुपलम्भम्। दुष्प्रलम्भम्। सुप्रलम्भम्।

११६५ सुदुर्भ्यः ॥४।४।१०९॥ सु दुर् इत्येताभ्यां व्यस्ताभ्यां समस्ताभ्यां चोपसर्गात् पराभ्यां परस्य लभतेः स्वरात् परः खल्घञोः परयोर्नोऽन्तः स्यात्। खल्–अतिसुलम्भम्। अतिदुर्लम्भम्। घञ्–अतिसुलम्भः। अतिदुर्लम्भः। उपसर्गादित्येव। सुलभम्। दुर्लभम्। सुदुर्लभम्। सुलाभः। दुर्लाभः। सुदुर्लाभः।

अतिसुलभमतिदुर्लभमित्यतेः पूजातिक्रमयोरनुपसर्गत्वात्। उपसर्गादेव सुदुर्भ्य इति नियमार्थं वचनम्। बहुवचनं व्यस्तसमस्तपरिग्रहार्थम् दुस्संग्रहार्थं च।

११६६ च्व्यर्थे कर्त्राप्याद् भूकृगः ॥५।३।१४०॥ कृच्छ्राकृच्छ्रार्थेभ्यो दुःस्वीषद्भ्यः पराभ्यां च्व्यर्थे वर्तमानाभ्यां कर्तृकर्मवाचिभ्यां शब्दाभ्यां पराभ्यां यथासंख्यं भूकृग्भ्यां परः खल् प्रत्ययः स्यात्। खानुबन्धबलात् कर्तृकर्मणोरेवानन्तर्यम्। दुःखेनानाढ्येनाढ्येन भूयते दुराढ्यंभवं भवता। सुखेनानाढ्येनाढ्येन भूयते स्वाढ्यंभवं भवता। ईषदाढ्यंभवं भवता। दुःखेनाढ्यः आढ्यः क्रियते दुराढ्यंकरो मैत्रो भवता। सुखेनानाढ्य आढ्यः क्रियते स्वाढ्यंकरश्चैत्रो भवता। ईषदाढ्यंकरश्चैत्रो भवता। सुखेनाकटः कटः क्रियन्ते सुकटंकराणि वीरणानि। सुकरः कटो वीरणैरित्यत्र तु करणविवक्षा। च्व्यर्थे इति किम्। दुराढ्येन भूयते। स्वाढ्येन भूयते। ईषदाढ्येन भूयते। आढ्य एव सन् कंचिद् विशेषमापद्यत इत्यर्थः। एवं दुराढ्यः क्रियते इत्यादि। अभूतप्रादुर्भावेऽपि वा प्रकृतेरविवक्षणात् च्व्यर्थो नास्ति।

११६७ शासूयुधिदृशिधृषिमृषातोऽनः ॥५।३।१४१॥ कृच्छ्राकृच्छ्रार्थदुःस्वीषत्पूर्वेभ्यः शासूप्रभृतिभ्य आकारान्तेभ्यश्च धातुभ्यो भावकर्मणोरर्थयोरनः प्रत्ययः स्यात्। दुःखेन शिष्यते दुःशासनः। सुखेन शिष्यते सुशासनः। ईषच्छासनः। एवं दुर्योधनः, दुर्दर्शनः, दुर्धर्षणः, दुर्मर्षणः। आदन्त–दुरुत्थानं भवता। सूत्थानम्। ईषदुत्थानम्। दुष्पानं पयो भवता। सुपानम्। ईषत्पानम्। आदन्तवर्जितेभ्यः केचिद् विकल्पमिच्छन्ति। तन्मते दुःशासः। दुर्योधः। दुर्दर्शः। दुर्धर्षः। दुर्मर्ष इत्याद्यपि भवति। दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः कार्यते। कथम् ईषद्दरिद्रः? विषयेऽप्याकारस्य लोपेनादन्तत्वाभावात् खलेव। खलोऽपवादो योगः।

११६८ णिन् चावश्यकाधमर्ण्ये ॥५।४।३६। अवश्यंभाव आवश्यकम्। ऋणेऽधमोऽधमर्णः तस्य भाव आधमर्ण्यम्। आवश्यके आधमर्ण्ये च गम्यमाने कर्तरि वाच्ये धातोर्णिन् कृत्याश्च स्युः। अवश्यं करोतीति कारी। हारी। यदा त्ववश्यमोऽपि प्रयोग उभाभ्यामपि द्योतनात् तदा मयूरव्यंसकादित्वात् समासः। अवश्यंकारी। अवश्यंहारी। अवश्यशब्दप्रयोगे तु अवश्यकारी। अकारान्तोऽपि ह्यनव्ययमवश्यशब्दोऽस्ति। अवश्यं गेयो गाथको गीतस्य। अवश्यं भव्यश्चैत्रः। आधमर्ण्ये–शतं दायी। सहस्रं दायी। कारी मे कटमसि। हारी मे भारमसि। गेयो

गाथानाम्। णिना बाधा माभूदिति कृत्यविधानम्। कृत्वाच्च कर्तरि णिनो विधानात् कृत्योनामपि कर्तर्येव विधानम्। भावकर्मणोस्तु सामान्येन विधानात् सिद्धा एव बाधकाभावात्।

११६९ निषेधेऽलंखल्वोः क्त्वा ॥५।४।४४॥ निषेधे वर्तमानयोरलंखलुशब्दयोरुपपदयोर्धातोः क्त्वाप्रत्ययो वा स्यात्। अलं कृत्वा। खलु कृत्वा। न कर्तव्यमित्यर्थः। पक्षे यथाप्राप्तम्। अलं वत्स रोदनेन। अलं रुदितम्। क्त्वान्तयोग एव खलुशब्दो निषेधवाचीति पक्षे खलुशब्दो नोदाह्रियते। अन्ये तु खलु कृतेन खलु भोजनेन खलु भोजनमित्यप्युदाहरन्ति। निषेध इति किम्। अलंकारः स्त्रियाः। सिद्धं खलु। अलंखल्वोरिति किम्। मा कारि भवता।

११७० परावरे ॥५।४।४५॥ परे अवरे च गम्यमाने धातोः क्त्वा वा स्यात्।

११७१ अनञः क्त्वो यप् ॥३।२।१५४॥ नञ्वर्जितादव्ययात् पूर्वपदाद् यदुत्तरपदं तदवयवस्य क्त्वाप्रत्ययस्य यबादेशः स्यात्। अतिक्रम्य नदीं पर्वतः। नद्याः परः पर्वत इत्यर्थः। बाल्यमतिक्रम्य यौवनम्। अवरे—अप्राप्य नदीं पर्वतः। नद्या अर्वाक् पर्वत इत्यर्थः। अप्राप्य यौवनम् बाल्यम्। नदीपर्वतयोर्बाल्ययौवनयोर्वा परावरत्वमात्रं प्रतीयते अस्ति प्राप्यत इति वा न द्वितीया क्रियेति। तुल्यकर्तृकक्रियान्तराभावात् 'प्राक्काले' इति न सिद्ध्यतीति वचनम्। वाधिकाराद् यथाप्राप्तं च। नद्यतिक्रमेण पर्वतः, नद्यप्राप्त्या पर्वतः। अनञ इति किम्। अकृत्वा। अहृत्वा। परमकृत्वा। अनञ इति नञ्सदृशमव्ययं गृह्यत इति इह नञोऽनव्ययाच्च न भवति। उत्तरपदस्येत्येव। अलं कृत्वा। खलु कृत्वा।

११७२ निर्मील्यादिमेङस्तुल्यकर्तृके ॥५।४।४६॥ तुल्यो धात्वर्थान्तरेण कर्ता यस्य स तुल्यकर्तृकस्तस्मिन्नर्थे वर्तमानेभ्यो निमील्यादिभ्यो मेङश्च धातोः संबन्धे सति क्त्वा वा स्यात्। निमील्यादीनां समानकालार्थो मेङस्तु परकालार्थ आरम्भः। स्वभावात् मेङ् व्यतिहार एव वर्तते। अक्षिणी निमील्य हसति। मुखं व्यादाय स्वपिति। पादौ प्रसार्य पतति। दन्तान् प्रकाश्य जल्पति। शिशुरयं मातरं भक्षयित्वोपजातः।

११७३ मेङो वा मित् ॥४।३।८८॥ मेङो यपि परे मिदादेशो वा स्यात्। अपमाय अपमित्य याचते। अपमातुं प्रतिदातुं याचत इत्यर्थः। पूर्वं ह्यसौ याचते पश्चादपमयत इत्यर्थः। याचेस्तु पूर्वकालेऽपि क्त्वा न भवति मेङः परकालभाविन्या

क्त्वया याचिमाकालस्योक्तत्वात् । पक्षे याचित्वापमयते । अपमातुं याचते । तुल्यकर्तृक इति किम् । चैत्रस्याक्षिनिमीलने मैत्रो हसति । चैत्रस्यापमाने मैत्रो याचते ।

११७४ प्राक्काले ॥५।४।४७॥ परकालेन धात्वर्थेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्तमानाद् धातोः धातोः संबन्धे क्त्वा वा स्यात् । आसित्वा भुङ्क्ते । भुक्त्वा व्रजति । भुक्त्वा पुनर्भुङ्क्ते । स्नात्वा भुक्त्वा पीत्वा व्रजति । पक्षे आस्यते भोक्तुम् इत्यपि भवति । तुल्यकर्तृक इत्येव । भुक्तवति गुरौ शिष्यो व्रजति । प्राक्काल इति किम् । भुज्यते पीयते चानेन । अथ यदनेन भुज्यते ततोऽयं पचति, यदनेनाधीयते ततोऽयं शेते इत्यत्र कथं क्त्वा न भवति ? उच्यते । यत्र यच्छब्देन सह ततः शब्दः प्रयुज्यते तत्र ततःशब्देनैव प्राक्कालताऽभिधीयते इत्युक्तार्थत्वात् क्त्वा न । यदनेन भुक्त्वा गम्यते ततोऽयमधीते इत्यत्र तु भोजनगमनयोः क्रमे क्त्वा गमनाध्ययनयोस्तु ततःशब्देन क्रमस्याभिधानात् गमेर्न भवति । प्राक्काले इत्युत्तरत्र यथासंभवमभिधानतोऽनुवर्तनीयम् ।

११७५ जनशो न्युपान्त्ये तादिः क्त्वा ॥ ५।३।२३ ॥ जकारान्ताद् धातोर्नशेश्च नकारे उपान्त्ये सति तकारादिः क्त्वा किद्वद्वा स्यात् । रक्त्वा । रङ्क्त्वा । भक्त्वा । भङ्क्त्वा । मक्त्वा । मङ्क्त्वा । 'मस्जेः सः' इति नः । नष्ट्वा । नंष्ट्वा । नशो धुटीति नः । नीति किम् । भुक्त्वा । इष्ट्वा । उपान्त्य इति किम् । निक्त्वा क्त्वेति किम् । भङ्क्ता । नंष्टा । तादिरिति किम् । विभज्य । अञ्जित्वा ।

११७६ ऋत्तृषमृषकृशवञ्चलुञ्चथफः सेट् ॥ ४।३।२४ ॥ न्युपान्त्य इति विशेषणं थफान्तानां नान्येषां संभवव्यभिचाराभावात् । न्युपान्त्ये सति एभ्यो विहितः क्त्वा सेट् किद्वद्वा स्यात् । ऋत् ऋतित्वा । अर्तित्वा । तृष्–तृषित्वा । तर्षित्वा । मृषच्–मृषित्वा । मर्षित्वा । कृश्–कृशित्वा कर्शित्वा । वञ्चू–वञ्चित्वा । वञ्चित्वा । लुञ्च्–लुञ्चित्वा लुञ्चित्वा । ग्रन्थ्–ग्रथित्वा ग्रन्थित्वा । ग्रन्थ्–ग्रथित्वा ग्रन्थित्वा । गुम्फ्–गुफित्वा । गुम्फित्वा । ऋम्फ्–ऋफित्वा, ऋम्फित्वा । न्युपान्त्य इत्येव । कुथ्–कोथित्वा । पुथ्–पोथित्वा । रिफ्–रेफित्वा । क्वेत्येव । ग्रथितः । ग्रथितवान् । सेडिति किम् । वञ्चू–वक्त्वा । मृषू–मृष्ट्वा । ऊदित्वात् क्त्वायां वेटौ विहितविशेषणाद् ऋफित्वेत्यत्र नलोपेऽपि कित्त्वाद् गुणो न । क्त्वेत्यनेन कित्त्वप्रतिषेधे प्राप्ते वचनम् ।

११७७ क्त्वा ॥४।३।२९॥ धातोः परः क्त्वा सेट् किद्वन्न स्यात् । देवित्वा ।

सेवित्वा । वर्त्तित्वा । भ्रंशित्वा । ध्वंसित्वा । व्रश्चित्वा । कथं कुटत् कुटित्वा ? ' कुटादेर्ङिद्वदणित् ' इति ङिद्वद्भावात् । सेडित्येव । कृत्वा । इष्ट्वा । शान्त्वा ।

११७८ स्कन्दस्यन्दः ॥४।३।३०॥ स्कन्दिस्यन्दिभ्यां परः क्त्वा किद्वन्न स्यात् । स्कन्त्वा । स्यन्त्वा । प्रस्कन्य । प्रस्यन्य । केचित् प्रस्कद्य प्रस्यद्येति यषः कित्त्वमिच्छन्ति । तन्मतसंग्रहार्थं क्त्वेति द्वितकारो निर्देशः । तकारादिः क्त्वेत्यर्थः । अनिडर्थं वचनम् । सेटि तु पूर्वसूत्रेण स्यन्दित्वेत्येव भवति ।

११७९ क्षुधक्लिशकुषगुधमृडमृदवदवसः ॥४।३।३१॥ नेति निवृत्तम् । एभ्यः परः क्त्वा सेट् किद्वत् स्यात् । क्षुधित्वा । क्लिशित्वा । कुषित्वा । गुधित्वा । मृडित्वा । मृदित्वा । उदित्वा । उषित्वा । क्षुधेर्नेच्छन्त्यन्ये । क्त्वेति प्रतिषेधे 'वौ व्यञ्जनादेः सन् चाग्वः' इति विकल्पे च प्राप्ते वचनम् ।

११८० हाको हिः क्ति ॥४।४।१४॥ ओहांक् इत्येतस्य तादौ किति क्त्वाप्रत्यये परे हिरादेशः स्यात् । हित्वा । ककारो हांङ्निवृत्त्यर्थः । हात्वा । क्त्वीति किम् । हीनः । तीत्येव । प्रहाय । यङ्लुपि–जहित्वा । द्वित्वे पूर्वदीर्घत्वमपीच्छन्ति एके । जाहित्वा । उभयत्रेटि आतो लुक् ।

११८१ जॄव्रश्चः क्त्वः ॥४।४।४१॥ जॄव्रश्चिभ्यां परस्य क्त्वाप्रत्ययस्यादिरिट् स्यात् । जरित्वा । जरीत्वा । व्रश्चित्वा । 'क्त्वा' इत्यनेनाकित्वान्न ग्वृत् । जॄ इति क्र्यादिकस्य ग्रहणम् । दैवादिकस्य तु सानुबन्धस्य जीर्त्वा । अस्यैवेच्छन्त्यन्ये । जॄ इत्यस्य ' ऋवर्णश्र्यूर्णुगः कितः ' प्रतिषेधे व्रश्चेरौदित्वाद् विकल्पे प्राप्ते वचनम् ।

११८२ ऊदितो वा ॥४।४।४२॥ ऊदितो धातोः परस्य क्त्वाप्रत्ययस्यादिरिड् वा स्यात् । दान्त्वा । दमित्वा । शान्त्वा । शमित्वा । तान्त्वा । तमित्वा । द्यूत्वा । देवित्वा । स्यूत्वा । सेवित्वा । यमूंसिध्यत्योरप्राप्तेऽन्येषां प्राप्ते विभाषा ।

११८३ लघोर्यपि ॥४।३।८६॥ लघोः परस्य णेर्यपि परेऽयादेशः स्यात् । प्रशम्य । प्रवेभिदय्य । लघोरिति किम् । प्रतिपाद्य गतः । वचनसामर्थ्यादेकेन वर्णेन व्यवधानमाश्रीयते न तु भूतपूर्वन्यायः अत इत्यकरणात् ।

११८४ वाप्नोः ॥४।३।८७॥ आप्नोतेः परस्य णेर्यपि परेऽयादेशो वा स्यात् । प्रापय्य गतः । प्राप्य गतः । [१]नुनिर्देशादिङादेशस्य न । अध्याप्य गतः । आप्लृंण् लम्भने इत्यस्यापीच्छन्त्यन्ये ।

११८५ क्षेः क्षी ॥४।३।८९॥ क्षेर्यपि परे क्षी आदेशः स्यात् । प्रक्षीय ।

उपक्षीय । निरनुबन्धनिर्देशात् क्षिपश् हिंसायामित्येतस्य न भवति । प्रक्षित्य । अस्यापि ग्रहणमित्यन्ये ।

११८६ ज्यश्च यपि ॥४।१।७६॥ ज्या इत्येतस्य वेगश्च यपि परे क्त्वन्न स्यात् । प्रज्याय । उपज्याय । प्रवाय । उपवाय ।

११८७ व्यः ॥४।१।७७॥ व्येगो यपि परे क्त्वन्न स्यात् । प्रव्याय । उपव्याय । योगविभाग उत्तरार्थः ।

११८८ संपरेर्वा ॥४।१।७८॥ संपरिभ्यां परस्य व्येगो यपि परे क्त्वद्वा न स्यात् । संव्याय । संवीय । परिव्याय । परिवीय । निरपेक्षत्वेनान्तरङ्गत्वात् प्रागेव क्त्वतो दीर्घत्वं न तु तोऽन्तः । समो नेच्छन्त्येके । तेन नित्यं संव्याय ।

११८९ क्रमः क्ति च वा ॥४।१।१०६॥ क्रमः परस्य धुडादौ क्त्वाप्रत्यये वा दीर्घः स्यात् । क्रान्त्वा । क्रन्त्वा । धुटि इत्येव । क्रमित्वा । ऊदितो वेति वेट् । प्रक्रम्येत्यत्र क्त्वन्तरङ्गमपि दीर्घत्वं बाधित्वा प्रागेव यप् । एतच्च 'यपि चादौ जग्ध्' इत्यत्र ज्ञापितमेव ।

११९० यपि ॥४।२।५६॥ एषां (यमिरमिनमिगमिहनिमनीनां वनतेस्तनादीनां च) धातूनामन्तस्य यपि परे लुक् स्यात् । 'वामः' इति वचनान्नान्तानामेवायं विधिः । हन्–प्रहत्य । मन्–प्रमत्य । वनति–प्रवत्य । तनादि–प्रतत्य । प्रसत्य । प्रक्षत्य । यपीति किम् । हन्यते । वन्यते । तन्यते ।

११९१ वामः ॥४।२।५७॥ एषां मकारान्तानां यपि प्रत्ययेऽन्तस्य लुग्वा स्यात् । प्रयत्य । प्रयम्य । विरत्य । विरम्य । प्रणत्य । प्रणम्य । आगत्य । आगम्य । एषामित्येव । उपशम्य ।

११९२ ख्णम् चाभीक्ष्ण्ये ॥४।२।४८॥ आभीक्ष्ण्यविशिष्टेन परकालेन तुल्यकर्तृके प्राकालेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धे ख्णम् चकारात् क्त्वा च स्यात् । भोजं भोजं व्रजति । भुक्त्वा भुक्त्वा व्रजति । पायं पायं गच्छति । पीत्वा पीत्वा गच्छति । अग्रे भोजं भोजं व्रजति । अग्रे भुक्त्वा भुक्त्वा व्रजति । अथ क्त्वाख्णमोर्हिंस्वादिवत् प्रकृत्यर्थोपाधिद्योतने सामर्थ्यं नास्तीति आभीक्ष्ण्याभिव्यक्तये द्विर्वचनं भवति । इह कस्मात् ख्णम् न–यदयं पुनः पुनर्भुक्त्वा व्रजति अधीते एव ततः परम् । आभीक्ष्ण्यस्य स्वशब्देनैवोक्तत्वात् । क्त्वापि तर्हि न प्राप्नोति । मा भूदाभीक्ष्ण्ये प्राकाल्ये भविष्यति । वाधिकारेणैव पक्षे क्त्वाप्रत्ययस्य सिद्धौ

चकारेण तस्य विधानं वर्तमानादिप्रत्ययान्तरनिषेधार्थम् । ननु क्त्वादिभिर्भावे विधीयमानैः कर्तुरनभिहितत्वादोदनं पक्त्वा भुङ्क्ते देवदत्त इत्यादिषु कर्तरि तृतीया प्राप्नोति । नैवम् । भुजिप्रत्ययेनैव कर्तुरभिहितत्वान्न भवति । प्रधानशक्त्यभिधाने हि गुणशक्तिरभिहितवत् प्रकाशते इति । खित्त्वं चौरंकारमाक्रोशति स्वादुंकारं भुङ्क्ते इत्युत्तरार्थम् ।

११९३ वापगुरो णमि ॥४।२।५॥ अपपूर्वस्य गुरैति इत्यस्य धातोः संध्यक्षरस्य स्थाने णमि प्रत्यये परे आकारादेशो वा स्यात् । अपगारमपगारम् । अपगोरमपगोरम् । आभीक्ष्ण्ये ख्णम् द्वित्वं च । अस्यपगारं युध्यन्ते । अस्यपगोरं युध्यन्ते । ' द्वितीयया ' इति णम् ।

११९४ पूर्वाग्रे प्रथमे ॥५।४।४९॥ पूर्व अग्रे प्रथम इत्येतेषूपपदेषु परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धे ख्णम् वा स्यात् । अनाभीक्ष्ण्यार्थं वचनम् । पूर्वं भोजं व्रजति । पूर्वं भुक्त्वा व्रजति । अग्रे भोजं व्रजति । अग्रे भुक्त्वा व्रजति । प्रथमं भोजं व्रजति । प्रथमं भुक्त्वा व्रजति । वर्तमानादयोऽपि–पूर्वं भुज्यते ततो व्रजति, अग्रे भुज्यते ततो व्रजति, प्रथमं भुज्यते ततो व्रजति । पूर्वादयश्चात्र व्यापारान्तरापेक्षे प्राक्काल्ये व्रज्यापेक्षे तु क्त्वाख्णमाविति नोक्तार्थता । ततश्चायमर्थोऽन्यभोक्तृभुजिक्रियाभ्यः स्वक्रियान्तरेभ्यो वा पूर्वं भोजनं कृत्वा व्रजतीत्यर्थः । पूर्वप्रथमसाहचर्यात् अग्रेशब्दः कालवाची ।

११९५ अन्यथैवंकथमित्थमः कृगोऽनर्थकात् ॥ ५।४।५० ॥ एभ्यः परात् तुल्यकर्तृकेऽर्थे वर्तमानात् करोतेरनर्थकात् धातोः संबन्धे ख्णम् वा स्यात् । अन्यथाकारं भुङ्क्ते । एवंकारं भुङ्क्ते । कथंकारम् इत्थंकारं भुङ्क्ते । पक्षे क्त्वैव । अन्यथा कृत्वा । एवं कृत्वा । कथं कृत्वा । इत्थं कृत्वा भुङ्क्ते । एवमुत्तरत्रापि । आनर्थक्यं करोतेरन्यथादिभ्यः पृथगर्थाभावात् । यावदुक्तं भवति अन्यथा भुङ्क्ते तावदुक्तं भवति अन्यथाकारं भुङ्क्ते इति । अनर्थकादिति किम् । अन्यथा कृत्वा शिरो भुङ्क्ते । अत्रान्यथाशब्दः शिरःप्रकारे करोतेश्च शिरः कर्म तन्न करोतिना विना गम्यत इति ।

११९६ यथातथादीर्ष्योत्तरे ॥ ५।४।५१ ॥ यथातथाशब्दाभ्यां परात् तुल्यकर्तृकेऽर्थे वर्तमानादनर्थकात् करोतेर्धातोः संबन्धे सति ख्णम् वा स्यात् ईर्ष्योत्तरे–ईर्ष्यश्चेत् पृच्छते उत्तरं ददाति । कथं भवान् भोक्ष्यत इति पृष्टोऽसूयया तं

प्रत्याह । यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किं तवानेन । किं ते मया यथाहं भोक्ष्ये तथाहं भोक्ष्ये इत्यर्थः । इष्येोत्तर इति किम् । यथा कृत्वाहं भोक्ष्ये तथा द्रक्ष्यसि । अनर्थकादित्येव । यथा कृत्वाहं शिरो भोक्ष्ये तथा कृत्वाहं शिरो भोक्ष्ये किं तवानेन ।

११९७ **शापे व्याप्यात्** ॥५।४।५२॥ अनर्थकादिति निवृत्तम् । व्याप्यात् कर्मणः परात् तुल्यकर्तृकेऽर्थे वर्तमानात् करोतेर्धातोः संबन्धे खणम् वा स्यात् शापे-आक्रोशे गम्यमाने । चौरंकारमाक्रोशति । करोतिरिहोच्चारणे । चौरं कृत्वा चौरशब्दमुच्चार्याक्रोशति । चौरोऽसीत्याक्रोशति इत्यर्थः । एवं दस्युंकारमाक्रोशति । व्याधंकारमाक्रोशति । शाप इति किम् । चौरं कृत्वा हेतुभिः कथयति ।

११९८ **स्वाद्वर्थाददीर्घात्** ॥५।४।५३॥ स्वादोरर्थे वर्तमानाच्छब्दाददीर्घान्ताद् व्याप्यात् परस्मात् तुल्यकर्तृके वर्तमानात् करोतेर्धातोः संबन्धे खणम् वा स्यात् । स्वादुंकारं भुङ्क्ते । संपन्नंकारं भुङ्क्ते । मिष्टंकारं भुङ्क्ते । लवणंकारं भुङ्क्ते । पक्षे स्वादु कृत्वा मिष्टं कृत्वा लवणं कृत्वा भुङ्क्ते । अदीर्घादिति किम् । स्वाद्वीं कृत्वा स्वादुकृत्य संपन्नां कृत्वा यवागूं भुङ्क्ते । स्वादुंकारं यवागूं भुङ्क्ते । अस्वादुं स्वादुं कृत्वा स्वादुंकारं भुङ्क्ते इत्यत्र तु ङीच्व्योर्विकल्पितत्वात् न दीर्घ इति भवति । संपन्नंकारं यवागूं भुङ्क्ते इति तु सामान्येन पदं निष्पाद्य पश्चाद् यवाग्वा संबन्धे भविष्यति ।

११९९ **विदृदृग्भ्यःकात्स्न्र्ये णम्** ॥५।४।५४॥ कात्स्न्र्यविशिष्टाद् व्याप्यात् परेभ्यस्तुल्यकर्तृके माक्काले‌ऽर्थे वर्तमानेभ्यो विदिभ्यो दृशेश्च धातोः संबन्धे णम् वा स्यात् । विद्यतेरकर्मकत्वात् तद्वर्जास्त्रयो विदयो गृह्यन्ते । अतिथिवेदं भोजयति । यं यमतिथिं जानाति लभते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः । कन्यादर्शं वरयति । यां यां कन्यां पश्यति तां तां सर्वां वरयति । बहुवचनात् त्रयाणामपि विदीनां ग्रहणम् । अन्यथा निरनुबन्धग्रहणे न सानुबन्धकस्येत्युपतिष्ठेत । कात्स्न्र्य इति किम् । अतिथिं विदित्वा भोजयति । कन्यां दृष्ट्वा वरयति ।

१२०० **यावतो विन्दजीवः** ॥५।४।५५॥ कात्स्न्र्यविशिष्टाद् व्याप्यात् यावच्छब्दात् पराभ्यां विन्दजीविभ्यामेककर्तृकेऽर्थे वर्तमानाभ्यां धातोः संबन्धे णम् वा स्यात् । विन्देति शनिर्देशाल्लाभार्थस्य ग्रहणम् । यावद्वेदं भुङ्क्ते । यावल्लभते तावद् भुङ्क्ते इत्यर्थः । यावज्जीवमधीते । यावज्जीवति तावदधीते

इत्यर्थः । जीवेः पूर्वकालासंभवात् अपूर्वकाल एव विधिः ।

१२०१ **चर्मोदरात् पूरेः** ॥५।४।५६॥ व्याप्याभ्यां चर्मोदरशब्दाभ्यां परादेककर्तृकेऽर्थे वर्तमानात् पूरयतेर्धातोः संबन्धे णम् वा स्यात् । चर्मपूरमास्ते । चर्म पूरयित्वा आस्ते इत्यर्थः । उदरपूरं शेते । उदरं पूरयित्वा शेते इत्यर्थः ।

१२०२ **वृष्टिमान ऊलुक् चास्य वा** ॥५।४।५७॥ व्याप्यात् परात् पूरयतेर्धातोः संबन्धे णम् वा स्यात् अस्य च पूरयतेरूकारस्य लुग्वा, समुदायेन चेद् वृष्टिमानं वृष्टीयत्ता गम्यते । गोष्पदप्रं वृष्टो देवः । गोष्पदपूरं वृष्टो देवः । सीताप्रं सीतापूरं वृष्टो मेघः । यावता गोष्पदादिपूरणा भवति तावद् वृष्ट इत्यर्थः । अस्येतिग्रहणादुपपदस्य न भवति । मूषकबिलपूरं वृष्टो मेघः । गोष्पदप्रमिति प्रातेर्धातोः 'आतो डोऽद्वामः' इति डेन गोष्पदपूरमित्यणा च क्रियाविशेषणत्वे सिद्ध्यति । एवं सर्वे णमन्ताः प्रयोगाः । तत्र 'णम्विधानमव्ययत्वेन तरामाद्यर्थमनुस्वारश्रवणार्थं च । तेन गोष्पदप्रंतरां गोष्पदप्रंतमां गोष्पदप्रंरूपं गोष्पदप्रंकल्पं देश्यं देशीयं गोष्पदपूरंतरां तमां रूपं कल्पं देश्यं देशीयम् इत्यादि सिद्धं भवति । अन्यथा हि गोष्पदप्रतरं गोष्पदपूरतरमित्याद्येव स्यात् । गोष्पदप्रेण गोष्पदप्रीभवति गोष्पदपूरेण गोष्पदपूरीभवतीत्यादिप्रयोगास्तु डधञादिप्रत्ययान्ता द्रष्टव्याः ।

१२०३ **चेलार्थात् क्नोपेः** ॥५।४।५८॥ चेलार्थात् व्याप्यात् परात् क्नोपयतेस्तुल्यकर्तृकेऽर्थे वर्तमानात् वृष्टिमाने गम्यमाने धातोः संबन्धे णम् वा स्यात् । चेलक्नोपं वृष्टो मेघः । वस्त्रक्नोपम् । वसनक्नोपम् । यावता चेलं क्नूयते आर्द्रीभवति तावद् वृष्ट इत्यर्थः । अर्थग्रहणादत्र स्वरूपपर्यायविशेषाणां त्रयाणामपि ग्रहणम् । तेन पटिकाक्नोपं कम्बलक्नोपमित्यादौ चेलविशेषादपि भवति । अयमप्यप्राक्काले विधिः ।

१२०४ **गात्रपुरुषात् स्नः** ॥५।४।५९॥ गात्रपुरुषाभ्यां व्याप्याभ्यां परादन्तर्भूतण्यर्थात् स्नातेस्तुल्यकर्तृकेऽर्थे वर्तमानात् वृष्टिमाने गम्यमाने धातोः संबन्धे णम् वा स्यात् । गात्रस्नायं वृष्टो मेघः । पुरुषस्नायं वृष्टो मेघः । यावता गात्रं पुरुषश्च स्नाप्यते तावद् वृष्ट इत्यर्थः । इदं केचिदेवेच्छन्ति ।

१२०५ **शुष्कचूर्णरूक्षात् पिषस्तस्यैव** ॥५।४।६०॥ शुष्कचूर्णरूक्षेभ्यो व्याप्येभ्यः परात् पिषेर्णम् वा स्यात् तस्यैव धातोः संबन्धे सति । शुष्कपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः । एवं चूर्णपेषम् । रूक्षपेषम् । शुष्कपेषं पिष्टः । शुष्क-

पेषं पेष्टव्यः । शुष्कपेषं पिष्यते । क्तादिभिरुक्तेऽपि व्याप्ये तदुपपदतास्त्येव । प्रयोगानुप्रयोगक्रिययोरैक्यात् तुल्यकर्तृकत्वम् प्राक्कालत्वं च नास्तीत्यत्र प्रकरणे पक्षे क्त्वा न भवति । घञादय एव तु भवन्ति । शुष्कस्य पेषं पिनष्टि । सामान्यविशेषभावविवक्षया च धातुसंबन्धः । यदाहुः—सामान्यपुषेरवयवपुषिः कर्म भवतीति । कश्चित्तु सामान्यविशेषविवक्षयात्रापि क्रियाभेदोऽस्तीति तुल्यकर्तृकत्वं प्राक्कालत्वं च तेन क्त्वापि निमूलं कषित्वा कषतीत्यादि मन्यते ।

१२०६ **कृञ्ग्रहोऽकृतजीवात्** ॥५।४।६१॥ अकृत जीव इत्येताभ्यां व्याप्याभ्यां पराभ्यां यथासंख्यं करोतिगृह्णातिभ्यां तस्यैव धातोः संबन्धे सति णम् वा स्यात् । अकृतकारं करोति, अकृतं करोतीत्यर्थः। जीवग्राहं गृह्णाति, जीवन्तं गृह्णातीत्यर्थः ।

१२०७ **निमूलात् कषः** ॥५।४।६२॥ निमूलाद् व्याप्यात् परात् कषस्तस्यैव धातोः संबन्धे सति णम् वा स्यात् । निमूलमित्यत्रात्यर्थेऽव्ययीभावः । निर्गतानि मूलान्यस्येति बहुव्रीहिर्वा । निमूलकाषं कषति । निमूलं कषतीत्यर्थः। पक्षे निमूलस्य काषं कषति ।

१२०८ **हनश्च समूलात्** ॥५।४।६३॥ समूलशब्दाद् व्याप्यात् परादहन्तेः कषेश्च तस्यैव धातोः संबन्धे सति णम् वा स्यात् । समूलमिति साकल्येऽव्ययीभावो बहुव्रीहिर्वा । समूलघातं हन्ति—समूलं हन्तीत्यर्थः । समूलकाषं कषति—समूलं कषतीत्यर्थः ।

१२०९ **करणेभ्यः** ॥ ५।४।६४ ॥ करणात् कारकात् पराद् हन्तेस्तस्यैव धातोः संबन्धे सति णम् वा स्यात् । पाणिघातं कुड्यमाहन्ति । पादघातं शिलां हन्ति । पाणिना पादेन वा हन्तीत्यर्थः । बहुवचनं व्याप्त्यर्थम् । तेन करणपूर्वाद्धिंसार्थादपि हन्तेः अनेनैव णम् । अस्युपघातमरीन् हन्ति । शरोपघातं मृगान् हन्ति । तथा च सति नित्यसमासस्तस्यैव धातोरनुप्रयोगश्च सिद्ध्यति ।

१२१० **स्वस्नेहनार्थात् पुषपिषः** ॥५।४।६५॥ आत्मा आत्मीयं ज्ञातिर्धनं च स्वम् । स्निह्यते सिच्यते येनोदकादिना तत् स्नेहनम् । स्वार्थात् स्नेहनार्थाच्च करणवाचिनः पराद् यथासंख्यं पुषः पिषश्च तस्यैव धातोः संबन्धे सति णम् वा स्यात् । स्वपोषं पुष्णाति पुष्यति पोषति वा । एवमात्मपोषं गोपोषं महिषीपोषं पितृपोषं मातृपोषं धनपोषं रैपोषम् । स्वादिभिः पुष्णातीत्यादयर्थः । स्नेहनार्थात्

उदपेषं पिनष्टि । एवं घृतपेषम् तैलपेषं क्षीरपेषम् । उदकादिना पिनष्टीत्यर्थः ।

१२११ हस्तार्थाद् ग्रहवर्तिवृतः ॥५।४।६६॥ हस्तार्थात् करणवाचिनः शब्दात् परेभ्यो ग्रहवर्तिवृद्भ्यस्तस्यैव धातोः संबन्धे सति णम् वा स्यात् । हस्तग्राहं गृह्णाति । एवं करग्राहम् । पाणिग्राहम् । हस्तेन गृह्णातीत्यर्थः । वर्तिवृत इति वर्ततेर्ण्यन्तस्याण्यन्तस्य च ग्रहणम् । हस्तवर्तं वर्तयति । करवर्तम् । पाणिवर्तम् । हस्तेन वर्तयतीत्यर्थः । हस्तवर्तं वर्तते । करवर्तम् । पाणिवर्तम् । हस्तेन वर्तत इत्यर्थः । अण्यन्तान्नेच्छन्त्येके ।

१२१२ बन्धेर्नाम्नि ॥ ५।४।६७ ॥ बन्धेरिति प्रकृतिर्नामविशेषणं च । बन्धेर्बन्ध्यर्थस्य बन्धनस्य यन्नाम संज्ञा तद्विषयात् करणवाचिनः पराद् बन्धेर्धातोस्तस्यैव धातोः संबन्धे सति णम् वा स्यात् । क्रौञ्चबन्धं बद्धः । मयूरिकाबन्धं बद्धः । मर्कटबन्धं बद्धः । गोबन्धं बद्धः । महिषीबन्धं बद्धः । अट्टालिकाबन्धं बद्धः । चण्डालिकाबन्धं बद्धः । क्रौञ्चादीनि बन्धनामधेयानि । क्रौञ्चाद्याकारो बन्धः क्रौञ्चादिरित्युच्यते । तेन बन्धेन बद्ध इत्यर्थः । केचित् उत्तरपदप्रकृतिप्रत्ययसमुदायस्य क्रौञ्चबन्धमित्यादेः संज्ञात्वं मन्यन्ते, व्युत्पत्तिं च क्रौञ्चेन क्रौञ्चाय क्रौञ्चाद् वा बन्धनमित्यादि यथाकथंचित् कुर्वन्ति तन्मतसंग्रहार्थं नाम्नीति प्रत्ययान्तोपाधित्वेन व्याख्येयम् ।

१२१३ आधारात् ॥५।४।६८॥ आधारवाचिनः पराद् बन्धेस्तस्यैव धातोः संबन्धे णम् वा स्यात् । चक्रबन्धं बद्धः । चारकबन्धं बद्धः । कूटबन्धं बद्धः । गुप्तिबन्धं बद्धः । चक्रादिषु बद्ध इत्यर्थः । ग्रामेबद्धः, हस्तेबद्धः इति बहुलाधिकारान्न भवति ।

१२१४ कर्तुर्जीवपुरुषान्नशिवहः ॥५।४।६९॥ कर्तृवाचिभ्यां जीवपुरुषाभ्यां पराभ्यां यथासंख्यं नशिवहिभ्यां तस्यैव धातोः संबन्धे सति णम् वा स्यात् । जीवनाशं नश्यति । जीवन्नश्यतीत्यर्थः । पुरुषवाहं वहति–पुरुषः प्रेष्यो भूत्वा वहतीत्यर्थः। कर्तुरिति किम् । जीवेन नश्यति । पुरुषं वहति ।

१२१५ ऊर्ध्वात्पूःशुषः ॥५।४।७०॥ कर्तृवाचिन ऊर्ध्वशब्दात् परात् पूरः शुषश्च तस्यैव धातोः संबन्धे सति णम् वा स्यात् ॥ पूरीत्यनिर्देशात् पूर्दैवादिको न चौरादिकः । ऊर्ध्वपूरं पूर्यते–ऊर्ध्वः पूर्यत इत्यर्थः । ऊर्ध्वशोषं शुष्यति । ऊर्ध्वः शुष्यतीत्यर्थः ।

१२१६ व्याप्याच्चेवात् ॥७।४।७१॥ व्याप्यात् कर्मणश्चकारात् कर्तुश्चेवात् इवार्थात् उपमानार्थात् पराद् धातोस्तस्यैव धातोः संबन्धे सति णम् वा स्यात्। सुवर्णनिधायं निहितः सुवर्णमिव निहित इत्यर्थः। एवं रत्ननिधायं घृतनिधायम्। शाकक्लेशं क्लिष्टः। ओदनपाचं पक्वः। कर्तुः—काकनाशं नष्टः। काक इव नष्ट इत्यर्थः। एवं जमालिनाशं नष्टः। अभ्रविलायं विलीनः। अभ्रमिव विलीन इत्यर्थः।

१२१७ उपात् किरो लवने ॥७।४।७२॥ उपपूर्वात् किरतेर्लवनेऽर्थे वर्तमानस्यान्यस्य धातोः संबन्धे सति णम् वा स्यात्। लवन इति वचनात् तस्यैवेति निवृत्तम्। उपस्कारं मद्रका लुनन्ति। विक्षिपन्तो लुनन्तीत्यर्थः। लवन इति किम्। उपकीर्य गच्छति।

१२१८ दंशेस्तृतीयया ॥७।४।७३॥ तृतीयान्तेन योगे उपपूर्वात् तुल्यकर्तृकेऽर्थे वर्तमानाद्दंशेरन्यस्य धातोः संबन्धे सति णम् वा स्यात्। मूलकेनोपदंशं भुङ्क्ते। मूलकोपदंशं भुङ्क्ते। आर्द्रकेणोपदंशं भुङ्क्ते। आर्द्रकोपदंशं भुङ्क्ते। पक्षे मूलकेनोपदश्य भुङ्क्ते। आर्द्रकेणोपदश्य भुङ्क्ते। मूलकाद्युपदंशेः कर्मापि प्रधानस्य भुजेः करणमिति तृतीयैव भवति। प्रधानक्रियोपयुक्ते हि कारके गुणक्रिया न स्वानुरूपां विभक्तिमुत्पादयितुमलमप्रधानत्वादेव यथेष्यते ग्रामो गन्तुं पक्त्वा भुज्यते ओदन इति। यदा त्ववयवक्रियापेक्षया पूर्वकालविवक्षायां क्त्वा क्रियते तदा क्रियाभेदात् संबन्धभेदे द्वितीयापि भवति—मूलकमुपदश्य भुङ्क्ते।

१२१९ हिंसार्थादेकाप्यात् ॥ ७।४।७४ ॥ हिंसा प्राण्युपघातस्तदर्थाद् धातोः संबध्यमानेन धातुना सहैकाप्यात् एककर्मकात् तृतीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्तमानाद् णम् वा स्यात्। दण्डेनोपघातं गाः सादयति। दण्डोघातं गाः सादयति। खड्गेन प्रहारं खड्गप्रहारं शत्रून् विजयते। दण्डेनाताडं दण्डाताडं गाः कालयति। पक्षे दण्डेनोपहत्येत्यादि। हिंसार्थादिति किम्। चन्दनेनानुलिप्य जिनं पूजयन्ति। एकाप्यादिति किम्। दण्डेनाहत्य चौरं गोपालको गाः खेटयति।

१२२० उपपीडरुधकर्षस्तत्सप्तम्या ॥७।४।७५॥ तया तृतीयया युक्ता सप्तमी तत्सप्तमी, तदन्तेन योगे उपपूर्वेभ्यः पीडरुधकर्षतिभ्यस्तुल्यकर्तृकेऽर्थे वर्तमानेभ्यो धातोः संबन्धे णम् वा स्यात्। पार्श्वाभ्यामुपपीडं शेते पार्श्वोपपीडं शेते। पार्श्वयोरुपपीडं शेते पार्श्वोपपीडं शेते। व्रजेनोपरोधं व्रजोपरोधं गाः सादयति। व्रजे उपरोधं व्रजोपरोधं गाः स्थापयति। पाणिनोपकर्षं पाण्युपकर्षं धानाः पिनष्टि। पाणावुप-

कर्षं पाण्युपकर्षं धाना गृह्णाति । कर्ष इति शप्निर्देशाद् भौवादिकस्य कर्षन्ति शाखां ग्राममिति द्विकर्मकस्याकर्षणार्थस्य ग्रहणं न तु तौदादिकस्य पञ्चभिर्हलैः कृषतीति विलेखनार्थस्य । तेन भूमावुपकृष्य तिलान् वपति हलेनोपकृष्य वपतीत्यत्र न भवति । अन्ये त्वनयोरर्थभेदमप्रतिपद्यमानास्तौदादिकादपीच्छन्ति । उपेति किम् । पार्श्वेन निपीड्य तिष्ठति । अन्ये तूपपूर्वादेव पीडेरिच्छन्ति, रुधकर्षाभ्यां तु कामचारेण । तेन व्रजरोधं गाः स्थापयति । हस्तरोधं दधद्धनुः । व्रजेन रोधम् । हस्तेन रोधम् । उपपूर्वादपि । व्रजोपरोधं गाः स्थापयति । अन्योपसर्गपूर्वादपि । व्रजानुरोधं गाः स्थापयति । एवं पाणिकर्षं धाना गृह्णाति । पाणौ कर्षं पाणिना कर्षमित्याद्यपि भवति ।

१२२१ प्रमाणसमासत्त्योः ॥५।४।७६॥ आयाममानं प्रमाणं समासत्तिः संरम्भपूर्वकः संनिकर्षस्तयोर्गम्यमानयोस्तृतीयान्तेन सप्तम्यन्तेन च योगे धातोस्तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोः संबन्धे सति णम् वा स्यात् । द्यङ्गुलेनोत्कर्षं द्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति । द्यङ्गुले उत्कर्षं द्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति । समासत्तौ–केशैर्ग्राहं केशग्राहं युद्धयन्ते । केशेषु ग्राहं केशग्राहं युद्धयन्ते । एवं हस्तग्राहम् । अस्यपनोदं युद्धयन्ते । युद्धसंरम्भादत्यन्तं संनिकृष्य युद्धयन्त इत्यर्थः । पक्षे द्यङ्गुलेनोत्कृष्य द्यङ्गुले उत्कृष्य गण्डिकाश्छिनत्ति । केशैर्गृहीत्वा केशेषु गृहीत्वा युद्धयन्ते ।

१२२२ पञ्चम्या त्वरायाम् ॥५।४।७७॥ त्वरा परीप्सा औत्सुक्यमिति यावत् । तस्यां गम्यमानायां पञ्चम्यन्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोः संबन्धे सति णम् वा स्यात् । शय्याया उत्थायं शय्योत्थायं धावति । एवं नाम त्वरते यदावश्यकादिकमपि नापेक्षते । स्तनरन्ध्रादपकर्षं स्तनरन्ध्रापकर्षं पयः पिबति । एवं नाम त्वरते यत्पात्रे दोहमप्यप्रतीक्ष्य मुख एव पयः पिबति इत्यर्थः । पक्षे शय्याया उत्थाय धावति । त्वरायामिति किम् । आसनादुत्थाय गच्छति ।

१२२३ द्वितीयया ॥५।४।७८॥ द्वितीयान्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे वर्तमानात् त्वरायां गम्यमानायां धातोः संबन्धे णम् वा स्यात् । लोष्ठान् ग्राहं लोष्ठग्राहं युद्धयन्ते । यष्टीर्ग्राहं यष्टिग्राहं युद्धयन्ते । दण्डमुद्यामं दण्डोद्यामं धावति । एवं नाम योद्धुं त्वरन्ते यदायुधग्रहणमपि नादियन्ते यत्किंचिदासन्नं तद् गृह्णन्ति । पक्षे लोष्ठान् यष्टीर्गृहीत्वा युद्धयन्ते । त्वरायामित्येव । खड्गं गृहीत्वा युद्धयन्ते । योगविभागः उत्तरार्थः ।

१२२४ **स्वाङ्गेनाध्रुवेण** ॥५।४।७९॥ अविकारोऽद्रवं मूर्तमित्यादिलक्षणं स्वाङ्गम् । यस्मिन्नङ्गे छिन्ने भिन्ने वा प्राणी न म्रियते तदध्रुवम् । अध्रुवेण स्वाङ्गेन द्वितीयान्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोः संबन्धे णम् वा स्यात् । भ्रुवौ विक्षेपं भ्रूविक्षेपं जल्पति । अक्षिणी निकाणमक्षिनिकाणं हसति । केशान् परिधायं केशपरिधायं नृत्यति । प्रतिमायाः पादावनुलेपं पादानुलेपं प्रणमति । पक्षे भ्रुवौ विक्षिप्य जल्पति इत्यादि । स्वाङ्गेति किम् । कफमुन्मूल्य जल्पति । अध्रुवेणेति किम् । शिर उत्क्षिप्य कथयति ।

१२२५ **परिक्लेश्येन** ॥५।४।८०॥ परि समंतात् क्लिश्यमानं पीड्यमानं परिक्लेश्यम् । तेन स्वाङ्गेन द्वितीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धे णम् वा स्यात् । ध्रुवार्थोऽयमारंभः । उरांसि प्रतिपेषमुरःप्रतिपेषं युद्धयन्ते । शिरांसि च्छेदं शिरच्छेदं युध्यन्ते । उरांसि परितः पीडयन्तः शिरांसि छिन्दन्तो युद्धयन्ते इत्यर्थः । पक्षे उरांसि प्रतिपिष्य शिरांसि छित्त्वा ।

१२२६ **विशपतपदस्कन्दो वीप्साभीक्ष्ण्ये** ॥५।४।८१॥ श्रुतत्वात् विश्यादिक्रियाभिः साकल्येनोपपदार्थानां व्याप्तुमिच्छा वीप्सा । प्रकृत्यर्थस्य पौनःपुन्येनासेवनमाभीक्ष्ण्यम् । यदाहुः—सुप्सु वीप्सा तिङ्सु अव्ययकृत्सु चाभीक्ष्ण्यमिति । द्वितीयान्तेन योगे विशादिभिस्तुल्यकर्तृकेऽर्थे वर्तमानेभ्यो वीप्सायामाभीक्ष्ण्ये च गम्यमाने धातोः संबन्धे सति णम् वा स्यात् । गेहं गेहमनुप्रवेशं गेहानुप्रवेशमास्ते । गेहमनुप्रवेशमनुप्रवेशं गेहानुप्रवेशमास्ते । गेहंगेहमनुप्रपातं गेहानुप्रपातमास्ते । गेहमनुप्रपातमनुप्रपातं गेहानुप्रपातमास्ते । गेहंगेहमनुप्रपादं गेहानुप्रपादमास्ते । गेहमनुप्रपादमनुप्रपादं गेहानुप्रपादमास्ते । गेहं गेहमवस्कन्दं गेहावस्कन्दमास्ते । गेहमवस्कन्दमवस्कन्दं गेहावस्कन्दमास्ते । पक्षे गेहं गेहमनुप्रविश्यास्ते । गेहमनुप्रविश्यानुप्रविश्यास्ते इत्यादि । वीप्सायामुपपदस्याभीक्ष्ण्ये तु धातोर्द्वित्वम् । गेहानुप्रवेशमास्ते इत्यादौ तु वीप्साभीक्ष्ण्ये शब्दशक्तिस्वाभाव्यात् समासेनैवोक्ते इति द्विर्वचनं न भवति । आभीक्ष्ण्ये णम् सिद्ध एव । विकल्पेनोपपदसमासार्थं वचनम् । तेन हि समासाभावः स्यात् । वीप्साभीक्ष्ण्य इति किम् । गेहमनुप्रविश्यास्ते ।

१२२७ **कालेन तृष्यस्वः क्रियान्तरे** ॥५।४।८२॥ क्रियामन्तरयतीति क्रियान्तरः क्रियाव्यवधायकः । तस्मिन्नर्थे वर्तमानाभ्यां तृष्यस्भ्यां धातुभ्यां

द्वितीयान्तेन कालवाचिना योगे धातोः संबन्धे णम् वा स्यात् । अहं तर्षं अहतर्षं गावः पिबन्ति । अहमत्यासं अहात्यासं गावः पिबन्ति । तृष्यस्व इति किम् । अहमुपोष्य भुङ्क्ते । क्रियान्तर इति किम् । अहरत्यस्येषून् गतः । इहात्यासेनाहरिषवश्च व्याप्यन्ते न तु गतिक्रिया व्यवधीयते ।

१२२८ **नाम्ना ग्रहादिशः** ॥५।४।८३॥ नामशब्देन द्वितीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्तमानाद् ग्रहेरादिशश्च धातोः संबन्धे णम् वा स्यात् । नामानि ग्राहं नामग्राहमाहयति । नाम्नी देवदत्तो ग्राहम् नामग्राहं देवदत्त आहयति । नामान्यादेशं नामादेशं ददाति । पक्षे नाम गृहीत्वा दत्ते । नामादिश्य दत्ते ।

१२२९ **कृगोऽव्ययेनिष्टोक्तौ क्त्वाणमौ** ॥५।४।८४॥ अव्ययेन योगे करोतेस्तुल्यकर्तृकेऽर्थे वर्तमानादनिष्टायामुक्तौ गम्यमानायां धातोः संबन्धे क्त्वाणमौ स्याताम् । ब्राह्मण पुत्रस्ते जातः किंतर्हि वृषल नीचैःकृत्वा नीचैःकृत्य कथयसि । किंतर्हि नीचैर्वृषल कारं वृषल नीचैःकारं कथयसि । उच्चैर्नाम प्रियमाख्येयम् । ब्राह्मण कन्या ते गर्भिणी, किं तर्हि वृषल उच्चैःकृत्वा उच्चैःकृत्य कथयसि। किंतर्हि उच्चैर्वृषल कारं वृषलोच्चैःकारं कथयसि। नीचैर्नामाप्रियमाख्येयम् । अनिष्टोक्ताविति किम् । उच्चैःकृत्वाचष्टे ब्राह्मण पुत्रस्ते जात इति । नीचैःकृत्वाचष्टे ब्राह्मण कन्या ते गर्भिणी जातेति । अव्ययेनेति किम् । ब्राह्मण पुत्रस्ते जातः, किंतर्हि वृषल मन्दं कृत्वा कथयसि । ब्राह्मण कन्या ते गर्भिणी जातेति किं तर्हि वृषल तारं कृत्वा कथयसि । वाधिकारेणैव पक्षे क्त्वायाः सिद्धौ समासार्थं तद्विधानम् । अन्यथा हि णम एव पाक्षिकः समासः स्यात् न तु क्त्वः । क्त्वा चेत्यकृत्वा णम्विधानमुत्तरत्रोभयानुवृत्त्यर्थम् ।

१२३० **तिर्यञ्चापवर्गे** ॥५।४।८५॥ अपवर्गः क्रियासमाप्तिः समाप्तिपूर्वको वा विरामः त्यागो वा । तस्मिन् गम्यमाने तिर्यञ्च् इत्यनेनाव्ययेन योगे करोतेस्तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोः संबन्धे क्त्वाणमौ प्रत्ययौ स्याताम् । तिर्यक्कृत्वा तिर्यक्कृत्य तिर्यक्कारमास्ते । समाप्य विरम्य वा उत्सृज्य वास्ते इत्यर्थः । अपवर्ग इति किम् । तिर्यक्कृत्वा काष्ठं गतः ।

१२३१ **स्वाङ्गतश्च्व्यर्थे नानाविधार्थेन भुवश्च** ॥५।४।८६॥ स्वाङ्गमुत्कलक्षणम् । तस्मात्प्रत्ययान्तेन च्व्यर्थवृत्तिभिर्नानाविधार्थैश्च प्रत्ययान्तैश्च योगे भुवः कृगश्च तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोः संबन्धे क्त्वाणमौ स्याताम् । वचनभेदा

धातुप्रत्यययथासंख्यं नास्ति । मुखतो भूत्वा मुखतोभूय मुखतोभावमास्ते । मुखतः कृत्वा मुखतःकृत्य मुखतःकारमास्ते । पार्श्वतो भूत्वा पार्श्वतोभूय पार्श्वतोभावं शेते । पार्श्वतः कृत्वा पार्श्वतःकृत्य पार्श्वतःकारं शेते । अनाना नानाभूत्वा गतः नानाभूत्वा नानाभूय नानाभावं गतः । अनाना नानाकृत्वा गतः नानाकृत्वा नानाकृत्य नानाकारं गतः । एवं विना भूत्वा विनाभूय विनाभावं गतः । विनाकृत्वा विनाकृत्य विनाकारं गतः । धार्था धाधमज्ञेधाध्यमज्ञः । द्विधा भूत्वा द्विधाभूय द्विधाभावमास्ते । द्विधाकृत्वा द्विधाकृत्य द्विधाकारं गतः । द्वैधं भूत्वा द्वैधंभूय द्वैधंभावमास्ते । द्वैधंकृत्वा द्वैधंकृत्य द्वैधंकारं गतः । द्वेधाभूत्वा द्वेधाभूय द्वेधाभावमास्ते । द्वेधाकृत्वा द्वेधाकृत्य द्वेधाकारं गतः । ऐकध्यंभूत्वा ऐकध्यंभूय ऐकध्यंभावमास्ते । ऐकध्यंकृत्वा ऐकध्यंकृत्य ऐकध्यंकारं गतः । धणस्तु प्रकारविचालवदर्थत्वेन अधार्थत्वात् अव्ययाधिकाराच्च निरासः । अस्यापि ग्रहणमित्यन्ये । अव्ययाधिकारादेव च मुखे तस्यति मुखतः कृत्वा गत इत्यत्र न भवति । स्वाङ्गेति किम् । सर्वतो भूत्वास्ते । तसिति किम् । मुखे भूत्वा गतः । च्व्यर्थेति किम् । नानाकृत्वा भक्ष्याणि भुङ्क्ते । द्विधाकृत्वा काष्ठानि गतः ।

१२३२ तूष्णीमा ॥ ५।४।८७ ॥ तूष्णींशब्देन योगे भवतेर्धातोः संबन्धे क्त्वाणमौ स्याताम् । तूष्णीं भूत्वा तूष्णींभूय तूष्णींभावमास्ते ।


१२३३ आनुलोम्येऽन्वचा ॥ ५।४।८८ ॥ आनुलोम्यमनुकूलता परचित्ताराधनम् । अन्वचित्यनेन अव्ययेन योगे भवतेस्तुल्यकर्तृकेऽर्थे वर्तमानादानुलोम्ये गम्यमाने धातोः संबन्धे क्त्वाणमौ स्याताम् । अन्वग्भूत्वा अन्वग्भूय अन्वग्भावमास्ते । अनुकूलो भूत्वा तिष्ठतीत्यर्थः । आनुलोम्य इति किम् । अन्वग्भूत्वा विजयते शत्रुः । पश्चाद् भूत्वेत्यर्थः । तिर्यचान्वचेति शब्दानुकरणात् तिरश्चानूचेति न भवति ।

॥ इति श्रीहैमबृहत्प्रक्रियायाम् उत्तरकृदन्तप्रकरणं समाप्तम् ॥

॥ इति श्रीहैमबृहत्प्रक्रिया समाप्ता ॥



मयाशंकरपुत्रेण गिरिजाशंकरेण वै ॥
कृतेयं प्रक्रिया जीयाद्यावच्चन्द्रदिवाकरौ ॥१॥



इति

श्रीहैमबृहत्प्रक्रिया

समाप्ता.

॥ हैमपञ्चपाठी ॥

तत्र प्रथमं

॥ हैम-(अष्टाध्यायी)-सूत्रपाठः ॥

॥ अथ प्रथमोऽध्यायः ॥

अर्हम् ॥१।१।१॥ सिद्धिः स्याद्वादात् ॥१।१।२॥ लोकात् ॥१।१।३॥ औदन्ताः स्वराः ॥१।१।४॥ एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः ॥१।१।५॥ अनवर्णा नामी ॥१।१।६॥ ऌदन्ताः समानाः ॥१।१।७॥ प ऐ ओ औ सन्ध्यक्षरम् ॥१।१।८॥ अं अः अनुस्वार-विसर्गौ ॥१।१।९॥ कादिर्व्यञ्जनम् ॥१।१।१०॥ अपञ्चमान्तस्थो धुट् ॥१।१।११॥ पञ्चको वर्गः ॥१।१।१२॥ आद्यद्वितीयशषसा अघोषाः ॥१।१।१३॥ अन्यो घोषवान् ॥१।१।१४॥ यरलवा अन्तस्थाः ॥ १।१।१५ ॥ अंअः×क×पशषसाः शिट् ॥ १।१।१६ ॥ तुल्या-स्यप्रयत्नः स्वः ॥ १।१।१७ ॥ स्यौजसमौशस्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङ-सोसाम्ङ्योस्सुपां त्रयी त्रयी प्रथमादिः ॥१।१।१८॥ स्त्यादिर्विभक्तिः ॥ १।१।१९ ॥ तदन्तं पदम् ॥ १।१।२० ॥ नाम सिदय् व्यंजने ॥ १।१।२१ ॥ नं क्ये ॥१।१।२२॥ न स्तं मत्वर्थे ॥१।१।२३॥ मनुर्नभोऽङ्गिरो वति ॥१।१।२४॥ वृत्त्यन्तोऽसषे ॥१।१।२५॥ सविशेषणमाख्यातं वाक्यम् ॥१।१।२६॥ अधातुविभक्तिवाक्यमर्थवन्नाम ॥१।१।२७॥ शिर्घुट् ॥१।१।२८॥ पुंस्त्रियोः स्यमौजस् ॥१।१।२९॥ स्वरादयोऽव्ययम् ॥१।१।३०॥ चादयोऽसत्वे ॥ १।१।३१ ॥ अघण्तस्वाद्याशसः ॥ १।१।३२ ॥ विभक्तिथमन्त-तसाद्याभाः ॥ १।१।३३ ॥ वत्तस्याम् ॥ १।१।३४ ॥ क्वातुमम् ॥ १।१।३५ ॥ गतिः ॥१।१।३६॥ अप्रयोगीत् ॥१।१।३७॥ अनन्तः पञ्चम्याः प्रत्ययः ॥१।१।३८॥ डत्यतु संख्यावत् ॥१।१।३९॥ बहुगणं भेदे ॥१।१।४०॥ कसमासेऽध्यर्धः ॥१।१।४१॥ अर्ध-पूर्वपदः पूरणः ॥१।१।४२॥

॥ इति प्रथमाध्यायस्य प्रथमः पादः ॥

समानानां तेन दीर्घः ॥१।२।१॥ ऋलति ह्रस्वो वा ॥१।२।२॥ ऋत ऋर्ल ऋलभ्यां वा ॥१।२।३॥ ऋतो वा तौ च ॥१।२।४॥ ऋस्तयोः ॥ १।२।५ ॥ अवर्णस्येवर्णादिनै-दोदरल् ॥ १।२।६ ॥ ऋणे प्रदशार्णवसनकम्बलवत्सरवत्सतरस्यार् ॥ १।२।७ ॥ ऋते तृतीयासमासे ॥ १।२।८ ॥ ऋत्यारुपसर्गस्य ॥ १।२।९ ॥ नाम्नि वा ॥ १।२।१० ॥ लृत्याल् वा ॥१।२।११॥ ऐदौत्संध्यक्षरैः ॥१।२।१२॥ ऊढा ॥१।२।१३॥ प्रस्यैषैष्यो-ढोढ्यूहे स्वरेण ॥१।२।१४॥ स्वैरस्वैर्यक्षौहिण्याम् ॥१।२।१५॥ अनियोगे लुगेषे ॥१।२।१६॥ वौष्ठौतौ समासे ॥१।२।१७॥ ओमाङि ॥१।२।१८॥ उपसर्गस्यानिणेधेदोति ॥१।२।१९॥ वा नाम्नि ॥१।२।२०॥ इवर्णादिरस्वे स्वरे यवरलम् ॥१।२।२१॥ ह्रस्वोऽ-पदे वा ॥१।२।२२॥ एदैतोऽय्याय् ॥१।२।२३॥ ओदौतोऽवाव् ॥१।२।२४॥ य्यक्ये

॥१।२।२५॥ ऋतो रस्तद्धिते ॥१।२।२६॥ पदोतः पदान्तेऽस्य लुक् ॥१।२।२७॥ गोर्नाम्न्यवोऽक्षे ॥१।२।२८॥ स्वरे वाऽनक्षे ॥१।२।२९॥ इन्द्रे ॥१।२।३०॥ वाऽत्यसन्धिः ॥१।२।३१॥ प्लुतोऽनितौ ॥१।२।३२॥ इश्वा ॥१।२।३३॥ ईदूदेद् द्विवचनम् ॥१।२।३४॥ अदो मुमी ॥१।२।३५॥ चादिः स्वरोऽनाङ् ॥१।२।३६॥ ओदन्तः ॥१।२।३७॥ सौ नवेतौ ॥१।२।३८॥ ऊँ चोश् ॥१।२।३९॥ अञ्वर्गात् स्वरे वोऽसन् ॥१।२।४०॥ अदुवर्णस्यान्तेऽनुनासिकोऽनीदादेः ॥१।२।४१॥

॥ इति प्रथमाध्यायस्य द्वितीयः पादः ॥

तृतीयस्य पञ्चमे ॥१।३।१॥ प्रत्यये च ॥१।३।२॥ ततो हश्चतुर्थः ॥१।३।३॥ प्रथमादधुटि शश्छः ॥१।३।४॥ रः कखपफयोः ×क×पौ ॥१।३।५॥ शषसे शषसं वा ॥१।३।६॥ चटते सद्वितीये ॥१।३।७॥ नोऽप्रशानोऽनुस्वारानुनासिकौ च पूर्वस्याऽधुट्परे ॥१।३।८॥ पुमोऽशिट्यघोषेऽख्यागि रः ॥ १।३।९ ॥ नॄनः पेषु वा ॥ १।३।१० ॥ द्विः कानः कानि सः ॥ १।३।११ ॥ स्सटि समा ॥ १।३।१२ ॥ लुक् ॥१।३।१३॥ तौ मुमो व्यञ्जने स्वौ ॥१।३।१४॥ मनयवलपरे हे ॥१।३।१५॥ सञ्झाद् ॥१।३।१६॥ ङ्णोः कटावन्तौ शिटि न वा ॥१।३।१७॥ ङ्ः सः त्सोऽधः ॥१।३।१८॥ नः शि ञ् ॥१।३।१९॥ अतोऽति रोरुः ॥१।३।२०॥ घोषवति ॥१।३।२१॥ अवर्णभोभगोऽघोर्लुगसंधिः ॥१।३।२२॥ व्योः ॥१।३।२३॥ स्वरे वा ॥१।३।२४॥ अस्पष्टावर्णात्वनुज्ञि वा ॥१।३।२५॥ रोर्यः ॥१।३।२६॥ ह्रस्वान्ङ्णनो द्वे ॥१।३।२७॥ अनाङ्माङो दीर्घाद्वा छः ॥१।३।२८॥ प्लुताद्वा ॥१।३।२९॥ स्वरेभ्यः ॥१।३।३०॥ हादिर्हस्वरस्यानुनवा ॥१।३।३१॥ अदीर्घाद् विरामैकव्यंजने ॥ १।३।३२ ॥ अञ्वर्गस्यान्तस्थातः ॥१।३।३३॥ ततोऽस्याः ॥ १।३।३४ ॥ शिटः प्रथमद्वितीयस्य ॥१।३।३५॥ ततः शिटः ॥१।३।३६॥न रात्स्वरे ॥१।३।३७॥ पुत्रस्यादिन् पुत्रादिन्याक्रोशे ॥१।३।३८॥ स्नां धुड्वर्गेऽन्त्योऽपदान्ते ॥१।३।३९॥ शिड् हेऽनुस्वारः ॥१।३।४०॥ रोरे लुग्दीर्घश्चादिदुतः ॥१।३।४१॥ ढस्तड्ढे ॥१।३।४२॥ सहिवहेरोष्ठावर्णस्य ॥१।३।४३॥ उदः स्थास्तम्भः सः ॥१।३।४४॥ तदः से स्वरे पादार्था ॥१।३।४५॥ एतदश्च व्यञ्जनेऽनग्नञ्समासे ॥१।३।४६॥ व्यञ्जनात् पञ्चमान्तस्थायाः सरूपे वा ॥१।३।४७॥ धुटो धुटि स्वे वा ॥१।३।४८॥ तृतीयस्तृतीयचतुर्थे ॥१।३।४९॥ अघोषे प्रथमोऽशिटः ॥१।३।५०॥ विरामे वा ॥१।३।५१॥ न संधिः ॥१।३।५२॥ रः पदान्ते विसर्गस्तयोः ॥१।३।५३॥ ख्यागि ॥१।३।५४॥ शिट्यघोषात् ॥१।३।५५॥ व्यत्यये लुग्वा ॥१।३।५६॥ अरोः सुपि रः ॥१।३।५७॥ वाहर्पत्यादयः ॥१।३।५८॥ शिट्याद्यस्य द्वितीयो वा ॥१।३।५९॥ सवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ ॥१।३।६०॥ सस्य शषौ ॥१।३।६१॥ न शात् ॥ १।३।६२ ॥ पदान्ताट् टवर्गादनाम्नगरीनवतेः ॥ १।३।६३ ॥ षि तवर्गस्य ॥१।३।६४॥ लि लौ ॥१।३।६५॥

॥ इति प्रथमाध्यायस्य तृतीयः पादः ॥

अत आ स्यादौ जस्ङ्यां ये ॥१।४।१॥ भिस ऐस् ॥१।४।२॥ इदमदसोऽक्येव

॥१।४।३॥ पद्बहुरभोसि ॥१।४।४॥ टाङसोरिनस्यौ ॥१।४।५॥ ङेङस्योर्यातौ ॥१।४।६॥ सर्वादेः स्मैस्मातौ ॥१।४।७॥ ङेःस्मिन् ॥१।४।८॥ जस इः ॥१।४।९॥ नेमार्धप्रथमचरमतयायाल्पकतिपयस्य वा ॥१।४।१०॥ द्वन्द्वे वा ॥ १।४।११ ॥ न सर्वादिः ॥१।४।१२॥ तृतीयान्तात् पूर्वापरं योगे ॥१।४।१३॥ तीयं ङित्कार्ये वा ॥१।४।१४॥ अवर्णस्यामः साम् ॥१।४।१५॥ नवभ्यः पूर्वेभ्य इस्मात्स्मिन् वा ॥१।४।१६॥ आपो ङितां यै यास् यास् याम् ॥ १।४।१७ ॥ सर्वादेर्डस्पूर्वाः ॥ १।४।१८ ॥ टौस्येत् ॥ १।४।१९ ॥ औता ॥१।४।२०॥ इदुतोऽक्षेरीदूत् ॥१।४।२१॥ जस्येदात् ॥१।४।२२॥ ङित्यदिति ॥ १।४।२३ ॥ टःपुंसि ना ॥ १।४।२४ ॥ ङिर्डाः ॥ १।४।२५ ॥ केवलसखिपतेरौः ॥१।४।२६॥ न नाङिदेत् ॥१।४।२७॥ स्त्रिया ङितां वा दै दास् दास् दाम् ॥ १।४।२८ ॥ स्त्रीदूतः ॥ १।४।२९ ॥ वेयुवोऽस्त्रियाः ॥ १।४।३० ॥ आमो नाम् वा ॥१।४।३१॥ ह्रस्वापश्च ॥१।४।३२॥ संख्यानां र्ण्याम् ॥१।४।३३॥ त्रेस्त्रयः ॥१।४।३४॥ पदोदभ्यां ङसिङसोरः ॥ १।४।३५ ॥ खितिखीतीय उर् ॥ १।४।३६ ॥ ऋतो ङर् ॥१।४।३७॥ तृस्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄ घुटचार् ॥१।४।३८॥ अर्डौ च ॥१।४।३९॥ मातुर्मातः पुत्रेऽर्हे सिनामन्त्र्ये ॥१।४।४०॥ ह्रस्वस्य गुणः ॥१।४।४१॥ पदापः ॥१।४।४२॥ नित्यदिदुद्विस्वराम्बार्थस्य ह्रस्वः ॥ १।४।४३ ॥ अदेतः स्यमोर्लुक् ॥ १।४।४४ ॥ दीर्घड्याब्व्यंजनात्सेः ॥१।४।४५॥ समानादमाऽतः ॥१।४।४६॥ दीर्घो नाम्यतिसृचतसृषः ॥१।४।४७॥ नुर्वा ॥१।४।४८॥ शसोऽता सश्च नः पुंसि ॥१।४।४९॥ संख्यासायवेरह्रस्याहन् ङौ वा ॥१।४।५०॥ निय आम् ॥१।४।५१॥ वाष्टन आः स्यादौ ॥१।४।५२॥ अष्ट और्जस्शसोः ॥१।४।५३॥ डतिष्णः संख्याया लुप् ॥१।४।५४॥ नपुंसकस्य शिः ॥१।४।५५॥ औरीः ॥१।४।५६॥ अतः स्यमोऽम् ॥१।४।५७॥ पञ्चतोऽन्यादेरनेकतरस्य दः ॥१।४।५८॥ अनतो लुप् ॥१।४।५९॥ जरसो वा ॥१।४।६०॥ नामिनो लुग्वा ॥१।४।६१॥ वान्यतैतः पुमांष्टादौ स्वरे ॥१।४।६२॥ दध्यस्थिसक्थ्यक्ष्णोऽन्तस्यान् ॥१।४।६३॥ अनाम्स्वरे नोऽन्तः ॥१।४।६४॥ स्वराच्छौ ॥१।४।६५॥ धुटां प्राक् ॥१।४।६६॥ लों वा ॥१।४।६७॥ घुटि ॥१।४।६८॥ अचः ॥१।४।६९॥ ऋदुदितः ॥१।४।७०॥ युञ्जोऽसमासे ॥१।४।७१॥ अनडुहः सौ ॥१।४।७२॥ पुंसोः पुमन्स् ॥१।४।७३॥ ओत औः ॥१।४।७४॥ आअम्शसोऽता ॥१।४।७५॥ पथिन्मथिन्नृभुक्षः सौ ॥१।४।७६॥ पः ॥१।४।७७॥ थोन्थ् ॥१।४।७८॥ इनङीस्वरे लुक् ॥१।४।७९॥ वोशनसो नश्चामन्त्र्ये सौ ॥१।४।८०॥ उतोऽनडुच्चतुरो वः ॥१।४।८१॥ वाः शेषे ॥१।४।८२॥ सख्युरितोऽशावैत् ॥ १।४।८३ ॥ ऋदुशनस्पुरुदंसोऽनेहसश्च सेर्डाः ॥ १।४।८४ ॥ नि दीर्घः ॥१।४।८५॥ न्स्महतोः ॥१।४।८६॥ इन्हन्पूषार्यम्णः शिस्योः ॥१।४।८७॥ अपः ॥१।४।८८॥ नि वा ॥१।४।८९॥ अम्वादेरत्वसः सौ ॥१।४।९०॥ क्रुशस्तुनस्तृच् पुंसि ॥१।४।९१॥ टादौ स्वरे वा ॥१।४।९२॥ स्त्रियाम् ॥१।४।९३॥

॥ इति प्रथमाध्यायस्य चतुर्थः पादः ॥

॥ अथ द्वितीयोऽध्यायः ॥

त्रिचतुरस्तिसृचतसृ स्यादौ ॥२।१।१॥ ऋतो रः स्वरेऽनि ॥२।१।२॥ जराया जरस् वा ॥२।१।३॥ अपोऽद्भ्मे ॥२।१।४॥ आ रायो ङ्यक्षने ॥२।१।५॥ युष्मदस्मदोः ॥२।१।६॥ टाङ्योसि यः ॥२।१।७॥ शेषे लुक् ॥२।१।८॥ मोर्वा ॥२।१।९॥ मन्तस्य युवावौ द्वयोः ॥२।१।१०॥ त्वमौ प्रत्ययोत्तरपदे चैकस्मिन् ॥२।१।११॥ त्वमहं सिना प्राक् चाकः ॥२।१।१२॥ यूयं वयं जसा ॥२।१।१३॥ तुभ्यं मह्यं ङ्या ॥२।१।१४॥ तव मम ङ्सा ॥२।१।१५॥ अमो मः ॥२।१।१६॥ शसो नः ॥२।१।१७॥ अभ्यं भ्यसः ॥२।१।१८॥ ङसेश्चाद् ॥२।१।१९॥ आम आकम् ॥२।१।२०॥ पदाद्युगविभक्त्यैकवाक्ये वस्नसौ बहुत्वे ॥२।१।२१॥ द्वित्वे वाम्नौ ॥२।१।२२॥ ङेङ्सा तेमे ॥२।१।२३॥ अमा त्वा मा ॥२।१।२४॥ असदिवामन्त्र्यं पूर्वम् ॥२।१।२५॥ जस् विशेष्यं वामन्त्र्ये ॥२।१।२६॥ नान्यत् ॥ २।१।२७ ॥ पादाद्योः ॥ २।१।२८ ॥ चाहहवैवयोगे ॥ २।१।२९ ॥ दृश्यर्थैश्चिन्तायाम् ॥ २।१।३० ॥ नित्यमन्वादेशे ॥ २।१।३१ ॥ सपूर्वात् प्रथमान्ताद्वा ॥२।१।३२॥ त्यदामेनदेतदो द्वितीयाटौस्यवैष्यन्ते ॥२।१।३३॥ इदमः ॥२।१।३४॥ अदव्यञ्जने ॥ २।१।३५ ॥ अनक् ॥२।१।३६॥ टौस्यनः ॥२।१।३७॥ अयमियं पुंस्त्रियोः सौ ॥ २।१।३८ ॥ दो मः स्यादौ ॥ २।१।३९ ॥ किमः कस्तसादौ च ॥ २।१।४० ॥ आ द्वेरः ॥२।१।४१॥ तः सौ सः ॥२।१।४२॥ अदसो दः सेस्तु डौः ॥२।१।४३॥ असुको घाऽकि ॥२।१।४४॥ मोऽवर्णस्य ॥२।१।४५॥ वाद्यौ ॥२।१।४६॥ मादुवर्णोऽनु ॥२।१।४७॥ प्रागिनात् ॥२।१।४८॥ बहुष्वेरीः ॥२।१।४९॥ धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये ॥२।१।५०॥ इणः ॥२।१।५१॥ संयोगात् ॥२।१।५२॥ भ्रूश्नोः ॥२।१।५३॥ स्त्रियाः ॥२।१।५४॥ वामशसि ॥२।१।५५॥ योऽनेकस्वरस्य ॥२।१।५६॥ स्यादौ वः ॥२।१।५७॥ क्विब्वृत्तेरसुधियस्तौ ॥ २।१।५८ ॥ दनुपुनर्वर्षाकारैर्भुवः ॥ २।१।५९ ॥ णषमसत्परे स्यादिविधौ च ॥२।१।६०॥ क्तादेशोऽषि ॥२।१।६१॥ षढोः कः सि ॥२।१।६२॥ भ्वादेर्नामिनो दीर्घो वेर्व्यञ्जने ॥२।१।६३॥ पदान्ते ॥२।१।६४॥ न यि तद्धिते ॥२।१।६५॥ कुरुच्छुरः ॥२।१।६६॥ मो नो म्वोश्च ॥२।१।६७॥ स्रंस्ध्वंस्कस्सनडहो दः ॥२।१।६८॥ क्तिवज्दि शदृशस्पृशस्रजदधृषुष्णिहो गः ॥ २।१।६९ ॥ नशो वा ॥ २।१।७० ॥ युजञ्चक्रुञ्चो नो ङः ॥२।१।७१॥ सो रुः ॥२।१।७२॥ सजुषः ॥२।१।७३॥ अहः ॥२।१।७४॥ रो लुप्यरि ॥२।१।७५॥ धुटस्तृतीयः ॥२।१।७६॥ गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः सध्वोश्च प्रत्यये ॥२।१।७७॥ धागस्तथोश्च ॥२।१।७८॥ अधश्चतुर्थात्तथोर्धः ॥ २।१।७९ ॥ नाम्यन्तात् परोक्षाद्यतन्याशिषो धो ढः ॥२।१।८०॥ हान्तस्थाऽज्झीड्भ्यां वा ॥२।१।८१॥ हो धुट् पदान्ते ॥२।१।८२॥ भ्वादेर्दादेर्घः ॥२।१।८३॥ मुहद्रुहष्णुहष्णिहो वा ॥२।१।८४॥ नहाहोर्धतौ ॥२।१।८५॥ चजः कगम् ॥२।१।८६॥ यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः ॥२।१।८७॥ संयोगस्यादौ स्कोर्लुक् ॥२।१।८८॥ पदस्य ॥२।१।८९॥ रात्सः ॥२।१।९०॥ नाम्नो नोऽनहः ॥२।१।९१॥ नामन्त्र्ये ॥२।१।९२॥ क्लीबे वा ॥२।१।९३॥ मावर्णान्तोपान्त्याऽपञ्चमवर्गान्मतोर्मो वः ॥२।१।९४॥ नाम्नि ॥२।१।९५॥ चर्मण्वत्यष्ठीवच्चक्रीवत्कक्षीवद्रुम-

ण्वत् ॥२।१।९६॥ उदन्वानब्धौ च ।२।१।९७॥ राजन्वान् सुराज्ञि ॥२।१।९८॥ नोर्म्यादिभ्यः ॥२।१।९९॥ मासनिशासनस्य शसादौ लुग्वा ॥२।१।१००॥ दन्तपादनासिकाहृदयास्यूषोदकदोर्यकृच्छकृतो दत्पन्नस्हृदसन्यूषन्नुदन्दोषनयकन्शकन् वा ॥२।१।१०१॥ यस्वरे पादः पदणिक्यघुटि ॥२।१।१०२॥ उदच उदीच् ॥२।१।१०३॥ अरुर्द्विषदजन्तस्य मुम् ॥२।१।१०४॥ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ॥२।१।१०५॥ ऋतो ङसिङसोः ॥२।१।१०६॥ ऋदुशनस्पुरुदंसोऽनेहसां सेरनङ् ॥२।१।१०७॥ ऋदुदितो नाम्यन्तस्य ॥२।१।१०८॥ ऋत इद्धातोः ॥२।१।१०९॥ वा दिहन्धूतराज्ञोऽणि ॥२।१।११०॥ न वमन्तसंयोगात् ॥२।१।१११॥ हनो ह्वो घ्नः ॥२।१।११२॥ लुगस्यादेत्यपदे ॥२।१।११३॥ ङित्यन्त्यस्वरादेः ॥२।१।११४॥ अवर्णाद्भ्रोन्तो वाऽतुरोङ्योः॥२।१।११५॥ श्यशवः ॥२।१।११६॥ दिव औः सौ ॥२।१।११७॥ उः पदान्तेऽनूत् ॥२।१।११८॥

॥ इति द्वितीयाध्यायस्य प्रथमः पादः ॥

क्रियाहेतुः कारकम् ॥२।२।१॥ स्वतंत्रः कर्ता ॥२।२।२॥ कर्तुर्व्याप्यं कर्म ॥२।२।३॥ वा कर्मणामणिकर्ता णौ ॥२।२।४॥ गतिबोधाहारार्थशब्दकर्मनित्याकर्मणामनीखाद्यदिह्राशब्दायक्रन्दाम् ॥ २।२।५ ॥ भक्षेर्हिंसायाम् ॥ २।२।६ ॥ वहेः प्रवेयः ॥२।२।७॥ हृक्रोर्नवा ॥२।२।८॥ दृश्यभिवदोरात्मने ॥२।२।९॥ नाथः ॥२।२।१०॥ स्मृत्यर्थदयेशः ॥२।२।११॥ कृगः प्रतियत्ने ॥२।२।१२॥ रुजार्थस्याज्वरिसंतापेर्भावे कर्तरि ॥२।२।१३॥ जासनाटक्राथपिषो हिंसायाम् ॥२।२।१४॥ निप्रेभ्यो घ्नः ॥२।२।१५॥ विनिमेयदूतपणं पण्यव्यवहोः ॥२।२।१६॥ उपसर्गादिवः ॥२।२।१७॥ न ॥२।२।१८॥ करणं च ॥२।२।१९॥ अधेः शीङ्स्थास आधारः ॥२।२।२०॥ उपान्वध्याङ्वसः ॥२।२।२१॥ वाभिनिविशः ॥२।२।२२॥ कालाध्वभावदेशं वा कर्म चाकर्मणाम् ॥२।२।२३॥ साधकतमं करणम् ॥२।२।२४॥ कर्माभिप्रेयः संप्रदानम् ॥२।२।२५॥ स्पृहेर्व्याप्यं वा ॥२।२।२६॥ क्रुधद्रुहेर्ष्यासूयार्थैर्यं प्रति कोपः ॥२।२।२७॥ नोपसर्गात्क्रुद्रुहा ॥२।२।२८॥ अपाये ऽवधिरपादानम् ॥२।२।२९॥ क्रियाश्रयस्याधारोऽधिकरणम् ॥२।२।३०॥ नाम्नः प्रथमैकद्विबहौ ॥२।२।३१॥ आमन्त्र्ये ॥२।२।३२॥ गौणात्समयानिकषाहाधिगन्तरान्तरेणातियेनतेनैर्द्वितीया ॥२।२।३३॥ द्वित्रेऽधोऽध्युपरिभिः ॥२।२।३४॥ सर्वोभयाभिपरिणा तसा ॥२।२।३५॥ लक्षणत्थोऽस्येत्थंभूतेष्वभिना ॥२।२।३६॥ भागिनि च प्रतिपर्यनुभिः ॥२।२।३७॥ हेतुसहार्थैऽनुना ॥२।२।३८॥ उत्कृष्टेऽनूपेन ॥२।२।३९॥ कर्मणि ॥२।२।४०॥ क्रियाविशेषणात् ॥२।२।४१॥ कालाध्वनोर्व्याप्तौ ॥२।२।४२॥ सिद्धौ तृतीया ॥२।२।४३॥ हेतुकर्तृकरणेत्थंभूतलक्षणे ॥२।२।४४॥ सहार्थे ॥२।२।४५॥ यद्भेदैस्तद्व्याख्या ॥२।२।४६॥ कृतार्थैः ॥२।२।४७॥ काले भाज्ञवाऽऽधारे ॥२।२।४८॥ प्रसितोत्सुकाभवद्धैः ॥२।२।४९॥ व्याप्ये द्विर्द्रोणादिभ्यो वीप्सायाम् ॥२।२।५०॥ समो ज्ञोऽस्मृतौ वा ॥२।२।५१॥ दामः संप्रदाने धर्म्य आत्मने च ॥२।२।५२॥ चतुर्थी ॥२।२।५३॥ तादर्थ्ये ॥२।२।५४॥ रुचिकल्प्त्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु ॥ २।२।५५ ॥ प्रत्याङः श्रुवाऽर्थैनि ॥२।२।५६॥ प्रत्यनोर्गृणाऽऽख्यातरि ॥२।२।५७॥ यद्वीक्ष्ये राधीक्षी ॥२।२।५८॥ उत्पातेन ज्ञाप्ये ॥२।२।५९॥ श्लाघह्नुङ्स्थाशपां प्रयोज्ये ॥ २।२।६० ॥ तुमोऽर्थं भाववचनात्

॥२।२।६१॥ गम्यस्याप्ये ॥२।२।६२॥ गतेर्नवाऽनाप्ते ॥२।२।६३॥ मन्यस्यानादरादिभ्योऽतिकुत्सने ॥२।२।६४॥ हितसुखाभ्याम् ॥२।२।६५॥ तद्धन्द्रायुष्यक्षेमार्थार्थेनाशिषि ॥२।२।६६॥ परिक्रयणे ॥२।२।६७॥ शक्तार्थवषट्नमःस्वस्तिस्वाहास्वधाभिः ॥२।२।६८॥ पञ्चम्यपादाने ॥२।२।६९॥ आङाऽवधौ ॥२।२।७०॥ पर्यपाभ्यां वर्ज्ये ॥२।२।७१॥ यतः प्रतिनिधिप्रतिदाने प्रतिना ॥२।२।७२॥ आख्यातर्युपयोगे ॥ २।२।७३ ॥ गम्ययपः कर्माधारे ॥२।२।७४॥ प्रभृत्यन्यार्थदिक्शब्दबहिरारादितरैः ॥२।२।७५॥ ऋणाद्धेतोः ॥२।२।७६॥ गुणादस्त्रियां न वा ॥२।२।७७॥ आरादर्थैः ॥२।२।७८॥ स्तोकाल्पकृच्छ्रकतिपयादसत्त्वे करणे ॥ २।२।७९ ॥ अज्ञाने ज्ञः षष्ठी ॥ २।२।८० ॥ शेषे ॥२।२।८१ ॥ रिरिष्टात्स्तादस्तादसतसाता ॥२।२।८२॥ कर्मणि कृतः ॥२।२।८३॥ द्विषो वाऽतृशः ॥२।२।८४॥ वैकत्र द्वयोः ॥२।२।८५॥ कर्तरि ॥२।२।८६॥ द्विहेतोरस्त्र्यणकस्य वा ॥२।२।८७॥ कृत्यस्य वा ॥२।२।८८॥ नोभयोर्हेतोः ॥ २।२।८९ ॥ तृन्नुदन्ताव्ययकस्वानातृशतृङिणकच्खलर्थस्य ॥ २।२।९० ॥ क्त्वोरसदाधारे ॥२।२।९१॥ वा क्लीबे ॥२।२।९२॥ अकमेरुकस्य ॥ २।२।९३ ॥ षष्यङ्गुणेनः ॥ २।२।९४ ॥ सप्तम्यधिकरणे ॥२।२।९५॥ नवा सुजर्थैः काले ॥२।२।९६॥ कुशलायुक्तेनाऽऽसेवायाम् ॥२।२।९७॥ स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः ॥२।२।९८॥ व्याप्ये क्तेनः ॥२।२।९९॥ तद्युक्ते हेतौ ॥ २।२।१०० ॥ अप्रत्यादावसाधुना ॥२।२।१०१॥ निपुणेन चार्चायाम् ॥ २।२।१०२ ॥ स्वेशेऽधिना ॥ २।२।१०३ ॥ उपेनाधिकिनि ॥ २।२।१०४ ॥ यद्भावो भावलक्षणम् ॥ २।२।१०५ ॥ गते गम्येऽध्वनोऽन्तेनैकार्थ्यं वा ॥ २।२।१०६ ॥ षष्ठी वानादरे ॥२।२।१०७॥ सप्तमी चाविभागे निर्धारणे ॥२।२।१०८॥ क्रियामध्येऽध्वकाले पञ्चमी च ॥२।२।१०९॥ अधिकेन भूयसस्ते ॥२।२।११०॥ तृतीयाल्पीयसः ॥२।२।१११ ॥ पृथग्नाना पञ्चमी च ॥ २।२।११२ ॥ ऋते द्वितीया च ॥ २।२।११३ ॥ विना ते तृतीया च ॥२।२।११४॥ तुल्यार्थैस्तृतीयाषष्ठ्यौ ॥२।२।११५॥ द्वितीयाषष्ठ्यावेनेनाञ्चेः ॥ २।२।११६ ॥ हेत्वर्थैस्तृतीयाद्याः ॥ २।२।११७ ॥ सर्वादेः सर्वाः ॥२।२।११८॥ असत्त्वारादर्थाट्टाङसिङ्यम् ॥२।२।११९॥ जात्याख्यायां नवैकोऽसंख्यो बहुवत् ॥२।२।१२०॥ अविशेषणे द्वौ चासदः ॥ २।२।१२१ ॥ फल्गुनीप्रोष्ठपदस्य भे ॥२।२।१२२॥ गुरावेकश्च ॥२।२।१२३॥

॥ इति द्वितीयाध्यायस्य द्वितीयः पादः ॥

नमस्पुरसो गतेः कखपफि रः सः॥२।३।१॥ तिरसो वा ॥२।३।२॥ पुंसः ॥२।३।३॥ शिरोऽधसः पदे समासैक्ये ॥ २।३।४ ॥ अतः कृकमिकंसकुम्भकुशाकर्णीपात्रेऽनव्ययस्य ॥२।३।५॥ प्रत्यये ॥२।३।६॥ रोः काम्ये ॥२।३।७॥ नामिनस्तयोः षः ॥२।३।८॥ निर्दुर्बहिरावष्प्रादुश्चतुराम् ॥२।३।९॥ सुचो वा ॥ २।३।१० ॥ वेसुसोऽपेक्षायाम् ॥२।३।११॥ नैकार्थेऽक्रिये ॥२।३।१२॥ समासेऽसमस्तस्य ॥ २।३।१३ ॥ भ्रातुष्पुत्रकस्कादयः ॥२।३।१४॥ नाम्यन्तस्थाकवर्गात् पदान्तः कृतस्य सः शिड्नान्तरेऽपि ॥२।३।१५॥ समासेऽग्नेः स्तुतः ॥२।३।१६॥ ज्योतिरायुभ्यां च स्तोमस्य ॥२।३।१७॥ मातृपितुः स्वसुः ॥ २।३।१८ ॥ अलुपि वा ॥ २।३।१९ ॥ निनद्याः स्नातेः कौशले

॥ २।३।२० ॥ प्रतेः स्नातस्य सूत्रे ॥ २।३।२१ ॥ स्नानस्य नाम्नि ॥ २।३।२२ ॥ वेः स्रः ॥ २।३।२३ ॥ अभिनिष्टानः ॥ २।३।२४ ॥ गवि युधेः स्थिरस्य ॥२।३।२५॥ पत्यकः ॥ २।३।२६ ॥ भादितो वा ॥ २।३।२७ ॥ विकुशमिपरेः स्थलस्य ॥ २।३।२८ ॥ कपेर्गोत्रे ॥ २।३।२९ ॥ गोऽम्बाम्बसव्यापद्वित्रिभूम्यग्निशेकुशङ्कुक्वङ्गुमञ्जिपुञ्जिबर्हिःपरमे दिवेः स्थस्य ॥२।३।३०॥ निर्दुःसोः सेधसन्धिसाम्नाम् ॥२।३।३१॥ प्रष्ठोऽग्रगे ॥२।३।३२॥ भीरुष्ठानादयः॥२।३।३३॥ ह्रस्वान्नाम्नस्ति ॥२।३।३४॥ निसस्तपेनाऽऽसेवायाम्॥२।३।३५॥ घस्वसः ॥२।३।३६॥ णिस्तोरेवास्वदस्विदसहः षणि ॥२।३।३७॥ सञ्ज्ञेर्वा ॥२।३।३८॥ उपसर्गात् सुग्सुवसोस्तुस्तुभोऽव्यप्यद्वित्वे ॥ २।३।३९ ॥ स्थासेनिसेधसिचसञ्जां द्वित्वेऽपि ॥२।३।४०॥ अङ्प्रतिस्तब्धनिस्तब्धे स्तम्भः ॥२।३।४१॥ अवाच्याश्रयोर्जाविदूरे ॥ २।३।४२ ॥ व्यवात्स्वनोऽशने ॥ २।३।४३ ॥ सदोऽप्रतेः परोक्षायां त्वादेः ॥२।३।४४॥ स्वञ्जश्च ॥२।३।४५॥ परिनिवेः सेवः ॥२।३।४६॥ सयसितस्य ॥२।३।४७॥ असोऽसिवूसहस्सटाम् ॥ २।३।४८ ॥ स्तुस्वञ्जश्चादि नवा ॥ २।३।४९ ॥ निरभ्यनोश्च स्यन्दस्याप्राणिनि ॥२।३।५०॥ वेः स्कन्दोऽक्तयोः ॥२।३।५१॥ परेः ॥२।३।५२॥ निर्नेः स्फुरस्फुलोः ॥२।३।५३॥ वेः ॥ २।३।५४ ॥ स्कभ्नः ॥ २।३।५५ ॥ निर्दुःसुवेः समसूतेः ॥ २।३।५६ ॥ अवः स्वपः ॥ २।३।५७ ॥ प्रादुरुपसर्गाद्यस्वरेऽस्तेः ॥ २।३।५८ ॥ न स्सः ॥२।३।५९॥ सिचो यङि ॥२।३।६०॥ गतौ सेधः ॥२।३।६१॥ सुगः स्यसनि ॥२।३।६२॥ रषृवर्णान्नो ण प्रकपदेऽनन्त्यस्याऽलचटतवर्गशसान्तरे ॥२।३।६३॥ पूर्वपदस्थान्नाम्न्यगः ॥ २।३।६४ ॥ नसस्य ॥ २।३।६५ ॥ निष्प्राग्रेऽन्तःखदिरकाश्यांशरेक्षुप्लक्षपीयूक्षाभ्यो वनस्य ॥२।३।६६॥ द्वित्रिस्वरौषधिवृक्षेभ्यो नवाऽनिरिकादिभ्यः ॥२।३।६७॥ गिरिनद्यादीनाम् ॥२।३।६८॥ पानस्य भावकरणे ॥२।३।६९॥ देशे ॥२।३।७०॥ ग्रामाग्राण्नियः ॥२।३।७१॥ वाह्याद्वाहनस्य ॥२।३।७२॥ अतोऽङ्गस्य ॥२।३।७३॥ चतुर्ब्रे र्हायनस्य वयसि ॥२।३।७४॥ वोत्तरपदान्तस्यादेरयुवपकाङ्गः ॥ २।३।७५ ॥ कवर्गैकस्वरवति ॥२।३।७६॥ अदुरुपसर्गान्तरो णहिनुमीनानेः ॥२।३।७७॥ नशः शः ॥२।३।७८॥ नेर्ज्ञादिपतपदनदगदवपीवहीशमूचिग्यातिवातिद्रातिप्सातिस्यतिहन्तिदेग्धौ ॥२।३।७९॥ अकखाद्यपान्ते पाठे वा ॥ २।३।८० ॥ द्वित्वेऽप्यन्तेऽप्यनितेः परेस्तु वा ॥ २।३।८१ ॥ हनः ॥२।३।८२॥ वमि वा ॥२।३।८३॥ निंसनिक्षनिन्दः कृति वा ॥२।३।८४॥ स्वरात् ॥२।३।८५॥ नाम्यादेरेव ने ॥ २।३।८६ ॥ व्यञ्जनादेर्नाम्युपान्त्याद्वा ॥ २।३।८७ ॥ णेर्वा ॥२।३।८८ ॥ निर्विण्णः ॥२।३।८९॥ न रूयापूर्भूभ्राकम्गम्प्याय्वेपो णेश्च ॥२।३।९०॥ देशेऽन्तरोऽयनहनः ॥२।३।९१॥ घात्पदे ॥२।३।९२॥ पदेऽन्तरेऽनाङ्यतद्धिते ॥ २।३।९३ ॥ हनो घि ॥२।३।९४॥ नृतेर्यङि ॥२।३।९५॥ क्षुभ्नादीनाम् ॥२।३।९६॥ पाठे धात्वादेर्णो नः ॥२।३।९७॥षः सोऽष्टयैष्टिवष्वष्कः ॥२।३।९८॥ क्रर लल कृपोऽकृपीटादिषु ॥२।३।९९॥ उपसर्गस्यायौ ॥२।३।१००॥ ग्रो यङि ॥२।३।१०१॥ नवा स्वरे ॥२।३।१०२॥ परेर्घाङ्क्योगे ॥२।३।१०३॥ ऋफिडादीनां डश्च लः ॥२।३।१०४॥ जपादीनां पो बः ॥२।३।१०५॥

॥ इति द्वितीयाध्यायस्य तृतीयः पादः ॥

स्त्रियां नृतोऽस्वस्रादेर्ङीः ॥ २।४।१ ॥ अवातूदितः ॥ २।४।२ ॥ अञ्चः ॥२।४।३॥

णस्वराघोषाद्धनो रश्च ॥२।४।४॥ वा बहुव्रीहेः ॥२।४।५॥ वा पादः ॥२।४।६॥ ऊधसः ॥२।४।७॥ अशिशोः ॥२।४।८॥ संख्यादेर्हायनाद्व्यसि ॥२।४।९॥ दाम्नः ॥२।४।१०॥ अनो वा ॥२।४।११॥ नाम्नि ॥२।४।१२॥ नोपान्त्यवतः ॥२।४।१३॥ मनः ॥२।४।१४॥ ताभ्यां वाप् ङित् ॥ २।४।१५ ॥ अजादेः ॥ २।४।१६ ॥ ऋचि पादः पात्पदे ॥ २।४।१७॥ आत् ॥२।४।१८॥ गौरादिभ्यो मुख्यान् ङीः ॥२।४।१९॥ अणञेयेकण्नञ्स्नञ्टिताम् ॥२।४।२०॥ वयस्यनन्त्ये ॥२।४।२१॥ द्विगोः समाहारात् ॥२।४।२२॥ परिमाणात्तद्धितलुक्यबिस्ताचितकम्बल्यात् ॥२।४।२३॥ काण्डात्प्रमाणादक्षेत्रे ॥२।४।२४॥ पुरुषाद्वा ॥२।४।२५॥ रेवतरोहिणाद् मे ॥ २।४।२६ ॥ नीलात्प्राण्योषध्योः ॥ २।४।२७ ॥ क्वाच नाम्नि वा ॥ २।४।४८ ॥ केवलमामकभागधेयपापपरसमानार्यकृतसुमङ्गलभेषजात् ॥ २।४।२९ ॥ भाजगोणनागस्थलकुण्डकालकुशकामुककटकबरात् पक्वापनस्थूलाकृत्रिमामत्रकृष्णायसीरिसंसुश्रोणिकेशपाशे ॥५।४।३०॥ नद्या शोणादेः ॥२।४।३१॥ इतोऽक्त्यर्थात् ॥ २।४।३२ ॥ पङ्क्तेः ॥ २।४।३३ ॥ शक्तेः शस्त्रे ॥ २।४।३४ ॥ स्वरादुतो गुणादखरोः ॥ २।४।३५ ॥ श्येतैतहरितभरतरोहिताद्वर्णात्ता नश्च ॥ २।४।३६ ॥ क्नः पलितासितात् ॥ २।४।३७ ॥ असहनञ्विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः ॥ २।४।३८ ॥ नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात् ॥ २।४।३९ ॥ नखमुखादनाम्नि ॥२।४।४०॥ पुच्छात् ॥ २।४।४१ ॥ कबरमणिविषशरादेः ॥ २।४।४२ ॥ पक्षाच्चोपमादेः ॥ २।४।४३ ॥ क्रीतात् करणादेः ॥२।४।४४॥ क्तादल्पे ॥२।४।४५॥ स्वाङ्गादेरकृतमितजातप्रतिपन्नाद् बहुव्रीहेः ॥२।४।४६॥ अनाच्छादजात्यादेर्नवा ॥२।४।४७॥ पत्युर्नः ॥२।४।४८॥ सादेः ॥२।४।४९॥ सपत्न्यादौ ॥२।४।५०॥ ऊढायाम् ॥२।४।५१॥ पाणिगृहीतीति ॥२।४।५२॥ पतिवत्न्यन्तर्वत्न्यौ भार्यागर्भिण्योः ॥२।४।५३॥ जातेरयान्तनित्यस्त्रीशूद्रात् ॥२।४।५४॥ पाककर्णपर्णवालान्तात् ॥२।४।५५॥ असत्काण्डप्रान्तशतैकाश्चः पुष्पात् ॥ २।४।५६ ॥ असंभस्त्राजिनैकशणपिण्डात् फलात् ॥२।४।५७॥ अनञो मूलात् ॥२।४।५८॥ धवाद्योगादपालकान्तात् ॥२।४।५९॥ पूतक्रतुवृषाकप्यग्निकुसिदकुसीदादै च ॥२।४।६०॥ मनोरौ च वा ॥२।४।६१॥ वरुणेन्द्ररुद्रभवशर्वमृडादान् चान्तः ॥२।४।६२॥ मातुलाचार्योपाध्यायाद्वा ॥२।४।६३॥ सूर्यादेवतायां वा ॥२।४।६४॥ यवयवनारण्यहिमाद्दोषलिप्युरुमहत्त्वे ॥२।४।६५॥ अर्यक्षत्रियाद्वा ॥२।४।६६॥ यञो ङायन् च वा ॥२।४।६७॥ लोहितादिशकलान्तात् ॥ २।४।६८ ॥ षावटाद्वा ॥ २।४।६९ ॥ कौरव्यमाण्डूकासुरेः ॥२।४।७०॥ इञ इतः ॥२।४।७१॥ नुर्जातेः ॥२।४।७२॥ उतोऽप्राणिनश्चायुरज्ज्वादिभ्यऊङ् ॥२।४।७३॥ बाह्वन्तकद्रुकमण्डलोर्नाम्नि ॥२।४।७४॥ उपमानसहितसंहितसहशफ. वामलक्ष्मणाद्युरोः ॥२।४।७५॥ नारी सखी पङ्गू श्वश्रू ॥२।४।७६॥ यूनस्तिः ॥२।४।७७॥ अनार्षे वृद्धेऽणिञो बहुस्वरगुरूपान्त्यस्यान्त्यस्य च्यः ॥ २।४।७८ ॥ कुलाख्यानाम् ॥ २।४।७९ ॥ क्रौड्यादीनाम् ॥ २।४।८० ॥ भोजसूतयोः क्षत्रियायुवत्योः ॥ २।४।८१ ॥ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धेर्वा ॥२।४।८२॥ च्या पुत्रपत्योः केवलयोरीच् तत्पुरुषे ॥२।४।८३॥ बन्धौ बहुव्रीहौ ॥२।४।८४॥ मातमातृमातृके वा ॥२।४।८५॥ अस्य ङ्यां लुक् ॥ २।४।८६ ॥ मत्स्यस्य यः ॥ २।४।८७ ॥ व्यञ्जनात्तद्धितस्य ॥ २।४।८८ ॥

सूर्यागस्त्ययोरीये च ॥२।४।८९॥ तिष्यपुष्ययोर्भाणि ॥२।४।९०॥ आपत्यस्य क्यच्च्योः ॥ २।४।९१ ॥ तद्धितयस्वरेऽनाति ॥ २।४।९२ ॥ बिल्वकीयादेरीयस्य ॥ २।४।९३ ॥ न राजन्यमनुष्ययोरके ॥ २।४।९४ ॥ ङ्यादेर्गौणस्याक्षिपस्तद्धितलुक्यगोणीसूच्योः ॥२।४।९५॥ गोश्चान्ते ह्रस्वोऽनंशिसमासे यो बहुव्रीहौ ॥२।४।९६॥ क्लीबे ॥२।४।९७॥ वेदूतोऽनव्ययस्वृदीङ्डीयुवः पदे ॥२।४।९८॥ ङ्यापो बहुलं नाम्नि ॥२।४।९९॥ त्वे ॥२।४।१००॥ भ्रुवोऽच्च कुंसकुट्योः ॥२।४।१०१॥ मालेषीकेष्टकस्यान्तेऽपि भारित्-लचिते ॥२।४।१०२॥ गोण्या मेये ॥२।४।१०३॥ ङ्यादीदूतः के ॥२।४।१०४॥ न कचि ॥२।४।१०५॥ नवापः ॥२।४।१०६॥ इच्चापुंसोऽनित्क्याप्परे ॥२।४।१०७॥ स्वङ्गाजभस्त्रा-धातुत्ययकात् ॥ २।४।१०८ ॥ द्व्येषसूतपुत्रवृन्दारकस्य ॥ २।४।१०९ ॥ वौ वार्तिका ॥२।४।११०॥ अस्यायत्तक्षिपकादीनाम् ॥२।४।१११॥ नरिका मामिका ॥ २।४।११२ ॥ तारका वर्णकाष्टका ज्योतिस्तान्तषपितृदैवत्ये ॥२।४।११३॥

॥ इति द्वितीयाध्यायस्य चतुर्थः पादः ॥

॥ अथ तृतीयोऽध्यायः ॥

धातोः पूजार्थस्यतिगतार्थाधिपर्यतिक्रमार्थातिवर्जः प्रादिरुपसर्गः प्राक् च ॥ ३।१।१ ॥ ऊर्याद्यनुकरणश्विडाचश्च गतिः ॥३।१।२॥ कारिका स्थित्यादौ ॥३।१।३॥ भूषादरक्षेपेऽलंसदत् ॥ ३।१।४ ॥ अग्रहानुपदेशेऽन्तरदः ॥ ३।१।५ ॥ कर्णेमनस्तृप्तौ ॥ ३।१।६ ॥ पुरोऽस्तमव्ययम् ॥ ३।१।७ ॥ गत्यर्थवदोऽच्छः ॥ ३।१।८ ॥ तिरोऽन्तर्धौ ॥३।१।९॥ कृगो नवा ॥३।१।१०॥ मध्येपदेनिवचनेमनस्युरस्यनत्याधाने ॥३।१।११॥ उपाजेऽन्वाजे ॥३।१।१२॥ स्वाम्येऽधिः ॥३।१।१३॥ साक्षादादिरुच्चयर्थे ॥३।१।१४॥ नित्यं हस्तेपाणावुद्ग्राहे ॥३।१।१५॥ प्राध्वं बन्धे ॥३।१।१६॥ जीविकोपनिषदौपम्ये ॥३।१।१७॥ नाम नाम्नैकार्थ्ये समासो बहुलम् ॥३।१।१८॥ सुज्वार्थे संख्या संख्येये संख्यया बहुव्रीहिः ॥३।१।१९॥ आसन्नादूराधिकाध्यर्धार्धादिपूरणं द्वितीयाद्यन्यार्थे ॥३।१।२०॥ अव्ययम् ॥३।१।२१॥ एकार्थं चानेकं च ॥३।१।२२॥ उष्ट्रमुखादयः॥३।१।२३॥ सहस्तेन ॥३।१।२४॥ दिशो रूढयान्तराले ॥३।१।२५॥ तत्रादाय मिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः ॥३।१।२६॥ नदीभिर्नाम्नि ॥३।१।२७॥ संख्या समाहारे ॥ ३।१।२८ ॥ वंश्येन पूर्वार्थे ॥ ३।१।२९ ॥ पारे मध्येऽग्रेऽन्तः षष्ठ्या वा ॥ ३।१।३० ॥ यावदियत्त्वे ॥३।१।३१॥ पर्यपाङ्बहिरच् पञ्चम्या ॥३।१।३२॥ लक्षणेनाभिप्रत्याभि-मुख्ये ॥३।१।३३॥ दैर्घ्येऽनुः ॥३।१।३४॥ समीपे ॥३।१।३५॥ तिष्ठद्ग्वित्यादयः ॥३।१।३६॥ नित्यं प्रतिनाल्पे ॥ ३।१।३७ ॥ संख्याशलाकं परिणा द्यूतेऽन्यथावृत्तौ ॥ ३।१।३८ ॥ विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिपश्चात्क्रमख्यातियुगपत्सदृक्संपत्-साकल्यान्तेऽव्ययम् ॥३।१।३९॥ योग्यतावीप्सार्थानतिवृत्तिसादृश्ये ॥३।१।४०॥ यथाऽथा ॥३।१।४१॥ गतिरन्यस्तत्पुरुषः ॥३।१।४२॥ दुर्निन्दाकृच्छ्रे ॥३।१।४३॥ सुः पूजायाम् ॥३।१।४४॥ अतिरतिक्रमे च ॥३।१।४५॥ आङ्लपे ॥३।१।४६॥ प्रात्यवपरिनिरादयो

गतकान्तक्रुष्टग्लानक्रान्ताद्यर्थाः प्रथमाद्यन्तैः ॥ ३।१।४७ ॥ अव्ययं प्रवृद्धादिभिः ॥ ३।१।४८ ॥ ङस्युक्तं कृता ॥ ३।१।४९ ॥ तृतीयोक्तं वा ॥ ३।१।५० ॥ नञ् ॥ ३।१।५१ ॥ पूर्वापराधरोत्तरमभिन्नेनांशिना ॥३।१।५२॥ सायाह्नादयः ॥३।१।५३॥ समेऽशेऽर्धं नवा ॥३।१।५४॥ जरत्यादिभिः ॥३।१।५५॥ द्वित्रिचतुष्पूरणाद्यादयः ॥३।१।५६॥ कालो द्विगौ च मेयैः ॥३।१।५७॥ स्वयंसामी कृतेन ॥३।१।५८॥ द्वितीया खट्वा क्षेपे ॥३।१।५९॥ कालः ॥ ३।१।६० ॥ व्याप्तौ ॥ ३।१।६१ ॥ श्रितादिभिः ॥ ३।१।६२ ॥ प्राप्तापन्नौ तयाच्च ॥ ३।१।६३ ॥ ईषद्गुणवचनैः ॥३।१।६४॥ तृतीया तत्कृतैः ॥ ३।१।६५ ॥ चतस्रार्थम् ॥३।१।६६॥ ऊनार्थपूर्वाद्यैः ॥३।१।६७॥ कारकं कृता ॥३।१।६८॥ नविंशत्यादिनैकोऽचान्तः ॥३।१।६९॥ चतुर्थी प्रकृत्या ॥३।१।७०॥ हितादिभिः ॥३।१।७१॥ तदर्थार्थेन ॥३।१।७२॥ पञ्चमी भयाद्यैः ॥ ३।१।७३ ॥ क्तेनाऽसत्वे ॥ ३।१।७४ ॥ परःशतादिः ॥ ३।१।७५ ॥ षष्ठ्ययत्नाच्छेषे ॥ ३।१।७६ ॥ कृति ॥३।१।७७॥ याजकादिभिः ॥३।१।७८॥ पत्तिरर्थौ गणकेन ॥ ३।१।७९ ॥ सर्वपश्चादादयः ॥ ३।१।८० ॥ अकेन क्रीडाजीवे ॥ ३।१।८१ ॥ न कर्तरि ॥३।१।८२॥ कर्मजा तृचा च ॥३।१।८३॥ तृतीयायाम् ॥३।१।८४॥ तृप्तार्थपूरणाव्ययाऽतृशृशत्रानशा ॥३।१।८५॥ ज्ञानेच्छार्चार्थाधारक्तेन ॥३।१।८६॥ अस्वस्थगुणैः ॥३।१।८७॥ सप्तमी शौण्डाद्यैः ॥३।१।८८॥ सिंहाद्यैः पूजायाम् ॥३।१।८९॥ काकाद्यैः क्षेपे ॥३।१।९०॥ पात्रेसमितेत्यादयः ॥३।१।९१॥ कृतेन ॥३।१।९२॥ तत्राहोरात्रांशम् ॥ ३।१।९३ ॥ नाम्नि ॥ ३।१।९४ ॥ कृद्येनावश्यके ॥३।१।९५॥ विशेषणं विशेष्येणैकार्थे कर्मधारयश्च ॥३।१।९६॥ पूर्वकालैकसर्वजरत्पुराणनवकेवलम् ॥ ३।१।९७ ॥ दिगधिकं संज्ञातद्धितोत्तरपदे ॥ ३।१।९८ ॥ संख्या समाहारे च द्विगुश्चानाम्न्ययम् ॥ ३।१।९९ ॥ निन्द्यं कुत्सनैरपापाद्यैः ॥ ३।१।१०० ॥ उपमानं सामान्यैः ॥३।१।१०१॥ उपमेयं व्याघ्राद्यैः साम्यानुक्तौ ॥ ३।१।१०२ ॥ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम् ॥ ३।१।१०३ ॥ श्रेण्यादिकृताद्यैश्च्व्यर्थे ॥ ३।१।१०४ ॥ कं नञादिभिश्चैः ॥३।१।१०५॥ सेडनादिना ॥३।१।१०६॥ सन्महत्परमोत्तमोत्कृष्टं पूजायाम् ॥३।१।१०७॥ वृन्दारकनागकुञ्जरैः ॥ ३।१।१०८ ॥ कतरकतमौ जातिप्रश्ने ॥ ३।१।१०९ ॥ किं क्षेपे ॥ ३।१।११० ॥ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यायकधूर्तप्रशंसारूढैर्जातिः ॥३।१।१११॥ चतुष्पाद्गर्भिण्या ॥३।१।११२॥ युवा खलतिपलितजरद्वलिनैः ॥ ३।१।११३ ॥ कृत्यतुल्याख्यमजात्या ॥ ३।१।११४ ॥ कुमारः श्रमणादिना ॥३।१।११५॥ मयूरव्यंसकेत्यादयः ॥३।१।११६॥ चार्थे द्वन्द्वः सहोक्तौ ॥ ३।१।११७ ॥ समानामर्थेनैकः शेषः ॥ ३।१।११८ ॥ स्यादावसंख्येयः ॥ ३।१।११९ ॥ त्यदादिः ॥ ३।१।१२० ॥ भ्रातृपुत्राः स्वसृदुहितृभिः ॥ ३।१।१२१ ॥ पिता मात्रा वा ॥३।१।१२२॥ श्वशुरः श्वश्रूभ्यां वा ॥३।१।१२३॥ वृद्धो यूना तन्मात्रमेदे ॥३।१।१२४॥ स्त्री पुंवच्च ॥३।१।१२५॥ पुरुषः स्त्रिया ॥३।१।१२६॥ ग्राम्याशिशुद्विशफसंघे स्त्री प्रायः ॥ ३।१।१२७ ॥ क्लीबमन्येनैकं च वा ॥ ३।१।१२८ ॥ पुष्यार्थाद् मे पुनर्वसुः ॥३।१।१२९॥ विरोधिनामद्रव्याणां नवा द्वन्द्वः स्वैः ॥३।१।१३०॥ अश्ववडवपूर्वापराधरोत्तराः ॥३।१।१३१॥ पशुद्यज्ञनानाम् ॥३।१।१३२॥ तरुतृणधान्यमृगपक्षिणां

बहुत्वे ॥३।१।१३३॥ सेनाङ्क्षुद्रजन्तूनाम् ॥३।१।१३४॥ फलस्य जातौ ॥३।१।१३५॥ अप्राणिपश्वादेः ॥३।१।१३६॥ प्राणितूर्याङ्गाणाम् ॥३।१।१३७॥ चरणस्य स्थेणोऽयतन्यामनुवादे ॥३।१।१३८॥ अक्षीवेऽध्वर्युक्रतोः ॥३।१।१३९॥ निकटपाठस्य ॥३।१।१४०॥ नित्यवैरस्य ॥३।१।१४१॥ नदीदेशपुरां विलिङ्गानाम् ॥ ३।१।१४२ ॥ पाल्यशूद्रस्य ॥ ३।१।१४३ ॥ गवाश्वादिः ॥ ३।१।१४४ ॥ न दधिपयआदिः ॥३।१।१४५॥ संख्याने ॥ ३।१।१४६ ॥ वान्तिके ॥ ३।१।१४७ ॥ प्रथमोक्तं प्राक् ॥३।१।१४८॥ राजदन्तादिषु ॥ ३।१।१४९ ॥ विशेषणसर्वादिसंख्यं बहुव्रीहौ ॥ ३।१।१५० ॥ क्तः ॥ ३।१।१५१ ॥ जातिकालसुखादेर्नवा ॥ ३।१।१५२ ॥ आहिताग्न्यादिषु ॥ ३।१।१५३ ॥ प्रहरणात् ॥३।१।१५४॥ न सप्तमीन्द्रादिभ्यश्च ॥३।१।१५५॥ गड्वादिभ्यः ॥३।१।१५६॥ प्रियः ॥३।१।१५७॥ कडारादयः कर्मधारये ॥३।१।१५८॥ धर्मार्थादिषु द्वन्द्वे ॥३।१।१५९॥ लघ्वक्षरासखीदुत्स्वराद्यदल्पस्वरार्च्यमेकम् ॥ ३।१।१६० ॥ मासवर्णश्रात्रनुपूर्वम् ॥३।१।१६१॥ भर्तुतुल्यस्वरम् ॥३।१।१६२॥ संख्या समासे ॥३।१।१६३॥

॥ इति तृतीयाध्यायस्य प्रथमः पादः ॥

परस्परान्योन्येतरेतरस्यां स्यादेर्वाऽपुंसि ॥ ३।२।१ ॥ अमव्ययीभावस्यातोऽपञ्चम्याः ॥३।२।२॥ वा तृतीयायाः ॥३।२।३॥ सप्तम्या वा ॥३।२।४॥ ऋद्धनदीवंश्यस्य ॥३।२।५॥ अनतो लुप् ॥३।२।६॥ अव्ययस्य ॥३।२।७॥ ऐकार्थ्ये ॥३।२।८॥ न नाम्येकस्वरात् खित्युत्तरपदेऽमः ॥३।२।९॥ असत्त्वे ङसेः ॥३।२।१०॥ ब्राह्मणाच्छंसी ॥ ३।२।११ ॥ ओजोऽङ्गःसहोऽम्भस्तमस्तपसष्टः ॥ ३।२।१२ ॥ पुंजनुषोऽनुजान्धे ॥ ३।२।१३ ॥ आत्मनः पूरणे ॥ ३।२।१४ ॥ मनसश्चाज्ञायिनि ॥ ३।२।१५ ॥ नाम्नि ॥३।२।१६॥ परात्मभ्यां ङेः ॥३।२।१७॥ अद्व्यञ्जनात् सप्तम्या बहुलम् ॥३।२।१८॥ प्राक्कारस्य व्यञ्जने ॥३।२।१९॥ तत्पुरुषे कृति ॥३।२।२०॥ मध्यान्ताद् गुरौ ॥३।२।२१॥ अमूर्धमस्तकात् स्वाङ्गादकामे ॥३।२।२२॥ बन्धे घजि न वा ॥३।२।२३॥ कालात्ससनतरतमकाले ॥ ३।२।२४ ॥ शयवासिवासेष्वकालात् ॥३।२।२५॥ वर्षक्षरवराप्सरःशरोरोमनसो जे ॥ ३।२।२६ ॥ शुप्रावृड्वर्षाशरत्कालात् ॥३।२।२७॥ अपो भयोनिमतिचरे ॥३।२।२८॥ नेन्सिद्धस्थे ॥३।२।२९॥ षष्ठ्याः क्षेपे ॥३।२।३०॥ पुत्रे वा ॥३।२।३१॥ पश्यद्वाग्दिशो हरयुक्तिदण्डे ॥३।२।३२॥ अदसोऽकञायनणोः ॥३।२।३३॥ देवानां प्रियः ॥३।२।३४॥ शेपपुच्छलाङ्गूलेषु नाम्नि शुनः ॥३।२।३५॥ बाचस्पतिबास्तोष्पतिदिवस्पतिदिवोदासम् ॥ ३।२।३६ ॥ ऋतां विद्यायोनिसंबन्धे ॥३।२।३७॥ स्वसृपत्योर्वा ॥३।२।३८॥ आ द्वन्द्वे ॥३।२।३९॥ पुत्रे ॥३।२।४०॥ वेदसहश्रुतावायुदेवतानाम् ॥ ३।२।४१ ॥ ईःषोमवरुणेऽग्नेः ॥ ३।२।४२ ॥ इर्वृद्धिमत्यविष्णौ ॥३।२।४३॥ दिवो द्यावा ॥३।२।४४॥ दिवस्दिवः पृथिव्यां वा ॥३।२।४५॥ उषासोषसः ॥३।२।४६॥ मातरपितरं वा ॥३।२।४७॥ वर्चस्कादिष्ववस्करादयः ॥३।२।४८॥ परतः स्त्रीपुंवत् स्त्र्येकार्थेऽनूङ् ॥ ३।२।४९ ॥ क्यङ्मानिपित्तद्धिते ॥ ३।२।५० ॥ जातिश्च णितद्धितयस्वरे ॥३।२।५१॥ एयेऽग्रायी ॥३।२।५२॥ नाप्रियादौ ॥३।२।५३॥ तद्धिताककोपान्त्यपूरण्याख्याः ॥ ३।२।५४ ॥ तद्धितः स्वरवृद्धिहेतुररक्तविकारे ॥ ३।२।५५ ॥

स्वाङ्गान्ङीर्जातिश्चामानिनि ॥३।२।५६॥ पुंवत्कर्मधारये ॥३।२।५७॥ रिति ॥३।२।५८॥ त्वते गुणः ॥३।२।५९॥ च्वौ क्वचित् ॥३।२।६०॥ सर्वादयोऽस्यादौ ॥३।२।६१॥ मृगक्षी-रादिषु वा ॥ ३।२।६२ ॥ ऋदुदित्तरतमरूपकल्पब्रुवचेलड्गोत्रमहते वा ह्रस्वश्च ॥ ३।२।६३ ॥ ङ्यः ॥ ३।२।६४ ॥ भोगवद्गौरिमतोर्नाञ्चि ॥ ३।२।६५ ॥ नवैकस्वराणाम् ॥ ३।२।६६ ॥ ऊङः ॥ ३।२।६७ ॥ महतः करघासविशिष्टे डाः ॥ ३।२।६८ ॥ स्त्रियाम् ॥३।२।६९॥ जातीयेकार्थे च्वेः ॥३।२।७०॥ न पुंवन्निषेधे ॥३।२।७१॥ इच्यस्वरे दीर्घ आच्च ॥ ३।२।७२ ॥ हविष्यष्टनः कपाले ॥३।२।७३॥ गवि युक्ते ॥ ३।२।७४ ॥ नाम्नि ॥३।२।७५॥ कोटरमिश्रकसिध्रकपुरगसारिकस्य वणे ॥३।२।७६॥ अञ्जनादीनां गिरौ ॥ ३।२।७७ ॥ अनजिरादिबहुस्वरशरादीनां मतौ ॥ ३।२।७८ ॥ ऋषौ विश्वस्य मित्रे ॥३।२।७९॥ नरे ॥३।२।८०॥ वसुराटोः ॥३।२।८१॥ वलच्यपित्रादेः ॥३।२।८२॥ चितेः कचि ॥३।२।८३॥ स्वामिचिन्हस्याविष्टाष्टपञ्चभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य कर्णे ॥३।२।८४॥ गतिकारकस्य नहिवृतिवृषिव्यधिरुचिसहितनौ कौ ॥३।२।८५॥ घञ्युप-सर्गस्य बहुलम् ॥३।२।८६॥ नामिनः काशे ॥३।२।८७॥ दस्ति ॥३।२।८८॥ अपील्वा-देर्वहे ॥३।२।८९॥ शुनः ॥३।२।९०॥ एकादश षोडश षोडन् षोढा षड्ढा ॥३।२।९१॥

द्वित्र्यष्टानां द्वात्रयोऽष्टाः प्राक्शताद्दनशीतिबहुव्रीहौ ॥३।२।९२॥ चत्वारिंशदादौ वा ॥३।२।९३॥ हृदयस्य हृल्लासलेखाण्ये ॥३।२।९४॥ पदः पादस्याज्यातिगोपहते ॥३।२।९५॥ हिमहतिकाषिये पत् ॥३।२।९६॥ ऋचः शसि ॥३।२।९७॥ शब्दनिष्कघोषमिश्रे वा ॥३।२।९८॥ नस् नासिकायास्तः क्षुद्रे ॥३।२।९९॥ येऽवर्णे ॥३।२।१००॥ शिरसः शीर्षन् ॥३।२।१०१॥ केशे वा ॥३।२।१०२॥ शीर्षः स्वरे तद्धिते ॥३।२।१०३॥ उदक-स्योदः पेषंधिवासवाहने ॥३।२।१०४॥ वैकल्यञ्जने पूर्ये ॥३।२।१०५॥ मन्थोदनसक्तु-बिन्दुवज्रभारहारवीवधगाहे वा ॥३।२।१०६॥ नाम्न्युत्तरपदस्य च ॥३।२।१०७॥ ते लुग्वा ॥३।२।१०८॥ ह्यन्तरनघणेपसर्गादप ईप् ॥३।२।१०९॥ अनोर्देश उप् ॥३।२।११०॥ खित्यनव्ययारुषोर्मोऽन्तो ह्रस्वश्च ॥ ३।२।१११ ॥ सत्यागदास्तोः कारे ॥ ३।२।११२ ॥ लोकंपृणमध्यंदिनानभ्याशमित्यम् ॥ ३।२।११३ ॥ आष्ट्राग्नेरिन्धे ॥ ३।३।११४ ॥ अगिलाद्गिलगिलगिलयोः ॥३।२।११५॥ भद्रोष्णात्करणे ॥३।२।११६॥ नवाऽखित्कृदन्ते रात्रेः ॥३।२।११७॥ धेनोर्भव्यायाम् ॥३।२।११८॥ अषष्ठीतृतीयादन्याद्योऽर्थे ॥३।२।११९॥

आशीराशास्थितास्थोत्सुकोतिरागे ॥३।२।१२०॥ ईयकारके ॥३।२।१२१॥ सर्वादिवि-श्वग्देवाड् डद्रिः कव्यञ्चौ ॥३।२।१२२॥ सहसमः सधिसमि ॥३।२।१२३॥ तिरसस्तिर्यति ॥३।२।१२४॥ नञत् ॥३।२।१२५॥ त्यादौ क्षेपे ॥३।२।१२६॥ नगोऽप्राणिनि वा ॥३।२।१२७॥ नखादयः ॥ ३।२।१२८ ॥ अनश्वरे ॥ ३।२।१२९ ॥ कोः कत्तत्पुरुषे ॥ ३।२।१३० ॥ रथवदे ॥३।२।१३१॥ तृणे जातौ ॥३।२।१३२॥ कत्रिः॥३।२।१३३॥ काक्षपथोः ॥३।२।१३४॥ पुरुषे वा ॥३।२।१३५॥ अल्पे ॥३।२।१३६॥ काकवी वोष्णे ॥३।२।१३७॥ कृत्येऽवश्यमो लुक् ॥ ३।२।१३८ ॥ समस्ततद्धिते वा ॥ ३।२।१३९ ॥ तुमश्च मनःकामे ॥३।२।१४०॥ मांसस्यानट्घञि पचि नवा ॥ ३।२।१४१ ॥ दिक्शब्दात्तोरस्य तारः ॥ ३।२।१४२ ॥ सहस्य सोऽन्यार्थे ॥ ३।२।१४३ ॥ नाम्नि ॥ ३।२।१४४ ॥ अदृश्याधिके ॥ ३।२।१४५ ॥

अकालेऽव्ययीभावे ॥ ३।२।१४६ ॥ ग्रन्थान्ते ॥ ३।२।१४७ ॥ नाशिष्यगोवत्सहले ॥३।२।१४८॥ समानस्य धर्मादिषु ॥३।२।१४९॥ सब्रह्मचारी ॥३।२।१५०॥ दृग्दृशदृक्षे ॥३।२।१५१॥ अन्यत्यदादेरा ॥३।२।१५२॥ इदंकिमोत्कोः ॥३।२।१५३॥ अनञः क्त्वो यप् ॥३।२।१५४॥ पृषोदरादयः ॥ ३।२।१५५ ॥ वावाप्योस्तनिक्रीधान्नहोर्वपौ ॥३।२।१५६॥

॥ इति तृतीयाध्यायस्य द्वितीयः पादः ॥

वृद्धिरारैदौत् ॥३।३।१॥ गुणोऽरेदोत् ॥३।३।२॥ क्रियार्थो धातुः ॥३।३।३॥ न प्रादिरप्रत्ययः ॥ ३।३।४ ॥ अवौ दाधौ दा ॥ ३।३।५ ॥ वर्तमाना तिव् तस् अन्ति सिव् थस् थ मिव् वस् मस् ते आते अन्ते से आथे ध्वे ए वहे महे ॥३।३।६॥ सप्तमी यात् याताम् युस् यास् यातम् यात याम् याव याम ईत ईयाताम् ईरन् ईथास् ईयाथाम् ईध्वम् ईय ईवहि ईमहि ॥३।३।७॥ पञ्चमी तुव् ताम् अन्तु हि तम् त आनिव् आवव् आमव् ताम् आताम् अन्ताम् स्व आथाम् ध्वम् ऐव् आवहैव् आमहैव् ॥३।३।८॥ ह्यस्तनो दिव् ताम् अन् सिव् तम् त अम्व् व म त आताम् अन्त थास् आथाम् ध्वम् इ वहि महि ॥३।३।९॥ पताः शितः ॥३।३।१०॥ अद्यतनी दि ताम् अन् सि तम् त अम् व म त आताम् अन्त थास् आथाम् ध्वम् इ वहि महि ॥३।३।११॥ परोक्षा णव् अतुस् उस् थव् अथुस् अ णव् व म ए आते ईरे से आथे ध्वे ए वहे महे ॥३।३।१२॥ आशीः क्यात् क्यास्ताम् क्यासुस् क्यास् क्यास्तम् क्यास्त क्यासम् क्यास्व क्यास्म सीष्ट सोयास्ताम् सीरन् सीष्ठास् सीयास्थाम् सीध्वम् सीय सीवहि सीमहि ॥३।३।१३॥ श्वस्तनी ता तारौ तारस् तासि तास्थस् तास्थ तास्मि तास्वस् तास्मस् ता तारौ तारस् तासे तासाथे ताध्वे ताहे तास्वहे तास्महे ॥३।३।१४॥ भविष्यन्तो स्यति स्यतस् स्यन्ति स्यसि स्यथस् स्यथ स्यामि स्यावस् स्यामस् स्यते स्येते स्यन्ते स्यसे स्येथे स्यध्वे स्ये स्यावहे स्यामहे ॥ ३।३।१५ ॥ क्रियातिपत्तिः स्यत् स्यताम् स्यन् स्यस् स्यतम् स्यत स्यम् स्याव स्याम स्यत स्येताम् स्यन्त स्यथास् स्येथाम् स्यध्वम् स्ये स्यावहि स्यामहि ॥३।३।१६॥ श्रोणि त्रीण्यन्ययुष्मदस्मदि ॥३।३।१७॥ एकद्विबहुषु ॥३।३।१८॥ नवाद्यानि शतृकस् च परस्मैपदम् ॥३।३।१९॥॥ पराणि कानाशौ चात्मनेपदम् ॥३।३।२०॥ तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्च ॥३।३।२१॥ इङ्जितः कर्तरि ॥ ३।३।२२ ॥ क्रियाव्यतिहारेऽगतिर्हिंसाशब्दार्थहसो हृवहश्चानन्योन्यार्थे ॥ ३।३।२३ ॥ निविशः ॥ ३।३।२४ ॥ उपसर्गादस्योहो वा ॥ ३।३।२५ ॥ उत्स्वराद्युजेरयज्ञतत्पात्रे ॥ ३।३।२६ ॥ परिव्यवात्क्रियः ॥३।३।२७॥ परावेर्जेः ॥३।३।२८॥ समः क्ष्णोः ॥३।३।२९॥ अपरिकरः ॥३।३।३०॥ उदश्वरः साप्यात् ॥३।३।३१॥ समस्तृतीयया ॥३।३।३२॥ क्रीडोऽकूजने ॥ ३।३।३३ ॥ अन्वाङ्परेः ॥ ३।३।३४ ॥ शप उपलम्भने ॥ ३।३।३५ ॥ आशिषि नाथः ॥३।३।३६॥ भुनजोऽत्राणे ॥३।३।३७॥ हृगो गतताच्छील्ये ॥३।३।३८॥ पूजार्थकभृत्युत्क्षेपज्ञानविगणनव्यये नियः ॥३।३।३९॥ कर्तुस्थामूर्ताप्यात् ॥३।३।४०॥ शदेः शिति ॥३।३।४१॥ म्रियतेरद्यतन्याशिषि च ॥३।३।४२॥ क्यङ्क्षो नवा ॥३।३।४३॥ द्युद्भ्योऽद्यतन्याम् ॥ ३।३।४४ ॥ वृद्भ्यः स्यसनोः ॥ ३।३।४५ ॥ कृपः श्वस्तन्याम्

॥३।३।४६॥ क्रमोऽनुपसर्गात् ॥३।३।४७॥ वृत्तिसर्गतायने ॥३।३।४८॥ परोपात् ॥३।३।४९॥ वेः स्वार्थे ॥ ३।३।५० ॥ प्रोपादारम्भे ॥ ३।३।५१ ॥ आङो ज्योतिरुद्गमे ॥ ३।३।५२ ॥ दागोऽस्वास्यप्रसारविकासे ॥३।३।५३॥ नुप्रच्छः ॥३।३।५४॥ गमेः क्षान्तौ ॥३।३।५५॥ ह्वः स्पर्धे ॥३।३।५६॥ संनिवेः ॥३।३।५७॥ उपात् ॥३।३।५८॥ यमः स्वीकारे ॥३।३।५९॥ देवार्चामैत्रीसंगमपथिकर्तृकमन्त्रकरणे स्थः ॥३।३।६०॥ वा लिप्सायाम् ॥३।३।६१॥ उदोऽनूर्ध्वैहे ॥३।३।६२॥ संविप्रावात् ॥३।३।६३॥ क्षीप्सास्थेये ॥३।३।६४॥ प्रतिज्ञायाम् ॥ ३।३।६५ ॥ समो गिरः ॥ ३।३।६६ ॥ अवात् ॥ ३।३।६७ ॥ निह्नवे ज्ञः ॥ ३।३।६८ ॥ संप्रतेरस्मृतौ ॥ ३।३।६९ ॥ अननोः सनः ॥ ३।३।७० ॥ श्रुवोऽनाङ्प्रतेः ॥ ३।३।७१ ॥ स्मृदृशः ॥३।३।७२॥ शको जिज्ञासायाम् ॥३।३।७३॥ प्राग्वत् ॥३।३।७४॥ आमः कृगः ॥३।३।७५॥ गन्धनावक्षेपसेवासाहसप्रतियत्नप्रकथनोपयोगे ॥३।३।७६॥ अधेः प्रसहने ॥ ३।३।७७ ॥ दीप्तिज्ञानयत्नविमत्युपसंभाषोपमन्त्रणे वदः ॥ ३।३।७८ ॥ व्यक्तवाचां सहोक्तौ ॥३।३।७९॥ विवादे वा ॥३।३।८०॥ अनोः कर्मण्यसति ॥३।३।८१॥ ज्ञः ॥३।३।८२॥ उपात् स्थः ॥३।३।८३॥ समो गमृच्छिप्रच्छिश्रुविद्स्वरत्यर्तिदृशः ॥३।३।८४॥ वेः कृगः शब्दे चानाशे ॥३।३।८५॥ आङो यमहनः स्वेऽङ्गे च ॥३।३।८६॥ व्युदस्तपः ॥३।३।८७॥ अणिकर्मणिकर्तृकाण्णिगोऽस्मृतौ ॥३।३।८८॥ प्रलम्भे गृधिवञ्चेः ॥३।३।८९॥ लीङ्लिनोऽर्चाभिभवे चाचाकर्तर्यपि ॥३।३।९०॥ स्मिङः प्रयोक्तुः स्वार्थे ॥ ३।३।९१ ॥ बिभेतेर्भीष् च ॥३।३।९२॥ मिथ्याकृगोऽभ्यासे ॥ ३।३।९३ ॥ परिमुहायमायसपाट्धेवदवसदमादरुचनृतः फलवति ॥ ३।३।९४ ॥ ईगितः ॥ ३।३।९५ ॥ क्ष्वोऽनुपसर्गात् ॥३।३।९६॥ वदोऽपात् ॥३।३।९७॥ समुदाङो यमेरग्रन्थे ॥३।३।९८॥ पदान्तरगम्ये वा ॥३।३।९९॥ शेषात् परस्मै ॥३।३।१००॥ परानोः कृगः ॥३।३।१०१॥ प्रत्यभ्यतेः क्षिपः ॥३।३।१०२॥ प्राद्वहः ॥३।३।१०३॥ परेर्मृषश्च ॥३।३।१०४॥ व्याङ्परे रमः ॥३।३।१०५॥ वोपात् ॥३।३।१०६॥ अणिगि प्राणिकर्तृकानाप्याण्णिगः ॥३।३।१०७॥ चल्याहारार्थेङ्वुधयुधप्रुद्रुश्रुनशजनः ॥३।३।१०८॥

॥ इति तृतीयाध्यायस्य तृतीयः पाद. ॥

गुपौ धूपविच्छिपणिपनेरायः ॥३।४।१॥ कमेर्णिङ् ॥३।४।२॥ क्तेर्डीयः ॥३।४।३॥ अशवि ते वा ॥३।४।४॥ गुप्तिजो गर्हाक्षान्तौ सन् ॥३।४।५॥ कितः संशयप्रतीकारे ॥ ३।४।६ ॥ शान्दान्मान्बधान्निशानार्जवविचारवैरूप्ये दीर्घश्चेतः ॥३।४।७॥ धातोः कण्ड्वादेर्यक् ॥३।४।८॥ व्यञ्जनादेकस्वराद्भृशाभीक्ष्ण्ये यङ् वा ॥३।४।९॥ अटयर्तिसूत्रिमूत्रिसूच्यशूर्णोः ॥३।४।१०॥ गत्यर्थात् कुटिले ॥३।४।११॥ गृलुपसदचरजपजभदशदहो गर्ह्ये ॥३।४।१२॥ न गृणाशुभरुचः ॥३।४।१३॥ बहुलं लुप् ॥३।४।१४॥ अचि ॥३।४।१५॥ नोतः ॥३।४।१६॥ चुरादिभ्यो णिच् ॥३।४।१७॥ युजादेर्नवा ॥३।४।१८॥ भूङः प्राप्तौ णिङ् ॥३।४।१९॥ प्रयोक्तृव्यापारे णिग् ॥३।४।२०॥ तुमर्हादिच्छायां सन्नतत्सनः ॥ ३।४।२१ ॥ द्वितीयायाः काम्यः ॥ ३।४।२२ ॥ अमाव्ययात् क्यन् च ॥३।४।२३॥ आधाराच्चोपमानादाचारे ॥३।४।२४॥ कर्तुः क्विप् गल्भक्लीवहोडात्तु ङित् ॥३।४।२५॥ क्यङ् ॥३।४।२६॥ सो वा लुक् च ॥३।४।२७॥ ओजोऽप्सरसः ॥३।४।२८॥

च्व्यर्थे भृशादेः स्तोः ॥३।४।२९॥ डाच्लोहितादिभ्यः क्षित् ॥३।४।३०॥ कष्टकक्षकृच्छ्रसत्रगहनाय पापे क्रमणे ॥ ३।४।३१ ॥ रोमन्थाद् व्याप्यादुच्चर्वणे ॥ ३।४।३२ ॥ फेनोष्मबाष्पधूमादुद्गमने ॥३।४।३३॥ सुखादेरनुभवे ॥ ३।४।३४ ॥ शब्दादेः कृतौ वा ॥३।४।३५॥ तपसः क्यन् ॥३।४।३६॥ नमोवरिवश्चित्रङोऽर्चासेवाश्चर्ये ॥३।४।३७॥ अङ्गान्निरसने णिङ् ॥३।४।३८॥ पुच्छादुत्परिव्यसने ॥३।४।३९॥ भाण्डात् समाचितौ ॥३।४।४०॥ चीवरात् परिधार्जने ॥३।४।४१॥ णिज् बहुलं नाम्नः कृगादिषु ॥३।४।४२॥ व्रताद् भुजितन्निवृत्त्योः ॥३।४।४३॥ सत्यार्थवेदस्याः ॥३।४।४४॥ श्वेताश्वाश्वतरगालोडिताह्वरकस्याश्वतरेतकलुक् ॥ ३।४।४५ ॥धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम् ॥३।४।४६॥ दयायासकासः ॥३।४।४७॥ गुरुनाम्यादेरनृच्छृणेः ॥३।४।४८॥ जागुरुसमिन्धेर्नवा ॥३।४।४९॥ भीह्रीभृहोस्तिव्वत् ॥३।४।५०॥ वेत्तेः कित् ॥३।४।५१॥ पञ्चम्याः कृग् ॥३।४।५२॥ सिजद्यतन्याम् ॥३।४।५३॥ स्पृशमृशकृशदृपदपो वा ॥३।४।५४॥ हृशिटो नाम्युपान्त्यादहशोऽनिटः सक् ॥३।४।५५॥ स्निषः ॥ ३।४।५६ ॥ नासत्वाश्लेषे ॥ ३।४।५७ ॥ णिश्रिद्रुस्रुकमः कर्तरि ङः ॥ ३।४।५८ ॥ ट्वेश्वेर्वा ॥३।४।५९॥ शास्त्यसूवक्तिख्यातेरङ् ॥३।४।६०॥ सत्यर्तेर्वा ॥३।४।६१॥ ह्वालिपूसिचः ॥३।४।६२॥ वात्मने ॥३।४।६३॥ लुदित्द्युतादिपुष्यादेः परस्मै ॥३।४।६४॥ ऋदिच्छ्विस्तम्भूस्तुम्भूस्रुचूम्लुचूमुचूग्लुचूग्लुञ्चूञ्रो वा ॥ ३।४।६५ ॥ अिच् ते पदस्तलुक् च ॥३।४।६६॥ दीपजनबुधपूरितायिप्यायो वा ॥३।४।६७॥ भावकर्मणोः ॥३।४।६८॥ स्वरग्रहदृग्रहन्भ्यः स्यसिजाशोःश्वस्तन्यां अिङ् वा ॥३।४।६९॥ क्यः शिति ॥३।४।७०॥ कर्तर्यनद्भ्यः शव् ॥३।४।७१॥ दिवादेः श्यः ॥३।४।७२॥ भ्रासम्लासभ्रमक्रमक्लमत्रसित्रुटिलषियसिसंयसेर्वा ॥३।४।७३॥ कुपिरञ्जेर्व्याप्ये वा परस्मै च ॥३।४।७४॥ स्वादेः श्नुः ॥३।४।७५॥ वाक्षः ॥३।४।७६॥ तक्षः स्वार्थे वा ॥३।४।७७॥ स्तम्भूस्तुम्भूस्कम्भूस्कुम्भूस्कोः श्नाँ च ॥३।४।७८॥ क्र्यादेः ॥३।४।७९॥ व्यञ्जनाच्छ्नाहेरानः ॥ ३।४।८० ॥ तुदादेः शः ॥ ३।४।८१ ॥ रुधां स्वराच्छ्नो नलुक् च ॥ ३।४।८२ ॥ कृन्तनादेरुः ॥ ३।४।८३ ॥ सृजः श्राद्धे अिक्यात्मने तथा ॥ ३।४।८४ ॥ तपेस्तपःकर्मकात् ॥३।४।८५॥ एकधातौ कर्मक्रिययैकाकर्मक्रिये ॥३।४।८६॥ पचिदुहेः ॥३।४।८७॥ न कर्मणा अिच् ॥३।४।८८॥ रुधः ॥३।४।८९॥ स्वरदुहो वा ॥३।४।९०॥ तपः कर्त्रनुतापे च ॥३।४।९१॥ णिस्नुश्रयात्मनेपदाकर्मकात् ॥३।४।९२॥ भूपार्थसन्किरादिभ्यश्च अिक्यौ ॥३।४।९३॥ करणक्रियया क्वचित् ॥३।४।९४॥

॥ इति तृतीयोऽध्यायः ॥

द्विर्धातुः परोक्षाङे प्राक्तु स्वरे स्वरविधेः ॥ ४।१।१ ॥ आद्योंश एकस्वरः ॥४।१।२॥ सन्यङश्च ॥४।१।३॥ स्वरादेर्द्वितीयः ॥४।१।४॥ न बदनं संयोगादिः ॥४।१।५॥ अयि रः ॥४।१।६॥ नाम्नो द्वितीयाद् यथेष्टम् ॥४।१।७॥ अन्यस्य ॥४।१।८॥ कण्ड्वादेस्तृतीयः ॥४।१।९॥ पुनरेकेषाम् ॥४।१।१०॥ यिः सन्वेर्व्यः ॥४।१।११॥ ह्वः शिति ॥ ४।१।१२ ॥ चराचरचलाचलपतापतवदावद्यनाद्यनपाटूपटं वा ॥ ४।१।१३ ॥ चिक्कित्दचक्कसम् ॥४।१।१४॥ दाश्वत्साह्वन्मीढ्वत् ॥४।१।१५॥ क्ष्यापो क्षीपोप् न च

द्विः सि सनि ॥४।१।१६॥ ऋध ईर्त् ॥ ४।१।१७ ॥ दम्भो धिप् धीप् ॥ ४।१।१८ ॥ अव्याप्यस्य मुचेर्मोग्वा ॥४।१।१९॥ मिमीमादामित् स्वरस्य ॥४।१।२०॥ रभलभशकपतपदामिः ॥४।१।२१॥ राधेर्वधे ॥४।१।२२॥ अवित्परोक्षासेट्थवोरेः ॥४।१।२३॥ अनादेशादेरेकव्यञ्जनमध्येऽतः ॥४।१।२४॥ तृन्नपफलभजाम् ॥४।१।२५॥ जृभ्रमवमत्रसफणस्यमस्वनराजभ्राजभ्रासभ्लासो वा ॥४।१।२६॥ ग्रन्थग्रन्थो नलुक् च ॥४।१।२७॥ दम्भः ॥ ४।१।२८ ॥ थे वा ॥ ४।१।२९ ॥ न शसददवादिगुणिनः ॥४।१।३०॥ हौ दः ॥४।१।३१॥ देर्दिगिः परोक्षायाम् ॥४।१।३२॥ ङे पिबः पीप्य् ॥४।१।३३॥ अङे हिहनो हो घः पूर्वात् ॥४।१।३४॥ जेर्गिः सन्परोक्षयोः ॥४।१।३५॥ चेः किर्वा ॥४।१।३६॥ पूर्वस्यास्वे स्वरे ग्लेरियुव् ॥ ४।१।३७ ॥ ऋतोऽत् ॥ ४।१।३८ ॥ ह्रस्वः ॥ ४।१।३९ ॥ गहोर्जः ॥४।१।४०॥ युतेरिः ॥४।१।४१॥ द्वितीयतुर्ययोः पूर्वौ ॥४।१।४२॥ तिर्वा ष्ठिवः ॥ ४।१।४३ ॥ व्यञ्जनस्यानादेर्लुक् ॥ ४।१।४४ ॥ अघोषे शिटः ॥ ४।१।४५ ॥ कङश्चञ् ॥ ४।१।४६ ॥ न कवतेर्यङः ॥ ४।१।४७ ॥ आगुणावन्यादेः ॥ ४।१।४८ ॥ न हाको लुपि ॥४।१।४९॥ वञ्चस्रंसध्वंसभ्रंशकसपतपदस्कन्दोऽन्तौ नीः ॥४।१।५०॥ मुरतोऽनुनासिकस्य ॥४।१।५१॥ जपजभदहदशभञ्जपशः ॥४।१।५२॥ चरफलाम् ॥४।१।५३॥ तिचोपान्त्यातोऽनोदुः ॥४।१।५४॥ क्रमतां रीः ॥४।१।५५॥ रिरौ च लुपि ॥४।१।५६॥ निजां शित्येत् ॥४।१।५७॥ पृभृमाहाङामिः ॥४।१।५८॥ सन्यस्य ॥४।१।५९॥ ओर्जान्तस्यापवर्गेऽवर्णे ॥४।१।६०॥ श्रुस्रुद्रुप्लुच्योर्वा ॥४।१।६१॥ स्वपो णावुः ॥४।१।६२॥ असमानलोपे सन्वल्लघुनि ङे ॥४।१।६३॥ लघोर्दीर्घोऽस्वरादेः ॥४।१।६४॥ स्मृदृत्वरप्रथम्रदस्तॄस्पशेरः ॥ ४।१।६५ ॥ वा वेष्टचेष्टः ॥ ४।१।६६ ॥ ईच्च गणः ॥ ४।१।६७ ॥ अस्यादेराः परोक्षायाम् ॥४।१।६८॥ अनातो नश्चान्त ऋदाद्यशौसंयोगस्य ॥४।१।६९॥ भूस्वपोरदुतौ ॥ ४।१।७० ॥ ज्याव्येव्यधिव्यचिव्यथेरिः ॥ ४।१।७१ ॥ यजादिवशवचः सस्वरान्तस्था व्वृत् ॥४।१।७२॥ न वयो य् ॥४।१।७३॥ वेरयः ॥४।१।७४॥ अविति वा ॥४।१।७५॥ ज्यश्च यपि ॥४।१।७६॥ व्यः ॥४।१।७७॥ संपरेर्वा ॥४।१।७८॥ यजादिवचेः किति ॥४।१।७९॥ स्वपेर्यङ्ङे च ॥४।१।८०॥ ज्याव्यधः किङति ॥४।१।८१॥ व्यचोऽनसि ॥४।१।८२॥ वशेरयङि ॥४।१।८३॥ ग्रहव्रश्चभ्रस्जप्रच्छः ॥४।१।८४॥ व्येस्यमोर्यङि ॥ ४।१।८५ ॥ चायः की ॥ ४।१।८६ ॥ द्विर्वे ह्वः ॥ ४।१।८७ ॥ णौ ङसनि ॥ ४।१।८८ ॥ श्वेर्वा ॥४।१।८९॥ वा परोक्षायङि ॥४।१।९०॥ प्यायः पीः ॥४।१।९१॥ क्तयोरनुपसर्गस्य ॥४।१।९२॥ आङोऽन्धूधसोः ॥४।१।९३॥ स्फायः स्फी वा ॥४।१।९४॥ प्रसमः स्त्यः स्तीः ॥४।१।९५॥ प्राक्तश्च मो वा ॥४।१।९६॥ श्यःशीर्द्रवमूर्तिस्पर्शे नश्चास्पर्शे ॥ ४।१।९७ ॥ प्रतेः ॥ ४।१।९८ ॥ वाऽभ्यवाभ्याम् ॥ ४।१।९९ ॥ श्रः शृतं हविःक्षीरे ॥४।१।१००॥ अपेः प्रयोक्त्रैक्यै ॥४।१।१०१॥ व्वृत् सकृत् ॥४।१।१०२॥ दीर्घमवोऽन्त्यम् ॥४।१।१०३॥ स्वरहनगमोः सनि धुटि ॥४।१।१०४॥ तनो वा ॥४।१।१०५॥ क्रमः क्त्वि वा ॥ ४।१।१०६ ॥ अहन्पञ्चमस्य क्विक्ङिति ॥ ४।१।१०७ ॥ अनुनासिके च छ्वः शूट् ॥ ४।१।१०८ ॥ मन्यविश्रिविज्वरित्वरेरुपान्त्येन ॥ ४।१।१०९ ॥ राल्लुक् ॥ ४।१।११० ॥ क्तेऽनिटश्चजोः कगौ धिति ॥ ४।१।१११ ॥ न्यङ्क्वादुगमेर्घादयः

॥ ४।१।११२ ॥ न वञ्चेर्गतौ ॥ ४।१।११३ ॥ यजेर्यज्ञाङ्गे ॥ ४।११४ ॥ च्यण्यावश्यके निप्राद्युजः ॥४।१।११५॥ शक्ये ॥४।१।११६॥ भुजो भक्ष्ये ॥४।१।११७॥ त्यज्यजप्रवचः ॥ ४।१।११८ ॥ वचोऽशब्दनाम्नि ॥ ४।१।११९ ॥ भुजन्युब्जं पाणिरोगे ॥ ४।१।१२० ॥ वीरुन्न्यग्रोधौ ॥ ४।१।१२१ ॥

॥ इति चतुर्थाध्यायस्य प्रथमः पादः ॥

आत्संध्यक्षरस्य ॥४।२।१॥ न शिति ॥४।२।२॥ व्यस्थव्णवि ॥४।२।३॥ स्फुर-स्फुलोर्घञि ॥४।२।४॥ वाऽपपुरो णमि ॥४।२।५॥ दीङः सनि वा ॥४।२।६॥ यबक्ङिति ॥ ४।२।७ ॥ मिग्मीगोऽखलचलि ॥ ४।२।८ ॥ लोङ्लिनोर्वा ॥ ४।२।९ ॥ णौ क्रीजीङः ॥ ४।२।१० ॥ सिद्धयतेरज्ञाने ॥ ४।२।११ ॥ चिस्फुरोर्नवा ॥ ४।२।१२ ॥ विषः प्रजने ॥४।२।१३॥ रुहः पः ॥४।२।१४॥ लियो नोऽन्तःस्नेहद्रवे ॥४।२।१५॥ लो लः ॥४।२।१६॥ पातेः ॥४।२।१७॥ धूग्प्रीगोर्नः ॥४।२।१८॥ वो विधूनने जः ॥४।२।१९॥ पाशाच्छा-सावेव्याह्वो यः ॥ ४।२।२० ॥ अर्तिह्वील्लीरीक्नूयिक्ष्माय्यातां पुः ॥ ४।२।२१ ॥ स्फाय् स्फाव् ॥४।२।२२॥ शदिरगतौ शात् ॥४।२।२३॥ घटादेर्ह्रस्वो दीर्घस्तु वा त्रिणम्परे ॥ ४।२।२४ ॥ कगेषनूजनैजृष्क्नसूरञ्जः ॥ ४।२।२५ ॥ अमोऽकर्म्यमिचमः ॥४।२।२६॥ पर्यपात् स्खदः ॥ ४।२।२७ ॥ शमोऽदर्शने ॥ ४।२।२८ ॥ यमोऽपरिवेषणे णिचि च ॥ ४।२।२९ ॥ मारणतोषणनिशाने ज्ञश्च ॥४।२।३०॥ चहणः शाठ्ये ॥ ४।२।३१ ॥ ज्वलह्वलह्मलग्लास्नावनूषमनमोऽनुपसर्गस्य वा ॥ ४।२।३२ ॥ छदेरिस्मन्यङ्क्वौ ॥ ४।२।३३ ॥ एकोपसर्गस्य च घेः ॥ ४।२।३४ ॥ उपान्त्यस्यासमानलोपिशास्वृदितो ङे ॥४।२।३५॥ भ्रासभासभाषदीपपीडजीवमीलकणरणवणभणश्रणह्रेहेठलुठलुपलपां नवा ॥ ४।२।३६ ॥ ऋदवर्णस्य ॥४।२।३७॥ जिघ्रतेरिः ॥४।२।३८॥ तिष्ठतेः ॥४।२।३९॥ ऊदुदुषो णौ ॥ ४।२।४० ॥ चित्ते च ॥ ४।२।४१ ॥ गोहः स्वरे ॥४।२।४२॥ भुवो वः परोक्षाद्यतन्योः ॥ ४।२।४३ ॥ गमहनजनखनघसः स्वरेऽनङि क्ङिति लुक् ॥ ४।२।४४ ॥ नो व्यञ्जनस्यानुदितः ॥ ४।२।४५ ॥ अञ्चोऽनचार्याम् ॥ ४।२।४६ ॥ लङ्किकम्प्योरुपतापाङ्गविकृत्योः ॥ ४।२।४७ ॥ भञ्जेर्जौ वा ॥ ४।२।४८ ॥ दंशसञ्जः शवि ॥ ४।२।४९ ॥ अकटुधिनोश्च रञ्जेः ॥ ४।२।५० ॥ णौ मृगरमणे ॥ ४।२।५१ ॥ घञि भावकरणे ॥ ४।२।५२ ॥ स्यदो जवे ॥ ४।२।५३ ॥ दशनावोदैधौद्मप्रस्थश्रथ-ह्रिमश्रथम् ॥ ४।२।५४ ॥ यमिरमिनमिगमिहनिमनिवनतितनादेर्धुटि क्ङिति ॥ ४।२।५५ ॥ यपि ॥४।२।५६॥ वामः ॥४।२।५७॥ गमां क्वौ ॥ ४।२।५८ ॥ न तिकि दीर्घश्च ॥ ४।२।५९ ॥ आः खनिसनिजनः ॥ ४।२।६० ॥ सनि ॥ ४।२।६१ ॥ ये नवा ॥ ४।२।६२ ॥ तनः क्ये ॥ ४।२।६३ ॥ तौ सनस्तिकि ॥ ४।२।६४ ॥ वन्याङ्पञ्च-मस्य ॥ ४।२।६५ ॥ अपाच्चायश्चिः क्वौ ॥ ४।२।६६ ॥ ह्लादो ह्लद् क्त्योश्च ॥४।२।६७॥ ऋल्वादेरेषां तो नोऽग्रः ॥ ४।२।६८ ॥ रदादमूर्छमदः क्त्योर्दस्य च ॥ ४।२।६९ ॥ सूयत्यद्योदितः ॥ ४।२।७० ॥ व्यञ्जनान्तस्थातोऽख्याध्यः ॥ ४।२।७१ ॥ पूदिव्यञ्चे-र्नाशाद्यूतानपादाने ॥ ४।२।७२ ॥ सेर्ग्रासे कर्मकर्तरि ॥ ४।२।७३ ॥ क्षेः क्षी चाध्यर्थे ॥४।२।७४॥ वाक्रोशः दैन्ये ॥४।२।७५॥ ह्रीभ्राभ्रात्रोन्दनुदविन्तेर्वा ॥४।२।७६॥ दुगोरू

च ॥४।२।७७॥ क्षैशुषिपचो मकवम् ॥४।२।७८॥ निर्वाणमवाते ॥४।२।७९॥ अनुपसर्गाः क्षोबोल्लाघकृशफुल्लोत्फुल्लसंफुल्लाः ॥४।२।८०॥ भित्तं शकलम् ॥४।२।८१॥ वित्तं धनप्रतीतम् ॥४।२।८२॥ हुधुटो हेर्धिः ॥४।२।८३॥ शासस्हनः शाध्येधिजहि ॥४।२।८४॥ अतः प्रत्ययाल्लुक् ॥४।२।८५॥ असंयोगादोः ॥४।२।८६॥ वम्यवितिं वा ॥४।२।८७॥ कृगो यि च ॥ ४।२।८८ ॥ अतः शित्युत् ॥ ४।२।८९ ॥ श्नास्त्योर्लुक् ॥ ४।२।९० ॥ वा द्विषातोऽनः पुस् ॥४।२।९१॥ सिज्विदोऽभुवः ॥४।२।९२॥ व्युक्तजक्षपञ्चतः ॥४।२।९३॥ अन्तो नो लुक् ॥४।२।९४॥ शौ वा ॥४।२।९५॥ श्नश्नातः ॥४।२।९६॥ पषामीर्व्यञ्जनेऽदः ॥४।२।९७॥ इर्दरिद्रः ॥४।२।९८॥ भियो न वा ॥४।२।९९॥ हाकः ॥४।२।१००॥ आ च हौ ॥४।२।१०१॥ यि लुक् ॥ ४।२।१०२ ॥ ओतः श्ये ॥ ४।२।१०३ ॥ जा ज्ञाजनोऽत्यादौ ॥४।२।१०४॥ प्वादेर्ह्रस्वः ॥४।२।१०५॥ गमिषद्यमश्छः ॥४।२।१०६॥ वेगो सर्तेर्धावि ॥४।२।१०७॥ श्नौतिकृवुधिवुपाघ्राध्मास्थाम्नादाम्दृश्अर्तिशदसदः शृकृधिपिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छशीयसीदम् ॥ ४।२।१०८ ॥ क्रमो दीर्घः परस्मै ॥ ४।२।१०९ ॥ ष्ठिवुक्रम्वाचमः ॥४।२।११०॥ शम्सप्तकस्य श्ये ॥४।२।१११॥ ष्ठिव्सिवोऽनटि वा ॥४।२।११२॥ मव्यस्याः ॥४।२।११३॥ अनतोऽन्तोऽदात्मने ॥४।२।११४॥ शीङो रत् ॥४।२॥११५॥ वेत्तेर्नवा ॥४।२।११६॥ तिवां णवः परस्मै ॥४।२।११७॥ ब्रूगः पञ्चानां पञ्चाहश्च ॥ ४।२।११८ ॥ आशिषि तुह्योस्तातङ् ॥ ४।२।११९ ॥ आतो णव औः ॥४।२।१२०॥ आतामाते आथामाथे आदिः ॥४।२।१२१॥ यः सप्तम्याः ॥४।२।१२२॥ याम्युसोरियमियुसौ ॥४।२।१२३॥

॥ इति चतुर्थाध्यायस्य द्वितीयः पादः ॥

नामिनो गुणोऽक्ङिति ॥ ४।३।१ ॥ उश्नोः ॥४।३।२॥ पुस्पौ ॥ ४।३।३॥ लघोरुपान्त्यस्य ॥ ४।३।४ ॥ मिदः श्ये ॥४।३।५॥ जागुः र्किति ॥ ४।३।६ ॥ ऋवर्णदृशोऽङि ॥ ४।३।७ ॥ स्कृच्छृतोऽकि परोक्षायाम् ॥ ४।३।८ ॥ संयोगाद्दर्तेः ॥ ४।३।९ ॥ क्ययङाशीर्ये ॥ ४।३।१० ॥ न वृद्धिश्चावितिं क्ङिल्लोपे ॥ ४।३।११ ॥ भवतेः सिज्लुपि ॥४।३।१२॥ सूतेः पञ्चम्याम् ॥४।३।१३॥ व्युक्तोपान्त्यस्य शिति स्वरे ॥४।३।१४॥ ह्वितोरप्विति व्यौ ॥४।३।१५॥ इको वा ॥४।३।१६॥ कुटादेर्ङिद्वदञ्णित् ॥४।३।१७॥ विजेरिट् ॥४।३।१८॥ वोर्णोः ॥४।३।१९॥ शिदवित् ॥४।३।२०॥ इन्ध्यसंयोगात्परोक्षा किद्वत् ॥४।३।२१॥ स्वञ्जेर्नवा ॥४।३।२२॥ जनशो न्युपान्त्ये तादिः क्त्वा ॥ ४।३।२३ ॥ ऋत्तृषमृषकृशगृज्वञ्चलुञ्चथफः सेट् ॥ ४।३।२४ ॥ वौ व्यञ्जनादेः सन् चाव्वः ॥४।३।२५॥ उति शवार्हद्भ्यः क्तौ भावारंभे ॥४।३।२६॥ न डीङ्शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदः ॥४।३।२७॥ मृषः क्षान्तौ ॥ ४।३।२८ ॥ क्त्वा ॥४।३।२९॥ स्कन्दस्यन्दः ॥ ४।३।३० ॥ क्षुधक्लिशकुषगुधमृडमृदवदवसः ॥४।३।३१॥ रुदविदमुषग्रहस्वपप्रच्छः सन् च ॥४।३।३२॥ नामिनोऽनिट् ॥ ४।३।३३ ॥ उपान्त्ये ॥४।३।३४॥ सिजाशिषाघात्मने ॥४।३।३५॥ ऋवर्णात् ॥४।३।३६॥ गमो वा ॥४।३।३७॥ हनः सिच् ॥४।३।३८॥ यमः सूचने ॥४।३।३९॥ वा स्वीकृतौ ॥४।३।४०॥ इश्अस्थादः ॥४।३।४१॥ मृजोऽस्य वृद्धिः ॥४।३।४२॥ ऋतः स्वरे वा ॥४।३।४३॥ सिचि परस्मै

समानस्याङिति ॥४।३।४४॥ व्यञ्जनानामनिटि ॥४।३।४५॥ वोर्णुगः सेटि ॥४।३।४६॥ व्यञ्जनादेर्वोपान्त्यस्यातः ॥४।३।४७॥ वदव्रजव्रूः ॥४।३।४८॥ न श्विजागृशसक्षण-ह्म्येदितः ॥४।३।४९॥ ञ्णिति ॥४।३।५०॥ नामिनोऽकलिहलेः ॥४।३।५१॥ जागुर्ञिणवि ॥४।३।५२॥ आतः ऐः कृञ्भौ ॥४।३।५३॥ न जनवधः ॥४।३।५४॥ मोऽकमियमिरमि-नमिगमिवमाचमः ॥ ४।३।५५ ॥ विश्रमेर्वा ॥ ४।३।५६ ॥ उद्यमोपरमौ ॥ ४।३।५७ ॥ णिद्वान्त्यो णव् ॥४।३।५८॥ उत ओर्वेति व्यञ्जनेऽद्वेः ॥४।३।५९॥ वोर्णेः ॥४।३।६०॥ न दिस्योः ॥४।३।६१॥ तृहः श्नादीत् ॥४।३।६२॥ ब्रूतः परादिः ॥४।३।६३॥ यङ्तुरु-स्तोर्बहुलम् ॥४।३।६४॥ सः सिजस्तेर्दिस्योः ॥४।३।६५॥ पिबैतिदाभूस्थः सिचो लुप् परस्मै न चेट् ॥४।३।६६॥ दृघेघ्राशाछासो वा ॥४।३।६७॥ तभ्यो वा तथासि ण्णोश्च ॥४।३।६८॥ सनस्तश्च वा ॥४।३।६९॥ धुङ्हस्वाल्लुगनिटस्तथोः ॥४।३।७०॥ इट ईति ॥४।३।७१॥ सो धि वा ॥४।३।७२॥ अस्तेः सि ह्यस्वेति ॥४।३।७३॥ दुहदिहलिहगुहो दन्त्यात्मने वा सकः ॥४।३।७४॥ स्वरेऽतः ॥४।३।७५॥ दरिद्रोऽद्यतन्यां वा ॥४।३।७६॥ अशित्यस्सनणकचणकानटि ॥ ४।३।७७ ॥ व्यञ्जनाद्देः सश्च दः ॥ ४।३।७८ ॥ सेः स्द्धौ च रुर्वा ॥४।३।७९॥ योऽशिति ॥४।३।८०॥ क्यो वा ॥४।३।८१॥ अतः ॥४।३।८२॥ णेरनिटि ॥ ४।३।८३ ॥ सेट्क्त्योः ॥ ४।३।८४ ॥ आमन्ताल्वाय्वेत्लावय् ॥ ४।३।८५ ॥ लघोर्यपि ॥ ४।३।८६ ॥ वाप्नोः ॥ ४।३।८७ ॥ मेङो वा मित् ॥ ४।३।८८ ॥ क्षेः क्षी ॥ ४।३।८९ ॥ क्षय्यजय्यौ शक्यौ ॥ ४।३।९० ॥ क्रय्यः क्रयार्थे ॥ ४।३।९१ ॥ सस्तः सि ॥४।३।९२॥ दीय् दीङः किङति स्वरे ॥४।३।९३॥ इडेत्पुसि चातो लुक् ॥४।३।९४॥ संयोगादेर्वाशिष्येः ॥ ४।३।९५ ॥ गापास्थासादामाहाकः ॥ ४।३।९६ ॥ इर्य्यञ्जनेऽयपि ॥४।३।९७॥ घ्राध्मोर्यङि ॥४।३।९८॥ हनोघ्नी र्वधे ॥४।३।९९॥ ञ्णिति घात् ॥४।३।१००॥ ञ्णवि धन् ॥४।३।१०१॥ नशेर्नेश्वाङि ॥४।३।१०२॥ श्वयत्यसूवक्षपतः श्वास्थवोच-पसम् ॥ ४।३।१०३ ॥ शीङ एः शिति ॥ ४।३।१०४ ॥ किङति यि शय् ॥ ४।३।१०५ ॥ उपसर्गादूहो ह्रस्वः ॥४।३।१०६॥ आशिषीणः ॥४।३।१०७॥ दीर्घश्च्वयङ्क्यक्येषु च ॥४।३।१०८॥ क्रतो रोः ॥४।३।१०९॥ रिः शक्याशीर्ये ॥४।३।११०॥ ईश्च्वावर्णस्या-नव्ययस्य ॥ ४।३।१११ ॥ क्यनि ॥ ४।३।११२ ॥ क्षुततृड्गर्धेऽशनायोदन्यधनायम् ॥४।३।११३॥ वृषाश्वान्मैथुने स्सोऽन्तः ॥४।३।११४॥ अस् च लौल्ये ॥४।३।११५॥

॥ इति चतुर्थाध्यायस्य तृतीयः पादः ॥

अस्तिब्रुवोर्भूवचावशिति ॥४।४।१॥ अघञ्क्यबलच्यजेर्घी ॥४।४।२॥ त्रने वा ॥४।४।३॥ चक्षो वाचि क्शांग् ख्यांग् ॥४।४।४॥ न वा परोक्षायाम् ॥४।४।५॥ भृञो भर्ज् ॥ ४।४।६ ॥ प्रात् दागस्त आरंभे कर्त्ते ॥ ४।४।७ ॥ निविस्वन्वनात् ॥ ४।४।८ ॥ स्वरादुपसर्गात् दस्ति कित्यधः ॥४।४।९॥ दत् ॥४।४।१०॥ दोसोमास्थ इः ॥४।४।११॥ छाशोर्वा ॥४।४।१२॥ शो व्रते ॥४।४।१३॥ हाको हिः कित्व ॥४।४।१४॥ धागः ॥४।४।१५॥ यपि चादो जग्ध् ॥४।४।१६॥ घस्लृ सनद्यतनीघञ्चलि ॥४।४।१७॥ परोक्षायां नवा ॥४।४।१८॥ वेर्वय् ॥४।४।१९॥ ऋः शृदृप्रः ॥४।४।२०॥ हनो वध आशिष्यञौ ॥४।४।२१॥ अद्यतन्यां वा त्वात्मने ॥४।४।२२॥ इणिकोर्गाः ॥४।४।२३॥ णावज्ञाने गमुः ॥४।४।२४॥

सनीडश्च ॥४।४।२५॥ गाः परोक्षायाम् ॥४।४।२६॥ णौ सन्डे वा ॥४।२।२७॥ वाऽद्यतनीक्रियातिपत्त्योर्गीङ् ॥ ४।४।२८ ॥ अङ्घातोरादिर्ह्यस्तन्र्यां चामाङा ॥ ४।४।२९ ॥ पत्यस्तेर्वृद्धिः ॥ ४।४।३० ॥ स्वरादेस्तासु ॥ ४।४।३१ ॥ स्ताद्यशितोऽत्रोणादेरिट् ॥४।४।३२॥ तेर्ग्रहादिभ्यः ॥४।४।३३॥ गृह्णो परोक्षायां दीर्घः ॥४।४।३४॥ वृतो नवाऽनाशीःसिच्परस्मै ॥४।४।३५॥ इट् सिजाशिषोरात्मने ॥ ४।४।३६ ॥ संयोगादतः ॥४।४।३७॥ धूगौदितः ॥४।४।३८॥ निष्कुषः ॥४।४।३९॥ क्त्वोः ॥४।४।४०॥ जृव्रश्चः क्त्वः ॥४।४।४१॥ ऊदितो वा ॥४।४।४२॥ क्षुधवसस्तेषाम् ॥४।४।४३॥ लुभ्यश्चेर्विमोहार्चे ॥ ४।४।४४ ॥ पूङ्क्ष्विशिभ्यो न वा ॥ ४।४।४५ ॥ सहलुभेच्छरुषरिषस्तादेः ॥ ४।४।४६ ॥ इवृधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृदरिद्रः सनः ॥ ४।४।४७ ॥ ऋस्मिपूङञ्जशौकृगृहधृप्रच्छः ॥४।४।४८॥ हनृतः स्यस्य ॥४।४।४९॥ कृतचृतनृतछृदतृदोऽसिचः सादेर्वा ॥४।४।५०॥ गमोऽनात्मने ॥४।४।५१॥ स्नोः ॥४।४।५२॥ क्रमः ॥४।४।५३॥ तुः ॥४।४।५४॥ न वृन्नृघः ॥४।४।५५॥ एकस्वरादनुस्वारेतः ॥४।४।५६॥ ऋवर्णव्यूर्णुगः कितः ॥४।४।५७॥ उवर्णात् ॥४।४।५८॥ ग्रहगुहश्च सनः ॥ ४।४।५९ ॥ स्वार्थे ॥४।४।६०॥ डीयः व्ययेदितः क्त्वोः ॥४।४।६१॥ वेटोऽपतः ॥४।४।६२॥ संनिवेरर्दः ॥४।४।६३॥ अविदूरेऽमेः ॥ ४।४।६४ ॥ वर्तेर्वृत्तं ग्रन्थे ॥ ४।४।६५ ॥ धृषशसः प्रगल्भे ॥४।४।६६॥ कषः कृच्छ्रगहने ॥४।४।६७॥ घुषेरविशब्दने ॥४।४।६८॥ बलिस्थूले दृढः ॥ ४।४।६९ ॥ क्षुब्धस्विरिब्धस्वान्तध्वान्तलग्नम्लिष्टफाण्टबाढपरिवृढं मन्थस्वरमनस्तमःसक्तास्पष्टानायासभृशप्रभौ ॥४।४।७०॥ आदितः ॥ ४।४।७१ ॥ नवा भावारंभे ॥४।४।७२॥ शकः कर्मणि ॥४।४।७३॥ णौ दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्तम् ॥४।४।७४॥ ध्वसजपवमरुषज्वरसंघुषास्वनामः ॥ ४।४।७५ ॥ हृषेः केशलोमविस्मयप्रतीघाते ॥ ४।४।७६ ॥ अपचितः ॥ ४।४।७७ ॥ सृजिदृशिस्कृस्वरात्वतस्तृजनित्यानिटस्थवः ॥४।४।७८॥ ऋतः ॥४।४।७९॥ ऋवृच्येऽद इट् ॥ ४।४।८० ॥ स्कसृवृभृस्तुद्रुस्रुश्रुवो र्यङ्लुगादेः परोक्षायाः ॥४।४।८१॥ घसेकस्वरातः क्सोः ॥४।४।८२॥ गमहनविदलविशदशो वा ॥४।४।८३॥ सिचोऽज्जेः ॥४।४।८४॥ धूग्स्तुस्तोः परस्मै ॥४।४।८५॥ यमिरमिनम्यातः सोऽन्तश्च ॥४।४।८६॥ ईशीङः सेध्वेस्वध्वमोः ॥४।४।८७॥ रुत्पञ्चकाच्छिदयः ॥४।४।८८॥ दिस्योरिट् ॥४।४।८९॥ अदश्चाट् ॥४।४।९०॥ संपरेः कृगः स्सट् ॥४।४।९१॥ उपाद्भूषासमवायप्रतियत्नविकारसाक्याध्याहारे ॥ ४।४।९२ ॥ किरो लवने ॥ ४।४।९३ ॥ प्रतेश्च वधे ॥४।४।९४॥ अपात्चतुष्पात्पक्षिशुनि हृद्यान्नाश्रयार्थे ॥४।४।९५॥ वौ विष्किरो वा ॥४।४।९६॥ प्रात्तुम्पतेर्गवि ॥४।४।९७॥ उदितः स्वरान्नोऽन्तः ॥४।४।९८॥ मुचादितृफडफगुफशुभोम्भः शे ॥४।४।९९॥ जभः स्वरे ॥४।४।१००॥ रध इटि तु परोक्षायामेव ॥४।४।१०१॥ रभोऽपरोक्षाशवि ॥४।४।१०२॥ लभः ॥४।४।१०३॥आङो यि ॥४।४।१०४॥ उपात् स्तुतौ ॥४।४।१०५॥ अिक्ष्णमोर्वा ॥४।४।१०६॥ उपसर्गात् खल्घञोश्च ॥४।४।१०७॥ सुदुर्भ्यः ॥४।४।१०८॥ न शो धुटि ॥४।४।१०९॥ मस्जेः सः ॥ ४।४।११० ॥ अः सृजिदृशोऽकिति ॥ ४।४।१११ ॥ स्पृशादिसृपो वा ॥ ४।४।११२ ॥ हृस्वस्य तः पित्कृति ॥४।४।११३॥ अतो म आने ॥४।४।११४॥ आसीनः ॥४।४।११५॥

ऋतां क्ङितीर् ॥ ४।४।११६ ॥ ओष्ठ्यादुर् ॥ ४।४।११७ ॥ इसासः शासोऽङ्व्यञ्जने ॥४।४।११८॥ क्वौ ॥४।४।११९॥ आङः ॥४।४।१२०॥ य्वोः प्वव्यञ्जने लुक् ॥४।४।१२१॥ कृतः कीर्तिः ॥४।४।१२२॥

॥ इति चतुर्थोऽध्यायः ॥

आ तुमोऽत्यादिः कृत् ॥५।१।१॥ बहुलम् ॥५।१।२॥ कर्तरि ॥५।१।३॥ व्याप्ये घुरकेलिमकृष्टपच्यम् ॥ ५।१।४ ॥ संगतेऽर्जयम् ॥ ५।१।५ ॥ रुच्याव्यथ्यवास्तव्यम् ॥ ५।१।६ ॥ भव्यगेयजन्यरम्यापात्याप्लाव्यं न वा ॥ ५।१।७ ॥ प्रवचनीयादयः ॥ ५।१।८ ॥ श्लिष्शीङ्स्थासवसजनरुहजृभजेः क्तः ॥ ५।१।९ ॥ आरंभे ॥ ५।१।१०॥ गत्यर्थाकर्मकपिबभुजेः ॥ ५।१।११ ॥ अद्यर्थाद्याधारे ॥ ५।१।१२ ॥ क्त्वातुमम् भावे ॥ ५।१।१३ ॥ भीमादयोऽपादाने ॥ ५।१।१४ ॥ संप्रदानाच्चान्यत्रोणादयः ॥ ५।१।१५ ॥ असरूपोऽपवादे वोत्सर्गः प्राक्तेः ॥ ५।१।१६ ॥ ऋवर्ण्व्यञ्जनाद् ध्यण् ॥ ५।१।१७ ॥ पाणिसमवाभ्यां सृजः ॥ ५।१।१८ ॥ उवर्णादावश्यके ॥५।१।१९॥ आसुयुवपिरपिलपित्रपिडिपिदभिचम्याचमः ॥ ५।१।२० ॥ वाधारेऽमावस्या ॥ ५।१।२१ ॥ संचाय्यकुण्डपाय्यराजसूयं क्रतौ ॥ ५।१।२२ ॥ प्रणाय्यो निष्कामासंमते ॥ ५।१।२३ ॥ धाय्यापाय्यसाङ्राय्यनिकाय्यमृग्मानहविर्निर्वास्ये ॥ ५।१।२४ ॥ परिचाय्योपचाय्यानाय्यसमूह्यचित्यमग्नौ ॥ ५।१।२५ ॥ याज्या दानार्चे ॥ ५।१।२६ ॥ तव्यानीयौ ॥५।१।२७॥ य पञ्चातः ॥५।१।२८॥ शकितकिचतियतिशसिसहियजिभजिपवर्गात् ॥५।१।२९॥ यममदगदोऽनुपसर्गात् ॥५।१।३०॥ चरेराङस्त्वगुरौ ॥५।१।३१॥ वर्योपसर्यावद्यपण्यमुपेयर्तुमतीगर्ह्यविक्रेये ॥५।१।३२॥ स्वामिवैश्येऽर्यः ॥५।१।३३॥ वह्यं करणे ॥५।१।३४॥ नाम्नो वदः क्यप्च ॥५।१।३५॥ हृत्याभूयं भावे ॥५।१।३६॥ अग्निचित्या ॥ ५।१।३७ ॥ खे मुपोधे ॥ ५।१।३८ ॥ कुप्यभिद्योद्ध्यसिध्यतिष्यपुष्ययुग्याज्यसूर्य नाम्नि ॥ ५।१।३९ ॥ दवृग्स्तुजुषेतिशासः ॥ ५।१।४० ॥ ऋदुपान्त्यादकृपिचृदचः ॥ ५।१।४१ ॥ कृवृषिमृजिशंसिगुहिदुहिजपो वा ॥ ५।१।४२ ॥ जिविपून्यो हलिमुञ्जकल्के ॥ ५।१।४३ ॥ पदास्त्रैरिवाद्यापक्ष्ये ग्रहः ॥ ५।१।४४ ॥ भृगोऽसंज्ञायाम् ॥ ५।१।४५ ॥ समो वा ॥ ५।१।४६ ॥ ते कृत्याः ॥ ५।१।४७ ॥ णकतृचौ ॥ ५।१।४८ ॥ अच् ॥ ५।१।४९ ॥ लिहादिभ्यः ॥ ५।१।५० ॥ ब्रुवः ॥ ५।१।५१ ॥ नन्द्यादिभ्योऽनः ॥ ५।१।५२ ॥ ग्रहादिभ्यो णिन् ॥ ५।१।५३ ॥ नाम्युपान्त्यप्रीकृगृज्ञः कः ॥ ५।१।५४ ॥ गेहे ग्रहः ॥ ५।१।५५ ॥ उपसर्गादातो डोऽध्यः ॥५।१।५६॥ व्याघ्राघ्रे प्राणिनसोः ॥५।१।५७॥ ध्राध्मापाद्यधेदृशः शः ॥५।१।५८॥ साहिसातिवेधुदेजिधारिपारिचेतेरनुपसर्गात् ॥५।१।५९॥ लिम्पविन्दः ॥५।१।६०॥ निगवादेर्नाम्नि ॥५।१।६१॥ वा ज्वलादिदुनोमूग्रहास्नोर्णः ॥५।१।६२॥ अवहसासंस्नोः ॥५।१।६३॥ तन्त्र्यधीण्श्वसातः ॥५।१।६४॥ नृत्खन्त्रञ्जः शिलिपन्यकट् ॥५।१।६५॥ गस्थकः ॥५।१।६६॥ टनण् ॥ ५।१।६७ ॥ हः कालव्रीह्योः ॥ ५।१।६८ ॥ प्रुसृल्वोऽकः साधौ ॥ ५।१।६९ ॥ आशिष्यकन् ॥ ५।१।७० ॥ तिककृतौ नाम्नि ॥ ५।१।७१ ॥ कर्मणोऽण् ॥ ५।१।७२ ॥ शीलिकामिभक्ष्याचरीक्षिक्षमा णः ॥ ५।१।७३ ॥ गायोऽनुसर्गाद् टक् ॥ ५।१।७४ ॥

सुराशीधोः पिवः ॥५।१।७५॥ आतो डोऽद्यावामः ॥५।१।७६॥ समः ख्यः ॥५।१।७७॥ दृश्याङः ॥५।१।७८॥ प्राज्ञश्च ॥५।१।७९॥ आशिषि हनः ॥५।१।८०॥ क्लेशादिभ्योऽपात् ॥५।१।८१॥ कुमारशीर्षाण्णिन् ॥५।१।८२॥ अचित्ते टक् ॥५।१।८३॥ जायापतेश्चिन्हवति ॥५।१।८४॥ ब्रह्मादिभ्यः ॥५।१।८५॥ हस्तिबाहुकपाटाच् शक्तौ ॥५।१।८६॥ नगरादगजे ॥५।१।८७॥ राजघः ॥५।१।८८॥ पाणिघताडघौ शिल्पिनि ॥५।१।८९॥ कुक्ष्यात्मोदराद्भृगः खिः ॥५।१।९०॥ अहोऽच् ॥५।१।९१॥ धनुर्दण्डत्सरुलाङ्गलाङ्कुशर्ष्टियष्टिशक्तितोमरघटाद्ग्रहः ॥५।१।९२॥ सूत्राद्धारणे ॥५।१।९३॥ आयुधादिभ्यो धृगोऽण्डादेः ॥५।१।९४॥ हृगो वयोऽनुद्यमे ॥५।१।९५॥ आङः शीले ॥५।१।९६॥ दतिनाथात्पशाविः ॥५।१।९७॥ रजःफले मलाद् ग्रहः ॥५।१।९८॥ देववातादापः ॥५।१।९९॥ शकृत्स्तबाद्वत्सवीहौ कृगः ॥५।१।१००॥ किंयत्तद्बहोरः ॥५।१।१०१॥ संख्याहर्दिवाविभानिशाप्रभाभास्त्रिचक्रत्र्यन्तानन्तकारबाह्वरुर्धनुर्नान्दीलिपिलिबिबलिभक्तिक्षेत्रजङ्गाक्षपाक्षणदारजनिदोषादिनदिवसाट् टः ॥५।१।१०२॥ हेतुतच्छीलानुकूलेऽशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात् ॥५।१।१०३॥ भृतौ कर्मणः ॥५।१।१०४॥ क्षेमप्रियमद्रभद्रात् खाण् ॥५।१।१०५॥ मेघर्तिभयाभयात् खः ॥५।१।१०६॥ प्रियवशाद्वदः ॥५।१।१०७॥ द्विषंतपपरंतपौ ॥५।१।१०८॥ परिमाणार्थमितनखात् पचः ॥५।१।१०९॥ कूलाभ्रकरीषात् कषः ॥५।१।११०॥ सर्वात् सहश्च ॥५।१।१११॥ भ्रूवृजितृतपदमेश्च नाम्नि ॥५।१।११२॥ धारेर्धर् च ॥५।१।११३॥ पुरंदरभगंदरौ ॥५।१।११४॥ वाचंयमो व्रते ॥५।१।११५॥ मन्याण्णिन् ॥५।१।११६॥ कर्तुः खश् ॥५।१।११७॥ पजेः ॥५।१।११८॥ शुनीस्तनमुञ्जकूलास्यपुष्पाद्दृधेः ॥५।१।११९॥ नाडीघटीखरीमुष्टिनासिकावाताद्धमश्च ॥५।१।१२०॥ मणिकरात् ॥५।१।१२१॥ कूलादुद्रुजोद्वहः ॥५।१।१२२॥ वहाभ्रालिहः ॥५।१।१२३॥ बहुविध्वरुस्तिलात्तुदः ॥ ५।१।१२४ ॥ ललाटवातशर्धात्तपाजहाकः ॥ ५।१।१२५ ॥ असूर्योग्रादृदृशः ॥५।१।१२६॥ इरंमदः ॥५।१।१२७॥ नग्नपलितप्रियान्धस्थूलसुभगाढ्यतदन्ताच्च्व्यर्थेऽच्वेर्भुवः खिष्णुखुकञ् ॥ ५।१।१२८ ॥ कृगः खनदृकरणे ॥ ५।१।१२९ ॥ भावे चाशिताद् भुवः खः ॥ ५।१।१३० ॥ नाम्नो गमः खड्डौ च विहायसस्तु विहः ॥५।१।१३१॥ सुगदुर्गमाधारे ॥५।१।१३२॥ निगो देशे ॥५।१।१३३॥ शमो नाम्न्यः ॥ ५।१।१३४ ॥ पार्श्वादिभ्यः शीङः ॥ ५।१।१३५ ॥ ऊर्ध्वादिभ्यः कर्तुः ॥ ५।१।१३६ ॥ आधारात् ॥ ५।१।१३७ ॥ चरेष्टः ॥ ५।१।१३८ ॥ भिक्षासेनादायात् ॥५।१।१३९॥ पुरोऽग्रतोऽग्रे सर्त्तेः ॥५।१।१४०॥ पूर्वात्कर्तुः ॥५।१।१४१॥ स्थाप्यास्नात्रः कः ॥५।१।१४२॥ शोकापनुदतुन्दपरिमृजस्तम्बेरमकर्णेजपं प्रियालसहस्तिसूचके ॥५।१।१४३॥ मूलविभुजादयः ॥५।१।१४४॥ दुहेर्डुघः ॥५।१।१४५॥ भजो विण् ॥५।१।१४६॥ मन् वन् क्वनिब् विच् क्वचित् ॥५।१।१४७॥ क्विप् ॥५।१।१४८॥ स्पृशोऽनुदकात् ॥ ५।१।१४९ ॥ अदोऽनन्नात् ॥५।१।१५०॥ कव्यात्-कव्यादावामपक्वादौ ॥ ५।१।१५१ ॥ त्यदाद्यन्यसमानादुपमानाद्व्याप्ये दृशष्टक्सकौ च ॥५।१।१५२॥ कर्तुर्णिन् ॥५।१।१५३॥ अजातेः शीले ॥५।१।१५४॥ साधौ ॥५।१।१५५॥ ब्रह्मणो वदः ॥५।१।१५६॥ व्रताभीक्ष्ण्ये ॥५।१।१५७॥ करणाद्यजो भूते ॥५।१।१५८॥

निन्दे व्याप्यादिन् विक्रियः ॥५।१।१५९॥ हनो णिन् ॥५।१।१६०॥ ब्रह्मभ्रूणवृत्रात् क्विप् ॥ ५।१।१६१ ॥ कृगः सुपुण्यपापकर्ममन्त्रपदात् ॥ ५।१।१६२ ॥ सोमात्सुगः ॥५।१।१६३॥ अग्नेश्चेः ॥५।१।१६४॥ कर्मण्यग्न्यर्थे ॥५।१।१६५॥ दृशः क्वनिप् ॥५।१।१६६॥ सहराजभ्यां कृग्युधेः ॥५।१।१६७॥ अनोर्जनेर्डः ॥५।१।१६८॥ सप्तम्याः ॥ ५।१।१६९ ॥ अजातेः पञ्चम्याः ॥५।१।१७०॥ क्वचित् ॥५।१।१७१॥ सुयजो ङ्वनिप् ॥५।१।१७२॥ जृषोऽतृः ॥५।१।१७३॥ क्तक्तवतू ॥५।१।१७४॥

॥ इति पञ्चमाध्यायस्य प्रथमः पादः ॥

श्वसदवस्भ्यः परोक्षा वा ॥५।२।१॥ तत्र क्वसुकानौ तद्वत् ॥५।२।२॥ येयिवदनाश्वदनूचानम् ॥ ५।२।३ ॥ अद्यतनी ॥५।२।४॥ विशेषाविवक्षाव्यामिश्रे ॥५।२।५॥ रात्रौ वसोऽत्ययायामाऽस्वप्नर्यद्य ॥ ५।२।६ ॥ अनद्यतने ह्यस्तनी ॥ ५।२।७ ॥ ख्याते दृश्ये ॥ ५।२।८ ॥ अयदि स्मृत्यर्थे भविष्यन्ती ॥५।२।९॥ वाकाङ्क्षायाम् ॥५।२।१०॥ कृतास्मरणातिनिह्नवे परोक्षा ॥ ५।२।११ ॥ परोक्षे ॥ ५।२।१२ ॥ हशश्वद्युगान्तःप्रच्छचे ह्यस्तनी च ॥ ५।२।१३ ॥ अविवक्षिते ॥ ५।२।१४ ॥ वाद्यतनी पुरादौ ॥५।२।१५॥ स्मे च वर्तमाना ॥५।२।१६॥ ननौ पृष्टोक्तौ सद्वत् ॥५।२।१७॥ नन्वोर्वा ॥५।२।१८॥ सति ॥५।२।१९॥ शत्रानशावेष्यति तु सस्यौ ॥५।२।२०॥ तौ माङ्याक्रोशेषु ॥५।२।२१॥ वा वेत्तेः क्वसुः ॥५।२।२२॥ पूङ्यजः शानः ॥५।२।२३॥ वयःशक्तिशीले ॥५।२।२४॥ धारीङोऽकृच्छ्रेऽतृश् ॥५।२।२५॥ सुग्द्विषार्हः सत्रिशत्रुस्तुत्ये ॥५।२।२६॥ तृन् शीलधर्मसाधुषु ॥५।२।२७॥ भ्राज्यलंकृग्निराकृग्भूसहिरुचिवृतिवृधिचरिप्रजनापत्रप इष्णुः ॥५।२।२८॥ उदः पचिपतिपदिमदेः ॥५।२।२९॥ भूजेः ष्णुक् ॥५।२।३०॥ स्थाग्लाम्लापचिपरिमृजिक्षेः स्नुः ॥५।२।३१॥ त्रसिगृधिधृषिक्षिपः क्नुः ॥ ५।२।३२ ॥ सन्भिक्षाशंसेरुः ॥५।२।३३॥ विन्दिच्छू ॥५।२।३४॥ शृवन्देरारुः ॥५।२।३५॥ दाधेसिशदसदो रुः ॥५।२।३६॥ शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालुः ॥५।२।३७॥ डौ सासहिवावहिचाचलिपापति ॥५।२।३८॥ सस्निचक्रिदधिजग्निनेमि ॥५।२।३९॥ शृकमगमहनवृषभूस्थ उकण् ॥५।२।४०॥ लषपतपदः ॥५।२।४१॥ भूषाक्रोधार्थजुसृगृधिज्वलशुचश्चानः ॥५।२।४२॥ चलशब्दार्थादकर्मकात् ॥५।२।४३॥ इङितो व्यञ्जनाद्यन्तात् ॥५।२।४४॥ न णिङयसूददीपदोक्षः ॥५।२।४५॥ द्रमक्रमो यङः ॥५।२।४६॥ यजिजपिदशिवदादुकः ॥५।२।४७॥ जागुः ॥५।२।४८॥ शमष्टकात् घिनण् ॥५।२।४९॥ युजभुजभजत्यजरज्जद्विषदुषद्रुहदुहाभ्याहनः ॥५।२।५०॥ आङः क्रीडमुषः ॥ ५।२।५१ ॥ प्राच्च यमयसः ॥ ५।२।५२ ॥ मथलपः ॥ ५।२।५३ ॥ वेश्च व्रोः ॥ ५।२।५४ ॥ विपरिप्रात् सर्त्तेः ॥५।२।५५॥ समः पृचैप्ज्वरेः ॥५।२।५६॥ संवेः सृजः ॥५।२।५७॥ संपरिव्यनुप्राद्वदः ॥५।२।५८॥ वेर्धिचकत्थस्रम्भकषकसलसहनः ॥५।२।५९॥ व्यपाभेर्लषः ॥५।२।६०॥ संप्राद्वसात् ॥५।२।६१॥ समत्यपाभिव्यभेश्चरः ॥५।२।६२॥ समनुव्यवाद्रुधः ॥ ५।२।६३ ॥ वेर्दहः ॥ ५।२।६४ ॥ परेर्देविमुहश्च ॥ ५।२।६५ ॥ क्षिपरटः ॥५।२।६६॥ वादेश्च णकः ॥५।२।६७॥ निन्दहिंसक्लिशखादविनाशिन्याभाषासूयाऽनेकस्वरात् ॥५।२।६८॥ उपसर्गात् देवृदेविक्रुशः ॥५।२।६९॥ वृङभिक्षिलुण्टिजल्पिकुट्टाद्

टाकः ॥ ५।२।७० ॥ प्रात्सूजोरिन् ॥ ५।२।७१ ॥ जीण्दक्षिविश्रिपरिभूवमाभ्यमाव्यथः ॥५।२।७२॥ सृघस्यदो मरक् ॥५।२।७३॥ भञ्जिभासिमिदो घुरः ॥५।२।७४॥ वेत्तिच्छिदभिदः कित् ॥५।२।७५॥ भियो रुरुकलुकम् ॥ ५।२।७६ ॥ सृजीष्णशङ्घरप् ॥५।२।७७॥ गत्वरः ॥५।२।७८॥ स्थ्यजसहिंसदीपकम्पकमनमो रः॥५।२।७९॥ तृषिधृषिस्वपो नजिङ् ॥५।२।८०॥ स्थेशभासपिसकसो वरः ॥५।२।८१॥ यायावरः ॥५।२।८२॥ दिद्युद्दद्दज्जगज्जुहूवाकप्राट्धीश्रीद्रूस्तूज्वायतस्तृकटप्रूपरिव्राड्भ्राजादयः किपः ॥५।२।८३॥ शंसंस्वयंविप्राद् भुवो ड्डुः ॥५।२।८४॥ पुव इत्रो दैवते ॥५।२।८५॥ ऋषिनाम्नोः करणे ॥५।२।८६॥ लूधूसूखनचरसहार्त्तेः ॥५।२।८७॥ नीदाव्शसूयुयुजस्तुतुदसिसिचमिहपतपानहस्वट् ॥५।२।८८॥ हलकोडास्ये पुवः ॥५।२।८९॥ दंशेरुत्रः ॥ ५।२।९० ॥ धात्री ॥ ५।२।९१ ॥ ज्ञानेच्छार्चार्थेभ्योच्छील्यादिभ्यः क्तः ॥५।२।९२॥ उणादयः ॥५।२।९३॥

॥ इति पञ्चमस्य द्वितीयः पादः ॥

वर्त्स्यति गम्यादिः ॥५।३।१॥ वा हेतुसिद्धौ क्तः ॥५।३।२॥ कषोऽनिटः ॥५।३।३॥ भविष्यन्ती ॥५।३।४॥ अनद्यतने श्वस्तनी ॥५।३।५॥ परिदेवने ॥५।३।६॥ पुरायावतोर्वर्तमाना ॥५।३।७॥ कदाकर्ह्योर्नेवा ॥५।३।८॥ किंवृत्ते लिप्सायाम् ॥५।३।९॥ लिप्स्यसिद्धौ ॥५।३।१०॥ पञ्चम्यर्थहेतौ ॥ ५।३।११ ॥ सप्तमी चोर्ध्वमौहूर्तिके ॥५।३।१२॥ क्रियार्थाक्रियार्थायां तुम्णकच्भविष्यन्ती ॥ ५।३।१३ ॥ कर्मणोऽण् ॥५।३।१४॥ भाववचनाः ॥ ५।३।१५ ॥ पदरुजविशस्पृशो घञ् ॥ ५।३।१६ ॥ सर्त्तेः स्थिरव्याधिबलमत्स्ये ॥ ५।३।१७ ॥ भावाकर्त्रोः ॥५।३।१८॥ इङोऽपादाने तु टिद्वा ॥ ५।३।१९ ॥ श्रो वायुवर्णनिवृते ॥५।३।२०॥ निरभेः पूल्वः ॥५।३।२१॥ रोरुपसर्गात् ॥५।३।२२॥ भूश्र्यदोऽल् ॥५।३।२३॥ न्यादो न वा ॥५।३।२४॥ संनिव्युपाद्यमः ॥५।३।२५॥ नेर्नदगदपठस्वनक्वणः ॥ ५।३।२६ ॥ वैणे क्वणः ॥ ५।३।२७ ॥ युवर्णवृद्दृवशरणगमृद्ग्रहः ॥५।३।२८॥ वर्षादयः क्लीबे ॥५।३।२९॥ समुदोऽजः पशौ ॥५।३।३०॥ सृग्लहः प्रजनाक्षे ॥५।३।३१॥ पणेर्मानि ॥५।३।३२॥ संमदप्रमदौ हर्षे ॥५।३।३३॥ हनोऽन्तर्घनान्तर्घणौ देशे ॥ ५।३।३४ ॥ प्रघणप्रघाणौ गृहांशे ॥ ५।३।३५ ॥ निघोद्घसंघोद्घनापघनोपघ्नं निमितप्रशस्तगणात्याधानाङ्गासन्नम् ॥५।३।३६॥ मूर्तिनिचिताभ्रे घनः ॥ ५।३।३७ ॥ व्ययोद्रोः करणे ॥५।३।३८॥ स्तम्बाद्घ्नश्च ॥५।३।३९॥ परेर्घः ॥५।३।४०॥ ह्वःसमाह्वयाह्वयौ द्यूतनाम्नोः ॥५।३।४१॥ न्यभ्युपवेर्वाश्रोत् ॥५।३।४२॥ आङो युद्धे ॥५।३।४३॥ आह्वावो निपानम् ॥५।३।४४॥ भावेऽनुपसर्गात् ॥५।३।४५॥ हनो वा वध् च ॥५।३।४६॥ व्यधजपमद्भ्यः ॥५।३।४७॥ नवा कणयमहसस्वनः ॥५।३।४८॥ आदो रुप्लोः ॥५।३।४९॥ वर्षविघ्नेऽवाद्ग्रहः ॥५।३।५०॥ प्राद्रश्मितुलासूत्रे ॥५।३।५१॥ वृगो वस्त्रे ॥५।३।५२॥ उदः श्रेः ॥ ५।३।५३ ॥ युपूद्रोर्घञ् ॥ ५।३।५४ ॥ ग्रहः ॥ ५।३।५५ ॥ न्यवाच्छापे ॥ ५।३।५६ ॥ प्राल्लिप्सायाम् ॥ ५।३।५७ ॥ समो मुष्टौ ॥५।३।५८॥ युदुद्रोः ॥५।३।५९॥ नियश्चानुपसर्गाद्वा ॥५।३।६०॥ वोदः ॥५।३।६१॥ अवात् ॥५।३।६२॥ परेर्धूते ॥५।३।६३॥ भुवोऽवज्ञाने ॥५।३।६४॥ यज्ञे ग्रहः ॥५।३।६५॥ संस्तोः ॥५।३।६६॥ प्रात्स्तुद्रुस्रोः ॥५।३।६७॥ अयज्ञे स्रः ॥५।३।६८॥ वेरशब्दे प्रथने ॥५।३।६९॥ छन्दोनामि ॥५।३।७०॥ श्रुश्रोः

॥५।३।७१॥ न्युदो ग्रः ॥५।३।७२॥ किरो धान्ये ॥५।३।७३॥ नेर्वुः ॥५।३।७४॥ इणोऽध्रेषे ॥५।३।७५॥ परेः क्रमे ॥ ५।३।७६ ॥ व्युपाच्छीङः ॥५।३।७७॥ हस्तप्राप्ये चेरस्तेये ॥ ५।३।७८ ॥ चितिदेहावासोपसमाधाने कश्चादेः ॥ ५।३।७९ ॥ संघेऽनूर्ध्वे ॥५।३।८०॥ माने ॥ ५।३।८१ ॥ स्थादिभ्यः कः ॥ ५।३।८२ ॥ ट्वितोऽथुः ॥५।३।८३॥ ड्वितस्त्रिमक् तत्कृतम् ॥ ५।३।८४ ॥ यजिस्वपिरक्षियतिप्रच्छो नः ॥ ५।३।८५ ॥ विच्छो नङ् ॥५।३।८६॥ उपसर्गाद्दः किः ॥ ५।३।८७ ॥ व्याप्यादाधारे ॥ ५।३।८८ ॥ अन्तर्धेः ॥५।३।८९॥ अभिव्याप्तौ भावेऽनञिन् ॥५।३।९०॥ स्त्रियां क्तिः ॥५।३।९१॥ श्वादिभ्यः ॥ ५।३।९२ ॥ समिणासुगः ॥ ५।३।९३ ॥ सातिहेतियूतिजूतिस्तुतिकीर्ति ॥५।३।९४॥ गापापचो भावे ॥५।३।९५॥ स्थो वा ॥५।३।९६॥ आस्यदिव्रज्यजःक्यप् ॥ ५।३।९७ ॥ भृगो नाम्नि ॥ ५।३।९८ ॥ समजनिषन्निषदशीङ्सुग्विदिचरिमनीणः ॥५।३।९९॥ कृगः श च वा ॥५।३।१००॥ मृगयेच्छायाच्चातृष्णाकृपाभाश्रद्धाऽन्तर्द्धा ॥ ५।३।१०१ ॥ परेः सृचरेर्यः ॥ ५।३।१०२ ॥ वाटाट्यात् ॥ ५।३।१०३ ॥ जागुरश्च ॥ ५।३।१०४ ॥ शंसिप्रत्ययात् ॥५।३।१०५॥ क्तेटो गुरोर्व्यञ्जनात् ॥५।३।१०६॥ षितोऽङ् ॥५।३।१०७॥ भिदादयः ॥ ५।३।१०८ ॥ भीषिभूषिचिन्तिपूजिकथिकुम्बिवर्चिस्पृहितोलिदोलिभ्यः ॥५।३।१०९॥ उपसर्गादातः ॥५।३।११०॥ णिवेत्यासश्रन्थघट्टवन्देरनः ॥५।३।१११॥ इषोऽनिच्छायाम् ॥५।३।११२॥ पर्यधेर्वा ॥५।३।११३॥ क्रुत्संपदादिभ्यः क्विप् ॥५।३।११४॥ भ्यादिभ्यो वा ॥ ५।३।११५ ॥ व्यतिहारेऽनीहादिभ्यो अः ॥५।३।११६॥ नञोऽनिः शापे ॥५।३।११७॥ ग्लाहाज्यः ॥५।३।११८॥ प्रश्नाख्याने वेञ् ॥ ५।३।११९ ॥ पर्यायार्हणोत्पत्तौ च णकः ॥ ५।३।१२० ॥ नाम्नि पुंसि च ॥ ५।३।१२१ ॥ भावे ॥ ५।३।१२२ ॥ क्लीबे क्तः ॥ ५।३।१२३ ॥ अनट् ॥ ५।३।१२४ ॥ यत्कर्मस्पर्शात्कर्त्रङ्गसुखं ततः ॥ ५।३।१२५ ॥ रम्यादिभ्यः कर्तरि ॥ ५।३।१२६ ॥ कारणम् ॥ ५।३।१२७ ॥ भुजिपत्यादिभ्यः कर्मापादाने ॥ ५।३।१२८ ॥ करणादाधारे ॥ ५।३।१२९ ॥ पुंनाम्नि घः ॥ ५।३।१३० ॥ गोचरसंचरवहव्रजव्यजखलापणनिगमबकभगकषाकषनिकषम् ॥५।३।१३१॥ व्यञ्जनाद् घञ् ॥५।३।१३२॥ अवात् तॄस्तृभ्याम् ॥५।३।१३३॥ न्यायावायाध्यायोद्भावसंहारावहाराधादारजारम् ॥५।३।१३४॥ उदङ्कोऽतोये ॥ ५।३।१३५ ॥ आनायो जालम् ॥ ५।३।१३६ ॥ खनो डडरेकेकवकं च ॥ ५।३।१३७ ॥ इकिञितव् स्वरूपार्थे ॥ ५।३।१३८ ॥ दुःस्वीषतः कृच्छ्रार्थात् खल् ॥ ५।३।१३९ ॥ च्व्यर्थे कर्त्रप्यादभूकृगः ॥ ५।३।१४० ॥ शास्युधिदृशिधृषिमृषातोऽनः ॥ ५।३।१४१ ॥

॥ इति पञ्चमे तृतीयः पादः ॥

सत्सामीप्ये सद्धा ॥५।४।१॥ भूतवच्चाशंस्ये वा ॥५।४।२॥ क्षिप्राशंसार्थयोर्भविष्यन्तीसप्तम्यौ ॥५।४।३॥ संभावने सिद्धवत् ॥५।४।४॥ नानद्यतनः प्रबन्धासत्योः ॥ ५।४।५ ॥ पण्यत्यवधौ देशस्यार्वाग्भागे ॥५।४।६॥ कालस्यानहोरात्राणाम् ॥५।४।७॥ परे वा ॥ ५।४।८ ॥ सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः ॥५।४।९॥ भूते ॥ ५।४।१० ॥ वोतात् प्राक् ॥ ५।४।११ ॥ क्षेपेऽपिजात्वोर्वर्तमाना ॥५।४।१२॥ कथमि

सप्तमी च वा ॥५।४।१३॥ किंवृत्ते सप्तमीभविष्यन्त्यौ ॥५।४।१४॥ अश्रद्धाऽमर्षेऽन्यत्रापि ॥५।४।१५॥ किंकिलास्त्यर्थयोर्भविष्यन्तो ॥५।४।१६॥ जातुयद्यदायदौ सप्तमी ॥ ५।४।१७ ॥ क्षेपे च यच्चयत्रे ॥ ५।४।१८ ॥ चित्रे ॥ ५।४।१९ ॥ शेषे भविष्यन्त्ययदौ ॥ ५।४।२० ॥ सप्तम्युताप्योर्बाढे ॥ ५।४।२१ ॥ संभावनेऽलमर्थैं तदर्थानुक्तौ ॥५।४।२२॥ अयदि श्रद्धाधातौ न वा ॥५।४।२३॥ सतोच्छार्थात् ॥५।४।२४॥ वर्त्स्यति हेतुफले ॥ ५।४।२५ ॥ कामोक्तावकचिति ॥ ५।४।२६ ॥ इच्छार्थे सप्तमीपञ्चम्यौ ॥ ५।४।२७ ॥ विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थने ॥ ५।४।२८ ॥ प्रैषानुज्ञावसरे कृत्यपञ्चम्यौ ॥ ५।४।२९ ॥ सप्तमी चोर्ध्वमौहूर्तिके ॥ ५।४।३० ॥ स्मे पञ्चमी ॥५।४।३१॥ अधीष्टौ ॥५।४।३२॥ कालवेलासमये तुम् वावसरे ॥५।४।३३॥ सप्तमी यदि ॥५।४।३४॥ शक्तार्हे कृत्याश्च ॥ ५।४।३५ ॥ णिन् चावश्यकाधमर्ण्ये ॥ ५।४।३६ ॥ अर्हे तृच् ॥ ५।४।३७ ॥ आशिष्याशीःपञ्चम्यौ ॥ ५।४।३८ ॥ माङ्यद्यतनी ॥ ५।४।३९ ॥ सस्मे ह्यस्तनी च ॥ ५।४।४० ॥ धातोः संबन्धे प्रत्ययाः ॥ ५।४।४१ ॥ भूशाभीक्ष्ण्ये हिस्वौ यथाविधि तध्वमौ च तद्युष्मदि ॥ ५।४।४२ ॥ प्रचये नष्ठ सामान्यार्थस्य ॥ ५।४।४३ ॥ निषेधेऽलंखल्वोः क्त्वा ॥ ५।४।४४ ॥ परावरे ॥ ५।४।४५ ॥ निमील्यादिमेऽस्तुल्यकर्तृके ॥५।४।४६॥ प्राक्काले ॥५।४।४७॥ ख्णम् चाभीक्ष्ण्ये ॥५।४।४८॥ पूर्वाग्रेप्रथमे ॥५।४।४९॥ अन्यथैवंकथमित्थमः कृगोऽनर्थकात् ॥५।४।५०॥ यथातथादीर्घोन्तरे ॥५।४।५१॥ शापे ख्याप्यात् ॥५।४।५२॥ स्वाद्वर्थादर्दीर्घात् ॥५।४।५३॥ विद्दृग्भ्यः कात्स्न्र्ये णम् ॥५।४।५४॥ यावतो विन्दजीवः ॥ ५।४।५५ ॥ चर्मोदरात् पूरेः ॥ ५।४।५६ ॥ वृष्टिमान ऊलुक् चास्य वा ॥५।४।५७॥ चेलार्थात् क्नोपेः ॥५।४।५८॥ गात्रपुरुषात् स्नः ॥ ५।४।५९ ॥ शुष्कचूर्णरूक्षात् पिषस्तस्यैव ॥५।४।६०॥ कृग्रहोऽकृतजीवात् ॥ ५।४।६१ ॥ निमूलात्कषः ॥५।४।६२॥ हनश्च समूलात् ॥५।४।६३॥ करणेभ्यः ॥ ५।४।६४ ॥ स्वस्नेहनार्थात् पुष्पिषः ॥ ५।४।६५ ॥ हस्तार्थाद् ग्रहवर्तिवृतः ॥ ५।४।६६ ॥ बन्धेर्नाम्नि ॥ ५।४।६७ ॥ आधारात् ॥५।४।६८॥ कर्तुर्जीवपुरुषान्नश्वहः ॥ ५।४।६९ ॥ ऊर्ध्वात् पूःशुषः ॥ ५।४।७० ॥ व्याप्याच्चेवात् ॥ ५।४।७१ ॥ उपात् किरो लवने ॥५।४।७२॥ दंशेस्तृतीयया ॥५।४।७३॥ हिंसार्थादिकाप्यात् ॥५।४।७४॥ उपपीडरुधकर्षस्तत्सप्तम्या ॥५।४।७५॥ प्रमाणसमासत्योः ॥५।४।७६॥ पञ्चम्या त्वरायाम् ॥५।४।७७॥ द्वितीयया ॥५।४।७८॥ स्वाङ्गेनाऽध्रुवेण ॥५।४।७९॥ परिक्रेश्येन ॥५।४।८०॥ विशपतपदस्कन्दो वीप्साभीक्ष्ण्ये ॥ ५।४।८१ ॥ कालेन तृप्यस्वः क्रियान्तरे ॥५।४।८२॥ नाम्ना ग्रहादिशः ॥ ५।४।८३ ॥ कृगोऽव्ययेनानिष्टोक्तौ क्त्वाणमौ ॥ ५।४।८४ ॥ तिर्यचापवर्गे ॥५।४।८५॥ स्वाङ्गतश्च्व्यर्थनानाविनाधार्थेन भुवश्च ॥५।४।८६॥ तूष्णीमा ॥५।४।८७॥ आनुलोम्येऽन्वचा ॥५।४।८८॥ इच्छार्थे कर्मणः सप्तमी ॥५।४।८९॥ शकधृषज्ञारभलभसहार्हग्लाघटास्तिसमर्थार्थे च तुम् ॥ ५।४।९० ॥

॥ इति पञ्चमोऽध्यायः ॥

तद्धितोऽणादिः ॥६।१।१॥ पौत्रादि वृद्धम् ॥६।१।२॥ वंश्यज्यायोभ्रात्रोर्जीवति प्रपौत्राद्यस्त्री युवा ॥ ६।१।३ ॥ सपिण्डे वयःस्थानाधिके जीवद्वा ॥६।१।४॥ युष्मद्वृद्धं

कुत्सार्चे वा ॥६।१।५॥ संज्ञा दुर्वा ॥६।१।६॥ त्यदादिः ॥६।१।७॥ वृद्धिर्यस्य स्वरेष्वादिः ॥ ६।१।८ ॥ एदोद् देश एवेयादौ ॥ ६।१।९ ॥ प्राग्देशे ॥६।१।१०॥ वाद्यात् ॥६।१।११॥ गोत्रोत्तरपदात् गोत्रादिवाजिह्माकात्यहरितकात्यात् ॥६।१।१२॥ प्राग्जितादण् ॥ ६।१।१३ ॥ धनादेः पत्युः ॥६।१।१४॥ अनिदम्यणपवादे च दित्यदित्यादित्यमपत्युत्तरपदाञ्ञ्यः ॥ ६।१।१५ ॥ बहिषष्टीकण्च ॥ ६।१।१६॥ कल्यग्नेरेयण् ॥ ६।१।१७ ॥ पृथिव्या ञाञ् ॥ ६।१।१८ ॥ उत्सादेरञ् ॥ ६।१।१९ ॥ वष्कयादसमासे ॥६।१।२०॥ देवाद्यञ् च ॥६।१।२१॥ अस्थाम्नः ॥६।१।२२॥ लोम्नोऽपत्येषु ॥६।१।२३॥ द्विगोरनपत्ये यस्वरादेर्लुबद्विः ॥६।१।२४॥ प्राग्वतः स्त्रीपुंसान्नञ् स्नञ् ॥६।१।२५॥ त्वे वा ॥ ६।१।२६ ॥ गोः स्वरे यः ॥ ६।१।२७ ॥ ङसोऽपत्ये ॥ ६।१।२८ ॥ आद्यात् ॥६।१।२९॥ वृद्धाद्यूनि ॥६।१।३०॥ अत इञ् ॥६।१।३१॥ बाह्वादिभ्यो गोत्रे ॥६।१।३२॥ वर्मणोऽचक्रात् ॥६।१।३३॥ अजादिभ्यो धेनोः ॥६।१।३४॥ ब्राह्मणाद्वा ॥६।१।३५॥ भूयःसंभूयोम्भोमितौजसः स्लुक् च ॥ ६।१।३६ ॥ शालङ्क्यौदिषाडिबाड्बलि ॥६।१।३७॥ व्यासवरुटसुधातृनिषादबिम्बचण्डालादन्तस्य चाक् ॥६।१।३८॥ पुनर्भूपुत्रदुहितृननान्दुरनन्तरेऽञ् ॥ ६।१।३९ ॥ परस्त्रियाः परशुश्वासावर्ण्ये ॥६।१।४०॥ बिदादेर्वृद्धे ॥६।१।४१॥ गर्गादेर्यञ् ॥६।१।४२॥ मधुबभ्रोर्ब्राह्मणकौशिके ॥ ६।१।४३ ॥ कपिबोधादाङ्गिरसे ॥६।१।४४॥ वतण्डात् ॥६।१।४५॥ स्त्रियां लुप् ॥६।१।४६॥ कुञादेर्ञ्यन्यः ॥६।१।४७॥ स्त्रीबहुष्वायनञ् ॥६।१।४८॥ अश्वादेः ॥६।१।४९॥ शपभरद्वाजादात्रेये ॥ ६।१।५० ॥ भर्गात् त्रैगर्त्ते ॥ ६।१।५१ ॥ आत्रेयाद् भारद्वाजे ॥६।१।५२॥ नडादिभ्य आयनण् ॥ ६।१।५३ ॥ यञिञः ॥ ६।१।५४ ॥ हरितादेरञः ॥ ६।१।५५ ॥ कोष्टृशलङ्कोर्लुक् च ॥६।१।५६॥ दर्भकृष्णाग्निशर्मरणशरद्वच्छुनकादाग्रायणब्राह्मणवार्षगण्यवाशिष्ठभार्गववात्स्ये ॥ ६।१।५७ ॥ जीवन्तपर्वताद्वा ॥ ६।१।५८ ॥ द्रोणाद्वा ॥६।१।५९॥ शिवादेरण् ॥६।१।६०॥ ऋषिवृष्ण्यन्धककुरुभ्यः ॥६।१।६१॥ कन्यात्रिवेण्याः कनीनत्रिवर्णं च ॥६।१।६२॥ शुङ्गाभ्यां भारद्वाजे ॥६।१।६३॥ विकर्णच्छगलाद्वात्स्यात्रेये ॥६।१।६४॥ णश्च विश्रवसो विश्लुक् च वा ॥६।१।६५॥ संख्यासंभद्रान्मातुर्मातुर्षे ॥ ६।१।६६ ॥ अदोनर्दीमानुषीनाम्नः ॥६।१।६७॥ पीलासाल्वामण्डूकाद्वा ॥६।१।६८॥ दितेश्चैयण् वा ॥ ६।१।६९ ॥ ङ्याप्ययूङः ॥६।१।७०॥ द्विस्वरादनद्याः ॥ ६।१।७१ ॥ इतोऽनिञः ॥६।१।७२॥ शुभ्रादिभ्यः ॥६।१।७३॥ श्यामलक्षणाद्वाशिष्ठे ॥६।१।७४॥ विकर्णकुषीतकात्काश्यपे ॥६।१।७५॥ भ्रुवो भुव् च ॥६।१।७६॥ कल्याण्यादेरिन् चान्तस्य ॥६।१।७७॥ कुलटाया वा ॥६।१।७८॥ चटकाण्णैरः स्त्रियां तु लुप् ॥६।१।७९॥ क्षुद्राभ्य परण् वा ॥६।१।८०॥ गोधाया दुष्टे णारश्च ॥६।१।८१॥ जण्टपण्टात् ॥६।१।८२॥ चतुष्पाद्भ्य एयञ् ॥६।१।८३॥ गृष्ट्यादेः ॥६।१।८४॥ वाडवेयो वृषे ॥६।१।८५॥ रेवत्यादेरिकण् ॥६।१।८६॥ वृद्धस्त्रियाः क्षेपे णश्च ॥६।१।८७॥ भ्रातुर्व्यः ॥६।१।८८॥ ईयः स्वसुश्च ॥६।१।८९॥ मातृपित्रादेर्ङेयणीयणौ ॥६।१।९०॥ श्वशुराद्यः ॥६।१।९१॥ जातौ राज्ञः ॥६।१।९२॥ क्षत्रादियः ॥६।१।९३॥ मनोर्यांणौ षश्चान्तः ॥६।१।९४॥ माणवः कुत्सायाम् ॥ ६।१।९५ ॥ कुलादीनः ॥ ६।१।९६ ॥ यैयकञावसमासे वा ॥ ६।१।९७ ॥

दुष्कुलादेयण् वा ॥ ६।१।९८ ॥ महाकुलाद्वाऽञ्नीनञौ ॥ ६।१।९९ ॥ कुवदिर्ज्यः ॥६।१।१००॥ सम्राजः क्षत्रिये ॥६।१।१०१॥ सेनान्तकारुलक्ष्मणादिञ् च ॥६।१।१०२॥ सुयाम्नः सौवीरेष्वायनिञ् ॥ ६।१।१०३ ॥ पाण्टाहृतिमिमताण्णश्च ॥ ६।१।१०४ ॥ भागवित्तितार्णविन्दवाकशापेयान्निन्दायामिकण् वा ॥६।१।१०५॥ सौयामायनियामुन्दायनिवार्ष्यायणेरीयश्च वा ॥६।१।१०६॥ तिकादेरायनिञ् ॥६।१।१०७॥ दगुकोसलकर्मारच्छागवृषाद्यादिः॥६।१।१०८॥ द्विस्वरादणः॥६।१।१०९॥ अवृद्धाद्दोर्नवा ॥६।१।११०॥ पुत्रान्तात् ॥६।१।१११॥ चर्मिवर्मिंगारेटकार्कट्यकाकलङ्कावाकिनाच्च कश्चान्तोऽन्त्यस्वरात् ॥६।१।११२॥ अदोरायनिः प्रायः ॥६।१।११३॥ राष्ट्रक्षत्रियात्सरूपाद्राजापत्ये ञिरञ् ॥६।१।११४॥ गान्धारिसाल्वेयाभ्याम् ॥ ६।१।११५ ॥ पुरुमगधकलिङ्गसूरमसद्विस्वरादण् ॥६।१।११६॥ साल्वांशप्रत्यग्रथकलकूटाश्मकादिञ् ॥६।१।११७॥ दुनादिकुर्वित्कोसलाजादाञ्ञ्यः ॥ ६।१।११८ ॥ पाण्डोर्ढण् ॥ ६।१।११९ ॥ शकादिभ्यो द्रेर्लुप् ॥६।१।१२०॥ कुन्त्यवन्तेः स्त्रियाम् ॥६।१।१२१॥ कुरोर्वा ॥६।१।१२२॥ द्रेरञणोऽप्राच्यभर्गादेः ॥६।१।१२३॥ बहुष्वस्त्रियाम्॥६।१।१२४॥ यस्कादेर्गोत्रे ॥६।१।१२५॥ यञञोऽश्यापर्णान्तगीपवनादेः ॥६।१।१२६॥ कौण्डिन्यागस्त्ययोः कुण्डिनागस्तौ च ॥६।१।१२७॥ भृग्वङ्गिरस्कुत्सवशिष्ठगोतमात्रेः ॥६।१।१२८॥ प्राग्भरते बहुस्वरादिञः ॥६।१।१२९॥ वोपकादेः ॥६।१।१३०॥ तिककितवादौ द्वन्द्वे ॥६।१।१३१॥ ब्वादेस्तथा ॥६।१।१३२॥ वान्येन ॥६।१।१३३॥ द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा ॥६।१।१३४॥ न प्राग्जितीये स्वरे ॥ ६।१।१३५ ॥ गर्गभार्गविका ॥ ६।१।१३६ ॥ यूनि लुप् ॥ ६।१।१३७ ॥ वायनणायनिञोः ॥ ६।१।१३८ ॥ द्रीञो वा ॥६।१।१३९॥ त्रिदार्षादणिञोः ॥ ६।१।१४० ॥ अब्राह्मणात् ॥ ६।१।१४१ ॥ पैलादेः ॥ ६।१।१४२ ॥ प्राच्येञोऽतौल्वल्यादेः ॥६।१।१४३॥

॥ इति षष्ठाध्यायस्य प्रथमः पादः ॥

रागाट्टो रक्ते ॥ ६।२।१ ॥ लाक्षारोचनादिकण् ॥ ६।२।२ ॥ शकलकर्दमाद्वा ॥६।२।३॥ नीलपीतादकम् ॥६।२।४॥ उदितगुरोर्भाषुक्तेऽब्दे ॥६।२।५॥ चन्द्रयुक्तात्काले लुप् त्वप्रयुक्ते ॥६।२।६॥ द्वन्द्वादीयः ॥६।२।७॥ श्रवणाश्वत्थाद्यान्नाम्न्यः ॥६।२।८॥ षष्ठ्याः समूहे ॥६।२।९॥ भिक्षादेः ॥६।२।१०॥ क्षुद्रकमालवात्सेनानाम्नि ॥६।२।११॥ गोत्रोक्षवत्सोष्ट्रवृद्धाजोरभ्रमनुष्यराजराजन्यराजपुत्रादकञ् ॥६।२।१२॥ केदाराण् ण्यश्च ॥६।२।१३॥ कवचिहस्त्यचित्ताच्चेकण् ॥६।२।१४॥ धेनोरनञः ॥६।२।१५॥ ब्राह्मणमाणववाडवाद्यः ॥६।२।१६॥ गणिकाया ण्यः ॥६।२।१७॥ केशाद्वा ॥६।२।१८॥ वाभ्वादीयः ॥६।२।१९॥ पर्श्वा ङ्वण् ॥६।२।२०॥ ईनोऽहः क्रतौ ॥६।२।२१॥ पृष्ठाद्यः ॥६।२।२२॥ चरणाद्धर्मवत् ॥६।२।२३॥ गोरथवातात् त्रल्कट्यलूलम् ॥६।२।२४॥ पाशादेश्च ल्यः ॥६।२।२५॥ श्वादिभ्योऽञ् ॥६।२।२६॥ खलादिभ्यो लिन् ॥६।२।२७॥ ग्रामजनबन्धुगजसहायात्तल् ॥६।२।२८॥ पुरुषात् कृतहितवधविकारे चैयञ् ॥६।२।२९॥ विकारे ॥६।२।३०॥ प्राण्यौषधिवृक्षेभ्योऽवयवे च ॥६।२।३१॥ तालाद्धनुषि ॥६।२।३२॥ त्रपुजतोः षोऽन्तश्च ॥ ६।२।३३ ॥ शम्या लः ॥ ६।२।३४ ॥ पयोद्रोर्यः ॥ ६।२।३५ ॥ उष्ट्रादकञ् ॥ ६।२।३६ ॥

उमोर्णाद्वा ॥६।२।३७॥ एण्या एयञ् ॥६।२।३८॥ कौशेयम् ॥६।२।३९॥ परशव्याद्यलुक् च ॥६।२।४०॥ कंसीयाञ् ञ्यः ॥६।२।४१॥ हेयार्थान्माने ॥६।२।४२॥ द्रोर्वयः ॥६।२।४३॥ मानात् क्रीतवत् ॥६।२।४४॥ हेमादिभ्योऽञ् ॥६।२।४५॥ अभक्ष्याच्छादने वा मयट् ॥६।२।४६॥ शरदर्भकूदीतृणसोमवल्वजात् ॥६।२।४७॥ पकस्वरात् ॥६।२।४८॥ दोरप्राणिनः ॥६।२।४९॥ गोः पुरीषे ॥६।२।५०॥ व्रीहेः पुरोडाशे ॥६।२।५१॥ तिलयवाद्नाम्नि ॥६।२।५२॥ पिष्टात् ॥६।२।५३॥ नाम्नि कः ॥६।२।५४॥ ह्योगोदोहादीनञ् हियङ्गुश्चास्य ॥ ६।२।५५ ॥ अपो यञ् वा ॥ ६।२।५६ ॥ लुब् बहुलं पुष्पमूले ॥ ६।२।५७ ॥ फले ॥ ६।२।५८ ॥ प्लक्षादेरण् ॥ ६।२।५९ ॥ जम्ब्वा वा ॥ ६।२।६० ॥ न द्विरद्रुवयगोमयफलात् ॥ ६।२।६१ ॥ पितृमातुर्व्यङ्ङं भ्रातरि ॥ ६।२।६२ ॥ पित्रोर्डामहट् ॥ ६।२।६३ ॥ अवेर्दुग्धे सोढदूसमरीसम् ॥ ६।२।६४ ॥ राष्ट्रेऽनङ्गादिभ्यः ॥ ६।२।६५ ॥ राजन्यादिभ्योऽकञ् ॥ ६।२।६६ ॥ वसातेर्वा ॥ ६।२।६७ ॥ भोरिक्यैषुकार्यादेर्विधभक्तम् ॥६।२।६८॥ निवासादूरभव इति देशनाम्नि ॥६।२।६९॥ तदत्रास्ति ॥ ६।२।७० ॥ तेन निर्वृत्ते च ॥ ६।२।७१ ॥ नद्यां मतुः ॥ ६।२।७२ ॥ मध्वादेः ॥ ६।२।७३ ॥ नडकुमुदवेतसमहिषाद् डित् ॥६।२।७४॥ नडशादात् ड्वलः ॥६।२।७५॥ शिखायाः ॥६।२।७६॥ शिरीषादिककर्णौ ॥६।२।७७॥ शर्करायाः इकणीयाण् च ॥ ६।२।७८॥ रोऽश्मादेः ॥६।२।७९॥ प्रेक्षादेरिन् ॥६।२।८०॥ तृणादेः सल् ॥६।२।८१॥ काशादेरिलः ॥६।२।८२॥ अरोहणादेरकण् ॥६।२।८३॥ सुपन्थ्यादेर्ण्यः ॥६।२।८४॥ सुतंगमादेरिञ् ॥ ६।२।८५ ॥ बलादेर्यः ॥ ६।२।८६ ॥ अहरादिभ्योऽञ् ॥ ६।२।८७ ॥ सख्यादेरेयण् ॥६।२।८८॥ पन्थ्यादेरायनण् ॥६।२।८९॥ कर्णादेरायनिञ् ॥६।२।९०॥ उत्करादेरोयः ॥६।२।९१॥ नडादेः कोयः ॥६।२।९२॥ कृशाश्वादेरीयण् ॥६।२।९३॥ ऋश्यादेः कः ॥६।२।९४॥ वराहादेः कण् ॥६।२।९५॥ कुमुदादेरिकः ॥६।२।९६॥ अश्वत्थादेरिकण् ॥६।२।९७॥ सास्यं पौर्णमासी ॥६।२।९८॥ आग्रहायण्यश्वत्थादिकण् ॥ ६।२।९९ ॥ चैत्रीकार्तिकीफाल्गुनीश्रवणाद्वा ॥ ६।२।१०० ॥ देवता ॥ ६।२।१०१ ॥ पैङ्गाक्षीपुत्रादेरीयः ॥ ६।२।१०२ ॥ शुक्रादियः ॥६।२।१०३॥ शतरुद्रात्तौ ॥६।२।१०४॥ अपोनपादपान्नपातस्तु चान्तः ॥६।२।१०५॥ महेन्द्राद्वा ॥६।२।१०६॥ कसोमाद्ढ्यण् ॥ ६।२।१०७ ॥ द्यावापृथिवीशुनासीराग्नीषोममरुत्वद्बास्तोष्पतिगृहमेधादीययौ ॥६।२।१०८॥ वाय्वृतुपित्रुषसो यः ॥६।२।१०९॥ महाराजप्रोष्ठपदादिकण् ॥६।२।११०॥ कालाद् भववत् ॥ ६।२।१११ ॥ आदेश्छन्दसः प्रगाथे ॥ ६।२।११२ ॥ योद्धृप्रयोजनाद्युद्धे ॥ ६।२।११३ ॥ भावघञोऽस्यां णः ॥ ६।२।११४ ॥ श्यैनंपाता तैलंपाता ॥ ६।२।११५ ॥ प्रहरणात् क्रीडायां णः ॥ ६।२।११६ ॥ तद्वेत्त्यधीते ॥ ६।२।११७ ॥ न्यायादेरिकण् ॥६।२।११८॥ पदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकात् ॥६।२।११९॥ अकल्पात् सूत्रात् ॥ ६।२।१२० ॥ अधर्मक्षत्रत्रिसंसर्गाङ्गाद्विद्यायाः ॥ ६।२।१२१ ॥ याज्ञिकौक्थिकलौकायतिकम् ॥ ६।२।१२२ ॥ अनुब्राह्मणादिन् ॥ ६।२।१२३ ॥ शतषष्टेः पथ इकट् ॥ ६।२।१२४ ॥ पदोत्तरपदेभ्य इकः ॥ ६।२।१२५ ॥ पदक्रमशिक्षामीमांसासाम्नोऽकः ॥ ६।२।१२६ ॥ ससर्वपूर्वाल्लुप् ॥ ६।२।१२७ ॥ संख्याङ्गा-

त्सूत्रे ॥ ६।२।१२८ ॥ प्रोक्तात् ॥ ६।२।१२९ ॥ वेदेनब्राह्मणमत्रैव ॥ ६।२।१३० ॥ तेन च्छन्ने रथे ॥६।२।१३१॥ पाण्डुकम्बलादिन् ॥६।२।१३२॥ दृष्टे साम्नि नाम्नि ॥६।२।१३३॥ गोत्रादङ्कवत् ॥६।२।१३४॥ वामदेवाद्यः ॥६।२।१३५॥ डिद्वाण् ॥६।२।१३६॥ वा जाते द्विः ॥६।२।१३७॥ तत्रोद्धृते पात्रेभ्यः ॥६।२।१३८॥ स्थण्डिलाच्छेते व्रती ॥ ६।२।१३९ ॥ संस्कृते भक्ष्ये ॥ ६।२।१४० ॥ शूलोखाद्यः ॥ ६।२।१४१ ॥ क्षीरादेयण् ॥६।२।१४२॥ दध्न इकण् ॥६।२।१४३॥ वोदश्वितः ॥६।२।१४४॥ क्वचित् ॥६।२।१४५॥

॥ इति षष्ठाध्यायस्य द्वितीयः पादः ॥

शेषे ॥६।३।१॥ नद्यादेरेयण् ॥६।३।२॥ राष्ट्रादियः ॥६।३।३। दूरादेत्यः ॥६।३।४॥ उत्तरादाहञ् ॥६।३।५॥ पारावारादीनः ॥६।३।६॥ व्यस्तव्यत्ययस्तात् ॥६।३।७॥ द्युप्रागपागुदक्प्रतीचो यः ॥६।३।८॥ ग्रामादीनञ् च ॥६।३।९॥ कट्यादेश्चैयकञ् ॥६।३।१०॥ कुण्डयादिभ्यो यलुक् च ॥६।३।११॥ कुलकुक्षिग्रीवाच्छ्वास्यलंकारे ॥६।३।१२॥ दक्षिणापश्चात्पुरसस्त्यण् ॥६।३।१३॥ वह्ल्यूर्दिपर्दिकापिश्याष्टायनण् ॥६।३।१४॥ रङ्कोः प्राणिनि वा ॥६।३।१५॥ केहामात्रतसस्त्यच् ॥६।३।१६॥ नेर्धुवे ॥६।३।१७॥ निसो गते ॥६।३।१८॥ ऐषमोह्यस्श्वसो वा ॥६।३।१९॥ कन्थाया इकण् ॥६।३।२०॥ वर्णावकञ् ॥६।३।२१॥ रूप्योत्तरपदारण्याण्णः ॥६।३।२२॥ दिक्पूर्वपदादनाम्नः ॥३।३।२३॥ मद्रादञ् ॥६।३।२४॥ उदग्ग्रामाद्यकृल्लोम्नः ॥६।३।२५॥ गोष्ठीतैकोनैकेतीगोमतीशूरसेनवाह्रीकरोमकपटच्चरात् ॥६।३।२६॥ शकलादेर्यञः ॥६।३।२७॥ वृद्धेञः ॥६।३।२८॥ न द्विस्वरात् प्राग्भरतात् ॥ ६।३।२९ ॥ भवतोरिकणीयसौ ॥ ६।३।३० ॥ परजनराज्ञोऽकीयः ॥ ६।३।३१ ॥ दोरीयः ॥ ६।३।३२ ॥ उष्णादिभ्यः कालात् ॥ ६।३।३३ ॥ व्यादिभ्यो णिकेकणौ ॥ ६।३।३४ ॥ काश्यादेः ॥ ६।३।३५ ॥ वाह्रीकेषु ग्रामात् ॥ ६।३।३६ ॥ वोशीनरेषु ॥ ६।३।३७ ॥ वृजिमद्राद् देशात्कः ॥ ६।३।३८ ॥ उवर्णादिकण् ॥ ६।३।३९ ॥ दोरेव प्राचः ॥ ६।३।४० ॥ ईतोऽकञ् ॥ ६।३।४१ ॥ रोपान्त्यात् ॥ ६।३।४२ ॥ प्रस्थपुरवहान्तयोपान्त्यधन्वार्थात् ॥ ६।३।४३ ॥ राष्ट्रेभ्यः ॥ ६।३।४४ ॥ बहुविषयेभ्यः ॥ ६।३।४५ ॥ धूमादेः ॥ ६।३।४६ ॥ सौवीरेषु कूलात् ॥६।३।४७॥ समुदान्नृनावोः ॥६।३।४८॥ नगरात्कुत्सादाक्ष्ये ॥६।३।४९॥ कच्छाग्निवक्त्रवर्तोत्तरपदात् ॥६।३।५०॥ अरण्यात्पथिन्यायाध्यायेभमरविहारे ॥६।३।५१॥ गोमये वा ॥ ६।३।५२ ॥ कुरुयुगंधराद्वा ॥ ६।३।५३ ॥ साल्वाद्गोयवाग्वपत्तौ ॥ ६।३।५४ ॥ कच्छादेर्नृलृस्थे ॥६।३।५५॥ कोपान्त्याच्चाण् ॥ ६।३।५६ ॥ गर्त्तोत्तरपदादीयः ॥ ६।३।५७ ॥ कटपूर्वात्प्राचः ॥ ६।३।५८ ॥ कखोपान्त्यकन्थापलदनगरग्रामह्रदोत्तरपदाद्दोः ॥ ६।३।५९ ॥ पर्वतात् ॥ ६।३।६० ॥ अनरे वा ॥ ६।३।६१ ॥ पर्णकृकणाद् भारद्वाजात् ॥६।३।६२॥ गहादिभ्यः ॥६।३।६३॥ पृथिवीमध्यान्मध्यमश्रास्य ॥ ६।३।६४ ॥ निवासाच्चरणेऽण् ॥ ६।३।६५ ॥ वेणुकादिभ्य ईयण् ॥ ६।३।६६ ॥ वा युष्मदस्मदोऽञीनञौ युष्माकास्माकं चास्यैकत्वे तु तवकममकम् ॥ ६।३।६७ ॥ द्वीपादनुसमुद्रं यः ॥ ६।३।६८ ॥ अर्धाद्यः ॥ ६।३।६९ ॥ सपूर्वाद्दिकण् ॥ ६।३।७० ॥ दिक्पूर्वात्तौ ॥ ६।३।७१ ॥ ग्रामराष्ट्रांशादणिकणौ ॥ ६।३।७२ ॥ परावराधमोत्तमादेर्यः

॥६।३।७३॥ अमोऽन्तावोधसः ॥६।३।७४॥ पश्चादाद्यन्ताग्रादिमः ॥६।३।७५॥ मध्यान्मः ॥६।३।७६॥ मध्य उत्कर्षापकर्षयोरः ॥६।३।७७॥ अध्यात्मादिभ्य इकण् ॥६।३।७८॥ समानपूर्वलोकोत्तरपदात् ॥६।३।७९॥ वर्षाकालेभ्यः ॥६।३।८०॥ शरदः श्राद्धे कर्मणि ॥६।३।८१॥ न वा रोगातपे ॥६।३।८२॥ निशाप्रदोषात् ॥६।३।८३॥ श्वसस्तादिः ॥६।३।८४॥ चिरपरुत्परारेस्तनः ॥६।३।८५॥ पुरो नः ॥६।३।८६॥ पूर्वाह्णापराह्णात्तनट् ॥६।३।८७॥ सायंचिरंप्राह्णेप्रगेऽव्ययात् ॥६।३।८८॥ भर्तुसंध्यादेरण् ॥६।३।८९॥ संवत्सरात् फलपर्वणोः ॥६।३।९०॥ हेमन्ताद्वा तलुक् च ॥६।३।९१॥ प्रावृष एण्यः ॥६।३।९२॥ स्थामाजिनान्ताल्लुप् ॥ ६।३।९३ ॥ तत्र कृतलब्धक्रीतसंभूते ॥ ६।३।९४ ॥ कुशले ॥६।३।९५॥ पथोऽकः ॥६।३।९६॥ कोऽश्मादेः ॥६।३।९७॥ जाते ॥६।३।९८॥ प्रावृष इकः ॥६।३।९९॥ नाक्षि शरदोऽकञ् ॥ ६।३।१०० ॥ सिन्ध्वपकरात्काणौ ॥६।३।१०१॥ पूर्वाह्णापराह्णाद्र्धामूलप्रदोषादकः ॥६।३।१०२॥ पथः पन्थ च ॥६।३।१०३॥ अश्व वामावास्यायाः ॥ ६।३।१०४ ॥ श्रविष्ठाषाढादीयण् च ॥ ६।३।१०५ ॥ फल्गुन्याष्टः ॥६।३।१०६॥ बहुलानुराधापुष्यार्थपुनर्वसुहस्तविशाखास्वातेर्लुप् ॥६।३।१०७॥ चित्रारेवतीरोहिण्याः स्त्रियाम् ॥६।३।१०८॥ बहुलमन्येभ्यः ॥६।३।१०९॥ स्थानान्तगोशालखरशालात् ॥६।३।११०॥ वत्सशालाद्वा ॥६।३।१११॥ सौदर्यसमानोदर्यौ ॥६।३।११२॥ कालाद् देय ऋणे ॥६।३।११३॥ कलाप्यश्वत्थयवबुसोमाव्यासैषमसोऽकः ॥६।३।११४॥ ग्रीष्मावरसमादकञ् ॥ ६।३।११५ ॥ संवत्सराग्रहायण्या इकण् च ॥ ६।३।११६ ॥ साधुपुष्यत्पच्यमाने ॥६।३।११७॥ उप्ते ॥६।३।११८॥ आश्वयुज्या अकञ् ॥६।३।११९॥ ग्रीष्मवसन्ताद्वा ॥६।३।१२०॥ व्याहरति मृगे ॥६।३।१२१॥ जयिनि च ॥६।३।१२२॥ भवे ॥६।३।१२३॥ दिगादिदेहांशाद्यः॥६।३।१२४॥ नाम्न्युदकात् ॥६।३।१२५॥ मध्याह्निनण्णेयामोऽन्तश्च ॥६।३।१२६॥ जिह्वामूलाङ्गुलेश्चेयः॥६।३।१२७॥ वर्गान्तात् ॥६।३।१२८॥ ईनयौ चाशब्दे ॥ ६।३।१२९ ॥ दतिकुक्षिकलशिवस्त्यहेरेयण् ॥ ६।३।१३० ॥ आस्तेयम् ॥६।३।१३१॥ ग्रीवातोऽण् च ॥६।३।१३२॥ चतुर्मासान्नाग्नि ॥६।३।१३३॥ यज्ञे ञ्यः ॥ ६।३।१३४ ॥ गंभीरपञ्चजनबहिर्देवात् ॥ ६।३।१३५ ॥ परिमुखादेरव्ययीभावात् ॥६।३।१३६॥ अन्तःपूर्वादिकण् ॥६।३।१३७॥ पर्यनोर्ग्रामात् ॥६।३।१३८॥ उपाज्जानुनीचिकर्णात्प्रायेण ॥ ६।३।१३९ ॥ रूढावन्तःपुरादिकः ॥६।३।१४०॥ कर्णललाटात्कल् ॥ ६।३।१४१ ॥ तस्य व्याख्याने च ग्रन्थात् ॥ ६।३।१४२ ॥ प्रायो बहुस्वरादिकण् ॥६।३।१४३॥ ऋगृद्द्विस्वरयागेभ्यः ॥६।३।१४४॥ ऋवेरध्याये ॥६।३।१४५॥ पुरोडाशपौरोडाशादिकेकटौ ॥ ६।३।१४६ ॥ छन्दसो यः ॥ ६।३।१४७ ॥ शिक्षादेश्चाण् ॥ ६।३।१४८ ॥ तत आगते ॥ ६।३।१४९ ॥ विद्यायोनिसंबन्धादकञ् ॥ ६।३।१५० ॥ पितुर्यो वा ॥ ६।३।१५१ ॥ ऋत इकण् ॥ ६।३।१५२ ॥ आयस्थानात् ॥ ६।३।१५३ ॥ शुण्डिकादेरण् ॥ ६।३।१५४ ॥ गोत्रादङ्कवत् ॥ ६।३।१५५ ॥ नृहेतुभ्यो रूप्यमयटौ वा ॥६।३।१५६॥ प्रभवति ॥६।३।१५७॥ वैडूर्यः ॥६।३।१५८॥ त्यदादेर्मयट् ॥६।३।१५९॥ तस्येदम् ॥ ६।३।१६० ॥ हलसीरादिकण् ॥ ६।३।१६१ ॥ समिध आधाने टेन्यण् ॥६।३।१६२॥ विवाहे द्वंद्वादकल् ॥६।३।१६३॥ अदेवासुरादिभ्यो वैरे ॥ ६।३।१६४ ॥

नटान्नृत्ते ञ्यः ॥ ६।३।१६५ ॥ छन्दोगौक्थिकयाज्ञिकबह्वृचाच्च धर्मान्नायसंघे ॥६।३।१६६॥ आथर्वणिकादणिकलुक् च ॥ ६।३।१६७ ॥ चरणादकञ् ॥ ६।३।१६८ ॥ गोत्राददण्डमाणवशिष्ये ॥६।३।१६९॥ रैवतिकादेरीयः ॥ ६।३।१७० ॥ कौपिञ्जलहास्तिपदादण् ॥६।३।१७१॥ संघघोषाङ्कलक्षणेऽञ्यञ्त्रिञः ॥ ६।३।१७२ ॥ शाकलादकञ् च ॥६।३।१७३॥ गृहेऽग्नोधो रण् धश्च ॥६।३।१७४॥ रथात्सादेश्च वोद्वङ्गे ॥६।३।१७५॥ यः ॥६।३।१७६॥ पत्रपूर्वादञ् ॥६।३।१७७॥ वाहनात् ॥ ६।३।१७८ ॥ वाह्यपथ्युपकरणे ॥६।३।१७९॥ वहेस्तुरिश्चादिः ॥ ६।३।१८० ॥ तेन प्रोक्ते ॥६।३।१८१॥ मौदादिभ्यः ॥ ६।३।१८२ ॥ कठादिभ्यो वेदे लुप् ॥ ६।३।१८३ ॥ तित्तिरिवरतन्तुखण्डिकोखादीयण् ॥ ६।३।१८४ ॥ छगलिनो णेयिन् ॥ ६।३।१८५ ॥ शौनकादिभ्यो णिन् ॥ ६।३।१८६ ॥ पुराणे कल्पे ॥ ६।३।१८७ ॥ काश्यपकौशिकाद्वेदवच्च ॥ ६।३।१८८ ॥ शिलालिपाराशर्यान्नटभिक्षुसूत्रे ॥ ६।३।१८९ ॥ कृशाश्वकर्मन्दादिन् ॥ ६।३।१९० ॥ उपज्ञाते ॥ ६।३।१९१ ॥ कृते ॥ ६।३।१९२ ॥ नाम्नि मश्चिकादिभ्यः ॥६।३।१९३॥ कुलालादेरकञ् ॥६।३।१९४॥ सर्वचर्मण ईनेनञौ ॥६।३।१९५॥ उरसो याणौ ॥ ६।३।१९६ ॥ छन्दस्यः ॥ ६।३।१९७ ॥ अमोऽधिकृत्य ग्रन्थे ॥ ६।३।१९८ ॥ ज्योतिषम् ॥ ६।३।१९९ ॥ शिशुक्रन्दादिभ्य ईयः ॥ ६।३।२०० ॥ ब्रह्मात्प्रायः ॥ ६।३।२०१ ॥ अभिनिष्क्रामति द्वारे ॥ ६।३।२०२ ॥ गच्छति पथिदूते ॥६।३।२०३॥ भजति ॥ ६।३।२०४ ॥ महाराजादिकण् ॥ ६।३।२०५ ॥ अचित्तादद्देशकालात् ॥ ६।३।२०६ ॥ वासुदेवार्जुनादकः ॥ ६।३।२०७ ॥ गोत्रक्षत्रियेभ्योऽकञ् प्रायः ॥६।३।२०८॥ सरूपात् द्रिः सर्वे राष्ट्रवत् ॥६।३।२०९॥ दस्तुल्यदिशि ॥६।३।२१०॥ तसिः ॥ ६।३।२११ ॥ यश्चोरसः ॥ ६।३।२१२ ॥ सेर्निवासादस्य ॥६।३।२१३॥ आभिजनात् ॥ ६।३।२१४ ॥ शण्डिकादेर्ण्यः ॥ ६।३।२१५ ॥ सिन्ध्वादेरञ् ॥ ६।३।२१६ ॥ सलातुरादीयण् ॥ ६।३।२१७ ॥ तूदीवर्मत्या पयण् ॥ ६।३।२१८ ॥ गिरेरीयोऽस्राजीवे ॥ ६।३।२१९ ॥

॥ इति षष्ठाध्यायस्य तृतीयः पादः ॥

इकण् ॥ ६।४।१ ॥ तेन जितजयद्दीव्यत्खनत्सु ॥ ६।४।२ ॥ संस्कृते ॥ ६।४।३ ॥ कुलत्थकोपान्त्यादण् ॥६।४।४॥ संसृष्टे ॥६।४।५॥ लवणादः ॥६।४।६॥ चूर्णमुद्गाभ्यामिनणौ ॥६।४।७॥ व्यञ्जनेभ्य उपसिक्ते ॥६।४।८॥ तरति ॥६।४।९॥ नौद्विस्वरादिकः ॥६।४।१०॥ चरति ॥६।४।११॥ पर्पादेरिकद् ॥६।४।१२॥ पदिकः ॥६।४।१३॥ श्वगणाद्वा ॥ ६।४।१४ ॥ वेतनादेर्जीवति ॥६।४।१५॥ व्यस्ताच्च क्रयविक्रयादिकः ॥६।४।१६॥ वल्गात् ॥६।४।१७॥ आयुधादीयश्च ॥६।४।१८॥ व्रातादीनञ् ॥ ६।४।१९ ॥ निर्वृत्तेऽक्षद्यूतादेः ॥ ६।४।२० ॥ भावादिमः ॥ ६।४।२१ ॥ याचितापमित्यात्कण् ॥६।४।२२॥ हरत्युत्सङ्गादेः ॥६।४।२३॥ भस्त्रादेरिकद् ॥ ६।४।२४ ॥ विवधवीवधाद्वा ॥ ६।४।२५ ॥ कुटिलिकाया अण् ॥ ६।४।२६ ॥ ओजःसहोम्भसो वर्तते ॥ ६।४।२७ ॥ तं प्रत्यनोर्लोमेपकूलात् ॥ ६।४।२८ ॥ परेर्मुखपार्श्वात् ॥ ६।४।२९ ॥ रक्षदुञ्छतोः ॥६।४।३०॥ पक्षिमत्स्यमृगार्थाद् घ्नति ॥६।४।३१॥ परिपन्थात् तिष्ठति च ॥६।४।३२॥

परिपथात् ॥६।४।३३॥ अवृद्धेर्गृह्णाति गर्ह्ये ॥६।४।३४॥ कुसीदादिकट् ॥६।४।३५॥ दशैकादशादिकश्च ॥ ६।४।३६ ॥ अर्थपदपदोत्तरपदललामप्रतिकण्ठात् ॥ ६।४।३७ ॥ परदारादिभ्यो गच्छति ॥ ६।४।३८ ॥ प्रतिपथादिकश्च ॥६।४।३९॥ माथोत्तरपदपदव्याक्रन्दाद् धावति ॥६।४।४०॥ पश्चात्यनुपदात् ॥६।४।४१॥ सुस्नातादिभ्यः पृच्छति ॥६।४।४२॥ प्रभूतादिभ्यो ब्रुवति ॥६।४।४३॥ माशब्द इत्यादिभ्यः ॥६।४।४४॥ शाब्दिकदार्दरिकलालाटिककौक्कुटिकम् ॥६।४।४५॥ समूहार्थात्समवेते ॥६।४।४६॥ पर्षदो ण्यः ॥ ६।४।४७ ॥ सेनाया वा ॥ ६।४।४८ ॥ धर्माधर्माञ्चरति ॥६।४।४९। षष्ठ्या धर्म्ये ॥६।४।५०॥ ऋन्नरादेरण् ॥६।४।५१॥ विभाजयितृविशसितुर्णीड्लुक् च ॥६।४।५२॥ अवक्रये ॥ ६।४।५३ ॥ तदस्य पण्यम् ॥ ६।४।५४ ॥ किशरादेरिकट् ॥ ६।४।५५ ॥ शलालुनो वा ॥ ६।४।५६ ॥ शिल्पम् ॥ ६।४।५७ ॥ मड्डुकझर्झराद्वाण् ॥ ६।४।५८ ॥ शीलम् ॥६।४।५९॥ अङ्स्थाच्छत्रादेरञ् ॥६।४।६०॥ तूष्णीकः ॥६।४।६१॥ प्रहरणम् ॥६।४।६२॥ परश्वधाद्वाण् ॥६।४।६३॥ शक्तियष्टेष्टीकण् ॥६।४।६४॥ वेष्ट्यादिभ्यः ॥६।४।६५॥ नास्तिकास्तिकदैष्टिकम् ॥६।४।६६॥ वृत्तोऽपपाठोऽनुयोगे ॥ ६।४।६७ ॥ बहुस्वरपूर्वादिकः ॥६।४।६८॥ भक्ष्यं हितमस्मै ॥६।४।६९॥ नियुक्तं दीयते ॥६।४।७०॥ श्राणामांसौदनादिको वा ॥६।४।७१॥ भक्तौदनाद्वा णिकट् ॥६।४।७२॥ नवयज्ञादयोऽस्मिन् वर्तन्ते ॥६।४।७३॥ तत्र नियुक्ते ॥६।४।७४॥ अगारान्तादिकः ॥६।४।७५॥ अदेशकालाद्ध्यायिनि ॥६।४।७६॥ निकटादिषु वसति ॥६।४।७७॥ सतीर्थ्यः॥६।४।७८॥ प्रस्तारसंस्थानतदन्तकठिनान्तेभ्यो व्यवहरति ॥ ६।४।७९ ॥ संख्यादेश्चार्हदलुचः ॥ ६।४।८० ॥ गोदानादीनां ब्रह्मचर्ये ॥६।४।८१॥ चन्द्रायणं च चरति ॥६।४।८२॥ देवव्रतादीन् डिन् ॥६।४।८३॥ उकश्चाष्टाचत्वारिंशतं वर्षाणाम् ॥६।४।८४॥ चातुर्मास्यं तौ यलुक् च ॥ ६।४।८५ ॥ क्रोशयोजनपूर्वाच्छताद्योजनाच्चाभिगमार्हे ॥ ६।४।८६ ॥ तद्यात्येभ्यः ॥६।४।८७॥ पथ इकट् ॥६।४।८८॥ नित्यं णः पन्थश्च ॥६।४।८९॥ शङ्कुत्तरकान्तारावारिस्थलजङ्गलादेस्तेनाहृते च ॥६।४।९०॥ स्थलादेर्मधुकमरिचेऽण् ॥६।४।९१॥ तुरायणपारायणं यजमानाधीयाने ॥ ६।४।९२ ॥ संशयं प्राप्ते ज्ञेये ॥ ६।४।९३ ॥ तस्मै योगादेः शक्ते ॥६।४।९४॥ योगकर्मभ्यां योकञौ ॥ ६।४।९५ ॥ यज्ञानां दक्षिणायाम् ॥ ६।४।९६ ॥ तेषु देये ॥ ६।४।९७ ॥ काले कार्ये च भववत् ॥ ६।४।९८ ॥ व्युष्टादिष्वण् ॥ ६।४।९९ ॥ यथाकथाचाण् णः ॥ ६।४।१०० ॥ तेन हस्ताद्यः ॥ ६।४।१०१ ॥ शोभमाने ॥ ६।४।१०२ ॥ कर्मवेषाद्यः ॥ ६।४।१०३ ॥ कालात्परिजय्यलभ्यकार्यसुकरे ॥६।४।१०४॥ निर्वृत्ते ॥६।४।१०५॥ तं भाविभूते ॥६।४।१०६॥ तस्मै भृताधीष्टे च ॥६।४।१०७॥ षण्मासादवयसि ण्येकौ ॥ ६।४।१०८ ॥ समाया ईनः ॥६।४।१०९॥ रात्र्यहःसंवत्सराच्च द्विगोर्वा ॥६।४।११०॥ वर्षादश्च वा ॥६।४।१११॥ प्राणिनि भूते ॥ ६।४।११२ ॥ मासाद्वयसि यः ॥ ६।४।११३ ॥ ईनञ्च ॥ ६।४।११४ ॥ षण्मासाद्ययणिकण् ॥६।४।११५॥ सोऽस्य ब्रह्मचर्यतद्वतोः ॥६।४।११६॥ प्रयोजनम् ॥६।४।११७॥ एकागाराच्चौरे ॥६।४।११८॥ चूडादिभ्योऽण् ॥६।४।११९॥ विशाखाषाढान्मन्थदण्डे ॥६।४।१२०॥ उत्थापनादेरीयः ॥६।४।१२१॥ विशिरुहिपदिपूरिसमापेर-

मात्सपूर्वपदात् ॥ ६।४।१२२ ॥ स्वर्गेस्वस्तिवाचनादिभ्यो यलुपौ ॥ ६।४।१२३ ॥ समयात् प्राप्तः ॥ ६।४।१२४ ॥ ऋत्वादिभ्योऽण् ॥६।४।१२५॥ कालाद्यः ॥६।४।१२६॥ दीर्घः ॥ ६।४।१२७ ॥ आकालिकमिकञ्चाद्यन्ते ॥ ६।४।१२८ ॥ त्रिंशद्विंशतेर्डकोऽसंज्ञायामार्हदर्थे ॥ ६।४।१२९ ॥ संख्याडतेश्चाशत्तिष्टेः कः ॥ ६।४।१३० ॥ शतात् केवलादतस्मिन् येकौ ॥ ६।४।१३१ ॥ वातोरिकः ॥ ६।४।१३२ ॥ कार्षापणादिकट् प्रतिश्चास्य वा ॥ ६।४।१३३ ॥ अर्धात् पलकंसकर्षात् ॥ ६।४।१३४ ॥ कंसार्धात् ॥ ६।४।१३५ ॥ सहस्रशतमानादण् ॥ ६।४।१३६ ॥ शूर्पाद्ढाञ् ॥ ६।४।१३७ ॥ वसनात् ॥ ६।४।१३८ ॥ विंशतिकात् ॥ ६।४।१३९ ॥ द्विगोरीनः ॥ ६।४।१४० ॥ अनाम्न्यद्विः प्लुप् ॥ ६।३।१४१ ॥ नवाऽण्वः ॥ ६।४।१४२ ॥ सुवर्णकार्षापणात् ॥ ६।४।१४३ ॥ द्वित्रिबहोर्निष्कबिस्तात् ॥ ६।४।१४४ ॥ शताद्यः ॥६।४।१४५॥ शाणात् ॥ ६।४।१४६ ॥ द्व्यादेर्याण् वा ॥ ६।४।१४७ ॥ पणपादमाषाद्यः ॥ ६।४।१४८ ॥ खारीकाकणीभ्यः कच् ॥ ६।४।१४९ ॥ मूल्यैः क्रीते ॥ ६।४।१५० ॥ तस्य वापे ॥ ६।४।१५१ ॥ वातपित्तश्लेष्मसंनिपाताच्छमनकोपने ॥६।४।१५२॥ हेतौ संयोगात्पाते ॥६।४।१५३॥ पुत्राद्येयौ ॥६।४।१५४॥ द्विस्वरत्र्यक्षपर्वसाद्योऽसंख्यापरिमाणाश्वादेः ॥६।४।१५५॥ पृथिवीसर्वभूमेरीशज्ञातयोश्चाञ् ॥ ६।४।१५६ ॥ लोकसर्वलोकाज् ज्ञाते ॥६।४।१५७॥ तदत्रास्मै वा वृद्ध्यायलाभोपदाशुल्कं देयम् ॥६।४।१५८॥ पूरणार्द्धादिकः ॥६।४।१५९॥ भागाद्येकौ ॥ ६।४।१६० ॥ तं पचति द्रोणाद्ढाञ् ॥ ६।४।१६१ ॥ संभवदवहरतोश्च ॥६।४।१६२॥ पात्राचिताढकादीनो वा ॥६।४।१६३॥ द्विगोरीनेकटौ वा ॥६।४।१६४॥ कुलिजाद्ढा लुप् च ॥६।४।१६५॥ वंशादेर्भाराद्वरद्वहदाघहत्सु ॥६।४।१६६॥ द्रव्यवस्नात् केकम् ॥६।४।१६७॥ सोऽस्य मूर्तिवस्नांशम् ॥६।४।१६८॥ मानम् ॥६।४।१६९॥ जीवितस्य सन् ॥६।४।१७०॥ संख्यायाः संघसूत्रपाठे ॥६।४।१७१॥ नाम्नि ॥६।४।१७२॥ विंशत्यादयः ॥६।४।१७३॥ त्रैंशचात्वारिंशम् ॥६।४।१७४॥ पञ्चद्दशद्वर्गे वा ॥६।४।१७५॥ स्तोमे डट् ॥६।४।१७६॥ तमर्हति ॥६।४।१७७॥ दण्डादेर्यः ॥ ६।४।१७८ ॥ यज्ञादियः ॥६।४।१७९॥ पात्राच्तौ ॥६।४।१८०॥ दक्षिणाकडङ्गरस्थालीबिलादीययौ ॥६।४।१८१॥ छेदादेर्नित्यम् ॥ ६।४।१८२ ॥ विरागाद्विरङ्कश्च ॥ ६।४।१८३ ॥ शीर्षच्छेदाद्यो वा ॥६।४।१८४॥ शालीनकौपीनार्त्विजीनम् ॥६।४।१८५॥

॥ इति षष्ठोऽध्यायः ॥

यः ॥ ७।१।१ ॥ वहति रथयुगप्रासङ्गात् ॥ ७।१।२ ॥ धुरो यैयण् ॥ ७।१।३ ॥ वामाद्यादेरीनः ॥ ७।१।४ ॥ अश्वैकादेः ॥७।१।५॥ हलसीरादिकण् ॥७।१।६॥ शकटादण् ॥ ७।१।७ ॥ विध्यत्यनन्येन ॥ ७।१।८ ॥ धनगणालुब्धरि ॥ ७।१।९ ॥ णोऽन्नात् ॥७।१।१०॥ द्व्यष्टनस्तुल्यमूल्यवश्यपथ्यवयस्यधेनुष्यागार्हपत्यजन्यधर्म्यम् ॥७।१।११॥ नौविषेण तार्यवध्ये ॥ ७।१।१२ ॥ न्यायार्थादनपेते ॥ ७।१।१३ ॥ मतमदस्य करणे ॥७।१।१४॥ तत्र साधौ ॥७।१।१५॥ पथ्यतिथिवसतिस्वपतेरेयण् ॥७।१।१६॥ भक्ताण्णः ॥ ७।१।१७ ॥ पर्षदो ण्यणौ ॥ ७।१।१८ ॥ सर्वजनाण्ण्येनञौ ॥७।१।१९॥ प्रतिजनादेरीनञ् ॥ ७।१।२० ॥ कथादेरिकण् ॥७।१।२१॥ देवतान्तात्तदर्थे ॥७।१।२२॥ पाद्यार्घ्ये

॥७।१।२३॥ ष्योऽतिथेः ॥७।१।२४॥ सादेश्चातदः ॥७।१।२५॥ हलस्य कर्षे ॥७।१।२६॥ सीतया संगते ॥७।१।२७॥ ईयः ॥७।१।२८॥ हविरन्नभेदापूपादेर्यो वा ॥ ७।१।२९ ॥ उवर्णयुगादेर्यः ॥ ७।१।३० ॥ नाभेर्नभ् चादेर्हांशात् ॥ ७।१।३१ ॥ न् चोधसः ॥ ७।१।३२ ॥ शुनो वश्चोदूत् ॥ ७।१।३३ ॥ कम्बलान्नाम्नि ॥ ७।१।३४ ॥ तस्मै हिते ॥७।१।३५॥ न राजाचार्यब्राह्मणवृष्णः ॥७।१।३६॥ प्राण्यङ्गरथखलतिलयववृषब्रह्ममाषाद्यः ॥७।१।३७॥ अव्यजात् ष्यप् ॥७।१।३८॥ चरकमाणवादीनञ् ॥७।१।३९॥ भोगोत्तरपदाभ्यामीनः ॥७।१।४०॥ पञ्चसर्वविश्वाज्जनात्कर्मधारये ॥७।१।४१॥ महत्सर्वादिकण् ॥७।१।४२॥ सर्वाण्णो वा ॥७।१।४३॥ परिणामिनि तद्धर्ये ॥७।१।४४॥ चर्मण्यञ् ॥७।१।४५॥ ऋषभोपानहाञ् ञ्यः ॥७।१।४६॥ छदिर्मेलेरेयण् ॥७।१।४७॥ परिखास्य स्यात् ॥७।१।४८॥ अत्र च ॥७।१।४९॥ तद् ॥ ७।१।५० ॥ तस्यार्हे क्रियायां वत् ॥७।१।५१॥ स्यादेरिवे ॥७।१।५२॥ तत्र ॥७।१।५३॥ तस्य ॥७।१।५४॥ भावे त्वतल् ॥७।१।५५॥ प्राक्त्वादगडुलादेः ॥ ७।१।५६ ॥ नञ्तत्पुरुषादबुधादेः ॥ ७।१।५७ ॥ पृथ्वादेरिमन् वा ॥७।१।५८॥ वर्णदृढादिभ्यष्ट्यण् च वा ॥७।१।५९॥ पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च ॥७।१।६०॥ अर्हतस्तो न्त् च ॥७।१।६१॥ सहायाद्वा ॥७।१।६२॥ सखिवणिग्दूताद्यः ॥७।१।६३॥ स्तेनान्नलुक् च ॥ ७।१।६४ ॥ कपिज्ञातेरेयण् ॥ ७।१।६५ ॥ प्राणिजातिवयोऽर्थादञ् ॥७।१।६६॥ युवादेरण् ॥७।१।६७॥ ह्यायवान्तात् ॥७।१।६८॥ य्ववर्णाल्लुग्घ्वादेः ॥७।१।६९॥ पुरुषहृदयादसमासे ॥७।१।७०॥ श्रोत्रियाद्यलुक् च ॥७।१।७१॥ योपान्त्याद्गुरूपोत्तमादसुप्रख्यादकञ् ॥ ७।१।७२ ॥ चौरादेः ॥ ७।१।७३ ॥ द्वन्द्वाल्लित् ॥ ७।१।७४ ॥ गोत्रचरणाच्छ्लाघात्याकारप्राप्त्यवगमे ॥ ७।१।७५ ॥ होत्राभ्य ईयः ॥ ७।१।७६ ॥ ब्रह्मणस्त्वः ॥७।१।७७॥ शाकटशाकिनौ क्षेत्रे ॥७।१।७८॥ धान्येभ्य ईनञ् ॥७।१।७९॥ व्रीहिशालेरेयण् ॥७।१।८०॥ यवयवकषष्टिकाद्यः ॥७।१।८१॥ वाणुमाषात् ॥७।१।८२॥ वोमाभङ्गातिलात् ॥ ७।१।८३ ॥ अलोऽवाश्च कटो रजसि ॥७।१।८४॥ अह्ना गम्येऽश्वादीनः ॥ ७।१।८५ ॥ कुलाज्जल्पे ॥ ७।१।८६ ॥ पील्वादेः कुणः पाके ॥७।१।८७॥ कर्णादेर्मूले जाहः ॥ ७।१।८८ ॥ पक्षात्तिः ॥ ७।१।८९ ॥ हिमादेलुः सहे ॥७।१।९०॥ बलवातादूलः ॥७।१।९१॥ शीतोष्णतृप्रादालुरसहे ॥७।१।९२॥ यथामुखसंमुखादीनस्तद्दृश्यतेऽस्मिन् ॥ ७।१।९३ ॥ सर्वादेः पथ्यङ्गकर्मपत्रपात्रशरावं व्याप्नोति ॥ ७।१।९४ ॥ आप्रपदम् ॥ ७।१।९५ ॥ अनुपदं बद्धा ॥ ७।१।९६ ॥ अयानयं नेयः ॥ ७।१।९७ ॥ सर्वान्नमत्ति ॥ ७।१।९८ ॥ परोवरीणपरंपरीणपुत्रपौत्रीणम् ॥ ७।१।९९ ॥ यथाकामानुकामात्यन्तं गामिनि ॥ ७।१।१०० ॥ पारावारं व्यस्तव्यत्यस्तं च ॥७।१।१०१॥ अनुग्वलम् ॥७।१।१०२॥ अध्वानं येनौ ॥७।१।१०३॥ अभ्यमित्रमीयश्च ॥ ७।१।१०४ ॥ समांसमीनाद्यश्वीनाद्यप्रातीनागत्रीनसान्तपदीनम् ॥७।१।१०५॥ अषडक्षाशितंग्वलंकर्मालंपुरुषादीनः ॥७।१।१०६॥ अदिक्स्त्रियां वाञ्छः ॥ ७।१।१०७ ॥ तस्य तुल्ये कः संज्ञाप्रतिकृत्योः ॥ ७।१।१०८ ॥ न नृपूजार्थध्वजचित्रे ॥ ७।१।१०९ ॥ अपण्ये जीवने ॥७।१।११०॥ देवपथादिभ्यः ॥७।१।१११॥ वस्तेरेयञ् ॥ ७।१।११२ ॥ शिलाया ष्यञ्च ॥७।१।११३॥ शाखादेर्यः ॥७।१।११४॥ द्रोर्भव्ये ॥७।१।११५॥ कुशा-

ग्रादीयः ॥७।१।११६॥ काकतालीयादयः ॥७।१।११७॥ शर्करादेरण् ॥७।१।११८॥ अः सपत्न्याः ॥७।१।११९॥ एकशालाया इकः ॥७।१।१२०॥ गोण्यादेश्चैकण् ॥७।१।१२१॥ कर्कलोहितात् टीकण् च ॥७।१।१२२॥ वेर्विस्तृते शालशङ्कटौ ॥७।१।१२३॥ कटः ॥ ७।१।१२४ ॥ संप्रोन्नेः संकीर्णप्रकाशाधिकसमीपे ॥ ७।१।१२५ ॥ अवात्कुटारच्चावनते ॥७।१।१२६॥ नासानतितक्षतोष्टीटनाटभ्रटम् ॥७।१।१२७॥ नेरिनपिटकाश्चिक्चिचिकश्चास्य ॥७।१।१२८॥ बिडबिरीसौ नीरन्ध्रे च ॥७।१।१२९॥ क्ष्विन्नाल्लश्चक्षुषि चिल् पिल् चुल् चास्य ॥७।१।१३०॥ उपत्यकाधित्यके ॥७।१।१३१॥ अवेः संघातविस्तारे कटपटम् ॥७।१।१३२॥ पशुभ्यः स्थाने गोष्ठः ॥७।१।१३३॥ द्वित्वे गोयुगः ॥७।१।१३४॥ षट्त्वे षड्गवः ॥७।१।१३५॥ तिलादिभ्यः स्नेहे तैलः ॥७।१।१३६॥ तत्र घटते कर्मणष्ठः ॥७।१।१३७॥ तदस्य संजातं तारकादिभ्य इतः ॥७।१।१३८॥ गर्भादप्राणिनि ॥७।१।१३९॥ प्रमाणान्मात्रट् ॥७।१।१४०॥ हस्तिपुरुषाद्घाण् ॥७।१।१४१॥ घोर्घ्वे दघ्नट् द्वयसट् ॥७।१।१४२॥ मानादसंशये लुप् ॥७।१।१४३॥ द्विगोः संशये च ॥७।१।१४४॥ मात्रट् ॥७।१।१४५॥ शनश्चिद्भातेः ॥७।१।१४६॥ डिन् ॥७।१।१४७॥ इदंकिमोऽतुरिय् किय् चास्य ॥ ७।१।१४८ ॥ यत्तदेतदो डावादिः ॥ ७।१।१४९ ॥ यत्तत्किमः संख्याया डतिर्वा ॥ ७।१।१५० ॥ अवयवात्तयट् ॥७।१।१५१॥ द्वित्रिभ्यां मयड् वा ॥७।१।१५२॥ द्व्यादेर्गुणान्मूल्यक्रेये मयट् ॥७।१।१५३॥ अधिकं तत्संख्यमस्मिन् शतसहस्रे शतिशद्दशान्ताया डः ॥७।१।१५४॥ संख्यापूरणे डट् ॥७।१।१५५॥ विंशत्यादेर्वा तमट् ॥७।१।१५६॥ शतादिमासार्धमाससंवत्सरात् ॥७।१।१५७॥ षष्ट्यादेरसंख्यादेः ॥७।१।१५८॥ नो मट् ॥७।१।१५९॥ पित्तिथट् बहुगणपूगसंघात् ॥७।१।१६०॥ अतोरिथट् ॥७।१।१६१॥ षट्कतिकतिपयात्थट् ॥७।१।१६२॥ चतुरः ॥७।१।१६३॥ येयौ चलुक् च ॥७।१।१६४॥ द्वेस्तीयः ॥७।१।१६५॥ त्रेस्त्र च ॥७।१।१६६॥ पूर्वमनेन सादेश्चेन् ॥७।१।१६७॥ इष्टादेः ॥७।१।१६८॥ श्राद्धमद्य भुक्तमिकेनौ ॥७।१।१६९॥ अनुपद्यन्वेष्टा ॥७।१।१७०॥ दाण्डाजिनिकायःशूलिकपार्श्वकम् ॥ ७।१।१७१ ॥ क्षेत्रेऽन्यस्मिन्नाश्य इयः ॥७।१।१७२॥ छन्दोऽधीते श्रोत्रश्च वा ॥७।१।१७३॥ इन्द्रियम् ॥७।१।१७४॥ तेन वित्ते चञ्चुचणौ ॥७।१।१७५॥ पूरणाद् ग्रन्थस्य ग्राहकेको लुक् चास्य ॥७।१।१७६॥ ग्रहणाद्वा ॥७।१।१७७॥ सस्याद् गुणात्परिजाते ॥ ७।१।१७८ ॥ धनहिरण्ये कामे ॥ ७।१।१७९ ॥ स्वाङ्गेषु सक्ते ॥ ७।१।१८० ॥ उदरे त्विकणाद्यूने ॥७।१।१८१॥ अंशं हारिणि ॥७।१।१८२॥ तन्त्रादचिरोद्धृते ॥७।१।१८३॥ ब्राह्मणान्नाम्नि ॥ ७।१।१८४ ॥ उष्णात् ॥ ७।१।१८५ ॥ शीताच्च कारिणि ॥ ७।१।१८६ ॥ अधेरारूढे ॥७।१।१८७॥ अनोः कमितरि ॥ ७।१।१८८ ॥ अमेरीश्च वा ॥ ७।१।१८९ ॥ सोऽस्य मुख्यः ॥७।१।१९०॥ शृङ्खलकः करभे ॥७।१।१९१॥ उदुत्सोरुन्मनसि ॥ ७।१।१९२ ॥ कालहेतुफलाद्रोगे ॥ ७।१।१९३ ॥ प्रायोऽन्नमस्मिन्नाम्नि ॥ ७।१।१९४ ॥ कुल्माषादण् ॥७।१।१९५॥ वटकादिन् ॥७।१।१९६॥ साक्षाद्द्रष्टा ॥ ७।१।१९७ ॥

॥ इति सप्तमाध्यायस्य प्रथमः पादः ॥

तदस्यास्त्यस्मिन्निति मतुः ॥७।२।१॥ आ यात् ॥७।२।२॥ नावादेरिकः ॥७।२।३॥

शिखादिभ्य इन् ॥७।२।४॥ व्रीह्यादिभ्यस्तौ ॥७।२।५॥ अतोऽनेकस्वरात् ॥७।२।६॥ अशिरसोऽशीर्षश्च ॥७।२।७॥ अर्थार्थान्ताद् भावात् ॥७।२।८॥ व्रीह्यर्थतुन्दादेरिलश्च ॥७।२।९॥ स्वाङ्गाद्विवृद्धात्ते ॥७।२।१०॥ वृन्दादारकः ॥७।२।११॥ शृङ्गात् ॥७।२।१२॥ फलवर्हाच्चिनः ॥ ७।२।१३ ॥ मलादीमसश्च ॥ ७।२।१४ ॥ मरुत्पर्वणस्तः ॥ ७।२।१५ ॥ वलिवटितुण्डेर्भः ॥७।२।१६॥ ऊर्णाहंशुभमो युस् ॥७।२।१७॥ कंशंभ्यां युस्तियस्तुतवभम् ॥ ७।२।१८ ॥ वलवातदन्तललाटादूलः ॥ ७।२।१९ ॥ प्राण्यङ्गादातो लः ॥ ७।२।२० ॥ सिध्मादिक्षुद्रजन्तुरुग्भ्यः ॥७।२।२१॥ प्रज्ञापर्णेदकफेनाल्लेलौ ॥ ७।२।२२ ॥ कालाज-टाघाटाक्षेपे ॥७।२।२३॥ वाचि आलाटौ ॥७।२।२४॥ गिमन् ॥७।२।२५॥ मध्वादिभ्यो रः ॥७।२।२६॥ कृष्यादिभ्यो वलच् ॥७।२।२७॥ लोमपिच्छादेः शेलम् ॥७।२।२८॥ नोऽङ्गादेः ॥ ७।२।२९ ॥ शाकीपलालीदर्व्या ह्रस्वश्च ॥ ७।२।३० ॥ विष्वचो विषुश्च ॥७।२।३१॥ लक्ष्म्या अनः ॥७।२।३२॥ प्रज्ञाश्रद्धार्चावृत्तेर्णः ॥७।२।३३॥ ज्योत्स्नादि-भ्योऽण् ॥७।२।३४॥ सिकताशर्कराट् ॥ ७।२।३५ ॥ इलश्च देशे ॥७।२।३६॥ क्षुद्रोभैः ॥ ७।२।३७ ॥ काण्डाण्डभाण्डादीरः ॥ ७।२।३८ ॥ कच्छ्वा ड्वरः ॥ ७।२।३९ ॥ दन्तादुन्नतात् ॥ ७।२।४० ॥ मेधारथान्नवेरः ॥७।२।४१॥ कृपाहृदयादालुः ॥७।२।४२॥ केशाद्वः ॥७।२।४३॥ मण्यादिभ्यः ॥७।२।४४॥ हीनात् स्वाङ्गादः ॥७।२।४५॥ अभ्रादिभ्यः ॥ ७।२।४६ ॥ अस्तपोमायामेधास्रजो विन् ॥ ७।२।४७ ॥ आमयाद्दीर्घश्च ॥७।२।४८॥ स्वाम्निन्नोशे ॥७।२।४९॥ गोः ॥७।२।५०॥ ऊर्जो विन्वलावस् चान्तः ॥७।२।५१॥ तमिस्रार्णवज्योत्स्नाः ॥ ७।२।५२ ॥ गुणादिभ्यो यः ॥७।२।५३॥ रूपात्प्रशस्ताहृतात् ॥ ७।२।५४ ॥ पूर्णमासोऽण् ॥ ७।२।५५ ॥ गोपूर्वादत इकण् ॥ ७।२।५६ ॥ निष्कादेः शतसहस्रात् ॥७।२।५७॥ एकादेः कर्मधारयात् ॥७।२।५८॥ सर्वादिरिन् ॥७।२।५९॥ प्राणिस्थादस्वाङ्गाद् द्वन्द्वरुग्निन्द्यात् ॥७।२।६०॥ वातातीसारपिशाचात् कश्चान्तः ॥७।२।६१॥ पूरणाद्दयसि ॥७।२।६२॥ सुखादेः ॥७।२।६३॥ मालायाः क्षेपे ॥७।२।६४॥ धर्मशीलवर्णान्तात् ॥ ७।२।६५ ॥ बाह्वर्बादेर्बलात् ॥ ७।२।६६ ॥ मन्माब्जादेर्नाभ्नि ॥७।२।६७॥ हस्तदन्तकराज्जातौ ॥७।२।६८॥ वर्णाद् ब्रह्मचारिणि ॥७।२।६९॥ पुष्करादेर्देशे ॥७।२।७०॥ सूक्तसाम्नोरीयः ॥७।२।७१॥ लुब्धाध्यायानुवाके ॥७।२।७२॥ विमुक्तादेरण् ॥७।२।७३॥ घोषादेरिकः ॥७।२।७४॥ प्रकारे जातीयर् ॥७।२।७५॥ कोऽण्वादेः ॥७।२।७६॥ जीर्णगोमूत्रावदातसुरायवकृष्णाच्छाल्याच्छादनसुराहिव्रीहितिले ॥७।२।७७॥ भूतपू-र्वेऽण्चरट् ॥७।२।७८ गोष्ठादीनञ् ॥७।२।७९॥ षष्ठ्या रूप्यण्चरट् ॥७।२।८०॥ व्याश्रये तसुः ॥७।२।८१॥ रोगात्प्रतीकारे ॥७।२।८२॥ पर्यभेः सर्वोभये ॥७।२।८३॥ आद्यादिभ्यः ॥७।२।८४॥ क्षेपातिग्रहाव्ययेष्वकर्तुस्तृतीयायाः ॥७।२।८५॥ पापहीयमानेन ॥७।२।८६॥ प्रतिना पञ्चम्याः ॥७।२।८७॥ अहीयरुहोऽपादाने ॥७।२।८८॥ किमद्यादिसर्वाद्यवैपु-ल्यबहोः पित्तस् ॥७।२।८९॥ इतोऽतः कुतः ॥७।२।९०॥ भवत्वायुष्मद्दीर्घायुर्देवानां-प्रियैकार्थात् ॥७।२।९१॥ त्रप् च ॥७।२।९२॥ ककुत्राग्रेह ॥७।२।९३॥ सप्तम्याः ॥७।२।९४॥ किंयत्तत्सर्वैकान्यात्काले दा ॥७।२।९५॥ सदाऽधुनेदानींतदानीमेतर्हि ॥७।२।९६॥ सद्योऽद्यपरेद्यव्यह्नि ॥ ७।२।९७ ॥ पूर्वापराधरोत्तरान्यान्यतरेतरादेद्युस् ॥ ७।२।९८ ॥

उभयाद् घुस् च ॥ ७।२।९९ ॥ षेषमः परुत्परारि वर्षे ॥७।२।१००॥ अनद्यतने हिः ॥ ७।२।१०१ ॥ प्रकारे था ॥ ७।२।१०२ ॥ कथमित्थम् ॥ ७।२।१०३ ॥ संख्याया धा ॥७।२।१०४॥ विचाले च ॥७।२।१०५॥ वैकाद् ध्यमञ् ॥७।२।१०६॥ द्वित्रेर्धमञेधौ वा ॥७।२।१०७॥ तद्वति धण् ॥७।२।१०८॥ वारे कृत्वस् ॥७।२।१०९॥ द्वित्रिचतुरः सुच् ॥७।२।११०॥ एकान्सकृच्चास्य ॥७।२।१११॥ बहोर्धासन्ने ॥७।२।११२॥ दिक्शब्दादिग्देशकालेषु प्रथमापञ्चमीसप्तम्याः ॥ ७।२।११३ ॥ ऊर्ध्वादिरिष्टातावुपश्चास्य ॥७।२।११४॥ पूर्वावराधरेभ्योऽस्तातौ पुरवधश्चैषाम् ॥७।२।११५॥ परावरात् स्तात् ॥७।२।११६॥ दक्षिणोत्तराच्चातस् ॥७।२।११७॥ अधरापराच्चात् ॥७।२।११८॥ वा दक्षिणात्प्रथमासप्तम्या आः ॥७।२।११९॥ आही दूरे ॥७।२।१२०॥ वोत्तरात् ॥७।२।१२१॥ अदूरे पनः ॥७।२।१२२॥ लुबञ्चेः ॥७।२।१२३॥ पश्चोऽपरस्य दिक्पूर्वस्य चाति ॥७।२।१२४॥ वोत्तरपदेऽर्धे ॥७।२।१२५॥ कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्त्वे च्विः ॥७।२।१२६॥ अरुर्मनश्चक्षुश्चेतोरहोरजसां लुक् च्वौ ॥७।२।१२७॥ इसुसोर्बहुलम् ॥७।२।१२८॥ व्यञ्जनस्यान्त ईः ॥७।२।१२९॥ व्याप्तौ स्सात् ॥७।२।१३०॥ जातेः संपदा च ॥७।२।१३१॥ तत्राधीने ॥७।२।१३२॥ देये त्रा च ॥७।२।१३३॥ सप्तमीद्वितीयाद्देवादिभ्यः ॥७।२।१३४॥ तीयशंबबीजात् कृगा कृषौ डाच् ॥७।२।१३५॥ संख्यादेर्गुणात् ॥ ७।२।१३६ ॥ समयाद्यापनायाम् ॥ ७।२।१३७ ॥ सपत्रनिष्पत्रादतिव्यथने ॥ ७।२।१३८ ॥ निष्कुलान्निष्कोषणे ॥ ७।२।१३९ ॥ प्रियसुखादानुकूल्ये ॥ ७।२।१४० ॥ दुःखात् प्रातिकूल्ये ॥७।२।१४१॥ शूलात् पाके ॥७।२।१४२॥ सत्यादशपथे ॥७।२।१४३॥ मद्रभद्राद्वपने ॥७।२।१४४॥ अव्यक्तानुकरणादनेकस्वरात् कृभ्वस्तिनाऽनितौ द्विश्च ॥७।२।१४५॥ इतावतो लुक् ॥७।२।१४६॥ न द्वित्वे ॥७।२।१४७॥ तो वा ॥७।२।१४८॥ डाच्यादौ ॥७।२।१४९॥ बह्वल्पार्थात् कारकादिष्टानिष्टे शस् ॥७।२।१५०॥ संख्यैकार्थाद् वीप्सायां शस् ॥७।२।१५१॥ संख्यादेः पादादिभ्यो दानेदण्डे चाकल्लुक् च ॥७।२।१५२॥ तीयाट्टीकण् न विद्या चेत् ॥७।२।१५३॥ निष्फले तिलात् पिञ्जपेजौ ॥७।२।१५४॥ प्रायोऽतोढ्यसट्मात्रट् ॥७।२।१५५॥ वर्णव्यियात् स्वरूपे कारः ॥७।२।१५६॥ रादेकः ॥ ७।२।१५७ ॥ नामरूपभागधेयाद्देयः ॥ ७।२।१५८ ॥ मतार्दिभ्यो यः ॥ ७।२।१५९ ॥ नवादीनतनत्नं च नू चास्य ॥७।२।१६०॥ प्रात् पुराणे नश्च ॥७।२।१६१॥ देवात्तल् ॥७।२।१६२॥ होत्राभ्य ईयः ॥७।२।१६३॥ भेषजादिभ्यष्ठक्ठण् ॥७।२।१६४॥ प्रज्ञादिभ्योऽण् ॥७।२।१६५॥ श्रोत्रौषधिकृष्णाच्छरीरभेषजमृगे ॥७।२।१६६॥ कर्मणः संदिष्टे ॥७।२।१६७॥ वाच इकण् ॥७।२।१६८॥ विनयादिभ्यः ॥७।२।१६९॥ उपायाद् ह्रस्वश्च ॥७।२।१७०॥ मृदस्तिकः ॥७।२।१७१॥ सस्नौ प्रशस्ते ॥७।२।१७२॥

॥ इति सप्तमाध्यायस्य द्वितीयः पादः ॥

प्रकृते मयट् ॥७।३।१॥ अस्मिन् ॥७।३।२॥ तयोः समूहवच्च बहुषु ॥७।३।३॥ निन्द्ये पाशप् ॥७।३।४॥ प्रकृष्टे तमप् ॥ ७।३।५ ॥ द्वयोर्विभज्ये च तरप् ॥ ७।३।६ ॥ कचित् (स्वार्थे) ॥७।३।७॥ किंत्याद्येव्ययादसत्त्वे तयोरन्तस्याम् ॥ ७।३।८ ॥ गुणाङ्गाद्वेष्ठेयसू ॥ ७।३।९ ॥ त्यादेश्च प्रशस्ते रूपप् ॥ ७।३।१० ॥ अतमबादेरीषदसमाप्ते

कल्पप् देश्यप् देशीयर् ॥७।३।११॥ नाम्नः प्राग् बहुर्वा ॥७।३।१२॥ न तमबादिः कपोऽच्छिन्नादिभ्यः ॥७।३।१३॥ अनत्यन्ते ॥७।३।१४॥ यावादिभ्यः कः ॥ ७।३।१५ ॥ कुमारीक्रोडनेचसोः ॥ ७।३।१६ ॥ लोहितान्मणौ ॥ ७।३।१७ ॥ रक्तान्नित्यवर्णयोः ॥ ७।३।१८ ॥ कालात् ॥ ७।३।१९ ॥ शीतोष्णादतौ ॥ ७।३।२० ॥ लूनक्रियातात्पशौ ॥७।३।२१॥ स्नाताद्वेदसमासौ ॥ ७।३।२२ ॥ तनुपुत्राणुबृहतीशून्यात् सूत्रकृत्रिम-निपुणाच्छादनरिक्ते ॥ ७।३।२३ ॥ भागेऽष्टमाञ् ञः ॥ ७।३।२४ ॥ षष्ठात् ॥७।३।२५॥ माने कश्च ॥ ७।३।२६ ॥ एकादाकिन् चासहाये ॥ ७।३।२७ ॥ प्राग् नित्यात् कप् ॥७।३।२८॥ त्यादिसर्वादेः स्वरेष्वन्त्यात्पूर्वोऽक् ॥ ७।३।२९॥ युष्मदस्मदोऽसोभा-दिस्यादेः ॥ ७।३।३० ॥ अव्ययस्य कोऽद् च ॥७।३।३१॥ तूष्णीकाम् ॥७।३।३२॥ कुत्सिताल्पाज्ञाते ॥ ७।३।३३ ॥ अनुकम्पातद्युक्तनीत्योः ॥ ७।३।३४ ॥ अजातेर्नाम्नो बहुस्वरादियेकेलं वा ॥७।३।३५॥ वोपादेरडाकौ ॥७।३।३६॥ ऋवर्णेवर्णात् स्वरादे-रादेर्लुक् प्रकृत्या च ॥७।३।३७॥ लुक्युत्तरपदस्य कप् ॥७।३।३८॥ लुक् चाजिना-न्तात् ॥ ७।३।३९ ॥ षड्वर्जैकस्वरपूर्वपदस्य स्वरे ॥ ७।३।४० ॥ द्वितीयात्स्वरादूर्ध्वम् ॥७।३।४१॥ संख्यक्षरात्तेन ॥७।३।४२॥ शेवलाद्यादेस्तृतीयात् ॥७।३।४३॥ क्वचित्तुर्यात् ॥७।३।४४॥ पूर्वपदस्य वा ॥७।३।४५॥ ह्रस्वे ॥७।३।४६॥ कुटीशुण्डाद्रः ॥७।३।४७॥ शम्या रुरौ ॥७।३।४८॥ कुत्वा डुपः ॥ ७।३।४९ ॥ कासूगोणीभ्यां तरट् ॥७।३।५०॥ वत्सोक्षाश्वर्षभाद् घासे पित् ॥७।३।५१॥ वैकाद् द्वयोर्निर्धार्ये डतरः ॥७।३।५२॥ यत्तत्किमन्यात् ॥७।३।५३॥ बहूनां प्रश्ने डतमश्च वा ॥७।३।५४॥ वैकात् ॥७।३।५५॥ क्तात्तमबादेश्चानत्यन्ते ॥ ७।३।५६ ॥ न सामिवचने ॥ ७।३।५७ ॥ नित्यं यञिनोऽण् ॥७।३।५८॥ विसारिणो मत्स्ये ॥७।३।५९॥ पूगादमुख्यकाञ् ञ्यो द्विः ॥७।३।६०॥ व्रातादस्त्रियाम् ॥ ७।३।६१ ॥ शस्त्रजीविसंघाञ् ञ्यट् वा ॥ ७।३।६२ ॥ वाहीकेष्व-ब्राह्मणराजन्येभ्यः ॥७।३।६३॥ वृकाद् ट्टेण्यण् ॥७।३।६४॥ यौधेयादेरञ् ॥७।३।६५॥ पश्वादेरण् ॥७।३।६६॥ दामन्यादेरीयः॥७।३।६७॥ श्रुमच्छमीवच्छिखावच्छलोवदूर्णाव-द्विदभृदभिजितो गोत्रेऽणो यञ् ॥७।३।६८॥ समासान्तः ॥७।३।६९॥ न किमः क्षेपे ॥ ७।३।७० ॥ नञ्तत्पुरुषात् ॥ ७।३।७१ ॥ पूजास्वर्तेः प्राक् टात् ॥७।३।७२॥ बहोर्ङ ॥ ७।३।७३ ॥ इच् युद्धे ॥ ७।३।७४ ॥ द्विदण्डयादेः ॥ ७।३।७५ ॥ ऋक्पूःपथ्यपोऽत् ॥ ७।३।७६ ॥ धुरोऽनक्षस्य ॥ ७।३।७७ ॥ संख्यापाण्डूदक्कृष्णाद्भूमेः ॥ ७।३।७८ ॥ उपसर्गाद्ध्वनः ॥७।३।७९॥ समवान्धात्तमसः ॥७।३।८०॥ तप्तान्ववाद्रहसः ॥७।३।८१॥ प्रत्यन्ववात्सामलोम्नः ॥७।३।८२॥ ब्रह्महस्तिराजपल्याद्वर्चसः ॥७।३।८३॥ प्रतेरुरसः सप्तम्याः ॥७।३।८४॥ अक्ष्णोऽप्राण्यङ्गे ॥७।३।८५॥ संकटाभ्याम् ॥७।३।८६॥ प्रतिपरोऽनो-रव्ययीभावात् ॥७।३।८७॥ अनः ॥७।३।८८॥ नपुंसकाद्वा ॥७।३।८९॥ गिरिनदीपौर्णमास्या-ग्रहायण्यपञ्चमवर्ग्याद्वा ॥७।३।९०॥ संख्याया नदीगोदावरीभ्याम् ॥७।३।९१॥ शरदादेः ॥७।३।९२॥ जराया जरस् च ॥ ७।३।९३ ॥ सरजसोपशुनानुगवम् ॥७।३।९४॥ जात-महद्वृद्धादुक्षणः कर्मधारयात् ॥ ७।३।९५ ॥ स्त्रियाः पुंसो द्वन्द्वाच्च ॥ ७।३।९६ ॥ ऋक्सामयजुषश्छन्दसाङ्गानसाहोरात्रेरात्रिदिवसमक्तदिवाहर्दिवोषष्ठीवपदष्ठीवा--

क्षिभ्रुवदारगवम् ॥ ७।३।९७ ॥ चवर्गदघहः समाहारे ॥ ७।३।९८ ॥ द्विगोरन्नहोऽट् ॥ ७।३।९९ ॥ द्वित्रेरायुषः ॥ ७।३।१०० ॥ वाञ्जलेरलुकः ॥ ७।३।१०१ ॥ खार्या वा ॥७।३।१०२॥ वार्धाच्च ॥७।३।१०३॥ नावः ॥७।३।१०४॥ गोस्तत्पुरुषात् ॥७।३।१०५॥ राजन्सखेः ॥७।३।१०६॥ राष्ट्राख्याद् ब्रह्मणः ॥७।३।१०७॥ कुमहद्भ्यां वा ॥७।३।१०८॥ ग्रामकौटात्तक्ष्णः ॥ ७।३।१०९ ॥ गोष्ठातेः शुनः ॥ ७।३।११० ॥ प्राणिन उपमानात् ॥७।३।१११॥ अप्राणिनि ॥ ७।३।११२ ॥ पूर्वोत्तरमृगाच्च सक्थ्नः ॥७।३।११३॥ उरसोऽग्रे ॥७।३।११४॥ सरोऽनोऽश्मायसो जातिनाम्नोः ॥७।३।११५॥ अह्नः ॥७।३।११६॥ संख्यातादह्नश्च वा ॥७।३।११७॥ सर्वांशसंख्याव्ययात् ॥७।३।११८॥ संख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत् ॥७।३।११९॥ पुरुषायुषद्विस्तावत्रिस्तावम् ॥ ७।३।१२० ॥ श्वसो वसीयसः ॥७।३।१२१॥ निसश्च श्रेयसः ॥७।३।१२२॥ नञव्ययात् संख्याया डः ॥७।३।१२३॥ संरव्याव्ययादङ्गुलेः ॥७।३।१२४॥ बहुव्रीहेः काष्ठे टः ॥७।३।१२५॥ सक्थ्यक्ष्णः स्वाङ्गे ॥ ७।३।१२६ ॥ द्वित्रेर्मूर्ध्नो वा ॥ ७।३।१२७ ॥ प्रमाणीसंख्यात् डः ॥ ७।३।१२८ ॥ सुप्रातसुश्वसुदिवशारिकुक्षुचतुरश्रैणीपदाजपदप्रोष्ठपदभद्रपदम् ॥७।३।१२९॥ पूरणीभ्यस्तत्प्राधान्येऽप् ॥७।३।१३०॥ नञ्सुब्युपत्रेश्चतुरः ॥७।३।१३१॥ अन्तर्बहिर्भ्यां लोम्नः ॥७।३।१३२॥ भान्नेतुः ॥ ७।३।१३३ ॥ नाभेर्नाभ्नि ॥७।३।१३४॥ नञ्बहोर्ऋचो माणवचरणे ॥७।३।१३५॥ नञ्सुदुर्भ्यः सक्तिसक्थिहलेर्वा ॥७।३।१३६॥ प्रजाया अस् ॥७।३।१३७॥ मन्दालपाच्च मेधायाः ॥७।३।१३८॥ जातेरीयः सामान्यवति ॥ ७।३।१३९ ॥ भृतिप्रत्ययान्मासादिकः ॥७।३।१४० ॥ द्विपदाद्धर्मादन् ॥ ७।३।१४१ ॥ सुहरिततृणसोमाज्जम्भात् ॥७।३।१४२॥ दक्षिणेर्मा व्याधयोगे ॥७।३।१४३॥ सुपूत्युत्सुरभेर्गन्धादिद् गणे ॥७।३।१४४॥ वाऽऽगन्तौ ॥७।३।१४५॥ वाल्पे ॥७।३।१४६॥ वोपमानात् ॥७।३।१४७॥ पात्पादस्याहस्त्यादेः ॥७।३।१४८॥ कुम्भपद्यादिः ॥७।३।१४९॥ सुसंख्यात् ॥७।३।१५०॥ वयसि दन्तस्य दत् ॥७।३।१५१॥ स्त्रियां नाभ्नि ॥७।३।१५२॥ श्यावारोकाद्वा ॥७।३।१५३॥ वाघ्रान्तशुद्धशुभ्रवृषवराहाहिमूषिकशिखरात् ॥७।३।१५४॥ संप्राज्ञानोर्ङ्ङौ ॥७।३।१५५॥ वोर्ध्वात् ॥७।३।१५६॥ सुहृद्दुर्हृन्मित्रामित्रे ॥७।३।१५७॥ धनुषो धन्वन् ॥७।३।१५८॥ वा नास्नि ॥७।३।१५९॥ खरखुराद्नासिकाया नस् ॥७।३।१६०॥ अस्थूलाच्च नसः ॥७।३।१६१॥ उपसर्गात् ॥७।३।१६२॥ वेः खुखग्रम् ॥७।३।१६३॥ जायाया जानिः ॥७।३।१६४॥ व्युदः काकुदस्य लुक् ॥७।३।१६५॥ पूर्णाद्वा ॥७।३।१६६॥ ककुदस्यावस्थायात् ॥७।३।१६७॥ त्रिककुद् गिरौ ॥७।३।१६८॥ स्त्रियामूधसोऽन् ॥७।३।१६९॥ इनः कच् ॥ ७।३।१७० ॥ क्रन्नित्यदितः ॥ ७।३।१७१ ॥ दध्नुरःसर्पिर्मधूपानच्छालेः ॥७।३।१७२॥ पुमनड्नौपयोलक्ष्म्या एकत्वे ॥७।३।१७३॥ नञोऽर्थात् ॥ ७।३।१७४ ॥ शेषाद्वा ॥७।३।१७५॥ न नाम्नि ॥७।३।१७६॥ ईयसोः ॥७।३।१७७॥ सहातुल्ययोगे ॥७।३।१७८॥ भ्रातुः स्तुतौ ॥७।३।१७९॥ नाडीतन्त्रीभ्यां स्वाङ्गे ॥७।३।१८०॥ निष्प्रवाणिः ॥७।३।१८१॥ सुभ्रवादिभ्यः ॥७।३।१८२॥

॥ इति सप्तमाध्यायस्य तृतीयः पादः ॥

वृद्धिःस्वरेष्वादेर्ञिणिति तद्धिते ॥७।४।१॥ केकयमित्रयुप्रलयस्य यादेरियँ च

॥७।४।२॥ देविकाशिंशपादीर्घसत्रश्रेयसस्तत्प्राप्तावाः ॥७।४।३॥ वहीनरस्यैत् ॥७।४।४॥ य्वः पदान्तात्प्रागैदौत् ॥७।४।५॥ द्वारादेः ॥७।४।६॥ न्यग्रोधस्य केवलस्य ॥७।४।७॥ न्यङ्कोर्वा ॥७।४।८॥ न अस्वङ्गादेः ॥७।४।९॥ श्वादेरिति ॥७।४।१०॥ इञः ॥७।४।११॥ पदस्यानिति वा ॥ ७।४।१२ ॥ प्रोष्ठभद्राज्जाते ॥७।४।१३॥ अंशादतोः ॥७।४।१४॥ सुसर्वार्धाद्राष्ट्रस्य ॥७।४।१५॥ अमद्रस्य दिशः ॥७।४।१६॥ प्राग्ग्रामाणाम् ॥७।४।१७॥ संख्याधिकाभ्यां वर्षस्याभाविनि ॥७।४।१८॥ मानसंवत्सरस्याशाणकुलिजस्यानाम्नि ॥७।४।१९॥ अर्धात्परिमाणस्याऽनतो वा त्वादेः ॥७।४।२०॥ प्राद्ब्राह्मणस्यैये ॥७।४।२१॥ एयस्य ॥७।४।२२॥ नञः क्षेत्रज्ञेश्वरकुशलचपलनिपुणशुचेः ॥७।४।२३॥ जङ्गलधेनुवलजस्योत्तरपदस्य तु वा ॥७।४।२४॥ हृद्भगसिन्धोः ॥ ७।४।२५ ॥ प्राचां नगरस्य ॥ ७।४।२६ ॥ अनुशतिकादीनाम् ॥७।४।२७॥ देवतानामात्वादौ ॥ ७।४।२८ ॥ आतो नेन्द्रवरुणस्य ॥ ७।४।२९ ॥ सारवैष्वाकमैत्रेयभ्रौणहत्यधैवत्यहिरण्मयम् ॥७।४।३०॥ वाऽन्तमाऽन्तितमाऽन्तितोन्तियाऽन्तिषद् ॥ ७।४।३१ ॥ विन्मतोर्णष्ठेयसौ लुप् ॥७।४।३२॥ अल्पयूनोः कन् वा ॥७।४।३३॥ प्रशस्यस्य श्रः ॥७।४।३४॥ वृद्धस्य च ज्यः ॥ ७।४।३५ ॥ ज्यायान् ॥ ७।४।३६ ॥ बाढान्तिकयोः साधनेदौ ॥ ७।४।३७ ॥ प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घवृद्धवृन्दारस्येमनि च प्रास्थास्फावरगरबंहत्रपद्राघवर्षवृन्दम् ॥ ७।४।३८ ॥ पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः ॥ ७।४।३९ ॥ बह्वोर्णष्ठे भूय् ॥७।४।४०॥ भूर्लुक् चेवर्णस्य ॥७।४।४१॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः ॥ ७।४।४२ ॥ अन्त्यस्वरादेः ॥ ७।४।४३ ॥ नैकस्वरस्य वा ॥ ७।४।४४ ॥ दण्डिहस्तिनोरायने ॥ ७।४।४५ ॥ वाशिन आयनौ ॥ ७।४।४६ ॥ एये जिह्माशिनः ॥ ७।४।४७ ॥ ईनेऽध्वात्मनोः ॥ ७।४।४८ ॥ इकण्यथर्वणः ॥ ७।४।४९ ॥ यूनोऽके ॥ ७।४।५० ॥ अनोऽटचे ये ॥ ७।४।५१ ॥ अणि ॥ ७।४।५२ ॥ संयोगादिनः ॥ ७।४।५३ ॥ गाथिविदथिकेशिपणिगणिनः ॥ ७।४।५४ ॥ अनपत्ये ॥ ७।४।५५ ॥ उक्षणो लुक् ॥ ७।४।५६ ॥ ब्रह्मणः ॥ ७।४।५७ ॥ जातौ ॥ ७।४।५८ ॥ अधर्मणो मनोऽपत्ये ॥ ७।४।५९ ॥ हितनाम्नो वा ॥ ७।४।६० ॥ नोऽपदस्य तद्धिते ॥७।४।६१॥ कलापिकुथुमितैतलिजाजलिलाङ्गलिशिखण्डिशिलालिसब्रह्मचारिपीठसर्पिस्कुरसब्रसुपर्वणः ॥७।४।६२॥ वाद्मनो विकारे ॥७।४।६३॥ चर्मशुनः कोशसंकोचे ॥७।४।६४॥ प्रायोऽव्ययस्य ॥७।४।६५॥ अनीनादट्यह्नोऽतः ॥७।४।६६॥ विंशतेस्तेर्डिति ॥ ७।४।६७ ॥ अवर्णेवर्णस्य ॥ ७।४।६८ ॥ अकद्रूपाण्ड्वोरुवर्णस्यैये ॥ ७।४।६९ ॥ अस्वयम्भुवोऽव् ॥ ७।४।७० ॥ ऋवर्णोवर्णदोसिसुसश्वदकस्मात्त इकस्येतो लुक् ॥ ७।४।७१ ॥ असकृत्संभ्रमे ॥ ७।४।७२ ॥ भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक् तमवादेः ॥७।४।७३॥ नानावधारणे ॥७।४।७४॥ आधिक्यानुपूर्व्ये ॥७।४।७५॥ डतरडतमौ समानां स्त्रीभावप्रश्ने ॥७।४।७६॥ पूर्वप्रथमावन्यतोऽतिशये ॥७।४।७७॥ प्रोपोत्सं पादपूरणे ॥७।४।७८॥ सामीप्येऽधोऽध्युपरि ॥७।४।७९॥ वीप्सायाम् ॥७।४।८०॥ प्लुप् चादावेकस्य स्यादेः ॥ ७।४।८१ ॥ द्वन्द्वं वा ॥ ७।४।८२ ॥ रहस्यमर्यादोक्तिव्युत्क्रान्तियज्ञपात्रप्रयोगे ॥ ७।४।८३ ॥ लोकज्ञातेऽत्यन्तसाहचर्ये ॥ ७।४।८४ ॥

आबाधे ॥ ७।४।८५ ॥ नवा गुणः सदृशे रिति ॥ ७।४।८६ ॥ प्रियसुखं वाऽकृच्छ्रे ॥ ७।४।८७ ॥ वाक्यस्य परिवर्जने ॥ ७।४।८८ ॥ संमत्यसूयाकोपकुत्सनेष्वाद्यामन्त्र्यमादौ स्वरेष्वन्त्यश्च प्लुतः ॥ ७।४।८९ ॥ भर्त्सने पर्यायेण ॥ ७।४।९० ॥ त्यादेः साकाङ्क्षस्याङ्गेन ॥७।४।९१॥ क्षियाशीःप्रैषे ॥७।४।९२॥ चितीवार्थे ॥७।४।९३॥ प्रतिश्रवणनिगृह्यानुयोगे ॥७।४।९४॥ विचारे पूर्वस्य ॥७।४।९५॥ ओमः प्रारंभे ॥७।४।९६॥ हेः प्रश्नाख्याने ॥७।४।९७॥ प्रश्ने च प्रतिपदम् ॥७।४।९८॥ दूरादामन्त्र्यस्य गुरुर्वैकोऽनन्त्योऽपि लनृत् ॥७।४।९९॥ हेहैस्वेषामेव ॥७।४।१००॥ अस्त्रीशूद्रे प्रत्यभिवादे भोगोत्रनाम्नो वा ॥ ७।४।१०१ ॥ प्रश्नास्त्रंविचारे च संधेयसंध्यक्षरस्यादिदुत्परः ॥ ७।४।१०२ ॥ तयोर्यौ स्वरे संहितायाम् ॥ ७।४।१०३ ॥ पञ्चम्या निर्दिष्टे परस्य ॥७।४।१०४॥ सप्तम्या पूर्वस्य ॥७।४।१०५॥ षष्ठ्यन्तस्य ॥७।४।१०६॥ अनेकवर्णः सर्वस्य ॥७।४।१०७॥ प्रत्ययस्य ॥७।४।१०८॥ स्थानीवाऽवर्णविधौ ॥७।४।१०९॥ स्वरस्य परे प्राग्विधौ ॥ ७।४।११० ॥ न संधिडीयकिद्विदीर्घासद्विधावस्लुकि ॥ ७।४।१११ ॥ लुप्यव्वृलेनत् ॥७।४।११२॥ विशेषणमन्तः ॥७।४।११३॥ सप्तम्या आदिः ॥७।४।११४॥ प्रत्ययः प्रकृत्यादेः ॥७।४।११५॥ गौणो ङ्यादिः ॥७।४।११६॥ कृत्सगतिकारकस्यापि ॥७।४।११७॥ परः ॥७।४।११८॥ स्पर्धे ॥७।४।११९॥ आसन्नः ॥७।४।१२०॥ संबन्धिनां संबन्धे ॥७।४।१२१॥ समर्थः पदविधिः ॥७।४।१२२॥

॥ इति सप्तमोऽध्यायः ॥

॥ ॐ ॥ अथ प्राकृतम् ॥ ८।१।१ ॥ बहुलम् ॥ ८।१।२ ॥आर्षम् ॥८।१।३॥ दीर्घह्रस्वौ मिथो वृत्तौ ॥८।१।४॥ पदयोः सन्धिर्वा ॥ ८।१।५ ॥ न युवर्णस्यास्वे ॥८।१।६॥ पदोतोः स्वरे ॥ ८।१।७ ॥ स्वरस्योद्वृत्ते ॥८।१।८॥ त्यादेः ॥८।१।९॥ लुक् ॥८।१।१०॥ अन्त्यव्यञ्जनस्य ॥ ८।१।११ ॥ न श्रदुदोः ॥ ८।१।१२ ॥ निर्दुरोर्वा ॥ ८।१।१३ ॥ स्वरेऽन्तरश्च ॥ ८।१।१४ ॥ स्त्रियामादविद्युतः ॥ ८।१।१५ ॥ रो रा ॥८।१।१६॥ क्षुभो हा ॥ ८।१।१७ ॥ शरदादेरत् ॥ ८।१।१८ ॥ दिक्प्रावृषोः सः ॥ ८।१।१९ ॥ आयुरप्सरसोर्वा ॥ ८।१।२० ॥ ककुभो हः ॥ ८।१।११ ॥ धनुषो वा ॥८।१।२२॥ मोऽनुस्वारः ॥८।१।२३॥ वा स्वरे मश्च ॥८।१।२४॥ ङ-ञ-ण-नो व्यञ्जने ॥८।१।२५॥ वकादावन्तः ॥८।१।२६॥ क्त्वास्यादेर्णस्त्वोर्वा ॥८।१।२७॥ विंशत्यादेर्लुक् ॥ ८।१।२८ ॥ मांसादेर्वा ॥८।१।२९॥ वर्गेऽन्त्यो वा ॥८।१।३०॥ प्रावृट्-शरत्तरणयः पुंसि ॥ ८।१।३१ ॥ स्नमदामशिरो-नभः ॥ ८।१।३२ ॥ वाक्यर्थवचनाद्याः ॥ ८।१।३३ ॥ गुणाद्याः क्लीबे वा ॥ ८।१।३४ ॥ वेमाञ्जल्याद्याः स्त्रियाम् ॥८।१।३५॥ बाहोरात् ॥ ८।१।३६ ॥ अतो डो विसर्गस्य ॥ ८।१।३७ ॥ निष्प्रती ओत्परौ माल्यस्थोर्वा ॥ ८।१।३८ ॥ आदेः ॥८।१।३९॥ त्यदाद्यव्ययात् तत्स्वरस्य लुक् ॥८।१।४०॥ पदादपेर्वा ॥८।१।४१॥ इतेः स्वरात् तश्च द्विः ॥ ८।१।४२ ॥ लुप्तयरवशषसां शषसां दीर्घः ॥८।१।४३॥ अतः समृद्धयादौ वा ॥८।१।४४॥ दक्षिणे हे ॥८।१।४५॥ इः स्वप्नादौ ॥ ८।१।४६ ॥ एकाङ्कारललाटे वा ॥ ८।१।४७ ॥ मध्यमकतमे द्वितीयस्य ॥८।१।४८॥ सप्तपर्णे वा ॥ ८।१।४९ ॥ मयटश्चर्वा ॥८।१।५०॥ ईर्हरे वा ॥८।१।५१॥ ध्वनिविष्व-

चोरुः ॥ ८।१।५२ ॥ (च) वन्द्रखण्डिते णा वा ॥ ८।१।५३ ॥ गवये वः ॥८।१।५४॥ प्रथमे पथोर्वा ॥ ८।१।५५ ॥ ज्ञो णत्वेभिज्ञादौ ॥ ८।१।५६ ॥ पच्छय्यादौ ॥८।१।५७॥ वल्ल्युत्करपर्यन्ताश्चर्ये वा ॥८।१।५८॥ ब्रह्मचर्ये चः ॥८।१।५९॥ तोऽन्तरि ॥८।१।६०॥ ओत्पद्मे ॥८।१।६१॥ नमस्कारपरस्परे द्वितोयस्य ॥८।१।६२॥ वार्षे ॥८।१।६३॥ स्वपावुच्च ॥८।१।६४॥ नात्पुनर्यादाद्द वा ॥८।१।६५॥ वालाज्वरण्ये लुक् ॥८।१।६६॥ वाव्ययोत्खाता-दावदातः ॥८।१।६७॥ घञ्वृद्धेर्वा ॥८।१।६८॥ महाराष्ट्रे ॥८।१।६९॥ मांसादिष्वनुस्वारे ॥ ८।१।७० ॥ श्यामाके मः ॥ ८।१।७१ ॥ इः सदादौ वा ॥८।१।७२॥ आचार्ये चोच्च ॥८।१।७३॥ ईः स्त्यानखल्वाटे ॥८।१।७४॥ उः सास्ना-स्तावके ॥८।१।७५॥ ऊद्वासारे ॥ ८।१।७६ ॥ आर्यायां र्यः श्वश्वाम् ॥ ८।१।७७ ॥ पद् ग्राह्ये ॥ ८।१।७८ ॥ द्वारे वा ॥८।१।७९॥ पारापते रो वा ॥८।१।८०॥ मात्रटि वा ॥८।१।८१॥ उदोद्वार्दे ॥८।१।८२॥ ओदाल्यां पङ्क्तौ ॥ ८।१।८३ ॥ ह्रस्वः संयोगे ॥ ८।१।८४ ॥ इत पद्मा ॥ ८।१।८५ ॥ किंशुके वा ॥८।१।८६॥ मिरायाम् ॥८।१।८७॥ पथिपृथिवीप्रतिश्रुन्मूषिकहरिद्राबिभीतकेष्वत् ॥ ८।१।८८ ॥ शिथिलेङ्गुदे वा ॥८।१।८९॥ तित्तिरौ रः ॥८।१।९०॥ इतौ तो वाक्यादौ ॥ ८।१।९१ ॥ हर्जिह्मार्सिहस्त्रिंशद्विंशतौ त्या ॥ ८।१।९२ ॥ लुकि निरः ॥८।१।९३॥ ह्रिन्योरुत् ॥८।१।९४॥ प्रवासीक्षौ ॥८।१।९५॥ युधिष्ठिरे वा ॥ ८।१।९६ ॥ ओच्च द्विधाकृगः ॥ ८।१।९७ ॥ वा निर्झरे ना ॥ ८।१।९८ ॥ हरीतक्यामोतोऽत् ॥ ८।१।९९ ॥ आत्कश्मीरे ॥ ८।१।१०० ॥ पानीयादिष्वित् ॥ ८।१।१०१ ॥ उज्जीर्णे ॥ ८।१।१०२ ॥ ऊर्हीनविहीने वा ॥ ८।१।१०३ ॥ तीर्थे हे ॥८।१।१०४॥ पत्यीयूषापीडविभीतककीदृशेदृशे ॥८।१।१०५॥ नीडपीठे वा ॥८।१।१०६॥ उतो मुकुलादिष्वत् ॥८।१।१०७॥ वोपरौ ॥८।१।१०८॥ गुरौ के वा ॥८।१।१०९॥ इर्भ्रुकुटौ ॥ ८।१।११० ॥ पुरुषे रोः ॥ ८।१।१११ ॥ ईः श्रुते ॥ ८।१।११२ ॥ उत्सुभगमुसले वा ॥ ८।१।११३ ॥ अनुत्साहोत्सन्ने त्सच्छे ॥ ८।१।११४ ॥ लुकि दुरो वा ॥ ८।१।११५ ॥ ओत्संयोगे ॥ ८।१।११६ ॥ कुतूहले वा ह्रस्वश्च ॥ ८।१।११७ ॥ अदूतः सूक्ष्मे वा ॥ ८।१।११८ ॥ दुकूले वा लश्च द्विः ॥८।१।११९॥ इर्वोद्वहूढे ॥८।१।१२०॥ उर्भ्रूहनूमत्कण्डूयबातूले ॥८।१।१२१॥ मधूके वा ॥८।१।१२२॥ इदेतौ नूपुरे वा ॥८।१।१२३॥ ओत्कूष्माण्डीतूणीरकूर्परस्थालताम्बूलगुडूचीमूल्ये ॥ ८।१।१२४ ॥ स्थूणातूणे वा ॥ ८।१।१२५ ॥ ऋतोऽत् ॥८।१।१२६॥ आत्कृशामृदुकमृदुत्वे वा ॥८।१।१२७॥ इत्कृपादौ ॥८।१।१२८॥ पृष्टे वानुत्तरपदे ॥८।१।१२९॥ मसृणमृगाङ्कमृत्युशृङ्गधृष्टे वा ॥८।१।१३०॥ उदृत्वादौ ॥८।१।१३१॥ निवृत्तवृन्दारके वा ॥८।१।१३२॥ वृषभे वा ॥८।१।१३३॥ गौणान्त्यस्य ॥ ८।१।१३४ ॥ मातुरिद्वा ॥ ८।१।१३५ ॥ उदूदोन्मृषि ॥ ८।१।१३६ ॥ इदुतौ वृश्चवृष्टिपृथङ्मृदङ्गनप्तृके ॥८।१।१३७॥ वा बृहस्पतौ ॥८।१।१३८॥ इदेदोद्वृन्ते ॥८।१।१३९॥ रिः केवलस्य ॥८।१।१४०॥ ऋणर्ज्वृषभर्ज्वृषौ वा ॥ ८।१।१४१ ॥ दृशः क्विप्टक्सनः ॥ ८।१।१४२ ॥ आदृते दिः ॥ ८।१।१४३ ॥ अरिर्दृप्ते ॥८।१।१४४॥ लृत इलिः क्लृप्त-कल्पे ॥ ८।१।१४५ ॥ पत इद्वा वेदनाचपेटादेवरकेसरे ॥८।१।१४६॥ ऊः स्तेने वा ॥ ८।१।१४७ ॥ पेत पत् ॥ ८।१।१४८ ॥ इत्सैन्धवशनैश्चरे ॥ ८।१।१४९ ॥ सैन्ये वा

॥ ८।१।१५० ॥ अइदैंःयादौ च ॥ ८।१।१५१ ॥ वैरादौ वा ॥ ८।१।१५२ ॥ पञ्च दैवे ॥ ८।१।१५३ ॥ उच्चैर्नीचैस्य अः ॥ ८।१।१५४ ॥ ईद्धैर्यै ॥ ८।१।१५५ ॥ ओतोद्वान्योन्यप्रकोष्ठातोद्यशिरोवेदनामनोहरसरोरुहे क्तोश्च वः ॥ ८।१।१५६ ॥ ऊत्सोच्छ्वासे ॥ ८।१।१५७ ॥ गव्यउ आअः ॥ ८।१।१५८ ॥ औत् ओत् ॥८।१।१५९॥ उत्सौन्दर्यादौ ॥८।१।१६०॥ कौक्षेयके वा ॥८।१।१६१॥ अउः पौरादौ च ॥८।१।१६२॥ आश्च गौरवे ॥ ८।१।१६३ ॥ नाव्यावः ॥ ८।१।१६४ ॥ पञ्चयोदशादौ स्वरस्य सस्वरव्यञ्जनेन ॥८।१।१६५॥ स्थविरविचकिलायस्कारे ॥ ८।१।१६६ ॥ वा कदले ॥ ८।१।१६७ ॥ वेतः कर्णिकारे ॥८।१।१६८॥ अयौ वैत् ॥८।१।१६९॥ ओत्पूतरबदरनवमालिकानवफलिकापूगफले ॥ ८।१।१७० ॥ नवा मयूखलवणचतुर्गुणचतुर्थचतुर्दशचतुर्वारसुकुमारकुतूहलोदूखलोलूखले ॥ ८।१।१७१ ॥ अवापोते ॥ ८।१।१७२ ॥ ऊचोपे ॥८।१।१७३॥ उमो निषण्णे ॥८।१।१७४॥ प्रावरणे अङ्ग्वाऊ ॥८।१।१७५॥ स्वरादसंयुक्तस्यानादेः ॥८।१।१७६॥ क-ग-च-ज-त-द-प-यवां प्रायो लुक् ॥८।१।१७७॥ यमुनाचामुण्डाकामुकातिमुक्तके मोऽनुनासिकश्च ॥ ८।१।१७८ ॥ नावर्णात् पः ॥८।१।१७९॥ अवर्णो यश्रुतिः ॥८।१।१८०॥ कुब्जकर्परकीले कः खोऽपुष्पे ॥८।१।१८१॥ मरकतमदकले गः कन्दुके त्वादेः ॥ ८।१।१८२ ॥ किराते वः ॥८।१।१८३॥ शीकरे भहौ वा ॥ ८।१।१८४ ॥ चन्द्रिकायां मः ॥ ८।१।१८५ ॥ निकषस्फटिकचिकुरे हः ॥८।१।१८६॥ खघथधभाम् ॥८।१।१८७॥ पृथकि धो वा ॥८।१।१८८॥ शृङ्खले खः कः ॥ ८।१।१८९ ॥ पुन्नागभागिन्योर्गो मः ॥ ८।१।१९० ॥ छागे लः ॥ ८।१।१९१ ॥ ऊत्वे दुर्भगसुभगे वः ॥ ८।१।१९२ ॥ खचितपिशाचयोश्चः सहौ वा ॥८।१।१९३॥ जटिले जो झो वा ॥ ८।१।१९४ ॥ टो डः ॥८।१।१९५॥ सटाशकटकैटभे ढः ॥८।१।१९६॥ स्फटिके लः ॥ ८।१।१९७ ॥ चपेटापाटौ वा ॥ ८।१।१९८ ॥ ठो ढः ॥ ८।१।१९९ ॥ अङ्कोठे ल्लुः ॥८।१।२००॥ पिठरे हो वा रश्च डः ॥८।१।२०१॥ डो लः ॥ ८।१।२०२ ॥ वेणौ णो वा ॥ ८।१।२०३ ॥ तुच्छे तश्चछौ वा ॥ ८।१।२०४ ॥ तगरत्रसरतूवरे टः ॥८।१।२०५॥ प्रत्यादौ डः ॥ ८।१।२०६ ॥ इत्वे वेतसे ॥८।१।२०७॥ गर्भितातिमुक्तके णः ॥८।१।२०८॥ रुदिते दिनाण्णः ॥८।१।२०९॥ सप्ततौ रः ॥८।१।२१०॥ अतसीसातवाहने लः ॥८।१।२११॥ पलिते वा ॥८।१।२१२॥ पीते वो ले वा ॥८।१।२१३॥ वितस्तिवसतिभरतकातरमातुलिङ्गे हः ॥ ८।१।२१४ ॥ मेथिशिथिरशिथिलप्रथमे थस्य दः ॥ ८।१।२१५ ॥ निशीथपृथिव्योर्वा ॥ ८।१।२१६ ॥ दशनदष्टदग्धदोलादण्डदरदाहदम्भदर्भकदनदोहदे दो वा डः ॥ ८।१।२१७ ॥ दंशदहोः ॥ ८।१।२१८ ॥ सङ्ख्यागद्गदे रः ॥ ८।१।२१९ ॥ कदल्यामद्रुमे ॥ ८।१।२२० ॥ प्रदीपिदोहदे लः ॥८।१।२२१॥ कदम्बे वा ॥ ८।१।२२२ ॥ दीपौ धो वा ॥ ८।१।२२३ ॥ कदर्थिते वः ॥८।१।२२४॥ ककुदे हः ॥८।१।२२५॥ निषधे धो ढः ॥८।१।२२६॥ वौषधे ॥८।१।२२७॥ नो णः ॥८।१।२२८॥ वादौ ॥ ८।१।२२९ ॥ निम्बनापिते ण्णं वा ॥ ८।१।२३० ॥ पो वः ॥ ८।१।२३१ ॥ पाटिपरुषपरिघपरिखापनसपारिभद्रे फः ॥ ८।१।२३२ ॥ प्रभूते वः ॥ ८।१।२३३ ॥ नीपापीडे मो वा ॥८।१।२३४॥ पापर्द्धौ रः ॥८।१।२३५॥

फो भहौ ॥ ८।१।२३६ ॥ बो वः ॥ ८।१।२३७ ॥ बिसिन्यां भः ॥८।१।२३८॥ कबन्धे मयौ ॥८।१।२३९॥ कैटभे भो वः ॥८।१।२४०॥ विषमे मो ढो वा ॥८।१।२४१॥ मन्मथे वः ॥ ८।१।२४२ ॥ वाभिमन्यौ ॥ ८।१।२४३ ॥ भ्रमरे सो वा ॥८।१।२४४॥ आदेर्यो जः ॥ ८।१।२४५ ॥ युष्मद्यर्थपरे तः ॥ ८।१।२४६ ॥ यष्ट्यां लः ॥८।१।२४७॥ वोत्तरीयानीयतीयकृद्ये ज्ञः ॥ ८।१।२४८ ॥ छायायां होऽकान्तौ वा ॥ ८।१।२४९ ॥ डाहवौ कतिपये ॥८।१।२५०॥ किरिमेरे रो डः ॥८।१।२५१॥ पर्याणे डा वा ॥८।१।२५२॥ करवीरे णः ॥ ८।१।२५३ ॥ हरिद्रादौ लः ॥ ८।१।२५४ ॥ स्थूले लो रः ॥८।१।२५५॥ लाहललाङ्गललाङ्गूले वादेर्णः ॥८।१।२५६॥ ललाटे च ॥८।१।२५७॥ शबरे बो मः ॥८।१।२५८॥ स्वप्ननोव्योर्वा ॥८।१।२५९॥ शषोः सः ॥८।१।२६०॥ स्नुषायां ण्हो न वा ॥८।१।२६१॥ दशपाषाणे हः ॥८।१।२६२॥ दिवसे सः ॥८।१।२६३॥ हो घोऽनुस्वारात् ॥८।१।२६४॥ षट्शमीशावसुधासप्तपर्णेष्वादेश्छः ॥ ८।१।२६५ ॥ शिरायां वा ॥ ८।१।२६६ ॥ लुग्भाजनदनुजराजकुले जः सस्वरस्य न वा ॥ ८।१।२६७ ॥ व्याकरणप्राकारागते कगोः ॥८।१।२६८॥ किसलयकालायसहृदये यः ॥८।१।२६९॥ दुर्गादेड्युदुम्बरपादपतनपादपीठेऽन्तर्दः ॥ ८।१।२७० ॥ यावत्तावज्जीवितावर्त्तमानावटप्रावारकदेवकुलैवमेवे वः ॥८।१।२७१॥

॥ इति अष्टमाध्यायस्य प्रथमः पादः ॥

संयुक्तस्य ॥८।२।१॥ शक्तमुक्तदष्टरुग्णमृदुत्वे को वा ॥८।२।२॥ क्षः खः क्वचित्तु छझौ ॥८।२।३॥ ष्कस्कयोर्नाग्नि ॥८।२।४॥ शुष्कस्कन्दे वा ॥८।२।५॥ श्वेटकादौ ॥८।२।६॥ स्थाणावहरे ॥८।२।७॥ स्तम्भे स्तो वा ॥८।२।८॥ थठावस्पन्दे ॥८।२।९॥ रक्ते गो वा ॥८।२।१०॥ शुल्के ल्को वा ॥८।२।११॥ कृत्तिचत्वरे च ॥८।२।१२॥ त्योऽचैत्ये ॥८।२।१३॥ प्रत्यूषे षश्च हो वा ॥८।२।१४॥ त्वथ्वद्रध्वां चलजझाः क्वचित् ॥८।२।१५॥ वृश्चिके श्चेर्च्छुर्वा ॥८।२।१६॥ छोऽक्ष्यादौ ॥८।२।१७॥ क्षमायां कौ ॥८।२।१८॥ ऋक्षे वा ॥८।२।१९॥ क्षण उत्सवे ॥८।२।२०॥ ह्रस्वात् थ्यश्चत्सप्तामनिश्चले ॥८।२।२१॥ सामर्थ्योत्सुकोत्सवे वा ॥८।२।२२॥ स्पृहायाम् ॥८।२।२३॥ द्यय्यर्याजः ॥८।२।२४॥ अभिमन्यौ जञौ वा ॥८।२।२५॥ साध्वसध्यह्यां झः ॥८।२।२६॥ ध्वजे वा ॥८।२।२७॥ इन्धौ झा ॥ ८।२।२८ ॥ वृत्तप्रवृत्तमृत्तिकापत्तनकदर्थिते टः ॥ ८।२।२९ ॥ र्त्तस्याधूर्त्तादौ ॥ ८।२।३० ॥ वृन्ते ण्टः ॥ ८।२।३१ ॥ ठोऽस्थिबिसंस्थुले ॥ ८।२।३२ ॥ स्त्यानचतुर्थार्थे वा ॥८।२।३३॥ ष्टस्यानुष्ट्रष्टासंदष्टे ॥८।२।३४॥ गर्त्ते डः ॥८।२।३५॥ सम्मर्दवितर्दिवेच्छर्दच्छर्दिकपर्दमार्दिते र्दस्य ॥ ८।२।३६ ॥ गर्दभे वा ॥ ८।२।३७ ॥ कन्दारिकाभिन्दिपाले ण्डः ॥८।२।३८॥ स्तब्धे ठढौ ॥८।२।३९॥ दग्धविदग्धवृद्धिवृद्धे ढः ॥८।२।४०॥ श्रद्धर्द्धिमूर्द्धार्घेऽन्ते वा ॥८।२।४१॥ म्नज्ञोर्णः ॥८।२।४२॥ पञ्चाशत्पञ्चदशदत्ते ॥ ८।२।४३ ॥ मन्यौ न्तो वा ॥ ८।२।४४ ॥ स्तस्य थोऽसमस्तस्तम्बे ॥८।२।४५॥ स्तवे वा ॥८।२।४६॥ पर्यस्ते थटौ ॥८।२।४७॥ वोत्साहे थो ह्रश्च रः ॥८।२।४८॥ आश्लिष्टे लघौ ॥८।२।४९॥ चिह्ने न्वो वा ॥८।२।५०॥ भस्मात्मनोः पो वा ॥८।२।५१॥ ष्मकर्मोः ॥८।२।५२॥ ष्पस्पयोः फः ॥८।२।५३॥ भीष्मे ष्मः ॥८।२।५४॥

श्लेष्मणि वा ॥८।२।५५॥ ताच्छील्ये म्वः ॥८।२।५६॥ ह्वो भो वा ॥८।२।५७॥ वा विह्वले वौ वश्च ॥ ८।२।५८ ॥ वोर्ध्वे ॥ ८।२।५९ ॥ कश्मीरे म्मो वा ॥ ८।२।६० ॥ न्मो मः ॥८।२।६१॥ ग्मो वा ॥८।२।६२॥ ब्रह्मचर्यतूर्यसौन्दर्यशौण्डोर्ये र्यो रः ॥८।२।६३॥ धैर्ये वा ॥८।२।६४॥ पतः पर्यन्ते ॥८।२।६५॥ आश्चर्ये ॥८।२।६६॥ अतो रिआररिज्जरीअं ॥८।२।६७॥ पर्यस्तपर्याणसौकुमार्ये ल्लः ॥८।२।६८॥ बृहस्पतिवनस्पत्योः सो वा ॥८।२।६९॥ बाष्पे होऽश्रुणि ॥८।२।७०॥ कार्षापणे ॥८।२।७१॥ दुःखदक्षिणतीर्थे वा ॥८।२।७२॥ कूष्माण्ड्यां ष्मो लस्तु ण्डो वा ॥८।२।७३॥ पक्ष्मश्मष्मस्मह्मां म्हः ॥८।२।७४॥ सूक्ष्मश्लक्ष्णस्निग्धश्लक्ष्णाणां ण्हः ॥ ८।२।७५ ॥ ह्लो ल्हः ॥ ८।२।७६ ॥ कगटडतदपशषसऽकऽपामूर्ध्वे लुक् ॥८।२।७७॥ अधो मनयाम् ॥८।२।७८॥ सर्वत्र लवरामवन्द्रे ॥८।२।७९॥ द्रे रो न वा ॥८।२।८०॥ धात्र्याम् ॥८।२।८१॥ तीक्ष्णे णः ॥८।२।८२॥ ह्रो त्रः ॥८।२।८३॥ मध्याह्ने हः ॥८।२।८४॥ दशार्हे ॥८।२।८५॥ आदेः श्मश्रुश्मशाने ॥८।२।८६॥ श्रो हरिश्चन्द्रे ॥८।२।८७॥ रात्रौ वा ॥८।२।८८॥ अनादौ शेषादेशयोर्द्वित्वम् ॥८।२।८९॥ द्वितीयतुर्ययोरुपरि पूर्वः ॥ ८।२।९० ॥ दीर्घं ङ्या ॥ ८।२।९१ ॥ न दीर्घानुस्वारात् ॥८।२।९२॥ रहोः ॥८।२।९३॥ धृष्टद्युम्ने णः ॥८।२।९४॥ कर्णिकारे वा ॥८।२।९५॥ दृते ॥८।२।९६॥ समासे वा ॥८।२।९७॥ तैलादौ ॥८।२।९८॥ सेवादौ वा ॥८।२।९९॥ शार्ङ्गे ङात्पूर्वोत् ॥ ८।२।१०० ॥ क्ष्माश्लाघारत्नेऽन्त्यव्यञ्जनात् ॥ ८।२।१०१ ॥ स्नेहाग्न्योर्वा ॥८।२।१०२॥ प्लक्षे लात् ॥८।२।१०३॥ ह्रैश्रीह्रीकृत्स्नक्रियादिष्ट्यास्वित् ॥८।२।१०४॥ शीर्षतत्तवज्ञे वा ॥८।२।१०५॥ लात् ॥८।२।१०६॥ स्याद् भव्यचैत्यचौर्यसमेषु यात् ॥८।२।१०७॥ स्वप्ने नात् ॥८।२।१०८॥ स्निग्धे वादितौ ॥८।२।१०९॥ कृष्णे वर्णे वा ॥८।२।११०॥ उच्चार्हति ॥८।२।१११॥ पद्मच्छद्मामूर्खद्वारे वा ॥८।२।११२॥ तन्वीतुल्येषु ॥८।२।११३॥ एकस्वरे श्वः स्वे ॥८।२।११४॥ ज्यायामीत् ॥८।२।११५॥ करेणूवाराणस्यो रणोर्व्यत्ययः ॥ ८।२।११६ ॥ आलाने लनोः ॥ ८।२।११७ ॥ अचलपुरे चलोः ॥८।२।११८॥ महाराष्ट्रे हरोः ॥८।२।११९॥ ह्रदे ह्रदोः ॥८।२।१२०॥ हरिताले रलोर्नवा ॥८।२।१२१॥ लघुके लहोः ॥८।२।१२२॥ ललाटे लडोः ॥८।२।१२३॥ ह्रे ह्योः ॥८।२।१२४॥ स्तोकस्य थोक-थोव-थेवाः ॥८।२।१२५॥ दुहितृभगिन्योर्धूआबहिण्यौ ॥८।२।१२६॥ वृक्षक्षितयो रुक्खछूढौ ॥८।२।१२७॥ वनितायां विलया ॥८।२।१२८॥ गौणस्येषतः कूरः ॥८।२।१२९॥ स्त्रिया इत्थी ॥८।२।१३०॥ धृतेर्दिहिः ॥८।२।१३१॥ मार्जारस्य मज्जरचञ्चरौ ॥८।२।१३२॥ वैडूर्यस्य वेरुलिअं ॥ ८।२।१३३ ॥ पण्हि पत्ताहे इदानीमः ॥८।२।१३४॥ पूर्वस्य पुरिमा ॥८।२।१३५॥ त्रस्तस्य हित्थतट्ठौ ॥८।२।१३६॥ बृहस्पतौ बहो भयः ॥८।२।१३७॥ मलिनाभयशुक्तिछुप्तारब्धपदार्तेर्मइलावहसिप्पिछिक्काढत्तपाइक्कं ॥८।२।१३८॥ दंष्ट्राया दाढा ॥८।२।१३९॥ बहिसो बाहिंबाहिरौ ॥८।२।१४०॥ अधसो हेट्ठं ॥८।२।१४१॥ मातृपितुः स्वसुः सिआछौ ॥८।२।१४२॥ तिर्यञ्चस्तिरिच्छः ॥८।२।१४३॥ गृहस्य घरोऽपतौ ॥८।२।१४४॥ शीलाद्यर्थस्येरः ॥८।२।१४५॥ क्त्वस्तुमत्तूणतुआणाः॥८।२।१४६॥ इदमर्थस्य केरः॥८।२।१४७॥ पर्यराजभ्यां कडिक्कौ ॥८।२।१४८॥ युष्मदस्मदोञ पञ्चयः ॥८।२।१४९॥ वतेर्वः ॥८।२।१५०॥ सर्वाङ्गादीनस्येकः ॥८।२।१५१॥

पथो णस्येकट् ॥८।२।१५२॥ ईयस्यात्मनो णयः ॥८।२।१५३॥ त्वस्य डिमात्तणौ वा ॥८।२।१५४॥ अनङ्कोठात्तैलस्य डेल्लुः ॥८।२।१५५॥ यत्तदेतदोतोरित्तिं अ एतल्लुक् च ॥ ८।२।१५६ ॥ इदंकिमश्च डेत्तिअडेत्तिलडेद्दहाः ॥ ८।२।१५७॥ कृत्वसो हुत्तम् ॥८।२।१५८॥ आल्विल्लोल्लालवन्तमन्तेत्तेरमणा मतोः ॥८।२।१५९॥ त्तो दो तसो वा ॥८।२।१६०॥ त्रपो हिहित्थाः ॥८।२।१६१॥ वैकाद्दः सि सिअं इआ ॥८।२।१६२॥ डिल्लडुल्लौ भवे ॥८।२।१६३॥ स्वार्थे कश्च वा ॥८।२।१६४॥ ल्लो नवैकाद्वा ॥८।२।१६५॥ उपरेः संव्याने ॥ ८।२।१६६ ॥ भ्रुवो मया डमया ॥ ८।२।१६७ ॥ शनैसो डिअम् ॥८।२।१६८॥ मनाको न वा डयं च ॥८।२।१६९॥ मिश्राड्डालिअः ॥८।२।१७०॥ रो दीर्घात् ॥ ८।२।१७१ ॥ त्वादेः सः ॥ ८।२।१७२ ॥ विद्युत्पत्रपीतान्धाल्लुः ॥ ८।२।१७३ ॥ गोणादयः ॥८।२।१७४॥ अव्ययम् ॥८।२।१७५॥ तं वाक्योपन्यासे ॥८।२।१७६॥ आम अभ्युपगमे ॥८।२।१७७॥ णवि वैपरीत्ये ॥८।२।१७८॥ पुणरुत्त कृतकरणे ॥८।२।१७९॥ हन्दि विषादविकल्पपश्चात्तापनिश्चयसत्ये ॥८।२।१८०॥ हन्द च गृहाणार्थे ॥८।२।१८१॥ मिवपिबविवव्वविअइवार्थे वा ॥८।२।१८२॥ जेण तेण लक्षणे ॥८।२।१८३॥ णइ चेअ चिअ च अवधारणे ॥८।२।१८४॥ बले निर्धारणनिश्चययोः ॥८।२।१८५॥ किरेर हिर किलाथ वा ॥८।२।१८६॥ णवर केवले ॥८।२।१८७॥ आनन्तर्ये णवरि ॥८।१।१८८॥ अलारि निवारणे ॥८।२।१८९॥ अण णाइं नञर्थे ॥८।२।१९०॥ माइं मार्थे ॥८।२।१९१॥ हद्धी निर्वेदे ॥ ८।२।१९२ ॥ वेव्वे भयवारणविषादे ॥८।२।१९३॥ वेव्व च आमन्त्रणे ॥ ८।२।१९४ ॥ मामि हला हले सख्या वा ॥ ८।२।१९५ ॥ दे संमुखीकरणे च ॥८।२।१९६॥ हुं दानपृच्छानिवारणे ॥८।२।१९७॥ हु खु निश्चयवितर्कसंभावनविस्मये ॥८।२।१९८॥ ऊ गर्हाक्षेपविस्मयसूचने ॥८।२।१९९॥ थू कुत्सायाम् ॥८।२।२००॥ रे अरे संभाषणरतिकलहे ॥८।२।२०१॥ हरे क्षेपे च ॥८।२।२०२॥ ओ सूचनापश्चात्तापे ॥८।२।२०३॥ अव्वो सूचनादुःखसंभाषणापराधविस्मयानन्दादरभयखेदविषादपश्चात्तापे ॥८।२।२०४॥ अइ संभावने ॥८।२।२०५॥ वणे निश्चयविकल्पानुकंप्ये च ॥८।२।२०६॥ मणे विमर्शे ॥८।२।२०७॥ अम्मो आश्चर्ये ॥८।२।२०८॥ स्वयंमोऽर्थे अप्पणो न वा ॥८।२।२०९॥ प्रत्येकमः पाडिक्कं पाडिएक्कं ॥८।२।२१०॥ उअ पश्य ॥८।२।२११॥ इहरा इतरथा ॥८।२।२१२॥ एक्कसरिअं झगिति संप्रति ॥८।२।२१३॥ मोरउल्ला मुधा ॥८।२।२१४॥ दराधाल्पे ॥८।२।२१५॥ किणो प्रश्ने ॥८।२।२१६॥ इजेराः पादपूरणे ॥८।२।२१७॥ प्यादयः ॥८।२।२१८॥

॥ इति अष्टमाध्याये द्वितीयः पादः ॥

वीप्स्यात्स्यादेर्वीप्स्ये स्वरे मो वा ॥८।३।१॥ अतः सेर्डोः ॥८।३।२॥ वैतत्तदः ॥८।३।३॥ जस्शसोर्लुक् ॥८।३।४॥ अमोऽस्य ॥८।३।५॥ टा आमोर्णः ॥८।३।६॥ भिसो हि हिँ हिं ॥८।३।७॥ ङसेस्त्तोदोदुहिहिन्तो लुकः ॥ ८।३।८ ॥ भ्यसस्त्तोदोदुहिहिन्तोसुन्तो ॥८।३।९॥ ङसः स्सः ॥८।३।१०॥ ङे म्मि ङेः ॥८।३।११॥ जस्शस्ङसित्तोदोद्वामि दीर्घः ॥८।३।१२॥ भ्यसि वा ॥८।३।१३॥ टाणशस्येत् ॥८।३।१४॥ भिस्भ्यस्सुपि ॥८।३।१५॥ हुतो दीर्घः ॥८।३।१६॥ चतुरो वा ॥८।३।१७॥ लुप्ते शसि

॥८।३।१८॥ अक्लीबे सौ ॥८।३।१९॥ पुंसि जसो डउ डओ वा ॥८।३।२०॥ वोतो डवो ॥८।३।२१॥ जस्शसोर्णो वा ॥८।३।२२॥ ङसिङसोः पुंक्लीबे वा ॥८।३।२३॥ टो णा ॥८।३।२४॥ क्लीबे स्वरान्म् सेः ॥८।३।२५॥ जस्शस इँइंणयः सप्राग्दीर्घाः ॥८।३।२६॥ स्त्रियामुदोतौ वा ॥८।३।२७॥ ईतः सेश्चा वा ॥८।३।२८॥ टाङस्ङेरदादिदेद्वा तु ङसेः ॥८।३।२९॥ नात आत् ॥८।३।३०॥ प्रत्यये ङोर्न वा ॥८।३।३१॥ अजातेः पुंसः ॥८।३।३२॥ किंयत्तदोस्यमामि ॥८।३।३३॥ छायाहरिद्रयोः ॥८।३।३४॥ स्वस्रादेर्डा ॥८।३।३५॥ ह्रस्वोऽमि ॥८।३।३६॥ नामन्त्र्यात्सौ मः ॥८।३।३७॥ डो दीर्घो वा ॥८।३।३८॥ ऋतोद्वा ॥८।३।३९॥ नाम्न्यरं वा ॥८।३।४०॥ वाप ए ॥८।३।४१॥ ईदूतोर्ह्रस्वः ॥८।३।४२॥ क्विपः ॥८।३।४३॥ ऋतामुदस्यमौसु वा ॥८।३।४४॥ आरः स्यादौ ॥८।३।४५॥ आ अरा मातुः ॥८।३।४६॥ नाम्न्यरः ॥८।३।४७॥ आ सौ न वा ॥८।३।४८॥ राज्ञः ॥८।३।४९॥ जस्शस्ङसिङसां णो ॥८।३।५०॥ टो णा ॥८।३।५१॥ इर्जस्य णो णा ङौ ॥८।३।५२॥ इर्णममामा ॥ ८।३।५३ ॥ ईद्भिस्भ्यसाम्सुपि ॥ ८।३।५४ ॥ आजस्य टाङसिङस्सु सणाणोष्वण् ॥८।३।५५॥ पुंस्यन आणो राज्ञश्च ॥८।३।५६॥ आत्मनष्टो णिआ णइआ ॥८।३।५७॥ अतः सर्वादेर्डे जसः ॥८।३।५८॥ ङेः स्सिम्मित्थाः ॥८।३।५९॥ न वानिदमेतदो हिं ॥८।३।६०॥ आमो डेसिं ॥८।३।६१॥ किंतद्भ्यां डासः ॥८।३।६२॥ किंयत्तद्भ्यो ङसः ॥८।३।६३॥ ईद्भ्यः स्सा से ॥८।३।६४॥ ङेर्डाहे डाला इआ काले ॥८।३।६५॥ ङसेर्म्हा ॥८।३।६६॥ तदो डोः ॥८।३।६७॥ किमो डिणोडीसौ ॥८।३।६८॥ इदमेतत्किंयत्तद्भ्यष्टो डिणा ॥८।३।६९॥ तदो णः स्यादौ क्वचित् ॥८।३।७०॥ किमः कस्त्रतसोश्च ॥८।३।७१॥ इदम इमः ॥८।३।७२॥ पुंस्त्रियोर्ने वायमिमिआ सौ ॥८।३।७३॥ स्सिंस्सयोरत् ॥८।३।७४॥ ङेर्मैन हः ॥८।३।७५॥ न त्थः ॥८।३।७६॥ णोम्शस्टाभिसि ॥८।३।७७॥ अमेणम् ॥८।३।७८॥ क्लीबे स्यमेदमिणमो च ॥८।३।७९॥ किमः किं ॥८।३।८०॥ वेदंतदेतदो ङसाम्भ्यां सेसिमौ ॥८।३।८१॥ वैतदो ङसेस्त्तो त्ताहे ॥८।३।८२॥ त्थे च तस्य लुक् ॥८।३।८३॥ एरदीतौ म्मौ वा ॥८।३।८४॥ वैसेणमिणमो सिना ॥८।३।८५॥ तदश्च तः सोक्लीबे ॥८।३।८६॥ वादसो दस्य होनोदाम् ॥८।३।८७॥ मुः स्यादौ ॥८।३।८८॥ म्मावये औ वा ॥८।३।८९॥ युष्मदस्तं तुं तुवं तुह तुमं सिना ॥८।३।९०॥भे तुब्भे तुज्झ (उज्झे) तुम्ह तुय्हे उय्हे जसा ॥८।३।९१॥ तं तुं तुमं तुवं तुह तुमे तुए अमा ॥८।३।९२॥ वो तुज्झ (उज्झे) तुब्भे तुय्हे उय्हे भे शसा ॥८।३।९३॥ मे दि दे ते तइ तए तुमं तुमइ तुमए तुमे तुमाइ टा ॥८।३।९४॥ मे तुब्भेहिं उज्झेहिं उय्हेहिं तुय्हेहिं उय्हेहिं भिसा ॥८।३।९५॥ तइ-तुव-तुम-तुह-तुब्भा ङसौ ॥८।३।९६॥ तुय्ह तुब्भ तहिन्तो ङसिना ॥८।३।९७॥ तुब्भतुय्होय्होम्हाभ्यसि ॥८।३।९८॥ तइ-तुं-ते-तुम्ह-तुह-तुहं-तुव-तुम-तुमे-तुमो-तुमाइ-दि-दे इ-ए-तुब्भोब्भोय्हा ङसा ॥८।३।९९॥ तु थो मे (तुय्ह) तुब्भ तुब्भं (उब्भ) तुब्भाण तुवाणतुमाणतुहाण उ (तु)म्हाण आमा ॥८।३।१००॥ तुमे तुमए तुमाइ तइ तए ङिना ॥८।३।१०१॥ तु-तुव-तुम-तुह-तुब्भा ङौ ॥८।३।१०२॥ सुपि ॥८।३।१०३॥ ब्भो म्हज्झौ वा ॥८।३।१०४॥ अस्मदो म्मि अम्मि अम्हि हं अहं अहयं सिना ॥८।३।१०५॥ अम्ह

अम्हे अम्हो मो वयं मे जसा ॥८।३।१०६॥ णे णं मि अम्मि अम्ह मम्ह मं ममं मिमं अहं अमा ॥८।३।१०७॥ अम्हे अम्हो अम्ह णे शसा ॥८।३।१०८॥ मि मे ममं ममए ममाइ मइ मए मयाइ णे टा ॥८।३।१०९॥ अम्हेहि अम्हाहि अम्ह अम्हे णे भिसा ॥८।३।११०॥ मइ-मम-मह-मज्झा-ङसौ ॥८।३।१११॥ ममाम्हौ भ्यसि ॥८।३।११२॥ मे मइ मम मह महं मज्झ मज्झं अम्ह अम्हं ङसा ॥८।३।११३॥ णे णो मज्झ अम्ह अम्हं अम्हे अम्हो अम्हाण ममाण महाण मज्झाण आमा ॥८।३।११४॥ मि मइ ममाइ मए मे ङिना ॥८।३।११५॥ अम्ह-मम-मह-मज्झा ङौ ॥८।३।११६॥ सुपि ॥८।३।११७॥ त्रेस्ती तृतीयादौ ॥८।३।११८॥ द्वेर्दोवे ॥८।३।११९॥ दुवे दोण्णि वेण्णि च जस्शसा ॥८।३।१२०॥ त्रेस्तिण्णिः ॥८।३।१२१॥ चतुरश्चत्तारो चउरो चत्तारि ॥८।३।१२२॥ सङ्ख्याया आमो ण्ह ण्हं ॥८।३।१२३॥ शेषेऽदन्तवत् ॥८।३।१२४॥ न दीर्घो णो ॥८।३।१२५॥ ङसेर्लुक् ॥८।३।१२६॥ भ्यसश्च हिः ॥८।३।१२७॥ ङेर्डें ॥८।३।१२८॥ एत् ॥८।३।१२९॥ द्विवचनस्य बहुवचनम् ॥८।३।१३०॥ चतुर्थ्याः षष्ठी ॥८।३।१३१॥ तादर्थ्येङेर्वा ॥८।३।१३२॥ वधाङ्काइश्च वा ॥८।३।१३३॥ क्वचिद् द्वितीयादेः ॥८।३।१३४॥ द्वितीयातृतीययोः सप्तमी ॥८।३।१३५॥ पञ्चम्यास्तृतीया ॥८।३।१३६॥ सप्तम्या द्वितीया ॥८।३।१३७॥ क्यङोर्यलुक् ॥८।३।१३८॥ त्यादीनामाद्यत्रयस्याद्यस्येचेचौ ॥८।३।१३९॥ द्वितीयस्य सि से ॥८।३।१४०॥ तृतीयस्य मिः ॥८।३।१४१॥ बहुष्वाद्यस्य न्ति न्ते इरे ॥८।३।१४२॥ मध्यमस्येत्थाहचौ ॥८।३।१४३॥ तृतीयस्य मो मु माः ॥८।३।१४४॥ अत एवैच् से ॥८।३।१४५॥ सिनास्तेः सिः ॥८।३।१४६॥ मि-मो-मैर्म्ह म्हो म्हा वा ॥ ८।३।१४७॥ अस्थिस्त्यादिना ॥ ८।३।८४८ ॥ णेरदेदावावे ॥८।३।१४९॥ गुर्वादेरविर्वा ॥८।३।१५०॥ भ्रमेराडो वा ॥८।३।१५१॥ लुगावी क्त-भाव-कर्मसु ॥८।३।१५२॥ अदेल्लुक्यादेरत आः ॥८।३।१५३॥ मौ वा ॥८।३।१५४॥ इच मो-मु-मे वा ॥८।३।१५५॥ क्ते ॥८।३।१५६॥ पञ्च क्त्वा-तुम्-तव्य-भविष्यत्सु ॥८।३।१५७॥ वर्तमाना-पञ्चमी-शतृषु वा ॥८।३।१५८॥ ज्ञा ज्जे ॥८।३।१५९॥ ईअ-इज्जौ क्यस्य ॥८।३।१६०॥ दृशिवचेर्डीसडुचं ॥८।३।१६१॥ सो-हि-होअ भूतार्थस्य ॥ ८।३।१६२ ॥ व्यञ्जनादीअः ॥८।३।१६३॥ तेनास्तेरास्यहेसी ॥८।३।१६४॥ ज्ञात्सप्तम्या इर्वा ॥८।३।१६५॥ भविष्यति हिरादिः ॥८।३।१६६॥ मि-मो-मु-मेस्सा हा न वा ॥८।३।१६७॥ मो-मु-मानां हिस्सा हित्था ॥८।३।१६८॥ मे स्सं ॥८।३।१६९॥ कृ-दो हं ॥८।३।१७०॥ श्रु-गमि-रुदि-विदि-दृशि-मुचि-वचि-छिदि-भिदि-भुजां सोच्छं गच्छं रोच्छं वेच्छं दच्छं मोच्छं वो (व)च्छं छेच्छं भेच्छं भोच्छं ॥८।३।१७१॥ सोच्छादय इजादिषु हिलुक् च वा ॥ ८।३।१७२ ॥ दु सु मु विध्यादिष्वेकस्मिन्त्रयाणाम् ॥ ८।३।१७३ ॥ सोर्हिर्वा ॥८।३।१७४॥ अत इज्जस्विज्जहीज्जे-लुको वा ॥८।३।१७५॥ बहुषु न्तु ह मो ॥८।३।१७६॥ वर्तमाना-भविष्यन्त्योश्च ज्ज ज्जा वा ॥८।३।१७७॥ मध्ये च स्वरान्ताद्वा ॥८।३।१७८॥ क्रियातिपत्तेः ॥८।३।१७९॥ न्तमाणौ ॥८।३।१८०॥ शत्रानशः ॥८।३।१८१॥ ई च स्त्रियाम् ॥८।३।१८२॥

॥ इति अष्टमाध्याये तृतीयः पादः ॥

इदितो वा ॥ ८।४।१ ॥ कथेर्वेञ्जरपञ्जराप्पालपिसुणमङ्गबाल्लचवजम्पसीससाहाः ॥८।४।२॥ दुःखे णिव्वरः ॥ ८।४।३ ॥ जुगुप्सेर्जुणदुगुच्छदुगुञ्छाः ॥८।४।४॥ बुभुक्षिवीज्योर्णीरवबोज्जौ ॥८।४।५॥ ध्यागोर्झागौ ॥८।४।६॥ झो जाणमुणौ ॥८।४।७॥ उदो ध्मो धुमा ॥८।४।८॥ श्रदो धो दहः ॥८।४।९॥ पिबेः पिज्जड (ड्ड)ल्लपट्टघोट्टाः ॥८।४।१०॥ उद्घातेरोरुम्मा वसुआ ॥८।४।११॥ निद्रातेरोहीरोड्डौ ॥८।४।१२॥ आघ्राराइघः ॥८।४।१३॥ स्नातेरब्भुत्तः ॥८।४।१४॥ समः स्त्यः खाः ॥८।४।१५॥ स्थष्ठाथक्कचिट्ठनिरप्पाः ॥८।४।१६॥ उदष्ठक्कुक्कुरौ ॥८।४।१७॥ म्लेर्वा पव्वायौ ॥८।४।१८॥ निमेर्मा निम्माणनिम्मवौ ॥८।४।१९॥ क्षेर्णिज्झरो वा ॥८।४।२०॥ छदेर्णुमनूमसन्नुमढक्कौम्वालपव्वालाः ॥८।४।२१॥ निव्रिपत्योर्णिहोडः ॥८।४।२२॥ दूङो दूमः ॥८।४।२३॥ धवलेर्दूमः ॥८।४।२४॥ तुलेरोहामः ॥८।४।२५॥ विरेचेरोलुण्डोल्लुण्डपल्हत्थाः ॥८।४।२६॥ तडेराहोडविहोडौ ॥८।४।२७॥ मिश्रेर्वीसालमेलवौ ॥८।४।२८॥ उद्भूलेर्गुण्ठः ॥८।४।२९॥ भ्रमेस्तालिअण्टतमाडौ ॥८।४।३०॥ नशेर्विउडनासवहारवविप्पगालपलावाः ॥ ८।४।३१ ॥ दृशेर्दावदंसदक्खवाः ॥८।४।३२॥ उद्घटेरुग्गः ॥८।४।३३॥ स्पृहः सिहः ॥८।४।३४॥ सम्भावेरासङ्घः ॥८।४।३५॥ उन्नमेरुत्थङ्गोल्लालगुलुगुञ्छोप्पेलाः ॥ ८।४।३६ ॥ प्रस्थापेः पट्ठवपेण्डवौ ॥८।४।३७॥ विज्ञपेर्वेक्कावुक्कौ ॥८।४।३८॥ अर्पेरल्लिवच्चप्पणामाः ॥८।४।३९॥ यापेर्जवः ॥८।४।४०॥ प्लावेरोम्वालपव्वालौ ॥८।४।४१॥ विकोशेः पक्खोडः ॥८।४।४२॥ रोमन्थे रोग्गालवग्गोलौ ॥८।४।४३॥ कमेर्णिहुवः ॥८।४।४४॥ प्रकाशेर्णुव्वः ॥८।४।४५॥ कम्पेर्विच्छोलः ॥८।४।४६॥ आरोपेर्वलः ॥८।४।४७॥ दोलेरङ्गोलः ॥८।४।४८॥ रञ्जेरावः ॥८।४।४९॥ घटेः परिवाडः ॥८।४।५०॥ वेष्टेः परिआलः ॥८।४।५१॥ क्रियः किणो वेस्तु क्के च ॥८।४।५२॥ भियो भाबोहौ ॥८।४।५३॥ आलीङोल्ली ॥८।४।५४॥ नीलीङेर्णिलीअणिलुक्कणिरिग्घलुक्कलिक्कलिहकाः ॥८।४।५५॥ विलीङेर्विरा ॥८।४।५६॥ रुते रुञ्जरुण्टौ ॥८।४।५७॥ श्रुटेर्हणः ॥८।४।५८॥ धूगेर्धुवः ॥८।४।५९॥ भुवेर्हो-हुव-हवाः ॥८।४।६०॥ अविति हुः ॥८।४।६१॥ पृथक् स्पष्टे णिव्वडः ॥८।४।६२॥ प्रभौ हुप्पो वा ॥८।४।६३॥ क्ते हूः ॥८।४।६४॥ कृगेः कुणः ॥८।४।६५॥ काणेक्षिते णिआरः ॥८।४।६६॥ निष्टम्भावष्टम्भे णिट्ठुहसंदाणं ॥८।४।६७॥ श्रमे वावम्फः ॥८।४।६८॥ मन्युनौष्ठुमालिन्ये णिव्वोलः ॥८।४।६९॥ शैथिल्यलम्बने पयल्लः ॥८।४।७०॥ निष्पाताच्छोटे णीलुञ्छः ॥८।४।७१॥ क्षुरे कम्मः ॥८।४।७२॥ चाटौ गुललः ॥८।४।७३॥ स्मरेर्झर-झूर-भर-भल-लड-विम्हर- सुमर-पयर-पम्हुहाः ॥८।४।७४॥ विस्मुः पम्हुस-विम्हर-वोसराः ॥८।४।७५॥ व्याहृगेः कोक्कपोक्कौ ॥८।४।७६॥ प्रसरेः पयल्लोवेल्लौ ॥८।४।७७॥ महमहो गन्धे ॥८।४।७८॥ निस्सहेर्णीहर-नील-धाड-वरहाडाः ॥८।४।७९॥ जाग्रेर्जग्गः ॥८।४।८०॥ व्याप्रेराअड्डः ॥८।४।८१॥ संवृगेः साहरसाहट्टौ ॥८।४।८२॥ आहङेः सन्नामः ॥८।४।८३॥ प्रहृगेः सारः ॥८।४।८४॥ अवतरेरोहओरसौ ॥८।४।८५॥ शकेश्चयतरतीरपाराः ॥८।४।८६॥ फक्कस्थक्कः ॥८।४।८७॥ श्लाघः सलहः ॥८।४।८८॥ खचेर्वेअडः ॥८।४।८९॥ पचेः सोल्लपउलौ ॥८।४।९०॥ मुचेश्छड्डावहेडमेल्लोस्सिक्करेअवणिल्लुञ्छधंसाडाः ॥८।४।९१॥ दुःखे णिव्वलः ॥८।४।९२॥ वञ्चेर्वेहववेलवजूर-

वोमच्छाः ॥८।४।९३॥ रचेरुगाहावहविडविड्डाः ॥८।४।९४॥ समारचेरुवहत्थसारव-समारकेलायाः ॥८।४।९५॥ सिचेः सिञ्चसिम्पौ ॥८।४।९६॥ प्रच्छः पुच्छः ॥८।४।९७॥ गर्जेर्वुक्कः ॥८।४।९८॥ वृषे ढिक्कः ॥८।४।९९॥ राजेरग्घछज्जसहरीररेहाः ॥८।४।१००॥ मस्जेराउड्डणिउड्डवुड्डखुप्पाः ॥ ८।४।१०१ ॥ पुञ्जेरारोलवमालौ ॥ ८।४।१०२ ॥ लस्जे-र्जीहः ॥८।४।१०३॥ तिजेरोसुक्कः ॥ ८।४।१०४ ॥ मृजेरुग्घुसलुञ्छपुञ्छपुंसफुसपुसलु-हहुलरोसाणाः ॥ ८।४।१०५ ॥ भञ्जेर्वेमयमुसुमूरमूरसूरसूडविरपविरञ्जकरञ्जनीरञ्जाः ॥ ८।४।१०६ ॥ अनुव्रजेः पडिअग्गः ॥ ८।४।१०७ ॥ अर्जेर्विढवः ॥ ८।४।१०८ ॥ युजो जुञ्जजुज्जजुप्पाः ॥ ८।४।१०९ ॥ भुजो भुञ्जजिमजेमकम्माण्हसमाणचमढचड्डाः ॥ ८।४।११० ॥ वोपेन कम्मवः ॥ ८।४।१११ ॥ घटेर्गढः ॥ ८।४।११२ ॥ समो गलः ॥ ८।४।११३ ॥ हासेन स्फुटेर्मुरः ॥ ८।४।११४ ॥ मण्डेश्चिञ्चचिञ्चमचिञ्चिल्लरीडटि-विडिक्काः ॥ ८।४।११५ ॥ तुडेस्तोडतुट्टखुट्टखुडोक्खुडोल्लुक्कणिल्लुक्कलुक्कोल्लूराः ॥ ८।४।११६ ॥ घूर्णो घुलघोलघुम्मपहल्लाः ॥ ८।४।११७ ॥ विवृतेर्ढंसः ॥ ८।४।११८ ॥ कथेरट्टः ॥८।४।११९॥ ग्रन्थो गण्ठः ॥८।४।१२०॥ मन्थेर्घुसलविरोलौ ॥८।४।१२१॥ ह्लादेरवअच्छः ॥ ८।४।१२२ ॥ नेः सदो मज्जः ॥८।४।१२३॥ छिदेर्दुहावणिच्छल्लणि-ज्झोडणिव्वरणिल्लूरलूराः ॥ ८।४।१२४ ॥ आङ ओअन्दोहालौ ॥८।४।१२५॥ मृदो मलमढपरिहट्टखड्डचड्डमड्डपन्नाडाः ॥ ८।४।१२६ ॥ स्पन्देश्चुलुचुलः ॥८।४।१२७॥ निरः पदेर्वलः ॥ ८।४।१२८ ॥ विसंवदेर्विअट्टविलोट्टफंसाः ॥ ८।४।१२९ ॥ शदोज्झडपक्-खोडौ ॥ ८।४।१३० ॥ आक्रन्देर्णीहरः ॥ ८।४।१३१ ॥ खिदेर्जुरविसूरौ ॥ ८।४।१३२ ॥ रुधेरुत्थङ्घः ॥ ८।४।१३३ ॥ निषेधेर्हक्कः ॥ ८।४।१३४ ॥ क्रुधेर्जूरः ॥ ८।४।१३५ ॥ जनो जाजम्मौ ॥ ८।४।१३६ ॥ तनेस्तडतड्डतड्डवविरल्लाः ॥ ८।४।१३७ ॥ तृपस्थप्पः ॥ ८।४।१३८ ॥ उपसर्पेरल्लिअः ॥ ८।४।१३९ ॥ संतपेर्झङ्खः ॥८।४।१४०॥ व्यापेरोअग्गः ॥ ८।४।१४१ ॥ समापेः समाणः ॥ ८।४।१४२ ॥ क्षिपेर्गलत्थाड्डक्खसोल्लपेल्लणोल्लुड्ड-हुलपरीघत्ताः ॥ ८।४।१४३ ॥ उत्क्षिपेर्गुलुञ्छोत्थङ्घालुत्थोब्भुत्थोस्सिक्कहक्खुवाः ॥८।४।१४४॥ आक्षिपेर्णीरवः ॥ ८।४।१४५ ॥ स्वपेः कमवसलिसलोट्टाः ॥ ८।४।१४६ ॥ वेपेरायम्बायज्झौ ॥ ८।४।१४७ ॥ विलपेर्झङ्खवडवडौ ॥ ८।४।१४८ ॥ लिपो लिम्पः ॥ ८।४।१४९ ॥ गुप्योवरणडौ ॥ ८।४।१५० ॥ क्रपोवहोणिः ॥ ८।४।१५१ ॥ प्रदीपस्ते-अवसन्दुमसन्धुक्काब्भुत्ताः ॥८।४।१५२॥ लुभेः सम्भावः ॥८।४।१५३॥ क्षुभेः खडर-पड्डुहौ ॥८।४।१५४॥ आङो रभे रम्भढवौ ॥ ८।४।१५५ ॥ उपालम्भेर्झङ्खपच्चारवेल-वाः ॥ ८।४।१५६ ॥ अवेर्जृम्भो जक्खा ॥ ८।४।१५७ ॥ भाराक्रान्ते नमीणे-सुढः ॥ ८।४।१५८ ॥ विश्रमेर्णिव्वा ॥ ८।४।१५९ ॥ आक्रमेरोहावोत्थारच्छुन्दाः ॥ ८।४।१६० ॥ भ्रमेष्ठिरिटिल्लदुण्ढुल्लढण्ढल्लचक्कम्मभम्मडभमडभमाडतलअण्टझण्ट-झम्पभुमगुमफुमफुसदुमदुसपरीपराः ॥ ८।४।१६१ ॥ गमेरई अइच्छाणुवज्जावज्ज-सोक्कुसाक्कुसपच्चड्डपच्छन्दणिम्महणीणीणणीलुक्कपदअरम्भपरिअल्लवोलपरिअल --णिरिणासणिवहावसेहावहराः ॥ ८।४।१६२ ॥ आङा अहिपच्चुअः ॥ ८।४।१६३ ॥ समा अब्भिडः ॥ ८।४।१६४ ॥ अभ्याङोम्मत्थः ॥ ८।४।१६५ ॥ प्रत्याङा पलोट्टः

॥ ८।४।१६६ ॥ शमेः पडिसापरिसामौ ॥ ८।४।१६७ ॥ रमेः संखुड्डुखेड्डोब्भावकिलिकिञ्चकोट्टुममोट्टायणोसरवेल्लाः ॥ ८।४।१६८ ॥ पूरेरग्घाडोग्घवोद्धुमाङ्गुमाहिरेमाः ॥ ८।४।१६९ ॥ त्वरस्तुवरजअडौ ॥ ८।४।१७० ॥ त्यादिशत्रोस्तूरः ॥८।४।१७१॥ तुरोत्यादौ ॥ ८।४।१७२ ॥ क्षरः खिरझरपज्झरपच्चडणिच्चलणिट्टुआः ॥ ८।४।१७३ ॥ उच्छल उत्थल्लः ॥ ८।४।१७४ ॥ विगलेस्थिप्पणिट्टुहौ ॥८।४।१७५॥ दलिवल्योर्विसट्टवम्फौ ॥ ८।४।१७६ ॥ भ्रंशेः फिडफिट्टफुडफुट्टचुक्कभुल्लाः ॥ ८।४।१७७ ॥ नशेर्णिरणासणिवहावसेहपडिसासेहावहराः ॥८।४।१७८॥ अवात्काशो वासः ॥८।४।१७९॥ संदिशेरप्पाहः ॥ ८।४।१८० ॥ दृशो निअच्छपेच्छावयच्छावयज्झवज्जसव्ववदेक्खोअक्खावक्खावअक्खपुलोअ (ए)पुलअनिआवआसपासाः ॥ ८।४।१८१ ॥ स्पृशः फासफंसफरिसछिवछिहालुङ्गालिहाः ॥८।४।१८२॥ प्रविशे रिअः ॥८।४।१८३॥ प्रान्मृशमुषोर्म्हुसः ॥ ८।४।१८४ ॥ पिषेर्णिवहणिरिणासणिरिण(णि)ज्जरोज्झचड्डाः ॥ ८।४।१८५ ॥ भषेर्भुक्कः ॥ ८।४।१८६ ॥ कृषेः कड्ढसाअड्ढाञ्चाणच्छायच्छाइच्छाः ॥ ८।४।१८७ ॥ असादक्खोडः ॥ ८।४।१८८ ॥ गवेषेर्दुण्ढुल्लढण्ढोलगमेसघत्ताः ॥८।४।१८९॥ श्लिषेः सामग्गावयासपरिअन्ताः ॥८।४।१९०॥ श्लक्षेश्चोप्पडः ॥८।४।१९१॥ काङ्क्षेराहाहिलङ्घाहिलङ्घवच्चवम्फमहसिहविलुम्पाः ॥ ८।४।१९२ ॥ प्रतीक्षेः सामयविहीरविरमालाः ॥ ८।४।१९३ ॥ तक्षेस्तच्छचच्छरम्परम्फाः ॥ ८।४।१९४ ॥ विकसेः कोआसवोसट्टौ ॥ ८।४।१९५ ॥ हसेर्गुञ्जः ॥ ८।४।१९६ ॥ स्रंसेर्लसडिम्भौ ॥ ८।४।१९७ ॥ त्रसेर्डरवोज्जवज्जाः ॥ ८।४।१९८ ॥ न्यसो णिमणुमौ ॥ ८।४।१९९ ॥ पर्यसःपलोट्टपल्लट्टपल्हत्थाः ॥ ८।४।२०० ॥ निश्वसेर्झङ्खः ॥ ८।४।२०१ ॥ उल्लसेरूसलोसुम्मणिल्लसपुलआअगुञ्जोल्लारोआः ॥ ८।४।२०२ ॥ भासेर्भिसः ॥ ८।४।२०३ ॥ ग्रसेर्घिसः ॥ ८।४।२०४ ॥ अवाद् गाहेर्वाहः ॥ ८।४।२०५ ॥ आरुहेश्चडवडग्गौ ॥८।४।२०६॥ मुहेर्गुम्मगुम्मडौ ॥८।४।२०७॥ दहेरद्दिऊलालुङ्गौ ॥ ८।४।२०८ ॥ ग्रहो वलगेण्हहरपङ्गनिरुवाराहिपच्चुआः ॥८।४।२०९॥ क्त्वातुमर्तव्येषु घेत् ॥८।४।२१०॥ वचो वोत् ॥ ८।४।२११ ॥ रुदभुजमुचां तोन्त्यस्य ॥ ८।४।२१२ ॥ दृशस्तेन दट्ठः ॥८।४।२१३॥ आः कृगो भूतभविष्यतोश्च ॥८।४।२१४॥ गमिष्यमासां छः ॥८।४।२१५॥ छिदिभिदो न्दः ॥८।४।२१६॥ युधबुधगृधक्रुधसिधमुहां ज्झः ॥ ८।४।२१७ ॥ रुधोन्धम्भौ च ॥ ८।४।२१८ ॥ सदपतोर्डः ॥ ८।४।२१९ ॥ कथवर्धां ढः ॥ ८।४।२२० ॥ वेष्टः ॥ ८।४।२२१ ॥ समो ल्लः ॥ ८।४।२२२ ॥ वोदः ॥ ८।४।२२३ ॥ स्विदां ज्जः ॥८।४।२२४॥ व्रजनृतमदां च्चः ॥ ८।४।२२५ ॥ रुदनमोर्वः ॥ ८।४।२२६ ॥ उद्विजः ॥ ८।४।२२७ ॥ खादधावोर्लुक् ॥ ८।४।२२८ ॥ सृजो रः ॥ ८।४।२२९ ॥ शक्कादीनां द्वित्वम् ॥८।४।२३०॥ स्फुटि चलेः ॥ ८।४।२३१ ॥ प्रादेर्मीलेः ॥ ८।४।२३२ ॥ उवर्णस्यावः ॥ ८।४।२३३ ॥ ऋवर्णस्यारः ॥ ८।४।२३४ ॥ वृषादीनामरिः ॥ ८।४।२३५ ॥ रुषादीनां दीर्घः ॥८।४।२३६॥ युवर्णस्य गुणः ॥८।४।२३७॥ स्वराणां स्वराः ॥८।४।२३८॥ व्यञ्जनाद्दन्ते ॥८।४।२३९॥ स्वरादनतो वा ॥८।४।२४०॥ चिजिश्रुह्रुस्तुलुपूधूगां णो ह्रस्वश्च


॥८।४।२४१॥ नवा कर्मभावे व्यः क्यस्य च लुक् ॥८।४।२४२॥ म्मश्चेः ॥८।४।२४३॥ हनखनोऽन्त्यस्य ॥८।४।२४४॥ ब्मो दुहलिहवहरुधामुच्चातः ॥८।४।२४५॥ दहो ज्झः ॥८।४।२४६॥ बन्धो न्धः ॥८।४।२४७॥ समनूपाद्रुधेः ॥८।४।२४८॥ गमादीनां द्वित्वम् ॥ ८।४।२४९ ॥ हकृतृज्ञामीरः ॥ ८।४।२५० ॥ अर्जेर्विंढप्पः ॥ ८।४।२५१ ॥ क्षीणव्वणज्जौ ॥८।४।२५२॥ व्याहृगेर्वाहिप्पः ॥ ८।४।२५३ ॥ आरमेराढप्पः ॥ ८।४।२५४ ॥ स्निहसिचोः सिप्पः ॥८।४।२५५॥ ग्रहेर्घेप्पः ॥८।४।२५६॥ स्पृशेश्छिप्पः ॥८।४।२५७॥ क्तेनाप्पुण्णादयः ॥८।४।२५८॥ धातवोऽर्थान्तरेऽपि ॥८।४।२५९॥ तोदोनादौ शौरसेन्यामयुक्तस्य ॥८।४।२६०॥ अधः क्वचित् ॥८।४।२६१॥ वादेस्तावति ॥८।४।२६२॥ आ आमन्त्र्ये सौ वेनो नः ॥८।४।२६३॥ मो वा ॥८।४।२६४॥ भवद्भगवतोः ॥८।४।२६५॥ नवा र्यो य्यः ॥८।४।२६६॥ थो धः ॥८।४।२६७॥ इहहचोर्हस्य ॥८।४।२६८॥ भुवो भः ॥८।४।२६९॥ पूर्वस्य पुरवः ॥८।४।२७०॥ क्त्वः इयदूणौ ॥८।४।२७१॥ कृगमो डडुआः ॥ ८।४।२७२ ॥ दिरिचेचोः ॥ ८।४।२७३ ॥ अतो देश्च ॥८।४।२७४॥ भविष्यति स्सिः ॥८।४।२७५॥ अतो डसेर्डादोडादू ॥८।४।२७६॥ इदानीमो दाणिं ॥८।४।२७७॥ तस्मात्ताः ॥८।४।२७८॥ मोऽन्त्याण्णो वेदेतोः ॥८।४।२७९॥ एवार्थे य्येव ॥८।४।२८०॥ हञ्जे चेट्याह्वाने ॥ ८।४।२८१ ॥ होमाणहे विस्मयनिर्वेदे ॥ ८।४।२८२ ॥ णं नन्वर्थे ॥ ८।४।२८३ ॥ अम्महे हर्षे ॥ ८।४।२८४ ॥ हीही विदूषकस्य ॥८।४।२८५॥ शेषं प्राकृतवत् ॥८।४।२८६॥ अत एत्सौ पुंसि मागध्याम् ॥८।४।२८७॥ रसोर्लशौ ॥८।४।२८८॥ सषोःसंयोगे सो ष्ठीष्मे ॥८।४।२८९॥ दृष्टयोस्टः ॥ ८।४।२९० ॥ स्थर्थयोस्तः ॥८।४।२९१॥ जय्यर्या यः ॥८।४।२९२॥ न्यण्यञ्ज्ञां ञ्जः ॥८।४।२९३॥ व्रजो जः ॥८।४।२९४॥ छस्य श्चोनादौ ॥८।४।२९५॥ क्षस्यक्कः ॥८।४।२९६॥ स्कः प्रेक्षाचक्षोः ॥८।४।२९७॥ तिष्ठश्चिष्ठः ॥८।४।२९८॥ अवर्णाद्वा ङसो डाहः ॥ ८।४।२९९॥ आमो डाहँवा ॥ ८।४।३०० ॥ अहं वयमोर्हंगे ॥ ८।४।३०१ ॥ शेषं शौरसेनीवत् ॥ ८।४।३०२ ॥ ङो ञ्जः पैशाच्याम् ॥८।४।३०३॥ राज्ञो वा चिञ् ॥८।४।३०४॥ न्यण्योर्ञ्ञः ॥८।४।३०५॥ णो नः ॥८।४।३०६॥ तदोस्तः ॥८।४।३०७॥ लो ळः ॥८।४।३०८॥ शषोः सः॥८।४।३०९॥ हृदये यस्य यः ॥८।४।३१०॥ दोस्तुर्वा ॥८।४।३११॥ क्त्वस्तूनः ॥८।४।३१२॥ ङूनत्थूनौ ङ्गः ॥ ८।४।३१३ ॥ र्यस्नष्टां रियसिनसटाः क्वचित् ॥ ८।४।३१४ ॥ क्यस्येय्यः ॥८।४।३१५॥ कृगो डीरः ॥८।४।३१६॥ यादृशादेर्दुस्तिः ८।४।३१७॥ इचेचः ॥८।४।३१८॥ आत्तेश्च ॥ ८।४।३१९ ॥ भविष्यत्येय्य एव ॥ ८।४।३२० ॥ अतो डसेर्डातोडादू ॥८।४।३२१॥ तदिदमोष्टा नेन स्त्रियां तु नाप ॥८।४।३२२॥ शेषं शौरसेनीवत् ॥८।४।३२३॥ नकगचजादिषट्शम्यन्तत्रोक्तम् ॥८।४।३२४॥ चूलिकापैशाचिके तृतीयतुर्ययोराद्यद्वितीयौ ॥८।४।३२५॥ रस्य लो वा ॥८।४।३२६॥ नादियुज्योरन्येषाम् ॥८।४।३२७॥ शेषं प्राग्वत् ॥८।४।३२८॥ स्वराणां स्वराः प्रायोऽपभ्रंशे ॥८।४।३२९॥ स्यादौ दीर्घह्रस्वौ ॥८।४।३३०॥ स्यमोरस्योत् ॥८।४।३३१॥ सौ पुंस्योद्वा ॥८।४।३३२॥ एट्टि ॥८।४।३३३॥ ङिनेच्च ॥८।४।३३४॥ भिस्येद्वा ॥८।४।३३५॥ ङसेर्हे हू ॥८।४।३३६॥ भ्यसो हुं ॥८।४।३३७॥ ङसः सुहोस्सवः ॥८।४।३३८॥ आमो हं ॥८।४।३३९॥ हुं

चेदुद्भ्याम् ॥८।४।३४०॥ ङसिभ्यस्ङीनां हेहुंहयः ॥८।४।३४१॥ आट्टो णानुस्वारौ ॥८।४।३४२॥ एं चेदुतः ॥८।४।३४३॥ स्यमज्जस्शसां लुक् ॥८।४।३४४॥ षष्ठ्याः ॥ ८।४।३४५ ॥ आमन्त्र्ये जसो होः ॥ ८।४।३४६ ॥ भिस्सुपोर्हिं ॥८।४।३४७॥ स्त्रियां जस्शसोरुदोत् ॥८।४।३४८॥ टए ॥८।४।३४९॥ ङस्ङस्योर्हे ॥८।४।३५०॥ भ्यसामोर्हुः ॥८।४।३५१॥ ङेर्हिं ॥८।४।३५२॥ क्लीबे जस्शसोरिं ॥८।४।३५३॥ कान्तस्यात उं स्यमोः ॥ ८।४।३५४ ॥ सर्वादेर्ङसेर्हां ॥ ८।४।३५५ ॥ किमो ङिहे वा ॥८।४।३५६॥ ङेर्हिं ॥८।४।३५७॥ यत्तत्किंभ्यो ङसो डासुर्नवा ॥८।४।३५८॥ स्त्रियां ङहे ॥८।४।३५९॥ यत्तदः स्यमोर्धुं त्रं ॥८।४।३६०॥ इदम इमुः क्लीबे ॥८।४।३६१॥ एतदः स्त्रीपुंक्लीबे एह एहो एहु ॥८।४।३६२॥ एइर्जस्शसोः ॥८।४।३६३॥ अदस ओइ ॥८।४।३६४॥ इदम आयः॥८।४।३६५॥ सर्वस्य साहो वा ॥८।४।३६६॥ किमः काइंकवणौ वा ॥८।४।३६७॥ युष्मदः सौ तुहुं ॥८।४।३६८॥ जस्शसोस्तुम्हे तुम्हइं ॥८।४।३६९॥ टाङ्यमा पइं तइं ॥८।४।३७०॥ भिसा तुम्हेहिं ॥८।४।३७१॥ ङसिङस्भ्यां तउतुज्झतुध्र ॥८।४।३७२॥ भ्यसांभ्यां तुम्हहं ॥ ८।४।३७३ ॥ तुम्हासु सुआ ॥ ८।४।३७४ ॥ सावस्मदो हउं ॥ ८।४।३७५ ॥ जस्शसोरम्हे अम्हइं ॥ ८।४।३७६ ॥ टा ङ्यमा मइं ॥ ८।४।३७७ ॥ अम्हेहिं भिसा ॥ ८।४।३७८ ॥ मह्यु मज्झु ङसिङस्भ्याम् ॥ ८।४।३७९ ॥ अम्हहं भ्यसाम्भ्याम् ॥ ८।४।३८० ॥ सुपा अम्हासु ॥८।४।३८१॥ त्यादेराद्यत्रयस्य बहुत्वे हिं न वा ॥८।४।३८२॥ मध्यत्रयस्याद्यस्य हिः ॥८।४।३८३॥ बहुत्वे हुं ॥८।४।३८४॥ अन्त्यत्रयस्याद्यस्य उं ॥ ८।४।३८५ ॥ बहुत्वे हुं ॥ ८।४।३८६ ॥ हिस्वयोरिदुदेत् ॥ ८।४।३८७ ॥ वर्त्स्यति स्यस्य सः ॥ ८।४।३८८ ॥ क्रियेः कीसु ॥८।४।३८९॥ भुवः पर्याप्तौ हुच्च ॥ ८।४।३९० ॥ ब्रूगो ब्रुवो वा ॥ ८।४।३९१ ॥ व्रजेर्वुत्रः ॥ ८।४।३९२ ॥ दृशेः प्रस्सः ॥८।४।३९३॥ ग्रहेर्गृण्हः ॥८।४।३९४॥ तक्ष्यादीनां छोल्लादयः ॥८।४।३९५॥ अनादौ स्वरादसंयुक्तानां कखतथपफां गघदधबभाः ॥ ८।४।३९६ ॥ मोऽनुनासिको वा ॥८।४।३९७॥ बाधो रो लुक् ॥८।४।३९८॥ अभूतोऽपि क्वचित् ॥८।४।३९९॥ आपक्लिपत्संपदां द इः ॥८।४।४००॥ कथं यथातथां थादेरेमेमेहेधा ङितः ॥८।४।४०१॥ यादृक्तादृक्कीदृगीदृशां दादेर्डेहः ॥ ८।४।४०२ ॥ असां डइसः ॥ ८।४।४०३ ॥ यत्रतत्रयोस्त्रस्य डिदेत्थत्तु ॥८।४।४०४॥ पत्थु कुत्रात्रे ॥८।४।४०५॥ यावत्तावतोर्वादेर्मं उं महिं ॥ ८।४।४०६ ॥ वा यत्तदोतोर्डेवडः ॥ ८।४।४०७ ॥ वेदंकिमोर्यादेः ॥८।४।४०८॥ परस्परस्यादिरः ॥ ८।४।४०९ ॥ कादिस्थैदोतोरुच्चारलाघवम् ॥ ८।४।४१० ॥ पदान्ते उं-हुं-हिं-हंकाराणाम् ॥ ८।४।४११ ॥ म्हो म्मो वा ॥ ८।४।४१२ ॥ अन्यादृशोन्नादृसावराद्दसौ ॥ ८।४।४१३ ॥ प्रायसः प्राउप्राइवप्राइम्वःपग्गिम्वाः ॥ ८।४।४१४ ॥ वान्यथोनुः ॥ ८।४।४१५ ॥ कुतसः कउ कहन्तिहु ॥ ८।४।४१६ ॥ तत-स्तदोस्तोः ॥ ८।४।४१७ ॥ एवं-परं-समं-ध्रुवं-मा-मना-कपम्व-पर-समाणु-ध्रुवु-मं-मणाउं ॥८।४।४१८॥ किलाथवादि-वा-सह-नहेः किराहवइ दिवे सहुं नाहिं ॥८।४।४१९॥ पश्चादेवमेवैवेदानींप्रत्युतेतसः पच्छइ--एम्वइ--जि--एम्वहिं--पच्चलिउ--पत्तहे ॥८।४।४२०॥ विषण्णोक्तवर्त्मनो वुन्न-वुत्त-विच्चं ॥८।४।४२१॥ शीघ्रादीनां वाहुल्ला-

दयः ॥८।४।४२२॥ हुहुरुघुग्घादयः शब्द-चेष्टानुकरणयोः ॥८।४।४२३॥ घइमादयोऽनर्थकाः ॥ ८।४।४२४ ॥ तादर्थ्ये केहिं-तेहिं-रेसि-रेसिं-तणेणाः ॥ ८।४।४२५ ॥ पुनर्विनः स्वार्थे डुः ॥ ८।४।४२६ ॥ अवश्यमो डें-डौ ॥ ८।४।४२७ ॥ एकशसो डिः ॥ ८।४।४२८ ॥ अ-डड-डुल्लाः स्वार्थिक-क-लुक् च ॥ ८।४।४२९ ॥ योगजाश्चैषाम् ॥ ८।४।४३० ॥ स्त्रियां तदन्ताड्डोः ॥ ८।४।४३१ ॥ आन्तान्ताड्डाः ॥८।४।४३२॥ अस्येदे ॥ ८।४।४३३ ॥ युष्मदादेरीयस्य डारः ॥८।४।४३४॥ अतोर्डेत्तुलः ॥८।४।४३५॥ त्रस्य डेत्तेहे ॥ ८।४।४३६ ॥ त्वतलोः प्पणः ॥ ८।४।४३७ ॥ तव्यस्य इएव्वउं एव्वउं एवा ॥ ८।४।४३८ ॥ क्त्वः इ-इउ-इवि-अवयः ॥ ८।४।४३९ ॥ एप्पेप्पिणवेव्वेविणवः ॥ ८।४।४४० ॥ तुम एवमणाणहमणहिं च ॥ ८।४।४४१ ॥ गमेरेप्पिणवेप्पयोरेलुग् वा ॥ ८।४।४४२ ॥ तृनोणअः ॥ ८।४।४४३ ॥ इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः ॥ ८।४।४४४ ॥ लिङ्गमतन्त्रम् ॥ ८।४।४४५ ॥ शौरसेनीवत् ॥ ८।४।४४६ ॥ व्यत्ययश्च ॥८।४।४४७॥ शेषं संस्कृतवत्सिद्धम् ॥८।४।४४८॥

॥ इत्यष्टमाध्यायस्य चतुर्थः पादः ॥

॥ समाप्तो हैमसूत्रपाठः ॥



॥ अथ हैम-गणपाठः ॥

१६२ भ्रातुष्पुत्रकस्कादयः ॥ २।३।१४॥ परमसर्पिष्कुण्डिका । परमधनुष्कपालम् । परमबर्हिष्पूलः । परमयजुष्पात्रम् । अत्र सर्पिष्कुण्डिकाधनुष्कपालबर्हिष्पूलयजुष्पात्राणां समासेऽसमस्तस्येत्यनेन षत्वे सिद्धेऽपि समस्तार्थमिह पाठः। अन्ये त्वेषां समस्तानां षत्वं न मन्यन्ते । तन्मते परमसर्पिःकुण्डिकेत्यादिषु षत्वं न भवति । कस्कः। वोप्सायां द्विर्वचनम् । कुतः कुतः आगतः कौतस्कुतः । शुनस्कर्णः। 'षष्ठ्याः क्षेपे' इत्यलुप् । सद्यस्कालः। बहुव्रीहिरसमासो वा । सद्यः क्रयणं सद्यस्क्रीः। तत्र भवः साद्यस्कः। भ्रातुष्पुत्र । सर्पिष्कुण्डिका । बर्हिष्पूल । यजुष्पात्र । इति भ्रातुष्पुत्रादयः। कस्कः। कौतस्कुतः। शुनस्कर्णः। सद्यस्कालः। सद्यस्क्रीः। साद्यस्कः। भास्करः। अहस्करः। अयस्काण्ड । तमस्कान्त । अयस्कान्त । अयस्कुण्ड । मेदस्पिण्ड । अयस्पिण्ड । इति कस्कादयः। बहुवचनमाकृतिगणार्थम्। तेन यथादर्शनमन्येऽपि भवन्ति ।

१७१ वाहर्पत्यादयः ॥१।३।५८॥ अहर्पतिः। अहःपतिः। अह्ःपतिः। गीर्पतिः। गीःपतिः। गीःपतिः। धूर्पतिः। धूःपतिः। धूःपतिः। इत्यहर्पत्यादयः। बहुवचनमाकृतिगणार्थम् ।

४२७ गौरादिभ्यो मुरव्यानङीः ॥२।४।१९॥ गौर। शबल । कल्माष। सारङ्ग । पिशङ्ग । हरिण। पाण्डुर । अमर । सुन्दर । विकल। विष्कल। पुष्कल । निष्कल।

गौरादीनां गुणवचनत्वेनाजातिधाचित्वादप्राप्ते पाठः । यस्तु विकलेति कालविशेषवाची आनन्तः स विगता कलेति भविष्यति। दास । चेट । विट । भिक्षुक । बन्धक। पुत्र । गायत्र । आनन्द । टेट । कटेट । नट । एषामजातिवचनत्वादप्राप्ते पाठः। काव्य । शैव्य । मत्स्य । मनुष्य । मुकय । हय । गवय । ऋस्य । द्रुण । ओकण । एषां जातिवाचित्वेप्यश्वानां यान्तत्वाद् द्रुणौकणयोर्नित्यस्त्रीविषयत्वादप्राप्ते पाठः। भौरिकि । भौलिकि । भौलिङ्गि । औद्ग्राहमाति । आलञ्चि । कालञ्चि । सौधर्म। आयस्थूण । आरद् । भौरिकिभौलिक्योः क्रौड्यादित्वात् शेषाणां त्वणिञन्तानां गुरूपान्त्यत्वात् ष्ये प्राप्ते पाठः । कथं भौरिक्या, भौलिक्या ? क्रौड्यादिपाठात् ष्योऽपि । आपञ्चिको राष्ट्रसरूपः क्षत्रियस्तस्यापत्यं स्त्री आपञ्चिकीत्यत्र शकादित्वाद् ञ्यलोपेऽपि जातिवाचित्वाद् ङीर्भवति । दोट । वरट । नाट । मूलाट । पाट । सूपाट । पेट । पट । पटल । पुट । कुट । फाण्टश । घातक । केतक। तर्कर । शर्कार । बदर । कुवल । लवण । बिल्व । आमलक । मालत । वेतस । अतस । आढक । कदर । कदल । गुडूच । बाकुच । नाच । माच । कुम्भ । कुसुम्भ । यूष । मेष । सूष । मूष । करीर । सल्लक । वल्लक । मल्लक । मालक । मेथ। पिप्पल । हरीतक । कोशातक । शम । तम । सुषव । शृङ्ग । भृङ्ग । बर्बर । पाण्ड । लोहाण्ड । शष्कण्ड । पिण्ड । मण्डर । मण्डल । यूप । सूप । सूर्प । सूर्म । मठ । पिठर । कुर्द । गूर्द । सूर्द । खार । काकण । द्रोण । अरीहण । ओकण । वृस । आसन्द । अलन्द । कन्दल । सलन्द । देह । देहल । शष्कुल । शव । सूच । भञ्जर। अलज । गण्डूज । वैजयन्त । शालूक । उपरतस । सच्छेद । एषां नित्यस्त्रीविषयत्वादप्राप्ते पाठः । क्रोष्टु सरस् अनयोरनकारान्तत्वादप्राप्ते पाठः। अनड्वाही अनड्वही। अत एव पाठादनड्वह्शब्दस्य ङ्यामुकारस्य पक्षे वाशब्दादेशः। सौ नित्यं नागमाभावश्च । प्रत्यवरोहिणी। पृथिवी । आग्रहायणी । सप्रत्ययपाठः पुंवद्भावनिषेधार्थः । अनड्वाहोभार्यः । अनड्वहीवृन्दारकेत्यादि। तद्धितलोपेऽपि लुगभावार्थश्च । पञ्चानड्वाहिः । दशानड्वहिः। आश्मरथ्यः।-गोत्रयञन्तात् ङ्यन् मा भूत् ङ्येव यथा स्यादित्यस्य पाठः । पहि-पर्येहि-अनयोरिदन्तत्वाद् विकल्पे प्राप्ते नित्यार्थः पाठः । बहुवचनमाकृतिगणार्थम् । तेन नद । मह । भव । ध्रुव । चर । गर । तर । गाह । देव । स्तद । अराल । उदवड । चण्ड । उमाभङ्ग । हरीकणी। वटर । अधिकारी । एषण । करणे-इति केचित् । इष्यते अन्विष्यतेऽनया दोष इति इषोऽनिच्छायाम् इत्यने सति एषणी वैद्यशलाका। करणादन्यत्रैषणा । अन्वेषणा । आग्रेव । तदन्ये न मन्यन्ते ।

४४१ नवा शोणादेः ॥२।४।३१॥ शोण । चण्ड । अराल । कमल । कृपण । विकट । विशाल। विशंकट। भरुज । ध्वज । कल्याण । उदार । पुराण । बहुबहुः बह्वी । एवंनामा काचित् ।

४४८ असहनञ्विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः॥२।४।३८॥ अक्रोडादिभ्य इति किम्। कल्याणो क्रोडा अस्याःकल्याणक्रोडा । क्रोडाशब्दःस्त्रीक्लीव-

लिङ्गः । कल्याणखुरा । पीनगुदा । एकशफा । दीर्घभाला । भव्यभाला । सुगला । सुभगा । कल्याणी उखा स्फिक् यस्याःसा कल्याणोखा । कल्याणगोखा । बहुवचनमाकृतिगणार्थम् । तेन किसलयकरा । मृणालभुजेत्यादि ।

४९१ क्रौड्यादीनाम् ॥२।४।८०॥ क्रौडि । लाडि । व्याडि । आपक्षिति । आपिशिलि । सौधातकि । भौरिकि । भौलिकि । शाल्मलि । शालास्थलि । कापिष्ठलि । रौढि । देवदत्ति । याज्ञदत्ति । इत्यादय इञन्ताः । चौपयत । चैकयत । चैटयत । बैल्वयत । सैकयत-एतेऽणन्ताः । बहुवचनमाकृतिगणार्थम् ।

६४१ बाहिताग्न्यादिषु ॥३।१।१५३॥ अग्न्याहितः । जातपुत्रः । पुत्रजातः । जातदन्तः । दन्तजातः । जातश्मश्रुः । श्मश्रुजातः । पीततैलः । तैलपीतः । पीतघृतः । घृतपीतः । पीतमद्यः । मद्यपीतः । पीतविषः । विषपीतः । ऊढभार्यः । भार्योढः । गतार्थः । अर्थगतः । छिन्नशीर्षः । शीर्षच्छिन्नः । बहुवचनमाकृतिगणार्थम् । तेन पीतदधिः । दधिपीत इत्यादयोऽपि भवन्ति ।

६४३ न सप्तमीन्द्वादिभ्यश्च ॥३।१।१५५॥ इन्दुमौलिः । चन्द्रमौलिः । शशिशेखरः । पद्मनाभः । ऊर्णनाभः । पद्महस्तः । शंखपाणिः । दर्भपवित्रपाणिः । पद्मपाणिः । इत्यादि ।

६४४ गड्वादिभ्यः ॥३।१।१५६॥ गडुकंठः । कंठेगडुः । शिरसिगडुः । गडुशिराः । शिरस्यरुः । अरुःशिराः । मध्येगुरुः । गुरुमध्यः । अन्तेगुरुः । गुर्वन्तः ।

६४७ नाप्प्रियादौ ॥३।२।५३॥ प्रिया । मनोज्ञा । कल्याणी । सुभगा । दुर्भगा । स्वा । क्षान्ता । कान्ता । वामना । समा । सचिवा । चपला । बाला । तनया । दुहितृ । भक्ति । इति स्त्रियादिः । वामेत्यप्यन्ये ।

६७८ कुंभपद्यादिः ॥७।३।१४९॥ कुंभपदी । जालपदी । एकपदी । शतपदी । स्थूणापदी । सूत्रपदी । मुनिपदी । शितिपदी । आर्द्रपदी । गोधापदी । कलशीपदी । दासीपदी । विष्णुपदी । कृष्णपदी । कृणिपदी । गुणपदी । द्रोण(णी)पदी । सकृत्पदी । सूकरपदी । शुचिपदी । सूचीपदी । द्विपदी । अपदी । निष्पदी । अष्टापदी । अशीतिपदी । इति कुंभपद्यादिः ।

७१६ सुभ्रूवादिभ्यः ॥७।३।१८२॥ सुभ्रूः । लेखाभ्रूः । शलाकाभ्रूः । कोमलोरूः । संहितोरूः । वरोरूः । पीवरोरूः । जातिवचनत्वादूङन्ता एते । बहुवचनमाकृतिगणार्थम् ।

७३५ तिष्ठद्गवित्यादयः ॥३।१।३६॥ तिष्ठन्ति गावो यस्मिन् काले गर्भग्रहणाय दोहाय वाहाय वत्सेभ्यो निवासाय जलपानार्थं वा स कालस्तिष्ठद्गु । वहन्ति गावो यस्मिन् काले स कालो वहद्गु । आयन्ति गावो यस्मिन् स काल आयतीगवम् । एतेऽन्यदार्थे काले । तथा खले यवा यस्मिन् स कालः खलेयवम् । खलेषुसम् । निपातनात् सप्तम्या अलुप् । लूनयवम् । लूयमानयवम् । पूनयवम् ।

पूयमानयवम् । संहृतवुसम् । संहियमाणयवम् । एते प्रथमैकवचनान्ता एवान्यपदार्थे काले । देशेऽपीत्यन्ये । तेन खलेयवं पश्य, खलेयवेन कृतम्, खलेयवे कृतम्, इत्यादयः प्रयोगा असाधवः । द्वितीयादिविभक्त्यन्ता अपि एते साधव इत्यन्ये । नाभेरधः अधोनाभम् । निपातनादत् समासान्तः । पूर्वपदार्थप्रधानोऽयम् । तथा समत्वं भूमेः समभूमि । एवं समपदाति । पक्षे पूर्वपदस्य ह्रस्वत्वमपि निपात्यते । समंभूमि । समंपदाति । एतौ देशकालभावेष्वन्यपदार्थेष्वित्यन्ये । उत्तरपदार्थप्राधान्ये तु समा भूमिः समभूमिः, समपदातिरिति कर्मधारय एव । तथा शोभनत्वं समस्य शोभनत्वं समायाः शोभना समा यत्र सुषमम् । एवं विषमम् । निष्षमं दुष्षमम् । अपरसमम् । उत्तरपदार्थप्राधान्ये तु तत्पुरुष एव । शोभना समा सुषमा । शोभने समे सुषमे । समशब्देनाव्ययीभाव इत्यन्ये । तथा समाया आयतीत्वम् आयती समा यत्र आयती समेति वा आयतीसमम् । एवं पापसमम् । पुण्यसमम् । समशब्देन तृतीयासमास इत्यन्ये । आयत्या समम् आयतीसमम् । एवं पापसमम् । पुण्यसमम् । तथा प्रकृष्टत्वं चाह्नः प्राह्णम् । निपातनादह्नादेशः । एवं प्रथम् प्रमृगम् प्रदक्षिणम् । कालभावलक्षणेऽन्येपदार्थेऽपीत्यन्ये । प्रक्रान्तमहरस्मिन् प्राह्णम् । प्रगता रथा अस्मिन् प्रथम् । प्रनष्टा मृगा अस्मिन् प्रमृगम् । प्रकृता दक्षिणा अस्मिन् प्रदक्षिणम् । अन्यत्र प्रगता मृगा अस्मात् प्रमृगो देशः । देशेऽप्यन्ये । उत्तरपदार्थप्राधान्ये तु तत्पुरुष एव । प्राह्णः । प्रथः । प्रमृगः । प्रदक्षिणा । तथैकत्वमन्तस्य एकोऽन्त इति वा एकान्तम् । देशेऽन्यपदार्थेऽपीत्यन्ये । एवं प्रान्तं समपक्षम् समानतीर्थम् समानतीरम् । तथा संप्रति असंप्रति अप्रदक्षिणानि यथासंख्यं वर्तमानावर्तमानवामेषु । तथा युद्धे इजन्तं च । केशाकेशि दण्डादण्डि द्विदण्डि द्विमुसलि । तिष्ठद्गवादिराकृतिगणः । तेन प्रसव्यम् अपसव्यम् यत्प्रभृति तत्प्रभृति इतःप्रभृति इत्यादि सिद्धम् ।

७४२ द्विदण्ड्यादिः ॥७।३।७५॥ द्वौ दण्डावस्मिन् प्रहरणे द्विदण्डि प्रहरति । एवं द्विमुसलि । उभादन्ति । उभयादन्ति । उभाबाहु । उभयाबाहु । उभौ हस्तावस्मिन् पाने उभाहस्ति पिबति । एवमुभयाहस्ति । उभापाणि । उभयापाणि । उभाञ्जलि । उभयाञ्जलि । उभौ कर्णावस्मिन् श्रवणे उभाकर्णि शृणोति । एवमुभयाकर्णि । अन्ते वासोऽस्मिन् स्थानेऽन्तेवासि तिष्ठति अन्तेवासी गुरोरिति ताच्छीलिकान्तेऽन्य एव शब्दः । संहितानि पुच्छान्यस्मिन् सरणे संहितपुच्छि धावन्ति । एकः पादोऽस्मिन् गमने एकपदि गच्छति । समानौ पादावस्मिन् सपदि गच्छति । आच्यपादौ आच्यपदि शेते । एवं प्रोह्यपदि हस्तिनं वाहयति । निकृच्य कर्णौ निकृच्यकर्णि धावति । तिष्ठद्गवादित्वादव्ययीभावः । उभाबाहु उभयाबाहित्वत्यत्र निपातनादिजुलुपि स्थानिवद्भावादिजन्तत्वेनाव्ययीभावसंज्ञा विभक्त्यलुक् पादस्य पद्भावः समानस्य सभावश्चेत्यादि सर्वं निपातनात् सिद्धम् ।

७४९ शरदादेः ॥७।३।९२॥ शरद् त्यद् तद् यद् किंयत् हिरुक् हिमवत्

उपसद् सदस् अदस् अनस् मनस् विपाश् दिश् दृश् विश् उपानह् अनड्वह् चतुर् दिव् ।

७६४ साक्षादादिश्च्व्यर्थे ॥ ३।१।१४ ॥ साक्षात् मिथ्या चिन्ता भद्रा रोचना लोचना अमा आस्था अग्धा प्राजर्या प्राजुरा प्राजरुहा बीजर्या बीजरुहा संसर्पा। अर्थे अग्नौ वशे विकपने प्रकपने विसहने प्रसहने । अर्थेऽभृतयः सप्तम्येकवचनान्तप्रतिरूपकाः स्वभावात् निपाताद्वा। लवणम् उष्णम् शीतम् उदकम् आर्द्रम्। लवणादीनामेतत्सूत्रविहितगतिसंज्ञासंनियोग एव मान्तत्वं निपात्यते । प्रादुस् आविस् नमस् इति साक्षादादिः ।

७६३ प्रात्यवपरिनिरादयो गतक्रान्तकुष्टग्लानक्रान्ताद्यर्थाः प्रथमाद्यन्तैः ॥३।१।४७॥ प्रादयः-प्रगत आचार्यः प्राचार्यः। एवं प्रान्तेवासी । प्रवृद्धो गुरुः प्रगुरुः । प्रकृष्टो वीरः प्रवीरः । संगतोऽर्थः समर्थः। विरुद्धः पक्षः विपक्षः। प्रत्यर्थी पक्षः प्रतिपक्षः । प्रतिबद्धं वचः प्रतिवचः । उपश्लिष्टः पतिरुपपतिः । उपपन्नोऽनुकूलः प्रतिकूलो वा नायकः उपनायकः । अनुनायकः । प्रतिनायकः।

अत्यादयः-अतिक्रान्तः खट्वामतिखट्वः। उद्गतो वेलामुद्वेलः। प्रतिगतोऽक्षं प्रत्यक्षः । अनुगतः प्रतिगतो वा लोमानि अनुलोमः । प्रतिलोमः । अभिप्रपन्नो मुखमभिमुखः।

अवादयः-अवक्रुष्टः कोकिलया अवकोकिलः । परिणद्धो वीरुद्भिः परिवीरुत्। संनद्धो वर्मणा संवर्मा । अनुगतमर्थेनान्वर्थं नाम । संगतमक्षेण समक्षं वस्तु। वियुक्तमर्थेन व्यर्थं वचः । संगतमर्थेन समर्थं पदम् ।

पर्यादयः-परिग्लानोऽध्ययनाय पर्यध्ययनः । उद्युक्तः संग्रामाय उत्संग्रामः। शक्तः कुमार्यै अलंकुमारिः । शक्तः पुरुषेभ्यः अलंपुरुषीणः । अलंशब्दस्य चतुर्थ्यन्तेन वक्ष्यमपीच्छन्त्यन्ये । अलं जीविकायै अलंजीविकः । अलं कुमार्यै अलंकुमारिः ।

निरादयः-निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः । अपगतः शाखाया अपशाखः। अन्तर्गतोऽङ्गुल्या अन्तरङ्गुलो नखः। उत्क्रान्ता कुलादुत्कुला कुलटा। एवमुद्वेलः समुद्रः । उच्छास्त्रं वचः । उत्सूत्रो न्यायः । उच्छृंखलः कलभः । अपगतमर्थादिपार्थम् । बहुवचनमाकृतिगणार्थम् ।

७७५ अव्ययं प्रवृद्धादिभिः ॥३।१।४८॥ पुनःप्रवृद्धं बर्हिः, पुनरुत्स्यूतं वासः । पुनर्निष्क्रान्तो रथः । पुनरुक्तं वचः। पुनर्नवं वयः । पुनःशृतं पयः । स्वर्यातः । अन्तर्भूतः । प्रातःसवनम् । उच्चैर्घोषः । नीचैर्गतम् । अधस्पदम् । अनड्वान् पुरुषः। असशक्तः पुरुषः । प्रायश्चित्तम् । सद्यस्क्रीः । प्राग्वृत्तम् । पुराकल्पः । श्वःश्रेयसम् । श्वोवसीयसम् । बहुवचनमाकृतिगणार्थम् ।

७८० सायाह्नादयः ॥३।१।५३॥ सायमह्नः सायाह्नः । मध्यमह्नः मध्याह्नः ।

मध्यं दिनस्य मध्यंदिनम् । मध्यं रात्रेः मध्यरात्रः । उपारताः पश्चिमरात्रगोचरात् इत्यादयः । बहुवचनमाकृतिगणार्थम् ।

७८२ जरत्यादिभिः ॥३।१।५५॥ अर्धो जरत्या अर्धजरती तत्तुल्यम् अर्धजरतीयम् । अर्धवैशसम् । अर्धोक्तम् । अर्धविलोकितम् । पक्षे जरत्यर्ध इत्याद्यपि भवति । बहुवचनमाकृतिगणार्थम् ।

७८९ श्रितादिभिः ॥३।१।६२॥ श्रित अतीत पतित गत अत्यस्त प्राप्त आपन्न गमिन् गामिन् आगामिन् । इति श्रितादयः । बहुवचनमाकृतिगणार्थम् । तेन ओदनबुभुक्षुः हिताशंसुः तत्त्वबुभुत्सुः सुखेच्छुः इत्यादि सिद्धम् ।

७९४ ऊनार्थपूर्वाद्यैः ॥३।१।६७॥ पूर्व । अवर । सदृश । सम । कलह । निपुण । मिश्र । श्लक्ष्ण इति पूर्वादयः । आकृतिगणोऽयम् । तेन धान्येनार्थो धान्यार्थः । हिरण्यार्थः । आत्मनापञ्चमः । आत्मनाषष्ठः । 'एतावलुप्समासौ' माषेणाधिकं माषाधि ।

७९८ हितादिभिः ॥३।१।७१॥ हित । सुख । रक्षित । बलि । इति हितादयः । आकृतिगणोऽयम् । तेन अश्वघासः । श्वश्रूसुरा । श्वश्रूसुरम् । हस्तिविधानम् । धर्मनियमः । धर्मजिज्ञासा । नाट्यशाला । आत्मनेपदम् । परस्मैपदम् इत्यादि सिद्धम् । कृत्यप्रत्ययान्तं चेह पठ्यते । देवदेयम् । ब्राह्मणदेयम् । वरप्रदेया कन्या । इह न भवति ब्राह्मणाय दातव्यम् ।

८०० पञ्चमी भयाद्यैः ॥३।१।७३॥ भय । भीत । भीति । भी । भीरु । भीलुक । निर्गत । जुगुप्सु । अपेत । अपाढ । मुक्त । पतित । अपत्रस्त इति भयादयः । आकृतिगणश्चायम् । तेन द्वीपान्तरानीतः । स्थानभ्रष्टः । तात्परः तपरः इत्यादि सिद्धम् ।

८०५ याजकादिभिः ॥३।१।७८॥ याजक । पूजक । परिचारक । परिवेषक । स्नापक । अध्यापक । आच्छादक । उन्मादक । उद्वर्तक । होतृ । भर्तृ । आकृतिगणोऽयम् । तेन तुल्यार्था अपि । गुरुसदृशः । गुरुसमः । दास्याः सदृशः । वृषल्याः समः । 'षष्ठ्याः क्षेपे' इत्यलुप् । तथा अन्यत्कारकम् । विश्वगोप्ता । तीर्थकर्ता । तत्प्रयोजको हेतुश्च । जनिकर्तुः प्रकृतिः । इत्यादि सिद्धम् ।

८१५ सप्तमी शौण्डाद्यैः ॥३।१।८८॥ शौण्ड । धूर्त । कितव । व्याल । सव्य । आयस । व्यान । सवीण । अन्तर । अधीन । पटु । पण्डित । कुशल । चपल । निपुण । सिद्ध । शुष्क । पक्व । बन्ध । बहुवचनमाकृतिगणार्थम् । तेन शिरःशेखरः । हस्तकटकः । आपातरमणीयः । अवसानविरसः । पृथिव्यांविदितः । पृथिवीप्रणतः । अन्तेगुरुः । मध्येगुरुः । ऋणेऽधमः अधमर्णः । ऋणे उत्तमः उत्तमर्णः । राजदन्तादित्वात् परनिपात इत्यादि सिद्धम् ।

८१६ सिंहाद्यैः पूजायाम् ॥ ३।१।८९ ॥ समरे सिंह इव समरसिंहः । एवं रणव्याघ्रः । भूमिवासवः । कलियुधिष्ठिरः । बहुवचनमाकृतिगणार्थम् ।

८१७ काकाद्यैः क्षेपे ॥३।१।९०॥ तीर्थे काक इव तीर्थकाकः । एवं तीर्थध्वांक्षः। तीर्थवायसः । तीर्थबकः । तीर्थश्वा । तीर्थसारमेयः । तीर्थकुक्कुटः । तीर्थशृगालः। बहुवचनमाकृतिगणार्थम् ।

८१८ पात्रेसमितेत्यादयः ॥३।१।९१॥ पात्र एव समिताः पात्रेसमिताः । एवं पात्रेबहुलाः । गेहेशूरः । गेहेदाही । गेहेक्ष्वेडी । गेहेनर्दी । गेहेनर्ती । गेहमेव विजितमनेन गेहेविजिती । इष्टादेः इतीनि व्याप्ये क्तेनः इति सप्तमी । एवं गेहेविचिती । गेहेव्यालः । गेहेपटुः । गेहेपण्डितः । गेहेप्रगल्भः । गोष्ठेशूरः । गोष्ठेक्ष्वेडी । गोष्ठेनर्दी । गोष्ठेविजिती । गोष्ठेव्यालः । गोष्ठेपटुः । गोष्ठेपण्डितः। गोष्ठेप्रगल्भः । एषु अवधारणेन क्षेपो गम्यते । उदुम्बरे मशक इव उदुम्बरमशकः। एवमुदुम्बरकृमिः । कूपकच्छपः । कूपमण्डूकः । अवटकच्छपः । अवटमण्डूकः । उदपानमण्डूकः । अल्पदृष्टैवमुच्यते । नगरकाकः । नगरवायसः । नगरश्वा । एतैः सदृशो धृष्ट उच्यते । उदुम्बरमशकादिषूपमया क्षेपो गम्यते । गेहमेही । पिण्डीशूरः । य आवश्यकार्थमपि बहिर्न निर्गच्छति भोजन एव च संरभते च स एवमुच्यते । अत्रावधारणेन निरुत्साहता तया च क्षेपो गम्यते । पितरि शूरः। मातरि पुरुषः । यः सदाचारं भिनत्ति स एवमुच्यते । अत्र प्रतिषिद्धासेवनेन क्षेपो गम्यते । गर्भेधीरः । गर्भेशूरः । गर्भेसुहितः । गर्भेतृप्तः । गर्भेदृप्तः । योऽलोकाभिमानित्वादनुचितचेष्टः स एवमुच्यते । तत एव च क्षेपो गम्यते । कर्णेटिरिटिरिः । कर्णेचुरुचुरः । कर्णेटिरिटिरा । कर्णेचुरुचुरा । चापलेनानुचितचेष्टोच्यते। टिरिटिरीति गत्यनुकरणं चुरुचुरिति वाक्यानुकरणम्। तत् करोति णिजन्तादप्रत्ययो निपातनसामर्थ्याच्चानो न भवति। बहुवचनमाकृतिगणार्थम्। तेन व्रणकृमिः । गृहसर्पः । गृहकलविङ्कः । आखनिकवकः इत्यादयो गृह्यन्ते ।

८२८ निन्द्यं कुत्सनैरपापाद्यैः ॥ ३।१।१०० ॥ अपापाद्यैरिति किम् । पापवैयाकरणः । अणकवैयाकरणः । प्रवृत्तिनिमित्तमेव कुत्स्यते । एवं पापकुलालः । अणकनापितः । हतविधिः । दग्धदैवम् । दुष्टामात्यः । क्षुद्रतापस इत्यादि ।

८३० उपमेयं व्याघ्राद्यैः साम्यानुक्तौ ॥३।१।१०२॥ व्याघ्र । सिंह । ऋषभ । वृषभ । महिष । चन्दन । वृक । वराह । हस्तिन् । कुञ्जर । रुरु । पृषत । पुण्डरीक । पलाविका । कुञ्जा । बहुवचनमाकृतिगणार्थम् । तेन वाग्वज्रः, मुखपद्मं, पाणिपल्लवं, करकिसलयं, वदनेन्दुः, पथिवचन्द्रः, वानरश्वा, कुचकुम्भस्तनकलशादयोऽपि भवन्ति ।

८३३ श्रेण्यादिकृत्याद्यैष्ट्यर्थे ॥ ३।१।१०४ ॥ श्रेणि । ऊक । पूग । कुन्दुम । कन्दुम । राशि । निचय । विशिष्ट । निर्धन । कृपण । इन्द्र । देव । मुण्ड । भूत । श्रमण । वदान्य । अध्यायकः अध्यापक । ब्राह्मण । क्षत्रिय । पटु । पण्डित । कुशल । चपल । निपुण इति श्रेण्यादिः ।

कृत । मत । मित । भूत । उक्त । उक्त । समाज्ञात । समाख्यात ।

समाम्नात । संभावित । अवधारित । अवकल्पित । निराकृत । उपकृत । अपाकृत । कलित । उदाहृत । उदीरित । उदित । दृष्ट । विश्रुत । विहित । निरूपित । आसीन । आस्थित । अवबद्ध इति कृतादयः । बहुवचनमाकृतिगणार्थम् ।

८४७ कुमारः श्रमणादिभिः ॥३।१।११७॥ [तत्रैव प्रक्रियायां तत्पुरुषसमासप्रकरणे श्रमणादयो निर्दिष्टाः]

८४८ मयूरव्यंसकेत्यादयः ॥३।१।११६॥ मयूरव्यंसकः । छात्रव्यंसकः । कम्बोजमुण्डः । यवनमुण्डः ।

पहोडादयोऽन्यपदार्थे । पहीडम्, पहियवं वर्तते । एवम् पहिवाणिजा । प्रेहिवाणिजा । अपेहिवाणिजा । पहिस्वागता । अपेहिस्वागता । पहिद्वितीया । अपेहिद्वितीया । पहिप्रघसा । अपेहिप्रघसा । पहिविघसा । अपेहिविघसा । पहिप्रकसा । अपेहिप्रकसा । प्रोहकटा । प्रोहकर्दमा । प्रोहकपर्दा । उद्धमचूडा । आहरचेला । आहरवसना । आहरवितता । कृन्धि विचक्षणेति कृन्धि विचक्षणमिति वा यस्यां सा कृन्धिविचक्षणा क्रिया । भिन्धि लवणमिति यस्यां सा भिन्धिलवणा । एवं पचलवणा । उद्धरोत्सृजेति जल्पो यस्यां सोद्धरोत्सृजा । एवमुद्धरावसृजा । उद्धमविधमा । उद्धपनिवपा । उत्पतनिपता । उत्पचनिपचा । कृन्धि विक्षिणीहीति कृन्धि विक्षणु इति वा यस्यां सा कृन्धिविक्षणा । उन्मृजावमृजेति यस्यां सोन्मृजावमृजा । अत एव निपातनादिहैव च मृजेर्हौ शो भवति ।

गतप्रत्यागतादयः ॥ गतं च तत्प्रत्यागतम् च गतप्रत्यागतम् । एवं यातानुयातम् । महान् क्रयोऽल्पः क्रयिका क्रयावयवयोगात् क्रयः क्रयिकावयवयोगात् क्रयिका क्रयश्चासौ क्रयिका च क्रयक्रयिका समुदायः । एवं पुटापुटिका । फलाफलिका । मानोन्मानिका ।

शाकपार्थिवादयः ॥ शाकप्रियः शाकभोजी शाकप्रधानो वा पार्थिवः पृथोरपत्यं शाकपार्थिवः । पृथिव्या ईश्वरः पार्थिवः इति वा तेन शाकपार्थिवः । कुतपवस्रसौश्रुतः । सुश्रुतोऽपत्यं सौश्रुतः । कुतपसौश्रुतः । अजापण्यस्तौल्वलिः अजातौल्वलिः । यष्टिप्रहरणो यो मौद्गल्यः यष्टिमौद्गल्यः । एवं परशुरामः । घृतप्रधाना रोटिः घृतरोटिः । एवमोदनपाणिनिः । आणिमाण्डव्यः । बलाकाकौशिकः । विदर्भीकौण्डिन्यः । सहस्रबाहुरर्जुनः सहस्रार्जुनः । त्र्यवयवा विद्या त्रिविद्या । एकाधिका दश एकादश । एवं द्वादश । षोडश । एकविंशतिः । द्वाविंशतिः । एकशतम् । द्विशतम् । दध्युपसिक्त ओदनो दध्योदनः । एवं घृतौदनः । गुडमिश्रा धाना गुडधानाः । एवं तिलपृथुकाः । अश्वयुक्तो रथः अश्वरथः । एवं गजरथः । घृतपूर्णो घटः घृतघटः । अत्र शाकपार्थिवादिषु प्रियादेरुत्तरपदस्य लोपः । तृतीयो भागः त्रिभागः । तृतीयभागः । त्र्यंशः । तृतीयांशः । षड्भागः । षष्ठभागः । षडंशः । षष्ठांशः । त्रिदिवं तृतीयदिवम् । त्रिविष्टपं, तृतीयविष्टपमित्यादिषु पूरणप्रत्ययस्य वा लुग् भवति । तथा सर्वेषां श्वेततरः सर्वश्वेतः । एवं सर्वम-

हान् । अत्र गुणेन तरबन्तेन निर्धारणषष्ठीसमासस्तरब्लोपश्च । बहुवचनमाकृतिगणार्थम् । तेन विस्पष्टं पटुः विस्पष्टपटुः । पुना राजा पुनाराजः । एवं पुनर्गवः । पादाभ्यां ह्रियते इति पादहारकः । गले चोप्यत इति गलेचोपकः । सायंदोहः । प्रातर्दोहः । पुनर्दोहः । सायमाशः । प्रातराश इत्यादयो द्रष्टव्याः ।

८४९ राजदन्तादिषु ॥३।१।१४९॥ राजदन्तः । लिप्तवासितम् । सिक्तसंमृष्टम् । भृष्टलुञ्चितम् । नग्नमुषितम् । अवक्लिन्नपक्वम् । अर्पितोप्तम् । उप्तगाढम् । ऋणे अधमः अधमर्णः–अत्र 'सप्तमी' ॥३।१।८८॥ इति प्रथमोक्तत्वेन पूर्वनिपातेऽधमस्य पूर्वनिपातः । एवमुत्तमर्णः । उलूखलं मुशलं च उलूखलमुशले । अत्र मुशलशब्दस्याल्पस्वरत्वात् पूर्वनिपाते प्राप्ते उलूखलशब्दस्यानेन पूर्वनिपातः । एवं तन्दुलकिण्वम् । चित्रस्थवाह्वीकौ । स्नातकराजानौ । उशीरबीजशिञ्जास्थम् । आरद्वायनिचान्धनि । अधरोष्ठम् । वैकारिमतगाजवाजम् । गोपालिधानपूलासम् । कुरण्डस्थलपूलासम् । दारजारौ । दारशब्द एकवचनान्तोऽप्यस्ति । अत्र नियमे दारार्थम् । अत्र तु स्वराद्यदन्तत्वादर्थशब्दस्य पूर्वनिपाते प्राप्ते दारशब्दस्य पूर्वनिपातः । एवं विष्वक्सेनार्जुनौ । शूद्रार्यौ । विषयेन्द्रियाणि । गवाश्वम् । अवन्त्यश्मकाः । चित्रास्वाती माणविके । केशश्मश्रु । अत्रेदुदन्तत्वेन स्वातिश्मश्रुशब्दयोः पूर्वनिपाते प्राप्ते चित्राकेशयोः पूर्वनिपातः । एवं भार्यापती । पुत्रपतौ । स्वसृपतौ । जंपतौ । दंपती । गणपाठाज्जायाशब्दस्य जंभावो दंभावश्च वा निपात्यते । पुत्रपशु । शिरोजानु । शिरोविजु । नरनारायणौ । अर्चर्त्वान्नारायणस्य पूर्वनिपाते प्राप्ते नरस्य पूर्वनिपातः । एवं सोमरुद्रौ । कुबेरकेशवौ काकमयूरौ । उमामहेश्वरौ । पाण्डुधृतराष्ट्रौ । ज्येष्ठभ्रातृत्वेन धृतराष्ट्रस्य पूर्वनिपाते प्राप्ते पाण्डोः पूर्वनिपातः । एवं विष्णुवासवौ । बहुवचनमाकृतिगणार्थम् । तेन क्वचिद् विकल्पः । पुरुषोत्तमः । उत्तमपुरुषः । मध्यगृहम् । गृहमध्यम् । अधरबिम्बम् । बिम्बाधरः । ओष्ठबिम्बम् । बिम्बोष्ठः । इत्यादि ।

८८६ मृगक्षीरादिषु वा ॥३।२।६२॥ मृग्याः क्षीरं मृगक्षीरम् मृगीक्षीरम् । एवं मृगपदम् मृगीपदम् । मृगशावः मृगीशावः । कुक्कुटाण्डम्, कुक्कुट्यण्डम् । मयूराण्डम्, मयूर्यण्डम् । काकाण्डम्, काक्यण्डम् । काकशावः, काकीशावः ।

८८८ धर्मार्थादिषु द्वन्द्वे ॥३।१।१५९॥ धर्मार्थौ । अर्थधर्मौ । कामार्थौ । अर्थकामौ । शब्दार्थौ । अर्थशब्दौ । आद्यन्तौ । अन्तादी । अग्नीन्द्रौ । इन्द्राग्नी । चन्द्रार्कौ । अर्कचन्द्रौ । अश्वत्थकपित्थौ । कपित्थाश्वत्थौ । इत्यादिषु स्वराद्यदन्तत्वाच्चित्यं पूर्वनिपाते प्राप्ते । सर्पिर्मधुनौ । मधुसर्पिषौ । गुणवृद्धी । वृद्धिगुणौ । दीर्घलघू । लघुदीर्घौ । चन्द्रराहू । राहुचन्द्रौ । इत्यादिष्विदुदन्तत्वाच्चित्यं पूर्वनिपाते प्राप्ते । तपःश्रुतौ श्रुततपसी । द्रोणभीष्मौ, भीष्मद्रोणौ । इत्यादिष्वर्चर्त्वाच्चित्यं पूर्वनिपाते प्राप्ते । शकृन्मूत्रम्, मूत्रशकृत् । कुशकाशम् । काशकुशम् । करभरासभौ । रासभकरभौ । इत्यादिषु लघ्वक्षरत्वात् पूर्वनिपाते प्राप्ते ॥ समी-

रणाग्नी । अग्निसमीरणौ । आदित्यचन्द्रौ । चन्द्रादित्यौ । पाणिनीयरौढीयाः । रौढीयपाणिनीयाः । जित्याविपूयविनीयाः । विपूयविनीयजित्याः । इत्यादिष्वल्पस्वरत्वान्नित्यं पूर्वनिपाते प्राप्ते । ब्राह्मणक्षत्रियविट्शूद्राः । शूद्रविट्क्षत्रियविप्राः । भीमसेनार्जुनौ । अर्जुनभीमसेनौ । देवापिशंतनू । शंतनुदेवापी । इति वर्णभ्रातृलक्षणेऽनुपूर्वं निपाते प्राप्ते विकल्पार्थं वचनम् । बहुवचनमाकृतिगणार्थम् । तेन वसन्तग्रीष्मौ । ग्रीष्मवसन्तौ । शुक्रशुची । शुचिशुक्रौ इत्यादयोऽपि द्रष्टव्याः ।

९०७ गवाश्वादिः ॥३।१।१४४॥ गौश्चाश्वश्च गवाश्वम् । गवाविकम् । गवैडकम् । अजाविकम् । अजैडकम् । कुब्जवामनम् । कुब्जकैरातम् । कुब्जकैरातकम् । पुत्रपौत्रम् । नित्यवैराभावपक्षे श्वचण्डालम् । स्त्रीकुमारम् । दासीमाणवकम् । शाटीपच्छिकम् । उष्ट्रखरम् । मूत्रशकृत् । मूत्रपुरीषम् । यकृन्मेदः । मांसशोणितम् । दर्भशरम् । दर्भपूतीकम् । अर्जुनपुरुषम् । तृणोलुपम् । कुडीकुडम् । दासीदासम् । भागवतीभागवतम् । त्रिष्वेतेषु 'पुरुषः स्त्रिया' ३-१-१२५ इत्येकशेषो न भवति निपातनात् । गवाश्वादिषु यथोच्चारितरूपग्रहणादन्यत्र नायं विधिः । गोऽश्वौ । गोऽश्वम् । गोअश्वौ । गोअश्वम् । गोऽविकौ । गोऽविकम् । गवेलकौ । गवेलकम् । पशुविभाषैव भवति ।

९०८ न दधिपयआदिः ॥३।१।१४५॥ दधि च पयश्च दधिपयसी । सर्पिर्मधुनी । मधुसर्पिषी । हरिवासवौ । ब्रह्मप्रजापती । शिववैश्रवणौ । स्कन्दविशाखौ । परिव्राजकौशिकौ । प्रवर्ग्योपसदौ । आद्यवसाने । सूर्याचन्द्रमसौ । मित्रावरुणौ । अग्नीषोमौ । सोमारुद्रौ । नारदपर्वतौ । खण्डामर्कौ । नरनारायणौ । रामलक्ष्मणौ । भीमार्जुनौ । कम्बलाश्वतरौ । मातापितरौ । पितापुत्रौ । श्रद्धामेधे । शुक्लकृष्णे । इध्मबर्हिषी । पूर्वस्य दीर्घत्वं निपातनात् । ऋक्सामे । वाङ्मनसे । अत्र 'ऋक्सामर्ग्यजुष' ७-२-९७ इत्यादिनाकारान्तत्वम् । याज्यानुवाक्ये । दीक्षातपसौ । श्रद्धातपसौ । श्रुततपसी । मेधातपसी । अध्ययनतपसी । उलूखलमुशले । अत्राद्येषु त्रिषु व्यञ्जनविकल्पे शुक्लकृष्णे इत्यत्र 'विरोधिनामद्रव्याणाम्' इति विकल्पे, इध्मबर्हिषी, उलूखलमुशले 'अप्राणिपश्वादेः' ३-१-१३६ इति नित्यमेकत्वे शेषेषु च 'चार्थे द्वन्द्वः सहोक्तौ' इत्युभयस्मिन् प्राप्ते प्रतिषेधोऽयम् । चण्डालमृतपाश्च द्रष्टव्याः ।

९९३ भोरुष्ठानादयः ॥२।३।३३॥ भोरुष्ठान । अङ्गुलिषङ्ग । सव्येष्ठ । परमेष्ठिन् । सुष्ठु । दुष्ठु । अपष्ठु । वनिष्ठु । गौरिषक्थ । प्रतिष्णिका । नौषेचिका । दुन्दुभिषेवणः । इति भोरुष्ठानादयः । बहुवचनमाकृतिगणार्थम् ।

९९७ गिरिनद्यादीनाम् ॥२।३।६८॥ गिरिणदी । गिरिनदी । गिरिणखः । गिरिनखः । गिरिणद्धः । गिरिनद्धः । गिरिणितम्बः । गिरिनितम्बः । चक्रणदी । चक्रनदी । चक्रणितम्बा । चक्रनितम्बा । चक्रणितम्बा । चक्रनितम्बा । माषोणः । माषोनः । तूर्यमाणः । तूर्यमानः । आर्गयणः । आर्गयनः । ऋगयनं वेत्त्यधीते वेत्यण् । ऋगयनस्य व्याख्यानं तत्र भवो वा शिक्षादित्वादण् । बहुवचनाद्यथादर्शनमन्येऽपि भवन्ति ।

१०१२ वर्चस्कादिष्ववस्करादयः ॥३।२।४८॥ वर्चस्केऽवस्करः । अवकीर्यतेऽवस्करः अन्नमलम् । तत्संबंधात् तद्देशोऽप्यवस्करः । अवकरोऽन्यः । अपस्करो रथाङ्गे । अपकरोऽन्यः । कुत्सिता तुम्बुरुः कुस्तुम्बुरुरौषधिजातौ । तत्फलान्यपि कुस्तुम्बुरूणि । अन्यत्र कुतुम्बुरुस्तिन्दुकवृक्षः । अवरस्परा अपरस्परा वा क्रियासातत्ये । अवरस्पराः सार्था गच्छन्ति–सततं गच्छन्तीत्यर्थः। अन्यत्रावरपराः सार्था गच्छन्ति । अवरे च अपरे च सकृदेव गच्छन्तीत्यर्थः । आस्पदं प्रतिष्ठायाम् । प्रतिष्ठा स्थानमात्मयापनापदम् । अन्यत्र आ ईषत् पदमा पदाद्वा आपदम् । आश्चर्यमद्भुते । आश्चर्यं नीला द्यौः । प्रस्कण्वहरिश्चन्द्रावृषी । प्रगतं कण्वं पापमस्मादिति प्रस्कण्वः । हरिश्चन्द्रइवाह्लादको यस्य हरिश्चन्द्रः। ऋषेरन्यत्र प्रकण्वो देशः । हरिचन्द्रो माणवकः । मस्करो वेणुदण्डयोः । मा क्रियते प्रतिषिध्यतेऽनेनेति मस्करः । मकरशब्दस्य वाऽव्युत्पन्नस्य मस्कर इति रूपम् । अन्यत्र मकरो ग्राहः । मस्करी परिव्राजके । माकरणशीलो मस्करी । सह्याद्रे माकृषत कर्माणि शान्तिर्वः श्रेयसीति । मकरिनशब्दस्य वा मस्करोति रूपम् । अन्यत्र मकरीति समुद्रः । कास्तीराजस्तुन्दे नगरे । ईषत्तीरमजस्येव तुन्दमस्येति व्युत्पत्तिमात्रम् । कास्तीरमजस्तुन्दं च नगरम् । अन्यत्र कातीरम् । अजतुन्दम् । कारस्करो वृक्षे । कारं करोति किल कारस्करो वृक्षः । कारकरोऽन्यः । वनस्पतिः पुष्पं विना फलवति वृक्षे । सर्वो हरितकायो वनस्पतिरित्यन्ये । वनपतिरन्यः । पारस्करो देशे । पारं करोति पारस्करो देशः । पारकरोऽन्यः । करस्करो गिरिवृक्षयोः । करं करोति इति करस्करो नाम गिरिः । करस्करो वृक्षः । करकरोऽन्यः । रथस्पा नद्याम् । रथं पाति पिबति वा रथस्पा नाम नदी । रथपाऽन्या । किष्कुरुः प्रहरणे । कस्य कुरुः किष्कुरुः नाम प्रहरणम् । किमो मकारस्य षकारादेशः । किष्कुः प्रमाणे । किमपीषत्परिमेया कुर्भूमिरस्य किष्कुः वितस्तिर्हस्तो वा । किं करोतीति वा किष्कुः । करोतेर्डुप्रत्ययः किमो मकारस्य च षकारः । कार्यं करोतीति वा किष्कुः । डुप्रत्ययः कार्यशब्दस्य किष्भावः । किष्किन्ध इति गुहापर्वतयोः । किमप्यन्तर्दधाति किष्किन्धा नाम गुहा । किमो द्विर्वचनं पूर्वस्य च मकारस्य षकारः । किं किं दधाति किष्किन्धः पर्वतः। आस्कथं नगरे । आहताः कथा अस्मिन्नित्यास्कन्थं नाम नगरम् । तस्करश्चौरे । तत् करोति तस्करश्चौरः । बृहस्पतिर्देवतायाम् । बृहतां पतिः बृहन् पतिरिति वा बृहस्पतिः । उभयत्र तकारस्य सकारः । अन्यत्र तत्करः बृहस्पतिः । प्रायश्चित्तप्रायश्चित्ती अतीचारशोधने । प्रकर्षेणेत्यागच्छत्यस्मदाचारधर्म इति प्रायो मुनिलोकः । चिन्त्यते स्मर्यते इति चित्तम् चित्तिश्च व्रतम् । प्रायश्चित्तं चिन्तितं किल्बिषविशुद्धये । प्रायश्चित्तमतिचारशोधनम् आलोचनप्रतिक्रमणादि । एवं प्रायश्चित्तिः । पक्षे विसर्जनीयपूर्वः शकार इत्यन्ये । प्रायःश्चित्तम् । प्रायःश्चित्तिः । अन्ये तु प्रायणं प्रायः तस्य चित्तं प्रायश्चित्तं प्रायश्चित्तिरित्यपि मन्यन्ते । शष्कुली कृतान्ते । शष्कुलशब्दाद् गौरादित्वाद् ङीः । कृताद्यादन्यत्र

शकुली मत्स्यविशेषः । गोष्पदं गोसेविते प्रमाणे च । यत्र गावः पद्यन्ते स गोभिः सेवितो ग्रामसमीपादिर्देश उच्यते । प्रमाणे गोष्पदपूरं वृष्टो देवः । गोष्पदमात्रं क्षेत्रम् । अत्र गोः पदमन्यस्येयत्तां परिच्छेत्तुमुपादीयमानं प्रमाणं भवति । अन्यत्र गोपदम् । अगोष्पदं सेवारहिते । न विद्यते गोः पदं येषु तान्यगोष्पदान्यरण्यानि । अगोष्पदेष्वरण्येषु विश्वासमुपजग्मिवान् । ननु गोष्पदप्रतिषेधादगोष्पदमिति सिद्धयति । सत्यम् । किं तु यत्र गवां प्रसङ्गो ताभिः सेवितस्तत्रैव स्यात् । यथा यत्र शुक्लगुणप्रसङ्गः स एवाशुक्ल इति भवति नात्माकाशादि । यत्र तु गवामत्यन्तासंभवस्तत्र न स्यात् तत्रापि यथा स्यादित्येवमर्थं निपातनम् । न विद्यते गोः पदं यत्रेति त्रिपदबहुव्रीहिविवक्षायां रूपान्तरनिवृत्त्यर्थम् । बहुवचनमाकृतिगणार्थम् । तेनावोचपरोवरादयोऽपि द्रष्टव्याः।

१०२० अञ्जनादीनां गिरौ ॥३।२।७७॥ अञ्जन भाञ्जन किंशुक किंशुलक साल्व लोहित कुक्कुट खड्न नल पिङ्गल इत्यञ्जनादिः । बहुवचनमाकृतिगणार्थम् ।

१०२१ अनजिरादिबहुस्वरशरादीनां मतौ ॥३।२।७८॥ शरावती, वंशावती, शुक्तीमती । कुशावती । धूमावती । अहीवती । कपीवती । मुनीवती । मणीवती । वार्दावान्नाम गिरिः । वेटावान्नाम गिरिः । बहुवचनमाकृतिगणार्थम् ।

बहुस्वरस्यानजिरादिविशेषणं किम् । अजिरवती । खदिरवती । खजुरवती । स्थविरवती । पुलिनवती । मलयवती । हंसकारण्डववती । चक्रवाकवती । अलंकारवती । शशाङ्कवती । हिरण्यवती । अजिरादिराकृतिगणः ।

१०२१ अपील्वादेर्वहे ॥३।२।८९॥ अपील्वादेरिति किम् । पीलुवहम् । दारुवहम् । चारुवहम् ।

१०६६ नखादयः ॥३।२।१२८॥ नास्य खमस्तीति नखः । न भ्राजते इति नभ्राट् क्विबन्तः । न पातीति नपात् शत्रन्तः । न वेत्तीति नवेदाः । न असत्यः नासत्यः । न मुञ्चतीति नमुचिः । नास्य कुलमस्तीति नकुलः । एवं न न पातीति नपात् । न न वेत्तीति नवेदाः । न न मुञ्चतीति नमुचिः । न न कुलमस्त्यस्य नकुलः । न न खमस्त्यस्य नखः । न पुमान् न स्त्रीति नपुंसकम् । न क्षीयते न क्षरति वा नक्षत्रम् । औणादिके त्रटि क्षभावे निपात्यते । न क्रामति न क्रीणाति वा नक्रः । डप्रत्ययो निपातनात् । नास्मिन्नकं दुःखमस्ति नाकः । न विद्यन्ते ग्नाः स्त्रियः छन्दांसि वास्य नग्नः । न अगः नागः । न विद्यते भागोऽस्य नभागः । नारमञ्चति नाराचः । न आप्यत इति नापितः । न मीयतेऽसाविति नमेरुः । नाभिनन्दति वधूमिति ननान्दा । नान्तरेण भवति नान्तरीयकम् । न न चिकेति नाचिकेतः । अत एव निपातनात् कित् ज्ञापनार्थो जुहोत्यादौ द्रष्टव्यः । अस्माच्च नञ्द्वयोपपदान्नाभि शब् प्रत्ययो भवति । बहुवचनमाकृतिगणार्थम् । तेन नास्तिकः । नभः । नारङ्गमित्यादयो द्रष्टव्याः ।

१०८० समानस्य धर्मादिषु ॥ ३।२।१४९ ॥ धर्म । जातीय । नामन् । गोत्र । रूप । स्थान । वर्ण । वयस् । वचन । ज्योतिस् । जनपद । रात्रि । नाभि ।

बन्धु । पक्ष । गन्ध । पिण्ड । देश । कर । लोहित । कुक्षि । वेणि इति धर्मादयः । बहुवचनमाकृतिगणार्थम् ।

१०८५ पृषोदरादयः ॥३।२।१५५॥ पृषदुदरमुदरे वास्य पृषोदरः। पृषत उदरं पृषोदरम् । पृषत उक्षानं पृषोक्षानम् । जीवनस्य जलस्य मूतः पुटबन्धः जीमूतः। अत्र वनस्य लोपः। वारिणो वाहको बलाहकः। अत्र पूर्वपदस्य वः उत्तरपदादेश्च ल आदेशः। आध्यायन्ति तमिति आढ्यः । अत्र ध्यस्य ढ्यादेशः । कृच्छ्रेण दास्यते नास्यते दभ्यते च खलि, दुष्टो दासो नासो दम्भ इति वा दूडासः । दूणासः । दूडभः । दुष्टं ध्यायति दूढ्यः । एषु पूर्वपदस्य दुसो दूभावः उत्तरपदादेश्च डत्वणत्वढत्वानि दम्भेर्नलोपश्च । मह्यां रौति मयूरः । रौतेरच्यन्तलोपो महीशब्दस्य मयूभावः । मह्यां शेते महिषः । डः । अत्र पूर्वपदस्य ह्रस्वत्वं शस्य च षत्वम् । पिशितमश्नाति पिशाचः । अत्र पिशितस्य पिशादेशः अश्नातेः शस्य चादेशः। शवानां शयनं श्मशानम् । पूर्वपदस्य श्मादेशः उत्तरपदस्य च शानादेशः। ध्रुवन्तोऽस्यां सीदन्ति विषीदन्ति वृसी । अत्र डट्प्रत्ययः । पूर्वपदस्य वृभावः । ऊर्ध्वं खं बिलं वास्य उदूखलम् । उलूखलं वा । अत्र पूर्वपदस्योदूभाव उलूभावश्च उत्तरपदस्य खलादेशः । दिवि द्यौर्वा के पषां दिवौकसः । अत्राकारागमः । अश्व इव तिष्ठति अश्वत्थः । कपिरिव तिष्ठति कपयोऽस्मिंस्तिष्ठन्ति इति वा कपित्थः। दध्नि तिष्ठति दधित्थः । मह्यां तिष्ठति महित्थः । एषु तिष्ठतेः सकारस्य तकारः । मुहुः स्वनं लाति मुहुर्मुहुर्लसतीति वा मुसलम् । अत्र मुहुःशब्दस्य मुभावः । स्वनशब्दस्य सभावः । पक्षान्तरे लसयोर्विपर्ययश्च। ऊर्ध्वौ कर्णावस्येत्युलूकः । अत्रोर्ध्वशब्दस्योलादेशः कर्णशब्दस्योकादेशश्च । मेहनस्य खं तस्य माला मेखला । अत्र मेहनखे हनस्य मालाशब्दे च माशब्दस्य लोपः । कौ जीर्यति कुञ्जरः । अत्र कुशब्दस्य मोऽन्तः । आश्वस्य विषमस्ति आशीविषः । अत्राशुशब्दस्याशीभावः । बलं वर्धयति बलीवर्दः । अत्र बलस्येकारोऽन्तादेशो वर्धधकारस्य च दकारः । मनस ईष्टे मनीषी । अत्र मनसोऽन्त्यस्वरादिलोपः ईशेः शस्य च षः । बिलं दारयतीति बिडालः । अत्र बिलशब्दस्य ललोपः । उत्तरपदस्य डालादेशः। मृदमालीयते-डः-मृणालः। अत्र मृदो दकारस्य णकारः। असृगालीयते डः-सृगालः । अत्रादेर्लोपः । असृग्गलति वा सृगालः । अत्रासृज आद्यन्तलोपः । पुरो दाश्यते पुरोडाशः । अत्रोत्तरपदादेर्डत्वम् । अश्वस्याम्बा वडवा। अत्राश्वस्याशो लोपः। ड् चान्तः। अम्बाशब्दे च मोलोपः। शकस्यान्धुः शकन्धुः । अत्र पूर्वपदान्तस्योत्तरपदादेर्वा लोपः । एवं कर्कन्धुः । अटतीत्यच् अटा । कुलानामटा कुलटा। अव् अवाक् अटन्त्यस्मिन्निति बाहुलकात् 'पुंनाम्नि' इति घः अवटः । हिनस्ति सिंहः । अत्र तकारस्य लोपः । शकारलकारयोस्तु विपर्ययः । भ्रमन् रौति-डः भ्रमरः । अत्र तलोपः । एवंप्रकाराः शिष्टैः प्रयुक्ताः पृषोदरादयः । मयूरमहिषादीनामुणादौ व्युत्पादितानामपीह व्युत्पादनमनेकधा शब्दव्युत्पत्तिज्ञापनार्थम् । बहुवचनमाकृतिगणार्थम् । तेन मुहूर्तमारग्वधोऽश्व-

स्यामन्निर्ह्रयतीत्यादयो द्रष्टव्याः ।

१०९० धनादेः पत्युः ॥६।१।१४॥ धन । अश्व । गज । शत । गण । कुल । गृह । पशु । धर्म । धन्वन् । सभा । सेना । क्षेत्र । अधि । राष्ट्र । धान्य । प्राण इति धनादिः ।

१०९९ उत्सादेरञ् ॥६।१।१९॥ उत्स । उदपान । विकर । विनद । महानद । महानस । महाप्राण । महाप्रयाण । तरुण । तलुन । धेनु । पङ्क्ति । जगती । बृहती । त्रिष्टुभ् । अनुष्टुभ् । जनपद । भरत । उशीनर । ग्रीष्म । अच्छन्दसि । पीलुकृण । उदस्थान । देशे वृषद् । अंशे वृषदंश इत्यन्ये । भल्लकीय । रथन्तर । मध्यंदिन । बृहत् । महिमन् । मिह्दित्यपि केचित् । सत्वच्छब्दो मत्वन्तः । सत्वतोऽपत्यं तत्र भवो वा सात्वतः । अन्ये तु नागममपीच्छन्ति । सात्वन्तः । कुरु । पञ्चाल । इन्द्रावसान । उष्णिह् । ककुभ् । अकारान्तावेतावित्यन्ये । सुवर्ण । हंसपथ । वर्धमान इति उत्सादिः ।

१११७ बाह्वादिभ्यो गोत्रे ॥६।१।३२॥ बाहु । उपबाकु । निबाकु । वटाकु । खटाकु । उपबिन्दु । चाटाकु । वृकला । कृकला । झूडा । बलाका । जङ्घा । छगला । अगला । लगहा । ध्रुवका । मूषिका । सुमित्रा । दुर्मित्रा । वृकलादिभ्यो यथासंभवमेयणो मानुषीनामलक्षणस्य चाणोऽपवादोऽयमित्र् । युधिष्ठिर । अर्जुन । राम । संकर्षण । कृष्ण । गद । प्रद्युम्न । साम्ब । सत्यक । शूर । असुर । अजीगर्त्त । मध्यंदिन । एषु ऋश्यादिलक्षणस्याणोऽपवादः । सुधावत् । स्वधावत् । पुष्करसद् । अनुहरत् । अनड्वह् । पञ्चन् । सप्तन् । अष्टन् । क्षेमधन्विन् । मार्षशिरोविन् । शृङ्खलतोदिन् । खरनादिन् । प्राकारमर्दिन् । नगरमर्दिन् । इन्द्रशर्मन् । मद्रशर्मन् । अग्निशर्मन् । देवशर्मन् । उपदश्च । उदश्च । क्षुनामन् । सुनामन् । सुदामन् । शिरस् । लोमन् । पतौ तदन्तौ । हस्तिशिरसोऽपत्यं हास्तिशीर्षिः । औडुलौमिः । शारलौमिः । इति बाह्वादयः । बहुवचनमाकृतिगणार्थम् । तेन सख्युरपत्यं साखिः । संवेशिनः सांवेशिः उदङ्कस्य औदङ्किः । औद्दालकिः । वाल्मीकिः । आरुणिः इत्यादि सिद्धं भवति ।

११२० अजादिभ्यो धेनोः ॥६।१।३४॥ अजादयः प्रयोगतोऽनुसर्तव्याः ।

११२८ बिदादेर्वृद्धे ॥६।१।४१॥ बिद । उर्व । कश्यप । कुशिक । भरद्वाज । कृष्णमन्यु । किलात । कीदर्भ । विश्वानर । ऋष्टिषेण । ऋतभाग । हर्यश्व । प्रियक । पियक । अपस्तम्भ । कुवाचर । कूवाचर । शरद्वत् । शुनक । धेनु । उत्सादिष्वपि धेनुशब्दः पठ्यते । स प्रत्यग्रप्रसवगव्यादिवाचकः । अयमृषिवचनः । अश्व । शंख । गोपवन । शिग्रु । बिन्दु । ताजम । अश्वावतान । श्यामाक । श्यापर्ण । हरित । किन्दास । वस्यस्क । अर्कलुश । वध्योग । विष्णुवृद्ध । वृष्णिवृद्ध । प्रतिबोध । रथीतर । रथंतर । गविष्ठिर । गविष्ठिल । निषाद । शबर । मठर । सदाकु । पृदाकु । केचिदेतौ हरितादेः प्राक् पठन्ति । तन्मते 'हरितादेरञः' इत्यायनण् न भवति । मठरशब्दं गोपवनादावपि अजो लुबभावार्थं

केचित् पठन्ति । अन्ये तु मठराद्यकारादिमत्रमिच्छन्ति । माठर्यः माठर्यौ । बहुष्वत्रो लुपि संनियोगशिष्टत्वात् यस्यापि निवृत्तिरिति मठराः ।

११३० गर्गादेर्यञ् ॥६।१।४२॥ गर्ग । वत्स । वाज । अज । संकृति । व्याघ्रपाद् । विदभृत् । पितृबध् । प्राचीनयोग । पुलस्ति । रेभ । अग्निवेश । शंख । शर । धूम । अवट । नमस । चमस । धनंजय । तृक्ष । विश्वावसु । जरमारण । कुरुकत । अनडुह् । लोहित । संशिति । वक । बभ्रु । बभ्लु । मण्ड । मङ्क्षु । मङ्खु । शस्थु । शङ्कु । लतु । लिगु । गूहलु । जिगीषु । मनु । तन्तु । मनुतन्तु । मनायी । अणेयणोः प्राप्तावस्य पाठः । पुंवद्भावस्तु ' कौण्डिन्यागस्त्ययोः ' इति कौण्डिन्यनिर्देशादनित्य इति न भवति । सूनु । स्रुव । कच्छक । ऋक्ष । रुक्ष । रूक्ष । तरुक्ष । तलुक्ष । तण्डिन् । वतण्ड । कपि । कत । शकल । कण्व । वामरथ । गोकक्ष । कुण्डिनी । यज्ञवल्क । पर्णवल्क । अभयजात । विरोहित । वृषगण । रहोगण । शण्डिल । मुद्गर । मुद्गल । मुसर । मुसल । पराशर । जंतूकर्ण । मन्द्रित । अश्मरथ । शर्कराक्ष । पूतिमाष । स्थूर । स्थूरा । अरराका । पिङ्ग । पिङ्गल । कृष्ण । गोलुन्द । उलूक । तितिम्भ । भिष । भिषज । भिष्णज । भण्डित । भडित । दल्भ । चिकित । देवह्रू । इन्द्रह्रू । यज्ञह्रू । एकलू । पिप्पलू । पत्यलू । वृहलू । पप्फलू । बृहदग्नि । जमदग्नि । सुलाभिन । कुटोगु । उक्थ । कुटल । चणक । चुलुक । कर्कट । अलापिन् । सुवर्ण । सुलाभिन् इति गर्गादिः ।

११३५ कुञ्जादेर्ञायन्यः ॥६।१।४७॥ कुञ्ज । ब्रध्न । गण । भस्मन् । लोमन् । लौमायन्य । तदन्तादेव केचित् । औडुलोमायन्यः । शट । अयं गर्गादिष्वपि । शाक । शुण्डा । शुभा । विपाश् । अयं शिवादिष्वपि । स्कन्ध । स्कम्भ । शंख । अयं गर्गादावश्वादौ बिदादौ च । इति कुञ्जादिः ।

११३७ अश्वादेः ॥ ६।१।४९ ॥ अश्व । शंख । जन । उत्स । ग्रीष्म । अर्जुन । वैल्य । अश्मन् । बिद । कुट । पुट । स्फुट । रोहिण । खर्जुल । खर्जूर । खर्जूल । पिञ्जूर । भदिल । भटिल । भडिल । भण्डिल । भटक । भडित । भण्डित । प्राडत । राम । उद । क्षान्ध । ग्रीव । रामोद । रामोदक्ष । अन्धग्रीव । काश । काण । गोल । आह्व । गोलाह्व । अर्क । स्वन । अर्कस्वन । शुन । वन । पत । पद । चक्र । कुल । ग्रीवा । श्रविष्ठा । पावित् । पवित्रा । (पाविश्र) पविन्द्रा । मोमिन् । श्याम । धूम । धूम्र । वस्र । वाग्मिन् । विश्वानर । विश्वतर । वत । सनख । सन । खड । जड । गद । जण्ड । अर्ह (अर्थ) वीक्ष । विशम्प । विशाल । गिरि । चपल । गिरिचपल । चुप । दासक । चुपदासक । धाय्या । धन्य । धर्म्य । पुंसिजात । शूद्रक । सुमनस् । दुर्मनस् । आतव । उत्सातव । कितव । किव । शिव । खिव । खिप । खदिर । आनडुह्य । आनडुह्यायन-इति यञन्तादायनणपि सिद्धयति प्राग्जितीयस्वरादौ तु यूनि लुप् इति नित्यलुबर्थमस्योपादानम् । इत्यश्वादिः । अत्र योऽश्वादिर्वृद्धकाण्डेऽन्यत्रापि पठ्यते तस्य

सोऽपि भवति। अश्वशब्दाद् बिदादिषु पाठादञ्। इहायनञ्। आश्वः। आश्वायनः। शंखशब्दाद् बिदादिष्वञ् गर्गादिषु यञ् कुञ्जादिषु ञायन्यः इहायनञ्। शांखः। शाङ्ख्यः। शांखायनः। जनशब्दान्नडादिष्वायनण् इहायनञ्। तत्र यूनि प्रत्यये विधेये विशेषः। जानायनिः। जानायनो युवा। उत्सग्रीष्मयोरुत्सादिषु पाठोऽनन्तरार्थोऽनपत्यार्थश्च। इह तु वृद्धेऽयमेव यथा स्यादित्येवमर्थः। औत्सायनः। ग्रैष्मायणः। अर्जुनशब्दस्य बाह्वादिषु पाठोऽनन्तरार्थः। वृद्धे त्वयमेव। आर्जुनायनः। वैल्येति विलिशब्दो ञ्यान्तस्ततो यूनि प्रत्ययः। वैल्यायनो युवा।

११४२ नडादिभ्य आयनण् ॥६।१।५३॥ नड। चर। वक। मुञ्ज। इतिक। इतिश। उपक। लमक। सप्तल (सत्तल)। सत्वल। व्याज। (वाज) व्यतिकेत्येके। प्राण। नर। सायक। दाश। मित्र। दाशमित्र। द्वीपा। द्वीप। पिङ्कर। पिङ्गल। किंकल। किंकर। कातर। काथल। काश्यप। काश्य। नाव्य। अज। अमुष्य। लिगु। चित्र। अमित्र। कुमार। लोह। स्तम्ब। स्तम्भ। अग्र। शिंशपा। तृण। शकट। मिकट। मिमत। सुमत। जन। ऋच्। इन्ध। ऋगिन्ध। मित। जनंधर। जलंधर। युगंधर। हंसक। दण्डिन्। हस्तिन्। पञ्चाल। चमसिन्। सुकृत्य। स्थिरक। ब्राह्मण। चटक। अश्वल। खरप। बदर। शोण। दण्डम। छाग। दुर्ग। अलोह। कामुक। (कामक) ब्रह्मदत्त। उदुम्बर। सण। लङ्क। केकर। (ककर)। नाव्य। आलाह। ऋग। वृषगण। अध्वर। वालिश। दण्डप। इति नडादयः। बहुवचनमाकृतिगणार्थम्।

११४४ हरितादेरञः ॥६।१।५५॥ बिदाद्यन्तर्गणो हरितादिः।

११४९ शिवादेरण् ॥६।१।६०॥ शिव। प्रौष्ठ। प्रौष्ठिक। वण्ट। जम्ब। जम्भ। ककुभ। कुथार। अनभिम्लान। ककुस्थ। कोहड। कहूय। रोध। पिलधर। वतण्ड। तृण। कर्ण। क्षीरहद। जलहद। परिषिक। शिलिन्द। गोफिल। गोहिल। कपिलक। जटिलक। बधिरक। मञ्जिरक। वृष्णिक। खञ्जार। खञ्जाल। रेख। लेख। आलेखन। वर्तन। ऋक्ष। वर्तनक्ष। विकट। पिटाक। तृक्षाक। नभाक ऊर्णनाभ। सुपिष्ट। पिष्टकर्णक। पर्णक। मसुरकर्ण। मसूरकर्ण। खडूरक। गडेरक। यस्क। लह्य। द्रुह्य। अयस्थूण। भलन्द। भलन्दन। विरूप। विरूपाक्ष। भूरि। संधि। भूमि। मुनि। कुञ्जा। कोकिला। इला। सपत्नी। जरत्कारु। उत्केया। काय्या। सुरोहिका। पोठीनासा। महित्री। आर्यश्वेता। ऋष्टिषेण। गङ्गा। पाण्डु। विपाश्। तक्षन्। इति शिवादिः। अत्राविरूपाक्षादिजोऽपवादः। भूर्यादीनामा आर्यश्वेताया पयणः, ऋष्टिषेणस्य सेनान्तस्य सेनान्तञ्येञोः। बिदादिपाठाद् वृद्धेऽञेव भवति। तदन्ताच्च यूनि अत इञ् तस्य 'ञिदार्षादणिञोः' इति लुपि आर्ष्टिषेणः पिता च पुत्रः। तथा ऋष्टिषेणस्यापत्यं वृद्धं बहवः बिदाद्यञ् तस्य 'यञञः' इत्यादिना लुपि ऋष्टिषेणाः। पाण्डुपाठः शुभ्रादेयणा गङ्गापाठस्तिकाद्यायनिञा च समावेशार्थः। तेन पाण्डोर्द्वैरूप्यं गङ्गायाश्च त्रैरूप्यं सिद्धम्। पाण्डवः। पाण्डवेयः। गाङ्गः। गाङ्गायनिः। गाङ्गेयः।

विपाश्पाठः कुञ्चादिलक्षणेन ञ्यन्येन समावेशार्थः । वैपाशः । वैपाशायन्यः । तक्षन्पाठः कुर्वादिञ्येन समावेशार्थः । ताक्ष्णः । ताक्ष्ण्यः ।

११६६ शुभ्रादिभ्यः ॥६।१।७३॥ शुभ्र । विष्टपुर । विष्टपर । ब्रह्मकृत । शतद्वार । शताहार । शालाधल । किट । (टीक) शालूक । कृकलास । प्रवाहण । भाण । भारत । कुदत्त । कर्पूर । इतर । अन्यतर । आलीढ । सुदत्त । सुदक्ष । तुद । अकशाप । वादन । शतल । शकल । (शक) शवल । खडूर । कुशम्ब । शुक्र । विग्र । बीज । अश्व । बीजाश्व । अजिर । मवक । मखण्ड । मकण्डु । मघण्डु । सूकण्ड । मृकण्डु । जिह्माशिन । अजवस्ति । शकन्धि । परिधि । अणीचि । कणीचि । शकुनि । अतिथि । अनुदृष्टि । शलाकाभू । लेखाभू । रोहिणी । रुक्मिणी । किंकशा । विवशा । गन्धपिङ्गला । षडोन्मत्ता । कुमारिका । कुबेरिका । अम्बिका । अशोका । श्वन् । गङ्गा । पाण्डु । विमातृ । विधवा । कद्रू । गोधा । सुदामन् । सुनामन् । इति शुभ्रादयः । मवकान्तानामित्रोऽपवाद ण्यण् मखण्ड्वादीनां विमात्रन्तानामणः विधवाया ण्यणः कद्रूगोधयोश्चतुष्पादेयञः । सुदामन्सुनाम्नोरित्रा शुभ्रस्य तु ञ्येन समावेशार्थः पाठः। बहुवचनमाकृतिगणार्थम् ।

११७२ कल्याणादेरिन् चान्तस्य ॥६।१।७७॥ कल्याणी । सुभगा । दुर्भगा । बन्धकी । जरती । बलीवर्दी । ज्येष्ठा । कनिष्ठा । मध्यमा । परस्त्री । अनुदृष्टि । अनुसृष्टि । इति कल्याण्यादिः । परस्त्र्यन्तानां 'ङ्याप्प्रातिपदिकात्' इति अनुदृष्टेः 'शुभ्रादिभ्यः' इति ण्यण् सिद्ध एव इनादेशमात्रं विधीयते । अनुसृष्टेरुभयम् ।

११७४ अनुशतिकादीनाम् ॥७।४।२७॥ अनुशतिक । अनुहोड । अनुसंवत्सर । अनुसंवरण । अनुरहत् । अगारवेणु । असिहत्या । अश्वि(स्य) हत्य । अस्यहेति । अस्यहेतु । अनिषाद । अधेनु । कुरुरुत । कुरुपञ्चाल । अधिदेव । अधिभूत । इहलोक । परलोक । सर्वलोक । सर्वपुरुष । सर्वभूमि । वध्योग । प्रयोग । अभिगम । परस्त्री । पुष्करसद् । उदकशुद्ध । सूत्रनड । चतुर्विद्या । शातकुम्भ । सुखशयन । इत्यनुशतिकादिः । आकृतिगणोऽयम् । तेन राजपौरुष्यादयष्ठ्यणन्ता अत्रैव पठ्यन्ते । राजपौरुष्यम् । पारिमाण्डल्यम् । प्रातिश्राव्यम् । सार्ववैद्यम् । प्रत्ययान्तरे त्वादेरेव वृद्धिः । राजपुरुषस्यापत्यं राजपुरुषायणिः ।

११८१ गृष्ट्यादेः ॥६।१।८४॥ गृष्टि । हृष्टि । हलि । वालि । विश्रि । कुत्रि । अजवस्ति । मित्रयु इति गृष्ट्यादिः ।

११८४ यस्कादेर्गोत्रे ॥६।१।१२५॥ यस्क । लह्य । द्रुह्य । अयस्थूण । तृणकर्ण । भलन्दन एभ्यः शिवाद्यणो लुप् । खरप-अस्मान्नडाद्यायनणः । भडिल । भण्डिल । भडित । भण्डित-एभ्योऽश्वाद्यायनञः। सदामत्त । कम्बलहार । पर्णाढक । कर्णाढक । पिण्डीजङ्घ । बकसक्थ । रक्षोमुख । जङ्घारथ । उत्काश । कदुमन्थ । कदुकमन्थ । विषपुट । निकष । (किषक) कषक । उपरिमेखल । कडम । कृश । पटाक ।

क्रोष्टुपाद । क्रोष्टुमाय । शीर्षमाय । स्थगल । पदक । वर्ष्मक-एभ्योऽत इञः । पुष्करसद्-अस्माद् बाह्वादीञः । विश्रि । कुद्रि । अजवस्ति । मित्रयु । एभ्यो गृष्ट्याद्येयञः । इति यस्कादिः ।

११८६ रेवत्यादेरिकण् ॥ ६।१।८६ ॥ रेवती । अश्वपाली । मणिपाली । द्वारपाली । वृकवञ्चिन् । वृकग्राह । कर्णग्राह । दण्डग्राह । कुक्कुटाक्ष इति रेवत्यादिः ।

१२०२ कुर्वादेर्ण्यः ॥६।१।१००॥ कुरु । शङ्कु । शकन्धु । शाकभू । पथिकारिन् । मतिमत् । पितृमत् । पितृमन्तु । वाच् । हन्तृ । हृदिक । शलाका । कालाका । एरका । पदका । खदाका । केशिनी । मति । कवि । हन्ति । पिण्डी । ऐन्द्रजाली । धातुजि । वैराजकि । दामोष्णीषि । गाणकरि । कैशौरि । कापिञ्जलादि । गर्गर । हनू । मञ्जूष । अविमारक । अजमारक । चफदक । कुट । कुटल । मुर । दभ्र । सूर्पणाय । श्यावनाय । श्यावरथ । श्याप्रथ । श्यावप्रथ । श्यापत्र । श्यापुत्र । सत्यंकार । वलभीकार । कर्णकार । पथिकार । बृहतीकार । वान्तवृक्ष । आर्द्रवृक्ष । मूढ । शाक । इन । रथकार । नापित । तक्षन् । शुद्ध इति कुर्वादिः । अत्र हन्त्रन्तानां सामान्याणो हृदिकस्य वृष्ण्यणोऽपवादो ञ्यः । शलाकादीनां केशिन्यन्तानामेयणः । मानुषीनामत्वेऽणोऽपि । केशिनीशब्दस्य स्त्रीलिङ्गपाठादेव पुंवद्भावो न भवति । कैशिन्यः । पुंलिङ्गनिवृत्त्यर्थस्तु सपाठो न भवति । 'गाथिविदथिकेशिपणिगणिनः' इत्यपत्येऽण्यन्त्यस्वरादेः लुक्प्रतिषेधात् । केशिन्शब्दाद्धि ञ्यविधानेऽण् न संभवत्येव । मतिकविहन्तिपिण्डीनामेयणः । ऐन्द्रजाल्यादीनां कापिञ्जलाद्यन्तानामायनणः । गर्गरादीनामित्रः । तक्षन्शब्दस्य शुभ्रस्यैयणा ।

१२०९ तिकादेरायनिञ् ॥६।१।१०७॥ तिक । कितव । संज्ञा । बाल । शिखा । बालशिख । उरश । शाट्य । सैन्धव । यमुन्द । रूप्य । पूर्णिक । ग्राम्य । नील । अमित्र । गोकक्ष्य । कुरु । देवर । दैवर । धेवर । धैवर । देवरथ । तैतिल । शैलाल । औरश । कौरव्य । भौरिकि । भौलिकि । चौपयत । चैतयत । चैटयत । शैकयत । क्षैतयत । ध्वाज । वत । ध्वाजवत । चन्द्रमस् । शुभ । शुभ । गङ्ग । गङ्गा । वरेण्य । वन्ध्या । बिम्बा । अरद्ध । अरद्धा । आरद्ध । वह्यका । खल्य । लोमका । उदन्य । यज्ञ । नोड । आरथ्य । लङ्कव । भीत । उतथ्य । सुयामन् । उखा । खल्वका । शल्यका । जाजल । वसु । उरस् इति तिकादिः । शाटयशब्दो यञन्तो ण्यन्तो वा । शाट्यायनिः । यञन्तादायनणेवेत्येके । शाट्यायनः । औरशशब्देन क्षत्रियप्रत्ययान्तेन साहचर्यात् कौरव्यशब्दः क्षत्रियप्रत्ययान्त एव गृह्यते । अन्यस्मादित्रेव । तस्य च 'ञिदार्षादणिञोः' इति लुप् । कौरव्यः पिता । कौरव्यः पुत्रः । आयनिञस्तु 'अब्राह्मणात्' इति प्राप्तापि लुप् न भवति विधानसामर्थ्यात् । नह्येञ आयनिञो वा लुपि कश्चिद्विशेषः । कौरव्यः पिता । कौरव्यायणिः पुत्रः ।

१२३४ शकादिभ्यो ञेर्लुप् ॥ ६।१।१२० ॥ शक । यवन । जर्त । कम्बोज ।

बोल । केरल । आधारय । विधारय । उपधारय । मुरल । खस । शकादयः प्रयोगगम्याः ।

१२३७ द्रेरञणोऽप्राच्यभर्गादेः ॥ ६।१।१२३ ॥ अप्राच्यभर्गादेरिति किम् । पाञ्चाली । वैदेही । पैप्पली । मागधी । कालिङ्गी । वैदर्भी । आङ्गी । वाङ्गी । सौह्मी । पौण्ड्री । शौरमसी । पाञ्चालादयः प्राच्या राष्ट्रसरूपाः क्षत्रियाः ।

भर्गादि-भर्ग । करूष । करूश । कैकय । कश्मीर । साल्व । सुस्थाल । उरश । यौधेय । शौक्रेय । शौभ्रेय । धार्तेय । धार्तेय । ज्यावानेय । त्रिगर्त । भरत । उशीनर । इति भर्गादिः । यौधेयादिज्यावानेयान्तानां स्वार्थिकस्याञो द्रेः लुप् प्रतिषिध्यते । योधेयीनां संघादि यौधेयमिति संघाद्यणर्थम् । लुपि हि सत्यामञन्तत्वाभावात् संघाद्यण् न स्यात् । प्रकृतस्य तु अञः प्रसङ्गाभावात् न प्रतिषेधः । भरतोशीनरशब्दाद्युत्सादिषु पठ्येते । तयोरिहोपादानात् सत्यप्यणपवादे चेत्यस्मिन् उत्साद्यञं बाधित्वा द्रिसंज्ञक एवाञ् भवतीति ज्ञाप्यते । तेन भरतानां राजानो भरता उशीनराणामुशीनरा इति राज्ञि विहितस्याञ उत्तरसूत्रेण लुप् सिद्धा भवति । उत्साद्यञस्तु द्रिसंज्ञाया अभावान्न स्यात् । नापि 'यञञः' इत्यादिना प्राप्तिः राज्ञामगोत्रत्वात् ।

१२४२ वोपकादेः ॥ ६।१।१३० ॥ उपक । लमक । आभ्यां नडाद्यायनणो लुप् । भ्रष्टक । कपिष्ठल । कृष्णाजिन । कृष्णसुन्दर । पिङ्गलक । कृष्णपिङ्गल । कलशीकण्ठ । दामकण्ठ । जतुक । कनक । मदाध । अपजग्ध । अडारक । वटारक । प्रतिलोम । अनुलोम । प्रतान । अनुपद । अभिहित । अनभिहित । खारीजङ्घ । कशकृत्स्न । शलाथल । कमन्दक । कमन्तक । कवन्तक । पिञ्जूलक । अडडुक । अक्त्वक । पतञ्जल । पदञ्जल । वर्णक । पर्णक । कठेरित । एभ्योऽत इञः । कुषीतक-अत्र काश्यपेऽर्थे 'विकर्णकुषीतकात्काश्यपे' इत्येयणः । अन्यत्रेञः । लेखाभूः-अत्र शुभ्राद्येयणः । पिष्ट । सुपिष्ट । मसुरकर्ण । कर्णक । पर्णक । जटिलक । वधिरक । एभ्यः शिवाद्यणः । कठेलिति । पतञ्जलि । खरीखन । एभ्य औत्सर्गिकाणः । इत्युपकादिः ।

१२४३ तिककितवादौ द्वन्द्वे ॥ ६।१।१३१ ॥ तिककितव । उज्जककुभ । उरशलङ्कट । अग्निवेशदशेरक । शण्डिलकशकृत्स्न । उपकलमक । भ्रष्टूककपिष्ठल । कृष्णाजिनकृष्णसुन्दर । वङ्कुरभण्डीरथ । पहकनरक । बकनख । स्वगुदपरिणद्ध । (ता) लङ्कशान्तमुख । इति तिककितवादिः ।

१२५३ पैलादेः ॥ ६।१।१४२ ॥ पैल । शालङ्कि । सात्यकि । सात्यंकामि । औदन्यि । औदञ्चि । औदमज्जि । औदव्रजि । औदभ्रुञ्जि । औदमेघि । औदशुद्धि । औदकशुद्धि । दैवस्थानि । पैङ्गलौदयनि । राणि । राहक्षिति । भौलिङ्गि । ओद्राहमानि । औञ्जिहानि । इति पैलादिः ।

१२५४ प्राच्येञोऽतौल्वल्यादेः ॥६।१।१४३॥ तौल्वलि । तैल्वलि । तैल्वकि ।

धारणि । रामणि । दालीपि । दैवोति । दैवमति । दैवयज्ञि । प्राटाहति । प्रादाहति । चाफट्टकि । आसुरि । पौष्करसादि । आनुराहति । आनुति । नैमिश्रि । नैमिस्रि । नैमिशि । आशि । बान्धकि । यासि । बाद्धकि । आसिनासि । आसिबद्धकि । चौङ्कि । पौष्पि । आर्हिंसि । वैरकि । वैलकि । वैशीति । वैहति । वैकर्णि । वार्कलि । कारेणुपालि । इति तौल्वल्यादिः ।

१२६६ भिक्षादेः ॥६।२।१०॥ भिक्षा । भिक्षशब्दीऽकारान्तोऽपीत्येके । गर्भिणी । युवति । क्षेत्र । करीष । अङ्गार । चर्मन् । वर्मन् । चर्मिन् । वर्मिन् । पद्धति । सहस्र । अथर्वन् । दक्षिणा । खण्डिक । युग । वरत्रा । युगवरत्रा । हल । बन्ध । हलबन्ध । औलुक्य । इति भिक्षादिः ।

१२८४ पाशादिभ्यो ल्यः ॥६।२।२५॥ पाश । तृण । खल । धूम । अङ्गार । पोटगल । पिटक । पिटाक । शकट । हल । नल । वन इति पाशादिः ।

१२८५ श्वादिभ्योऽञ् ॥६।२।२६॥ शुनां समूहः शौवम् । अह्नामाह्नम् । दण्डिनां दाण्डम् । चक्रिणां चाक्रम् । श्वादयः प्रयोगगम्याः ।

१२८६ खलादिभ्यो लिन् ॥६।२।२७॥ खलानां समूहः खलिनी । ऊकानाम् ऊकिनी । कुटुम्बानां कुटुम्बिनी । खलादयः प्रयोगगम्याः ।

१३०६ हेमादिभ्योऽञ् ॥६।२।४५॥ हेमन् । रजत । उदुम्बर । नीवुदार । रोहितक । बिभीतक । कण्डकार । गवीधुका । पाटधी । श्यामाक । बार्हिण-इति हेमादयः । बहुवचनमाकृतिगणार्थम् ।

१३१८ द्वारादेः ॥७।४।६॥ द्वार । स्वर । स्वर् । स्वस्ति । स्वादुमृद् । व्यल्कस । श्वस् । श्वन् । स्क्यकृत । स्व । स्वाध्याय । स्वग्राम । इति द्वारादिः ।

१३२३ प्लक्षादेरण् ॥६।२।५९॥ प्लक्ष । न्यग्रोध । अश्वत्थ । इङ्गुदी । वेणु । बृहती । सगु । रु(स)कु कक्कतु इति प्लक्षादिः ।

१३३० राष्ट्रेऽनङ्गादिभ्यः ॥ ६।२।६५ ॥ अङ्ग । वङ्ग । सुह्म । पुण्ड्र इति । अङ्गादयः प्रयोगम्याः ।

१३३१ राजन्यादिभ्योऽकञ् ॥ ६।२।६६ ॥ राजन्य । दैवयातव । देवयात आवृत । आत्रीतक । वात्रव । शालङ्कायन । बाभ्रव्य । जालन्धरायण । जानंधरायण । कौन्ताल । आत्मकामेय । अम्बरीपुत्र । आम्बरीपुत्र । अम्बरीषपुत्र । वैल्ववन । शैलूषज । उदुम्बर । औदुम्बर । तैतल । संप्रिय । दाक्षि । ऊर्णनाभ । ऊर्णनाभि । आर्जुनायन । विराट । मालव । त्रिगर्त । इति राजन्यादिः । बहुवचनमाकृतिगणार्थम् ।

१३३३ भौरिक्यैषुकार्यादिर्विधभक्तम् ॥ ६।२।६८ ॥ भौरिकि । भौलिकि । चौपयत । चौदयत । चैटयत । चैकयत । सैकयत । क्षैतयत । काणेय । वालिकाग्र । वाणिजक इति भौरिक्यादिः ।

ऐषुकारि । सारसायन । चान्द्रायण । तार्क्ष्यायण । द्याक्षायण । ऽयाक्षायण । द्यक्षायण । ऽयक्षायण । औलायन । सौवीर । दासमित्रि । दासमित्रायण । शौद्रकायण । शयण्ड । शाण्ड । शायाण्ड । शायण्डायन । खादायन । गौ(मा)लुकायन । विश्व । वैश्वधेनव । वैश्वमाणव । वैश्वदेव । तुण्ड । देव । तुण्डदेव । शायाण्डी । शायण्डी । वायौविद इत्यैषुकार्यादिः ।

१३३९ मध्वादेः ॥६।२।७३॥ मधु । विस । स्थाणु । ऋषि । इक्षु । वेणु । कर्कन्धु । कर्कन्धू । शमी । करीर । हिम । किसर । सार्पण । रुवत् । पार्दा । कीशरु । इष्टका । पार्दाकी । शरु । शुक्ति । आसुति । सुत्या । आसन्दी । शकली । वेट । पीडा । अक्षशिल । अक्षशिला । आमिषी । इति मध्वादिः ।

१३४५ रोऽश्मादेः ॥६।२।७९॥ अश्मन् । यूष । ऊष । यूथ । मीन । गुद । दर्भ । कूट । गुहा । वृन्द । नग । कण्ड । गह्व । कन्द । पामन् इत्यश्मादिः ।

१३४६ प्रेक्षादेरिन् ॥६।२।८०॥ प्रेक्षा । फलका । बन्धुका । धुवका । धुवका । क्षिपका । कूप । पुक । धुक । इकट । कङ्कट । संकट । मह । गर्त । न्यग्रोध । परिवाप । यवाष । हिरण्य इति प्रेक्षादिः ।

१३४७ तृणादेः सल् ॥६।२।८१॥ तृण । नद । जन । पर्ण । वर्ण । अर्णस् । वरण । विल । तुस । वन । पुल इति तृणादिः ।

१३४८ काशादेरिलः ॥ ६।२।८२ ॥ काश । वाश । अश्वत्थ । पलाश । पीयूक्षा । पाश । विश । तृण । नल । वन । मलवम । कर्दम । कर्पूर । बर्बर । बर्तूल । शीपाल । कण्टक । गुहा । कपित्थ इति काश्यादिः ।

१३४९ अरीहणादेरकण् ॥ ६।२।८३ ॥ अरीहण । खण्ड । खण्डू । द्रुघण किरण । खदिर । भगल । भलन्दन । उलुन्द । खावुरायण । खापुरायण । खानुरायण । कौष्टायन । कौद्रायण । भाल्लायण । त्रैगर्तायन । रैवत । रायस्पोष । विपथ । विपाश । उद्दण्ड । उदञ्चन । पैडायन । जाम्बवत । जाम्बवस् । शिंशपा । वीरण । धौमतायन । यज्ञदत्त । सुयज्ञ । बधिर । बिल्व । जम्बू । साम्बुरायण । कश । कृत्स्न । सुशर्मन इति अरीहणादिः ।

१३५० सुपन्थ्यादेर्ऽयः ॥६।२।८४॥ सुपन्थिन् । सुवन्थिन् । संकाश । कम्पील । सुपरि । यूप । अश्मन् । अश्व । अङ्ग । नाथ । कुण्ट । कुट । कूट । मादित । मृष्टि । आगस्त्य । शूर । विरन्त । विकर । नासिका । प्रगदिन् । मगदिन् । कटिद । कटिप । कटिव । चूदार । मदार । मजार । कोविदार । कश्मीर । शूरसेन । कुम्भ । सीर । सुर । कसमल । अंस । नासा । रोमन् । लोमन् । तीर्थ । पुलिन । मलिन । अगस्ति । सुपथिन् । दश । नल । सकर्ण । कलिव । खडिव । गडिव । इति सुपन्थ्यादिः ।

१३५१ सुतंगमादेरिञ् ॥ ६।२।८५ ॥ सुतंगम । मुनिवित्त । विप्रचित्त ।

महावित्त । महापुत्र । शुक्र । श्वेत । विघ्र । श्वन् । विघ्रश्वन् । अर्जुन । अजिर । गदिक । बीज । वाप । बीजवाप । कर्ण इति सुतंगमादिः ।

१३५२ बलादेर्यः ॥६।२।८६॥ बल । पुल । मुल । उल । कुल । दुल । नल । दल । उरल । लकुल । वन इति बलादिः ।

१३५३ अहरादिभ्योऽञ् ॥६।२।८७॥ अहन् । लोमन् । वेमन् । गङ्गा । इत्यहरादिराकृतिगणः ।

१३५४ सख्यादेरेयण् ॥ ६।२।८८ ॥ सखि । सखिदत्त । दत्त । अग्नि । अग्निदत्त । वादस्त । वायुदत्त । गोफिल । भल्ल । भल्लिपाल । चक्र । चक्रवाक । छगल । अशोक । सीरक । सरक । वीर । वीरसरस । समल । रोह । तमाल । कदल । करवीर । कुशीरक । सुरसा । सरम । सपूल इति सख्यादिः ।

१३५५ पन्थ्यादेरायनण् ॥६।२।८९॥ पथिन् । पक्ष । तुष । अण्डक । वलिक । पाक । चित्र । चित्रा । अतिश्व । कुम्भ । सीरक । लोमन् । रोमन् । लोमक । हंसक । सकर्ण । सकर्णक । सरक । सहक । सरस । समल । अंशुक । कुण्ड । यमल । बिल । हस्त । हस्तिन् । सिंहक इति पन्थ्यादिः ।

१३५६ कर्णादेरायनिञ् ॥६।२।९०॥ कर्ण । वसिष्ठ । अर्क । लुस । अर्कलुस । द्रुपद । आनडुह । पाञ्चजन्य । रिफग् । रिफज । कुलिश । आकनीकुम्भ । जित्वन् । जित्य । जैत्र । आण्डीवत् । जीवन्त इति कर्णादिः ।

१३५७ उत्करादेरीयः ॥६।२।९१॥ उत्कर । संकर । संपर । संपल । सफर । संफल । संफुल । पिप्पल । मूल । पिप्पलमूल । अर्क । अश्मन् । सुवर्ण । सुपर्ण । पर्ण । सुपर्णपर्ण । हिरण्यपर्ण । इडा । अजिर । इडाजिर । अग्नि । तिक । कितव । आतप । अनेक । पलाश । तिककितक । वातपान । एक । पलाश । अनेकपलाश । अंशक । त्रैवण । पिचुक । अश्वत्थ । काश । क्षुद्रा । काशक्षुद्रा । भल्ला । विशाल । शाला । अरण्य । अजिन । अरण्याजिन । जन्यजनक । आर्जन । खण्डाजिन । चत्वण । उत्कोश । क्षान्ध । रु(ख)ण्ड । खदिर । सूपर्णाय । श्यावनाय । नैवाकव । नितान्त । वृक्ष । नितान्तवृक्ष । आर्द्रवृक्ष । इन्द्रवृक्ष । अग्निवृक्ष । मन्त्रणार्ह । अरीहण । वातागर । विजिगीषा । संस्रव । रोहिद्गर्त । नीवापक । अणक । निशान्त । खल । जिन । वैराणक । अवरोहित । जन्य । इन्द्रवर्म । गर्त । इत्युत्करादिः ।

१३५८ नडादेः कीयः ॥ ६।२।९२ ॥ नड । प्लक्ष । बिल्व । वेणु । वेत्र । वेतस । त्रि । तक्षन् । इक्षुकाष्ठ । कपोत । कुञ्च । कुञ्चाशब्दस्यात एव गणपाठात् ह्रस्वत्वम् । इति नडादिः ।

१३५९ कृशाश्वादेरीयण् ॥६।२।९३॥ कृशाश्व । अरिष्ट । अरिष्य । वेष्य । विशाल । रोमक । लोमक । रोमश । शवल । शिवल । कूट । चर्चुल । पूगर । शूकर । धूकर । पूकर । संदश । सदश । पुरगा । पूरवा । धूम । धूम्र ।

विनीत । आविनत । विकूच्या । अयस् । सायस् । इरस् । उरस् । अरुष्य । ऐरास । इर । आभ । मुद्गल । मौद्गल्य । सुवर्चल । प्रतर । अजिन । अविनत । विकुट्याङ्कुश । पराशर इति कृशाश्वादिः ।

१३६० ऋश्यादेः कः ॥६।२।९४॥ ऋश्य । न्यग्रोध । शर । निलीन । निवात । विनद्ध । सित । शित । नद्ध । निनद्ध । परिगूढ । उपगूढ । उत्तर । अश्मन् । उत्तराश्मन् । स्थूल । बाहु । स्थूलबाहु । खदिर । अरदु । अनडुह् । परिवंश । खण्ड । वोरण । कर्दम । शर्करा । निबन्ध । अशनि । खण्ड । दण्ड । वेणु । परिवृत वेश्मन् । अंशु इति ऋश्यादिः ।

१३६१ वराहादेः कण् ॥ ६।२।९५ ॥ वराह । पलाश । विनद्ध । निबद्ध । स्थूल । बाहु । स्थूलबाहु । खदिर । विदग्ध । विजग्ध । विभग्न । विभक्त । पिनद्ध । निमग्न इति वराहादिः ।

१३६२ कुमुदादेरिकः ॥६।२।९६॥ कुमुद । इक्कट । निर्यास । कङ्कट । संकट । गर्त । परिवाप । यवाष । कूप । विकङ्कत । बल्वज । अश्वत्थ । न्यग्रोध । बीज । दशा । शाल्मलि । मुनि । स्थल । ग्राम इति कुमुदादिः ।

१३६३ अश्वत्थादेरिकण् ॥६।२।९७॥ अश्वत्थ । कुमुद । गोमठ । रथकार । दाश । ग्राम । घास । कुन्द । शाल्मलि । मुनि । स्थल । मुनिस्थल । कुट । मुचुकर्ण । मुचुकूर्ण । कुण्डल । शुचिकर्ण इत्यश्वत्थादिः । इतिकरणाद् यथादर्शनं प्रत्ययव्यवस्थायामर्थप्रकृत्युपादानं प्रपञ्चार्थम् ।

१३८६ न्यायादेरिकण् ॥६।२।११८॥ न्याय । न्यास । लोकायत । पुनरुक्त । परिषद् । चर्चा । क्रमेतर । श्लक्ष्ण । संहिता । पदे । पद । क्रम । संघट । संघटा । वृत्ति । संग्रह । आयुर्वेद । गण । गुण । स्वागम । इतिहास । पुराण । भारत । ब्रह्माण्ड । आख्यान । द्विपदा । ज्योतिष । गणित । अनस्त । लक्ष्य । लक्षण । अनुलक्ष्य । सुलक्ष्य । वसन्त । वर्षा । शरद् । वर्षाशरद् । हेमन्त । शिशिर । प्रथम । चरम । प्रथमगुण । चरमगुण । अनुगुण । अथर्वन् । आथर्वण इति न्यायादिः ।

१४१४ नद्यादेरेयण् ॥६।३।२॥ नदी । मही । वाराणसी । श्रावस्ती । कौशाम्बी । वनकौशाम्बी । वनवासी । काशफरी । खादिरी । पूर्वनगर । पूर्वनगरी । पुर । वन । गिरि । पुर । वनगिरि । पूर्वनगरी । पाषा । मावा । माल्वा । दार्वा । सेतकी । सैतवी । इति नद्यादिः ।

१४२२ कत्र्यादेश्चैयकञ् ॥ ६।३।१० ॥ कत्रि । पुष्कर । पुष्कल । पौदन । उम्पि । उम्भि । औम्भि । कुम्भी । कुण्डिना । नगर । महिष्मती । वर्मवती । चर्मण्वती इति कत्र्यादिः ।

१४२३ कुण्ड्यादिभ्यो यलुक् च ॥६।३।११॥ कुण्ड्या । कुण्या । उक्ष्या । भाण्ड्या । ग्रामकुड्या । तृण्या । वन्या । पल्या । पुल्या । मुल्या । इति कुण्ड्यादिः ।

१४४७ व्यादिभ्यो णिकेकणौ ॥६।३।३४॥ वैकालिकः। वैकालिका। वैकालिकी। आनुकालिकः। आनुकालिका आनुकालिकी। ऐदंकालिका। ऐदंकालिकी। धौमकालिका। धौमकालिको। आपत्कालिका। आपत्कालिको। सांपत्कालिका। सांपत्कालिकी। कौपकालिका। कौपकालिकी। क्रौधकालिका। क्रौधकालिको। और्ध्वकालिका। और्ध्वकालिकी। पौर्वकालिका। पौर्वकालिकी। तात्कालिका। तात्कालिकी। क्रौरकालिका। क्रौरकालिकी व्यादयः प्रयोगगम्याः।

१४४८ काश्यादेः ॥६।३।३५॥ काशि। चेदि। देवदत्त। सांयाति। सांवाह। अच्युत। मोदमान। श्वकुलाद। शकुलाद। हस्तिकर्षू। कौनाम। हिरण्य। करण। हैहिरण्यः करणे। अरिंदम। सधमित्र। दाशमित्र। सिन्धुमित्र। दासमित्र। छागमित्र। दासग्राम। शौवावतान। गौवाशन। गौवासन। तारङ्गि। भारङ्गि। युवराज। उपराज। देवराज इति काश्यादिः।

१४६२ धूमादेः ॥६।३।४६॥ धूम। षडण्ड। षडाण्ड। अवतण्ड। त्वण्डक। वतण्डव। शशादन। अर्जुन। आर्जुनाव। दाण्डायन। स्थली। दाण्डायनस्थली। मानकस्थली। आनकस्थली। माहकस्थली। मद्रकस्थली। माषस्थली। घोषस्थली। राजस्थली। अट्टस्थली। मानस्थली। माणवकस्थली। राजगृह। सत्रासाह। सात्रासाह। भक्ष्यादी। भक्ष्यली। भक्ष्याली। भद्राली। मद्रकुल। अज्ञीकुल। व्याहाव। व्याहाव। ह्रियाहाव। त्रियाहाव। संस्फोय। वर्बड। गर्त। वर्ज्य। शकुन्ति। विनाद। इमकान्त। विदेह। आनर्त। वादूर। खाडूर। माठर। पाठेय। पाथेय। घोष। घोषमित्र। शिष्य। वणिय। पल्ली। अराज्ञी। आराज्ञी। धार्तराज्ञी। धार्तराष्ट्री। धार्तराष्ट्र। अवया। तीर्थकुक्षि। समुद्रकुक्षि। द्वीप। अन्तरीप। अरुण। उज्जयनी। दक्षिणापथ। साकेत इति धूमादिः। दाण्डायनस्थलीत्यादीनां दुसंज्ञकानामोकारान्तानां वादूरखाडूरमाठराणां च पाठोऽप्राच्यार्थः। प्राच्यानां त्वीद्रोपान्त्यलक्षणोऽकञ् सिद्ध एव। विदेहानर्तयो राष्ट्रेऽकञ् सिद्ध एव। सामर्थ्यादेशार्थः पाठः। विदेहानामानर्तानां च क्षत्रियाणामिदं वैदेहकम्। आनर्तकम्। पाठेयपाथेययोर्यापान्त्यत्वादकञ् सिद्धोऽदेशार्थः पाठः। पठेः पठाया वापत्यं पाठेयः। तस्येदं पाठेयकम्।

१४७१ कच्छादेर्नृन्नृस्थे ॥६।३।५५॥ कच्छ। सिन्धु। वर्णु। मधुमत्। कम्बोज। साल्व। कुरु। अनुषण्ड। अनूषण्ड। कश्मीर। विजापक। द्वीप। अनूप। अजवाह। कुलूत। रङ्गु (ङ्कु)। गन्धार। साल्वेय। यौधेय। सस्थाल। सिन्ध्वन्त इति कच्छादिः। कच्छादयो ये बहुविषया राष्ट्रशब्दास्तेभ्यो 'बहुविषयेभ्यः' इत्यकञ् सिद्ध एव। उत्तरेण त्वणा बाधा मा भूदिति पुनर्विधीयते। वर्णुसिन्धुभ्याम् 'उवर्णादिकण्' इतीकणितदपवादे कच्छाद्यणि कुरोः 'कुरुयुगन्धराद्या' इति विकल्पे विजापकस्य कोपान्त्यलक्षणेऽणि कच्छस्यौत्सर्गिकाणि प्राप्तेऽकञ्विधिः। अपरे कच्छमपि बहुविषयं राष्ट्रशब्दमाहुस्तदा पूर्वोक्तमेव पाठफलम्।

१४७९ गहादिभ्यः ॥६।३।६३॥ गह। अन्तस्थ। अन्थस्था। सम। विषम। उत्तम। अङ्गमगध। शुक्लपक्ष। पूर्वपक्ष। अपरपक्ष। कृष्णशकुन। अधमशाख। उत्तमशाख। समानशाख। एकशाख। समानग्राम। एकग्राम। एकवृक्ष। एकपलाश। इष्वग्र। दन्ताग्र। इष्वनीक। अवस्यन्द। कामप्रस्थ। सौप्रख्य। खाडायनि। काठेरणि। काठेरिणि। लावेरणि। लावेरिणि। लावीरणि। शैशिरि। शौङ्गि। शौङ्गिशैशरि। आसुरि। आहिंसि। आमिक्षि। व्याडि। भौङ्गि। भौर्जि। भौजि। आश्वत्थि। आश्वत्थ। औद्गाहमानि। औपबिन्दवि। आग्निशर्मि। दैवशर्मि। श्रौति। बाटारकि। वाल्मीकि। क्षैमधृत्वि। उत्तर। अन्तर। मुखतस्। पार्श्वतस्। एकतस्। अनन्तर। आनृशंसि। साटि। सौमित्रि। परपक्ष। स्वक। देवक। इति गहादयः। बहुवचनमाकृतिगणार्थम्।

१४८२ वेणुकादिभ्य ईयण् ॥६।३।६६॥ वैणुकीयः। वैत्रकीयः। औत्तरपदीयः। औत्तरीयः। औत्तरकीयः। प्रास्थीयः। प्रास्थकीयः। माध्यमकीयः। माध्यमिकीयः। नैपुणकीयः। बहुवचनं प्रयोगानुसरणार्थम्।

१४९४ अध्यात्मादिभ्य इकण् ॥६।३।७८॥ अध्यात्मं भवमाध्यात्मिकम्। एवमाधिदैविकम्। आधिभौतिकम्। और्ध्वदमिकः। और्ध्वदमिकः। और्ध्वदेहिकः और्ध्वदैहिकः। अत एव पाठादूर्ध्वशब्दस्य दमदेहयोर्वा मोऽन्तः केचित् ऊर्ध्वदमौर्ध्वदेहावनुशतिकादिषु पठन्त उभयपदवृद्धिमिच्छन्ति-और्ध्वदामिकः। और्ध्वदैहिकः। ऊर्ध्वमौहूर्तिकः। अकस्मात् हेतुशून्यः कालः तत्र भवमाकस्मिकम्। अमुष्मिन् परलोके भवम् आमुष्मिकम्। एवमामुत्रिकम्। पारत्रिकम्। इह भवमैहिकम्। शैषिकम्। पाठसामर्थ्यात् सप्तम्या अलुप्। अध्यात्मादयः प्रयोगगम्याः।

१५०६ भर्तुसंध्यादेरण् ॥ ६।३।८९॥ संध्या। संधिवेला। अमावास्या। त्रयोदशी। चतुर्दशी। पञ्चदशी। पौर्णमासी। प्रतिपद्। शश्वत् इति संध्यादिः।

१५१४ कोऽश्मादेः ॥६।३।९३॥ अश्मन्। अशनि। आकर्ष। त्सरु। पिशाच। पिचण्ड। पाद। शकुनि। निचय। जय। नय। ह्राद। ह्लाद। इत्यश्मादिः।

१५४३ दिगादिदेहांशाद्यः ॥६।३।१२४॥ दिश्। वर्ग। पूग। गण। यूथ। पक्ष। धाय्या। मित्र। धाय्यमित्र। मेधा। न्याय। अन्तर्। पथिन्। रहस्। अलीक। उख। उखा। साक्षिन्। आदि। अन्त। मुख। जघन। मेघ। वंश। अनुवंश। देश। काल। वेश। आकाश। अप् इति दिगादिः। मुखजघनवंशानुवंशानाम् अदेहांशार्थः पाठः। सेनाया यन्मुखं तत्र भवो मुख्यः। सेनाया यज्जघनं तत्र भवो जघन्यः। वंशोऽन्वयस्तत्र भवो वंश्यः। एवमनुवंश्यः।

१५५५ परिमुखादेरव्ययीभावात् ॥६।३।१३६॥ परिमुख। परिहनु। पर्योष्ठ। पर्युलूखल। परिरथ। परिसिर। परिसीर। उपसीर। अनुसीर। उपस्थूण। उपस्थूल। उपकलाप। उपकपाल। अनुपथ। अनुगङ्ग। अनुतिल। अनुसीत। (अनुशीत) अनुमाष। अनुयव। अनुयूप। अनुवंश। अनुपद। इति परिमुखादिः। अनुवंशादिगादित्वाद्योऽपि।

१५६९ शिक्षादेश्चाण् ॥६।३।१४८॥ शिक्षा । ऋगयन । पद । व्याख्यान । पदव्याख्यान । छन्दोव्याख्यान । छन्दोमान । छन्दोभाष । छन्दोविचिति । छन्दोविचिती । छन्दोविजिति । न्याय । पुनरुक्त । निरुक्त । व्याकरण । निगम । वास्तुविद्या । अङ्गविद्या । क्षत्रविद्या । त्रिविद्या । विद्या । उत्पात । उत्पाद । संवत्सर । मुहूर्त । निमित्त । उपनिषद् । ऋषि । यज्ञ । चर्चा । क्रमेतर । ऋक्ष्ण । इति शिक्षादिः । बहुस्वराणामदुसंज्ञकानामुपादानं प्रायोग्रहणस्य प्रपञ्चः॥

१५७६ शुण्डिकादेरण् ॥६।३।१५४॥ शुण्डिका । उदपान । पर्ण । कृकण । उलप । तृण । तीर्थ । स्थण्डिल । उपल । उदक । भूमि । पिप्पल इति शुण्डिकादिः ।

१५९७ रैवतिकादेरीयः ॥६।३।१७०॥ रैवतिक । गौरग्रीवि । स्वापिशिष्य । क्षैमधृति । औदमेघि । औदवाहि । वैजवापि । इति रैवतिकादिः ।

१६१४ शौनकादिभ्यो णिन् ॥६।३।१८६॥ शौनक । शाङ्गरव । वाजसनेय । शापेय । काकेय । (शाफेय) शाष्पेय । शाल्फेय । स्कन्ध । स्कम्भ । देवदर्श । रज्जुभार । रज्जुतार । रज्जुकण्ठ । दामकण्ठ । कठ । शाठ कुशाठ । कुशाप । कुशायन । आश्वपञ्चम । तलवकार । परुषांसक । पुरुषांसक । हरिद्र । तुम्बुरु । उपलप । आलम्बि । पलिङ्ग । कमल । ऋचाभ । आरुणि । ताण्ड्य । श्यामायन । खादायन । कषायतल । स्तम्भ इति शौनकादयः ।

१६२२ नाम्नि मक्षिकादिभ्यः ॥६।३।१९३॥ मक्षिका । सरघा । गर्मुन् । नर्मुका । पुत्तिका । क्षुद्रा । भ्रमर । वटर । वातप इति । मक्षिकादयः प्रयोगगम्याः ।

१६२३ कुलालादेरकञ् ॥६।३।१९४॥ कुलाल । वरुट । कर्मार । निषाद । चण्डाल । सेना । सिरन्ध्र । देवराजन् । देवराज । परिषद् । वधू । भद्र । अनड्वह् । ब्रह्मन् । कुम्भकार । अश्वपाक । रुरु इति कुलालादिः ॥

१६२९ शिशुक्रन्दादिभ्य ईयः ॥६।३।२००॥ शिशुक्रन्द । यमसभ । इन्द्रजनन । प्रद्युम्नप्रत्यागमन । प्रद्युम्नोदयन । सीताहरण । सीतान्वेषण । शिशुक्रन्दादयः प्रयोगतोऽनुसर्तव्याः ॥

१६४३ शण्डिकादेर्ण्यः ॥६।३।२१५॥ शण्डिक । कूचवार । सर्वसेन । सर्वकेश । शङ्ख । शक । शट । रक । चरण । शंकर । बोध इति शण्डिकादिः ॥

१६४४ सिन्ध्वादेरञ् ॥६।३।२१६॥ सिन्धु । वर्णु । मधुमत् । कम्बोज । कुलूज । गन्धार । कश्मीर । सल्व । किष्किन्ध । गब्दिक । उरस् । दरद् । ग्रामणी । काण्डवरक । सल्वान्तेभ्यो नृनृस्थाकञोऽपवादोऽञ् । शेषेभ्यो बहुविषयराष्ट्रलक्षणस्याकञो ग्रामणीकाण्डवरकाभ्यामीयस्य । तक्षशिलादिभ्यस्तु अञ् नोच्यते उत्सर्गेणैव सिद्धत्वात् ॥

१६५९ पर्पादेरिकट् ॥ ६।४।१२ ॥ पर्प । अश्व । अश्वत्थ । रथ । अर्घ्य । व्याल । व्यास इति पर्पादिः ॥

१६६२ वेतनादेर्जीवति ॥६।४।१५॥ वेतन । वाह । अर्धवाह । धनुस् । दण्ड । धनुर्दण्ड । जाल । वेश । उपवेश । प्रेषण । भृति । उपवेष । उपस्था । उपास्ति । उपस्थान । सुख । शय्या । सुखशय्या । शक्ति । उपनिषद् । उपरिजन । स्विज । स्फिग । बाल । पुतचाल । उपदेश । पाद । उपहस्त । इति वेतनादिः॥

१६६७ निर्वृत्तेऽक्षद्यूतादेः ॥ ६।४।२० ॥ अक्षद्यूत । जङ्घाप्रहत । जङ्घाप्रहृत । जङ्घाप्रहार । पादस्वेद । पादस्वेदन । कण्टकमर्द । कण्टकमर्दन । शर्करामर्दन । गत । आगत । गतागत । यात । उपयात । यातोपयात । गतानुगत । अनुगत इत्यक्षद्यूतादिः ॥

१६७० हरत्युत्सङ्गादेः ॥६।४।२३॥ उत्सङ्ग । उडुप । उडुप । उत्पुत । उत्पुट । पिटक । पिटाक इत्युत्सङ्गादिः ॥

१६७१ भस्त्रादेरिकट् ॥६।४।२४॥ भस्त्रा । भरट । भरण । शीर्षभार । शीर्षेभार । अङ्गभार । अङ्गेभार । अंसभार । अंसेभार इति भस्त्रादिः ॥

१६८५ परदारादिभ्यो गच्छति ॥ ६।४।३८ ॥ परदार । गुरुदार । गुरुतल्प । सभर्तृका । भ्रातृजाया । इत्यादयः परदारादयः प्रयोगगम्याः॥

१६८९ सुस्नातादिभ्यः पृच्छति ॥६।४।४३॥ सुस्नात । सुखरात्र । सुखशयन । सुखशय्या इत्यादयः प्रयोगगम्याः सुस्नातादयः ॥

१६९० प्रभूतादिभ्यो ब्रुवति ॥६।४।४३॥ प्रभूत । पर्याप्त । विपुल । विचित्र । निपुण । स्वर्गमन । स्वागत । स्वस्ति इत्यादयः प्रयोगगम्याः प्रभूतादयः ॥

१६९१ माशब्द इत्यादिभ्यः ॥ ६।४।४४ ॥ माशब्द । कार्यशब्द । नित्यशब्द इत्यादयः प्रयोगगम्याः माशब्दादयः ॥

१६९८ ऋन्नरादेरण् ॥ ६।४।५१ ॥ नर । महिषी । प्रजावती । प्रजापति । विलेपिका । प्रलेपिका । अनुलेपिका । वर्णक । पेषिका । वर्णकपेषिका । मणिपाली । पुरोहित । अनुचारक । अनुवाक । यजमान । होतृयजमान । इति नरादिः ॥

१७०२ किशरादेरिकट् ॥ ६।४।५५ ॥ किशर । तगर । स्थगर । उशीर । हरिद्रा । हरिद्रु । हरिद्रुपर्णी । गुग्गुलु । नलद इति किशरादिः ॥

१७०७ अङ्स्थाच्छत्रादेरञ् ॥ ६।४।६० ॥ छत्र । चुरा । तपस् । कर्मन् । शिक्षा । चुक्षा । भिक्षा । भक्षा । तितिक्षा । बुभुक्षा । विध्वधा । उदस्थान । उपस्थान । पुरोडा । कृषि । मन्द्र । सत्य । अनृत । विशिख । विशिखा । प्ररोह इति छत्रादिः ॥

१६१२ वेष्टयादिभ्यः ॥६।४।६५॥ इष्टि । ईषा । कम्पन । अम्भस् । दण्ड इत्यादयः प्रयोगगम्या इष्टयादयः ।

१७२० नवयज्ञादयोऽस्मिन् वर्तन्ते ॥ ६।४।७३ ॥ नवयज्ञ । पाकयज्ञ इति नवयज्ञादयः प्रयोगगम्याः ॥

१७२४ निकटादिषु वसति ॥ ६।४।७७ ॥ निकट । वृक्षमूल । श्मशान । अभ्यवकाश । आवसथ इति निकटादयः प्रयोगगम्याः ॥

१७२८ गोदानादीनां ब्रह्मचर्ये ॥६।४।८१॥ गोदान । आदित्यव्रत । महानाम्नी इति गोदानादयः प्रयोगगम्याः ।

१७३० देवव्रतादीन् ङिन् ॥३।४।८३॥ देवव्रत । तिलव्रत । अवान्तरदीक्षा । महाव्रत इत्यादयो देवव्रतादयः प्रयोगगम्याः ॥

१७४१ तस्मै योगादेः शक्ते ॥३।४।९४॥ योग । सन्ताप । सन्नाह । संग्राम । संयोग । संपराय । संघात । संपाद । संपादन । संक्रम । संपेश । संवेश । संमोदन । निष्पेष । निःसर्ग । निर्घोष । निसर्ग । विसर्ग । उपसर्ग । प्रवास । उपवास । सक्तु । मांस । ओदन । मांसौदन । सक्तुमांसौदन इति योगादिः ॥

१७४६ व्युष्टादिष्वण् ॥ ६।४।९९ ॥ व्युष्ट । नित्य । निष्क्रमण । प्रवेशन । तीर्थ । संग्राम । संघात । अग्निपद । पीलुमूल । प्रवास । उपवास इति व्युष्टादिः । आकृतिगणोऽयम् ॥

१७६८ चूडादिभ्योऽण् ॥६।४।११९॥ चूडा । चूला । उपनयन । श्रद्धा इति चूडादयः प्रयोगगम्याः ॥

१७७० उत्थापनादेरीयः ॥६।४।१११॥ उत्थापन । उपस्थापन । अनुप्रवचन । अनुवाचन । अनुवदन । अनुवादन । अनुपान । अनुवासन । आरम्भण । समारम्भण इत्युत्थापनादिः ॥

१७७२ स्वर्गस्वस्तिवाचनादिभ्यो यलुपौ ॥६।४।१२३॥ स्वर्ग । यशस् । आयुस् । काम । धन इत्यादयः प्रयोगगम्याः स्वर्गादयः ॥

स्वस्तिवाचन । शान्तिवाचन । पुण्याहवाचन इत्यादयः प्रयोगगम्याः स्वस्तिवाचनादयः ॥

१७७४ ऋत्वादिभ्योऽण् ॥ ६।४।१२५ ॥ ऋतु । उपवस्तृ । प्राशित्र इति ऋत्वादयः प्रयोगगम्याः ॥

१८०९ द्विस्वरब्रह्मवर्चसाद्योऽसंख्यापरिमाणाश्वादेः ॥ ६।४।१५५ ॥ अश्व । गण । वसु । वस्त्र । ऊर्णा । उमा । भङ्गा । वर्षा । अश्मन् इत्यश्वादिः ॥

१८२० वंशादेर्भाराद्धरब्रह्मदावहत्सु ॥ ६।४।१६६ ॥ वंश । कुट । कुटज । वल्वज । मूल । स्थूणा । अक्ष । अश्मन् । इक्षु । खट्वा । श्लक्ष्ण इति वंशादिः॥

१८३२ दण्डादेर्यः ॥६।४।१७८॥ दण्ड । मुसल । मेधा । वध । मधुपर्क । अर्घ । मेघ । उदक । इभ । कशा । युग इति दण्डादिः ॥

१८३६ छेदादेर्नित्यम् ॥६।३।१८२॥ छेद । भेद । द्रोह । दोह । नर्त । गोनर्त । कर्ष । विकर्ष । प्रकर्ष । प्रयोग । विप्रयोग । संप्रयोग । प्रेक्षण । संप्रश्न । विप्रश्न इति छेदादिः ॥

१८४४ वामाद्यादेरीनः ॥७।१।४॥ वामधुरा । सर्वधुरा । उत्तरधुरा । दक्षिणधुरा इति वामादयः प्रयोगगम्याः ॥

१८६० प्रतिजनादेरीनञ् ॥७।१।२०॥ प्रतिजन । अनुजन । विश्वजन । पाञ्चजन । महाजन । इदंयुग । संयुग । समयुग । परयुग । परकुल । परस्यकुल । अमुष्यकुल । इति प्रतिजनादिः ॥

१८६१ कथादेरिकण् ॥७।१।२१॥ कथा । विकथा । विश्वकथा । संकथा । वितण्डा । जनेवाद (जनवाद) । भृशोवाद । जनभृशोवाद । वृत्ति । संग्रह । गुण । गण । आयुर्वेद । गुड । कुल्माष । गुल्मास । इक्षु । सक्तु । वेणु । अपूप । मांसौदन । मांस । ओदन । संग्राम । संघात । संवाह । प्रवास । निवास । उपवास इति कथादिः ॥

१८६९ हविरन्नभेदापूपादेर्यो वा ॥७।१।२९॥ अपूप । तण्डुल । ओदन । पृथुक । अभ्यूष । अभ्योष । अवोष । किण्व । मुसल । कटक । शकट । वर्णवेष्टक । ईर्गल । इल्वल । स्थूणा । यूप । सूप । दीप । प्रदीप । अश्वपत्र इत्यपूपादिः ॥

१८७० उवर्णयुगादेर्यः ॥७।१।३०॥ युग । हविस् । अष्टका । बर्हिस् । मेधा । स्रुच् । बीज । कूप । क्षर । अक्षर । खद । स्खद । विष । दाश । खर । असुर । दर । अध्वन् । गो इति युगादिः ॥

१८८१ क्षुभ्नादीनाम् ॥२।३।९६॥ क्षुभ्ना । तृप्नु । आचार्यानी । आचार्यभोगीन । सर्वनामन् । नूनमन । नूनमेत्येके । नृत्त । नर्तन । नट । नद । नड । इत्येके । नदी । नगर । निवेश । निवास । अग्नि । अनूप । नन्दिन् । नन्दन । गहन । नदन । ख्याग् इति क्षुभ्नादिः ॥ बहुवचनमाकृतिगणार्थम् ।

१९०० प्राक्त्वादगडुलादेः ॥७।१।५६॥ गडुल । विशस्त । दायाद । बालिश । संवादिन् । बहुभाषिन् । शीर्षघातिन् । शीर्षाघातिन् । कमण्डलु इति गडुलादिः ।

१०१ नञ्तत्पुरुषादबुधादेः ॥७।१।५७॥ बुध । चतुर । संगत । लवण । वड । कत । रस । लस । यथा । तथा । यथातथ । यथापुर । ईश्वर । क्षेत्रज्ञ । संवादिन् । संवेशिन् । बहुभाषिन् । शीर्षघातिन् । समस्थ । विषमस्थ । पुरस्थ । परमस्था मध्यस्थ । दुष्पुरुष । कापुरुष । विशाल । इति बुधादिः । पभ्यो नञ्तत्पुरुषेभ्यो राजादित्वात् टच्प्रत्ययः ॥ गडुलविशस्तदायादानामपि पाठं केचित् इच्छन्ति । अन्ये तु बुधादीनामष्टानामेव प्रतिषेधमिच्छन्ति । एषामेव च विकल्पमपरे ।

१९०२ पृथ्वादेरिमन् वा ॥७।१।५८॥ पृथु । मृदु । पटु । महि । तनु । लघु । बहु । साधु । आशु । उरु । गुरु । खण्ड । पाण्ड । बहुल । चण्ड । खण्ड । अकिंचन । बाल । होड । पाक । वत्स । मन्द । स्वादु । ऋजु । वृष । कटु । ह्रस्व । दीर्घ । क्षिप्र । क्षुद्र । प्रिय । महत् । अणु । चारु । वक्र । वृद्ध । काल । तृप्त । इति पृथ्वादिः ।

१९०७ वर्णदृढादिभ्यष्ट्यण् च वा ॥७।१।५९॥ दृढ । वृढ । परिवृढ । कृश । भृश । चुक्र । शुक्र । आम्र । ताम्र । अम्ल । लवण । शीत । उष्ण । तृष्ण । जड । बधिर । मूक । मूर्ख । पण्डित । मधुर । विधात । विलात । विमनस् । विशारद । विमति । संमति । संमनस् इति दृढादिः ।

१९०८ पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च ॥ ७।१।६० ॥ राजन् । कवि । ब्राह्मण । माणव । दण्डमाणव । वाडव । चौर । धूर्त । आराधय । विराधय । उपराधय । अपिराधय । अनृशंस । कुशल । चपल । निपुण । पिशुन । चौक्ष । स्वस्थ । विश्वस्त । विफल । विशस्य । पुरोहित । ग्रामिक । खण्डिक । दण्डिक । कर्मिक । चर्मिक । वर्मिक । शिलिक । सूतक । अजिनिक । अञ्जनिक । अञ्जलिक । छत्रिक । सूचक । सुहित । बाल । मन्द । होड । राजादिराकृतिगणः ॥

१९२५ युवादेरण् ॥७।१।६७॥ युवन् । स्थविर । यजमान । कुतुक । श्रमण । श्रमणक । श्रवण । कमण्डलुक । कुस्त्री । दुःस्त्री । सुस्त्री । सुहृदय । दुर्हृदय । सुहृत् । दुर्हृत् । सुभ्रातृ । दुर्भ्रातृ । वृषल । परिव्राजक । सब्रह्मचारिन् । अनृशंस । चपल । कुशल । निपुण । पिशुन । कुतूहल । क्षेत्रज्ञ । उद्गातृ । उन्नेतृ । प्रशास्तृ । प्रतिहर्तृ । होतृ । पोतृ । भ्रातृ । भर्तृ । रथगणक । पत्तिगणक । सुष्ठु । दुष्ठु । अध्वर्यु । कर्तृ । मिथुन । कुलीन । सहस् । सहस्र । कण्डुक । कितव इति युवादिः । स्थविरश्रमणपिशुननिपुणकुशलचपल-अनृशंसेभ्यो राजादिदर्शनात् ष्यणपि । स्थाविर्यं श्रामण्यमित्यादि । पूर्वत्राणि द्वैपादि न सिद्धयति । इह त्वञि यौवनादि इत्यञणोरुपादानम् ॥

१६२१ चौरादेः ॥ ७।१।७३ ॥ चौर । धूर्त । युवन् । ग्रामपुत्र । ग्रामसण्ड । ग्रामसाण्ड । ग्रामकुमार । ग्रामकुल । ग्रामकुलाल । अमुष्यपुत्र । अमुष्यकुल । शारपत्र । शारपत्र । मनोज्ञ । प्रियरूप । अदोरूप । अभिरूप । बहुल । मेधाविन् । कल्याण । आढ्य । सुकुमार । छान्दस । छात्र । श्रोत्रिय । विश्वदेव । ग्रामिक । कुलपुत्र । सारपुत्र । वृद्ध । अवश्यम् । इति चौरादिः ।

१९३६ पीलवादेः कुणः पाके ॥ ७।१।८७ ॥ पीलु । कर्कन्धु । शमी । करीर । बदर । कुवल । अश्वत्थ । खदिर इति पीलवादिः ।

१९३७ कर्णादिर्मूले जाहः ॥७।१।८८॥ कर्ण । अक्षि । आस्य । वक्त्र । नख । मुख । केश । दन्त । ओष्ठ । भ्रू । शृङ्ग । पाद । गुल्फ । पुष्प । फल । इति कर्णादिः ।

१९६० देवपथादिभ्यः ॥७।१।१११॥ देवपथ । हंसपथ । अजपथ । वारिपथ । राजपथ । शतपथ । शङ्कुपथ । स्थलपथ । सिन्धुपथ । उष्ट्रग्रीवा । वामरज्जु । हंस । (हस्त) इन्द्र । दण्ड । पथ्य । (पुष्प) मत्स्य इति देवपथादिः ॥

१९६३ शाखादेर्यः ॥ ७।१।११४ ॥ शाखा । मुख । जघन । स्कन्द । स्कन्ध । मेघ । शृङ्ग । चरण । शरण । उरस् । शिरस् । अग्र । इति शाखादिः ॥

१९६६ काकतालीयादयः ॥ ७।१।११७ ॥ काकतालीयम् । खलतिबिल्वीयम् । अन्धकवर्तिकीयम् । अजाकृपाणीयम् । अर्धजरतीयम् । घुणाक्षरीयमित्यादि ॥

१९६७ शर्करादेरण् ॥ ७।१।११८ ॥ शर्करा । कपालिका । कम्बाष्टिका । गोपुच्छ । गोलोमन् । पुण्डरीक । शतपत्र । नराची । नकुल । सिकता ।

कपाटिका । इति शर्करादिः ॥

१९७० गोण्यादेश्चेकण् ॥ ७।१।१२१ ॥ गोणी । अङ्गुली । भरुजा । वभ्रू । बभ्रु । वल्गु । मण्डर । मण्डल । शष्कुली । हरि । मण्डु । कपि । भरु । खल । उदश्वित् । तरस् । कुलिश । मुनि । रुरु । इति गोण्यादिः ।

१९८५ तिलादिभ्यः स्नेहे तैलः ॥ ७।१।१३६ ॥ तिलतैलम् । सर्षपतैलम् । इङ्गुदतैलम् । एरण्डतैलम् ॥

१९८७ तदस्य संजातं तारकादिभ्य इतः ॥ ७।१।१३८ ॥ तारका । पुष्प । कर्णक । ऋजीष । मूत्र । पुरीष । निष्क्रमण । उच्चार । विचार । प्रचार । आराल । कुड्मल । कुसुम । मुकुल । वकुल । स्तबक । पल्लव । किशलय । वेश । वेग । निद्रा । तन्द्रा । श्रद्धा । बुभुक्षा । पिपासा । अभ्र । श्वभ्र । रोग । अङ्गारक । पर्णक । द्रोह । सुख । दुःख । उत्कण्ठा । भर । तरङ्ग । व्याधि । व्रण । कण्डूक । कण्टक । मञ्जरी । कोरक । अङ्कुर । हस्तक । पुलक । रोमाञ्च । हर्ष । उत्कर्ष । गर्व । कल्लोल । शृङ्गार । अन्धकार । कन्दल । शैवल । कुतूहल । कुवलय । कलङ्क । कज्जल । कर्दम । सीमन्त । राग । क्षुध् । तृष् । ज्वर । गर । दोह । शास्त्र । षण्डा । मुकुर । मुद्रा । गर्ध । फल । तिलक । चन्द्रक । इति तारकादिः ।

२०१७ इष्टादेः ॥ ७।१।१६८ ॥ इष्ट । पूर्त । उपपादित । उपसादित । उपासित । निगदित । परिगदित । निकटित । संकलित । परिकलित । संरक्षित । परिरक्षित । अर्चित । अगणित । अवगणित । अवकीर्ण । अवमुक्त । आयुक्त । गृहीत । अधीत । आम्नात । श्रुत । आसेवित । अवधारित । अवकल्पित । कृत । निराकृत । उपकृत । उपाकृत । अनुयुक्त । अनुगुणित । अनुगणित । गणित । परिगणित । अनुपठित । निपठित । पठित । व्याकुलित । उद्गृहीत । कथित । निकथित । निषादित । इतीष्टादिः ।

२०५४ नोर्म्यादिभ्यः ॥ २।१।९९ ॥ ऊर्मि । दलिम । भूषि । तिमि । कृमि । यव । कुञ्चा । द्राक्षा । भ्राङ्क्षा । वासा । हरित् । गरुत् । ध्वजित् । ककुद् । ज्योतिस् । महिष । गो । कान्ति । शिम्बी । चारु । इक्षु । बन्धु । मधु । बिन्दु । इन्दु । क्षु । वसु । अंशु । श्रु । हनु । सानु । भानु । इत्यूर्म्यादिः ।

२०५५ नावादेरिकः ॥ ७।२।३ ॥ नौ । कुमारी । यवखदा । सभा । करण । इति नावादिः ।

२०५६ शिखादिभ्य इन् ॥ ७।२।४ ॥ शिखा । माला । शाला । मेखला । शाखा । वीणा । संज्ञा । वडवा । अष्टका । बलाका । पताका । कर्मन् । बल । उत्साह । उद्दास । उद्भास । उल । मुल । मूल । आयाम । प्रयाम । आरोह । अवरोह । परिणाह । शृङ्ग । वृन्द । गदा । निचुल । मुकुल । कूल । फल । अल । मान । मनीषा । व्रत । धन्वन् । चूडा । केका । दंष्ट्रा । सूना । घृणा । करुणा । जरा । आयास । (आयस) । स्तबक । उपयाम । उद्यम । इति

शिखादिराकृतिगणः । केचित्तु वडवा । अष्टका । कर्मन् । वर्मन् । चर्मन् । इत्येतेभ्य इकमपीच्छन्ति ।

२०५७ व्रीह्यादिभ्यस्तौ ॥ ७।२।५ ॥ व्रीहि । माया इत्यादयः प्रयोगगम्याः ।

२०६१ व्रीह्यर्थतुन्दादेरिलश्च ॥७।२।९॥ तुन्द । उदर । पिचण्ड । यव । ग्रह । पङ्क । गुहा । कला । काक । इति तुन्दादिः ।

२०७३ सिध्मादिक्षुद्रजन्तुरुग्भ्यः ॥ ७।२।२१ ॥ सिध्म । वर्ष्मन् । गड । तुण्डि । मणि । नाभि । बीज । निष्पाद् । निष्पद् । निष्प । पांशु । हनु । पर्शु । पार्ष्णी । धमनी । सक्तु । मांस । पत्र । वात । पित्त । श्लेष्मन् । पार्श्व । कर्ण । सक्थि । स्नेह । शीत । कृष्ण । श्याम । पिङ्ग । पक्ष्मन् । पृथु । मृदु । मञ्जु । वटु । कण्डू इति सिध्मादिः ।

२०७८ मध्वादिभ्यो रः ॥७।२।२६॥ मधु । ख । मुख । कुञ्ज । नग । ऊष । मुष्क । शुषि । कण्डू । पाण्ड । पांशु इत्यादयः प्रयोगगम्या मध्वादयः ।

२०७९ कृष्यादिभ्यो वलच् ॥७।२।२७॥ कृषि । आसुती । परिषद् । रजस् । दन्त । शिखा । मातृ । पितृ । भ्रातृ । उत्साह । पुत्र । उत्सङ्ग । इत्यादयः प्रयोगगम्याः कृष्यादयः ।

२०८० लोमपिच्छादेः शेलम् ॥ ७।२।२८ ॥ लोमन् । रोमन् । बभ्रु । वल्गु । हरि । कपि । मुनि । गिरि । ऊरु । कर्क इति लोमादिः ।

पिच्छ । उरस् । ध्रुवका । पक्ष । चूर्ण इति पिच्छादिः ।

२९८१ नोऽङ्गादेः ॥ ७।२।२९ ॥ अङ्ग । पामन् । धामन् । हेमन् । श्लेष्मन् । सामन् । वर्ष्मन् (वर्धमन्) शाकिन् । पलालिन् । पलाशिन् । ऊष्मन् । कद्रु । बलि इत्यङ्गादिः ॥

२०८६ ज्योत्स्नादिभ्योऽण् ॥ ७।२।३४ ॥ ज्योत्स्ना । तमिस्रा । विसर्प । विपाद् । कुतुप । कुण्डल । तपस् । सहस्र । इत्यादयः प्रयोगगम्या ज्योत्स्नादयः ॥

२०९६ मण्यादिभ्यः ॥७।२।४४॥ मणि । हिरण्य । बिम्ब । कुरर । कुरव । राजी । इष्टका । गाण्डि । गाण्डी । अजका इति मण्यादयः प्रयोगगम्याः ॥

२०९८ अभ्रादिभ्यः ॥७।२।४६॥ अभ्र । अर्शस् । उरस् । तुन्द । चतुर । पलित । जय । घाटा । कर्दमां काम । बल । घटा । अम्ल । लवण । इत्यभ्रादिराकृतिगणः।

२१०५ गुणादिभ्यो यः ॥ ७।२।५३ ॥ गुण । हिम । इत्यादयः प्रयोगगम्या गुणादयः ।

२११५ सुखादेः ॥७।२।६३॥ सुख । दुःख । तृप्र । कृच्छ्र । अस्र । अलीक । कृपण । सोढ । प्रतीप । प्रणय । हस्त । (हल) आस्य । कक्ष । शील इत्येके । इति सुखादिः ।

२११९ मन्माब्जादेर्नाम्नि ॥ ६।२।६७ ॥ अम्भ । कमल । सरोरुह । सरोज । अम्भोज । राजीव । अरविन्द । पङ्कज । पुटक । नालोक । मृणाल । बिस । तामरस । यवास । इत्यब्जादिः ।

२१२२ पुष्करादेर्देशे ॥७।२।७०॥ पुष्कर । पद्म । उत्पल । तमाल । कुमुद । कैरव । नल । कपित्थ । बिस । मृणाल । कर्दम । शालूक । विवर्ह । करीष । शिरीष । यवास । यवास । यव । माष । हिरण्य । तट । तरङ्ग । कल्लोल । इति पुष्करादिः ॥

२१२५ विमुक्तादेरण् ॥७।२।७३॥ विमुक्त । देवासुर । रक्षोसुर । उपसद् । उपसद् । परिसारक । वसु । मरुत् । सत्वत् । सत्वन्त । दशार्ह । वयस् । हविर्धान । महित्री । सोमापूषन् । इडा । इला । अग्नाविष्णू । उर्वशी । दशार्ण । वसुमन्तु । पत्नीवन्तु । वर्हवन्तु । (सु)वृत्रहन् । पतत्रिन् । सुपर्ण । इति विमुक्तादिः ।

२१२६ घोषदादेरकः ॥ ७।२।७४ ॥ घोषद् । गोषद् । इषेत्वा । मातरिश्वन् । देवस्यत्वा । पत्वा । देवीराप । कृष्णोरथ । खरेष्ठा । देविधीया । रक्षोहण । अञ्जन । प्रतूर्त । उशान । कृशानु । सहस्रशीर्षन् । वाचस्पति । स्वाहा । प्राण । इति घोषदादिः ॥

२१२९ कोऽण्वादेः ॥७।२।७६॥ अणु । स्थूल । माष । इषु । इक्षु । वाद्य । तिल । काल । तिलकाल । पत्र । मूल । पत्रमूल । पर्णमूल । कुमारीपुत्र । कुमारी । श्वशुर । मणि । बृहत् । चञ्चत् । चन्द्र । परण्ड । पुण्ड्र । इत्यण्वादिः॥

२१३७ आद्यादिभ्यः ॥ ७।२।८४ ॥ आदि । मध्य । अन्त । अग्र । वक्षस् । पार्श्व । पृष्ठ । मुख । सर्व । विश्व । उभय । अन्य । पूर्व । एक । इदम् । प्रमाण । पृष्ठ । पार्श्व । स्वर । वर्ण । शब्द । अर्थ । अभिधान । यत् । तत् इत्यादयः प्रयोगम्या आद्यादयः ।

२१९० सप्तमीद्वितीयादेवादिभ्यः ॥७।२।१३४॥ देव । मनुष्य । मर्त्य । पुरुष । पुरु । बहु । इति शिष्टप्रयोगगम्या देवादयः ॥

२२०५ संख्यादेः पादादिभ्यो दानदण्डे वाकल् लुक् च ॥७।२।१५२॥ पाद । शत । मोदक इत्यादयः पादादयः प्रयोगतोऽनुसर्तव्याः ।

२२१२ मर्तादिभ्यो यः ॥७।२।१५९॥ मर्त । सूर । क्षेम । यविष् । भाग । अपराध । रव । लव इत्यादयः प्रयोगगम्या मर्तादयः ।

२२१७ भेषजादिभ्यष्ठण् ॥७।२।१६४॥ भेषज । अनन्त । आवसथ । इतिह । चतुर्वर्ण । चतुराश्रम । चतुर्वेद । चतुर्विद्या । त्रिवेद । त्रिविद्या । त्रिलोक । एकभाव । द्विभाव । त्रिभाव । अन्यभाव । सर्वविद्या । सर्वलोक । षड्गुण । शील । इत्यादयः शिष्टप्रयोगगम्या भेषजादयः ।

२२१८ प्रज्ञादिभ्योऽण् ॥ ७।२।१६५ ॥ प्रज्ञ । वणिज् । उशिज् । प्रत्यक्ष । विद्वस् । विदत् । विन्दन्त । द्विदत् । षोडत् । विद्या । मनस् । जुह्वत् । चिकीर्षत् । चिकीर्षति । वसु । मरुत् । (वसुमत्) सत्वस् । सन्वतु । सर्व । दशार्ह । कुञ्च । वयस् । रक्षस् । असुर । शत्रु । चोर । योध । चक्षु । पिशाच । अशनि । कर्षापण । देवता । बन्धु । अनुजा । वर । अनुषुक् । चतुष्पास्थ । रक्षोघ्न । वियात । विकृत । चिकृति । व्याकृत । वैरिवस्कृत । अग्रायण । अग्रहा-

यण । संतपन । मधुप । द्विधा(ता) । चण्डाल । गायत्री । उष्णिह् । अनुष्टुभ् । बृहती । पङ्क्ति । त्रिष्टुभ् । जगती । इति प्रज्ञादिराकृतिगणः ।

२२२२ विनयादिभ्यः ॥ ७।२।१६९ ॥ विनय । समय । समाय । कथंचित् । अकस्मात् । उपचार । व्यवहार । समाचार । संप्रदाय । समुत्कर्ष । संगति । संग्राम । समूह । विशेष । अव्यय । अत्यय । अनुगादिन् । इति विनयादिराकृतिगणः ।

यावादिभ्यः कः ॥ ७।३।१५ ॥ याव । मणि । अवि । अस्थि । लात्र । पात्र । पीत । स्तब्ध । ज्ञात । अज्ञात । पुण्य । नित्य । सत्वत् । दशार्ह । वयस् । चन्द्र । जानु । भूत । भिक्षु इति यावादिराकृतिगणः ।

२२९५ यौधेयादेरञ् ॥७।३।६५॥ भर्गाद्यन्तर्गणो यौधेयादिः ॥

२३०० पर्श्वादेरण् ॥ ७।३।६६ ॥ पर्शु । रक्षस् । असुर । वह्निक । वयस् (वचस्) । वसु । मरुत् । सत्वन् । सत्वन्तु । दशार्ह । पिशाच । अशनि । कार्षापण इति पर्श्वादिः ।

२३०१ दामन्यादेरीयः ॥७।३।६७॥ दामनि । औलपि । औपलि । वैजवापि । औदकि । आच्युतन्ति । काकन्दि । काकन्दकि । ककुन्दि । ककुन्दकि । शाकन्तपि । (शाङ्कन्तपि) । सार्वसेनि । बिन्दु । तुलभा । मौञ्जायन । औदमेधि । औपबिन्दि । सावित्रीपुत्र । कौण्ठोपरथ । कौण्डोपरथ । कौण्ठारथ । दाण्डकि । क्रौष्टकि । जालमानि । जारमाणि । ब्रह्मगुप्त । ब्राह्मगुप्त । जानकि । इति दामन्यादिः ।

॥ इति पूर्वार्द्धम् ॥

॥ अथोत्तरार्द्धम् ॥

२०१ ऋरलवं कृपोऽकृपीटादिषु ॥ २।३।८९ ॥ अकृपीटादिष्विति किम् । कृपीटम् । कृपणः । कृपाणः । कृपः । कर्पूरः । कर्परः । कर्पटः । कर्पटिः । इत्यादि । बहुवचनमाकृतिगणार्थम् ।

४८१ च्व्यर्थे भृशादेः स्तोः ॥ ३।४।२९ ॥ भृश । उत्सुक । शीघ्र । चपल । पण्डित । अर । कण्डुर । फेन । शुचि । नील । हरित । मन्द । भद्र । भद्र । संश्चत् । तृषस् । रेफत् । रेहत् । वेहत् । वर्चस् । उन्मनस् । सुमनस् । दुर्मनस् । अभिमनस् इति भृशादिः ॥


४८२ डाज्लोहितादिभ्यः षित् ॥३।४।३०॥ लोहित । जिह्म । श्याम । धूम । चर्मन् । हर्ष । गर्व । सुख । दुःख । मूर्च्छा । निद्रा । कृपा । करुणा ।

४८७ सुखादेरनुभवे ॥ ३।४।३४ ॥ सुख । दुःख । तृप्र । कृच्छ्र । आस्र । अलीक । करण । कृपण । सोढ । प्रतीप ।

४८८ शब्दादेः कृतौ वा ॥ ३।४।३५ ॥ शब्द । वैर । कलह । ओघ । वेग । युद्ध । अभ्र । कण्व । मम । मेघ । अट । अट्या । अटाट्या । सोका । सोटा । कोटा । पोटा । प्लुष्टा । सुदिन । दुर्दिन । नीहार ॥

७५७ वा ज्वलादिदुनीभूग्रहास्नोर्णः ॥५।१।६२॥ ज्वल । कुच । परल । पथे ।

कथे । मथे । षद्लृं । शद्लृं । बुध् । टुवमू । भ्रमू । क्षर । चल । जल । टल । ट्वल । ष्टुल । ह्वल । णल । बल । पुल । कुल । पल । फल । शल । हुल । क्रुश । कस । रुहं । रमिं । पहि । वृत् इति ज्वलादिः ॥



॥ अथ हैम-धातुपाठः ॥

१ भू सत्तायाम् । २ पां पाने । ३ घ्रां गन्धोपादाने । ४ धमां शब्दाग्निसंयोगयोः । ५ ष्ठां गतिनिवृत्तौ । ६ म्नां अभ्यासे । ७ दाम् दाने । ८ जिं ज्रिं अभिभवे । ९ क्षिं क्षये । १० इं दुं द्रुं स्रुं गतौ । ११ ध्रुं स्थैर्ये च । १२ सुं प्रसवैश्वर्ययोः । १३ स्मृं चिन्तायाम् । १४ गृं घृं सेचने । १५ औस्वृं शब्दोपतापयोः । १६ द्वृं वरणे । १७ ध्वृं व्हृं कौटिल्ये । १८ सुं गतौ । १९ ऋं प्रापणे च । २० तृ प्लवनरतणयोः । २१ दृधिं पाने । २२ दैंव् शोधने । २३ ध्यैं चिन्तायाम् । २४ ग्लैं हर्षक्षये । २५ म्लैं गात्रविनामे । २६ द्यैं न्यक्करणे । २७ द्रैं स्वप्ने । २८ घ्रैं तृप्तौ । २९ कैं गैं रैं शब्दे ३० ष्टयैं स्त्यैं सङ्घाते च । ३१ ख्यैं खदने । ३२ क्षैं जैं सैं क्षये । ३३ स्रैं श्रैं पाके । ३४ पैं ओवैं शोषणे । ३५ ष्णैं वेष्टने । ३६ फक्क नीचैर्गतौ । ३७ तक हसने । ३८ तकु कृच्छ्रजीवने । ३९ शुक गतौ । ४० वुक्क भाषणे ४१ उखृ रास्वृ लाखृ द्राखृ घ्राखृ शोषणालमर्थयोः । ४२ शाखृ श्लाखृ व्याप्तौ । ४३ कक्ख हसने । ४४ उख नख णख वख मख रख लख मखु रखु लखु रिखु इख इखु ईखु वल्ग रगु लगु तगु श्रगु श्लगु अगु वगु मगु स्वगु इगु उगु रिगु लिगु गतौ । ४५ त्वगु कम्पने च । ४६ युगु जुगु वुगु वर्जने । ४७ गग्ध हसने । ४८ दघु पालने । ४९ शिघु आघ्राणे । ५० मघु मण्डने । ५१ लघु शोषणे ५२ शुच शोके । ५३ कुच शब्दे तारे । ५४ क्रुञ्च गतौ । ५५ कुञ्च च कौटिल्याल्पीभावयोः । ५६ लुञ्च अपनयने । ५७ अर्च पूजायाम् । ५८ अञ्चू गतौ च । ५९ वञ्चू चञ्चू तञ्चू त्वञ्चू मञ्चू मुञ्चू मुंचू म्रुचू म्लुचू ग्लुचू ग्लुंचू षञ्च गतौ । ६० म्रुचू ग्लुचू स्तेये । ६१ म्लेच्छ अव्यक्तायाम्वाचि । ६२ लछ लाछु लक्षणे । ६३ वाछु इच्छायाम् । ६४ आछु आयामे । ६५ ह्रीछ लज्जायाम् । ६६ हूर्छा कौटिल्ये । ६७ मूर्छा मोहसमुच्छाययोः । ६८ स्फूर्छा स्मूर्छा विस्मृतौ । ६९ युछ प्रमादे । ७० धृज धृजु ध्वज ध्वजु भ्रज भ्रजु वज व्रज षस्ज गतौ । ७१ अज क्षेपणे च । ७२ कुजू खुजू स्तेये । ७३ अर्ज सर्ज अर्जने । ७४ कर्ज व्यथने ७५ खर्ज मार्जने च । ७६ खज मन्थे । ७७ खजू गतिवैकल्ये । ७८ पजृ कम्पने । ७९ ट्वोस्फूर्जा वज्रनिर्घोषे । ८० क्षीज कूज गुज गुजु अव्यक्ते शब्दे । ८१ लज लजु तर्ज भर्त्सने । ८२ लाज लाजु भर्जने च । ८३ जज जजु युद्धे । ८४ तुज हिंसायाम् । ८५ तुजु बलने च । ८६ गर्ज गजु गृज गृजु मुज मुजु मृज मृजु मज शब्दे । ८७ गज मदने च । ८८ त्यजं हानौ । ८९ षंजं सङ्गे । ९० कटे वर्षावरणयोः । ९१ शट रुजाविशरणगत्यवसादनेषु । ९२ वट वेष्टने । ९३ किट खिट उत्त्रासे । ९४ शिट

षिट अनादरे । ९५ जट झट सङ्घाते । ९६ पिट शब्दे च । ९७ भट भृतौ । ९८ तट उच्छ्राये । ९९ खट कांक्षे । १०० णट नृत्तौ । १०१ हट दीप्तौ । १०२ षट अवयवे । १०३ लुट विलोटने । १०४ चिट प्रैष्ये । १०५ विट शब्दे । १०६ हेट विबाधायाम् । १०७ अट पट इट किट कट कटु कटै गतौ । १०८ कुटु वैकल्ये । १०९ मुट प्रमर्दने । ११० चुट चुटु अल्पीभावे । १११ वटु विभाजने । ११२ रुटु लुटु स्तेये । ११३ स्फुट स्फुट विशरणे । ११४ लट बाल्ये । ११५ रट रठ च परिभाषणे । ११६ पठ व्यक्तायाम् वाचि । ११७ वठ स्थौल्ये । ११८ मठ मदनिवासयोश्च । ११९ कठ कृछ्रजीवने । १२० हठ बलात्कारे । १२१ उठ रुठ लुठ उपघाते । १२२ पिठ हिंसासंक्लेशयोः । १२३ शठ कैतवे च । १२४ शुठ गतिप्रतिघाते । १२५ कुठु लुठु आलस्ये च । १२६ शुठु शोषणे । १२७ अठ रुठु गतौ । १२८ पुड प्रमर्दने । १२९ मुड खण्डने च । १३० मडु भूषायाम् । १३१ गडु वदनैकदेशे । १३२ शौडृ गर्वे । १३३ यौडृ सम्बन्धे । १३४ मेडृ म्रेडृ म्लेडृ लोडृ लौडृ उन्मादे । १३५ रोडृ रौडृ तौडृ अनादरे । १३६ क्रीडृ विहारे । १३७ तडृ तुडृ तौडृ तोडने । १३८ हुडृ हूडृ हूडृ हौडृ गतौ । १३९ खोडृ प्रतिघाते । १४० विड आक्रोशे । १४१ अड उद्यमे । १४२ लड विलासे । १४३ कडु मदे । १४४ कडु कार्कश्ये । १४५ अडु अभियोगे । १४६ चुड हावकरणे । १४७ अण रण वण व्रण बण भण भ्रण मण धण ध्वण भ्रण कण कण चण शब्दे । १४८ ओणृ अपनयने । १४९ शोणृ वर्णगत्योः । १५० श्रोणृ श्लोणृ संघाते । १५१ पैणृ गतिप्रेरणश्लेषणेषु । १५२ चितै संज्ञाने । १५३ अत सातत्यगमने । १५४ च्युतृ आसेचने । १५५ चुतृ श्चुतृ श्च्युतृ क्षरणे । १५६ जुतृ भासने । १५७ अतु बन्धने । १५८ कित निवासे । १५९ ऋत घृणा-गतिस्पर्द्धेषु । १६० कुथु पुथु लुथु मथु मन्थ मान्थ हिंसासंक्लेशयोः । १६१ खाद भक्षणे १६२ बद स्थैर्ये । १६३ खद हिंसायाम् च । १६४ गद व्यक्तायाम् वाचि । १६५ रद विलेखने । १६६ णद अनिक्षिदा अव्यक्ते शब्दे । १६७ अर्द गतियाचनयोः । १६८ नर्द णर्द गर्द शब्दे । १६९ तर्द हिंसायाम् । १७० कर्द कुत्सिते शब्दे । १७१ खर्द दशने । १७२ अदु बन्धने । १७३ इदु परमैश्वर्ये १७४ विदु अवयवे । १७५ णिदु कुत्सायाम् । १७६ दुनदु समृद्धौ । १७७ चदु दीप्त्याल्हादनयोः । १७८ श्रदु चेष्टायाम् । १७९ कदु क्रदु क्लदु रोदनाह्वानयोः । १८० क्लिदु परिदेवने । १८१ स्कंदृं गतिशोषणयोः । १८२ षिधु गत्याम् । १८३ षिधौ शास्त्रमाङ्गल्ययोः । १८४ शुन्ध शुद्धौ । १८५ स्तन धन ध्वन चन स्वन वन शब्दे । १८६ वन षन संभक्तौ । १८७ कनै दीप्तिकान्तिगतिषु । १८८ गुपौ रक्षणे । १८९ तपं;-धुप; सन्तापे । १९० रप लप जल्प व्यक्ते वचने । १९१ जप मानसे च । १९२ चप सान्त्वने । १९३ षप समवाये । १९४ सृप्लृं गतौ । १९५ चुप मन्दायाम् । १९६ तुप तुम्प तुप तुम्प तुफ तुम्फ तुफ तुम्फ हिंसायाम् । १९७ वर्फ रफ रफु अर्ब कर्ब खर्ब गर्ब चर्ब तर्ब नर्ब पर्ब बर्ब शर्ब षर्ब सर्ब

रिङु गतौ । १९८ कुङु आच्छादने । १९९ लुङु तुङु अर्दने । २०० चुङु चक्रुसंयोगे । २०१ स्रुभू स्रुम्भू स्रिभू स्रिंभू भर्म हिंसायाम् । २०२ शुम्भ भाषणे च । २०३ यभं जभ मैथुने । २०४ चमू छमू जमू झमू जिमू अदने । २०५ क्रमू पादविक्षेपे । २०६ यमूं उपरमे । २०७ स्यमू शब्दे । २०८ णमं प्रह्वत्वे । २०९ षम ष्टम वैक्लव्ये । २१० अम शब्दभक्त्योः । २११ अम द्रम हम्म मिमृ गम्लृं गतौ । २१२ हय हर्य क्लान्तौ च । २१३ मव्य बन्धने । २१४ सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः । २१५ शुच्यै चुच्यै अभिषवे । २१६ । त्सर छद्मगतौ । २१७ कमर हूर्छने । २१८ अभ्र वभ्र मभ्र गतौ । २१९ चर भक्षणे च । २२० धोर्क्ष गतिचातुर्ये । २२१ खोर्क्ष प्रतिघाते । २२२ दल त्रिफला विशरणे । २२३ मील श्मील स्मील क्ष्मील निमेषणे । २२४ पील प्रतिष्टम्भे । २२५ णील वरणे । २२६ शील समाधौ । २२७ कील बन्धे । २२८ कूल आवरणे । २२९ शूल रुजायाम् । २३० तूल निष्कर्षे । २३१ पूल संघाते । २३२ मूल प्रतिष्ठायाम् । २३३ फल निष्पत्तौ । २३४ फुल्ल विकसने । २३५ चुल्ल ह्रावकरणे । २३६ चिल्ल शैथिल्ये च । २३७ पेल फेल शेल षेल सेल वेल्ल सल तिल तिल्ल पल्ल वेल्ल गतौ । २३८ वेल चेल केल क्वेल खेल स्खल चलने । २३९ खल सञ्चये च । २४० श्वल श्वल्ल आशुगतौ । २४१ गल चर्व अदने । २४२ पूर्व्व पर्व्व मर्व्व पूरणे । २४३ गर्व धिवु शव गतौ । २४४ कर्व्व खर्व्व गर्व्व दर्पे । २४५ ष्ठिवू क्ष्विवू निरसने । २४६ जीव प्राणधारणे । २४७ पीव मीव तीव नीव स्थौल्ये । २४८ उर्व्वैं तुर्वैं थुर्व्वैं दुर्व्वैं धुर्व्वैं जुर्व्वैं अर्व भर्व शर्व हिंसायाम् । २४९ मुर्व्वैं मव बन्धने । २५० गुर्व्वैं उद्यमे । २५१ पिवु मिवु निवु सेचने । २५२ हिवु विवु जिवु प्रीणने । २५३ ह्रवु व्याप्तौ च । २५४ अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादहनभाववृद्धिषु । २५५ कश शब्दे । २५६ मिश मश रोषे च । २५७ शश प्लुतिगतौ । २५८ णिश समाधौ । २५९ दृशूं प्रेक्षणे । २६० दंशं दशने । २६१ घुषृ शब्दे । २६२ चूष पाने । २६३ तूष तुष्टौ । २६४ पूष वृद्धौ । २६५ लूष मूष स्तेये । २६६ षूष प्रसवे । २६७ ऊष रुजायाम् । २६८ ईष उंछे । २६९ कृषं विलेखने । २७० कष शिष जष झष वष मष मुष रुष रिष यूष जूष शष चष हिंसायाम् । २७१ वृष संघाते च । २७२ भष भर्त्सने । २७३ जिषू विषू मिषू निषू पृषू वृषू सेचने । २७४ मृषू सहने च । २७५ उषू श्रिषू स्रिषू प्रुषू प्लुषू दाहे । २७६ घृषू सङ्घर्षे । २७७ हृषू अलीके । २७८ पुष पुष्टौ । २७९ भूष तसु अलङ्कारे । २८० तुस हस हस रस शब्दे । २८१ लस श्लेषणक्रीडनयोः । २८२ घस्लृं अदने । २८३ हसे हसने । २८४ पिसृ पेसृ वेसृ गतौ । २८५ शसू हिंसायाम् । २८६ शंसू स्तुतौ च । २८७ मिहं सेचने । २८८ दहं भस्मीकरणे । २८९ चह कल्कने । २९० रह त्यागे । २९१ रहु गतौ । २९२ दह दहु बृह वृद्धौ । २९३ बृहृ बृहु शब्दे च । २९४ उहृ तुहृ दुहृ अर्दने । २९५ अर्ह मह पूजायाम् । २९६ उक्ष

सेचने । २९७ रक्ष पालने । २९८ मक्ष मुक्ष सङ्घाते । २९९ अक्षौ व्याप्तौ च । ३०० तक्षौ त्वक्षौ तनूकरणे । ३०१ णिक्ष चुम्बने । ३०२ तृक्ष स्तृक्ष णक्ष गतौ । ३०३ वक्ष रोषे । ३०४ त्वक्ष त्वचने । ३०५ सूर्क्ष अनादरे । ३०६ काक्षु वाक्षु माक्षु कांक्षायाम् । ३०७ द्राक्षु ध्राक्षु ध्वाक्षु घोरवासिते च । इति परस्मैभाषाः ।

१ गाङ् गतौ । २ ष्मिङ् ईषद्धसने । ३ डीङ् विहायसा गतौ । ४ उंङ् कुंङ् गुंङ् घुंङ् डुंङ् शब्दे । ५ च्युंङ् ज्युंङ् जुंङ् मुंङ् प्लुङ् गतौ । ६ रुंङ् रेषणे च । ७ पूङ् पवने । ८ मूङ् बन्धने । ९ धूंङ् अवध्वंसने । १० मेंङ् प्रतिदाने । ११ देंङ् त्रैंङ् पालने । १२ श्यैंङ् गतौ । १३ प्यैंङ् वृद्धौ । १४ वकुङ् कौटिल्ये । १५ मकुङ् मण्डने । १६ अकुङ् लक्षणे । १७ शीकृङ् सेचने । १८ लोकृङ् दर्शने । १९ श्लोकृङ् सङ्घाते । २० द्रेकृङ् ध्रेकृङ् शब्दोत्साहे । २१ रेकृङ् शकुङ् शङ्कायाम् । २२ ककि लौल्ये । २३ कुकि वृकि आदाने । २४ चकि तृप्तिप्रतीघातयोः । २५ ककुङ् श्वकुङ् भ्रकुङ् भ्रकुङ् श्लकुङ् ढौकृङ् श्रौकृङ् ष्वष्कि वस्कि मस्कि तिकि टिकि टीकृङ् सेकृङ् स्रेकृङ् रघुङ् लघुङ् गतौ । २६ अघुङ् वघुङ् गत्याक्षेपे । २७ मघुङ् कैतवे च । २८ राघृङ् लाघृङ् सामर्थ्ये । २९ द्राघृङ् आयासे च । ३० श्लाघृङ् कत्थने । ३१ लोचृङ् दर्शने । ३२ षचि सेचने । ३३ शचि व्यक्तायाम् वाचि । ३४ कचि बन्धने । ३५ कचुङ् दीप्तौ च ३६ श्वचि श्वचुङ् गतौ । ३७ वर्चि दीप्तौ । ३८ मचि मुचुङ् कल्कने । ३९ मचुङ् धारणोच्छ्रायपूजनेषु च । ४० पचुङ् व्यक्तीकरणे । ४१ ष्टुचि प्रसादे । ४२ पजृङ् भ्रेजृङ् भ्राजि दीप्तौ । ४३ इजुङ् गतौ । ४४ ईजि कुत्सने च । ४५ ऋजि गतिस्थानार्जनोपार्जनेषु । ४६ ऋजुङ् भृजैङ् भर्जने । ४७ तिजि क्षमानिशानयोः । ४८ घट्टि चलने । ४९ स्फुटि विकसने । ५० चेष्टि चेष्टायाम् । ५१ गोष्टि लोष्टि सङ्घाते । ५२ वेष्टि वेष्टने । ५३ अट्टि हिंसातिक्रमयोः । ५४ पठि हेठि विबाधायाम् । ५५ मठुङ् कठुङ् शोके । ५६ मुठुङ् पलायने । ५७ वठुङ् एकचर्यायाम् । ५८ भठुङ् पठुङ् गतौ । ५९ हुडुङ् पिडुङ् सङ्घाते । ६० शडुङ् रुजायाम् च । ६१ तडुङ् ताडने । ६२ कडुङ् मदे । ६३ खडुङ् मन्थे । ६४ खुडुङ् गतिवैकल्ये । ६५ कुडुङ् दाहे । ६६ वडुङ् मडुङ् वेष्टने । ६७ भडुङ् परिभाषणे । ६८ मुडुङ् मार्जने । ६९ तुडुङ् तोडने । ७० भुडुङ् धरणे । ७१ चडुङ् कोपे । ७२ द्राढृङ् भ्राढृङ् विशरणे । ७३ शाढृङ् श्लाघायाम् । ७४ वाढृङ् आप्लाव्ये । ७५ हेढृङ् होढृङ् अनादरे । ७६ हिडुङ् गतौ च । ७७ घिणुङ् घुणुङ् घृणुङ् ग्रहणे । ७८ घुणि घूर्णि भ्रमणे । ७९ पणि व्यवहारस्तुत्योः । ८० यतैङ् प्रयत्ने । ८१ युतृङ् जुतृङ् भासने । ८२ विथृङ् वेथृङ् याचने । ८३ नाथृङ् उपतापैश्वर्याशीःषु च । ८४ श्रथुङ् शैथिल्ये । ८५ ग्रथुङ् कौटिल्ये ८६ कत्थि श्लाघायाम् । ८७ खिदुङ् श्वैत्ये । ८८ वदुङ् स्तुत्यभिवादनयोः । ८९ भदुङ् सुखकल्याणयोः । ९० मदुङ् स्तुतिमोदमदस्वप्नगतिषु । ९१ स्पदुङ् किञ्चिच्चलने । ९२ क्ष्विदुङ् परिदेवने । ९३ मुदि हर्षे । ९४ ददि दाने । ९५ हर्दि पुरीषोत्सर्गे । ९६ ष्वदि स्वदि स्वादि

आस्वादने । ९७ उर्दि मानक्रीडयोश्च ९८ कुर्दि गुर्दि गुदि क्रीडायाम् । ९९ षूदि क्षरणे । १०० ह्रादि शब्दे । १०१ ह्लादैङ् सुखे च । १०२ पर्दि कुत्सिते शब्दे । १०३ स्कुदुङ् आप्रवणे । १०४ षधि वृद्धौ । १०५ स्पर्द्धि सङ्घर्षे । १०६ गाधृङ् प्रतिष्ठालिप्साग्रन्थेषु । १०७ बाधृङ् रोटने । १०८ दधि धारणे । १०९ बधि बन्धने । ११० नाधृङ् नाथृङ्वत् । १११ पनि स्तुतौ । ११२ मानि पूजायाम् । ११३ तिपृङ् ष्टिपृङ् ष्टेपृङ् क्षरणे । ११४ तेपृङ् कम्पने च । ११५ टुवेपृङ् केपृङ् गेपृङ् कवुङ् चलने । ११६ ग्लेपृङ् दैन्ये च । ११७ मेपृङ् रेपृङ् लेपृङ् गतौ । ११८ त्रपौषि लज्जायाम् । ११९ गुपि गोपनकुत्सनयोः । १२० अबुङ् रबुङ् शब्दे । १२१ लबुङ् अवस्रंसने च । १२२ कबृङ् वर्णे । १२३ क्रीबृङ् अधार्ष्ट्ये । १२४ क्षीबृङ् मदे । १२५ शीभृङ् चीभृङ् शल्भि कत्थने । १२६ वल्भि भोजने । *१२७ गल्भि धार्ष्ट्ये । १२८ रेभृङ् अभृङ् रभृङ् लभृङ् शब्दे । १२९ ष्टभृङ्* स्कभुङ् ष्टुभुङ् स्तम्भे । १३० अभुङ् जभैङ् जृभुङ् गात्रविनामे । १३१ रभि राभस्ये । १३२ डुलभिष् प्राप्तौ । १३३ भामि क्रोधे । १३४ क्षमौषि सहने । १३५ कमूङ् कान्तौ । १३६ अयि वयि पयि मयि नयि चयि रयि गतौ । १३७ तयि णयि रक्षणे च । १३८ दयि दानगतिहिंसादहनेषु च । १३९ ऊयैङ् तन्तुसन्ताने । १४० पूयैङ् दुर्गन्धविशरणयोः । १४१ कनूयैङ् शब्दोन्दनयोः । १४२ क्ष्मायैङ् विधूनने । १४३ स्फायैङ् ओप्यायैङ् वृद्धौ । १४४ तायृङ् सन्तानपालनयोः । १४५ वलि वल्लि संवरणे । १४६ शलि चलने च । १४७ मलि मल्लि धारणे । १४८ भलि भल्लि परिभाषणहिंसादानेषु । १४९ कलि शब्दसंख्यानयोः । १५० कल्लि अशब्दे । १५१ तेवृङ् देवृङ् देवने । १५२ षेवृङ् सेवृङ् केवृङ् खेवृङ् गेवृङ् ग्लेवृङ् पेवृङ् म्लेवृङ् मेवृङ् म्लेवृङ् सेवने । १५३ रेवृङ् पवि गतौ । १५४ काश्रृङ् दीप्तौ । १५५ क्लेशि विबाधने । १५६ भाषि च व्यक्तायां वाचि । १५७ ईषि गतिहिंसादर्शनेषु । १५८ गेवृङ् अन्विच्छायाम् । १५९ येवृङ् प्रयत्ने । १६० जेपृङ् णेपृङ् एपृङ् हेपृङ् गतौ । १६१ रेपृङ् हेपृङ् अव्यक्ते शब्दे । १६२ पर्षि स्नेहने । १६३ घुषुङ् कान्तीकरणे । १६४ स्रंसृङ् प्रमादे । १६५ कासृङ् शब्दकुत्सायाम् । १६६ भासि दुर्भासि दुर्भ्लासृङ् दीप्तौ । १६७ रासृङ् णासृङ् शब्दे । १६८ णसि कौटिल्ये । १६९ भ्यसि भये । १७० आङ् शसुङ् इच्छायाम् । १७१ ग्रसृङ् ग्लसृङ् अदने । १७२ वसुङ् करणे । १७३ ईहि चेष्टायाम् । १७४ अहुङ् प्लिहि गतौ । १७५ गर्हि कुत्सने । १७६ वर्हि गल्हि प्राधान्ये । १७७ बर्हि बल्हि परिभाषणहिंसाच्छादनेषु । १७८ वेहृङ् जेहृङ् वाहृङ् प्रयत्ने । १७९ दाहृङ् निक्षेपे । १८० ऊहि तर्के । १८१ गाहौङ् विलोडने । १८२ ग्लाहौङ् ग्रहणे । १८३ बहुङ् महुङ् वृद्धौ । १८४ दक्षि शैघ्र्ये च । १८५ धुक्षि धिक्षि सन्दीपनक्लेशनजीवनेषु । १८६ वृक्षि वरणे । १८७ शिक्षि विद्योपादाने । १८८ भिक्षि याञ्चायाम् । १८९ दीक्षि मौण्ड्येज्योपनयननियमव्रतादेशेषु । १९० ईक्षि दर्शने । इति आत्मनेभाषाः ।

१ श्रिग् सेवायाम् । २ णींग् प्रापणे । ३ हृंग् हरणे । ४ भृंग् भरणे ।

५ धूंग् धारणे । ६ डुकुंग् करणे । ७ हिक्की अव्यक्ते शब्दे । ८ अञ्चूग् गतौ च । ९ डुयाचूंग् याञ्चायाम् । १० डुपचींष् पाके । ११ राजृंग् दुभ्राजी दीप्तौ । १२ भर्जीं सेवायाम् । १३ रङ्गीं रागे । १४ रेदृग् परिभाषणयाचनयोः । १५ वेणृग् गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । १६ चतेग् याचने । १७ प्रोथृग् पर्याप्तौ । १८ मिथृग् मेधाहिंसयोः । १९ मेथृग् सङ्गमे च । २० चदेग् याचने । २१ ओबुन्दृग् निशामने । २२ णिदग् णेदग् कुत्सासन्निकर्षयोः । २३ मिदग् मेदग् मेधाहिंसयोः । २४ मेधृग् सङ्गमे च । २५ ग्रुधृग् ग्रुधृग् उन्दे । २६ बुधृग् बोधने । २७ खनूग् अवदारणे । २८ दानी अवखण्डने । २९ शानी तेजने । ३० शपीं आक्रोशे । ३१ चायृग् पूजानिशामनयोः । ३२ व्ययौ गतौ । ३३ अलो भूषणपर्याप्तिवारणेषु । ३४ धावृग् गतिशुद्ध्योः । ३५ चीवृग् ऋषीवत् । ३६ दाशृग् दाने । ३७ ऋषी आदानसंवरणयोः । ३८ मेषृग् भये । ३९ श्रेषृग् चलने च । ४० पषी बाधनस्पर्शनयोः । ४१ लषी कान्तौ । ४२ चषी भक्षणे । ४३ छषी हिंसायाम् । ४४ त्विषीं दीप्तौ । ४५ अषी असो गत्यादानयोश्च । ४६ दासृग् दाने । ४७ माहृग् माने । ४८ गुहौग् संवरणे । ४९ भलक्षी भक्षणे । इति उभयतो भाषाः ।

१ द्युति दीप्तौ । २ रुचि अभिप्रीत्यां च । ३ घुटि परिवर्तने । ४ रुटि लुटि लुठि प्रतीघाते । ५ श्विताङ् वर्णे । ६ ञिमिदाङ् स्नेहने । ७ ञिक्ष्विदाङ् ञिष्विदाङ् मोचने च । ८ शुभि दीप्तौ । ९ क्ष्णुभि सञ्चलने । १० णभि तुभि हिंसायाम् । ११ स्रंभूङ् विश्वासे । १२ भ्रंशूङ् स्रंसूङ् अवस्रंसने । १३ ध्वंसूङ् गतौ च । १४ वृतूङ् वर्तने । १५ स्यंदोङ् स्रवणे । १६ वृधूङ् वृद्धौ । १७ ग्रुधूङ् शब्दकुत्सायाम् । १८ कृपौङ् सामर्थ्ये । वृत् द्युतादयः ।

१ ज्वल दीप्तौ । २ कुच सम्पर्चनकौटिल्यप्रतिष्टंभविलेखनेषु । ३ पत्लृ पथि गतौ । ४ कथे निष्पाके । ५ मथे विलोडने । ६ पदृलृं विशरणगत्यवसादनेषु । ७ शदृलृं शातने । ८ बुध अवगमने । ९ डुवमू उद्गिरणे । १० भ्रमू चलने । ११ क्षर सञ्चलने । १२ चल कम्पने । १३ जल घात्ये । १४ टल ट्वल वैक्लव्ये । १५ घ्रुल स्थाने । १६ हल विलेखने । १७ णल गन्धे । १८ बल प्राणनधान्यावरोधयोः । १९ पुल महत्वे । २० कुल बन्धुसंस्त्यानयोः । २१ पल फल शल गतौ । २२ डुल हिंसासंवरणयोश्च । २३ क्रुशं आह्वानरोदनयोः । २४ कस गतौ । २५ रुहं जन्मनि । २६ रभिं क्रोडायाम् । २७ षहिं मर्षणे । वृत् ज्वलादिः ।

१ यजीं देवपूजासङ्गतिकरणदानेषु । २ व्येंग् तन्तुसन्ताने । ३ वेंग् संवरणे । ४ ह्वेंग् स्पर्धाशब्दयोः । ५ डुवपीं बीजसन्ताने । ६ वहीं प्रापणे । ७ ट्वोश्वि गतिवृद्ध्योः । ८ वद व्यक्तायाम् वाचि । ९ वसं निवासे । वृत् यजादिः ।

१ घटिष् चेष्टायाम् । २ क्षजुङ् गतिदानयोः । ३ व्यथिष् भयचलनयोः । ४ प्रथिष् प्रख्याने । ५ म्रदिष् मर्दने । ६ स्खदिष् खदने । ७ कवुङ् क्रवुङ् क्लवुङ्

वैक्लव्ये । ८ क्रपि कृपायाम् । ९ त्रित्वरिष् सम्भ्रमे । १० प्रसिष् विस्तारे । ११ दक्षि हिंसागत्योः । १२ श्रां पाके । १३ स्मृं आध्याने । १४ दृ भये । १५ नृ नये । १६ ष्टक स्तक प्रतीघाते । १७ चक तृप्तौ च । १८ अक कुटिलायां गतौ । १९ कखे हसने । २० अग अकवत् । २१ रगे शङ्कायाम् । २२ लगे सङ्गे । २३ हगे ह्रगे षगे सगे ष्टगे स्थगे संवरणे । २४ वट भट परिभाषणे २५ णट नृत्तौ । २६ गड सेचने । २७ हेड वेष्टने । २८ लड जिह्वोन्मथने । २९ फण कण रण गतौ । ३० चण हिंसादानयोश्च । ३१ शण श्रण दाने । ३२ स्नथ क्नथ क्रथ क्लथ हिंसार्थाः । ३३ छद उर्जने । ३४ मृदै हर्षग्लपनयोः । ३५ ष्टन स्तन ध्वन शब्दे । ३६ स्वन अवतंसने । ३७ चन हिंसायाम् । ३८ ज्वर रोगे । ३९ चल कम्पने । ४० ह्वल ह्मल चलने । ४१ ज्वल दीप्तौ च । वृत् घटादिः ।

॥ इति भ्वादयो निरनुबन्धा धातवः समाप्ताः ॥

१ अदं प्सांक् भक्षणे । २ भांक् दीप्तौ । ३ यांक् प्रापणे । ४ वांक् गतिगन्धनयोः । ५ ष्णांक् शौचे । ६ श्रांक् पाके । ७ द्रांक् कुत्सितगतौ । ८ पांक् रक्षणे । ९ लांक् आदाने । १० रांक् दाने । ११ दांक्ँ लवने । १२ ख्यांक् प्रकथने । १३ प्रांक् पूरणे । १४ मांक् माने । १५ इंक् स्मरणे । १६ इंण्क् गतौ । १७ वींक् प्रजनकान्त्यसनखादने च । १८ ह्रुंक् अभिगमे । १९ ष्वुंक् प्रसवैश्वर्ययोः । २० तुंक् वृत्तिहिंसापूरणेषु । २१ युक् मिश्रणे । २२ णुक् स्तुतौ । २३ क्ष्णुक् तेजने । २४ स्नुक् प्रस्रवणे । २५ ष्ठुक्षु रु कुंक् शब्दे । २६ रुदृक् अश्रुविमोचने । २७ त्रिष्वपंक् शये । २८ अन प्वसक् प्राणने । २९ जक्षक् भक्षहसनयोः । ३० दरिद्राक् दुर्गतौ । ३१ जागृक् निद्राक्षये । ३२ चकासृक् दीप्तौ । ३३ शासूक् अनुशिष्टौ । ३४ वचंक् भाषणे । ३५ मृजौक् शुद्धौ । ३६ सस्तुक् स्वप्ने । ३७ विदक् ज्ञाने । ३८ हनंक् हिंसागत्योः । ३९ वशक् कान्तौ । ४० असक् भुवि । ४१ षसक् स्वप्ने । ४२ यङ्लुप् च । इति परस्मैभाषाः ।

१ इंङ् अध्ययने । २ शीङ् स्वप्ने । ३ हनुंङ् अपनयने । ४ षूङौक् प्राणिगर्भविमोचने । ५ पूचैङ् पूजुङ् पिजुकी संपर्चने । ६ वृजैकिं वर्जने । ७ णिजुकिं विशुद्धौ । ८ शिजुकि अव्यक्ते शब्दे । ९ इडिक् स्तुतौ । १० ईरिक् गतिकंपनयोः । ११ ईशिक् ऐश्वर्ये । १२ वसिक् आच्छादने । १३ आङ्शासुकि इच्छायाम् । १४ आसिक् उपवेशने । १५ कसुकि गतिसातनयोः । १६ णिसुकि चुंबने । १७ चक्षिक् व्यक्तायाम् वाचि । इति आत्मनेभाषाः ।

१ ऊर्णुंक् आच्छादने । २ ष्टुंङ्क् स्तुतौ । ३ ब्रूंक् व्यक्तायाम् वाचि । ४ ह्रिषींक् अप्रीतौ । ५ दुहींक् क्षरणे । ६ दिहींक् लेपे । ७ लिहींक् आस्वादने इति उभयतो भाषाः ।

१ हुंक् दानादनयोः । २ ओहांक् त्यागे । ३ ह्रिभींक् भये । ४ हींक् लज्जायाम् । ५ पूंक् पालनपूरणयोः । ६ क्रंक् गतौ इति परस्मैभाषाः ।

१ ओहांङ् गतौ । २ मांङ् मानशब्दयोः । इति आत्मनेभाषाः ।

१ डुदांग्क् दाने । २ डुधांग्क् धारणे च । ३ टुडुभृंग्क् पोषणे च । ४ णिजृंकी शौचे च । ५ विजृंकी पृथग्भावे । ६ विष्लृंकी व्याप्तौ । इति उभयतो भाषाः । वृत ह्रादयः । इति अदादयः कितो धातवः ।

१ दिवूच् क्रीडाजयेच्छाद्यणिद्युतिस्तुतिगतिषु । २ जृष् ज्रष्च् जरसि । ३ शोंच् तक्षणे । ४ दों छोंच् छेदने । ५ षोंच् अन्तकर्मणि । ६ व्रीडच् लज्जायाम् । ७ नृतैच् नर्तने । ८ कुथच् पूतिभावे । ९ पुथच् हिंसायाम् । १० गुधच् परिवेष्टने । ११ राधंच् वृद्धौ । १२ व्यधंच् ताडने । १३ क्षिपंच् प्रेरणे । १४ पुष्पच् विकसने । १५ तिम तीम ष्टिम ष्टीमच् आर्द्रभावे । १६ षिवूच् उतौ । १७ श्रिवूच् गतिशोषणयोः । १८ ष्ठिवू क्ष्विवूच् निरसने । १९ इषच् गतौ । २० ष्णसूच् निरसने । २१ क्लसूच् व्हृतिदीप्त्योः । २२ ग्रसैच् भये । २३ प्युसच् दाहे । २४ षह पुहच् शक्तौ । २५ पुषंच् पुष्टौ । २६ उचच् समवाये । २७ लुटच् विलोटने । २८ ष्विदांच् गात्रप्रक्षरणे । २९ क्ष्विदौच् आर्द्रभावे । ३० ञिमिदाच् स्नेहने । ३१ ञिक्ष्विदाच् मोचने च । ३२ क्षुधंच् बुभुक्षायाम् । ३३ शुधंच् शौचे । ३४ क्रुधंच् कोपे । ३५ षिधूंच् संराद्धौ । ३६ रुधूच् वृद्धौ । ३७ गृधूच् अभिकांक्षायाम् । ३८ रधौच् हिंसासंराद्धयोः । ३९ तृपौच् प्रीतौ । ४० दृपौच् हर्षमोहनयोः । ४१ कुपच् क्रोधे । ४२ गुप्च् व्याकुलत्वे । ४३ युप रुप लुपच् विमोहने । ४४ डिपच् क्षेपे । ४५ ष्टूपच् समुच्छ्राये । ४६ लुभच् गार्द्ध्ये । ४७ क्षुभच् सञ्चलने । ४८ णभ तुभच् हिंसायाम् । ४९ नशौच् अदर्शने । ५० कुशच् श्लेषणे । ५१ भृशु भ्रंशूच् अधःपतने । ५२ वृशच् वरणे । ५३ कृशच् तनुत्वे । ५४ शुषंच् शोषणे । ५५ दुषंच् वैकृत्ये । ५६ श्लिषंच् आलिङ्गने ५७ प्लुषूच् दाहे ५८ जितृषच् पिपासायाम् । ५९ तुषं हृषच् तुष्टौ । ६० रुषंच् रोषे । ६१ प्युष् प्युस् पुसच् विभागे । ६२ विसच् प्रेरणे । ६३ कुसच् श्लेषे । ६४ असूच् क्षेपणे । ६५ यसूच् प्रयत्ने । ६६ जसूच् मोक्षणे । ६७ तसू दसूच् उपक्षये । ६८ वसूच् स्तम्भे । ६९ वुसच् उत्सर्गे । ७० मुसच् खण्डने । ७१ मसैच् परिणामे । ७२ शमू दमूच् उपशमे । ७३ तमूच् कांक्षायाम् । ७४ श्रमूच् खेदतपसोः । ७५ भ्रमूच् अनवस्थाने । ७६ क्षमूच् सहने । ७७ मदैच् हर्षे । ७८ क्लमूच् ग्लानौ । ७९ मुहौच् वैचित्ये । ८० ष्णुहौच् जिघांसायाम् । ८१ ष्णुहौच् उद्गिरणे । ८२ ष्णिहौच् प्रीतौ । वृत् पुषादिः । इति परस्मैभाषाः ।

१ षूङौच् प्राणिप्रसवे । २ दूंङ्च् परितापे । ३ दींङ्च् क्षये । ४ धींङ्च् अनादरे । ५ मींङ्च् हिंसायाम् । ६ रींङ्च् श्रवणे । ७ लींङ्च् श्लेषणे । ८ डींङ्च् गतौ । ९ व्रीङ्च् वरणे । वृत् स्वादिः ।

१० पीङ्च् पाने । ११ ईङ्च् गतौ । १२ प्रींङ्च् प्रीतौ । १३ युजिंच् समाधौ । १४ सृजिंच् विसर्गे । १५ वृतूचि वरणे । १६ पर्दिंच् गतौ । १७ विदिंच् सत्तायाम् । १८ खिदिंच् दैन्ये । १९ युधिंच् सम्प्रहारे । २० अनो

रुधिच् कामे। २१ बुधिं मनिच् ज्ञाने। २२ अनिच् प्राणने। २३ जनैचि प्रादुर्भावे। २४ दीपैचि दीप्तौ। २५ तपिच् ऐश्वर्ये वा। २६ पुरैचि आप्यायने। २७ घूरैङ् ज्वरैचि जरायाम्। २८ धूरैङ् गूरैचि गतौ। २९ थूरैचि स्तम्भे। ३० तूरैचि त्वरायाम्। ३१ घूरादयो हिंसायाम् च। ३२ चूरैचि दाहे। ३३ क्लिशिच् उपतापे। ३४ लिशिच् अल्पत्वे। ३५ काशिच् दीप्तौ। ३६ वासिच् शब्दे। इति आत्मनेभाषाः।

१ शकींच् मर्षणे। २ शुचृगैच् पूतिभावे। ३ रञ्जींच् रागे। ४ शपींच् आक्रोशे। ५ मृषींच् तितिक्षायाम्। ६ णहींच् बन्धने। इति उभयतो भाषाः। इति दिवादयश्चितो धातवः।

१ षुंग्ट् अभिषवे। २ षिंग्ट् बन्धने। ३ शिंग्ट् निशातने। ४ डुमिंग्ट् प्रक्षेपणे। ५ चिंग्ट् चयने। ६ धूग्ट् कम्पने। ७ स्तृंग्ट् आच्छादने। ८ कृंग्ट् हिंसायाम्। ९ वृग्ट् वरणे। इति उभयतोभाषाः।

१ हिंट् गतिवृद्धयोः। २ श्रुंट् श्रवणे। ३ टुदुंट् उपतापे। ४ पूंट् प्रीतौ। ५ स्मृंट् पालने च। ६ शक्लृंट् शक्तौ। ७ तिक तिग षधट् हिंसायाम्। ८ राधं साधंट् संसिद्धौ। ९ रुधूट् वृद्धौ। १० आप्लृंट् व्याप्तौ। ११ तृपट् प्रीणने। १२ दम्भूट् दम्भे। १३ कुवुट् हिंसाकरणयोः। १४ धिवुट् गतौ। १५ ञिधृषाट् प्रागल्भ्ये। इति परस्मैभाषाः।

१ ष्टिघिट् आस्कन्दने। २ अशौटि व्याप्तौ। इति आत्मनेभाषाः। इति स्वादयश्चितो धातवः।

१ तुदींत् व्यथने। २ भ्रस्जींत् पाके। ३ क्षिपींत् प्रेरणे। ४ दिशींत् अतिसर्जने। ५ कृषींत् विलेखने। ६ मुच्लृंती मोक्षणे। ७ षिचींत् क्षरणे। ८ विद्लृंती लाभे। ९ लुप्लृंती छेदने। १० लिपींत उपदेहे। इति उभयतो भाषाः॥ ११ कृतैत् छेदने। १२ खिदंत् परिघाते। १३ पिशत् अवयवे। वृत्मुचादिः।

१४ रिपींत् गतौ। १५ धिंत् धारणे। १६ क्षिंत् निवासगत्योः। १७ षूत् प्रेरणे। १८ मृंत् प्राणत्यागे। १९ कृत् विक्षेपे। २० गृत् निगरणे। २१ लिखत् अक्षरविन्यासे। २२ जर्ष झर्षत् परिभाषणे। २३ त्वचत् संवरणे। २४ रुचत् स्तुतौ। २५ ओव्रश्चौत् छेदने। २६ ऋछत् इन्द्रियप्रलयमूर्त्तिभावयोः। २७ विछत् गतौ। २८ उछैत् विवासे। २९ मिछत् उत्क्लेशे। ३० उछुत् उञ्छे। ३१ प्रच्छंत् ज्ञीप्सायाम्। ३२ उब्जत् आर्जवे। ३३ सृजंत् विसर्गे। ३४ रुजोंत् भङ्गे। ३५ भुजोंत् कौटिल्ये। ३६ टुमस्जोंत् शुद्धौ। ३७ जर्ज झर्जत् परिभाषणे। ३८ उज्झत् उत्सर्गे। ३९ जुडत् गतौ। ४० पृड मृडत् सुखने। ४१ कडत् मदे। ४२ पृणत् प्रीणने। ४३ तृणत् कौटिल्ये। ४४ मृणत् हिंसायाम्। ४५ ट्रणत् गतिकौटिल्ययोश्च। ४६ पुणत् शुभे। ४७ मुणत् प्रतिज्ञाने। ४८ कुणत् शब्दोपकरणयोः। ४९ घुण घूर्णत् भ्रमणे। ५० चृतैत् हिंसाग्रन्थयोः। ५१ णुदंत् प्रेरणे। ५२ षदॢंत् अवसादने। ५३ विधत् विधाने। ५४ जुन शुनत्

गतौ । ५५ छुंपत् स्पर्शे । ५६ रिफत् कथनयुद्धहिंसादानेषु । ५७ तृफ तृंफत् तृप्तौ । ५८ ऋफ रिंफत् हिंसायाम् । ५९ वृफ वृंफत् उत्क्लेशे । ६० गुफ गुंफत् ग्रंथने । ६१ उभ उंभत् पूरणे । ६२ शुभ शुंभत् शोभार्थे । ६३ दृभैत् ग्रंथे । ६४ लुभत् विमोहने ६५ कुरत् शब्दे । ६६ क्षुरत् विलेखने । ६७ खुरत् छेदने च । ६८ घुरत् भीमार्थशब्दयोः । ६९ पुरस् अग्रगमने । ७० मुरत् संवेष्टने । ७१ सुरत् ऐश्वर्यदीप्त्योः । ७२ स्फर स्फलत् स्फुरणे । ७३ किलत् श्वैत्यक्रीडनयोः । ७४ इलत् गतिस्वप्नक्षेपणेषु । ७५ हिलत् हावकरणे । ७६ शिल सिलत् उञ्छे । ७७ तिलत् स्नेहने । ७८ चलत् विलसने । ७९ चिलत् वसने । ८० विलत् वरणे । ८१ बिलत् भेदने । ८२ णिलत् गहने । ८३ मिलत् श्लेषणे । ८४ स्पृशंत् संस्पर्शे । ८५ रुशं रिशिंत् हिंसायाम् । ८६ विशंत् प्रवेशने । ८७ मृशंत् आमर्शने । ८८ लिशं क्वैत् गतौ । ८९ इषत् इच्छायाम् । ९० मिषत् स्पर्द्धायाम् । ९१ वृहौत् उद्यमे । ९२ तृंहौ तृहौ स्तृहौ स्तृंहौत हिंसायाम् । ९३ कुटत् कौटिल्ये । ९४ गुंत् पुरीषोत्सर्गे । ९५ ध्रंत् गतिस्थैर्ययोः । ९६ णूत् स्तवने । ९७ धूत् विधूनने । ९८ कुचत् संकोचने । ९९ व्यचत् व्याजीकरणे । १०० गुजत् शब्दे । १०१ घुटत् प्रतीघाते । १०२ चुट छुट त्रुटत् छेदने । १०३ तुटत् कलहकर्मणि । १०४ मुटत् आक्षेपप्रमर्दनयोः । १०५ स्फुटत् विकसने । १०६ पुट लुठत् संश्लेषणे । १०७ कुडत् घसने । १०८ कुडत बाल्ये च । १०९ गुडत् रक्षायाम् । ११० जुडत् बंधने । १११ तुडत् तोडने । ११२ लुड घुड स्थुडत् संवरणे । ११३ बुडत् उत्सर्गे च । ११४ भ्रुड भ्रुडत् संघाते । ११५ टुड हुड त्रुडत् निमज्जने । ११६ चुणत् छेदने । ११७ डिपत् क्षेपे । ११८ छुरत् छेदने । ११९ स्फुरत् स्फुरणे । १२० स्फुलत् संचये च । इति परस्मैभाषाः ।

१२१ कुंङ् कुङ्त् शब्दे । १२२ गुरैति उद्यमे । वृत्कुटादिः ।

१२३ पूंङ्त् व्यायामे । १२४ दंङ्त् आदरे । १२५ धूंङ्त् स्थाने । १२६ ओविजैति भयचलनयोः । १२७ ओलजैङ् ओलस्जैति व्रीडे । १२८ ष्वर्जिंत् सङ्गे । १२९ जुषैति प्रीतिसेवनयोः । इति आत्मनेभाषाः । इति तुदादयस्ततो धातवः ।

१ रुधूंपी आवरणे । २ रिचूंपी विरेचने । ३ विचूंपी पृथग्भावे । ४ युजूंपी योगे । ५ क्षुदूंपी संपेषे । ६ भिदूंपी विदारणे । ७ छिदूंपी द्वैधीकरणे । ८ ऊछृदूपी दीप्तिदेवनयोः । ९ ऊतृदूपी हिंसानादरयोः । इति उभयतो भाषाः ।

१० पूचैप् संपर्के । ११ वृचैप् वरणे । १२ तंचूं तंजौप् संकोचने । १३ भंजौंप् आमर्दने । १४ भुजंप् पालनाभ्यवहारयोः । १५ अंजौप् व्यक्तिम्रक्षणकान्तिगतिषु । १६ ओविजैप् भयचलनयोः । १७ कृतैप् संवेष्टने । १८ उंदैप् क्लेदने । १९ शिष्लंप् विशेषणे । २० पिष्लंप् संचूर्णने । २१ हिसु तृहप् हिंसायाम् । इति परस्मैभाषाः ।

२२ खिदिंप् दैन्ये । २३ विदिंप् विचारणे । २४ त्रिइंधैपि दीप्तौ । २५ इति आत्मनेभाषाः । इति रुधादयः पितो धातवः ।

१ तनूयी विस्तारे । २ षणूयी दाने । ३ क्षणू क्षिणूयी हिंसायाम् । ४ ऋणूयी गतौ । ५ तृणूयी अदने । ६ घृणूयी दीप्तौ । इति उभयतो भाषाः ।

७ वनूयि याचने । ८ मनूयि बोधने । इति आत्मनेभाषाः । इति तनादयो यितो धातवः ।

१ डुक्रींग्श् द्रव्यविनिमये । २ षिग्श् बन्धने । ३ प्रींग्श् तृप्तिकान्त्योः । ४ श्रींग्श् पाके । ५ मींग्श् हिंसायाम् । ६ युंग्श् बन्धने । ७ स्कुंग्श् आप्रवणे । ८ क्नूग्श् शब्दे । ९ द्रूग्श् हिंसायाम् । १० ग्रहीश् उपादाने । ११ पूग्श् पवने । १२ लूग्श् छेदने । १३ धूग्श् कम्पने । १४ स्तृग्श् आच्छादने । १५ कृग्श् हिंसायाम् । १६ वृग्श् वरणे । इति उभयतो भाषाः ।

१ ज्यांश् हानौ । २ रींश् गतिरेषणयोः । ३ लींश् श्लेषणे । ४ व्लींश् वरणे । ५ प्लींश् गतौ । ६ कॄ मॄ शॄश् हिंसायाम् । ७ पॄश् पालनपूरणयोः । ८ वृश् भरणे । ९ भृश् भर्जने च । १० दृश् विदारणे । ११ झृश् क्षयोहानौ । १२ नृश् नये । १३ गृश् शब्दे । १४ ऋश् गतौ । वृत्त्वादिः । वृत्त्वादिः ।

१५ ज्ञांश् अवबोधने । १६ क्षिंश्श् हिंसायाम् । १७ व्रीश् वरणे । १८ भ्रीश् भरणे । १९ हेठश् भूतप्रादुर्भावे । २० मृडश् सुखने । २१ ग्रन्थश् विमोचनप्रतिहर्षणयोः । २२ मन्थश् विलोडने । २३ ग्रन्थश् संदर्भे । २४ क्रुन्थश् संक्लेशे । २५ मृदश् क्षोदे । २६ गुधश् रोषे । २७ बन्धश् बन्धने । २८ क्षुभश् संचलने । २९ णभ तुभश् हिंसायाम् । ३० खषश् हेठश् वत् । ३१ क्लिशौश् विबाधने । ३२ अशश् भोजने । ३३ इषश् आभीक्ष्ण्ये । ३४ विषश् विप्रयोगे । ३५ प्लुष प्लुषश् स्नेहसेचनपूरणेषु । ३६ मुषश् स्तेये । ३७ पुषश् पुष्टौ । ३८ कुषश् निष्कर्षे । ३९ ध्रसुश् उञ्छे । इति परस्मैभाषाः ।

१ वृङ्श् सम्भक्तौ । इति आत्मनेभाषाः । इति क्र्यादयः शितो धातवः ॥

१ चुरण् स्तेये । २ पूण् पूरणे । ३ धूण् स्रवणे । ४ शुल्क वल्कण् भाषणे । ५ नक्क धक्कण् नाशने । ६ चक्क चुक्कण् व्यथने । ७ टक्कण् बन्धने । ८ अर्कण् स्तवने । ९ पिच्चण् कुट्टने । १० पचुण् विस्तारे । ११ म्लेच्छण् म्लेच्छने । १२ ऊर्जण् बलप्राणनयोः । १३ युज पिजुण् हिंसाबलदाननिकेतनेषु । १४ क्षुजुण् कुच्छ्रजीवने । १५ पूजण् पूजायाम् । १६ गज मार्जण् शब्दे । १७ तिजण् निशाने । १८ वज व्रजण् मार्गणसंस्कारगत्योः । १९ रुजण् हिंसायाम् । २० नटण् अवस्यन्दने । २१ तुट चुट चुट्ट छुट्टण् छेदने । २२ कुट्टण् कुत्सने च । २३ पुट्ट चुट्ट षुट्टण् अल्पीभावे । २४ पुट मुटण् संचूर्णने । २५ अट्ट स्मिटण् अनादरे । २६ लुण्टण् स्तेये च । २७ स्निटण् स्नेहने । २८ घट्टण् चलने । २९ खट्टण् संवरणे । ३० षट्ट स्फिट्टण् हिंसायाम् । ३१ स्फुटण् परिहासे । ३२ कीटण् वर्णने । ३३ वटुण् विभाजने । ३४ रुटण् रोषे । ३५ शठ श्वठुण् संस्कारगत्योः । ३६ शुठण् आलस्ये । ३७ शुठुण् शोषणे । ३८ गुठुण् वेष्टने । ३९ लडण् उपसेवायाम् । ४० स्फुडण् परिहासे । ४१ ओलडुण् उत्क्षेपे । ४२ पीडण् गहने । ४३

तडण् आघाते । ४४ खड खडुण् भेदे । ४५ कडुण् खण्डने च । ४६ कुडुण् रक्षणे । ४७ गुडुण् वेष्टने च । ४८ चुडुण् छेदने । ४९ मडुण् भूषायाम् । ५० भडुण् कल्याणे । ५१ पिडुण् सङ्घाते । ५२ ईडण् स्तुतौ । ५३ चडुण् कोपे । ५४ जुड चूर्ण वर्णण् प्रेरणे । ५५ चूण तूणण् संकोचने । ५६ श्रणण् दाने । ५७ पूणण् संघाते । ५८ चितुण् स्मृत्याम् । ५९ पुस्त बुस्तण् आदरानादरयोः । ६० मुस्तण् संघाते । ६१ कृतण् संशब्दने । ६२ स्वर्त पथुण् गतौ । ६३ श्रथण् प्रतिहर्षे । ६४ पृथुण् प्रक्षेपणे । ६५ प्रथण् प्रख्याने । ६६ छदण् संवरणे । ६७ चुदण् संचोदने । ६८ मिदुण् स्नेहने । ६९ गुर्दण् निकेतने । ७० छर्दण् वमने ७१ बुधण् हिंसायाम् । ७२ वर्धण् छेदनपूरणयोः । ७३ गर्धण् अभिकांक्षायाम् । ७४ बन्ध बधण् संयमने । ७५ छपुण् गतौ । ७६ क्षपुण् क्षान्तौ । ७७ धूपण् समुच्छ्राये । ७८ डिपण् क्षेपे । ७९ ह्रपण् व्यक्तायां वाचि । ८० डपु डिपुण् संघाते । ८१ शूर्पण् माने । ८२ शुल्बण् सर्जने च । ८३ डबु डिबुण् क्षेपे । ८४ सम्बण् सम्बन्धे । ८५ कुबुण् आच्छादने । ८६ लुबु तुबुण् तर्दने । ८७ पुर्बण् निकेतने । ८८ यमण् परिवेषणे ८९ व्ययण् क्षये । ९० यत्रुण् संकोचने । ९१ कुद्रुण् अनृतभाषणे । ९२ श्वभ्रण् गतौ । ९३ तिलण् स्नेहने । ९४ जलण् अपवारणे । ९५ क्षलण् शौचे । ९६ पुलण् समुच्छ्राये । ९७ बिलण् भेदे । ९८ तलण् प्रतिष्ठायाम् । ९९ तुलण् उन्माने । १०० दुलण् उत्क्षेपे । १०१ बुलण् निमज्जने । १०२ मुलण् रोदने । १०३ कल किल पिलण् क्षेपे । १०४ पलण् रक्षणे । १०५ इलण् प्रेरणे । १०६ चलण् भृतौ । १०७ सांत्वण् सामप्रयोगे । १०८ धूशण् कान्तीकरणे । १०९ श्लिषण् श्लेषणे । ११० लुषण् हिंसायाम् । १११ रुषण् रोषे । ११२ प्युषण् उत्सर्गे । ११३ पसुण् नाशने । ११४ जसुण् रक्षणे । ११५ पुंसुण् अभिमर्दने । ११६ ब्रुस पिस जस बर्हण् हिंसायाम् । ११७ ष्लिहण् स्नेहने । ११८ म्रक्षण् म्लेच्छने । ११९ भक्षण् अदने । १२० पक्षिण् परिग्रहे । १२१ लक्षीण् दर्शनांकनयोः ।

॥ इतोऽर्थविशेषे आलक्षिणः ॥

१२२ ज्ञाण् भारणादिनियोजनेषु । १२३ च्युण् सहने । १२४ भूण् अवकल्कने । १२५ बुक्कण् भषणे । १२६ रक लक रग लगण् आस्वादने । १२७ लिगुण् चित्रीकरणे । १२८ चर्चण् अध्ययने । १२९ अंचण् विशेषणे । १३० मुचण् प्रमोचने । १३१ अर्जण् प्रतियत्ने । १३२ भजण् विश्राणने । १३३ चट स्फुटण् भेदे । १३४ घटण् संघाते हन्त्यर्थाश्च । १३५ कणण् निमीलने । १३६ यतण् निकारोपस्कारयोः । १३७ निरश्च प्रतिदाने । १३८ शब्दण् उत्सर्गात् भाषाविष्कारयोः । १३९ पूदण् आश्रवणे । १४० आङः क्रंदण् सातत्ये । १४१ १४२ मुदण् संसर्गे । १४३ स्पृधण् प्रसहने । १४४ कृपण् अवकल्कने । १४५ जभुण् नाशने । १४६ अमण् रोगे । १४७ चरण् असंशये । १४८ पूरण् आप्यायने । १४९ दलण् विदारणे । १५० दिवण् अर्दने । १५१ पश पषण् बन्धने । १५२ पुषण् धारणे । १५३ घुषृण् विशब्दने । १५४ आङः क्रन्दे । १५५ भूष तसुण्

अलंकारे । १५६ जसण् ताडने । १५७ त्रसण् वारणे । १४८ वसण् स्नेहच्छेदावहरणेषु । १५९ भ्रसण् उत्क्षेपे । १६० ग्रसण् ग्रहणे । १६१ लसण् शिल्पयोगे । १६२ अर्हण् पूजायाम् । १६३ मोक्षण् असने । १६४ लोकृ, तर्क, रघु, लघु, लोचृ, विच्छ, अजु, तुजु, पिजु, लजु, लुजु, भजु, पट, पुट, लुट, घट, घटु, वृत, पुथ, नद, वृध, गुप, धूप, कुप, चिव, दशु, कुशु, त्रसु, पिसु, कुसु, दसु, वर्ह, वृहु, वल्ह, अहु, वहु, महुण्, भाषार्थाः । इति परस्मैभाषाः ।

१ युणि जुगुप्सायाम् । २ गृणि विज्ञाने । ३ वंचिण् प्रलम्भने । ४ कुटिण् प्रतापने । ५ मदिण् तृप्तियोगे । ६ विदिण् चेतनाख्याननिवासेषु । ७ मनिण् स्तंभे । ८ बलि भलिण् आभण्डने । ९ दिविण् परिकूजने । १० वृषिण् शक्तिबन्धे । ११ कुत्सिण् अवक्षेपे । १२ लक्षिण् आलोचने । १३ हिष्कि किष्किण् हिंसायाम् । १४ निष्किण् परिमाणे । १५ तर्जिण् संतर्जने । १६ कूटिण् अप्रमादे । १७ त्रुटिण् छेदने । १८ शठिण् श्लाघायाम् । १९ कूणिण् संकोचने । २० तूणिण् पूरणे २१ भ्रूणिण् आशंसायाम् । २२ चितिण् संवेदने । २३ बस्त गंधिण् अर्दने । २४ डपि डिपि डंपि डिंपि डंभि डिंभिण् संघाते । २५ स्यमिण् वितर्के । २६ शमिण् आलोचने । २७ कुस्मिण् कुस्मयने । २८ गुरिण् उद्यमे २९ तंत्रिण् कुटुंबधारणे । ३० मंत्रिण् गुप्तभाषणे । ३१ ललिण् ईप्सायाम् । ३२ स्पशिण् ग्रहणश्लेषणयोः । ३३ दंशिण् दंशने । ३४ दंसिण् दर्शने च । ३५ भर्त्सिण् संतर्जने । ३६ यक्षिण् पूजायाम् । इति आत्मनेभाषाः ।

॥ इतोऽदन्ताः ॥

१ अङ्कण् लक्षणे । २ व्लेप्कण् दर्शने । ३ सुख दुःखण् तत्क्रियायाम् । ४ अङ्कण् पदलक्षणयोः । ५ अघण् पापकरणे । ६ रचण् प्रतियत्ने । ७ सूचण् पैशून्ये । ८ भाजण् पृथक्कर्मणि । ९ सभाजण् प्रीतिसेवनयोः । १० लज लजुण् प्रकाशने । ११ कूटण् दाहे । १२ पट वट्टुण् ग्रन्थे । १३ खेटण् भक्षणे । १४ खोटण् क्षेपे । १५ पुटण् संसर्गे । १६ वट्टुण् विभाजने । १७ शठ श्वठण् सम्यग्भाषणे । १८ दण्डण् दण्डनिपातने । १९ व्रणण् गात्रविचूर्णने । २० वर्णण् वर्णक्रियाविस्तारगुणवचनेषु । २१ पर्णण् हरितभावे । २२ कर्णण् भेदे । २३ तूणण् संकोचने । २४ गणण् सङ्ख्याने । २५ कुण गुण केतण् आमन्त्रणे । २६ पतण् गतौ वा । २७ वातण् गतिसुखसेवनयोः । २८ कथण् वाक्यप्रबन्धे । २९ श्रथण् दौर्बल्ये । ३० छेदण् द्वैधीकरणे । ३१ गदण् गर्जे । ३२ अन्धण् दृष्टुपसंहारे । ३३ स्तनण् गर्जे । ३४ ध्वनण् शब्दे । ३५ स्तेनण् चौर्ये । ३६ उनण् परिहाणे । ३७ कृपण् दौर्बल्ये । ३८ रुपण् रूपक्रियायाम् । ३९ क्षप लाभण् प्रेरणे । ४० भामण् क्रोधे । ४१ गोमण् उपलेपने । ४२ सामण् सान्त्वने । ४३ श्रामण् आमन्त्रणे । ४४ स्तोमण् श्लाघायाम् । ४५ व्ययण् वित्तसमुत्सर्गे । ४६ सूत्रण् विमोचने । ४७ मूत्रण् प्रश्रवणे । ४८ पार तीरण् कर्मसमाप्तौ । ४९ कत्र गात्रण् शैथिल्ये । ५० चित्रण् चित्रक्रियाकदाचिद्दृष्टयोः । ५१ छिद्रण् भेदे । ५२ मिश्रण् संपर्चने । ५३ वरण् ईप्सायाम् ।

५४ स्वरण् आक्षेपे । ५५ शारण् दौर्बल्ये । ५६ कुमारण् क्रीडायाम् । ५७ कलण् संख्यानगत्योः । ५८ शीलण् उपधारणे । ५९ वेल कालण् उपदेशे । ६० पल पूलण् लवनपवनयोः । ६१ अंशण् समाघाते । ६२ पषण् अनुपसर्गः । ६३ गवेषण् मार्गणे । ६४ मृषण् क्षान्तौ । ६५ रसण् आस्वादनस्नेहनयोः । ६६ वासण् उपसेवायाम् । ६७ निवासण् आच्छादने । ६८ चहण् कत्कने । ६९ महण् पूजायाम् । ७० रहण् त्यागे । ७१ रहुण् गतौ । ७२ स्पृहण् ईप्सायाम् । ७३ रूक्षण् पारुष्ये । इति परस्मैभाषाः ।

१ मृगणि अन्वेषणे । २ अर्थणि उपयाचने । ३ पदणि गतौ । ४ संग्रामणि युद्धे । ५ शूर वीरणि विक्रान्तौ । ६ सन्नणि सन्दानक्रियायाम् । ७ स्थूलणि परिबृंहणे । ८ गर्वणि माने । ९ गृहणि ग्रहणे । १० कुहणि विस्मापने । इति आत्मनेभाषाः ।

१ युजण् संपर्चने । २ लीण् द्रवीकरणे । ३ मीण् गतौ । ४ प्रीगण् तर्पणे । ५ धूगण् कम्पने । ६ वृगण् आवरणे । ७ जॄण् वयोहानौ । ८ चीक शीकण् आमर्षणे । ९ मार्गण् अन्वेषणे । १० पृचण् संपर्चने । ११ रिचण् वियोजने । १२ वचण् भाषणे । १३ अर्चिण् पूजायाम् । १४ वृजैण् वर्जने । १५ मृजौण् शौचालङ्कारयोः । १६ कठुण् शोके । १७ ग्रन्थ ग्रन्थण् सदर्भे । १८ क्रथ अर्दिण् हिंसायाम् । १९ श्रथण् बन्धने च । २० विदण् भाषणे । २१ छदण् अपवारणे २२ आङः सदण् गतौ । २३ वृदण् संदीपने । २४ शुधिण् शुद्धौ । २५ तनुण् श्रद्धाघाते । २६ उपसर्गात् दैर्घ्ये । २७ मानण् पूजायाम् । २८ तपिण् दाहे । २९ तृपण् पृणने । ३० आप्लृण् लम्भने । ३१ दृभैण् भये । ३२ ईरण् क्षेपे । ३३ मृषिण् तितिक्षायाम् । ३४ शिषण् असर्वोपयोगे । ३५ विपूर्वो अतिशये । ३६ जुषण् परितर्कणे । ३७ घृषण् प्रसहने । ३८ हिंसुण् हिंसायाम् । ३९ गर्हण् विनिन्दने । ४० पहण् मर्षणे ।

॥ बहुलमेतन्निदर्शनम् । वृत्युजादिःपरस्मैभाषाः। इत्याचार्यहैमचन्द्रानुस्मृताश्वादयो णितो धातवः ॥

॥ इति हैम-धातुपाठः ॥

॥ अथ हैम-परिभाषापाठः ॥

१ स्वं रूपं शब्दस्याशब्दसंज्ञा । २ सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्य । ३ ऋलोर्वृद्धिमद्धिधाववयवेभ्यः। ४ स्वरस्य ह्रस्वदीर्घप्लुताः। ५ आद्यन्तवदेकस्मिन् । ६ प्रकृतिवदनुकरणम् । ७ एकदेशविकृतमनन्यवत् । ८ भूतपूर्वकस्तद्वदुपचारः । ९ भाविनि भूतवदुपचारः । १० यथासंख्यमनुदेशः समानाम् । ११ विवक्षातः कार-

काणि । १२ अपेक्षातोऽधिकारः। १३ अर्थवशाद् विभक्तिपरिणामः। १४ अर्थवद्ग्रहणे नानर्थकस्य । १५ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् । १६ नामग्रहणे लिङ्गविशिष्टस्यापि । १७ प्रकृतिग्रहणे यङ्लुबन्तस्यापि । १८ तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च । एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि । १९ सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य । २० असिद्धं बहिरङ्गमन्तरङ्गे । २१ न स्वरानन्तर्ये । २२ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः। २३ कृत्रिमाकृत्रिमयोः कृत्रिमे । २४ क्वचिदुभयगतिः । २५ सिद्धे सत्यारंभो नियमार्थः । २६ धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् । २७ नञुक्तं तत्सदृशे । २८ उक्तार्थानामप्रयोगः । २९ निमित्ताभावे नैमित्तिकस्याप्यभावः । ३० सन्नियोगशिष्टानामेकापाये ऽन्यतरस्याप्यपायः । ३१ नान्वाचीयमाननिवृत्तौ प्रधानस्य । ३२ निरनुबन्धग्रहणे न सानुबन्धकस्य । ३३ एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य । ३४ नानुबन्धकृतान्यसारूप्यानेकस्वरत्वानेकवर्णत्वानि । ३५ समासान्तागमसंज्ञाज्ञापकगणनञ्निर्दिष्टान्यनित्यानि । ३६ पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् । ३७ मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् । ३८ यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते । ३९ यस्य तु विधेर्निमित्तमस्ति नासौ विधिर्बाध्यते । ४० येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः। ४१ बलवन्नित्यमनित्यात् । ४२ अन्तरङ्गं बहिरङ्गात् । ४३ निरवकाशं सावकाशात् । ४४ वार्णात्प्राकृतम् । ४५ ध्वृद् ध्वृदाश्रयं च । ४६ उपपदविभक्तेः कारकविभक्तिः। ४७ लुबन्तरङ्गेभ्यः । ४८ सर्वेभ्यो लोपः । ४९ लोपात्स्वरादेशः । ५० आदेशादागमः । ५१ आगमात् सर्वादेशः । ५२ परान्नित्यम् । ५३ नित्यादन्तरङ्गम् । ५४ अन्तरङ्गाच्चानवकाशम्। ५५ उत्सर्गादपवादः। ५६ अपवादान् क्वचिदुत्सर्गोऽपि। ५७ नानिष्टार्था शास्त्रप्रवृत्तिः। ५८ प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानामपि ग्रहणम् । ५९ प्रत्ययाप्रत्ययययोः प्रत्ययस्यैव । ६० अदाद्यनदाद्योरनदादेरेव । ६१ प्राकरणिकाप्राकरणिकयोः प्राकरणिकस्यैव । ६२ निरनुबन्धग्रहणे सामान्येन । ६३ साहचर्यात् सदृशस्यैव । ६४ वर्णग्रहणे जातिग्रहणम् । ६५ वर्णैकदेशोऽपि वर्णग्रहणेन गृह्यते । ६६ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते। ६७ आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते। ६८ स्वाङ्गमव्यवधायि । ६९ उपसर्गो न व्यवधायी । ७० येन नाव्यवधा तेन व्यवहितेऽपि स्यात् । ७१ ऋकारापदिष्टं कार्यं लृकारस्यापि । ७२ सकारापदिष्टं तदादेशस्य शकारस्यापि । ७३ ह्रस्वदीर्घापदिष्टं कार्यं न प्लुतस्य । ७४ संज्ञोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं न तदन्तस्य । ७५ ग्रहणवता नाम्ना न तदन्तविधिः। ७६ अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं प्रयोजयन्ति । ७७ गामादाग्रहणेष्वविशेषः । ७८ श्रुतानुमितयोः श्रौतो विधिर्बलीयान् । ७९ अन्तरङ्गानपि विधीन् यबादेशो बाधते । ८० सकृद्गते स्पर्द्धे यद् बाधितं तद् बाधितमेव । ८१ द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधकः । ८२ कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये पश्चाद् वृद्धिस्तद्ग्राह्योऽट् च । ८३ पूर्वं पूर्वोत्तरपदयोः कार्यं कार्यं

पश्चात् सन्धिकार्यम् । ८४ संज्ञा न संज्ञान्तरबाधिका । ८५ सापेक्षमसमर्थम् । ८६ प्रधानस्य तु सापेक्षत्वेऽपि समासः । ८७ तद्धितीयो भावप्रत्ययः सापेक्षादपि । ८८ गतिकारकङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समासः। ८९ समासतद्धितानां वृत्तिर्विकल्पेन वृत्तिविषये च नित्यैवापवादवृत्तिः । ९० आदशभ्यः संख्या संख्येये वर्तते न संख्याने । ९१ एकशब्दस्यासंख्यात्वं क्वचित् । ९२ णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद् भवति । ९३ द्विर्वद्धं सुवद्धं भवति । ९४ आत्मनेपदमनित्यम् । ९५ क्विपि व्यञ्जनकार्यमनित्यम् । ९६ स्थानिवद्भावपुंवद्भावैकशेषद्वन्द्वैकत्वदीर्घत्वान्यनित्यानि । ९७ अनित्यो णिच्चुरादीनाम् । ९८ णिलोपोऽप्यनित्यः । ९९ णिच्संनियोगे एव चुरादीनामदन्तता । १०० धातवोऽनेकार्थाः । १०१ गत्यर्था ज्ञानार्थाः । १०२ नाम्नां व्युत्पत्तिरव्यवस्थिता । १०३ उणादयोऽव्युत्पन्नानि नामानि । १०४ शुद्धधातूनामकृत्रिमं रूपम् । १०५ क्विबन्ता धातुत्वं नोज्झन्ति शब्दत्वं च प्रतिपद्यन्ते । १०६ उभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभाक् । १०७ अवयवे कृतं लिङ्गं समुदायमपि विशिनष्टि चेत्तं समुदायं सोऽवयवो न व्यभिचरति । १०८ येन धातुना युक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञाः। १०९ यत्रोपसर्गत्वं न संभवति तत्रोपसर्गशादेव प्रादयो लक्ष्यन्ते न तु संभवत्युपसर्गत्वे । ११० शीलादिप्रत्ययेषु नासरूपोत्सर्गविधिः । १११ त्यादिष्वन्योन्यं नासरूपोत्सर्गविधिः । ११२ स्त्रीखलना अलो बाधकाः स्त्रियाः खलनौ । ११३ यावत् संभवस्तावद्विधिः । ११४ संभवे व्यभिचारे च विशेषणमर्थवत् । ११५ सर्वं वाक्यं सावधारणम् । ११६ परार्थे प्रयुज्यमानः शब्दो वतमन्तरेणापि वदर्थं गमयति । ११७ द्वौ नञौ प्रकृतमर्थं बोधयतः । ११८ चकारो यस्मात्परस्तत्सजातीयमेव समुच्चिनोति । ११९ चानुकृष्टं नानुवर्त्तते । १२० चानुकृष्टेन न यथासंख्यम् । १२१ व्याख्यातो विशेषार्थप्रतिपत्तिः। १२२ यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिभवन्तीपरः प्रयुज्यते। १२३ यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः। १२४ यस्य येनाभिसंबन्धो दूरस्थस्यापि तेन सः । १२५ येन विना यन्न भवति तत्तस्यानिमित्तस्यापि निमित्तम् । १२६ नामग्रहणे प्रायेणोपसर्गस्य न ग्रहणम् । १२७ सामान्यातिदेशे विशेषस्य नातिदेशः । १२८ सर्वत्रापि विशेषेण सामान्यं बाध्यते न तु सामान्येन विशेषः । १२९ ङित्त्वेन कित्त्वं बाध्यते । १३० परादन्तरङ्गं बलीयः । १३१ प्रत्ययलोपेऽपि प्रत्ययलक्षणं कार्यं विज्ञायते । १३२ विधिनियमयोर्विधिरेव ज्यायान् । १३३ अनन्तरस्यैव विधिर्निषेधो वा । १३४ पर्जन्यवल्लक्षणप्रवृत्तिः । १३५ न केवला प्रकृतिः प्रयोक्तव्या । १३६ किमर्थं प्रकृतिरेवाह । १३७ द्वन्द्वात्परः प्रत्येकमभिसंबध्यते । १३८ विचित्राः शब्दशक्तयः । १३९ किं हि वचनान्न भवति । १४० न्यायाः स्थविरयष्टिप्रायाः ॥

॥ अथ हैम-लिङ्गानुशासनम् ॥

॥ लघुन्यासस्थावचूरिसहितम् ॥

॥ तत्र प्रथमं पुंलिङ्गाधिकारः ॥

पुंलिङ्गं कटणथपभमयरषसन्त्वन्तमिमनलौ किशितव् ॥
ननङौ घघञौ दः किर्भावे खोऽकर्तरि च कः स्यात् ॥१॥

(अव०) लिङ्गानुशासनमन्तरेण शब्दानुशासनं नाविकलमिति सामान्यविशेषलक्षणाभ्यां लिङ्गमनुशिष्यते । नामेति वक्ष्यमाणमिह संबध्यते । कटणथपभमयरषसान्तं स्त्वन्तं च नाम पुंलिङ्गं स्यात् । कादयोऽकारान्ता गृह्यन्ते पृथक् सन्तनिर्देशात् ॥ द्विस्वरसन्तानां नपुंसकत्वस्य वक्ष्यमाणत्वेन एकस्विस्वरादिसन्ता गृह्यन्ते ॥ कान्तः-आनकः-पटहो दुन्दुभिश्चेत्यादि । टान्तः-कक्षापुटः-सारसंग्रहग्रन्थः इत्यादि । णान्तः-गुणः शुम्बेऽप्रधानादौ । इत्यादि । थान्तः-निशीथः अर्धरात्रः, शपथः समयः । इत्यादि । पान्तः-क्षुपो लतासमुदायः । इत्यादि । भान्तः-दर्भो बर्हिः । इत्यादि । मान्तः-गोधूमो नागरङ्गे स्यात् । इत्यादि । यान्तः-भागधेयो दायादः । राजदेये तु पुंस्त्रियोर्वक्ष्यते । शुभे तु तन्नामत्वादेव क्लीबत्वम् । तन्दुलीयः शाकविशेष इत्यादि । रान्तः-निदुरः । कन्दरी । इत्यादि । षान्तः-गवाक्षः । 'गवाक्षी शक्रवारुण्यां गवाक्षो जालके कपौ' इत्यादि । सान्तः-कूर्पासः कञ्चुके । हंसो विहङ्गभेदे । इत्यादि । सन्तः-माश्चन्द्रमासयोः पुंसि । अनेहा कालः इत्यादि । नन्तः-ग्रावा पाषाणो गिरिश्च । इत्यादि । उकारान्तः-तर्कुः सूत्रवेष्टनमगन्याधारभाण्डं च । मन्तुः अपराधः । इत्यादि । अन्तान्तं नाम पुंलिङ्गम् । पर्यन्तोऽवसानम् । विष्टान्तः मरणम् । प्रत्यन्तस्य बाहुलकत्वाच्चपुंसकत्वमेव । इमन्प्रत्ययान्तमल्प्रत्ययान्तं च नाम पुंलिङ्गम् । इमन्-प्रथिमा । भ्रदिमा । द्रढिमा इत्यादि । नन्तत्वेनैव सिद्धे इमनग्रहणम् 'आत्वात् त्वादिः' इति नपुंसकबाधनार्थम् । यस्त्वौणादिकस्तस्याश्रयलिङ्गता । भरिमा पृथ्वी, वरिमा तपस्वी इत्यादि । अल्-प्रभवः । प्रभवस्तु पराक्रमे । मोक्षेऽपवर्गः इत्यादि । तथा क्यन्तं शितवन्तं नाम पुंलिङ्गम् । किः-अयं वृतिः-वृतूङ् धातुस्तदर्थश्च । शितव्-अयं पचति-डुपचींष् धातुस्तदर्थश्च । शितव्साहचर्यात् 'इकिशितव् स्वरूपार्थे' इति विहितस्यैव केग्रहणम् । तथा नप्रत्ययान्तं नङ्प्रत्ययान्तं (च) नाम पुंलिङ्गम् । 'स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शनेऽपि च' । प्रश्नः पृच्छा । नङ्-विश्नो गमनम् । तथा घप्रत्ययान्तं घञ्प्रत्ययान्तं च नाम पुंलिङ्गम् । घः-करः । 'करो वर्षोपले रश्मौ पाणौ प्रत्यायशुण्डयोः' । परिसरो मृत्यौ देशोपान्तप्रदेशयोः । उरश्छदः कवचं

प्रच्छदश्चोत्तरपटः । छदस्य तु नपुंसकता वक्ष्यते । इत्यादि । घञन्तम्-पादः । पादो वुन्धांह्रितुर्यांशरश्मिप्रत्यन्तपर्वतादिषु । आप्लावः स्नानम् । भावः । 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु । क्रियालीलापदार्थेषु विभूतिबन्धजन्तुषु' ॥ अनुबन्धः प्रकृत्यादेरनुयोगी । दासंज्ञकाद्धातोर्यः किः प्रत्ययो विहितस्तदन्तं नाम पुंलिङ्गम् । आदिः प्राथम्यम् । व्याधिः रोगः । उपाधिर्धर्मचिन्ता कैतवं कुटुम्बव्यापृतौ विशेषणं च । उपधिः कपटम् । उपनिधिः न्यासः । प्रतिनिधिः प्रतिबिम्बम् । संधिः पुमान् सुरङ्गादौ । परिधिः परिवेषः । अवधिस्त्ववधानादौ । प्रणिधिः प्रार्थनमवधानं चरश्च । समाधिः प्रतिसमाधानं नियमो मौनं चित्तैकाग्र्यं च । विधिः कालः कल्पो ब्रह्मा विधिवाक्यं विधानं दैवं प्रकारश्च । वालधिः पुच्छम् । शब्दधिः कर्णः । जलधिः समुद्रः । अन्तार्द्धिर्न्यधा । प्रघेस्तु नेमौ स्त्रीपुंसत्वं वक्ष्यते रोगविशेषे स्त्रीत्वं, शिरोघेस्तु स्त्रीत्वम्, इषुधेस्तु स्त्रीपुंसत्वं वक्ष्यते । इत्यादि । भावे खः । भावेऽर्थे यः खो विहितस्तदन्तं नाम पुंलिङ्गम् । आशितस्य भवनं आशितंभवो वर्तते । तृप्तिरित्यर्थः । भाव इति किम् । आशितो भवत्यनया आशितंभवा पञ्चपूली । अकर्तरि च कः स्यात् । भावे कर्तृवर्जिते च कारके यः कः प्रत्ययस्तदन्तं नाम पुंलिङ्गम् । आखूनामुत्थानमाखूत्थः, विहन्यतेऽनेनास्मिन् वा विघ्न अन्तरायः इत्यादि । अकर्तरि चेति किम् । जानातीति ज्ञा परिषद् ॥१॥

हस्तस्तनौष्ठनखदन्तकपोलगुल्फकेशान्धुगुच्छदिनसर्तुपतद्ग्रहाणाम् ।
निर्यासनाकरसकण्ठकुठारकोष्ठहैमारिवर्षविषबोलरथाशनीनाम् ॥ २ ॥

(अव०) हस्तादीनां नाम जलध्यादीनां तु सभिदां सप्रभेदानामपि पुंलिङ्गं भवति । हस्तनाम-पञ्चशाखः । करः । शयः । अयं शय्यायामपि यान्तत्वात् पुंसि । हस्तस्य तु पुंनपुंसकत्वम् । स्तननाम-स्तनः, पयोधरः, कुचः, वक्षोजः इत्यादि । ओष्ठनाम-ओष्ठः, अधरः, दन्तच्छदः इत्यादि । नखनाम-करजः, कररुहः, मदनाङ्कुशः इत्यादि । नखः पुंक्लीबः । नखरस्तु त्रिलिङ्गः । दन्तनाम-दन्तः । दशनः । अयं रुग्रटेन क्लीबेऽपि निबद्धः-'दशनानि च कुन्दकलिकाः स्युः' इति तच्चिन्त्यम् । द्विजः । रदः । रदनः इत्यादि । कपोलनाम-कपोलः । गण्डः । गल्लः इत्यादि । गुल्फनाम-गुल्फः । गुट्टः । प्रपदः । आप्रपदः । खुरकः । निस्तोदः । पादशीर्षः इत्यादि । हस्तिगुल्फस्तु प्रौहः । घुटिकघुण्टिघुण्टगुल्फास्तु स्त्रीपुंसलिङ्गा वक्ष्यन्ते । केशनाम-केशः । शिरोजः । शिरोरुहः । चिकुरः । चिहुरः । कचः-अयं बाहुलकाद् व्रणेऽपि पुंसि । गुरोः पुत्रे तु देहिनामत्वात्सिद्धम् । इभ्यां तु योनिमत्वात्स्त्रीत्वम् । अस्रः । वेल्लिताग्रः इत्यादि । वृजिनश्च । यद्गौडः । 'वृजिनं कल्मषे क्लीबं केशे ना कुटिले त्रिषु' । कुन्तलश्च । 'कुन्तलाः स्युर्जनपदो हलो वालश्च कुन्तलः' । हले बाहुलकात् पुंसि । वालः पुंनपुंसको वक्ष्यते । तद्विशेषोऽपि केशः । कुरलः अलकः । अन्धुः कूपस्तन्नाम-अन्धुः । ह्रहिः । प्रहिः इत्यादि । कूपस्तु स्त्रीपुंसलिङ्गः । गुच्छनाम-गुच्छः ।

गुत्सः । गुलुञ्छः । स्तबकस्तु पुंक्लीबः । दिननाम-घस्रः । सूर्याङ्गः । दण्डयामः । दिन-दिवसवासराणां पुंनपुंसकत्वम् । दिवाह्नोस्तु नपुंसकत्वम् । स इति समासस्याख्या पूर्वाचार्याणाम् । तन्नाम । तन्नाम-बहुव्रीहिः, अव्ययीभावः, द्वन्द्वः इत्यादि । ऋतुनाम-हेमन्तः । वसन्तशिशिरनिदाघाः पुन्नपुंसकाः । शरत्प्रावृड्वर्षाश्च स्त्रीलिङ्गाः । ऋतुस्तु उदन्तःवात् पुंसि । पतद्ग्रह आचेलकाधारस्तन्नाम । प्रतिग्रहः । प्रतिग्राहः इत्यादि । निर्यासनाम-वृक्षादीनां रसः-गुग्गुलः । श्रीपृष्टः । श्रीवेष्टः । सर्जरसः । उषः । उलूखलं नपुंसकम् । निर्यासस्तु पुंनपुंसकः । कुम्भकुन्दोलूखले तु बाहुलकान्नपुंसके । नाकनाम-स्वर्गः । स्वः। अव्ययम् । नाकत्रिदिवौ पुंनपुंसकौ । दिवं त्रिविष्टपं क्लीबे । द्योदिवौ स्त्री । रसाः शृङ्गारादयस्तन्नाम-शृङ्गारहास्यकरुणरौद्रवीरभयानकशान्तबीभत्सादद्भुता इति । वत्सलस्तु पुत्रादिस्नेहात्मा रतिभेद एव । शृङ्गारः पुंक्लीबः । गौडस्तु 'शृङ्गारवीरौ बीभत्सं रौद्रं हास्यं भयानकम् । करुणा चाद्भुतं शान्तं वात्सल्यं च रसा दश' इति । कण्ठनाम-गलः । नालः । कुठारनाम-परशुः । पर्शुः । स्वधितिः इत्यादि । कुठारः पुंस्त्री । कोष्टनाम-कुशूलः इत्यादि । हैमनाम-हैमो भेषजभेदः-किराततिक्तः । किरातकसंज्ञः । अरिनाम-द्विषन् । प्रत्यर्थी । रिपुः इत्यादि । वर्षनाम-वत्सः । संवत्सरः । संवदित्यव्ययमपीति कश्चित् । वर्षहायनाब्दास्तु पुंक्लीबाः । शरत्समे तु स्त्रीलिङ्गे । विषनाम-गरः । ब्रह्मसुतः । क्ष्वेडः । वत्सनाभः इत्यादि । विषकालकूटगरलहालाहलकाकोलाः पुंनपुंसकाः। मधुरस्य बाहुलकात् क्लीबत्वम् । बोल औषधविशेषस्तन्नाम-गन्धरसः । प्राणः । इत्यादि । रथनाम-पताकी । स्यन्दनः पुंनपुंसकोऽयमिति गौडशेषः । रथः पुंस्त्री । अशनिनाम-पविः । इत्यादि । अशनिः पुंस्त्री । वज्रकुलिशौ पुंक्लीबौ । भिदुरं बाहुलकात् क्लीबम् ॥२॥

*श्वेतप्लवात्ममुरजासिकफाभ्रपङ्कमन्थत्विषां जलधिशेवधिदेहभाजाम् ।
मानद्रुमादिविषयाशुगशोणमासधान्याध्वराग्निमरुतां सभिदां तु नाम ॥३॥

(अव०) श्वेतनाम-श्वेतः । कपर्दः । प्लवनाम-कोलः । मेलः । उडुपस्तु पुंक्लीबः । आत्मनाम-जीवः । पुद्गलः । क्षेत्रज्ञः । प्रधाने त्वाश्रयलिङ्गता । पुरुषः इत्यादि । मुरजो मर्दलस्तन्नाम-मृदङ्गः । मुरजभेदोऽपि । मुरजः । असिनाम-निस्त्रिंशः । खड्गः । कफेस्तु पुंस्त्रीत्वम् । कफः श्लेष्मा । खेटस्तु पुंक्लीबः । अभ्रं मेघः । अभ्रस्तु पुंक्लीबः । पङ्को निषद्वरः । पङ्कजम्बालौ पुंक्लीबौ । मन्थः मन्थानः । त्विट् कांतिः । अंशुः । अयं रश्वावपि । अंशुः । मूर्धन्योपान्त्योऽयम् । मयूखः । अयं शोभाज्वालयोरपि बाहुलकात् पुंसि । रुचित्विड्द्युतिदीधितयः स्त्रीलिङ्गाः । रोचिःशोचिषी तु द्विस्वरसन्तत्वात् क्लीबे । गोमरीचिप्रश्नयस्तु पुंस्त्रीलिङ्गाः । रश्मिः । अयं रज्जौ स्त्रियाम् । जलधिः । अर्णवः । समुद्रः । महाकच्छः । पश्चिमाशापतौ तु देहिनामत्वात् पुंसि । तत्प्रभेदनाम-क्षीरोदः लवणोदः इत्यादि । शेवधिः । निधिः । तत्प्रभेदः । 'महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव' । पद्मस्य त्विभबिन्दौ

नपुंसकत्वम् । देही । जन्तुः । जन्मी । जन्मशब्दोऽकारान्ताऽप्यस्ति । जन्तुः पुंनपुंसकः । तत्प्रभेदः-ब्राह्मणः । क्षत्रियः । वैश्यः । शूद्र इत्यादि । देवः । सुरः । इत्यादि । तत्प्रभेदः-इन्द्रः । चन्द्रः इत्यादि । माननाम-तूलः । कुडवः । प्रस्थः पुंनपुंसकः । आढकस्तु त्रिलिङ्गः । द्रुमनाम-अंहिपः वनस्पतिः। विषयनाम-विषयः इन्द्रियग्राह्यो गन्धशब्दस्पर्शादिः देशश्च । तुबररावकषाय-कोलाहलनीलानां पुंक्लीबत्वम् । रूपस्य तु नपुंसकत्वम् । आशुगनाम-पतत्रिः । शरबाणकाण्डाः पुंनपुंसकाः । इषुस्त्रिलिङ्गः । धान्यनाम-व्रीहिः । स्तम्बकरिः । धान्यसीत्यशस्यानां संयुक्तयान्तत्वेन नपुंसकत्वम् । माषाणू पुंनपुंसकौ । आढकीप्रियंगू स्त्री । मसूरः स्त्रीपुंसः । शणं नपुंसकम् । अध्वरनाम-अध्वरः । मखः । यज्ञः । वितानवाजपेयराजसूयानां यज्ञविशेषाणां पुंनपुंसकत्वम् । बर्हिः-सत्रयोस्तु नपुंसकत्वम् । अग्निनाम-भास्करः, आशुशुक्षणिः । अयमण्यन्तोऽपि बाहुलकात् पुंसि । मरुन्नाम-वातः । समानस्तु पुंनपुंसकः ॥३॥

बर्होऽच्छदेऽहिर्वप्रे व्रीह्यग्न्योर्हायनबर्हिषौ ॥
मस्तुः सक्तौ स्फटिकेऽच्छो नीलमित्रौ मणीनयोः ॥४॥

(अव०) छदः पर्ण पिच्छं च । ततोऽन्यस्मिन् बर्हः पुंसि । बर्हः परिवारः । तयोस्तु पुंनपुंसकः । वप्रे केदारेऽहिः पुंसि । सर्पे तु पुंस्त्री । हायन-बर्हिषौ व्रीह्यग्नौ च पुंसि । वर्षरश्म्योश्च भेदे पुंनपुंसकौ । बर्हिषोऽग्निनामत्वा-देव सिद्धे द्विस्वरसन्तक्लीबत्वबाधनार्थम् । सक्तौ धानाविकारे मस्तुः । अन्यत्र तु स्वन्तत्वात् क्लीबत्वम् । स्फटिकेऽच्छः । अयमव्ययमाभिमुख्येऽप्यस्ति । मणौ रत्ने इने सूर्ये क्रमेण नीलमित्रौ पुंसि । नीलान्तत्वान्महीनीलोऽपि । मित्रस्य देहिनामत्वादेव सिद्धे नियमार्थं, तेन सुहृदि संयुक्तरान्तत्वेन क्लीबत्वम् ॥४॥

कोणेऽस्रश्चषके कोशस्तलस्तालचपेटयोः ॥
अनातोद्ये घनो भूम्नि दारप्राणासुवल्वजाः ॥५॥

(अव०) कोणेऽस्रः पुंसि । कोणः अस्रः । अन्यत्रेदमस्रं रुधिरम् । संयु-क्तरान्तत्वान्नपुंसकत्वम् । केशे तु नन्नामत्वादेव पुंस्त्वम् । चषके कोशः पुंसि । कोशश्चषकः । प्रत्याकारे शम्बायां च त्रिषु । भाण्डागारादौ तु पुंनपुंसकः । तालो वृक्षविशेषो वितस्तिश्च तयोश्चपेटे च तलः पुंसि । तलान्तत्वात् प्रत-लोऽपि चपेटे । आतोद्यमुपलक्षणं नृत्यस्य । आतोद्यान्मध्यमनृत्ताद्यान्यत्र घनः पुंसि । दाराः कलत्रम् । प्राणा असवो जीवितं च । असवः प्राणाः । वल्वजा उपलाख्यस्तृणभेदः । एते पुंलिङ्गाः । भूम्नि-बहुत्व एव । क्वचिदेषामेकत्वमपि । असुसाहचर्यात्तद्वाचिन एव प्राणस्य बहुत्वम् । पुंस्त्वं तु णान्तत्वादेव सिद्धम् ॥५॥

कान्तश्चन्द्रार्कनामायःपरो यानार्थतो युगः ॥
यश्च स्यादसमाहारे द्वन्द्वोऽश्ववडवाविति ॥६॥

(अव०) चन्द्रार्कनामभ्योऽयःशब्दाच्च परः कान्तो यानार्थवाचिनः परो

युगश्च पुंलिङ्गः । चन्द्रकान्तः । सूर्यकान्तः । अयस्कान्तः लोहाकर्षणः । (यूप-युग्मयोरपि) यानयुगः । शकटयुगः । यश्चासमाहारे इतरेतरयोगे द्वन्द्वोऽश्ववडवाविति स पुंसि । अश्वश्च वडवा चेमावश्ववडवौ । द्विवचनमतन्त्रम् । तेनाश्ववडवाः । अश्ववडवान् पश्य । 'अश्ववडवपूर्वापराधरोत्तराः' इति निर्देशाद्ध्रस्वत्वम् । असमाहार इति किम् । अश्ववडवम् । द्वन्द्व इति किम् । अश्वो वडवाऽस्याश्ववडवमुन्मुग्धं कुलम् । अश्ववडवा स्त्री । द्वन्द्वस्यापरवलिङ्गत्वप्राप्तौ वचनम् ॥ ६ ॥

वाकोत्तरा नक्तकरलकाङ्का न्युङ्कोत्तरासङ्गतरङ्गरङ्गाः ॥
परागपूगौ सृगमस्तुलङ्गकुडङ्गकालिङ्गमतङ्गमङ्गाः ॥ ७ ॥

(अव०) अतःपरं स्वरान्तक्रमेण शब्दा उदाह्रियन्ते । तत्र स्वरान्तेषु ककारोपान्त्यादिक्रमेणाकारान्ता उदाह्रियन्ते । वाकोत्तरपदा नक्तकादयश्च शब्दाः पुंलिङ्गाः । अनूच्यत इति अनुवाकः-ऋग्यजुःसमूहात्मकं वचनम् । घञन्तत्वादेव सिद्धे नियमार्थं वचनम्, 'भाव एव पुंस्त्व' मिति । तेन वङ्कं काष्ठमित्यादौ भावादन्यत्र घञन्तस्याश्रयलिङ्गता । अनुगतो अथवा वाकोऽनेन तदनुवाक इति अन्यपदार्थत्वेऽपि पुंस्त्वार्थम् । नक्तको गलनम् । रलकः पक्ष्मकम्बलः । अङ्कः समीपम् । नक्तकरलकयोर्वस्त्रनामत्वेनाङ्कस्यान्तिकनामत्वेन क्लीबत्वे प्राप्ते वचनम् । न्युङ्काः षडोङ्काराः । सम्यग्मनोज्ञे त्वाश्रयलिङ्गः । उत्तरासङ्गः वैकक्ष्यम् । तद्वाची अर्थप्राधान्यात् कम्बलोऽपि । तरङ्गः ऊर्मिः । रङ्गो नर्तनभूमिः । परागो धूल्यादिः । पूगः क्रमुकः संघोऽपि । अयं क्लीबोऽपीति कश्चित् । सृगो भिन्दिपालाख्यः शस्त्रविशेषोऽर्थप्राधान्याद् भिन्दि (न्द) पालोऽपि । मस्तुलिङ्गो मस्तिष्कः । कुडङ्गो वृक्षगहनम् । कालिङ्गः कालिङ्गिनी तत्फलं च । चिर्भट्यां वल्लिनामत्वादेव स्त्रीत्वम् । वल्लिनामत्वेन स्त्रीत्वे फलनामत्वेन क्लीबत्वे प्राप्ते वचनम् । तमङ्ग इन्द्रकोशः । मङ्गो धर्मो नौः शिरश्च ॥७॥

वेगसमुद्गावपाङ्गवर्गौघार्घा मञ्चसपुच्छपिच्छगच्छाः ॥
वाजौजकिलिञ्जपुञ्जमुञ्जा अवटः पट्टहठप्रकोष्ठकोष्ठाः ॥८॥

(अव०) वेगो रयः किंपाकफलं प्रवाहो मूत्रादिप्रवृत्तिश्च । समुद्गः संपुटः । अपाङ्गो नेत्रान्तस्तिलकश्च । वर्गः संघातः । ओघः समूहादिः । अर्घो मूल्यं पूजाविशेषश्च । वेगवर्गरङ्गौघार्घाणामौणादिकगान्तानां समुद्गस्य च डान्तस्य ग्रहणम् । घञन्तत्वे तु सिद्धमेव । मञ्चो राजासनम् । पुच्छः पश्चाद्भागः । लाङ्गूले तु पुंनपुंसकः । पिच्छं लाङ्गूलम् । गच्छोऽभिमतसंख्यावसानम् । वाजः पिच्छम् । ओजो विषमसंख्या । किलिञ्जः कटः । मुञ्जः शरेषीका । अवटो रन्ध्रम् । पट्टः पेषणपाषाणः पीठं च । ललाटभूषायां बाहुलकत्वात् स्त्रीत्वे पट्टी । हठः बलात्कारः वारिपर्णी च । प्रकोष्ठः कूर्परादधः । कोष्ठः कुक्षिगृह्ययोरन्तरालम् आत्मीयश्च ॥८॥

अङ्गुष्ठगण्डौ लगुडभगण्डकरण्डकूष्माण्डगुडाः शिखण्डः ॥
वरुण्डरुण्डौ च पिचण्डनाडीव्रणौ गुणभ्रूणमलक्तकुन्तौ ॥९॥

(अव०) अङ्गुष्ठोऽङ्गुलिविशेषः । अथ डान्ता दश । गण्डः पिटकः । लगुडो लोहमयं शस्त्रम् । प्रगण्डः कूर्परांसयोर्मध्यम् । करण्डो भाण्डविशेषः । कूष्माण्डः कर्कारुः भ्रूणश्च । गुडो गोलकः । शिखण्डश्चूडा । वरण्डोऽन्तरावेदौ । रुण्डः कबन्धः । रुण्डान्तत्वाद्वारुण्डः सेकपात्रम् । पिचण्ड उदरम् । णान्तास्त्रयः । नाडीव्रणो रोगविशेषः । व्रणस्य पुंनपुंसकत्वेन तत्पुरुषेण परवल्लिङ्गताप्राप्तौ वचनम् । गुणः पटः । भ्रूणो गर्भिणी स्त्री शिशुश्च । गुणस्यांशुकनामत्वेन नपुंसकत्वे भ्रूणस्य तु योनिमन्नामत्वेन स्त्रीत्वे प्राप्ते पाठः । अथ तान्ताः सप्त । अलक्तो यावकः । कुन्तः प्रासः । अर्थप्राधान्यात् शलपराचदीर्घायुधा अपि ॥९॥

पोतः पिष्टातः पृषतश्चोत्पातव्रातावर्थकपर्दौ ॥
बुद्बुदगदमगदो मकरन्दो जनपदगन्धस्कन्धमगाधाः ॥१०॥

(अव०) पोतः-प्रवहणं शिशुश्च । पिष्टातः पटवासकः । पृषता विन्दवः । प्रायेण बहुवचनान्तोऽयम् । मृगवाचिनस्तु देहिनामत्वादेव पुंस्त्वम् । उत्पातः उपसर्गः । व्रातः समूहः । अथ थान्तः । ' अर्थः प्रकारे विषये चित्तकारणवस्तुषु । अभिधेयेऽपि शब्दानाम् ' । धननामत्वेन क्लीबत्वे प्राप्तेऽस्य पाठः । अथ दान्ताः षट् । कपर्दो हरजटाबन्धः । वराटवाचिनस्तु तन्नामत्वादेव सिद्धं पुंस्त्वम् । बुद्बुदः जलादिसंस्थानविशेषः । गदो व्याधिः, विष्णोरनुजश्च । अगद औषधम् । मकरन्दः पुष्परसः । अर्थप्राधान्यान्मरन्द इति । जनपदो जनसमूहो विषयः करदश्च कुटुम्बी । अगदजनपदयोर्भेषजनामपदान्तत्वाभ्यां नपुंसकत्वे प्राप्तेऽस्य पाठः । अथ धान्ताः । ' गन्धो गन्धक आमोदे लेशे संबन्धगर्वयोः ' । स्कन्धः-' प्रकाण्डेऽंशे नृपे स्कन्धः काये व्यूहसमूहयोः ' । अगाधः विरलम् । बिलनामत्वादेव क्लीबत्वे प्राप्तेऽस्य पाठः । विरं छन्दः ॥१०॥

अर्धसुदर्शनदेवनमह्नाभिजनजनाः परिघातनफेनौ ॥
पूपापूपौ सूपकलापौ रेफः शोफः स्तम्बनितम्बौ ॥११॥

(अव०) अर्धः खण्डम् । ग्रामार्धः । अर्धः पटी । अर्धः नगरम् । समांशे तु क्लीबत्वस्य वक्ष्यमाणतया विषमांशवृत्तिरिहार्धशब्दः । अथ नान्ताः सप्त । सुदर्शनः विष्णुचक्रं शक्रपुरं च । मेरुजम्ब्वां स्त्रीपुंसलिङ्गः । देवनः अक्षः । क्रीडाविहारविजिगीषासु नान्तत्वान्नपुंसकत्वमेव । अह्न इति ' संख्यात '-इति ' सर्वाश ' इति च कृतसामासान्तोऽहन्शब्दः । संख्याताह्नः । सर्वमह्नः सर्वाह्नः । एवं सायाह्नः । प्रारंभो मध्यं चाह्नः प्राह्णः मध्याह्नः । अपराह्णस्तु पुंक्लीबः । परवल्लिङ्गतापवादोऽह्नस्य पाठः । अभिजनः कुले ख्यातावभिजनो जन्मभूम्यां

कुलध्वजौ । जनः लोकः । परिघातनः अयोबद्धो लगुडः । फेनः डिण्डीरः । अर्थप्राधान्यादब्धिकफ इत्यपि । अथ पान्ताश्चत्वारः । पूपोऽपूपश्च गुणभेदः। सूपः मुद्गादिविकारः। सूपकारे देहिनामत्वादेव सिद्धम् । अर्थप्राधान्यात् स्रद इत्यपि । पूपादीनां नपुंसकत्वे प्राप्तेऽस्य पाठः । 'कलापः संहतौ बर्हे काञ्च्याम् भूषणतूणयोः । पिच्छनामत्वान्नपुंसकत्वेऽस्य पाठः । अथ फान्तौ । रेफोऽवद्यम् । वर्णविशेषे तु विषयनामत्वेनैव पुंस्त्वम् । शोफःश्वयथुः । अथ बान्ताः । स्तम्बः आलानं व्रीह्यादीनां प्रकाण्डविशेषश्च । तत्र चार्थप्राधान्याद् गुच्छोऽपि । नितम्बः–'स्त्रियाः पश्चात्कटौ सानौ नितम्बः कटरोधसोः' ॥११॥

शम्बाम्बौ पाञ्चजन्यतिष्यौ पुष्यः सिचयनिकाय्यरात्रत्रयाः ॥
मन्त्रामित्रौ कटप्रपुण्ड्रारः कल्लोलोल्लौ च खल्लतल्लौ ॥१२॥

(अव०) शम्बः मुसलाग्रस्थो लोहमण्डलकः । अशनौ तु तन्नामत्वादेव पुंस्त्वम् । अम्बः सरकादीनाम् । अथ यान्ताः । पाञ्चजन्यो विष्णोः शंखः पोटगलश्च । तिष्यः पुष्यश्च कलियुगम् । नक्षत्रे बहुलं नक्षत्रेत्यनेन मासविशेषे तु मासनामत्वादेव पुंस्त्वम् । सिचयो वस्त्रम् । अंशुकनामत्वेन क्लीबत्वे प्राप्तेऽस्य पाठः। निकाय्यो निवासः। अथ रान्ताः। रात्र इति कृतसमासान्तः 'संख्यातैक' इति ऋक्साम इति च रात्रिशब्दः । पुण्या रात्रिः पुण्यरात्रः । वर्षारात्रः । दीर्घरात्रः । चिररात्रः । पूर्वरात्रः । अपररात्रः । अर्धरात्रः । अहोरात्राविमौ । एकात्समाहारे च पुंक्लीबः । परवल्लिङ्गतापवादोऽस्य पाठः । वृत्रोऽन्धकारः रिपुश्च । मन्त्रः ऋगादिलक्षणः । अमित्रो वैरी । अरिनामत्वादेव सिद्धे संयुक्तरान्तत्वात् क्लीबत्वबाधनार्थं वचनम् । कटप्रः समूहः । 'पुण्ड्रो दैत्यविशेषेक्षुभेदयोरतिमुक्तके' । आरः आरकूटः । द्रवनामत्वात् क्लीबत्वे प्राप्तेऽस्य पाठः । अथ लान्ताः । कल्लोलस्तरङ्गः । अर्थप्राधान्यादुल्लोलोऽपि । उल्लः सूरणः । खल्लः कृतौ हस्तपादावमर्दनाख्यरुजि च । तल्लस्तडागः ॥१२॥

कण्डोलपोटगलपुद्गलकालवालावेला गलो जगलहिङ्गुलगोलफालाः ॥
स्यादेवलो बहुलतण्डुलपत्रपालवातूलतालजडुला भृमलो निचोलः ॥१३॥

(अव०) कण्डोलः पिटकाख्यं भाजनम् । पोटगलः काशः नडश्च । पुद्गलः परमाणुः देहश्च । कालो मृत्युः । वालोऽश्वकरिवालधिः । तुटौ तु बाहुलकात् स्त्रियाम् । आवेलश्चर्वितताम्बूलम् । गलः सर्जरसः । अर्थप्राधान्यात् कलकल इत्यपि । कण्ठे तु तन्नामत्वादेव पुंस्त्वम् । द्रवनामत्वात् क्लीबत्वे प्राप्तेऽस्य पाठः। जगलः पिष्टमद्यम् । हिङ्गुलं दारदम् । गोलः सर्वतोवृत्तः बालक्रीडनकाष्टे स्त्रीपात्राज्ञनादौ क्लीबः । यस्तु गोल एव गोलक इति स्वार्थिकप्रत्ययान्तो मृते भर्तरि जारजस्य वाचकः स आश्रयलिङ्गः । फालः कुशी । देवलः देवायतनम् । बहुलः कृष्णपक्षः। तण्डुलः धान्यसारः विडङ्गं च । पत्रपालः दीर्घा छुरी । वातूलः वातसमूहः । वातासहे चोन्मत्ते चाश्रयलिङ्गः । तालः गीतकालक्रियामानकरत-

लादौ। जडुलो देहे कृष्णं लक्ष्म। भूमलो रोगविशेषः। निचोलः निचुलकम्। उपसर्गस्यातन्त्रत्वात् चोलः। स्त्रीणां कूर्पासकश्चोलः ॥ १३ ॥

कामलकुद्दालावयवस्वाः स्रुवरौरवयावाः शिवदावौ ॥
माधवपणवादीनवहावध्रुवकोटीशांशाः स्पशवंशौ ॥१४॥

(अव०) कामलो–'मरौ रोगेऽवतंसे ना कामलस्त्रिषु कामुके'। कुद्दालः खनित्रविशेषः। अथ वान्ताः १२। अवयवः अङ्गम्। स्व आत्मा स्वभावः ज्ञातिश्च। अर्थे तु पुंक्लीबः। आत्मीये तु गुणवृत्तित्वात् आश्रयलिङ्गः। स्रुवः स्रुग्भेदः। रौरवो नरकभेदः। यावः अलक्तकः। शिवो वेदादिः। दावोऽरण्यम्। वह्निविशेषे तु पुस्त्वं सिद्धमेव। अर्थप्राधान्याद्व इत्यपि। 'कानने वनवह्नौ च स्याद्दावो दवबन्नरि। माधवो मधुमिश्र आसवः। स्वार्थिके के माधवकः। माघे मासभेदे मधौ विष्णौ च सिद्धमेव पुंस्त्वम्। स्त्रियामपीति कश्चित्। पणवः पटहः। आदीनवो दोषः परिक्लिष्टः क्षुरन्तश्च। हावः भावसूचकः। ध्रुवः–आयतौशिवे शंकौ'। इत्यादि। अथ शान्ताः ७। कोटीशो लोष्टभेदनः। अर्थप्राधान्यात् कोटिशोऽपि। अंशः भागः। स्पशः संपरायः प्रणिधिश्च। 'वंशो वर्गे कुले वेणौ पृष्ठस्यावयवेऽपि च' ॥ १४ ॥

कुशोड्डीशपुरोडाशवृषकुल्मासनिष्कुहाः ॥
अहर्निर्यूहकलहाः पक्षराशिवराश्वृषिः ॥१५॥

(अव०) कुशः योक्त्रम् द्वीपश्च। उड्डीशो ग्रन्थविशेषः। हरे तु देहिनामत्वात् पुंस्त्वम्। 'पुरोडाशो हविर्भेदे चमस्यां पिष्टकस्य च। रसे सोमलतायाश्च हुतशेषे च पुंस्यपि'॥ अथ षान्ताः। वृषः गवादिः। व्रतिनामासने वृषी। अथ सान्ताः। कुल्मासः अर्धस्विन्नो माषादिः। अन्ननामत्वात् क्लीबत्वे प्राप्तेऽस्य पाठः। मूर्धन्योपान्त्योऽप्ययम्। अथ हान्ताः ४। निष्कुहः कोटरम्। ये तु टान्तमाहुस्तन्मते टान्तत्वात् पुंस्त्वम्। अह इति 'द्विगोः'–इति 'अह्नः' इति च कृतसमासान्तोऽहन्शब्दः। द्वयोरह्नोः समाहारो द्व्यहः। त्र्यहः। पञ्चाहः। सप्ताहः। द्विगुरन्नेति स्त्रीनपुंसकत्वे परमाह उत्तराह इत्यादौ परवल्लिङ्गतापाप्तौ वचनम्। सुदिनैकाभ्यां क्लीबत्वम्। पुण्याहस्य तु पुंनपुंसकत्वम्। निर्यूहः शेखरे नागदन्ते निर्यासेऽपि। कलहः खड्गकोशे भण्डने च। अथ क्षान्तः। पक्षः पिच्छम्। युद्धपिच्छनामत्वात् क्लीबत्वे प्राप्ते वचनम्। प्रतिज्ञार्थादौ च पक्षस्य षान्तत्वादेव पुंस्त्वम्। अथेकारान्ताः। राशिर्मेषादिः पुञ्जश्च। वराशिः स्थूलशाटः। वस्त्रनामत्वात् क्लीबत्वे प्राप्तेऽस्य पाठः। ऋषिर्वेदवसिष्ठादौ ॥१५॥

दुन्दुभिर्वमतिवृष्णिपाण्यविज्ञातिरालिकलयोऽञ्जलिर्घृणिः ॥
अग्निवह्निक्रमयोऽहिदीदिविग्रन्थिकुक्षितयोऽर्दनिर्ध्वनिः ॥१६॥

(अव०) दुन्दुभिर्भेरीविशेषे। दैत्ये तु सिद्धमेव। अक्षे स्त्रीत्वम्। वमति-

वान्तिः। वृष्णिः कुलविशेषः मेषश्च। पाणिः हस्तः। अविः मूषककम्बलः। ज्ञातिः स्वजनः। रालिः कलहः। कलिः अन्त्ययुगम्। अञ्जलिः पाणिपुटः। घृणिरभीशुः। अग्निः कृशानुः। वह्निः स एव। कृमिः कीटः। अर्थप्राधान्यात् क्रिमिरपि। अंह्रिः पादः। अर्थप्राधान्यादङ्घ्रिरपि। दीदिविः ओदनम्। अर्थप्राधान्यात् कुरुश्च। ग्रन्थिः रज्ज्वादिवेष्टनबन्धः। कुक्षिर्जठरम्। हतिश्चर्म चर्मप्रसेवकश्च। अर्दनिः अग्निः। ध्वनिः प्रतीयमानोऽर्थः। वृष्णिघृष्ण्यार्ष्ण्यन्तत्वात् अग्निवह्न्योश्च न्यन्तत्वात् अर्दनेरन्यन्तत्वात् कृमेर्म्यन्तत्वात् पाणिकुक्ष्यंह्रीणां प्राण्यङ्गवाचीदन्तत्वात् स्त्रीत्वे दीदिवेरन्नामत्वाद्रालेश्च युन्नामत्वात् क्लीबत्वे प्राप्ते वचनम् ॥१६॥

गिरिशिश्वुजायुकर्षो हाहाहूहूश्च नग्नहूर्गर्मुत् ॥
पादश्मानावात्मा पाप्मस्थेमोष्मयक्ष्माणः ॥१७॥

(अव०) गिरिः कन्दुकः। शिश्वुः श्रोत्रम्। जायुरौषधम्। कर्षूः करीषाग्निः। हाहाहूहूरित्यखण्डं नाम देवगायनवाचि। केचित् खण्डयन्ति। अव्ययत्वादलिङ्गाविति केचित्। गन्धर्वौ च हाहा हूहूरिति तु लक्ष्यम्। एकदेशविकृतस्यानन्यत्वादर्थप्राधान्याद्वा निर्देशस्य तदपि संगृहीतम्। देहिनामत्वादेव पुंस्त्वसिद्धौ विमतिज्ञापनार्थं हूहूरित्यस्य कृत इति स्त्रीत्वबाधनार्थम्। नग्नहूर्मार्यदलिन्यादिबीजम्। अर्थप्राधान्यान्नग्नहुरित्यपि। नग्नान् ह्वयति इति व्युत्पत्तिप्राधान्ये त्वाश्रयलिङ्गता। अथ व्यञ्जनान्ताः। गर्मुत् सुवर्णम् सरघा च। द्रवनामत्वान्नपुंसकत्वे प्राप्तेऽस्य पाठः। पाद् चरणः। अदन्तोऽप्ययम्। अश्मा पाषाणः। उपलक्षणत्वाद्वेमलोऽपि। आत्मा शरीरं स्वभावश्च। पाप्मा पापं रोगश्च। स्थेमा स्थैर्यम्। इमनन्तत्वादेव सिद्धे द्विस्वरं [मन्नकर्तरि इति क्लीबत्वबाधनार्थमस्य पाठः। ऊष्मा संतापः समृद्धिश्च। यक्ष्मा क्षयरोगः। तदन्तत्वाद्राजयक्ष्मापि। अश्मादीनामन्नन्तत्वेन क्लीबत्वे प्राप्ते वचनम्। एवं शेषेष्वपि लिङ्गेषु स्वरव्यञ्जनान्तक्रमो ज्ञेयः ॥ १७ ॥

॥ इति पुंलिङ्गं समाप्तम् ॥

॥ अथ स्त्रीलिङ्गाधिकारः ॥

स्त्रीलिङ्गं योनिमद्वन्त्रीसेनावल्लितडिन्निशाम् ॥
वीचितन्द्राऽवदुग्रीवाजिह्वाशस्त्रीदयादिशाम् ॥१॥

(अव०) नामेति स्मर्यते। योनिमदादीनां नाम स्त्रीलिङ्गं भवति। पुरुषी। स्त्री। रामा। वामा। हस्तिनी। वशा। वृषी। अश्वा। मकरी। मत्सी। मयूरी इत्यादि। वन्त्रीनाम उपदेहिका इत्यादि। सेनानाम-चमूः, पृतना, वाहिनी, इत्यादि। वल्लिनाम-लता, प्रतानिनी, वल्लरी, इत्यादि। वल्ली। अजमोदायां तु अस्य बाहुलकात् स्त्रीत्वम्। तडिन्नाम-शंबा, चपला, चरा इत्यादि।

निशानाम-तुङ्गी, तमी । निद्शब्दोऽप्यस्ति निशावाची । वीचिनाम-वीचिः, उत्कलिका, लहरी, भङ्गिः इत्यादि । तरङ्गोल्लोलकल्लोलानां पुंस्त्वमुक्तम् । तन्द्रा-शब्देनालस्यनिद्रे गृह्येते । अवटुनाम-घाटा, कुकाटिका इत्यादि । अवटोस्तु स्त्रीपुंसत्वम् । ग्रीवानाम-ग्रीवा । अयं तन्नशिरायामपि । जिह्वानाम-रसज्ञेत्यादि । शङ्खीनाम-शङ्खी, अस्थिपुत्री, इत्यादि । दयानाम-दया, करुणा, इत्यादि । दिग्नाम-आशा, ककुप् इत्यादि ॥१॥

शिंशपाद्या नदीवीणाज्योत्स्नाचीरीतिथीधियाम् ॥
अङ्गुलीकलशिकङ्गुहिङ्गुपत्रीसुरानसाम् ॥ २ ॥

(अव०) शिंशपादिगणो नद्यादीनां नाम च स्त्रीलिङ्गं भवति । शिंश-पादि-शिंशपा, विरुत्, पाटला, विडंग, फल्गुका, स्नुक्स्नुह्यौ, निर्गुण्डी, झण्टी, जम्बूः, श्रीपर्णी, भद्रपर्णी, बंदरी, इत्यादि गणपाठः । नदीनाम-नदी, धुनी, निम्नगा, इत्यादि । वीणानाम-घोषवती । तद्भेदोऽपि । विपञ्ची इत्यादि । ज्योत्स्नानाम-चन्द्रिका, कौमुदी, इत्यादि । चीरी जीवविशेषः । तिथीति ङ्यन्तं पदम् । प्रतिपदाद्याः द्वितीया तृतीया चतुर्थी इत्यादि यावत् पञ्चदशी । सैव पूर्णचन्द्रा राका । पूर्णिमा । न्यूनचन्द्रोऽनुमतिः । अमावास्या इत्यादि । धीनाम-धिषणा, पण्डा । अङ्गुलीनाम-अङ्गुली, करशाखा, कलशी, गर्गरी । कङ्गुधा-न्यविशेषः । हिङ्गुपत्री गुल्मभेदः । सुरा वारुणी । नसा नासिका ॥ २ ॥

रास्नाशिलावचालालाशिम्बाकृष्णोष्णिकाश्रियाम् ॥
सूक्कापण्यातसीधाय्यासरघारोचनाभुवाम् ॥ ३ ॥

(अव०) रास्ना ओषधीविशेषः । शिला मनःशिला । वचा शतपर्विका । गोलोमी । जीवा षड्ग्रन्था । उग्रगन्धा इत्यादि । लाला सृणीका । शिम्बा बीजकोशी । कृष्णा कृष्णजीरकं राजिका च । पिप्पल्यां बहुलिनामत्वात् सिद्ध-मेव । उष्णिका यवागूः । श्रीः, लक्ष्मीः, कमला, पद्मा, पद्मवासा, हरिप्रिया, क्षीरोदतनया, मा, रमा, इन्दिरा इत्यादि । सूक्का गन्धद्रव्यविशेषः, तन्नाम । मरुन्माला, पिशुना, सूक्का, देवीलता, इत्यादि । पण्यानाम-पण्या, कटती, सुवर्णलता, ज्योतिष्का, इत्यादि । अतसीनाम-कृष्णप्रिया, चण्डिका, मसृणा, क्षुमा, उमा, इत्यादि । धाय्यानाम-सामिधेनी ऋक् इत्यादि । सरघानाम-क्षुद्रा, मधुमक्षिका, इत्यादि । रोचनेति । गोरोचना वंशरोचना च गृह्यते । तत्राद्या-नाम-'वन्दनीया तु रोचना । भूतघ्नी भूतनाशिनी' । वंशरोचना तु वांशी तु काक्षीरी तुका शुभा इत्यादि । भूनाम-भूः, भूमिः, पृथ्वी, मही इत्यादि ॥३॥

हरिद्रामांसिदूर्वाऽऽलूबलाकाकृष्णलागिराम् ॥
इत्तु प्राण्यङ्गवाचि स्यादीदूदेकस्वरं कृतः ॥ ४ ॥

(अव०) हरिद्रा । पीतिका । मांसिर्गन्धद्रव्यविशेषः। दूर्वा हरिताली । आलूः

कर्करी, गलन्तिका च । बलाका पुंध्वजेऽपि स्त्रीत्वमेव । बलाका विसकण्टिका । कृष्णला गुञ्जा । गीर्वाक् । प्राण्यङ्गवाचि इकारान्तं नाम स्त्रीलिङ्गम् । गोधिर्ललाटम् । कटिः । पालिः । इत्यादि । इदिति किम् । कर्णः । प्राण्यङ्गवाचीति किम् । नाभिः क्षत्रियः । प्राण्यङ्गवाचिनस्तु स्त्रीपुंसत्वम् । चक्रपिण्डिकायां तु स्त्रीत्वम् । ईकारान्तमूकारान्तं चैकस्वरं स्त्रीलिङ्गम् । ह्रीः, प्रीः, श्रीः, भ्रूः, स्रूः, द्रूः, जूः । एकस्वरमिति किम् । स्वयंभूर्ब्रह्मा । नीः लूरित्यादौ तु गुणवृत्तित्वादाश्रयलिङ्गता । कृतसंबन्धिनौ यावीदूतौ तदन्तं नाम स्त्रीलिङ्गम् । अनेकस्वरार्थ आरंभः । लक्ष्मीः । पपीः । इत्यादि । यवागूः । कुकूः । कच्छूः । अजूः । तनूः । इत्यादि ॥४॥

पात्रादिवर्जितादन्तोत्तरपदः समाहारे ॥
द्विगुरन्नावन्तान्तो वाऽन्यस्तु वेर्वा नपुंसकः ॥५॥

(अव०) पात्रादिवर्जितमकारान्तमुत्तरपदं यस्य स द्विगुः समाहारे स्त्री । पञ्चानां पूलानां समाहारः पञ्चपूली । पात्रादिवर्जित इति किम् । द्विपात्रम् । द्विमासम् । त्रिभुवनम् । चतुर्युगम् । द्वित्रिचतुर्भ्यः परः पथः । त्रिपुरम् । इत्यादि । अदन्तेति किम् । पञ्चसमिति । त्रिगुसि । पञ्चकुमारि । दशकुमारि । अन्त्ययोः स्त्रीपुंसत्वमपीत्येके । उत्तरपदेति किम् । पञ्च गावः समाहृताः पञ्चगवम् । एवं दशगवम् । सप्तभूमम् । अत्र द्विगुरदन्तो नोत्तरपदम् । समाहार इति किम् । पञ्चाम्रप्रियः । अन्नन्तमावन्तं च यदुत्तरपदं तदन्तो द्विगुर्वा स्त्री । पञ्चराजम् । पञ्चराजी । पञ्चमालम् । पञ्चमाली । त्रिसन्ध्यं तु क्लीबम् । अन्नन्तं चावन्तं चोत्तरपदं न द्विगुरिति द्विरन्तग्रहणम् । उक्तस्त्रीत्वादन्यो द्विगुः समाहारे वर्तमानो नपुंसकम् । तेन पात्राद्युत्तरपदस्यानदन्तोत्तरपदस्य विकल्पितस्त्रीत्वस्य च पक्षे क्लीबत्वम् ॥५॥

लिन्मिन्यनिण्यणिस्युक्ताः क्वचित्तिगल्पह्स्वे कप् ॥
विंशत्याद्या शताद् द्वन्द्वे सा चैक्ये द्वन्द्वमेययोः ॥६॥

(अव०) लित्प्रत्ययान्तं मि-नि-अनि-अणिप्रत्ययान्तं स्त्रियामुक्ताः स्युक्ताः क्तिः, क्यप्, शः, यः, अः, अङ्, अनः, क्विप्, ञः, अनिः, इञ्, णकश्च इत्येतदन्तं च नाम स्त्रीलिङ्गं स्यात् । लित्-गवां समूहो गोत्रा । एवं रथकट्यातृण्याजनतादयोऽपि । शुक्लस्य भावः शुक्लता । देव एव देवता । इत्यादि । मिः-नेमिः कूपस्यान्ते त्र्यस्रं काष्ठं चक्रधारा च । वल्मिरिन्द्रः । दल्मिः शस्त्रम् । निः-वेनिः केशरचना । अनिः-वर्तनिः मार्गः । अटनिर्धनुष्प्रान्तः । णिः-वाणिः मूल्यम् । वेणिः केशरचना प्रवाहश्च । अणिः-सरणिः पन्थाः । तरणिः संक्रमो यवागूश्च । समुद्रादौ तु स्त्रीपुंसत्वम् । क्तिः-भूत्यादयः । क्यप्-आस्या आसनम् । अट्या, व्रज्या, ईर्या च गमने । शः-क्रिया । यः-जागर्या । अः-शंसा, इच्छा । शुश्रूषा श्रवणेच्छा । अङ्-भिदा, चिदा, पूजा । अनः-वन्दना स्तुतिः ।

चेतना संविच्चितिः । याचेरपि बाहुलकादने याचना । एषां भावे क्लीबत्वम् । क्विप्-संपत् । समित् एधो रणश्च । रुक्, त्विद्, द्युच कान्तिः । अः-व्यात्युक्षी व्यतिहारेण सेचनम् । अनिः-अजननिस्ते वृषल भूयात् । इञ्-कां त्वं कारिमकार्षीः सर्वां कारिमकार्षम् । णकः-भवतः शायिका-शयितुं पर्याय इत्यर्थः । क्वचिल्लक्ष्यानुसारेण तिगन्तं नाम स्त्रीलिङ्गम् । तनुतात्तन्तिरित्यादि । अल्पे ह्रस्वे चार्थे यः कप् तदन्तं नाम स्त्रीलिङ्गम् । अल्पः क्रयः क्रयिका । ह्रस्वः पुटः पुटिका । क्वचिदिति किम् । पुटकः विंशत्याद्या संख्या संख्येये संख्याने वर्तमाना च स्त्रीलिङ्गम् । इयं विंशतिः घटा घटानां वा । एवं त्रिंशदादयोऽपि । षष्टिस्त्रिलिङ्गः । शताद्यानां पुंनपुंसकत्वम् । नन्तसंख्या त्वलिङ्गा । द्वन्द्वे विंशत्याद्या संख्या शतादवाक् स्त्रीलिङ्गम् एकविंशतिर्यावन्नवनवतिः । द्वन्द्वैकत्वे इति क्लीबत्वबाधनार्थं वचनम् । सा विंशत्याद्या संख्या द्वन्द्वे इतरेतरसमासे मेये संख्येये च वर्तमाना एकत्व एव प्रयोक्तव्या । इतरेतरार्थं वचनम् । एकविंशतिर्घटा घटानां वा । एकशतम् । द्विलक्षम् । द्विसहस्रम् । द्वन्द्वमेययोरिति किम् । द्वे विंशती घटानां तिस्रो वा त्रिंशतयः । विंशत्यादेः संख्यास्थानस्यैव द्वित्वबहुत्वविवक्षायां द्विवचनबहुवचने । सा चेति प्रसिद्धसंख्यापरामर्शादिह न स्यात् । एकश्चैत्राय विंशतिर्मैत्रायेति एकविंशती आभ्यां दीयतामिति द्विवचनमेव ॥ ६ ॥

स्रुग्गीतिलताभिदि ध्रुवा विडनरि वारि घटीभबन्धयोः ॥
शल्यध्वनिवाद्यभित्सु तु क्ष्वेडा दुन्दुभिरक्षबिन्दुषु ॥७॥

(अव०) स्रुग्भेदे यज्ञभाण्डभेदे गीतिलताभिदोः शालिपर्णीमूर्वयोश्च ध्रुवाशब्दः स्त्रीलिङ्गः । नरादन्यत्र विट् । वारीति शब्दरूपं घट्यामिभबन्धनभुवां वा ॥ शल्यभिदि वेणुशलाकायां ध्वनिभिदि भटानां सिंहनादे वाद्यभिदि च दन्तोष्ठवाद्ये क्ष्वेडा स्त्री । अक्षबिन्दुषु पासकबिन्दुषु दुन्दुभिः स्त्री ॥ ७ ॥

गृह्या शाखापुरेऽश्मन्तेऽन्तिका कीला रताहतौ ॥
रज्जौ रश्मिर्यवादिर्दोषादौ गञ्जा सुरागृहे ॥८॥

(अव०) शाखापुरं समीपस्थपुरं तत्र गृह्या अश्मन्ते चुल्यामन्तिका, रताहतौ सुरतग्रहणने कीला स्त्री । रज्जौ वाच्यायां रश्मिः स्त्री । इह यवादयो यवयवनेति सूत्रोक्ताः शब्दा दोषादयश्चार्था गृह्यन्ते । दुष्टो यवो यवानी । यवनानां लिपिर्यवनानी । उरु अरण्यमरण्यानी । महद्धिमं हिमानी । दोषादाविति किम् । यवः । यवनाः । धान्यविषयनामत्वात् पुंस्त्वमेव । अरण्यहिमयोस्तु प्रतिपदपाठान्नपुंसकत्वम् । सुरागृहे वाच्ये गञ्जा स्त्री । खानौ स्त्रीपुंसलिङ्गः ॥ ८ ॥

अहंपूर्विकादिर्वर्षाभघा अप्कृत्तिका बहौ ॥
वा तु जलौकाप्सरसः सिकतासुमनसःसमाः ॥९॥

(अव०) *अहंपूर्विकादयो मयूरव्यंसकादिषु कृतनिपाताः स्त्रीलिङ्गाः। 'अहंपूर्वोऽहं पूर्व इत्यहंपूर्विका स्त्रियाम्। आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि। अहमहमिका तु सा स्यात्परस्परमहंकृतिः'* । *वर्षाभ्वाऽप्कृत्तिकाः* स्त्रीबहुवचनान्ताश्च । जलौक आदयोऽपि स्त्री० विकल्पेन बहुवचनान्ताश्च । कृत्तिकाऽर्थप्राधान्याद् बहुलाऽपि। समान्तत्वात् सुषमाऽपि कालभेदे परमशोभायां च ॥९॥

गायत्र्यादय इष्टका बृहतिका संवर्तिका सर्जिका- ।
दूषीके अपि पादुका डिरुकया पर्यस्तिका मानिका ॥
नीका कञ्चुलिकाऽऽलुका कलिकया राका पताकान्धिका ।
शूकापूपलिका त्रिका चविकयोल्का पञ्चिका पिण्डिका ॥१०॥

(अव०) षडक्षरीं गायत्रीमादीकृत्य षड्विंशत्यक्षरीमुत्कृष्टिं यावत् छन्दोजातिनामानि स्त्री० । शर्करी मेखलानद्योरपि । अक्षरनियमात्मकं छन्दः । गुरुलघुनियमात्मकं वृत्तम् । इति बहुलं वृत्तेत्यादिना न सिद्ध्यति । इष्टका मृद्विकारः । बृहतिका उत्तरासङ्गः । कप्रत्ययाभावे बृहती रिङ्गिणी । संवर्तिका पद्मादीनां नवोद्भिन्नं दलम् । सर्जिका क्षारविशेषः । अर्थप्राधान्यात् सर्ज्जिकापि । सुवर्चिका, स्रुघ्नी इत्यादि । दूषीका नेत्रमलम् । अर्थप्रधान्यात् दूषिका इत्यादि । पादुका उपानत् । अर्थप्राधान्यादुपानदादयोऽपि तत्पर्यायाः सर्वे । डिरुका कोष्ठिकाख्यो मृद्विकारः । पर्यस्तिका परिकरः । अर्थप्राधान्यादवसक्थिकापि । मानिका द्रोणचतुष्टयम् । नीका सारणिः । कञ्चुलिका कञ्चुकः । अलुका धान्यकम् । कलिका कुड्मलम् । कलिकान्तत्वादुत्कलिकापि हेलोत्कण्ठयोः । राका कच्छूः । पताका सौभाग्यं ध्वजश्च । अर्थप्राधान्यात् पटाकावैजयन्तीजयन्त्योऽपि । अन्धिका कैतवम् । शूका हल्लेखा । पूपलिकाऽपूपः । काभावे पूपली । अर्थप्राधान्यात् पोली । त्रिका कूपस्यान्ते न्यस्तं काष्ठम् । चविका श्लेष्मघ्नश्चव्याख्यो मेषजः । अर्थप्राधान्यात् सुगन्धापि । उल्का ज्वाला । पञ्चिका न्यासः । पिण्डिका चक्रनाभिः ॥ १० ॥

ध्रुवका क्षिपका कनीनिका शम्बूका शिबिका गवेधुका ॥
कणिका केका विपादिका महिका यूका मक्षिकाष्टका ॥११॥

(अव०) ध्रुवका भाण्डविशेषः । उपलक्षणत्वात् ध्रुवकापि । क्षिपका शस्त्रविशेषः । कनीनिका नेत्रतारा । शम्बूका शुक्तिः । शिबिका यान्ययानम् । गवेधुका तृणधान्यविशेषः । अर्थप्राधान्यात् गवीधुकापि । कणिका गोधूमचूर्णम् । अर्थप्राधान्यात् शुद्धसमितापि । केका मयूरध्वनिः । विपादिका पादस्फोटः । महिका हिमम् । यूका क्षुद्रजीवविशेषः। मक्षिकापि। अष्टका पितृदैवत्यं कर्म ॥११॥

कूर्चिका कूचिका टीका कोशिका केणिकोर्मिका ॥
जलौका प्राविका धूका कालिका दीर्घिकोष्ट्रिका ॥१२॥

(भव०) कूर्चिका क्षीरविकृतिः । कूचिका कपाटाङ्कुटः । अर्थप्राधान्यात् कुञ्चिकापि । टीका वृत्तिः । कोशिका दीपभाजनम् । केणिका गुणलयनी । ऊर्मिका अङ्गुलीयकम् । जलौका रक्ताकर्षः प्राणी । अर्थप्राधान्याज्जलूकाऽपि । प्राविका श्येनः। धूका पताका । कालिका क्षारविशेषःकीटश्च । दीर्घिका परिखा । उष्ट्रिका अलिञ्जरः । अर्थप्राधान्यान्नन्दापि ॥ १२ ॥

(शि)शलाका वालुकेषीका विहङ्गिकेषिके उखा ॥
परिखा विशिखा शाखा शिखा भङ्गा सुरङ्गया ॥१३॥

(अव०) शलाका चित्रकूर्चिका । वालुका सिकता । वालुकान्तत्वाद्धिभवालुकापि कर्पूरे । इषीका वीरणशलाकाविशेषः । विहङ्गिका भारयष्टिः । ईषिका गजाक्षिकूटम् । उखा स्थाली । परिखा खेयविशेषः । विशिखा प्रतोली । शाखा भुजः । शिखा चूडा । भङ्गा तृणधान्यम् । सुरङ्गा गूढमार्गः । अर्थप्राधान्यात् संधिलापि ॥ १३ ॥

जङ्घा चञ्चा कच्छा पिच्छा पिञ्जा गुञ्जा खजा प्रजा ॥
झञ्झा घण्टा जटा घोण्टा पोटा भिस्सटया छटा ॥१४॥

(अव०) जङ्घा अङ्गविशेषः । चञ्चा तृणमयः पुरुषः। कच्छा कच्छोटिकापि । अर्थप्राधान्यात् कच्छाटिकापि । पिच्छा काञ्चिकम् । पिञ्जा तूलम् । गुञ्जा पटहः। खजा मन्थः दर्विश्च । अर्थप्राधान्यात् खजाकापि । प्रजा लोकः । झञ्झा सशीकरो मेघवातः । घण्टा वाद्यविशेषः । अर्थप्राधान्यात् किङ्किणीक्षुद्रघण्टिके अपि । जटा कचविकारः । घोण्टा बदरीफलम् । पोटा शण्ढः । अर्थप्राधान्यात् तृतीयाप्रकृतिरपि । भिस्सटा दग्धिका । छटा समूहविशेषः ॥१४॥

विष्ठा मञ्जिष्ठया काष्ठा पाठा शुण्डा गुडा जडा ॥
वेडा वितण्डया दाढा राढा रीढाऽवलीढया ॥१५॥

(अव०) विष्ठा पुरीषम् । मञ्जिष्ठा रागद्रव्यविशेषोऽर्थप्राधान्यात् अरुणापि । काष्ठा मर्यादा । पाठा औषधविशेषः । शुण्डा करिहस्तः । गुडा स्नुही । गुडिकापि च । जडा शूकशिम्बी । वेडा नौः । वितण्डा वादभेदः । दाढा दंष्ट्रा । राढा शोभा । रीढा अवलेहा । अवलीढापि ॥ १५ ॥

घृणोर्णा वर्वणा स्थूणा दक्षिणा लिखिता लता ॥
तृणता त्रिवृता त्रेता गीता सीता सिता चिता ॥१६॥

(अव०) घृणा निन्दा । ऊर्णा मेषरोम । वर्वणा मक्षिका । स्थूणा गृहादीनामुत्तम्भनकाष्ठम् । दक्षिणा यज्ञदानम् । लिखिता लिपिः । तृणता चापम् । त्रिवृता औषधिः । अर्थप्राधान्यात् अरुणादयोऽपि तत्पर्यायाः । त्रेता युगविशेषः । गीता शास्त्रविशेषः । सीता लाङ्गलपद्धतिः । सिता शर्करा । अर्थप्राधान्यात् कठिन्यपि । चिता मृतकदाहाय काष्ठशय्या ॥ १६ ॥

मुक्ता वार्ता लूताऽनन्ता प्रसूता मार्जिताऽमृता ॥
कन्था मर्यादागदेक्षुगन्धा गोधा स्वधा सुधा ॥१७॥

(अव०) मुक्ता मौक्तिकम् । वार्ता वृत्तिः । लूता ऊर्णनाभः । अनन्ता दूर्वा । प्रसूता जङ्घा । मार्जिता शिखरिणी । अर्थप्राधान्यात् मर्जिताशिखरिण्यावपि । अमृता पथ्या गुडूची च । कन्था स्यूतजीर्णवस्त्रप्रावरणम् । मर्यादाऽवधिः । गदा प्रहरणविशेषः । इक्षुगन्धा कोकिलाक्षे गोक्षुरकाशकोष्ट्रीषु । गोधा दोह्याणं प्राणिविशेषश्च । पुंस्त्वजोऽपि । गोधान्तत्वात् तृणगोधा कृकलासः । स्वधा पितृदानार्थो मंत्रविशेषः । सुधा पीयूषं लेपनं च ॥ १७ ॥

सास्ना सूना धाना पम्पा झम्पा रम्पा प्रपा शिफा ॥
कम्बा भम्भा सभा हम्भा सीमा पामारुमे उमा ॥१८॥

(अव०) सास्ना गोगलचर्म । सूना घातस्थानम् । धाना भ्रष्टयवोऽङ्कुरश्च । पम्पा सरोवरविशेषः । झम्पा उच्चादधःपतनम् । रम्पा चर्मैकदुपकरणम् । प्रपाऽम्बुशाला । अकर्तरि कः स्यादिति पुंस्त्वे प्राप्तेऽस्य पाठः । शिफा तरुजटा । कम्बा कम्बिः । भम्भा भेरी । सभा वृन्दम् सभासदश्च । हम्भा गोध्वनिः । अर्थप्राधान्याद्रम्भाऽपि । सीमा मर्यादा । पामा कण्डूः । अर्थप्राधान्याद्विचर्चिकापि । रुमा लवणाकरः । उमा कीर्तिः ॥ १८ ॥

चित्या पद्या पर्या योग्या छाया माया पेया कक्ष्या ॥
दृष्या नस्या शम्या संध्या रथ्या कुल्या ज्या मल्लिया ॥१९॥

(अव०) चित्या चिता । पद्या मार्गः । पर्या क्रमः । सहयोगे सपर्या पूजा । योग्याभ्यासः । छाया शोभातमःप्रतिबिम्बेषु पालनोत्कोचयोः षड्क्त्यर्कयोषित्कान्त्यादिषु च ॥ माया दम्भः । अर्थप्राधान्यात् शाम्बरी । पेया शृतं दुग्धादि । कक्ष्या काञ्ची हर्म्यादेर्मध्यभागश्च । दृष्या रज्जुः । नस्या वृषादीनां नासारज्जुः । शम्या युगकीलकः । संध्या चिंतामर्यादादिषु । रथ्या रथानां समूहः प्रतोली पन्थाश्च । कुल्या सारणिः । ज्या मूर्वी । मल्लिया मल्लिकागन्ध्यगुरुश्च ॥ १९ ॥

उपकार्या जलार्द्रेरा प्रतिसीरा परंपरा ॥
कण्डराऽसृग्धरा होरा वागुरा शर्करा शिरा ॥२०॥

(अव०) उपकार्या नृपमन्दिरम् । अर्थप्राधान्यादुपकारिकापि । जलार्द्रा आर्द्रवस्त्रम् । इरा जलमन्नं गीश्च । प्रतिसीरा जवनिका । परंपरा परिपाटिः सन्तानकश्च । कण्डरा महास्नायुः । असृग्धराऽजिनम् । होरा लग्नम् । वागुरा मृगबन्धिनी । शर्करा उपला । शिरा धमनी ॥ २० ॥

गुन्द्रा मुद्रा क्षुद्रा भद्रा भस्त्रा छत्रा यात्रा मात्रा ॥
दंष्ट्रा फेला वेला मेला गोला दोला शाला माला ॥२१॥

(अव०) गुन्द्रा मुस्ताविशेषः । अर्थप्राधान्यान्महिलापि । मुद्रा प्राण्यङ्गुलिसंनिवेशः । क्षुद्रा वेश्या नटी कण्टकारिका च । भद्रा विष्टिः । भस्त्रा लोहध्मनी । छत्रा मधुरिका कुस्तुंबरशिलन्ध्रयोश्च । यात्रा प्रयाणी देवोत्सवो वृत्तिश्च । मात्रा परिच्छदः मानमल्पं च । दंष्ट्रा दाढा । अर्थप्राधान्याद्राक्षस्यपि । फेला भोजनोज्झितम् । अर्थप्राधान्यात् पिण्डोलिः फेलिश्च । वेला काले बुधग्रहस्त्रियां सीम्नि वाचि च । अकारप्रश्लेषादवेला पूगचूर्णः । मेला मसिः । गोला बालक्रीडनकाष्ठम् । दोला प्रेङ्खा । शाला गृहम् । अर्थप्राधान्यात् किमीत्यपि । माला पङ्क्तिः। स्वार्थिके के मालिका पुष्पमाल्यम् , सरिद्भेदः पक्षी ग्रैवेयकं च ॥२१॥

मेखला सिध्मला लीला रसाला सर्वला बला ॥
कुहाला शङ्कुला हेला शिला सुवर्चला कला ॥२२॥

(अव०) मेखला काञ्चीशैलनितम्बखड्गबन्धेषु । सिध्मला मत्स्यचूर्णम् । लीला केलिः । रसाला मार्जिता जिह्वा च । सर्वला बाणभेदः । बला ओषधिविशेषः । अर्थप्राधान्यात् विनयापि । बलान्तत्वात् अतिबलामहाबले अपि । कुहाला काहला । अर्थप्राधान्याच्चण्डकोलाहला पिच्छला पत्रकाहला च । शङ्कुला क्रीडनशङ्कुः । हेलावहेला । शिला दृषत् स्तम्भाधारभूतं दारु च । गण्डूपद्यां तु ङ्यां शिली । सुवर्चला शाकविशेषः । कला शिल्पादिः ॥ २२ ॥

उपला शारिवा मूर्वा लट्वा खट्वा शिवा दशा ॥
कशा कुशेशा मञ्जूषा शेषा मूषेषया स्नसा ॥२३॥

(अव०) उपलाऽश्मरूपा मृत् शर्करा च । अत्र चोपलक्षणत्वात् माधवी मधुनः शर्करा । अथ वान्ताः पञ्च । शारिवा औषधविशेषः शालिविशेषः । मूर्वा ज्याहेतुस्तृणविशेषः । अर्थप्राधान्यान्मोरटालवे अपि । कटंभरापि च । लट्वा कुसुम्भं भ्रमरश्च । खट्वा शयनम् । शिवा क्रोष्ट्री । दशावस्था वर्तिश्च । कशाऽश्वताडनं चर्मदण्डः । अर्थप्राधान्यात् सप्तलापि । कुशा बला ङ्यां कुशी आयसी चेत् । ईशा हलदण्डः । मञ्जूषा पेटा । अर्थप्राधान्यात् पेटीपेटे अपि । शेषा देवनिर्माल्यम् । मूषा स्वर्णविलयनभाण्डम् । ईषा हलाद्यवयवः । स्नसा स्नायुः ॥ २३ ॥

वस्नसा विस्रसा भिस्सा नासा बाहागुहा स्वाहा ॥
कक्षाऽऽमिक्षा रिक्षा राक्षा भङ्ग्यावल्यायतिस्त्रोटिः ॥२४॥

(अव०) वस्नसा स्नायुः । विस्रसा जरा । भिस्सा ओदनः । नासा स्तम्भादीनामुपरि दारु । बाहा बाहुः । गुहा गिरिविवरम् । स्वाहाग्निभार्या ।

कक्षा उद्ग्राहणिका स्पर्धा पदं कटाटिका च । आमिक्षा शृतक्षीरक्षिप्तदधि । रिक्षा यूकाण्डम् लत्वे लिक्षा । राक्षा जतु । लत्वे लाक्षा । अर्थप्राधान्यात् वरवर्णिनी रजनी पलंकषा च । अथ चैदन्ताः । भङ्गिर्विच्छित्तिः । आवलिः पंक्तिः । आयतिरुत्तरकालः प्रभावः दैर्घ्यं च । त्रोटिर्मत्स्यभेदे वन्द्यां च ॥ २४ ॥

पेशिर्वासिर्वसतिर्विपणी नाभिनाल्यालि पालि–।
भेलिः पल्लिर्भ्रकुटिश्चकटी चर्चरिः शाटिभाटी ॥
खार्टिर्वर्तिर्व्रततिर्वमिश्शुण्ठीतिरीतिर्वितर्दि–।
र्दर्विर्नीविश्छविर्लिबिशढिश्रेढिजात्याजिराजि ॥२५॥

(अव०) पेशिर्मांसपिण्डी खड्गपिधानं च । वासिस्तक्षोपकरणम् । अर्थप्राधान्यात्तक्षण्यपि । वसतिर्वेश्म । विपणिः पण्यमापणः पण्यवीथी च । अस्यां च पुंस्यपि कश्चित् । नाभिश्चक्रादिनाभिः । नाभिः कालमानं कन्दलं च । लत्वाभावे नाडिर्नालम् शिरा च । शिरायां चार्थप्राधान्याल्लुलनापि । आलिरनर्थः सेतुश्च । चर्चरिः हर्षक्रीडा । शाटिः प्रावरणविशेषः । भाटिः सुरतमूल्यम् । खार्टिः किणः । वर्तिर्दीपस्तद्दशा च । व्रततिर्विस्तारः । वमिर्वान्तिः । शुण्ठिर्नागरम् । ईतिरुपद्रवः । अर्थप्राधान्यात् शृगाल्यपि । ' अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः । अत्यासन्नाश्च राजानो षडेता ईतयः स्मृताः' । रीतिरारकूटम् । अर्थप्राधान्यादरीरी अपि । वितर्दिर्वेदिका । दर्विर्दारुहस्तः । नीविर्मूलधनम् । छविः कान्तिः शोभा च । लिबिर्लेपिः । अर्थप्राधान्याल्लिपिरपि । शढिरौषधविशेषः। श्रेढिर्गणितव्यवहारविशेषः। जातिर्मालती । आजिः संग्रामः । पुंस्यपीति कश्चित् । राजिः पङ्क्तिः । के राजिका केदारः ॥ २५ ॥

रुचिः सूचिसाची खनिः खानिखारी ।
खलिः कीलितूली कृमिर्वापिधूली ॥
कृषिः स्थालिहिण्डी त्रुटिर्वेदिनान्दी ।
ककिः कुक्कुटिः काकलिः शुक्तिपङ्क्ती ॥२६॥

(अव०) रुचिः कान्तिः । सूचिः सेवनी । साचिः तिर्यग् । खनिराकरः । खानिः स एव । खारिर्मानविशेषः । खलिः पिण्याकादिः । कीलिः कीलिका । तूलिः चित्रकूर्चिका । कृमिः कृमः । वापिः कूपः । धूलिः पांशुः । कृषिः कर्षणम् । उपलक्षणं चेदं किप्रत्ययान्तानाम् । तेन छिदिभिदित्विष्यादयोऽपि सिद्धाः। स्थालिरुखा । हिण्डिः रात्रौ रक्षाचारः । त्रुटिः संशयेऽल्पेऽपि । वेदिर्यज्ञोपकरणो भूः । नान्दिः पूर्वरङ्गाङ्गम् । ककिः पक्षिविशेषः । कुक्कुटिः कुहनी । काकलिर्ध्वनिविशेषः। शुक्तिः कपालशकले। पङ्क्तिर्दशसंख्या ॥ २६ ॥

किखिस्ताडिकम्बी द्युतिः शारिराति–।
स्तटिः कोटिविष्टी वटिर्गृष्टिवीथी ॥

दरिर्वल्लरिर्मञ्जरिः पुञ्जिर्भेरी
शरारिस्तुरिः पिण्डिमाढी मुषण्ढिः ॥ २७ ॥

(अव०) किखिः कालस्य गोत्रविशेषः । ताडिराभरणविशेषः । कम्बिर्दर्विः। द्युतिः कान्तिः । शारिरक्षोपकरणम् ॥ आतिः शरारिः । तटिः नद्यादौ जलास्फोटनस्थानम् । कोटिरग्रम् । विष्टिर्भद्रा । वटिर्गुलिका । गृष्टिर्गविशेषः । वीथिः पङ्क्त्यादिषु । दरिः कन्दरा । वल्लरिमञ्जर्यौ एकार्थे । पुञ्जिः संहतिः । भेरिः वाद्यम् । शरारिराटिः । तुरिस्तन्तुवायोपकरणम् । पिण्डिर्निष्पीडितस्नेहपिण्डः । माढिः पत्रस्नसा । मुषण्ढिरायुधविशेषः ॥२७॥

राटिराटिरटविः परिपाटिः फालिगालिजनिकाकिनिकानि ॥
चारिहानिवलभि प्रधिकम्पी चुल्लिचुण्टितरयोंऽहतिशाणी ॥२८॥

(अव०) राटिः कलहः । आटिः शरारिः। अटविः अरण्यम् । परिपाटिः क्रमः । फालिर्दलम् । गालिरवद्योद्भावनम् । जनिर्जन्म । काकिनिर्माषचतुर्भागः। कानिः संकोचः। चारिः पशुभक्ष्यम् । हानिरर्थनाशः। वलभिः पटलाधारो वंशपञ्जरः। इदन्तवात् ङ्यां वलभी । अर्थप्राधान्यान् गोपानसी । प्रधिः रोगविशेषः। कम्पिः कम्पनम् । चुल्लिरुद्धानम् । चुण्टिः क्षुद्रवापी । तरिः नौः । अर्थप्राधान्यात् द्रोण्यपि । अंहतिर्दानम् । शाणिः शाणः ॥२८॥

सनिः सानिमेनिर्मरिर्मारिरभ्योषधी विद्रधिर्झल्लरिः पारिरभ्रिः ।
शिरोधिः कबिः कीर्तिगन्त्रीकबर्यः कुमार्याढकी स्वेदनी ह्रादिनीली ॥२९॥

(अव०) सनिर्याञ्चा । सानिर्वस्त्रभेदः । मेनिः संकल्पः । मरिर्मारिश्च मरकम् । अभ्रिः कोटिः। ओषधिरौषधम् । विद्रधिः रोगविशेषः। झल्लरिर्वाद्यविशेषः । अर्थप्राधान्यात् कलरिरपि । पारिस्तैलाद्याधारः । अभ्रिः खनित्रम् । शिरोधिः कन्धरा । कबिः खलीनम् । कीर्तिर्यशः । अथेदन्ताः—गन्त्री शकटिका । कबरी वेणिः । कुमारी रामतरुणी । आढकी धान्यभेदः । अर्थप्राधान्यात् तुवर्यपि । स्वेदिनी कण्डूः । ह्रादिनी वज्रम् । ईली एकधारोऽसिः ॥२९॥

हरिण्यश्मरी कर्तरीस्थग्यपट्यः करीर्यकपद्यक्षवत्यः प्रतोली ॥
कृपाणीकदल्यौ पलालीहसन्यौ वृसी गृध्रसी घर्घरी कर्परी च ॥३०॥

(अव०) हरणी स्वर्णप्रतिमा । अश्मरी मूत्रकृच्छ्रम् । कर्तिनी तर्कुः । स्थगी ताम्बूलकरङ्कः। अपटी काण्डपटः। करीरी करिदन्तमूलम् । एकपदी मार्गः। अर्थप्राधान्यात् पदवीरपि । अक्षवती द्यूतम् । प्रतोली विशिखा । कृपाणिः कर्तरिः । अर्थप्राधात्कर्तर्यपि । कदली पताका । पलाली क्षोदः । हसनी अङ्गारशकटी । अर्थप्राधान्यात् हसन्त्यपि । वृसी व्रतिनामासनम् । मूर्धन्योपान्त्यो दन्त्योपान्तश्च । गृध्रसी ऊरुसंधौ वातरुक् । घर्घरी किंकिणी । कर्परी तुत्थाञ्जनम् । अर्थप्राधान्याद्दर्विकापि ॥३०॥

काण्डी खल्ली मदी धटी गोणी खण्डोल्येषणी द्रुणी ॥
तिलपर्णी केवली खटी नभ्रीरसवत्यौ च वातली ॥३१॥

(अव०) काण्डी वेदविषयो ग्रन्थः । खल्ली हस्तपादावमर्दनाख्यो रोगः । मदी कृषिवस्तुविशेषः । धटी वस्त्रखण्डम् । गोणी धान्यभाजनविशेषः । अर्थप्राधान्यात् कण्ठालापि । खण्डोली सरसी तैलमानं च । एषणी वैद्यशलाका । अर्थप्राधान्यात् नाराच्यपि । द्रुणी कर्णजलौका । तिलपर्णी रक्तचन्दनम् । पर्ण्यन्तत्वेन माषपर्णीत्याद्यपि । केवली ज्योतिःशास्त्रम् । खटी खटिनी । अर्थप्राधान्यात् कष्कटी कठिन्यामपि । नभ्री वभ्री । रसवती महानसम् । वातली वागुरा ॥३१॥

वाली गन्धोली काकली गोष्ठ्यजाजीन्द्राणी मत्स्यण्डी दामनी शिञ्जिनी च ।
शृङ्गी कस्तूरी देहली मौर्व्यतिभ्यासन्दीक्षैरेय्यः शष्कुली दद्रुपर्शू ॥३२॥

(अव०) वाली कर्णभूषणम् । कप्रत्यये वालिका सिकता । गन्धोली क्षुद्रजन्तुः । काकली ध्वनिविशेषः । गोष्ठी सभा संलापश्च । अजाजी जीरकः । इन्द्राणी करणविशेषः सिन्दुवारश्च । मत्स्यण्डी शर्कराभेदः । अर्थप्राधान्यात् मात्स्यण्डी मीनाण्डी च । दामनी पशुरज्जुः । शिञ्जिनी ज्या । शृङ्गी चूर्णविशेषः । कस्तूरी मृगमदः । अर्थप्राधान्याद्योजनगन्धाऽपि । देहली गेहद्वाराग्रस्थली । मौर्वी ज्या । अतिभीर्वज्रज्वाला । आसन्दी वेत्रासनम् । क्षैरेयी पायसम् । शष्कुली अन्नभेदः । अथोदन्ताः । दद्रुः कुष्ठभेदः । पर्शुः पार्श्वास्थि ॥३२॥

कर्णान्दुकच्छू तनूरज्जुचञ्चू स्नायुर्जुहूः सीमधुरौ स्फिगर्वाक् ॥
द्वार्द्यौदिवौ स्रुक्त्वगृचः शरद्वाश्छर्दिर्दरत्पामदषद्दृशौ नौः ॥३३॥

(अव०) कर्णान्दुरक्षिप्तिका । कच्छुः पामा । तनुः कायः । रज्जुर्गुणः । अर्थप्राधान्याद्वरत्रापि । चञ्चुः पक्षिमुखाग्रम् । स्नायुः शिरा । जुहूः स्रुग्भेदः । सीमा मर्यादा । धूः शकटाङ्गम् । स्फिग् श्रुतम् । अर्वाक् अवान्तरम् । द्वार् द्वारम् । द्यौदिवित्येतौ स्वर्गाकाशवाचिनौ ओकारान्तवन्तौ । स्रुग्होमभाण्डम् । त्वक् चर्म वल्कलं च । कल्कले चार्थप्राधान्यात् छल्लिरपि । ऋग् गायत्र्यादिः । एते त्रयोऽपि चन्ताः । शरत् ऋतुविशेषः वर्षश्च । वाः वारि । क्वचित् क्लीबत्वमपि । छर्दिर्वान्तिः । दरत् श्लेच्छविशेषः । पामा कण्डूः । दषत् पाषाणः । दृग् लोचनम् । नौस्तरी ॥३३॥

॥ इति स्त्रीलिङ्गं समाप्तम् ॥

॥ अथ नपुंसकाधिकारः ॥

नलस्तुतत्तसंयुक्तररुयान्तं नपुंसकम् ॥
वेध आदिन् विना सन्तं द्विस्वरं मन्नकर्तरि ॥१॥

(अव०) नान्तं लान्तं त्वन्तं तान्तं त्तान्तं संयुक्ता ये ररुयास्तदन्तं च नपुंसकलिङ्गं स्यात् । नान्तमजिनं चर्मेत्यादि । लान्तं-चक्रवालं समूहः । दलं शकलम् । त्वन्तं-वस्तु तत्त्वं पदार्थश्च । मस्तु दधिनिष्यन्दः । तान्तं-शीतमनुष्णम्, अद्भुतमाश्चर्यमित्यादि । त्तान्तं-भित्तं शकलम् । निमित्तं हेतुरित्यादि । त्तस्य संयुक्तस्य पृथगुपन्यासात् पूर्वेऽसंयुक्ता गृह्यन्ते । संयुक्तरान्तम्-अग्रं पुरः अधिकं च । गोत्रं नाम कुलं क्षेत्रं च । शुक्रं सप्तमो धातुः । इत्यादि । संयुक्तशब्दान्तम्-श्मश्रु कूर्चमित्यादि । संयुक्तयान्तं-शरव्यं लक्ष्यं वेध्यं च । साध्नाय्यं हव्यमित्यादि । वेधस्प्रभृतीन् वर्जयित्वा सकारान्तं द्विस्वरं नपुंसकम् । इदं रक्षः निशाचरः । उषः प्रभातं संध्यायां तु पुंस्त्री । तपः कृच्छ्राचरणम् । माघे पुंनपुंसकम् । रजो रेणुः । पुंसीति गौडः । जोषान्त्योऽयम् । यादो जलचरः । रोचिः शोचिश्च दीप्ती । वेध आदीनिति किम् । वेधा बुधो विष्णुर्विधिश्च । सहा हेमन्तः। नभा मेघादिः । ओका आश्रयः । ओकस्य तु कान्तत्वात् पुंस्त्वम् । पूर्वापवादो योगः। तेनाम्भःस्रोतो याद इत्यादीनां नद्यादिनामत्वेऽपि क्लीबत्वमेव। गुणवृत्तेस्त्वाश्रयलिङ्गता परत्वात् । द्विस्वरमिति अनुवर्तते । अकर्तरि विहितो यो मन् तदन्तं नाम नपुंसकम् । धाम तेजः । वर्ष्म प्रमाणं शरीरं च । तर्म यूपाग्रम् । वर्त्म मार्गः। अकर्तरीति किम् । ददातीति दामा । करोतीति कर्मा ॥१॥

धनरत्ननभोऽन्नहृषीकतमोघुसृणाङ्गणशुल्कशुभाम्बुरुहाम् ॥
अघगूथजलांशुकदारुमनोबिलपिच्छधनुर्दलतालुहृदाम् ॥२॥

(अव०) धनादीनां नाम नपुंसकम् । धननाम-द्रविणं वस्तु इत्यादि । रत्नं माणिक्यमित्यादि । नभो वियदित्यादि । अन्नं सिक्थं भक्तम् । हृषीकम् इन्द्रियम् अक्षम् । तमोऽवतमसम् इत्यादि । दिगम्बरस्य तु बाहुलकात् पुंस्त्वम् । घुसृणं कुंकुमः । पुंसीति वाचस्पतिः । कश्मीरजम् इत्यादि । अङ्गणं प्राङ्गणम् अजिरम् इत्यादि । शुल्कम् आरनालं तुषोदकमित्यादि । शुभं श्वःश्रेयसं कल्याणमित्यादि । शम्भावपि निःश्रेयसशब्दो बाहुलकान्नपुंसकः। अम्बुरुहम् अब्जम् कुशेशयमित्यादि। अम्बुरुहवाचिनां नलिनाम्बुजपद्मकमलनालीकानां पुंनपुंसकत्वम् । अघं पापम् । गूथम् अशुचिः । जलं सलिलं कीलालं क्षीरम् । दधिसारवाणयोस्तु पुंनपुंसकत्वम् । गौडस्तु घनरसस्यापि । वरुणस्य तद्वाचिनो बाहुलकात् पुंस्त्वम् । अंशुकं वस्त्रम् । दारु काष्ठम् । काष्ठान्तत्वात् पूतिकाष्ठमपि । सरलो देवदारुश्च द्रुमौ । एधस्तु घञन्तत्वेन पुंसि । समिधस्तु स्त्र्युक्तत्वात् स्त्रीत्वम् । मनो मानसमित्यादि । बिलं रन्ध्रमित्यादि । पिच्छं पतत्रं पत्रम् । तनूरुहगरुद्वर्हास्तु पुंनपुंसकाः । धनुः

कार्मुकम् । पिनाकोदण्डगाण्डीवगाण्डिवानां पुंनपुंसकत्वम् । दलं किसलयम् । तालु काकुदम् । हृत् हृदयम् । वक्षः पुंनपुंसकम् ॥ २ ॥

हलदुःखसुखागुरुहिङ्गुरुचलचभेषजतुत्थकुसुम्भदृशाम् ।
मरिचास्थिशिलाभवसृक्कयकृन्नलदान्तिकवल्कलसिध्मयुधाम् ॥३॥

(अव०) हलं लाङ्गलम् । दुःखं कष्टम् । सुखं शर्म । सुखादीनां गुणवृत्तेस्त्वाश्रयलिङ्गता । सुखः सुखा । अगुरु लोहम् । हिङ्गु सहस्रवेधि । रुचं ह्रीवेरम् । त्वचं गन्धद्रव्यविशेषः । भेषजं शमनम् । औषधस्तु पुंनपुंसकः । तुत्थं चक्षुष्यो द्रव्यविशेषः । कुसुम्भं वह्निशिखम् महारजतम् । कुसुंभस्तु पुंनपुंसकः । अक्षि ईक्षणम् । दृग् दृष्टिः स्त्रीलिङ्गे । मरिचं वेल्लजम् । अस्थि कीकसम् । शिलाभवं शिलायाः सारः निष्यन्दः शैलेयसंज्ञम् । सृक्क ओष्ठपर्यन्तः । यकृत् दक्षिणपार्श्वे कृष्णमांसांशः । नलदं तृणविशेषः । अन्तिकं समीपम् अभ्यर्णम् अभ्याशम् । दन्त्योपान्त्ये तु बाहुलकात् पुंस्त्वम् । सिध्म किलासम् । युत् युद्धम् । युधस्तु स्त्रीत्वम् । संयतो नपुंसकत्वम् ॥ ३ ॥

सौवीरस्थानकद्वारक्षोमधौतेयकासृजाम् ॥
लवणव्यञ्जनफलप्रसूनद्रवतां सभित् ॥४॥

(अव०) सौवीरादीनां लवणादीनां तु सभेदमपि क्लीबम् । वाच्यस्य सभेदत्वान्नामापि सभेदम् । सौवीरं सौवीराञ्जनम् । स्थानकं योधानामालीढादिसंस्थानविशेषः । द्वारमुपायेऽपि बाहुलकात् क्लीबम् । क्षोममुदर्यो जलाधारो हृदयस्य दक्षिणे यकृत् क्लोमं च वामे प्लीहा पुष्पसाश्रेति वैद्याः । धौतेयकं ग्रन्थिपर्णम् । तद्वाची जोवदस्तु बाहुलकात् पुंसि । असृग् रुधिरम् । लवणं तद्भेदाः-अक्षीवमाणिवन्धविडादयः । व्यञ्जनभेदाः दधिदुग्धाज्यतक्रादयः । गोरसस्य सान्तत्वात् पुंस्त्वम् । फलभेदा नालिकेरादयः । प्रसूनभेदाश्चम्पकादयः । अग्निसंपर्के ये द्रवन्ति विलीयन्ते ते द्रवन्तस्तेषां भेदा लोहादयः । स्वर्णवाचिनस्तु चाम्पेयस्य आरकूटवाचिनो मदनस्य तु बाहुलकात् पुंस्त्वम् । इह पृथग्ग्रहणात् जलसंपर्काद्ये द्रवन्ति न तेषां परिग्रहः । तेन न मृदोऽपि परिग्रहः ॥ ४ ॥

पुरं सद्माङ्क्योश्छत्रशीर्षयोः पुण्डरीकके ॥
मधु द्रवे ध्रुवं शश्वत्तर्कयोः खपुरं घटे ॥५॥

(अव०) सद्मनि अङ्के च पुरं क्लीबम् । नगरे तु त्रिलिङ्गः । पुण्डरीकं कं च क्रमेण छत्रे शीर्षे च । द्रवति वस्तुनि मधु क्लीबम् । मधु मकरन्दः । शश्वन्नित्ये तर्के ऊहे च ध्रुवम् । अन्यत्र तु यथाप्राप्तम् । खपुरं घटे वाच्ये क्लीबम् ॥ ५ ॥

अयूपे दैवेऽकार्यादौ युगं दिष्टं तथा कटु ॥
असं द्वन्द्वं स्थले धन्वारिष्टमद्रुमपक्षिणोः ॥६॥

(अव०) अयूपादिष्वर्थेषु यथासंख्यं युगदिष्टकदुशब्दाः क्लीबाः । युगं युग्मं कृतादि । यूपे तु पुंनपुंसकम् । गोगोयुगं इत्यादौ तु गोयुगप्रत्ययान्तादेव सिद्धम् । दिष्टं दैवम् । काले तु पुंसि । कटु अकार्यम् दूषणं च । समासादन्यत्र द्वन्द्वं क्लीबम् । द्वन्द्वं युग्मम् । अर्थप्राधान्याद् द्वन्द्वमपि । धन्वनशब्दः स्थले क्लीबः । मरौ तु पुंनपुंसकः । द्रुमं च पक्षिणं च वर्जयित्वाऽरिष्टं क्लीबम् । अरिष्टं सूतिकागृहम् मरणं अशुभम् ॥ ६ ॥

धर्मे दानादिके तुल्यभागेऽर्धं ब्राह्मणं श्रुतौ ॥
न्याय्ये सारं पद्मभिभविन्दौ काममनुमतौ ॥७॥

(अव०) दानादिके पुण्यस्योपाये धर्मः क्लीबः । तानि धर्माणि प्रथमान्यासन् । पुण्ये तु मान्तत्वात् पुंस्त्वम् । स्वभावे तु पुंनपुंसकः । समेऽशे वाच्येऽर्धशब्दः । अर्धं पिप्पल्याः अर्धपिप्पली । अतुल्ये भागे तु पुंस्त्वम् । केचिदाश्रयलिङ्गतामाहुः । श्रुतौ वेदविषये ब्राह्मणं नपुंसकम् । न्यायादनपेतं न्याय्यम् , तस्मिन् वाच्ये सारशब्दः । बलादौ तु पुंस्त्वम् । इभबिन्दौ वाच्ये पद्मं नपुंसकम् । अन्यत्र तु यथाप्राप्तम् । अनुज्ञायां कामं क्लीबम् । अयमव्ययमप्यस्ति ॥७॥

खलं भुवि तथा लक्ष्मं वेध्येऽहः सुदिनैकतः ॥
भूमोऽसंख्यात एकार्थे पथः संख्याव्ययोत्तरः ॥८॥

(अव०) भुवि वाच्यायां क्लीबं खलम् । पिण्याके दुर्जने च पुंनपुंसकः । स्थाने तु त्रिलिङ्गः । वेध्ये वाच्ये लक्ष्मम् । व्याजे तु पुंनपुंसकः । संख्यायां तु पुंस्त्रा । शोभनवाचिसुदिनशब्दादेकशब्दाच्च परो अह इति कृतसमासान्तोऽहन्शब्दः क्लीबः । भूम इति कृतसमासान्तो भूमिशब्दः संख्याया अन्येभ्यः परः एकार्थे कर्मधारये वर्तमानः क्लीबः । पाण्डुर्भूमिः पाण्डुभूमम् । एवमुदग्भूमम् । कृष्णभूमम् । असंख्यात इति किम् । द्वयोर्भूम्योः समाहारो द्विभूमम् । 'अन्यस्तु सर्वो नपुंसकः' इति नपुंसकत्वम् । ननु चेत्संख्यापूर्वस्यापि क्लीबत्वं तर्हि निषेधोऽनर्थकः । नैवम् । द्वयोर्भूम्योः क्रीत इति कृतसमासान्तादिकणि तस्य लुपि क्लीबत्वम् आश्रयलिङ्गता चेष्यते । एतच्च विशिष्टं व्यावृत्तेः फलम् । संख्यावाचिनोऽव्ययाच्च परः कृतसमासान्तोऽयं पथिन्शब्दः पथशब्दो वा क्लीबे । द्वयोः पन्थाः द्विपथम् । द्व्यवयवो वाऽयम् ॥ ८ ॥

द्वन्द्वैकत्वाव्ययीभावौ क्रियाव्ययविशेषणे ॥
कृत्याः क्तानाः खल् ञिन् भावे आ स्यात् त्वादिः समूहजः ॥९॥

(अव०) द्वन्द्वैकत्वं सुखदुःखम् । अव्ययीभावः दण्डादण्डि । तूष्णींगङ्गं देशः । पञ्चनदम् । पारेगङ्गमित्यादि । क्रियाया अव्ययस्य च यद्विशेषणं समानाधिकरणं तद्वाचि नपुंसकम् । साधु पचति । प्राग्रमणीयम् दिग् देशः कालो वा । एवमुदग् प्रत्यगित्यादि । भावे ये विहिताः कृत्याः क्तानाः खल् ञिन् तदन्तं

नाम क्लीबम्। चैत्रेण कार्यं पाक्यं कर्तव्यं करणीयं देयं ब्रह्मभूयं ब्रह्मत्वमित्यादि। क्ताना इति प्रश्लेषात् आनानानटो गृह्यन्ते। के-चैत्रेण कृतम्। आनेति कानानशोर्ग्रहणम्। पेचानं पच्यमानं चैत्रेण। अनद् निर्वाणम्। अन-ईषत्स्थानं मैत्रेण। खल्-दुराढ्यंभवं मैत्रेण। ञिन्-समन्ताद् रावः सांराविणम्। 'भावे त्वतल्' इति त्वप्रत्ययादारभ्य ब्रह्मणस्त्वमिति त्वमभिव्याप्य ये प्रत्यया त्व-य--ष्यण्--अञ्--अण्--अकञ्--ईय--त्वरूपास्तदन्तं नाम क्लीबम्। त्व--तदात्वम् तत्कालः। यः-सख्यं मैत्री। वणिज्यं तु स्त्री क्लीबम्। ष्यण्-कापेयम् कपेः क्रीडादिकम्। अञ्-द्वैपम्-द्वीपिनो जातिः कर्म च। अण्-चापलम्। अकञ्-आचार्यकम्, आचार्यता। ईय-दौत्रीयम्। त्व-ब्रह्मत्वम्। समूहे जाता ये प्रत्यया अण्--अकञ्--ष्य--इकण्--य--ईय--ड्वण्--अञ्--ष्यञ्रूपास्तदन्तं नाम क्लीबम्। अण्-भैक्षम्। अकञ्-औपगवकम्। ष्य-कैदार्यम्। इकण्-कावचिकम्। य-ब्राह्मण्यम्। ईय-अश्वीयम्। ड्वण्-पार्श्वम्। अञ्-शौवम्। ष्यञ्-पौरुषेयम्। इत्यादि ॥ ९ ॥

गायत्र्याद्यण् स्वार्थेऽव्यक्तमथानञ्कर्मधारयः ॥
तत्पुरुषो बहूनां चेच्छाया शालां विना सभा ॥१०॥

(अव०) गायत्र्यादीनि छन्दोनामानि स्वार्थे योऽण् तदन्तानि क्लीबानि। गायत्र्येव गायत्रम्। एवमानुष्टुभादीन्यपि। अव्यक्तम् अव्यक्तलिङ्गवाचि क्लीबम्। किं तस्या गर्भे जातम्। यत्तत्रोत्पद्यते तदानय। इदं च शिष्टप्रयुक्तेष्वेव द्रष्टव्यम्। अधिकारोऽयं गृहतः स्थूणा इति यावत्। यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र नञ्समासं कर्मधारयं च वर्जयित्वा योऽन्यस्तत्पुरुषः स नपुंसकं भवति इति अधिकृतं वेदितव्यम्। छायान्तस्तत्पुरुषः क्लीबः। सा यदि येषां बहूनां समुदितानां संभवति। शलभानां छाया शलभच्छायम्। शरच्छायम्। बहूनामिति किम्। कुड्यस्य छाया कुड्यच्छाया। सेनाशालेत्यादिना विकल्पे प्राप्ते वचनं नित्यार्थम्। शालां मुक्त्वाऽन्यत्रार्थे यः सभाशब्दस्तदन्तः तत्पुरुषः क्लीबः। स्त्रीसभं दासीसभं मनुष्यसभं तत्समूह इत्यर्थः। अनञ्कर्मधारय इत्येव। असभा। परमसभाया उत्तरपदत्वविज्ञानादिह न स्यात्। स्त्रीणां परमसभा स्त्रीपरमसभा। एवमुत्तरत्रापि ॥ १० ॥

राजवर्जितराजार्थराक्षसादेः पराऽपि च ॥
आदावुपक्रमोपज्ञे कन्थोशीरनामनि ॥११॥

(अव०) राजार्था ईश्वरादयस्तेभ्यो राजवर्जितेभ्यो राक्षसादयः पिशाचादयश्च प्राणिनोऽमनुष्यास्तेभ्यः परा या सभा तदन्तस्तत्पुरुषः क्लीबः। शालार्थ आरंभः। इनसभम् ईश्वरसभं नृपसभम्। पिशाचसभम्। रक्षःसभम्। तद्वृन्दं तत्संघो वेत्यर्थः। नृपतिसभामगमदिति बाहुलकात्। राजवर्जितेति किम्। राजसभा। समूहार्थस्य भवत्येव पूर्वेण राजसभम्। राजार्थराक्षसादेरिति किम्।

नरसभा। आदौ उपक्रमस्योपज्ञानस्य च प्राथम्ये विवक्षिते उपक्रमोपज्ञेत्येतदन्तस्तत्पुरुषः क्लीबः। श्रेयांसोपक्रमः श्रेयांसोपक्रमं दानम्। श्रेयांसेन श्रेयसे प्रथमं प्रवर्तितमित्यर्थः। आदिदेवस्योपज्ञा आदिदेवोपज्ञं धर्मव्यवस्था। आदिदेवेन प्रथमं ज्ञात्वा प्रवर्तितेत्यर्थः। उपक्रम्यते इत्युपक्रमः। उपज्ञायते इत्युपज्ञा। कर्मणि घञडावित्यनुयोगेन सामानाधिकरण्यम्। उशीनरा नाम देशस्तत्र चेत्कस्यचित्संज्ञायां वर्तमानः कन्थान्तस्तत्पुरुषः क्लीबः। सौशमीनां कंथा सौशमिकन्थम्। आह्वरकन्थं नाम उशीनरेषु ग्रामः। उशीनरेति किम्। दक्षिणकन्था नाम ग्रामसंज्ञा किन्तु उशीनरेषु न ॥ ११ ॥

सेनाशालासुराच्छायानिशा वोर्णा शशात्परा ॥
भाद्गणो गृहतः स्थूणा संख्यादन्ता शतादिका ॥१२॥

(अव०) सेनाद्यन्तस्तत्पुरुषो वा क्लीबः। कपिसेनम्। कपिसेना। हस्तिशालम्। हस्तिशाला। यवसुरम्। यवसुरा। छत्रच्छायम्। छत्रच्छाया। चौरनिशम्। चौरनिशा। अनञ्कर्मधारय इति किम्। असेना। परमसेना। शशात्परो य ऊर्णाशब्दस्तदन्तस्तत्पुरुषः क्लीबः। शशोर्णम्। अन्यत्र तु न। छागोर्णा। भात्परो यो गणस्तदन्तस्तत्पुरुषः क्लीबः। भगणम्। अन्यत्र न। गोगणः। गृहात्परा या स्थूणा तदन्तस्तत्पुरुषः क्लीबः। गृहस्थूणं गृहधारणम्। अन्यत्र तु न। शालास्थूणा। अकारान्ताः शतप्रभृतिसंख्याः क्लीबाः। अब्जं खर्वं निखर्वं महासरोजमित्यादि। शतसहस्रायुतप्रयुतानां पुंनपुंसकत्वम्। लक्षस्य तु पुंस्त्वीत्वम् ॥ १२ ॥

मौक्तिकं माक्षिकं सौप्तिकं क्लीतकं नाणकं नाटकं खेटकं तोटकम् ॥
आह्निकं रूपकं जापकं जालकं वेणुकं गैरकं कारकं वास्तुकम् ॥१३॥

(अव०) अथ कान्ताः। मौक्तिकं मुक्ता। माक्षिकं यस्मात्ताम्रादि भवति स धातुविशेषः। सौप्तिकं रात्रिधाटी। क्लीतकं मधुकम्। नाणकं रूपकादि। नाटकं दशरूपकभेदः। खेटकं फलकम्। तोटकं दशरूपकभेदः वृत्तं च। आह्निकं नित्यक्रिया भोजनं च। रूपकं काव्यालंकारविशेषः। उपलक्षणत्वाद्यमकं दीपकं च। जापकं दर्वी सुगन्धिद्रव्यविशेषश्च। अर्थप्राधान्यात् कालापकमपि। दर्व्यां च पुंलिङ्गोऽप्ययमित्येके। जालकं कुड्मलम्। वेणुकं गजयोत्रम्। गैरिकं धातुविशेषः। कारकं कर्त्रादि। गुणवृत्तिस्त्वाश्रयलिङ्गः। वास्तुकं शाकविशेषः॥१३॥

रुचकं धान्याकनिःशलाकालीकालिकशल्कोपसूर्यकाल्कम् ॥
कवकक्विुकतोकतिन्तिडीकैडूकं छत्राकत्रिकोल्मुकानि ॥१४॥

(अव०) रुचकं चन्दनपेषणी शिला। धान्याकं अल्लुका। अर्थप्राधान्यात् धानेयकम् धान्यकं धानीयकमपि। निःशलाकं रहः। अर्थप्राधान्याज्जनान्तिकमपि। अलीकं ललाटम् अलिकं च। शल्कं खण्डम्। उपसूर्यकं परिवेषः। अल्कश्च

रोगः । कवकं भूकन्दविशेषः । किबुकं जलोत्पन्नद्रव्यविशेषः । तोकमपत्यम् । तिन्तिडीकं चुक्रम् । पट्टकं अन्तर्न्यस्तास्थि कुडयम् । छत्राकं भूकन्दविशेषः । त्रिकं पृष्ठाधोभागः । उल्मुकं अलातम् ॥१४॥

माद्वीकंकदम्बके बुकं चिबुकं कुतुकमनूकचित्रके ॥
कुहुकं मधुपर्कशीर्षके शालूकं कुलकं प्रकीर्णकम् ॥१५॥

(अव०) माद्वीकं मृद्वीकासवः । अर्थप्राधान्यात् माध्वीकमपि हारहूरं च । सुरानामत्वेन स्त्रीत्वे प्राप्ते वचनम् । कदम्बकं समूहः । काभावे कदम्बम् । बुकं तृणविशेषः । चिबुकमधरस्याधः । कुतुकं कुतूहलम् । अनूकमन्वयः । चित्रकं पुण्ड्रम् । कुहुकमाश्चर्यम् । मधुपर्कं दधिमध्वादिः देवादीनामर्घः । शीर्षकं शिरस्त्राणम् । शालूकमुत्पलादिकन्दः । कुलकं वृत्तसमूहः । प्रकीर्णकं चामरम् ॥१५॥

हल्लीसकपुष्के खलिङ्गं स्फिगमङ्गं प्रगचोचबीजपिञ्जम् ॥
रिष्टं फाण्टं ललाटमिष्टन्युष्टं करोटकृपीटचीनपिष्टम् ॥ १६ ॥

(अव०) हल्लीसकं स्त्रीणां नृत्तभेदः । पुष्पकं नेत्ररोगः । खं संवेदनम् । लिङ्गं हेतुश्चिह्नं च । अर्थप्राधान्याच्चिह्नमपि । स्फिगं स्फिग् । अङ्गं प्रतीकः समीपं च । अङ्गान्तत्वाद्वराङ्गं चक्राङ्गं च । प्रगं प्रभातम् । चोचमुपभुक्तफलावशेषश्छल्ल्यादि । बीजं हेतुः आधानं च । पिञ्जं बलम् । रिष्टं क्षेमम् । फाण्टमनायासम् । ललाटं भालम् । इष्टं क्रतुकर्म । व्युष्टं प्रभातम् । करोटं मस्तकम् कांस्यभाजनं च । कृपीटमुदरम् । चीनपिष्टम् सिन्दूरम् ॥ १६ ॥

शृङ्गाटमोरटपिटान्यथ पृष्ठगोष्ठभाण्डाण्डतुण्डशरणग्रहणेरणानि ॥
पिङ्गाणतीक्ष्णलवणद्रविणं पुराणं त्राणं शणं हिरणकारणकार्मणानि ॥१७॥

(अव०) शृङ्गाटं जलोद्भवकन्दः चतुष्पथं च । मोरटमिक्षुमूलम् । पिटं छर्दिः । टान्तानां तु पुंस्त्वे प्राप्तेऽस्य पाठः । अथ ठान्तौ । पृष्ठं प्राण्यङ्गम् । गोष्ठं गोकुलम् । गोष्ठप्रत्ययान्तमपि । गोगोष्ठम् । अश्वगोष्ठम् । 'पशुभ्यः स्थाने गोष्ठः' इति गोष्ठः । भाण्डं भाजनं गेहं च । अण्डं वृषणः । तुण्डं मुण्डम् । अर्थप्राधान्यात् द्विजालयमपि । शरणं गृहं त्राणं च । ग्रहणमादरः । इरणमूषरम् । अर्थप्राधान्यादूरमपि । पिङ्गाणं काचभाजनं गेहं च । तीक्ष्णं विषादिः । लवणं लावण्यम् । द्रविणं पराक्रमः । अर्थप्राधान्यात् द्युम्नमपि । पुराणं पञ्चलक्षणम् । त्राणं त्रायमाणाख्यो विधिविशेषः । शणं धान्यविशेषः । हिरणम् 'विराटहेमरेतःसु हिरणं स्याद्धिरण्यवत्' । कारणं हेतुः । कार्मणं संवननमपि ॥१७॥

पर्याणर्णघ्राणपारायणानि श्रीपर्णोष्णे धोरणक्षूणभूतम् ॥
मादेशान्ताश्मन्तशीतं निशान्तं वृन्तं तूस्तं वार्त्तवाहित्थमुक्थम् ॥१८॥

(अव०) पर्याणं पल्ययनम् । ऋणमुत्तमर्णदेयम् । घ्राणं घ्राणा । पारायणं

शाखविशेषः । श्रीपर्णमग्निमन्थः । उष्णं शीतविरोधः । धोरणं वाहनम् । क्षूणं विकलता । भूतं प्राणी । प्रादेशान्तं प्रमाणविशेषावस्थानम् । अश्मन्तं चुल्लिः । शीतम् ऋतुविशेषः उष्णविरोधश्च । निशान्तं गृहम् अवरोधश्च । अन्तान्तत्वात् पुंस्त्वे प्राप्तेऽस्य पाठः । वृन्तं प्रसवबन्धनम् । वृन्तान्तत्वात् तालवृन्तमपि । तूस्तं केशजटा, जरद्वस्त्रम् । खण्डे तु सिद्धमेव । वार्तमारोग्यं निःसारं च । अथ थान्तौ । वाहित्थं गजकुम्भयोरधः । उक्थं साम ॥ १८ ॥

अच्छोदगोदकुसिदानि कुसीदतुन्दवृन्दास्पन्दं दपदनिम्नसशिल्पतल्पम् ॥
कूर्पत्रिविष्टपपरीपवदन्तरीपरूपं च पुष्पनिकुरम्बकुटुम्बशुल्बम् ॥१९॥

(अव०) अथ दान्ताः । अच्छोदं देवसरः । उपलक्षणत्वान्मानसमपि । गोदं मस्तकस्नेहः । कुसिदम् ऋणम् । कुसीदं विज्ञानम् । तुन्दमुदरम् । वृन्दं समूहः । आस्पदं प्रतिष्ठा कृत्यं च । दं कलत्रं त्राणं च । पदं त्राणं स्थानम् । पादे पुंस्यपि पदान्तत्वात् गोष्पदप्रपदादयोऽपि । निम्नं गम्भीरम् । शिल्पं विज्ञानम् । तल्पं रणमण्डपः अट्टः दाराश्च । शयनीये तु पुंक्लीबः । कूर्पं भ्रुवोर्मध्यरोम । कूर्पमिति भार्गविः । त्रिविष्टपं स्वर्गः । त्रिविष्टपमपि । परीपं परिगता आपो यत्र । अन्तरीपं मध्येजलप्रदेशः । रूपं चक्षुर्विषयः सौन्दर्यं च । पुष्पं स्त्रीरजोनेत्ररोगश्रीदविमानप्रसूनेषु । निकुरम्बं समूहः । कुटुम्बं पुत्रदारादि । शुल्बं रज्जुः ॥ १९ ॥

प्रसभतलभशुष्माध्यात्मधामेर्मसूक्ष्मं किलिमतलिमतोक्मं युग्मतिग्मं त्रिसन्ध्यम् ॥
किसलयशयनीये सायखेयेन्द्रियाणि द्रुवयभयकलत्रद्वापरक्षेत्रसत्रम् ॥२०॥

(अव०) अथ भान्तौ । प्रसभं बलात्कारः । तलभं करिकराघातः । भान्तत्वेन पुंस्त्वे प्राप्तेऽस्य वचनम् । अथ मान्ता दश । शुष्ममोजः । आत्मानमधिष्ठितमध्यात्मं योगशास्त्रम् । बाहुलकात् तत्पुरुषादपि समासान्तः । अव्ययीभावस्य तु 'द्वन्द्वैकत्व' इति नपुंसकत्वम् । धामं गेहं तेजश्च । नन्तस्य तु मन्नन्तत्वादेव सिद्धम् । ईर्मं व्रणम् । सूक्ष्ममणौ । किलिमं देवदारुः । तलिमं कुट्टिमं तल्पं चन्द्रहासः वितानं च । तोक्मं कर्णमलः । युग्मं युगम् । तिग्मं तीक्ष्णम् । अर्थप्राधान्यात् तीक्ष्णं खरं तीव्रमपि । अथ यान्ताः । त्रिसन्ध्यमुपवैणवं सन्ध्यात्रयसमाहारः । 'अन्नाबन्तान्तो वा' इति पक्षे स्त्रीत्वे प्राप्तेऽस्य पाठः । किसलयं पल्लवः । शयनीयं शय्या । सायं दिनावसानम् । खेयं परिखा । इन्द्रियं रेतः । द्रुवयं मानम् । पाय्यमपि । भयं प्रतिभयं कुब्जकप्रसूनेऽपि । शुष्मादीनां मान्तत्वात् किसलयादीनां यान्तत्वात् पुंस्त्वे प्राप्ते पाठः । अथ रान्ताः । कलत्रं भार्या । द्वापरं युगविशेषः । क्षेत्रं केदारः । क्षेत्रकलत्रयोर्योनिमन्नामत्वेन स्त्रीत्वप्राप्तौ वचनम् । सत्रं गृहम् आच्छादनं सदादानं वनं दम्भः साधनं यज्ञश्च ॥२०॥

शृङ्गवेरमजिराभ्रपुष्करं तीरमुत्तरमगारनागरे ॥
स्फारमक्षरकुकुन्दरोदरप्रान्तराणि शिबिरं कलेवरम् ॥२१॥

(अव०) शृङ्गवेरमार्द्रकम् । अजिरं प्राङ्गणे वाते विषये दर्दुरे तनौ । अभ्रं मेघः नाकश्च । स्वार्थिके के अभ्रकं गिरिजामलम् । अर्थप्राधान्यात् शैलाभ्रादयोऽपि । पुष्करं पद्मजव्योमपयःकरिकराग्रेषु । तीरं तटम् । त्रपुवाची तु तीरो बाहुलकात् पुंसि । उत्तरं प्रतिवचनम् । अगारं गृहम् । नागरं मुस्तकः शुण्ठी च । स्फारं विपुलम् । गुणवृत्तेस्त्वाश्रयलिङ्गता । अक्षरं वर्णः मोक्षः परब्रह्म च । कुकुन्दरं जघनकूपः । अर्थप्राधान्यात् ककुन्दरतावुके अपि । उदरं जठरव्याधियुद्धानि । जठरे त्रिलिङ्गोऽयमिति बुद्धिसागरः । प्रान्तरं विपिने दूरशून्यवर्त्मनि कोटरे च । शिबिरं सैन्यम् तन्निवेशश्च । कलेवरं शरीरम् ॥ २१ ॥

सिन्दूरमण्डूरकटीरचामरक्रूराणि दूराररवैरचत्वरम् ॥
औशीरपातालमुलूखलार्तवे सत्वं च सान्त्वं दिवकिण्वयौतवम् ॥२२॥

(अव०) सिंदूरं धातुविशेषः । अर्थप्राधान्यात् मसिवर्द्धनम् गन्धोरम् नागसंभवमित्यपि । मण्डूरं लोहमलम् । कटीरं कटी । चामरं प्रकीर्णकम् । पुंस्यपीति कश्चित् । क्रूरं क्रौर्यम् । दूरं विप्रकृष्टम् । अनयोर्गुणवृत्तेस्त्वाश्रयलिङ्गतैव । अरारं कपाटं रणं च । वैरं विरोधः । चत्वरं चतुष्पथम् । औशीरं शयनासने चामरं यष्टिश्च । अथ लान्तौ । पातालं वडवानलः । उलूखलं गुग्गुलः । निर्यासनामत्वात् पुंस्त्वे प्राप्तेऽस्य पाठः । आर्तवं पुष्पं क्षीरजश्च । सत्वं व्यवसाये स्वभावे विलम्बिते चित्ते गुणे द्रव्यात्मभावयोः । चस्यानुक्तसमुच्चयार्थत्वात् तत्त्वं स्वरूपे वाद्यभेदे परमात्मनि च । प्लवं मुस्तः गन्धतृणं च । सान्त्वं साम दाक्षिण्यं च । दिवं दिवसः स्वर्गश्च । किण्वं सुराबीजम् । यौतवं मानविशेषः ॥ २२ ॥

विश्वं वृशपलिशमर्पिशकिल्बिषानुतर्षार्षिषं मिषमृचीषमृजीषशीर्षे ॥
पीयूषसाध्वसमहानससाहसानि कासीसमत्सतरसं यवसं बिसं च ॥२३॥

(अव०) विश्वं जगत् । वृशं शृङ्गवेरं लशुनं मूलकं च । पलिशं यत्र स्थित्वा मृगादि व्यापाद्यते । अर्पिशम् आर्द्रमांसम् बालवत्साया दुग्धं च । अथ षान्ताः । किल्बिषं रोगः अपराधः विषं च । अनुतर्षं मद्यम् । अर्षिषम् आर्द्रमांसम् । मिषं व्याजः । ऋचीषम् ऋजीषं च पिष्टपचनभाजनम् । शीर्षं शिरः । शीर्षान्तत्वात् कपिशीर्षमपि । पीयूषममृतं प्रत्यग्रप्रसवगव्यादिक्षीरविकारश्च । अथ सान्ताः । साध्वसं भयम् । महानसं पाकस्थानम् । साहसं दुष्करकर्म वैयात्यमविमृश्यकारिता दमश्च । कासीसं धातुविशेषः । अर्थप्राधान्यात् धातुकासीसं धातुशेखरमपि । मत्सं संधिस्थानम् । तरसं मांसम् । अर्थप्राधान्यात् उत्सन्नं शुष्कमांसम् । यवसमश्वादिघासः । बिसं पद्मकन्दः ॥ २३ ॥

मन्दाक्षवीक्षमथ सक्थि शयातु यातु स्वाद्वाशु तुम्बरु कशेरु शलालु चालु ॥
संयत्ककुन्महदहानि पृषत्पुरीतत्पर्वाणि रोम च भसच्च जगल्ललाम ॥२४॥

(अव०) मन्दाक्षं लज्जा शूका च । वीक्षं विस्मयः दृश्यं च । सक्थि ऊरुः ।

'इक्षु प्राण्यङ्ग'-इति स्त्रीत्वप्राप्तौ वचनम् । अथोदन्ताः । शयातु अजगरः । यातु राक्षसः । स्वादु पयः । आशु शीघ्रम् । तुम्बरु ओषधिविशेषः । उकारान्तत्वात् पुंस्त्वे प्राप्ते वचनम् । कसेरु कन्दविशेषःपृष्ठास्थि च । अर्थप्राधान्यात् गाङ्गेयमपि । शलालु गन्धद्रव्यम् । आलु कन्दविशेषः । अथ व्यञ्जनान्ताः । संयत् संग्रामः । ककुत् वृषस्कन्धः । महत् राज्यं बुद्धितत्त्वं च । अयं पुंस्यपि । महान् प्रकृतिः । अहर्दिनम् । पृषत् बिन्दुः । पुरीतत् अन्त्रम् । पर्व दर्शप्रतिपदोः संधिः । ग्रन्थिप्रस्तावयोरपि । पर्व क्लीबमाहवे च विषुवत्प्रभृतिष्वपि । रोम तनूरुहम् । रोमणी इति द्विवचनम् । मन्नन्तत्वेनैव सिद्धे कर्त्रर्थं वचनम् । पुंस्यपि कश्चित् । भसदास्यं जघनमाश्रयस्थानम् । दकारान्तोऽयम् । जगत् विश्वम् । ललाम ध्वजादौ रम्ये च । ललामस्य तु पुंनपुंसकत्वम् ॥ २४ ॥

॥ इति नपुंसकलिङ्गं समाप्तम् ॥

॥ अथ स्त्रीपुंसाधिकारः ॥

पुंस्त्रीलिङ्गं चतुर्दशके शङ्कुर्निरये च दुर्गतिः ॥
दोर्मूले कक्ष आकरे गञ्जो भूरुहि बाणपिप्पलौ ॥१॥

(अव०) चतुर्दशके स्थाने वर्तमानः शङ्कुशब्दः स्त्रीपुंसलिङ्गः अयमियं वा शङ्कुः । 'एकं दश शतं तस्मात् सहस्रमयुतं ततः परं लक्षम् । प्रयुतं कोटिमथार्बुदमब्जं खर्वं निखर्वं च ॥१॥ तस्मान्महासरोजं शङ्कुं सरितां पतिं ततस्त्वन्त्यम् । मध्यं परार्धमाहुर्यथोत्तरं दशगुणं तज्ज्ञाः' ॥२॥ निरये वाच्ये दुर्गतिशब्दः स्त्रीपुंसलिङ्गः । अयमियं वा दुर्गतिः । भुजमूलेऽभिधेये कक्षशब्दः स्त्रीपुंसलिङ्गः । कक्षः कक्षा दोर्मूलम् । आकरे वाच्ये गञ्जः स्त्रीपुंसलिङ्गः । गञ्जः गञ्जा आकरः । भाण्डागारे तु पुंनपुंसकत्वमसुरालये तु स्त्रीत्वं प्रतिपदपाठेनोक्तम् । भूरुहि वृक्षे वाच्ये बाणपिप्पलशब्दौ स्त्रीपुंसकौ । बाणः बाणा शिण्टी । पिप्पलः पिप्पली अश्वत्थः । वस्त्रच्छेदनोपकरणे प्रतिपदपाठात्पुंनपुंसकत्वम् । जले तु तन्नामत्वान्नपुंसकत्वम् ॥ १ ॥

नाभिः प्राण्यङ्गके प्रधिर्नेमौ क्वचन बलिर्गृहे कुटः ॥
श्रोण्योषध्योः कटो भ्रमो मोहे पिण्डो वृन्दगोलयोः ॥२॥

(अव०) प्राण्यङ्गे वाच्ये नाभिशब्दः स्त्रीपुंसलिङ्गः । अयं नाभिः इयं नाभिः प्राण्यङ्गविशेषः । नेमौ चक्रधारायां वाच्यायां प्रधिः । अयमियं वा प्रधिः । क्वचनार्थविशेषे बलिशब्दः स्त्रीपुंसलिङ्गः । उभयोरैक्येन निर्देशः । अयमियं वा बलिः उपहारः त्वग् मांससंकोचश्च जठरावयवश्च । गृहे वाच्ये कुटशब्दः । कुटः कुटी । घटे हलाङ्गे च पुंस्त्रीवः । श्रोणावौषधिविशेषे च कटः पुंस्त्रीलिङ्गः । कटः कटी श्रोणिः, कटः कटा औषधिः । मोहे अज्ञानविशेषे च भ्रमः पुंस्त्री । भ्रमः भ्रमी अज्ञानविशेषे संदेहे भ्रमणे च । वृन्दे सक्त्वादीनां गाले च वाच्ये पिण्डः पुंस्त्री । पिण्डः पिण्डी वृन्दं गोलकश्च ॥ २ ॥

भकनीनिकयोस्तारो भेऽश्लेषहस्तश्रवणाः ॥
कणः स्फुलिङ्गे लेशे च वराटो रज्जुशस्त्रयोः ॥३॥

(अव०) भे नक्षत्रे कनीनिकायां तारकायां च तारशब्दः स्त्रीपुंसलिङ्गः । तारस्तारा नक्षत्रं कनीनिका च । भे नक्षत्रविशेषे अश्लेषहस्तश्रवणाः स्त्रीपुंसलिङ्गाः । अश्लेषः, अश्लेषा, हस्तो हस्ता, श्रवणः श्रवणा नक्षत्राणि । स्फुलिङ्गे लेशे च वाच्ये कणः स्त्रीपुंसलिङ्गः। कणः कणा स्फुलिङ्गो लेशश्च । वराटः वराटा रज्जुशस्त्रविशेषौ । अन्यत्र तु कपर्दे श्वेतनामत्वात् पुंस्त्वमेव ॥ ३ ॥

कुंभः कलशे तरणिः समुद्रार्कांशुयष्टिषु ॥
भागधेयो राजदेये मेरुजम्ब्वां सुदर्शनः ॥४॥

(अव०) कलशे वाच्ये कुम्भः पुंस्त्री । कुम्भः कुम्भी कलशः । अन्यत्र तु यथाप्राप्तम् । गुग्गुलौ बाहुलकान्नपुंसकत्वम् । अयमियं वा तरणिः समुद्रः अर्कः अंशुः पतितगोरूपोत्थापनी यष्टिश्च । अन्यत्र तु 'लिङ्गिन्यनिण्यणिन्यूयुक्ताः' इति स्त्रीत्वमेव । भागधेयो भागधेयी राजदेयः करः । मेरुजम्ब्वां सुदर्शनशब्दः स्त्रीपुंसलिङ्गः । सुदर्शनः सुदर्शना मेरुजम्बूः । अन्यत्र तु विष्णुचक्रे शक्रपुरे च प्रतिपदपाठात्पुंस्त्वमेव ॥ ४ ॥

करेणुर्गजहस्तिन्योरल्पाख्यापत्यतद्धितः ॥
लाजवस्त्रदशौ भूम्नीहाद्याः प्रत्ययभेदतः ॥५॥

(अव०) गजे हस्तिन्यां च वाच्ये करेणुः स्त्रीपुंसलिङ्गः। अयमियं वा करेणुः गजः हस्तिनी च । अलेर्भ्रमरस्याख्या पुंस्त्री । अयमलिः । इयमलिः । एवमली अलिनी, भृङ्गः भृङ्गी इत्यादि । देहिनामत्वात्पुंस्त्वे प्राप्ते योनिमत्त्वाभावाच्च स्त्रीपुंसार्थं वचनम् । अपत्येऽर्थे जातस्तद्धितस्तदन्तं नाम पुंस्त्रीलिङ्गम् । अयमौपगवः । इयमौपगवी । एवं वैदः वैदी गार्ग्यः गार्गी इत्याद्यपि । आश्रयलिङ्गत्वमपीति कश्चित् । औपगवः ना औपगवी स्त्री औपगवं कुलमित्यादि । लाजशब्दः वस्त्रसंबन्धी दशावाची च दशशब्दः स्त्रीपुंसौ तौ च बहुत्व एव प्रयोक्तव्यौ । अघञ्प्रत्ययभेदेनेहाद्याः शब्दाः स्त्रीपुंसलिङ्गाः । ईहः ईहा वाञ्छा उद्यमश्चेष्टा च । ऊहः ऊहा तर्कः । स्पर्धः स्पर्धा संघर्षः । इत्यादि ॥ ५ ॥

शुण्डिकचर्मप्रसेवकौ सल्लकमल्लकवृश्चिका अपि ॥
शल्यकघुटिकौ पिपीलिकचुल्लकहुडुक्कतुरुष्कतिन्दुकाः ॥६॥

(अव०) अथ कान्ताः । शुण्डिकः शुण्डिका सुरापणः । चर्मप्रसेवकः चर्मप्रसेवका इतिः । सल्लकः सल्लकी गजप्रियतरुः निर्यासविशेषश्चेत्यरुणः । मल्लकः मल्लिका दीपवर्त्याधारः । वृश्चिकः वृश्चिकी सविषः कीटः । शल्यकः शल्यकी श्वावित् । घुटिकः घुटिका गुल्फः । अर्थप्राधान्यात् घुण्टिकः घुण्टिका,

घुटः घुटी, गुल्फः गुल्फा इत्यादि । पिपीलकः पिपीलिका वल्मीककृमिः । चुलुकः चुलुका आस्यपूरणं वारि । हुडुक्कः हुडुक्कातोद्यम् । तुरुष्कः तुरुष्का सिह्लकः। तिन्दुकः तिन्दुकी वृक्षविशेषः ॥ ६ ॥

शृङ्गोऽथ लञ्चभुजशाटसटाः सृपाटः कीटः किटस्फटघटा वरटः किलाटः ॥
चोटश्चपेटफटशुण्डगुडाः सशाणाः स्युर्वारिपर्णफलगर्तरथाजमोदाः ॥७॥

(अव०) शृङ्गः शृङ्गा कन्दलः । अथ चान्तः । लञ्चः लञ्चा उपचारः । भुजः भुजा बाहुः । शाटः शाटी परिधानम् । सटः सटा सिंहस्कन्धकेशाः । सृपाटः सृपाटी परिमाणविशेषः । किटः किटी वंशादिपुत्तलिका । स्फटः स्फटा फणः । घटः घटी कलशः । वरटः वरटा क्षुद्रजन्तुविशेषः । किलाटः किलाटी क्षीरविकारः । किलाटिकेत्यमरटीका । चोटः चोटी शाटिका । चपेटः चपेटा विस्तृताङ्गुलिपाणितलम् । फटः फटा फणः । शुण्डः शुण्डा सुरा । गुडः गुडा हस्तिसन्नाहः । शाणः शाणा निकषः । वारिपर्णः वारिपर्णी फल्गुनामशाकम् । फणः फणा फटा । गर्तः गर्ता श्वभ्रम् । रथः रथी स्यन्दनः । अजमोदः अजमोदा ब्रह्मकुशा ॥ ७ ॥

विधकूपकलम्बजित्यवर्ध्राः सहचरमुद्गरनालिकेरहाराः ॥
बहुकरकृसरौ कुठारशारौ वल्लरशफरमसूरकीलरालाः ॥८॥

(अव०) विधः विधा प्रकारः । कूपः कूपी अन्धुः । कलम्बः कलम्बी शाकविशेषः । जित्यः जित्या हलिः । अथ रान्ताः । वर्ध्रः वर्ध्री चर्मरज्जुः । सहचरः सहचरी लता समूहविशेषश्च । मुद्गरः मुद्गरी लोष्टादिभेदनोपकरणम् । नालिकेरः नालिकेरी तरुविशेषः । फले तु तन्नामत्वात् क्लीबत्वम् । हारः हारा मुक्तादाम । बहुकरः बहुकरी संमार्जनी । कृसरः कृसरी तिलौदनः । कुठारः कुठारी पर्शुः। शारः शारी आयानयोनः वराटश्चेति हर्षः । वल्लरः वल्लरी मञ्जरी। अर्थप्राधान्यान्मञ्जरः मञ्जरीत्यपि । शफरः शफरी मत्स्यविशेषः । मसूरः मसूरी माषविशेषः । अर्थप्राधान्यान्मसुरोपि । कीलः कीला कफण्यादि । रालः राला सर्जरसः ॥ ८ ॥

पटोलः कम्बलो भल्लो दंशो गण्डूषवेतसौ ॥
लालसो रभसो वर्तिवितस्तितुटयस्रुटिः ॥९॥

(अव०) पटोलः पटोला ओषधिविशेषः। कम्बलः कम्बली ऊर्णावस्त्रं गोमलचर्म च। भल्लः भल्ली शस्त्रभेदः। अथ शान्तः। दंशः दंशी क्षुद्रजन्तुविशेषः। अथ षान्तः। गण्डूषः गण्डूषा करजलादिमुखपूरणम्। अथ सान्ताः । वेतसः वेतसी वानीरः। लालसः लालसा तृष्णातिरेकौत्सुक्ययाच्ञासु ॥ अन्यत्र तु आश्रयलिङ्गः। रभसः सभसा पौर्वापर्याविचारः। रभसो हर्षवेगयोः। माघे तु स्त्रियाम्। 'क्रमते नभो रभसयैव'। अथेदन्ताः । अयं वर्तिरियं वर्तिर्वस्त्रस्य दशा। अयं वितस्ति-

रियं वितस्तिः विततोऽङ्गुष्ठकनिष्ठः करः। अयं कुटिरियं कुटिः स्वल्पवासः। अयं त्रुटिरियं त्रुटिः अवस्था क्षणद्वयं चेत्यरुणः ॥ ९ ॥

ऊर्मीशम्यौ रत्न्यरत्नी अवीचिर्लव्यण्याणिश्रेणयः श्रोण्यरण्यौ ॥
पार्ष्णीशल्यौ शाल्मलिर्यष्टिमुष्टी योनिमुन्यौ स्वातिगव्यूतिबस्त्यः ॥१०॥

(अव०) अयमूर्मिरियमूर्मिः वीच्यादि। अयमियं वा शमिस्तरुविशेषः। अयमियं वा रत्निः बद्धमुष्टिः करः। अयमियं वाऽरत्निः सकनिष्ठः करः। अयमियं वाऽवीचिः नरकभेदः। अयमियं वा लविर्दात्रम्। अयमियं वा अणिः अक्षाग्रकीलिका अश्रिः सीमा च। अयमियं वाणिः सैव। अयमियं वा श्रेणिः पङ्क्तिः। अयमियं वा श्रोणिः कटिः। अयमियमरणिः अग्निनिर्मन्थनकाष्ठम्। अयमियं वा पार्ष्णिः गुल्फयोरधः पादावयवः। सैन्यपृष्ठे तु बाहुलकात्पुंसि। अयमियं वा शलिः कौटिल्यम्। अयमियं वा शाल्मलिर्वृक्षविशेषः। एकदेशविकृतस्यानन्यत्वात् शल्मलिः। अयमियं वा यष्टिः आलम्बनदण्डः। अयमियं वा मुष्टिः संपीडिताङ्गुलिः करः। अयमियं वा योनिरुत्पत्तिस्थानं श्रोणिश्च। यद्गौडः 'द्वयोर्योनिर्भगाकारे'। अयमियं वा मुनिस्तपस्वी। अयमियं वा स्वातिर्नक्षत्रम्। अयमियं वा गव्यूतिः क्रोशद्वयम्। अयमियं वा बस्तिर्मूत्राधारः ॥ १० ॥

मेथिर्मेधिमशी मषीषुधी ऋष्टिः पाटलीजाटली अहिः ॥
प्रश्निस्तिथ्यशनी मणिः सृणिर्मौलिः केलिहलीमरीचयः ॥११॥

(अव०) अयमियं वा मेथिः पशुबन्धनार्थं खलमध्ये स्थूणा। अयमियं मेधिः सैव। अयमियं मसिः कज्जलम्। अयमियं मषिस्तदेव। अयमियमिषुधिस्तूणीरः। अयमियमृष्टिः खड्गः। व्यञ्जनादिरपि। अयमियं पाटलिस्तरुविशेषः। अयमियं जाटलिः स एव। अयमियमहिः सर्पः। अयमियं प्रश्निः किरणः। अयमियं तिथिः प्रतिपदादिः। अयमियमशनिर्वज्रम् विद्युच्च। अयमियं मणिः रत्नादि। अयमियं सृणिरङ्कुशः। अयमियं मौलिः चूडा मुकुटः केशाश्च। अयमियं केलिः परिहासः। अयमियं हलिः महाहलम्। अयमियं मरीचिः करः ॥ ११ ॥

हन्वाखू कर्कन्धुः सिन्धुर्मृत्युमन्ववट्वेर्वारुः ॥
ऊरुः कन्दुः काकुः किष्कुर्बाहुर्गवेधू रा गौर्भाः ॥१२॥

(अव०) अयमियं हनुः कपोलयोरधोवर्ती मुखावयवः। अयमियमाखुः मूषिकः। अयमियं कर्कन्धुः बदरी। अयमियं सिन्धु सरिदर्णवश्च। अयमियं मृत्युः प्राणवियोगः। अयमियं मनुः प्रजापतिः। अयमियमवट्टुः कुकाटिका। अयमियमेर्वारुः चिर्भटः। उपलक्षणत्वादीर्वारुरपि। स्वार्थिके तु के प्रकृतिलिङ्गबाधया एर्वारुकमपि। अयमियमूरुः सक्थि। अयमियं कन्दुः स्वेदनिका। अय-

मियं काकुः ध्वनेर्विकारः । अयमियं 'किष्कुः हस्ते वितस्तौ च प्रकोष्ठे वा नपुंसकम्' । अयमियं बाहुः हस्तः । अयमियं गवेधुः तृणधान्यविशेषः । अयमियं रा द्रव्यम् । अयमियं गौः । अयमियं भाः कान्तिः प्रभाषश्च । अन्यत्र प्रभायामपि भाः शब्दः सन्तः पुंलिङ्ग एव चेत्याह ॥ १२ ॥

॥ अथ पुंनपुंसकाधिकारः ॥

पुंनपुंसकलिङ्गोऽब्जः शंखे पद्मोऽब्जसंख्ययोः ॥
कंसोऽपुंसि कुशो बर्हिर्वालो ह्रीवेरकेशयोः ॥१॥

(अव०) शंखे वाच्येऽब्जशब्दः पुंनपुंसकलिङ्गः। अब्जः अब्जं शंखः। यदुक्तम् 'अब्जो धन्वतरौ चन्द्रे शंखे स्त्रीक्लीबमम्बुजे' । अब्जे संख्याविशेषे च पद्मः पुंनपुंसकम् । पद्मः पद्ममब्जं संख्याविशेषश्च । पद्मकादावपीत्यन्ये । अपुंसि नरादन्यत्रार्थे कंसशब्दः पुंनपुंसकः। कंसः कंसं मानविशेषः पानपात्रं कांस्यं च । कुशशब्दः पुंनपुंसको बर्हिर्दर्भप्वेद्वाच्यः । कुशः कुशं दर्भः । रामसुते तु देहिमनामत्वाद् योक्त्रद्वीपान्तरयोस्तु प्रतिपदपाठात् पुंसि ॥१॥

द्वापरः संशये च्छेदे पिप्पलो विष्टरस्तरौ ॥
अब्दो वर्षे दरत्रासे कुकूलस्तुषपावके ॥२॥

(अव०) संशये संदेहे वाच्ये द्वापरशब्दः पुंनपुंसकः । द्वापरः द्वापरं संशयः। अन्यत्र तु यथाप्राप्तम् । द्वापरं युगविशेषः प्रतिपदपाठात् नपुंसकः । छिद्यतेऽनेनेति च्छेदो वस्त्रोपकरणम् । तस्मिन् वाच्ये पिप्पलः पुंनपुंसकः । पिप्पलः पिप्पलं वस्त्रच्छेदोपकरणम् । तरोरन्यत्रार्थे विष्टरः पुंनपुंसकः । विष्टरः विष्टरम् आसनं बर्हिर्मुष्टिश्च । अब्दः अब्दं वर्षम् । दरो दरं भयम् । कन्दरे तु त्रिलिङ्गः । ईषदर्थे त्वव्ययम् देश्यपदं वा । यथा 'दरदलितहरिद्रापिञ्जराण्यङ्गकानि' । तुषपावके तुषाग्नौ वाच्ये कुकूलः पुंनपुंसकः । कुकूलः कुकूलं तुषपावकः । अन्यत्र तु लान्तत्वान्नपुंसकम् । कुकूलं शंकुमान् गर्तः ॥२॥

परीवादपर्यङ्कयोर्जन्यतल्पौ तपोघर्मवत्सानि माघोष्णहृत्सु ॥
वटस्तुल्यतागोलभक्ष्येषु वर्णः सितादिस्वराद्यो रणे संपरायः ॥३॥

(अव०) जन्यशब्दः परीवादे कौलीने वाच्ये तल्पश्च पल्यङ्के पुन्नपुंसकः । जन्यः जन्यं परीवादः । 'जन्यः स्याज्जनवादेऽपि' इत्यमरः । तल्पं तल्पः पर्यङ्कः। तपःशब्दो माघमासे घर्मशब्द उष्णे शीतविरोधिनि वत्सः हृदि पुंनपुंसकः । अयं तपा इदं तपः माघः । घर्मः घर्ममुष्णः । वत्सः वत्सं हृत् । वटशब्दस्तुल्यतायां गोलके भक्ष्यविशेषे च वाच्ये पुंनपुंसकः । वटः वटं तुल्यता गोलकः भक्ष्यविशेषः । न्यग्रोधे रज्जौ च त्रिलिङ्गः । भक्ष्ये स्वार्थिके केऽपि वटकः

घटकम् । न्यग्रोधफले फलनामत्वान्नपुंसकम् । वर्णशब्दः सितादौ स्वरादौ च वाच्ये पुंनपुंसकः । वर्णः वर्णं सितकृष्णादि रूपं स्वराद्यक्षरं च । अन्यत्र तु णान्तत्वात्पुंस्येव । विलेपनेऽप्येके । रणे युद्धे वाच्ये संपरायः पुंनपुंसकः । संपरायः संपरायं रणम् ॥ ३ ॥

सैन्धवो लवणे भूतः प्रेते तमो विधुंतुदे ॥
स्वदायौ कस्वरे कृच्छ्रं व्रते शुक्रोऽग्निमासयोः ॥४॥

लवणे वाच्ये सैन्धवः पुंनपुंसकः । सैन्धवः सैन्धवं लवणम् । प्रेते वाच्ये भूतः पुंनपुंसकः । भूतः भूतं प्रेतः । अन्यत्र तु पृथिव्यादौ प्राणिनिच क्लीबः विधुंतुदे राहौ वाच्ये तमः शब्दः पुंनपुंसकलिङ्गः । अयं तमा इदं तमो राहुः । स्वदायशब्दौ कस्वरे धने वाच्ये पुंनपुंसकौ । स्वः स्वं कस्वरम् । अन्यत्र स्वः आत्मा स्वभावो ज्ञातिश्च । प्रतिपदपाठात् पुंस्त्वमेव । दायः दायं धनम् । कृच्छ्रशब्दो व्रते वाच्ये पुंनपुंसकः । कृच्छ्रः कृच्छ्रं सान्तपनादिव्रतम् । अग्नौ ज्येष्ठमासे च शुक्रः शब्दः पुंनपुंसकः । शुक्रः शुक्रमग्निर्ज्येष्ठमासश्च ॥ ४ ॥

कर्पूरस्वर्णयोश्चन्द्र उडावृक्षं छदे दलः ॥
धर्मः स्वभावे रुचको भूषाभिन्मातुलिङ्गयोः ॥५॥

(अव०) कर्पूरे स्वर्णे च वाच्ये चन्द्रशब्दः पुंनपुंसकः । चन्द्रः चन्द्रं कर्पूरं स्वर्णं च । उडौ नक्षत्रे वाच्ये ऋक्षशब्दः पुंनपुंसकः । ऋक्षः ऋक्षं भम् । छदे पर्णे वाच्ये दलशब्दः पुंनपुंसकः । दलः दलं छदः । स्वभावे स्वरूपे वाच्ये धर्मशब्दः पुंनपुंसकः । धर्मः धर्मं स्वभावः । अन्यत्र तु पुण्योपाये क्लीबत्वमुक्तम् । अन्यत्र तु पुंलिङ्ग एव । भूषाभिदि ग्रैवेयके मातुलिङ्गे च बीजपूरे वाच्ये रुचकः पुंनपुंसकः । रुचकः रुचकं ग्रैवेयकं बीजपूरं च । सौवर्चले चन्दनपेषण्यां शिलायां च क्लीबः ॥५॥

पाताले वाडवो वर्ध्रः सीस आमलकः फले ॥
पिटजङ्गलसत्त्वानि पिटकामांसजन्तुषु ॥६॥

(अव०) पाताले वाच्ये वाडवशब्दः पुंनपुंसकः । वाडवः वाडवं पातालम् । वर्ध्रः सीसे सीसके वाच्ये । फले वाच्ये आमलकः पुंनपुंसकः । आमलकः आमलकं फलम् । पिटकाख्ये भाजनविशेषे मांसे जन्तौ च यथासंख्यं पिटजङ्गलसत्त्वाः पुंनपुंसकाः । पिटः पिटम् पिटका । अन्यत्र छर्दौ आकर्षफले च प्रतिपदपाठान्नपुंसकत्वम् । जङ्गलः जङ्गलं मांसम् । जङ्गलो निर्जले देशे त्रिलिङ्गः पिशितेऽस्त्रियाम् । सत्त्वः सत्त्वं जन्तुः । जन्तुविशेषोऽपि जन्तुः । तेन पिशाचादावपि पुंनपुंसकत्वम् । उपलक्षणत्वाद् गुणप्राणयोरपि । अन्यत्र तु क्लीबः ॥ ६ ॥

मधुपिडौ सुरातन्वोर्नाम शेवालमध्ययोः ॥
एकाद्रात्रः समाहारे तथा सूतककूलकौ ॥७॥

(अव०) सुरायां मृद्वीकामद्ये तनौ च वाच्यायां मधुपिण्डशब्दौ पुंनपुंसकौ। अयं मधुः इदं मधु सुरा। अयं पिण्डः इदं पिण्डं तनुः। शेवालमध्ययोर्नाम पुंनपुंसकम्। शेवालः शेवालम् शेवलः शेवलमित्यादि। मध्यः मध्यं मध्यमः मध्यमम् अवलग्नः अवलग्नम् विलग्नः विलग्नमित्यादि। रात्र इति कृतसमासान्तो रात्रिशब्दो गृह्यते स एकशब्दात्परः पुंनपुंसकः। असमाहारार्थं वचनम्। एका चासौ रात्रिश्च एकरात्रः एकरात्रम्। समाहारे द्विगुसमाहारो द्वन्द्वसमाहारश्च गृह्यते तस्मिन् वर्तमानो यो रात्रशब्दः स पुंनपुंसकः। द्वे रात्री समाहृते द्विरात्रः द्विरात्रम्। एवं त्रिरात्रः त्रिरात्रमित्यादि। द्वन्द्वसमाहारे अहश्च रात्रिश्च अहोरात्रम्। समाहार इति किम्। पूर्वो रात्रेरंशः पूर्वरात्रः। अथ कान्ताः ॥ सूतकः सूतकं पारदः। कूलकः कूलकं स्तूपः ॥ ७ ॥

वैनीतकभ्रमरकौ मरकोवलीकवल्मीकवल्कपुलकाः फरकव्यलीकौ ॥
किञ्जल्ककल्कमणिकस्तबका वितङ्कवर्चस्कचूचुकतडाकतटाकतङ्काः ॥८॥

(अव०) वैनीतकः वैनीतकं परंपरावाह्यं याप्ययानादि। भ्रमरकः भ्रमरकं ललाटस्थोऽलकः। मरकः मरकं बहुप्राणिमरणम्। वलीकः वलीकं नीव्रम्। वल्मीकः वल्मीकं पिपीलिकादिकृतो मृत्संचयः। वल्कः वल्कं तरुत्वक्। पुलकः पुलकं रोमाञ्चः। फरकः फरकं खेटकः। रलयोरैक्येन फलकमपि। व्यलीकः व्यलीकमप्रियकार्यं च। किञ्जल्कः किञ्जल्कं केसरम्। कल्कः कल्कं कषायः तिलादेः खलश्च। मणिकः मणिकमलिञ्जरः। स्तबकः स्तबकं गुच्छः। वितङ्कः वितङ्कम् आरोग्यम्। वर्चस्कः वर्चस्कमवस्करः। चूचुकः चूचुकं कुचाग्रम्। तडाकः तडाकं सरः। तटाकः तटाकं तदेव। अर्थप्राधान्यात्तडागोऽपि। तङ्कः तङ्कम् आतङ्कः ॥८॥

बालकः फलकमालकालका मूलकस्तिलकपङ्कपातकाः ॥
कोरकः करककन्दुकान्दुकानीकनिष्कचषका विशेषकः ॥९॥

(अव०) बालकः परिहार्यमङ्गुलीयकं च। फलकः फलकं खेटकम्। तदन्तत्वात् शालिफलकोऽपि अष्टापदः। मालकः मालकं ग्रामान्तराटवी। अलकः अलकं चूर्णकुन्तलः। मूलकः मूलकं शाकविशेषः। तिलकः तिलकं पुण्ढः। पङ्कः पङ्कं कर्दमः पापं च। पातकः पातकं पापम्। कोरकः कोरकं कुड्मलम्। अर्थप्राधान्यात् क्षारकोऽपि। करकः करकं कमण्डलुः करंकश्च। कन्दुकः कन्दुकं गिरिः। अन्दुकः अन्दुकं गजपादबन्धनम्। अनीकः अनीकं युद्धं सेना च। निष्कः निष्कं हेम्नः अष्टोत्तरं शतं पलं कर्षः हेम्नः उरोभूषणं दीनारश्च। चषकः चषकं मद्यपानभाजनम्। विशेषकः विशेषकं तिलकः ॥९॥

शाटककण्टकटङ्कविटङ्का मञ्चकमेचकनाकपिनाकाः ॥
पुस्तकमस्तकमुस्तकशाका वर्णकमोदकमूषिकमुष्काः ॥१०॥

(अव०) शाटकः शाटकं वस्त्रविशेषः। कण्टकः कण्टकं रोमाञ्चः वृक्षभेदी

च। टङ्कः पाषाणादिच्छेदोपकरणं गिरिशृङ्गं च। विटङ्कः विटङ्कं कपोतपालीसंज्ञं पक्षिविश्रामार्थं बहिर्निर्गतं दारु चक्रदार्वाधारः, तत्र हि कपोतपङ्क्तिरुत्कीर्यते। मञ्चकः २ पल्यङ्कः। मेचकः २ वर्णविशेषः। नाकः २ स्वर्ग आकाशं च। पिनाकः २ रुद्रधनुः। पुस्तकः २ लिखितपत्रसञ्चयः। णकप्रत्ययान्तोऽयम्। तेन पुस्तात् स्वार्थिकेन च सिद्ध्यति। मस्तकः २ शिरः। उणादौ तु कान्तोऽयम्। तप्रत्ययान्ताद्वा स्वार्थिकःकः। मुस्तकः २ मुस्ता। शाकं २ मूलकादि। वर्णकः २ विलेपनम्। मोदकः २ लड्डुकः। मूषिकः २ आखुः। मुष्कः २ वृषणः ॥१०॥

चण्डातकश्चरकरोचककञ्चुकानि मस्तिष्कयावककरण्डकतण्डकानि ॥
आतङ्कशूकसरकाः कटकः सशुल्कः पिण्याकझर्झरकहंसकशंखपुंखाः ॥११॥

(अव०) चण्डातकः २ अधोरुकवस्त्रम्। चरकः २ शास्त्रविशेषः। रोचकः २ क्षुत्। कञ्चुकः २ सन्नाहादिः। मस्तिष्कः २ मस्तकस्नेहः। यावकः २ अलक्तकः। करण्डकः २ पुष्पाद्याधारः। तरण्डकः २ शाल्यादिसारः। आतङ्कः २ इष्टवियोगतापरुक्शंकादिषु। घञन्तत्वात् पुंसि। शूकः २ धान्यादेः शूंगः। सरकः २ मद्यभाजनम्। मद्यपाने तु त्रिलिङ्गः। कटकः २ सैन्यं सानुः वलयोऽद्रिशृङ्गं च। शुल्कः २ मार्गादौ राजदेयं स्त्रीविवाहपरिग्राह्यं धान्यं च। पिण्याकः २ तिलादिखलः। झर्झरकः २ कलियुगम्। हंसकः २ नूपुरम्। शंखः २ कम्बुः वलयं प्राण्यङ्गम्। पुंखः २ शरपृष्ठम् ॥ ११ ॥

नखमुखमधिकाङ्गः संयुगः पद्मरागो भगयुगमथ टङ्कोद्योगशृङ्गा निदाघः ॥
ककचकवचकूर्चार्धर्चपुच्छोऽछकच्छा व्रजमुटजनिकुञ्जौ कुञ्जभूर्जाम्बुजाश्च ॥१२॥

(अव०) नखमुखे प्रसिद्धे। अधिकाङ्गः २ सारसनं यद्हृदि बध्यते युधि। संयुगः २ संग्रामः। पद्मरागः २ शोणमणिः। भग २ उपस्थः। युगो २ यूपः। टङ्कः २ खनित्रम्। उद्योगः २ पराक्रमः। शृङ्गं २ शिखरम्। निदाघः २ ग्रीष्मः। ककचः २ करपत्रम्। कवचः २ वर्म। कूर्चः भ्रूमध्यम् दीर्घश्मश्रु कैतवं च। ऋचोऽर्धमर्धर्चः २। 'परलिङ्गो द्वंद्वोऽशी' इत्यस्यापवादः। पुच्छः २ लाङ्गूलम्। उञ्छं २ जीविकाविशेषः। कच्छो २ बहुजलो देशः। व्रजः २ पन्थाः। उटजः २ तापसपर्णकुटी। निकुञ्जः २ गह्वरम्। कुञ्जः २ गह्वरः गजकुंभाधो दन्तिदन्तः हनुश्च। भूर्जं २ च तरुविशेषत्वक्। अम्बुजः कमलम्। चकारोऽनुक्तसमुच्चये। तेन चान्तेषु अध्यर्धो २ नमस्या ॥ १२ ॥

ध्वजमलयजकूटाः कालकूटारकूटौ कवटकपटखेटाः कर्पटः पिष्टलोष्टौ ॥
नटनिकटकिरीटाः कर्बटः कुक्कुटाट्टौ कुटयकुटविटानि त्र्यङ्कटः कोट्टकुष्ठौ ॥१३॥

(अव०) ध्वजः २ पताकादिः। मलयजः २ श्रीखण्डम्। कूटं २ मायादि। कालकूटं २ विषम्। आरकूटो २ रीतिः। कवटः २ उच्छिष्टम्। कपटः २ दम्भः। खेटः फलकं कफश्च। कर्पटः २ वासः। पिष्टः २ अपूपः। लोष्टः २ मृच्छकलम्।

नटः २ नर्तकविशेषः । निकटः २ समीपम् । किरीटः २ मुकुटम् । कर्बटः २ पर्वतावृतग्रामविशेषः । कुक्कुटः २ ताम्रचूडः । अट्टः क्षौमम् गेहभेदश्च । कुटो घटः हलाङ्गविशेषश्च । यकुटः वार्ताकीकुसुमम् । विटः खिङ्गः गोविशेषश्च । त्र्यङ्गटः शिक्यभेदः । कोट्टः दुर्गः । अथ ठान्तौ । कुष्ठं त्वग्दोषः गन्धद्रव्यविशेषश्च ॥ १३ ॥

कमठो वारुण्डखण्डषण्डा निगडाक्रीडनडप्रकाण्डकाण्डाः ॥
कोदण्डतरण्डमण्डमुण्डा दण्डाण्डौ दृढवारवाणवाणाः ॥ १४ ॥

(अव०) कमठः २ असुरविशेषः भाजनं च । कूर्मे तु देहिनामत्वात् पुंस्त्वमेव । वारुण्डः २ दक्कर्णमलः गणिस्थराजश्च । खण्डः २ शर्करामिक्षुविकारश्च । गुणवृत्तेस्त्वाश्रयलिङ्गता । खण्डः खण्डी खण्डमिति । षण्डः २ वृक्षादिसमूहः । निगडः २ पादबन्धनम् । आक्रीडः २ उद्यानविशेषः । नडः २ नड्वलजस्तृणविशेषः । प्रकाण्डः २ स्तम्बः शस्तं तरोश्च मूलशाखान्तरम् । काण्डः २ शरः समयश्च प्रकरणं समूहः जलं वालं कुत्सितं वृषस्कन्धः लता च । कोदण्डं २ चापम् । तरण्डः २ उडुपः । मण्डः २ प्रवद्द्रव्याणामुपरिस्थो भागः भक्तादिनिर्यासः परण्डः मस्तु च । मुण्डम् २ शिरः । दण्डः २ यष्टिः मन्थाः सैन्यं दमनं च । अण्डः पक्ष्यादिप्रसवः । अथ ढान्तः । दृढः २ स्थूलं बलवाँश्च । वारवाणं २ चर्म । वाणः २ शरः पुष्पविशेषश्च ॥ १४ ॥

कर्षापणः श्रवणपक्कणकङ्कणानि द्रोणापराह्णचरणानि तृणं सुवर्णम् ॥
स्वर्णव्रणौ वृषणभूषणदूषणानि भाणस्तथा किणरणप्रवणानि चूर्णः ॥१५॥

(अव०) कर्षापणः २ मानविशेषः पणषोडशकं च । प्रज्ञाद्यणि कार्षापणोऽपि । श्रवणः २ कर्णः । पक्कणः शबरालयः । कङ्कणः २ हस्तरक्षासूत्रम् । द्रोणः २ परिमाणविशेषः । अपराह्णः २ दिवसापरभागश्च । चरणं २ गोत्रादि । तृणः २ उपलादिः । सुवर्णः २ स्वर्णः २ हेमम् । व्रणः २ ऊरुः । वृषणः २ मुष्कः । भूषणः २ अलंकारः । अर्थप्राधान्यात् मण्डनोऽपि । दूषणः २ उपालंभः । भाणः २ प्रबन्धभेदः । किणः २ त्वग्ग्रन्थिः । रणः २ संपरायः । प्रवणः २ चतुष्पथम् । चूर्णः २ क्षोदः ॥ १५ ॥

तोरणपूर्तनिकेतनिवाताः पारतमन्तयुतप्रयुतानि ॥
क्ष्वेडितमक्षतदेवतवृत्तैरावतलोहितहस्तशतानि ॥१६॥

(अव०) तोरणः २ चन्दनमाला बहिर्द्वारि निर्यूहश्च । पूर्तः खातादि कर्म । निकेतः २ आवासः । निवातः २ गृहं दुर्भेदं चर्म च । वातरहिते प्रदेशे त्वाश्रयलिङ्गता । पारतं २ रसेन्द्रः । अर्थप्राधान्यात् पारदमपि । अन्तः २ प्रान्तः समीपं स्वरूपं च । उपलक्षणत्वात् प्रान्तः प्रान्तमपि । युतम् २ अपानम् । प्रयुतं २ दश लक्षाणि । क्ष्वेडितः २ सिंहनादविशेषः । अक्षताः अक्षतम् मङ्गलस्य

तण्डुलाः । पुंसि बहुत्व एवायम् । दैवतः २ देवता । वृत्तम् २ शीलं निस्तलं च । ऐरावतः २ सुरेन्द्रदन्ती । लोहितः २ शोणितम् । गुणवृत्तिस्त्वाश्रयलिङ्गः। हस्तः २ करः। शतं २ पञ्च विंशतयः ॥ १६ ॥

व्रतोपवीतौ पलितो वसन्तध्वान्तायुतद्यूतघृतानि पुस्तः ॥
शुद्धान्तवुस्तौ रजतो मुहूर्तद्वियूथयूथानि वरूथगूथौ ॥१७॥

(अव०) व्रतः शास्त्रितो नियमः । उपवीतः २ कण्ठसूत्रम् । पलितं २ पक्वकेशः । केशपाके कर्दमे च तान्तत्वान्नपुंसकत्वम् । वसन्तः २ सुरभिः देवपुत्रविशेषश्च । ध्वान्तं २ तमः। अयुतं २ दशसहस्राणि । द्यूतः २ दुरोदरम् । घृतम् २ आज्यम् । पुस्तं २ लेख्यपत्रसंघातः लेपादिकर्म च । शुद्धान्तः २ अन्तःपुरम् । वुस्तं २ पक्वमांसविशेषः । रजतो रूप्यं श्वेतं च । मुहूर्तः घटिकाद्वयम् । द्वयोर्यूथयोः समाहारो द्वियूथः । यूथः सजातीयपश्वादिसंघातः । वरूथः २ रथगुप्तिः । गूथः २ विष्ठा ॥ १७ ॥

प्रस्थं तीर्थं प्रोथमलिन्दः ककुदः कुकुदाष्टापदकुन्दाः ॥
गुददोहदकुमुदच्छदकन्दार्बुदसौधमथोत्सेधकबन्धौ ॥१८॥

(अव०) प्रस्थः २ मानम् । तन्मितं वस्तुमात्रं च । तीर्थं २ पुण्यस्थानं जलावतारश्च । प्रोथः २ अश्वादेर्घोणान्तरम् । अलिन्दः २ गृहद्वारस्था स्थली । ककुदः २ कुकुदश्च श्रेष्ठं वृषस्कन्धः राजचिन्हं च । अष्टापदं २ सुवर्णं द्यूतफलकं च । अर्थप्राधान्यात् शारिफलकमपि । गिरौ शलभे कपौ चाद्रिदेहिनामत्वात् पुंस्त्री । कुन्दः २ पुष्पविशेषः । निधिभेदमुरभिदोस्तु पुंस्त्वमुक्तमेव । चक्रभ्रमौ च बाहुलकात् पुंसि । गुदम् २ अपानम् । दोहदः २ श्रद्धादौ । हृदयस्य तु बाहुलकान्नपुंसकत्वम् । कुमुदः २ कैरवम् । छदः २ दलं पिच्छं च । कन्दः २ पयोधरः सस्यमूलं च । अर्बुदो २ दश कोट्यः । कोटिरित्यन्ये । स्थानविशेषः अक्षिरोगविशेषश्च । पर्वतविशेषे तु पुंस्त्वमेव । अथ धान्ताः । सौधः २ राजगृहम् । उत्सेधः २ उन्नतिः । कबन्धः शिरोरहितः कायः ॥ १८ ॥

श्राद्धायुधान्धौषधगन्धमादनभस्फोटनालग्नपिधानचन्दनाः ॥
वितानदाजादनशिश्नयौवनापीनोदपानासनकेतनाशनम् ॥१९॥

(अव०) श्राद्धः २ पितृकर्म । यस्तु मत्वर्थीयाणन्तः स आश्रयलिङ्गः । आयुधः प्रहरणम् । अन्धः २ तमः । औषधो २ भेषजम् । गन्धमादनः २ पर्वतविशेषः । प्रस्फोटनः २ शूर्पम् । लग्नं २ मेषादि । पिधानं २ संवरणम् । अपेः प्यादेशाभावेऽपिधानमपि । चन्दनः २ मलयजतरुः । चन्दनान्तत्वाद्धरिचन्दनो देवदारुः चन्दनविशेषश्च । वितानं २ विस्तारः उल्लोचःशून्यः यज्ञश्च । राजादनः २ पियालः क्षोरिका च । शिश्नं २ मेढ्रः । यौवनं २ द्वितीयं वयः । आपीनम् २ ऊधः । उदपानं २ कूपः । असनं २ वृक्षविशेषः । श्लेषनिर्देशादासनमुपवेशनम् । केतनः २ ध्वजः । अशनः ३ ओदनः ॥ १९ ॥

नलिनपुलिनमौना वर्धमानः समानौदनदिनशतमाना हायनस्थानमानाः॥
धननिधनविमानास्ताडनस्तेनवस्ना भवनभुवनयानोद्यानवातायनानि ॥२०॥

(अव०) नलिनः २ पद्मम् । पुलिनः २ सैकतम् । मौनो २ वाग्यमः । वर्धमानः २ शरावः । समानः २ तुल्यः शरीरस्थो वायुविशेषश्च । ओदनः कूरम् । दिनो २ दिवसः। शतं मानान्यस्य शतमानः २ भूभागविशेषः रूप्यमानं च । हायनः २ वर्षः रश्मिश्च । स्थानम् २ आश्रयः । मानः २ दर्पः । धनो २ द्रव्यम् । निधनः २ विनाशः कुलं च । विमानं २ व्योमयानादि । ताडनः २ व्यधनम् । स्तेनः २ चौरः चौर्यं च । वस्नः २ अवक्रयः । धनवस्त्रयोस्तु क्लीबत्वम् । भवनः गेहम् । भुवनं जगत् । यानः २ वाहनम् । उद्यानः २ क्रीडास्थानम् । वातायनः २ गवाक्षः ॥ २० ॥

अभिधानद्वीपिनौ निपानं शयनं लशुनरसोनगृञ्जनानि ॥
खलिनखलीनानुमानदीपाः कुणपः कुतपावापचावसूर्पाः ॥२१॥

(अव०) अभिधानं २ संज्ञा शब्दश्च । द्वीपिनं २ व्याघ्रः । निपानं २ आह्वावः । शयनं २ शय्या । लशुनरसोनगृञ्जना २ महाकन्दाः । खलिनं २ खलीनं च कथियम् । अनुमानो हेतुः । अकर्त्रनडन्तोऽयम् । भावे तु क्लीबत्वमेव । दीपः २ प्रदीपः। कुणपः २ शवम्। कुतपः २ छागरोमकृतकम्बलः दर्भः अपराह्णकालश्च । आवापो २ वलयः । चापं २ धनुः । सूर्पं २ धान्यादिपवनं भाण्डम् ॥ २१ ॥

स्तूपोडुपौ विटपमण्डपशष्पबाष्पद्वीपानि विष्टपनिपौ शफडिम्बबिम्बाः ॥
जम्भः कुसुम्भककुभौ कलभो निभार्मसंक्रामसंक्रमललामहिमानि हेमम् ॥२२॥

(अव०) स्तूपो २ मृदादिकूटः । उडुपं २ प्लवः । चन्द्रे तु पुंस्त्वम् । विटपः २ तरोः स्कन्धादूर्ध्वं शाखा । मण्डपो जनाश्रयः । शष्पं २ बालतृणं प्रोक्तम् । बाष्पं नेत्रवारि ऊष्मा च । द्वीपं २ मध्येजलं देशः । विष्टपं २ जगत् । निपं २ घटः । शफः २ खुरः । डिम्बः २ उदरान्तोऽवयवः । बिम्बं २ प्रतिबिम्बं मण्डलं च । जम्भो जम्भीरः । कुसुम्भं कमण्डलुः महारजतं च । ककुभः वीणाप्रसेवः । कलभः २ करिपोतः । निभो २ व्याजः । अर्मः चक्षूरोगः । संक्रामः संक्रमश्च जलतरणविशेषः । ललामः शृङ्गं पुच्छं हयमुखेऽन्यवर्णः पुण्ड्रः केतुश्च । हिमः २ तुषारः । २ हेमम् स्वर्णः ॥२२॥

उद्यमकामोद्यामाश्रमकुट्टिमकुसुमसंगमा गुल्मः ॥
क्षेमक्षौमौ कम्बलिवाह्यौ मैरेयतूर्यौ च ॥२३॥

(अव०) उद्यमः २ उत्साहः। कामः २ अभिलाषः। उद्यामः २ 'उद्यमोपरमौ' इति निपातनाद् वृद्धिनिषेधेऽपि अत एव निपातनादात्वमपि । आश्रमः २ मुनिस्थानं ब्रह्मचर्यादिश्च । कुट्टिमः संस्कृतभूमिविशेषः । कुसुमं २ पुष्पे स्त्रीर-

जस्यपि च । नेत्ररोगे तु बाहुलकात् क्लीबत्वमेव । संगमः२ संगमः । गुल्मः विटपः प्रकाण्डं च । क्षेमः २ कुशलं लब्धरक्षणं च । क्षौमम् २ अट्टालकः अभ्यन्तरे प्राकारधारणार्थं खोमाख्यश्च । कम्बलिवाह्यं २ गन्त्री । मैरेयः २ सीधुः । तूर्यं २ वाद्यम् ॥२३॥

पूयाजन्यप्रमयसमया राजसूयो हिरण्या-।
रण्ये संख्यं मलयवलयौ वाजपेयः कषायः ॥
शल्यं कुल्याव्ययकवियवद्गोमयं पारिहार्यः ।
पारावारातिखरशिखरक्षत्रवस्त्रोपवस्त्राः ॥२४॥

(अव०) पूयः २ क्लिन्नासृग् । अजन्यः २ उत्पातः । प्रमयः २ मरणम् । समयः २ कालः । अन्यत्र पुंसि । राजसूयः २ क्रतुः । हिरण्यं २ स्वर्णम् । अरण्यः २ अटवी । संख्यः २ आहवः । मलयः २ गिरिविशेषः । वलयः २ कटकम् । वाजपेयः २ क्रतुभेदः । कषायो २ रसभेदेऽङ्गरोगे च । शल्यं २ देहगतं शस्त्रादि । कुल्यः २ अस्थि । अव्ययं २ स्वरादि । कवियः २ अलिनम् । गोमयः गोशकृत् । पारिहार्यं २ वलयम् । अथ रान्ताः। पारं २ परतीरं समाप्तिश्च । अवारम् २ अर्वाक्तीरम् । अतिखरः २ औषधविशेषः । शिखरं २ शैलवृक्षाग्रं पुलकः पक्वदाडिमबीजाभमाणिक्यं च । क्षत्रं क्षत्रियः । वस्त्रं २ वासः । उपवस्त्रम् २ उपवासः । यत्नूपवस्ता प्राप्तोऽस्येति कृत्वाणि औपवस्त्रमुपवासः तत्संयुक्तरान्तत्वान्नपुंसकम् ॥ २४ ॥

अलिञ्जरः कूबरकूरबेरनीहारहिञ्जीरसहस्रमेढ्राः ॥
संसारसीरौ तुवरश्च सूत्रशृङ्गारपद्रान्तरकर्णपूराः ॥२५॥

(अव०) अलिञ्जरः २ मणिकः । कूबरं २ युगंधरः । कूरः २ ओदनम् । बेरो २ देहः । नीहारः २ हिमम् । हिञ्जीरः २ अन्दुकः । सहस्रं दशशतानि । मेढ्रः २ शफः । संसारः २ जगत् । सीरं २ हलम् । तुवरः २ कषायः । सूत्रः २ तन्तुः सूत्रणा च । शृङ्गारो रसविशेषः । पद्रं ग्रामस्थानविशेषः । अन्तरं २ मध्यं छिद्रं विनार्थश्च अवधिः अवकाशः विशेषश्च । कर्णपूरः २ अवतंसः नीलोत्पलं च ॥२५॥

नेत्रं वक्त्रपवित्रपत्रसमरौशीरान्धकारा वरः ।
केदारप्रवरौ कुलीरशिशिरावाडम्बरो गह्वरः ॥
क्षीरं कोटरचक्रचुक्रतिमिराङ्गारास्तुषारः शर-।
भ्राष्ट्रोपह्वरराष्ट्रतक्रजठरार्द्राः कुञ्जरः पञ्जरः ॥२६॥

(अव०) नेत्रो २ नयनम् परिधानविशेषश्च । वक्त्रो मुखम् । पवित्रः पावनम् । गुणवृत्तेस्त्वाश्रयलिङ्गता । पत्रं २ पर्ण वाहनं च । समरः २ रणम् ।

उशीरः २ वीरणीमूलम् । अन्धकारः २ तमः । अर्थप्राधान्यान्नीलपङ्कदिनकेसरावपि । वरः २ श्रेष्ठः देवतादेश्च । मनागिष्टे त्वव्ययम् । अन्ये तु क्लीबम् । केदारः २ वप्रः । प्रवरो २ गोत्रविशेषः हिमं च । कुलीरः २ कर्कटकः । शिशिरः ऋतुविशेषः । आडम्बरं २ करिगर्जितं पटह उद्धतवेषादिश्च । गह्वरं बिलं निकुञ्जः दंभश्च । क्षीरः २ दुग्धम् । जले तु नपुंसकत्वम् । कोटरं छिद्रम् निष्कुहश्च । चक्रः आयुधं रथाङ्गं संघातः राष्ट्रं कटकं च । स्वल्पह्रस्वयोः कपि चक्रिका दुरुद्योगः घुणावर्तश्च । चुक्रम् अम्लो रसः अम्लव्यञ्जनं च । तिमिरः २ तमः । अङ्गारः अग्निदग्धकाष्ठशकलम् । तुषारः २ हिमम् । शरः २ बाणः दधिसारश्च । भ्राष्ट्रं २ अम्बरीषः । उपह्वरः २ उपसरः रहः समीपं च । राष्ट्रः २ जनपदः उपद्रवश्च । तक्रम् २ उदश्वित् । जठरम् २ उदरम् । आर्द्रः २ शृङ्गवेरम् । कुञ्जरः २ गजः । पञ्जरं २ वीतंसम् ॥२६॥

कर्पूरनूपुरकुटीरविहारवारकान्तारतोमरदुरोदरवासराणि ॥
कासारकेसरकरीरशरीरजीरमञ्जीरशेखरयुगंधरवज्रवप्राः ॥२७॥

(अव०) कर्पूरं २ घनसारः । नूपुरो २ मञ्जीरः । कुटीरं २ ह्रस्वा कुटी । विहारं २ भिक्षुस्थानं यतिचर्या च । वारः २ परिपाटिः अवसरः समूहश्च । कान्तारो २ महारण्यम् । तोमरं २ शस्त्रविशेषः । दुरोदरं २ पणः । वासरं २ दिनम् । कासारः २ पल्वलम् । केसरः २ किञ्जल्कः सटा च । करीरं २ वंशाद्यङ्कुरः घटश्च । शरीरः २ कायः । जीरम् २ अजाजीकः । जीरकोऽपि च । मञ्जीरः २ नूपुरम् । शेखरं २ शिरोभूषणम् । युगंधरं २ कूबरम् । वज्रम् २ अशनिः रत्नं च । वप्रं २ क्षेत्रं रोधश्च ॥२७॥

आलवालपलभालपलालाः पल्वलः खलचषालविशालाः ॥
शूलमूलमुकुलास्तलतैलौ तूलकुड्मलतमालकपालाः ॥२८॥

(अव०) आलवालम् २ आवालम् । पलम् २ मांसं मानविशेषश्च । भालं २ ललाटम् । पलालं २ धान्यादेः शुष्कनालम् । पल्वलः २ कासारः । खलः २ पिण्याकः दुर्जनश्च । दुर्जने आश्रयलिङ्गोऽप्ययमित्येके । चषालः २ यज्ञपात्रम् । विशालः २ विस्तीर्णता । गुणवृत्तेस्त्वाश्रयलिङ्गता । शूलम् २ आयुधम् । मूलम् २ आदिः प्रतिष्ठा च । मुकुलं २ कुड्मलः । तलम् २ अधः स्वभावश्च । पृष्ठे तु लान्तत्वान्नपुंसकः । तैलं २ तिलादिस्नेहः । तूलं २ पिचुः । कुड्मलो २ मुकुलः । तमालो २ वृक्षविशेषः । कपालम् २ शिरोऽस्थि । घटादिशकले व्रजे भिक्षाभाजने च स्त्रीक्लीबः ॥ २८ ॥

कवलप्रवालबलशम्बलोत्पलोपलशीलशैलशकलाङ्गुलाश्चलाः ॥
कमलं मलं मुशलशालकुण्डलाः कललं नलं निगलनीलमङ्गलाः ॥२९॥

(अव०) कवलः २ भक्ष्यपिण्डः । प्रवालं २ नवकिशलयं विद्रुमश्च । बलः

प्राणः। अर्थप्राधान्यात् सहोऽपि। सैन्यस्थौल्यरूपेषु तु क्लीबः। शंबलं २ पाथेयम्। उत्पलं २ सरोजम्। अर्थप्राधान्यात् कुवलयमपि। उपलः २ पाषाणः। शीलं २ शद्वृत्तं स्वभावश्च। शैलं २ गडः। शकलं खण्डम्। अङ्गुलः अङ्गुलीयमानम्। अञ्चलं २ वस्त्रैकदेशः। कमलः २ पद्मम्। जले तु क्लीबः। अर्थप्राधान्यान्नालीकमपि। मलं किट्टं पापं च। किट्टे चार्थप्राधान्यात् किट्टः किट्टम्। मुसलः २ क्षोदनोपकरणम्। अर्थप्राधान्यात् अयोऽग्रः। शालं २ वृक्षविशेषः। कुण्डलं २ कर्णाभरणम्। कललं २ शुक्रशोणितयोरीषद्घनः परिणामः। नलम् २ अन्तःशुषिरस्तृणविशेषः। नल् गन्धे इत्यस्येदं रूपमिति कृतलत्वान्नडादस्य भेदः। निगल्यते बध्यतेऽनेनेति निगलः पादबन्धनम्। अयमपि धातुभेदे कृतलत्वान्न सिद्ध्यति। नीलं २ वर्णविशेषः। मङ्गलः २ प्रशस्तम् ॥२९॥

काकोलहलाहलौ हलं कोलाहलकङ्कालवल्कलाः ॥
सौवर्चलधूमले फलं हालाहलजम्बालखण्डलाः ॥ ३० ॥

(अव०) काकोलो २ विषभेदः। हलाहलः २ स एव। हलः २ सीरः। कोलाहलः २ कलकलः। कंकालं २ शरीरास्थि। वल्कलं २ वृक्षादीनां त्वक्। सौवर्चलं २ रुचकम्। धूमलः २ तूर्यः। फलः २ प्रयोजनं पुष्पादिभवं च। हालाहलो २ विषभेदः। एकदेशविकृतस्यानन्यत्वेन हालहलमपि। जम्बालः २ कर्दमः। खण्डलः २ खण्डम् ॥३०॥

लाङ्गूलगरलाविन्द्रनीलगाण्डीवगाण्डिवाः ॥
उल्वः पारशवः पार्श्वापूर्वत्रिदिवताण्डवाः ॥३१॥

(अव०) लाङ्गूलः २ पुच्छम्। गरलं २ विषम्। इन्द्रनीलः २ रत्नभेदः। गाण्डीवं २ धनुः पार्थधनुश्च। गाण्डिवं तदेव। उल्वः कललम्। पारशवः २ शस्त्रम्। पार्श्वः २ कक्षाधःशरीरदेशः। अपूर्व २ धर्माधर्मौ ॥ त्रिदिवं स्वर्गः। ताण्डवं २ उद्धतं नृत्यम् ॥३१॥

निष्ठेवः प्रग्रीवः शरावरावौ भावक्लीवशवानि ॥
दैवः पूर्वः पल्लवनल्वौ पाशं कुलिशं कर्कशकोशौ ॥३२॥

(अव०) निष्ठेवः २ निष्ठेवनम्। अत्र यज्ञोपकरणवाचिनं पात्रीवशब्दं केचित् पठन्ति स त्वाश्रयलिङ्गः। प्रग्रीवो २ वातायनम्। शरावो २ वर्धमानम्। रावः २ ध्वनिविशेषः। भावः २ स्वभावादिः। क्लीबः २ तृतीयाप्रकृतिः। अर्थप्राधान्यान्नपुंसकमपि। शवो २ मृतशरीरम्। दैवो २ विधिः। पूर्वः २ प्रथमता। गुणवृत्तिस्त्वाश्रयलिङ्गः। पल्लवः २ किशलयम्। पल्लवान्तत्वात् सपल्लवो २ वासः। नल्वो २ हस्तचतुःशती। अथ शान्ताः। पाशो २ बन्धनम्। कुलिशो २ वज्रम्। कर्कशोऽमृदुत्वम्। गुणवृत्तेस्त्वाश्रयलिङ्गता। कोशो २ भाण्डागारः कुड्मलं शपथश्च। भाण्डागारेऽर्थप्राधान्यात् गञ्जोऽपि तालव्योपान्त्यः। समानार्थः मूर्धन्योपान्त्यः कोषशब्दो वक्ष्यते ॥ ३२ ॥

आकाशकाशकणिशाङ्कुशशेषवेषोष्णीषाम्बरीषविषरोहिषमाषमेषाः ॥
प्रत्यूषयूषमथकोषकरीषकर्षवर्षामिषा रसबुसेकसचिकसाश्च ॥३३॥

(अव०) आकाशो २ नभः । काशः २ तृणविशेषः । कणिशं २ धान्यशीर्षकम् । अङ्कुशः २ सृणिः । अथ षान्ताः । शेषः २ उपयुक्तेतरत् । वेषः २ आकल्पः । तालव्योपान्त्योऽप्ययम् । उष्णीषं २ किरीटम् शिरोवेष्टनं च । अम्बरीषं २ भ्राष्ट्रः । विषं २ गरलम् । रोहिषं २ रक्ततृणम् । माषः २ धान्यविशेषः । मेषः २ मेण्ढ्रम् । प्रत्यूषः प्रभातम् । यूषं २ मुद्गादिरसविशेषः । कोषः २ कुड्मलम् । करीषः २ शुष्कगोमयं तदग्निश्च । कर्षः २ पलचतुर्थांशः । वर्षः २ संवत्सरः वृष्टिः खण्डः भरतक्षेत्रादि च । आमिषम् २ उत्कोचः मांसं भोग्यवस्तु च । रसं २ मधुरादि शृङ्गारादि विषं वीर्यं रागश्च । बुसं २ कडङ्गरः । इक्कसं २ वस्तुविशेषः । चिक्कसं २ यवान्नविशेषः । चकारात् पायसं २ परमान्नं २ च ॥३३॥

कर्पास आसो दिवसावतंसवीतंसमांसाः पनसोपवासौ ॥
निर्यासमासौ चमसांसकांसस्नेहानि बर्हो गृहगेहलोहाः ॥३४॥

(अव०) कर्पासः २ तूलकारणम् । आसो २ धनुः । दिवसं २ दिनम् । अवतंसः २ शेखरः । अवस्य वादेशे वतंसोऽपि । अर्थप्राधान्यादुत्तंसो २ ऽपि । वीतंसः २ पक्षरः । मांसं २ जङ्गलम् । पनसो २ वृक्षविशेषः । उपवासः २ अहोरात्रनिरशनता । निर्यासो २ वृक्षादेर्निस्यन्दः । मासः २ पक्षद्वयम् । चमसं २ यज्ञपात्रम् । मत्वरादिपिष्टे तु बाहुलकात् स्त्रीत्वम् । चमसी । अंसः २ स्कन्धः । कांसो भाण्डविशेषः । स्नेहं २ सौहृदं तैलं च । बर्हः २ कलापः वर्णं च । गृहाणि २ दारा वेश्म च । गेहः २ सदनम् । लोहः २ अयः अगुरु च ॥ ३४ ॥

पुण्याहदेहौ पटहस्तनूरुहो लक्षाररिस्थाणुकमण्डलूनि च ॥
चाटुश्चटुर्जन्तुकशिप्वणुस्तथा जीवातुकुस्तुम्बुरुजानु सानु च ॥३५॥

(अव०) पुण्याहः २ पुण्यदिनम् । देहः २ कायः । पटहः २ आनकः । तनूरुहः २ गरुल्लोम्नी । लक्षः २ व्याजः । वेध्ये क्लीबः । संख्यायां तु स्त्रीक्लीबः । अररिः २ कपाटम् । अथोदन्ताः । स्थाणुः २ शंकुः । शिवे तु देहिनामत्वात्पुंस्त्वम् । कमण्डलुः २ करकः । चाटुः २ प्रियवाक्यम् । चटुः २ तदेव । जन्तुः २ प्राणी । कशिपुः २ भोजनाच्छादने । अणुः २ परमाणुः सूक्ष्मपरिमाणविशेष इत्यर्थः । जीवातुः २ जीवनौषधम् । कुस्तुम्बुरुः २ धान्यविशेषः । जानुः २ अष्ठीवान् । सानुः २ गिरितटम् ॥ ३५ ॥

कम्बुः सक्तुर्दार्वगुरुर्वास्तु पलाण्डुर्हिङ्गुः शिग्रुर्दोस्तितउः सीध्वथ भूम ॥
वेम प्रेम ब्रह्म गरुल्लोम विहायः कर्माष्ठीवत्पक्ष्मधनुर्नामहिम्नी ॥३६॥

(अव०) कंबुः २ शंखः । वलये शम्बूके गजे कर्चूरे च पुंसि । सक्तुः

यवादिधकृतिः। केचिदेनं बहुवचनान्तं पठन्ति। दारु २ काष्ठम्। दार्वन्त-त्वादेव महादार्वादयोऽपि पुंक्लीबाः। सर्वेऽप्येते एकार्थाः। अगुरु २ गन्धद्रव्य-विशेषः। वास्तुः २ गृहभूमिः। पलाण्डुः २ कन्दविशेषः। हिङ्गु २ रामठम्। शिग्रुः २ शोभाञ्जनम्। अथोदन्तप्रक्रम एव छन्दोऽनुसंधानात् सन्तः। दोः २ बाहुः। तितउः २ शूर्पम्। सीधुः २ मैरेयम्। अथ व्यञ्जनान्ताः। भूमा २ बहुत्वम्। वेमा २ तन्तुवायशलाका। प्रेमा २ स्नेहः नर्म च। ब्रह्म २ तपः वेदः ज्ञानम् आत्मा प्रजापतिः। गरुत् ३ स्वर्णं पिच्छं च। लोम २ तनूरुहम्। विहायाः २ शकुनिर्नभश्च। कर्म २ क्रिया व्याप्यं च। अष्ठीवान् २ जानुः। पक्ष्म २ अक्षि-रोम तूलं च। धनुः २ चापम्। नाम २ संज्ञा। महिमा २ महत्त्वम् ॥ ३६ ॥

॥ इति पुंनपुंसकलिङ्गाः ॥

॥ अथ स्त्रीनपुंसकाधिकारः ॥

स्त्रोक्लीबयोर्नखं शुक्तौ विश्वं मधुकमौषधे ॥
माने लक्षं मधौ कल्यं क्रोडोऽङ्के तिन्दुकं फले ॥१॥

(अव०) शुक्तौ गन्धद्रव्यविशेषे नखशब्दः स्त्रीक्लीबलिङ्गः। नखी नखम्। विश्वमधुकनाम्नी औषधवाचिनी स्त्रीक्लीबे। विश्वा विश्वं शुण्ठी। मधुका मधुकं मधुयष्टिः। माने संख्यायां लक्षं स्त्रीक्लीबम्। लक्षा लक्षं सहस्रशतम्। मधौ मद्ये वाच्ये कल्यशब्दः स्त्रीक्लीबः। कल्या कल्यम्। अङ्के उरसि वाच्ये क्रोडशब्दः स्त्रीक्लीबः। क्रोडा क्रोडम्। फलविशेषे तिन्दुकं स्त्रीक्लीबम्। तिन्दुकी तिन्दुकम् ॥१॥

तरलं यवाग्वां पुष्पे पाटलं पटलं चये ॥
वसन्ततिलकं वृत्ते कपालं भिक्षुभाजने ॥२॥

(अव०) यवाग्वां वाच्यायां तरलम्। तरला तरलम्। हारे तन्मध्यमणौ चाभरणनामत्वात् पुंस्त्वम्। पुष्पविशेषे वाच्ये पाटलम्। पाटली पाटलम्। चये समूहे वाच्ये पटलम्। पटली पटलम्। पिटकतिलकपरिच्छेदेषु लान्तत्वा-न्नपुंसकत्वम्। वृत्तविशेषे वसन्ततिलकम्। वसन्ततिलका वसन्ततिलकम्। भिक्षु-भाजने वाच्ये कपालं स्त्री क्लीबम्। कपाली कपालम् ॥ २ ॥

अर्धपूर्वपदो नावष्टच्णकर्त्रनटौ क्वचित् ॥
चोराद्यमनोज्ञाद्यकव् कथानककशेरुके ॥३॥

(अव०) अर्धशब्दपूर्वपदोऽट् समासान्तो नौशब्दःस्त्रीक्लीबः। अर्धनावी। अर्धनावम्। ट्यण्प्रत्ययान्तं कर्तृवर्जिते कारके विहितो योऽनट्प्रत्ययस्तदन्तं च क्वचिल्लक्ष्यानुसारेण स्त्रीक्लीबम्। ट्यण्, उचितस्य भावः कर्म वा औचिती। औचित्यम्। एवं याथाकामी याथाकाम्यम्। वैदग्धी वैदग्ध्यम्। मैत्री मैत्र्यम्।

आनुपूर्वी आनुपूर्व्यम् । इत्यादि । क्वचिद्रचनात् क्वचित्स्त्रीत्वमेव । शीलमेव शैली । क्वचित्क्लीबत्वमेव । शैत्यम् । एवं दाढर्यम् । जाड्यम् । ब्राह्मण्यम् । त्रैलोक्यम् । सैन्यम् । इत्यादि । अकर्त्रनट् । आस्थानी आस्थानम् राजसभा । राजधानी राजधानम् स्कन्धावारः । चालनी चालनं ततउः । एवं करणी करणम् । प्रमाणी प्रमाणम् । इत्यादि । क्वचित् स्त्रीत्वमेव गुणलयनी दूष्यम् । भ्रमणी राज्ञः क्रीडा । प्रसाधनी कङ्कतिका । वेषे तु क्लीबत्वमेव । गवादनी गवां घासस्थानम् । इत्यादि । क्वचिन्नपुंसकत्वमेव । प्रधीयतेऽस्मिन्निति प्रधानम् । 'प्रकृतौ तु महामात्रे प्रज्ञायां परमात्मनि । नपुंसकं प्रधानं स्यात् एकत्वे तूत्तमे सदा' ॥ १ ॥ साध्यतेऽनेनेति साधनं प्रमाणं तुरगादिसमूहश्च । लक्षणं लक्ष्म चिह्नं नाम च । उपवर्तनं देशः । स्थानं स्थितिः सादृश्यं च । युक्तार्थे करणार्थे च स्थाने इत्यव्ययम् । केतनं २ गृहम् । केतौ तु पुंनपुंसकम् । प्रमाणं २ सम्यक्प्रवक्ता । कारणं २ मर्यादा मानं च । उपसर्जनं २ गौणमित्यादयः । केचित्तु आश्रयलिङ्गभाजः । राजभोजनः शालिः । राजभोजनी द्राक्षा । राजभोजनमन्नम् । इत्यादिकाः । मनोज्ञाद्यन्तर्गणवर्जितेभ्यश्चोरादिभ्यो योऽकञ् प्रत्ययस्तदन्तं नाम क्लीनपुंसकम् । चौरिका चौरकम् । धौर्तिका धौर्तकम् । यौवनिका यौवनकम् । इत्यादि । अमनोज्ञादीति किम् । मानोज्ञकम् प्रैयरूपकम् इत्यादौ 'आ त्वात्त्वादिः' इत्यनेन क्लीबत्वमेव । चौर, धूर्त, युवन्, ग्रामपुत्र, ग्रामषण्ड, ग्रामभाण्ड, ग्रामकुमार, ग्रामकुल, ग्रामकुलाल, अमुष्यपुत्र, अमुष्यकुल, शरपुत्र, शारपुत्र, मनोज्ञ, प्रियरूप, अभिरूप, बहुल, मेधाविन्, कल्याण, आढ्य, सुकुमार, छान्दस, छात्र, श्रोत्रिय, विश्वदेव, ग्रामिक, कुलपुत्र, सारपुत्र, वृद्ध, अवश्य इति चौरादिः । अथ कान्ताश्चत्वारः । कथानिका, कथानकम्, आख्यानम् । कशेरुका कशेरुकं पृष्ठास्थि ॥ ३ ॥

वंशिकवक्रोष्ठिककन्यकुब्जपीठानि नक्तमवहित्थम् ॥
रशनं रसनाच्छोटनशुंबं तुम्बं महोदयं कांस्यम् ॥४॥

(अव०) वंशिका वंशिकम् अगुरुः । वक्रोष्ठिका वक्रोष्ठिकं स्मितम् । अथ जान्तः । कन्यकुब्जा कन्यकुब्जं महोदयाख्यो देशः । अथ ठान्तः । पीठी पीठमासनम् । नक्ता नक्तं रात्रिः । नक्तमिति मन्तमव्ययमपि । अवहित्था अवहित्थमाकारगोपनम् । रशनं रशना काञ्ची । रसना रसनं जिह्वा । आच्छोटना आच्छोटनं मृगया । शुम्बा शुम्बं रज्जुः । तुम्बी तुम्बं वल्लिविशेषः । महोदया महोदयं कन्यकुब्जाख्यो देशः । कांस्यी कांस्यं सौराष्ट्रिका । अर्थप्राधान्यात् सौराष्ट्रिका सौराष्ट्रिकमपि ॥ ४ ॥

मृगव्यचव्ये च वणिज्यवीर्यनासीरगात्रापरमन्दिराणि ॥
तमिस्रशस्ये नगरं मसूरत्वक्षीरकादम्बरकाहलानि ॥ ५ ॥

(अव०) मृगव्या मृगव्यं पापर्द्धिः । चव्या चव्यं नागवल्लिमूलम् । वचायां

तु स्त्रीत्वमेव । वणिज्या वणिज्यं वणिक्कर्म । वीर्या वीर्यम् अतिशयशक्तिः । अथ रान्ता दश । नासीरा नासीरमग्रयानम् । गात्रा गात्रं गजस्य पूर्वजङ्घादिभागः । अपरा अपरं गजस्य पाश्चात्यजङ्घा । मन्दिरा मन्दिरं गृहम् । समुद्रे तु पुंस्त्वमेव । नगरे तु क्लीबम् । तमिस्रं तमः । तमिस्रा निबिडं तमः । सामान्यविशेषयोरभेदविवक्षया ऐकार्थ्यम् । कोपे तु क्लीबम् । कृष्णपक्षनिशायां तु स्त्री । शस्त्री शस्त्रमायुधविशेषः नगरी नगरं पुरी । मसूरी मसूरं चर्मासनम् । त्वक्षीरी त्वक्षीरं वंशलोचना । कादम्बरी कादम्बरं मद्यविशेषः । सामान्यविशेषयोरभेदविवक्षायामित्थं निर्देशः। यदाह–' कादंबरं मद्यभेदे दधिसारे सीधुनि स्त्रियाम्'। अथ लान्ता अष्ट । काहला काहलं शुषिरो वाद्यभेदः ॥ ५ ॥

स्थालीकदल्यौ स्थलजालपित्तला गोलायुगल्यौ बडिशं च छर्दि च ॥
अलाबु जम्बूदुरुषः सरः सदो रोदोऽर्चिषी दामगुणे त्रयट् तयट् ॥६॥

(अव०) स्थाली स्थालं भाजनविशेषः । कदली कदलं शाकादेर्नवनालम् । स्थली अकृत्रिमा चेत् कृत्रिमा तु स्थला । स्थलम् उन्नतो भूभागः । जाली जालम् आनायः समूहः गवाक्षश्च । पित्तला पित्तलमारकूटम् । गोला गोलं ' पत्राञ्जने कुनद्यां च गोदावर्यां च मण्डले । सखीमणिकयोर्गोला गोलं लक्ष्यानुसारतः ' ॥१॥ युगली युगलं युगम् । अथ शान्तः। बडिशा बडिशं मत्स्यबन्धनम् । बडिशीत्यपि क्वचित् । अथेदन्तः । इयं छर्दिः इदं छर्दि वान्तिः । इयमलाबूः इदमलाबु तुम्बीलता । इयं जम्बूः इदं जम्बु जम्बूवृक्षफलम् । अनयोः क्लीबत्वे ह्रस्वता । उडुः उडु नक्षत्रम् । उषा उषः सन्ध्या । प्रभाते पुंनपुंसकम् । सरः सरसी तडागः । सदः सदाः सभा । रोदः रोदसी द्यावापृथिव्यौ । अर्चिः २ अग्निशिखा रश्मिश्च । दाम २ बन्धनम् । गुणवाचि अयट्तयडन्तं नाम स्त्रीनपुंसकम् । द्वयी द्वयम् । त्रयी त्रयम् । चतुष्टयी चतुष्टयम् । गुणिनि त्वाश्रयलिङ्गतैव । द्वये पदार्थाः द्वयी गतिः । द्रव्यं वस्तु । त्रयाणि जगन्ति । चतुरये कषायाः। चतुष्टयो शब्दानां प्रवृत्तिः इत्यादि ॥६॥

॥ इति स्त्रीक्लीबलिङ्गाः ॥

॥ अथ स्वतस्त्रिलिङ्गाधिकारः ॥

स्वतस्त्रिलिङ्गः सरकोऽनुतर्षे शलः शले ॥
करकोऽब्दोपले कोशः शिम्बाखड्गपिधानयोः ॥ १ ॥

(अव०) स्वतो नतु विशेष्यवशात् । अनुतर्षे मद्यपाने वाच्ये सरकशब्दस्त्रिलिङ्गः । सरकः सरका सरकम् । स्वतस्त्रिलिङ्ग इत्यधिकारः । शले श्वाविद्रोमणि वाच्ये शलशब्दस्त्रिलिङ्गः । शलः शलला शलम् । अब्दोपले मेघपाषाणे वाच्ये करकशब्दस्त्रिलिङ्गः । शिम्बायां बीजकोशे खड्गपिधाने प्रत्याकारे च कोशशब्दस्त्रिलिङ्गः ॥ १ ॥

जीवः प्राणेषु केदारे वलजः पवने खलः ॥
बहुलं वृत्तनक्षत्रपुराद्याभरणाभिधाः ॥ २ ॥

(अव०) प्राणेषु असुषु वाच्येषु जीवः स्वतस्त्रिलिङ्गः । जीवः जीवा जीवं प्राणाः । केदारे वाच्ये वलजस्त्रिलिङ्गः । पवने धान्यपवनस्थाने खलशब्दस्त्रिलिङ्गः । वृत्तं मात्रादिच्छन्दः । वृत्तादीनामभिधा नामानि बहुलं लक्ष्यानुरोधेन त्रिलिङ्गानि । वृत्ताभिधा-श्लोकः पुटः पणव इत्यादि पुंसि । प्रमाणी समानी कलिका गाथा आर्या इत्यादि स्त्रियाम् । पक्त्रं वितानमित्यादि क्लीबे । दण्डकः पुंनपुंसकः । वसंततिलकं स्त्रीक्लीबे उक्तम् । नक्षत्राभिधा तिष्यः पुनर्वसुःइत्यादि पुंसि । अश्विनी इत्वलाः चित्रा इत्यादि स्त्रियाम् । भं नक्षत्रं इत्यादि नपुंसकम् । मृगशिरः पुंनपुंसकः। कस्यचित्पुरस्याभिधा द्रङ्गः द्राङ्गः निगमः इत्यादि पुंसि । पूः अमरावती अलकेत्यादि स्त्रियाम् । अधिष्ठानं पत्तनं दुर्गम् इत्यादि क्लीबम् । आदिशब्दो ग्रामदेशोपलक्षणम् । तेन वरणा ग्रामः गोदौ ग्रामः इत्यादि पुंसि । शालूकिनी ग्रामः । काञ्ची माढिश्च देश इत्यादि स्त्रियाम् । क्रोडं ग्रामः कुरुक्षेत्रं च देशः इत्यादि क्लीबे । आभरणाभिधा-तुलाकोटिः ताडङ्कः इत्यादि पुंसि । वालपाश्यापारितथ्याशब्दौ केशाभरणे, मेखला सप्तकी इत्यादि स्त्रियाम् । केयूराङ्गदे मुकुटम् अङ्गुलीयकम् इत्यादि क्लीबे । आवाप्यादयः पुंनपुंसकाः। हारः पुंनपुंसकः। रशनं स्त्रीक्लीबम् ॥२॥

भल्लातक आमलको हरीतकविभीतकौ ॥
तारकाढकपिटकस्फुलिङ्गा विडङ्गतटौ ॥३॥

(अव०) भल्लातकी आमलकी हरीतकी बिभीतक्यादयो वृक्षभेदाः । तारका भम् । आढकी मानविशेषः । पिटका भाजनविशेषः फोटश्च । स्फुलिङ्गा अग्निकणाः । विडङ्गा औषधिविशेषः । अभिज्ञे त्वाश्रयलिङ्गः। तटी रोधः ॥ ३ ॥

पटः पुटो वटो वाटः कपाटशकटौ कटः ॥
पेटो मठः कुण्डनीडविषाणास्तूणकङ्कतौ ॥४॥

(अव०) पटी वस्त्रविशेषः । पुटी पत्रभाजनम् । भूर्जाद्यवयवे तु दान्तत्वात् पुंस्त्वमेव । वटो न्यग्रोधतरुः रज्जुश्च । वाटी वृत्तिः । यवविकारे वरण्डेऽङ्गे च बाहुलकात्पुंनपुंसकः । वर्त्मनि पुंस्त्वमेव । इक्कटीवास्तुनोस्तु स्त्रियाम् । कपाटी अररिः । जपादित्वाद्वत्वे कवाटी । शकटी अनः । कटो वीरणादिकृतः। पेटी संघातः परिच्छदश्च । स्वार्थे के पेटिका । मठी आश्रयविशेषः । कुण्डी भाजनभेदः । नीडा कुलायः । विषाणी विषाणा वा गवादिशृङ्गम् दन्तिदन्तश्च । तूणो तूणा वा इषुधिः । कंकती केशमार्जनम् ॥ ४ ॥

मुस्तकुथेङ्गुदजृम्भदाडिमाः पिठरप्रतिसरपात्रकन्दराः ॥
नखरो वल्लूरो दरः पुरश्छत्रकुवलयमृणालमण्डलाः ॥५॥

(अव०) मुस्ता कन्दविशेषः । कुथा वर्णकम्बलः । इङ्गुदी वृक्षविशेषः । जृम्भा जृम्भणम् । दाडिमा उच्चिलिङ्गतरुः तत्फलं तत्कणश्च । पिठरी स्थाली । मुस्तं मन्थानदण्डयोस्तु क्लीबम् । प्रतिसरा मङ्गल्यसूत्रं सेनायाः पश्चाद्भागश्च । पात्री भाजनम् । योग्ये यज्ञभाण्डे नाट्यानुकर्तरि च क्लीबः । कन्दरी कन्दरा च दरी । अंकुशे तु पुंसि । नखरी नखरा वा नखः । वल्लूरा सौकरं शुष्कं वा मांसम् । ऊषरे नक्षत्रे वाहने च क्लीबम् । दरी श्वभ्रम् । पुरी नगरी । छत्री आतपत्रम् । कुवली वृक्षविशेषः तत्फलं च । मृणाली बिसम् । मण्डलो देशः समूहश्च बिम्बं चतुरस्रता च ॥ ५ ॥

नालप्रणालपटलार्गलशृंखलकन्दलाः ॥
पूलावहेलौ कलशकटाहौ षष्टिरेणिषु ॥६॥

(अव०) नाली नाला वा पद्मादिवृन्तम् । जलनिर्गमे तु बाहुलकात् पुंसि-लत्वाभावे नाडः । प्रणाली जलपद्धतिः । पटली गृहोपरिभागः अक्षिरोगश्च । 'अर्गला त्रिषु कल्लोले दण्डे चान्तः कपाटयोः। शृंखलः शृंखला शृंखलमयोमयी रज्जुः। कन्दली उपरागः समूहः नवाङ्कुरः द्रुममेदश्च । पूली पूला वा बद्धतृणसंचयः। अवहेलाऽवज्ञा । कलशो जलाद्याधारविशेषः । दन्त्योपान्त्योऽयमपि । कटाही भाण्डविशेषः । षष्टिः संख्याविशेषः । रेणुर्धूलिः । इषुर्बाणः ॥ ६ ॥

॥ इति स्वतन्त्रलिङ्गाः ॥

॥ अथ परलिङ्गाधिकारः ॥

परलिङ्गो द्वन्द्वोऽशी डेऽर्थो वाच्यवदपत्यमिति नियताः ॥
अरुयारोपाभावे गुणवृत्तेराश्रयाद्वचनलिङ्गे ॥ १ ॥

(अव०) द्वन्द्वः समासो द्वन्द्वस्यैव यत्परमुत्तरपदं तत्समानलिङ्गो भवति । स च समाहारादन्यो भिन्नलिङ्गवर्तिपदो वचनं प्रयोजयति । समाहारस्तु नपुंसक उक्तः। समानलिङ्गवर्तिपदोऽपि सिद्धलिङ्ग एव । इमौ मयूरीकुक्कुटौ । इमे कुक्कुट-मयूर्यौ । इत्यादि । अंशितत्पुरुषसमासः परलिङ्गो भवति। अर्धं पिप्पल्या अर्धपिप्पलो। अर्धं 'समेऽशेऽर्धं नवा' इति समासः'। अर्धो जरत्या अर्धजरतीयम् । 'जर-त्यादिभिः' इति समासः। द्वितीयं भिक्षायाः द्वितीयभिक्षा 'द्वित्रि' इति समासः। पूर्वाह्णपूर्वरात्रादीनाम् 'अह्न' इति 'रात्र' इति च पुंस्त्वम् । डेऽर्थश्चतुर्थ्यर्थोऽ-र्थशब्दो यत्र प्रस्तावात् तत्पुरुषसमासे स वाच्यस्य यल्लिङ्गं तत्समानलिङ्गो भवति । ब्राह्मणायायं ब्राह्मणार्थः सूपः । एवं ब्राह्मणार्था पेया । ब्राह्मणार्थं पयः । डे इति किम् । धान्येनार्थः धान्यार्थः । पुंस्त्वापवादो योगः । अपत्यमिति अपत्यादयः शब्दा नियता नियते अजहद्वर्तिनो व्यस्ते समस्ते वा लिङ्गवचने येषां ते तथा । अपत्यं दुहिता पुत्रश्च । इति शब्दस्यार्थत्वादेव तोकं रक्षः सारथिः सादी

निषादी अतिथिः स्त्री पुमान् कुलं वा । स्याद्वादः प्रमाणम्, अनेकान्तात्मकं वस्तु संविदां गोचरः, दण्ड उपसर्जनं, विद्या गुणः, गौः प्रकाण्डं, कुमारी तल्लजः, अश्वो मतल्लिका । स्वार्थिककप्रत्ययान्तास्तु क्वचिद्वाच्यलिङ्गा अपि भवन्ति । वीरौ रक्षःप्रकाण्डकौ । कुमारी तल्लजका इत्यादि । बाहुलकात् क्वचिदाश्रयलिङ्गा अपि । प्रमाणी ब्राह्मणी । गुणो विशेषणं तस्मात् प्रवृत्तिनिमित्ताद्विशेष्ये वृत्तिर्यस्य स गुणवृत्तिः शब्दः तस्याश्रयाद्विशेष्यवशाल्लिङ्गवचने स्याताम् । परत्वात् सकलशास्त्रापवादः । अस्त्र्यारोपेति-आरोपोऽर्थान्तरे निवेशनम् । अस्त्रियामारोपोऽस्त्र्यारोपस्तस्याभावे सति । गुणवृत्तिश्च गुणद्रव्यक्रियोपाधिभेदात्त्रिधा । गुणोपाधिः-शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रम् । मूर्खो ना, मूर्खा स्त्री, मूर्खं कुलम् इत्यादि । द्रव्योपाधिः-दण्डी ना, दण्डिनी स्त्री, दण्डि कुलम् इत्यादि । क्रियोपाधिः-पाचको ना पाचिका स्त्री पाचकं कुलम् । सर्वादिः केवलस्तन्तश्च गुणवृत्तिः । एवं संख्यापि । सर्वः सूपः, सर्वा यवागूः, सर्वमन्नम् । एवं स सा तत् । अन्यः अन्या, अन्यत् । द्वाभ्यामन्यः द्वयः । द्वय्या । द्वयत् । एकः पटः एका पटी एकं वस्त्रम् । एवं द्वौ द्वे द्वे । त्रयः तिस्रः त्रीणि । बहुव्रीहिरदिग्वृत्तिर्गुणवृत्तिः । चित्रा गावोऽस्य चित्रगुर्ना चित्रगुः स्त्री चित्रगु कुलम् इत्यादि । दिग्वाची तु दिग्नामत्वात् स्त्रीलिङ्गः । दक्षिणस्याः पूर्वस्याश्च यदन्तरालं दिक् सा दक्षिणपूर्वा दिक् । एवं दक्षिणपश्चिमा । पूर्वपदप्रधानस्तत्पुरुषस्तद्धितार्थद्विगुश्च गुणवृत्तिः । अतिक्रान्तः खट्वामतिखट्वः अतिखट्वा अतिखट्वम् । एवमवकुष्टः कोकिलया अवकोकिलः ३ । परिग्लानोऽध्ययनाय पर्यध्ययनः ३ । अलं जीविकायै अलंजीविकः ३ । निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः ३ । प्राप्तो जीविकां प्राप्तजीविकः ३ इत्यादयः । शतात्परे परःशताः । एवं परःसहस्राः ३ । परोलक्षाः ३ । उत्तरपदप्रधानस्य तु यथास्वं लिङ्गम् । तद्धितार्थद्विगुः-पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पञ्चकपाला पञ्चकपालम् । रक्ताद्यर्थेऽणाद्यन्ताश्च गुणवृत्तयः । हरिद्रया रक्तः हारिद्रः हारिद्रो हारिद्रम् । एवं सर्वतद्धितेषु यथायोगमपवादवर्जमुदाहार्यम् । आरोपाभावे इति किम् । चञ्चेव चञ्चा पुरुषः । अत्र समतया आरोपः । एवमन्येष्वप्यारोपेषूदाहार्यम् । अस्त्रीति किम् । धवनाम्नो योगात्तद्भार्यायामध्यारोपे आश्रयलिङ्गतैव । प्रभुस्य भार्या स एवेयमित्यभेदोपचारेण प्रभुः । एवं भवान्यादयोऽपि ॥१॥

प्रकृतेर्लिङ्गवचने बाधन्ते स्वार्थिकाः क्वचित् ॥
प्रकृतिर्हरीतक्यादिर्न लिङ्गमतिवर्तते ॥ २ ॥

(अव०) स्वार्थे प्रकृत्यर्थे भवन्ति इति स्वार्थिकाः । ते च क्वचिल्लक्ष्यानुसारेण प्रकृतेर्लिङ्गं वचनं च बाधन्ते । बाधिते च लिङ्गे बहुलं लिङ्गव्यवस्था । संदिष्टा वाक् वाचिकम् । विनय एव वैनयिकम् । उपाय एव औपयिकम् । योग्ये त्वाश्रयलिङ्गता । वृत्तिरेव वार्तिकम् । ह्रस्वा शुण्डा शमी वा शुण्डारः शमीरः । क्वचिदनुवर्तते । राज्ञो धूः राजधुरा । मृदेव मृत्तिका मृत्सा । मृत्स्ना ।

क्वचिद्विकल्पः । ईषदपरिसमाप्तौ गुडो बहुगुडो बहुगुडा वा द्राक्षा प्रकृतिलिङ्गप्रतिपत्तिव्युदासार्थं वचनम् । हरीतक्यादिका प्रकृतिः प्रत्ययार्थे वर्तमानापि प्रकृत्यर्थलिङ्गं नातिक्रामति । हरीतक्या विकारोऽवयवो वा हरीतकी हरीतक्यौ हरितक्यः फलानि । एवं पिप्पल्यादयोऽपि । मल्लिकाया विकारोऽवयवो वा पुष्पं मल्लिका । एवं मालती यूथिका मागधी नवमालिकादयोऽपि ॥२॥

वचनं तु खलतिकादिर्बह्वर्थात्येति पूर्वपदभूता ॥
स्त्रीपुंनपुंसकानां सहवचने स्यात् परं लिङ्गम् ॥३॥

(अव०) खलतिकादिका प्रकृतिर्वचनमेव नातिक्रामति । लिङ्गं तु अतिक्रामति । तुरेवार्थे । खलतिको नाम पर्वतस्यादूरभवानि खलतिकं वनानि । बहुविषया प्रकृतिः पञ्चालादिका पूर्वपदभूता सती स्वगतं वचनमतिक्रामति । 'अस्त्र्यारोपाभावे'-इत्यस्यापवादः । पञ्चालाश्च निवासः मथुरा च पञ्चालमथुरे । स्त्रीपुंनपुंसकानामिति । स्त्रीपुंनपुंसकलिङ्गानां सहवचने परं पुंलिङ्गं नपुंसकलिङ्गं वा भवति । स्त्रीपुंसयोः सहवचने पुंलिङ्गं भवति । सा च स च तौ । स च शाटी च तौ । स्त्रीनपुंसकयोर्नपुंसकम् । सा च वल्लं च ते । पुंनपुंसकयोर्नपुंसकम् । स च तच्च ते । स्त्रीपुंनपुंसकानां नपुंसकम् । सा च स च तच्च तानि ॥३॥

नन्ता संख्या डतिर्युष्मदस्मच्च स्युरलिङ्गकाः ॥
पदं वाक्यमव्ययं चेत्यसंख्यं च तद्बहुलम् ॥४॥

(अव०) नन्ता संख्या डत्यन्तं युष्मदस्मदी च अलिङ्गाः शब्दाः । पञ्च कति यति वा स्त्रियः । अत्र ङीर्न भवति । युष्मभ्यम् अस्मभ्यम् अत्राप् न भवति । विभक्त्यन्तं पदं, सविशेषणमाख्यातं वाक्यम्, स्वराद्यव्ययं च अलिङ्गानि असंख्यानि च । काण्डे । कुलं पचते । काण्डीभूतं कुलम् । एषु क्लीबे इति ह्रस्वो न भवति । तद्बहुलम् । तत्पूर्वोक्तं लिङ्गलक्षणं बहुलं द्रष्टव्यम् । तेन 'पिङ्गः पिशङ्गे पिङ्गी तु शम्यां पिङ्गे तु बालकम् । रामठे नालिकायां तु पिङ्गा गोरोचनामयोः' इत्येवमादि लिङ्गं शिष्टप्रयोगानुसारेण वेदितव्यम् । तदुक्तम्-

वाग्विषयस्य तु महतः संक्षेपत एव लिङ्गविधिरुक्तः ॥
यन्नोक्तमत्र सद्भिस्तल्लोकत एव विज्ञेयम् ॥१॥

निःशेषनामलिङ्गानुशासनान्यभिसमीक्ष्य संक्षेपात् ॥
आचार्यहेमचन्द्रः समदभदनुशासनानि लिङ्गानाम् ॥५॥

॥ इति हैमलिङ्गानुशासनम् ॥

॥ अथ श्रीसिद्धहैमबृहत्प्रक्रियास्थसूत्राणाम् अकारादिवर्णक्रमसूची ॥

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
	अ	
१०८	अइउवर्ण-देः ॥ १ । २ । ४१ ॥	२१
१५	अं अः-गौ ॥ १ । १ । ९ ॥	३
१४	अं अः ८ क-ट् ॥ १ । १ । १६ ॥	२
२०३१	अंशं हारिणि ॥ ८ । १ । १८२ ॥	४०९
१४९७	अंशाद्भूतोः ॥ ७ । ४ । १४ ॥	३०६
१९६८	अः सपत्न्याः ॥ ७ । १ । ११९ ॥	३९७
१४९	अः सृजिदृशोऽकिति ॥ ४ । ४ । १११ ॥	५१०
११०२	अः स्थाम्नः ॥ ६ । १ । २२ ॥	२३९
५०	अकखाद्य-वा ॥ २ । ३ । ८० ॥	४८५
१९३	अकट्घिनोश्च रञ्जेः ॥ ४ । २ । ५० ॥	५२४
११६३	अकद्रूपा-ये ॥ ७ । ४ । ६९ ॥	२४९
५८४	अकमेरुकस्य ॥ २ । २ । ९३ ॥	१३३
१३८८	अकल्पात् सूत्रात् ॥ ६ । २ । १२० ॥	२८८
७३७	अकालेऽव्ययीभावे ॥ ३ । २ । १४६ ॥	१६३
८०८	अकेन क्रीडाजीवे ॥ ३ । १ । ८१ ॥	१७७
८९९	अक्रीबेऽध्वर्युक्रतोः ॥ ३ । १ । १३९ ॥	२००
९४०	अक्ष्णोऽप्राण्यङ्गे ॥ ७ । ३ । ८५ ॥	२०९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१७२२	अगारान्तादिकः ॥ ६ । ४ । ७५ ॥	३४८
१०५७	अगिलाद्विलगिल-योः ॥ ३ । २ । ११५ ॥	२३१
७२१	अग्निचित्या ॥ ५ । १ । ३७ ॥	६७१
८६६	अग्नेश्चेः ॥ ५ । १ । १६४ ॥	६९८
७५५	अग्रहानुपदेशेऽन्तरदः ॥ ३ । १ । ५ ॥	१६६
१११	अघञ्क्यबल-वीं ॥ ४ । ४ । २ ॥	४९९
११८	अघोषे प्र-टः ॥ १ । ३ । ५० ॥	२२
६८	अघोषे शिटः ॥ ४ । १ । ४५ ॥	४९०
३५५	अङप्रतिस्त-म्भः ॥ २ । ३ । ४१ ॥	५७१
२६१	अङेहिहनो-र्वात् ॥ ४ । १ । ३४ ॥	५४१
४९१	अङ्गान्निरसने णिङ् ॥ ३ । ४ । ३८ ॥	६१०
१७०७	अङ्स्थाच्छत्रादेरञ् ॥ ६ । ४ । ६० ॥	३४५
७३५	अच् ॥ ५ । १ । ४९ ॥	६७४
२८९	अचः ॥ १ । ४ । ६९ ॥	५७
७३६	अचि ॥ ३ । ४ । १५ ॥	६७४
१६३५	अचित्तादेशकालात् ॥ ६ । ३ । २०६ ॥	३३२
७८१	अचित्ते टक् ॥ ५ । १ । ८३ ॥	६८२
२९१	अच्च् प्रा-श्च ॥ २ । १ । १०४ ॥	५७
८७२	अजातेः पञ्चम्याः ॥ ५ । १ । १७० ॥	६९८
८५६	अजातेः शीले ॥ ५ । १ । १५४ ॥	६९५

२२६९ अजातेर्नृ-वा ॥ ७ । ३ । ३५ ॥ ४५८
११२० अजादिभ्यो धेनोः ॥ ६ । १ । ३४ ॥ २४२
४०२ अजादेः ॥ २ । ४ । १६ ॥ ८७
५७१ अज्ञाने ज्ञः षष्ठी ॥ २ । २ । ८० ॥ १३१
४०५ अञ्चः ॥ २ । ४ । ३ ॥ ८८
२८८ अञ्चोऽनर्चायाम् ॥ ४ । २ । ४६ ॥ ५६
१०२० अञ्जनादीनां गिरौ ॥ ३ । २ । ७७ ॥ २२४
६४ अञ्वर्ग-तः ॥ १ । ३ । ३३ ॥ ११
१०७ अञ्वर्गात्-न् ॥ १ । २ । ४० ॥ २०
४४१ अट्यर्तिसू-र्णोः ॥ ३ । ४ । १० ॥ ५९९
२८ अड्धातोरा-ङा ॥ ४ । ४ । २९ ॥ ४८०
४३० अणञ्नेयेक-ताम् ॥ २ । ४ । २० ॥ ९३
१११९ अणि ॥ ७ । ४ । ५२ ॥ २४२
५६५ अणिक्कर्मणिक्-तौ ॥ ३ । ३ । ८८ ॥ ६२९
६८२ अणिगि प्राणिक-गः ॥ ३ । ३ । १०७ ॥ ६३४
१२१ अतः ॥ ४ । ३ । ८२ ॥ ५०२
१५२ अतः कृकमि-स्य ॥ २ । ३ । ५ ॥ २७
२५ अतः प्रत्ययाल्लुक् ॥ ४ । २ । ८५ ॥ ४८०
१८५ अतः शित्युत् ॥ ४ । २ । ८९ ॥ ५२२
२६९ अतः स्यमोऽम् ॥ १ । ४ । ५७ ॥ ५३
१८२ अत आः-ये ॥ १ । ४ । १ ॥ ३३
१११५ अत इञ् ॥ ६ । १ । ३१ ॥ २४१
२२४५ अतमबादे-यर् ॥ ७ । ३ । ११ ॥ ४५२
७७१ अतिरतिक्रमे च ॥ ३ । १ । ४५ ॥ १६९
१६३ अतोऽति रोरुः ॥ १ । ३ । २० ॥ ३०
२०५८ अतोऽनेकस्वरात् ॥ ७ । २ । ६ ॥ ४१५
९४८ अतो म आने ॥ ४ । ४ । ११४ ॥ ७१६
२०१० अतोरिथद् ॥ ७ । १ । १६१ ॥ ४०७
८७२ अतोऽह्नस्य ॥ २ । ३। ७३ ॥ १९३
१८९१ अत्र च ॥ ७ । १ । ४९ ॥ ३८०
२२१ अदभ्राट् ॥ ४ । ४ । ९० ॥ ५३३
९६८ अदसोऽकञायनणोः ॥ ३ । २ । ३३ ॥ २१४
३७६ अदसो दः सेस्तु डौ ॥ २ । १ । ४३ ॥ ७९
१९५६ अदिक्स्त्रियां वाञ्चः ॥ ७ । १ । १०७ ॥ ३९५
५५ अदीर्घात्-ने ॥ १ । ३ । ३२ ॥ १०
४९ अदुरुपसर्गा-नेः ॥ २ । ३ । ७७ ॥ ४८४
२१७७ अदूरे एनः ॥ ७ । २ । १२२ ॥ ४३७
६३३ अदृश्याधिके ॥ ३ । २ । १४५ ॥ १४५
१९३ अदेतः-क् ॥ १ । ४ । ४४ ॥ ३५
१५९१ अदेवासुरादिभ्यो वैरे ॥ ६ । ३ । १६४ ॥ ३२४
१७२३ अदेशकालाद्ध्यायिनि ॥ ६ । ४ । ७६ ॥ ३४८
८५२ अद्योऽनद्यात् ॥ ५ । १ । १५० ॥ ६९४
१०२ अदोमुमो ॥ १ । २ । ३५ ॥ १९
१२१८ अदोरायनिः प्रायः ॥ ६ । १ । ११३ ॥ २५८
११५९ अदार्नदीमा-म्नः ॥ ६ । १ । ६७ ॥ २४९
२९ अद्यतनी ॥ ५ । २ । ४ ॥ ४८१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३०	अद्यतनी-महि ॥ ३ । ३ । ११ ॥	४८१
२५९	अद्यतन्यां ब्रा-ने ॥ ४ । ४ । २२ ॥	५४१
८८०	अद्यर्थाद्याधारे ॥ ५ । १ । १२ ॥	७००
९५३	अद्यश्वीनात्स-लम् ॥ ३ । २ । १८ ॥	२११
३५७	अदूव्यञ्जने ॥ २ । १ । ३५ ॥	७४
३९६	अधण्-सः ॥ १ । १ । ३२ ॥	८६
२१७२	अधरापराञ्चात् ॥ ७ । २ । ११८ ॥	४३६
१३८९	अधर्मक्षत्त्रभि-याः ॥ ६ । २ । १२१ ॥	२८८
१३१	अधश्चतुर्थात्तथोर्धः ॥ २ । १ । ७९ ॥	५०५
१७६	अधातुवि-म ॥ १ । १ । २७ ॥	३३
४०४	अधातूदितः ॥ २ । ४ । २ ॥	८८
२००३	अधिकं तत्सं-ङः ॥ ७ । १ । १५४ ॥	४०४
६०३	अधिकेन भूयसस्ते ॥ २ । २ । १११ ॥	१३७
६५९	अधोष्ठौ ॥ ५ । ४ । ३२ ॥	६५६
५५०	अधेः प्रसहने ॥ ३ । ३ । ७७ ॥	६२५
५१६	अधेः शीङ्स्थास आधारः ॥ २ । २ । २० ॥	११६
२०३६	अधेरारूढे ॥ ७ । १ । १८७ ॥	४१०
१४९४	अध्यात्मादिभ्य इकण् ॥ ६ । ३ । ७८ ॥	३०५
१९५२	अध्वानं येनौ ॥ ७ । १ । १०३ ॥	३९३
७४४	अनः ॥ ७ । ३ । ८८ ॥	१६५
३५९	अनक् ॥ २ । १ । ३६ ॥	७५
१०२१	अनजिरादि-तौ ॥ ३ । २ । ७८ ॥	२२४
११७१	अनञः क्त्वो यप् ॥ ३ । २ । १५४ ॥	८८८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
४६८	अनञो मूलात् ॥ २ । ४ । ५८ ॥	१०२
११४८	अनट् ॥ ५ । ३ । १२४ ॥	८८३
३८१	अनडुहः सौ ॥१ । ४ । ७२ ॥	७९
१२६	अनतोऽन्तोदात्मने ॥ ४ । २ । ११४ ॥	५०३
२८०	अनतो लुप् ॥ १ । ४ । ५९ ॥	५५
७२१	अनतो लुप् ॥ ३ । २ । ६ ॥	१५९
२२४८	अनत्यन्ते ॥ ७ । ३ । १४ ॥	४५४
२१५४	अनद्यतने र्हिः ॥ ७ । २ । १०१ ॥	४३२
४२	अनद्यतने श्वस्तनी ॥ ५ । ३ । ५ ॥	४८३
२६	अनद्यतने ह्यस्तनी ॥ ५ । २ । ७ ॥	४८०
५४५	अननोः सनः ॥ ३ । ३ । ७० ॥	६२४
१७७	अनन्तः प-यः ॥ १ । १ । ३८ ॥	३३
१२६६-२	अनपत्ये ॥ ७ । ४ । ५५ ॥	२६९
१४७७	अनरे वा ॥ ६ । ३ । ६१ ॥	३०३
५	अनवर्णो नामी ॥ १ । १ । ६ ॥	२
१४०	अनाङ्माङो-छः ॥ १ । ३ । २८ ॥	२५
४५७	अनाच्छादजा-वा ॥ २ । ४ । ४७ ॥	९९
१०७	अनातो नञ्धान्त-स्य ॥ ४ । १ । ६९ ॥	४९८
१०१	अनादेशादे-तः ॥ ४ । १ । २४ ॥	४९६
१७९३	अनाम्न्यद्भिः प्लुप् ॥ ६ । ४ । १४१ ॥	३६०
२८१	अनाम्स्वरे नोन्तः ॥ १ । ४ । ६४ ॥	५५
४८९	अनार्षे वृद्धे-ब्यः ॥ २ । ४ । ७८ ॥	१०५
१०९२	अनिदम्यणपवादे-ञ्यः ॥ ६ । १ । १५ ॥	२३७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
४९	अनियो-वे ॥ १ । २ । १६ ॥	९
१२८०	अनीनाद-तः ॥ ७ । ४ ६६ ॥	२७१
२२६	अनुकम्पा-त्योः ॥ ७ । ३ ३४ ॥	४५८
१९५१	अनुग्वलम् ॥ ७ । १ । १०२ ॥	३९३
३३८	अनुनासिके च-ट् ॥ ४ । १ । १०८ ॥	५६३
१९४५	अनुपदं वद्धा ॥ ७ । १ । ९६ ॥	३९२
२०१९	अनुपद्यन्वेष्टा ॥ ७ । १ । १७० ॥	४०७
८९६	अनुपसर्गाः क्षीबो-ह्लाः ॥ ४ । २ । ८० ॥	७०४
१३९१	अनुब्राह्मणादिन् ॥ ६ । २ । १२३ ॥	२८८
११७४	अनुशतिकादीनाम् ॥ ७ । ४ । २७ ॥	२५१
३२	अनेकवर्णः सर्वस्य ॥ ७ । ४ । १०७ ॥	५
२०३७	अनोः कमितरि ॥ ७ । १ । १८८ ॥	४१०
५५४	अनोः कर्मण्यसति ॥ ३ । ३ । ८१ ॥	६२७
११९४	अनोऽट्ये ये ॥ ७ । ५१ ॥	२५३
८७०	अनोर्जानेर्डः ॥ ५ । १ । १६८ ॥	६९८
१०५२	अनार्देशे उप् ॥ ३ । २ । ११० ॥	२३०
४१०	अनो वा ॥ २ । ४ । ११ ॥	८९
२०९	अनोऽस्य ॥ २ । १ । १०८ ॥	३९
१५५६	अन्तःपूर्वादिकण् ॥ ६ । ३ । १३७ ॥	३१७
११११	अन्तर्द्धेः ॥ ५ । ३ । ८९ ॥	८७६
६५९	अन्तर्बहि-मनः ॥ ७ । ३ । १३२ ॥	१५०
३०३	अन्तो नो लुक् ॥ ४ । २ । ९४ ॥	६०
१०८३	अन्त्यदादेरः ॥ ३ । २ । १५२ ॥	२३६
११९५	अन्यथैवंकथ-कात् ॥ ५ । ४ । ५० ॥	८९२
५०१	अन्यस्य ॥ ४ । १ । ८ ॥	६१५
१२	अन्यो घो-न् ॥ १ । १ । १४ ॥	२
५१६	अन्वाङ्परेः ॥ ३ । ३ । ३४ ॥	६१८
६६३	अन् स्वरे ॥ ३ । २ । १२९ ॥	१५१
३५०	अपः ॥ १ । ४ । ८८ ॥	७३
९४१	अपचितः ॥ ४ । ४ । ७७ ॥	७१५
९	अपञ्चमा-ट् ॥ १ । १ । ११ ॥	२
१९५९	अपण्ये जीवने ॥ ७ । १ । ११० ॥	३९५
५१२	अपस्किरः ॥ ३ । ३ । ३० ॥	६१७
३३१-२	अपाच्चतुष्पा-र्थे ॥ ४ । ४ । ९५ ॥	५६२
१११९	अपाच्चायश्चिः स्तौ ॥ ४ । २ । ६६ ॥	८७८
५५९	अपायेऽवधिरपादानम् ॥ २ । २ । २९ ॥	१२७
१०३१	अपील्वादेर्वहे ॥ ३ । २ । ८९ ॥	२२६
३५१	अपोऽद् मे ॥ २ । १ । ४ ॥	७३
१३७३	अपोनपादपा-तः ॥ ६ । २ । १०५ ॥	२८५
१३१७	अपो यज् वा ॥ ६ । २ । ५६ ॥	२७६
९६३	अपो ययोनिमतिचरे ॥ ३ । २ । २८ ॥	२१४
५९३	अप्रत्यादावसाधुना ॥ २ । २ । १०१ ॥	१३५
१६	अप्रयोगीत् ॥ १ । १ । ३७ ॥	३
८६५	अप्राणिनि ॥ ७ । ३ । ११२ ॥	१९२
८९९	अप्राणिपश्वादेः ॥ ३ । १ । १३६ ॥	२००
१२५२	अब्राह्मणात् ॥ ६ । १ । १४१ ॥	२४५

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१३०७	अभक्ष्याच्छादने वा मयट् ॥ ६ । २ । ४६ ॥	२७५
१६३१	अभिनिष्क्रामति द्वारे ॥ ६ । ३ । २०२ ॥	३३१
९८३	अभिनिष्टानः ॥ २ । ३ । २४ ॥	२१६
१९१२	अभिव्याप्तौ-जिन् ॥ ५ । ३ । ९० ॥	८७६
२०३८	अमेरीश्च वा ॥ ७ । १ । १८९ ॥	४१०
१९५३	अभ्यमित्रमीयश्च ॥ ७ । १ । १०४ ॥	३९३
३१६	अभ्यम्भ्यसः ॥ २ । १ । १८ ॥	६३
२०९८	अभ्रादिभ्यः ॥ ७ । २ । ४६ ॥	४२२
३०२	अभ्वादे-सौ ॥ १ । ४ । ९० ॥	५९
१४६१	अमद्रस्य दिशः ॥ ७ । ४ । १६ ॥	३००
७२३	अमव्ययीभाव-म्याः ॥ ३ । २ । २ ॥	१६०
३२५	अमा त्वामा ॥ २ । १ । २४ ॥	६६
४६९	अमाव्ययात्क्यन् च ॥ ३ । ४ । २३ ॥	६०५
९५७	अमूर्धमस्तका-मे ॥ ३ । २ । २२ ॥	२१२
४०३	अमोऽकम्यमिचमः ॥ ४ । २ । २६ ॥	५९०
१६२७	अमोऽधिकृत्य ग्रन्थे ॥ ६ । ३ । १९८ ॥	३३१
१४९०	अमोऽन्तावोधसः ॥ ६ । ३ । ७४ ॥	३०५
३०९	अमौ मः ॥ २ । १ । १६ ॥	६१
१०९०	अयङ्ये स्वः ॥ ५ । ३ । ६८ ॥	८७३
६५०	अयदि श्रद्धा-नवा ॥ ५ । ४ । २३ ॥	६५४
६१२	अयदि स्मृ-न्तो ॥ ५ । २ । ९ ॥	६४३
३५४	अयमियं पुं-सौ ॥ २ । १ । ३८ ॥	७४
१९४६	अयानयं नेयः ॥ ७ । १ । ९७ ॥	३९२
२८३	अयि रः ॥ ४ । १ । ६ ॥	५४६
१४६७	अरण्यात्पथि-रे ॥ ६ । ३ । ५१ ॥	३०१
१३४९	अरीहणादेरकण् ॥ ६ । २ । ८३ ॥	२८१
२१८०	अरुर्मनश्च-ऋौ ॥ ७ । २ । १२७ ॥	४३८
३६२	अरोः सुपि रः ॥ १ । ३ । ५७ ॥	७५
२४७	अर्डौ च ॥ १ । ४ । ३९ ॥	४६
३७२	अर्तिरीव्लीढी-पुः ॥ ४ । २ । २१ ॥	५७८
१६८४	अर्धपदपदोत्तर-ण्ठात् ॥ ६ । ४ । ३७ ॥	३४०
२०६०	अर्धार्धान्ता-त् ॥ ७ । २ । ८ ॥	४१६
१७८२	अर्धपूर्वपदः पूरणः ॥ १ । १ । ४२ ॥	३५८
१८०४	अर्धात्परि-देः ॥ ७ । ४ । २० ॥	३६२
१७८६	अर्धात्पलकं-त् ॥ ६ । ४ । १३४ ॥	३५९
१४८५	अर्धाद्यः ॥ ६ । ३ । ६९ ॥	३०४
४७७	अर्यक्षत्रियाद्रा ॥ २ । ४ । ६६ ॥	१०३
१९०९	अर्हतस्तो न्त् च ॥ ७ । १ । ६१ ॥	३८६
१	अर्हम् ॥ १ । १ । १ ॥	१
७३४	अर्हे तृच् ॥ ५ । ४ । ३७ ॥	६७३
७८९	अर्होऽच् ॥ ५ । १ । ९१ ॥	६८३
१९३३	अलाब्वाश्च-सि ॥ ७ । १ । ८४ ॥	३९०
९७६	अलुपि वा ॥ २ । ३ । १९ ॥	२१५
२२३८	अल्पयूनोः कन् वा ॥ ७ । ४ । ३३ ॥	४५१
१०७२	अल्पे ॥ ३ । २ । १३६ ॥	२३४
२३७	अवः स्वपः ॥ २ । ३ । ५७ ॥	५३७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१७००	अवक्रये ॥ ६ । ४ । ५३ ॥	३४३
२०००	अवयवात्तयट् ॥ ७ । १ । १५१ ॥	४०२
१६५	अवर्णभो-धिः ॥ १ । ३ । २२॥	३०
१८७	अवर्णस्या-साम् ॥ १ । ४ । १५ ॥	३७
३९	अवर्णस्ये रल् ॥ १ । २ । ६ ॥	७
३८७	अवर्णादश्नो-ङयोः ॥ २ । १ । ११५ ॥	८२
६५२	अवर्णेवर्णस्य ॥ ७ । ४ । ६८ ॥	१४९
१२२२	अवर्मणो-त्ये ॥ ७ । ४ । ५९ ॥	२५८
७५८	अवहसासंस्रोः ॥ ५ । १ । ६३ ॥	६७८
३५६	अवाच्याश्रयो-रे ॥ २ । ३ । ४२ ॥	५७१
५४२	अवात् ॥ ३ । ३ । ६७ ॥	६३४
१०८४	अवात् ॥ ५ । ३ । ६२ ॥	८७६
१९७५	अवात्कुटा-ते ॥ ७ । १ । १२६ ॥	३९०
११५८	अवात् तृस्तृभ्याम् ॥ ५ । ३ । १३३ ॥	८८५
२१२	अविति वा ॥ ४ । १ । ७५ ॥	५२९
३२७	अवित्परोक्षा-रेः ॥ ४ । १ । २३॥	५५९
९२९	अविदूरेऽभेः ॥ ४ । ४ । ६४ ॥	७११
६१६	अविवक्षिते ॥ ५ । २ । १४ ॥	६४५
१४०	अविशेषणे-दः ॥ २ । २ । १२२ ॥	१४०
१२१२	अवृद्धाद्दोर्नवा ॥ ६ । १ । ११० ॥	२५६
१६८१	अवृद्धेर्गृह्णति गर्ह्ये ॥ ६ । ४ । ३४ ॥	३४०
१९८१	अवेः संघा-टम् ॥ ७ । १ । १३२ ॥	३९९
१३२२	अवेर्दुर्गन्धे-सम् ॥ ६ । २ । ६४ ॥	२७८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
७०	अवौ दाधौ दा ॥ ३ । ३ । ५ ॥	४९१
२२०१	अव्यक्तानु-श्च ॥ ७ । २ । १४५ ॥	४४२
१८७८	अव्यजात्यप् ॥ ७ । १ । ३८ ॥	३७७
६२७	अव्ययम् ॥ ३ । १ । २१ ॥	१४४
७७५	अव्ययं प्रवृ-भिः ॥ ३ । १ । ४८ ॥	१७०
४०१	अव्ययस्य ॥ ३ । २ । ७ ॥	८७
२२६५	अव्ययस्य कोऽद् च ॥ ७ । ३ । ३१ ॥	४५७
४३२	अव्याप्यस्य मुचेर्मोग्वा ॥ ४ । १ । १९ ॥	५९६
१२५	अशवि ते वा ॥ ३ । ४ । ४ ॥	५०३
२४३	अशित्यस्सन्-टि ॥ ४ । ३ । ७७ ॥	५३८
२०१९	अशिरसोऽशीर्षश्च ॥ ७ । २ । ७ ॥	४१६
४२३	अशिशोः ॥ २ । ४ । ८ ॥	९२
१५२१	अश्व बाऽमावास्यायाः ॥ ६ । ३ । १०४ ॥	३१०
१८४५	अश्वैकादेः ॥ ७ । १ । ५ ॥	३७१
६४२	अश्रद्धामर्षे-पि ॥ ५ । ४ । १५ ॥	६५२
१३६३	अश्वत्थादेरिकण् ॥ ६ । २ । ९७ ॥	२८३
८९४	अश्ववडवपू-राः ॥ ३ । १ । १३१ ॥	१९८
११३७	अश्वादेः ॥ ६ । १ । ४९ ॥	२४६
१९५५	अषडक्षा-नः ॥ ७ । १ । १०६ ॥	३९४
१०६१	अषष्ठीतृतो-र्थे ॥ ३ । २ । ११९ ॥	२३२
३४९	अष्ट और्ज-सोः ॥ १ । ४ । ५३ ॥	७३
४६७	असंभक्त्राजिनैक-त् ॥ २ । ४ । ५७ ॥	१०२
१८८	असंयोगादोः ॥ ४ । २ । ८६ ॥	५२३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२३०३	असकृत् संभ्रमे ॥ ७ । ४ । ७२ ॥	४६६
४६६	असत्काड-त् ॥ २ । ४ । ५६ ॥	१०१
६१२	असत्वाराद्-म् ॥ २ । २ । १२० ॥	१३९
९४५	असत्वे ङसेः ॥ ३ । २ । १० ॥	२१०
३२६	असदिवा-र्वम् ॥ २ । १ । २५ ॥	६७
१७४	असमानलोपे-ङे ॥ ४ । १ । ६३ ॥	५१९
६७५	असरूपोप-क्तेः ॥ ५ । १ । १६ ॥	६६२
४४८	असहनञ्विं-भ्यः ॥ २ । ४ । ३८ ॥	९७
३७७	असुको वाकि ॥ २ । १ । ४४ ॥	७९
८२४	अस्पर्धाग्राद् दृशः ॥ ५ । १ । १२६ ॥	६८८
१९०	असोऽसिवू-टाम् ॥ २ । ३ । ४८ ॥	५२३
४७६	अस् च लौल्ये ॥ ४ । ३ । ११५ ॥	६०७
२०९९	अस्तपोमाया-विन् ॥ ७ । २ । ४७ ॥	४२२
२६७	अस्तिब्रुवोर्भूवचावशिति ॥ ४ । ४ । १ ॥	५४३
२६५	अस्तेः सि-ति ॥ ४ । ३ । ७३ ॥	५४२
९७	अस्त्रीशूद्रे-वा ॥ ७ । ४ । १०१ ॥	१८
६९१	अस्थूलाच्च नसः ॥ ७ । ३ । १६१ ॥	१५५
१६७	अस्पष्टाव-वा ॥ १ । ३ । २५ ॥	३१
२२२७	अस्मिन् ॥ ७ । ३ । २ ॥	४४७
४२५	अस्य ङ्यां लुक् ॥ २ । ४ । ८६ ॥	९२
९०	अस्यादेराः परोक्षायाम् ॥ ४ । १ । ६८ ॥	४९४
४१९	अस्याऽयत्त-नाम् ॥ २ । ४ । १११ ॥	९१
३१०८	अस्वयंभुवोऽव् ॥ ७ । ४ । ७० ॥	२४७
८१४	अस्वस्थगुणैः ॥ ३ । १ । ८७ ॥	१७८
७६७	अहन्पञ्चमस्य-ति ॥ ४ । १ । १०७ ॥	६७९
१३५३	अहरादिभ्योऽञ् ॥ ६ । २ । ८७ ॥	२८२
२१४१	अहीयरुहो-ने ॥ ७ । २ । ८८ ॥	४२९
१६९	अह्नः ॥ २ । १ । ७४ ॥	३१
८६९	अह्नः ॥ ७ । ३ । ११६ ॥	१९३
१९३४	अह्ना ग-नञ् ॥ ७ । १ । ८५ ॥	३९१

आ

२५६	आ अम्शसोऽता ॥ १ । ४ । ७५ ॥	४८
४६३	आः खनिलविजनः ॥ ४ । २ । ६० ॥	६०४
१७७७	आकालिक-न्ते ॥ ६ । ४ । १२८ ॥	३५७
५१४	आख्यातर्युपयोगे ॥ २ । २ । ७३ ॥	१२९
४३९	आगुणावन्यादेः ॥ ४ । १ । ४८ ॥	५९८
१३६५	आग्रहायण्यश्व-कण् ॥ ६ । २ । ९९ ॥	२८३
२७५	आङः ॥ ४ । ४ । १२० ॥	५४४
९८०	आङः क्रीडमुषः ॥ ५ । २ । ५१ ॥	७२४
७९४	आङः शीले ॥ ५ । १ । ९६ ॥	६८४
७७२	आङ्रूपे ॥ ३ । १ । ४६ ॥	१६९
५६१	आङावधौ ॥ २ । २ । ७० ॥	१२८
५२७	आङो ज्योतिरुद्गमे ॥ ३ । ३ । ५२ ॥	६२१
९०१	आङोऽन्धूधसोः ॥ ४ । १ । ९३ ॥	७०५
५६१	आङो यमहनः-च ॥ ३ । ३ । ८६ ॥	६२८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
७१२	आङो यि ॥ ४ । ४ । १०४ ॥	६६९
१०६५	आङो युद्धे ॥ ५ । ३ । ४३ ॥	८७१
१०७१	आङो रुग्लोः ॥ ५ । ३ । ४९ ॥	८७२
२९२	आ च हौ ॥ ४ । २ । १०१ ॥	५४९
४०३	आत् ॥ २ । ४ । १८ ॥	८८
५८७	आत ऐः कृञ्जौ ॥ ४ । ३ । ५३ ॥	६३५
१२९	आतामातेआथा-दिः ॥ ४ । २ । १२१ ॥	५०३
६६७	आ तुमोऽत्या-त् ॥ ५ । १ । १ ॥	६६०
७७४	आतो डोऽह्वावामः ॥ ५ । १ । ७६ ॥	६८१
५५	आतो णव औः ॥ ४ । २ । १२० ॥	४८७
१३६९	आतो नेन्द्र-स्य ॥ ७ । ४ । २९ ॥	२८४
९४९	आत्मनः पूरणे ॥ ३ । २ । १४ ॥	२११
११४०	आत्रेयादू भारद्वाजे ॥ ६ । १ । ५२ ॥	२२६
९६	आत्संध्यक्षरस्य ॥ ४ । २ । १ ॥	४९५
१५९४	अथर्वणिका-च ॥ ६ । ३ । १६७ ॥	३२४
८९७	आदितः ॥ ४ । ४ । ७१ ॥	७:४
१३८०	आदेश्छन्दसः प्रगाथे ॥ ६ । २ । ११२ ॥	२८६
११	आद्यद्वितीय-षाः ॥ १ । १ । १३ ॥	२
१११३	आद्यात् ॥ ६ । १ । २९ ॥	२४१
२१३७	आद्यादिभ्यः ॥ ७ । २ । ८४ ॥	४२८
२४६-२	आद्योऽश एकस्वरः ॥ ४ । १ । २ ॥	५३९
९११	आ द्वंद्वे ॥ ३ । २ । ३९ ॥	२०२
२३३	आ द्वेरः ॥ २ । १ । ४१ ॥	४३
४७३	आधाराच्चोप-रे ॥ ३ । ४ । २४ ॥	६०६
८४५	आधारात् ॥ ५ । १ । १३७ ॥	६९१
१२१३	आधारात् ॥ ५ । ४ । ६८ ॥	८९६
२३०६	आधिक्यानुपूर्व्ये ॥ ७ । ४ । ७५ ॥	४६८
११६१	आनायो जालम् ॥ ५ । ३ । १३६ ॥	८८५
१२३३	आनुलोम्येऽन्वचा ॥ ५ । ४ । ८८ ॥	९०१
२१८४	आपत्यस्य क्यच्व्योः ॥ २ । ४ । ९१ ॥	४३९
२५९	आपो ङितां-याम् ॥ १ । ४ । १७ ॥	४९
१९४४	आप्रपदम् ॥ ७ । १ । ९५ ॥	३९२
२३१६	आबाधे ॥ ७ । ४ । ८५ ॥	४७१
१६४२	आभिजनात् ॥ ६ । ३ । २१४ ॥	३३४
३२१	आम आकम् ॥ २ । १ । २० ॥	६४
१०५	आमः कृगः ॥ ३ । ३ । ७५ ॥	४९७
१७६	आमन्ताल्वाय्येत्नावय् ॥ ४ । ३ । ८५ ॥	५१९
४९५	आमन्त्ये ॥ २ । २ । ३२ ॥	१०८
२१००	आमयाद्दीर्घश्च ॥ ७ । २ । ४८ ॥	४२२
२४४	आमो नाम् वा ॥ १ । ४ । ३१ ॥	४६
१५७५	आयस्थानात् ॥ ६ । ३ । १५३ ॥	३२१
२०४८	आयात् ॥ ७ । २ । २ ॥	४१३
१६६५	आयुधादिभ्यो-ढेः ॥ ५ । १ । ९४ ॥	३३७
१६६५	आयुधादीयश्च ॥ ६ । ४ । १८ ॥	३३७
६७८	आरम्भे ॥ ५ । १ । १० ॥	७००
५६९	आरादर्थैः ॥ २ । २ । ७८ ॥	१३०

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२५४	आ रायो व्यञ्जने ॥ २ । १ । ५ ॥	४८
२४	आशिषि तु-ङ् ॥ ४ । २ । ११९ ॥	४८०
५१८	आशिषि नाथः ॥ ३ । ३ । ३६ ॥	६१९
१६७	आशिषि हनः ॥ ५ । १ । ८० ॥	६८१
२३१	आशिषीणः ॥ ४ । ३ । १०७ ॥	५३५
७६५	आशिष्यकन् ॥ ५ । १ । ७० ॥	६७९
७६९	आशिष्याशीःपञ्चम्यौ ॥ ५ । ४ । ३८ ॥	६७१
४१	आशीः क्यात्-सोमहि ॥ ३ । ३ । १३ ॥	२३२
१५३८	आश्वयुज्या अकञ् ॥ ६ । ३ । ११९ ॥	३१४
२८५	आसन्नः ॥ ७ । ४ । १२० ॥	५
६२४	आसन्नादूरा-र्थे ॥ ३ । १ । २० ॥	१४३
९४९	आसीनः ॥ ४ । ४ । ११५ ॥	३१७
६९१	आसुयु-मः ॥ ५ । १ । २० ॥	६६५
१५५०	आस्तेयम् ॥ ६ । ३ । १३१ ॥	३१६
११२१	आस्यटिव्रज्यजः क्यप् ॥ ५ । ३ । ९७ ॥	८७८
१०६६	आह्वावो निपानम् ॥ ५ । ३ । ४४ ॥	८७१
६४१	आहिताग्न्यादिषु ॥ ३ । १ । १५३ ॥	१४७
२१७५	आहि दूरे ॥ ७ । २ । १२० ॥	४४६

इ

१६४८	इकण् ॥ ६ । ४ । १ ॥	३३५
१६८६-२	इकण्यथर्वणः ॥ ७ । ४ । ४९ ॥	२८७
११६१	इकिश्तिव् स्वरूपार्थे ॥ ५ । ३ । १३८ ॥	८८६
२२६	इको वा ॥ ४ । ३ । १६ ॥	५३४
७	इङितः कर्त्तरि ॥ ३ । ३ । २२ ॥	४७६
९७३	इङितो व्यञ्जना-तू ॥ ५ । २ । ४४ ॥	७२२
१०४१	इङोऽपादाने-ङ्रा ॥ ५ । ३ । १९ ॥	८६७
४१५	इच्चापुंसो-रे ॥ २ । ४ । १०७ ॥	९०
६५७	इच्छार्थे कर्मणः सप्तमी ॥ ५ । ४ । ८९ ॥	६५६
६५४	इच्छार्थे सप्तमीपञ्चम्यौ ॥ ५ । ४ । २७ ॥	६५५
७२०	इच्यस्वरे दी-च ॥ ३ । २ । ७२ ॥	१५९
७१९	इच् युद्धे ॥ ७ । ३ । ७४ ॥	१५९
४८२	इञ इतः ॥ २ । ४ । ७१ ॥	१०४
१२२०	इञः ॥ ७ । ४ । ११ ॥	२५८
६३	इट ईति ॥ ४ । ३ । ७१ ॥	४८९
३२५	इट् सिजाशिषो-ने ॥ ४ । ४ । ३६ ॥	५२८
५३	इडेत्पुसि-लुक् ॥ ४ । ३ । ९४ ॥	४८७
२३०	इणः ॥ २ । १ । ५१ ॥	८३५
२२८	इणिकोर्गाः ॥ ४ । ४ । २३ ॥	५३५
१०९७	इणोऽध्रेषे ॥ ५ । ३ । ७५ ॥	८७४
७४	इतावतो लुक् ॥ ७ । २ । १४६ ॥	१३
४४२	इतोऽक्त्यर्थात् ॥ २ । ४ । ३२ ॥	९६
२१४३	इतोऽतः कुतः ॥ ७ । २ । ९० ॥	४३०
११६५	इतोऽनित्रः ॥ ६ । १ । ७२ ॥	२५०
१०८४	इदंकिमीत्कीः ॥ ३ । २ । १५३ ॥	२३६
१९९७	इदंकिमो-स्य ॥ ७ । १ । १४८ ॥	४०२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३५६	इदमः ॥ २ । १ । ३४ ॥	७४
३६०	इदमदसोऽक्येव ॥ १ । ४ । ३ ॥	७५
२१४	इदुतोऽस्त्रे-त् ॥ १ । ४ । २१ ॥	४०
७०१	इनः कच् ॥ ७ । ३ । १७० ॥	१५६
३४६	इनङीस्वरे लुक् ॥ १ । ४ । ७९ ॥	७२
२०२३	इन्द्रियम् ॥ ७ । १ । १७४ ॥	४०८
८१	इन्द्रे ॥ १ । २ । ३० ॥	१४
५६	इन्धसंयोगा-ङत् ॥ ४ । ३ । २१ ॥	४८७
३३९	इनहन्-स्योः ॥ १ । ४ । ८७ ॥	७१
८२५	इरंमदः ॥ ५ । १ । १२७ ॥	६८९
२४०	इर्दरिद्रः ॥ ४ । २ । ९८ ॥	५३७
९१५	इर्वृद्धिमत्यविष्णौ ॥ ३ । २ । ४३ ॥	२०३
२०८८	इलश्च देशे ॥ ७ । २ । ३६ ॥	४२१
५४	इवर्णादे-लम् ॥ १ । २ । २१ ॥	१०
१६४	इश्च स्थादेः ॥ ४ । ३ । ४१ ॥	५१४
४२४	इवृध-सनः ॥ ४ । ४ । ४७ ॥	५९५
११३६	इषोऽनिच्छायाम् ॥ ५ । ३ । ११२ ॥	८८०
२०१७	इष्टादेः ॥ ७ । १ । १६८ ॥	४०७
२४९	इसासः शासोऽङ्व्यञ्जने ॥ ४ । ४ । ११८ ॥	५३९
२१८२	इसुसोर्बहुलम् ॥ ७ । २ । १२८ ॥	४३८
	ई	
९१४	ईः षोमवरुणेऽग्नेः ॥ ३ । २ । ४२ ॥	२०२
८	ईगितः ॥ ३ । ३ । ९५ ॥	४७६
२११	ईडौ वा ॥ २ । १ । १०९ ॥	४०
३७६	ई च गणः ॥ ४ । १ । ६७ ॥	५८२
१४५५	ईतोऽकञ् ॥ ६ । ३ । ४१ ॥	२९९
१०१	ईदूदे-नम् ॥ १ । २ । ३४ ॥	१९
१७६३	ईनञ् च ॥ ६ । ४ । ११४ ॥	३५५
१५४८	ईनयौ चाशब्दे ॥ ६ । ३ । १२९ ॥	३१५
१८८२	ईनेऽध्वात्मनोः ॥ ७ । ४ । ४८ ॥	३७८
१२७९	ईनोऽहः क्रतौ ॥ ६ । २ । २१ ॥	२७१
१८६८	ईयः ॥ ७ । १ । २८ ॥	३७५
११९०	ईयः स्वसुश्च ॥ ६ । १ । ८९ ॥	२५३
१०६३	ईयाकरके ॥ ३ । २ । १२१ ॥	२३२
७११	ईयसोः ॥ ७ । ३ । १७७ ॥	१५७
४५०	ईर्व्यञ्जनेऽपि ॥ ४ । ३ । ९७ ॥	६००
२७४	ईशीड--मोः ॥ ४ । ४ । ८७ ॥	५४४
२१७९	ईश्चावावर्ण-स्य ॥ ४ । ३ । १११ ॥	४३७
७९१	ईषद्गुणवचनैः ॥ ३ । १ । ६४ ॥	१७४
	इ३	
१००	इ३वा ॥ १ । २ । ३३ ॥	१९
	उ	
३६५	उः पदान्तेऽनूत् ॥ २ । १ । ११८ ॥	७६
१५८५	उक्षणो लुक् ॥ ७ । ४ । ५६ ॥	३२३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१०२१	उणादयः ॥ ५ । २ । ९३ ॥	७३१
२३२	उत और्विति व्यञ्जनेऽद्वेः ॥ ४ । ३ । ५९ ॥	५३६
९११	उति शवर्हा-मे ॥ ४ । ३ । २६ ॥	७०८
३६३	उतोऽनङ्चतुरो वः ॥ १ । ४ । ८१ ॥	७५
४८४	उतोऽप्राणिन-ऊङ् ॥ २ । ४ । ७३ ॥	१०४
१३५७	उत्करादेरीयः ॥ ६ । २ । ९१ ॥	२८२
५२६	उत्कृष्टेऽनूपेन ॥ २ । २ । ३९ ॥	११९
१४१७	उत्तरादाहञ् ॥ ६ । ३ । ५ ॥	२९३
१७७०	उत्थापनादेरीयः ॥ ६ । ४ । १२१ ॥	३५६
५४९	उत्पातेन ज्ञाप्ये ॥ २ । २ । ५९ ॥	१२४
१०९९	उत्सादेरञ् ॥ ६ । १ । १९ ॥	२३८
५०८	उत्स्वराद्यु-त्रे ॥ ३ । ३ । २६ ॥	६१७
९५८	उदः पचि-रेः ॥ ५ । २ । २९ ॥	७२०
१०७५	उदः श्रेः ॥ ५ । ३ । ५३ ॥	८७२
११७	उदः स्थास्तम्भः सः ॥ १ । ३ । ४४ ॥	२२
१०४६	उदकस्योदः पेषंधिवास-ने ॥ ३ । २ । १०४ ॥	२२९
१४३७	उदग्ग्रामाद्य-म्नः ॥ ६ । ३ । २५ ॥	२९६
११६०	उदङ्कोऽतोये ॥ ५ । ३ । १३५ ॥	८८५
२९५	उदच उदीच् ॥ २ । १ । १०३ ॥	५८
२०५२	उदन्वानब्धौ च ॥ २ । १ । ९७ ॥	४१४
२०३०	उदरे त्विकणाद्यूने ॥ ७ । १ । १८१ ॥	४०९
५१३	उदश्वरः साप्यात् ॥ ३ । ३ । ३१ ॥	६१८
१०२	उदितः स्वराञ्नोन्तः ॥ ४ । ४ ९८ ॥	४९७
१२६०	उदितगुरोर्भा-ब्दे ॥ ६ । २ । ५ ॥	२६७
२०४१	उदुत्सोरुन्मनसि ॥ ७ । १ । १९२ ॥	४११
५३७	उदोऽनूर्ध्वैहे ॥ ३ । ३ । ६२ ॥	६२३
१०४०	उद्यमोपरमौ ॥ ४ । ३ । ५७ ॥	८६७
१६२०	उपज्ञाते ॥ ६ । ३ । १९१ ॥	३२९
१९८०	उपत्यकाधित्यके ॥ ७ । १ । १३१ ॥	३९८
१२२०	उपपीडरुध-म्या ॥ ५ । ४ । ७५ ॥	८९७
८२९	उपमानं सामान्यैः ॥ ३ । १ । १०१ ॥	१८३
४८६	उपमानसहितः-रोः ॥ २ । ४ । ७५ ॥	१०५
८३०	उपमेयं व्याघ्रा-क्तौ ॥ ३ । १ । १०२ ॥	१८३
५२	उपसर्गस्यानि-ति ॥ १ । २ । १९ ॥	१०
१७८	उपसर्गस्यायौ ॥ २ । ३ । १०० ॥	५१९
६९२	उपसर्गात् ॥ ७ । ३ । १६२ ॥	१५५
५९४	उपसर्गात् खल्घञोश्च ॥ ४ । ४ । १०७ ॥	६३७
२८४	उपसर्गात् सुग्-त्वे ॥ २ । ३ । ३९ ॥	५४६
९३५	उपसर्गादध्वनः ॥ ७ । ३ । ७९ ॥	२०८
५०६	उपसर्गादस्योहो वा ॥ ३ । ३ । २५ ॥	६१६
११३९	उपसर्गादातः ॥ ५ । ३ । ११० ॥	८८०
७५१	उपसर्गादातो-श्यः ॥ ५ । १ । ५६ ॥	६७७
५०७	उपसर्गादूहो ह्रस्वः ॥ ४ । ३ । १०६ ॥	६१७
११०९	उपसर्गाद्दः किः ॥ ५ । ३ । ८७ ॥	८७६
५१३	उपसर्गाद्दिवः ॥ २ । २ । १७ ॥	११५
९९७-२	उपसर्गादेवृ-शः ॥ ५ । २ । ६९ ॥	७२६

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
७६२	उपाजेऽन्वाजे । ॥ ३ । १ । १२ ॥	१६७
१५५८	उपाज्जानुनीवि-ण ॥ ६ । ३ । १३९ ॥	३१७
५३३	उपात् ॥ ३ । ३ । ५८ ॥	६२२
१२७६	उपात् किरो लवने ॥ ५ । ४ । ७२ ॥	८९७
७१३	उपात् स्तुतौ ॥ ४ । ४ । १०५ ॥	६६९
५५६	उपात्स्थः । ॥ ३ । ३ । ८३ ॥	६२८
१९२	उपाद्भूषासमवाय-रे ॥ ४ । ४ । ९२ ॥	५२४
१७२	उपान्त्यस्यासमा-ङे ॥ ४ । २ । ३५ ॥	५१८
११९	उपान्त्ये ॥ ४ । ३ । ३४ ॥	५०२
५१७	उपान्वध्याङ्वसः ॥ २ । २ । २१ ॥	११६
२२२३	उपायाङ्रस्वश्च ॥ ७ । २ । १७० ॥	४४७
५९७	उपेनाधिकिनि ॥ २ । २ । १०५ ॥	१३६
१५३७	उप्ते ॥ ६ । ३ । ११८ ॥	३१४
२१५२	उभयाद् द्युस् च ॥ ७ । २ । ९९ ॥	४३२
१२९८	उमोर्णाद्वा ॥ ६ । २ । ३७ ॥	२७३
८६७	उरसोऽग्रे ॥ ७ । ३ । ११४ ॥	१९२
१६२५	उरसो याणौ ॥ ६ । ३ । १९६ ॥	३००
१८७०	उवर्णयुगादेर्यः ॥ ७ । १ । ३० ॥	३७६
२७३	उवर्णात् ॥ ४ । ४ । ५८ ॥	५४४
६९०	उवर्णादावश्यके ॥ ५ । १ । १९ ॥	६६५
१४५३	उवर्णादिकण् ॥ ६ । ३ । ३९ ॥	२९९
१५८	उश्नोः ॥ ४ । ३ । २ ॥	५१२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
९१८	उषासोषसः ॥ ३ । २ । ४६ ॥	२०४
६२९	उष्ट्रमुखादयः ॥ ३ । १ । २३ ॥	१४४
१२९७	उष्ट्रादकञ् ॥ ६ । २ । ३६ ॥	२७३
२०३४	उष्णात् ॥ ७ । १ । १८५ ॥	४१०
१४४६	उष्णादिभ्यः कालात् ॥ ६ । ३ । ३३ ॥	२९७

ऊ

१०१७	ऊङः ॥ ३ । २ । ६७ ॥	२२३
१०६	ऊँ चोञ् ॥ १ । २ । ३९ ॥	२०
४६	ऊटा ॥ १ । २ । १३ ॥	८
४६१	ऊढायाम् ॥ २ । ४ । ५१ ॥	१००
११८२	ऊदितो वा ॥ ४ । ४ । ४२ ॥	८९०
४०९	ऊदुषो णौ ॥ ४ । २ । ४० ॥	५९१
४२२	ऊध्नः ॥ २ । ४ । ७ ॥	९२
७९४	ऊनार्थपूर्वादैः ॥ ३ । १ । ६७ ॥	१७४
२१०३	ऊर्जो विन्वन्तः ॥ ७ । २ । ५१ ॥	४२३
२०६९	ऊर्णाहंशुभमो युस् ॥ ७ । २ । १७ ॥	४१७
१२१५	ऊर्ध्वात् पूःशुषः ॥ ५ । ४ । ७० ॥	८९६
८३४	ऊर्ध्वादिभ्यः कर्तुः ॥ ५ । १ । १३६ ॥	६९१
२१६८	ऊर्ध्वाद्विरिष्ठा-स्य ॥ ७ । २ । ११४ ॥	४३५
२३	ऊर्याद्यनु-तिः ॥ ३ । १ । २ ॥	४

ऋ

३५	ऋलति-वा ॥ १ । २ । २ ॥	६

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२९६	ऋः शृदृप्रः ॥ ४ । ४ । २० ॥	५४९
९३२	ऋकपूःपथ्यपोऽत् ॥ ७ । ३ । ७६ ॥	२०७
९२०	ऋकसामर्ग्य-वम् ॥ ७ । ३ । ९७ ॥	२०४
१५६५	ऋगृद्द्विस्वरयागेभ्यः ॥ ६ । ३ । १४४ ॥	३१९
१०३९	ऋचः शसि ॥ ३ । २ । ९७ ॥	२२८
४०९	ऋचि पादः-दे ॥ २ । ४ । १७ ॥	८९
५६७	ऋणाद्धेतोः ॥ २ । २ । ७६ ॥	१३०
४७	ऋणे अ-र् ॥ १ । २ । ७ ॥	७
१५७४	ऋत इकण् ॥ ६ । ३ । १५२ ॥	३२१
८२	ऋतः ॥ ४ । ४ । ७९ ॥	४९३
२५२	ऋतः स्वरे वा ॥ ४ । ३ । ४३ ॥	५४०
६७२	ऋतां विद्यायो-न्धे-॥ ३ । २ । ३७ ॥	२१५
४०१	ऋते तृ-से ॥ १ । २ । ८ ॥	७
६०६	ऋत द्वितीया च ॥ २ । २ । ११४ ॥	१३८
१२३	ऋतेर्डीयः ॥ ३ । ४ । ३ ॥	५०३
२५१	ऋतो डुर् ॥ १ । ४ । ३७ ॥	४७
८०	ऋतोऽत् ॥ ४ । १ ३८ ॥	४९३
२६४	ऋतोरः-नि ॥ २ । १ । २ ॥	५०
१५७३	ऋतो र-ते ॥ १ । २ । २६ ॥	३२०
२१८५	ऋतो रीः ॥ ४ । ३ । १०९	४३९
३७	ऋतो वा तौ च ॥ १ । २ । ४ ॥	७
११७६	ऋतृतृषमृषकृश-सेट् ॥ ४ । ३ । २४ ॥	८८९
४२	ऋत्यारु-स्य ॥ १ । २ । ९ ॥	९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१७७४	ऋत्वादिभ्योऽण् ॥ ६ । ४ । ९२५ ॥	३५७
३००	ऋत्विग्दिश-गः ॥ २ । १ । ६९ ॥	५९
३०१	ऋदुदितः ॥ १ । ४ । ७० ॥	५९
१०१३	ऋदुदित्तरतम-श्च ॥ ३ । २ । ६३ ॥	२२२
७२५	ऋदुपान्त्याद-चः ॥ ५ । १ । ४१ ॥	६७२
२२४	ऋदुशनस्पु-र्डाः ॥ १ । ४ । ८४ ॥	४२
३६८	ऋदवर्णस्य ॥ ४ । २ । ३७ ॥	५७६
७२६	ऋदनदीवंश्यस्य ॥ ३ । २ । ५ ॥	१६०
४२५	ऋध ईर्त् ॥ ४ । १ । १७ ॥	५९५
१६९८	ऋन्नरादेरण् ॥ ६ । ४ । ५१ ॥	३४३
७०२	ऋन्नित्यदितः ॥ ७ । ३ । १७१ ॥	१५६
१०६२-३	ऋफिडादीनां डश्च लः ॥ २ । ३ । १०४ ॥	८७१
४५५	ऋमतां रीः ॥ ४ । १ । ५५ ॥	६०१
२०१	ऋर लृलं-षु ॥ २ । ३ । ९९ ॥	५२७
८९	ऋवर्णदृशोऽङि ॥ ४ । ३ । ७ ॥	४९४
६७७	ऋवर्णव्यञ्ज-ध्यण् ॥ ५ । १ । १७ ॥	६६२
३२६	ऋवर्णश्र्यूर्णुगः कितः ॥ ४ । ४ । ५७ ॥	५५९
१६२	ऋवर्णात् ॥ ४ । ३ । ३६ ॥	५१४
१२७३	ऋवर्णोवर्ण-लुक् ॥ ७ । ४ । ७१ ॥	२७०
२२७१	ऋवर्णोवर्णा-च ॥ ७ । ३ । ३७ ॥	४५९
९१	ऋवृव्येद इद् ॥ ४ । ४ । ८० ॥	४९४
१३६०	ऋश्यादेः कः ॥ ६ । २ । ९४ ॥	२८३
१८८८	ऋषभोपा-ज्यः ॥ ७ । १ । ४६ ॥	३७९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१०१४	ऋषिनाम्नोः करणे ॥ ५ । २ । ८६ ॥	७२९
११५०	ऋषिवृष्ण्यन्धककुरुभ्यः ॥ ६ । १ । ६१ ॥	२४७
१५६६	ऋषेरध्याये ॥ ६ । ३ । १४५ ॥	३१९
१०२२	ऋषौ विश्वस्य मित्रे ॥ ३ । २ । ७९ ॥	२२४
४३९	ऋसिपूङ्अशौ-च्छः ॥ ४ । ४ । ४८ ॥	५९६
८९१	ऋहीग्राधा-र्वा ॥ ४ । २ । ७६ ॥	७०३
	ऋ	
९४	ऋतां क्ङितीर् ॥ ४ । ४ । ११६ ॥	४९५
१०९	ऋदिच्छिवस्तम्भू-वा ॥ ३ । ४ । ६५ ॥	४९८
८८२	ऋल्वादेरे-प्रः ॥ ४ । २ । ६८ ॥	७०९
३८	ऋस्तयोः ॥ १ । २ । ५ ॥	७
	ऌ	
३६	ऌत-वा ॥ १ । २ । ३ ॥	६
४४	ऌत्याल् वा ॥ १ । २ । ११ ॥	८
१३७	ऌदिद्युतादि-स्मै ॥ ३ । ४ । ६४ ॥	५०६
	ॡ	
६	ॡदन्ताः-नाः ॥ १ । १ । ७ ॥	२
	ए	
७	ए ऐ ओ औ-रम् ॥ १ । १ । ८ ॥	२
३४४	एः ॥ १ । ४ । ७७ ॥	७२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
४	एकद्वित्रि-तः ॥ १ । १ । ५ ॥	१
३	एकद्विबहुषु ॥ ३ । ३ । १८ ॥	४७५
५९६	एकधातौ कर्म-ये ॥ ३ । ४ । ८६ ॥	६३८
१९६७	एकशालाया इकः ॥ ७ । १ । १२० ॥	३९७
१३०९	एकस्वरात् ॥ ६ । २ । ४८ ॥	२७५
५९	एकस्वरादनु-तः ॥ ४ । ४ । ५६ ॥	४८८
१७६७	एकागाराच्चौरे ॥ ६ । ४ । ११८ ॥	३५५
२१६४	एकात्-स्य ॥ ७ । २ । १११ ॥	४३४
१०३३	एकादश षोडश-ड्ढा ॥ ३ । २ । ९१ ॥	२२६
२२६१	एकादाकि-ये ॥ ७ । ३ । २७ ॥	४५६
२११०	एकादेः कर्मधारयात् ॥ ७ । २ । ५८ ॥	४२४
६२८	एकार्थं चानेकं च ॥ ३ । १ । २२ ॥	१४४
१६५५-२	एकोपसर्गस्य च घे ॥ ४ । २ । ३४ ॥	८८४
८१६	एजेः ॥ ५ । १ । ११८ ॥	६८७
१२९९	एण्या एयञ् ॥ ६ । २ । ३८ ॥	२७३
१७५	एतदश्च-से ॥ १ । ३ । ४६ ॥	३२
१२	एताः शितः ॥ ३ । ३ । १० ॥	६८७
९८५	एत्यकः ॥ २ । ३ । २६ ॥	२१७
२२७	एत्यस्तेर्वृद्धिः ॥ ४ । ४ । ३० ॥	४७७
२६०	एदापः ॥ १ । ४ । ४२ ॥	४९
६८	एदैतोऽयाय् ॥ १ । २ । २३ ॥	१२
७८	एद्योतः-लुक् ॥ १ । २ । २७ ॥	१३
१४५०	एद्वोदेश एवेयादौ ॥ ६ । १ । ९ ॥	२९८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२१८	पदोद्भ्यां-रः ॥ १ । ४ । ३६ ॥	४१
१८८	पद्वहुस्भोसि ॥ १ । ४ । ४ । २२ ॥	३४
११६८	पयस्य ॥ ७ । ४ । २२ ॥	२५०
१२१७	पयेऽम्नायी ॥ ३ । २ । ५२ ॥	२५७
१२२६	पये जिह्वाशिनः ॥ ७ । ४ । ४७ ॥	२५९
२९०	पवामीर्व्यञ्जनेऽदः ॥ ४ । २ । ९७ ॥	५४८
६३४	पश्यत्यवधौ-गे ॥ ५ । ४ । ६ ॥	६४९
५८५	पश्यदृणेनः ॥ २ । २ । ९४ ॥	१३३

ऐ

६१९	ऐकार्थ्यं ॥ ३ । २ । ८ ॥	१४३
४५	ऐदौत्-रैः ॥ १ । २ । १२ ॥	८
२१५३	ऐषमःपरु-र्वै ॥ ७ । २ । १०० ॥	४३२
१४३१	ऐषमोह्यःश्वसो वा ॥ ६ । ३ । १९ ॥	२९५

ओ

१६७४	ओजःसहो-ते ॥ ६ । ४ । २७ ॥	३३९
९४७	ओजोऽःस-ष्टः ॥ ३ । २ । १२ ॥	२११
४८०	ओजोऽप्सरसः ॥ ३ । ४ । २८ ॥	६०८
२५५	ओत औः ॥ १ । ४ । ७४ ॥	४८
३०२	ओतः श्ये ॥ ४ । २ । १०३ ॥	५५१
१४	ओदन्तः ॥ १ । २ । ३७ ॥	२०
६९	ओदौतोऽवाव् ॥ १ । २ । २४ ॥	१२
९२	ओमः प्रारम्भे ॥ ७ । ४ । ९६ ॥	१६
५१	ओमाङि ॥ १ । २ । १८ ॥	१०
३७३	ओर्जान्तिस्था-र्णे ॥ ४ । १ । ६० ॥	५७८
२९५	ओष्ठ्यादुर् ॥ ४ । ४ । ११७ ॥	५४८

औ

२५७	औता ॥ १ । ४ । २० ॥	४९
३	औदन्ताः स्वराः ॥ १ । १ । ४ ॥	१
२७०	औरीः ॥ १ । ४ । ५६ ॥	५३

क

२०७०	कंशंभ्यां-भम् ॥ ७ । २ । १८ ॥	४१८
२७८७	कंसार्धात् ॥ ६ । ४ । १३५ ॥	३५९
१३०२	कंसीयाड्यः ॥ ६ । २ । ४१ ॥	२७४
६९८	ककुदस्या-म् ॥ ७ । ३ । १६७ ॥	१५६
१४७५	कखोपान्त्य-दोः ॥ ६ । ३ । ५९ ॥	३०३
४०१	कगेवनूजनै-रञ्जः ॥ ४ । २ । २५ ॥	५९०
७५	कङश्चञ् ॥ ४ । १ । ४६ ॥	४९२
१४६६	कच्छाग्निवक्त्र-दात् ॥ ६ । ३ । ५० ॥	३०१
१४७१	कच्छादेर्नृनृस्थे ॥ ६ । ३ । ५५ ॥	३०२
२०९१	कच्छ्वा ड्वरः ॥ ७ । २ । ३९ ॥	४२१
१९७३	कटः ॥ ७ । १ । १२४ ॥	३९७
१४७४	कटपूर्वात्प्राचः ॥ ६ । ३ । ५८ ॥	३०३
१६११	कठादिभ्यो वेदे लुप् ॥ ६ । ३ । १८३ ॥	३२७
८५०	कडारादयः कर्मधारये ॥ ३ । १ । १५८ ॥	१८९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
७५६	कर्णेमनस्तृप्तौ ॥ ३ । १ । ६ ॥	१६७
५०२	कण्ड्वादेस्तृतीयः ॥ ४ । १ । ९ ॥	६१५
८३९	कतरकतमौ-ऽग्ने ॥ ३ । १ । १०९ ॥	१८५
१०६९	कत्रिः ॥ ३ । २ । १३३ ॥	२३३
१४२२	कड्यादेश्चैयकञ् ॥ ६ । ३ । १० ॥	२९३
२१५६	कथमित्थम् ॥ ७ । २ । १०३ ॥	४३३
६४०	कथमि सप्तमी च वा ॥ ५ । ४ । १३ ॥	६५१
१८६१	कथादेरिकण् ॥ ७ । १ । २१ ॥	३७४
६२३	कदाकर्ह्योर्नेवा ॥ ५ । ३ । ८ ॥	६४६
१४३२	कन्थाया इकण् ॥ ६ । ३ । २० ॥	२९५
११५१	कन्याभ्रिवेण्याः-च ॥ ६ । १ । ६२ ॥	२४८
१९१३	कपिज्ञातेरेयण् ॥ ७ । १ । ६५ ॥	३८६
११३२	कपिबोधा-से ॥ ६ । १ । ४४ ॥	२४५
९८९	कपेर्गोत्रे ॥ २ । ३ । २९ ॥	२१७
४५२	कबरमणि-देः ॥ २ । ४ । ४२ ॥	९९
१७०	कमेर्णिङ् ॥ ३ । ४ । २ ॥	५१७
१८७४	कम्बलान्नास्नि ॥ ७ । १ । ३४ ॥	३७७
६०४	करणक्रियया क्वचित् ॥ ३ । ४ । ९४ ॥	६४२
५१५	करणं च ॥ २ । २ । १९ ॥	११५
८६०	करणाद्यजो भूते ॥ ५ । १ । १५८ ॥	६९६
११५४	करणाधारे ॥ ५ । ३ । १२९ ॥	८८४
१२०९	करणेभ्यः ॥ ५ । ४ । ६४ ॥	८९५
१९७१	कर्कलोहि-च ॥ ७ । १ । १२२ ॥	३९७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१५६०	कर्णललाटात्कल् ॥ ६ । ३ । १४१ ॥	३१८
१३५६	कर्णादेरायनिञ् ॥ ६ । २ । ९० ॥	२८२
१९३७	कर्णादेर्मूले जाहः ॥ ७ । १ । ८८ ॥	३९१
५७७	कर्तरि ॥ २ । २ । ८६ ॥	१३२
६६९	कर्तरि ॥ ५ । १ । ३ ॥	६६१
१३	कर्तर्यनद्भ्यः शव् ॥ ३ । ४ । ७१ ॥	४७८
४७७	कर्तुः क्विप्-ङित् ॥ ३ । ४ । २५ ॥	६०७
८१५	कर्तुः खश् ॥ ५ । १ । ११७ ॥	६८७
१२१४	कर्तुर्जीवपुरुषा-ह्नः ॥ ५ । ४ । ६९ ॥	८९६
८५५	कर्तुर्णिन् ॥ ५ । १ । १५३ ॥	६९५
४९८	कर्तुर्व्याप्यं कर्म ॥ २ । २ । ३ ॥	१०८
५२१	कर्तृस्थामूर्ताप्यात् ॥ ३ । ३ । ४० ॥	६२०
८१०	कर्मजा तृचा च ॥ ३ । १ । ८३ ॥	१७७
२२२०	कर्मणः संदिष्टे ॥ ७ । २ । १६७ ॥	४४६
४९९	कर्मणि ॥ २ । २ । ४० ॥	१०९
५७४	कर्मणि कृतः ॥ २ । २ । ८३ ॥	१३१
७७०	कर्मणोऽण् ॥ ५ । १ । ७२ ॥	६८०
१०३१	कर्मणोऽण् ॥ ५ । ३ । १४ ॥	८६५
८६७	कर्मण्यग्न्यर्थे ॥ ५ । १ । १६५ ॥	६९८
१७५०	कर्मवेषाद्यः ॥ ६ । ४ । १०३ ॥	३५२
५३९	कर्माभिप्रेयः संप्रदानम् ॥ २ । २ । २५ ॥	१२२
१६०९	कलापिकुथु-णः ॥ ७ । ४ । ६२ ॥	३२७
१५३३	कलाप्यश्वत्थ-कः ॥ ६ । ३ । ११४ ॥	३१३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१०९७	कल्यग्नेरेयण् ॥ ६ । १ । १७ ॥	२३८
११७२	कल्याण्यादेरिनञ्वान्तस्य ॥ ६ । १ । ७७ ॥	२५०
१२७१	कवचिह-कण् ॥ ६ । २ । १४ ॥	२६९
२६८	कवर्गैकस्वरवति ॥ २ । ३ । ७६ ॥	५३
९३२	कषः कृच्छ्रगहने ॥ ४ । ४ । ६७ ॥	७१२
१०२६	कषोऽनिटः ॥ ५ । ३ । ३ ॥	८६४
४८४	काष्टकक्षकृच्छ्र-णे ॥ ३ । ४ । ३१ ॥	६०९
१७८१	कसमा-र्धः ॥ १ । १ । ४१ ॥	३५८
१३७५	कसोमात् ट्यण् ॥ ६ । २ । १०७ ॥	२८५
१९६७	काकतालीयादयः ॥ ७ । १ ११७ ॥	३९६
१०७३	काकवौ वोष्णे ॥ ३ । २ । १३७ ॥	२३४
८१७	काकाद्यैः क्षेपे ॥ ३ । १ । ९० ॥	१७९
१०७०	काक्षपथोः ॥ ३ । २ । १३४ ॥	२३३
२०९०	काण्डाण्डभाण्डादीरः ॥ ७ । २ । ३८ ॥	४२१
४३४	काण्डात्प्रमा-त्रे ॥ २ । ४ । २४ ॥	९४
८	कादिर्व्यञ्जनम् ॥ १ । १ । १० ॥	२
६५३	कामोक्तावकच्चिति ॥ ५ । ४ । २६ ॥	६५५
७९५	कारकं कृता ॥ ३ । १ । ६८ ॥	१७४
११५२	कारणम् ॥ ५ । ३ । १२७ ॥	८८४
७५३	कारिका स्थित्यादौ ॥ ३ । १ । ३ ॥	१६६
१७८५	कार्षापणा-वा ॥ ६ । ४ । १३३ ॥	३५९
७८७	कालः ॥ ३ । १ । ६० ॥	१७३
६६०	कालवेलासमये-रे ॥ ५ । ४ । ३३ ॥	६५६
६३५	कालस्यानहोरात्राणाम् ॥ ५ । ४ । ७ ॥	६५०
२०४२	कालहेतु-गे ॥ ७ । १ । १९३ ॥	४११
२०७५	कालाजटाद्या-पे ॥ ७ । २ । २३ ॥	४१९
२२५३	कालात् ॥ ७ । ३ । १९ ॥	४५५
९५९	कालात्तनतरतमकाले ॥ ३ । २ । २४ ॥	२१३
१७५१	कालात्परि-रे ॥ ६ । ४ । १०४ ॥	३५२
१५३२	कालाद्देय ऋणे ॥ ६ । ३ । ११३ ॥	३१३
१३७९	कालाद्भववत् ॥ ६ । २ । १११ ॥	२८६
१७७५	कालाद्यः ॥ ६ । ४ । १२६ ॥	३५७
५१९	कालाध्वभा-णाम् ॥ २ । २ । २३ ॥	११६
१७४५	काले कार्ये-वत् ॥ ६ । ४ । ९८ ॥	३५१
१२२७	कालेन तृप्य-रे ॥ ५ । ४ । ८२ ॥	८९९
५३५	काले भान्नवाधारे ॥ २ । २ । ४८ ॥	१२१
७८४	कालो द्विगौ च मेयैः ॥ ४ । १ । ५७ ॥	१७२
१३४८	काशादेरिलः ॥ ६ । २ । ८२ ॥	२८१
१६१६	काश्यपकौ-च्च ॥ ६ । ३ । १८८ ॥	३२८
१४४८	काश्यादेः ॥ ६ । ३ । ३५ ॥	२९७
२२८४	कासूगोणी-रट् ॥ ७ । ३ । ५० ॥	४६१
२१४८	किंयत्तत्सर्वै-दा ॥ ७ । २ । ९५ ॥	४३१
६२४	किंवृत्ते लिप्सायाम् ॥ ५ । ३ । ९ ॥	६४६
६४१	किंवृत्ते सप्तमी-न्त्यौ ॥ ५ । ४ । १४ ॥	६५१
७९९	किंयत्तद्वहोरः ॥ ५ । १ । १०१ ॥	६८४
६४३	किंकिलास्त्यर्थ-न्ती ॥ ५ । ४ । १६ ॥	६५२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
८४०	किं क्षेपे ॥ ३ । १ । ११० ॥	१८६
११७	कितः संशयप्रतीकारे ॥ ३ । ४ । ६ ॥	५०२
२२३४	किंत्याद्ये-स्याम् ॥ ७ । ३ । ८ ॥	४५०
३५३	किमः क-च ॥ २ । १ । ४० ॥	७३
२१४२	किमद्यादि-त्तस् ॥ ७ । २ । ८९ ॥	४२९
१०९५	किरो धान्ये ॥ ५ । ३ । ७३ ॥	८७४
३३५	किरो लवने ॥ ४ । ४ । ९३ ॥	५६२
१७०२	किशरादेरिकट् ॥ ६ । ४ । ५५ ॥	३४४
६७८	कुंभपद्यादिः ॥ ७ । ३ । १४९ ॥	१५३
७८८	कुक्ष्यात्मोदरा-खिः ॥ ५ । १ । ९० ॥	६८३
११३५	कुञ्जादेर्ञ्यन्यः ॥ ६ । १ । ४७ ॥	२४५
३४०	कुटादेर्ङिद्वदञ्णित् ॥ ४ । ३ । १७ ॥	५६५
१६७३	कुटिलिकाया अण् ॥ ६ । ४ । २६ ॥	३३८
२२८१	कुटीशुण्डाद्रः ॥ ७ । ३ । ४७ ॥	४६१
१४२३	कुण्ड्यादिभ्यो यलुक् च ॥ ६ । ३ । ११ ॥	२९४
२२८३	कुत्वा ङपः ॥ ७ । ३ । ४९ ॥	४६१
२२६७	कुत्सितालपाज्ञाते ॥ ७ । ३ । ३३ ॥	४५७
१२३५	कुन्त्यवन्तेः स्त्रियाम् ॥ ६ । १ । १२१ ॥	२६१
७२३	कुप्यभिद्यो-म्नि ॥ ५ । १ । ३९ ॥	६७१
८६१	कुमहद्भ्यां वा ॥ ७ । ३ । १०८ ॥	१९१
८४७	कुमारः श्रमणादिना ॥ ३ । १ । ११५ ॥	१८७
७८०	कुमारशीर्षोण्णिन् ॥ ५ । १ । ८२ ॥	६८२
२२५०	कुमारीक्रीड-सौः ॥ ७ । ३ । १६ ॥	४५४

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१३६२	कुमुदादेरिकः ॥ ६ । २ । ९६ ॥	२८३
१८७	कुरुक्षुरः ॥ २ । १ । ६६ ॥	५२२
१४६९	कुरुयुगंधराद्वा ॥ ६ । ३ । ५३ ॥	३०१
१२३६	कुरोर्वा ॥ ६ । १ । १२२ ॥	२६१
१२०२	कुर्वादेर्ण्यः ॥ ६ । १ । १०० ॥	२५४
१४२४	कुलकुक्षि-रे ॥ ६ । ३ । १२ ॥	२९४
११७५	कुलटाया वा ॥ ६ । १ । ७८ ॥	२५१
१६५१	कुलत्थकोपान्त्यादण् ॥ ६ । ४ । ४ ॥	३३५
४९०	कुलाख्यानाम् ॥ २ । ४ । ७९ ॥	१०६
१९३५	कुलाञ्जलपे ॥ ७ । १ । ८६ ॥	३९१
११९८	कुलादीनः ॥ ६ । १ । ९६ ॥	२५४
१६२३	कुलालादेरकञ् ॥ ६ । ३ । १९४ ॥	३३०
१८१९	कुलिजाद्वा लुप् च ॥ ६ । ४ । १६५ ॥	३६६
२०४४	कुल्मासादण् ॥ ७ । १ । १९५ ॥	४११
५८९	कुशलायु-याम् ॥ २ । २ । ९७ ॥	१३४
१५१२	कुशले ॥ ६ । ३ । ९५ ॥	३०९
१९६५	कुशाग्रादीयः ॥ ७ । १ । ११६ ॥	३९६
६०७	कुषिरञ्जेर्व्याप्ये-च ॥ ३ । ४ । ७४ ॥	६४२
१६८२	कुसीदादिकट् ॥ ६ । ४ । ३५ ॥	३४०
८२०	कूलादुद्रुजोद्ग्रहः ॥ ५ । १ । १२२ ॥	६८८
८०८	कूलाभ्रकरी-षः ॥ ५ । १ । ११० ॥	६८६
८२७	कृगः खनट्-णे ॥ ५ । १ । १२९ ॥	६८९
५०८	कृगः प्रतियत्ने ॥ २ । २ । १२ ॥	११४

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
११२४	कृगः श च वा ॥ ५ । ३ । १०० ॥	८७८
८२७	कृगः सुपुण्य-त् ॥ ५ । १ । १६२ ॥	६८९
७६०	कृगो नवा ॥ ३ । १ । १० ॥	१६७
१८६	कृगो यि च ॥ ४ । २ । ८८ ॥	५२२
१२२९	कृगोऽव्ययेना-मौ ॥ ५ । ४ । ८४ ॥	९००
१२०६	कृग्रहो-वात् ॥ ५ । ४ । ६१ ॥	८९५
१८४	कृग्तनादेरुः ॥ ३ । ४ । ८३ ॥	५२२
३०३	कृतचृततृत-र्वा ॥ ४ । ४ । ५० ॥	५५१
५३४	कृताद्यैः ॥ २ । २ । ४७ ॥	१२१
६१४	कृतास्मरणा-क्षा ॥ ५ । २ । ११ ॥	६४४
८०४	कृति ॥ ३ । १ । ७७ ॥	१७६
१६२१	कृते ॥ ६ । ३ । १९२ ॥	३३०
८४६	कृत्यतुल्या-त्या ॥ ३ । १ । ११४ ॥	१८७
१०७४	कृत्येऽवश्यमो लुक् ॥ ३ । २ । १३८ ॥	२३४
५७९	कृत्यस्य वा ॥ १ । २ । ८८ ॥	१३२
८२०	कृत्सगति-पि ॥ ७ । ४ । ११७ ॥	१७९
८२३	कृद्येनावश्यके ॥ ३ । १ । ९५ ॥	१८०
२०२	कृपः श्वस्तन्याम् ॥ ३ । ३ । ४६ ॥	५२७
२०९४	कृपाहृदयादालुः ॥ ७ । २ । ४२ ॥	४२१
२१७८	कृभ्वस्तिभ्यां-च्विः ॥ ७ । २ । १२६ ॥	४३७
६२६	कृवृषिमृजि-वा ॥ ५ । १ । ४२ ॥	६७२
१६१९	कृशाश्वक-दिन् ॥ ६ । ३ । १९० ॥	३२९
१३५९	कृशाश्वादेरीयण् ॥ ६ । २ । ९३ ॥	२८२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२०७९	कृच्यादिभ्यो वलच् ॥ ७ । २ । २७ ॥	४१९
३६७	कृतः कीर्तिः ॥ ४ । ४ । १२३ ॥	५७६
११८२	केकयमित्र्यु-च ॥ ७ । ४ । २ ।	२५२
१२७०	केदाराण्ण्यश्च ॥ ६ । २ । १३ ॥	२६९
४३९	केवलमामक-ज्ञात् ॥ २ । ४ । २९ ॥	९५
२२८	केवलस-रौः ॥ १ । ४ । २६ ॥	४२
२०९५	केशाद्वः ॥ ७ । २ । ४३ ॥	९२२
१२७६	केशाद्वा ॥ ६ । २ । १८ ॥	२७०
१०९४	केशो वा ॥ ३ । २ । १०२ ॥	२२९
७६८	कोः कत्तत्पुरुषे ॥ ३ । २ । १३० ॥	१६९
१०१९	कोटकमिश्रक-णे ॥ ३ । २ । ७६ ॥	२२४
२१२९	कोऽण्वादेः ॥ ७ । २ । ७६ ॥	४२७
१४७२	कोपान्त्याच्चाण् ॥ ६ । ३ । ५६ ॥	३०२
१५१४	कोऽश्मादेः ॥ ६ । ४ । ९७ ॥	३०९
१२३९	कौण्डिन्याग-च ॥ ६ । १ । १२७ ॥	२६२
१५९८	कौपिञ्जलहास्तिपदादण् ॥ ६ । ३ । १७१ ॥	३२५
४८१	कौरव्यमाण्डूकासुरेः ॥ २ । ४ । ७० ॥	१०४
१३००	कौशेयम् ॥ ६ । २ । ३९ ॥	२७४
४५३	क्ङिति यि शय् ॥ ४ । ३ । १०५ ॥	६०१
८३४	क्तं नञादिभिन्नैः ॥ ३ । १ । १०५ ॥	१८४
८७६	क्तक्तवतू ॥ ५ । १ । १७४ ॥	६९९
९२५	क्तयोः ॥ ४ । ४ । ४० ॥	७११
९००	क्तयोरनुपसर्गस्य ॥ ४ । १ । ९२ ॥	७०५

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
५८२	कयोरसदाधारे ॥ २ । २ । ९१ ॥	१३३
६३९	कः ॥ ३ । १ । १५१ ॥	१४६
४३८	कश्च नास्मि वा ॥ २ । ४ । २८ ॥	९५
२२९०	क्तात्तमबादे-न्ते ॥ ७ । ३ । ५६ ॥	४६३
४५५	क्तादल्पे ॥ २ । ४ । ४५ ॥	९९
२४५	क्तादेशोऽषि ॥ २ । १ । ६१ ॥	४६
११३०	क्तेटो गुरोर्व्यञ्जनात् ॥ ५ । ३ । १०६ ॥	८७९
८१९	क्तेन ॥ ३ । १ । ९२ ॥	१७९
८०१	क्तेनासत्वे ॥ ३ । १ । ७४ ॥	१७६
६७८	क्तेऽनिटश्चजोः-ति ॥ ४ । १ । १११ ॥	६६२
११७७	क्त्वा ॥ ४ । ३ । २९ ॥	८८९
३९९	क्त्वातुमम् ॥ १ । १ । ३५ ॥	८७
१०२८	क्त्वातुमम्-वे ॥ ५ । १ । १३ ॥	८६५
४४७	क्रः पलितासितात् ॥ २ । ४ । ३७ ॥	९७
५८४	क्रयः शिति ॥ ३ । ४ । ७० ॥	६३५
४७८	क्यङ् ॥ ३ । ४ । २६ ॥	६०७
१७९४	क्यङ्मानिपित्-ते ॥ ३ । २ । ५० ॥	३६०
४८३	क्यङ्षो नवा ॥ ३ । ३ । ४३ ॥	६०८
४७०	क्यनि ॥ ४ । ३ । ११२ ॥	६०६
८३	क्ययङाशीर्ये ॥ ४ । ३ । १० ॥	४९३
४७२	क्यो वा ॥ ४ । ३ । ८१ ॥	६०६
१४४	क्रमः ॥ ४ । ४ । ५४ ॥	५०८
११८९	क्रमः क्त्वि वा ॥ ४ । १ । १०६ ॥	८९१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१४३	क्रमो दीर्घः परस्मै ॥ ४ । २ । १०९ ॥	५०८
५२२	क्रमोऽनुपसर्गात् ॥ ३ । ३ । ४७ ॥	६२०
७२	कर्त्यः क्रियार्थे ॥ ४ । ३ । ९१ ॥	१३
८५३	कर्त्यात्क्रव्या-दौ ॥ ५ । १ । १५१ ॥	६९४
४८	क्रियातिपत्तिः-महि ॥ ३ । ३ । १६ ॥	४८४
६०२	क्रियामध्येऽध्व-च ॥ २ । २ । ११० ॥	१३७
६२८	क्रियायां क्रियार्था-न्ती ॥ ५ । ३ । १३ ॥	६४७
२०	क्रियार्थो धातुः ॥ ३ । ३ । ३ ॥	४
५२७	क्रियाविशेषणात् ॥ २ । २ । ४१ ॥	११९
५०४	क्रियाव्यतिहा-र्थे ॥ ३ । ३ । २३ ॥	६१६
५८६	क्रियाश्रयस्या-णम् ॥ २ । २ । ३० ॥	१३४
४९६	क्रियाहेतुः कारकम् ॥ २ । २ । १ ॥	१०८
५१५	क्रीडोऽकूजने ॥ ३ । ३ । ३३ ॥	६१८
४५४	क्रीतात्करणादेः ॥ २ । ४ । ४४ ॥	९९
११३४	क्रुत्संपदादिभ्यः क्विप् ॥ ५ । ३ । ११४ ॥	८८१
५४२	क्रुद्द्रुहे-पः ॥ २ । २ । २७ ॥	१२२
२४६	क्रुशस्तुनः-सि ॥ १ । ४ । ९१ ॥	४६
१७३३	क्रोशयोजन-र्हे ॥ ६ । ४ । ८६ ॥	३५०
११४५	क्रोष्टुशलङ्कोर्लुक् च ॥ ६ । १ । ५६ ॥	२४७
४९१	क्रोड्यादीनाम् ॥ २ । ४ । ७९ ॥	१०६
३५३	क्वाद्यादेः ॥ ३ । ४ । ७९ ॥	५७०
१९७९	क्ष्विष्णाङ्-स्य ॥ ७ । १ । १३० ॥	३९८
९३१	क्लीबमन्ये-वा ॥ ३ । १ । १२८ ॥	२०७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२७९	क्लीबे ॥ २ । ४ । ९७ ॥	५४
११४७	क्लीबे क्तः ॥ ५ । ३ । १२३ ॥	८८३
३९१	क्लीबे वा ॥ २ । १ । ९३ ॥	८३
७७९	क्लेशादिभ्योऽपात् ॥ ५ । १ । ८१ ॥	६८१
२।४६	ककुत्राग्रेह ॥ ७ । २ । ९३ ॥	४३१
८७३	क्वचित् ॥ ५ । १ । १७१ ॥	६९९
१४१२	क्वचित् ॥ ६ । २ । १४५ ॥	२९२
२२।८	क्वचित्तुर्यात् ॥ ७ । ३ । ४४ ॥	४६०
२२३३	क्वचित् ॥ ७ । ३ । ७ ॥	४५०
४७२	क्वसुष्मतौ च ॥ २ । १ । १०५ ॥	७८
८४७	क्विप् ॥ ५ । १ । १४८ ॥	६९३
२४१	क्विब्वृत्तेरसुधियस्तौ ॥ २ । १ । ५८ ॥	४५
१४२८	क्वेहामाम्रतसस्त्यन् ॥ ६ । ३ । १६ ॥	२९४
८४९	क्वौ ॥ ४ । ४ । १२० ॥	६१३
११९५	क्षत्रादियः ॥ ६ । १ । ९३ ॥	२५४
७१	क्षय्यजय्यौ शक्तौ ॥ ४ । ३ । ९० ॥	१२
९९५	क्षिपरटः ॥ ५ । २ । ६६ ॥	७२५
६३१	क्षिप्राशंसार्थ-म्यौ ॥ ५ । ४ । ३ ॥	६४८
८८	क्षियाशोःप्रैषे ॥ ७ । ४ । ९२ ॥	१५
१४०९	क्षीरादेयण् ॥ १ । २१ । १४२ ॥	२९१
४७४	क्षुत्तृड्गर्धेऽशना-थम् ॥ ४ । ३ । ११३ ॥	६०६
१२६७	क्षुद्रकमालवा-म्नि ॥ ६ । २ । ११ ॥	२६९
११७७	क्षुद्राभ्य परण् वा ॥ ६ । १ । ८० ॥	२५१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
११७९	क्षुधक्लिशकुष-सः ॥ ४ । ३ । ३१ ॥	८९०
९२६	क्षुधवसस्तेषाम् ॥ ४ । ४ । ४३ ॥	७११
९३५	क्षुब्धविरिब्ध-भौ ॥ ४ । ४ । ७१ ॥	७१२
१८८१	क्षुभ्नादीनाम् ॥ २ । ३ । ९६ ॥	३७८
१०९३	क्षुभ्नोः ॥ ५ । ३ । ७१ ॥	८७४
११८५	क्षेः क्षी ॥ ४ । ३ । ८९ ॥	८९०
८८९	क्षेः क्षी चाघ्यार्थे ॥ ४ । २ । ७४ ॥	७०३
२०२१	क्षेत्रेऽन्य-यः ॥ ७ । १ । १७२ ॥	४०७
२१३	क्षेपातिग्र-याः ॥ ७ । २ । ८६ ॥	४२८
६४५	क्षेपे च यज्ञयत्रे ॥ ५ । ४ । १८ ॥	६५३
६३१	क्षेपेऽपिजात्वो-ना ॥ ५ । ४ । १२ ॥	६५१
८०३	क्षेमप्रिय-खाण् ॥ ५ । १ । १०५ ॥	६८५
८९४	क्ष्वेशुषिपचो-वम् ॥ ४ । २ । ७८ ॥	७०४

ख

११६२	खनो डडरेकेकवकघं च ॥ ५ । ३ १३७ ॥	८८५
६८९	खरखुराग्रा-नस् ॥ ७ । ३ । १६० ॥	१५५
१२८६	खलादिभ्यो-लिन् ॥ ६ । २ । २७ ॥	२७२
१८०२	खारोकाक-कच् ॥ ६ । ४ । १४९ ॥	३६२
८५६	खार्या वा ॥ ७ । ३ । १०२ ॥	१९०
२२७	खिति खीती-र् ॥ १ । ४ ॥ ३६ ॥	४२
१०५३	खित्यनव्यया-श्च ॥ ३ । २ । ११२ ॥	२३०
७२२	खेयमृषोचे ॥ ५ । १ । ३८ ॥	६७१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
११९२	ख्णम् चाभीक्ष्ण्ये ॥ ५ । ४ । ४८ ॥	८९१
१४६	ख्यागि ॥ १ । ३ । ५४ ॥	२७
६११	ख्याते दृश्ये ॥ ५ । २ । ८ ॥	६४३

ग

१६३२	गच्छति पथिदूते ॥ ६ । ३ । २०३ ॥	३३२
३३५	गडदबादे-ये ॥ २ । १ । ७७ ॥	७०
६४४	गड्वादिभ्यः ॥ ३ । १ । १५६ ॥	१४७
१२७५	गणिकाया ण्यः ॥ ६ । २ । १७ ॥	२७०
४००	गतिः ॥ १ । १ । ३६ ॥	८७
१०२७	गतिकारक-क्वौ ॥ ३ । २ । ८५ ॥	२२९
७५२	गतिक्वन्य-षः ॥ ३ । १ । ४२ ॥	१६६
५०१	गतिबोधा-दाम् ॥ २ । २ । ५ ॥	१११
५९९	गते गम्येऽध्व-वा ॥ २ । २ । १०७ ॥	१३६
५५३	गतेर्नवाऽनाप्ते ॥ २ । २ । ६३ ॥	१२९
१३०	गतौ सेधः ॥ २ । ३ । ६१ ॥	५०५
७५८	गत्यर्थवदोऽच्छः ॥ ३ । १ । ८ ॥	१६७
६७९	गत्यर्थाकर्मक-जेः ॥ ५ । १ । ११ ॥	७००
४४२	गत्यर्थात्कुटिले ॥ ३ । ४ । ११ ॥	५९९
१००६	गत्वरः ॥ ५ । २ । ७८ ॥	७२७
५४९	गन्धनावक्षे-गे ॥ ३ । ३ । ७६ ॥	६२५
१४६	गमहनजन-लुक् ॥ ४ । २ । ४४ ॥	५०८
९४४	गमहनविद्लु-वा ॥ ४ । ४ । ८३ ॥	७१६

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
८४८	गमां क्वौ ॥ ४ । २ । ५८ ॥	६९३
१४५	गमिषद्यमश्छः ॥ ४ । २ । १०६ ॥	५०८
५३०	गमेः क्षान्तौ ॥ ३ । ३ । ५५ ॥	६२२
१४७	गमोऽनात्मने ॥ ४ । ४ । ५१ ॥	५०८
५५८	गमो वा ॥ ४ । ३ । ३७ ॥	६२८
१५५४	गम्भीर-वात् ॥ ६ । ३ । १३५ ॥	३१६
५६५	गम्ययपः कर्माधारे ॥ २ । २ । ७४ ॥	१२९
५५२	गम्यस्याप्ये ॥ २ । २ । ६२ ॥	१२५
१२४८	गर्गभार्गविका ॥ ६ । १ । १३६ ॥	२६५
११३०	गर्गादेर्यञ् ॥ ६ । १ । ४२ ॥	२४४
१४७३	गर्तोत्तरपदादीयः ॥ ६ । ३ । ५७ ॥	३०२
१९८८	गर्भादप्राणिनि ॥ ७ । १ । १३९ ॥	४००
९०७	गवाश्वादिः ॥ ३ । १ । १४४ ॥	२०२
८८४	गवि युक्ते ॥ ३ । २ । ७४ ॥	१९५
९८४	गवियुधेः स्थिरस्य ॥ २ । ३ । २५ ॥	२१६
७६१	गस्थकः ॥ ५ । १ । ६६ ॥	६७८
१४७९	गहादिभ्यः ॥ ६ । ३ । ६३ ॥	३०३
६५	गहोर्जः ॥ ४ । १ । ४० ॥	४८९
२६९	गाः परोक्षायाम् ॥ ४ । ४ । २६ ॥	५४३
१२०४	गात्रपुरुषात्खः ॥ ५ । ४ । ५९ ॥	८९४
१२२७	गाथिविद-नः ॥ ७ । ४ । ५४ ॥	२५९
१२२९	गान्धारिसाल्वेयाभ्याम् ॥ ६ । १ । ११५ ॥	२५९
११९७	गापापचो भावे ॥ ५ । ३ । ९५ ॥	८७७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
५८	गापास्थासादा-कः ॥ ४ । ३ । ९६ ॥	४८७
७७२	गायोऽनुपसर्गाट्टक् ॥ ५ । १ । ७४ ॥	६८०
७४७	गिरिनदी-ह्रा ॥ ७ । ३ । ९० ॥	१६५
९९७	गिरिनद्यादीनाम् ॥ २ । ३ । ६८ ॥	२१९
१६४७	गिरेरीयोऽस्त्राजीवे ॥ ६ । ३ । २१९ ॥	३३५
२२३५	गुणाङ्गाद्वेष्ठेयसू ॥ ७ । ३ । ९ ॥	४४५
५६८	गुणाद्-नवा ॥ २ । २ । ७७ ॥	१३०
२१०५	गुणादिभ्यो यः ॥ ७ । २ । ५३ ॥	४२३
१९	गुणोऽरेदोत ॥ ३ । ३ । २ ॥	४
१३५	गुपौधूपवि-यः ॥ ३ । ४ । १ ॥	५०६
१६६	गुप्तिजो-सन् ॥ ३ । ४ । ५ ॥	५१५
६१६	गुरावेकश्च ॥ २ । २ । १२४ ॥	१४०
१०४	गुरुनाम्यादे-र्णेः ॥ ३ । ४ । ४८ ॥	४९७
११८१	गृष्ट्यादेः ॥ ६ । १ । ८४ ॥	२५२
१६०१	गृहेऽग्नोधो रणश्च ॥ ६ । ३ । १७४ ॥	३२६
३५९	गृह्वोऽपरोक्षायां दीर्घः ॥ ४ । ४ । ३४ ॥	५७१
४४४	गृह्वुपसद-गर्ह्ये ॥ ३ । ४ । १२ ॥	६००
७५०	गेहे ग्रहः ॥ ५ । १ । ५५ ॥	६७७
२१०२	गोः ॥ ७ । २ । ५० ॥	४२३
१३११	गोः पुरीषे ॥ ६ । २ । ५० ॥	२७५
११०६	गोः स्वरे यः ॥ ६ । १ । २७ ॥	२४०
११५६	गोचरसंचर-षम् ॥ ५ । ३ । १३१ ॥	८८४
१९७०	गोण्यादेश्चेकण् ॥ ७ । १ । १२१ ॥	३९७
१०११	गोण्या मेये ॥ २ । ४ । १०३ ॥	२२२
१६३७	गोत्रक्षत्रिये-यः ॥ ६ । ३ । २०८ ॥	३३२
१९२४	गोत्रचरणा-मे ॥ ७ । १ । ७५ ॥	३८९
१४०२	गोत्रादङ्कवत् ॥ ६ । २ । १३४ ॥	२९१
१५७७	गोत्रादङ्कवत् ॥ ६ । ३ । १५५ ॥	३२१
१५९६	गोत्राददण्ड-ष्ये ॥ ६ । ३ । १६९ ॥	३९
१२६८	गोत्रोक्षवत्सो-कञ् ॥ ६ । २ । १२ ॥	२६९
१२५५	गोत्रोत्तरपदाद्-त्यात् ॥ ६ । १ । १२ ॥	२६६
१७२८	गोदानादीनां-र्यं ॥ ६ । ४ । ८१ ॥	३४९
११७८	गोधाया दुष्टे णारश्च ॥ ६ । १ । ८१ ॥	२५१
२१०८	गोपूर्वादत इकण् ॥ ७ । २ । ५६ ॥	४२३
१४६८	गोमये वा ॥ ६ । ३ । ५२ ॥	३०१
९९०	गोऽम्बाम्ब-स्य ॥ २ । ३ । ३० ॥	२१७
१२८३	गोरथवातात्र-लम् ॥ ६ । २ । २४ ॥	२७१
७९	गोर्नाम्न्यवोक्षे ॥ १ । २ । २८ ॥	१३
६३८	गोश्रान्ते-हौ ॥ २ । ४ । ९६	१४६
८६३	गोष्ठातेः शुनः ॥ ७ । ३ । ११० ॥	१९१
२१३२	गोष्ठादीनञ् ॥ ७ । २ । ७९ ॥	४२८
८५९	गोस्तत्पुरुषात् ॥ ७ । ३ । १०५ ॥	१९१
१९४	गोहः स्वरे ॥ ४ । २ । ४२ ॥	५२५
५२०	गौणात्तम-या ॥ २ । २ । ३३ ॥	११७
१००५	गौणो ङ्यादिः ॥ ७ । ४ । ११६ ॥	२२१
४२७	गौरादिभ्यो मुख्यान् ङीः ॥ २ । ४ ॥ १९ ॥	९३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१४३८	गोष्ठीतैकी-ञ्चरात् ॥ ६ । ३ । २६ ॥	२९६
२०७७	ग्मिन् ॥ ७ । २ । २५ ॥	४१९
१०७९	ग्रन्थान्ते ॥ ३ । २ । १४७ ॥	२३५
१०७७	ग्रहः ॥ ५ । ३ । ५५ ॥	८७२
४१६	ग्रहगुहश्च सनः ॥ ४ । ४ । ५९ ॥	५९३
२०२६	ग्रहणाद्वा ॥ ७ । १ । १७७ ॥	४०८
३३१	ग्रहवश्चभ्रस्जप्रच्छः ॥ ४ । १ । ८४ ॥	५१६०
७४१	ग्रहादिभ्यो णिन् ॥ ५ । १ । ५३ ॥	६७६
८६२	ग्रामकौटात्तक्ष्णः ॥ ७ । ३ । १०९ ॥	१९१
१२८७	ग्रामजनबन्धु-त्तल् ॥ ६ । २ । २८ ॥	२७२
१४८८	ग्रामराष्ट्रांशाद्-णौ ॥ ६ । ३ । ७२ ॥	३०४
१०००	ग्रामाग्रान्नियः ॥ २ । ३ । ७१ ॥	२१९
१४२१	ग्रामादीनञ् च ॥ ६ । ३ । ९ ॥	२९३
९३०	ग्राम्याशिशुद्वि-यः ॥ ३ । १ । १२७ ॥	२०७
१५५१	ग्रीवातोऽण् च ॥ ६ । ३ । १३२	३१६
१५३९	ग्रीष्मवसन्ताद्वा ॥ ६ । ३ । १२० ॥	३१३
१५३४	ग्रीष्मावर-कञ् ॥ ६ । ३ । ११५ ॥	३१५
४४५	ग्रो यङि ॥ २ । ३ १०१ ॥	६००
११४२	ग्लाहाज्यः ॥ ५ । ३ । ११८ ॥	८८२

घ.

१०३७	घञि भावकरणे ॥ ४ । २ । ५२ ॥	८६७
१०२८	घञ्युपसर्ग-लम् ॥ ३ । २ । ८६ ॥	२२५
३७४	घटादेर्ह्रस्वो-रे ॥ ४ । २ । २४ ॥	५७९
९४३	घसेकस्वरा-सोः ॥ ४ । ४ । ८२ ॥	७१५
२२२	घस्लृ-सन-लि ॥ ४ । ४ । १७ ॥	५३३
१५५	घस्वसः ॥ २ । ३ । २६ ॥	५११
२७२-२	घुटि ॥ १ । ४ । ६८ ॥	५३
९३३	घुषेरविशब्दे ॥ ४ । ४ । ६८ ॥	७१२
२१२६	घोषदादेरकः ॥ ७ । २ । ७४ ॥	४२६
१६४	घोषवति ॥ १ । ३ । २१ ॥	३०
७५३	घ्राध्मामापादधे-शः ॥ ५ । १ । ५८ ॥	६७७
४५१	घ्राध्मोर्यङि ॥ ४ । ३ । ९८ ॥	६०१
६८२	घ्यण्यावश्यके ॥ ४ । १ । ११५ ॥	६६४

ङ

३१९	ङसेश्चाद् ॥ २ । १ । १९ ॥	६३
११०१	ङसोऽपत्ये ॥ ६ । १ । २८ ॥	२४०
७७६	ङस्युक्तं कृता ॥ ३ । १ । ४९ ॥	१७०
२१९	ङिर्ङीः ॥ १ । ४ । २५ ॥	४१
२१७	ङित्यदिति ॥ १ । ४ । २३ ॥	४१
१९८	ङेः स्मिन् ॥ १ । ४ । ८ ॥	३७
३२४	ङेङसा ते मे ॥ २ । १ । २३ ॥	६६
१८७	ङेङस्योर्यातौ ॥ १ । ४ । ६ ॥	३४
३९६	ङेः पिबः पीप्य् ॥ ४ । १ । ३३ ॥	५८९
९६७	ङौ सासह्यिवाव-ति ॥ ५ । २ । ३८ ॥	७२१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१२४	ङ्णोः कटा-वा ॥ १ । ३ । १७ ॥	२३
१०१४	ङ्यः ॥ ३ । २ । ६४ ॥	२२३
७०३	ङ्यादीदूतः के ॥ २ । ४ । १०४ ॥	१५६
१३२१	ङ्यादेर्गौण-च्योः ॥ २ । ४ । ९५ ॥	२७७
७८७	ङ्यापो बहुलं नाम्नि ॥ २ । ४ । ९९ ॥	२१७
११६२	ङ्याप्ट्यूङः ॥ ६ । १ । ७० ॥	२४९

च

२७६	चक्षो वाचि-ख्याङ् ॥ ४ । ४ । ४ ॥	५४५
२८५	चजः कगम् ॥ २ । १ । ८६ ॥	५६
११७६	चटकाण्डैरः-पू ॥ ६ । १ । ७९ ॥	२५१
१४५	चटते स-ये ॥ १ । ३ । ७ ॥	२७
७९३	चतस्रार्थ(र्द्ध)म् ॥ ३ । १ । ६६ ॥	१७४
२०१२	चतुरः ॥ ७ । १ । १६३ ॥	४०६
५४०	चतुर्थी ॥ २ । २ । ५३ ॥	१२२
७९७	चतुर्थी प्रकृत्या ॥ ३ । १ । ७० ॥	१७५
१५५२	चतुर्मासान्नाभि ॥ ६ । ३ । १३३ ॥	३१६
८४४	चतुष्पाद् गर्भिण्या ॥ ३ । १ । ११२ ॥	१८७
११८०	चतुष्पाद्भ्य ष्यञ् ॥ ६ । १ । ८३ ॥	२५१
४२६	चतुस्रेर्हा-सि ॥ २ । ३ । ७४ ॥	९३
१०३५	चत्वारिंशदादौ वा ॥ ३ । २ । ९३ ॥	२२७
१२६२	चन्द्रयुक्तात्-क्ते ॥ ६ । २ । ६ ॥	२६८
१७२९	चन्द्रायणं च चरति ॥ ६ । ४ । ८२ ॥	३४९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१८७९	चरकमा-नञ् ॥ ७ । १ ३९ ॥	३७७
९०१	चरणस्य स्थेणो-दे ॥ ३ । १ । १३८ ॥	२००
१५९५	चरणादकञ् ॥ ६ । ३ १६८ ॥	३२४
१२८२	चरणाद्धर्मवत् ॥ ६ । २ । २३ ॥	२७१
१६५८	चरति ॥ ६ । ४ । ११ ॥	३३७
४४१	चरफलाम् ॥ ४ । १ । ५३ ॥	६००
७३९	चराचरचला-वा ॥ ४ । १ । १३ ॥	६७४
११५	चरेराङ-स्वगुरौ ॥ ५ । १ । ३१ ॥	६७०
८३६	चरेष्टः ॥ ५ । १ । १३८ ॥	६९१
१८८७	चर्मण्यञ् ॥ ७ । १ ॥ ४५ ॥	३७९
२०५१	चर्मण्वत्य-त् ॥ २ । १ ॥ ९६ ॥	४१४
१२९१	चर्मशुनः-चे ॥ ७ । ४ । ६४ ॥	२७२
१२१४	चर्मिवर्मि-रात् ॥ ६ । १ । ११२ ॥	२५७
१२०१	चर्मोदरात्पूरेः ॥ ५ । ४ । ५६ ॥	८९४
९७२	चलशब्दार्था-त् ॥ ५ । २ । ४३ ॥	७२२
५८३	चल्याहारार्थेङ्-नः ॥ ३ । ३ । १०८ ॥	६३४
१२१	चवर्गद-रे ॥ ७ । ३ । ९८ ॥	२०४
३७७	चहणः शाठये ॥ ४ । २ । ३१ ॥	५८३
१७३२	चातुर्मास्यन्-च ॥ ६ । ४ । ८५ ॥	३४९
२१	चादयोऽसत्वे ॥ १ । १ । ३१ ॥	४
१०३	चादिः-नाङ् ॥ १ । २ । ३६ ॥	१९
४६९	चायः कीः ॥ ४ । १ । ८६ ॥	६०२
८८७	चार्थे द्वन्द्वः सहोक्तौ ॥ ३ । १ । ११७ ॥	१९६

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३३०	चाहहवैवयोगे ॥ २ । १ । २९ ॥	६८
७४०	चिक्कित्दवक्तसम् ॥ ४ । १ । १४ ॥	६७४
११०१	चितिदेहा-देः ॥ ५ । ३ । ७९ ॥	८७५
८९	चितीवार्थे ॥ ७ । ४ । ९३ ॥	१६
१८२५	चितेः कवि ॥ ३ । २ । ८३ ॥	२२४
४१०	चित्ते वा ॥ ४ । २ । ४१ ॥	५९१
१५२५	चित्रारेवती-याम् ॥ ६ । ३ । १०८ ॥	३११
६४६	चित्रे ॥ ५ । ४ । १९ ॥	६५३
१५०२	चिरपरुत्प-स्तनः ॥ ६ । ३ । ८५ ॥	३०७
३९०	चिस्फुरोर्नवा ॥ ४ । २ । १२ ॥	५८८
४९४	चीवरात्परिधार्जने ॥ ३ । ४ । ४१ ॥	६११
३६४	चुरादिभ्यो णिच् ॥ ३ । ४ । १७ ॥	५७४
१७६८	चूडादिभ्योऽण् ॥ ६ । ४ । ११९ ॥	३५५
१६५४	चूर्णमुद्गा-णौ ॥ ६ । ४ । ७ ॥	३३६
३२३	चेः किर्वा ॥ ४ । १ । ३६ ॥	५५८
१२०३	चेलार्थात् क्रोपेः ॥ ५ । ४ । ५८ ॥	८९४
१३६६	चैत्रीकार्तिकी-द्वा ॥ ६ । २ । १०० ॥	२८३
१९२१	चौरादेः ॥ ७ । १ । ७३ ॥	३८८
२१७९-२	च्वौ कचित् ॥ ३ । २ । ६० ॥	४३८
११६६	च्व्यर्थे कर्त्राप्या-गः ॥ ५ । ३ । १४० ॥	८८७
४८१	च्व्यर्थे भूशादेः स्तोः ॥ ३ । ४ । २९ ॥	६०८

छ

१६१३	छगलिनो ञेयिन् ॥ ६ । ३ । १८५ ॥	३२८
१८८९	छदिर्बलेरेयण् ॥ ७ । १ । ४७ ॥	३७९
८५०	छदेरिस्मन्नद् क्वौ ॥ ४ । २ । ३३ ॥	६९४
१५६८	छन्दसो यः ॥ ६ । ३ । १४७ ॥	३२०
१६२६	छन्दस्यः ॥ ६ । ३ । १९७ ॥	३३०
१५९३	छन्दागौ-घे ॥ ६ । ३ । १६६ ॥	३२४
२०२२	छन्दोऽधीते-वा ॥ ७ । १ । १७३ ॥	४०८
१०९२	छन्दोनाम्नि ॥ ५ । ३ । ७० ॥	८७४
९२१	छाशोर्वा ॥ ४ । ४ । १२ ॥	७१०
१८३६	छेदादेर्नित्यम् ॥ ६ । ४ । १८२ ॥	३६९

ज

१५६२-३	जङ्गल-वा ॥ ७ । ४ । २४ ॥	३१८
११७९	जण्टपण्टात् ॥ ६ । १ । ८२ ॥	२५१
११७५	जनशो न्युपान्त्ये-क्त्वा ॥ ४ । ३ । २३ ॥	८८९
४४८	जपजभदहदश-शः ॥ ४ । १ । ५२ ॥	६००
१०६२-४	जपादीनां पो वः ॥ २ । ३ । १०५ ॥	८७१
१४०	जभः स्वरे ॥ ४ । ४ । १०० ॥	५०७
१३२५	जम्ब्वा वा ॥ ६ । २ । ६० ॥	२७८
१५४१	जयिनि च ॥ ६ । ३ । १२२ ॥	३१४
७८२	जरत्यादिभिः ॥ ३ । १ । ५५ ॥	१७१
२७५	जरसो वा ॥ १ । ४ । ६० ॥	५४
७५०	जराया ज-च ॥ ७ । ३ । ९३ ॥	१६५
२०५	जराया ज-चा ॥ २ । १ । ३ ॥	३८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१९४	जस इः ॥ १ । ४ । ९ ॥	३६
२१५	जस्येदोत् ॥ १ । ४ । २२ ॥	४०
३२७	जस्विशे-न्त्ये ॥ २ । १ । २६ ॥	६७
९७७	जागुः ॥ ५ । २ । ४८ ॥	७२३
२८४	जागुः किति ॥ ४ । ३ । ६ ॥	५३९
११२८	जागुरश्च ॥ ५ । ३ । १०४ ॥	८७९
२४७	जागुर्जिणवि ॥ ४ । ३ । ५२ ॥	५३९
१५४	जाग्रुषसमिन्धेर्नेवा ॥ ३ । ४ । ४९ ॥	५११
३१७	जा ज्ञाजनोऽत्यादौ ॥ ४ । २ । १०४ ॥	५५६
८५१	जातमहद्-यात् ॥ ७ । ३ । ९५ ॥	१८९
६४०	जातिकालसुखा-वा ॥ ३ । १ । १५२ ॥	१४७
१२१६	जातिश्च णितद्धि-रे ॥ ३ । २ । ५१ ॥	२५७
८३७	जातीयैकार्थेऽच्वेः ॥ ३ । २ । ७० ॥	१८५
६४४	जातुयद्यदायदौ सप्तमी ॥ ५ । ४ । १७ ॥	६५२
१५१५	जाते ॥ ६ । ३ । ९८ ॥	३०९
२१८७	जातेः सम्पदा च ॥ ७ । २ । १३१ ॥	४३९
४६४	जातेरयान्त-त् ॥ २ । ४ । ५४ ॥	१००
६६८	जातेरीयः सामान्यवति ॥ ७ । ३ । १३९ ॥	१५१
१५९७	जातौ ॥ ७ । ४ । ५८ ॥	३२३
११९३	जातौ राज्ञः ॥ ६ । १ । ९२ ॥	२५३
६१३	जात्याख्यायां-चत् ॥ २ । २ । १२१ ॥	१३९
७८२	जायापतेश्चि-ति ॥ ५ । १ । ८४ ॥	६८२
६९५	जायाया जानिः ॥ ७ । ३ । १६४ ॥	१५५
५१०	जासन्नट-याम् ॥ २ । २ । १४ ॥	११४
४०७	जिघ्रतेरिः ॥ ४ । २ । ३८ ॥	५९१
७२७	जिविपून्यो-ल्के ॥ ५ । १ । ४३ ॥	६७२
१५४६	जिह्वामूला-यः ॥ ६ । ३ । १२७ ॥	३१५
१०००	जीर्णदक्षि-थः ॥ ५ । २ । ७२ ॥	७२६
२१३०	जीर्णगोमूत्रा-ले ॥ ७ । २ । ७७ ॥	४२७
११४७	जीवन्तपर्वताद्वा ॥ ६ । १ । ५८ ॥	२४७
७६७	जीविकोपनि-म्ये ॥ ३ । १ । १७ ॥	१६८
१८२४	जीवितस्य सन् ॥ ६ । ४ । १७० ॥	३६७
१३२	जृभ्रमवम-वा ॥ ४ । १ । २६ ॥	५०५
११८१	जृव्रश्चः क्त्वः ॥ ४ । ४ । ४१ ॥	८९०
८७५	जृषोऽतृः ॥ ५ । १ । १७३ ॥	६९९
७३	जेर्गिः सन्परोक्षयोः ॥ ४ । १ । ३५ ॥	४९१
५५५	ज्ञः ॥ ३ । ३ । ८२ ॥	६२७
४२७	ज्ञप्यापो ज्ञोपीप्-सनि ॥ ४ । १ । १६ ॥	५९५
८१३	ज्ञानेच्छार्चार्था-न ॥ ३ । १ ।८६ ॥	१७८
१०२०	ज्ञाने च्छार्चार्थैर्ज्ञी-क्तः ॥ ५ । २ । ९२ ॥	७३०
५३९	ज्ञीप्सास्थेये ॥ ३ । ३ । ६४ ॥	६२४
५७२	ज्ञोऽनुपसर्गात् ॥ ३ । ३ । ९६ ॥	६३२
११८६	ज्यश्च यपि ॥ ४ । १ । ७६ ॥	८९१
२२४१	ज्यायान् ॥ ७ । ४ । ३६ ॥	४५१
३०४	ज्याव्यधः किङति ॥ ४ । २ । ८१ ॥	५५२
२१५	ज्याव्येव्यधिव्यचि-रिः ॥ ४ । १ । ७१ ॥	५३०

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
९७८	ज्योतिरायु-स्य ॥ २ । ३ । १७ ॥	२१६
१६२८	ज्योतिषम् ॥ ६ । ३ । १९९ ॥	३३१
२०८६	ज्योत्स्नादिभ्योऽण् ॥ ७ । २ । ३४ ॥	४२०
४०६	ज्वलह्वलह्माल-वा ॥ ४ । २ । ३२ ॥	५९१
	ञ	
५९३	ञिक्ष्णमोर्वा ॥ ४ । ४ । १०६ ॥	६३७
३१६	ञिच् ते षद-च ॥ ३ । ४ । ६६ ॥	५५५
२६०	ञिणवि घन् ॥ ४ । ३ । १०१ ॥	५४१
११४१	ञिदार्षादणिञोः ॥ ६ । १ । १४० ॥	२४६
१००	ञिणति ॥ ४ । ३ । ५० ॥	४९६
३७५	ञिणति धात् ॥ ४ । ३ । १०० ॥	५७९
	ट	
२१६	टः पुंसि ना ॥ १ । ४ । २४ ॥	४१
७६२	टनण् ॥ ५ । १ । ६७ ॥	६७८
१६३८	टस्तुल्यदिशि ॥ ६ । ३ । २१० ॥	३३३
१८५	टाङसोरिनस्यौ ॥ १ । ४ । ५ ॥	३४
३१४	टाङधोसि यः ॥ २ । १ । ७ ॥	६२
२४९	टादौ स्वरे वा ॥ १ । ४ । ९२ ॥	४७
३५८	टौस्यनः ॥ २ । १ । ३७ ॥	७४
२५८	टौस्येत् ॥ १ । ४ । १९ ॥	४९
६०	ट्वेघ्राशाछासो वा ॥ ४ । ३ । ६७ ॥	४८९
	ठ	
९८	ट्वेश्चेर्वा ॥ ३ । ४ । ५९ ॥	४९५
११०५	ट्वितोऽथुः ॥ ५ । ३ । ८३ ॥	८७६
	ड	
१७३१	डकश्चाष्टाच-णाम् ॥ ६ । ४ । ८४ ॥	३४९
२३०७	डतरडतमौ-श्ने ॥ ७ । ४ । ७६ ॥	४६८
२३०	डतिष्णः-पू ॥ १ । ४ । ५४ ॥	४२
२२९	डत्यतु संख्यावत् ॥ १ । १ । ३९ ॥	४२
२२०२	डाच्यादौ ॥ ७ । २ । १४९ ॥	४४२
४८२	डाचलोहिता-षित् ॥ ३ । ४ । ३० ॥	६०८
२२०	डित्यन्त्यस्वरादेः ॥ ५ । १ । ११४ ॥	४१
१४०४	डिद्वाण् ॥ ६ । २ । १३६ ॥	२९१
१९९६	डिन् ॥ ७ । १ । १४७ ॥	४०१
८९२	डीयश्यैदितः क्रयोः ॥ ४ । ४ । ६१ ॥	७०३
१२६	ड्नः सः-श्चः ॥ १ । ३ । १८ ॥	२३
११०६	ड्वितश्चिमक्-तम् ॥ ५ । ३ । ८४ ॥	८७६
	ढ	
१७३	ढस्तड्ढे ॥ १ । ३ । ४२ ॥	३२
	ण	
७२१	णकतृचौ ॥ ५ । १ । ४८ ॥	६७३
११५४	णश्च चिश्रवसो-वा ॥ ६ । १ । ६५ ॥	२४८
३६२	णषमसत्परेस्यादिविधौ च ॥ २ । १ । ६० ॥	७३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
४०६	णस्वराघोषा-श्च ॥ २ । ४ । ४ ॥	८८
४११	णावज्ञाने गमुः ॥ ४ । ४ । २४ ॥	५९२
४९५	णिज् बहुलं-धु ॥ ३ । ४ । ४२ ॥	६११
७४	णिद्वान्त्यो णव् ॥ ४ । ३ ॥ ५८ ॥	४९१
११६८	णिन् चावश्य-र्ण्ये ॥ ५ । ४ । ३६ ॥	८८७
११३५	णिवेत्यास-नः ॥ ५ । ३ । १११ ॥	८८०
७८	णिश्रिद्रुस्रुकमः-ङः ॥ ३ । ४ । ५८ ॥	४९२
४३६	णिस्तोरेवाऽ-णि ॥ २ । ३ । ३७ ॥	५९७
६०१	णिस्नुश्रुयात्मने-त् ॥ ३ । ४ । ९२ ॥	६४०
१७१	णेरनिटि ॥ ४ । ३ । ८३ ॥	५१७
७०४	णेर्वा ॥ २ । ३ । ८८ ॥	६६८
१८५०	णोऽन्नात् ॥ ७ । १ । १० ॥	३७२
३८७	णौ क्रीजोङः ॥ ४ । २ । १० ॥	५८८
३९७	णौ ङसनि ॥ ४ । १ ॥ ८८ ॥	५९०
९३८	णौ दान्तशान्त-तम् ॥ ४ । ४ । ७४ ॥	७१४
४०२	णौ मृगरमणे ॥ ४ । २ । ५१ ॥	५९०
३८८	णौ सन्ङे वा ॥ ४ । ४ । २७ ॥	५८८
१८६४	ण्योऽतिथेः ॥ ७ । १ । २४ ॥	३७५

त

३०५	तः सौ सः ॥ २ । १ । ४२ ॥	६०
१५९	तक्षः स्वार्थे वा ॥ ३ । ४ । ७७ ॥	५१२
६६	ततः शिटः ॥ १ । ३ । ३६ ॥	१२
११७०	तत आगते ॥ ६ । ३ । १४९ ॥	३२०
६१	ततोऽस्याः ॥ १ । ३ । ३४ ॥	११
११९	ततो ह-र्थः ॥ १ । ३ । ३ ।	२३
९५५	तत्पुरुषे कृति ॥ ३ । २ । २० ॥	२१२
१८९६	तत्र ॥ ७ । १ । ५३ ॥	३८१
१५११	तत्र कृतलब्ध-ते ॥ ६ । ३ । ९४ ॥	३०९
९४२	तत्र क्वसुकानौ-त् ॥ ५ । २ । २ ॥	७१५
१९८६	तत्र घटते-ष्ठः ॥ ७ । १ । १३७ ॥	३९१
१७२१	तत्र नियुक्ते ॥ ६ । ४ । ७४ ॥	३४७
१८५५	तत्र साधौ ॥ ७ । १ । १५ ॥	३७४
७१८	तत्रादायमि-वः ॥ ३ । १ । २६ ॥	९५९
२१८८	तत्राधीने ॥ ७ । २ । १३२ ॥	४४०
८२१	तत्राहोरात्रांशम् ॥ ३ । १ । ९३ ॥	१७९
१४०४	तत्रोद्धृते पात्रेभ्यः ॥ ६ । २ । १३८ ॥	२९१
६	तत्साप्यानाप्या-श्च ॥ ३ । ३ । २१ ॥	४७५
१८९२	तद् ॥ ७ ॥ १ ॥ ५० ॥	३८०
१७४	तदः सेः-र्था ॥ १ । ३ । ४५ ।	३२
२६	तदन्तं पदम् ॥ १ । १ । २० ॥	५
१३३५	तदत्रास्ति ॥ ६ । २ । ७० ॥	२८०
१८१२	तदत्रास्मै वा-यम् ॥ ६ । ४ । १५८ ॥	३६४
७९९	तदर्थार्थेन ॥ ३ । १ । ७२ ॥	१७५
१७०१	तदस्य पण्यम् ॥ ६ । ४ । ५४ ॥	३४४
१९८७	तदस्य सं-तः ॥ ७ । १ । १३८ ॥	३९९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२०४७	तदस्यास्त्य-तुः ॥ ७ । २ । १ ॥	४१२
६४१	तद्धितः स्वर-रे ॥ ३ । २ । ५५ ॥	१४८
११८८	तद्धितयस्वरेऽनाति ॥ २ । ४ । ९२ ॥	२५२
६४८	तद्धिताकको-ख्याः ॥ ३ । २ । ५४ ॥	१४८
१०८७	तद्धितोऽणादिः ॥ ६ । १ । १ ॥	२३७
५५६	तद्भद्रायुष्य-षि ॥ २ । २ । ६६ ॥	१२६
१७३४	तद्यात्येभ्यः ॥ ६ । ४ । ८७ ॥	३५०
२१६१	तद्वति धण् ॥ ७ । २ । १०८ ॥	४३८
१३८५	तद्वेत्त्यधीते ॥ ६ । २ । ११७ ॥	२८७
५९२	तद्युक्ते हेतौ ॥ २ । २ । १०० ॥	१३५
५८८	तनः क्ये ॥ ४ । २ । ६३ ॥	६३६
२२५७	तनुपुत्राणु-के ॥ ७ । ३ । २३ ॥	४५५
४२९	तनो वा ॥ ४ । १ । १०५ ॥	५९६
२०३२	तन्त्रादचि-ते ॥ ७ । १ । १८३ ॥	४१०
३५१	तन्भ्यो वा-श्च ॥ ४ । ३ । ६८ ॥	५६९
७५९	तन्व्यधीण्-तः ॥ ५ । १ । ६४ ॥	६७८
५८९	तपः कर्त्रनुतापे च ॥ ३ । ४ । ९१ ॥	६३६
४८९	तपसः क्यन् ॥ ३ । ४ । ३६ ॥	६१०
६०६	तपेस्तपःकर्मकात् ॥ ३ । ४ । ८५ ॥	६४२
९३७	तप्तान्ववाद्रहस. ॥ ७ । ३ । ८१ ॥	२०८
१८३१	तमर्हति ॥ ६ । ४ । १७७ ॥	३६९
२१८४	तमिस्रार्णवज्योत्स्नाः ॥ ७ । २ । ५२ ॥	४२३
१८१५	तं पचति द्रोणाद्वात्र् ॥ ६ । ४ । १६१ ॥	३६५
१६७५	तं प्रत्यनो-लात् ॥ ६ । ४ । २८ ॥	३३९
१७५३	तं भाविभूते ॥ ६ । ४ । १०६ ॥	३५३
९९	तयोर्य्वौ-याम् ॥ ७ । ४ । १०३ ॥	१९
२२२८	तयोः समू-षु ॥ ७ । ३ । ३ ॥	४४७
१६५६	तरति ॥ ६ । ४ । ९ ॥	३३६
८९६	तरुतृणधान्य-त्वे ॥ ३ । १ । १३३ ॥	१९९
३२०	तव मम ङसा ॥ २ । १ । १५ ॥	६४
१०९	तवर्गस्य श्च-गौ ॥ १ । ३ । ६० ॥	२१
६९९	तव्यानीयौ ॥ ५ । १ । २७ ॥	६६७
१६३९	तसिः ॥ ६ । ३ । २११ ॥	३२३
१७५४	तस्मै भृता-च ॥ ६ । ४ । १०७ ॥	३५३
१७४१	तस्मै योगादेः शक्ते ॥ ६ । ४ । ९४ ॥	३५१
१८७५	तस्मै हिते ॥ ७ । २ । ३५ ॥	३७७
१८९७	तस्य ॥ ७ । १ । ५४ ॥	३८१
१९५७	तस्य तुल्ये कः-त्योः ॥ ७ । १ । १०८ ॥	३९५
१८०५	तस्य वापे ॥ ६ । ४ । १५१ ॥	३६३
१५६३	तस्य व्याख्या-त् ॥ ६ । ३ । १४२ ॥	३१८
१५८२	तस्येदम् ॥ ६ । ३ । १६० ॥	३२२
१८९३	तस्यार्हे-वत् ॥ ७ । १ । ५१ ॥	३८०
५४४	तादर्थ्ये ॥ २ । २ । ५४ ॥	१२३
४१४	ताभ्यां वा-त् ॥ २ । ४ । १५ ॥	९०
४२१	तारका वर्णका-त्ये ॥ २ । ४ । ११३ ॥	९२
१२९३	तालाद्धनुषि ॥ ६ । २ । ३२ ॥	२७३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१२४३	तिककितवादौ द्वन्द्वे ॥ ६ । १ । १३१ ॥	२६३
१२०९	तिकादेरायनिञ् ॥ ६ । १ । १०७ ॥	२५६
७६६	तिक्कृतौ नाम्नि ॥ ५ । १ । ७१ ॥	६७९
४४७	ति चोपान्त्या-दुः ॥ ४ । १ । ५४ ॥	६००
१६१२	तित्तिरिवर-यण् ॥ ६ । ३ । १८४ ॥	३२८
२९७	तिरसस्तिर्यति ॥ ३ । २ । १२४ ॥	५८
१५०	तिरसो वा ॥ २ । ३ । २ ॥	२७
७५९	तिरोन्तर्धौ ॥ ३ । १ । ९ ॥	१६७
१२३०	तिर्यचापवर्गे ॥ ५ । ४ । ८५ ॥	९००
१४८	तिर्वा ष्ठिवः ॥ ४ । १ । ४३ ॥	५१०
१३१३	तिलयवादनाम्नि ॥ ६ । २ । ५२ ॥	२७६
१९८५	तिलादिभ्यः-लः ॥ ७ । १ । १३६ ॥	३९९
२५३	तिवां णवः परस्मै ॥ ४ । २ । ११७ ॥	५४०
४०८	तिष्ठतेः ॥ ४ । २ । ३९ ॥	५९१
७३५	तिष्ठद्गु-यः ॥ ३ । १ । ३६ ॥	१६२
१२६१	तिष्यपुष्ययो-र्भाणि ॥ २ । ४ । ९० ॥	२६७
२०३	तीर्यं ङित्-वा ॥ १ । ४ । १४ ॥	३८
२१९१	तीयश्रम्ब-ङाञ् ॥ ७ । २ । १३९ ॥	४४०
२२०६	तीयाट्टीकण्-चेत् ॥ ७ । २ । १५३ ॥	४४४
७३३	तुः ॥ ४ । ४ । ५४ ॥	६७३
३३०	तुदादेः शः ॥ ३ । ४ । ८१ ॥	५६०
३१५	तुभ्यं मह्यं ङया ॥ २ । १ । १४ ॥	६२
४१४	तुमर्हादिच्छायां-नः ॥ ३ । ४ । २१ ॥	५९२
१०७६	तुमश्च मनःकामे ॥ ३ । २ । १४० ॥	२३४
५५१	तुमोर्थ भा-त् ॥ २ । २ । ६१ ॥	१२५
१७३९	तुरायणपा-ने ॥ ६ । ४ । ९२ ॥	३५०
१७	तुल्यस्थाना-स्वः ॥ १ । १ । १७ ॥	३
६०८	तुल्यार्थैस्तृतीयाषष्ठ्यौ ॥ २ । २ । ११६ ॥	१३८
१६४६	तूदीवर्मत्या पयण् ॥ ६ । ३ । २१८ ॥	३३४
१७०८	तूष्णीकः ॥ ६ । ४ । ६१ ॥	३४५
२२६६	तूष्णीकाम् ॥ ७ । ३ । ३२ ॥	४५७
१२३२	तूष्णीमा ॥ ५ । ४ । ८७ ॥	९०२
१३४७	तृष्णादेः सल् ॥ ६ । २ । ८१ ॥	२८१
१०६८	तृणे जातौ ॥ ३ । २ । १३२ ॥	२३३
५९	तृतीयस्तृ-र्थे ॥ १ । ३ । ४९ ॥	११
११४	तृतीयस्य पञ्चमे ॥ १ । ३ । १	२२
७९२	तृतीया तत्कृतैः ॥ ३ । १ । ६५ ॥	१७४
२०२	तृतीयान्तात्-गे ॥ १ । ४ । १३ ॥	३७
८११	तृतीयायाम् ॥ ३ । १ । ८४ ॥	१७७
६०४	तृतीयाल्पीयसः ॥ २ । २ । ११२ ॥	१३८
७७७	तृतीयोक्तं वा ॥ ३ । १ । ५० ॥	१७०
५८१	तृन्नुदन्ता-स्य ॥ २ । २ । ९० ॥	१३३
९५६	तृन् शीलधर्मसाधुषु ॥ ५ । २ । २७ ॥	७१९
८१२	तृप्तार्थपूरणा-शा ॥ ३ । १ । ८५ ॥	१७८
१००८	तृषिधृषिस्वपो नजिङ् ॥ ५ । २ । ८० ॥	७२८
२४८	तृस्थस्तृ-र् ॥ १ । ४ । ३८ ॥	४६

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३५० तृहः श्नादीत् ॥ ४ । ३ । ६२ ॥		५६८
९३ तृत्रपफलभजाम् ॥ ४ । ३ । २५ ॥		४९५
६७६ ते कृत्याः ॥ ५ । १ । ४७ ॥		६६२
१३९९ तेन च्छन्ने रथे ॥ ६ । २ । १३१ ॥		२९०
१६४९ तेन जित-त्सु ॥ ६ । ४ । २ ॥		३३५
१३३६ तेन निर्वृत्ते च ॥ ६ । २ । ७१ ॥		२८०
१६०८ तेन प्रोक्ते ॥ ६ । ३ । १८१ ॥		३२७
२०२४ तेन वित्ते-णौ ॥ ७ । १ । १७५ ॥		४०८
१७४८ तेन हस्तादयः ॥ ६ । ४ । १०१ ॥		३५२
११२० तेभ्रेहादिभ्यः ॥ ४ । ४ । ३३ ॥		८७८
१८५० ते लुग्वा ॥ ३ । २ । १०८ ॥		२३०
१७४४ तेषु देये ॥ ६ । ४ । ९७ ॥		३५१
७७ तो वा ॥ ७ । २ । १४८ ॥		९३
९५० तौ माङ्याक्रोशेषु ॥ ५ । २ । २१ ॥		७१८
१२१ तौ मुमो-स्वौ ॥ १ । ३ । १४ ॥		२३
७६९ तौ सनस्तिकि ॥ ४ । २ । ६४ ॥		६७९
६८५ त्यजयजप्रवचः ॥ ४ । १ । ११८ ॥		६६४
९२३ त्यदादिः ॥ ३ । १ । १२० ॥		२०५
११५७ त्यदादिः ॥ ६ । १ । ७ ॥		२४८
१५८१ त्यदादेर्मयट् ॥ ६ । ३ । १५९ ॥		३२२
८५४ त्यदाद्यन्कसमा-च ॥ ५ । १ । १५२ ॥		६९५
३०६ त्वदामेन-ते ॥ २ । १ । ३३ ॥		६०
२२६२ त्यादिसर्वादेः-ऽक् ॥ ७ । ३ । २९ ॥		४५६
८७ त्यादेः सा-न ॥ ७ । ४ । ९१ ॥		१५
२२४४ त्यादेश्च प्र-पए ॥ ७ । ३ । १० ॥		४५२
१०६४ त्यादौ क्षेपे ॥ ३ । २ । १२६ ॥		२३२
७३२ त्रने वा ॥ ४ । ४ । ३ ॥		६७२
२२३५-२ त्रन्त्यस्वरादेः ॥ ७ । ४ । ४३ ॥		४५१
१२९४ त्रपुजतोः षोऽन्तश्च ॥ ६ । २ । ३३ ॥		२७३
२१४५ त्रप् च ॥ ७ । २ । ९२ ॥		४३१
९६१ त्रसिगृधि-कनुः ॥ ५ । २ । ३२ ॥		७२०
६९९ त्रिककुद् गिरौ ॥ ७ । ३ । १६८ ॥		१५६
२६३ त्रिचतुरस्-दौ ॥ २ । १ । १ ॥		५०
१७७८ त्रिंशद्विंशते-र्यें ॥ ६ । ४ । १२९ ॥		३५७
२ त्रीणि त्रीण्यन्य-दि ॥ ३ । ३ । १७ ॥		४७५
२०१५ त्रेस्त्र च ॥ ७ । १ । १६६ ॥		४०६
२६२ त्रेस्त्रयः ॥ १ । ४ । ३४ ॥		४३
१८२८ त्रैंशच्चात्वारिंशम् ॥ ६ । ४ । १७४ ॥		३६८
१८९९ त्वते गुणः ॥ ३ । २ । ५९ ॥		३८३
३०७ त्वमहं-कः ॥ २ । १ । १२ ॥		६१
३१२ त्वमौ प्र-न् ॥ २ । १ । ११ ॥		६२
१००८ त्वे ॥ २ । ४ । १०० ॥		२२१
११०५ त्वे वा ॥ ६ । १ । २६ ॥		२३९
थ		
३२९ थे वा ॥ ४ । १ । २९ ॥		५५९
३४५ थो न्थ् ॥ १ । ४ । ७८ ॥		७२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
	द	
११४	दंशसञ्जः शवि ॥ ४ । २ । ४९ ॥	५००
१२१८	दंशेस्तृतीयया ॥ ५ । ४ । ७३ ॥	८८७
१८१८	दंशेञ्चः ॥ ५ । २ । ९० ॥	७३०
१०३५	दक्षिणाकडङ्गर-यौ ॥ ६ । ४ । १८१ ॥	३६९
१४२५	दक्षिणापश्चा-त्यण् ॥ ६ । ३ । १३ ॥	२९४
६७२	दक्षिणेर्मा व्याधयोगे ॥ ७ । ३ । १४३	१५२
२१७१	दक्षिणोत्तराञ्चातस् ॥ ७ । २ । १७ ॥	४२६
१२१०	दगुकोशल-दिः ॥ ६ । १ । १०८ ॥	२५६
१८३२	दण्डादेर्यः ॥ ६ । ४ । १७८ ॥	३६९
१२२४	दण्डिहस्ति-नै ॥ ७ । ४ । ४५ ॥	२५८
९१८	दत् ॥ ४ । ४ । १० ॥	७०९
१४१०	दध्न इकण् ॥ ६ । २ । १४३ ॥	२९२
२८४	दध्यस्थि-न् ॥ १ । ४ । ६३ ॥	५५
७०५	दध्युरःस-लेः ॥ ७ । ३ । १७२ ॥	१५७
२०८	दन्तपादना-वा ॥ २ । १ । १०१ ॥	३९
२०९२	दन्तादुन्नतात् ॥ ७ । २ । ४० ॥	४२१
३२८	दम्भः ॥ ४ । १ । २८ ॥	५५९
४२६	दम्भो धिष्वीप् ॥ ४ । १ । १८ ॥	५९५
१७७	दयायास्कासः ॥ ३ । ४ । ४७ ॥	५१९
२४२	दरिद्रोऽद्यतन्यां वा ॥ ४ । ३ । ७६ ॥	५३८
११४६	दर्भकृष्णाग्निशर्म-त्स्ये ॥ ६ । १ । ५७ ॥	२४७
१०३९	दशनावोदै-थम् ॥ ४ । २ । ५४ ॥	८६७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१६८३	दशैकादशादिकश्च ॥ ६ । ४ । ३६ ॥	३४०
७७६	दश्राङः ॥ ५ । १ । ७८ ॥	६८१
१०३०	दस्ति ॥ ३ । २ । ८८ ॥	२२६
५२८	दागोऽस्वास्यप्रसारविकासे ॥ ३ । ३ । ५३ ॥	६२२
९६५	दाधेसिशद-रुः ॥ ५ । २ । ३६ ॥	७२०
२०२०	दाण्डाजिनि-कम् ॥ ७ । १ । १७१ ॥	४०७
५३८	दामः संप्रदा-च ॥ २ । २ । ५२ ॥	१२२
२३०१	दामन्यादेरीयः ॥ ७ । ३ । ६७ ॥	४६५
४०९-२	दाम्नः ॥ २ । ४ । १० ॥	८९
९४६	दाश्वत्साह्वन्मीढ्वत् ॥ ४ । १ । १५ ॥	७१६
१४३५	दिक्पूर्वपदादनाम्नः ॥ ६ । ३ । २३ ॥	२९५
१४८७	दिक्पूर्वात्तौ ॥ ६ । ३ । ७१ ॥	३०४
१०७८	दिक्शब्दात्तीर-रः ॥ ३ । २ । १४२ ॥	२३५
२१६६	दिक्शब्दा-ग्याः ॥ ७ । २ । ११३ ॥	४३५
८२६	दिगधिकं संज्ञा-दे ॥ ३ । १ । ९८ ॥	१८१
१५४३	दिगादिदेहांशाद्यः ॥ ६ । ३ । १२४ ॥	३१५
११६१	दितेश्चैयण् वा ॥ ६ । १ । ६९ ॥	२४९
१०११	दिद्युद्दृज्ज-षः ॥ ५ । २ ८३ ॥	७२८
३६४	दिव औः सौ ॥ २ । १ । ११७ ॥	७५
९१७	दिवस् दिवः-वा ॥ ३ । २ । ४५ ॥	२०३
३०९	दिवादेः श्यः ॥ ३ । ४ । ७२ ॥	५५१
९१६	दिवो द्यावा ॥ ३ । २ । ४४ ॥	२०३
६३५	दिशो रूक्ष्या-ले ॥ ३ । १ । २५ ॥	१४५

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३३५	दिस्योरोट् ॥ ४ । ४ । ८९ ॥	५३६
४३५	दीङः सनि वा ॥ ४ । २ । ६ ॥	५९७
१७९	दीपजनबुध-वा ॥ ३ । ४ । ६७ ॥	५२०
५५१	दीप्तिज्ञानयत्न-दः ॥ ३ । ३ । ७८ ॥	६२६
३१४	दीय् दीङः-रे ॥ ४ । ३ । ९३ ॥	५५५
१७७६	दीर्घः ॥ ६ । ४ । १२७ ॥	३५७
२३५	दीर्घङ्याब्-सेः ॥ १ । ४ । ४५ ॥	४४
२६१	दीर्घमबोऽन्त्यम् ॥ ४ । १ । १०३ ॥	५७२
२१८१	दीर्घश्च्वयङ्-च ॥ ४ । ३ । १०८ ॥	४३८
१९१	दीर्घो नाम्य-घ्रः ॥ १ । ४ । ४७ ॥	३४
२१९७	दुःखात्प्रातिकूल्ये ॥ ७ । २ । १४१ ॥	४४२
११६४	दुःस्वीषतः-खल् ॥ ५ । ३ । १३९ ॥	८८६
८९३	दुगोरू च ॥ ४ । २ । ७७ ॥	७०४
१२३२	दुनादिकुर्वि-ञ्यः ॥ ६ । १ । ११८ ॥	२६०
७६९	दुर्निन्दाकुच्छ्रे ॥ ३ । १ । ४३ ॥	१६९
१२००	दुष्कुलादेयण्वा ॥ ६ । १ । ९८ ॥	२५४
१९५	दुहदिहलिह-कः ॥ ४ । ३ । ७४ ॥	५२५
८४३	दुहेर्डुघः ॥ ५ १ । १४५ ॥	६९२
९५	दूरादामन्त्र्य-नृत् ॥ ७ । ४ । ९९ ॥	१७
१४१६	दूरादेत्यः ॥ ६ । ३ । ४ ॥	२९३
१०८२	दृग्दृशदक्षे ॥ ३ । २ । १५१ ॥	२३५
१५४९	दृतिकुक्षि-यण् ॥ ६ । ३ । १३० ॥	३१६
७९५	दृतिनाथात्पशाविः ॥ ५ । १ । ९७ ॥	६८४
२५१	दृन्पुनर्वर्षाकारैर्भुवः ॥ २ । १ । ५९ ॥	४७
७२४	दृवृस्तुजुषे-सः ॥ ५ । १ । ४० ॥	६७२
८६८	दृशः क्वनिप् ॥ ५ । १ । १६६ ॥	६९८
५०५	दृश्यभिवदोरात्मने ॥ २ । २ । ९ ॥	११३
३३१	दृश्यर्थैश्चिन्तायाम् ॥ २ । १ । ३० ॥	६९
१४०१	दृष्टे साम्नि नाम्नि ॥ ६ । २ । १३३ ॥	२९०
२१८९	देये त्रा च ॥ ७ । २ । १३३ ॥	४४०
१६५	देर्दिगिः परोक्षायाम् ॥ ४ । १ । ३२ ॥	५१४
१३६७	देवता ॥ ६ । २ । १०१ ॥	२८४
१३६८	देवतानामात्वादौ ॥ ७ । ४ । २ ॥	२८४
१८६२	देवतान्तात्तदर्थे ॥ ७ । १ । २२ ॥	३७४
१९६०	देवपथादिभ्यः ॥ ७ । १ । १११	३९६
७९७	देववातादापः ॥ ५ । १ । ९९ ॥	६८४
१७३०	देवव्रतादीन् ङिन् ॥ ६ । ४ । ८३ ॥	३४२
२२१५	देवात्तल् ॥ ७ । २ । १६२ ॥	४४५
११०१	देवाद्यञ् च ॥ ६ । १ । २१ ॥	२३९
९६९	देवानांप्रियः ॥ ३ । २ । ३४ ॥	२१४
५३५	देवार्चामैत्री-स्थः ॥ ३ । ३ । ६० ॥	६२३
१५६१	देविकाशिंश-वाः ॥ ७ । ४ । ३ ॥	३१८
९९९	देशे ॥ २ । ३ । ७० ॥	२१९
७७०	देशेऽन्तरो-नः ॥ २ । ३ । ९१ ॥	६६८
७३३	दैर्घ्येऽनुः ॥ ३ । १ । ३४ ॥	१६२
४९३	दैवयज्ञिशौचिवृ-र्वा ॥ २ । ४ । ८२ ॥	१०६

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३५५	दो मः स्यादौ ॥ २ । १ ३९ ॥	७४
१३१०	दोरप्राणिनः ॥ ६ । २ । ४९ ॥	२७५
१४४४	दोरीयः ॥ ६ । ३ । ३२ ॥	२९७
१४५४	दोरेव प्राचः ॥ ६ । ३ । ४० ॥	२९९
९२०	दोसोमास्थ इः ॥ ४ । ४ । ११ ॥	७१०
१३७६	द्यावापृथिवी-यौ ॥ ६ । २ । १०८ ॥	२८५
१९७	द्युतेरिः ॥ ४ । १ । ४१ ॥	५२६
१९६	द्युद्भ्योऽयतन्याम् ॥ ३ । ३ । ४४ ॥	५२५
२०८९	द्युद्रोर्मः ॥ ७ । २ । ३७ ॥	४२१
१४२०	द्युप्रागपागु-यः ॥ ६ । ३ । ८ ॥	२९३
९६२	द्युप्रावृट्वर्षा-त् ॥ ३ । २ । २७ ॥	२१३
९७५	द्रमक्रमो यङः ॥ ५ । २ । ४६ ॥	७२३
१८२१	द्रव्यवस्रात्केकम् ॥ ६ । ४ । १६७ ॥	३६६
१२५१	द्रीञो वा ॥ ६ । १ । १३९ ॥	२६५
१२३७	देरञणोऽप्राच्यभर्गादेः ॥ ६ । १ । १२३ ॥	२६१
११४८	द्रोणाद्रा ॥ ६ । १ । ५९ ॥	२४७
१९६४	द्रोर्भव्ये ॥ ७ । १ । ११५ ॥	३९६
१३०४	द्रोर्वयः ॥ ६ । २ । ४३ ॥	२७४
१२४४	द्रयादेस्तथा ॥ ६ । १ । १३२ ॥	२६३
२३१३	द्वन्द्वं वा ॥ ७ । ४ । ८२ ॥	४७०
१६३०	द्वन्द्वात्प्रायः ॥ ६ । ३ । २०१ ॥	३३१
१२६३	द्वन्द्वादीयः ॥ ६ । २ । ७ ॥	२६८
१९२३	द्वन्द्वाल्लित् ॥ ७ । १ । ७४ ॥	३८८
२००	द्वन्द्वे वा ॥ १ । ४ । ११ ॥	३७
२२३२	द्वयोर्विभज्ये च तर ॥ ७ । ३ । ६ ॥	४४९
१३१८	द्वारादेः ॥ ७ । ४ । ६ ॥	२६६
१३६	द्विः कानः-सः ॥ १ । ३ । ११ ॥	२५
१९९३	द्विगोः संशये च ॥ ७ । १ । १४४ ॥	४०१
४३२	द्विगोः समाहारात् ॥ २ । ४ । २२ ॥	९४
११०३	द्विगोरनपत्ये-द्विः ॥ ६ । १ । २४ ॥	२३९
८५३	द्विगोरनह्नोऽट् ॥ ७ । ३ । ९९ ॥	१९०
१७९२	द्विगोरीनः ॥ ६ । ४ । १४० ॥	३६०
३६५	द्विगोरीनेकटौ वा ॥ ६ । ४ । १६४ ॥	३६५
३८	द्वितीयतुर्य-वौ ॥ ४ । १ । ४२ ॥	४८२
१२२३	द्वितीयया ॥ ५ । ४ । ७८ ॥	८९८
७८६	द्वितोया खट्वा क्षेपे ॥ ३ । १ । ५९ ॥	१७३
२२७५	द्वितीयात्स्वरादूर्ध्वम् ॥ ७ । ३ । ४१ ॥	४६०
४६८	द्वितीयायाः काम्यः ॥ ३ । ४ । २२ ॥	६०५
६०९	द्वितीयाषष्ठ्यथावे-ञ्चेः ॥ २ । २ । ११७ ॥	१३८
२१६३	द्वित्रिचतुरः सुच् ॥ ७ । २ । ११० ॥	४३४
७८३	द्वित्रिचतुष्पू-यः ॥ ३ । १ । ५६ ॥	१७२
१७९७	द्वित्रिबहो-स्तात् ॥ ६ । ४ । १४४ ॥	३६१
२००१	द्वित्रिभ्यामयड् वा ॥ ७ । १ । १५२ ॥	४०३
९९६	द्वित्रिस्वरौ-भ्यः ॥ २ । ३ । ६७ ॥	२१८
८५४	द्वित्रेरायुषः ॥ ७ । ३ । १०० ॥	१९०
२१६०	द्वित्रेर्धमञ्जधौ वा ॥ ७ । २ । १०७ ॥	४३४

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
६५४	द्वित्रेर्मूर्ध्नो वा ॥ ७ । ३ । १२७ ॥	१४९
१०३४	द्वित्र्यष्टानां-हौ ॥ ३ । २ । ९२ ॥	२३६
१८००	द्वित्र्यादेर्याण् वा ॥ ६ । ४ । १४७ ॥	३६१
१९८३	द्वित्वे गींयुगः ॥ ७ । १ । १३४ ॥	३९९
५२१	द्वित्वे ऽधोऽध्युपरिभिः ॥ २ । २ । ३४ ॥	११८
२३८	द्वित्वेऽप्यन्ते-वा ॥ २ । ३ । ८१ ॥	५३७
३२३	द्वित्वे वां नौ ॥ २ । १ । २२ ॥	६६
२१८	द्वित्वे ह्रः ॥ ४ । १ । ८७ ॥	५३०
७४२	द्विदण्डयादिः ॥ ७ । ३ । ७५ ॥	१६४
६७०	द्विपदाद्धर्मादन् ॥ ७ । ३ । १४१ ॥	१५२
३६	द्विर्धातुः परोक्षाङे-धेः ॥ ४ । १ । १ ॥	४८२
८०६	द्विषन्तपपरन्तपौ ॥ ५ । १ । १०८ ॥	६८६
५७६	द्विषो वातृशः ॥ २ । २ । ८४ ॥	१३२
१८०९	द्विस्वरब्रह्म-देः ॥ ६ । ४ । १५५ ॥	३६३
१२११	द्विस्वरादणः ॥ ६ । १ । १०९ ॥	२५६
११६४	द्विस्वरादनद्याः ॥ ६ । १ । ७१ ॥	२४९
५७८	द्विहेतो-वा ॥ २ । २ । ८७ ॥	१२२
१४८४	द्वीपादनुसमुद्रं ण्यः ॥ ६ । ३ । ६८ ॥	३०४
२०१४	द्वेस्तीयः ॥ ७ । १ । १६५ ॥	४०६
१०५१	द्व्यन्तरनव-ईप् ॥ ३ । २ । १०९ ॥	२३०
२००२	द्व्यादेर्गुणान्-यद् ॥ ७ । १ । १५१ ॥	४०३
२३९	द्व्युक्तजक्षपञ्चतः ॥ ४ । २ । ९३ ॥	५३७
३००	द्व्युक्तोपान्त्यस्य-रे ॥ ४ । ३ । १४ ॥	५५०
१२४६	द्व्येकेषु-र्वा ॥ ६ । १ । १३४ ॥	२६४
४१७	द्व्येषसूत-स्य ॥ २ । ४ । १०९ ॥	९१

ध

१८४९	धनगणाल्लब्धरि ॥ ७ । १ । ९ ॥	३७२
२०२८	धनहिरण्ये कामे ॥ ७ । १ । १७९ ॥	४०९
१०९०	धनादेः पत्युः ॥ ६ । १ । १४ ॥	२३७
७९०	धनुर्दण्डत्सरु-हः ॥ ५ । १ । ९२ ॥	६८३
६८७	धनुषो धन्वन् ॥ ७ । ३ । १५८ ॥	१५४
२११७	धर्मशील-त् ॥ ७ । २ । ६५ ॥	४२५
१६९६	धर्माधर्माभ्यरति ॥ ६ । ४ । ४९ ॥	३४३
८८८	धर्मार्थादिषु द्वन्द्वे ॥ ३ । १ । १५९ ॥	१९७
४६९	धवाद्योगा-त् ॥ २ । ४ । ५९ ॥	१०२
९२३	धागः ॥ ४ । ४ । १५ ॥	७१०
२९८	धागस्तथोश्च ॥ २ । १ । ७८ ॥	५५०
४९९	धातोः कण्ड्वादेर्यक् ॥ ३ । ४ । ८ ॥	६१४
२२	धातोः पू-च्च ॥ ३ । १ । १ ॥	४
६६३	धातोः सम्बन्धे प्रत्ययाः ॥ ५ । ४ । ४१ ॥	६५७
१२२	धातारनेकस्वरादाम्-न्तम् ॥ ३ । ४ । ४६ ॥	५०२
२३८	धातोरिवर्णो-ये ॥ २ । १ । ५० ॥	४४
१०१९	धात्री ॥ ५ । २ । ९१ ॥	७३०
१९२८	धान्येभ्य इनञ् ॥ ७ । १ । ७९ ॥	३९०
६९५	धाय्यापाय्यसा-से ॥ ५ । १ । २४ ॥	६६६
९५४	धारोऽोऽकृच्छ्रे तृश् ॥ ५ । २ । २५ ॥	७१९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
८११	धारेर्धर् च ॥ ५ । १ । ११३ ॥	६८७
७६	धुटस्तृतीयः ॥ २ । १ । ७६ ॥	१३
२७६	धुटां प्राक् ॥ १ । ४ । ६६ ॥	५४
१२८	धुटो धुटि-वा ॥ १ । ३ । ४८ ॥	२४
८११	धुड्ह्रस्वा-थोः ॥ ४ । ३ । ७० ॥	६८७
९३३	धुरोऽनक्षस्य ॥ ७ । ३ । ७७ ॥	२०८
१८४२	धुरोयैयण् ॥ ७ । १ । ३ ॥	३७१
८६	धूगौदितः ॥ ४ । ४ । ३८ ॥	४९४
३८१	धूग्रीगोर्नः ॥ ४ । २ । १८ ॥	५८५
७९	धूग्सुस्तोः परस्मै ॥ ४ । ४ । ८५ ॥	४९३
१४६२	धूमादेः ॥ ६ । ३ । ४६ ॥	३००
९३१	धृषशसः प्रगल्भे ॥ ४ । ४ । ६६ ॥	७१२
१२७२	धेनोरनञः ॥ ६ । २ । १५ ॥	२७०
१०६०	धेनोर्भव्यायाम् ॥ ३ । २ । ११८ ॥	२३२

न

५१४	न ॥ २ । २ । १८ ॥	११५
४७१	नं क्ये ॥ १ । १ । २२ ॥	६०६
१२७	नः शि ञ्च् ॥ १ । ३ । १९ ॥	२४
७०४	न कचि ॥ २ । ४ । १०५ ॥	१५६
८०९	न कर्तरि ॥ ३ । १ । ८२ ॥	१७७
५९८	न कर्मणा ञिच् ॥ ३ । ४ । ८८ ॥	६३९
४५७	न कवतेर्यङः ॥ ४ । १ । ४७ ॥	६०२
८४२	न किमः क्षेपे ॥ ७ । ३ । ७० ॥	१८६
४५०	नखमुखादनाम्नि ॥ २ । ४ । ४० ॥	९८
१०६६	नखादयः ॥ ३ । २ । १२८ ॥	२३३
७०६	न ख्यापूग्-श्च ॥ २ । ३ । ९० ॥	६६८
१४६५	नगरात्कुत्सादाक्ष्ये ॥ ६ । १ । ४९ ॥	३०१
७८५	नगरादगजे ॥ ५ । १ । ८७ ॥	६८२
४४९	न गृणाशुभरुचः ॥ ३ । ४ । १३ ॥	६००
१०६५	नगोऽप्राणिनि वा ॥ ३ । २ । १२७ ॥	२३३
८२६	नग्नपलित-कञौ ॥ ५ । १ १२८ ॥	६८९
१८७२	न् चोधसः ॥ ७ । १ । ३२ ॥	३७६
३१८	न जनवधः ॥ ४ । ३ । ५४ ॥	५५६
७७८	नञ् ॥ ३ । १ । ५१ ॥	१७०
१५८४	नञः क्षेत्रज्ञे-चेः ॥ ७ । ४ । २३ ॥	३२३
६६५	नञत् ॥ ३ । २ । १२५ ॥	१५१
८७७	नञव्यया-ऽजः ॥ ७ । ३ । १२३ ॥	१९४
२२९२-२	न त्रस्वङ्गादेः ॥ ७ । ४ । ९ ॥	४६४
११४१	नञोऽनिः शापे ॥ ५ । ३ । ११७ ॥	८८२
७०७	नञोर्थात् ॥ ७ । ३ । १७४ ॥	१५७
८७९	नञ्तत्पुरुषात् ॥ ७ । ३ । ७१ ॥	१९४
१९०१	नञ्तत्पुरु-देः ॥ ७ । १ । ५७ ॥	३८३
६६२	नञ्बह्वो-णे ॥ ७ । ३ । १३५ ॥	१५१
६६४	नञ्सुदुर्भ्यः र्वा ॥ ७ । ३ । १३६ ॥	१५१
६५८	नञ्सुञ्युप-रः ॥ ७ । ३ । १३१ ॥	१५०
१५९२	नटान्नृत्ते ञ्यः ॥ ६ । ३ । १६५ ॥	३२४

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१३४०	नडकुमुदवेतस-डित् ॥ ६ । २ । ७४ ॥	२८०
१३४३	नडशादाद् वलः ॥ ६ । २ । ७५ ॥	२८१
११४२	नडादिभ्य आयनण् ॥ ६ । १ । ५३ ॥	२४६
१३५८	नडादेः कीयः ॥ ६ । २ । ९२ ॥	२८२
९१२	न डीङ्शीङ्-दः ॥ ४ । ३ । २७ ॥	७०८
९७४	न णिङ्यसृद-क्षः ॥ ५ । २ । ४५ ॥	७२३
२२४७	न तमबादिः-भ्यः ॥ ७ । ३ । १३ ॥	४५३
७६९	न तिकि दीर्घश्च ॥ ४ । २ । ५९ ॥	६७९
९०८	न दधिपयआदिः ॥ ३ । १ । १४५ ॥	२०२
२७९	न दिस्योः ॥ ४ । ३ । ६१ ॥	५४५
९०५	नदीदेशपुरां-नाम् ॥ ३ । १ । १४२ ॥	२०१
७२२	नदीभिर्नाम्नि ॥ ३ । १ । २७ ॥	१६०
१४१४	नद्यादेरेयण् ॥ ६ । ३ । २ ॥	२९२
१३३७	नद्यां मतुः ॥ ६ । २ । ७२ ॥	२८०
७५	न द्वित्वे ॥ ७ । २ । १४७ ॥	१३
१३२६	न द्विरनुवय-त् ॥ ६ । २ । ६१ ॥	२७८
१०४१	न-द्विस्वरा-तात् ॥ ६ । ३ । २९ ॥	२९६
२२६	न नाङ्दित् ॥ १ । ४ । २७ ॥	४२
७१०	न नाम्नि ॥ ७ । ३ । १७६ ॥	१५७
९४४	न नाम्येक-ऽमः ॥ ३ । २ । ९ ॥	२१०
१९५८	न नृपूजार्थध्वजचित्रे ॥ ७ । १ । १०९ ॥	३९५
६१९	ननौ पृष्टोक्तौ-त् ॥ ५ । २ । १७ ॥	६४५
७४६	नन्द्यादिभ्योऽनः ॥ ५ । १ । ५२ ॥	६७५
६२०	नन्वोर्वा ॥ ५ । २ । १८ ॥	६४६
२७१	नपुंसकस्य खिः ॥ १ । ४ । ५५ ॥	५३
७४६	नपुंसकाद्वा ॥ ७ । ३ । ७९ ॥	१६५
८८२	न पुंवन्निषेधे ॥ ३ । २ । ८१ ॥	१९५
१२४७	न प्राग्जितीये स्वरे ॥ ६ । १ । १३५ ॥	२६४
१	न प्रादिरप्रत्ययः ॥ ३ । ३ । ४ ॥	४७४
३६५	न वदनं संयोगादिः ॥ ४ । १ । ५ ॥	५७५
१४९	नमस्पुरसो-सः ॥ २ । ३ । १ ॥	२७
४९०	नमोवरिवश्चित्रङो-र्यै ॥ ३ । ४ । ३७ ॥	६१०
१८४३	न यि तद्धिते ॥ २ । १ । ६५ ॥	३७१
१२६९	न राजन्य-के ॥ २ । ४ । ९४ ॥	२६९
१८७६	न राजाचार्य-ष्णः ॥ ७ । १ । ३६ ॥	३७७
६७	न रात्स्वरे ॥ १ । ३ । ३७ ॥	६७
४२०	नरिका मामिका ॥ २ । ४ । ११२ ॥	९२
१०२३	नरे ॥ ३ । २ । ८० ॥	२२४
६८०	नवश्चेर्गतौ ॥ ४ । १ । ११३ ॥	६६३
१९९	नवभ्यः-वा ॥ १ । ४ । १६ ॥	३७
३३८	न वमन्तसंयोगात् ॥ २ । १ । १११ ॥	७०
१७२०	नवयज्ञादयोऽ-न्ते ॥ ६ । ४ । ७३ ॥	३४७
२१०	न वयो यू ॥ ४ । १ । ७३ ॥	५२९
१०७०	नवा कणयमहसस्वनः ॥ ५ । ३ । ४८ ॥	८७१
१०५९	नवाऽखित्कृद-त्रेः ॥ ३ । २ । ११७ ॥	२३१
१३१७	नवा गुणः-रित् ॥ ७ । ४ । ८६ ॥	४७१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१७९५	नवाणः ॥ ६ । ४ । १४२ ॥	३६०
२२१३	नवादीन-स्य ॥ ७ । २ । १६० ॥	४४५
४	नवाद्यानि शत् दम् ॥ ३ । ३ । १९ ॥	४७५
७८९	नवापः ॥ २ । ४ । १०६ ॥	१५७
२७७	नवा परोक्षायाम् ॥ ४ । ४ । ५ ॥	५४५
९३६	नवा भावारम्भे ॥ ४ । ४ । ७२ ॥	७१४
१४९९	नवा रोगातपे ॥ ६ । ३ । ८२ ॥	३०६
४४९	नवा शोणादेः ॥ २ । ४ । ३१ ॥	९६
५५८	नवा सुजर्थैः काले ॥ २ । २ । ९६ ॥	१३४
३३७	नवा स्वरे ॥ २ । ३ । १०२ ॥	५६२
७९६	न विंशत्यादि-न्तः ॥ ३ । १ । ६९ ॥	१७५
१६३	न वृद्धिश्चा-पे ॥ ४ । ३ । ११ ॥	५१४
१९९	न वृद्धयः ॥ ४ । ४ । ५५ ॥	५२६
१०१६	नवैकस्वराणाम् ॥ ३ । २ । ६६ ॥	२२३
३०७	नशः शः ॥ २ । ३ । ७८ ॥	५५३
१०६	न शसदद्-नः ॥ ४ । १ । ३० ॥	४९८
१११	न शात् ॥ १ । ३ । ६२ ॥	२१
९७	न शिति ॥ ४ । २ । २ ॥	४९५
३०८	नशेर्नेश् वाङि ॥ ४ । ३ । १०२ ॥	५५३
३०९	नशो धुटि ॥ ४ । ४ । १०९ ॥	५५३
३६६	नशो घा ॥ २ । १ । ७० ॥	७६
११५	न श्विजागृस-तः ॥ ४ । ३ । ४९ ॥	५००
१४२	न संधिः ॥ १ । ३ । ५२ ॥	२६
५८	न संधिक्रीय-कि ॥ ७ । ४ । १११ ॥	१०
६४३	न सप्तमीन्द्रादिभ्यश्च ॥ ३ । १ । १६५ ॥	१४७
२०१	न सर्वादिः ॥ १ । ४ । १२ ॥	३७
६९३	नसस्य ॥ २ । ३ । ६५ ॥	१५५
२२९१	न सामिवचने ॥ ७ । ३ । ५७ ॥	४६३
२०४९	न स्तं-थें ॥ १ । १ । २३ ॥	४१४
१०४१	नस् नासिका-द्रे ॥ ३ । २ । ९९ ॥	२२८
५९५	न स्सः ॥ २ । ३ । ५९ ॥	६३८
४६४	न हाको लुपि ॥ ४ । १ । ४९ ॥	६०४
३८५	नहाहोर्धतौ ॥ २ । १ । ८५ ॥	८१
८१८	नाडीघटीखरी-श्च ॥ ५ । १ । १२० ॥	६८८
७१४	नाडीतन्त्रीभ्यां स्वाङ्गे ॥ ७ । ३ । १८० ॥	१५८
५०६	नाथः ॥ २ । २ । १० ॥	११३
६३३	नानद्यतन-त्योः ॥ ५ । ४ । ५ ॥	६४९
२३०५	नानावधारणे ॥ ७ । ४ । ७४ ॥	४६७
३२८	नान्यत् ॥ २ । १ । २७ ॥	६७
६४७	नाप्रियादौ ॥ ३ । २ । ५३ ॥	१४८
१८७१	नामेर्नभ्-शात् ॥ ७ । १ । ३१ ॥	३७६
६६१	नामेर्नाम्नि ॥ ७ । ३ । १३४ ॥	१५०
३३६	नामन्त्ये ॥ २ । १ । ९२ ॥	७०
६१८	नाम नाम्नैकार्थ्ये-लम् ॥ ३ । १ । १८ ॥	१४२
२२११	नामरूप-यः ॥ ७ । २ । १५८ ॥	४४५
२७७	नाम सिद-ने ॥ १ । १ । २१ ॥	३९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१०२९	नामिनः काशे ॥ ३ । २ । ८७ ॥	२२५
१५५	नामिनस्तयोः षः ॥ २ । ३ । ८ ॥	२८
३९	नामिनोऽकलिहलेः ॥ ४ । ३ । ५१ ॥	४८२
१४	नामिनो गुणो-ति ॥ ४ । ३ । १ ॥	४७८
४१९	नामिनोऽनिट् ॥ ४ । ३ । ३३ ॥	५९३
२८२	नामिनो लुग्वा ॥ १ । ४ । ६१ ॥	५५
४९४	नाम्नः प्रथमै-हौ ॥ २ । २ । ३१ ॥	१०७
२२४६	नाम्नः प्राग्-र्वा ॥ ७ । ३ । १२ ॥	४५३
१२२८	नाम्ना ग्रहादिशः ॥ ५ । ४ । ८३ ॥	९००
१३३८	नाम्नि ॥ २ । १ । ९५ ॥	२८०
४११	नाम्नि ॥ २ । ४ । १२ ॥	८९
८२२	नाम्नि ॥ ३ । १ । ९४ ॥	१८०
९५१	नाम्नि ॥ ३ । २ । १६ ॥	२११
१०१८	नाम्नि ॥ ३ । २ । ७५ ॥	२२४
६३२	नाम्नि ॥ ३ । २ । १४४ ॥	१४५
१८२६	नाम्नि ॥ ६ । ४ । १७२ ॥	३६८
१३१५	नाम्नि कः ॥ ६ । २ । ५४ ॥	२७६
११४५	नाम्नि पुंसि च ॥ ५ । ३ । १२१ ॥	८८२
१६२२	नाम्नि मक्षिकादिभ्यः ॥ ६ । ३ । १९३ ॥	३३०
४३	नाम्नि वा ॥ १ । २ । १० ॥	८
१५१७	नाम्नि शरदोऽकञ् ॥ ६ । ३ । १०० ॥	३१०
८२९	नाम्नो गमः-हः ॥ ५ । १ । १३१ ॥	६८९
५००	नाम्नो द्विती-घम् ॥ ४ । १ । ७ ॥	६१५
२१०	नाम्नो नोऽनह्नः ॥ २ । १ । ९१ ॥	३९
७१९	नाम्नो वदः क्यप् च ॥ ५ । १ । ३५ ॥	६७१
१०४९	नाम्न्युत्तरपदस्य च ॥ ३ । २ । १०७ ॥	२२९
१५४४	नाम्न्युदकात् ॥ ६ । ३ । १२५ ॥	३१५
१९२	नाम्यन्तस्था-पि ॥ २ । ३ । १५ ॥	३५
७०२	नाम्यादेरेव ने ॥ २ । ३ । ८६ ॥	६६७
७४८	नाम्युपान्त्य-कः ॥ ५ । १ । ५४ ॥	६७६
४८७	नारीं सखी-श्रू ॥ २ । ४ । ७६ ॥	१०५
८५८	नावः ॥ ७ । ३ । १०४ ॥	१९१
२०५५	नावादेरिकः ॥ ७ । २ । ३ ॥	४१५
६२४	नांशिष्यगोवत्सहले ॥ ३ । २ । १४८ ॥	१४५
३११	नासत्वाश्लेषे ॥ ३ । ४ । ५७ ॥	५५४
१९५६	नासानति-टम् ॥ ७ । १ । १२७ ॥	३९८
४४९	नासिकोदरौ-ष्ठात् ॥ २ । ४ । ३९ ॥	९८
१७१३	नास्तिका-कम् ॥ ६ । ४ । ६६ ॥	३४६
७००	निंसनिक्ष-वा ॥ २ । ३ । ८४ ॥	६६७
९०३	निकटपाठस्य ॥ ३ । १ । १४० ॥	२०१
१७२४	निकटादिषु वसति ॥ ६ । ४ । ७७ ॥	३४८
७५६	निगवादेर्नाम्नि ॥ ५ । १ । ६१ ॥	६७७
१०५८	निघोद्घसंघो-घम् ॥ ५ । ३ । ३६ ॥	८६९
२९९	निजां शित्येत् ॥ ४ । १ । ५७ ॥	५५०
२३७	नित्यदिद्-स्वः ॥ १ । ४ । ४३ ॥	४४
३३२	नित्यमन्वादेशे ॥ २ । १ । ३१ ॥	६९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
९०४	नित्यवैरस्य ॥ ३ । १ । १४१ ॥	२०१
२२९२	नित्यंजिञिनोऽण् ॥ ७ । ३ । ५८ ॥	४६४
१७३६	नित्यं णः पन्थश्च ॥ ६ । ४ । ८९ ॥	३५०
७३६	नित्यं प्रतिनाल्पे ॥ ३ । १ । ३७ ॥	१६२
७६५	नित्यं हस्ते-हे ॥ ३ । १ । १५ ॥	१६८
२७३	नि दीर्घः ॥ १ । ४ । ८५ ॥	५३
९७९	निनद्याः-ले ॥ २ । ३ । २० ॥	२१६
९९७	निन्दहिंस-रात् ॥ ५ । २ । ६८ ॥	७२६
८२८	निन्द्यं कुत्सनै-द्यैः ॥ ३ । १ । १०० ॥	१८२
२२२९	निन्द्ये पाशप् ॥ ७ । ३ । ४ ॥	४४८
८६९	निन्द्ये व्याप्या-यः ॥ ५ । १ । १५९ ॥	६९६
५९५	निपुणेन चार्चायाम् ॥ २ । २ । १०३ ॥	१३५
६८३	निप्राद्युजः शक्ये ॥ ४ । १ । ११६ ॥	६६४
५११	निप्रेभ्यो घ्नः ॥ २ । २ । १५ ॥	११५
११७२	निमील्यादिभेङ-के ॥ ५ । ४ । ४६ ॥	८८८
१२०७	निमूलात्कषः ॥ ५ । ४ । ६२ ॥	८९४
२४०	निय आम् ॥ १ । ४ । ५१ ॥	४५
१०८२	नियश्चानुपसर्गाद्वा ॥ ५ । ३ । ६० ॥	८७३
१७१७	नियुक्तं दीयते ॥ ६ । ४ । ७० ॥	३४७
१०४३	निरभेः पूलवः ॥ ५ । ३ । २१ ॥	८६७
२००	निरभ्यनोश्च-नि ॥ २ । ३ । ५० ॥	५२६
८३१	निर्गो देशे ॥ ५ । १ । १३३ ॥	६९०
७४५	निर्दुःसुखैः-तैः ॥ २ । ३ । ५६ ॥	६७५
१५६	निर्दुर्बहि-राम् ॥ २ । ३ । ९ ॥	२८
९९१	निर्दुःसोः-म्नाम् ॥ २ । ३ । ३१ ॥	२१८
३४२	निर्नः स्फुरस्फुलोः ॥ २ । ३ । ५३ ॥	५६६
८९५	निर्वाणमवाते ॥ ४ । २ । ७९ ॥	७०४
७०५	निर्विण्णः ॥ २ । ३ । ८९ ॥	६६८
१६६७	निर्वृत्तेऽक्षद्यूतादेः ॥ ६ । ४ । २० ॥	३३८
१७५२	निर्वृत्ते ॥ ६ । ४ । १०५ ॥	३५३
३९२	नि वा ॥ १ । ४ । ८९ ॥	८३
१४८१	निवासाचरणेऽण् ॥ ६ । ३ । ६५ ॥	३०३
१३३४	निवासादूरभवे-म्नि ॥ ६ । २ । ६९ ॥	२७९
५०५	निविशः ॥ ३ । ३ । २४ ॥	६१६
९१७	निविस्वन्ववात् ॥ ४ । ४ । ८ ॥	७०९
१५००	निशाप्रदोषात् ॥ ६ । ३ । ८३ ॥	३०६
११६९	निषेधेऽलंखल्वोः कत्वा ॥ ५ । ४ । ४४ ॥	८८८
२१०९	निष्कादेः-स्नात् ॥ ७ । २ । ५७ ॥	४२४
२१९५	निष्कुलान्नि-णे ॥ ७ । २ । १३९ ॥	४४१
३६३	निष्कुषः ॥ ४ । ४ । ३९ ॥	५७४
७१५	निष्प्रवाणिः ॥ ७ । ३ । १८१ ॥	१५८
२२०७	निष्फले तिला-जौ ॥ ७ । २ । १५४ ॥	४४४
९९५	निष्पा-नस्य ॥ २ । ३ । ६६ ॥	२१८
१३६	निसस्तपेऽनासेवायाम् ॥ २ । ३ । ३५ ॥	५०६
८७६	निसश्च श्रेयसः ॥ ७ । ३ । १२२ ॥	१९४
१४३०	निसो गते ॥ ६ । ३ । १८ ॥	२९५

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
५४३	निह्नवे ज्ञः ॥ ३ । ३ । ६८ ॥	६२४
१०१६	नीदाव्शसु-ब्रद् ॥ ५ । २ । ८८ ॥	७२९
१२५९	नीलपीतादकम् ॥ ६ । २ । ४ ॥	२६७
४३७	नीलात्प्राण्योषध्योः ॥ २ । ४ । २७ ॥	९५
५२९	नुप्रच्छः ॥ ३ । ३ । ५४ ॥	६२२
४८३	नुर्जातेः ॥ २ । ४ । ७२ ॥	१०४
२५३	नुर्वा ॥ १ । ४ । ४८ ॥	४८
४५६	नृतेर्यङि ॥ २ । ३ । ९५ ॥	६०१
७६०	नृत्खन्रक्षः-ट् ॥ ५ । १ । ६५ ॥	६७८
१५७८	नृहेतुभ्यो-वा ॥ ६ । ३ । १५६ ॥	३२१
१३३	नृनः-वा ॥ १ । ३ । १० ॥	२५
९६४	नेनसिद्धस्थे ॥ ३ । २ । २९ ॥	२१४
२०४	नेमार्धे-वा ॥ १ । ४ । १० ॥	३८
१९७७	नेरिनपिट-स्य ॥ ७ । १ । १२८ ॥	३९८
७१	नेर्ङमादापत-ग्धौ ॥ २ । ३ । ७९ ॥	४९१
१४२९	नेर्ध्रुवे ॥ ६ । ३ । १७ ॥	२९५
१०४८	नेर्नदगदपठ-णः ॥ ५ । ३ । २६ ॥	८६८
१०९६	नेर्वुः ॥ ५ । ३ । ७४ ॥	८७४
२२३७	नैकस्वरस्य ॥ ७ । ४ । ४४ ॥	४५१
१६०	नैकार्थेऽक्रिये ॥ २ । ३ । १२ ॥	२९
२०८१	नोऽङ्गादेः ॥ ७ । २ । २९ ॥	४२०
७३७	नोतः ॥ ३ । ४ । १६ ॥	६७४
६५५	नोऽपदस्य तद्धिते ॥ ७ । ४ । ६१ ॥	१४९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
५४३	नोपसर्गात्-हा ॥ २ । २ । २८ ॥	१२३
४१२	नोपान्त्यवतः ॥ २ । ४ । १३ ॥	८९
१३०	नोऽप्रशानो-रे ॥ १ । ३ । ८ ॥	२४
५८०	नोभयोर्हेतोः ॥ २ । २ । ८९ ॥	१३३
२००८	नो मट् ॥ ७ । १ । १५९ ॥	४०५
२०५४	नोर्म्यादिभ्यः ॥ २ । १ । ९९ ॥	४१५
१०८	नो व्यञ्जनस्या-तः ॥ ४ । २ । ४५ ॥	४९८
१६५७	नौह्रिस्वरादिकः ॥ ६ । ४ । १० ॥	३३६
१८५२	नौविषेण-ध्ये ॥ ७ । १ । १२ ॥	३७३
१८७२	न्चोधसः ॥ ७ । १ । ३२ ॥	३७६
१३२४	न्यग्रोधस्य-स्य ॥ ७ । ४ । ७ ॥	२७७
६७९	न्यङ्कूद्र-यः ॥ ४ । १ । ११२ ॥	६६३
१५८३	न्यङ्कोर्वा ॥ ७ । ४ । ८ ॥	३२३
१०६४	न्यभ्युपवेर्वाश्रोत् ॥ ५ । ३ । ४२ ॥	८७१
१०७८	न्यवाच्छापे ॥ ५ । ३ । ५६ ॥	८७२
१०४६	न्यादो नवा ॥ ५ । ३ । २४ ॥	८६८
१३८६	न्यायादेरिकण् ॥ ६ । २ । ११८ ॥	२८७
१८५३	न्यायार्थादनपेते ॥ ७ । १ । १३ ॥	३७३
११५९	न्यायाधाया-रम् ॥ ५ । ३ । १३४ ॥	८८५
१०९४	न्युदो ग्रः ॥ ५ । ३ । ७४ ॥	८७४
२७७	न्स्महतोः ॥ १ । ४ । ८६ ॥	५४
	प	
४५३	पक्षाद्यौपम्यादेः ॥ २ । ४ । ४३ ॥	९९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१९३८	पक्षात्तिः ॥ ७ । १ । ८९ ॥	३९१
१६७८	पक्षिमत्स्य-ति ॥ ६ । ४ । ३१ ॥	३३९
५९७	पचिदुहेः ॥ ३ । ४ । ८७ ॥	६३९
१०	पञ्चको वर्गः ॥ १ । १ । १२ ॥	२
२७४	पञ्चतोऽन्यादे-दः ॥ १ । ४ । ५८ ॥	५३
१८२९	पञ्चदशद्वर्गे वा ॥ ६ । ४ । १७५ ॥	३६८
२३	पञ्चमो-आमहैव् ॥ ३ । ३ । ८ ॥	४८०
८००	पञ्चमी भयाद्यैः ॥ ३ । १ । ७३ ॥	१७५
५६०	पञ्चम्यपादाने ॥ २ । २ । ६९ ॥	१२७
६२६	पञ्चम्यर्थहेतौ ॥ ५ । ३ । ११ ॥	६४७
२५४	पञ्चम्याः कृग् ॥ ३ । ४ । ५२ ॥	५४०
१२२२	पञ्चम्या त्वरायाम् ॥ ५ । ४ । ७७	८९८
२९	पञ्चम्या नि-स्य ॥ ७ । ४ । १०४ ॥	५
१८८३	पञ्चसर्व-ये ॥ ७ । १ । ४१ ॥	३७८
१८०१	पणपादमाषाद्यः ॥ ६ । ४ । १४८ ॥	३६१
१०५४	पणेर्माने ॥ ५ । ३ । ३२ ॥	८६९
१९०८	पतिराजान्त-च ॥ ७ । १ । ६० ॥	३८५
४६३	पतिवत्न्यन्त-ण्योः ॥ २ । ४ । ५३ ॥	१००
८०६	पत्तिरथौ गणकेन ॥ ३ । १ । ७९ ॥	१७७
४५८	पत्युर्नः ॥ २ । ४ । ४८ ॥	१००
१६०४	पत्रपूर्वादञ् ॥ ६ । ३ । १७७ ॥	३२६
१७३५	पथ इकट् ॥ ६ । ४ । ८८ ॥	३५०
१५२०	पथः पन्थ च ॥ ६ । ३ । १०३ ॥	३१०
३४३	पथिन्मथिन्-सौ ॥ १ । ४ । ७६ ॥	७२
१५१३	पथोऽकः ॥ ६ । ३ । ९६ ॥	३०९
१८५६	पथ्यतिथि-यण् ॥ ७ । १ । १६ ॥	३७४
१०३७	पदः पादस्याज्या-ते ॥ ३ । २ । ९५ ॥	२२७
१३८७	पदकल्पल-कात् ॥ ६ । २ । ११९ ॥	२८७
१३९४	पदकर्मशिक्षा-कः ॥ ६ । २ ॥ १२६ ॥	२८९
१०३३	पदरुजविश-घञ् ॥ ५ । ३ । १६ ॥	८६६
६०	पदस्य ॥ २ । १ । ८९ ॥	११
१३१९	पदस्यानिति वा ॥ ७ । ४ । १२ ॥	२७६
३२२	पदाद्युग्-त्वे ॥ २ । १ । २१ ॥	६५
५७५	पदान्तरगम्ये वा ॥ ३ । ३ । ९९ ॥	६३३
११२	पदान्ताट्ट-तेः ॥ १ । ३ । ६३ ॥	२१
३६८	पदान्ते ॥ २ । १ । ६४ ॥	७६
७२८	पदास्वैरिबा-हः ॥ ५ । १ । ४४ ॥	६७२
१६६०	पदिकः ॥ ६ । ४ । १३ ॥	३३७
७०९	पदेऽन्तरेऽना-ते ॥ २ । ३ । ९३ ॥	६६९
१३९३	पदोत्तरपदेभ्य इकः ॥ ६ । २ । १२५ ॥	२८९
४४३	पद्धतेः ॥ २ । ४ । ३३ ॥	९६
१३५५	पन्थ्यादेरायनण् ॥ ६ । २ । ८९ ॥	२८२
१२९६	पयोद्रोर्यः ॥ ६ । २ । ३५ ॥	२७३
१७८	परः ॥ ७ । ४ । ११८ ॥	३३
८०२	परःशतादिः ॥ ३ । १ । ७५ ॥	१७६
१४४३	परजनराज्ञोऽकीयः ॥ ६ । ३ । ३१ ॥	२९७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
६४६	परतः स्त्री पुंवत्-ङ् ॥ ३ । २ । ४९ ॥	१४७
१६८५	परदारादिभ्यो गच्छति ॥ ६ । ४ । ३८ ॥	३४१
१३०१	परशव्याद्यलुक् च ॥ ६ । २ । ४० ॥	२७४
१७१०	परश्वधाद्वाण् ॥ ६ । ४ । ६३ ॥	३४५
११२७	परस्त्रियाः प-र्ण्यं ॥ ६ । १ । ४० ॥	२४४
२३२०	परस्परान्योन्येत-सि ॥ ३ । २ । १ ॥	४७२
५	पराणि कानान-दम् ॥ ३ । ३ । २० ॥	४७५
९५२	परात्मभ्यां ञेः ॥ ३ । २ । १७ ॥	२११
५७६	परानोः कृगः ॥ ३ । ३ । १०१ ॥	६३३
२१७०	परावरात्स्तात् ॥ ७ । २ । ११६ ॥	४३६
१४८९	परावराधमो-र्यः ॥ ६ । ३ । ७३ ॥	३०५
११७०	परावरे ॥ ५ । ४ । ४५ ॥	८८८
५१०	परावेर्जेः ॥ ३ । ३ । २८ ।	६१७
५५७	परिक्रयणे ॥ २ । २ । ६७ ॥	१२६
१२२५	परिक्लेश्येन ॥ ५ । ४ । ८० ॥	८९९
१८९०	परिखाऽस्य स्यात् ॥ ७ । १ । ४८ ॥	३७९
६९६	परिचाय्योप-म्नौ ॥ ५ । १ । २५ ॥	६६६
१८८६	परिणामि-र्थे ॥ ७ । १ । ४४ ॥	३७८
६२१	परिदेवने ॥ ५ । ३ । ६ ॥	६४६
१८१	परिनिवेः सेवः ॥ २ । ३ । ४६ ॥	५२०
१६८०	परिपथात् ॥ ६ । ४ । ३३ ॥	३४०
१६७९	परिपन्थात्तिष्ठति च ॥ ६ । ४ । ३२ ॥	३४०
४३३	परिमाणा-ल्यात् ॥ २ । ४ । २३ ॥	९४

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
८०७	परिमाणार्थ-चः ॥ ५ । १ । १०९ ॥	६८६
१५५५	परिमुखादे-वात् ॥ ६ । ३ । १३६ ॥	३१६
५७१	परिमुहायमा-ति ॥ ३ । ३। ९४ ॥	६३२
५०९	परिव्यवात् क्रियः ॥ ३ । ३ । २७ ॥	६१७
७४४	परेः ॥ २ । ३ । ५२ ॥	६७५
१०९८	परेः क्रमे ॥ ५ । ३ । ७६ ॥	८७४
११२६	परेः सूचरेर्यः ॥ ५ । ३ । १०२ ॥	८७९
१०६२	परेर्घ्रः ॥ ५ । ३ । ४० ॥	८७०
१०६२-२	परेर्घाङ्कयोगे ॥ २ । ३ । १०३ ॥	८७१
९९४	परेर्दैविमुहश्च ॥ ५ । २ । ६५ ॥	७२५
१०८५	परेर्ह्रते ॥ ५ । ३ । ६३ ॥	८७३
१६७६	परेर्मुखपार्श्वात् ॥ ६ । ४ । २९ ॥	३३९
५७९	परेर्मृषश्च ॥ ३ । ३ । १०४ ॥	६३३
६३६	परे वा ॥ ५ । ४ । ८ ॥	६५०
३५	परोक्षा-महे ॥ ३ । ३ । १२ ॥	४८१
२२३	परोक्षायां नवा ॥ ४ । ४ । १८ ॥	५३३
३४	परोक्षे ॥ ५ । २ । १२ ॥	४८१
५२४	परोपात् ॥ ३ । ३ । ४९ ॥	६२१
१९४८	परोवरीण-णम् ॥ ७ । १ । ९९ ॥	३९३
१४७८	पर्णकृकणात्-जात् ॥ ६ । ३ । ६२ ॥	३०३
१६५९	पर्पादिरिकट् ॥ ६ । ४ । १२ ॥	३३७
११३७	पर्यधेर्वा ॥ ५ । ३ । ११३ ॥	८८१
१५५७	पर्यनोर्ग्रामात् ॥ ६ । ३ । १३८ ॥	३१७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
७३१	पर्यपाङ्-स्या ॥ ३ । १ । ३२ ॥	१६१
४०४	पर्यपात् स्खदः ॥ ४ । २ । २७ ॥	५९१
५६२	पर्यपाभ्यां वर्ज्ये ॥ २ । २ । ७१ ॥	१२८
२१३६	पर्यभेः सर्वोभये ॥ ७ । २ । ८३ ॥	४२८
११४४	पर्यायार्हणोत्पत्तौ च णकः ॥ ५ । ३ । १२० ॥	८८२
१४७६	पर्वतात् ॥ ६ । ३ । ६० ॥	३०३
१२७८	पर्श्वा ङ्वण् ॥ ६ । २ । २० ॥	२७०
२३००	पर्श्वादेरण् ॥ ७ । ३ । ६६ ॥	४६५
१६९४	पर्षदो ण्यः ॥ ६ । ४ । ४७ ॥	३४३
१८५८	पर्षदो ण्यणौ ॥ ७ । १ । १८ ॥	३७४
१९८२	पशुभ्यः-ष्ठः ॥ ७ । १ । १३३ ॥	३९९
८९५	पशुभ्यञ्ञनानाम् ॥ ३ । १ । १३२ ॥	१९९
१६८८	पश्चात्यनुपदात् ॥ ६ । ४ । ४८ ॥	३४१
१४९१	पश्चादाद्यन्ता-मः ॥ ६ । ३ । ७५ ॥	३०५
२१७३	पश्चोऽपरस्य-ति ॥ ७ । २ । १२४ ॥	४३६
९६७	पश्यद्वाग्दि-ण्डे ॥ ३ । २ । ३२ ॥	२१४
४६५	पाकर्कर्णपर्ण-स् ॥ २ । ४ । ५५ ॥	१०१
११६	पाठे धात्वादेर्णो नः ॥ २ । ३ । ९७ ॥	५०१
८१९	पाणिकरात् ॥ ५ । १ । १२१ ॥	६८८
४६२	पाणिगृहीतीति ॥ २ । ४ । ५२ ॥	१००
७८७	पाणिघताडघौ-नि ॥ ५ । १ । ८९ ॥	६८३
६८९	पाणिसमवाभ्यां सृजः ॥ ५ । १ । १८ ॥	६६५
१२०९	पाण्टाहति-णञ्च ॥ ६ । १ । १०४ ॥	२५५
१४००	पाण्डुकम्बलादिन् ॥ ६ । २ । १३२ ॥	२९०
१२३३	पाण्डोर्ड्यण् ॥ ६ । १ । ११९ ॥	२६०
३९३	पातेः ॥ ४ । २ । १७ ॥	५८९
६७७	पात्पादस्याह-देः ॥ ७ । ३ । १४८ ॥	१५३
१८१७	पात्राचिता-वा ॥ ६ । ४ । १६३ ॥	३६५
१८३४	पात्राप्तौ ॥ ६ । ४ । १८० ॥	३६९
८१८	पात्रेसमि-यः ॥ ३ । १ । ९१ ॥	१७९
९०६	पात्र्यशूद्रस्य ॥ ३ । १ । १४३ ॥	२०१
३२९	पादाद्योः ॥ २ । १ । २८ ॥	६८
१८६३	पाद्यार्घ्ये ॥ ७ । १ । २३ ॥	३७४
९९८	पानस्य भावकरणे ॥ २ । ३ ।६९ ॥	२१९
२१३९	पापहीयमानेन ॥ ७ । २ । ८६ ॥	४२९
१९५०	पारावार्-च ॥ ७ । १ । १०१ ॥	३९३
१४१८	पारावारादीनः ॥ ६ । ३ । ६ ॥	२९३
७२९	पारेमध्ये-वा ॥ ३ । १ । ३० ॥	१६१
८३३	पार्श्वादिभ्यः-ङः ॥ ५ । १ । १३५ ॥	६९१
३९५	पाशाच्छासा-यः ॥ ४ । २ । २० ॥	५८९
१२८४	पाशादेश्च ल्यः ॥ ६ । २ । २५ ॥	२७१
९२५	पिता मात्रा वा ॥ ३ । १ । १२२ ॥	२०५
१५७२	पितुर्यो वा ॥ ६ । ३ । १५१ ॥	३२०
१३२७	पितृमातुर्व्य- रि ॥ ६ । २ । ६२ ॥	२७८
२००९	पित्तिथट्-घात् ॥ ७ । १ । १६० ॥	४०५
१३२८	पित्रोर्डामहट् ॥ ६ । २ । ६३ ॥	२७८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३१	पिबैतिदाभूस्थः-द् ॥ ४ । ३ । ६६ ॥	४८१
१३१४	पिष्टात् ॥ ६ । २ । ५३ ॥	२७६
११६०	पीलासाल्वा-द्वा ॥ ६ । १ । ६८ ॥	२४९
१९३६	पोल्वादेः-के ॥ ७ । १ । ८७ ॥	७९१
११५५	पुंनाम्नि घः ॥ ५ । ३ । १३० ॥	८८४
८८५	पुंवत् कर्मधारये ॥ ३ । २ । ५७ ॥	१९५
१३२	पुंसः ॥ २ । ३ । ३ ॥	२५
३७४	पुंसो-न्स् ॥ १ । ४ । ७३ ॥	७८
२१२-२	पुंस्त्रियोः-स् ॥ १ । १ । २९ ॥	४२
४५१	पुच्छात् ॥ २ । २ । ४१ ॥	९५
४९२	पुच्छादुत्परिव्यसने ॥ ३ । ४ । ३९ ॥	६१०
९४८	पुत्रनुषोऽजान्धे ॥ ३ । २ । १३ ॥	२११
६२	पुत्रस्यादि-शे ॥ १ । ३ । ३८ ॥	११
१८०८	पुत्राधेयौ ॥ ६ । ४ । १५४ ॥	३६३
१२१३	पुत्रान्तात् ॥ ६ । १ । १११ ॥	२५७
९१२	पुत्रे ॥ ३ । २ । ४० ॥	२०३
९६६	पुत्रे वा ॥ ३ । २ । ३१ ॥	२१४
५०३	पुनरेकेषाम् ॥ ४ । १ । १० ॥	६१५
११२६	पुनर्भूपुत्र-त्र् ॥ ६ । १ । ३९	२४३
७०६	पुमनड्-त्वे ॥ ७ । ३ । १०३ ॥	१५७
१३१	पुमोऽशि-रः ॥ १ । ३ । ९ ॥	२४
८१२	पुरंदरभगंदरौ । ५ । १ । ११४ ॥	६८७
१६१५	पुराणे कल्पे ॥ ६ । ३ । १८७॥	३२८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
६२२	पुरायावतोर्वर्त्तमाना ॥ ५ । ३ । ७ ॥	६४६
१२३०	पुरुमगधकलिङ्ग-दण् ॥ ६ । १ । ११६ ॥	२५९
९२९	पुरुषःस्त्रिया ॥ ३ । १ । १२६ ॥	२०६
१०१८	पुरुषहृदयादसमासे ॥ ७ । १ । ७० ॥	३८७
१२८८	पुरुषात् कृत-यञ् ॥ ६ । २ । २९ ॥	२७२
४३५	पुरुषाद्वा ॥ २ । ४ । २५ ॥	९५
८७४	पुरुषासु वम् ॥ ७ । ३ । १२० ॥	१७४
१०७१	पुरुषे वा ॥ ३ । २ । १३५ ॥	२३४
८३८	पुरोऽग्रतोऽग्रे सर्तेः ॥ ५ । १ । १४० ॥	६९१
१५६७	पुरोडाश-ढौ ॥ ६ । ३ । १४६ ॥	३२०
१५०३	पुरो नः ॥ ६ । ३ । ८६ ॥	३०७
७५७	पुरोऽस्तमव्ययम् ॥ ३ । १ । ७ ॥	१६७
१०१३	पुव इत्रो देवते ॥ ५ । २ । ८५ ॥	७२९
२१२२	पुष्करादेर्देशे ॥ ७। २ । ७० ॥	४२५
८९२	पुष्यार्थाद्धे पुनर्वसुः ॥ ३ । १ । १२९ ॥	१९८
३४५	पुस्पौ ॥ ४ । ३ । ३ ॥	५३८
२९४	पूगादमुख्य-द्रिः ॥ ७ । ३ । ६० ॥	४६४
९१३	पूङ्क्लिशिभ्यो नवा ॥ ४ । ४ । ४५ ॥	७०८
९५२	पूङ्त्यजेः शानः ॥ ५ । २ । २३ ॥	७१८
५२०	पूजाचार्यक-यः ॥ ३ । ३ । ३९ ॥	६१९
९४२	पूजास्वतेः प्राक्टात् ॥ ७ । ३ । ७२ ॥	२०९
४७०	पूतक्रतुवृषा-त्र ॥ २ । ४ । ६० ॥	१०२
८८६	पूदिव्यश्वेर्ना-ने ॥ ४ । २ । ७२ ॥	७०२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२०२५	पूरणाद्ग्रन्थ-स्य ॥ ७ । १ । १७६ ॥	४०८
२११४	पूरणाद्व्ययसि ॥ ७ । २ । ६२ ॥	४२४
१८१३	पूरणार्द्धादिकः ॥ ६ । ४ । १५९ ॥	३६४
६५७	पूरणीभ्यस्तत्-पू ॥ ७ । ३ । १३० ॥	१५०
२१०७	पूर्णमासोऽण् ॥ ७ । २ । ५५ ॥	४२३
६९७	पूर्णाद्वा ॥ ७ । ३ । १६६ ॥	१५६
८२५	पूर्वकालैक-लम् ॥ ३ । १ । ९७ ॥	१८१
६९०	पूर्वपदस्था-गः ॥ २ । ३ । ६४ ॥	१५५
२२७९	पूर्वपदस्य वा ॥ ७ । ३ । ४५ ॥	४६१
२३०८	पूर्वप्रथमा-ये ॥ ७ । ४ । ७७ ॥	४६८
२०१६	पूर्वमनेन-न् ॥ ७ । १ । १६७ ॥	४०६
७७	पूर्वस्याऽस्वे स्वरे योरियुव् ॥ ४ । १ । ३७ ॥	४९२
११९४	पूर्वाग्रेप्रथमे ॥ ५ । ४ । ४९ ॥	८९२
८३९	पूर्वात्कर्तुः ॥ ५ । १ । १४१ ॥	६९१
८३१	पूर्वापरप्र-रम् ॥ ३ । १ । १०३ ॥	१८३
७७९	पूर्वापराध-ना ॥ ३ । १ । ५२ ॥	१७१
२१५१	पूर्वापरा-द्युस् ॥ ७ । २ । ९८ ॥	४३२
२१६९	पूर्वावराध-धाम् ॥ ७ । २ । ११५ ॥	४३५
१५०४	पूर्वाह्ण-नट् ॥ ६ । ३ । ८७ ॥	३०७
१५१९	पूर्वाह्ण-कः ॥ ६ । ३ । १०२ ॥	३१०
८६६	पूर्वोत्तर-कथनः ॥ ७ । ३ । ११३ ॥	१९२
६०५	पृथग् नाना-च ॥ २ । २ । ११३ ॥	१३८
१४८०	पृथिवीमध्यान्-स्य ॥ ६ । ३ । ६४ ॥	३०३
१८१०	पृथिवीसर्व-श्राञ् ॥ ६ । ४ । १५६ ॥	३६४
१०९८	पृथिव्या जाञ् ॥ ६ । १ । १८ ॥	२३८
१९०३	पृथुमृदु-रः ॥ ७ । ४ । ३९ ॥	३८४
१९०२	पृथ्वादेरिमन्वा ॥ ७ । १ । ५८ ॥	३८४
१०८५	पृषोदरादयः ॥ ३ । २ । १५५ ॥	२३६
१२८१	पृष्ठाद्यः ॥ ६ । २ । २२ ॥	२७१
२९४	पृभृमाहाङामिः ॥ ४ । १ । ५८ ॥	५४८
१३७०	पैङ्गाक्षीपुत्रादेरीयः ॥ ६ । २ । १०२ ॥	२८४
१२५३	पैलादेः ॥ ६ । १ । १४२ ॥	२६६
८४३	पोटायुवति-ति ॥ ३ । १ । १११ ॥	१८६
११०९	पौत्रादि वृद्धम् ॥ ६ । १ । २ ॥	२४०
१८०	प्यायः पीः ॥ ४ । १ । ९१ ॥	५२०
२१२७	प्रकारे जातीयर् ॥ ७ । २ । ७५ ॥	४२६
२१५५	प्रकारे था ॥ ७ । २ । १०२ ॥	४३३
२२२६	प्रकृते मयट् ॥ ७ । ३ । १ ॥	४४७
२२३०	प्रकृष्टे तमप् ॥ ७ । ३ । ५ ॥	४४८
१०५७	प्रघणप्रघाणौ गृहांशे ॥ ५ । ३ । ३५ ॥	८६९
६६६	प्रचये नवा-स्य ॥ ५ । ४ । ४३ ॥	६५९
६६६	प्रजाया अस् ॥ ७ । ३ । १३७ ॥	१५१
२२१८	प्रज्ञादिभ्योऽण् ॥ ७ । २ १६५ ॥	४४६
२०७४	प्रज्ञापर्णोद-लौ ॥ ७ । २ । २२ ॥	४१८
२०८५	प्रज्ञाश्रद्धा-र्णः ॥ ७ । २ । ३३ ॥	४२०
६९४	प्रणाय्यो नि-ते ॥ ५ । १ । २३ ॥	६६६

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१८६०	प्रतिजनादेरीनञ् ॥ ७ । १ । २० ॥	३७४
५४०	प्रतिज्ञायाम् ॥ ३ । ३ । ६५ ॥	६२४
२१४०	प्रतिना पञ्चम्याः ॥ ७ । २ । ८७ ॥	४२९
१६८६	प्रतिपथादिकश्च ॥ ६ । ४ । ३९ ॥	३४१
७४३	प्रतिपरोऽनो-वात् ॥ ७ । ३ । ८७ ॥	१६४
९०	प्रतिश्रवण-गे ॥ ७ । ४ । ९४ ॥	१६
९०६	प्रतेः ॥ ४ । १ । ९८ ॥	७०६
९८०	प्रतेः स्नातस्य सूत्रे ॥ २ । ३ । २१ ॥	२१६
७७४	प्रतेरुरसः सप्तम्याः ॥ ७ । ३ । ८४ ॥	१७०
३३६	प्रतेश्च वधे ॥ ४ । ४ । ९४ ॥	७०६
५४७	प्रत्यनोर्गृणा-रि ॥ २ । २ । ५७ ॥	१२४
९३८	प्रत्यन्ववात्सामलोम्नः ॥ ७ । ३ । ८२ ॥	२०८
५७७	प्रत्यभ्यतेः क्षिपः ॥ ३ । ३ । १०२ ॥	६३३
३९४	प्रत्ययः-देः ॥ ७ । ४ । ११५ ॥	८४
३३	प्रत्ययस्य ॥ ७ । ४ । १०८ ॥	६
१५३	प्रत्यये ॥ २ । ३ । ६ ॥	२८
११५	प्रत्यये च ॥ १ । ३ । २ ॥	२२
५४६	प्रत्याङः श्रु-नि ॥ २ । २ । ५६ ॥	१२३
१२०	प्रथमाद्-छः ॥ १ । ३ । ४ ॥	२३
६२५	प्रथमोक्तं प्राक् ॥ ३ । १ । १४८ ॥	१४४
१५७९	प्रभवति ॥ ६ । ३ । १५७ ॥	३२२
१६९०	प्रभूतादि-ति ॥ ६ । ४ । ४३ ॥	३४२
५६६	प्रभृत्यन्यार्थ-रैः ॥ २ । २ । ७५ ॥	१२९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१२२१	प्रमाणसमासस्योः ॥ ५ । ४ । ७६ ॥	८९८
१९८९	प्रमाणान्मात्रट् ॥ ७ । १ । १४० ॥	४००
६२३	प्रमाणीसंख्याड्डः ॥ ७ । ३ । १२८ ॥	१४३
३८३	प्रयोक्तृव्यापारे णिग् ॥ ३ । ४ । २० ॥	५८७
१७६६	प्रयोजनम् ॥ ६ । ४ । ११७ ॥	३५५
५६६	प्रलम्भे गृधिवञ्चेः ॥ ३ । ३ । ८९ ॥	६३१
६७४	प्रवचनीयादयः ॥ ५ । १ । ८ ॥	६६२
२२३९	प्रशस्यस्य श्रः । ७ । ४ । ३४ ॥	४५१
११४३	प्रश्नाख्याने वेञ् । ५ । ३ । ११९ ॥	८८२
९७	प्रश्नार्थाविचा-रः ॥ ७ । ४ । १०२ ॥	१८
९४	प्रश्ने च प्रतिपदम् ॥ ७ । ४ । ९८ ॥	१७
९९२	प्रष्ठोऽग्रगे ॥ २ । ३ । ३२ ॥	२१८
९०३	प्रसमः स्त्यः स्तीः ॥ ४ । १ । ९५ ॥	७०६
५३५-२	प्रसितोत्सु-द्धैः ॥ २ । २ । ४९ ॥	१२१
१७१६	प्रस्तारसंस्थान-ति ॥ ६ । ४ । ७९ ॥	३४८
१४५७	प्रस्थपुरवहान्त-त् ॥ ६ । ३ । ४३ ॥	२९९
४७	प्रस्यैषै-ण ॥ १ । २ । १४ ॥	९
१७०९	प्रहरणम् ॥ ६ । ४ । ६२ ॥	३४५
६४२	प्रहरणात् ॥ ३ । १ । १५४ ॥	१४७
१३८४	प्रहरणात् क्रीडायां णः ॥ ६ । २ । ११६ ॥	२८७
९५४	प्राकारस्य व्यञने ॥ ३ । २ । १९ ॥	२१२
११७४	प्राकाले ॥ ५ । ४ । ४७ ॥	८८९
१९००	प्राक्त्वादगडुलादेः ॥ ७ । १ । ५६ ॥	३८३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२२६२	प्राग्नित्यात्कप् ॥ ७ । ३ । २८ ॥	४५६
३८०	प्रागिनात् ॥ २ । १ । ४८ ॥	७९
१५६२	प्राग्ग्रामाणाम् ॥ ७ । ४ । १७ ॥	३५८
१०८९	प्राग्जितादण् ॥ ६ । १ । १३ ॥	२३७
१४४५	प्राग्देशे ॥ ६ । १ । १० ॥	२९७
१२४१	प्राग्भरते-ञः ॥ ६ । १ । १२९ ॥	२६३
४२२	प्राग्वत् ॥ ३ । ३ । ७४ ॥	५९५
११०४	प्राग्वतः-स्नञ् ॥ ६ । १ । २५ ॥	२३९
१५६२-२	प्रार्चां नगरस्य ॥ ७ । ४ । २६ ॥	३१८
९८१	प्राच्च यमयसः ॥ ५ । २ । ५२ ॥	७२४
१२५४	प्राच्येञोऽतौल्वल्यादेः ॥ ६ । १ । १४३ ॥	२६६
७७७	प्राज्ञश्च ॥ ५ । १ । ७९ ॥	६८१
१९१४	प्राणिजाति-दञ् ॥ ७ । १ । ६६	३८७
९००	प्राणितूर्याङ्गाणाम् ॥ ३ । १ । १३७ ॥	२००
८६४	प्राणिन उपमानात् ॥ ७ । ३ । १११ ॥	१९२
१७६१	प्राणिनि भूते ॥ ६ । ४ । ११२	३५४
२११२	प्राणिस्थादस्वा-त् ॥ ७ । २ । ६० ॥	४२४
१८७७	प्राण्यङ्गरथचल-ष्यः ॥ ७ । १ । ३७ ॥	३७७
२०७२	प्राण्यङ्गादातो लः ॥ ७ । २ । २०	४१८
१२९२	प्राण्योषधिवृ-च ॥ ६ । २ । ३१ ॥	२७२
९०४	प्राप्तश्च मो वा ॥ ४ । १ । ९६ ॥	७०६
१३९	प्राप्तुम्पतेर्गवि ॥ ४ । ४ । ९७ ॥	५०७
२२१४	प्राप्तुपुराणे नश्च ॥ ७ । २ । १६१ ॥	४४५
७७३	प्राप्यधपरि-न्तैः ॥ ३ । १ । ४७ ॥	१६९
९९९	प्राप्सुजोरिन् ॥ ५ । २ । ७१ ॥	७२६
१०८९	प्राप् स्नुद्रुस्तोः ॥ ५ । ३ । ६७ ॥	८७३
२६६	प्रादुरुपसर्गा-स्तेः ॥ २ । ३ । ५८ ॥	५४२
९१६	प्राद्दागस्त आ-क्ते ॥ ४ । ४ । ७ ॥	७०९
१०७३	प्राद्रश्मितुलासूत्रे ॥ ५ । ३ । ५१ ॥	८७२
५७८	प्राद्वहः ॥ ३ । ३ । १०३ ॥	६३३
११६७	प्राह्णाहणस्यैये ॥ ७ । ४ । २१ ॥	२५०
७६६	प्राध्वं बन्धे ॥ ३ । १ । १६ ॥	१६८
७९०	प्राप्तापन्नौ-च ॥ ३ । १ । ६३ ॥	१७४
२२०८	प्रायोऽतोर्द्वैय-त्रद् ॥ ७ । २ । १८५ ॥	४४४
२०४३	प्रायोऽन्नम-म्नि ॥ ७ । १ । १९४ ॥	४११
१५६४	प्रायो बहुस्वरादिकण् ॥ ६ । ३ । १४३ ॥	३१९
१०९६	प्रायोऽव्ययस्य ॥ ७ । ४ । ६५ ॥	२३८
१०७९	प्राल्लिप्सायाम् ॥ ५ । ३ । ५७ ॥	८७२
१५१६	प्रावृष इकः ॥ ६ । ३ । ९९ ॥	३१०
१५०९	प्रावृष एण्यः ॥ ६ । ३ । ९२ ॥	३०८
६४५	प्रियः ॥ ३ । १ । १५७ ॥	१४७
८०५	प्रियवशाद्वदः ॥ ५ । १ । १०७ ॥	८८६
२३१८	प्रियसुखं-छे ॥ ७ । ४ । ८७ ॥	४७२
२१९६	प्रियसुखादा-ल्ये ॥ ७ । २ । १४० ॥	४४२
१९०४	प्रियस्थिर-न्दम् ॥ ७ । ४ । ३८ ॥	३८४
७६४	प्रुसृल्वोऽकः साधौ ॥ ५ । १ । ६९ ॥	६७९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१३४६	प्रेक्षादेरिन् ॥ ६ । २ । ८० ॥	२८१
६५५	प्रैषानुज्ञावसरे-म्यौ ॥ ५ । ४ । २९ ॥	६५५
१३९७	प्रोक्तात् ॥ ६ । २ । १२९ ॥	२८९
६२६	प्रोपादारम्भे ॥ ३ । ३ । ५१ ॥	६२१
२३०९	प्रोपोत्सं-णे ॥ ७ । ४ । ७८ ॥	४६९
१५२८	प्रोष्ठभद्राजाते ॥ ७ । ४ । १३ ॥	३१२
१३२३	प्लक्षादेरण् ॥ ६ । २ । ५९ ॥	२७७
१४१	प्लुतवाक्ये ॥ १ । ३ । २९ ॥	२६
८४	प्लुतोऽनितौ ॥ १ । २ । ३२ ॥	१४
२३१२	प्लुपश्चादा-देः ॥ ७ । ४ । ८१ ॥	४७०
३६०	प्वादेर्ह्रस्वः ॥ ४ । २ । १०९ ॥	५७२

फ

२०६५	फलबर्हाच्चिनः ॥ ७ । २ । १३ ॥	४१७
८९८	फलस्य जातौ ॥ ३ । १ । १३५ ॥	१९९
१३२२	फले ॥ ६ । २ । ५८ ॥	२७७
६१५	फल्गुनीप्रो-से ॥ २ । २ । १२३ ॥	१४०
१५२३	फल्गुन्याष्टः ॥ ६ । ३ । १०६ ॥	३११
४८६	फेनोष्मबाष्प-ने ॥ ३ । ४ । ३३ ॥	६०९

ब

९५८	बन्धे घञि भवा ॥ ३ । २ । २३ ॥	२१३
१२१२	बन्धेनाम्नि ॥ ५ । ४ । ६७ ॥	८९६
१७०४	बन्धौ बहुव्रीहौ ॥ २ । ४ । ८४ ॥	९२१
२०७१	बलवातदन्त-लः ॥ ७ । २ । १९ ॥	४१८
१९४०	बलवातादूलः ॥ ७ । १ । ९१ ॥	३९१
१३५२	बलादेर्यः ॥ ६ । २ । ८६ ॥	२८२
९३४	बलिस्थूले दृढः ॥ ४ । ४ । ६९ ॥	७१२
१०००	बष्कयादसमासे ॥ ६ । १ । २० ॥	२३९
१०९५	बह्वियष्टीकण् च ॥ ६ । १ । १६ ॥	२३८
१७८०	बहुव-दे ॥ १ । १ । ४० ॥	३५८
४६२	बहुलं लुप् ॥ ३ । ४ । १४ ॥	६०३
६६८	बहुलम् ॥ ५ । १ । २ ॥	६६१
१५२६	बहुलमन्येभ्यः ॥ ६ । ३ । १०९ ॥	३११
१५२४	बहुलानुराधा-लुप् ॥ ६ । ३ । १०७ ॥	३११
८२२	बहुविभ्वरु-दः ॥ ५ । १ । १३४ ॥	६८८
१४५९	बहुविषयेभ्यः ॥ ६ । ३ । ४५ ॥	३००
६६१	बहुव्रीहेः-टः ॥ ७ । ३ । १२५ ॥	१४९
१२३८	बहुष्वस्त्रियाम् ॥ ६ । १ । १२४ ॥	२६१
३७९	बहुष्वेरीः ॥ २ । १ । ४२ ॥	७९
१७१५	बहुस्वरपूर्वादिकः ॥ ६ । ४ । ६८ ॥	३४६
२२८८	बह्वां प्रश्ने-चा ॥ ७ । ३ । ५४ ॥	४६२
९४३	बह्वोर्डे ॥ ७ । ३ । ७३ ॥	२०९
२२४३	बह्वोर्णिष्ठे भूय् ॥ ७ । ४ । ४० ॥	४५२
२२६५	बह्वोर्यासन्ने ॥ ७ । २ । ११२ ॥	४३४
१४२६	बह्वल्पार्दिपर्दि० ॥ ६ । ३ । १४ ॥	२९४
२२०३	बह्वल्पार्था-प्रशस्य ॥ ७ । २ । १५० ॥	४४३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२२४४	बाढान्तिक-दौ ॥ ७ । ४ । ३७ ॥	४५२
२११८	बाह्वर्षादेर्बलात् ॥ ७ । २ । ६६ ॥	४२५
४८५	बाह्वन्तक-मिन ॥ २ । ४ । ७४ ॥	१०५
१११७	बाह्वादिभ्यो गोत्रे ॥ ६ । १ । ३२ ॥	२४२
१९७८	बिडबिरी-च ॥ ७ । १ । १२९ ॥	३९८
११२८	बिदादेर्वृद्धे ॥ ६ । १ । ४१ ॥	२४४
५६९	बिमेतेर्भीष् च ॥ ३ । ३ । ९२ ॥	६३१
१५६२-३	बिल्वकीयादेरीयस्य ॥ २ । ४ । ९३ ॥	३१८
१५८६	ब्रह्मणः ॥ ७ । ४ । ५७ ॥	३२३
१९२६	ब्रह्मणस्त्वः ॥ ७ । १ । ७७ ॥	३८९
८५७	ब्रह्मणो वदः ॥ ५ । १ । १५६ ॥	६९६
८६३	ब्रह्मभ्रूणवृ-प् ॥ ५ । १ । १६१ ॥	६९६
९३९	ब्रह्महस्ति-सः ॥ ७ । ३ । ८३ ॥	२०९
७८३	ब्रह्मादिभ्यः ॥ ५ । १ । ८५ ॥	६८२
१२७४	ब्राह्मणमाण-चः ॥ ६ । २ । १६ ॥	२७०
९४६	ब्राह्मणाच्छंसी ॥ ३ । २ । ११ ॥	२१०
११२१	ब्राह्मणाद्वा ॥ ६ । १ । ३५ ॥	२४३
२०३३	ब्राह्मणान्नाम्नि ॥ ७ । १ । १८४ ॥	४१०
७४१	ब्रुवः ॥ ५ । १ । ५१ ॥	६७४
२८५	ब्रूगः पञ्चानां-श्च ॥ ४ । २ । ११८ ॥	५४६
२८६	ब्रूतः परादिः ॥ ४ । ३ । ६३ ॥	५४६

भ

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१८५७	भक्ताण्णः ॥ ७ । १ । १७ ॥	३७४
१७१९	भक्तौदनाद्राणिकट् ॥ ६ । ४ । ७२ ॥	३४७
५०२	भक्षेर्हिंसायाम् ॥ २ । २ । ६ ॥	११२
१७१६	भक्ष्यं हितमस्मै ॥ ६ । ४ । ६९ ॥	३४७
१६३३	भजति ॥ ६ । ३ । २०४ ॥	३३२
८४४	भजो विण् ॥ ५ । १ । १४६ ॥	६९२
१००२	भञ्जिभासिमिदो घुरः ॥ ५ । २ । ७४ ॥	७२७
५९२	भञ्जेर्जौ वा ॥ ४ । २ । ४८ ॥	६३७
१०५८	भद्रोष्णात्करणे ॥ ३ । २ । ११६ ॥	२३१
११३९	भर्गात् त्रैगर्ते ॥ ६ । १ । ५१ ॥	२४६
८९१	भर्तुतुल्यस्वरम् ॥ ३ । १ । १६२ ॥	१९८
१५०६	भर्तुसंध्यादेरण् ॥ ६ । ३ । ८९ ॥	३०८
८६	भर्त्सने पर्यायेण ॥ ७ । ४ । ९० ॥	१५
३२	भवतेः सिज्लुपि ॥ ४ । ३ । १२ ॥	४८१
१४४२	भवतोरिकणीयसौ ॥ ६ । ३ । ३० ॥	२९६
२१४४	भवत्वायु-र्थात् ॥ ७ । २ । ९१ ॥	४३०
४५	भविष्यन्ती ॥ ५ । ३ । ४ ॥	४८४
४६	भविष्यन्ती-हे ॥ ३ । ३ । १५ ॥	४८४
१५४२	भवे ॥ ६ । ३ । १२३ ॥	३१५
६७३	भव्यगेयजन्य-नवा ॥ ५ । १ । ७ ॥	६६१
१६७१	भस्त्रादेरिकट् ॥ ६ । ४ । २४ ॥	३३८
१२०७	भाविचित्ता-वा ॥ ६ । १ । १०५ ॥	२५५
१८१४	भागाद्येकौ ॥ ६ । ४ । १६० ॥	३६५
५२४	भागिनि च-भिः ॥ २ । २ । ३७ ॥	११८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२२५८	भागेऽष्टमाज्जः ॥ ७ । ३ । २४ ॥	४५६
४४०	भाजगोण-शे ॥ २ । ४ । ३० ॥	९५
४९३	भाण्डात्समाचितौ ॥ ३ । ४ । ४० ॥	६१०
९८६	भादितो वा ॥ २ । ३ । २७ ॥	२१७
६६०	भान्नेतुः ॥ ७ । ३ । १३३ ॥	१५०
५८५	भावकर्मणोः ॥ ३ । ४ । ६८ ॥	६३५
१३८२	भावघञो-णः ॥ ६ । २ । ११४ ॥	२८६
१०३२	भाववचनाः ॥ ५ । ३ । १५ ॥	८६६
१०३५	भावाकर्त्रोः ॥ ५ । ३ । १८ ॥	८६६
१६६८	भावादिमः ॥ ६ । ४ । २१ ॥	३३८
११४६	भावे ॥ ५ । ३ । १२२ ॥	८८३
८२८	भावे चाशि-खः ॥ ५ । १ । १३० ॥	६८९
१८९८	भावे त्वतल् ॥ ७ । १ । ५५ ॥	३८१
१०६७	भावेऽनुपसर्गात् ॥ ५ । ३ । ४५ ॥	८७१
१२६६	भिक्षादेः ॥ ६ । २ । १० ॥	२६९
८३७	भिक्षासेनादायात् ॥ ५ । १ । १३९ ॥	६९१
८९८	भित्तं शकलम् ॥ ४ । २ । ८१ ॥	७०५
११३२	भिदादयः ॥ ५ । ३ । १०८ ॥	८८०
२९३	भियो नवा ॥ ४ । २ । ९९ ॥	५४८
१००४	भियो रुरुकलुकम् ॥ ५ । २ । ७६ ॥	७२७
१८६	भिस ऐस् ॥ १ । ४ । २ ॥	३४
१०२२	भीमादयोऽपादाने ॥ ५ । १ । १४ ॥	८६३
९९३	भीरुष्ठानादयः ॥ २ । ३ । ३३ ॥	२१८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
११३३	भीषिभूषि-भ्यः ॥ ५ । ३ । १०९ ॥	८८०
२८८	भीह्रीभृहोस्तिव्वत् ॥ ३ । ४ । ५० ॥	५४७
६८७	भुजन्युब्जं-गे ॥ ४ । १ । १२० ॥	६६४
११५३	भुजिपत्या-ने ॥ ५ । ३ । १२८ ॥	८८४
६८४	भुजो भक्ष्ये ॥ ४ । १ । ११७ ॥	६६४
३४८	भुनजोऽत्राणे ॥ ३ । ३ । ३७ ॥	५६८
३३	भुवो वः न्योः ॥ ४ । २ । ४३ ॥	४८१
१०८६	भुवोऽवज्ञाने वा ॥ ५ । ३ । ६४ ॥	८७३
३८२	भूङः प्राप्तौ णिङ् ॥ ३ । ४ । १९ ॥	५८६
९५९	भूजेः ष्णुक् ॥ ५ । २ । ३० ॥	७२०
२१३१	भूतपूर्वे पूचरट् ॥ ७ । २ । ७८ ॥	४२७
६३०	भूतवच्चाशंस्ये वा ॥ ५ । ४ । २ ॥	६४८
६३७	भूते ॥ ५ । ४ । १० ॥	६५०
११२२	भूयःसंभूयो-च ॥ ६ । १ । ३६ ॥	२४३
१९०५	भूर्लुक् चेवर्णस्य ॥ ७ । ४ । ४१ ॥	३८५
१०४५	भूश्वयदोऽल् ॥ ५ । ३ । २३ ॥	८६८
९७१	भूषाक्रोधार्थ-नः ॥ ५ । २ । ४२ ॥	७२२
७५४	भूषादरक्षेपे-त् ॥ ३ । १ । ४ ॥	१६६
६०३	भूषार्थसन-क्यौ ॥ ३ । ४ । ९३ ॥	६४०
३७	भूस्वपोरदुतौ ॥ ४ । १ । ७० ॥	४८२
११२२	भृगो नाम्नि ॥ ५ । ३ । ९८ ॥	८७८
७२९	भृगोऽसंज्ञायाम् ॥ ५ । १ । ४५ ॥	६७३
१२४०	भृग्वङ्गिरस्कु-त्रेः ॥ ६ । १ । १२८ ॥	२६२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३३२	भृञ्जो भर्ज ॥ ४ । ४ । ६ ॥	५६१
६६९	भृतिप्रत्य-कः ॥ ७ । ३ । १४० ॥	१५२
८०२	भृतौ कर्मणः ॥ ५ । १ । १०४ ॥	६८५
८१०	भृवृजितृ-म्नि ॥ ५ । १ । ११२ ॥	६८६
२२०४	भृशाभीक्ष्ण्या-देः ॥ ७ । ४ । ७३ ॥	४६७
६६४	भृशाभीक्ष्ण्ये हि-दि ॥ ५ । ४ । ४९ ॥	६५८
२२१७	भेषजादिभ्यष्ठ्यण् ॥ ७ । २ । १६४ ॥	४४६
१०९५	भोगवद्गौरिमतोर्नाम्नि ॥ ३ । २ । ६५ ॥	२२३
१८८०	भोगोत्तर-नः ॥ ७ । १ । ४० ॥	३७७
४९२	भोजसूतयोः-त्योः ॥ २ । ४ । ८१ ॥	१०६
१३३३	भौरिक्यैषु-कतम् ॥ ६ । २ । ६८ ॥	२७९
३६६	भ्राजभासभाष-नवा ॥ ४ । २ । ३६ ॥	५७९
९५७	भ्राज्यलंकृग्-ष्णुः ॥ ५ । २ । २८ ॥	७१९
११८९	भ्रातुर्व्यः ॥ ६ । १ । ८८ ॥	२५३
७१३	भ्रातुः स्तुतौ ॥ ७ । ३ । १७९ ॥	१५८
१६२	भ्रातुष्पुत्र-यः ॥ २ । ३ । १४ ॥	३०
९२४	भ्रातृपुत्राः स्वसृ-भिः ॥ ३ । १ । १२१ ॥	२०५
१०५६	भ्राष्ट्राग्नेरिन्धे ॥ ३ । २ । ११४ ॥	२३१
१४२	भ्रासभ्लासभ्रम-र्वा ॥ ३ । ४ । ७३ ॥	५०८
१००९	भ्रुवोऽच-च्योः ॥ २ । ४ । १०१ ॥	२२२
११७१	भ्रुवो भुव् च ॥ ६ । १ । ७६ ॥	२५०
२६७	भ्रूश्नोः ॥ २ । १ । ५३ ॥	५२
११३९	भ्वादिभ्यो वा ॥ ५ । ३ । ११५ ॥	८८१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३८३	भ्वादेर्दार्घः ॥ २ । १ । ८३ ॥	८०
३३७	भ्वादेर्नामिनो-ने ॥ २ । १ । ६३ ॥	७०
	म	
१७०५	मङ्डकञ्झर्झराङ्काण् ॥ ६ । ४ । ५८ ॥	३४४
२०९६	मण्यादिभ्यः ॥ ७ । २ । ४४ ॥	४२२
१८५४	मतमर्दस्य करणे ॥ ७ । १ । १४ ॥	३७३
४२८	मत्स्यस्य यः ॥ २ । ४ । ८७ ॥	९३
९८२	मथलपः ॥ ५ । २ । ५३ ॥	७२४
२२००	मद्रभद्राद्यपने ॥ ७ । २ । १४४ ॥	४४२
१४३६	मद्रादञ् ॥ ६ । ३ । २४ ॥	२९५
११३१	मधुब्रोर्ब्राह्म-के ॥ ६ । १ । ४३ ॥	२४५
१४९३	मध्य उत्क-रः ॥ ६ । ३ । ७७ ॥	३०५
१५४५	मध्याह्निण्णेया मोन्तश्च ॥ ६ । ३ । १२६ ॥	३१५
९५६	मण्यान्ताद्गुरौ ॥ ३ । २ । २१ ॥	२१२
१४९२	मध्यान्मः ॥ ६ । ३ । ७६ ॥	३०५
७६१	मध्ये पदे नि-ने ॥ ३ । १ । ११ ॥	१६७
२०७८	मध्वादिभ्यो रः ॥ ७ । २ । २६ ॥	४१९
१३३९	मध्वादेः ॥ ६ । २ । ७३ ॥	२८०
४१३	मनः ॥ २ । ४ । १४ ॥	८९
१२२	मनयवलपरे हे ॥ १ । ३ । १५ ॥	२३
९५०	मनसश्चाज्ञायिनि ॥ ३ । २ । १५ ॥	२११
१८९५	मनुर्नभो-ति ॥ १ । १ । २४ ॥	३८१
४७१	मनोरौ च वा ॥ २ । ४ । ६१ ॥	१०२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
११९६	मनोर्याणौ षश्चान्तः ॥ ६ । १ । ९४ ॥	२५३
३०८	मन्तस्य युवा-योः ॥ २ । १ । १० ॥	६१
१०४८	मन्थौदनसक्तु-वा ॥ ३ । २ । १०६ ॥	२३०
६६७	मन्दाल्पाच्च मेधायाः ॥ ७ । ३ । १३८ ॥	१५१
२११९	मन्माङ्ज्ञादेर्नाम्नि ॥ ७ । २ । ६७ ॥	४२५
५२४	मन्यस्यानावा-ने ॥ २ । २ । ६४ ॥	१२५
८१४	मन्याण्णिन् ॥ ५ । १ । १०६ ॥	६८७
८४५	मन्वनक्वनि-चित् ॥ ५ । १ । १४७ ॥	६९२
८४८	मयूरव्यंसकेत्यादयः ॥ ३ । १ । ११६ ॥	१८८
२०६७	मरुत्पर्वणस्तः ॥ ७ । २ । १५ ॥	४०७
२२१२	मर्तादिभ्यो यः ॥ ७ । २ । २५९ ॥	४४५
२०६६	मलादीमसश्च ॥ ७ । २ । १४ ॥	४१७
४६६	मव्यविश्रिवि—न ॥ ४ । १ । १९० ॥	६०५
१६	मव्यस्याः ॥ ४ । २ । ११३ ॥	४७८
३२९	मस्जेः सः ॥ ४ । ४ । ११० ॥	५६३
८८०	महतः-ङाः ॥ ३ । २ । ६८ ॥	१९४
१८८४	महत्सर्वादिकण् ॥ ७ । १ । ४२ ॥	३७८
१२०१	महाकुलाद्ब्राह्मणेभ्यो ॥ ६ । १ । ९९ ॥	२५४
१३७८	महाराजप्रो-कण् ॥ ६ । २ । ११० ॥	२८६
१६३४	महाराजादिकण् ॥ ६ । ३ । २०५ ॥	३३२
१३७४	महेन्द्राद्वा ॥ ६ । २ । । १०६ ॥	२८५
१०७७	मांसस्यानड्-वा ॥ ३ । २ । १४१ ॥	२३४
२२-२	माङ्यद्यर्तनी ॥ ५ । ४ । ३९ ॥	४८१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
११९७	माणवः कुत्सायाम् ॥ ६ । १ । ९५ ॥	२५४
१००६	मातमातृमातृके वा ॥ २ । ४ । ८५ ॥	२२१
९१९	मातरपितरं वा ॥ ३ । २ । ४७ ॥	२०४
७१७	मातुर्मातः-न्ये ॥ १ । ४ । ४० ॥	१५८
४७३	मातुलाचार्यो-ङ्या ॥ २ । ४ । ६३ ॥	१०३
९७४	मातृपितुः स्वसुः ॥ २ । ३ । १८ ॥	२१५
११९१	मातृपित्रादेर्ङेयणीयणौ ॥ ६ । १ । २० ॥	२५३
१९९४	मात्रट् ॥ ७ । १ । १४५ ॥	४०१
१६८७	माथोत्तरपद-ति ॥ ६ । ४ । ४० ॥	३४१
२९४	मादुवर्णोऽनु ॥ २ । १ । ४७ ॥	५७
१८२३	मानम् ॥ ६ । ४ । १६९ ॥	३६७
१७५८	मानसंव-म्नि ॥ ७ । ४ । १९ ॥	३५४
१३०५	मानात् क्रीतवत् ॥ ६ । २ । ४४ ॥	२७४
१९९२	मानादसंशये लुप् ॥ ७ । १ । १४३ ॥	४००
११०३	माने ॥ ५ । ३ । ८१ ॥	८७५
२२६०	माने कश्च ॥ ७ । ३ । २६ ॥	४५६
३७१	मारणतोषण-ङश्च ॥ ४ । २ । ३० ॥	५७८
२११६	मालायाः क्षेपे ॥ ७ । २ । ६४ ॥	४२५
१०१०	मालेषीके-ते ॥ २ । ४ । १०२ ॥	२२२
२०५०	मावर्णान्तो-वः ॥ २ । १ । ९४ ॥	४१४
१६९१	माशब्दहत्यादिभ्यः ॥ ६ । ४ । ४४ ॥	३४२
२०६	मासनिशा-वा ॥ २ । १ । १०० ॥	३८
८९०	मासवर्णभ्रात्रनुपूर्वम् ॥ ३ । १ । १६१ ॥	१९८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१७६२	मासाद्ध्यसि यः ॥ ६ । ४ । ११३ ॥	३५४
३२२	मिगमीगोऽखलचलि ॥ ४ । २ । ८ ॥	५५८
५७०	मिथ्याकृगोऽभ्यासे ॥ ३ । ३ । ९३ ॥	६३१
३०५	मिदः श्ये ॥ ४ । ३ । ५ ॥	५५२
४३३	मिमोमादामित्स्वरस्य ॥ ४ । १ । २० ॥	५९६
३३३	मुचादितृफदृफ-शे ॥ ४ । ४ । ९१ ॥	५६१
४४३	मुरतोऽनुनासिकस्य । ४ । १ ५१ ॥	५९९
३८४	मुहद्रुहष्णुहष्णिहो वा ॥ २ । १ । ८४ ॥	८०
१०५९	मूर्तिनिचिताभ्रे घनः ॥ ५ । ३ । ३७ ॥	८७०
८४२	मूलविभुजादयः ॥ ५ । १ । १४४ ॥	६९२
१८०३	मूल्यैः क्रीते ॥ ६ । ४ । १५० ॥	३६२
८८६	मृगक्षीरादिषु वा ॥ ३ । २ । ६२ ॥	१९६
११२५	मृगयेच्छा याच्ञा-र्द्धा ॥ ५ । ३ । १०१ ॥	८७९
२५१	मृजोऽस्य वृद्धिः ॥ ४ । ३ । ४२ ॥	५४०
२२२४	मृंदस्तिकः ॥ ७ । २ । १७१ ॥	४४७
९१४	मृषः क्षान्तौ ॥ ४ । ३ । २८ ॥	७०८
८०४	मेघर्तिभया-खः ॥ ५ । १ । १०६ ॥	६८६
११७३	मेङो वा मित् ॥ ४ । ३ । ८८ ॥	८८८
२०९३	मेधारथान्नवेरः ॥ ७ । २ । ४१ ॥	४२१
५९०	मोऽकमियमिरमि-मः ॥ ४ । ३ । ५५ ॥	६३७
३५२	मो नो म्वोश्च ॥ २ । १ । ३७ ॥	७३
३१८	मोर्वा ॥ २ । १ । ९ ॥	६३
३७८	मोऽवर्णस्य ॥ २ । १ । ४५ ॥	७९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१६१०	मौदादिभ्यः ॥ ६ । ३ । १८२ ॥	३२७
२७८	म्नां घुङ्-न्ते ॥ १ । ३ । ३९ ॥	५४
३३४	म्रियतेरद्यत-च ॥ ३ । ३ । ४२ ॥	५६२
	य	
७१०	य पञ्चातः ॥ ५ । १ । २८ ॥	६६९
१६०३	यः ॥ ६ । ३ । १७६ ॥	३२६
१८४०	यः ॥ ७ । १ । १ ॥	३७०
१९	यः ॥ ४ । २ । १२२ ॥	४७९
२३३	यङ्तुरुस्तोर्बहुलम् ॥ ४ । ३ । ६४ ॥	५३६
२८६	यजसृज-षः ॥ २ । १ । ८७ ॥	५६
२०८	यजादिवचेः किति ॥ ४ । १ । ७९ ॥	५२९
२०७	यजादिवश्-व्वृत् ॥ ४ । १ । ७२ ॥	५२९
९७६	यजिजपिदंशि-कः ॥ ५ । २ । ४७ ॥	७२३
११०७	यजिस्वपिरक्षि-नः ॥ ५ । ३ । ८५ ॥	८७६
६८१	यजेर्यज्ञाङ्गे ॥ ४ । १ । ११४ ॥	६६२
१८३३	यज्ञादियः ॥ ६ । ४ । १७९ ॥	३६९
१७४३	यज्ञानां दक्षिणायाम् ॥ ६ । ४ । ९६ ॥	३५१
१०८७	यज्ञे ग्रहः ॥ ५ । ३ । ६५ ॥	८७३
१५५३	यज्ञे ज्यः ॥ ६ । ३ । १३४ ॥	३१६
११२९	यञञोऽश्या-देः ॥ ६ । १ । १२६ ॥	२४४
११४३	यञिञः ॥ ६ । १ । । ५४ ॥	२४६
४७८	यञो डायन् च वा ॥ २ । ४ । ६७ ॥	१०४
५६३	यतः प्रतिनि-ना ॥ २ । २ । ७२ ॥	१२८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
११५०	यत्कर्मस्पर्शात्-तः ॥ ५ । ३ । १२५ ॥	८८३
१९९९	यत्तत्किमः—र्वा ॥ ७ । १ । १५० ॥	४०२
२२८७	यत्तत्किमन्यात् ॥ ७ । ३ । ५३ ॥	४६२
१९९८	यत्तदेतदो डावादिः ॥ ७ । १ । १४९ ॥	४०२
१७४७	यथाकथाचाणः ॥ ६ । ४ । १०० ॥	३५२
१९४९	यथाकामा-नि ॥ ७ । १ । १०० ॥	३९३
११९६	यथातथादीर्घोत्तरे ॥ ५ । ४ । ५१ ॥	८९२
७४१	यथाऽथा ॥ ३ । १ । ४१ ॥	१६४
१९४२	यथामुख-स्मिन् ॥ ७ । १ । ९३ ॥	३९१
५९८	यद्भावो भावलक्षणम् ॥ २ । २ । १०६ ॥	१३६
५३३	यद्धेदैस्तद्वदाख्या ॥ २ । २ । ४६ ॥	१२१
५४८	यद्वीक्ष्ये राधीक्षी ॥ २ । २ । ५८ ॥	१२४
११९०	यपि ॥ ४ । २ । ५६ ॥	८९१
९२४	यपि चादो जग्ध् ॥ ४ । ४ । १६ ॥	७१०
३१३	यबक्ङति ॥ ४ । २ । ७ ॥	५५५
५६३	यमः सूचने ॥ ४ । ३ । ३९ ॥	६२९
५३४	यमः स्वीकारे ॥ ३ । ३। ५९ ॥	६२३
७१४	यममदगदोऽनुपसर्गात् ॥ ५ । १ । ३० ॥	६७०
२५६	यमिरमिनमिगमि-ति ॥ ४ । २ । ५५ ॥	५४१
६२	यमिरमिनम्या-श्च ॥ ४ । ४ । ८६ ॥	४८९
३७०	यमोऽपरिवे-च ॥ ४ । २ । २९ ॥	५७७
१३	यरलवा अन्तस्थाः ॥ १ । १ । १५ ॥	२
१९३०	यवयवक-च्यः ॥ ७ । १ । ८१ ॥	३९०
४७६	यवयवनार-त्वे ॥ २ । ४ । ६५ ॥	१०३
१६४०	यश्चोरसः ॥ ६ । ३ । २१२ ॥	३३४
११८४	यस्कादेगोत्रे ॥ ६ । १ । १२५ ॥	२५२
३३४	यस्वरे पा-टि ॥ २ । १ । १०२ ॥	६९
१६६९	याचितापमित्यात्कण् ॥ ६ । ४ । २२ ॥	३३८
८०५	याजकादिभिः ॥ ३ । १ । ७८ ॥	१७६
१३९०	याज्ञिकौक्थिक-कम् ॥ ६ । २ । १२२ ॥	२८८
६९८	याज्या दानर्चि ॥ ५ । १ । २६ ॥	६६७
२०	याम्युसोरियमियुसौ ॥ ४ । २ । १२३ ॥	४७९
१०१०	यायावरः ॥ ५ । २ । ८२ ॥	८२८
१२००	यावतो विन्दजीवः ॥ ५ । ४ । ५५ ॥	८९३
७३०	यावदियत्त्वे ॥ ३ । १ । ३१ ॥	१६१
२२४९	यावादिभ्यः कः ॥ ७ । ३ । १५ ॥	४५४
४१५	यिः सन्वेर्ष्यः ॥ ४ । १ । ११ ॥	५९३
२९१	यि लुक् ॥ ४ । २ । १०२ ॥	५४८
२९०	युजश्चकुञ्जो नो ङः ॥ २ । १ । ७१ ॥	५७
९७९	युजभुजभज-नः ॥ ५ । २ । ५० ॥	७२३
३७८	युजादेर्नवा ॥ ३ । ४ । १८ ॥	५८४
२९८	युञ्जोऽसमासे ॥ १ । ४ । ७१ ॥	५८
१०८१	युदुद्रोः ॥ ५ । ३ । ५९ ॥	८७३
१०७६	युपूद्रोर्धञ् ॥ ५ । ३ । ५४ ॥	८७२
१०५०	युषर्णवृदवश-हः ॥ ५ । ३ । २८ ॥	८६८
११११	युववृद्धं कुत्सार्थै वा ॥ ६ । १ । ५ ॥	२४१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
८४५	युवा खलति–नैः ॥ ३ । १ । ११३ ॥	१८७
१९१५	युवादेरण् ॥ ७ । १ । ६७ ॥	३८७
३१०	युष्मदस्मदोः ॥ २ । १ । ६ ॥	६१
२२६४	युष्मदस्मदो–देः ॥ ७ । ३ । ३० ॥	४५७
४८८	यूनस्तिः ॥ २ । ४ । ७७ ॥	१०५
१२४९	यूनि लुप् ॥ ६ । १ । १३७ ॥	२६५
१९२२	यूनोऽके ॥ ७ । ४ । ५० ॥	३८८
३११	यूयं वयं जसा ॥ २ ।१ । १३ ॥	६२
१३४	ये नवा ॥ ४ । २ । ६२ ॥	५०५
२०१३	येयौ शलुक् च ॥ ७ । १ । १६४ ॥	४०६
१०४२	येऽवर्णे ॥ ३ । २ । १०० ॥	२२८
११९९	यैयकञावसन्नासे वा ॥ ६ । १ । ९७ ॥	२५४
१७४२	योगकर्मभ्यां योकञौ ॥ ६ । ४ । ९५ ॥	३५१
७४०	योग्यतावीप्सा–श्ये ॥ ३ । १ । ४० ॥	१६४
१३८१	योद्भप्रयोजनाद्युद्धे ॥ ६ । २ । ११३ ॥	२८६
२३९	योऽनेकस्वरस्य ॥ २ । १ । ५६ ॥	४५
१९२०	योपान्त्या–कञ् ॥ ७ । १ । ७२ ॥	३८८
४४०	योऽशिति ॥ ४ । ३ । ८० ॥	५९९
२२९९	यौधेयादेरञ् ॥ ७ । ३ । ६५ ॥	४६५
७०	व्यक्ये ॥ १ । २ । २५ ॥	१२
११२५	व्वः पदान्तात्–दौत् ॥ ७ । ४ । ५ ॥	२४३
२१३	व्वृत् सकृत् ॥ ४ । १ । १०२ ॥	५३०
१९१७	व्वृवर्णाल्लुग्वादेः ॥ ७ । १ । ६९ ॥	३८७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३८६	व्वोः प्वव्व्यञ्ञे लुक् ॥ ४ । ४ । १२१ ॥	५८८
	र	
१३४	रः कखप–ऽ पौ ॥ १ । ३ । ५ ॥	२५
१३५	रः पदान्ते–योः ॥ १ । ३ । ५३ ॥	२५
२२५२	रक्तानित्यवर्णथोः ॥ ७ । ३ । १८ ॥	४५४
१६७७	रक्षवुच्छतोः ॥ ६ । ४ । ३० ॥	३३९
१४२७	रङ्गोः प्राणिनि वा ॥ ६ । ३ । १५ ॥	२९४
७९६	रजःफलेमलाद्ग्रहः ॥ ५ । १ । ९८ ॥	६८४
१०६७	रथवदे ॥ ३ । २ । १३१ ॥	२३३
१६०२	रथात्सादेश्च वोढ्रङे ॥ ६ । ३ । १७५ ॥	३२६
८८३	रदादमूर्च्छेम–च ॥ ४ । ३ । ६९ ॥	७०१
३०६	रघ इदि तु–च ॥ ४ । ४ । १०१ ॥	७०१
४३०	रमलभशक–मिः ॥ ४ । १ । २१ ॥	५९६
४१२	रभोऽपरोक्षाशचि ॥ ४ । ४ । १०२ ॥	५९२
११५१	रम्यादिभ्यः–रि ॥ ५ । ३ । १२६ ॥	८८३
१९५	रपृवर्णान्नो–रे ॥ २ । ३ । ६३ ॥	३६
२३१४	रहस्यमर्या–गे ॥ ७ । ४ । ८३ ॥	४७१
१२५६	रागाद्वो रक्ते ॥ ६ । २ । १ ॥	२६७
७८६	राजघः ॥ ५ । १ । ८८ ॥	६८३
८४९	राजदन्तादिषु ॥ ३ । १ । १४९ ॥	१८९
१३३१	राजन्यादिभ्योऽकञ् ॥ ६ । २ । ६६ ॥	२७९
२०५३	राजन्वान् सुराज्ञि ॥ २ । १ । ९८ ॥	४१५
८४१	राजन्सखेः ॥ ७ । ३ । १०६ ॥	१८६

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
६१०	रात्रौ वसो-द्य ॥ ५ । २ । ६ ॥	६४३
१७५७	राज्यहःसं-र्वा ॥ ६ । ४ । ११० ॥	३५३
३७०	रात्सः ॥ २ । १ । ९० ॥	७७
२२१०	रादेफः ॥ ७ । २ । १५७ ॥	४४५
४३४	राधेर्वधे ॥ ४ । १ । २२ ॥	५९७
४६७	राल्लुक् ॥ ४ । १ । ११० ॥	६०५
१२२८	राष्ट्रक्षत्रियात्-रञ् ॥ ६ । १ । ११४ ॥	२५९
८६०	राष्ट्राख्याद्ब्रह्मणः ॥ ७ । ३ । १०७ ॥	१९१
१४१५	राष्ट्रादियः ॥ ६ । ३ । ३ ॥	२९३
१३३०	राष्ट्रेऽनङ्गादिभ्यः ॥ ६ । २ । ६५ ॥	२७९
१४५८	राष्ट्रेभ्यः ॥ ६ । ३ । ४४ ॥	२९९
८५	रिः शक्याशीर्ये ॥ ४ । ३ । ११० ॥	४९३
२१२८	रिति ॥ ३ । २ । ५८ ॥	४२६
५७३	रिरिष्टात्-ता ॥ २ । २ । ८२ ॥	१३१
४६५	रिरौ च लुपि ॥ ४ । १ । ५६ ॥	६०४
५४५	रुचिकृप्य-षु ॥ २ । २ । ५५ ॥	१२३
६७२	रुच्याव्यथ्यवास्तव्यम् ॥ ५ । १ । ६ ॥	६६१
५०९	रुजार्थस्या-रि ॥ २ । २ । १३ ॥	११४
२३४	रुत्पञ्चकाच्छिदयः ॥ ४ । ४ । ८८ ॥	५३६
४१७	रुदविदमुष-च ॥ ४ । ३ । ३२ ॥	५९३
५९९	रुधः ॥ ३ । ४ । ८९ ॥	६३९
३४७	रुधां स्वराच्छ्नो-च ॥ ३ । ४ । ८२ ॥	५६७
३९२	रुहः पः ॥ ४ । २ । १४ ॥	५८९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१५५९	रूढावन्तःपुरादिकः ॥ ६ । ३ । १४० ॥	३१७
२१०६	रूपात्प्रशस्ताहतात् ॥ ७ । २ । ५४ ॥	४२३
१४३४	रूप्योत्तरपदारण्याण्णः ॥ ६ । ३ । २२ ॥	२९५
४३६	रेवतरोहिणाद्मे ॥ २ । ४ । २६ ॥	९५
११८६	रेवत्यादेरिकण् ॥ ६ । १ । ८६ ॥	२५२
१५९७	रैवतिकादेरीयः ॥ ६ । ३ । १७० ॥	३२५
१५४	रोः काम्ये ॥ २ । ३ । ७ ॥	२८
२१३५	रोगात्प्रतीकारे ॥ ७ । २ । ८२ ॥	४२८
१४५६	रोपान्त्यात् ॥ ६ । ३ । ४२ ॥	२९९
४८५	रोमन्थाद्याप्या-णे ॥ ३ । ४ । ३२ ॥	६०९
१०४४	रोरुपसर्गात् ॥ ५ । ३ । २२ ॥	८६७
१७२	रो रे लुग्-नः ॥ १ । ३ । ४१ ॥	३२
१६८	रोर्यः ॥ १ । ३ । २६ ॥	३१
१७०	रोलुप्यरिं ॥ २ । १ । ७५ ॥	३१
१३४५	रोऽश्मादेः ॥ ६ । २ । ७९ ॥	२८१
१६०	र्नाम्यन्तात्-ढः ॥ २ । १ । ८० ॥	५१३
३८६	र्लो वा ॥ १ । ४ । ६७ ॥	८२
६३	र्हादर्हस्व-वा ॥ ९ । ३ । ३१ ॥	११

ल

५२३	लक्षणवीप्स्ये-ना ॥ २ । २ । ३६ ॥	११८
७३२	लक्षणेनाभि-क्ये ॥ ३ । १ । ३३ ॥	१६१
२०८४	लक्ष्म्या अनः ॥ ७ । २ । ३२ ॥	४२०
१७५	लघोर्दीर्घोऽस्वरादेः ॥ ४ । १ । ६४ ॥	५१९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१०३	लघोरुपान्त्यस्य ॥ ४ । ३ । ४ ॥	४९७
११८३	लघोर्यपि ॥ ४ । ३ । ८६ ॥	८९०
८८९	लघ्वक्षरास-कम् ॥ ३ । १ । १६० ॥	१९७
९१०	लङ्गिकम्प्यो-त्योः ॥ ४ । २ । ४७ ॥	७०७
४१३	लभः ॥ ४ । ४ । १०३ ॥	५९२
८२३	ललाटवात-कः ॥ ५ । १ । १२५ ॥	६८८
१६५३	लवणादः ॥ ६ । ४ । ६ ॥	३३६
९७०	लषपतपदः ॥ ५ । २ । ४१ ॥	७२२
१२५७	लाक्षारोचनादिकण् ॥ ६ । २ । २ ॥	२६७
६२५	लिप्स्यसिद्धौ ॥ ५ । ३ । १० ॥	६४७
७५५	लिम्पविन्दः ॥ ५ । १ । ६० ॥	६७७
३७९	लियो नोऽन्तः-वे ॥ ४ । २ । १५ ॥	५८४
११६	लि लौ ॥ १ । ३ । ६५ ॥	२२
७३८	लिहादिभ्यः ॥ ५ । १ । ५० ॥	६७४
५६७	लीङ्लिनो-पि ॥ ३ । ३ । ९० ॥	६३१
३१५	लीङ्लिनोर्वा ॥ ४ । २ । ९ ॥	५५५
१३८	लुक् ॥ १ । ३ । १३ ॥	२५
२२७३	लुक्वाजिनान्तात् ॥ ७ । ३ । ३९ ॥	४५९
२२७२	लुक्थुत्तरपदस्य कप् ॥ ७ । ३ । ३८ ॥	४५९
३०४	लुगस्यादेत्यपदे ॥ २ । १ । ११३ ॥	६०
२१३	लुगातोऽनापः ॥ २ । १ । १०७ ॥	४०
२३१	लुप्यव्वृलेनत् ॥ ७ । ४ । ११२ ॥	४३
२१६७	लुबञ्चेः ॥ ७ । २ । १२३ ॥	४३५

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१३२०	लुब्बहुलं पुष्पमूले ॥ ६ । २ । ५७ ॥	२७७
२१२४	लुब्धाध्यायानुवाके ॥ ७ । २ । ७२ ॥	४२६
९२७	लुभ्यञ्चेर्विमोहार्चे ॥ ४ । ४ । ४४ ॥	९११
१०१५	लूधूस्-तः ॥ ५ । २ । ८७ ॥	७२९
२२५५	लूनवियातात् पशौ ॥ ७ । ३ । २१ ॥	४५५
१३७	लृदिद्युतादि० ॥ ३ । ४ । ६४ ॥	५०६
१०५५	लोकंपृणम-त्यम् ॥ ३ । २ । ११३ ॥	२३१
२३१५	लोकज्ञाते-र्थे ॥ ७ । ४ । ८४ ॥	४७१
१८११	लोकसर्व-ते ॥ ६ । ४ । १५७ ॥	३६४
२७	लोकात् ॥ १ । १ । ३ ॥	५
२०८०	लोमपिच्छादेः शेलम् ॥ ७ । २ । २८ ॥	४१९
२३४	लोम्नोऽपत्येषु ॥ ६ । १ । २३ ॥	४३
३८०	लो लः ॥ ४ । २ । १६ ॥	५८४
४७९	लोहितादिश-त् ॥ २ । ४ । ६८ ॥	१०४
२२५१	लोहितान्मणौ ॥ ७ । ३ । १७ ॥	४५४

व

१८२०	वंशादेर्भा-त्सु ॥ ६ । ४ । १६६ ॥	३६६
१११०	वंश्यज्यायो-वा ॥ ६ । १ । ३ ॥	२४०
७२८	वंश्येन पूर्वार्थे ॥ ३ । १ । २९ ॥	१६०
६८६	वचोऽशब्दनाम्नि ॥ ४ । १ । ११९ ॥	६६४
४५८	वञ्चस्रंसध्वंस-नीः ॥ ४ । १ । ५० ॥	६०२
२०४५	वटकादिन् ॥ ७ । १ । १९६ ॥	४११
११३३	वतण्डात् ॥ ६ । १ । ४५ ॥	२४५

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३९८	वत्सस्याम् ॥ १ । १ । ३४ ॥	८६
१५३०	वत्सशालाद्वा ॥ ६ । ३ । १११ ॥	३१२
२२८२	वत्सोक्षाश्व-पित् ॥ ७ । ३ । ५१ ॥	४६१
११०	वदव्रजलूः ॥ ४ । ३ । ४८ ॥	४९९
५७३	वदोऽपात् ॥ ३ । ३ । ९७ ॥	६३२
७४६	वन्याङ्पञ्चमस्य ॥ ४ । २ । ६५ ॥	६९३
२५७	वमि वा ॥ २ । ३ । ८३ ॥	५४१
३२०	वम्यविति वा ॥ ४ । २ । ८७ ॥	५५७
९५३	वयःशक्तिशीले ॥ ५ । २ । २४ ॥	७१८
६८०	वयसि दन्त-तृ ॥ ७ । ३ । १५१ ॥	१५३
४३१	वयस्यनन्त्ये ॥ २ । ४ । २१ ॥	९४
१३६१	वराहादेः कण् ॥ ६ । २ । ९५ ॥	२८३
४७२	वरुणेन्द्र-न्तः ॥ २ । ४ । ६२ ॥	१०३
१५४७	वर्गान्तात् ॥ ६ । ३ । १२८ ॥	३१५
१०१२	वर्चस्कादिष्व-यः ॥ ३ । २ । ४८ ॥	२२२
१९०७	वर्णदृढा-वा ॥ ७ । १ । ५९ ॥	३८५
२१२१	वर्णाद्-णि ॥ ७ । २ । ६९ ॥	४२५
१४३३	वर्णावकञ् ॥ ६ । ३ । २१ ॥	२९५
२२०९	वर्णाव्ययात्-रः ॥ ७ । २ । १५६ ॥	४४४
११	वर्तमाना-महे ॥ ३ । ३ । ६ ॥	४७७
९३०	वर्तेर्वृत्तं ग्रन्थे ॥ ४ । ४ । ६५ ॥	७१२
१०२४	वर्त्स्यति गम्यादिः ॥ ५ । ३ । १ ॥	८६४
६५२	वर्त्स्यति-ले ॥ ५ । ४ । २५ ॥	६५४
१११८	वर्मणोऽचक्रात् ॥ ६ । १ । ३३ ॥	२४२
७१६	वर्योपसार्या-ये ॥ ५ । १ । ३२ ॥	६७०
९६१	वर्षक्षर-जे ॥ ३ । २ । २६ ॥	२१३
१०७२	वर्षविप्रेऽवाद्ग्रहः ॥ ५ । ३ । ५० ॥	८७२
१४९६	वर्षाकालेभ्यः ॥ ६ । ३ । ८० ॥	३०६
१०५१	वर्षादयः क्लीबे ॥ ५ । ३ । २९ ॥	८६८
१७५९	वर्षादश्च वा ॥ ६ । ४ । १११ ॥	३५४
१०२४	वलच्यापित्रादेः ॥ ३ । २ । ८२ ॥	२२४
२०६८	वलिवटि-र्मः ॥ ७ । २ । १६ ॥	४१७
२६२	वशेरयङि ॥ ४ । १ । ८३ ॥	५४२
१३३२	वसातेर्वा ॥ ६ । २ । ६७ ॥	५७९
१७२०	वसनात् ॥ ६ । ४ । १३८ ॥	३५९
२९९	वसुराटोः ॥ ३ । २ । ८१ ॥	५९
१९६१	वस्तेरेयञ् ॥ ७ । १ । २१२ ॥	३९६
१६६४	वस्तान ॥ ६ । ४ । १७ ॥	३३७
१८४१	वहित रथयु-त् ॥ ७ । १ । २ ॥	३७०
८२१	वहाभ्राल्लिहः ॥ ५ । १ । १२३ ॥	६८८
१११६	वहीनरस्यैत् ॥ ७ । ४ । ४ ॥	२४२
५०३	वहेः प्रवेयः ॥ २ । २ । ७ ॥	११२
१६०७	वहेस्तुरिश्रादिः ॥ ६ । ३ । १८० ॥	३२७
७१८	वह्यं करणे ॥ ५ । १ । ३४ ॥	६७०
१४२६	वह्लथूर्दिपर्दि-नण् ॥ ६ । १४ ॥	२९४
३६१	वाः शेषे ॥ १ । ४ । ८२ ॥	७५

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
५००	वाऽकर्मणा-णौ ॥ २ । २ । ४ ॥	१११
५१३	वाकाङ्क्षायाम् ॥ ५ । २ । १० ॥	६४४
२३१९	वाक्यस्य परिर्वर्जने ॥ ७ । ४ । ८८ ॥	४७२
८९०	वाक्रोशदैन्ये ॥ ४ । २ । ७५ ॥	७०३
५८३	वा क्लीबे ॥ २ । २ । ९२ ॥	१३३
१५७	वाक्षः ॥ ३ । ४ । ७६ ॥	५१२
६७४	वागन्तौ ॥ ७ । ३ । १४५ ॥	१५३
६८३	वाग्रान्त-रात् ॥ ७ । ३ । १९५ ॥	१५४
२०७६	वाच आलाटौ ॥ ७ । २ । २४ ॥	४१९
२२२१	वाच इकण् ॥ ७ । २ । १६८ ॥	४४६
८१३	वाचंयमो व्रते ॥ ५ । १ । ११५ ॥	६८७
९७१	वाचस्पति-सम् ॥ ३ । २ । ३६ ॥	२१५
१५२७	वा जाते ङिः ॥ ६ । २ । १३७ ॥	३१२
७५७	वा ज्वलादि-र्णः ॥ ५ । १ । ६२ ॥	६७८
८५५	वाञ्छलेरल्लुकः ॥ ७ । ३ । १०१ ॥	१९०
११२७	वाटाट्यात् ॥ ५ । ३ । १०३ ॥	८७९
११८५	वाडवेयो वृषे ॥ ६ । १ । ८५ ॥	२५२
१९३१	वाणुमाषात् ॥ ७ । १ । ८२ ॥	३९०
१८०६	वातपित्त-न्ने ॥ ६ । ४ । १५२ ॥	३६३
२११३	वातातीसार-न्तः ॥ ७ । २ । ६१ ॥	४२४
७२४	वा तृतीयायाः ॥ ३ । २ । ३ ॥	१६०
१७८४	वातोरिकः ॥ ६ । ४ । १३२ ॥	३५९
२१७	वात्मने ॥ ३ । ४ । ६३ ॥	५३०
८२	वात्यसंधिः ॥ १ । २ । ३१ ॥	१४
२१७४	वा दक्षिणात्-आः ॥ ७ । २ । ११९ ॥	४३६
९९६	वादेश्च णकः ॥ ५ । २ । ६७ ॥	७२६
२६८	वाद्यतनीक्रिया-र्गीङ् ॥ ४ । ४ । २८ ॥	५४३
६१७	वाद्यतनो पुरादौ ॥ ५ । २ । १५ ॥	६४५
१०८८	वाद्यात् ॥ ६ । १ । ११ ॥	२३७
२९३	वाद्रौ ॥ २ । १ । ४६ ॥	५७
२२४	वा द्विषातोऽनः पुस् ॥ ४ । २ । ९१ ॥	५३४
६९२	वाधारऽमावास्या ॥ ५ । १ । २१ ॥	६६५
१०	वा नाम्नि ॥ १ । २ । २० ॥	५३
६८८	वा नाम्नि ॥ ७ । ३ । १५९ ॥	१५५
९१०	वान्तिके ॥ ३ । १ । १४७ ॥	२०२
२२३१	वान्तमान्ति-षद् ॥ ७ । ४ । ३१ ॥	४४९
२८३	वान्यतः पुमान्-रे ॥ १ । ४ । ६२ ॥	५५
१२४५	वान्येन ॥ ६ । १ । १३३ ॥	२६४
११९३	वापगुरो णमि ॥ ४ । २ । ५ ॥	८९२
२१९	वा परोक्षायङि ॥ ४ । १ । ९० ॥	५३१
४०८	वा पादः ॥ २ । ४ । ६ ॥	८९
११८४	वाप्नोः ॥ ४ । ३ । ८७ ॥	८९०
४०७	वा बहुव्रीहेः ॥ २ । ४ । ५ ॥	८९
५१८	वाभिनिविशः ॥ २ । २ । २२ ॥	११६
९०७	वाऽभ्यवाभ्याम् ॥ ४ । १ । ९९ ॥	७०६
११९१	वामः ॥ ४ । २ । ५७ ॥	८९१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१४०३	वामदेवाद्यः ॥ ६ । २ । १३५ ॥	२९१
१८४४	वामाद्यादेरोनः ॥ ७ । १ । ४ ॥	३७१
२२३	वाम्शसि ॥ २ । १ । ५५ ॥	४१
१२५०	वायनणायनिञोः ॥ ६ । १ । १३८ ॥	२६५
१४८३	वा युष्मद-कम् ॥ ६ । ३ । ६७ ॥	३०४
१३७७	वाय्वृतुपितृषसो यः ॥ ६ । २ । १०९ ॥	२८५
२१६२	वारे कृत्वस् ॥ ७ । २ । १०९ ॥	४३४
८५७	वार्धाञ्च ॥ ७ । ३ । १०३ ॥	१९०
५३६	वा लिप्सायाम् ॥ ३ । ३ । ६१ ॥	६२३
६७५	वाल्पे ॥ ७ । ३ । १४६ ॥	१५३
१०८६	वावाप्यो-पो ॥ ३ । २ । १५६ ॥	२३६
९५१	वा वेत्तेः क्सुः ॥ ५ । २ । २२ ॥	७१८
३८५	वा वेष्टचेष्टः ॥ ४ । १ । ६६ ॥	५८८
१२२५	वाशिन आयनौ ॥ ७ । ४ । ४६ ॥	२५८
१२९०	वाश्मना विकारे ॥ ७ । ४ । ६३ ॥	२७२
१२७७	वाश्वादीयः ॥ ६ । २ । १९ ॥	२७०
३४८	वाष्टन आः स्यादौ ॥ १ । ४ । ५२ ॥	७२
१६३६	वासुदेवार्जुनादकः ॥ ६ । ३ । २०७ ॥	३३२
५३४-२	वा स्वीकृतौ ॥ ४ । ३ । ४० ॥	६२३
१६०५	वाहनात् ॥ ६ । ३ । १७८ ॥	३२६
१७१	वाह्वर्पत्यादयः ॥ १ । ३ । ५८ ॥	३१
६४१	वाह्विताग्न्यादिषु ॥ ३ । १ । १५३ ॥	१४७
१४४९	वाह्वीकेषु ग्रामात् ॥ ६ । ३ । ३६ ॥	२९८
२२९७	वाह्वीकेष्वब्राह्म-भ्यः ॥ ७ । ३ । ६३ ॥	४६४
१०२५	वा हेतुसिद्धौ क्तः ॥ ५ । ३ । २ ॥	८६४
१६०६	वाह्यपथ्युपकरणे ॥ ६ । ३ । १७९ ॥	३२६
१००१	वाह्याद्वाहनस्य ॥ २ । ३ । ७२ ॥	२१९
१७९१	विंशतिकात् ॥ ६ । ४ । १३९ ॥	३६०
६२६	विंशते-ति ॥ ७ । ४ । ६७ ॥	१४४
१८२७	विंशत्यादयः ॥ ६ । ४ । १७३ ॥	३६८
२००५	विंशत्यादेर्वा तमट् ॥ ७ । १ । १५६ ॥	४०५
११७०	विकर्णकुषीत-पे ॥ ६ । १ । ७५ ॥	२५०
११५३	विकर्णच्छगला-ये ॥ ६ । १ । ६४ ॥	२४८
१२८९	विकारे ॥ ६ । २ । ३० ॥	२७२
९८८	विकुशमिपरेः-स्य ॥ २ । ३ । २८ ॥	२१७
९१	विचारे पूर्वस्य ॥ ७ । ४ । ९५ ॥	१६
२१५८	विचाले च ॥ ७ । २ । १०५ ॥	४३३
११०८	विच्छो नङ् ॥ ५ । ३ । ८६ ॥	८७६
३४४	विजेरिट् ॥ ४ । ३ । १८ ॥	५६६
८९९	वित्तं धनप्रतीतम् ॥ ४ । २ । ८२ ॥	७०५
११९९	विद्दग्भ्यः-णम् ॥ ५ । ४ । ५४ ॥	८९३
१५७१	विद्यायोनिसम्बन्धादकञ् ॥ ६ । ३ । १५० ॥	३२०
१७	विधिनिमन्त्रणा-ने ॥ ५ । ४ । २८ ॥	४७९
१८४८	विध्यत्यनन्येन ॥ ७ । १ । ८ ॥	३७२
२२२२	विनयादिभ्यः ॥ ७ । २ । १६९ ॥	४४७
६०७	विना ते तृतीया च ॥ २ । २ । ११५ ॥	१३८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
५१२	विनिमेययूतपणं-ह्नोः ॥ २ । २ । १६ ॥	११५
९६३	विन्द्विच्छु ॥ ५ । २ । ३४ ॥	७२०
२२३६	विन्मतोर्णीष्ठि-लुप् ॥ ७ । ४ । ३२ ॥	४५१
९८४	विपरिप्रात्सर्तेः ॥ ५ । २ । ५५ ॥	७२४
३९७	विभक्तिथ-भाः ॥ १ । १ । ३३ ॥	८६
७३८	विभक्तिस-यम् ॥ ३ । १ । ३९ ॥	१६३
१६९९	विभाजयितृ-च ॥ ६ । ४ । ५२ ॥	३७३
२१२५	विमुक्तादेरण् ॥ ७ । २ । ७३ ॥	४२६
३९१	विथः प्रज्ञने ॥ ४ । २ । १३ ॥	५८९
१८३७	विरागाद्विरङ्गश्च ॥ ६ । ४ । १८३ ॥	३६९
१८९	विरामे वा ॥ १ । ३ । ५१ ॥	३४
८९३	विरोधिनाम-स्वैः ॥ ३ । १ । १३० ॥	१९८
१६७२	विषधवीवधाद्वा ॥ ६ । ४ । २५ ॥	३५८
५५३	विवादे वा ॥ ३ । ३ । ८० ॥	६२७
१५९७	विवाहे द्वन्द्वादकल् ॥ ६ । ३ । १६३ ॥	३२३
१२५६	विशपतपद-क्ष्ण्ये ॥ ५ । ४ । ८१ ॥	८९९
१७६९	विशाखाषा-ण्डे ॥ ६ । ४ । १२० ॥	३५६
१७७१	विशिरुहि-वात् ॥ ६ । ४ । १२२ ॥	३५६
८२४	विशेषणं वि-श्च ॥ ३ । १ । ९६ ॥	१८०
२४	विशेषणमन्तः ॥ ७ । ४ । ११३ ॥	४
६३७	विशेषणस-हौ ॥ ३ । १ । १५० ॥	१४६
६०९	विशेषाविव-श्रे ॥ ५ । २ । ५ ।	६४३
५९१	विश्रमेर्वा ॥ ४ । ३ । ५६ ॥	६३७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२०८३	विष्वद्वो विषुश्च ॥ ७ । २ । ३१ ॥	४२०
२२९३	विसारिणो मत्स्ये ॥ ७ । ३ । ५९ ॥	४६४
२३११	वोप्सायाम् ॥ ७ । ४ । ८० ॥	४६९
६८८	विरुन्न्यग्रोधौ ॥ ४ । १ । १२१ ॥	६६४
२२९८	वृकाट्टेण्यण् ॥ ७ । ३ । ६४ ॥	४६५
१०७४	वृगो वस्रे ॥ ५ । ३ । ५२ ॥	८७२
१४५२	वृजिमद्राद्देशात्कः ॥ ६ । ३ । ३८ ॥	२९८
५२३	वृत्तिसर्गतायने ॥ ३ । ३ । ४८ ॥	६२०
१७१४	वृत्तोऽपपाठोऽनुयोगे ॥ ६ । ४ । ६७ ॥	३४६
३९३	वृत्यन्तोऽसर्वे ॥ १ । १ । २५ ॥	८४
११८७	वृद्धस्त्रियाः-णश्च ॥ ६ । १ । ८७ ॥	२५२
२२४०	वृद्धस्य च ज्यः ॥ ७ । ४। ३५ ॥	४५१
१११४	वृद्धाद्यूनि ॥ ६ । ७ । ३० ॥	२४१
१०९१	वृद्धिः स्वरेष्वा-ते ॥ ७ । ४ । १ ॥	२३७
१८	वृद्धिरादैदौत् ॥ ३ । ३ । १ ॥	४
११५८	वृद्धिर्यस्य स्व-दिः ॥ ६ । १ । ८ ॥	२४९
१४४०	वृद्धेऽः ॥ ६ । ३ । २८ ॥	२९६
९२७	वृद्धौ यूना तन्मात्रभेदे ॥ ३ । १ । १२४ ॥	२०६
९९८	वृद्धिक्षिलुण्टि-कः ॥ ५ । २ । ७० ॥	७२६
१९८	वृद्भ्यः स्यसनोः ॥ ३ । ३ । ४५ ॥	५२६
२०६३	वृन्दादारकः ॥ ७ । २ । ११ ॥	४१७
८३८	वृन्दारकनागकुञ्जरैः ॥ ३ । १ । १०८ ॥	१८५
४७५	वृषाश्वान्मथुने स्त्रोऽन्तः ॥ ४ । ३ । ११४ ॥	६०७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१२०२	वृष्टिमान-वा ॥ ५ । ४ । ५७ ॥	८९४
९५	वृतो नवाऽना-च ॥ ४ । ४ । ३५ ॥	४९५
३४३	वेः ॥ २ । ३ । ५४ ॥	५६६
५६०	वेः कृगः-शे ॥ ३ । ३ । ८५ ॥	६२८
६९४	वे खुखग्रम् ॥ ७ । ३ । १६३ ॥	१५५
७४३	वेः स्कन्दोऽक्तयोः ॥ २ । ३ । ५१ ॥	६७५
९८२	वेः स्रः ॥ २ । ३ । २३ ॥	२१६
५२५	वेः स्वार्थे ॥ ३ । ३ । ५० ॥	६२१
८७	वेगे सत्तैर्धावृ ॥ ४ । २ । १०७ ॥	४९४
८८७	वेटोऽपतः ॥ ४ । ४ । ६२ ॥	७०२
१४८२	वेणुकादिभ्य इयण् ॥ ६ । ३ । ६६ ॥	३०४
१६३२	वेतनादेर्जीविति ॥ ६ । ४ । १५ ॥	३३७
१००३	वेत्तिच्छिदभिदः कित् ॥ ५ । २ । ७५ ॥	७२७
२५५	वेत्तेः कित् ॥ ३ । ४ । ५१ ॥	५४०
५२९	वेत्तेर्नेवा ॥ ४ । २ । ११६ ॥	६२८
९१३	वेदसहश्रु-नाम् ॥ ३ । २ । ४१ ॥	२०३
१००७	वेदूतोऽनव्य-दे ॥ २ । ४ । ९८ ॥	२२१
१३९८	वेदेनब्राह्मणमत्रैव ॥ ६ । २ । १३० ॥	२२०
९४५	वेयिवदनाश्व-नम् ॥ ५ । २ । ३ ॥	७१६
२४३	वेयुवोऽस्त्रियाः ॥ १ । ४ । ३० ॥	४५
२११	वेरयः ॥ ४ । १ । ७४ ॥	५२९
१०९१	वेरशब्दे प्रथने ॥ ५ । ३ ।६९ ॥	८७४
९९३	वेर्दहः ॥ ५ । २ । ६४ ॥	७२५

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२०९	वेर्वय् ॥ ४ । ४ । १९ ॥	५२९
९८८	वेर्विचकत्थ-नः ॥ ५ । २ । ५९ ॥	७२५
१९७२	वेर्विस्तृते-टौ ॥ ७ । १ । १२३ ॥	३९७
९८३	वेश्च द्रोः ॥ ५ । २ । ५४ ॥	७२४
१७१२	वेष्टुचादिभ्यः ॥ ६ । ४ । ६५ ॥	३४५
१५९	वेसुसोऽपेक्षायाम् ॥ २ । ३ । ११ ॥	२९
५७६	वैकत्र द्वयोः ॥ २ । २ । ८५ ॥	१३२
१०४७	वैकव्यञ्ञने पूर्वे ॥ ३ । २ । १०५ ॥	२२९
२२८९	वैकात् ॥ ७ । ३ । ५५ ॥	४६३
२२८६	वैकात्-रः ॥ ७ । ३ । ५२ ॥	४६२
२१५९	वैकाद् ध्यमञ् ॥ ७ । २ । । १०६ ॥	४३४
१५८०	वैडूर्यः ॥ ६ । ३ । १५८ ॥	३२२
१०४९	वैणे क्णः ॥ ५ । ३ । २७ ॥	८६८
६३८	वोतात् प्राक् ॥ ५ । ४ । ११ ॥	६५१
१००२	वोत्तरपद-हृः ॥ २ । ३ । ७५ ॥	२२०
८३२	वोत्तरपदेऽर्धे ॥ ७ । २ । १२५ ॥	१८४
२१७६	वोत्तरात् ॥ ७ । २ । १२१ ॥	४३७
१०८३	वोदः ॥ ५ । ३ । ६१ ॥	८७३
१४११	वोदश्चितः ॥ ६ । २ । १४४ ॥	२९२
१२४२	वोपकादेः ॥ ६ । १ । १३० ॥	२६३
६७६	वोपमानात् ॥ ७ । ३ । १४७ ॥	१५३
५८१	वोपात् ॥ ३ । ३ । १०६ ॥	६३४
२२७०	वोपादेरडाकौ च ॥ ७ । ३ । ३६ ॥	४५८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१९३२	वोमाभङ्गातिलात् ॥ ७ । १ । ८३ ॥	३९०
२८०	वोर्णुगः सेटि ॥ ४ । ३ । ४६ ॥	५४५
२७८	वोर्णोः ॥ ४ । ३ । १९ ॥	५४५
२७८	वोर्णोः ॥ ४ । ३ । ६० ॥	५४५
१९९१	वोर्ध्वं द-सद् ॥ ७ । १ । १४२ ॥	४००
६८५	वोर्ध्वात् ॥ ७ । ३ । १५६ ॥	१५४
३९४	वो विधूनने जः ॥ ४ । २ । १९ ॥	५८९
३७५	वोशनसो-सौ ॥ १ । ४ । ८० ॥	७९
१४५१	वोशीनरेषु ॥ ६ । ३ । ३७ ॥	२९८
४१८	वौ वर्तिका ॥ २ । ४ । ११० ॥	९१
७४९	वौ विष्किरो वा ॥ ४ । ४ । ९६ ॥	६७६
४२३	वौ व्यञ्जनादेः-व्वः ॥ ४ । ३ । २५ ॥	५९४
५०	वौष्ठौतौ-से ॥ १ । २ । १७ ॥	९
११८७	व्यः ॥ ४ । १ । ७७ ॥	८९१
५५२	व्यक्तवाचां सहोक्तौ ॥ ३ । ३ । ७९ ॥	६२६
३४१	व्यचोऽनसि ॥ ४ । १ । ८२ ॥	५६५
६४	व्यञ्जनस्या-र्लुक् ॥ ४ । १ । ४४ ॥	४८९
२१८३	व्यञ्जनस्यान्त ईः ॥ ७ । २ । १२९ ॥	४३९
३५८	व्यञ्जनाच्छ्नाहेरानः ॥ ३ । ४ । ८० ॥	५७१
४२९	व्यञ्जनात्तद्धितस्य ॥ २ । ४ । ८८ ॥	९३
१०९३	व्यञ्जनात्प-वा ॥ १ । ३ । ४७ ॥	२३७
४३८	व्यञ्जनादेरेक-वा ॥ ३ । ४ । ९	५९८
७०३	व्यञ्जनादेर्नाम्युपान्त्याद्वा ॥ २ । ३ । ८७ ॥	६६७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
९९	व्यञ्जनादेर्वा-तः ॥ ४ । ३ । ४७ ॥	४९६
११५७	व्यञ्जनाद् घञ् ॥ ५ । ३ । १३२ ॥	८८५
२४४	व्यञ्जनाद्देः सश्र दः ॥ ४ । ३ । ७८ ॥	५३८
११२	व्यञ्जनानामनिटि ॥ ४ । ३ । ४५ ॥	५००
८८५	व्यञ्जनान्तस्था-ध्यः ॥ ४ । २ । ७१ ॥	७०२
१६५५	व्यञ्जनेभ्य उपसिक्ते ॥ ६ । ४ । ८ ॥	३३६
११४०	व्यतिहारेऽनीहा-त्रः ॥ ५ । ३ । ११६ ॥	८८१
१४८	व्यत्यये लुग्वा ॥ १ । ३ । ५६ ॥	२७
१०६९	व्यधजपमद्भ्यः ॥ ५ । ३ । ४७ ॥	८७१
९८९	व्यपाभेर्लषः ॥ ५ । २ । ६० ॥	७२५
१०६०	व्ययोद्रोः करणे ॥ ५ । ३ । ३८ ॥	८७०
१३३	व्यवात्स्वनोऽशने ॥ २ । ३ । ४३ ॥	५०५
१४१९	व्यस्तव्यत्यस्तात् ॥ ६ । ३ । ७ ॥	२९३
१६६३	व्यस्ताच्च क्र-कः ॥ ६ । ४ । १६ ॥	३३७
२१४	व्यस्थण्वि ॥ ४ । २ । ३ ॥	५३०
७५२	व्याघ्राद्रे प्रा-सोः ॥ ५ । १ । ५७ ॥	६७७
५८०	व्याङ्परे रमः ॥ ३ । ३ । १०५ ॥	६३४
१४४७	व्यादिभ्यो णिकेकणौ ॥ ६ । ३ । ३४ ॥	२९७
७८८	व्याप्तौ ॥ ३ । १ । ६१ ॥	१७३
२१८६	व्याप्तौ स्तात् ॥ ७ । २ । १३० ॥	४३९
१२१६	व्याप्याच्चेवात् ॥ ५ । ४ । ७१ ॥	८९७
१११०	व्याप्यादाधारे ॥ ५ । ३ । ८८ ॥	८७६
५९१	व्याप्ये केनः ॥ २ । २ । ९९ ॥	१३५

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
६७०	व्याप्ये घुरके-व्यम् ॥ ५ । १ । ४ ॥	६६१
५३६	व्याप्ये ह्रिद्रो-याम् ॥ २ । २ । ५० ॥	१२१
२१३४	व्याश्रये तसुः ॥ ७ । २ । ८१ ॥	४२८
११२४	व्यासवरुट-चाक् ॥ ६ । १ । ३८ ॥	२४३
१५४०	व्याहरति मृगे ॥ ६ । ३ । १२१ ॥	३१४
६९६	व्युदः काकु-लुक् ॥ ७ । ३ । १६५ ॥	१५६
५६४	व्युदस्तपः ॥ ३ । ३ । ८७ ॥	६२९
१०९९	व्युपाच्छीङः ॥ ५ । ३ । ७७ ॥	८७४
१७४६	व्युष्टादिष्वण् ॥ ६ । ४ । ९९ ॥	३५२
४५९	व्येस्यमोर्यडि ॥ ४ । १ । ८५ ॥	६०२
१६६	व्योः ॥ १ । ३ । २३ ॥	३०
४९६	व्रताद्भुजितन्निवृत्योः ॥ ३ । ४ । ४३ ॥	६१३
७५९	व्रताभीक्ष्ण्ये ॥ ५ । १ । १५७ ॥	६९६
२२९५	व्रातादस्त्रियाम् ॥ ७ । ३ । ६१ ॥	४६४
१६६६	व्रातादीनञ् ॥ ६ । ४ । १९ ॥	३३८
१९२९	व्रीहिशालेरेयण् ॥ ७ । १ । ८० ॥	३९०
१३१२	व्रीहेः पुरोडाशे ॥ ६ । २ । ५१ ॥	२७६
२०६१	व्रोह्यर्यतुन्दा-ञ्च ॥ ७ । २ । ९ ॥	४१६
२०५७	व्रोह्यादिभ्यस्तौ ॥ ७ । २ । ५ ॥	४१५

श

१०१२	शंसंस्वर्य-ङुः ॥ ५ । २ । ८४ ॥	७२९
११२९	शंसिप्रत्ययात् ॥ ५ । ३ । १०५ ॥	८७९
९३७	शकः कर्मणि ॥ ४ । ४। ७३ ॥	७१४
१०३०	शकधृषज्ञारभ-तुम् ॥ ५ । ४ । ९० ॥	८६५
१८४७	शकटादण् ॥ ७ । १ । ७ ॥	३७१
१२५८	शकलकर्दमाद्वा ॥ ६ । २ । ३ ॥	२६७
१४३९	शकलादेर्यञः ॥ ६ । ३ । २७ ॥	२९६
१२३४	शकादिभ्यो ब्रेर्लुप् ॥ ६ । १ । १२० ॥	२६१
७११	शकितकिचति-त् ॥ ५ । १ । २९ ॥	६६९
७९८	शकुन्स्तम्बाद्-गः ॥ ५ । १ । १०० ॥	६८४
५४८	शकोऽजिज्ञासायाम् ॥ ३ । ३ । ७३ ॥	६२५
५५०	शक्तार्थवषट्नमः-भिः ॥ २ । २ । ६८ ॥	१२७
६६२	शक्तार्हे कृत्याश्च ॥ ५ । ४ । ३५ ॥	६५७
१७११	शक्तियष्टेष्टोकण् ॥ ६ । ४ । ६४ ॥	३४५
४४४	शक्तेः शस्त्रे ॥ २ । ४ । ३४ ॥	९६
१७३७	शङ्कुत्तर-च ॥ ६ । ४ । ९० ॥	३५०
१६४३	शण्डिकादेर्ण्यः ॥ ६ । ३ । २१५ ॥	३३४
१३७२	शतरुद्रात्तौ ॥ ६ । २ । १०४ ॥	२८५
१३९२	शतषष्टेः पथ इकट् ॥ ६ । २ । १२४ ॥	२८८
१७८३	शतात्केव-कौ ॥ ६ । ४ । १३१ ॥	३५८
२००६	शतादिमासा-रात् ॥ ७ । १ । १५७ ॥	४०५
१७९८	शताद्यः ॥ ६ । ४ । १४५ ॥	३६१
९४७	शत्रानशावे-स्यौ ॥ ५ । २ । २० ॥	७१६
४००	शदिरगतौ शात् ॥ ४ । २ । २३ ॥	५९०
२०५	शदेः शिति ॥ ३ । ३ । ४१ ॥	५२८
१९९५	शन्शद्भिंशतेः ॥ ७ । १ । १४६ ॥	४०१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
५१७	शप उपलम्भने ॥ ३ । ३ । ३५ ॥	६१८
११३८	शपभरद्वाजादात्रेये ॥ ६ । १ । ५० ॥	२४६
१०४०	शब्दनिष्कघोषमिश्रे वा ॥ ३ । २ । ९८ ॥	२२८
४८८	शब्दादेः कृतौ वा ॥ ३ । ४ । ३५ ॥	६०९
९७८	शमष्टकात्-ण् ॥ ५ । २ । ४९ ॥	७२३
४७५	शमो दर्शने ॥ ४ । २ । २८ ॥	५९१
८३२	शमो नाम्न्यः ॥ ५ । १ । १३४ ॥	६९०
२२८२	शम्या रुरौ ॥ ७ । ३ । ४८ ॥	४६१
१२९५	शम्या लः ॥ ६ । २ । ३४ ॥	२७३
३१२	शम्सप्तकस्य इये ॥ ४ । २ । १११ ॥	५५४
९६०	शयवासिवासे-त् ॥ ३ । २ । २५ ॥	२१३
१४९८	शरदः श्राद्धे कर्मणि ॥ ६ । ३ । ८१ ॥	३०६
१३०८	शरदर्भकृदो-जात् ॥ ६ । २ । ४७ ॥	२७५
७४९	शरदादेः ॥ ७ । ३ । ९२ ॥	१६५
१९६७	शर्करादेरण् ॥ ७ । १ । ११८ ॥	३९७
१३४४	शर्कराया इक-ण्च ॥ ६ । २ । ७८ ॥	२८१
१७०३	शलालुनो वा ॥ ६ । ४ । ५६ ॥	३४४
१४४	शषसे श-वा ॥ १ । ३ । ६ ॥	२६
१८४	शसोता-सि ॥ १ । ४ । ४९ ॥	३४
३१३	शसो नः ॥ २ । १ । १७ ॥	६२
२२१६	शस्त्रजीवि-वा ॥ ७ । ३ । ६२ ॥	४६४
१९२७	शाकटशा-त्रे ॥ ७ । १ । ७८ ॥	३९०
१६००	शाकलादकञ् च ॥ ६ । ३ । १७३ ॥	३२६

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
२०८२	शाकीप-ञ्च ॥ ७ । २ । ३० ॥	४२०
१९६३	शाखादेर्यः ॥ ७ । १ । ११४ ॥	३९६
१७९९	शाणात् ॥ ६ । ४ । १४६ ॥	३६१
१६८	शान्दाम्मान्बधा-तः ॥ ३ । ४ । ७ ॥	५१७
११९७	शापे व्याप्यात् ॥ ५ । ४ । ५२ ॥	८९३
१६९२	शाब्दिकदार्द-कम् ॥ ६ । ४ । ४५ ॥	३४२
११२३	शालङ्क्यौदिषा-लि ॥ ६ । १ । ३७ ॥	२४३
१८३९	शालीनकौ-नम् ॥ ६ । ४ । १८५ ॥	३७०
२५०	शासस्हनः-हि ॥ ४ । २ । ८४ ॥	५३९
११६७	शास्युधिदृशि-नः ॥ ५ । ३ । १४१ ॥	८०७
२२५	शास्त्यसूवक्ति-रङ् ॥ ३ । ४ ६० ॥	५३४
१५६९	शिक्षादेश्चाण् ॥ ६ । ३ । १४८ ॥	३२०
२०५६	शिखादिभ्य इन् ॥ ७ । २ । ४ ॥	४१५
१३४२	शिखायाः ॥ ६ । २ । ७६ ॥	२८१
६५	शिटः प्रथ-स्य ॥ १ । ३ । ३५ ॥	१२
१४७	शिट्यघोषात् ॥ १ । ३ । ५५ ॥	२७
१२५	शिट्याद्यस्य द्वितीयो वा ॥ १ । ३ । ४० ॥	२३
३७१	शिड्ढेऽनुस्वारः ॥ १ । ३ । ४० ॥	७७
१५	शिदवित् ॥ ४ । ३ । २० ॥	४७८
१०४३	शिरसः शीर्षन् ॥ ३ । २ । १०१ ॥	२२९
१३४३	शिरीषादिककणौ ॥ ६ । २ । ७७ ॥	२८१
१५१	शिरोऽधसः-कये ॥ २ । ३ । ४	२७
२७१-२	शिर्घुट् ॥ १ । १ । २८ ॥	५३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१९६२	शिलाया एयङ्च ॥ ७ । १ । ११३ ॥	३९६
१६१८	शिलालिपा–त्रे ॥ ६ । ३ । १८९ ॥	३२९
१७०७	शिल्पं ॥ ६ । ४ । ५७ ॥	३४४
११४९	शिवादेरण् ॥ ६ । १ । ६० ॥	२४७
१६२९	शिशुक्रन्दा–यः ॥ ६ । ३ । २०० ॥	३३१
२७०	शीङ पः शिति ॥ ४ । ३ । १०४ ॥	५४३
२७१	शीङो रट् ॥ ४ । २ । ११५ ॥	५४३
९६६	शीङ्श्रद्धानिद्रा–लुः ॥ ५ । २ । ३७ ॥	७२१
२०३५	शीताच्च कारिणि ॥ ७ । १ । १८६ ॥	४१०
१९४१	शीतोष्णतृ–हे ॥ ७ । १ । ९२ ॥	३९१
२२५४	शीतोष्णाद्दतौ ॥ ७ । ३ । २० ॥	४५५
१०४५	शीर्षः स्वरे तद्धिते ॥ ३ । २ । १०३ ॥	२२९
१८३८	शीर्षच्छेदाद्यो वा ॥ ६ । ४ । १८४ ॥	३७०
१७०६	शीलम् ॥ ६ । ४ । ५९ ॥	३४४
७७१	शीलिकामि–णः ॥ ५ । १ । ७३ ॥	६८०
१३७१	शुकादिभ्यः ॥ ६ । २ । १०३ ॥	२८४
११५२	शुङ्गाभ्यां भरद्वाजे ॥ ६ । १ । ६३ ॥	२४८
१५७६	शुण्डिकादेरण् ॥ ६ । ३ । १५४ ॥	३२१
१०३२	शुनः ॥ ३ । २ । ९० ॥	२२६
८१७	शुनीस्तन–ट्टेः ॥ ५ । ३ । ११९ ॥	६८७
१८७३	शुनो वक्षोवृत् ॥ ७ । १ । ३३ ॥	३७६
११६६	शुभ्रादिभ्यः ॥ ६ । १ । ७३ ॥	२५०
१२०५	शुष्कचूर्ण–ट्व ॥ ५ । ४ । ६० ॥	८९४

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१७८९	शूर्षाद्यञ् ॥ ६ । ४ । १३७ ॥	३५९
२१९८	शूलात्पाके ॥ ७ । २ । १४२ ॥	४४२
१४०८	शूलोखाद्यः ॥ ६ । २ । १४१ ॥	२९१
२०४०	शृङ्खल–भेः ॥ ७ । १ । १९१ ॥	४११
२०६४	शृङ्गात् ॥ ७ । २ । १२ ॥	४१७
९६९	शृकमगम–कण् ॥ ५ । २ । ४० ॥	७२१
९६४	शृवन्देरारुः ॥ ५ । २। ३५ ॥	७२०
९७०	शेपपुच्छला–नः ॥ ३ । २ । ३५ ॥	२१४
२२७७	शेवलाद्यादे–यात् ॥ ७ । ३ । ४३ ॥	४६०
७	शेषात्परस्मै ॥ ३ । ३। १०० ॥	४७७
७०८	शेषाद्वा ॥ ७ । ३ । १७५ ॥	१५७
५७२	शेषे ॥ २ । २ । ८१ ॥	१३१
१४१३	शेषे ॥ ६ । ३ । १ ॥	२९२
६४७	शेषे भविष्यन्त्ययदौ ॥ ५ । ४ । २० ॥	६५३
३१७	शेषे लुक् ॥ २ । १ । ८ ॥	६३
८४१	शोकापनुद–के ॥ ५ । १ । १४३ ॥	६९२
१७४९	शोभमाने ॥ ६ । ४ । १०२ ॥	३५२
९२२	शोव्रते ॥ ४ । ४ । १३ ॥	७१०
१६१४	शौनकादिभ्यो णिन् ॥ ६ । ३ । १८६ ॥	३२८
३९०	शौ वा ॥ ४ । २ । ९५ ॥	८३
२४१	श्चुत्रातः ॥ ४ । २ । ९६ ॥	५३८
२६४	श्नास्त्योर्लुक् ॥ ४ । २ । ९० ॥	५४२
९०५	श्यः शीर्द्रवमूर्ति–र्शे ॥ ४ । १ । ९७ ॥	७०६

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
३८८	श्यशवः ॥ २ । १ । ११६ ॥	८३
११६९	श्यामलक्षणा-ष्ठे ॥ ६ । १ । ७४ ॥	२५०
६८२	श्याश्वारोकाद्वा ॥ ७ । ३ । १५३ ॥	१५४
४४६	श्येतैतहरित-नश्च ॥ २ । ४ । ३६ ॥	९७
१३८३	श्यैनंपाता-ता ॥ ६ । २ । ११५ ॥	२८७
९०८	श्रः शृतं हविःक्षीरे ॥ ४ । १ । १०० ॥	७०७
३६२	श्रन्थग्रन्थो नलुक्-च ॥ ४ । १ । २७ ॥	५७३
९८९	श्रपेः प्रयोऽक्ये ॥ ४ । १ । १०१ ॥	७८७
१२६४	श्रवणाश्वत्थान्नाम्न्यः ॥ ६ । २ । ८ ।	२६८
१५२२	श्रविष्ठाषाढादीयण् च ॥ ६ । ३ । १०५ ॥	३११
१७१८	श्राणामांसौ-वा ॥ ६ । ४ । ७१ ॥	३४७
२०१८	श्राद्धमद्य-नौ ॥ ७ । १ । १६९ ॥	४०७
७८९	श्रितादिभिः ॥ ३ । १ । ६२ ॥	१७३
२३०२	श्रुमच्छमो-यञ् ॥ ७ । ३ । ६८ ॥	४३६
५४६	श्रुवोऽनाङ्प्रतेः ॥ ३ । ३ । ७१ ॥	६२५
६०८	श्रुसदवस्भ्यः-वा ॥ ५ । २ । १ ॥	६४२
३८४	श्रुस्रुद्रुप्रु-र्वा ॥ ४ । १ । ६१ ॥	५८७
८३३	श्रेण्यादिकृता-र्थे ॥ ३ । १ । १०४ ॥	१८४
१९१९	श्रोत्रियाद्यलुक् च ॥ ७ । १ । ७१ ॥	३८८
२२१९	श्रोत्रौषधि-गे ॥ ७ । २ । १६६ ॥	४२६
१०४२	श्रो वायुवर्णनिवृते ॥ ५ । ३ । २० ॥	८६७
५१	श्रौतिकृवुधिवु-दम् ॥ ४ । २ । १०८ ॥	४८६
१११४	श्वादिभ्यः ॥ ५ । ३ । ९२ ॥	८७७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
५५०	श्लाघह्नुस्था-ज्ये ॥ २ । २ । ६० ॥	१२५
३१०	श्लिषः ॥ ३ । ४ । ५६ ॥	५५३
८७७	श्लिषशीङ्-क्तः ॥ ५ । १ । ९ ॥	६९९
१६६१	श्वगणाद्वा ॥ ६ । ४ । १४ ॥	३३७
३४२	श्वन्युवन्म-उः ॥ २ । १ । १०६ ॥	७१
२०३	श्वयत्यसूवच-तम् ॥ ४ । ३ । १०३ ॥	५२७
९२६	श्वशुरः श्वश्रूभ्यां वा ॥ ३ । १ । १२३ ॥	२०६
११९२	श्वशुराद्यः ॥ ६ । १ । ९१ ॥	२५३
९३९	श्वसजपवम-मः ॥ ४ । ४ । ७५ ॥	७१४
१५०१	श्वसस्तादिः ॥ ६ । ३ । ८४ ॥	३०७
८७५	श्वसो वसीयसः ॥ ७ । ३ । १२१ ॥	१९४
४३	श्वस्तनी ता-तास्मद्दे ॥ ३ । ३ । १४ ॥	४८३
१२८५	श्वादिभ्योऽञ् ॥ ६ । २ । २६ ॥	२७१
१२१९	श्वादेरिति ॥ ७ । ४ । १० ॥	२५८
४९८	श्वेताश्वाश्वतर-लुक् ॥ ३ । ४ । ४५ ॥	६१३
३९८	श्वेर्वा ॥ ४ । १ । ८९ ॥	५९०

ष

६७	षः सोऽष्ठयै-क्कः ॥ २ । ३ । ९८ ॥	४९०
२०११	षट्कति-थट् ॥ ७ । १ । १६२ ॥	४०६
१९८४	षट्त्वे षड्गवः ॥ ७ । १ । १३५ ॥	३९९
२२७४	षड्वर्जैक-रे ॥ ७ । ३ । ४० ॥	४५९
१५०	षढोः कः सि ॥ २ । १ । ६२ ॥	५१०
१७५५	षण्मासादयसि-कौ ॥ ६ । ४ । १०८ ॥	३५३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१७६४	षण्मासाद्य-कण् ॥ ६ । ४ । ११५ ॥	३५५
२००७	षष्ठ्यादेर-देः ॥ ७ । १ । १५७ ॥	४०५
२२५९	षष्ठात् ॥ ७ । ३ । २५ ॥	४५६
६००	षष्ठी वानादरे ॥ २ । २ । १०८ ॥	१३७
८०३	षष्ठ्यर्थलाच्छेषे ॥ ३ । १ । ७६ ॥	१७६
९६५	षष्ठ्याः क्षेपे ॥ ३ । २ । ३० ॥	२१४
१२६५	षष्ठ्याः समूहे ॥ ६ । २ । ९ ॥	२६८
१६९७	षष्ठ्या धर्म्ये ॥ ६ । ४ । ५० ॥	३४३
३१	षष्ठ्यान्त्यस्य ॥ ७ । ४ । १०६ ॥	५
२१३३	षष्ठ्या रूप्य-ट् ॥ ७ । २ । ८० ॥	४२८
७०८	षात्पदे ॥ २ । ३ । ९२ ॥	६६८
१२२१	षादिहन-णि ॥ २ । १ । ११० ॥	२५८
४८०	षावटाद्वा ॥ २ । ४ । ६९ ॥	१०४
११३	षि तवर्गस्य ॥ १ । ३ । ६४ ॥	२२
११३१	षितोऽङ् ॥ ५ । ३ । १७७ ॥	८७९
१४१	ष्ठिवुक्लम्वाचमः ॥ ४ । २ । ११७ ॥	५०७
११४९	ष्ठिव्सिवोऽवा ॥ ४ । २ । ११२ ॥	८८३
१००३	ष्या पुत्रपत्योः-षे ॥ २ । ४ । ८३ ॥	२२०

स

९४१	संकटाभ्याम् ॥ ७ । ३ । ८६ ॥	२०९
७३७	संख्याश-त्तौ ॥ ३ । १ । ३८ ॥	१६३
१३९६	संख्यात्सूत्रे ॥ ६ । २ । १२८ ॥	२८९
१७७९	संख्याडते-कः ॥ ६ । ४ । १३० ॥	३५८
८७०	संख्याता-वा ॥ ७ । ३ । ११७ ॥	१९३
८७३	संख्यातैक-रत् ॥ ७ । ३ । ११९ ॥	१९३
२२०५	संख्याधेः पादा-च ॥ ७ । ४ । १५२ ॥	४४४
२१९२	संख्यादेर्गुणात् ॥ ७ । २ । १३६ ॥	४४१
४२४	संख्यादेर्हाय-सि ॥ २ । ४ । ९ ॥	९२
१७२७	संख्यादेश्चा-चः ॥ ६ । ४ । ८० ॥	३४८
१७६०	संख्याधि-नि ॥ ७ । ४ । १८ ॥	३५४
३४७	संख्यानां र्णाम् ॥ १ । ४ । ३३ ॥	७२
९०९	संख्याने ॥ ३ । १ । १४६ ॥	२०२
९३४	संख्यापाण्डू-मेः ॥ ७ । ३ । ७८ ॥	२०८
२००४	संख्यापूरणे डट् ॥ ७ । १ । १५५ ॥	४०४
१८२५	संख्यायाः संघ-ठे ॥ ६ । ४ । १७१ ॥	३६७
२१५७	संख्याया धा ॥ ७ । २ । १०४ ॥	४३३
७४८	संख्यायानदी-म् ॥ ७ । ३ । ९१ ॥	१६५
८७८	संख्याव्ययादङ्गुलेः ॥ ७ । ३ । १२४ ॥	१९४
६२१	संख्या समासे ॥ ३ । १ । १६३ ॥	१४३
७२७	संख्या समाहारे ॥ ३ । १ । २८ ॥	१६०
८२७	संख्या समाहारे-यम् ॥ ३ । १ । ९९ ॥	१८२
२१२	संख्यासाय-वा ॥ १ । ४ । ५० ॥	४०
११५५	संख्यासंभ-र्चे ॥ ६ । १ । ६६ ॥	२४८
८००	संख्यार्हादिवा-टः ॥ ५ । १ । १०२ ॥	६८५
२२०४	संख्यैकार्था-शस् ॥ ७ । २ । १५१ ॥	४४३
६७१	संगतेऽजर्यम् ॥ ५ । १ । ५ ॥	६६१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१५९९	संघघोषा-अः ॥ ६ । ३ । १७२ ॥	३२५
१९०२	संघेऽनूर्ध्वे ॥ ५ । ३ ८० ॥	८७५
६९३	संचाय्यकुण्ड-तौ ॥ ५ । १ । २२ ॥	६६५
११५६	संज्ञा दुर्वा ॥ ६ । १ । ६ ॥	२४८
२२७६	संध्यक्षरान्तेन ॥ ७ । ३ । ४२ ॥	४६०
५३२	संनिवेः ॥ ३ । ३ । ५७ ॥	६२२
९२८	संनिवेरर्दः ॥ ४ । ४ । ६३ ॥	७११
१०४७	संनिव्युपाद्यमः ॥ २ । ३ । २५ ॥	८६८
९८७	संपरिव्यनुप्राद्वदः ॥ ५ । २ । ५८ ॥	७२४
१८९	संपरेः कृगः स्सट् ॥ ४ । ४ । ९१ ॥	५२३
११८८	संपरेर्वा ॥ ४ । १ । ७८ ॥	८९१
५४४	संप्रतेरस्मृतौ ॥ ३ । ३ । ६९ ॥	६२४
१०२३	संप्रदानाद्यान्य-यः ॥ ५ । १ । १५ ॥	८६३
६८४	संप्राज्ञा-ज्ञौ ॥ ७ । ३ । १५२ ॥	१५४
९९०	संप्राद्वसात् ॥ ५ । २ । ६१ ॥	७२५
१९७४	संप्रोन्नेः सं-पे ॥ ७ । १ । १२५ ॥	३९८
९७५	संबन्धिनां संबन्धे ॥ ७ । ४ । १२१ ॥	२१५
१८१६	संभवदवहरतोश्च ॥ ६ । ४ । १६२ ॥	३६५
६४९	संभावनेलमर्थे-क्त्वौ ॥ ५ । ४ । २२ ॥	६५३
६३२	संभावने सिद्धवत् ॥ ५ । ४ । ४ ॥	६४९
८५	संमत्यसू-तः ॥ ७ । ४ । ८९ ॥	१५
१०५५	संमदप्रमदौ हर्षे ॥ ५ । ३ । ३३ ॥	८६९
२८७	संयोगस्या-क् ॥ २ । १ । ८८ ॥	५६
२४२	संयोगात् ॥ २ । १ । ५२ ॥	४५
१२१५	संयोगादिनः ॥ ७ । ४ । ५३ ॥	२५७
३२४	संयोगाद्दतः ॥ ४ । ४ । ३७ ॥	५५८
८१	संयोगाद्दर्तेः ॥ ४ । ३ । ९ ॥	४९३
६६	संयोगादेर्वा-ष्येः ॥ ४ । ३ । ९५ ॥	४९०
१५३५	संवत्सराग्र-च्च ॥ ६ । ३ । ११६ ॥	३१३
१५०७	संवत्सरात्-णोः ॥ ६ । ३ । ९० ॥	३०८
५३८	संविप्राद्वात् ॥ ३ । ३ । ६३ ॥	६२३
९८६	संवेः सृजः ॥ ५ । २ । ५७ ॥	७२४
१७४०	संशयं प्राप्ते ज्ञेये ॥ ६ । ४ । ९३ ॥	३५१
१६५२	संसृष्टे ॥ ६ । ४ । ५ ॥	३३६
१६५०	संस्कृते ॥ ६ । ४ । ३ ॥	३३५
१४०७	संस्कृते भक्ष्ये ॥ ६ । २ । १४० ॥	२९१
१०८८	संस्तोः ॥ ५ । ३ । ६६ ॥	८७३
६१	सः सिजस्तेर्दिस्योः ॥ ४ । ३ । ६५ ॥	४८९
६५३	सक्थ्यक्ष्णः स्वाङ्गे ॥ ७ । ३ । १२६ ॥	१४९
१९११	सखिवणिग्दूताद्यः ॥ ७ । १ । ६३ ॥	३८६
१३५४	सख्यादेरेयण् । ६ । २ । ८८ ॥	२८२
२२५	सख्युरितोऽशावैत् । १ । ४ । ८३ ॥	४२
३६७	सजुषः ॥ २ । १ । ७३ ॥	७६
४३७	सञ्जेर्वा ॥ २ । ३ । ३८ ॥	५२८
१०	सति ॥ ५ । २ । १९ ॥	४७७
६५१	सतीच्छार्थात् ॥ ५ । ४ । २४ ॥	६५४

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१७२५	सतीर्थ्यः ॥ ६ । ४ । ७८ ॥	३४८
१०५४	सत्यागदास्तोः कारे ॥ ३ । २ । ११२ ॥	२३१
२१९९	सत्यादशपथे ॥ ७ । २ । १४३ ॥	४४२
४९७	सत्यार्थवेदस्याः ॥ ३ । ४ ।४४ ॥	६१३
६२९	सत्सामीप्ये सद्वद्वा ॥ ५ । ४ । १ ॥	६४८
२१४९	सदाधुने-हिं ॥ ७ । २ । ९६ ॥	४३१
२०४	सदोऽप्रतेः-देः ॥ २ । ३ । ४४ ॥	५२८
२१५०	सद्योऽद्य-द्धि ॥ ७ । २ । ९७ ॥	४३२
३५३	समस्तत्रा वा ॥ ४ । ३ । ६९ ॥	५६९
४२८	सनि ॥ ४ । २ । ६१ ॥	५९५
४२१	समीङश्च ॥ ४ । ४ । २५ ॥	५२४
९६२	सन्भिक्षाशंसेरुः ॥ ५ । २ । ३३ ॥	७२०
८३६	सन्महत्परमो-याम् ॥ ३ । १ । १०७ ॥	१८५
११८	सन्यङश्च ॥ ४ । १ । ३ ॥	५०२
१६९	सन्यस्य ॥ ४ । १ । ५९ ॥	५१७
४६०	सपत्न्यादौ ॥ २ । ४ । ५० ॥	१००
२१९४	सपत्रनिष्पत्रा-ने ॥ ७ । २ । १३८ ॥	४४१
११११	सपिण्डे वयःस्थाना-द्वा ॥ ६ । १ । ४ ॥	२४०
३३३	सपूर्वात्-द्वा ॥ २ । १ । ३२ ॥	६९
१४८६	सपूर्वादिकण् ॥ ६ । ३ । ७० ॥	३०४
१८	सप्तमी-ईमहि ॥ ३ । ३ । ७ ॥	४७९
६०१	सप्तमीचा-णे ॥ २ । २ । १०९ ॥	१३७
६२७	सप्तमीचोर्ध्व-के ॥ ५ । ३ । १२ ॥	६४७
६५६	सप्तमीचो-के ॥ ५ । ४ । ३० ॥	६५६
२१९०	सप्तमीह्रिती-भ्यः ॥ ७ । २ । १३४ ॥	४४०
६६१	सप्तमी यदि ॥ ५ । ४ । ३४ ॥	६५७
८१५	सप्तमी शौण्डाद्यैः ॥ ३ । १ । ८८ ॥	१७९
५८७	सप्तम्यधिकरणे ॥ २ । २ । ९५ ॥	१३४
४७	सप्तम्यर्थे-क्रि-त्तिः ॥ ५ । ४ । ९ ॥	४८४
८७१	सप्तम्याः ॥ ५ । १ । १६९ ॥	६९८
२१४७	सप्तम्याः ॥ ७ । २ । ९४ ॥	४३१
२५	सप्तम्या आदिः ॥ ७ । ४ । ११४ ॥	४
३०	सप्तम्या पूर्वस्य ॥ ७ । ४ । १०५ ॥	५
७२५	सप्तम्या वा ॥ ३ । २ । ४ ॥	१६०
६४८	सप्तम्युताप्योर्बाढे ॥ ५ । ४ । २१ ॥	६५३
१०८१	सब्रह्मचारी ॥ ३ । २ । १५० ॥	२३५
५११	समः क्ष्णोः ॥ ३ । ३ । २९ ॥	६१७
७७५	समः ख्यः ॥ ५ । १ । ७७ ॥	८६१
९८५	समः पृचैप्ज्वरेः ॥ ५ । २ । ५६ ॥	७२४
११२३	समजनिषद्विषद्-णः ॥ ५ । ३ । ९९ ॥	८७८
९९१	समत्यपाभिः ॥ ५ । २ । ६२ ॥	७२५
९९२	समनुव्यवाद्रुधः ॥ ५ । २ । ६३ ॥	७२५
१७७३	समयात् प्रातः ॥ ६ । ४ । १२४ ॥	३५६
२१९३	समयाद्या-याम् ॥ ७ । २ । १३७ ॥	४४१
६१७	समर्थः पदविधिः ॥ ७ । ४ । १२२ ॥	१४०
९३६	समवान्धात्तमसः ॥ ७ । ३ । ८० ॥	२०८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१०७१	समस्ततद्धिते वा ॥ ३ । २ । १३९ ॥	२३४
५१४	समस्तृतीयया ॥ ३ । ३ । ३२ ॥	६१८
१९५४	समांसमी-नम् ॥ ७ । १ । १०५ ॥	३९४
१४९५	समानपूर्व-त् ॥ ६ । ३ । ७९ ॥	३०६
१०८०	समानस्य धर्मादिषु ॥ ३ । २ । १४९ ॥	२३५
१८३	समानादमोतः ॥ १ । ४ । ४६ ॥	३४
३४	समानानां-र्धः ॥ १ । २ । १ ॥	६
९२२	समानामर्थेनैकः शेषः ॥ ३ । १ । ११८ ॥	२०५
१७५६	समाया ईनः ॥ ६ । ४ । १०९ ॥	३५३
६२२	समासान्तः ॥ ७ । ३ । ६९ ॥	१४३
९७७	समासेऽग्नेः स्तुतः ॥ २ । ३ । १६ ॥	२१६
१६१	समासेऽसमस्तस्य ॥ २ । ३ । १३ ॥	२९
१११५	समिणा सुगः ॥ ५ । ३ । ९३ ॥	८७७
१५८९	समिधआ-न्यण् ॥ ६ । ३ । १६२ ॥	३२३
७३४	समीपे ॥ ३ । १ । ३५ ॥	१६२
५७४	समुदाङो यमेरग्रन्थे ॥ ३ । ३ । ९८ ॥	६३२
१०५२	समुदोऽजः पशौ ॥ ५ । ३ । ३० ॥	८६९
१४६४	समुद्रान्नृनावोः ॥ ६ । ३ । ४८ ॥	३०१
१६९३	समूहार्थात्समवेते ॥ ६ । ४ । ४६ ॥	३४२
७८१	समेऽशेऽर्धे नवा ॥ ३ । १ । ५४ ॥	१७१
५५७	समोगमृ-शः ॥ ३ । ३ । ८४ ॥	६२८
५४१	समो गिरः ॥ ३ । ३ । ६६ ॥	६२४
५३७	समोज्ञोऽ-वा ॥ २ । २ । ५१ ॥	१२२
१०८०	समो मुष्टौ ॥ ५ । ३ । ५८ ॥	८७२
७३०	समोवा ॥ ५ । १ । ४६ ॥	६७३
१२०३	सम्राजः क्षत्रिये ॥ ६ । १ । १०१ ॥	२५५
१२३	सम्राट् ॥ १ । ३ । १६ ॥	२३
७४२	सयसितस्य ॥ २ । ३ । ४७ ॥	६७४
७५१	सरअसोप-धम् ॥ ७ । ३ । ९४ ॥	१६५
१६३७	सरूपाद्भ्रेः-वत् ॥ ६ । ३ । २०९ ॥	३३३
८६८	सरोऽनो-म्नोः ॥ ७ । ३ । ११५ ॥	१९२
१०३४	सर्तेः स्थिर-त्स्ये ॥ ५ । ३ । १७ ॥	८६६
८८	सर्त्यर्तेर्वा ॥ ३ । ४ । ६१ ॥	४९४
१६२४	सर्वचर्मण इनेनञौ ॥ ६ । ३ । १९५ ॥	३३०
१८५९	सर्वजनाण्ण्येनञौ ॥ ७ । १ । १९ ॥	३७४
८०७	सर्वपश्चा-यः ॥ ३ । १ । ८० ॥	१७७
१८८५	सर्वाण्णो वा ॥ ७ । १ । ४३ ॥	३७८
८०९	सर्वात्सहश्च ॥ ५ । १ । १११ ॥	६८६
६३६	सर्वादयोऽस्यादौ ॥ ३ । २ । ६१ ॥	१४६
२९२	सर्वादिविष्वग्-श्वौ ॥ ३ । २ । १२२ ॥	५७
१९४३	सर्वादेः प-ति ॥ ७ । १ । ९४ ॥	३९२
६११	सर्वादेः सर्वाः ॥ २ । २ । ११९ ॥	१३९
१९६	सर्वादेः स्मैस्मातौ ॥ १ । ४ । ७ ॥	३६
२६१	सर्वादेर्डस्पूर्वाः ॥ १ । ४ । १८ ॥	४९
२१११	सर्वादेरिन् ॥ ७ । २ । ५९ ॥	४२४
१९४७	सर्वान्नमत्ति ॥ ७ । १ । ९८ ॥	३९२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
८७१	सर्वांश-यात् ॥ ७ । ३ । ११८ ॥	१९३
५२२	सर्वोभया-सा ॥ २ । २ । ३५ ॥	११८
१६४५	सलातुरादीयण् ॥ ६ । ३ । २१७ ॥	३३४
३२१-२	सविषेषण-क्यम् ॥ १ । १ । २६ ॥	६५
१३९५	ससर्वपूर्वाल्लुप् ॥ ६ । २ । १२७ ॥	२८९
१५६	सस्तः सि ॥ ४ । ३ । ९२ ॥	५११
२२२५	सस्नौ प्रशस्ते ॥ ७ । २ । १७२ ॥	४४७
२९-३	सस्मे ह्यस्तनी च ॥ ५ । ४ । ४० ॥	४८१
११०	सस्य शषौ ॥ १ । ३ । ६१ ॥	२१
२०२७	सस्यादगुणात्-ते ॥ ७ । १ । १७८ ॥	४०९
९६८	सस्रिचक्रिदधि-मि ॥ ५ । २ । ३९ ॥	७२१
८६९	सहराजभ्यां-धेः ॥ ५ । १ । १६७ ॥	६९८
१५३	सहलुमेच्छा-देः ॥ ४ । ४ । ४६ ॥	५११
२९६	सहसमः सध्रिसमि ॥ ३ । २ । १२३ ॥	५८
६३०	सहस्तेन ॥ ३ । १ । २४ ॥	१४५
१७८८	सहस्रशत-दण् ॥ ६ । ४ । १३६ ॥	३५९
६३१	सहस्य सोऽन्यार्थे ॥ ३ । २ । १४३ ॥	१४५
७१२	सहानुल्ययोगे ॥ ७ । ३ । १७८ ॥	१५८
१९१०	सहायाङ्गा ॥ ७ । १ । ६२ ॥	३८६
५३२	सहार्थे ॥ २ । २ । ४५ ॥	१२०
२०६	सहिवहे-स्व ॥ १ । ३ । ४३ ॥	५२९
७६४	साक्षादादि श्ल्यर्थे ॥ ३ । १ । १४ ॥	१६८
२०४६	साक्षाद्द्रष्टा ॥ ७ । १ । १९७ ॥	४१२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१११६	सातिहेतियूति-र्ति ॥ ५ । ३ । ९४ ॥	८७७
४५९	सादेः ॥ २ । ४ । ४९ ॥	१००
१८६५	सादेश्चातदः ॥ ७ । १ । २९ ॥	३७५
५३१	साधकतमं करणम् । २ । ३ । २४ ॥	१२०
५९४	साधुना ॥ २ । २ । १०२ ॥	१३५
१५३६	साधुपुष्यत्पच्यमाने ॥ ६ । ३ । ११७ ॥	३१४
८५७	साधौ ॥ ५ । १ । १५५ ॥	६९५
२३१०	सामीप्येऽधो-रि ॥ ७ । ४ । ७९ ॥	४६९
१५०५	सायंचिरंप्रा-यात् ॥ ६ । ३ । ८८ ॥	३०७
७८०	सायाह्नादयः ॥ ३ । १ । ५३ ॥	१७१
११८३	सारवैश्वा-यम् ॥ ७ । ४ । ३० ॥	२५२
१४७०	साल्वात्-त्तौ ॥ ६ । ३ । ५४ ॥	३०२
१२३१	साल्वांशप्रत्य-दिञ् ॥ ६ । १ । ११७ ॥	२६०
१३५४	सास्य पौर्णमासी ॥ ६ । २ । ९८ ॥	२८३
७५४	साहिसातिवे-त् ॥ ५ । १ । ५९ ॥	६७७
२०८७	सिकताशर्कराद् ॥ ७ । २ । ३५ ॥	४२१
७२	सिचि-परस्मै-ति ॥ ४ । ३ । ४४ ॥	४९१
३४९	सिचोऽज्ञेः ॥ ४ । ४ । ८४ ॥	५६८
४६१	सिध्यो यङि ॥ २ । ३ । ६० ॥	६०२
३०	सिजद्यतन्याम् ॥ ३ । ४ । ५३ ॥	४८१
१८३	सिजाशिषाधात्मने ॥ ४ । ३ । ३५ ॥	५२१
५२	सिज्विदोऽभुवः ॥ ४ । ३ । ९२ ॥	४८७
२	सिद्धिः-त् ॥ १ । १ । २ ॥	१

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
५२९	सिद्धौ तृतीया ॥ २ । २ । ४३ ॥	११९
२०७३	सिध्मादि-गम्यः ॥ ७ । २ । २१ ॥	४१८
३८९	सिध्यतेरज्ञाने ॥ ४ । २ । ११ ॥	५८८
१६४४	सिन्ध्वादेरञ् ॥ ६ । ३ । २१६ ॥	३३४
८१६	सिंहाद्यैः पूजायाम् ॥ ३ । १ । ८९	१७९
१८६७	सीतया संगते ॥ ७ । १ । २७ ॥	३७५
७७०	सुः पूजायाम् ॥ ३ । १ । ४४ ॥	१६९
२११५	सुखादेः ॥ ७ । २ । ६३ ॥	४२५
४८७	सुखादेरनुभवे ॥ ३ । ४ । ३४ ॥	६०९
८३०	सुगदुर्गमाधारे ॥ ५ । १ । १३२ ॥	३९०
३२१	सुगः स्यसनि ॥ २ । ३ । ६२ ॥	५५७
९५५	सुग् द्विषार्हः-त्ये ॥ ५ । २ । २६ ॥	७१९
१५७	सुचो वा ॥ २ । ३ । १० ॥	२९
६२०	सुज्वार्थे सं-हिः ॥ ३ । १ । १९ ॥	१४३
१३५१	सुतंगमादेरिञ् ॥ ६ । २ । ८५ ॥	२८२
११६५	सुदुर्भ्यः ॥ ४ । ४ । १०८ ॥	८८६
१३५०	सुपन्थ्मादेर्ढ्यः ॥ ६ । २ । ८४ ॥	२८१
६७३	सुपूत्युत्सु-णे ॥ ७ । ३ । १४४ ॥	१५२
६५६	सुप्रातसुश्व-दम् ॥ ७ । ३ । १२९	१५०
७१६	सुभ्वादिभ्यः ॥ ७ । ३ । १८२ ॥	१५८
८७४	सुयजोर्ङ्वनिप् ॥ ५ । १ । १७२ ॥	६९९
१२०५	सुयाम्नः सौवी-निञ् ॥ ६ । १ । १०३ ॥	२५५
७७३	सुराशोधोः पिबः ॥ ५ । १ । ७५ ॥	६८०

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१७९६	सुवर्णकार्षापणात् ॥ ६ । ४ । १४३ ॥	३६०
१४६०	सुसर्वार्धाद्राष्ट्रस्य ॥ ७ । ४ । १५ ॥	३००
६७९	सुसंख्यात् ॥ ७ । ३ । १५० ॥	१५३
१६८९	सुस्नातादि-ति ॥ ६ । ४ । ४२ ॥	३४१
६७१	सुहरित तृण-त् ॥ ७ । ३ । १५२ ॥	१५२
६८६	सुहृद्दुर्हृन्-त्रे ॥ ७ । ३ । १५७ ॥	१५४
२१२३	सूक्तसाम्नोरीयः ॥ ७ । २ । ७१ ॥	४२५
२७२	सूतेः पञ्चम्याम् ॥ ४ । ३ । १३ ॥	५४४
७९१	सूत्राद्धारणे ॥ ५ । १ । ९३ ॥	६८३
८८४	सूयत्याद्योदितः ॥ ४ । २ । ७० ॥	७०१
४७५	सूर्यागस्त्ययो-च ॥ २ । ४ । ८९ ॥	१९३
४७४	सूर्यादेवतायां वा ॥ २ । ४ । ६४ ॥	१०३
१०५३	सृग्लहः प्रजनाक्षे ॥ ५ । ३ । ३१ ॥	८६९
१००१	सृघस्यदोमरक् ॥ ५ । २ । ७३ ॥	७२७
६०५	सृजः श्राद्धे-तथा ॥ ३ । ४ । ८४ ॥	६४२
५७	सृजिदृशिस्कृ-वः ॥ ४ । ४ । ७८ ॥	४८७
१००५	सृजीणनशष्ट्वरप् ॥ ५ । २ । ७७ ॥	७२७
२४६	सेः स्द्यांचरुर्वा ॥ ४ । ३ । ७९ ॥	५३९
९१५	सेट् कतयोः ॥ ४ । ३ । ८४ ॥	७०९
८३५	सेड्नानिटा ॥ ३ । १ । १०६ ॥	१८५
८९७	सेनाङ्क्षुद्र-नाम् ॥ ३ । १ । १३४ ॥	१९९
१२०४	सेनान्तका-च ॥ ६ । १ । १०२ ॥	२५५
१६९५	सेनाया वा ॥ ६ । ४ । ४८ ॥	३४३

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
८८८	सेर्ग्रांसे कर्मकर्तरि ॥ ४ । २ । ७३ ॥	७०३
१६४१	सेर्निवासादस्य ॥ ६ । ३ । २१३ ॥	३३४
१५३१	सोदर्यसमानोदर्यौ ॥ ६ । ३ । ११२ ॥	३१२
१२७	सोधिवा ॥ ४ । ३ । ७२ ॥	५०३
८६५	सोमात् सुगः ॥ ५ । १ । १६३ ॥	६९७
१४३	सोरुः ॥ २ । १ । ७२ ॥	२६
४७९	सोवालुकृच्च ॥ ३ । ४ । २७ ॥	६०८
१७६५	सोऽस्य ब्रह्म-तोः ॥ ६ । ४ । ११६ ॥	३५५
१८२२	सोऽस्य भृति-शम् ॥ ६ । ४ । १६८ ॥	३६६
२०३९	सोऽस्य मुख्यः ॥ ७ । १ । १९० ॥	४९०
१०५	सौनवेतौ ॥ १ । २ । ३८ ॥	२०
१२०८	सौयामायनि-वा ॥ ६ । १ । १०६ ॥	२५६
१४६३	सौवीरेषु कूलात् ॥ ६ । ३ । ४७ ॥	१००
११७८	स्कन्द स्यन्दः ॥ ४ । ३ । ३० ॥	८९०
३५७	स्कभ्नः ॥ २ । ३ । ५५ ॥	५७१
९२	स्कृच्छृतो-याम् ॥ ४ । ३ । ८ ॥	४९४
४०	स्कसृवृभृ-याः ॥ ४ । ४ । ८१ ॥	४८३
१०६१	स्तम्बाद् घनश्च ॥ ५ । ३ । ३९ ॥	८७०
३५४	स्तम्भूस्तुम्भू-च ॥ ३ । ४ । ७८ ॥	५७०
४४	स्ताद्यशितो-रिट् ॥ ४ । ४ । ३२ ॥	४८३
१९१	स्तुस्वञ्जश्चा-वा ॥ २ । ३ । ४९ ॥	५२३
१९१२	स्तेनान्न लुक्च ॥ ७ । १ । ५४ ॥	३८६
५७०	स्तोकाल्प-णे ॥ २ । २ । ७९ ॥	१३०
१८३०	स्तोमेऽट् ॥ ६ । ४ । १२६ ॥	३६९
१८०	स्त्यादिर्विभक्तिः ॥ १ । १ । १९ ॥	३३
२२२	स्त्रियाः ॥ २ । १ । ६४ ॥	४१
८५२	स्त्रियाः पुंसो-च्च ॥ ७ । ३ । ९६ ॥	१८९
२६२	स्त्रिया ङितां-म् ॥ १ । ४ । २८ ॥	५०
११११	स्त्रियांक्तिः ॥ ५ । ३ । ९१ ॥	८७८
६८१	स्त्रियां नाम्नि ॥ ७ । ३ । १५२ ॥	१५३
२६६	स्त्रियां नृतो-ङीः ॥ २ । ४ । १ ॥	५२
११३४	स्त्रियां लुप् ॥ ६ । १ । ४६ ॥	२४५
२६५	स्त्रियाम् ॥ १ । ४ । ९३ ॥	५२
८८१	स्त्रियाम् ॥ ३ । २ । ६२ ॥	१९५
७००	स्त्रियामूधसोऽन् ॥ ७ । ३ । १६९ ॥	१५६
२३६	स्त्रीदृतः ॥ १ । ४ । २९ ॥	४४
११३६	स्त्रीबहुष्वायनञ् ॥ ६ । १ । ४८ ॥	२४६
७२८	स्त्री पुंवच्च ॥ ३ । १ । १२५ ॥	२०६
१४०६	स्थण्डिलात्-ती ॥ ६ । २ । १३९ ॥	२९१
१७३८	स्थलादेर्मधुक-ण् ॥ ६ । ४ । ९१ ॥	३५०
९६०	स्थाग्लाम्लापचि-स्नुः ॥ ५ । २ । ३१ ॥	७२०
११०४	स्थादिभ्यः कः ॥ ५ । ३ । ८२ ॥	८७५
१५२९	स्थानान्तगो-लात् ॥ ६ । ३ । ११० ॥	३१२
५६	स्थानीवावर्णविधौ ॥ ७ । ४ । १०९ ॥	१०
८४०	स्थापास्नात्रः कः ॥ ५ । १ । १४२ ॥	६९२
१५१०	स्थामाजिना-ए् ॥ ६ । ३ । ९३ ॥	३०८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
६९	स्थासेनिसेध-पि ॥ २ । ३ । ४० ॥	४९०
१९०६	स्थूलदूर-नः ॥ ७ । ४ । ४२ ॥	३८५
१००९	स्थेशभास-रः ॥ ५ । २ । ८१ ॥	७२८
१११८	स्थोवा ॥ ५ । ३ । ९६ ॥	८७८
२२५६	स्नाताद्वेदसमाप्तौ ॥ ७ । ३ । २२ ॥	४५५
९८१	स्नानस्य नाम्नि ॥ २ । ३ । २२ ॥	२१६
६०२	स्नोः ॥ ४ । ४ । ५२ ॥	६४०
१५८	स्पर्धे ॥ ७ । ४ । ११९ ॥	२९
१५१	स्पृशमृशकृष-वा ॥ ३ । ४ । ५४ ॥	५११
१३८	स्पृशादिसृपो वा ॥ ४ । ४ । ११२ ॥	५०७
८५१	स्पृशोऽनुदकात् ॥ ५ । १ । १४९ ॥	६९४
५४१	स्पृहेर्व्याप्यिं वा ॥ २ । २ । २६ ॥	१२२
३९९	स्फाय् स्फाव् ॥ ४ । २ । २२ ॥	५९०
९०२	स्फायः स्फी वा ॥ ४ । १ । ९४ ॥	७०६
१०३६	ऽस्फुरस्फुलोर्घत्रि ॥ ४ । २ । ४ ॥	८६६
५६८	स्मिङः प्रयोक्तुः स्वार्थे ॥ ३ । ३ । ९१ ॥	६३१
५०७	स्मृत्यर्थदयेशः ॥ २ । २ । ११ ॥	११३
३६९	स्मृदृत्वरप्रथ-रः ॥ ४ । १ । ६५ ॥	५७६
५४७	स्मृदृशः ॥ ३ । ३ । ७२ ॥	६२५
६१८	स्मेचे वर्त्तमाना ॥ ५ । २ । १६ ॥	६४५
६५८	स्मे पञ्चमी ॥ ५ । ४ । ३१ ॥	६५६
१००७	स्यजसहिंस-रः ॥ ५ । २ । ७९ ॥	७२७
१०३८	स्यदोजवे ॥ ४ । २ । ५३ ॥	८६७

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१८१	स्यादावसंख्येयः ॥ ३ । १ । ११९ ॥	३३
१८९४	स्यादेरिवे ॥ ७ । १ । ५२ ॥	३८०
२५२	स्यादौ वः ॥ २ । १ । ५७ ॥	४७
१७९	स्यौजस-दिः ॥ १ । १ । १८ ॥	३३
३७३	स्रंस्ध्वंस्-दः ॥ २ । १ । ६८ ॥	७८
३४५	स्वङ्गश्च ॥ २ । ३ । ४५ ॥	५६६
३४६	स्वङ्गेर्नवा ॥ ४ । ३ । २२ ॥	५६७
४१६	स्वङ्गाजभ-कात् ॥ २ । ४ । १०८ ॥	९०
४९७	स्वतन्त्रः कर्ता ॥ २ । २ । २ ॥	१०८
२३६	स्वपेर्यङेच ॥ ४ । १ । ८० ॥	५३७
४१८	स्वपोणावुः ॥ ४ । १ । ६२ ॥	५९३
७८५	स्वयं सामी क्तेन ॥ ३ । १ । ५८ ॥	१७३
५८६	स्वरग्रहदृश-वा ॥ ३ । ४ । ६९ ॥	६३५
६००	स्वरदुहो वा ॥ ३ । ४ । ९० ॥	६३९
५७	स्वरस्य परे-धौ ॥ ७ । ४ । ११० ॥	१०
४२०	स्वरहनगमोः-टि ॥ ४ । १ । १०४ ॥	५९३
२७२	स्वराच्छौ ॥ १ । ४ । ६५ ॥	५३
७०१	स्वरात् ॥ २ । ३ । ८५ ॥	६६७
३९५	स्वरादयोऽ-यम् ॥ १ । १ । ३० ॥	८४
४४५	स्वरादुतो-रोः ॥ २ । ४ । ३५ ॥	९६
९१८	स्वरादुपसर्गात्-धः ॥ ४ । ४ । ९ ॥	७०९
१७३	स्वरादेर्द्वितीयः ॥ ४ । १ । ४ ॥	५१९
७६	स्वरादेस्तासु ॥ ४ । ४ । ३१ ॥	४९२

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१८२	स्वरेऽनः ॥ ४ । ३ । ७५ ॥	५२१
१३९	स्वरेभ्यः ॥ १ । ३ । ३० ॥	२५
७३	स्वरेवा ॥ १ । ३ । २४ ॥	१३
८०	स्वरेषाऽनक्षे ॥ १ । २ । २९ ॥	१४
१७७२	स्वर्ग स्वस्ति-पौ ॥ ६ । ४ । १२३ ॥	३५६
९७३	स्वसृपत्योर्वा ॥ ३ । २ । ३८ ॥	२१५
१२१०	स्वस्नेहनार्था-षः ॥ ५ । ४ । ६५ ॥	८९५
१२३१	स्वाङ्गतश्चेव्यर्थ-श्च ॥ ५ । ४ । ८६ ॥	९००
६५०	स्वाङ्गात्-नि ॥ ३ । २ । ५६ ॥	१४२
४५६	स्वाङ्गादेरकृत-हेः ॥ २ । ४ । ४६ ॥	९९
२०६२	स्वाङ्गाद्विवृद्धात्ते ॥ ७ । २ । १० ॥	४१७
१२२४	स्वाङ्गेनाध्रुवेण ॥ ५ । ४ । ७९ ॥	८९९
२०२९	स्वाङ्गेषु सक्ते ॥ ७ । १ । १८० ॥	४०९
३१९	स्वादेः इनुः ॥ ३ । ४ । ७५ ॥	५२७
११९८	स्वाद्वर्थाददीर्घात् ॥ ५ । ४ । ५३ ॥	८९३
२१०१	स्वाग्निन्नोशे ॥ ७ । २ । ४९ ॥	४२२
१०२६	स्वामिचिह्न-र्णे ॥ ३ । २ । ८४ ॥	२२५
७१७	स्वामिवैश्येऽर्यः ॥ ५ । १ । ३३ ॥	६७०
५९०	स्वामीश्वरा-तैः ॥ २ । २ । ९८ ॥	१३४
७६३	स्वाम्येऽधिः ॥ ३ । १ । १३ ॥	१६८
१२०	स्वार्थे ॥ ४ । ४ । ६० ॥	५०२
५९६	स्वैरेऽधिना ॥ २ । २ । १०४ ॥	१३६
४८	स्वैर-ण्याम् ॥ १ । १ । १५ ॥	९

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१३७	स्सटि समः ॥ १ । ३ । १२ ॥	२५
	ह	
७६३	हः कालघ्रीह्योः ॥ ५ । १ । ६८ ॥	६७९
७२०	हत्या भूयं भावे ॥ ५ । १ । ३६ ॥	६७१
२५८	हनः ॥ २ । ३ । ८२ ॥	५४१
५६२	हनः सिच् ॥ ४ । ३ । ३८ ॥	६२९
१२०८	हनश्च समूलात् ॥ ५ । ४ । ६३ ॥	८९५
८४	हनृतः स्यस्य ॥ ४ । ४ । ४९ ॥	४९३
३४१	हनो घि ॥ २ । ३ । ९४ ॥	७१
४५२	हनो ह्मीर्वधे ॥ ४ । ३ । ९९ ॥	६०१
८६२	हनो णिन् ॥ ५ । १ । १६० ॥	६९६
१०५६	हनोऽन्तर्घना-देशे ॥ ५ । ३ । ३४ ॥	८६९
२६२	हनो वध आ-औ ॥ ४ । ४ । २१ ॥	५४२
१०६८	हनो वा वध् च ॥ ५ । ३ । ४६ ॥	८७१
३४०	हनो ह्रो घ्नः ॥ २ । १ । ११२ ॥	७१
१६७०	हरत्युत्सङ्गादेः ॥ ६ । ४ । २३ ॥	३३८
११४४	हरितादेरजः ॥ ६ । १ । ५५ ॥	२४७
१०१७	हलकोडास्येपुवः ॥ ५ । २ । ८९ ॥	७२९
१५८८	हलसीरादिकण् ॥ ६ । ३ । १६१ ॥	३२३
१८४६	हलसीरादिकण् ॥ ७ । १ । ६ ॥	३७१
१८६६	हलस्य कर्षे ॥ ७ । १ । २६ ॥	३७५
२८७	हवः शिति ॥ ४ । १ । १२ ॥	५४७
१८६९	हविरन्न-वा ॥ ७ । १ । २९ ॥	३७५

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
८८३	हविष्यघ्नः कपाले ॥ ३ । २ । ७३ ॥	१९५
६१५	हशश्वद्युगान्तः-च ॥ ५ । २ । १३ ॥	६४४
१५२	हशिटोना-सक् ॥ ३ । ४ । ५५ ॥	५११
२१२०	हस्तदन्त-तौ ॥ ७ । २ । ६८ ॥	४२५
११००	हस्तप्राप्ये चेरस्तेये ॥ ५ । ३ । ७८ ॥	८७५
१२११	हस्तार्थाद्ग्रह-तः ॥ ५ । ४ । ६६ ॥	८९६
१९९७	हस्तिपुरुषाद्धाण् ॥ ७ । १ । १४१ ॥	४००
७८४	हस्तिबाहुकपा-क्का ॥ ५ । १ । ८६ ॥	६८२
२८९	हाकः ॥ ४ । २ । १०० ॥	५४७
११८०	हाकी हिः कित्व ॥ ४ । ४ । १४ ॥	८९०
१६१	हान्तस्थाञ् ञोड्भ्यांवा ॥ २ । १ । ८१ ॥	५१३
१९१६	हायनान्तात् ॥ ७ । १ । ६८ ॥	३८७
१२२३	हितनाम्नो वा ॥ ७ । ४ । ६० ॥	२५८
५५५	हितसुखाभ्याम् ॥ २ । २ । ६५ ॥	१२६
७९८	हितादिभिः ॥ ३ । १ । ७१ ॥	१७५
१०३८	हिमहतिकाषिये पद् ॥ ३ । २ । ९६ ॥	२२७
१९३९	हिमादेलुः सहे ॥ ७ । १ । ९० ॥	३९१
१२१९	हिंसार्थादेकाप्यात् ॥ ५ । ४ । ७४ ॥	८९७
२०९७	हीनात्स्वाङ्गादः ॥ ७ । २ । ४५ ॥	४२२
२२०	हुधुटो हेधिः ॥ ४ । २ । ८३ ॥	५३३
५०४	हृक्रोर्नवा ॥ २ । २ । ८ ॥	११३
५१९	हृगो गतताच्छील्ये ॥ ३ । ३ । ३८ ॥	६१९
७९३	हृगो वयोऽनुद्यमे ॥ ५ । १ । ९९ ॥	६८४

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१०३६	हृदयस्य-ण्ये ॥ ३ । २ । ९४ ॥	२२७
११७३	हृद्भगसिन्धोः ॥ ७ । ४ । २५ ॥	२५०
१८५१	हृद्यपद्यतुल्य-र्म्यम् ॥ ७ । १ । ११ ॥	३७
९४०	हृषेः केशलोम-ते ॥ ४ । ४ । ७६ ॥	७१५
९३	हेः प्रश्नाख्याने ॥ ६ । ४ । ९७ ॥	१६
५३०	हेतुकर्तृकरणे-णे ॥ २ । २ । ४४ ॥	१२०
८०१	हेतुताच्छील्या-त् ॥ ५ । १ । १०३ ॥	६८५
५२५	हेतुसहार्थैऽनुना ॥ २ । २ । ३८ ॥	११९
१८०७	हेतौसं-ते ॥ ६ । ४ । १५३ ॥	३६३
६१०	हेत्वर्थैस्तृ-द्याः ॥ २ । २ । ११८ ॥	१३८
१५०८	हेमन्ताद्रातलुक्च ॥ ६ । ३ । ९१ ॥	३०८
१३०६	हेमादिभ्योऽञ् ॥ ६ । २ । ४५ ॥	२७५
१३०३	हेमार्थान्माने ॥ ६ । २ । ४२ ॥	२७४
९६	हेहैञ्वेषामेव ॥ ७ । ४ । १०० ॥	१७
१९२५	होत्राभ्य ईयः ॥ ७ । १ । ७६ ॥	३८९
२२१६	होत्राया ईयः ॥ ७ । २ । १६३ ॥	४४६
३८२	हो धुट्पदान्ते ॥ २ । १ । ८२ ॥	८०
२९७	हौ दः ॥ ४ । १ । ३१ ॥	५४९
५४	ह्रस्वः ॥ ४ । १ । ३९ ॥	४८७
२२१	ह्रस्वस्य गुणः ॥ १ । ४ । ४१ ॥	४१
६९७	ह्रस्वस्य तः पित्कृति ॥ ४ । ४ । ११३	६६६
१२९	ह्रस्वान्ङ्णनोद्धे ॥ १ । ३ । २७ ॥	२४
९९४	ह्रस्वान्नाम्नस्ति ॥ २ । ३ । ३४ ॥	२१८

सूत्रांकः	॥ सूत्रम् ॥	पृष्ठम्
१९०	ह्रस्वापश्च ॥ १ । ४ । ३२ ॥	३४
२२८०	ह्रस्वे ॥ ७ । ३ । ४६ ॥	४६१
८३	ह्रस्वोऽपदे वा ॥ १ । २ । २२ ॥	१४
२७	ह्यस्तनी-महि ॥ ३। ३ । ९ ॥	४८०
१३१६	ह्यो गोदोहादी-स्य ॥ ६ । २ । ५५ ॥	२७६
८८१	ह्रादो ह्रद्-श्च ॥ ४ । २ । ६७ ॥	७०१
१०६३	ह्रः समाह्वया-म्नोः ॥ ५ । ३ । ४१	८७१
५३१	ह्रः स्पर्धे ॥ ३ । ३ । ५६ ॥	६२२
२१६	ह्रालिप्सिचः ॥ ३ । ४ । ६२ ॥	५३०
२२९	ह्रिणोरप्विति व्यौ ॥ ४ । ३ । १५ ॥	५३५

॥ अथ अकारादिक्रमेण हैमधातुसूची ॥

धातुः	गणः	पृष्ठम्
अक	भ्वा०	५३२
अकुङ्	,,	५१४
अक्षौ	,,	५१२
अग	,,	५३२
अगद्	कण्ड्वा०	६१५
अगु	भ्वा०	४९७
अघण्	चुरा०	५८१
अघुङ्	भ्वा०	५१५
अङ्कण्	चुरा०	५८१
अङ्कण्	भ्वा०	४९९
अङ्कण्	चुरा०	५८१
अज	भ्वा०	४९९
अजु	चुरा०	५८०
अञ्चण्	,,	५७८
अञ्चु	भ्वा०	४९८
अञ्चूर्	,,	५२४
अञ्जौप्	रुधा०	५७८
अट	भ्वा०	५०१
अट्ट	चुरा०	५७५
अट्टि	भ्वा०	५५५
अठ	,,	५०१
अठुङ्	,,	५१५
अड	,,	५०१
अड्ड	,,	५०१
अण	,,	५०२
अत	,,	५०२
अतु	,,	५०२
अदं	अदा०	५३३
अदु	भ्वा०	५०४
अन	अदा०	५३७
अनिच्	दिवा०	५५६
अन्धण्	चुरा०	५८२
अबुङ्	भ्वा०	५१७
अभुङ्	,,	५१७
अभ्र	,,	५०९
अम	,,	५०८
अम	,,	५०८
अमण	चुरा०	५८०
अयि	भ्वा०	५१९
अरर	कण्ड्वा०	६१५
अर्कण्	चुरा०	५७४
अर्च	भ्वा०	४९८
अर्चिण्	चुरा०	५८५
अर्ज	भ्वा०	४९९
अर्जण्	चुरा०	५७९
अर्थणि	,,	५८४
अर्द	भ्वा०	५०४
अर्दिण्	चुरा०	५०५
अर्ब	भ्वा०	५०७
अर्व	,,	५१०
अर्ह	,,	५१२
अर्हण्	चुरा०	५८०
अली	भ्वा०	५२५
अव	भ्वा०	५१०
अशश्	क्रया०	५७३
अंशण	चुरा०	५८३
अशौटि	स्वा०	५६०
अषो	भ्वा०	५२५
अस्	कण्ड्वा०	६२५
असक्	अदा०	५४२
असी	भ्वा०	५२५
असु	कण्ड्वा०	६१४
असु	,,	६१४

धातुः	गणः	पृष्ठम्
अस्वग्	कण्ड्वा	६१४
असूच्	दिवा०	५५४
अहु	चुरा०	५८०
अहुङ्	भ्वा०	५२१
	आ०	
आछु	भ्वा०	४९९
आप्लंष्	चुरा०	५०५
आप्लंषृ	स्वा०	५९९
आसिक्क	अदा०	५४४
	इ०	
इं	भ्वा०	४९२
इंक्	अदा०	५३४
इख	भ्वा०	४९७
इखु	,,	४९७
इगु	,,	४९७
इंङ्क्	अदा०	५४३
इजुङ्	भ्वा०	५१५
इट	,,	५०१
इंण्क्	अदा०	५३५
इदु	भ्वा०	५०४
इन्धैपि	रुधा०	५६९
इमस्	कण्ड्वा०	६१५
इयस्	,,	६१५
इरग्	,,	६१४
इरज्	,,	,,
इरध	कण्ड्वा०	६१५
इरस्	,,	६१४
इलण्	चुरा०	५७७
इलत्	तुदा०	५६४
इवु	भ्वा०	५१०
इषच्	दिवा०	५५१
इषत्	तुदा०	५६५
इषण्	क्रया०	५१३
इषुध	कण्ड्वा०	६१५

धातुः	गणः	पृष्ठम्
	ई	
ईक्	अदा०	५३५
ईक्षि	भ्वा०	५२१
ईर्ये	भ्वा०	५०९
ईखु	भ्वा०	४९७
ईङ्च्	दिवा०	५५५
ईजि	भ्वा०	५१५
ईडण्	चुरा०	५७५
ईकिक्	अदा०	५४४
ईरण्	चुरा०	५८५
ईरिक्	अदा०	५४४
ईशिक्	,,	,,
ईष	भ्वा०	५११
ईषि	,,	५२०
ईर्ष्य	,,	५०९
ईहि	,,	५२१
	उ	
उक्ष	भ्वा०	५१२
उख	,,	४९७
उगु	,,	,,
उङ्	,,	५१३
उचच्	दिवा०	५५२
उछु	भ्वा०	४९९
उछुत्	तुदा०	५६३
उच्छैत्	,,	५६३
उज्झत्	,,	५६४
उठ	भ्वा०	५०१
उन्दैप्	रुधा०	५६८
उब्जत्	तुदा०	५७३
उभ	तुदा०	५६४
उम्भत्	,,	५६४
उरण	कण्ड्वा०	६१५
उरस्	,,	६१४
उर्दि	भ्वा०	५१६

धातुः	गणः	पृष्ठम्
उर्वै	भ्वा०	५१०
उषस्	कण्ड्वा०	६१४
उषू	भ्वा०	५११
उह्	भ्वा०	५१२
	ऊ.	
ऊनण्	चुरा०	५८२
ऊयैङ्	भ्वा०	५१९
ऊर्जण्	चुरा०	५७४
ऊर्णुगक्	अदा०	५४५
ऊवण्	चुरा०	५८२
ऊष	भ्वा०	५११
ऊहि	,,	५२१
	ऋ.	
ऋं	भ्वा०	४९४
ऋंक्	अदा०	५४९
ऋचत्	तुदा०	५६२
ऋच्छत्	,,	५६३
ऋजि	भ्वा०	५१५
ऋजुङ्	,,	,,
ऋणूयी	तना०	५७०
ऋत	भ्वा०	५०३
ऋधूद्	स्वादि०	५५९
ऋधूच्	दिवा०	५५२
ऋफ	तुदा०	५६४
ऋम्फत्	,,	,,
ऋम्फ	,,	,,
ऋश्	क्र्या०	५७३
ऋषी	भ्वा०	५२५
ऋषैत्	,,	५६५
	ए.	
एजृ	भ्वा०	४९९
एजृङ्	,,	५१५
एठि	,,	,,
एधि	,,	५१६

धातुः	गणः	पृष्ठम्
एला	कण्ड्वा०	६५५
एषृङ्	भ्वा०	५२०
	ओ.	
ओखृ	भ्वा०	४९७
ओणृ	,,	५०२
ओलडुण्	चुरा०	५७५
ओलस्जैति	तुदा०	५६६
	क.	
ककि	भ्वा०	५२४
ककुङ	,,	५१५
कक्ख	,,	४९७
कखे	,,	५३२
कचि	,,	५१५
कचुङ्	,,	५१५
कट	,,	५०१
कटु	,,	,,
कटे	,,	५००
कटै	,,	५०१
कठ	,,	,,
कठुङ्	,,	५१५
कठुण्	चुरा०	५८५
कडत्	रुधा०	५६४
कडृ	भ्वा०	५०१
कडु	,,	५०१
कडुङ्	,,	५१५
कण्डुग्	कण्ड्वा०	५१४
कडु	भ्वा०	५०१
कण	,,	५३२
कणण्	चुरा०	५७९
कत्र	,,	५८३
कथण्	,,	५८२
कत्थि	भ्वा०	५१६
कदु	,,	५०४
कदुङ्	,,	५३२

धातुः	गणः	पृष्ठम्
कनै	भ्वा०	५०६
कपुङ्	,,	५१७
कबृङ्	,,	,,
कमुङ्	,,	,,
कर्ज	,,	४९९
कर्णण्	चुरा०	५८२
कर्द	भ्वा०	५०४
कर्ब	,,	५०७
कर्व	,,	५१०
कलण्	चुरा०	५७७
कलण्	,,	५८३
कलि	भ्वा०	५२०
कल्लि	,,	,,
कश	,,	५१०
कष	,,	५११
कस	,,	५२८
कसुकि	अदा०	५४४
काक्षु	भ्वा०	५१२
कालण्	चुरा०	५८३
काशिच्	दिवा०	५५६
काशृङ्	भ्वा०	५२०
कासृङ्	,,	५२०
किट	,,	५०१
किट	भ्वा०	५०१
कित	,,	५०२
किल	चुरा०	५७७
किलत्	तुदा०	५६४
किष्कण्	चुरा०	५८१
कीटण्	,,	५७५
कील	भ्वा०	५०९
कुकि	,,	५१५
कुंक्	अदा०	५३६
कुंङ्	भ्वा०	५१३
कुंङ्	तुदा०	५६६

धातु०	गण	पृष्ठम्
कुच	भ्वा०	४९८
कुच	,,	५२७
कुचत्	तुदा०	५६५
कुजू	भ्वा०	४९९
कुञ्च	,,	४९८
कुटिण्	चुरा०	५८०
कुठ	भ्वा०	५०१
कुडत्	तुदा०	५७५
कुडुङ्	भ्वा०	५०१
कुडण्	चुरा०	५७५
कुणत्	तुदा०	५६४
कुण	चुरा०	५८२
कुत्सिण्	चुरा०	५८१
कुथच्	दिवा०	५५१
कुथु	भ्वा०	५०४
कुद्रुण्	चुरा०	५७७
कुन्थश्	क्र्या०	५७३
कुप	चुरा०	५८०
कुपच्	दिवा०	५५३
कुबु	भ्वा०	५०७
कुबुण्	चुरा०	५७७
कुमारण्	,,	५८३
कुरत्	तुदा०	५६४
कुर्दि	भ्वा०	५१६
कुल	,,	५२८
कुशच्	दिवा०	५५३
कुशु	चुरा०	५८०
कुषश्	क्र्या०	५७४
कुशुभ्	कण्ड्वा०	६१५
कुसच्	दिवा०	५५४
कुसु	चुरा०	५८०
कुस्मिण्	चुरा०	५८१
कुहणि	,,	५८४
कूङ्त्	तुदा०	५७६

धातुः	गणः	पृष्ठम्
कूज	भ्वा०	४९९
कूटण्	चुरा०	५८२
कूटिष्	,,	५८१
कूटिण्	,,	५८०
कूणिण्	,,	५८१
कूल	भ्वा०	५०९
कूंग्	,,	५२२
कृंग्ट्	स्वा०	५५८
कृडत्	तुदा०	५६६
कृतैत्	,,	५६२
कृतैप्	रुधा०	५६८
कृपौङ्	भ्वा०	५२७
कृपण्	चुरा०	५७९
कृपण्	,,	५८२
कृवुट्	स्वा०	५६०
कृशच्	दिवा०	५५३
कृष	भ्वा०	५११
कृषीत्	तुदा०	५६१
कृ	क्रया०	५७३
कृगृश्	,,	५७२
कृणि	चुरा०	५८०
कृत्	तुदा०	५६२
कृतण्	चुरा०	५७६
केतण्	,,	५८२
केपृङ्	भ्वा०	५१७
केला	कण्ड्वा०	६१५
केलृ	भ्वा०	५१०
केवृङ्	भ्वा०	५२०
कैं	भ्वा०	४९५
क्रथ	,,	५३२
क्रसूच्	दिवा०	५५२
क्नूग्श	क्रया०	५७१
क्नूयैङ्	भ्वा०	५२०
क्मर	,,	५०९
क्रथ	भ्वा०	५३२
क्रथ	चुरा०	५८५
क्रदु	भ्वा०	५०४
क्रदुङ्	,,	५३२
क्रन्दण्	चुरा०	५७९
क्रपि	भ्वा०	५३२
क्रमू	,,	५०७
क्रीणग्	क्रया०	५७०
क्रीडृ	भ्वा०	५०१
क्रुञ्च	,,	४९८
क्रुधंच्	दिवा०	५५२
क्रुशं	भ्वा०	५२८
क्रुथ	भ्वा०	५३२
क्लदु	,,	५०४
क्लदुङ्	,,	५३२
क्लदौच्	दिवा०	५५२
क्लमूच्	,,	५५४
क्लिदु	भ्वा०	५०४
क्लिदुङ्	,,	५१६
क्लिशिच्	दिवा०	५५६
क्लिशौच्	क्रया०	५७३
क्लीवृङ्	भ्वा०	५१७
क्लेशि	,,	५२०
क्वण	,,	५०२
क्वथे	,,	५२७
क्वेलृ	,,	५१०
क्षजुङ्	,,	५३१
क्षजुण्	चुरा०	५७४
क्षण्	तना०	५६९
क्षप	चुरा०	५८२
क्षपुण्	,,	५७६
क्षमौच्	दिवा०	५५४
क्षमौषि	भ्वा०	५१७
क्षर	,,	५२८

धातुः	गणः	पृष्ठम्
क्षलण्	चुरा०	५७७
क्षि	भ्वा०	४९२
क्षिणूबी	तना०	५६९
क्षित्	तुदा०	५६२
क्षिपश्	क्रया०	५७३
क्षिपंच्	दिवा०	५५२
क्षिपींत्	तुदा०	५६१
क्षिवू	भ्वा०	५१०
क्षिवूच्	दिवा०	५५२
क्षीज	भ्वा०	४९९
क्षीषृङ्	,,	५१७
क्षु	अदा०	५३६
क्षुदृंपी	रुधा०	५६७
क्षुधंच्	दिवा०	५५२
क्षुभच्	दिवा०	५५३
क्षुभश्	क्रया०	५७३
क्षुभि	भ्वा०	५२६
क्षुरत्	तुदा०	५६४
क्षैं	भ्वा०	४९६
क्ष्णुक्	अदा०	५३६
क्ष्मायैङ्	भ्वा०	५२०
क्ष्मील	,,	५८९
क्ष्विदा	,,	५०४
क्ष्विदाङ्	भ्वा०	५२६
क्ष्विदाच्	दिवा०	५५२
	ख	
खगु	भ्वा०	४९७
खज	,,	४९९
खजु	,,	,,
खट	,,	५०१
खट्टण्	चुरा०	५७५
खड	,,	,,
खडुङ्	भ्वा०	५१५
खडुण्	चुरा०	५७५
खद	भ्वा०	५०४
खनुण्	,,	५२५
खज	,,	४९९
खर्द	,,	५०४
खर्व	,,	५०७
खर्व	,,	५१०
खल	,,	,,
खवश्	क्रया०	५७३
खाद	भ्वा०	५०४
खिट	,,	५०१
खिदंत्	तुदा०	५६२
खिदिच्	दिवा०	५५५
खिदिंप्	रुधा०	५६९
खुजु	भ्वा०	४९९
खुडुङ्	,,	५१५
खुडुण्	चुरा०	५७५
खुरत्	तुदा०	५६४
खेटण्	,,	५८२
खेला	कण्ड्वा०	६१५
खेलृ	भ्वा०	५१०
खेवृङ्	,,	५२०
खोटण्	चुरा०	५८२
खोर्ऋ	भ्वा०	५०९
खोडृ	,,	५०१
ख्यांक्	अदा०	५३४
ख्यै	भ्वा०	४९६
	ग	
गन्ध	भ्वा०	४९८
गज	चुरा०	५७४
गज	भ्वा०	५००
गजु	,,	५००
गड	,,	५३२
गडु	,,	५०१
गणण्	चुरा०	५८२

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
गद	भ्वा०	५०४	गुपि	भ्वा०	५१७
गदण्	चुरा०	५८२	गुप	चुरा०	५८०
गद्गद	कण्ड्वा०	६१५	गुपच्	दिवा०	५५३
गन्धिण्	चुरा०	५८१	गुपौ	भ्वा०	५०६
गम्लृं	भ्वा०	५०८	गुफ	तुदा०	५६४
गर्ज	,,	५००	गुम्फत्	,,	,,
गर्द	,,	५०४	गुरैति	तुदा०	५६६
गर्धण्	चुरा०	५७६	गुर्दण्	चुरा०	५७६
गर्ब	भ्वा०	५०७	गुर्दि	भ्वा०	५१६
गर्व	,,	५१०	गुर्वै	,,	५१०
गर्ज	,,	५१०	गुहौग्	,,	५२५
गर्वणि	चुरा०	५८४	गूरिण्	चुरा०	५८१
गर्हि	भ्वा०	५२१	गुरैचि	दिवा०	५५६
गर्हण्	चुरा०	५८६	गृं	भ्वा०	४९३
गल	भ्वा०	५१०	गृज	,,	५००
गल्भि	,,	५१७	गृजु	,,	,,
गल्हि	,,	५२१	गृधुच्	दिवा०	५५२
गवेषण्	चुरा०	५८३	गृहणि	चुरा०	५८४
गाङ्	भ्वा०	५१३	गृत्	तुदा०	५६२
गात्रण्	चुरा०	५८३	गृणि	चुरा०	५८०
गाधृङ्	भ्वा०	५१६	गृश्	क्रया०	५७३
गाहौङ्	,,	५२१	गेपृ	भ्वा०	५२०
गुंङ्	,,	५१३	गेवृङ्	,,	५१७
गुज	,,	४९९	गेषृङ्	,,	५२०
गुजत्	तुदा०	५६५	गैं	,,	४९६
गुजु	भ्वा०	४९९	गोधा	कण्ड्वा०	६१५
गुठ्ठण्	चुरा०	५७५	गोमण्	चुरा०	५८२
गुडत्	तुदा०	५६६	गोष्टि	भ्वा०	५१५
गुडण्	चुरा०	५७५	ग्रथुङ्	,,	५१६
गुण	,,	५८२	ग्रन्थण्	चुरा०	५८५
गुंत्	तुदा०	५६५	ग्रन्थश्	क्रया०	५७३
गुदि	भ्वा०	५१६	ग्रसण्	चुरा०	५८०
गुधश्	क्रया०	५७३	ग्रसूङ्	भ्वा०	५२१
गुधच्	दिवा०	५५१	ग्रहीश्	क्रया०	५७१

धातुः	गणः	पृष्ठम्
ग्लुचू	भ्वा०	४९८
ग्लसूङ्	,,	५२१
ग्लाहोङ्	,,	५२१
ग्लुचू	,,	४९८
ग्लुञ्चू	,,	,,
ग्लेपृङ्	,,	५१७
ग्लेवृङ्	,,	५२०
ग्लैं	,,	४९६
	घ	
घट	चुरा०	५८०
घटण्	,,	५७९
घटिष्	भ्वा०	५३१
घट्टण्	चुरा०	५७५
घट्टि	भ्वा०	५१५
घडु	चुरा०	५००
घसुङ्	भ्वा०	५२१
घस्लृं	,,	५११
घिणुङ्	,,	५१६
घुंङ्	,,	५१३
घुटि	,,	५२६
घुटत्	तुदा०	५६५
घुण	तुदा०	५६४
घुणि	भ्वा०	५१६
घुणु.४	,,	५१६
घुरत्	तुदा०	५६४
घुषुङ्	भ्वा०	५२०
घुषृ	,,	५१०
घुषृण्	चुरा०	५८०
घूर्णत्	तुदा०	५६४
घूर्णि	भ्वा०	५१६
घूरैङ्	दिवा०	५५६
घृं	भ्वा०	४९३
घृण्	चुरा०	५७४
घृणूयी	तना०	५७०
घृषू	भ्वा०	५११
घ्रां	,,	४९८
घ्रुणुङ्	,,	५१६
	ङ	
ङुंङ्	भ्वा०	५१३
	च	
चक	भ्वा०	५३२
चकि	,,	५१५
चक्क	चुरा०	५७४
चकासृक्	अदा०	५३९
चक्षिक्	,,	५४४
चञ्चु	भ्वा०	४९८
चट	चुरा०	५७९
चडङ्	भ्वा०	५१६
चडुण्	चुरा०	५७५
चण	भ्वा०	५३२
चण	,,	५०२
चतेग्	,,	५२४
चदु	,,	५०४
चदेग्	,,	५२४
चन	,,	५०५
चन	,,	५३२
चप	,,	५०६
चमू	,,	५०७
चयि	,,	५१९
चर	,,	५०९
चरण्	चुरा०	५८०
चर्चण्	,,	५७८
चर्व	भ्वा०	५०७
चर्व	,,	५१०
चल	,,	५२८
चल	,,	५३२
चलत्	तुदा०	५६५

धातुः	गणः	पृष्ठम्
चलण्	चुरा०	५७१
चष	भ्वा०	५११
चषी	,,	५२५
चह	,,	५१२
चहण्	चुरा०	५८३
चायृग्	भ्वा०	५२५
चिन्द्	स्वा०	५५८
चिट	भ्वा०	५०१
चितण्	चुरा०	५८१
चितुण्	चुरा०	५७६
चितै	भ्वा०	५०२
चिजण्	चुरा०	५८३
चिलत्	तुदा०	५६५
चिल्ल	भ्वा०	५१०
चिष	चुरा०	५८०
चीक	,,	५८५
चीभृङ्	भ्वा०	५१७
चीमृङ्	,,	५२५
चुक्कण्	चुरा०	५७४
चुक्ष्वे	भ्वा०	५०९
चुट	,,	५०१
चुट	तुदा०	५६५
चुट	चुरा०	५७५
चुट्ट	,,	,,
चुड्ड	चुरा०	५७५
चुड्ड	भ्वा०	५०१
चुड्डण्	चुरा०	५७५
चुड्ड	भ्वा०	५०१
चुषत्	तुदा०	५६६
चुत्	भ्वा०	५०२
चुदण्	चुरा०	५७६
चुद्रु	भ्वा०	५०७
चुरण	कण्ड्वा०	६१५
चुरण्	चुरा०	५७४
चुल्ल	भ्वा०	५१०
चूण	चुरा०	५७५
चूरैचि	दिवा०	५५६
चूर्ण	चुरा०	५७५
चूष	भ्वा०	५५०
चृतैत्	तुदा०	५६४
चेल्	भ्वा०	५१०
चेष्टि	,,	५१५
च्युण्	चुरा०	५७८
च्युंङ्	भ्वा०	५१३
च्युत्ङ्	,,	५०२

छ

छद्	भ्वा०	५३२
छदण्	चुरा०	५८५
छदण्	,,	५७६
छद्म	भ्वा०	५०९
छर्दण्	चुरा०	५७७
छर्दुण्	,,	५७६
छमू	भ्वा०	५०७
छर्दण्	चुरा०	५७६
छषी	भ्वा०	५२५
छिदृंपि	रुधा०	५६७
छिद्रण्	चुरा०	५८३
छुट	तुदा०	५३५
छुटुण्	चुरा०	५७५
छुरत्	तुदा०	५६६
(उ)छृदृंपि	रुधा०	५६७
छृदण्	चुरा०	५८५
छेदण्	चुरा०	५८२
छोच्	दिवा०	५५१

ज

जक्षक्	अदा०	५३७
जज्ञ	भ्वा०	५००

धातुः	गणः	पृष्ठम्
जजु	भ्वा०	५००
जट	,,	५०१
जनैषि	दिवा०	५५६
जप	भ्वा०	५०६
जभ	,,	५०७
जभुङ्	,,	५१७
जभुष्	चुरा०	५८०
जभैङ्	भ्वा०	५१७
जर्च	तुदा०	५६२
जर्ज	,,	५६४
जल	भ्वा०	५२८
जलण्	चुरा०	५७७
जल्प	भ्वा०	५०६
जष	,,	५११
जस	चुरा०	५७७
जसण्	,,	५८०
जसुण्	,,	५७७
जसूच्	दिवा०	५५४
जागृक्	अदा०	५३८
जि	भ्वा०	४२१
जिमु	भ्वा०	५०७
जिदु	,,	५१०
जिषू	,,	५११
जीव	,,	५१०
जुगु	,,	४९८
जुङ्	,,	५१३
जुड	चुरा०	५७५
जुडत्	तुदा०	५६४
जुडत्	,,	५६५
जुतृङ्	,,	५१६
जुतृ	भ्वा०	५०२
जुन	तुदा०	५६४
जुर्वै	भ्वा०	५१०
जुषण्	चुरा०	५८६
जुषैति	तुदा०	५६७
जूष	भ्वा०	५११
जृभुङ्	,,	५१७
जृण्	चुरा०	५८५
जृश्	दिवा०	५५१
जृम्भ्	क्रया०	५७३
जेषृङ्	भ्वा०	५२०
जेहङ्	,,	५२१
जैं	,,	४९६
जौङ्	,,	५०१
ज्ञाण्	चुरा०	२७९
ज्ञांश्	क्रया०	५७३
ज्यांश्	,,	५७२
ज्युंङ्	भ्वा०	५१३
ज्रि	,,	४९१
ज्वर	,,	५३२
ज्वरैचि	दिवा०	५५६
ज्वल	भ्वा०	५२७
ज्वल	,,	५३२
	झ	
झट	भ्वा०	५०१
झमू	,,	५०७
झर्चत्	तुदा०	५६२
झर्झत्	,,	५६४
झष	भ्वा०	५११
झषच्	दिवा०	५५१
	ट	
टकुण्	चुरा०	५७४
टल	भ्वा०	५२८
टूर्वं	,,	४९५
टिकि	भ्वा०	५१५
टीकृङ्	,,	५१५
टुड	तुदा०	५६६
टुल	भ्वा०	५२८

धातुः	गणः	पृष्ठम्
	ड	
डप	चुरा०	५८१
डंपि	चुरा०	५८१
डंभि	,,	५८१
डपु	,,	५७६
डवु	,,	५७७
डिपत्	तुदा०	५६६
डिपण्	चुरा०	५७६
डिपि	,,	५८१
डिपच्	दिवा	५५३
डिपुण्	चुरा०	५७६
डिवुण्	चुरा०	५७७
डिंपि	,,	५८१
डिंभिण्	,,	५८१
डीङ्	भ्वा०	५१३
डींङ्च्	दिवा०	५५५
	ढ	
ढौकृङ्	भ्वा०	५१५
	ण	
णक्ष	भ्वा०	५१२
णख	,,	४९७
णट	,,	५०१
णट	,,	५०४
णद	,,	५३२
णभ	दिवा०	५५४
णभ	क्रया०	५७३
णभि	भ्वा०	५२६
णमं	,,	५०८
णयि	भ्वा०	५२०
णर्द	,,	५०४
णल	भ्वा०	५२१
णसि	,,	५२१
णहींच्	दिवा०	५५७
णासृङ्	भ्वा०	५२१

धातुः	गणः	पृष्ठम्
णिक्ष	भ्वा०	५१२
णिजुंकी	अदा०	५५०
णिदृग्	भ्वा०	५२४
णिदु	भ्वा०	५०४
णिलत्	तुदा०	५६५
णिश	भ्वा०	५१०
णिसुकि	अदा०	५४४
णींग्	भ्वा०	५२२
णील	भ्वा०	५०९
णुक	अदा०	५३६
णुदंत्	तुदा०	५६४
णूत्	,,	५६५
णेदृग्	भ्वा०	५२४
णेष्टृङ्	,,	५२०
	त	
तक	भ्वा०	४९६
तकु	,,	४९६
तक्षौ	,,	५१२
तगु	,,	४९७
तञ्चु	रुधा०	५६८
तञ्चू	भ्वा०	४९८
तञ्चौप्	रुधा०	५६८
तट	भ्वा०	५०१
तडण्	चुरा०	५७५
तडङ्	भ्वा०	५१५
तनूण्	चुरा०	५८१
तनूयो	तना०	५६९
तंत्रीण्	चुरा०	५८१
तपं	भ्वा०	५०६
तपिण्	चुरा०	५८५
तर्पिच्	दिवा०	५५६
तपुस्	कण्ड्वा०	६१५
तमूच्	दिवा०	५५४
तम्पस्	कण्ड्वा०	६१५

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
तयि	भ्वा०	५२९	तुडत्	तुदा०	५६६
तरण्	कण्ड्वा०	६१५	तुडङ्	भ्वा०	५१६
तर्क	चुरा०	५८०	तुडृ	,,	५०१
तर्ज	भ्वा०	५००	तुणत्	तुदा०	५६४
तर्जणि	चुरा०	५८१	तुदींत्	,,	५६०
तर्द	भ्वा०	५०४	तुप	भ्वा०	५०७
तर्व	,,	५०७	तुबु	,,	,,
तलण्	चुरा०	५७७	तुबुण्	चुरा०	५७७
तसु	भ्वा०	५११	तुभि	भ्वा०	५२६
तसुण्	चुरा०	५८०	तुभच्	दिवा०	५५३
तस्	दिवा०	५५४	तुभश्	क्रया०	५७३
तायृङ्	भ्वा०	५२०	तुम्प	भ्वा०	५०७
तिक	स्वा०	५५९	तुफ	,,	,,
तिकि	भ्वा०	५१५	तुम्फ	,,	,,
तिग	स्वा०	५५९	तुरण	कण्ड्वा०	६१५
तिजण्	चुरा०	५७५	तुर्वै	भ्वा०	५१०
तिजि	भ्वा०	५१५	तुलण्	चुरा०	५७७
तिपृङ्	,,	५१७	तुर्व	दिवा०	५५४
तिम	दिवा०	५५२	तुस	भ्वा०	५११
तिरस्	कण्ड्वा०	६१५	तुहृ	,,	५१२
तिल	भ्वा०	५१०	तूडृ	भ्वा०	५०१
तिलण्	चुरा०	५७७	तूणण्	चुरा०	५७६
तिलत्	तुदा०	५६४	तूणण्	,,	५८२
तिल्ल	भ्वा०	५१०	तूणिण्	,,	५८१
तीमच्	दिवा०	५५२	तूरैचि	दिवा०	५५६
तीरण्	चुरा०	५८३	तूल	भ्वा०	५०९
तीव	भ्वा०	५१०	तूष	,,	५१०
तुंक्	अदा०	५३६	तृक्ष	,,	५१२
तुज	चुवा०	५००	तृजु	चुरा०	५७४
तुजु	चुरा०	५८०	तृणूयी	तना०	५७०
तुजु	भ्वा०	५००	(उ)तृदृंपी	रुधा०	५६७
तुट	चुरा०	५७५	तृपट्	स्वा०	५५९
तुटत्	तुदा०	५६५	तृपण्	चुरा०	५८५
तुड	तुदा०	५६६	तृपौच्	दिवा०	५५३

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
तृफ्	तुदा०	५६४		थ	
तृम्फ्	,,	,,	थुड्	तुदा०	५६६
तृष्च्	दिवा०	५५४	थुर्वै	भ्वा०	५१०
तृह्	रुधा०	५६८		द	
तृहौ	तुदा०	५६५	दक्षि	भ्वा०	५२१
तृंहौ	,,	,,	दक्षि	भ्वा०	५३२
तॄ	भ्वा०	४९४	दघु	,,	४९८
तेपृङ्	,,	५१७	दण्डण्	चुरा०	५८२
तेवृङ्	,,	५२०	ददि	भ्वा०	५१६
तौङ्	,,	५०१	दधि	भ्वा०	,,
त्यजं	,,	५००	दभैल्	तुदा०	५६४
त्रकुङ्	,,	५१५	दमूष्	दिवा०	५५४
त्रदु	,,	५०४	दम्भूङ्	स्वादि०	५५९
त्रपौङि	,,	५१७	दयि	भ्वा०	५२०
त्रसण्	चुरा०	५८०	दरिद्राङ्	अदा०	५३७
त्रसु	,,	,,	दल	भ्वा०	५०९
त्रसैङ्	दिवा०	५५२	दलण्	चुरा०	५८०
त्रुटत्	तुदा०	५६५	दंशं	भ्वा०	५१०
त्रुटिण्	चुरा०	५८१	दंशिण्	चुरा०	५८१
त्रुडत्	तुदा०	५६६	दंसिण्	,,	,,
त्रुप	भ्वा०	५०७	दशु	,,	५८०
त्रुम्प	भ्वा०	,,	दसु	,,	,,
त्रुफ	,,	,,	दसूच्	दिवा०	५५४
त्रुम्फ	,,	,,	दहं	भ्वा०	५१२
त्रैङ्	,,	५१४	दांगिङ्	अदा०	५३९
त्रैकृङ्	,,	५१५	दांश्	भ्वा०	४९०
त्वक्ष	,,	५१२	दानी	,,	५२५
त्वक्षौ	,,	,,	दांशृङ्	अदा०	५३४
त्वचत्	तुदा०	५६२	दाधृष्	भ्वा०	५२५
त्वञ्चु	भ्वा०	४९४	दाशृङ्	,,	,,
त्वञ्चु	,,	४९४	दिवण्	चुरा०	५८०
त्वरिष	,,	५३२	दिविण्	चुरा०	५८१
त्विषीं	,,	५२५	दिवु	भ्वा०	५१०
त्सर	,,	५०९	दिवूङ्	दिवा०	५११

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
दिशींत्	तुदा०	५६१	धैं	भ्वा०	४९६
दिहींक्	अदा०	५४७	द्रम	,,	५०८
दीक्षि	भ्वा०	५२१	द्रांक्	अदा०	५३४
दीङ्ख्	दिवा०	५५५	द्राक्षु	भ्वा०	५१२
दीपैक्	दिवा०	५५६	द्राखृ	,,	४९७
दुं	भ्वा०	४९२	द्राघृङ्	,,	५१५
दुःख	कण्ड्वा०	६१५	द्राङ्क्	,,	५१६
दुःखण्	चुरा०	५८१	द्राङ्कृङ्	,,	५२१
दुंठ	स्वा०	५५९	द्रुहौच्	दिवा०	५५४
दुर्वैं	भ्वा०	५१०	द्रूणश्	क्रया०	५७१
दुरज	कण्ड्वा०	६१५	द्रेकृङ्	भ्वा०	५१४
दुलण्	चुरा०	५७७	द्रैं	,,	४९६
दुवस्	कण्ड्वा०	६१५	द्विषींक्	अदा०	५४७
दुषंङ्	दिवा०	५५३	द्वृं	भ्वा०	४९४
दुहींक्	अदा०	५४७		ध	
दुहृ	भ्वा०	५१२	धकण्	चुरा०	५७५
दूङ्ख्	दिवा०	५५५	धण	भ्वा०	५०२
दृपौच्	,,	५५३	धन	भ्वा०	५०५
दृफ	तुदा०	५६४	धांगृक्	अदा०	५५०
दंङ्क्	,,	५६६	धाङ्कृङ्	भ्वा०	५१६
दंफत्	,,	५६४	धावूग्	,,	५२५
दभैत्	,,	,,	धिंत्	तुदा०	५६२
दभैण्	चुरा०	५८५	धिक्षि	भ्वा०	५२१
दशृं	भ्वा०	५१०	धिवु	,,	५१०
दह	,,	५१२	धिवुङ्	स्वा०	५६०
दहु	,,	,,	धींङ्ख्	दिवा०	५५५
दृ	,,	५३२	धुक्षि	भ्वा०	५२१
दृश	,,	,,	धुर्वैं	,,	५१०
देंङ्	,,	५१४	धूगृ	क्रया०	५७२
देवृङ्	,,	५२०	धूगण्	चुरा०	५८५
दैंव्	,,	४९५	धूगक्	स्वा०	५५८
दोंङ्	दिवा०	५५१	धूग्द्	,,	५५९
द्युंक्	अदा०	५३५	धूत्	तुदा०	५६५
द्युति	भ्वा०	५२५	धूप	भ्वा०	५०६

धातुः	गणः	पृष्ठम्
धूरैङ्	दिवा०	५५६
धूर्ष्	चुरा०	५७७
धृंग्	भ्वा०	५२२
धृङ्	,,	५१४
धृङ्त्	तुदा०	५६६
धृज	भ्वा०	४९९
धृजु	,,	४९९
धृष्	चुरा०	५८६
धृषाद्	स्वा०	५६०
धोर्क्ष	भ्वा०	५०९
ध्मां	,,	४९०
ध्यै	,,	४९६
ध्रज	,,	४९९
ध्रजु	,,	४९९
ध्रण	,,	५०२
ध्रसष्	चुरा०	५८०
ध्रसूश्	क्रया०	५७४
ध्राक्षु	भ्वा०	५१२
ध्राखृ	,,	४९७
ध्राङृङ्	भ्वा०	५१६
ध्रुं	,,	४९२
ध्रुंत्	तुदा०	५६५
ध्रेकृङ्	भ्वा०	५१४
ध्रैं	,,	४९६
ध्वज	,,	४९९
ध्वजु	,,	४९९
ध्वण	,,	५०२
ध्वन	,,	५०५
ध्वन	,,	५६२
ध्वनष्	चुरा०	५८२
ध्वंसूङ्	भ्वा०	५२६
ध्वाक्षु	,,	५१२
ध्वृं	,,	४९४

धातः	गणः	पृष्ठम्
	न	
नक्क	चुरा०	५७४
नख	भ्वा०	४९७
नटष्	चुरा०	५७५
नद	चुरा०	५८०
नदु	भ्वा०	५०४
नयि	,,	५१९
नर्द	,,	५०४
नर्व	,,	५०७
नशौच्	दिवा०	५५३
नाथृङ्	भ्वा०	५१६
नाधृङ्	,,	५१७
निवासष्	चुरा०	५८३
निवु	भ्वा०	५१०
निष्कष्	चुरा०	५८१
निषू	भ्वा०	५११
नीव	,,	५१०
नृतैच्	दिवा०	५५१
नॄ	भ्वा०	५३२
नृश्	क्रया०	५७३
	प	
पक्षष्	चुरा०	५७७
पर्चिष्	भ्वा०	५२४
पचुष्	चुरा०	५७४
पचुङ्	भ्वा०	५१५
पट	,,	५०१
पट	चुरा०	५८०
पट	चुरा०	५८२
पठ	भ्वा०	५०१
पठुङ्	,,	५१५
पणि	,,	५१६
पतष्	चुरा०	५८२
पत्लृ	भ्वा०	५२७
पथुष्	चुरा०	५७६

धातु०	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
पथे	भ्वा०	५२७	पिवु	भ्वा०	५१०
पदाण	चुरा०	५८४	पिशत्	तुदा०	५६२
पदिंच्	दिवा०	५५५	पिप्लंप्	रुधा०	५६८
पनि	भ्वा०	५१७	पिस्	चुरा०	५७७
पयि	,,	५१९	पिसु	,,	५८०
पयस्	कण्ड्वा०	६१५	पिसृ	भ्वा०	५१२
पर्णण्	चुरा०	५८२	पींङ्च्	दिवा०	५५५
पर्दि	भ्वा०	५१६	पीडण्	चुरा०	५७५
पर्व	भ्वा०	५०७	पील	भ्वा०	५०९
पर्व	,,	५१०	पीव	,,	५१०
पर्षि	,,	५२०	पुंसण्	चुरा०	५७७
पल	,,	५२८	पुट	तुदा०	५६६
पलण्	चुरा०	५७७	पुट	चुरा०	५७६
पल्यूलण्	,,	५८३	पुटण्	,,	५८२
पल्ल	भ्वा०	५१०	पुट्ट	,,	५७५
पवि	,,	५२०	पुड्ड	भ्वा०	५०१
पश	चुरा०	५८०	पुणत्	तुदा०	५६४
पशण्	,,	५८३	पुथ	चुरा०	५८०
पषण्	,,	५८०	पुथच्	दिवा०	५५१
पषी	भ्वा०	५२५	पुथु	भ्वा०	५०४
पसुण्	चुरा०	५७७	पुरण्	कण्ड्वा०	६१५
पां	भ्वा०	४८६	पुरत्	तुदा०	५६४
पांक्	अदा०	५३४	पुर्बण्	चुरा०	५७६
पार	चुरा०	५८३	पुल	भ्वा०	५२८
पिंत्	तुदा०	५६२	पुलण्	चुरा०	५७७
पिचण्	चुरा०	५७४	पुष	भ्वा०	५११
पिजु	,,	५८०	पुषण्	चुरा०	५८०
पिजुण्	,,	५७४	पुषश्	क्रया०	५७४
पिजुकि	अदा०	५४४	पुषंच्	दिवा०	५५२
पिट	भ्वा०	५०१	पुष्पच्	,,	,,
पिठ	,,	,,	पुंसण्	चुरा०	५७७
पिडङ्	,,	५१५	पुसच्	दिवा०	५५४
पिडण्	चुरा०	५७५	पुस्त	चुरा०	५७६
पिलण्	,,	५७६	पूगश्	क्रया०	५७२

धातुः	गणः	पृष्ठम्
पूङ्	भ्वा०	५१४
पूजण्	चुरा०	५७४
पूणण्	,,	५७६
पूयैङ्	भ्वा०	५२०
पूरण्	चुरा०	५८०
पूरैचि	दिवा०	५५६
पूर्व	भ्वा०	५१०
पूल	,,	,,
पूष	,,	५११
पृंक्	अदा०	५४८
पृंङ्त्	तुदा०	५६६
पृछण्	चुरा०	५८५
पृचैङ्	अदा०	५४४
पृचैप्	रुधा०	५६८
पृजुङ्	अदा०	५४४
पृंट्	स्वादि०	५५९
पृड	तुदा०	५६४
पृण	चुरा०	५७४
पृणत्	तुदा०	५६४
पृथण्	चुरा०	५७६
पृषू	भ्वा०	५११
पृश्	क्रया०	५७२
पेल्	भ्वा०	५१०
पेवृङ्	भ्वा०	५२०
पेस्	,,	५१२
पैं	,,	४९६
पैणृ	,,	५०२
प्यायैङ्	,,	५२०
प्युषण्	चुरा०	५७७
प्युष्	दिवा०	५५४
प्युस	,,	,,
प्यैङ्	भ्वा०	५१४
प्रच्छत्	तुदा०	५६३
प्रथण्	चुरा०	५७६
प्रथिष्	भ्वा०	५३२
प्रसिष्	,,	,,
प्रांङ्	अदा०	५३४
प्रींण्	चुरा०	५८४
प्रींञ्	क्रया०	५७०
प्रींङ्त्	दिवा०	५५५
प्रुंङ्	भ्वा०	५१३
प्रुष्	क्रया०	५७४
प्रुषू	भ्वा०	५११
प्लिहि	,,	५२१
प्लींञ्	क्रया०	५७२
प्लुंङ्	भ्वा०	५१३
प्लुषश्	क्रया०	५७४
प्लुषु	भ्वा०	५११
प्लुषूष्	दिवा०	५५४
प्लेवृङ्	भ्वा०	५२०
प्स्यांङ्	अदा०	५३३
	फ.	
फक	भ्वा०	४९६
फण	,,	५३२
फल	,,	५२८
फल	,,	५१०
फला	,,	५०९
फुल	,,	५१०
फुल	,,	,,
फेल	,,	,,
	ब.	
बण	भ्वा०	५०२
बद	,,	५०४
बध	चुरा०	५७१
बधि	भ्वा०	५१६
बधण्	चुरा०	५७६
बधि	भ्वा०	५१६
बन्ध	चुरा०	५७६

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
बन्धंश्	क्रया०	५७३		भ०	
बर्ब	भ्वा०	५०७	भक्षण्	चुरा०	५७७
बर्ह	चुरा०	५८०	भजण्	,,	५७९
बर्हण्	,,	५७७	भर्जी	भ्वा०	५२४
बर्हिं	भ्वा०	५२१	भजु	चुरा०	५८०
बल	,,	५२८	भञ्जौंप्	रुधा०	५६८
बलि	चुरा०	५८१	भट	भ्वा०	५०१
बल्ह	चुरा०	५८०	भट	,,	५३२
बल्हि	भ्वा०	५२१	भडङ्	,,	५१५
बस्ति	,,	५८१	भडण्	चुरा०	५७५
बहुङ्	भ्वा०	५२१	भण	भ्वा०	५०२
बाधृङ्	,,	५१६	भदुङ्	,,	५१६
बिदु	,,	५०४	भरण्	कण्ड्वा०	६१५
बिलत्	तुदा०	५६५	भर्भ	भ्वा०	५०७
बिलण्	चुरा०	५७७	भर्व	,,	५१०
बिसच्	दिवा०	५५४	भर्त्सिण्	चुरा०	५८१
बुक्क	भ्वा०	४९७	भलि	भ्वा०	५२०
बुक्कण्	चुरा०	५७८	भलिण्	चुरा०	५८१
बुडत्	तुदा०	५६६	भल्लि	भ्वा०	५२०
बुध	भ्वा०	५२८	भष	,,	५११
बुधुण्	चुरा०	५७६	भाक्	अदा०	५३४
बुर्धि	दिवा०	५५६	भाजण्	चुरा०	५८१
बुधृग्	भ्वा०	५२४	भामि	भ्वा०	५१७
बुन्दग्	,,	,,	भामण्	चुरा०	५८२
बुलण्	चुरा०	५७६	भाषि	भ्वा०	५२०
बुस्तण्	,,	,,	भासि	,,	५२१
बृहु	भ्वा०	५१२	भिक्षि	,,	,,
बृहु	चुरा०	५८०	भिदंपी	रुधा०	५६७
बृहृ	भ्वा०	५१२	भिषज्	कण्ड्वा०	६१५
बृस	चुरा०	५७७	भिष्णुक	कण्ड्वा०	,,
ब्रुड	तुदा०	५६६	भींक्	अदा०	५४८
ब्रूंगक्	अदा०	५४६	भुजप्	रुधा०	५६८
ब्लींश्	क्रया०	५७३	भुजौंस्	तुदा०	५६३
ब्लेष्कण्	चुरा०	५८१	भुडङ्	भ्वा०	५१५

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
भू	भ्वा०	४७७	मघुङ्	भ्वा०	५१५
भूण्	चुरा०	५७८	मचि	,,	,,
भूष	भ्वा०	५११	मचुङ्	,,	५१५
भूष	चुरा०	५००	मज	,,	५००
भृंग्	भ्वा०	५२२	मञ्चु	,,	४९८
भृंगृक्	अदा०	५५०	मठ	,,	५०१
भृजैङ्	भ्वा०	५१५	मठुङ्	,,	५१५
भृश्	दिवा०	५५३	मड	,,	५०१
भृश्	क्रया०	५७३	मडुङ्	,,	५१५
मेजृङ्	भ्वा०	५१५	मडुण्	चुरा०	५७५
मेपृग्	,,	५२५	मण	भ्वा०	५०२
भ्यसि	,,	५२१	मथु	,,	५०४
भ्रण्	,,	५०२	मथे	,,	५२७
भ्रम्	,,	५२८	मदिण्	चुरा०	५८०
भ्रमूच्	दिवा०	५५४	मदुङ्	भ्वा०	५१६
भ्रस्जींत्	तुदा०	५६०	मदै	,,	५३२
भ्रंशूच्	दिवा०	५५३	मदैच्	दिवा०	५५४
भ्रंसूङ्	भ्वा०	५२६	मनिच्	,,	५५५
भ्राजि	,,	५१५	मनिण्	चुरा०	५८०
भ्राजृग्	,,	५२४	मनूयी	तना०	५७०
भ्रासि	,,	५२१	मंत्रिण्	चुरा०	५८१
भ्रींश्	क्रया०	५७३	मन्तु	कण्ड्वा०	६१४
भ्रुडत्	तुदा०	५६६	मन्थ	भ्वा०	५०४
भ्रुणिण्	चुरा०	५८१	मन्थश्	क्रया०	५७३
भ्रेषृग्	भ्वा०	५२५	मभ्र	भ्वा०	५०९
भ्लक्षी	,,	,,	मयि	,,	५१९
भ्लासृङ्	,,	५२१	मर्ब	,,	५१०
	म०		मर्ह	,,	५१२
मकुङ्	भ्वा०	५१४	मलि	,,	५२०
मक्ष	,,	५१२	मल्लि	,,	,,
मख	,,	४९७	मव	,,	५१०
मखु	,,	४९७	मव्य	,,	५०९
मगध	कण्ड्वा०	६१५	मश	,,	५१०
मगु	भ्वा०	४९७	मष	,,	५११

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
मसैच्	दिवा०	५५४	मीव	भ्वा०	५१०
मस्की	भ्वा०	५१५	मुक्ष	,,	५१२
मस्जोंत्	तुदा०	५६३	मुचुङ्	,,	५१५
महण्	चुरा०	५८३	मुडङ्	,,	५१६
महींङ्	कण्ड्वा०	५१४	मुच्लृंती	तुदा०	५६१
महुङ्	भ्वा०	५२१	मुचण्	चुरा०	५७९
महुण्	चुरा०	५८०	मुज	भ्वा०	५००
माक्षु	भ्वा०	५१२	मुजु	,,	,,
मांक्	अदा०	५३४	मुञ्चु	,,	४९८
मार्गण्	चुरा०	५८५	मुट	,,	५०१
मांङ्	अदा०	५४९	मुटण्	चुरा०	५७५
मान्थ	भ्वा०	५०४	मुटत्	तुदा०	५६५
मानण्	चुरा०	५८५	मुड	भ्वा०	५०१
मानि	भ्वा०	५१७	मुणत्	तुदा०	५६४
मार्जण्	चुरा०	५७४	मुदण्	चुरा०	५७९
माहृग्	भ्वा०	५२५	मुदि	भ्वा०	५१६
मिंग्द्	स्वा०	५५८	मुरत्	तुदा०	५६४
मिच्छत्	तुदा०	५६३	मुर्च्छा	भ्वा०	४९९
मिदाङ्	भ्वा०	५२६	मुर्वैं	,,	५१०
मिदाच्	दिवा०	५५२	मुष	,,	५११
मिदुण्	चुरा०	५७६	मुषश्	क्र्या०	५७४
मिदृग्	भ्वा०	५२४	मुसच्	दिवा०	५५४
मिमृ	,,	५०८	मुस्तण्	चुरा०	५७६
मिलत्	तुदा०	५६५	मुहौच्	दिवा०	५५४
मिवु	भ्वा०	५१०	मूङ्	भ्वा०	५१४
मिश	,,	,,	मूचण्	चुरा०	५८३
मिश्रण्	चुरा०	५८३	मूल	भ्वा०	५१०
मिषत्	तुदा०	५६५	मूलण्	चुरा०	५७७
मिषू	भ्वा०	५११	मूष	भ्वा०	५११
मिहं	भ्वा०	५१२	मृज	,,	५००
मींग्श्	क्र्या०	५७०	मृजु	,,	,,
मींङ्च्	दिवा०	५५५	मृगणि	चुरा०	५८४
मीण्	चुरा०	५८४	मृजौक्	अदा०	५४०
मील	भ्वा०	५०९	मृजौण्	चुरा०	५८५

धातुः	गणः	पृष्ठम्
मृडत्	तुदा०	५६४
मृडश्	क्रया०	५७३
मृणत्	तुदा०	५६४
मृंत्	,,	५६२
मृदश्	क्रया०	५७३
मृधृग्	भ्वा०	५२४
मृशंत्	तुदा०	५६५
मृषण्	चुरा०	५८३
मृषिण्	,,	५८५
मृषीच्	दिवा०	५५७
मृषू	भ्वा०	५११
मृ	क्रया०	५७३
मेंङ्	भ्वा०	५१४
मेड़्	,,	५०१
मेथृग्	,,	५२४
मेदृग्	,,	,,
मेधा	कण्ड्वा०	६१५
मेधृग्	भ्वा०	५२४
मेपृङ्	,,	५१७
मेवृङ्	,,	५२०
मोक्षण्	चुरा०	५८०
म्रां	भ्वा०	४९०
म्रक्षण्	चुरा०	५७६
म्रदिष्	भ्वा०	५३२
म्रचु	,,	४९८
म्रञ्चु	,,	४९८
म्रेड़्	,,	५०१
म्लुचु	,,	४९८
म्लुञ्चू	,,	४९८
म्लेच्छ	,,	४९८
म्लेच्छण्	चुरा०	५७४
म्लेड़्	भ्वा०	१०१
म्लेवृङ्	,,	५२०
म्लैं	,,	४९६

धातुः	गणः	पृष्ठम्
	य०	
यक्षिण्	चुरा०	५८१
यजिं	भ्वा०	५२९
यतण्	चुरा०	५७९
यतैङ्	भ्वा०	५१६
यन्त्रण्	चुरा०	५७७
यभं	भ्वा०	५०७
यमण्	चुरा०	५७७
यमूं	भ्वा०	५०९
यस्च्	दिवा०	५५४
यांक्	अदा०	५३४
याचृंङ्	भ्वा०	५२४
युक्	अदा०	५३६
युंग्श्	क्रया०	५७०
युगु	भ्वा०	४९८
युच्छ	,,	४९९
युजण्	चुरा०	५८४
युजिंच्	दिवा०	५५५
युजृपी	रुधा०	५६७
युणि	चुरा०	५८०
युतृङ्	भ्वा०	५१६
युधिंच्	दिवा०	५५६
युप	,,	५५३
यूष	भ्वा०	५११
येषृङ्	,,	५२०
यौड़्	,,	५०१
	र०	
रक	चुरा०	५७८
रक्ष	भ्वा०	५१२
रख	,,	४९७
रखु	,,	४९७
रग	चुरा०	५७८
रगु	भ्वा०	४९७
रगे	,,	५३२

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
रघुंङ्	भ्वा०	५१५	रिं	तुदा०	५६२
रघु	चुरा०	५८०	रिखु	भ्वा०	४९७
रचण्	,,	५८१	रिगु	,,	४९७
रञ्जीं	भ्वा०	५२४	रिचण्	चुरा०	५८५
रञ्जींच्	दिवा०	५५७	रिचृंपी	रुधा०	५६७
रट	भ्वा०	५०१	रिफत्	तुदा०	५६४
रठ	,,	,,	रिखु	भ्वा०	५०७
रण	,,	५३२	रिशंत्	तुदा०	५६५
रण	,,	५०२	रिष	भ्वा०	५११
रद	,,	५०४	रींङ्च्	दिवा०	५५५
रधौच्	दिवा०	५५२	रींश	क्रया०	५७२
रप	भ्वा०	५०६	रु	अदा०	५३६
रफ	,,	५०७	रुंङ्	भ्वा०	५१४
रफु	,,	,,	रुचि	,,	५२६
रबु	,,	,,	रुजण्	चुरा०	५७५
रबुङ्	,,	५१७	रुजोंत्	तुदा०	५६३
रभिङ्	,,	,,	रुटण्	चुरा०	५७५
रभुङ्	,,	,,	रुटि	भ्वा०	५२६
रभि	,,	५२८	रुडु	,,	५०१
रवि	,,	५१९	रुठ	,,	,,
रस	,,	५११	रुढु	भ्वा०	५०१
रसण्	चुरा०	५८३	रुदक्	अदा०	५३६
रस्कि	भ्वा०	५१५	रुधिच्	दिवा०	५५६
रह	,,	५१२	रुधृंपि	रुधा०	५६७
रहण्	चुरा०	५८३	रुप	दिवा०	५५३
रहु	भ्वा०	५१२	रुशं	तुदा०	५६४
रहुण्	चुरा०	५८३	रुष	भ्वा०	५११
रांक्	अदा०	५३४	रुषण्	चुरा०	५७७
राखृ	भ्वा०	४९७	रुषंच्	दिवा०	५५४
राघृङ्	,,	५१५	रुहं	भ्वा०	५२८
राजृग्	,,	५२४	रूक्षण्	चुरा०	५८३
राधं	स्वा०	५५९	रूपण्	चुरा०	५८२
राधंच्	दिवा०	५५१	रेङ्कृङ्	भ्वा०	५१४
रासृङ	भ्वा०	५२१	रेवा०	कण्ड्वा०	६१५

धातुः	गणः	पृष्ठम्
रेदृग्	भ्वा०	५२४
रेपृङ्	,,	५१७
रेभृङ्	,,	५१७
रेबृङ्	,,	५२०
रेषृङ्	,,	५२०
रैं	,,	४९६
रोडृ	,,	५०१
रौडृ	,,	५०१
	ल	
लक	चुरा०	५७८
लक्षिण्	,,	५७७
लक्षोण्	,,	५८१
लख	भ्वा०	४९७
लखु	भ्वा०	४९७
लगण्	चुरा०	५७५
लगु	भ्वा०	४९७
लगे	,,	५३२
लघु	,,	४९८
लघु	चुरा०	५८०
लघुङ्	भ्वा०	५१५
लछ	,,	४९९
लज	,,	४९९
लज	चुरा०	५८१
लजु	भ्वा०	४९९
लजु	चुरा०	५८०
लजुण्	,,	५८१
लजैङ्	तुदा०	५६६
लट	भ्वा०	५०१
लड	,,	५०१
लड	,,	५३२
लडण्	चुरा०	५७५
लडुण्	,,	५७५
लप	भ्वा०	५०६
लबुङ्	,,	५१७

धातुः	गणः	पृष्ठम्
लभिष्	भ्वा०	५१७
ललिण	चुरा०	५८१
लषीं	भ्वा०	५९५
लस	,,	५११
लसण्	चुरा०	५८०
लांक्	अदा०	५३४
लाखृ	भ्वा०	४९७
लाघृङ्	,,	५१५
लाङ्	कण्ड्वा०	६१४
लाछु	भ्वा०	४९९
लाज	,,	५००
लाजु	भ्वा०	५००
लाट्	कण्ड्वा०	६१४
लाभण्	चुरा०	५८२
लिखत्	तुदा०	५६२
लिगु	भ्वा०	४९७
लिगुण्	चुरा०	५७८
लिट	कण्ड्वा०	६१४
लिपींत्	तुदा०	५६१
लिशं	,,	५६५
लिशिच्	दिवा०	५५६
लिहींक्	अदा०	५४७
लीण्	चुरा०	५८४
लींङ्च्	दिवा०	५५५
लींश्	क्रया०	५७२
लुजु	चुरा०	५८०
लुञ्च	भ्वा०	४९८
लुट	,,	५०१
लुट	चुरा०	५८०
लुटच्	दिवा०	५५२
लुटि	भ्वा०	५२६
लुड्ड	,,	५०१
लुठ	,,	५०१
लुठत्	तुदा०	५६५

धातुः	गणः	पृष्ठम्
लुठि	भ्वा०	५२६
लुठ्	,,	५०१
लुण्टत्	चुरा०	५७५
लुधु	भ्वा०	५०४
लुपच्	दिवा०	५५३
लुप्लंती	तुदा०	५६१
लुबु	चुरा०	५७७
लुबु	भ्वा०	५०७
लुभच्	दिवा०	५५३
लुभत्	तुदा०	५६४
लूगृश्	क्रया०	५७२
लूष	भ्वा०	५१०
लूषण्	चुरा०	५७७
लेखा	कण्ड्वा०	६१५
लेट्	कण्ड्वा०	६१४
लेपृङ्	भ्वा०	५१७
लोक	चुरा०	५८०
लोकृङ्	भ्वा०	५१४
लोचृ	चुरा०	५८०
लोचृङ्	भ्वा०	५१५
लोट्	कण्ड्वा०	६१४
लोट्	,,	६१४
लोड़	भ्वा०	५०१
लोष्टि	,,	५१५
लौड़	,,	५०१

व.

वकुङ्	भ्वा०	५१४
वक्ष	भ्वा०	५१२
वख	,,	४९७
वगु	,,	४९७
वघुङ्	,,	५१५
वचंण्	चुरा०	५८५
वचंक्	अदा०	५४०
वज	भ्वा०	४९९
वज	चुरा०	५७५
वञ्चिण्	,,	५८०
वञ्चि	चुरा०	,,
वञ्चु	भ्वा०	४९८
वट	,,	५३२
वट	,,	५०१
वटु	,,	,,
वटुण्	चुरा०	५७५
वटुण्	भ्वा०	५८२
वठ	भ्वा०	५०१
वठुङ्	भ्वा०	५१५
वडुण्	चुरा०	,,
वडुङ्	भ्वा०	,,
वण	,,	५०२
वणण्	चुरा०	५८२
वद	भ्वा०	५३१
वदिण्	चुरा०	५८५
वदुङ्	भ्वा०	५१६
वन	,,	५०५
वन	,,	,,
वनूयी	तना०	५७०
वर्पी	भ्वा०	५३०
वभुङ्	,,	५१७
वभ्र	,,	५०९
वमू	,,	५२८
वयि	,,	५१९
वरण	कण्ड्वा०	६१५
वरण्	चुरा०	५८३
वर्चि	भ्वा०	५१५
वर्णण्	चुरा०	५७६
वर्णण्	,,	५८२
वर्धण्	,,	५७६
वर्फ	भ्वा०	५०७
बर्हि	,,	५२१

धातु०	गणः	पृष्ठम्	धातु०	गणः	पृष्ठम्
वलि	,,	५२०	विदिण्	चुरा०	५८०
वल्कष्	चुरा०	५७४	विदिच्	दिवा०	५५६
वल्ग	भ्वा०	४९७	विदिप्	रुधा०	५६९
वल्गु	कण्ड्वा०	६१४	विदु	भ्वा०	५०४
वल्भि	भ्वा०	५१७	विदूलंती	तुदा०	५६१
वल्लि	,,	५२०	विधत्	,,	५६४
वल्ह	चुरा०	५८०	विलत्	,,	५६५
वल्हि	भ्वा०	५२१	विशंत्	,,	,,
वशक्	अदा०	५४२	विषश्	क्र्या०	५७६
वष	भ्वा०	५११	विषू	भ्वा०	५११
वसं	,,	५३१	विष्लंकी	अदा०	५५०
वसण्	चुरा०	५८०	विसच्	दिवा०	५५४
वसिक्	अदा०	५४४	वींक्	अदा०	५३५
वसूच्	दिवा०	५५४	वीरणि	चुरा०	५८४
वहीं	भ्वा०	५३१	वुगु	भ्वा०	४९८
वहु	चुरा०	५८०	वुसच्	दिवा०	५५४
वांक्	अदा०	५३४	वृकि	भ्वा०	५१५
वाक्षु	भ्वा०	६१२	वृक्षि	,,	५२१
वाछु	,,	४९९	वृजैषृ	चुरा०	५८५
वाड्ड्	,,	५१६	वृजैकिं	अदा०	५४४
वातण्	चुरा०	५८२	वृङ्भ्	क्र्या०	५७४
वासण्	चुरा०	५८६	वृग्द्	स्वा०	५५८
वाशिच्	दिवा०	५५६	वृण्	चुरा०	५८५
वाहृङ्	भ्वा०	५२१	वृचैप्	रुधा०	५६८
विचृंपी	रुधा०	५६७	वृत	चुरा०	५८०
विच्छ	चुरा०	५८०	वृतूङ्	भ्वा०	५२६
विच्छत्	तुदा०	५६३	वृतूचि	दिवा०	५५५
विजृंकी	अदा०	५५०	वृध	चुरा०	५००
विजैति	तुदा०	५६६	वृधूङ्	भ्वा०	५२७
विजैष्	रुधा०	५६८	वृशच्	दिवा०	५५३
विट	भ्वा०	५०१	वृष	भ्वा०	५११
विड	,,	,,	वृषि	चुरा०	५८१
विधूङ्	,,	५१६	वृषू	भ्वा०	५११
विदक्	अदा०	५४०	वृह	,,	५१२

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
वृहौत्	तुदा०	५६५	व्लीश्	क्रया०	,,
वृश्च्	क्रया०	५७२		श०	
वृश्	,,	५७३	शकींच्	दिवा०	५५७
वेंग्	भ्वा०	५२९	शकुङ्	भ्वा०	५१४
वेंङ्	कण्ड्वा०	६१४	शक्लंद्	स्वा०	५५९
वेट्	,,	६१४	शचि	भ्वा०	५१५
वेण्टग्	भ्वा०	५२४	शट	,,	५०१
वेथृङ्	,,	५१६	शठ	चुरा०	५७५
वेपृङ्	,,	५१७	शठ	,,	५८२
वेल	चुरा०	५८३	शठ	भ्वा०	५०१
वेलण्	,,	,,	शठिण्	चुरा०	५८१
वेला	कण्ड्वा०	६१५	शडुङ्	भ्वा०	५१५
वेल्	भ्वा०	५१०	शण	,,	५३२
वेल्ल	,,	,,	शद्लृं	भ्वा०	५२८
वेष्टि	,,	५१५	शपीं	,,	५२५
वेसृ	,,	५१२	शपींच्	दिवा०	५५६
वेहृङ्	,,	५२१	शब्दण्	चुरा०	५७९
वेहृं	,,	५१०	शमिण्	,,	५८१
वैं	,,	४९६	शम्	दिवा०	५५४
व्यचत्	तुदा०	५६५	शर्ब	भ्वा०	५०७
व्यथण्	चुरा०	५७७	शर्व	,,	५१०
व्यथीष्	भ्वा०	५३१	शल	,,	५२८
व्यधंच्	दिवा०	५५१	शलि	,,	५१०
व्ययण्	,,	५८३	शल्भि	,,	५१७
व्ययी	भ्वा०	२२५	शव	,,	५१०
व्युसच्	दिवा०	५५२	शश	,,	५१०
व्येंग्	भ्वा०	५३०	शष	,,	५११
व्रज	,,	४९९	शसुङ्	,,	५२१
व्रजण्	चुरा०	५८५	शसू	,,	५१२
व्रण	भ्वा०	५०२	शंसू	,,	५१२
व्रश्चौत्	तुदा०	५६२	शाखृ	,,	४९७
व्रींङ्च्	दिवा०	५५५	शाडृङ्	,,	५१६
व्रीडन्	,,	५५१	शानी	,,	५२४
व्रींश्	क्रया०	५७३	शारण्	चुरा०	५८३

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
शासक्	अदा०	५३९	शूर	चुरा०	५८४
शासूकि	अदा०	५४४	शूरैचि	दिवा०	५५६
शिक्षि	भ्वा०	५२१	शूर्पण्	चुरा०	५७६
शिघु	,,	४९८	शूल	भ्वा०	५०९
शिग्द्	स्वा०	५५८	शृंधण्	चुरा०	५७९
शिट	भ्वा०	५०१	शृधूग्	भ्वा०	५२४
शिल	तुदा०	५६४	शृधूङ्	,,	५२७
शिष	भ्वा०	५११	शृश्	क्रया०	५७३
शिषण्	चुरा०	५८५	शेल	भ्वा०	५१०
शिष्लंप्	रुधा०	५६८	शोंच्	दिवा०	५५१
शीकण्	चुरा०	५८५	शोणृ	भ्वा०	५०२
शीकृङ्	भ्वा०	५१४	शौङ्	भ्वा०	५०१
शीङ्क्	अदा०	५४३	श्चुतृ	भ्वा०	५०२
शीमृङ्	भ्वा०	५१७	श्च्युतृ	,,	५०२
शील	,,	५०९	श्मील	,,	५०९
शीलण्	चुरा०	५८३	श्यैङ्	,,	५१४
शुक	भ्वा०	४९७	श्रकुङ्	भ्वा०	५१५
शुच	,,	४९८	श्रगु	,,	४९७
शुचृशौच्	दिवा०	५६७	श्रण	,,	५३२
शुच्यै	भ्वा०	५०९	श्रणण्	चुरा०	५७६
शुठ	,,	५०१	श्रथण्	चुरा०	५७६
शुठण्	चुरा०	५७५	श्रथण्	,,	५८२
शुठ	भ्वा०	५०१	श्रथण्	,,	५८५
शुठण्	चुरा०	५७५	श्रथुङ्	भ्वा०	५१६
शुनंत्	तुदा०	५६४	श्रन्थ	चुरा०	५८५
शुन्ध	भ्वा०	५०५	श्रन्थश्	क्रया०	५७३
शुन्थण्	चुरा०	५८५	श्रमूच्	दिवा०	५५४
शुभ	तुदा०	५६४	श्रां	भ्वा०	५३२
शुभि	भ्वा०	५२६	श्रांक्	अदा०	५३४
शुम्भ	,,	५०७	श्रामण्	चुरा०	५८२
शुम्भत्	तुदा०	५६४	श्रिग्	भ्वा०	५२२
शुल्क	चुरा०	५७४	श्रिवूच्	दिवा०	५५२
शुल्वण्	,,	५७७	श्रिषू	भ्वा०	५११
शुषंच्	दिवा०	५५३	श्रींश्	क्रया०	५७०

धातुः	गणः	पृष्ठम्	धातुः	गणः	पृष्ठम्
श्रुं	भ्वा०	४९२	षण	भ्वा०	५०५
श्रुंट	स्वा०	५५९	षणूयी	तना०	५६९
श्रुंधंच्	दिवा०	५५२	षद्लृं	भ्वा०	५२८
श्रैं	भ्वा०	४९६	षद्लृंस्	तुदा०	५६४
श्रोणृ	भ्वा०	५०२	षप	भ्वा०	५०६
श्लकुङ्	,,	५१५	षम	,,	५०८
श्लगु	,,	४९७	षर्ब	,,	५०७
श्लाखृ	,,	४९७	षसक्	अदा०	५४३
श्लाघृङ्	,,	५१५	षस्ज	भ्वा०	४९९
श्लिषण्	चुरा०	५७०	षह	दिवा०	५५२
श्लिषंच्	दिवा०	५५३	षहण्	चुरा०	५८६
श्लिषू	भ्वा०	५११	षहि	भ्वा०	५२८
श्लोकुङ्	,,	५१४	षिंग्द्	स्वा०	५५८
श्लोणृ	,,	५०२	षिंगृश्	क्रया०	५७०
श्वकुङ्	,,	५१५	षिचींत्	तुदा०	५६१
श्वचि	,,	,,	षिट	भ्वा०	५०१
श्वचुङ्	,,	,,	षिधू	,,	५०५
श्वठ	चुरा०	५७५	षिधूंच्	दिवा०	५५२
श्वठण्	,,	५८२	षिधौ	भ्वा०	५०५
श्वठुण्	,,	५७५	षिम्भू	,,	५०७
श्वभ्रण्	,,	५७७	षिवूंच्	दिवा०	५५२
श्वल	भ्वा०	५१०	षुंक	अदा०	५३६
श्वल्ल	,,	५१०	षुगृद्	स्वा०	५५७
श्वसक्	अदा०	५३७	षुदण्	कण्ड्वा०	६१५
श्वि	भ्वा०	२३१	षुडच्	दिवा०	५५२
श्वित्ताङ्	,,	५२६	षूत्	तुदा०	५६२
	ष.		षूङौक्	अदा०	५४३
षमे	भ्वा०	५३२	षूङौच्	दिवा०	५५५
षघट्	स्वा०	५५९	षूदण्	चुरा०	५७९
षचि	भ्वा०	५१५	षूदि	भ्वा०	५१६
षञ्ज	,,	४९८	षूप	,,	५११
षंज्ज	,,	५००	षेल्	,,	५१०
षट	,,	५०१	षेवृङ्	,,	५२०
षट्ट	चुरा०	५७५	षैं	,,	४९६

धातुः	गणः	पृष्ठम्
ष्वोंच्	दिवा०	५५१
ष्टक	भ्वा०	५३२
ष्टगे	,,	५३२
ष्टन	,,	५३२
ष्टभुङ्	,,	५१७
ष्टम	,,	५०८
ष्टिचिद्	स्वा०	५६०
ष्टिपृङ्	भ्वा०	५१७
ष्टिम	दिवा०	५५२
ष्टीमच्	,,	५५२
ष्टुगक्	अदा०	५४६
ष्टुचि	भ्वा०	५१५
ष्टुपच्	दिवा०	५५३
ष्टूपण्	चुरा०	५७६
ष्टेपृङ्	भ्वा०	५१७
ष्टथैं	,,	४९६
ष्टल	,,	५२८
ष्ठां	,,	४९०
ष्ठिवू	,,	५१०
ष्ठिवू	दिवा०	५५२
ष्णसूच्	,,	५५२
ष्णुफ	अदा०	५३६
ष्णांक्	,,	५३४
ष्णिहौच्	दिवा०	५५४
ष्णुहौच्	,,	५५४
ष्णैं	भ्वा०	४९६
ष्मिङ्	भ्वा०	५१३
ष्लुषश्	क्रया०	५७४
ष्वर्जित्	तुदा०	५६६
ष्वदण्	चुरा०	५७९
ष्वदि	भ्वा०	५१६
ष्वंपक्	अदा०	५३६
ष्वष्कि	भ्वा०	५१५
ष्विदाङ्	,,	५२६
ष्विदांच्	दिवा०	५५२

धातुः	गणः	पृष्ठम्
	स.	
सगे	भ्वा०	५३२
सत्रणि	चुरा०	५८४
सदण्	,,	५८५
सपर	कण्ड्वा०	६१५
सभाजण्	चुरा०	५८५
समर	कण्ड्वा०	६१५
सम्बण्	चुरा०	५७७
सस्तुक्	अदा०	५४०
संग्रामणि	चुरा०	५८४
संभूयस्	कण्ड्वा०	६१५
सर्ज	भ्वा०	४९९
सर्ब	,,	५०७
सल	,,	५१०
साधंद्	स्वा०	५५९
सान्त्वण्	चुरा०	५७७
सामण्	चुरा०	५८२
सिलत्	तुदा०	५६४
सुं	भ्वा०	४९२
सुख	चुरा०	५८१
सुख	कण्ड्वा०	६१५
सुरत्	तुदा०	५६४
सूचण्	चुरा०	५८१
सूत्रण्	,,	५८३
सूर्क्ष्यं	भ्वा०	५०९
सूर्क्ष	,,	५१२
सृं	,,	४९४
सृजंत्	तुदा०	५६३
सृजिच्	दिवा०	५५५
सृप्लृं	भ्वा०	५०६
सृभू	,,	५०७
सृम्भू	,,	५०७
सेकृङ्	,,	५१५
सेल	,,	५१०

धातुः	गणः	पृष्ठम्
सेवृङ्	भ्वा०	५२०
स्कंदृ	,,	५०४
स्कभुङ्	,,	५१७
स्कम्भू	क्रया०	५७०
स्कुंग्श्	,,	५७५
स्कुदुङ्	भ्वा०	५१६
स्कुम्भू	क्रया०	५७०
स्खदिङ्	भ्वा०	५३२
स्खल	,,	५१०
स्तक	,,	५३२
स्तन	,,	५०५
स्तन	,,	५३२
स्तनण्	चुरा०	५८२
स्तम्भू	क्रया०	५७०
स्तुम्भू	,,	,,
स्तृक्ष	भ्वा०	५१२
स्तृंग्ट्	स्वा०	५५८
स्तृंहौत्	तुदा०	५६५
स्तृग्श्	क्रया०	५७२
स्तेनण्	चुरा०	५८२
स्तोमण्	,,	५८३
स्त्यै	,,	४९६
स्नथ	भ्वा०	५३२
स्निटण्	चुरा०	५७५
स्निहण्	चुरा०	५७७
स्थगे	भ्वा०	५३२
स्थुडत्	तुदा०	५६६
स्थूलणि	चुरा०	५८४
स्पदुङ्	भ्वा०	५१६
स्पर्द्धि	,,	५१६
स्पशिण्	चुरा०	५८१
स्पृशत्	तुदा०	५६५
स्पृहण्	चुरा०	५८३
स्फर	तुदा०	५६४
स्फलत्	तुदा०	५६४
स्फायैङ्	भ्वा०	५२०
स्फिटण्	चुरा०	५७५
स्फुट	भ्वा०	५०१
स्फुटण्	चुरा०	५७५
स्फुटत्	तुदा०	५६६
स्फुटण्	चुरा०	५७९
स्फुटि	भ्वा०	५१५
स्फुट्ट	,,	५०१
स्फुडण्	चुरा०	५७५
स्फुरत्	तुदा०	५६६
स्फुर्च्छा	भ्वा०	४९९
स्मूर्च्छा	,,	४९९
स्फुलत्	तुदा०	५६६
स्फूर्जा	भ्वा०	४९९
स्मिटण्	चुरा०	५७५
स्मोल	भ्वा०	५०९
स्मृं	भ्वा०	४९३
स्मृं	,,	५३२
स्मृंट्	स्वा०	५५९
स्यन्दौङ्	,,	५२६
स्यमिण्	चुरा०	५८१
स्यमू	भ्वा०	५०८
स्रन्सृङ	,,	५२०
स्रम्भूङ्	,,	५२६
स्रंसृङ्	,,	५२६
स्रिभू	,,	५०७
स्रुं	,,	४९२
स्रेकृ	,,	५१५
स्रैं	,,	४९६
स्वदि	,,	५१६
स्वन	,,	५०५
स्वन	,,	५३२
स्वरण्	चुरा०	५८३
स्वर्त	,,	५७६

धातुः	गणः	पृष्ठम्
स्वादि	भ्वा०	५१६
स्विदुङ्	,,	५१६
स्वृ	,,	४९३
	ह०	
हट	,,	५०१
हठ	,,	५०१
हर्दि	,,	५१६
हनंक्	अदा०	५४१
हम्म	भ्वा०	५०८
हय	,,	५०९
हर्य	,,	५०९
हल	,,	५२८
हसे	,,	५१२
हांक्	अदा०	५४७
हांङ्क्	,,	५४१
हिकि	भ्वा०	५२४
हिंट्	स्वा०	५५९
हिडुङ्	भ्वा०	५१६
हिलत्	तुदा०	५६४
हिवु	भ्वा०	५१०
हिष्कि	चुरा०	५८१
हिसु	रुधा०	५६८
हिसुण्	चुरा०	५८६
हुंक्	अदा०	५४७
हुड	तुदा०	५६६
हुडुङ्	भ्वा०	५१५
हुडृ	,,	५०१
हुर्च्छा	,,	४९९
हुल	,,	५२८
हुड़	भ्वा०	५०१
हुंग्	भ्वा०	५२२
हृणीङ्	कण्ड्वा०	६१४०
हृषच्	दिवा०	५५४
हृषू	भ्वा०	५११
हृस	,,	५११
हेट	,,	५०१
हेठश्	क्रया०	५७३
हेठि	भ्वा०	५१५
हेड	,,	५३२
हेडृङ्	,,	५१६
हेषृङ्	,,	५२०
हेडृङ्	,,	५१६
हौड़	,,	५०१
ह्नुङ्क्	अदा०	५४३
ह्रल	,,	५३२
ह्रगे	,,	५३२
ह्रादि	भ्वा०	५१६
ह्रींक्	अदा०	५४८
ह्रीच्छ	भ्वा०	४९९
ह्रेषृङ्	,,	५२०
ह्लगे	,,	५३२
ह्लपण्	चुरा०	५७६
ह्लस	भ्वा०	५११
ह्लादेङ्		
ह्लल	भ्वा०	५३२
ह्वृं	,,	५९४
ह्रेंग्	,,	५३०



॥ वैयाकरणन्यायादर्शः ॥

॥ श्रीहेमहंसगणिकृतन्यायसंग्रहात्समुद्धृतः ॥

समुद्धर्ता-मयाशंकरजन्मा गिरिजाशंकरः शास्त्री ॥

॥ मंगलं प्रतिज्ञा च ॥

यं यजन्ते भिक्षभिन्नरूपैर्नामान्तरैरपि ॥
जगतां सर्वधर्मास्तं परमात्मानमीड्महे ॥ १ ॥

हैमव्याकरणस्थितॉश्च बहुशः प्राचीनपाठागतान् ।
पाश्चात्यव्याकरणान्तरज्ञविबुधैरन्यैरपि स्वीकृतान् ॥
संजग्राह विरच्य वृत्तिमतुलां यान् हेमहंसो गणी ।
तान् वच्मीह समासतोऽहमखिलान्यायान्विवृत्या युतान् ॥२॥

एकैकज्ञापकयुतो-दाहृत्येकैकभूषितैः ।
न्यायैः सुविम्बितोऽयं स्तान्न्यायादर्शो मुदे सताम् ॥ ३ ॥

अथ च प्रसिद्धाचार्यैः श्रीहेमचन्द्रैरेव यदुक्तमाविष्कार्यं न्यायसूत्रस्यादौ तदेवाह—

अथ ये तु शास्त्रे सूचिता लोकप्रसिद्धाश्च न्यायास्तदर्थं यत्नः क्रियते; इति ।

अस्यार्थः—अथेति । कोऽर्थः ? हैमव्याकरणानन्तरम् । एतेन तद्व्याकरणेन सह सर्वन्यायानामानन्तर्यसंबन्धः सूच्यते । तथा च ये त्विति शब्दोऽपि व्याकरणसूत्राणामर्वाचीनत्वेऽपि न्यायसूत्राणां तु व्याकरणान्तरेष्वपि तथैव पठितत्वेनातीव प्राचीनत्वं द्योतयति; न्यायाश्चैते गुरुपरंपरयैवागता इति तेषां गुरुपूर्वकमलक्षणरूपसंबन्धमपि प्रकाशयति । शास्त्रे इत्यनेन साङ्गशब्दानुशासनमत्र निर्दिष्टम् । लोकप्रसिद्धा इति पदे च लोका वैयाकरणसमयविदः प्रामाणिकतयात्र गृह्यन्ते । न्याया इति । न्यायशब्दस्य किल 'सूचीकटाहन्यायः'

इत्यादिदृष्टान्ते रूढत्वेऽप्यत्र तु नीयते सन्दिग्धोऽर्थो निर्णयमेभिरिति न्यायाः-स्वेष्टसंसाधनानुगुणा युक्तय इत्येवार्थः स्वीक्रियते। अन्यच्च स्पष्टम्।

अथ प्रतिज्ञातमुपक्रम्यते-

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ १ ॥

सर्वत्र व्याकरणसूत्रे शब्दस्य स्वं रूपं ग्राह्यम्। अशब्दसंज्ञा-यदि तेन शब्देन संज्ञाकरणं न स्यात्। यदि तेन शब्देन काचित्संज्ञा कृता चेत्तर्हि रूपमनादृत्य यावतां सा संज्ञा तावतामेव ग्रहणम्। यथा-'समः ख्यः' ॥ ५। १। ७७ ॥ इत्यत्र ख्यांक्धातुश्चक्षादेशश्चेति द्विधाऽपि ख्या इति रूपमेव गृह्यते ख्येति संज्ञाया अभावात्। तेन गाः संख्याति, संचष्टे वेत्युभयथापि गोसंख्य इत्यादौ डः सिद्धः। अन्यथा तु गौणमुख्ययोः, कृत्रिमाकृत्रिमयोर्वेति न्यायाभ्यां स्वाभाविकधातोः ख्यांक् इत्यस्मादेव कृत्रिमाच्चक्षादेशादेव वा डः स्यात्। अतएव गौणमुख्ययोरित्यादिन्यायानामपवादत्वमस्येत्यग्रे निवेदयिष्यते। 'उपसर्गाद्दः किः' ॥ ५। ३। ८७ ॥ इत्यादौ तु दासंज्ञा धातवो गृह्यन्ते देतिसंज्ञासद्भावात्। तेन आदिरित्यत्र यथा आधिरित्यत्रापि किः सिद्धः। स्वं रूपं शब्दस्येत्यंशस्य ज्ञापकं 'नदीभिर्नाम्नि' ॥ ३। १। २७ ॥ इत्यत्र बहुवचनम्। एकवचने हि न्यायेनानेन स्वरूपस्यैव केवलस्य नदीरूपस्य ग्रहणं प्रसज्येत नतु नदीविशेषाणामपि। ततश्च 'संख्या समाहारे' ॥ ३।१।२८ ॥ इत्युत्तरसूत्रेण पञ्चानां नदीनां समाहारः पञ्चनदमित्यत्रैवाव्ययीभावसमासः स्यान्न तु द्वयोर्यमुनयोः समाहारो द्वियमुनमित्यादिषु। अशब्दसंज्ञेत्यंशस्य च ज्ञापकं 'स्वरादुपसर्गाद्दस्तिकित्यधः' ॥४।४।९॥ इत्यत्र धावर्जनम्। यदि हि स्वं रूपमित्यनेन 'द' इति दारूपमेव गृह्यते तर्ह्यत्र धाप्रसङ्ग एव नास्तीति किमर्थं धावर्जनम्। अस्य चाद्योऽशोऽनित्यः, तेन 'उत्स्वराद्युजेरयज्ञतत्पात्रे' ॥ ३।३।२६ ॥ इत्यत्र 'युजादेर्न वा' ॥ ३।४।१८ ॥ इत्यनेन विकल्पितणिचश्चौरादिकयुजेर्णिचोऽभावपक्षे युजिरूपसंभवेऽपि न ग्रहणम्। अनित्यताज्ञापकं तु 'पृङ्क्लिशिभ्यो न वा' ॥ ४। ४। ४५ ॥ इत्यत्र बहुवचनम्। तद्धि क्लिश्यतिक्लिश्नात्योर्ग्रहणार्थं निर्दिष्टम्। एतन्न्यायाद्यांशस्य नित्यत्वे तु तयोरुभयोरपि ग्रहणं सेत्स्यतीति कुतो बहुवचननिर्देशः। द्वितीयांशोऽप्यनित्यस्तेन 'प्राज्ञश्च' ॥ ५।१।७९ ॥ इत्यत्र 'दश्राङ्' ॥ ५।१।७८ ॥ इति पूर्वसूत्राद् इत्यनुवृत्त्या दासंज्ञकवददासंज्ञकयोरपि दाद्दैवोर्ग्रहणं सिद्धम्। अस्यानित्यत्वे ज्ञापकं 'प्राज्ञश्चे'त्यस्य वृत्तौ द इति दारूपमेव ॥ १ ॥

सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्य ॥ २ ॥

अयमर्थः-जनपदवाचिनो यो विधिरुक्तः स सुसर्वार्द्धदिक्शब्दपूर्वस्य जनपदान्तस्यापि स्यात्। यथा मगधेषु भवो मागधक इत्यादौ केवलाज्जनपदवाचिशब्दादिव, सुमगधेषु भवः सुमागध इत्यादौ सुपूर्वाज्जनपदान्तादपि 'बहुविषयेभ्यः' ॥ ६।३।४५ ॥ इत्यकञ् स्यादेव। ज्ञापकमस्य 'सुसर्वार्द्धाद्राष्ट्रस्य ॥७।४।१५॥

'अमद्रस्य दिशः' ॥ ७।४।१६ ॥ इति सूत्राभ्यां वृद्धिविधानमेव। ग्रहणवतेति न्यायेन सुमगधादिशब्देभ्यो जनपदान्तत्वेन ञ्णित्प्रत्यय एव न भविष्यतीति आभ्यां वृद्धिकरणस्य निर्विषयत्वमेव। अत एव चायं न्यायो ग्रहणवतेति न्यायस्यापवादः। एवमुत्तरोऽपि ॥ २ ॥

ऋतोर्ट्टद्धिमद्विधावयवेभ्यः ॥३॥

यस्मिन् परे वृद्धिप्राप्तिः स ञ्णित्प्रत्ययो वृद्धिमानिह गृह्यते। ऋतुवाचकाद् ञ्णित्प्रत्ययस्य विधौ कर्तव्ये तदवयवपूर्वाट्टवन्तादपि स विधिः स्यात्। तेन वर्षासु भवं धार्षिकमित्यत्र यथा केवलाद्वर्षाशब्दाद् 'वर्षाकालेभ्यः' ॥ ६।३।८० ॥ इतीकण् भवति तथा पूर्वाश्च ताः वर्षाश्च पूर्ववर्षाः तासु भवं पूर्ववार्षिकमित्यत्र वर्षान्तादपि वर्षाकालेभ्य इतीकण् सिद्ध्यति। ज्ञापकमस्य 'अंशाट्टतोः' ॥ ७। ४। १४ ॥ इत्यनेनांशवाचिनः परस्य ऋतुमद्वाच्युत्तरपदस्य वृद्धिविधानमेव। अंशाट्टतोरित्यनेनोत्तरपदवृद्धिस्तावद् वर्षाकालेभ्य इत्यादिसूत्रविहिते ञ्णित्प्रत्यये परे एव भवति, स च ञ्णित्प्रत्ययो यदि पूर्ववर्षादिशब्देभ्य ऋत्वन्तत्वेन ग्रहणवतेतिन्यायाच्चायास्यत्येवेति अंशाट्टतोरिति वृद्धिविधानं व्यर्थं सज्ज्ञापयतीमं न्यायम् ॥ ३ ॥

स्वरस्य ह्रस्वदीर्घप्लुताः ॥ ४ ॥

अयं भावः-ह्रस्वाद्यादेशाः स्वरस्यैव स्युर्नतु व्यञ्जनस्य। तेन सह श्रिया वर्तते सश्रि कुलमित्यत्र ईतः 'क्लीबे' ॥ २।४।९७ ॥ इत्यनेन ह्रस्वो यथा भवति तथा तत् इत्यत्र तकारस्य लवर्णतवर्गलसा दन्त्या इत्यासन्नत्वेन ह्रस्वः प्राप्तोऽपि व्यञ्जनत्वान्न भवति। तथा च प्रत्यञ्चन्तीति क्विपि तान् प्रतीचः इत्यत्र 'अच प्राग् दीर्घश्च' ॥ २। १। १०४ ॥ इत्यनेनाचश्चत्वे प्राक्स्थितस्य इतो यथा दीर्घस्तथा दृषदमञ्चन्तीति क्विपि तान् दृषच्चः इत्यत्र पूर्वोक्तसूत्रेणाचश्चत्वे प्राक्स्थितदकारस्य पूर्ववदासन्नत्वेऽपि व्यञ्जनत्वान्न दीर्घप्राप्तिः। तथैव च हे चैत्र ३ एहि; अत्र अकारस्य 'दूराद्वामन्त्र्यस्य' ॥ ७। ४। ९९ ॥ इत्यनेन प्लुतत्वं यथा तथान्यत्र कुत्रापि व्यञ्जनस्य न। ज्ञापकमस्य न्यायस्य ह्रस्वाद्यादेशविधायके तत्तद्विधौ प्रायःस्थान्यनुपादानम्। स्थानिविशेषानुक्त्या स्वरवद् व्यञ्जनस्यापि ह्रस्वाद्यादेशप्रसङ्गे प्रतिषेधार्थोऽयं न्यायः ॥ ४ ॥

आद्यन्तवदेकस्मिन् ॥ ५ ॥

अयमाशयः-यत्रैकमेव वर्णाद्यस्ति कार्यं तु तदादिकस्य तदन्तस्य वोक्तं तत्र तदेवैकं वर्णाद्यादित्वेनान्तत्वेन प्रकल्प्य तत्तत् कार्यं करणीयम्। तत्रादित्वेन प्रकल्पनं यथा-ईहाञ्चक्रे इत्यादौ धातोर्गुरुनाम्यादित्वेन परोक्षायां 'गुरुनाम्यादे'-३।४।४९ ॥ इत्यनेनाम् भवति यथा तथैव ईक्ष्क् गतावित्यस्य परोक्षायामयाञ्चक्रे इत्यादावपि नामिमात्रस्यैव नाम्यादित्वकल्पनयाम् क्रियते। ज्ञापकम-

स्यात्रांशे 'यः स्वरे पादः पदणिवयधुटि' ॥ २।१।१०२ ॥ इत्यत्र णिवर्जनम्। तद्धि णेः पतन्न्यायेन स्वरादित्वादेव कृतम्। यदि हि स्वरमात्रस्यापि णेः स्वरादित्वं न स्यात्तर्हि प्रसङ्गाभावादेव णिवर्जनस्य निष्प्रयोजनत्वमेव। अस्यांशस्यानित्यत्वम्। तेन ईङ्च् गतावित्यस्य गुरुनाम्यादित्वकल्पनाया अभावेनामादेशाभावात् ईये, ईयाते इत्याद्यपि भवति। अन्तत्वेन प्रकल्पनं यथा-जेता इत्यादौ धातोर्नाम्यन्तत्वेन 'नामिनो गुणोऽविङति' ॥ ४।३।१ ॥ इति गुणो यथा भवति तथा एता इत्यादौ नामिमात्रस्यापि धातोर्नाम्यन्तत्वकल्पनात् स्यादेव। अत्रांशे ज्ञापकं तु यन्तीत्यादाविय्बाधनार्थं 'ह्निणोरण्विति व्यौ' ॥ ४।३।१५ ॥ इति यत्वविधानम्। तद्धि 'धातोरिवर्णो०' ॥ २।१।५० ॥ इति प्राप्तेयूबाधनार्थं विधीयते। यदि च इकारमात्ररूपस्येण्धातोरेतन्न्यायेनेषर्णान्तत्वं न स्यात्तर्हि इय्प्राप्तेरसंभवात् तद्बाधनार्थं यत्वकरणमनावश्यकमेव। अप्राप्तप्रापणार्थोऽयं न्यायः। एवमुत्तरोऽपि ॥ ५ ॥

प्रकृतिवदनुकरणम् ॥ ६ ॥

प्रकृतिः अनुकार्यं धात्वादि। तद्वत् अनुकरणेऽपि कार्यं स्यात्। तेन 'परिव्यवात् क्रियः' ॥ ३।३।२७ ॥ इत्यत्र धात्वनुकरणस्य क्री इत्यस्यापि धातुत्वद्भावात् 'संयोगात्' ॥ २।१।५२ ॥ इतीयादेशरूपं धातुकार्यं भवति। वत्करणेन च सर्वथा धातुत्वाभावान्न त्यादयः। ज्ञापकमस्य क्रिय इति सूत्रनिर्देश एव। अस्य चानित्यत्वम्। 'तदःसेः स्वरे पादार्था ॥ १।३।४५ ॥ इत्यत्र तदः स्थाने तस्मादिति निर्देशाभावात् ॥ ६ ॥

एकदेशविकृतमनन्यवत् ॥ ७ ॥

अयमाशयः-एकस्मिन् प्रदेशे वैसदृश्येन शब्दस्यान्यत्वं नैव गण्यते, किंतु तथाविधस्यापि यथोक्तं कार्यं क्रियते। तेन अतीसारोऽस्यास्तीत्यतीसारकी इत्यत्र यथा अतिसारोऽस्यास्तीत्यतिसारकी इत्यत्रापि 'वातातीसार०' ॥७।२।६१॥ इत्यनेन मत्वर्थीय इन् कागमश्च सिद्ध्यति। ज्ञापकमस्य 'सख्युरितोऽशावैत्' इत्यत्र इत इति वचनम्। तद्धि सखीशब्दस्य ऐत्वनिषेधार्थम्। पतन्न्यायाभावे तु सूत्रे सखिशब्दस्यैव साक्षादुक्तेः सखीशब्दस्य ऐत्वप्राप्तिरेव नेति कुतःसखीनिषेधार्थमित इत्युच्येत। अस्य चानित्यत्वम्। सूरशब्दस्य मर्तादित्वे सत्यपि एकदेशविकृतशूरशब्दस्य मर्त्तादित्वाभावात्। अस्य नित्यत्वे तु यथा सूरस्य 'मर्त्तादिभ्यो यः' ॥७।२।१५९॥ इत्यनेन स्वार्थिके ये सूर्य इति निष्पन्नं तथा शूरस्यापि शूर्य इत्यनिष्टं निष्पद्येत। अनित्यत्वे ज्ञापकं तु 'संख्याहर्दिवाविभा०' ॥५।१।१२४॥ इति सूत्रे लिपिलिव्योः पृथङ् निर्देशः। अस्य नित्यत्वे ह्यन्यतरनिर्देशेनापि निर्वहेत्। साक्षाल्लक्ष्यमाणस्यापि वैसदृशस्यापह्नवार्थोऽयं न्यायः ॥७॥

पूर्वन्याये एकदेशेत्युपलक्षणम्, तेन-

क्वचिदनेकदेशविकृतमप्यनन्यवत् ॥८॥

स्पष्टोऽर्थः। यथा 'यमिरमि०' ॥ ४। २। ५५॥ इत्यादिना नलोपे प्रणिहत इत्यादावेकदेशविकृतस्येव 'नेर्ङ्मादापतपद०' ॥ २।३।७९॥ इति णत्वं तथा प्रणिघ्नन्तीत्यत्र हनेः अनेकदेशविकृतत्वेऽपि अनन्यवद्भावात् तस्मिन् परे णत्वं सिद्धम्। न च प्रन्योर्हनेश्च योगे ज्ञाते एव नेर्णः करिष्यत इति कथमेतन्न्यायावकाश इति वाच्यम्। 'णषमसत्परे' ॥२।१।६०॥ इति वचनेन त्याद्युत्पत्त्यादिपरकार्ये कर्तव्ये णत्वशास्त्रस्यासत्त्वेनाप्रवृत्तेः। ज्ञापकमस्य पूर्वन्यायबीजत्वमेव ॥८॥

भूतपूर्वकस्तद्वदुपचारः ॥ ९ ॥

इदमस्य तात्पर्यम्-यः प्राक् तथा भूत्वा संप्रत्यन्यथाभूतः स उपचारेण प्राच्यावस्थावानिव व्यवह्रियते। तेन प्रण्यहन्नित्यादौ साक्षाद् हनाविव प्रण्यवधीदित्यादौ हनादेशवधेरपि भूतपूर्वहनूरूपत्वोपचारात् 'नेर्ङ्मादा०' ॥२।३।७९॥ इति नेर्णः सिद्धः। ज्ञापकमस्य 'नेर्ङ्मादा०' इत्यस्मिन्नेव सूत्रे हन्तेरिव वधेरपठनम्। अस्य च क्वचिदनित्यत्वम्। तेन विज्ञप्यत्येत्यादौ 'मारणतोषणनिशाने ज्ञश्च' ॥४।२।३०॥ इत्यनेन कृतह्रस्वस्य ज्ञपेर्भूतपूर्वज्ञापिरूपत्वानुपचरणात् 'लघोर्यपि' ॥४।३।८६॥ इत्यनेन लघूपान्त्यलक्षणो णेरय् सिद्ध्यति। अनित्यत्वे ज्ञापकं तु 'संख्यानां र्ण्णाम्' ॥१।४।३३॥ इत्यत्र र्ण्णामिति बहुवचनम्। तद्धि अष्टानामित्यत्र परत्वाद् 'वाऽष्टनआ' ॥१।४।५२॥ इत्यात्वे परत्वात् कृते नान्तत्वाभावाद् भूतपूर्वनान्तादपि आमो नाम्भावार्थं कृतम्। नित्यत्वे त्वस्य बहुवचनं विनाप्येतन्न्यायेनैव व्यवहारे बहुवचननिर्देशस्य व्यर्थत्वमेव ॥ ९ ॥

भाविनि भूतवदुपचारः ॥ १० ॥

अर्थात्-भाविनीमवस्थां भूतवदुपचर्य भाव्यवस्थासंबंधि कार्यं विधीयते। तेन नृणामित्यादौ पदत्वे निष्पन्ने 'रषृवर्णान्नो ण' ॥२।३।६३॥ इति णत्वं यथा भवति तथा रवणमित्यादावपि स्याद्युत्पत्त्यनन्तरं भाविनः पदत्वस्य भूतवदुपचारेण णत्वं कृत्वैव न्यासः सिद्धः। ज्ञापकं त्वस्य 'रषृवर्णात्' इत्यनेन पद एव णत्वविधानम्। णत्वं तावन्नृणामित्यादिपदेष्विव रवणादिनामस्वपि दृश्यते इति 'रषृवर्णात्' इत्यत्र पदे एव विहितम्, तेन च ज्ञायते नाम्नां णत्वे कर्तव्य एष न्यायोऽस्तीति। अस्याप्यनित्यत्वम्। तेन अपाठीदित्यादौ कृतेऽन्यस्मिन् धातुकार्ये वृद्धिस्तदबाध्योऽदचेति न्यायेनाटः सर्वकार्यपश्चाद्भावित्वेन पठेः स्वरादित्वे भाविन्यपि भूतवदनुपचरणाद् 'व्यञ्जनादेर्वो०' ॥ ४। ३। ४७॥ इति वृद्धिः सिद्धा ॥१०॥

यथासंख्यमनुदेशः समानाम् ॥ ११ ॥

इदं रहस्यम्-संख्यया एकद्व्यादिवचननिर्देशेन चेति प्रकारद्वयेन समानां मिथः तुल्यानां पूर्वेषामुत्तरेषां च पदानां यथासंख्यं-संख्याऽनतिक्रमेणैवानु-अनुकूलं देशनं-कथनं कर्तव्यम्। अयमर्थः-आद्यमाद्येन द्वितीयं द्वितीयेनेत्यादि-

रीत्यैव योजना कर्तव्या न त्वन्यथा । यथा 'ङेङस्योर्यातौ' इत्यादौ स्थानिनोरादेशयोश्च द्विद्विसंख्यत्वेन द्विवचनानिर्दिष्टत्वेन च यथासंख्यं योजना । एतन्न्यायाभावे तु ङेङसिभ्यां सह यातोः प्रत्येकं योजनेत्याद्यप्याशंक्येत निषेधकाभावात् । ज्ञापकमस्य चछटटतथे इति लघुना सूत्रेण सिद्धावपि 'चटते सद्वितीये' ॥१।३।७॥ इति गुरुसूत्रकरणम् । तद्धि शषसानां चटतानां चैतन्न्यायाद्यथासंख्यं योजनेति ज्ञापनार्थं कृतम् । चछेत्यादिनिर्देशे तु यथासंख्यं योजना न स्यात् । अनित्योऽयम् । 'भुजिपत्यादिभ्यः कर्मापादाने' ॥५।३।१२८॥ इत्यत्र वचनवैषम्येऽपि यथासंख्यसद्भावात्, 'पूर्वावराधरेभ्योऽसस्तातौ०' इत्यत्र च पूर्वावराधरशब्दानां 'दिक्शब्दाहिग्देशकालेषु०' ॥७।२।११३॥ इति सूत्रादनुवर्त्तमानैर्दिग्देशकालैः सह संख्याया वचननिर्देशस्य तुल्यत्वेऽपि यथासंख्याभावात् । योजनाया यादृच्छिकत्वे प्राप्ते नियमनार्थोऽयं न्यायः ॥ ११ ॥

विवक्षातः कारकाणि ॥ १२ ॥

भवन्ति, न भवन्ति, अन्यथा भवन्ति चेति शेषः। तत्र भवनं-भिक्षा वासयतीत्यादौ भिक्षादेर्निर्व्यापारत्वेन हेतुमात्रत्वात्तत्वतोऽकारकत्वेऽपि स्वतंत्रतया वासनादिव्यापारविवक्षया कर्तृकारकत्वम् । अभवनं-माषाणामश्नीयादित्यादौ माषादीनां कर्मत्वे सत्यपि तदविवक्षणात् संबन्धमात्रे षष्ठी । अन्यथाभवनम्-ओदनः स्वयं पच्यते, असिश्छिनत्तीत्यादावोदनास्योः कर्मकरणयोरपि स्वातंत्र्यविवक्षया कर्तृत्वम् । ज्ञापकमस्य 'स्मृत्यर्थदयेशः' ॥२।२।११॥ इतिसूत्रस्य नियमार्थत्वम् । यदि हि न्यायेनानेन स्मृत्यर्थदयेशामपि कर्मणः कर्मत्वस्य विवक्षावशात् वैकल्पिकत्वमानीयते तर्ह्येव कर्मत्वविकल्पसिद्धौ 'स्मृत्यर्थदयेश' इति कर्मत्वविकल्पारंभस्य नियमार्थत्वमुपपद्येत, सिद्धे सत्यारंभो नियमार्थ इति न्यायात् । नियमश्चायम्-स्मृत्यर्थेति सूत्रोक्तधातूनां कर्मैव पक्षे अकर्मत्वविधानात् शेषरूपेण विवक्ष्यते नतु कारकान्तरम् । तेन मात्रा स्मृतमित्यादौ कर्त्रादीनां शेषविवक्षाया अभावात् षष्ठी न । अनित्यश्चायम् । तेन संबन्धस्याकारकत्वमेव । ततश्च बहूनामिदं वर्त्मेत्यत्र बहुशब्दात् 'बह्वल्पार्थात्०' ॥ ७।२।१५० ॥ इति एशस् न । कारकाणां मिथोऽसाधारणलक्षणत्वेन नैयत्य एव प्रसक्ते तन्निषेधार्थोऽयं न्यायः ॥ १२ ॥

अपेक्षातोऽधिकारः ॥ १३ ॥

अयं भावः-अपेक्षा इष्टता, तत एवाधिकारः प्रवृत्तिमान्निवृत्तिमाँश्च ज्ञेयः, नतु तत्र किंचिज्ज्ञापकमपेक्ष्यम् । यथा 'षष्ठमसत्परे स्यादिविधौ' ॥२।१।६०॥ इत्यतः सूत्रादसत्पर इत्यधिकारो 'राजसः' ॥२।१।९०॥ इतियावदनुवर्त्तते नोर्ध्वम्, स्यादिविधौ चेत्यधिकारस्तु 'नोम्यादिभ्यः' ॥२।१।९९॥ इतियावदित्येषोऽर्थः ज्ञापकमन्तरापि सिद्ध्यति । ज्ञापकमस्य 'समानानां तेनदीर्घः' ॥१।२।१॥ इत्यत्र समानामिति निर्देशः । अत्र तावदामो नाम् 'ह्रस्वापश्च' ॥ १।४।३२ ॥ इत्यनेन कृतः। स

च तेन तदैव स्याद्यदि 'आमो नाम्वा' ॥१।४।३१॥ इति पूर्वसूत्रादाम इति नामिति च पदे तत्रानुवर्त्तेते । तदनुवृत्तिश्चैतन्न्यायादेव न त्वन्यथा, ज्ञापकान्तराभावात् । तथा 'ऐदौत्संध्यक्षरैः' ॥१।२।१२॥ इत्यत्र ऐत्वमप्यस्य ज्ञापकम् । इदं ह्यनुपसर्गाकारस्यैत्वं 'क्त्यारुपसर्गस्य' ॥१।२।१९॥ इत्यतोऽनुवर्तमानस्योपसर्गाधिकारस्य निवृत्तावेव संभवेत् तन्निवृत्तिश्चैतन्न्यायाधीनैवेत्यादि । अनित्यश्चायम् । यदि सर्वत्राप्यधिकारप्रवृत्तिनिवृत्ती एवमेवापेक्षातः स्यातां तर्हि 'प्रत्यये च' ॥१।३।२॥ इत्यतोत्तरत्रा विकल्पानुवृत्त्यर्थश्चकारः 'शषसे शषलं वा' ॥१।३।६॥ इत्यत्र च नवाधिकारे वाग्रहणमुत्तरत्र विकल्पानुवृत्त्यर्थं किमर्थं क्रियेत । तेनैवानित्यत्वमस्य ज्ञायते । विशेषातिदिष्टो विधिः प्रकृताधिकारं न बाधते' इत्यपि न्यायो 'मण्डूकप्लुति' न्यायश्चास्यैव प्रपञ्चः ॥ १३ ॥

अर्थवशाद् विभक्तिपरिणामः ॥ १४ ॥

विभक्तेः परिणामः परावर्तः अर्थवशात् क्रियत इत्यर्थः । यथा 'अत आः'० ॥१।४।१॥ इत्यतो षष्ठ्यन्तस्याप्यत इति पदस्य 'भिस ऐस्' ॥१।४।२॥ इत्यत्र पञ्चम्यन्तत्वेन परिणमनम् । ज्ञापकमस्य 'अद्व्यञ्ञने' ॥२।१।३५॥ इत्यत्र स्थानिनोऽनुपादानम् । अत्र तावदिदंशब्दः स्थानित्वेनेष्टः, यदि च पूर्वसूत्रस्थः षष्ठ्यन्त एव तत्रानुवर्त्येत तदा 'षष्ठ्यान्त्यस्य' ॥७।४।१०६॥ इति परिभाषया इदमो मस्यैवादेशः स्यात्, प्रयोगेषु च संपूर्णस्यैवेदम आदेशो 'दृश्यते', ततश्च 'अद्व्यञ्ञने' इत्यत्र प्रथमान्तेनेदंशब्देन स्थानित्वेन भाव्यमेव सत्यप्येवं यदत्रे सर्वथा स्थानी नोपात्तस्तदेतन्न्यायेन षष्ठ्याः प्रथमात्वपरिणमनसंभावनयैव । अयमप्यनित्यः । 'तृतीयस्य पञ्चमे' ॥१।३।१॥ इत्यतोऽनुवर्तमानस्य तृतीयस्येति पदस्य पञ्चम्यन्तत्वेन परिणामसंभवेऽपि 'ततो ह्यचतुर्थ' ॥१।३।३॥ इत्यत्र तत इत्युक्तिदर्शनात् ॥ १४ ॥

अर्थवद्ग्रहणे नानर्थकस्य ॥ १५ ॥

अयमर्थः- अर्थवतः प्रत्ययस्य प्रकृतेर्वा ग्रहणे संभवति सति अनर्थकस्य ग्रहणं न कार्यम् । शब्दसारूप्यादुभयोर्ग्रहणे प्रसक्ते अर्थवत एव ग्रहणमनेन कार्यते । तत्र प्रत्ययस्य यथा-'तीयं ङित्कार्ये वा' ॥१।४।१४॥ इत्यत्र 'द्वेस्तीयः' ॥७।१।१६५॥ इत्यादिविहितसार्थकतीयस्य संभवे जातीयर्संबंध्यनर्थकतीयस्याग्रहणेन पटुजातीयायेत्यादौ 'तीयं ङित्कार्ये वा' इत्यनेन स्मायादयो न भवन्ति । प्रकृतेर्यथा-प्लीहानौ प्लीहानः इत्यादौ च हनो निरर्थकत्वात् 'इनहन्पूषार्यम्णः०' ॥५।४।८७॥ इत्यत्राग्रहणे 'नि दीर्घः' ॥१।४।८५॥ इत्यनेन दीर्घः सिद्ध्यति । ज्ञापकमस्य 'तृस्वसृनप्तृ०' ॥१।४।३८॥ इत्यत्र तृशब्दान्तानामपि नप्त्रादीनां पृथगुपादानम् । तद्धि नप्त्रादीनामौणादिकतृप्रत्ययान्तानामुणादयोऽव्युत्पन्नानि नामानीति न्यायादव्युत्पन्नसंज्ञाशब्दत्वेन तृशब्दस्यानर्थकत्वादनेन न्यायेन तृशब्देनाग्रहणं प्राप्स्यतीत्याशंकया कृतम् । यद्यस्य न्यायस्याभावस्तदा तृशब्देनैव नप्त्रा-

दीनां ग्रहणसंभवात् पृथगुपादानं निष्प्रयोजनमेव । अनित्यश्चायम् । अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति न्यायेन बाध्यत्वात् । अनित्यज्ञापकं तु ' संख्याडतेश्चाशक्तिष्टे कः ' ॥ ६ । ४ । १३० ॥ इत्यत्र डत्यन्तानां ' डत्यतु संख्यावत् ' ॥ १ । १ । ३९ ॥ इत्यन संख्यावत्करणात् संख्याशब्देन ग्रहणे सिद्धेऽपि पृथग् ग्रहणम् । तद्धि त्यन्तानां वर्जने डत्यन्तानामपि वर्जनं प्रसङ्क्ष्यतीत्याशंकया क्रियते । यदि नित्यत्वमस्य स्यात्तर्हि डतौ तेरनर्थकत्वेन त्यन्तवर्जने डत्यन्तवर्जनस्य प्रसङ्ग एव नास्तीति किमर्थं तच्छङ्कया डतिं पृथग् गृह्णीयात् ॥१५॥

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥१६॥

लक्ष्यतेऽनेनेति लक्षणं लिङ्गम्, तदाश्रित्योक्तो विधिरप्युपचाराल्लक्षणम्: पदं पदं प्रति उक्तः प्रतिपदोक्तः । अर्थात् यत्सामान्येन लिङ्गमात्रं निर्दिश्य विहितं तल्लक्षणं, यच्च नामग्राहं विहितं तत् प्रतिपदोक्तम्, तत्रोभयोर्ग्रहणे प्रसक्ते प्रतिपदोक्तमेव ग्राह्यं नतु लक्षणेन चरति लाक्षणिकमिति । यथा ' नोऽप्रशानोऽनुस्वारा० ' ॥ १ । ३ । ८ ॥ इत्यत्र लाक्षणिकनकारस्याग्रहणात् त्यन्तत्रेत्यादौ नस्य सो न । अत्र च नकारस्य वल्ल्यादिच्छन्नदेशे ककुदं दृष्ट्वा गवाऽत्र भाव्यमितिवत् तकारं पुरो दृष्ट्वा तकारस्यानुनासिकेन नकारेणात्र भाव्यमिति युक्त्या लक्षणाच्चिह्नादागतत्वेन लाक्षणिकत्वात् । प्रतिपदोक्तनस्य तु सः स्यादेव । यथा भवाँस्तत्र । अत्र नस्य ' नो नोऽन्त ' इति नकारमेवोक्त्वा विहितत्वेन प्रतिपदोक्तत्वम् । ज्ञापकमस्य ' एकार्थं चानेकं च ' ॥ ३ । १ । २२ ॥ इत्यनेनैव सिद्धे ' आसन्नादूरा० ' ॥ ३ । १ । २० ॥ इत्यादिप्रतिपदोक्तबहुव्रीहिविधानम् । तेन आसन्ना दश येषां ते आसन्नदशाः इत्यादावेव डः, नतु एकार्थमितिसूत्रनिष्पन्ने बहुव्रीहौ-प्रिया दश येषां ते प्रियदशानः इत्यादौ । अस्याप्यनित्यत्वम् । ' ह्रस्वस्य गुणः ' ॥ १ । ४ । ४१ ॥ इत्यत्र प्रतिपदोक्तवल्लाक्षणिकस्यापि ह्रस्वस्य ग्रहणात् । यथा हे कर्तः इत्यत्र ' णकतृचौ ' ॥ ५ । १ । ४८ ॥ इतिविहिततृरूपप्रतिपदोक्तह्रस्वस्य गुणस्तथैव ' निर्गतः कौशांब्यास्तत्संबुद्धौ हे निष्कौशांबे ' इत्यत्र ' गोश्चान्ते० ' ॥ २ । ४ । ९६ ॥ इत्यनेन ह्रस्व इति सामान्योक्त्या कौशांबीशब्दे ईकारं स्थानिनं दृष्ट्वा तस्य स्वकीय इकारः ह्रस्वः स्यादित्यनया युक्त्या लक्षणाच्चिह्नादेवागतत्वेन ह्रस्वस्य लाक्षणिकत्वेऽपि गुणः । अत्र च केचिदिममप्यर्थं स्वीकुर्वन्ति-लक्षणेन व्याकरणेन निष्पन्नं लाक्षणिकमव्युत्पन्नं प्रतिपदोक्तमिति । सोऽपि पूर्वोक्तव्याख्ययैव संगृह्यते ॥ १६ ॥

नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ १७ ॥

अयं भावः—नाममात्रनिर्देशे स्त्रीत्वादिलिङ्गविशिष्टमपि नाम गृह्यते । यथा ' त्यदादामेनदेतदो० ' ॥ २ । १ । ३३ ॥ इत्यत्र त्यदादामिति नाममात्रनिर्देशेन त्यदाद्यधिकारे सर्वत्र स्त्रीत्वादिविशिष्टानामपि त्यदादीनां ग्रहणम् । तेन सा

स्था इत्यादौ ' तः सौ सः ' ॥ २ । १ । ४२ ॥ इति से कर्तव्ये त्यदादेः सेश्च आपा व्यवधानं न । आपश्च स्त्रीलिङ्गवैशिष्ट्यजन्यत्वेन कार्ये कारणोपचारनीत्या स्त्रीलिङ्गवैशिष्ट्यमात्ररूपत्वविवक्षणात् । तथा च आपः एतन्न्यायेन त्यदादिनामग्रहणेनापि ग्रहणात् । ज्ञापकमस्य ' राजन् सखेः ' ॥ ७ । ३ । १०६ ॥ इत्यत्रराजन्निति नान्तनिर्देशः । स हि महती राज्ञी महाराज्ञीत्यत्र स्त्रीलिङ्गे अट्समासान्तनिषेधार्थं क्रियते । यदि न चेन्न्यायोऽयं राजसखेरिति निर्देशेन महाराज्ञीत्यत्र राज्ञीत्यस्य भिन्नशब्दत्वेन प्राप्तिरेव नेति कुतस्तन्निषेधार्थं नान्तनिर्देशः क्रियेत । अनित्योऽप्ययम् । तेन ' सर्वादिविष्वग्देवाडऽद्रिः० ' ॥३।२।१२२॥ इति डद्रिर्विषूचीशब्दान्न भवति । अन्यथा विषूचश्चड् इत्यनिष्टमेव रूपं स्यात् । शब्दभेदादर्थभेदाच्चाप्राप्तस्य ग्रहणस्य प्रापणार्थोऽयं न्यायः । एवमुत्तरोऽपि ॥१७॥

प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम् ॥ १८ ॥

यस्माच्छब्दाद् यः प्रत्ययो विधीयते सा तस्य प्रकृतिः, सा चात्र सामर्थ्याद् धातुरूपैव, यङ्लुबन्तत्वस्यान्यत्रासंभवात् । एवमुत्तरत्रापि । यस्य धातोः केवलस्य यत्कार्यमुक्तं तत्तस्य यङ्लुबन्तस्यापि स्यात् । तेन प्रणिदत्ते इत्यत्र केवले दाग्गि परे यथा ' नेर्ङ्मादा० ' ॥ २ । ३ । ७९ ॥ इत्यनेन णत्वं तथा प्रणिदादेति इति यङ्लुबन्तेऽपि । ज्ञापकमस्य ' एकस्वरादनुस्वारेतः ' ॥४।४।५६॥ इति बृहत्सूत्ररचनम् । तथाहि अनुस्वारेतस्तावद् कृगादिधातवः, ते च सर्वेऽप्येकस्वरा एव, न त्वनेकस्वरः कश्चिदपीति एकस्वरादित्यस्य व्यवच्छेद्याभावात् कर्तेत्यादाविड्निषेधार्थम् ' अनुस्वारेतः ' इत्येतावतैव सूत्रेण भाव्यम् । न चैतावत्येव सूत्रे अवधीदित्यत्रापीड्निषेधः प्रसज्येतेति बृहत्सूत्ररचनमावश्यकमेवेति वाच्यम् । तत्रेड्निषेधनिवृत्त्यर्थमवधानुस्वारेत इत्येव सूत्रेऽपि सुनिर्वाहात् । सत्येप्येवं बृहत्सूत्ररचनमिदं तदैव सार्थकं स्याद्यदि न केवलमेक एव हनादेशवधधातुरदन्तत्वादनेकस्वरः स्थानिवद्भावाच्चानुस्वारेत् संभवति, किन्त्वन्येऽपि बहवो धातवोऽनेकस्वरानुस्वारेतः संभवन्ति । तादृशाश्च बहवो धातवस्तदैव संभवेयुर्यदि कृगादीन् यङ्लुबन्तोकृत्यैष न्यायः स्फोर्यते । तद्यथा–कृधातुर्यङ्लुबन्तत्वे चर्कृ इत्यादिरूपत्वादनेकस्वर एतन्न्यायस्फोरणादनुस्वारेच्चेति । ततश्च चर्कर्तीत्यादावबधोदित्यादावपि चेड्निषेधनिवृत्त्यर्थमेवं बृहत्सूत्रं कर्तव्यमेव । अनित्यश्चायमग्रेतनन्यायेन बाध्यमानत्वात् ॥१८॥

तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च ॥
एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि ॥१९॥

निर्दिष्टमित्यस्य प्रत्येकं संबन्धात् तिवादिनिर्दिष्टमेकस्वरशब्दमुख्यार्थं च विहितं कार्यं विवक्षितधातोर्यङ्लुपि न । पूर्वेणातिप्रसङ्गे निषेधार्थोऽयं न्यायः । तत्र तिवा निर्दिष्टं द्वेधा । अलुप्तेन लुप्तेन च । अलुप्तेन यथा–' न कवतेर्यङः ' ॥ ४ । १ । ४७ ॥ इति कस्य चत्वनिषेधः । अयं कोकूयते इत्यादौ स्यान्नतु

श्लोकवीतीत्यादौ । लुप्तेन यथा-ङेः पिबः पीप्य् ' ॥ ४ । १ ।३३ ॥ इति पीप्यादेशः केवलस्यैव पिबतेः अपोप्यदित्यत्र स्यान्नतु यङ्लुपि अपापयदित्यत्र । शवा निर्दिष्टं यथा-' निसस्तपेऽनासेवायाम् ' ॥ २।३।३५ ॥ इति षत्वं निष्टपतीत्यादौ एव स्यान्न तु निस्तातपीतीत्यादौ । अनुबन्धेन निर्दिष्टं यथा-' गापास्थासादामाहाकः ' ॥ ४।३।९६ ॥ इति षत्वम् । इदं हेयादित्यत्रैव स्यान्न तु जहायादित्यादौ । गणेन निर्दिष्टं त्रिधा-संख्यया आदिशब्देन बहुवचनेन च । तत्र संख्यया यथा-' रुत्पञ्चकाच्छिदयः ' ॥ ४।४।८८ ॥ इति । अयं स्वपितीत्यादौ एव स्यान्नतु सोषोत्तीत्यादौ । आदिशब्देन यथा-' लुदिद्द्युतादिपुष्यादेः परस्मै ' ॥ ३।४।६४ ॥ इत्यङ् । अयमद्युतदित्यादावेव स्यान्न तु अदेद्योतीत्यादौ । बहुवचनेन यथा-' तेर्ग्रहादिभ्यः ' ॥ ४।४।३३५ ॥ इत्यनेन ग्रहादिभ्यः परस्याशितस्तिप्रत्ययस्यादौ ' स्ताद्याशित० ' इत्यनेन प्राप्तस्य इटो अनुज्ञाविधिः । स च भणितिः इत्यादावेव नतु बभ्राणिरित्यादौ । एकस्वरनिमित्तं यथा-' एकस्वरादनुस्वारेतः ' ॥ ४।४।५६ ॥ इतीड्निषेधः । अयं शक्त इत्यादावेव न तु शाशकित इत्यादौ । ज्ञापकमस्य तत्तत्सूत्रेषु तत्तन्निर्देशा एव । अनित्यत्वमस्य आद्ये पञ्चमे चांशे न दृश्यते शेषेषु तु दृश्यते । तत्र द्वितीयेंऽशे-' पिबेतिदाभूस्थः० ॥ ४।३।६६ ॥ इति सिचो लुबिण्निषेधश्च शवनिर्दिष्टोऽपि अपात् इत्यादाविव अपापादित्यत्रापि भवति । तृतीयेंऽशे-' डीयश्व्यैदितः० ' ॥ ४।४।६१ ॥ इतीड्निषेधस्यानुबन्धनिर्दिष्टत्वेऽपि नृत्त इत्यादाविव नरीनृत्त इत्याद्यपि प्रवृत्तिः । चतुर्थेंऽशे-' स्पृशादिसृपां वा ' इत्यदागमस्य गणनिर्दिष्टत्वेऽपि स्प्रष्टा इत्यादाविव यङ्लुपि पर्स्पर्ष्टीत्यादावपि दर्शनमस्यानित्यत्वे बीजम् ॥१९॥

सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥२०॥

अयमर्थः- सन्निपतति सङ्गच्छते कार्यमस्मिन्निति सन्निपातो निमित्तम् । निमित्तरूपमव्यभिचारि चिन्हं दृष्ट्वा निर्णीतप्रवृत्तिकः स्वनिमित्तादुद्भूत इति यावत् । स विधिस्तस्य स्वनिमित्तस्य विघाते निमित्तं न । यथा-पपाच इत्यत्र णवा जातमनेकस्वरत्वं ' धातोरनेकस्वरादाम्० ' ॥ ३।४ ४६ ॥ इत्यामादेशनिष्पादनेन णवो विघातकं न स्यात् । ज्ञापकमस्य धातोरनेकस्वरादित्यत्र सामान्येनानेकस्वरादित्युक्तिः । तथाहि-धातोरनेकस्वरत्वं तावद् द्वेधा । परोक्षाहेतुकमन्यच्च । आद्यं पचादीनामन्यच्च चकासादीनाम् । तत्र द्वितीये धातोरनेकस्वरादित्यामो देशो दृश्यते यथा चकासामास । आद्ये तु न यथा पपाच । एवं सत्यपि सूत्रेऽनेकस्वरादिति सामान्येनैव यदुक्तं तदेतन्न्यायाशयैव । अनित्यश्चायम् । अतिजरसैरित्यत्र अदन्तत्वेन निष्पन्नस्यापि ऐसादेशस्य जरसादेशहेतुभवनेन स्वनिमित्तादन्तत्वविघातत्वात् । अनित्यत्वे लिङ्गं तु ' भिस ऐस् ' ॥ १।४।२ ॥ इत्यत्र एस्करणेनापि देवैरित्यादीनां सिद्धौ ऐस्करणम् । तद्धि अतिजरसैरित्यर्थमेव कृतं विभाव्यते ॥२०॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ २१ ॥

यत्प्रकृत्याश्रितं, पूर्वं वा व्यवस्थितम्, अल्पनिमित्तं वा तदन्तरङ्गम्; यच्च प्रत्ययाश्रितम्, बहिर्वा व्यवस्थितं बहुनिमित्तं वा तद् बहिरङ्गम्। अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गममसिद्धमसदिव स्यात्। यथा, गिर्योरित्यादौ प्रत्ययाश्रितत्वेन बहिर्व्यवस्थितत्वेन वा बहिरङ्गस्य यत्वस्य प्रकृत्याश्रितत्वेन पूर्वं व्यवस्थितत्वेन वा अन्तरङ्गे 'भ्वादेर्नामिनो०' ॥ २।१।६३ ॥ इति दीर्घे कर्तव्ये असिद्धत्वान्न दीर्घः। ज्ञापकमस्य 'न सन्धिडी०' ॥ ७।४।१११ ॥ इत्यत्र सन्धिविधित्वेन द्वित्वविधावपि स्थानिवद्भावनिषेधस्य सिद्धौ द्विग्रहणम्। तद्धि दद्धयत्रेत्यादौ धस्य 'अदीर्घाद्विरामैकव्यञ्जने' ॥ १।३।३२ ॥ इति द्वित्वे क्रियमाणे 'स्वरस्य परे प्राग्विधौ' ॥ ७।४।११० ॥ इत्यनेन यत्वादेः प्राप्तस्थानिवद्भावस्य सन्धिविधित्वेन निषेधे कृतेऽपि पुनरनेन न्यायेनासिद्धत्वद्वारेण प्राप्तस्थानिवद्भावनिषेधार्थं कृतम्। अस्य न्यायस्यासत्त्वे तु स्थानिवद्भावनिषेधस्य सन्धिविधित्वेनैव सिद्धत्वात् द्विग्रहणं व्यर्थमेव स्यात्। अनित्यश्चायमुत्तरेण बाध्यमानत्वात् ॥२१॥

न स्वरानन्तर्ये ॥ २२ ॥

स्वरयोरानन्तर्ये सति अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गमसिद्धं न। पूर्वेण प्राप्तेऽतिप्रसङ्गे निषेधार्थोऽयं न्यायः। यथा इयेषेत्यादौ बहिर्व्यवस्थितत्वेन बहिरङ्गोऽपि इष्धातोर्गुणः, पूर्वव्यवस्थितत्वेनान्तरङ्गे 'पूर्वस्यास्वे स्वरे य्वोरियुव्' ॥ ४।१।३७ ॥ इतीयादेशे कर्तव्ये नासिद्धः स्वरयोरानन्तर्यसद्भावात्। ज्ञापकमस्य 'वृत्र्यन्तोऽसषे' ॥ १।१।२५ ॥ इति निर्देश एव। स्वरयोरानन्तर्येऽपि पूर्वन्यायेन बहिरङ्गासिद्धत्वं स्यात्तत्रैव वृत्र्यन्तशब्दाग्रस्थस्य से रोः 'अतोऽति रोरुः' ॥ १।३।२० ॥ इत्यनेन कृतस्योत्वस्य पदान्तरस्थाकारसापेक्षत्वेन बहिरङ्गत्वाद् 'अवर्णस्येषर्णादिनै०' ॥ १।२।६ ॥ इत्यनेन प्राक्स्थिताकारेण सह ओत्वे पकपदापेक्षत्वेनान्तरङ्गे कर्तव्ये असिद्धत्वेन 'वृत्र्यन्तोऽसषे' इति निर्देशो नैव संभवेत्। अनित्यत्वमस्य तु न ज्ञायते ॥ २२ ॥

गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ २३ ॥

मुख्यस्य बलिष्ठत्वमनेन सूत्र्यते। यथा 'चरणस्य स्थेणोऽद्यतन्यामनुवादे' ॥ ३।१।१३८ ॥ इति सूत्रे स्थेणोर्मुख्यकर्तुश्चरणस्येति व्याख्यातम्। संबन्धहेतूनां कारकाणां षट्संख्यत्वेन स्थेणोः करणादित्वेनापि संबन्धित्वं चरणानां संभवत्यपि 'चरणस्य स्थेणः०' इति सूत्रवृत्तौ स्थेणोः कर्तृत्वेन संबन्धिनो ये चरणा इति यद् व्याख्यातं तत्कर्तुरेव स्वातन्त्र्यात् सर्वकारकेषु मुख्यत्वेनैतन्न्यायात्कर्तुरेव व्याख्यात्र प्राप्नोतीति बुद्ध्या। अपिच कर्तृत्वेन संबन्धे सत्यपि कर्ता गौणो मुख्यश्च संभवतीति असान्न्यायान्मुख्यत्वभाजा कर्त्रा सह संबन्ध एव समाहारः स्यान्न तु गौणत्वभाजा कर्त्रा सह संबन्धे। अस्य ज्ञापकं 'चरणस्य स्थेणः०' इति सामान्येनोक्तिरेव। स्थेणोर्मुख्यकर्तुश्चरणस्येतीष्टेऽपि यत्तथैव नोक्तमित्येत-

न्याशयेनैव । अस्य न्यायस्य सत्त्व एव चरणानां कर्तृत्वं कर्तृत्वेऽपि मुख्यत्वं च लभ्यते नान्यथा । अस्यानित्यत्वम् । 'धातोरिवर्णोवर्णस्य०' ॥ २।१।५०॥ इत्यनेन शिश्रियुः, लुलुधुरित्यादौ मुख्यधातूनामिव नियौ, लुवौ इत्यादौ गौणानामपि इयुवोः कृतत्वात् । अनित्यत्वे ज्ञापकं तु 'स्यादौ वः' ॥ २।१।५७॥ इति सूत्रम् । तद्धि वसु इच्छतः-क्यनि वसूयतः, ततः क्विपि-वस्वौ-इत्यादौ इवर्णादेरस्वे०' ॥१।२।२१॥ इत्यनेन सिद्धेऽपि वत्वे वार्णात्प्राकृतमिति न्यायात्परत्वाच्च तद् वत्वं बाधित्वा धातोरिवर्णेत्युवेव प्राप्स्यतीति तद्बाधनार्थं कृतम् । नित्यत्वे त्वस्य वस्वौ इत्यादीनां गौणधातुत्वेन धातोरिवर्णेत्यस्य प्राप्तिरेव नेति किमर्थं तद्बाधनार्थमिदमारभ्येत । अस्यैव न्यायस्य प्रपञ्चीभूतौ 'प्रधानानुयायिनो व्यवहाराः' 'प्रधानानुयाय्यप्रधानम्' इतीमौ न्यायावित्यन्यत्र विस्तरः ॥२३॥

कृत्रिमाकृत्रिमयोः कृत्रिमे ॥ २४ ॥

कार्यसंप्रत्यय इति संबन्धः । कृत्रिमं परिभाषानिष्पन्नं तच्च गौणमौपाधिकत्वात् । ततोऽन्यदकृत्रिमं लोकप्रसिद्धं तच्च मुख्यमनौपाधिकत्वात् । तयोर्मध्ये कृत्रिमे कार्यं कर्तव्यम् । पूर्वेणाकृत्रिमस्य ग्रहणे प्राप्ते तदपवादोऽयं न्यायः । यथा 'असहनञ्विद्यमानपूर्वपदात्०' ॥ २।४।३८ ॥ इत्यत्र—

'अविकारोऽद्रवं मूर्त्तं प्राणिस्थं स्वाङ्गमुच्यते ।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु' ॥—

इतिपरिभाषानिष्पन्नं कृत्रिममेव स्वाङ्गं गृह्यते न तु स्वमङ्गमवयव इति यौगिकमकृत्रिमम् । तेन दीर्घमुखा शालेत्यत्र मुखस्य शालापेक्षया लोकप्रसिद्धस्वाङ्गत्वे सत्यपि अप्राणिस्थत्वेन पारिभाषिकस्वाङ्गत्वाभावान्न ङीः । ज्ञापकमस्य 'आङो यमहनः स्वेऽङ्गे च' ॥ ३।३।८६ ॥ इत्यत्र स्वाङ्गशब्दयोर्व्यस्ताभिधानम् । इदं ह्यायच्छति पादौ मैत्रस्येत्यादावविकारो द्रवमित्यादिस्वाङ्गलक्षणे सत्यपि पदयोः स्वकीयत्वाभावात् आत्मनेपदं मा भूदित्येवमर्थम् । स्वाङ्ग इति समस्ताभिधानेत्वत्रापि स्वाङ्गलक्षणसद्भावादेतन्न्यायबलादात्मनेपदमभविष्यदेव । अस्यानित्यत्वमुत्तरत्र ज्ञापयिष्यते ॥२४॥

क्वचिदुभयगतिः ॥ २५ ॥

अयमर्थः—क्वचित् कृत्रिममकृत्रिमं चेत्युभयं गृह्यते । पूर्वन्यायापवादोऽयम् । तेन 'नाडीतन्त्रीभ्यां स्वाङ्गे' ॥ ७।३।१८० ॥ इत्यत्र बहुनाडिः कायो बहुतन्त्री ग्रीवेति कृत्रिमस्वाङ्गवृत्त्योर्नाडीतन्त्रीशब्दयोर्यथा कञ्निषेधस्तथा अकृत्रिमस्वाङ्गवृत्त्योर्बहुनाडिः स्तम्बो बहुतन्त्री वीणेत्यनयोरपि । ज्ञापकमस्य तत्तत्प्रयोगदर्शनमेव । अनित्यश्चायं पूर्वश्च । कृत्रिमाकृत्रिमयोः अकृत्रिमस्यैव केवलस्य क्वापि ग्रहणदर्शनात् । यथा 'शिरोऽधसः पदे समासैक्ये' ॥ २।३।४ ॥ इत्यत्र पारिभाषिकं विभक्त्यन्तं पदं व्युदस्याकृत्रिमं पदशब्दरूपमेव पदं गृह्यते । यथा शिरस्पदम्, अधस्पदमिति ॥२५॥

सिद्धे सत्यारंभो नियमार्थः ॥२६॥

स्पष्टोऽर्थः। यथा दण्डीत्यादौ 'नि दीर्घः' ॥ १।४।८५ ॥ इति सिद्धेऽपि दीर्घे 'इनहन्पूष०' ॥ १।४।८७ ॥ इति सूत्रारंभ इनादीनां शिस्योरेव दीर्घो नान्यघुटीति नियमार्थं एव। तेन दण्डिनावित्यादौ नि दीर्घे इत्यनेनापि न दीर्घः। नैरर्थक्याशंकानिरासार्थोऽयं न्यायः। ज्ञापकमस्य पुनः सूत्रारंभ एव। अस्याप्यनित्यत्वम्। तेन पूजार्हं इत्यादौ 'लिहादिभ्यः' ॥ ५।१।५० ॥ इत्यनेनाचि सिद्धेऽपि 'अर्हेऽच्' ॥ ५।१।९१ ॥ इत्यादिषट्सूत्र्यारंभस्य लिहादिप्रपञ्चार्थत्वमेव न तु नियमार्थत्वम् ॥ २६ ॥

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् ॥२७॥

यत्कार्यं धातोः स्वरूपमुच्चार्यं प्रत्यये परे सत्युक्तं तत् तत्प्रत्यये इति कोऽर्थः सर्वं वाक्यं सावधारणमिति न्यायेन तस्य धातोरेव संबन्धिनि विवक्षितप्रत्यये पुरःस्थे सति स्याद्न तु नाम्नोऽपि संबन्धिनि। तेन दुष्यन्तं प्रयुङ्क्ते दूषयतीत्यत्र यथा 'ऊद् दुषो णौ' ॥ ४।२।४० ॥ इत्यनेन उत ऊर्भवति तथा दोषणं दुट्, क्विप्, तां करोति 'णिज् बहुलं०' ॥ ३।४।४२ ॥ इति णिजि दुषयतीत्यत्र न भवति। कुत इति चेत् अत्र क्विबन्तस्य दुषः क्विबन्ता धातुत्वं नोज्झन्तीति न्यायेन धातुत्वनामत्वोभयवत्त्वात् तदग्रे विहितस्य णिजोऽपि धातुसंबन्धित्वनामसंबन्धित्वोभयोर्दर्शनात्। ज्ञापकमस्य दूषयतीत्यादौ धातुसंबन्धिनि प्रत्यये धातोरुत ऊत्वं दृश्यते न तु दुषयतीत्यादौ नामसंबन्धिनि प्रत्यये नाम्नस्तथापि 'ऊद् दुषो णा' वित्यादौ विशेषणानुक्तिरेव। अनित्यत्वमस्य न ज्ञायते ॥२७॥

नञुक्तं तत्सदृशे ॥२८॥

अयमर्थः—नञा उक्तं पदं-यत्पदं नञा योगान्निषिध्यते तत् सदृशमेव ग्राह्यं नतु असदृशम्। यथा 'व्यक्ये' ॥ १।२।२५ ॥ इत्यत्र क्यप्रत्ययेन नञुक्तपदेन क्यसदृशस्य यकारादेरपि प्रत्ययत्वनियमनाद् गां नावं वेच्छति क्यनि गव्यति नाव्यतीत्यादौ अवावौ स्यातां न तु गोयानं नौयानमित्यादौ। ज्ञापकमस्य प्राग्वत्। अनित्यश्चायम्। पर्युदासे प्रवृत्तेरिव प्रसज्ये प्रवृत्त्यदर्शनात्। अतएवोक्तं—'पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्' इति। ततश्च 'अनतो लुप्' इत्यत्र प्रसज्यनञ्सद्भावेन अकारस्य नञुक्तत्वेऽपि अकारसदृशस्वरस्यैव केवलस्य ग्रहणं न किंतु विसदृशसर्वस्वराणां व्यञ्जनानां च। तेन पय इत्यादौ व्यञ्जनान्तादपि स्यमोर्लुप् सिद्धा। एवं च निषेधमात्रपर्यवसायिनः प्रसज्यनञः विरुद्धोऽयं न्यायः ॥२८॥

उक्तार्थानामप्रयोगः ॥ २९ ॥

येषां अर्थः अन्यैः प्रत्ययाद्यैरुक्तस्तेषां द्वितीयादिविभक्त्यादीनां प्रयोगो न कार्यः। यथा क्रियते कटोऽनेनेत्यादौ कर्मादिषु उत्पन्नैः आत्मनेपदाद्यैः एव कर्मादयः उक्ताः इति पुनस्तद्दर्शनार्थं द्वितीयादि न स्यात् ततश्च परिशिष्टेऽर्थमात्रे

प्रथमैव । ज्ञापकमस्य 'रवृवर्णात्०' ॥ २।३।६३ ॥ इत्यत्र एकशब्दस्य नियमार्थत्वम् । तद्धि 'विधिनियमयोः संभवतोर्विधिरेव ज्यायानि'ति न्यायात् विध्यर्थे बाधकमुद्भाव्यैव कर्तुं शक्यते नान्यथा । तद्बाधकं च यथा-यद्यत्रैकशब्दस्य एकत्वमात्ररूपो विध्यर्थः स्यात्तर्हि 'ह्रस्वोऽपदे वा' ॥ १।२।२२ ॥ इत्यत्रैव एकवचनेनैव एकत्वं बोधितमित्युक्तार्थत्वेन एतन्न्यायात् तस्य प्रयोगो न युक्त इति नात्र विध्यर्थः संभवतीति । अत एवैकशब्दस्य नियमार्थत्वं विज्ञायते नियमश्चायम्-एकमेव यन्नित्यं पदं तत्रैव नृणामित्यादौ णत्वं स्यान्नतु यद् एकमनेकं च तत्र-नृनाथ इत्यादौ । अस्याप्यनित्यत्वम् । 'शिरोधसः पदे समासैक्ये' ॥ २।३।४ ॥ इत्यत्र ऐक्यशब्दप्रयोगात् । अस्य नित्यत्वे 'समासे' इत्येकवचनेनाप्यैक्यस्योक्तत्वे पुनरैक्यशब्दाप्रयोग एव युज्येत । अस्माद् ऐक्यशब्दप्रयोगात् 'विचित्रा सूत्राणां कृतिरि'त्यपि न्यायः स्फोर्यते कैश्चित् । वैचित्र्यमेतदेव यदुक्तार्थानामपि प्रयोगः ॥२९॥

निमित्ताभावे नैमित्तिकस्याप्यभावः ॥३०॥

निमित्तस्य निवृत्तौ निमित्तेन चरति नैमित्तिकं तस्येति-निमित्ताज्जातस्यापि कार्यस्य निवृत्तिरित्यर्थः । यथा बिम्बशब्दाद् वलिविशेषनामत्वविवक्षायां स्त्रीत्वे गौरादित्वाट् ङ्यां बिम्बाकारस्य च लुकि बिम्बी ततश्च बिम्ब्याः फलं बिम्बमित्यत्र हेमादित्वादञि 'फले' ॥ ६।२।५८ ॥ इति तल्लुपि 'ङ्यादेर्गौणस्य०' ॥ २।४।९५ ॥ इत्यादिना निमित्तरूपङीनिवृत्तौ 'अस्य ङ्यां लुक्' ॥ २।४।८६ ॥ इति नैमित्तिकस्याल्लुकोऽपि निवृत्तेः पुनरकारस्य दर्शनम् । ज्ञापकमस्य 'न सन्धि०' ॥ ७।४।१११ ॥ इति सूत्रे लुकोऽल्लुकि कार्ये स्थानिवद्भावनिषेधनम् । तद्धि बिम्बमित्यादिसिद्ध्यर्थमेव । एतन्न्यायाभावे बिम्बमित्यादावकारस्य ङीसद्भावसमय एव लुप्तत्वेनाविद्यमानत्वमेवेत्यल्लुको वारणार्थं तदनावश्यकमेव । लोके कुंभकारविनाशेऽपि घटस्य दर्शनात् कारणनिवृत्तौ कार्यनिवृत्तेरभावेऽपि व्याकरणे तद्भावख्यापनार्थोऽयं न्यायः। अनित्योऽयम् । मुनीनामित्यादौ 'दीर्घो नाम्यतिसृ०' ॥१।४।४७॥ इति दीर्घे कृते ह्रस्वरूपनिमित्तनाशेऽपि ह्रस्वाज्जातत्वेन नैमित्तिकस्य नामो नाशादर्शनात् । अनित्यत्वे ज्ञापकं तु 'ह्रादर्हस्वरस्यानु०' ॥ १।३।३१ ॥ इत्यत्र अनुग्रहणम् । तद्धि प्रोर्णुनावेत्यत्र प्रथममन्तरङ्गत्वाद् ऊर्नुतोर्नस्य द्वैरूप्ये कृते पश्चात् परोक्षाहेतुकत्वेन बहिरङ्गस्य द्वित्वस्य भवने प्रोर्णुनावेत्यनिष्टं मा भूदित्येतदर्थं कृतम् । न्यायस्यास्य नित्यत्वे रेफानन्तर्यजस्य नस्य कृतमपि द्वैरूप्यं द्विर्वचनकरणे रेफस्य णुव्यवधानभवनेन न्यायादस्मादेव निवर्त्स्यतीत्यनिष्टरूपापत्तिभियाऽनुग्रहणं कुतः क्रियेत ॥३०॥

सन्नियोगशिष्टानामेकापायेऽन्यतरस्याप्यपायः ॥३१॥

कोऽर्थः—सन्नियोगशिष्टानां-सह कथितानां कार्याणामेकस्य अपाये-अभावे अन्यतरस्याप्यपायः-अपरमपि न भवतीति । लोके युग्मजभ्रात्रादीनामेकस्याभावे

इतरस्य भावोऽपि दृश्यते लक्षणे तु न तथेति ज्ञापनार्थोऽयं न्यायः। अभवनं च द्वेधा। भूत्वा निवर्त्तनं मूलतोऽप्यभवनं च। तत्राद्यं यथा–पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः इत्यत्र 'देवता' ॥ ६।२।१०१ ॥ इत्यणि 'द्विगोरनपत्ये०' ॥ ६।१।२४ ॥ इति तल्लुपि 'ङ्यादेर्गौणस्य०' ॥ २।४।९५ ॥ इत्यनेन ङीनिवृत्तौ तत्सन्नियोगशिष्ट आनपि निवृत्तः। द्वितीयं यथा–एतान् गाः पश्येत्यत्र गोरोतः शसोऽता सह 'आ अम्शसोऽता' ॥ १।४।७५ ॥ इत्यात्वे कृते शसोऽकारस्याभावात् 'शसोऽता सश्च नः पुंसि' ॥ १।४।४९ ॥ इति दीर्घाभावे तत्सन्नियोगशिष्टं नत्वमपि न। ज्ञापकमस्य पञ्चेन्द्र इत्यादावान्निवर्तनाय एतान् गाः पश्येत्यादौ नत्वधारणाय च यत्नाकरणमेव। अनित्यश्चायम्। अनेन न्यायेन यदृच्छयाऽन्यतरस्याभावे इतरदपि निवर्तत इति प्रसक्ते सति गौणनिवृत्तौ मुख्यनिवृत्तिरिति पक्षस्योत्तरेण निषेत्स्यमानत्वात् ॥३१॥

नान्वाचीयमाननिवृत्तौ प्रधानस्य ॥३२॥

अयंभावः—अनु–पश्चात्प्राधान्येन आचीयमानस्य मील्यमानस्य कार्यस्याभावे प्राधान्येन विहितस्य कार्यस्याभावो न स्यात्। किन्तु मुख्यस्याभावे गौणस्याप्यभाव इत्येव। पूर्वेण यदृच्छायां प्राप्तायां नियमार्थोऽयं न्यायः। यथा बुद्धीरित्यादौ पुंस्त्वाभावात् 'शसोऽता०' इत्यनेन नत्वाभावेऽपि प्रधानतयोक्तत्वाद्दीर्घः स्यादेव। ज्ञापकमस्य 'शसोऽता०' इत्यत्रैव नत्वविधेः सश्च न इत्यन्वाचयार्थेन चेन निर्देशः। यतो गौणत्वेन समुच्चयस्तावदन्वाचय उच्यते। गौणत्वस्य चैतावानेव विशेषो यद् गौणस्य निवृत्तौ मुख्यं न निवर्तत इति। अनित्यत्वमस्य न दृश्यते ॥ ३२ ॥

निरनुबन्धग्रहणे न सानुबन्धस्य ॥३३॥

निरनुबन्धं कञ्चन शब्दं सूत्रे उच्चार्य यत्कार्यं विहितं तत् तस्य निरनुबन्धस्य ग्रहणे संभवति सानुबन्धस्य नेत्यर्थः। अविशेषोक्त्या उभयोर्ग्रहणे प्राप्ते तदपवादोऽयं न्यायः। यथा 'येऽवर्णे' ॥ ३।२।१०० ॥ इत्यनेन 'तस्मै हिते' ॥ ७।१।३५ ॥ इत्यादिविहिते निरनुबन्धे एव यप्रत्यये नासिकायै हितं नस्यमित्यादावेव नासिकाया नसादेशः स्यान्नतु 'सुपन्थ्यादेर्ण्यः' ॥ ६।२।८४ ॥ इत्यनेन विहिते ण्ये-नासिक्यं नगरमित्यादौ सानुबन्धयप्रत्यये। ज्ञापकमस्य 'न यि तद्धिते' इत्यत्र ये इत्यकरणम्। तथा कृते तादृशनिरनुबन्धयप्रत्ययस्य संभवात् सानुबन्धयप्रत्ययस्य ग्रहणमेतन्न्यायसत्त्वात् कर्तुं नैव शक्यते। य् इति व्यंजनमात्रोपादाने तु तादृशस्य कस्यापि प्रत्ययस्यासंभवात् एतन्न्यायाप्रवृत्तेरुभयोरपि निरनुबन्धसानुबन्धकयोर्ग्रहणं कर्तुं शक्यत इत्याशयेन सूत्रे यि इति निर्देशः। 'निरनुबन्धग्रहणे सामान्येन ग्रहणमि'त्यस्यापि न्यायस्य विद्यमानत्वादनित्योऽयम् ॥३३॥

एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य ॥३४॥

कोऽर्थः। सूत्रोक्तस्यैकानुबन्धशब्दस्य ग्रहणे संभवति तत्सूत्रकार्यं द्व्यनुबन्ध-

कस्योपलक्षणत्वाद्व्यनुबन्धकस्य च न भवति । सूत्रोक्तैकानुबन्धे शब्दे योऽनुबन्धोऽस्ति तस्य द्व्याद्यनुबन्धकेऽपि सद्भावात् तस्यापि ग्रहणे प्रसक्ते प्रतिषेधार्थोऽयं न्यायः । यथा ' व्यक्ये ' ॥ १ । २ । २५ ॥ इत्यत्र एकानुबन्धक्यस्य वर्जनात् द्व्यनुबन्धके क्यनि क्यङि च अवावौ स्यातामेव । तेन गव्यति गव्यते नाव्यति नाव्यत इत्यादि सिद्धम् । ज्ञापकमस्य ' दीर्घश्विवयङ्यक्ये ' ॥ ४ । ३ । १०८ ॥ इत्यत्र क्येष्विति बहुवचनम् । तद्धि क्यक्यनक्यङ्क्यङाम्विशेषेण ग्रहणार्थम् । एतन्न्यायाभावे जातिविवक्षायामेकवचनेनापि सर्वेषां ग्रहणमायास्यतीति बहुवचननिर्देशः किमर्थः । अस्याप्यनित्यत्वम् । ' आपो ङितां यै यास् यास् याम् ' ॥ १ । ४ । १७ ॥ इत्यत्र आप इव डापोऽपि ग्रहणात् । तेन मालायै इत्यादिवत् सीमन्शब्दाद् अपि सीमायै इत्यादयपि सिद्धम् ॥ ३४ ॥

नानुबन्धकृतान्यसारूप्यानेकस्वरत्वानेकवर्णत्वादीनि ॥३५॥

अनुबन्धकृतं मिथो विसदृशरूपमसारूप्यम् अनेकस्वरत्वम् अनेकवर्णत्वं च न स्यात् । लक्षणे क्वचिदपि निषेधाभावात् प्रामान्यसारूप्यादीन्यनेन निषिद्ध्यन्ते । असारूप्यं यथा–अणो डेनासरूपत्वाभावात् ' आतोऽज्झा० ' ॥ ५ । १ ।७६ ॥ इति ङविषये ' कर्मणोऽण् ' ॥ ५ । १ । ७२ ॥ इति प्राप्तः अण् ' असरूपोऽपवादे० ' ॥ ५ । १ । १६ ॥ इत्यनेनानुमतत्वान्न भवति । अन्यथा गोदाय इत्यनिष्टं स्यात् । ज्ञापकमस्य ' कृवृषिमृजिशंसिगुहिदुहिजपो वा ' ॥ ५।१।४२ ॥ इति क्यपो विकल्पनम् । तद्धि पक्षे ' ऋवर्णव्यञ्जनाद् घ्यण् ' ॥ ५।१।१७ ॥ इत्यौत्सर्गिकघ्यणर्थम् । एतन्न्यायाभावेऽनुबन्धेन क्यचोऽसरूपत्वात् 'असरूपोपवादे०' इत्यनेनैव पक्षे घ्यण् सेत्स्यतीति किमर्थं तत्कुर्यात् । अनेकस्वरत्वं यथा–धातुपाठे ' डुपचींष् ' इति पठितस्यापि पच्धातोरनुबन्धवशादनेकस्वरत्वाभावेन पपाचेति परीक्षायाम् ' धातोरनेकस्वरात्० ' ॥ ३।४।४६ ॥ इत्याम् न । ज्ञापकमस्य ' निन्दहिंसक्लिशखाद० ' ॥ ५।२।६८ ॥ इति सूत्रे निन्दादिग्रहणम् । यदि ह्यनुबन्धकृतमनेकस्वरत्वं स्यात्तर्हि धातुपाठे ' णिदु कुत्सायाम्, हिसु हिंसायाम् ' इत्यादिपाठात् अनेकस्वरत्वेन धातोरनेकस्वरादित्यनेनैवाम् सेत्स्यतीति कुतस्तेषामाम्विधानाय पृथग्ग्रहणं क्रियेत । अनेकवर्णत्वं यथा–' वन्याङ्पञ्चमस्य ' ॥ ४।२।६५ ॥ इत्याङादेशस्य ङित्वेन वर्णद्वयभवनेऽपि अनुबन्धकृतानेकवर्णवत्त्वाभावाद् घुणि भ्रमणे इत्यस्मात् ' मन्वन्क्वनिप्विच् क्वचित् ' ॥ ५।१।१४७ ॥ इति वनि घ्वावा इत्यत्र ' षष्ठ्यान्त्यस्य ' ॥ ७।४।१०६ ॥ इति पञ्चममात्रस्यैवाङादेशो नतु ' अनेकवर्णः सर्वत्र ' ॥७।४।१०७॥ इति सर्वादेशः । ज्ञापकमस्य करीषस्येव गन्धोऽस्य करीषगन्धिः, तस्यापत्यं स्त्री कारीषगन्ध्या, तस्याः पुत्रः कारीषगन्धीपुत्रः इत्यत्र ष्याया ईजादेशविधायके ' ष्यापुत्रपत्योः केवलयोरीच्० ' ॥ २।४।८३ ॥ इत्यत्र ष्यायाः स्थानित्वेन ' ष्यायाः ईच् ' इति भेदनिर्देशे युक्तेऽपि ष्या इत्यस्य ईजरूपसर्वादेशत्वार्थं ष्यैव ईच्

स्यादित्यभेदनिर्देशः । यद्यनुबन्धकृतमनेकवर्णत्वं स्यात्तर्हि ईचोऽनेकवर्णधत्वेन 'ष्यादा ईच्' इति भेदनिर्देशोऽपि 'अनेकवर्णः सर्वत्रे'ति सर्वादेशत्वं सेत्स्यतीति कुतस्तदर्थमभेदनिर्देशे यत्नः । आद्यांशोऽयमनित्यः । तेन पिता कृत्वा गतः इत्यत्र पितृशब्दात् 'ऋदुशनस्पुरु०' ॥ १।४।८४ ॥ इत्यनेन सेर्डा कृतः, द्वितीयाकृत्य क्षेत्रं गतः इत्यत्र च तीयान्तात् 'तीयशंबबीजात्०' ॥ ७।२।१३५ ॥ इति यो डाच् प्रत्ययः कृतः तयोरनुबन्धापेक्षया असरूपत्वेऽपि पिता कृत्वेत्यत्र 'ऊर्याद्यनुकरण०' ॥ ३।१।२ ॥ इति गतिसंज्ञाया अभवनेन 'गतिकवन्यस्तत्पुरुषः' ॥ ३।१।४२ ॥ इति समासाभावे 'अनञःक्त्वो यप्' ॥ ३।२।१५४ ॥ इति यबादेशो न; द्वितीयाकृत्येत्यत्र च गतिसंज्ञाया निर्बाधत्वेन समासे जाते यबादेशः सिद्धः। शेषांशयोरनित्यत्वं नालोक्यते ॥३५॥

समासान्तागमसंज्ञाज्ञापकगणनञ्निर्दिष्टान्यनित्यानि ॥३६॥

समासान्तः, आगमः, संज्ञानिर्दिष्टं, ज्ञापकनिर्दिष्टं, गणनिर्दिष्टं, नञ्निर्दिष्टं च कार्यमित्येतानि षड् यथाप्रयोगदर्शनमनित्यानि । अर्थात् व्याकरणसूत्रैर्विहितान्यपि क्वचित्स्युः क्वचिच्च न स्युरपि। सर्वं वाक्यं सावधारणमिति न्यायात् समासान्तादीनां नित्यत्वे एव प्राप्ते तन्निषेधार्थोऽयम्। समासान्तो यथा–बह्वप आपो यस्मिन् तद् बहूपं सरः इत्यत्र-यः समासान्तः 'ऋक्पूःपथ्यपोऽत्' ॥७।३।७६॥ इत्यद् भवति स एव अनित्यत्वात् 'बह्वाम्पि, बह्वम्पि' इत्यादौ न भवति ।अनित्यत्वज्ञापकं तु 'ऋक्पूःपथ्यपोऽत्' इति निर्देश एव। नित्यत्वे तु अत्र सूत्र एव समासान्तभवने पथ्यपादित्येव निर्देशो न्याय्यः। आगमो यथा–पट्टा पटिता इत्यत्र पटेः सेट्त्वेऽपि वेट्त्वम्। जभेस्तिवि जम्भतीत्यत्र 'जभःस्वरे' ॥४।४।१००॥ इति नागमो भवति यः स एव अनित्यत्वाद् जजृम्भीतीत्यत्र न। अत्र च ज्ञापकम् इड्नागमादीनां विकल्पनादियत्नाकरणम्। संज्ञानिर्दिष्टं यथा–चकासामासेत्यादौ 'धातोरनेकस्वरात्०' ॥ ३।४।४६ ॥ इति जायमान आम् परोक्षेति संज्ञानिर्दिष्टत्वेनानित्यत्वाद् 'ददरिद्रौ' इत्यत्र प्राप्तोऽपि न भवति। ज्ञापकमत्र 'आतो णव औः' ॥ ४।२।१२० ॥ इत्यत्र ओकारेणापि पपाविल्यादिसिद्धौ औकारविधानम्। तद्धि ददरिद्राविल्येतदर्थं कृतम्। अन्यथा 'अशित्यस्सनणकचणकानटि' ॥ ४।३।७७ ॥ इत्यालोपे ददरिद्रो इत्येव स्यात्। यदि दरिद्रातेराम् नित्य एव स्यात्तर्हि दरिद्राञ्चकारेत्येव रूपे आतो णव इत्यत्र औकरणं व्यर्थमेव। सौत्रनिर्देशगणपाठादिज्ञापकनिर्दिष्टं यथा—'दशैकादशादिकश्च' ॥ ६।४।३६ ॥ इति सौत्रनिर्देशेन दशैकादशशब्दस्यादन्तत्वसिद्धया दशैकादशान् गृह्णातीत्यस्यैव प्रयोगस्य न्याय्यत्वेऽपि सौत्रनिर्देशरूपज्ञापकस्यानित्यत्वाद्दशैकादश गृह्णातीत्यस्यापि न्याय्यत्वमेव। ज्ञापकमत्र 'पूर्वपदस्थान्नाम्न्यगः' इत्यत्राग इति। तद्धि ऋगयनमित्यत्र णत्वनिषेधार्थमुक्तम्। णत्वनिषेधस्तु 'शिक्षादेश्चाण्' ॥ ६।३।१४८ ॥ इतिसूत्रोक्ते शिक्षादिगणे ऋगयनमित्यस्य पाठादेव सेत्स्यतीति किमर्थं पुनःणत्ववारणाय 'अग' इत्युच्येत। एतदेव ज्ञापयति सौत्रनिर्देशगणपाठादिज्ञापकनिर्दिष्टमनित्यमिति। गणनिर्दिष्टं च यथा—कुटितेः

त्यादौ 'कुटादेर्ङिद्वदङिणत्' ॥ ४।३।१७ ॥ इति जायमानं प्रत्ययस्य ङित्वं गणनिर्दिष्टेनानित्यं सत् व्यचत् व्याजीकरणे-थवि विव्यचिथेत्यत्र न भवति। तेन यषो ङित्त्वाभावात् धातोर्यस्य 'व्यचोऽनसि' ॥ ४।१।८२ ॥ इति य्वृन्न। ज्ञापकमत्र य्वृन्निषेधार्थं यत्नाकरणमेव। नञ्निर्दिष्टं तु यथा-कुङ् उ आस्ते कुङ्ङास्ते, किम् उ आवपनं किम्वावपनमित्यत्र 'अव्वर्गात् स्वरे वोऽसन्' ॥ १।२।४० ॥ इत्यादिना वत्वस्यासत्त्वात् ङस्य 'ह्रस्वाद्ङ्णो द्वे' ॥ १।३।२७ ॥ इति द्वे रूपे भवतः मस्य तु पुरो व्यंजनाभावेन अनुस्वारानुनासिकौ न भवतः किन्त्वस्यैवासङ्गावस्य नञ्निर्दिष्टत्वेनानित्यत्वात् तद् उ अस्य मतं तद्व्वस्य मतमित्यादौ 'ततोऽस्याः' ॥ १।३।३४ ॥ इति वस्य द्वित्वं भवत्यपि। ज्ञापकमत्र 'व्याप्तौ स्सात्' ॥ ७।२।१३० ॥ इति द्विसकारनिर्देशः। स हि अग्निसादित्यादौ षत्ववारणाय क्रियते। एतन्यायांशाभावे त्वत्र सस्य 'वृत्यन्तोऽसषे' ॥ १।१।२५ ॥ इत्यनेन पदादित्वात् षत्वस्य प्राप्तिरेव नेति किमर्थं तद्वारणाय द्विसकारपाठः क्रियेत। किन्त्वनेन न्यायेन 'असषे' इति नञ्निर्दिष्टपदत्वविधेरनित्यत्वमाशंक्य सातः पदत्वाभवने सस्य पदादित्वं कदाचिन्न स्यादपीति षत्ववारणाय द्विसकारपाठः क्रियते। अनित्योऽयं संपूर्णो न्यायः। तेन केचिदेव समासान्तादयो यथाप्रयोगदर्शनमनित्या इति क्वचिद्भवन्ति न भवन्ति च। अन्ये तु षडपि स्वस्वविषयं प्राप्य नित्यमेव स्युः ॥ ३६ ॥

पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥३७॥

पूर्वं स्थितानि बाधकसूत्राणि वक्ष्यमाणबाध्यमध्येऽनन्तरान् विधीन् बाधन्ते न व्यवहितान्। अव्यवहितानामपि बाधकत्वे प्राप्ते तन्निषेधार्थोऽयं न्यायः। यथा 'श्लिषः' ॥ ३।१।५६ ॥ इति पूर्वं स्थितं सन्विधायकं बाधकं पुषाद्यङ्मनन्तरस्थं बाधते नतु व्यवहितं भावकर्मञ्चिमपि। तेन आश्लिक्षत् कन्यां चैत्र इत्यत्राङ् न भवति, आश्लेषि कन्या चैत्रेणेत्यत्र ञिच् तु स्यादेव। ज्ञापकमस्य सक्-अङ्-ञिच्-सूत्राणामेवमुपन्यासक्रम एव। बाध्योक्तेरनु बाधकोक्तिरिति न्यायात् समर्थपक्षाश्रयणस्यैव न्याय्यत्वाच्च बाध्यादङ्सूत्रादन्वेव बाधकं सक्सूत्रं कर्तव्यम्। तथा सति अनिष्टस्य ञिच्बाधस्यापि मध्येऽपवादाः पूर्वानिति न्यायेन सिद्धेः। सत्यप्येवं बाधकोक्तेरनु बाध्योक्तिरित्यसमर्थपक्षाश्रयणमेतद् ज्ञापयतीमं न्यायमिति। अनित्यत्वमस्य 'संयोगात्' ॥ २।१।५२ ॥ इतीयादेशस्य शिश्रियुरित्यादौ प्राप्तस्य 'योऽनेकस्वरस्य' ॥ २।१।५६ ॥ इति अनन्तरस्थयत्वस्य यथा बाधकत्वं तथा यवक्रियावित्यादौ 'क्विब्वृत्तेरसुधियस्तौ' ॥ २।१।५८ ॥ इति व्यवहितसूत्रविहितस्यापि यत्वस्य बाधकत्वात् ॥३७॥

मध्येऽवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥३८॥

उक्तवक्ष्यमाणमध्ये वर्तमानानि बाधकसूत्राणि प्राग्विधीन् बाधन्ते नतूत्तरान्। उत्तरेषामपि बाधकत्वे प्राप्तेऽयं न्यायः। यथा 'ब्रह्मभ्रूणवृत्रात् क्विप्' ॥५।१।१६१॥

इति भूतकाले विहितः क्विप् ब्रह्महा इत्यादौ प्रागुक्तान् 'कर्मणोऽण्' ॥५।१।७२॥ इत्यणं 'ब्रह्मादिभ्यः' ॥ ५।१।८५ ॥ इति टकं 'हनो णिन्' ॥ ५।१।१६० ॥ इति णिनं च बाधते न तूत्तरस्थं 'क्तक्तवतू' ॥ ५।१।१७४ ॥ इति क्तवतुम् । तेन भूतेऽर्थे ब्रह्म हतवान् इति स्यादेव । अस्य च ज्ञापकमीदृक्प्रयोगा एव । अस्यानित्यत्वं तु न ज्ञायते ॥ ३८ ॥

यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते ॥३९॥

उपदेशः कथनं प्रवर्तनमिति यावत् । यस्य सूत्रस्य यत्र प्रवर्तने किंचित् फलं नास्ति तत्सूत्रं तत्र बाध्यते-न प्रवर्त्यत इत्यर्थः । लोके निष्फला अपि मेघवृष्ट्यादयो दृश्यन्ते व्याकरणे तु तथा निषेधनार्थोऽयं न्यायः । यथा 'तनित्यजिभ्यो डट्' (उणादि० ८९५) इति डट्प्रत्यये तद्, त्यद्, इत्यादीनां सिद्धौ पुनर्दस्य 'धुटस्तृतीयः' ॥ २।१।७६ ॥ इति दविधिर्निष्फलत्वान्न भवति । ज्ञापकमस्य तादृग्रूपसिद्धिरेव ॥३९॥

यस्य तु विधेर्निमित्तमस्ति नासौ विधिर्बाध्यते ॥४०॥

निमित्तं प्रयोजनं फलमित्यर्थः । यथा तच्चारु इत्यादौ दस्य तृतीयविधिः क्रियत एव न तु बाध्यते निमित्तसद्भावात् । तथाहि 'धुटस्तृतीयः' इति दत्वस्य असदधिकारविहितत्वेन 'चजः कगम्' ॥ २।१।८६ ॥ इति परकार्ये कर्तव्येऽसत्त्वात् तत्स्थाने 'तवर्गस्य श्चवर्ग०' ॥ १।३।६० ॥ इति कृतं जत्वमप्यसदभूत्, ततश्च तत्स्थाने 'अघोषे प्रथमः०' ॥ १।३।५० ॥ इत्यनेन विहितं चत्वमप्यसदेव । तथा च गत्वकत्वाभवनात् तक् चारु इत्यनिष्टं नाभूत् । दस्य पुनर्दत्वाकरणे तदसत्त्वाभवनेन कत्वगत्वयोर्वारणमशक्यमेव । अस्यापि ज्ञापकमीदृक्प्रयोगा एव ॥ ४० ॥

येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः ॥४१॥

येन विधिना न अप्राप्ते-अवश्यं प्राप्तमेव तस्मिन् सति यो विधिरारभ्यते स तस्यैव बाध्यविधेर्बाधकः भवति, न तु यस्य क्वचित् प्राप्तिमतः क्वचिच्चाप्राप्तिमतो बाध्यविधेः । प्राप्त्यप्राप्तिमतोऽपि बाध्यस्य बाधकत्वे प्राप्ते तन्निषेधार्थोऽयं न्यायः । यथा 'स्रंस्ध्वंस्०' ॥२।१।६८॥ इति दत्वं विद्वत्कुलं स्वनड्वत्कुलमित्यादौ अवश्यं प्राप्तिमतः 'सोरुः' ॥ २।१।७२ ॥ इति रुत्वस्य 'होधुट् पदान्ते' ॥ २।१।८२ ॥ इति ढत्वस्य च बाध्यविधेरेव बाधकं भवति, नतु विद्वान्, हे विद्वन्, अनड्वान्, हे अनड्वन्' इत्यादौ प्राप्तिमतः विद्वत्कुलं स्वनड्वत्कुलमित्यादौ चाप्राप्तिमतः 'पदस्य' ॥ २।१।८९ ॥ इति संयोगान्तलोपस्य बाध्यविधेरपि बाधकम् । ज्ञापकमस्य 'स्रंस्ध्वंस्०' इत्यत्र क्वसः सिति विशेषणम् । यदि हि दत्वविधायकमिदं बाधकं सोरुत्वं यथा बाधते तथैव संयोगान्तलोपमपि बाधेत तर्हि क्वसः सन्तत्वं न क्वापि व्यभिचरतीति किमर्थं सिति विशेषणं क्रियेत । एतदेव ज्ञापयति यत् संयोगान्तलोपं प्राप्त्यप्राप्तिमन्तमयं

दत्वविधिर्न बाधते, ततश्च यत्र संयोगान्तलोपः स्यात्तत्र क्वसः सन्तत्वं व्यभिचरतीति सिति विशेषणस्य सार्थकत्वेन विद्वान् हे विद्वन् इत्यादौ नकारस्य प्राप्नुवतो दविधेरभवनं सिद्धम्। अन्यथा विद्वान् हे विद्वन् इत्यादावपि क्वस्वन्तत्वसद्भावादत्रापि दत्वं प्रासंक्ष्यदेव ॥ ४१ ॥

बलवन्नित्यमनित्यात् ॥४२॥

यत् यस्मिन् कृते अकृतेऽपि च प्राप्नोति तत् तदपेक्षया नित्यम् यत्तु अकृते प्राप्नोति नतु कृते तदनित्यम्। तयोर्युगपत्प्राप्तौ नित्यं कार्यमनित्याद् बलवदिति प्रथमं प्रवर्तते। यथा अकार्ष्टेत्यादौ 'धुड्ढस्वाल्लुगनिटोः' ॥४।३।७०॥ इति सिज्लुकः प्रथमं नित्यत्वात् 'सिचि परस्मै समानस्याङिति' ॥४।३।४४॥ इत्यनेन वृद्धिः स्यात् पश्चाच्च ह्रस्वाभावान्न सिज्लुक्। ज्ञापकमस्य 'नामिनोऽकलिहलेः' ॥४।३।५१॥ इत्यत्र कलिहलिवर्जनोपायकरणम्। तद्धि कलिहलिशब्दयोर्णौ प्रथमत एव 'त्रन्यस्वरादेः' ॥ ७।४।४३ ॥ इत्यनेन इकाररूपस्यान्त्यस्वरस्य लुग् भवतु नित्यत्वादेतन्न्यायेन बलवत्त्वात्; परं पटुलघ्वादिशब्दानां तु णावनित्यामप्यन्त्यस्वरस्य वृद्धिं कृत्वैव नित्याप्यन्त्यस्वरादिलुक् कार्या न त्वन्यथेति व्यवस्थापनार्थं कृतम्। तदेवं पट्वादीनां प्रथमतो वृद्धेरेव संपादनार्थं यत् कलिहलिवर्जनोपायः सूरिभिः कृतस्तदेवंकरणाभावे नित्यत्वादेतन्न्यायेन बलवत्वादन्त्यस्वरादिलुक एव सर्वत्र प्रथमं भवनमाशंक्य तन्निवारणार्थमेव। यदि त्वेष न्यायो नाभविष्यत्तर्हि अन्त्यस्वरादिलुको बलवत्त्वशंकाया अप्यभावान्नानिष्टार्थेति न्यायेन यथाशिष्टप्रयोगं सर्वाण्यपि रूपाण्युपायं विनाऽप्यसाधयिष्यन्त। सत्यप्येवं सूरिभिः पट्वादिषु प्रथमं वृद्धेर्व्यवस्थापनार्थं कलिहलिवर्जनोपायो यत्कृतः स एतन्न्यायज्ञापक एवेति। अनित्यश्चायम्। नित्यादन्तरङ्गमित्याद्यैर्बाध्यमानत्वात् ॥४२॥

अन्तरङ्गं बहिरङ्गात् ॥४३॥

बलवदिति शेषः। एवमुत्तरत्रापि। यथा त इन्द्रमित्यत्र जस इत्वे कृते 'समानानां तेन०' ॥ १।२।१ ॥ इति इन्द्रेकारेण सह जस इकारस्य प्राप्तात् पदद्वयापेक्षत्वेन बहिरङ्गाद् दीर्घात्पूर्वम् 'अवर्णस्येवर्णादिना०' ॥ १।२।६ ॥ इत्येत्वमेव स्यात् एकपदाश्रितत्वेन अन्तरङ्गत्वात्। ज्ञापकमस्य 'वृत्यन्तोऽसषे' ॥ १।२।२५ ॥ इति निर्देशः। अत्र हि वृत्यन्तशब्दपुरःस्थस्य रोः उत्वे कृते पूर्वेण सह ओत्वं पुरःस्थेन असषे इत्यकारेण सह वत्वं च प्राप्तम्, तत्र पदद्वयाश्रितत्वाद् बहिरङ्गं वत्वं बाधित्वा एकपदापेक्षत्वादन्तरङ्गमोत्वं यन्निर्दिष्टं तदेतन्न्यायबलादेवेति। अनित्योऽप्यम्। वार्णात्प्राकृतम्, लुबन्तरङ्गेभ्यः, अन्तरङ्गाच्चानवकाशम्, इत्याद्यैर्बाध्यमानत्वात् ॥ ४३ ॥

निरवकाशं सावकाशात् ॥४४॥

अल्पविषयं कार्यं बहुविषयात् कार्याद् बलवदिति तद् बाधित्वा स्वयं प्रवर्तत इत्यर्थः। यथा वृक्षैः इत्यादौ परमपि 'षट्बहुभ्योसि' ॥ १।४।४ ॥ इति

एत्वं बाधित्वा 'भिस् ऐस्' ॥ १।४।२॥ इत्येव प्रवर्तते निरवकाशत्वादल्पविषयत्वाच्च । पद्बहुस्भोसीत्यस्य तु वृक्षेभ्यः इत्यादौ सावकाशत्वं बहुविषयत्वं च स्पष्टमेव । भिस ऐस् इत्यस्य भिस्येव विषयः, पद्बहुस्भोसीत्यस्य तु भिसि भ्यसि चेति अल्पविषयबहुविषयत्वे स्पष्टे एव । ज्ञापकमस्य 'भिस ऐस्' इति सूत्रमेव । एतन्न्यायाभावे वृक्षैः इत्यादावपि यदि पद्बहुस्भोस्सीत्येवं स्यात्तर्हि भिस ऐस् इति सूत्रं नैव कुर्यात् अवकाशाभावात् । अनित्यत्वमस्य न दृश्यते ॥४४॥

वार्णात् प्राकृतम् ॥४५॥

वर्णमुच्चार्य विहितात् वार्णात् कार्यात् प्रकृतिं धातुरूपामेव न तु नामरूपामुच्चार्य यत्कार्यमुक्तं तद् बलवदित्यर्थः । अन्तरङ्गं बहिरङ्गादित्यस्यापवादोऽयम् । यथा ऊवतुः, ऊवुः इति वेंग् तन्तुसन्ताने इत्यस्य परोक्षायां 'यजादिवचेः' ॥ ४।१।७९ ॥ इति ग्वृति द्वित्वे च कृते उकारद्वयावस्थाने सति 'अन्तरङ्गं बहिरङ्गादि'ति न्यायं बाधित्वा एतन्न्यायेन बहिरङ्गोऽपि 'धातोरिवर्ण०' ॥२।१।५०॥ इत्युवेव प्रथमं भवति धातुरूपप्रकृतेर्नाम गृहीत्वा विहितत्वेन प्राकृतत्वात् । तत्पश्चादेवान्तरङ्गमपि 'समानानां तेन०' ॥ १।२।१ ॥ इति दीर्घत्वं समानरूपवर्णमुच्चार्य विहितत्वेन वार्णत्वात् । एतन्न्यायाभावे अन्तरङ्गं बहिरङ्गादिति न्यायेनान्तरङ्गे दीर्घे प्रथमं कृते पश्चाच्च धातोरिवर्णेत्युवि ऊवतुः ऊवुरित्याद्यनिष्टमेवापद्येत । ज्ञापकमस्य 'अन्तरङ्गं बहिरङ्गात्' इति न्यायेन प्रसक्तानाम् ऊवतुः ऊवुरित्याद्यनिष्टरूपाणां निषेधनार्थं यत्नाकरणमेव । अनित्यश्चायम् । उत्तरन्यायेन बाध्यमानत्वात् ॥ ४५ ॥

ग्वृद् ग्वृदाश्रयं च ॥४६॥

वार्णमपि ग्वृद् ग्वृदाश्रयं च कार्यं प्राकृतवद् बलवदिति भावः । यथा उपपूर्वाद् श्विधातोः क्त्वि यपि च उपश्ये्त्यत्र ह्रस्वान्तप्रकृतित्वाश्रितत्वात् प्राकृतमपि 'ह्रस्वस्य तः पित्कृति' ॥ ४।४।११३ ॥ इति तागमं बाधित्वा सस्वरान्तस्थारूपवर्णाश्रितत्वाद् वार्णमपि 'यजादिवचेः ॥ ४।१।७९ ॥ इति ग्वृत्कार्यं जातम् । तदन्वपि तागमं प्राकृतमपि बाधित्वा ग्वृतो 'दीर्घमवोऽन्त्यम्' ॥ ४।१।१०३ ॥ इति दीर्घो ग्वृदाश्रितत्वेन बलवत्त्वादेवाभूत् । ज्ञापकमस्य तादृक्प्रयोगदर्शनम् । अनित्यत्वं त्वस्य न ज्ञायते ॥४६॥

उपपदविभक्तेः कारकविभक्तिः ॥४७॥

बलीयसीति शेषः । पदमाश्रित्य जायमाना उपपदविभक्तिः, क्रियामाश्रित्य जायमाना कारकविभक्तिः । यथा नमस्यति देवानित्यत्र 'शक्तार्थवषड्नमः०' ॥ २।२।६८ ॥ इति नमस्पदयोगलक्षणत्वेनोपपदविभक्तिं चतुर्थीं बाधित्वा कर्मणि कारकविभक्तिर्द्वितीयैव क्रियायोगलक्षणा भवति बलीयस्त्वात् । ज्ञापकता त्वस्य पूर्ववदेव । अनित्यत्वं तु 'क्रुद्रुहेर्ष्यासूयार्थैर्यं प्रति कोपः' ॥ २।२।२७ ॥ इत्यत्र 'यस्मै कोपः' इत्यनिर्दिश्य 'यं प्रति कोपः' इति निर्देशात् स्पष्टमेव । नित्य-

त्वे त्वस्य कुर्यतिक्रियायोगादनेनैव सूत्रेण यदः संप्रदानसंज्ञाभवनेन चतुर्थ्यैव भाव्यं नतु प्रतीतिपदयोगलक्षणया 'भागिनि प्रतिपर्यनुभिः' ॥ २।२।३७॥ इति द्वितीयया ॥ ४७ ॥

लुबन्तरङ्गेभ्यः ॥४८॥

अन्तरङ्गेभ्योऽपि कार्येभ्यो बहिरङ्गा लुप् बलवतीति योज्यम् । यथा गर्गस्यापत्यानि वृद्धानि 'गर्गादेर्यञ्' ॥ ६।१।४२ ॥ इति यञि गर्गाः। अत्र प्रकृत्याश्रितत्वेनान्तरङ्गामपि 'वृद्धिःस्वरेष्वादेः—॥ ७।४।१ ॥ इति वृद्धिं बाधित्वा प्रत्ययाश्रितत्वेन बहिरङ्गापि यञो लुप् प्रथमं स्यात् ततश्च ञ्णित्प्रत्ययाभावान्न वृद्धिः । ज्ञापकमस्य 'त्वमौ प्रत्ययोत्तरपदे चैकस्मिन्' ॥ २।१।११ ॥ इत्यत्र प्रत्ययोत्तरपदग्रहणम् 'तद्धि त्वदीयः, मत्पुत्रः इत्यादौ न्यायेनानेन अन्तरङ्गेभ्योऽपि कार्येभ्यो लुब्विधेर्बलवत्त्वात् सूत्रे स्याद्यधिकारेणैव निर्वाहे सत्यपि प्रथममेव स्यादेर्लुपो भवनात् तद्द्वारेण त्वमादेशौ नैव सेत्स्यतः इत्याशंकयैव कृतम् । अनित्यत्वं त्वस्य न दृश्यते ॥ ४८ ॥

सर्वेभ्यो लोपः ॥४९॥

पूर्वन्याये लुपो बलवत्त्वस्योक्तत्वादत्र लोपशब्देनादर्शनमात्ररूपा लुगगृह्यते । तथा च लुग्विधिः सर्वविधिभ्यो बलीयानिति स्थितम् । यथा अबुद्धेत्यत्र 'धुड्ढस्वाद्' ॥ ४।३।७० ॥ इत्यनेन सिचः सर्वेभ्यः प्रथमं लोपात् 'गडदबादेः०' ॥ २।१।७७ ॥ इत्यनेनादेश्चतुर्थत्वं न । ज्ञापकमस्य 'सस्तः सि' ॥ ४।३।९२ ॥ इत्यत्र विषयसप्तमीव्याख्यानम् । निमित्तसप्तमीव्याख्याने वसेरद्यतनीतामि अवात्तामित्यादौ सिजुत्पादानन्तरमेतन्न्यायाल्लोपविधेर्बलीयस्त्वेन पूर्वमेव 'धुड्ढस्वाद्' ॥ ४।३।७० ॥ इति सिज्लोपात् 'सस्तः सि' इति सस्तो न सिद्ध्यतीत्येतदर्थं तत् कृतम् । एवं च अवात्तामित्यादौ सिज्विषय एव सस्तः सीति सस्य तत्वे ततः सिचि तस्य लुकि स्थानिवद्भावे च 'व्यञ्जनादेर्वोपान्त्यस्य०' ॥ ४।३।४७ ॥ इति वृद्धिः सिद्धा । अमित्यश्चायम्। उत्तरेण बाध्यमानत्वात् ॥४९॥

लोपात् स्वरादेशः ॥५०॥

बलवानिति योज्यम् । एवमग्रेऽपि । अस्य च पूर्वापवादत्वादत्रापि लोपशब्दस्य लुग्वाचित्वम् । यथा श्रीर्देवता अस्येत्यत्र 'देवता' ॥ ६।२।१०९ ॥ इत्यणि परमपि 'अवर्णेवर्णस्य' ॥ ७।४।६८ ॥ इति ईकारलुकं बाधित्वा स्वरादेशो वृद्धिः सिद्ध्यति । ज्ञापकमस्य वृद्धिसूत्रस्य अवर्णेवर्णस्येत्यस्मात् प्राग्विधानम्। एतन्न्यायाभावे अवर्णेवर्णस्येत्यस्मात् प्रागेव वृद्धिसूत्रविधानेन परत्वात् प्रथमं वृद्धौ आयमित्यादि सेत्स्यति तथापि यत्प्राग्विधानं वृद्धिसूत्रस्येत्येतन्न्यायं द्योतयति । अस्याप्यनित्यत्वं नानिष्टार्था शास्त्रप्रवृत्तिरित्यत्र वक्ष्यते ॥ ५० ॥

आदेशादागमः ॥५१॥

यथा अर्पयतोत्यत्र ऋधातोर्णौ आदेशरूपां वृद्धिं बाधित्वा प्रथमं प्वागमे

'पुस्पौ' ॥४।३।३॥ इति गुणरूप आदेशः। ज्ञापकमस्य त्वेतदर्थं यत्नाकरणमेव। अस्य चाप्यनित्यत्वम्। द्वयोः कुलयोरित्यत्र द्विशब्दात् 'अनाम्स्वरे नोऽन्तः' ॥१।४।६४॥ इति नागमात्पूर्वमेव 'आद्वेः' ॥२।१।४१॥ इत्यदादेशस्य भवनात् ॥५१॥

आगमात्सर्वादेशः ॥५२॥

पूर्वस्यापवादोऽयम्। तेन प्रियतिसृणः कुलादित्यत्र सर्वादेशे तिसरि कृते नागमः सिद्धः। ज्ञापकमस्य 'ऋतो रः स्वरेऽनि' ॥ २।१।२ ॥ इत्यत्र अनीति नकारविषयकनिषेधोक्तिः। एतन्न्यायाभावे पूर्वन्यायेन स्वरादौ स्यादौ प्रथमं नागमस्यैव भवनात् नागमव्यवधानेन च तिस्रादेशस्यैवाप्रसक्तेः कस्य ऋतो रत्वं प्राप्नोतीति रत्वविधौ नकारविषयकनिषेधः क्रियेत। अस्य चोत्तरस्य चानित्यत्वं न दृश्यते ॥ ५२ ॥

परान्नित्यम् ॥५३॥

'स्पर्द्धे' ॥ ७।४।११९ ॥ इत्यस्यापवादोऽयम्। यथा युष्मानस्मान् वा आचक्षाणेन युष्या, अस्या। अत्र युष्मदस्मद्भ्यां णिजि 'त्रन्त्यस्वरादेः' ॥ ७।४।४३ ॥ इत्यद्लुकि क्विपि 'अप्रयोगीत्' ॥ १।१।३७ ॥ इति तल्लुकि 'णेरनिटि' ॥ ४।३।८३ ॥ इति णिज्लुकि टाप्रत्यये पराभ्यामपि त्वमादेशाभ्यां प्रागेव कृताकृतप्रसङ्गित्वेन नित्यत्वाद् यत्वं सिद्धम्। ज्ञापकमस्य तु मा भवानटन्तं प्रायुक्त इति मा भवानटिटदित्यादौ नित्यमपि द्विर्वचनं बाधित्वा अनित्योऽपि प्रागेव 'उपान्त्यस्यासमान०' ॥ ४।२।३५ ॥ इति ह्रस्वः स्यादित्येतदर्थं ओणेर्ऋदित्करणम्। तद्धि मा भवानोणिणदित्यादौ ऋदित्वादुपान्त्यह्रस्वनिषेधनार्थं क्रियते। यदि तु नित्यत्वात्पूर्वमेव 'स्वरादेर्द्वितीयः' ॥ ४।१।४ ॥ इति द्वितीयांशस्य द्वित्वे क्रियमाणे औकारस्यानुपान्त्यत्वादेव ह्रस्वत्वाप्राप्तिरिति किंतन्निषेधार्थं ऋदित्करणम्। सत्यप्येवमिदम् ऋदित्करणं ज्ञापयति यत् सर्वत्र पूर्वं ह्रस्व एव प्राप्नोति न तु द्वित्वमिति। तथा च मा भवानटिटदित्यादि सिद्धम्। एतन्न्यायाभावे तु परत्वादेव ह्रस्वप्राथम्यस्य सिद्धौ पुनस्तज्ज्ञापनार्थम् ओणेर्ऋदित्करणं नैव क्रियते। यत्तु कृतं तदेतन्न्यायेन परादपि नित्यस्य बलवत्त्वान्नित्यं द्वित्वमेव प्रथमं भविष्यति नतु अनित्य उपान्त्यह्रस्व इति मा भवानटिटदित्यादीनामसिद्धिरेवेत्याशंकयैव ॥ ५३ ॥

नित्यादन्तरङ्गम् ॥५४॥

अनित्यमपीति शेषः। यथा प्रेजुरित्यत्र यजेर्व्वृद् व्वृदाश्रयं चेति न्यायात् प्रथमं व्वृति द्वित्वे पदद्वयापेक्षत्वेन बहिरङ्गान्नित्यादप्येत्वात् पूर्वमेवानित्योऽप्येकपदाश्रयत्वेनान्तरङ्गो दीर्घ एव। ज्ञापकमस्य 'आशीः०' ॥ ३।३।१३ ॥ इति सूत्रनिर्देशः। अत्र तावत् सेलेपि आशिस् इति स्थिते सोरुत्वे विसर्गस्य 'पदान्ते' ॥ २।१।६४ ॥ इति दीर्घस्य च प्राप्तावेतन्न्यायान्नित्यमपि विसर्गं बाधित्वा पूर्वव्यवस्थितत्वेनान्तरङ्गत्वात् पूर्वं दीर्घे ततो विसर्गः। एतन्न्यायाभावे तु पूर्वन्यायेन

प्रथमं विसर्गे ततो रेफाभावेन दीर्घाभवने 'आशीः' इति निर्देशासंभव एव । अनित्यश्चायम् । उत्तरेण बाध्यमानत्वात् ॥५४॥

अन्तरङ्गाच्चानवकाशम् ॥५५॥

बहिरङ्गमपीति शेषः । यथा त्वमहमित्यत्र प्रकृतिमात्रादेशत्वेनान्तरङ्गाभ्यामपि त्वमादेशाभ्यां प्रागेव प्रकृतिप्रत्ययादेशत्वाद् बहिरङ्गावपि त्वमहमादेशावनवकाशत्वादेव भवतः । ज्ञापकमस्य 'त्वमहं सिना प्राक् चाकः' ॥२।१।१२॥ इति सूत्रारंभ एव । यद्यन्तरङ्गत्वात्त्वमावेव स्यातां तर्हि 'त्वमहं सिना०' इति व्यर्थमेव निरवकाशत्वात् । अनित्यत्वमस्य नास्ति ॥ ५५ ॥

उत्सर्गादपवादः ॥५६॥

तेन आपचन्त्यस्मिन्निति आपाकः इत्यत्रौत्सर्गिकस्य 'पुंनाम्नि घः' ॥ ५।३।१३० ॥ इति घस्य प्राप्तौ 'व्यञ्जनाद् घञ्' ॥ ५।३।१३२ ॥ इति घञेव स्यादपवादत्वात् । ज्ञापकमस्य, गोचरसंचरवह०' ॥ ५।३।१३१ ॥ इति गोचरादीनां निपातनम् । तद्धि एतन्न्यायबलादौत्सर्गिकं घं बाधित्वा घञेव भविष्यतीत्याशंकया कृतम् । अनित्यश्चायम् । उत्तरेण बाध्यमानत्वात् ॥ ५६ ॥

अपवादात् क्वचिदुत्सर्गोऽपि ॥५७॥

यथा मख गतौ मखन्ति स्वर्गं गच्छन्त्यनेनेति मखः इत्यादौ अपवादमपि 'व्यञ्जनाद् घञ्' इति घञं बाधित्वा औत्सर्गिकोऽपि 'पुंनाम्नि' इति घ एव बलवत्त्वाद् भवति । ज्ञापकमस्य मखादीनां सिद्धौ यत्नान्तराकरणमेव । अनित्यत्वमस्य न दृश्यते ॥ ५७ ॥

नानिष्टार्था शास्त्रप्रवृत्तिः ॥५८॥

अयमर्थः—शास्त्रस्य-सूत्रस्य न्यायस्य वा अनिष्टप्रयोगसिद्ध्यर्थं प्रवृत्तिर्न क्रियते, शिष्टप्रयोगसिद्ध्यर्थमेव तत्सद्भावात् । अनिष्टप्रयोगसिद्धिप्रतिबन्धार्थोऽयं न्यायः । तत्र सूत्रस्य यथा-नयतेर्गित्त्वात् फलवत्कर्तृविवक्षयाऽऽत्मनेपदे सिद्धेऽपि 'कर्तृस्थामूर्त्ताप्यात्' ॥ ३।३।४० ॥ इति यदारभ्यते तत् कर्तृस्थामूर्त्ताप्यादेव नयतेरात्मनेपदं यथा स्यात् श्रमं विनयते यमयतीत्यर्थ इत्यादौ न त्वन्यत्र चैत्रस्य मन्युं विनयतीत्यादाविति नियमार्थम् । अयं च नियमः 'कर्तृस्थामूर्ताप्यादि'त्यत्र अर्थविशेषानुक्तावपि शमयतिक्रियार्थस्यैव नयतेर्विज्ञेयो नत्वन्यार्थस्येत्येव शिष्टाभिप्रेतम् । ततश्च शमयतिक्रियार्थान्नयतेर्यद्यात्मनेपदं भवति तर्हि कर्तृस्थामूर्ताप्यत्वसद्भाव एव नतु तदभावे फलवत्कर्तृविवक्षयापीति व्यवस्थितम् । तेन शमयतिक्रियातोऽन्यत्रार्थे फलवत्कर्तृविवक्षाऽविवक्षाभ्यामात्मनेपदपरस्मैपदे सिद्धे-अजा ग्रामं नयते नयतीत्यादौ । न्यायस्य यथा-'लोपात्स्वरादेशः' इति हि न्यायः चिकीर्ष्यते इत्यादौ चिकीर्ष इति स्थिते 'क्यः शिति' ॥ ३।४।७० ॥ इति क्ये परे सनो 'दीर्घश्चिव०' ॥ ४।३।१०८ ॥ इति दीर्घरूपं स्वरादेशं कर्तुं न प्रवर्तते, दीर्घस्य शिष्टानिष्टत्वात् । तेन सनः 'अतः' ॥ ४।३।८२ ॥

इत्यलोप एव। ज्ञापकमस्य तत्र तत्र 'कर्तृस्था०' इति सूत्रे लोपात्स्वरादेशः' इति न्याये च यथाक्रमं शमयत्यर्थस्य नयतेरिति दीर्घवर्जैः स्वरादेश इति च विशेषणस्यानुक्तिरेव। अनित्यश्चायम्। 'इदमदसोऽक्येव' ॥ १।४।४३ ॥ इत्यत्रानिष्टनियमापोहार्थमेवकारप्रयोगात्। 'इदमदस' इत्यस्य नियमसूत्रमात्रत्वं तु एवकारं विनापि सिद्ध्यति। यथा-इमकैः अमुकैः इत्यत्र 'भिस ऐस्' ॥१।४।२॥ इत्यनेनैव ऐसि सिद्धे नियमार्थमिति। परमत्र द्वौ नियमौ संभवतः। इदमदस एवाकि भिस ऐस् न त्वन्यशब्देभ्यः इत्येकः। इदमदसोऽक्येव सति भिस ऐस् न त्वकोऽभावे इत्यन्यः। तत्राद्योऽनिष्टस्तकैर्विश्वकैरित्यादावपि ऐसो दर्शनात्। द्वितीयस्त्विष्ट एभिरमीभिरित्यत्रादर्शनात्। तत एतदर्थमेव अक्येवेत्येवकारः प्रयुज्यते। एतन्न्यायस्य नित्यत्वे तु अनिष्टनियमापोहनमिष्टनियमग्रहणं चैतन्न्यायेनैव सेत्स्यतीति कुतस्तदर्थमेवकारप्रयोगः ॥ ५८ ॥

प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानामपि ग्रहणम् ॥५९॥

अत्र प्रकृतिर्धातुरूपा नामरूपा च गृह्यते। स्वार्थिकप्रत्ययान्तानामिति प्रकृतीनामिति शेषः। प्रकृतीनां केवलत्वे स्वार्थिकप्रत्ययान्तत्वे च बहुः शब्दभेदः स्यादिति शब्दभेदादन्यस्य कथनेऽन्यग्रहणं न प्राप्नोतीत्ययं न्यायः। तत्र धातुरूपा प्रकृतिर्यथा-'विनिमेयद्यूतपणं पणिव्यवहोः' ॥ २।२।१६ ॥ इत्यत्र पणीत्युक्तेः केवलस्यैव पणेर्ग्रहणं प्राप्नोति तथापि स्वार्थिकायप्रत्ययान्तस्यापि स्यात्। तेन शतस्य शतं वा अर्पणिष्टेत्यादाविव शतस्य शतं वा अपणायीदित्यत्रापि 'विनिमेय०' इत्यनेन वा कर्मत्वम्। नामरूपा यथा-ग्रामात् परस्मिन् देशे वसतीत्यादौ केवलपरशब्दयोगे इव ग्रामात् परस्ताद्वसतीत्यादौ स्वार्थिकस्तात्प्रत्ययान्तपरशब्दयोगेऽपि 'प्रभृत्यन्यार्थ०' ॥ २।२।७५ ॥ इति दिग्योगलक्षणा पञ्चमी। ज्ञापकमस्य सर्वादिगणे नियमार्थं डतरडतमोपादानम्। प्रत्ययानां केवलानां सर्वादित्वासंभवात् प्रत्ययः प्रकृतिमाक्षिपतीति कृत्वा येभ्यः स्वार्थिकौ डतरडतमौ संभवतस्ते यदादिशब्दा डतरडतमान्ता इह डतरडतमाभ्यां गृह्यन्ते इत्येतदर्थं तत् नियममपि करोति यथा-सर्वादीनां स्वार्थिकप्रत्ययान्तानां प्रकृतिसर्वादित्वद्वारेण यदि सर्वादित्वं स्यात्तर्हि डतरडतमान्तानामेव स्यान्नत्वन्यस्वार्थिकप्रत्ययान्तानाम्। तेन प्रकृष्टार्थे स्वार्थिकतमपि सर्वतमाय सर्वतमादित्येव स्यात्। इत्थं चान्यस्वार्थिकप्रत्ययान्तानां सर्वादित्वाभावार्थं डतरडतमग्रहणयत्नस्तदैव कर्तुं युज्यते यदि सर्वस्वार्थिकप्रत्ययान्तानां सर्वादित्वप्राप्तिः केनापि प्रसक्ता स्यात्। सा चैतन्न्यायसत्व एव संभवति नान्यथा। अनित्यश्चायम्। पणायतीत्यादौ पणिधातोरिदित्वेऽप्यात्मनेपदाभावात्। अनित्यत्वे ज्ञापकं तु कामयते इत्यत्रात्मनेपदार्थं णिङो ङित्वं क्रियते ॥५९॥

प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ॥६०॥

ग्रहणमिति संबध्यते। यत्र विवक्षितशब्दः प्रत्ययरूपोऽप्रत्ययरूपश्च संभ-

षति तत्रासौ प्रत्ययरूप एव गृह्यते न त्वप्रत्ययरूप इत्यर्थः। उभयोर्ग्रहणे प्रसक्ते व्यवस्थार्थोऽयं न्यायः। यथा 'कालात्ततनतरतमकाले' ॥ ३।२।२४ ॥ इत्यत्र तरतमौ प्रत्ययावेव गृह्येते न तु तरति, ताभ्यतीत्यचि व्युत्पन्ने नाम्नी। ज्ञापकमस्य तत्तसूत्रे अविशेषेणोक्तिरेव। अस्याप्यनित्यत्वम्। 'स्त्रीदूतः' ॥१।४।२९॥ इत्यादौ 'नारी०' ॥ २।४।७६ ॥ इत्यादिङीप्रत्ययान्तानामिव तरीत्यादिप्रत्ययरहितानामव्युत्पन्नानामपि ग्रहणात्। अनित्यत्वज्ञापकं तु 'धातोरिवर्ण०' ॥२।१।५०॥ इत्यत्र साक्षात् प्रत्ययग्रहणम् ॥ ६० ॥

अदाद्यनदाद्योरनदादेरेव ॥६१॥

धातोरिति शेषः। ग्रहणमित्यत्रापि संबध्यते। यत्र विवक्षितो धातुरादादिकोऽन्यश्च संभवेत् तत्रान्य एव गृह्यते न त्वादादिकः। यथा 'उपान्वध्याङ्वसः' ॥ २।२।२९ ॥ इत्यत्र वस्तेर्व्युदासेन वसतेरेव ग्रहणम्। ज्ञापकमस्य 'शासस्हनः शाध्येधिजहि' ॥ ४।२।८४ ॥ इत्यत्रास्तेरादादिकग्रहणसिद्ध्यर्थं शास्हन्साहचर्यबलग्रहणम्। तद्धि एतन्न्यायादसत्यस्यतोर्ग्रहणे प्रसक्ते तद्धारणार्थं कृतम्। अस्याप्यनित्यत्वम्। 'ऋह्लीघ्राध्रात्रो०' ॥ ४।२।७६ ॥ इत्यत्र भौवादिकस्येव आदादिकस्यापि ऋधातोर्ग्रहणदर्शनात् ॥६१॥

प्राकरणिकाप्राकरणिकयोः प्राकरणिकस्यैव ॥६२॥

ग्रहणमिति योज्यम्। प्रकरणेन चरति प्राकरणिकं-स्वाधिकारोक्तं प्रत्ययादि। अप्राकरणिकं-विवक्षितसूत्रापेक्षया अन्याधिकारोक्तम्। तत्रोभयोर्ग्रहणे संभवति स्वाधिकारोक्तमेव प्रत्ययादि गृह्यते नत्वन्याधिकारोक्तमित्यर्थः। तेन 'इञ इतः' ॥ २।४।७१ ॥ इत्यत्र 'यञो ङायन् च वा' ॥ २।४।६७ ॥ इत्यतः प्रारब्धात् तद्धिताधिकारात् तद्धितीय एवेञ् गृह्यते न तु 'प्रश्नाख्याने वेञ्' ॥ ५।३।११९ ॥ इति कृत्सूत्रोक्तः। ततश्च सुतङ्गमेन निर्वृत्ता सौतङ्गमीत्यत्र 'सुतङ्गमादेरिञ्' ॥ ६।२।८५ ॥ इतीञि 'इञ इतः' इति ङीर्भवति न तु 'हे चैत्र कां त्वं कारिमकार्षीः, सर्वां कारिमकार्षम्' इति कृदिन्नन्तात् कारिशब्दात्। ज्ञापकमस्य 'द्रेरञणोऽप्राच्यभगदिः' ॥ ६।१।१२३ ॥ इत्यत्र 'शकादिभ्यो द्रेर्लुप्' ॥ ६।१।१२० ॥ इत्येतस्मात् द्रावनुवर्तमानेऽपि पुनर्द्रिग्रहणम्। तद्धि एतन्न्यायात् प्राकरणिकस्यैवापत्याधिकारीयस्य द्रेरञणोऽनेन लुप् भविष्यति अस्याप्यपत्याधिकारस्थत्वात् न त्वप्राकरणिकस्य शस्त्रजीविसंघाधिकारीयस्येत्याशङ्क्य द्रिविधिस्यापि तस्य लुप् स्यादित्येतदर्थं कृतम्। तेन मद्रस्यापत्यं स्त्री 'पुरुमगधकलिङ्ग०' ॥ ६।१।११६ ॥ इति द्रिसंज्ञेऽणि 'द्रेरञण' ॥ ६।१।१२३ ॥ इति तल्लुपि प्रत्ययलोपेऽपि तल्लक्षणकार्यविज्ञानात् लुप्तेऽप्यणि 'अणञेय०' ॥ २।४।२० ॥ इति ङ्यां मद्री। अत्र यथाऽपत्याधिकारीयस्य द्रेरणो लुप् तथा पर्शुर्नाम काचित् तस्यापत्यानि माणवकाः 'पुरुमगध०' इत्यणि 'शकादिभ्य' इति तल्लुपि च पर्शवः; ते शस्त्रजीविसंघः स्त्रीत्वविशिष्टो विवक्षितः-'पश्वदिरण्'

॥७।३।६६॥ इत्यणि तस्य शस्त्रजीविसंघाधिकारस्थत्वेऽपि 'द्रेरजण०' इति लुप्। ततश्च 'उतोऽप्राणिनश्चा०' ॥ २।४।७३ ॥ इत्यूङि पर्शूः। अनित्यश्चायम्। जॄष्-धातोरद्यतन्यामजरदित्यादावाख्यातसंबंधिनि 'मृदिच्छिव०' ॥ ३।४।६५ ॥ इत्यङ्-प्रत्यये यथा 'ऋवर्णदृशोऽङि' ॥ ४।३।७ ॥ इति गुणः क्रियते तथा जरणं जरा इत्यादौ 'षितोऽङ्' ॥५।३।१०७॥ इति कृत्संबंधिन्यङि परेऽपि तस्य विहितत्वात् ॥६२॥

निरनुबन्धग्रहणे सामान्येन ॥६३॥

सामान्येनेति निरनुबन्धसानुबन्धयोर्ग्रहणमित्यर्थः। विसदृशत्वेन सानुबन्धस्य ग्रहणे अप्राप्तेऽयं न्यायः। तेन स्वः, कः; इत्यत्र 'रः पदान्ते विसर्गस्तयोः' ॥ १।३।५३ ॥ इत्यनेन रस्य रोश्च विसर्गः सिद्धः। ज्ञापकमस्य 'अरोः सुपि रः' ॥ १।३।५७ ॥ इत्यत्र रुवर्जनम्। तद्धि 'रः पदान्ते०' इत्यधिकारात् पतन्न्यायेनोभयोरपि तत्र ग्रहणे प्रसक्ते कृतम्। निरनुबन्धग्रहणे न सानुबन्धस्य' इत्यस्यापि न्यायस्य सद्भावादनित्योऽयम् ॥६३॥

साहचर्यात् सदृशस्यैव ॥६४॥

अयमर्थः—अव्यभिचारिणा व्यभिचारी यन्नियम्यते तत् साहचर्यम्। तस्माच्च सदृश एव गृह्यते नत्वसदृशः। इष्टग्रहणसिद्ध्यर्थोऽयं न्यायः। यथा 'क्त्वातुमम्' ॥ १।१।३५ ॥ इत्यत्र क्त्वातुमोः कृतोः साहचर्यात् अमपि कृदेव गृह्यते न तु द्वितीयैकवचनम्। ज्ञापकमस्याविशेषेणोक्तिरेव। अस्याप्यनित्यत्वम्। 'वत्तस्याम्' ॥१।१।३४॥ इत्यत्र वत्तसिसाहचर्यात्तद्धितस्यैव आमो ग्रहणे न्याय्येऽपि परोक्षाया आमोऽपि ग्रहणात्। तेन उभयोरपि आमोरव्ययसंज्ञाभवनेन यथा किंतरामित्यत्र आमोऽग्रे 'अव्ययस्य' ॥ ३।२।७ ॥ इति सेर्लुप् भवति तथा पाचयांचक्रुषा इत्यत्र परोक्षाया आमोऽग्रेऽपि टाया लुप् सिद्धा ॥ ६४ ॥

वर्णग्रहणे जातिग्रहणम् ॥६५॥

एकवर्णग्रहणे तज्जातीयानेकस्यापि ग्रहणमित्याशयः। अमुकवर्णस्येकवचननिर्देशे एकस्यैव ग्रहणं प्राप्नोति न द्वयोरित्यतोऽयं न्यायः। यथा 'मुरतोऽनुनासिकस्य' ॥ ४।१।५१ ॥ इत्यत्र अनुनासिकस्येत्येकवचननिर्देशेऽपि अनुनासिकजातेर्ग्रहणात् 'रंरम्यते' इत्यादावेकानुनासिकान्ते यथा स्वागमः सिद्धस्तथा हम्मतेर्यङि जंहम्म्यते इत्यादावनुनासिकद्वयान्तत्वेऽपि सिद्ध्यति। ज्ञापकमस्य जंहम्म्यते इत्यादिसिद्ध्यर्थं यत्नान्तराकरणम्। अनित्यश्चायम्। क्वचिद्वर्णग्रहणे जातिग्रहस्य भवनादभवनाच्च। यथा सुपूर्वस्य धिणुङ् ग्रहणे इत्यस्य उदित्वान्नागमे 'तवर्गस्य श्चवर्ग-' ॥ १।३।६०॥ इति तस्य णत्वे धिण्ण्रूपाद्धातोः 'मन्वन' ॥ ५।१।१४७॥ इति वनि 'वन्याङ् पञ्चमस्य' ॥४।३।६५॥ इत्यत्र पञ्चमजातिग्रहस्य भवने णह्रयस्याप्याङादेशे आङो ङित्त्वेन गुणाभावे यत्वे च सुघ्यावेति रूपम्। जातिग्रहाभवने तु अन्त्यस्यैव णस्य आङादेशे निमित्तनिवृत्तौ नैमित्तिकस्यापि निवृत्तेराद्यणस्य णत्वनिवृत्तौ सुघिनावेत्यपि भवति। अनित्यत्वे ज्ञापकं तु काष्ठतङ्क्षि

कुलानीत्यादौ नागमार्थं 'धुटां आक्' ॥ १।४।६६ ॥ इति बहुवचनम्। तद्धि धुड्रूपजातिग्रहार्थं न्यस्तम्। नित्यत्वे त्वस्य धुट् इत्येकवचनेनापि सिद्धौ बहुवचनं किमर्थं न्यस्येत। अथास्मिन्न्याये वर्णग्रहणे इत्यस्योपलक्षणत्वात् विशिष्टवर्णसमुदायग्रहणेऽपि क्वचिज्जात्याश्रयणं सिद्धयति। यथा 'उपान्त्यस्यासमान०' ॥ ४।२।३५ ॥ इत्यादौ णाविति णिजातिराश्रीयते। तेन चोरयन्तं प्रायुक्त अचूचुरदित्यत्र णिद्वयेनापि एकस्यैव णेर्ऌपरत्वगणनात् ह्रस्वः सिद्धयति ॥६५॥

वर्णैकदेशोऽपि वर्णग्रहणेन गृह्यते ॥६६॥

ऋकारमध्येऽर्द्धमात्रो रेफोऽग्रे पश्चाच्च तुरीयः स्वरभागोऽस्ति। एवं ऌकारेऽर्द्धमात्रो ल इत्यादापि वाच्यमिति वृद्धाः। ततश्च यथा गोविकये क्रियमाणे मांसविक्रयनियमो न प्राप्नोति गवि मांसबुद्धेरभावात् तथा ऋलृग्रहणे तन्मध्यस्थरलयोर्ग्रहणं न प्राप्नोति ताभ्यां रलबुद्धेरनुत्पादनादित्यतोऽयं न्यायः। यथा प्रलीयमानमित्यादिघत् प्रक्लृप्यमानमित्यादावपि ऌकारव्यवधाने तदेकदेशलकारेणापि व्यवधानादलचटेति निषेधेन 'स्वरात्' ॥ २।३।८५ ॥ इति प्राप्तं णत्वं वाभूत्। ज्ञापकमस्य प्रक्लृप्यमानमित्यादौ णत्वनिषेधाय यत्नान्तराकरणम्। अनित्यश्चायम्। कृतः कृतवानित्यादौ 'रदादमूर्द्धमद०' ॥ ४।२।६९ ॥ इति प्राप्तस्य क्तयोस्तो नत्वस्य अभवनात्। नित्यत्वे त्वस्य ऋमध्यस्थरेफस्य रग्रहणेन ग्रहणे नत्वप्राप्तिर्दुर्निवारैव। अनित्यताज्ञापकं तु 'रषृवर्णात्' ॥ २।३।६३ ॥ इत्यत्र रेफऋवर्णयोर्ग्रहणम्। नित्यतायामस्य ऋवर्णमध्येऽपि रेफस्य विद्यमानत्वाद् एकग्रहणेनापि सरेदेव ॥ ६६ ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥६७॥

आदिप्रत्यये एकस्मिन्ननेकस्मिन् वाऽन्तःपतितेऽपि सति धात्वादेर्यथोक्तं कार्यं स्यादेव। प्रत्ययेऽन्तःपतिते धातोः खण्डितत्वबुद्धेरुत्पादात् खण्डीभूतस्य च तस्य कपालरूपतापन्नकलशस्य जलाहरणादिकार्ये इव धातुकार्ये अप्राप्तेऽयं न्यायः। तत्रैकस्मिन्यथा–अरुणदित्यत्र श्नेऽन्तःपतितेऽपि रुधेः प्रागट् सिद्धः। अनेकस्मिन्यथा–अतृणेडित्यत्र श्ने ईति चान्तःपतितेऽपि तृहेः प्रागट्। ज्ञापकमस्य 'त्वमहं सिना०' ॥ २।१।१२ ॥ इत्यत्र प्राक्चाक इति कथनम्। तद्धि युष्मदस्मदोरकिसौ त्वकमहकमित्येतदर्थम्। प्राक्चाक इति कथनाभावे 'त्यादिसर्वादि०' ॥ ७।३।२९ ॥ इत्यनेन प्रथममकि पतन्न्यायेन साकोऽपि युष्मदस्मदोस्त्वमहमादेशः स्यात्। तथा चाकःश्रवणमेव न स्यात्। अस्यानित्यत्वं न दृश्यते ॥ ६७ ॥

आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥६८॥

बहुवचनस्यातन्त्रत्वादेकोऽपि द्व्यादयो वा आगमाः यद्गुणीभूतायस्याश्रयीभूतास्तद्ग्रहणेन गृह्यन्ते। यस्य केवलस्य यत्कार्यमुक्तं तत्तस्य सागमस्यापि स्यादित्यर्थः। तत्तदागमविधायके सूत्रे आदिशब्देनान्तशब्देन च निर्देशस्य फलदर्शनार्थोऽयं न्यायः। तत्रैको यथा–प्रण्यपतत् इत्यत्राट्सहितेऽपि पतौ 'नेड्र्माद्य०' ॥२।३।७९॥

इति नेर्नो णः सिद्धः। द्वौ यथा-प्रतिपूर्वस्य पतेर्यङ्लुपि दिवि 'व्यञ्जनादेः सश्च दः' ॥४।३।७८॥ इति तल्लुकि प्रण्यपनीपतदित्यादावत्। आदिशब्दनिर्दिष्टत्वेन न्यञ्चान्तशब्दनिर्दिष्टत्वेनागमत्वात्तद्युतस्यापि पतेः पतिग्रहणेन ग्रहणात् 'नेर्ङ्यादा०' इति नेर्नो णः सिद्धः। त्रयो यथा-प्रनिपूर्वस्य यमेर्यङ्लुपि अद्यतन्यां प्रण्ययंयंसीदित्यत्राडागमव्यागमसंगमयुतेऽपि यमौ परे 'अकखाद्यषान्ते०' ॥ २।३।८० ॥ इति नेर्नो णः सिद्धः। ज्ञापकमस्य सेटःक्सोरुषादेशाय 'क्सुष्मतौ च' ॥ २।१।१०५ ॥ इत्येतद्भिन्नयत्नाकरणम्। एतन्न्यायाभावे 'क्सुष्मतौ च' इत्यनेनानिटः क्सोरुषादेशे बभूवुषीत्यादीनां सिद्धावपि पेचुषीत्यादिसेट्क्सवन्तानां सिद्ध्यर्थमुषादेशविधायकं सूत्रान्तरं कर्तव्यमेव। अनित्यश्चायम्। 'वेः स्कन्दोक्तयोः' ॥ २।३।५१ ॥ इति षत्वसूत्रे अट्सहितस्य स्कन्दग्रहणेनाग्रहणे व्यस्कन्दादित्यादौ षत्वस्याभवनात्। अनित्यत्वे ज्ञापकं तु 'उपसर्गात्सुग्सुवसो०' ॥ २।३।३९ ॥ इत्यत्र अटथपीति वचनम्। तद्धि अभ्यषुणोदित्यादावड्व्यवधानेऽपि षत्वार्थम्। नित्यत्वे त्वस्य सुग्रहणेनाट्सहितस्यापि सुगो ग्रहणसिद्धेरटा व्यवधानाभवनादटथपीति न वक्तव्यमेव। 'आगमोऽनुपघातो' त्यपि न्यायो विद्यते परं सोऽप्यत्रैवान्तर्भवति समानफलत्वात् ॥६८॥

स्वाङ्गमव्यवधायि ॥६९॥

द्विरुक्तादिकं स्वमङ्गं धात्वादेर्निजाङ्गिनः कार्ये कर्तव्ये व्याघातकं न भवति। स्वाङ्गत्वस्य ह्येतावदेव फलमिति ज्ञापनार्थोऽयं न्यायः। यथा संचस्कारेत्यत्र सम् कृ इति स्थितेऽन्तरङ्गत्वात् प्रथमं स्सटि ततश्च तदवसरप्राप्ते 'स्सटि समः' ॥ १।३।१२ ॥ 'लुक्' ॥ १।३।१३ ॥ इति सूत्रे बाधित्वा परत्वान्नित्यत्वाद् धातुमात्राश्रयत्वेनान्तरङ्गत्वाच्च णवि तदाश्रिते द्वित्वादौ च कृते संचस्कृ इति स्थिते एतन्न्यायाद् धात्वङ्गेन द्वित्वजचकारेण समो व्यवधानाभवनात् निमित्ताभाव इति न्यायप्राप्ता स्सटो निवृत्तिर्नाभूत्। ज्ञापकमस्य 'नेर्ङ्यादा०' ॥ २।३।७९ ॥ इति सूत्रस्य 'द्वित्वेऽप्यन्तेऽप्यनितेः०' ॥ २।३।७९ ॥ इति सूत्रान्तरकरणं तत्र च द्वित्वेऽपीत्यननुवर्तयित्वा ङ्मादिधातूनां सामान्यनिर्देशः। तथाहि नेर्णत्वं तावत् प्रणिपततीत्यादिवत् प्रणिपपातेत्यादावपीष्टम्। तच्च तदैव सिद्ध्येत् यदि 'नेर्ङ्यादा' इत्येतत् 'द्वित्वेऽप्यन्ते' इत्येतदनन्तरं क्रियेत तत्र च द्वित्वेऽपीत्यनुवर्त्येत। एवं हि द्वित्वेऽप्यद्वित्वेऽपि च ङ्मादिधातुषु परेषु नेर्णः सिद्ध्यत्येव। यत्तु तथा न कृतं किन्तु सामान्येन ङ्मादिधातव एव निर्दिष्टास्तज्ज्ञायते प्रणिपततीत्यादिवत् प्रणिपपातेत्यादावपि 'नेर्ङ्यादा०' इत्यनेनैव णत्वं सेत्स्यति; द्वित्वजस्य पस्य धातोः स्वाङ्गत्वात् स्वाङ्गमव्यवधायीति न्यायस्य सद्भावात्। अनित्यश्चायम्। 'वेःस्कन्दोक्तयोः' ॥ २।३।५१ ॥ इत्यत्र द्वित्वसहितस्य स्कन्दः अग्रहणाद्विचिस्कन्त्सतीत्यादौ षत्वाभावात्। अनित्यत्वे ज्ञापकं तु प्रतितष्ठाचित्यादौ द्वित्वव्यवधानेऽपि षत्वार्थं 'स्थासेनिसेध०' ॥ २।३।४० ॥ इत्यत्र द्वित्वे-

ऽपीत्युक्तिः । नित्यत्वे त्वस्य द्वित्वस्य स्वाङ्गत्वेनाव्यवधायित्वे किमर्थं सा उच्येत ॥ ६९ ॥

उपसर्गो न व्यवधायि ॥७०॥

विभक्त्यन्तत्वेन उपसर्गस्यापि पृथक्पदत्वाद् व्यवधायित्वे प्राप्तेऽयं न्यायः । यथा उक्षांप्रचकुर्नगरस्य मार्गान् इत्यत्र 'गुरुनाम्यादेः०' ॥ ३।४।४८ ॥ इत्यामादेशे कृते आमन्तस्य कृगश्च प्रेण न व्यवधानम् । अयंभावः–कृभ्वस्तिचानु तदन्तमित्यत्रानुशब्दस्य तावदयमर्थः–व्यवहितो विपर्यस्तो वा कृभ्वस्तीनां प्रयोगो न कार्यः किन्त्वनन्तर एवेति । यदि चात्र प्रेण व्यवधानं स्यात्तदाऽयं प्रयोग एव असाधुः स्यात् । ज्ञापकमस्य 'गापोष्टक्' ॥ ५।१।७४ ॥ इत्यत्र उपसर्गवर्जनम् । तद्धि साम गायतीति टकि सामगो स्त्री इत्यादाविव साम संगायतीति सामसंगायीत्यत्र सोपसर्गाद् गायतेष्टक् मा भूत् किन्तु 'कर्मणोऽण्' ॥ ५।१।७२ ॥ इत्यणेव स्यादित्येतदर्थम् । एतन्न्यायाभावे 'गायष्टक्' इत्येतावतापि सूत्रेण साम संगायतीत्यत्र समा व्यवधानेन गायः कर्मणः परत्वाभावात् टकः प्राप्तिरेव नेति किमर्थं तत्कुर्यात् । किन्त्वेतन्न्यायसत्त्वेन कर्मगायत्योरुपसर्गेण व्यवधानं न भविष्यतीति साम संगायति स्त्री सामसंगायीत्यत्राऽपि टक्प्राप्त्या सामसंगीत्यनिष्टं मा भूदित्याशंकयैव तत् । अनित्यश्चायम् । समागच्छतीत्यत्र आङा व्यवधानेन 'समो गमृच्छिप्रच्छि०' ॥ ३।३।८४ ॥ इत्यात्मनेपदस्य अविहितत्वात् ॥७०॥

येन नाव्यधानं तेन व्यवहितेऽपि स्यात् ॥७१॥

यत्र येन वर्णादिना अवश्यव्यवधानं तत्र तद्व्यवधानेऽपि तत्कार्यं स्यात् । अप्राप्ते प्रापणार्थोऽयं न्यायः । एवमुत्तरयोरपि । यथा चार्वी, गुर्वीत्यादौ स्वरोकारयोरेकव्यञ्जनेन व्यवधानवत्त्वेऽपि 'स्वरादुतो गुणादखरोः ॥ २।४।३५ ॥ इति ङी सिद्धः । स्वरात्परस्य अव्यवहितस्य उतो गुणवाचिष्वसंभवात् । ज्ञापकमस्य 'स्वरादुतः०' इत्यत्रैव स्वरादुत इत्युक्तिः । एतन्न्यायाभावे स्वरात्परस्य अव्यवहितस्य उतः कुत्रापि गुणवाचिष्वसंभवात् स्वरादुत इत्युक्तिर्व्यर्थैव स्यात् । तथैवात्र सूत्रे खरुवर्जनमप्यस्य ज्ञापकम् । स्वरात्परो य उकारस्तदन्ताच्चान्नो ङी स्यादित्युक्ते स्वरोकारयोर्व्यञ्जनेन व्यवधानात् खरुशब्दाद् ङीप्रसङ्ग एव नेति तद्व्यर्थं सत् ज्ञापयतीमं न्यायम् । अनित्यत्वमस्य न दृश्यते ॥७१॥

ऋकारापदिष्टं कार्यं लृकारस्यापि ॥७२॥

यथा कृपौङः सनि चिक्लृप्सतीत्यत्र निर्निमित्तत्वात् प्रथमं 'ऋरलवं०' ॥ २।३।९९ ॥ इति ऋत लृत्वे द्वित्वे च 'ऋतोऽत्' ॥ ४।१।३८ ॥ इति लृतोऽप्यत् सिद्धः । ज्ञापकमस्य 'दूरादामन्त्र्यस्य०' ॥ ७।४।९९ ॥ ऋवर्जस्वरस्य प्लुतत्वमुक्त्वापि पुनर्लृग्रहणम् । तद्धि ऋनिषेधे एतन्न्यायेन लृनिषेधोऽपि मा भूदित्येतदर्थम् । अनित्यश्चायम् । 'ऋलृति ह्रस्वो वा' ॥ १।२।२ ॥ इत्यत्र ऋलृतोरुभयोरप्युक्तेः ॥ ७२ ॥

सकारापदिष्टं कार्यं तदादेशस्य शकारस्यापि ॥७३॥

तदादेशस्येत्यनेन 'भूतपूर्वकस्तद्वदुपचारः' इति न्यायस्यैवायं प्रपञ्चः। यः किल सकारादेशः शकारः स भूतपूर्वकरीत्या सकार एवेति तात्पर्यात्। यथा षस्च् गतौ इत्यस्य षस्य 'षः सोष्टयैष्टिवष्वष्कः' ॥ २।३।९८ ॥ इत्यनेन से 'सस्य शषौ' ॥ १।३।६१ ॥ इति सस्य शे यङ्लुपि दिवि 'व्यञ्जनादेः' ॥ ४।३।७८ ॥ इति तल्लुक्येतन्न्यायात् 'संयोगस्यादौ स्कोर्लुक्' ॥ २।१।८८ ॥ इति सकारादेशस्य शस्य लुकि चस्य कत्वे च असासक् इति सिद्धम्। ज्ञापकमस्य 'ङ्नः सः त्सोऽशः' ॥ १।३।१८ ॥ इत्यत्र श्ववर्जनम्। तद्धि भवान् श्योतोत्यादौ शस्य त्सत्वाभावार्थम्। एतन्न्यायाभावे ङ्नः सः इति भणनात् त्सत्वप्राप्तिरेव नेति किमर्थं श्ववर्जनं क्रियेत। अनित्यत्वमस्य प्रायो नास्ति ॥७३॥

ह्रस्वदीर्घापदिष्टं कार्यं न प्लुतस्य ॥७४॥

ह्रस्वदीर्घस्थाननिष्पन्ने प्लुते भूतपूर्वकस्तद्वदिति न्यायेन ह्रस्वदीर्घनामोच्चारोक्तकार्याणां प्राप्तौ तन्निषेधार्थोऽयं न्यायः। तत्र ह्रस्वापदिष्टं यथा–हे राज३ निह इत्यत्र परत्वान्नित्यत्वाच्च 'दूरादामन्त्र्य०' ॥ ७।४।९९ ॥ इत्यनेन पूर्वं प्लुते कृते तस्मात् परस्य नस्य 'ह्रस्वान् ङ्णन०' ॥ १।३।२७ ॥ इति न द्वित्वम्। अत्रांशे ज्ञापकं–'ह्रस्वात् ङ्णन०' इत्यत्र ह्रस्वादिति सामान्योक्तिः। द्वित्वं तावत् अप्लुतरूपात् ह्रस्वात्परेषां ङणनामिष्यते न तु प्लुतरूपात्। तथापि सूत्रे ह्रस्वादिति सामान्येन यदुक्तं तदिमं न्यायं ज्ञापयति। दीर्घापदिष्टं यथा–'अदीर्घाद्विराम०' ॥ १।३।३२ ॥ इत्यत्र दीर्घवर्जनेऽपि दीर्घस्थाननिष्पन्नप्लुतस्य एतन्न्यायेन वर्जनं न ज्ञातम्। तेन च हे गोऽत्रात, हे गोत्रात इत्यत्र दीर्घस्थानीयप्लुतादपि द्वित्वं सिद्धम्। ज्ञापकमस्य 'अनाङ्माङो दीर्घाद्वा छः' ॥ १।३।२८ ॥ इत्यनेन सिद्धेऽपि दीर्घस्थाननिष्पन्नात् प्लुतात्परस्य छस्य द्वित्वविकल्पार्थं 'प्लुताद्वा' ॥ १।३।२९ ॥ इति सूत्रकरणम् ॥ तद्धि आगच्छ भो इन्द्रभूते ३च्छत्रमानये-त्यत्र एतन्न्यायेन 'अनाङ्माङो दीर्घात्०' इति दीर्घापदिष्टं कार्यं प्लुतस्य न भविष्यतीत्याशंक्य पृथक् कृतम्। एतन्न्यायाभावे 'अनाङ्माङ्०' इत्यनेनैव प्लुताद्वेति सूत्रं निष्प्रयोजनमेव। अनित्यत्वमस्य नास्ति ॥ ७४ ॥

संज्ञोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं न तदन्तस्य ॥७५॥

संज्ञेति संज्ञासूत्राणि। प्रत्ययः किल प्रकृतिमाक्षिपति, प्रकृतिं विना प्रत्ययानुत्पत्तेरित्यतः प्रत्ययमात्रग्रहणेनापि तदन्तग्रहणे प्राप्ते तन्निषेधार्थोऽयं न्यायः। तत्र संज्ञाधिकारे यथा–'स्यादिर्विभक्तिः' ॥ १।१।१९ ॥ इत्यत्र स्याद्यन्तं विभक्तिरिति नार्थः किंतु स्यादिः प्रत्यय एव विभक्तिसंज्ञ इत्यर्थः। ज्ञापकमस्य संज्ञाधिकारस्थे 'तदन्तं पदम्' ॥१।१।२०॥ इत्यत्र अन्तशब्दनिर्देशः। एतन्न्यायाभावे 'सापदम्' इत्युक्तावपि प्रत्ययेन प्रकृतेराक्षेपात् तदन्तविधिलाभे किमर्थमन्तशब्दो निर्दिश्येत। अनित्यत्वमस्यात्रांशे न दृश्यते। 'उत्तरपदाधिकारे यथा–'न नाम्येक-

स्वरात् खित्युत्तरपदेऽमः ' ॥ ३।२।९ ॥ इत्यतोऽनुवर्तमानोत्तरपदाधिकारस्थे ' कालात्तनतर० ' ॥ ३।२।२४ ॥ इत्यत्र तनाद्याः प्रत्यया एव गृह्यन्ते न तदन्तनामानि । ज्ञापकमस्योत्तरपदाधिकारस्थे ' नवा खित्कृदन्ते रात्रेः ' ॥ ३।२।११७ ॥ इत्यत्रान्तशब्दनिर्देशः। एतन्न्यायायाभावेऽत्रापि खित्कृतीत्येवोक्ते प्रत्ययेन प्रकृतेराक्षेपात् तदन्तविधिलाभेऽपि किमर्थमन्तशब्दो निर्दिश्येत । अनित्योऽशोयम् । ' नेन्सिद्धस्थे ' ॥ ३।२।२९ ॥ इत्यत्रोत्तरपदाधिकारेऽपि इनन्तस्य ग्रहणात् । तेन स्थण्डिलशायीतीनन्ते शायिनि परे ' तत्पुरुषे कृति ' ॥ ३।२।२० ॥ इति प्राप्तायाः सप्तम्यलुपो न निषेधः ॥७५॥

ग्रहणवता नाम्ना न तदन्तविधिः ॥७६॥

निर्देशे सतीति शेषः । साक्षान्नामग्रहणेन यस्य यत्कार्यमूचे तत्कार्यं तस्य नाम्नः समासादिना समुदायान्तभूतस्य सतो न स्यादित्यर्थः । यथा सूत्रप्रधानो नडः सूत्रनडस्तस्यापत्यम् ' अत इञ् ' ॥ ६।३।३१ ॥ इतीञि अनुशतिकादित्वादुभयपदवृद्धौ सौत्रनाडिः । अत्र सूत्रनडशब्दात् ' नडादिभ्य आयनण् ' ॥ ३।१।९३ ॥ इत्यायनण् नाभूत् । ज्ञापकमस्य ' मालेषाकेष्टकस्यान्तेऽपि भारित्रलचिते ' ॥ २।४।१०॥ इत्यत्र अन्तेऽपीति वचनम् । तद्धि मालभारीतिवदुत्पलमालभारीत्यादावपि ह्रस्वसिद्ध्यर्थं कृतम् । यदि तावदवयवप्राधान्यविवक्षया मालावदुत्पलमालेत्यादेरपि ह्रस्वः स्यात्तर्हि किमर्थं तत्कुर्यात् । परं मालेत्यादिनामग्राहं विहितो ह्रस्व एतन्न्यायादुत्पलमालेत्यादौ न प्राप्नोतीति तद्वचनमावश्यकम् । अनित्यश्चायम् । ह्याश्रये ' प्रियासृजोऽसावपृणद्विडस्ना ' इत्यत्र ' प्रियासृजो द्विडस्ना ' इति स्थानद्वये समासान्तगस्यासृजो ' दन्तपादनासिका० ' ॥ २।१।१०१ ॥ इत्यनेन वैकल्पिकस्यासनादेशस्य करणात् । अनित्यत्वे ज्ञापकं तु ' केवलसखिपतेरौः ' ॥१।४।२६॥ इत्यत्र केवलशब्दः । स हि प्रियसखौ नरपतावित्यादौ ङेरौत्वनिषेधार्थः । नित्यत्वे त्यस्य ' सखिपतेरौः ' इत्येव सूत्रे कृते तत्र निषेधः सिद्ध्यतीति किमर्थं केवलशब्दो निर्दिश्येत । ' उपपदविधिषु न तदन्तविधिः ' इत्यपि न्यायोऽस्तीति केचित् । यत्रामुकोपपदाद्धातोः अमुकः प्रत्ययः स्यादिति विधीयते तत्र तदुपपदं यदि समासादिना अन्तर्भूतं स्यात्तदा स विधिर्न स्यात् इति तदर्थः। अयं न्यायः ग्रहणवता नाम्नेति न्याये एव अन्तर्भवति; उपपदविधिष्वप्युपपदानां नामान्येव गृहीत्वा कार्याणामुक्तत्वात् । तथा च ' ग्रहणवता नाम्ना न तदादिविधिः ' इत्यपि न्यायो दृश्यते क्वचित् परमेतस्येदृक्सूत्रपाठः साक्षात् क्वापि न दृष्ट इत्यसावपि न पृथक् प्रदर्श्यते ॥७६॥

अनिनस्मनग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥७७॥

अन्-इन्-अस्-मन् इत्येतेषां ग्रहणानि अर्थवता अनर्थकेन च स्वेन तदन्तविधिं प्रवर्तयन्तीत्यर्थः । अर्थवद्ग्रहण इत्यस्यापवादोऽयं न्यायः । तत्र अन् सार्थको यथा— राजिधातोः ' उक्षितक्षि० ' (उणा० ५००) इत्यौणादिके अनि राजा; स्त्री चेद्राज्ञी—' ङिति हृतोऽस्वसन्तादेर्ङीः ' ॥ २।४।१ ॥ इति ङीः। अनर्थको

यथा-अश्नोतेः 'षष्यशौभ्याम्०' (उणादि० ९०३) इत्यौणादिके तनि अष्टन् ततो बहुव्रीहौ प्रियाष्ट्णः पश्य। उभयत्रापि 'अनोऽस्य' ॥ २।१।१०८ ॥ इत्यनो अलोपः सिद्धः। इन् सार्थको यथा-दण्डोऽस्यास्ति 'अतोऽनेकस्वरात्' ॥ ७।२।६ ॥ इतीनि दण्डी। अनर्थको यथा-स्रगस्यास्ति 'अस्तपोमायामेधास्रजो विन्' ॥७।२।४७॥ इति विनि स्रग्वी। उभयत्रापि 'इन्हन्पूष०' ॥ १।४।८७ ॥ इति दीर्घः। अस् सार्थको यथा-आप्नोतेः 'आपोऽपाक्ता०' (उणा० ९६४) इत्यौणादिके असि धातोरप्सरादेशे च अप्सराः। अनर्थको यथा-खरस्येव नासिकाऽस्य 'खरखुराद्नासिकाया नस्' ॥ ७।३।१६० ॥ इति नासिकाया नसादेशे खरणाः। उभयत्रापि 'अभ्वादेः०' ॥ १।४।९० ॥ इति दीर्घः। मन् सार्थको यथा-स्यतेः 'स्यतेरीच्च वा' (उणा० ९१५) इत्यौणादिके मनि स्यतेरात ईत्वे च सीमा। अनर्थको यथा-महतो भावः 'पृथ्वादेरिमन्वा' ॥ ७।१।५८ ॥ इति इमनि महिमा, तमतिक्रान्ता अतिमहिमा स्त्री। उभयत्रापि 'मनः' ॥ २।४।१४ ॥ इति ङीनिषेधः। उपलक्षणादतुरपि सार्थकवदनर्थकोऽपि गृह्यते। ज्ञापकमस्य अस्लक्षणेऽशे 'अभ्वादेरत्व०' इत्यत्राभ्वादेरिति वचनम्। तद्धि पिण्डं ग्रसते पिण्डग्रः इत्यादौ दीर्घनिषेधार्थं तावदुक्तम्। एतन्न्यायाभावे ग्रसतेरसोऽनर्थकत्वेन अर्थवद्ग्रहणे इति न्यायाद्दीर्घत्वस्य प्राप्तिरेव नेति किमर्थं तदुच्येत। किंच अस्य न्यायस्य इन्नंशे अनित्यत्वात् सुपथी स्त्री इत्यत्र पथिन्शब्दस्यौणादिकत्वादव्युत्पत्तिपक्षे इनोऽनर्थत्वात् 'इनःकच्' ॥ ७।३।१७० ॥ इति कच् नाभूत्। एवं शेषेष्वपि ज्ञापकमनित्यत्वं चोन्नेयम् ॥७७॥

गामादाग्रहणेष्वविशेषः ॥७८॥

यत्र गा-मा-दा इति सूत्रे निर्दिष्टं तत्र गाङ् गतौ, गै शब्दे इत्येतौ; मांङ् माने, माङ् मानशब्दयोः, मेङ् प्रतिदाने इत्येते; दारूपाश्चाविशेषेण गृह्यन्ते। लक्षणप्रतिपदोक्तयोरित्यादिन्यायानां यथायोगमपवादोऽयम्। तथव चाग्रे दर्शयिष्यते। तत्र गाग्रहणे यथा-गातेर्गायतेर्वा यल्लुप्याशिषि जागेयाद् ग्रामं गीतं वा। अत्रोभयोरपि 'गामास्था०' ॥ ४।३।९६ ॥ इति यः सिद्धः। अन्यथा गायतेर्गारूपस्य लाक्षणिकत्वाल्लक्षणप्रतिपदोक्तयोरिति न्यायेन प्रतिपदोक्तगारूपस्य गातेरेव ग्रहणं स्यान्नतु गायतेः। यद्वा कृत्रिमाकृत्रिमयोरिति न्यायात् कृत्रिमगारूपस्य गायतेरेव ग्रहणं स्यान्नतु गातेरिति। ज्ञापकमस्य 'गायोऽनुपसर्गाट्टक्' ॥ ५।१।७४ ॥ इत्यत्र गातिं निषेद्धुं गाय इति निर्देशः। अत्रांशे क्वचिदनित्योऽयम्। 'गस्थकः' ॥ ५।१।६६ ॥ इत्यत्र ग इति सामान्यनिर्देशेऽपि गाङं व्युदस्य गायतेरेव ग्रहणात्। माग्रहणे यथा-मात्योर्मयतेश्च कयोर्मितः मितवान् इत्यत्र 'दोसोमास्थ इः' ॥ ४।४।११ ॥ इति इः। ज्ञापकमस्य 'ईर्ष्यक्षनेऽयपि' ॥ ४।४।९७ ॥ इत्यस्य वृत्तौ मा इति मां-मांङ्-मेङां ग्रहणमित्युक्तिः। एतन्न्यायांशाभावे मा इति कथने अदाधनदाद्योरिति कृत्रिमाकृत्रिमयोरिति वा न्यायाद् मेङ एव ग्रहणं प्राप्नोति न तु मात्योः। यद्वा लक्षणप्रतिपदोक्तयोरिति न्यायात् मात्योरेव ग्रहणं

प्राप्नोति न तु मेङः । तथा च मां-मांङ्मेङां ग्रहणमित्युक्तिरसङ्गतैव । अत्रांशेऽनित्योऽयम् । 'मिमीमादामित्स्वरस्य' ॥ ४।१।२० ॥ इत्यत्र सामान्येन ग्रहणार्थं बहुवचनयत्नस्य कृतत्वात् । नित्यत्वे त्वस्य अनेनैव सामान्यग्रहणस्य सिद्धेः किमर्थं स यत्नः क्रियेत । दाग्रहणे यथा-'प्राज्ञश्च' ॥ ५।१।७९ ॥ इत्यत्र ज्ञारूपसाहचर्याद्दारूपमेव प्रत्याग्रहः कार्यो न तु दासंज्ञां प्रतीत्येव संसाध्य तदन्वेतन्न्यायबलादविशेषेण षड्भ्योऽपि दारूपेभ्यो ङः कृतः । यथा-डुदांङ्क् दाम् वा-धनप्रदः । दों-वृक्षप्रदः । देंङ्-पुत्रप्रदः । दांङ्क्-केदारप्रदः । दैंव्-भाजनप्रद इति । एतन्न्यायांशाभावे अदाद्यनदाद्योरिति न्यायाद्दांङ्क्दांङ्क्वर्जानां चतुर्णामेव ग्रहणं प्राप्नोति । यद्वा लक्षणप्रतिपदोक्तयोरिति न्यायाद्दैंङ्दैव्वर्जत्रयाणामेव ग्रहणं स्यात् । अत्रांशे ज्ञापकं 'दाट्धेसिशदसदोरुः' ॥ ५।२।३६ ॥ इत्यत्र धयतेः पृथगुक्त्या दासंज्ञां प्रत्याग्रहोऽत्र न कार्य इत्येव वक्तुं शक्येऽपि षडपि दारूपा इह गृह्यन्त इत्यप्युक्तिः । धयतेः पृथगुक्त्या तावद्दासंज्ञां प्रत्याग्रहस्य निरासोऽत्र भवतु, दारूपषट्कग्रहस्तु कथं सिद्धयेत् ; अदाद्यनदाद्योरित्यादिन्यायानां सत्त्वात् । तथापि यद्दारूपाः षड् गृह्यन्त इत्युक्तं तदेतन्न्यायसत्त्वमस्य तदपवादत्वं च स्मृत्वैव । अत्रांशेऽनित्यत्वमस्य न दृश्यते ॥ ७८ ॥

श्रुतानुमितयोः श्रौतो विधिर्बलीयान् ॥७९॥

श्रुतः-सूत्रे साक्षाच्छब्देनोक्तः' अनुमितः-परिभाषया पूर्वानुवृत्ताधिकारादिना वा आरोपितः । श्रुतानुमितयोरिति संबन्धे षष्ठी । विध्योरिति चात्र शेषः । तत्र तु निर्धारणे षष्ठी । श्रुतस्यायं श्रौतः । ततश्च श्रुतानुमितयोः संबन्धिनोर्द्वयोर्विध्योः संभवतोर्मध्ये श्रुतस्य विधिर्बलीयानिति स एव क्रियत इत्यर्थः । यथा 'ऋतां विङतीर्' ॥ ४।४।१६० ॥ तीर्णम् । अत्र श्रुतस्य ऋत एव इर् न तु 'अनेकवर्णः सर्वस्य' ॥ ७।४।१०७ ॥ इति ऋदन्तधातोः सर्वस्य । यत ऋदन्तत्वमृतामिति धातुविशेषणत्वेन 'विशेषणमन्तः' ॥ ७।४।११३ ॥ इति परिभाषया आरोपितत्वादनुमितमित्युच्यते । ततोऽनुमितस्य ऋदन्तत्वस्य विधिर्निर्बलत्वान्न क्रियते । ऋदन्तस्य विधिः कः इति चेत् इरोऽनेकवर्णत्वात् 'अनेकवर्णः' इति परिभाषया यदखण्डस्य ऋदन्तधातोरिर् प्राप्नोति स ऋदन्तत्वस्य विधिरिति । ज्ञापकमस्य 'ऋतामृत' इत्यकृत्वा सूत्रे ऋतामित्येव निर्देशः । तथाहि-ऋतामित्यस्य तावत् ऋदन्तानामिति व्याख्या । इर् चादेशोऽनेकवर्णः । ततश्च 'अनेकवर्णः' इति परिभाषया सर्वस्य ऋदन्तधातोरिर् प्राप्नोति । इष्यते तु ऋमात्रस्यैव । तथा च अनेकवर्ण इति परिभाषाया अवकाशनिरासाय ऋतामृत इर् इति निर्देष्टुं युक्तम् । 'सत्यप्येवं ऋतामित्येव यन्निर्दिष्टं तद्ज्ञापयतीमं न्यायमिति । अनित्यश्चायम् । तेन 'मनोरौ च वा' ॥ २।४।६१ ॥ इत्यत्र वाशब्दो ङीप्रत्यये पूर्वाधिकारानुमिते संबध्यते न तु श्रुते औकारे । तथा च मनोर्भार्या इति धवयोगे 'मनोरौ च वा' इति वा ङ्यां ङीयोगे औदैतोश्च मनावी, मनायी, मनुरिति त्रैरूप्यं सिद्धम् । औचेत्यस्य वाशब्दसंबन्धने तु ङीप्रत्ययस्य नित्यमेव

भवनात् मनावी मनायी, मन्वी इति त्रैरूप्यं स्यात् ॥ ७९ ॥

निर्दिश्यमानस्यैवादेशाः स्युः ॥८०॥

यथा—'यस्वरे पादः' ॥ २।१।१०२ ॥ इत्यत्र पाद इत्यस्य तावत् पादन्तस्येति व्याख्या । पादन्तस्येत्येतच्चाधिकृतस्य नाम्न इत्यस्य विशेषणम् । ततश्च पद् इत्यादेशस्यानेकवर्णत्वात् 'षष्ठ्यान्त्यस्य' ॥ ७।४।१०६ ॥ इति परिभाषा बाधित्वा 'अनेकवर्णः०' इत्यनेन पादन्तस्य नाम्नः सर्वस्य पद्भावप्राप्तौ न्यायेनानेन पाद इत्येतावत एव स्यात् । सूत्रे तस्यैव निर्देशात् । यथा द्वौ पादावस्य द्विपात् 'पात्पादस्याहस्त्यादेः' ॥ ७।३।१४८ ॥ इत्यनेन पादस्य पाद्भावः । ततस्तृतीयायां 'यस्वरे पादः०' ॥ २।१।१०२ ॥ इत्यनेन पाद् इत्येतावत एव पद्भावे द्विपदा इति । अयं न्यायः पूर्वस्यैव प्रपञ्चः ॥ ८० ॥

अन्तरङ्गानपि विधीन् यबादेशो बाधते ॥८१॥

प्रत्ययाश्रितत्वात् पदद्वयापेक्षत्वाच्च बहिरङ्गोऽपीति शेषः । यथा प्रशम्य इत्यत्र 'अहन्पञ्चमस्य किङ्किति' ॥ ४।१।१०७ ॥ इति दीर्घत्वं प्रकृत्याश्रितत्वादेकपदापेक्षत्वाच्चान्तरङ्गमपि बाधित्वा पूर्वं यप् । पश्चात्तु धुडादिप्रत्ययाभावान्न दीर्घत्वम् । ज्ञापकमस्य प्रजग्ध्येति सिद्ध्यै 'यपि चादो जग्ध्' ॥ ४।४।१६ ॥ इत्यत्र यपि चेति वचनम् । यदि क्ित्व परे जग्धादेशः, पश्चाच्च यप् क्रियते तदाऽपि प्रजग्ध्येति सिद्ध्यत्येव तथापि यद् यपि चेति वचनं तदेतन्न्यायेन यपः सर्वकार्येभ्यः पूर्वं भवनादेव । अनित्यतास्य न दृश्यते ॥ ८१ ॥

सकृद्गते स्पर्द्धे यद् बाधितं तद् बाधितमेव ॥८२॥

गते इति धातूनामनेकार्थत्वाज्ज्ञाते, गत्यर्था इति न्यायाज्ज्ञाते इति वा । द्वयोर्विध्योरन्यत्र सावकाशयोस्तुल्यबलयोरेकत्रोपनिपातः स्पर्द्धः । द्वयोः सूत्रयोः स्पर्द्धे सति यत् केनापि हेतुना प्रथमं बाधितं तद् बाधितमेवेति बाधकसूत्रप्रवृत्त्यनन्तरमपि न प्रवर्तत इत्यर्थः । यथा द्वयोः कुलयोः इत्यत्र द्वि ओस् इति स्थिते आदेशादागम इति न्यायात् प्रथमं 'अनाम्स्वरे०' ॥ १।४।६४ ॥ इति नोऽन्तः प्राप्तः स च परत्वादन्तरङ्गत्वाच्च 'आद्वेरः' ॥ २।१।४२ ॥ इत्यनेन बाधितस्ततस्तस्मिन् कृते 'पदद्वहुस्भोसि०' ॥ १।४।४ ॥ इत्येत्वे च कृते पुनः प्राप्तोऽपि न स्यात् । ज्ञापकमस्य 'उदच उदीच्' ॥ २।१।१०३ ॥ इत्यत्र णिवर्जनम् । तद्धि उदश्चमाचष्टे' इति णौ उदयतीति रूपसिद्ध्यर्थम् । तद्धि उदीचादेशकरणान्तरं यदि 'त्रन्त्यस्वरादेः' ॥ ७।४।४३ ॥ इत्यन्त्यस्वरादिलुक् प्रवर्त्यते तदाऽपि सिद्ध्यत्येव । परं विशेषविहितत्वेनान्त्यस्वरादिलोपात्प्रागेवोदीचादेशे पश्चाच्चैतन्न्यायादन्त्यस्वरादिलुकोऽप्रवृत्तेरुदोचयतीत्येव स्यान्न तु उदयतीति णिवर्जनं कृतम्। तथा च उदीचादेशं विनाऽन्त्यस्वरादिलुकैवोदयतीति सिद्धम्। अनित्यश्चायम्। प्रियतिसृणः कुलस्येस्यत्र आगमात् सर्वादेशः इति न्यायेन प्रथमं बाधितस्यापि नागमस्य तिस्रादेशानन्तरं पुनः करणात् ॥ ८२ ॥

द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधकः ॥८३॥

द्वित्वे सति यः पूर्वोऽवयवस्तस्य विकारेषु कर्तव्येषु यो बाधको विधिः स स्वं बाध्यविधिं बाधितुं न प्रभवति । स्पर्धे परः, बलवन्नित्यमनित्यादित्यादीनामपवादोऽयम् । यथा अचीकरदित्यत्र 'लघोर्दीर्घ०' ॥ ४।१।६४ ॥ इति दीर्घविधिः परत्वे नित्यत्वे च सत्यपि सन्वद्भावं बाधित्वा पूर्वं न प्रवर्तते । प्रवृत्तौ तु अचाकरदित्यनिष्टमेव स्यात् । ज्ञापकमस्य 'आगुणावन्यादेः' ॥ ४।१।४८ ॥ इत्यत्र न्यादिवर्जनम् । तद्धि वनीवच्यते इत्यादावात्वाभावार्थं कृतम् । आत्वाभावस्त्वन्यथाऽपि सेत्स्यत्येव, न्यागमादेरात्वापवादत्वात् । परमेतन्न्यायेन न्यागमादय आत्वं बाधितुं नालमिति तद्वर्जनं क्रियते । अनित्यत्वमस्य न दृश्यते ॥८३॥

कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये पश्चाद् वृद्धिस्तद्बाध्योऽट् च ॥८४॥

वृद्धिरिति सामान्योक्तेऽपि अत्र अडागमबाधिका 'स्वरादेस्तासु' ॥४।४।३१॥ इति विहितैव गृह्यते । अन्यथाऽटस्तया बाध्यस्तद्बाध्य इति विशेषणानुपपत्तेः । बलवन्नित्यमनित्यात्, अन्तरङ्गं बहिरङ्गादित्यादीनामपवादोऽयम् । तत्र वृद्धिर्यथा-ऋंक् गतौ-ह्यस्त० अन्—ऐयरुः इत्यादौ 'धातोरिवर्ण०' ॥ २।१।५० ॥ इतीयादेशे कृते अकृतेऽपि प्राप्ता नित्याऽपि वृद्धिरियादेशं कृत्वैव क्रियते । पूर्वं वृद्धौ हि आयरुरित्यनिष्टं स्यात् । अत्रांशे ज्ञापकं इण्क् गतौ-ह्य०-आयन् इत्यादिरूपेषु यत्वादिभ्यः प्रागेव परत्वात् 'स्वरादेस्तासु' इति वृद्धौ सिद्धयत्यपीष्टे 'पत्यस्तेर्वृद्धिः' ॥ ४।४।३० ॥ इति वृद्धिसूत्रकरणम् । तद्धि एतन्न्यायांशाभावे व्यर्थमेव सत् ज्ञापयतीमं न्यायम् । एतन्न्यायांशसत्त्वे तु यत्वादीनां प्रथमं प्राप्तेस्तदनु स्वरादित्वाभावात् 'स्वरादेस्तासु' इति वृद्ध्यभवनेन आयन्नित्यादि न सिद्ध्येदिति तद्बाधनार्थं पुनः 'पत्यस्तेः' इति वृद्धिविधानं सार्थकम् । अत्रांशेऽनित्योऽयम् । तेन संपूर्वे ऋं प्रापणे इत्यस्मादद्यतन्यां 'समो गमृच्छि०' ॥३।३।८४॥ इत्यात्मनेपदे समार्ष्टेत्यादौ 'धुड्हस्वात्०' ॥ ४।३।७० ॥ इति प्राप्तात् सिज्लोपात्प्रागेव नित्यत्वाद् वृद्धिः । ततश्च धुड्हस्वाभावान्न सिज्लोपः । अड् यथा—अचीकरदित्यादौ प्रागुक्तहेतुना नित्योऽप्यल्पनिमित्तत्वादन्तरङ्गोऽपि चाडागमो 'लघोर्दीर्घ०' ॥ ४।१।६४ ॥ इति दीर्घं कृत्वैव क्रियते । पूर्वमदि हि स्वरादित्वादीर्घो न स्यात् । अस्मिन्नंशे च ज्ञापकम् 'अड्धातोः०' ॥ ४।४।२९ ॥ इत्यत्र अन्विति पदानुपन्यासः । यदि हि नित्यत्वादिहेतुना प्रथममट् भविष्यति तदा धातोः स्वरादित्वभवनेन 'लघोर्दीर्घ०' इत्यस्याप्रवृत्त्या अचीकरदित्यादीनामसिद्धिरेवेति सर्वकार्येभ्यः पश्चादड्भवनार्थं अड्धातोरित्यत्र अन्विति पदन्यासस्यावश्यकत्वेऽपि सूत्रकृता यत्तन्न न्यस्तं तदेवेमं न्यायांशं ज्ञापयति । अत्रांशेऽप्यनित्योऽयम् । 'उपसर्गात्सुनुसुध०' ॥ २।३।३९ ॥ इत्यत्र अटव्यपीत्युक्तेः । तथाहि-अभ्यषुणोदित्यादावड्व्यवधानेऽपि षत्वार्थं तावदटव्यपीत्युक्तम् । नित्यत्वे त्वस्य षत्वस्य प्रथममेव भवनात् पश्चादड्भवने तद्व्यवधाने न काचित्क्षतिरित्यटव्यपीति न वक्तव्यं स्यात् ॥८४॥

पूर्वं पूर्वोत्तरपदयोः कार्यं कार्यं पश्चात् सन्धिकार्यम् ॥८५॥

अन्तरङ्गं बहिरङ्गादित्याद्यपवादोऽयम्। तत्र पूर्वपदकार्यं यथा—अग्निश्चेन्द्रश्च अग्नेन्द्रौ इत्यत्र पूर्वपदस्याग्नेरिकारस्य 'वेदसहश्रुता०' ॥ ४।२।४१ ॥ इत्यात्वमेव द्वन्द्वसमासापेक्षत्वाद् बहिरङ्गमपि प्रथमं क्रियते नतु तदनपेक्षत्वादन्तरङ्गमपि 'समानानां तेन' ॥ १।२।१ ॥ इति दीर्घत्वरूपं सन्धिकार्यम्। अत्रांशे ज्ञापकं 'यवः पदान्तात्प्रागैदौत्' ॥ ७।४।५ ॥ इत्यत्र वृद्धिप्राप्तौ सत्यामित्यधिकारानुवर्तनम्। तद्धि व्याकरणं वेत्त्यधीते वा वैयाकरणः, स्वश्वस्यायं सौवश्व इत्यादौ वि-आकरण-अण्, सु-अश्व-अण्, इति स्थिते वि-सुशब्दयोरणि वृद्धिरूपं पूर्वपदकार्यमेव प्रथमं प्राप्स्यति नतु यत्ववत्वरूपं सन्धिकार्यमिति संभाव्यैव। तत्प्राप्तौ च सत्यां 'यवः पदान्तात्०' इतिसूत्रकरणसामर्थ्यात् वृद्धिं बाधित्वा यत्ववत्वे एव स्यातां तत ऐदौतौ चेति एतन्न्यायांशाभावे व्याकरणस्वश्वशब्देयोर्निष्पादनकाल एव यत्ववत्वभवनादिवर्णोवर्णयोः कथं वृद्धिप्राप्तिः स्यात्तदभावे च कथमेतत्सूत्रेण ऐदौतौ स्याताम्। अस्यांशस्यानित्यत्वं न दृश्यते। उत्तरपदकार्यं यथा—परमश्चासावयं च परमायमित्यत्र उत्तरपदस्येदमः स्यादिपुंलिङ्गापेक्षत्वाद् बहिरङ्गोऽपि 'अयमियं पुंस्त्रियोः सौ' ॥ २।९।३८ ॥ इति अयमादेशः उत्तरपदकार्यमिति प्रथमं क्रियते नतु अन्तरङ्गम् 'अवर्णस्येवर्ण०' ॥ १।२।६ ॥ इत्येत्वरूपं सन्धिकार्यम्। अत्रांशे च ज्ञापकम् अग्नेन्द्रौ देवते अस्येति 'देवता' ॥ ६।२।१०१ ॥ इत्यणि आग्नेन्द्रं सूक्तमित्यत्र प्रथमं पूर्वपदकार्यं 'वेदसहश्रुता०' ॥ ३।२।४१ ॥ इत्यनेनाग्नेरित आत्वे तदनु अणि परे 'देवतानामात्वादौ' ॥ ७।४।२८ ॥ इत्युभयपदवृद्धौ प्राप्तायामिन्द्रशब्दरूपस्योत्तरपदस्य 'आतो नेन्द्रवरुणस्य' ॥ ७।४।२९ ॥ इत्यनेन वृद्धिनिषेधः। एतन्न्यायांशाभावे इन्द्रशब्दस्थद्विस्वरमध्यात् प्रथमस्वरे अन्तरङ्गत्वात् प्रथमं 'अवर्णस्येवर्णा०' इत्येत्वभवनादपहृते द्वितीयस्वरे च अणि परे परत्वात् 'अवर्णेवर्णस्य' ॥ ७।४।६८ ॥ इति लुकापहृते इन्द्रशब्दस्य स्वराभावाद् वृद्धिप्राप्तेरेवाभावेन तन्निषेधो व्यर्थ एव स्यात्। अनित्योऽशोऽयम्। तेन परम इर्यस्य तस्य परमेरित्यत्रेकारस्य 'ङित्यदिति' ॥ १।४।२३ ॥ इत्येत्वरूपमुत्तरपदकार्यं प्रथमं न। सति हि तस्मिन् परमैरित्यनिष्टमापद्येत ॥८५॥

संज्ञा न संज्ञान्तरबाधिका ॥८६॥

यथा प्रस्थ इत्यत्र प्रस्य गत्युपसर्गसंज्ञयोः सद्भावात् 'गतिकवन्यः' ॥३।१।४२॥ इति तत्पुरुषः 'उपसर्गादातो ङोऽश्यः' ॥ ५।१।५६ ॥ इति ङश्च युगपदभूताम्। ज्ञापकमस्य प्रादीनां 'धातोः पूजार्थ०' ॥ ३।१।१ ॥ इत्युपसर्गसंज्ञाकरणम्। यदि हि 'ऊर्याद्यनुकरण०' ॥३।१।२॥ इत्याद्यनन्तरसूत्रक्रियमाणया गतिसंज्ञयोपसर्गसंज्ञा बाध्यमाना स्यात्तदा निष्फत्वादुपसर्गसंज्ञा कुर्यादेव न। अनित्यश्चायम्। 'स्पृहेर्ष्यार्थ्यं वा' ॥ २।२।२६ ॥ इत्यत्र वाग्रहणात्। नित्यत्वे त्वस्य कर्मसंप्रदानसंज्ञयोर्बाध्यबाधकभावाभावादुभयोरपि तयोः प्रवृत्तेर्विकल्पाकरणेऽपि विभक्तिद्वयेन चैत्रं

चैत्राय वा स्पृहयतीति द्वैरूप्यसिद्धेर्विकल्पविधाने किं फलम् । तथापि यद्विकल्पः क्रियते तदेतन्न्यायानित्यत्वेन संप्रदानसंज्ञया कर्मसंज्ञाया बाधा मा भूदिति फलकः ॥८६॥

प्रतिकार्यं संज्ञा भिद्यन्ते ॥८७॥

कार्ये कार्ये प्रति संज्ञाभिधायकानि सूत्राणि भिद्यन्ते ॥ अयंभावः–' करणं च ' ॥२।२।१९॥ इति सूत्रेण दिवः करणस्य युगपत्कर्मकरणसंज्ञयोर्विधानादक्षानक्षैर्वा दीव्यतीति द्वैरूप्यं सिद्धम् । तथा अक्षैर्देवयते मैत्रश्चैत्रेणेत्यत्राक्षशब्दस्य करणत्वात् तृतीया भवति कर्मत्वाच्च ' गतिबोधाहारार्थ० ' ॥ २।२।५ ॥ इत्यनेन प्राप्तं नित्याकर्मकलक्षणम् अणिक्कर्तुः कर्मत्वं न स्यात् । तथा अक्षशब्दस्य कर्मत्वादेव देवयतेः ' अणिगि प्राणिकर्तृका० ' ॥ ३।३।१०७ ॥ इत्यनेन प्राप्तमकर्मकलक्षणं परस्मैपदं न स्यात् । अत्राह परः–नन्वक्षैर्देवयते मैत्रश्चैत्रेणेत्यादौ संज्ञाद्वययौगपद्यं चरितार्थम् । ततोऽक्षानक्षैर्वा दीव्यतीत्यादौ सत्यपि संज्ञाद्वये स्पर्धे परत्वात् करणत्वहेतुका तृतीयैव भवितुमर्हति नतु द्वितीया। अत्रोत्तरम्–सत्यमेतत् परमनेन न्यायेन द्वितीयाऽपि स्यादेव । तथाहि यद्यपि ' करणं च ' इति सूत्रे युगपत्संज्ञाद्वयमस्ति परमक्षानक्षैर्वा दीव्यतीति प्रयोगद्वयं यद् दृश्यते तत्सिद्ध्यर्थमनेन न्यायेन ' करणं च ' इति सूत्रमावृत्त्या द्विधा व्याख्यायते यथा–दिवः करणं कर्म स्यात् इति, दिवः करणं करणं स्यादिति च । तत्राद्यव्याख्याने इदं सूत्रं कर्मसंज्ञाया एव विधायकं न तु करणसंज्ञाया इति कल्पने निर्बाधमक्षान् दीव्यतीति सिद्धम् । द्वितीयव्याख्या तु अक्षैर्दीव्यतीति प्रयोगस्य सर्वाभिमतत्वेन निर्विवादैव । अयमपि न्यायः पूर्वन्यायार्थमेव भंग्यन्तरेण समर्थयतीति ज्ञापकादि सर्वं पूर्ववदूह्यम् ॥८७॥

सापेक्षमसमर्थवत् ॥८८॥

पदान्तरसापेक्षं पदं समासादिपदविधीन् प्राप्तुं नालम् । यथा ऋद्धस्य राज्ञः पुरुषः। अत्र राजशब्दस्य ऋद्धविशेषणसापेक्षत्वात् पुरुषशब्देन सह न समासः । ज्ञापकमस्य ईदृक्प्रयोगेषु समासादि निषेद्धुं यत्नाकरणमेव । ' समर्थः पदविधिः ' ॥ ७।४।१२२ ॥ इति परिभाषायाः प्रपञ्चोऽयम् । अनित्यश्चायम् । देवदत्तस्य दासभार्येत्यादौ दासशब्दस्य देवदत्तस्येतिपदसापेक्षत्वेऽपि समासदर्शनात् । देवदत्तस्य यो दासस्तस्य भार्येति ह्यत्रार्थः ॥८८॥

प्रधानस्य तु सापेक्षत्वेऽपि समासः ॥८९॥

यस्य क्रियया सह सामानाधिकरण्येन प्रयोगस्तत्प्रधानम् । यथा राजपुरुषोऽस्ति दर्शनीयः इत्यादौ समासात्प्रागवस्थायां पुरुषशब्दस्य स्वविशेषणदर्शनीयशब्दसापेक्षत्वेऽपि राजशब्देन तत्पुरुषः । य एव हि पुरुषत्वस्याधिकरणं स एवास्तीतिक्रियाया अपीति क्रियया सह सामानाधिकरण्यप्रयोगेण पुरुषशब्दस्य प्रधानत्वात् । ज्ञापकमस्य पुरुषो व्याघ्रः शूर इत्यादौ पुरुषव्याघ्रशब्दयोः

समासाभावार्थं 'उपमेयं व्याघ्रादिभिः साम्यानुक्तौ' ॥ ३।१।१०२ ॥ इत्यत्र साम्यानुक्तिग्रहणम् । तद्धि पुरुषो व्याघ्रः शूरः इत्यादौ यदा व्याघ्रत्वोपचारकारणं शूरत्वमुपन्यस्यते तदा समासवारणार्थं कृतम् । यदि च पुरुषशब्दस्य स्वविशेषणशूरशब्दसापेक्षतया असमर्थत्वात् पूर्वन्यायेनैवात्र समासाभावः सिद्धयेत्तर्हि साम्यानुक्तिग्रहणं किमर्थं क्रियेत । परं पूर्वन्यायबाधकस्यैतन्न्यायस्य सत्त्वेन शूरशब्दसापेक्षस्यापि पुरुषशब्दस्य प्रधानत्वाद् व्याघ्रशब्देन समासोऽनिष्टोऽपि भविष्यतीत्याशंकया तत्कृतम् । अनित्यत्वमस्य न दृश्यते । पूर्वन्यायस्यापवाद श्चायमुत्तरश्च । अपि च 'किं हि वचनान्न भवति' इति न्यायस्यायमुत्तरश्च प्रपञ्चीभूतः ॥८९॥

तद्धितीयो भावप्रत्ययः सापेक्षादपि ॥९०॥

यथा काकस्य कृष्णस्य भावः काकस्य काष्ण्यमित्यादौ कृष्णशब्दात्काकशब्दसापेक्षादपि 'पतिराजान्त०' ॥ ७।१।६० ॥ इति ष्यञ् सिद्धः । ज्ञापकमस्य 'पुरुषहृदयादसमासे' ॥ ७।१।७० ॥ इत्यत्र असमासे इति वचनम् । तद्धि परमस्य पुरुषस्य भावः परमपुरुषत्वमित्यादौ 'भावे त्वतलौ' ॥ ७।१।५५ ॥ इति त्व एव स्यान्न ष्यञ् इत्येतदर्थमुक्तम् । एतन्न्यायाभावे समासविषयस्य पुरुषशब्दस्य परमशब्दसापेक्षत्वेनासमर्थत्वादेवात्राण् न भविष्यतीति किमर्थमसमास इति । अनित्यत्वमस्य नास्ति ॥९०॥

गतिकारकङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेःप्रागेव समासः ॥९१॥

यद्यपि 'नाम नाम्नैकार्थ्ये समासो बहुलम्' ॥ ३।१।१८ ॥ इत्यनेन नाम्नो नाम्ना सह समास उक्तस्तथाऽप्येकार्थ्ये इत्यनेन समासान्तर्वर्त्तिविभक्तिलुप्करणादेवं ज्ञापितं यदुत विभक्त्यन्तानामेव समास इति । ततश्चोभयोरपि पदयोर्विभक्त्यन्तत्वे प्राप्ते कृदन्तस्योत्तरपदस्याविभक्त्यन्तत्वनियमाऽर्थोऽयं न्यायः । तत्र गतेर्यथा–विकिरति पक्षाविति विष्किरो इत्यादौ पक्ष्यर्थमात्रापेक्षत्वेनान्तरङ्गत्वात् प्रथममेव 'वौ विष्किरो वा' ॥ ४।४।९६ ॥ इति ष्वटि विस्किर इति स्थिते 'ऊर्याद्यनुकरण०' ॥ ३।१।२ ॥ इति कृतगतिसंज्ञस्य वेः 'नाम्युपान्त्य-प्रीकृगृज्ञः कः' ॥ ५।१।५४ ॥ इति कप्रत्ययान्तेन स्किरेत्यनेन सह 'गतिकवन्य०' ॥ ३।१।४२ ॥ इति तत्पुरुषस्ततो 'असोऽसिवूसहस्सटाम्' ॥ २।३।४८ ॥ इत्यनेन स्सटः सस्य षत्वे च विष्किरः पक्षी, ततः स्त्रीत्वविवक्षायामदन्तत्वात् 'जातेरयान्त०' ॥ २।४।५४ ॥ इति ङीः सिद्धः । एतन्न्यायाभावे विभक्त्यन्तेन स्किरेत्यनेन समासे कर्मादिशक्तिसंख्याद्यपेक्षत्वेन बहिरङ्गाया विभक्तेरुत्पत्तेः प्रागेव स्त्रीत्वमात्रापेक्षत्वेनान्तरङ्गस्य आपः प्राप्तावदन्तत्वाभावाद् ङीर्न स्यात् । कारकस्य यथा–चर्मणा क्रीयते स्म चर्मक्रीतो इत्यादौ चर्मन् टा क्रीत इति स्थिते चर्मेत्यस्य करणकारकस्य क्रीतेत्यनेन सह 'कारकं कृता' ॥ ३।१।६८ ॥ इति तत्पुरुषः । ततः स्त्रीत्वविवक्षायां 'क्रीतात्करणादेः' ॥ २।४।४४ ॥ इत्यनेन क्रीतशब्दाददन्तात् ङीः सिद्धः । यदि तु विभक्त्यन्तेन क्रीत इत्यनेन समासः स्यात्तर्हि

प्राग्वदन्तरङ्गत्वाद् विभक्त्युत्पत्तेः प्रागेवापः प्राप्तावदन्तत्वाभावाद् ङीर्न स्यात्। कृत्प्रत्ययविधायिसूत्रे ङसिनेत्येकदेशस्य समुदायोपलक्षणत्वेन संपूर्णपञ्चमीलाभात् 'विशेषणमन्तः' ॥ ७।४।११३ ॥ इति परिभाषयाऽन्तशब्दलाभाच्च पञ्चम्यन्तेन पदेनोक्तं ङस्युक्तम्। तत्र ङसिनैवोक्तस्य यथा-कच्छं पिबतीति कच्छपी इत्यादौ कच्छ अम् प इति स्थिते 'नाम्नो गमः खडौ च०' ॥ ५।१।१३१ ॥ इत्यतोऽधिकृतान्नाम्नः परस्य स्थाधातोर्विहितो यः 'स्थापात्राप्रः कः' ॥ ५।१।१४२ ॥ इति कप्रत्ययस्तदन्तेन पेत्यनेन सह कच्छशब्दस्य 'ङस्युक्तं कृता' ॥ ३।१।४२ ॥ इति तत्पुरुषः। कच्छशब्दस्य नाम्न इति ङसिनोक्तत्वात्। ततः स्त्रीत्वविवक्षायां 'जातेरयान्त०' ॥ २।४।५४ ॥ इत्यनेन कच्छपशब्दाददन्ताद् ङीः सिद्धः। विभक्त्यन्तेन पेत्यनेन समासे तु प्राग्वदापः प्राप्तावदन्तत्वाभावाद् ङीर्न स्यात्। पञ्चमीभ्यसोक्तमप्युक्तयुक्त्या ङस्युक्तमेव। तस्य यथा-विषं धरतीति विषधरी इत्यादौ विष अम् धर इति स्थिते विषशब्दस्य 'आयुधादिभ्यो०' ॥ ५।१।९४ ॥ इति सूत्रे आयुधादिभ्य इति भ्यसोक्तस्यापि ङस्युक्तत्वादच् प्रत्ययान्तेन धरेत्यनेन सह 'ङस्युक्तं कृता' इति तत्पुरुषः। ततः स्त्रीत्वविवक्षायां 'जातेरयान्त०' इति ङीः। विभक्त्यन्तेन धरेत्यनेन समासे तु पूर्ववददन्तत्वाभावाद् ङीर्न स्यात्। ज्ञापकमस्य कारकांशे 'क्रीतात्करणादेः' इत्यनेनादन्तात् क्रीताद् ङीविधिः। अत्र तावत्करणादेः क्रीतादित्युक्तम्। करणस्य आद्यवयवत्वं च समासं विना न स्यात्। एतन्न्यायाभावे विभक्त्यन्तेन क्रीतेत्यनेन समासे अन्तरङ्गत्वाद् विभक्त्युत्पत्तेः प्रागेवापःप्राप्तौ क्रीतस्यादन्तत्वं न संभवति तथापि यददन्तादित्युक्तं तदिमं न्यायांशं ज्ञापयति। गतिङस्युक्तांशयोस्त्वस्य ज्ञापकं विष्किरी, कच्छपोत्यादौ ङीप्रतिबन्धकाब्निषेधयत्नाकरणम्। अनित्यता त्वस्य न दृश्यते ॥ ९१ ॥

समासतद्धितानां वृत्तिर्विकल्पेन वृत्तिविषये च नित्यैवापवादवृत्तिः ॥९२॥

अयमर्थः—परार्थाभिधानं वृत्तिः। सा च त्रेधा। समासवृत्तिस्तद्धितान्तवृत्तिर्नामधातुवृत्तिश्च। यथा राजपुरुषः, औपगवः, पुत्रकाम्यतीति। तत्र समासवृत्तौ समस्यमानपदानि शेषवृत्त्योस्तु प्रकृतिप्रत्ययौ संभूय समुदायार्थं सह ब्रुवन्तीतिरीत्या परस्थान्यर्थस्य-स्वार्थातिरिक्तस्य समुदायार्थस्य यदभिधानं सा वृत्तिः। तत्र वाक्येनाभिधाने प्राप्ते वृत्तिरारभ्यमाणा येन नाप्राप्ते इति न्यायाद्वाक्यस्य बाधिका प्राप्नोति इति विकल्पेन तस्यानुज्ञा अनेन न्यायेनोच्यते। तथा वृत्तिपक्षे उत्सर्गापवादरूपयोर्वृत्त्योः संभवे उत्सर्गस्य नित्यमेव बाधश्चानेन न्यायेनोच्यते। तत्र समासवृत्तिर्यथा-कायस्य पूर्वोऽशः पूर्वकायः। अत्र 'पूर्वापराधरो०' ॥ ३।१।५२ ॥ इत्यनेनांशितत्पुरुषो वाक्यं च न तु 'षष्ठ्यर्थयत्नाच्छेषे' ॥ ३।१।७६ ॥ इत्यौत्सर्गिकः कायपूर्व इति षष्ठीसमासः। अत्र चाद्येंऽशे समासानां वृत्तिर्विकल्पेनेतिरूपे ज्ञापकं 'नित्यं प्रतिनाऽल्पे' ॥ ३।१।३७ ॥ इत्यत्र नित्यमिति वचः। तद्धि अनेन न्यायेन प्राप्तविकल्पबाधनार्थम्। द्वितीयांशे च

'वृत्तिविषये नित्यैवापवादवृत्तिः' इतिरूपे ज्ञापकं तु 'पारेमध्येऽग्रेऽन्तः षष्ठ्या वा' ॥ ३।१।३० ॥ इत्यत्र वाग्रहणम् । तद्धि पक्षे औत्सर्गिकषष्ठीसमासानुज्ञार्थम् । एतन्न्यायाभावे क्रमेणोत्सर्गापवादयोः प्रवृत्तेः पक्षे औत्सर्गिकः षष्ठीसमासोऽपि सिद्ध एवेति किमिति तदनुज्ञार्थं वाग्रहणं कुर्यात् । तद्धितवृत्तिर्यथा-गर्गस्यापत्यं वृद्धं गार्ग्यः इत्यत्र 'गर्गादेः०' ॥ ६।१।४२ ॥ इति यञ् वाक्यं च, न तु औत्सर्गिको गार्गिरिति 'अत इञ्' ॥ ६।१।३१ ॥ इति इञ् । अत्र चाद्यांशे ज्ञापकं 'नित्यं ञ्नित्यादिनोऽण्०' ॥ ७।३।५८ ॥ इत्यत्र नित्यग्रहणम् । तद्धि अनेन प्राप्तस्य विकल्पस्य निषेधार्थम् । उत्तरांशे तु ज्ञापकं 'वोदश्वितः' ॥ ६।२।१४४ ॥ इत्यत्र वाग्रहणम् । तद्धि पक्षे औत्सर्गिकाणार्थम् । एतन्न्यायांशाभावे क्रमेणोत्सर्गापवादयोः प्रवृत्तेः पक्षे औत्सर्गिकोऽणपि सिद्ध एवेति किमिति तदनुज्ञार्थं वाग्रहणं कुर्यात् । अयं न्यायः समासतद्धितवृत्तिव्यवस्थाऽनुवादमात्रपरो न त्वनेन नव्यं किंचिद् व्यवस्थाप्यते, एतत्साध्यस्य तत्तत्सूत्रैरेव सिद्धेः। अनित्यत्वमस्य नास्ति ॥९२॥

एकशब्दस्यासंख्यात्वं क्वचित् ॥९३॥

एकशब्दस्य प्रसिद्धिस्तावत्संख्यात्वस्यैवास्तीत्यतस्तत्प्रतिरोधाऽर्थोऽयं न्यायः। यथैकमह इत्यत्रैकशब्दस्य सदपि संख्यात्वं न गण्यते । ततश्च 'अह्नः' ॥ २।१।७४ ॥ इत्यट्समासान्ते 'नोऽपदस्य तद्धिते' ॥ ७।४।६१ ॥ इत्यन्त्यस्वरादिलोपे 'अहर्निर्यूहकलहाः' (लिङ्गा० पुं० १५।३) इति पुंस्त्वे प्राप्तेऽपि 'अहःसुदिनैकतः' (लिङ्गा० न० ८।२) इति विशेषविधिना क्लीबलिङ्गत्वे एकाह्नमिति सिद्धम् । एकशब्दस्य संख्यात्वगणने 'सर्वांशसंख्याऽव्ययात्' ॥ ७।३।११८ ॥ इत्यनेनाटि अनेनैव चाह्नादेशे 'अर्द्धसुदर्शनदेवनमह्ना' (लिङ्गा० पुं० ११।१) इति पुंस्त्वे च एकाह्न इत्यनिष्टं स्यात् । ज्ञापकमस्य 'संख्यातैकपुण्यवर्षा०' ॥ ७।३।११९ ॥ इत्यत्र चकारेण 'सर्वांशसंख्याऽव्ययात्' ॥७।३।११८॥ इति सूत्रात् संख्यानुवृत्तावपि एकशब्दग्रहणम् । क्वचिदिति वचनाच्च बहुत्र एकशब्दस्य संख्यात्वं गण्यते एव। तेन एकधेत्यत्र 'संख्याया धा' ॥ ७।२।१०४ ॥ इति धाः सिद्धः । अनित्यत्वमस्य न दृश्यते ॥ ९३ ॥

आदशभ्यः संख्या संख्येये वर्तते न संख्याने ॥९४॥

आदशभ्य इति कोऽर्थः ? दशन्शब्दस्य प्रयोगावधि-अष्टादशसंख्यावधीति यावत । ततश्चाष्टादशसंख्यावधि संख्या संख्येयेन सह सामानाधिकरण्येन प्रयोज्येत्यर्थः । यथैको द्वौ त्रयो वा यावदष्टादश घटाः न तु घटानामिति । एकोनविंशत्यादिसंख्या तु संख्येये संख्याने च वर्तते । यथैकोनविंशतिर्घटा घटानां वा यावन्नवनवतिः शतं सहस्रं लक्षं कोटिर्वेत्यादि । ज्ञापकमस्य 'सुज्वार्थे संख्या संख्येये०' ॥ ३।१।१९ ॥ इत्यनेन संख्येये वर्तमानया संख्यया सह समासविधानम् । एतन्न्यायाभावे का संख्या संख्येयवर्तिनीति कथं ज्ञायेत । तदज्ञाने च कथं संख्यानवर्तिसंख्यापरिहारेण संख्येयवर्तिसंख्यया समासः कर्तुं शक्येत ।

एतद् ज्ञापकमादशभ्य इति पदं व्युदस्य शेषवाक्यापेक्षया योज्यम् । संख्येये वर्तमानाऽपि काचित्संख्यास्तीत्येतावत पदार्थस्यानेन ज्ञाप्यमानत्वात् । अस्य चानित्यत्वम् । तेन 'आसन्नादूर०' ॥ ३।१।२० ॥ इति बहुव्रीहौ 'प्रमाणीसंख्याड् डः' ॥ ७।३।१२८ ॥ इति डे च आसन्नदशा इति कोऽर्थः नवैकादश वा । अत्र आसन्ना दशेति कोऽर्थः ? दश संख्या येषामिति वाक्यं सिद्धम् ॥ ९४ ॥

णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद् भवति ॥९५॥

णाविति निमित्तसप्तमी । यथा स्फुरत् णौ सनि पुस्फारयिषति । अत्र 'चिस्फुरोर्न वा' ॥ ४।२।१२ ॥ इति आत्वस्य णौ निमित्ते सति कृतस्य स्थानिवद्भावात् स्फु इति द्वित्वं सिद्धम् । ज्ञापकमस्य युक् मिश्रणे, पूर्श् पवने आभ्यां सनि यियविषति, पिपविषतीत्यादौ पूर्वस्य उत इत्वार्थमोः पयेऽवर्णे इत्येतावेतैव सूत्रेण सरत्यपि जुं गतौ सौत्रो धातुः, यौतिपुनाती तु प्रागुक्तावेव-पभ्यो णौ सनि जिजावयिषति, यियावयिषति, पिपावयिषतीत्यादौ प्यन्तानामपि जवत्यादीनामुत इत्वार्थं 'ओर्जान्तिस्थापवर्गेऽवर्णे' ॥ ४।१।६० ॥ इति बृहत्सूत्रकरणम् । एतन्न्यायाभावे जिजावयिषतीत्यादिष्वन्तरङ्गत्वात् प्रथमं वृद्ध्यावादेशौ कृत्वा पश्चाद् द्वित्वे 'सन्यस्य' ॥ ४।१।५९ ॥ इत्यनेनैव इत्वं सिद्ध्यतीति किमर्थं 'ओर्जान्तिस्था०' ॥ ४।१।६० ॥ इति बृहत्सूत्रं क्रियेत । परमेतन्न्यायेन वृद्ध्यादेः सर्वस्य स्थानिवद्भवनात् 'सन्यस्य' इत्यनेनेत्वासिद्धेरुत इत्वार्थं 'ओर्जान्तिस्था०' इति बृहत्सूत्रकरणम् । अनित्यश्चायम् । तेन यस्य णिनिमित्तकृतकार्यस्य स्थानिवद्भावश्चिकीर्ष्यते तदाऽऽधारभूतो वर्णो वर्णसमुदायो वा अवर्णवान् यदि स्यात्तदैवायं न्यायः स्फुरेन्नान्यथा । तेन कृतणश्चुरादित्वात् णिचि 'कृतः कीर्तिः' ॥ ४।४।१२२ ॥ इति कीर्तादेशे अचिकीर्तत् । अत्र की इत्येव द्वित्वं न तु कृ इति । कीर्त इतिवर्णसमुदायस्य ईकारवत्त्वादवर्णत्वाभावेन स्थानिवद्भावाभवनात् । अयं न्यायः 'स्थानीवावर्णविधौ' ॥ ७।४।१०९ ॥ इति परिभाषायाः प्रपञ्चः ॥९५॥

द्विर्बद्धं सुबद्धं भवति ॥९६॥

अयमर्थः—यदर्थं व्याकरणधातुपाठादौ प्रयत्नद्वयं कृतं तद् द्विर्बद्धं कार्यं सुबद्धम्-अव्यभिचारि स्यात् । यथा असूच् क्षेपणे-अद्य०-आस्थत्-इत्यत्राङो न व्यभिचारः । अस्यतेः 'शास्यसुवक्तिख्यातेरङ्' ॥३।४।६०॥ इति सूत्रे पुष्यादौ च पाठात् । अन्येषां तु पुष्यादिपठितानां क्वचित्तद्व्यभिचारोऽपि । यथा 'भगवन्मा कोपी'रिति बालरामायणे । अत्र पुष्यादित्वेऽप्यङ् न । ज्ञापकमस्य दंशेर्यङ्लुपि दंदशीतीत्यत्र नस्य लोपः केनापि सूत्रेणाविहितोऽपि स्यादेवेति ज्ञापनार्थं 'गृलुपसदचर०' ॥ ३।४।१२ ॥ इत्यत्र दशेति निर्देशे कृतेऽपि पुनस्तदर्थं 'जपजभदहo' ॥ ४।१।५२ ॥ इत्यत्रापि दशेति निर्देशः। स हि ज्ञापकेन सकृज्ज्ञापितो यो विधिः स समासान्तागमेति न्यायात् दशैकादशशब्दस्यादन्तत्ववत् क्वचिदनित्य-

तामपि भजेत; यस्तु द्विर्ज्ञाप्यते तस्यैतन्न्यायेनानित्यत्वभयं न स्यादित्येतदर्थः। एतन्न्यायाभावे द्विर्ज्ञापितस्यापि विधेरनित्यत्ववारणं दुर्निवारमेव। अनित्यत्वमप्यस्य नकारलोपाभावने ददंशीतीत्यस्यापि सर्वैः स्वीकृतत्वात्। 'जपजभ,' इत्यस्य वृत्तावपि साक्षादुक्तत्वाच्च। अयं न्यायोऽग्रेतनाश्रोणादयोऽव्युत्पन्नानीति यावत्सर्वे न्यायाः सर्वं वाक्यं सावधारणमिति न्यायस्यानित्यत्वप्रपञ्चीभूता एव ॥९६॥

आत्मनेपदमनित्यम् ॥९७॥

यथाशिष्टप्रयोगं क्वचित्प्राप्तमप्यात्मनेपदं न स्यात् क्वचिच्चाप्राप्तमपि भवतीत्यनित्यशब्दार्थः। तत्र प्राप्तस्याप्यभवनं यथा–'सम्यक् प्रणम्य न लभन्ति कदाचनापि' इत्यादिषु डुलभिष् प्राप्तावित्यादिधातूनामिडित्वात्प्राप्तमप्यात्मनेपदं नाभूत्। अप्राप्तस्यापि भवनं यथा–'प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु'–इत्यादिषु षस्ज् गताधित्यादीनामिडित्वाभावेऽप्यात्मनेपदमभूत्। ज्ञापकमस्य पञ्चृङ् भेजृङ् भ्राजि दीप्ताविति भ्राजेरात्मनेपदिषु पाठेऽपि राजृग् दुभ्राजि दीप्तावित्यत्र पुनः पाठः। भ्राजेरयमात्मनेपदिषु द्विःपाठस्तावद् पूर्वन्यायेनास्यात्मनेपदाव्यभिचारार्थः। तदर्थं चेयान् यत्नस्तदैव कर्तुं युज्येत यदि कथंचिदात्मनेपदस्य व्यभिचारः संभवेत्। एतन्न्यायाभावे कुतोऽस्य संभवः। अस्याप्यनित्यत्वम्। तेन 'इङ्धितः कर्तरि' ॥ ३।३।२२ ॥ इति विहितमेवात्मनेपदं यथाप्रयोगदर्शनं क्वचिदनित्यं न तु 'क्रियाव्यतिहारेऽगतिर्हिंसा०' ॥ ३।३।२३ ॥ इत्यादिना विहितम् ॥ ९७ ॥

किपि व्यञ्जनकार्यमनित्यम् ॥९८॥

प्राप्तमपि न भवतीत्यनित्यशब्दार्थः। तत्राख्यातकिपि यथा–राजेवाचरति 'कर्तुः क्विप् गल्भङ्क्ष्वीबहोडाच्चु डित्' ॥ ३।४।२५ ॥ इति किपि राजानतीत्यादौ किप्सत्कवकारव्यञ्जनद्वारप्राप्तस्य 'नाम सिदय्व्यंजने' ॥ १।१।२१ ॥ इति नस्य लुग् न। कृत्किपि यथा–गीर्यते इति 'कृत्संपदादिभ्यः क्विप्' ॥ ५।३।११४ ॥ इति किपि गिरौ गिरः। अत्र प्राग्वत्प्राप्तपदत्वाभवनात् 'पदान्ते' ॥ २।१।६४ ॥ इति न दीर्घः। ज्ञापकमस्य मित्रं शास्तीति मित्रशीरित्यादौ क्विपो व्यञ्जनादित्वात् 'इसासः शासोऽङ्व्यञ्जने' ॥ ४।४।११८ ॥ इत्यनेनैव इसि सिद्धत्यपि 'कौ' ॥ ४।४।११९ ॥ इति सूत्रस्य करणम्। तद्धि एतन्न्यायेन क्विपि व्यञ्जनद्वारोक्तकार्यं न भविष्यतीति कृतम्। अस्मिन्न्याये क्विवपीत्यस्योपलक्षणत्वाद् विच्यपि व्यञ्जनकार्यमनित्यम्। यथा मुख्यमाचष्टे णिजि 'मन्वन०' ॥ ५।१।१४७ ॥ इति विचि मुख्य। तं मुख्यम्–अत्र विचि परे 'य्वोः प्वय्व्यञ्जने लुक्' ॥४।४।१२१॥ इति यलुक् नाभूत्। अनित्यता त्वस्य नास्ति। केचित्तु क्विपि किञ्चिद् व्यञ्जनकार्यं नित्यमपीच्छन्ति। यथा च जयकुमारः–पां पाने इत्यस्य क्विपि 'अप्रयोगीत्' ॥ १।१।३७ ॥ इति तल्लुकि लुप्तेऽपि व्यञ्जनादौ प्रत्यये 'इर्व्यञ्जनेऽयपि' ॥ ४।३।९७ ॥ इति ईत्वमिच्छन् पीरित्याह। तदपेक्षया अस्य न्यायस्य अनित्यत्वमपि ध्वन्यते ॥९८॥

स्थानिवद्भावपुंवद्भावैकशेषद्वन्द्वैकत्वदीर्घत्वान्यनित्यानि ॥९९॥

स्थानिवद्भावादीनि पञ्च अनित्यानि–यथाप्राप्ति भवन्ति न भवन्ति चेत्यर्थः। द्वन्द्वैकत्वं समाहारद्वन्द्वः। दीर्घत्वं च सामान्योक्तमपि 'भ्वादेर्नामिनः' ॥२।१।६३॥ इति सूत्रविहितमत्र विवक्षितम्। एषां भवनोदाहरणानि सुलभानीति नेहोच्यन्ते, अभवनोदाहरणान्येव प्रदर्श्यन्ते। तत्र स्थानिवद्भावे यथा–स्वादुशब्दात् स्वाद्वकार्षीदिति णिजि–असिस्वददित्यत्र उकारस्य वृद्धौ अन्त्यस्वरादिलुक्। तस्य स्थानिवद्भावाभवनेन आकारस्योपान्त्यत्वात् 'उपान्त्यस्यासमान०' ॥ ४।२।३५ ॥ इति ह्रस्वः सिद्धः। अत्रांशे ज्ञापकं–मालामाख्यत् अमालदित्यादावन्त्यस्वरादिलुकः स्थानिवद्भवने आकारस्योपान्त्यत्वादेव ह्रस्वनिषेधे सिद्धयत्यपि 'उपान्त्यस्यासमान०' इत्यत्रासमानलोपिग्रहणम्। तद्धि स्थानिवद्भावस्यानित्यत्वादभवनशंकयैव कृतम्। पुंवद्भावे यथा–दक्षिणस्यां भवो दाक्षिणात्य इत्यत्र 'सर्वादियोऽस्यादौ' ॥ ३।२।६१ ॥ इति प्राप्तोऽपि पुंवद्भावोऽनित्यत्वादेव नाभूत्। सति हि तस्मिन् स्त्रीत्वनिवृत्त्या निमित्ताभाव इति न्यायेन स्त्रीत्वहेतुकस्यापोऽपि निवृत्तौ दाक्षिणात्य इति स्यात्। अत्रांशे ज्ञापकं तु 'कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च' ॥ ६।१।१२७॥ इत्यत्र कौण्डिन्येति निर्देशः। अयं हि पुंवद्भावानित्यत्वं विना न कदापि सिद्धयति। तथाहि–कुडङ् दाहे इत्यस्मात् 'अजातेः शीले' ॥ ५।१।१५४ ॥ इति णिनि स्त्रीत्वे ङ्यां कुण्डिनी। ततः कुण्डिनीशब्दात् वृद्धापत्यार्थे 'गर्गादेः' ॥ ६।१।४२ ॥ इति यञि 'जातिश्च णितद्धितयस्वरे' ॥३।२।५१॥ इति पुंवद्भावो यदि स्यात्तदा स्त्रीत्वनिवृत्त्या तद्धेतुकस्य कुण्डिनीशब्दस्थङीप्रत्ययस्यापि निवृत्तौ 'नोऽपदस्य०' ॥ ७।४।६१ ॥ इति इनलोपे कौण्डेयेति प्राप्नोति। सत्यप्येवं यत्कौण्डिन्येति निर्दिष्टं तदेन्यायेन पुंवद्भावानित्यत्वादभवने 'अवर्णेवर्णस्य' ॥७।४।६८॥ इति ईल्लुग्रूपस्य स्वरादेशस्य स्थानिवद्भावेन नोऽपदस्येति प्राप्तस्य इनलोपस्याभवनात् कौण्डिन्येतिरूपसिद्धिसंभावनयैव। एकशेषे यथा–तदतदात्मकं तत्त्वमातिष्ठन्ते जैनाः–इत्यत्र 'त्यदादिः' ॥३।१।१२०॥ इति प्राप्तस्तच्छब्दैकशेषो न। अत्रांशे तु ज्ञापकं त्वीदकप्रयोगा एव। द्वन्द्वैकत्वे यथा शंखदुन्दुभिवीणाः। अत्र 'प्राणितूर्याङ्गाणाम्' ॥ ३।१।१३७ ॥ इति प्राप्तोऽपि समाहारद्वन्द्वो न। अत्रांशे च ज्ञापकं 'प्राणितूर्याङ्गाणाम्' इति बहुवचनमेव। एकवचनेनैव निर्वाहे बहुवचनमिदं कस्यचिद्विशेषस्य ज्ञप्त्यर्थमेव। इह च यदि तत्प्रयुक्तं तज्ज्ञायते किञ्चिदत्र प्रयोजनमस्तीति। तच्चात्र द्वन्द्वैकत्वानित्यताज्ञप्तिरेव अन्यप्रयोजनाभावात्। दीर्घत्वे यथा–कुर्दि क्रीडायाम्–'रम्यादिभ्यः कर्तरि' ॥ ५।३।१२६ ॥ इत्यनेन कुर्दनः इत्यादौ अनित्यत्वादेव 'भ्वादेर्नामिनः' ॥ २।१।६३ ॥ इति दीर्घो नाभूत्। अत्रांशे ज्ञापकं तु 'भ्वादेर्नामिनः' इत्यनेनैव दीर्घे सिद्धेऽपि स्फूर्ज्, ऊर्ज्, ऊर्णु–इत्यादीनां कृतदीर्घाणामेव धातुषु पठनं न तु हुर्छामुर्छादीनामिवाकृतदीर्घाणाम्। सदीर्घपठनं हि स्फूर्जादीनां दीर्घत्वाव्यभिचारज्ञापनद्वारेणान्येषां क्वचित्तद्व्यभिचारज्ञापनार्थम्। एतन्न्यायांशाभावे कस्यार्थस्य

ज्ञप्त्यर्थं स्फूर्जादीनां सदीर्घपाठः क्रियेत। अनित्यस्यानित्यत्वं न संभवतीति न दर्श्यते ॥

अनित्यो णिच्चुरादीनाम् ॥१००॥

सर्वत्र भवन्नपि यथाप्रयोगदर्शनं क्वचिन्न भवेदपीत्यर्थः। यथा चुरण् चोरति चितुण् चिन्ततीत्यादि। ज्ञापकमस्य चुरादिषु ऋदित्त्वम्। तद्धि 'ऋदिच्छिवस्तम्भू०' ॥ ३।४।६५ ॥ इत्यङि अघुषदित्यादिरूपसिद्ध्यर्थमेव कृतम्। णिचो नित्यत्वे तु विशेषविधित्वात् 'णिश्रिद्रुस्रु०' ॥ ३।४।५८ ॥ इतिङस्यैव प्राप्तेरजूघुषदित्यस्यैव भवनेनाङोऽवकाशस्यैवाभावात् किमर्थं तत्। अस्यानित्यत्वम्। युजादिवर्जानामेव चुरादीनां यथाशिष्टप्रयोगमनित्यो णिच्, युजादीनां तु 'युजादेर्नवा' ॥ ३।४।१८ ॥ इति नित्य एवेति स्वीकारात् ॥१००॥

णिलोपोऽप्यनित्यः ॥१०१॥

यथाप्राप्ति सर्वत्र भवन्नपि क्वचिन्न भवतीत्यर्थः। यथा-'मधवो युधि सुप्रकम्पयाः' इत्यत्र सुप्र-पूर्वात् ण्यन्तात् कम्पेः खलि णेर्लुचो अनित्यत्वादभवने गुणे अयादेशः सिद्धः। ज्ञापकमस्य 'णिवेत्यास०' ॥५।३।१११॥ इत्यनपवादस्य 'भीषिभूषिचिन्ति०' ॥५।३।१०९॥ इति सूत्रस्य 'जागुरश्च' ॥५।३।१४०॥ इति सूत्रात्प्रारब्धे अप्रत्ययाधिकारे करणे सति अप्रत्ययेनापि चिन्ता-पूजादीनां णेर्लुकि सिद्धावपि 'षितोऽङ्' ॥ ५।३।१०७ ॥ इति सूत्रात्प्रारब्धे अङ्प्रत्ययाधिकारे 'भीषिभूषि०' इतिसूत्रकरणेनाङ्विधानम्। तथा हि-अप्रत्ययस्याङश्च भेदस्तावद् ङित्वेनैव। ङित्वस्य च साध्यं गुणाभाव एव। णिलोपस्य नित्यत्वे तु णेर्लुकि नाम्यभावाद् गुणप्राप्तिरेव नेति किमर्थमप्रत्ययत्यागेनाङ्प्रत्ययमानेतुमङोऽधिकारे 'भीषिभूषि०' इति सूत्रं क्रियते। यच्च कृतं तदेव ज्ञापयति-णिलोप अनित्य इति। एवं च णेर्लुगभावे यदि अप्रत्यय आनीयते तर्हि णेर्गुणे चिन्तया पूजयेति स्यात्, इष्यते चिन्तिया, पूज्येति। अतोऽङोऽधिकारे सूत्रं कृतम्। तथा च गुणाभावे क्रमेण 'संयोगात्' ॥ २।१।५२ ॥ इतीयि 'योऽनेक०' ॥ २।१।५६ ॥ इति यत्वे च चिन्तिया, पूज्येति सिद्धम् ॥१०१॥

णिच्संनियोग एव चुरादीनाम् ॥१०२॥

चुरादीनामिति सामान्योक्तेऽङ्कादीनां श्लेष्कान्तानामिति ज्ञेयं नान्येषाम्। तेषामदन्तत्वस्यैवासंभवात्। प्राग् णिचः सर्वत्र यथादर्शनमनित्यत्वोक्तेर्णिजभावपक्षे अङ्कादीनामदन्ततानिषेधार्थोऽयं न्यायः। यथा जगणतुरित्यादौ णिजभावपक्षे गणेरनदन्तत्वेनानेकस्वरत्वाभावादामादेशो नाभूत्। ज्ञापकमस्य 'ई वा गणः' इत्यपि कृते अजीगणदजगणदिति रूपद्वयसिद्धावपि 'ई च गणः' ॥ ४।१।६७ ॥ इति सूत्रकरणम्। तथाहि-गणेस्तावण्णिचि णिगि च प्रत्येकमजीगणदजगणदिति द्वैरूप्यमिष्टम्। यदि च गणेः सर्वथाऽप्यदन्तत्वं स्यादेव तदा तद् द्वैरूप्यम्। 'ई वा गणः' इति सूत्रेणापि सिद्ध्यति। यथा-प्रथमे पक्षे 'ई वा गणः' इति ईत्वं स्याद्, द्वितीये तु यथाप्राप्तं समानलोपि-

त्वात् सन्वद्भावाद्यभाव इति । तथापि यत् 'ई च गणः' इति सूत्रं कृत्वा चकारेणाकारानुकर्षणं कृतं तत् णिच अनित्यत्वादभवनपक्षे यदा पतन्न्यायेनादन्तत्वं भविष्यति तदा णिगि परे 'ई वा गणः' इति ईत्वे विकल्पितेऽप्यजीगणदित्येकमेव रूपं प्राप्स्यति; तथा च मा भूत् किन्त्वजगणदित्यपि यथा स्यादित्येवमर्थं तत् । अनित्यश्चायम् । 'पतण् गतौ वा' इति धातुपारायणे 'वाशब्दो णिजन्तत्वयोर्विकल्पार्थः । इत्युक्तेः । नित्यत्वे त्वस्य 'वाशब्दो णिग्विकल्पार्थः' इत्येवोक्तं स्यात् ॥ १०२ ॥

धातवोऽनेकार्थाः ॥१०३॥

तेन धातुपाठेऽनुक्तोनुक्तोऽप्यर्थो लक्ष्यानुसारात् तेषां प्रयोज्य इत्यर्थः । यथा विधत् विधाने । अयं व्यधार्थेऽपि । यथा-वेधः शब्दवेधी । पधि वृद्धौ । अयं दीप्त्यर्थेऽपि । यथा पुरश्चक्रं तवैधते । प्राप्त्यर्थेऽपि । यथा-औषवस्रफलमेधते इत्यादि । ज्ञापकमस्य 'तक्षः स्वार्थे वा' ॥ ३।४।७७ ॥ इत्यत्र स्वार्थे इति विशेषणम् । तेन ह्यर्थान्तरे म्नुर्न । यथा संतक्षति वाग्भिः शिष्यम् । निर्भर्त्सयतीत्यर्थः। पतन्न्यायाभावे तक्षोऽर्थान्तरवृत्त्यभावादेव स्वार्थे इत्युक्तिरस्थान एव। अनित्योऽप्ययम्। तेन धात्वर्थं बाधते कश्चिदुपसर्गो यथा-प्रतिष्ठते, प्रवसतीत्यादीत्युक्तिर्न विरुद्ध्यते । एषां धातुपाठे योऽर्थः पठितोऽस्ति स एवार्थो यदि स्यादिधातूनां स्यात्तदैवोच्यमाना संगच्छते । यदि त्वेतन्न्यायाद्धातूनामनेकार्थत्वं स्यादेव तदा स्यादिधातूनां स्थित्याद्यर्थस्येव गत्याद्यर्थत्वस्यापि संभवादाचष्टे आलोकते इत्यादाविव प्रतिष्ठते इत्यादावप्युपसर्गस्य धात्वर्थं प्रत्यनुवर्तकत्वमेवोच्यमानं यौक्तिकं स्यान्नतु बाधकत्वमिति । अनित्यत्वे ज्ञापकं तु प्रवापयति, प्रवाययतोत्यनयोर्वांतिवेतिभ्यां णौ सिद्धावपि 'वियःप्रजने' ॥ ४।२।१३ ॥ इति सूत्रकरणम् । तथाहि-पुरो वातो गाः प्रवापयतीति तावद्वांक् गतिगन्धनयोरित्यस्य धातोर्णिगि सिद्ध्यति । प्रवाययतीत्यपि च वींक् प्रजनकान्त्यसनखादनेषु चेत्यस्य धातोर्णिगि। तथापि यद् 'वियः प्रजने' इति सूत्रं कृत्वा वियो विकल्पेन आत्वकरणं तदेतन्न्यायानित्यत्वेन वांकधातोः प्रजने वृत्त्यभावमेव दर्शयति ॥१०३॥

गत्यर्था ज्ञानार्थाः ॥१०४॥

धातव इति संबद्ध्यते। यथा गमयति शब्दोऽर्थं ज्ञापयतीत्यर्थः । ज्ञापकमस्य 'णाम्बज्ञाने गमुः' ॥ ४।४।२४ ॥ इत्यत्रेणोऽज्ञान इति विशेषणम् । तेन हि प्रत्याययत्यर्थानित्यादाविणो ज्ञानार्थत्वान्न गम्वादेशः । एतन्न्यायाभावे गत्यर्थस्य ज्ञानार्थत्वासंभवादज्ञान इति विशेषणं वृथैव । अनित्यश्चायम् । 'गतिबोधाहारार्थ०' ॥ २।२।५ ॥ इत्यत्र बोधग्रहणात् । नित्यत्वे त्वस्य गत्यर्थानां बोधार्थत्वसंभवेन केवलं गतिशब्दमेव गृह्णीयात् ॥ १०४ ॥

नाम्नां व्युत्पत्तिरव्यवस्थिता ॥१०५॥

तेन नामानि अनेकधाऽपि व्युत्पाद्यन्त इत्यर्थः। यथा अम्बस्याम्बा वडवा,

असृगालेढि सृगालः; मह्यां रौति मयूरः–इत्यादि पृषोदरादित्वात् सिद्धम्। पुनर्वंड आग्रहणे इति सौत्राद्धातोः 'वडिवटि०' (उ० ५१५) इत्यवे वडवा। सृधातोः 'सर्तेर्गोऽन्तश्च' (उ० ४७८) इति कित्याले आगमे च सृगालः। मीनातेः 'मीमसि' (उणा० ४२७) इत्यूरे मयूर इत्याद्युणादावपि साधितम्। तथा सूर्यशब्दः कृति 'कुप्यभिद्योध्यसिद्धय०' ॥ ५।१।३९ ॥ इत्यनेन सृधातोः क्यपि संज्ञायां निपातितः। पुनस्तद्धिते सूरशब्दस्य मर्तादिगणपाठात् 'मर्त्तादिभ्यो यः' ॥ ७।२।१५९ ॥ इति स्वार्थिकप्रत्ययेनापि साधितः। ज्ञापकमस्य शब्दानामसकृद् व्युत्पादनमेव। अनित्यत्वाच्चास्य रूढनाम्नामेव व्युत्पत्तिरव्यवस्थिता न तु यौगिकानां नीलकण्ठादीनाम् ॥ १०५ ॥

उणादयोऽव्युत्पन्नानि नामानि ॥१०६॥

अवयवावयविनोरभेदोपचारात् उणादय इत्युणादिप्रत्ययान्तानि कारुपाय्वादिनामानि 'कृवापा०' (उणा० १) इत्यादिना पञ्चोत्तरसूत्रसहस्रेण 'उणादयः' ॥ ५।२।९३ ॥ इति सूत्रसूचितेन यद् व्युत्पादितानि तत्प्रकृतिप्रत्ययविभागेन वर्णानुपूर्वीविज्ञानार्थमेव नतु कर्तेत्यादिक्रियाशब्दवदन्वर्थदर्शनार्थम्। तेन तत्त्वतस्तान्यव्युत्पन्नानि। तेषां रूढिशब्दत्वेन व्युत्पत्तेरकिंचित्करत्वात्। यथा वींकधातोः 'पटिवीभ्याम्' (उणा० ५७९) इति डिसे बिसम्। अत्रैवं व्युत्पादितस्याप्यस्य नाम्नस्तत्त्वतो अत्युत्पन्नत्वेन सस्य कृतत्वाभावान्न षः। ज्ञापकमस्य 'अतः कृकमि०' ॥ २।३।५ ॥ इति सूत्रे कमिग्रहणात्कमेरौणादिकेन 'मावावधमि०' (उणा० ५६४) इति सेन निष्पन्ने कंसे लब्धेऽपि पृथक्कंसग्रहणम्। तथाहि–'अतःकृकमि०' ॥ २।३।५ ॥ इति सूत्रे तावत् कृकमी केवलाभ्यां समासासंभवात् प्रत्ययान्तौ ग्राह्यावित्युक्तम्। यथा–अयस्कारः, अयस्काम इत्यादि। एतन्न्यायाभावे कंस इत्यत्र कमेरेव सप्रत्ययान्तस्य सद्भावात् पयस्काम इतिवत् पयस्कंस इत्यपि कमिग्रहणेनैव सिद्ध्यतीति किमर्थं पृथक्कंसग्रहणं क्रियेत। यत्तु कृतं तदेतन्न्यायादव्युत्पन्न एवायं कंसशब्दो न तु कमिना व्युत्पन्न इति बुद्ध्यैव। तदेवमेतन्न्यायोत्थया कंसशब्दाव्युत्पन्नत्वबुद्ध्या कृतं पृथक्कंसग्रहणमेतन्न्यायं गमयति। अस्य चानित्यत्वम्। क्वचिदेषां व्युत्पत्तिपक्षस्याप्याश्रणात्। तेन वपेरौणादिके 'रुद्यर्ति०' (उणा० ९९७) इत्युसि वपुषेत्यादौ सस्य कृतत्वात् षः। अनित्यत्वे ज्ञापकं तु 'तृस्वस्०' ॥ १।४।३८ ॥ इति सूत्रे तृग्रहणेनैव सिद्धे पुनर्नप्त्रादीनामौणादिकानां पृथक्पठनस्य नियमार्थत्वम्। तद्धि तदैव स्याद्यदि तृग्रहणेनैव नप्त्रादीनामप्यार् सिद्धः स्यात्। तृग्रहणेन च नप्त्रादीनामार् तदैव सिद्ध्यति यदि व्युत्पत्तिपक्ष आश्रीयते। नियमश्चायम्–औणादिकतृप्रत्ययान्तानां नप्त्रादीनामेवार् नान्येषाम्। तेन पितरौ, मातरौ इत्यादीनां न ॥१०६॥

शुद्धधातूनामकृत्रिमं रूपम् ॥१०७॥

शुद्ध इति कोऽर्थः। ये यादृशा धातुपाठे पठितास्तेषामकृत्रिमं रूपमिति

कोऽर्थः? ते धातवः कृता इति नोच्यन्ते। वृक्षेष्वित्यादौ सुपः 'सप्तम्यधिकरणे' ॥ २।१।९५ ॥ इति सूत्रमुच्चार्य स्थापितत्वेन कृतत्वभवनाद् यथा तदीयसस्य षत्वं स्यात्तथा धातोरपि धातुपाठसूत्रमुच्चार्य स्थापनेन तदीयसस्य कृतत्वप्रसङ्गात् षत्वप्रसक्तिरिति तस्य कृतत्वनिषेधार्थोऽयं न्यायः। तेन मुसच्-औणादिके कित्यले मुसलमित्यत्र सस्य कृतत्वाभावात् 'नाम्यन्तस्था०' ॥ २।३।१५ ॥ इति षत्वं नाभूत्। ज्ञापकमस्य मुसलादौ षत्वं निषेद्धुं यत्नाकरणम्। शुद्धेति किम्। षन भक्ताविति्यस्य 'षः सोऽष्टये' ॥ २।३।९८ ॥ इति से कृते सन् इति रूपस्य कृत्रिमत्वात् णो ङे असीषणदित्यादौ 'नाम्यन्तस्था०' ॥ २।३।१५ ॥ इति षत्वं यथा स्यात्। अनित्यत्वमस्य न दृश्यते ॥ १०७ ॥

क्विबन्ता धातुत्वं नोज्झन्ति शब्दत्वं च प्रतिपद्यन्ते ॥१०८॥

क्विबित्युपलक्षणत्वाद्विचन्ता अपि। धातुत्वमिति सामान्योक्तेऽपि नामार्थे संवलितधात्वर्थाभिधायित्वाद् गौणधातुत्वम्। तत एव शब्दत्वं चोपचाराद् वृक्षादिवन्नामत्वं च प्रतिपद्यन्ते-धातुत्वनामत्वयोः कार्यं लभन्ते इत्यर्थः। अन्योऽन्यविरुद्धकार्यप्रापणार्थोऽयं न्यायः। यथा नियौ लुवौ इत्यादौ धातुत्वाद् 'धातोरिवर्ण०' ॥ २।१।५० ॥ इति इयुवौ, शब्दत्वाच्च स्यादयः। ज्ञापकमस्य 'धातोरिवर्ण०' इत्युब्बाधकं 'स्यादौ वः' ॥ २।१।५७ ॥ इति वत्वकरणम्। तथाहि-वत्वं तावद्धातोः स्यादावनन्तरे सत्युक्तम्। स्यादिश्च धातोरनन्तरस्तदा स्याद्यदा धातुः क्विबन्तः स्यात्तस्य च यदि नामत्वं स्यान्नत्वन्यथा। क्विबन्तानां धातुत्वनामत्वोभयमेतन्न्यायादेवेति। तथा च वस्विच्छति क्यनि क्विपि च तल्लुकि वसूः वस्वौ इत्यादौ वत्वं सिद्धम्। अनित्यश्चायम्। तेन आख्यातक्विबन्तानां धातुत्वमेव न तु नामत्वमिति राजनतीत्यत्र त्यादिरेव न तु स्यादिः ॥१०८॥

उभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभाक् ॥१०९॥

उभयोः स्थानिनोः स्थाने निष्पन्न आदेशो यथेच्छमन्यतरजोऽपि व्यवह्रियते पुत्र इव मातापित्रोः ॥ उभयोः कार्ययोर्यौगपद्येन प्रसङ्गे क्रमेण प्रापणार्थोऽयं न्यायः। यथा आङ्, ईषि गत्यादौ, आ ईष्यः एष्यः ततः प्रेण योगे आङ्ईतोः स्थानजस्य एतो यदा आङादेशत्वं तदा 'ओमाङि' ॥ १।२।१८ ॥ इत्यल्लोपे प्रेष्य इति स्यात्। यदा तु धात्वादेशत्वं तदा 'उपसर्गस्यानिणे०' ॥ १।२।१९ ॥ इत्यनेन प्रस्यालोपः प्राप्नोति। परं तं बाधित्वा विशेषविहितत्वात् 'प्रस्यैषैष्योढोढ्यूहे स्वरेण' ॥ १।२।१४ ॥ इत्वैत्वे प्रैष्य इति स्यात्। ज्ञापकमस्य 'गडदवादे०' ॥ २।१।७७ ॥ इत्यत्र प्रत्ययययोरिति न्यायात्प्रत्ययत्वे लब्धेऽपि साक्षात् प्रत्ययशब्दग्रहणम्। तथाहि-धाधातोर्वसि द्वित्वे पूर्वस्य ह्रस्वे 'द्वितीयतुर्ययोः पूर्वौ' ॥ ४।१।४२ ॥ इति दत्वे 'झझातः' ॥ ४।२।९६ ॥ इति धातोराल्लुकि 'अदीर्घात्०' ॥ १।३।३२ ॥ इति धस्य द्वित्वं यदा क्रियते तदा दद्ध्व इत्यत्र ध्वस्य प्रकृतिप्रत्ययस्थानजस्य यद्येतन्न्यायेन प्रत्ययत्वमापाद्यते तदा कृतद्वित्वधकारसंबंधिना प्रथमधकारेणान्तर्वर्तमानेन धातोश्च तुर्यान्तत्वसद्भावादा-

दिचतुर्थत्वंप्राप्नोति। तत्करणे च धद्ध्व इति रूपं स्यात्तन्माभूत् किंतु प्रत्ययग्रहणबलान्न्यायानपेक्षो यः प्रत्ययस्तत्रैव परे आदिचतुर्थत्वं स्तादिति ज्ञापनार्थं हि 'गडदबादेः०' इत्यत्र प्रत्ययशब्दग्रहणम्। एतन्न्यायाभावे ध्वस्य कथमपि प्रत्ययत्वानापत्त्या तस्मिन् परे दद्ध्व इत्यत्रादिचतुर्थस्य प्रसङ्गोऽपि नास्तीति किमर्थं प्रत्ययग्रहणेन न्यायानपेक्ष एव प्रत्ययोऽत्र गृह्यत इति ज्ञापनम्। अस्यानित्यत्वमपि। तेन राजानमाख्यदरराजदित्यत्रान्त्यस्वरादिलोपस्य अनूरूपस्वरव्यञ्जनोभयस्थानजत्वेऽपि स्वरादेशतैव व्यपदेश्या नतु व्यञ्जनादेशता। तद्व्यपदेशे हि असमानलोपित्वादुपान्त्यह्रस्वस्य सन्वद्भावादेश्च सिद्धावरीरजदिति स्यात् ॥१०९॥

अवयवे कृतं लिङ्गं समुदायस्यापि विशिनष्टि
चेत्तं समुदायं सोऽवयवो न व्यभिचरति ॥११०॥

अप्राप्तप्रापणार्थोऽयं न्यायः। यथा 'कुस्मिण् स्मयने' इत्यस्मात् 'चुरादिभ्यः' ॥ ३।४।१७ ॥ इति णिचि कुस्मयते। चित्रशब्द आश्चर्यार्थे ङित्; ततश्चित्रं करोति इति धात्वर्थे 'नमोवरिवश्चित्रङो०' ॥ ३।४।३७ ॥ इति क्यनि चित्रीयते। महीङ् पूजायाम्-कण्ड्वादिः अस्मात् 'धातोः कण्ड्वादेर्यक्' ॥३।४।८॥ इति यकि महीयते इत्यादौ कुस्मिणचित्रङ्महीङामिङित्वेन णिच्क्यन्यगन्तसमुदायस्यापीङित्वादात्मनेपदम्। कुस्म्यादीनां णिचाद्यन्तसमुदायेन सममव्यभिचारित्वात्। चेत्तं समुदायमिति किम्। कुस्मयति, चित्रीययति, महीययतीत्यादौ कुस्म्यादीनामेव णिच्क्यन्यकामागमनादनु प्रयोक्तृव्यापारार्थसंजातणिगन्तीकृतानां समुदायादिङित्त्वहेतुकमात्मनेपदं मा भूत्। णिगः प्रयोक्तृव्यापारे सत्येवोत्पत्तेः। कुस्म्यादीनां णिगन्तसमुदायव्यभिचारित्वात्। ज्ञापकमस्य कुस्म्यादीनामिङित्करणमेव। एतन्न्यायाभावे ह्यात्मनेपदाभवनेन निष्फलत्वादिङित्त्वं कुर्यादेव न। अनित्यत्वमस्य नास्ति ॥११०॥

येन धातुना युक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञाः ॥१११॥

तदन्यधात्वादियोगे उपसर्गकार्यं न स्यादित्यर्थः। यथा प्रगता ऋच्छका यस्मात् स प्रर्छको देशः-इत्यादौ प्रस्य गमिना सह संबंधाद् गमिं प्रत्येवोपसर्गत्वं नतु ऋच्छिं प्रति। तेन प्रावर्णस्य 'ऋत्यारुपसर्गस्य' ॥ १।२।९ ॥ इत्यार्न। ज्ञापकमस्य ऋत्यारिति सूत्रे उपसर्गस्येत्युक्तिरेव। एतन्न्यायाभावे प्रार्छको देश इत्यादावप्यार् प्राप्नोति। यदि च तथेष्टं स्यात्तदा लाघवार्थं प्रादेरित्येव निर्दिश्येत। येनोपसर्गसंज्ञस्यानुपसर्गसंज्ञस्य च चादिगणप्रान्तस्थितप्रादिगणस्य संबन्धिनो वर्णस्याविशेषेण ऋदादिधातावार् सिद्ध्येत। एवं सत्यपि यदुपसर्गस्येति गुरुनिर्देशः स एतन्न्यायात् प्रर्छको देश इत्यादावार्निषेधार्थमेव। अनित्यश्चायम्। उत्तरेण बाध्यमानत्वात् ॥१११॥

यत्रोपसर्गत्वं न संभवति तत्रोपसर्गशब्देन
प्रादयो लक्ष्यन्ते नतु संभवत्युपसर्गत्वे ॥११२॥

पूर्वापवादोऽयम् । यथा प्रगतोऽध्वानं प्राध्वो रथ इत्यादौ प्रस्यानुपसर्गत्वेऽपि ' उपसर्गादध्वनः ' ॥ ७।३।७९ ॥ इत्यत् समासान्तः । न ह्यत्राध्वशब्दसंबद्धस्य प्रस्य कथमप्युपसर्गत्वं संभवति; उपसृत्य धातुमर्थविशेषं सृजतीत्युपसर्ग इत्यन्वर्थाश्रयणात् । प्राध्व इत्यत्र धातुसंबन्धपरिहारेण नामसंबन्धस्यैव दृश्यमानत्वात् । ज्ञापकमस्य अध्वनः प्रागुपसर्गासंभवेऽपि उपसर्गादित्युक्तिः । सा हि एतन्न्यायज्ञापनार्थमेव । अन्यथा लाघवार्थं प्रादेरित्येवोच्येत । अनित्यत्वमस्य न दृश्यते ॥११२॥

शीलादिप्रत्ययेषु नासरूपोत्सर्गविधिः ॥११३॥

आदिशब्दाद् धर्मसाध्वर्थयोर्ग्रहणम् । शीलादिप्रत्यये अपवादे विषयभूते सत्यपवादे नासमानरूपो ' असरूपोऽपवादे० ' ॥ ५।१।१६ ॥ इति सूत्रप्राप्तोऽप्यौत्सर्गिकः शीलाद्यर्थप्रत्ययो न स्यादित्यर्थः । प्राप्तप्रतिषेधार्थोऽयं न्यायः । एवमुत्तरोऽपि । यथा अलङ्करिष्णुः कन्यामित्यादौ ' भ्राज्यलंकृञ्निराकृग्० ' ॥५।२।२८॥ इति इष्णुरेव स्यान्तु ' तृन्शीलधर्मसाधुषु० ' ॥ ५।२।२७ ॥ इति तृन् । तेन शीलाद्यर्थे अलङ्कर्ता कन्यामित्यादिप्रयोगो न साधुः । ज्ञापकमस्य पद्यतेरिदित्वात् ' इङितो व्यञ्जनाद्यन्तात् ' ॥ ५।२।४४ ॥ इत्यनेनैवाने सिद्धेऽपि ' भूषाक्रोधार्थ० ' ॥ ५।२।४२ ॥ इत्यनप्रत्ययसूत्रे चेन पदोऽनुकर्षणम् । एतन्न्यायाभावे पदेरिदित्वात् ' इङितः ' इत्यनेनैवानस्य सिद्धत्वात् ' भूषाक्रोधा० ' इत्यत्र चेन पद् किमर्थमनुकृष्येत । अनित्यश्चायम् । तेन शीलाद्यर्थे ' शृकमगमहनवृषभूस्थउकण् ' ॥ ५।१।४० ॥ इत्युकण्प्रत्यये आगामुक इत्यादिवत् ' तृन् शील० ' ॥ ५।२।२७ ॥ इत्यनेन तृनि आगन्तेत्याद्यपि स्यात् । अनित्यत्वे ज्ञापकं तु दीप्र इत्यत्र ' स्म्यजसहिंसदीपकम्पकमनमोरः ' ॥ ५।१।७९ ॥ इति रैणैवाननिषेधे सिद्धेऽपि ' न णिङ्यसृददोपदीक्षः ' ॥ ५।२।४५ ॥ इत्यननिषेधसूत्रे दीपिग्रहणम् । दीप्र इत्यत्र ' इङितो व्यञ्जन० ' ॥ ५।२।४४ ॥ इति प्राप्तोऽप्यनः ' स्म्यजसहिंस० ' इति रैणैव बाधितत्वान्न भावी; ततो ' न णिङ्य० ' इत्यननिषेधसूत्रे किमर्थं दीपिग्रहणं क्रियते । न च ' असरूपोऽपवादे ' इत्यनुज्ञानादौत्सर्गिकोऽनोऽपि स्यादिति वाच्यम् । एतन्न्यायेन तदनुज्ञाया निषेधात् । यदि परमेतन्न्यायस्यानित्यत्वाच्छीलादिप्रत्ययेष्वपि क्वचिदसरूपविधेरनुज्ञासंभवाद् रप्रत्यये अनप्रत्ययोऽपि स्यादित्याशंक्य ' न णिङ् य० ' इत्यत्र दीपिग्रहणसार्थक्यम् । एतन्न्यायस्यायमर्थः—शीलादिप्रत्ययेषु विषयभूतेष्वर्थसामान्यविहितः कृत्प्रत्ययोऽसरूपोत्सर्गविधिना प्राप्तोऽपि न स्यात् । तेन शीलाद्यर्थेऽलङ्करिष्णुरित्यादौ ' भ्राज्यलङ्कृग्० ' ॥ ५।२।२८ ॥ इति विहितस्य इष्णुप्रत्ययस्य विषयेऽर्थसामान्यविहितत्वात् प्राप्तोऽपि ' णकतृचौ ' ॥ ५।१।४८ ॥ इति णको न स्यात् । तेन शीलाद्यर्थविवक्षायामलङ्कारक इत्यादिप्रयोगो न साधुः । ज्ञापकमत्र परिवादक इत्यस्यार्थसामान्यविहितेन ' णकतृचौ ' इति णकेन सिद्धावपि ' वादेश्च णकः ' ॥ ५।२।६७ ॥ इति शीलाद्यर्थणकविधानम् । यदि हि शीलाद्यर्थेषु तृन्नादिप्रत्ययविषयेऽर्थसामान्य-

विहितत्वात् 'णकतृचौ' इति णकोऽपि 'असरूपोऽपवादे०' ॥५।१।१६॥ इत्यनेन भवन् यदि स्यात् तर्हि किमिति णकार्थे 'वादेश्च णकः' इति सूत्रं क्रियेत। यत्तु कृतं तच्छीलाद्यर्थेषु 'णकतृचौ' ॥ ५।१।४८ ॥ इति णकस्यार्थे विधानात् प्राप्नुवतोऽप्येतन्न्यायादनागमनसंभावनयैव। अस्य चानित्यत्वात् क्वचिच्छीलाद्यर्थेऽर्थसामान्यविहितोऽसरूपोत्सर्गकृत्प्रत्ययः स्यादपि। यथा 'कामक्रोधौ मनुष्याणां खादितारौ वृकाविव'। अत्र 'निन्दहिंसक्लिशखाद०' ॥ ५।२।६८ ॥ इति प्राप्तः शीलाद्यर्थसामान्यविहितस्तृच्। न चायं तन्नितिवाच्यम्। तृनः कर्मणि 'तृन्नुदन्ताव्यय०' ॥ २।२।९० ॥ इति षष्ठीनिषेधात्। नास्त्यत्र शीलाद्यर्थ इत्यपि न वाच्यम्। तं विना मनुष्यखादनशीलवृकोपमाया अनुपपत्तेः ॥११३॥

त्यादिष्वन्योन्यं नासरूपोत्सर्गविधिः ॥११४॥

यत्रोत्सर्गरूपायास्त्यादिविभक्तेर्विषये अपवादरूपा त्यादिविभक्तिरागच्छन्ती स्यात्तत्र तद्विषये औत्सर्गिकी त्यादिविभक्तिः 'असरूपोऽपवादे ॥ ५।१।१६ ॥ इत्यनेन प्राप्ताऽप्येतन्न्यायेन निषिध्यते। यथा स्मरसि चैत्र कश्मीरेषु वत्स्याम इत्यादौ 'अयदि स्मृत्यर्थै भविष्यन्ती' ॥ ५।२।९ ॥ इति भविष्यन्ती। तद्विषये 'अनद्यतने ह्यस्तनी' ॥५।२।७॥ इति ह्यस्तनी तु प्राप्ताऽपि न स्यात्। अन्योऽन्यमिति-वचनाच्च त्यादिविभक्तीनामेवान्योन्यमसरूपोत्सर्गविधिर्निषिध्यते। प्रत्ययेन तु समं त्यादिविभक्तीनां सोऽस्त्येव। तेनोपशुश्रावेत्यादौ 'श्वसदवस्यः परोक्षा वा' ॥५।२।११॥ इति परोक्षावत्तद्विषये उत्सर्गभूताःक्तादयोऽपि स्युरेव। यथा उपश्रुतः उपश्रुतवानित्यादि। ज्ञापकमस्य 'श्वसद०' इत्यत्र वाग्रहणम्। तद्धि पक्षे यथास्वकालमद्यतनीह्यस्तन्यर्थम्। ते चैतन्न्यायाभावे असरूपत्वात् सिद्धे एवेत्यतः किमिति तदर्थं वाग्रहणं क्रियेत। यदि परमेतन्न्यायसद्भावात् 'श्वसद०' ॥५।२।११॥ इति परोक्षया औत्सर्गिक्यावद्यतनीह्यस्तन्यौ बाधिष्येते इत्याशंक्य पक्षे यथास्वकालं ते अपि स्तामिति बुद्ध्या 'श्वसद०' ॥ ५।२।११ ॥ इत्यत्र वाग्रहणं सफलम्। अनित्यस्तु नायम्। 'असरूपोऽपवादे०' ॥५।१।१६॥ इत्यस्यापवादाविमौ ॥११४॥

स्त्रीखलना अलो बाधकाः स्त्रियाः खलनौ ॥११५॥

स्त्रीति—स्त्रयुक्तप्रत्ययाःक्त्यादयः। अन इति चानट् प्रत्ययः। 'असरूपोऽपवादे०' ॥५।१।१६॥ इत्यनेन प्राक्तेरिति वचनात् 'स्त्रियां क्तिः' ॥५।३।९१॥ इत्यतः प्राग् ये कृत्प्रत्ययास्तेषु पाक्षिकोऽसरूपविधिर्व्यवस्थापितस्तदग्रेतनप्रत्ययानां तु स्पर्द्धे सति व्यवस्थार्थोऽयं न्यायः। यथा चयनं चितिरित्यादौ स्त्रियांक्तिः—'युवर्णवृदवशरणगमृद्ग्रहः' ॥ ५।३।२८ ॥ इत्याभ्यां क्रमात् स्त्र्यलोः प्राप्तौ परत्वात् स्त्र्येव। दुःखेन चीयते दुश्चयमित्यादौ 'दुःस्वीषतःकृच्छ्राकृच्छ्रार्थात्खल्' ॥५।३।१३९॥ 'युवर्ण०' इत्याभ्यां क्रमात्खललोः प्राप्तौ परत्वात् खलेव। पलाशानि शात्यन्तेऽनेनेति पलाशशातनो दण्ड इत्यादौ 'करणाधारे' ॥ ५।३।१३९ ॥ 'युवर्ण०' इत्याभ्यां क्रमादनडलोः प्राप्तौ परत्वादनडेव। तथा दुःखेव भिद्यते इति दुर्भिदा भूरित्यादौ 'स्त्रियांक्तिः' 'दुःस्वीषतः०' इत्याभ्यां क्रमात् स्त्रीखलोःप्राप्तौ परत्वात्

खलेव । सक्तवो धीयन्तेऽस्यामिति सक्तुधानी इत्यादौ 'स्त्रियांक्तिः' 'करणाधारे' ॥ ५।३।१२९ ॥ इत्याभ्यां क्रमात् क्यनटोः प्राप्तौ परत्वादनडेव । 'स्पर्द्धे' ॥ ७।४।११९ ॥ इति परिभाषायाः प्रपञ्चोऽयम् । ज्ञापकमस्य षषां व्यवस्थायै यत्नान्तराकरणम् । अनित्यश्चायम् । तेन जय इत्यादौ स्त्रियांक्तिः' 'युवर्ण०' इत्याभ्यां क्रमात् स्नयलोः प्राप्तावलेव । शिरसोऽर्दनं शिरोऽर्त्तिरित्यादौ च अर्दतेः 'स्त्रियांक्तिः' 'अनङ्' ॥५।३।१२४॥ इत्याभ्यां क्रमात् क्यनटोः प्राप्तौ क्येव ॥११५॥

यावत्संभवस्तावद्विधिः ॥११६॥

यथाप्राप्तस्य सूत्रस्य न्यायस्य वा यावतो वारान् प्रवृत्तेः संभव इति कोऽर्थः? अव्याहता प्राप्तिः स्यात्तावतो वारांस्तस्य प्रवृत्तिः कार्यैव । नत्वेकवारमस्य प्रवृत्तिः कृतेति बुद्ध्याऽधिकवारसंभवे सत्यपि तत्प्रवृत्तिर्न क्रियत इति । यदा च संभवो व्याहतस्तदनु तत्प्रवृत्तिर्न कार्यैवेत्यस्यार्थस्य ख्यापनार्थोऽयं न्यायः । तत्र सूत्रस्य यथा-त्वक् इत्यादौ प्रथमं विरामे परे 'अदीर्घात्०' ॥ १ । ३ । ३२ ॥ इत्यनेन कस्य द्वे रूपे क्रियेत । यथा त्वक् । पुनरनेनैव एकव्यञ्जने परे सूत्रप्रवृत्तेः संभवस्य सद्भावादाद्यकस्य द्वे रूपे क्रियेते । यथा त्वक्क् । ततः परं तु मध्यमकस्य 'धुटो धुटि स्वे वा' ॥ १ । ३ । ४८ ॥ इति लुकि पुनराद्यकस्य 'अदीर्घात्' इति द्वे रूपे प्राप्नुतः परं न क्रियेते । तथाकरणे क्रियाऽनुपरमप्रसङ्गाद्यं विधिं प्रतीति न्यायेन व्यर्थनिषेधेन प्रवृत्तेः संभवस्य व्याहतत्वात् । न्यायस्य यथा-ब्रूगः कृतवचादेशस्य प्रण्यवोचतेत्यादौ भूतपूर्वकन्यायस्य प्रथमवारं प्रवर्तनेन वोचस्य वचत्वोपचाराद् द्वितीयवारं प्रवर्त्तनेन वचस्यापि ब्रूत्वोपचारात् तस्मिन् परे 'अकखादि०' ॥ २।३।८०॥ इत्यनेन नेर्नाणः । 'ज्ञापकमस्य ष्वृत्सकृत्' इति सूत्रम् । तद्धि ष्वेंग् संवरणे इत्यस्य 'आत्संध्यक्षरस्य' ॥ ४।२।१ ॥ इति कृतात्वस्य क्ये संवीयते इत्यादावेकवारं 'यजादिवचेः ॥ ४।१।७९॥ इत्यनेन या इत्यस्य ष्वृति वि इति जाते पुनस्तस्यैकदेशविकृतजातेन यजादित्वस्यैव सद्भावात् 'यजादि०' इति प्राप्तष्वृत्निषेधार्थम् । एतन्न्यायाभावे एकवारं ष्वृत्सूत्रं प्रवृत्तमिति द्वितीयवारं प्रवृत्तिसंभवे अव्याहतेऽपि प्रागेव चरितार्थीभूतत्वात् स्वयमेव न प्रवर्त्स्यतीति किमर्थं तन्निषेधः ? । अनित्यता त्वस्य नास्ति ॥ ११६ ॥

संभवे व्यभिचारे च विशेषणमर्थवत् ॥११७॥

यत्र विशेष्ये विवक्षितविशेषणस्य न संभवो नापि संभवासंभवरूपो व्यभिचारस्तत्र तद्विशेषणोपन्यासो न कार्यो व्यर्थत्वादित्यर्थः । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते इति न्यायस्यायं प्रपञ्चः । अनेनापि व्यर्थविशेषणोपन्यासविधेरेव निषिध्यमानत्वात् । यथा 'तौ मुम०' ॥ १।३।१४ ॥ इत्यत्र पदान्त इति विशेषणं ह्यागमस्य न योज्यते असंभवात् । मस्य तु योज्यते । त्वन्तरसीत्यादौ संभवेन रंरम्यत इत्यादावसंभवेन च पदान्तस्थत्वस्य व्यभिचारत्वात् ।

ज्ञापकमस्य तत्रैव सूत्रे स्वाविति । तत्स्वाविति विशेषणं तावद्द्विवचनेनानुस्वारस्यानुनासिकस्य च संबन्धितम् । तत्र चानुस्वारः कस्यापि स्वो न स्यादित्यतस्तस्यैतद्विशेषणमसंभवि । अनुनासिकस्तु स्वोऽप्यस्वोऽपि च स्यादित्यतः संभवित्वाद्व्यभिचारित्वाच्चैतन्न्यायेन तस्यैवैतद् विशेषणं सार्थकम् । सत्यप्येवं यद् द्विवचनेनोभयोरपि निर्दिष्टं तदुभयोः संबन्धनेऽप्येतन्न्यायात् स्वयमेवानुनासिकस्यैव संभवन्त्स्यत इत्याशयैव । अस्य न्यायस्यानित्यत्वाच्च द्वे ब्रह्मणी वेदितव्ये, इत्यादौ द्विवचनप्रयोगान्यथानुपपत्त्या ब्रह्मणोर्द्वित्वव्यभिचाराभावेऽपि द्वे इति विशेषणम् ॥ ११७ ॥

सर्वं वाक्यं सावधारणम् ॥११८॥

एवस्याप्रयोगेऽपि सर्ववाक्येष्वेवोऽवधारणार्थो लभ्यत इत्यर्थः । 'सिद्धिः स्याद्वादात्' ॥ १।१।२ ॥ इत्युक्त्या सर्वत्र स्याद्वादाश्रयणे प्रसक्तेऽपि क्वचिदेव स्याद्वादः श्रयितव्यो न तु सर्वत्रेति ख्यापनार्थोऽयं न्यायः । यथा 'समानानां तेन०' ॥ १।१।१ ॥ इत्यत्र दीर्घः स्यादेवेति वाक्यस्यावधारणाद् दण्डाग्रमित्यत्र दीर्घोऽभूदेव । ज्ञापकं तु 'ऋलृति ह्रस्वो वा' ॥ १।२।२ ॥ इत्यादौ विकल्पोक्तिः । एतन्न्यायाभावे तावद् ह्रस्वः स्यादित्येतावत्युक्ते ह्रस्वः स्याच्च नवा । 'विधिनिमन्त्रणाधीष्टसंप्रश्नप्रार्थने' ॥ ५।४।२८ ॥ इति सूत्रेण कामचारेऽपि सप्तम्या विहितत्वात् । तथाच विकल्पोक्तिं विनाऽपि स्वयं द्वैरूप्यसिद्धेः किमर्थं विकल्पः क्रियेत । परं ह्रस्वः स्यादित्युक्ते एतन्न्यायाद् ह्रस्वो नित्यमेव भविष्यतीत्याशङ्क्य विकल्पार्थं वेति वचनम् । उपलक्षणत्वात् क्वचित्पदमपि सावधारणम् । यथा 'लुगस्यादेत्यपदे ॥ २।१।११३ ॥ इत्यत्रापदे एवेत्यपदादिस्थे एषाति परे इत्यवधारणाद् दण्डाग्रमित्यत्र 'वृत्यन्तोऽसपे' ॥ १।१।२५ ॥ इति वृत्यन्तस्य पदत्वनिषेधेनाग्रशब्दस्य पदत्वाभावात्तस्याकारे परे प्राप्तोऽप्यल्लुग् न स्यात् । यतोऽग्रशब्दस्य यद्यपि वृत्यवस्थायां वृत्यन्तत्वाद् 'वृत्यन्तोऽसपे' ॥ १।१।२५ ॥ इत्यनेन पदत्वनिषेधात् पदत्वं नास्ति परं यदा वृत्तेः पूर्वं पदत्वमासीत्तदाऽयमकारः पदादिस्थोऽप्यासीदित्यतोऽपदादिस्थे एवेत्यवधारणं भग्नमिति । यस्त्वेकान्तेनापदादिस्थ एवाकारस्तस्मिन् परे लुगस्येत्यल्लुक् स्यादेव । यथा पचन्तीत्यत्र शवोऽकारस्य अन्तिस्थे अकारे परे लुक् । आपादिका चास्यापद इत्यनवधारणोक्तिः। सा ह्येतन्न्यायात् स्वयमेवावधारणं लप्स्यते इत्याशयैव कृता । अस्यासामर्थ्यसमर्थकं तु द्विर्बद्धं सुबद्धमिति न्यायः । यदि तावत् सर्वं वाक्यं सावधारणमेव स्यात्तदा सकृद्बद्धं सुबद्धमेवेति किमर्थं द्विर्बध्येत । यत्तु केचिद्विधयो द्विर्बद्धास्तत्तद्वाक्यानामनवधारणत्वादेव ॥११८॥

द्वौ नञौ प्रकृतमर्थं गमयतः ॥११९॥

नञावित्यर्थप्रधानो निर्देशस्तेन द्वौ निषेधौ निषेधद्वयस्य प्रयोगात् पूर्वं यः स प्रकृतोऽर्थो विधिरूपस्तं ब्रूतः । यथा 'न नाम्येकस्वरात्०' ॥ ३।२।९ ॥

इति सूत्रस्थो विभक्तेर्लुपो निषेधार्थो नञ्शब्दः पुरः पुरोऽनुवर्तमानो यावत् 'नेनसिद्धस्थे' ॥ ३।२।२१ ॥ इति सूत्रस्थद्वितीयनञा मिलितस्तावता विभक्तिलुपो विधिमेवाह स्म । ज्ञापकमस्य 'न नाम्येक०' इत्यतो विभक्तिलुब्निषेधार्थे नञ्यनुवर्तमानेऽपि विभक्तिलुब्विध्यर्थं 'नेनसिद्ध०' इत्यत्र पुनर्नञ्ग्रहणम् । यदि हि द्वितीयेन नञा पूर्वनञ्संबन्धी निषेधरूप एवार्थो दृढीक्रियमाणः स्यात्तदा विभक्तिलुब्निषेधार्थे नञ्यनुवर्तमाने सति तल्लुब्विध्यर्थं कथं पुनर्द्वितीयनञं गृह्णीयात् । यत्तु गृहीतस्तदेतन्न्यायाद् द्वितीयनञा विध्यर्थभवनसंभावनादेवेति । 'नमो नमस्ते सततं नमो नम' इत्यादौ नमःशब्दादीनामसकृत्प्रयोगे स्वार्थंद्रढनमेव दृश्यते । ततो नञोऽपि तथैव प्रसक्ते सति तन्निषेधार्थोऽयं न्यायः । इह च द्वाविति समसंख्योपलक्षणम् । तेन चतुःषडादयोऽपि नञो विधिगमका एवेत्यूह्यम् । अनित्यश्चायम् । तेन संभ्रमादौ नञोऽसकृत्प्रयोगेऽपि निषेधार्थतैव । यथा कश्चिद् भुञ्जानो अमुकं परिवेषयामीत्युक्तस्तदनिच्छुः सहसा प्रत्याह न नेति ॥११९॥

चकारो यस्मात्परस्तत्सजातीयमेव समुच्चिनोति ॥१२०॥

चस्याविशेषेण समुच्चयमात्रार्थत्वाद् विजातीयस्यापि समुच्चये प्रसक्तेऽयं न्यायः । तत्रोपसर्गादुपसर्गे यथा-'प्रतेश्च वधे' ॥ ४।४।९४ ॥ १ । प्रकृतेः प्रकृतिं यथा-'एतदश्च व्यञ्जनेऽनञ्समासे' ॥ १।३।४७ ॥ २ । प्रत्ययात् प्रत्ययं यथा-'अर्ङौ च' ॥ १।४।३९ ॥ ३ । आदेशादादेशं यथा-'आ च हौ' ॥४।२।१०१॥४। आगमादागमं यथा-'अश्च लौल्ये' ॥ ४।३।११५ ॥ ५ । अर्थादर्थं यथा-'अतिरतिक्रमे च' ॥ ३।१।४५ ॥ ६ । वाक्यार्थाद् वाक्यार्थं यथा-'तस्य व्याख्याने च ग्रन्थात्' ॥ ६।३।१४२ ॥ ७ । षपू क्रमेणोपादिति, तद इति, घुटीति, इरिति, स्सोन्त इति, पूजायामिति, तत्र भवे इत्येषां समुच्चयः । अस्य च ज्ञापकं पूर्वोक्तेष्वेव 'प्रतेश्च वधे' इत्यादिसूत्रेषु विजातीयसमुच्चयव्यवच्छित्त्यै यल्लाकरणम् । अनित्यता त्वस्य नास्ति । समुच्चिनोतीति वचनाच्च समुच्चयार्थ एव चकार एवं नियम्यते । अनुकर्षणार्थस्तु विजातीयमप्यनुकर्षति । तथैव चाग्रेतनन्याये उदाहरिष्यते ॥१२०॥

चानुकृष्टं नानुवर्तते ॥१२१॥

चकारेणानुकृष्टं पदं वाक्यं वाऽग्रेतनसूत्रेषु न याति । अपेक्षातोऽधिकार इति न्यायाच्चानुकृष्टस्याप्यनुवृत्तौ प्रसक्तायां तन्निषेधार्थोऽयं न्यायः । तत्र पदं यथा-'गडदवादेः०' ॥ २।१।७७ ॥ इति स्तध्वोश्चेति चेनानुकृष्टं पदान्त इति पदं 'धागस्तथोश्च' ॥ २।१।७८ ॥ इत्युत्तरसूत्रे न याति । वाक्यं यथा-'सदोऽप्रतेः परोक्षायां त्वादेः' ॥ २।३।४४ ॥ इति सूत्रात्परोक्षायां त्वादेः इत्येतावद्वाक्यं स्वञ्जधात्वपेक्षया विजातीयमपि सत् 'स्वञ्जश्च' ॥ २।३।४५ ॥ इति सूत्रे चेनानुकृष्टमित्यतः 'परिनेर्वेः सेवः' ॥ २।३।४६ ॥ इत्युत्तरसूत्रे न याति । तेन स्वञेः परोक्षायां द्वित्वे कृते आदेरेव सस्य षः स्यान्न तु द्वितीयस्य । यथा परिष-

स्वजे । सेवेस्तु परोक्षायामुभयोरपि सयोः षः स्यात् । यथा परिषिषेवे । चानुकृष्टमित्येव । चेन समुच्चितं तु यथेच्छमनुवर्तत एव । यथा 'मो नो म्वोश्च' ॥ २।१।६७ ॥ इत्यत्र पदान्त इत्यस्य म्वोश्च समुच्चयार्थश्चकारः । ततश्च चेन समुच्चितं पदान्त इत्येतत्पदं 'संस्ध्वंस्कवस्त्०' ॥ २।१।६८ ॥ इत्याद्युत्तरसूत्रेष्वनुवर्तते । अस्य च ज्ञापकं 'स्वञ्जश्च' इति सूत्रवृत्तौ 'चकारः परोक्षायां त्वादेः इत्यस्यानुकर्षणार्थस्ततश्च तस्य पुरोऽननुवृत्तिः सिद्धा' इत्यक्षराणि । अनित्यश्चायम् । तेन 'मारणतोषण०' ॥ ४।२।३० ॥ इत्यत्र च णिचि च इत्यस्यानुकर्षणार्थ इत्युक्तेऽपि तस्य पुरोऽनुवृत्तिः सिद्धा ॥ १२१ ॥

चानुकृष्टेन न यथासंख्यम् ॥१२२॥

चानुकृष्टं नाम यथासंख्ये अनुपयोगीत्यर्थः । यथासंख्यमनुदेशः समानामित्यस्यापवादोऽयम् । यथा 'वौ व्यञ्जनादेः सन् चाग्वः' ॥ ४।३।२५ ॥ इत्यत्र क्त्वासनोर्वावित्यनेन सह संख्याया वचननिर्देशस्य च साम्येऽपि यथासंख्यं नास्ति क्त्वश्चानुकृष्टत्वात् । अग्व इति तु न व्याख्यातमत्र; तद्विनापि प्रस्तुतन्यायोदाहरणसिद्धेः। ज्ञापकमस्य यथासंख्यस्य निषेधार्थं यत्नाकरणम्। अयमनित्यश्चापि। तेन 'शक्तार्हे कृत्याश्च' ॥ ५।४।३५ ॥ इत्यत्र चानुकृष्टसप्तम्या सह शक्तार्हयोर्यथासंख्यभङ्गाय बहुषचनम्। नित्यत्वे त्वस्य कृत्यश्चेत्युक्तेऽपि कृत्यसप्तमीभ्यां शक्तार्हयोर्यथासंख्यं न प्राप्नोत्येव ॥१२२॥

व्याख्यातो विशेषार्थप्रतिपत्तिः ॥ १२३ ॥

व्याख्यायाः सूत्रतोऽभ्यर्हितत्वज्ञापनार्थोऽयं न्यायः । यथा करीषगन्धेरपत्यं वृद्धं स्त्री 'ङसोऽपत्ये' ॥ ६।१।२८ ॥ इत्यणि 'अनार्षे वृद्धे०' ॥ २।४।७८ ॥ इत्यनेनाणः ष्यादेशे 'अणञेयेकण्० ॥ २।४।२० ॥ इत्यनेनाणन्तलक्षणो ङीः प्राप्नोति परं न स्यात् । तत्राणः स्वरूपस्थस्य ग्रहणात् इह चाणः ष्यरूपीभवनात् । एतच्च 'अणञेयेकण्०' इत्यत्र व्याख्यानत एव लभ्यते ज्ञापकान्तराभावात् । ततश्च ङ्यभवने अदन्तत्वात् 'आत्' ॥ २।४।१८ ॥ इति आपि कारीषगन्ध्या इत्येव स्यात् । ज्ञापकमस्य 'नेमार्ध०' ॥ १।४।१० ॥ इति सूत्रे तयाययोः प्रत्ययोर्नेमादिनामपङ्क्तौ निःशंकं पठनम् । तद्धि एतन्न्यायात् तयायेति तयायशब्दौ न, किंतु तयायप्रत्ययान्तनामानि लप्स्यन्ते, शेषाणि तु स्वतंत्रनामानीत्याशयेन । अनित्यश्चायमपि । व्याख्यातोऽर्थनैयत्यसिद्धावपि 'शरदः श्राद्धेः कर्मणि' ॥ ६।३।८१ ॥ इत्यत्र कर्मणीति विशेषणोक्तेः । नित्यत्वे त्वस्य 'सृजः श्राद्धे त्रिक्यात्मने तथा ॥ ३।४।८४ ॥ इत्यत्र यथा श्राद्धः श्रद्धावानिति लभ्यते । 'श्राद्धमद्य भुक्तमिकेनौ' ॥ ७।१।१६९ ॥ इत्यत्र तु श्राद्धं पितृदैवत्यं कर्मेति; तथा 'शरदः श्राद्धे कर्मणि' इत्यत्रापि श्राद्धशब्देन पितृदैवत्यं कर्म व्याख्यानतो लप्स्यत एवेति किमर्थं कर्मणीति विशेषणं प्रयुज्येत ॥ १२३ ॥

यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते ॥१२४॥

अत्रेति वाक्याङ्गभूतपदसमुदाये इति विशेष्यमध्याहार्यम् । अस्तिना च भवतिर्विद्यतिरित्यादयोऽपि लक्ष्याः एकार्थत्वात् । भवन्तो वर्तमाना । उपलक्षणत्वात् प्रकरणादिवशात् सप्तम्यादिपरोऽपि प्रयुज्यते इति । आख्यातपदरहितत्वेन वाक्यत्वरहितस्य पदसमुदायस्य वाक्यीकरणार्थमस्तीत्याद्याख्यातपदमवश्यप्रयोक्तव्यमाख्यातपदस्यैव वाक्यसंज्ञोक्तेस्तद्विना वाक्यत्वस्याभवनादित्यर्थः । कश्चित् क्रियापदं साक्षाददृष्ट्वा वक्ष्यमाणोदाहरणेषु वाक्यत्वाभावमाशङ्क्ष्यते इत्यतस्तदाशंकानिरासार्थोऽयं न्यायः । तत्र भवन्तो यथा–जम्बूद्वीपस्तत्र वर्षाणि । अत्रास्ति, सन्तीति । सप्तमी यथा—' शिर्घुट् ' ॥ १।१।२८ ॥ ' औदन्ताः स्वराः ' ॥ १।१।४ ॥ अत्र स्यात् , स्युरिति । पञ्चम्याशिषौ यथा–देवो मुदे वो वृषभः परे च । अत्रास्तु, सन्त्विति; भूयाद् भूयासुरिति वा । ह्यस्तन्यद्यतनीपरोक्षा यथा–अवन्त्यां विक्रमनृपस्तस्य ह्यापञ्चाशद्धीराः । अत्रासीदासञ्चिति । अभूदभूवञ्चिति; बभूव बभूवुरिति वा । श्वस्तनी यथा–अतः परं श्वो भोजनम् । अत्र भवितेति । भविष्यन्तो यथा–अद्य नश्चतुर्षु गव्यूतेषु भोजनम् । भाविन्यां तु पद्मनाभः सुरदेव इति । अत्र भविष्यति, भविष्यन्तीति । क्रियातिपत्तिप्रयोगस्तु प्रायः साक्षादेवेष्यते । ज्ञापकमस्य ' तदस्य पण्यम् ' ॥ ६।४।५४ ॥ इत्यादिसूत्रनिर्देशः । अत्र ह्यस्तीति क्रियापदमस्त्येव । अन्यथा अर्थसंगत्यभवनात् । एवं सत्यपि यदस्तीति साक्षान्नोक्तं तदेतन्न्यायाशयैव । अनित्यत्वमप्यस्य । तेन क्वचिदन्यक्रियाऽध्याहारेऽपि । यथार्हम् । अत्र प्रणिदध्महे इति ॥ १२४ ॥

यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः ॥१२५॥

इट इति शेषः । उपाधिर्व्यवच्छेदकं विशेषणमिति यावत् । यद्विशेषणविशिष्टस्य धातोः प्रत्ययस्य वा इटो विभाषा विकल्पस्तद्विशेषणविशिष्टस्यैव तस्य ' वेटोऽपतः ' ॥ ४।४।६२ ॥ इतीड्निषेधः कार्यो न तु तद्विशेषणाभावे । इष्टनियमार्थोऽयं न्यायः । यथा ' गमहनविद्लृ० ' ॥ ४।४।८३ ॥ इत्यनेन विद्लृंती लाभे इत्यस्यैव वेट्त्वाद्विदक् ज्ञाने इत्यस्य क्त्वयोः परयोः ' वेटोऽपतः ' ' इतीड्निषेधो न, किंतु नित्यमेवेट् । यथा विदितः, विदितवान् । ज्ञापकमस्य ' आदितः ' ॥ ४।४।७१ ॥ ' नवा भावारंभे ' ॥ ४।४।७२ ॥ इत्यनयोः पृथक्सूत्रकरणम् । तथाहि–आदितो नवा भावारंभे इत्येकयोगकरणेऽपि तावदादितां धातूनां भावारंभार्थक्त्वयोः परयोर्वेट्त्वेन पारिशेष्यात् कर्तृकर्मादिविहितयोः क्त्वयोः ' वेटोऽपतः ' इतीड्निषेधः सिद्ध्यति । परं भावारंभे एव वेट्त्वादेतन्न्यायबलेन भावारंभविहितयोरेव क्त्वयोरिड्निषेधः न तु कर्तृकर्मादिविहितयोस्तथा च साक्षाद्विरोधः । कथम् । आदितो नवा भावारंभे इत्यनेन आदितां भावारंभार्थे क्त्वयोरिड्विकल्प्यते । वेटोऽपतः ' ॥ ४ । ४ । ६२ ॥ इत्यनेन च भावारंभार्थक्त्वयोरेव च स निषिध्यते । पृथग्योगकरणे तु कर्तृकर्मादिविहितयोः क्त्वयोरिड्निषेधः आदितः ' आदितः ' इत्यनेन सिद्धो भावारंभविहितयोस्तूत्तरेण तद्विकल्प इति व्यवस्थितत्वात् ' वेटोऽपतः ' ॥ ४ । ४ । ६२ ॥ इत्यस्य क्वचिदप्यादिद्धातुष्ववकाशाभा-

देवाप्रवृत्या विरोधः परिहृत एव स्यात् ॥ १२५ ॥

यस्य येनाभिसंबन्धो दूरस्थस्यापि तेन सः ॥१२६॥

यथा अश्वेन चैत्रः संचरते इत्यादौ चैत्र इत्यनेन व्यवधानेऽपि तृतीयान्तेन योगसद्भावात् संचरते इत्यत्र 'समस्तृतीयया' ॥३।३।३२॥ इत्यात्मनेपदं सिद्धम्। योगः किलानन्तरयोरेव प्रसिद्ध इत्यतोऽयं न्यायः ॥१२६॥

येन विना यन्न भवति तत्तस्यानिमित्तस्यापि निमित्तम् ॥१२७॥

यत्नेन सहचरितमेव दृश्यते नत्वेकाकि तत्तस्य निर्निमित्ततया प्रसिद्धस्यापि निमित्तमित्युच्यते। ततश्च क्वचित्तदभावे निमित्ताभावे इति न्यायान्नैमित्तिकमपि निवर्त्तते इति तात्पर्यम्। यथा कृतणः कीर्त्तादेशो णिचा सहचरित एव दृश्यते इत्यतो णिच् कीर्त्तादेशस्य निर्निमित्तं विहितस्यापि निमित्तमित्युच्यते। तथा च कृततोत्यत्रानित्यो णिच्चुरादीनामिति न्यायेन णिचोऽनित्यत्वात्तदभावे कीर्तादेशोऽपि न्यवर्त्तत ॥ १२७ ॥

नामग्रहणे प्रायेणोपसर्गस्य न ग्रहणम् ॥१२८॥

उपसर्गस्यापि नामत्वाद् ग्रहणे प्राप्ते निषेधार्थोऽयं न्यायः। यथा उपस्पृशतीत्यत्र स्पृशेरुपपूर्वान्नाम्नः परत्वेऽपि 'स्पृशोऽनुदकात्' ॥ ५।१।१४१ ॥ इत्यनेन क्विप् न स्यात्। तेन उपस्पृगिति प्रयोगो न साधुः। प्रायेणेति वचनान्नामग्रहणे क्वाप्युपसर्गस्यापि ग्रहणं भवतीति अर्द्धभागित्यादिवत् प्रभागित्यादावपि 'भजो विण्' ॥ ५।१।१४६ ॥ इति विण् सिद्धः ॥ १२८ ॥

सामान्यातिदेशे विशेषानतिदेशः ॥१२९॥

अन्यत्र प्रसिद्धस्यार्थस्यान्यत्र कथनमतिदेशः। विशेषाः किल सामान्येऽन्तर्भवन्तीति युक्त्या सामान्येऽतिदिष्टे विशेषस्याप्यतिदेशः प्राप्नोतीत्यतोऽयं न्यायः। यथा-'भूतवच्चाशंस्ये वा' ॥ ५।४।२ ॥ इति सूत्रे भूतवदित्यनेन भूतमात्रस्यैवातिदेशे अनद्यतनपरोक्षत्वविशिष्टभूतकालस्यातिदेशाभवनादुपाध्यायश्चेदागमत् एते तर्कमध्यगीष्महीत्यादौ स्थानद्वयेऽपि भूतमात्रलक्षणाद्यतन्येव 'भूतवच्च०' ॥५।४।२॥ इति सूत्रेण स्यान्नत्वद्यतनत्वपरोक्षत्वविशिष्टभूतविहिते ह्यस्तनीपरोक्षे॥ १२९॥

सर्वत्रापि विशेषेण सामान्यं बाध्यते नतु सामान्येन विशेषः ॥१३०॥

तार्किकाणां सामान्यविशेषयोर्बाध्यबाधकव्यवहारो नास्ति, परं व्याकरणेऽस्तीति ज्ञापनार्थोऽयं न्यायः। सर्वत्रापीति कोऽर्थः? प्राप्तावस्थायां प्राप्स्यदवस्थायां च। तत्र प्राप्तावस्थायां यथा-कोऽर्थः इत्यादौ सेः 'सोरुः' ॥२।१।७२॥ इति रुभवनादनु प्राप्तं 'रोर्यः' ॥ १।३।२६ ॥ इति सामान्यस्वरनिमित्तकं सूत्रं बाधित्वा 'अतोऽति' ॥ १।३।२० ॥ इत्येतद् विशेषस्वरनिमित्तकं प्रावर्तिष्ट। प्राप्स्यदवस्थायां यथा-सोऽहं तथापि तवेत्यादि। अत्र रोर्यः' ॥ १।३।२६ ॥ इति 'तदः से०' ॥ १।३।४५ ॥ इति, 'अतोऽति०' इति सूत्राणां प्राप्तिर्विचार्यते।

तथाहि-'रोर्यः' इति तावत्सामान्यसूत्रं सर्वरुविषयत्वात्। 'तदः सेः०' इत्येतत्तु तदपेक्षया विशेषसूत्रं सिमात्रविषयत्वात्। 'अतोऽति०' इत्येतत्तूभयोरपि तयोः स्वरसामान्यनिमित्तकयोरपेक्षया विशेषसूत्रम् अकारमात्रविषयत्वात्। इह च 'तदः सेः' इत्यस्य प्राप्तौ सत्यां 'सोरुः' इति सूत्रेणान्तरिता द्वयोः सूत्रयोः प्राप्तिरस्ति। इयं च प्राप्स्यत्तेत्युच्यते सूत्रान्तरप्रवृत्या अन्तरितत्वात्। कथम्। यदि 'तदः सेः०' ॥ १।३।४५॥ इति सेर्लुकमकृत्वा परत्वात् 'सोरुः' ॥२।७।७२॥ इति रुःकरिष्यते तदा तदनु 'रोर्यः' इत्यस्य सामान्यसूत्रस्य प्राप्स्यत्त्वे सति तदः सेः०' इति विशेषसूत्रेण 'सोरुः' इत्यस्य प्रवृत्तिर्निरुध्यते। तन्निरोधे च परंपरया 'रोर्यः' इत्येतदेव बाधनम्। सोरुः' इत्येतत्प्रवर्तनानन्तरमेव तस्य प्रवृत्तिसंभवात्। 'अतोऽति' इति विशेषसूत्रस्य प्राप्स्यत्त्वे सति तु 'सोरुः' इत्यस्य प्रवृत्तिर्न निरुध्यते। तदनिरोधेन च परंपरया 'अतोऽति०' इत्यस्यैव प्रवृत्तिरव्याहतीभूता। तथा च प्रत्युत 'अतोऽति०' इत्यस्यैव बलिष्ठत्वात् 'सोरुः' इत्यस्य पुरस्करणपूर्वं प्रवृत्तमितिकृत्वा सोऽहमिति सिद्धम्। तक्रकौण्डिन्यन्यायश्चास्यैव न्यायस्य प्रपञ्चः। तथाहि-तक्रं देयमस्मै सचासौ कौण्डिन्यश्च तक्रकौण्डिन्यः। मयूरव्यंसकादित्वाद्देयशब्दलोपः। स एव न्यायो दृष्टान्तः। यथा द्विजेभ्यो दधि देयमित्युक्त्वा कौण्डिन्याय तक्रं देयमित्युक्ते कौण्डिन्यस्य दधिदाननिषेधोऽनुक्तोऽपि प्रतीयते। तथा यत्र विशेषलक्षणेन विधिना पूर्वोक्तस्य सामान्यलक्षणस्य विधेर्बाधोऽनुक्तोऽपि प्रतीयते तत्रायं न्यायः। यथा 'व्यञ्जनादेकस्वराद् भृशाभीक्ष्ण्ये०' ॥ ३।४।९ ॥ इति सामान्येन भृशाभीक्ष्ण्ये यङं विधाय पुनः 'गत्यर्थात्' ॥ ३।४।११ ॥ इति विशेषविधिरुक्तस्तेन गत्यर्थेभ्यो यङ्निषेधोऽनुक्तोऽपि गम्यते। तदेवमत्रापि विशेषेण सामान्यबाध इत्येतावदेव जातं नत्वपरं किंचित्॥ १३० ॥

ङित्त्वेन कित्त्वं बाध्यते ॥१३१॥

बलाबलोक्तिन्यायोऽयम्। एवमुत्तरोऽपि। यथा-णूत् स्तवने कुटादिः। नुवितः, प्रणुवितः इत्यत्र 'उवर्णात्' ॥४।४।५८॥ इत्यनेन कित्प्रत्ययस्यादौ विहित इड्निषेधो नाभूत्। कुटादित्वहेतुकेन क्तस्य ङित्त्वेन तत्कित्त्वस्य बाधनात्। ङित्त्वेनेति किम्। प्रकृत्य। अत्र यप; पित्त्वेन क्त्वाकित्त्वस्याबाधनाद् गुणाभावः। कित्त्वमिति किम्। ध्रुंत् गतिस्थैर्ययोः कुटादिः। कित्व-प्रध्रुत्य। अत्र कुटादित्वहेतुकेन यपो ङित्त्वेन पित्त्वस्याबाधनाद् तागमः। अनित्यश्चायम्। नूतः प्रणूतः इत्यादेरपि दर्शनात्। इह च ङित्त्वेन कित्त्वमित्युपलक्षणम्। तेनान्यत्रापि धात्वादीनां पूर्वावस्थानुबन्ध उत्तरावस्थानुबन्धेन बाध्यते। तत्र धातोर्यथा-चक्ष्यादेशस्य ख्यागो गित्वेन प्राक्तनेदित्त्वस्य बाधनात् धात्वादेशो धातुवदिति स्थानिवद्भावेन प्रसक्तस्यापि नित्यात्मनेपदित्त्वस्य निवृत्त्या उभयपदित्वं सिद्धम्। यथा आचख्यौ, आचख्ये। प्रत्ययस्य यथा-युतात्। अत्र लातङो ङित्त्वेन तुवो वित्त्वस्य बाधनात् 'उत और्वितिं व्यञ्जनेऽङ्गेः' ॥ ४।३।५९ ॥ इति और्नेत्यादि।

क्वचिच्च न बाध्यतेऽपि । यथा प्रकृत्येत्यत्र यपः पित्त्वेन क्त्वाकित्त्वस्याबाधनाद् गुणाभावः ॥ १३१ ॥

परादन्तरङ्गं बलीयः ॥१३२॥

यथा स्योमा इत्यत्र सीव्यतेः 'मनवन्०' ॥ ५।१।१४७ ॥ इति मनि 'ग्वोः-पव्' ॥ ४।४।१२१ ॥ इति वलोपमपवादत्वात् 'लघोरुपान्त्यस्य' ॥ ४।३।४ ॥ इति गुणं च नित्यत्वाद् बाधित्वा ऊटि कृते तदनु च परत्वादुपान्त्यगुणे प्राप्तेऽप्यन्तरङ्गत्वात् प्रथमं यत्वं सिद्धं पश्चात्तु ऊटो गुणः। यद्यपि परान्नित्यं नित्यादन्तरङ्गमिति न्यायाभ्यामस्य न्यायस्यार्थो लब्ध एव तथापि तयोर्न्याययोः परादन्तरङ्गमित्यस्य च न्यायस्य भिन्नभिन्नोदाहरणेष्ववतारात् परादन्तरङ्गमित्येषोऽपि न्यायो दर्शितः ॥१३२॥

प्रत्ययलोपेऽपि प्रत्ययलक्षणं कार्यं विज्ञायते ॥१३३॥

लोपशब्दस्य लुग्लुपोर्वाचकत्वेऽपि लुकि स्थानिवद्भावेनैव सिद्धत्वाल्लुप्येतन्न्यायाधिकारः। प्रत्ययस्य लुपि सत्यां 'लुप्यय्वृल्लेनत्' ॥७।४।११२॥ इति सूत्रेण य्वृल्लत्वैनदादेशवर्जानां तन्निमित्तकसर्वकार्याणां निषेधे कृतेऽपि लुप्तप्रत्ययान्तनिर्दिष्टकार्याणामनुमत्यर्थोऽयं न्यायः । यथा मासेन पूर्वायेत्यत्रवन्मासपूर्वायेत्यत्र 'ऐकार्थ्ये' ॥ ३।२।८ ॥ इत्यनेन समासान्तर्वर्तितृतीयाया लुप्यपि तृतीयान्तलक्षणः 'तृतीयान्तात् पूर्वापरं योगे' ॥ १।४।१३ ॥ इत्यनेन पूर्वशब्दस्य सर्वादित्वनिषेधः सिद्धः। तथा पापचीति। अत्र लुबन्तरङ्गभ्य इति न्यायात् प्रथममेव यङो लुप्यपि एतन्न्यायेन यङ्डन्तलक्षणं 'सन्यङश्च' ॥ ४।१।३ ॥ इति द्वित्वं सिद्धम् । ज्ञापकं चास्य 'सिज्विदोऽभुवः' ॥४।१।९२ ॥ इत्यत्र भूवर्जनम् । तथाहि-अभूवन्नित्यत्रानः पुसादेशनिषेधार्थं हि तत्कृतम् । परमत्र भुवो सिज्लुबन्तत्वेन सूत्रे च सिजिति सिजन्तस्य ग्रहणात् पुसादेशस्य प्राप्तिरेव नास्ति तथापि यद्भूवर्जनं तज्ज्ञापयति-लुप्तसिजन्तस्यापि सिजन्तकार्यमेतन्न्यायात् प्राप्नोतीति । क्वचिदनित्योऽयम्। यौधेयशब्दस्य 'द्रेरञणोऽप्राच्यभर्गादेः' ॥६।१।२३॥ इत्यञ्लोपविधायकसूत्रस्थभर्गादिगणे पाठात् । तथाहि-युधा नाम काचित् तस्या अपत्यानि 'द्विस्वरादनद्याः' ॥ ६।१।७१ ॥ इत्येयणि यौधेयाः । ते शस्त्रजीविसंघाः स्त्रीत्वविशिष्टा विवक्षिता इति 'यौधेयादेः०' ॥ ७।३।६५ ॥ इत्यञि 'अणञेय०' ॥ २।४।२० ॥ इति ङ्यां यौधेय्य इति निष्पन्नम् । अत्र च 'द्रेरञणो०' इत्यनेनाञो लुप् प्राप्नोति । अञो लुक्करणे च निमित्ताभावे इति न्यायादञ्निमित्तकाया वृद्धेर्निवृत्त्या युधेय्य इति रूपं स्यात्। लोपाभावात्तु यौधेय्य इत्येव स्थितम् । तदनु यौधेयीनां संघो यौधेयमित्यत्राञन्तलक्षणः 'संघघोषा०' ॥ ६।३।१७२ ॥ इत्यनेनाण् यथा स्यादित्येवमर्थं तावद्भर्गादिगणपाठेन यौधेयशब्दात् शस्त्रजीविसंघार्थादागतस्याञो लुप् प्रतिषिध्यते। नित्यत्वे त्वस्य लुब्भूतेऽप्यञि तदन्तलक्षणः 'संघघोषाङ्क०' इत्यण् भविष्यत्येवेति किमर्थं यौधेयशब्दस्य भर्गादिपाठः क्रियेत। यत्त्वसौ कृतस्तदञो लुब्भवने एतन्न्यायस्य क्वचिदनित्य-

त्वात्तदन्तलक्षणः 'संघघोषाङ्क०' इत्यण् न भविष्यतीत्याशंकयैव ॥१३३॥

विधिनियमयोर्विधिरेव ज्यायान् ॥१३४॥

विधिनियमरूपौ द्वौ व्याख्याप्रकारौ संभवतस्तत्र नियममपास्य विधिरेव व्याख्येयस्तस्यैवाप्राप्तप्रापकत्वेन प्रधानत्वात् । शास्त्रान्तरे व्याख्या क्वापि नियमिता नास्ति तस्या यथाकामीनत्वात् । व्याकरणे तु तस्या अपि नियमनार्थोऽयं न्यायः । यथा–'प्रत्यभ्यतेः क्षिपः' ॥३।३।१०२॥ इत्यत्र क्षिपींत् प्रेरणे इत्ययं क्षिपिरुभयपदी तौदादिको व्याख्येयस्तस्यैव परस्मैपदविध्यर्हत्वात्, न तु क्षिपंच् प्रेरणे इत्ययं केवलपरस्मैपदी दैवादिकस्तस्य सिद्धपरस्मैपदत्वेन सूत्रस्य नियमार्थताप्रसंगात् । नियमश्चायम्–प्रत्यभ्यतिपूर्वादेव क्षिपेः परस्मैपदं नत्वन्योपसर्गपूर्वादनुपसर्गाद्वेति । तदेवं प्राप्तनियमार्थतायास्त्यागेन विधिरेवात्र गृह्यते ॥ १३४ ॥

अनन्तरस्यैव विधिर्निषेधो वा ॥१३५॥

तत्र निषेधो यथा–'नामन्त्ये' ॥२।१।९२॥ इत्यनेन 'नाम्नो नोऽनहः' ॥२।१।९१॥ इत्यनन्तरसूत्रविहितस्य नकारलुको निषेधः क्रियते न तु परंपरैः 'रात्सः' ॥ २।१।९०॥ इत्यादिपूर्वसूत्रैर्विहितानां सकारलुगादीनाम् । विधिर्यथा–'क्ङीबे' ॥२।१।९३॥ इत्यनेनानन्तरसूत्रविहितस्य नकारलुको निषेधस्य विकल्पनेन विधिः क्रियते इत्यादि । यद्यपि शब्दशक्तिरेवैषा यद्विधिर्निषेधो वाऽनन्तरस्यैव स्यादिति । परं शब्दशक्तेरनुवाद्ययं न्यायो विचित्राः शब्दशक्तय इत्यादिन्यायवत् ॥१३५॥

पर्जन्यवल्लक्षणप्रवृत्तिः ॥१३६॥

यथा पर्जन्य ऊनं पूर्णं वाऽनपेक्षमाणः सर्वत्र वर्षति तथा स्वविषयं प्राप्य लक्षणेन सर्वत्र फलाभावेऽपि प्रवर्त्तितव्यमेव । अप्रवृत्तौ हि तस्यानर्थक्यं स्यादिति । यथा गोपायतीत्यादावायादीनामदन्तत्वेन तदन्तधातूनामप्यदन्तत्वात् शवोऽनाकाङ्क्षायामपि 'कर्तर्यनदभ्यः०' ॥३।४।७१॥ इति शव् सिद्धः। अनित्योऽप्ययम्। 'समानानां तेन०' ॥१।२।१॥ इत्यत्राग्रेतनसूत्रसमानव्याप्तिसिद्ध्यर्थं बहुवचनप्रयोगात् । तथाहि–कॢप् ऋषभः, होतृ लृकार इत्यादौ तावद् 'ऋस्तयोः' ॥ १।२।५ ॥ इति ऋरेव प्राप्नोति। इष्यते त्वत्र ह्रस्वोऽपीति यावन्तःकेऽपि समानास्तेषां सर्वेषामपि ऋलृति ह्रस्वः स्यादेवेति व्याप्तिसिद्ध्यर्थं 'समानानाम्०' इत्यत्र बहुवचनप्रयोगः। नित्यत्वे त्वस्य ऋत्ववत् ह्रस्वोऽपि भविष्यत्येवेति किमर्थं बहुवचनम् । परमेतस्यानित्यत्वाद् ह्रस्वस्याबलत्वेन बाधं परत्वात् सबलत्वेन ऋत्वस्यैव प्रवृत्तिं संभाव्य तत् ॥ १३६ ॥

न केवला प्रकृतिः प्रयोक्तव्या ॥१३७॥

प्रकृतिर्धातुरूपाऽपि संभवेत् परं धातोः प्रत्ययान्तत्वे विवादाभावेन केवलत्वशङ्काया अभावान्नाम्नस्तु वक्ष्यमाणरीत्या प्रत्ययोत्पादस्य विवादापन्नत्वेन के-

वलत्वशंकासद्भावान्नामरूपैव प्रकृतिरिहाधिक्रियते। यथा कटं करोति भीष्ममुदारं दर्शनीयमित्यत्र यद्यपि कटरूपस्य द्रव्यस्यैव क्रियायां साक्षादुपयोगात् कटस्यैव कर्मत्वं युज्यते नतु भीष्मादीनां किमपि, तथाप्येतन्न्यायकृतनियमेन भीष्मादीनामविभक्तिकानामप्रयोगार्हत्वादेकविभक्तिमन्तरेण च सामानाधिकरण्यविशेषणत्वायोगाद्यथेश्वरसुहृदां स्वयं निर्धनत्वेऽपि तदेकयोगक्षेमत्वाद्धनेनैव फलभाक्त्वं स्यादेवमेषामकर्मकाणामपि कटकर्मत्वेनैव द्वितीया सिद्धा। विशेषणानां विशेष्यसमानविभक्त्युपपादनार्थोऽयं न्यायः ॥ १३७ ॥

किंवर्थं प्रकृतिरेवाह ॥ १३८ ॥

यथा त्वां मां चाचक्षाणेन इति णिजि, क्विपि, तल्लुकि च युष्मद् अस्मद् इति मान्तादङौ 'टाङ्योसि०' ॥ २।१।७ ॥ इत्यनेन मस्य प्राप्तं यत्वं बाधित्वा परत्वात् त्वमादेशे पश्चाच्च त्वमयोरकारस्य प्राप्नुवतोऽपि यत्वस्य सकृद्गते स्पर्द्धे इतिन्यायादभवने, युष्मदस्मदोश्चात्र णिजन्तक्विबन्तत्वेन सर्वादित्वाभावात् स्मिन्नादेशाभावे त्वे मे इति स्यात् इत्येष प्रकृतन्यायानपेक्षः पक्षः। यदा तु किंवर्थं प्रकृतिरेवाहेति न्यायः प्रयुज्यते तदा स्मिन्नादेशोऽपि स्यात्। तथाहि-अस्यार्थस्तावदयम्। किंबन्तयोर्युष्मदस्मदोर्योऽर्थस्तमर्थं किंरहिता युष्मदस्मद्रूपा प्रकृतिरेवाह। नहि प्रकृतिं विना क्विबन् भवतीति। एतेनायं भावः-यथा अगुडित इव गुडितोऽपि गजो गज एवोच्यते। नहि गजं विना गुडना भवति। तथा केवलाविव णिजन्तक्विबन्तावपि युष्मदस्मच्छब्दौ तावेवोच्येते न त्वपरं किञ्चित्। एवं च केवलयोस्तयोः सर्वादित्वमस्तीति कृत्वा णिजन्तक्विबन्तयोरपि सर्वादित्वं विवक्ष्यते। न चात्र शब्दभेदस्यार्थभेदस्य च साक्षादेव लक्ष्यमाणत्वात् अयुक्तैवेयं विवक्षेति वाच्यम्। सिद्धिः स्याद्वात् इति सूत्रेणाभिन्नानामपि भेदविवक्षाया भिन्नानामप्यभेदविवक्षायाश्चाभ्यनुज्ञानात्। कथमन्यथा पीयमानं मधु मदयतीत्यत्रैकस्यैव मधुनःकर्मत्वं कर्तृत्वं चेत्याद्युपपद्यते। ततो यथा मधुनो अभेदेऽपि भेदविवक्षा, तथाऽत्र भेदेऽप्यभेदविवक्षा। ततश्च णिजन्तक्विबन्तयोर्युष्मदस्मदोः केवलाभ्यां ताभ्यां सहाभेदविवक्षया सर्वादित्वाद् ङेः स्मिन्नादेशे त्वस्मिन् मस्मिन्नित्यपि स्यात्। एवं च णिजन्तक्विबन्तयोर्युष्मदस्मदोः शब्दभेदादर्थभेदाच्चाप्राप्तस्य सर्वादित्वस्य प्रापणार्थोऽयं न्यायः ॥ १३८ ॥

द्वन्द्वात्परः प्रत्येकमभिसंबध्यते ॥१३९॥

शब्द इति शेषः। यथा 'एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः' ॥ १।१।५ ॥ इत्यादौ मात्राशब्द एकद्वित्रीतिद्वन्द्वात्परः सन्नेकाद्यैः सह प्रत्येकं संबध्यते। अन्यथेष्टार्थप्रतीतिर्न स्यादित्यतोऽयं न्यायः ॥ १३९ ॥

विचित्राः शब्दशक्तयः ॥१४०॥

तेनैव लिङ्गसंख्यादौ वैचित्र्यं दृश्यत इति ज्ञापनार्थोऽयं न्यायः। यथा-प्रशस्तं पचतीति 'त्यादेश्च प्रशस्ते रूपप्' ॥ ७।३।१० ॥ इति स्वार्थिके रूपपि

पचतिरूपमित्यादौ 'पदं वाक्यमव्ययं चेत्यसंख्यं च' इति लिङ्गानुशासनपाठाद्-लिङ्गस्यापि त्याद्यन्तपदस्य क्लीबत्वं सिद्धम् इत्यादि । तथा केऽपि शब्दाः पदान्तरस्य सापेक्षाः केऽप्यनपेक्षाश्च तत्तल्लिङ्गान्याहुः । तत्र सापेक्षो यथा-इयं गौः अयं गौः । अत्र गवार्थस्योभयलिङ्गत्वादियमितिपदापेक्षेण गोपदेन स्त्रीपुंसत्वमुच्यते । तस्य स्त्रीपुंसत्वानुक्तावियमयमिति विशेषणयोः स्त्रीपुंसत्वानुपपत्तेः अनपेक्षास्तु त्रिभिः प्रकारैस्तत्तल्लिङ्गान्याहुः । नाममात्रेणाऽऽदेशेन प्रत्ययेन च । तत्र नाममात्रेण यथा-माता, पिता । अत्र नाममात्रमेव स्त्रीपुंसत्वोक्तौ क्षमम् । आदेशेन यथा-तिस्रः । अत्र स्त्रीत्वं विनाऽप्युपपद्यमानेन तिस्रादेशेन स्त्रीत्वं प्रतीयते । एवं क्रोष्टा । अत्र पुंस्त्वजेन कुशस्तुनस्तृजादेशेन पुंस्त्वम् । प्रत्ययेन-यथा-राज्ञी । अत्र स्त्रीत्वोद्भवेन ङीप्रत्ययेन स्त्रीत्वम् । गोचरः-इत्यत्र पुंनामत्वोद्भवेन 'गोचरसंचर०' ॥ ५।३।१३१ ॥ इति घेन पुंस्त्वम् । संख्यावैचित्र्यं यथा-अं अः ×क× पशषसाः शिट्' ॥ १ । १ । १६ ॥ इत्यत्र संज्ञिषड्त्वेऽपि संज्ञाया एकवचनम् । दाराः-अत्रार्थैकत्वेऽपि बहुवचनमित्यादि ॥ १४० ॥

किंहि वचनान्न भवति ॥१४१॥

वचनमिष्टार्थप्रत्यायनं तद्बलात् किं न स्यात् । काक्वा सर्वं स्यादित्यर्थः । इष्टार्थप्रत्यये सति शिष्टप्रयोगानुसारेण केचिद्विधयोऽप्राप्ता अपि प्रवर्त्यन्ते, प्राप्ता अपि च केचिन्न प्रयर्त्यन्ते । इष्टार्थप्रत्ययाभावे तु प्राप्ता अपि केचिद्विधयो न प्रवर्त्यन्ते इति यावत् । 'समर्थः पदविधिः' ॥७।४।१२२॥ इत्यस्यापवादोऽयं न्यायः । तत्राप्राप्तप्रवर्तनं यथा-सूर्यमपि न पश्यन्त्यसूर्यपश्या राजदाराः । 'अस्यैतोन्नाद् दृशः' ॥५।१।१२६॥ इति खश् । वत्सेभ्यो न हितो अवत्सीयो गोधुक् । 'तस्मै हिते' ॥७।१।३५॥ इतीयः। अत्र नञः क्रमाद् दृशिना हितेन च संबन्धोऽस्ति । न सूर्येण वत्सैश्चेति समस्यमानपदानां मिथः संबन्धाभावादसामर्थ्येऽपि इष्टार्थगमकत्वात् समासः सिद्धः । प्राप्ताप्रवर्तनं यथा-'नहाहोर्धतौ' ॥२।१।८५॥ अत्र धात्वग्रे इकिश्तवो न । इष्टार्थप्रत्ययाभावे प्राप्ताप्रवर्तनं यथा-सङ्घस्य भद्रं भूयादित्यत्र सङ्घभद्रमिति षष्ठीसमासो न । नहि संघभद्रं भूया, दित्युक्ते संघस्य भद्रं भूयादिति प्रतीयते अपि तु संघभद्रं नाम संघसंबन्धितया प्रसिद्धं किञ्चिद्भद्रं कस्यचिद् भूयादिति । अभिधानलक्षणाः कृत्तद्धितसमासाः स्युरित्यपि न्यायोऽस्ति । अस्यार्थः—अभिधानमिष्टार्थप्रत्यायनं तदेव लक्षणं चिन्हं येषां कृदादीनां, कोऽर्थः इष्टार्थप्रत्ययसंभवे कृदादयः स्युस्तदभावे तु नेति । एवं च प्रस्तुतन्यायानुवाद्येवायमपि न्यायः । अथ किं हि वचनादिति न्यायस्यान्योऽर्थः कथ्यते । वचनादिति कोऽर्थः । सूत्रोक्तविधानबलात् किं न स्यात् । काक्वा अप्राप्ता अपि विधयः प्रवर्तन्त इत्यर्थः । यथा श्रेष्ठः श्रेयान् । अत्र इष्ठेयस्वोः परयोः श्रादेशविधानबलेनागुणाङ्गादपि प्रशस्यशब्दाद् 'गुणाङ्गाद्वेष्ठेयसू' ॥१।३।९॥ इत्यनेन इष्ठेयसुप्रत्ययौ न प्राप्नुतः । तथापि. इष्ठेयस्वोः प्रत्ययोः परयोः प्रशस्यशब्दस्य 'प्रशस्यस्य श्रः' ॥७।४।३४॥ इति सूत्रेण श्रादेशो

यद्विहितोऽस्ति तद्विधानबलादगुणाङ्गादपि प्रशस्यशब्दात् 'गुणाङ्गाद्वेष्ठेयसू' ॥७।३।९॥ इति सूत्रेण इष्ठेयसुप्रत्ययौ सिद्धौ। अस्यां व्याख्यायां चाप्राप्तप्रापणार्थोऽयं न्यायः। अपि च-विचित्रा सूत्राणां कृतिः, मात्रालाघवमपि उत्सवाय मन्यन्ते वैयाकरणाः, ते वै विधयः सुसंगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्च। इत्यादयोऽपि न्यायप्रकारा वाग्विशेषाः सन्ति, परमेते व्याकरणसूत्ररचनायामेवोपयुज्यन्ते। पारिशेष्यादयोऽपि न्यायाः सूत्रार्थव्यवस्थापनायामेवोपयोगिनो नतु केऽपि प्रस्तुतायां प्रयोगरचनायां क्वचिदितीहोपेक्षिताः। शास्त्रान्तरेषु च यथोद्देशं निर्देश इत्यादयो बहवोऽपि न्यायाः सन्ति परमत्र व्याकरणे क्वापि ते साक्षाद्गुदाहृता न दृश्यन्त इति नोक्ताः ॥१४१॥

न्यायाः स्थविरयष्टिप्रायाः ॥१४२॥

यथा स्थविरो गमनादिकार्योत्पादे तत्साधनाय यष्टिमवलंबते तदभावे तु न; तथा न्याया अपि शिष्टप्रयोगान्यथानुपपत्तावेवाश्रीयन्ते न त्वन्यथा। एकस्मिन्नपि प्रयोगादौ स एव न्याय आश्रितोऽनाश्रितश्च यद् दृश्यते तद्विरुद्धमित्याशंकां भङ्क्तुमयं न्यायः। यथा रायमतिक्रान्तानां कुलानामतिरोणाम्। अत्र 'ह्रीवे' ॥ २।४।९७ ॥ इति ह्रस्वे सति तज्जे नामादेशे परे एकदेशविकृतमनन्यवदिति न्यायात्प्राप्तमपि 'आ रायो व्यञ्जने' ॥ २।१।५ ॥ इत्वात्वं सन्निपातलक्षणो विधिरिति न्यायेन निषेधान्न स्यात्। तत्करणे ह्रस्वविधातसंभवात्। दीर्घो नाम्यतिसृ०' ॥ १।४।४७ ॥ इति दीर्घावसरे तु सन्निपातलक्षणन्यायानाश्रयणान्निर्विघ्नं दीर्घः सिद्धः। तथा 'वत्तस्याम्' ॥ १।१।३४ ॥ इत्यत्र वत्तस्योस्तद्धितयोः साहचर्यादामोऽपि तद्धितस्यैव ग्रहणं प्राप्तम्। परं साहचर्यन्यायाश्रयणात् परोक्षास्थानजोऽप्याम् गृह्यते। न च तद्वदेव षष्ठीबहुवचनस्याप्यामो ग्रहः तदा सदाश्रयणात्। ज्ञापकं चास्य तत्तत्प्रयोगादिषु तत्तन्न्यायाश्रयणानाश्रयणफलदर्शनम् ॥ १४२ ॥

शिष्टनामनिष्पत्तिप्रयोगधातूनां सौत्रत्वाल्लक्ष्यानुरोधाद्वा सिद्धिः ॥१४३॥

शिष्टाः शेषा ये व्याकरणेन नाम्नाख्याता ईदृशा ये नामानि-निष्पत्तयः-प्रयोगाः-धातवश्च तेषाम्। सौत्रत्वादिति। सूत्रं व्याकरणादि तत्र निर्दिष्टाः सौत्राः। लक्ष्यानुरोधाद्वेति। लक्ष्याणि पूर्वमहाकविप्रयोगाः। सिद्धिशब्दो मङ्गलार्थः ॥१४३॥

॥ इति श्री वैयाकरणन्यायादर्शः समाप्तः ॥

॥ शुद्धिपत्रम् ॥

अशुद्धम्	शुद्धम्	पत्रम्	पंक्तिः
लृदन्ताः	ऌदन्ताः	२	३
लृकारान्ता	ऌकारान्ता	२	३
व्यपारेण	व्यापारेण	३	२८
उपोष्टीयति	उपोष्ट्रीयति	८	१८
अञ्चवर्गात्	अञ्चूवर्गात्	२०	२१
बहिरङ्गमन्तरङ्गे	बहिरङ्गमन्तरङ्गे	२१	१७
क्रुणनो	क्रुण्नो	२२	१०
उत्स्कद्को	उत्स्कन्द्को	२२	२९
प्रथमस्प	प्रथमस्य	२३	२१
लुलुविड्	लुलुविड्ढ्वे	३२	१०
अनुस्वारभवनान्	अनुस्वारभवनात्	३५	६
पुल्लिङ्गा	पुँल्लिङ्गा	,,	१९
वहिर्भावेन	बहिर्भावेन	३६	८
वर्तमास्य	वर्तमानस्य	५७	३
त्यदादानां	त्यदादीनां	६०	१९
एकत्वेन	एकत्वेन	६२	१३
त्वा	त्वां	६४	१४
अंतिमभ्यम्	अतिमभ्यम्	,,	१९
तद्विशेषणभूत	तद्विशेषणीभूत	६७	२६
तद्विशेषणभूते	तद्विशेषणीभूते	६८	१
दृश्यर्थानामर्थः	दृश्यर्थानामर्थः	६९	५
लुप्ताकारस्य	लुप्ताकारस्य	,,	२२
तत्संबन्धविज्ञानादिह	तत्संबंधिविज्ञानादिह	७२	२३
आ,	ओ,	८६	७
ड	ङः	९२	७
आविस्ताचितकम्बल्यादितिकिम्	अविस्ताचितकम्बल्यादिति०	९४	२०
सर्वेण	सर्वेण	९७	९
मूकात्	मूलात्	१०२	९
फलशब्द	मूलशब्द	,,	,,
इत इत किम्	इत इति किम्	१०४	१५
रज्वादिँश्च	रज्वादीँश्च	,,	२३

अशुद्धम्	शुद्धम्	पत्रम्	पंक्तिः
पदुः	पदुः	१०४	२७
दीर्घोपात्स्ये	दीर्घोपान्त्यस्ये	१०५	,,
हिंथार्थस्याणिकर्ता	हिंसार्थस्याणिकर्ता	११२	१६
प्रतुङ्क्त	प्रयुङ्क्त	११३	१७
माक्षणे	मोक्षणे	११४	२०
कृरून्	कुरून्	११७	१२
किंतहि	किंतर्हि	११८	२
द्वारम्	द्वारम्	११५	२०
गभिः	गमिः	,,	२५
जिनायतनेभ्यः	जिनानामायतनेभ्यः	१२७	६
वर्तमाद्	वर्तमानाद्	१२८	१६
जाडयस्यैतद्	जाड्यस्यैतद्	१३०	९
कृच्छाद्वा	कृच्छ्राद्वा	,,	१८
आवभाग	अविभाग	१३७	१५
कल्याणधर्मा	कल्याणधर्मा	१५२	११
सुहरिततृणसोमा-	सुहरिततृणसोमा-		
ज्जम्भात्	ज्जम्भात्	,,	१५
मूर्खभातृकः	मूर्खभ्रातृकः	१५८	७
समासातो	समासान्तो	,,	२२
वर्वन्ते	वर्तन्ते	,,	२६
॥२।१।१४॥	॥३।१।१४॥	१६८	९
गोभिर्वपावान्	गोभिर्वपावान्	१७५	६
कालस्य	काकस्य	१७८	२१
नानुलिप्तपदेन-	नानुलिप्तपदेनै-		
कार्थ्यम्	कार्थ्यम्	१८१	२३
यवं	एवं	१८८	२१
मकि	किम्	१८९	२७
द्विगोरनङ्नोऽट्	द्विगोरनङ्नोऽट्	१९०	१
॥१।३।१५९॥	॥३।१।१५९॥	१९७	१८
उरू	ऊरू	२०४	१७
उर्वष्ठीवम्	ऊर्वष्ठीवम्	,,	,,
भूवौ	भ्रुवौ	,,	१८
सहोक्ता	सहोक्तौ	२०५	२
सहोक्तो	सहोक्तौ	२०६	८

अशुद्धम्	शुद्धम्	पत्रम्	पंक्तिः
मनःशब्दादात्म-	मनःशब्दादात्म-		
शब्दाश्च	शब्दाच्च	२११	९
मूर्धमस्तकशब्द-	मूर्धमस्तकशब्द-		
वजितात्	वर्जितात्	२१२	२१
इङ्रूपौ	ईङ्रूपौ	२२१	११
ह्रस्वः	ह्रस्वः	,,	२६
विश्वमित्रा	विश्वमित्रो	२२४	१७
दीर्घोऽतादेशः	दीर्घोऽन्तादेशः	२२५	,,
तुरेर्जुहात्यादिपाठात्	तुरेर्जुहोत्यादिपाठात्	,,	२७
तु तु	तु	२२६	१९
वतु	थतु	,,	२२
अशीति बहुव्रीहौ-	अशीतिबहुव्रीहौ	२२७	१
'पादकः'	'पदिकः'	२२७	१२
पादनिष्कः ।	पन्निष्कः, पादनिष्कः ।	,,	१०
पद्घोषः ।	पद्घोषः, पादघोषः ।	,,	२१
धेनोर्भव्यायाम्	धेनोर्भव्यायाम्	२३२	७
रथवदयोरुत्तरपरयोः	रथवदयोरुत्तरपदयोः	२३३	१३
कुलकीतवर्धनम्	कुलकीर्तिवर्धनम्	२४१	१८
'कुतश्चरतिः	कुतश्चरति	,,	२३
वत्	वेत्	२४३	१६
कोशिकः	कौशिकः	२४५	७
॥१।१।४७॥	॥६।१।४७॥	,,	२५
काश्यये	काश्यपे	२५०	१८
गौधेयाऽन्यः	गौधेयोऽन्यः	२५१	२१
मित्रयुशब्दा	मित्रयुशब्दो	२५२	१३
भागवत्तितार्णबिन्द-	भागवत्तितार्णबिन्दवा-		
वाकशापेयान्निवायामिकण्वा	कशापेयान्निन्दायामिकण्वा	२५५	२२
कोण्डिन्यागस्त्ययोः	कौण्डिन्यागस्त्ययोः	२५७	२१
लुंग्रः	लुंत्र	२५८	२७
केदाराण्यत्येवमादयः	केदाराण्यश्चेत्येवमादयः	२६८	२०
इत्यादिभ्यश्चातुरर्थिको	इत्यादिभ्यश्चातुरर्थिको	२८१	२३
सख्यादेरयण्	सख्यादेरेयण्	२८२	११
इतिकरणानुवृत्तेः	इतिकरणानुवृत्तेः	२८७	२
ऋतुभिरुह्यते	ऋतुभिरुह्यते	२९२	१०

अशुद्धम्	शुद्धम्	पत्रम्	पंक्तिः
यकृल्लोमन्-	यकृल्लोमन्-	२९६	३
॥७।३।५५॥	॥६।३।५५॥	३०२	११
वर्षाकालेभ्यः	वर्षाकालेभ्यः	३०६	५
शतभिषक्	शतभिषक्	३१२	२
ङ्यादेर्गाणस्येत्यादिना	ङ्यादेर्गौणस्येत्यादिना	,,	१६
काल वाचिनो	कालवाचिनो	३१४	२०
न्यत्पद्यते	न्युत्पद्यते	३२१	७
नृत्त	नृत्तं	३२४	७
धर्माम्नायसंधे	धर्म्माम्नायसंघे	,,	९
पमौमृगवकम्	मौपगवकम्	,,	२६
कापटवक	कापटवकम्	,,	२६
भाद्रबाहवानि	भाद्रबाहवानि	३२७	६
अचार्याः	आचार्याः	३२९	२५
कचिदन्यात्रापि	कचिदन्यत्रापि	३३१	२
निष्क्रान्तः	निष्क्रान्तः ।	३३२	३
विशारप्लकः	शारप्लविकः	३३६	२५
चरत्यथ	चरत्यर्थे	३३७	१२
कियवतामिति	कियतामिति	३४२	१०
द्वार्दिकः	द्वार्द्रिकः	,,	१६-१७
षष्ठ्यन्तां	षष्ठ्यन्ताभ्यां	३४३	२३
आस्था ।	आस्था	३४५	६
प्रथमान्तादस्यति	प्रथमान्तादस्येति	३४६	१४
माहानामिकः	माहानाम्निकः	३४९	१६
मासंमासीनः	मासंभूतो मासीनः	३५५	५
आदिर्येषां	आदिर्येषां	३७१	१२
इत्यनेनव	इत्यनेनैव	३७६	,,
तदर्थं	तदर्थं	३७९	७
परिणाभिनि	परिणामिनि	,,	१६
भावेत्वल्	भावेत्वतल्	३८१	१६
पृथ्वादेरिमन्	पृथ्वादेरिमनवा	६८४	१७
ककास्य	ककारस्य	३८५	टिप्पणे
षष्ठ्यदेरसंख्यादेः	षष्ठ्यादेरसंख्यादेः	४०५	१५
हिरण्यका	हिरण्यको	४०९	१५
शारीत्यावश्यके	कारीत्यावश्यके	४१०	२४
भूभिमान्	भूमिमान्	४१५	७
शिष्यते	क्षिप्यते	४१९	८
शिखात्वादित्वेन	शिखादित्वेन	४२३	१४

अशुद्धम्	शुद्धम्	पत्रम्	पंक्तिः
मत्यर्थे	मत्वर्थे	४२४	१२
मत्वर्थ	मत्वर्थे	४२५	१६
शब्दप्रवृत्ति । निमित्तस्य	शब्दप्रवृत्तिनिमित्तस्य	४२७	२४
इत्थं:	इत्यर्थः	४२८	२५
एव	एवं	४३०	,,
अनद्यननेऽपि	अनद्यतनेऽपि	४३३	२
काममात्रविवक्षायां	कालमात्रविवक्षायां	,,	,,
सावकाशावतसाधाकारो	सावकाशावतसातावाकारो	४३६	२५
शस्त्रअग्निसात्	शस्त्रमग्निसात्	४३९	२३
स्थार्थे	स्वार्थे	४४५	१
तहि	तर्हि	४४८	२४
भूमापवादः ।	भूभावापवादः ।	४५२	१२
स्थूलदूरेत्यदिना	स्थूलदूरेत्यादिना	,,	१३
प्रशस्तेऽर्थ	प्रशस्तेऽर्थे	,,	१६
मृत्तिकाकास्तरी	मृत्तिका कास्तरी	४५३	१२
त्यादिसवादेः	त्यादिसर्वादेः	४५६	२०
उचकैः	उच्चकैः	४५७	२४
प्रकृतेर्द्वितीयात्	प्रकृतेर्द्वितीयात्	४६०	६
सुपर्याशीर्दत्तो	सुपर्याशीर्दत्तो	,,	२४
कास्तूगोणीभ्यां	कास्तगोणीभ्यां	४६१	२०
लघु	लघु	४६६	२२
कार्षाषण-	कार्षापण	४६७	२५
मृहे	गृहे	४६९	२१
युष्मदर्थः	युष्मदर्थः	४७५	३
युष्मदस्मदोर्गौणत्वात्	युष्मदस्मदोर्गौणत्वात्	४७८	२०
संपश्नः	संप्रश्नः	४७९	७
सर्वप्रत्ययापवादभूतया	सर्वप्रत्ययापवादभूतया	४७९	२२
भविष्यथ	भविष्यथः	४८४	७
स्यैन्त	स्यन्त	,,	१२
विधिधार्थावगतेः	विविधार्थावगतेः	४८५	१३
नानाभिनिर्वृत्तस्य	नानभिनिर्वृत्तस्य	४८५	२६
एकस्वरादनुस्वारेता	एकस्वरादनुस्वारेतो	४८८	४
स्पृशिमृशतिविशतिदृशि-	स्पृशिमृशतिविशतिदृशि-		
शिशिष्लशुषय	शिषलशुषय	४८९	३
दीर्घः	दीर्घः	४९५	११
च वर्गीयान्ताः	चवर्गीयान्ताः	५००	२२

अशुद्धम्	शुद्धम्	पत्रम्	पंक्तिः
धातोःराद्य	धातोराद्य	५०२	१२
स्याम्	स्यात्	५०३	८
१२७	१२९	५०४	२२
करोतीत्यर्थः	करोतीत्यर्थः	५०५	२४
प्रस्तुम्पतिरन्यः	प्रतुम्पतिरन्यः	५०७	१२
स्थौल्पे	स्थौल्ये	५१०	१३
शब्दे	शब्दे	५१२	१०
बाधनस्पर्शनशोः	बाधनस्पर्शनयोः	५२५	८
अस्यन्दिण्ट	अस्यन्दिष्ट	५२६	२२
कल्पिषीष्ट	कल्पिषीष्ट	५२७	११
कोष्टा	क्रोष्टा	५२८	१९
व्यञ्जना-	व्यञ्जनादे-	५३६	१८
सुषुषुः	सुषुपुः	५३७	२
वबाश । उवश ।	उवाश । उवश ।	५४२	११
आशिति	अशिति	५४३	२
वभ्रज्जिथ	बभ्रज्जिथ	५६१	८
धातुपाराराायणकृता	धातुपारायणकृता	५६३	२८
कृटादेर्गणात्	कुटादेर्गणात	५६५	१४
अगुषीम्	अगुषीत्	,,	१७
वञ्चेः	स्वञ्चेः	५६६	२६
कनूगृ	क्नूगृ	५७१	२४
अस्यतीत्यर्थः	अस्यतीत्यर्थः	५८०	१७
व्रगृ	वृगृ	५८५	५
असदीत्	आसदीत्	,,	१८
॥४।४।११२॥	॥४।४।१२१॥	५८८	९
क्रोपयति	क्रोपयति	,,	१०
थानिवत्त्वाद्	स्थानिवत्त्वाद्	,,	११
स्गात्	स्यात्	५९१	८
भवानानिदिधत	भवानिदिधत्	२९२	२
तुमर्हाम्दितिकि	तुमर्हादितिकिम्	,,	२६
क्षीपी	क्षीपीप्	५९५	१७
स्वञ्चेर्वा	सञ्चेर्वा	५९८	७
नरिननर्ति	नरिनर्ति	५९९	४
शक्नोति	शक्नोति	६०५	२४
ह्रिवी	ह्रिती	,,	२५
क्षुत्तृङ्भ्यं	क्षुत्तृङ्भ्यं	६०६	२५
क्षुत्तृङ्भ्यं	क्षुत्तृङ्भ्यं	६०७	१

अशुद्धम्	शुद्धम्	पत्रम्	पंक्तिः
वृत्तावन्तर्भूतत्वा-	वृत्तावन्तर्भूतत्वा-		
न्मुणुरकर्मकः	न्मुण्डिरकर्मकः	६११	१६
वानभिधानान्न	वानभिधानान्न	,,	२४
पुत्रीयन्तं	पुत्रीयन्तं	६१५	३९
श्यनिर्दशो	श्यनिर्देशो	६१६	२३
मूनिरस्यति	निरस्यति	६१६	२६
सहते	समूहते	,,	,,
उत्कण्ठापूर्वके	उत्कंठापूर्वके	६२२	१२
निह्नव	निह्नव	६२४	१८
न्यभवनं	न्यग्भवनं	६३१	२
अदुग्ध	अदुग्ध	६३९	११
आत्मनेपद्यकर्मक,:	आत्मनेपदाकर्मकाः	६४०	३
स्वयमेव ?	स्वयमेव !	६४१	९
वाऽऽकाक्षायाम्	वाऽऽकाङ्क्षायाम्	६४४	४
धात्वर्थेवर्तमानाद्	धात्वर्थे वर्तमानाद्	६४६	१४
महांमहे	गहांमहे	६५१	६
सप्तमीनिमित्तस्तीति	सप्तमीनिमित्तमस्तीति	६५४	१८
व	च	६५८	१
पुनातीत्येव	पुनातीत्येव	६५९	२८
कर्मणाऽण्	कर्मणोऽण्	६६३	१८
पुष्पाति	पुष्णाति	६६९	२
ऋवर्णव्वञनान्तात्	ऋवर्णव्यञनान्तात्	,,	१४
निपात्यते	निपात्यन्ते	६७०	१३
कप्	क्यप्	६७१	१६
जिघ्रतेर्यथासंख्यं	जिघ्रतेर्यथासंख्यं	६७७	१३
अवहसासंख्यो	अवहसासंख्यो	६७८	१०
कश्चित्वाचार-	कश्चित्याचार-		
क्वापि	क्वापि	६७९	१६
आखुघातो	आखुघातो	६८२	१२
करोष्टः	करोतेष्टः	६८५	७
पाणिधमाः	पाणिन्धमाः	६८८	९
असूर्योग्राभ्यां	असूर्योग्राभ्यां	,,	२२
बहुलाधिकाराच्च	बहुलाधिकाराच्च	६९५	२३
भित्र	मित्रं	६९९	१०
मैत्रणेति	मैत्रेणेति	७०७	२४
बिभाषेयम्	विभाषेयम्	७०९	१४
देवादिकरयोरेव	देवादिकयोरेव	७१०	७
व्रत	ब्रूत	७१२	१८

अशुद्धम्	शुद्धम्	पत्रम्	पंक्तिः
स्यातात्	स्यात्तम्	७१५	२०
क्षसुप्रत्ययान्ता	कसुप्रत्ययान्ता	७१६	१६
वधर्हति	वधमर्हति	७१९	१४
शृकमगमहनवृषभूस्थ उकण्	शृकमगबहनवृषभूस्थ उकण्	७२१	२१
कर्तृकर्माद्यर्थदेश	कर्तृकर्माद्यर्थनिर्देश	७३०	७
कनिगदिमनेःमरूपे	कनिगदिमनेःसरूपे	७३३	१
निष्पतौ	निष्पत्तौ	७३४	१६
बातास्ततः	जातास्ततः	७३५	१८
मियूश्रणे	मिश्रणे	७३६	२७
का	यूका	,,	,,
तुंक्	तुंक्	७३७	१
स्तावकः	स्तावकः	७४०	२६
मदयधूतीति मकः	मद्यधूतीति मधूकः	७४४	२६
हर्ष	हर्षे	७४८	१६
तडण	तडण्	,,	२५
मत्मातौ	मन्मातौ	७४९	९
प्रत्ययः	प्रत्ययः	७५०	१६
स्वजु	खजु	७५९	४
ण्यतोऽपि	ण्यन्तोऽपि	७६५	१०
अक्षसंधातः	अक्षसंघातः	७६६	१
नबनीतं	नवनीतं	,,	९
खप्ने	स्वप्ने	,,	१३
द्रूहथः	द्रुहथः	७६७	१३
बर्म	वर्म	,,	१७
धेन	धेनः	७७०	२३
अभिभवे	अभिभवे	७७१	२
मेढः	मेढ्रः	७७६	२१
कुल्फ	कुल्फः	,,	२३
रागे	रोगे	७८३	१७
चुम्वि	चुम्बि	७८७	१५
विकसोवकल्पः	विकसेर्विकल्पः	७८८	३
शश्	शृश्	७९०	१९
अङ्कुङ्	अङ्कुरः	७९४	३
वर्षाभिधानानि	वर्षाभिधानानि	७९६	२२

अशुद्धम्	शुद्धम्	पत्रम्	पंक्तिः
दश्	शृश्	७९७	५
वैष्टूः	वैष्ट्रः	७९८	१२
ट्रूवमू	ट्रुवमू	७९९	२१
स्यता	स्यात्	,,	२८
हृणींच्	णहींच्	८०१	१६
दुक्वोः	दुक्वोः	८०५	२२
बा	वा	८०६	१८
आभ्या	आभ्यां	८०७	६
मानकीडयो	मानक्रीडयो	,,	२६
उर्ध्वमुपरि	ऊर्ध्वमुपरि	,,	२७
कैरवंः	कैरवं	८०९	१२
पश्शः	पभ्यः	८१०	११
कुँङ	कुंङ्	८११	२७
पूठ	पूश्	८१८	२१
मन्त्रिण	मन्त्रिण्	८१९	१५
भुष	मुष्श्	८२४	५
बरणे	वरणे	८२६	२४
विदोरधिक्	विदेरधिक्र	८२८	१५
मुहूरिः	मुहुरिः	८३१	४
दिवेर्द्वित्वं	दिवेर्द्वित्वं	८३२	२
भ्नमरः	भ्रमरः	८४२	९
निमित्तवर्गीयान्त्योन	निमित्तवर्गीयान्त्यो न	८४६	१४
लूपूयुवृषिदंशि	लूपूयुवृषिदंशि	८५२	३
ऋतुश्च:	ऋतुश्च	८६१	२६
सति	सतिं	८६९	६
भावाअर्त्रोरल्	भावाकर्त्रोरल्	८७१	११
कृत्योनामपि	कृत्यानामपि	८८८	२
चाभीक्ष्ण्पे	चाभीक्ष्ण्ये	८९१	२१
यथाकारमरं	यथाकारमहं	८९३	१
भुङ्क्ते	भुङ्क्ते	,,	२८
तन्मतसंग्रहार्थ	तन्मतसंग्रहार्थं	८९६	१५
इत्यर्थः	इत्यर्थः	८९८	१५
गण्डिकाच्छिनत्ति	गण्डिकाश्छिनत्ति	,,	१६
यो	योद्धुं	,,	२७
ति षु	तिङ्षु	८९९	१५

॥ परिशिष्टानि ॥

॥ तत्तत्स्थले प्रमादान्न निर्दिष्टानि सूत्राणि ॥

उत्तरार्द्धे-

२९-२ अद्यतनी दि ताम् अन् सि तम् त अम् व म त आताम् अन्त थास् आथाम् ध्वम् इ वहि महि ॥ ३ । ३ । ११ ॥ इमानि वचनानि अद्यतनीसंज्ञानि स्युः । ४८१ पृष्ठे ४ पंक्तेः पश्चात् ।

३३-२ माङ्यद्यतनी ॥ ५ । ४ । ३९ ॥ माङ्युपपदे धातोरद्यतनी स्यात् । सर्वविभक्त्यपवादः । मा भवान् भूत् । कथं मा भवतु तस्य पापं मा भविष्यति इति ? असाधुरेवायम् । केचिदाहुरङ्तो माशब्दस्यायं प्रयोगः ।

३३-३ स्मे ह्यस्तनी च ॥ ५ । ४ । ४० ॥ स्मशब्दसहिते माङ्युपपदे धातोर्ह्यस्तनी चकारादद्यतनी च स्यात् । मास्म भवत् । मास्म भूत् ।

इमे द्वे सूत्रे ४८१ पृष्ठे १६ पंक्त्यनन्तरं गृहीतव्ये ।

२४६-२ आद्योऽश एकस्वरः ॥ ४ । १ । २ ॥ अनेकस्वरस्य धातोराद्य एकस्वरोऽवयवो द्विः स्यात् । ५३९ पृष्ठे ६ पंक्तौ 'पक्षे' इति पदानन्तरम् ।

३३६-२ अपाच्चतुष्पात्पक्षिशुनिहृष्टान्नाश्रयार्थे ॥ ४ । ४ । ९६ ॥ अपात्परस्य किरतेश्चतुष्पदि पक्षिणि शुनि च कर्तरि यथासंख्यं हृष्टेऽन्नार्थिनि आश्रयार्थिनि सति सडादिः स्यात् । अपस्किरते वृषभो हृष्टः । हर्षाद्विलिख्य तटं विक्षिपतीत्यर्थः । अपस्किरते कुक्कुटो भक्ष्यार्थी । विलिख्यावस्करं विक्षिपतीत्यर्थः । अपस्किरते श्वाश्रयार्थी । विलिख्य भस्म विक्षिपतीत्यर्थः । अपादिति किम् । विकिरति वृषभो हृष्टः । एष्विति किम् । अपकिरति बालो धूलिं हृष्टः । हृष्टादिष्विति किम् । अपकिरति हस्ती रजश्चापलेन ।

५६२ पृष्ठे १८ पंक्तेः पश्चात् ।

५३४-२ वा स्वीकृतौ ॥ ४ । ३ । ४० ॥ स्वीकृतौ वर्तमानाद्यमेः पर आत्मनेपदविषयः सिच् किद्वद्वा स्यात् । उपायत ।

६२३ पृष्ठे २ पंक्तौ 'वेश्यामुपयच्छते' इत्यनन्तरम् ।

९९७-२ उपसर्गादेवृदेविकुशः ॥ ५ । २ । ६९ ॥ उपसर्गात् परेभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य एभ्यो णकः स्यात् । आदेवत इत्येवंशील आदेवकः । परिदेवकः । देवीति दीव्यतेर्देवतेर्वा ण्यन्तस्य ग्रहणम् । आदेवयतीति आदेवकः ।

परिदेवकः । आक्रोशकः । परिक्रोशकः। उपसर्गादिति किम् । देवनः । देवयिता । क्रोष्टा । देवतेर्ण्यन्तादेवेति कश्चित् । ७२६ पृष्ठे १५ पंक्तेरनन्तरम् ।

१०६२-२ परेर्घाङ्ग्योगे ॥ २ । ३ । १०३ ॥ परिसंबन्धिनो रेफस्य घ अङ्ग योग इत्येतेषु शब्देषु परेषु लो वा स्यात् । इति ळत्वे पलिघः । पल्यङ्कः, पर्यङ्कः । पलियोगः, परियोगः ।

१०६२-३ ऋफिडादीनां डश्च ल : ॥ २ । ३ । १०४ ॥ ऋफिड इत्यादीनामृरो लृलौ डकारस्य च लो वा स्यात् । लृफिडः । लृफिलः । ऋफिलः । ऋफिडः । लृतकः । ऋतकः । कपलिका । कपरिका । तल्पलीकम् । तर्परीकम् । कपिलकम् । कपिरकम् । लोमानि । रोमाणि । अङ्गुलिः । अङ्गुरिः । पुलुषः । पुरुषः । तलुनः । तरुणः । सलिलम् । सरिरम् । अलम् । अरम् । मूलम् । मूरम् । कलिलः । करीरः । कल्य । कर्म । मुकुलम् । मुकुरम् । पांसुलः । पांसुरः। लेखा । रेखा । लिक्षा । रिक्षा । लोहितम् । रोहितम् । इत्यादि । अर्थभेदेऽपि-इला भूमिः । इरा अमृतम् । तल्पलो गजेष्वेकदेशः । तर्परः पशूनां कण्ठघण्टः । कलभो बालहस्ती । करभः उष्ट्रः । शलभः पतङ्गः । शरभोऽष्टापदः । कालो वर्णकारो रक्षानिर्वेशः । बालः केशः । वाः क्रियाभ्याहृत्तिः । लघुरपचितपरिणामः। रघुः राजा । गलः प्राण्यङ्गम् । गरो विषम् । एवं मुद्गल, मुद्गर, मण्डल, मण्डर, कन्दरादयोऽपि द्रष्टव्याः । एकार्थ्येऽपि दृश्यते । गलं गरं च । बडिशं बलिशं । डश्च लः-ऋफिलः, ऋफिडः । वलभी, वडभी । चूडा, चूला । इला, इडा । व्यालः, व्याडः । पुरोलाशः, पुरोडाशः । षोलशः । षोडशः । (बलिशम्, बडिशम्) पुलिनम्, पुडिनम् । पीला, पीडा । यथादर्शनमन्येऽपि ऋफिडादौ द्रष्टव्याः । संयुक्तस्य आदेश्च न दृश्यते । पाण्डुः। कण्डूः । डामरः । डीनः । डुण्डुमः । डिण्डिमः ।

१०६२-४ जपादीनां पो वः ॥ २ । ३ । १०५ ॥ जपादिशब्दसंबन्धिनः पकारस्य वकारादेशो वा स्यात् । जवा, जपा । पारावतः, पारापतः । त्रिविष्टपम्, त्रिविष्टवम् । पारापारः, पारावारः । कवाटः, कपाटः । विष्टवम्, विष्टपम् । कवलः, कपलः । अवाची, अपाची । जपादयः प्रयोगतोऽनुसर्तव्याः । त्रीणीमानि सूत्राणि ८७१ पृष्ठे १ पंक्तौ 'परिहृष्यतेऽनेनेति परिघोऽर्गला' इत्य० गृहीत०।

११५८-२ एकोपसर्गस्य च घे ॥ ४ । २ । ३४ ॥ एकोपसर्गस्यानुपसर्गस्य च छदेर्घपरे णौ ह्रस्वः स्यात् । ८८४ पृष्ठे १५ पंक्तौ गृहीतव्यम् ।

पुस्तकप्राप्तिस्थानम्—

शाह मणिलाल गोकळदास.

कार्यवाहकः—श्री वीरविजय जैन उपाश्रय.

भद्रीनी पोळ, अहमदाबाद.